CC-0. In Public Domain. Digitization by eGangotri

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालाया अष्टापञ्चाशत्तमं पुष्पम्

अष्टाध्यायी

{शारदाप्रभाव्याख्यासहिता}

व्याख्याता

विद्यावारिधि - प्रा. हरिप्रसादशर्मा आचार्यः

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

नेपालगञ्ज-दाङ्ग-बिल्वकुञ्ज (बेलझुण्डी) स्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकः : महेन्द्रसंस्कृत-विश्वविद्यालयः,
नेपालाङ्ग-दाङ्ग-बिल्वकुञ्ज (बेलझुण्डी) स्थः

प्रथमं संस्करणम् : २०६०

प्रतिरूपाणि : १०००

मूल्यम् :

पुनः प्रकाशनाद्यधिकारः : व्याख्यात्रधीनः

कम्प्युटरकार्यम् : गीता कम्प्युटर सर्भिस, डिल्लीबजार,
काठमाडौं

मुद्रणम् : श्री ५ को सरकार
सूचना तथा संचार मन्त्रालय
मुद्रण विभाग
सिंहदरबार, काठमाडौं
फोन नं. ४२४४५२५, ४२२७३४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतिर्हरिप्रसादस्य व्याख्येयं शारदाप्रभा ।
प्रीत्यै स्ताज्जगदम्बायाः सप्ताष्टहायनाकृतेः ॥

साम्प्रतममरावतीपुरीमलङ्करिष्णवः श्रीलपञ्चमहाराजाधिराज-महेन्द्रवीरविक्रम-शाहदेवाः

इति जगदम्बाप्रीतीकृतं ग्रन्थमिमं जगदम्बाप्रसादभूतं जगदम्बावर-बृंहितसाहवंशावतंसेषु पौरस्त्यसँस्कारपूतान्तःकरणतया परिष्कृत-पुराणदेवमन्दिरकदम्बेषु श्रद्धानुष्ठिताऽनेकविधमहाक्रतुषु संगच्छध्वं संवदध्वम्...मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा इत्यादिश्रुतिप्रशस्त-सरणिमनुसृत्य स्वोपज्ञव्यवस्थाद्वारा परिपोषित-समाजैकता-राष्ट्रियैकता-राष्ट्रियभावनेषु महनीय-सुशासनद्वारा राष्ट्रे प्रवर्तित-कृतयुगाऽनुकारि-शान्तिसुरक्षादिवार्तेषु भूमिसुधार-देशपूर्वापरयोजन-स्वनामाञ्चित-महेन्द्र (सशाख-कुट्टिम) राजमार्गनिर्माण-बहुलसेतुबन्ध-प्रज्ञाप्रतिष्ठानशिक्षणसंस्था-चिकित्सालयस्थापन-विद्युदुत्पादनप्रभृतिभिरुपायैः समुप्त-राष्ट्रियसर्वाङ्गीणविकास-बीजेषु राष्ट्रियमुद्रामूल्यं व्यवस्थाप्य स्वदेश- प्रतिवद्ध-राष्ट्रान्तरीय-मुद्राव्यवहारेषु, अनावश्यक-पुनर्विवाह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिबन्धद्वारा बहूपकृत-महिलासमुदायेषु, दुहितृमात्रसन्ततिकानां सम्पत्सु दुहितृणामेवाऽधिकारो भवतीति नियमप्रवर्तनया दुहितृमात्रसन्ततिकानां तद्दुहितृणां च प्रशमिताऽरुन्तुदमानसोद्वेगेषु धर्मपरिवर्तनप्रतिबन्धद्वारा प्रतिस्तब्ध-हिन्दूजगदङ्गभङ्गेषु तथा स्वधर्मत्यागरूपमहापातकभोग्याऽनन्तनिरययातनातो गोपायिताऽबोधवराक प्रियप्रजेषु धृतविग्रहेष्विव क्षात्रधर्मेषु मूर्तिमत्स्विव पुञ्जीभूत-राष्ट्रियहितहेतुनिवहेषु निवारित-राष्ट्रापित्सुभीमापायेषु गूढाकृतिषु अपरिमेयबोधनिधानेष्वपि मितवादिषु विदेशिभिरपि वर्णितगुणगणेष्वपि सर्वथोतप्रोत-राष्ट्रियभावनेषु भयरहितविनयनिधानेषु नयनदीष्णतया सफलाऽसंलग्न-परराष्ट्रनीतिषु दीर्घदर्शिष्वपि सूक्ष्मदृष्टिषु ज्वलत्प्रतापानलेष्वपि सौम्याकृतिषु स्वयमेव राष्ट्रियपरियोजना-कल्पननिपुणेष्वपि समादृतजनप्रतिनिधिमन्तव्येषु समादृतबहुमतेष्वपि स्वविवेकजलधौत-सर्वव्यवहारेषु शतावधानेष्वपि राष्ट्रियाभ्युदयोपाचिन्तनमग्नतया विस्मरणीयाऽशनशयनेषु देशप्रतिक्षेत्रविकाससमीहया राष्ट्रियसर्वोच्चविधायिकायाः प्रतिनिधिभिस्तत्तत्क्षेत्रवास्तव्यैरेव भाव्यमिति नियमप्रवर्तनया समं "ग्रामं प्रति निवर्तध्वम्" इति राष्ट्रियाऽभियानं प्रवर्त्य स्वयमपि पर्यायेण प्रत्येकं क्षेत्रेषु यष्टिं टेकित्वा स-स्वेदस्यन्दनं पादचारिषु "आभ्यन्तरं भयं रक्ष्यमसारं बाह्यो भयम्" इति महाभारताऽनुसारेण दयादाक्षिण्यादिगुणैरावर्जिताऽशेषजनतामानसतया राजा प्रकृतिरञ्जनादिति नीतेरनन्योदाहरणभूतेषु नेपालदेशग्राहित-राष्ट्रसंघसदस्यतेषु विश्वप्रख्यापित-हिन्दूराष्ट्रनेपालमहिमसु विश्वप्रसृमर-शीतांशुधवलयशःसु वैक्रमविंशत्येकविंशतितमशताब्दीयुगपुरुषेषु ज्ञानविज्ञानसमन्वयात्मकशिक्षापद्धतिजिजागरयिषया नेपालाङ्ग-दाङ्ग-विजौरीस्थ-तात्कालिक-जनतामहाविद्यालय-सम्पन्ने करपात्र-स्वामि-शङ्कराचार्य-प्रभृतिभिर्योगिराजैः श्रीगङ्गाधरशास्त्रिपराजुली-पण्डितराजसोमनाथसिग्द्याल-प्रभृतिभी राष्ट्रियैर्वाराणसेय-विद्वद्वृन्दप्रभृतिभिरान्तरराष्ट्रैश्च प्रथितयशोभिः सुरसरस्वती-सेविभिर्महामहिम-तात्कालिक-भारतीयराजदूत-श्रीराजबहादुर प्रभृतिभिः सभ्यैः सँस्कृतानुरागि-जनसमुदायैश्च सुशोभिते ऐतिहासिके विद्वत्संमेलने सँस्कृतज्ञानां विज्ञाने रुचेभावे विज्ञानविदां च सँस्कृतज्ञानाऽभावे वयं समस्यां समाधातुं न प्रभवामः । अतो ज्ञानविज्ञानसमन्वयात्मिका शिक्षा प्रवर्तयितव्येति बोधनपुरस्सरं तदर्थं नेपाले सँस्कृतविश्वविद्यालयस्याऽतीवाऽवश्यकता सर्वैरननुभूता नेति नञ्द्वयघटितवाक्येन सँस्कृतविश्वविद्यालयस्याऽनिवार्याऽवश्यकतामुद्घोषितवत्सु गुणज्ञेषु संख्यातीतगुणनिधानेषु

ननु रेणुकणान् महीगतानपि योऽनन्त-नभोग-तारकाः
गणयेद् गणितस्फुरन्मतिः स भवेत् त्वद्गुणवर्णनक्षमः ॥

(श्री ५ महेन्द्र-विरह-वेदना, इत्यत उद्धृतम्)

तत्पुत्रोऽभूत् स युगपुरुषो विश्वसङ्गीतकीर्ति-
यज्वा वीरो हत-बहुविपद् भूरिधीरल्पजल्पः ।
पञ्चायत्तं परिकलयिता राष्ट्रसंमानवर्धी
धीरो दाताऽपभय-विनयोऽनन्तकृत्यो महेन्द्रः ॥

[श्री ५ वीरेन्द्रशुभराज्याऽभिषेकम् (स-शिक्षानिदानम्) इत्यत उद्धृतम्]

इत्थमुत्तरोत्तरं नृपप्राण-गुणज्ञ-जनताद्रवन्मानसस्मरणीयतमाऽसाधारणाऽनन्तगुणेषु साम्प्रत-ममरावतीपुरीमलङ्करिष्णुष्वपि शमपरायण-नेपालजनता-भूमण्डलवर्तिहिन्दूजगन्मानसपटल-विराजमानभास्वरमूर्तिषु श्रील-पञ्च-महाराजाऽधिराज-महेन्द्रवीरविक्रम-शाहदेवेषु स-श्रद्धं समर्पयति । - व्याख्याता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिन्दूसम्राड् जयाऽब्दे भुजगशरवियद्दो (२०५८) र्मिते वैक्रमेऽब्दे
ज्येष्ठस्यैकोनविंश्यां निशि प्रथमनताऽर्धात्यये हस्त ऋक्षे ।
एकादश्यामकस्माद् युजि दशहरया शुक्रवारे सुधांशौ-
कन्यायां भाति योगे ऽप्यमृतभणितिभाज्युद्गतादुग्रविघ्नात् ॥

(१)

श्रीमद्-वीरेन्द्रवीरः सदय-सरल-धीरेवमैश्वर्यराज्य-
लक्ष्मीदेवी विनीतो बत ! पितृचरणैर्यौवराज्येऽभिषिक्तः ।
श्रीमद्दीपेन्द्रवीरः श्रुतिरमलमना धीर-नीराजनो ऽपि
कीर्त्या शेषाः, प्रजास्तान् हृदि हृदभिमतान् राजयेयुर्युगान्तम् ॥

(२)

तेषां प्रजाहृदिस्थानां तैः समं च तनुत्यजाम् ।
साश्रुधारं स-निःश्वासं सद्गतिं कामयामहे ॥

(३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्यः पुत्रो महेन्द्रस्य ज्ञानेन्द्रवीरविक्रमः ।
श्रीलपञ्च-महाराजाधिराजः सव्यकोमलः ॥
(१)

महोत्साहो विपद्ग्रस्त-राष्ट्रोद्धार-परायणः ।
गूढाकारो ऽपभीर्धीरो लक्ष्यते पितृ-सन्निभः ॥
(२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीहीराकुमारी देवी व्याख्यातृ-जननी

माताऽवसानेऽनुगपुत्रपौत्रा काशीमगात् सा द्युमणावुदीच्ये ।
व्राह्मे शरीरं व्यसृजन्मुहूर्तेऽधिव्रह्मनालं मणिकर्णिकायाम् ॥
॥६०॥ (व्याख्यातृवंशपरिचयतः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रद्धाज्ञापनम्-

विश्वामृताशनगवीबुधसङ्गमाढ्ये
वङ्ग्लोरधाम्नि शिवमूर्ति-यतीश्वरेण ।
संवर्धितो बुधसभे शुभयाऽऽशिषया यः
श्रद्धां व्यनक्ति स स-भक्ति हरिप्रसादः ॥

कृतज्ञताज्ञापनम्-

मन्दाकिनीसँस्कृत-वाचकाञ्चित-
पूर्वांश-विद्वत्परिषत्-प्रतीत्यया ।
वङ्ग्लोरगू-शक्रपुरस्थसंस्थया
संमानितोऽनक्ति कृतज्ञतां हरिः ॥

वङ्ग्लोर-सम्पन्ने दशमविश्वसँस्कृतसंमेलने 'विद्यासागरः' इत्युपाधिनाऽलङ्क्रियमाणः
श्रीहरिप्रसादशर्मा आचार्यः, व्याख्याता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीशारदादेवी व्याख्यातृधर्मपत्नी

सतीवियोगोद्भववेदनाविदः सुधांशुमौलेः सुलभं न मादृशा ।
भवेऽत्र सीताविरहाऽनुभाविनः स्नुतात्मनो दाशरथेश्च दर्शनम् ॥
(१)

अतो बत ! स्वाऽर्धवपुर्वियोगजामरुन्तुदां बाढमशक्यवर्णनाम् ।
अहो ! कथं कस्य दयावतोऽग्रतः स-बाष्पवेगं व्यनजानि वेदनाम् ॥
(२)

द्विरर्दितोऽपि श्वसिमीह निःश्वसन् यया रुजा त्वं सकृदर्दिता तया ।
हृता, तदह्नाय तु भाति शारदे ! न रुङ् निदानं व्ययुयुक्षतेश्वरः ॥
(३)

व्यनक्ति जीवाचरितं हि वस्तुतः फलेन काले नियतिर्बलीयसी ।
अतो व्यषीदन् भिषजोऽप्यहो ! कथं ! वियोक्तुमिच्छेन्नु दयालुरीश्वरः ॥
(४)

त्वयाऽनुभूतात् स्वपनेऽथ जागरेऽनवेतपूर्णान्तिमवेलयोदितात् ।
अवैमि वृत्तात् "त्वममुत्र शम्भुनाऽनुकम्पितासीति" हृदाऽपसव्यवान् ।
(५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महेन्द्र-संस्कृत-विश्वविद्यालयः
Mahendra Sanskrit University
उपकुलपतेः कार्यालयः

Office of the Vice-Chancellor

काठमाडौँ कार्यालय, वसन्तपुर
Basszntapur
पो.ब.नं. ५००३

Kathmandu Office,
P.O.Box. No. 5003

In replay please refer to
२०६०।१०।११

Date:/मितिः-

पत्रङ्संख्याः- (फा) उ.कु.का. (०६०/०६१)
चलानी नम्बरः-

भूमिका

लौकिकवैदिकयोः क्षेत्रयोर्व्यवहारार्थं शास्त्राणामध्ययनं मननं चिन्तनं व्यवहरणं च नितान्तमावश्यकमस्ति । शास्त्राणि खलु सर्वेषु व्यवहारेषु जनाञ् शासति । तत एव जनाः कर्तव्याकर्तव्येषु ग्राह्याग्राह्येषु आदेयानादेयादिषु पठिताभ्यस्तशास्त्रीयविवेकानुसारं व्यवहृत्य समाजे संमानं लभमानाः सानन्दं जीवनं यापयन्तीति सार्थकजीवनास्ते आदर्शमहापुरुषा मन्यन्ते । सर्वत्र समाद्रियन्ते चेति नाविदितं विद्वत्तल्लजानाम् ।

एतादृषेषु जीवनसार्थककारकेषु विविधशास्त्रेषु व्याकरणं प्रमुखमस्ति- यो वेद वेदवदनं सदनं हि सम्यगित्यादिवचनैः प्रथममेतदधीत्य धीमाञ् शास्त्रान्तरस्य भवति श्रवणेऽधिकारी । प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम् प्रामाणिकानां विदुषामित्यादिवचनैर्व्याकरणस्य सर्वशास्त्राधारता कथिताऽस्ति । व्याकरणं शब्दशास्त्रमस्ति, व्याकरणशास्त्रेण परिष्कृता एव शब्दाः सर्वेषु शास्त्रेषु लौकिकवैदिकसर्वग्रन्थेषु प्रयुक्ता रक्षिताश्च सन्ति। अतो विविधशास्त्ररत्नरहस्यं बोद्धुं प्रवृत्तैः सर्वैरपि सज्जनैः प्रथमतो व्याकरणशास्त्रमवश्यमध्येयमिति वस्तुतत्त्वं सर्वस्य हृद्गोचरी भवति ।

उक्तञ्चाचार्यदण्डिना-

इदमन्धं तमः सर्वं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ इत्यादि ।

व्याकरणशास्त्रपरिष्कृतशब्दानां संबन्धे योगिराजो भर्तृहरिश्च कथयति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दरूपस्य या सिद्धिः सा सिद्धिः परमात्मनः ।
अतो यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ॥
तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते । इत्यादि ।

विविधेषु व्याकरणेषु पाणिनीयं व्याकरणं सर्वेषु व्याकरणेषु प्रमुखमस्ति । इदं लौकिकवैदिकशब्दानां परिष्कारे सर्वथा समर्थमिति नात्र कोऽपि सन्दिग्धे । इतःपूर्ववर्तिनोऽष्टाध्यायीसूत्रव्याख्यानग्रन्थाः सूत्रक्रमानुसारिणः प्रक्रियाक्रमानुसारिणो वा सन्ति ।

व्याकरणशास्त्रे व्याकरणदर्शने च लब्धख्यातिना विद्यावारिधिना प्राध्यापकश्रीहरिप्रसादशर्माचार्यमहोदयेन महता प्रयासेन सर्वेषां व्याकरणशास्त्राध्येतॄणां कृते निर्मिते 'अष्टाध्यायी शारदाप्रभाव्याख्यामहिता' इतिनामकेऽस्मिन् ग्रन्थे सूत्रक्रमस्य प्रक्रियाक्रमस्य च सङ्गमो वर्तते । अतः पूर्ववर्तिव्याकरणव्याख्यानग्रन्थैरगतार्थोऽयमपूर्वो ग्रन्थः स्वल्पेनैव कालेन व्याकरणपरिज्ञानायाऽतीवोपयोगी भवन् वैयाकरणसमाजे सुप्रतिष्ठितो भवेदिति मन्ये । न केवलं स्वदेशीय एव किन्तु वैदेशिकोऽपि सश्रद्धमधिजिगांसुरेतद्ग्रन्थमाध्यमेन शीघ्रं व्याकरणं ज्ञातु प्रभवति ।

अहमिच्छाम्येतादृशस्यग्रन्थस्य प्रचारप्रसारौ स्याताम् । व्याकरणशास्त्रमध्येतुकामः प्रत्येकं जनो लाभान्वितश्च भवेदिति शिवं शुभम् ।

आचार्यपूर्णचन्द्रोपाध्यायढुङ्गेलः
उपकुलपतिः,
अनेकशास्त्राचार्यः, विद्यावाचस्पतिश्च
महेन्द्र-संस्कृत-विश्वविद्यालयस्य
नेपालाङ्ग-दाङ्ग-बिल्वकुञ्ज (बेलझुण्डी)-
स्थस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकीयम्

विचित्रा हि विश्वसृजो रचनापद्धतिः, यत्र कालकर्मभ्यां पापच्यमानेषु प्राणिषु मानवः सर्वश्रेष्ठो विवेकवान् । मानवेषु च ब्रह्मवेदिनः श्रेष्ठा इति स्मृतीनां मतम् । ब्रह्मज्ञानं च शब्दब्रह्मज्ञानाधीनम् ।

तदुक्तम्-

'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।। इति ।
(अग्निपुः ११५, विष्णुपु. ६।५।६४)

शब्दब्रह्मज्ञानञ्च शब्दशास्त्राधीनम् । अतश्चरमपुरुषार्थभूतमोक्षद्वारं शब्दशास्त्रं मुमुक्षुभिरध्येतव्यम् । अथ च 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति श्रुतिमनुसृत्य' प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः, (वा.प.ब्रह्मका.-११) इति विदितं वेदप्रधानीभूतं मुखरूपमङ्गं व्याकरणमध्येयम् । अतीवातीतकालात् प्रचलितेषु च व्याकरणेषु 'शताच्च ठन्यतावशते' इति सूत्रे नियतकालाश्च स्मृतयो व्यवस्थाहेतवः, मुनित्रयंमतेनाद्यत्वे साध्वसाधुप्रविभागः' इति कैयटनागेशादिभिरैकमत्येन सिद्धान्तितत्वादधुना पाणिनीयव्याकरणमेव वेदप्रधानाङ्गताया भारं बिभर्ति ।१ विश्वस्य या भाषाः संस्कृतभाषामूला इति व्यवहरामो वयम्, साम्प्रतिकैः पाश्चात्त्यैस्तदनुसारिभिर्भारतीयैश्च भाषाशास्त्रिभिस्ता भाषा भारत-युरोपीय-परिवारान्तर्गता इति वदन्ति । ते च विश्वस्य भाषाशास्त्रिषु पाणिनिमेव मूर्धन्यं मन्यन्ते । ते वदन्ति-सन्धिनियम-पदविज्ञान-पदविभाजनार्थविज्ञान-प्रभृतिविषयेषु पाणिनिरेव भाषाशास्त्रिणः साम्प्रतिकाँस्तथ्यात्मकपथं दर्शयति । स एव वैदिकलौकिकशब्दभेद-साक्षात्कारणात् प्राचाम्, उदीचाम् इत्यादि-प्रान्तीय-विभाषाप्रदर्शनाच्च तुलनात्मक-भाषाशास्त्रविषये भाषाशास्त्रिण उपकरोति । भारते नेपाले च विश्वविद्यालयादि-संस्कृत-शिक्षण-संस्थासु प्रक्रियाक्रमानुसारेणैव पाणिनीयव्याकरणाध्यापनं बहुधा प्रचलति । पाणिनीयव्याकरणाध्यापन-कृते प्रक्रियाक्रमानुसारी सर्वाङ्गपूर्णो ग्रन्थो भट्टोजिदीक्षित-कृतिर्वैयाकरणसिद्धान्तकौमुदी बहुभ्यो वर्षेभ्यः पाठ्यक्रमे निर्धारितः । तदाधारे रचितां स्वल्पकायां मध्यसिद्धान्तकौमुदीं चाऽनिवार्यविषयतया व्याकरणातिरिक्त (साहित्यादि) कवर्गीयविषयाध्यायिनः पाठ्यन्ते । अस्मिन्नेव सन्दर्भे २०३० तमवैक्रमाऽब्दे त्रिभुवनविश्वविद्यालये नूतनायां शिक्षायोजनायां प्रवर्तितायां संस्कृतसङ्कायेनोत्तरमध्यमायामन्यपाठ्यांशेन समं मध्यसिद्धान्तकौमुद्या ण्यन्तप्रक्रियादिसमाप्तिपर्यन्तो भागः पाठ्यांशतया निर्धारितः । भाषान्तरे एस्.एल्.सी. परीक्षामुत्तीर्णा अनधीतसंस्कृता अपिच्छात्रा उत्तरमध्यमायामध्ययनायाऽङ्गीकृताः । अध्ययनसमयश्च षाणमासिक-सत्रावधिरासीत् । तावता कालेन तावानेव पाठभारोऽपि दुर्वहः । तत्रापि सन्धिनियम-सुबन्त-तिङन्त-प्रकरणाऽध्ययनमन्तरेण मध्यसिद्धान्तकौमुद्या ण्यन्तप्रक्रियादिभागाऽध्ययनमसंभवमिति विविच्याऽत्र भवान् प्राध्यापकः श्रीहरिप्रसादशर्मा आचार्यः, अष्टाध्याय्या द्वयोः पुस्तकयोः पत्राणि पृथक्कृत्य तानि गुन्द्रेण पटे संश्लिष्य तं च पटं भित्त्यामवलम्ब्य तत्र यथास्थानं सूत्राणि दर्शयन् सूत्रक्रमं प्रक्रियाक्रमं च सङ्गमयञ्श्यामपाटीप्रयोगविधिना विद्यार्थिनो बोधयन्नध्यापयति स्म । स-लीलं तया रीत्याऽध्यायिनश्छात्राश्च लाभान्विता अभूवन् । अत्र भवता तादृशी रीतिः समाश्रिता, यया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्यन्तप्रक्रियातः पुरोवर्ती सुबन्त-तिङन्त-भागोऽपि बोधविषयीभूतोऽध्येतृणाम् । अत्र भवान् विदुषामग्रणीर्हरिप्रसादो वदति-अष्टाध्यायीसूत्रक्रमस्या प्रक्रियाक्रमस्य च समन्वये कर्तव्ये यथास्थानमावश्यताऽनुसारेणोपषट्शतानि सूत्राणि वृतानि वर्तन्तेऽत्रेति ।

त्रिभुवनविश्वविद्यालयीय-संस्कृतसङ्कायस्य केन्द्रीयकार्यालयो दाङ्गे स्थापितः । नवशिक्षायोजनायां प्रवर्तितायां प्रथमः संस्कृतसङ्कायनीः (डीन) अम्बिकाप्रसादोऽधिकार्यासीत् । स च प्राध्यापकस्य श्रीहरिप्रसाद शर्मण आचार्यस्य तादृशीं व्याकरणाध्यापनरीतिं विज्ञाय नितरां प्रभावितः प्रमुदितश्च, आचार्यमहोदयाय मुक्तकण्ठं श्लाघमानो 'यथा भवान् पाठयति, तथा लिपिबद्धं करोतु, वयं मुद्रयित्वा शैलीमिमामन्यत्रापि प्रसारयेम' इत्युक्तवानभूत् । स्वयं प्रक्रियाक्रमानुसारिणीं वैयाकरणसिद्धान्तकौमुदी तद्व्याख्यानभूत-प्रौढमनोरमाशब्देन्दुशेखरादिग्रन्थानधीत्य नव्यव्याकरणाचार्यपरीक्षामुत्तीर्णोऽप्यत्र भवानष्टाध्यायी-क्रमेणाऽध्ययनाऽध्यापनयोः प्रवृत्तः सूक्ष्मेक्षिकया पाणिनीयाष्टकं पर्यालोचयत् । नवशिक्षायोजना-प्रचालनात् पूर्वमेवाऽत्र भवान् स्वात्मजां सरस्वतीं जिज्ञासूनन्याँश्च च्छात्रान् पाणिनीयाष्टकाऽध्ययनरीतिं प्रशिक्षयति स्म ।

वैयाकरणो विद्वद्वरेण्यो हरिप्रसादाचार्यः, स्वकीयां विलक्षणां व्युत्पत्तिमतीं प्रतिभां कृतिप्रावीण्यं च समुपयुज्य महता परिश्रमेण 'अष्टाध्यायी शारदाप्रभाव्याख्यामहिता' इति नामक ग्रन्थमिमं सम्पाद्य विदुषां पुरः समुपन्यस्तवान् । 'सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र' इति मार्गं द्रढयितु मनसा शाब्दिकेन विदुषाऽत्र भवता सूत्रकृतः पाणिनिमुनेराशयो याथार्थ्येन समुपस्थापितोऽत्र । अत्र तत्तत्सूत्रगतानामनुवर्तनीयपदानामनुवृत्त्यवधिप्रदर्शनपरकः सङ्केतः प्रदर्शितोऽस्ति । अनुवृत्तिसरणिश्च स्फुटतया संदर्शिताऽस्ति । सर्वत्रोदाहरण-प्रत्युदाहरणोपन्यासपुरःसरमध्ययनाऽध्यापनमार्गः सरलीकृतोऽस्ति ।

महेन्द्रसंस्कृतविश्वविद्यालयस्य विद्यापीठेषु निर्धारित-व्याकरणविषयक-पाठ्यक्रममनुसृत्य प्रक्रियाक्रमानुसारिणीं वैयाकरणसिद्धान्तकौमुदीं तद्व्याख्यानभूत-ग्रन्थाँश्च पाठयन्तः शिक्षका विश्वविद्यालयेन प्रकाशनीयेषु ग्रन्थेष्विममपि दृष्ट्वाऽनुसन्धानकेन्द्रस्थस्यास्य मुद्रणीयलिपितः कतिपयपृष्ठान्यधीत्य च नितरां समुत्सुकाः प्रकाशनं प्रतीक्षमाणा आसन् विगतवर्षेष्वेवेति ज्ञायते । ते वैयाकरणाः शिक्षका ग्रन्थमेनं शङ्कानिवारणसमर्थं मन्यन्ते । वैयाकरणेभ्योऽन्येभ्यश्चाऽधिजिगांसुभ्यः सर्वेभ्यः समुपयोगी भविष्यति ग्रन्थोऽयमिति मन्यमानो ग्रन्थेनैनेन नैपालका भारतीयाः पाश्चात्त्याश्च शाब्दिका भाषाशास्त्रिणः संस्कृतवाङ्मयाऽध्यायिनोऽन्ये मनीषिणश्च समुपकृता भविष्यन्तीत्याशासानो ग्रन्थरत्नमिदं निर्माय विद्यापरम्परायाः पल्लवने कृतभूरियोगदानाय विद्वद्धुरन्धराय प्राध्यापकाय विद्यावारिधये श्रीहरिप्रसादाचार्यमहोदयाय कृतज्ञतां प्रकाशयन्नेतद्ग्रन्थप्रकाशन-सहयोगिभ्यश्च सर्वेभ्यः ससौहार्दं शतशः साधुवादान् समुपहरन् विरमति ।

प्रा. नारायणकुमारआचार्यः
शिक्षाध्यक्षो
महेन्द्रसंस्कृतविश्वविद्यालयस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याख्यातृवंशपरिचयः

ब्रह्मर्षि-कौण्डिन्य-कुले बुधाग्रणीः
श्रीसच्चिदानन्द उदैत् त्रयीमयः
भाति स्म तस्याऽवरजोऽपि वेदविद्
विद्वान् सदानन्द इति श्रुतः पुरा
(१)

सकलागमपारगामिनौ यमलाया नृपतेः कदाचन ।
रणकेशरसिंहवर्मणो भवनं तौ समुपेयतुर्द्विजौ ॥
(२)

मुदितो गृहमेतयोस्तयोः शुभमातिथ्यमुपाचरन्नृपः ।
अपि तावभिनन्द्य तं नृपं शुशुभाते नृपकल्पितासने ॥
(३)

बुधायोरथ राजसूयजिन्महनीयक्रतवीयमण्डपे ।
विविधध्वजतोरणाऽञ्चिते शनकैरेव तयोर्गता दृशः ॥
(४)

हविषां हवनाय होतृषु प्रयुयुक्षुष्वरणिश्रितानलम्
अवगत्य तथा स्थितिं बुधौ स्मितमन्योऽन्यमुखं स्म पश्यतः ॥
(५)

उचितं हवनं तु पूजिते ननु वेदध्वनिजे हुताशने ।
इति वर्णयतः स्म याज्ञिकैरनुयुक्तौ स्मयकारणं बुधौ ॥
(अनुयुक्तौ = पृष्टौ, प्रश्नोऽनुयोगः पृच्छा च इत्यमरः)
(६)

क्षितिपाऽनुनयादथाऽतिथिः श्रुतिसूक्तानि पठन् द्विजोऽनुजः ।
अपसारितवेदिमध्यमृद् नवपानीयमिहोदजीगमत् ॥
(७)

इति तन्महनीयकर्मणा नवपानीयपदेन पूजितः ।
समवाप्य महीपतेर्द्विजः क्षितिवृत्तिं वसति स्म तत्र सः ॥
(८)

अपि वेदविदि द्विजेऽग्रजे जलमेतच्च स-वैदिकध्वनि ।
अभिमन्त्र्य समित्सु सिञ्चति सहसैव ज्वलति स्म पावकः ।
(९)

अथ सोऽपिमहीभुजा वृतः स्वकुलाचार्यतया स-वंशजः ।
युवराज-नरेन्द्रवर्मणोऽप्युपनीस्तत्र सतां मतोऽवसत् ॥
(१०)

अपि वंशपरम्पराक्रमे यमलाभूपतिवंश्य-भूमिपैः ।
श्रुत-तद्द्विज-वंशजा द्विजाः स्वकुलाचार्यतया सदाऽऽदृताः ॥
(११)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपि सामनि दानदण्डयोर्भिदि युध्येवमदृष्टयोश्च ते ।
परराष्ट्रनये तथाऽऽन्तरे समभूवन् क्षितिभृत्-सहायिनः ॥
(१२)
कालेऽधिके गते ब्राह्मैः कर्मभिर्वैभवैरपि ।
श्रीविप्रोऽन्वर्थनामाऽभूदाचार्यकुलदीपकः ॥
(१३)
खाँचीक्षितीश्वरावाप्त-भूमिवृत्तेः सतां मतः ।
स तां भूर्त्यालयाचार्यवंश्याद् वृत्तिभुवं द्विजात्- ॥
(१४)
एकाशीतिसहस्रेण (१०८१) राजतै रूप्यकैर्बुधः ।
क्रीत्वैरावत्युदक्तीरे दर्भाने महितोऽवसत् ॥
(१५)
दुर्गादासः सुतो ज्येष्ठोऽज्ञातनामा च मध्यमः ।
यवीयान् सुकुरुस्तस्य सुताः समुदपत्सत ॥
(१६)
दुर्गादाससुतः ख्यातः प्रतिमानस्तदात्मजाः ।
अभूवन् भगवद्दासो देवमणिर्धनञ्जयः ॥
(१७)
भवानीशङ्करः पञ्चाऽज्ञातनाम्ना यवीयसा, ।
भगवद्दासपुत्रोऽभूत् खलुदासः सतां मतः ॥
(१८)
तस्याऽऽत्मजोऽतिविनयी जयदास आर्यो
धर्मावती-सलिल-शीतल-सत्समीरे ।
नीलाश्मजित्वर-लसद्द्युति-सस्य-शस्ते
ग्रामे ससार सरसे खदिरालयेऽथ ॥
(१९)

पुत्री यतो भवति गोमुखपर्वतस्य
गोमुख्यतो हिमरुगच्छतमाऽम्बुमत्त्वात् ।
धर्मावती पृथुलसस्यसमृद्धिदेति
ख्याता नदी वहति यत्र सुधोपमाऽम्बुः
(२०)
स्वच्छेऽम्बरे विततरोचिषि माधवान्ते खस्वस्तिकाश्रयिणि तिग्मकरेऽपि यत्र ।
हैयङ्गवीनमृदुफाणितकर्दमेषु क्षेत्रेषु शीतल-समीरण-सेव्यमानाः- ॥
(२१)
धर्मावतीस्वनन-मेलित-गीततालाः क्रौञ्चीयपङ्क्तिनिवहा इव बद्धमालाः ।
बाला भुजङ्गनिभवेणिधराः सुवेषाः शादं मिथः सकुतुकस्मितमुत्किरन्त्यः ॥
(२२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोलालकालि शुकपक्षनिभान् सलीलमुत्खन्य कोमलतमान् कलमप्ररोहान् ।
चारग्रहात्वर-विहङ्गमचञ्चु-तीव्र-हस्तं वितस्तिवितति प्रतिरोपयन्ति ॥
(२३)

ग्रीष्मेऽप्यगाधसलिले सरये सलीलं सोपानसोदर-सुलोल-तरङ्गभङ्गे ।
धार्मावते निपुणमाश्रितपादचालं गौपुच्छिकाः स्मितमुखं वटवो रमन्ते ॥
(२४)

वर्षासु नीलनवनीरद-हेमकान्तिसौदामनी-विजितबर्हनिभेन्द्रचापान् ।
पश्यन्त्य उत्कमपसारितकुन्तलाग्रं बाला लुनन्तकि हरिन्मणिभासघासम् ॥
(२५)

मार्गादि-पञ्चसु च वामनबाहु-लभ्य-कालेयकानि जितषट्पदसन्निभानि ।
आस्यश्रवोनयनदोषहराणि शश्वदास्वादयन्ति विपिने मधुराणि गोपाः ॥
(२६)

जिह्वादुराप-विषमास्थियुगान्तराणि स्वादूनि पूर्णरसकट्फलसोदराणि ॥
पित्तक्षयज्वरहराणि जना यथेच्छमश्नन्ति साम्लमधुराणि परूषकाणि ॥
(२७)

हेमाद्रिपादनिभ-पीतपलालवीटाकुञ्जेषु तुल्यशिशुमारक-मेधिमत्सु ।
शीतांशुमण्डलसमान- खलाञ्चितेषु क्षेत्रेषु सार्चिरनलेष्वथ तारकाढ्ये- ॥
(२८)

स्वच्छेऽम्बरे शरदि जानपदा विमुग्धाः कौतूहलादुभयतोऽप्यवलोकयन्तः ॥
लोका अहो ! उभयतोऽखिलदृश्यसाम्याद् भूव्योमसंस्तवविधौ निशि विभ्रमन्ति ॥
(२९)

मारीभयं ग्रहभयं भृशदुर्दमाधिं दुर्वाररोगनिवहं द्रुतमीतिभीतिम् ।
श्रीभैरवः कनखला-जलपाविपादो भक्त्या स्मृतो हरति यत्र विराजमानः ॥
(३०)

श्वेतोच्छ्रिताऽक्षतयुगाऽञ्चितभालदेशो व्यालाकृतिः किसलयोपमपाटलाङ्गः ।
त्राता सतां विचरिता भृगुशैलकूटे वार्तं प्रवर्तयति यत्र च भूमिदेवः ॥
(३१)

तत्रोदभूद् गणपतिः श्रुतपुण्यकीर्तिः स्वाध्यायवान् द्विजवरो जयदाससूनुः ।
माहाकुलीन इति पूजितभावनाढ्य-तत्रत्य-सज्जन-जनाञ्चित-हृद्यसात्म्यः ॥
(३२)

हीराप्रसाद उदभूत् प्रथमश्च लक्ष्मी-रामोऽन्तिमो गणपतेरपि मध्यमस्तु ।
धीरःसुधीर्भवभयापहराम-भक्तो धर्म्यः सुतो वरगुणोऽजनि भक्तिरामः ॥
(३३)

जज्ञे सुतः पितृगुणो ऽथ च भक्तिरामाद् रामाश्रयेति समुदीरणपुण्यसात्म्यः ।
मान्यः सतां श्रुतगुणोऽजनि फर्सुरामो लोका प्रसूर्दिवमगाद् विरह्य्य बालम् ॥
(३४)

अथ ठाकुरकृष्णाद्यप्रसादावुदपत्सत ।
क्रमाद् हरिप्रसादश्च भागीरथीयगर्भतः ॥
(३५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काले कियत्यतिगते सति फर्सुरामः प्राज्ञः खटीधरपदेऽधिकृतो विनीतः ।
पाराशराऽन्वयभुवं श्रुतरूपशीलां कन्यामुपायत युवाऽथ धनेश्वरां सः ॥
(३६)

नाम्ना गुणैरपि कुले प्रथिता पवित्रा जातास्तथा मधुधरा मधुरस्वभावा ।
चान्द्री कलेव च कला किल चन्द्रपूर्वा शीलाञ्चिता दुहितरः क्रमशस्तदीयाः ॥
(३७)

कालक्रमेण च सुतेषु समुद्भवत्सु सर्वेषु हा ! स्थितयशःसु जराऽनुभावी ।
स्थानेषु वेदविधिना प्रतिपाद्य पुत्रीः पत्न्या स धर्मतनयाय परामृमर्श ॥
(३८)

स्यादौरसः कुलहिताय यथा सुपुत्रो न स्यात् तथाविधगुणः किल धर्मपुत्रः ।
नेहावयोर्दुहितरोऽपि समं सुतैः स्वैर्भ्रातृस्मृताः सरसमैतुमहो ! लभेरन् ॥
(३९)

तद् धर्मपुत्रविषयं जहता विमर्शं भूयः प्रभो ! परिणयो भवता विधेयः ।
अप्यर्थितो मृदुलभावनयेति पत्न्या भूयोभवे परिणये न मनो दधे सः ॥
(४०)

भर्त्रा मुहुर्मुहुरपि प्रतिषिध्यमाना वंशक्रमं प्रथयितुं पतिदेवता सा ।
हीरां यथाविधि विवाहयति स्म भारद्वाजाऽन्वयोदितवतीं सुमुखीं कुमारीम्
(४१)

अथेश्वरीप्रसादोऽभूत् पुत्रः पितृमुदा सह ।
भवेऽस्मिन् भङ्गुरे किन्तु को वेद भाविभव्यताम् ॥
(४२)

अन्त्योद्भवः प्रथमया नितरां जनन्या लोकोत्तराऽनुपमभावनया स-तोषम् ।
शायाऽशन-स्नपन-तेलन-चुम्बनाद्यैः संलालितः पितृमुदं स ततान बालः ॥
(४३)

पुत्री खिमाऽच्छमहिमाऽजनि याति काले स्मेराननोऽथ तनयोऽतिथिवृद्धसेवी ।
दीपः कुलस्य पितृदेव उदात्तभावो दुर्गाप्रसाद उदभूदथ सच्चरित्रा- ॥
(४४)

चित्रा सुताऽजनि सुतः खुविरामशर्मा यो गोमतीं परिणिनाय मृदुस्वभावाम् ।
नाम्ना शिवाऽपि हि शिवेतरभागधेया काले सती दुहितरं सुषुवे स्नुषाऽऽद्या ॥
(४५)

दुःखास्पदे ननु भवेऽत्र सुखावभासे हा ! हन्त ! हन्त ! नियतिर्दुरतिक्रमाऽस्ति
सिन्दूरबिन्दु-रहितं प्रथमस्नुषाया भालं निभाल्य सहसा पितरो मुमूर्छुः ॥
(४६)

रामं विनीतमनवेक्षितमातृभेदं स्नेहास्पदं दशरथस्य च केकयी प्राक् ।
प्राज्ञं प्रजाप्रियमनन्तगुणं सपत्नीगर्भोद्भवं हि वनवासयति स्म सेर्ष्यम् ॥
(४७)

सन्तानबीजमपि केवलमेकपुत्रं स्मेरं स्तनन्धयमहो ! नृप-चित्रकेतोः ।
पत्न्यः पुरा विमनसो निभृतं सपत्नी-गर्भोद्भवोऽयमिति हा ! गरलेन जघ्नुः ॥
(४८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकद्वय-प्रथित-पुण्ययशाः सपत्नी-गर्भोद्भवेऽप्युपरते तु धनेश्वराऽम्बा ।
शोकाग्निदग्धहृदया सह मूर्छयैव स्वानेव दिव्यमहिमा हि जहात्यसून् स्म ॥

(४९)

दुर्गाप्रसादस्तु वसिष्ठवंश्य-श्रीमद्घनश्यामसुतां विनीताम् ।
सत्कीर्तनीयोत्तमरूपशीलां हीराकुमारीमुपयच्छते स्म ॥

(५०)

गुप्तस्थपाण्डवकृतस्तुति-रामगाथा-वर्माऽर्गला सहित कीलक-पाठमग्नः ॥
रामेति नाम रजनीपरतस्त्ययामादासङ्गवं सुमधुरं समचीकृतत् सः ।

(५१)

विद्वान् सुतोऽजनि च तस्य गुरुप्रसादो गूढाकृतिर्मधुरगीरनुजन्मपाठी ।
शीलाऽञ्चिता मृदुमनास्तनया विनीता सौभाग्यभाजनवराऽजनि हेरमाऽथ ॥

(५२)

पुत्री पराऽप्यथ मुगाऽजनि पुण्यवृत्ता सा हन्त ! किन्तु विधिना त्वतिवञ्चिताऽऽसीत् ॥
सर्वं हि सञ्चितमिहैव समापनीयं मत्वेति सा तु विदुषी न भृशं व्यषीदत् ॥

(५३)

मध्योऽहमेव तनयोऽस्मि हरिप्रसादः कृष्णप्रसाद उदभूच्च ततः कनीयान् ।
नाऽवैमि तत् तनयपाठनदत्तचित्तौ दुःखं न यद्धि पितरावनुभूतवन्तौ ॥

(५४)

कार्यान्तरोत्कमनसोऽपि हि तर्जनाद्यैः स्थानेऽपकृत्यवशगानिव वारयन्तौ ।
स्नानेऽशनेऽपि शयने विहितावकाशानस्मान् सदैव पठने पितरावयुङ्क्ताम् ॥

(५५)

स्वर्याति तातेऽपि वयोऽर्धपारे गुरुप्रसादाद्यसुतप्रमाणा ।
माताऽत्मजस्नेहरसप्लुताऽऽत्मा चित्तेऽपि दूनाऽभृत गेहभारम् ॥

(५६)

सूनुस्नुषापौत्रननान्दृपुत्रीनानान्द्रदौहित्रकबन्धुतानाम् ।
सन्तोषणाद्यैरभवत् तदीया हीराकुमारीत्यभिधा कृतार्था ॥

(५७)

तातो दुर्गाप्रसादोऽगमदमरपुरीं काशिके मय्यधीत्या
तस्मात् तत्पाद-संवाहन-परिचरण-स्तुत्यसौभाग्यहीनः ।
शम्भुं हीराङ्गजोऽहं भवरुगपहरं शारदासव्यकः श्री-
दुर्गाहीरेश्वरं श्री हरि-रवि-हरभू-शक्तिभिः सार्धमाधाम् ॥

(५८)

प्रत्यक्तीराद्रिमूले ललितमभिमुखं गोमुखी-वारियानं
द्वारं विद्युद्विभूत्यै रचितमभिनवं माण्डवीयं व पश्यत् ।
स्वर्गद्वारी-समीपे हिमरुगुदकवद्-गोमुखीपूर्वतीरे
सेतोर्विद्युन्निदानादुपकरशतकं मन्दिरं राजते तैः ॥

(५९)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माताऽवसानेऽनुगपुत्रपौत्रा काशीमगात्, सा द्युमणावुदीच्ये ॥
ब्राह्मे शरीरं व्यसृजन् मुहूर्त्तेऽधिब्रह्मनालं मणिकर्णिकायाम् ॥

(६०)

श्रुत्वेति वृत्तं हृदि यो दधाति निरस्तसापत्न्यमतिर्यशस्वी ।
सम्पद्य मातापितृदेव आर्यो भूयात् स लोकद्वयपूजनीयः

(६१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः

प्राक्कथनम्

॥ॐ नमः श्रीजगदम्बायै ॥

धर्मार्थकाममोक्षाः पुरुषार्थाश्चत्वार इति पौरस्त्य-सिद्धान्तः। ते च षडङ्ग-वेदोपनिषदादि-शास्त्रसन्दोह-स्वरस-साध्याः। षट्स्वङ्गेषु च मुखस्थानीयमपि व्याकरणं न साक्षात् पुरुषार्थ-चतुष्टयसाधकम्। किन्तु शास्त्रान्तरज्ञानाऽनुबन्धि-शब्दशक्ति-द्योतन-द्वारा परम्परीणं प्रयोजकम्। अतो व्याकरणादि-षडङ्गज्ञानद्वारा सभौतिकशास्त्र-वेदोपनिषत्प्रभृति-शास्त्राणामध्ययनमेव हि वस्तुतोऽध्ययनम्। शतं जीवेम शरदः ? इत्यादि श्रुतिप्रशस्तं पुरुषायुषं च शतं वर्षाणि। आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेन च विद्योपयुक्ता भवति। अध्ययनावधिश्चाऽधिकतमः प्रथमं वयः। तत्रापि पञ्चानामब्दानां बाल्यलीलयैव व्यतिगमः। शेषसमयेऽपि सम्भवन्त्येवाऽन्तरायाः। एवञ्च सारगर्भाणामेव विषयाणां मननेन समयाकर-णमुचितमिति प्रत्येकं शास्त्राणामुपदेशे शैली सर्वथा परिष्कार्या वर्तते, इति न तिरोहितं विचारवताम्। तत्र व्याकरणं सरलेनोपायेन शीघ्रं शिक्षणीयं कथं संभवेदिति वसु-भूमि-व्योम-बाहु (२०१८) मिताद् वैक्रमाब्दादेव विमृशतः पाठनसमये छात्राणामुत्कण्ठां स्फूर्तिं विषादं वाऽवदधतः कया रीत्या पाठने छात्रा भारमनुभवन्ति, कया रीत्या पाठने चाऽनायासं बुध्यन्ते। व्याकरणं कथं बहुकालसाध्यं कथञ्च स्वल्पसमयसाध्यमिति चाऽनुबुभूषोः पाठन-पाठनपरीक्षण-प्रभृतिभिः समयाकरणं जातं मम। अनुभवक्रमश्च- प्रथमः- लघुकौ-मुदीप्रभृतिग्रन्थानां सम्यग् भावबोधनपुरस्सरमु-पदेशः। द्वितीयः-अष्टाध्यायी-सूत्रपाठं सम्पूर्णं कण्ठस्थं कारयित्वाऽग्रे तदर्थोदाहरणोपदेशः। तृतीयः-अर्थसहिताऽष्टाध्यायीसूत्रा-र्थोदेशः। उदाहरणानां च निगमनरीत्या लौकिकव्यवहार-प्रयोगार्हाणां बोधनम्। तुरीयः-उदाहरणापेक्ष्याणि सूत्राणि स्थले स्थले वृत्वा सोदाहरणा-ऽष्टाध्यायीसूत्रार्थोपदेशः। उदाहरणानां च निगमनरीत्या लौकिकव्यवहारप्रयोगार्हाणां बोधनम्। पञ्चमः-बालान् व्यवहारद्वारा सँस्कृतभाषायां व्यवहर्तुं क्षमान् सम्पाद्य (सँस्कृतभाषाशिक्षणरीतिश्च 'पौरस्त्यशिक्षा' इति-शीर्षकं दत्त्वा 'हिमज्योतिः' इति पत्रिकायाश्चतुर्ष्वङ्केषु क्रमशः सविस्तरं प्रपञ्चिताऽस्ति प्रकृतव्याख्याकृता) व्यवहारे प्रयुक्तानि पदानि आगमनरीत्यो-दाहरणीयानीति धिया तत्तदुदाहरणाऽ पेक्ष्याणि सूत्राणि वृत्वाऽष्टाध्याय्यामेव सोदाहरण-सूत्रार्थोपदेशः। इति यथोत्तरमनुभवः। तत्र प्रथमे- वृत्तिघोषणे समयव्ययः, सूत्रघोषणा-ऽऽनर्थक्याभासः, सूत्रपौर्वापर्यज्ञानसँस्काराभावः, व्याकरणं बहुकालसाध्यम्। द्वितीये- बाल-बुद्धिकुण्ठा। तृतीये- प्रयासाधिक्यमन्धतमसपर्यटनसादृश्यं बालबुद्धिकुण्ठा च। तुरीये-निगमनरीत्या बोधने स्फूर्त्यभावः। अतः पञ्चमस्तेभ्यः सर्वेभ्यः श्रेयान्। अनुभवस्वरसः-अतोऽद्यत्वे व्याकरणोपदेशात् पूर्वं छात्रान् व्यवहारद्वारा सँस्कृतभाषायां व्यवहर्तुं क्षमान् सम्पाद्य पूर्वमागमनरीत्या त्रिचतुरैः षड्भिर्वा मासैः सामान्यं व्याकरणं शिक्षणीयमिति। इत्थं प्रतिदिनं (अवकाशदिनानि विहाय) होरावधि मननशीलश्छात्रः सार्धवर्षेण व्याकरणप्रक्रियांशे लब्धप्रवेशो भवतीति मदीयोऽनुभवस्वरसः। पाठन-पाठनपरीक्षणा-ऽनुभवसन्दर्भेऽन्तिमरीत्या शिक्षणेन अनवेतसँस्कृता उत्तीर्णविषयान्तर- पूर्वमध्यमासमकक्ष-परीक्षाश्छात्रा मध्यकौमुद्या ण्यन्तादि-समाप्त्यवधिकं पाठ्यांशं प्रतिदिनं (अवकाशदिनानि विहाय) होरावधि पठनेन षड्भिरेव मासैः शिक्षितवन्तः। प्रत्यक्षमेतद-नुभूय त्रिभुवनविश्व-विद्यालयान्तर्गत-सँस्कृताऽध्ययन-संस्थान-तात्कालिक-संकायनीः (डीन) श्रीमदम्बिकाप्रसादा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिकारी महोदयो मामवोचद्-यद्, भवान् यथा पाठयति तथा लिपिबन्धं करोतु, यतः सर्वत्र संस्थासु शैलीयं प्रसरेत्। इति। एवमेव त्रिभुवनविश्वविद्यालयो-पकुलपतिः श्रीसूर्यवहादुर-शाक्यमहोदयोऽपि कार्यविशेषगौरवेण दाङ्गमागतो ज्ञातवृत्तः पूर्वोक्तं सङ्कायनीवाक्यं मामुद्दिश्या ऽऽवीवृतत्। एवं वर्धितोत्साहः प्रसङ्गान्तरे त्रिभुवनविश्वविद्यालय-समन्वयमहा-शाखातो व्याकरणविषये ऽनुसन्धानाय प्रकाशितां विज्ञप्तिमनुसृत्या-ऽनुसन्धित्सुषु प्रत्याशिषु पूर्वोक्तमहाशाखया ऽहं वृतः। इत्थमनुसन्धानाय लब्धावसरेण मया सम्पूर्णानन्दसँस्कृत-विश्वविद्यालयसंमानितप्राध्यापक-व्याकरणविभागाध्यक्षचर-परमश्रद्धेय-गुरुवरश्रीरामप्रसाद-त्रिपाठिचरणानां निर्देशकत्वे ऽनुसंहितम्। प्रसङ्गेऽस्मिन्ननुसन्धान-सम्बन्धीनि पद्यानि प्रस्तूयन्ते-

आत्मारामादपाठीद् यजुरवधि बुधाद् वर्णमालाविवेकात्
पूर्वाङ्गं शाब्दशास्त्रं प्रथमभव-गुरूद्भासिताद्य-प्रसादात्-।
नेत्राद् मुक्तेस्तथाऽथो हरिहर-निहिते भोज्यवस्त्रादिकाङ्क्षे
विद्यासद्मन्यधीयन् सरसमुदतरद् मध्यमां यः परीक्षाम्॥

(१)

काशीस्थे राजकीये बुधकुलमहितेऽ थोच्चविद्यालये
यस्तत्संस्थालब्धवृत्तिः श्रुतिमुखजलधेराचमीद् द्वित्रबिन्दून्।
संस्थायामेव तस्यां परिणतवपुषि ख्यात- वा. सं. वि.-नाम्न्या-
माचार्यान्तां परीक्षां क्रमश उदतरत् स्नेहपात्रं गुरूणाम्।

(२)

हेब्वारान्न्यायशास्त्रा ऽम्बुधिसलिल-पृषत्-स्पृक् च पद्मप्रसादात्,
काव्यश्रावी रसानामविदपि कविताकल्पना ऽपत्रपिष्णुः।
स घ्राता यास्कवाचां श्रुतनरहरिगीः पूज्यहीराकुमारी-
श्रीमद्दुर्गाप्रसाद-द्विजवर - तनयः पाणिनीया ऽष्टिकायाम्-॥

(३)

बुद्धिः शीघ्रं सलीलं प्रविशतु सरसं मा श्रमो भूदपीष-
च्छात्राणां शिक्षकोक्तावविहितमनसां स्तात् प्रकाशोऽञ्जसेति
श्रीमद्रामप्रसाद- प्रथित-बुध-पदाम्भोज-लब्ध-प्रसादात्
तेषां निर्देशकत्वे हरिरुपहरते शब्दशास्त्राऽनुसन्धाम्॥

(४)

गुणा येऽत्र प्रतीयन्ते ते निर्देशकमूलकाः।
दूषणान्यनुसन्धातृ-मूलानीति विभाव्यताम्॥ इति।

(५)

अथ तदनुसन्धानमपि समावेश्य व्याख्याता सवार्तिका सोदाहरणा सम्पूर्णाष्टाध्यायी विदुषां पुर उपह्रियमाणाऽस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्य ग्रन्थस्योद्देश्यम्

१. स्वल्पेन समयेन सरलेनोपायेन पाणिनीय-व्याकरण-शिक्षणम् ।
२. सँस्कृतभाषा पाणिनीयव्याकरणञ्च कठिनमिति भ्रमनिवारणम् ।
३. व्यवहारेऽपि 'षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इत्यागमवचनस्य सार्थक्योपपादनम् ।
४. पौरस्त्यवाङ्मयेषु केषांचिदामूलचूलज्ञानम्, शेषाणामपि सारगर्भ-सामान्यसिद्धान्तज्ञानम् ।
५. पौरस्त्यवाङ्मयग्रन्थेषु विकलानामङ्गानां मधुकरवृत्त्या पोषणाय फल्गुफालन-वल्गु-समावेशन-प्रयोजनक-भाषान्तरग्रन्थाऽध्ययनमननाऽपेक्ष्याऽवसरावाप्तिः ।
६. समयाऽपेक्ष्य- विषयान्तरज्ञानाऽपेक्ष्याऽवसराऽवाप्तिः ।
७. क्रमशो यथोत्तरमनुसन्धानद्वारा जगति पुनर्निरपेक्ष-मुधकर- वृत्तिक- सर्वा[illegible]ग-पौरस्त्य- शिक्षालोक- प्रसारणम् ।

एतत्प्रसङ्गे ज्ञानविज्ञानसमन्वयात्मकशिक्षापद्धतेः पुनरुज्जीवनायै शिक्षापद्धतिसुधारा-पायविषये मत्कृतात् "श्री ५ वीरेन्द्रशुभ-राज्याऽभिषेकम् (स-शिक्षानिदानम्)" इत्यतः कानिचित् सूत्ररूपेण निबद्धानि पद्यान्युद्ध्रियन्ते ६७ तः ९० पर्यन्तानि यथा -

आबालवृद्धं रसनासु शश्वन्नृत्येत् सुधा-सोदर-देववाणी ।
द्वि-त्राऽब्द- बालाः श्रुत-वृद्ध- वाक्या गीर्वाण-वाणीं प्रथमं ब्रुवन्तु ॥६७॥
जानन्तु खेलच्छल-शिक्ष्यमाणां बुधैर्वयस्यैरिव देववाणीम् ।
षड्भिर्हि मासैः शिशवः स-लीलं, न दुष्करोऽयं विषयः सुसाधः ॥६८॥
बालाँस्तथा शिक्षित-देवभाषान् बुधैर्विभिन्नाः सुरगीर्निबद्धाः ।
संक्षिप्त-वृत्ताः स-रसाः सुबोधाः कथा विचित्रा अथ पाठनीयाः ॥६९॥
विद्यार्थिनो व्याकरणं विनैवं गीर्वाण-वाणी-विहिताऽधिकाराः ।
अधीयतां संस्कृत-वाङ्मय-स्थां विद्यां बुधेभ्यो व्यवहार-विद्भ्यः ॥७०॥
शैलान् विशालानिव दर्पणेऽल्पे सूत्रे प्रतीत्यान् विषयाननल्पान् ।
तेऽल्पेन कालेन विदन्तु, विज्ञैः शङ्काऽपनोद्याऽस्तु तदुद्भवैव ॥७१॥
नोत्सारणाऽङ्गस्य सुधार इष्टः प्रबोधनाऽल्पाऽक्षरतस्तु स स्यात् ।
तद्धेतु-सूत्र-क्रम-पाठनायै प्रशिक्षणीयाः खलु शिक्षकाः प्राक् ॥७२॥
विद्यार्थिनो द्वादश-वर्षकल्पा रीत्येति लब्धाऽध्ययनाऽवकाशाः ।
यास्कादि-दृङ्-मार्गित-मूलशब्दं भाषान्तराण्यप्यवयन्त्वयासम् ॥७३॥

[भाषान्तर-मूलशब्दनिर्वचननिदर्शनं मासिक्यां हिमज्योतिः पत्रिकायां प्रथम (वैक्रमाब्द २०४१)वर्षस्य नवमाङ्कात् तृतीयवर्षस्य प्रथमाङ्कावधि 'निर्वचनज्योतिः' इति शीर्षकयुतं क्रमशः प्रस्तुतं प्रकृतव्याख्याकृता । ततस्तस्यां पत्रिकायां विरतायां लेखोऽपि विरतः सः]

विद्यार्थिनोऽत्यत्व उरु-प्रयत्नात् ख-दो (२०) र्मिताऽब्दैरवयन्ति यावत् ।
वल्गु-ग्रहाः फल्गु-मुचस्तु तावद् रीत्याऽनया हायन-पञ्चकेन ॥७४॥
परं महाभारत-युद्धकालात् क्रमान्निरस्तोल्वण-मूलमार्गा ।
शिक्षाऽस्मदीयेति पुनस्तमेतुं वृत्तिर्ध्रुवं माधुकरी तु वृत्या ॥७५॥
आषोडशाऽब्दं सुर-गीर्निबद्ध-पौरस्त्य-विद्याऽध्ययनेन सार्धम् ।
भाषान्तराण्यप्यनुसन्दधद्भ्यो विदन्त्वतस्ते प्रतिभानवद्भ्यः ॥७६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रित-प्रयोगं विषयान् यथेच्छं छात्रास्ततस्तेऽन्यतमान् वृणन्तः ।
पठन्तु तत्तद्-विषयाऽनुगानि साऽऽर्षाणि भाषान्तर-पुस्तकानि ॥७७॥
दशाऽवरा एवमधीत-विद्ये शते विशिष्ट-प्रतिभा भवेयुः ।
ते साऽऽर्ष-भाषान्तर-वर्ति-सारान् दशाऽवराऽब्दाऽवधि पाठयेयुः ॥७८॥
स्वाध्यायतोऽभ्यासत उच्च- बोधास्तेऽध्यापना-जाऽनुभवाच्च दक्षाः ।
आवापतश्चोद्वपनाच्च सारैः पौरस्त्य-विद्यां परिपोषयन्तु ॥७९॥
निदर्शितां तैः सरणीं श्रयन्ती निरस्त-भाषान्तर-बोध-भारा ।
जागर्तु शिक्षाऽथ च साऽनुसन्धा सत्यं यतो ज्ञानमनन्तमस्ति ॥८०॥
स-नाम-स-श्रेणि-दशैक-जाति- विभिन्नसामान्य-विरुट्चयाढचम्
भैषज्य-शास्त्रोन्नतये विशालमुद्यानमुद्यद्-द्युति राष्ट्रियं स्यात् ॥८१॥
न रूप-नम्नां ननु वैरुहाणां बोधाय युक्ता चरकादि-रीतिः ।
सम्प्रत्यलाभाद् विपिने मुनीनां, गोपादि-भाषा-परिवर्तनाच्च ॥८२॥
अपृच्छमुद्यानत एव विद्युर्नामानि रूपाणि च वैरुहाणि ।
गुरूपदेशोदित-तन्त्र-तत्त्वा विधे रसादीन् मननाच्च नाडीः ॥८३॥
स्युर्भावि-नैपालक-कर्णधारा विक्रीय राष्ट्रे न परौषधानि ।
निर्यातिनो राष्ट्रियवैभवानां चिकित्सकाख्याः परदेश्यभृत्याः ॥८४॥
आप्तोपदिष्टानि स-युक्तिकानि प्राचीन-वृत्तानि विदन्तु सर्वे ।
तथ्येतिहासः किल मानवानामनन्य-साधारण-दर्पणो यत् ।८५॥
चला महीति प्रथमं जगाद यास्कस्ततोऽप्यार्यभटस्ततोऽन्ये- ।
ऊचुर्निजोपज्ञमिवेदृशि ज्ञैः स एव मान्यो य उवाच पूर्वम् ॥८६॥
[गौः (पृथिवी) कस्मात् ? यदेषा दूरं गता भवतीति-यास्कः । अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत् । अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम्-आर्यभटः ।
आकृष्टिशक्तिश्च महीत्युवाच श्रीभास्करो वै प्रथमं ततोऽन्ये ।
ऊचुर्निजोपज्ञमिवेदृशि ज्ञैः स एव मान्यो य उवाच पूर्वम् ॥८७॥
[आकृष्टिशक्तिश्च मही तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या ।
आकृष्यते तत् पततीव भाति समे समन्तात् क्व पतत्विदं खे - भास्करः ।]
निर्वास्य शब्दान् स- गलग्रहं स्वान् प्रवेशयन्ते बत ! ये विदेश्यान् ।
तेषां किमाकूतकमित्यवैतुं राष्ट्रप्रियाः सन्तु सदा सतर्काः ॥८८॥
संवत्सरं स्वं प्रथितं विहाय ये कालमाने वृणतेऽन्यदीयम् ।
तेषां किमाकूतकमित्यवैतुं राष्ट्रप्रियाः सन्तु सदा सतर्काः ॥८९॥
रीत्येति नैपालक-कर्णधाराः स-ज्ञान-विज्ञान-विदो विनीताः ।
क्रियाचणा राष्ट्रिय-भावनाऽऽढचाः स्थिराऽङ्घ्रयो राष्ट्र-विभूतये स्युः ॥९०॥

सावधानम्

(अ)- अत्र निदर्शितरीतेर्भावमधिगत्य शिक्षकेणाऽष्टाध्याय्यां सूत्राणि दर्शयता छात्रा उपदेश्याः । अत्रत्याः पङ्क्तयो न वाचनीयाः ।

(आ)- शिक्षकसुविधायै यद्यप्यत्र सूत्राध्याय-पाद-क्रमाङ्कैः सह सूत्राणामानुपूर्वी च प्रत्ताऽस्ति । तथापि शिक्षकैः छात्राणामुपवेशे त्वध्याय-पाद-क्रमाङ्का एव लेखयितव्या न तु सूत्रानुपूर्वी । आनुपूर्व्यां लेखितायां तस्यामेव लेख्यपुस्तिकायामभ्यस्यन्ति नाऽष्टाध्याय्यां ततश्च छात्रमस्तिष्के अध्याय-पाद-क्रमाङ्का न स्फुरन्ति । स एष महान् दोषो बोध्यः ।

(इ)- छात्रैः स्वयमेव पुस्तकमवलोक्य व्याकरणशिक्षणप्रयासो न कार्यः । किन्तु प्रकृतग्रन्थोक्तरीत्या गुरुमुखादेव व्याकरणं शिक्षणीयम् । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपक्रमः

विद्या

ॐ नमः श्रीजगदम्बायै

विद्या द्विविधा। परा, अपरा च। तत्र परा विद्या ब्रह्मज्ञान-प्रयोजना उपनिषदादयः। अपरा वेदास्तदङ्गानि च। तथाहि ॐ ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता॥ स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय जेष्ठपुत्राय प्राह ॥१॥ अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम्॥ स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम् ॥२॥ शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ॥ कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥३॥ तस्मै स होवाच॥ द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवाऽपरा च ॥४॥ तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति॥ अथ परा यया तदक्षरमधिगम्यते ॥५॥ (मुण्डकोपनिषदि)

वेदमूलाश्चान्या विविधा विद्या व्यवहारप्रयोजनाः। तथाहि-ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद् भगवोऽध्येमि। (छन्दोग्योपनिषदि ख.१, अ. ७)

इत्थं चत्वारो वेदाः। आयुर्वेद-धनुर्वेद-गान्धर्ववेद-स्थापत्यवेद-भेदेन च चत्वार उपवेदाः। ब्राह्मणानि। षडङ्गानि। अङ्गेष्वपि ज्योतिषं होरासंहितासिद्धान्तभेदेन त्रिविधम्। पूर्वोत्तरभेदेन द्विविधा मीमांसा। न्याय-वैशेषिक-सांख्य-योग-बौद्ध-जैनदर्शन-भेदेन वितताऽऽन्वीक्षिकी। धर्मशास्त्र-तन्त्र-भेदेन द्विविधाः स्मृतयः। अष्टादश पुराणानि। अष्टादशोपपुराणानि। रामायण-महाभारत-प्रभृतीतिहासः। कृषि-गोरक्षणादिभेदा वार्ता। दण्डनीतिः। कामशास्त्रम्। चतुःषष्टिः कलाः। चतुः शतमुपकलाः। व्यवहार-प्रयोजना विद्या एता वेदितव्याः। तत्र अन्यविषयकं शास्त्रमपि विषयान्तरशास्त्रानुबन्धि भवति। यथोपदिशति श्रीदिवोदासः काशीपतिः - नह्येकस्मिञ्शास्त्रे शक्यः सर्वशास्त्राणामवरोधः कर्तुम्। एकं शास्त्रमधीयानो न विद्याच्छास्त्रनिश्चयम्...। इति (सुश्रुतसंहितायां सूत्रस्थाने अ. ४)

शब्दमाहात्म्यम्

सर्वा अपि विद्याः सर्वं व्यवहारजातं च शब्दाऽधीनानि। यथोपदिशति भगवान् सनत्कुमारः- वाग् (शव्दो वागिति नार्थान्तरम्) वाव नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाँश्च मनुष्याँश्च पशूँश्च वयांसि च तृणवनस्पतीञ्छ्वापदान्याकीटपतंगपिपीलिकधर्मं चाऽधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं च यद् वै वाङ् नाभविष्यन्न धर्मो नाऽधर्मो व्यज्ञापयिष्यन् न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत्सर्वं विज्ञापयति वाचमुपास्स्वेति। (छान्दोग्योपनिषदि १, ख. २, अ. ७)

वाचामेव प्रसादो यद्, अतीतानां पुण्ययशसां चरितानि, अनागता विषयाश्च दर्पण इव परिस्फुरन्ति पुरतः। यथोपदिशति तत्र भवान् दण्डी च-

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ॥३॥
इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥४॥
आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ॥५॥ (काव्यादर्शे) ।
अत एव वैयाकरणाः सर्वजगत्कारणं वाचमेव वदन्ति । तथाहि-अनादिनिधनं ब्रह्म शदतत्त्वं यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥१॥ (वाक्यपदीये ब्रह्मकाण्डे)
पौराणिका अपि सृष्टि-स्थित्यन्त-कारणं वाचमेव मन्यन्ते । तथाहि-
सृष्टौ या सर्गरूपा जगदवनविधौ पालनी या च रौद्री ।
[illegible] चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या ।
पश्य[illegible]यमाऽथो तदनु भगवती वैखरी वर्णरूपा
सा[illegible]द्वाच प्रसन्ना विधि-हरि-गिरिशाऽऽराधिताऽलङ्करोतु ॥ (देवीभागवतमाहात्म्य-मङ्गलाचरणम्) ।

व्याकरणमाहात्म्यम्

सा च वाक् सुप्रयुक्ता कामदुधा सती प्रयोक्तुः परत्रेह च शर्मणे भवति , दुष्प्रयुक्ता तु सैव प्रयोक्तुरनिष्टये । यथोपदिशति तत्र भवान् दण्डी-
गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ॥६॥ (काव्यादर्शे)
उपदिशति च भगवान् पतञ्जलिः-
दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।
यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले ।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥ (महाभाष्ये पस्पशाह्निके)

अतः सम्यग् वाक्प्रयोगाय व्याकरणम्=शब्दानुशासनमतीवाऽऽवश्यकम् । यतो न हि व्याकरणाद् ऋते सम्यक् शब्दाः प्रयोक्तुं शक्यन्ते, शब्दानामानन्त्येन पुरुषायुषस्य चाल्पीयस्त्वेन व्याकरणं विना प्रतिपदोपदेशविधिना पारायणादिना तेषां सम्यग् ज्ञानस्याऽसंभवात् । यथोपदिशति भगवान् पतञ्जलिः- महान् शब्दस्य प्रयोगविषयः । सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः, साङ्गाः सरहस्या बहुधा भिन्नाः- एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृचं नवधाथर्वणो वेदः, वाकोवाक्यम् इतिहासः पुराणम्, वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः । इति (महाभाष्ये पस्पशाह्निके) ।

अत एव तत्र भवान् आनन्दवर्धनः सर्वविद्यानां व्याकरणमूलत्वमुपदिशन् वैयाकरणान् मुक्तकण्ठं प्रशंसति-प्रथमे हि विद्वांसो वैयाकरणाः । व्याकरणमूलत्वात्सर्वविद्यानामिति (धन्यालोके प्रथमोद्घाते) । तत्र भवान् भास्कराचार्यश्च, अनधीतव्याकरणानां शास्त्रान्तरश्रवणाऽनधिकारित्वं द्योतयन्, अधीतव्याकरण एव शास्त्रान्तरस्य श्रवणेऽधिकारीत्युपदिशन् सर्वविद्यानां व्याकरणमूलत्वं स्फुटमेवाङ्गीकरोति-
यो वेद वेदवदनं सदनं हि सम्यग्
ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम् ।
यस्मादतः प्रथममेतदधीत्य धीमान्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी (सिद्धान्तशिरोमणौ गोलाध्याये श्लो. ८)।
अत एव च व्याकरणं खलु वेदानां षट्स्वङ्गेषु मुखस्थानीयमित्यत्र न केषामपि विप्रतिपत्तिः।
शब्दशास्त्रं मुखं, ज्यौतिषं चक्षुषी,
श्रोत्रमुक्तं निरुक्तं, च कल्पः करौ,।
या तु शिक्षाऽस्य वेदस्य सा नासिका,
पादपद्मद्वयं छन्द आद्यैर्बुधैः। भास्करः। (सिद्धान्तशिरोमणौ भगणाध्याये)।
छन्दः पादौ तु वेदस्य मुखं व्याकरणं स्मृतम् (पाणिनीयशिक्षायाम्)
भगवान् पतञ्जलिरपि आगमवचनं पुरस्कुर्वन् व्याकरणस्य
सर्वथाऽध्येयत्वं प्रतिपादयति- आगमः खल्वपि-ब्राह्मणेन निष्कारणो
धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयः। प्रधानं च षट्स्वङ्गेषु व्याकरणम्।
प्रधाने च कृतो यत्नः फलवान् भवति। इति (महाभाष्ये पस्पशाह्निके)।

व्याकरण-परम्परा
व्याकरणं सर्वप्रथमं ब्रह्मा बृहस्पतये प्रोवाच। ततः क्रमशो बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्य उपदिदिशुः। ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्राय इन्द्रो भारद्वाजाय, भारद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्य : (ऋक्तन्त्रे १।४।)
तत्र बृहस्पतये ब्रह्मणोपदिष्टं व्याकरणमतिविशालतमकायं बभूव। अत एव दिव्यं वर्षसहस्रमिन्द्राय बृहस्पतिनोपदिश्यमानमपि तन्नान्तं जगाम। (बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम-महाभाष्ये पस्पशाह्निके)
इन्द्रश्च प्रकृति-प्रत्यय-विभाग-कल्पनेन तद् व्याकरणं संचिक्षेप। तथाहि-वाग्वै पराच्य व्याकृताऽवदत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। (तैत्तिरीयसंहितायाम् ४-६-७)।
तामखण्डां वाचं मध्ये विच्छिद्य प्रकृति-प्रत्यय-विभागं सर्वत्राऽकरोत् (सायणभाष्ये)।
तच्च व्याकरणमिन्द्रेण संक्षिप्तमपि विशालकायमेव बभूव। तथा च श्रूयते-
यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात्।
पदरत्नानि किं तानि सन्ति पाणिनि-गोष्पदे ॥इति (महाभारतटीकारम्भे श्रीदेवबोधः)।
विशालकायमेतन्माहेन्द्रं (ऐन्द्रं) व्याकरणञ्च बार्हस्पत्य-व्याकरणस्य शततमांशतुल्यं लघुकायं बभूव। तच्च बार्हस्पत्य-व्याकरणं माहेश्वर-व्याकरण-सागर समक्षं कुम्भमितं जलमिव प्रतीयते स्म। तथा च श्रूयते-समुद्रवद् व्याकरणं महेश्वरे तदम्बुकुम्भोद्धरणं बृहस्पतौ।
तद्भागभागाच्च शतं पुरन्दरे तृणाग्रबिन्दु-प्रमितं हि पाणिनौ ॥ इति ॥ एतेन ज्ञायते यद्, व्याकरणं यथोत्तरं संक्षिप्तमाचार्यैरिति। न केवलं व्याकरणं किन्तु शास्त्रान्तराण्यपि समये समये तत्तदाचार्यैः संक्षिप्तानि। यथा-
आयुर्वेदः- श्लोकशतसहस्रमध्यायसहस्रञ्च कृतवान्... ततोऽल्पायुष्ट्वमल्पमेधस्त्वं चाऽवलोक्य नराणां भूयोऽष्टधा प्रणीतवान् (सुश्रुतसंहितायां सूत्रस्थाने १-३)।
अर्थशास्त्रम्-एवं लोकानुरोधेन शास्त्रमेतन्महर्षिभिः। संक्षिप्तमायुर्विज्ञाय मर्त्यानां ह्रासमेव च (महाभारते शान्तिपर्वणि ५६।८१) ॥
साहित्यम्- विद्यास्थानानां गन्तुमन्तं न शक्तो जीवेद् वर्षाणां योऽपि साग्रं सहस्रम्। तस्मात् संक्षेपादर्थसन्दोह उक्तो ग्रन्थ-भीरु-प्रियार्थम् (काव्यमीमांसायाम्) ॥
नीतिशास्त्रम्-शतलक्षश्लोकमितं नीतिशास्त्रमथोक्तवान्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अल्पायुर्भूभृदाद्यर्थं संक्षिप्तं तर्कविस्तृतम् (शुक्रनीतौ १।२, ४)
ज्यौतिषम्-प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम् ।
नातिलघुविपुलरचनाभिरुद्यतः स्पष्टमभिधातुम् (बृहत्संहितायाम्, उपनयनाध्याये) ॥२॥
यच्छास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिर्ज्यौतिषं
तस्योच्छित्तिभयात् पुनः कलियुगे संसृत्य यो भूतलम् ।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा-
दित्थं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते (बृहत्संहितायां भट्टोत्पलकृतविवृतिमङ्गलाचरणम्) ।
शिल्पशास्त्रम्- अल्पायुष्यादिधर्माणां नराणां त्वधिकारिणाम् ।
अनुग्रहार्थं त्वेतेषां संक्षेपाद् वद मे प्रभो (काश्यपशिल्पे प्रथमपटले) ॥
इत्थं शास्त्राणां संक्षिप्तौ मूलकारणञ्च यथोत्तरं मनुष्याणामल्पायुष्ट्व-प्रतिभामान्द्यादिकम् । अत एवोपदिशति तत्र भवानुदयनाचार्यः-
जन्म- संस्कार-विद्यादेः शक्तेः स्वाध्यायकर्मणोः ।
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम् ॥ इति (न्यायकुसुमाञ्जलौ) ।

वैयाकरणाः

यद्यपि व्याकरणोपदेशिन आचार्या बहवः । तेषु दशानां नामानि तु पाणिनिरपि स्वसूत्रेषु स्मरति ।
यथा-आपिशलिः (वा सुप्यापिशलेः ६।१।८९॥) काश्यपः- (तृषि-मृषि-कृशेः काश्यपस्य १-२-२५)
गार्ग्यः - ओतो गार्ग्यस्य ८।३।२०)
गालवः (तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य ७।१।७४)
चाक्रवर्मण : (ई चाक्रवर्मणस्य ६।१।१२६)
भारद्वाज : - (ऋतो भारद्वाजस्य ७।२।६३)
शाकटायनः- (लँङः शाकटायनस्यैव ३।४।१११)
शाकल्यः - (लोपः शाकल्यस्य ८।३।१९)
सेनकः - (गिरेश्च सेनकस्य ५।४।११२)
स्फोटायनः- (अवङ् स्फोटायनस्य ६।१।११९) इति । गार्ग्य-शाकल्य-नामनी ऋग्वेदप्रातिशाख्येऽपि लभ्येते तत्र शाकल्यौ द्वौ ।
शाकल्यः (ऋग्वेदप्रातिशाख्ये, स्वरपटले २२) वृद्धशाकल्यश्च (संहितापटले ८१) गार्ग्यः (संज्ञापरिभाषाटले १५)
तथापि नवानामेव व्याकरणानां विशेषप्रसिद्धिर्बभूव । यथा अगस्त्यमुनिर्हनुमतो विषये रामं ब्रवीति-
ससूत्रवृत्त्यर्थपदं महार्थं ससङ्ग्रहं सिध्यति वै कपीन्द्रः ।
न ह्यस्य कश्चित् सदृशोऽस्ति शास्त्रे वैशारदे छन्दगतौ तथैव ॥
सर्वासु विद्यासु तपोविधाने प्रस्पर्धतेऽयं हि गुरुं सुराणाम् ।
सोऽयं नवव्याकरणार्थवेत्ता ब्रह्मा भविष्यत्यपि ते प्रसादात् ॥ (वाल्मीकिरामायणे उत्तरकाण्डे, सर्गः ३६, श्लो. ४६-४७)
अत्र- सर्वासु विद्यासु गुरुं सुराणाम्, इत्यंशस्य, तथा-
नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहु व्याहरताऽनेन न किञ्चिदपभाषितम् ॥ (श्लो. २९ सर्गः ३ किष्किन्धाकाण्डे)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति पद्यस्य च विमर्शनात् सर्वमपि व्याकरणजातं नवसु व्याकरणेषु पर्यवसन्नं बभूवेति प्रतीयते। परन्तु तानि व्याकरणानि साम्प्रतं नोपलभ्यन्ते। यानि चाऽद्यत्वेऽष्टौ वैयाकरणनामानि- ऐन्द्रश्चान्द्रः काशकृत्स्नापिशली शाकटायनः।

पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥

इति श्रूयन्ते, तेष्वपि इन्द्रस्य व्याकरणं (ऐन्द्रव्याकरणम्) साम्प्रतं नोपलभ्यते। चान्द्रव्याकरणमपि नाद्यत्वे लभ्यते (अद्यत्वे लभ्यमानं त्वाधुनिकं न तूपरितनपद्यनिर्दिष्टम्)। काशकृत्स्नव्याकरणस्य तु धातुपाठं युधिष्ठिरमीमांसको विदुषां पुरतः प्रकाशितवान्। परन्तु तस्यापि सूत्राणि कानिचिदेवोपलब्धानि।आपिशालि-शाकटायन-व्याकरणे अपि नाद्यत्वे लभ्येते।यच्चाद्यत्वे लभ्यमानं शाकटायनव्याकरणं न तदप्युपरितनपद्यनिर्दिष्टम् यतः सर्वाणि नामानि आख्यातजानि, इति सिद्धान्तः खलु पद्यनिर्दिष्टशाकटायनस्य। (सर्वाणि नामान्याख्यातजानीति शाकटायनो नैरुक्त समयश्च निरुक्ते अ. १ पा.४ ख.१३)।

अद्यत्वे लभ्यमानं तद् व्याकरणञ्च न तदनुकूलं प्रतीयते। अमर-व्याकरणमपि नाद्यत्वे लभ्यते। जैनेन्द्रव्याकरणं यद्यपि लभ्यते तथापि तद् व्याकरणं सावधानं पठतां पाणिनीयमेवेदं व्याकरणमिति स्फुटं भवति। अतो नेदमप्युपरितनपद्यनिर्दिष्टमिति प्रतिभाति। अतोऽद्यत्वे लोक-वेदोभय-विषयं लघुकायमपि सर्वाङ्गीणं विश्वतोमुखं व्याकरणं पाणिनीयमेव जागर्ति जगति।

पाणिनिरुदकं पीत्वा केदारक्षेत्रे महेश्वरध्यानपरो द्वादशभिर्वर्षैः प्रसादितान्महेश्वराड्डमरुध्वनिद्वारा चतुर्दश वर्णसमाम्नायसूत्राणि समवाप

पाणिनितपः स्थलविषये प्रपञ्चः

यद्यपि पूर्वं खिदीमस्थ- हरिहरसँस्कृतपाठशालायामधीत्य वाराणस्यामध्ययनरताभ्यां श्रीटीकारामशर्मणा मया=हरिप्रसादशर्मणा च पाणिनि-जन्मस्थान-वाचि-शलातुरशब्दः क्रमशः शलातुर-हलातुर-हलाथुर-हलाहुर-लाहुर इति रीत्या वर्णपरिवर्तनं भजन् साम्प्रतं लाहौर इत्युच्यते, इति महर्महः श्रतवदभ्यामभ्यस्तवदभ्यां च स्वपूर्वाऽध्ययनस्थान-खिदीमग्रामाऽनन्तरस्य

ण पृष्ठे- "संभावितम्।" इत्यस्य"यःशब्द :"इत्यस्य च मध्ये ऽधस्तन-कोष्ठान्तर्गत -पङ्क्तयः पाठ्याः-
।तांच संभावनां हृदा तथ्यां मत्वा यथा अचार्जशब्दः
आचार्यशब्दमूलकः,सिङ् शब्दः सिंहशब्दमूलक :, अतः
हरि अचार्ज इति लेख्ये हरि आचार्य इति निमानसिङ्
इति लेख्ये निमानसिंह इति लिख्यते तथा
तुलीडांडा वर्तते इति लेख्ये "तूदीडांडा वर्तते "
इति लिखितम्। हरि :।

अतो मध्ये पठ्यमानस्तूदीशब्दोऽपि तपोभूमेर्वाचकः स्यादिति सम्भाव्य तदपभ्रंशस्तुलीति सम्भावितम्। इत्थं कल्पिताभ्यां हेतुभ्यां सविश्वासं तपोभूमौ निर्णीतायां भविष्यपुराणस्य केदारमुदकं पीत्वा शिवध्यानपरोऽभवत् इतिपद्यांशघटकं केदारमिति पदम् अकर्मकधातोर्योगे प्रकारान्तरेण द्वितीयान्तं समर्थयितुमशक्यं मत्वा उदकमित्यस्य विशेषणमिति साधनाय बुद्धिव्यायामो विहितः। अर्थात् केदारमुदकमित्यस्य गण्डकीतोयमित्यर्थः कृतः। इत्थं पणेनाग्रामः पाणिनितपोभूमिरिति साधनाय यद्यपि प्रथमो मुख्यो हेतुः पाणिनि-पणेना-शब्दयोर्वर्णसादृश्यम्। द्वितीयो हेतुः- तुदी-तुली-शब्दयोर्वर्णसादृश्यम्। तृतीयो हेतुः- केदारशब्दस्य प्रथमे वयसि वर्तमानयोर्बुद्धिव्यायाममूला व्युत्पत्तिः। इति त्रयः। तथापि निबन्धस्याऽस्य साधनाय निरन्तरं ज्वरपीडायामपि व्यपृताभ्यां षड् मासा व्यतिगमिता आसन्। अथ पणेनाग्रामाभिजनो बाष्पयान (रेल)-कार्यालय-कर्मकरोऽनधीती लिपिमात्रविदपि प्रलपनाऽलज्जनस्तदानीं वाराणस्यां वसति स्म कश्चित्। स निबन्धमिमं प्रकाशयामीति गृहीत्वा सँस्कृतभाषायां लिखितस्य तस्य निबन्धस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति पद्यस्य च विमर्शनात् सर्वमपि व्याकरणजातं नवसु व्याकरणेषु पर्यवसन्नं बभूवेति प्रतीयते। परन्तु तानि व्याकरणानि साम्प्रतं नोपलभ्यन्ते। यानि चाऽद्यत्वेऽष्टौ वैयाकरणनामानि- ऐन्द्रश्चान्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥
इति श्रूयन्ते, तेष्वपि इन्द्रस्य व्याकरणं (ऐन्द्रव्याकरणम्) साम्प्रतं नोपलभ्यते। चान्द्रव्याकरणमपि नाद्यत्वे लभ्यते (अद्यत्वे लभ्यमानं त्वाधुनिकं न तूपरितनपद्यनिर्दिष्टम्)। काशकृत्स्नव्याकरणस्य तु धातुपाठं युधिष्ठिरमीमांसको विदुषां पुरतः प्रकाशितवान्। परन्तु तस्यापि सूत्राणि कानिचिदेवोपलब्धानि।आपिशालि-शाकटायन-व्याकरणे अपि नाद्यत्वे लभ्येते।यच्चाद्यत्वे लभ्यमानं शाकटायनव्याकरणं न तदप्युपरितनपद्यनिर्दिष्टम् यतः सर्वाणि नामानि आख्यातजानि, इति सिद्धान्तः खलु पद्यनिर्दिष्टशाकटायनस्य। (सर्वाणि नामान्याख्यातजानीति शाकटायनो नैरुक्त समयश्च निरुक्ते अ. १ पा.४ ख.१३)।
अद्यत्वे लभ्यमानं तद् व्याकरणञ्च न तदनुकूलं प्रतीयते। अमर-व्याकरणमपि नाद्यत्वे लभ्यते। जैनेन्द्रव्याकरणं यद्यपि लभ्यते तथापि तद् व्याकरणं सावधानं पठतां पाणिनीयमेवेदं व्याकरणमिति स्फुटं भवति। अतो नेदमप्युपरितनपद्यनिर्दिष्टमिति प्रतिभाति। अतोऽद्यत्वे लोक-वेदोभय-विषयं लघुकायमपि सर्वाङ्गीणं विश्वतोमुखं व्याकरणं पाणिनीयमेव जागर्ति जगति।
पाणिनिरुदकं पीत्वा केदारक्षेत्रे महेश्वरध्यानपरो द्वादशभिर्वर्षैः प्रसादितान्महेश्वराड्डमरुध्वनिद्वारा चतुर्दश वर्णसमाम्नायसूत्राणि समवाप

पाणिनितपः स्थलविषये प्रपञ्चः

यद्यपि पूर्वं खिर्दीमस्थ- हरिहरसँस्कृतपाठशालायामधीत्य वाराणस्यामध्ययनरताभ्यां श्रीटीकारामशर्मणा मया=हरिप्रसादशर्मणा च पाणिनि-जन्मस्थान-वाचि-शलातुरशब्दः क्रमशः शलातुर-हलातुर-हलाथुर-हलाहुर-लाहुर इति रीत्या वर्णपरिवर्तनं भजन् साम्प्रतं लाहौर इत्युच्यते, इति मुहुर्मुहुः श्रुतवद्भ्यामभ्यस्तवद्भ्यां च स्वपूर्वाऽध्ययनस्थान-खिदीमग्रामाऽनन्तरस्य पणेनाग्रामस्यापि पणेना इति नाम पाणिनिना सम्बद्धं स्यादिति सम्भाव्य पाणिनीया-पाणिनाया-पाणिना-पणिना-पणेना, इति क्रमशो वर्णपरिवर्तनेन जातं सम्भावितम्। मनसि च पाणिनि-तपोभूमिरिति विश्वास उत्पन्नः। नेपालीभाषायां पर्वत-पर्वाणि डाँडा इत्युच्यन्ते। खिदिम-पणेना-ग्रामयोर्मध्ये वर्तमानं पर्वतपर्वैकं तुलीडाँडा इत्युच्यते। तन्नामघटक-तुलीशब्दश्च तूदीशब्दमूलक इति सम्भावितम्। यः शब्दः पाणिनिना तूदीशलातुर... सूत्रे पठितोऽस्ति। तत्सूत्रात् पूर्वसूत्रं च सिन्धुतक्षशिलादिभ्योऽणञौ इति वर्तते। तक्षशिला पाणिनेरध्ययनस्थानं शलातुरश्च जन्मस्थानम्। अतो मध्ये पठ्यमानस्तूदीशब्दोऽपि तपोभूमेर्वाचकः स्यादिति सम्भाव्य तदपभ्रंशस्तुलीति सम्भावितम्। इत्थं कल्पिताभ्यां हेतुभ्यां सविश्वासं तपोभूमौ निर्णीतायां भविष्यपुराणस्य केदारमुदकं पीत्वा शिवध्यानपरोऽभवत् इतिपद्यांशघटकं केदारमिति पदम् अकर्मकधातोर्योगे प्रकारान्तरेण द्वितीयान्तं समर्थयितुमशक्यं मत्वा उदकमित्यस्य विशेषणमिति साधनाय बुद्धिव्यायामो विहितः। अर्थात् केदारमुदकमित्यस्य गण्डकीतोयमित्यर्थः कृतः। इत्थं पणेनाग्रामः पाणिनितपोभूमिरिति साधनाय यद्यपि प्रथमो मुख्यो हेतुः पाणिनि-पणेना-शब्दयोर्वर्णसादृश्यम्। द्वितीयो हेतुः- तुदी-तुली-शब्दयोर्वर्णसादृश्यम्। तृतीयो हेतुः- केदारशब्दस्य प्रथमे वयसि वर्तमानयोर्बुद्धिव्यायाममूला व्युत्पत्तिः। इति त्रयः। तथापि निबन्धस्याऽस्य साधनाय निरन्तरं ज्वरपीडायामपि व्यपृताभ्यां षड् मासा व्यतिगमिता आसन्। अथ पणेनाग्रामाभिजनो बाष्पयान (रेल)-कार्यालय-कर्मकरोऽनधीती लिपिमात्रविदपि प्रलपनाऽलज्जनस्तदानीं वाराणस्यां वसति स्म कश्चित्। स निबन्धमिमं प्रकाशयामीति गृहीत्वा सँस्कृतभाषायां लिखितस्य तस्य निबन्धस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केनचित् सँस्कृतभाषाविदा नेपालीभाषायामनुवादं कारयित्वा मया लिखितोऽयं निबन्ध इति विशिष्टविदुषामपि पुरः प्राप्य विशिष्टविदुषां बालानां च सम्मतीः संयोज्य लेखकत्वं स्वकीयं ख्यापयन् पाणिनितपोभूमिः=पणेना इति नामकं पुस्तकं प्राचकाशत् । ज्ञातप्रपञ्चेन च मया "कथमेवं कृतवान् ? त्वया लिखितोऽयं निबन्ध इति को विश्वसिति ? प्रत्युत ये त्वां परिचिन्वन्ति, ते तु त्वामुपहसिष्यन्ति" इत्युच्यमानः साम्प्रतिका जना उपहसन्तु नाम वर्षशतकानन्तरं तु मां जना महान्तं विद्वांसं मंस्यन्त इत्युदबमीद् वीतलज्जः । अथ तत्पुस्तकाधारेण पाणिनिशब्द-घटितानि कानिचिदाधुनिकानि स्थानी-यनामानि व्यवहारेऽद्यत्वे प्रयुज्यन्ते । लेखाश्च केषांचिद् तथाविधा दृश्यन्ते । अथ भूवेद-नख (२०४१) वैक्रमाब्दे गुल्मीस्थ-किरणपुस्तकालय-प्रकाशिते 'केहि जनश्रुतिहरु' इति पुस्तके श्री टीकारामः सविवरणं प्रलपनपटोर्नामोल्लेखनपुरस्सरं स इदानीं भैरवायां वसतीत्युदलिखत् । साम्प्रतमपि भैरवायामेव स्यात् सः । एवं वृथा प्रपञ्चो जातः । तथापि जन्म-सँस्काराभ्यां ब्राह्मणस्य उदयपुरमण्डलस्य राज्ञो हरिप्रसादशर्मणः पुत्रः पूर्वं खिदीमे हरिहरसँस्कृतपाठशालायामधीती श्रीगजराजशर्मा मामवोचद् यत्, पत्रिकायां 'महत्त्वपूर्ण-साहित्यिकचोरी' इति दृष्ट्वाऽहम् पाणिनितपोभूमिः=पणेना इति पुस्तकं दृष्टवान् । तत्र भवद्भ्यां पणेनानामविषये पाणिनिना सम्बन्धो दर्शितः । वस्तुतस्तु आकाशाद् वर्षतो जलस्य सञ्चयनाय द्रोण्याकार-काष्ठादि-निर्मितं साधनं नेपालीभाषायां पणेल्नो इत्युच्यते । तस्य साधनस्य च तस्मिन् ग्रामे बहुधोपयुज्यमानत्वाद् ग्रामनाम पणेना जातम् पाणिनिना सम्बन्धो न, इति । इति श्रुत्वा हन्त ? मृषाप्रसाराय बुद्धिर्व्यापारिता प्रथमे वयसि वर्तमानाभ्यामिति मन्येऽहम् । तथाहि-नेपालीभाषायामोकारान्ताः शब्दा आकारान्ता भवन्ति बहुवचने । यथा-वाटो वाटा । पाठो पाठा वाच्छो वाच्छा वाठो वाठा इत्यादयः । एवञ्च पणेल्नो शब्दोऽपि बहुवचने पणेल्ना भवति । संयोगस्थलकारश्च जिह्वया फाल्यते । तथा च प्राकृतप्रकाश-वररुचि-सूत्रम्-सर्वत्र वलराम् इति । पणेल्ना इत्यत्रत्ये लकारे गते पणेना इति शिष्यते । इत्थं प्रथम=मुख्यहेतोः सर्वथा हेत्वाभासत्वे सिद्धे तुलीशब्दस्तूदीशब्दमूलक इति सम्भावनमप्यसम्भवम् । किञ्च कदाचिदेत-द्विषयकचर्चा प्रसङ्गे खिदीमग्रामाभिजनो महेन्द्रसँस्कृतविश्वविद्यालयीयोपकुलपतिः श्रीमाधव-राजगौतमो-ऽवोचद् यत्, तस्य पर्वतपर्वणः पार्श्वौ निम्नौ स्तो मध्ये कूटं वर्तते । अतः पार्श्वौ तुलाकोटिस्थानीयौ कूटं च मध्ये तुलासूत्रस्थानीयमिति तुलाकृतित्वात् तुलीडाँडा इति नाम जातमिति । इत्थं द्वितीयस्यापि हेतोर्हेत्वाभासत्वं स्फुटम् । तृतीयहेतोर्विषये प्रथमं भविष्य-पुराणस्य प्रतिसर्गपर्वणो द्वितीयखण्डस्य ३१ अध्यायस्थ २-४ श्लोकांशाः प्रस्तूयन्ते-

सामनस्य सुतः श्रेष्ठः पाणिनिर्नामविश्रुतः ।
कणभुग्वरशिष्यैश्च शास्त्रज्ञैः स पराजितः ॥
लज्जितः पाणिनिस्तत्र गतस्तीर्थान्तरं प्रति ।
स्नात्वा सर्वाणि तीर्थानि सन्तर्प्य पितृदेवताः ॥
केदारमुदकं पीत्वा शिवध्यानपरोऽभवत् । इत्यादि ।

एपु पद्येषु अन्यानि पदानि स्फुटार्थानि=सरलानि सन्ति । तद्रीत्या केदारमुदकमित्यस्य यदि गण्डकीतोयमित्यर्थः स्यात् तर्हि स्फुटप्रतिपत्तये गण्डक्या उदकमिति गाण्डकमुदक-मिति गण्डकीसलिलमिति चक्रनद्युदकमिति वा भवेत । अतोऽत्र केदारशब्दः केदारक्षेत्रपरः । अर्थाद् उदकं पीत्वा केदारक्षेत्रे शिवध्यानपरोऽभवत्, इत्यर्थः । शिवपुराणस्य कोटिरुद्रसं-हिताया एकोनविंशतितमाध्यायस्य त्रयोविंशतितमे-

गत्वा तत्र प्रीतियुक्तः केदारेशं प्रपूज्य च ।
तत्रत्यमुदकं पीत्वा पुनर्जन्म न विन्दति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति पद्ये पठ्यमानम् उदकमित्यस्य विशेषणं तत्रत्यमिति पदं च केदारोदकपानस्य महिमातिशयं प्रख्यापयति । उभयोः पुराणयोः 'उदकं पीत्वा' इति द्वे एव पदे समाने । ततः पूर्वं तु शिवपुराणे केदारनाम्नः पूर्वार्धे पठितत्वात् तत्रत्यमित्युक्तम् । भविष्यपुराणे तु स्थाननिर्देशार्थं केदारमित्युक्तम् उदकं पीत्वा इत्यस्य च प्रत्यासत्त्या केदारोदकं पीत्वेत्यर्थः प्रतीयते । यदि केदारशब्दः स्थाननिर्देशको न स्यात् तर्हि स्थाननिर्देशकं किमपि पदान्तरं भवेत् पदान्तरं तथा नास्ति । अतः स्थाननिर्देशक एव । भोः ? शिवध्यानपरो ऽभवत् इत्यत्र अभवत् इति भूधातुरकर्मकः कथं केदारमित्यत्र द्वितीया ? उच्यते-अत्रैव पूर्वपद्यांशे स्नात्वा सर्वाणि तीर्थानि इत्यस्य सर्वेषु तीर्थेषु स्नात्वा, इत्यर्थः । यथा तत्र द्वितीया तथैव केदारमित्यत्रापि । अर्थाद् अकर्मका अपि धातवः कदाचित् सकर्मका भवन्ति । तथाहि - (अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्) इति । भर्तृहरिरपि पठति-

कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः ।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते ॥इति ।

श्रीटीकारामपन्थिमहोदयः 'केही जनश्रुति' पुस्तके स्कन्दपुराण- महेश्वरखण्डान्तर्गताऽरुणाचल-माहात्म्योत्तरार्ध- द्वितीयाध्यायस्य

गोपर्वतमिति स्थानं शम्भोःप्रख्यापितं मया ।
यत्र पाणिनिना लेभे वैयाकरणिकाग्र्यता ॥

इति षष्ठं पद्यं पुरस्कुर्वन् गोपर्वतं तं च रेसुङ्गापर्वतं सम्भाव्य रेसुङ्गापर्वतः पाणिनेस्तपःस्थलमिति संभावितवानस्ति । **अत्र विषये विमृश्यते**-रेसुङ्गापर्वतान्नातिदूरे प्रतिष्ठानपुर (प्यूठान)मण्डलस्य शिरसि गोमुखपर्वतः प्रथमानो विराजते । बहवस्तीर्थयात्रिणस्तत्रागत्य विशेषेण दामानि समर्पयन्ति । माघसङ्क्रान्तौ विशेष उत्सवश्च तत्र भवति । ततः प्रभवन्ती गङ्गा गोमुखीनाम्ना प्रथमाना (अधिकसस्योत्पादनेन धर्मावती इति, स्वच्छजलत्वेन च हिमरुक्=झिंरुक् इति नामान्तराभ्यां व्यवह्रियमाणा) उभयपार्श्वतः सेचनेन प्रतिष्ठानपुर (प्यूठान) मण्डलं सस्यश्यामलं कुर्वती बहन्ती हंसपुरे माण्डव्या नद्या सह मिलति । उभयनदीसङ्गमस्थले तत्र त्रिंशच्चत्वारिंशवर्षपूर्वावधि महान् पाषाणमयो हस्ती वर्तते स्म । तं च जना ऐरावत इति भणन्ति स्म । सोऽद्यत्वे बालुकापाषाणादिभिराच्छादितोऽस्ति । सत्युत्खनने मिलेदेवाऽद्यत्वेऽपि । तद्धस्तिनाम-प्रभावाद् द्वयोर्मेलनादेकीभूता सा गङ्गा च ऐरावती इत्युच्यते स्म । तदपभ्रंशनाम चाऽद्यत्वे राप्ती इत्युच्यते । अञ्चलनाम च राप्तीति तत एव प्रथते । हिमालखण्डश्च वस्तुतः सर्वोऽपि देवभूमिः । अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः । (कालिदासः) । अतो रेसुङ्गापर्वतस्य गोपर्वत इति संभावनाऽपेक्षया तु गोमुखपर्वतस्यैव तथा संभावनमुचितमिव प्रतीयते ।

किञ्च अन्या हिमवतः प्रभवन्त्यो नद्यः शम्बस्थलमागत्य सस्योत्पादनाऽनुकूला भवन्ति । गोमुखी तु उद्गमस्थानादेव सिञ्चतीति गोपर्वतो गोमुखपर्वतश्चैक एवेति प्रमाणान्तरोपलब्धौ सत्यां भविष्यपुराणस्य केदारमुदकमित्यस्य च यद्यपि केदारार्थमुदकम्= केदारोपयोग्युदकम् इत्यर्थश्च कर्तुं शक्येत । तथापि गोपर्वतो गोमुखपर्वतश्चैक एवेति साधकं प्रमाणान्तरमन्तरेण भविष्यपुराणेऽन्येषां पदानां स्फुटवाच्यार्थानां दर्शनात् केदारशब्दमात्रस्य लक्ष्यार्थवाचित्वसाधनं नोचितम् ।

अतः पुराणद्वयसमन्वयदृष्टया भागीरथीगङ्गोद्गमधाम्नो गोमुखनाम्ना विश्वस्मिन् प्रथिततरत्वाच्च स्कन्दपुराणोक्तो गोपर्वतः केदारखण्डान्तर्गतोऽवधेयः । इत्थं पुराणप्रमाणेन पाणिनेस्तपः स्थलं केदारक्षेत्रमिति निश्चीयते । प्रसङ्गेऽस्मिन् 'नाऽनृतं वदेत्' इति शास्त्रोल्लङ्घनजन्यप्रत्यवाय-प्रायश्चित्ताय (प्रायः पापं विजानीयाच्चित्तं तस्य विशोधनम्), न पुनरेवंबुद्धिर्मृषाप्रतिपादने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवर्ततामिति कृते च भगवतीं गायत्रीमनुतप्तः प्रार्थयमानः प्रकृतविषयाद् विरमामि। पाणिनिर्महेश्वराल्लब्धानि चतुर्दश वर्णसमाम्नायसूत्राणि मुख्यरूपेणाश्रित्य पूर्वाचार्यसूत्राणि चोपजीव्य व्याकरणग्रन्थरत्नम्= अष्टाध्यायीं प्रणीय तदङ्गपुष्टये धातुपाठसहितं गणपाठं लिङ्गानुशासनं चोपदिदेश। अथ प्रसङ्गात् पाणिनिशास्त्रे पूर्वाचार्योपजीवकत्वं निदर्श्यते।

व्राजसनेयिप्रातिशाख्यम्	
मुखनासिकावचनोऽनुनासिकः १।७५।	अष्टाध्यायी (पाणिनीया)
अन्त्याद् वर्णात् पूर्व उपधा १।३५।	मुखनासिकावचनोऽनुनासिकः १।१।८
प्रंगृह्यम् १।९२।	अलोऽन्त्यात् पूर्व उपधा १।१।६४
एकारेकारोकारा द्विवचनान्ताः १।९३।	ईदूदेद् द्विवचनं प्रगृह्यम्

वाजसनेयिप्रातिशाख्यम्	
उच्चैरुदात्तः १।१८।	उच्चैरुदात्तः १।२।२९
नचैरनुदात्तः १।१०९।	नीचैरुनुदात्तः १।२।३०
उभयवान् स्वरितः १।११०	समाहारः स्वरितः १।२।३१
तस्यादित उदात्तं स्वरार्धमात्रम् १।१२६	तस्यादित उदात्तमर्धह्रस्वम् १।२।३२
तस्मिन्निति निर्दिष्टे पूर्वस्य १।१३४	तस्मिन्निति निर्दिष्टे पूर्वस्य १।१।६५
तस्मादित्युत्तरस्यादेः १।१३५	तस्मादित्युत्तरस्य १।१।६६
	आदेः परस्य १।१।५३
षष्ठी स्थानेयोगा १।१३६	षष्ठी स्थानेयोगा १।१।४८
वर्णस्याऽदर्शनं लोपः १।१४१	अदर्शनं लोपः १।१।५९
संख्यातानामनुदेशो यथासंख्यम् १।१४३	यथासंख्यमनुदेशः समानाम् १।३।१०
द्विरुक्तमाम्रेडितं पदम् १।१४४	तस्य परमाम्रेडितम् ८।१।२
एकवर्णः पदमपृक्तम् १।१५१	अपृक्त एकाल्प्रत्ययः १।२।४१
विप्रतिषध उत्तरं बलवदलोपे १।१५९	विप्रतिषेधे परं कार्यम् १।४।२
आमन्त्रितं च २।२४	आमन्त्रितस्य च ६।१।१९२
ऋषरेफेभ्यो नकारो णकारं समानपदे ३।८४	रषाभ्यां नो णँः समानपदे ८।४।१
सिं सर्वणे दीर्घः ४।५२	अकः सवर्णे दीर्घः ६।१।९७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत् तावत् सूत्रसादृश्यम्। संज्ञाविषये यथा- तिङः प्रथम-मध्यमोत्तम-संज्ञाकृते तिङस्त्रीणि त्रीणि प्रथम-मध्यमोत्तमाः १।४।१०० इति सूत्रं पठितं न तथा सुँपां प्रथमा-द्वितीयादिसंज्ञाकृते। प्रथमाद्वितीयादिसंज्ञास्तु प्राचीनैर्विहिताः प्रथमत एव प्रसिद्धा इति तदाशयः। यथोदिपशति म.म. श्री गिरिधरशर्मा चतुर्वेदः कर्मणि द्वितीया कर्तृकरणयोस्तृतीया, इत्यादिषु द्वितीयातृतीयादिनाम्ना विभक्तयः पाणिनिना विहिताः, न तु द्वितीयातृतीयादिसंज्ञाः स्वशास्त्रे कृताः, प्राक्तनव्याकरणदृष्टसंज्ञाभिरेवात्र व्यवहार इति व्याचक्षते व्याख्यातारः। (व्याकरणमहाभाष्य-नवाह्निक-भूमिकायाम्)।

हरदत्तश्चोपदिशति- ये साधवस्ते शास्त्रेणानुशिष्यन्ते... इमे साधव इति। कथं पुनरिदमाचार्येण पाणिनिनावगतमेते साधव इति। आपिशलेन पूर्वव्याकरणेन। आपिशलिना तर्हि केनाऽवगतम्। ततः पूर्वेण व्याकरणेन।... अनादिरयं संसारः इति। (शब्दानुशासनम्, इति प्रतीके पदमञ्जर्याम्, काशिका १ भागे)।

क्षीरस्वामी चोपदिशति-

पाठमध्येऽनुदात्तानामुदात्तः कथितः क्वचित्।
अनुदात्तोऽप्युदात्तानां पूर्वेषामनुरोधतः॥इति॥ (क्षि क्षये इति धातुव्याख्याने, क्षीरतरङ्गिण्याम् १।१४९)

पाणिनीय-व्याकरण-वैशिष्टचम्

अण्, अक् सुँप् सुँट् तिङ् इति प्रभृति- प्रत्याहाराश्रयणद्वारा वृद्धि-गुण-टि-घु-भ-प्रभृति-संज्ञाश्रयणद्वारा, सम्पूर्णग्रन्थानुपूर्वी-विन्यासकौशलेन, विप्रतिषेधे परं कार्यम् १।३।२ पूर्वत्रासिद्धम् ८।२।१ असिद्धवदत्राऽऽभात् ६-४-२२ इति सूत्रैरधिकारसूत्रैरेव च व्याकरणनियमानां तुरीयांश- बोधनद्वारा च लाघवेनोपदेशः। एवं प्राचीनाचार्याणां मतानि च वा प्रभृतिशब्दैर्गुम्फनेन यथा-

प्रत्ययसवर्णं मुदि शाकटायनः ३।९। अविकारं शाकल्यः शषसेषु ३।१० (वाजसनेयिप्रातिशाख्यम्) वा शरि ८।३।३६ (पाणिनीयम्) प्रकृत्या कखयोः पफयोश्च ३।११ जिह्वामूलीयोपध्मानीयौ शाकटायनः ३।१२ (वा.स.प्रा.) कुप्वोः ≍क ≍पौ च ८।३।३७ (पाणिनीयम्) छकारं तयोरुदयः शकारः १२ न शाकल्यस्य १३ (ऋग्वेद-प्रातिशाख्यम् सन्धिपटलम्) शश्छोऽटि ८।४।६२ (पाणिनीयम्)। संज्ञास्वीकारेणाऽनुवृत्तिस्वीकारेण च। यथा-

कण्ठचादिवर्ण एकारम् ४।५४ वा. स.प्रा. (ऋकारलृकाराववशिष्टौ) उवर्ण ओकारम् ४।५५ वा.स.प्रा. ऋकारलृकाराववशिष्टौ)

आदगुणः ६।१।८४। पाणिनीयम् (ऋकारलृकारयोरप्युपदेशो जातः)। तृन् ३।२।१३५ इत्येकाक्षरं सूत्रं वर्तते तेनान्वाख्येयानि पदानि यावज्जीवं कश्चित् सङ्कलयितुं प्रवर्तेत न पारं यायात्। अतो यावदपि पाणिनीयव्याकरणस्य महात्म्यं वर्ण्येत न्यूनमेव तद् भवेत्। यथा स्वल्पेऽपि दर्पणे विशाला नदीपर्वतादयो दृश्यन्ते, तथैव पाणिनीये लघुकायेऽपि व्याकरणे त्रिलोकीविषयाः सर्वेऽपि शब्दाः प्रतीयन्ते। यत्तूद्धृतं पूर्वम् पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे इति। तत् तु उणादयो बहुलम् ३।३।१ पृषोदरादीनि यथोपदिष्टम् ६।३।१०८। इत्यादिसूत्राऽनवधानमूलकम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाणिनीय-व्याकरण-व्याख्यान-परम्परा

पाणिनीय-व्याकरणोपरि यद्यपि बहुभिराचार्यैर्वार्तिकानि भाष्याणि च रचितानि। यथा- परिभाषान्तरमिति च मत्वा क्रोष्ट्रीयाः पठन्ति (१।१।३ सूत्रे भाष्ये) भारद्वाजीयाः पठन्ति (१।१।२० सूत्रे भाष्ये)। अपर आह... अस्मिन् पक्षे वा इत्येतदसमर्थितं भवति (१।१।१० सूत्रे भाष्ये)। अपरआह (१।१।६९ सूत्रे भाष्ये)। तथापि तेषु महर्षि-वररुचि-विरचित-वार्तिकानि भगवता पतञ्जलिना विरचितं महाभाष्यं चाऽद्यत्वे प्रथन्ते। सूत्र-वार्तिक भाष्य-सन्दोह एव च साङ्गोपाङ्गं व्याकरणम्। यथोपदिशति तत्र भवान् हरदत्तः-

यद् विस्मृतमदृष्टं वा सूत्रकारेण तत् स्फुटम्।
वाक्यकारो ब्रवीत्येवं तेनाऽदृष्टं च भाष्यकृत्॥ अत एव च
पाणिनीयमेतत् त्रिमुनि व्याकरणं वदन्ति सन्तः। (पदमञ्जर्याम् काशिका प्र.भा.)
वार्तिकानि भाष्यञ्च अष्टाध्यायी-सूत्र-क्रमेणैवोपन्यस्तानि।

अथ प्रथिता काशिकावृत्तिश्च जयादित्य-वामनाभ्याम् अष्टाध्यायीक्रमेणैव रचिता। तद्व्याख्याभूता बोधिसत्त्वदेशीयाचार्य- श्री जिनेन्द्रबुद्धिपाद-विरचिता न्यासापरनामधेया काशिका-विवरण-पञ्जिका तथा विद्वद्वर-श्री हरदत्तमिश्र-विरचिता पदमञ्जरी च वृत्त्यनुरोधादष्टाध्यायी-सूत्र-क्रममनुसरतः।

प्रक्रियानुसारि-सूत्र-सन्निवेशः

१३०० खिस्ताब्दात् पूर्वं विद्वद्वरो धर्मकीर्तिः कानिचित् सूत्राणि वृणन् सवृत्तीनि तानि प्रक्रियामनुसृत्य सन्निवेशयन् रूपावतारं नाम ग्रन्थं पाणिनीय-व्याकरण-प्रवेशाय रचयामास। स एव प्रथमः प्रक्रियानुसारि-सूत्र-सन्निवेशाऽवलम्बी। यत्र संज्ञा-सन्धि-सुबन्त-स्त्रीप्रत्यय-कारक-समास-तद्धितावताराः पूर्वभागे पूर्वोत्तरतिङन्त-कृदन्तावतारा उत्तरभागे दर्शिताः सन्ति। अस्योपदेश-शैलीदिग्दर्शनम्-तपरस्तत्कालस्य (१।१।७०) तः परः यस्मात् सोऽयं तपरः, तादपि परः तपरः, तपरो योवर्णः स तत्कालस्य आत्मना तुल्यकालस्य गुणान्तरयुक्तस्य सवर्णस्य ग्राहको भवति स्वस्य च रूपस्य। किं पुनः सवर्णम् तुल्यास्यप्रयत्नं सवर्णम् (१।१।९) तुल्यशब्दः सदृशपर्यायः, तुलया संमितं तुल्यम्, प्रयतनम् आभ्यन्तरप्रयत्नः स्पृष्टतादिर्वर्णगुणः। तुल्यौ आस्यप्रयत्नौ यस्य वर्णस्य येन वर्णेन सह स समानजातीयं प्रति सवर्णसंज्ञो भवति। झलां जश् झशि (८।४।५३) झलाम् जशादेशो भवति झशि परतः। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः (१।४।१००) तान्येकवचन-द्विवचन बहुवचनान्येकशः (१।४।१०१ इत्यनुवर्तमाने सुँपः (१।४।१०२ सुँपः त्रीणि त्रीणि पदानि भूत्वा एकश एकवचन-द्विवचन-बहुवचन-संज्ञानि भवन्ति। इति प्रथमैकवचनम् सुँ। इत्यादि।

ततः १४०० खिस्ताब्दे श्रीमत्परमहंसपरिव्राजकाचार्य- श्रीविमलसरस्वती च कानि चिदेव सूत्राणि प्रक्रियानुसारीणि सन्निवेशयन् रूपमालेतिनामानं ग्रन्थं पुरश्चकार।

तत्र प्रकरणानि–संज्ञामाला-स्वर-व्यञ्जन-विसर्ग-सन्धयो हलन्तसर्वनाम-संख्योभयलिङ्ग-हलन्तपुंलिङ्ग-हलन्तस्त्रीलिङ्ग-नियतलिङ्गच्छान्दसाऽव्यय-स्त्रीप्रत्यय-कारक-तिङन्त-कृदन्त-तद्धित-समासमालाः।

एतदीयोपदेश-शैली-दिग्दर्शनम्-हलन्त्यम् १।३।३। तस्य लोपः १।३।९। इत्संज्ञकस्येत्यर्थः। उपदेशेऽजनुनासिक इत् १।३।२। प्रतिज्ञानुनासिक्याः पाणिनीयाः। अकः सवर्णे दीर्घः ६।१।९७। सह स्यात्। मोऽनुस्वारः ८।३।२२३। पदान्तस्य हलि स्यात्। टा-ङसिँ-ङसामिनात्स्याः ७।१।१२। अदन्तादङ्गात् स्युः। स्वमोर्नपुंसकात् ७।१।२३ लुक् स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतोऽम् ७।१।२४। संयोगादेरातो धातोर्यण्वतः ८।२।४३ । निष्ठातकारस्य नः स्यात् । ल्वादिभ्यः ८।२।४४ ओदितश्च ८।२।४५ क्षियो दीर्घात् ८।२।४६ इत्यादि ।

अथ-श्रीरामचन्द्राचार्यः प्रथितानि कतिपयानि सूत्राणि सवृत्तीनि प्रक्रियामनुसृत्य सन्निवेशयन् प्रक्रियाकौमुदीनामकं ग्रन्थं विरचयामास । तत्रत्यः प्रकरण-विभागश्चेत्थम्-संज्ञाप्रकरणम्, अच्सन्धिः, हल्संन्धिः, विसर्गसन्धिः, स्वादिसन्धिः, अजन्तपुंलिङ्गाः, अजन्तस्त्रीलिङ्गाः, अजन्तनपुंसकलिङ्गाः; हलन्तपुंलिङ्गाः, हलन्तस्त्रीलिङ्गाः, हलन्तनपुंसकलिङ्गाः, अव्ययम्, स्त्रीप्रत्ययाः, विभक्त्यर्थाः, अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः, द्वन्द्वः, समासान्ताः, अलुक्समासः, तद्धिताः, द्विरुक्तप्रक्रिया, इति पूर्वार्धः । भ्वादिप्रक्रिया, अदादि प्र., ह्वादि प्र., दिवादि प्र., स्वादि प्र., तुदादि प्र., रुधादिं प्र., तनादि प्र., क्र्यादि प्र., चुरादि प्र., ण्यन्त प्र., सन्नन्त प्र., यङन्त प्र., यङ्लुगन्त प्र. सुब्धातु (नामधातु) प्र., पद (परस्मैपदात्मनेपद) व्यवस्था प्र., भावकर्म (कर्मकर्तृसहिता) प्र., लकारार्थ प्र., कृदन्त (कृत्य.पू.कृ.उ.कृ.) प्रक्रिया, वैदिकी प्रक्रिया । इति ।

आनन्त्यात् सर्वशब्दा हि न शक्यन्तेऽनुशासितुम् ।
बालव्युत्पत्तयेऽस्माभिः संक्षिप्योक्ता यथामति । (प्रक्रियाकौमुद्याम्) ।

सा च कौमुदी कौमुदीव समादृताऽभूद् विद्वत्समाजे । अत एव समये समये तां कौमुदीं विशिष्टा विद्वांसो व्याचख्युः ।

भाष्य-वृत्ति-हरिग्रन्थ-तद्व्याख्या-मर्म-वेदिनः ।
कौतुकाऽऽक्रान्त-मनसः प्रमोदयतु मत्कृतिः । (प्रसादटीकायां विट्ठल्लः) ।

प्रक्रियाकौमुदी-व्याख्यातारः	व्याख्यानामानि
शेषकृष्णः	प्रक्रियाप्रकाशः
विट्ठलः	प्रसादः
चक्रपाणिदत्तः	प्रदीपः
वारणवनेशः	अमृतसृतिः
नृसिंहः	प्रक्रियाव्याकृतिः
जयन्तः	व्याख्यानम्
विद्यानाथदीक्षितः	प्रक्रियारञ्जनम् ।
वरदराजः	विवरणम् । इत्यादि

गच्छति क्रमशः काले श्रीभट्टोजिदीक्षितः सर्वाणि सूत्राणि सवृत्तीनि मूले स्थापयन् प्रक्रियाकौमुद्यास्तत्तत्स्थलेषु वृत्त्यादि च परिवर्तयन् वैयाकरणसिद्धान्तकौमुदीनामकं ग्रन्थं विरचयामास ।

अतोऽत्र प्रक्रियाकौमुद्याः सिद्धान्तकौमुद्याश्च केषांचन सूत्राणां वृत्तयो निदर्श्यन्ते ।

मुखनासिकावचनोऽनुनासिकः १।१।८ मुखयुतनासिकयोच्चार्यमाणोऽनुनासिकः स्यात्- प्र.कौ. मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्-सि.कौ. । तुल्यास्यप्रयत्नं सवर्णम् । १।१।९ तुल्यौ स्थानप्रयत्नौ यस्य तदक्षरं मिथः सवर्णं स्यात् प्र.कौ. ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद् द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् सि.कौ. । उरण्रपरः १।१।५१। ऋलृस्थानीयोऽण् रप्रत्याहारपरः स्यात् -प्र.कौ. । ऋकारस्त्रिंशत इत्युक्तम्, तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते-सि.कौ. । भट्टोजिदीक्षितः सिद्धान्तकौमुद्या व्याख्यारूपां प्रौढमनोरमानाम्नीं टीकां चकार । यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राचीनाचार्यग्रन्थखण्डनप्रसङ्गे निज-गुरुश्रीशेषकृष्णरचितं प्रक्रियाप्रकाशमपि खण्डयामास। अतः प्रक्रियाक्रमवादिष्वपि प्रक्रियाकौमुदीपक्षपातिनां वैयाकरण-सिद्धान्तकौमुदीपक्षपातिनां च मिथो वर्धमानो विवादः सीमानमतिचक्रामेत्यत्र प्रमाणाय पण्डितराज-जगन्नाथ-विरचिताया मनोरमाखण्डनरूपायाः कुचमर्दिनी इति व्याख्याया मङ्गलाचरणपद्यमेव पर्याप्तं भवति। यथा-

लक्ष्मीकान्त-पदाम्भोजं प्रणम्य श्रेयसां पदम्।
पण्डितेन्द्रो जगन्नाथः स्यति गर्वं गुरुद्रुहाम्। इति

अत्र गुरुद्रुहाम् इति पदेन भट्टोजिदीक्षितो विवक्षितः। अथ नागेशः पण्डितराजविरचितं रसगङ्गाधरं भट्टोजिदीक्षित- विरचित-सिद्धान्त-कौमुदीं च व्याख्याय विवादोग्ररूपतामशीशमत्। अथाऽद्यत्वे व्याकरणाध्ययनाऽध्यापन-प्रक्रियायां द्वे सरणी प्रथेते-काशिकामनुसृत्य सूत्रक्रमानुसारिणी वरदराजेन सिद्धान्तकौमुदीतः संक्षिप्तां लघुकौमुदीं मध्यकौमुदीं भट्टोजिदीक्षितकृतिं सिद्धान्तकौमुदीं चानुसृत्य प्रयोगानुसारिणी च। तत्र प्रक्रियाक्रमभाजो वैयाकरणसिद्धान्तकौमुदीं मुक्तकण्ठं प्रशंसन्ति। यथा-

कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः॥ इति।

पाणिनिद्वारा प्रकरणक्रम इस प्रकार सज्जित है कि पूर्ण अष्टाध्यायी के ज्ञान के विना एक भी पद वनाया नही जा सकता, वाक्य वनाना तो दुरकी वात है पाणिनिना प्रकरणक्रम एवं सन्निवेशितो यत् सम्पूर्णाष्टाध्यायीबोधं विना पदमेकमपि नान्वाख्यातुं शक्यते, वाक्यान्वाख्यानवार्ता तु दूरे वर्तते। (पाणिनीय व्यकरणका अनुशीलन, रामशंकर भट्टाचार्य)

श्रीभट्टोजिदीक्षितेन भाष्यार्णवं प्रमथ्य सिद्धान्तकौमुदीयमुल्लासिता, या साम्प्रतमखिलायामिलायां कौमुदीवाऽज्ञानतमःप्रसरमपसारयन्ती प्रसरन्ती रात्रिन्दिवं विद्वज्जनमनःकुमुदमोदिनी मोदतेतराम् (सि.कौ. प्रस्तावनायाम् खेमराज श्रीकृष्णदासद्वारा प्रकाशितायाम्)।

सूत्रक्रमपक्षपातिनश्च प्रक्रियाक्रमवादिनो भृशं हुङ्कुर्वन्ति। यथा-

अष्टाध्यायीमहाभाष्ये द्वे व्याकरणपुस्तके।
ततोऽन्यत् पुस्तकं यत्तु तत्सर्वं धूर्तचेष्टितम्। श्री स्वामीविरजानन्दः (संस्कृत व्याकरण शास्त्रका इतिहास इत्यत उद्धृतम्)

त्यजेत् द्रुतं छात्रसंघास्समेता अये चौरवृत्त्या कृतं ग्रन्थपाशम्।
मुनेः कोशगं वृत्तिकृत्काञ्चनं तद् गतं लोहतां सूत्रहृच्चौरहस्ते ॥६७॥
समेत हे संस्कृतपाठका द्रुतं सर्वोपकृद् व्याकृतिसूत्रसृण्मुनिः।
चौरप्रहारेण विमूर्छितश्चिरादुद्बोधनीयोऽमृतसम्प्रसेकतः ॥६८॥
(श्रीगोपालशास्त्रिणो दर्शनकशरिणः पाणिनीयप्रशस्तौ)।

रूपावतारादि-समीक्षा

विद्वद्भिरेतत् सम्यगवधेयं यद्, यः कोऽपि विषयः स्वयं सम्यगभ्यस्तः परैः प्रकारान्तरेण प्रतिपादितो दृश्यमानः सरलः सुखसाध्यश्च प्रतिभाति। प्रागनभ्यस्ततद्विषयाणां विदुषां तु स पुनः कठिन एव भवतीति। अतो वैयाकरणैरत्र समीक्षणे स्वयं तदध्येतृभिर्बालैर्भाव्यम् अर्थात् समीक्षणीयग्रन्थ-समकक्षव्याकरणाऽध्ययनसमये मदीया ग्रहणशक्तिः कीदृशी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसीदिति विमृश्यैव ग्रन्थस्य गुणदोषौ विमृश्यौ । तद् रीत्या समीक्षणे रूपावतारः खलु बालानां कृते नोपयोगी । यतः बालाः खलु पदानि घोषयित्वा तत्तत्पदाधारेणैव सूत्रार्थं बुध्यन्ते, न पुनः सकृत् पङ्क्तिदर्शनमात्रेण श्रुतां कथामिव मस्तिष्के चिरं स्थिरीकर्तुं शक्नुवन्ति । पङ्क्तिष्वनुपस्थितासु सूत्रार्थोऽपि नोपतिष्ठते ! रूपावतारे वृत्तयो लम्बा वर्तन्ते, ताश्च दुरभ्यसाः । सूत्रस्थानि पदानि तु तत्राऽनपेक्ष्याण्येव प्रतीयन्ते । कथमन्यथा झलां जश्झशि ८।४।५३ सूत्रे वृत्तिः पठिता सूत्राक्षरैरेव सूत्रार्थ-स्फुट-प्रतिपत्तिसम्भवात् । न हि गुरूपदेशं विना सरलतमानामपि पदानां भावं बुध्यन्ते बालाः । गुरूपदेशात्तु स्वल्पैः सूत्राक्षरैरपि भवत्येव बोधस्तेषाम् । किन्च सुँपः १।४।१०२ सूत्रे यदि लम्बावृत्तिः स्थाप्या तर्हि तत्र १।४।१०१, १०२ सूत्रानुवृति-प्रदर्शनं छात्राणां भारायैव । अतो गौरवग्रस्तत्वादनुपयुक्तोऽयं बालानां कृते रूपावतारः । रूपमाला यद्यपि रूपावताराात् समीचीना । यतः तत्र प्रायः सूत्रान्तराऽनुवर्त्यानि पदान्येव वृत्तौ सन्निवेशितानि । प्रकृतसूत्रस्थपदानि तु न पुनरुक्तानि वृत्तौ । तथापि, यदि तत्र दर्शितां प्रक्रियामुनसृत्य तत्र वृतानि सूत्राणि शिक्षकः क्रमशोऽष्टाध्याय्यां छात्रानभ्यासयेदिति तत्र भवान् परमहंसो नियममुपादेक्ष्यत् तर्हि व्याकरणप्रवेशायाऽत्यन्त मुपयोगिनी मालेयमभविष्यत् । परन्तु अष्टाध्यायीं विना प्रयोगानुसारिणि सूत्रसन्निवेशे एव पाठन नियमादियमपि नातोवो-पयोगिनी । सूत्रान्तरानुवर्त्यपदघटितवृत्तिघोषणाऽपेक्षणीयत्वान् । सूत्रपौवापर्य संस्काराऽनुद्भावकत्वाच्च । प्रक्रियाकौमुदीसिद्धान्तकौमुदीविषये तु याः स्तुतयो गर्हा वा, तास्तु वस्तुतो रामचन्द्र विहकरदिकमेव सम्बन्धान्ति न भट्टोर्योज दीक्षितमिति तदीयगृन्थद-र्शनात् स्फुटं भवति ।

सूत्रक्रम-प्रक्रियाक्रम-वादि-मत-समीक्षा

सूत्रक्रमवादिनां मतमस्ति यज्ज्ञेयानि शस्त्राणि बहूनि वर्तन्ते । कौमुदीरीत्याव्ययने व्याकरणाध्ययनेनैव समयोऽतिवाहितो भवति शास्त्रान्तराध्ययनयावसरो न लभ्यते । अतः सूत्रक्रमेणैव व्याकरणं पाठ्यमिति । प्रक्रियाक्रमवादिनां मंतमस्ति यद्, एकास्मिन् प्रयोगे साध्ये विभिन्न-स्थल-पठितानि सूत्राण्यये दमन्ते । अतः सूत्रक्रमेणततत्सूत्राणामुदाहरणानि बोधयितुं न शक्यन्ते इति । अत्र समीक्षणे दयोरपि मतं कश्मिँचिदशे युक्तमयुक्तं च कस्मिँश्चिदशे । सूत्रक्रमवादिमते, आपाततो लाघवं प्रतीयते, परन्तु तत्पक्षे १।१।४ (नधातुलोपआर्धधातुके) सूत्रस्योदाहरणमेव प्रथमं स्फुटं बोधयितुं न शक्यते । अत एव पाणिनेरपि प्रक्रिया बोधनप्रणाली अष्टाध्यायीसूत्रक्रमानु-सारिणी न बभूवेति नाज्झलो १।१।१० इति सूत्रे भाष्ये ध्वनितम् । अर्थात् पारायणं १।१।१ सूत्रात् क्रमशः कार्यम् प्रयोगज्ञाने तु न तथा क्रमशः किन्तु स्थले स्थले सूत्राणि वृत्यानि, इति व्याकरण शिक्षणस्य पुरातनी शुद्धा शैली । तत्र पारायणं १।१।१। सूत्रात क्रमशः कार्यमिति तु अष्टाध्यायीपुस्तकावलोकनादेवावगम्यते । प्रयोगज्ञाने च न क्रमशः किन्तु स्थले स्थले सूत्राणि वृत्यानि, इत्यपि महाभाष्यात् प्रतीयते । तथाहि- आक्षे वर्णानामुपदेशः तदुत्तरकालेत्संज्ञा, तदुत्तरकालः प्रत्याहारः, तदुत्तरकाला सवर्णसंज्ञा, तदुत्तरकालं सर्वग्रहणम्, एतेन समुदि तेनाऽन्यत्र सवर्णानां ग्रहणं भवति न स्वास्मिन् नापि स्वाङ्गे (१-१-१० सूत्रभाष्यम्) अस्माद् भाष्यात् स्फुटं प्रतीयते यत्, पुरातन समये प्रथमं वर्णसमाम्नायं ततः १।३।३। (हलन्तम्) ततः १।१।७१ (आदिरन्तेवान संहिता) ततः १।१।९ (तुल्यास्य-प्रयत्नं सवर्णम) तत्सन्दर्भे १।१।१० (नाज्झलौ ततः १।१।६९ (अणुदित्सवर्णस्य चाप्रत्ययः) सूत्राणि पाठयन्ति स्म । ततः सूत्रान्तरपाठसन्दर्भे अदेङ गुणः (१।१।२) सूत्रे अत् इत्यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तकारश्चरितार्थी भवति । स खलु तकारो ग्राहकसूत्रबलप्रतीयमान-सवर्वादिर्धाकारदीनां निरासार्थः । यदि तु १।१।१ सूत्रात् क्रमशः सूत्रार्थान पठयेयुस्तर्हितु ग्राहकसूत्रवाक्यार्थबोधात् पूवं पठ्यमाने नान्भलौ १।१।१० खति सुत्रे यथा न सवर्णानां बोधस्तथैव प्रकृत (१।१।२) सूत्रेऽपि स्वत एव सवर्णानां ग्रहणं न भवेत् किं तकारेण ? इति अतः प्रक्रिया-शिक्षणाय पाणिनिरपि अष्टाध्यायी सूत्र क्रमाद् भिन्नं रीत्यन्तरं स्वीचकारेति स्फुटं भवति ।

प्रक्रियाक्रमवादिमते सन्निवेशमात्रेण व्याकरणचतुर्थाशबोध (१।४।२) ८।२।१ इत्यादि) सूत्राणां विषयस्थलान्येव नावधीयन्ते व्याकरणं च बहुकालसाध्यं भवति । स च दोषः । यतः, आचीक्षिकी-त्रयी-वार्ता-दण्डनीति-विधानां ज्ञानार्जनावधिर्जन्मतः षेडशवर्षाणीति कौटिल्यः । तथाहि वृत्तचौल-कर्मा लिपिं संख्यानं चोपयुन्जीत वृतौपनयनस्त्रयीमान्वीक्षिकीं च शिष्टेभ्यः वार्तामध्यक्षेभ्यः दण्डनीतिं वक्तृ-प्रयोक्तुभ्यः । ब्रह्मचर्य चचाष्नेडशाद् वर्षाद् । अतो गोदानं दारकर्मचेति । (कौटिलियार्थशास्त्रे १ अधिकरणे २ प्रकरणे वृद्धसंयोगे, ५ अध्याये) महाकवेः कालिदासस्यापि नुनमतदेवाऽभिप्रेतं पतीयते । तथाहि-सवृतचूलश्चलकाकपक्षैक रमात्यपुत्रैः सवयोभिरन्वितः । लिपेयर्थावद् ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रभाविशत् ।२८॥

धियः समग्रैः स गुणौरुधारधीः क्रमाच्चतम्रश्चतुरर्णावोपमाः ।
तमार विधाः पवनातिपातिभिर्दिशो हरिद्भोर्हरितामिवेश्वरः ॥३०॥
अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तपद् गुरुः ॥३३॥
ततः प्रजानां चिरमात्मना धृता नितान्तगुवी लघयिष्यता धुरम् ।
निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशदभाक् ॥३५॥

अतः १-१-३ अदेङ् गुणः सूत्रं ग्राहकसूत्रात् पश्चाद् १-१-१० नाज्झलौ सूत्रं ग्राहकसूत्रात् प्राक् पाठयन्ति स्मेति प्रतीयते ।

निसर्गेण स्वभावेन, संस्कारेण शास्त्राभ्यासजनितवासनया च, विनीत इति तत्रत्या सन्जीविनी व्याख्या । (रघुवंश सर्गः ३)

महाकविर्दण्डी चैतदेव मतं पोषयति । तथाहि-राजवाहनोऽनुक्रमेण चौलोपनयनादि सँस्कारजातमलभत । ततः सकललिपिज्ञानं निखिलदेशीयभाषापाण्डित्यं षडङ्गसहितवेद-समुदायकोविदत्वं काव्यनाटकाख्यानाख्यायिकेतिहासचित्रकथासहितपुराणगणनैपुण्यं धर्म-शास्त्रज्योतिस्तर्कमीमांसा-दिसमस्तशास्त्रनिकरचातुर्यं कौटिल्यकामन्दकी-यादिनीतिपटल-कौशलं वीणाद्यशेषवाद्यदाक्ष्यं सङ्गीतसाहित्यहारित्वं मणिमान्त्रौषधाक्षि-मायाप्रपज्वचुन्चुत्वं मातङ्गतुरङ्ग दिवाहनारोहणपाटवं विविधायुधप्रयोगचणत्वं चौर्यदुदरादिक पटकला प्रौढत्वं च तत्तदाचार्येभ्यः सम्यग् यौवनेन विलसन्तं कृत्येषु अनलसं तं कुमार निकरं निरीक्ष्य महावल्ल भः सः अहं शत्रुजनदुर्लभः, इति परमानन्दमविन्दत् ।

(दशकुमार चरिते पूर्वपीठिकायां, प्रथमोच्छ्वावासे)

प्रथमवयोऽवधिविर्धाध्ययनसमय इन्त्यते । तथा च नीतिः

आद्ये वयसि नाधीतं द्वितीये नाऽर्जितं धनम् ।
तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति ॥ (हितोपदेश प्रस्तावनायाम्)

यस्याः कस्या अपि विद्यायाः समुचितोपयोगिता च चतुर्भिः प्रकारैर्भवति ।

यथोपदिशति भगवान् पतञ्जलीः -चतुर्भिश्च प्रकारैर्विधोपयुक्त भवति, आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति । (महाभाष्य पस्पशान्हिक)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पोषयति चैतन्मतं श्रीहर्षोऽपि । यथा-

अधीतिबोधाचरणप्रचारणदशाश्चतस्रः प्रणयननुपाधिभिः ।

चतुर्दशत्वं कृतवान् कृतः स्वयं न वेदिम विद्यासु चतुर्दश स्वयम् ॥४॥ (नैषधीयचरिते सर्गः १) विद्वद्भिरपि व्यवहारविधिश्च गोपादिभ्योऽपि शिक्षणीयो भवति यथोपदिशति महर्षिरग्निवेशः ओषधीर्नामरूपाभ्यां जानते सजया वने अविपाश्चैव गोपाश्च ये चान्ये वनकासिनः १२२। (चरकसंहितायां सूत्रस्थाने, १ अध्याये)

विषयमिमं प्रकारान्तरेण चौपदिशति सुश्रुते राजर्षिर्दिवोदासः गोपालास्तापसा व्याधा ये चान्ये वनचारिणः मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिशिष्यते ॥ इति ॥

अतः साम्प्रतिक-प्रचलित-लघुकौमुदी-मध्यकौमुदी-सिद्धान्त-कौमुदीप्रभृति-रीत्या व्याकरण-शिक्षणे व्याकरणाध्यनेनैव सर्वमायुर्व्यतिगच्छेत् । कदा शास्त्रान्तराभ्यासः स्यात् । अत एवोपदिशति तत्र भवान् कुमारिलभट्टः

सूत्रार्थे ल्लिकश्यतश्चैवं दुरे वेदार्थनिर्णयः ।

तत्र यत्नस्य भारत्वं वक्तृश्रोतोः प्रसज्यते ॥३६॥

प्रयासो वेदवाक्येषु कार्यः सूत्रेष्वनेन किम् ? ... ॥३८॥

सूत्रकारप्रशंसा वा लोक इत्यादिनोच्यते ।

प्रसिद्धैरभिधानादि न शिष्याः ल्केशिता यतः ॥५९॥ इति ॥ (मीमांसाश्लोकवर्तिके १ सूत्रे)

अतः कौमुदी-प्रभृतयो व्याख्यार्गन्धा विदुषां मननैयैवोपयोज्या न तु व्याकरणे प्रविविक्षूणां विद्यार्थिनाम् ।

स्वानुभवस्वरसः

अतः प्रातिपदिकेभ्यः स्वादयः प्रत्यया भवन्ति, धातुभ्यश्च तिङ् कृत् प्रत्यया भवन्ति, समासे बहून्यपि पदानि एकपदी भवन्ति, कारक भेदेन विभक्ति भेदा भवन्ति । णिच् सल् यङ् इत्यादिषु धातवो रुपान्तराणि भजन्ते, इत्यादि व्याकरण समान्य प्रक्रियासंस्कारे छात्राणां दृढे सति १।१।१ सूत्रतो ऽध्ययने ऽध्यापने च काठिन्यं न भवति, व्याकरणञ्च स्वल्पसमयसाध्यं भवति। यथोपदिशन्त्याचार्याः

सरितामिव प्रवाहास्तुच्छाः प्रथमं यथोत्तरं विपुलाः ।

ये शास्त्रसमारम्भा भवन्ति लोकस्य ते कन्याः इति ॥ (काव्यमीमांसायाम् २ अध्याये)

अतः सामान्यप्रक्रियाबोधनाय प्रक्रियामनुसृत्य ततत्स्थलानां सूत्राणि शिक्षकोवृत्वा, अष्टाध्याय अध्याय-पाद-सङ्ख्यां सूत्र-सङ्ख्या च लेखयेत् । छात्राश्च तत्र तत्र अष्टाध्यायामेव दृष्ट्वाऽभ्यसेययुः । तथा सति अध्याय-पाद-सूत्र-संख्या-ज्ञानं मस्तिष्के स्फुरति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्रवरणविधिः

बहुलप्रयोगाणि सरलार्थानि सूत्राणि प्रथमं वृत्यानि पश्चाच्च यथोत्तरं कठिनार्थानि। यथोपदिशन्त्याचार्याः सरितामिव प्रवाहास्तुच्छा इत्याद्यनुपदमेवोक्तम् (काव्यमीमांसाया २ अध्यायस्य)

प्रसङ्गात्प्रयुक्तानां पदानां सिद्धये छात्रजिज्ञासायां जाग्रत्यां तेषां व्युत्पादकानि सूत्राणि तथा प्रक्रियालाघवसाध्यानां पदानां व्युत्पादकानि सूत्राणि छात्रजिज्ञासायामजाग्रत्यामपि स्वयं शिक्षकेणच्छात्राणां जिज्ञासामुद्भाव्योपदेशाय च वृत्यानि। प्रयोगबहुलानि कठिनार्थानि चेत् तत्र कठिनार्थमंशं परित्यज्याऽपि सूत्राणि वृत्यान्येव। यथा- युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः। सूत्रमिदं वृत्यं परन्तु स्थानिन्यपि इत्यंशस्यार्थः प्रथमं त्याज्यः। एवमेव समर्थानां प्रथमाद् वा सूत्रेस्मिन् वृत्येऽपि समर्थानामित्यस्यार्थः प्रथमं त्याज्यः। लाघवेन बोधाय सूत्रान्तराऽनुवर्त्यपदत्यागेनाऽपि सूत्राणि वृत्यानि। यथा मोनुस्वारः इति सूत्रम् अनुवर्त्यस्य पदस्येति परित्यागेन, अतो भिस ऐस् इति च अनुवर्त्यस्य अङ्गस्य इति परित्यागेन वृत्ये। प्रथमप्रवेशे लाघवेनोपदेशाय तथ्येतरोपदेशोऽपि युक्त एव। यथोपदिशति तत्र भवान् हरिः- उपायाः शिक्षमाणानां बालानामुपलालनाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते। इति।

(१।२।४५ सूत्रस्थ प्रौढमनोरमात उद्धृतम्)।

सावधानम्

शिक्षकः सूत्राणामानुपूर्वीं कदाचिदपि न लेखयेत्, तथा सति तामेवाऽनुपूर्वीं दृष्ट्वा घोषयन्तिच्छात्रा अष्टाध्यायीं न पश्यन्ति। स एष व्याकरणशिक्षणे महान् दोषः पाठन-पाठनपरीक्षण-प्रभृतिभिः स्वयमनुभूतः प्रकृताऽनुसन्धात्रा। अतो द्वाविंशत्या वर्षैः पाठन-पाठनपरीक्षण-प्रभृतिभिरुपायैरनुभूतः सफल-परीक्षणो व्याकरणशिक्षणविधिः प्रस्तूयते। येन गुरुमुखात् प्रतिदिनं होरावध्यधीयानो मननशीलश्छात्रः सार्धवर्षेण व्याकरणस्य पूर्णं प्रक्रियांशं शिक्षितुं प्रभवति विवादांशवर्जम्।

एतच्चानुसन्धानं शिक्षकप्रशिक्षणकृते कृतमितिच्छात्राः स्वयं नात्र प्रवर्तन्ताम्। यतः स्वयं छात्रैरभ्यस्यमानमनुसन्धानमिदं न हि गुरूपदेशं विना लाभकरं भवेत्। अथातः प्रकृताऽनुसन्धानरीत्या यदि शिक्षका अष्टाध्यायीक्रमेणोपदिशेयुस्तदा सार्धवर्षेणच्छात्राणां व्याकरणस्य प्रक्रियांशज्ञानं भवेत्। स एष विषयः प्रकृताऽनुसन्धात्रा सफलपरीक्षणेनानुभूतः।

अतः सोऽयं विधिः प्रस्तूयते।

तत्रादौ श्यामपाटी-प्रयोग-विधिः

यथा शब्दप्रयोगेण व्यवहारः सुखसाध्यः। न तथाऽन्यैः पाणिविहाराक्षिसंकोचादिभिरभिनयैः। अत एवोपदिशति भगवान् यास्कः-अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके (निरुक्ते)।

परन्तु वैखरीध्वनेरुच्चरितप्रध्वंसितत्वेन न स स्थायी भवति। अत एवोपस्थापयति भगवान् यास्को भगवत औदुम्बरायणस्य मतम्- इन्द्रियनित्यं वचनमौदुम्बरायणः इति (निरुक्ते)।

श्रोताऽपि श्रुतमात्रं विशेषेण विश्लेषितमपि न तथा सुखं बुध्यते यथा लिपिबद्धं विषयं स्वल्पेन समयेन सुखं बुध्यते। अत एव सर्वेषां ग्रन्थानां लिपिबन्धो जातः। तस्यैव लिपिप्रयोगस्य विशिष्टरूपं श्यामपाटीप्रयोगः। तत्रापि गणितव्याकरणयोस्तु श्यामपाटीप्रयोगो नितान्तमावश्यकः। यथा गणिते कियतीनांचन पृथक् पृथक् संख्यानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्यामपाटीप्रयोगं (लिपिबन्धं) विना कथंचिद् योगसंख्यायां ज्ञातायामपि श्यामपाटीप्रयोगादिव सरलतया ज्ञातुं न शक्यते। बह्वीनां पृथक् पृथक्संख्यानां तु श्यामपाटीप्रयोगं (श्यामपाट्यां लिपिबन्धं) विना संख्या नैव स्मर्तुं शक्यते । तथैव व्याकरणशिक्षणेऽपि श्यामपाटीप्रयोगं विनोपदिष्टान्युदाहरणानि च्छात्रैर्महताऽऽयासेन बोध्यानि भवन्ति। तत्रापि प्रथमं व्याकरणे प्रविविक्षुः सन्धिं शिशिक्षिषमाणश्छात्रस्तु श्यामपाटीप्रयोगविधिं विना महताऽऽयासेन साधनप्रक्रियां घोषणपुरस्सरं कण्ठस्थां कथञ्चित् कुर्यान्नाम। किन्तु विषयस्तुच्छात्रबोधगोचरो नैव भवति। तेन कानि चिद्दिनानि सूत्रार्थमात्रमावर्तयन्नपिच्छात्रस्तत्तत्सूत्राणामुदाहरणानि भणितुं न शक्नोति। अत एव बहवश्छात्राः संस्कृताध्ययनादेव पलायन्ते। संस्कृतमारभ्य बोधभारभयात् त्यक्त्वा विषयान्तरप्रविष्टानां च मस्तिष्के संस्कृतं कठिनं भवतीति भ्रान्तधारणा दृढमूला भवति। फलतस्ते संस्कृतभाषाविरोधिनो भवन्ति । अतो व्याकरणशिक्षणे श्यामपाटीप्रयोगो नितान्तमावश्यकः। तत्रापि सन्धिशिक्षणप्रक्रिया तु श्यामपाटी-प्रयोगं विना सर्वथा न कार्या। घोषणेन त्रिभिर्दिनैः साध्यः प्रयोगः श्यामपाटी-प्रयोगविधिना होरया (घण्टया) साधयितुं शक्यते। छात्रबोधगोचरभावितया सूत्रार्थमात्रमावर्तयन्नपि (सूत्रार्थमविस्मरन्) प्रयोगप्रक्रियां न विस्मरति। श्यामपाट्यां दृष्ट्वा यथाऽनायासेनच्छात्रा विषयमवगच्छन्ति स उपाय एव श्यामपाटीप्रयोगविधिः। तत्रोत्तरसूत्रेषु पूर्वसूत्रेभ्योऽनुवर्त्यानि पदानि श्यामपाट्यां बाणचिह्नेन प्रदर्शयितव्यानीति मदीयोऽनुभवः । किन्तु मुद्रणे बाणचिह्नं न समभूत्। अतः पूर्वसूत्रेष्वग्रिमसूत्राऽनुवर्त्यपदोपरि (शिरसि) (क) (ख) (ग) इत्यादयो वर्णाः सन्दर्शिताः सन्ति। उत्तरसूत्रेषु च पार्श्वभागेषु (क)(ख)(ग) इत्यादयो वर्णाः सन्दर्शिताः सन्ति। ततश्च पूर्वसूत्रेभ्योऽनुवर्तमानानि पदान्युत्तरसूत्रेष्वत्र समावेश्यानीति बोध्यम्। यथा-

(क)
६-१-७४ इको यणचि ॥
६-१-७५ एचोऽयवायावः (क) ॥

अत्र पूर्वसूत्रात् 'अचि' इत्यनुवर्तते, तच्चोत्तरसूत्रे 'अयवायावः' इत्यतः परतः समावेश्यमिति। अत्र ग्रन्थे स्थले स्थले पुनरुक्तयः सन्ति। ताश्च बाला एवं बोधयितव्या इति प्रयोजनमूलाः । यद्यपि श्यामपाटीप्रयोगविधिर्व्याकरणशिक्षणे बहुत्रोदाहरणत एव स्फुटो भविष्यति तथापि प्रकृतेऽपि ज्यौतिषविषयकमेकमुदाहरणं प्रस्तूयते। यथा-

(क) प्रातः सूर्योदयाद् द्वादशवादनावधिकः कालो दिन-पूर्वनतकालः।
(ख) तदूर्ध्वः सूर्यास्तावधिकः कालो दिन-परनतकालः।
(ग) सूर्यास्तसमयाद् निशीथा (रात्रिद्वादशवादना) वधिकः कालो रात्रिपूर्वनतकालः।
(घ) तदूर्ध्वः सूर्योदयपूर्वः कालो रात्रिपरनतकालः।

तत्र कश्चिदिष्टकालः पूर्वनतः परनतो वा इति जिज्ञासायामुच्यते-
पूर्वं नतं स्याद् द्युदलाऽल्पमिष्टं दिनार्धमानात् प्रविशोध्य शेषम्।
इष्टे दिनार्धादधिके विशोध्यं दिनार्धमिष्टादपरं नतं स्यात्॥
एवं स्वबुद्ध्या सुधिया विधेयं रात्र्यर्धतो रात्रिगतं नतं च॥ इति॥

अस्यार्थः (क) यदि दिनपूर्वनतकाल इष्टकालः स च दिनार्धमानान्न्यूनः। यथा ३० घटीकं दिनं चेत् तदर्धं १५ घटी। इष्टकालश्च प्रातः सूर्योदयात् ५ घटीकः। तदा दिनार्ध (१५ घटीतः) मानादिष्ट (५) घट्यः शोध्याः।(यथा १५-५=१०) शेषो दिनपूर्वनतकालो भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ख)- यदि दिनपरनतकाल इष्टकालः स च दिनार्धमानादधिकः। यथा-इष्टकालः प्रातः सूर्योदयात् षोडशघटीकः। तदा इष्टघटी (१६) तः दिनार्ध (१५) मानं शोध्यम् (यथा १६-१५=१) शेषो दिनपरनतकालः। एवमेव रात्रिपूर्वपरनतकालोऽपि बोध्य इति पद्यतो ज्ञायते। स एष विषयः श्यामपाटचां बोध्यमानश्छात्राणां सुखेन बोधगोचरो भवति।

यथा- खस्वस्तिकम्



सूर्योदयः

निशीथः

अधः खस्वस्तिकम्

सूर्यगतिः (किरणाः) →→→

इत्थं श्यामपाट्यां दर्शयित्वा खस्वस्तिकाद् यावति दूरे सूर्यो भवति तावान् नतकालः अर्थात् सूर्यविम्बखस्वस्तिक-मध्यवर्ती कालः पूर्वः परो वा नतकालः। अतः सूर्यगत्यनुरोधात् पूर्वनतकालो यथोत्तरं ह्रसते। परनतकालस्तु यथोत्तरं वर्धते इत्युपदेशे पूर्ववर्णितविषयः (इष्टकालाद् दिनार्धमानं दिनार्धमानात् वेष्टकालः शोध्यमिति अर्थात् कथं क्वचिदिष्टकालात् क्वचिद् दिनार्धमानाच्छोध्यमिति) स्फुटो भवतीति।

सावधानम्

सूत्रार्थबोधनाय प्रकृतग्रन्थे बहुत्र स्थलेषु ये श्यामपाटीप्रयोगविधयो दर्शिताः सन्ति। ते खलु बहुषुच्छात्रेषु विद्यमानेष्वेव प्रयोक्तव्याः। अन्यथा तु च्छात्रेण पठचमानायामष्टाध्याय्यामेव शिक्षकेणाऽङ्गुल्याऽनुवर्त्यानि पदानि तत्तत्सूत्रेष्वेव दर्शयितव्यानि। तत्र श्यामपाटीप्रयोगाऽपेक्षया साङ्गलिनिर्देशं तत्‌तत्सूत्रेष्वेव बोधनमुत्तममिति। सति सम्भवे तु संस्थाभिर्भित्त्यां मणिशिला (संगमर्मर) यां वार्तिकसहितानि क्रमेण सूत्राणि खलूत्करणीयानि। तथा सति व्याकरणशिक्षणे महानुपकारो भवेत् संस्करणभेदेन सूत्र स्थानभेदाभावाच्च च्छात्रमस्तिष्के एतत् सूत्रमस्मिन् पृष्ठे, पृष्ठेऽपि आदौ मध्ये अन्ते वा वर्तत इति संस्कारो दृढतमो भवति। अहं प्रकृतव्याख्याता तु द्वयोरष्टाध्यायीपुस्तकयोः पत्राणि पृथक्कृत्य एकस्मिन् पटे गुन्द्रेण क्रमशः संश्लेष्य

पूर्णामष्टाध्यायीं अध्यापनकक्षायां भित्त्यामवलम्बितवानस्मि। व्याकरणे प्रविविक्षून् खलु तस्यामेव भित्त्यां लम्बमानानि सूत्राणि अनुवर्त्यानि पदानि च साङ्गुलिनिर्देशं दर्शयन् पाठयामि।

अनुवृत्तिचर्चा

लाघवेन सूत्रार्थोपदेशाय भगवान् सूत्रकारोऽनुवृत्तिरीतिमङ्गीकृतवान्। तत्र कस्मात् सूत्रात् किमग्रिमसूत्रेष्वनुवर्तते इति प्रतिपत्तये स्वरित (नामकं किञ्चित्) चिह्नमनुवर्त्ये पदे शब्दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा खलूपयुयुजे । यथोपदिशति तद्विषये सूत्रमेव भगवान् स्वरितेनाऽधिकारः १।३।११ इति । यथा त्रिदण्डेन (चिह्नेन) यतिरयम् पुस्तकेन (चिह्नेन) छात्रोऽयम् इत्थमनायासेनैव बुध्यते तथैव स्वरितेन (चिह्नेन) एतदग्रिमसूत्रेष्वनुवर्तत इति अनायासेनैवच्छात्रा बुध्येन्ते स्म पूर्वम् । क्वचिच्च पूर्वसूत्रादुत्तरसूत्रे किञ्चिदनुवर्तत इति स्फुटप्रतिपत्तये चकारमपि पठितवान् भगवान् सूत्रकारः ।

चकारविषये भाष्यकारश्च लुँटि च क्लृपः १-३-९३ । सूत्रे उपदिशति - किमर्थ-श्चकारः । स्यसनोरित्येतदनुकृष्यते । यदि तर्हिनान्तरेण चकारमनुवृत्तिर्भवति द्युद्भ्यो लुङीत्यत्रापि चकारः कर्तव्यः विमाष्येत्मनुकर्षणार्थः

अथदानीमन्तरेणपि चकारमनुवृद्धिभवति । इहापि नार्थश्चकारेण । एव सर्वे चकाराः प्रत्याख्यायन्ते । इति । भाष्यनस्यास्य तात्पर्यञ्चैतत-सर्वत्र स्वरित्वत्वि न्हनैवाऽनु वृत्तिज्ञायते अतोऽनुवृत्तिस्फुट-प्रतिपत्तये क्वापिचकारो न पाठयः स्वरित चिन्हेनैव स्फुटं भवतीति यथोपदिशति तत्रैव कैयटः- स्वरितत्वादनुवृत्या च शब्दान प्रत्याचष्टे इति । काल क्रमेण शिक्षणरीतौ विकृतायां तस्मिन स्वरितेना धिकारः १-३-११ इति सूत्रे वर्तमाने पि ततत्सुत्रेषु पठितेषु अनुवतर्येषु न केवलं स्वरित (चिह्न) मात्रं भ्रष्टम् । अपितु स्वरितपदार्थोऽपि नाऽद्यत्वे दृढं निश्चीयते । अत एव नागेशो पि स्वरितपदार्थविषये सन्दिहानो लिखति-स्वरितं चेदं दोषविशेषरुपमज्झल्साधारणं स्वररूपमधिक्रियमाणपद-घटकाज्निष्ठं वा । तच्चानुनासिक्यवत् प्रतिज्ञागम्यम् । विनियोगश्च प्रायेणोत्ररत्रो-पस्थितिः क्वचित् पूर्वत्रापि । कियद्दुरमधिकार इत्यत्राऽसति गमके व्याख्यानमेव शरणम् । इति । (लघुशद्बेन्दुशेखरे) । अतो निष्कर्षेऽनुनासिकज्ञानयाऽनुनासिकसंज्ञा विधायकसूत्रमिव प्रकृतसूत्रमपि नाद्यत्वेऽनुवृत्तिज्ञानायोपयोगि सूत्रकार-स्वीकृत-स्वरित-ज्ञानह्रासात् । स एष ह्रासो व्याकरणशिक्षणे वर्णनाऽतीता विकृति महती क्षतिश्च वैयाकरणानाम् । अतोऽनुवर्त्यमिदमिति संकेतनाय किञ्चिच्चिन्हमुपयोक्तव्यम् । मम विचारे शिरस्यूर्ध्वरेखा स्यादुपयोगिनी । यथा-

इको यणॅचि ६।१।०४७

अॅाद् गुणः ६।१।८४

वृद्धिरेचि ६।१।८५

ऊर्ध्वरेखा स्वरितचिह्नमित्यग्रेऽपि वक्ष्यते ।

म.म. पण्डितराज डा. श्री गोपालशास्त्री वर्शनकेशरी तु मुद्रणानुकूल्याय स्थूलाक्षेरमेव स्वरितचिह्नं कल्पयति । यथोपदिशति तत्र भवान् स्वरितचिन्ह पाणिनेरिभिमतं तच्च मुद्रणे बाधकमिति स्थूलाक्षरमेव स्वरितचिह्नं ज्ञेयम् । इति । स्थूलाक्षराणि त्वरितमेव दृष्टिपथमायान्तीत्युपायोऽयमप्यादृत्य एव । अथ कतमसूत्रावध्यनुवर्तते इति तथा मण्डू-कप्लुतिन्यायेन धाराप्रवाहन्यायेन वाऽनुवर्तते इति च बोधनाय सूत्रकारः स्वरितेन चिह्नेन कथं व्यवस्थापितवानिति विषये यथोत्तरमनुसन्धेयम् । साम्प्रतं तु गुरुपदेशः शरणम् धाराप्रवाहे अनुवर्त्यघटितसूत्राग्रे विरम्यानुवृत्तिक-सूत्रसंख्यालेखनं च । किन्च विशेष्य विशेषणं च विहाय समानविभक्त्यन्तमुत्तरसूत्रे नानुवर्तते किन्तु विरुद्धविभक्त्यन्त मेवाऽनु वर्तते । यथा-

इको यणेचि ६-१-७४ ।

एचो यवायावः ६-१-७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र द्वितीयसूत्रे एच इति षष्ठ्यन्तम्, पूर्वसूत्रे इक इति च षष्ठ्यन्तम् अतो द्वितीयसूत्रे पूर्वसूत्रात् इकः इति नाऽनुवर्तते समानविभक्त्यन्तत्वात्। एवमेव अयवायावः इति प्रथमान्तम्, तेन पूर्व सूत्राद् यण् इति च नानुवर्तते प्रथमान्तत्वात्। अथ अचि इति त्वनुवर्तते द्वितीयसूत्रे सप्तम्यन्ताभावात्। विशेष्यं विशेषणं समानविभक्त्यन्तमप्यनुवर्तते यथा-

न क्त्वा सेट् १-२-१८ ॥

निष्ठा शीङ् स्विदिमिदिक्ष्विदिधृषः १-२-१९ अत्र यद्यपि प्रथमसूत्रे सेट् इति द्वितीयसूत्रे निष्ठा इति च प्रथमान्तेपदे तथापि पूर्वसूत्राद् द्वितीयसूत्रे प्रथमान्त (समानविभक्त्यन्त) मपि सेट् इत्यनुवर्तते विशेषणत्वात्। इतिं।

तथा-

उपदेशेऽजनुनासिक इत् - १-३-२ ॥

हलन्त्यम् १-३-३॥ अत्र द्वितीयस्मिन् सूत्रे द्वे-अपि पदे प्रथमान्ते। पूर्वसूत्रे च इत् इति प्रथमान्तम् (समानविभक्त्यन्तम्) तथापि तदनुवर्तत एव विशेष्यत्वात्।

या विशेष्येषु दृश्यन्ते लिङ्गसंख्याविभक्तयः।

प्रायस्ता एव कर्तव्याः समानार्थे विशेषणे ॥

इति नियमात् तत्र विशेष्ये विशेषणे च समानैव विभक्तिर्भवति। अतस्तत्र समानविभक्तिकता बाधिका न भवतीति। (पाणिनीय प्रवोधनाटके श्री गोपालशास्त्री दर्शनकेशरी)। तमिमं समाम्नायं निघण्टव इत्याचक्षते इति निरुक्ते वचनभेदेऽपि दोषोद्धाराय पद्यमिदं या विशेष्येषु दृश्यन्ते... इत्यादिकं क्वाचित्कं टिप्पण्यामुद्धृत्य इति वचनव्यवस्थितौ प्रायः पदोपादानादित्युक्तम्। (निरुक्ते मुकुन्दशर्मणा)।

तेन इको झल् १-२-९। लिंङ् सिँचावात्मनेपदेषु १-२-११। इत्यादिषु वचनभेदेऽपि न दोष इति बोध्यम्। यत्र विशेष्य-विशेषण-भिन्नमपि समानविभक्तिकमनुवर्त्यं तत्र स्फुटप्रतिपत्तये सूत्रकारश्चकारं पठति। यथा-

१-३-९२ वृदभ्यः स्यसनोः ॥

१-३-९३ लुँटि च क्लृपः ॥ अत्र द्वितीयसूत्रे लुँटि इति सप्तम्यन्तम्। उपरितनसूत्रे च स्यसनोरिति सप्तम्यन्तम्। तच्च लुँटि इत्यस्य न विशेष्यं नापि विशेषणम्। अतः समानविभक्तिकस्याऽनुकर्षणाय स्फुटप्रतिपत्तये चकारं पठितवान्। एवमेव हेतुः इति प्रथमान्तघटिते तत्प्रयोजको हेतुश्च १-४-५५ इति सूत्रेऽपि पठितश्चकारः स्वतन्त्रः कर्ता १-४-५४ इति सूत्रात् कर्ता इति प्रथमान्ताऽनुकर्षणार्थः स्फुटप्रतिपत्तये बोध्यः।

एतेन-तत्प्रयोजको हेतुश्च इति पाणिनिसूत्रस्थानीयं तद्योजको हेतुः इति चकाररहितं जैनेन्द्रव्याकरणसूत्रं पाणिनिसूत्रोपजीव्यकम् [illegible]।

अथ १-३-२ उपदेशेऽजनुनासिक इत् ॥ इति सूत्रविषय-निश्चयोपायः बहुलप्रयोगमिदं सूत्रम्। अत्र सूत्रे को नामाऽनुनासिकपदार्थः इति विद्वद्भिर्बहुचर्चितः। अनुनासिकपदार्थस्तु यद्यपि भगवता सूत्रकारेणैव मुखनासिकावचनोऽनुनासिकः १-१-८ इति सूत्रयता कण्ठरवेणैवोदिष्टः। तथाप्यद्यत्वे सूत्रस्याऽस्य विषयो दुरूह इव प्रतिभाति। अत्र को नाम अनुनासिकपदार्थ इत्याकाङ्क्षाशमनाय प्रतिज्ञाऽनुनासिक्याः पाणिनीयाः इति वाक्यं प्रकृतसूत्रे काशिकायाम् प्रक्रियाकौमुद्याम् सिद्धान्तकौमुद्याम् मध्यकोमुद्यामपि दृश्यते। कोऽभिप्रायस्तस्य वाक्यस्य ? यदि गणपाठादिवत् अनुनासिकपाठः पाणिनिना पठित आसीत् कालक्रमेण स नष्टः। अतोऽद्यत्वेऽनुनासिकोऽनुमेयः। यथा स्वौजसमौट् ४-१-२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति सूत्रे प्रथमैकवचने उकारो दृश्यते । प्रत्ययः ३-१-१ इत्यादि सूत्रेषु च विसर्गो दृश्यते । अतः प्रथमाविभक्तेरेकवचनस्य सु इत्यस्योकारोऽनुनासिकः । यद्ययमनु नासिको न स्यात् तदा सकारस्य उकारेण व्यवधानाङ् रुत्वाधनापतौ विसर्गा निर्देशो न सङ्गच्छेत । सप्तमीबहुवचने तु न लोपः सुप् स्वरसंज्ञानुग्विधिषु कृति ८-२-२ इत्यादिषुकारश्रवणान्नानुनासिक इत्यभिप्रायश्चेत् । अत्रोच्यते-अनुनासिकपाठो गणपाठादिवत् पाणिनिना न पठितः अनुनासिकसंज्ञाविधायक-सूत्रप्रणयनानुपपत्तेः । अनुनासिकस्य परिचायिका लिपिरुच्छिन्नत्यभिप्राय इत्यपि न सङ्गच्छेत प्रकृत सूत्रे एव उपदेशे इति किम् अम्र आँ अपः (काशिका) अम आँ अटितः (प्रौढमनोरमाशद्धरत्नम) इत्यादिषु स-विन्दु कार्धचन्द्राकार । लिपेदशनात् । सैव लिपिः कालक्रमेण यथास्थानदुच्छिन्नेत्याभिप्रायश्चेत् ह्रस्वदीर्घादिव्यत्य यशोधनवदा यथास्थानं चिन्ह प्रयोग एव शोभनो नतु लिपिकर प्रमादमादृत्याऽनुनासिकाऽनुमानप्रक्रियाद्वारा व्याकरण-शिक्षण-पद्धतो गुरुमारस्थापनमु-चितम् । अतः सवत्राऽनुनासिकस्थलेष्वनुना सिकोच्चारणं कार्य लिप्या च चिन्हमिद । देयम् । यथा वर्तमाने लँट् ३-२-१२३ । लँङ ३-२-११० । अनधतने लँङ ३-२-१११ । क्तक्तवतुँ निष्ठा १-१-२५ ससजुषो रुँः ८-२-६६ विभक्तो- सुँ ङसिँ । धातुषु- अतँ सातत्यग-मने अवँ रक्षणादिषु चितीँ संज्ञाने इत्यादि ।

अथ १-३-१२ । अनुदात्तङित आत्मनेपदम् । १-३-७२ । स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥
इति सूत्रयोविषयनिश्चयोपायः-अधत्वेऽनुदात्तेत उदात्तेतः स्वरितेतश्च धातवः प्रकरणादेवाऽतुमीयन्ते । कश्चिचदपि प्रकरणमजानन् एध वृत्त डपच अव इत्याधातुपूर्वा लापमवक्षमाणोऽपि सर्वेऽनुदात्तेन इमे उदात्तेतो वा स्वरितेतो वा अन्यतमोऽन्यतमावन्यतमा वाऽन्यतमेतो धतवे इति न परिचुर्त क्षमते । पूर्वसूत्र (१-३-२) उपदेशज्ज... विषयेतु यदि शिक्षक इच्छेत तदाऽनुनासिकमुच्चाय बोधयितुं शक्नोति । प्रकृत सूत्रयोस्तु शिक्षका अपि उदात्तं वाऽनुदात्तं पृथककृत्य प्राय उच्चारयि न शक्नुवन्ति । अत एव शुक्लयजुर्वेदऽपि विषयमिमं लिप्यां चिह्नविषेशप्रयोगेण, ध्वनौ हस्त चालनेन च वैदिकाः सङकेतयन्ति चेत् का कथा पुनर्लौकिकसंस्कृते ।
वेदे खलु अनुदात्तधोतनाय हस्तः क्वचिद् दक्षिणतः क्वचिदधश्च नीयते । उदाजद्योतनाय च हस्तः क्वचिद् वामतः क्वाचिदूर्ध्वतश्च नीयते । यथा-

अधोदक्षिणे च अनुदात्तः । अनुदात्तः उदात्तः अनुदात्तः उदात्त
स्वरितः

स न्दुं	मि	धा	ग्नि
↑	↑	↑	↑
दक्षिणे	वामे	अधः	ऊर्ध्वतः

ऊर्ध्वे वामे च उदात्तः

अतोऽनुदात्त विषये स्वरित विषये च यथा वेदे तथा लोकेपि चिन्ह प्रयोग एव श्रेयानुपस्य । अनुदात्त चिन्हम अधस्तियग् रेखा ।
यथा - एधँ वृद्धौ । वृतुँ वर्तने । स्वरितचिह्नम्-उपर्यूर्ध्वरेखा । यथा डु प॑चँप् पाके । व॑हँ प्रापणे । इत्यादि । उदातस्य चिह्नं न भवति वेदेऽपि तथैव । एतेपामुच्चारणे वस्तुतस्तु गुरूपदेश एव शरणम् । यथोपदिशति श्रीगोपालचन्द्रमिश्रः । उच्चारणे वस्तुतस्तु सद्गुरूः शरणं मतम् इति (सम्प्रदायबोधिनी शिक्षा ।)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रन्थेऽस्मिन् सूत्रे निदर्शनीये अध्याय-पाद-क्रम-संख्याऽऽदौ दत्ताऽस्ति । यथा- ६-१-७४ इकोयणचि, इति । अर्थबोधनायाऽनुवृत्ते निदर्शनीये अन्ते ( ) एतत् कोष्ठगर्भे दत्ताऽस्ति सा । तत्र पर्यायपदं न दत्तमस्ति । अतः सत्यावश्यके यतस्तदनुवृत्तं तत्रैव द्रष्टव्यम् । क्वचित्तु स्फुटप्रतिपत्तये पर्यायपदमपि दत्तमस्ति । यथा-

६-१-८४ आद् गुणः ॥ ६-१-८५ बृद्धिरेचि ॥

६-१-८६ एत्येधत्यूठ्सु ॥ आत् (६-१-८४) एचि (६-१-८५)= एजाद्योः इत्यादि । श्यामपाट्यां सूत्रान्तरे सूत्रान्तरादनुर्वतनीये निदर्शनीये पूर्वसूत्रशिरसि (क) (ख) इत्यादि दत्त्वा यत्राऽनुवर्तनीयं तत्र सूत्रे यथास्थानं (क) (ख) इत्यादयो वर्णा दत्ताः सन्ति ।

(क)

यथाः- ६-१-७४ इको यण् अचि ॥

६-१-७५ एचः अयवायावः (क) ॥ इति ।

(क) (ख) (ग)

६-१-८१ एकः पूर्वपरयोः ॥ ६-१-८४ आद् गुणः ॥

६-१-८५ वृद्धिः (ग) एचि (ख) (क=एका) ॥ इति च ।

❀

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रेयांसि बहुविघ्नानि

अथ मुद्रणप्रसङ्ग :- २०५३ वैक्रमाऽब्दस्य माघमासे पुस्तकस्याऽस्य मुद्रणचर्चाप्रसङ्गे तात्कालिकोपकुलपतिमहोदयो मामवोचद् यद्, आगामिन आषाढमासस्यान्तात् पूर्वमेव पुस्तकं टङ्कन-तत्संशोधनद्वारा मुद्रणार्हं करोत्विति । अस्त्वित्युक्त्वा मयि कोष्ठाद् बहिर्निःसृतवत्येव मदीयं दुरदृष्टं फलं दातुं प्रावर्तत । ग्रन्थप्रागरूपनिर्मितौ ग्रन्थस्य प्रारम्भादेव क्रमशः प्रतिदिनं दशद्वादशपृष्ठानि टङ्कयित्वा टङ्कितभागं संशोधयेयमिति विचारितवानभूवम् । परन्तु यच्चिन्तितं तदिह दूरतरं प्रयाति-दुरदृष्टवशादेकदैव बहुषु स्थलेषु ग्रन्थस्य पृथक् पृथग् भागानां पत्राणि प्रसारितानि टङ्कनकृते । तथा प्रसारणमप्यनियतस्थानतया कदाचित् क्वचित् कदाचित् क्वचित् । टङ्कनान्यप्यतिसुदुष्करसंशोधनानि जातानि । अतः प्रागुक्ताषाढमासान्तावधि टङ्कना-तत्संशोधनकृते मयि सर्वथा व्यापृतवत्यप्युपलब्धिः शून्यकल्पाऽभवत् । अथ मया तथाऽनुभूतां वेदनां बोधितः श्रीहेमराजज्ञवाली महोदयो मामवोचद् 'घनश्याम ओली टङ्कनं सम्यक् करोति, तेन साधयतु कार्यमिति ।' अथ वृत्तमिदं बोधितेनोपकुलपतिमहोदयेनापि तथाऽङ्गीकारे कृते 'व्यक्तिविशेषेणापि विश्वविद्यालयसम्बन्धिना जनेन रचिता रीतिर्विश्वविद्यालयरचितेव, अतस्तेन रचितां रीतिं निरस्य कथमहमन्यत्र साधयितुं प्रभवेयम्' ? इति मया बोधित उपकुलपतिमहोदयः 'तमहं भणेयम्' इत्यवोचत् । अथोपकुलपतिमहोदय-सकाशादावासं प्राप्तो दुरभाषद्वारा साक्रोशं सहृदयाघातं भृशं भर्त्सितोऽभूवमहमपराधीव । यस्मिन्कस्मिन्नाक्रुष्टवत्यपि लब्धोपकुलपतिस्वीकृतिरहं प्रागुक्तमुपायमवलम्बयेयम् । परन्तु ग्रन्थस्याऽधिको भागो मम हस्तात् परहस्ते गतचरोऽभूत् । अतोऽहं भोगीव मन्त्रौषधिरुद्धवीर्य इति वाक्यवाच्यतां गतः । वैयाकरणसंप्रदाये तद्धितप्रकरणं प्रत्यूहकरमिति प्रसिद्धिर्वर्तते । तथापि परिस्थितिवशादादौ तद्धितप्रकरणस्य मध्येऽन्यप्रकरणानामन्ते च पुनस्तद्धितप्रकरणस्य प्रागरूपसंशोधनाय वश्योऽभूवम् । इत्थं प्रागरूपनिर्माणकार्यक्रमः प्रत्यूहपुटित इव, ग्रन्थक्रमसंनिवेशश्चाऽन्धतमसे निमग्न इवाभूताम् । एवं वेदनामनुभूतवता क्षतौजसा हतोत्साहेनाऽपि यथाशीघ्रं कार्यं साधयितुं पुनरप्युपकुलपतिमहोदयप्रेरितेन मया ग्रन्थप्रागरूपसंशोधनसहयोगकृतेऽनुरुद्धः शिक्षाध्यक्षचर-विद्यावारिधि- श्रीटीकारामपन्थिमहोदयः सतीर्थ्यत्वमूलकसौहार्दात् सुरसरस्वतीसेवेति धिया च न केवलं प्रागरूपसंशोधनमात्रेण स्तुत्यं सहयोगं कृतवान्, अपितु स्थलविशेषेषु परामर्शप्रदानेनापि महनीयं सहयोगं विहितवान् । पुनरपि रजनी पुनरपि प्रातः, शिशिरवसन्तौ पुनरायातः । महता कष्टेन २०५६ वर्षे पुस्तकस्य प्रागरूपं यथाकथमपि सम्पन्नम् । पुस्तकं तु तदापि न प्रकाशमागमत् । बुधा ग्रन्थस्याऽस्य बाहयस्वरूपसमीक्षणे मय्यापतितमवरोधमप्यवदघ्युरितीयमरण्यरोदनसोदरप्रस्तुतिः । वस्तुतस्तु

यस्माच्च येन च यथा च यदा च यच्च यावच्च यत्र च शुभाशुभमात्मकर्म ।
तस्माच्च तेन च तथा च तदा च तच्च तावच्च तत्र च विधातृवशादुपैति ॥

तत्रापि आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् ।

अतः सर्वं तत् कष्टजातं स्वकीयदुरदृष्टफलं मन्ये । अथ पुस्तकं कथं न प्रकाशितमिति जिज्ञासया ग्रन्थटङ्कनकालिकोपकुलपतिमहोदयसम्पर्की श्रीहेमराजज्ञवालीमहोदयो मामवोचद् यत्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पङ्क्त्यक्षरसंनिवेशसौष्ठवाऽभावेन प्रकाशनाऽनर्हत्वात् पुस्तकं न प्रकाशितं रे इति । साम्प्रतं (२०५८ वैक्रमाऽब्दस्य माघमासे) सम्पृच्यमानः साम्प्रतिकशिक्षाध्यक्षमहोदयः (पङ्क्त्यक्षरसंनिवेश सौष्ठवाय सम्पृच्यमानेन ग्रन्थटङ्कनोत्तरदायित्ववाहिना 'कम्प्यूटरस्थाः पङ्क्तयः फालिताः' इत्युत्तरं दत्तमिति) दुर्दशां श्रावितवान् । इत्थं न केवलं ग्रन्थटङ्कनकृते कृतं विश्वविद्यालयस्य विनियोजनमात्रं व्यर्थं जातम्, अपितु शिक्षापद्धतिसुधारक्रमे सूत्रक्रमेण व्याकरणपठनपाठनप्रक्रियाया जिजागरयिषायामप्याघातो जातः । अहो दुरदृष्टबलम् ! विश्वविद्यालयस्थे निर्मितप्रागरूपे पुस्तकेऽवलोक्यमाने च तत्र 'अथ मुद्रणप्रसङ्गः' इति शीर्षकघटितो लेखोऽपि नास्ति । अथ पूर्णस्यैव ग्रन्थस्य सुसज्जनायै तु पूर्णस्यैव ग्रन्थस्य पुनष्टङ्कनं विना नास्त्युपायान्तरम् । पुनष्टङ्कने च विश्वविद्यालयोपरि द्विगुणो व्ययभार आपतेत् । विद्वांसो हि ग्रन्थप्रतिपादितविषयसौष्ठवमाद्रियन्ते, बाहयसज्जासौष्ठवाऽभावस्तु सह्यो भवति तत्र भवताम् । अतोऽधिकविकृतिभाञ्ज्येव पृष्ठानि पुनष्टङ्कयितुं पूर्वं ग्रन्थस्याऽस्य तृतीयाध्यायस्याऽपि टङ्कयिता श्रीघनश्याम ओली सम्पृच्यमानः श्री ५ वीरेन्द्रस्मृतिग्रन्थटङ्कने व्याप्रियमाणोऽपि कार्यं साधितवानिति धन्यवादार्हः सः । प्रथमेऽन्ये कम्प्युटरटङ्कनस्य कर्तारोपि यथाटङ्कनाभ्यासमक्षराणि टङ्कितवन्त इति धन्यवादार्हाः । यतः, 'अथाऽवाच्यः सर्वः स्वमतिपरिणामावधि गृणन्' 'भवति योजयितुर्वचनीयता' ।

जगदम्बापदस्मर्तुः सङ्कटं न कदाचन । यदि जायेत तच्चापि ज्ञेयं तत्स्वस्तये किल ॥

साम्प्रतं श्रीपूर्णचन्द्रढुङ्गेलमहोदय उपकुलपतिपदं श्रीमाधवशरणमहोदयश्च शिक्षाध्यक्षपदमध्यासीनौ वर्तेते । इत्थमुपकुलपतिः शिक्षाध्यक्षश्च साम्प्रतमुभावेव विद्यावदातौ पाणिनीयव्याकरण-रचना-परिपाटी-तत्त्वविदौ संस्कृतवाङ्मय-साम्प्रतिकस्थितिविषयकबोधवन्तौ, संस्कृतवाङ्मयाऽभ्युदय-समीहिनौ च वर्तेते । ईदृशबुधयोगो दुरदृष्ट-स्वर्भानु-ग्रस्यमान-प्रकृत-ग्रन्थेन्दुकृतेऽनुकूल एव स्यात् । यतः

अर्केण मन्दः शनिना महीसुतः कुजेन जीवो गुरुणा निशाकरः ।
सोमेन शुक्रोऽसुरमन्त्रिणा बुधो बुधेन चन्द्रः खलु वर्धते सदा ॥ (जातक पारिजातः)

सावधानम् ।

अत्र ग्रन्थे ग्रन्थसर्वाङ्गीणपुष्टतायै उणादिप्रकरणस्य फिट्सूत्राणां लिङ्गानुशासनस्य पाणिनीयशिक्षाया गणपाठस्य च सिद्धान्तकौमुदीतः प्रतिबिम्बनेन समावेशनमावश्यकम् ।

विद्वत्सु निवेदनम्- ग्रन्थेऽस्मिन् मदीयाऽज्ञानमूलाश्च्युतयस्तु भवेयुरेवाऽनेकाः । यतः, 'गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः' तत्राऽपि मादृशमन्दमतेस्तु का कथा ? । विषयेऽस्मिन् विदुषां, पुरः साञ्जलिबन्धं प्रणतिं पुरस्करोमि । प्रागरूपनिर्माणे मदीयाऽनवधानमूलाश्च स्युरेवाऽत्र दोषा बहवः । अत्रापि प्रणतिपुरस्कारं विना न पश्याम्युपायान्तरम् । विशेषेण स्थलान्तरे स्थलान्तरस्थ-सूत्राऽध्याय-पाद-सङ्ख्या-सूच्यङ्केषु स्युर्दोषाः । तत्र आद्यानि द्वित्राणि सूत्राक्षराण्यपि दत्तानि सन्ति तदाधारेण दोषोद्धारः सुकरः स्यादिति विनिवेदयामि । व्याकरणशिक्षण- सुगमशैलीकृतेऽनुसन्धानपरम्परा यथोत्तरं जागर्तुतमाम् । यतः सत्यं ज्ञानमनन्तम् ।

हरिः ॐ तत्सत् ।-व्याख्याता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रथमोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टाध्यायी

महामुनि- पाणिनि- प्रणीता
सवार्तिका सोदाहरणा
शारदाप्रभाव्याख्या-महिता

श्रीगणेशाय नमः ।
ॐ नम : श्रीजगदम्बायै ।

स्वैरं लीलाकलित-वपुषे ऽतीतमायाय भूम्ने
गौर्या सार्धं हिमवति सदा राजते दिव्यधाम्ने ।
सिद्धिं साध्ये लघु वितरते साधकानामपूर्वां
दिव्यं ज्योतिर्मनसि यमिनामों नमः श्रीशिवाय ॥

(१)

ज्योतीरूपा विधिहरिनुता ऽनन्त - वैरिञ्चकोश-
क्षेमासक्ता सुरनर-कृते कल्पिता ऽनल्पमूर्तिः ।
ध्याता सद्यो विपदपहरा सम्पदां या प्रदात्री
श्रद्धालूनां स्फुरतु हृदये सर्वदा सा ऽऽद्यशक्तिः ॥

(२)

येनाक्षर - समाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

(३)

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥

(४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णविच्छेद :- पौरस्त्यरीत्या लिपिजातं सम्यक् परिचित्य प्रयोज्य - प्रयोजक - वृद्धव्यवहार - द्वारा सामान्यतः संस्कृत - भाषायां व्यवहारे क्षमाणां व्याकरणमधिजिगांसूनां छात्राणां वर्णविच्छेद-प्रक्रिया ज्ञातव्या भवति । तस्यां ज्ञातायां सत्यां पश्चात् सन्धि-प्रक्रियायां वर्णपरिवर्तनादयः स्फुटं बोध-गोचरा भविष्यन्ति ।

अत एव विषयस्याऽस्याऽतीवाऽऽवश्यकतां द्योतयन् भङ्ग्यन्तरेण सूत्रयति भगवान् कात्यायन : - "व्यञ्जनं स्वरेण स-स्वरम्" इति (वाजसनेयिप्रातिशाख्यम् १-१०७) । महर्षिर्याज्ञवल्क्यो ऽप्युपदिशति - "स्वर उच्चः स्वरो नीच : स्वरः स्वरित एव च । स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन स-स्वरम्,, ॥ इति (याज्ञवल्क्यशिक्षा ११८) । शाकटायनो ऽपि भगवान् सूत्रयति- "अनुस्वार व्यञ्जनञ्चाक्षराङ्गम्" इति (ऋग्वेदप्रातिशाख्यम्, संज्ञापरिभाषापटलम् २२) । उपदिशति च भगवान् पतञ्जलिः- "न पुनरन्तरेणा ऽचं व्यञ्जनस्योच्चारणमपि संभवति" इति (१-२-२९ उच्चैरुदात्तः-सूत्रभाष्यम्) । यद्यपि दीर्घादि - स्वरवर्णा अपि वर्णद्वयादिश्लेषमूलास्तथापि न ते प्रथमं व्याकरणे प्रविविक्षुभ्य उपदेश्याः, दुर्बोधतया छात्राणामुद्वेगकरत्वात् । किन्तु स-स्वर-व्यञ्जनानामेव विच्छेदज्ञानमत्यावश्यकम् । अतः शिक्षकैरधोनिर्दिष्टरीत्या वर्णविच्छेद-प्रक्रिया बोधयितव्या । अ आ इ ई उ ऊ ऋ ॠ लृ ए ऐ ओ औ एते वर्णा वर्णान्तराणां सहयोगं विनैव एकाकिनो ऽप्युच्चारयितुं शक्यन्ते । क् ख् ग् घ् ङ् इत्यादयो वर्णा एकाकिन उच्चारयितुं न शक्यन्ते । किन्तु अ आ इ ई इत्यादिवर्णान्तराणां सहयोगेनैव तेषामुच्चारणं संभवति । यथा - क् + अ = क । ख् + अ = ख । ग् +अ = ग । घ् + अ= घ । ङ् + अ = ङ । क् + आ = का । ख् + आ = खा । ग् + आ = गा । घ् + आ = घा । ङ् + आ = ङा । क् + इ = कि । ख् + इ = खि । ग् + इ = गि । घ् + इ = घि । ङ् + इ = ङि । इत्यादि । रीत्या ऽनया श्यामपाट्यां लिखित्वा ऽधोनिर्दिष्टो दृष्टान्तः प्रस्तुत्य : । छात्राणां बोधनाय दृष्टान्तोपस्थापनं पौरस्त्यशिक्षणविधौ सुतरां महीयते । यथा-अन्यार्थं प्रकृतमन्यार्थं न भवतीति बोधनाय दृष्टान्तमुपस्थापयति भगवान् पतञ्जलि :-
"न हि गोधा सर्पन्ती सर्पणादहिर्भवति," इति (१-१-२३ ष्णान्ता... सूत्रभाष्यम्) । अन्यार्थमपि प्रकृतमन्यार्थं भवतीति बोधनाय चोपस्थापयति - "शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयते उस्पृश्यते चेति" (तत्रत्यमेव भाष्यम्) । सन्निपातपरिभाषा-स्वीकारे दोषा आपतन्ति, तस्मात् सा परिभाषा न स्वीकार्येति पूर्वपक्षं कृत्वा सिद्धान्ते परिभाषा स्वीकार्यैवेति बोधनाय च दृष्टान्तमुपस्थापयति - "न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते, न च मृगाः सन्तीति यवा नोप्यन्ते," इति । (१-१-३८ कृन्मे... सूत्र - भाष्यम्) । अन्तरतमो भवतीति बोधनाय चोपस्थापयति - "गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति, तेन सह शेरते" । तथा "यान्येतानि गोयुक्तकानि संघुष्टकानि भवन्ति, तान्यन्योऽन्यमपश्यन्ति शब्दं कुर्वन्ति" । "लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग् गच्छति नोर्ध्वमारोहति, पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः" । इति च (१-१-४९ स्थाने... सूत्रभाष्यम्) । सनकादयो ऽपि मुनयः कथावाचने दृष्टान्तकुशलमेव प्रशंसन्ति -

दृष्टान्तकुशलो धीरो वक्ता कार्योऽ तिनिःस्पृहः ॥२०॥ इति ।
वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः ।
पण्डितः संशयच्छेत्ता लोक-बोधन-तत्परः ॥२२॥ इति च ।
(श्रीमद्भागवतमाहात्म्यम्, अध्याय : ६) ।

प्रकृते दृष्टान्त :- यथा तिलास्तण्डुलाश्च मिश्रिताः पुनः पृथक् कर्तुं शक्यन्ते, तथैव लिप्यां क्य ख्य ग्य इत्यादयः = क (क्) य, ख (ख्) य, ग (ग्) य इत्यादिरूपेण पृथक् कर्तुं शक्यन्ते ।

किन्तु पीयमाने पयसि मधुरेऽनुभूयमाने "पय इदं स-शर्करम्" इति प्रतीतौ जातायामपि तिलतण्डुलवद् विभागस्तु तयोर्दुष्करो भवति । तथैव लिप्यां क ख ग घ ङ, का खा गा घा ङा, कि खि गि घि ङि इत्यादयो विभक्तुमशक्या भवन्ति । अर्थात् क्य ख्य इत्यादिषु यथा क +य, ख् +य इत्यादिरूपेण लिप्यां पृथक्कृत्य पृथक् पृथगवयवा दर्शयितुं शक्यन्ते, तथा क ख इत्यादिषु ककार-खकाराद्याद्यंशा अकाराद्यन्तांशाश्च पृथक्कृत्य दर्शयितुं न शक्यन्त इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ माहेश्वराणि वर्णसमाम्नाय - सूत्राणि ।

अ इ उ ण् ॥१॥ ऋ ऌ क् ॥२॥ ए ओ ङ् ॥३॥ ऐ औ च् ॥४॥ ह य व र ट् ॥५॥ल ण् ॥६॥ ञ म ङ ण न म् ॥७॥ झ भ ञ् ॥८॥ घ ढ ध ष् ॥९॥ ज ब ग ड द श् ॥१०॥ ख फ छ ठ थ च ट त व् ॥११॥ क प य् ॥१२॥ श ष स र् ॥१३॥ ह ल् ॥१४॥

अत: श्यामपाट्यां क् + अ = क, क् + आ = का, ख् + अ = ख, ख् + आ = खा, इत्यादिरीत्या लिखित्वा शिक्षयित्वा का खा कि खि कु खु इत्यादिवर्णान् पृथक् कुरुतेत्यादय: प्रश्ना देया: ।

यदिच्छात्रा: प्रश्नान् सम्यङ् न समादधति, तदा छात्राणां दोषो न मन्तव्य: । किन्तु सम्यग् बोधयितुमहमक्षम इति स्वकीय एव दोषो मन्तव्य: । स्वकीय-दोष-दर्शनं हि विदुषो लक्षणम् । विद्वान् विपश्चिद् दोषज्ञ: ।

अत: पुनश्छात्रा बोधयितव्या: । छात्रेषु प्रश्नान् सम्यक् समादधत्सु पुनरग्रिमप्रश्ना देया: । श्यामपाट्याम् - भानु सानु आलु कारु (इति लिखित्वा) इत्येतेषु, उकारे फालिते, अवशिष्टभागा: किमाकारा: स्वस्यां स्वस्यामुत्तरपुस्तिकायां लिखतेतिच्छात्रा आदेश्या: । मुनि मणि कपि इत्येतेषु इकारे फालिते, अवशिष्टभागा: किमाकारा: ? इत्यादयश्च प्रश्ना: पुन: पुनर्देया: । यदि तुच्छात्रा रोमन (आङ्गल) लिपिं जानन्ति तदा तु श्यामपाट्यां Ka = क् + अ = क, Kã क् +आ = का, Ki = क् + इ = कि, Kee = क् + ई = की, Bhãn+u = भान् + उ, Bhanu = भानु, Sãn+u = सान् + उ, Sãnu = सानु, अनया रीत्या वोधनं सरलं प्रतीयते व्यञ्जनविशिष्टस्वरवर्णस्यापि पृथ गनुभावयितुं शक्यत्वात् । द्वित्रैर्दिनैर्विषयेऽस्मिन्नभ्यासनीयाश्छात्रा: । ततो विषये ऽस्मिन् फुरन्मतिभ्यस्तेभ्यो भानु सानु आलु कारु इत्यत्र, उकारं फालयित्वा तत्स्थाने औकारे लिखिते पूर्वोक्ता: शब्दा: किमाकारा भवन्तीत्यादय: प्रश्ना: प्रस्तुत्या: । तत्र केचन सम्यगुत्तरं लिखेयु: केचन च न लिखेयु: । समानमीहमानानां चाधीयानानाञ्च के चिदर्थैर्युज्यन्ते अपरे न तत्र किमस्माभि: शक्यं कर्तुम् ? स्वाभाविकमेतत् (हयवरट् - सूत्रभाष्यम्) । तदानीमुत्तरं दातुमसमर्थाश्छात्रा: प्रत्याख्यानादिभिर्ह-तोत्साहा न कार्या: । किन्तु शिक्षकेण स्मेर-मुखेण सता बोधनायोपायान्तर-माश्रयणीयम् । यथा श्यामपाट्यां क ख ग घ वर्णा लेख्या: । ते चच्छात्रैर्वाचयितव्या : । तत: प्रष्टव्यास्ते यदि अत्रत्यं 'ख' इति लिपिं फालयित्वा तस्य स्थने 'छ' इति लिपिर्लिख्येत तदा पूर्वोक्तो वर्णक्रम: कीदृश: स्यादिति । यदि सत्यमुत्तरं लभ्यते तदा सुष्ठु । यदि तु सत्यमुत्तरं न प्राप्तं तदा क ख ग घ इति पूर्वोक्तश्यामपाटीवर्णस्थाने क ख ग घ = क छ ग घ इति रीत्या श्यामपाट्यां प्रदर्शनीया: । मुहुर्मुहुरभ्यासेन संस्कारे दृढे जाते भानु सानु इत्यादिषु उकारफालनेन तत्स्थाने औकारस्थापनेन च संभवन्त आकारा अधोनिर्दिष्टरीत्या वोधनीया: । भानु = भान् + उ, अत्र उकारस्थाने औकारे भान् = औ=भानौ । एवम् - सानु = सान् + उ, सान्+ औ = सानौ । इत्यादि । अत्रापि रोमन (आङ्गल) लिपिविदां कृते Bhãn+u = भान्+ उ, Bhãnu =भानु, Bhãn+ãu=भान् + औ, Bhãnãu = भानौ । रीत्याऽ नया वोधनं. सरलं प्रतीयते । इत्थं वर्णविच्छेद- वर्णसंमेलन-निपुणेभ्यश्छात्रेभ्यो माहेश्वराणि चतुर्दश वर्णसमाम्नायसूत्राण्युपदेश्यानि ।

अइउण् वर्णविच्छेदप्रक्रियोत्तरं वर्णसमाम्नाय उपदेश्य: । पूर्वं वर्णसमाम्नायसूत्राणां कण्ठस्थीकरणं तत्पश्चादेव शिक्षकै: प्रत्याहारादीनामुपदेश इति प्रायो ऽद्यत्वे शिक्षणपरम्परा वर्तते । परन्तु सा न पुरातनी शुद्धा प्रणाली । यतो ऽर्थबोधं विना निगदपाठो बुद्धिमान्द्यायैव भवति । श्रोत्रियस्येव ते राजन् मन्दकस्याऽविपश्चित: । अनुवाकहता बुद्धिर्न हि तत्त्वार्थदर्शिनी ॥ (महाभारतम्) । (मन्दकस्या ऽ ल्पमेधस: इति नित्यमसिँच्... सूत्रे हरदत्त:) छात्राश्च भारमनुभवन्ति । अतश्चतुर्दश सूत्राणि श्यामपाट्यां लिखित्वा प्रथमम् अच्प्रत्याहारगर्भ्या अण् अक् इक् उक् एङ् एच् अच् प्रत्याहारा: शिक्षणीया: । शिक्षणप्रकारश्च यथा - अच् इति लिपिं दर्शयित्वा, अत्र आद्यवर्ण: को ऽस्तीति प्रश्न: कार्य: । छात्रात् 'अ' अस्ति इत्युत्तरे आगते सति वर्णसमाम्नाये अ इति वर्ण: कुत्रास्तीति पुन: प्रश्न: कार्य: । यदि च्छात्रादुत्तरं नायाति तदा श्यामपाट्यां लिखितान् वर्णसमाम्नायवर्णान् साङ्गुलिनिर्देशं प्रत्येकं दर्शयित्वा एष वर्ण:, 'अ' इत्यस्ति न वा ? इति प्रश्ने क्रियमाणे तथ्यमुत्तरमायाति । ततश्च वर्णसमाम्नायघटकस्य अ इत्यस्योपरि चिह्नमिदं √ देयम् । यथा अ॑ इति । तत:, अच् इत्यत्र द्वितीयमक्षरं किमिति प्रश्न: कार्य: । उत्तरे सत्ये प्राप्ते श्यामपाट्यां वर्णसमाम्नाये 'च्' इति कुत्रास्तीति प्रश्न:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ स्थानानि-
अ-कु-ह-विसर्जनीयानां कण्ठः ।
इ-चु-य- शानां तालु ।
ऋ-टु-र-षाणां मूर्धा ।
लृ-तु-ल-सानां दन्ताः ।
उ-पूपध्मानीयानामोष्ठौ ।
ञ-म-ङ-ण-नानां नासिका च ।

एदैतोः कण्ठतालु ।
ओदौतोः कण्ठोष्ठम् ।
वकारस्य दन्तोष्ठम् ।
जिह्वामूलीयस्य जिह्वामूलम् ।
नासिकाऽनुस्वारस्य ।

कार्यः । तदा ११=एकादश-सूत्र - घटकं चवर्णमपि कदाचिद् दर्शयेयुश्छात्राः । तदानीं पुनः श्यामपाटचां लिखिताम् अच् इति लिपिं दर्शयित्वा अत्रत्यस्तु चकारः खण्डितपादो वर्तते । अत उत्तरं तथ्यं नास्ति । अतः खण्डितपादं चकारं दर्शयतेति पुनरादेशे क्रियमाणे तथ्यमुत्तरमायाति । तदानीं श्यामपाटचां वर्णसमाम्नाय-चतुर्थ-सूत्र-चकारोपरि चिह्नमिदं √ देयम् । एवञ्च श्यामपाट्यामधोनिर्दिष्टरूपो वर्णसमाम्नायो दृश्यते - अ इ उ ण् ॥१॥ ऋ लृ क् ॥२॥ ए ओ ङ् ॥३॥ ऐ औ च् ॥४॥ इति । उपरि दत्ताभ्यां चिह्नाभ्याम् अकार-चकारौ स्फुटं नयन- गोचरौ भवतः । अत्रच्छात्राणां सकौतुक- साहस-वर्धनाय शिक्षकोऽष्टाध्यायी-पुस्तकं दर्शयन् यथा- स्वल्पेऽपि दर्पणे विशालानां हस्त्यादीनां संभवः (समावेशः) प्रतीयते तथैवेयन्मात्रे लघुकाये व्याकरणपुस्तके समग्रं वाङ्मयं संभवति (समाविष्टं भवति)। तत्रापि चतुर्दश सूत्राणीमानि तु व्याकरणस्य बीजरूपाणि । सूत्राणामेतेषां तात्पर्ये ज्ञाते समग्रमेव व्याकरणं पठितुं सरलं भविष्यति । एभिः सूत्रैः केवलाभ्यां द्वाभ्यामक्षराभ्यां बहवो वर्णा बोध्यन्ते । यथा प्रकृते (श्यामपाटचां लिखिताम् अच् इति लिपिं दर्शयन्) अ च् इत्यत्र आद्यवर्णः अ अस्ति, अन्तिमवर्णश्च च् अस्ति । अतः अच् इति द्वाभ्यामक्षराभ्याम् अ इ उ ऋ लृ ए ओ ऐ औ एते वर्णा बुध्यन्ते । कथम् ? द्वयोरक्षरयोर्मध्ये आद्यमक्षरं वर्णसमाम्नाये यत्र वर्तते, तत आरभ्य, अन्तिमवर्णश्च वर्णसमाम्नाये यत्र वर्तते तदवधिका वर्णा ग्राह्याः । अतः अच् इत्यनेन अ इ उ ऋ लृ ए ओ ऐ औ एते वर्णा बोधगोचरा भवन्ति । मध्यपातिनोऽ पि ण् क् ङ् एते वर्णा न गृह्यन्ते । अन्तिमः 'च्' इति वर्णोऽपि न गृह्यते । अतो निष्कर्षोऽयं निः सरति–द्वयोरक्षरयोर्मध्ये, आद्याऽक्षरादारम्भः कार्यः, अन्तिमवर्णः सीमारूपः । अर्थात् आद्याक्षरादन्तिमवर्णावधि विद्यमाना वर्णा ग्रह्याः सीमारूपोऽन्तिमवर्णस्तु न ग्राह्य इति इत्युपदिशेत् । अत्र बोधनसौविध्याय यथा केदारः (क्षेत्रं) धान्यवपनायोपयुज्यते । सीमा=आली तु नोपयुज्यते, इत्यादयो दृष्टान्ता उपयोक्तुं शक्यन्ते । इत्थं मुहुर्मुहुरभ्यासेन अच् प्रत्याहार-गर्भ्यान् प्रत्याहारान् सम्यग् विद्म इति वदन्तश्छात्राः शिक्षकेण परीक्षणीयाः श्रोता बुद्धवान् न वेति परीक्षाऽस्माकं पुरातनी प्रथिता पद्धतिः । यथोपदिश्य पृच्छति श्रीकृष्णः-

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्र्येण चेतसा ।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनञ्जय ! ॥इति॥

तत उत्तीर्णपरीक्षेभ्यश्छात्रेभ्यो हल्प्रत्याहारगर्भ्याः प्रश्ना देयाः । तत्र च मुहुर्मुहुरभ्यासः कारयितव्यः । अभ्यासश्च लेखनद्वारा न तु घोषणद्वारा । घोषणात् खलु बालानां कोमला बुद्धिः प्रतिहन्यते । मुहुर्मुहुर्लेखनेन सूत्राणि स्वयं कण्ठस्थानि भवन्ति । तथा सति न चच्छात्रा भारमनुभवन्ति । इदमत्राऽवधेयम्- हल्प्रत्याहारगर्भ्य-प्रत्याहार-ज्ञं-मन्या अपिच्छात्रा वस्तुतस्तान् प्रत्याहारान् सम्यङ् न ज्ञातवन्तो भवन्तीति । यथा- जश्= ज ब ग ड द । यण् = य व र ल । ङम् = ङ ण न । इति मन्यन्ते ते । हल्प्रत्याहारगर्भ्य- प्रत्याहारविषये विशेषा ऽनुपदेशात् । अत इतः परं हल्प्रत्याहारविषये विशेष उपदेश्यः । यथा - छात्राः ? ह य व र ट् इत्यादिषु दशसु सूत्रेषु ये हकारादयो वर्णा अखण्डितपादाः सन्ति, तेऽपि वस्तुतः खण्डितपादा एव, किन्तु अकारादिवर्णानां सहयोगं विना हकारादिवर्णानामुच्चारणा ऽ संभवात् तेषामुच्चारणाय अकारेण सह मेलयित्वा वर्णसमाम्नाये निर्दिष्टाः सन्ति । अतः, जश्= ज् ब् ग् ड् द् । यण् = य् व् र् ल् । ङम् = ङ् ण् न् इत्यादि ज्ञेयम् ।

सावधानं शृणुत-खण्डितपादा वर्णा न ग्राह्या इति पूर्वमुक्तम् । साम्प्रतं पुनर्हकारादयो वर्णाः सर्वेऽपि खण्डितपादा इति प्रतिपादितम् । अतः के ग्राह्याः के च न ग्राह्या इति निश्चयाय तात्पर्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुध्यध्वम् - वर्णसमाम्नाये ये वर्णाः खण्डितपादा निर्दिष्टास्ते न ग्राह्याः । अवधि (सीमा) ज्ञानायैव ते पठिताः । ये तु हकारादयोऽखण्डितपादा वर्णास्ते ग्राह्याः । ते च खण्डितपादा इति बोध्या इति । विषयोऽयं शिक्षकैः सम्यग् बोधनीयः ।

यद्यध्येतारो बालास्तदा सप्ताहावधि प्रतिदिनं लेखयित्वा शिक्षकैरभ्यासः कारयितव्यः । यदि तु युवादयस्तदा तु यावता समयेन सम्यग् बुध्यन्ते तावदवधि सम्यगभ्यासः कारयितव्यः । एवम् अण् अच् हल् इत्यादयः प्रत्याहारशब्देन व्यवह्रियन्त इति च बोधनीयम् । १-१-७ आदि... सूत्रं तु साम्प्रतं न प्रस्तुत्यम् । बोधभारापत्तौ छात्राणामुद्वेगकरत्वात् ।

इतः परं स्थानान्युपदेश्यानि । **अ-कु** -प्रत्याहार-बोधनाऽनन्तरं वर्णानां स्थानान्युपदेश्यानि । उपदेश - सन्दर्भे गावः कुत्र वसन्ति ? इति प्रश्नः कार्यः । यदि 'गोष्ठे' इत्युत्तरं छात्रेभ्य आयाति, तर्हि सुष्ठु । यदि तु मार्गे वने इत्यादिकमुत्तरमायाति । तदा तु ते पुनर्बोधनीयाः - मार्गः वनम् इत्यादिकं तु नियतं स्थानं न । नियत-स्थान-विषयको हि मम प्रश्न इति । ततो गोष्ठे इति भणेयुः । तत्र युक्तम् इति वक्तव्यम् । एवं पक्षिणां स्थानं किम् ? मनुष्याणां स्थानं किम् ? देवतानां स्थानं किम् ?

इत्यादयः प्रश्नाः कार्याः । क्रमशः कुलायः, गृहम्, मन्दिरम्, इत्यादिषूत्तरेषु प्राप्तेषु शिक्षकैरग्रे पुनश्छात्रा उपदेश्याः । यथा-अयि वत्साः ? यथा पक्षिणां स्थानं कुलायः, मनुष्याणां स्थानं गृहम्, देवतानां स्थानं मन्दिरम् । एवम् अन्येषां येषां केषाञ्चनापि यथा स्वानि स्वानि स्थानानि भवन्ति तथा वर्णानामपि स्थानानि भवन्ति । तानि च स्थानानि मुखे भवन्ति । तत्र केषां वर्णानां किं किं स्थानमिति युष्मानहं शिक्षयामि सावधानं शृणुतेति । अथ क ख, प फ इति वर्णानुच्चारयतेति शिक्षकेणच्छात्रा वाच्याः । छात्रैस्तेषु वर्णेषूच्चारितेषु "कतमवर्णोच्चारणे मिलत ओष्ठौ, कतमवर्णोच्चारणे च न मिलत ओष्ठौ" इति मुहुर्मुहुस्तेषां वर्णानामुच्चारणं कारयन् पृच्छेत् स्मेरमुखः शिक्षकः । अत्र तु च्छात्रेभ्यः सत्यमेवोत्तरमायाति । ततस्ते वाच्याः- आम्, पकार-फकारोच्चारणे मिलत ओष्ठौ, ककार-खकारोच्चारणे तु न मिलतः । अतः पकार-फकारयोः स्थानमोष्ठौ, ककार-खकारयोस्तु ओष्ठौ नेति ज्ञायत इति । अथ ते पुनरग्रे वाच्याः ट ठ त थ एतान् वर्णानुच्चारयन्तो जिह्वाग्रभागः कुत्र कुत्र गच्छतीति विमृशतेति ।

अत्र प्रायश्छात्राः सत्यमेवोत्तरं दद्युः । अन्यथाऽपि ट ठ इत्युच्चारणे त थ इत्युच्चारणे च जिह्वाग्रभागो मुखस्य भिन्ने भिन्ने स्थाने गच्छतीति त्ववश्यं वदन्ति । ततः शिक्षकेण वाच्यम्-आम् ! ट ठ इति वर्णोच्चारणे जिह्वाग्रभागो मूर्धानं प्रति गच्छति । त थ इति वर्णोच्चारणे तु दन्तान् प्रति (दन्तमूलप्रदेशान् प्रति वा) गच्छति । अतष्टकार-ठकारयोः स्थानं मूर्धा तकार- थकारयोस्तु दन्ता दन्तमूलप्रदेशा वेत्यनुभूयते । यथा प फ ट ठ त थ वर्णानां स्थानानि गुरूपदेशं विना तेषामुच्चारणेनैव ज्ञातानि, तथैव सर्वेषामन्येषां वर्णानामपि यदि शुद्धमुच्चारणं स्यात् तदा तु तेषामप्युच्चारणेनैव गुरूपदेशं विना स्थानानि स्वयमेव ज्ञातानि भवेयुः । परन्तु महाभारत-युद्धोत्तरकालात् क्रमशो यथोत्तरं विकृतायां शिक्षापद्धतौ वर्णोच्चारण-परिपाटी च भ्रष्टा वर्तते । अतोऽद्यत्वे तु सर्वेषां वर्णानामुच्चारणमात्रेण स्थानानि निश्चेतुं न शक्यन्ते । तस्मात् प्रत्येकं वर्णानां स्थानान्युपदेश्यानि भवन्तीति तानि निर्दिश्यन्ते इत्यादि । अथ स्थानबोधनाय श्यामपाट्यामधोनिर्दिष्टक्रमेण वर्णा लेख्याः-

अननुनासिकः ह्रस्वः	अननुनासिकः दीर्घः	अनुनासिकः ह्रस्वः	अनुनासिकः दीर्घः
इ	ई	इँ	ईँ
उ	ऊ	उँ	ऊँ
ऋ	ॠ	ऋँ	ॠँ
ऌ		ऌँ	

इति

अथ यथाऽत्र इकार उकार ऋकारश्च प्रत्येकं चतुर्विधाः प्रतीयन्ते, एवम् अकारोऽपि चतुर्विधः प्रतीयते न वेति च्छात्राः प्रष्टव्याः । तदा व्याकरणे प्रथमं प्रविविक्षवश्छात्रास्तु केचन नाऽनुभूयत इत्युत्तरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ स्थानानि-
अ-कु-ह-विसर्जनीयानां कण्ठः ।
इ-चु-य- शानां तालु ।
ऋ-टु-र-षाणां मूर्धा ।
लृ-तु-ल-सानां दन्ताः ।
उ-पूपध्मानीयानामोष्ठौ ।
ञ-म-ङ-ण-नानां नासिका च ।

एदैतोः कण्ठतालु ।
ओदौतोः कण्ठोष्ठम् ।
वकारस्य दन्तोष्ठम् ।
जिह्वामूलीयस्य जिह्वामूलम् ।
नासिकाऽनुस्वारस्य ।

कार्यः । तदा ११=एकादश-सूत्र - घटकं चवर्णमपि कदाचिद् दर्शययेयुश्छात्राः । तदानीं पुनः श्यामपाटचां लिखिताम् अच् इति लिपिं दर्शयित्वा अत्रत्यस्तु चकारः खण्डितपादो वर्तते । अत उत्तरं तथ्यं नास्ति । अतः खण्डितपादं चकारं दर्शयतेति पुनरादेशे क्रियमाणे तथ्यमुत्तरमायाति । तदानीं श्यामपाटचां वर्णसमाम्नाय-चतुर्थ-सूत्र-चकारोपरि चिह्नमिदं √ देयम् । एवञ्च श्यामपाट्यामधोनिर्दिष्टरूपो वर्णसमाम्नायो दृश्यते - अ इ उ ण् ॥१॥ ऋ लृ क् ॥२॥ ए ओ ङ् ॥३॥ ऐ औ च् ॥४॥ इति । उपरि दत्ताभ्यां चिह्नाभ्याम् अकार-चकारौ स्फुटं नयन- गोचरौ भवतः । अत्रच्छात्राणां सकौतुक- साहस-वर्धनाय शिक्षकोऽष्टाध्यायी-पुस्तकं दर्शयन् यथा- स्वल्पेऽपि दर्पणे विशालानां हस्त्यादीनां संभवः (समावेशः) प्रतीयते तथैवेयन्मात्रे लघुकाये व्याकरणपुस्तके समग्रं वाङ्मयं संभवति (समाविष्टं भवति)॥ तत्रापि चतुर्दश सूत्राणीमानि तु व्याकरणस्य बीजरूपाणि । सूत्राणामेतेषां तात्पर्ये ज्ञाते समग्रमेव व्याकरणं पठितुं सरलं भविष्यति । एभिः सूत्रैः केवलाभ्यां द्वाभ्यामक्षराभ्यां बहवो वर्णा बोध्यन्ते । यथा प्रकृते (श्यामपाटचां लिखिताम् अच् इति लिपिं दर्शयन्) अ च् इत्यत्र आद्यवर्णः अ अस्ति, अन्तिमवर्णश्च च् अस्ति । अतः अच् इति द्वाभ्यामक्षराभ्याम् अ इ उ ऋ लृ ए ओ ऐ औ एते वर्णा बुध्यन्ते । कथम् ? द्वयोरक्षरयोर्मध्ये आद्यमक्षरं वर्णसमाम्नाये यत्र वर्तते, तत आरभ्य, अन्तिमवर्णश्च वर्णसमाम्नाये यत्र वर्तते तदवधिका वर्णा ग्राह्याः । अतः अच् इत्यनेन अ इ उ ऋ लृ ए ओ ऐ औ एते वर्णा बोधगोचरा भवन्ति । मध्यपातिनोऽ पि ण् क् ङ् एते वर्णा न गृह्यन्ते । अन्तिमः 'च्' इति वर्णोऽपि न गृह्यते । अतो निष्कर्षोऽयं निः सरति–द्वयोरक्षरयोर्मध्ये, आद्याऽक्षरादारम्भः कार्यः, अन्तिमवर्णः सीमारूपः । अर्थात् आद्याक्षरादन्तिमवर्णावधि विद्यमाना वर्णा ग्रह्याः सीमारूपोऽन्तिमवर्णस्तु न ग्राह्य इति इत्युपदिशेत् । अत्र बोधनसौविध्याय यथा केदारः (क्षेत्रं) धान्यवपनायोपयुज्यते । सीमा=आली तु नोपयुज्यते, इत्यादयो दृष्टान्ता उपयोक्तुं शक्यन्ते । इत्थं मुहुर्मुहुरभ्यासेन अच् प्रत्याहार-गर्भ्यान् प्रत्याहारान् सम्यग् विद्म इति वदन्तश्छात्राः शिक्षकेण परीक्षणीयाः श्रोता बुद्धवान् न वेति परीक्षाऽस्माकं पुरातनी प्रथिता पद्धतिः । यथोपदिश्य पृच्छति श्रीकृष्णः-

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्र्येण चेतसा ।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनञ्जय ! ॥इति॥

तत उत्तीर्णपरीक्षेभ्यश्छात्रेभ्यो हल्प्रत्याहारगर्भ्याः प्रश्ना देयाः । तत्र च मुहुर्मुहुरभ्यासः कारयितव्यः । अभ्यासश्च लेखनद्वारा न तु घोषणद्वारा । घोषणात् खलु बालानां कोमला बुद्धिः प्रतिहन्यते । मुहुर्मुहुर्लेखनेन सूत्राणि स्वयं कण्ठस्थानि भवन्ति । तथा सति न चच्छात्रा भारमनुभवन्ति । इदमत्राऽवधेयम्- हल्प्रत्याहारगर्भ्य-प्रत्याहार-ज्ञं-मन्या अपिच्छात्रा वस्तुतस्तान् प्रत्याहारान् सम्यङ् न ज्ञातवन्तो भवन्तीति । यथा- जश्= ज ब ग ड द । यण् = य व र ल । ङम् = ङ ण न । इति मन्यन्ते ते । हल्प्रत्याहारगर्भ्य- प्रत्याहारविषये विशेषा ऽनुपदेशात् । अत इतः परं हल्प्रत्याहारविषये विशेष उपदेश्यः । यथा - छात्राः ? ह य व र ट् इत्यादिषु दशसु सूत्रेषु ये हकारादयो वर्णा अखण्डितपादाः सन्ति, तेऽपि वस्तुतः खण्डितपादा एव, किन्तु अकारादिवर्णानां सहयोगं विना हकारादिवर्णानामुच्चारणा ऽ संभवात् तेषामुच्चारणाय अकारेण सह मेलयित्वा वर्णसमाम्नाये निर्दिष्टाः सन्ति । अतः, जश्= ज् ब् ग् ड् द् । यण् = य् व् र् ल् । ङम् = ङ् ण् न् इत्यादि ज्ञेयम् ।

सावधानं शृणुत-खण्डितपादा वर्णा न ग्राह्या इति पूर्वमुक्तम् । साम्प्रतं पुनर्हकारादयो वर्णाः सर्वेऽपि खण्डितपादा इति प्रतिपादितम् । अतः के ग्राह्याः के च न ग्राह्या इति निश्चयाय तात्पर्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुध्यध्वम् - वर्णसमाम्नाये ये वर्णाः खण्डितपादा निर्दिष्टास्ते न ग्राह्याः । अवधि (सीमा) ज्ञानायैव ते पठिताः । ये तु हकारादयोऽखण्डितपादा वर्णास्ते ग्राह्याः । ते च खण्डितपादा इति बोध्या इति । विषयोऽयं शिक्षकैः सम्यग् बोधनीयः ।

यद्यध्येतारो बालास्तदा सप्ताहावधि प्रतिदिनं लेखयित्वा शिक्षकैरभ्यासः कारयितव्यः । यदि तु युवादयस्तदा तु यावता समयेन सम्यग् बुध्यन्ते तावदवधि सम्यगभ्यासः कारयितव्यः । एवम् अण् अच् हल् इत्यादयः प्रत्याहारशब्देन व्यवह्रियन्त इति च बोधनीयम् । १-१-७ आदि... सूत्रं तु साम्प्रतं न प्रस्तुत्यम् । बोधभारापत्तौ छात्राणामुद्वेगकरत्वात् ।

इतः परं स्थानान्युपदेश्यानि । **अ-कु** -प्रत्याहार-बोधनाऽनन्तरं वर्णानां स्थानान्युपदेश्यानि । उपदेश - सन्दर्भे गावः कुत्र वसन्ति ? इति प्रश्नः कार्यः । यदि 'गोष्ठे' इत्युत्तरं छात्रेभ्य आयाति, तर्हि सुष्ठु । यदि तु मार्गे वने इत्यादिकमुत्तरमायाति । तदा तु ते पुनर्बोधनीयाः - मार्गः वनम् इत्यादिकं तु नियतं स्थानं न । नियत-स्थान-विषयको हि मम प्रश्न इति । ततो गोष्ठे इति भणेयुः । तत्र युक्तम् इति वक्तव्यम् । एवं पक्षिणां स्थानं किम् ? मनुष्याणां स्थानं किम् ? देवतानां स्थानं किम् ?

इत्यादयः प्रश्नाः कार्याः । क्रमशः कुलायः, गृहम्, मन्दिरम्, इत्यादिषूत्तरेषु प्राप्तेषु शिक्षकैरग्रे पुनश्छात्रा उपदेश्याः । यथा-अयि वत्साः ? यथा पक्षिणां स्थानं कुलायः, मनुष्याणां स्थानं गृहम्, देवतानां स्थानं मन्दिरम् । एवम् अन्येषां येषां केषाञ्चनापि यथा स्वानि स्वानि स्थानानि भवन्ति तथा वर्णानामपि स्थानानि भवन्ति । तानि च स्थानानि मुखे भवन्ति । तत्र केषां वर्णानां किं किं स्थानमिति युष्मानहं शिक्षयामि सावधानं शृणुतेति । अथ क ख, प फ इति वर्णानुच्चारयतेति शिक्षकेणच्छात्रा वाच्याः । छात्रैस्तेषु वर्णेषूच्चारितेषु "कतमवर्णोच्चारणे मिलत ओष्ठौ, कतमवर्णोच्चारणे च न मिलत ओष्ठौ" इति मुहुर्मुहुस्तेषां वर्णानामुच्चारणं कारयन् पृच्छेत् स्मेरमुखः शिक्षकः । अत्र तु च्छात्रेभ्यः सत्यमेवोत्तरमायाति । ततस्ते वाच्याः- आम्, पकार-फकारोच्चारणे मिलत ओष्ठौ, ककार-खकारोच्चारणे तु न मिलतः । अतः पकार-फकारयोः स्थानमोष्ठौ, ककार-खकारयोस्तु ओष्ठौ नेति ज्ञायत इति । अथ ते पुनरग्रे वाच्याः ट ठ त थ एतान् वर्णानुच्चारयन्तो जिह्वाग्रभागः कुत्र कुत्र गच्छतीति विमृशतेति ।

अत्र प्रायश्छात्राः सत्यमेवोत्तरं दद्युः । अन्यथाऽपि ट ठ इत्युच्चारणे त थ इत्युच्चारणे च जिह्वाग्रभागो मुखस्य भिन्ने भिन्ने स्थाने गच्छतीति त्ववश्यं वदन्ति । ततः शिक्षकेण वाच्यम्-आम् ! ट ठ इति वर्णोच्चारणे जिह्वाग्रभागो मूर्धानं प्रति गच्छति । त थ इति वर्णोच्चारणे तु दन्तान् प्रति (दन्तमूलप्रदेशान् प्रति वा) गच्छति । अतष्टकार-ठकारयोः स्थानं मूर्धा तकार- थकारयोस्तु दन्ता दन्तमूलप्रदेशा वेत्यनुभूयते । यथा प फ ट ठ त थ वर्णानां स्थानानि गुरूपदेशं विना तेषामुच्चारणेनैव ज्ञातानि, तथैव सर्वेषामन्येषां वर्णानामपि यदि शुद्धमुच्चारणं स्यात् तदा तु तेषामप्युच्चारणेनैव गुरूपदेशं विना स्थानानि स्वयमेव ज्ञातानि भवेयुः । परन्तु महाभारत-युद्धोत्तरकालात् क्रमशो यथोत्तरं विकृतायां शिक्षापद्धतौ वर्णोच्चारण-परिपाटी च भ्रष्टा वर्तते । अतोऽद्यत्वे तु सर्वेषां वर्णानामुच्चारणमात्रेण स्थानानि निश्चेतुं न शक्यन्ते । तस्मात् प्रत्येकं वर्णानां स्थानान्युपदेश्यानि भवन्तीति तानि निर्दिश्यन्ते इत्यादि । अथ स्थानबोधनाय श्यामपाट्यामधोनिर्दिष्टक्रमेण वर्णा लेख्याः-

अननुनासिकः ह्रस्वः	अननुनासिकः दीर्घः	अनुनासिकः ह्रस्वः	अनुनासिकः दीर्घः	
इ	ई	इँ	ईँ	
उ	ऊ	उँ	ऊँ	
ऋ	ॠ	ऋँ	ॠँ	
लृ		लृँ		इति

अथ यथाऽत्र इकार उकार ऋकारश्च प्रत्येकं चतुर्विधाः प्रतीयन्ते, एवम् अकारोऽपि चतुर्विधः प्रतीयते न वेति च्छात्राः प्रष्टव्याः । तदा व्याकरणे प्रथमं प्रविविक्षवश्छात्रास्तु केचन ना ऽनुभूयत इत्युत्तरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दद्युः । ते च कतिविधोऽनुभूयते तर्हि ? इति पृच्छ्यमाना अ अँ इति द्विविधोऽनुभूयत इत्युत्तरं दद्युः । केचन च, अ अँ अ २ अँ २ इति रीत्या चतुर्विधः प्रतीयत इत्युत्तरं दद्युः । ततः शिक्षकेण यथा इकारश्चतुर्विधोऽनुभूतो युष्माभिः, उकारश्च ऋकारश्च चतुर्विध एवाऽनुभूतः प्रत्येकम् । तथैव अकारोऽपि चतुर्विध एव संभवति इति वदता श्यामपाट्यां निर्दिष्टानाम् इकारादीनामधः क्रमशः, अ आ अँ आँ इति लिखित्वा यथा 'इ' इत्यस्य दीर्घं स्वरूपम् ई भवति, 'उ' इत्यस्य दीर्घं स्वरूपम् 'ऊ' भवति, 'ऋ' इत्यस्य दीर्घं स्वरूपम् 'ॠ' भवति, तथैव अकारस्य दीर्घं स्वरूपम् 'आ' भवतीतिच्छात्रा बोधनीयाः । अथाऽग्रेऽपि पुनः शिक्षकेण वक्तव्यम् - अयि वत्साः ? यद्यपि अ इ उ ऋ वर्णाः, प्रत्येकं प्रायश्चतुर्विधा अनुभूयन्ते, तथापि वस्तुतस्तु ततो ऽप्यधिकाः प्रत्येकं ते ऽष्टादशविधा भवन्तीति विभावनीयमिति । अत्रोदात्तादिभेदास्तु नोपदेश्याः । केवलं संख्यैवोपदेश्या । चर्तुविध- भेदोऽपि स्थानोपदेशे अ इत्यनेन अँ आ आँ इत्येतेऽपि गृह्यन्त इति बोधनाय प्रदर्शितः । यदि तु स्थानोपदेशे, एव अ इत्यनेन अँ आ आँ इत्येतेऽपि ग्राह्या इत्युपदेशः सुकरोऽनुभूयते तदा तु पूर्वोक्तश्चतुर्विधवर्णभेदोपदेशो वास्तविकाष्टादशवर्णभेदसंख्योपदेशश्च साम्प्रतं न कार्यः ।

अथाऽधोनिर्दिष्टरूपेण उदितस्तद्बोध्या वर्णाश्च श्यामपाट्यां लेख्याः-

कु = क् ख् ग् घ् ङ्
चु = च् छ् ज् झ् ञ्
टु = ट् ठ् ड् ढ् ण्
तु= त् थ् द् ध् न्
पु = प् फ् ब् भ् म्

ततश्च कु इति निर्देशे क् ख् ग् घ् ङ् इति वर्णा ज्ञातव्या भवन्तीत्यादिरूपेण प्रत्येकमुदितः प्रत्येकमुदिद्-बोध्य-वर्णांश्च साङ्गुलिनिर्देशं दर्शयित्वा भावो बोधयितव्यः । यथा गणिते क=५ ख=७ इति सङ्केते शिक्षिते क × ख इति प्रश्नस्य ३५ इत्युत्तरमनायासेन निश्चीयते । इत्यादि-दृष्टान्तोऽपि प्रकृते भवत्युपयोगी । अत्र १-१-६८ अणु ... सूत्रचर्चा तु न कार्या, बोधभारापत्तेः । अथ शिक्षकेण "अ-कु-ह-विसर्जनीयानां कण्ठः" इत्यानुपूर्वी श्यामपाट्यां लिखित्वा पूर्वोक्त-प्रक्रियामुद्बोधयता साङ्गुलिनिर्देशं प्रत्येकमक्षराणि दर्शयता अ आ (अष्टादशानामकाराणाम्) क् ख् ग् घ् ङ् ह् इत्येतेषां वर्णानां विसर्गस्य च स्थानं कण्ठः, इति सम्यक् छात्रा बोधनीयाः । अनयैव रीत्या अन्येषामपि वर्णानां स्थानानि बोधयितव्यानि । तत्र विशेषः- इ-चु-य- शानां तालु" इत्यत्र त्रिविध (शषस) मध्ये कतमोऽत्र वर्ण इति पृच्छता निजाङ्गुल्या वर्णं दर्शयता शिक्षकेण तालव्य- शकार इत्युत्तरं छात्रेभ्य एव ग्राह्यम् । एवमग्रे षकार- सकारयोरपि विषये बोध्यम् । **अवधीयताम्** ञ-म-ङ-ण-नानां नासिका च इत्यत्र (नेपालीभाषायाम्) नासिका= नासिका स्थान जान्नु । च = चकार पढ्नाले आफ्ना आफ्ना वर्गको स्थान पनि जान्नु इत्यर्थ उपदिश्यते । स चोपदेशः पूर्वोक्तानां वर्णानां स्वस्व-वर्गानुकूलस्थानानि कथं गृह्यन्ते ? इति विशेषजिज्ञासावतामाकाङ्क्षा-शमनाय पठ्यमानस्य "चकारेण स्वस्ववर्गानुकूल - ताल्वादि गृह्यते" इति वाक्यस्याऽ नुवादः । स च कोमल-मतीनां बालानां भाराय भवति । अतः (नेपालीभाषायाम्) नासिका च = नासिका स्थान पनि जान्नू = नासिका स्थान पनि हो । इत्यर्थ उपदेश्यः । (हिन्दीभाषायाम्) नासिका च = नासिका स्थान भी है, इत्यर्थ उपदेश्यः । प्रसङ्गे ऽस्मिन् विचारो ऽयमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ संज्ञा ।

कादयो मावसानाः स्पर्शाः ।
यणोऽन्तःस्थाः ।
शल ऊष्माणः ।
अचः स्वराः ।

अथाऽऽभ्यन्तर- प्रयत्नाः ।
स्पृष्टं प्रयतनं स्पर्शानाम् ।
ईषत्स्पृष्टमन्तः स्थानाम् ॥
ईषद्विवृतमूष्मणाम् ।
विवृतं स्वराणाम् ।

प्रस्तूयते यत्, अ-कु-ह-...इत्यादिषु कण्ठः=कण्ठ .स्थान जान्नू इत्यर्थोपदेशापेक्षया कण्ठः=कण्ठ स्थान हो । इत्यर्थोपदेशः, तथैव कण्ठः=कण्ठ स्थान जान लेना चाहिए इत्यर्थोपदेशापेक्षया कण्ठः=कण्ठ-स्थान है इत्यर्थोपदेशः श्रेयान् स्यात् । एवम् तालु मूर्धा इत्यादिष्वपि बोध्यमिति । तथा च श्रूयते गुरुमुखात् ।

सँस्कृतैः प्राकृतैश्चैव देशभाषादिभिस्तथा । गद्यपद्याक्षरैश्चैव बोधयेत् स गुरुः स्मृतः॥ इति । "एदैतोः कण्ठतालु" इत्यत्र च कण्ठताल्विति एकं पृथक् स्थानमिति भ्रमो यथा न भवति, अर्थात् एकारस्य ऐकारस्य च द्वे द्वे स्थाने स्तः=कण्ठः, तालु चेति बोधो यथा भवति तथा शिक्षकेणच्छात्रा बोधयितव्याः । एवमोकारौकारयोर्वकारस्य च विषयेऽपि ज्ञेयम् ।

अन्ते वर्णानां स्थानानि छात्रा जानन्ति नवेति च्छात्राः परीक्षणीयाः । यदवधि सम्यङ् न बुध्यन्ते, तदवधि अभ्यासः कारयितव्यः । अथ ज्ञात-वर्णस्थानाश्छात्राः, प्रसङ्गेऽस्मिन् वर्णोच्चारणविषये ऽधोनिर्दिष्टरूपेणोपदेश्याः-अयि वत्साः , उक्तं पूर्वं वर्णोच्चारण - परिपाटी च भ्रष्टा वर्तत इति, तत्रापि विशेषेण श ष स वर्णानामुच्चारणे भेदः सर्वथा न प्रतीयते तथा -ब-व-वर्णयोरुच्चारणे च । अतः, च छ इत्युच्चारणे यथा जिह्वा ऽऽ कुञ्चिता भवति तथैव रीत्या तालव्यशकार उच्चारणीयः । ट ठ इत्युच्चारणे यथा जिह्वाग्रभाग उपरितो भुग्न इव प्रतीयते तयैव रीत्या मूर्धन्यषकार उच्चारणीयः । त थ इत्युच्चारणे जिह्वाग्रभागो यथा दन्तमूलप्रदेशं प्रति गच्छति तयैव रीत्या दन्त्य -सकार उच्चारणीयः । प फ इत्युच्चारणे यथा द्वावोष्ठौ सर्वथा मिलतस्तयैव रीत्या बकार उच्चारणीयः । वकारोच्चारणे तु ओष्ठौ ईषदेव मेलनीयौ । इत्थमन्येषां वर्णानामुच्चारणेऽ पि सावधानेन भाव्यम् । इत्थमुच्चारण - परिपाटी यथोत्तरं सुधारणीयेति । अथ वर्णानां सज्ञोपदेश्या ।

कादयो-स्थानोपदेशोत्तरं वर्णानां संज्ञोपदेश्या । यथा ब्राह्मण क्षत्रिय- वैश्य- शूद्र- भेदेन मनुष्याणां चतस्रो जातयो भवन्ति । तथैव वर्णानामपि चतस्रः संज्ञा भवन्ति । इति दृष्टान्त - प्रदर्शनपुरस्सरं वर्णानां संज्ञा एताश्छात्रेभ्यस्तथोपदेश्या यथाभ्यन्तरप्रयत्नोपदेशसमये 'स्पर्शानाम्' इत्यस्य कादिमावसानवर्णानामित्यर्थं छात्राः स्वयमेव बुध्येरन्, न तु पुनः, अर्थात् कादिमावसानवर्णानामित्युपदेशक्लेशःसोढव्यो भवेत् ।

स्पृष्टं- संज्ञोपदेशानन्तरमाभ्यन्तरप्रयत्न उपदेश्याः । उपदेशप्रक्रिया- अयि वत्साः ? यथा यस्मिन् कस्मिन्नपि कार्ये कर्तव्ये प्रयत्नो ऽपेक्ष्यते । गुरुभारोत्थापनाय प्रयत्नोऽ पि महानपेक्ष्यते । लघुवस्तूत्थापनं तु यद्यपि स्वल्पेनाऽ पि प्रयत्नेन संभवति, परन्तु प्रयत्नं विना तु किमपि साधयितुं न शक्यते । अत एवाऽस्वास्थ्यादिवशात् क्षीणशरीरो बोल्लितुमपि न शक्नोति । एतेनैतत् स्फुटं भवति यद् वर्णानामुच्चारणे प्रयत्नोऽपेक्ष्यत इति । प्रयत्नश्च द्विविधो भवति यथा शतं पदानि धावितुमिच्छुः कश्चिदपि जनो वेगेन धावन्, शतं पदानि गत्वा स्तम्भितुकामोऽप्यग्रे कानिचित् पदान्यगत्वा नोम्भितुं समर्थः । अर्थात् कानिचित् पदान्यग्रतो गच्छत्येव । तथैव प्रयत्नेन वर्णा उच्चार्यन्ते । वर्णोच्चार णानन्तरपमि प्रयत्नान्तरं भवत्येव । येन प्रयत्नेन वर्णा उच्चार्यन्ते, अर्थाद् वर्णोच्चारणादव्यवहितपूर्वं यः प्रयत्नो भवति स आभ्यन्तरप्रयत्न उच्यते । वर्णोच्चारणानन्तरभावी यः प्रयत्नः स बाह्यप्रयत्न उच्यते "वर्णाऽभिव्यक्त्यनन्तरभावी सावर्ण्याऽनुपयुक्त आन्तरतम्यपरीक्षोपयुक्तश्च कण्ठविवरादि- निष्ठ-विकासादेरास्य-बहिर्देशाऽवच्छिन्नकार्यस्य जनको यत्नो गुणशब्देनोच्यते (गुणश्च बाह्यप्रयत्नः, तथाहि) आनुनासिक्यमेषामधिको गुण इति भाष्येण तस्य बाह्यप्रयत्नत्वोक्त्या" इति "प्रकृष्टो यत्नः=आभ्यन्तरः, , तस्य वर्णोत्पत्त्यव्यवहित-प्राग्भावित्वरूप-प्रकर्षवत्वात्" इति च १-१-९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुल्यास्य...सूत्रे लघुशब्देन्दुशेखरे नागेशः । यद्यपि श्वासो नादस्तदुभयं च वर्णानां प्रकृतयः । तथा च ऋग्वेदप्रातिशाख्ये शिक्षापटलम्- "ता वर्णानां प्रकृतयो भवन्ति" इति । तथापि प्रकृताऽनुपयोगित्वान्न तथाऽत्र विवक्षा । (नागेशमतादेतदवधि केवलं शिक्षकेण मननीयं न तु च्छात्रेभ्य उपदेश्यम्) तत्र बाह्यप्रयत्नाः १-१-४९ स्थाने... सूत्रे पश्चादुपदेक्ष्यन्ते । साम्प्रतमाभ्यन्तरप्रयत्नानुपदिशामि, सावधानं शृणुतेति वदता शिक्षकेणच्छात्राः सावधानाः कार्याः । ततो मूलोक्ताः पङ्क्तीर्दर्शयित्वा के स्पर्शाः ? का अन्तः स्थाः ? के ऊष्माणः ? के स्वराः ? इति शिक्षकेण पृष्टाश्छात्रा यदि यथार्थमुत्तरं दद्युस्तदा सुष्ठु । यदि तु नोत्तरमागतं तदा तु शिक्षकेण "कादयो मावसानाः स्पर्शाः " इत्यादि पूर्वमुपदिष्टं पुनरुद्बोधयितव्यम् । तत आभ्यन्तरप्रयत्नाः सम्यक् शिक्षणीयाः । अत्र सिंहावलोकनन्यायेन प्रत्याहारेषु स्थानेष्वाभ्यन्तरप्रयत्नेषु चच्छात्राः परीक्षणीयाः । यदवधि प्रश्नान् यथार्थं न समादध्युस्तदवधि पाठोऽग्रे न वर्धनीयः । सम्यगवगत-प्रत्याहार-स्थानाऽऽभ्यन्तरप्रयत्नेभ्य एवच्छात्रेभ्योऽग्रिम-पाठ उपदेश्यः । अथ १-१-१ वृद्धि"... सूत्रं निगदरूपेणोपदेश्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रथमाऽध्याये

प्रथमः पादः

१-१-१ **वृद्धि**रादैच् ॥३
१-१-२ अदेङ् **गुणः** ॥३
१-१-३ **इको गुणवृद्धी** ॥६
१-१-४ **न** धातुलोप आर्धधातुके ॥६
पोपुवः । लोलुवः ।
१-१-५ क्क्ङिति च ॥
जिष्णुः । चितः । जुहुतः ।

१-१-१ वृद्धि-आभ्यन्तरप्रयत्नोपदेशानन्तरं सूत्रमिदं मङ्गलार्थं निगदरूपेणोपदिश्य १-१-२ अदेङ्.... सूत्रमपि मङ्गलार्थं निगदरूपेणैवोपदेश्यम् । एतत्-सूत्रार्थस्तु १-१-५० उरण् .... सूत्राऽनन्तरं शिक्षणीयः । तथाहि-आत्=आकारः=आ र, ऐच् च (ऐच्प्रत्याहारे के के वर्णाः सन्तीतिच्छात्राः प्रष्टव्याः) =ऐ औ इति वर्णावपि=ऐ औ पनि, वृद्धिः=वृद्धिसंज्ञका भवन्ति=वृद्धि हुन् । अर्थाद् वृद्धिरित्युक्तौ आ ऐ औ वर्णा ग्राह्या भवन्तीति सम्यग् बोधनीयम् । अथ ६-१-८५ वृद्धिरेचि - सूत्रं पाठचम् ।

१-१-२ अदेङ्-१-१-१ वृद्धि... सूत्रस्य निगदरूपेणोपदेशानन्तरं सूत्रमिदमपि मङ्गलार्थं निगदरूपेणैवोपदिश्य १-१-९ तुल्या...सूत्रमुपदेश्यम् । एतत्सूत्रार्थस्तु ६-१-७४ इको... सूत्रानन्तरं शिक्षणीयः । तथाहि- अत्= अकारः=अ र, एङ्=एङ् च (एङ्प्रत्याहारे के के वर्णाः सन्तीतिच्छात्राः प्रष्टव्याः)=ए ओ पनि, गुणः=गुणसंज्ञका भवन्ति=गुण हुन् । अर्थाद् गुण इत्युक्तौ अ ए ओ वर्णा ग्राह्या भवन्तीति सम्यग् बोधनीयम् । अथ ६-१-८४ आद् गुणः सूत्रं पाठचम् ।

१-१-३ इको- ७-३-८४ सार्व... सूत्रोपदेशसन्दर्भे सूत्रमिदं पाठचम् । गुणवृद्धी=गुणो वृद्धिश्च, इकः = इकः स्थाने भवतः । इत्यर्थो बालोपलालनाऽनुसारेणोपदेश्यः । (द्वितीयावृत्तौ तु यथासूत्राऽभिप्रेतमर्थ उपदेश्यः । तथा हि - गुणवृद्धी=यत्र गुणशब्दमुच्चार्य गुणो विधीयते वृद्धिशब्दमुच्चार्य च वृद्धिर्विधीयते, तत्र, इकः = इक इति षष्ठ्यन्तं पदमुपतिष्ठते । इति । पूर्वसूत्राभ्यां गुणवृद्धिशब्दानुवृत्त्यैवेष्टसिद्धौ पुनर्गुणवृद्धिग्रहणसामर्थ्यादुक्तार्थलाभः । तेन ७-२-१०२ त्यदा... ७-१-८५ पथि... इत्यादौ न दोषः) अथ ७-३-८४ सार्व... सूत्रार्थ उपदेश्यः ।

१-१-४ न धा - धातुलोपे=धात्ववयवलोपनिमित्ते, आर्धधातुके = आर्धधातुके परे, न = इकः स्थाने जायमाने गुणवृद्धी न भवतः । यथा 'दग्धं पटं न परिधेहि' इत्युक्तौ भस्मनः परिधानाऽसम्भवेन निषेधाऽसङ्गत्या दग्धशब्दो दग्धावयवपर इति गम्यते, तथैव धातोर्लोपे तत्स्थाने गुणवृद्धिप्रसङ्गा ऽसम्भवेन निषेधा ऽसङ्गत्या धातुशब्दोऽत्र धात्ववयवपरो बोध्यः । धातुम्= धात्ववयवम्, लोपयतीति धातुलोपम् = धात्ववयवलोपनिमित्तम् । उदाहरणयोः पूञ् (१४८१) लूञ् (१४८२) धातुभ्यां यङन्ताभ्याम् ३-१-१३४ नन्दि...इत्यचि २-४-७४ यङो... इति यङो लुकि ७-३-८४ सार्व...इति प्राप्तस्य गुणस्य प्रकृतसूत्रेण निषेधे ६-४-७७ अचि...इत्युवँङि स्वादिकार्यम् ।

१-१-५ क्क्ङिति- ८-४-५३ अभ्यासे चर्च... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र

(क) (ख) (ग)

श्यामपाटीप्रयोगो यथा - १-१-३ इको गुणवृद्धी । १-१-४ न धातुलोप आर्धधातुके ॥ १-१-५ क्क्ङिति च (क) (ख) (ग) ॥ इति । अत्र सूत्रे ग् क् ङ् इत् इत्यत्र सन्धौ क्क्ङित् । ततः सप्तम्येकवचने क्क्ङिति इति रूपं सिध्यति, इति शिक्षकेणच्छात्रा बोधयितव्याः । अथ शिक्षकश्छात्राणामाकूतमवगच्छन् सति संभवे सप्तम्यर्थो निमित्तमित्युपदिशेत् । तथा च सूत्रार्थः फलति- क्क्ङिति =गित् किन् ङिन्निमित्ते = गिन्निमित्तिके किन्निमित्तिके ङिन्निमित्तिके च, (क)=इकः= इकः स्थाने जायमाने, (ख) गुणवृद्धी = गुणो वृद्धिश्च, (ग) = न=न भवतः । इति । प्रकृते ङिन्निमित्तको गुणः संभाव्यमान इति स न भवति । जुहुतः । एवं जुहुथः । जुहुथ । जुहुवः । जुहुमः । झिप्रत्यये तु जुहु+झि इति श्यामपाटचां लिखित्वा ६-१-५ उभे... सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-६ दीधीवेवीटाम् ॥ दीध्यनम् । दीध्यकः । वेव्यनम् । वेव्यकः । पठिता । १-१-७ हलोऽनन्तराः संयोगः ॥	१-१-८ मुखनासिकावचनोऽनुनासिकः ॥ १-१-९ तुल्यास्यप्रयत्नं सवर्णम् ॥१०

१-१-६ दीधी - दीधीवेवीटाम् = दीधीवेवीधात्वोरिडागमस्य च स्थाने, न (१-१-४)।
१-१-७ हलो- १-१-५३ आदेः ... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अनन्तराः = स्वैरव्यवहिताः, हलः= हल्वर्णाः, संयोगः = संयोगसंज्ञका भवन्ति । इत्यर्थोपदेशप्रसङ्गे व्यवधानं सर्वत्र विजातीयैरेव भवतीत्यधोनिर्दिष्ट - दृष्टान्त-द्वारा विशदयेत् । यथा - यत्र गावश्चरन्ति, तत्र यद्यपि गवां मध्ये गवान्तराणि सन्ति । तथापि गावो गोभिर्व्यवहिताः सन्तीति व्यवहारो न भवति । यत्र तु मध्ये महिष्योऽपि चरन्ति तत्र गावो महिषीभिर्व्यवहिताः सन्तीति व्यवहारो भवति । प्रकृते च हल्वर्णेभ्यो विजातीयाः स्वरवर्णा भवन्ति, अतः अनन्तरा इत्यस्य स्वैरव्यवहिता इत्यर्थः फलतीति । प्रकृतसूत्रद्वारा ' न्स्' इति ' संयोग' इति जानीतेति बोधयित्वा युष्मान्स् इति समुदायः, अस्मान्स् इति समुदायश्च पदमित्युद्बोध्य श्यामपाटचां युष्मान्स् अस्मान्स् इति लिखित्वा ८-२-२३ संयोगान्त... सूत्रं प्रस्तुवीयात् ।
१-१-८ मुख - ८-४-२ अट्कु... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । एतत्सूत्रार्थबोधनसन्दर्भे द्विविधा अचो यवलाश्च । एकविधा एव नासिक्य (ङ् ञ् ण् न् म्) वर्णा इति च्छात्राः सम्यग् बोधयितव्याः । यथा अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ ऌँ एँ ऐँ ओँ औँ य् व् ल् यँ वँ लँ ङ् ञ् ण् न् म् इति । अथ ८-४-४४ यरो... सूत्रमुपदेश्यम् ।
१-१-९ तुल्या- १-१-२ अदेङ्... सूत्रस्य निगदरूपेणोपदेशानन्तरं सूत्रमिदं पाठ्यम् । प्रथमं तावत् प्रकृतसूत्रार्थमुपदिदिक्षुणा शिक्षकेण येषां वर्णानां स्थानानि आभ्यन्तरप्रयत्नाश्च समानानि, अर्थात् स्थानमेकम् आभ्यन्तरप्रयत्नश्चैक एव, ते वर्णाः सवर्णा भवन्तीति भावं छात्रा बोधयितव्याः । छात्रेषु भावमवगच्छत्सु विषयममुमेवोपदिशति भगवान् पाणिनिरिति वर्णयता शिक्षकेण श्यामपाट्याम् १-१-९ अङ्कान् दर्शयता सूत्रमिदमष्टाध्याय्यां पश्यतेतिच्छात्रा आदेश्याः ।
विशेषः - सूत्रार्थाऽभ्यासः सूत्रपाठो वाऽष्टाध्यायीपुस्तकमवलोक्यैव कार्यः । सति तथा ऽध्यायसंख्या पादसंख्या सूत्रसंख्या च स्फुटं बोधगोचरीभवन्ति । सूत्रमेतत् पृष्ठेऽस्मिन् वर्तत इति सँस्कारो दृढो भवति । अतोऽभ्यासार्थं सूत्रमन्यत्र कर्गलादौ न लेख्यम् । ह्रस्व-दीर्घादि- शुद्धलेखाय तु सूत्राणि लेख्यान्येव । किन्तु तत्कार्यमपि पुस्तकं दृष्ट्वैव नाऽन्यथेति विभाव्यम् । अष्टाध्यायीमदृष्ट्वा पृथक् पुस्तके मुद्रितानि वा कर्गलादौ लिखितानि प्रयोगाऽपेक्षितानि विभिन्नाऽध्याय-पाद- संख्याकानि तिल-तण्डुलवन्मिश्रितानि सूत्राणि न कदाचिदप्यभ्यसनीयानि । अष्टाध्यायीक्रमं विना कृतः सूत्राभ्यासो महते दोषाय भवति । अष्टाध्यायीक्रमं विना कृतः सूत्राऽभ्यासः खलूषरोप्तं बीजमिव भवति । यतः, ८-२-१ पूर्व... १-४-२ विप्र... ६-४-२२ असि... इत्यादीन्यष्टाध्यायी-सञ्चालकानि यानि सूत्राणि सन्ति तानि खलु क्रममाश्रित्यैव सञ्चालयन्ति । न्यूनतममपि व्याकरणस्य तुरीयमंशं सन्निवेशक्रममात्रेण बोधयति भगवान् सूत्रकारः पूर्वोक्तादिसूत्रैरनुवृत्त्या च ।

सावधानम्

परन्तु १-१-१ वृद्धि... सूत्रात् क्रमशः सूत्रार्थाभ्यासः कार्यः सोदाहरणमिति तु न प्रमदितव्यम् । तथा सति १-१-४ न धा... सूत्रस्योदाहरणमेव बोधयितुं न शक्येतेति प्रतिपादितमेव पूर्वम् । किन्तु शिक्षकेणच्छात्राणामाकाङ्क्षां ग्रहणशक्तिं च विचार्य तदनुसारेण सूत्रं वृत्वा तत्सूत्रार्थः सोदाहरणमष्टाध्याय्यामभ्यासनीयः । तथा सति सूत्र-पौर्वापर्यमनुवृत्तिमपिच्छात्राः सलीलं बुध्यन्ते । पूर्वपर-सन्निवेश-सँस्कार-दाढर्याय पारायणमष्टाध्याय्यामेव कार्यम् । अत एव भाष्यमपि सूत्रसन्निवेशक्रमानुसारि वर्तते । काशिकादयः प्राचीना व्याख्यानग्रन्थाश्च सूत्रसन्निवेशक्रमाऽनुसारिण एव वर्तन्ते । यद्यपि रामचन्द्र-भट्टोजिदीक्षित- वरदराजाचार्यैः प्रयोगानुसारि- सूत्र-संनिवेशः कृतः । तथापि प्रयोगोपदेशे क्रमश इमानि सूत्राणि वृत्यानीत्येव तात्पर्यं तत्र भवतां तथा लिपिबन्धे । न त्वष्टाध्यायीं मुक्त्वा प्रयोगानुसारि-सूत्रसन्निवेशक्रमेण सूत्र- तद्वृत्तिघोषणे । अत एव १-३-३ हल... सूत्रे सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्रेति वरदराजाचार्य उपदिष्टवान् । परन्तु कालक्रमेण प्रयोगापेक्ष्याणां शिक्षक-वृत्यानां सूत्राणां सानुवृत्तिबोधमुपदेशविधिमुपेक्ष्य प्रयोगानुसारि-सूत्रसरणिं तत्तत्सूत्रवृत्तिघोषणं च समाद्रियमाणेषु विद्वत्सु क्रमशो यथोत्तरं व्याकरण-शिक्षण-विधौ विकृतिरागता । अतः पुनः शिक्षकैरध्यापनानुभवपुरस्सरं तां विकृतिमुदस्य प्राचीना शुद्धा स्वच्छा शैली जागरयितव्येति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्)

अन्वाख्यानं व्याकरणम्

प्रसङ्गेऽस्मिन्नेतदत्यन्तं गम्भीरं विभावनीयं यद्, अद्यत्वे प्रायो धारणा वर्तते जनानाम् व्याकरणाध्ययनं विना सँस्कृतभाषायां व्यवहर्तुं न शक्यत इति । अतः प्रथमं व्याकरणमध्येयमिति कोमलमतयो बालका नियोज्यन्ते । तस्यैव दुष्परिणामोऽयं वर्तते साम्प्रतं यत्, केचन सँस्कृतं कठिनमिति प्रवेशादेवोद्विजन्ते । केचन प्रविविक्षवो ऽपि हतोत्साहा भवन्ति । केचन महत् काठिन्यमनुभवन्तः पठन्तोऽपि सँस्कृतभाषायां व्यवहर्तुं न शक्नुवन्ति । स एष दोषः शब्दानामन्वाख्यानं व्याकरणमिति पूर्वाचार्योपदेशं विस्मृत्य लौकिकभाषायां व्यवहरतां विदुषामेव । अतः प्रथमं सरलान्यल्पानि वाक्यानि प्रयुञ्जानैः शिक्षकैः, छात्रैः सह सँस्कृतभाषायां व्यवहारः कार्यः । यथा-पुस्तकम् कुत्र अस्ति । तव पिता कुत्र अस्ति । घटे जलम् अस्ति । न अस्ति=नास्ति । अत्र अस्ति=अत्रास्ति । इत्यादि । व्यवहाराऽपेक्ष्याणां वस्तूनां बोधनाय सर्वदैकमेव पदं प्रयोज्यं न तु पर्यायपदम् । अत एवोपदिशति भगवान् जैमिनिः- “अन्याय्योऽनेकशब्दत्वम्” इति । इत्यादि-रीत्या व्याकरणाऽध्ययनात् पूर्वमेव यथा छात्राः सँस्कृतभाषायां व्यवहर्तुं शक्नुयुस्तथा शिक्षणीयम् । अनया रीत्या छात्राः खलु षड्भिरेव मासैः सँस्कृतभाषायां व्यवहर्तुं क्षमा भवन्ति । न कश्चिदत्र सन्देहः । सोऽयं विषयोऽनुसन्धात्रा प्रकृतलेखकेन सफलपरीक्षणेनाऽनुभूतः । तदिदं परीक्षणं प्रायः सर्वे नेपालीया विद्वांसोऽपि जानन्ति । प्रकृतमनुसरामः । अथ श्यामपाटयाम् १-१-९ अङ्कान् दृष्ट्वा छात्रेषु “तुल्यास्यप्रयत्नं सवर्णम्” इत्युच्चारयत्सु शिक्षकेण तदेव सूत्रं श्यामपाटयामपि लेख्यम् । अथाऽधोनिर्दिष्टरूपेण सूत्रार्थो बोधनीयः । वत्साः ? पश्यत-यथा अत्र + आगच्छ= अत्रागच्छ । अत्र + आस्ते= अत्रास्ते । तथैव तुल्य+आस्य=तुल्यास्य । इति । अथ, आस्यम् = मुखम् । अत्र आस्यशब्देन आस्य (मुख)-स्थानि ताल्वादिस्थानानि गृह्यन्ते । प्रयत्नशब्देन चाऽऽभ्यन्तरप्रयत्नो गृह्यते । अतः सूत्रार्थो भवति-तुल्यास्यप्रयत्नम् (नेपालीभाषायाम्)= स्थान र आभ्यन्तरप्रयत्न एउटै हुने अक्षर, सवर्णम्=सवर्ण हो । (हिन्दीभाषायाम्) स्थान और आभ्यन्तर प्रयत्न एक ही होने वाला अक्षर, सवर्णम्=सवर्ण है । सवर्णम्=“सवर्णसंज्ञक” इति न वाच्यम्, बहुव्रीहिसमासगम्यविषयस्य दुर्बोधत्वात् । अथ. ऋ लृ... इति वार्तिकमुपदेश्यम् ।

ऋलृ-१-१-९ तुल्या... सूत्रानन्तरमिदं वार्तिकं पाठयम् । अत्र वार्तिकार्थमुपदिशता शिक्षकेण सूत्रे विद्यमानेऽपि वार्तिकोद्भव - प्रयोजनं स्फुटं प्रकाशनीयम् । **आवर्तनमध्ययनसमयश्च ।**

अत्र सिंहावलोकनन्यायेन प्रत्याहारस्थाना ऽभ्यन्तरप्रयत्न-सवर्ण-विषये छात्राः परीक्षणीयाः । तथा प्रतिदिनमधीता विषयाः पुनरावर्तनीया इतिच्छात्राः प्रतिदिनमुपदेश्याः । व्याकरणाऽध्ययने च प्रतिदिनं होरा (घण्टा) मितःसमय उपयोज्यः ।

न तु ततो ऽधिकः । दुर्भर- बोध-भारापत्ते : । विषयान्तर- ज्ञानसम्पत्त्यभावेन कूपमण्डूकतापत्तेश्च । सँस्कृतभाषायां व्यवहरन्तः प्रतिदिनं होरामित-समये व्याकरणं, समयान्तरे च विषयान्तराण्यभ्यस्यन्तो युवानः सार्धवर्षेण व्याकरण-सामान्यप्रक्रियांशं सलीलं शिक्षमाणाः क्रमशोऽष्टाध्यायीग्रन्थपठने ऽधिकारिणो भवन्ति विषयान्तराणि चाऽवगच्छन्ति ।

सन्धि-शिक्षण-रीतिः

वर्णसमाम्नाय- क्रमानुसारेण प्रथममच्सन्धि-शिक्षणं समुचितमित्यापाततः प्रतिभाति । वस्तुतस्तु स-व्यञ्जनानां स्वराणां लिप्यां पृथक् पृथक् स्वरव्यञ्जन-स्वरूपाणि न प्रतीयन्ते । व्यञ्जनमात्रस्य तु लिप्यां स्वरूपं स्फुटं भवति । अतः प्रथमं हल् - सन्धि-शिक्षणमेवोचितम् । यद्यपि वर्णविच्छेद-प्रक्रियायां ज्ञातायां प्रथममेवाऽच्सन्धि-शिक्षणेऽपि न स्याद् दोषस्तथापि तत्पक्षेऽपि बालानां स्थूलदृशां च स्फुटप्रतिपत्तये प्रथमं हल्सन्धि-शिक्षणमेवोचितम् । अत इतः परम् ८-४-३९ स्तोःश्चु... सूत्रं पाठयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-१० नाऽऽज्झलौ ॥
१-१-११ **ईदूदेद्** द्विवचनं **प्रगृह्यम्** ॥१२, १८
हरी एतौ । मुनी उपदिशतः ।
विष्णू इमौ । शिशू आगच्छतः ।
गङ्गे अमू । कन्यके उद्याने क्रीडतः ।
१-१-१२ अदसो मात् ॥
अमी ईशाः । रामकृष्णावमू आसाते ।
१-१-१३ शे ॥
अस्मे इन्द्राबृहस्पती ।
१-१-१४ **निपात** एकाजनाङ् ॥१५
इ इन्द्रः । उ उमेशः । आ एवं नु
मन्यसे । आ एवं किल तत् ।
ईषदर्थे क्रियायोगे मर्यादा ऽभिविधौ च यः ।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित् ॥
ईषदुष्णम्=ओष्णम् ।
आ+इतः=एतः । आ+उद्यानात्
=ओद्यानात् । आ+उदकान्तात्
=ओदकान्तात् ।
१-१-१५ **ओत्** ॥१६
अहो अष्टाध्यायीसूत्रसंनिवेशः ।
१-१-१६सम्बुद्धौ शाकल्यस्येतावनार्षे ॥द्वि॰१७
विष्णो इति, विष्ण इति, विष्णविति ।
प्र. १-१-१७ उञः ॥ द्वि. १७
उ इति, विति ।
द्वि. १-१-१७ ऊँ ॥
ऊँ इति ।
१-१-१८ ईदूतौ च सप्तम्यर्थे ॥
सोमो गौरी अधिश्रितः ।
मामकी तनू इति । अर्थग्रहणाद्
वृत्तावर्थान्तरोपसंक्रान्तौ न भवति । वाप्यश्वः ।

१-१-१० नाऽऽज्झ-आज्झलौ=आकारसहितोऽच् हल् च, न =सवर्णौ न भवतः। ऊष्मणामपि विवृतमिति मते ऽकारहकारादीनामपि प्राप्तायाः सवर्णसंज्ञायाः प्रतिषेधार्थमिदम् । ईषद्विवृतमिति मते त्वदृष्टार्थं बोध्यम् ।

१-१-११ ईदूदेत्=ईदूदेदन्तम्=दीर्घ ई दीर्घ ऊ ए अन्त्यमा हुने, द्विवचनम्= द्विवचन प्रगृह्यम्= प्रगृह्यसंज्ञकं भवति ।

१-१-१२ अदसः=अदश्शब्दावयवात्, मात्=मकारात् परम्, ईदूत् (१-१-११)=दीर्घेकारदीर्घोकारौ, प्रगृह्यम् (ह्यौ) (१-१-११) ।एत् इति तु नानुवर्तते ।अदश्शब्दावयवमकारात् परत एकारस्याऽसम्भवात् ।

१-१-१३ शे=शे इति, प्रगृह्यम् (१-१-११) । उदाहरणे ७-१-३९ सुँपां... इति भ्यसः शे ।

१-१-१४ निपा-अनाङ्=ङिदाकारभिन्नः, एकाच्=एकाज्रूपः, निपातः=निपातसंज्ञको वर्णः, प्रगृह्यम् (१-१-११) । १-४-५७ चाद...सूत्रं दृश्यम् । **ईषदर्थे**, क्रियायोगे मर्यादायाम् अभिविधौ च वर्तमानः, यः= य आकारः, एतम्, आतम्=आकारम्, ङितं विद्यात्=ङितं जानीयत् । वाक्यस्मरणयोः=पूर्वोपक्रान्त - वाक्यार्थाऽनभिमतत्वस्य स्मरणरूपार्थस्य च द्योतक आकारः, अङित्=ङिद्भिन्नो वोध्यः ।

१-१-१५ ओत्=ओकारान्तः, निपातः (१-१-१४) प्रगृह्यम् (१-१-११) । १-१-७१ येन.... इति तदन्तविधिना ओत्= ओकारान्त इति ।

१-१-१६ सम्बुद्धौ=सम्वुद्धिनिमित्तकः (निमित्तं सप्तम्यर्थः), ओत् (१-१-१५)=ओकारः (नाऽत्र तदन्तविधिः, विशेष्याऽसन्निधानात्) प्रगृह्यम् (१-१-११) अनार्षे=वैदिकभिन्ने, इतौ=इति शव्दे परे, शाकल्यस्य= शाकल्यमुनेर्मते । अन्येषां मते ६-१-७५ एचो... इत्यवादेशः । तत्रापि ८-३-१९ लोपः... सूत्रेण शाकल्यमते वकारलोपः । अन्येषां मते तु वकारः श्रूयत एव ।

प्र. १-१-१७ उञः=उञ् इति निपातस्य, प्रगृह्यम् (१-१-११) अनार्षे+इतौ+शाकल्यस्य (१-१-१६) ।

द्वि. १-१-१७ ऊँ- उञः (प्र. १-१-१७)=ऊँञ् इति निपातस्य स्थाने, ऊँ = दीर्घो ऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो भवति, अनार्षे+इतौ+शाकल्यस्य (१-१-१६) ।

१-१-१८ इदू-सप्तम्यर्थे=सप्तम्यर्थे पर्यवसन्नम्, ईदूतौ=ईदूदन्तं शव्दस्वरूपम्, प्रगृह्यम् (१-१-११) । ईदूतौ सप्तमी इति न्यासे ईदूदन्तं सप्तम्यन्तमित्यर्थे सिद्धेऽपि क्रियमाणमर्थग्रहणं पर्यवसन्नमित्यर्थं गमयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-१९ दाधा घ्वदाप् ॥
प्रणिददाति । प्रणिदधाति ।
प्रणिद्यति । प्रणिधयति ।

१-१-२० आद्यन्तवदेकस्मिन् ॥
आभ्याम् ।

१-१-२१ तरप्तमपौ घः॥
ब्राह्मणितरा । ब्राह्मणितमा ।

१-१-२२ बहुगणवतुँडति **संख्या** ॥२४
बहुतिथः । गणतिथः । तावतिथः । कति ।

१-१-२३ ष्णान्ता **षट्** ॥२४
षट्, षड् । पञ्च ।

१-१-२४ डति च ॥
कति ।

१-१-२५ क्तक्तवतूँ निष्ठा ॥

१-१-२६ **सर्वादीनि सर्वनामानि** ॥३१, ३५
(संज्ञोपसर्जन-प्रतिषेधः)
सर्व इति कस्यचिन्नाम । तस्मै
सर्वाय । अतिक्रान्तः सर्वान् = अतिसर्वः ।
तस्मै अतिसर्वाय ।
(अन्तरमिति गणसूत्रे-'अपुरि' इति वक्तव्यम्)
अन्तरायां पुरि ।

न चाऽर्थग्रहणाऽभावे संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेरभावस्य सुप्तिङन्तं पदमित्यत्रान्तग्रहणेन ज्ञापितत्वेन ईकारोकाररूपा सप्तमी इत्येवार्थो लभ्येतेति वाच्यम्, ईदूतौ सप्तमी प्रगृह्यम्, अदसः, एच्च द्विवचनम्, इति लघीयसा न्यासेन सिद्धे गुरुन्यासकरणसामर्थ्यादूकारांशे सप्तमीरूपत्वाऽसम्भवाच्च तदन्तविधिलाभात् ।

१-१-१९ **दाधा**= दा-धा-धातू तत्प्रकृतयश्च, घु=घुसंज्ञका भवन्ति, अदाप् =दाप्दैपौ विना ।

१-१-२० **आद्य**-एकस्मिन्=असहाये, आद्यन्तवत्= आदाविवान्त इव च कार्यं भवति ।

१-१-२१ **तरप्तमपौ**= तरप्-तमप्-प्रत्ययौ, घः=घसंज्ञौ भवतः । उदाहरणयोः – ६-३-४३ घरूप... इति ह्रस्वः ।

१-१-२२ **बहु**...डति= बहुगणशब्दौ वतुँप्रत्ययान्तडतिप्रत्ययान्ताश्च शब्दाः, संख्या=संख्यासंज्ञका भवन्ति । उदाहरणणेष्वाद्येषु त्रिषु ५-२-४८ तस्य... इति डट् । अन्त्ये १-१-२४ डति च - इति षट् ७-१-२२ षड्भ्यो... इति जश्शसोर्लुक् ।

१-१-२३ **ष्णान्ता**- ७-१-५५ षट्च... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र
(क)
श्यामपाटीप्रयोगो यथा- १-१-२२ बहु-गण-वतुँ-डति संख्या ॥ १-१-२३ ष्णान्ता (क) षट् ॥ इति । ष्णान्ता=षकारान्तो नकारान्तश्च, (क) =संख्या=संख्यावाची शब्दः, षट्= षट्संज्ञको भवति । पञ्चन् इत्यत्र च्छात्रैः समन्वयं कारयित्वा जश्प्रत्यये शस्प्रत्यये वा कृते पञ्चन् अस् इति श्यामपाटचां लिखित्वा ७-१-२२ षड्भ्यो... सूत्रं प्रस्तुत्यम् ।

१-१-२४ **डति** = डत्यन्तः, संख्या (१-१-२२) = संख्यावाची शब्दः, षट् (१-१-२३) । उदाहरणे प्रक्रिया १-१-२२ सूत्रे दृश्या

१-१-२५ **क्तक्त**-३-२-७६ क्विँप् च सूत्रानन्तरं सूत्रमिदं पाठचम् । क्तक्तवतूँ=क्त प्रत्ययः क्तवतुँप्रत्ययश्च, निष्ठा=निष्ठासंज्ञकौ भवतः (निष्ठा-इत्युच्येते) । इत्यर्थमुपदिश्य निष्ठापदार्थं सम्यग् बोधयित्वा ३-२-१०२ निष्ठा-सूत्रमुपदिशेत् ।

१-१-२६ **सर्वा**- ६-४-१३ सौ च -सूत्रानन्तरं सूत्रमिदं पाठचम् । (सर्वादिगणपाठं दर्शयन्) सर्वादीनि=सर्वादि-शब्दस्वरूपाणि सर्वाद्यन्त-शब्द-स्वरूपाणि च, सर्वनामानि =सर्वनामसंज्ञकानि भवन्ति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । अथ जस् प्रत्यये कृते सर्व+अस् इति श्यामपाटचां लिखित्वा ६-१-९८ प्रथमयोः... सूत्र-समन्वयावधिच्छात्रैः साधयित्वा बाधयित्वा च ७-१-१७ जशः शी- सूत्रं प्रस्तुवीयात् । **संज्ञो... षेधः**= संज्ञोपसर्जनयोः सर्वादिगणे पाठप्रतिषेधो वक्तव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-२७ विभाषा दिक्समासे बहुव्रीहौ ॥ २८

उत्तरपूर्वस्यै, उत्तरपूर्वायै ।

१-१-२८ न बहुव्रीहौ ॥३०

त्वकं पिता यस्य त्वत्कपितृकः ।
अहकं पिता यस्य मत्कपितृकः ।
भाष्यकारस्तु त्वकत्पितृको मकत्पितृक इत्येव भविव्य-मित्युपदिशन् सूत्रमिदं प्रत्याचष्टे ।

१-१-२९ तृतीयासमासे ॥

मासपूर्वाय । मासेन पूर्वाय ।

१-१-३० द्वन्द्वे च ३१

वर्णाश्रमेतराणाम् ।

१-१-३१ विभाषा जसि ॥३५

वर्णाश्रमेतरे, वर्णाश्रमेतराः ।

१-१-३२ प्रथमचरमतयाल्पार्ध कतिपयनेमाश्च ॥

प्रथमे, प्रथमाः । चरमे, चरमाः । द्वितये, द्वितयाः । उभयशब्दस्य तु १-१-२६ सर्वा... इति नित्यं संज्ञा ।
विभक्तिनिरपेक्षत्वेनाऽन्तरङ्गत्वात् । उभये ।
अल्पे, अल्पाः । अर्धे, अर्धाः । कतिपये, कतिपयाः । नेमे, नेमाः ।

१-१-३३ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ॥

पूर्वे, पूर्वाः ।

१-१-३४स्वमज्ञातिधनाख्यायाम् ॥

स्वे, स्वाः । आत्मीया आत्मान इति वा ।
ज्ञातिधनवाचिनस्तु स्वाः ।
ज्ञातयोऽर्था वा ।

१-१-३५ अन्तरं बहिर्योगोपसंव्यानयोः ॥

अन्तरे, अन्तरा वा गृहाः ।
बाह्या इत्यर्थः ।
अन्तरे, अन्तरा वा शाटकाः । परिधानीया इत्यर्थः ।
(तीयस्य ङित्सु वा)
द्वितीयस्मै, द्वितीयाय ।

१-१-२७ विभा-दिक्... व्रीहौ= २-२-२६ दिङ्नामान्यन्तराले इति सूत्रेण विहिते बहुव्रीहिसमासे, विभाषा=विकल्पेन सर्वनामसंज्ञा भवति ।

१-१-२८ न ब -बहुव्रीहौ = बहुव्रीह्यर्थे अलौकिके विग्रहवाक्ये, न = सर्वनामसंज्ञा न भवति । सूत्रे विषयत्वं सप्तम्यर्थः ।

१-१-२९ तृतीयासमासे=तृतीयासमासे तृतीयासमासार्थवाक्येऽ पि, न (१-१-२८) । १-१-२७ विभा... सूत्रात् समासे इत्यनुवृत्त्यैव सिद्धे पुनः समासग्रहणं समासार्थवाक्यस्यापि ग्रहणार्थम् ।

१-१-३० द्वन्द्वे = द्वन्द्वसमासे, न (१-१-२८) ।

१-१-३१ विभा-जसि=जसः स्थाने शीभावे कर्तव्ये, द्वन्द्वे (१-१-३०) विभाषा = वा सर्वनामसंज्ञा भवति ।

१-१-३२ प्रथम... नेमाः=प्रथम-चरम-तयप्प्रत्ययान्तशब्दा अल्पशब्दोऽर्धशब्दः कतिपय-नेमशब्दौ च, जसि+विभाषा (१-१-३१) । नेमशब्दस्य सर्वादिगणे पाठान्नित्ये प्राप्तेऽन्येषामप्राप्ते विकल्पविधिरयम् ।

१-१-३३ पूर्व- असंज्ञायाम्=संज्ञाभिन्नायाम्, व्यवस्थायाम्=व्यवस्थायां गम्यमानायाम्, पूर्व... राणि=पूर्व पर अवर दक्षिण उत्तर अपर अधर इत्येते शब्दाः, जसि+विभाषा (१-१-३१) । का नाम व्यवस्था ? स्वाभिधेयापेक्षावधिनियमः । स्वः = पूर्वादिशब्दः, तस्य (स्वस्य) अभिधेयः= वाच्यः = दिग्देशकालादिरूपः, तेन (अभिधेयेन) अपेक्षः =अपेक्ष्यः, स चाऽसाववधिः=इत इत्यादिरूपः, तस्य नियमः स एव व्यवस्था । अपेक्ष्यते इत्यपेक्षः कर्मणि घञ् । अपेक्षाया अवधिरिति वा ।

१-१-३४ स्वम-अज्ञातिधनाख्यायाम्=बन्धुधनभिन्ने वाच्ये, स्वम्= स्वशब्दः, जसि+विभाषा (१-१-३१) ।

१-१-३५ अन्त- वहि....नयोः=बाह्ये परिधानीये चाऽर्थे, अन्तरम्=अन्तरशब्दः, जसि+विभाषा (१-१-३१) ।

तीयस्य=तीयप्रत्ययान्तस्य, ङित्सु=ङिद्विभक्तिविषये, वा=विभाषया सर्वनामसंज्ञा भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-३६ स्वरादिनिपातम**व्य'यम्** ॥४०	१-१-३८ । कृन्मेजन्तः ॥
स्वः । त्वं च ।	पठितुम् । जीवसे ।
१-१-३७ तद्धितश्चाऽसर्वविभक्तिः ॥	
सर्वत्र ।	

१-१-३६ **स्वरा-** ६-४-७ नोप...सूत्रानन्तरं सूत्रमिदं पाठचम् । स्वरा...पातम्= स्वरादिगणपठितशब्दा निपातसंज्ञकशब्दाश्च, अव्ययम्=अव्ययसंज्ञका भवन्ति । अथ २-४-८२ अव्यया...सूत्रं पाठचम् ।
१-१-३७ **तद्धित-** ५-१-११४ तेन तुल्यं क्रिया चेद् वतिः- सूत्रानन्तरं सूत्रमिदं पाठचम् ।

(क)

अत्र श्यामपाटीप्रयोगो यथा- १-१-३६ स्वरादिनिपातम् अव्ययम् ॥१-१-३७ तद्धितःच असर्वविभक्तिः (क) ॥ इति । असर्वविभक्तिः=अनुत्पत्त्यर्हसर्वविभक्तिकः, तद्धितः=तद्धितान्तः शब्दः, (क)=अव्ययम्=अव्ययसंज्ञको भवति । इत्यर्थोपदेशक्रमे के खलु अनुत्पत्त्यर्ह-सर्वविभक्तिक- तद्धितान्ताः शब्दाः ? इति जिज्ञासामुद्भाव्य ५-३-७ पञ्च.. सूत्रादारभ्य ५-३-४६ एधाच्च-सूत्रावधिकाः । ५-४-४२ बह्व... सूत्रादारभ्य ५-४-६७ मद्रा...सूत्रावधिकाः, अम् (५-४-१२ अमुँ...) आम् (५-४-११ किमे...) कृत्वोऽर्थाः, (५-४-१७ संख्या...१८,१९,२०) तसिँ (४-३-११३) वतिँ (५-१-११४ तेन...११५, ११६, ११७) नानाञौ (५-२-२७ विनञ्भ्यां...) इति प्रत्ययान्ताः । इति परिगणनमभ्यासयेत् । प्रकृते वत्यन्तत्वादव्ययसंज्ञायां स्वाद्युत्पत्तौ २-४-८२ अव्यया...इति लुक् । श्यामवत् पठति रामः । अथ ५-१-११८ तस्य भावस्त्वतलौ- सूत्रमुपदिशेत्
१-१-३८ **कृन्मे** ३-३-१० तुमुँण्ण्वुँलौ...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र

(क)

श्यामपाटी-प्रयेगो यथा- १-१-३६ स्वरादिनिपातम् अव्ययम् ॥
१-१-३८ कृन्मेजन्तः = कृत् (क) मेजन्तः ॥ इति । मेजन्तः+कृत् = मकारान्त एजन्तश्च, = यः कृत्प्रत्ययस्तदन्तः शब्दः, (क) = अव्ययम् = अव्ययसंज्ञको भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा २-४-८२ अव्यया...सूत्रमुद्बोधयेत् । सत्यावश्यके पूर्वमुपदिप्टम् 'अव्ययकृतो भावे' इत्युद्बोधयेत् । अनुक्तकर्मणि च पूर्ववद् द्वितीयेति चोद्बोधयेत् । श्यामःकोशं पठितुं याति । इत्थं सर्वेभ्यो धातुभ्यस्तुमुँन्प्रत्ययो भवतीति वोधयेत् । अथाऽधोनिर्दिप्ट-वाक्यानि संस्कृतेऽनुवदितुं छात्रानादिशेत् । श्याम नुहाएर (स्ना धातुः) आउँछ = श्याम नहाकर आता है । राम नुहाउन जान्छ = राम नहानेके लिए जाता है । श्याम सुत्न (शी धातुः) गयो = श्याम सोने के लिए गया । राम सुतेर उठचो = राम सोकर उठा । श्याम खाएर विद्यालय जान्छ = श्याम खाकर विद्यालय जाता है । राम खान घर जान्छ = राम खानेके लिए घर जाता है । इत्यादि । अथ कृदन्ते पूर्वमुक्तानाम्- आँ इँ ओँ ञि टु डु इत्येतेषामनुबन्धानामुपदेश- फलानि सोदाहरणानि पुनरुद्बोधयेत् । इत्युत्तरकृदन्त-शिक्षण-रीतिः । **इति कृदन्त- शिक्षण-रीतिः ।**

अथ कारकम् । कारकशिक्षणे प्रथममधोनिर्दिप्टरूपेण प्रथमा विभक्तिः कुत्र भवति ? इति स्फुटं बोधयेत् । यथा-वत्साः ? उपदिष्टं पूर्वम् ४-१-२ स्वौजस...सूत्रम् । तत्प्रसङ्गे च सर्वेभ्योऽपि प्रातिपदिकेभ्यःसुँप्रभृतयः प्रत्ययाः परतो भवन्तीत्यप्युपदिप्टम् । अथेदानीं कुत्र कतमा विभक्तिः प्रयोक्तव्येति विचार्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-३९ क्त्वा-तोसुँन्-कसुँनः ॥ पठित्वा । उदेतोः । विसृपः । १-१-४० अव्ययीभावश्च ॥ अधिसरित् (अधिसरितम्) ।	(क) १-१-४१ शि सर्वनामस्थानम् ॥४२ १-१-४२ सुँडनपुंसकस्य (क) ॥

तत्र प्रथमं प्रथमा विभक्तिः कुत्र प्रयोक्तव्येत्युपदिशामि, इति वदन् २-३-४६ प्रातिपदिकार्थ... सूत्रं प्रस्तुवीयात् ।

१-१-३९ क्त्वातो -३-४-२१ समानकर्तृकयोः ... सूत्रानन्तरं सूत्रमिदं पाठयम् ।

(क)

अत्र श्यामपाटीप्रयोगो यथा- १-१-३६ स्वरादिनिपातम् अव्ययम् ॥ १-१-३९ क्त्वा-तोसुँन्-कसुँनः (क)॥ इति । क्त्वा-तोसुँन्-कसुँनः =क्त्वाप्रत्ययान्ताः तोसुँन्प्रत्ययान्ताःकसुँन्प्रत्ययान्ताश्च शब्दाः, (क) = अव्ययम् = अव्यय-संज्ञका भवन्ति । इत्यर्थमुपदिश्य श्यामः पठित्वा आगच्छति, इत्युदाहृत्य, अनुक्तकर्मणि २-३-६५ कर्तृ... सूत्रेण प्राप्तायाः षष्ठयाः २-३-६९ न लो... सूत्रेण प्रतिषेधाद् द्वितीयैव विभक्तिर्भवति । यथा व्याकरणं पठित्वा न्यायं पठति, इत्यादि । इति बोधयेत् । अथ १-२-१८ न क्त्वा... सूत्रमुपदिशेत् ।

१-१-४० अव्य- २-२-३० उपसर्जनं... सूत्रानन्तरं सूत्रमिदं पाठयम् ।

(क)

अत्राऽधोनिर्दिष्टरूपेण श्यामपाटयां लिखेत् -१-१-३६ स्वरादिनिपातम् अव्ययम् ॥ १-१-४० अव्ययीभावः च (क) ॥ इति । अव्ययीभावः= अव्ययीभाव-समासः , (क)= अव्ययम्= अव्ययसंज्ञको भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा स्वाद्युत्पत्तिबोधनपुरस्सरम् २-४-८२ अव्य... सूत्रमुद्बोधयेत् ॥ **अधिसरित्** । ५-४-१११ झयः, इति पाक्षिके टचि अधिसरितम् इत्यपि भवति, इति शिक्षकोऽवदध्यात् । छात्राँस्तु इदं रूपान्तरमपि भवति, तच्च पश्चादुपदेक्ष्यते, इत्येव वदेत् । अतएव ( ) एतत्कोष्ठाभ्यन्तरे तद्रूपं स्थापितम् । अथ मीनाः सरिति सन्ति= मीना अधिसरित् सन्ति । एवमेव सरसि स्वच्छं जलं वर्तते = अधिसरः स्वच्छं जलं वर्तते । इति वाक्यप्रदर्शनपुरस्सरम्, 'अधिसरः, इति प्रयोगं छात्रैः साध्यमानं शिक्षकः शृणुयात् । अथ मह्याम् इति विग्रहे च्छात्रैः साध्यमानां प्रक्रियां शिक्षकः शृण्वन् प्रक्रिया-सन्दर्भे, 'अधिमही' इत्यवस्थायाम् २-४-१८ अव्ययीभावश्च-सूत्रमुपदिशेत् ।

१-१-४१ शि स + ४२ सुँड - १-१-६४ अलोऽन्त्यात्... सूत्राऽनन्तरं सूत्रे इमे पाठ्ये । अथ शि= शि इत्येतत् सर्वनामस्थानम्= सर्वनामस्थानसंज्ञकं भवति । अर्थात्, शि सर्वनामस्थानमुच्यते, इतिप्रथमसूत्रार्थमुपदिश्य ४-१-२ स्वौजस... सूत्रं दर्शयता शिक्षकेण सुँ इत्यतः खण्डितपाद- टकारावधि प्रत्याहारं दर्शयित्वा यथा 'एच्' इत्युक्तौ ए ओ ऐ औ वर्णा गृह्यन्ते, तथैव 'सुँट्' इत्युक्तौ सुँ औ जस् अम् औट् एते प्रत्यया गृह्यन्ते इति च बोधयित्वा द्वितीय- सूत्रार्थ उपदेश्यः । यथा-अनपुंसकस्य= नपुंसकभिन्नस्य, सुँट्= सुँ औ जस् अम् औट् एते प्रत्ययाः, (क)=सर्वनामस्थानम्= सर्वनामस्थानसंज्ञका भवन्ति ।

अर्थात् पुंलिङ्गे स्त्रीलिङ्गे च सुँ औ जस् अम् औट् इति प्रत्ययाः सर्वनामस्थान - शब्द - वाच्या भवन्ति । नपुंसकलिङ्गे तु जश्शसोर्विहितं शिमात्रं सर्वनामस्थानशब्दवाच्यं भवतीति स्फुटं बोधयितव्यम् । अथ-प्रकृतोदाहरणं पुंलिङ्गस्य वर्तते । तेनाऽत्र सुँसम्वन्धी 'स्' सर्वनामस्थानं भवतीत्युपदेश्यम् । अथ - ६-४-८ सर्व ... सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-४३ नवेति विभाषा ॥
१-१-४४ इग् यणः सम्प्रसारणम् ॥
१-४-४५ आद्यन्तौ टकितौ ॥
बालकानाम् । स्तुत्यः ।
१-१-४६ मिदचोऽन्त्यात् परः ॥
दधिनी । मधुनी ।
१-१-४७ एच इग्घ्रस्वादेशे ॥
प्ररि । सुनु ।
१-१-४८ षष्ठी स्थानेयोगा ॥५४
१-१-४९ स्थानेऽन्तरतमः ॥
बाह्यप्रयत्ना एकादश । विवारः

१-१-४३ **नवे**-नवा इति = निषेधविकल्पयोः, विभाषा = विभाषा संज्ञा भवति । उदाहरणं यथा ६-१-३० विभाषा श्वेः । एवं वा अन्यतरस्याम् इति निर्देशस्थलेष्वपि बोध्यम् ।
१-१-४४ **इग्** = अस्यार्थो द्विविधः । आद्यः-यणः+इक् = "यणः स्थाने इग् भवति" इत्यर्थः, सम्प्रसारणम्= सम्प्रसारणसंज्ञको भवति । द्वितीयः- यणः +इक् = यणः स्थाने जात इक्, सम्प्रसारणम्= सम्प्रसारणसंज्ञको भवति ।
१-१-४५ **आद्य** ७-१-५४ ह्रस्वनद्यापो नुँट्सूत्रानन्तरं सूत्रमिदं पाठचम् । टकितौ =टित्कितौ, आद्यन्तौ= आद्यवयवान्तावयवौ भवतः । अत्र लक्षण-समन्वय- सन्दर्भेऽधोनिर्दिष्टरीत्या श्यामपाट्यां लेख्यम्-
टित्   कित्
आद्यवयवः   अन्तावयवः
अत्र सत्यामावश्यकतायां यथाक्रमं बोधयता सता शिक्षकेण प्रकृते नकार आद्यवयवो भवतीतिच्छात्रेभ्य एवोत्तरं ग्राह्यम् । अथ "राम-श्याम-विष्णुमित्र+नाम्", इति श्यामपाट्यां लिखित्वा ६-४-३ नामि-सूत्रमुपदेश्यम् ।
१-१-४६ **मिद**- ७-१-७३ इकोऽ चि विभक्तौ- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र "भूतानां प्राणिनः श्रेष्ठाः" "प्राणिनां बुद्धिजीविनः" "नराणां च नराधिपः" इति वाक्येषु यथा 'भूतानां मध्ये' 'प्राणिनां मध्ये' 'नराणां मध्ये' इत्यर्थस्तथैव प्रकृतसूत्रे 'अच' इति अच्शब्दस्य षष्ठचन्तं रूपमिति बोधनपुरस्सरं अच इत्यस्य अचां मध्ये इत्यर्थ इति बोधयित्वा सूत्र-वाक्यार्थ उपदेश्यः । मित् (मित्पदार्थबोधनाय ७-१-५४ ह्रस्व ... सूत्रे प्रतिपादितमुद्बोधनीयं सत्यामावश्यकतायाम्) अचः = अचां मध्ये, अन्त्यात्= अन्तिमात्, परः=परो (तस्यैवान्तावयवो) भवति । लक्षणसमन्वयश्छात्रैः कारयितव्यः । ६-४-१४८ यस्येति... सूत्रं तु साम्प्रतं नोपदेश्यम् । जश्शसोः-दधि+अस् । मधु+अस्, इति श्यामपाट्यां लिखित्वा ७-१-२० जश्शसोः शि-सूत्रं प्रस्तुत्यम् ।
१-१-४७ **एच**-७-४-१ णौ चङ्यु... सूत्रानन्तरं सूत्रमिदं पाठचम् । ह्रस्वादेशे= आदिश्यमान-ह्रस्वानां-मध्ये, एचः = एचः स्थाने, इक् = इगेव भवति । लक्षणसमन्वयं छात्रैः कारयित्वा अचुर्+इ+अति इति श्यामपाटचां लिखित्वा ६-१-११ चङि-सूत्रमुपदिशेत् ।
१-१-४८ **षष्ठी**=अनिर्धारित-सम्बन्धविशेषा षष्ठी, स्थानेयोगा= स्थाने इत्यनेन युक्ता भवति । यथा ६-१-७४ इको... इत्यत्र इकः=इकः स्थाने, इत्यादि । स्थानेयोगा इत्यत्र स्थाने योगो यस्या इति व्यधिकरणो बहुव्रीहिः । अत एव निपातनाच्च सप्तम्या अलुक् । इति काशिका ।
१-१-४९ **स्थाने** =बहूनां प्रसङ्गे, अन्तरतमः = स्थानार्थगुणप्रमाणैः सदृशतम आदेशो भवति । यथा - ६-१-७४ इको... इत्यत्र इ उ ऋ लृ वर्णानां स्थाने य् व् र् ल् इत्यादेशानां प्रसङ्गे स्थानेनान्तरतम्यात् ते क्रमशो भवन्ति । ७-१-९५ तृज्व... इत्यत्र अर्थेनान्तरतम्यात् क्रोष्टृ इत्यादेशो भवति । ८-२-८० अद... इत्यत्र प्रमाणेनान्तरतम्याद् अकारस्य उकारः, आकारस्य ऊकारः । अमुष्मै, अमूभ्याम् इत्यादि । स्थानार्थप्रमाणभिन्ना गुणशब्देन गृह्यन्ते । ८-४-५९ तोर्लि इत्यत्र नासिक्या ऽनासिक्यत्व-गुणसाम्येनान्तरतम्याद् दकारस्य लकारो नकारस्य लँकारः । ८-४-४४ यरो... इत्यत्र आभ्यन्तरप्रयत्न गुणसाम्येनान्तरतम्याद् गकारादीनां स्पर्शवर्णानां स्थाने ङकारादयः । ८-४-६१ झयो... इत्यत्र वाह्यप्रयत्नगुणसाम्येनान्तरतम्याद् हकारस्य स्थाने वर्गचतुर्थ ः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संवारः श्वासो नादो घोषो ऽघोषो ऽल्पप्राणो महाप्राण उदात्तो ऽनुदात्तः स्वरितश्चेति । खरो विवाराः श्वासा अघोषाश्च । हशः संवारा नादा घोषाश्च । वर्गाणां प्रथम- तृतीय - पञ्चमा यणश्चा ऽल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः । अच उदात्ता ऽनुदात्त-स्वरित-संवार-नाद-घोषा ऽल्पप्राणाः ।

१-१-५० उरण् रपरः ॥

देवर्षिः ।

१-१-५० उरण् - ६-१-८४ आद् गुणः- सूत्रानन्तरं सूत्रमिदं पाठचम् । एतत्सूत्रार्थोपदेशे शिक्षकेण स्मेर-मुखेण सता छात्राणां हृदयमावर्जनीयम् । स्वयमपि त्वरा न कार्या । यथा - श्यामपाटचां सूत्रं लिखित्वा, पदच्छेदो नाम पदानां पृथक्करणम्, तदा पृथक्, पृथक् पदेभ्यः परतः किमपि न भवति इति भावं स्फारयता शिक्षकेण प्रकृतसूत्रस्य पदच्छेदे कर्तव्ये, उकारेण रेफे ताननीये (आकर्षणीये उर् इति वक्तव्ये) 'उः' भवति, इति ८-३-१५ खर... सूत्रार्थमुद्बोधयता विशदनीयम् । अर्थाद् रेफो विसर्गाय क्लृप्तस्तानननीय इत्यत्र प्रमाणं ८-३-१५ खर... सूत्रमुद्बोधनीयम् । अथ विसर्गाय क्लृप्ते रेफे उकारेण तानिते, अण्, रपरः, इति क्रमेण पदच्छेदः शिक्षणीयः । अथ श्यामपाटचामधोनिर्दिष्टरूपेण लेख्यम्-

पितृ पितुः भ्रातृ भ्रातुः मातृ मातुः जामातृ जामातुः

अथ शिक्षकेण वामभागस्थ- शब्दं दक्षिणभागस्थ- शब्दं चाऽङ्गुलीभ्यां दर्शयता, अत्र वामभाग-स्थःशब्दः स्वकीये कतमस्मिन् वर्णे कस्मै रूपाय कल्पमाने दक्षिणभागस्थ- शब्दाय कल्पते । इति च्छात्राः प्रष्टव्याः । उत्तरे समीचीने अप्राप्ते, उभयत्र प्रत्येकं वर्णास्तैः सपृथक्कारमुच्चारयितव्याः । ततो वामभागे दक्षिणभागे च कियानंशः समानः कियानंशश्च भिन्नः ? इति प्रष्टव्याः । तदा यथार्थमुत्तरमागमिष्यति । अर्थात्, ऋवर्णः 'उः' इति रूपाय कल्पते, इति स्फुटं भवति । ततः, यथा- ६-१-७४ इको... इत्यत्र 'इकः' इत्यस्य इकः स्थाने इत्यर्थस्तथैव 'उः' इत्यस्य ऋकारस्य स्थाने इत्यर्थो भवति । एवञ्च- 'उः+अण्' इत्यस्य ऋकारस्य स्थाने जायमानः अण् इत्यर्थो निःसरति । अथ शिक्षकेणा ऽधोनिर्दिष्ट- रीत्याच्छात्रा बोधयितव्याः । अयि वत्साः ? यथा 'अ' इत्युक्तौ आकारो ऽपि गृह्यते तथैव 'ऋ' इत्युक्तौ लृकारो ऽ पि गृह्यते । अतः 'उः+अण्' इत्यस्य "ऋकार +लृकारयोः स्थाने जायमानः अण्" इत्यर्थो बोध्य इति । अथ 'रपरः' इत्यस्यार्थ -बोधन-प्रसङ्गे शिक्षकेणच्छात्रा अधो निर्दिष्टरीत्या बोधयितव्याः । यथा-श्यामपाट्याम् एङ् इति लिखित्वा, अत्र कुत आरभ्य किमवधि के वर्णा गृह्यन्ते ? इति च्छात्रान् पृष्ट्वा तेभ्यो यथार्थमुत्तरे आगते सति आम् ! यथा एङ् इत्यत्र एकारादारभ्य खण्डितपाद-ङकारावधिकौ वर्णौ गृह्येते तथैव र =र्+अ (इति श्यामपाटचां लिखित्वा) इत्यत्र हयवरट् इति सूत्र-स्थ-रेफादारभ्य ल (ल्+अ) ण् इति सूत्रा ऽकारा ऽवधिकौ वर्णौ गृह्येते । यथा च एङ् इत्यत्रा ऽन्तिमो वर्णो ङकारो न गृह्यते, तथैव र=र् + अ इत्यत्रान्तिमो वर्णः =अकारो न गृह्यते । इति बोधन - सन्दर्भे वर्णसमाम्नाय-सूत्राणि दर्शयता, तथा हयवरट् इत्यादिषु वस्तुतो हकारादयः खण्डितपादा एवेति पूर्वमुपदिष्टमुद्बोधयता र् + अ प्रत्याहार - बोधनपुरस्सरं खण्डितपादे रेफे अकारमनुधावति 'र' इति रूपं सम्पद्यते, इति च बोधयित्वा 'र' इत्यस्य 'रेफ-लकारौ' इत्यर्थ इतिच्छात्राः सरलया रीत्योपदेश्याः । इति 'र' इत्यस्योपदेश -प्रकारः । अथ 'रपरः' इत्यस्योपदेशप्रकारो यथा-रामः श्यामः यादवः कृष्णः, एते छात्राः श्रेणि-बन्धनरूपेण वर्तन्ते । अत्र रामः श्याम-परः, अस्ति । यादवःकृष्ण- परः, अस्ति । श्यामः, यादव-परः अस्ति । इत्यादिरीत्या तदानीमुपस्थिताँश्छात्रानेव दर्शयता शिक्षकेण यथा रामात् परतः श्यामे सति रामः श्याम-परः, इत्युच्यते । श्यामात् परतो यादवे सति श्यामो यादवपरः, इत्युच्यते । यादवात् परतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-५१ अलो ऽन्त्यस्य ॥५३, ५२ हे गौरि । १-१-५२ ङिच्च ॥ सखा ।	१-१-५३ आदेःपरस्य ॥ युष्मान् । अस्मान् ।

कृष्णे सति यादवः कृष्णपरः इत्युच्यते । तथैव अणः परतो रे (रेफे लकारे च) सति, अण्, र (र् ल्) परः, इत्युच्यते इति बोधन-प्रसङ्गे अर् इत्यत्र अकारो रेफपरः । अल् इत्यत्र अकारो लकारपरः । इर् इत्यत्र इकारो रेफपरः । इल् इत्यत्र इकारो लकारपरः । इत्यादि - रीत्या यथा छात्रा भारं नानुभवेयुस्तथा शिक्षणीयम् इति । इत्थम् उः +अण्= ऋकारलृकारयोः स्थाने जायमानः अण्, रपरः =रेफलकारपरको भवति । इति सूत्रार्थे छात्रैः सम्यग् ज्ञाते सति, देव+ऋषिः, इत्यत्र ६-१-८४ आद् गुणः, इति लक्षण- समन्वय-प्रसङ्गे, अत्र ऋकारस्य स्थाने अ ए ओ वर्णा जायमानाः सन्ति । तेषु अकारो र (र् ल्) परो भवति । अर्थात् अकारः, अर्अल् इति रूपाय कल्पमानः प्रवर्तत इति । एकारस्य ओकारस्य च अण्प्रत्याहारे पाठाऽभावत् तौ रपरौ न भवतः । अतः पूर्वोक्तोदाहरण - साधन-प्रसङ्गे अर् अल् ए ओ एते आदेशाः प्राप्ता इति च्छात्रा बोधयितव्याः ॥ अथ स्थानविचारे कण्ठस्थाने
अकारः, मूर्धस्थाने च रेफो वर्तते । अतः कण्ठ-मूर्ध-स्थाने, अर्, अस्ति । तस्मात् पूर्वपरयोःस्थाने अर् इति जाते देव् +अर्+षिः = देवर्षिः । इत्यादिरीत्या शिक्षणीयम् । लृकारोदाहरणं साम्प्रतं नोपदेश्यं प्रयोग- बाहुल्या ऽभावात् । अथ १-१-१ वृद्धि... सूत्रार्थः शिक्षणीयः ।

१-१-५१ अलो- ३-१-१०७ अम्बार्थ... सूत्रोदाहरणसन्दर्भे सूत्रमिदं पाठ्यम् । अन्त्यस्य +अलः = अन्त्यस्य अलःस्थाने आदेशो भवति । इत्यर्थो बालोपलालनानुसारेणोपदेश्यः । [द्वितीयावृत्तौ तु अन्त्यस्य+ अलः = स्थानषष्ठ्यन्तपदबोध्यान्त्यस्या ऽलः स्थाने, आदेशो भवति । इत्यर्थ उपदेश्यः । १-१-४८ षष्ठी इति सूत्राऽनुवृत्त्योक्तार्थलाभः । तेनागमेषु न दोषः] अथ लक्षणसमन्वये कृते सति गौरि +स् इति श्यामपाट्यां लिखित्वा ६-१-६७ एङ्ह्र... सूत्रमुद्बोधनीयम् । **अथ ७-३-१०७ अम्बार्थ... सूत्र-** स्थाया एवं पत्नी देवी -कुमारीत्यादि-पङ्क्तेः परतः पाठ्यम् ।

१-१-५२ ङिच्च- १-१-५४ अनेकाल्... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र
(क) (ख)
श्यामपाटीप्रयोगो यथा १-१-५१ अलः अन्त्यस्य १-१-५२ ङिच्च (ख) (क) इति । ङिच्च= ङिदादेशो ऽपि (ङित्पदार्थबोधनाय ७-१-५४ ह्रस्व... सूत्रे प्रतिपादितमुद्बोधनीयम्) (ख) = अन्त्यस्य (क)=अलः स्थाने भवति । अर्थात्, अनेकाल् आदेशो ऽपि, ङिच्चेदन्त्यस्यैव स्थाने भवति । सर्वस्य स्थाने न भवति । इदं सूत्रम् १-१-५४ अनेकाल्... सूत्रस्य बाधकम् । सखिशब्दोपदेशे विषयो ऽयं स्फुटो भवति ।

अयि वत्साः ? सखिशब्दो ऽपि साधारणव्यवहारे बहुल- प्रयोगः । तेन यद्यपि मुनिशब्दोपदेश - प्रसङ्गे स उपदेशार्हः । तथापि बहुल-प्रक्रिय इति तदानीं नोपदिष्टः । साम्प्रतं ङिदादेशचर्चा-प्रसङ्गादुपदिश्यते । यथा-मम सखा इति वक्तव्ये सखा इति रूपं कथं सिध्येदिति जिज्ञासामुद्भाव्य सखि शब्दात् सुँप्रत्यये कृते सखि+ स् इति श्यामपाट्यां लिखित्वा ७-१-९३ अनँङ्... सूत्रं प्रस्तुत्यम् ।

१-१-५३ आदेः- ७-१-२९ शसो नँ - सूत्रोदाहरण- प्रसङ्गे सूत्रमिदं पाठ्यम् । परस्य =परस्य स्थाने विधीयमान आदेशः, आदेः =तस्य परस्य आदेः स्थाने भवति । इत्यर्थो बालोपलालनानुसारेणोपदेश्यः । (द्वितीयावृत्तौ तु परस्य=परवोधकशब्दमुच्चार्य परस्य स्थाने विधीयमान आदेशः, आदेः, अलः (१-१-५१) स्थाने भवति । इत्यर्थ उपदेश्यः । परस्येत्यस्यावृत्त्योक्तार्थलाभः । तेन ७-३-७२ क्सस्याचि इत्यादौ न दोषः) लक्षणसमन्वय-सन्दर्भे ऽधोनिर्दिष्टरूपेणच्छात्रा बोधयितव्याः । यथा-७-१-२९ शसो... सूत्रेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-५४ अनेकाल्-शित् सर्वस्य ॥
कः । कौ । तव । मम ।
१-१-५५ स्थानिवदादेशो -
ऽनल्विधौ ॥ ५७, ५८
सर्वे ।
१-१-५६ अचः परस्मिन्
पूर्वविधौ ॥ ५८, ५७
कथयति ।
१-१-५७ न पदान्त-द्विर्वचन-
वरे-यलोप-स्वर-सवर्णाऽनुस्वार-
दीर्घ-जश्-चर्विधिषु ॥५८
एषो यन् हसति । दद्ध्यानय । यायावरः ।
यातिः । चिकीर्षकः । पाद्धसति ।
पिष्टः । प्रतिदीव्ना । सग्धिः । जक्षतुः ।

युष्मदस्मद्भ्यां परस्य शसः (अ स् इत्यस्य) स्थाने नकारो विधीयमानो ऽस्ति । १-१-५३ प्रकृतसूत्रेण च परस्य स्थाने विधीयमान आदेशः परस्यादेः स्थाने भवतीत्युच्यते । तेन शस्=अस् इत्यस्य आदेः (अकारस्य) स्थाने नकारो (न्) भवति । इति स्फुटं बोधयित्वा युष्मद् +न्+स्, अस्मद् +न्+स् इति श्यामपाटचां लिखित्वा ७-२-८७ द्विती.. सूत्रमुद्बोध्य युष्म +आ+ न्स् अस्म+आ+न्स् इति श्यामपाटचां लिखित्वा छात्रैः सन्धिकार्यं साधयित्वा युष्मान्स्, अस्मान्स् इति श्यामपाटचां लिखित्वा १-१-७ हलो... सूत्रं प्रस्तुत्यम् ।

१-१-५४ अने- ८-१-२३ त्वामौ... सूत्रानन्तरं सूत्रमिदं पाठचम् । अनेकाल-शित् = अनेकालादेशः शिदादेशश्च, सर्वस्य = सर्वस्य स्थाने भवति । ७-२-१०३ किमः... सूत्रेण विधीयमानः क आदेशो ऽनेकाल् वर्तते, तेन स सर्वस्य स्थाने जातः । ७-१-३० भ्यसो... सूत्रेण विहितो ऽभ्यमादेशश्चाऽनेकाल् वर्तते, तेन सो ऽपि सर्वस्य स्थाने जातः । वांनावादय आदेशा अप्यनेकालः । तेन ते सर्वस्य स्थाने भवन्ति । ७-१-२७ युष्म... सूत्रेण ङसः (अस् इत्यस्य) स्थाने अश् विहितः । तत्र शकारे ऽनुबन्धे गते अ इति यद्यप्यनेकाल् नास्ति, तथापि शिदस्ति । तेन सोऽपि सर्वस्य स्थाने भवति । १-१-५४ अने... सूत्रम् १-१-५१ अलो... १-१-५३ आदेः ... सूत्रयोर्बाधकम् । इत्थम् अनेकाल् आदेशः शिदादेशश्च सर्वस्य स्थाने भवतः । तद्भिन्न आदेशः परस्य- विहितश्चेत् तस्य परस्यादेः स्थाने भवति । अन्यस्य स्थाने विहितश्चेदन्त्यस्य स्थाने भवतीति विषये छात्रबुद्धौ स्फुरति सति
१-१-५२ ङिच्च- सूत्रं प्रस्तुवन्नुपदिशेत् ।

१-१-५५ स्थानि- आदेशः, स्थानिवत्= स्थानिवृत्तिधर्मवान् भवति, अनल्विधौ= स्थानिसम्बन्ध्यलाश्रये विधौ कर्तव्ये तु न भवति । उदाहरणे यथा- ७-१-१७ जशः... इति शी इत्यादेशे प्रकृतसूत्रेण स्थानिवद्भावेन प्रत्ययादित्वात् १-३-८ लश... सूत्रेण शकारस्येत्संज्ञा सिध्यति । अनल्विधावित्युक्तेः क्त्वो ल्यपि ७-२-३५ आर्ध... इति न वलादिलक्षण इट् । प्रहस्य ।

१-१-५६ अचः- परस्मिन्= परनिमित्तकः, अचः = अचः स्थाने जातः, आदेशः + स्थानिवत् (१-१-५५) पूर्वविधौ=स्थानिभूतादचः पूर्वस्य स्थाने विधौ कर्तव्ये । उदाहरणे ऽल्लोपस्य स्थानिवद्भावान्नोपधावृद्धिः ।

१-१-५७ न पदान्त.... विधिषु = पदे परतः पूर्वपदस्य चरमा ऽवयवे कर्तव्ये, द्वित्वे कर्तव्ये, वरच्प्रत्यये परे, यलोपे कर्तव्ये, स्वरे कर्तव्ये, सवर्णे कर्तव्ये, अनुस्वारे कर्तव्ये, जश्त्वे कर्तव्ये, चर्त्वे कर्तव्ये च, परस्मिन् +अचः (१-१-५६) +आदेशः (१-१-५५), न =स्थानिवन्न भवति । सूत्रे ऽस्मिन् न इति पृथक् पदम् । शेषमन्यत् पदम् । पदान्त-प्रभृति - चरित्यन्त-द्वन्द्वस्य कर्मषष्ठ्यन्तस्य भावसाधनेन विधिशब्देन समासः । विधिशब्दस्य पदान्त-प्रभृतिभिः प्रत्येकं सम्बन्धः । द्वन्द्वान्ते श्रूयमाणस्य प्रत्येकं सम्बन्धात् । एवञ्च पदान्तविधौ द्विर्वचनादिविधौ च कर्तव्ये, न = परनिमित्तको ऽच्स्थानिक आदेशः स्थानिवन्न भवतीति सूत्रार्थः फलति । अथ पदान्तविधौ इत्यस्य को ऽर्थः ? उक्तमेव पदे परतःपूर्वपदस्य चरमावयवे कर्तव्ये' इति । यतः पदे अन्तः पदान्त इति सप्तमीसमासः । अन्तशब्दश्च चरमावयववाची । भोः ? पदे परत इत्युक्तौ पुनःपूर्वपदस्येत्यर्थः कथं लभ्यते ? । उच्यते-पदे परत इत्युक्तौ पूर्वस्येति स्वत एवाध्याहृतो भवति । पूर्वभागश्च तत्र पदमेव संभवति । अपदं न प्रयुञ्जीतेति सिद्धान्तात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत्) बहुखट्वकः । गिर्योः । वाय्वोः । (क्वौ लुप्तं न स्थानिवत्) लवमाचष्टे लवयति । लवयतीति लौः ।	(पूर्वत्राऽसिद्धीये न स्थानिवत्) आदित्यः । (तस्य दोषः संयोगादिलोपलत्वणत्वेषु) काक्यर्थम् । निगाल्यते । माषवपनी ।

एषो यन् हसति इण्धातोःशतृँप्रत्यये यणि 'यन्' इति रूपं सिध्यति । अत्रोदाहरणे ६-१-१२८ एत... इति सूत्रेण सुँलोपे कर्तव्ये यणादेशस्य स्थानिवद्भावप्रतिषेधो न भवति । यतो यदि सुँलोपः स्यात् तर्हि चरमावयवो न स्यात् ? । कथम् ? उच्यते-लोपो नाम अभावः । कथं स चरमावयवः स्यात् ? श्रूयमाण एव हि वर्णश्चरमावयवः सम्भवति । अतः सुँलोपे कर्तव्ये स्थानिवद्भाव एव भवति । तथा च हल्परकत्वा ऽभावान्न सुँलोपः । उत्वे कर्तव्ये तु स्थानिवद्भावप्रतिषेधः प्रवर्तते । यत उकारादेशश्चरमावयवः कार्यः श्रूयमाणः । उदाहरणान्तरे- कानि सन्ति, कौ स्तः । अत्र यणावादेशयोःकर्तव्ययोरस्तेरल्लोपस्य न स्थानिवत् । यद्यत्र यणावादेशौ स्यातां तौ खलु चरमावयवौ स्याताम् । दध्यानय ६-१-७४ इको... इति विहितस्य यणःप्राप्तस्थानिवद्भावस्य प्रतिषेधात् ८-४-४६ अन... इति धकारस्य द्वित्वम् । पूर्वधकारस्य स्थाने ८-४-५२ झलां... इति जश्त्वेन दकारः । **यायावरः** यङन्ताद् या (१०४९) धातोः ३-२-१७६ यश्च... इति वरच् । ६-४-४८ अतो... इत्यल्लोपे ६-१-६४ लोपो... इति यलोपे च, अल्लोपस्य स्थानिवद्भावप्रतिषेधाद् ६-४-६४ आतो... इत्याल्लोपो न । **यातिः** यातेर्यङन्तात् ३-३-१७४ क्तिच्क्तौ... इति क्तिच् । पूर्ववदल्लोपयलोपयोः, यायाति इति जाते अल्लोपस्य स्थानिवद्भावेन ६-४-६४आतो...इत्याकारलोपः । यलोपे कर्तव्ये तु प्रकृतसूत्रेण स्थानिवद्भावप्रतिषेधः । **चिकीर्षकः** सन्नन्तात् कृधातोः (१४७१) ण्वुँलि ६-४-४८ अतो....इत्यल्लोपः । तस्य स्थानिवद्भावप्रतिषेधात्, ६-१-१८८ लिति इति कीत्यस्येकार उदात्तः ।

पाद्धसति- पादयतेःक्विँपि णिलोपे पाद्+हसति, इत्यत्र ८-४-६१ झयो... इति पूर्वसवर्णः । अत्र १-१-५६ अचः...इत्यत्र पूर्वस्माद् विधिरिति पञ्चमी-समासपक्षे णिलोपस्य स्थानिवद्भावे प्राप्ते प्रकृतसूत्रेण प्रतिषेधः । **पिंष्टः**पिष् (१४५१) धातोर्लटि तसि श्नमि ६-४-१११ श्नसो... इत्यल्लोपे तस्य स्थानिवद्भावे प्राप्ते प्रकृतसूत्रेण प्रतिषेधः । यदि स्थानिभावप्रतिषेधो न स्यात् तर्हि ८-३-२४ नश्चा... इत्यनुस्वारो न स्यात् । **प्रतिदीव्ना** प्रतिदिवन् +आ(टा) इत्यवस्थायाम् ६-४-१३४ अल्लो... इत्यल्लोपे तस्य प्राप्तस्य स्थानिवद्भावस्य प्रकृतसूत्रेण प्रतिषेधः । यदि स्थानिवद्भावप्रतिषेधो न स्यात् तर्हि ८-२-७७ हलि... इति दीर्घो न स्यात् । **सग्धिः** अद् (१०११)धातोः क्तिनि २-४-३९ बहु... इति घस्लृँ । ६-४-१०० घसि... इत्युपधालोपे ८-२-४० झष... इति तकारस्य स्थाने धकारे ८-२-२६ झलो... इति सकारलोपे घ् धि इत्यवस्थायां ६-४-१०० घसि... इति कृतस्योपधालोपस्य प्राप्तस्थानिवद्भावस्य प्रकृतसूत्रेण प्रतिषेधाद् ८-४-५२ झलां...इति घकारस्य जश्त्वेन गकारः । ग्धिःइत्यस्य समानशब्देन समासे ६-३-८४ समा...इति समानस्य सादेशः । **जक्षतुः** अद्धातोर्लिटि २-४-४० लिँट्य...इति घस्लृँ । क्रमाद् जघस् + अतुस् इत्यवस्थायाम् ६-४-९८ गम... इत्युपधालोपः । तस्य स्थानिवद्भावप्रतिषेधात् ८-४-५४ खरि... इति घकारस्य स्थाने चर्त्वेन ककारः । षत्वे कर्तव्ये स्थानिवद्भावशङ्का तु न कार्या । स्थानिभूतादचः पूर्वस्य विधेरभावात् । न खलु सकारः स्थानिभूताकारात् पूर्वतो वर्तते ।कुतस्तर्हि वर्तते ? परतः ।

प्रतिषेधे - लोपाजादेशः = लोपाजादेश एव, न स्थानिवत् । अन्यादेशस्तु स्थानिवदेव भवति । उदाहरणेषु - आद्ये ७-४-१५ आपोऽन्य... इति कृतस्य ह्रस्वस्य स्थानिवद्भावाद् ६-२-१७३ ह्रस्वान्ते... इति खकाराकारस्योदात्तत्वं न ६-२-१७२ न कपि पूर्वम् इत्यस्यैव प्रवृत्तिः । अन्त्ययोर्यणादेशस्य स्थानिवद्भावात् क्रमशः ८-२-७८ उप... इति न दीर्घः । ६-१-६४ लोपो... इति यलोपो न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-५८ द्विर्वचने ऽचि ॥ चक्रतुः । **१-१-५९ अदर्शनं लोपः ॥६०** राजा । **१-१-६० प्रत्ययस्य लुक्श्लुलुपः ॥** कति । जुहुतः । वङ्गाः ।	**१-१-६१ प्रत्ययलोपे प्रत्ययलक्षणम् ॥६२** पयोमुक् । **१-१-६२ न लुमता ऽङ्गस्य ॥** तत् । यत् ।एतत् ।

क्वौ लुप्तं- क्वौ=क्विँनिमित्तके विधौ कर्तव्ये, लुप्तम्, न स्थानिवत् । **लौः** अत्राऽल्लोपणिलोपयोः स्थानिवद्भावप्रतिषेधात् ६-४-१९ च्छ्वोः शूड... इत्यूठ् । ततः ६-१-८६ एत्ये... इति वृद्धिः ।
पूर्वत्रा ऽसिद्धीये = त्रिपादीस्थे कार्ये कर्तव्ये । **आदित्यः** अत्र आदित्यशब्दाद् ४-१-८५ दित्य... इति ण्यप्रत्यये ६-४-१४८ यस्येति चेत्यल्लोपे तस्य स्थानिवद्भावप्रतिषेधाद् ८-४-६३ हलो... इति यलोपः ।
तस्य दोषः- उदाहरणेषु- आद्ये यणादेशस्य स्थानिवद्भावात् ८-२-२९ स्कोः... इति ककारलोपो न । द्वितीये णिलोपस्य स्थानिवद्भावाद् ८-२-२१ अचि... इति वैकल्पिकं लत्वम् । अन्त्ये ऽल्लोपस्य स्थानिवद्भावात् ८-४-११ – प्रतिपदिकान्त ... इति णत्वं न । अत्रोदाहरणे गतिकारकोपपदानामिति सुँबुत्पत्तेःप्राक् समासस्ततो डीबिति बोध्यम् ।
१-१-५८ द्विर्व-१-३-६३ आम्प्र... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी प्रयोगो यथा-

(क)
१-१-५५ स्थानिवत् आदेशः अनल्विधौ ॥
(ख)
१-१-५६ अचः परस्मिन् पूर्वविधौ ॥
(ग)
१-१-५७ न पदान्त............॥

१-१-५८ द्विर्वचने ऽचि (ख) (क) (ग) (द्विर्वचने) इति । अत्रैतत्सूत्रार्थ- बोधनात् पूर्वं "द्विर्वचने" इत्यावर्तते तदेवा ( ) ऽस्मिन् कोष्ठे दर्शितमिति बोधयेत् । अथ सूत्रार्थमुपदिशेत्-द्विर्वचने+अचि = द्वित्वनिमित्ते अचि परे, [(ख) = अचः + (क) = आदेशः] = अचः स्थाने जायमान आदेशः (ग) =न=न भवति, द्विर्वचने =द्वित्वे कर्तव्ये । अत्र लक्षण-समन्वयं छात्रैःकारयित्वा ६-१-८ लिँटि.... सूत्रे प्रवृत्ते ६-१-४ पूर्वो... सूत्रेणा ऽभ्याससंज्ञां चच्छात्रैरेव साधयित्वा चोरयाम् +कृ+कृ+अ इति श्यामपाट्यां लिखित्वा ७-४-६६ उरत्-सूत्रमुपदिशेत् ।
१-१-५९ अदर्शनम् = प्रसक्तस्या ऽनुच्चारणम्, लोपः = लोपसंज्ञं भवति ।
१-१-६० प्रत्ययस्य, +अदर्शनम् (१-१-५९)= लुक्श्लुलुप्शब्दैः कृतं प्रत्ययस्याऽनुच्चारणम्, लुक्श्लुलुपः = क्रमशो लुक्-श्लु-लुप्संज्ञं भवति ।
१-१-६१ प्रत्य- १-४-१ आकडारा... सूत्रानन्तरं सूत्रमिदं पाठचम् । प्रत्ययलोपे =प्रत्यये लुप्ते ऽपि, प्रत्ययलक्षणम् = प्रत्ययनिमित्तकं कार्यं भवति । एतत्सूत्रबलेन सुँप्रत्यये लुप्तेऽपि १-४-१४ सुँप्ति... सूत्रेण पयोमुच् इत्येतत् सुँनिमित्तकं पदं भवति । इति बोधन- पुरस्सरं छात्राणामाकाङ्क्षा शमनीया । अथ ८-२-३० चोः कुः- सूत्रं प्रस्तुत्यम् ।
१-१-६२ न लु -७-३-११४ सर्वनाम्नः स्याड्... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)
१-१-६१ प्रत्ययलोपे प्रत्ययलक्षणम् ॥
१-१-६२ न लुमता (क) **अङ्गस्य** (ख) ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-६३ अचोऽन्त्यादि टि ॥	१-१-६४ अलोऽन्त्यात्- पूर्व उपधा ॥

एतत्-सूत्रार्थ-बोधनात् पूर्वं शिक्षको ऽधोनिर्दिष्टरूपेणच्छात्रान् बोधयेत् । यथा-अयि वत्साः ? यत्र व्रीहयो भवन्ति स प्रदेशो व्रीहिमान् इत्युच्यते । यत्र दधि भवति स दधिमान् इत्युच्यते । यत्र मधु भवति स मधुमान् इत्युच्यते । तथैव यत्र लु शब्दो भवति स लुमान् इत्युच्यते । यथा लुक् इत्यत्र श्लु इत्यत्र लुप् इत्यत्र च लुशब्दो वर्तते । तेन ते लुमच्छब्देन गृह्यन्ते । लोप इत्यत्र तु लुशब्दो नास्ति तेन लोपशब्दो लुमच्छब्देन न गृह्यते । इति । अथ शिक्षकः श्यामपाट्यां लुक् श्लु लुप् लोपः इति लिखित्वा साङ्गुलीनिर्देशं प्रत्येकं शब्दान् दर्शयन् "अयं शब्दो लुमान् न वेति" च्छात्रान् परीक्षेत । अथ सूत्रार्थमुपदिशेत्- लुमता=लुक्-श्लु-लुप्शब्दैः (क)=प्रत्ययलोपे=प्रत्यये लुप्ते, अङ्गस्य, (ख) = प्रत्ययलक्षणम्=प्रत्यनिमित्तकं कार्यम्, न = न भवति । इति । प्रथमा-द्वितीया-द्विवचन-बहुवचनयोः ७-२-१०२ त्यदा... सूत्रेणात्वे ६-१-९४ अतो... सूत्रेण पररूपे च कृते फलशब्दे इव प्रक्रिया । तृतीयादौ पुंसीव प्रक्रियेति शिक्षकःसम्यगवबोधयेत् ।

येनाक्षर-समाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ अत्र तस्मै इति पुंसि रूपम् । या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता । नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ अत्र तस्यै इति स्त्रियां रूपम् । 'तं वन्दे साधुवन्द्यम्' अत्र तम् इति पुंसि रूपम् । 'वन्दे तां परमेश्वरीम्' अत्र ताम् इति स्त्रियां रूपम् । इत्यादीन्युदाहरणानि लिङ्गभेदेन रूप-भेद-स्फुट-प्रतिपत्तये शिक्षयेत् ।

अथ इदंशब्दस्य पुंस्युपदेशः 'अयम् बालकःकस्यां कक्षायां पठति' इति वक्तव्ये अयम् इति रूपं कथं सिध्येदिति जिज्ञासामुद्भाव्य, इदंशब्दात् सुँप्रत्यये कृते इदम्+स् इति श्यामपाट्यां लिखित्वा ७-२-१०२ त्यदा... सूत्र-प्राप्तिमुद्भाव्य ७-२-१०८ इदमो मँः- सूत्रं प्रस्तुत्यम् ।

१-१-६३ अचो-३-१-६७ सार्वधातुके... सूत्रानन्तरं सूत्रमिदं पाठचम् । १-१-४६ मिद... सूत्रे इव प्रकृत-सूत्रे ऽपि अच इत्यस्य अचां मध्ये इत्यर्थः । इति प्रथमं बोधयित्वा सूत्रार्थमुपदिशेत् । यथा-अचः +अन्त्यादि= अचां मध्ये यो ऽन्त्यः स आदिर्यस्य तत्, टि=टिसंज्ञं भवति । अन्त्य आदिर्यस्येति तद्गुण - संविज्ञानो बहुव्रीहिः । तेन 'त' इत्यत्र 'अ' इति टि भवति । 'आताम्' इत्यत्र आम् इति टि भवति । पथिन् इत्यत्र 'इन्' इति टि भवति । इत्यादि । अनेन सूत्रेण पठ्य +त इति घटकस्य त इत्यस्याऽकारस्य टिसंज्ञा भवति । इति बोधयित्वा ३-४-७९ टित... सूत्रं प्रस्तुवीयात् ।

१-१-६४ अलो -७-१-९४ ऋदुशन... सूत्रोपदेशानन्तरं सूत्रमिदं पाठचम् । अन्त्यात् = अन्तिमात्, अलः = अल्वर्णात्, पूर्व :=पूर्वो वर्णः, उपधा =उपधासंज्ञको भवति । अर्थात् अन्त्यादल्वर्णात् पूर्वो वर्ण उपधा इत्युच्यते । इति भावं बोधयित्वा प्रकृते श्यामपाट्यां नकारमन्त्यवर्णं निजाङ्गुल्या दर्शयता शिक्षकेण तस्मात् पूर्वो ऽकार उपधा ज्ञेय इति तथा बोधनीयं यथा ऽत्रोपधा तकारोत्तरा ऽकार इतिच्छात्राः सम्यगवगच्छेयुः । अथ १-१-४१ शि स ... ४२ सुँड ... सूत्रे प्रस्तुत्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-६५ तस्मिन्निति **निर्दिष्टे** पूर्वस्य ॥६६ १-१-६६ तस्मादित्युत्तरस्य ॥	१-१-६७ स्वं रूपं शब्दस्याऽशब्दसंज्ञा ॥७१

१-१-६५ तस्मिन् + इति + निर्दिष्टे = सप्तम्यन्तपदेन निर्दिष्टे, पूर्वस्य = सप्तम्यन्तार्थादव्यवहितपूर्वस्य स्थाने कार्यं भवति । किमुदाहरणम् ? ६-१-७४ इको यणचि इति । किं क्रियते तत्र प्रकृतसूत्रेण ? उच्यते - तत्र सूत्रे अचि इति सप्तम्यन्तं पदम् । सप्तमी च औपश्लेषिकाधिकरणे विहिता । उपश्लेषस्य समीपवृत्तित्वत्वादचः पूर्वस्य परस्य व्यवहितस्याऽव्यवहितस्य च स्यात् । सत्येतस्मिन् परिभाषासूत्रे अजव्यवहितपूर्वस्येति निर्णीयते । कथं निर्णयः ? निः शब्दो नैरन्तर्यवाची दिशिरुच्चारणक्रियः । किं फलति तेन ? अव्यवहितस्येति फलति । अन्यथा व्यवहितपूर्वस्यापि इकः स्थाने यण् स्यात् । ननु च भोः पूर्वस्येत्युच्यते तेन व्यवहिते न भविष्यति । दृश्यते हि व्यवहिते ऽपि पूर्वशब्दप्रयोगः । स यथा प्रतिष्ठानपुरात् काष्ठमण्डपः पूर्व इत्युच्यते सन्ति च तत्र मध्ये गण्डकीप्रभृत्यञ्चलानि । यद्येवं पूर्वस्येति न पठितव्यम् । तच्च पठितव्यम् । कथम् ? अव्यवहितपरस्य मा भूदिति । एवञ्च इको यणचि इत्यस्यार्थः अजव्यवहितपूर्वस्येकः स्थाने यण् भवतीति संभवति । तत्फलितार्थकथनं तु इकः स्थाने यण् भवति अव्यवहिते अचि परे इति । अथैतस्मिन् सूत्रे इति शब्दः किमर्थः ? तस्मिन्निति पदमर्थपरमिति ज्ञापनार्थः । कथं ज्ञापयति ? उच्यते इतिशब्दः पदार्थविपर्यासकृत् । इति करणा ऽभावे खलु तत्पदं शब्दपरं स्यात् । यथोपदिशति भगवान् सूत्रकारः १-१-६७ स्वं रूपं... इति । तथा च ४-३-२ तस्मिन्नणि... इत्यादावेव प्रवर्तेत न तु ६-१-७४ इको यणचि इत्यादौ ।

१-१-६६ तस्मात् +इति, +निर्दष्टे (१-१-६५)= पञ्चम्यन्तपदेन निर्दिष्टे, उत्तरस्य = पञ्चम्यन्तार्थादव्यवहितोत्तरस्य स्थाने कार्यं भवति । किमुदाहरणम् ? ८-४-६० उदः .... इति । तत्र हि उद इति दिग्योगे पञ्चम्यन्तम् । एतत्परिभाषासूत्राऽभावे अध्याहार्यो दिग्वाची शब्दः पर इव पूर्वोऽपि स्यात् । ततश्च पूर्वस्य व्यवहितस्य परस्य च स्थाने विधिः स्यात् । अथेदं विचार्यते - यत्र सूत्रे सप्तम्यन्तं पञ्चम्यन्तं च तत्र किं पूर्वसूत्रेण व्यवस्था भवति ? आहोस्वित् प्रकृतसूत्रेण ? प्रकृतसूत्रेण । कथम् ? उपदिशति भगवान् सूत्रकार एव १-४-२ विप्र... इति । तेन ८-३-२९ डः सि.... सूत्रस्य डात् परस्य सस्य इत्यर्थः फलति न तु सकारात् पूर्वस्य डकारस्येति ।

१-१-६७ स्वं रू- शब्दस्य, स्वं रूपम्=स्वकीयं रूपं बोध्यं भवति, अशब्दसंज्ञा =व्याकरणशास्त्रे कृतां संज्ञां विना । उदाहरणं यथा ४-२-३३ अग्नेर्ढक् इति सूत्रेण अग्निशब्दादेव ढक् प्रत्ययो भवति । न तु अग्निवाचिभ्यो वह्निवैश्वानरप्रभृतिभ्यः शब्देभ्यः । अथ किमिदमशब्दसंज्ञेति ? शब्दशास्त्रे=व्याकरणे कृता संज्ञा=शब्दसंज्ञा । शब्दसंज्ञाया अन्यत् =अशब्दसंज्ञा=व्याकरणशास्त्रे कृतायाः संज्ञाया भिन्नम् इति । किमेतस्य प्रतिषेधस्य प्रयोजनम् ? कर्मादिसंज्ञा ऽनुवादप्रदेशेषु स्वरूपग्रहणं मा भूदिति । किञ्च तेन सिध्यति ? कुम्भकार इत्यत्र ३-२-१ कर्म... इत्यण् प्रत्ययः सिध्यति । अदात् अधात् इत्यादौ २-४-७७ गाति .... इति सिँचो लुक् च सिध्यति । यद्येवम् अशब्दशास्त्रकृतसंज्ञा इति निर्देशः कर्तव्यः । न कर्तव्यः । शब्दशब्दस्य शब्दशास्त्रे लक्षणा द्रष्टव्या । एवमपि अशब्दकृतसंज्ञा इति निर्देशः कर्तव्यः । स च न कर्तव्यः । उत्तरपदलोपो ऽत्र द्रष्टव्यः । शब्दकृता संज्ञा =शब्दसंज्ञा । शब्दसंज्ञाया अन्यत् =अशब्दसज्ञेति । अथेदं विचार्यते प्रकृतसूत्रे स्वमिति पदं किमर्थम् ? ननु चोक्तं स्वकीयं रूपं यथा विज्ञायेत नान्यदीयमिति । नैतदस्ति प्रयोजनम् । रूपशब्द एव स्वरूपपरः । शब्दस्य रूपम् = शब्दस्य स्वरूपमिति ज्ञायते । तद् यथा लोके ऽपि देवदत्तस्य रूपमित्युक्तौ देवदत्तस्यैव स्वरूपमिति प्रतीयते न तु यज्ञदत्तादेः । एवं तर्हि रूपशब्दः स्वरूपपर एव । स्वशब्दश्च आत्मीयवाची । कश्च शब्दस्य आत्मीयो भवति ? अर्थः । किमुक्तं भवति शब्दस्य स्वरूपमर्थश्च बोध्यं भवतीत्युक्तं भवति । किञ्च तेन ज्ञायते ? अर्थवद् ग्रहणे नानर्थकस्य ग्रहणं भवतीति ज्ञायते । किञ्च तेन सिध्यति ? प्रोढवानित्यत्र ६-१-८६ एत्ये... सूत्रस्थ-प्रादू....... इति वार्तिकेन वृद्ध्यभावः सिध्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-६८ अणुदित्सवर्णस्य चाप्रत्ययः ॥६९ १-१-६९ तपरस्तत्कालस्य ॥	१-१-७० आदिरन्त्येन सहेता ॥

१-१-६८ अणु- अप्रत्ययः=अविधीयमानः, अण्=अण्वर्णः, सर्वणस्य=सवर्णस्य ग्राहको भवति, उदित् +च = उदिदपि सवर्णस्य ग्राहको भवति । किमिदम् अप्रत्यय इति ? प्रत्ययभिन्नः । अथ कः पुनः प्रत्ययः ? प्रतीयते= विधीयत इति प्रत्ययः = विधीयमानः । तद्भिन्नः= अप्रत्ययः=अविधीयमानः, अण् सवर्णस्य ग्राहको भवति । यथा ७-४-३२ अस्य--इति सूत्रेण अकारस्य स्थाने विधीयमान ईकार आकारस्य स्थानेऽपि भवति । अथ किमिदंमुदिदिति ? उत्= उकारः, इत्= इत्संज्ञको यस्य स उदित् = उकारेत्संज्ञको वर्णः । यथा कु चु टु तु पु इत्यत्र क् च् ट् त् प् वर्णाः प्रत्येकमुदितः प्राचीनाचार्यास्तथैव व्यवहृतवन्त इति भावः । अत्र शास्त्रे ऽपि तथैव व्यवहियते । सं च । कश्च ? उदिच्च सवर्णस्य ग्राहको भवति । तेन ८-२-३० चोः कुः इति सूत्रस्य चवर्गस्य स्थाने कवर्गो भवतीत्यर्थःसिध्यति । युक्तःखलु चवर्गस्य स्थाने इत्यर्थः । अयन्त्वयुक्तः कवर्गो भवतीति । कथम् ? उक्तं खलु भवतैव पूर्वम् - अप्रत्ययः = अविधीयमान इति । कुरिति च विधीयमानः । युक्त एव । कः ? कुरित्यस्य कवर्गो भवतीत्यर्थः । कथम् ? अप्रत्यय इति न उदितो विशेषणम् । किं वक्तव्यमेतत् ? न हि । कथमनुच्यमानं ज्ञायते ? ज्ञायत इत्याह- इत्संज्ञकोकारनिर्देशः सवर्णग्रहणार्थः क्रियते । यदि अप्रत्यय इति उदितोऽपि विशेषणं स्यात् तर्हि विधेये सवर्णग्रहणप्रयोजनाभावेन ८-२-३० चोः कुरित्यत्र विधेये कँ इति वक्तव्ये उकारनिर्देशो व्यर्थः स्यात् । अथ अण् इत्यत्र सन्देहो भवति किमयं पूर्वेण णकारेण प्रत्याहारः आहोस्वित् परेणेति । सन्देहस्तु भवति तस्य पुनर्व्याख्यानेन निवृत्तिर्भवति । किञ्च तद् व्याख्यानम् । अथ भवान् कथयतु ६-१-१०७ ऋत... सूत्रे ऋकारात् परतो यस्तकारनिर्देशः स किमर्थः ? ऋकारेण सवर्णानां ग्रहणं मा भूदित्येतदर्थः । यद्येवं तदेव व्याख्यानं भवति । कथम् ? यदि प्रकृतसूत्रे अण् पूर्वेण णकारेण प्रत्याहारः स्यात् तर्हि ऋकारेण सर्वणग्रहणा ऽप्रसक्तौ ऋत इत्यत्र सवर्णग्रहणनिरासार्थस्तकारनिर्देशो व्यर्थः स्यात् । तस्मात् प्रकृतसूत्रे ऽण् परेण णकारेण प्रत्याहारः । अन्यत्र सर्वत्र अण् पूर्वेण, ६-४-७७ अचि... सूत्रे इण इति प्रत्याहार-निर्देशे कर्तव्ये य्वोरिति निर्देशात् इण् सर्वत्र परेणेति बोध्यम् ।

१-१-६९ तपरः= तकारपरकः+तकारात् परश्च वर्णः , तत्कालस्य= तत्कालस्य ग्राहको भवति । तत्कालस्येति किमुक्तं भवति ? अण् सवर्णस्य ग्राहको भवतीति यत् पूर्वसूत्रेणोक्तं तत् तपरे न भवतीत्युक्तं भवति । अथ तपर इत्यस्य तकारपरकः तकारात् परश्च वर्ण इत्युभावर्थौ कथं सम्भवतः ? सम्भवत इत्याह- समासभेदात् । यदा तपर इत्यस्य पञ्चमीतत्पुरुषः तात्पर इति तदा तकारात्परो वर्ण इत्यर्थः संभवति । यदा तु बहुव्रीहिः तः परो यस्मादिति तदा तकारपरक इत्यर्थः संभवति । किमुदाहरणम् । १-१-२ अदेङ्..., इति । अत्र तकारपरकः खलु अकारो दीर्घप्लुताकारौ न गृह्णाति । तात् परौ ए ओ वर्णौ च प्लुतौ न गृह्णीतः । यद्येवम् ३-३-५७ ऋदो... इति सूत्रेण दीर्घोकारान्तादप्प्रत्ययो न प्राप्नोति । कथम् ? तकारात् परः खलु तत्रोकारः । नैष तकारः । कस्तर्हि ? दकारः । किमर्थो दकारः ? असन्देहार्थो मुखसुखार्थो वा । इह तर्हि दोषः ६-१-८४ आद् गु....इति सूत्रेण आकारादेव अचि गुणः प्राप्नोति, नत्वकारात् । कथम् ? तकारपरकःखलु तत्रा ऽऽकारः । ननु च तत्रापि दकारो न तकारः । नेत्याह-नासौ दकारः । कस्तर्हि तकार एव । कथम् ? अशब्दस्य पञ्चम्यन्तमेतत् आत् इति रूपम् । तकारस्य जश्त्वेन दकारः श्रूयते । तकारस्तु अस्ति दोषो नास्ति । कथम् ? १-१-६८ अणु... सूत्राप्रवृत्तेः । अथापि विधिपक्षे दोष एव । तत्पक्षे ऽपि नास्ति दोषः । कथम् ? उक्तमेवा ऽनुपदं भवतैव विभक्तितकारो ऽयमिति । न च विभक्तितकारस्तपरसूत्रे गृह्यते । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं ज्ञायते ? सूत्रकारव्यवहारात् । तथा हि-यदि तपरसूत्रे विभक्तितकारो गृह्येत तर्हि ६-१-८८ उपसर्गादृति..., सूत्रे तकारात् परत्वेन सिद्धे तत्र ऋति इत्यत्र ऋकारात् परतः पुनस्तकारनिर्देशो व्यर्थः स्यादिति ।

१-१-७० आदि-अन्त्येन +इता+सह = अन्त्येत्संज्ञकवर्णेन सह पठितः, आदिः = आदिवर्णः समुदायस्य ग्राहको भवति । समुदायस्य ग्राहको भवतीत्युच्यते कस्य समुदायस्य ? आदित आरभ्य अन्त्येत्संज्ञकवर्णपर्यन्तस्य । यद्येवं समुदाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-१-७१ येन विधिस्तदन्तस्य ॥ (उगिद्वर्णग्रहणवर्जम्)
(समासप्रत्ययविधौ प्रतिषेधः)

स्येति निर्देशः कर्तव्यः आदिरन्त्येन सहेता समुदायस्येति । स तर्हि तथा निर्देशः कर्तव्यः । न कर्तव्यः । अन्तरेण समुदायस्येति निर्देशं कथं समुदायस्येत्यर्थो ज्ञायते ? । अथ भवान् कथयतु - किमिदमादिरिति किञ्चान्त्य इति ? सति परस्मिन् यस्मात् पूर्वो नास्ति स आदिः । सति पूर्वस्मिन् यस्मात् परो नास्ति सो ऽन्त्य इति । यद्येवम् आदिरित्युक्तौ परतः केचन वर्णाः सन्तीति प्रतीयते । अन्त्य इत्युक्तौ च पूर्वतः केचन वर्णाः सन्तीति प्रतीयते । आद्यन्त्यशब्दौ च सूत्रे पठ्येते । तेन समुदायस्येत्यर्थो ज्ञायते । किमुदाहरणम् ? अच् अल् इत्यादि । अथ अच् इत्यनेन के वर्णा व्यवह्रियन्ते ? अ इ उ ऋ लृ ए ओ ऐ औ इत्येतेषु प्रत्येकं वर्णाः । ननु च समुदायस्य ग्राहको भवतीत्युक्तं पूर्वम् । कथं पुनः प्रत्येकं व्यवह्रियेरन् ? । समुदायस्य प्रयोगाभावात् । नहि समुदायस्य क्वचिल्लक्ष्ये प्रयोगो ऽस्तीति प्रत्येकं व्यवह्रियन्ते । अथ कथं णादयश्चत्वारो व्यञ्जनवर्णा न गृह्यन्ते ? दृश्यन्ते हि अकाराच्चकारपर्यन्ते णादयश्चत्वारो व्यञ्जनवर्णाः सन्निविष्टाः । दृश्यन्ते न तु गृह्यन्ते । कथम् ? । प्रत्याहारेष्वितां न ग्रहणम् । कथं ज्ञायते प्रत्याहारेष्वितां न ग्रहणमिति ? ज्ञायत इत्याह-अनुनासिक इत्यादिनिर्देशात् । यदि प्रत्याहारेष्वितामपि ग्रहणं स्यात् तर्हि अनुनासिक इत्यत्र ककारे परे पूर्वत इकारश्रवणं न स्याद् यणः प्रसङ्गात् । एवम् अक् पदेन अ इ उ ऋ लृ वर्णा व्यवह्रियन्ते इत्यादि ।

१-१-७१ येन - ७-१-१९ नपुंसकाच्च- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । सूत्रे ऽस्मिन् येनेति यच्छब्दनिर्देशः । तेन तच्छब्दो ऽध्याहृतो भवति । यत्तदोर्नित्यसम्बन्धात् । एवञ्च "येन विधिस्तत् तदन्तस्य" इत्याकारकं सूत्रं फलति । अथ सूत्रार्थः - येन = यद्द्वारा = जस् द्वारा, विधिः = विधिर्भवति = विधि हुन्छ, तत् = त्यो , तदन्तस्य = तदन्तस्य बोधकं भवति । अर्थात् जस् द्वारा विधि हुन्छ , त्यस्को अर्थ त्यो अन्त्यमा हुने भन्नु पर्छ = जिस के द्वारा विधि होता है, उसका अर्थ ' वह अन्त्यमें होने वाला' कहना चाहिए । यथा -७-१-७३ इको ... सूत्रं नपुंसके वर्तमानस्याऽङ्गस्य नुँमागमं करोति । केन द्वारा? इग्द्वारा । यथा छात्रो लिखति । केन द्वारा ? कलमद्वारा । कलमेन लिखति । कीनासः क्षेत्रं कृषति । केन द्वारा ? हलद्वारा । हलेन कृषति । तथा ७-१-७३ इको... सूत्रम् अङ्गस्य नुँमागमं करोति । केन द्वारा ? इग्द्वारा । अतो ऽत्रत्य इक्शब्द इगन्तस्य बोधकः । इक् = इगन्तः । इकः = इगन्तस्य । इति । इदमत्रा ऽवधेयम्- येन द्वारा विधिर्भवति तत् करणं खलु शब्दे विशेषणं भवति । अत एव "विशेषणं तदन्तस्य संज्ञा स्यात्" इत्युक्तं दीक्षितेन । (द्वितीयावृत्तौ तु व्यपदेशिवद्भावेन स्वस्य च रूपस्येत्यपि बोधयितव्यो ऽर्थः । अत एव ३-३-५६ एरच् इत्यनेन अय इत्याद्यपि सिध्यति) अथ ७-१-७३ इको ऽचि... सूत्रमुपदेश्यम् । **समा... विधौ** = समासविधौ प्रत्ययविधौ च, प्रतिषेधः=तदन्तविधेः प्रतिषेधो वक्तव्यः । किमुदाहरणम् ? समासविधौ तावत् कृष्णमुपश्रितः । यथा- कृष्णं श्रितः = कृष्णश्रित इत्यत्र २-१-२४ द्वितीया...सूत्रेण समासो भवति न तथा तदन्तविधिना कृष्णमुपश्रित इत्यत्रापि भवति । प्रत्ययविधौ- सौत्रनाडिः । यथा- नडस्य गोत्रापत्यं नाडायन इत्यत्र ४-१-९९ नडा... इति सूत्रेण फक् प्रत्ययो भवति, न तथा तदन्तविधिना सूत्रनडस्य गोत्रापत्यं सौत्रनाडिरित्यत्रापि भवति । ४-१-९५ अत.... इति इञ् । ७-३-२० अनु... इत्युभयपदादिवृद्धिः ।

उगिद्... वर्जम् = उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वा तदन्तविधेः प्रतिषेधो वक्तव्यः । अर्थाद् उगिद्ग्रहणे वर्णग्रहणे च तदन्तविधिर्भवति । यथा भवती इत्यत्र भवच्छब्दात् ४-१-६ उगि..., इति ङीप् प्रत्ययो भवति तथा अतिभवती इत्यत्रापि अतिभवच्छब्दात् तेन सूत्रेण ङीप् प्रत्ययो भवति । उगिद्ग्रहणे तदन्तविधिप्रतिषेधाभावात् । एवमेव यथा अय इत्यत्र इण्धातो : ३-३-५६ एरच्... इत्यच् प्रत्ययो भवति, तथा चयः इत्यत्रापि चिधातोस्तेन सूत्रेणा ऽच् प्रत्ययो भवति । वर्णग्रहणे च तदन्तविधिप्रतिषेधा ऽभावात् । वार्तिके ऽत्र वर्जम् इति ३-४-५३ द्विती..., इति णमुँलन्तम् । ननु च भोः सूत्रं तत् त्वरायां प्रवर्तते । नात्र त्वरा प्रतीयते । प्रतीयत इत्याह- तदन्तविधिप्रतिषेधे सत्वरमेवेदं वक्तव्यं न विलम्बितव्यमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(यस्मिन् विधिस्तदादावल्ग्रहणे)

१-१-७२ वृद्धिर्यस्या'चा'मादि'स्त'द् वृद्धम्' ॥७४

शालीयः । मालीयः । प्रासादीयः ।

(वा नामधेयस्य वृद्धसंज्ञा)

देवदत्तीयः, दैवदत्तः ।

(गोत्रान्तादसमस्तवत् प्रत्ययो भवतीति वक्तव्यम्)

घृतप्रधानो रौढिः = घृतरौढिः । तस्यच्छात्रा घृतरौढीयाः । ओदनप्रधानः पाणिनिः = ओदनपाणिनिः । तस्यच्छात्रा ओदनपाणिनीयाः ।

(जिह्वाकात्य- हरितकात्यवर्जम्)

जैह्वाकाताः । हारितकाताः ।

१-१-७३ त्यदादीनि च ॥

त्यदीयः । तदीयः ।

१-१-७४ एङ् प्रचां देशे ॥

एणीपचनीयः , ऐणीपचनः ।

भोजकटीयः, भौजकटः ।

गोनर्दीयः, गौनर्दः ।

इति प्रथमाध्याये प्रथमः पादः ।

यस्मिन्- अल्ग्रहणे= अल्वर्णग्रहणे, यस्मिन् = यत्- सप्तमीप्रकृति- निमित्तकः, विधिः= यो विधिः, सः, तदादौ=तत्सप्तमीप्रकृत्यल्वर्णादौ बोध्यः । किमनया परिभाषया साध्यते ? तदन्तविधेरपवादस्तदादिविधिः साध्यते । अथ किमिदमल्ग्रहणे इति ? अल् गृह्यतेऽस्मिन्=अल्ग्रहणम् । तस्मिन् अल्ग्रहणे । अधिकरणे ल्युँट् । अथ यस्मिन्नित्यस्य कोऽर्थः ? यत्सप्तमीप्रकृतिनिमित्तकः, इति । किमयमर्थः पदाक्षरैर्लभ्यते ? आहोस्वित् कल्प्यते । पदाक्षरैर्लभ्यत इत्याह-सप्तमीप्रकृतिर्यच्छब्दार्थः स च विभक्त्या गम्यते । निमित्तं सप्तम्यर्थः । अथ तदादौ इत्यत्र तच्छब्दः कतमपदार्थकः ? सप्तमीप्रकृति-यच्छब्दबोध्याल्वर्णपदार्थकः । अथ तदादौ इत्यत्र कः समासः ? तद्गुणसंविज्ञानो बहुव्रीहिरित्याह - सः सप्तम्याः प्रकृतिरूपो ऽल्वर्ण आदिर्यस्य स तदादिस्तस्मिन् तदादौ । इति । इत्थं परिभाषार्थः फलति-अल्रूपं यत् सप्तम्याः प्रकृतिरूपमक्षरं तन्निमित्तको विधिस्तदादौ बोध्य इति । सप्तम्यन्तं चैतादृशं विशेषणमेव सम्भवतीत्यवधेयम् । किमुदाहरणम् ? ६-१-७६ वान्तो यि प्रत्यये । यि प्रत्यये इत्युच्यते यादौ प्रत्यये इत्यर्थो ज्ञायते । ६-४-७७ अचि प्रत्यये इत्युच्यते, अजादौ प्रत्यये इत्यर्थो ज्ञायते ।

१-१-७२ वृद्धि - सूत्रे अचामिति निर्धारणे षष्ठी । यस्य = यस्य समुदितस्य, अचाम् = अचां मध्ये, आदिः=आदिवर्णः, वृद्धिः=वृद्धिरस्ति, तत्=समुदितम्, वृद्धम्=वृद्धसंज्ञकं भवति । उदाहरणेषु ४-२-११४ वृद्धा... इतिच्छः । एवमग्रे ऽपि बोध्यम् । **वा ना** - नामधेयस्य = नामवाचिशब्दस्य, वा = विभाषया वृद्धसंज्ञा भवति ।

गोत्रान्तात् =गोत्रप्रत्ययान्तात्, असमस्तवत्=असमस्तादिव प्रत्ययो भवतीति वक्तव्यम् । यथा वृद्धात् केवलाद् गोत्रप्रत्ययान्तात् ४-२-११४ वृद्धा... इतिच्छप्रत्ययो भवति, तथैवोत्तरपदवृद्धकात् समस्तादवृद्धादपि भवतीति भावः ।

जिह्वा... वर्जम्=जिह्वाकात्यहरितकात्यशब्दौ वर्जयित्वा असमस्तवत् प्रत्ययो भवतीति वक्तव्यम् । उदाहरणयोःओत्सर्गिकोऽण् । ६-४-१४८ यस्ये... इत्यल्लोपः । ६-४-१५१ आप... इति यकारलोपः ।

१-१-७३ त्यदादीनि=त्यदादिगणपठितशब्दस्वरूपाणि वृद्धम् (१-१-७२)=वृद्धानि । वृद्धमित्यनुवर्तमानमेक-वचनान्तमपि त्यदादीनीति बहुवचनान्तेन सम्बन्धाद् बहुवचनान्ताय कल्पते ।

१-१-७४ एङ् प्रा - यस्य +अचाम्+आदिः (१-१-७२), एङ् = एङ् अस्ति, देशे= देशविषयकम्, तद् + वृद्धम् (१-१-७२), प्राचाम् = प्राचामाचार्याणां मते । प्राचामित्याचार्यविशेषणम् ॥ यदि तु देशविशेषणं स्यात् तदा प्राग्देशे इति समस्तनिर्देशः स्यात् । ननु जैनेन्द्रव्याकरणे एतत्सूत्रस्थानीयम् एङ् प्राग्देशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येव सूत्रं पठ्यते । तेन समन्वयायाऽत्रापि देशविशेषणमिति चेन्न । तत्प्रयोजको हेतुश्च इति सूत्रस्थानीयस्य तद्योजको हेतुरिति सूत्रस्येव पाणिन्यभिप्रायाज्ञानमूलक-सूत्रभेदप्रतिपादन-फलकप्रयासस्यापि सम्भवेन तन्न्यासस्य प्रमाणत्वेन ग्रहीतुमशक्यत्वात् । जैनेन्द्रव्याकरणं न स्वोपज्ञं व्याकरणान्तरं किन्तु साधारणबुध-सुशकपरिवर्तनं पाणिनीयमेवेति तद्ग्रन्थावलोकिनां स्फुटं भवति । अथ के प्राच्याः ? शरावतीनद्याः प्राग्दक्षिणो देशः प्राच्यः । तत्रत्या विद्वांसश्च प्राच्याः । तस्या एव नद्याः पश्चिमोत्तरो देश उदीच्यः । तत्रत्या विद्वांसश्चोदीच्याः । ...शरावत्यास्तु योऽवधेः । देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः-अमरः । प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा । विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती । -काशिका ।

इति प्रथमाध्याये
प्रथमः पादः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रथमाऽध्याये
द्वितीयः पादः

१-२-१ गाङ्कुटादिभ्योऽञ्णिन् ङित् ॥४
अध्यगीष्ट । कुटिष्यति ।
कुटितव्यम् ।
१-२-२ विज इट् ॥३
उद्विजिष्यते । उद्विजितव्यम् ।
इडित्युक्तेर्नेह-उद्वेजनम् । उद्वेजनीयम् ।
१-२-३ विभाषोर्णोः ॥
ऊर्णुविष्यति, ऊर्णविष्यति ।
१-२-४ सार्वधातुकमपित् ॥५
तुदति । पठचेते ।
१-२-५ असंयोगाल्लिँट् कित् ॥६,२६
पेठतुः । पेठुः । सिषिधतुः । सिषिधुः ।
(ऋदुपधेभ्यो लिँटः कित्त्वं
गुणात् पूर्वविप्रतिषेधेन)
ववृके । ववृते ।
१-२-६ इन्धिभवतिभ्यां च ॥
ईधे । बभूव ।
(श्रन्थि-ग्रन्थि-दम्भि-स्वञ्जीनां
लिँटः कित्त्वं वा)
श्रेथतुः, शश्रन्थतुः । ग्रेथतुः,
जग्रन्थतुः । देभतुः, ददम्भतुः । सस्वजे, सस्वञ्जे ।

१-२-१ **गाङ्...** दिभ्यः = गाङादेशात् कुटादिभ्यश्च परः, अञ्णित् = ञिण्णिद्भिन्नः प्रत्ययः, ङित्= ङिद्वद् भवति । उदाहरणेष्वाद्ये २-४-५० विभा.... इति गाङ् ६-४-६६ घुमा ... इतीत्वम् । अन्त्ययोःकुट् (१३६५) धातोर्लृँट् तव्यश्च क्रमशः । ङित्त्वात् १-१-५ क्क्ङिति... इति गुणप्रतिषेधः ।
१-२-२ **विजः**=विज् धातोः परः, इट्=इडादिः प्रत्ययः, ङित् (१-२-१) । इट् इत्येतावदिह पदम् । कथं पुनरियता पदेन इडादिप्रत्यय इत्यर्थो ज्ञायेत ? अथ भवान् कथयतु यदि इडादिप्रत्यय इति नोच्येत तदा इट् किमर्थं ङित् क्रियेत ? लघूपधगुणप्रतिषेधार्थम् । यद्येवं ङित्करणं व्यर्थम् । कथम् ? न हीटमाश्रित्य लघूपधगुणः प्राप्नोति । किमाश्रित्य तर्हि प्राप्नोति ? आर्धधातुकमाश्रित्य । इट् च आर्धधातुकस्याद्यवयवो न त्वार्धधातुकम् । किञ्चातः ? अवयवस्य ङित्त्वे प्रयोजनं नास्तीति अवयवेन अवयवी गृह्यत इट्= इडादिप्रत्यय इति । १-१-४५ आद्यन्तौ-सूत्रभाष्यं चाऽ वधेयमत्र । उदाहरणयोः- विज् (१२८८+१४५९) धातुः प्रक्रिया प्राग्वत् ।
१-२-३ **विभा-ऊर्णोः**=ऊर्णु- धातोःपरः, इट् (१-२-२) विभाषा=वा, ङित् (१-२-१) । उदाहरणयोः- ङित्त्वपक्षे गुणप्रतिषेधात् ६-४-७७ अचि..... इत्युवँङ् । ङित्त्वाभावपक्षे ७-३-८४ सार्व... इति गुणः ।
१-२-४ **सार्व** -३-४-७९ टित... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-
(क)
१-२-१ गाङ्कुटा... ङित् १-२-४ सार्वधातुकमपित् (क) ॥ इति । अपित् +सार्वधातुकम्= पिद्भिन्नं सार्वधातुकम्, (क) =ङित्= ङिद्वद् भवति । सत्यावश्यके ७-१-५४ सूत्रे वर्णितं पित्, ङित् इत्यादि शिक्षक उद्बोधयेत् । प्रकृते आताम् पिद् -भिन्नमस्ति सार्वधातुकञ्च । तेन ङिद्वज्जातमिति बोधयित्वा ७-२-८१ आतो ङितः- ....सूत्रमुपस्थापयेत् ।
१-२-५ **असं**-७-२-११६ अत... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-
(क)
१-२-४ सार्वधातुकम् अपित् ॥ १-२-५ असंयोगात् (क) लिँट् कित् ॥ इति । असंयोगात् = संयोगभिन्नात् परतो वर्तमानः, (क) = अपित्= पिद्भिन्नः, लिँट् = लिँट्, कित् = किद्वद् भवति । इत्युपदिश्याऽग्रे च च्छात्रैः साधितं पपठ् + अतुस् इति श्यामपाट्यां लिखित्वा ६-४-१२० अत एकहल्.. सूत्रमुपदिशेत् ।
१-२-६ **इन्धिभवतिभ्याम्** = इन्ध्धातोर्भूधातोश्च परः, लिँट्+कित् (१-२-५) । किमर्थमिदमुच्यते ? न पुनः पूर्वसूत्रेणैव सिद्धम् ? नेत्याह- पूर्वसूत्रे खलु असंयोगादित्युच्यते । इन्ध्धातौ च नकारधकारयोः संयोगः । अस्ति प्रयोजनमेतत् ? किं तर्हि ? न हि इन्ध् धातोः परतो लिँट् सम्भवति । कथम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-७ मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥८
मृडित्वा । मृदित्वा । गुधित्वा । कुषित्वा ।
क्लिशित्वा । उदित्वा । उषित्वा ।

१-२-८ रुदविदमुषग्रहिस्वपिप्रच्छः सँश्च ॥१०
रुरुदिषति । रुदित्वा । विविदिषति । विदित्वा । मुमुषिषति ।
मुषित्वा । जिघृक्षति । गृहीत्वा ।
सुषुप्सति । पिपृच्छिषति ।

१-२-९ इको झल् ॥११, १७
जिगीषति । तुष्टूषति ।

१-२-१० हलन्ताच्च ॥११
लिलिक्षति । हल्ग्रहणं जातिपरम् ।
धिप्सति, धीप्सति ।

आम्प्रत्ययो भवति ३-१-३६ इजा... इति । ततश्च कृभ्वस्तिप्रयोगः । युक्तं खलु भवदुक्तं लौकिकेषु प्रयोगेषु, यत्र आम् प्रत्ययो भवति । वेदे तु आम् प्रत्ययो न भवति (पुत्र ईधे अथर्वणः । इति यथा) । कथम् ? अनुवर्तते तत्र (३-१-३६) खलु अमन्त्रे इति ३-१-३५ कास्प्र... सूत्रात् । अपिदिति च । किम् ? पूर्वसूत्रे ऽनुवर्तते । किञ्चातः ? पूर्वसूत्रेण तिप्सिप्मिप् च कितो न भवन्ति । बभूव । बभूविथ । बभूव । इति । एवमर्थमिदमुच्यते । **श्रन्थि- कित्त्वं वा** - अत्र पदमञ्जरी- यदि संयोगार्थमेव वचनम् पित्सु न भाव्यम् । अथ संयोगान्तार्थं पिदर्थं च पित्स्वपि भाव्यम् । किं पुनरत्रार्थतत्त्वम् ? देवो ज्ञातुमर्हतीति । **श्रेथतुः** ६-४-१२० अत एकहल्... सूत्रस्थेन श्रन्थिग्रन्थि... इत्यनेनैत्वाभ्यासलोपौ ।

१-२-७ मृड....... वसः = एभ्यः परः, क्त्वा = क्त्वाप्रत्ययः, कित् (१-२-५) । ननु च भोः क्त्वाप्रत्ययः स्वयमेव किदस्ति, किमर्थं पुनः सूत्रमिदं पठ्यते ? उच्यते वक्ष्यत्येत् १-२-१८ न क्त्वा सेट् सूत्रम् । ततश्चा ऽन्येषामिव मृडादीनामपि सेट् क्त्वा किन्न स्यादिति किदर्थं पुनः सूत्रमिदं पठ्यते । **क्लिशित्वा** ७-२-५० क्लिश.... इति क्त्वो वेट् । इडभावे क्लिष्ट्वा इत्यपि रूपम् । **उदित्वा** ६-१-१५ वचि ... इति सम्प्रसारणम् । **उषित्वा** ७ -२ -५२ वस... इति क्त्व इट् । प्रागवत् सम्प्रसारणम् । ८ -३ -६० शासि... इति षत्वम् ।

१-२-८ रुद.... प्रच्छः = एभ्यः परः, सन् = सन् प्रत्ययः, क्त्वा (१-२-७) च, कित् (१-२-५) । स्वपिप्रच्छिग्रहणं सनः कित्त्वार्थम् । अन्येषां तु सनः, पूर्वसूत्रवत् क्त्वो ऽपि कित्त्वार्थम् । **जिघृक्षति ।** ७-२-१२ सनि .... इतीट्प्रतिषेधः । ६-१-१६ ग्रहि... इति सम्प्रसारणम् । **गृहीत्वा** पूर्ववत् सम्प्रसारणम् । ७-२-३७ ग्रहो...... इतीटो दीर्घः । सुषुप्सति ६-१-१५ वचि ... इति सम्प्रसारणम् । **पिपृच्छिषति** ७-२-७५ किर... इतीट् ६-१-१६ ग्रहि... इति सम्प्रसारणम् ।

१-२-९ इको- इकः= इगन्ताद् धातोः परः, झल् = झलादिः, सन् (१-२-८) कित् (१-२-५) । इकः = इगन्तादिति - सनाऽऽक्षिप्तस्य धातोर्विशेष्यस्य सत्त्वेन १-१-७१ येन.... इति तदन्तविधिः । झल्= झलादिरिति- ननु भो ? झलित्येतावदिह पदम् । कथं पुनरियता पदेन झलादिरित्यर्थो लभ्यते ? अथ भवान् कथयतु यदि झलादिर्नोच्येत कस्तर्हि तदानीमर्थः स्यात् ? झल्रूपः सन् इति । यद्येवं सूत्रमिदं व्यर्थं स्यात् । कथम् ? लक्ष्या ऽभावात् । न हि झल्रूपः सन् क्वचिल्लभ्यते । कस्तर्हि लभ्यते ? इकारादिर्झलादिर्वा । ननु च भोः अतो लोपे झल्रूपः सँल्लभ्यते यथा जिगीष्यते बुभूष्यते । इति । नेत्याह - कित्त्वे कर्तव्ये तत्रापि झलादिरेव भवति , न तु झल्रूपः । कथम् ? अल्लोपस्य स्थानिवद्भावात् । यथोपदिशति भगवान् सूत्रकारः १-१-५६ अचः.... इति । किञ्चातः ? झल्रूपः सन् प्रत्ययो न लभ्यत इति झलादिः सन्नित्यर्थो ज्ञायते । कश्चेदानीं व्यावृत्तो भवति ? इडादि : सन् । यथा-चिकरिषति । इति । अत्र कृ (१४०८) धातोः सनि ७-२-७५ किर.... इति सन इट् । जिगीषति ६-४-१६ अज्झ... इति दीर्घः । ७-३-५७ सर्लिं.... इति कुत्वम् ।

१-२-१० हल- इकः (१-२-९) + हलन्तात्= इक्समीपाद् हलः परः, झल् (१-२-९) सन् (१-२-८) कित् (१-२-५) । अथ कः सूत्रार्थः ? उक्तमेव- इक्समीपाद् हलः पर इत्यादि । कथमत्र समीपादित्यर्थो लभ्यते ? उच्यते - अन्तशब्दः समीपवाची । कथं ज्ञायते समीपवाचीति ? अथ भवान् कथयतु- यदि समीपवाची न भवेत् तदा किंवाची स्यात् ? अवयववाची । कस्या ऽवयवः ? इकः । नेत्याह- न खलु वर्णो वर्णान्तरस्यावयवः क्वचिदपि पृथगुच्चार्यमाणः संभवति । एवं तर्हि धातोः । धातोरपि नेत्याह -

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-११ लिँङ्सिँचावात्मनेपदेषु ॥१३, १७
रुत्सीष्ट । अरुद्ध । मुक्षीष्ट । अमुक्त ।
१-२-१२ उश्च ॥
कृषीष्ट । अकृत ।
१-२-१३ वा गमः ॥
संगसीष्ट, संगंसीष्ट ।
समगत, समगंस्त ।
१-२-१४ हनःसिँच् ॥१७
आहत ।

यदि धातोरवयवःस्यादन्तग्रहणं व्यर्थं स्यात् । १-१-७१ येन... इत्यनेनैव सिद्धेः । किमप्येतेन ज्ञायते ? हलन्तादित्यत्र समासो न बहुव्रीहिरित्यपि ज्ञायते । कस्तर्हि ? कर्मधारयः । हल् चासावन्तश्च हलन्तः = हल्रूपः समीपः = समीपो हल् इति । **लिलिक्षति** ८-२-३१ हो ढ इति ढकारः । ८-२-४१ षढोः.... इति ढकारस्य ककारः । ८-३-५९ आदे .... इति सकारस्य षकारः । कषसंयोगे क्षः । **हल्ग्रहणं जातिपरमिति** किमिदमपूर्ववचनम् ? नेत्याह - ना ऽपूर्ववचनम् । किं तर्हि ? सूत्रकारव्यवहारतः प्रतीयमानम् । कथं प्रतीयते ? अथ भवान् कथयतु १-१-१४ निपा ... इति सूत्रे क्रियमाणमेकग्रणं किमर्थम् ? अच्समुदायस्य संज्ञा मा भूदित्येतदर्थम् । एवन्तर्हि भवत्प्रश्नोत्तरमपि भवतैव दत्तं भवति । कथम् ? वर्णग्रहणे जातिग्रहणाभावे कः प्रसङ्गो ऽच्समुदायस्य संज्ञायाः, यन्निवृत्त्यर्थमेकग्रहणं क्रियेत । **धिप्सति** ७-२-४९ सनी ... इत्यत्र द्रष्टव्यम् ।

१-२-११ लिङ्सिँचा- ८-२-२६ झलो.... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी- प्रयोगो यथा -

(क) (ख) (ग) (घ)

१-२-५ असंयोगाल्लिँट् कित् ॥ १-२-९ इको झल् ॥ १-२-१० हलन्ताच्च ॥

१-२-११ (ख) (घ)(ग) लिङ्सिँचौ (क) आत्मनेपदेषु ॥ इति । [ख= इकः +(घ) = हलन्तात्] =इक्समीपाद् हलः परौ (ग) = झल्= झलौ= झलादी, लिङ्सिचौ= लिँङ् सिँच् च, (क)= कित्= कितौ भवतः, आत्मनेपदेषु= आत्मनेपदेषु परतः सत्सु । लिँङ्सिँचौ च इड्रहितौ झलादी संभवतः । इति बोधयित्वा प्रकृतोदाहरणे लक्षणसमन्वयं छात्रैःकारयित्वा ७-३-८६ पुँग... सूत्रेण गुणप्राप्तिं संभाव्य १-१-५ क्क्ङिति... सूत्रेण निषेधयेत् । अथ अरौध् +स्+ ताम्, अरौद्धाम् इत्यत्रेवच्छात्रैः साध्यमानां प्रक्रियां शिक्षकः शृणुयात् । अरुद्ध । अथ शिक्षकः ६-४-१०४ चिणो... सूत्रानन्तरम् अदिव् +इस्+ति इति प्रस्तुत्य ८-२-३ वार्तिके दर्शिते 'अदेवीत्' इत्यत्र ७-२-३ वद... सूत्रं गुणस्य बाधकं कथं न प्रवृत्तम् ?" इतिच्छात्राणामाकाङ्क्षामुद्भाव्य ७-२-४ नेटि- सूत्रमुपदिशेत् ।

१-२-१२ उश्च - उः= ऋवर्णात् परौ, प्राग्वत् । **अकृत** ८-२-२७ ह्रस्वा.... इति सलोपः ।

१-२-१३ वा ग - गमः = गम्धातोःपरौ, वा= वा प्राग्वत् । उदाहरणेषु १-३-२९ समो... इत्यात्मनेपदम् । ६-४-३७ अनु ... इति मलोपः । **समगत** इत्यत्र सलोपः प्राग्वत् ।

१-२-१४ हनः = हन्धातोः परः, झल् (१-२-९) सिँच्, कित् (१-२-५) आत्मनेपदेषु (१-२-११) । अनुवृत्त्यैव सिद्धे पुनरत्र सिँज्ग्रहणं किमर्थम् ? लिँङो निवृत्त्यर्थम् । अथैतस्मिन् सूत्रे आत्मनेपदेष्विति किमर्थमनुवर्त्यते ? परस्मैपदेषु कित्त्वं मा भूदिति । नैतदस्ति प्रयोजनम् । लुँङि परस्मैपदेषु हन्धातुर्नोपलभ्यते। कथम् ? वधादेशेनापहारात् । २-४-४२ हनो .... इत्यनुवर्तमाने २-२-४३ लुँङि च इति । यद्येवं सूत्रमिदं व्यर्थम् । कथम् ? यथा परस्मैपदे हन्धातोरपहारस्तथा ऽऽत्मनेपदेऽपि हन्धातुरपह्रियेत । नेत्याह- न चाऽत्मनेपदे सर्वथा हन्धातुरपह्रियते । कथं तर्हि ? विकल्पेन, २-४-४४ आत्म.... इति । यदि लुङि परस्मैपदे हन्धातोर्वधादेशेनापहारस्तर्हि आत्मनेपदेष्वित्यनुवृत्तिर्व्यर्था । यत आत्मनेपद एव हन् धातुर्लभ्यते । न च सा व्यर्था । किमर्था तर्हि ? उत्तरत्रानुवृत्त्यर्था । **आहत** १-३-२८ आङो .... इत्यात्मनेपदम् । शेषप्रक्रिया समगत इत्यत्रेव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-१५ यमो गन्धने ॥ १६

उदायत । गन्धन इत्युक्तेर्नेह-उदायंस्त पादम् । आकृष्टवानित्यर्थः ।

१-२-१६ विभाषोपयमने ॥

रामः सीतामुपायत, उपायंस्त वा ।

१-२-१७ स्थाघ्वोरिच्च ॥

उपास्थित । अदित । अधित ।

१-२-१८ न क्त्वा सेट् ॥ २६

शयित्वा ।

१-२-१९ निष्ठा शीङ्-स्विदि-मिदि-क्ष्विदि-धृषः ॥ २२

शयितः । स्वेदितः । मेदितः ।

क्ष्वेदितः । धर्षितः । सेडित्यनुवृत्तेर्नेह-स्विन्नः । मिन्नः । क्ष्विण्णः । धृष्टः ।

स्विद्यतेस्तु स्विदितः । स्विन्नः ।

१-२-१५ यमः- यम् धातोःपरः, प्राग्वत्, गन्धने=पैशुन्ये । **उदायत** परावद्यमाविष्कृतवानित्यर्थः । समगत इत्यत्रेव प्रक्रिया । आत्मनेपदं तु १-३-२८ आङो .... इति ।

१-२-१६ विभा- विभाषा= पूर्वोक्तं कार्यं विकल्पेन भवति, उपयमने= विवाहे गम्ये । उदाहरणयोः कित्त्वपक्षे प्राग्वत् प्रक्रिया । कित्त्वाऽभावे ८-३-२४ नश्चा.... इत्यनुस्वारः ।

१-२-१७ स्थाघ्वो:- स्थाधातोर्घुसंज्ञकधातूनां च स्थाने, इत्=इकारादेशो भवति, सिँच् (१-२-१४) च, कित् (१-२-५) आत्मनेपदेषु (१-२-११) । उदाहरणेषु ष्ठा (९२८) डुदाञ् (१०९०) डुधाञ् (१०९१) धातवः । आद्ये १-३-२६ अक....इति, अन्त्ययोः १-३-७२ स्वरि.... इत्यात्मनेपदम् । ८-२-२७ ह्रस्वा .... इति सलोपः ।

१-२-१८ न क्त्वा- १-१-३९ क्त्वातोसुँन्.... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

१-२-५ असंयोगाल्लिँट् कित् ॥ १-२-१८ न(क) क्त्वा सेट् ॥ इति ।

सेट् क्त्वा= इडागमसहितः क्त्वाप्रत्ययः, न+[(क) = कित्]= किन्न भवति । इत्यर्थोपदेशप्रसङ्गे अर्थात् किद्वन्न भवति; इति तात्पर्यम् । ककारस्य इत्संज्ञा तु भवत्येवेति बोधयन् बालकः शयित्वा उत्तिष्ठति, अत्र वाक्ये शी(ङ्) धातोःक्त्वाप्रत्यये, इटि च ककारस्येत्संज्ञायां सत्यामपि प्रकृतसूत्रेण कित्त्वप्रतिषेधात् १-१-५ क्क्ङिति सूत्राऽप्राप्तौ ७-३-८४ सार्व... सूत्रेण गुणो भवतीति स्फुटं बोधयेत् । एवं पूर्वकालवृत्तिक्रियावाचिभ्यः सर्वेभ्यो धातुभ्यः क्त्वाप्रत्ययो भवतीति बोधयेत् । तत्प्रसङ्गे 'अव्ययकृतो भावे' इति वचनाऽभ्यासन-पुरस्सरम्, अव्ययकृतो भावे भवन्तीति विशदयेत् । अथाऽधोनिर्दिष्टरूपेण शिक्षकश्छात्रानुपदिशेत्-वत्साः ? नेपालीभाषायाम् यत्र 'न' अथवा 'नका निमित्त' इत्युच्यते यथा-श्याम पढ्न (पढ्नका निमित्त) जान्छ । इत्यादि । हिन्दी भाषयां च 'ने के लिए' इत्युच्यते यथा-श्याम पढने के लिए जाता है । इत्यादि । तत्र सँस्कृतभाषायां धातुभ्यस्तुमुँन् प्रत्ययो भवति । वत्साः ? पढ्न (पढ्नका निमित्त) जान्छ । पढने के लिए जाता है । इत्युक्तौ प्रथमं गमनक्रिया पश्चात् पठनक्रिया प्रतीयते, इति बोधयित्वा ३-३-१० तुमुँ... सूत्रमुपदिशेत् ।

१-२-१९ निष्ठा- शीङ् .....धृषः=शीङ्प्रभृतिभ्यः परः, सेट् (१-२-१८) निष्ठा=निष्ठासंज्ञकः प्रत्ययः, न (१-२-१८) । उदाहरणेषु-शीङ् (१०३२) ञिष्विदाँ (७४३+९७८) ञिमिदाँ (७४२+१२४२) ञिक्ष्विदाँ (७४३+१२४३) ञिधृषाँ (१२६८)-धातवः । आद्ये ७-२-३५ आर्ध.... इतीट् । धृषेः ७-२-१९ धृषिशसी.... इति नियमादवैयात्ये इट् । अन्येषु ३-२-१८ निष्ठा-सूत्रस्थेन आदि... इति वार्तिकेन निष्ठा । ७-२-१७ विभा .....इति पाक्षिक इट् । कित्त्वप्रतिषेधाद् गुणप्रतिषेधाभावः । प्रत्युदाहरणेषु तु कित्त्वात् १-१-५ क्क्ङिति इति गुणप्रतिषेधः । अत्र दीक्षितः-ञिष्विदेति भ्वादिरत्र गृह्यते । ञीद्भिः साहचार्यात् । स्विद्यतेस्तु स्विदित इत्येव । ञिमिदा ञिक्ष्विदा दिवादी भ्वादी चेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-२० मृषस्तितिक्षायाम् ॥

मर्षितः । क्षान्त इत्यर्थः ।
तितिक्षायामित्युक्तेर्नेह-अपमृषितं वाक्यम् । अविस्पष्टमित्यर्थः ।

१-२-२१ उदुपधाद् भावादिकर्मणो-रन्यतरस्याम् ॥

द्युतितम्, द्योतितम् । द्युतितः, द्योतितः । मुदितम् मोदितम् । मुदितः, मोदितः ।
भावादिकर्मणोरित्युक्तेर्नेह-रुचितं कार्षापणम् ।
अत्र काशिका-व्यवस्थितविभाषा चेयम् ।
तेन शब्विकरणानामेव भवति ।
गुध परिवेष्टने गुधितमित्यत्र न भवतीति ।

१-२-२२ पूङः क्त्वा च ॥ २६

पवित्वा । पवितः ।

१-२-२३ नोपधात् थफान्ताद् वा ॥ २६

श्रथित्वा, श्रन्थित्वा । गुफित्वा, गुम्फित्वा ।

१-२-२४ वञ्चिलुञ्च्यृतश्च ।

वचित्वा, वञ्चित्वा । लुचित्वा, लुञ्चित्वा । ऋतित्वा, अर्तित्वा ।

१-२-२५ तृषिमृषिकृशेः काश्यपस्य ॥

तृषित्वा, तर्षित्वा । मृषित्वा, मर्षित्वा । कृशित्वा, कर्शित्वा ।

१-२-२६ रलो व्युपधाद् धलादेः सँश्च ॥

शुभित्वा, शोभित्वा । शुशुभिषते, शुशोभिषते । लिखित्वा, लेखित्वा । लिलिखिषति, लिलेखिषति ।

१-२-२० मृषः=मृष्धातोःपरः,सेट् (१-२-१८) निष्ठा (१-२-१९) न (१-२-१८) तितिक्षायाम्=क्षमायाम् ।

१-२-२१ उदुपधाद्= उदुपधाद् धातोः परः, भावादिकर्मणोः= भावे आदिकर्मणि च विहितः, सेट् (१-२-१८) निष्ठा (१-२-१९) अन्यतरस्याम्=वा, न (१-२-१८) । उदित्यत्र तकारो मुखसुखार्थः । दीर्घोपधानामलघूपधत्वादेव गुणप्रसङ्गा ऽभावत् ।

१-२-२२ पूङः=पूङ्धातोः परः, सेट् (१-२-१८) क्त्वा=क्त्वाप्रत्ययः, निष्ठा (१-२-१९) च, न (१-२-१८) । सूत्रे ऽस्मिन् क्त्वाग्रहणं किमर्थम् ? स्फुटमेवैतदकिदर्थमिति । नैतदस्ति प्रयोजनम् । १-२-१८ न क्त्वा इत्येव सिद्धम् । उत्तरार्थं तर्हि क्त्वाग्रहणम् । अथाऽत्र सूत्रे ऽन्यतरस्यामित्यनुवर्तते न वा ? नानुवर्तते । यद्यत्राऽनुवर्तेत तर्हि इतो ऽनुवृत्त्यैव सिद्धे ऽग्रिमसूत्रे वा ग्रहणं व्यर्थं स्यात् । उदाहरणयोः ७-२-५१ पूङः.... इतीट् ।

१-२-२३ नोपधात्= नकारोपधकात्, थफान्तात्= थकारफकारान्ताद् धातोः परः, सेट् (१-२-१८) क्त्वा (१-२-२२) वा= विकल्पेन, न (१-२-१८) । अत्र सूत्रे क्त्वामात्रमनुवर्तते न तु निष्ठा । पूर्वसूत्रे चानुकृष्टत्वात् । तथा च परिभाषा पठ्यते- 'चानुकृष्टं नोत्तरत्र' इति । कित्त्वपक्षे ६-४-२४ अनि .... इति न लोपः ।

१-२-२४ वञ्चिलुञ्च्यृतः =वञ्च् लुञ्च् ऋत् इति धातुभ्यः परः, प्राग्वत् । किमर्थो ऽत्र सूत्रे चकारः ? वा इत्यनुवृत्त्यर्थः । चकारं विनाऽपि वा इत्यनुवृत्तौ कः प्रतिबन्धः ? अथ भवान् कथयतु प्रकृतसूत्रे चकाराभावे उत्तरसूत्रे काश्यपग्रहणं किमर्थं सम्भाव्येत ? विकल्पार्थम् । यद्येवं तर्हि प्रकृतसूत्रे वा इति नानुवर्तत इति संभाव्येत । यद्यनुवर्तेत तर्हि तदेवोत्तरसूत्रे ऽप्यनुवर्तेतेति काश्यपग्रहणं व्यर्थं स्यात् । किञ्चातः ? पठितव्यश्चकारो वा इत्यनुवृत्तये । उदाहरणेषु आद्ययोः कित्त्वपक्षे नलोपः । अन्त्ये कित्त्वा ऽभावपक्षे गुणः ।

१-२-२५ तृषि.... कृशेः = तृष् मृष् कृश् इति धातुभ्यः परः, प्राग्वत् ।

१-२-२६ रलो- व्युपधात् = उकारेकारोपधकात् , रलः = रलन्ताद्, हलादेः = हलादेर्धातोः परः, सेट् (१-२-१८) क्त्वा (१-२-२२) सन् च, वा (१-२-२३) कित् (१-२-५) । अथ- किमिदं व्युपधादिति ? उश्च इश्च वी तौ उपधे यस्य स व्युपधस्तस्माद् व्युपधादिति । अथ किमिदं हलादेरिति ? हल् आदिर्यस्य स हलादिः, तस्माद् हलादेरिति । अथ किमिदं रल इति ? रल् इति प्रत्याहारवाची शब्दः । तस्य पञ्चम्यन्तं रूपं रल इति । को ऽर्थस्तस्य ? रलन्तादिति । कथं रल इत्यस्य रलन्तादित्यर्थः सम्भवति ? १-१-७१ येन.... इति तदन्तविधिबलात् । उदाहरणेषु शुभ् (४३१ +१३२०) लिख् (१३६४) धातू । कित्त्वपक्षे गुणप्रतिषेधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-२७ ऊकालोऽज्झ्रस्वदीर्घप्लुतः ॥ ३१, २८
१-२-२८ अचश्च ।

१-२-२९ उच्चैरुदात्तः ॥
ये ।

१-२-२७ ऊकालो- अथा ऽत्र सूत्रे किमिदम् ऊकाल इति ? उश्च ऊ२ श्च ऊ ३ श्च= वः= त्रय ऊकाराः = एकमात्र-द्विमात्र-त्रिमात्राः । वाम् = त्रयाणामूकाराणां कालः = ऊकालः = त्रयाणामूकाराणामुच्चारणकालः । ऊकाल इव कालो यस्य स ऊकालः । एकमात्रिकद्विमात्रिकत्रिमात्रिकोकारोच्चारणकालसदृशोच्चारणकालः, अच्, ह्रस्वदीर्घप्लुतः = ह्रस्व-दीर्घ प्लुतसंज्ञको भवति । ननु च भोः ऊकालकाल इति प्राप्नोति ? नैष दोषः । उत्तरपदलोपो ऽत्र द्रष्टव्यः । अथ किं प्रत्येकं तिस्रः संज्ञाः ? नेत्याह- क्रमश एकैका । यथोपदिशति भगवान् सूत्रकार एव । यथा- १-३-१० यथा..... इति । को ऽस्य सूत्रस्य स्फुटो ऽभिप्रायः ? उच्यते-एकमात्रिकोकारोच्चारणे यावान् कालो ऽपेक्ष्यते तावता कालेनोच्चार्यमाणो ऽच् ह्रस्वसंज्ञो भवति । द्विमात्रिकोकारोच्चारणे यावान् कालो ऽपेक्ष्यते तावता कालेनोच्चार्यमाणो ऽच् दीर्घसंज्ञो भवति । त्रिमात्रिकोकारोच्चारणे यावान् कालो ऽपेक्ष्यते तावता कालेनोच्चार्यमाणो ऽच् प्लुतसंज्ञो भवति । अर्थात् एकमात्रो ऽच् ह्रस्वः । द्विमात्रो ऽच् दीर्घः । त्रिमात्रो ऽच् प्लुतः । इति निष्कर्षः । यद्येवं प्रकृतसूत्रे ऽज्ग्रहणं न कर्तव्यम् । कथम् ? अथ भवान् कथयतु अज्ग्रहणं किमर्थम् ? हल्व्यावृत्त्यर्थम् । नैतदस्ति प्रयोजनम् । कथम् ? एक-द्वि-त्रि-मात्रा इत्युच्यते न च हल्वर्णा एकद्वित्रिमात्राः सन्ति । कियन्मात्रास्तर्हि सन्ति ? अर्धमात्राः । किञ्चातः अज्ग्रहणं न कर्तव्यं व्यावर्त्या ऽभावात् । कर्तव्यमेव । किं प्रयोजनम् ? संयोगव्यावृत्त्यर्थम् । यथा **संरक्ष्य** इत्यत्र ककार-षकाराभ्यामर्धमात्राभ्यां मिलिताभ्यां सम्पन्न एकमात्रः क्ष् इति संयोगः । तस्य ह्रस्वसंज्ञा स्यात् । किं च स्याद् यदि क्ष् इत्यस्य ह्रस्वसंज्ञा स्यात् ? ६-१-६९ ह्रस्व... इति तुँगागमः स्यात् । अतः संयोगव्यावृत्त्यर्थमज्ग्रहणं कर्तव्यम् ।

अ इ उ ऋ ऌ इत्येते वर्णा ह्रस्वाः । आ ई ऊ ॠ ए ओ ऐ औ इत्येते वर्णा दीर्घाः । आ ३ ई ३ ऊ ३ ॠ ३ ऌ ३ ए ३ ओ ३ ऐ ३ औ ३ इत्येते वर्णाः प्लुताः । ऌवर्णो दीर्घो नास्ति । ए ओ ऐ औ इत्येते वर्णा ह्रस्वा न सन्ति । व्यञ्जनवर्णा अर्धमात्रा भवन्ति । अतो न ते ह्रस्वादयः ।

एकमात्रो भवेद् ह्रस्वो
द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो
व्यञ्जनञ्चाऽर्धमात्रकम् ॥

१-२-२८ अच- ७-३-८३ जुसि च - सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-
(क)
१-२-२७ ऊकालो ऽच् ह्रस्व-दीर्घ-प्लुतः ॥ १-२-२८ (क) अचश्च ॥ इति । (क)= ह्रस्व-दीर्घ प्लुतः = ह्रस्वो दीर्घः प्लुतश्च, अचः = अचः स्थाने भवन्ति । (द्वितीयावृत्तौ तु यथासूत्राभिप्रेतमर्थमुपदिशेत् । तथाहि - ह्रस्वशब्दमुच्चार्य यत्र ह्रस्वो विधीयते दीर्घशब्दमुच्चार्य दीर्घो विधीयते प्लुतशब्दमुच्चार्य च प्लुतो विधियते तत्र, अचः = 'अचः' इति षष्ठयन्तं पदमुपतिष्ठत इति । एष चा ऽर्थः पूर्वसूत्रात् अच् इत्यप्यनुवर्त्य ह्रस्वो दीर्घः प्लुतो यो ऽच् इति योजनया लभ्यते । तेन ७-२-१०२ त्यदादीनामः ७-१-८५ पथिमथ्यृभुक्षामात् इत्यादौ न दोषः) अस्याऽभिप्रायं बोधयित्वा ७-४-२५ अकृत्सार्व... सूत्रं पाठयेत् ।
१-२-२९ उच्चै- अत्र श्रुतिप्रकर्षो न गृह्यते किन्तु स्थानकृतमुच्चैस्त्वम् । भागत्रयवन्ति ताल्वादि-स्थानानि भवन्तीति ध्येयम् । अथ सूत्रार्थः - उच्चैः = ताल्वादिस्थानानामुपरिभागे उच्चार्यमाणः, अच् (१-२-२७) उदात्तः = उदात्तसंज्ञको भवति । **ये** यच्छब्दः फिष (१ फि.) इत्यन्तोदात्तः । जस् ३-१-४ अनु... इत्यनुदात्तः । त्यदाद्यत्वे पररूपे शीभावे गुणे च ८-२-५ एका.... इत्येकार उदात्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-३० नीचैरनुदात्तः ॥

नमस्ते । अर्वाङ् ।

१-२-३१ समाहारःस्वरितः ॥

क्व ।

१-२-३२ तस्यादित उदात्तमर्धह्रस्वम् ॥

१-२-३३ एकश्रुति दूरात् सम्बुद्धौ ॥ ३९

आगच्छ भो देवदत्ता ३ ।

१-२-३० नीचैः = ताल्वादिस्थानानामधोभागे उच्चार्यमाणः, अच् (१-२-२७) अनुदात्तः = अनुदात्तसंज्ञको भवति। **नमस्ते** ८-१-२२ ते म .... इत्यनुदात्तस्ते इत्यादेशः। अनुदात्तश्रवणं च पदकाले। संहितायां तु १-२-३९ स्वरितात्... इत्यैकश्रुत्यम्।

अर्वाङ् अत्र अव्युत्पन्नं प्रातिपदिकमिति मते फिट्स्वरेणान्तोदात्तत्वे शेषनिघातेनाद्योऽकारोऽनुदात्तः। व्युत्पन्नमिति मते रीतौ भिन्नायामपि स्वरः स एव।

१-२-३१ समा-किमिदं समाहार इति ? समाहारो ऽस्त्यस्मिन्निति समाहारः। कथं सिध्यति ? ५-२-१२७ अर्श.... इति समाहारशब्दान्मत्वर्थीयो ऽच्। अत्राधिकरणरूपोऽन्यपदार्थः कः ? १-१-२७ ऊका..... सूत्रादनुवर्तमानो ऽच्। अथा ऽत्र आधेयरूपो यः समाहारःस कतरपदार्थकः ? संघातपदार्थकः। कयोः संघातः ? उदात्तत्वा ऽनुदात्तत्वयोर्वर्णधर्मयोः। कथं ज्ञायते उदात्तत्वा ऽनुदात्तत्वयोर्वर्णधर्मयोरिति ? अथ भवान् कथयतु कयोस्तर्हि संघातः संभाव्येत ? सन्निहितयोरुदात्तानुदात्तयोर्वर्णयोरिति। नेत्याह- नह्येकस्मिन्नचि उदात्तानुदात्तयोर्वर्णयोः संघातः संभवति। किञ्चातः ? उदात्तानुदात्तयोर्वर्णयोः संघात एकस्मिन्नचि न संभवति, समाहार इति चोच्यते, तेन उदात्तत्वा ऽनुदात्तत्वयोर्वर्णधर्मयोः संघात इति ज्ञायते। अथेदं विचार्यते -कथमेकस्मिन् धर्मिणि विरुद्धयोरुदात्तत्वानुदात्तत्वयोर्वर्णधर्मयोःसमावेशः ? अग्रिम-सूत्रस्थ-भाष्यात् स्फुटीभविष्यति। **क्व** ५-३-१२ किमो ऽत् इत्यत् प्रत्ययः। ७-२-१०५ क्वाति इति क्वादेशः। ६-१-१८० तित्स्वरितमिति स्वरितः।

१-२-३२ तस्या- तस्य = स्वरितस्य, आदितः = आदितो वर्तमानम्, अर्धह्रस्वम् = अर्धमात्रा, उदात्तम् = उदात्तं बोध्यम्। शिष्टमनुदात्तम्। सूत्रे किमिदम् आदितः इति ? आदौ इति आदितः। ५-४-४४ प्रति... सूत्रस्थेन तसिँप्रकरणे आद्या... इति वार्तिकेन सप्तम्यन्तात् तसिँः। यद् वा आदिना एकदिक् आदितः। ४-३-११३ तसिँ.... इति तृतीयान्ताद् तसिँः। अथा ऽत्र सूत्रे केचिद् अर्धह्रस्वमित्यत्र ह्रस्वग्रहणमतन्त्रमिति मत्वा, अर्धमुदात्तमिति व्याचक्षते। तत्रा ऽऽद्यपक्षे दीर्घप्लुतयोरपि आद्या ऽर्धमात्रैवोदात्ता शिष्टमनुदात्तं भवति। अन्त्यपक्षे तु आद्यः स्वरार्धभाग उदात्तो भवति शिष्टमर्धञ्चानुदात्तम्। शाखाभेदेन व्यवस्था। अत्रोपदिशति भगवान् भाष्यकारः- किमर्थं पुनरिदमुच्यते ? आमिश्रीभूतमिवेदं भवति। तद् यथा क्षीरोदके सम्पृक्ते आमिश्रीभूतत्वान्न ज्ञायते कियत् क्षीरम्, कियदुदकम्, कस्मिन्नवकाशे क्षीरम्, कस्मिन् वोदकमिति। एवमिहाप्यामिश्रीभूतत्वान्न ज्ञायते- कियदुदात्तम्, कियदनुदात्तम्, कस्मिन्नवकाशे उदात्तम्, कस्मिन्ननुदात्तमिति। तदाचार्यः सुहृद् भूत्वा ऽन्वाचष्टे इयदुदात्तमियदनुदात्तमस्मिन्नवकाश उदात्तम्, अस्मिन्नवकाशे ऽनुदात्तमिति। अस्माद् भाष्यात् कथमेकस्मिन् धर्मिणि विरुद्धयोरुदात्तत्वानुदात्तत्वयोर्वर्णधर्मयोः समावेश इति पूर्वसूत्रे कृतस्य प्रश्नस्याप्युत्तरं दत्तं भवति। कथम् ? उदात्तत्वा ऽनुदात्तत्वे वर्णधर्मौ न खलु प्रत्येकं व्याप्य तिष्ठतः। कथन्तर्हि तिष्ठतः ? पूर्वभागे उदात्तत्वम्, शेषभागे ऽनुदात्तत्वम्।

१-२-३३ एक- दूरात्= विप्रकृष्टात्, सम्बुद्धौ= आह्वाने वर्तमानं वाक्यम्, एकश्रुति= एकविधश्रवणं भवति, अर्थात् तिरोहितोदात्तादिभेदं भवति प्लुतवर्जम्। सूत्रे किमिदम् एकश्रुतीति ? एका श्रुतिर्यस्य तदेकश्रुति। अत्रा ऽन्यपदार्थःकः ? वाक्यम्। किं वक्तव्यमेतत् ? न हि। कथमनुच्यमानं ज्ञायते ? ज्ञायत इत्याह-एकश्रुति इति नपुंसकनिर्देशः। श्रोत्रग्राह्यश्च शब्दो भवति। तेन वाक्यमिति ज्ञायते। अथ कः खलु भेद एकश्रुतिस्वरितयोः ? विग्रहादेवाऽवगम्यते यदुदात्तत्वादिभेदतिरोधानादेकविधश्रवणमेकश्रुतीति। स्वरिते ऽप्युक्तम्। किमुक्तम् ? पूर्वभागे उदात्तत्वम्, शेषभागे ऽनुदात्तत्वमिति। अथ दूरादिति कस्य विशेषणम् ? सम्बुद्धेः। नेत्याह - न खलु दूरादिति सम्बुद्धेर्विशेषणं सम्भवति। कथम् ? सम्बुद्धिर्नाम प्रथमैकवचनम्। यथोपदिशति भगवान् सूत्रकारः- २-३-४९ एक.... इति। नचैकवचनस्य दूरादिति विशेषणं सम्भवति। न तर्हि पारिभाषिक्याः सम्बुद्धेर्ग्रहणम् एकवचनं सम्बुद्धिरिति। किं तर्हि ? अन्वर्थग्रहणं विज्ञायते सम्बोधनं सम्बुद्धिरिति। किमविशेषेण एकश्रुति भवति ? नेत्याह- अप्लुतम्=प्लुतं वर्जयित्वेति। स तर्हि तथा निर्देशः कर्तव्यः। अप्लुतमेकश्रुतीति। न कर्तव्यः। अन्तरेण अप्लुतमिति निर्देशं कथमप्लुतमित्यर्थो ज्ञायेत ? ज्ञायत इत्याह-उदात्तविधानसामर्थ्यात्। उपदिशति हि भगवान् सूत्रकारः ८-२-८२ वाक्यस्य टेः प्लुत उदात्त इत्यनुवर्तमाने ८-२-८४ दूराद्धूते च। इति। यदि प्लुतमप्येकश्रुति स्यात् तर्हि उदात्तविधानं व्यर्थं स्यात्। तथा च दूराद्धूते च इति सूत्रे काशिका-अस्याश्च प्लुतेरेकश्रुत्या समावेश इष्यत इति। वाक्ये समावेश इति तदभिप्रायः। नत्ववयवे। एकस्मिन्नवयवे विरुद्धयोः समावेशा ऽसम्भवात्। अतो वाक्यस्य टे :प्लुतो भवति, शेषमेकश्रुतीति बोध्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-३४ यज्ञकर्मण्यजपन्यूङ्खसामसु ॥ ३५
अग्निर्म्मूर्द्धा दिवःककुत्पतिः पृथिव्या अयम् ।
अपा (९.७) रेता (९.७) सि जिन्वतो ३म् ।
यज्ञकर्मणीत्युक्तेः स्वाध्यायकाले
त्रैस्वर्यमेव । अजपेत्युक्तेरिह त्रैस्वर्यमेव-
ममाग्ने वर्चो विहवेष्वस्तु । अन्यूङ्खेत्युक्तेः
षोडशसु त्रयस्त्रिमात्रा ओकारा
उदात्तास्त्रयोदशा ऽर्धौकारा
अनुदात्ताः । असामस्वित्युक्तेरिह
त्रैस्वर्यमेव-ए ३ विश्वं समत्रिणं दहा ३ ।

१-२-३४ यज्ञकर्मणि, एकश्रुति (१-२-३३) किमविशेषेण ? नेत्याह-अजपन्यूङ्खसामसु इति । जप उपांशुप्रयोगः । ते मन्त्रा एव यदा जलनिमग्नेनेव सूक्ष्ममुच्चार्यन्ते तदा जपशब्देन व्यवह्रियन्ते । न्यूङ्खाः षोडश ओकाराः । तेषां परिचयाय पदमञ्जरी प्रस्तूयते- तेषु (षेडशस्वोकारेषु) प्रथम-सप्तम-त्रयोदशास्त्रय उदात्तास्त्रिमात्राः । इतरे त्रयोदश अनुदात्ता अर्धौकाराः । एतच्च आश्वलायनेन चतुर्थे ऽहनीत्यस्मिन् खण्डे लक्षणेनोक्तमुदाहृतं चेति । सामानि=गीतयः । तत्रैकश्रुत्यं न भवति । किं तर्हि ? त्रैस्वर्यमेव । अथाऽत्र दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ इत्यैतिह्य- प्रसिद्धस्य 'इन्द्रशत्रुर्वर्धस्व' इत्यूहितस्य वाक्यस्य विवरणे सन्देहो भवति । किं तद् विवरणम्, यत्र सन्देहः स्यात् ? उच्यते-इन्द्रशत्रुरित्यत्र शत्रुशब्दो यौगिकः । शातयिता= शत्रुरिति । न तु रिपुवाची रूढशब्दः । न हि रूढशब्दे बहुव्रीहितत्पुरुषयोरर्थभेदः । अथ इन्द्रस्य शातयिता इत्यर्थे सति तत्पुरुषे इन्द्रशत्रुरितिशब्दो ऽन्तोदात्तःप्रयोक्तव्यः । परन्तु त्वष्ट्रा ऽऽद्युदात्तः प्रयुक्तो यः खलु स्वरो बहुव्रीहौ भवति । तेन स्वरदोषेण इन्द्रः शत्रुः = शातयिता यस्य वृत्रस्य सः, इन्द्रशत्रुः = वृत्रः । वृत्रस्य शातयिता = वृत्रस्य हन्ता इन्द्रो ऽभूदिति विवरणम् । कश्चाऽत्र सन्देहः ? स एष सन्देहो यद् यज्ञकर्मणीति सूत्रे जागरूके एकश्रुतौ प्रयोक्तव्ये आद्युदात्तः प्रयुक्त इति वक्तव्यं स्यात् । अन्तोदात्ते प्रयोक्तव्ये आद्युदात्तः प्रयुक्त इति विव्रियत इति । नास्ति सन्देहः । कथम् ? यज्ञकर्मणीति सूत्रेण मन्त्राणामेवैकश्रुत्यं विधीयते । न चोहितं वाक्यं मन्त्रो भवति । यथोपदिशति भगवाञ्जैमिनिः -अनाम्नातेष्वमन्त्रत्वम् (पू.मी. २-१-३४) इति । के तर्हि मन्त्राः ? आम्नाताः = वेदेषु पठिताःकण्डिकाः । यद्येवं मन्त्रे इति निर्देशः कर्तव्यः । स तर्हि तथा निर्देशः कर्तव्यः, मन्त्रे यज्ञकर्मण्यजपन्यूङ्खसामसु इति । न कर्तव्यः । अन्तरेण मन्त्रे इति निर्देशं कथं मन्त्रे इत्यर्थो लभ्यते ? अथ भवान् कथयतु सूत्रे ऽस्मिन् पर्युदस्यमानानि जपन्यूङ्खसामानि कुत्रोपलभ्यन्ते ? वेदेषूपलभ्यन्ते । एवं तर्हि तेषां पर्युदासादेव अन्तरेणापि मन्त्रे इति निर्देशं मन्त्रे इत्यर्थो लभ्यते । कथम् ? सादृश्यं नञर्थः । अजपन्यूङ्खसामसु =जपन्यूङ्खसामसदृशेषु । के पुनर्जपन्युङ्खसामसदृशाः ? मन्त्राः । उदाहरणे अग्निशब्दः, अङ्गे (४९९ उ.सू.) इति सूत्रेण निप्रत्ययान्तः ३-१-३ आद्यु.... इति प्रत्ययस्वरेणान्तोदात्तः । मूर्धञ्शब्दः श्वन्नु.... (१६५ उ.सू.) इति सूत्रेण कनिन् प्रत्ययान्त आद्युदात्तो निपात्यते । दिव इत्यत्र ६-१-१६६ ऊडि... इति विभक्तिरुदात्ता । पतिशब्दो डतिप्रत्ययान्तः ३-१-३ आद्यु... इति प्रत्ययस्वरेणाद्युदात्तः । ककुदः पतिः = ककुत्पतिः इत्यत्र ६-१-२१८ समा... इत्यन्तोदात्तत्वम् । पृथिव्या इत्यत्र ६-१-१६९ उदा... इति विभक्तिरुदात्ता । अयमिति कमिप्रत्ययान्तस्येदमो रूपम् । तत्र ३-१-३ आद्यु... इति प्रत्ययस्वरेणान्तोदात्तत्वम् । अपामित्यत्र ६-१-१६६ ऊडि... इति विभक्तिरुदात्ता । रेतः शब्दो ऽसुँन् प्रत्ययान्तः ६-१-१९२ ञ्नित्या... इत्याद्युदात्तः । जिन्वतेर्लँटि तिपि जिन्वति इत्यत्र ८-२-८९ प्रण.... इत्युदात्त ओम् । एतेषु स्वरेषु एकश्रुतिर्विधीयते । प्रत्युदाहरणेषु-ममेत्यत्र ६-१-२०६ युष्म... इत्याद्युदात्तत्वम् । अग्ने इत्यत्र ८-१-१९ आम... इति निघातः । वर्चश्शब्दो ऽसुँन्प्रत्ययान्तो ञ्नित्या... इत्याद्युदात्तः । विहवशब्दो विपूर्वाद् ह्वेञ् धातोः ३-३-७२ ह्वःसं... इत्यपि सम्प्रसारणे च २-२-१९ उप.... इति समासे ६-२-१४३ थाथ... इत्यन्तोदात्तः । अस्तु इत्यस्य ८-१-२८ तिङ्ङः... इति निघातः । **ए ३ विश्वमिति**-ए इति (८० फि.) निपा.... इत्याद्युदात्तः । विश्वशब्दः क्वन् प्रत्ययान्तः ६-१-१९२ ञ्नित्या.... इत्याद्युदात्तः । समं च तदत्रिणं समत्रिणम् ६-१-२१८ समा.... इत्याद्युदात्तः । दहा ३ इति ६-३-१३५ द्व्यचो.... इति दीर्घः । ८-१-२८ तिङ्ङः.... इति निघातः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-३५ उच्चैस्तरां वा वषट्कारः ॥
सोमस्याग्ने वीही ३ वौ ३षट्
१-२-३६ विभाषा छन्दसि ॥
इषे त्वोर्जेत्वा । अग्न आयाहि
वीतये । शन्नो देवीरभीष्टये ।
१-२-३७ न सुब्रह्मण्यायां
स्वरितस्य तूदात्तः ॥३८

सुब्रह्मण्यो ३ मिन्द्रागच्छ ।
(असावित्यन्तः)
गार्ग्यो यजते ।
(अमुष्येत्यन्तः)
दाक्षेःपिता यजते ।
(स्यान्तस्योपोत्तमं च)
गार्ग्यस्य पिता यजते ।

१-२-३५ उच्चै- यज्ञकर्मणि (१-२-३४) वषट्कारः = वौषट्शब्दः, उच्चैस्तरां वा = उदात्ततरो वा, एकश्रुतिः (१-२-३३) वा। उदात्ततर एकश्रुतिर्वा भवति। अथ किमिदमुच्चैस्तरामिति ? अतिशयेनोच्चैरुच्चैस्तराम् = उदात्ततरः । अथ कः वषट्कारः ? वौषट्शब्दः । कथं तर्हि वौषट्शब्द एव नोपात्तः ? सत्यम् । अत्र काशिका-वौषड्ग्रहणमेव कस्मान्न कृतम् ? वैचित्र्यार्थम् । विचित्रा हि सूत्रस्य कृतिः पाणिनेरिति ।

१-२-३६ विभा- छन्दसि= वेदे, विभाषा= विकल्पेनैकश्रुतिर्भवति। वा (१-२-३५) इत्यनुवर्तमाने पुनर्विभाषाग्रहणं किमर्थम् ? यज्ञकर्मणीति निवृत्त्यर्थम् । तेन स्वाध्यायकाले ऽपि विभाषयैकश्रुतिर्भवति । अत्र काशिका-व्यवस्थितविकल्पो ऽयमिति केचित् । व्यवस्था च वेदे मन्त्रदले नित्यं त्रैस्वर्यम् । ब्राह्मणदले नित्यमैकश्रुत्यमिति । अथा ऽत्र दीक्षितः - व्यवस्थितविभाषेयम् । संहितायां त्रैस्वर्यम् । ब्राह्मणे एकश्रुतिर्बह्वृचानाम् । अन्येषामपि यथासम्प्रदायं व्यवस्थेति । यद्येवं बहुलं छन्दसि इति निर्देशः कर्तव्यः । कथम् ? बहुलमिति निर्देशे हि क्वचित् प्रवृत्तिःक्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेवेति स्फुटं प्रतिपत्तिर्भवतीति । एवन्तर्हि स्फुटप्रतिपत्तये बहुलमिति निर्देशे कर्तव्ये यद् विभाषाग्रहणं करोति तज् ज्ञापयति भगवान् सूत्रकारः- सूत्रमिदं द्वेधा छेद्यमिति । कौ च प्रकारौ छेदस्य ? एकस्तावत् प्रकार उक्त एव विभाषा छन्दसीति । अन्यः पुनः प्रकार उच्यते-विभाषा अच्छन्दसीति । किञ्च तेन सिध्यति ? लोकेऽपि विकल्पेन एकश्रुतिः सिध्यति। किमु भो द्व्यर्थान्यपि वाक्यानि भवन्ति ? भवन्तीत्याह- यथोदाहरति भगवान् भाष्यकारः श्वेतो धावति। अलम्बुसानां पातेति। कोऽर्थस्तयोरुदाहरणयोः ? श्वा=कुकुर इतो धावति, श्वेतः=शुक्लः धावति । बुसानाम्=कडङ्गराणाम् अलम्=यथेच्छम्, पाता = भक्षयिता । अलम्बुसानाम्=देशानाम्, पाता=रक्षितेति ।

१-२-३७ न सु- सुब्रह्मण्यायाम्= सुब्रह्मण्याख्ये निगदविशेषे, नः = १-२-३४ यज्ञ... इति १-२-३६ विभा.... इति च प्राप्ता एकश्रुतिर्न भवति । स्वरितस्य तु=स्वरितस्थाने तु, उदात्तः = उदात्तो भवति । अथ किमिदं सुब्रह्मण्येति ? निगदविशेषः । कः खलु निगदो यस्य विशेषः सुब्रह्मण्येति ? पादबन्धरहितं यजुरात्मकं यन्मन्त्रवाक्यं स निगदः । कथम् ? अपादबन्धे गदिर्वर्तते । यथा गद्यम् इति । उदाहरणे - सुब्रह्मण्याशब्दः ४-४-९८ तत्र.... इति यत्प्रत्ययान्तः । अतः ६-१-१८० तित्स्व.... इति स्वरितान्तः । ततष्टापा सहैकादेश आन्तरतम्यात् स्वरितः । ओं शब्दः (८० फि.) निपा.... इत्याद्युदात्तः । ६-१-९२ ओमा... इति पररूपे सुब्रह्मण्यो ३ मिति । आन्तरतम्यात् ओकारःस्वरितः ।

अत्र वाक्ये ऐकश्रुत्यनिषेधेन सह ओकार उदात्तः क्रियते प्रकृतसूत्रेण । इन्द्रागच्छ अत्र इन्द्र इति ६-१-१९३ आम... इत्याद्युदात्तः । द्वितीयो वर्णः = अ इति ६-१-१५३ अनु... इत्यनुदात्तः । ततः ८-४-६५ उदा... इत्यकारः स्वरितः । आगच्छ इत्यत्र (८१ फि.) उप.... इत्याकार उदात्तः । ६-१-१५३ अनु... इति शिष्टमनुदात्तम् । ८-४-६५ उदा... इति गकारोत्तराकारःस्वरितः । अत्र वाक्ये ऐकश्रुत्यप्रतिषेधेन सह द्र इत्यस्य ग इत्यस्य च अकार उदात्तः क्रियते प्रकृतसूत्रेण । एवम् 'इन्द्र आगच्छ' इति वाक्ये चत्वार उदात्ताःसम्पन्नाः । अन्तिमो ऽनुदात्त इति ।

असावित्यन्तः:-असौ इति=प्रथमान्तस्य, अन्तः= अन्तिमो वर्णः, उदात्तः (१-२-३७) । असौ इति प्रथमान्तोपलक्षणम् । उदाहरणे ६-१-१९२ ञ्नित्या... इति प्राप्ते ऽनेना ऽन्तोदात्तत्वम् ।

अमुष्येत्यन्तः:- अमुष्य इति = षष्ठ्यन्तस्य प्राग्वत् । अमुष्येति षष्ठ्यन्तोपलक्षणम् ।

स्यान्तस्योपोत्तमं च - स्यान्तस्य= स्य इत्यन्तस्य, अमुष्य= षष्ठ्यन्तस्य, उपोत्तमम्, अन्तश्च, उदात्तः (१-२-३७) । किमिदमुपोत्तममिति ? ४-१-७८ अणि..... सूत्रे द्रष्टव्यम् । उदाहरणे द्वावुदात्तौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(वा नामधेयस्य)
देवदत्तस्य पिता यजते ।
१-२-३८ देवब्रह्मणोरनुदात्तः ॥
देवा ब्रह्माण आगच्छत ।
१-२-३९ स्वरितात् संहितायामनुदात्तानाम् । ४०

पचति । इमं मे गङ्गे यमुने सरस्वति ।
१-२-४० उदात्तस्वरितपरस्य सन्नतरः ॥
इमं मे गङ्गे यमुने सरस्वति शुतुद्रि । माणवक जटिलका ऽध्यापक क्व गमिष्यसि ।

वा नामधेयस्य-स्यान्तस्य, नामधेयस्य = नामवाचिनः, अमुष्य=षष्ठचन्तस्य, उपोत्तमम्, वा= उदात्तः (१-२-३७) वा । इमानि वार्तिकान्यपि प्रागुक्तनिगद- विषयकाणि ।

१-२-३८ देव - सुब्रह्मण्यायाम् + न (१-२-३७) देवब्रह्मणोः =देवशब्दस्य ब्रह्मञ् शब्दस्य च, स्वरितस्य तु (१-२-३७) अनुदात्तः । उदाहरणवाक्ये द्वयोरपि पदयोः ६-१-१९३ आम.... इत्याद्युदात्तत्वे ६-१-१५३ अनु... इति शेषनिघाते ८-४-६५ उदा.... इति स्वरिते पूर्वसूत्रेण ऐकश्रुत्यप्रतिषेधेन सह स्वरितस्य स्थाने उदात्ते प्राप्ते तं बाधित्वा ऽनुदात्तः क्रियते प्रकृतसूत्रेण । आगच्छतेत्यत्र तु स्वरप्रक्रिया पूर्वसूत्रोदाहृते आगच्छेत्यत्रेव बोध्या ।

१-२-३९ स्वरितात् = स्वरितात्परेषाम्, अनुदात्तानाम् = अनुदात्तानां स्थाने, एकश्रुति (१-२-३३) संहितायाम् । किमनेन क्रियते ? उक्तमेव एकश्रुति इति । यद्यवेम् एकश्रुति इति वक्तव्यम् । ननु च प्रकृतमनुवर्तते । क्व प्रकृतम् ? १-२-३३ एकश्रुति दूरात् सम्बुद्धौ इति । विच्छिन्नं तत् प्रतिषेधेन उदात्तानुदात्ताभ्यां च पूर्वसूत्रेषु । अस्तु पूर्वसूत्रेषु विच्छिन्नं पुनरत्र सम्बध्यते । विच्छिन्नमपि कथं पुनरत्र सम्बध्येत । सम्बध्यत इत्याह-मण्डूकप्लुतिन्यायेन । मण्डुका यथोत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदप्यधिकारा भवन्ति । अथ संहितायामिति किमर्थमुच्यते ? अवग्रहे मा भूदिति । को नामाऽवग्रहः ? पदपाठः । **पचति** अत्र पच् धातुः ६-१-१५७ धातोः सूत्रेणोदात्तः । शप्तिपौ ३-१-४ अनु... इत्यनुदात्तौ । ततः ८-४-६५ उदा.... इति शपो ऽकारः स्वरितः । तस्मात् परस्तिप इकारो ऽनुदात्तः संहितायामेकश्रुतिः क्रियते प्रकृतसूत्रेण । **इमं मे गङ्गे** इममिति अन्तोदात्तम् । कमिप्रत्ययान्तस्येदंशब्दस्य ३-१-३ आद्यु... इति प्रत्ययस्वरेणान्तोदात्तत्वेन त्यदाद्यत्वे पररूपे अनुदात्तविभक्त्या= अमा सह ६-१-१०३ अमि.... इति पूर्वरूपे ८-२-५ एका इत्युदात्तत्वात् । मे इति ८-१-१८ अनु... इत्यनुदात्तम् । तच्च ८-४-६५ उदा... इति स्वरितम् । गङ्गे प्रभृतीनि ८-१-१९ आम... इत्यनुदात्तानि । तानि च प्रकृतसूत्रेणैकश्रुतीनि क्रियन्ते ।

१-२-४० उदात्तस्वरितपरस्य = उदात्तपरकस्य स्वरितपरकस्य च, अनुदात्तस्य (१-२-३९) स्थाने, सन्नतरः = अनुदात्ततरो भवति । किमिदमुदात्तस्वरितपरस्येति ? उदात्तश्च स्वरितश्च उदात्तस्वरितौ । उदात्तस्वरितौ परौ यस्मात् स उदात्तस्वरितपरः । तस्य उदात्तस्वरितपरस्य । अथा ऽत्र को ऽन्यपदार्थः ? पूर्वसूत्रादनुवर्तमानम् अनुदात्तस्येति । नेत्याह-अनुदात्तानामिति हि पूर्वसूत्रे वर्तते ना ऽनुदात्तस्येति । नैष दोष : । बहुवचनान्तमपि एकवचनान्तेन सम्बध्यमानमेकवचनान्तं भवति । अथ किमिदं सन्नतर इति ? अतिशयेन सन्नः सन्नतरः । प्रकर्षे तरप्प्रत्ययः । अथ कः सन्नः ? अनुदात्तः । **इमं मे... शुतुद्रि** शुतुद्रि इत्यस्य आद्य उकार उदात्तः । तस्मिन् परे सरस्वति इत्यस्य य इकारो ऽनुदात्तः सो ऽनुदात्ततरो भवति । ननु च भोः शुतुद्रि इत्यस्य आद्य उकारः कथमुदात्त उच्यते न पुनर्गङ्गे यमुने सरस्वति इव शुतुद्रि इत्यप्यनुदात्तम् ? नेत्याह-अपादादौ वर्तमानमेवा ऽनुदात्तं भवति । शुतुद्रि इति च पादादौ वर्तते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-४१ अपृक्त एकाल् प्रत्ययः ॥ सरित् । गौरी । रमा । अहन् । १-२-४२ तत्पुरुषः समानाधिकरणः कर्मधारयः ॥	१-२-४३ प्रथमानिर्दिष्टं समास उपसर्जनम् ॥ ४४ १-२-४४ एकविभक्ति चाऽपूर्वनिपाते ॥

तेन नाऽनुदात्तः । कस्तर्हि ? ६-१-१९३ आम... इत्याद्युदात्तः । माणवक... क्व गमिष्यसि अत्र क्व इति स्वरितम् । तस्मिन परे क इत्यस्या ऽनुदात्ताकारस्य स्थाने ऽनुदात्ततरो भवति । क इत्यस्या ऽकारः कथमनुदात्तः ? ६-१-१९३ आम... इति माणवकस्यादिरुदात्तः । ततः ६-१-१५३ अनु... इति शिष्टमनुदात्तम् ।

१-२-४१ अपृ- एकालप्रत्ययः= एकाल्रूपः प्रत्ययः, अपृक्तः= अपृक्तसंज्ञको भवति । संज्ञाफलम् ६-१-६६ हल्ङ्या... इति सुँलोपादि ।

१-२-४२ तत्पु... २-४-२६ परवल्लिङ्गं सूत्रानन्तरं सूत्रमिदं पाठ्यम् । समानाधिकरणः, तत्पुरुषः = तत्पुरुषसमासः, कर्मधारयः = कर्मधारय-संज्ञको भवति । प्रकृते "शुक्ला शाटी" इति समुदायःकर्मधारय - संज्ञक इति बोधयित्वा ६-३-४२ पुंवत्... सूत्रमुपदिशेत् ।

१-२-४३ प्रथ- २-१-६ अव्ययं ... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । [अत्र शिक्षकोऽवदध्यात् सूत्रे ऽस्मिन् समासशब्दस्य समासविधायकशास्त्रे लक्षणेति] समासे= समासविधायके शास्त्रे, प्रथमानिर्दिष्टम् = प्रथमान्तपदबोध्यम्, उसर्जनम् = उपसर्जनसंज्ञकं भवति । अर्थाद् येन सूत्रेण वार्तिकेन वा समासो विधीयते तस्मिन् सूत्रे वार्तिके वा यत् प्रथमान्तं पदं वर्तते, तत्र समस्यमानानां मध्ये यस्य समन्वयो भवति, तत् उपसर्जनम् इति ज्ञेयम् । यथा-प्रकृते समासविधायकं शास्त्रम् २-१-६ अव्ययं... वचनेषु इति सूत्रम् । तत्र विभक्ति... वचनेषु इति तु सप्तम्यन्तं वर्तते । 'अव्ययम्' इति प्रथमान्तं वर्तते । फलम्, वनम्, इत्यादिवत् क्लीबम् । तत्र च प्रकृतोदाहरणे, अधि इत्यस्य समन्वयो भवति, 'सरित् +ङि' इत्यस्य तु समन्वयो न भवति, अनव्ययत्वात् इति स्फुटं बोधयित्वा २-२-३० उपसर्जनं... सूत्रमुपदिशेत् ।

१-२-४४ एक- ६-३-३४ स्त्रियाः पुंवद्... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क) (ख)

१-२-४३ प्रथमा... समास उपर्सजनम् ॥

१-२-४४ (क) एकविभक्ति चा ऽपूर्वनिपाते (ख) ॥ इति ।

(क) = समासे= समासनिमित्तके विग्रह-वाक्ये, (दीक्षितानुसारेण) एकविभक्ति = एकविभक्तिकम् = नियत-विभक्तिकं पदम्, अपूर्वनिपाते = पूर्वनिपातभिन्ने कार्ये कर्तव्ये, (ख) = उपसर्जनम् = उपसर्जनसंज्ञकं भवति । इत्यर्थोपदेश- सन्दर्भे यथा २-४-८४ तृती... सूत्रोदाहरण-प्रसङ्गे ग्रामस्य समीपम् = उपग्राममित्युक्तम् । तत्र ग्रामस्य समीपेन, ग्रामस्य समीपाय, ग्रामस्य समीपस्य, ग्रामस्य समीपे, इत्यादि-रीत्या समीप-शब्दो विग्रहे, अनियत-विभक्तिको भवति । ग्रामशब्दस्तु 'ग्रामस्य' इति षष्ठ्यन्त एव=नियतविभक्त्यन्त एव । अतस्तत्र 'ग्राम ङस्' इत्युपसर्जनं प्रकृत-सूत्रेण । (फलाऽभावात् तत्र संज्ञा न कृता, इति त्वन्यत्) तस्य २-२-३० उप ... सूत्रेण पूर्वप्रयोगस्तु न भवति । पूर्वनिपातभिन्ने (अपूर्वनिपाते) कार्ये कर्तव्ये, एवोपसर्जनसंज्ञाविधानात् । एवमेव मालामतिक्रान्तः = अतिमालः । मालामतिक्रान्तम् -अतिमालम् । मालामतिक्रान्तेन = अतिमालेन । मालामतिक्रान्ताय =अतिमालाय । मालामतिक्रान्तात् = अतिमालात् । मालामतिक्रान्तस्य = अतिमालस्य । मालामतिक्रान्ते = अतिमाले । इत्यादिषु २-२-१८ कुग... सूत्रस्थेन, अत्या... वार्तिकेन समासे मालामिति द्वितीयान्तम् = नियतविभक्त्यन्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(एकविभक्तावषष्ठचन्तवचनम्)
अर्धपिप्पली ।
(एकदेशिसमासविषयको ऽयं प्रतिषेधः)
पञ्चानां खट्वानां समाहारः पञ्चखट्वी ।

१-२-४५ अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥४६
रामः । पटः ।

१-२-४६ कृत्तद्धित-समासाश्च ॥
पाठकः । दाशरथिः । राजपुरुषः ।

१-२-४७ ह्रस्वो नपुंसके प्रातिपदिकस्य ॥४८
सुलु । अधिमहि ।

अतिक्रान्तः, अतिक्रान्तम्, अतिक्रान्तेन, इत्यादीन्यनियत- विभक्त्यन्तानि । अतो मालाशब्दस्योपसर्जनसंज्ञा भवति । अतिशब्दस्य न भवति । तथा प्रकृते ऽपि प्रकृत १-२-४४ एक...सूत्रेण कन्याशब्दस्योपर्सनसंज्ञा जाता । (शिक्षको विशेषजिज्ञासायां लघुशब्देन्दुशेखरं पश्येत्) पूर्वप्रयोगस्तु न जातः । इति बोधयित्वा १-२-४८ गोस्त्रि... सूत्रमुपदिशेत् ।

एकविभक्तौ= एकविभक्ति चाऽपूर्वनिपाते इति सूत्रेण संज्ञायां कर्तव्यायाम्, अषष्ठयन्तवचनम्=षष्ठयन्तं वर्जयित्वेति वक्तव्यम् । तेनोदाहरणे २-२-२ अर्ध... इत्येकदेशिसमासे एतत्संज्ञाया अभावेन १-२-४८ गोस्त्रि....इति न ह्रस्वः ।

एकदेशि....प्रतिषेधः- प्रतीयमानमिदं वचनं न त्वपूर्वम् । प्रतीतौ प्रमाणञ्च पञ्चखट्वी इति भाष्योदाहरणम् । अन्यथा तत्र भाष्योदाहरणे षष्ठयन्तत्वेनैतत्संज्ञाया अभावे ह्रस्वा ऽभावेन अदन्तत्वा ऽभावाद् ४-१-२१ द्विगोः इति ङीब् न स्यात् ।

१-२-४५ अर्थ- अधातुः=धातुभिन्नम्, अप्रत्ययः=प्रत्ययप्रत्ययान्तभिन्नम्, अर्थवत्=अर्थयुक्तं शब्दस्वरूपम्, प्रातिपदिकम् =प्रातिपदिकसंज्ञं भवति । एतत्संज्ञायाः फलम् ४-१-२ स्वौजस... इत्यादिसूत्रैः प्रत्ययविधानादि । यथा- अस्ति मृगवाची रामशब्दः । तस्य प्रकृतसूत्रेण प्रातिपदिकसंज्ञायां तस्मात् ४-१-२ स्वौजस... इति सूत्रेण स्वादिषु प्रत्ययेषु रामः । रामौ । रामाः । इत्यादीनि रूपाणि भवन्ति । यदि तु घञ्प्रत्ययान्तो रामशब्दो दाशरथिप्रभृतिवाची तदा रामशब्दो ऽपि व्युत्पन्न एव । तत्रा ऽव्युत्पन्नानां शब्दानां प्रकृतसूत्रेण प्रातिपदिकसंज्ञा भवति । व्युत्पन्नानां तूत्तरसूत्रेण । सर्वथा प्रातिपदिकसंज्ञाया अभात्रे स्वादयः प्रत्यया एव न भवन्तीति सम्यग् विभावनीयम् । इदमत्रा ऽवधेयम्- शब्दाः खलु द्विविधा भवन्ति, व्युत्पन्ना अव्युत्पन्नाश्च । यत्र प्रकृतिप्रत्ययादिविभागेना ऽर्थः प्रतीयते ते व्युत्पन्नाः । यथा पाठक-पाचक-पानीय इत्यादयः शब्दाः । यत्र प्रकृतिप्रत्ययादिविभागो न प्रतीयते ते शब्दा अव्युत्पन्नाः । यथा मृगवाची रामशब्दः पूर्वमुक्तः ।

१-२-४६ कृत्त ३-१-९३ कृदतिङ्- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्रा ऽधोनिर्दिष्टरूपेण श्यामपाटीप्रयोगं कुर्यात् । यथा-

(क)
१-२-४५ अर्थवद..., प्रातिपदिकम् ।
१-२-४६ कृत्तद्धित-समासाश्च (क) ॥ इति ।

कृत्तद्धितसमासाः = कृदन्तास्तद्धितान्ताः समासाश्च, (क) = प्रातिपदिकम् = प्रातिपदिकानि = प्रातिपदिकसंज्ञका भवन्ति । वत्साः ? १-४-१०३ विभ... सूत्रे किं नाम प्रातिपदिकम् ? इत्याकाङ्क्षां जागरयित्वा सामान्यरीत्या "नाम प्रातिपदिकम्" इत्युपदिष्टम् । साम्प्रतं विशेषरूपेण प्रातिपदिकस्या ऽन्यतमः प्रकारः प्रदर्शितः । यानि प्रातिपदिकानि तेभ्यः परतः सुँ-प्रभृतयः प्रत्यया भवन्ति । तथाहि, इति वदन् १-४-१०३ विभ... सूत्रानन्तरं साधारणरीत्योपदिष्टं ४-१-२ स्वौजसमौट् ... सूत्रमुपदिशेत् ।

१-२-४७ ह्रस्वो... २-४-१८ अव्ययीभावश्च-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । नपुंसके = नपुंसकलिङ्गे वर्तमानस्य, प्रातिपदिकस्य= प्रातिपदिकस्य स्थाने, ह्रस्वः = ह्रस्वो भवति । इत्यर्थमुपदिशेत् । १-१-७१ येन ... १-२-२८ अच... सूत्रमूलकम् अजन्तस्येत्यर्थं साम्प्रतं नोपदिशेत् (द्वितीयावृत्तौ तूपदिशेदेव तथा) । अथ १-१-५१ अलो... सूत्रोद्‌बोधन-पूर्वकं लक्षण-समन्वयं छात्रैः करयित्वा, 'अधिमहि' इति श्यामपाट्यां लिखित्वा, अव्यय-संज्ञा सुब्लुक् च पूर्ववदिति ब्रुवता शिक्षकेण च्छात्रैः साध्यमाना प्रक्रिया श्रोतव्या । सर्वे पदार्था मह्याम्, उत्पद्यन्ते विलीयन्ते च = सर्वे पदार्था अधिमहि, उत्पद्यन्ते विलीयन्ते च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-४८ गोस्त्रियोरुपसर्जनस्य ॥४९
चित्रगुः । सुशीलकन्यः पिता । अतिमालः ।
(ईयसो बहुव्रीहेर्नेति वाच्यम्)
बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी ।

१-२-४९ लुक् तद्धितलुकि ॥५०
श्रविष्ठः । आमलकम् । पञ्चेन्द्र ः ।
१-२-५० इद् गोण्याः ।
पञ्चगोणिः ।

एवमेव जगत्यामिति विग्रहे ऽधिजगति, इति प्रयोगं छात्रैः साध्यमानं शिक्षकः शृणुयात् । अथ वने, इति विग्रहे पूर्ववच्छात्रैः साध्यमानायां प्रक्रियायाम् 'अधिवन' इति जाते ऽव्ययसंज्ञायां सुँबुत्पत्तौ लुकि संभाविते २-४-८३ नाव्ययीभावा... सूत्रमुपदिशेत् ।

१-२-४८ गोस्त्रि-१-२-४४ एकविभक्ति... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा-
(क) (ख)
१-२-४७ ह्रस्वो नपुंसके प्रातिपदिकस्य ॥
१-२-४८ गोस्त्रियोरुपसर्जनस्य (ख)(क) इति । उपर्सजनस्य + गोस्त्रियोः = उपसर्जनगोशब्दान्तस्य उपसर्जनस्त्रीप्रत्ययान्तान्तस्य च, (ख)= प्रातिपदिकस्य = प्रातिपदिकस्य स्थाने, (क)= ह्रस्वः=ह्रस्वो भवति । प्रकृते उपर्सजनस्त्रीप्रत्ययान्तं कन्या इति । तदन्तं 'सुशील-कन्या' इति बोधनपुरस्सरं लक्षण-समन्वय-सन्दर्भे १-१-५१ अलो... सूत्रमुद्बोधयेत् । सुशीलकन्यः पिता । सुशीलकन्या माता । सुशीलकन्यं कुलम् ।अथ सुशीला भार्या यस्य पुरुषस्य, रूपवती भार्या यस्य पुरुषस्येति विग्रहे च च्छात्रैः समासप्रक्रियां साधयेत् । सुशीलभार्यः पुरुषः । रूपवद्भार्यः पुरुषः । इति । इत्थं व्यस्तवाक्ये ऽन्यपदार्थवाची शब्दो यल्लिङ्गको यद्विभक्तिको यद्वचनान्तको वर्ततेः, समासार्थे विग्रहवाक्ये ऽपि यच्छब्दस्तल्लिङ्गकस्तद्विभक्तिकस्तद्वचनान्तकः प्रयोज्यते । इति विशदं बोधयेत् । यथा-छात्रः सपर्यां सम्पादितवान् = छात्रेण सपर्या सम्पादिता । अथा ऽत्र बहुव्रीहि-समासे क्रियमाणे ऽन्यपदार्थवाची छात्रशब्दः पुंलिङ्गकस्तृतीयैकवचनान्तो वर्तते । अतो बहुव्रीहिसमासार्थे विग्रहवाक्ये सम्पादिता सपर्या येनेति विग्रहः क्रियते । अर्थाद् यच्छब्दो ऽपि पुंलिङ्गकस्तृतीयैकवचनान्तः प्रयुज्यते । सम्पादित-सपर्यश्छात्रः । इति । छात्रो गुरोः सपर्यां सम्पादितवान्=छात्रेण गुरोः सपर्या सम्पादिता । अत्रच्छात्रेण सम्पादितया सपर्यया गुरुः पूजयति, इति तात्पर्ये समासक्रमे 'छात्रेण सम्पादिता' इत्यत्र २-१-३२ कर्तृ... सूत्रेण समासे छात्र-सम्पादिता । छात्रसम्पादिता गुरोः सपर्या । इति भवति । अथा ऽत्र बहुव्रीहि-समासे क्रियमाणे ऽन्यपदार्थवाची गुरुशब्दः पुंलिङ्गकषष्ठ्येकवचनान्तो वर्तते । अतो बहुव्रीहि-समासार्थक-विग्रहवाक्ये छात्रसम्पादिता सपर्या यस्येति विग्रहः क्रियते । अर्थाद् यच्छब्दो ऽपि पुंलिङ्गक-षष्ठ्येकवचनान्तः प्रयुज्यते । छात्रसम्पादित-सपर्यो गुरुः पूजयति । इत्यादि । अथ बहुव्रीहि-समासे ऽपि क्वचित् समासान्ताः प्रत्यया भवन्तीति सँस्काराय ५-४-११३ बहु... सूत्रात् ५-४-१५४ शेषा... सूत्रावधि दर्शयित्वा, एतानि सूत्राणि बहुव्रीहिसमासे समासान्त-प्रत्यय-विधायीनीति बोधयित्वा ५-४-१५४ शेषाद्... सूत्रमुपदिशेत् ।

१-२-४९ लुक् त-तद्धितलुकि=तद्धितप्रत्ययस्य लुकि सति, उपसर्जनस्य + स्त्रियाः (१-२-४८) = उपसर्जनस्त्रीप्रत्ययस्य, लुक् = लुग् भवति । उपसर्जनस्येति पूर्वसूत्रादनुवर्तते । तच्च लौकिकमिह गृह्यते न तु शास्त्रीयम् । कथम् ? असम्भवात् । न हि शास्त्रीयमुपसर्जनं प्रकृते सम्भवति । स्त्रिया इति च पूर्वसूत्रादनुवर्तते । स्त्रीशब्देन च ४-१-३ स्त्रियाम् इत्यधिकारोक्ताः प्रत्यया गृह्यन्ते । ननु भोः कथं स्त्रिया इत्यनुवर्तते इत्येवोच्यते ? न पुनर्गोस्त्रियोरिति, यत एकयोगनिर्दिष्टयोः सहैवा ऽनुवृत्तिनिवृत्तिभ्यां भवितव्यम् ? को वा विशेषः ? अस्ति विशेष इत्याह- प्रत्ययस्यैवा ऽदर्शनस्य लुक्संज्ञा क्रियते, यथोपदिशति भगवान् सूत्रकारः १-१-६० प्रत्ययस्य लुक्श्लुलुप इति । गोशब्दश्चा ऽव्युत्पन्नं प्रातिपदिकं न तु प्रत्ययो ऽस्ति, यस्यानुवृत्तौ लुक् स्यात् । तेन स्त्रिया इत्यस्या ऽनुवृत्तिर्भवति न तु गोशब्दस्य । स एष विशेषो ऽस्तीति । तथा च पूर्वोक्तः सूत्रार्थःफलति । **श्रविष्ठः** ४-३-३४ श्रवि... सूत्रे द्रष्टव्यम् । **आमलकम्** ४-३-१६१ फले... सूत्रे द्रष्टव्यम् । **पञ्चेन्द्रः** पञ्चेन्द्राण्यो देवता अस्येति विग्रहे २-१-५१ तद्धि... इति समासे ४-२-२४ साऽस्य ... इत्यण् । तस्य ४-१-८८ द्विगो... इति लुकि प्रकृतसूत्रेण ङीषो लुक् ।

१-२-५० इद् गो- तद्धितलुकि (१-२-४९) उपसर्जनस्य (१-२-४८) + गोण्याः = उपसर्जनगोणीशब्दस्य स्थाने, इत् = ह्रस्व इकारो भवति । नेति वक्तव्ये इद्ग्रहणं किमर्थम् ? उच्यते -नेति निर्देशे हि लुक एव प्रतिषेधः स्यात् । ह्रस्वेकारेण तु प्रकृते भाव्यम् । स च न सिध्येत् इत्येतदर्थमिद्ग्रहणं क्रियते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-५१ लुपि युक्तवद् व्यक्तिवचने ॥५२

पञ्चालाः । मत्स्याः । अङ्गाः ॥
वङ्गाः । कलिङ्गाः । सुह्माः । पुण्ड्राः ।
(हरीतक्यादिषु व्यक्तिः)
हरीतक्याःफलानि हरीतक्यः ।
(खलतिकादिषु वचनम्)
खलतिकं वनानि ।

१-२-५२ विशेषणानां चाऽजातेः ॥

पञ्चाला रमणीयाः सम्पन्नपानीयाः ।
अजातेरित्युक्तेर्नेह-पञ्चाला जनपदः ।
(मनुष्यलुपि प्रतिषेधः)
चञ्चा अभिरूपः ।

नैतदस्ति प्रयोजनम् । लुकः प्रतिषेधेनापि सिध्यत्येतत् । कथम् ? लुकः प्रतिषेधे १-२-४८ गोस्त्रि... इति ह्रस्वः स्यात् । एवन्तर्हि नेति वक्तव्ये यदिद्ग्रहणं करोति तज्ज्ञापयति सूत्रमिदं विभागमर्हतीति । यथा-इत् इति पृथक् सूत्रम्, गोण्या इति च पृथगिति । किञ्च तेन सिध्यति ? पञ्चभिः सूचीभिः क्रीतः पञ्चसूचिरित्यत्रापि ह्रस्वेकारः सिध्यति । एवन्तर्हि इदित्यनेनैव सिद्धे गोण्या इति द्वितीयं सूत्रं व्यर्थम् । न च तद् व्यर्थम् । किन्तर्हि तस्य प्रयोजनम् ? गोणीशब्दस्य सर्वथा भवति । अन्यत्र तु क्वचिदिति ज्ञापनम् । तेन इदिति सूत्रं सूचीशब्दे एव प्रवर्तते नान्यत्रेति । पञ्चसूचिरित्यत्र प्रक्रिया पञ्चगोणिरित्यत्रेव ज्ञेया । **पञ्चगोणिः** पञ्चभिर्गोणीभिः क्रीत इति विग्रहे २-१-५१ तद्धि... इति समासे ५-१-३६ तेन... इति ठञ् । तस्य ५-१-२८ अध्य... इति लुकि पञ्चगोणी इत्यवस्थायां १-२-४९ लुक् त... इति लुकं बाधित्वा प्रकृतसूत्रेणेत् ।

१-२-५१ लुपि = प्रत्ययस्य लुपि सति, व्यक्तिवचने = लिङ्गसंख्ये, युक्तवत् = प्रकृतेरिव भवतः । किमिदं युक्तवदिति ? युक्तस्येव = युक्तवत् । ५-१-११५ तत्र तस्येव... इति वतिँप्रत्ययः । अथ को नाम युक्तः ? प्रकृतिः । किमयमर्थः शब्दाक्षरैर्लभ्य उताहो शब्दस्य कश्चिदर्थो वक्तव्यो भवतीति युक्तः प्रकृतिरित्युच्यते ? शब्दाक्षरैर्लभ्यः सो ऽर्थ इत्याह - युक्त इत्युक्ते केन युक्त इत्याकाङ्क्षायां प्रत्यासत्त्या सहपठित-लुप्शब्दवाच्येन युक्त इत्यर्थः प्रतीयते । लुप्शब्दवाच्यं च प्रत्यया ऽदर्शनम् =प्रत्यया ऽभावः । तादृशा ऽभावयुक्तं च सर्वं भवतीति सामर्थ्याल्लुपः प्राक् तत्प्रत्यययुक्त इत्यर्थो ज्ञायते । स च प्रत्ययात् पूर्वो भागः प्रकृतिरिति । व्यक्तिः =लिङ्गम् । वचनम् = संख्या । उदाहरणेषु ४-२-६९ तस्य... इत्यण् । ४-२-८१ जन ... इति लुपि प्रकृतसूत्रेण युक्तवत् ।

हरी-लुपि (१-२-५१) हरीतक्यादिषु = हरीतकीप्रभृतिगणपठितशब्देषु, व्यक्तिः = व्यक्तिरेव= लिङ्गमात्रम्, युक्तवत् (१-२-५१) । पूर्वसूत्रेणैव सिद्धे सत्यारभ्यमाणस्य वार्तिकस्य नियमार्थत्वाद् व्यक्तिः = व्यक्तिरेव = लिङ्गमात्रमित्युक्तम् । तेन लिङ्गमात्रस्य युक्तवद्भावो न तु वचनस्य । अत उदाहरणे बहुवचनम् । उदाहरणे ४-३-१३२ तस्य ... इत्यण् । तस्य ४-३-१६५ हरी ... इति लुपि प्रकृतवार्तिकेन लिङ्गमात्रं प्रकृतिवत् ।

खल-लुपि (१-२-५१) खलतिकादिषु = खलतिक-प्रभृति-गणपठितशब्देषु वचनम्= वचनमेव = संख्यामात्रम्, युक्तवत् (१-२-५१) । वार्तिकमिदं पूर्ववद् व्याख्येयं नियमार्थमिति । उदाहरणे खलतिकस्य पर्वतस्या ऽदूरभवानि वनानि इति विग्रहे ४-२-७० अदू... इत्यण् । तस्य ४-२-८२ वर... इति लुपि संख्यामात्रस्य युक्तवद्भावादेकवचनं लिङ्गं तु प्रत्ययार्थ-विशेष्य-वनानुसारि जातम् । एतन्नियमा ऽभावे तु सूत्रेण लिङ्गस्या ऽपि युक्तवद्भावा ऽपत्तौ पुंलिङ्गं स्यात् ।

१-२-५२ विशे - अजातेः =जातिं वर्जयित्वा, विशेषणानाम् = लुबर्थविशेषणानाम्, व्यक्तिवचने + युक्तवत् (विशेष्यवत्) (१-२-५१) । विशेषणानामित्युक्तौ कस्येति जिज्ञासा जागर्ति । प्रकरणाच्च लुबर्थस्येति ज्ञायते । अतो लुबर्थविशेषणानामिति विवृतम् । उदाहरणे युक्तवद्भावाद् विशेषणाभ्यामपि बहुवचनम् । अत्र कैयटः-तावद् युक्तवद्भावो भवति यावज्जातिर्न प्रक्रान्ता । यदा तु जातिः प्रक्रम्यते विशेषणत्वेन विशेष्यत्वेन वा तदा युक्तवद् भावो न भवतीति । पञ्चाला जनपदो रमणीयो बह्वन्नः । अत्र विशेषणानां न युक्तवत् ।

मनुष्यलुपि = मनुष्यलक्षणे लुबर्थे, प्रतिषेधः = लुबन्तस्य विशेषणानां व्यक्तिवचने विशेष्यवन्न भवतः । लुबन्तस्य तु युक्तवद् भवत्येव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-५३ तदशिष्यं संज्ञाप्रमाणत्वात् ॥ ५७ १-२-५४ लुब् योगाऽ प्रख्यानात् ॥ १-२-५५ योगप्रमाणे च तदभावेऽदर्शनं-स्यात् ॥	१-२-५६ प्रधानप्रत्ययार्थ-वचनमर्थस्याऽन्यप्रमाणत्वात् ॥

१-२-५३ तद - पूवाचार्यानुरोधेन स्वयमुपदिष्टमपि युक्तवद्भावं सूत्रकारः स्वयं प्रत्याचष्टे- तदशिष्यमित्यादि। तद् = युक्तवद्वचनम्, अशिष्यम् = उपदेशानर्हम्, संज्ञाप्रमाणत्वात् = लिङ्गसङ्ख्ययोर्विषये संज्ञावाचिशब्दानां प्रमाणत्वादिति। एवं तर्हि संज्ञावाचिशब्दप्रमाणत्वादिति, निर्देशः कर्तव्यः। स तर्हि तथा निर्देशः कर्तव्यः तदशिष्यं संज्ञावाचिशब्दप्रमाणत्वादिति। न कर्तव्यः। मध्यमपदलोपो ऽत्र द्रष्टव्यः। स यथा- शाकप्रियः पार्थिवः शाकपार्थिवः। देवपूजको ब्राह्मणः = देवब्राह्मण इति। तथा संज्ञावाचिनः शब्दाः संज्ञाशब्दाः तेषां प्रमाणत्वात् = संज्ञाप्रमाणत्वादिति। एवमपि संज्ञाशब्दप्रमाणत्वादिति निर्देशःकर्तव्यः। स च न कर्तव्यः। दृश्यन्ते हि वाक्येषु वाक्यैकदेशाः प्रयुज्यमानाः पदेषु च पदैकदेशाः। वाक्येषु वाक्यैकदेशा यथा- 'गृहं प्रविश' इति वक्तव्ये 'प्रविश' इति। नद्या आगत इति वक्तव्ये नद्या इति। को गच्छतीति ? प्रश्नस्योत्तरे 'अहं गच्छामि' इति वक्तव्ये 'अहम्' इति। पदेषु पदैकदेशाः प्रयुज्यमाना यथा-देवदत्तो देवः। सत्यभाभा सत्या। दुर्गाप्रसादपुत्रो दुर्गापुत्रः। हीराकुमार्यङ्गो हीराङ्गज इति। तथा ऽत्र संज्ञाशब्देति प्रयोक्तव्ये संज्ञेति पदैकदेशः प्रयुज्यते - संज्ञाशब्दप्रमाणत्वात् = संज्ञाप्रमाणत्वात् इति। स्वरसतः सूत्रेण किमुक्तं भवति ? पञ्चाला वरणा इत्यादयो न यौगिकशब्दाः। के तर्हि ? संज्ञाशब्दाः संज्ञाशब्दाश्च नानालिङ्गका नानासंख्याकाश्च भवन्ति। तत्रेमे शब्दा एतल्लिङ्गा इयत्संख्याकाश्चेति न यत्नप्रतिपाद्यम्। किन्तु ते शब्दा एव हि लिङ्गसंख्याविषये स्वयं प्रमाणानि भवन्ति। यथा आपो दारा गृहा वर्षा इत्यादय इत्युक्तं भवति।

१-२-५४ लुब् यो-पूर्ववत् प्रत्याचष्टे - लुप् = लुबपि, अशिष्यः (१-२-५३) योगा ऽप्रख्यानात् = प्रकृतिप्रत्यया ऽर्थ -सम्बन्धा ऽप्रतीतेः। लुप्= ४-२-८१ जनपदे लुप् इत्यादिना विधीयमानो लुबपि, अशिष्यः (१-२-५३) कथम् ? योगाऽप्रख्यानात्, योगस्य अप्रख्यानं योगाप्रख्यानं तस्माद् योगाप्रख्यानात्। कः पुनर्योगः ?प्रकृतिप्रत्ययार्थयोः सम्बन्धः। तस्य अप्रख्यानम् =अप्रतीतिः। किमुक्तं भवति ? एतदुक्तं भवति-न हि क्षत्रिययोगाज्जनपदे पञ्चाला इत्यादयो न च वृक्षादियोगान्नगरे वरणा इत्यादयः प्रयोगाः। किं तर्हि ? संज्ञा एता जनपदादीनाम्। अतो ऽत्र ४-२-६९ तस्य निवासः ४-२-७० अदूरभवश्चेति सूत्राभ्यां तद्धितप्रत्ययेनैव न भवितव्यं यस्य लुप् स्यात्। प्रत्ययस्यैवा ऽभावे तस्य लुब्विधानमर्थकमिति लुब्विधायके सूत्रे अशिष्ये इत्युक्तं भवति।

१-२-५५ योगप्रमाणे = पञ्चालप्रभृतिशब्देषु प्रकृतिप्रत्ययार्थसम्बन्धस्य वाचकेषु, च= हि=निश्चय एव, तदभावे= योगाऽभावे = प्रकृतिप्रत्ययार्थसम्बन्धाभावे, अदर्शनं स्यात् =प्रयोगा ऽभावः स्यात्। सूत्रमिदं किमर्थम् ? पञ्चाला इत्यादिषु प्रकृतिप्रत्यार्थयोः सम्बन्धस्या ऽप्रतीतिरिति पूर्वमुक्तस्य युक्त्यन्तरेणापि समर्थनार्थम्। अत्रत्यश्चकारो ह्यर्थे बोध्यः। प्रमीयते = प्रत्याय्यते ऽनेनेति =प्रमाणम्=प्रत्यायकम्=वाचकम्। दर्शनस्या ऽभावः = अदर्शनम्=प्रयोगा ऽभावः। स्वरसतः सूत्रेण किमुक्तं भवति ? यदि पञ्चालादिशब्दाः प्रकृतिप्रत्ययार्थसम्बन्धस्य वाचकाः स्युस्तर्हि क्षत्रियादिसम्बन्धा ऽभावे जनपदे वाच्ये पञ्चाला इत्यादयः प्रयोगा न स्युः। वृक्षादिसम्बन्धा ऽभावे नगरे वाच्ये वरणा इत्यादयः प्रयोगा न स्युः। दृश्यन्ते पुनः प्रयोगाः खलु क्षत्रियादिसम्बन्धा ऽभावे ऽपि जनपदादिषु वाच्येषु। अतः प्रत्ययविधायि - लुब्विधायि-सूत्राणि न पठनीयानीत्युक्तं भवति।

१-२-५६ प्रधान... वचनम् = प्रधानं प्रत्ययार्थ इति वचनं प्रधानप्रत्ययाभ्यामर्थाभिधानमनेन प्रकारेण भवतीति च वचनम्, अशिष्यम् ((१-२-५३) अर्थस्य= अभिधेयस्य विषये, अन्यप्रमाणत्वात् = लोकप्रमाणत्वात्। प्रधानं प्रत्ययार्थः, इति वचनं न कार्यम्, अर्थस्य = तथा बोधस्य, अन्यप्रमाणत्वात्= व्युत्पत्त्यनुसारित्वादिति हि तदर्थ इति वैयाकरणभूषणसारे कौण्डभट्टः। अथा ऽत्र काशिका-अशिष्यमिति वर्तते। प्रधानं समासे किञ्चित् पदम्। प्रत्ययस्तव्यदादिः। ताभ्यामर्थवचनमर्थाभिधानमनेन प्रकारेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-५७ कालोपसर्जने च तुल्यम् ॥
१-२-५८ जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् ॥ ५९, ६०, ६२

व्रीहयः, व्रीहिः । यवाः, यवः ।
एकस्मिन्नित्युक्तेर्नेह-व्रीहियवौ ।

भवतीति पूर्वाचार्यैः परिभाषितम्। प्रधानोपसर्जने प्रधानार्थं सह ब्रूतः। प्रकृतिप्रत्ययौ सहार्थं ब्रूतः। इति। तत्पाणिनिराचार्यः प्रत्याचष्टे अशिष्यमेतत्। अर्थस्यान्यप्रमाणत्वदिति। अन्य इति शास्त्रापेक्षया लोको व्यपदिश्यते। शब्दैरर्थाभिधानं स्वाभाविकं न पारिभाषिकमशक्यत्वात्। लोकत एवा ऽर्थावगतेरिति। अथा ऽनेन सूत्रेण स्वरसतः किमुक्तं भवति ? अस्य शब्दस्या ऽयमर्थ इत्यत्र अस्या ऽर्थस्य वाचको ऽयं शब्द इत्यत्र च लोक एव प्रमाणं भवतीत्युक्तं भवति। तथा चोपदिशति पस्पशाह्निके भगवान् भाष्यकारः- एतस्मिँश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते। तद् यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एनमार्या भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु। इति।

१-२-५७ कालोपसर्जने- कालश्च = अतीतानागताभ्यां निशीथाभ्यां सहितो दिवसो ऽद्यतनस्तद्भिन्नो ऽनद्यतन इत्यादि, उपसर्जनं च = अप्रधानमुपसर्जनमित्यादि च वचनम्, तुल्यम् = अनन्तरोक्तप्रत्याख्यातैः सदृशम्। अर्थादशिष्यम्। अथ किमर्थो ऽत्र सूत्रे चकारः ? अनुक्तसमुच्चयार्थः। सूत्रान्तराण्यपि कानि चिदशिष्याणीति। कानि च तान्यशिष्याणि सूत्राणि ? लिङ्गोपदेशीनि २-४-१७ स नपुंसकम् इत्यादीनि। संख्योपदेशीनि च १-२-५८ जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यामित्यादीनि। अत्र काशिका-पूर्वसूत्र एव कालोपसर्जनग्रहणं कस्मान्न क्रियते, किमर्थो योगविभागः ? प्रदर्शनार्थः। अन्यदप्येवंजातीयकमशिष्यमिति। तथा च पूर्वाचार्याः परिभाषन्ते - मत्वर्थे बहुव्रीहिः, पूर्वपदार्थप्रधानो ऽव्ययीभावः, उभयपदार्थप्रधानो द्वन्द्व इत्येवमादि तदशिष्यमितीति।

१-२-५८ जात्याख्यायाम् = जातौ वाच्यायाम्, एकस्मिन् = एकस्मिन्नर्थे विद्यमाने ऽपि, अन्यतरस्याम् = वा, बहुवचनम् = बहूनामर्थानामिवा ऽऽख्या भवति। **जात्याख्या**-जातेराख्या जात्याख्या। बहुवचनम् =बहूनामर्थानां वचनं कथनं बहुवचनम् = बहूनामर्थानां कथनं भवति। किमुक्तं भवति ? किमेकवचनस्य स्थाने बहुवचनं भवतीति ? नेत्याह- न खल्वेकवचनस्थाने बहुवचनं भवतीत्यर्थः सूत्राक्षरैर्लभ्यते। तथा सति एकस्येति षष्ठ्यन्तं निर्दिष्टं स्यात्। सप्तम्यन्तं तु निर्दिष्टमस्ति एकस्मिन्निति। कस्तर्ह्यर्थःसूत्राक्षरैर्लभ्यते ? एकस्मिन्नर्थे विद्यमाने ऽपि बहूनामर्थानां कथनं भवतीति। किञ्च तथा ऽर्थेन सिध्यति ? एकस्मिन्नर्थे वाच्ये ऽपि बहुवचनान्तो ऽपि प्रयोगः सिध्यति- व्रीहिरिति वक्तव्ये व्रीहय इति यथा। यद्येवम् एकस्येति षष्ठ्यन्तेन निर्देशे हि एकवचनस्थाने वा बहुवचनमिति सुगमो ऽर्थो वर्णलाघवं च स्याताम्। एवन्तर्हि षष्ठ्यन्तेन निर्देशे सुगमे ऽर्थे वर्णलाघवे च सिद्धे यत् सप्तम्यन्तेन निर्देशं करोति तज्ज्ञापयति भगवान् सूत्रकारः सूत्रे ऽस्मिन् वचनमित्यन्वर्थं गृह्यते न पारिभाषिकमिति। तथा च एकस्मिन्नर्थे वाच्ये ऽपि वा बहूनामर्थानामाख्यानमिति सूत्राक्षरार्थो भवति। न च य एव एकः स एव बहव इत्युक्तिः सङ्गच्छते। उच्यते च एकस्मिन्नर्थे विद्यमाने ऽपि वा बहूनामर्थानामाख्यानं भवतीति। तेनाऽर्थाऽतिदेशो गम्यते-बहूनामर्थानाम् = बहूनामर्थानामिवेति। ततश्च एकोऽपि जात्यर्थो वा बहुवद् भवतीति सूत्रार्थःपर्यवस्यति। ननु च भोः सुगमार्थो वर्णलाघवञ्च षष्ठ्यन्तेन निर्देशे भवत एकस्मिन्नर्थे वाच्ये ऽपि बहुवचनान्तः प्रयोगो ऽपि सिध्यति चेत् षष्ठ्यन्तेनैव निर्देशोऽस्तु किं सप्तम्यन्तेन निर्देशेन ? नेत्याह - न खलु षष्ठ्यन्तेन निर्देशःकर्तुं शक्यते। कथम् ? षष्ठ्यन्तेन निर्देशे व्रीहिभ्य इत्यादौ जात्याख्यायां ङेर्ङसेर्वा स्थाने भ्यसि स्थानिवद्भावेन ङित्त्वमाश्रित्य ७-३-१११ घेर्ङितीति गुणापत्तिः स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(संख्याप्रयोगे प्रतिषेधो वक्तव्यः)
एको व्रीहिः सम्पन्नः सुभिक्षं करोति ।
१-२-५९ अस्मदो द्वयोश्च ॥ ६२
वयं ब्रूमः । अहं ब्रवीमि,
आवां ब्रूवो वा ।
(अस्मदःसविशेषणस्य प्रयोगे न)
अहं देवदत्तो ब्रवीमि ।
अहं पटुर्ब्रवीमि ।

आवां देवदत्तयज्ञदत्तौ ब्रूवः ।
१-२-६० फल्गुनीप्रोष्ठपदानां च नक्षत्रे । ६२
पूर्वाःफल्गुन्यः,पूर्वे फल्गुन्यौ ।
पूर्वाः प्रोष्ठपदाः, पूर्वे प्रोष्ठपदे ।
१-२-६१ छन्दसि पुनर्वस्वोरेकवचनम् ॥ ६२
पुनर्वसुर्नक्षत्रम् । पुनर्वसू वा ।

संख्याप्रयोगे= संख्यावाचिशब्दप्रयोगे, प्रतिषेधो वक्तव्यः = पूर्वसूत्रेण विधीयमानस्य बहुवचनस्य निषेधो वाच्यः ।

१-२-५९ अस्मदः = अस्मच्छब्दसम्बन्धिनि एकस्मिन् (१-२-५८) द्वयोश्च = द्वयोरप्यर्थयोः, अन्यतरस्याम् +बहुवचनम् (१-२-५)। सूत्रेऽत्र किमर्थश्चकारः ? एकस्मिन्नित्यनुवृत्त्यर्थः । चानुकृष्टत्वादुत्तरसूत्रे नोपतिष्ठते ।

अस्मदः- सविशेषणस्य = विशेषणेन सहितस्य, अस्मदः= अस्मच्छब्दस्य प्रयोगे, न = पूर्वसूत्रं न प्रवर्तते ।

१-२-६० फल्गु - नक्षत्रे = नक्षत्रार्थे वर्तमानानाम् फ.... नाम्= फल्गुनीप्रोष्ठपदासम्बन्धिनोः, (नक्षत्रार्थे वर्तमानौ यौ फल्गुनीप्रोष्ठपदाशब्दौ तत्सम्बन्धिनोः) = तद्वाच्ययोः द्वयोः (१-२-५९) अन्यतरस्याम् +बहुवचनम् (१-२-५८)। सूत्रे ऽस्मिन् फल्गुनीप्रोष्ठपदानामित्यत्र केषां शब्दानां द्वन्द्वः ? फल्गुनीप्रोष्ठपदाशब्दयोः । यद्येवं फल्गुनीप्रोष्ठपदयोरिति निर्देशः प्राप्नोति । नैष दोषः । एकशेषगर्भो ऽत्र द्वन्द्वो द्रष्टव्यः । फल्गुनी च फल्गुनी च फल्गुन्यौ । प्रोष्ठपदा च प्रोष्ठपदा च प्रोष्ठपदे । फल्गुन्यौ च प्रोष्ठपदे च फल्गुनीप्रोष्ठपदाः । तेषां फल्गुनीप्रोष्ठपदानामिति । अथाऽत्र सूत्रे चकारः किमर्थः ? द्वयोरित्यनुवृत्त्यर्थः । चानुकृष्टमपीदमुत्तरसूत्रद्वये ऽनुवर्तते तत्र पुनर्वस्वोरिति विशाखयोरिति च द्विवचनान्तनिर्देशात् ।

१-२-६१ छन्द - नक्षत्रे (१-२-६०)+ पुनर्वस्वोः=नक्षत्रार्थे वर्तमानो यः पुनर्वसुशब्दस्तत्सम्बन्धिनोः द्वयोः (१-२-५९) अन्यतरस्याम् (१-२-५८) एकवचनम्=एकवचनं भवति, छन्दसि= वेदे । किमर्थमिदं सूत्रम् ? सूत्रार्थादेवाऽवगम्यते यद् द्विवचनप्रसङ्गे विभाषयैकवचनार्थमिति । ननु च भो नक्षत्रे वाच्ये प्रकृतसूत्रं प्रवर्तते । तत्र कः पुनः प्रसङ्गो द्विवचनस्य ? यतो नियमेनैवैकवचनं भविष्यति । कथं भवान् फल्गुनीप्रोष्ठपदाशब्दविषये पूर्वसूत्रे न शङ्कितवान् पुनर्वसुशब्दविषये तु पुनरत्र शङ्कते ? को वा विशेषः ? अस्ति विशेषो येन फल्गुनीप्रोष्ठपदाशब्दविषये पूर्वसूत्रे शङ्का न जाता पुनर्वसुशब्दविषये तु पुनरत्र भवति शङ्केति ।

कः स विशेषः ? उच्यते-नक्षत्राणि सन्ति खलु सप्तविंशतिः सा ऽभिजिन्ति वा ऽष्टाविंशतिः तत्र फल्गुनीशब्दो नक्षत्रनामसु द्विःपठ्यते यथा पूर्वा फल्गुनी उत्तरा फल्गुनीति । प्रोष्ठ्पदा ऽपि द्विःपठचते कथम् ? प्रोष्ठपदा भाद्रपदेति नार्थान्तरम्। तथा च पूर्वा भाद्रपदा उत्तरा भाद्रपदेति पठिते पूर्वा प्रोष्ठपदा उत्तरा प्रोष्ठपदेत्यपि पठितं भवति । एवञ्च पूर्वा फल्गुनी उत्तरा फल्गुनी ते उभे फल्गुन्यौ तत्रास्ति द्विवचनप्रसङ्ग :। तथा पूर्वा प्रोष्ठपदा उत्तरा प्रोष्ठपदा ते उभे प्रोष्ठपदे तत्रास्ति द्विवचनप्रसङ्गः । अतः फल्गुनीप्रोष्ठपदाशब्दविषये पूर्वसूत्रे न भवति शङ्का । पुनर्वसुशब्दः पुनर्नक्षत्रनामसु सकृदेव पठ्यते तेन तत्र नास्ति द्विवचनप्रसङ्ग इति पुनर्वसुशब्दविषये भवति शङ्का । स एष विशेषः । विशेषाभासमात्रमेतद् भवति, वस्तुतस्तु नास्ति विशेष इत्याह-इदमपि सिद्धं भवति पूर्वे फल्गुन्यौ पूर्वाः फल्गुन्यः । उत्तरे फल्गुन्यौ उत्तराः फल्गुन्यः । पूर्वे प्रोष्ठपदे पूर्वाः प्रोष्ठपदाः । उत्तरे प्रोष्ठपदे उत्तराः प्रोष्ठपदा इति । अतः फल्गुनीप्रोष्ठपदाशब्दविषये पुनर्वसुशब्दविषये च नास्ति विशेषः । यावता च विशेषो नास्ति तर्हि शङ्का जागर्ति चेत् पूर्वसूत्रे ऽपि जागर्तु यदि तु पूर्वसूत्रविषये न जागर्ति शङ्का तर्हि नास्त्यत्रापि काचन शङ्का । यदि पूर्वे फल्गुन्यौ उत्तरे फल्गुन्यौ पूर्वे भाद्रपदे उत्तरे भाद्रपदे इत्यादयो ऽपि प्रयोगा भवन्ति, नास्ति तर्हि पुनर्वसुशब्दे फल्गुनीप्रोष्ठपदाशब्दयोश्च विशेषः । द्विवचनप्रसङ्गविषये तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-६२ विशाखयोश्च ॥
विशाखा नक्षत्रम् । विशाखे वा ।
१-२-६३ तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ॥
उदितौ तिष्यपुनर्वसू ।

१-२-६४ सरूपाणामेकशेष एकविभक्तौ ॥ ७२
बालकौ । बालकाः ।
एकविभक्तावित्युक्तेर्नेह-ब्राह्मणाभ्यां कृतं ब्राह्मणाभ्यां देहि ।

शङ्का पुनर्जागर्त्येव सूत्रयोरुभयोरपि । शङ्कामात्रमेतद् भवति, शङ्कायाश्च समाधानं भवति । किमत्र समाधानम् ? उच्यते -यथा भूगोलज्ञानसौविध्याय षष्ट्युत्तरेषु त्रिषु शतेषु भूमिर्विभज्यते ऽक्षांशेषु । तथैव नभोमण्डलज्ञानसौविध्याय मेषवृषादिषु द्वादशसु राशिषु नभोमण्डलं विभज्यते । तदेव नभोमण्डलं प्रकारान्तरेण सप्तविंशत्यां भागेषु विभज्यते । ते च भागा अश्विन्यादिभिः प्रतिभागं प्रथिततारकानामभिर्व्यवह्रियन्ते । ताश्च प्रथितास्तारकाः कस्मिँश्चिद् भागे केवलैका भवति कस्मिँश्चिद् द्वे भवतः । कस्मिँश्चिच्च बह्व्यो भवन्तीति ज्योतिःशास्त्रतो ऽवगन्तव्यम् । तथा च फल्गुनीप्रोष्ठपदाशब्दविषये पुनर्वसुशब्दविषये च समाधानं भवति यत् फल्गुनीप्रोष्ठपदाशब्दवाच्ये पूर्वे एव तारे अपि उत्तरे एव तारे अपि प्रत्येकं प्रथिते द्वे द्वे पुनर्वसुशब्दवाच्ये च द्वे स्त इति द्वयोःप्रसङ्गे पूर्वसूत्रेण विकल्पेन बहुवचनं प्रकृतसूत्रेण चैकवचनं विधीयते एवमुत्तरसूत्रे ऽपि बोध्यम् । यद्येवं लोके पुनर्वसुशब्दस्य द्विवचनान्तः प्रयोगः प्राप्नोति । इष्टः खलु द्विवचनान्तः प्रयोगो लोके पुनर्वसुशब्दस्य ।

१-२-६२ विशा-नक्षत्रे (१-२-६०) = नक्षत्रार्थे वर्तमानयोः, विशाखयोः = विशाखाशब्दसम्बन्धिनोः, (नक्षत्रार्थे वर्तमानो यो विशाखाशब्दस्तत्सम्बन्धिनोः) = तद्वाच्ययोः, द्वयोः (१-२-५९) अन्यतरस्याम् (१-२-५८) एकवचनम्+छन्दसि (१-२-६१) । किमर्थो ऽत्र सूत्रे चकारः ? छन्दसीत्यनुवृत्त्यर्थः । अथ किमर्थमिदं सूत्रम् ? सूत्रार्थादेवा ऽवगम्यते यद् द्विवचनप्रसङ्गे विभाषयैकवचनार्थमिति । नैतदस्ति प्रयोजनम् । पूर्वसूत्रे विशाखाशब्दपाठेनापि सिध्यत्येतत् । पूर्वसूत्रे विशाखाशब्दपाठे खलु चकारो ऽपि न पठनीयो भवति पृथग्योगा ऽकरणरूपं चकारपाठाकरणरूपं च लाघवमपि भवति । एवन्तर्हि यल्लाघवमनादृत्य गौरवमाश्रयति तज्ज्ञापयति भगवान् सूत्रकारः- सूत्रमिदमुदासीनमिति । यदि सूत्रमिदमुदासीनं तर्हि विशाखाशब्दस्य वेदे ऽपि द्विवचनान्त एव प्रयोगः प्राप्नोति । प्रयोगस्तु एकवचनान्तो ऽपि भवत्येव । कथम् ? अनुद्भूता ऽवयवविवक्षायामेकवचनं भविष्यति । उद्भूतावयवविवक्षायां च द्विवचनं भविष्यति । यद्येवं लोके ऽपि कदाचिदेकवचनान्तः प्रयोगः प्राप्नोति । इष्टः खलु विशाखाशब्दस्यैकवचनान्तो ऽपि प्रयोगो लोके कदाचित् । अत एवोपदिशति तत्र भवानमरसिंहः- राधा विशाखेति ।

१-२-६३ तिष्यपुनर्वस्वोः=तिष्यपुनर्वसुशब्दयोस्तत्पर्यायाणांच, नक्षत्रद्वन्द्वे = नक्षत्रविषयके द्वन्द्वसमासे, बहुवचनस्य=बहुवचनस्य स्थाने नित्यम्=सदा, द्विवचनम्=द्विवचनं भवति । नक्षत्र इत्यनुवर्तमाने पुनर्नक्षत्रग्रहणं किमर्थम् ? तिष्यपुनर्वसुपर्यायाणामपि ग्रहणार्थम् । अथ बहुवचनग्रहणं किमर्थम् ? एकवचननिवृत्त्यर्थम् । नैतदस्ति प्रयोजनम् । यतस्तिष्य एकः पुनर्वसू च द्वौ तेषां द्वन्द्वे बहुवचनस्यैव प्रसङ्गो भवति, न कदाचिदप्येकवचनस्य । यद्येकवचनस्य प्रसङ्गो नास्ति तर्हि बहुवचनग्रहणस्य प्रयोजना ऽभावेऽपि यद् बहुवचनग्रहणं करोति तज्ज्ञापयति भगवान् सूत्रकारः "सर्वो द्वन्द्वो विभाषयैकवद् भवतीति" इदमपि सिद्धं भवति - **उदितं तिष्यपुनर्वसु** इति । अथ नित्यग्रहणं किमर्थम् ? अन्यतरस्यामिति निवृत्त्यर्थम् ।

१-२-६४ सरू - एकविभक्तौ = एकैकस्यां विभक्तौ परतः, सरूपणाम् = समानाकृतीनां शब्दानां मध्ये, एकशेषः = एकः शिष्यते, (अन्ये लुप्यन्ते) । किमिदं सरूपाणामिति ? समानं रूपं येषां ते सरूपाः ६-३-८५ ज्योति... इति समानस्य सः । तेषां सरूपाणाम् । निर्धारणे षष्ठी । अथ किं पुना रूपम् ? आकृतिः । का पुनराकृतिः ? श्रोत्रग्राह्या शब्दा ऽऽनुपूर्वी । कथं रूपं नाम आकृतिः श्रोत्रग्राह्याऽनुपूर्वी स्यात्, न पुनश्चक्षुर्ग्राह्यम् ? शब्दानुशासनात् । शब्दानुशासनमत्र भवति । न चा ऽत्र चक्षुर्ग्राह्यं किञ्चिदपि सम्भवति । शब्दान् दृष्ट्वैव पुस्तकानि पठ्यन्त इति तु न भ्रमितव्यम् । पुस्तकेषु लिपयः खलु दृश्यन्ते, लिपयो हि शब्दानां संकेतिकाः, न तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(विरूपाणामपि समानार्थानाम्)
घटश्च कलशश्च घटौ, कलशौ ।
१-२-६५ वृद्धो यूना तल्ल - क्षणश्चेदेव विशेषः ॥ ६६, ६९
गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ ।

१-२-६६ स्त्री पुंवच्च ॥
गार्गी च गार्ग्यायणश्च गार्ग्यौ ।
१-२-६७ पुमान् स्त्रिया ॥
हंसी च हंसश्च हंसौ ।

शब्दाः । अथ प्रकृते का तर्हि सम्भवति ? श्रोत्रग्राह्या शब्दानुपूर्वी । या संभवति सा गृह्यते । अथैकशेष इत्यत्र एकग्रहणं किमर्थम् ? द्वयोर्बहूनां वा मा भूदिति । अथैकविभक्तौ इत्यत्र एकग्रहणं किमर्थम् ? एकस्यां विभक्तौ इत्यर्थलाभार्थम् । नैतदस्ति प्रयोजनम् । विभक्तौ इत्येकवचनान्तम्, तत्रैकवचनेनैव एकस्यां विभक्तौ इत्यर्थो भविष्यति । एवन्तर्हि सिद्धे सति यदेकग्रहणं करोति तज्ज्ञापयति भगवान् सूत्रकारः- एकशब्दो ऽयमेकैकार्थपरोऽपीति । किमतेस्य ज्ञापने फलम् ? जननीपरिच्छेत्तृवाचिनोर्मातृशब्दयोरेकशेषा ऽभावः । तयोः खलु भ्यामादौ सारूप्ये ऽपि औट्सु वैरूप्यान्नैकशेषः । अथ स्वरसतः सूत्रमिदं किमर्थम् ? एतत्सूत्रा ऽभावे “सकृदुच्चरितःशब्दः सकृदेवा ऽर्थं गमयति” इति न्यायाद् द्विप्रभृतिषु वाच्येषु तावतां शब्दानामनिष्टाः प्रयोगाः स्युः । बालकबालकौ । बालक-बालक-बालका इत्यादयः । अत एकशेषार्थमिदं सूत्रम् । प्रत्युदाहरणे **ब्राह्मणाभ्यामिति** क्रमशस्तृतीयान्तं चतुर्थ्यन्तं च ।

विरू- समानार्थानाम् = एकार्थानाम्, विरूपाणामपि = भिन्नरूपाणां शब्दानां मध्ये ऽपि, एकशेषः + एकविभक्तौ (१-२-६४) ।

१-२-६५ वृद्धो - यूना = युवप्रत्ययान्तेन सहोक्तौ, वृद्धः = गोत्रप्रत्ययान्तः शब्दः, शेषः (१-२-६४) = शिष्यते, विशेषः= वैरूप्यम्, तल्लक्षण एव चेत् = गोत्रयुव-प्रत्ययमात्रकृतश्चेत् । अथा ऽत्र सूत्रे किमिदं वृद्ध इति ? अथ भवान् कथयतु किमिदं यूनेति ? युवेति कृत्रिमा संज्ञा यथोपदिशति भगवान् सूत्रकारः ४-१-१६३ जीवति तु वंश्ये युवेत्यादि । तदीयं तृतीयान्तं रूपं यूनेति । २-३-१९ सहयुक्ते ऽप्रधाने, इति तृतीया । इदमेव सूत्रं ज्ञापकं सहार्थप्रतीतौ तद्वाचकशब्दा ऽप्रयोगे ऽपि तृतीयाविधानस्य । अथ युवार्थे प्रत्ययाः कस्माद् भवन्ति ? गोत्रप्रत्ययान्तात् । यथोपदिशति भगवान् सूत्रकारः- ४-१-९४ गोत्राद् यूनि इति । यद्येवं युवसाहचर्यात् कृत्रिमैव संज्ञा गृह्यते । का च सा संज्ञा ! गोत्रमिति । कथं भो भवान् अन्यविषयके प्रश्ने अन्यविषयकमुत्तरं ददाति । आम्रान् पृष्टः कोविदारानाचष्टे । वृद्धशब्दविषयके प्रश्ने गोत्रशब्दविषयकमुत्तरं ददाति । नैष दोषः । वृद्धं गोत्रमित्यनर्थान्तरम् । यथोपदिशति भगवान् पाणिनिः - ४-१-१६२ अपत्यं पौत्रप्रभृति गोत्रमिति । तथैवोपदिशन्ति भगवन्तः पूर्वाचार्याः- अपत्यमन्तर्हितं वृद्धमिति । किमिदमपत्यमन्तर्हितमिति ?। अन्तर्हितम् = व्यवहितम्, अपत्यम् = सन्ततिः । अन्तर्हितमपत्यम्= पौत्रप्रभृति । तत् खलु पुत्रेण व्यवहितं भवति । अथ तल्लक्षण इत्यत्र तच्छब्दः कतरपदार्थपरामर्शी ? वृद्धयुवप्रत्ययपरामर्शी ।

१-२-६६ स्त्री पुं- यूना (१-२-६५) वृद्धः (१-२-६५) + स्त्री = गोत्रप्रत्ययान्तस्त्रीवाचकशब्दः, शेषः (१-२-६४) पुंवच्च= स शेषः पुंलिङ्गवच्च भवति, विशेषः (१-२-६५) तल्लक्षण एव चेत् (१-२-६५) = गोत्र - युव- स्त्रीप्रत्ययमात्रकृतश्चेत् ।

१-२-६७ पुमान्-स्त्रिया = स्त्रीवाचिना शब्देन सहोक्तौ, पुमान् = पुंवाचकशब्दः, शेषः (१-२-६४) विशेषः (१-२-६५) तल्लक्षण एव चेत् (१-२-६५) = स्त्रीप्रत्ययमात्रकृतश्चेत् । अत्र काशिका- एवकारः किमर्थः ? इन्द्रश्च इन्द्राणी चेन्द्रेन्द्राण्यौ । पुंयोगादाख्यायामित्यपरो विशेष इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-२-६८ भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥
भ्राता च स्वसा च भ्रातरौ।
पुत्रश्च दुहिता च पुत्रौ।

१-२-६९ नपुंसकमनपुंसकेनैकवच्चाऽस्याऽन्यतरस्याम् ॥७१
शुक्लः कम्बलः शुक्ला शाटी
शुक्लं वस्त्रं तदिदं शुक्लम्।
तानीमानि शुक्लानि।

१-२-७० पिता मात्रा ॥
माता च पिता च पितरौ,
मातापितरौ।

१-२-७१ श्वशुरःश्वश्र्वा ॥
श्वश्रूश्च श्वशुरश्च श्वशुरौ,
श्वश्रूश्वशुरौ।

१-२-७२ त्यदादीनि सर्वैर्नित्यम् ॥
स च देवत्तश्च=तौ। यश्च
देवदत्तश्च= यौ।

१-२-६८ भ्रातृ - स्वसृदुहितृभ्याम् = स्वसृदुहितृशब्दाभ्यां सहोक्तौ, भ्रातृपुत्रौ= भ्रातृशब्दः पुत्रशब्दश्च, शेषः (१-२-६४)= शेषौ= शिष्येते। कोऽभिप्रायः सूत्रस्याऽस्य ? १-३-१० यथा... सूत्रद्वारा स्वसृशब्देन सहोक्तौ भ्रातृशब्दः, दुहितृ-शब्देन सहोक्तौ पुत्रशब्दः शिष्यते, इति।

१-२-६९ नपुं- अनपुंसकेन= अक्लीबे वर्तमानेन शब्देन सहोक्तौ, नपुंसकम्=क्लीबे वर्तमानः शब्दः, शेषः (१-२-६४) अस्य=एतस्य शेषस्य, अन्यतरस्याम्=वा, एकवच्च=एकवद्भावोऽपि भवति, विशेषः तल्लक्षण एव चेत् (१-२-६५)=वैरूप्यं लिङ्गमात्रकृतं चेत्। अथ शुक्लं च शुक्लं शुक्लं चेति विग्रहे का रूपसिद्धिः ? शुक्लानि इति। अनपुंसकेनेत्युच्यते नपुंसकानि चेमानि। नैष दोषः। नाऽहं ब्रवीमि प्रकृतसूत्रेणैकशेषो भवतीति। केन तर्हि भवति ? १-२-६४ सरू ... इति सूत्रेण। यद्यनपुंसकेन सहोक्तौ प्रकृतसूत्रेणैकशेषो भवति नपुंसकेन सहोक्तौ च पुनः १-२-६४ सरू... इति सूत्रेणैकशेषो भवतीति सर्वथैकशेषो भवति चेत्, तर्हि प्रकृतसूत्रे अनपुंसकेनेति निर्देशो व्यर्थः। कथम् ? प्रकृतसूत्राप्रवृत्तावपि तस्यामवस्थायां सरूपसूत्रप्रवृत्तौ व्यावर्त्याऽभावेन फलाऽभावात्। नास्ति व्यर्थ इत्याह-अस्ति खलु फलं प्रकृतसूत्राप्रवृत्तिवेलायां सरूपसूत्रप्रवृत्तावपि। किम् ? एकवद्भावाऽभावः। सरूपसूत्रप्रवृत्तौ एकवद्भावो न भवति। प्रकृतसूत्रे अनपुंसकेनेति निर्देशाभावे तु तत्रापि प्रकृतसूत्रेणैकशेषे वैकल्पिक एकवद्भावः स्यादिति।

१-२-७० पिता- मात्रा = मातृशब्देन सहोक्तौ, पिता = पितृशब्दः, अन्यतरस्याम्, (१-२-६९) शेषः (१-२-६४)। **मातापितरौ** ६-३-२५ आनँ... इत्यानँङ्।

१-२-७१ श्वशु-श्वश्र्वा= श्वश्रूशब्देन सहोक्तौ, श्वशुरः = श्वशुरशब्दः, अन्यतरस्याम् (१-२-६९) शेषः (१-२-६४)। सूत्रमिदं किमर्थम् ? श्वशुरशब्दस्य शेषार्थम्। नैतदस्ति प्रयोजनम्, १-२-६७ पुमान्... इत्येव सिद्धम्। विकल्पार्थं तर्हीदम्। इदमपि सिद्धं भवति श्वश्रूश्वशुरौ इति। शेषार्थं च। किम् ? सूत्रमिदमावश्यकम्। ननु चोक्तं १-२-६७ पुमान्... इत्येव सिद्धमिति। न सिध्यति। कथम् ? विशेषः स्त्रीप्रत्ययमात्रकृतश्चेदित्युच्यते तत्र, पुंयोगादाख्यायामित्यपरोऽपि विशेषो ऽत्रेति।

१-२-७२ त्यदा- सर्वैः = सकलैः (त्यदादिभिरन्यैश्च) शब्दैःसहोक्तौ, त्यदादीनि=त्यदादिशब्दस्वरूपाणि, नित्यम् = सदा, शेषः (१-२-६४) = शेषाणि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यदादितःशेषे पुंनपुंसकतो
लिङ्गवचनानि ।
सा च देवदत्तश्च=तौ ।
सा च कुण्डे च तानि ।
(पुंनपुंसकयोरेकशेषे परत्वान्नपुंसकम्)
तच्च देवदत्तश्च=ते ।
(अद्वन्द्वतत्पुरुषविशेषणानाम्)
स कुक्कुटः सा मयूरी कुक्कुटमयूर्यौ ते ।
मयूरीकुक्कुटौ तौ ।
ते च (पिप्पल्यर्धे च) सा च
(अर्धपिप्पली च) अर्धपिप्पल्यस्ताः ।
(त्यदादीनां मिथः सहोक्तौ यत्
परं तच्छिष्यते)
स च यश्च = यौ ।
(पूर्वशेषो ऽपि दृश्यते)
स च यश्च= तौ ।

१-२-७३ ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री ॥

गावश्च (वृषाश्च) गावश्च (धेनवश्च)
गाव इमाः । ग्राम्येत्युक्तेर्नेह-रुरव इमे ।
पशिवत्युक्तेर्नेह-ब्राह्मणा इमे ।
सङ्घेष्वित्युक्तेर्नेह-इमौ गावौ चरतः ।
अतरुणेष्वित्युक्तेर्नेह-वत्सा इमे ।
(अनेकशफेष्विति वक्तव्यम्)
नेह- गर्दभ्यश्च गर्दभाश्च गर्दभाः ।
अश्वाश्च (वडवाश्च) अश्वाश्च
(हयाश्च) अश्वा इमे ।

इति प्रथमाऽध्याये द्वितीय पादः ।

त्यदादितः = त्यदादीनाम्, शेषे = शेषे सति, पुंनपुंसकतः = पुंनपुंसकानुसारेण, लिङ्गवचनानि = लिङ्गानि वाच्यानि । अथ को ऽर्थो वार्तिकस्या ऽस्य ? उक्त एवा ऽनुपदम् । यद्यनुपदमुक्तो ऽर्थस्तर्हि त्यदादीनामिति पुंनपुंसकयोरिति च निर्देशौ कर्तव्यौ । न कर्तव्यौ । अन्तरेण तथा निर्देशं कथमुक्तार्थो गम्यते ? गम्यत इत्याह-त्यदादित इति पुंनपुंसकत इति च षष्ठचन्ताद् व्याश्रये तसिँप्रत्ययान्तौ द्रष्टव्यौ । यथोपदिशति भगवान् सूत्रकारः षष्ठचन्ताद् व्याश्रये ऽर्थे तसिँप्रत्ययो भवतीत्यर्थकं सूत्रं ५-४-४८ षष्ठचा व्याश्रये, इति । अथ किमिदं व्याश्रय इति ? विभिन्नपक्षाश्रयणं व्याश्रयः । किमु भोः प्रतीयते तु प्रकृतवार्तिके व्याश्रयः ? बाढं प्रतीयत इत्याह- त्यदादि - तद्भिन्नपक्षयोरेकशेषेण त्यदादिपक्षाश्रयणात्, स्त्रीपुंनपुंसकपक्षेषु लिङ्गवचनैःपुंनपुंसकपक्षाश्रयणात् प्रकृतवार्तिके व्याश्रयः प्रतीयत इति । अथ सा च देवदत्तश्चेति विग्रहे एकशेषे का रूपसिद्धिः ? उदाहृतं खलु मूले तौ इति । ननु च भो उच्यते वार्तिकेन पुंनपुंसकतो लिङ्गवचनानीति, तथा सति स इति एकवचनान्तेन रूपेण भाव्यम् । नैष दोषः । वार्तिके वचनशब्दः प्रसङ्गोच्चारितः । अभिधेयवशादेव हि वचनानि भवन्ति । अत एव 'लिङ्गवचनानि' इत्यस्य लिङ्गानि वाच्यानीति फलितार्थो दर्शितः ।

पुंनपुंसकयोः = पुंनपुंसकयोर्मध्ये, एकशेषे= एकशेषे जाते परत्वात्, नपुंसकम् । कथं नपुंसकस्य परत्वम् ? त्यदादित इति वार्तिके पुंनपुंसकत इत्यत्र नपुंसकशब्दस्य पुंशब्दात् परवर्तित्वात् ।

अद्वन्द्व-किं त्यदादित इति वार्तिकमविशेषेण प्रवर्तते ? नेत्याह-अद्वन्द्वेति-अद्वन्द्वतत्पुरुषविशेषणानाम् = द्वन्द्व-तत्पुरुषसमास-विशेषण-भिन्नानां त्यदादिशब्दानाम् "पुंनपुंसकतो लिङ्गवचनानि" इति वक्तव्यम् ।

त्यदा+पूर्व-अत्रा ऽवधेयम्-यदि परशेषो ऽपि भवति पूर्वशेषो ऽपि भवति तर्हि द्वे वार्तिके इमे अदृष्टफलके एव । कथम् ? १-२-७२ त्यदा... इति सूत्रेणैवैकशेषः कदाचित् पूर्वस्य कदाचित् परस्य भविष्यति ।

१-२-७३ ग्राम्य-अतरुणेषु = तरुणभिन्नवाचिषु, ग्रा.. षु = ग्रामीणपशुसमूहवाचिशब्देषु, स्त्री = स्त्रीवाचिशब्दः, शेषः (१-२-६४) । अथ का व्युत्पत्तिर्ग्राम्यपशुसङ्घेष्वित्यस्य ? ग्रामे भवा ग्राम्याः । ग्राम्याश्च ते पशवो ग्राम्यपशवः । तेषां सङ्घाः=समूहाः । तेषु ग्राम्यपशुसङ्घेषु । निर्धारणे सप्तमीति । प्रत्युदाहरणेषु सर्वत्र १-२-६७ पुमान्... इति पुंसामेकशेषः ।

अने- कोऽभिप्रायो वार्तिकस्या ऽस्य ? अचीरित-खुर-पशुवाचिनां शब्दानां मध्ये स्त्रीवाची शब्दो न शिष्यते । इति । अतस्तत्र १-२-६७ पुमान्.. इति पुंसां शेषः ।

इति प्रथमाऽध्याये
द्वितीयः पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रथमाऽध्याये
तृतीयः पादः

१-३-१ भूवादयो धातवः ॥ १-३-२ **उपदेशे** ऽजनुनासिक इत् ॥९	१-३-३ हलन्त्यम् ॥

१-३-१ भूवा- २-४-८२ अव्ययादाप्सुँपः- सूत्रानन्तरं सूत्रमिदं पाठयम्। भूवादयः = भूप्रभृतयः, धातवः = धातुसंज्ञका भवन्ति = धातु हुन् = धातु हैं। इत्यर्थं बालोपलालनामनुसृत्योपदिशेत् (द्वितीयावृत्तौ तु भूवादयः= क्रियावाचिनो भूप्रभृतयो धातवः। इत्यर्थमुपदिशेत्। तेन 'याः पश्यसि' इत्यादौ, न दोषः) अथ यथा प्रत्येकं प्रातिपदिकेभ्यः सुँप्रभृतिषु प्रत्ययेषु जातेषु रूपाणि विभिन्नानि भवन्ति, तथैव प्रत्येकं धातुभ्यो लँट् लिँट् इत्यादिषु प्रत्ययेषु जातेषु रूपाणि विभिन्नानि भवन्ति। इत्युपदिश्याऽग्रिम-दृष्टान्तमुपस्थापयेत्। यथा-

अयि वत्साः ? सावधानं शृणुत। यथा कृषीवला धान्यादिसेचनाय (धान्यादिषु जल-चारणाय) बहुभिर्दिवसैःकुल्यां खनन्ति। यद्यपि वास्तविकं प्रयोजनं जलस्य भवति। न तु कुल्यायाः। परन्तु गर्गर्यादिष्वानीतं जलं पर्याप्तं सर्वथा न भवति। अतः कुल्या कार्यैव। तथैव लँट् लिँट् प्रभृतीनां प्रत्ययानां प्रयोगे वास्तविकं प्रयोजनं यद्यपि नास्ति, तथापि पठति पठतः पठन्ति इत्यादीनां पदानामुपदेशनं गर्गर्यामानीतं जलमिव पर्याप्तं सर्वथा न भवति। अतो लँट् लिँट् इत्यादीनामुपदेशो ऽत्यन्तमावश्यकः। स चोपदेशो जलार्थिनां कुल्यानिर्माणमिव प्रथमं यत्न-साध्यो भवति। अतो धीरं विमृशन्तः शृणुतेति। अथ 'श्यामः पठति' इति वाक्ये 'पठति' इति प्रयोगः कथं सिध्यति ? इति जिज्ञासायामुच्यते। प्रथमं धातुपाठे 'पठँ व्यक्तायां वाचि' (३३०) इति धातुं शिक्षकश्छात्रान् दर्शयेत्। तत्र ठकारोत्तरा ऽकारो ऽनुनासिकः पठितो ऽस्ति। अतः १-३-२, ९ सूत्रे उद्बोध्य पठ् इत्यवशेष्य इति बोधयेत्। अथ स (पठ्) च धातुः। प्रकृत १-३-१ भूवा... सूत्रादित्युपदिशेत्। अथ ३-२-१२३ वर्तमाने... सूत्रमुपस्थापयितुकामस्तत्सूत्रार्थोपदेशात् पूर्वं ३-१-१ प्रत्य... सूत्रं ५-४-१६० निष्प्र... सूत्रं च दर्शयित्वा द्वयोरेतयोः सूत्रयोर्मध्ये विधेयाः प्रत्यय-शब्देन व्यवह्रियन्ते। ते च प्रायः परतो भवन्तीत्युद्बोधयेत्। एवं यथा ४-१-२ स्वौजस... प्रभृति - सूत्रविधेयाः प्रत्यया ङ्याप्प्रातिपदिकादेव भवन्ति, तथैव ३-१-९६ तव्य... सूत्रादारभ्याऽऽतृतीयाऽध्यायान्तं ये प्रत्यया विधीयन्ते, ते धातोरेव भवन्ति। ते च परत एव भवन्तीत्युपदिशता शिक्षकेण ३-१-९१ धातोः सूत्रं दर्शयितव्यम्। (यद्यपि ३-१-९६ तव्य... सूत्रात् पूर्वैरपि सूत्रैर्धातोः प्रत्यया विधीयन्ते तथापि साम्प्रतं ततो ध्यानं न देयम्) अथ ३-२-१२३ वर्तमाने... सूत्रमुपदेश्यम्।

१-३-२ उप -८-२-६६ ससजुषो रुँः- सूत्रानन्तरं सूत्रमिदं पाठयम्। उपदेशे = शास्त्रे साक्षादुच्चार्यमाणः, अनुनासिकः, अच्, इत्= इत्संज्ञको भवति= इत् हो= इत् है। इत्यर्थमुपदिश्य रुँ इत्यस्य घटकः, 'उँ' इत्यनुनासिको वर्तते। तेन स इत्संज्ञक इति स्फुटं बोधयित्वा १-३-९ तस्य लोपः- सूत्रमुपदेश्यम्।

१-३-३ हल- ६-१-१०३ अमि पूर्वः- सूत्रानन्तरं सूत्रमिदं पाठयम्। अत्रा ऽधोनिर्दिष्टरूपेण श्यामपाट्यां लेख्यम्

(क) (ख)

१-३-२ उपदेशे ऽजनुनासिक इत् ॥

१-३-३ (क) हलन्त्यम् (ख) ॥ इति।

अथ स्वयमङ्गुल्या पदानि दर्शयता शिक्षकेण, (क)= उपदेशे, अन्त्यम्+ हल्= अन्ते वर्तमानो हल् वर्णः (ख) = इत्। इत्यर्थ उपदेश्यः। लक्षणसमन्वयस्तुच्छात्रैरेव कारयितव्यः। ततः १-३-९ तस्य... सूत्रसमन्वयमपिच्छात्रैः कारयित्वा 'रामश्याम +औ' इति श्यामपाट्यां लिखित्वा शेषप्रक्रिया प्रथमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-४ न विभक्तौ तुस्माः ॥	**१-३-६ षः प्रत्ययस्य ॥८**
१-३-५ आदिर्ञिटुडवः ॥८	**१-३-७ चुटू ॥**

द्विवचन-समेति शिक्षकश्छात्रानुपदिशँश्छात्रैः साध्यमानामग्रिमप्रक्रियां धीरं शृणुयात्।

शस् - 'गुरू राम-श्याम-विष्णुमित्रान् पाठयति' इति वक्तव्ये 'राम-श्याम-विष्णुमित्रान्' इति प्रयोगः कथं सिध्येदित्याकाङ्क्षां जागरयित्वा प्रक्रियामुपदिशेत्। यथा- रामश्यामविष्णुमित्र-प्रातिपदिकात् ४-१-२ स्वौजस... सूत्रेण, अम्, औट्, शस्, इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२१ बहु... सूत्रबलेन शस्प्रत्यये विहिते सति शिक्षको रामश्यामविष्णुमित्र + शस् इति श्यामपाट्यां लिखित्वा १-३-८ लशक्वतद्धिते-सूत्रमुपदिशेत्।

१-३-४ न वि-विभक्तौ= विभक्तौ वर्तमानाः, तुस्माः= तवर्गसकारमकाराः, न = इतो न भवन्ति। इतीत्संज्ञायाः प्रतिषेधात् ७-१-१२ टाङसिँ... ३-४-१०५ झस्य... ४-१-२ स्वौजस... ३-४-७८ तिप्तस्... इत्यादिषु तवर्गसकारमकाराणाम् १-१-९ तस्य... इति लोपो न।

१-३-५ आदि-उपदेशे (१-३-२) आदिः (आदिरित्यत्र सप्तम्यर्थे प्रथमा द्रष्टव्या) = आदौ वर्तमानाः, ञिटुडवः= ञि टु डु इत्येते, इत् (१-३-२) = इतो भवन्ति। उदाहरणानि- ३-२-१८७ ञीतः... ३-३-८९ ट्वितो... ३-३-८८ ड्वितः... इत्यादिषु द्रष्टव्यानि।

१-३-६ षःप्र- प्रत्ययस्य, आदिः (१-३-५) षः = षकारः, इत् (१-३-२)। उदाहरणानि ३-१-१४५ शिल्पिनि... इत्यादिषु द्रष्टव्यानि।

१-३-७ चुटू- १-४-२१ बहुषु...सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्रा ऽधोनिर्दिष्टरूपेण श्यामपाट्यां सूत्राणि लेख्यानि -

(क) (ख)

१-३-२ उपदेशे ऽजनुनासिक इत् ॥ १-३-५ आदि र्ञिटुडवः ॥

(ग)

१-३-६ षः प्रत्ययस्य ॥ १-३-७ (ग) (ख) चुटू (क) ॥ इति

अथ शिक्षकेणाऽनात्वरमाणेन (अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्। शिष्याणामुपदेशार्थे कुर्याद् वृत्तिं विलम्बिताम्॥ ऋग्वेदप्रातिशाख्यम्, शिक्षापटलम्- ४९) प्रकृत-सूत्रार्थ-बोधन-सन्दर्भे छात्रा एवमुपदेश्याः-वत्साः ? यथा द्वयोर्भान्वोर्वाच्ययोर्भानुशब्दात् प्रथमा- द्विवचने औ प्रत्यये 'भानू' इति रूपं सिध्यति। तथैव चवर्ग-टवर्गयोर्वाच्ययोः, चुटुशब्दात् प्रथमा-द्विवचने औ प्रत्यये चुटू इति रूपं सिध्यतीति। अथ पुनरग्रे शिक्षकेणच्छात्राः सम्बोध्याः। अयि वत्साः ? यथा कुल्याया आगतं जलं त्रिकोणे क्षेत्रे त्रिकोणायते। चतुष्कोणे च चतुष्कोणायते। अर्थाद् यादृशाकारं क्षेत्रं भवति तादृशाकारं जलं भवति। तथैव सूत्रान्तरादनुवर्तमानं पदं यादृशेन पदेन सम्बध्यते तादृशं भवति। अतः प्रकृते चुटू इति द्विवचनान्तेन सम्बन्धात् १-३-२ उप... सूत्रादनुवर्तमानम् इत् इत्यपि द्विवचना (औ प्रत्यया) न्ताय कल्पते-इत्+औ= इतौ, इति। एवम् १-३-५ आदि... सूत्रादनुवर्तमानम् आदि इति पदमपि द्विवचना (औ प्रत्यया) न्ताय कल्पते, आदी इतीति। इत्थं सूत्रार्थः फलति- (ग) = प्रत्ययस्य, (ख)=आदी, = आद्यौ, चुटू = चवर्गटवर्गौ, (क) = इतौ। इति। यदिच्छात्राः स्वयमुद्भावयेयुस्तदा युक्तमुक्तं युक्तमुक्तमिति साम्रेडं वदता शिक्षकेण तेषामुत्साहो वर्धयितव्यः। अथ प्रकृत १-३-७ चुटू-सूत्रस्य १-३-९ तस्य... सूत्रस्य च समन्वयं छात्रैःकारयित्वा श्यामपाट्यां जकारं फालयित्वा रामश्यामविष्णुमित्र +अस् इति दर्शयित्वा स-बाध्य-बाधनं ६-१-९८ प्रथ... सूत्रस्य समन्वयमपिच्छात्रैरेव कारयित्वा 'रामश्यामविष्णुमित्रास्' इति श्यामपाट्यां लिखित्वा ऽग्रे ८-२-६६ सस... सूत्रोदाहरणवच्च च्छात्रैरेव लक्षणसमन्वयं कारयित्वा 'रामश्यामविष्णुमित्राः' इति रूपं साधयितव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-८ ल-श-क्वतद्धिते ॥ (इर उपसंख्यानम्) १-३-९ तस्य लोपः ॥	१-३-१० यथासंख्यमनुदेशः समानाम् ॥

अम्-अथ 'गुरुः श्यामं पाठयति' इति वक्तव्ये 'श्यामम्' इति प्रयोगः कथं सिध्यतीत्याकाङ्क्षामुद्भाव्य श्यामशब्दात् ४-१-२ स्वौजस... सूत्रेण अम् औट् शस् इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२२ द्व्येक... सूत्रबलेन अम् प्रत्यये श्याम +अम् इति श्यामपाट्यां लिखित्वा ६-१-८४ आद् गुणः... ६-१-९७ अकः ... ६-१-९८ प्रथ ... सूत्राणि बाधयित्वा ६-१-१०३ अमि... सूत्रमुपदेश्यम्। इर-उदाहरणम् ३-१-५७ इरि... इत्यत्र दृश्यम्।

१-३-८ लश १-३-३ हलन्त्यम्-सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्रा ऽधोनिर्दिष्टरूपेण श्यामपाट्यां लिखेत् -

(क) (ख)

१-३-२ उपदेशे ऽजनुनासिक इत् ॥ १-३-५ आदि र्ञिटुडवः ॥

(ग)

१-३-६ षः प्रत्ययस्य ॥ १-३-८ (ग)(ख) लशकु(क) अतद्धिते ॥ इति।

अस्य सूत्रस्य 'अतद्धिते' इत्यंशं विहाय १-३-७ चुटू इति सूत्रस्येवार्थः (अत्र प्रथमं शिक्षको मनसा विमृशेत् किमिदं लशकु इति ? लश्च शश्च कुश्चेति=लशकु=लकार-शकार-कवर्गाः। समाहारद्वन्द्वः। अथ अतद्धिते इति कस्य विशेषणम् ? १-३-६ षः प्रत्ययस्येति सूत्रादनुवर्तमानस्य प्रत्ययस्येत्यस्य। यद्येवम् अतद्धितस्येति निर्देशः कर्तव्यः। न कर्तव्यः। विभक्तिव्यत्ययोऽत्र द्रष्टव्यः षष्ठ्याः स्थाने सप्तमी जातेति। यथोपदिशति भगवान् सूत्रकारश्छान्दसं सूत्रं ३-१-८५ व्यत्ययो बहुलमिति। उक्तं च पूर्वम्। किमुक्तम् ? सूत्राणिच्छन्दोवद् भवन्तीति)। अतद्धिते = तद्धितभिन्नस्य = तद्धितभिन्न, (ग) = प्रत्ययस्य= प्रत्ययका, (ख) = आदि=आदौ वर्तमानम्= आदिमा रहेका, लशकु = लकारतालव्यशकारकवर्गाः, (क) = इत्। इति। अथ ४-१-७६ तद्धिताः... सूत्रमष्टाध्याय्यां दर्शयित्वा इत आरभ्य ५-४-१६० निष्प्र ५-४-१५१ उरः... इति सूत्रे दर्शयन् पञ्चमाध्यायान्तं ये प्रत्यया विधीयन्ते ते तद्धितपदवाच्या भवन्तीति बोधन- सन्दर्भे प्रकृतसूत्रेण तद्धिते 'इत्' न भवतीति बोधनपुरस्सरं ४-१-२ स्वौजस... सूत्रं तदन्तरे नास्ति, अतो ऽनेन (४-१-२ स्वौजस) सूत्रेण विहितः (शस्) प्रत्ययस्तद्धितो नेतिच्छात्रान् बोधयेत्। अथच्छात्रैरेव लक्षणसमन्वयं १-३-९ तस्य सूत्रेण लोपं च कारयित्वा रामश्यामविष्णुमित्र + अस् इति श्यामपाट्यां लिखित्वा प्रथमाबहुवचने, इवाऽग्रिमप्रक्रियां छात्रैः साधयित्वाऽधोनिर्दिष्टं श्यामपाट्यां लिखेत्-

'राम-श्याम-विष्णुमित्रास्' इति। अथ ८-२-६६ सस... सूत्रं बाधयित्वा ६-१-९९ तस्माच्छसो... सूत्रं समुपदिशेत्।

१-३-९ तस्य - १-३-२ उपदेशे... सूत्रानन्तरं सूत्रमिदं पाठचम्। (अत्र प्रथमं शिक्षकः सूत्रस्या ऽस्य तस्येति पदं मनसा स्फारयेत्- तस्य, लोपः। तस्य नाम कस्य ? इतः। कथम् ? तच्छब्दः प्रकृत-परामर्शी भवति। प्रकृतं च 'इत्' इति वर्तते इति) तस्य=इतः= इत्संज्ञकस्य, लोपः = लोपो भवति। इत्युपदिश्य छात्रा + रुँ इत्यत्र उँकार इत् अस्ति, अतस्तस्य लोपे छात्रार् इति। इतो ऽग्रिमप्रक्रिया ८-३-१५ खर... सूत्रे पूर्वमुपदिष्टैव। अथ ६-१-१०९ अतो रोँ... सूत्रं पाठचम्।

१-३-१० यथा- ७-२-९० शेषे लोपः- सूत्रानन्तरं सूत्रमिदं पाठचम् । समानाम् = तुल्यानाम् (नेपालीभाषायाम् बराबरको) (हिन्दीभाषायाम् बराबरका), अनुदेशः = विधिः, यथासंख्यम् = क्रमेण भवति। उदाहरणं तु ८-४-३९ स्तोःश्चु... सूत्रे स-विस्तरं प्रतिपादितम्। अतःप्रकृते ऽपि युष्मदस्मदोर्मपर्यन्तस्य क्रमेणादेशौ भवतः। एवमग्रे ऽपि। इति।

औ- युवाम् पठथः, आवाम् पठावः, इति वक्तव्ये औ प्रत्यये पूर्ववदमि युष्मद्+अम्, अस्मद्+ अम् इति श्यामपाट्यां लिखित्वा ७-२-९२ युवावौ... सूत्रं प्रस्तुत्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-११ स्वरितेना ऽधिकारः ॥ १-३-१२ अनुदात्तङित **आत्मनेपदम्** ७७	एधते। त्रायते।

१-३-११ स्वरि - सूत्रमिदं किमर्थम् ? अनुवृत्तिज्ञानार्थम्। सूत्रेषु सर्वाणि पदानि न भवन्ति। यथा-६-१-७५ एचोऽयवायावः, इत्यत्र 'अचि' इति पदं नास्ति। तथापि 'अचि' इत्यर्थः स्वीक्रियते। कथम् ? ६-१-७४ इको यणचि इति सूत्रादनुवर्तत इति। तर्हि कुत्र कुत्र कस्मात् कस्मात् कानि कानि पदान्यनुवर्तन्त इति निर्णयायोपदिशति भगवान् सूत्रकारः- स्वरितेनाधिकार इति। स्वरितेनेति इत्थंभूतलक्षणे तृतीया। यथा दण्डेन यतिः = दण्डं दृष्ट्वा यतिरयमिति ज्ञायते। पुस्तकेन च्छात्रः = पुस्तकं दृष्ट्वा छात्रो ऽयमिति ज्ञायते। तथा स्वरितेन अधिकारः =स्वरितं दृष्ट्वा अधिकारो ज्ञायते। किमुक्तं भवति ? सूत्रस्थे यत्र पदे पदांशे वा स्वरितः श्रूयते तदनुवर्तत इत्युक्तं भवति। अथ कः स्वरितो नाम ? स्वरविशेषः। यथोपदिशति भगवान् सूत्रकारः १-२-३१ समाहारः स्वरितः, इति। अत्रेदमवधेयम्- भगवान् सूत्रकारः परत्रानुवर्तनीयेषु पदेषु पदांशेषु वा स्वरितस्वरं पठति स्म। ततश्च पुरा खलु श्रवणेनैवेदमनुवर्ततेऽग्रत इति ज्ञायते स्म। कालक्रमेण च उदात्तानुदात्तस्वरितोच्चारणभेदे तिरोहिते हन्ताऽद्यत्वे न केवलं श्रवणेनैवेदमनुवर्तते न वेति ज्ञानमात्रं दुर्लभं किन्तु कः स्वरितपदार्थ इति विषयेऽपि नैकमत्यम्। अतो ऽनुवर्तनीयेषु किमपि चिह्नं स्वरितमिति कल्पनीयमिति। ग्रन्थेऽत्रोर्ध्वरेखा स्वीक्रियते। किञ्च विरुद्धविभक्त्यन्तं पदमनुवर्तते, न समानविभक्त्यन्तम्। यथा -६-१-७५ एचो ऽयवायाव इति सूत्रे सप्तम्यन्तं पदं नास्ति, अतः, ६-१-७४ इको यणचि इति सूत्रात् 'अचि' इति सप्तम्यन्तं पदमनुवर्तते। इक इति षष्ठचन्तं यण् इति प्रथमान्तं च पदे ना ऽनुवर्तेते। एच इति षष्ठचन्तस्य, अयवायाव इति प्रथमान्तस्य पदयोः समानविभक्त्यन्तयोरत्र सत्वात्। विशेष्यवाचक-विशेषणवाचके तु समानविभक्त्यन्ते अपि अनुवर्तेते एव। अर्थाद् विशेष्यविशेषणवाचकभिन्नं समानविभक्त्यन्तं पदमनुवृत्तेः प्रतिबन्धकं भवति। अतो विशेष्यविशेषणवाचकभिन्ने समानविभक्त्यन्ते पदे ऽनुवर्तयितव्ये तत्र तत्र चकारं पठति भगवान् सूत्रकारः। यथा -१-४-५५ तत्प्रयोजको हेतुश्चेति सूत्रे १-४-५४ स्वतन्त्रः कर्तेति सूत्रात् 'कर्ता' इत्यस्यानुवर्तनाय चकारं पठति। चकाराऽभावे तु हेतुरिति प्रथमान्तं पदं 'कर्ता' इति प्रथमान्तस्या ऽनुवृत्तौ प्रतिबन्धकं स्यादिति। एतेन-तत्प्रयोजको हेतुश्च इति सूत्रस्थानीयं 'तद्योजको हेतुः' इति जैनेन्द्रव्याकरणसूत्रं परित्यक्तचकारं पाणिन्यभिप्रायाऽज्ञानमूलकमिति स्फुटं भवति।

१-३-१२ अनु ३-४-१०६ इटो ऽ त् - सूत्रानन्तरं सूत्रमिदं पाठचम्। (अत्र प्रथमं शिक्षकेण मनसा विमृश्यम्। तथाहि-किमिदम् अनुदात्तङित् इति ? अनुदात्तश्च ङ् च = अनुदात्तङौ। ताविती यस्य सः = अनुदात्तङित्। तस्मात्= अनुदात्तङितः = अनुदात्तेतो ङकारेतश्चेति। अथाऽत्राऽन्यपदार्थः कः ? धातुः। कथं ज्ञायते धातुरिति ? ज्ञायत इत्याह-प्रकृतसूत्रेण आत्मनेपदमेवेति नियम्यते, आत्मनेपदसंज्ञकाः परस्मैपदसंज्ञकाश्च प्रत्यया धातोरेव विधीयन्त इति। ननु च भोः आत्मनेपदसंज्ञकाः परस्मैपदसंज्ञकाश्च न धातोर्विधीयमानाः प्रत्ययाः। के तर्हि ? आदेशास्ते। नैष दोषः। तेषां स्थानिनः खलु धातोर्विधीयमानाः प्रत्ययाः। मूलोक्तोदाहरणयोः, एधँ (२) त्रैङ् (९६५) धातू इति। अनुदात्तङितः = अनुदात्तेतः, ङितश्च धातोः, आत्मनेपदम्= आत्मनेपदं भवति। इत्यर्थः। अग्रे च युष्मच्छब्दे कर्तृपदे मध्यमपुरुषः (थास् आथाम्, ध्वम्) अस्मच्छब्दे कर्तृपदे, उत्तमपुरुषः (इट्, वहि, महिङ्) युष्मदस्मच्छब्दभिन्ने कर्तृपदे च= प्रथमपुरुषः (त, आताम्, झ) भवन्ति। शेषप्रक्रिया च पठ्धातोः कर्मणि लँटीव। केवलं तत्रत्येन ३-१-६७ सार्व... सूत्रेण ३-१-६८ कर्तरि... सूत्रं विनिमातव्यम्। रूपाणि यथा-श्यामो लभते। रामश्यामौ लभेते। रामश्यामविष्णुमित्रा लभन्ते। त्वं लभसे। युवां लभेथे। यूयं लभध्वे। अहं लभे। आवां लभावहे। वयं लभामहे। इति। इत्थं केभ्यश्चिद् धातुभ्यः कर्तर्यप्यात्मनेपदं भवति। कर्मणि लकारे तु यगेव। रूपाणि यथा-लभ्यते। लभ्येते। लभ्यन्ते। लभ्यसे। लभ्येथे। लभ्यध्वे। लभ्ये। लभ्यावहे। लभ्यामहे। **उभयपदे-केभ्यश्चिद् धातुभ्यः** कर्तरि लकारे विहिते, उभयपदे (आत्मनेपदं परस्मैपदं च) भवतः। यथा पच् (डु पचँष् ९९६) धातुः स्वरितेत्। इति धातुपाठ-प्रदर्शन-पुरस्सरं बोधयित्वा कर्तरि लकारे विहिते १-३-७२ स्वरि... सूत्रं प्रस्तुत्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-१३ भावकर्मणो : ॥
भूयते । पठ्यते ।

१-३-१४ कर्तरि कर्मव्यतिहारे ॥९३, १६
व्यतिस्ते । सम्प्रहरन्ते राजानः ।

१-३-१५ न गतिहिंसार्थेभ्यः ॥१६
व्यतिगच्छन्ति । व्यतिघ्नन्ति ।
(प्रतिषेधे हसादीनामुपसंख्यानम्)
व्यतिहसन्ति । व्यतिपठन्ति ।
(हरतेरप्रतिषेधः)
सम्प्रहरन्ते राजानः ।

१-३-१६ इतरेतरान्योन्योपपदाच्च ॥
इतरेतरस्य, अन्योन्यस्य वा व्यतिलुनन्ति ।
(परस्परोपपदाच्चेति वक्तव्यम्)
परस्परस्य व्यतिलुनन्ति ।

१-३-१७ नेर्विशः ॥
निविशते ।

१-३-१८ परिव्यवेभ्यः क्रियः ॥
परिक्रीणीते । विक्रीणीते ।
अवक्रीणीते ।

१-३-१३ भाव-७-३-१०१ अतो दीर्घो... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा-
(क)
१-३-१२ अनुदात्तङित आत्मनेपदम् ॥ १-३-१३ भावकर्मणोः (क) ॥ इति । भावकर्मणोः=भावे कर्मणि चाऽर्थे, (क) = आत्मनेपदम्= आत्मनेपदं भवति । इति । प्रकृते लकारस्यार्थः कर्म वर्तते । अतो लकारस्य स्थाने भाविनां तिङामप्यर्थः कर्मेति बोध्यमिति च सत्यावश्यके ऽनुवदेत् । १-१-१३ भाव... सूत्रेण पठ्धातोः परत आत्मनेपदम् (त, आताम् ... महिङ्) प्राप्तम् । अथ १-४-१०४ युष्म... १-४-१०६ अस्म... १-४-१०७ शेषे... इत्येतेषु सूत्रेषु कतमत् सूत्रं प्रवर्तेतेति विचारे प्रकृते तिङ् कर्म बोधयति । अर्थात् तिङो ऽर्थः कर्मास्ति । अतस्तिङ् कर्मणि वसति (उषितवानस्ति स्वनिष्ठवाचकतानिरूपितवाच्यतासम्बन्धेन) व्याकरणशब्दश्च कर्म बोधयति । अतो व्याकरणशब्दोऽपि कर्मणि वसति (स्वनिष्ठवाचकतानिरूपितवाच्यतासम्बन्धेन) फलतो व्याकरणशब्दस्तिङ् च समानाधिकरणौ । अतस्तिङ्समानाधिकरणो युष्मच्छब्दो नास्ति । तेन १-४-१०४ युष्म... सूत्रेण मध्यमपुरुषो न भवति । अस्मच्छब्दोऽपि तिङ्समानाधिकरणो नास्ति । तेन १-४-१०६ अस्म... सूत्रेणोत्तमपुरुषोऽपि न भवति । अतो मध्यमोत्तमपुरुषयोर्विषया ऽभावेन शेषत्वात् १-४-१०७ शेषे... सूत्रेण प्रथमपुरुषो (त, आताम्, झ) भवति । अथ प्रकृते व्याकरणं कर्म, एकमस्ति । तेन १-४-२२ द्व्येक... सूत्रबलेन एकवचनं (त) भवति । अथ श्यामपाट्यां 'पठ्+त' इति लिखित्वा ३-४-११३ तिङ्शि... सूत्रेण सार्वधातुकसंज्ञां छात्रैः कारयित्वा तिङः कर्मार्थत्वेन कर्त्रर्थत्वा ऽभावात् ३-१-६८ कर्तरि... सूत्रं प्रकृते न प्रवर्तते, इति बोधनपुरस्सरं ३-१-६७ सार्व... सूत्रमुपस्थापयेत् ।

१-३-१४ कर्त-कर्म= क्रिया । व्यतिहारः= विनिमयः । कर्मव्यतिहारे = क्रियाविनिमये द्योत्ये, कर्तरि = कर्त्रर्थे, आत्मनेपदम् (१-३-१२) । अत्र कैयटः- क्रियाणां साध्यैकस्वभावानां कथं व्यतिहार इति चेत् योग्यतावशादस्येयं क्रिया साध्या अस्या इदं साधनमिति निर्ज्ञाते साध्यसाधनभावे यो व्यत्यासः स क्रियाव्यतिहारः । परस्परकरणमपि क्वचित् क्रियाव्यतिहारः । यथा- सम्प्रहरन्ते राजान इतीति ।

१-३-१५ न ग -ग ... भ्यः = गत्यर्थेभ्यो हिंसार्थेभ्यश्च धातुभ्यः, न = कर्तरि कर्मव्यतिहारे इति सूत्रेण आत्मनेपदं न भवति ।

प्रतिषेधे = १-३-१४ कर्तरि... सूत्रेण प्राप्तस्य आत्मनेपदस्य प्रतिषेधे, हसादीनाम्= हसप्रकाराणाम्= शब्दक्रियाणां धातूनाम्, उपसंख्यानं कर्तव्यम् । अत्रादिशब्दः प्रकारार्थः ।

हरतेः = हृधातोः, अप्रतिषेधः = १-३-१५ न ग ... इति सूत्रेण प्रतिषेधो न भवतीति वक्तव्यम् ।

१-३-१६ इतरेतरान्योन्योपपदाच्च = इतरेतरा ऽन्योन्योपपदकाद् धातोः, न (१=३-१५) ।

परस्परोपपदाच्च = परस्परोपपदकाच्च धातोः, न (१-३-१५) इति वक्तव्यम् ।

१-३-१७ नेः = नि इत्युपसर्गात् परस्माद्, विशः = विश्धातोः आत्मनेपदम् (१-३-१२) ।

१-३-१८ परिव्यवेभ्यः = परि वि अव इत्युपसर्गेभ्य परस्मात्, क्रियः = क्रीधातोः, आत्मनेपदम् (१-३-१२) । १-३-७२ स्वरि ... इति सिद्धे सूत्रमिदं किमर्थम् ? अकर्त्रभिप्रायार्थम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-१९ विपराभ्यां जेः ॥
विजयते । पराजयते ।

१-३-२० आङो दो ऽनास्यविहरणे ॥२१
विद्यामादत्ते । अनास्यविहरण इत्युक्तेर्नेह-मुखं व्याददाति ।
(आस्य-विहरण-समान-क्रियादपि प्रतिषेधो वक्तव्यः)
विपादिकां व्याददाति ।
(पराङ्गकर्मकान्न निषेधः)
व्याददते पिपीलिकाः पतङ्गस्य मुखम् ।

१-३-२१ क्रीडो ऽनुसंपरिभ्यश्च
अनुक्रीडते । संक्रीडते ।
परिक्रीडते । आक्रीडते ।
(समो ऽकूजने)
नेह-संक्रीडति चक्रम् ।
(आगमेः क्षमायाम्)
आगमयस्व तावन्माणवकम् ।
(शिक्षेर्जिज्ञासायाम्)
विद्यासु शिक्षते ।
(आशिषि नाथः)

१-३-१९ **विपराभ्याम्** = वि परा इत्युपसर्गाभ्यां परस्मात्, जेः= जिधातोः, आत्मनेपदम् (१-३-१२) ।

१-३-२० **आङो**-आङः = आङुपसर्गात् परस्मात्, दः = दाधातोः, आत्मनेपदम् (१-३-१२) अनास्यविहरणे = मुखव्यादाना ऽनवगमे । १-३-७२ स्वरि... इति सिद्धे सूत्रमिदं किमर्थम् ? अकर्त्रभिप्रायार्थम् । अथ किमिदमनास्यविहरण इति ? आस्यम् = मुखम् । तस्य-विहरणम्=व्यादानम्= विकासनम् । आस्यविहरणविरुद्धम् = अनास्यविहरणम् । तस्मिन् अनास्यविहरणे, इति ।

आस्य... दपि= मुखव्यादान-तुल्यक्रियाद् दाधातोरपि, प्रतिषेधो वक्तव्यः= प्रकृतसूत्रेण आत्मनेपदं न भवतीति वक्तव्यम् । विपादिका=पादस्फोटः ।

पराङ्गकर्मकात् = पराङ्गकर्मकाद् दाधातोः आत्मनेपदे कर्तव्ये, न निषेधः = अनास्यविहरणे इति प्रतिषेधो न भवति । अथ "व्याददत्ते विहगपतिर्मुखं स्वकीयम्" इति मुरारिप्रयोगः कथं सङ्गच्छेत ? स्वाङ्गकर्मको ऽत्र हि धातुः ?ः उक्तं पूर्वम् । किमुक्तम् १-३-७२ स्वरि... इति सिद्धे सूत्रमिदं किमर्थम् ? इति प्रश्नस्योत्तरमकर्त्रभिप्रायार्थमिति । कर्त्रभिप्रायविवक्षया च मुरारिप्रयोगो वेदितव्यः

१-३-२१ **क्रीडो**- अनु ... भ्यः = अनु सम् परि इत्येतेभ्य उपसर्गेभ्यः, आङः (१-३-२०) च = आङुपसर्गाच्च परस्मात्, क्रीडः= क्रीड्धातोः, आत्मनेपदम् (१-३-१२) । किमर्थो ऽत्र सूत्रे चकारः ? आङो ऽनुवृत्त्यर्थः । अथेह कस्मान्न भवति- माणवकमनुक्रीडतीति । उपसर्गसंज्ञायाः कर्मप्रवचनीयसंज्ञया बाधात् । अथ कथं ज्ञायते ? अन्वादय उपसर्गा एव गृह्यन्त इति । समा साहचर्यात् ।

समो-समः = सम् इत्युपसर्गात् परस्मात्, क्रीडः (१-३-२१), अकूजने= अकूजने एव= अशब्दने एव, आत्मनेपदम् (१-३-१२) । सूत्रेणैव सिद्धे वार्तिकमिदमारभ्यते । सिद्धे सत्यारभ्यमाणश्च विधिर्नियमाय भवति । अतः 'अकूजने' इत्यस्य अकूजने एव इत्यर्थः कृतः ।

आगमेः = आङुपसर्गपूर्वकण्यन्त-गम् धातोः, आत्मनेपदम् (१-३-१२) क्षमायाम्= उपेक्षायाम् । उदाहरणे का क्षमा प्रतीयते ? उपेक्षा कालविषयिका न त्वरस्वेति ।

शिक्षेः = शिक्ष् धातोः, आत्मनेपदम् (१-३-१२) । वार्तिकमिदं विध्यर्थं नियमार्थं वा ? कथं वा विध्यर्थं कथं वा नियमार्थम् ? यदि शकेः सन्नन्तस्य ग्रहणं तर्हि विध्यर्थम् । यदि पुनः शिक्ष् विद्योपादाने (६०४) इति धातोर्ग्रहणं तर्हि १-३-१२ अनु... इत्येव सिद्धे पुनराभ्यमाणं नियमार्थम् । अत्र कैयटः- विधेरेव तु ज्यायस्त्वात् सन्नन्तशकिग्रहणं न्याय्यमिति । **विद्यासु शिक्षते** अत्र कैयटः विद्यां जिज्ञासितुं घटत इत्यर्थः । आत्मनेपदेनैव जिज्ञासाया अवगमाज्जिज्ञासितुमिति न प्रयुज्यत इति । शकेः सनि ७-४-५४ सनि... इतीस् । ७-४-५८ अत्र... इत्यभ्यासलोपः । ८-२-२९ स्कोः... इति सकारलोपः

आशि- नाथः = नाथ्धातोः, आशिषि = आशिष्येव, आत्मनेपदम् (१-३-१२) । १-३-१२ अनु... इत्येव सिद्धे वार्तिकमिदं किमर्थम् ? आशिष्येवेति नियमार्थम् । अथ किमिदमाशीरिति इदं मे भूयादितीच्छा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्पिषो नाथते । मधुनो नाथते ।
(हरतेर्गतताच्छील्ये)
पैतृकमश्वा अनुहरन्ते ।
मातृकं गावो ऽनुहरन्ते ।
(किरतेर्हर्षजीविकाकुलायकरणेषु)
उदाहरणानि ६-१-१३७ अपा ... सूत्रे द्रष्टव्यानि ।
(आङि नुप्रच्छ्योः)
आनुते शृगालः । आपृच्छते गुरुम् ।
(शप उपलम्भने)
देवदत्ताय शपते ।

१-३-२२ समवप्रविभ्यः स्थः ॥२६
संतिष्ठते । अवतिष्ठते ।
प्रतिष्ठते । वितिष्ठते ।
(आङः स्थः प्रतिज्ञाने)
शब्दं नित्यमातिष्ठते ।

१-३-२३ प्रकाशनस्थेयाख्ययोश्च ॥
गोपी कृष्णाय तिष्ठते । आशयं प्रकाशयतीत्यर्थः । संशय्य कर्णादिषु तिष्ठते यः । कर्णादीन् निर्णेतृत्वेनाश्रयतीत्यर्थः ।

१-३-२४ उदो ऽनूर्ध्वकर्मणि ॥
सामाजिककर्मसूत्तिष्ठते । तदर्थं यतत इत्यर्थः । मुक्तावुत्तिष्ठते ।
अनूर्ध्वकर्मणीत्युक्तेर्नेह- पीठादुत्तिष्ठति ।
(उद ईहायाम्)
नेह-ग्रामाच्छतमुत्तिष्ठति ।

१-३-२५ उपान्मन्त्रकरणे ॥२६
ऐन्द्या गार्हपत्यमुपतिष्ठते । आग्नेय्या आग्नीध्रमुपतिष्ठते ।

हरते := हृधातोः, गतताच्छील्ये = सततं प्रकारस्य शीलने, आत्मनेपदम् (१-३-१२) । अत्र गतं प्रकार इति कैयटः । अथ किमिदं ताच्छील्यमिति ? अविच्छेदेन शीलनमिति नागेशः । पैतृकमश्वा अनुहरन्ते पितुरागतं प्रकारं सततं शीलयन्तीत्यर्थ इति कैयटः ।

किर-हर्ष... णेषु= हर्ष-जीविका-नीडनिर्माणेषु गम्येषु, किरतेः = कृधातोः, आत्मनेपदम् (१-३-१२) ।

आङि = आङुपसर्गे सति, नुप्रच्छ्योः = नु- प्रच्छिभ्याम् आत्मनेपदम् (१-३-१२) । **आनुते** णु स्तुतौ (१०३५) । नुराङ्पूर्व उत्कण्ठापूर्वक-शब्दमात्रे रूढ इति नागेशः । **आपृच्छते** प्रच्छँ ज्ञीप्सायाम् (१४१२) । ३-१-७७ तुदा... इति शः । ६-१-१६ ग्रहि... इति सम्प्रसारणम् ।

शपः = शप्धातोः, आत्मनेपदम् (१-३-१२) उपलम्भने । अत्र काशिका-वाचा शरीरस्पर्शनम्= उपलम्भनमिति । 'त्वत्पादौ स्पृशामि' नैतन्मया कृतमित्येवंरूपः शपथविशेष इति पदमञ्जरी । १-३-७२ स्वरि... इति सिद्धे वार्तिकमिदं किमर्थम् ? अकर्त्रभिप्रायार्थम् । तच्चोपलम्भन एव ।

१-३-२२ **समवप्रविभ्यः** = सम् अव प्र वि इत्युपसर्गेभ्यः परस्मात्, स्थः = स्थाधातोः, आत्मनेपदम् (१-३-१२) । उदाहरणेषु ७-३-७८ पाघ्रा... इति तिष्ठादेशः ।

आङः= आङुपसर्गात् परस्मात्, स्थः= स्थाधातोः, आत्मनेपदम् (१-३-१२) प्रतिज्ञाने= प्रतिज्ञायाम् ।

१-३-२३ प्रकाशनस्थेयाख्ययोः= प्रकटने प्राड्विवाकप्रतिपत्तौ च, स्थः (१-३-२२) आत्मनेपदम् (१-३-१२) । किमिदं प्रकाशनमिति ? प्रकटनम् । अथ का स्थेयाख्या ? स्थेयस्य आख्या= प्रतिपत्तिः, स्थेयाख्या = स्थेयप्रतिपत्तिः । कःपुनः स्थेयः ? प्राड्विवाकः = निर्णेता ।

१-३-२४ उदो- अनूर्ध्वकर्मणि= ऊर्ध्वभिन्नक्रियायां वर्तमानात्, उदः = उदुपसर्गात् परस्मात्, स्थः (१-३-२२) आत्मनेपदम् (१-३-१२) । **उद**- अनूर्ध्वकर्मणि, उदः, स्थः (१-३-२२) ईहायाम्= कायपरिस्पन्दात्मिकायां चेष्टायामेव, आत्मनेपदम् (१-३-१२) । सूत्रेणैव सिद्धे वार्तिकमिदमारभ्यमाणं नियमार्थमीहायामेवेति । का पुनरीहा ? अत्र कैयटः- ईहा विशिष्टा चेष्टा कायपरिस्पन्दात्मिका गृह्यत इति ।

१-३-२५ उपात् = उपोपसर्गात् परस्मात्, स्थः (१-३-२२) आत्मनेपदम् (१-३)१२) मन्त्रकरणे= मन्त्रकरणके स्तवेऽर्थे गम्यमाने । किमिदं मन्त्रकरणे इति ? मन्त्रः= अग्निर्मूर्धा दिवः इत्यादिः, करणम् = साधकतमं यत्र तत् = मन्त्रकरणम्= स्तोत्रम्=स्तवः । तस्मिन् मन्त्रकरणे इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(वा लिप्सायाम्)
भिक्षुको ब्राह्मणकुलमुपतिष्ठते ।
भिक्षुको ब्राह्मणकुलमुपतिष्ठति ।

१-३-२६ अकर्मकाच्च ॥ २९

भोजनसमये उपतिष्ठते ।
(उपाद् देवपूजा-सङ्गतिकरण-मित्रकरण-पथिष्वितिवाच्यम्)
सूर्यमुपतिष्ठते । गङ्गा यमुनामुपतिष्ठते ।
गोमुखी माण्डवीमुपतिष्ठते ।
नेपालो भारतमुपतिष्ठते भारतं च नेपालं पौरस्त्यसंस्कारवत्सु प्रशासकेषु ।
महेन्द्रराजमार्गो मेचीं महाकालीं चोपतिष्ठते ।

१-३-२७ उद्विभ्यां तपः ॥

उत्तपते । वितपते । अकर्मकादित्यनुवृत्तेर्नेह-उत्तपति सुवर्णं सुवर्णकारः ।
(स्वाङ्गकर्मकाच्च)
उत्तपते पाणी । वितपते पाणी ।
स्वाङ्गकर्मकादित्युक्तेर्नेह-देवदत्तो यज्ञदत्तस्य पृष्ठमुत्तपति ।

१-३-२८ आङो यमहनः ॥

आयच्छते । दीर्घो भवतीत्यर्थः ।
आहते । प्रहतिमनुभवतीत्यर्थः ।
आयच्छते स्वं पाणिम् । आहते स्वं शिरः । नेह- आयच्छति कूपाद् रज्जुम् । आहन्ति भटः स्तेनशिरः ।

१-३-२९ समो गम्यृच्छिभ्याम् ॥

सङ्गच्छते । संगतं भवतीत्यर्थः ।
समृच्छते । म्रियत इत्यर्थः ।
नेह-ग्रामं सङ्गच्छति । ग्रामं समृच्छति ।
(विदिप्रच्छिस्वरतीनामुपसंख्यानम्)
संवित्ते । संपृच्छते । संस्वरते ।
(अर्तिश्रुदृशिभ्यश्च)

वा लि- उपात् (१-३-२५) स्थः (१-३-२२) आत्मनेपदम् (१-३-१२) वा, लिप्सायाम् = प्राप्तीच्छायाम् । किमिदं लिप्सेति ? लब्धुमिच्छा । लभेः सनि ३-३-१०२ अ प्र... इत्यप्रत्ययः ।

१-३-२६ अकर्मकात् = कर्मरहितात्, उपात् (१-३-२५) स्थः (१-३-२२) आत्मनेपदम् (१-३-१२) ।

उपात् , स्थः (१-३-२२) आत्मनेपदम् (१-३-१२) देव..... थिषु = देवपूजने सङ्गतिकरणे मित्रकरणे मार्गे चा ऽर्थे गम्यमाने । वार्तिके ऽत्र देवपूजाग्रहणं किमर्थम् ? सूर्यमुपतिष्ठते इत्यादावात्मनेपदार्थम् । नैतदस्ति प्रयोजनम् । पूर्वसूत्रेणापि सिद्धमेतत् । न सिध्यति । कथम् ? तत्र हि मन्त्रकरणे इत्युच्यते, न चात्र मन्त्रःकरणम् । अथ सङ्गतिकरणमित्रकरणयोः को भेदः ? सङ्गतिकरणमुपश्लेषः मित्रकरणं त्वनुपश्लिष्टस्यापि प्रीतिरूपो मैत्रीसम्बन्धः ।

१-३-२७ उद्विभ्याम् = उद् वि इत्युपसर्गाभ्यां परस्मात्, अकर्मकात् (१-३-२६) तपः = तप् धातोः आत्मनेपदम् (१-३-१२) ।

स्वाङ्ग - उद्विभ्याम् (१-३-२७) स्वा... कात् = निजाङ्गकर्मकात्, तपः (१-३-२७) आत्मनेपदम् (१-३-१२) ।

१-३-२८ आङः = आङुपसर्गात् परस्मात्, अकर्मकात् (१-३-२६) स्वाङ्गकर्मकाच्च (१-३-२७ वा.) यमहनः = यम्धातोर्हन्धातोश्च, आत्मनेपदम् (१-३-१२) ।

१-३-२९ समः = समुपसर्गात् पराभ्याम्, अकर्मकाभ्याम् (१-३-२६) स्वाङ्गकर्मकाभ्यां च (१-३-२७ वा.) गम्यृच्छिभ्याम् = गम् धातोर्ऋच्छधातोश्च आत्मनेपदम् (१-३-१२) ।

विदि- समः (१-३-२९)= समुपसर्गात् परेभ्यः, अकर्मकेभ्यः (१-३-२६) स्वाङ्गकर्मकेभ्यश्च (१-३-२७ वा.) वि ... नाम् = विद्धातोः प्रच्छधातोः स्वृधातोश्च, उपसंख्यानम् = आत्मनेपदं भवतीति वक्तव्यम् । उपसंख्यानमिति भावल्युँडन्तम् । अतः स्वरतीनामित्यन्तं पदं कर्मषष्ठ्यन्तम् । विध्यनुरोधाच्च पञ्चम्यन्तं कल्पयित्वा ऽर्थःकृतः ।

अर्ति-समः (१-३-२९) = समुपसर्गात् परेभ्यः, अकर्मकेभ्यः (१-३-२६) स्वाङ्गकर्मकेभ्यश्च (१-३-२७ वा.) अर्ति... भ्यः = ऋ-श्रु- दृश् धातुभ्यः, आत्मनेपदम् (१-३-१२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समृच्छते । हितान्न यः संशृणुते
स किं प्रभुः । संपश्यते ।
अत्र भट्टोजिदीक्षितः- अथास्मिन्नकर्म-
काधिकारे हनिगम्यादीनां कथमकर्म-
कतेति चेत्, शृणु-
धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणो ऽकर्मिका क्रिया ॥
वहति भारम् । नदी वहति । स्यन्दत
इत्यर्थः । जीवति । प्राणान् धारयति ।
नृत्यति । गात्रविक्षेपं करोति । प्रसिद्धेर्यथा-
मेघो वर्षति । कर्मणो ऽविवक्षातो यथा -
हितान्न यः संशृणुते स किं प्रभुः । इति ।

१-३-३० निसमुपविभ्यो ह्वः ॥

निह्वयते । संह्वयते । उपह्वयते । विह्वयते ।
(उपसर्गादस्यत्यूह्योर्वा वचनम्)
निरस्यति, निरस्यते । समूहति, समूहते ।

१-३-३१ स्पर्धायामाङः ॥

मल्लो मल्लमाह्वयते ।
कृष्णश्चाणूरमाह्वयते ।
स्पर्धायामित्युक्तेर्नेह- पुत्रमाह्वयति ।

१-३-३२ गन्धनावक्षेपण-सेवन-साहसिक्य-प्रतियत्न-प्रकथनोपयोगेषु कृञः ॥३५

उत्कुरुते । सूचयतीत्यर्थः ।
श्येनो वर्तिकामुदाकुरुते ।
भर्त्सयतीत्यर्थः । जगदम्बामुपकुरुते ।
सेवत इत्यर्थः । परदारान् प्रकुरुते ।
सहसा प्रवर्तत इत्यर्थः । एधोदकस्यो
पस्कुरुते । गुणानाधत्त इत्यर्थः ।
कथाः प्रकुरुते । प्रकर्षेण कथयतीत्यर्थः ।
शतं प्रकुरुते । सत्कर्मणि विनियुङ्क्त
इत्यर्थः । गन्धनादिषु विधानान्नेह-कटं
करोति ।

१-३-३० **निसमुपविभ्यः** = नि सम् उप वि इत्युपसर्गेभ्यः परस्मात्, ह्वः = ह्वे धातोः, आत्मनेपदम् . (१-३-१२) । अकर्मकात् (१-३-२६) इति स्वाङ्गकर्मकाच्च (१-३-२७ वा.) इति च निवृत्तम् । १-३-७२ स्वरि... इत्येव सिद्धे सूत्रमिदमकर्त्रभिप्रायार्थम् ।
उपसर्गात्=उपसर्गात् पराभ्याम्, अस्यत्यूह्योः=दैवादिकाद् अस् धातोः ऊहधातोश्च, वा वचनम् = अन्यतरस्यामात्मनेपदं भवतीति वक्तव्यम् । अथ वार्तिकमिदं किमर्थम् ? अस्धातोरप्राप्तस्यात्मनेपदस्य पाक्षिकविधानार्थम् । ऊहँ धातोस्तु १-३-१२ अनु... इति नित्ये प्राप्ते विकल्पार्थम् । **निरस्यते**- असुँ क्षेपणे (१२०८) । **समूहते**- ऊहँ वितर्के (६४७) ।
१-३-३१ **स्पर्धा** - आङः= आङुपसर्गात् परस्मात्, ह्वः (१-३-३०) आत्मनेपदम् (१-३-१२) स्पर्धायाम्= पराभिभवेच्छायाम् । इदमपि सूत्रमकर्त्रभिप्रायार्थम् । अथ किमिदं स्पर्धेति ? संघर्षः ? कः पुनः संघर्षः ? पराभिभवेच्छा ।
१-३-३२ **गन्ध**... गेषु= गन्धनादिषु कृञः= कृञ् धातोः, आत्मनेपदम् (१-३-१२) । १-३-७२ स्वरि... इत्येव सिद्धे सूत्रमिदमकर्त्रभिप्रायार्थम् । अथ किमिदं गन्धनमिति ? पैशुन्यम् । अत्र काशिका - गन्धनमपकारप्रयुक्तं हिंसात्मकं सूचनम् । तथाहि- वस्त गन्ध अर्दने । अर्द हिंसायाम् इति चुरादौ पठ्येते, इति । अथ किमिदमवक्षेपणमिति ? भर्त्सनम् । सेवनम् = सेवा । अथ किमिदं साहसिक्यमिति ? सहसा प्रवर्तत इति साहसिकः । तस्य कर्म साहसिक्यम् = बलात्कारपूर्विका अविवेकपूर्विका वा क्रिया । अथ किमिदं प्रतियत्न इति ? गुणाधानम् । किं पुनर्गुणाधानमिति ? अपूर्वत्वस्थापनम् । प्रकथनम् = प्रकर्षेण कथनम् । अथ किमिदमुपयोग इति ? सत्कर्मणि विनियोजनम् । किं पुनर्विनियोजनम् ? व्ययः । **एधोदकस्योपस्कुरुते** एधश्च दकं च एधश्चोदकं च वा = एधोदकं तस्य = एधोदकस्य २-३-५३ कृञ... इति कर्मणि षष्ठी । उपस्कुरुते इत्यत्र च ६-१-१३४ उपात्... इति सुँट् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-३३ अधेः प्रसहने ॥

शत्रुमधिकुरुते । क्षमते, अभिभवति वा ।

१-३-३४ वेः शब्दकर्मणः ॥३५

स्वरान् विकुरुते । उच्चारयतीत्यर्थः ।

१-३-३५ अकर्मकाच्च ॥

कुसङ्गतेन स्वभावो विकुरुते ।

१-३-३६ संमाननोत्सञ्जनाचार्यकरण-ज्ञान-भृति-विगणन-व्ययेषु नियः ॥३७

शास्त्रे नयते । शास्त्रस्थं सिद्धान्तं शिष्येभ्यः प्रापयतीत्यर्थः । तेन शिष्यादरः फलितः । दण्डमुन्नयते । दण्डमुत्क्षिपतीत्यर्थः । माणवकमुपनयते । शास्त्रीयविधिना ऽऽत्मसमीपं प्रापयतीत्यर्थः । तथा च स उपनेता स्वयमाचार्यः सम्पद्यते । तत्त्वं नयते । निश्चिनोतीत्यर्थः । कर्मकरानुपनयते । भृतिदानेन समीपं करोतीत्यर्थः । करं विनयते । राजस्वं निर्यातयतीत्यर्थः । शतं विनयते । विनियुङ्क्त इत्यर्थः । संमाननाद्युक्तेर्नेह-अजां ग्रामं नयति ।

१-३-३७ कर्तृस्थे चाऽशरीरे कर्मणि ॥

क्रोधं विनयते । अशरीरे इत्युक्तेर्नेह- गडुं विनयति । कथं तर्हि विगणय्य नयन्ति पौरुषमिति ? कर्तृगामित्वा ऽविवक्षायां भविष्यतीति भट्टोजिदीक्षितः ।

१-३-३३ अधेः = अध्युपसर्गात् परस्मात्, कृञः (१-३-३२) आत्मनेपदम् (१-३-१२) प्रसहने = मर्षणे ऽभिभवे च । इदमपि सूत्रमकर्त्रभिप्रायार्थम् । अथ किमिदं प्रसहनमिति ? मर्षणमभिभवश्च । कथं ज्ञायते मर्षणमभिभवश्चेति ? षह मर्षणे ऽभिभवे चेति धातुपाठादिति दीक्षितोक्त्या, केचित्तु 'षह मर्षणे ऽभिभवे छन्दसि' इति पठन्ति, तत्र 'छन्दसि' इति प्रायिकं द्रष्टव्यमिति हरदत्तोक्त्या च तथाऽर्थनिर्देशानुमानात् । आधुनिकधातुपाठे तु 'अभिभवे' इति निर्देशो न लभ्यते । किं पुनर्मर्षणं कश्च पुनरभिभवः ? मर्षणम्= क्षमा । अभिभवस्तिरस्कारः ।

१-३-३४ वेः - वि इत्युपसर्गात् परस्मात्, शब्दकर्मणः = शब्दकर्मकात्, कृञः (१-३-३२) आत्मनेपदम् (१-३-१२) ।

१-३-३५ अकर्मकात् = कर्मरहितात्, वेः (१-३-३४) कृञः (१-३-२२) आत्मनेपदम् (१-३-१२) । अत्रत्यश्चकारः किमर्थः ? 'वेः' इत्यनुकर्षणार्थः ।

१-३-३६ संमा... व्ययेषु= संमाननाद्यर्थेषु गम्यमानेषु, नियः= नीधातोः, आत्मनेपदम् (१-३-१२) । १-३-७२ स्वरि... इत्येव सिद्धे सूत्रमिदमकर्त्रभिप्रायार्थम् । अथ किमिदं संमाननमिति ? आदरः । उत्सञ्जनम्= उपरि फालनम् । आचार्यकरणम् = आचार्यक्रिया । का पुनराचार्यक्रिया ? उपनयना ऽध्यापनादिशास्त्रीयविधिनाऽऽत्मसमीपप्रापणम् । यथा स उपनेता स्वयमाचार्यः सम्पद्यते । ज्ञानम् = प्रमेयनिश्चयः । भृतिः = वेतनम् । विगणनम् = निर्यातनम् । किं पुनर्निर्यातनम् ? निस्तरणम् । व्ययः = विनियोगः ? कः पुनर्विनियोगः ? विनियोजनम् । अथेदं विचार्यते यत् किमेते ऽर्था धातोर्वाच्या आहोस्वित् प्रयोगोपाधय इति । उच्यते न सर्वे ऽर्था धातोर्वाच्या न च सर्वे प्रयोगोपाधयः । उत्सञ्जन ज्ञान-विगणन-व्यया धातोर्वाच्याः शेषाः प्रयोगोपाधयः ।

१-३-३७ कर्तृस्थे= कर्तृवर्तिनि, कर्मणि= कर्मणि सति, अशरीरे = तस्मिन् कर्मणि शरीरावयवभिन्ने सत्येव, नियः (१-३-३६) आत्मनेपदम् (१-३-१२) । सूत्रे चकारः किमर्थः ? निय इत्यनुकर्षणार्थः । नैतदस्ति प्रयोजनम् । अन्तरेणापि चकारमनुवृत्तिर्भविष्यति । असन्देहार्थस्तर्हि चकारः । यदि चकारो न स्यात् तदा शरीरे इति वा छेदः, अशरीरे इति वेति सन्देहः स्यात् । अथ १-३-७२ स्वरि... इत्येव सिद्धे सूत्रमिदं किमर्थम् ? नियमार्थम् ? कर्तृस्थे कर्मणि शरीरावयवभिन्ने सत्येवात्मनेपदं नान्यत्रेति । यद्येवं कर्तृस्थे चाऽशरीरावयवे कर्मणि इति निर्देशः कर्तव्यः । स तर्हि तथा निर्देशः कर्तव्यः । न कर्तव्यः । यथान्यासमेवास्तु । अन्तरेण अशरीरावयवे इति निर्देशं कथं शरीरावयवभिन्ने इत्यर्थो ज्ञायेत ? ज्ञायत इत्याह- शरीरशब्देन शरीरावयवो लक्ष्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-३८ वृत्ति-सर्ग-तायनेषु क्रमः । ३९,४३
तर्के क्रमते बुद्धिः । व्याकरणाध्यनाय क्रमते । जले तैलं क्रमते ।
१-३-३९ उपपराभ्याम् ॥
उपक्रमते । पराक्रमते । नियमान्नेह- तर्के प्रक्रामति बुद्धिः ।
१-३-४० आङ उद्गमने ॥
आक्रमते सूर्यः
(ज्योतिरुद्गमन इति वाच्यम्)
नेह- आक्रामति धूमो हर्म्यतलात् ।
१-३-४१ वेः पादविहरणे ॥
साधु विक्रमते वाजी ।
१-३-४२ प्रोपाभ्यां समर्थाभ्याम् ॥
प्रक्रमते । उपक्रमते । प्रारभत इत्यर्थः । समर्थाभ्यामित्युक्तेर्नेह- प्रक्रामति । गच्छतीत्यर्थः । उपक्रामति । आगच्छतीत्यर्थः ।

किं वक्तव्यमेतत् ? न हि । कथमनुच्यमानं ज्ञायते ? अशरीरे इति पर्युदासात् । कथं पर्युदासेन तादृशी लक्षणा ज्ञायते ? ज्ञायत इत्याह- कर्ता खलु देवदत्तादिः शरीरी । न च शरीरिणः पृथक् शरीरं संभवति । यत् खलु शरीरिणि वर्तेत । कस्तर्हि संभवति ? शरीरावयवः । सम्भाव्यमानस्यैव च पर्युदास उचितः । ननु च भोः ? शरीरम्= देहः । शरीरी च = आत्मा । तयोर्भेदः स्फुट एव । तत् कथं भवता न च शरीरिणः पृथक् शरीरं संभवति, यत् खलु शरीरिणि वर्तेतेत्युच्यते ? नैष दोषः । नाऽत्र कर्तृशब्देन केवल आत्मा गृह्यते । किं तर्हि गृह्यते ? व्यापारविशिष्टं मांसपिण्डम् । न च व्यापारवतो मांसपिण्डात् पृथक् शरीरं भवति । प्रत्युदाहरणे गड्वपनयनफलं कर्त्रभिप्रायमिति १-३-७२ स्वरि... इति आत्मनेपदं प्राप्नोति, नियमान्न भवति ।

१-३-३८ वृत्ति-वृत्तिः= अप्रतिबन्धः । सर्गः = उत्साहः । तायनम् = स्फीतता । एष्वर्थेषु, क्रमः = क्रम् धातोः, आत्मनेपदम् (१-३-१२) । उदाहरणेषु क्रमशो न रुध्यते, उत्सहते, सर्वतः प्रसरति, इत्यर्थः ।

१-३-३९ उप- वृत्ति - सर्ग- तायनेषु (१-३-३८) उपपराभ्याम्= उप परा इत्युपसर्गाभ्याम् परस्मात्, क्रमः (१-३-३८) आत्मनेपदम् (१-३-१२) । पूर्वसूत्रेणैव सिद्धे सूत्रमिदं किमर्थम् ? नियमार्थम्- सोपसर्गाच्चेत् उपपरोपसर्गाभ्यां परस्मादेव नान्येभ्यः परस्मादिति । प्रत्युदाहरणे ७-३-७६ क्रमः .... इति दीर्घः ।

१-३-४० आङः = आङुपसर्गात् परस्मात्, क्रमः (१-३-३८) आत्मनेपदम् (१-३-१२) उद्गमने = ऊर्ध्वगमने ऽर्थे ।

ज्योतिरुद्गमने = ग्रहनक्षत्रादीनामुदये, इति वक्तव्यम् ।

१-३-४१ वेः = वि इत्युपसर्गात् परस्मात्, क्रमः (१-३-३८) आत्मनेपदम् (१-३-१२) पादविहरणे = पादचालने ऽर्थे ।

१-३-४२ प्रोपा- समर्थाभ्याम् = तुल्यार्थाभ्याम् (आरम्भार्थकाभ्यामिति यावत्) प्रोपाभ्याम्= प्र उप इत्युपसर्गाभ्यां परस्मात्, क्रमः (१-३-३८) आत्मनेपदम् (१-३-१२) । सूत्रे किमिदं समर्थाभ्यामिति ? समः = समानः, अर्थः= अभिधेयः, ययोस्तौ समर्थौ । ताभ्याम् = समर्थाभ्यामिति । यद्येवं समार्थाभ्यामिति निर्देशः प्राप्नोति । नैष दोषः । पररूपमत्र द्रष्टव्यम् । यथोपदिशति भगवान् वार्तिककारः- शकन्ध्वादिषु पररूपं वाच्यमिति । अथ क्व प्रोपौ समानार्थौ ? आरम्भे । ननु च भो उपसर्गा द्योतका इति वैयाकरणानां सिद्धान्तः । एवञ्च प्रक्रमते,उपक्रमते इत्यादौ, आरम्भार्थः क्रम् धातोरेव न तूपसर्गयोरिति स्फुटम् । ततश्च समर्थाभ्यामिति प्रोपाभ्यामित्यस्य विशेषणं न सङ्गच्छते । सङ्गच्छत इत्याह- शङ्कमानेन भवतैव समाहितम् । किम् ? उपसर्गा द्योतका इति । द्योतकतयैव सार्थकाः खलूपसर्गाः । प्रक्रामति ७-३-७६ क्रमः... इति दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-४३ अनुपसर्गाद् वा ॥

क्रमते । क्रामति ।

१-३-४४ अपह्नवे ज्ञः ॥४६

शतमपजानीते ।

१-३-४५ अकर्मकाच्च ॥

सर्पिषो जानीते ।

१-३-४६ सम्प्रतिभ्यामनाध्याने ॥

शतं संजानीते । शतं प्रतिजानीते ।
अनाध्याने इत्युक्तेर्नेह-मातुः संजानाति ।

१-३-४७ भासनोपसंभाषा-ज्ञान-यत्न-विमत्युपमन्त्रणेषु वदः ॥५०

व्याकरणे वदते । भासमानो ब्रवीतीत्यर्थः । कर्मकरानुपवदते । उपसान्त्वयतीत्यर्थः । व्याकरणे वदते । वदितुं जानातीत्यर्थः । क्षेत्रे वदते । यतत इत्यर्थः । क्षेत्रे विवदन्ते । कलहायन्त इत्यर्थः । कुलभार्यामुपवदते । प्रार्थयत इत्यर्थः ।

१-३-४८ व्यक्तवाचां समुच्चारणे ॥५०

सम्प्रवदन्ते ब्राह्मणाः ।

१-३-४३ अनुपसर्गात् = उपसर्गरहितात्, क्रमः (१-३-३८) वा=विभाषया, आत्मनेपदम् (१-३-१२) । **क्रामति** दीर्घः प्रागवत् ।

१-३-४४ अपह्नवे = वञ्चनायाम्, ज्ञः=ज्ञाधातोः, आत्मनेपदम् (१-३-१२) । उदाहरणे ७-३-७९ ज्ञाज... इति जादेशः । ६-४-११३ ई ह... इतीत्वम् ।

१-३-४५ अकर्मकात् = कर्मरहितात्, ज्ञः (१-३-४४) आत्मनेपदम् (१-३-१२) । ननु भोः कदा ज्ञा धातुरकर्मकः संभवेत् ? उच्यते-यदा ज्ञानपूर्वकप्रवृत्तौ धातुर्वर्तते तदा संभवति । यथोदाहरणस्य सर्पिषोपायेन प्रवर्तत इत्यर्थः । सर्पिर्विना भोजने न प्रवर्तत इति सर्पिर्भोजनप्रवृत्तौ करणं जातम् । अत एव २-३-५१ ज्ञो ऽ वि ... सूत्रेण सर्पिष इत्यत्र षष्ठी । जानीते इत्यत्र प्रक्रिया प्रागवत् ।

१-३-४६ सम्प्रतिभ्याम् = सम् प्रति इत्युपसर्गाभ्यां परस्मात् , ज्ञः (१-३-४४) आत्मनेपदम् (१-३-१२) अनाध्याने = उत्कण्ठापूर्वकस्मरणा ऽनवगमे । अथ किमिदमनाध्याने इति ? आध्यानविरुद्धमनाध्यानम् । तस्मिन् अनाध्याने, इति । अथ किं पुनराध्यानम् ? उत्कण्ठापूर्वकस्मरणम् । प्रत्युदाहरणे मातुरित्यत्र २-३-५२ अधी... इति षष्ठी ।

१-३-४७ भासनोपसंभाषा... मन्त्रणेषु = भासन-प्रभृतिष्वर्थेषु गम्यमानेषु, वदः = वद्धातोः, आत्मनेपदम् (१-३-१२) । किमिदं भासनमिति ? दीप्तिः । कथम् ? भासृँ दीप्तौ (६२३) इति धातुपाठत् । अथ का उपसंभाषेति ? उपसान्त्वनम् । अथ किं ज्ञानमिति ? सम्यगवबोधः । अथ को यत्न इति ? प्रयासः । कथम् ? यतीँ प्रयत्ने यसुँ प्रयत्ने (१२०९) इति च धातुपाठात् । यत्न उत्साह इति काशिका । क्षेत्रे यतते इत्यस्य च तद्विषयमुत्साहयतीत्यर्थ इति च तत्रोक्तम् । अथ का विमतिः ? विवादः । अथ किमिदमुपमन्त्रणमिति ? रहस्युपच्छन्दनमिति काशिका । किं पुनरुपच्छन्दनम् ? प्रार्थनम् । उपसंभाषोपमन्त्रणे धातोर्वाच्ये, इतरे प्रयोगोपाधय इति तत्र भवान् भट्टोजिदीक्षितः ।

१-३-४८ व्यक्तवाचाम् = मनुष्याणाम्, समुच्चारणे = सङ्घीभूयोच्चारणे, वदः (१-३-४७) आत्मनेपदम् (१-३-१२) । व्यक्ता= स्फुटा वाग् येषां ते = व्यक्तवाचः = मनुष्याः । कथं भो भवान् व्यक्तवाचो मनुष्या एवेति मन्यते ? यतः खलु दृश्यन्ते शुकसारिकादयो ऽपि व्यक्तवाचः । नैष दोषः । न सर्ववर्णविषयकं स्वाभाविकं व्यक्तवाक्त्वं शुकसारिकादीनाम् । किं तर्हि ? पुरुषप्रयत्नवशेन कतिपयवर्णविषयकम् । अत्रोपदिशति भगवान् पतञ्जलिः - व्यक्तवाचामिति किमर्थम् ? वरतनु ! सम्प्रवदन्ति कुक्कुटाः । व्यक्तवाचामित्युच्यमाने ऽप्यत्र प्राप्नोति । एते ऽपि हि व्यक्तवाचः । आतश्च व्यक्तवाचः । कुक्कुटेनोदिते उच्यते -कुक्कुटो वदतीति । एवं तर्हि व्यक्तवाचामित्युच्यते सर्व एव हि व्यक्तवाचः । तत्र प्रकर्षगतिर्विज्ञास्यते-साधीयो ये व्यक्तवाच इति । के च साधीयः ? येषां वाच्यकारादयो वर्णा व्यज्यन्ते । न चैतेषां वाच्यकारादयो वर्णा व्यज्यन्ते, इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-४९ अनोरकर्मकात् ॥

अनुवदते कठः कलापस्य ।
अकर्मकादित्युक्तेर्नेह- उक्तमनुवदति ।
व्यक्तवाचामित्यनुवृत्तेर्नेह-अनुवदति वीणा ।

१-३-५० विभाषा विप्रलापे ॥

विप्रवदन्ति विप्रवदन्ते वा वैद्याः ।

१-३-५१ अवाद् ग्रः ॥५२

अवगिरते ।

१-३-५२ समः प्रतिज्ञाने ॥

शब्दं नित्यं संगिरते ।

१-३-५३ उदश्चरःसकर्मकात् ॥५४

वृक्षमुच्चरते । वृक्षमारोहतीत्यर्थः ।

१-३-५४ समस्तृतीयायुक्तात् ॥५५

अश्वेन संचरते ।

१-३-५५ दाणश्च सा चेच्चतुर्थ्यर्थे ।

दास्या संयच्छते कामुकः ।

१-३-५६ उपाद् यमः स्वकरणे ॥

भार्यामुपयच्छते ।

१-३-४९ अनोः = अनूपसर्गात् परस्मात्, व्यक्तवाचाम् (१-३-४८) = व्यक्तवाग्विषयकात्, अकर्मकात् = कर्मरहितात्, वदः (१-३-४७) आत्मनेपदम् (१-३-१२)। पूर्वसूत्राद् व्यक्तवाचामित्यनुवर्तते, न तु समुच्चारणे इति। कथं ज्ञायते समुच्चारणे इति नानुवर्तते इति ? ज्ञायत इत्याह- सम्पूर्णसूत्रानुवृत्तौ सूत्रमिदं व्यर्थं स्यात्। उदाहरणमुद्दिश्य काशिकायामुक्तम् - अनुः सादृश्ये। यथा कलापो ऽधीयानो वदति तथा कठ इत्यर्थ इति। कलापस्येत्यत्र २-३-७२ तुल्या... इति षष्ठी। अथ कथमत्र धातुरकर्मकः ? उच्यते -वदनमात्रसादृश्ये तात्पर्यमिति कर्म न विवक्षितमिति तत्र भवान् हरदत्तः ।

१-३-५० विभा-विप्रलापे = विरुद्धोक्तिरूपे, व्यक्तवाचां + समुच्चारणे (१-३-४८) वदः (१-३-४७) विभाषा= विकल्पेन, आत्मनेपदम् (१-३-१२)। किमिदं विप्रलाप इति ? विरुद्धः प्रलापो विप्रलापः। तस्मिन् विप्रलापे इति ।

१-३-५१ अवात् = अव इत्युपसर्गात् परस्मात्, ग्रः = तौदादिकाद् गृ धातोः, आत्मनेपदम् (१-३-१२)। किमिदं ग्र इति ? गृधातोरनुकरणस्य ङस्यन्तं रूपम्। अत्रोपदिशति भगवान् पतञ्जलिः- अवाद् ग्र इत्यत्र गिरतेरिति वक्तव्यम्। गृणातेर्मा भूत्। तत् तर्हि वक्तव्यम्। न वक्तव्यम्। प्रयोगा ऽभावात्। अवाद् ग्र इत्युच्यते। न चाऽवपूर्वस्य गृणातेः प्रयोगो ऽस्तीति। उदाहरणे ७-१-१०० ऋत... इतीत्।

१-३-५२ समः = सम् इत्युपसर्गात् परस्मात्, ग्रः (१-३-५१) आत्मनेपदम् (१-३-१२) प्रतिज्ञाने = प्रतिज्ञार्थे। उदाहरणस्य शब्दो नित्यो वर्तत इति प्रतिजानीत इत्यर्थः ।

१-३-५३ उदः = उदुपसर्गात् परस्मात्, सकर्मकात् = कर्मयुक्तात्, चरः =चर्धातोः, आत्मनेपदम् (१-३-१२)।

१-३-५४ सम-तृ... तात् = तृतीयान्तेन युक्तात्, समः = समुपसर्गात् परस्मात्, चरः (१-३-५३) आत्मनेपदम् (१-३-१२)। सूत्रे तृतीयाशब्देन तृतीया विभक्तिर्गृह्यते। प्रत्ययग्रहणे तदन्तग्रहणम्। तदन्तेन च चरतेरर्थद्वारको योगः ।

१-३-५५ दाण - तृतीयायुक्तात् + समः (१-३-५४), दाणः = दाण्धातोः, आत्मनेपदम् (१-३-१२) सा = सा तृतीयाविभक्तिः, चतुर्थ्यर्थे चेत् = चतुर्थ्यर्थे वर्तमाना चेत्। उदाहरणे दास्या इत्यत्र २-३-१३ चतु... सूत्रस्थेन अशिष्ट... इति वार्तिकेन तृतीया। **संयच्छते** इत्यत्र ७-३-७८ पाघ्रा... इति यच्छादेशः। प्रत्युदाहरणं तत्रैव वार्तिके द्रष्टव्यम्।

१-३-५६ उपात् = उपोपसर्गात् परस्मात्, स्वकरणे = स्वीकारे ऽर्थे वर्तमानात्, यमः = यम् धातोः, आत्मनेपदम् (१-३-१२)। अत्र काशिका -पाणिग्रहणविशिष्टमिह स्वकरणं गृह्यते न स्वकरणमात्रमिति। अत्रोपदिशति भगवान् पतञ्जलिः - इह कस्मान्न भवति स्वं शाटकान्तमुपयच्छति इति ? अस्वं यदा स्वं करोति तदा भवितव्यम्। इति। उदाहरणे ७-३-७७ इष... इतिच्छः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-५७ ज्ञाश्रुस्मृदृशां **सनः** ॥५९
धर्मं जिज्ञासते । गुरुं शुश्रूषते ।
नष्टं सुस्मूर्षते । नृपं दिदृक्षते ।
१-३-५८ **ना**ऽनोर्ज्ञः ॥५९
पुत्रमनुजिज्ञासति ।
१-३-५९ प्रत्याङ्भ्यां श्रुवः ॥
प्रतिशुश्रूषति । आशुश्रूषति ।

१-३-६० शदेः**शितः** ॥६१
शीयते । शित इत्युक्तेर्नेह-शशाद ।
१-३-६१ म्रियतेर्लुँङ्लिँङोश्च ॥
अमृत । मृषीष्ट । म्रियते ।
लुँङ्लिँङोश्चेत्युक्तेर्नेह-ममार ।
मरिष्यति ।

१-३-५७ ज्ञाश्रु- सनः = सन्नन्तेभ्यः, ज्ञा... शाम् = ज्ञा श्रु स्मृ दृश् धातुभ्यः, आत्मनेपदम् (१-३-१२)। यदि ज्ञाश्रुस्मृदृशधातुभ्य इत्यर्थस्तर्हि ज्ञाश्रुस्मृदृग्भ्य इति निर्देशः प्राप्नोति। नैष दोषः। सम्बन्धे षष्ठी ज्ञेया। केना ऽत्र सम्बन्धः ? सना। सन इति तु पञ्चम्येकवचनान्तमपि विशेष्यानुरोधात् बहुवचनान्तं प्रस्तुतं सन्नन्तेभ्य इति। **जिज्ञासते** ३-१-७ धातोः... इति सन्। **शुश्रूषते** १-२-९ इको ... इति कित्। ६-४-१६ अज्झ... इति दीर्घः। **सुस्मूर्षते** प्राग्वत् सन्-कित्त्व-दीर्घाः ७-१-१०२ उदो... इत्युत्वम्। **दिदृक्षते** दृश्-सन् १-२-१० हल... इति कित्त्वम्। ८-२-३६ व्रश्च... इति षः। ८-२-४१ षढोः... इति कः। ८-३-५९ आदे... इति षः। कषसंयोगे क्षः।

१-३-५८ ना ऽनो- अनोः - अनु इत्युपसर्गात् परस्मात्, सनः (१-३-५७)= सन्नन्तात्, ज्ञः (१-३-५७) = ज्ञाधातोः, न = आत्मनेपदं न भवति। अथेह प्रतिषेधः कस्मान्न भवति औषधस्य अनुजिज्ञासते, इति ? अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा। किञ्चा ऽतः ? १-३-५७ ज्ञाश्रु... इति प्राप्तस्यैवा ऽयं प्रतिषेधः। केन तर्हि प्रकृते आत्मनेपदम् ? १-३-६२ पूर्व... इति सूत्रेण। कथम् ? १-३-४५ अकर्म ... इति सूत्रेण सन्प्रकृतेर्ज्ञाधातोर्विधानात्।

१-३-५९ प्रत्याङ्भ्याम्=प्रति आङ् इत्युपसर्गाभ्यां परस्मात्, सनः (१-३-५७) = सन्नन्तात्, श्रुवः= श्रुधातोः, न (१-३-५८)। उदाहरणयोः प्रक्रिया १-३-५७ शुश्रूषते इत्यत्रेव तिङ्वर्जम्।

१-३-६० शदेः - शितः=शकारेत्संज्ञकप्रत्यय - प्रकृतेः, शदेः = शद् धातोः आत्मनेपदम् (१-३-१२)॥ सूत्रे ऽस्मिन् कतमविभक्त्यन्ते पदे शदेरिति शित इति च ? आद्यं पञ्चम्यन्तं शदेरिति। द्वितीयं षष्ठ्यन्तं शित इति। कथं निर्णीयते शित इति पदं षष्ठ्यन्तमेवेति ? उत्तरसूत्रे लुँङ्लिङोरिति षष्ठ्यन्तपद - दर्शनेन प्रकृते शित इत्यत्रापि सम्बन्धे षष्ठीति निर्णीयते - शितः = शित्सम्बन्धिनः शदेरिति। कश्च शदिः शित्सम्बन्धी ? अथ भवान् कथयतु किमिदं शिदिति ? शकारेत्संज्ञकः प्रत्ययः। यद्येवं सम्बन्धी च तस्य प्रकृतिः। यथोपदिशति भगवान् पतञ्जलिः- शित इति नैषा पञ्चमी। का तर्हि ? सम्बन्धे षष्ठी- शितो यः शदिः। कश्च शितः शदिः ? प्रकृतिः। शदेः शित्प्रकृतेरितीति। **शीयते** ७-३-७८ पाघ्रा... इति शीयादेशः।

१-३-६१ म्रियते-लुँङ्लिँङोः = लुँङुलिँङोः शितः (१-३-६०) च, प्रकृतेः, म्रियतेः = मृङ्धातोः, आत्मनेपदम् (१-३-१२)॥ अत्रत्यश्चकारः, किमर्थः ? शित इत्यनुवृत्त्यर्थः। अथ कोऽर्थः सूत्रस्याऽस्य ? उक्त एवाऽनुपदं लुँङ्लिँङोः शितश्च प्रकृतेरिति। यद्येवं प्रकृतेरिति निर्देशः कर्तव्यः। न कर्तव्यः। अन्तरेण प्रकृतेरिति निर्देशं कथं प्रकृतेरिति ज्ञायते ? ज्ञायत इत्याह - लुँङलिँङोरिति सम्बन्धे षष्ठी। न च सम्बन्धिनं विना सम्बन्धः सम्भवति। सम्वन्धी च प्रत्ययस्य को नामाऽ न्यः स्यात् ॠते प्रकृतेरिति। अथ ङित्त्वादेव सिद्धे सूत्रमिदं किमर्थम् ? नियमार्थम्। सिद्धे सत्यारभ्यमाणो विधिर्नियमाय भवति, लुँङ्लिडोः शितश्च प्रकृतेरेव मृङ आत्मनेपदं भवति नाऽन्यस्मादिति। तेन ममार, मरिष्यति, इत्यादौ नात्मनेपदम्। यद्येवं मृङ् धातौ ङिदनुबन्धो व्यर्थः। अप्राप्ते विधिरेवास्तु किं नियमेन ? नेत्याह अत्रोपदिशति तत्र भवान् हरदत्तः - मा हि मृतेति लुँङि ६-१९८१ तास्यनुदात्तेत्... इति ङिल्लक्षणः सार्वधातुकनिघातो यथा स्यात् तिङ् निघातो ऽत्र ८-१-३४ हि च इति प्रतिषिद्ध इति। उपदिशति च तत्र भवान् न्यासकारः स्वरार्थमुपदिश्यते मा हि मृतेति लुङि तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकस्य अनुदात्तत्वे कृते धातोरन्तोदात्तत्वं भवति। ८-१-२८ तिङ्ङतिङ इति निघातो ऽ त्र ८-१-३४ हि च इति प्रतिषिध्यते, इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-६२ पूर्ववत् सनः ॥६३
रिरंसते । मुमोदिषते ।
शिश्रयिषति । शिश्रयिषते ।
पिपठिषति ।
१-३-६३ आम्प्रत्ययवत् कृञो ऽ नुप्रयोगस्य ॥
ईक्षाञ्चक्रे । गोपायाञ्चकार ।
१-३-६४ प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥
प्रयुङ्क्ते । उपयुङ्क्ते ।
अयज्ञपात्रेष्वित्युक्तेर्नेह-द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति ।
(स्वराद्यन्तोपसर्गादिति वक्तव्यम्)
उद्युङ्क्ते । नियुङ्क्ते ।
१-३-६५ समः क्ष्णुवः ॥
संक्ष्णुते ।

१-३-६२ पूर्व- ८-३-५९ आदेश... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा -
(क)
१-३-१२ अनुदात्तङित आत्मनेपदम् ॥ १-३-६२ पूर्ववत् (क) सनः ॥ इति । सनः=सन्नन्ताद् धातोः, पूर्ववत् = सनः पूर्वस्माद् धातो (सनःप्रकृते) रिव, (क) = आत्मनेपदं भवति । अथ लिँटि आम्प्रत्ययमार्धधातुकसंज्ञां चच्छात्रैःसाधयित्वा पिपठिष +आम्+ल् इति श्यामपाट्यां लिखित्वा ६-४-४८ अतो लोपः- सूत्रमुपदिशेत् ।
१-३-६३ आम्प्र- ३-१-४० कृञ्चा... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र शिक्षक एतत्सूत्रार्थोपदेशात् पूर्वमधोनिर्दिष्टरूपेणच्छात्रानुपदिशेत् । वत्साः ? यथा आम्र (वृक्ष) परं गृहम् । वट (वृक्ष) परं गृहम् । इत्यत्र आम्रपर-वटपर-शब्दौ गृहं बोधयतः । तथा हि आम्राः (वृक्षाः) परे यस्मात् तत्= आम्रपरम्= गृहम् । वटाः (वृक्षाः) परे यस्मात् तद् वटपरम् = गृहम् । तथैव प्रकृतसूत्रे आम्प्रत्ययशब्देन आमःप्रकृतिभूतो धातुर्गृह्यते । तथा हि- आम् प्रत्ययो यस्मात् स आम्प्रत्ययः = आमः प्रकृतिभूतो धातुः । आम्प्रत्ययस्येव=आम्प्रत्ययवत्=आम्प्रकृतिभूतधातुवत् इति । (पूर्ववदिति पूर्वसूत्रादनुवृत्तिस्तु साम्प्रतं नोपदेश्या । सूत्रार्थबोधे भारा ऽभावे ऽपि "प्रकृतसूत्रेण अप्राप्तस्य विधानेऽपि प्राप्तस्य निवारणं न संभवति, तेन पूर्ववदित्यनुवृत्त्यभावे गोपायाञ्चकार इत्यादौ कर्तृगे फले आत्मनेपदापत्ति" रित्युपदेशो भाराय भवेत् । अनुवृत्त्युपदेशे हि सोऽप्युपदेशः सर्वथा ऽपेक्षितो भवति ।(द्वितीयावृत्तौ तु तथोपदेशपुरस्सरं पूर्ववदेवात्मनेपदं भवति, न तु तद्विपरीतमिति नियमस्वरूपं च बोधयेत्) अथ सूत्रार्थमुपदिशेत्- अनुप्रयोगस्य = अनुप्रयुक्तस्य, कृञः = कृञ्धातोः, आम्प्रत्ययवत्=आम्प्रकृतिभूतधातोरिव आत्मनेपदं भवति, इति । णिजन्ताच्च (चोरि, इत्यादितः) उभयपदे भवतः । तेन प्रकृते कृञ् धातोरपि उभयपदे भवतः । इत्युपदिश्य तिपिच्छात्रैः साध्यमानं 'चोरयाम्+कृ+अ' इति श्यामपाट्यां लिखित्वा ६-१-७४ इको .... सूत्रं ७-३-८४ सार्व... सूत्रं च बाधयित्वा ७-२-११५ अचो... इति वृद्धौ ६-१-८ लिँटि... इति द्वित्वे च प्राप्तयोः १-४-२ विप्र... सूत्रबलेन ७-२-११५ अचो... सूत्रेण वृद्धौ सम्भाव्यमानायां १-१-५८ द्विर्व..., सूत्रमुपदिशेत् ।
१-३-६४ प्रोपा- को ऽ यं युजिः ? युजिर् योगे इति काशिका । अत्रोपदिशति च तदेव प्रतीकमादाय तत्र भवान् न्यासकारः- युज समाधौ इत्यस्यानुदात्तेत्वात् सिद्धमात्मनेपदमित्यतस्तस्येह ग्रहणमयुक्तमित्यभिप्रायेणाह- युजिर् योगे इतीति । किमर्थमिदं सूत्रम् ? अकर्त्रभिप्रायार्थम् । अथ अयज्ञपात्रेषु इत्यत्र कः सप्तम्यर्थः ? विषयत्वम् । इत्थं सूत्रार्थः फलति- प्रोपाभ्याम्= प्र उप इत्युपसर्गाभ्यां परस्मात्, अयज्ञपात्रेषु=यज्ञपात्रप्रयोगभिन्नविषयकात्, युजेः= युज् धातोः, आत्मनेपदम् (१-३-१२) । **स्वरः**= अच्, आदिः अन्तो (वा) यस्य स स्वराद्यन्तः= स्वरादिः स्वरान्तो वा । स चासावुपसर्गः । तस्मात्= स्वरादेः स्वरान्ताद् वा उपसर्गात् परस्मात्, युजेः (१-३-६४) इति वक्तव्यम्= आत्मनेपदं भवतीति वक्तव्यम् ।
१-३-६५ समः= समुपसर्गात् परस्मात्, क्ष्णुवः= क्ष्णुधातोः, आत्मनेपदम् (१-३-१२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-६६ भुजो ऽनवने ॥ ओदनं भुङ्क्ते । अनवन इत्युक्तेर्नेह-महीं भुनक्ति । पालयतीत्यर्थः ।	१-३-६७ णेरणौ यत्कर्म णौ चेत् स कर्ता ऽ नाध्याने ॥७१ दर्शयते भवः । आरोहयते हस्ती स्वयमेव ।

१-३-६६ भुजो-अनवने= अपालने ऽर्थे वर्तमानात्, भुजः= भुज् धातोः, आत्मनेपदम् (१-३-१२)। क्वत्यो ऽ यं भुजिः ? रौधादिकः। कथं ज्ञायते रौधादिक इति ? उच्यते-भुजँ पालनाभ्यवहारयो (१४५३) रिति तत्रत्यो धातुपाठः। अवनं पालनञ्चा ऽनर्थान्तरम्। अनवने इति च पर्युदासः सम्भवन्तमेवार्थं पर्युदस्यतीति।

१-३-६७ णेर- सूत्रे ऽस्मिन् स इति निर्देशः किमर्थः ? स्फुटमेवोत्तरं प्रश्नस्या ऽस्य। अतश्च स्फुटमेवोत्तरं यद् यत्तदोर्नित्यसम्बन्धः प्रसिद्ध इति। कथं भवान् प्रश्नस्याऽभिप्रायमबुद्ध्वैवोत्तरं ददाति ? कस्तर्हि प्रश्नस्याऽभिप्रायः ? उच्यते-सूत्रे यदिति निर्देशो वर्तते, यत्तदोश्च नित्यसम्बन्धः प्रसिद्धः। अतः स इति निर्देशा ऽ भावे ऽपि स्वयमेव स इत्यध्याहृतो भविष्यति किं पुनः कण्ठरवेणेति। तथाविधमेव प्रश्नाभिप्रायं बुद्ध्वैवोत्तरं दत्तं भवानेवोत्तरस्याऽभिप्रायं न बुद्धवानित्याह-सूत्रनिर्दिष्ट-यच्छब्दबोध्यं स इत्यनेन न परामृश्यते। तथा सति तु स इति निर्देशो व्यर्थ एव स्यात्। किं तर्हि ? यदिति निर्देशेन तदिति, स इति निर्देशेन च यदिति अध्याह्रियते यत्तदोः सम्बन्धस्य नित्यत्वात्। तत्र अध्याहृत यच्छब्दबोध्यं स इत्यनेन परामृश्यते इति। तर्हि किमाकारकं तदा सूत्रं भवति ? "णेरणौ यत् तत् कर्म णौ चेद् यत् स कर्ता ऽ नाध्याने" इति तदा यत् स इति निर्देशे ऽपि न दोषः। शैत्यं हि यत् सा प्रकृतिर्जलस्येत्यत्रैव लिङ्गभेदे ऽपि दोषाभावात्। कोऽर्थस्तस्य ? णेः=ण्यन्तात्, आत्मनेपदम् (१-३-१२) अणौ= अण्यन्तावस्थायाम्, यत् कर्म= या क्रिया, णौ= ण्यन्तावस्थायाम्, तत् + चेत्= सैव क्रिया चेत्, अणौ = अण्यन्ताऽवस्थायाम्, यत् कर्म = यत् कर्म कारकम्, णौ= ण्यन्तावस्थायाम्, सः, कर्ता चेत्= कर्तृकारकं चेत्, अनाध्याने= उत्कण्ठापूर्वक-स्मरणा ऽ नवगमे। ३-१-८७ कर्मवत्... इत्यनेन कर्मवद्भावेनैवा ऽत्मनेपदे सिद्धे सूत्रमिदं किमर्थम् ? यत्र कर्मवद्भावो नास्ति तदर्थम्। अथापि १-३-७४ णिच... इति सिद्धे सूत्रमिदमकर्त्रभिप्रायार्थम्। अत्रोपदिशति तत्र भवान् न्यासकारः- आरोहन्ति हस्तिनं हस्तिपकाः। इत्यत्राङ्पूर्वस्य तु रुहबीजजन्मनि प्रादुर्भावे इत्यस्य द्वे क्रिये न्यग्भवनं न्यग्भावनं च। तत्र न्यग्भवनस्य हस्ती कर्ता, न्यग्भावनस्य हस्तिपका इति। न्यग्भवन्तं हस्तिनं न्यग्भावयन्तीत्यर्थः। स यदा तु सुशिक्षितत्वात् सुविधेयत्वाच्च न्यग्भावनक्रियायामत्यन्तमानुकूल्यं प्रतिपद्यते हस्ती स्वयमेव, तदासौ हस्ती हस्तिपकान् प्रति प्रयोजकत्वेन विवक्ष्यते, हस्तिपकास्तु प्रयोज्यत्वेन। हस्ती हस्तिपकान् प्रयुङ्क्ते - मामारोहतेति। ततश्च प्रयोज्यप्रयोजकभावे विवक्षिते हेतुमण्णिच् ।ततस्तस्मिन्नुत्पन्ने यदा निर्ज्ञातस्वरूपत्वाच्चरितार्थत्वात् प्रयोज्या न विवक्ष्यन्ते, निवृत्तत्वात् प्रयोज्यप्रयोकभावस्य न्यग्भवनमात्रे रुहिर्वर्तते। अत्रेदमुदाहरणम्-आरोहयते हस्ती स्वयमेवेति। तथा हि यदेवा ऽण्यन्ते कर्मासीत् स एव ण्यन्ते हस्ती कर्ता भवति न च प्रयोज्यप्रयोजकभावे निवृत्ते ऽपि णिचो निवृत्तिर्भवति, निवृत्तिकारणाभावात्। यथैव हि देवदत्तस्य व्यापारे निवृत्ते ऽपि पचिः पाकान्न निवर्तते-पच्यत ओदनः स्वयमेवेति, तथेहापि निवृत्ते प्रयोज्यप्रयोजकव्यापारे णिचो निवृत्तिर्न भवतीति वेदितव्यमिति। अत्रोद्धरणमुपदिशति तत्र भवान् हरदत्तः-

न्यग्भावनं न्यग्भवनं रुहौ शुद्धे प्रतीयते। अवस्थां पञ्चमीमाहु-र्ण्यन्तानां कर्मकर्तरि।
न्यग्भावनं न्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते॥ निवृत्तप्रेषणाद्धातोः प्राकृते ऽर्थे णिजुच्यते॥

इतीति। अत्रोपदिशति तत्र भवान् कैयटः- सिद्धशव्दव्युत्पत्तये हि प्रकृति-प्रत्यय- विभाग- कल्पना आश्रीयते। अर्थस्योपादानं त्यागश्च क्रियते। लौकिके तु व्यवहारे सौकर्यमात्रविवक्षायां लावयते केदार इति प्रयुज्यते, इति।

प्रथमाऽध्याये तृतीयः पादः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-६८ भीस्म्योर्हेतुभये ॥
मुण्डो भापयते। जटिलो विस्मापयते।
हेतुभये इत्युक्तेर्नेह- कुञ्चिकयैनं भाययति।
रूपेण विस्माययति।

१-३-६९ गृधिवञ्च्योः प्रलम्भने ॥ ७०
माणवकं गर्धयते। माणवकं वञ्चयते।

१-३-७० लियः संमाननशालिनीकरणयोश्च ॥
जटाभिरालापयते। श्येनो वर्तिकामुल्लापयते।
संमाननाद्युक्तेर्नेह- बालकमुल्लापयति।

१-३-७१ मिथ्योपपदात् कृञोऽभ्यासे ॥
पदं मिथ्या कारयते। अभ्यासे इत्युक्तेर्नेह-
सकृत् पदं मिथ्या कारयति।

अत्रोपदिशति तत्र भवान् भट्टोजिदीक्षितः- णिचश्च इति सिद्धे ऽकर्त्रभिप्रायार्थमिदम्। कर्त्रभिप्राये तु विभाषोपपदेनेति विकल्पे ऽणावकर्मकादिति परस्मैपदे च परत्वात्प्राप्ते पूर्वविप्रतिषेधेनेदमेवेष्यते। कर्तृस्थभावकाः कर्तृस्थक्रियाश्चोदाहरणम्। तथाहि-पश्यन्ति भवं भक्ताः। चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः। प्रेरणांशत्यागे पश्यति भवः। विषयो भवतीत्यर्थः। ततो हेतुमण्णिच्। दर्शयन्ति भवं भक्ताः। पश्यन्तीत्यर्थः। पुनर्ण्यर्थस्या ऽ विवक्षायां दर्शयते भवः। इह प्रथमतृतीययोरवस्थयोर्द्वितीयचतुर्थ्योश्च तुल्यो ऽर्थः। तत्र तृतीयकक्षायां न तङ्, क्रियासामान्ये ऽ प्यणौ कर्मकारकस्य णौ कर्तृत्वा ऽभावात्। चतुर्थ्यां तु तङ्, द्वितीयामादाय क्रियासाम्यात्, प्रथमायां कर्मणो भवस्येह कर्तृत्वाच्च। एवमारोहयते हस्तीत्युदाहरणम्। आरोहन्ति हस्तिनं हस्तिपकाः। न्यग्भावयन्तीत्यर्थः। तत आरोहति हस्ती न्यग्भवतीत्यर्थः। ततो णिच्। आरोहयन्ति। आरोहन्तीत्यर्थः। तत आरोहयते। न्यग्भवतीत्यर्थः।

यद्वा- पश्यन्त्यारोहन्तीति प्रथमकक्षा प्राग्वत्। ततः कर्मण एव हेतुत्वारोपाण्णिच्। दर्शयति भवः। आरोहयति हस्ती। पश्यत आरोहतश्च प्रेरयतीत्यर्थः। ततो णिज्भ्यां तत्प्रकृतिभ्यां च उपात्तयोरपि प्रेषणयोस्त्यागे दर्शयते। अरोहयते। इत्युदाहरणम्। अर्थः प्राग्वत्। अस्मिन् पक्षे द्वितीयकक्षायां न तङ्, समानक्रियत्वाभावाण्णिजर्थस्याधिक्यात्। अनाध्याने किम्? स्मरति वनगुल्मं कोकिलः। स्मरयति वनगुल्मः। उत्कण्ठापूर्वकस्मृतौ विषयो भवतीत्यर्थः। इति। अपरिस्पन्दन-साधन-साध्यो भावः। सपरिस्पन्दन-साधनसाध्या क्रिया।

१-३-६८ भीस्म्यो- सूत्रे भयग्रहणं धात्वर्थोपलक्षणम्। णेः (१-३-६७) भीस्म्योः= भीधातोः स्मिधातोश्च, आत्मनेपदम् (१-३-१२) हेतुभये= प्रयोजकाद् भये स्मये च गम्ये। उदाहरणप्रत्युदाहरणेषु ६-१-५५ बिभे... इति ६-१-५६ नित्यं ... इति च सूत्रे दृश्ये।

१-३-६९ गृधि- किमिदं प्रलम्भनमिति ? प्रतारणम्। अत्रोपदिशति तत्र भवाञ्जयादित्यः - प्रलम्भनम् = विसंवादनम्, मिथ्याफलाख्यानमिति। णेः (१-३-६७) गृधिवञ्च्योः = गृध्धातोर्वञ्च्धातोश्च आत्मनेपदम् (१-३-१२) प्रलम्भने = प्रतारणे।

१-३-७० लियः- सूत्रे ऽत्र चकारः किमर्थः ? प्रलम्भन इत्यनुवृत्त्यर्थः। अथ किं शालिनीकरणमिति ? तिरस्कारः। णेः (१-३-६७) लियः= लीधातोः, आत्मनेपदम् (१-३-१२) संमा... णयोः= संमानने तिरस्कारे, प्रलम्भने (१-३-६९) च। अत्रोपदिशति तत्र भवाञ्जयादित्यः- ६-१-५० विभाषा लीयतेरिति वा ऽऽ त्वं विधीयते। तदस्मिन् विषये नित्यमन्यत्र विकल्पः। व्यवस्थितविभाषा हि सेति।

१-३-७१ मिथ्यो- किमिदं मिथ्योपपदादिति ? उप= समीपे, उच्चरितम्= उपोच्चरितम्। उपोच्चरितं पदम्= उपपदम्। मध्यमपदलोपो ऽत्र द्रष्टव्यः। यथा दुर्गाप्रसादपुत्रो दुर्गापुत्रः। हीराकुमार्यङ्गजो हीराङ्गज इति। मिथ्या= मिथ्याशब्द उपपदं, यस्य सः= मिथ्योपपदः। तस्मात् मिथ्योपपदात्= मिथ्याशब्दोपपदकात्, णेः (१-३-६७) कृञः= कृञ् धातोः, आत्मनेपदम् (१-३-१२) अभ्यासे= मननाय पुनः पुनरावृत्तौ। उदाहरणस्य मुहुर्मुहुरशुद्धमुच्चारयतीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-७२ स्वरित- ञितः **कर्त्रभिप्राये क्रियाफले** ॥७७ पचति । पचते । वपति । वपते । श्रयति । श्रयते ।	१-३-७३ अपाद् वदः ॥ न्यायमपवदते । कर्त्रभिप्राये क्रियाफले इत्यनुवृत्तेर्नेह -गां संरक्षितुमपवदति ।

१-३-७४ णिचश्चेत्यनेन सिद्धे १-३-६७ णेरणौ... प्रभृति १-३-७१ मिथ्योपप... इत्यन्तानि सूत्राणि किमर्थानि ? अकर्त्रभिप्रायार्थानि ।

१-३-७२ स्वरि- १-३-१२ अनुदात्तङित... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र (क)

शयमपाटीप्रयोगो यथा- १-३-१२ अनुदात्तङित आत्मनेपदम् ॥ १-३-७२ स्वरितञितः (क) कर्त्रभिप्राये क्रियाफले ॥ इति । स्वरितञितः= स्वरितेतो ञितश्च धातोः, (क)= आत्मनेपदं भवति, क्रियाफले = व्यापारफले, कर्त्रभिप्राये= कर्तृगामिनि सति । इति सूत्रेण आत्मनेपदे लभ्धाताविव प्रक्रिया । रूपाणि यथा- पचते । पचेते । पचन्ते । पचसे । पचेथे । पचध्वे । पचे । पचावहे । पचामहे । इति । क्रियाफले परगामिनि तु आत्मनेपदनिमित्ताऽभावेन १-३-७८ शेषा... सूत्रेण परस्मैपदे पठ्धाताविव प्रक्रिया। रूपाणि यथा- पचति । पचतः । पचन्ति । पचसि । पचथः । पचथ । पचामि । पचावः । पचामः । इति । भक्तं पचते । सूदो भक्तं पचति । पचते = पकाउँछ = पकाता है । पचति= पकाइ दिन्छ= पकादेता है । भावकर्मणोस्तु यस्मात् कस्मादपि धातोः १-३-१३ भाव ... सूत्रेणात्मनेपदमेवेति । पदव्यवस्था सम्यग् बोधयितव्या ।

अथ गण-भेद-फल- बोधनम्

वत्साः ? कर्मणि भावे वा लकारे विहिते गणभेदेन विकरणभेदो न भवति । कर्तरि लकारे विहिते गणभेदेन विकरणानि भिन्नानि भवन्ति । इत्युपदेश-सन्दर्भे स्फुटप्रतिपत्तये ३-१-६९ दिवा...३-१-७३ स्वादि... ३-१-७७ तुदा... ३-१-७८ रुधा... ३-१-७९ तना... ३-१-८१ क्र्यादि... सूत्राणि शिक्षको दर्शयेत् । अथ धातुपाठं दर्शयन् भूधातोरारभ्यमाणो गणो भ्वादिः । अद् (अदँ) धातोरारभ्यमाणो गणो ऽदादि : । जुहोति (हु) धातोरारभ्यमाणो गणो जुहोत्यादिः । दिव् (दिवुँ) धातोरारभ्यमाणो गणो दिवादिः । सु (षुञ्) धातोरारभ्यमाणो गणः स्वादिः । तुद् (तुदँ) धातोराभ्यमाणो गणस्तुदादिः । तन् (तनुँ) धातोराभ्यमाणो गणस्तनादिः । रुध् (रुधिँर्) धातोरारभ्यमाणो गणो रुधादिः । क्री (डुक्रीञ्) धातोरारभ्यमाणो गणः क्र्यादिः । चुर् (चुरँ) धातोरारभ्यमाणो गणश्चुरादिः । इति बोधयेत् । **सावधानम्** ? धातुपाठं दर्शयतैव शिक्षकेण गणभेदो बोधयितव्यः । धातुपाठमदर्शयित्वैव गणभेद- फल-बोधन- प्रयासः शिक्षकस्य शिक्षणकलायामयोग्यतां प्रकाशयति । इति । तत्र भ्वादिगणे विकरणं साधारणतया ३-१-६८ कर्त ... सूत्रेण शप् प्रत्ययो भवति । यथा- पठति, पठतः पठन्ति, इत्यादिषु पूर्वमुक्तमेव । वत्साः ? यद्यपि भ्वादेः पठ् भण् इत्यादिधातूनां रूपाणि पूर्वं प्रस्तुतानि शब्विकरणानि । परन्तु तेषु शब्विकरणे तुदादौ शविकरणे चा ऽ नुबन्धविनिर्मुक्तः 'अ' इत्यवशिष्यते तत्र विकरण-भेद-फलं न प्रतीयते । अतो विकरण- भेद-फल-स्फुट- प्रतिपत्तये भूधातुर्मुद् धातुश्च साम्प्रतं क्रमश उपदिश्येते इति च्छात्रानुपदिश्य शिक्षकः प्रथमं भूधातुमुपदिशेत् । यथा- भू धातुरकर्मकः । अनुबन्धश्च नाऽत्र कश्चित् ।

अस्माद् धातोर्लँटि लकारस्याऽर्थे कर्तरि विवक्षिते पठ्+ अ + ति, पठ+अ+तस्, पठ+अ+झि, इत्यादिष्विव भू+अ+ति, भू+अ+तस्, भू+ अ+ झि इत्यादिकायां प्रक्रियायां छात्रैः साधितायां शिक्षकः ३-४-११३ तिङ्शि ... सूत्रमुद्बोधयन् विकरणम् (अकारो ऽपि) सार्वधातुकमिति बोधयित्वा ७-३-८४ सार्वधातुकार्ध... सूत्रमुपदिशेत् ।

१-३-७३ अपात्= अप इत्युपसर्गात् परस्मात्, वदः= वद् धातोः, आत्मनेपदम् (१-३-१२) क्रियाफले + कर्त्रभिप्राये (१-३-७२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-७४ णिचश्च ॥

चोरयति । चोरयते ।

१-३-७५ समुदाङ्भ्यो यमो ऽग्रन्थे ॥

व्रीहीन् संयच्छते । भारमुद्यच्छते । वस्त्रमायच्छते । अग्रन्थे इत्युक्तेर्नेह-उद्यच्छति चिकित्साशास्त्रं वैद्यः । कर्त्रभिप्राये क्रियाफले इत्यनुवृत्तेर्नेह-भूधनिनो व्रीहीन् संयच्छति कृषीवलः । स्वामिनो भारमुद्यच्छति कर्मकरः । परस्य वस्त्रमायच्छति ।

१-३-७६ अनुपसर्गाज्ज्ञः ॥

गां जानीते । अनुपसर्गादित्युक्तेर्नेह- स्वर्गं लोकं न प्रजानाति । कर्त्रभिप्राये क्रियाफले इत्यनुवृत्तेर्नेह- देवदत्तस्य गां जानाति ।

१-३-७७ विभाषोपपदेन प्रतीयमाने ॥

स्वं धान्यं वपति, वपते वा । स्वस्य चिकित्सायै भिषजं श्रयते, श्रयति वा । स्वं पुत्रमपवदते, अपवदति वा । स्वं कटं कारयते कारयति वा । स्वान् व्रीहीन् संयच्छते संयच्छति वा । स्वं भारमुद्यच्छते, उद्यच्छति वा । स्वं वस्त्रमायच्छते, आयच्छति वा । स्वां गां जानीते जानाति वा ।

१-३-७८ शेषात् कर्तरि परस्मैपदम् ॥ ९३

१-३-७४ णिच- ३-१-३२ सनाद्यन्ता... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र श्यामपाटीप्रयोगो यथा-

(क)

१-३-१२ अनुदात्तङित आत्मनेपदम् ॥

(ख) (ग)

१-३-७२ स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥

१-३-७४ णिचश्च (क) (ग) (ख) ॥ इति ॥।

णिचः= णिजन्ताद् धातोः, (क)= आत्मनेपदं भवति, (ग)= क्रियाफले, (ख)= कर्त्रभिप्राये। चोरयति। चोरयते। चोरयतु। चोरयताम्। अचोरयत्। अचोरयत। चोरयेत्। चोरयेत। इत्यादीनि रूपाणि च्छात्रैः साध्यमानानि शिक्षकः स्थालीपुलाकन्यायेन शृणुयात्। इत्थं चुरादौ धातुर्णिजन्तो भवति, विकरणं तु शबेव। धातोश्च गुणो भवतीति विशेषं बोधयेत्। कर्मणि तु यगेवेति बोधनसन्दर्भे चोरि+यत इति श्यामपाट्यां लिखित्वा तस्य च यकः ३-४-११४ आर्ध... सूत्रेणार्धधातुकसंज्ञामुद्बोध्य ६-४-५१ णेरनिटि- सूत्रमुपस्थापयेत्।

१-३-७५ समुदाङ्भ्यः= सम् उद् आङ् इत्युपसर्गेभ्यः परस्मात्, यमः = यम् धातोः, आत्मनेपदम् (१-३-१२) अग्रन्थे= ग्रन्थविषयकप्रयोगाऽभावे। **उद्यच्छति चिकित्साशास्त्रं वैद्यः** चिकित्साशास्त्रमधिगन्तुमुद्यमं करोतीत्यर्थः। उदाहरणेषु प्रत्युदाहरणेषु च ७-३-७७ इष... इतिच्छः।

१-३-७६ अनुपसर्गात् = उपसर्गरहितात्, ज्ञः = ज्ञाधातोः, आत्मनेपदम् (१-३-१२) क्रियाफले + कर्त्रभिप्राये (१-३-७२)। प्रक्रिया ३-१-८१ क्र्यादि... ७-३-७९ ज्ञाज... ६-४-११३ ई ह... इत्यत्र द्रष्टव्या।

१-३-७७ विभा- उपपदेन = समीपोच्चारितपदेन, क्रियाफले + कर्त्रभिप्राये (१-३-७२) प्रतीयमाने = अवगम्यमाने सति, विभाषा = क्रियाफले कर्त्रभिप्राये विधायकैः सूत्रैर्विधीयमानमात्मनेपदं विकल्पेन भवति। कानि च क्रियाफले कर्त्रभिप्राये विधायकानि सूत्राणि ? स्वरित ञित इत्यादीनि पञ्च सूत्राणि।

१-३-७८ शेषा - १-४-१०१ तान्येकवचन... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। यस्माद् धातोः पूर्वोक्तैः १-३-१२ अनु... प्रभृतिभिः सूत्रैरात्मनेपदं न भवति, स शेषो बोध्य इति बोधनपुरस्सरं सूत्रार्थमुपदिशेत्। शेषात्= आत्मनेपदनिमित्त- हीनाद् धातोः, कर्तरि = कर्तर्यर्थे वाच्ये, परस्मैपदम् = परस्मैपदं भवति। अर्थाद् यदा लकारस्या ऽर्थः कर्ता भवति तदा पूर्वोक्तैः १-३-१२ अनु... प्रभृतिभिः सूत्रैरात्मनेपदे ऽसति प्रकृतसूत्रेण परस्मैपदं भवति। यदा तु लकारस्याऽ र्थः कर्ता नास्ति किन्तु भावः कर्म वा वर्तते, तदा प्रकृत- सूत्रं सर्वथा न प्रवर्तते। यतः कर्तरि = कर्तर्यर्थे वाच्ये, इत्युच्यते। अस्मिन् प्रसङ्गे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-७९ अनुपराभ्यां कृञः ॥
अनुकरोति । पराकरोति ।

१-३-८० अभिप्रत्यतिभ्यः क्षिपः ॥
अभिक्षिपति । प्रतिक्षिपति । अतिक्षिपति ।

१-३-८१ प्राद् वहः ॥
प्रवहति ।

१-३-८२ परेर्मृषः ॥
परिमृष्यति ।

१-३-८३ व्याङ्परिभ्यो रमः ॥८५
विरमति । आरमति । परिरमति ।

१-३-८४ उपाच्च ॥
उपरमति = उपरमयतीत्यर्थः ।

१-३-८५ विभाषा ऽकर्मकात् ॥
उपरमति, उपरमते । निवर्तते , इत्यर्थः ।

१-३-८६ बुध-युध-नश-जनेङ्-प्रु-द्रु-स्रुभ्यो णेः ॥८९
बोधयति पद्मम् । योधयति काष्ठानि । नाशयति दुःखम् । जनयति सुखम् । अध्यापयति । प्रावयति । द्रावयति । स्रावयति ।

शिक्षकेण लकारस्य यो ऽ र्थस्तत्स्थाने जातस्य तिङो ऽपि स एवा ऽर्थ इति च्छात्रा बोधयितव्याः । अथा ऽ तः प्रकृते लकारस्या ऽर्थः कर्तेति विवक्षितस्तेन प्रकृतप्रयोगे तिङो ऽर्थः कर्तेति स्फुटम् । अथ शिक्षकः पठ् धातोःपूर्वोक्तैः१-३-१२ अनु... प्रभृतिभिः सूत्रैरात्मनेपदं न भवति, पठ्धातौ तेषां सूत्राणां निमित्ता ऽभावात् । इति च्छात्रान् बोधयित्वा लक्षणसमन्वयायच्छात्रान् प्रवर्तयेत् । प्रकृतसूत्रेण पठ्धातोः परतः परस्मैपदं (तिप्... मस्) प्राप्तम् । अर्थात् आत्मनेपदं (त... महिङ्) निवृत्तम् । इति च्छात्रान् बोधयेत् । अथ शिक्षकश्छात्रानुद्दिश्य भणेद् यद्, अयि वत्साः ? इतः परं १-४-१०४ युष्म... १-४-१०६ अस्म... १-४-१०७ शेषे ..., त्रीणीमानि सूत्राण्युपदिशामि । येषां भावे स्फुटं ज्ञाते वाक्यादि- लेखने प्रायो ऽशुद्धिर्न जायते । अज्ञाते त्वेतेषां भावे प्रतिशतं पञ्चाशदशुद्धयो भवन्ति । अतः सावधानतया सम्यगवगच्छत भावमेतेषां त्रयाणां सूत्राणामिति । अथ प्रथमं १-४-१०४ युष्मद्युपपदे... सूत्रं प्रस्तुवीयात् ।

१-३-७९ अनुपराभ्याम्= अनु परा इत्युपसर्गाभ्यां परस्मात्, कृञः= कृञ् धातोः, कर्तरि + परस्मैपदम् (१-३-७८) । अत्रोपदिशति तत्र भवाञ्जयादित्यः - कर्त्रभिप्राये क्रियाफले गन्धनादिषु च करोतेरात्मनेपदं विहितम्, तदपवादः परस्मैपदं विधीयते, इति ।

१-३-८० अभिप्रत्यतिभ्यः = अभि प्रति अति इत्युपसर्गेभ्यः परस्मात्, क्षिपः= क्षिप् धातोः, कर्तरि +परस्मैपदम् (१-३-७८) । क्षिपँ (१२८४) धातुः स्वरितेत् । कर्त्रभिप्राये क्रियाफले ऽपि परस्मैपदार्थमिदम् ।

१-३-८१ प्रात् = प्र इत्युपसर्गात् परस्मात्, वहः = वह्धातोः, कर्तरि + परस्मैपदम् (१-३-७८) । वहँ धातुः स्वरितेत् । कर्त्रभिप्राये क्रियाफले ऽपि परस्मैपदार्थं सूत्रमिदम् ।

१-३-८२ परेः = परि इत्युपसर्गात् परस्मात्, मृषः = मृष् धातोः, कर्तरि +परस्मैपदम् (१-३-७८) मृषँ (११६३) धातुः स्वरितेत् । प्राग्वत् परस्मैपदार्थं सूत्रमिदम् ।

१-३-८३ व्याङ्परिभ्यः = वि आङ् परि इत्युपसर्गेभ्यः परस्मात्, रमः = रम्धातोः, कर्तरि+परस्मैपदम् (१-३-७८) । अनुदात्तेत्वादात्मनेपदे प्राप्ते परस्मैपदं विधीयते ।

१-३-८४ उपात्=उपोपसर्गात् परस्मात्, रमः (१-३-८३) कर्तरि + परस्मैपदम् (१-३-७८) । अत्रोपदिशति तत्र भवाञ्जयादित्यः - अन्तर्भावितण्यर्थो ऽत्र रमिरिति ।

१-३-८५ विभा - उपात् (१-३-८४) अकर्मकात् = कर्मरहितात्, रमः (१-३-८३) कर्तरि (१-३-७८) विभाषा=वा, परस्मैपदम् (१--३-७८) । अत्रोपदिशति तत्र भवाञ्जयादित्यः- पूर्वेण नित्ये परस्मैपदे प्राप्ते विकल्प आरभ्यते, इति ।

१-३-८६ बुध-णेः = ण्यन्तेभ्यः, बुध... स्रुभ्यः= बुध् युध् नश् जन् इङ् प्रु द्रु स्रु इत्येतेभ्यो धातुभ्यः, कर्तरि + परस्मैपदम् (१-३-७८) । अत्रोपदिशति तत्र भवाञ्जयादित्यः - ये ऽत्राऽकर्मकास्तेषाम् १-३-८८ अणावकर्मकाच्चित्तवत्कर्तृकात् इत्येव सिद्धे वचनमिदमचित्तवत्कर्तृकार्थमिति । ये ऽत्र चलनार्था अपि तेषां १-३-८७ निगरणचलनार्थेभ्यश्च इति सिद्धे यदा न चलनार्थास्तदर्थं वचनमिति च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-८७ निगरणचलनार्थेभ्यश्च ॥
आशयति । भोजयति । चलयति । कम्पयति ।
(अदेः प्रतिषेधो वक्तव्यः)
आदयते ।

१-३-८८ अणावकर्मकाच्चित्तवत्कर्तृकात् ॥
आसयति बालं माता । शाययति ।

१-३-८९ न पादम्याङ्यमाङ्यस-परिमुह-रुचि-नृति-वद-वसः ॥
पाययते । दमयते । आयामयते । आयासयते । परिमोहयते । रोचयते । नर्तयते । वादयते । वासयते ।
अकर्त्रभिप्राये तु पाययति ।
(पादिषु धेट उपसंख्यानम्)
धापयेते शिशुमेकं समीची ।

१-३-९० वा क्यषः ॥९३
लोहितायति, लोहितायते ।

१-३-९१ द्युद्भ्यो लुँङि ॥
अद्युतत्, अद्योतिष्ट ।

१-३-९२ वृद्भ्यः स्यसनोः ॥९३
उदाहरणानि ७-२-५९ न वृद्भ्य... इत्यत्र दृश्यानि ।

जनयति ६-४-९२ मितां... इत्युपधाह्रस्वः । अध्यापयति ६-१-४७ क्रीङ्जी ... इत्यात्वम् ।

१-३-८७ निग- णेः (१-३-८६) निग... र्थेभ्यः = निगरणार्थेभ्यश्चलनार्थेभ्यश्च धातुभ्यः, कर्तरि + परस्मैपदम् (१-३-७८)। अत्रोपदिशति तत्रभवाञ्जयादित्यः- अयमपि योगः सकर्मकार्थः, अचित्तवत्कर्तृकार्थश्चेति ।

अदेः- णेः (१-३-८६) अदेः= अद् धातोः, प्र... व्यः= पूर्वसूत्रेण विधीयमानस्य परस्मैपदस्य निषेधो वाच्यः ।

१-३-८८ अणौ = अण्यन्तावस्थायाम्, अकर्मकात् = कर्मरहितात्, चित्तवत्कर्तृकात् = चित्तयुक्तकर्तृकात्, णेः (१-३-८६)= ण्यन्ताद् धातोः, कर्तरि + परस्मैपदम् (१-३-७८) । सूत्रमिदं १-३-७४ णिच... इति बाधनार्थम् ।

१-३-८९ न पा-णेः (१-३-८६) पा... वसः = पा दम् आङ्+यम् आङ्+ यस् परि + मुह् रुच् नृत् वद् वस् इत्येतेभ्यो धातुभ्यः, न = पूर्वसूत्राभ्यां विधीयमानं परस्मैपदं न भवति। इदमत्रा ऽवधेयम्- १-३-७४ णिचश्चेति सूत्रस्य बाधके पूर्वसूत्रे उभे। तयोर्निषेधकं प्रकृतसूत्रमिति। किञ्चा ऽतः ? प्रकृतसूत्रेण प्रतिषेधाद् बाधका ऽभावन्यायेन णिचश्चेति सूत्रं प्रवर्तते । तच्च कर्त्रभिप्राये क्रियाफले एव प्रवर्तत इति पूर्वमुक्तम् । तेन पादिभ्यो ण्यन्तेभ्यः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति । अकर्त्रभिप्राये तु १-३-७८ शेषा... इति परस्मैपदमेव भवति । वद् धातुसाहचर्याद् वस्धातुरपि भौवादिक एवा ऽत्र गृह्यते ।

पादिषु= पादम्यादिषु, धेटः= धेट् धातोः, उपसंख्यानम् =ग्रहणं कर्तव्यम् । किमुक्तं भवति ? ण्यन्ताद् धेट्धातोः कर्त्रभिप्राये क्रियाफले परस्मैपदं न भवतीत्युक्तं भवति ।

१-३-९० वा क्य- क्यषः = क्यषन्ताद् धातोः, कर्तरि (१-३-७८) वा= विभाषया, परस्मैपदम् (१-३-७८) । वा परस्मैपदमित्युक्त्या पाक्षिकमात्मनेपदं भवतीति ज्ञातं भवति । उदाहरणयोः ३-१-१३ लोहि... इति क्यष् ।

१-३-९१ द्युदभ्यो- लुँङि इति कतमविभक्त्यन्तं पदम् ? सप्तम्यन्तम् । को ऽर्थस्तस्य ? लुँङः स्थाने इति ।
यदि लुँङि इति सप्तम्यन्तं पदम्, कथं तस्य लुँङः स्थाने इत्यर्थः सम्भवेत् ?
बाढं सम्भवतीत्याह-द्युद्भ्य इति पञ्चम्यन्तम् पञ्चमी च परतस्त्यां विभक्तिं षष्ठीं कल्पयति । यथोपदिशति भगवान् सूत्रकारः १-१-६६ तस्मा... इति। षष्ठी च 'स्थाने' इत्यनेन युज्यते यथोपदिशति भगवान् सूत्रकारः- षष्ठी स्थानेयोगेति ।

१-३-९२ वृद्भ्यः- सूत्रमिदं किमर्थम् ? वृतादीनामनुदात्तेत्त्वात् १-३-१२ अनुदात्तङित आत्मनेपदमिति १-३-६२ पूर्ववत् सन इति च सूत्रेण, आत्मनेपदमात्रे प्राप्ते विकल्पेन परस्मैपदविधानार्थम् । अथ वृद्भ्य इति बहुवचननिर्देशः कथम् ? वृधादीनां ग्रहणार्थम् । अथ स्यसनोरित्यस्य कोऽर्थः ? स्ये सनि च विषये,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-३-९३ लुँटि च क्लृपः ॥ उदाहरणानि ७-२-६० तासि च... सूत्रे दृश्यानि	इति प्रथमाऽध्याये तृतीयः पादः ।

इति । कथम् ? विषयसप्तम्यन्तत्वात् । स्यसनोरिति हि विषयसप्तम्यन्तं पदम् । ननु च भो वृद्भ्य इति पञ्चम्यन्तं पदम् । तच्च परतस्त्यां विभक्तिं षष्ठीं कल्पयेद् यथोपदिशति भगवान् सूत्रकारः तस्मादित्युत्तरस्येति । नेत्याह-नात्र पञ्चमी परतस्त्यां विभक्तिं षष्ठीं कल्पयति । कथम् ? असम्भवात् । न हि स्यसनोः स्थाने परस्मैपदस्या ऽऽत्मनेपदस्य वा संभवः । कस्य स्थाने तर्हि संभवः ? लकारस्य स्थाने । एतेन स्यसनोरिति परसप्तम्यन्तं नेत्यपि व्याख्यातं भवति । कथम् ? असम्भवादेव । न हि स्यसनोः परयोः परस्मैपदस्या ऽऽत्मनेपदस्य वा संभवः । क्व तर्हि संभवः ? स्यसन्भ्यां परतः । इत्थं सूत्रार्थः संभवति -वृद्भ्यः= वृतादिभ्यः, वा (१-३-९०) परस्मैपदम् (१-३-७८) स्यसनोः =स्ये सनि च विषये = स्यविषये सन्विषये चेति ।

१-३-९३ लुँटि- इदमपि सूत्रं पूर्ववदात्मनेपदमात्रे प्राप्ते विकल्पेन परस्मैपदविधानार्थम् । अथ सूत्रेऽस्मिन् चकारोऽयं किमर्थः ? स्यसनोरित्यनुवृत्त्यर्थः । किमु भो अन्तरेण चकारमनुवृत्तिर्न भवति ? । भवत्येव । यद्येवं प्रकृतसूत्रे ऽपि चकारो न कर्तव्यः । प्रकृतसूत्रे कर्तव्यश्च । कथम् ? उक्तं पूर्वं १-३-११ स्वरितेनाधिकार इति सूत्रे विशेष्यविशेषणवाचकभिन्नं समानविभक्त्यन्तं पदमनुवृत्तेः प्रतिबन्धकमिति । प्रकृते लुँटि इति सप्तम्यन्तम् । पूर्वसूत्रादनुवर्त्यं स्यसनोरिति च सप्तम्यन्तं समानविभक्त्यन्तम् । अतस्तदनुवृत्यर्थश्चकारो ऽत्र कर्तव्य एव । अथ कः सूत्रार्थः ? उच्यते-क्लृपः = कृप् धातोर्विहितस्य, लुँटि= लुँटःस्थाने, स्य सनोः (१-३-९२) च, वा (१-३-९०) परस्मैपदम् (१-३-७८) इति । अथ लुँटि इति सप्तम्यन्तस्यापि पदस्य लुँटः स्थाने इत्यर्थः कथं संभवति ? संभवतीत्याह-क्लृप इति पञ्चम्यन्तं पदम्, तत्र विशेष उक्तः पूर्वं १-३-९१ द्युद्भ्यो लुङि, इति सूत्रे ।

इति प्रथमाऽध्याये
तृतीयः पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रथमाऽध्याये

चतुर्थः पादः

१-४-१ आ कडारादेका संज्ञा ॥ २-२-३८

१-४-२ विप्रतिषेधे परं कार्यम् ॥

फल+भ्यस् = फलेभ्यः ।

(गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुँम् पूर्वविप्रतिषेधेन)

वारिणे । अतिसखीनि । वारिणि ।

प्रियक्रोष्टूनि ।

(नुँमचिरतृज्वद्भावेभ्यो नुँट् पूर्वविप्रतिषेधेन)

वारीणाम् । तिसृणाम् । क्रोष्टूनाम् ।

(इत्वोत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन)

करीता । चकार । पिपर्ति । पपार ।

१-४-१ आ क- १-४-१८ यचि भम् - सूत्रानन्तरं सूत्रमिदं पाठचम् । आकडारात् = २-२-३८ कडाराः कर्मधारये इति सूत्रात् प्राक्, एका संज्ञा= एकस्यैकैव संज्ञा भवति । इत्यर्थमुपदिश्य का तर्हि प्रकृते एका संज्ञा कार्या ? पदसंज्ञा भसंज्ञा वा ? इति सन्दिह्य १-४-२ विप्र... सूत्रमुद्बोधनीयम् । ततस्तु भसंज्ञा भवतीति स्फुटं भवति । सारांशः- सर्वनामस्थाने परे पूर्वभागमात्रं पदमपि न भवति भमपि न भवति । सर्वनामस्थानभिन्ने ऽ जादौ यकरादौ च प्रत्यये परे पूर्वो भागो भसंज्ञो भवति । सर्वनामस्थानभिन्ने यकार-भिन्न- हलादौ प्रत्यये परे पूर्वो भागः पदसंज्ञो भवतीति । एवं सम्यगभ्यासेन भ-पद- विषये छात्रेषु स्फुरत्प्रतिभेष्वेव पाठोऽ ग्रे सारणीयः । यतो यथा स्थान- प्रत्याहार-ज्ञानं प्रक्रियायामत्यन्तोपयोगि भवति, तथैवा ऽग्रिमप्रक्रियायां भ-पद ज्ञानमत्यन्तोपयोगि भवति । तेन विना ऽग्रिम-प्रक्रिया रुध्यत एव । अतो ऽभ्यासः सर्वथा ऽपेक्षितः । अथ हलन्तेषु पयोमुच् शब्दात् सुँप्रत्यये कृते सति पयोमुच् +स् इति श्यामपाद्यां लिखित्वा ६-१-६६ हल्ङ्या... सूत्रमुद्बोधनीयम् । अथ श्यामपाद्यां सकारःकर्तनीयः (पयोमुच्स्= पयोमुच् इति लेख्यम्) अथ पयोमुच् इति पदं स्यान्न वेति विचारे १-४-१७ स्वादि... सूत्रस्य तु सर्वथा संभावना नास्ति, सर्वनामस्थानभिन्न - प्रत्ययपरत्वा ऽभावात् । १-४-१४ सुँप्ति... सूत्रं तु सुँबन्तमिति कथयति । प्रकृते च सुँ प् (सुँ=स्) लुप्त एव इतिच्छात्राणां मनसि शङ्कां जागरयित्वा १-१-६१ प्रत्ययलोपे... सूत्रं प्रस्तुत्यम् ।

१-४-२ विप्र- ७-३-१०३ बहुवचने.... सूत्रोदाहरण- प्रसङ्गे सूत्रमिदं पाठचम् । विप्रतिषेधे = विरोधे (द्वितीयावृत्तौ तुल्यबलविरोधे) सति, परं कार्यम् = परं कार्यं भवति । इत्यर्थमुपदिश्य कतरत् सूत्रं प्रवर्तेत ? इति च्छात्रैरेव निर्णयः कारयितव्यः । विशेषः- अथ यदिच्छात्राः "७-३-१०२" सुँपि... सूत्रं बाधित्वा ७-३-१०३ बहु..., सूत्रस्य प्रवृत्त्या ऽपि तु न कार्यं सम्पद्येत ? कथं पुनः १-४-२ विप्र..., सूत्रस्या ऽवश्यकतेति" सन्दिह्युस्तदा शिक्षकेण ६-१-८५ वृद्धि... सूत्रं स्मारयता तत्रत्य-वृत्तद्वय-दृष्टान्तोद्बोधनपुरस्सरं निरवकाशे बाध्यबाधकता भवति, नान्यथेति बोधनसन्दर्भे भ्यामि (यथा पूर्वमुक्ते गौरीशङ्कराभ्यामित्युदाहरणे) ७-३-१०३ बहु.... सूत्रस्य प्राप्तिर्न भवति ॥ ७-३-१०२ सुँपि... सूत्रस्य तु प्राप्तिर्भवति । सप्तमी- बहुवचने (सुपि) वन+सु इत्यादौ ७-३-१०२ सुँपि... सूत्रस्य प्राप्तिर्न भवति । ७-३-१०३ बहु.... सूत्रस्य तु प्राप्तिर्भवति । अतो ऽत्र निरवकाशत्वा ऽभावेन बाध्यबाधकताया अभावेन १-४-२ विप्र... सूत्रं निर्णयाया ऽऽवश्यकमित्युपदेश्यम् । यदि तुच्छात्राः किमपि न कथयेयुस्तदा शिक्षकेण स्वं पाण्डित्यं न प्रदर्शयितव्यम् ।

ङसिँ - वृक्षात् पत्राणि पतन्ति, इति वक्तव्ये वृक्षात् इति प्रयोगः कथं सिध्येदिति जिज्ञासामुद्भाव्य प्रयोग उपदेश्यः । सर्वत्रैवं जिज्ञासोद्भावनीया, न केवलमिहैवेति विमृश्यम् । अथ वृक्षप्रातिपदिकात् ४-१-२ स्वौज..., सूत्रेण ङसिँ भ्याम् भ्यस् इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२२ द्व्येक... सूत्रबलेन ङसिँ प्रत्यये, १-३-८ लश... १-३-९ तस्य... १-३-२ उप १-३-९ तस्य... सूत्रद्वारा वृक्ष + अस् इति जाते स-बाध्य-बाधनं ७-१-१२ टाङ... सूत्रप्रवृत्तिरुपदेश्या । लक्षणसमन्वयस्तुच्छात्रैरेव कारयितव्यः ।

(**इत्वोत्वाभ्यां-** विप्रतिषेधे परमङ्गाधिकारे पूर्वमिति प्रकृतसूत्रस्थभाष्यवार्तिकारम्भे वार्तिकमिदमावश्यकम् ।)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-३ यू स्त्र्याख्यौ नदी ॥६

हेगौरि । गौर्यै । हेवधु । वध्वै ।

(प्रथमलिङ्गग्रहणं च)

हे बहुश्रेयसि । बहुश्रेयस्यै ।

१-४-४ नेयँङुवँङ्स्थानावस्त्री ॥६

हे श्रीः । हे भ्रूः।

१-४-५ वा ऽऽ मि ॥ ६

श्रीणाम्, श्रियाम् । भ्रूणाम्, भ्रुवाम् ।

१-४-६ ङिति ह्रस्वश्च ॥७

मत्यै, मतये । मत्याः, मतेः । मत्याम्, मतौ ।

श्रियै, श्रिये । भ्रुवै, भ्रुवे ।

भ्याम्- 'वृक्षाभ्यां पत्राणि पतन्ति' इति वाच्ये वृक्षप्रातिपदिकात् ४-१-२ स्वौज... सूत्रेण ङसिँ भ्याम् भ्यस् इत्येतेषु प्रत्ययेषु प्राप्तेषु चतुर्थी-द्विवचने इव प्रक्रिया छात्रैरुच्यमाना श्रोतव्या ।

भ्यस्- 'वृक्षेभ्यः पत्राणि पतन्ति', इत्यत्र वृक्षप्रातिपदिकात्, ४-१-२ स्वौज .... सूत्रेण ङसिँ भ्याम् भ्यस् इत्येतेषु प्रत्ययेषु प्राप्तेषु चतुर्थी-बहुवचने, इव प्रक्रिया छात्रैरुच्यमाना श्रोतव्या ।

ङस्-'श्यामस्य पुस्तकम्' इति वाच्ये श्यामप्रातिपदिकात् ४-१-२ स्वौज... सूत्रेण ङस् ओस्, आम् इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२२ द्व्येक ... सूत्र-बलेन ङस्प्रत्यये १-३-८ लश... १-३-९ तस्य... सूत्रद्वारा श्याम +अस् इति जाते पञ्चम्येकवचने इव सूत्र-प्रवृत्तिः । आदेशस्तु कतमो भवेदिति विवेकः कार्य इति च्छात्रानुपदिशता शिक्षकेण च्छात्रैः क्रियामाणो लक्षणसमन्वयः श्रोतव्यः ।

ओस्- 'रामश्यामयोः पुस्तकानि' इति वाच्ये रामश्याम-प्रातिपदिकात् ङस्, ओम् आम्, इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२२ द्व्येक... सूत्र-बलेन 'रामश्याम+ओस्' इति जाते तच्च श्यामपाट्यां लिखित्वा स-बाध्य-बाधनम् ७-३-१०४ ओसि च - सूत्रं प्रस्तुत्यम् ।

१-४-३ यू स्त्र्या - ६-१-१०१ दीर्घाज्जसि च - सूत्रानन्तरं सूत्रमिदं पाठ्यम् । स्त्र्याख्यौ = स्त्री+ आख्यौ= स्त्र्याख्यौ = स्त्रीवाचिनौ = नित्यस्त्रीलिङ्गौ, यू (ई+ऊ=यू)= दीर्घेकारान्त- दीर्घोकारान्त-शब्दौ, नदी = नदीसंज्ञौ भवतः । तत्सन्दर्भे च 'संज्ञा' इति नामोच्यते, इत्युपदिशता शिक्षकेणाऽधीयानाँश्छात्रान् दर्शयता अस्य नाम रमेशः= अस्य संज्ञा रमेशः= अयं रमेशसंज्ञकः= अयं रमेशनामकः, इत्यादिरीत्या बोधयता यथा ऽस्यच्छात्रस्य संज्ञा = नाम रमेशः । तथैव केषांचिच्छब्दानां नदी संज्ञा= नदी नाम, इति बोधयित्वा लक्षण - समन्वय- सन्दर्भे यत्र नदीशब्देन व्यवहारस्तत्र प्रकृतसूत्रानुसारेण नित्यस्त्रीलिङ्गौ ईदूदन्तौ शब्दौ गृह्येते (सूत्रान्तरकृतनदीसंज्ञका अपि शब्दा गृह्यन्ते) इति साम्रेडं छात्राः स्फुटं बोधनीयाः । अथ चतुर्थ्येकवचने गौरी + ए इति श्यामपाट्यां लिखित्वा ७-३-११२ आण्नद्याः- सूत्रमुपस्थापयितव्यम् ।

प्रथम- पूर्वं स्त्र्याख्यस्य साम्प्रतमुपसर्जनत्वे ऽपि नदी संज्ञा भवतीति भावः ।

१-४-४ नेयँङु- इयँङुवँङ्स्थानौ (इयँङुवँङौ तिष्ठतो यत्र= ययोः, इति विग्रहे स्थाधातोरधिकरणे ल्युँट अनुक्तकर्तृषष्ठ्याः स्थानशब्देन समासः) इयँङुवङोः स्थानौ (स्थानिनौ), यू (१-४-३) = यौ ईदूतौ तदन्तौ, स्त्र्याख्यौ (१-४-३) शब्दौ, न = नदीसंज्ञौ न भवतः, अस्त्री = स्त्रीशब्दं वर्जयित्वा ।

१-४-५ वाऽऽमि- इयँङुवँङ्स्थानौ (१-४-४) यू (१-४-३) = यौ ईदूतौ, तदन्तौ, स्त्र्याख्यौ (१-४-३) शब्दौ, वा = विकल्पेन नदीसंज्ञौ भवतः, अस्त्री (१-४-४) आमि = आमो विषये ।

१-४-६ ङिति - ६-४-८० वा ऽम्शसोः- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)
१-४-३ यू स्त्र्याख्यौ नदी ॥
(घ)
१-४-५ वा ऽऽमि ।

१-४-६(ख) ङिति ह्रस्वश्च (क)(घ)(ग) इति । (ख) =स्त्र्याख्यौ = स्त्रियां वर्तमानौ ह्रस्वः+ [(क) = यू] =ह्रस्वेकारान्त - ह्रस्वोकारान्त शब्दौ, (घ)+(ग) = वा नदी = विकल्पेन नदीसंज्ञौ भवतः, ङिति=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-७ शेषो घ्यसखि ॥९	१-४-८ पतिः समास एव ॥
मुनिना । मुनये । भानुना । भानवे ।	पत्या । पत्ये । भूपतिना । भूपतये ।

ङिद्विभक्तौ । इत्यर्थ उपदेश्यो बालानामुपलालनामनुसृत्य । [द्वितीयावृत्तौ तु सूत्रे चकारस्य पाठात्- च = इयँङुवँङ्स्थानौ (१-४-४) यू (१-४-३)= यौ ईदूतौ तदन्तौ, स्त्र्याख्यौ (१-४-३) वा (१-४-५) अस्त्री (१-४-४) ङिति । इत्यप्यर्थ उपदेश्यः । अत्राऽवधेयम्-ह्रस्वपक्षे स्त्रियां वर्तमानौ इत्यर्थः । दीर्घपक्षे स्त्र्याख्यौ, (नित्यस्त्रीलिङ्गौ) इत्यर्थ उक्तः । तेन ह्रस्वानां लिङ्गान्तरभाजामपि स्त्रियां वा नदी संज्ञा । दीर्घाणां तु लिङ्गान्तरभाजां नेति] अथा ऽग्रिमप्रक्रिया गौरीशब्दवत् । नदीसंज्ञाया अभावे मुनिशब्दवत् । ङौ तु यद्यपि प्रक्रियायां विशेषस्तथापि, अधुना ऽवधि प्र. ७-३-११८ औत् - सूत्रार्थ-बोधा ऽभावेन साम्प्रतं स विशेषो नोपस्थाप्यः क्लेशापत्तेः । **इति स्त्रीलिङ्ग-प्रक्रिया । अथ नपुंसक- लिङ्ग-प्रक्रिया-विशेष उपदेश्यः** तत्र प्रथममदन्तशब्दोपदेशे ७-१-२३ स्वमो.... सूत्रोदाहरण-ज्ञानं विना ७-१-२४ अतो... सूत्रप्रवर्तनायै तत् ७-१-२३ स्वमो... सूत्रं बाधनीयं भवति । किञ्च यदि ७-१-२३ स्वमो... सूत्रमनुपदिश्य ७-१-२४ अतो... सूत्रमेवोपदिश्येत तदा १-४-२३ स्वमो.... सूत्रा ऽनुवृत्तिं विना १-४-२४ अतो... सूत्र- वाक्यार्थबोधो ऽपि न जायते । अतः प्रथममिदुदन्ताः शब्दा उदाहार्याः । यथा दधि स्वादु वर्तते, मधु मधुरं वर्तते, इति वक्तव्ये दधिशब्दान्मधुशब्दाच्च सुँ प्रत्यये कृते दधि +स्, मधु+स्, इति श्यामपाट्यां लिखित्वा ७-१-२३ स्वमोर्नपुंसकात्-सूत्रं प्रस्तुत्यम् ।

१-४-७ **शेषो** -७-३-१०९ जसि च- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्रा ऽधोनिर्दिष्ट-रीत्या सूत्राणि श्यामपाट्यां लेख्यानि ।

(क)

१-४-३ यू स्त्र्याख्यौ नदी ॥

(ख)

१-४-६ ङिति ह्रस्वश्च ।

१-४-७ शेषो घ्यसखि (ख)(क) ॥ इति ।

अत्र सूत्रार्थ (वाक्यार्थ) बोधात् पूर्वं पदार्थः स-पदकृत्यमुपदेश्यः । यथा-अयि वत्साः ? सूत्रे ऽस्मिन् पदानि त्रीणि सन्ति । शेषः, घि, असखि, इति । तत्र शेषो नाम= उक्तादन्यः । प्रकृते च नदी संज्ञोक्ता । अतो ऽत्र शेषो नाम= नदीभिन्न इत्यर्थः फलितः । अथ १-४-३ यू स्त्र्या... सूत्रे यू= दीर्घेकार- दीर्घोकारौ वर्णितौ । तत्प्रसङ्गेन १-४-६ ङिति.... सूत्रे ह्रस्वशब्देन ह्रस्वेकार-ह्रस्वोकारौ ज्ञायेते । प्रकृत १-४-७ शेषो ... सूत्रे ऽपि स एव ह्रस्वशब्दो ऽनुवर्तते । अतो ऽर्थो ऽपि स एव (ह्रस्वेकार-ह्रस्वोकारावेव) । एवञ्च असखि= सखिशब्दभिन्नः, शेषः =नदीभिन्नः, (ख) = ह्रस्वः + [(क)=यू]= ह्रस्वेकारान्तो ह्रस्वोकारान्तश्च, शब्दः, घि = घिसंज्ञको भवति । अर्थात् नदीभिन्नो ह्रस्वेकारान्तो ह्रस्वोकारान्तश्च शब्दो घिसंज्ञो भवति, परन्तु नदीभिन्नो ऽपि ह्रस्वेकारान्तो ऽपि सखिशब्दो घिसंज्ञो न भवति । एवं स्फुटमर्थं बोधयता शिक्षकेण प्रकृतोदाहरणे सूत्रार्थसमन्वयायच्छात्रा एव प्रवर्तयितव्या : । अथ टा प्रत्यये 'मुनि+आ' इति श्यामपाट्यां लिखित्वा ७-३-११९ आङो ना... सूत्रं प्रस्तुत्यम् ।

१-४-८ **पतिः**- प्र. ७-३-११८ औत्-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

१-४-७ शेषो घि असखि ॥

१-४-८ पतिः समास एव (क) ॥ इति ।

पतिः= पतिशब्दः, समासे एव, (क) = घि= घिसंज्ञको भवति । इत्यर्थमुपदिश्य प्रकृते समासा ऽभावाद् घिसंज्ञा नेति वोधन-सन्दर्भे, एकीभूत द्व्यवर-शब्दः समस्तः = समाससंज्ञा-युक्तो भवतीति स्फुटं छात्रा वोधयितव्याः । तेन भूपति- प्रभृतयः शब्दास्तु घिसंज्ञाकार्याणि लभन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-९ षष्ठीयुक्तश्छन्दसि वा ॥

क्षेत्रस्य पतिना वयम्।

१-४-१० ह्रस्वं लघु ॥११

१-४-११ संयोगे गुरु ॥१२

१-४-१२ दीर्घं च ॥

१-४-१३ यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ॥

बालकाभ्याम्। पठामि।

१-४-१४ सुँप्तिङन्तं पदम् ॥१७

छात्राः। पठतः।

अथ संख्यावाचिनःशब्दा उपदेश्याः। एकशब्द एकत्वसंख्याविशिष्टस्य वाचकः। अतः सः एकवचनान्त एव। द्विशब्दो द्वित्वसंख्याविशिष्टस्य वाचकः। अतः स द्विवचनान्त एव। त्रि-प्रभृतयो दशान्ताः शब्दा बहुत्वसंख्याविशिष्टस्य वाचकाः। अतस्ते बहुवचनान्ता एव प्रयुज्यन्ते। इति प्रथमं बोधयित्वा ततः क्रमशः शिक्षणीयाः। यथा-एकशब्दः सर्वनामकार्यं लभते-एकस्मै, इत्यादि। स्त्रियाम्-एकस्यै, इत्यादि। द्विशब्दे ७-२-१०२ त्यदा... सूत्रमुद्बोधनीयम्। द्वौ। इत्यादि। स्त्रियां टाप् च। द्वे। इत्यादि। त्रिशब्दः पुंसि मुनिशब्दवत्। आमि तु विशेषो वर्तते। इति ब्रुवता 'त्रि+आम्' इति श्यामपाट्यां लिखित्वा ७-१-५३ त्रेस्त्रयः- सूत्रं प्रस्तुत्यम्।

१-४-९ षष्ठीयुक्तः = षष्ठ्यन्तेन युक्तः, पतिः (१-४-८) वा = विकल्पेन, घि(१-४-७) छन्दसि = वेदे।

१-४-१० ह्रस्वं - ७-३-८४ सार्वधातुकार्ध... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। ह्रस्वम् = ह्रस्वमक्षरम्, लघु=लघुसंज्ञकं भवति। प्रकृते मुद् इत्यत्रोकारो ह्रस्वो वर्तते। तेन स लघुसंज्ञको भवतीति च्छात्रान् बोधयित्वा ७-३-८६ पुँगन्त... सूत्रमुपदिशेत्।

१-४-११ संयोगे = संयोगे परे, ह्रस्वम् (१-४-१०) गुरु= गुरुसंज्ञकं भवति।

१-४-१२ दीर्घम् = दीर्घमक्षरम्, -गुरु (१-४-११)।

१-४-१३ यस्मा - ८-२-७ न लोपः... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। यस्मात् प्रत्ययविधिः = यस्मात् प्रत्ययो विधीयते, तदादि = तदादिशब्दस्वरूपम्, प्रत्यये = तस्मिन् प्रत्यये परे, अङ्गम्= अङ्गसंज्ञकं भवति। अर्थात् प्रत्ययात् पूर्वो भागः, अङ्गम् इत्युच्यते। यथा पितन्+स् इत्यत्र प्रत्ययात् ('स्' इत्यतः) पूर्वो भागः 'पितन्' इति अङ्गम् इत्युच्यते, एवं सर्वत्र प्रत्ययात् पूर्वो भागः, अङ्गम् इति व्यवह्रियते इतिच्छात्रान् बोधयता स्वयं तु शिक्षकेण पठ्धातोर्लँट्प्रत्यये मिबादेशे शप्प्रत्यये 'पठ्+अ+मि' इत्यत्र तदादि=सः (पठ्) आदिर्यस्य तदादि='पठ्+अ' इति, प्रत्यये=मिप्रत्यये परतो ऽङ्गं भवति। अर्थात् प्रत्यये (प्रकृते मिप्रत्यये) परतः पठ्+अ= पठ इति विकरणविशिष्टों ऽशोऽपि, अङ्गं भवतीति विमृश्यम्। परन्तु नामुमंशं साम्प्रतं छात्रा उपदेश्याः। बोधभारापत्तेः।

पितरौ पितृशब्दात् औप्रत्यये कृते पितृ+औ इति श्यामपाट्यां लिखित्वा स-बाध्यबाधनम् ७-३-११० ऋतो ङि... सूत्रं प्रस्तुत्यम्।

१-४-१४ सुँप्ति - ७-१-७२ नपुंसकस्य... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। सुँप्तिङन्तम् = सुँबन्तं तिङन्तं च, पदम् = पदसंज्ञकं भवति। इत्यर्थमुपदिश्य सुँबन्तं नाम सुँप्सहितं पदं भवति। अर्थात् प्रकृति-प्रत्यय-समुदायः पदं भवति , न तु सुँपि परे पूर्वभागमात्रम्। यथा पयोमुचौ इति पदं भवति। पयोमुच्+औ इत्यत्र औकारं त्यक्त्वा पयोमुच् इत्येतावन्मात्रं पदं न भवति। एवं तिङन्ते ऽपि तिङ त्यक्त्वा पूर्वभगमात्रं पदं न भवति। पूर्वभागं त्यक्त्वा प्रत्ययमात्रमपि पदं न भवति। सारांशः-प्रातिपदिकस्य सुँपश्च मिलितं रूपं पदं भवति। तथा धातोस्तिङश्च मिलितं रूपं पदं भवति। इति भावार्थो विशदनीयः। अथा ऽप्यग्रे शिक्षकेणोपदेश्यम्। अयि वत्साः ? प्रायः (शक्तं पदमित्यपि व्यवह्रियभाणतया प्राय इत्युक्तम्) सर्वत्र शास्त्रेषु व्यवहारे च १-४-१४ सुँप्ति.... सूत्रेण बोधितं पदं गृह्यते। केवल- व्याकरण-शास्त्रस्य कृते तु पदमन्यदपि भवति। तच्च प्रसङ्गादुपदिश्यत इति। इत्युपदिशता १-४-१७ स्वादि... सूत्रं प्रस्तुत्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-१५ नः क्ये ॥ राजीयति । वाच्यति । **१-४-१६ सिति च ॥** अहंयुः । शुभंयुः । **१-४-१७ स्वादिष्वसर्वनामस्थाने ॥१८** राजभ्याम् ।	**१-४-१८ यचि भम् ॥ २०** विश्वपः । राज्ञः । (नभोऽङ्गिरोमनुषां वत्युपसंख्यानम्) नभस्वत् । अङ्गिरस्वत् । मनुष्वत् । (वृषण् वस्वश्वयोः) वृषण्वसुः । वृषणश्वः ।

१-४-१५ नः क्ये-क्यच्क्यङोः सुबन्तादेव विधेयत्वेन सुँपो लुकि प्रत्ययलक्षणद्वारा पूर्वसूत्रेणैव पदत्वे सिद्धे ऽपि पुनरारभ्यमाणं सूत्रमिदं नियमार्थम्-क्ये= क्यचि क्यङि च परे नः = नकारान्तमेव शब्दस्वरूपम्, पदम् (१-४-१४) ना ऽन्यत् । **वाच्यति** पदत्वाऽभावान्ना ऽत्र कुत्वजश्त्वे ।

१-४-१६ **सिति**= सिति प्रत्यये परे, पूर्वं पदम् (१-४-१४) । उदाहरणयोः ५-२-१४० अहं.... इति युस् प्रत्ययः ।

१-४-१७ **स्वादि** - १-४-१४ सुँप्तिङन्तं... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र

(क)

श्यामपाटी-प्रयोगो यथा - १-४-१४ सुँप्तिङन्तं पदम् ॥ १-४-१७ स्वादिष्वसर्वनामस्थाने (क) ॥ इति । असर्वनामस्थाने= सर्वनामस्थानभिन्नेषु, स्वादिषु= सुँप्रभृतिषु (४-१-२ स्वौजस... सूत्रादारभ्य ५-४-१५४ शेषाद् ... इति पर्यन्तैः सूत्रैर्विहितेषु) प्रत्ययेषु परेषु, (क) = पदम्= पूर्वो भागः पदं भवति । यथा 'राजन्+भ्याम्' इत्यत्र भ्यामः पूर्वभागो राजन् इत्यंशो राजन्+भिस् इत्यत्र भिसः पूर्वभागो राजन् इत्यंशो व्याकरणमात्रे पदमुच्यते । राजभ्याम् इति समुदायो राजभिः इति समुदायश्च व्याकरणे ऽन्यत्रापि व्यवहारे पदमुच्यते १-४-१४ सुँप्तिङन्तं... सूत्रात् । अथा ऽस्य सूत्रस्या ऽर्थे वाच्ये 'पूर्वो भाग' इत्यर्थः कथं ज्ञायते ? उच्यते - यथा श्यामः पूर्वं गत इत्युक्तौ पश्चिमाद् गत इति बुध्यते शब्दप्रयोगं विनैव । पश्चिमं गत इत्युक्तौ च पूर्वस्माद् गत इति बुध्यते शब्दप्रयोगं विनैव । तथैव स्वादिषु परेषु इत्युक्तौ पूर्वो भाग इति ज्ञायते शब्दप्रयोगं विनैवेतिच्छात्रा बोधयितव्याः । अथ १-४-१८ यचि... सूत्रं प्रस्तुत्यम् ।

१-४-१८ **यचि**-१-४-१७ स्वादिस्व... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

१-४-१७ स्वादिषु असर्वनामस्थाने ॥

१-४-१८ (ख) यचि (क) भम् ॥ इति ।

अत्र प्रथमं य्+अच् = यच्+ङि (इ)=यचि इति सप्तम्यन्तमिति विश्लेष्य बोधनीयम् । अथ (ख)= असर्वनामस्थाने=सर्वनामस्थानभिन्नेषु, यचि=यकारादिषु +अजादिषु च, (क)=स्वादिषु= सुँप्रभृतिषु (४-१-२ स्वौजस... सूत्रादारभ्य ५-४-१५४ शेषाद् ... इति पर्यन्तैः सूत्रैर्विहितेषु) प्रत्ययेषु परेषु, भम् = पूर्वो भागो भसंज्ञो भवति । इत्यर्थ उपदेश्यः । अथ, अयि वत्साः ? सुँप् प्रत्यया अजादयो हलादयश्च सन्ति । तेषु हलादिप्रत्ययो यकारादिर्नास्ति । अतः सर्वनामस्थानभिन्ने हलादौ सुँपि परे क्वचिदपि भसंज्ञा न प्राप्नोति किन्तु पदसंज्ञैव भवति पूर्व (१-४-१७ स्वादि...) सूत्रेण । सुँप्प्रत्ययभिन्नेषु आ ५-४-१५४ शेषाद्... सूत्राद् विधेयेषु प्रत्ययेषु यकारादिरपि प्रत्ययो लभ्यते, यथा- राजन्+ य, इति । (प्रयोगो ऽयं पश्चादुपदेक्ष्यते इत्युक्त्या प्रक्रियाविषयिकां छात्राणामाकाङ्क्षा शमयितव्या) । अथा ऽत्र पूर्वभागस्य पूर्व (१-४-१७ स्वादि...) सूत्रेण पदसंज्ञापि प्राप्नोति, प्रकृत (१-४-१८ यचि... सूत्रेण) भसंज्ञापि प्राप्नोति । सुँपि च सर्वनामस्थानभिन्ने ऽजादौ पूर्वभागस्य पूर्व (१-४-१७ स्वादि...) सूत्रेण पदसंज्ञापि प्राप्नोति प्रकृत (१-४-१८ यचि...) सूत्रेण भसंज्ञापि प्राप्नोति । यथा- राजन्+शस् = राजन् +अस् इत्यत्र पूर्वभागस्य पदसंज्ञापि प्राप्नोति भसंज्ञापि प्राप्नोति । किं तर्हि द्वे संज्ञे कार्ये ? न, इति वदता शिक्षकेण १-४-१ आ क.... सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-१९ तसौ मत्वर्थे ॥
मरुत्वान् । यशस्वी ।
१-४-२० अयस्मयादीनि च्छन्दसि ।
(उभयसंज्ञान्यपीति वक्तव्यम्)
ससुष्टुभा स ऋक्वता गणेन ।
१-४-२१ बहुषु बहुवचनम् ॥
छात्राः। पठन्ति ।
१-४-२२ द्व्येकयोर्द्विवचनैकवचने ॥
छात्रौ । पठतः । छात्रः । पठति ।
१-४-२३ कारके ॥५५

१-४-२४ ध्रुवमपाये ऽपादानम् ॥३१
उदाहरणम् २-३-२८ अपा... सूत्रे द्रष्टव्यम्
(जुगुप्सा-विराम-प्रमादार्थानामुपसंख्यानम्)
अधर्माज्जुगुप्सते । अधर्माद् विरमति । धर्मात् प्रमाद्यति ।
१-४-२५ भीत्रार्थानां भयहेतुः ॥
सिंहाद् बिभेति । सिंहात् त्रायते ।

१-४-१९ तसौ = तकार-सकारान्तं शब्दस्वरूपम्, भम् (१-४-१८) मत्वर्थे = मत्वर्थीये प्रत्यये परे । उदाहरणयोर्भत्वेन पदत्वबाधात् क्रमशो जश्त्वं रुत्वं च न ।

१-४-२० अयस्मयादीनि = अयस्मयप्रभृतीनि शब्दस्वरूपाणि यथायोग्यं भपदसंज्ञाद्वारा साधूनि भवन्ति छन्दसि= वेदे । **उभय-** छन्दसि (१-४-२०) । **ऋक्वता** अत्र पदत्वात् कुत्वं भत्वाज्जश्त्वाऽभावः ।

१-४-२१ बहु - ६-१-१०० नादिचि- सूत्रानन्तरं सूत्रमिदं पाठचम् । बहुषु=बहुषु वाच्येषु= धेरैलाई भन्दामा बहुतों को वताने में, बहुवचनम् = बहुवचनं भवति = बहुवचन हुन्छ=बहुवचन होता है । इत्यर्थमुपदिश्य लक्षणसमन्वयं कुर्वता शिक्षकेण 'राम-श्याम-विष्णुमित्र+जस्' इति श्यामपाट्यां लिखित्वा १-३-७ चुटू-सूत्रमुपदेश्यम् ।

१-४-२२ द्व्येक- १-४-१०३ विभक्तिश्च- सूत्रानन्तरं सूत्रमिदं पाठचम् । अस्य सूत्रस्यार्थोपदेशे द्वित्वसंख्याविशिष्ट एकत्वसंख्याविशिष्ट इत्याद्यर्थः कठिनः प्रतीयते । अतः, द्व्येकयोः = दुइटा र एउटा लाई भन्दामा= दो और एक को वताने में, द्विवचनैकवचने= द्विवचन र एकवचन हुन्छन्= द्विवचन और एकवचन होते हैं । इत्यर्थ उपदेश्यः । अथ ८-४-३९ स्तोः श्चु... सूत्रोक्त- भोजन- दृष्टान्तद्वारा द्वयोर्वाच्ययोर्द्विवचनम्, एकस्मिन् वाच्ये, एकवचनं भवतीति शिक्षको बोधयेत् । अथ प्रकृते श्याम + सुँ इति जाते १-३-२ उप... १-३-९ तस्य... सूत्रसमन्वयं छात्रैरेव कारयेत् । ततः श्यामस् इति श्यामपाट्यां लिखित्वा, इतो ऽग्रिमा प्रक्रिया ८-२-६६ सस... सूत्रोदाहरणवदिति वदञ्शिक्षकश्छात्रैः क्रियमाणमग्रिमलक्षण- समन्वयं केवलं शृणुयात् । सति वैपरीत्ये कथम् ? इति प्रश्नमात्रं कुर्यात् । एवम् उपदिशति मुनिः, उदेनि भानुः, इत्यादिषु लक्षणसमन्वयं कारयेत् ।

औ- अथ द्विवचनोपदेशे प्रथमं शिक्षकेणाऽदन्तः श्यामशब्दो न प्रस्तुत्यः । पूर्वसवर्णदीर्घोदाहरणं विना निषेधज्ञानस्या ऽस्फुटत्वाऽऽ पत्तेः । अतः, मुनी (द्वौ मुनी) उपदिशतः, इति वक्तव्ये 'मुनी' इति प्रयोगः कथं सिध्येदिति विचारयामेनि च्छात्रसम्वोधन- सन्दर्भे पूर्ववत् प्रक्रियाक्रमे मुनि + औ इति श्यामपाट्यां लिखित्वा छात्रैरेव बाध्यसूत्रं बाधयित्वा ६-१-९८ प्रथमयोः... सूत्रं प्रस्तुत्यम् ।

१-४-२४ ध्रुव- २-३-१३ चतुर्थी... सूत्रानन्तरं सूत्रमिदं पाठचम् । अपाये = विश्लेषे ऽर्थे गम्यमाने, ध्रुवम्= अवधिभूतं वस्तु, अपादानम् = अपादन-संज्ञं भवति । इत्यर्थमुपदिश्य २-३-२८ अपादाने... सूत्रमुपदिशेत् ।

जुगुप्सा= निन्दा, विरामः = विरतिः, प्रमादः= अनवधानता, एतदर्थानां धातूनां प्रयोगे, जुगुप्सादिविषयकं कारकमपादानम् ।

१-४-२५ भीत्रार्थानाम्= भयार्थानां त्राणार्थानां च धातूनां प्रयोगे, भयहेतुः=भयकारणम्, अपादानम् (१-४-२४) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-२६ पराजेरसोढः ॥
शत्रुभ्यः पराजयते ।
१-४-२७ वारणार्थानामीप्सितः ॥
यवेभ्यो गा वारयति ।
१-४-२८ अन्तर्धौ येना ऽदर्शनमिच्छति ॥
मातुर्निलीयते ।इच्छतिग्रहणाद् व्यवधानेच्छायां सत्यपि.. दर्शने भवति ।
१-४-२९ आख्यातोपयोगे ॥
१-४-३० जनिकर्तुः प्रकृतिः ॥३१
गोमयाद् वृश्चिको जायते ।
१-४-३१ भुवः प्रभवः ॥
हिमालयात् सप्त गण्डक्यः सप्त कौशिक्यश्च प्रभवन्ति ।
१-४-३२ कर्मणा यमभिप्रैति स सम्प्रदानम् ॥४१
छात्रेभ्यो वृत्तिं ददाति ।
(क्रियया यमभिप्रैति स सम्प्रदानम्)
पत्ये शेते ।
(यजेःकर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा)
पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः ।
१-४-३३ रुच्यर्थानां प्रीयमाणः ॥
देवदत्ताय रोचते मोदकः ।
१-४-३४ श्लाघ-ह्नुङ्-स्था-शपां ज्ञीप्स्यमानः ॥
देवदत्ताय श्लाघते, ह्नुते, तिष्ठते, शपते वा ।
१-४-३५ धारेरुत्तमर्णः ॥
देवदत्ताय शतं धारयति ।
१-४-३६ स्पृहेरीप्सितः ॥
फलेभ्यः स्पृहयति ।
प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा ।
फलानि स्पृहयति ।

१-४-२६ पराजेः = परोपसर्गपूर्वक- जिधातोः प्रयोगे, असोढः=अभिभवितुमशक्यो ऽर्थः, अपादानम् (१-४-२४) ।
१-४-२७ वारणार्थानाम् = वारणार्थकधातूनां प्रयोगे, ईप्सितः, = अभिलषितो ऽर्थः, अपादानम् । (१-४-२४) ।
१-४-२८ अन्तर्धौ = व्यवधाने सति, येना ऽदर्शनमिच्छति= यत्कर्तृक-दर्शना ऽभावमिच्छति, सः (यत्तदोर्नित्यसम्बन्धात्) अपादानम् (१-४-२४) ।
१-४-२९ आख्या-उपयोगे= नियमपूर्वकविद्यास्वीकारे, आख्याता= उपदेशकः, अपादानम् (१-४-२४) ।
१-४-३० जनिकर्तुः = जायमानस्य, प्रकृतिः = हेतुः, अपादानम् (१-४-२४) ।
१-४-३१ भुवः +कर्तुः (१-४-३०) = प्रभवितुः, प्रभवः = प्रकाशस्थानम्, अपादानम् (१-४-२४) ।
१-४-३२ कर्म- १-४-४२ साधकतमं.... सूत्रा ऽनन्तरं सूत्रमिदं पाठचम् । कर्मणा=दानार्थकस्य धातोः (महासंज्ञाकरणमन्वर्थसंज्ञाविधानार्थमित्याहुः) कर्मणा, यम्, अभिप्रैति= कर्ता सम्वध्नाति, सः, सम्प्रदानम्= सम्प्रदानसंज्ञको भवति । इत्यर्थमुपदिश्य २-३-१३ चतुर्थी... सूत्रमुपदिशेत् ।
१-४-३३ रुच्यर्थानाम् = रुच्यर्थकधातूनां प्रयोगे, प्रीयमाणः = प्रीत्याश्रयः, सम्प्रदानम् (१-४-३२) । अभिलाषाश्रयभिन्नकर्तृको ऽभिलाषो रुचेरर्थः । अभिलाषाश्रयकर्तृको ऽभिलाषो लषेरर्थः । तेनेह न- देवदत्तो मोदकमभिलष्यति ।
१-४-३४ श्लाघ... शपाम् = श्लाघ् ह्नुङ् स्था शप् इत्येतेषां धातूनां प्रयोगे, ज्ञीप्स्यमानः = बोधयितुमिष्यमाणो ऽर्थः, सम्प्रदानम् (१-४-३२) ।
१-४-३५ धारेः = धारिधातोःप्रयोगे, उत्तमर्णः = ऋणप्रदः, सम्प्रदानम् (१-४-३२) ।
१-४-३६ स्पृहेः = स्पृहिधातोः प्रयोगे, ईप्सितः= ईप्सितोऽर्थः, सम्प्रदानम् (१-४-३२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-३७ क्रुध- द्रुहेर्ष्या ऽसूयार्थानां यंप्रति कोपः ॥३८

शत्रुभ्यः क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति वा ।

१-४-३८ क्रुधद्रुहोरुपसृष्टयोः कर्म ॥

शत्रुमभिक्रुध्यति, अभिद्रुह्यति वा ।

१-४-३९ राधीक्ष्योर्यस्य विप्रश्नः ॥

देवदत्ताय राध्यतीक्षते वा

१-४-४० प्रत्याङ्भ्यां श्रुवःपूर्वस्य कर्ता ॥४१

विप्राय गां प्रतिशृणोति, आशृणोति वा ।

१-४-४१ अनुप्रतिगृणश्च ॥

होत्रे ऽनुगृणाति, प्रतिगृणाति वा ।

१-४-४२ साधकतमं करणम् ॥४४

परशुना छिनत्ति । कन्दुकेन क्रीडति ।

१-४-४३ दिवः कर्म च ॥

अक्षान् दीव्यति, अक्षैर्दीव्यति वा ।

१-४-४४ परिक्रयणे सम्प्रदानमन्यतरस्याम् ॥

शतेन शताय वा परिक्रीतः ।

१-४-३७ क्रुध...यार्थानाम् = क्रुधाद्यर्थकानां धातूनां प्रयोगे, यं प्रति कोपः = यं प्रति रोषो भवति, सः, सम्प्रदानम् (१-४-३२) । क्रोधो ऽमर्षः । द्रोहो ऽपकारः । ईर्ष्या ऽक्षमा । असूया= गुणेषु दोषाविष्करणम् ।

१-४-३८ क्रुध- उपसृष्टयोः =सोपसर्गयोः, क्रुधद्रुहोः = क्रुध् द्रुह् इत्येतयोर्धात्वोः प्रयोगे, यं प्रति कोपः (१-४-३७) सः, कर्म= कर्मसंज्ञो भवति ।

१-४-३९ राधीक्ष्योः = राध् ईक्ष् इत्येतयोर्धात्वोः प्रयोगे, यस्य = यद् विषयकः, विप्रश्नः = विविधः प्रश्नः क्रियते, सः, सम्प्रदानम् (१-४-३२) ।

१-४-४० प्रत्याङ्भ्याम् = प्रति आङ् इत्युपसर्गाभ्याम् परस्य, श्रुवः= श्रुधातोः प्रयोगे, पूर्वस्य+कर्ता= (प्रवर्तनारूप) पूर्वव्यापारस्य कर्ता, सम्प्रदानम् (१-४-३२) ।

१-४-४१ अनुप्रतिगृणः = अनु प्रति इत्युपसर्गाभ्याम् परस्य गृणातेः प्रयोगे, पूर्वस्य +कर्ता (१-४-४०) सम्प्रदानम् (१-४-३२) ।

१-४-४२ साध-२-३-४६ प्रातिपदिकार्थ... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । साधकतमम्= क्रियासिद्धावत्यन्तमुपकारकम्, करणम्= करणसंज्ञकं भवति । येन साधनेन कार्यं साध्यते तत् करणमिति भावः ।

कीनाशः कुद्दालेन खनति । हलेन कृषति । छात्रःकलमेन लिखति । जीवा नेत्राभ्यां पश्यन्ति । कर्णाभ्यां शृण्वन्ति । जिह्वया लिहन्ति । इत्येतेषु वाक्येषु कुद्दाल-हल-कलम-नेत्र-कर्ण-जिह्वा (पदार्थाःकरणानि) शब्दाः करणवाचकाः । यतः खनने साधनं कुद्दालः । कर्षणे साधनं हलम् । लेखने साधनं कलमः । दर्शने साधने नेत्रे । श्रवणे साधने कर्णौ । लेहने साधनं जिह्वा वर्तन्ते । पूर्वोक्तवाक्येषु करणार्थस्य तिङा ऽनुक्तत्वेन करणरूपार्थस्यापि करणवाचकशब्देभ्य आगमिष्यन्त्या विभक्त्या बोधनीयतया प्रथमाया अप्राप्तौ अनुक्ते करणे तृतीया विभक्तिर्जातेति बोधयेत् । अथ १-४-३२ कर्मणा... सूत्रमुपदिशेत् ।

१-४-४३ दिवः = दिव्धातोः प्रयोगे, साधकतमं (१-४-४२) कर्म= कर्मसञ्ज्ञकं भवति, करणं (१-४-४२) च ।

१-४-४४ परिक्रयणे - नियतकालं भृत्या स्वीकरणं परिक्रयणम् । तत्र, साधकतमम् (१-४-४२) अन्यतरस्याम्= वा, सम्प्रदानम् = सम्प्रदानसंज्ञकं भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-४५ आधारो ऽधिकरणम् ॥४८
खट्वायां स्वपिति । स्थाल्यां पचति ।
तिलेषु तैलं भवति
राष्ट्रोन्नत्यामिच्छाऽस्ति ।
१-४-४६ अधि-शीङ्-स्थासां कर्म ॥४८
खट्वामधिशेते । पीठमधितिष्ठति ।
पीठमध्यास्ते
१-४-४७ अभिनिविशश्च ॥
ग्राममभिनिविशते । 'अभिनिविश्'
इत्यानुपूर्व्यामविकृतायामेव
सूत्रमिदं प्रवर्तते । तेनेह न-
कल्याणे ऽभिनिवेशः ।
१-४-४८ उपान्वध्याङ् वसः ॥
पीठमुपवसति, अनुवसति, अधिवसति,
आवसति वा
(वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः)
एकादश्यामुपवसति ।
१-४-४९ कर्तुरीप्सिततमं कर्म ॥५३
ग्रामं गच्छति ।
१-४-५० तथायुक्तं चाऽनीप्सितम् ॥
ओदनं भुञ्जानो विषं भुङ्क्ते ।
ग्रामं गच्छन्, तृणं स्पृशति ।
१-४-५१ अकथितं च ॥
दुह् याच् पच् दण्ड् रुधि प्रच्छि चि ब्रू शासुँ
जि मन्थ् मुषाम् । कर्मयुक् स्यादकथितं
तथा स्यान्नीहृकृष्वहाम् ॥
गां दोग्धि पयः । बलिं याचते वसुधाम् ।
तण्डुलानोदनं पचति ।दुर्वृत्तं शतं दण्डयति ।
व्रजमवरुणद्धि गाम् । पथिकः पथिकं पन्थानं
पृच्छति ।वृक्षमवचिनोति फलानि । माणवकं
धर्मं ब्रूते, शास्ति वा । शतं जयति देवदत्तम् ।
सुधां क्षीरनिधिं मथ्नाति । शतं मुष्णाति
देवदत्तम् । ग्राममजां नयति हरति कर्षति
वहति वा ।
(अर्थनिबन्धनेयं संज्ञा)
बलिं भिक्षते वसधाम् ।

१-४-४५आधा- २-३-२८ अपादाने... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । आधारः= आश्रयः, अधिकरणम्=अधिकरणसंज्ञको भवति । बालोपलालनानुसारेणेत्यर्थमुपदिशेत् । (द्वितीयावृत्तौ तु - औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा । आधारः= कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधार इति बोधयेत्) अथ २-३-३६ सप्तम्यधि... सूत्रमुपदिशेत् ।

१-४-४६ अधि... साम्= अधिपूर्वकाणां शीङ् स्था आस् इत्येतेषां धातूनां प्रयोगे, आधारः (१-४-४५) कर्म=कर्मसंज्ञको भवति ।

१-४-४७ अभिनिविशः=अभिनि इति समुदायपूर्वकस्य विश्धातोः प्रयोगे, आधारः (१-४-४५) कर्म (१-४-४६) ।

१-४-४८ उपा... वसः=उप अनु अधि आङ् इति पूर्वकस्य वस्धातोः प्रयोगे, आधारः (१-४-४५) कर्म (१-४-४६) ।

वसे- अत्राऽर्थशब्दो निवृत्तिवाची, अश् धातुश्च भोजनार्थकः । अतो वार्तिकार्थः फलति- अश्यर्थस्य = भोजननिवृत्तिवाचिनः, वसेः= वस्धातोः, प्रतिषेधो वक्तव्यः=आधारस्य कर्मसंज्ञायाः प्रतिषेधो वाच्य इति ।

१-४-४९ कर्तुः + ईप्सिततमम् = कर्तृवृत्तिक्रियया सम्वन्द्धुमिष्टतमं (कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयीभूतं) वस्तु, कर्म= कर्मसंज्ञकं भवति । कर्मेत्यनुवृत्तावपि पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम् ।

१-४-५० तथायुक्तम् = ईप्सिततमवत् क्रियया युक्तम्, अनीप्सितं च = ईप्सितभिन्नमपि, कर्म (१-४-४९) ।

१-४-५१ अक-अपादानादिविशेषैरविवक्षितं दुहादीनां नीहृकृष्वहां च धातूनाम्, कर्मयुक्= कर्मणा युक्तम्, अकथितम्= गौणम्, कर्म (१-४-४९) । अत्र नागेशः- कर्मयुक्त्वं धात्वर्थव्यापारात् प्राक् तदनन्तरं वा –

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्)
कुरून् स्वपिति । मासमास्ते ।
गोदोहमास्ते । क्रोशं स्वपिति ।

१-४-५२ गति- बुद्धिप्रत्यवसानार्थ-शब्दकर्माऽकर्मकाणामणिकर्ता स णौ ॥५३

गमयति माणवकं गृहम् । बोधयति
माणवकं धर्मम् । भोजयति
माणवकमोदनम् । पाठयति व्याकरणं
छात्रान् । अङ्के वासयति पुत्रम् ।
शत्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदयत् ।
आशयच्चाऽमृतं देवान् वेदमध्यापयद् विधिम् ॥
आसयत् सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ॥
गत्याद्युक्तेर्नेह-पाचयत्योदनं देवदत्तेन ।
(जल्पति-प्रभृतीनामुपसंख्यानम्)
जल्पयति धर्मं पुत्रं देवदत्तः ।
(दृशेश्च)
दर्शयति पुत्रं पितरम् ।
(नीवह्योर्न)
नाययति वाहयति वा भारं भृत्येन ।
(नियन्तृकर्तृकस्य वहेरनिषेधः)
वाहयति रथं वाहान् सूतः ।
नियन्तृ-नियन्ता= सारथिः ।
(आदिखाद्योर्न)
आदयते खादयति वा माणकेनौदनम् ।
(भक्षेरहिंसार्थस्य न)
भक्षयत्यन्नं वटुना ।
हिंसायां तु भक्षयति बलीवर्दान् सस्यम् ।
(शब्दायतेर्न)
शब्दाययति देवदत्तेन ।

१-४-५३ हृक्रोरन्यतरस्याम् ॥

हारयति कारयति वा कटं
देवदत्तं देवदत्तेन वा ।
(अभिवादिदृशोरात्मनेपदे वेति वाच्यम्)
अभिवादयते गुरुं देवदत्तं देवदत्तेन वा । दर्शयते राजानं राजभक्तान् राजभक्तैर्वा ।

१-४-५४ स्वतन्त्रः कर्ता ॥५५

तत्सम्वद्धत्वम् । तत्र ब्रुविशास्यतिरिक्ते धात्वर्थव्यापारात् प्रागेव तत्सम्बद्धत्वं, तद्विषये तु तदनन्तरं तत्सम्वद्धत्वं वोध्यम् । तत्र सति सम्भवे प्राक् तत्सम्बद्धत्वमेव ग्राह्यमिति । 'तेन पाणिना कांस्यपात्र्यां गां पयो दोग्धि' इत्यत्र पाणिकांस्यपात्र्योर्न कर्मत्वम् । तयोः पयसा धात्वर्थ- व्यापारात् प्राक् सम्बद्धत्वाऽभावात् ।

अकर्मक- यथोपदिशति भर्तृहरिः-

कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् ।
देशाश्चा ऽकर्मकाणाञ्च कर्मसंज्ञा भवन्ति च ॥ इति ।

१-४-५२ गति- प्रत्यवसानम्=भोजनम् । गति...काणाम्=गत्यर्थक-बुद्ध्यर्थक-भोजनार्थक शब्दकर्म-काणामकर्मकाणां च धातूनाम्, अणि=अण्यन्तावस्थायाम्, कर्ता=यः कर्ता ऽस्ति, सः=स कर्ता, णौ= ण्यन्तावस्थायाम्, कर्म (१-४-४९) ।

१-४-५३ हृक्रोः=हृधातोः कृधातोश्च, अणि + (यः) कर्ता+ सः +णौ (१-४-५२) अन्यतरस्याम् = वा, कर्म (१-४-४९) ।

अभि-आत्मनेपदे=आत्मनेपदविषयकयोः, अभि... दृशोः = अभिपूर्वकवादिधातोर्दृश्धातोश्च, अणि+ (यः) कर्ता+ सः +णौ (१-४-५२) वा =विभाषया, कर्म (१-४-४९) इति वाच्यम् ।

१-४-५४ स्वत- ७-२-५ हम्यन्त... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । स्वतन्त्रः= क्रियायां स्वतन्त्रः (क्रियायां पराधीनता-रहितः) कर्ता= कर्तृसंज्ञको भवति ('कर्ता' इत्युच्यते) इति सूत्रार्थः । यथा -वालकः स्वपिति, इत्यत्र शयनक्रियायां वालकः स्वतन्त्रो ऽस्ति । अतोऽत्र बालकः कर्ता वर्तते । छात्रः कलमेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-५५ तत्प्रयोजको हेतुश्च ॥ १-४-५६ प्राग्रीश्वरान्निपाताः ॥ ९८ १-४-५७ चादयोऽसत्त्वे ॥ ५८	प्र.१-४-५८ प्रादयः ॥ द्वि.१-४-५८ उपसर्गाः क्रियायोगे ॥

लिखति, इत्यत्र लेखनक्रियायां छात्रः स्वतन्त्रोऽस्ति। अतोऽत्रच्छात्रः कर्ता वर्तते । कलमस्तु लेखनक्रियायां छात्राऽधीनो वर्तते स्वतन्त्रो नास्ति। अतः कलमः कर्ता न वर्तते। इत्युपदिश्य भृत्यो भारं वहति, इत्यत्र भृत्यो वहनक्रियायां स्वतन्त्रः= पराधीनता- रहितो वर्तते। अतोऽत्र भृत्यः कर्ता वर्तते, इत्युपदेश्यम्। अथा ऽत्र यदि भृत्यः स्वतन्त्रः स्यात् तदा परेषां भारं कथं वहेत् ? स तु स्वाम्यधीनः प्रतीयत इति यदिच्छात्राः शङ्केरन्, तदा ऽधोनिर्दिष्टरूपेण तेषामाकाङ्क्षा शमयितव्या। यथा वत्साः ? ना ऽ हमुपदिष्टवान् "भृत्यः सर्वत्र स्वतन्त्रो ऽस्ति, स्वामिनो ऽप्यधीनो नास्तीति" अहं तु 'वहनक्रियायां भृत्यः स्वतन्त्रो वर्तते, इत्युपदिष्टवान्। यदि तु भारवहनाय भृत्यं स्वामी नियोजयति तदानीं भृत्यः स्वतन्त्रो न भवति। भृत्यो भारं वहति इत्यत्र तु वह्धातोरर्थो वहनाय नियोजनं नास्ति। प्रापणमेव हि वह्धातोरर्थः। तत्र भृत्यः स्वतन्त्र एव। अर्थाद् वाक्यश्रवणे ऽनुमानादिना पराधीनता - प्रतीतावपि धात्वर्थमात्रविचारे स्वतन्त्रः प्रतीयते चेत् स स्वतन्त्रः कर्ता इत्युच्यते। भृत्यो भारं वहति, इत्यत्र च वह्धातोरर्थमात्रविचारे भृत्यः स्वतन्त्र एव प्रतीयते। तत्र पराधीनता-प्रतीतिस्तु, अनुमानादिगम्येत्यादि- रीत्या स्फुटं बोधयितव्यम्। इति।

(क) अथ बालको हसति, छात्रः कलमेन लिखति, एवमेव छात्रः पठति, इत्येतेषु वाक्येषु प्रयुक्ता धातवः पाणिनिना धातुपाठ- पठितेष्वन्यतमाः (ख) अथ यदि माता बालकं हसनाय प्रेरयति (प्रवर्तयति) गुरुश्च छात्रं लेखनाय प्रेर (प्रवर्त) यति, एवमेव गरुश्छात्रं पठनाय प्रेर (प्रवर्त) यति इति वक्तव्यं तदा केवला धातवः के प्रयोक्तव्याः ? यैः प्रवर्तनाऽर्थोऽपि बोध्येत। न हि तत्र हस् लिख् पठ् धातवः प्रयोक्तुं शक्यन्ते। यतः, हसनं लेखनं पठनमेव हि तेषां क्रमशोऽर्थः। न तु तेषां प्रेरण (प्रवर्तन) मप्यर्थः। इति शिक्षकश्छात्राणामाकाङ्क्षामुद्भाव्य १-४-५५ तत्प्रयोजको ...सूत्रमुपदिशेत्।

१-४-५५ तत्प्र-१-४-५४ स्वतन्त्रः... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र

(क)

श्यामपाटी-प्रयोगो यथा-१-४-५४ स्वतन्त्रः कर्ता ॥

१-४-५५ तत्प्रयोजको (क) हेतुश्च ॥ इति।

अत्र तच्छब्देन पूर्वसूत्रोपात्तः कर्ता गृह्यते, सर्वनाम्नां पूर्वपरामर्शित्वात्। तत्प्रयोजकः = कर्तुः प्रयोजकः = कर्तुः प्रेरकः= कर्तुः प्रवर्तकः, (क) = कर्ता = कर्तृसंज्ञकः, हेतुश्च= हेतुसंज्ञकश्च भवति। अर्थात् कर्तुः प्रवर्तकः कर्ता ऽप्युच्यते हेतुरप्युच्यते। अत उपरि १-४-५४ स्वत... सूत्रे निर्दिष्टेषु (क) वाक्येषु वालकः, छात्रः, कर्तारौ। (ख) वाक्येषु माता गुरुः प्रयोजकौ = कर्तारौ हेतू च। एतेन (ख) वाक्येषु प्रयोजकः = कर्ता हेतुश्च भवतीति स्फुटमेव। हेतौ (प्रयोजके) कर्तरि सति केवला धातवो न प्रयुज्यन्ते, किन्तु धातुपाठपठितेभ्यो मूलधातुभ्यो णिच्प्रत्ययं कृत्वा णिजन्ता धातवः प्रयुज्यन्ते। अतः १-४-५४ स्वतन्त्र... सूत्र- दर्शित (ख) वाक्योक्त- भाव- बोधनाय हस्, लिख् पठ् धातुभ्यो णिच्प्रत्ययं कृत्वा हासि, लेखि, पाठि, इति णिजन्ता धातवः प्रयोक्तव्या भवन्ति। तथा हि इति वदन् ३-१-२६ हेतुमति च - सूत्रमुपदिशेत्।

१-४-५६ प्राग्री- रीश्वरात् +प्राक् = १-४-९६ अधिरीश्वरे-सूत्रात् पूर्वतः, निपाताः='निपातसंज्ञका भवन्ति' इत्यधिक्रियते।

१-४-५७ चाद- असत्त्वे = द्रव्यभिन्ने ऽर्थे वर्तमानाः, चादयः = च वा ह इत्यादयः, निपाताः (१-४-५६)। लिङ्गसंख्यान्वितं द्रव्यम्।

प्र. १-४-५८ प्रादयः - असत्त्वे (१-४-५७) प्रादयः= प्र परा... प्रभृतयः, निपाताः (१-४-५६)।

द्वि. १-४-५८ उप-प्रादयः (प्र. १-४-५८) क्रियायोगे =धात्वर्थयोगे, उपसर्गाः = उपसर्गसंज्ञका भवन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(अन्तः शब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्)

अन्तर्धा । अन्तर्धिः । अन्तर्भवाणि ।

(श्रच्छब्दस्योपसंख्यानम्)

श्रद्धा ।

(दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः)

दुःस्थितिः । दुर्भवानि । दुर्नीतम् ।

१-४-५९ गतिश्च ॥७८

अभ्युद्धरति ।

(कारिकाशब्दस्योपसंख्यानम् ।)

कारिकाकृत्य

१-४-६० ऊर्यादिच्विँडाचश्च ॥

ऊरीकृत्य । शुक्लीकृत्य । पटपटाकृत्य ।

१-४-६१ अनुकरणं चाऽ नितिपरम् ॥

खाट्कृत्य ।

अनितिपरमित्युक्तेर्नेह-खाडिति कृत्वा निरष्ठीवत् ।

१-४-६२ आदरानादरयोः सदसती ॥

सत्कृत्य । असत्कृत्य ।

१-४-६३ भूषणे ऽलम् ॥

अलंकृत्य ।

१-४-६४ अन्तरपरिग्रहे ॥

अन्तर्हत्य ।

अपरिग्रहे इत्युक्तेर्नेह-अन्तर्हत्वा गतः ।

१-४-६५ कणेमनसी श्रद्धाप्रतिघाते ॥

कणेहत्य मनोहत्य वा पयः पिबति ।

अन्तः - उदाहरणेषु- क्रमशः ३-३-१०६ आत... इत्यङ् । ३-३-९२ उप... इति किः । ८-४-१६ आनि... इति णत्वम् ।

श्रच्छ - श्रद्धा प्राग्वदङ् ।

दुरः- उदाहरणेषु - आद्ये ८-३-६५ उपसर्गात्... +नुँम्विसर्ज... इति षत्वा ऽभावः । अन्त्ययोः- क्रमशः ८-४-१६ आनि... ८-४-१४ उप... इति णत्वा ऽभावः ।

१-४-५९ गतिश्च- प्रादयः (१-४-५८) क्रियायोगे (द्वि. १-४-५८) गतिः = गतिसंज्ञकाः, उपसर्गाः (द्वि. १-४-५८) च भवन्ति । अत्र सूत्रे चकारः किमर्थः ? उपसर्गसंज्ञायाः समावेशार्थः । अन्यथा १-४-१ आकडारा... इति पर्यायः स्यात् । गतिसंज्ञायाः फलम् -उदाहरणे ८-१-७० गति... इत्यनुदात्तः । **कारिकाशब्दस्य,** क्रियायोगे (द्वि. १-४-५८) उपसंख्यानम्= गतिसंज्ञा भवतीति वक्तव्यम् ।

गतिसंज्ञायाः फलम् उदाहरणे २-२-१८ कुगति... इति समासः । समासत्वाच्च ७-१-३७ समासेऽनञ्पूर्वे... इति क्त्वो ल्यप् । एवमग्रिमसूत्रोदाहरणेष्वपि बोध्यम् ।

१-४-६०ऊर्यादिच्विँडाचः = ऊरीप्रभृतिगणपठितशब्दाश्च्विँप्रत्ययान्ता डाच् प्रत्ययान्ताश्च शब्दाः, क्रियायोगे (द्वि. १-४-५८) गतिः (१-४-५९) ।

१-४-६१ अनु- अनितिपरम्= परत इतिशब्दरहितम्, अनुकरणम् = अनुकरणवाचि शब्दस्वरूपम्, क्रियायोगे (द्वि. १-४-५८) गतिः (१-४-५९) ।

१-४-६२ आद-सदसती= सत् असत् इत्येतौ शब्दौ, आद....रयोः= (यथासंख्यम्) आदरे अनादरे चार्थे, गतिः (१-४-५९) ।

१-४-६३ भूषणे= भूषणेऽर्थे, अलम् = अलं शब्दः, गतिः (१-४-५९) ।

१-४-६४ अन्तः = अन्तर् इति शब्दः, अपरिग्रहे= अपरिग्रहेऽर्थे, गतिः (१-४-५९) । उदाहरणस्य मध्ये हत्वेत्यर्थः । प्रत्युदाहरणस्य हतं परिगृह्य गत इत्यर्थः ।

१-४-६५ कणेमनसी= कणेमनश्शब्दौ, श्रद्धाप्रतिघाते= अभिलाषनिवृत्त्यर्थे, गतिः (१-४-५९) । कणेशब्दः सप्तमीप्रतिरूपको निपातोऽभिलाषातिशये वर्तते । मनः शब्दो ऽप्यत्रैवेति-दीक्षितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-६६ पुरो ऽव्ययम् ॥६८
पुरस्कृत्य ।
१-४-६७ अस्तं च ॥
अस्तंगत्य पुनरुदेति सूर्यः ।
१-४-६८अच्छ गत्यर्थवदेषु ॥
अच्छगत्य । अच्छोद्य ।
१-४-६९ अदो ऽनुपदेशे ॥
अदः कृत्य ।
अनुपदेशे इत्युक्तेर्नेह-अदः कृत्वा ऽदःकुरु ।
१-४-७० तिरो ऽन्तर्धौ ॥ ७१
तिरोभूय ।
१-४-७१ विभाषा कृञि ॥ ७५, ७८
तिरस्कृत्य, तिरःकृत्य,
तिरः कृत्वा । अन्तर्धावित्यनुवृत्तेर्नेह-
तिरः कृत्वा काष्ठं तिष्ठति ।
१-४-७२ उपाजे ऽन्वाजे ॥
उपाजेकृत्य, उपाजे कृत्वा । अन्वाजेकृत्य, अन्वाजे कृत्वा ।

१-४-७३ साक्षात्प्रभृतीनि च ॥
(साक्षात्प्रभृतिषु च्व्यर्थवचनम्)
साक्षात्कृत्य, साक्षात् कृत्वा ।
१-४-७४ अनत्याधान उरसिमनसी ॥
उरसिकृत्य उरसि कृत्वा ।
मनसिकृत्य, मनसि कृत्वा ।
१-४-७५ मध्ये पदे निवचने च ॥
मध्येकृत्य, मध्ये कृत्वा । पदेकृत्य, पदे कृत्वा ।
निवचनेकृत्य, निवचने कृत्वा ।
१-४-७६ नित्यं हस्तेपाणावुपयमने
हस्तेकृत्य । पाणौकृत्य ।
१-४-७७ प्राध्वं बन्धने ॥
प्राध्वंकृत्य ।
१-४-७८ जीविकोपनिषदावौपम्ये ॥
जीविकाकृत्य । उपनिषत्कृत्य ।

१-४-६६ पुरो - अव्ययम् = अव्ययसंज्ञकः, पुरः=पुरश्शब्दः, गतिः (१-४-५९) । उदाहरणे ८-३-४० नमस्पुर... इति सः ।
१-४-६७ अस्तं- अव्ययम् (१-४-६६) अस्तम् = अस्तम् इति शब्दः, गतिः (१-४-५९) । अस्तंगत्य ६-४-३८ वा ल्यपि... इति मलोपे ६-१-६९ ह्रस्वस्य... इति तुँक् ।
१-४-६८ अच्छ- गत्यर्थवदेषु = गत्यर्थकधातोर्वद्धातोश्च योगे, अव्ययम् (१-४-६६) अच्छ= अच्छशब्दः, गतिः, (१-४-५९) । **अच्छोद्य** ६-१-१५ वचि... इति सम्प्रसारणम् । **अच्छगत्य** अस्तंगत्येतिवत् ।
१-४-६९ अदो- अनुपदेशे= उपदेशभिन्न- विषयः, अदः = अदश्शब्दः, गतिः (१-४-५९) ।
१-४-७० तिरो- अन्तर्धौ = तिरोधाने ऽर्थे वर्तमानः, तिरः=तिरश्शब्दः, गतिः (१-४-५९) ।
१-४-७१ विभाषा-कृञि= कृञ्धातोर्योगे, अन्तर्धौ +तिरः (१-४-५९) विभाषा=वा, गतिः (१-४-५९) । उदाहरणे ८-३-४२ तिरसो... इति वा सत्वम् । गतित्वा ऽभावे सत्वमपि न ।
१-४-७२ उपाजेऽन्वाजे=उपाजे अन्वाजे शब्दौ, कृञि+विभाषा (१-४-७) गतिः (१-४-५९ ।
१-४-७३ साक्षात् प्रभृतीनि=साक्षात्प्रभृतिगणपठितशब्दस्वरूपाणि, प्राग्वत् ।
१-४-७४ अनत्याधाने=असंयोगे, उर... सी=उरसि मनसि शब्दौ प्राग्वत् ।
१-४-७५ मध्ये... चने = मध्ये पदे निवचने शब्दाः, प्राग्वत् ।
१-४-७६ नित्यं- उपयमने = विवाहे गम्ये, हस्तेपाणौ = हस्ते पाणौ शब्दौ, नित्यम्, गतिः (१-४-५९) = गतिसंज्ञकौ भवतः, कृञि (१-४-७१) ।
१-४-७७ प्राध्वम्- बन्धने= बन्धने गम्ये, प्राध्वम्= प्राध्वमिति शब्दः, गतिः (१-४-५९) कृञि (१-४-७१) । प्राध्वमित्यानुकूल्ये वर्तते । उदाहरणस्य बन्धनेनाऽनुकूल्यं कृत्वेत्यर्थः
१-४-७८ जीवि- औपम्ये = उपमाविषयत्वे, जीवि... षदौ= जीविका उपनिषद् इति शब्दौ, प्राग्वत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-७९ ते प्राग् धातोः ॥८१

पुरस्कृत्य । प्रभवति ।

१-४-८० छन्दसि परे ऽपि ॥८१

हरिभ्यां याह्योक आ ।

१-४-८१ व्यवहिताश्च ॥

आमन्द्रैरिन्द्र हरिभिर्याहि ।

१-४-८२ कर्मप्रवचनीयाः ॥९७

गत्युपसर्गसंज्ञाऽपवादः ।

१-४-८३ अनुर्लक्षणे ॥८५

जपमनुप्रावर्षत्

१-४-८४ तृतीयार्थे ॥

नदीमन्ववसिता सेना ।

नद्या सह सम्बद्धेत्यर्थः ।

१-४-८५ हीने ॥

अनुशाकटायनं वैयाकरणाः ।

शाकटायनमपेक्ष्या ऽन्ये वैयाकरणा हीना इत्यर्थः ।

१-४-८६ उपो ऽधिके च ॥

उपपरार्धे हरेर्गुणाः । उपशाकटायनं वैयाकरणाः ।

१-४-८७ अपपरी वर्जने ॥

अपहरेः संसारः । परिहरेः संसारः ।

१-४-८८ आङ् मर्यादावचने ॥

आमुक्तेः संसारः । आकुमारं यशः पाणिनेः ।

१-४-८९ लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः ॥९०

वृक्षं प्रति परि अनु वा विद्योतते विद्युत् । साधुर्देवदत्तो मातरं प्रति परि अनु वा । यदत्र मां प्रति स्यात् परि स्यात् अनु स्याद् वा । वृक्षं वृक्षं प्रतिसिञ्चति परिसिञ्चति अनुसिञ्चति वा ।

१-४-७९ ते प्राग्- ते= गत्युपसर्गसंज्ञकाः, धातोः = धातुतः, प्राक्= पूर्वतः प्रयोज्याः ।

१-४-८० छन्दसि= वेदे, ते +धातोः (१-४-७९) परे = परतः, प्राक् (१-४-७९)+ अपि प्रयोज्याः ।

१-४-८१ व्यव-ते+ धातोः (१-४-७९) व्यवहिताः +च = व्यवहिता अव्यवहिताश्च प्रयुज्यन्ते, छन्दसि (१-४-८०) ।

१-४-८२ कर्मप्रवचनीयाः = कर्मप्रवचनीयसंज्ञका भवन्ति, इत्यधिक्रियते, १-४-९७ विभाषा कृञि इति सूत्रं यावत् ।

१-४-८३ अनु - लक्षणे= लक्ष्यलक्षणभावसम्बन्धे गम्यमाने, अनुः = अनुशब्दः, कर्मप्रवचनीयः (१-४-८२) । उदाहरणे २-३-८ कर्मप्रवचनीय... इति द्वितीया ।

१-४-८४ तृतीयार्थे= साहित्येऽर्थे, अनुः (१-४-८३) कर्मप्रवचनीयः (१-४-८२) । उदाहरणे प्राग्वद् द्वितीया ।

१-४-८५ हीने= उत्कृष्टमपेक्ष्य न्यूने, अनुः (१-४-८३) प्राग्वत् ।

१-४-८६ उपो- अधिके, हीने (१-४-८५) च, उपः= उपशब्दः, प्राग्वत् । उदाहरणयोः- आद्ये २-३-९ यस्मा... इति सप्तमी । अन्त्ये प्राग्वद् द्वितीया ।

१-४-८७ अप वर्जने= वर्जनेऽर्थे, अपपरी= अप परि इत्येतौ शब्दौ, कर्मप्रवचनीयौ (१-४-८२) । उदाहरणयोः २-३-१० पञ्च.... इति पञ्चमी ।

१-४-८८ आङ् मर्यादावचने-मर्यादा उच्यते अस्मिन्= मर्यादावचनम्= २-१-१३ आङ् मर्यादाऽभिविध्योरिति सूत्रम्, तत्रोक्तार्थे= मर्यादाऽभिविध्योः= मर्यादायामभिविधौ चाऽर्थे, आङ्= आङ्शब्दः, कर्मप्रवचनीयः (१-४-८२) । अवधिं विहाय सम्बन्धो मर्यादा । अवधिमभिव्याप्य सरम्बन्धोऽभिविधिः । उदाहरणयोः प्राग्वत् पञ्चमी ।

१-४-८९ लक्ष... प्सासु= लक्ष्यलक्ष्यणभावे इत्थंभूताख्याने भागे वीप्सायां च द्योत्येषु, प्रति...नवः= प्रति परि अनु इत्येते, कर्मप्रवचनीयाः (१-४-८२) । उदाहरणेषु आद्ययोः प्राग्वद् द्वितीया । अन्त्ययोः क्रमशः ८-३-८७ उप...इति ८-३-६५...उप इति न षत्वं कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-९० अभिरभागे ॥

वृक्षमभिविद्योतते विद्युत् । साधुर्देवदत्तो मातरमभि । वृक्षं वृक्षमभिसिञ्चति । भागे तु यदत्र ममाऽभिष्यात् तद् दीयताम् ।

१-४-९१ प्रतिः प्रतिनिधिप्रतिदानयोः ॥

अर्जुनः कृष्णात् प्रति । तिलेभ्यः प्रतियच्छति माषान् ।

१-४-९२ अधिपरी अनर्थकौ ॥

कुतोऽध्यागच्छति । परिस्थितिः ।

१-४-९३ सुः पूजायाम् ॥ ९४

सुसिक्तम् । सुस्तुतम् । पूजायामित्युक्तेर्नेह- सुषिक्तं किं तवात्र ।

१-४-९४ अतिरतिक्रमणे च ॥

अति देवान् कृष्णः । अति सिक्तम् । अति स्तुतम् ।

१-४-९५ अपिः पदार्थ- संभावना ऽन्ववसर्ग-गर्हा-समुच्चयेषु ॥

सर्पिषोऽपि स्यात् । अपि स्तुयाद् राजानम् । अपि सिञ्च । धिग् देवदत्तम्, अपि सिञ्चेत् पलाण्डुम् ।
अपि सिञ्च, अपि स्तुहि ।

१-४-९६ अधिरीश्वरे ॥

अधिभुवि रामः । अधिरामे भूः ।

१-४-९७ विभाषा कृञि ॥

यदत्र मामधिकरिष्यति ।

१-४-९० अभि-अभागे= भागभिन्ने अर्थात् लक्ष्यलक्षणभावे इत्थं भूताख्याने वीप्सायां च द्योत्येषु, अभिः =अभिशब्दः, कर्मप्रवचनीयः (१-४-८२) । उदाहरणेषु-आद्ययोः प्रागवद् द्वितीया । अन्त्ये ८-३-६५ उप... इति न षत्वम् ।

१-४-९१ प्रतिः- प्रतिनिधिप्रतिदानयोः = प्रतिनिधि- प्रतिदानयोरर्थयोर्द्योत्ययोः, प्रतिः = प्रतिशब्दः, कर्मप्रवचनीयः (१-४-८२) । मुख्यस्या ऽभावे तत्सदृशो य उपादीयते स प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनम् = प्रतिदानम् । उदाहरणयोः २-३-११ प्रति... इति पञ्चमी ।

१-४-९२ अधि- अनर्थकौ= द्योत्यार्थरहितौ, अधिपरी= अधि परि इत्येतौ, कर्मप्रवचनीयौ (१-४-८२) । उदाहरणयोः - आद्ये गतिसंज्ञाया बाधाद् ८-१-७० गति... इति निघातो न । अन्त्ये उपसर्गसंज्ञाया बाधाद् ८-३-६५ उप... इति षत्वं न ।

१-४-९३ सुः -पूजायाम् = पूजायां द्योत्यायाम्, सुः= सु इति शब्दः, कर्मप्र... (१-४-८२) । उदाहरणयोः उपसर्गज्ञाया बाधाद् ८-३-६५ उप... इति न षत्वम् । प्रत्युदाहरणे तु उपसर्गसंज्ञायां षत्वं भवत्येव ।

१-४-९४ अति- अतिक्रमणे = अतिक्रमणेऽर्थे, पूजायां (१-४-९३) च, अतिः = अतिशब्दः, कर्मप्र... (१-४-८२) । उदाहरणेषु संज्ञाफलम्- आद्ये द्वितीया । अन्त्ययोरुपसर्गत्वा ऽ भावात् षत्वाऽभावः ।

१-४-९५ अपिः- पदार्थः = अप्रयुज्यमानस्य पदान्तरस्याऽर्थः । संभावनम्= शक्तेरप्रतिघातस्य प्रकाशनम् । अन्ववसर्गः = कामचाराऽभ्यनुज्ञानम् = यथेष्टा ऽऽ चरणे ऽनुमतिदानम् । यथा 'अपि सिञ्च' इत्युदाहरणस्य सिञ्च वा मा वा= यथेच्छं कुर्वित्यर्थः । गर्हा= निन्दा, समुच्चयः= परस्परनिरपेक्षाणामेकत्राऽन्वयः । एषु द्योत्येषु, अपिः= अपिशब्दः, कर्मप्रवचनीयः (१-४-८२) । उदाहरणेषु आद्ये अपिना बिन्दुर्द्योत्यते । सर्पिषो बिन्दुरपि स्यात् इत्यर्थः । सर्पिषो बिन्दुना ऽन्वयो न त्वपिना । अत एव सर्पिश्शब्दान्न द्वितीया । संज्ञाफलम्- उपसर्गसंज्ञाया बाधात् ८-३-८७ उप... इति षत्वा ऽभावः । शेषेषु ८-३-६५ उप... इति षत्वं न ।

१-४-९६ अधि-ईश्वरे= स्वस्वामिभावसम्बन्धे द्योत्ये, अधिः = अधिशब्दः, कर्मप्र. (१-४-८२) । उदाहरणयोः- २-३-९ यस्मा... इति सप्तमी ।

१-४-९७ विभा-कृञि = कृञ्धातोर्योगे, ईश्वरे + अधि (१-४-९६) विभाषा = वा, कर्मप्र... (१-४-८२) । उदाहरणे विनियोक्तुरीश्वरत्वं गम्यते । गतिसंज्ञाया बाधात् ८-१-७१ तिङि... इति निघातो न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-९८ **लः** परस्मैपदम् ॥९९ १-४-९९ तङानावात्मनेपदम् ॥ १-४-१०० **तिङस्त्रीणि** त्रीणि प्रथममध्यमोत्तमाः ॥ १०१, १०२	१-४-१०१ तान्येकवचन द्विवचनबहु- वचनान्येकशः ॥

१-४-९८, ९९ लः प... + तङा- ३-४-७८ तिप् तस् ... सूत्रानन्तरं सूत्रे इमे पाठ्ये । लः = लादेशाः, परस्मैपदम् = परस्मैपदसंज्ञकाः, तङानौ = तङ् (त इत्यत आरभ्य महिङ् इत्यत्रत्य- ङकारावधि प्रत्याहार इति शिक्षणीयम्) आन (शानच् कानच् प्रत्यययोरनुबन्धलोपे, आन इत्यवशिष्यते इति शिक्षणीयम्) श्च, आत्मनेपदम् = आत्मनेपदसंज्ञकौ भवतः । अथ शिक्षकेणच्छात्राः सावधानाः कार्याः । यथा- अयि वत्साः ? १-४-९८ लः प... सूत्रेण तिप् इत्यत आरभ्य महिङ्पर्यन्तानां परस्मैपदसंज्ञा भवतीत्युच्यते । १-४-९९ तङा... सूत्रेण च त इत्यत आरभ्य महिङ्पर्यन्तानामात्मनेपदसंज्ञा भवतीत्युच्यते । तत्र तिप् इत्यत आरभ्य मस्पर्यन्तानां तु परस्मैपदसंज्ञा भवति । अर्थात् तिप् इत्यत आरभ्य मस् पर्यन्ताः परस्मैपदशब्देन व्यवह्रियन्ते, इत्यत्र न काचिदपि विप्रतिपत्तिः । किन्तु त इत्यत आरभ्य महिङ्पर्यन्तानां तु का संज्ञा भवेत् ? परस्मैपदसंज्ञा ? आत्मनेपदसंज्ञा वेति विप्रतिपत्तिः । न खलूभे संज्ञे समाविशतः । यत उक्तं पूर्वम् १-४-१ आक... सूत्रम्, इत्युद्बोध्य शङ्कां द्रढयित्वा १-४-२ विप्र... सूत्रोद्बोधनपुरस्सरं त इत्यत आरभ्य महिङ्पर्यन्तानामात्मनेपदसंज्ञा भवति । अर्थात् त इत्यत आरभ्य महिङ्पर्यन्ता आत्मनेपदशब्देन व्यवह्रियन्ते, इति समाधेयम् । एवम् आन (शानच् कानच्) विषयेऽपि । अर्थात् तिङक्षु ति इत्यत आरभ्य मस्पर्यन्ताः परस्मैपदशब्दवाच्याः । त इत्यत आरभ्य महिङ्पर्यन्ता आत्मनेपदशब्दवाच्याः । तिङ्भिन्नेषु लस्थानिकेष्वादेशेषु शानच्कानचौ, आत्मनेपदशब्दवाच्यौ, शेषे तु परस्मैपदशब्दवाच्यत्वम् इति च्छात्राः स्फुटं बोधनीयाः।

१-४-१०० तिङस्त्रीणि १-४-९९ तङाना... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । तिङः = तिप् इत्यत आरभ्य महिङ् पर्यन्तानाम्, त्रीणि+ त्रीणि= प्रति त्रिकम्, प्रथम- मध्यमोत्तमाः = प्रथम (पुरुष) संज्ञकानि मध्यम (पुरुष)संज्ञकानि उत्तम(पुरुष)संज्ञकानि भवन्ति । इत्युपदिश्य शिक्षकः पूर्वमुपदिष्टं १-३-१० यथा... सूत्रमुद्बोधयन् स्फुटप्रतिपत्तये ऽधोनिर्दिष्टरूपेण श्यामपाट्यां लिखेत् ।

१	२	३	(परस्मैपदम्)	१	२	३	(आत्मनेपदम्)
तिप्	तस्	झि	"	त	आताम्	झ	"
सिप्	थस्	थ	"	थास्	आथाम्	ध्वम्	"
मिप्	वस्	मस्	"	इट्	वहि	महिङ्	"

अथ १-४-१०१ तान्येकवचन... सूत्रमुपस्थापयेत् ।

१-४-१०१ तान्येक- १-४-१०० तिङस्त्रीणि... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- १-४-१००

(क) (ख) (ग)

तिङ स्त्रीणि त्रीणि... ॥ १-४-१०१ तानि= (क)+(ख)+(ग) एक..कशः ॥ इति । तानि = (क)+(ख)+(ग) = तिङस्त्रीणि त्रीणि, एकशः = प्रत्येकम्, एकवचनद्विवचनबहुवचनानि = एकवचन-द्विवचन-बहुवचन-संज्ञकानि भवन्ति । अथ १-३-१० यथा... सूत्रमुद्बोधयन् पूर्ववत् स्फुटप्रतिपत्तये ऽधोनिर्दिष्टरूपेण श्यामपाट्यां लिखेत् । यतश्छात्राः तिप्, सिप्, मिप्, त, थास्, इट्, प्रत्येकमेकवचनम् । तस्, थस्, वस्, आताम्, आथाम्, वहि, प्रत्येकं द्विवचनम् । झि, थ, मस्, झ, ध्वम्, महिङ्, प्रत्येकं वहुवचनम् । इति स्फुटं बुध्येरन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमाऽध्याये चतुर्थः पादः

१-४-१०२ सुँपः ॥ १-४-१०३ विभक्तिश्च ॥ १-४-१०४ युष्मद्युपपदे समानाधिकरणे	**स्थानिन्यपि मध्यमः** ॥१०५, १०६, १०५ त्वं पठसि । त्वं लभसे ।

एकवचनम्	द्विवचनम्	बहुवचनम्	
तिप्	तस्	झि (प्रथमपुरुषः)	परस्मैपदम्
सिप्	थस्	थ (मध्यमपुरुषः)	"
मिप्	वस्	मस् (उत्तमपुरुषः)	"
त	आताम्	झ (प्रथमपुरुषः)	आत्मनेपदम्
थास्	आथाम्	ध्वम् (मध्यमपुरुषः)	"
इट्	वहि	महिङ् (उत्तमपुरुषः)	"

अथ १-३-७८ शेषा... सूत्रमुपस्थापयितुकामः शिक्षक एतदर्थोपदेशात् पूर्वम् १-३-१२ अनु... सूत्रतः १-३-७७ विभा... सूत्रपर्यन्तानि सर्वाणि सूत्राणि दर्शयन् सूत्रैरेतैः स्वस्मिन् स्वस्मिन् निमित्ते विद्यमाने, आत्मनेपदं विधीयते, यत्रैतेषां निमित्तं न भवति (यत्रेमानि सूत्राणि न प्रवर्तन्ते) तत्र प्रकृतसूत्रं प्रवर्तत इतिच्छात्रान् बोधयन् १-३-७८ शेषात्... सूत्रार्थमुपदिशेत् ।

१-४-१०२ सुँपः ८-३-२२ हलि सर्वेषाम्- सूत्रानन्तरं ४-१-२ स्वौजस... सूत्रं दर्शयित्वा सूत्रमिदं पाठचम् । अत्रा ऽधोनिर्दिष्टरूपेण श्यामपाट्यां सूत्राणि लेख्यानि । यथा- १-४-१०० तिङः

(क) (ख) (ग) (घ)

त्रीणि त्रीणि प्रथम... ॥ १-४-१०१ तानि एकवचन... न्येकशः ॥ १-४-१०२ सुँपः (क) (ख) (घ) (ग)॥

इति । शिक्षक इत्थं श्यामपाट्यां दर्शयन् १-४-१०१ तान्ये... सूत्रस्येव प्रकृतसूत्रस्या ऽप्यर्थःकेवलं तत्रत्येन 'तिङ :' इति पदेन, अत्रत्यं 'सुँपः' इति पदं विनिमातव्यम् इति बोधनपुरस्सरं सुँ, अम्, इत्यादिनि प्रत्येकमेकवचनानि । औ औट् इत्यादीनि प्रत्येकं द्विवचनानि । जस् शस् इत्यादीनि प्रत्येकं बहुवचनानीति बोधयेत् । अथ १-४-१०३ विभक्तिश्च-सूत्रमुपदिशेत् ।

१-४-१०३ विभ- १-४-१०२ सुँपः- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्रेत्थं श्यामपाटीप्रयोगः-

(क)

१-४-१०० तिङः......... तमाः ॥

(ख)

१-४-१०२ सुँपः ....॥

१-४-१०३ (ख) (क) विभक्तिश्च ॥ इति ।

(ख)= सुँपः, (क) = तिङः=तिङश्च, विभक्तिः = विभक्तिसंज्ञा भवति । अत्र ४-१-२ स्वौज... सूत्रं दर्शयित्वा सुँप्प्रत्याहारं ३-४-७८ तिपतस्...... सूत्रं दर्शयित्वा तिङ्प्रत्याहारं च शिक्षक उद्बोधयेत् । अथ यथा कश्चिदपि जनो निर्वस्त्रो न भवति । अर्थात् किमपि वस्त्रं धारयति । तथैव किमपि प्रातिपदिकमस्वादिपरकं न भवति । अर्थात् कस्माच्चिदपि प्रातिपदिकात् परतः ४-१-२ स्वौज... सूत्रेण विधेयेषु सुँ- प्रभृतिष्वन्यतमः प्रत्ययः प्रयोज्यत एव । यथा ऽऽपणादानीते वस्त्रे समाने ऽपि स्यूतिपरिधान-कला-भेदेन वस्त्राणि परिधातारश्च विभिन्नाकाराणि भवन्ति, तथैव सुँप्रभृतिषु समानेष्वपि प्रक्रिया-भेदेन शब्दानां रूपाणि विभिन्नानि भवन्ति । तानीतः परमुपदिश्यन्ते । इति शिक्षकेणच्छात्रा बोधयितव्याः । अथा ऽत्र किं नाम प्रातिपदिकम् ? इतिच्छात्राणामाकाङ्क्षां जागरयित्वा "नाम प्रातिपदिकम्, इत्युच्यते" इत्युपदेशः कर्तव्यः । १-२-४५ अर्थ... १-२-४६ कृत्त... सूत्रे साम्प्रतं नोपदेश्ये । तात्पर्य-बोधाऽसंभवेनच्छात्राणां गुरुभारा ऽनुभवा ऽऽपत्तेः । अथ पठत्सुच्छात्रेष्वन्यतमः श्यामो ऽस्ति चेत् तदा शिक्षकेणच्छात्राः संबोध्याः । वत्साः ? श्यामः पठति इति वक्तव्ये 'श्यामः' इति प्रयोगः कथं सिध्यति ? इति विचारयामेति । ततः श्याम इति प्रातिपदिकम् । अतस्तस्मात् ४-१-२ स्वौज... सूत्रेण परतः सुँ, औ, जस् एते प्रत्ययाः प्राप्ताः । तेषु कतमो भवेदिति जिज्ञासां जागरयित्वा १-४-२२ द्व्येक... सूत्रं प्रस्तुत्यम् ।

१-४-१०४ युष्म- १-३-७८ शेषात्... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । साम्प्रतं प्रकृतसूत्रस्य 'स्थानिन्यपि' इत्यंशस्या ऽर्थो नोपदेश्यो बोधभारा ऽऽपत्तेः । (द्वितीयावृत्तौ तु स्थानिन्यपि= प्रयोगविवक्षायामपि, इत्यर्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपदेश्य:) अत: शेषभागमात्रस्यार्थ उपदेश्य:। यथा- समानाऽधिकरणे + युष्मदि + उपपदे = समानाऽधिकरणे युष्मच्छ्दे उपपदे सति, मध्यम: = मध्यमपुरुषो भवति। इति। अर्थात् तिङ् युष्मच्छब्दश्च यत्र समानाधिकरणौ तत्र मध्यमपुरुषो भवति। अत्र शिक्षक: समानाधिकरण: कीदृश: ? व्यधिकरण: कीदृश: ? इतिच्छात्रान् परीक्षेत। सत्यावश्यके ३-४-६९ ल: क... सूत्रे बोधितमिमं विषयं पुनरुद्बोधयेत्। अथ शिक्षक: प्रकृतप्रयोगे मध्यमपुरुषो भवति न वेति विचाराय श्यामपाट्यां पूर्वोक्तं वाक्यं लिखेत्। यथा- "श्याम: पठति" इति।

अथ शिक्षको ऽधोनिर्दिष्टरूपेण च्छात्रान् बोधयेत्। अयि वत्सा: ? य: शब्दो यमर्थं बोधयति, स शब्दस्तत्रा ऽर्थे वसतीति विभावनीयम्। अग्निशब्दो वह्निं बोधयति, अतो ऽग्निशब्दो बह्नौ वसतीति ज्ञायते। जलशब्द: पानीयं बोधयति, अतो जलशब्द: पानीये वसतीति ज्ञायते । (स्वनिष्ठ वाचकतानिरूपितवाच्यतासम्बन्धेन शब्दो ऽर्थे वसतीति शिक्षकेण बोध्यं परन्तु च्छात्रास्तथा नोपदेश्या:) प्रकृतवाक्ये च लकार: कर्तारं बोधितवान्। तेन लकारस्य स्थाने जातस्तिङ् अपि कर्तारमेव बोधयति। अत: प्रकृते तिङ् कर्तरि वसति इति स्फुटमेवेति। अथ को नाम कर्ता ? इति च्छात्रान् परीक्षमाण: सत्यावश्यके ३-४-६९ ल: क... सूत्रे शिक्षितं विषयममुं पुनरुद्बोधयन् प्रकृतवाक्ये कर्ता श्यामो वर्तते, अत: श्यामशब्दो ऽपि कर्तरि वसति। अर्थात् प्रकृतवाक्ये तिङ् श्यामशब्दश्च कर्तरि वसत:= तिङ् शयामशब्दश्च समानाधिकरणौ स्त इति बोधयेत्। अत्र श्यामपाटी-प्रयोगो यथा- श्याम: तिङ्

↓ ↓

कर्ता

अत्र शिक्षकेणा ऽवधेयं यद्, नैष विषयश्छात्राणां बोधगोचरो जातो ऽस्तीति। यत:, तिङ् अपि कर्तारं बोधयति, श्यामशब्दो ऽपि कर्तारं बोधयति, इत्युच्यते। द्वौ कर्तारौ स्त: किमु ? इति च्छात्रमनसि शङ्कान्धकारो वर्तत इति। अतस्ते ऽधोनिर्दिष्टरूपेण बोधयितव्या:। अयि वत्सा: ? (अङ्गुल्या ऽऽत्मानं दर्शयता) अहं खलु साम्प्रतमस्य विद्यालयस्य शिक्षको ऽस्मि। मम नाम शर्माऽस्ति । अतो यूयं विद्यालयस्याऽस्य शिक्षक: शर्मा च एक एवेति मन्यध्वे। वस्तुतस्तु विद्यालयस्याऽस्य शिक्षक: शर्मा च एक एव न। यत: कालान्तरे मयि विद्यालयमेनं मोक्ष्यति, विष्णुमित्रोऽत्र यदि पाठयितुं प्रवर्तेत तदानीमस्य विद्यालयस्य शिक्षक: शर्मा च एक एवेति को ऽपि न मंस्यते। वरमस्य विद्यालयस्य शिक्षको विष्णुमित्रश्च, एक एवेति व्यवहारो भवेत्। शर्मा विष्णुमित्रश्च एक एवेति च को ऽपि न मंस्यते। अत: सारांशे विचारणीयं यत्, शिक्षक इति विद्यालयस्य पदं वर्तते, तत्र यदा य: सङ्गच्छते तदा विद्यालयस्य शिक्षक: स च एक एवेति व्यवह्रियते। वस्तुतस्त्वेक एव न। अन्यथा शर्मा विष्णुमित्रश्च एक एवेति व्यवहारापत्ति:स्यात्। एवमेव 'कर्ता' इति तिङो ऽर्थ:। तत्र यदा य: सङ्गच्छते स (श्याम:, राम:कृष्ण:, इत्यादिष्वन्यतम:) तिङो ऽर्थश्च एक एवेति प्रतीयते। प्रकृतवाक्ये च तिङो ऽर्थ: कर्ता ऽस्ति, श्यामश्च तत्रैव सङ्गच्छते। अर्थात् तिङ् अपि कर्तारं बोधयति, श्यामशब्दो ऽपि कर्तारं वोधयति। अतस्तिङ् श्यामशव्दश्च कर्तरि वसत:। वत्सा: ? सावधाना भवतेति ब्रुवता शिक्षकेणा ऽधोनिर्दिष्टरूपेण च्छात्रा वोधयितव्या:। वत्सा: ? तिङ् तु कर्तारं बोधयति, अर्थात् तिङो ऽर्थ: कर्ता ऽस्ति, अतस्तिङ् कर्तरि वसतीत्युक्तिरुचिता। श्यामशब्दस्तु स्वयं कर्ता ऽस्ति, स कथं कर्तरि वसेत् ? इति भ्रमो ना ऽनुभाव्य:। यत: श्यामशब्द: कर्ता नास्ति। किन्तु यस्य मनुष्यस्य नाम श्यामो ऽस्ति स मनुष्य: कर्ता ऽस्ति। तं मनुष्यं श्यामशब्दो वोधयति। अत: श्यामशब्दस्या ऽर्थ (मांसपिण्डं=मनुष्य) एव कर्ताऽस्ति। अत: श्यामशव्दो ऽपि कर्तरि वसति। अर्थो नाम शब्दबोध्यं वस्तु। यथा घट:शब्द:। तस्यार्थो जलाधार-भाण्डम्। गौ: शब्द:। तदर्थ: सास्नावान्। एवञ्च तिङ् श्यामशब्दश्च समानाधिकरणौ ज्ञायेते। तेन प्रकृतवाक्ये तिङ्समानाधिकरण: श्यामशब्दो वर्तते, युष्मच्छब्द: समानाधिकरणो नास्ति। तेन प्रकृतवाक्ये मध्यमपुरुषो न भवतीति। अथ- १-४-१०६ अस्म... सूत्रं प्रस्तुत्यम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-१०५ प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ॥
एहि मन्ये ओदनं भोक्ष्यसे, इति भुक्तः सोऽतिथिभिः ।
एतं मन्ये ओदनं भोक्ष्यध्वे, इति भुक्तः सो ऽतिथिभिः ।
यथार्थ-कथने तु एहि मन्यसे, ओदनं भोक्ष्ये इति भुक्तः सो ऽतिथिभिः ।
एत मन्यध्वे ओदनं भोक्ष्यामहे, इति भुक्तः सो ऽतिथिभिः ।

१-४-१०६ अस्मद्युत्तमः ॥
अहं पठामि । अहं लभे ।

१-४-१०७ शेषे प्रथमः ॥
छात्रः पठति । छात्रो लभते ।

१-४-१०८ परः सन्निकर्षः संहिता ॥

१-४-१०९ विरामो ऽ वसानम् ॥

इति प्रथमा ऽध्याये चतुर्थः पादः ।

१-४-१०५प्रहासे = परिहासे गम्यमाने, मन्योपपदे- मन्यः = दैवादिको मन् धातुः उपपदं युष्मदा सम्बद्धं यस्य धातोः सः = मन्योपपदः, तस्मिन् प्रकृति भूते सति, मध्यमः (१-४-१०४) मन्यतेस्तूत्तमः, स चैकवद् भवति । मध्यमोत्तमयोः प्राप्तयोरुत्तममध्यमौ विहितौ ।
अत्र न्यासः- यथाक्रमं युष्मदस्मदोरुपपदयोः समानाधिकरणयोरप्रयुज्यमानयोरप्यर्थस्य विद्यमानत्वादिति ।

१-४-१०६ अस्म- १-४-१०४ युष्मद्युपपदे... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क) (ख)

१-४-१०४ युष्मदि उपपदे समानाधिकरणे..... ॥
१-४-१०६ (ख) अस्मदि (क) उत्तमः ॥ इति ।

(अत्रा ऽपि 'स्थानिन्यपि' इत्यंशो द्वितीयावृत्तावेवोपदेश्यः) अस्या ऽर्थः- (ख) = समानाधिकरणे, अस्मदि = अस्मच्छब्दे, (क) = उपपदे, उत्तमः =उत्तमपुरुषो भवति । इति । प्रकृते समाना ऽधिकरणो ऽस्मच्छब्द उपपदं नास्ति । तेन प्रकृतवाक्ये उत्तमपुरुषो न भवतीति शिक्षको बोधयेत् । इत्थं प्रकृत-वाक्ये मध्यमपुरुषस्योत्तमपुरुषस्य च प्राप्तिर्नास्तीति च्छात्रमस्तिष्के प्रकाशं प्रसार्य १-४-१०७ शेषे... सूत्रमुपस्थापयेत् ।

१-४-१०७ शेषे- १-४-१०६ अस्मद्युत्तमः- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । शेषे= (उक्तादन्यःशेषः) मध्यमोत्तमयोरविषये = मध्यमोत्तमयोरप्राप्तौ, प्रथमः= प्रथमपुरुषो भवति । प्रकृते मध्यमोत्तमयोर्विषयो (मध्यमोत्तमयोः प्राप्तिः) नास्ति । अतः प्रथमपुरुषः (तिप्, तस्, झि) प्राप्त इति बोधयित्वा १-४-२२ द्व्येक... सूत्रमुद्बोधयन् प्रकृते तिङा कर्ता बोधनीयः, कर्ता च प्रकृते एको ऽस्ति । अत एकवचनं (तिप्) भवतीति च्छात्रान् बोधयेत् । अनुबन्धफालनं छात्रैः साधयेत् । अथा ऽधोनिर्दिष्टरूपेण श्यामपाट्यां लिखेत् । यथा-
'पठ्+ति' इति । अथ ३-४-११३ तिङ्शित्.... —
सूत्रमुपदिशेत् ।

१-४-१०८ परः = अतिशयितः, सन्निकर्षः = वर्णानां सन्निधिः, संहिता= संहितासंज्ञको भवति ।

१-४-१०९ विरामः= वर्णानामभावः, अवसानम् = अवसानसंज्ञको भवति ।

इति प्रथमाऽध्याये चतुर्थः पादः ।

इति प्रथमोऽध्यायः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ द्वितीयोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ द्वितीयाध्याये

प्रथमः पादः

२-१-१ समर्थः पदविधिः॥

२-१-२ सुँबामन्त्रिते पराङ्गवत् स्वरे ॥ (२-२-२९)

द्रवत्पाणी शुभस्पती । यत्ते दिवो दुहितर्मर्त भोजनम् । परशुना वृश्चन् ।

(सुँबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानम्)

तीक्ष्णेन परशुना वृश्चन् ।

(षष्ठ्यामन्त्रितकारकवचनम्)

तेँनेह न- अयमग्ने जरिता । एतेनाग्ने ब्रह्मणा ।

(छन्दसि पूर्वाङ्गवच्चेति वक्तव्यम्)

आ ते पितर्मरुतां सुम्नमेतु ।

(अव्ययानां प्रतिषेधो वक्तव्यः)

उच्चैरधीयान ।

(अव्ययीभावस्य त्विष्यत एव)

उपाग्न्यधीयान ।

२-१-३ प्राक् कडारात् समासः॥ २-२-३८

२-१-१ समर्थः- अत्र सूत्रे समर्थशब्दो लक्षणया समर्थाश्रितपरः । पदसंबन्धी विधिर्हि समाससंज्ञादिः । तस्य समर्थेन विशेष्यविशेषणभावाऽसम्भवात् । समर्थशब्दस्य च विग्रहवाक्यतुल्यार्थक इत्यर्थः । समः=विग्रहवाक्येन तुल्यः, अर्थो यस्येति बहुव्रीहौ शकन्ध्वादित्वात् पररूपे समर्थशब्दसिद्धिः । विधिशब्दश्च कर्मसाधनः । शेषषष्ठ्याः समासः । अथ सूत्रार्थः- पदविधिः= पदसम्बन्धी विधिः, समर्थः=समर्थाश्रितो बोध्यः । इति । सामर्थ्यं द्विविधम् । व्यपेक्षारूपमेकार्थीभावरूपं च । तत्र पृथगर्थानां पदानामाकाङ्क्षादिवशाद् यः परस्परं सम्बन्धः सा व्यपेक्षा । परस्परान्वितत्वे सति एकार्थोपस्थितिजनकत्वमेकार्थीभावरूपसामर्थ्यम् । आद्ये विग्रहवाक्यम् । यथा-राज्ञः पुरुषः । इत्यादि । अन्त्ये वृत्तिः । यथा-राजपुरुष इत्यादि ।

२-१-२ सुँबा- सुँप्=सुँबन्तम्, आमन्त्रिते= आमन्त्रिते परे, पराङ्गवत्=आमन्त्रितावयववद् भवति, स्वरे= स्वरे कर्तव्ये । उदाहरणेष्वाद्ये- क्विँबन्तस्य शुभेः षष्ठ्यन्तस्य शुभ इत्यस्य पराङ्गवद्भावाद् ६-१-१९३ आम... इत्याद्युदात्तत्वम् । आष्टमिको निघातस्तु न, पूर्वामन्त्रितस्याऽविद्यमानत्वेन पादादित्वात् । द्वितीये- दिव इत्यस्य ८-१-१९ आम...इति निघातः ।

तृतीये- ६-१-१९३ आम... इत्यनेन परशुनेत्यस्याद्युदात्तत्वम् ।

सुँबन्त- उदाहरणे तीक्ष्णेन इत्यस्य प्राग्वदाद्युदात्तत्वम् ।

षष्ठ्या- पराङ्गवद्भावे षष्ठ्यन्तमामन्त्रितान्तं प्रति यत्कारकं तद्वाचकं चेति परिगणनं कर्तव्यमित्यर्थः ।

तेनेह न- पराङ्गवद्भावाभावाद्, अयम् एतेन इत्यनयोर्नाद्युदात्तत्वम् ।

छन्दसि- उदाहरणे पितरित्यामन्त्रितनिघातेनानुदात्तम् । तस्मात् परं मरुतामित्येतदपि पूर्वाङ्गवद्भावादनुदात्तमेव भवति ।

अव्यया- प्रतिषेधः= पराङ्गवद्भावप्रतिषेधः । पराङ्गवद्भावप्रतिषेधाद् आमन्त्रिताद्युदात्तत्वाऽप्राप्तौ स्वरादिगणेऽन्तोदात्तः पठित उच्चैः शब्दः प्रकृतोदाहरणे तथैव स्थितः ।

अव्ययी- उदाहरणे पराङ्गवद्भावेन ६-१-१९३ आम... इत्याद्युदात्तत्वम् ।

२-१-३ प्राक् क- ५-३-६ सर्वस्य... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र शिक्षकेणाऽवधेयम्- समासशब्दोऽयं यथायोग्यं भावघञन्तः कर्मघञन्तो वा बोध्यः । स्थले स्थले वचनव्यत्ययोऽपि भवतीति । कडारात् प्राक्= २-२-३८ कडाराः...सूत्रात् पूर्वम्, समासः=समास इत्यस्याऽधिकारो भवति । अर्थात्, इत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-१-४ सह सुँपा ॥२-२-२२

पूर्वं भूतः=भूतपूर्वः

२-१-५ अव्ययीभावः ॥२१

प्राक् तत्पुरुषादिदमधिक्रियते ।

२-१-६ अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्था॑ऽभावा॑ऽत्यया॑ऽसंप्रति-शब्दप्रादुर्भाव-पश्चाद्यथाऽऽनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्यान्तवचनेषु ॥८

अधिसरित् । उपग्रामम् । ग्रामं समया, ग्रामं निकषा, आराद् ग्रामात् इत्यादौ तु नाऽव्ययीभावः । आद्ययोः २-३-२ सूत्रस्थेन अभितः...इति वार्तिकेन द्वितीयाया अन्त्ये २-३-२९ अन्यारा...इति सूत्रेण पञ्चम्या विधानसामर्थ्यात् । राष्ट्रस्य समृद्धिः सुराष्ट्रम् । खलानां व्यृद्धि (विगता ऋद्धि) र्दुष्खलम् । मक्षिकाणामभावो निर्मक्षिकम् । हिमस्याऽत्ययोऽतिहिमम् । निद्रा सम्प्रति न युज्यते इत्यतिनिद्रम् । हरिशब्दस्य प्रकाश इतिहरि । विष्णोः पश्चादनुविष्णु । 'ततः पश्चात्स्रंस्यते' इति भाष्यप्रयोगात् पश्चाच्छब्दस्य नाऽयं समासः । योग्यता-वीप्सा-पदार्थानतिवृत्ति-सादृश्यानि यथार्थाः । रूपस्य योग्यमनुरूपम् । एकमेकं प्रति प्रत्येकम् । अर्थमर्थं प्रतीति भाष्यप्रयोगात् प्रतियोगे द्वितीयागर्भं वाक्यमपि । शक्तिमनतिक्रम्य यथाशक्ति । हरेः सादृश्यं सहरि । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् । चक्रेण युगपत् सचक्रम् । यथार्थत्वेनैव सिद्धे सादृश्यग्रहणं गुणभूतेऽपि सादृश्ये समासार्थम् । सदृशः सख्या ससखि । क्षत्राणां सम्पत्तिः सक्षत्रम् । तृणमप्यपरित्यज्य सतृणमत्ति । अग्निग्रन्थपर्यन्तमधीते साग्नि ।

आरभ्य २-२-३८ कडारा...सूत्रात् प्रागवर्तिभिः सूत्रैः समास-संज्ञा क्रियते । अथ-२-१-४ सह...सूत्रमुपदिशेत् ।

२-१-४ सह- २-१-३ प्राक् क...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्राऽधोनिर्दिस्टरूपेण श्यामपाटीमुपयुञ्जीत ।

यथा २-१-२ सुँप् आमन्त्रिते...॥ २-१-३ प्राक् कडारात् समासः ॥ २-१-४ (क) सह सुँपा (ख) ॥ इति । (क) = सुँप् = सुँबन्तम्, सुँपा सह = सुँबन्तेन सह, (ख) समासः = समाससंज्ञकं भवति । इत्यर्थमुपदिशेत् । (अत्र समर्थं समर्थेन, इत्यर्थं न प्रस्तुवीयात्, साम्प्रतं २-१-१ समर्थ...सूत्रस्याऽनुपदेशात्, तत्सूत्रोपदेशे च साम्प्रतमुदाहरण- प्रत्युदाहरणबोधनं दुष्करम् । अतः समासशिक्षणाऽवसाने २-१-१ समर्थः...सूत्रमुपदिशेत् । तदानीमेव समर्थं समर्थेन, इत्यर्थं च बोधयेत्) अथोदाहरणे पूर्वं भूत इति लौकिकविग्रहवाक्यम् । पूर्व+अम्, भूत+सुँ इत्यलौकिकविग्रहः । इति शिक्षयन् सर्वत्राऽलौकिकविग्रहे समासो भवतीति बोधयेत् । अथ लक्षणसमन्वये, सुँबन्तम् प्रकृते पूर्व+अम् इति, 'सुँबन्तेन सह' अत्र सुँबन्तम् = 'भूत+सुँ' इति, तेन सह, समासः = समाससंज्ञकं भवति । 'पूर्व+अम्' इति 'भूत+सुँ' इत्यनेन सह समाससंज्ञकं भवति । अर्थात् 'पूर्व+अम्, भूत+सुँ' इति समुदायः समाससंज्ञको जातः । इति बोधयेत् । अथ 'पूर्व+अम्, भूत+सुँ' इति श्यामपाट्यां लिखित्वाऽस्य समुदायस्य १-२-४६ कृत्त...सूत्रेण (समासतया) प्रातिपदिकसंज्ञां छात्रैः कारयित्वा २-४-७१ सुँपो...सूत्रेण (पूर्व+अम्, भूत+सुँ, इति समुदायः प्रातिपदिकम् । अतः सुँ इति अम् इति च प्रातिपदिकावयवौ तेन) अम् इत्यस्य सुँ इत्यस्य च लुकिच्छात्रैरेव साधिते श्यामपाट्याम् 'पूर्व भूत' इत्यवशेषयेत् । अथ ५-३-५३ भूत... सूत्रं दर्शयित्वा, अत्र भूतशब्दस्य पूर्वप्रयोग–दर्शनाद् भूतशब्दस्य पूर्वप्रयोगो भवतीति ज्ञायते, इति वोधनपुरस्सरं 'भूतपूर्व' इति श्यामपाट्यां लिखित्वा 'भूतपूर्व' इति प्रातिपदिकमिति तु साधितमेव । प्रातिपदिकाच्च ४-१-२ स्वौज...सूत्रेण परतः स्वादयो भवन्तीति पूर्वोक्तोद्बोधनपुरस्सरं श्यामशब्दवत् प्रक्रियेत्युपदिशेत् । प्रातिपदिकत्वसाधनाय, एकदेशविकृतमनन्यवदिति तुच्छात्रेषु शङ्कमानेष्वेवोपस्थापयेन्नाऽन्यथा । अथ २-१-५ अव्ययीभावः-सूत्रं २-१-२२ तत्पुरुषः-सूत्रञ्च शिक्षकोऽष्टाध्याय्यां दर्शयन् २-१-५ अव्ययीभावः- सूत्रात् परैः २-१-२२ तत्पुरुषः- सूत्रात् पूर्वैः सूत्रैः क्रियमाणः समासोऽव्ययीभावसमास उच्यते, इति बोधयेत् । अथाऽव्ययीभावसमासमुपदिदिक्षुः, २-१-६ अव्ययं वि...सूत्रमुपदिशेत् ।

२-१-६ अव्ययं- २-१-४ सह...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-१-७ यथाऽसादृश्ये ॥ असादृश्ये एवेति | नियमान्नेह-यथा हरिस्तथा हर :।

(क)

२-१-३ प्राक् कडारात् समास : ॥

(ख) (ग)

२-१-४ सह सुँपा ॥

(घ)

२-१-५ अव्ययीभावः ॥

२-१-६ अव्ययं विभक्ति...वचनेषु (ग) (ख) (क) (घ) ॥ इति ।

अत्र वचनम् (कर्मणि ल्युँट्) = वाच्यम् । तच्च प्रत्येकं सम्बध्यते । यथा-विभक्तिवचने, समीपवचने, इत्यादि । इति बोधयित्वा विभक्ति...वचनेषु = विभक्त्यादिषु = वाच्येषु = अर्थेषु (वर्तमानम्) अव्ययम्, [(ग) = सुँपा, (ख) = सह] = सुँबन्तेन सह, (क) = समासः = समाससंज्ञकं भवति, (घ) = अव्ययीभावः = अव्ययीभावसंज्ञकं च भवति । अर्थात् अव्ययीभावसंज्ञा समाससंज्ञा च समाविशतः । अत्र १-४-१ आक...सूत्रं न प्रवर्तते । एवमग्रे तत्पुरुषादि-संज्ञास्वपि बोध्यमित्युपदिशेत् । यदिच्छात्राणाम् १-४-१ आक...सूत्रं कथं न प्रवर्तते, इत्याकाङ्क्षा स्वयं जागृयात्, तदाऽधोनिर्दिष्टरूपेण ते बोधयितव्याः । यथा-वत्साः? २-१-३ प्राक् क...सूत्रार्थस्तु पूर्वमुपदिष्ट एव । तत्राऽवधीयताम् । कडारात् इति पञ्चम्यन्तेन दिग्वाचकः शब्दः प्रागिति स्वयमेवाऽध्याहृतो भवेत् (२-३-२९ अन्या...सूत्रं प्रदर्श्य) यतो दिग्वाचकशब्दयोगेऽत्र पञ्चमी जाताऽस्ति । एवं सिद्धेऽपि पुनः प्राक्शब्दोपादानेन तत् सूत्रं 'प्राक् प्राक् कडारात् समासः' इत्याकारं फलति । एवञ्च कडारात् प्राक्= २-२-३८ कडा...सूत्रात् पूर्वम्' 'प्राक् समासः = पूर्वं समाससंज्ञा भवति, पश्चाद् अव्ययीभावादयः संज्ञा भवन्तीत्यर्थः फलति । अतः संज्ञाद्वयसमावेश इति । छात्राणामाकाङ्क्षाया अभावे विषयोऽयं नोपदेश्यः । दुर्बोधतयोद्वेगकरत्वात् । अथोदाहरणमुपदिदिक्षुः शिक्षकोऽधोनिर्दिष्टरूपेण बोधयेत् । वत्साः १-४-४५ आधा...सूत्रे आधारः = आश्रयः = अधिकरणम् इति कथितम् । २-३-३६ सप्त...सूत्रेण चाऽधिकरणे सप्तमी विभक्तिर्भवति । अथ च सरित् इति नदी उच्यते । अतस्तत्र आधारेऽर्थे बोधयितव्ये सप्तमी विभक्तिरानेया भवति । अर्थात् सरिति । नद्याम् । इति प्रयोगः कार्यो भवति । सम्यगवधीयताम्- 'सरिति' इत्यत्र सप्तम्या (ङि इत्यस्य) योऽर्थः = अधिकरणम्, स एवाऽर्थो यदि कस्य चिदव्ययस्य भवति चेत् तदव्ययं विभक्त्यर्थे वर्तमानं भवति । विभक्त्यर्थेऽव्ययानि बहूनि सन्ति । तेष्वन्यतमोऽधिशब्दोऽपि वर्तते । अतः प्रकृते सरिति इत्यत्र सरित्+ङि, इत्यनेन सहाऽधिशब्दस्य समास उपदिश्यते, इति वदन्, विभक्त्यर्थे वर्तमानम् अव्ययं प्रकृते 'अधि' इति तत् सुँबन्तेन प्रकृते सुँबन्तम्, सरित्+ङि इति । अनेन (सरित्+ङि इत्यनेन) सह, समासः = समाससंज्ञकं भवति, अव्ययीभावः = अव्ययीभावसंज्ञकं च भवति । इति लक्षणसमन्वयं बोधयित्वाऽधो निर्दिष्टरूपेणोपदिशेत् । वत्साः? २-१-४ सह...सूत्रेण क्रियमाणे समासेऽन्यतरस्य पूर्वप्रयोगनिश्चयाय सूत्रं नास्ति । २-१-६ अव्ययं...प्रभृतिभिः सूत्रैः क्रियमाणे समासे त्वन्यतरस्य पूर्वप्रयोगो भवतीति निश्चयाय सूत्राणि सन्ति । अतः प्रकृते 'अधि' इत्यस्य पूवएप्रयोगः कार्यः, 'सरित्+ङि' इत्यस्य वा ? इति विचारसन्दर्भे प्रथमं १-२-४३ प्रथमा...सूत्रमुपदिशामि । तथाहि, इति वदन् तत् = १-२-४३ प्रथमा निर्दिष्टं-सूत्रमुपदिशेत् ।

[**सहरि**- ६-३-८१ अव्ययी....इति सहस्य स : । एवमग्रे सचक्रम् प्रभृतिपु च । **सतृणम्** । साकल्येनेत्यर्थः । न त्वत्र तृणभक्षणे तात्पर्यम्] ।

२-१-७ **यथा**- असादृश्ये= असादृश्ये एव, यथा = यथाशब्दः, सुँपा (२-१-४) समासः (२-१-३) अव्ययीभावश्च (२-१-५) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-१-८ यावदवधारणे ॥

यावच्छ्लोकम् ।

२-१-९ सुँप् प्रतिना मात्रार्थे ॥

शाकस्य लेश : = शाकप्रति ।

२-१-१० अक्ष-शलाका-संख्याः परिणा ॥

द्यूत-व्यवहारे पराजय एवाऽयं समासः । अक्षेण विपरीतं वृत्तम् अक्षपरि । शलाकापरि । एकपरि ।

२-१-११ विभाषा ॥। २-२-२९

२-१-१२ अपपरिबहिरञ्चवःपञ्चम्या ॥ १३

अपविष्णु संसारः, अपविष्णोः । परिविष्णु, परिविष्णोः । बहिर्ग्रामम्, बहिर्ग्रामात् । प्राग्ग्रामम्, प्राग्ग्रामात् ।

२-१-१३ आङ् मर्यादाऽभिविध्योः॥

आप्रतिष्ठानपुरम्, आप्रतिष्ठानपुरात् ।

आसकलं ब्रह्म, आसकलात् ।

२-१-१४ लक्षणेनाऽभिप्रती आभिमुख्ये ॥१६

अभ्यग्नि शलभाः पतन्ति, अग्निमभि । प्रत्यग्नि, अग्निं प्रति ।

२-१-१५ अनुर्यत्समया ॥ १६

अनुवनमशनिर्गतः, वनस्यानु ।

२-१-८ याव- अवधारणे = परिमाणनिश्चये, यावत्= यावत् इति, अव्ययम् (२-१-६) सुँपा (२-१-४) समासः (२-१-३) अव्ययीभावश्च (२-१-५) ।

२-१-९ सुँप्प्र- मात्रार्थे-मात्रा=लेशः, तदर्थे वर्तमानेन, प्रतिना =प्रतिशब्देन सह, सुँप् (२-१-२) समासः (२-१-३) अव्ययीभावश्च (२-१-५) ।

२-१-१० अक्ष... संख्याः =अक्ष-शलाका-संख्यावाचि- शब्दप्रकृतिकम्, सुँप् (२-१-२) परिणा =परिशब्देन सह, समासः (२-१-३) अव्ययीभावश्च (२-१-५) ।

२-१-११ विभा- ५-४-१११ झयः- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । सूत्रमिदं दर्शयित्वा शिक्षकः "इतोऽग्रे विधीयमानाः समासा विकल्पेन भवन्ति" इति बोधयेत् ।

इत्यव्ययीभाव- समास-शिक्षण-रीतिः।

अथ १-२-४३ प्रथ... २-२-३० उप...सूत्रयोर्भावार्थविषये छात्रान् परीक्ष्य सत्यावश्यके पुनस्तथा बोधयेद् यथाऽग्रिमसमासेषु पूर्वप्रयोगविषये छात्राणां प्रतिभा स्वयमेव स्फुरेत् । अथ २-१-२२ तत्पु... सूत्रं २-२-२३ शेषो... सूत्रं च दर्शयित्वाऽनयोः सूत्रयोरन्तराले वर्तमानैः सूत्रैर्विधीयमानः समासस्तत्पुरुषसंज्ञको भवतीति बोधनपुरस्सरं २-१-५७ विशेषणं सूत्रं प्रस्तुवीयात् ।

२-१-१२ अप... चवः=अप परि बहिष् शब्दप्रकृतिकम् अञ्चूत्तरपदशब्दप्रकृतिकं च, सुँप् (२-१-२) पञ्चम्या=पञ्चम्यन्तसमर्थेन सह, विभाषा (२-१-११) समासः (२-१-३) अव्ययीभावश्च (२-१-५) । विभाषाऽधिकारात् पक्षे वाक्यान्यपि । एवमग्रेऽपि बोध्यम् ।

२-१-१३ आङ्म- मर्या... विध्योः =मर्यादायामभिविधौ चाऽर्थे (द्योतकत्वेन) वर्तमानः, आङ्=आङ्, पञ्चम्या (२-१-१२) प्राग्वत् ।

२-१-१४ लक्ष- आभिमुख्ये = (द्योतकत्वेन) आभिमुख्येऽर्थे वर्तमानौ, अभिप्रती= अभिप्रतिशब्दौ, लक्षणेन = चिह्नवाचिना, सुँपा (२-१-४) प्राग्वत् ।

२-१-१५ अनु- अत्र समयाशब्दो न समीपमात्रस्य वाचकः, किन्तु समीपवाचिनो वाचकः । अतोऽत्र समयाशब्दस्य वाच्योऽनुशब्द एव भवति । एवञ्च सूत्रार्थः फलति-यत्समया= यदीय-समीपवाची (द्योतकः) अनुशब्दो वर्तते, तद्वाचिना, लक्षणेन (२-१-१४) सुँपा (२-१-४) अनुः= अनुशब्दः, प्राग्वत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-१-१६ यस्य चाऽऽयामः ॥

अनुगङ्गं वाराणसी । गङ्गायाअनु ।

२-१-१७ तिष्ठद्गुप्रभृतीनि च ॥

तिष्ठद्गु । आयतीगवम् ।

२-१-१८ पारेमध्ये षष्ठ्या वा ॥

पारेगङ्गम्, गङ्गापारम्, गङ्गायाःपारम् ।

मध्येगङ्गम्, गङ्गामध्यम्, गङ्गाया मध्यम् ।

२-१-१९ **संख्या** वंश्येन ॥ २०

त्रयो मुनयः = त्रिमुनि व्याकरणस्य ।

एकविंशतिर्भारद्वाजाः= एकविंशतिभारद्वाजम् ।

२-१-२० **नदीभि**श्च ॥२१

(समाहारे चाऽयमिष्यते)

सप्तगङ्गम् ।

२-१-२१ अन्यपदार्थे च संज्ञायाम् ॥

लोहिता गङ्गा यस्मिन् स लोहितगङ्गं नाम देश : ।

२-१-२२ **तत्पुरुषः** ॥२-२-२२

इदमधिक्रियते प्राग् बहुव्रीहेः (२-२-२३) ।

२-१-२३ द्विगुश्च ॥

तत्पुरुषः (२-१-२२) ।

२-१-२४ **द्वितीया** श्रितातीतपतित-गतात्यस्त-प्राप्तापन्नैः ॥२९

२-१-१६ यस्य- अत्राऽप्यायामशब्दो दैर्घ्यवाचिनो वाचकः । अतोऽत्राप्यायामशब्दस्य वाच्योऽनुशब्द एव । एवञ्च-यस्य आयामः= यदीयदैर्घ्यस्य वाचको (द्योतको)ऽनुशब्दः, तद्वाचिना, लक्षणेन (२-१-१४) सुँपा (२-१-४) अनु (२-१-१५) प्रागवत् ।

२-१-१७ तिष्ठद्गुप्रभृतीनि- निपात्यन्ते । उदाहरणयोः- आद्ये शतृँप्रत्ययो द्वितीये शतृँप्रत्ययः पुंवद्भावाऽभावः समासान्तश्च निपात्यन्ते अव्ययीभावःसमासश्चोभयत्र ।

२-१-१८ पारेमध्ये= पारमध्यशब्दप्रकृतिकम्, सुँप् (२-१-२) षष्ठ्या= षष्ठ्यन्तसमर्थेन सह, वा= विभाषया, समासः (२-१-३) अव्ययीभावश्च (२-१-५) पारमध्यशब्दयोरेदन्तत्वं च निपात्यते । महाविभाषयैव सिद्धौ पुनर्वाग्रहणं "यत्रोत्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते पुनरुत्सर्गशास्त्रं न प्रवर्तते" इति ज्ञापयति । अत इतोऽन्यत्र महाविभाषया मुक्ते विग्रहवाक्यमेवाऽवतिष्ठते, पुनरुत्सर्गशास्त्रं न प्रवर्तते । तेन पूर्वं कायस्येति विग्रहे २-२-१ पूर्वा... इति समासे पूर्वकायः । तदभावे विग्रहवाक्यमेव न तु पुनः २-२-८ षष्ठी- इति समासः । एवं सर्वत्र ज्ञेयम् ।

२-१-१९ संख्या= संख्यावाचिशब्दप्रकृतिकम्, सुँप् (२-१-२) वंश्येन= वंश्यवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) विभाषा (२-१-११) समासः (२-१-३) अव्ययीभावश्च (२-१-५) । वंशो द्विधा विद्यया जन्मना च । तत्र भवो वंश्यः ।

२-१-२० नदीभिः= नदीवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) संख्या (२-१-१९) सुँप् (२-१-२) प्रागवत् ।

२-१-२१ अन्यपदार्थे= अन्यपदार्थे वर्तमानम्, सुँप् (२-१-२) नदीभिः (२-१-२०) सुँपा (२-१-४) समासः (२-१-३) अव्ययीभावश्च (२-१-५) संज्ञायाम् । अत्र संख्येति नानुवर्तते । विभाषाऽधिकारेऽपि समासोऽयं नित्यः । वाक्येन संज्ञाऽनवगमात् ।

२-१-२४ द्विती- ६-३-४२ पुंवत्... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । द्वितीया= द्वितीयान्तम्, श्रितातीत...पन्नैः=श्रित अतीत पतित गत अत्यस्त प्राप्त आपन्न इति शब्दप्रकृतिकेन, सुँपा (२-१-४) = सुँबन्तेन सह, विभाषा (२-१-११)= विकल्पेन, समासः (२-१-३)= समाससंज्ञकं भवति, तत्पुरुषः (२-१-२२)= तत्पुरुषसंज्ञं च भवति । इत्यर्थमुपदिश्य कृष्णं श्रितः-कृष्ण+अम् श्रित+सुँ इति विग्रहे छात्रैः साध्यमानां प्रक्रियां शिक्षकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णं श्रितः= कृष्णश्रितः । दुःखमतीतः=दुखातीतः ।

कूपं पतितः=कूपपतितः । ग्रामं गतः =ग्रामगतः । इत्यादि ।

(श्रितादिषु गम्यादीनामुपसंख्यानम्)

ग्रामं गमी= ग्रामगमी । ओदनं बुभुक्षुः= ओदनबुभुक्षुः । इत्यादि ।

२-१-२५ स्वयं क्तेन॥ २८

स्वयंविलीनम् ।

२-१-२६ खट्वा क्षेपे ॥

खट्वारूढो जाल्मः ।

विभाषाऽधिकारेऽपि नित्यसमासोऽयं विग्रहेण निन्दाऽनवगमात् ।

२-१-२७ सामि ॥

सामिकृतम् ।

२-१-२८ कालाः ॥२९

मासप्रमितः ।

२-१-२९ अत्यन्तसंयोगे च ॥

मुहूर्तं सुखम्= मुहूर्तसुखम् ।

२-१-३० तृतीया तत्कृतार्थेन गुणवचनेन ॥३५

शङ्कुलया खण्डः- शङ्कुलाखण्डः । धान्येनाऽर्थो धान्यार्थः ।

२-१-३१ पूर्व-सदृशसमोनार्थ-कलह-निपुण-मिश्र-श्लक्ष्णैः॥

मासपूर्वः । पितृसदृशः । मातृसमः । माषोनम् । माषविकलम् । वाक्कलहः । आचारनिपुणः । गुडमिश्रः । आचारश्लक्ष्णः ।

शृणुयात् । एवं ग्रामं गतः= ग्रामगत इत्यत्राऽलौकिकविग्रहं छात्रैरुच्चार्यमाणं धीरं शृण्वन् प्रक्रियां च तैरुच्यमानां शृणुयात् । सावधानम्- अत्र श्यामपाटीप्रयोगो न विहितः । सुँपा, विभाषा, समासः, तत्पुरुषः, इत्यनुवर्तनीय-पद-घटितानां सूत्राणां संख्या तत्तत् सूत्राऽर्थ-बोधनप्रसङ्गे दर्शिता । इतोऽग्रेऽपि समासप्रकरणे तथैव करिष्यते । श्यामपाट्यां तेषामुल्लेखो न करिष्यते । अतः शिक्षकः सावधानं विमृश्य शिक्षयेत् । अथ २-१-३२ कर्तृकरणे...सूत्रमुपदिशेत् ।

२-१-२५ स्वयम्= स्वयंशब्दप्रकृतिकम्, सुँप् (२-१-२) क्तेन=क्तप्रत्ययान्तशब्दप्रकृतिकेन, सुँपा (२-१-४) विभाषा (२-१-११) समासः (२-१-३) तत्पुरुषश्च (२-१-२२) । द्वितीयेति तु नेह सम्बध्यते, द्वितीयार्थाऽसम्भवात् ।

२-१-२६ खट्वा= खट्वाशब्दप्रकृतिकम्, द्वितीया (२-१-२४) क्तेन (२-१-२५) सुँपा (२-१-४) समासः (२-१-३) तत्पुरुषश्च (२-१-२२) ।

२-१-२७ सामि= सामिशब्दप्रकृतिकम्, सुँप् (२-१-२) क्तेन (२-१-२५) सुँपा (२-१-४) विभाषा (२-१-११) समासः (२-१-३) तत्पुरुषश्च (२-१-२२) । अत्र काशिका- "सामि" इत्येतदव्ययमर्द्धशब्दपर्यायः, तस्याऽसत्त्ववाचित्वाद् द्वितीयाया नास्ति सम्बन्ध इति ।

२-१-२८ कालाः= कालवाचिशब्दप्रकृतिकम्, द्वितीया (२-१-२४) क्तेन (२-१-२५) सुँपा (२-१-४) विभाषा (२-१-११) समासः(२-१-३) तत्पुरुषश्च (२-१-२२) । अनत्यन्तसंयोगार्थमिदम् । अत्यन्तसंयोगे तूत्तरसूत्रेण सिद्धम् ।

२-१-२९ अत्यन्तसंयोगे, कालाः (२-१-२८) द्वितीया (२-१-२४) सुँपा (२-१-४) विभाषा (२-१-११) समासः (२-१-३) तत्पुरुषश्च (२-१-२२) ।

२-१-३० तृती- सूत्रे तत्कृतेति लुप्ततृतीयान्तं गुणवचनेनेत्यस्य विशेषणम् । तच्छब्देन तृतीयान्तार्थो गृह्यते । एवञ्च सूत्रार्थः फलति- तृतीया= तृतीयान्तम्, तत्कृत+गुणवचनेन=तृतीयान्तार्थकृतो यो गुणस्तद्वाचिशब्दप्रकृतिकेन, अर्थेन- अर्थशब्दप्रकृतिकेन च, सुँपा (२-१-२) विभाषा (२-१-११) समासः (२-१-३) तत्पुरुषः (२-१-२२) च । इति ।

२-१-३१ पूर्व- तृतीया (२-१-३०) पूर्व... श्लक्ष्णैः= पूर्व, सदृश, सम, ऊनार्थक, कलह, निपुण, मिश्र,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(अवरस्योपसंख्यानम्)

मासावरः ।

२-१-३२ कर्तृकरणे कृता बहुलम् ॥३३

हरित्रातः । कलमलिखितः ॥

(कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्)

नखनिर्भिन्नः ।

२-१-३३ कृत्यैरधिकार्थवचने ॥

काकपेया नदी । वातच्छेद्यं तृणम् ।

(कृत्यग्रहणे यण्ण्यतोर्ग्रहणं कर्तव्यम्)

नेह-काकैः पातव्या नदी ।

२-१-३४ अन्नेन व्यञ्जनम् ॥

दध्ना (उपसिक्त) ओदनः=दध्योदनः।

२-१-३५ भक्ष्येण मिश्रीकरणम् ॥

गुडेन (मिश्रा) धानाः=गुडधानाः ।

२-१-३६ चतुर्थी तदर्थार्थ-बलि-हित-सुख-रक्षितैः ॥

यूपाय दारु=यूपदारु । तदर्थेन प्रकृति- विकृतिभाव एव गृह्यते ।

नेह- रन्धनाय स्थाली । भूतबलिः ।

गोहितम् । गोसुखम् । गोरक्षितम् ।

(अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्)

द्विजायाऽयं द्विजार्थः सूपः । द्विजार्था यवागूः । द्विजार्थं पयः ।

२-१-३७ पञ्चमी भयेन ॥३९

चोराद् भयम्=चोरभयम् ।

श्लक्ष्ण इति शब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् ।

२-१-३२ कर्तृ- २-१-२४ द्वितीया...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- २-१-३० (क) तृतीया... गुणवचनेन ॥ २-१-३२ कर्तृकरणे (क) कृता बहुलम् ॥इति । कर्तृकरणे+((क)=तृतीया)= कर्तरि करणे च या तृतीया तदन्तं समर्थम्, कृता=कृदन्तप्रकृतिकेन, सुँपा (२-१-४)= सुँबन्तेन सह, बहुलम्=बाहुल्येन, समासः (२-१-३)= समाससंज्ञकम्, तत्पुरुषः (२-१-२२)= तत्पुरुषसंज्ञकं च भवति । हरिणा त्रातः, कलमेन लिखित इति विग्रहे च साध्यमानां प्रक्रियां शिक्षकः शृणुयात् । अथ २-१-३६ चतु...सूत्रमुपदिशेत् ।

२-१-३३ कृत्यै- अधिकार्थवचने=स्तुति-निन्दाफलकेऽर्थवादवचने गम्यमाने, कर्तृकरणे (२-१-३२)+तृतीया (२-१-३०) कृत्यैः= कृत्यप्रत्ययान्तशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् । पूर्वस्यैवाऽयं प्रपञ्च इति काशिका ।

२-१-३४ अन्नेन= अन्नवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) व्यञ्जनम्=व्यञ्जनवाचिशब्दप्रकृतिकम्, तृतीया (२-१-३०) प्राग्वत् ।

२-१-३५ भक्ष्येण= भक्ष्यवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) मिश्रीकरणम्= मिश्रीकरणवाचिशब्दप्रकृतिकम्, तृतीया (२-१-३०) प्राग्वत् ।

२-१-३६ चतु- २-१-३२ कर्तृकरणे... सूत्रानन्तरं सूत्रमिदं पाठचम् । चतुर्थी= चतुर्थ्यन्तम्, तदर्थार्थ...रक्षितैः=चतुर्थ्यन्तार्थ-निमित्त-वाचि-शब्दप्रकृतिकेन+अर्थ-बलि-हित-सुखरक्षितशब्दप्रकृतिकेन च, सुँपा (२-१-४)= सुँबन्तेन सह, विभाषा (२-१-११) समासः (२-१-३)= समाससंज्ञकं भवति, तत्पुरुषः (२-१-२२)= तत्पुरुषसंज्ञकं च भवति । इत्यर्थमुपदिश्य यूपाय दारु, भूतेभ्यो बलिरित्यादिविग्रहे मूलोदाहरणानि च्छात्रैः साध्यमानानि शिक्षकः शृणुयात् । अथ-२-१-३७ पञ्चमी...सूत्रमुपदिशेत् ।

अर्थेन- चतुर्थी (२-१-३६) अर्थेन= अर्थशब्दप्रकृतिकेन, सुँपा (२-१-४) नित्यसमासः, तत्पुरुषश्च (२-१-२२) विशेष्यलिङ्गता चेति वक्तव्यम् ।

२-१-३७ पञ्च- २-१-३६ चतुर्थी...सूत्रानन्तरं सूत्रमिदं पाठचम् । पञ्चमी=पञ्चम्यन्तम्, भयेन=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(भय-भीत-भीति-भीभिरिति वक्तव्यम्)

वृकभीतः । इत्यादि ।

२-१-३८ अपेताऽपोढ-मुक्त-पतिताऽपत्रस्तैरल्पशः ॥

सुखापेतः । अल्पश इत्युक्तेर्नेह-स्वर्गात् पतितः ।

२-१-३९ स्तोकान्तिक-दूरार्थ-कृच्छ्राणि क्तेन ॥

स्तोकान्मुक्तः । अल्पान्मुक्तः । अन्तिकादागतः । समीपादागतः । इत्यादि ।

(शत-सहस्रौ परेणेति वक्तव्यम्)

शतात् परे = परश्शताः । सहस्रात् परे =परस्सहस्राः ।

२-१-४० सप्तमी शौण्डैः ॥४८

अक्षशौण्डः ।

२-१-४१ सिद्ध-शुष्क-पक्व-बन्धैश्च ॥

हिमालसिद्धः । आतपशुष्कः । स्थालीपक्वः । कीलबन्धः ।

२-१-४२ ध्वाङ्क्षेण क्षेपे ॥

तीर्थकाकः ।

२-१-४३ कृत्यैर्ऋणे ॥

मासे देयमृणम् = मासदेयम् । पूर्वाह्णगेयं साम ।

२-१-४४ संज्ञायाम् ॥

अरण्येतिलकाः ।

वाक्येन संज्ञाऽनवगमान्नित्यसमासोऽयम् ।

भयशब्दप्रकृतिकेन, सुँपा (२-१-४)= सुँबन्तेन सह, विभाषा (२-१-११) समासः (२-१-३)= समाससंज्ञकं भवति, तत्पुरुषः (२-१-२२)= तत्पुरुषसंज्ञकं च भवति । इत्यर्थमुपदिश्य चोराद् भयम् इति विग्रहे छात्रैः साध्यमानां प्रक्रियां शिक्षकः शृणुयात् । अथ-२-२-८ षष्ठी-सूत्रमुपस्थाप्य "सुँपा" इत्यनुवर्तत एवेत्युद्बोधनपुरस्सरमर्थं शिक्षयेत् ।

भय-पञ्चमी (२-१-३७) भय...भीभिः- भय-भीत-भीति-भीशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् ।

२-१-३८ अपे... त्रस्तैः= अपेत अपोढ मुक्त पतित अपत्रस्त इति शब्दप्रकृतिकेन, सुँपा (२-१-४) अल्पशः+ पञ्चमी= अल्पाभ्यः प्रकृतिभ्य उत्पन्ना या पञ्चमी तदन्तम्, प्राग्वत् । अत्र काशिका- अल्पश इति समासस्याल्पविषयतामाचष्टे । अल्पा पञ्चमी समस्यते, न सर्वेति ।

२-१-३९ स्तोका... छ्राणि=स्तोकार्थक-समीपार्थक- दूरार्थकशब्दप्रकृतिकं कृच्छ्रशब्दप्रकृतिकं च, पञ्चमी (२-१-३७) सुँपा (२-१-४) प्राग्वत् । उदाहरणेषु ६-३-२ पञ्च... इति पञ्चम्या अलुक् ।

शत- परश्शताः राजदन्तादित्वात् परनिपातः, निपातनात् सुँडागम इति-काशिका ।

२-१-४० सप्त- २-२-८ षष्ठी- सूत्रानन्तरं सूत्रमिदं पाठचम् । सप्तमी=सप्तम्यन्तम्, शौण्डैः= शौण्डादि-गण-पठित-शब्द-प्रकृतिकेन, सुँपा (२-१-४)= सुँबन्तेन सह, विभाषा (२-१-११) समासः (२-१-३)= समाससंज्ञकं भवति, तत्पुरुषः (२-१-२२)= तत्पुरुषसंज्ञकं च भवति । इत्यर्थमुपदिश्य, अक्षेषु शौण्ड इति विग्रहे छात्रैः साध्यमानां प्रक्रियां शिक्षकः शृणुयात् । अथ समासेऽपि क्वचित् २-४-७१ सुँपो... सूत्रेण सुँपो लुङ् न भवतीतिच्छात्र-मस्तिष्के संस्काराऽऽधानाय, ओजसा कृतमिति विग्रहे २-१-३२ कर्तृ... सूत्रेण समासं छात्रैः कारयित्वा २-४-७१ सुँपो... सूत्रेण "ओजस्" इत्यतः परतस्त्याया विभक्तेः (टा, इत्यस्य) लुकः प्राप्तौ संभाव्यमानायाम् ६-३-३ ओजः... सूत्रमुपदिशेत् ।

२-१-४१ सिद्ध- सप्तमी (२-१-४०) सि....न्धैः = सिद्ध-शुष्क-पक्व-बन्धशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् ।

२-१-४२ ध्वाङ्क्षे- सप्तमी (२-१-४०) ध्वाङ्क्षेण = ध्वाङ्क्ष (काक) वाचिशब्दप्रकृतिकेन, सुँपा २-१-४) प्राग्वत् ।

२-१-४३ कृत्यै- सूत्रे ऋणग्रहणं नियोगोपलक्षणार्थम् = आवश्यकोपलक्षणार्थम् । सप्तमी (२-१-४०) सुपा (२-१-४) प्राग्वत्, ऋणे=आवश्यके ।

२-१-४४ संज्ञा- सप्तमी (२-१-४०) सुँपा (२-१-४) समासः (२-१-३) नत्पुरुषः (२-१-२२) च,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-१-४५ क्तेनाऽहोरात्राऽवयवाः ॥

पूर्वाह्णकृतम्। अपररात्रकृतम्।

२-१-४६ तत्र ॥

तत्रकृतम्।

२-१-४७ क्षेपे ॥ ४८

भस्मनिहुतम्।

२-१-४८ पात्रेसमितादयश्च ॥

पात्रेसमिताः। भोजनसमय एवोपस्थिता न तु कार्ये, इत्यर्थः। कूपमण्डूकः।

२-१-४९ पूर्वकालैकसर्वजरत्पुराण-नवकेवलाः समानाधिकरणेन ॥७२

पूर्वं स्नातः पश्चादनुलिप्तः= स्नाताऽनुलिप्तः। पूर्वं दग्धं पश्चात् प्ररूढम्= दग्धप्ररूढम्। एको देवः = एकदेवः। सर्वे देवाः= सर्वदेवाः। जरद्गवः। पुराणान्नम्। नवान्नम्। केवलान्नम्।

२-१-५० दिक्संख्ये संज्ञायाम् ॥५१

पूर्वेषुकामशमी। सप्तर्षयः। संज्ञायामेवेति नियमान्नेह-उत्तरा वृक्षाः। पञ्च ब्राह्मणाः।

२-१-५१ तद्धितार्थोत्तरपदसमाहारे च ॥

पूर्वस्यां शालायां भवः = पौर्वशालः। पूर्वा शाला प्रिया यस्य = पूर्वशालाप्रियः। समाहारे दिक्शब्दो न संभवति। पञ्चसु कपालेषु संस्कृतः = पञ्चकपालः। पञ्च गावो धनं यस्य = पञ्चगवधनः। पञ्चानां पूलानां समाहारः = पञ्चपूली। पञ्चानां कुमारीणां समाहारः = पञ्चकुमारि ॥

(द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्)

छत्त्रोपानहप्रियः। पञ्चगवप्रियः।

२-१-५२ संख्यापूर्वो द्विगुः ॥

संज्ञायाम्=संज्ञायां गम्यमानायाम्। उदाहरणे ६-३-९ हल... इति सप्तम्या अलुक्।

२-१-४५ क्तेन- अहोरात्रावयवाः = अहरवयव-रात्र्यवयव-वाचि-शब्दप्रकृतिकम्, सप्तमी (२-१-४०) क्तेन = क्तप्रत्ययान्त-शब्दप्रकृतिकेन, सुँपा (२-१-४) विभाषा (२-१-११) समासः (२-१-३) तत्पुरुषः (२-१-२२) च।

२-१-४६ तत्र = तत्रेत्येतत्, सप्तमी (२-१-४०) क्तेन (२-१-४५) सुँपा (२-१-४) प्राग्वत्।

२-१-४७ क्षेपे- सप्तमी (२-१-४०) क्तेन (२-१-४५) सुँपा (२-१-४) प्राग्वत्, क्षेपे = निन्दायाम्। उदाहरणे ६-३-१४ तत्पु... इति सप्तम्या अलुक्।

२-१-४८ पात्रे- एते तत्पुरुषसमाससंज्ञका निपात्यन्ते। अत्र काशिका- चकारोऽवधारणार्थः। तेन समासान्तरं न भवति- परमपात्रेसमिता इति। परमाः पात्रेसमिता इत्येव भवतीति तद्भावः।

२-१-४९ पूर्व... वलाः= पूर्वकालवृत्तिक्रियाबोधकशब्दप्रकृतिकम् एक सर्व जरत् पुराण नव केवलशब्दप्रकृतिकं च, सुँप् (२-१-२) समा.., णेन= समानाधिकरणवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत्।

२-१-५० दिक्संख्ये = दिग्वाचि-संख्यावाचि-शब्दप्रकृतिकम्, सुँप् (२-१-२) समानाधिकरणेन (२-१-४९) सुँपा (२-१-४) संज्ञायाम्= संज्ञायामेव, प्राग्वत्। २-१-५७ विशे...इत्येव सिद्धे नियमार्थमिदम्।

२-१-५१ तद्धि... हारे= तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये, दिक्संख्ये (२-१-५०) सुँप् (२-१-२) समानाधिकरणेन (२-१-४९) सुँपा (२-१-४) प्राग्वत्। असंज्ञार्थमिदम्। पौर्वशालः ४-२-१०७ दिक्पू...इति ञः।

२-१-५२ संख्यापूर्वः = २-१-५१ तद्धि...सूत्रेण विहितः संख्यापूर्वः समासः, द्विगुः= द्विगुसंज्ञो भवति। उदाहरणेषु आद्ये-पञ्चसु कपालेषु संस्कृत इति विग्रहे २-१-५१ तद्धि... इति समासे ४-२-१६ संस्कृ..इत्यण्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चकपालः । पञ्चनावप्रियः । पञ्चमूली ।

२-१-५३ कुत्सितानि कुत्सनैः ॥

वैयाकरणखसूचिः । याज्ञिककितवः ।

शब्दप्रवृत्तिनिमित्तकुत्सायां समासोऽयम् ।

नेह-वैयाकरणश्चौरः । अत्र वैयाकरणः कुत्स्यते चौरत्वेन, न तु (शब्दप्रवृत्तिनिमित्तं) वैयाकरणत्वम् ।

२-१-५४ पापाणके कुत्सितैः ॥

पापनापितः । अणकनापितः ।

२-१-५५ उपमानानि सामान्यवचनैः ॥

घन इव श्यामः = घनश्यामः ।

२-१-५६ उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे ॥

पुरुषो व्याघ्र इव पुरुषव्याघ्रः ।

साधारणधर्मवाचिशब्दप्रयोगे तु न-पुरुषो व्याघ्र इव शूरः । अत्र साधारणधर्मवाची शूरशब्दः प्रयुक्तः ।

२-१-५७ विशेषणं[1] विशेष्येण[1]

तस्य ४-१-८८ द्विगो...इति लुक् । द्वितीये-पञ्च नावः प्रिया यस्येति बहुव्रीहौ प्रियाशब्दे उत्तरपदे पूर्वयोः २-१-५१ तद्धि...इति समासे ५-४-९९ नावो... इति टच् । १-२-४८ गोस्त्रि...इति ह्रस्वः । अन्त्ये-समाहारेऽनेन समासे ४-१-२१ द्विगोः- इति ङीप् ।

२-१-५३ कुत्सितानि= कुत्सितवाचिशब्दप्रकृतिकम्, सुँप् (२-१-२) समानाधिकरणेन (२-१-४९) कुत्सनैः= कुत्सनवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् ।

२-१-५४ पापाणके = पाप अणक इतिप्रकृतिकम्, सुँप् (२-१-२) समानाधिकरणेन (२-१-४९) सुँपा (२-१-४) प्राग्वत् । पूर्वेण सिद्धे पूर्वनिपातार्थोऽयमारम्भः ।

२-१-५५ उपमानानि= उपमानवाचिशब्दप्रकृतिकम्, सुँप् (२-१-२) समानाधिकरणेन (२-१-४९) सामान्यवचनैः= साधारणधर्मविशिष्टवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् ।

२-१-५६ उपमितम्= उपमेयवाचिशब्दप्रकृतिकम्, सुँप् (२-१-२) समानाधिकरणेन (२-१-४९) व्याघ्रादिभिः= व्याघ्रप्रभृतिशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत्, सामान्याऽप्रयोगे = साधारणधर्मविशिष्टवाचिशब्दाऽप्रयोगे ।

२-१-५७ विशे- २-१-११ विभाषा-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । एतत्सूत्रार्थोपदेशात् पूर्वं विशेष्यविशेषण-पदार्थं बोधयेत् । यथा-वत्साः? प्रधानं विशेष्यं भवति । अप्रधानं विशेषणं भवति । यथा लोहितं शिरस्त्रम्, इत्यत्र लोहितं विशेषणम् । शिरस्त्रं विशेष्यम् । शीतं जलम्, इत्यत्र च शीतं विशेषणम् । जलं विशेष्यम् । इति । अथ यदिच्छात्राः प्रधानमप्रधानं च स्फुटं न बुध्येरँस्तदाऽधोनिर्दिष्टरूपेण बोधयेत् । यथा- वत्साः? यस्मै लोहितं शिरस्त्रं रोचते, तस्य लोहितशिरस्त्राऽनुपलब्धौ लोहित-चतुर्बन्धेन शिरस्त्राण-कार्यं न भवति । लोहितेतरेणाऽपि शिरस्त्रेण तु शिरस्त्राण-कार्यं भवति । अतो लोहितम् (तेन विनाऽपि कार्यं निर्वहति, अतः) अप्रधानम् = विशेषणम् । शिरस्त्रम् (तेन विना कार्यनिरोधात्) प्रधानम् = विशेष्यम् । इति । एवमेव पिपासया यस्य शीतं जलमपेक्षितं तस्य शीतजलाऽनुपलब्धौ शीतपाषाणेन पिपासानिवृत्तिरूपं कार्यं न भवति । उष्णजलेन तु पिपासानिवृत्तिरूपं कार्यं सम्पद्यते । अतः शीतम् (तेन विना कार्यनिर्वाहात्) अप्रधानम् = विशेषणम् । जलम् (तेन विना कार्यनिरोधात्) प्रधानम् = विशेष्यम् । इत्यादिरीत्या बोधयेत् । अथ सूत्राऽर्थोपदेशायाऽधोनिर्दिष्टरूपेण (क) श्यामपाट्यां लिखेत् । यथा-

२-१-४९ पूर्वकालैक... समानाऽधिकरणेन

२-१-५७ विशेषणं (क) विशेष्येण बहुलम् ॥ इति । विशेषणम् = विशेषण-वाचि-शब्द-प्रकृतिकम्, सुँप्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुलम् ॥५८

लोहितं शिरस्त्रम् = लोहितशिरस्त्रम् ।

शीतं जलम् = शीतजलम् । बहुलग्रहणात् क्वचिन्नित्यसमासः । कृष्णसर्पः । क्वचिन्न समासः । रामो जामदग्न्यः ।

२-१-५८ पूर्वापर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीराश्च ॥

पूर्वपुरुषः । अपरपुरुषः । इत्यादि ।

२-१-५९ श्रेण्यादयः कृतादिभिः ॥

(श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यम्)

अश्रेणयः श्रेणयः कृताः= श्रेणिकृताः । च्व्यन्तानां तु २-२-१८ कुग...इति नित्य-समासः । श्रेणीकृताः ।

२-१-६० क्तेन नञ्विशिष्टेनाऽनञ् ॥

कृतं च तदकृतं च= कृताकृतम् ।

(कृतापकृतादीनामुपसंख्यानम्)

कृतं च तदपकृतञ्च= कृतापकृतम् ।

(शाकपार्थिवादीनामुत्तरपदलोपश्च)

शाकप्रियः पार्थिवः= शाकपार्थिवः ।

२-१-६१ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ॥

सत्पुरुषः । महापुरुषः । इत्यादि ।

२-१-६२ वृन्दारक-नाग-कुञ्जरैः पूज्यमानम् ॥

गौर्वृन्दारक इव= गोवृन्दारकः ।

गोनागः । गोकुञ्जरः ।

२-१-६३ कतर-कतमौ जातिपरिप्रश्ने ॥

कतरकठः । कतमकलापः ।

२-१-६४ किं क्षेपे ॥

कुत्सितो राजा= किंराजा । किंसखा ।

(२-१-४)= सुँबन्तम्, (क) = समानाधिकरणेन+विशेष्येण = समानाऽधिकरण-विशेष्यवाचि-शब्दप्रकृतिकेन, सुँपा (२-१-२)= सुँबन्तेन सह, बहुलम् = बाहुल्येन, समासः (२-१-३)= समाससंज्ञकं भवति, तत्पुरुषः (२-१-२२) = तत्पुरुषसंज्ञकं च भवति। इत्यर्थमुपदिश्य लोहित+सुँ शिरस्त्र+सुँ इत्यत्र लक्षणसमन्वयं पूर्वप्रयोगाद्यग्रिमकार्यं च च्छात्रैः साधयित्वा "लोहितशिरस्त्र" इति श्यामपाट्यां लिखित्वा २-४-२६ परवल्लिङ्गं...सूत्रमुपदिशेत् ।

२-१-५८ पूर्वा...वीराः = पूर्व अपर प्रथम चरम जघन्य समान मध्य मध्यम वीर इति शब्दप्रकृतिकम्, सुँप् (२-१-२) समाना...(२-१-४९) सुँपा (२-१-४) प्राग्वत् ।

२-१-५९ श्रेण्यादयः = श्रेणिप्रभृतिशब्दप्रकृतिकम्, सुँप् (२-१-२) समाना... (२-१-४९) कृतादिभिः= कृतप्रभृतिशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् ।

२-१-६० क्तेन- अनञ्= नञ्रहितक्तप्रत्ययान्तशब्दप्रकृतिकम्, सुँप् (२-१-२) समाना...(२-१-४९) नञ्विशिष्टेन+क्तेन= नञ्युक्तक्तप्रत्ययान्तशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् ।

२-१-६१ सन्म...कृष्टाः=सत् महत् परम उत्तम उत्कृष्टशब्दप्रकृतिकम्, सुँप् (२-१-२) समाना...(२-१-४९) पूज्यमानैः= पूज्यमानवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् ।

२-१-६२ वृन्दा-पूज्यमानम्= पूज्यमानवाचिशब्दप्रकृतिकम्, सुँप् (२-१-२) समाना० (२-१-४९) वृन्दा...जरैः= वृन्दारक नाग कुञ्जर शब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् ।

२-१-६३ कत...तमौ= कतरकतमशब्दप्रकृतिकम्, सुँप् (२-१-२) समाना० (२-१-४९) सुँपा (२-१-४) प्राग्वत्, जातिपरिप्रश्ने = जतिविषयिकायां परिपृच्छायाम् ।

२-१-६४ किम्= किंशब्दप्रकृतिकम्, सुँप् (२-१-२) समाना० (२-१-४९) सुँपा (२-१-४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-१-६५ पोटा-युवति-स्तोक-कतिपय-गृष्टि-धेनु-वशा-वेहद्-बष्कयणी-प्रवक्तृ-श्रोत्रियाऽध्यापक-धूर्तैर्जातिः ॥६६

इभपोटा । इभयुवतिः । इत्यादि ।

२-१-६६ प्रशंसावचनैश्च ॥

प्रशंसावचनशब्देन मतल्लिकादयो रूढिशब्दा एव गृहचन्ते न त्वन्ये शोभनादयः । ते च रूढिशब्दा अजहल्लिङ्गा एव समानाधिकरणा भवन्ति । गोमतल्लिका । गोप्रकाण्डम् ।

२-१-६७ युवा खलति-पलित-वलिन-जरतीभिः ॥

युवा खलतिः= युवखलतिः । "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्याऽपि ग्रहणम्"

युवतिर्जरती= युवजरती । "वृत्त्यन्तरे हि जरद्भिरिति पठचते" इति न्यासकारः । युवा जरन्= युवजरन् ।

२-१-६८ कृत्यतुल्याख्या अजात्या ॥

उष्णं भोज्यम्= भोज्योष्णम् । शीतं पानीयम्= पानीयशीतम् । तुल्यःश्वेतः= तुल्यश्वेतः । सदृशःश्वेतः = सदृशश्वेतः ।

२-१-६९ वर्णो वर्णेन ॥

कृष्णः सारङ्गः= कृष्णसारङ्गः ।

२-१-७० कुमारः श्रमणादिभिः ॥

लिङ्गविशिष्ट (२-१-६७) परिभाषया कुमारीशब्दोऽपि गृहचते । कुमारी श्रमणा= कुमारश्रमणा । कुमारः पण्डितः =कुमारपण्डितः ।

२-१-७१ चतुष्पादो गर्भिण्या ॥

गौर्गर्भिणी= गोगर्भिणी ॥

(चतुष्पाज्जातिरिति वक्तव्यम्)

नेह-कालाक्षी गर्भिणी ।

२-१-७२ मयूरव्यंसकादयश्च ॥

मयूरो व्यंसको मयूरव्यंसकः । व्यंसको धूर्तः ।

प्रागवत् क्षेपे=निन्दायाम् । उदाहरणयोः ५-४-७७किमः ... इति समासान्तप्रतिषेधः ।

२-१-६५ पोटा- जातिः= जातिवाचिशब्दप्रकृतिकम्, सुँप् (२-१-२) पोटा...धूर्तैः =पोटा युवति स्तोक कतिपय गृष्टि धेनु वशा वेहत् बष्कयणी प्रवक्तृ श्रोत्रिय अध्यापक धूर्त इति शब्दप्रकृतिकेन, समाना० (२-१-४९) सुँपा (२-१-४) प्रागवत् ।

२-१-६६ प्रशं- जातिः (२-१-६५) सुँप् (२-१-२) प्रशंसावचनैः = मतल्लिकाप्रभृति- प्रशंसावाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) प्रागवत् ।

२-१-६७ युवा= युव(न्)शब्दप्रकृतिकम्, सुँप् (२-१-२) समाना० (२-१-४९) खल...तीभिः= खलति-पलित वलिन-जरती- शब्दप्रकृतिकेन, सुँपा (२-१-४) प्रागवत् ।

२-१-६८ कृत्यतुल्याख्याः= कृत्यप्रत्ययान्तप्रकृतिकं तुल्यार्थकशब्दप्रकृतिकं च, सुँप् (२-१-२) समाना० (२-१-४९) अजात्या= जातिभिन्नवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) प्रागवत् ।

२-१-६९ वर्णः= वर्णवाचिशब्दप्रकृतिकम्, सुँप् (२-१-२) समाना० (२-१-४९) वर्णेन= वर्णवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) प्रागवत् ।

२-१-७० कुमारः= कुमारशब्दप्रकृतिकम्, सुँप् (२-१-२) समाना० (२-१-४९) श्रमणादिभिः= श्रमणाप्रभृतिशब्दप्रकृतिकेन, सुँपा (२-१-२) प्रागवत् ।

२-१-७१ चतुष्पादः= चतुष्पाद्वाचिशब्दप्रकृतिकम्, सुँप् (२-१-२) समाना० (२-१-४९) गर्भिण्या= गर्भिणीशब्दप्रकृतिकेन, सुँपा (२-१-२) प्रागवत् ।

२-१-७२ मयू...दयः= मयूरव्यंसकप्रभृतयः शब्दास्ततपुरुषसमाससंज्ञका निपात्यन्ते । **चिन्मात्रम्, राजान्तरम् ।** मात्रशब्दो निर्धारणार्थः । अन्यशब्दश्च भिन्नार्थः । उभयत्र नित्यसमासः । अतएवाऽलौकिकविग्रहावस्वपदौ दर्शितौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिदेव-चिन्मात्रम् । अन्यो राजा राजान्तरम् ।
(एहीडादयोऽन्यपदार्थे) ग.सू.
एहि, ईडे, इति यस्मिन् कर्मणि तद् एहीडम् ।
एहि स्वागतमिति यस्यां क्रियायां सा एहिस्वागता ।
(जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाऽभिदधाति) ग.सू.
जहि जोडमित्याभीक्ष्ण्येन य आह स जहिजोडः ।
जहिस्तम्बः ।
(आख्यातमाख्यातेन क्रियासातत्ये) ग.सू.
अश्नीत पिबतेत्येव यत्र सततमभिधीयते सा, अश्नीतपिबता । पिबतखादता ।
इति द्वितीयाध्याये प्रथमः पादः ।

एही- एहीडादयः, अन्यपदार्थे, समासः (२-१-३) = समाससंज्ञका भवन्ति, तत्पुरुषः (२-१-२२) तत्पुरुषसंज्ञकाश्च भवन्ति । एहीडम् "ईडे" इति ईड्धातोर्लँट्युत्तमपुरुषैकवचनान्तम् । तत्रैकारस्याऽकारो निपात्यते ।

जहि- जहि= जहि इत्येतत्, कर्मणा= कर्मवाचिशब्दप्रकृतिकेन, सुँपा (२-१-२) बहुलम्, प्राग्वत्, आभीक्ष्ण्य= आभीक्ष्ण्ये गम्ये, कर्तारं च अभिदधाति= समासः कर्तारं कथयति । उदाहरणयोः- जहि जोडं जहि जोडम् इति आभीक्ष्ण्येन य आह स जहिजोडः । एवं जहि स्तम्बं जहि स्तम्बम्, इत्याभीक्ष्ण्येन य आह स जहिस्तम्बः । इति प्रक्रिया बोध्या ।

आख्यातम् = तिङन्तम्, आख्यातेन = तिङन्तेन सह, प्राग्वत्, क्रियासातत्ये । उदाहरणयोः समासत्वेन प्रातिपदिक-संज्ञायां प्रातिपदिककार्यम् । **इति द्वितीयाऽध्याये प्रथमः पादः ।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ द्वितीयाऽध्याये
द्वितीयः पादः

२-२-१ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ॥३

कायस्य पूर्वम्= पूर्वकायः । अपरकायः । अधरकायः । उत्तरकायः । एकदेशिनेत्युक्तेर्नेह-पूर्वं नाभेः कायस्य । अत्र नाभिशब्देन सह न समासः । एकाधिकरण इत्युक्तेर्नेह- पूर्वश्छात्राणाम् । "सर्वोऽप्येकदेशोऽह्ना समस्यते" ६-३-११० संख्याविसायेत्यादिज्ञापकात् । मध्याह्नः । सायाह्नः । केचित्तु सर्वोऽप्येकदेशः कालेन समस्यते, न त्वह्नैव, ज्ञापकस्य सामान्यापेक्षत्वात् । तेन मध्यरात्रः । इत्यादि सिद्धमित्याहुः ।

२-२-२ अर्धं नपुंसकम् ॥

अर्धं पिपल्या अर्धपिप्पली ।

२-२-३ द्वितीय-तृतीय-चतुर्थ-तुर्याण्यन्यतरस्याम् ॥४

द्वितीयं भिक्षायाः= द्वितीयभिक्षा । पक्षे २-२-८ षष्ठीसमासः । भिक्षाद्वितीयम् । २-२-११ पूर... इति निषेधस्तु नेह प्रवर्तते । महा (२-१-११) विभाषया सिद्धे पुनरन्यतरस्यांग्रहणसामर्थ्यात् । एकदेशिनेत्यनुवृत्तेर्नेह- द्वितीयं भिक्षाया भिक्षुकस्य ।

(तुरीयशब्दस्यापीष्यते)

तुरीयं भिक्षायाः= तुरीयभिक्षा । भिक्षातुरीयम् ।

२-२-४ प्राप्तापन्ने च द्वितीयया ॥

प्राप्तो जीविकां प्राप्तजीविकः । आपन्नजीविकः । पक्षे २-१-२४ द्विती...सूत्रेण समासः । जीविकाप्राप्तः । जीविकापन्नः । इह सूत्रे द्वितीयया अ इतिच्छित्त्वा अकारोऽपि विधीयते । तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका । आपन्नजीविका । इति दीक्षितः । प्राप्तापन्नयोरकारादेश इति तदाशयः ।

२-२-१ पूर्वा- अत्र अधिकरणशब्दो द्रव्यवाची । एकाधिकरणे इति एकदेशिना इत्यस्य विशेषणम् । एकदेशः = अवयवः । सोऽस्यास्तीति-एकदेशी = अवयवी । तथा च सूत्रार्थः फलति- एकाधिकरणे+ एकदेशिना=एकत्वसंख्याविशिष्टद्रव्ये वर्तमानो यः अवयविवाचिशब्दस्तत्प्रकृतिकेन, सुँपा (२-१-४) पूर्वा...तरम् = पूर्व अपर अधर उत्तर इति शब्दप्रकृतिकम्, सुँप् (२-१-२) विभाषा (२-१-११) समासः (२-१-३) तत्पुरुषः (२-१-२२) ।

नाभिशब्देन सह न समासः कायशब्देन तु भवत्येव पूर्वकायो नाभेरिति ।

२-२-२ अर्धं- समांशवाच्यर्धशब्दो नित्यं क्लीबे वर्तते । एकाधिकरणे+एकदेशिना (२-२-१) सुँपा (२-१-४) नपुंसकम्+अर्धम् = नपुंसकवर्त्यर्धशब्दप्रकृतिकम्, सुँप् (२-१-२) प्राग्वत् । षष्ठीसमासापवादः ।

२-२-३ द्विती- एकाधिकरणे+एकदेशिना (२-२-१) सुँपा (२-१-४) द्विती...याणि = द्वितीय-तृतीय-चतुर्थ-तुर्य-शब्दप्रकृतिकम्, सुँप् (२-१-२) अन्यतरस्याम्, प्राग्वत् । **द्वितीयं भिक्षाया भिक्षुकस्य** अत्र भिक्षुकशब्देन न समासः । भिक्षुको नैकदेशी किन्तु स्वामी । **तुरीय**-एकाधिकरणे+एकदेशिना (२-२-१) सुँपा (२-१-४) तुरीयशब्दस्य = तुरीयशब्दप्रकृतिकम्, सुँप् (२-१-२) अन्यतरस्याम् (२-२-३) प्राग्वत् ।

२-२-४ प्राप्तापन्ने = प्राप्त आपन्न इतिशब्दप्रकृतिकम्, सुँप् (२-१-२) द्वितीयया = द्वितीयान्तसमर्थेन, अन्यतरस्याम् (२-२-३) प्राग्वत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-२-५ कालाः परिमाणिना ॥

मासो जातस्य यस्य स मासजातः । द्व्यहजातः । (उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानम्)

द्व्यह्नजातः ।

२-२-६ नञ् ॥

न ब्राह्मणः = अब्राह्मणः ।

२-२-७ ईषदकृता ॥

ईषत्पिङ्गलः ।

(ईषद् गुणवचनेनेति वक्तव्यम्)

ईषद्रक्तम् ।

२-२-८ षष्ठी[1] ॥१७

छात्रस्य पुस्तकम्=छात्रपुस्तकम् । राज्ञःपुरुषः= राजपुरुषः ।

(कृद्योगा षष्ठी समस्यत इति वाच्यम्)

इध्मव्रश्चनः ।

२-२-९ याजकादिभिश्च ॥

ब्राह्मणयाजकः । देवपूजकः ।

(तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्यम्)

२-२-५ कालाः = कालवाचिशब्दप्रकृतिकम्, सुँप् (२-१-२) परिमाणिना = परिमाणिवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् । परिमाणमपेक्ष्यैव परिमाणी भवति । अतः कालशब्देन परिमाणवचनाः कालवाचिनः शब्दा गृह्यन्ते । **मासजातः** मासे देयमृणमित्यत्राऽवधिरिवाऽत्र मासः परिमाणम् । **द्व्यहजातः**ः द्वयोरह्नोः समाहारः= द्व्यहः । ५-४-९१ राजा... इति टच् । द्व्यहो जातस्य यस्य स द्व्यहजातः । **उत्तर-द्व्यह्नजातः** द्वे अहनी जातस्य यस्य सः प्राग्वट्टच् । ५-४-८८ अह्नो...इत्यह्नादेशः ।

२-२-६ नञ्, सुँपा (२-१-४) प्राग्वत् । **अब्राह्मणः** ६-३-७३ नलो..इति नकारलोपः ।

२-२-७ ईषत्,=ईषच्छब्दः, अकृता= कृदन्तभिन्नशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् । **ईषत्,** गुणवचनेन = गुणवाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) प्राग्वत् ।

२-२-८ षष्ठी-२-१-३७ पञ्चमी... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । षष्ठी= षष्ठ्यन्तम्, सुँपा (२-१-४) = सुँबन्तेन सह, विभाषा (२-१-११) समासः (२-१-३) = समाससञ्ज्ञकं भवति, तत्पुरुषः (२-१-२२) = तत्पुरुषसञ्ज्ञकं च भवति । इत्यर्थमुपदिश्य मूले दर्शितयोर्विग्रहयोः, जनकस्य पुत्री, दशरथस्य पुत्रः, इति विग्रहयोश्च च्छात्रैः साध्यमानां प्रक्रियां शिक्षकः शृणुयात् । सत्यावश्यके राजपुरुष इत्यत्र १-१-६१ प्रत्य... ८-२- ७ न लो...सूत्रे उद्बोधयेत् । इतः परम् २-१-४० सप्तमी...सूत्रमुपदिशेत् । **कृद्यो**...२-२-१० न नि...सूत्रस्थ...प्रति...इति प्रतिषेधे प्राप्ते वचनम् ।

२-२-९ याजकादिभिः= याजकादिशब्दप्रकृतिकेन, सुँपा (२-१-४) षष्ठी (२-२-८) समासः (२-१-३) तत्पुरुषः (२-१-२२) च । २-२-१५ तृजका...इत्यस्य प्रतिप्रसवोऽयम् । **तत्स्थैः**= तेषु तिष्ठन्तीति तत्स्थाः, तैः= तत्स्थैः, तच्छब्देन चाऽत्र प्रत्यासत्त्या गुणा एव परामृश्यन्ते । एवञ्च तत्स्थैः= गुणस्थैः+गुणैः= गुणवर्तिनो ये गुणाः, तद्वाचिशब्दप्रकृतिकेन, सुँपा (२-१-४) षष्ठी= षष्ठ्यन्तम्, समस्यत इति । किमुच्यते गुणवर्तिनो ये गुणा इति ? न खलु क्वचिदपि गुणेषु गुणा वर्तन्ते, सर्वत्रैव हि गुणा द्रव्येषु वर्तन्ते । इति चेत्, अत्रेदं तात्पर्यम्-शुक्लो गुणोऽस्मिन्नस्तीति विग्रहे विहितस्य मतुँपो लुकि शुक्लशब्दो द्रव्यवाचिनां पटादिशब्दानां विशेषणं भवति यथा-पटःशुक्लः । अनो गुणवाची शुक्लशब्दो द्रव्यवाचीति प्रतीयते । रूपरसादिशब्दास्तु द्रव्यवाचिनां पटादीनां विशेषणानि न भवन्ति पटो रूपम्, 'आम्रं रसः' इत्यादयः प्रयोगा न भवन्ति । पटस्य रूपम्, आम्रस्य रसः, इत्यादय एव प्रयोगा भवन्ति । अतः शुक्लशब्दमात्रप्रयोगे यथा शुक्लगुणाश्रयः पटादिःप्रतीयते न तथा रूपम् रस इत्यादिशब्दमात्रप्रयोगे रूपगुणाश्रयः, रसगुणाश्रयः प्रतीयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्दनस्य गन्धः = चन्दनगन्ध : । पटस्य रूपम्= पटरूपम् ।

(गुणात्तरेण तरलोपश्चेति वक्तव्यम्)

सर्वेषां श्वेततरः= सर्वश्वेतः ।

२-२-१० न निर्धारणे ॥

क्षत्रियो मनुष्याणां शूरतमः । गवां बहुक्षीरा कृष्णा । धावन्नध्वगानां शीघ्रतमः ।

(प्रतिपदविधाना च षष्ठी न समस्यत इति वक्तव्यम्)

उदाहरणानि २-३-५१ ज्ञोऽवि...प्रभृतिषु द्रष्टव्यानि ।

२-२-११ पूरण-गुण-सुहितार्थ-सदव्यय-तव्य-समानाधिकरणेन ॥

छात्राणां पञ्चमः । काकस्य कार्ष्ण्यम् । अनित्योऽयं गुणेन निषेधः । संज्ञाप्रमाणत्वात् (१-२-५३ तद...सूत्रे) इति निर्देशात् । तेन बुद्धिमान्द्यम् । यत्नगौरवमित्यादिसिद्धिः । फलानां तृप्तः । सत्= शतृँशानचौ । ब्राह्मणस्य कुर्वन् कुर्वाणो वा । ब्राह्मणस्य कृत्वा । ब्राह्मणस्य कर्तव्यम् । तव्यता तु समासो भवत्येव-ब्राह्मणकर्तव्यम् । तक्षकस्य सर्पस्य ।

२-२-१२ क्तेन च पूजायाम् ॥

राज्ञां मतो बुद्धः पूजितो वा ।

२-२-१३ अधिकरणवाचिना च ॥

इदमेषामासितं गतं भुक्तं वा ।

२-२-१४ कर्मणि च ॥

आश्चर्यो गवां दोहोऽगोपेन ।

२-२-१५ तृजकाभ्यां कर्तरि ॥

अपां स्रष्टा । ओदनस्य पाचकः ।

२-२-१६ कर्तरि च ॥

अतः शुक्लादिशब्दा द्रव्यवर्तिगुणवाचिनः, रूपरसादिशब्दास्तु आत्म (गुण) वर्ति-वाचिन एव । तेन रूपरसादिशब्दैः समासो भवति, न तु शुक्लादिशब्दैरिति । २-२-११ पूर... इत्यस्य प्रतिप्रसवः ।

गुणात्+तरेण= गुणवाचिशब्दात् परो यस्तरप्प्रत्ययस्तदन्तप्रकृतिकेन, सुँपा (२-१-४) षष्ठी (२-२-८) प्राग्वत्, तरलोपश्च । २-२-१० न नि.. इत्यस्य प्रतिप्रसवः ।

२-२-१० न नि- निर्धारणे+षष्ठी (२-२-८) = निर्धारणे वर्तमाना या षष्ठी तदन्तम्, न= न समस्यते । जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम् ।

२-२-११ पूरण...णेन = पूरणप्रत्ययान्त- गुणवाचि-तृप्त्यर्थक-सत्संज्ञकप्रत्ययान्तशब्दप्रकृतिकेन अव्ययसंज्ञकशब्दप्रकृतिकेन तव्यप्रत्ययान्तशब्दप्रकृतिकेन समानाधिकरणवाचिशब्दप्रकृतिकेन च, सुँपा (२-१-२) षष्ठी (२-२-८) न (२-२-१०) । सुहितम्= तृप्तिः। षुहँ चक्यर्थे चक्यर्थस्तृप्तिः । सत्= शतृँ शानचौ । ३-२-१२७ तौ सत् इति शतृँशानचोः सत्संज्ञाया विधानात् ।

२-२-१२ क्तेन- पूजायामिति ३-२-१८८ मति...सूत्रे निर्दिष्टस्यार्थस्योपलक्षणम् । पूजायाम्+क्तेन = मतिबुद्धीत्यादिना विहितो यः क्तस्तदन्तप्रकृतिकेन, सुँपा (२-१-४) षष्ठी (२-२-८) न (२-२-१०) ।

२-२-१३ अधिकरणवाचिना+क्तेन(२-१-१२) = अधिकरणवाची यः क्तप्रत्ययस्तदन्तप्रकृतिकेन, सुँपा (२-१-४) षष्ठी (२-२-८) न (२-२-१०) । उदाहरणेषु ३-४-७६ क्तोऽधि...इत्यधिकरणे क्तः ।

२-२-१४ कर्मणि च+षष्ठी (२-२-८)= २-३-६६ उभयप्राप्तौ कर्मणि इति सूत्रेण विहिता या षष्ठी तदन्तम्, न (२-२-१०) ।

२-२-१५ तृज- कर्तरि+तृजकाभ्याम्= कर्त्रर्थे विहितौ यौ तृजकौ तदन्तप्रकृतिकेन, सुँपा (२-१-४) षष्ठी (२-२-८) न (२-२-१०) ।

२-२-१६ कर्तरि च+षष्ठी (२-२-८)= कर्त्रर्थे विहिता या षष्ठी तदन्तम्, अकेन (२-२-१५)=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवतः शायिका ।

२-२-१७ नित्यं क्रीडाजीविकयोः ॥२०

उद्दालकपुष्पभञ्जिका । दन्तलेखकः ।

२-२-१८ कु-गति-प्रादयः ॥

कुपुरुषः । गतेरुदाहरणानि १-४-६० ऊर्या... प्रभृतिषु द्रष्टव्यानि ।

(प्रादयो गताद्यर्थे प्रथमया)

प्रगतः पुरुषः= प्रपुरुषः ।

(अत्यादयः क्रान्ताद्यर्थे द्वितीयया)

खट्वामतिक्रान्तः= अतिखट्वः ।

(अवादयः क्रुष्टाद्यर्थे तृतीयया)

अवक्रुष्टः कोकिलयाऽ वकोकिलः ।

(पर्यादयो ग्लानाद्यर्थे चतुर्थ्या)

परिग्लानोऽध्ययनाय पर्यध्ययनः ।

(निरादयः क्रान्ताद्यर्थे पञ्चम्या)

निष्क्रान्तः कौशाम्ब्याः= निष्कौशाम्बिः ।

(इवेन सह समासो विभक्त्यलोपः पूर्वपद-प्रकृति-स्वरत्वं च वक्तव्यम्)

वागर्थाविव ।

(प्रादिप्रसङ्गे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः)

वृक्षं प्रति विद्योतते विद्युत् ।

२-२-१९ उपपदमतिङ् ॥२२

कुम्भकारः ।

(गति-कारकोपपदानां कृद्भिः समासवचनं प्राक् सुँबुत्पत्तेः)

व्याघ्री । कच्छपी । अश्वक्रीती ।

अकप्रत्ययान्तशब्दप्रकृतिकेन, सुँपा (२-१-४) न (२-२-१०) । नेह तृजनुवर्तते, तद्योगे कर्तुरुक्तत्वेन कर्तृषष्ठ्या असम्भवात् । उदाहरणे ३-३-१११ पर्या...इति ण्वुँच् ।

२-२-१७ नित्यं- षष्ठी (२-२-८) तृजकाभ्याम् (२-२-१५) नित्यम्= नित्यं समस्यते, क्रीडाजीविकयोः=क्रीडायां जीविकायां च गम्यमानायाम् । **उद्दालपुष्पभञ्जिका** । क्रीडाविशेषस्येयं संज्ञा । ३-३-१०९ संज्ञा...इति ण्वुँल् । **दन्तलेखकः** ३-१-१३३ ण्वुँल्तृचौ इति ण्वुँल् । क्रीडायां विकल्पे जीविकायां २-२-१५ तृज...इति निषेधे प्राप्ते वचनम् ।

२-२-१८ कु-गति-प्रादयः= कुशब्दः प्रादयश्च सुँबन्तेन,गतिसंज्ञकाश्च समर्थेन नित्यम् (२-२-१७) समस्यन्ते । कथमर्थे वैषम्यम् ? अत्र गतिग्रहणं पृथक्कृत्य तस्य उत्तरसूत्रादाकृष्टेन अतिङ् इति लुप्ततृतीयान्तेन सम्बन्धात् । गतिसाहचर्यात् कुशब्दोऽव्ययं गृह्यते, न तु पृथिव्यादिद्रव्यवाची ।

२-२-१९ उप-३-२-१ कर्मण्यण्-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र 'अतिङ्' इति लुप्ततृतीयान्तम् । तिङ्शब्दश्च तिङन्तपरः । इति प्रथमं बोधयेत् । अथ-उपपदम्, अतिङ्= तिङन्तभिन्नेन सह, नित्यम् (२-२-१७) समासः (२-१-३)= समाससंज्ञकं भवति, तत्पुरुषः (२-१-२२) = तत्पुरुषसंज्ञकं च भवति । इत्यर्थमुपदिश्य 'कुम्भ+ङस्' इत्युपपदं 'कार' इत्यतिङन्तेन सह समाससंज्ञकं जातम्= 'कुम्भ+ङस्+कार' इति समुदायः समास-शब्देन व्यवह्रियते, इति बोधयेत् । अथ 'कुम्भ+ङस्+कार' इति श्यामपाट्यां लिखित्वा १-२-४६ कृत्त...सूत्रेण तस्य समुदायस्य प्रातिपदिकसंज्ञां छात्रैः कारयित्वा समुदाय-घटक-ङसः प्रातिपदिकावयवत्वेन २-४-७१ सुँपो...सूत्रेण छात्रैरेव लुकि साधिते कुम्भकारशब्दः सिद्धः । अथ स्वादिकार्यम् । इति बोधयेत् । उपसर्जन-पूर्वप्रयोगादिविषयाः समासशिक्षण-रीतावेवोपदेश्याः । प्रकृते तु नोपदेश्या बोधभारापत्तेः । अथ च अण् प्रत्ययस्य विरूपत्वेन ण्वुँल्तृचोर्विकल्पेन बाधकत्वेन पक्षान्तरे कुम्भस्य कारकः, कुम्भस्य कर्ता, इत्यादयोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-२-२० अमैवाऽव्ययेन ॥२१

स्वादुङ्कारम् । अमैवेति नियमान्नेह-कालो भोक्तुम् (३-३-१६७) । अग्रे भोजम्, अग्रे भुक्त्वा, (३-४-२४) ।

२-२-२१ तृतीया-प्रभृतीन्यन्यतरस्याम् ॥२२

उभयत्र विभाषेयम् । मूलकोपदंशं भुङ्क्ते, मूलकेनोपदंशम् । उच्चैःकारमाचष्टे ।

२-२-२२ क्त्वा च ।

उच्चैःकृत्य, उच्चैः कृत्वा ।

२-२-२३ शेषो बहुव्रीहिः ॥२८

२-२-२४ अनेकमन्यपदार्थे ॥२९

चतुर्भुजः । चतुर्भुजा ॥

(सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः)

कण्ठे-स्थः कालो यस्य स कण्ठेकालः ।

उष्ट्रमुखमिव मुखं यस्य स उष्ट्रमुखः ।

प्रयोगा बोध्या इति च शिक्षकः विशदं बोधयेत् । अथ ३-२-३ आतोऽनुपसर्गे कः- सूत्रमुपदिशेत् ।

२-२-२० अमै- 'अमैव' इत्यस्य 'उपपदम्' (२-२-१९) इत्यत्रान्वयः, न त्वव्ययेन, इत्यत्र । अम् इत्यनेन अम्प्रत्ययविधायकं वाक्यं गृह्यते । आक्षिप्यमाणं निर्दिष्टमिति क्रियापदमपेक्ष्य च तृतीया । एवञ्च, अमैव= अम्प्रत्ययमात्रविधायकेन वाक्येन निर्दिष्टम्, उपपदम् = उपपदमेव, अव्ययेन, नित्यम् (२-२-१७) समस्यते । पूर्वेण सिद्धेऽस्य नियमार्थत्वात् उपपदमेव इत्युक्तम् । अव्ययेन सहोपपदस्य समासो भवति चेत् अम्प्रत्ययमात्रविधायकं यद् वाक्यं तेन निर्दिष्टस्यैव नान्यस्येति भावः । तदव्ययञ्चाऽमन्तमेव संभवति नाऽन्यदित्यवधेयम् । प्रत्युदाहरणेषु आद्ये अमोऽभावाद् द्वितीये क्त्वाप्रत्ययस्यापि विधानात् तृतीये क्त्वाप्रत्ययान्तत्वान्न समासः ।

२-२-२१ तृती- अमैव (२-२-२०) इत्यनुवर्तमानमत्र, अव्ययेन (२-२-२०) इत्यस्य विशेषणम्, न तूपपदस्य । तृ...नि= ३-४-४७ उप...इत्यतः प्रभृतिषु निर्दिष्टान्युपपदानि, अमैवाऽव्ययेन (२-२-२०)= अमन्तेनैवाऽव्ययेन, सह, अन्यतरस्याम्,= वा समस्यन्ते । उदाहरणयोः- आद्ये-३-४-४७ उप...इति णमुँल् । अन्त्ये ३-४-५९ अव्यये...इति णमुँल् । आद्ये प्राप्ते अन्त्ये त्वप्राप्ते विकल्पेन समासः ।

२-२-२२ क्त्वा च- क्त्वा इति क्त्वाशब्दस्य तृतीयैकवचनान्तं रूपम् । तृतीयाप्रभृतीनि, (२-२-२१) क्त्वा= क्त्वाप्रत्ययान्तेन सह, अन्यतरस्याम् (२-२-२१) समस्यन्ते । पूर्वेणाऽप्राप्ते वचनम् । समासपक्षे ७-१-३७ समा...इति ल्यप् ।

२-२-२३ शेषो-२-२-३६ निष्ठा-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । शेषः= प्रथमान्तं पदम्, बहुव्रीहिः= बहुव्रीहिसंज्ञकं भवतीत्यर्थमुपदिश्य बहुव्रीहिरिति २-२-२८तेन...सूत्रावधि, अधिकृतं भवतीति बोधयेत् । अथ २-२-२४ अनेक... सूत्रमुपदिशेत् ।

२-२-२४ अने- २-२-२३ शेषो बहुव्रीहिः- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्राऽधोनिर्दिष्टरूपेण श्यामपाट्यां

(क) (ख)

लिखेत् । यथा २-२-२३ शेषः बहुव्रीहिः ॥ २-२-२४ अनेकम् (क) अन्यपदार्थे (ख) इति । अन्यपदार्थे = अन्यस्य पदस्यार्थे वर्तमानम्, अनेकम्, (क)= शेषः= प्रथमान्तम्, विभाषा, (२-१-११), समासः (२-१-३)= समाससंज्ञकं भवति, (ख)= बहुव्रीहिः = बहुव्रीहिसंज्ञकं च भवति । इत्यर्थमुपदिशेत् । अत्र अन्यपदार्थे (अन्यस्य पदस्य अर्थे) इत्यत्र कस्मात् अन्यस्य ? इति च्छात्राणामाकाङ्क्षायां सत्यां शेषशब्देन प्रथमान्तं गृह्यते, इति तूक्तमेव । तस्याऽत्राऽप्यनुवृत्त्या, अनेकं प्रथमान्तमित्यर्थोऽपि स्फुट एव जातः । अतोऽत्र 'अन्यस्य' इत्यस्य प्रथमान्तादन्यस्य= भिन्नस्य इत्यपि प्रायः स्फुटकल्पमेवेति बोधयेत् । प्रसङ्गादत्र शिक्षको मनसाऽधोनिर्दिष्टं विषयं विमृशेत् । यथा- समस्तपदानां सरलेनोपायेनाऽर्थं बोधयितुं समासोपदेशः क्रियते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परन्तु, अद्यत्वेऽधीत-व्याकरणा अपिच्छात्राः समस्त-पद-घटितानि काव्यादि-वाक्यानि पठन्तः, समासप्रसङ्गमनुत्थाप्य वाक्यार्थमात्रं गुरुणोपदिश्यमानं सरलं मन्यन्ते । समासप्रदर्शनपुरस्सरमुपदिश्यमानं वाक्यार्थं कठिनं मन्यन्ते । तत्रापि बहुव्रीहौ तु कुत्र यस्येति वाच्यम् ? कुत्र येन ? कुत्र यस्मै ? कुत्र यस्मात् ? कुत्र यस्मिन् ? एवमेव कुत्र यस्याः ? कुत्र यस्याम् ? इत्यादिषु महत् काठिन्यमनुभवन्ति । इति । अतः काव्यपठने समस्तानां पदानां समासनिर्देशं विना क्रियमाणाद् वाक्यार्थमात्रोपदेशात् ससमासनिर्देशं क्रियमाणं वाक्यार्थोपदेशं छात्रा यथा सरलमनुभवेयुस्तथोपदेशः कर्तव्य इति च । तदर्थं श्यामपाट्यामधोनिर्दिष्टरूपेण वाक्यानि लिखेत् ।

असमस्त-वाक्यानि	समस्त-वाक्यानि
१. भगवतः चत्वारः भुजाः सन्ति ।	चतुर्भुजः भगवान् अस्ति ।
२. भगवत्याः चत्वारः भुजाः सन्ति ।	चतुर्भुजा भगवती अस्ति ।
३. गृहस्य चत्वारः जालाः सन्ति ।	चतुर्जालम् गृहम् अस्ति ।

(अत्र जालशब्दः पुंसि वर्तते, तथा च प्रयोगो दृश्यते-

उच्चं हर्म्यं संनिरुद्धाश्च जाला इति । अथाऽत्र शिक्षको बोधयेत्- प्रथमवाक्ये चतुर्भुजः, इति समस्तं पदं भगवन्तं बोधयति विशेषणतया । चतुष्पदार्थं भुजपदार्थं च न बोधयति । तेन 'चतुर्+जस्' 'भुज+जस्' इति प्रथमान्ते पदे चतुष्पदार्थाद् भुजपदार्थाच्च अन्यस्य (प्रकृते भगवतः) पदस्य अर्थे वर्तेते इति स्फुटमेव । एवञ्चाऽत्र (चतुर्+जस् भुज+जस्, इत्यत्र) २-२-२४ अने... सूत्रस्य समन्वयो भवति । तथा प्रकृतेऽन्यपदार्थश्च भगवान् । असमस्तवाक्येऽन्यपदार्थवाचकं पदं च 'भगवतः' इति पुंलिङ्गस्य षष्ठ्येकवचनान्तं रूपं वर्तते । अतः प्रकृते चत्वारः, भुजाः, यस्य, इति विग्रहः क्रियते । अर्थात् अन्यपदार्थबोधनाय पुंलिङ्गस्य षष्ठ्येकवचनान्तस्य यच्छब्दस्य रूपमुच्चार्यते । इति । अथ २-२-२४ सूत्रेण बहुव्रीहिसमासे सति २-२-३५ सप्त... सूत्रेण विशेषणवाचकस्य चतुर्जस् इत्यस्य पूर्वप्रयोगे 'चतुर्+जस् भुज+जस्' इति श्यामपाट्यां लिखित्वा छात्रैः प्रातिपदिकसंज्ञां सुँब्लुक्कार्यं च साधयित्वा 'चतुर्भुज" इति श्यामपाट्यां लिखित्वा छात्रान् बोधयेत् । यथा-वत्साः ? बहुव्रीहिसमासे समस्तं पदम् अन्यपदार्थ-वाचक-शब्दाऽनुसारि-लिङ्गविभक्ति-भाग् भवति । यतः समस्तं पदम् अन्यपदार्थवाचकशब्दस्य विशेषणं भवति । विशेषणं च विशेष्याऽनुसारि भवति । अतः प्रकृते भगवान् इति विशेष्यानुसारी चतुर्भुजशब्दः पुंलिङ्गे प्रथमैकवचनान्तः प्रयुज्यते । 'चतुर्भुजः' इति । द्वितीयवाक्ये-अन्यपदार्थो भगवती वर्तते । असमस्तवाक्ये भगवत्या इति षष्ठ्येकवचनान्तं स्त्रीलिङ्गस्य रूपं वर्तते । अतः, 'चत्वारः, भुजाः, यस्याः, इति विग्रहः क्रियते । पूर्ववत् समासे सति च भगवती इति विशेष्यस्य स्त्रीलिङ्गकत्वेन चतुर्भुजब्दोऽपि स्त्रीलिङ्गकः प्रयोज्यः । स्त्रीलिङ्गे चाऽदन्तशब्दाट्टाब्भवतीति तु ६-१-६७ एङ्ह्र... सूत्रे पूर्वमुपदिष्टमेव । चतुर्भुजा । इति । तृतीयस्मिन् वाक्ये, अन्यपदार्थो गृहं वर्तते । अतः, 'चतुर्+जस् जाल+जस्' इत्यत्र च पूर्ववत् समासे सति गृहम् इति विशेष्यस्य क्लीबत्वेन चतुर्जाल-शब्दोऽपि क्लीबे प्रयुज्यते- चतुर्जालम्, इति । एवमेव चत्वारो भुजा यस्येति विग्रहे चतुर्भुजम् = भगवती-रूपम् । इत्यादि ज्ञेयम् । अथ पुनः श्यामपाट्यामधस्तनानि वाक्यानि लेख्यानि ।

१- (क) गावः जलम् पीतवत्यः= (ख) गोभिः जलम् पीतम् । २ (क) गोपालः कलमम् प्राप्तवान्= (ख) गोपालेन कलमः प्राप्तः । अत्र प्रथमे (ख) वाक्ये गोभिः इति रूपं गोशब्दस्य स्त्रीलिङ्गस्य तृतीयाबहुवचनान्तं वर्तते । अतस्तत्र बहुव्रीहिसमासे कर्तव्ये पीतं जलं याभिरिति विग्रहः कार्यः । 'पीत+सुँ जल+सुँ' इत्यत्र समासे च २-२-३६ निष्ठा-सूत्रेण पीत+सुँ इत्यस्य पूर्वप्रयोगे पूर्ववत् प्रक्रियायां पीतजल इति श्यामपाट्यां लिखित्वा, अन्यपदार्थवाचिनो गोशब्दस्य (विशेष्यस्य) स्त्रीलिङ्गे वर्तमानत्वेन पीतजलशब्दादपि टापि बहुवचनान्तं 'पीतजलाः' इति प्रयोज्यम्= 'पीतजलाः गावः" इति । अथाऽधोनिर्दिष्टरूपेण श्यामपाट्यां लिखेत्- गवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः)

प्रपतितं पर्णं यस्य स प्रपर्णः, प्रपतितपर्णो वा।

(नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः)

अविद्यमानः पुत्रो यस्य सः, अपुत्रः, अविद्यमानपुत्रो वा।

२-२-२५ सङ्ख्ययाऽव्ययासन्नाऽदूराधिक-संख्याः संख्येये ॥

दशानां समीपे ये सन्ति ते, उपदशाः। नव, एकादश वेत्यर्थः। उपशब्दः समीपे समीपिनि च वर्तते। आद्येऽव्ययीभावः। द्वितीये तु बहुव्रीहिरिति विवेकः। विंशतेरासन्ना आसन्नविंशाः। दशानामदूरा अदूरदशाः। दशभ्योऽधिका अधिकदशाः। द्वौ वा त्रयो वा द्वित्राः।

२-२-२६ दिङ्नामान्यन्तराले ॥

उत्तरस्याः पूर्वस्याश्च दिशोऽन्तरालम्= उत्तरपूर्वा।

२-२-२७ तत्र तेनेदमिति सरूपे ॥

केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तं दण्डादण्डि।

२-२-२८ तेन सहेति तुल्ययोगे ॥

पुत्रेण सहाऽऽगतः= सपुत्र आगतः, सहपुत्र इति वा। तुल्ययोगे इति प्रायिकम्। विभाषा सपूर्वस्येत्या-दिनिर्देशात्। सकर्मकः। विद्यमानकर्मक इत्यर्थः।

घासम् दत्तवान्= गवे घासः दत्तः। अत्र 'गवे' इति रूपं स्त्रीलिङ्गस्य गोशब्दस्य चतुर्थ्येकवचनान्तम्। अतः, घासः दत्तः यस्यै इति विग्रहः कार्यः। पूर्ववत् प्रक्रियायां च दत्तघासा गौः, इति। इत्थमन्यपदार्थवाचिशब्दानुसारेण यस्य, यस्याः, यस्मिन्, यस्याम्, याभिः, यासाम्, इत्यादि विचारणीयमिति पुनरुक्तिदोषमनादृत्य स्फुटं बोधयेत्। अथाऽधोनिर्दिष्टवाक्येषु बहुव्रीहिसमासविधौ विग्रहे च च्छात्रान् परीक्षेत-मनुष्यस्य नेत्रे द्वे स्तः। मनुष्याणां मतयः विभिन्नाः सन्ति। छात्रेभ्यः वृत्तिः दत्ता। कन्यायै वस्त्रं दत्तम्। इत्यादि। अथ सुशीला (सुँ) कन्या (सुँ) यस्येति विग्रहे पूर्ववत् समासक्रमे 'सुशीला कन्या' इति श्यामपाट्यां लिखित्वा ६-३-३४ स्त्रियाः पुंवद्...सूत्रं प्रस्तुवीयात्। **सप्तम्युप**-सप्तमी च उपमानं च= सप्तम्युपमाने, ते पूर्वपदे यस्य तस्य सप्तम्युपमानपूर्वपदस्य= सप्तम्यन्तपूर्वपदकस्य उपमानवाचिपूर्वपदकस्य च, प्रथमान्तान्तरेण, विभाषा (२-१-११) समासः, उत्तरपदलोपः= पूर्वपदघटकोत्तरपदलोपश्च वक्तव्यः। **प्रादि**- धातोर्जातम्= धातुजम्= धातोर्निष्पन्नम्। प्रादिभ्यो धातुजस्य= प्रादिभ्यः परं यद् धातुजम् (पतितादि) तदन्तप्रकृतिक-प्रथमान्तस्य प्रथमान्तान्तरेण सह विभाषा (२-१-११) वाच्यः= समासो वक्तव्यः, बहुव्रीहिश्च (२-२-२३) उत्तरपदलोपश्च वा= पूर्वपदघटकोत्तरपदलोपश्च वा। **नञोऽस्त्यर्था**- नञः+अस्त्यर्थानाम्= नञः परे ये विद्यमानार्थास्तदन्तप्रकृतिकप्रथमान्तानां प्रथमान्तान्तरेण सह, विभाषा (२-१-११) वाच्यः= समासो वक्तव्यः, बहुव्रीहिश्च (२-२-२३) उत्तरपदलोपश्च वा= पूर्वपदघटकोत्तरपदलोपश्च वा।

२-२-२५ संख्य- संख्येये+संख्यया= संख्येयार्थवृत्ति-संख्यावाचिशब्दप्रकृतिकेन, सुँपा (२-१-२) अव्यया...संख्याः= अव्ययसंज्ञक आसन्न अदूर अधिक इति प्रकृतिकं संख्यावाचिशब्दप्रकृतिकं च सुँप् (२-१-२) विभाषा (२-१-११) समासः (२-१-३) बहुव्रीहिश्च (२-२-२३)।

२-२-२६ दिङ्नामानि= दिग्वाचिशब्दप्रकृतिकानि, सुँप् (२-१-२)= सुँबन्तानि, प्राग्वत्, अन्तराले=अन्तराले वाच्ये।

२-२-२७ तत्र-सरूपे = समानं रूपं ययोस्ते। ६-३-८५ ज्योति...इति समानस्य सः। सरूपे = समानाकारे, तत्र तेन इदमिति= ग्रहणविषयके सप्तम्यन्ते प्रहरणविषयके तृतीयान्ते च इदं युद्धं प्रवृत्तमित्यर्थे विभाषा (२-१-११) समासः (२-१-३)=समाससंज्ञके, बहुव्रीहि (२-२-२३) संज्ञके च, कर्मव्यतिहारे। ग्रहणं प्रहरणं कर्मव्यतिहारो युद्धं च समासार्थ इति सर्वमितिकरणाल्लभ्यत इति काशिका। उदाहरणयोः ५-४-१२७ इच् क... इतीच्। ६-३-१३७ अन्ये... इति पूर्वपदस्य दीर्घः। २-१-१७ तिष्ठ...इत्यव्ययीभावादव्ययत्वम्।

२-२-२८ तेन-तुल्ययोगे = समानसम्बन्धे वर्तमानः, सह इति= सह शब्दः, तेन= तृतीयान्तेन सह, विभाषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-२-२९ चार्थे द्वन्द्वः ॥	हरिहरौ । हरिहरगणेशाः । संज्ञापरिभाषम् ।

(२-१-११) समासः (२-१-३) बहुव्रीहिश्च (२-२-२३)। उदाहरणे ६-३-८२ वोप...इति सहस्य वा सः ।
२-२-२९ चार्थे-२-२-३२ द्वन्द्वे घि-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा- २-२-२४ (क)
अनेकम् अन्यपदार्थे ॥ २-२-२९ चार्थे (क) द्वन्द्वः ॥इति। चार्थे = चार्थे वर्तमानम् (क)= अनेकम्, सुँप् (२-१-२)= सुँबन्तम्, विभाषा, (२-१-११) समासः (२-१-३), = समाससंज्ञकं भवति, द्वन्द्वः= द्वन्द्वसंज्ञकं च भवति । अथाऽधोनिर्दिष्टरूपेण बोधयेत्-वत्साः ? 'हरिः पालयति हरश्च पालयति' इत्यत्र द्वे वाक्ये स्तः । तत्र हरेः, हरस्य च एकेनैव (कर्तृत्वेनैव) रूपेण पालनक्रियायामन्वयो भवति । एतादृशे स्थले द्वन्द्वसमासो भवतीति वदन् हरिश्च (हरि+सुँ) हरश्च (हर+सुँ) इति श्यामपाट्यां लिखित्वा लक्षण-समन्वयं छात्रैः कारयित्वा प्रातिपदिकसंज्ञां सुँब्लुक्-कार्यं च च्छात्रैः साधयिष्यन् हरिशब्दस्य पूर्वप्रयोगार्थं २-२-३२ द्वन्द्वे...सूत्रसमन्वयायच्छात्रानादिशेत् । अथ हरिहर इति श्यामपाट्यां लिखित्वा स्वाद्युत्पत्तौ कर्तव्यायाम्, अत्र हरिहरौ द्वौ स्तः । अतो द्विवचनं भवतीत्युद्बोधयेत् । हरिहरौ, इति । तदनुसारेण क्रियापदमपि द्विवचनान्तं भवति । यथा-हरिहरौ पालयतः । एतेन यदि त्रि-प्रभृतीनां पदानां समासस्तदा बहुवचनं भवतीति च स्फुटमेव । यथा-हरिश्च हरश्च गणेशश्च= हरिहरगणेशाः । हरिश्च हरश्च सूर्यश्च गणेशश्च= हरि-हर-सूर्य-गणेशाः । इत्यादि । अथाऽधोनिर्दिष्टरूपेण शिक्षको बोधयेत्-वत्साः ? यथा सेनायां यद्यपि बहवो जना भवन्ति । तथापि सेना युध्यते । इत्येकवचनान्तं प्रयुज्यते । तत्र समूहस्य विवक्षणात् । तथैव द्वन्द्वसमासेऽपि समाहार (समूह) विवक्षायां द्वयोः पदयोर्बहूनां वा पदानां समासेऽपि समस्तं पदमेकवचनान्तं प्रयुज्यते । तच्च क्लीबे, एव भवति । यथा-संज्ञा च परिभाषा च संज्ञापरिभाषम् । अत्र २-४-१७ स न...सूत्रमुद्बोधयेत् । अथ सारांशरूपेण बोधयेत्-समाहारे द्वन्द्वे, एकवचनान्तं क्लीबं भवति । इतरेतरयोग-द्वन्द्वे तु (२-४-२६ पर...सूत्रमुद्बोधयन्) परवल्लिङ्गं भवति । व्यक्तिसंख्यानुसारेण च वचनं भवति । पुष्पं च माला च= पुष्पमाले । (इतरेतरयोगः), पुष्पमालम् (समाहारः) । पार्वती च गणेशश्च= पार्वतीगणेशौ (इतरेतरयोगः) इत्यादि । वाक् च अर्थश्च= वागर्थौ । पार्वती च परमेश्वरश्च= पार्वती-परमेश्वरौ । वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये । जगतःपितरौ वन्दे पार्वती- परमेश्वरौ ॥ (रघुवंशम्, सर्गः १, श्लोकः १) ग्रन्थोपसंहारः- एवं सन्धिविधि-सुँबन्तप्रक्रिया-तिङन्तप्रक्रिया-कृदन्तप्रक्रिया-तद्धितप्रक्रिया-समासप्रक्रिया-सँस्कारं छात्रमस्तिष्के द्रढयित्वा प्रथमं सुँबन्तेषु वर्णसमाम्नायोपदिष्टाऽकारादिवर्णान्तानि प्रातिपदिकानि तत्तत्प्रयोगाऽपेक्ष्याणि सूत्राणि वृण्वानः शिक्षकः क्रमेणोपदिश्य तिङन्तेषु भू सत्तायाम् इत्यादि-धातुपाठोपदेश-क्रमेण तत्तत्प्रयोगाऽपेक्ष्याणि सूत्राणि वृण्वानः शिक्षको धातुरूपाणि चोपदिश्य १-१-१ वृद्धिरादैच्-सूत्रात् क्रमशोऽष्टाध्यायीं समापयेत् । तत्र धातुपाठोपदेशे, आँदितः फलम्-निष्ठायामिडभावः । इँदितः फलम्-नुँमागमः । ईँदितः फलम्- निष्ठायामिडभावः । उँदितः फलम्-क्त्वाप्रत्ययस्य वेट् । ऊँदितःफलम्-वलादेरार्धधातुकस्य वेट् । ॠँदितःफलम्-चङ्परे णौ उपधाह्रस्व-प्रतिषेधः । लृँदितः फलम्-परस्मैपदे च्लेरङ् । एँदितः फलम्-इडादौ सिचि परस्मैपदे वृद्धिप्रतिषेधः । ओँदितः फलम्-निष्ठातकारस्य नत्वम् । षितः फलम्- भावे स्त्रियामङ् । ञीतः फलम्-वर्तमाने क्तः । ट्वितः फलम्-अथुच् प्रत्ययः । ड्वितः फलम्- क्त्रिप्रत्ययः । अनुदात्तङितः फलम्- आत्मनेपदम् । स्वरितञितः फलम्-कर्त्रभिप्राये क्रियाफले आत्मनेपदम् । इरितः फलम्- परस्मैपदे विभाषया च्लेरङ् । इत्यादि मध्ये मध्ये प्रश्नपुरस्सरमुद्बोधयेद्, यथा तत्तदनुबन्धं दृष्ट्वा तत्तन्मूलकं कार्यं छात्रमस्तिकेषु स्वयमेव स्फुरेदिति । हरिः ओं तत्सत्, श्रीजगदम्बार्पणमस्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-२-३० उपसर्जनं पूर्वम् ॥३१,३८

२-२-३१ राजदन्तादिषु परम् ॥

दन्तानां राजा= राजदन्तः ।

(धर्मादिष्वनियमः)

अर्थधर्मौ, धर्मार्थौ ।

२-२-३२ द्वन्द्वे घि ॥३४

हरिहरौ ।

(अनेकप्राप्तावेकस्य नियमः शेषे त्वनियमः)

हरिगुरुहराः । हरिहरगुरवः ।

२-२-३३ अजाद्यदन्तम् ॥

ईशकृष्णौ ।

(बहुष्वनियमः)

अश्वरथेन्द्राः । इन्द्राश्वरथाः ।

(द्वन्द्वे घ्यन्तादजाद्यदन्तं विप्रतिषेधेन)

इन्द्राग्नी । इन्द्रवायू ।

२-२-३४ अल्पाच्तरम् ॥

प्लक्षन्यग्रोधौ ।

(बहुष्वनियमः)

शङ्ख-दुन्दुभि-वीणाः । वीणा-शङ्ख-दुन्दुभयः ।

(ऋतुनक्षत्राणां समानाक्षराणामानुपूर्व्येण)

हेमन्त-शिशिर-वसन्ताः । कृत्तिका-रोहिण्यौ ।

समानाक्षराणामित्युक्तेर्नेह- ग्रीष्मवसन्तौ ।

चित्रारोहिण्यौ ।

(लघ्वक्षरं पूर्वम्)

कुशकाशम् ।

(अभ्यर्हितं च)

तापसपर्वतौ ।

(वर्णानामानुपूर्व्येण)

ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः ।

(भ्रातुर्ज्यायसः)

युधिष्ठिरार्जुनौ ।

(संख्याया अल्पीयस्या द्वन्द्वे चाऽद्वन्द्वे च)

द्वित्राः । त्रिचतुराः । नवतिशतम् ।

२-२-३० **उप**-१-२-४३ प्रथमानिर्दिष्टं... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। समासप्रकरणे सूत्रमिदं वर्तते। अतः सूत्रेऽस्मिन् समासे इति पदं कण्ठरवेणाऽपठ्यमानमपि स्वयमेव प्रतीयते। इति बोधनपुरस्सरम्, उपसर्जनम्= समासे उपसर्जनम्, पूर्वम्= पूर्वं प्रयुज्यते। इत्यर्थमुपदिश्य लक्षणसमन्वये कर्तव्ये, प्रकृते उपसर्जनम् अधि इति वर्तते। अतः, अधि इत्यस्यैव पूर्वप्रयोगो भवति। इति बोधनपुरस्सरमधोनिर्दिष्टरूपेण श्यामपाट्यां लिखेत्। 'अधि सरित्+ङि' इति। अथ २-१-४ सह...सूत्रे भूतपूर्व इत्यत्रैव प्रातिपदिकसंज्ञां सुँपः (ङि इत्यस्य) लुक्कार्यं च च्छात्रैः साधयित्वा श्यामपाट्याम् अधिसरित् इत्यवशेष्य १-१-४० अव्ययीभावश्च-सूत्रमुपदिशेत्।

२-२-३१ **राजदन्तादिषु**= राजदन्तादिगणपठितशब्देषु, परम्= प्राप्तपूर्वनिपातं पदं परतः प्रयोज्यम्।

२-२-३२ **द्वन्द्वे**-५-४-१५३ नद्यृतश्च-सूत्रानन्तरं सूत्रमिदं पाठ्यम्।

(क) अत्र श्यामपाटीप्रयोगो यथा- २-२-३० उपसर्जनं पूर्वम् ॥ २-२-३१ द्वन्द्वे घि (क) ॥इति। द्वन्द्वे = द्वन्द्वसमासे, घि= घिसंज्ञकं पदम्, (क)=पूर्वम्= पूर्वं प्रयुज्यते इत्युपदिश्य २-२-२९ चार्थे... सूत्रमुपदिशेत्। **लघ्व**- द्वन्द्वे (२-२-३२)। **अभ्य**- प्राग्वत्। **वर्णा**- प्राग्वत्। **भ्रातु**- प्राग्वत्। **संख्या**-पूर्वनिपातो वक्तव्यः।

२-२-३३ **अजाद्यदन्तम्**- अच् आदिर्यस्य तत् अजादि, अत् अन्तो यस्य तत् अदन्तम्। ततः पदद्वयस्य विशेषणसमासः। अजाद्यदन्तं पदम्, द्वन्द्वे (२-२-३२) पूर्वम् (२-२-३०)।

२-२-३४ **अल्पाच्तरम्**- अल्पे अचो यस्य तत् अल्पाच्। ततस्तरप्। अल्पाच्तरम्, द्वन्द्वे (२-२-३२) पूर्वम् (२-२-३०)।

ऋतु- पूर्वनिपातो वक्तव्यः, द्वन्द्वे (२-२-३२)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-२-३५ सप्तमी-विशेषणे **बहुव्रीहौ** ॥३७

कण्ठेकाल: । चतुर्भुज: ।

(सर्वनामसंख्ययोरुपसंख्यानम्)

सर्वश्वेत: । द्विशुल्क: ।

(मिथोऽनयो: समासे परत्वात् संख्याया: पूर्वनिपात:)

द्व्यन्य: । त्र्यन्य: ।

(वा प्रियस्य पूर्वनिपात:)

प्रियगुड: । गुडप्रिय: ।

(गड्वादिभ्य: सप्तम्यन्तं परम्)

गडुकण्ठ: ।

(क्वचिन्न)

वहेगडु: ।

२-२-३६ निष्ठा ॥

पीतजला गाव: । कृतकृत्य: ।

(जातिकालसुखादिभ्य: परा निष्ठा वाच्या)

सारङ्गजग्धी । मासजात: । सुखजात: ।

(क्वचिन्न)

कृतकट: । पीतोदक: ।

(प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भवत इति वक्तव्य्)

अस्युद्यत: । दण्डपाणि: ।

(क्वचिन्न)

उद्यतासि: ।

२-२-३७ वाऽऽहिताग्न्यादिषु ॥

आहिताग्नि: । अग्न्याहित: । बद्धशरीर : । शरीरबद्ध: ।

२-२-३८ कडारा: कर्मधारये ॥

कडारजैमिनि: । जैमिनिकडार: ।

इति द्वितीयाध्याये द्वितीय: पाद: ।

२-२-३५ सप्त-५-४-९१ राजा...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा- २-२-३० (क) उपसर्जनं पूर्वम् २-२-३५ सप्तमी-विशेषणे बहुव्रीहौ (क) ॥ इति । बहुव्रीहौ= बहुव्रीहिसमासे, सप्तमीविशेषणे = सप्तम्यन्तं विशेषणवाचि च पदम्, (क) = पूर्वम्= पूर्वं प्रयुज्यते । अथ २-२-३६ निष्ठा-सूत्रमुपदिशेत् । **सर्वनाम**- बहुव्रीहौ (२-२-३५) पूर्वनिपाताय । **मिथो**- बहुव्रीहौ (२-२-३५) । **वा प्रि**- बहुव्रीहौ (२-२-३५) । **गड्वा**- बहुव्रीहौ (२-२-३५) ।

२-२-३६ निष्ठा-२-२-३५ सप्तमी... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- २-२-३० (क) उपसर्जनं पूर्वम् ॥ २-२-३५ सप्तमीविशेषणे बहुव्रीहौ (ख) ॥ २-२-३६ (ख) निष्ठा (क) ॥इति। (ख) = बहुव्रीहौ= बहुव्रीहिसमासे, निष्ठा= निष्ठाप्रत्ययान्तं पदम्, (क)= पूर्वम्= पूर्वं प्रयुज्यते । अथ बहुव्रीहि-समासमुपदिदिक्षु: २-२-२३ शेषो... २-२-२४ अने...सूत्रे अष्टाध्याय्यां दर्शयेत् । तत्प्रसङ्गे पूर्वमुपदिष्टानि २-१-२४ द्विती... २-१-३० तृती...२-१-३६ चतु...२-१-३७ पञ्च...२-१-४० सप्त...२-२-८ षष्ठी इति सूत्राणि दर्शयन् सूत्रैरेनै:, द्वितीयान्तादीनामुच्चार्य समासो विहित:, प्रथमान्तस्य तु सामान्यरूपेण २-१-५७ विशे... प्रभृतिभि: समासे विहितेऽपि प्रथमा= प्रथमान्तमिति क्वापि नोच्चारितम् । अत: २-२-२३ शेषो बहुव्रीहि:-सूत्रे शेषशब्देन प्रथमा= प्रथमान्तं बोध्यते, इत्युपदेशपुरस्सरं तत् २-२-२३ शेषो बहुव्रीहि:-सूत्रमुपदिशेत् । **जाति**-बहुव्रीहौ (२-२-३५) । **प्रह**- बहुव्रीहौ (२-२-३५) ।

२-२-३७ वाऽऽहि-आहिताग्न्यादिषु,= आहिताग्न्यादिगणपठितशब्देषु, बहुव्रीहौ (२-२-३५) वा = विभाषया, पूर्वम् (२-२-३०) ।

२-२-३८ कडारा: = कडारादय: शब्दा:, कर्मधारये= कर्मधारयसमासे, वा (२-२-३७) पूर्वम् (२-२-३०) प्रयोज्या: ।

इति द्वितीयाऽध्याये द्वितीय: पाद: ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ द्वितीयाऽध्याये तृतीयः पादः

२-३-१ अनभिहिते ॥७३

२-३-२ कर्मणि द्वितीया ॥३,५

उदाहरणानि १-४-४९ कर्तु..प्रभृति-सूत्रेषु द्रष्टव्यानि। (अभितः परितः समया-निकषा-हा-प्रति-योगेऽपि) ग्राममभितः। ग्रामं परितः। ग्रामं समया। ग्रामं निकषा। हा शठम्। बुभुक्षितं न प्रतिभाति किञ्चित्। उभ-सर्व-तसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥

उभयतो ग्रामम्। सर्वतो ग्रामम्। धिग् देवदत्तम्। उपर्युपरि ग्रामम्। अध्यधि ग्रामम्। अधोऽधो ग्रामम्। ऋते जगदम्बा-कृपां किमपि न सम्पद्यते।

२-३-३ तृतीया च होश्छन्दसि ॥

यवाग्वाऽग्निहोत्रं जुहोति। यवागूमग्निहोत्रं जुहोति।

२-३-४ अन्तरान्तरेणयुक्ते ॥

अन्तरा त्वां मां च कमण्डलुः। अन्तरेण पुरुषकारं न किञ्चिल्लभ्यते।

२-३-५ कालाध्वनोरत्यन्तसंयोगे ॥७,६

मासमधीते। मासं कल्याणी। मासं गुडधानाः। क्रोशमधीते। क्रोशं कुटिला नदी। क्रोशं पर्वतः। अत्यन्तसंयोगे इत्युक्तेर्नेह-मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः।

२-३-६ अपवर्गे तृतीया ॥

मासेनाऽधीतः। क्रोशेनाऽधीतः। अपवर्गे इत्युक्तेर्नेह-मासमधीतो न गृहीतः।

अथ द्वितीयाऽध्याये तृतीयः पादः

२-३-१ अनभिहिते = अनुक्ते वक्ष्यमाणा विभक्तयो भवन्ति।

२-३-२ कर्म- ३-४-८० थासः... सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा-

२-३-१ अनभिहिते (क) ॥

२-३-२ कर्मणि (क) द्वितीया ॥ इति।

कर्मणि+[(क) = अनभिहिते)] = कर्मणि अनुक्ते सति (द्वितीयावृत्तौ अनुक्तकर्मरूपार्थबोधकात् प्रातिपदिकात्, इत्यप्यर्थमुपदिशेत्) द्वितीया= द्वितीया विभक्तिर्भवति। इत्यर्थः। अतो यदा तिङोऽर्थः कर्ता भवति, अर्थात् तिङ् कर्तारं बोधयति, तदा तिङा कर्ता उच्यते (उक्तो भवति) तदा तिंङा कर्म उक्तं न भवति (अनुक्तं भवति) तेन कर्मणि प्रकृतसूत्रेण द्वितीया विभक्तिर्भवति। कर्तरि च (२-३-४६ प्राति...सूत्रं दृश्यताम्) प्रथमा विभक्तिर्भवति। यथोपरि दर्शितेषु (क) वाक्येषु। अथ २-३-१८ कर्तृकरणयो...सूत्रमुपदिशेत्। **उभसर्वतसोः**= उभ-सर्व-शब्दप्रकृतिको यस्तसिँस्तदन्तयोगे, द्वितीया कार्या। धिक्= धिक्शब्दयोगे, द्वि.का.। आम्रेडितान्तेषु= आम्रेडितसंज्ञकशब्दान्तेषु, उपर्यादिषु त्रिषु= उपरि अधि अधस् इतिशब्दयोगे, द्वि.का.। ततः, अन्यत्र अपि, दृश्यते = द्वितीया विभक्तिर्दृश्यते। अथ किंनामाऽऽम्रेडितम्? ८-१-२ तस्य परमाम्रेडितम्। अथ २-३-१८ कर्तृ...सूत्र पाठचम्। **२-३-३ तृती-**होः=हुधातोः, कर्मणि (२-३-२) अनभिहिते (२-३-१) तृतीया, द्वितीया (२-३-२) च, छन्दसि=वेदे। उदाहरणे-अग्निहोत्रम्=हविः।

२-३-४ अन्तराशब्दो मध्ये इत्यर्थे, अन्तरेणशब्दो मध्ये इत्यर्थे विनार्थे च। उभावेवाऽव्यये। अन्त...युक्ते= अभ्यां युक्ते तदर्थान्वय्यर्थबोधकप्रातिपदिकात्, द्वितीया (२-३-२)।

२-३-५ कालाऽध्वनोः= कालस्याऽध्वनश्च, अत्यन्तसंयोगे = क्रियागुणद्रव्यैरत्यन्तसंयोगे, कालवाचिनोऽध्ववाचिनश्च शब्दात्, द्वितीया (२-३-२)।

२-३-६ अप-कालाध्वनोरत्यन्तसंयोगे (२-३-५) तृतीया= तृतीया विभक्तिर्भवति, अपवर्गे = फलप्राप्तौ गम्यमानायाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-३-७ सप्तमीपञ्चम्यौ कारकमध्ये ॥

अद्य भुक्त्वा द्व्यहे द्व्यहाद् वा भोक्ता । इहस्थोऽयं क्रोशे क्रोशाद् वा लक्ष्यं विध्येत् ।

२-३-८ **कर्मप्रवचनीययुक्ते** द्वितीया ॥११

उदाहरणानि १-४-८३ अनु... प्रभृतिषु द्रष्टव्यानि ।

२-३-९ यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ॥

उदाहरणानि १-४-८६ उपो...१-४-९६ अधि... इत्यत्र द्रष्टव्यानि ।

२-३-१० पञ्चम्यपाङ्परिभिः ॥

उदाहरणानि १-४-८७ अप...१-४-८८ आङ्म...इत्यत्र द्रष्टव्यानि ।

२-३-११ प्रतिनिधिप्रतिदाने च यस्मात् ॥

उदाहरणे १-४-९१ प्रतिः...इत्यत्र द्रष्टव्ये ।

२-३-१२ गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥

ग्रामं ग्रामाय वा गच्छति । चेष्टायामित्युक्तेर्नेह-मनसा शल्यानकूटं गच्छति । अनध्वनीत्युक्तेर्नेह-पन्थानं गच्छति । गन्त्राधिष्ठितेऽध्वन्येवाऽयं निषेधः । तेनाऽत्र भवत्येव-उत्पथेन पथे गच्छति ।

२-३-१३ चतुर्थी सम्प्रदाने ॥

छात्रेभ्यो वृत्तिं ददाति ।

(तादर्थ्ये चतुर्थी वाच्या)

यूपाय दारु ।

२-३-७ सप्त- कारकशब्देन कारकशक्तिर्गृह्यते । कालाध्वनो (२-३-५) रित्यनुवर्तमानं पञ्चम्यन्ततया विपरिणम्यते । कारकमध्ये+कालाध्वनोः (२-३-५)= कारकशक्तिमध्ये यौ कालाध्वानौ तद्वाचिनः शब्दात्, सप्तमीपञ्चम्यौ= सप्तमी पञ्चमी च विभक्ती भवतः । नेह यथासंख्यम्, अस्वरितत्वात् । उदाहरणयोः, आद्ये-कर्तृशक्त्योर्मध्ये कालः, अन्त्ये-कर्तृकर्मशक्त्योर्मध्ये देशः ।

२-३-८ कर्मप्रवचनीययुक्ते= कर्मप्रवचनीयसंज्ञकशब्देन युक्ते तदर्थान्वय्यर्थबोधकप्रातिपदिकात्, द्वितीया= द्वितीया विभक्तिर्भवति ।

२-३-९ यस्मादधिकम्= यदवधिकमधिकं प्रतीयते तद्वाचकात् प्रातिपदिकात्, यस्य चेश्वरवचनम्= यत्सम्बन्धीश्वरो यत्कर्तृकेश्वरश्च उच्यते, तत्र, तद्वाचकप्रातिपदिकाच्च, कर्मप्रवचनीययुक्ते (२-३-८) सप्तमी= सप्तमी विभक्तिर्भवति

२-३-१० पञ्च- कर्मप्रवचनीयैः (२-३-८)+अपाङ्परिभिः+युक्ते (२-३-८)= कर्मप्रवचनीयसंज्ञकैः अप आङ् परि इत्येतैर्युक्ते, तदर्थान्वय्यर्थबोधकात् प्रातिपदिकात्,पञ्चमी= पञ्चमी विभक्तिर्भवति ।

२-३-११ प्रति- यस्मात्= यत्सम्बन्धिनी, प्रतिनिधिप्रतिदाने= प्रतिनिधिः प्रतिदानं च तद्वाचकात् प्रातिपदिकात्, कर्मप्रवचनीययुक्ते (२-३-८) पञ्चमी (२-३-१०) । मुख्यस्याऽभावे यस्तत्सदृश उपादीयते स प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनम्= प्रतिदानम् । अस्मादेव निर्देशाल्लिङ्गादाभ्यां योगे पञ्चमी । 'ज्ञापकसिद्धं न सर्वत्र' इति कृष्णस्य प्रतिनिधिरित्यपि सिद्धमित्याहुरिति-तत्त्वबोधिनी ।

२-३-१३ चतु- १-४-३२ कर्मणा...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-
२-३-१ (क) अनभिहिते ॥ २-३-१३ चतुर्थी संप्रदाने (क) ॥ इति ।

संप्रदाने+[(क)= अनभिहिते] = संप्रदाने अनुक्ते सति, (अनुक्तसम्प्रदानरूपार्थबोधकात् प्रातिपदिकात्) चतुर्थी= चतुर्थी विभक्तिर्भवति । मूलोक्तोदाहरणे छात्रः संप्रदानम् । तच्च प्रकृते तिङाऽनुक्तम् । अतोऽनुक्तसम्प्रदानवाचकच्छात्रशब्दाच्चतुर्थी विभक्तिर्जातेति बोधयेत् । अथ १-४-२४ धुव...सूत्रमुपदिशेत् । **तादर्थ्ये-** तच्छब्देन चतुर्थ्यन्तार्थः (कार्यं) निर्दिश्यते । तस्मै इदं तदर्थम् । तस्य भावः= तादर्थ्यम् । तस्मिन्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(क्लृपि सम्पद्यमाने च)
नकारो णकाराय कल्पते-चतुर्णाम्। दुग्धं दध्ने कल्पते।
(उत्पातेन ज्ञापिते च)
वाताय कपिला विद्युत्।
(हितयोगे च)
प्रजाभ्यो हितम्।
(अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया वाच्या)
दास्या संयच्छते कामुकः।
अशिष्टव्यवहारे इत्युक्तेर्नेह-भार्यायै संयच्छति।

२-३-१४ क्रियार्थोपपदस्य च कर्मणि स्थानिनः॥

फलेभ्यो याति। फलान्याहर्तुं यातीत्यर्थः।

२-३-१५ तुमर्थाच्च भाववचनात्॥

पाकाय गच्छति। पक्तुं गच्छतीत्यर्थः।

२-३-१६ नमःस्वस्ति-स्वाहा-स्वधाऽलं-वषड्-योगाच्च॥

हरये नमः। जगदम्बायै नमः।
(उपपदविभक्तेः कारकविभक्तिर्बलीयसी) जगदम्बां नमस्करोमि। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा।
(अलमिति पर्याप्त्यर्थग्रहणम्)
दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि। 'प्रभ्वादियोगे षष्ठ्यपि' स एषां ग्रामणीरित्यादिलिङ्गात्। तेन प्रभुर्बुभूषुर्भुवन-त्रयस्येत्यादि सिद्धम्। वषडिन्द्राय। सूत्रे चकारः पुनरस्यैव समुच्चयार्थः। तेनाशीर्विवक्षायां परामपि २-३-७३ चतु...इति षष्ठीं बाधित्वा चतुर्थ्येव भवति। स्वस्ति प्रजाभ्यो भूयात्।

२-३-१७ मन्यकर्मण्यनादरे विभाषाऽप्राणिषु॥

न त्वां तृणं तृणाय वा मन्ये। अप्राणिष्वित्यपनीय (नौकाकान्नशुक-शृगालवर्ज्येष्विति वक्तव्यम्) तेन 'न त्वां नावमन्नं वा मन्ये' इत्यत्राऽप्राणित्वेऽपि चतुर्थी न। 'न त्वां शुने मन्ये' इत्यत्र प्राणित्वेऽपि भवति।

२-३-१८ कर्तृकरणयोस्तृतीया॥

रामेण बाणेन हतो वाली। छात्रेण कलमेन

तादर्थ्ये = उपकार्योपकारकभावसम्बन्धे गम्ये, उपकार्यबोधकप्रातिपदिकात्, चतुर्थी वाच्या। **क्लृपि**= क्लृप्त्यर्थानां धातूनां प्रयोगे, सम्पद्यमाने = प्रकृतिविकृतिभावसम्बन्धे गम्ये, विकृतिवाचकप्रातिपदिकात्, चतुर्थी वाच्या। **उत्पातेन**-प्राणिनां शुभाशुभयोः सूचको भूतविकार उत्पातः। तेन, ज्ञापिते = बोधितेऽर्थे वर्तमानात् प्रातिपदिकात्, चतुर्थी वाच्या। **हितयोगे च**-चतुर्थी वाच्या। **अशिष्टव्यवहारे**= सङ्कीर्णाचाराणां व्यवहारे, दाणः प्रयोगे = दाण्धातोः प्रयोगे, चतुर्थ्यर्थे तृतीया वाच्या।

२-३-१४ क्रियार्थोपपदस्य= क्रियानिमित्तकक्रियोपपदस्य, स्थानिनः= अप्रयुज्यमानस्य तुमुँण्वुँलन्तस्य धातोः, कर्मणि= कर्मकारके चतुर्थी (२-३-१३)।

२-३-१५ तुमर्थात्+ भाववचनात्= तुमर्थकभावप्रत्ययान्तात् (३-३-११ भाववचनाश्च इति सूत्रविहितप्रत्ययान्तात्) चतुर्थी (२-३-१३)।

२-३-१६ नमः...योगात् (नमः...वषड्भिर्योगोऽस्य तस्मात्)= नमःप्रभृतिशब्दैर्योगे तदर्थान्वय्यर्थबोधकप्रातिपदिकात्, चतुर्थी (२-३-१३)।

२-३-१७ मन्य- अप्राणिषु= प्राणिभिन्ने, मन्यकर्मणि= दैवादिकस्य मन्धातोः कर्मणि, विभाषा= वा, चतुर्थी (क) (२-३-१३) अनादरे= अवमाने गम्ये।

२-३-१८ कर्तृ- २-३-२ कर्मणि...सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र श्यामपाटी-प्रयोगो यथा- २-३-१ अनभिहिते॥ २-३-१८ कर्तृकरणयोः (क) तृतीया॥ इति। कर्तृकरणयोः+(क= अनभिहिते = अनभिहितयोः)= कर्तरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करणे च अनुक्ते सति, (द्वितीयावृत्तौ तु अनुक्तकर्तृकरणरूपार्थबोधकात् प्रातिपदिकात् इत्यप्यर्थमुपदिशेत्) तृतीया= तृतीया विभक्तिर्भवति । इत्यर्थः । अतो यदा तिङोऽर्थः कर्म भवति, अर्थात् तिङ् कर्म बोधयति तदा तिङा कर्म उच्यते (तिङा कर्म उक्तं भवति) तदा कर्ता तिङा उक्तो न भवति (अनुक्तो भवति) तेन अनुक्ते कर्तरि प्रकृतसूत्रेण तृतीया विभक्तिर्भवति । कर्मणि तु (२-३-४६ प्राति...सूत्रं दृश्यताम्) प्रथमा विभक्तिर्भवति । यथा ३-४-८० थासः...सूत्रानन्तरोक्तेषु २-३-२ कर्म...सूत्र-सन्दर्भ- (ख) वाक्येषु । 'उक्तमिति' किमुच्यते ? यद् वस्तु येन शब्देन उच्यते = बोध्यते, तद् वस्तु तेन शब्देन उक्तं भवति । यथा-यद् वस्तु स्यन्दते, पीयमानं पिपासां नाशयति, तद् वस्तु जलशब्देन उच्यते = उक्तं भवति । यःपदार्थो दहति, स पदार्थः अग्निशब्देन उच्यते = उक्तो भवति । एवमेव तिङ् कर्तारं बोधयति चेत् तिङा कर्ता उच्यते = उक्तो भवति । यदा नोच्यते तदाऽनुक्तो भवति । तिङ् कर्म बोधयति चेत् तिङा कर्म उच्यते = उक्तं भवति । यदा नोच्यते तदाऽनुक्तं भवतीति । भावे तु प्रथमपुरुषैकवचनमात्रम् । अथ शिक्षकोऽधोनिर्दिष्टरूपेण बोधयेत्- यथा-वत्साः ? सकर्मक-धातु-विषये सामान्यसरणिरुपदिष्टा । यत्र लकारस्यार्थे कर्तरि लकारस्यार्थे कर्मणि च विचारः कृतः । उभयत्र च सर्वेषु पुरुषेषु सर्वेषु वचनेषु च रूपाणि साधितानि । अथाऽतोऽकर्मक-धातु-विषये विचारः क्रियते, इति । वत्साः ? अकर्मक-धातुभ्यो विहितस्य लकारस्याऽर्थः कर्ता वा भावो भवतीति तु पूर्वमुपदिष्टमेव । तत्र कर्तरि लकारस्यार्थे सति, सर्वेषु पुरुषेषु सर्वेषु वचनेषु च रूपाणि भवन्ति । यथा- हस्धातुरकर्मकः । तस्मात् कर्तरि लकारे (लँट् लकारे) श्यामो हसति । रामश्यामौ हसतः । रामश्यामविष्णुमित्रा हसन्ति । त्वं हससि । युवां हसथः । यूयं हसथ । अहं हसामि । आवां हसावः । वयं हसामः । इति रूपाणि भवन्ति । अत्र कर्तृवाचकपदानि च प्रथमान्तानि सन्ति । यतः प्रकृते तिङा कर्ता उच्यते = उक्तोऽस्ति । भावे लकारे विहिते तु मध्यमपुरुषोत्तमपुरुषयो रूपाणि न भवन्ति । प्रथमपुरुषेऽपि द्विवचन-बहुवचनयो रूपे न भवतः । किन्तु प्रथमपुरुषैकवचनमात्रे रूपं भवति । तथाहि- (पठत्सुच्छात्रेष्वन्यतमः श्यामोऽस्ति चेत्) अयि श्याम ? त्वं यदा पठसि, तदाऽहं भणेयम्-'त्वं पठसि' इति । तत्र (अङ्गुल्या श्यामं दर्शयन्) त्वं कर्ता भवसि । त्वां (कर्तारम्) 'त्वम्' इति युष्मच्छब्दो बोधयति । तिङोऽर्थश्च कर्ता वर्तते । अतस्तत्र युष्मच्छब्दस्तिङ् च समानाधिकरणौ । तेन मध्यमपुरुषस्य प्राप्तिर्भवति । एवमेव यदा त्वं पठितुं प्रवर्तसे तदा त्वमात्मानमुद्दिश्य 'अहं पठामि' इति भणसि तदा (अङ्गुल्या निर्दिशन्) त्वम् (हस्तपादाद्यवयववान्) कर्ता भवसि । त्वाम् (हस्तपादाद्यवयववन्तं च) 'अहम्' इति अस्मच्छब्दो बोधयति । तिङोऽर्थश्च कर्ता वर्तते । अतस्तत्र अस्मच्छब्दस्तिङ् च समानाधिकरणौ । तेनोत्तमपुरुषस्य प्राप्तिर्भवति । एवमेवाऽकर्मकधातोरपि त्वं हससि । अहं हसामि । इत्यादिषु मध्यमोत्तमपुरुषयो रूपाणि भवन्ति । लकारस्यार्थे भावे सति तु भावो नाम धातोरर्थः (प्रकृते धातुर्हस् अस्ति । तदर्थो हसनं वर्तते । अतो लकारस्यापि हसनमेवाऽर्थः)। युष्मदस्मच्छब्दौ धातोरर्थं कदापि कुत्रापि न बोधयतः । अतो युष्मदस्मच्छब्दौ भावे = धातोरर्थे न वसतः । अतो युष्मदस्मच्छब्दौ भावार्थकस्तिङ् च समानाधिकरणा न भवन्ति । अर्थाद् युष्मच्छब्दो भावार्थकस्तिङ् च समानाधिकरणौ कदापि न भवतः । अस्मच्छब्दो भावार्थकस्तिङ् च समानाधिकरणौ कदापि न भवतः । अतो मध्यमोत्तमपुरुषौ न भवतः । अतः प्रथमपुरुषमात्रं भवति शेषत्वात् । प्रथमपुरुषेऽपि द्विवचनबहुवचने न भवतः । यतः, द्वयोर्वाच्ययोर्द्विवचनं भवति । बहुषु वाच्येषु च बहुवचनं भवति । तिङोऽर्थे भावे संख्यैव न प्रतीयते । अत एकवचनमात्रं भवति ।

कर्तृवाच्यम्	**भाववाच्यम्**
श्यामो हसति	श्यामेन हस्यते ।
रामश्यामौ हसतः	रामश्यामाभ्यां हस्यते ।
रामश्यामविष्णुमित्रा हसन्ति	रामश्यामविष्णुमित्रैर्हस्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिखितोऽनुवादः ।

(प्रकृत्यादिभ्य उपसंख्यानम्)

प्रकृत्या दर्शनीयः । प्रायेण वैयाकरणः । गार्ग्यो गोत्रेण । समेनैति । विषमेणैति । द्विद्रोणेन धान्यं क्रीणाति ।

२-३-१९ सहयुक्तेऽप्रधाने ॥

पुत्रेण सहागतः पिता । पुत्रेण सममागतः पिता । सहार्थप्रतीतौ विनापि तद्योगं तृतीया १-२-६५ वृद्धो यूनेति निर्देशात् । पुत्रेणाऽऽगतः पिता ।

२-३-२० येनाङ्गविकारः ॥

अक्ष्णा काणः । पादेन खञ्जः ।

२-३-२१ इत्थंभूतलक्षणे ॥

जटाभिस्तापसः । पुस्तकेनच्छात्रः ।

२-३-२२ संज्ञोऽन्यतरस्यां कर्मणि ॥

पित्रा पितरं वा संजानीते ।

त्वं हससि	त्वया हस्यते ।
युवां हसथः	युवाभ्यां हस्यते ।
यूयं हसथ	युष्माभिर्हस्यते ।
अहं हसामि	मया हस्यते ।
आवां हसावः	आवाभ्यां हस्यते ।
वयं हसामः	अस्माभिर्हस्यते ।

इति कर्तृवाच्यानि भाववाच्यानि च पदानि श्यामपाटचां दर्शयित्वा बोधयेत् । अथ शिक्षकः परीक्षेत- 'मया हस्यते' इत्यत्र 'मया' इति अस्मच्छब्दे उपपदे सत्यपि कथं नोत्तमपुरुषः ? त्वया हस्यते इत्यत्र 'त्वया' इति युष्मच्छब्दे उपपदे सत्यपि कथं न मध्यमपुरुषः ? 'रामश्यामविष्णुमित्रैर्हस्यते' इत्यत्र कर्तृषु बहुषु सत्स्वपि 'हस्यते' इत्येकवचनान्तं क्रियापदं कथं ? कथं न बहुवचनान्तम् ? इत्यादि । **लोट्**-यद्यपि वर्णक्रमानुसारेण लँट्लकारोपदेशानन्तरं लिँट्लकारोपदेश उचित इत्यापाततः प्रतीयते । परन्तु वस्तुतस्तथा नोचितः । यतः, लँट् लोटँ लँङ् विधिलिङ् इत्येतेषु धातुभेदेन रूपभेदे गणभेदोऽपि कारणम् । लिँट्लकारे तु न खलु रूपभेदे गणभेदः कारणम् । अतो गणभेदान् प्रदर्श्य सर्वेषु गणेषु लिँट्लकारे सामान्यनियमः प्रदर्शयितुमुचितः । लोँट्लकारेऽपि सर्वस्य लँट्कार्यस्याऽपेक्षणीयतया लँङुपदेशानन्तरं लोँट् लकारस्यैवोपदेशस्योचितत्वाच्च लोँट्लकार एवोपदिश्यते तथाहि- **तिप्** 'श्यामः पठतु' इति वक्तव्ये 'पठतु' इति प्रयोगः कथं सिध्येदिति जिज्ञासायां ३-३-१६२ लोँट् च-सूत्रं प्रस्तुवीयात् ।

२-३-१९ सहयुक्ते = सहार्थकशब्देन युक्ते, अप्रधाने= गौणे, तृतीया (२-३-१८) । यस्य क्रियायामन्वयस्तत् प्रधानम् । यस्य त्वनन्वयस्तदप्रधानम् ।

२-३-२० येना- अङ्गशब्दोऽत्र अङ्गिपरः, ५-२-१२७ अर्श...इति मत्वर्थीयाऽच्प्रत्ययान्तः । येनेत्यत्र यच्छब्दो विकृताङ्गपरामर्शी, अङ्गापेक्षत्वादङ्गिनः । अविकृताङ्गस्याङ्गिविकारं प्रति हेतुत्वाऽसम्भवाच्च । येन= येन विकृतेनाङ्गेन, अङ्गविकारः= अङ्गिविकारो लक्ष्यते, तद् (विकृताङ्ग) वाचकप्रातिपदिकात्, तृतीया (२-३-१८) ।

२-३-२१ इत्थंभूतलक्षणे-इदंशब्दात् प्रकारवचनेऽर्थे थमुँप्रत्यये, इत्थमिति । चौरादिकाद् भू प्राप्तौ धातोः आधृषाद् वेति णिजभावपक्षे गत्यर्थत्वात् कर्तरि क्तप्रत्यये भूत इति । लक्ष्यतेऽनेनेति करणे लुँटि लक्षणम्= चिह्नम् । इत्थंभूतशब्दात् कर्मणि षष्ठ्यां लक्षणशब्देन समासः । तस्मिन् इत्थंभूतलक्षणे = प्रकारविशेषं प्राप्तस्य लक्षणे वर्तमानात् प्रातिपदिकात्, तृतीया (२-३-१८) ।

२-३-२२ संज्ञो- संज्ञः= समुपसर्गपूर्वकस्य ज्ञाधातोः, कर्मणि= कर्मकारके, अन्यतरस्याम्= वा, तृतीया (२-३-१८) । पक्षे २-३-२ कर्म...इति द्वितीयैव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-३-२३ हेतौ ॥२७

विद्यया यशः ।

२-३-२४ अकर्तर्यृणे पञ्चमी ॥

शताद् बद्धः ।

अकर्तरीत्युक्तेर्नेह-शतेन बन्धितः ।

२-३-२५ विभाषा गुणेऽस्त्रियाम् ॥

पाण्डित्यात् पाण्डित्येन वा मुक्तः । गुणे इत्युक्तेर्नेह- धनेन कुलम् । अस्त्रियामित्युक्तेर्नेह- बुद्ध्या मुक्तः । अत्र विभाषेति योगो विभज्यते । तेनाऽगुणे स्त्रियां च क्वचित् । वह्निमान् धूमात् । नास्ति घटोऽनुपलब्धेः ।

२-३-२६ षष्ठी हेतुप्रयोगे ॥ २७

अन्नस्य हेतोर्वसति ।

२-३-२७ सर्वनाम्नस्तृतीया च ॥

केन हेतुना वसति । कस्य हेतोर्वसति ।

(निमित्त-पर्याय-प्रयोगेषु सर्वासां प्रायदर्शनम्)

किं निमित्तं वसति । केन निमित्तेन । कस्मै निमित्तायेत्यादि । को हेतुः । केन हेतुना । कस्मै हेतवे. इत्यादि । प्रायग्रहणादसर्वनाम्नः प्रथमा-द्वितीये न भवतः । अन्नेन कारणेन वसति । अन्नाय कारणायेत्यादि ।

२-३-२८ अपादाने पञ्चमी ॥३५

वृक्षात् पत्राणि पतन्ति ।

(ल्यब्लोपे कर्मण्यधिकरणे च)

प्रासादात् प्रेक्षते । प्रासादमारुह्य प्रेक्षत इत्यर्थः । आसनात् प्रेक्षते । आसने उपविश्य प्रेक्षत इत्यर्थः । 'गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिका' कुतो भवान् ? प्रतिष्ठानपुरात् ।

(यतश्चाध्वकालनिर्माणं तत्र पञ्चमी)

(तद्युक्तादध्वनः प्रथमासप्तम्यौ)

वनाद् ग्रामो योजनं योजने वा ।

(तद्युक्तात् कालात् सप्तमी वाच्या)

२-३-२३ हेतौ= हेत्वर्थे वर्तमानात्, प्रातिपदिकात्, तृतीया (२-३-१८) । अनाश्रितव्यापारो हेतुः । आश्रितव्यापारं करणम् । यथाहुः-

द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् । अनाश्रिते तु व्यापारे निमित्तं हेतुरुच्यते । इति ।

२-३-२४ अकर्तरि= कर्तृभिन्ने, ऋणे, = आधमर्ण्ये, हेतौ (२-३-२३) पञ्चमी= पञ्चमी विभक्तिर्भवति ।

२-३-२५ विभा-गुणे+हेतौ (२-३-२३)+अस्त्रियाम्= गुणवाचि-हेतुबोधकात् स्त्रीलिङ्गभिन्ने वर्तमानात् प्रातिपदिकात्, विभाषा=वा, पञ्चमी (२-३-२४) ।

२-३-२६ षष्ठी- हेतुप्रयोगे = हेतुशब्दस्य प्रयोगे, हेतौ (२-३-२३) षष्ठी=षष्ठी विभक्तिर्भवति ।

२-३-२७ सर्वनाम्न इति षष्ठचन्तम् । पूर्वसूत्रादनुवर्तमानेन प्रयोगे इत्यनेन सम्बन्धात् । सर्वनाम्नः=सर्वनामसंज्ञकशब्दस्य प्रयोगे (२-३-२६) हेतुप्रयोगे (२-३-२६) हेतौ (२-३-२३) तृतीया=तृतीया विभक्तिर्भवति, षष्ठी (२-३-२६) च । **निमित्तपर्यायप्रयोगेषु**= निमित्तशब्दस्य तत्पर्यायाणां च प्रयोगेषु, सर्वासां विभक्तीनां प्रायदर्शनम् ।

२-३-२८ अपा-१-४-२४ ध्रुव...सूत्रानन्तरं सूत्रमिदं पाठचम् । अपादाने=अपादानकारके, अनभिहिते, (२-३-१) (अनुक्तापादानरूपात् प्रातिपदिकात्) पञ्चमी=पञ्चमी विभक्तिर्भवति इत्यर्थमुपदिश्य 'वृक्षात् पत्राणि पतन्ति' इत्युदाहरेत् । प्रकृतोदाहरणे पत्राणां विश्लेषः प्रतीयते । विश्लेषणावधिश्च वृक्षो वर्तते । अतो वृक्षपदार्थः अपादानम् । प्रकृतवाक्ये तिङाऽपादानस्याऽनुक्तत्वेन अपादानवाचक-वृक्षशब्दात् पञ्चमी विभक्तिर्भवतीति बोधयेत् । अथ १-४-४५ आधारो...सूत्रमुपदिशेत् । **ल्यब्लोपे** = ल्यबन्तस्याऽप्रयोगे, कर्मण्यधिकरणे च= (प्रत्यासत्त्या प्रतीयमानस्य ल्यबन्तस्य) कर्मणि अधिकरणे च, पञ्चमी (२-३-२८) । **यतः**= यद् (अवधित्वेन) आश्रित्य, अध्वकालनिर्माणम्= अध्वकालयोः परिमाण-निश्चयः, तत्र= तत्र वर्तमानात् प्रातिपदिकात्, पञ्चमी । **तद्यु**-तच्छब्देन पञ्चम्यन्तार्थः परामृश्यते । तद्युक्तात्= पञ्चम्यन्तार्थेन (अर्थद्वारा) युक्तात्, अध्वनः अध्ववाचिनः प्रातिपदिकात्, प्रथमासप्तम्यौ । **तद्युक्तात्**= पञ्चम्यन्तार्थेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्तिक्या आग्रहायणी मासे ।

२-३-२९ अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ॥

अन्य इत्यर्थग्रहणम् । इतरग्रहणं प्रपञ्चार्थम् । अन्यो भिन्न इतरो विलक्षणो वा देवदत्तात् । आराद् ग्रामात् । दिव्या भाषा काऽस्ति ऋते सँस्कृतात् ?। गोमुख्याः पूर्वस्यां दिशि श्रीदुर्गाहीरेश्वरशिवपञ्चायतन-देवता-मन्दिरं विराजते । दिक्शब्द इत्यत्र शब्दग्रहणं दिशि दृष्टः शब्दो दिक्शब्द इत्युत्तरपदलोपिसमासलाभार्थम् । तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति । दाङ्गात् पूर्वं प्रतिष्ठानपुरम् । चैत्रात् पूर्वः फाल्गुनः । दिक्शब्दत्वादेव सिद्धे पुनरञ्चूत्तरपदग्रहणं २-३-३० षष्ठच... सूत्रबाधनार्थम् । प्राक् प्रत्यग् वा ग्रामात् । दक्षिणा ग्रामात् । दक्षिणाहि ग्रामात् ।

२-३-३० षष्ठ्यतसर्थप्रत्ययेन ॥

पुरः, पुरस्तात्, दक्षिणतः, उत्तरतः, उपरि, उपरिष्टाद् वा ग्रामस्य ।

२-३-३१ एनपा द्वितीया ॥

दक्षिणेन ग्रामं ग्रामस्य वा । उत्तरेण ग्रामं ग्रामस्य वा । एनपेति योगो विभज्यते, तत्र षष्ठीत्यनुवर्तते । एनबन्तेन युक्ते षष्ठी इत्यर्थः । अथ द्वितीयेत्यत्र एनपेत्यनुवर्तते । एनबन्तेन युक्ते द्वितीया इत्यर्थः । अत एनबन्तेन युक्ते द्वितीया षष्ठी च सिध्यतः ।

२-३-३२ पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् ॥३५,३३

अन्यतरस्यां ग्रहणं समुच्चयार्थम् । तेन पञ्चमी (२-३-२८), द्वितीया (२-३-३१) चाऽनुवर्तेते । पृथग्, विना, नाना वा देवदत्तं देवदत्तेन देवदत्ताद् वा ।

२-३-३३ करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य॥३५

स्तोकेन स्तोकाद् वा मुक्तः । असत्त्ववचनस्येत्युक्तेर्नेह-स्तोकेन विषेण हतः । करण इत्युक्तेर्नेह-स्तोकं मुञ्चति । क्रियाविशेषणं कर्मैतत् ।

२-३-३४ दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ॥

अन्यतरस्यां ग्रहणं पञ्चम्यर्थम् । दूरं ग्रामाद् ग्रामस्य वा । अन्तिकं ग्रामाद् गामस्य वा ।

२-३-३५ दूरान्तिकार्थेभ्यो द्वितीया च ॥ ३६

प्रातिपदिकार्थमात्रे विधिरयम् । चकारेण तृतीया-

(अर्थद्वारा) युक्तात्, कालात्= कालवाचिनः प्रातिपदिकात्, सप्तमी वाच्या ।

२-३-२९ **अन्या**...युक्ते = अन्यार्थक आरात् इतर ऋते दिग्वाचक अञ्चूत्तरपदक आच्प्रत्ययान्त आहिप्रत्ययान्त इत्येतैर्युक्ते, तदर्थान्वय्यर्थबोधकात् प्रातिपदिकात्, पञ्चमी (२-३-२८) ।

२-३-३० **षष्ठच**- अतसर्थप्रत्ययेन= अतसुँजर्थक-प्रत्ययान्तेन, युक्ते (२-३-२९.) तदर्थान्वय्यर्थबोधकप्रातिपदिकात्, षष्ठी=षष्ठी विभक्तिर्भवति ।

२-३-३२ **पृथ**...नाभिः= पृथग् विना नानाशब्दैर्योगे, तृतीयाऽन्यतरस्याम्= द्वितीया (२-३-३१) तृतीया, पञ्चमी (२-३-२८) च भवन्ति ।

२-३-३३ **कर**-सूत्रेऽस्मिन्नुभयत्र पञ्चम्यर्थे षष्ठी । करणे = करणेऽर्थे वर्तमानेभ्यः, असत्त्ववचनस्य= अद्रव्यवाचिभ्यः, स्तोक...यस्य= स्तोक अल्प कृच्छ्र कतिपय इत्येतेभ्यः प्रातिपदिकेभ्यः, तृतीया (२-३-३२) पञ्चमी (२-३-२८) च ।

२-३-३४ **दूरान्तिकार्थैः**= दूरार्थकान्तिकार्थकशब्दैर्योगे, तदर्थान्वय्यर्थबोधकात् प्रातिपदिकात्, षष्ठी=षष्ठी विभक्तिर्भवति, अन्यतरस्याम्= पञ्चमी (२-३-२८) च । **पञ्चम्यर्थम्** तृतीयार्थं तु नैतत् । पूर्वसूत्रादनुवृत्त्यैव सिद्धे पुनरन्यतरस्यां ग्रहणवैयर्थ्यात् । न चाऽन्या काचित् प्रकृता । तस्मात् पञ्चमीविकल्पार्थमिति ज्ञायते ।

२-३-३५ **दूरा**- असत्त्ववचनस्य (२-३-३३)= असत्त्ववचनेभ्यः, दूरान्तिकार्थेभ्यः=दूरार्थकेभ्योऽन्तिकार्थेभ्यश्च,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चम्यौ समुच्चीयेते । ग्रामस्य दूरं दूरेण दूराद् वा । अन्तिकम् अन्तिकेन, अन्तिकाद् वा ग्रामस्य । असत्त्ववचनस्ये (२-३-३३) त्यनुवृत्तेर्नेह-दूरः पन्थाः । अन्तिकः पन्थाः ।

२-३-३६ सप्तम्यधिकरणे च ॥४१,४५

उदाहरणानि १-४-४५ आधारो... सूत्रे द्रष्टव्यानि । चकारेण दूरान्तिकार्थेभ्य इत्यनुकृष्यते । ग्रामस्य दूरेऽन्तिके वा । एवञ्च दूरान्तिकार्थेभ्यः पूर्वोक्ताभिः सह चतस्रो विभक्तयः फलिताः ।

(क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्)

अधीती व्याकरणे ।

(साध्वसाधुप्रयोगे च)

साधुः कृष्णो मातरि । असाधुर्मातुले ।

(अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्-वैपरीत्ये च)

सत्सु तरत्सु असन्त आसते । असत्सु तिष्ठत्सु सन्तस्तरन्ति । सत्सु तिष्ठत्सु असन्तस्तरन्ति । असत्सु तरत्सु सन्तस्तिष्ठन्ति । अत्र तरणक्रियायां सन्त उचिता इति ध्येयम् । लक्ष्यलक्षण-भावाऽविवक्षायां सप्तम्यर्थमिदम् ।

लक्ष्यलक्षणभावविवक्षायां तु २-३-३७ यस्य...इत्येव सिद्धम् ।

(निमित्तात् कर्मयोगे)

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥

२-३-३७ यस्य च भावेन भावलक्षणम् ॥३८

गोषु दुह्यमानासु गतः ।

२-३-३८ षष्ठी चाऽनादरे ॥४१

रुदति, रुदतो वा प्राव्राजीत् । रुदन्तं

द्वितीया=द्वितीया विभक्तिर्भवति, तृतीया (२-३-३२) पञ्चमी (२-३-२८) च ।

२-३-३६ सप्त= १-४-४५ आधारो...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अधिकरणे=अधिकरणकारके अनभिहिते (२-३-१) (अनुक्ताधिकरणवाचकात् प्रातिपदिकात्) सप्तमी=सप्तमी विभक्तिर्भवति । इतिमात्रमर्थमुपदिशेत्, न तु चकाराकृष्टं दूरान्तिकार्थेभ्य इति च । खट्वायां वसति, इत्यत्र खट्वा अधिकरणम् । तत् प्रकृतवाक्ये तिङाऽनुक्तं च । तेनाऽधिकरणवाचि-खट्वाशब्दात् सप्तमी विभक्तिर्जातेति बोधयेत् । अथवा छात्राणामुत्साहं वीक्ष्य तदपि= दूरान्तिकार्थेभ्यश्च सप्तमी विभक्तिर्भवतीत्युपदिश्य प्रतिष्ठानपुरात् काष्ठमण्डपो दूरे रुरुक्षेत्रं समीपे वर्तेते इत्युदाहरेत् । अथ २-३-५० षष्ठी...सूत्रमुपदिशेत् ।

क्तस्येन्-इन्विषयस्य= इन् (प्रत्ययः) विषयो यस्य स इन्विषयस्तस्य= इन्विषयकस्य, क्तस्य= क्तप्रत्ययान्तस्य, कर्मणि, उपसंख्यानम्= सप्तमी वाच्या । **साध्व**-सप्तमी (२-३-३६) । **अर्हा**-यस्यां क्रियायां ये, उचितास्ते अर्हाः, तेषां कर्तृत्वे, यस्यां क्रियायां येऽनुचितास्ते अनर्हाः, तेषाम् अकर्तृत्वे, सप्तमी (२-३-३६) । तद्वैपरीत्ये च= अर्हाणामकर्तृत्वे, अनर्हाणां कर्तृत्वे च, सप्तमी (२-३-३६) । उदाहरणेषु तरणक्रियायां सन्त उचिता इति ध्येयम् । लक्ष्यलक्षणभावाऽविवक्षायां सप्तम्यर्थमिदम् । लक्ष्यलक्षणभावविवक्षायां तु २-३-३७ यस्य...इत्येव सिद्धम् । **निमि**-क्रियायाः फलम्= क्रियारम्भस्य प्रयोजनं यत्, तदेव निमित्तशब्देनेह गृह्यते । योगः= सम्बन्धः= संयोग-समवायाऽन्यतरः । कर्मयोगे = प्रकृतक्रियायाः कर्मणा सह संयोगे समवाये वा सम्बन्धे गम्यमाने, निमित्तात्= फलबोधकप्रातिपदिकात्, सप्तमी (२-३-३६) ।

२-३-३७ यस्य- यस्येति निर्देशात् तत इति स्वयमेव ज्ञायते, यत्तदोः सम्बन्धस्य नित्यत्वात् । यस्य भावेन= यदीयया क्रियया, भावलक्षणम्= क्रियान्तरं लक्ष्यते = क्रियान्तरस्य ज्ञानं भवति, ततः= तस्मात्= भाववतः= क्रियावतः, सप्तमी (२-३-३६) ।

२-३-३८ षष्ठी- यस्य भावेन भावलक्षणम् (२-३-३७) ततः, षष्ठी=षष्ठी विभक्तिर्भवति, सप्तमी (२-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः ।

२-३-३९ स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥

गवां गोषु वा स्वामी । इत्यादि । षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थमिदम् ।

२-३-४० आयुक्तकुशलाभ्यां चासेवायाम् ॥

आयुक्तः कुशलो वा कटकरणे कटकरणस्य वा । आसेवायामित्युक्तेर्नेह-आयुक्तो गौः शकटे । अत्राऽऽषदर्थे । ईषद्युक्त इत्यर्थः ।

२-३-४१ **यतश्च निर्धारणम्** ॥४२

मनुष्याणां मनुष्येषु वा क्षत्रियः शूरतमः । गवां गोषु वा बहुक्षीरा कृष्णा । धावन्नध्वगानामध्वगेषु वा शीघ्रतमः ।

२-३-४२ पञ्चमी विभक्ते ॥

मध्यदेशीयेभ्यः पर्वतीयाः स्वस्थतराः ।

२-३-४३ साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ॥४५

मातरि साधुर्निपुणो वा । अर्चायामित्युक्त्या तत्त्वकथने न भवति । साधुर्भृत्यो राज्ञः । अप्रतेरित्युक्तेर्नेह-साधुः कृष्णो मातरं प्रति । (अप्रत्यादिभिरिति वक्तव्यम्)

साधुः कृष्णो मातरं प्रति, परि, अनु वा ।

२-३-४४ प्रसितोत्सुकाभ्यां **तृतीया** च ॥४५

प्रसित उत्सुको वा केशैः केशेषु वा ।

३-३७) च, अनादरे= तिरस्कारे गम्यमाने । केवलभावलक्षणे पूर्वसूत्रेण सप्तमी । अनादराऽधिक्ये त्वनेन षष्ठी-सप्तम्यौ, इति निष्कर्षः ।

२-३-३९ स्वामी... सूतैः= स्वामिन् ईश्वर अधिपति दायाद साक्षिन् प्रतिभू प्रसूत इत्येतैः शब्दैर्योगे, षष्ठी (२-३-३८) सप्तमी (२-३-३६) च ।

२-३-४० आयु...लाभ्याम्= आयुक्त कुशल शब्दाभ्यां योगे, षष्ठी (२-३-३८) सप्तमी (२-३-३६) च, आसेवायाम्= तत्परत्वे गम्यमाने ।

२-३-४१ यत- निर्धारणपदार्थः २-२-१० न नि...सूत्रे द्रष्टव्यः । यतः= यत्समुदायात्, निर्धारणम्= जातिगुणक्रियासंज्ञाभिरेकदेशस्य पृथक्करणं तद्वाचकात्, षष्ठी (२-३-३८) सप्तमी (२-३-३६) च ।

२-३-४२ पञ्च- विभक्तम्= विभागः । ३-३-११४ नपुं...इति भावे क्तः । यतः+निर्धारणम् (२-३-४१) तत्र= निर्धारणाश्रये, विभक्ते = निर्धार्यमाणस्य विभागे (भेदे सत्येव) निर्धारणाश्रयवाचकात्, पञ्चमी=पञ्चमी विभक्तिर्भवति । पूर्वसूत्राऽपवादः । कथमुच्यते निर्धारणाश्रये निर्धार्यमाणस्य भेदे सतीति ? यतः सर्वत्रैव हि निर्धारणाश्रये निर्धार्यमाणस्य भेदो भवति । भेदाऽभावे तु निर्धारणमेव न स्यादिति चेत् उच्यते-सर्वथा भेद एवेति तात्पर्यम् । अत एव भेदे सत्येवेति व्याख्यातम् । तथाहि-मनुष्य इत्युक्तौ मनुष्यसमुदाये क्षत्रियोऽपि गृह्यते, क्षत्रियः शूरतम इत्युक्तौ मनुष्यसमुदायात् क्षत्रियः पृथक् क्रियते । पर्वतीया इत्युक्तौ तु पर्वतीयसमुदाये मध्यदेशीयसमुदायो न गृह्यते । तेनाऽत्र भेदं एव । अतोऽत्र पञ्चमी जाता । पूर्वसूत्रोदाहरणेषु तु न ।

२-३-४३ साधु...णाभ्याम्= साधुनिपुणशब्दाभ्यां योगे, अर्चायाम्= पूजायां गम्यमानायाम्, सप्तमी=सप्तमी विभक्तिर्भवति, अप्रतेः= प्रतिशब्दाऽप्रयोगे । **साधुर्भृत्यो राज्ञः** अत्र राज्ञो भृत्येनाऽन्वयो न तु साधुना । अत एव साध्वसाधुप्रयोगे चेत्यपि नाऽत्र प्रवर्तते । प्रत्यासत्त्या तु= राजविषयमेव साधुत्वं गम्यत इति प्रत्युदाहृतम् ।

२-३-४४ प्रसि...काभ्याम्= प्रसित उत्सुक इत्येताभ्यां योगे, तदर्थान्वय्यर्थबोधकप्रातिपदिकात् तृतीया=तृतीया विभक्तिर्भवति, सप्तमी (२-३-४३) च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-३-४५ नक्षत्रे च लुपि ॥

मूलेनावाहयेद् देवीं श्रवणेन विसर्जयेत्। मूले श्रवणे वा। अधिकरणे (२-३-३६) इत्यनुवृत्तेर्नेह- अद्य पुष्यः। अद्य कृत्तिका।

२-३-४६ प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचन-मात्रे प्रथमा ॥४९

कृष्णः। श्रीः। ज्ञानम्। तटः। तटी। तटम्। द्रोणो व्रीहिः। एकः। द्वौ। बहवः

२-३-४५ नक्षत्रे = नक्षत्रे प्रकृत्यर्थे सति, लुपि= लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थे वर्तमानात् प्रातिपदिकात्, अधिकरणे (२-३-३६) तृतीया (२-३-४४) सप्तमी (२-३-४३) च। चशब्देन तृतीया(२-३-४४)+सप्तमी (२-३-४३) चाऽनुकृष्येते। अन्यथा तृतीयैवाऽनुवर्तेत। न तु सप्तमी पूर्वसूत्रे चाऽनुकृष्टत्वात्।

२-३-४६ प्राति-१-१-३८ कृन्मेजन्तः- सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्राऽधोनिर्दिष्टरूपेण बोधयेत्। यथा- वत्साः ? सूत्रेऽस्मिन् 'लिङ्ग-परिमाण-वचन' इत्यंशस्य साम्प्रतं विचारो न कार्यः। द्वितीयावृत्तौ तु लिङ्गमात्राधिक्ये परिमाणमात्रे वचनमात्रे (संख्यामात्रे) च इत्यप्यर्थ उपदेश्यः। उदाहरणानि च लिङ्गमात्राधिक्ये तटः। तटी। तटम्। (दीक्षितानुसारेण)। परिमाणमात्रे द्रोणो व्रीहिः। संख्यामात्रे- एकः। द्वौ। बहवः। इति। किन्तु 'प्रातिपदिकार्थ-मात्रे प्रथमा' इत्यंशस्य भावः सम्यग् बोद्धव्यः। तथाहि-प्रातिपदिकार्थमात्रे प्रथमा विभक्तिर्भवति। अर्थात्, प्रथमा विभक्तिः प्रातिपदिकार्थमात्रं बोधयति, प्रातिपदिकार्थादधिकमर्थं न बोधयति। अत्र विषये ३-४-८० थासः...सूत्र-प्रसङ्गे प्रस्तुतानि (क) (ख) वाक्यानि निभाल्य विचारयत, तत्रोपदिष्टं विषयञ्च विमृशतेति शिक्षको वदन्नधोनिर्दिष्टरूपेण पुनरग्रे बोधयेत्। यथा-वत्साः ? यः कोऽपि विषयो यद्यज्ञातो भवेत् तदा स विषय उपदेष्टव्यो भवति। यदि कश्चन बालकः कलमं दृष्ट्वा किमिदम् ? इति पृच्छेत् तदा 'अयं कलमः, इति स बालक उपदेष्टव्यो भवति। यदि तु षोडशवर्षो युवा कश्चिद् भवेत्, स ज्ञातकलमपदार्थः कलमं दृष्ट्वा 'किमिदम् ?' इति नैव पृच्छेत्। तं युवानमुद्दिश्य च 'अयं कलमः' इति च कोऽपि नोपदिशति। अर्थात् कश्चिदपि विषयः कुतश्चिदप्युपायान्तराज्ज्ञातश्चेत् स विषयः पुनरन्येन नोपदिश्यते, उपदेशवैयर्थ्यात्। अनया रीत्या पूर्वोक्तानि (क) (ख) वाक्यानि विचारयत तु तत्र (क) वाक्येषु 'कर्ता' इत्यर्थस्तिङा बोध्यते। अतस्तेषु वाक्येषु ये कर्तृवाचकाः शब्दास्तेभ्य आगतया विभक्त्या 'कर्ता' इत्यर्थो बोधयितुं नापेक्ष्यते, तिङा बोधितत्वात्। किन्तु प्रातिपदिकमात्रस्य अर्थो विभक्त्या बोधयितव्यः। तेन (क) वाक्येषु प्रातिपदिकार्थमात्रे बोधयितव्ये कर्तृवाचकशब्देभ्यः प्रकृतसूत्रेण प्रथमा विभक्तिर्जाता। अतस्तत्र कर्तृवाचकपदानि प्रथमान्तानि सन्ति। अथ तत्र यानि कर्मवाचकानि प्रातिपदिकानि तेभ्य आगतया विभक्त्या 'कर्म' इत्यर्थोऽपि बोधयितुमपेक्ष्यते। 'कर्म' इत्यर्थस्य केनाऽपि (प्रकृते तिङा) अबोधितत्वात्। अर्थात् कर्मवाचकप्रातिपदिकेभ्य आगमिष्यन्त्या विभक्त्या प्रातिपदिकार्थः प्रातिपदिकार्थादधिकः 'कर्म' इत्यर्थश्च बोधयितव्यः। अत्र प्रातिपदिकार्थमात्राऽभावात् (प्रातिपदिकार्थादधिकस्य 'कर्म' इत्यर्थस्य च बोधयितव्यत्वात्) कर्मवाचकशब्देभ्यः प्रथमा विभक्तिर्न प्राप्नोति। (ख) वाक्येषु 'कर्म' इत्यर्थस्तिङा बोध्यते। अतस्तेषु वाक्येषु यानि कर्मवाचकानि प्रातिपदिकानि, तेभ्य आगतया विभक्त्या 'कर्म' इत्यर्थो बोधयितुं नापेक्ष्यते तिङा बोधितत्वात्। किन्तु प्रातिपदिकमात्रस्य अर्थो विभक्त्या बोधयितव्यो भवति। तेन (ख) वाक्येषु प्रातिपदिकार्थमात्रे बोधयितव्ये कर्मवाचकशब्देभ्यः प्रकृतसूत्रेण प्रथमा विभक्तिर्जाता। अतस्तत्र कर्मपदानि प्रथमान्तानि सन्ति। अथ तत्र ये कर्तृवाचकाः शब्दास्तेभ्य आगतया विभक्त्या 'कर्ता' इत्यर्थोऽपि बोधयितुमपेक्ष्यते। 'कर्ता' इत्यर्थस्य केनाऽपि (प्रकृते तिङा) अबोधितत्वात्। अर्थात् कर्तृवाचकशब्देभ्य आगमिष्यन्त्या विभक्त्या प्रातिपदिकार्थः प्रातिपदिकार्थादधिकः 'कर्ता' इत्यर्थश्च बोधयितव्यो भवति। अतः प्रातिपदिकार्थमात्राऽभावात् (प्रातिपदिकार्थादधिकस्य 'कर्ता' इत्यर्थस्य च बोधयितव्यत्वात्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

२-३-४७ **सम्बोधने** च ॥४९ हे राम । २-३-४८ साऽऽमन्त्रितम् ॥	उदाहरणानि ८-१-७२ आम...प्रभृतिषु द्रष्टव्यानि । २-३-४९ एकवचनं सम्बुद्धिः ॥

कर्तृवाचकशब्देभ्यः प्रथमा विभक्तिर्न प्राप्नोति । अतः (क) वाक्येषु अनुक्ते कर्मणि द्वितीया (ख) वाक्येषु च अनुक्ते कर्तरि तृतीया विभक्तिर्जाता । या खलु तत्रैवोपदिष्टा । एवमेव ७-१-१ युँवौं...सूत्रप्रसङ्गे २-३-६५ कर्तृ...सूत्र-सन्दर्भे, प्रस्तुते 'श्यामः कोशस्य पाठकः' इति वाक्ये कर्तुर्ण्वुँल्प्रत्ययेनोक्तत्वेन कर्तृवाचकं श्याम इति पदं प्रथमान्तम् । तत्रैव कर्मणोऽनुक्तत्वेन कोशस्येति पदं षष्ठयन्तम् (तत्रैव द्रष्टव्यम्) तथा ३-४-७० तयोः... सूत्रप्रसङ्गे २-३-६९ न लो...सूत्रसन्दर्भे प्रस्तुतेषु (क) (ख) (ग) वाक्येषु कर्तुः क्तवतुँप्रत्ययेन बोधितत्वेन कर्तृवाचकशब्देभ्य आगतया विभक्त्या प्रातिपदिकार्थमात्रस्य बोधनीयतया कर्तृपदानि प्रथमान्तानि । तत्रैव कर्मणः क्तवतुँप्रत्ययेनाऽनुक्तत्वेन कर्मवाचकशब्देभ्य आगमिष्यन्त्या विभक्त्या कर्मार्थस्याऽपि बोधनीयतया प्रातिपदिकार्थमात्राऽभावात् (अर्थात् प्रातिपदिकार्थस्य ततोऽधिकस्य कर्मरूपार्थस्य च बोधनीयत्वात्) अनुक्ते कर्मणि द्वितीयाविधानात् कर्मवाचकपदानि द्वितीयान्तानि सन्ति (घ) (ङ) (च) वाक्येषु तु क्तप्रत्ययेन कर्मण उक्तत्वेन कर्मवाचकशब्दात् प्रातिपदिकार्थमात्रे प्रथमायां विभक्तौ कर्मवाचकपदानि प्रथमान्तानि । तत्रैव क्तप्रत्ययेन कर्तुरनुक्तत्वेन 'कर्ता' इत्यर्थस्यापि विभक्त्या बोधनीयतया प्रातिपदिकार्थमात्राऽभावेन प्रथमाया अप्राप्तौ, अनुक्ते कर्तरि तृतीयाया विधानात् कर्तृपदानि तृतीयान्तानि सन्तीति विशदय्य बोधयेत् । अथ प्रातिपदिकार्थादधिके सम्बोधनेऽर्थे गम्येऽपि २-३-४७ सम्बो....सूत्रेण प्रथमा विभक्तिर्भवतीति पूर्वमुपदिष्टमुद्बोधयेत् । अथाऽधोनिर्दिष्टरूपेण शिक्षकश्छात्रान् बोधयेत् । वत्साः!

कर्ता, कर्म, करणम्, सम्प्रदानम्, अपादानम्, अधिकरणम् इति कारकाणि षट् सन्ति । कर्ता कर्म च करणं सम्प्रदानं तथैव च । अपादानाधिकरणे इत्याहुः कारकाणि षट् ॥ एषु केनचित् प्रत्ययेन वा निपातेनोक्तेषु प्रातिपदिकार्थमात्रे प्रथमा विभक्तिर्भवति । अनुक्तेषु पृथक् पृथग् विभक्तयो भवन्ति । तासु अनुक्ते कर्मणि द्वितीया विभक्तिर्भवति, अनुक्ते कर्तरि करणे च तृतीया विभक्तिर्भवतीति च क्रमशः २-३-२ कर्म...२-३-१८ कर्तृ... सूत्रयोरुक्तमेव । किन्तु किं नाम करणम् ? इति नोपदिष्टम् पूर्वम् । अतः प्रथममत्र करणपदार्थमुपदिशामीति वदन् १-४-४२ साधक...सूत्रमुपदिशेत् ।

२-३-४७ सम्बो- ८-३-५७ इण्कोः- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्राऽधोनिर्दिष्टरूपेण सूत्रे श्यामपाटचां लेख्ये । २-३-४६ प्राति...प्रथमा ॥ २-३-४७ सम्बोधने च (क) ॥इति॥ सम्बोधने = सम्बोधनेऽर्थे गम्यमाने, (क)= प्रथमा= प्रथमा विभक्तिर्भवति । इत्यर्थ उपदेश्यः । अथ सुँ, औ, जस् इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२२ द्व्येक...सूत्रबलेन श्याम+सुँ इति जाते १-३-२ उप...१-३-९ तस्य... सूत्रद्वारा 'श्याम+स्' इति जाते २-३-४९ एकवचनं... सूत्रमुपस्थाप्यम् ।

२-३-४८ साऽऽम- सा इत्यनेन सन्निहितेन २-३-४७ सम्बोधने च इति सूत्रेण विधीयमाना प्रथमा विभक्तिर्निर्दिश्यते । संज्ञाविधावपि तदन्तग्रहणम् । अन्यथा प्रदेशेषु सम्बोधनग्रहणेन सिद्धे संज्ञाविधानं व्यर्थ स्यात् । सा= सम्बोधने च इति सूत्रेण विहिता या प्रथमा तदन्तम्, आमन्त्रितम्= आमन्त्रितसंज्ञं भवति ।

२-३-४९ एक- २-३-४७ सम्बोधने च सूत्रानन्तरं सूत्रमिदं पाठचम् । एकवचनम् = सम्बोधने विहितायाः प्रथमाया एकवचनम्, सम्बुद्धिः= सम्बुद्धिसंज्ञकं भवति । इत्यर्थ उपदेश्यः । **विशेषः** 'सम्बोधने विहितायाः प्रथमायाः' इत्यर्थो न सूत्राक्षर-लभ्यः । अतो दृष्टान्तेन बोधनीयः । यथा-छात्राः पठन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-३-५० षष्ठी शेषे ॥७३,६४

२-३-५१ ज्ञोऽविदर्थस्य करणे ॥

सर्पिषो ज्ञानम् । सर्पिषा प्रवर्तनमित्यर्थः । अविदर्थस्येत्युक्तेर्नेह- स्वरेण पुत्रं जानाति ।

२-३-५२ अधीगर्थदयेशां कर्मणि ॥

मातुः स्मरणम् । सर्पिषो दयनम् ईशनं वा ।

२-३-५३ कृञः प्रतियत्ने ।

एधोदकस्योपस्करणम् । सँस्कारद्वारा गुणाधानम् इत्यर्थः ।

२-३-५४ रुजार्थानां भाववचनानामज्वरेः ॥

रोगस्य चौरस्य रुजा । अज्वरेरित्युक्तेर्नेह-रोगस्य-चौरज्वरः । (अज्वरि-संताप्योरिति वक्तव्यम्)

रोगस्य चौरसन्तापः ।

२-३-५५ आशिषि नाथः ॥

सर्पिषो नाथनम् ।

२-३-५६ जासिनिप्रहणनाटक्राथपिषां

तत्प्रसङ्गे एकः श्यामवर्णो वर्तते, इत्युक्तौ एकश्छात्र इति ज्ञायते प्रकृतत्वात् । तथैव, एकवचनमित्युक्तौ २-३-४७ सम्बोधने चेति विहितायाः प्रथमाया एकवचनमिति ज्ञायते प्रकृतत्वात् । इति । अथ ६-१-६७ एङ्ह्रस्वात्... सूत्रमुपदेश्यम् ।

२-३-५० षष्ठी- २-३-३६ सप्तम्यधिकरणे च- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । शेषे = सम्बन्धे, षष्ठी = षष्ठी विभक्तिर्भवति । इत्यर्थमुपदिश्य श्यामस्य पुस्तकम् । रामस्य पिता । मम भ्राता । इत्यादीन्युदाहृत्य सूत्रेणाऽनेन विहिता षष्ठी विभक्तिः कारकविभक्तिर्न । २-३-६५ कर्तृ...सूत्रेण विहिता षष्ठी तु कारकविभक्तिरेवेति बोधयेत् । कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव । भजे शम्भोश्चरणयोः (अतः शेषत्वेन विवक्षायामनेनैव सिद्धेऽग्रिमसूत्राणि प्रतिपदविधाना...इति समासनिषेधफलकानीति शिक्षकेण बोध्यम्, छात्रास्तु नोपदेश्याः) इति कारक-शिक्षण-रीतिः । **अथ तद्धित-शिक्षण-रीतिः**

तद्धित-शिक्षणे शिक्षकः प्रथमं १-४-१७ स्वादि...१-४-१८ यचि...सूत्रयोरुपदिष्टं भ-पद-विषयकमुपदेशं छात्राः सम्यगवदधति न वा ? इति परीक्ष्य सत्यावश्यके पुनस्तमुद्बोधयेत् । अथ ४-१-७६ तद्धिताः...सूत्रमुपदिशेत् ।

२-३-५१ ज्ञोऽवि- अविदर्थस्य = अज्ञानार्थस्य, ज्ञः = ज्ञाधातोः, करणे = करणंकारके, शेषे (२-३-५०) = शेषत्वेन विवक्षिते, षष्ठी (२-३-५०) ।

२-३-५२ अधी= अधीगिति-अधिपूर्वक इक् स्मरणे धातुः । अधी...येशाम् = स्मरणार्थकधातूनां दय्धातोः ईश्धातोश्च, कर्मणि=कर्मकारके, शेषे (२-३-५०) = शेषत्वेन विवक्षिते, षष्ठी (२-३-५०) ।

२-३-५३ कृञः= कृञ्धातोः, कर्मणि (२-३-५२) प्राग्वत्, प्रतियत्ने = गुणाधाने ।

२-३-५४ रुजा- अत्र भाववचनानामित्यस्य भाववाचिनामिति नार्थः । धातुमात्राणां भाववाचित्वाऽव्यभिचारात् । अतो भावशब्देनाऽत्र घञादिवाच्यः सिद्धरूपो भावो गृह्यते । वक्तीति वचनः । बाहुलकात् कर्तरि ल्युँट् । रुजार्थानां भावश्च कर्ता न संभवतीति प्रकृत्यर्थं त्यक्त्वा प्रत्ययार्थः कर्तैव वचनशब्देन गृह्यते । भावो वचनः = कर्ता येषां ते भाववचनाः । तेषाम् = भाववचनानाम् = घञादि-वाच्यसिद्धभाव-कर्तृकाणाम्, अज्वरेः = ज्वरिभिन्नानाम्, रुजार्थानाम्=रुजार्थक धातूनाम्, कर्मणि (२-३-५२) प्राग्वत् । उदाहरणे रोगशब्दो भावघञन्तः । स च रुजायाः कर्ता । प्रत्युदाहरणे प्रकृतसूत्राप्रवृत्तौ शेषत्वेन विवक्षिते २-३-५० षष्ठी...इति षष्ठ्यां समासो जातः । **अज्व-** उदाहरणे पूर्ववत् षष्ठी समासश्च ।

२-३-५५ आशिषि- इदं मे भूयादित्यर्थित्वेनाऽऽशंसा = आशीः, तस्यां गम्यमानायाम्, नाथः = नाथ् धातोः, कर्मणि (२-३-५२) प्राग्वत् ।

२-३-५६ जासि...पिषाम् = जासि निप्रहण नाट क्राथ इत्येतेषां धातूनाम्, कर्मणि (२-३-५२) प्राग्वत्, हिंसायाम्=हिंसायां गम्यमानायाम् । जासि = चौरादिको जसुँ धातुः । निप्रहणः निपूर्वः प्रपूर्वः निप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिंसायाम् ॥
चौरस्योज्जासनम् । चौरस्य निहननं प्रहणनं निप्रहणनं प्रणिहननं वा ।
चौरस्योन्नाटनम् । चौरस्य क्राथनम् ।
हिंसायामित्युक्तेर्नेह-धानापेषणम् ।

२-३-५७ व्यवहृपणोः समर्थयोः ॥

शतस्य व्यवहरणं पणनं वा । समर्थयोरित्युक्तेर्नेह-शलाकाव्यवहारः । गणनेत्यर्थः ।
ब्राह्मणपणनम् । स्तुतिरित्यर्थः ।

२-३-५८ दिवस्तदर्थस्य ॥६०

शतस्य दीव्यति । तदर्थस्येत्युक्तेर्नेह-ब्राह्मणं दीव्यति । स्तौतीत्यर्थः ।

२-३-५९ विभाषोपसर्गे ॥

शतस्य शतं वा प्रतिदीव्यति ।

२-३-६० द्वितीया ब्राह्मणे ॥

गामस्य तदहः सभायां दीव्येयुः ।

२-३-६१ प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने ॥

अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य । अग्नये छागस्य हविषो वपाया मेदसोऽनुब्रूहि ।
(हविषः प्रस्थितस्य प्रतिषेधो वक्तव्यः)
इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य ।

२-३-६२ चतुर्थ्यर्थे बहुलं छन्दसि ॥६३

पुरुषमृगश्चन्द्रमसः । पुरुषमृगश्चन्द्रमसे ।
(षष्ठ्यर्थे चतुर्थी वक्तव्या)
या खर्वेण पिबति तस्यै खर्वो जायते ।

इति समुदायपूर्वः प्रणि इति विपरीतानुपूर्वीपूर्वोऽपि हन् धातुः । **नाट-** चौरादिको नट् धातुः । क्राथ-क्रथँ धातोरुपधाया वृद्धिश्च निपात्यते । अन्यथा घटादित्वेन मित्त्वाद् ह्रस्वः स्यात् । प्रत्युदाहरणे रोगस्य चौरज्वर इत्यत्रैव षष्ठी, समासश्च ।

२-३-५७ व्यव- समर्थयोः = समः अर्थः ययोस्तौ समर्थौ । शकन्ध्वादित्वात् पररूपम् । तयोः = समर्थयोः, व्यवहृपणोः = व्यवपूर्वकहृधातोः पण्धातोश्च, कर्मणि (२-३-५२) प्राग्वत् । द्यूते क्रयविक्रय-व्यवहारे चेमौ समानार्थौ ।

२-३-५८ दिव- तदर्थस्य (सः = पूर्वसूत्रोक्तः द्यूतं, क्रयविक्रयरूपव्यवहारश्च अर्थो यस्य तस्य) दिवः = दिव्धातोः, कर्मणि (२-३-५२) षष्ठी (२-३-५०) । 'शेषे' इति तु नात्र सम्बध्यते, अग्रिमसूत्रद्वयारम्भसामर्थ्यात् ।

२-३-५९ विभा-उपसर्गे=उपसर्गे सति, तदर्थस्य+दिवः (२-३-५८) कर्मणि (२-३-५२) विभाषा=वा, षष्ठी (२-३-५०) ।

२-३-६० द्विती- ब्राह्मणे = ब्राह्मणविषयके प्रयोगे, तदर्थस्य+दिवः (२-३-५८) कर्मणि (२-३-५२) द्वितीया=द्वितीया विभक्तिर्भवति ।

२-३-६१ प्रेष्यब्रुवो-प्रेष्य इति दैवादिकस्य इष्धातोर्लोटि मध्यमपुरुषैकवचनान्तम् । तत्साहचर्याद् ब्रूधातुरपि लोण्मध्यम-पुरुषैकवचनान्तमेव गृह्यते । अतोऽत्र सूत्रे शेष इत्यपि न सम्बध्यते तिङन्तेन समासस्याऽप्रसक्तत्वात् । देवतासम्प्रदाने-देवता सम्प्रदानं यस्यार्थस्य स देवतासम्प्रदानः । तस्मिन् = देवतासम्प्रदानेऽर्थे वर्तमानयोः, प्रेष्य ब्रुवोः=प्रेष्य इत्यस्य ब्रूधातोश्च, कर्मणि (२-३-५२) = कर्मार्थे वर्तमानात्, हविषः = हविर्विशेषवाचिनः प्रातिपदिकात्, षष्ठी (२-३-५०) । सूत्रमिदं भाषाविषयमपि, उत्तरसूत्रे छन्दोग्रहणात् ।

हविषः-प्रस्थितस्य = प्रस्थितशब्देन विशेषितस्य, हविषः = हविर्विशेषवाचिनः, प्रतिषेधो वक्तव्यः = कर्मणि षष्ठी न भवतीति वक्तव्यम् ।

२-३-६२ चतुर्थ्यर्थे, बहुलम्= बाहुल्येन, षष्ठी (२-३-५०) छन्दसि=वेदे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-३-६३ यजेश्च करणे ॥

सोमस्य सोमेन वा यजते ।

२-३-६४ कृत्वोऽर्थप्रयोगे कालेऽधिकरणे ॥

पञ्चकृत्वोऽह्नो भोजनम् । द्विरह्नो भोजनम् ।

२-३-६५ कर्तृकर्मणोः कृति ॥

ओदनस्य पाचकः । भवतः शायिका । अपां स्रष्टा ।

कृतीत्युक्तेर्नेह-कृतपूर्वी कटम् ।

(गुणकर्मणि वेष्यते)

नेताऽश्वस्य मन्दुराया मन्दुरां वा ।

२-३-६६ उभयप्राप्तौ कर्मणि ॥

आश्चर्यो गवां दोहोऽगोपेन ।

(स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः)

भेदिका देवदत्तस्य काष्ठानाम् । चिकीर्षा देवदत्तस्य कटस्य ।

(शेषे विभाषा)

विचित्रा हि सूत्रस्य कृतिः पाणिनेः पाणिनिना वा ।

(केचिदविशेषेण विभाषामिच्छन्ति)

शब्दानामनुशासनमाचार्येण आचार्यस्य वा ।

२-३-६७ क्तस्य च वर्तमाने ॥६८

राज्ञां मतो बुद्धः पूजितो वा ।

२-३-६३ यजेः = यज् धातोः प्रयोगे, करणे = करणार्थे वर्तमानात् प्रातिपदिकात्, बहुलम् (२-३-६२) षष्ठी (२-३-५०) छन्दसि (२-३-६२) ।

२-३-६४ कृत्वोऽर्थप्रयोगे= कृत्वसुँचोऽर्थे वर्तमानस्य प्रत्ययस्य प्रयोगे, काले = कालवाचिनि, अधिकरणे=अधिकरणकारके शेषे (२-३-५०) = शेषत्वेन विवक्षिते, षष्ठी (२-३-५०) ।

२-३-६५ कर्तृ- ७-१-१ युँवोँरनाकौ-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो- यथा-

२-३-१ अनभिहिते ॥ २-३-५० षष्ठी शेषे २-३-६५ कर्तृकर्मणोः (क) कृति (ख) इति । कृति = कृद्योगे, कर्तृकर्मणोः+[(क) = अनभिहिते = अनभिहितयोः)] = कर्तृकर्मणोरनुक्तयोः सतोः, (ख) = षष्ठी = अनुक्तकर्तृकर्मवाचकशब्दात् षष्ठी विभक्तिर्भवति । इत्यर्थः । एवं दर्शक- योजक- कर्षक-दोहक-सेवक शब्दसिद्धये दृश्-युज्-कृष्-दुह-सेव् धातुभ्यो ण्वुँल् । स च ३-४-११४ आर्ध...सूत्रेणार्धधातुकम् । तेन ७-३-८६ पुँग...सूत्रेण धातोरुपधाया गुण इति सत्यावश्यके उद्बोधयेत् । सेवक इत्यत्र तु सेव् धातोरेव विहितत्वान्न गुणप्रसङ्ग इत्यादि सम्यग् बोधयेत् । अथाऽधोनिर्दिष्टरूपेणच्छात्रान् बोधयेत् । वत्साः ? ते दर्शक-योजकादयः शब्दा यदि स्त्रीलिङ्गे भवेयुस्तदा तु तेभ्यः पुनष्टाप्प्रत्यये दर्शिका योजिका इत्यादयः सम्पद्यन्ते । तथाहि इति वदन् ६-१-६७ एङ्ह्र...सूत्रप्रकरणे स्त्रीलिङ्गे टाप् प्रत्ययो भवतीति गन्धप्रतिपत्तये प्रस्तुतम् ४-१-४ अजाद्यतष्टाप्-सूत्रमुपदिशेत् ।

२-३-६६ उभ- पूर्वेण प्राप्तौ षष्ठीनियमार्थमिदम् । उभयशब्देन प्रकृते कर्तृकर्मणी गृह्येते । उभयोः = कर्तृकर्मणोः प्राप्तिर्यस्मिन् कृति सः = उभयप्राप्तिः कृत्, तस्मिन् = तत्प्रयोगे, कर्मणि = कर्मण्येव, षष्ठी (२-३-५०) । **स्त्रीप्रत्यययोः** = ३-३-९४ स्त्रियां क्तिन्, इत्यधिकारे विहितयोः, अकाकारयोः = अकस्य अकारस्य च प्रयोगे, अयं नियमो न । उदाहरणयोः- आद्ये ३-३-१११ पर्या...इति ण्वुँच् । द्वितीये ३-३-१०२ अ प्र...इत्यप्रत्ययः । **शेषे** = अकाकारभिन्नस्य ३-३-९४ स्त्रियां क्तिन् इत्यधिकारे विहितस्य प्रत्ययस्य योगे, विभाषा = पूर्वोक्तो नियमो विकल्पेन भवति ।

केचित्-अविशेषेण=अकाकारभिन्ने कृन्मात्रे ।

२-३-६७ क्तस्य -२-३-६९ न लो...इत्यस्य प्रतिप्रसवः । वर्तमाने=वर्तमानेऽर्थे विद्यमानस्य, क्तस्य = क्तप्रत्ययस्य योगे, कर्तरि (२-३-६५) षष्ठी (२-३-५०) । कर्मणस्तूक्तत्वान्नात्र प्रसक्तिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-३-६८ अधिकरणवाचिनश्च ॥
इदमेषामासितं गतं भुक्तं वा ।
इदमेषां भुक्तमोदनस्य ।

२-३-६९ न लोकाव्ययनिष्ठाखलर्थतृनाम् ॥७०
लादेशः-ओदनं पचन् पचमानो वा । उः- कटं चिकीर्षुः । कन्यामलङ्करिष्णुः
उकः- दैत्यान् घातुको हरिः । अव्ययम्-ओदनं भुक्त्वा । निष्ठा-ओदनं भुक्तवान् । पुत्रेण लिखितं पत्रम् । तृन्- (३-२-१२४) लँटः...इति सूत्रस्थ-तृशब्दादारभ्य आ (३-२-१३५) तृन्सूत्रस्थ-नकारात् प्रत्याहारः
सोमं पवमानः । कर्ता कटान् ।
(उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः)
लक्ष्म्याः कामुको हरिः ।
(अव्ययप्रतिषेधे तोसुँन्कसुँनोरप्रतिषेधः)
पुरा सूर्यस्योदेतो राधेयः । पुरा क्रूरस्य विसृपो विरप्शिन् ।
(द्विषः शतुर्वा)
चौरस्य चौरं वा द्विषन् ।

२-३-७० अकेनोर्भविष्यदाधमर्ण्ययोः ॥
कटं कारको व्रजति । ग्रामं गमी ।
शतं दायी ।

२-३-७१ कृत्यानां कर्तरि वा ॥
श्यामेन कोशः पठितव्यः, श्यामस्य कोशःपठितव्यः ।
(उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्यः)
नेतव्या ग्राममजा देवदत्तेन ।

२-३-६८ अधिकरणवाचिनः= अधिकरणकारकवाचकस्य, क्तस्य (२-३-६७) अनभिहितयोः (२-३-१) कर्तृकर्मणोः (२-३-६५) षष्ठी (२-३-५०) । उदाहरणयोः आद्ये कर्तरि षष्ठी । अन्त्ये-कर्तरि कर्मणि च । अत्र तत्त्वबोधिनी-सकर्मकेभ्यस्त्वधिकरणे क्ते कर्तृकर्मणोर्द्वयोरपि षष्ठी, अनभिहितत्वाविशेषात् । **इदमेषां भुक्तमोदनस्य** । उभयप्राप्तौ कर्मणि इत्ययं नियमस्तु नेह प्रवर्तते, कर्तृकर्मणोः कृति इत्यनन्तरस्या एव षष्ठ्यास्तन्नियमाभ्युपगमात् । एतच्च कौस्तुभे स्पष्टमिति ।

२-३-६९ न लो- ३-४-७० तयोरेव... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । लोका...तृनाम् [ल+उ, उकारान्त)+उक+अव्यय+निष्ठा+खलर्थ+तृन्]= लकारस्थानिकादेश उप्रत्यय उकारान्तप्रत्यय उकप्रत्ययः अव्ययम् निष्ठासंज्ञकप्रत्ययः खलर्थप्रत्ययः तृन् प्रत्ययः (तृन् प्रत्याहारः) इत्येतेषां योगे, न = २-३-६५ कर्तृ...सूत्रं न प्रवर्तते = 'कर्तृकर्मणोः कृति' इति सूत्रेण षष्ठी विभक्तिर्न भवति । **अथ ञि इत्यनुबन्धफलप्रदर्शनाय ३-२-१८७ ञीतः...सूत्रमुपदिशेत् ।**

२-३-७० अके- भवि...ण्ययोः+अकेनोः= भविष्यत्काले विहितस्य अकस्य भविष्यत्काले आधमर्ण्यार्थे च विहितस्य इनः प्रयोगे, न (२-३-६९) । उदाहरणेषु- आद्ये ३-३-१० तुमुँ...इति ण्वुँल् । द्वितीये गमेरिनिँरि त्यौणादिक इनिँः ३-३-३ भवि...इति भविष्यति । अन्त्ये ३-३-१७० आव...इति णिनिँः ।

२-३-७१ कृत्या- ३-१-९६ तव्यत्...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । कृत्यानाम् = कृत्यप्रत्ययानां योगे, कर्तरि= कर्तृकारके, अनभिहिते (२-३-१) = अनुक्ते, वा = विकल्पेन, षष्ठी (२-३-५०) = षष्ठी विभक्तिर्भवति । इत्यर्थमुपदिश्याऽधोनिर्दिष्टानि चोदाहरणानि प्रस्तुवीयात् । श्यामेन कोशः पठनीयः = श्यामस्य कोशः पठनीयः । श्यामेनाऽष्टाध्यायी पठितव्या पठनीया वा = श्यामस्याऽष्टाध्यायी पठितव्या पठनीया वा । विष्णुमायया व्याकरणं पठितव्यम् पठनीयं वा = विष्णुमायाया व्याकरणं पठितव्यं पठनीयं वा । अस्मिन् प्रसङ्गे तव्यप्रत्यये तव्यत् प्रत्यये च विशेषः स्वरविषयक एवेति सामान्यरीत्या बोधयेत् ।

नेपाली	हिन्दी	संस्कृतम्
पढ्ने पुस्तक	पढनेका पुस्तक	पठनीयं पुस्तकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-३-७२ तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् ॥

तुल्यः सदृशो वा देवदत्तेन देवदत्तस्य वा ।

अतुलोपमाभ्यामित्युक्तेर्नेह-तुला उपमा वा कृष्णस्य नास्ति ।

२-३-७३ चतुर्थी चाऽऽशिष्यायुष्यमद्रभद्र कुशलसुखार्थहितैः ॥

आयुष्यं चिरञ्जीवितं मद्रं भद्रं कुशलं निरामयं सुखं शम् अर्थः प्रयोजनं हितं पथ्यं वा देवदत्ताय देवदत्तस्य वा भूयात् । मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः ।

आशिषीत्युक्तेर्नेह-

देवदत्तस्याऽऽयुष्यमस्ति ।

इति द्वितीयाध्याये तृतीयः पादः ।

व्याकरण पढ्नुपर्छ	व्याकरण पढना चाहिए	व्याकरणं पठनीयम् ।
कोश पढ्नुपर्छ	कोश पढना चाहिए	कोशः पठनीयः ।
अष्टाध्यायी पढ्नुपर्छ	अष्टाध्यायी पढना चाहिए	अष्टाध्यायी पठनीया ।
हाँस्नुपर्छ	हँसना चाहिए	हसनीयम् ।
नाँच्नुपर्छ	नाचना चाहिए	नर्तनीयम् ।

अथाऽत्रापि प्रत्ययान्तराण्यपि भवन्तीति दिग्दर्शनाय द्वे अन्ये प्रसिद्धे सूत्रे अपि प्रस्तोतुकामः प्रथमम् ३-१-९७ अचो यत्-सूत्रमुपदिशेत् ।

२-३-७२ तुल्या- अतुलोपमाभ्याम्= तुला उपमा इति शब्दौ वर्जयित्वा, तुल्यार्थैः= सदृशार्थकशब्दयोगे, अन्यतरस्याम्= वा, तृतीया= तृतीया विभक्तिर्भवति । पक्षे षष्ठी (२-३-५०) । बहुवचननिर्देशेनैव स्वरूपस्य निरासे सिद्धेऽर्थग्रहणं पदान्तरनिरपेक्षया ये तुल्यार्थास्तेषां ग्रहणार्थम् । एवञ्च द्योतका इवादयो निरस्ता भवन्ति । तेनेह न- गौरिव गवयः । यथा गौस्तथा गवयः । वेत्यनुवर्तमानेऽन्यतरस्यां ग्रहणमुत्तरसूत्रे चकारेण तस्याऽ नुकर्षणार्थम् । अन्यथा तृतीयाऽनुकृष्येत ।

२-३-७३ **चतु-** आयुष्य...हितैः= आयुष्य मद्र भद्र कुशल सुख अर्थ हित इत्येतदर्थकशब्दैर्योगे, अन्यतरस्याम् (२-३-७२) चतुर्थी=चतुर्थी विभक्तिर्भवति, आशिषि= आशीरर्थे गम्यमाने । पक्षे षष्ठी (२-३-५०) ।

इति द्वितीयाऽध्याये तृतीयः पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ द्वितीयाऽध्याये

चतुर्थः पादः

२-४-१ द्विगुरेकवचनम् ॥१७

पञ्चगवम्। पञ्चमूली।

२-४-२ द्वन्द्वश्च प्राणि-तूर्य-सेनाङ्गानाम् ॥१८

पाणिपादम्। मार्दङ्गिकपाणविकम्। रथिकाश्वारोहम्।

२-४-३ अनुवादे चरणानाम् ॥

उदगात् कठकालापम्। प्रत्यष्ठात् कठकौथुमम्। (स्थेणोर्लुँङीति वक्तव्यम्)

नेह-अभूवन् कठकालापाः। तिष्ठन्तु कठकालापाः।

२-४-४ अध्वर्युक्रतुरनपुंसकम् ॥

अर्काश्वमेधम्। अध्वर्युक्रतुरित्युक्तेर्नेह-इषुवज्रौ। सामवेदे विहिताविमौ। अनपुंसकमित्युक्तेर्नेह-राजसूयवाजपेये।

२-४-५ अध्ययनतोऽविप्रकृष्टाख्यानाम् ॥

पदकक्रमकम्।

२-४-६ जातिरप्राणिनाम् ॥

धानाशष्कुलि। द्रव्यजातेर्ग्रहणाद् गुणक्रियाजाति-वाचिनां न। रूपरसौ। गमनाकुञ्चने।

जातिप्राधान्य एवायमेकवद्भावः। तेनेह न-बदरामलकानि।

२-४-७ विशिष्टलिङ्गो नदीदेशोऽग्रामाः ॥

गङ्गाशोणम्। कुरुकुरुक्षेत्रम्।

विशिष्ट= भिन्नलिङ्गानामित्युक्तेर्नेह-गङ्गायमुने। मद्रकेकयाः। अग्रामा इत्युक्तेर्नेह-जाम्बवं नगरं शालूकिनी ग्रामः = जाम्बवशालूकिन्यौ।

२-४-१ द्विगु- वच् धातोर्बाहुलकात् कर्तरि ल्युँटि वचनम्। सामान्ये नपुंसकम्। पश्चाद् द्विगुरित्यस्य सम्बन्धाल्लिङ्गभेदेऽपि न दोषः। एकस्य वचनम्= एकवचनम्= एकार्थस्य वाचक इत्यर्थः। अनेकार्थाभिधायिन एकार्थाभिधायित्वं कर्तुं वचनशतेनाऽपि न संभवतीति एकवदित्यतिदेशो गम्यते। व्याख्यानतश्च समाहारे विहित इति लभ्यते। द्विगुः= समाहारे विहितो द्विगुः, एकवचनम्= एकवद् भवति।

२-४-२ द्वन्द्व- अङ्गशब्दस्य प्रत्येकं योगः। प्राणि...ङ्गानाम्= प्राण्यङ्गवाचिनां तूर्याङ्गवाचिनां सेनाङ्गवाचिनां च, द्वन्द्वः= द्वन्द्व-समासः, एकवत् (२-४-१)। एषां समाहारे एव द्वन्द्व इति नियमार्थ सूत्रम्। एवमग्रेऽपि बोध्यम्।

२-४-३ अनु- चरणानाम्= शाखाध्येतृवाचिनाम्, द्वन्द्वः (२-४-२) एकवत् (२-४-१) अनुवादे=अनुवादे गम्यमाने। अत्रोदाहरणविषये तत्त्वबोधिनी-यदा कठेषु कालापेषु चोदितेषु कठेषु कौथुमेषु च प्रतिष्ठितेषु चावाभ्यां तत्र गन्तव्यमिति संकेतयित्वा तत्संकेतं विस्मृत्यासीनं प्रतीदमुच्यत इति। **स्थेणोर्लुँङि**= स्थाधातुसम्बन्धिनि इण् धातु सम्बन्धिनि च लुँङ्लकारे प्रयुक्ते, इति वक्तव्यम्= प्रकृतसूत्रं प्रवर्तते, इति वाच्यम्।

२-४-४ अध्व- अध्वर्युशब्देन यजुर्वेदो लक्ष्यते। अनपुंसकम्= नपुंसकेतरलिङ्गानाम्, अध्वर्युक्रतुः= यजुर्वेदविहितक्रतुवाचिनाम्, द्वन्द्वः (२-४-२) एकवत् (२-४-१)।

२-४-५ अध्ययनतः= अध्ययनेन (निमित्तेन) अविप्रकृष्टाख्यानाम्-अविप्रकृष्टा= प्रत्यासन्ना, आख्या येषां, तेषां शब्दानाम्, द्वन्द्वः (२-४-२) एकवत् (२-४-१)। पदान्यधीत्य क्रमोऽध्येतव्यः। तेनोदाहरणेऽध्ययननिमित्तेन पदक इति क्रमक इति चाऽध्येतुराख्या प्रत्यासन्ना भवति।

२-४-६ जाति- अप्राणिनाम्= प्राणिवाचिभिन्नानाम्, जातिः= द्रव्यजातिवाचिनाम्, द्वन्द्वः (२-४-२) एकवत् (२-४-१)। जातिरित्यस्य द्रव्यजातिरित्यर्थो नञिव-न्याय-लभ्यः।

२-४-७ विशि- विपूर्वः शिषिर्भिदिना समानार्थः। तथा च भेदकं विशेषणं भेद्यं विशेष्यमित्युच्यते, इति हरदत्तः। वि...ङ्गः= भिन्नलिङ्गानाम्, अग्रामाः= ग्रामवाचिभिन्नानाम्, नदी= नदीवाचिनाम्, देशः= देशवाचिनाम्, च, द्वन्द्वः (२-४-२) एकवत् (२-४-१)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-४-८ क्षुद्रजन्तवः ।९

आनकुलात् क्षुद्रजन्तवः । यूकालिक्षम् ।

२-४-९ येषां च विरोधः शाश्वतिकः ॥

अहिनकुलम् । चकारः पुनरस्यैव समुच्चयार्थः । तेन 'गोव्याघ्रम्' 'काकोलूकम्' इत्यादौ २-४-१२ विभा...सूत्रं बाधित्वा नित्यमेवेदं प्रवर्तते ।

२-४-१० शूद्राणामनिरवसितानाम् ॥

तक्षायस्कारम् । अनिरवसितानामित्युक्तेर्नेह-चण्डालमृतपाः ।

२-४-११ गवाश्वप्रभृतीनि च ॥

गवाश्वम् । दासीदासम् । आद्ये पशुद्वन्द्वत्वेन प्राप्ता २-४-१२ विभाषा, द्वितीये तु १-२-६७ पुमान्...इत्येकशेषो बाध्येते ।

२-४-१२ विभाषा वृक्ष-मृग-तृण-धान्य-व्यञ्जन-पशु-शकुन्यश्ववडव-पूर्वापराधरोत्तराणाम् ॥१३

प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः । रुरुपृषतम्, रुरुपृषताः । कुशकाशम्, कुशकाशाः । व्रीहियवम्, व्रीहियवाः । दधिघृतम् । दधिघृते । गोमहिषम्, गोमहिषाः । तितिरिकपिञ्जलम्, तितिरिकपिञ्जलाः । अश्ववडवम्, अश्ववडवौ । पूर्वापरम्, पूर्वापरे । अधरोत्तरम्, अधरोत्तरे ।

(फल-सेनाङ्ग-वनस्पति-मृग-शकुनि-क्षुद्रजन्तु-धान्य-तृणानां बहुप्रकृतिरेव द्वन्द्व एकवदिति वक्तव्यम्)

बदरामलके । रथिकाश्वारोहौ । प्लक्षन्यग्रोधौ । रुरुपृषतौ । हंसचक्रवाकौ । यूकालिक्षे । व्रीहियवौ । कुशकाशौ ।

२-४-१३ विप्रतिषिद्धं चाऽनधिकरणवाचि ॥

शीतोष्णम्, शीतोष्णे । सुखदुःखम्, सुखदुःखे । अनधिकरणवाचीत्युक्तेर्नेह-शीतोष्णे उदके ।

२-४-१४ न दधिपय आदीनि ॥१५

दधिपयसी । वाङ्मनसे ।

२-४-८ क्षुद्रजन्तवः= क्षुद्रजन्तुवाचिनाम्, द्वन्द्वः (२-४-२) एकवत् (२-४-१) ।

२-४-९ येषां- पूर्वसूत्रादनुवर्तमानं जन्तव इति जन्तूनामिति षष्ठयन्ताय कल्पते येषामित्यस्याऽनुरोधात् । एवमत्र प्रकरणे द्वन्द्व इत्यर्थानुरोधेन प्रथमान्तानां षष्ठयतानामिवाऽर्थः कृत इत्यवधेयम् । येषाम्=येषां जन्तूनाम्, विरोधः= वैरम्, शाश्वतिकः= नित्यः, तेषाम्, द्वन्द्वः (२-४-२) एकवत् (२-४-१) ।

२-४-१० शूद्रा- अनिरवसितानाम्+शूद्राणाम्= अबहिष्कृतशूद्रवाचिनाम्, द्वन्द्वः (२-४-२) एकवचनम् (२-४-१) ।

२-४-११ गवा...तीनि=गवाश्वप्रभृतिगणपठित- शब्दस्वरूपाणि यथोच्चारितानि तथैव साधूनि ।

२-४-१२ विभा- वृक्षादयो विशेषवाचिनो गृह्यन्ते । अत्राऽप्राणिवाचिनां २-४-६ जाति...इति नित्ये प्राप्ते विभाषार्थमिह ग्रहणम् । उभयत्र द्वन्द्वे सिद्धे मृगशकुनिग्रहणं मृगविशेषवाचिनां मृगविशेषवाचिभिरेव शकुनिविशेषवाचिनां शकुनिविशेषवाचिभिरेव विभाषेति नियमार्थम् । तेनैषामन्यैः सहेतरेतरयोग एव द्वन्द्वः । एवं पूर्वापराधरोत्तरविषयेऽपि बोध्यम् । अत्र न्यासकारः-पशुद्वन्द्व इत्येव सिद्धेऽश्ववडवग्रहणं नियमार्थम् । योऽन्य एतयोः पर्यायस्तत्र माभूत्-हयवडवे इति । अत्र दीक्षितः- अश्ववडवग्रहणं तु पक्षे नपुंसकत्वार्थम् । अन्यथा परत्वात् पूर्ववदश्ववडवाविति स्यात् । इति ।

२-४-१३ विप्र- अनधिकरणवाचि= अद्रव्यवाचिनाम्, विप्रतिषिद्धम्= परस्परविरुद्धार्थानाम्, द्वन्द्वः (२-४-२) विभाषा (२-४-१२) एकवत् (२-४-१) । विप्रतिषिद्धवाचिनामुभयत्र द्वन्द्वो भवति चेद् अद्रव्यवाचिनामेवेति नियमार्थं सूत्रमिदम् । अत्राऽधिकरणशब्दो द्रव्यवाची । चशब्दो विभाषेत्यनुकर्षणार्थः ।

२-४-१४ न द- दधि...दीनि= दधिपयः प्रभृतीनाम्, द्वन्द्वः (२-४-२) न+एकवत् (२-४-१)= एकवन्न भवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-४-१५ अधिकरणैतावत्त्वे च ॥१६

दश दन्तोष्ठाः ।

२-४-१६ विभाषा समीपे ॥

उपदशं दन्तोष्ठम्, उपदशा दन्तोष्ठाः ।

२-४-१७ स नपुंसकम् ॥२५

पञ्चगवम् । पाणिपादम् ।

(अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः)

पञ्चमूली ।

(वाऽबन्तः स्त्रियामिष्टः)

पञ्चखट्वम्, पञ्चखट्वी ।

(अनो नलोपश्च वा च द्विगुः स्त्रियाम्)

पञ्चतक्षम् । पञ्चतक्षी ।

(पात्राद्यन्तो न)

पञ्चपात्रम् । चतुर्युगम् । त्रिभुवनम् ।

२-४-१८ अव्ययीभावश्च ॥

अधिमहि ।

(पुण्यसुदिनाभ्यामह्नः क्लीबतेष्यते)

पुण्याहम् । सुदिनाहम् ।

(पथः संख्याव्ययादेः क्लीबतेष्यते)

त्रिपथम् । सुपथम् ।

(क्रियाविशेषणानां च क्लीबतेष्यते)

मृदु पचति । शोभनं पचति ।

२-४-१९ तत्पुरुषोऽनञ्कर्मधारयः ॥२५

२-४-२० संज्ञायां कन्थोशीनरेषु ॥

सौशमिकन्थम् । उशीनरेष्वित्युक्तेर्नेह-दाक्षिकन्था ।

२-४-२१ उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ॥

२-४-१५ अधि- अत्राऽधिकरणशब्दः समासावयवभूतस्य पदस्य योऽर्थस्तस्य वाचकः । चकारो नेत्यनुकर्षणार्थः । अधिकरणैतावत्त्वे= समासावयवपदार्थस्येयत्तायां गम्यमानायाम्, न=एकवदेवेति नियमो न भवति ।

२-४-१६ विभा- अत्र समीपशब्दो भावप्रधानः । तदनुरोधेन पूर्वसूत्रादनुवर्तमानम् 'अधिकरणैतावत्त्वे इति सप्तम्यन्तं षष्ठयन्ताय कल्पते । समीपे= अधिकरणैतावत्त्वस्य सामीप्ये गम्ये, विभाषा= एकवदेवेति नियमो विकल्पेन भवति ।

२-४-१७ सः= समाहारे विहितो द्विगुर्द्वन्द्वश्च, नपुंसकम्=नपुंसकलिङ्गे भवति । **वाऽऽब-आबन्तः**= आबन्तोत्तरपदो द्विगुः । **अनो-**द्विगुः= (प्रत्यासत्त्या) अन्नन्तोत्तरपदो द्विगुः, वा स्त्रियाम्, अनो नलोपश्च । **पात्रा-** पात्राद्यन्तः= पात्राद्यन्तो द्विगुः, न= स्त्रियां न भवति ।

२-४-१८ अव्य- १-१-४० अव्ययीभावश्च- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

२-४-१७ स नपुंसकम् (क) ॥ २-४-१८ अव्ययीभावः च (क) ॥ इति ।

अव्ययीभावः= अव्ययीभावसमासः, (क)= नपुंसकम्= नपुंसकलिङ्गको भवति । अर्थादव्ययीभावसमासो नपुंसकलिङ्गे भवति । इति बोधयित्वा १-२-४७ ह्रस्वो...सूत्रमुपदिशेत् ।

२-४-१९ तत्पु...अनञ्कर्मधारयः= नञ्समास-कर्मधारयसमासभिन्नः, तत्पुरुषः= तत्पुरुषसमासः, नपुंसकम् (२-४-१७) इत्यर्थकमिदं सूत्रमग्रिम-सूत्रेष्वधिक्रियते ।

२-४-२० संज्ञा-कन्था= कन्थाशब्दान्तः, अनञ्कर्मधारयस्तत्पुरुषः (२-४-१९) नपुंसकम् (२-४-१७) संज्ञायाम्= संज्ञायां गम्यमानायाम्, उशीनरेषु= उशीनरदेशवर्तिनी कन्था चेत् । **दाक्षिकन्था** अस्नीयं ग्रामस्य संज्ञा, नतूशीनरेषु, किं तर्हि ? ततोऽन्यत्रेति न्यासः । २-४-२६ पर...इत्यस्याऽपवादप्रकरणम् ।

२-४-२१ उपज्ञोपक्रमम्= उपज्ञा उपक्रम इत्येतदन्तः, अनञ्कर्मधारयस्तत्पुरुषः (२-४-१९) नपुंसकम् (२-४-१७) तदाद्याचिख्यासायाम्= उपज्ञोपक्रमयोरादिमाख्यातुमिच्छायां गम्यमानायाम् । आख्यातुमिच्छा= आचिख्यासा । तयोः (उपज्ञोपक्रमयोः) आदिः= तदादिः । तदादेराचिख्यासा= तदाद्याचिख्यासा । तस्याम्= तदाद्याचिख्यासायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाणिन्युपज्ञमकालकं व्याकरणम् ।
नन्दोपक्रमाणि मानानि । रामसाहोपक्रमं स्तुत्यस्थितिस्थापनम् ।

२-४-२२ छाया बाहुल्ये ॥

इक्षुच्छायम् ।

२-४-२३ **सभा** राजाऽमनुष्यपूर्वा ॥२४

इनसभम् । ईश्वरसभम् । रक्षः सभम् । पिशाचसभम् ।
(राजपर्यायस्यैवेष्यते)
नेह-राजसभा । महेन्द्रसभा ।

२-४-२४ अशाला च ॥

स्त्रीसभम् । स्त्रीसङ्घात इत्यर्थः ।

२-४-२५ विभाषा सेना-सुराच्छाया-शाला-निशानाम् ॥

नेपालसेनम्, नेपालसेना । यवसुरम्, यवसुरा । कुडचच्छायम्, कुडचच्छाया । गोशालम्, गोशाला । श्वनिशम्, श्वनिशा ।

२-४-२६ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥

कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ । अर्धपिप्पली ।
(द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः)
पञ्चकपालः । प्राप्तजीविकः । आपन्नजीविकः । अलंकुमारिः । निष्कौशाम्बिः ।

२-४-२७ **पूर्व**वदश्ववडवौ ॥२८

२-४-२२ छाया= छायाशब्दान्तः, अनञ्कर्मधारयस्तत्पुरुषः (२-४-१९) नपुंसकम् (२-४-१७) बाहुल्ये = पूर्वपदार्थस्य बाहुल्ये गम्यमाने । २-४-२५ विभाषा सेना...इत्यस्याऽपवादः ।

२-४-२३ सभा- अत्र राजशब्देन पर्यायाणामेव ग्रहणम् । अमनुष्यशब्देन च रुढया रक्षः पिशाचादीनां ग्रहणम् । राजाऽमनुष्यपूर्वा+सभा= राजपर्यायपूर्वो रक्षः पिशाचादिपूर्वश्च यः सभाशब्दः, तदन्तः, अनञ्कर्मधारयस्तत्पुरुषः (२-४-१९) नपुंसकम् (२-४-१७) ।

२-४-२४ अशाला+सभा (२-४-२३)= सङ्घवाची यः सभाशब्दः, तदन्तः, अनञ्कर्मधारयस्तत्पुरुषः (२-४-१९) नपुंसकम् (२-४-१७) । अत्र पदमञ्जरी-सभाशब्दोऽयं शालावचनः संघवचनश्च, तत्र शालाप्रतिषेधादितरस्य ग्रहणम्....पूर्वेण राजामनुष्यपूर्वत्वे शालावचनस्यापि भविष्यति, अशालावचनस्य त्वनेन राजामनुष्यपूर्वत्वाऽभावेऽपीति ।

२-४-२५ विभा- निशानामिति प्रथमार्थे षष्ठी । सेना...निशानाम्= सेनाद्यन्तः, अनञ्कर्मधारयस्तत्पुरुषः (२-४-१९) विभाषा= वा, नपुंसकम् (२-४-१७) । **कुडचच्छायम् कुडचच्छाया** बाहुल्याऽभावे विकल्पः । बाहुल्ये तु अस्य २-४-२२ छाया...इत्यनेन बाधान्नित्यमेव ।

२-४-२६ पर- २-१-५७ विशेषणं... सूत्रानन्तरं सूत्रमिदं पाठचम् । द्वन्द्वतत्पुरुषयोः= द्वन्द्वसमासस्य तत्पुरुषसमासस्य च, लिङ्गम्, परवत्= परपदस्य (उत्तरपदस्य) इव भवति । इत्यर्थमुपदिश्य सुँबन्तप्रक्रियां छात्रैः साधयेत् । लोहितशिरस्त्रम् । एवं शीतं जलम्= शीत+सुँ जल+सुँ= शीतजलम् । शुक्लः पटः= शुक्ल+सुँ पट+सुँ= शुक्लपटः । इत्यादि च्छात्रैः साध्यमानं शिक्षकः शृणुयात् । अथ शुक्ला शाटी= शुक्ला+सुँ शाटी+सुँ इत्यत्र पूर्ववच्छात्रैः प्रक्रियायां साध्यमानायां शुक्ला शाटी इति श्यामपाट्यां लिखित्वा १-२-४२ तत्पुरुषः...सूत्रमुपदिशेत् । **द्विगु...सेषु**= द्विगुसमासे प्राप्त आपन्न अलम् इत्येतत्पूर्वकसमासे गतिसमासे च, परवल्लिङ्गस्य प्रतिषेधो वक्तव्यः ।

२-४-२७ पूर्व- अश्ववडवौ= अश्ववडवाशब्दस्य, पूर्ववत्+लिङ्गम् (२-४-२६)= पूर्ववल्लिङ्गं भवति । अश्वश्च वडवा च= **अश्ववडवौ** । पूर्ववल्लिङ्गत्वे टापो निवृत्तिः । एकवद्भावादन्यत्र २-४-२६ पर...इत्यस्य बाधनार्थमिदम् । सूत्रे द्विवचनमतन्त्रम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्ववडवौ । अश्ववडवान् ।

२-४-२८ हेमन्तशिशिरावहोरात्रे चच्छन्दसि ॥

हेमन्तशिशिरौ । अहोरात्रे ।

अहोरात्राणि । छन्दसीत्युक्तेर्लोके-

हेमन्तशिशिरे च । अहोरात्रौ ।

२-४-२९ रात्राह्नाहाः पुंसि ॥

अहोरात्रः । पूर्वाह्णः । त्र्यहः ।

(संख्यापूर्वं रात्रं क्लीबम्)

त्रिरात्रम् ।

२-४-३० अपथं नपुंसकम् ॥३१

अपथम् । कृतसमासान्तनिर्देशात्

समासान्ताभावपक्षे पुंस्येव । अपन्थाः।

२-४-३१ अर्धर्चाः पुंसि च ॥

अर्धर्चः, अर्धर्चम् । कार्षापणः, कार्षापणम् ।

२-४-३२ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ॥

आभ्यां छात्राभ्यां रात्रिरधीता । अथो आभ्यामहरप्यधीतम् ।

२-४-३३ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥३४

एतस्मिन् ग्रामे सुखं वसामः । अथो अत्र युक्ता अधीमहे । एतस्माच्छात्राच्छन्दोऽधीष्व । अथो अतो व्याकरणमप्यधीष्व ।

२-४-३४ द्वितीयाटौस्स्वेनः ॥

इमं छात्रं छन्दोऽध्यापय । अथो एनं व्याकरणमप्यध्यापय । एतं छात्रं छन्दोऽध्यापय । अथो एनं व्याकरणमप्यध्यापय ।

एनेन । एनयोः ।

(इदमेतदोरन्वादेशे नपुंसके एनद् वक्तव्यः)

अस्मिन्, एतस्मिन् वा पुस्तकेऽहं पठितवान् । एनद् गृहाण ।

२-४-३५ आर्धधातुके ॥५७

२-४-३६ अदो जग्धिर्ल्यप्ति किति ॥४०

प्रजग्ध्य । जग्धः ।

२-४-२८ हेम... रात्रे = हेमन्तशिशिर-अहोरात्र इत्येतयोः, पूर्ववत् (२-४-२७) लिङ्गम् (२-४-२६) छन्दसि = वेदे । द्विवचनमतन्त्रम् । **हेमन्तशिशिरे** च शिशिरोऽस्त्रियाम् इति क्लीबेऽपि ।

२-४-२९ रात्राह्नाहाः= रात्र अह्न-अह इत्येतदन्तौ, द्वन्द्वतत्पुरुषौ (२-४-२६) पुंसि = पुंलिङ्गे भवतः । अत्र पदमञ्जरी-समाहारेऽपि परत्वादिदमेव प्रवर्तते, इति । **संख्या-** संख्यापूर्वा रात्रिः, इति लिङ्गानुशासनमूलकमिदं वार्तिकम् ।

२-४-३० अपथम्= कृततत्पुरुषसमासः अपथशब्दः, नपुंसकम्= नपुंसकलिङ्गे भवति ।

२-४-३१ अर्ध- बहुवचननिर्देशः प्रभृत्यर्थलाभार्थः । पुंसीति सप्तम्यन्तस्य साहचर्याच्चकाराऽनुकृष्टं नपुंसकमित्यपि सप्तम्यन्ताय कल्पते । अर्धर्चाः= अर्धर्चप्रभृतयः शब्दाः, पुंसि= पुंलिङ्गे भवन्ति, नपुंसके (२-४-३०) च ।

२-४-३२ इद- किञ्चित् कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः । आदेशवचनं साकच्कार्थम्, इति काशिका । अकज्रहिते तु त्यदाद्यत्वे हलि लोप इतीदो लोपेन सिद्धेः । एनेन, एनयोरित्यत्र तु एनादेशो विशिष्य विहित इति । तदाशयः । अन्वादेशे= अन्वादेशे गम्यमाने, इदमः= इदंशब्दस्य स्थाने, अनुदात्तः+अश्= अनुदात्तः+अश् आदेशो भवति, तृतीयादौ= तृतीयाप्रभृतिविभक्तौ परतः ।

२-४-३३ एतदः= एतच्छब्दस्य स्थाने, अनुदातः+अश् (२-४-३२) त्रतसोः=त्रतसोः परयोः, अनुदात्तौ च= तौ त्रतसौ च अनुदात्तौ भवतः ।

२-४-३४ द्विती- अन्वादेशे (२-४-३२) इदमः (२-४-३२) एतदः (२-४-३३) च, अनुदात्तः (२-४-३२) एनः= एन इत्यादेशो भवति, द्वितीयाटौस्सु= द्वितीया विभक्ति टा ओस् इत्येतेषु परेषु ।

२-४-३५ आर्धधातुके= आर्धधातुकविषये इत्यर्थकमिदं सूत्रमधिक्रियते ।

२-४-३६- अदः= अद्धातोः स्थाने, जग्धिः= जग्ध् आदेशो भवति, ल्यप्= ल्यपि, ति किति= तकारादौ किति च परे । ल्यबिति लुप्तसप्तम्यन्तं पृथक् पदम् । जग्धौ सिद्धेऽन्तरङ्गत्वात् ति कितीति ल्यबुच्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-४-३७ लुँङ्सनोर्घस्लृँ ॥४०

अघसत्। जिघत्सति।

(घस्लृँभावेऽच्युपसंख्यानम्)

प्रात्तीति = प्रघसः।

२-४-३८ घञपोश्च ॥

घासः। प्रघसः।

२-४-३९ बहुलं छन्दसि ॥

घस्तान्नूनम्। सग्धिः।

२-४-४० लिँटचन्यतरस्याम् ।४१

जघास। जक्षतुः। आद। आदतुः।

२-४-४१ वेञो वयिः ॥

उवाय। ऊयतुः, ऊवतुः। ववौ। ववतुः।

२-४-४२ हनो बध लिँङि ॥४४

वध्यात्।

२-४-४३ लुँङि च ॥४४

अवधीत्।

२-४-४४ आत्मनेपदेष्वन्यतरस्याम् ॥

आवधिष्ट, आहत।

२-४-४५ इणो गा लुँङि ॥४७

अगात्।

ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम् ॥ अस्या अर्थः- ति किति इत्युक्त्यैव अन्तरङ्गत्वाज्जग्धादेशे सिद्धे यत् पुनर्ल्यबुच्यते तद् अन्तरङ्गाणां ल्यपा बाधनं भवतीति ज्ञापयति। तेन विधाय विहाय इत्यादिषु। ७-४-४२ दधा...७-४-४३ जहा...इत्यादीनि न प्रवर्तन्ते।

२-४-३७ लुँङ्स- अदः (२-४-३६) घस्लृँ= घस्लृँ आदेशो भवति, लुँङ्सनोः= लुँङि सनि च परे ॥

२-४-३८ घञ-अदः (२-४-३६) घस्लृँ (२-३-३७) घञपोः= घञि अपि च प्रत्यये परे। **प्रघसः** ३-३-५९ उप...इत्यप्।

२-४-३९ बहु- अदः (२-४-३६) बहुलम्= बाहुल्येन, घस्लृँ (२-४-३७) छन्दसि= वेदे। **घस्ताम्** अद्+लुँङ्+तस् ६-४-७५ बहुलं छन्द...इत्यडभावः। २-४-८० मन्त्रे...इति च्लेर्लुक्। **सग्धिः** अद्+क्तिन्+घस्लृँ ६-४-१०० घसि...इत्युपधालोपः। ८-२-२६ झलो... इति सलोपः। ८-२-४० झष...इति धकारः। ८-४-५२ झलां...इति जश्त्वम्। समाना ग्धिरिति २-१-५८ पूर्वा...इति समासः। ६-३-८४ समा...इति सादेशः। अत्र काशिका-अन्यतरस्यां ग्रहणमेव कस्मान्न क्रियते, तदेवोत्तरार्थमपि भविष्यति ? कार्यान्तरार्थं बहुलग्रहणम्। घस्तामित्यत्रोपधालोपो न भवतीति।

२-४-४० लिँट्य- अदः (२-४-३६) अन्यतरस्याम्= वा, घस्लृँ (२-४-३७) लिँटि= लिँटि परे। **जक्षतुः** ६-४-९८ गम... इत्युपधालोपः ८-३-६० शासि...इति षत्वम्।

२-४-४१ वेञः= वेञ्धातोः स्थाने, अन्यतरस्याम् (२-४-४०) वयिः= वय् आदेशो भवति, लिँटि (२-४-४०)। **उवाय** ६-१-१७ लिँट्य...इत्यभ्यासवकारस्य सम्प्रसारणम्। यकारस्य ६-१-३७ लिँटि...इति प्रतिषेधात्। **ऊयतुः, ऊवतुः** ६-१-३८ वश्चा...इति पाक्षिको वकारः। **ववौ** ६-१-६९ वेञः इति सम्प्रसारणप्रतिषेधः। ७-१-३४ आत...इति णल औकारादेशः। **ववतुः** ६-४-६४ आतो...इत्याकारलोपः।

२-४-४२ हनः= हन्धातोः स्थाने, वध=वध इत्यादेशो भवति, लिँङि= लिँङि परे, आर्धधातुके (२-४-३५)= आर्धधातुकविषये। अकारान्तोऽयमादेशः। **वध्यात्** ६-४-४८ अतो...इत्यकारलोपः।

२-४-४३ लुँङि= लुङि परे, हनः+वध (२-४-४२)। **अवधीत्** प्राग्वदल्लोपः। तस्य १-१-५६ अचःइति... स्थानिवद्भावाद् ७-२-७ अतो...इति न वृद्धिः

२-४-४४ आत्म- हनः (२-४-४२) अन्यतरस्याम्= वा, वध (२-४-४२) लुँङि (२-४-४३) आत्मनेपदेषु। उदाहरणयोः १-३-२८ आङो...इत्यात्मनेपदम्। अन्त्ये १-२-१४ हन...इति सिंच् कित्। ६-४-३७ अनु...इति नलोपः। ८-२-२७ ह्रस्वा...इति सिँचो लुक्।

२-४-४५ इणः= इण्धातोः स्थाने, गा= गा इत्यादेशो भवति, लुँङि= लुँङ्लकारे परे। लुँङि प्रकृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(इण्वदिक इति वक्तव्यम्)

अध्यगात् ।

२-४-४६ णौ **गमि॑रबोधने॑** ॥४८, ४७

गमयति । अबोधने इत्युक्तेर्नेह-प्रत्याययति ।

(इण्वदिकः)

अधिगमयति ।

२-४-४७ **सनि॑** च ॥४८

जिगमिषति । बोधने तु प्रतीषिषति ।

(इण्वदिकः)

अधिजिगमिषति ।

२-४-४८ **इ॑ङश्च** ॥५१

अधिजिगांसते ।

२-४-४९ **गा॑ङ्** लिँटि ॥५१

अधिजगे ।

२-४-५० **विभाषा॑** लुँङ्लृँङोः ॥५१

अध्यगीष्ट, अध्यैष्ट । अध्यगीष्यत, अध्यैष्यत ।

२-४-५१ णौ च सँश्चङोः ॥

अधिजिगापयिषति, अध्यापिपयिषति ।

अध्यजीगपत्, अध्यापिपत् ।

२-४-५२ अस्तेर्भूः ॥

बभूव । भविष्यति । भवितव्यम् ।

२-४-५३ ब्रुवो वचिः ॥

उवाच । वक्ष्यति । वक्तव्यम् ।

२-४-५४ **चक्षि॑ङः ख्या॑ञ्** ॥५५

(शस्य यो वा)

ख्यास्यति, क्शास्यति । ख्यास्यते, क्शास्यते ।

(वर्जने प्रतिषेधो वक्तव्यः)

दुर्जनाः संचक्ष्याः । वर्जनीया इत्यर्थः ।

(असनयोश्च)

नृचक्षाः । विचक्षणः ।

(बहुलं संज्ञाछन्दसोरिति वक्तव्यम्)

'अन्न-वधक-गात्र-विचक्षणाजिराद्यर्थम्'

२-४-५५ वा लिँटि ॥

चख्यौ, चक्शौ । चख्ये, चक्शे । चचक्षे ।

पुनर्लुँङ्ग्रहणम्, आत्मनेपदेष्वन्तरस्याम् इत्यस्याऽसम्बन्धार्थम् । **अगात्** २-४-७७ गाति...इति सिँचो लुक् ।

२-४-४६ णौ ग- अबोधने = अबोधनेऽर्थे वर्तमानस्य, इणः (२-४-४५) गमिः= गम् आदेशो भवति, णौ= णिप्रत्यये परे ।

२-४-४७ सनि= अबोधने (२-४-४६) इणः (२-४-४५) गमिः (२-४-४६) सनि= सन् प्रत्यये परे ।

२-४-४८ इङः= इङ्धातोः स्थाने, गमिः (२-४-४६) सनि (२-४-४७) । उदाहरणे ६-४-१६ अज्झ...इति दीर्घः ।

२-४-४९ गाङ् लि- इङः (२-४-४८) गाङ्= गाङ् आदेशो भवति, लिँटि= लिँटि परे ।

२-४-५० विभा- इङः (२-४-४८) विभाषा= वा, गाङ् (२-४-४९) लुँङ् लृङोः= लुँङ्लृङोः परयोः । उदाहरणयोः- गाङादेशपक्षे १-२-१ गाङ्कु...इति ङित्वम् । ६-४-६६ घुमा...इतीत्वं च ।

२-४-५१ णौ च- इङः (२-४-४८) विभाषा (२-४-५०) गाङ् (२-४-४९) सँश्चङोः= सन्परके चङ्परके च, णौ= णिप्रत्यये परे । उदाहरणेषु- गाङ्पक्षे ७-३-३६ अर्ति...इति पुँक् । पक्षान्तरेऽपि ६-१-४७ क्रीङ्जी...इत्यात्वे प्रागवत् पुँक् ।

२-४-५२ अस्तेः= अस् धातोः स्थाने, भूः= भू इत्यादेशो भवति, आर्धधातुके (२-४-३५) ।

२-४-५३ ब्रुवः= ब्रूधातोः स्थाने, वचिः= वच् आदेशो भवति, आर्धधातुके (२-४-३५) ।

२-४-५४ चक्षिङः= चक्षिङ् धातोः स्थाने, ख्याञ्= ख्शाञ् आदेशो भवति, अर्धधातुके (२-४-३५) । **शस्य=** ख्शाञः शकारस्य स्थाने, यो वा= यकारो वा । **वर्जने**, ख्शाञादेशस्य प्रतिषेधो वक्तव्यः । **असनयोः=** अस् अन इत्येतयोः परयोः, च= ख्शाञ आदेशस्य प्रतिषेधो वक्तव्यः ।

२-४-५५ वा लिँ- चक्षिङः (२-४-५४) वा= वा ख्शाञ्, लिँटि= लिँटि परे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-४-५६ अजेर्व्यघञपोः ॥५७

विवाय । अघञपोरित्युक्तेर्नेह-

समाजः । समजः ।

(घञपोः प्रतिषेधे क्यप उपसंख्यानम्)

समज्या ।

(वलादावार्धधातुके वेष्यते)

वेष्यति, अजिष्यति ।

२-४-५७ वा यौ ॥

प्रवयणो दण्डः । प्राजनो दण्डः ।

२-४-५८ ण्य-क्षत्रियार्ष-ञितो यूनि लुगणिञोः ॥६१,८४

कौरव्यः पिता पुत्रश्च । श्वाफल्कः पिता पुत्रश्च । वासिष्ठः पिता पुत्रश्च । बैदः पिता पुत्रश्च । तैकायनिः पिता पुत्रश्च ।

(अब्राह्मणगोत्रमात्राद् युवप्रत्ययस्योपसंख्यानम्)

बौधिः पिता पुत्रश्च । जाबालिः पिता पुत्रश्च । भाण्डीरजङ्घिः पिता पुत्रश्च ।

२-४-५९ पैलादिभ्यश्च ॥

पैलः पिता पुत्रश्च ।

(तद्राजाच्चाणः) ग.सू.

आङ्गः पिता पुत्रश्च ।

२-४-६० इञः प्राचाम् ॥

पान्नागरिः पिता पुत्रश्च । प्राचामित्युक्तेर्नेह-

दाक्षिःपिता (मू.तृ.) दाक्षायणः पुत्रः (मू.च.) ।

२-४-५६ अजेः= अज्धातोः स्थाने, वी=वी इत्यादेशो भवति, अघञपोः= घञब्भिन्ने, आर्धधातुके (२-४-३५) । **समजः** ३-३-६९ समु...इत्यप् । **घञ-समज्या** ३-३-९९ संज्ञा...इति क्यप् ।

२-४-५७ वा यौ- अजेः (२-४-५६)वा, = विभाषया, वी (२-४-५६) यौ=युँप्रत्यये परे ।

२-४-५८ ण्यक्ष- ण्य...ञितः = गोत्रवाचिण्यप्रत्ययान्तात् क्षत्रियगोत्रवाचिप्रत्ययान्ताद् ऋषिगोत्रवाचिप्रत्ययान्ताद् गोत्रवाचिञकारेत्संज्ञकप्रत्ययान्ताच्च परयोः, यूनि = युवार्थे विहितयोः, अणिञोः= अण इञश्च, लुक्= लुग् भवति। गोत्रवाचीत्यर्थः कुतो लभ्यते ? गोत्रप्रत्ययान्तभिन्नेभ्यः परतो युवप्रत्ययस्याऽसंभवात् । यतः, गोत्रप्रत्ययान्तेभ्य एव हि युवप्रत्यया विधीयन्ते, नाऽन्येभ्यः । तथा चोपदिशति भगवान् सूत्रकारः-४-१-९४ गोत्राद्...इति । **कौरव्यः पिता** (मूलात् तृतीयः) ४-१-१५१ कुर्वा...इति ण्यः । ततो यूनि इञ् तस्य लुक् । **कौरव्यः पुत्रः** (मूलाच्चतुर्थः) **क्षत्रिय-श्वाफल्कः पिता** (मू.तृ.) ४-१-११४ ऋष्य...इत्यण् । ततो यूनि इञ् । तस्य लुक् **श्वाफल्कः पुत्रः** (मू.च.) **आर्ष-वासिष्ठः पिता** (मू.तृ) **वासिष्ठः पुत्रः** (मू.च.) प्रक्रिया पूर्ववत् । **ञित्-बैदः पिता** (मूलात् तृतीयः) ४-१-१०४ अनृ...इत्यञ् । ततो यूनि इञ् । तस्य लुक् । बैदः पुत्रः (मूलाच्चतुर्थः) **तैकायनिः पिता** (मू.तृ.) ४-१-१५४ तिका...इति फिञ् । ततो यूनि अण् । तस्य लुक् । **तैकायनिः पुत्रः** । (मू.च.) **अब्राह्मणगोत्रमात्रात्**= ब्राह्मणभिन्न (क्षत्रिय वैश्य) गोत्रमात्रात् परस्य, युवप्रत्ययस्य, उपसंख्यानम्= लुग्भवतीति वक्तव्यम् ।

बौधिः पिता (मू.तृ.)४-१-१७१ साल्वा...इतीञ् । ततो यूनि ४-१-१०१ यञि..इतिं फक् । तस्य लुक् । **बौधिः पुत्रः** (मू.च.) **जाबालिः पिता** (मू.तृ.) ४-१-९५ अत... इतीञ् । ततो यूनि पूर्ववत् फक् । तस्य लुक् । **जाबालिः पुत्रः** (मू.च.) **भाण्डीरजङ्घिः पिता** (मू.तृ.) **भाण्डीरजङ्घिः पुत्रः** (मू.च.) प्रक्रिया पूर्ववत् । आद्ये तद्राजात् क्षत्रियगोत्राद् द्वितीये क्षत्रियगोत्रात् तृतीये वैश्यगोत्रात् परस्य युवप्रत्ययस्य लुक् । अत्र विशेष जिज्ञासायां न्यासग्रन्थो द्रष्टव्यः । अब्राह्मणेत्युक्तेर्नेह-दाक्षायणः । ब्राह्मणगोत्रात् परत्वमत्र यूनः = फकः ।

२-४-५९ पैलादिभ्यः= पैलप्रभृतिभ्यः परस्य, यूनि (२-४-५८) = युवार्थे विहितस्य प्रत्ययस्य, लुक् (२-४-५८) । **पैलः पिता** (मू.तृ.) ४-१-११८ पीला...इत्यण् । ततो यूनि ४-१-१५६ अणो...इति फिञ् । तस्य लुक् । **पैलः पुत्रः** (मू.च.) । **तद्रा- आङ्गः** ४-१-१६८ द्व्यञ्मगध... इत्यणंन्ताद् ४-१-१५६ अणो...इति विहितस्य फिञो लुक् ।

२-४-६० इञः-प्राचाम्+इञः= प्राचां गोत्रे विहितो य इञ् तदन्तात् परस्य, यूनि+लुक् (२-४-५८) । **पिता** (मू.तृ.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-४-६१ न तौल्वलिभ्यः ॥

तौल्वलिः पिता । तौल्वलायनः पुत्रः ।

२-४-६२ तद्राजस्य बहुषु तेनैवाऽस्त्रियाम् ॥७०

अङ्गाः । वङ्गाः । लोहितध्वजाः ।

बहुष्वित्युक्तेर्नेह-आङ्गः । आङ्गौ । लौहितध्वज्यः । लौहितध्वज्यौ ।

तेनैवेत्युक्तेर्नेह-प्रियवाङ्गाः ।

अस्त्रियामित्युक्तेर्नेह-आङ्ग्यः स्त्रियः ।

२-४-६३ यस्कादिभ्यो गोत्रे ॥७०

यस्काः । बहुष्वित्यनुवृत्तेर्नेह-यास्कः । यास्कौ ।

अस्त्रियामित्यनुवृत्तेर्नेह-यास्क्यःस्त्रियः ।

२-४-६४ यञञोश्च ॥

गर्गाः । बिदाः । बहुष्वित्यनुवृत्तेर्नेह-गार्ग्यः । गार्ग्यौ । बैदः । बैदौ । तेनैवेत्यनुवृत्तेर्नेह-प्रियगार्ग्याः । प्रियबैदाः । अस्त्रियामित्यनुवृत्तेर्नेह-गार्ग्यः स्त्रियः । बैद्यः स्त्रियः ।

गोत्रे इत्यनुवृत्तेः शैषिके न-द्वैप्याः । औत्साः ।

(यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानम्)

गार्ग्यस्य गार्ग्ययोर्वा कुलम् = गर्गकुलम्, गार्ग्यकुलं वा । बैदस्य बैदयोर्वा कुलम्=बिदकुलम्, बैदकुलं वा । यञादीनामित्युक्तेर्नेह-आङ्गकुलम् ।

२-४-६५ अत्रि-भृगु-कुत्स-वसिष्ठ-गोतमाङ्गिरोभ्यश्च ॥

अत्रयः । भृगवः । कुत्साः । वसिष्ठाः । गोतमाः । अङ्गिरसः । बहुष्वित्यनुवृत्तेर्नेह-आत्रेयः । भार्गवः । तेनैवेत्यनुवृत्तेर्नेह-प्रियात्रेयाः । प्रियभार्गवाः । अस्त्रियामित्यनुवृत्तेर्नेह-आत्रेय्यः स्त्रियः ।

२-४-६६ बह्वच इञः प्राच्यभरतेषु ॥

पन्नागाराः । युधिष्ठिराः ।

४-१-९५ अत...इतीञ् । ततो यूनि ४-१-१०१ यञि..इति फक् । तस्य लुक् । **पान्नागारिः पुत्रः** (मू.च.)

२-४-६१ न तौ- बहुवचननिर्देशात् प्रभृत्यर्थो ज्ञायते । तौल्वलिभ्यः= तौल्वलिप्रभृतिभ्यः परस्य, यूनि (२-४-५८) = युवार्थे विहितस्य प्रत्ययस्य, न= २-४-६० इञः प्राचामिति सूत्रेण लुग् न भवति । उदाहरणयोः- आद्ये ४-१-९५ अत...इति गोत्रे इञ् । अन्ते ४-१-१०१ यञि...इति यूनि इञन्तात् फक् ।

२-४-६२ तद्रा- अस्त्रियाम्= स्त्रीलिङ्गभिन्ने वर्तमानस्य, तद्राजस्य= तद्राजसंज्ञकप्रत्ययस्य, लुक् (२-४-५८) तेनैव= तद्राजसंज्ञकप्रत्ययेनैव, बहुषु= बहुत्वे गम्ये । **अङ्गाःवङ्गाः** ४-१-१६८ द्व्य``ञ्म...इत्यण् । तस्य ४-१-१७२ ते त...इति तद्राजसंज्ञायां लुक् । **लोहितध्वजाः** । ५-३-११२ पूगा...इतिञ्यस्तस्य ५-३-११९ ञ्याद...इति तद्राजसंज्ञायां लुक् ।

२-४-६३ यस्कादिभ्यः= यस्कप्रभृतिभ्यः, गोत्रे = गोत्रेऽर्थे विहितस्य, अस्त्रियाम् (२-४-६२) = स्त्रीलिङ्गभिन्ने वर्तमानस्य प्रत्ययस्य, लुक् (२-४-५८) तेनैव (२-४-६२)= गोत्रप्रत्ययेनैव, बहुषु (२-४-६२) । **यस्काः** यस्कस्य गोत्रापत्यानि यस्काः । ४-१-११२ शिवा...इत्यण् । तस्य लुक् ।

२-४-६४ यञ- गोत्रे (२-४-६३)= गोत्रे विहितयोः अस्त्रियाम् (२-४-६२)= स्त्रीलिङ्गभिन्ने वर्तमानयोः, यञञोः= यञ् अञ् इत्येतयोः प्रत्यययोः, लुक् (२-४-५८) तेनैव (२-४-६२)= गोत्रप्रत्ययेनैव, बहुषु (२-४-६२) । **गर्गाः** ४-१-१०५ गर्गा...इति यञ् । तस्य ...लुक् । **गार्ग्यः स्त्रियः** ४-१-१६ यञश्च इति ङीप् ६-४-१४८ यस्येत्यल्लोपे ६-४-१५० हल... इति यकारलोपः। **बैद्यः स्त्रियः** ४-१-७३ शार्ङ्ग...इति ङीन् ।

यञादीनाम्- षष्ठ्याः= षष्ठ्यन्तस्य, तत्पुरुषे = तत्पुरुषसमासे सति, एकद्वयोः= एकत्वे द्वित्वे च गम्ये, यञादीनाम् वा+उपसंख्यानम्= विकल्पेन लुग्भवतीति वक्तव्यम् । **आङ्गकुलम्** ४-१-१६८द्व्यञ्म...इत्यण् स च न यञादिस्तस्य यञादिभ्यः प्राक् पाठात् ।

२-४-६५ अत्रि...रोभ्यः= अत्रि भृगु कुत्स वसिष्ठ गोतम अङ्गिरस् इत्येतेभ्यः, गोत्रे (२-४-६३) अस्त्रियाम् (२-४-६२) प्रत्ययस्य, लुक् (२-४-५८) तेनैव+बहुषु (२-४-६२) । **आत्रेय्यः** ४-१-१५ टिड्ढा...इति ङीप् ।

२-४-६६ बह्वचः= बह्वच्कात् प्रातिपदिकात्, प्राच्यभरतेषु= प्राच्यगोत्रे भरतगोत्रे च विहितस्य, अस्त्रियाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-४-६७ न गोपवनादिभ्यः ॥

गौपवनाः ।

२-४-६८ तिककितवादिभ्यो द्वन्द्वे ॥

तिककितवाः ।

२-४-६९ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे ॥

उपकलमकाः । उपकाः । औपकायनाः । लमकाः । लामकायनाः ।

२-४-७० आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ॥

अगस्तयः । कुण्डिनाः ।

बहुत्वाऽभावे तु आगस्त्यः । कौण्डिन्यः ।

२-४-७१ सुँपो धातुप्रातिपदिकयोः ॥

पुत्रीयति । राजपुरुषः ।

(२-४-६२) इञः= इञ् प्रत्ययस्य, लुक् (२-४-५८) तेनैव+बहुषु (२-४-६२)। **पन्नागाराः** ४-१-९५ अत...इतीञ्। **युधिष्ठिराः** ४-१-११४ ऋष्य...इति कुरुलक्षणाणं बाधित्वा ४-१-९६ बाह्वा...इतीञ्। भरता अपि प्राच्या एव। अतः प्राच्येत्यनेनैव सिद्धेऽत्र सूत्रे पृथग् भरतग्रहणं प्राच्यग्रहणे भरतानामग्रहणमिति ज्ञापयति। तेन-**यौधिष्ठिरिः पिता** (मूलात् तृतीयः) **यौधिष्ठिरायणः पुत्रः** (मूलाच्चतुर्थः) इत्यादौ २-४-६० इञः...इति युवप्रत्ययस्य न लुक्।

२-४-६७ न गो- गोपवनादिभ्यः= गोपवनप्रभृतिभ्यः परस्य गोत्रप्रत्ययस्य, न= लुग् न भवति। गोपवनादिर्बिदाद्यन्तर्गणः। ४-१-१०४ अनृ...इति विहितस्याऽञ्प्रत्ययस्य २-४-६४ यञ...इति प्राप्तो लुक् प्रतिषिध्यते।

२-४-६८ तिककितवादिभ्यः= तिकादिभ्यः कितवादिभ्यश्च, गोत्रे (२-४-६३) अस्त्रियाम् (२-४-६२) प्रत्ययस्य, लुक् (२-४-५८) द्वन्द्वे = द्वन्द्वसमासे, तेनैव+बहुषु (२-४-६२)। **तिककितवाः** तैकायनयश्च कैतवायनयश्च ४-१-१५४ तिका...इति फिञ्। तस्य लुक्।

२-४-६९ उपकादिभ्यः= उपकप्रभृतिभ्यः, गोत्रे (२-४-६३) अस्त्रियाम् (२-४-६२) प्रत्ययस्य, अन्यतरस्याम् = वा, लुक् (२-४-५८) अद्वन्द्वे = द्वन्द्वे अद्वन्द्वे च, तेनैव+बहुषु (२-४-६२)। उपकादीनां मध्ये- उपकलमकाः, भ्राष्ट्रककपिष्ठलाः, कृष्णाजिनकृष्णसुन्दराः, इत्येतेषां त्रयाणां तिककितवादिषु पाठाद् द्वन्द्वे पूर्वेण नित्यं लुक्। अद्वन्द्वे एवाऽनेन विकल्पः। शेषेषूभयत्रैनेनैव विकल्पः। इति काशिकाशयः। अत्र दीक्षितः- भ्राष्ट्रककपिष्ठलाः। भ्राष्ट्रकिकापिष्ठलयः इत्यप्युदाहृतवान्। भाष्ये भ्राष्ट्रकिकापिष्ठलय इत्युदाहरणात् तिककितवादिष्वस्य पाठोऽनार्ष इति कैयटः। तेनाऽत्र द्वन्द्वेऽपि विकल्प एवोचित इत्याशयेनोदाहरतीति- तत्रत्या तत्त्वबोधिनी। अद्वन्द्वग्रहणं पूर्वसूत्राद् 'द्वन्द्वे' इति नाऽनुवर्तते, इति स्फुटप्रतिपत्त्यर्थम्। तेन द्वन्द्वे अद्वन्द्वेऽपि सूत्रमेतत् प्रवर्तते। **उपकलमकाः** ४-१-९९ नडा...इति फक्। तस्य लुक्।

२-४-७० आग...न्ययोः= आगस्त्य कौण्डिन्य इत्येतयोरवयवस्य, गोत्रे (२-४-६३) अस्त्रियाम् (२-४-६२) प्रत्ययस्य (अणो यञश्च) लुक् (२-४-५८) अग...नच्= प्रकृतिभागस्य स्थाने क्रमात् अगस्ति कुण्डिनच् इत्यादेशौ भवतः, तेनैव+बहुषु (२-४-६२)। उदाहरणयोः आद्ये-४-१-११४ ऋष्य...इत्यण्। अन्त्ये-४-१-१०५ गर्गा...इति यञ्। प्रकृती= अगस्त्य-कुण्डिनौ।

२-४-७१ सुँपो- ३-१-८ सुँप आत्मनः...सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा-२-४-५८ ण्यक्षत्रियार्ष...लुक् (क) ....णिञोः ॥ २-४-७१ सुँपो (क) धातुप्रातिपदिकयोः ॥ इति। धातुप्रातिपदिकयोः= धात्ववयवस्य प्रातिपदिकावयवस्य च, सुँपः, (क)= लुक्। इत्यर्थमुपदिश्य लक्षणसमन्वयप्रसङ्गे, पुत्र+अम्+य, इति समुदायो धातुर्वतते, तेन तद्घटकः= तदवयवः अम्' इति धात्ववयवः, स च सुँप् इति तु स्पष्टमेव। अतः प्रकृतोदाहरणे अमो लुकि पुत्र+य' इति श्यामपाटचामवशेष्य ७-४-३३ क्यचि...सूत्रमुपदिशेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-४-७२ अदिप्रभृतिभ्यः शपः ॥७३,७६

अत्ति । अत्तः । अदन्ति ।

२-४-७३ बहुलं छन्दसि ॥

वृत्रं हनति । त्राध्वं नो देवाः ।

२-४-७४ यङोऽचि च ॥

पोपुवः । बोभवीति ।

२-४-७५ जुहोत्यादिभ्यः श्लुः ॥७६

जुहोति ।

२-४-७२ अदि- ७-३-८६ पुँगन्त...सूत्रानन्तरमिदं सूत्रं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-२-४-५८ ण्यक्षत्रिया...लुक्(क) ...णित्रोः ॥ २-४-७२ अदिप्रभृतिभ्यः शपः (क) ॥इति । अदिप्रभृतिभ्यः= अदादि-गणपठित-धातुभ्यो विहितस्य, शपः= शप्प्रत्ययस्य, (क)= लुक् । अथच्छात्रैर्लक्षणसमन्वयं कारयित्वा शिक्षकः श्यामपाट्याम् अकारं कर्तयेत् । यथा अद्+अ+ति=अद्+अ+ति इति । अथाऽत्र किं सूत्रं प्रवर्तते ? इति शिक्षकेणच्छात्राः परीक्षणीयाः । छात्रेभ्य उचिते उत्तरेऽनागते ८-४-५४ खरि...सूत्रमुद्‌बोध्य लक्षणसमन्वयायच्छात्रा एवादेश्याः । अत्ति अत्तः । अदन्ति । अत्सि । अत्थः । अत्थ । अद्मि । अद्वः । अद्मः । प्रकृते यत्र न चर्त्वं तत्र कथं न चर्त्वम् ? इतिच्छात्राः परीक्षणीयाः । लोँटि-अत्तु । अत्ताम् । अदन्तु । सिपि- 'अद्+हिं' इति छात्रैःसाधिते शिक्षकस्तथैव श्यामपाट्यां लिखित्वा ६-४-१०१ हुझल्भ्यो...सूत्रमुपदिशेत् ।

२-४-७३ बहु-शपः (२-४-७२) बहुलम्=बाहुल्येन, लुक् (२-४-५८) छन्दसि=वेदे । उदाहरणयोः क्रमशः हन्ति, त्रायध्वमिति प्राप्ते, आद्ये प्राप्तलुकोऽभावः । अन्ते शपो लुक् ।

२-४-७४ यङो- ७-४-८२ गुणो...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- २-४-५८ ण्यक्षत्रियार्ष...लुक्(क)...णित्रोः॥ २-४-७३ बहुलं(ख) छन्दसि ॥ २-४-७४ यङोऽचि च (ख) (क) ॥ इति । यङः= यङ्प्रत्ययस्य, अचि= अच्प्रत्यये परे, (क)= लुक्= लुग्भवति, च (चकारात्)= अच्प्रत्ययाऽभावेऽपि (ख)= बहुलम्= बाहुल्येन लुग् भवति । इत्यर्थोपदेशप्रसङ्गे प्रकृतसूत्रे 'अच्' इति प्रत्ययो गृह्यते, यङा साहचर्यात् । नत्वच्प्रत्याहार इति बोधयेत् । अच्युदाहरणं १-१-४ न धा...सूत्रे द्रष्टव्यम् । अथ यदि अच्प्रत्यये तदभावेऽपि यङो लुग् भवति, तर्हि किमत्र सूत्रेऽज्ग्रहणेन ? इति यदिच्छात्राः शङ्केरन्, तदाऽधोनिर्दिष्टरूपेणोत्तरं देयम् । अज्ग्रहणाभावे अच्प्रत्यये परेऽपि बाहुल्येन लुक् स्यात् । तथा च क्वचित् अच्प्रत्ययेऽपि यङःश्रवणं स्यात् । अज्ग्रहणे कृते तु अच्प्रत्यये लुगेव भवति न तु यङः श्रवणम् । अन्यत्र बाहुल्येन लुग् भवति । तेन यङः श्रवणमपि भवतीति । 'अच्प्रत्यये नित्यं तदभावे यङो बहुलं लुगिति फलितम् । तेन लूञो यङन्तादचि यङो लुगभावपक्षे अतो लोपे लोलूय इति रूपम्' इति बालमनोरमा तु चिन्त्या । तथा सति पृथगज्ग्रहण-वैयर्थ्यापत्तेः । (प्रकृतमनुसरामः) अथ पुनः पुनर्भवति, अतिशयेन भवतीति वा विग्रहे यङ् प्रत्यये भू य इत्यवस्थायाम् अच्प्रत्ययाऽभावेऽपि बाहुल्येन यङो लुकि 'भू' इत्यवस्थायां १-१-६१ प्रत्य...सूत्रमुद्‌बोध्य द्वित्वादिकार्ये यङीवच्छात्रैः साधिते 'बोभू' इति श्यामपाट्यां लिखित्वा छात्रानधोनिर्दिष्टरूपेण बोधयेत् । वत्साः? यङ्लुकि ङित्त्वाऽभावान्नात्मनेपदम् । अर्थात् परस्मैपदं भवति । इति यङ्लुगन्तस्य अदादिगणे पाठात् (यङ्लुगन्ता धातवोऽदादि गणे पठ्यन्ते तेन) शपो लुग् भवनीति । इति बोधनपुरस्सरं प्रक्रियासन्दर्भे 'बोभू+ति' इति श्यामपाट्यां लिखित्वा ७-३-९४ यङो वा- सूत्रमुपदिशेत् ।

२-४-७५ जुहो- ६-१-९३ उस्य...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- २-४-७२ अदिप्रभृतिभ्यः शपः(क) ॥ २-४-७५ जुहोत्यादिभ्यः (क) श्लुः ॥इति । जुहोत्यादिभ्यः= हुप्रभृतिभ्यो धातुभ्यो विहितस्य (क)= शपः= शप्प्रत्ययस्य, श्लुः= श्लुर्भवति । 'श्लुः' इति कथनेन किं ज्ञायते ? अथ भवान् कथयतु लुक् इति कथनेन किं ज्ञायते ? प्रत्ययस्याऽदर्शनं ज्ञायते । श्लुः इत्यनेनाऽपि तथैव प्रत्ययादर्शनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२-४-७६ बहुलं छन्दसि ॥

दाति प्रियाणि । पूर्णां विवष्टि ।

२-४-७७ गाति-स्था-घु-पा-भूभ्यः सिँचः परस्मैपदेषु ॥ ७९, ७८

अगात् । अस्थात् । अदात् । अधात् । अपात् । अभूत् । (गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम्)

नेह-गै शब्दे अगासीत् । पा रक्षणे अपासीत् ।

२-४-७८ विभाषा घ्रा-धेट्-शाच्छासः ॥७९

अघ्रात्, अघ्रासीत् । अधात्, अधासीत् । अशात्, अशासीत् । अच्छात्, अच्छासीत् । असात्, असासीत् ।

२-४-७९ तनादिभ्यस्तथासोः ॥

अतत, अतनिष्ट । थासा साहचर्यादात्मनेपदस्यैव तशब्दस्य ग्रहणम् । तेन परस्मैपदे मध्यमपुरुषबहुवचने न भवति- अतनिष्ट । अतथाः, अतनिष्ठाः ।

२-४-८० मन्त्रे घस-ह्वर-णश-वृ-दहाद्-वृच्-कृ-गमि-जनिभ्यो लेः ॥

अक्षन्नमीमदन्त । मा ह्वर्मित्रस्य त्वम् ।

प्राणङ् मर्त्यस्य ।

सुरुचोवेन आवः । मा न आ धक् ।

आप्रा द्यावापृथिवी । मा नो अस्मिन् महाधने परावर्क् ।

अक्रन् कर्म कर्मकृतः । अग्मन् । अज्ञत वा अस्य दन्ताः । मन्त्रग्रहणं छन्दस उपलक्षणम् ।

२-४-८१ आमः ॥

ज्ञायते । इत्यादि संवादरूपेण १-१-६० प्रत्य...सूत्रप्रदर्शनपुरस्सरं लुक् श्लु लुप् शब्दैः प्रत्ययादर्शनं बोध्यत इति बोधयता शिक्षकेण हु+ति इति श्यामपाटचामवशेष्य श्लुशब्देन प्रत्ययस्याऽदर्शने जाते कार्यान्तरमपि भवतीति वदता ६-१-१० श्लौ सूत्रं प्रस्तुत्यम् ।

२-४-७६ बहु- शपः (२-४-७२) बहुलम्=बाहुल्येन श्लुः (२-४-७५) छन्दसि=वेदे । उदाहरणयोः क्रमशः ददाति, वष्टि इति प्राप्ते । आद्ये प्राप्तश्लोरभावः । अन्त्ये शपो लुकि प्राप्ते श्लुः । वशँ कान्तौ, आदादिकः ।

२-४-७७ गाति- ३-१-४४ च्लेः सिँच्-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी-प्रयोगो यथा- २-४-५८ ण्यक्ष...लुक्(क)...णिञोः ॥ २-४-७७ गातिस्था...सिँचः(क)...देषु ॥ इति । गाति...भ्यः= इण्स्थानिक-गाधातोः स्थाधातोः घुसंज्ञकधातोः पिबतिरूपक-पाधातोः भूधातोश्च परस्य, सिँचः= सिँच् प्रत्ययस्य (स्थानिवद्भावेन सिँजपि प्रत्ययः) (क)= लुक्, परस्मैपदेषु= परस्मैपदेषु परेषु । इत्यर्थमुपदिश्यच्छात्रैर्लक्षणसमन्वयं कारयित्वा 'अभू+ति' इति श्यामपाटचां लिखित्वा ७-३-८४ सार्व...सूत्रेण गुणप्रसक्तिमुद्बोध्य ७-३-८८ भूसु...सूत्रमुपदिशेत् ।

२-४-७८ विभा- घ्रा...सः= घ्रा-धेट्-शा छा-सा धातुभ्यः परस्यः, सिँचः (२-४-७७) विभाषा= वा, लुक् (२-४-५८) परस्मैपदेषु (२-४-७७) । उदाहरणेषु लुगभावे ७-२-७३ यम...इतीट्सँकौ ।

२-४-७९ तनादिभ्यः =तनादिभ्यः परस्य, सिँचः (२-४-७७) विभाषा (२-४-७८) लुक् (२-४-५८) तथासोः= त थास् इत्येतयोः परयोः । सिँज्लोपपक्षे तथासोः १-२-४ सार्व...इति ङित्त्वात् ६-४-३७ अनु...इत्यनुनासिकलोपः ।

२-४-८० मन्त्रे = मन्त्रविषये प्रयोगे, घस्...निभ्यः= घस् ह्वृ णश् वृ दह् आत् (आकारान्त) वृज् कृ गम् जन् इत्येतेभ्यो धातुभ्यः परस्य, लेः= लिँप्रत्ययस्य, लुक् (२-४-५८) । अत्र सूत्रे लिँशब्देन च्लिँप्रत्ययो गृह्यते, उत्तरसूत्रे तु लिँडादयोऽपि गृह्यन्ते । **अक्षन्** घस्+लुङ्+झि ६-४-९८ गम...इत्युपधालोपः । ८-३-६० शासि...इति षत्वम् । **अग्मन्** गमःप्राग्वत् षत्ववर्जम् । **अज्ञत** जन्+झ शेषं प्राग्वत् ।

२-४-८१ आमः= ६-४-५५ अयामन्ता...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी-प्रयोगो यथा- २-४-५८ ण्यक्षत्रि...लुक्(क)...णिञोः ॥ २-४-८० मन्त्रे...लें(ख) ॥ २-४-८१ आमः (ख) (क) ॥ इति । आमः= आमन्तात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एधाञ्चक्रे ।	२-४-८३ नाऽव्ययीभावादतो ऽम्त्वपञ्चम्याः ॥८४
२-४-८२ अव्ययादाप्सुँपः ॥८४	अधिवनम् ।
तत्र शालायाम् ।	२-४-८४ तृतीया-सप्तम्योर्बहुलम् ॥

परस्य (ख)=लेंः = लिँ इत्यस्य, (क)= लुक्= लुग्भवति । इत्यर्थमुपदिश्यच्छात्रैर्लक्षणसमन्वयं कारयित्वा श्यामपाटचां 'चोरयाम्' इत्यवशेषयेत् । अथ ३-१-४० कृञ्चा...सूत्रं प्रस्तुवीयात् ।

२-४-८२ अव्य- १-१-३६ स्वरा...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी-प्रयोगो यथा- २-४-५८ ण्यक्षत्रि...लुक्(क) णिञोः ॥ २-४-८२ अव्ययादाप्सुँपः (क) ॥ इति । अव्ययात्= अव्ययाद् विहितस्य, आप्सुँपः= आपःसुँपश्च (क)= लुक्= लुग्भवति । सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ अस्याः कारिकाया भावः शिक्षकेण स्मारणीयः । इति सुँबन्त-शिक्षण-रीतिः । शुभम् ।

ऊँनमः श्री जगदम्बायै

अथ तिङन्त-शिक्षण-रीतिः

सम्यगभ्यस्त-सुँबन्तशिक्षणरीतयश्छात्राः खलु तिङन्त-शिक्षणरीति-शिक्षणेऽधिकारिणः । ते चच्छात्राः प्रथमं शिक्षकेणाऽधोनिर्दिष्टरूपेणोपदेश्याः । यथा- अयि वत्साः ? सम्यगभ्यस्ता युष्माभिः सुँबन्त-शिक्षण-रीतिः । तत्र यथा प्रत्येकं प्रातिपदिकेभ्यः सुँप्रभृतयः सुप् इत्यन्ताः प्रत्ययाः परतो योज्यन्ते (विधीयन्ते) इति युष्माभिर्ज्ञायते तथैव धातोः परतो लँट्, लिँट् इत्यादयः प्रत्यया विधीयन्ते । (ति, तः, न्ति, इत्यादयः परतो योज्यन्ते) 'श्यामः पठति, इति वक्तव्ये 'श्यामः' इति पदं कथं सिध्यतीति शिक्षितं युष्माभिः । साम्प्रतं 'पठति' इति प्रयोगः कथं सिध्यतीति जिज्ञासायां तिङन्त-शिक्षण-रीतिःप्रस्तूयते । इति । अयि वत्साः ? यथा नाम प्रातिपदिकमुच्यते तथा क्रियावाची शब्दो धातुरुच्यते । क्रियानाम-पठनम्, हसनम्, लेखनम्, क्रीडनम्, इत्यादि कार्यबोधनम् । तद्बाचिनः पठ्, हस्, लिख्, क्रीड् इत्यादयो धातवो भवन्ति (धातुशब्दवाच्या भवन्ति) तेषां च भू इत्यत आरभ्य गणपाठ एवास्ति पाणिनिना पठितः । स एव धातुपाठ-नाम्ना प्रथते । इत्युपदेशसन्दर्भे धातुपाठं छात्रान् दर्शयित्वा, एते सर्वे धातुशब्दवाच्या इति बोधयित्वा तथा चोपदिष्टं भगवता पाणिनिनेति ब्रुवञ् शिक्षकः १-३-१ भूवा...सूत्रमुपस्थापयेत् ।

२-४-८३ नाऽव्य- १-२-४७ ह्रस्वो नपुंसके...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- २-४-५८ ण्यक्षत्रि...लुक्(क) णिञोः ॥ २-४-८२ अव्ययादाप्-सुँपः(ख) ॥ २-४-८३ न (क) अव्ययीभावात् (ख) अतः अम् तु अपञ्चम्याः ॥ इति । अतः+अव्ययीभावात्= अदन्तादव्ययीभावाद् विहितस्य (ख)= सुँपः= सुँप्प्रत्ययस्य, न+[(क)= लुक्)]= लुग् न भवति, तु= किन्तु, अपञ्चम्याः= पञ्चमीं विभक्तिं विहाय, अम्= (तस्य सुँपः स्थाने) अमादेशो भवति । इत्यर्थमुपदिश्य तत्प्रसङ्गे लक्षणसमन्वयात् पूर्वमेव २-४-८४ तृतीया...सूत्रमुपदिशेत् ।

२-४-८४ तृती- २-४-८३ नाऽव्ययीभावात्...सूत्रानन्तरं सूत्रमिदं पाठचम् । अतः+अव्ययीभावात् (२-४-८३) = अदन्तादव्ययीभावाद् विहितयोः, तृतीयासप्तम्योः= तृतीयासप्तमीविभक्त्योः स्थाने, बहुलम्+अम् (२-४-८३) = बाहुल्येन अमादेशो भवति । इत्यर्थमुपदिश्य, अदन्ताव्ययीभावस्य पञ्चमीविभक्तौ पृथक् पृथग् रूपाणि भवन्ति । यथा प्रकृते अधिवनात् अधिवनाद् । अधिवनाभ्याम् । अधिवनेभ्यः । इति । तृतीयासप्तम्योः पक्षे अम् आदेशो भवति । यथा-अधिवनम् । अधिवनम् इति । पक्षान्तरे पृथक् पृथग् रूपाणि भवन्ति । यथा- प्रकृते तृतीयायाम्-अधिवनेन । अधिवनाभ्याम् । अधिवनैः । इति । सप्तम्याम्-अधिवने । अधिवनयोः । अधिवनेषु । इति । अन्यासु सर्वासु विभक्तिषु अमेव । यथा-प्रकृते अधिवनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिवनम् । अधिवनेन, अधिवने वा ।

२-४-८५ लुँटः प्रथमस्य डारौरसः ॥

पठिता । पठितारौ । पठितारः ।

इति द्वितीयाध्याये चतुर्थः पादः ।

इति द्वितीयोऽध्यायः ।

इति । विशदय्य बोधयेत् । वने गावश्चरन्ति= अधिवनं गावश्चरन्ति । अथ 'ग्रामस्य समीपम्' = 'उपग्रामम्' इति श्यामपाटचां लिखित्वा छात्रान् बोधयेत् । वत्साः? समीपमित्यर्थकम् 'उप' इत्यव्ययमस्ति इति । अथ ग्राम+ङस् इत्यनेन सुँबन्तेन सह समीपार्थकस्य 'उप' इत्यस्य पूर्ववत् समासादिप्रक्रियां छात्रैरुच्यमानां शिक्षकः शृणुयात् । प्राकारो ग्रामस्य समीपे वर्तते = उपग्रामं प्राकारो वर्तते = उपग्रामे प्राकारो वर्तते । ग्रामस्य समीपे पाठशाला वर्तते = उपग्रामं पाठशाला वर्तते । उपग्रामे पाठशाला वर्तते । इत्यादि । अथ-समासेऽपि क्वचित् समासान्तास्तद्धितप्रत्यया भवन्तीतिच्छात्रमस्तिष्के सँस्काराऽऽधानाय राज्ञः समीपम् इति विग्रहे समासप्रक्रियाक्रमे उपराजन् इति श्यामपाटचां लिखित्वा ५-४-१०८ अनश्च-सूत्रमुपदिशेत् ।

२-४-८५ लुँटः- ३-३-१५ अनद्यतने लुँट्- सूत्रानन्तरं सूत्रमिदं पाठचम् । लुँटः= लुँट्सम्बन्धिनः, प्रथमस्य= प्रथमपुरुषस्य स्थाने, डा-रौ-रसः= डा रौ रस् इत्यादेशा भवन्ति । इत्यर्थमुपदिश्याऽधोनिर्दिष्ट-श्यामपाटीप्रयोगद्वाराऽऽदेशं बोधयेत् ।

प्रथमपुरुषः

एकवचनम्	**द्विवचनम्**	**बहुवचनम् (स्थानिनः)**
डा	रौ	रस् (आदेशाः)

प्रकृते डाऽऽदेशेऽनुबन्धलोपे च 'पठितास्+आ 'इति श्यामपाटचां लिखित्वा' डित्त्वे यत्र कुत्रापि टिलोपो भवति' इति बोधयित्वा छात्रै रूपं साधयेत् । पठिता । तसि पूवत् प्रक्रियायां जातायां 'पठितास्+रौ' इति श्यामपाटचां लिखित्वा ७-४-५१ रि च. सूत्रमुपदिशेत् ।

इति द्वितीयाऽध्याये चतुर्थःपादः । इति द्वितीयोऽध्यायः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तृतीयोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तृतीयाऽध्याये

प्रथमः पादः

३-१-१ प्रत्ययः ॥ ५-४-१६०

३-१-२ परश्च ॥ ५-४-१६०

३-१-३ आद्युदात्तश्च ५-४-१६०

कर्तव्यम् ।

३-१-४ अनुदात्तौ सुँप्पितौ ॥

दृषदौ । पठति ।

३-१-५ गुप्तिज्किद्भ्यः सन् ॥७

जुगुप्सते । तितिक्षते । चिकित्सते ।

३-१-६ मान्-बध-दान्-शान्भ्यो दीर्घश्चाऽभ्यासस्य ॥

मीमांसते । बीभत्सते । दीदांसति, दीदांसते । शीशांसति, शीशांसते ।

३-१-७ धातोः कर्मणः समान-कर्तृकादिच्छायां वा ॥११,९,२२

(आशङ्कायामुपसंख्यानम्)

नदीकूलं पिपतिषति ।

शैषिकान्मतुँबर्थीयाच्छैशिको मतुँबर्थिकः ।

सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते ॥

पिपठिषितुमिच्छतीति विग्रहे न सन् ।

३-१-१ प्रत्ययः= आपञ्चमाध्यायान्ताद्, इत ऊर्ध्वमनुक्रंस्यमानाः प्रत्येकं प्रत्ययसंज्ञका भवन्ति, प्रकृत्युपपदोपाधिविकारागमान् वर्जयित्वा ।

३-१-२ पर- प्रत्ययः (३-१-१), परः= प्रकृतेः परतो भवति ।

३-१-३ आद्यु- प्रत्ययः (३-१-१) आद्युदात्तः= आद्युदात्तो भवति । **कर्तव्यम्** शेषनिघाते सति ८-४-६५ उदा...इति व्यइत्यस्याकारः स्वरितः ।

३-१-४- सुँप्पितौ= सुँप् पिच्च, अनुदात्तौ= अनुदात्तौ भवतः ।

३-१-५ गुप्तिज्- गुपेर्निन्दायाम्, तिजेः क्षमायाम्, कितेर्व्याधिप्रतीकारे निग्रहे, अपनयने, च । एष्वेवार्थेषु सन् प्रत्ययो भवति । एष्वेवार्थेषु चाऽनुदात्तेतो धातव इमे । तत्सामर्थ्याच्च सन्नन्तादपि भवत्यात्मनेपदम् । **जुगुप्सते** अत्र धात्वधिकाराऽभावात् सनो नाऽर्धधातुकत्वम् । तेनेड्गुणौ न । अत एवाग्रिमसूत्रेऽपि सनो नेट् । अर्थान्तरे तु निरनुबन्धकाश्चुरादयः । गोपयति । तेजयति । संकेतयति ।

३-१-६ मान्बध- मानेर्जिज्ञासायाम्, बधेश्चित्तविकारे, दानेरार्जवे, शानेर्निशाने । एष्वर्थेषु सन् प्रत्ययो भवति । एष्वेवार्थेषु आद्यावनुदात्तेतौ । अन्त्यौ स्वरितेतौ । अर्थान्तरे तु निरनुबन्धकाश्चुरादयः । मानयति । बाधयति । दानयति । निशानयति ।

३-१-७ धातोः ३-१-२६ हेतुमति च- सूत्रानन्तरं सूत्रमिदं पाठयम् । अत्र श्यामपाटीप्रयोगो यथा- ३-१-५ गुप्तिज्किद्भ्यः सन् ॥ ३-१-७ धातोः कर्मणः समानकर्तृकादिच्छायां वा (क) ॥ इति । एतत्सूत्रार्थोपदेशात् पूर्वं शिक्षकश्छात्रानधोनिर्दिष्टरूपेण बोधयेत् । यथा-वत्साः? सूत्रेऽस्मिन् कर्मण इति श्रूयते । तत्र जिज्ञासा जागर्ति कस्य धातोः कर्मण ? इति । तत्रोत्तरमिदं भवति यत्, अत्रैव सूत्रे, 'इच्छायाम्' इति श्रूयते, तेन सन्निहितत्वात् इष्धातोः कर्मणः, इति । अथ सूत्रेऽस्मिन् 'समानकर्तृकात्' इति श्रूयते । तत्रापि जिज्ञासा जागर्ति केन धातुना समानकर्तृकात् ? इति । तत्राप्युत्तरमिदमेव भवति यत्, अत्रैव सूत्रे 'इच्छायाम्' इति श्रूयते । तेन सन्निहितत्वात् इष्धातुना 'समानकर्तृकात्'= 'इष्धातुनैककर्तृकात् इति । अथ सूत्रार्थमुपदिशेत् । कर्मणः='इष्धातोः कर्मीभूतात्, समानकर्तृकात्= इष्धातुनैककर्तृकात्, धातोः= धातोः परतः, इच्छायाम्= इच्छार्थे (इष्धातोरर्थे) वा+[(क)=सन्] =विकल्पेन सन् प्रत्ययो भवति । इति । अथ शिक्षकः श्यामपाटचां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-८ सुँप आत्मनः क्यच् ॥११, ९, १०

आत्मनः पुत्रमिच्छति = पुत्रीयति ।

(मान्तप्रकृतिकसुँबन्तादव्ययाच्च क्यज्नेति वक्तव्यम्)

इदमिच्छति । स्वरिच्छति ।

(छन्दसि परेच्छायामिति वक्तव्यम्)

मा त्वा वृका अघायवो विदन् ।

३-१-९ काम्यच्च ॥

आत्मनः पुत्रमिच्छति = पुत्रकाम्यति ।

३-१-१० उपमानादाचारे ॥११

पुत्रमिवाचरति = पुत्रीयति ।

(अधिकरणाच्चेति वक्तव्यम्)

प्रासादीयति कुड्ये ।

३-१-११ कर्तुः क्यङ् सलोपश्च ॥१८

श्येन इवाचरति श्येनायते काकः ।

सलोपविधौ व्यवस्थित-विभाषा ।

'छात्रः पठितुम् इच्छति' इति दर्शयन्, इच्छति इत्यस्य कर्म 'पठितुम्' इत्यस्ति । अतः प्रकृते पठ् धातुः इष्धातोः कर्म वर्तते । तथा यः पठति सोऽपिच्छात्रः, यश्च इच्छति सोऽपिच्छात्र एव । अतः प्रकृते पठ्धातुः इष्धातुना समानकर्तृकश्च= एककर्तृकश्च वर्तते । इति बोधनपुरस्सरं छात्रैर्लक्षणसमन्वयं कारयेत् । अथाऽनुबन्धलोपे छात्रैः साधिते सति 'स' इत्यस्य आर्धधातुकसंज्ञामिडागमं चच्छात्रैः साधयित्वा 'पठ्+इ+स' इति श्यामपाट्यां लिखित्वा ६-१-९ सन्यङोः सूत्रमुपदिशेत् । **शैषि-** शैषिकात् सरूपः शैषिकः प्रत्ययो नेष्टः। शालायां भवः= शालीयः । शालीये भव इति विग्रहे न पुनश्छः । विरूपस्तु भवत्येव । अहिच्छत्रे भव आहिच्छत्रः । तत्र भवः= आहिच्छत्रीयः । तथा मतुँबर्थीयात् सरूपो मतुँबर्थीयः प्रत्ययो नेष्टः । प्रशस्तं धनमस्यास्तीति धनवान् । धनवानस्यास्तीति विग्रहे न मतुँप् । विरूपस्तु भवत्येव । दण्डोऽस्यास्तीति दण्डी । सोऽस्यामस्तीति दण्डिमती शाला । एवमेव सन्नन्तात् सरूपः (अर्थद्वारकं सारूप्यं ग्राह्यम्) सन् नेष्यते । तेनेच्छासन्नन्तादिच्छासन् न । विरूपस्तु (स्वार्थसन्नन्तादिच्छासन् तु) भवत्येव । जुगुप्सिषते ।

३-१-८ सुँप- ७-३-९४ यङो वा- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- ३-१-७ धातोः कर्मण...इच्छायां वा ॥ ३-१-८ (क) सुँप आत्मनः (ख) (ग) क्यच् ॥इति । आत्मनः= एषितुरात्मसम्बन्धिनः, (३-१-७ धातोः सूत्रोक्तमुद्बोधयेत्) (क)= कर्मणः= इष्धातोः कर्मणः, सुँपः= सुँबन्तात्, (ख)= इच्छायाम्= इच्छार्थे = इष्धातोरर्थे (ग)= वा (३-१-७)+क्यच्= विकल्पेन क्यच् प्रत्ययो भवति । उदाहरणं यथा- 'आत्मनःपुत्रमिच्छति' इति विग्रहे 'पुत्र+अम्' इति इष् धातोः कर्म वर्तते, एषितुरात्मसम्बन्धी च वर्तते इति बोधनपुरस्सरं तस्मात् सुँबन्तात् (पुत्र+अम्, इत्यतः) क्यच्प्रत्ययेऽनुबन्धलोपे च छात्रैः साधिते 'पुत्र+अम्+य' इति श्यामपाट्यां छात्रैः कारितायां २-४-७१ सुँपो...सूत्रमुपदिशेत् । **छन्द-** इषिकर्मणः (३-१-७) सुँपः (३-१-८) परेच्छायाम्, क्यच् (३-१-८) इति वक्तव्यम्, छन्दसि । परेषामघमिच्छवः= **अघायवः ।** ७-४-३३ क्यचि च- इति प्राप्तेत्वस्य ७-४-३५ नच्छ...इति निषेधे ७-४-३७ अश्वा...इत्यात्वम् । ३-२-१७० क्याच्छ...इति 'उः' ।

३-१-९ काम्य- इषिकर्मणः (३-१-७) आत्मनः (३-१-८) सुँपः (३-१-८) इच्छायाम्+ वा (३-१-७) काम्यच्= काम्यच् प्रत्ययो भवति । फलाऽभावात् ककारस्य नेत्संज्ञा ।

३-१-१० उपमानात्=उपमानवाचिनः, कर्मणः (३-१-७)= आ+चर्धातोः कर्मणः, सुँपः+क्यच् (३-१-८) वा (३-१-७) आचारे=आचारेऽर्थे । आचारे इति सूत्रे श्रुतत्वेन प्रत्यासत्त्या कर्मापि आ+चर्धातोरेव विवक्षितम् । **अधि**-उपमानात् अधिकरणात्, सुँपः+क्यच् (३-१-८) वा (३-१-७) आचारे (३-१-१०) । **प्रासादीयति** प्रासादे इवाचरति । क्यचि च (७-४-३३) इतीत्वम् ।

३-१-११ कर्तुः- उपमानात् (३-१-१०) कर्तुः= कर्तृवाचकात्, सुँपः (३-१-८) आचारे (३-१-१०) वा (३-१-७) क्यङ्=क्यङ् प्रत्ययो भवति, सलोपश्च= सति सकारे तस्य लोपश्च वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओजसोऽप्सरसो नित्यमितरेषां विभाषया ।
सकारस्येष्यते लोपः शब्दशास्त्रविचक्षणैः ॥
ओजायते । अप्सरायते । यशायते, यशस्यते ।
(आचारेऽवगल्भ-क्लीब-होडेभ्यः क्विँब्वा वक्तव्यः)
अवगल्भते, अवगल्भायते । क्लीबते, क्लीवायते ।
होडते, होडायते ।
(सर्वप्रातिपदिकेभ्यः क्विँब्वा वक्तव्यः)
छात्रति, छात्रायते । अश्वति, अश्वायते ।

३-१-१२ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ॥१३

अभृशो भृशो भवति = भृशायते । उन्मनायते ।

३-१-१३ लोहितादिडाज्भ्यः क्यष् ॥

लोहितायति । लोहितायते ।
पटपटायति । पटपटायते ।
(लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि)
नीलायते । हरितायते । यानि लोहितादिषु पठ्यन्ते तेभ्यः क्यङेव । अपरिपठितेभ्यस्तु क्यषेव ।
वर्मायति, वर्मायते ।

३-१-१४ कष्टाय क्रमणे ॥

कष्टाय क्रमते = कष्टायते । पापं कर्तुमुत्सहत इत्यर्थः ।
(सत्र-कष्ट-कक्ष-कृच्छ्र-गहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम्)
कण्वम् = पापम् । सत्रं चिकीर्षति सत्रायते ।
कष्टायते । कक्षायते ।
कृच्छ्रायते । गहनायते ।

आचा- उपमानेभ्यः (३-१-१०) अवगल्भ क्लीब होडेभ्यः, कर्तृभ्यः (३-१-११) आचारे, क्विँप् वा । अवगल्भादयः पचाद्यजन्ताः । क्विँप्संनियोगेन तस्याऽकारस्याऽनुदात्तत्वाऽनुनासिकत्वे प्रतिज्ञायेते । तेनाऽनुदात्तेत्त्वात् क्विँबन्तादात्मनेपदम् । क्विँपा मुक्ते ३-१-११ कर्तुः...इति क्यङ् भवति । तत्पक्षे च नेत् । क्विँप्सन्नियोगेनैवाऽनुदात्तत्वाऽनुनासिकत्वयोः प्रतिज्ञानात् । **सर्व-**७-४-३३ क्यचि च...सूत्रानन्तरं वार्तिकमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- ३-१-१० उपमानात्[क] आचारे[ख] ॥ ३-१-११ कर्तुः[ग] क्यङ् सलोपश्च ॥ ((क) (ग) सर्वप्रातिपदिकेभ्यः (ख) क्विँब्वा वक्तव्यः) इति । (क)= उपमानात्= उपमानबोधकेभ्यः, (ग)= कर्तुः= कर्तृवाचकेभ्यः, सर्वप्रातिपदिकेभ्यः= सर्वेभ्यः प्रातिपदिकेभ्यः, (ख) = आचारे, वा क्विँप् वक्तव्यः । उदाहरणं यथा- छात्र इवाचरति, इति विग्रहे प्रकृतवार्तिकेन क्विँपि अनुबन्धलोपे 'छात्र+व्' इति श्यामपाट्यां लिखित्वा ३-१-३२ सना...सूत्रमुद्बोध्य धातुसंज्ञां छात्रैः कारितायां ६-१-६५ वेरपृक्तस्य-सूत्रमुपदिशेत्

३-१-१२ भृशा- अच्वेः= च्व्यन्तभिन्नेभ्यः, अभूततद्भावविषयेभ्यः (अच्वेरितिपर्युदासलभ्योऽयमर्थः) भृशादिभ्यः= भृशादिभ्यः प्रातिपदिकेभ्यः, भुवि= भवत्यर्थे, क्यङ् (३-१-११) वा (३-१-७) हलः= हलन्तानाम्, लोपश्च= लोपोऽपि भवति ।

३-१-१३ लोहि- अच्वेः (३-१-१२) लोहि...डाज्भ्यः= लोहितादिगणपठितेभ्यो डाच्प्रत्ययान्तेभ्यश्च प्रातिपदिकेभ्यः, भुवि (३-१-१२) वा (३-१-७) क्यष्= क्यष्प्रत्ययो भवति । आद्योदाहरणयोः- अलोहितो लोहितो भवतीति विग्रहः । द्वितीययोः पटत् करोतीति विग्रहे अत एव ज्ञापकात् क्यषा योगे डाच् । ८-१-१२ प्रका...सूत्रस्थ-डाचि...इति द्वित्वे, डाचि परे टिलोपे ६-१-९६ नाम्रे...सूत्रस्थ-नित्य... इति पररूपे पटपटा इत्यतः क्यष् ।

लोहि...क्यषेव- यानि प्रमादाल्लोहितादिषु पठ्यन्ते तेषां भृशादिषु पाठो वेदितव्यः । नत्वपरिपठितानां वर्मादीनाम् । अतस्तेषामादिग्रहणेन ग्रहणे सति क्यषेव भवतीति-न्यासः । हंहो ! किमुच्यते अपरिपठितेभ्यस्तु क्यषेवेति ? यदि गणे न पठिताः कथं ते लोहितादयःस्युः ? कोऽभिप्रायः? ये लोहितादिगणे पठिता अद्यत्वे सन्ति तेऽर्वाचीनैः प्रमादात् पठिता वेदितव्याः । लोहितादिस्त्वाकृतिगण इत्यभिप्रायः ।

३-१-१४ कष्टाय= चतुर्थ्यन्तात् कष्टशब्दात् क्यष् (३-१-१३) वा (३-१-७) क्रमणे = उत्साहेऽर्थे ।

सत्र- द्वितीयान्तेभ्यः प्रत्ययः । चिकीर्षा प्रति कर्मत्वात् । सत्रादयश्च वृत्तिविषये पापपर्यायाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-१५ कर्मणो रोमन्थतपोभ्यां वर्तिचरोः ॥२०

रोमन्थं वर्तयति = रोमंन्थायते गौः ।

(हनुचलन इति वक्तव्यम्)

नेह-कीटो रोमन्थं वर्तयति ।

(तपसः परस्मैपदं च)

तपश्चरति = तपस्यति ।

३-१-१६ बाष्पोष्मभ्यामुद्वमने ॥

बाष्पमुद्वमति = बाष्पायते । ऊष्मायते ।

(फेनाच्चेति वक्तव्यम्)

फनेमुद्वमति = फेनायते ।

३-१-१७ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ॥२१

शब्दं करोति = शब्दायते । वैरायते ।

कलहायते । अभ्रायते । कण्वायते । मेघायते ।

(सुदिन-दुर्दिन-नीहारेभ्यश्चेति वक्तव्यम्)

सुदिनायते । इत्यादि ।

३-१-१८ सुखादिभ्यः कर्तृवेदनायाम् ॥

सुखं वेदयते = सुखायते । दुःखायते ।

३-१-१९ नमोवरिवश्चित्रङः क्यच् ॥

नमस्करोति = नमस्यति देवान् । वरिवस्यति गुरून् । शुश्रूषत इत्यर्थः । चित्रीयते ।

३-१-२० पुच्छभाण्डचीवराण्णिङ् ॥

(पुच्छादुदसने पर्यसने च)

पुच्छमुदस्यति = उत्पुच्छयते । पुच्छं पर्यस्यति = परिपुच्छयते ।

(भाण्डात् समाचयने)

भाण्डानि समाचिनोति = संभाण्डयते ।

(चीवरादर्जने परिधाने च)

चीवराण्यर्जयति परिदधाति वा संचीवरयते भिक्षुः ।

३-१-२१ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ॥

३-१-१५ कर्मणः= कर्मवाचिभ्याम्, रोम...भ्याम्=रोमन्थतपः शब्दाभ्याम्, वर्तिचरोः= वर्तिचरोरर्थयोः, क्यङ् (३-१-११) वा (३-१-७) । **तप**- कर्मणः (३-१-१५) तपसः= तपश्शब्दात्, चरतीत्यर्थे क्यङ् (३-१-११) वा (३-१-७) तदन्तात् परस्मैपदं च । **तपस्यति** १-४-१५ नः क्ये इति नियमेनाऽपदान्तत्वान्न रुँत्वम् ।

३-१-१६ बाष्पो- कर्मभ्याम् (३-१-१५) वा...भ्याम्= बाष्प उष्मन् इति शब्दाभ्याम्= उद्वमने= उद्वमनेऽर्थे, क्यङ् (३-१-११) वा (३-१-७) ।

३-१-१७ शब्द- कर्मभ्यः (३-१-१५) शब्द...घेभ्यः= शब्दप्रभृतिशब्देभ्यः, करणे = कृधात्वर्थे, क्यङ् (३-१-११) वा (३-१-७) ।

३-१-१८ सुखा- सूत्रे कर्तृ इति पृथक्पदं लुप्तषष्ठ्यन्तम् । कर्मभ्यः (३-१-१५) सुखादिभ्यः=सुखप्रभृतिगणपठित शब्देभ्यः, वेदनायाम्= अनुभवेऽर्थे, क्यङ् (३-१-११) वा (३-१-७) कर्तृ= कर्तुश्चेत् सुखादीनि भवन्ति ।

३-१-१९ नमो- कर्मणः (३-१-१५) नमो....त्रङः=नमस् वरिवस् चित्र (ङ्) शब्देभ्यः, करणे (३-१-१७) वा (३-१-७) क्यच्= क्यच् प्रत्ययो भवति । **चित्रीयते** ७-४-३३ क्यचि...इतीत्वम् । ङिदनुबन्धसामर्थ्यात् क्यजन्तादप्यात्मनेपदम् ।

३-१-२० पुच्छ- कर्मणः (३-१-११) पुच्छभाण्डचीवरात्= पुच्छभाण्डचीवरशब्देभ्यः, करणे (३-१-१७) णिङ्= णिङ् प्रत्ययो भवति । **पुच्छा**-उदसनम्= ऊर्ध्वक्षेपणम् । पर्यसनम्= परितःक्षेपणम् । उदाहरणयोः ६-४-१५५ टेः-सूत्रस्थ-णाविष्ठ...इति टिलोपः ।

भाण्डा-समाचयनम्= राशीकरणम् ।

३-१-२१ मुण्ड- कर्मभ्यः (३-१-१५) मुण्ड...स्तेभ्यः= मुण्डादिभ्यः, करणे (३-१-१७) णिच्=णिच् प्रत्ययो भवति ।

व्रता- उदाहरणयोः क्रमशः अश्नाति वर्जयतीत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुण्डं करोति = मुण्डयति । मिश्रयति ।
श्लक्ष्णयति । लवणयति ।
(व्रताद् भोजने तन्निवृत्तौ च)
पयो व्रतयति । वृषलान्नं व्रतयति ।
(वस्त्रात् समाच्छादने)
संवस्त्रयति
(हल्यादिभ्यो ग्रहणे)
हलिकल्योरदन्तत्वं च निपात्यते । हलिं गृह्णाति = हलयति । कलिं गृह्णाति = कलयति ।
परत्वाद्वृद्धौ सत्यामपीष्ठवद्भावेन अगेव लुप्यते । अतः सन्वद्भावदीर्घौ न । अजहलत् । अचकलत् । कृतं गृह्णाति = कृतयति । तूस्तानि विहन्ति = वितूस्तयति केशान् । विशदीकरोतीत्यर्थः ।

३-१-२२ धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ॥९०, २४

पुनः पुनर्भृशं वा भवति = बोभूयते । एकाच इत्युक्तेर्नेह-भृशं जागर्ति ।
हलादेरित्युक्तेर्नेह-भृशमीक्षते ।
(सूचिसूत्रिमूत्र्यटचर्त्यशूर्णोतिभ्यो यङ् वाच्यः)
सोसूच्यते । सोसूत्र्यते । मोमूत्र्यते । अटाटचते । अरार्यते । अशाश्यते । ऊर्णोनूयते ।

३-१-२३ नित्यं कौटिल्ये गतौ ॥२४

कुटिलं व्रजति = वाव्रज्यते ।

३-१-२४ लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम् ॥

गर्हितं लुम्पति = लोलुप्यते । सासद्यते । चञ्चूर्यते । जञ्जप्यते । जञ्जभ्यते । दन्दह्यते । दन्दश्यते । धातोरुपधानकारस्य लोपो यङ्लुक्यपि । दशेति लुप्तनकारनिर्देशात् । दन्दशीति । जेगिल्यते । भावगर्हायामेवेत्युक्तेर्नेह-साधु जपति । भृशं लुम्पति ।

३-१-२५ सत्यापपाशरूपवीणा-

३-१-२२ धातो- ६-४-४८ अतो लोपः-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र क्रियासमभिहारो नाम पौनःपुन्यमतिशयश्चेति बोधयित्वा हलादेः, एकाचः, धातोः, (परतः) क्रियासमभिहारे यङ् प्रत्ययो भवति इति सूत्रार्थं बोधयित्वा उदाहरणं प्रस्तुवीयात् । तथाहि- पुनः पुनः पठति, अथवा 'अतिशयेन पठति' इति श्यामपाटचां लिखित्वा मध्ये मध्ये साहाय्यं ददच्छात्रैर्लक्षणसमन्वयं कारयेत् । प्रकृते पठ् धातुरेकाज्वर्तते हलादिश्च । अथ ८-३-५९ आदे...सूत्रप्रसङ्गे दर्शितं गङ्गावारि, गङ्गाजलम् इत्यादि दृष्टान्तोद्बोधनपुरस्सरमधोनिर्दिष्ट- श्यामपाटीप्रयोगविधिना बोधयेत् । 'पुनः पुनः पठ्'= पठ्+यङ्' 'अतिशयेन पठ्'= पठ्+यङ्' अर्थात् 'पुनः पुनः पठ्' इति कथनं 'पठ्+यङ्' इति कथनं च तुल्यार्थकम्, तथा 'अतिशयेन पठ्' इति कथनं 'पठ्+यङ्' इति कथनं च तुल्यार्थकम् । इति । अथच्छात्रैरनुबन्धलोपे कारिते ६-१-९. सन्यङोः-सूत्रमुद्बोध्य च्छात्रैरेव हलादिशेषावधि प्रक्रियां साधयित्वा प पठ्+य' इति श्यामपाटचां लिखित्वा ७-४-८३ दीर्घोऽकितः- सूत्रमुपदिशेत् । **सूचि-अरार्यते** ७-४-३० यङि.....इति गुणः । र्य इत्यस्य द्वित्वम् । ६-१-३ नन्द्रा...इति प्रतिषेधस्तु न । 'यकारपरस्य रेफस्य प्रतिषेधः' ईति वचनादिति- न्यासः । अरार्यते इति भाष्यप्रयोगादिति-दीक्षितः ।

३-१-२३ नित्यं- गतौ= गत्यर्थे वर्तमानात्, धातोः (३-१-२२) कौटिल्ये नित्यम्= गति- कौटिल्ये एव, यङ् (३-१-२२) न तु क्रियासमभिहारे ।

३-१-२४ लुप...गॄभ्यः= लुपप्रभृतिभ्यो धातुभ्यः, भावगर्हायाम्+नित्यम् (३-१-२३)= भावगर्हायामेव, यङ् (३-१-२२) न तु क्रियासमभिहारे । **चञ्चूर्यते** ७-४-८७ चर...इति नुंक् । ७-४-८८ उत्प...इत्युत्वम् । ७-४-८६ जप जभ दह...इति नुंक् । **जेगिल्यते** ७-१-१०० ॠत...इतीत् । ८-२-२० ग्रो यङि इति लत्वम् ।

३-१-२५ सत्या- ६-४-११२ श्नाभ्यस्तयो... सूत्रानन्तरं सूत्रमिदं पाठचम् । सत्याप...चुरादिभ्यः = सत्यापप्रभृतिचूर्णान्त-प्रातिपदिकेभ्यः चुरादिगणपठितधातुभ्यश्च, णिच्= णिच्प्रत्ययो भवति । (अनिर्दिष्टार्थाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ॥२६

सत्यादि-चूर्णान्तेभ्यः 'प्रातिपदिकाद्धात्वर्थे...' इत्येव सिद्धे प्रपञ्चार्थमिह ग्रहणम्।

(सत्यार्थवेदानामापुँग् वक्तव्यः)

सत्यं करोति = सत्यापयति। पाशं विमुञ्चति = विपाशयति। रूपं पश्यति=रूपयति। वीणयोपगायति = उपवीणयति। तूलेनाऽनुकुष्णाति = अनुतूलयति। श्लोकैरुपस्तौति = उपश्लोकयति। सेनयाऽभियाति = अभिषेणयति। लोमान्यनुमार्ष्टि =अनुलोमयति। त्वचं गृह्णाति = त्वचयति। वर्मणा संनह्यति = संवर्मयति। वर्णं गृह्णाति = वर्णयति। चूर्णैरवध्वंसयति = अवचूर्णयति। चोरयति।

३-१-२६ हेतुमति च ॥

माता शिशुं हासयति।

३-१-२७ कण्ड्वादिभ्यो यक् ॥

कण्डूयति। कण्डूयते।

प्रत्ययाः स्वार्थे भवन्तीति णिजयं स्वार्थिक इति शिक्षकेण मनसाऽवधेयम्) इत्यर्थमुपदिश्य लक्षणसमन्वयेऽनुबन्धलोपे च 'चुर्+इ' इति श्यामपाटचां लिखित्वा ३-४-११४ आर्धधातुकं...सूत्रमुपदेश्यम्।

३-१-२६ हेतु- १-४-५५ तत्प्रयोजको...सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा-

३-१-१७ शब्दवैर....करणे (क) ॥ ३-१-२२ धातोः (ख) एकाचो...॥ ३-१-२५ सत्याप...णिच् (ग) ॥ ३-१-२६ हेतुमति च (क) (ख) (ग) इति। हेतुमति= प्रयोजकनिष्ठे, (क)= करणे = क्रियायाम्= धात्वर्थे = व्यापारे वाच्ये सति, (ख)= धातोः, (ग)= णिच्= णिच्प्रत्ययो भवति। इति सूत्रार्थः। (शिक्षकेण बोध्यश्छात्रेभ्यो नोपदेश्यो विषयः-हेतुमति इत्यस्य प्रयोजकनिष्ठे इत्यर्थः कथम्? हेत्वाश्रये इत्यर्थेन भाव्यम्? अत्रोच्यते- हेतुः= प्रयोजक इति तु १-४-५५ तत्प्र...सूत्रादेवाऽवगतम्। स्वनिष्ठाधारतानिरूपिताधेयतासम्बन्धेन हेतुर्यत्रेति विग्रहे हेतुशब्दादत्र मतुँप् प्रत्ययः। अतो 'हेतुमान्' इत्यस्य हेतुनिष्ठ इत्यर्थः। इति) लक्षणसमन्वयेऽनुबन्धलोपे चाऽवशिष्ट इकारः ३-४-११४ आर्ध...सूत्रेणाऽऽर्धधातुकमित्युद्बोधयेत्। अथ 'हस्+इ, पठ्+इ, लिख्+इ' इति श्यामपाटचां लिखित्वाऽऽद्ययोः ७-२-११६ अत...सूत्रम्, अन्त्ये ७-३-८६ पुँग...सूत्रमुद्बोध्य' हासि पाठि लेखि' इति श्यामपाटचां लिखित्वा स-सन्दर्भं ३-१-३२ सना...सूत्रमुद्बोधयेत्। शेषप्रक्रिया तु चोरि इत्यादाविवेत्युपदिशेत्। हासयति। पाठयति। लेखयति। लुँङि आद्ययोः अचीकमत इत्यत्रेव। अजीहसत्। अपीपठत्। इत्यादि। अन्त्ये अचूचुरत्, इत्यत्रेव अलीलिखत्। इत्यादि। एवं प्रयोजके कर्तरि सति सर्वेभ्यो धातुभ्यो णिच्प्रत्ययं कृत्वा णिजन्ता एव धातवः प्रयोक्तव्या इति स्फुटं बोधयेत्। यथा बालकः खादति बालको भुङ्क्ते। इत्यत्र प्रयोज्ये कर्तरि सति मूलधातू (धातुपाठे पठितौ) प्रयुक्तौ। माता बालकेन खादयति। माता बालकं भोजयति। इत्यत्र मूलधातुभ्यां णिचं कृत्वा णिजन्तौ प्रयुक्तौ। इत्यादि। **इति णिजन्त-शिक्षणरीतिः।** अथ, पाणिनिना प्रकारान्तरैरुपदिष्टेषु धातुष्वन्यतमः प्रकारः सन् प्रत्यय उपदिश्यते- वत्साः? यथा प्रवर्तनार्थं बोधयितुं मूलधातोर्णिच्प्रत्ययं कृत्वा णिजन्ता धातवः प्रयुज्यन्त इति साम्प्रतमेवोपदिष्टम्। तथैवेच्छार्थं बोधयितुं मूलधातोः सन्प्रत्ययं कृत्वा सन्नन्ता धातवः प्रयुज्यन्ते। यथा छात्रः पठितुमिच्छति इति वक्तव्ये पठ् धातोः सन् प्रत्ययो भवति। तथाहि इति वदन् ३-१-७ धातोः कर्मणः...सूत्रमुपदिशेत्।

३-१-२७ कण्ड्वादिभ्यः=कण्डूप्रभृतिभ्यो धातुभ्यः, यक्=यक् प्रत्ययो भवति, स्वार्थे। द्विविधाः कण्ड्वादयः-धातवः प्रातिपदिकानि च। तत्र धात्वधिकाराद् धातुभ्य एव प्रत्ययो विधीयते, न तु प्रातिपदिकेभ्यः। अत्र काशिका- धातुप्रकरणाद् धातुः कस्य चासञ्जनादपि। आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः॥ इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-२८ गुपूँधूपविच्छिपणिपनिभ्य आयः ॥

गोपायति । धूपायति । विच्छायति । पणायति । पनायति । पणँ धातुर्व्यवहारे स्तुतौ च वर्तते । पनँधातुस्तु स्तुतावेव । पनँसाहचर्यात् पणँ धातुरपि स्तुत्यर्थक एवाऽत्र गृह्यते । न तु व्यवहारार्थकः । शतस्य पणते ।

३-१-२९ ऋतेरीयङ् ॥

ऋतिः सौत्रो धातुः, गतिवृद्धिहिंसासु । ऋतीयते ।

३-१-३० कमेर्णिङ् ॥

कामयते ।

३-१-३१ आयादय आर्धधातुके वा ॥

गोपायाञ्चकार, जुगोप । ऋतीयाञ्चक्रे, आनर्त । कामयाञ्चक्रे, चकमे ।

३-१-३२ सनाद्यन्ता धातवः ॥

उदाहरणानि ३-१-५ गुप्ति...प्रभृति ३-१-३० कमेर्णिङ्-पर्यन्तेषु सूत्रेषु द्रष्टव्यानि ।

३-१-३३ स्यतासीँ लृँलुँटोः ॥

पठिता । पठिष्यति ।

३-१-२८ गुपूँ...निभ्यः=गुपूँप्रभृतिभ्यः, आयः=आयप्रत्ययो भवति, स्वार्थे । **शतस्य पणते** २-३-५७ व्यव...इति कर्मणि षष्ठी ।

३-१-२९ ऋतेः= ऋत्धातोः, ईयङ्= ईयङ् प्रत्ययो भवति, स्वार्थे । अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति ।

३-१-३० कमेः= कम् धातोः, णिङ्= णिङ्प्रत्ययो भवति, स्वार्थे ।

३-१-३१ आया- ७-४-९४ दीर्घो लघोः-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- ३-१-२८ गुपू.....आयः (क) ॥ ३-१-२९ ऋतेः ईयङ् (ख) ॥ ३-१-३० कमेः णिङ् (ग) ॥ ३-१-३१ आयादयः= (क) (ख) (ग)... वा ॥इति । अत्र प्रथमं शिक्षकेण ३-१-३० कमे...सूत्रस्यार्थ उपदेश्यो यथा-कमेः= कम् धातोः, णिङ्= णिङ्प्रत्ययो भवति । इति । अथाऽऽर्धधातुकविवक्षायामपि तेन नित्ये णिङि प्राप्ते तं बाधयित्वा शिक्षकः प्रकृतसूत्रार्थमुपदिशेत् । आयादयः= आय ईयङ् णिंङ् इत्येते प्रत्ययाः, आर्धधातुके = आर्धधातुकविषये, वा= विकल्पेन भवन्ति । इति । इति विकल्पेन णिङि 'कामि' इत्यस्य ३-१-३२ सना...सूत्रेण धातुसंज्ञायां लुङि चोरि धाताविव प्रक्रियायाम् अच+कम्+इ+अ त इति श्यामपाटचां लिखित्वा छात्रैः पूर्ववत्सन्वद्भावं साधयित्वा ७-४-७९ सन्यतः-सूत्रमुपदिशेत् ।

३-१-३२ सना- ३-४-११४ आर्धधातुकं...सूत्रानन्तरं सूत्रमिदं पाठचम् । सनाद्यन्ताः=सन्प्रभृत्यन्ताः (३-१-५ गुपू...सूत्रादारभ्य ३-१-३० कमे...सूत्रपर्यन्तं विहिताः प्रत्ययाः सनादय इति प्रकरणप्रदर्शनपुरस्सरंबोधयेत् प्रकरणमदर्शयित्वैवार्थघोषणायां छात्रैरनुभूयमानो बोधभारः शिक्षकस्य शिक्षणकलाया अयोग्यतां प्रकाशयति) धातवः= धातुसंज्ञका भवन्ति । अथाग्रिमप्रक्रिया भूधाताविवेति वदता शिक्षकेण छात्रैरुच्यमाना प्रक्रिया श्रोतव्या । चोरयति । किन्तु भूधातोः केवलं परस्मैपदमेव भवति णिजन्तात्तु कर्त्रभिप्राये क्रियाफले आत्मनेपदमपि भवति । तथाहि- इति वदता शिक्षकेण १-३-७४ णिचश्च-...सूत्रमुपदेश्यम् ।

३-१-३३ स्यता-३-३-१३ लृंट् शेषे च-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- ३-१-२२ धातोः....यङ् (क) ॥ ३-१-३३ (क) स्यतासीँ लृँलुँटोः ॥इति । (क) धातोः= धातोः परतः, स्यतासीँ= स्य तासिँ इति प्रत्ययौ भवतः, लृँलुँटोः= लृँलुँटोः परयोः । इत्यर्थमुपदिश्य १-३-१० यथा...सूत्रमुद्बोधयता शिक्षकेण लक्षणसमन्वयाय च्छात्रा आदेश्याः । अथ पठ्+स्य+ति' इति श्यामपाटचां लिखित्वा शिक्षकः ३-४-११४ आर्ध...सूत्रमुद्बोध्य 'स्य' प्रत्यय आर्धधातुकसंज्ञक इति च्छात्राणां मस्तिष्के प्रकाश्य ७-२-३५ आर्धधातुकस्येड्...सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-३४ सिँब्बहुलं लेँटि ॥

जोषिषत् ।

(सिँब्बहुलं णिद् वक्तव्यः)

प्रण आयूंषि तारिषत् ।

३-१-३५ कास्प्रत्ययादाममन्त्रे लिँटि ॥ ४२,३९

कासाञ्चकार । बोभूयाञ्चक्रे ।

पिपठिषाञ्चकार ।

अमन्त्रे इत्युक्तेर्नेह- कृष्णो नोनाव ।

प्रत्ययादित्यपनीय-

(कास्यनेकाच इति वक्तव्यम्)

चकासाञ्चकार ।

आमोऽमित्त्वमदन्तत्वादगुणत्वं विदेस्तथा ।

आस्कासोराम्विधानाच्च पररूपं कतन्तवत् ॥

३-१-३६ इजादेश्च गुरुमतोऽनृच्छः ॥

ईहाञ्चक्रे । ऊहाञ्चक्रे । अनृच्छ

इत्युक्तेर्नेह-आनर्च्छ ।

(ऊर्णोतेः प्रतिषेधो वाच्यः)

ऊर्णुनाव ।

वाच्य ऊर्णोर्णुवद् भावो यङ्प्रसिद्धिः प्रयोजनम् ।

आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात् ॥

ऊर्णोनूयते । ऊर्णुतः । ऊर्णुतवान् ।

३-१-३७ दयायासश्च ॥

दयाञ्चक्रे । अयाञ्चक्रे । आसाञ्चक्रे ।

३-१-३४ सिँब्ब- धातोः (३-१-२२) बहुलम्=बाहुल्येन, सिँप्= सिँप्प्रत्ययो भवति, लेँटि=लेँटि परे । **जोषिषत्** प्रक्रिया ३-४-७ लिँङर्थे...सूत्रे द्रष्टव्या ।

३-१-३५ कास्प्रत्ययात्=कास्धातोः प्रत्ययान्तधातोश्च, आम्=आम् प्रत्ययो भवति, लिँटि=लिँटि परे, अमन्त्रे=मन्त्रे गम्ये न भवति । **नोनाव** यङ्लुगन्तात् प्रत्ययलक्षणेन प्राप्त आम् प्रतिषिद्धः । **कास्य-** ६-४-२२ असिद्ध...सूत्रानन्तरं वार्तिकमिदं पाठचम् । कास्यनेकाचः= कास्धातोरनेकाज्धातोश्च, इति वक्तव्यम्= आम् प्रत्ययो भवतीति वक्तव्यम्, लिँटि= (३-१-३५)= लिँट् लकारे परे, अमन्त्रे=मन्त्रे गम्ये न भवति । इत्यर्थमुपदिश्य च्छात्रैर्लक्षणसमन्वयं कारयित्वा चोरि+आम्+ल् इति श्यामपाटचां लिखित्वा आमः ३-४-११४ आर्ध...सूत्रेणार्धधातुकसंज्ञायां ६-४-५१ णेर...सूत्रेण णिलोपे प्राप्ते तं बाधयित्वा ६-४-५५ अया...सूत्रमुपदिशेत् । **आमोऽमित्त्व-** आमो मकारस्य कथं नेत्त्वमिति विशदयति-आमँ अमन्त्रे इति च्छेदः । अत उपदेशे आमँ इत्यँदन्तत्वेन मकारस्याऽनन्त्यत्वान्नेत्संज्ञा । द्वितीयं हेत्वन्तरं दर्शयति-आस् धातोः ३-१-३७ दया...सूत्रेण कास् धातोः प्रकृतसूत्रेण आम् विधानाच्च (मकारस्येत्संज्ञायाम् आकारस्य १-१-४६ मिद....इति आकारात् परतः स्थितौ आ+आस् = आस् का+आस् = कास् इति प्रकृतिप्रत्त्यापत्तौ आम् विधानं व्यर्थं स्यात् इति)। यदि आमँ इत्यदन्तम् ? कथं सूत्रे न दीर्घनिर्देशः ? इत्यत आह-पररूपं कतन्तवत्-यथा ४-१-१८ सर्व...इत्यत्र कतन्त इति शकन्ध्वादित्वात् पररूपं तथात्रापीति भावः । विदेर्लिटि आमि कथं न गुण इति शङ्कायामाह-३-१-३८ उष विद...इत्यत्र आम् सन्नियोगेन विद इत्यदन्तत्वं निपात्यत इति प्रसङ्गादुक्तमेतदप्रकृतमपि ।

३-१-३६ इजा- अनृच्छः= ऋच्छ् भिन्नात्, इजादेः= इज्वर्णादिकात्, गुरुमतः=गुरुसंज्ञकवर्णविशिष्टात्, धातोः (३-१-२२) आम्+लिँटि (३-१-३५) । **आनर्च्छ** ७-४-११ ऋच्छ...इति गुणः ७-४-७१ तस्मा...इति नुँट् । **ऊर्णो- ऊर्णुनाव** णत्वस्याऽसिद्धत्वान्नुशब्दस्य द्वित्वेऽभ्यासस्य णत्वम् । पूर्वत्राऽसिद्धमद्वित्वे इति त्वनित्यम् । ८-४-२० उभौ साभ्यासस्येति लिङ्गात् । **वाच्य-** इडुपग्रहात्- ल्यब्लोपे पञ्चमी- इडुपग्रहम्= इडभावम् उद्दिश्य । एकाच उगन्तात् परस्य कितः ७-२-११ श्र्युकः...इतीट्प्रतिषेधमुद्दिश्येति भावः ।

३-१-३७ दयायासः= दय् अय् आस् इत्येतेभ्यः, आम्+लिँटि (३-१-३५) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-३८ उषविदजागृभ्योऽन्यतरस्याम् ॥

ओषाञ्चकार, उवोष । विदाञ्चकार, विवेद । जागराञ्चकार, जजागार ।

३-१-३९ भीह्रीभृहुवां श्लुवच्च ॥

बिभयाञ्चकार, बिभाय । जिह्रयाञ्चकार, जिह्राय । बिभराञ्चकार, बभार । जुहवाञ्चकार, जुहाव ।

३-१-४० कृञ्चाऽनुप्रयुज्यते लिँटि ॥

३-१-४१ विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ॥ ४२

विदाङ्करोतु, वेत्तु ।

३-१-४२ अभ्युत्सादयां प्रजनयां चिकयां रमयामकः पावयांक्रियाद् विदामक्रन्निति च्छन्दसि ॥

अभ्युत्सादयामकः । अभ्युदसीषददिति लोके । प्रजनयामकः । प्राजीजनदिति लोके । चिकयामकः । अचैषीदिति लोके । रमयामकः । अरीरमदिति लोके । पावयांक्रियात् । पाव्यादिति लोके । विदामक्रन् । अवेदिषुरिति लोके ।

३-१-४३ च्लिँ लुँङि ॥६६

३-१-३८ उष...गृभ्यः =उष्प्रभृतिभ्यः, अन्यतरस्याम्= वा, आम्+लिँटि (३-१-३५) । **उवोष** ६-४-७८ अभ्या...इत्युवँङ् । **विदाञ्चकार** गुणाऽभावेऽनुपदमेवोक्ता कारिका ।

३-१-३९ भी...हुवाम् = भी ह्री भृ हु धातुभ्यः,अन्यतरस्याम् (३-१-३८) आम्+लिँटि (३-१-३५) श्लुवच्च= एतेषां श्लाविव कार्यं च भवति । ६-१-१० श्लौ सूत्रे प्रक्रिया दृश्या ।

३-१-४० कृञ्चा-२-४-८१ आमः-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र प्रथमं ५-४-५० कृभ्व...५-४-५८ कृञो... प्रकरणं प्रदर्श्य प्रकृत (३-१-४०) सूत्रे तत्प्रकरण (कृञ्) प्रत्याहार-ग्रहणमिति बोधनपुरस्सरं कृञ् ग्रहणेन कृ भू अस् एते गृह्यन्ते सामान्यार्थकत्वात् । संपदिःप्रत्याहारान्तर्भूतोऽपि विशेषार्थकत्वान्न गृह्यते इति बोधयित्वा सूत्रार्थमुपदिशेत् । अथ प्रथममत्र शिक्षकेण मनसाऽवधेयं यत्, सूत्रेऽस्मिन् पठचमानश्चकारः समुच्चयार्थकः । तेन पूर्वोक्तेभ्यो (पूर्वप्रकरणोक्तेभ्यो) धातुभ्य आम् प्रत्ययो भवति लिँटि कृञ् च अनुप्रयुज्यते इत्यर्थः फलतीति । अथाऽधो निर्दिष्टरूपेण शिक्षकः सूत्रार्थं छात्रानुपदिशेत् । लिँटि+कृञ्= लिँट्परकाः कृभ्वस्तयः, अनुप्रयुज्यते = आमन्तादनुप्रयुज्यन्ते । इति । अथ चोरयाम्+कृ+ल्, चोरयाम्+भू+ल्, चोरयाम्+अस्+ल् इति श्यामपाटचां लिखित्वा छात्रानुपदिशेत् । वत्साः? अत्र लकारस्य स्थाने तिङि सति चोरयाम् इति भागो धातुकार्यं न लभते । चोरयाम् इति तु पृथक् पदमवगन्तव्यम् । कृ भू अस् एते एव धातुकार्याणि लभन्ते । तेषु भू धातोः, अस्धातोश्च सर्वत्र परस्मैपदं भवति । कृधातोस्तु आमः प्रकृतेरात्मनेपदं भवति चेदात्मनेपदं भवति । आमः प्रकृतेः परस्मैपदं भवति चेत् कृधातोरपि परस्मैपदं भवति । आमः प्रकृतेर्यदि उभयपदे भवतस्तर्हि कृधातोरप्युभयपदे भवतः । इति । एवं भावं बोधयित्वा १-३-६३ आम्प्र...इति सूत्रमुपदिशेत् ।

३-१-४१ विदाङ्कुर्वन्तु इति= विदेर्लोँटि आम्, गुणाऽभावः, लोँटो लुक्, लोँट्परक- कृञोऽनुप्रयोगश्च, अन्यतरस्याम्= वा, निपात्यन्ते । इतिकरणं पुरुषवचननिर्देशाऽनपेक्षार्थम् । तेन सर्वेषु पुरुषेषु वचनेषु च निपातनमिदम् । उदाहरणयोः आद्ये ३-१-७९ तना...इति उः । अन्त्ये २-४-७२ अदि...इति शपो लुक् ।

३-१-४२ अभ्यु...मकः= अन्यतरस्याम् (३-१-४१) निपात्यन्ते=अभ्युदित्युपसर्गपूर्वकसद्, प्रोपसर्गपूर्वक जन्, रम् इत्येतेभ्यो ण्यन्तेभ्यः, चिधातोश्च लुँङि परे आम्, चिधातोर्द्वित्वं कुत्वं च,लुङो लुक् लुङ्परक कृधातोरनुप्रयोगः, **पावयांक्रियात्**= पूधातोर्ण्यन्तादाशीर्लिँङ्याम् लेँर्लुकि आशीर्लिँङ्परक कृधातोरनुप्रयोगः, **विदामक्रन्**= विदेर्लुँङ्याम्, गुणाऽभावः, लुँङो लुक्, लुँङ्परककृधातोरनुप्रयोगश्च निपात्यन्ते, छन्दसि= वेदे । उदाहरणेषु आद्येषु चर्तुषु षष्ठे च २-४-८० मन्त्रे...इति च्लेँर्लुक् । षष्ठं बहुवचनान्तम् । पञ्चमे-७-४-२८ रिङ् श...इति रिङ् ।

३-१-४३ च्लिँ लुँ- ३-२-११० लुँङ्-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- ३-१-२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-४४ **च्लेः** सिँच् ॥६६

अजैषीत् ।

(स्पृश-मृश-कृप-तृप-दृपां च्लेः सिँज्वा वाच्यः)

अस्प्राक्षीत्, अस्पार्क्षीत्, अस्पृक्षत् । अम्राक्षीत्, अमार्क्षीत्, अमृक्षत् ।

अक्राक्षीत्, अकार्क्षीत्, अकृक्षत् ।

अत्राप्सीत्, अतार्प्सीत्, अतृपत् ।

अद्राप्सीत्, अदार्प्सीत्, अदृपत् ।

३-१-४५ शल इगुपधादनिटः क्सः ॥४७

अस्पृक्षत् । अधुक्षत् ।

३-१-४६ श्लिष आलिङ्गने ॥

योगोऽयं विभज्यते-

प्र.३-१-४६ **श्लिषः** ॥ द्वि..३-१-४६

अश्लिक्षत् कन्यां देवदत्तः । अश्लेषि कन्या देवदत्तेन ।

द्वि. ३-१-४६ आलिङ्गने ॥

नेह- समश्लिषज्जतु काष्ठम् । समश्लिक्षत जतूनि काष्ठैः ।

३-१-४७ न दृशः ॥

अदर्शत्, अद्राक्षीत् ।

३-१-४८ णिश्रिद्रुस्रुभ्यः कर्तरि **चङ्** ॥५१

(क)

धातोः...यङ् ॥३-१-४३ (क) च्लिँ लुँङि ॥इति । (क)=धातोः=धातोः परतः, च्लिँरूच्लिँप्रत्ययो भवति, लुँङि=लुँङ्लकारे परे । इत्यर्थमुपदिश्य च्छात्रैरनुबन्धौ लोपयित्वा अभू+ल्+ति इति श्यामपाटचां लिखित्वा ३-१-४४ च्लेः सिँच्-सूत्रमुपदिशेत् ।

३-१-४४ च्लेः सिँच्- ३-१-४३- च्लिँ लुँङि-सूत्रानन्तरं सूत्रमिदं पाठचम् । च्लेः=च्लिँप्रत्ययस्य स्थाने, सिँच्=सिच् आदेशो भवति । इत्यर्थमुपदिश्यच्छात्रैर्लक्षणसमन्वयमनुबन्धफालनं च कारयित्वा अभू+स्+ति इति श्यामपाटचां लिखित्वा २-४-७७ गाति...सूत्रमुपदिशेत् । स्पृश-आद्येषु त्रिपु ३-१-४५ शल...इति क्सादेशे प्राप्ते, अन्त्ययोः, ३-१-५५ पुपा...इत्यङि प्राप्ते, विकल्पेन सिँच् । तदभावे यथाप्राप्तम् । उदाहरणेपु सिँचपक्षे ६-१-५८ अनु...इतिपाक्षिकोऽम् ।

३-१-४५ शल- इगुपधात्=इगुपधकात्, शलः=शलन्तात्, धातोः (३-१-२२) परस्य, अनिटः=इड्रहितस्य, च्लेः (३-१-४४) क्सः=क्स आदेशो भवति । यद्यपि च्लेः सिंजादिभिरादेशैर्भवितव्यमिति क्वचिदप्यश्रवणान्न सेट्त्वमनिट्त्वं वा, तथापि दुह्+ल्, इति स्थिते क्सस्यायं विपय इति सिँचा न भाव्यम् । क्सोऽपि तावन्न भवति यावदस्याऽनिट्त्वं न ज्ञातम्, तत्र लकारस्यैवेटः प्राप्तौ तन्निपेधात् सेट्त्वमनिट् त्वं च निरूप्यते, इति विशेपणोपपत्तिरिति हरदत्तः । उदाहरणयोः धातू स्पृश्दुहौ ।

प्र.३-१-४६ श्लिषः= श्लिप्धातोः परस्य, अनिटः (३-१-४५)
च्लेः (३-१-४४) क्सः (३-१-४५) । पुरस्तादपवादन्यायेन ३-१-५५ पुपा...
इत्यङोऽपवादो न तु ३-१-६६ चिण्...इति चिणः ।

द्वि.३-१-४६ आलि- श्लिपः (प्र.३-१-४६) अनिटः (३-१-४५) । च्लेः (३-१-४४) आलिङ्गने=आलिङ्गनेऽर्थे एव, क्सः (३-१-४५) । किमर्थोऽयं योगविभागः ? आलिङ्गने एवेति नियमार्थः ।
योगविभागसामर्थ्याच्च ३-१-४५ शल इगु...इत्यस्याऽप्ययं नियमः ।
तेन कर्मण्यातांप्रभृतिप्वनालिङ्गने सिँजेव भवति तु क्सः ।
समश्लिक्षत क्सादेशे तु समश्लिक्षन्तेत्यनिष्टं रूपं स्यात् ।

३-१-४७ न दृ-दृशः=दृश्धातोः परस्य, च्लेः (३-१-४४) न=क्सो न भवति । उदाहरणयोः ३-१-५७ इरि...इति पाक्षिकेऽङि ७-४-१६ ऋदृ...इति गुणः । अङोऽभावे क्सस्याऽनेन-निपेधे सिँचि ६-१-५७ सृजि...इत्यम् ।

३-१-४८ णिश्रि-७-४-७० अत आदेः-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-३-१-

(क) (ख)

-४३ च्लिँ लुँङि ॥ ३-१-४४ च्लेः सिँच् ॥ ३-१-४८ णिश्रिद्रुस्रुभ्यः (ख) कर्तरि (क) चङ् ॥ इति । णिश्रिद्रुस्रुभ्यः=ण्यन्ताच् श्रिद्रुस्रुभ्यश्च विहितस्य, (ख)=च्लेः=च्लिँस्थाने, चङ्=चङ् आदेशो भवति, कर्तरि+[(क)=लुँङि]=कर्त्रर्थे लुँङि परे । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा अचोरि+अ+ति इति श्यामपाटचां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अचूचुरत् । अशिश्रियत् । अदुद्रुवत् । असुस्रुवत् ।
(कमेरुपसंख्यानम्)
अचकमत ।

३-१-४९ विभाषा धेट्श्व्योः ॥५०

अदधत्, अधात्, अधासीत् । अशिश्वियत्, अश्वत्, अश्वयीत् ।

३-१-५० गुपेश्छन्दसि ॥५१

गृहानजूगुपतम्, अगौप्तम्, अगोपिष्टम्, अगोपायिष्टम् ।
भाषायां त्वन्तिमानि त्रीणि रूपाणि ।

३-१-५१ नोनयति-ध्वनयत्येलयत्यर्दयतिभ्यः ॥

काममूनयीः । मा त्वाग्निर्ध्वनयीत् ।
काममैलयीः । मैनमर्दयीत् । लोके तु-औननत् ।
अदध्वनत् । ऐलिलत् । आर्दिदत् ।

३-१-५२ अस्यति-वक्ति-ख्यातिभ्योऽङ् ॥५१

आस्थत् । अवोचत् । आख्यत् ।

३-१-५३ लिपिसिचिह्वश्च ॥५४

अलिपत् । असिचत् । अह्वत् ।

३-१-५४ आत्मनेपदेष्वन्यतरस्याम् ॥

अलिपत, अलिप्त । असिचत, असिक्त ।
आह्वत, आह्वास्त ।

लिखित्वा ७-४-१ णौ चङ्यु...सूत्रमुपदिशेत् । **कमे-** च्लेः (३-१-४४) चङ् (३-१-४८) कर्तरि (३-१-४८) लुङि (३-१-४३) ।

३-१-४९ विभा- धेट्श्व्योः= धेट्श्विभ्यां विहितस्य, च्लेः (३-१-४४) विभाषा= वा, चङ् (३-१-४८) कर्तरि (३-१-४८) लुँङि (३-१-४३) । उदाहरणेषु चङ्पक्षे ६-१-११ चङि इति द्वित्वम् । चङभावे धेटि-२-४-७८ विभा...इति इति पाक्षिकः सिँचो लुक् । तदभावे ७-२-७३ यम...इतीट्सँकौ । श्वयतौ ३-१-५८ जृस्त...इति पाक्षिकेऽङि ७-४-१८ श्वय...इत्यकारः । अङभावे सिँचि ७-२-१ सिँचि...इति प्राप्ताया वृद्धेः ७-२-५ ह्म्यन्त...इति प्रतिषेधः ।

३-१-५० गुपेः =गुप्धातोर्विहितस्य, च्लेः (३-१-४४) विभाषा (३-१-४९) चङ् (३-१-४८) कर्तरि (३-१-४८) लुङि (३-१-४३) छन्दसि= वेदे । **अजूगुपतम्** ६-१-७ तुजा...इत्यभ्यासस्य दीर्घः ।

३-१-५१ नोन-ऊन...तिभ्यः= ऊनि ध्वनि एलि अर्दि इत्येतेभ्यो धातुभ्यो विहितस्य, च्लेः (३-१-४४) न= चङ् न भवति, छन्दसि (३-१-५०) । उदाहरणेषु ७-२-१ सिँचि...इति प्राप्ताया, वृद्धेः ७-२-५ ह्म्यन्त...इति प्रतिषेधः । आद्यास्त्रयो धातवश्चुरादित्वाण्णिजन्ताः । अर्दिस्तु हेतुमण्ण्यन्तः ।

३-१-५२ अस्य...तिभ्यः =अस् (दैवादिकः) वच् ख्याधातुभ्यो विहितस्य, च्लेः (३-१-४४) अङ् =अङादेशो भवति, कर्तरि (३-१-४८) लुङि (३-१-४३) । पुषादित्वात् सिद्धे अस्यतिग्रहणमात्मनेपदार्थम्-निरास्थत । अत्र १-३-३० निस...सूत्रस्थेन...उप...इति वार्तिकेनाऽत्मनेपदम् । उदाहरणेषु क्रमशः- ७-४-१७ अस्य...इति थुँक् । ७-४-२० वच...इत्युम् । ६-४-६४ आतो...इत्याकारलोपः ।

३-१-५३ लिपि...ह्वः =लिप् सिच् ह्वाधातुभ्यो विहितस्य, च्लेः (३-१-४४) अङ् (३-१-५२) कर्तरि (३-१-४८) लुँङि (३-१-४३) ।

३-१-५४ आत्म- लिपिसिचिह्वः (३-१-५३) च्लेः (३-१-४४) अन्यतरस्याम्= वा, अङ् (३-१-५२) कर्तरि (३-१-४८) लुँङि (३-१-४३) आत्मनेपदेषु= आत्मनेपदेषु परेषु । **अलिप्त असिक्त** अङभावे सिँच् । तस्य १-२-११ लिँङ् सिँ...इति कित्वान्न गुणः । ८-२-२६ झलो...इति सलोपः ।

३-१-५५ पुषा- ७-४-२ नाग्लोपि...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

३-१-४४ च्लेँ सिँच् (क) ॥ ३-१-५२ अस्यति...भ्यः अङ् (ख) ॥ ३-१-४३ च्लिँ लुँङि (ग) ॥ ३-१-५५ पुषादि...तः (क) (ख)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-५५ पुषादि-द्युताद्य्लृँदितः परस्मैपदेषु ॥५८

अपुषत् । अद्युतत्, अद्योतिष्ट । अगमत् ।

३-१-५६ सर्तिशास्त्यर्तिभ्यश्च ॥

असरत् । अशिषत् । आरत् । आत्मनेपदेष्वपि-समारत ।

३-१-५७ इरितो वा ॥५८

अरुधत्, अरौत्सीत् ।

३-१-५८ जृस्तम्भुँ म्रुचुँ म्लुचुँ-ग्रुचुँग्लुचुँग्लुञ्चुँश्विभ्यश्च ॥

अजरत्, अजारीत् । अस्तभत्, अस्तम्भीत् । अम्रुचत्, अम्रोचीत् । अम्लुचत्, अम्लोचीत् । अग्रुचत्, अग्रोचीत् । अग्लुचत्, अग्लोचीत् । अग्लुञ्चत्, अग्लुञ्चीत् ।

३-१-५९ कृमृदृरुहिभ्यश्छन्दसि ॥

अकरत् । अमरत् । अदरत् । अरुहत् ।

लोके तु अकार्षीत् । अमृत । अदारीत् । अरुक्षत् ।

३-१-६० चिण् ते पदः ॥ ६५, ६६

अपादि ।

(ग) परस्मैपदेषु ॥इति । पुषादि-द्युताद्य्लृँदितः= श्यन्विकारणपुषादेर्द्युतादेर्लृँदितश्च धातोः विहितस्य, (क)= च्लेः= च्लेँः स्थाने, (ख)= अङ्= अङ् आदेशो भवति (ग) =लुँङि, परस्मैपदेषु= परस्मैपदेषु परेषु । इति सूत्रार्थः । उदाहरणं यथा- गम्लृँ= गम् सृप्लृँ= सृप् इत्येताभ्यां धातुभ्यां लुङ्प्रत्यये च्लिँप्रत्ययावधि च्छात्रैः साध्यमानम् अगम्+ल+ति, असृप्+ल+ति इति श्यामपाट्यां लिखित्वा ३-१-४४ च्लेँः सिँच्-सूत्रं बाधयित्वा छात्रैः प्रकृतसूत्र (३-१-५५) समन्वयमग्रिमप्रक्रियां च साधयेत् । अगमत् । असृपत् । इत्यादि । एँकारानुबन्धफलम् ७-२-७ अतो...सूत्रेण प्राप्ताया वृद्धेः ७-२-५ ह्म्यन्त...सूत्रेण निषेध इति वदन् सूत्रं तदुपदिशेत् ।

३-१-५६ सर्ति...तिभ्यः= सृ शास् ऋ इत्येतेभ्यो विहितस्य, च्लेँः (३-१-४४) अङ् (३-१-५२) कर्तरि (३-१-४८) लुँङि (३-१-४३) । अत्र परस्मैपदेष्विति न सम्बध्यते, पृथग्योगकरणसामर्थ्यात् । उदाहरणेषु आद्यन्तयोः ७-४-१६ ऋदृ...इति गुणः । मध्ये- ६-४-३४ शास...इतीत् । **समारत** १-३-२९ समो...सूत्रस्थेन...अर्ति...इत्यनेनात्मनेपदम् ।

३-१-५७ इरि- ८-३-७८ इणः...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ) (ङ)

३-१-४४ च्लेँ सिँच् ॥ ३-१-४८ णिश्रि... कर्तरि ३-१-५२ अस्यति...अङ् च्लिँ लुँङि ३-१-५५ पुषादि...परस्मैपदेषु ॥ ३-१-५७ इरितो (क) वा (ग) (ख) (घ) (ङ) ॥ इति । इरितः= इरित्संज्ञकाद् धातोः विहिस्य, (क)= च्लेँः= च्लिँस्थाने वा+ [(ग)= अङ्)] = विकल्पेन अङ् आदेशो भवति (ख)= कर्तरि, (घ) लुङि, (ङ)=परस्मैपदेषु= परस्मैपदेषु परेषु । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा यद्यप्यत्रत्योऽङ् ३-४-११४ आर्ध...सूत्रेणाऽर्धधातुकं तेन ७-३-८६ पुँग...सूत्रेण गुणप्राप्तिस्तथापि १-१-५ क्क्ङिति...सूत्रेण निषेधान्न गुण इतिच्छात्रान् बोधयेत् । अरुधत् । अरुधताम् । अरुधन् । प्रकृत ३-१-५७ सूत्राप्रवृत्तौ तु ३-१-४४ च्लेँः सिँच् सूत्रप्रवृत्तावग्रिमप्रक्रियायां सत्याम् अरुध्+स्+ईत् इति श्यामपाट्यां लिखित्वा ७-३-८६ पुँग...सूत्रं बाधयित्वा ७-२-३ वदव्रज... सूत्रमुपदिशेत् ।

३-१-५८ जृस्त-....श्विभ्यः = जृप्रभृतिभ्यो विहितस्य, च्लेँः (३-१-४४) वा (३-१-५७) अङ् (३-१-५२) परस्मैपदेषु (३-१-५५) । अजरत् ७-४-१६ ऋदृ...इति गुणः । अस्तभत् ६-४-२४ अनि...इति न लोपः । अग्लुञ्चत् । ग्लुचुँ ग्लुञ्चुँ अनयोरन्यतरेण सिद्धे द्वयोरुपादानसामर्थ्यान्नलोपो नेत्याहुः ।

३-१-५९ कृ...हिभ्यः=कृमृ- प्रभृतिभ्यो विहितस्य, च्लेँः (३-१-४४) अङ् (३-१-५५) परस्मैपदेषु (३-१-५५) छन्दसि=वेदे । **अमरत्** छन्दसि व्यत्ययेन परस्मैपदम् । आद्येषु त्रिषु प्राग्वद् गुणः ।

३-१-६० चिण् ते- पदः= पद्धातोर्विहितस्य, च्लेँः (३-१-४४) चिण्= चिण् आदेशो भवति, ते = तशब्दे परे । **अपादि** ६-४-१०४ चिणो...इति तशब्दस्य लुक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-६१ दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् ॥६३

अदीपि, अदीपिष्ट । अजनि, अजनिष्ट ।

अबोधि, अबुद्ध । अपूरि, अपूरिष्ट ।

अतायि, अतायिष्ट । अप्यायि, अप्यायिष्ट ।

३-१-६२ अचः कर्मकर्तरि ॥६५

अकारि कटः स्वयमेव, अकृत वा ।

३-१-६३ दुहश्च ॥

अदोहि गौः स्वयमेव, अदुग्ध वा ।

३-१-६४ न रुधः ॥६५

अन्ववारुद्ध गौः स्वयमेव ।

३-१-६५ तपोऽनुतापे च ॥

अतप्त तपस्तापसः । अन्वतप्त पापेन ।

३-१-६६ चिण् भावकर्मणोः ॥६७

अभावि । अपाठि ।

३-१-६७ सार्वधातुके यक् ॥८२

भूयते । क्रियते ।

३-१-६८ कर्तरि शप् ॥८८

श्यामः पठति ।

३-१-६१ दीप...यिभ्यः = दीप्प्रभृतिभ्यो विहितस्य, च्लेः (३-१-४४) अन्यतरस्याम्=वा, चिण्+ते (३-१-६०)।

३-१-६२ अचः= अजन्ताद् धातोः विहिस्य, च्लेः (३-१-४४) अन्यतरस्याम् (३-१-६१) चिण् (३-१-६०) कर्मकर्तरि, ते (३-१-६०)।

३-१-६३ दुहः = दुह्धातोर्विहितस्य, च्लेः (३-१-४४) अन्यतरस्याम् (३-१-६१) चिण् (३-१-६०) कर्मकर्तरि, (३-१-६२) ते (३-१-६०)।

३-१-६४ न रु- रुधः= रुधधातोर्विहितस्य, च्लेः (३-१-४४) न= चिण् न भवति, कर्मकर्तरि (३-१-६२)।

३-१-६५ तपः= तप्धातोर्विहितस्य च्लेः (३-१-४४) न (३-१-६४) कर्मकर्तरि ।(३-१-६२) अनुतापे च= पश्चात्तापेऽर्थे गम्ये च । अनुतापग्रहणं तस्मिन्नर्थे गम्ये भावकर्मणोरपि प्रतिषेधार्थम् ।

३-१-६६ चिण् भा- ६-४-८८ भुवो...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो

(क) (ख)

यथा- ३-१-४४ च्लेः सिँच् ॥ ३-१-६० चिण् ते पदः ॥ ३-१-६६ (क) चिण् भावकर्मणोः (ख) ॥ इति । (क)= च्लेः = च्लिँस्थाने, चिण्= चिण् आदेशो भवति, भावकर्मणोः= भावे कर्मणि च विहिते, (ख)= ते = तशब्दे परे । इत्यर्थमुपदिश्य लक्षणसमन्वयमनुबन्धलोपं च छात्रैः साधयित्वा 'अभू+इ+त' इति श्यामपाटचां लिखित्वा ७-३-८४ सार्व...सूत्रं बाधयित्वा ७-२-११५ अचो...सूत्रमुद्बोध्य लक्षणसमन्वयमग्रिमसन्धिं च च्छात्रैः साधयित्वा 'अभावि+त 'इति श्यामपाटचां लिखित्वा ६-४-१०४ चिणो लुक्-सूत्रमुपदिशेन् ।

३-१-६७ सार्व- १-३-१३ भाव कर्मणोः-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

३-१-२२ धातोः...यङ् ॥ ३-१-६६ चिण् भावकर्मणोः ॥ ३-१-६७ (ख) सार्वधातुके (क) यक् ॥ इति । (क)= धातोः= धातोः परतः, यक्= यक् प्रत्ययो भवति, (ख)= भावकर्मणोः+सार्वधातुके = भाववाचिनि कर्मवाचिनि च सार्वधातुके परे । अत्र लक्षणसमन्वयमनुबन्धफालनञ्चच्छात्रैः साधयेत् । अथ 'पठ्+य+न' इति श्यामपाटचां लिखित्वा १-१-६३ अचोऽन्त्यादि टि-सूत्रमुपस्थापयेत् ।

३-१-६८ कर्त- ३-४-११३ तिङ्शित्..सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- ३-१-१

(क) (ख) (ग) (घ)

प्रत्ययः ॥ ३-१-२ परश्च ॥ ३-१-२२ धातोः ....यङ् ॥ ३-१-६७ सार्वधातुके यक् ॥ ३-१-६८ कर्तरि (घ) (ग) (ख) शप् (क) इति । (ग)= धातोः, (ख)= परः=परतः, शप् +(क)= प्रत्ययः=शप्प्रत्ययो भवति, कर्तरि=कर्त्रर्थे (घ)= सार्वधातुके = सार्वधातुके परे । इत्यर्थमुपदिश्य पूर्वं लकारस्यार्थः कर्ता स्वीकृतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-६९ दिवादिभ्यः श्यन् ॥७२

दीव्यति ।

३-१-७० वा भ्राश-भ्लाश-भ्रमुँ-क्रमुँ-क्लमुँ-त्रसि-त्रुटि-लषः ॥७२

भ्राश्यते, भ्राशते । भ्लाश्यते, भ्लाशते । भ्राम्यति, भ्रमति । क्राम्यति, क्रामति । क्लाम्यति, क्लामति । त्रस्यति । त्रसति । त्रुटचति, त्रुटति । लष्यति, लषति ।

३-१-७१ यसोऽनुपसर्गात् ॥

यस्यति, यसति । अनुपसर्गादित्युक्तेरिह नित्यम्-प्रयस्यति ।

३-१-७२ संयसश्च ॥

संयस्यति, संयसति ।

अतस्तत्स्थाने जातस्य तिङश्चाऽर्थः कर्तैवेत्युद्बोधनपुरस्सरं लक्षणसमन्वयायच्छात्रान् प्रवर्तयेत् । अथ पठ्+शप्+ति इति श्यामपाटचां लिखित्वा सति सम्भवेऽनुबन्धफालनप्रक्रियामपिच्छात्रैः साधयेत् । अथ पठ्+अ+ति इति श्यामपाटचां लिखित्वा छात्रैर्वर्णसंमेलनं कारयेत् । पठति । इमं प्रयोगं द्वित्रैर्दिनैः सम्यगभ्यासयेत् । अस्मिन् प्रयोगे सम्यग् ज्ञाते तिङन्तप्रक्रिया सर्वथा सरला भविष्यति नाऽन्यथेतिच्छात्रान् प्रवर्तयेत् । **तस्**-अथ रामश्यामौ पठतः, इति वाच्ये 'पठतः' इति प्रयोगः कथं सिध्येदिति जिज्ञासायां पठ्धातोः सर्वाऽपि प्रक्रिया पठति इत्यत्रेव । केवलमत्र विशेषस्त्वेषः- श्यामःपठति इत्यत्र कर्ता एकः । रामश्यामौ पठतः इत्यत्र तु कर्तारौ रामःश्यामश्च द्वौ स्तः । तिङ् च कर्तारं बोधयति । (प्रकृते रामश्यामौ बोधयति) अतः १-४-२२ द्व्येक...सूत्रेण द्विवचनं (तस्) भवति । पठ्+तस् इति । अथ पूर्ववत् सार्वधातुकसंज्ञां शप्प्रत्ययं च च्छात्रैः साधयित्वा रूपं बोधयेत् । रुँत्वविसर्गौ च न विस्मरणीयौ । पठतः । इति ।

झि-अथ 'रामश्यामविष्णुमित्राः पठन्ति' इति वाच्ये 'पठन्ति' इति प्रयोगः कथं सिध्येदिति जिज्ञासायामपि पठ्धातोः सर्वां पूर्वप्रक्रियां 'पठति' इत्यत्रेव च्छात्रैः साधयन् १-४-२२ द्व्येकं...सूत्रेण १-४-२१ सूत्रस्य विनिमयमुद्बोध्य 'पठ्+झि' इति श्यामपाटचां लिखित्वाऽग्रिमप्रक्रियां 'पठति' इत्यत्रेवच्छात्रैरुच्यमानां श्रुत्वा 'पठ+झि' इति श्यामपाटचां लिखित्वा ७-१-३ झोऽन्तः-सूत्रमुपदिशेत् ।

३-१-६९ दिवा- ७-४-२५ अकृत्सार्व...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- ३-१-२२ धातोः (क) ....यङ् ॥ ३-१-६७ सार्वधातुके (ख) यक् ॥ ३-१-६८ कर्तरि (ग) शप् ॥ ३-१-६९ दिवादिभ्यः (क) श्यन् (ग) (ख) इति । दिवादिभ्यः= दिवादिगणपठितेभ्यः, (क)= धातोः= धातुभ्यः, श्यन्= श्यन् प्रत्ययो भवति, (ग)= कर्तरि= कर्त्रर्थे, (ख)= सार्वधातुके = सार्वधातुके परे । इत्यर्थमुपदिश्य लक्षणसमन्वयमनुबन्धफालनञ्च च्छात्रैःकारयित्वा दिव्+य+ति इति श्यामपाटचां लिखित्वाऽधोनिर्दिष्टरूपेणच्छात्रा बोधयितव्याः । यथा-वत्साः? यथा मोदते इत्यत्र मुद्+अ+त इत्यवस्थायां शपोऽवशिष्टोऽकारः शित्त्वात् सार्वधातुकम्, अतस्तन्निमित्तकः ७-३-८६ पुँग...सूत्रेण गुणो भवति । तथाऽत्रापि यद्यपि श्यनोऽवशिष्टो य इति सार्वधातुकं तु वर्तते परं तु गुणस्तु न भवति । पिद्भिन्नत्वेन १-२-४ सार्व...सूत्रेण ङिद्वत्त्वेन १-१-५ क्क्ङिति...सूत्रेण गुणस्य निषेधात् । इति । अथ शिक्षकः ८-२-७७ हलि च- सूत्रमुपदिशेत् ।

३-१-७० वा भ्रा- भ्राश...लषः= भ्राशप्रभृतिभ्यो धातुभ्यः, वा=विभाषया, श्यन् (३-१-६९) कर्तरि (३-१-६८) सार्वधातुके (३-१-६७) ।

३-१-७१ यसो- अनुपसर्गात्=उपसर्गरहितात्, यसः = यस्धातोः, प्राग्वत् ।

३-१-७२ संयसः = समुपसर्गपूर्वकात्, यसः (३-१-७१) **प्राग्वत्** ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-७३ स्वादिभ्यः श्नुः ॥७६

सुनोति । सुनुते ।

३-१-७४ श्रुवः शृ च ॥

शृणोति ।

३-१-७५ अक्षोऽन्यतरस्याम् ॥७६

अक्ष्णोति, अक्षति ।

३-१-७६ तनूकरणे तक्षः ॥

तक्ष्णोति, तक्षति वा काष्ठम् ।

तनूकरणे इत्युक्तेर्नेह-वाग्भिः संतक्षति । भर्त्सयतीत्यर्थः ।

३-१-७७ तुदादिभ्यः शः ॥

तुदति । तुदते ।

३-१-७३ स्वादि- ६-१-६२ धात्वादेः... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

३-१-२२ धातो...यङ् ॥ ३-१-६७ सार्वधातुके यक् ॥ ३-१-६८ कर्तरि शप् ॥ ३-१-७३ स्वादिभ्यः (क) श्नुः (ग) (ख) ॥इति । स्वादिभ्यः= स्वादिगणपठितेभ्यः (क)= धातोः= धातुभ्यः, श्नुः= श्नुप्रत्ययो भवति, (ग)= कर्तरि, (ख)= सार्वधातुके । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा शिक्षकोऽधोनिर्दिष्टरूपेण बोधयेत् । यथा- वत्साः ? श्नुप्रत्ययोऽप्यनुबन्ध- विनिर्मुक्तो 'नु' इति सार्वधातुकसंज्ञो भवति शित्त्वादिति तु यूयं जानीथैव । परन्तु तन्निमित्तको धातोर्गुणस्तु न भवति । पिद्भिन्नत्वेन ङिद्वद्भावेन गुणस्य निषेधात् । श्नु (नु) प्रत्ययोकारस्य स्थाने तु तिप् सिप् मिप् इत्येतेषु परेषु गुणो भवति नान्यत्रेति । सुनोति । सुनुतः । ७-१-४ अद...सूत्रोदाहरणे 'जुह्वति' इत्यत्रेव निर्वाहः कार्यः । सुन्वन्ति । सुनोषि । सुनुथः । सुनुथ । सुनोमि । वस्मसोस्तु- शिक्षकेण सुनु+वस् सुनु+मस् इति श्यामपाटचां लिखित्वा ६-४-१०७ लोपश्चा...सूत्रमुपदेश्यम् । **३-१-७४ श्रुवः**= श्रुधातोः, श्नुः (३-१-७३) शृ च= श्रुधातोःस्थाने शृ इत्यादेशश्च भवति, कर्तरि (३-१-६८) सार्वधातुके (३-१-६७) ।

३-१-७५ अक्षः= अक्षधातोः, अन्यतरस्याम्=वा, श्नुः (३-१-७३) कर्तरि (३-१-६८) सार्वधातुके (३-१-६७) ।

३-१-७६ तनू- तक्षः= तक्षधातोः, प्राग्वत्, तनूकरणे=शातनेऽर्थे ।

३-१-७७ तुदा- ६-४-१०६ उतश्च...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

३-१-२२ धातोः...यङ् ॥ ३-१-६७ सार्वधातुके यक् ॥ ३-१-६८ कर्तरि शप् ॥ ३-१-७७ तुदादिभ्यः (क) शः (ग) (ख) ॥ इति तुदादिभ्यः= तुदादिगणपठितेभ्यः, (क)= धातोः= धातुभ्यः, शः= शप्रत्ययो भवति, (ग)= कर्तरि, (ख)= सार्वधातुके । लक्षणसमन्वयं छात्रैः करयित्वा 'तुद्+अ+ति' इति श्यामपाटचां लिखित्वा शिक्षकोऽधोनिर्दिष्टरूपेणच्छात्रान् बोधयेत् । यथा- अयि वत्साः ? यद्यपि शप्प्रत्यये शप्रत्यये चाऽनुबन्धविनिर्मुक्ते 'अ' इत्यवशिष्यते सार्वधातुकसंज्ञा चोभयोर्भवति शित्त्वात् । अत आपातनो विकरणभेदे फलं न प्रतीयते । नथापि शपि सति मोदते इत्यादौ गुणो भवति । शे तु पिद्भिन्नत्वेन ङिद्वद्भावात् तन्निमित्तको गुणो न भवति १-१-५ क्क्ङिति...सूत्रेण निषेधात् । इति विकरणभेदे फलं स्फुटमेवेति । तुदत् । तुदताम् । अतुदत् । अतुदत । तुदेत् । तुदेत । इत्यादि-रूपाणि च्छात्रैः साध्यमानानि स्थालीपुलाकन्यायेन शिक्षकः शृणुयात् । इत्थं तुदादौ विशेषकार्यं शपो बाधकः शप्रत्ययो भवति । तस्य पिद्भिन्नत्वेन १-२-४ सार्व...सूत्रेण ङित्वात् १-१-५ क्क्ङिति...सूत्रेण गुणप्रतिषेधो भवतीति स्फुटं बोधयेत् । कर्मणि तु यगेव । तुद्यते । तुद्यताम् । अतुद्यत । तुद्येत । इत्यादि । **अथ रुधादि**-गणप्रयुक्तं विशेषकार्यं शपो बाधकः श्नम् भवतीति बोधनपुरस्सरं रुधादिधातुपाठं दर्शयता शिक्षकेण एते धातवो रुधादयः । इति कथयता रुध् (रुधिर्) धातोः कर्तरि लँट पठति इत्यत्रेव प्रक्रियाप्रसङ्गे रुध्+ति इति श्यामपाटचां लिखित्वा शपं छात्रैर्बाधयित्वा ३-१-७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-७८ रुधादिभ्यः श्नम् ॥

रुणद्धि । रुन्द्धे ।

३-१-७९ तनादिकृञ्भ्य उः ॥ ८०

तनोति । तनुते । करोति ।

३-१-८० धिन्विकृण्व्योर च ॥

धिनोति । कृणोति ।

३-१-८१ क्र्यादिभ्यः श्ना ॥ ८२

क्रीणाति । क्रीणीते ।

३-१-८२ स्तन्भुँ-स्तुन्भुँ-स्कन्भुँ-स्कुन्भुँ-स्कुञ्भ्यः श्नुश्च ॥

रुधादिभ्यः...सूत्रमुपदेश्यम् ।

३-१-७८ रुधा- ३-१-७७ तुदादिभ्यः शः- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्रापि श्यामपाटीप्रयोगः पूर्वसूत्रवत् केवलं तत्रत्येन तुदा...सूत्रेण ३-१-७८ रुधा...सूत्रं विनिमातव्यम् । रुधादिभ्यः= रुधादिगणपठितेभ्यो धातुभ्यः, श्नम्= श्नम् प्रत्ययो भवति, कर्तरि सार्वधातुके । इत्यर्थमुपदिश्य लक्षणसमन्वयमनुबन्धफालनं चच्छात्रैः कारयित्वा १-१-४६ मिद...सूत्रमुद्बोधयितव्यम् । ततश्च शिक्षकश्छात्रैः साध्यमानम् रु+न+ध्+ति= रु+ण+ध्+ति इति श्यामपाटचां लिखित्वा ८-२-४० झष...सूत्रमुपदिशेत् ।

३-१-७९ तना- ८-२-७५ दश्च-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्रापि श्यामपाटीप्रयोगः ३-१-७७ तुदा...सूत्रवत् । केवलमत्र ३-१-७७ तुदा...सूत्रेण प्रकृतं ३-१-७९ तना...सूत्रं विनिमातव्यम् । तनादिकृञ्भ्यः (तनादिधातुपाठप्रदर्शनपुरस्सरम्)= तनादिगणपठितेभ्यो धातुभ्यः कृञ्धातोश्च, उः= उप्रत्ययो भवति, कर्तरि सार्वधातुके । इत्यर्थमुपदिश्य च्छात्रैर्लक्षणसमन्वयं कारयित्वा तन्+उ+ति इति श्यामपाटचां लिखित्वा सत्यावश्यकेऽधोनिर्दिष्टरूपेण शिक्षकश्छात्रान् बोधयेत् । यथा- वत्साः ? अत्रत्यस्य विकरणस्य (उप्रत्ययस्य) सार्वधातुकसंज्ञा न भवति, शित्त्वाऽभावात् । तस्योकारस्य तु पिति ७-३-८४ सार्व...सूत्रेण गुणो भवतीति । तनोति । तनुतः । तन्वन्ति । तनुते । तन्वाते । तन्वते । तनोतु । तनुताम् । अतनोत् । अतनुत । तनुयात् । तन्वीत । इत्यादीनि रूपाणिच्छात्रैः साधयेत् । इत्थं तनादौ विशेषकार्यं शपो बाधक उप्रत्ययो भवतीति स्फुटं बोधयेत् । कर्मणि तु यगेव । तन्यते । तन्यताम् । अतन्यत । तन्येत । इत्यादि । ६-४-४४ तनो...सूत्रं तुच्छात्राणां प्रगतिं विचार्योपदिशेन्नैव वोपदिशेत् । अथ क्र्यादि धातुपाठं दर्शयता शिक्षकेण 'एते धातवः क्र्यादयः' एषु सर्वेषु विकरणं शपो बाधकः श्ना प्रत्ययो भवतीति कथयता क्री (डुक्रीञ्) धातोः कर्तरि लँटि पठति इत्यत्रेव प्रक्रिया-प्रसङ्गे क्री+ति इति श्यामपाटचां लिखित्वा शपं बाधयित्वा ३-१-८१ क्र्यादिभ्यः श्ना -सूत्रमुपदेश्यम् ।

३-१-८० धिन्विकृण्व्योः= धिन्व्कृण्व् इत्यनयोः स्थाने, अ= अ इत्ययमादेशो भवति, उः (३-१-७९) च= ताभ्याम् उप्रत्ययोऽपि भवति, कर्तरि (३-१-६८) सार्वधातुके (३-१-६७) । सूत्रे धिन्विकृण्व्योरिति आदेशापेक्षं षष्ठयन्तमपि प्रत्ययापेक्षं पञ्चम्यन्ताय कल्पत इति बोध्यम् ।

३-१-८१ क्र्यादि- ३-१-७९ तनादि...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्रापि श्यामपाटीप्रयोगः ३-१-७७ तुदा...सूत्रवत् । केवलमत्र ३-१-७७ तुदा...सूत्रेण प्रकृतं ३-१-८१ क्र्यादि...सूत्रं विनिमातव्यम् । क्र्यादिभ्यः= क्री प्रभृतिभ्यः= क्र्यादि-गणपठितेभ्यो धातुभ्यः, श्ना= श्ना प्रत्ययो भवति, कर्तरि सार्वधातुके । इत्यर्थमुपदिश्यच्छात्रैर्लक्षणसमन्वयं कारयित्वा शिक्षकः क्री+ना+ति इति श्यामपाटचां लिखित्वा बोधयेत् । वत्साः ? अत्रत्यस्य विकरणस्य शित्त्वात् सार्वधातुकसंज्ञा भवति । परन्तु पिद्भिन्नत्वेन ङित्त्वात्तन्निमित्तको गुणस्तु न भवति । इति । अथ सत्यावश्यके ८-४-२ अट्कु...सूत्रमुद्बोधयेत् । क्रीणाति । नसि-क्रीणा+तस् इति श्यामपाटचां लिखित्वा १-२-४ सार्व...सूत्रोद्बोधनपुरस्सरम् ६-४-११३ ई ह...सूत्रमुपस्थापयेत् ।

३-१-८२ स्तन्भु...स्कुञ्भ्यः=स्तन्भुँ प्रभृतिभ्यो धातुभ्यः, श्नुः= श्नुप्रत्ययो भवति, श्ना (३-१-८१) च,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तभ्नाति । स्तभ्नोति । स्कुनाति । स्कुनोति ।

३-१-८३ हलः श्नः शानज्झौ ॥८४

गृहाण ।

३-१-८४ छन्दसि शायजपि ॥८६

गृभाय जिह्वया मधु । बधान पशुम् ।

३-१-८५ व्यत्ययो बहुलम् ॥

आण्डा शुष्मस्य भेदति । भिनत्तीति प्राप्ते । स च न मरति । म्रियत इति प्राप्ते । इन्द्रो वस्तेन नेषतु । नयतु इति प्राप्ते । तरुषेम वृत्रम् । बहुलग्रहणं सर्वोपाधिव्यभिचारार्थम् ।

सुँप्तिङुपग्रहलिङ्गनराणां
कालहलच्स्वरकर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां
सोऽपि च सिध्यति बाहुलकेन ॥

३-१-८६ लिङ्याशिष्यङ् ॥

मन्त्रं वोचेमाऽग्नये ।

(दृशेरग्वक्तव्यः)

पितरं च दृशेयं मातरं च ।

३-१-८७ कर्मवत् कर्मणा तुल्यक्रियः ॥९०

पच्यते फलम् । भिद्यते काष्ठम् । अपाचि फलं

कर्तरि (३-१-६८) सार्वधातुके (३-१-६७) । आद्याश्चत्वारो धातवः सौत्राः । इति काशिका । सर्वे रोधनार्था इत्येके । माधवस्तु प्रथमतृतीयौ स्तम्भार्थौ द्वितीयो निष्कोषणार्थश्चतुर्थो धारणार्थ इत्याहेति-दीक्षितः ।

३-१-८३ हलः= हलः परस्य, श्नः= श्नाप्रत्ययस्य स्थाने, शानच्, =शानच् आदेशो भवति, हौ=हौ परे ।

३-१-८४ छन्द- हलः+श्नः (३-१-८३) शायच्= शायच् आदेशः, शानच् (३-१-८३)+ अपि=शानच् आदेशोऽपि भवति, हौ (३-१-८३) छन्दसि=वेदे । **गृभाय** ८-२-३५ आह...सूत्रस्थ-हृग्र...इति हकारस्य भकारः ।

३-१-८५ व्यत्य- विकरणानाम्, बहुलम्=बाहुल्येन, व्यत्ययः=विपर्ययो भवति, छन्दसि (३-१-८४) । **मरति** व्यत्ययेन शप् परस्मैपदं च । **नेषतु** व्यत्ययेन शप्सिँपौ । **तरुषेम** व्यत्ययेन शप् सिँप् उप्रत्ययः । पूर्वसूत्राद् 'अपि' इत्यनुवर्त्य 'व्यत्ययोऽपि'= व्यत्ययो यथाप्राप्तमपि भवति, इत्यर्थलाभेन सकलेष्टसिद्धौ पुनर्बहुलग्रहणं सर्वेषां प्रकृतानामप्रकृतानाञ्च विधीनां व्यभिचारार्थमिति ज्ञायते । ते च विधयः के ? इति जिज्ञासायामुच्यते-सुँप्तिङित्यादि । सुपां व्यत्ययः-धुरि दक्षिणायाः । दक्षिणस्यामिति प्राप्ते । तिङाम्-ये यूपाय तक्षति । तक्षन्तीति प्राप्ते । उपग्रहशब्देन परस्मैपदात्मनेपदे लक्ष्येते । स ब्रह्मचारिणमिच्छते । इच्छतीति प्राप्ते । ऊर्मिर्युध्यति । युध्यते इति प्राप्ते । लिङ्गस्य-मधोस्तृप्ता इवासते । मधुन इति प्राप्ते । नराणाम्= पुरुषाणाम् । अथोपचारैर्दशभिर्वियूयाः । वियूयादिति प्राप्ते । कालः= कालवाचि-प्रत्ययः । तद्व्यत्ययः सोऽग्नीनाधास्यमानेन । लुँटो विषये लृँट् । हलाम्-शुफितं मुखबीजम् । शुभितमिति प्राप्ते । अचाम्-उपगायन्तु मां पत्नयो गर्भिणयः । दीर्घ (ईकार) स्य स्थाने ह्रस्व (इकार): । स्वराणाम्-गवामिव श्रियसे । नित्त्वादाद्युदात्तत्वे प्राप्ते मध्योदात्तता । कर्तृशब्दः कारकमात्रपरः । तद्व्यत्ययः-आसादयद्भिरुभयोर्वेदाः । आसादयद्भ्य इति प्राप्ते । यङाम्- यङ् इति ३-१-२२ धातो...यङ् इतिसूत्रघटक-यशब्दादारभ्य ३-१-८६ लिङ्याशिष्यङ्-सूत्र-घटक-ङकारेण प्रत्याहारः । तद्व्यत्ययः- आण्डा शुष्मस्य भेदति । भिनत्तीति प्राप्ते । स च न मरति । म्रियत इति प्राप्ते । इन्द्रो वस्तेन नेषतु । नयतु इति प्राप्ते । इन्द्रेण युजा तरुषेम वृत्रम् । तरेम इति प्राप्ते । बहुलग्रहणं सर्वोपाधिव्यभिचारार्थम् । तेन सुँप्तिङुपग्रहेत्यादि कारिका सिद्धा ।

३-१-८६ लिँङ्या- आशिषि+लिँङि= आशिषि लिँङि परे, धातोः (३-१-२२) अङ्=अङ् प्रत्ययो भवति, छन्दसि (३-१-८४) । शबाद्यपवादः । ३-४-११७ छन्द...इति सार्वधातुकसंज्ञा । **वोचेम** ७-४-२० वच...इत्युम् । **दृशेः**= दृश् धातोः, अक् प्रत्ययो वाच्यः, आशिषि+लिँङि (३-१-८६), छन्दसि (३-१-८४) । अङोऽपवादः । अङि सति तु ७-४-१६ ऋदृ..इति गुणःस्यात् ।

३-१-८७ कर्म- अत्रसूत्रे कर्मशब्दः १-३-१४ कर्त...इत्यत्रेव क्रियावाची पारिभाषिककर्मवाची वा ? नाद्यः, तथा सति क्रियाया यया कयाचिदपि क्रियया तुल्यत्वेन क्रियया तुल्यक्रियः= तुल्या क्रिया यस्येति किमुक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयमेव । अभेदि काष्ठं स्वयमेव । कारिष्यते कटः स्वयमेव ।

यत्र क्रियाकृतो विशेषो दृश्यते, तत्रैव कर्मवद्भावो नाऽन्यत्र । गच्छति ग्रामः । आरोहति हस्ती । पक्वापक्व-फलेषु भिन्नाभिन्नकाष्ठेष्विव गतागतग्रामेषु आरूढानारूढहस्तिषु च क्रियाकृतो विशेषो नोपलभ्यते ।

(सकर्मकाणां प्रतिषेधो वक्तव्यः)

अजा ग्रामं नयति ।

(दुहिपच्योर्बहुलं सकर्मकयोरिति वक्तव्यम्)

गौः पयो दुग्धे । तण्डुला ओदनं पच्यन्ते ।

(सृजियुज्योः श्यँस्तु)

(सृजेः श्रद्धोपपन्ने कर्तर्येवेति वाच्यम्)

सृज्यते मालां देवदत्तः । श्रद्धया निष्पादयतीत्यर्थः।

युज्यते ब्रह्मचारी योगम् ।

३-१-८८ तपस्तपः कर्मकस्यैव ॥

तपांसि तापसं तपन्ति । दुःखयन्तीत्यर्थः । तापसस्तपस्तप्यते । अर्जयतीत्यर्थः । अतप्त तपस्तापसः ।

३-१-८९ न दुह-स्नु-नमां यक्चिणौ ॥

गौः पयो दुग्धे । अदुग्ध, अदोहि वा गौः पयः । प्रस्नुते गौः स्वयमेव । प्रास्नोष्ट गौः स्वयमेव । नमते दण्डः स्वयमेव ।

अनंस्त दण्डः स्वयमेव ।

(यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानम्)

कारयते । अचीकरत । उच्छ्रयते दण्डः । उदशिश्रियत । चिण्वदिट् तु स्यादेव कारिष्यते । उच्छ्रायिष्यते । ब्रूते कथा । अवोचत ।

भारद्वाजीयाः पठन्ति-

(यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्मनेपदाऽकर्मकाणामुपसंख्यानम्)

पुच्छमुदस्यति-उत्पुच्छयते गौः । अन्तर्भावितण्यर्थतायाम्- उत्पुच्छयते गाम् । पुनः कर्तृत्वविवक्षायाम्- उत्पुच्छयते गौः । उदपुपुच्छत । श्रन्थि-ग्रन्थ्योराधृषीययोर्णिजभावे,

---

भवेत् ? । नाऽन्त्यः, पारिभाषिककर्मणः क्रियायाश्चाऽत्यन्तभेदेन सादृश्याऽसंभवात् । अतः, मञ्चा हसन्तीत्यत्र मञ्चस्था हसन्तीतिवत् कर्मशब्दस्य कर्मस्थक्रियायां लक्षणा बोध्या । तुल्यक्रिय इत्यत्र सापेक्षत्वेऽपि गमकत्वात् समासः । कर्तरि (३-१-६८) इत्यनुवर्तमानं सप्तम्यन्तमपि तुल्यक्रिय इति प्रथमान्तानुरोधेन प्रथमान्ताय कल्पते । एवञ्च सूत्रार्थः फलति-कर्मणा= कर्मस्थक्रियया, तुल्यक्रियः= समानक्रियः, कर्ता (३-१-६८) कर्मवत्= कर्मवद् भवति । तेन यगात्मनेपद-चिण्- चिण्वद्भावेटो भवन्ति । यदा कर्मैव कर्तृत्वेन विवक्ष्यते तदा सकर्मकाणामपि अकर्मकत्वेन कर्तरि भावे च लकारः । तत्र कर्तरि लकारे सूत्रमिदं प्रवर्तते । भावे तु 'पच्यते फलेन ।' 'भिद्यते काष्ठेन' इत्यादौ फलकाष्ठादिशब्देभ्यो द्वितीया न भवति । ३-१-८६ लिङ्या...इत्यतः पूर्वत्र, ३-१-८५ व्यत्य...इत्यस्याऽनन्तरं संहितापाठे संयोगान्तलोपेन लकारस्य प्रश्लेषेण तस्येहानुवृत्त्या लकारवाच्यः कर्ता कर्मवत् इति व्याख्यानात् ।

दुहि-दुग्धे ३-१-८९. न दु...इति यक् प्रतिषेधः ।

सृजियुज्योः= सकर्मकयोः सृज् युज् धात्वोः, कर्ता बहुलं कर्मवत्, यगपवादश्च श्यन् वाच्यः । श्यनि प्रकृतेराद्युदात्तत्वं भवति यकि तु ६-१-१८१ नास्य...इति लसार्वधातुकानुदात्तत्वे यक उदात्तत्वं स्यात् ।

३-१-८८ तप- तपः कर्मकस्य, तपः= तप्धातोः, कर्ता (३-१-६८) कर्मवत् (३-१-८७) । अर्थभेदात् पूर्वेणाऽप्राप्तौ कर्मवद्भावो विधीयते । एवकारो विस्पष्टार्थः । **अतप्त** ३-१-६५ तपो...इति चिणोऽभावः ।

३-१-८९ न दु- दुहस्नुनमाम्=दुह् स्नु नम् धातूनाम्, यक्चिणौ= कर्मकर्तरि यक्चिणौ, न=न भवतः । अदोहि ३-१-६३ दुह...इति वा चिण् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रैयादिकयोश्च ग्रहणम् । ग्रन्थते, ग्रथ्नीते वा ग्रन्थः स्वयमेव । अग्रन्थिष्ट । श्रन्थते, श्रथ्नीते वा ग्रन्थः स्वयमेव । अश्रन्थिष्ट । ब्रूञः पूर्वमुदाहृतम् । विकुर्वते सैन्धवाः । अन्तर्भावितण्यर्थस्य पुनः प्रेषणत्यागे विकुर्वते सैन्धवाः । व्यकारिष्ट, व्यकृत ।

(भूषाकर्म-किरादि-सनां यक्चिण्-चिण्वदिटां प्रतिषेधो वक्तव्यः)

अलङ्कुरुते कन्या । अलङ्करिष्यते । अलमकृत । अवकिरते हस्ती । अवाकरिष्ट, अवाकरीष्ट, अवाकीर्ष्ट वा हस्ती स्वयमेव । गिरते । अगरिष्ट, अगरीष्ट अगीर्ष्ट । आद्रियते । आदृत । चिकीर्षते कटः । अचिकीर्षिष्ट । इच्छायाः कर्तृस्थत्वेऽपि करोतिक्रियापेक्षमिह कर्मस्थक्रियात्वम् ।

३-१-९० कुषिरञ्जोः प्राचां श्यन् परस्मैपदं च ॥

प्राचामित्युक्तेरुदीचां मते यगात्मनेपदं च भवतः । कुष्यति, कुष्यते वा पादः स्वयमेव । रज्यति, रज्यते वा वस्त्रम् । यगपवादश्यन्साहचर्याच् श्यनो (यको)ऽविषये नास्य प्रवृत्तिः । कोषिष्यते । रङ्क्ष्यते । कोषिषीष्ट । रङ्क्षीष्ट । अकोषि । अरञ्जि ।

३-१-९१ धातोः ॥ ३-४-११७

३-१-९२ तत्रोपपदं सप्तमीस्थम् ॥

३-१-९३ कृदतिङ् ॥

३-१-९० कुषिरञ्जोः = कुष् रञ्ज् धातुभ्याम्, परस्मैपदम्= परस्मैपदं भवति, श्यन्+च= श्यन् प्रत्ययोऽपि भवति, कर्मकर्तरि, प्राचाम्= प्राचामाचार्याणां मते ।

३-१-९१ धातोः= इत ऊर्ध्वमातृतीयाध्यायपरिसमाप्तेर्ये प्रत्यया विधीयन्ते ते धातोः परतो भवन्तीति बोध्यम् । उदाहरणानि ३-१-९६ तव्य...प्रभृतिषु द्रष्टव्यानि ।

३-१-९२ तत्रो- ७-२-३७ ग्रहो...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । वत्साः ? (शिक्षकोऽङ्गुल्या निर्दिशन्) इदं सूत्रं ३-१-९१ धातोः सूत्रस्याऽधो वर्तते । अतः प्रकृत-सूत्रार्थः-'(३-१-९१)= धातोः= धातोः इति सूत्राधिकारे, सप्तमीस्थम्= सप्तम्यन्ते पदे (वाच्यत्वेन) वर्तमानं पदम्, उपपदम् = उपपदसंज्ञकं भवति, तत्र=तस्मिन्नुप पदे सति वक्ष्यमाणाः प्रत्यया भवन्तीति' स्फुट एव । परन्तु सूत्रस्याऽस्याऽभिप्रायो नैतावताऽर्थमात्रेण स्फुटो भवति । अतः सम्यगवधत्त इति वदन् ३-२-१ कर्म...सूत्रं प्रस्तुत्य तत्रत्यं 'कर्मणि' इति पदं शिक्षकोऽङ्गुल्या निर्दिशन् वत्साः ? 'कर्मणि' इति पदं सप्तम्यन्तमिति तु यूयं जानीथैव । सप्तम्यन्ते पदे यस्य पदस्य समन्वयो भवति= यत् पदं घटते, तदेव पदं तत्रस्थम्= सप्तम्यन्ते पदे वर्तमानं भवति । यथा कुम्भं करोति, इति कुम्भकारः, इत्यत्र कुम्भम् इत्यस्य तत्र (कर्मण्यण् इति सूत्रघटके कर्मणि, इत्यत्र) समन्वयो भवति । अतः प्रकृते कुम्भम् इति पदम् उपपदं भवति । एवमुपपदे सत्येव च तेन (कर्मण्यण् इति) सूत्रेण अण् प्रत्ययो भवति । तथाहि, इति वदन् ३-२-१ कर्मण्यण्-सूत्रमुपदिशेत् ।

३-१-९३ कृद- ६-१-६५ वेँरपृक्तस्य-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र प्रथमं ३-१-९३ प्रकृत-सूत्रं दर्शयित्वा सूत्रमेतत् ३-४-७६ क्तोऽधि...सूत्रपर्यन्तं प्रवर्तते । अर्थात् ३-१-९३ कृद...सूत्रादारभ्य ३-४-७६ क्तोऽधि...सूत्रपर्यन्तं ये प्रत्यया विधीयन्ते ते सर्वे कृन (कृत्संज्ञका) उच्यन्ते । कृत्संज्ञायाः फलं १-२-४६ कृत्त...सूत्रेण कृदन्तानां प्रातिपदिकसंज्ञाद्वारा स्वाद्युत्पत्त्यादि, इति बोधनपुरस्सरं सूत्रार्थबोधनायाऽधोनिर्दिष्टरूपेण श्यामपाटीं प्रयुञ्जीत । यथा-

(क) (ख)

३-१-१ प्रत्ययः ॥ ३-१-९१ धातोः ॥ ३-१-९३ (ख) कृत् अतिङ् (क) ॥ इति । (ख)=धातोः = ३-१-९१ धातोः इति सूत्रस्याधिकारे विधीयमानः, अतिङ् = तिङ् भिन्नः, (क) = प्रत्ययः, कृन् = कृन्संज्ञो भवति । अथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिक्षकोऽधोनिर्दिष्टरूपेणच्छात्रानुपदिशेत् । वत्साः? येषां कृत्संज्ञा भवति, तदन्तानां १-२-४६ कृत्त...सूत्रेण प्रातिपदिकसंज्ञा भवतीत्युक्तमेवेदानीमत इतः परं तदेव सूत्रमुपदिशामीति वदन् १-२-४६ कृत्तद्धित...सूत्रमुपदिशेत् ।

३-१-९४ वाऽस- ४-१-५ ऋन्ने...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र शिक्षकः प्रकृत ३-१-९४ सूत्रमुपदिदिक्षुरधोनिर्दिष्टरूपेण च्छात्रानुपदिशेत् । यथा- वत्साः? यथा तिङन्तप्रक्रियायां सर्वेभ्यो धातुभ्यो लँङ्लिँडादिषु भिन्नेषु प्रत्ययेषु विहितेष्वपि अनुबन्धविनिर्मुक्तस्तु प्रत्ययो 'ल्' इत्येव सर्वत्राऽवशिष्यते, इति यूयं जानीथैव । तत्स्थाने जातैस्तिबादिभिरादेशैश्च रूपाणि भिन्नानि भवन्तीत्यपि यूयं जानीथैव । कृदन्तप्रक्रियायां (कृत्-कृत्यप्रत्ययेषु) तु क्वचित् प्रत्ययेषु भिन्नेष्वपि अनुबन्धविनिर्मुक्तौ शेषभागः प्रत्ययः सरूपः (समानाकृतिः) भवति । यथा- ण्यत्, क्यप्, यत् प्रत्यया भिन्नाः । परन्तु अनुबन्धविनिर्मुक्तौ 'य' इति तिङन्तप्रक्रियायां लकार (ल्) इव सरूपः (समानाकृतिः) शिष्यते । एवमेव अण्, ण, क, अच्, ट इत्येतेषु प्रत्ययेषु भिन्नेष्वपि, अनुबन्धविनिर्मुक्तौ 'अ' इति शेष भागः प्रत्ययः सरूपः (समानाकृतिः) शिंष्यते (तत्र प्रक्रिया विशेषै रूपाणि तु भिन्नानि भवन्तीत्यन्यदेतत्) क्वचित् पुनरनुबन्धविनिर्मुक्तावपि प्रत्यया विरूपावशेषा भवन्ति । यथा- तव्यत्, ण्यत्, केलिमर् प्रत्यया अनुबन्धविनिर्मुक्ता अपि तव्य, य, एलिम, इति विरूपाः (भिन्नाकृतयः) शिष्यन्ते । इति । अथाऽग्रेऽपि पुनरुपदिशेत् वत्साः ? एवमुपदेशस्य प्रयोजनमेतदस्ति यत्, ३-१-९१ धातोः, इति सूत्राऽधिकारस्थले बाध्य-बाधक-विचारे बाध्यबाधकौ प्रत्ययौ यद्युभावपि सरूपौ तदा बाधको बाध्यं नित्यं बाधते । अर्थाद् बाधके प्रत्यये जाते पुनर्बाध्यः प्रत्ययो न भवति । यथा ण्यत्प्रत्ययं बाधित्वा यत्प्रत्यये सति पुनः पक्षान्तरे ण्यत्प्रत्ययो न भवति । एवमेव अण्प्रत्ययं बाधित्वा कप्रत्यये सति पुनः पक्षान्तरेऽण् प्रत्ययो न भवति । यदि तु बाध्यबाधकौ प्रत्ययौ विरूपौ तदा बाधको बाध्यं विकल्पेन बाधते । अर्थाद् बाधके प्रत्यये जातेऽपि पुनः पक्षान्तरे बाध्यः प्रत्ययोऽपि भवति । यथा-तव्यत् प्रत्ययं बाधित्वा ण्यत्प्रत्यये जातेऽपि पुनः पक्षान्तरे तव्यत् प्रत्ययोऽपि भवति । एवमेव ण्वुँल्प्रत्ययं बाधित्वा, अच्प्रत्यये जातेऽपि पुनः पक्षान्तरे ण्वुँल् प्रत्ययोऽपि भवति । इति । अथैवमुपदेशप्रसङ्गे शिक्षकस्तथा च प्रकृतसूत्रम् इति वदन् ३-१-९४ वाऽस...सूत्रार्थमुपदिशेत् ।

(क)

अत्र श्यामपाटीप्रयोगो यथा- ३-१-९१ धातोः ॥ ३-१-९४ (क) वाऽसरूपोऽस्त्रियाम् ॥इति । अत्र वा, असरूपः, इतिच्छेदः । (क) = धातोः = ३-१-९१ धातोः, इति सूत्राधिकारस्थले, असरूपः = विरूपः प्रत्ययः, वा = विकल्पेन भवति (विरूप-बाधकप्रत्ययाऽभावे पुनर्बाध्यप्रत्ययः प्रवर्तते । तेन विरूपो बाधकः प्रत्ययो ना बाधक इति भावः फलितः) अस्त्रियाम् = ३-३-९४ स्त्रियां...सूत्राधिकारोक्तं प्रत्ययं विना । अर्थात् ३-३-९४ स्त्रियां...सूत्राधिकारोक्तः प्रत्ययस्तु विरूपोऽपि बाध्यप्रत्ययं नित्यं बाधते । इति सूत्रार्थं भावार्थं च ३-१-९४ वाऽस...सूत्राधिकारमष्टाध्याय्यां (३-३-११२ आक्रोशे...सूत्रावधि) सूत्रप्रदर्शनपुरस्सरं बोधयेत् । अथ शिक्षकोऽधोनिर्दिष्टरूपेण बोधयेत् । यथा- वत्साः? यद्यपि कृत्प्रत्यया बहवः सन्ति तथापि तेषु केचित् प्रस्तूयन्ते । ते च ण्वुँल्तृचाविव धातोः परतः कर्त्रर्थे भवन्ति, कृत्संज्ञकाश्च । तेन तदन्ताः प्रातिपदिकसंज्ञकाः स्वादिप्रक्रियाभाजो भवन्ति । इति बोधनपुरस्सरं ३-१-१३४ नन्दिग्रहि...सूत्रमुपदिशेत् ।

३-१-९५ कृत्याः- ३-४-७२ गत्यर्थाकर्मक...सूत्रानन्तरं सूत्रमिदं पाठचम् । कृत्याः = ३-१-१३३ ण्वुँल् तृचौ-सूत्रात् प्रागवर्तिनः प्रत्ययाः कृत्यसंज्ञका भवन्ति । इत्यर्थः । अथ तेषां ३-१-९३ कृद...सूत्रेण कृत्संज्ञापि भवति । तेन तव्यदादयो यद्यपि कृत्प्रत्यया एव तथापि ते ३-४-६७ कर्त...सूत्रेण कर्त्रर्थे न भवन्ति, तस्य सूत्रस्य ३-४-७० तयो...सूत्रेण बाधात् । अर्थात् कृत्यप्रत्ययाः सकर्मकेभ्यः कर्मणि, अकर्मकभ्यो भावे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-९६ तव्यत्तव्यानीयरः ॥

एधितव्यम्। एधनीयम्। गन्तव्यो गमनीयो वा ग्रामस्त्वया तव वा।

(वसेस्तव्यत् कर्तरि णिच्च)

वसतीति-वास्तव्यः।

(केलिमर उपसंख्यानम्)

पचेलिमा माषाः। भिदेलिमानि काष्ठानि।

३-१-९७ अचो यत् ॥१०६

चेयम्। जेयम्।

(तकिशसिचतियतिजनीनामुपसंख्यानम्)

तक्यम्। शस्यम्। चत्यम्। यत्यम्। जन्यम्।

(हनो वा यद् वध च)

वध्यम्, घात्यम्।

३-१-९८ पोरदुपधात् ॥

शप्यम्, लभ्यम्।

३-१-९९ शकिसहोश्च ॥

शक्यम्। सह्यम्।

३-१-१०० गदमदचरयमश्चाऽनुपसर्गे ॥१०८

गद्यम्। मद्यम्। चर्यम्। यम्यम्।

अनुपसर्गे, इत्युक्तेर्नेह-प्रगाद्यम्। प्रमाद्यम्।

भवन्ति। तत्र कर्मार्थकप्रत्ययान्ता शब्दाः कर्मानुसारि-लिङ्गवचन-भाजो भवन्ति। भावार्थकप्रत्ययान्तास्तु सर्वदैव क्लीबलिङ्गका एकवचनान्ता भवन्ति। नेपालीभाषायां 'नुपर्दछ = नु पर्छ' इति, हिन्दी भाषायां ना चाहिए इत्यर्थे बोधयितव्ये सँस्कृतभाषायां कृत्यप्रत्ययाः प्रयोज्यन्ते। यथा नेपालीभाषायां कोश पढ्नु पर्छ (पर्दछ) हिन्दीभाषायां कोश पढना चाहिए इत्यर्थे बोधयिव्ये सँस्कृतभाषायां पठितुं योग्य इति विग्रहे पठ् धातोः कृत्यप्रत्ययानुपदिदिक्षुः ३-१-९६ तव्यत्...सूत्रमुपदिशेत्।

३-१-९६ तव्य- ३-१-९५ कृत्याः-सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा-

३-१-९१- (धातोः) ॥ ३-१-९६ (क) तव्यत्तव्यानीयरः ॥इति। (क) = धातोः = धातोःपरतः, तव्यत्तव्यानीयरः = तव्यत् तव्य अनीयर् इति प्रत्यया भवन्ति। इत्यर्थमुपदिश्य लक्षणसमन्वयप्रसङ्गे यथा ण्वुँल्-तृचौ द्वौ प्रत्ययौ। निष्ठाप्रत्ययौ च द्वौ। तथैव तव्यत्, तव्य, अनीयर् इति त्रयः प्रत्ययाः सर्वेभ्यो भवन्ति। ते चाऽर्धधातुकसंज्ञकाः। तेन आर्धधातुककार्यमपि (प्रकृते तव्य-तव्यतोरिडागमः) भवति। अनुबन्धलोपे तव्य, तव्य, अनीय, इत्यवशिष्यन्ते। प्रकृते पठ् धातुः सकर्मकस्तेन कर्मणि प्रत्यया भवन्ति। अनुक्ते कर्तरि तृतीया विभक्तिः षष्ठी विभक्तिश्च भवतः। तथाहि इति भणन् २-३-७१ कृत्यानां...सूत्रमुपदिशेत्।

३-१-९७ अचो- २-३-७१ कृत्यानां...सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा- ३-१-९१ धातोः३-१-९७ अचो (क) यत् ॥अचः+ [(क) = धातोः] = अजन्ताद् धातोः परतः, यत् = यत् प्रत्ययो भवति। इति सूत्रार्थं १-१-७१ येन...सूत्रोद्बोधनपुरस्सरं बोधयित्वा चि जि धातुभ्यां यत् प्रत्यये, आर्धधातुकत्वात्तन्निमित्तके गुणे स्वादिकार्ये च चेयम्। जेयम्। इति। अथ ३-१-१२४ ऋहलोर्ण्यत्-सूत्रमुपदिशेत्। **हनो**-घात्यम् यदभावे ३-१-१२४ ऋह...इति ण्यत्। ७-३-५४ हो ह...इति कुत्वम्। ७-२-११६ अत...इत्युपधावृद्धिः। ७-३-३२ हन...इति नकारस्य तकारः।

३-१-९८ पोर- अदुपधात्=ह्रस्वाऽकारोपधकात्, पोः= पवर्गान्तात्, धातोः (३-१-९१) यत् (३-१-९७)। ण्यतोऽपवादः।

३-१-९९ शकिसहो... शक्सह् धातुभ्याम्, यत् (३-१-९७)। ण्यतोऽपवादः।

३-१-१०० गद- अनुपसर्गे = उपसर्गाऽभावे सति, गद...यमः= गद् मद् चर् यम् इत्येतेभ्यो धातुभ्यः, यत् (३-१-९७)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमेः पूर्वेण (३-१-९८ पोर...इति) सिद्धेऽनुपसर्गादेव भवतु, सोपसर्गान्माभूदिति नियमार्थमिह ग्रहणम्। प्रयाम्यम्। अत्र हरदत्तः-कथं तर्हि तेन न तत्र भवेद् विनियम्यमिति ? प्रमादपाठोऽयम्, विनियाम्यमिति पाठ इति। अत्र भट्टोजिदीक्षितः निपूर्वात्तु स्यादेव। त्वया नियम्या ननु दिव्यचक्षुषा। नियमे साधुरिति वा। इति।

(चरेराङि चाऽगुरौ)

आचर्यो देशः। गुरौ तु-आचार्यः।

३-१-१०१ अवद्य-पण्य-वर्या गहर्यपणितव्याऽनिरोधेषु ॥

अवद्यम् पापम्। अनुद्यमन्यत्। पण्यः कम्बलः। पाण्यमन्यत्। शतेन वर्या कन्या। वर्या इति स्त्रीलिङ्गनिर्देशाद् वार्या ऋत्विजः।

३-१-१०२ वहचं करणम्।

वहचं शकटम्। वाहचमन्यत्।

३-१-१०३ अर्यः स्वामिवैश्ययोः ॥

अर्यः स्वामी वैश्यो वा। स्वामिवैश्ययोरित्युक्तेर्नेह-आर्यो ब्राह्मणः।

३-१-१०४ उपसर्या काल्या प्रजने ॥

उपसर्या गौः। प्रजने काल्येत्युक्तेर्नेह-उपसार्या काशी। प्राप्तव्येत्यर्थः।

३-१-१०५ अजर्यं सङ्गतम् ॥

न जीर्यतीत्यजर्यम्। सङ्गतमित्युक्तेर्नेह-अजरीता कम्बलः।

३-१-१०६ वदः सुँपि क्यप् च ॥१०८

ब्रह्मोद्यम्। ब्रह्मवद्यम्। अनेन भावे प्रत्ययौ विधीयेते, उत्तरसूत्राद् भावे इत्याकर्षणादित्याहुः।

३-१-१०७ भुवो भावे ॥१०८

ब्रह्मभूयम्। ब्रह्मत्वमित्यर्थः।

३-१-१०८ हनस्तँ च ॥

ब्रह्महत्या। स्त्रीत्वं लोकात्।

३-१-१०१ अव- गह्र्य...धेषु= निन्द्य-व्यवहर्तव्याऽप्रतिबन्धेषु गम्येषु, अवद्य-पण्य-वर्या एते निपात्यन्ते। (नञ्पूर्वकवद्धातोः पण् वृङ्भ्यां च यत्) **अनुद्यम्** ३-१-१०६ वदः...इति क्यप्। ६-१-१५ वचि...इति सम्प्रसारणम्। **वार्या-** ऋत्विजामपि यज्ञमात्रे वरणीयत्वादनिरोधोऽस्ति। स्त्रीत्वं तु नास्ति। भट्टिस्तु 'सुग्रीवो नाम वर्योऽसौ' इति प्रायुङ्क्त।

३-१-१०२ वह्यमिति= वह् धातोर्यत्प्रत्ययान्तं निपात्यते, करणम्= करणं चेत् तद् भवति। वहन्त्यनेनेति वह्यं शकटम्।

३-१-१०३ अर्यः= अर्य इति ऋधातोर्यत्प्रत्ययान्तं निपात्यते, स्वामिवैश्ययोः= स्वामिनि वैश्ये च वाच्ये। **आर्यः** ३-१-१२४ ऋह...इति ण्यत्।

३-१-१०४ उप- कालः प्राप्तोऽस्याः काल्या= प्राप्तकाला ५-१-१०६ कालाद्...इति यत्। प्रजने = गर्भग्रहणे, काल्या= प्राप्तकाला, इत्यर्थे उपसर्या= उपोपसर्गात् सृधातोर्यत् प्रत्ययो निपात्यते।

३-१-१०५ अजर्यम्= नञ् पूर्वाज्जृधातोः कर्तरि यत् प्रत्ययो निपात्यते, सङ्गतम्= सङ्गतं चेद् विशेष्यम्। **अजरीता** ३-१-१३३ ण्वुँल्...इति तृच्।

३-१-१०६ वदः अनुपसर्गे (३-१-१००) सुँपि= सुबन्ते उपपदे, वदः= वद्धातोः, क्यप्= क्यप् प्रत्ययो भवति, यत् (३-१-९७) च। अनेन भावे प्रत्ययौ विधीयेते, उत्तरसूत्राद् 'भावे' इत्यनुकर्षणादित्याहुः। क्यपि ६-१-१५ वचि...इति सम्प्रसारणम्। उभयत्र २-२-१९, उप...इति समासः।

३-१-१०७ भुवो- अनुपसर्गे (३-१-१००) सुँपि (३-१-१०६) भुवः= भूधातोः, भावे= भावेऽर्थे, क्यप् (३-१-१०६)। उदाहरणे समासः प्राग्वत्।

३-१-१०८ हन- अनुपसर्गे (३-१-१००) सुँपि (३-१-१०६) हनः= हन्धातोः, भावे (३-१-१०७) क्यप् (३-१-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-१०९ एति-स्तु-शास्-वृ-दृ-जुषः क्यप् ।।१२।।

इत्यः । स्तुत्यः। अवश्यस्तुत्यः । शिष्यः । वृत्यः । वृ इति वृञो ग्रहणं न तु वृङः । वृङस्तु वार्या ऋत्विजः । आदृत्यः । जुष्यः ।

(शंसिदुहिगुहिभ्यो वा)

शस्यम्, शंस्यम् । दुह्यम्, दोह्यम् ।

गुह्यम्, गोह्यम् ।

(आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानम्)

आज्यम्=घृतम् ।

३-१-११० ऋदुपधाच्चाऽक्लृपिचृतेः ॥

नृत्यम् । कल्प्यम् । चर्त्यम् ।

(पाणौ सृजेर्ण्यद् वक्तव्यः)

पाणिसर्ग्यः ।

(समवपूर्वाच्च)

समवसर्ग्या ।

३-१-१११ ई च खनः ॥

खेयम् ।

३-१-११२ भृञोऽसंज्ञायाम् ॥

भृत्याः कर्मकराः । भर्तव्या इत्यर्थः ।

असंज्ञायामित्युक्तेर्नेह-भार्यो नाम क्षत्रियः ।

(समश्च बहुलम्)

संभृत्याः, संभार्याः ।

संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिध्यति ।

स्त्रियां भावाऽधिकारोऽस्ति तेन भार्या प्रसिध्यति ।

३-१-११३ मृजेर्विभाषा ॥

मृज्यः, मार्ग्यः ।

---

१०६) तँ च= हन्धातोः स्थाने तँ (अनुबन्धलोपे त्) आदेशश्च भवति । १-१-५१ अलो...इत्यन्त्यस्य= नकारस्य स्थाने तकारः ।

३-१-१०९ एति...जुषः= इण् स्तु शास् वृ दृ जुष् धातुभ्यः, क्यप्= क्यप् प्रत्ययो भवति । **इत्यः** ६-१-६९ ह्रस्व...इति तुँक् । **शिष्यः** ६-४-३४ शास...'इत्युपधाया इत् ।

३-१-११० ऋदु- अक्लृपिचृतेः= क्लृप् चृत् इति धातुभिन्नात्, ऋदुपधात्= ऋदुपधकाद् धातोः, क्यप् (३-१-१०६) ।

३-१-१११ ई च- खनः= खन्धातोः, क्यप् (३-१-१०६) ई च= खन्धातोः स्थाने ई इत्ययमादेशश्च भवति । इ इति सिद्धे ई इति दीर्घ निर्देश इ इ इति प्रश्लेषेण पुनरित्वविधानार्थः । तेन खेयमित्यत्र ६-४-४३ ये वि...इति पाक्षिकमप्यात्वं न भवति ।

३-१-११२ भृञः= भृञ्धातोः, क्यप् (३-१-१०९) असंज्ञायाम्= संज्ञायामगम्यमानायाम् ।

संज्ञा ३-१-११२ भृञो...सूत्रे असंज्ञायामिति प्रतिषेधस्य भार्यो नाम क्षत्रिय इति पुंसि चारितार्थ्याद् भार्या वधूरित्यत्र संज्ञायां गम्यमानायां ३-३-९९ संज्ञा...सूत्रेण क्यपैव भाव्यं न तु ण्यतेति पूर्वार्धेनाऽऽक्षिपति-ते = सूत्रकारस्य, भार्या न प्रसिध्यतीति । ३-३-९९ संज्ञा...सूत्रं स्त्रीत्वविशिष्टे भावे प्रवर्तते । भार्या शब्दस्तु कर्मणि ण्यत्प्रत्ययेन सिध्यतीत्युत्तरार्धेन समाधत्ते । ननु च भोः ३-३-९९ संज्ञा...सूत्रे ३-३-१८ भावे ३-३-१९ अकर्तरि च कारके इत्यनुवर्तेते एव कथं भावे प्रवर्तते इत्युच्यते । नाऽहं ब्रवीमि ते उभे नानुवर्तेते तत्रेति । किमुच्यते तर्हि ? भृधातोस्तेन क्यपि भावे एव संज्ञा गम्यते, न तु अकर्तरि कारके । संज्ञायां च तेन क्यब् विधीयते । काशिकायामपि भावाऽधिकारः= भावव्यापार इत्यभिप्रायः । भट्टोजिदीक्षितस्तु बिभर्तेः, भृ इति दीर्घान्तात् क्र्यादेर्वा ण्यत् । क्यप् तु भरतेरेव, तदनुबन्धकग्रहणे नाऽतदनुबन्धकस्येति परिभाषयेत्युपदिशति ।

३-१-११३ मृजेः= मृज् धातोः, विभाषा= वा, क्यप् (३-१-१०६) । प्राप्तविभाषेयम् । **मार्ग्यः** ७-२-११४ मृजे...इति वृद्धिः । ७-३-५२ चजोः...इति कुत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-११४ राजसूय-सूर्य-मृषोद्य-रुच्य-कुप्य-कृष्टपच्याऽव्यथ्याः ॥

३-१-११५ भिद्योदध्यौ नदे ॥

भिनत्ति कुलं भिद्यः । उज्झत्युदकमुद्ध्यः । नदे इत्युक्तेर्नेह-भेत्ता । उज्झिता ।

३-१-११६ पुष्पसिध्यौ नक्षत्रे ॥

पुष्यन्त्यस्मिन्नर्थाः पुष्यः । सिध्यन्त्यस्मिन् सिध्यः । नक्षत्रे इत्युक्तेर्नेह-पोषणम् । सेधनम् ।

३-१-११७ विपूयविनीयजित्या मुञ्जकल्कहलिषु ॥

विपूयो मुञ्जः । विनीयः कल्कः । जित्यो हलिः । अन्यत्र विपाव्यम् । विनेयम् । जेयम् ।

३-१-११८ प्रत्यपिभ्यां ग्रहेः ॥११९

(छन्दसीति वक्तव्यम्)

प्रतिगृह्यम् । अपिगृह्यम् ।

लोके तु प्रतिग्राह्यम् । अपिग्राह्यम् ।

३-१-११९ पदास्वैरिबाह्यापक्ष्येषु च ॥

प्रगृह्यं पदम् । अवगृह्यं पदम् ।

अस्वैरी= परतन्त्रः- गृह्यकाः शुकाः । ग्रामगृह्या सेना । ग्रामाद् बहिर्भूतेत्यर्थः । पक्षे भवः पक्ष्यः । आर्यगृह्यः । सत्पक्षाश्रित इत्यर्थः ।

३-१-१२० विभाषा कृवृषोः ॥

कृत्यम्, कार्यम् । वृष्यम्, वर्ष्यम् ।

३-१-१२१ युग्यं च पत्रे ।

युग्यो हस्ती ।

३-१-११४ राज- आद्यः कर्मणि, अधिकरणे वा । सूर्य-रुच्याव्यथ्याः कर्तरि । तृतीयो भावे । पञ्चमः संज्ञायाम् । उपान्त्यः कर्मकर्तरि । एते क्यबन्ता निपात्यन्ते । तथाहि- राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः (इति कर्मणि) लतात्मकः सोम एव राजा स सोतव्योऽत्र (इत्यधिकरणे) सुधातोः क्यब्दीर्घश्च । सरत्याकाशे इति विग्रहे सृधातोः क्यप् ऋकारस्योत्वम् ८-२-७७ हलि...इति दीर्घः । अथवा सुवति= कर्मणि लोकं प्रवर्तयतीति विग्रहे सू (षू प्रेरणे तुदादिः) धातोः क्यप् रुँट् च । मृषोपपदाद् वदेः ३-१-१०६ वद....इति क्यपि यति च प्राप्ते क्यप्प्रत्ययमात्रं निपात्यते । ६-१-१५ वचि...इति सम्प्रसारणम् । रोचते इति रुच्यः, रुच् धातोः क्यप् । गुपः क्यप् आदेः कत्वं च । कुप्यम् । सुवर्णरजतभिन्नद्रव्यस्येयं संज्ञा । कृष्टे स्वयमेव पच्यन्ते इति कृष्टपच्याः । न व्यथते = अव्यथ्यः ।

३-१-११५ भिद्योध्यौ = भिदेरुज्झेश्च कर्तरि क्यवन्तौ निपात्येते, उज्झेर्धत्वं च, नदे= नदे वाच्ये ।

३-१-११६ पुष्यसिध्यौ = पुषेः सिधेश्चाऽधिकरणे क्यबन्तौ निपात्येते, नक्षत्रे= नक्षत्रे वाच्ये । प्रत्युदाहरणयोः ३-३-११७ कर...इति ल्युँट् ।

३-१-११७ विपू...जित्याः = विपूर्वकाभ्यां पवति नयतिभ्यां जयतेश्च कर्मणि क्यब् निपात्यते, मुञ्ज...लिपु = मुञ्ज प्रभृतिषु गम्येषु । विपूयते, विनीयते = सिद्धत्वं प्राप्यते, जेतव्य इति क्रमशो विग्रहः । प्रत्युदाहरणेषु, आद्ये ३-१-१२५ ओरा...इति ण्यत् । अन्त्ययोः ३-१-९७ अचो...इति यत् ।

३-१-११८ प्रत्यपिभ्याम्=प्रति अपि इत्युपसर्गाभ्यां परस्मात्, ग्रहेः= ग्रह् धातोः,-क्यप् (३-१-१०९) । उदाहरणयोः ६-१-१६ ग्रहि... इति सम्प्रसारणम् ।

३-१-११९ पदा- ग्रहेः (३-१-११८) क्यप् (३-१-१०९) पदा...क्ष्येषु= पदप्रभृतिष्वर्थेषु । बाह्या इति स्त्रीलिङ्गनिर्देशात् पुंनपुंसकयोर्न ।

३-१-१२० विभा- कृवृषोः= कृवृष्धातुभ्याम्, विभाषा= वा, क्यप् (३-१-१०९) । करोतेर्ण्यति वृषेर्नित्यं क्यपि प्राप्ते विभाषा क्यप् । **कृत्यम्** ६-१-६९ ह्रस्व...इति तुँक् ।

३-१-१२१ युग्यं- पत्रे = वाहने गम्ये, युग्यम् = युज् धातोः क्यप् कुत्वं च निपात्येते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-१२२ अमावस्यदन्यतरस्याम् ॥

अमावस्या, अमावास्या ।

३-१-१२३ छन्दसि निष्टर्क्य देवहूय-प्रणीयोन्नीयोच्छिष्य-मर्य-स्तर्या-ध्वर्य-खन्य-खान्य-देवयज्यापृच्छ्य-प्रतिषीव्य-ब्रह्मवाद्य-भाव्यस्ताव्योपचाय्यपृडानि ॥

(हिरण्य इति वक्तव्यम्)

उपचाय्यपृड इति निपात्यते । उपचेयपृडमन्यत् ।

निष्टर्क्ये व्यत्ययं विद्यान्निसः षत्वं निपातनात् ।
ण्यदायादेश इत्येतावुपचाय्ये निपातितौ ।
ण्यदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः ॥
ण्यदेकस्माद् यशब्दश्च द्वौ क्यपौ ण्यद् विधिश्चतुः ॥

३-१-१२४ ऋहलोर्ण्यत् ॥१३१

धार्यम् । हास्यम् ।

(ण्यत्प्रकरणे लपिदभिभ्यां चेति वाच्यम्)

अपलाप्यम् । अपदाभ्यम् ।

३-१-१२२ अमा- अमाशब्दः सहार्थकः । तस्मिन्नुपपदे वस्धातोः कालेऽधिकरणे ण्यत् प्रत्ययः, वृद्धौ सत्यां पाक्षिक उपधाह्रस्वश्च निपात्येते । अमा = सह वसतोऽस्यां सूर्याचन्द्रमसाविति, अमावस्या, अमावास्या वा ।

३-१-१२३ छन्द- निष्टर्क्ये = निष्टर्क्य इत्यत्र निस्पूर्वकात् कृत् धातोर्ण्यति सति तकारककारयोर्व्यत्ययो निसः सकारस्य स्थाने षत्वं च निपातनाद् भवतः । उपचाय्ये = उपचाय्य इत्यत्र, उपपूर्वकाच्चिधातोर्ण्यद् (वृद्धौ सत्याम्) आयादेशश्च निपातितौ । एकस्मात् = निस्+कृत् धातोः, ण्यत् = ण्यत् प्रत्ययो भवति । चतुर्भ्यः = देवशब्दोपपदकाद् ह्वा (ह्वेञ्) धातोः, प्रोपसर्गकान्नीधातोः, उदुपसर्गकान्नीधातोः, उदुपसर्गकाच्छास् (शास्) धातोः, क्यप् = क्यप् प्रत्ययो भवति । चतुर्भ्यः = मृ स्तृ ध्वृ खन् धातुभ्यः, यतो विधिः = यत् प्रत्ययो विधीयते । तत्र 'स्तर्या' इति स्त्रियामेव । एकस्मात् = खन् धातोः, ण्यत् = ण्यत् प्रत्ययो भवति । **यशब्दश्च** = अन्यस्मादेकस्मात् = देवशब्दोपपदकाद् यज् धातोर्यप्रत्ययो भवति । द्वौ क्यपौ= आङ्पूर्वकप्रच्छ् धातोः प्रतिपूर्वकसिव् धातोश्च क्यप्प्रत्ययो भवति । चतुः = चतुरो वारान्, ण्यद् विधिः = ण्यद् विधीयते, अर्थात्- ब्रह्मशब्दोपपदकाद् वद्धातोः, भूधातोः स्तुधातोः पृडशब्दे उत्तरपदे उपोपसर्गकाच्चि धातोश्च ण्यत् प्रत्ययो भवति ।

३-१-१२४ ऋह- ३-१-९७ अचो यत्- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

३-१-९१ धातोः ३-१-१२४ ऋहलोः (क) ण्यत् ॥ इति । ऋहलोः = ऋवर्णान्ताद् हलन्ताच्च, (क) = धातोः, ण्यत् = ण्यत् प्रत्ययो भवति । यथा धृधातोर्हस् धातोश्च ण्यत्प्रत्यये णित्त्वादन्त्यवृद्धावुपधावृद्धौ च स्वादिकार्ये धार्यम् । हास्यम् । इति । अथ प्रयोगदिग्दर्शनम् ।

नेपाली	**हिन्दी**	**संस्कृतम्**
फूल टिप्नु पर्छ	फूल टिपना चाहिए	पुष्पाणि चेयानि ।
मानिस चिन्नुपर्छ	आदमी पहिचानना चाहिए	मनुष्याः परिचेयाः ।
छात्रहरुलाई उपदेश दिनुपर्छ	छात्रोंको उपदेश देना चाहिए	छात्रा उपदेश्याः ।
टोपी लगाउनुपर्छ	टोपी पहनना चाहिए	शिरस्त्रं धार्यम् ।
साडी पहिरनुपर्छ	साडी पहनना चाहिए	शाटी परिधेया ।
हातमा लठ्ठी लिनुपर्छ	हाथमें लठ्ठी लेना चाहिए	हस्ते दण्डो ग्रहीतव्यः ।

अथाऽत्र ४-१-५ ऋन्ने...सूत्रप्रकरणे ३-१-९४ वाऽस...सूत्रसन्दर्भे बोधितं विषयं सत्यावश्यके, उद्बोधयन् यत्, ण्यत् इति प्रत्ययाभ्यां तव्यत् तव्याऽनीयरो विकल्पेन बाध्यन्ते । ऋदन्ताद् विधीयमानो ण्यत्तु यत्प्रत्ययं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-१२५ ओरावश्यके ॥

अवश्यलाव्यम् ।

लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि

समो वा हिततततयोर्मांसस्य पचि युँड्घञोः ॥

कर्तुकामः । गन्तुमनाः । सहितम्, संहितम् । सततम्, संततम् । मांस्पचनी । मांस्पाकः ।

३-१-१२६ आसु-यु-वपि-रपि-लपि-त्रपि-चमश्च ॥

आसाव्यम् । याव्यम् । वाप्यम् । राप्यम् । लाप्यम् । त्राप्यम् ।

आचाम्यम् । अत्र काशिका-अनुक्तसमुच्चयार्थश्चकारः । दभि-दाभ्यम् । इति ।

३-१-१२७ आनाय्योऽनित्ये ॥

आनाय्यो गार्हपत्यादानीतो दक्षिणाग्निः । आनेयोऽन्यः= घटादिः, गार्हपत्येतरस्मादानीतो दक्षिणाग्निश्च ।

३-१-१२८ प्रणाय्योऽसंमतौ ॥

प्रणाय्यश्चौरः । प्रीत्यनर्ह इत्यर्थः ।

प्रणाय्योऽन्तेवासी । विरक्त इत्यर्थः ।

३-१-१२९ पाय्य-सान्नाय्य-निकाय्य-धाय्या मान-हविर्निवास-सामिधेनीषु ॥

नित्यं बाधते । इत्युद्बोधयेत् । यथा-

नेपाली	हिन्दी	सँस्कृतम्
फूल टिप्नुपर्छ =	फूल टिपना चाहिए =	पुष्पाणि चेयानि, चयनीयानि, चेतव्यानि वा ।
टोपी लगाउनुपर्छ	टोपी पहनना चाहिए	शिरस्त्रं धार्यम्, धर्तव्यम्, धरणीयं वा
साडी पहिरनुपर्छ	साडी पहननी चाहिए	शाटी परिधेया, परिधानीया, परिधातव्या वा ।
लट्ठी लिनुपर्छ	लट्ठी लेना चाहिए	दण्डः, धार्यः, धरणीयः, धर्तव्यो वा ।
उपदेश लिनुपर्छ	उपदेश लेना चाहिए	उपदेशो ग्राह्यः, ग्रहणीयः, ग्रहीतव्यो वा ।

अथोत्तरकृदन्तोपदेश- दिग्दर्शनम् ।

अथाऽधो निर्दिष्टरूपेण शिक्षकश्छात्रानुपदिशेत् । वत्साः? एतदवधि प्रायः सकर्मकेभ्यः कर्मणि, अकर्मकेभ्यो भावे विधेयानां प्रत्ययानां दिग्दर्शनं कारितम् । अथातः सकर्मकेभ्योऽपि भावे एव विधेयानां प्रत्ययानां दिग्दर्शनं प्रस्तूयते । तत्रापि अनुक्ते कर्मणि कर्तरि च षष्ठी विभक्तिर्भवति । तथाहि- यत्र नेपाली भाषायां 'नु' इत्युच्यते यथा- हाँस्नु, लेख्नु, खेल्नु, पढ्नु इत्यादि । हिन्दीभाषायां च 'ना' इत्युच्यते । यथा-हसना, लिखना, खेलना, पढना इत्यादि । तत्र सँस्कृतभाषायां धातुभ्यो ल्युँट्प्रत्ययो भवति । ते च ल्युँट् प्रत्ययान्ताः शब्दाः सर्वदैव क्लीबे भवन्ति । तथाहि, इति भणन् ३-३-११५ ल्युँट् च-सूत्रमुपदिशेत् ।

३-१-१२५ ओः+धातोः (३-१-९१) = उवर्णान्ताद् धातोः, ण्यत् (३-१-१२४) आवश्यके= आवश्यके द्योत्ये ।

३-१-१२६ आसु...चमः= आङ्पूर्वकसुधातोर्युप्रभृतिभ्यश्च, ण्यत् (३-१-१२४) । आद्याभ्याम् ३-१-९७ अचो...इति, शेषेभ्यः ३-१-९८ पोर...इति यति प्राप्ते ।

३-१-१२७ आनाय्यः- आङ्पूर्वकान्नीधातोर्ण्यत् सत्यां वृद्धावायादेशश्च निपात्येते, अनित्ये= अनित्ये गम्ये । रूढिशब्दोऽयम् । यथा गच्छतीति व्युत्पत्तावपि गोशब्देन यः कोऽपि गन्ता न गृह्यते, किन्तु सास्नादिमती गृह्यते, तथा आनाय्यशब्देन घटादिरनित्यो न गृह्यते किन्तु यो गार्हपत्यादानीयते स दक्षिणाग्निरेव गृह्यते । स चाऽनित्यः सततमप्रज्वलनात् ।

३-१-१२८ प्रणा- संमतिः = प्रीतिविषयीभवनं कर्मव्यापारः = पूजा । भोगेष्वादरोऽपि संमतिः । असंमतौ, प्रणाय्यः- प्रपूर्वान्नीधातोः पूर्वसूत्रवन्निपातः । असंमतिशब्दे अविद्यमाना संमतिरस्मिन्निति बहुव्रीहिर्बोध्यः ।

३-१-१२९ पाय्य...धाय्याः= पाय्य- प्रभृतयः, मान...नीषु= मानप्रभृत्यर्थेषु निपात्यन्ते । **सामिधेनी** समिध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-१३० क्रतौ कुण्डपाय्य-संचाय्यौ ॥
३-१-१३१ अग्नौ परिचाय्योपचाय्यसमूह्याः ॥१३२
३-१-१३२ चित्याऽग्निचित्ये च ॥
चित्योऽग्निः । अग्निचित्या ।
३-१-१३३ ण्वुँल्-तृचौ ॥
कारकः । कर्ता । पाचकः । पक्ता । पाठकः । पठिता ।
३-१-१३४ नन्दि-ग्रहि-पचादिभ्यो ल्युँणिन्यचः ॥
नन्दनः । ग्राही । पचः ।

आधीयन्ते = स्थाप्यन्तेऽनया सा सामिधेनी = ऋक् । ४-३-१२० तस्ये...सूत्रस्थ-समि...इति वार्तिकेन षेण्यण् । मीयतेऽनेनेति-पाय्यम् = मानम् । माङःकरणे ण्यत्, आदेः पत्वं च । ७-३-३३ आतो...इति युँक् । सम्यङ् नीयते होमार्थमग्निं प्रतीति-सान्नाय्यम् = हविः । सम्पूर्वान्नीधातोः कर्मणि ण्यत् आयादेशो दीर्घश्चोपसर्गस्य । 'रूढित्वाच्च हविर्विशेषेष्ववतिष्ठते', इति काशिका । 'ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायामिति विहितयोर्दधिपयसोः । माघस्तु यथाश्रुतार्थग्राही हविर्मात्रे प्रायुङ्क्त- 'हुतमयमवलीढे साधु सान्नाय्यमग्निः, इति, तत्रैव पदमञ्जरी । निचीयतेऽस्मिन् धान्यादिकमिति-निकाय्यः = निवासः । निपूर्वाच्चिनोतेरधिकरणे ण्यत्, वृद्धौ सत्याम् आयादेशः आदेः कुत्वं च । धीयतेऽनया समिदिति-धाय्या = ऋक् । धाञो ण्यत् ७-३-३३ आतो...इति युँक् । अत्र काशिका-धाय्येति न सर्वा सामिधेन्युच्यते । किं तर्हि ? काचिदेव । रूढिशब्दो ह्यम् । तथा चाऽसामिधेन्यामपि दृश्यते-धाय्या शंसत्यग्निर्नेता त्वं सोमक्रतुभिः इति ।

३-१-१३० क्रतौ= क्रतौ वाच्ये, कुण्डपायसञ्चाय्यौ= कुण्डपाय्य सञ्चाय्य इति निपात्येते । कुण्डेन पीयतेऽस्मिन्निति विग्रहे तृतीयान्ते उपपदे पाधातोरधिकरणे यत्, युँक् च निपात्येते । ण्यत्प्रकरणे यद्युँकोर्निपातनं स्वरसिद्ध्यर्थम् । कुण्डपाय्यः = क्रतुः । संचीयतेऽस्मिन्निति विग्रहे संपूर्वाच्चिधातोरधिकरणे ण्यत्, वृद्धौ सत्यामायादेशश्च संचाय्यः = क्रतुः ।

३-१-१३१ अग्नौ- न ज्वलने, किंतर्हि ? तदर्थ इष्टकावचयनविशेषे, तत्रैव रूढत्वात्, इति हरदत्तः । अग्निधारणार्थे स्थलविशेषे, इति भट्टोजिदीक्षितः । आद्ययोः पर्युपपूर्वाच्चिधातोर्ण्यत्, वृद्धौ सत्यामायादेशश्च, अन्त्ये संपूर्वाद्वह्धातोर्ण्यति सति सम्प्रसारणं दीर्घश्च निपात्यन्ते ।

३-१-१३२ चित्या- आद्ये चिधातोः कर्मणि क्यप्, (अग्नौ (३-१-१३१) । ६-१-६९. ह्रस्व...इति तुँक् । अन्त्ये अग्निपूर्वाच्चिधातोर्यप्रत्ययो भावे तुँक् च निपात्यते । (अग्नौ इति नाऽत्र सम्बध्यते, भावेऽसंभवात्) क्यपा सिद्धे तथा निपातनं स्वरसिद्ध्यर्थम् ।

३-१-१३३ ण्वुँल्तृ- ४-१-२ स्वौजस...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

३-१-१ प्रत्ययः ॥ ३-१-२ परश्च ॥ ३-१-९१धातोः ॥ ३-१-१३३ (ग) ण्वुँल्तृचौ (क) (ख) ॥ इति । (ग) = धातोः, ण्वुल्तृचौ+ [(क) = प्रत्ययः (ख) = परः] =ण्वुँल्तृच्प्रत्ययौ परतो भवतः । इति सूत्रार्थः । प्रकृते पाठक इति शब्दसिद्धये पठतीति विग्रहे पठ्धातोर्ण्वुँल्प्रत्ययेऽनुबन्धलोपे पठ्+वुं इति श्यामपाटचां लिखित्वा वुं इत्यस्य ३-१-९३ कृद...सूत्रेण कृत्संज्ञायां ३-४-६७ कर्तरि कृन्-सूत्रमुपदिशेत् ।

३-१-१३४ नन्दि- ३-१-९४ वाऽसरूपो...सूत्रानन्तरं सूत्रमिदं पाठचम् । नन्दिग्रहिपचादिभ्यः = नन्दि (ण्यन्तधातुः) प्रभृतिभ्यः ग्रह्प्रभृतिभ्यः पच्प्रभृतिभ्यश्च ल्युँणिन्यचः = ल्युंः णिनिः अच् इति प्रत्यया भवन्ति । यथाक्रमं नन्दिप्रभृतिभ्यो ल्युँः । ग्रहादिभ्यो णिनिः । पचादिभ्योऽच् प्रत्यया भवन्तीति बोधयेत् । अथ नन्द्यादि-ग्रह्यादि-पचादयश्च तत्तद्गणपाठादवगन्तव्या इति गणपाठप्रदर्शनपुरस्सरं बोधयेत् । अथ प्रकृते नन्दयतीति विग्रहे मध्ये मध्ये साहाय्यं ददच्छात्रैरेव लक्षणसमन्वयं कारयेत् । नन्दि+ल्युँ, अनुबन्धलोपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-१३५ इगुपध-ज्ञा-प्री-किरः कः ॥१३६

क्षिपः । बुधः । कृशः । ज्ञः । प्रियः । किरः ।

३-१-१३६ आतश्चोपसर्गे ॥

प्रज्ञः । सुग्लः ।

३-१-१३७ पा-घ्रा-ध्मा-धेड्-दृशः शः ॥१३९

पिबः । जिघ्रः । धमः । धयः । पश्यः ।

(जिघ्रतेः संज्ञायां प्रतिषेधो वक्तव्यः)

व्याघ्रः ।

३-१-१३८ अनुपसर्गाल्लिम्पविन्द-धारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ॥

लिम्पः । विन्दः । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातयः । साहयः ।

अनुपसर्गादित्युक्तेर्नेह-प्रलिपः ।

(नौ लिम्पेरिति वक्तव्यम्)

निलिम्पा देवाः ।

(गवादिषु विन्देः संज्ञायाम्)

गोविन्दः । अरविन्दम् ।

३-१-१३९ ददातिदधात्योर्विभाषा ॥१४०

ददः, दायः । दधः, धायः । उपसर्गे तु-प्रदः । प्रधः ।

नन्दि+युँ ७-१-१ युँवौ...सूत्रमुद्बोध्य नन्दि+ अन इति श्यामपाटचां लिखित्वा ६-४-५१ णेर...सूत्रमुद्बोध्य नन्दनशब्दं साधयित्वा शेषकार्यं छात्रैःपूर्वत् साधयेत् । नन्दनः । नन्दना । अथ गृह्णातीति विग्रहे ग्रह्धातोर्णिनिँप्रत्ययेऽनुबन्धलोपे ७-२-११६ अत...इत्युपधावृद्धौ ग्राहिन् इति शब्दो निष्पन्नः । स्वादिकार्यं तु ६-४-१३ सौ च-सूत्रे प्रस्तुतस्य 'विद्यार्थिन्' इति शब्दस्येवेत्युपदिशन् विद्यार्थिभिरुच्यमानानि ग्राही, ग्राहिणौ, ग्राहिणः, इत्यादीनि रूपाणि शिक्षकः शृणुयात् । स्त्रियां तु ४-१-५ ऋन्ने...सूत्रेण ङीपि ग्राहिणीशब्दः सम्पद्यते । तत्र स्वादिकार्यं तु ६-१-६६ हल्ङ्या...सूत्रसन्दर्भे प्रस्तुतस्य गौरीशब्दस्येव ज्ञेयमित्युद्बोयधन्, तैरुच्यमानानि ग्राहिणी ग्राहिण्यौ ग्राहिण्यः, इत्यादीनि रूपाणि शिक्षकः शृणुयात् । अथ पचतीति विग्रहे पच्धातोरच्प्रत्ययेऽनुबन्धलोपे पुंसि स्वादिकार्ये पचः । पचौ । पचाः । स्त्रियां तु पचा पचे पचाः इत्यादीनि रूपाणिच्छात्रैः साध्यमानानि शिक्षकः शृणुयात् । अथ शिक्षकः ३-१-९४ वाऽस...सूत्रमुद्बोधयन् प्रकृते ल्युँ= युँ, णिनिँ= इन्, अच् = अ, इत्येतेषां त्रयाणामपि प्रत्ययानां ण्वुँल्= वुँ तृच्= तृ प्रत्यययोश्च द्वयोरपि विरूपत्वेन त्रयाणां प्रत्ययानां विकल्पेन बाधकतया पक्षान्तरे तौ ण्वुँल् = वुँ, तृच् = तृ प्रत्ययौ भवतः । इति बोधनप्रसङ्गे यथा-नन्दकः । नन्दिका । नन्दयिता । नन्दयित्री । ग्रह्धातोर्ण्वुँलि ग्राहकः । ग्राहिका । पच् धातोर्ण्वुँलि पाचकः पाचिका । इत्यादि । इत्युपदिशेत् । अथाऽत्र शिक्षकः 'वत्साः ? प्रकृते सावधानं शृणुत इति वदन्नधोनिर्दिष्टरूपेणोपदिशेत् । पठ्धातोस्तृचि पठिता इत्यादीव ग्रह्धातोस्तृचि 'ग्रहिता' पच्धातोश्च 'पचिता' इत्यादीनि रूपाणि न भवन्ति । किन्तु ग्रह्धातोस्तृचि ग्रहीता । ग्रहीत्री इत्यादीनि पच्धातोस्तृचि च पक्ता । पक्त्री । इत्यादीनि रूपाणि भवन्ति । इति । अथ तथाहि इति वदन् 'ग्रह्+इ+तृ' इतिश्यामपाटचां लिखित्वा ७-२-३७ ग्रहो...सूत्रमुपस्थापयेत् ।

३-१-१३५ इगु... किरः = इगुपधकाज्ज्ञाप्रीभ्यां किरतेः(कृधातोश्च) कः= कप्रत्ययो भवति ।

३-१-१३६ आत- उपसर्गे = उपसर्गे सति, आतः = आकारान्ताद्, धातोः, (३-१-९१) कः (३-१-१३५) । ३-१-१४१ श्याद्व्य...इति णस्यापवादः ।

३-१-१३७ पाघ्रा...दृशः= पाप्रभृतिभ्यः, शः= शप्रत्ययो भवति । उदाहरणेषु ७-३-७८ पाघ्रा...इति पादीनां पिबाद्यादेशाः ।

३-१-१३८ अनुपसर्गात् = अविद्यमानोपसर्गेभ्यः, लिम्प...हिभ्यः = लिप् विद् प्रभृतिभ्यः, शः (३-१-१३७) । आद्यौ तौदादिकौ । ३-१-७७ तुदा...इति शः । ७-१-५९ शे मु...इति नुँम् । सातिः सौत्रो धातुः । शेषा हेतुमण्ण्यन्ताः ।

३-१-१३९ ददा- अनुपसर्गात् (३-१-१३८) ददातिदधात्योः= दाञो धाञश्च, विभाषा= वा, शः (३-१-१३७) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-१-१४० ज्वलितिकसन्तेभ्यो णः ॥१४३

ज्वालः, ज्वलः । उपसर्गे तु प्रज्वलः ।

(तनोतेर्णस्योपसंख्यानं कर्तव्यम्)

अवतनोतीत्यवतानः ।

३-१-१४१ श्याद्व्यधास्रुसंस्र्वतीण-वसावहृलिहश्लिषश्वसश्च ॥

अवश्यायः । दायः । धायः । व्याधः । आस्रावः । संस्रावः । अत्यायः । अवसायः । अवहारः । लेहः । श्लेषः । श्वासः ।

३-१-१४२ दुन्योरनुपसर्गे ॥

दावः । नायः । नीसाहचर्यात्, टुदु उपतापे इति सानुबन्धकस्यैव ग्रहणान्निरनुबन्धकाद् दवतेः पचाद्यच् । दवः ।

३-१-१४३ विभाषा ग्रहः ॥१४४

व्यवस्थितविभाषेयम् । तेन जलचरे ग्राहः । ज्योतिषि ग्रहः ।

(भवतेश्चेति वक्तव्यम्)

भावः । भवः ।

३-१-१४४ गेहे कः ॥

गृह्णाति धान्यादिकमिति-गृहम् ।

तात्स्थ्याद् गृहाः=दाराः ।

३-१-१४५ शिल्पिनि ष्वुँन् ॥

(नृति-खनि-रञ्जिभ्य एव)

नर्तकः । खनकः । रजकः ।

३-१-१४६ गस्थकन् ॥१४७

गाथकः ।

३-१-१४७ ण्युँट् च ॥१४८

गायनः ।

३-१-१४८ हश्च व्रीहिकालयोः ॥

हायनो व्रीहिः । हायनः संवत्सरः ।

३-१-१४९ प्रुसृल्वः समभिहारे वुँन् ॥१५०

प्रवकः । सरकः । लवकः ।

३-१-१५० आशिषि च ॥

जीवताद्-जीवकः ।

इति तृतीयाऽध्याये प्रथमः पादः ।

शप्रत्यये शप् श्लुश्च । पक्षे ३-१-१४१ श्याद्व्य...इति णः ।

३-१-१४० ज्वलि- अविद्यमानोपसर्गेभ्यः (३-१-१३८) ज्वलि...तेभ्यः = ज्वलादिभ्यः कस्पर्यन्तेभ्यो धातुभ्यः, विभाषा (३-१-१३९) णः= ण प्रत्ययो भवति । पक्षे पचाद्यच् ।

३-१-१४१ श्याद्व्य...श्वसः = श्या आत् (आकारान्त) व्यध् आसु संसु अति+इण् अव+सा अव+हृ लिह् श्लिष् श्वस् इत्येतेभ्यो धातुभ्यः, णः (३-१-१४०) । आदित्यनेनैव सिद्धे पृथक् श्याऽवसाग्रहणं बाधकबाधनार्थम् ।

अवश्यायः अत्र ३-१-१३६ आत...इति कप्रत्ययं बाधित्वा णो भवति । एवम् अवसाय इत्यत्र ।

३-१-१४२ दुन्यो- अनुपसर्गे = उपसर्गाभावे, दुन्योः = दु नी धातुभ्याम्, णः (३-१-१४०) ।

३-१-१४३ विभा- ग्रहः= ग्रह्धातोः, विभाषा= वा, णः (३-१-१४०) । **ग्रहः** पचाद्यच् ।

३-१-१४४ गेहे = गृहे कर्तरि, ग्रहः (३-१-१४३) कः= कप्रत्ययो भवति । **गृहम्** ६-१-१६ ग्रहि...इति सम्प्रसारणम् ।

३-१-१४५ शिल्पिनि= शिल्पिनि गम्ये, धातोः (३-१-९१) ष्वुँन्= ष्वुँन् प्रत्ययो भवति ।

नृति- रजकः ६-४-२४ अनि...सूत्र स्थेन असि...इति वार्तिकेन नलोपः ।

३-१-१४६ गः = गाधातोः, थकन्= थकन् प्रत्ययो भवति ।

३-१-१४७ ण्युँट् च = गः (३-१-१४६) ण्युँट्= ण्युँट् प्रत्ययो भवति । **गायनः** ७-३-३३ आतो...इति युँक् ।

३-१-१४८ हः = हा (ओहाक् ओहाङ्) धातोः, ण्युँट् (१४७) व्रीहिकालयोः= व्रीहौ काले च कर्तरि ।

३-१-१४९ प्रुसृल्वः = प्रु सृ लू धातुभ्यः, समभिहारे = साधुकारित्वे, वुँन्=वुँन् प्रत्ययो भवति ।

३-१-१५० आशिषि- अभीष्टवस्तुप्राप्तिविषयिकाऽऽशंसा = आशीः । तस्यां गम्यमानायाम्, धातोः (३-१-९१) वुँन् (३-१-१४९) ।

इति तृतीयाऽध्याये प्रथमः पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तृतीयाऽध्याये

द्वितीयः पादः

३-२-१ कर्मण्यण् ॥५८, २

(शीलिकामिभिक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्)

मांसशीलः । मांसशीला । मांसकामः । मांसकामा । मांसभक्षः । मांसभक्षा । कल्याणाचारः । कल्याणाचारा ।

(ईक्षिक्षमिभ्यां च)

सुखप्रतीक्षः । सुखप्रतीक्षा । बहुक्षमः । बहुक्षमा ।

३-२-२ ह्वावामश्च ॥

स्वर्गह्वायः । तन्तुवायः । धान्यमायः ।

३-२-३ आतोऽनुपसर्गे कः ॥७

गोदः । कम्बलदः । अणोऽपवादः । अनुपसर्गे इत्युक्तेर्नेह-गोसंदायः ।

३-२-१ कर्म- ३-२-९२ तत्रोपपदं... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)
३-१-९१ धातोः ॥ ३-२-१ कर्मणि (क) अण् ॥इति ।

कर्मणि= कर्मबोधके पदे उपपदे सति, (क)=धातोः, अण्=अण् प्रत्ययो भवति । इत्यर्थमुपदिशेत् । अथाग्रे शिक्षकः प्रकृतोक्तं 'कुम्भकार' इति प्रयोगं शिक्षयितुकामश्छात्रानुपदिशेत् । वत्साः ? उक्तमेव' 'कुम्भम्' इत्युपपदमिति । तस्मिन् सति कृ (डुकृञ् तनादि) धातोः पूर्ववत् कर्तरि अण् प्रत्ययेऽनुबन्धलोपे कृ+अ ७-२-११५ अचो...सूत्रेण वृद्धौ 'कार' (इति श्यामपाट्यां लिखित्वा) इति भवति । इति । अथाऽग्रे शिक्षकः सिंहावलोकनन्यायेनोद्बोधयेत् । वत्साः? यदा 'करोति' इति कर्त्रर्थक-तिङन्तं पदं तदाऽनुक्ते कर्मणि द्वितीया विभक्तिर्भवति । यथोपदिष्टं २-३-२ कर्म...सूत्रे । परन्तु प्रकृते कर्त्रर्थक-कृत् (अण्) प्रत्ययान्तेन कार इत्यनेन योगे तु अनुक्ते कर्मणि द्वितीयाविभक्तेर्बाधिका षष्ठी विभक्तिर्भवति । यथोपदिष्टं २-३-६५ कर्तृ...सूत्रे । अतः पूर्वम्, कुम्भम् (कुम्भ+अम्) करोति इति विग्रहेऽपि साम्प्रतं कुम्भ+ङस् कार इति जातम् । इति । अथाऽत्र शिक्षकोऽनन्यचेतसश्छात्रान् धीरमधोनिर्दिष्टरूपेण बोधयेत् । वत्साः? अत एव (कृत्प्रत्यये सति षष्ठी विभक्तिर्भवतीति विचारादेव) कुम्भं करोतीति विग्रहे कुम्भ+ङस् इति बुद्धिस्थे (साम्प्रतं कृद्योगाऽभावेन षष्ठ्या असम्भवेऽपि) षष्ठ्यन्ते पदे उपपदे कृधातोः, इति प्रक्रियाविदः प्राहुरिति । अथ कुम्भ+ङस्+कार इति श्यामपाट्यां लिखित्वा २-२-१९. उपपदमतिङ्-सूत्रमुपदिशेत् ।

३-२-२ ह्वावामः= (कर्मणि ३-२-१) ह्वा (ह्वेञ्) वा (वेञ्) मा धातुभ्यः, अण् (३-२-१) । वा गतिगन्धनयोरित्यस्य तु न ग्रहणम् । ह्वेञा साहचर्यात् सानुबन्धकस्यैव ग्रहणात् । ३-२-३ आतो...इति कस्याऽपवादः ।

३-२-३ आतो- २-२-१९. उपपदमतिङ्- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)
३-१-९१ धातोः ॥ ३-२-१ कर्मणि अण् ॥

३-२-३ (ख) आतः (क) अनुपसर्गे कः ॥इति । (ख)=कर्मणि=कर्मण्युपपदे, अनुपसर्गे =उपसर्गाऽभावे सति, आतः=आकारान्ताद्, (क)=धातोः, कः=कप्रत्ययो भवति । इत्यर्थमुपदिश्योदाहरेत् । यथा-गां ददाति इति विग्रहे पूर्ववद् गाम् इत्यस्य (गो+ङस् इति बुद्धिस्थस्य वा) उपपदसंज्ञायां तस्मिन्नुपपदे (जुहोत्यादि-डुदाञ्) धातोः प्रकृतसूत्रेण कप्रत्ययेऽनुबन्धलोपे च 'दा+अ' इति श्यामपाट्यां लिखित्वा ६-४-६४ आतो लोप...सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-४ सुँपि स्थः ॥८३

समस्थः । विषमस्थः ।

अत्र सुँपीति योगो विभज्यते । द्वाभ्यां पिबतीति द्विपः । ततः 'स्थः' अर्थः प्राग्वत् ।

द्वितीयं किमर्थम् ?

भावेऽपि यथा स्यात् । आखूनामुत्थानमाखूत्थः । इत उत्तरं कर्मणीति च सुँपीति च द्वयमप्यनुवर्तते । तत्र सकर्मकेषु धातुषु कर्मणीत्येतदुपतिष्ठते, अन्यत्र सुँपीतीति-काशिका ।

३-२-५ तुन्दशोकयोः परिमृजापनुदोः ॥

(आलस्यसुखाहरणयोरिति वक्तव्यम्)

तुन्दपरिमृजोऽलसः । तुन्दपरिमार्जोऽन्यः । शोकाऽपनुदः पुत्रः । यः प्रतिपक्षोपदेशेन शोकस्याऽपनोदको न तु सुखस्योत्पादकस्तस्मिन् वाच्ये शोकापनोदः ।

(मूलविभुजादिभ्यः कः)

मूलानि विभुजंतीति मूलविभुजः ।

आकृतिगणोऽयम् । महीध्रः । कुध्रः ।

३-२-६ प्रे दाज्ञः ॥

सर्वप्रदः । पथिप्रज्ञः । प्रे इत्युक्तेर्नेह-गोसंदायः ।

३-२-७ समि ख्यः ॥

गोसंख्यः ।

३-२-८ गापोष्टक् ॥

सामगः । टित्त्वान्ङीप् सामगी ।

(पिबतेः सुराशीध्वोरिति वक्तव्यम्)

सुरापः । सुरापी । शीधुपः । शीधुपी ।

उपसर्गे तु सामसंगायः ।

(बहुलं छन्दसीति वक्तव्यम्)

सुरापी सुरापा वा ब्राह्मणी ।

३-२-९ हरतेरनुद्यमनेऽच् ॥११,१५

अंशहरः । अनुद्यमने, इत्युक्तेर्नेह- भारहारः ।

(अच्प्रकरणे शक्तिलाङ्गलाङ्कुशतोमरयष्टिघटघटीधनुष्षु ग्रहेरुपसंख्यानम्)

शक्तिग्रहः ।

(सूत्रे च धार्यर्थे)

सूत्रग्रहः=सूत्रस्य धारयिता । सूत्रग्राहोऽन्यः ।

३-२-४ सुँपि=सुँबन्ते उपपदे, स्थः=स्थाधातोः, कः (३-२-३) ।

अत्र...ज्यते-सुँबन्ते उपपदे, आतः (३-२-३) धातोः (३-१-९१) कः (३-२-३) ।

३-२-५ तुन्द- कर्मणोः (३-२-१) = कर्मबोधकयोः,तुन्दशोकयोः= तुन्दशोकयोरुपपदयोः, परिमृजापनुदोः= परिमृज् अपनुद् इत्येताभ्यां धातुभ्याम्, कः (३-२-१) ।

मूलविभुजादिभ्यः=मूलविभुजादिशब्दसिद्धये, कः= कप्रत्ययो भवति ।

३-२-६ प्रे- कर्मणि (३-२-१) प्रे=प्र इत्युपसर्गे सति, दाज्ञः=ददातेर्जानातेश्च, कः (३-२-३) । अणोऽपवादः । सोपसर्गत्वात् । ३-२-३ आतो...इत्यस्याऽप्राप्ताविदम् ।

३-२-७ समि- कर्मणि (३-२-१) समि=समुपसर्गे सति, ख्यः=ख्याधातोः, कः (३-२-३) ।

३-२-८ गापो- कर्मणि (३-२-१) अनुपसर्गे (३-२-३) गापोः=गायतेः पिबतेश्च, टक्=टक् प्रत्ययो भवति । कस्याऽपवादः । **बहु-सुरापी सुरापा** टक्पक्षे ङीप् । कपक्षे टाप् ।

३-२-९ हर- कर्मणि (३-२-१) हरतेः=हृधातोः, अच्= अच् प्रत्ययो भवति, अनुद्यमने =ऊर्ध्वनयनार्थाऽनवगमे । उद्यमनम्=ऊर्ध्वनयनम् । तदभावः=अनुद्यमनम् ।

अच् प्र- प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्, इति परिभाषया सिद्धे घटीग्रहणं तस्याः परिभाषाया अनित्यत्वज्ञापनार्थम् । तेन नेपालराज्ञी इत्यत्र ५-४-९१ राजा...इति न टच् ।

सूत्रे =कर्मबोधके सूत्रशब्दे उपपदे, धार्यर्थे =धारयितेत्यर्थे, ग्रहः, अच् (३-२-९) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-१० वयसि च ॥

कवचहरः कुमारः ॥

३-२-११ आङि ताच्छील्ये ॥

पुष्पाहरः । फलाहरः ।

३-२-१२ अर्हः ॥

पूजार्हा ब्राह्मणी ।

३-२-१३ स्तम्बकर्णयो रमिजपोः ॥

(हस्तिसूचकयोरिति वक्तव्यम्)

स्तम्बेरमो हस्ती । कर्णेजपः सूचकः ।

३-२-१४ शमि धातोः संज्ञायाम् ।

शङ्करः । शंभवः ।

३-२-१५ **अधिकरणे** शेतेः ॥१६

खेशयः, खशयः ।

(पार्श्वादिषूसंख्यानम्)

पार्श्वाभ्यां शेते=पार्श्वशयः । उदरशयः । पृष्ठशयः ।

(दिग्धसहपूर्वाच्च)

दिग्धसहशयः ।

(उत्तानादिषु कर्तृषु)

उत्तानः शेते = उत्तानशयः । अवमूर्धा शेते =अवमूर्धशयः ।

(गिरौ डश्छन्दसि)

गिरौ शेते =गिरिशः । लोकेऽपि ५-२-१०० लोमा...इति शप्रत्यये सिध्यति । गिरीशो गिरिशो मृडः, इत्यमरः ।

३-२-१६ **चरेष्टः** ॥१७,२३

कुरुषु चरतीति=कुरुचरः ।

टित्वान्ङीप्-कुरुचरी ।

३-२-१७ भिक्षासेनादायेषु च ॥

भिक्षां चरतीति=भिक्षाचरः । सेनां चरतीति=सेनाचरः । आदायचरः ।

३-२-१८ पुरोऽग्रतोऽग्रेषु **सर्तेः** ॥१९

पुरस्सरः । अग्रतःसरः । अग्रेसरः । कथमग्रसर इति ? बाहुलकात् ।

३-२-१० वय- कर्मणि (३-२-१) हरतेः+अच् (३-२-९) वयसि=वयसि गम्ये । उद्यमनार्थमिदम् ।

३-२-११ आङि- कर्मणि (३-२-१) आङि= आङ्युपपदे, हरतेः+अच् (३-२-९) ताच्छील्ये= ताच्छील्ये गम्ये । ताच्छील्यम्= तत्स्वभावता ।

३-२-१२ अर्हः- कर्मणि (३-२-१) अर्हः=अर्हधातोः, अच् (३-२-९) । **पूजार्हा** अजन्तत्वाट्टाप् । अणि तु ङीप् स्यात् ।

३-२-१३ स्तम्ब- सुँपि (३-२-४)=सुँबन्तयोः, स्तम्बकर्णयोः= स्तम्बकर्णयोरुपपदयोः, रमिजपोः=रमिजपिभ्याम्, अच् (३-२-९) । **हस्ति-** उदाहरणयोः- ६-३-१४ तत्पु...इति ङेरलुक् ।

३-२-१४ शमि=शमित्युपपदे, धातोः= धातोः परतः, अच् (३-२-९) संज्ञायाम्= संज्ञायां गम्यमानायाम् । धातोरित्यधिकारे पुनर्धातोरिति ग्रहणं हेत्वादिषु कृञष्टबाधनार्थम् । शङ्करा नाम शकुनिका सा तच्छीला तत्संज्ञा च ।

३-२-१५ अधिकरणे= अधिकरणे उपपपदे, शेतेः=शीधातोः, अच् (३-२-९) । **खेशयः** ६-३-१८ शय...इति ङेरलुग्वा । **पार्श्वा**दिषूपपदेषु शेतेः (३-२-१५) अच् (३-२-९) । **दिग्धसहपूर्वात्**, शेतेः (३-२-१५) अच् (३-२-९) । दिग्धेन सह=दिग्धसह । दिग्धसह शेते =दिग्धसहशयः । **उत्ता-** कर्तृषु=कर्तृवाचिषु, उत्तानादिषु=उत्तानप्रभृतिषूपपदेषु, शेतेः (३-२-१५) अच् (३-२-९) ।

३-२-१६ चरे- अधिकरणे (३-२-१५) चरेः=चर्धातोः, टः=टप्रत्ययो भवति ।

३-२-१७ भिक्षा...येषु=भिक्षा सेना आदायेत्युपपदेषु, चरेः+टः (३-२-१६) । आदायेति ल्यबन्तम् ।

३-२-१८ पुरो...ग्रेषु=पुरस् अग्रतस् अग्र इतिशब्देषूपपदेषु, सर्तेः=सृधातोः, टः (३-२-१६) अग्रशब्दस्यैदन्तत्वं च निपात्यते । सप्तम्या अलुका तु अग्रेण सरतीत्यादिविग्रहे न सिध्येत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-१९ पूर्वे कर्तरि ॥

पूर्वः सरतीति=पूर्वसरः । पूर्वं (देश) सरतीति विग्रहे तु- पूर्वसारः ।

३-२-२० **कृञो** हेतुताच्छील्यानुलोम्येषु ॥२४

यशस्करी विद्या । श्राद्धकरः । वचनकरः ।

हेत्वादिष्वित्युक्तेर्नेह- कुम्भकारः ।

३-२-२१ दिवा-विभा-निशा-प्रभाभास्का-रान्तानन्तादि-बहु-नान्दी-किं-लिपि-लिबि-बलि-भक्ति-कर्तृ-चित्र-क्षेत्र-संख्या-जङ्घा-बाह्वहर्यत्तद्धनुररुष्षु ॥

दिवाकरः । विभाकरः । निशाकरः । प्रभाकरः । भास्करः । कारकरः । अन्तकरः । अनन्तकरः । आदिकरः । बहुकरः । नान्दीकरः । किंकरः । लिपिकरः । लिबिकरः । बलिकरः । भक्तिकरः । कर्तृकरः । चित्रकरः । क्षेत्रकरः । एककरः । द्विकरः । त्रिकरः । जङ्घाकरः । बाहुकरः । अहस्करः । यत्करः । तत्करः । धनुष्करः । अरुष्करः ।

(कियत्तद्बहुषु कृञोऽज्विधानम्)

किंकरा । यत्करा । तत्करा । बहुकरा ।

३-२-२२ कर्मणि भृतौ ॥

कर्म करोतीति=कर्मकरः । भृतक इत्यर्थ : ।

भृतावित्युक्तेर्नेह-कर्मकारः ।

३-२-२३ न शब्द- श्लोक- कलह-गाथा-वैर-चाटु-सूत्र-मन्त्रपदेषु ॥

शब्दकार इत्यादि ।

३-२-२४ स्तम्बशकृतोरिन् ॥२७

(व्रीहिवत्सयोरिति वक्तव्यम्)

स्तम्बकरिर्व्रीहिः । शकृत्करिर्वत्सः ।

३-२-२५ हरतेर्दृतिनाथयोः पशौ ॥

दृतिहरिः पशुः । नाथहरिः पशुः । पशोरन्यत्र दृतिहारः । नाथहारः ।

३-२-२६ फलेग्रहिरात्मम्भरिश्च ॥

फलेग्रहिः । आत्मम्भरिः । चकारोऽनुक्तसमुच्चयार्थः । अत एव चान्द्राः-आत्मोदरकुक्षिष्विति पठन्ति । उदरम्भरिः । कुक्षिम्भरिः ।

३-२-१९ पूर्वे- कर्तरि=कर्तृवाचिनि, सुँपि (३-२-४) पूर्वे =पूर्वशब्दे उपपदे, सर्तेः (३-२-१८) टः (३-२-१६) ।

३-२-२० कृञो- कर्मणि (३-२-१) कृञः=कृञ् धातोः, टः (३-२-१६) हेतु...म्येषु=हेत्वादिषु गम्येषु ।

३-२-२१ दिवा...रुष्षु=दिवाप्रभृतिषूपपदेषु, कृञः (३-२-२०) टः (३-२-१६)। अहेत्वाद्यर्थ आरम्भः । **भास्करः** ८-३-४८ कस्का...इति सत्वम् । **अहस्करः** ८-३-४६ अत...इति सत्वम् । **धनुष्करः अरुष्करः** ८-३-४५ नित्यं...इति षत्वम् ।

३-२-२२ कर्म- कर्मणि (३-२-१) =कर्मबोधके, कर्मणि=कर्मञ्शब्दे उपपदे, कृञः (३-२-२०) टः (३-२-१६) भृतौ=वेतने गम्ये ।

३-२-२३ न श- शब्द...देषु=शब्दप्रभृतिषु शब्देषूपपदेषु, कृञः (३-२-२०) टः (३-२-१६) +न= टप्रत्ययो न भवति । **शब्दकारः** हेत्वादिषु प्राप्तष्टः प्रतिषिध्यते । (३-२-१) कर्म...इत्यण् ।

३-२-२४ स्तम्ब- कर्मणोः (३-२-१) स्तम्बशकृतोः= स्तम्बशकृतोरुपपदयोः, कृञः (३-२-२०) इन्= इन् प्रत्ययो भवति ।

३-२-२५ हर- कर्मणोः (३-२-१) दृतिनाथयोः= दृतिनाथशब्दयोरुपपदयोः, हरतेः=हृधातोः, इन् (३-२-२४) पशौ=पशौ कर्तरि । दृतिः=चर्म । नाथः=नासारज्जुः ।

३-२-२६ फले...भरिः- निपात्येते- फलशब्दे उपपदे ग्रहेरिन् फलशब्दस्यैकारः, आत्म (न्) शब्दे उपपदे भृञ इन् पूर्वपदस्य मुँमागमश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-२७ छन्दसि वन-सन-रक्षि-मथाम् ॥

ब्रह्मवनिं त्वा क्षत्रवनिम् । गोसनिं यौ पथिरक्षी श्वानौ । हविर्मथीनाम् ।

३-२-२८ एजेः खश् ॥३७

जनानेजयतीति=जनमेजयः ।

(खश्प्रकरणे वातशुनीतिलशर्द्धेष्वज-धेट्-तुद-जहातीनामुपसंख्यानम्)

वातमजा मृगाः । शुनिन्धयः । तिलन्तुदः । शर्द्धञ्जहा माषाः ।

३-२-२९ नासिकास्तनयोर्ध्माधेटोः ॥३०

अत्र यथासंख्यं नेष्यते ।

(स्तने धेटो नासिकायां ध्मश्च धेटश्च)

स्तनन्धयः । नासिकन्धमः । नासिकन्धयः ।

धेटष्टित्त्वात् स्त्रियां ङीप् । स्तनन्धयी ।

३-२-३० नाडीमुष्टचोश्च ॥

अत्रापि यथासंख्यं नेष्यते ।

नाडिन्धमः । नाडिन्धयः । मुष्टिन्धमः । मुष्टिन्धयः । चकारोऽनुक्तसमुच्चयार्थः-पुष्पन्धयः ।

(घटीखारीखरीषूपसंख्यानम्)

घटिन्धमः । घटिन्धयः । खारिन्धमः । खारिन्धयः । खरिन्धमः । खरिन्धयः ।

"घटीखारीवातशब्देष्वप्युपपदेषु ध्माधेटोः खश् भवति" इति न्यासः । वातन्धमः । वातन्धयः ।

३-२-३१ उदि कूले रुजिवहोः ॥

कूलमुद्रुजः । कूलमुद्वहः ।

३-२-३२ वहाभ्रे लिहः ॥

वहंलिहो गौः । अभ्रंलिहो वायुः ।

३-२-३३ परिमाणे पचः ॥३४

प्रस्थम्पचः । खारिम्पचः ।

३-२-३४ मितनखे च ॥

मितम्पचा ब्राह्मणी । नखम्पचा यवागूः ।

३-२-२७ छन्द- वन...मथाम्= वन् सन् रक्ष् मथ् इति धातुभ्यः, इन् (३-२-२४) छन्दसि= वेदे । **पथिरक्षी** द्विवचने ६-१-९८ प्रथ...इति पूर्वसवर्णदीर्घः ।

३-२-२८ एजेः- कर्मणि (३-२-१) एजेः=ण्यताद् एजेः,खश्=खश्प्रत्ययो भवति । **जनमेजयः** शित्त्वात् सार्वधातुककार्यम् । ६-३-६७ अरु...इति मुँमागमः ।

खश्प्र- शुनिन्धयः ६-३-६६ खित्य... इति ह्रस्वः । मुँम् प्राग्वत् ।

३-२-२९ नासि- कर्मणोः (३-२-१) नासिकास्तनयोः= नासिकास्तनयोरुपपदयोः, ध्माधेटोः= ध्मा धेट् धातुभ्याम्, खश् (३-२-२८) । **नेष्यते-** अल्पाच्तरस्य स्तनशब्दस्य पूर्वनिपाते कर्तव्ये परनिपातसामर्थ्यादिदं ज्ञायते । **स्तने-नासिकन्धमः** ७-३-७८ पाघ्रा...इति धमादेशः । ह्रस्वः, प्राग्वत् । सर्वत्रैव प्राग्वद् मुँम् ।

३-२-३० नाडी- कर्मणोः (३-२-१) नाडीमुष्टयोः= नाडी मुष्टि शब्दयोरुपपदयोः, ध्माधेटोः (३-२-२९) खश् (३-२-२८) । **नेष्यते-** घ्यन्तमुष्टिशब्दस्य परनिपातसामर्थ्यात् । हस्वमुँमागमौ प्राग्वत् ।

३-२-३१ उदि- कर्मणि (३-२-१) कूले =कूलशब्दे उपपदे, उदि=उद् इत्युपसर्गे सति, रुजिवहोः= रुज् वह् धातुभ्याम्, खश् (३-२-२८) । कूलमुद्रुजः ३-१-७७ तुदा...इति शः ।

३-२-३२ वहा- कर्मणि (३-२-१) वहाभ्रे=वह अभ्र इत्युपपदे, लिहः=लिह्धातोः, खश् (३-२-२८) । वहंलिहो गौः २-४-७२ अदि...इति शपो लुक् । अतो ङिद्गुणप्रतिषधौ ।

३-२-३३ परिमाणे =परिमाणवाचिनि, कर्मणि (३-२-१) पचः=पच्धातोः, खश् (३-२-२८) । **प्रस्थम्पचः** यद्यप्यत्र प्रस्थादिशब्दाः प्रस्थादिपरिमितव्रीह्यादिपराः प्रस्थादेः काष्ठादिमयस्य विक्लित्त्यसम्भवात्, तथापि परिमाणव्यपदेशो न विरुध्यते, प्रथमं परिमाणवृत्तित्वात् ।

३-२-३४ मित-कर्मणि (३-२-१) मितनखे =मितशब्दे नखशब्दे चोपपदे, पचः (३-२-३३) खश् (३-२-२८) । अपरिमाणार्थमिदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-३५ विध्वरुषोस्तुदः ॥

विधुन्तुदः । अरुन्तुदः ।

३-२-३६ असूर्यललाटयोर्दृशितपोः ॥

सूर्यं न पश्यन्तीति=असूर्यंपश्या राजदाराः ।

ललाटन्तपः सूर्यः ।

३-२-३७ उग्रम्पश्येरम्मदपाणिन्धमाश्च ॥

उग्रम्पश्यः । इरम्मदः । पाणिन्धमः ।

३-२-३८ प्रियवशे वदः खच् ॥४७

प्रियंवदः । वंशवदः ।

(खच्प्रकरणे गमेः सुँप्युपसंख्यानम्)

मितङ्गमो हस्ती ।

(विहायसो विह च)

विहायसा गच्छति-विहङ्गमः ।

(खच्च डिद्वा वाच्यः)

विहङ्गः, विहङ्गमः । भुजङ्गः, भुजङ्गमः ।

३-२-३९ द्विषत्परयोस्तापेः ॥

द्विषन्तं तापयतीति=द्विषन्तपः । परन्तपः ।

लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्नेह-

द्विषतीं तापयतीति=द्विषतीतापः ।

३-२-४० वाचि यमो व्रते ॥

वाचंयमो मौनव्रती । व्रतादन्यत्र-

वाग्यामः । अत्राऽणेव ।

३-२-४१ पूःसर्वयोर्दारिसहोः ॥

पुरं दारयतीति=पुरन्दरः । सर्वंसहः ।

(भगे च दारेरिति वक्तव्यम्)

भगं दारयतीति-भगन्दरः ।

३-२-४२ सर्वकूलाभ्रकरीषेषु कषः ॥

सर्वंकषः खलः । कूलंकषा नदी ।

अभ्रंकषो गिरिः । करीषंकषा वात्या ।

३-२-३५ विध्व- कर्मणोः (३-२-१) विध्वरुषोः=विधु अरुष् शब्दयोरुपपदयोः, तुदः=तुद्धातोः, खश् (३-२-२८) । **अरुन्तुदः** ६-३-६७ अरु...इति मुँम् । ८-२-२३ संयो...इति षलोपः ।

३-२-३६ असू- कर्मणोः (३-२-१) असू...टयोः= असूर्यललाट- शब्दयोरुपपदयोः, दृशितपोः=दृश् तप् इति धातुभ्याम्, खश् (३-२-२८) । **असूर्यम्पश्या** ७-३-७८ पाघ्रा...इति पश्यादेशः । नञो दृशिना सम्बन्धेऽपि, अत एव ज्ञापकात् सूर्यशब्देन सामर्थ्याऽभावेऽपि समासः ।

३-२-३७ उग्र...धमाः= एते खश्प्रत्ययान्ता निपात्यन्ते । उग्र इर मद इत्येतेषूपपदेषु क्रमशो दृश् मद् ध्मा धातुभ्यः । उग्रं पश्यतीत्युग्रम्पश्यः । इरया माद्यतीति इरंमदः । अत्र श्यनोऽभावः । पाणयो ध्मायन्तेऽस्मिन्निति-पाणिन्धमः=पन्थाः । तत्र सर्पाद्यपनयनाय पाणयो ध्मायन्ते रात्रौ । आद्यन्तयोः ७-३-७८ पाघ्रा...इति पश्यधमौ ।

३-२-३८ प्रिय- कर्मणि (३-२-१) प्रियवशे = प्रियशब्दे वशशब्दे चोपपदे, वदः= वद्धातोः, खच्= खच् प्रत्ययो भवति । खच आर्धधातुकसंज्ञा । खशि तु सार्वधातुकसंज्ञा स्यात् । संज्ञाभेदफलमग्रिमसूत्रेषु ।

३-२-३९ द्विष- कर्मणोः (३-२-१) द्विषत्परयोः=द्विषत्परयोरुपपदयोः, तापेः=तापि (ण्यन्ततप्) धातोः, खच् (३-२-३८) । उदाहरणयोः खच आर्धधातुकत्वात् ६-४-५१ णेर...इति णिलोपः । ६-४-९४ खचि...इत्युपधाह्रस्वः । ६-३-६७ अरु...इति मुँम् ।

३-२-४० वाचि- कर्मणि (३-२-१) वाचि=वाच्शब्दे उपपदे, यमः=यम्धातोः, खच् (३-२-३८) व्रते= व्रते गम्ये । **वाचंयमः** ६-३-६९ वाचं...इति निपातनम् ।

३-२-४१ पूःस- कर्मणोः (३-२-१) पूःसर्वयोः= पुर् सर्वशब्दयोरुपपदयोः, दारिसहोः = दारि सह् धातुभ्याम्, खच् (३-२-६८) । **पुरन्दरः** ६-४-५१ णेर...इति णिलोपः । ६-४-९४ खचि...इत्युपधाह्रस्वः । ६-३-६९ वाचं...इति निपातनम् ।

३-२-४२ सर्वकूल-कर्मसु (३-२-१) सर्व...षेषु= सर्व कूल अभ्र करीष इति शब्देषूपपदेषु, कषः=कष्धातोः, खच् (३-२-३८) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-४३ मेघर्तिभयेषु कृञः । ४४

मेघङ्करः । ऋतिङ्करः । भयङ्करः ।

'भयशब्देन तदन्तविधिः'

अभयङ्करः ।

३-२-४४ क्षेमप्रियमद्रेऽण् च ॥

क्षेमङ्करः, क्षेमकारः प्रियङ्करः, प्रियकारः । मद्रङ्करः, मद्रकारः । कथं तर्हि क्षेमकरः क्षितिपो यतः प्रजानाम् इति भट्टिः? पचाद्यच् ।

३-२-४५ आशिते भुवः करणभावयोः ॥

आशितो भवत्यनेन=आशितंभव ओदनः ।

आशितस्य भवनम्=आशितंभवं वर्तते ।

३-२-४६ संज्ञायां भृ-तॄ-वृ-जि-धारि-सहि-तपि-दमः ॥४७

विश्वंभरः । रथन्तरः । पतिंवरा । शत्रुञ्जयः । युगन्धरः । शत्रुंसहः । शत्रुन्तपः । अरिन्दमः ।

संज्ञायामित्युक्तेर्नेह-

कुटुम्बं बिभर्तीति=कुटुम्बभारः ।

३-२-४७ गमश्च ॥४८

सुतङ्गमः ।

३-२-४८ अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः ॥५०

अन्तगः । इत्यादि ।

(डप्रकरणे सर्वत्रपन्नयोरुपसंख्यानम्)

सर्वत्रगः । पन्नगः ।

(उरसो लोपश्च)

उरसा गच्छतीति=उरगः ।

(सुदुरोरधिकरणे)

सुखेन गच्छन्त्यस्मिन्निति=सुगः ।

दुःखेन गच्छन्त्यस्मिन्निति=दुर्गः ।

(अन्यत्रापि दृश्यत इति वाच्यम्)

ग्रामगः ।

(डे च विहायसो विहादेशो वक्तव्यः)

विहगः ।

३-२-४९ आशिषि हनः ॥५५

शत्रुं वध्यात्=शत्रुहः ।

आशिषीत्युक्तेर्नेह-शत्रुं हन्तीति-शत्रुघातः ।

(दारावाहनोऽणन्तस्य च टः संज्ञायाम्)

३-२-४३ मेघ-कर्मसु (३-२-१) मेघ...येषु= मेघ ऋति भय इति शब्देषूपपदेषु, कृञः=कृञ् धातोः, खच् (३-२-३८) ।

३-२-४४ क्षेम- कर्मसु (३-२-१) क्षेम...मद्रे=क्षेमप्रियमद्रशब्देषूपपदेषु, कृञः (३-२-४३) अण्=अण्प्रत्ययो भवति, खच् (३-२-३८) च ।

३-२-४५ आशि- सुँपि (३-२-४) आशिते =आशितशब्दे उपपदे, भुवः=भूधातोः, खच् (३-२-३८) करणभावयोः=करणे भावे चार्थे । अत्र कर्मणि (३-२-१) इति न सम्बध्यते, भूधातोरकर्मकत्वात् ।

३-२-४६ संज्ञा- संज्ञाशब्दा द्विविधाः । प्रतीत्यावयवार्था अप्रतीत्यावयवार्थाश्च । तत्राद्येषु साध्येषु कर्मणि (३-२-१) इति सम्बध्यते । यथा-विश्वं भरतीति-विश्वम्भरः । अन्त्येषु व्युत्पत्त्यर्थं सुँपि (३-२-४) इनि सम्बध्यते । यथा-रथेन रथे वा तरतीति-रथन्तरं साम । भृ...दमः= भृप्रभृतिभ्यो धातुभ्यः, कर्मणि सुँपि वोपपदे, खच् (३-२-३८) संज्ञायाम्= संज्ञायां गम्यमानायाम् ।

३-२-४७ गम- सुँपि (३-२-४) गमः=गम् धातोः, खच् (३-२-३८) संज्ञायाम् (३-२-४६) । पूर्वसूत्रे एव गमेः पाठेन सिद्धे योगविभाग उत्तरसूत्रे गमेरेवानुवृत्तिर्यथा स्यान्नभृञादीनामपीत्येतदर्थः ।

३-२-४८ अन्ता- कर्मसु (३-२-१) अन्ता...न्तेषु=अन्तादिषूपपदेषु, गमः (३-२-४७) डः= डप्रत्ययो भवति । **अन्तगः** । डित्त्वाट्टिलोपः । **उर-**सुँपि (३-२-४) गमः (३-२-४७) डः (३-२-४८) उरसो लोपश्च । (१-१-५१) अलो...सूत्रबलेन सकारलोपः ।

३-२-४९ आशि- कर्मणि (३-२-१) हनः=हन्धातोः, डः (३-२-४८) आशिषि= आशिषि गम्यमानायाम् ।

दारा- कर्मणि (३-२-१) दारौ= दारुशब्दे उपपदे, आहनः= आङ् पूर्वकाद् हन्धातोः, अण्= अण् प्रत्ययो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्वाघाटः ।

(चारौ वा)

चार्वाघाटः, चार्वाघातः ।

(कर्मणि समि च)

पदानि संहन्ति=पदसंघाटः, पदसंघातः ।

३-२-५० अपे क्लेशतमसोः ॥

क्लेशापहः पुत्रः । तमोऽपहः सूर्यः ।

३-२-५१ कुमारशीर्षयोर्णिनिँः ॥

कुमारघाती । शीर्षघाती ।

३-२-५२ लक्षणे जायापत्योष्टक् ॥५४

जायाघ्नो ना । पतिघ्नी स्त्री ।

३-२-५३ अमनुष्यकर्तृके च ॥

जायाघ्नस्तिलकालकः । पतिघ्नी पाणिरेखा । पित्तघ्नं घृतम् । कथं कृतघ्नः, इति ? मूलविभुजादित्वात् ।

चोरघातो नगरघातो हस्तीति तु बाहुलकादण् ।

३-२-५४ शक्तौ हस्तिकपाटयोः ॥

हस्तिघ्नो ना । कपाटघ्नश्चोरः ।

शक्तावित्युक्तेर्नेह-विषेण हस्तिनं हन्तीति=हस्तिघातः ।

३-२-५५ पाणिघ-ताडघौ शिल्पिनि ॥

पाणिं हन्ति=पाणिघः । ताडघः ।

(राजघ उपसंख्यानम्)

राजानं हन्तीति-राजघः ।

३-२-५६ आढ्य-सुभग-स्थूल-पलित-नग्नान्ध-प्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युँन् ॥५७

अनाढ्यमाढ्यं कुर्वन्त्यनया=आढ्यङ्करणी ।

अच्वावित्युक्तेर्नेह-आढ्यीकुर्वन्त्यनेन ।

भवति, अन्तस्य च= हन् धातोरन्त्यस्य (नकारस्य) च स्थाने, टँः= टँ (अनुबन्धलोपे ट्) आदेशो भवति, संज्ञायां गम्यमानायाम् ।

चारौ- कर्मणि (३-२-१) चारौ= चारुशब्दे उपपदे, आहनः, अण्, अन्त्यस्य स्थाने, वा टँः, संज्ञायाम् । टादेशाभावे, ७-३-३२ हन...इति तकारः ।

कर्मणि= कर्मण्युपपदे, समि= सम् इत्युपसर्गे सति, हन् धातोः, अण्, अन्त्यस्य च विकल्पेन टकारादेशः ।

३-२-५० अपे- कर्मणोः (३-२-१) क्लेशतमसोः= क्लेशतमश्शब्दयोरुपपदयोः, अपे=अप इत्युपसर्गे सति, हनः (३-२-४९) डः (३-२-४८) ।

३-२-५१ कुमा-कर्मणोः (३-२-१) कुमारशीर्षयोः= कुमारशिरश्शब्दयोरुपपदयोः, हनः (३-२-४९) णिनिँः=णिनिँप्रत्ययो भवति, शिरश्शब्दस्य शीर्षभावश्च निपात्यते ।

३-२-५२ लक्षणे =लक्षणवति कर्तरि, कर्मणोः (३-२-१) जायापत्योः= जाया पति इत्येतयोरुपपदयोः, हनः (३-२-४९) टक्= टक् प्रत्ययो भवति । अत्र सूत्रे लक्षणशब्दो मत्वर्थीयाच्प्रत्ययान्तः । केवले लक्षणे तूत्तरसूत्रेणैव सिद्धौ सूत्रमिदं व्यर्थं स्यात् ।

३-२-५३ अम- कर्मणि (३-२-१) अमनुष्यकर्तृके= अमनुष्यकर्तृकेऽर्थे वर्तमानात्, हनः (३-२-४९) टक् (३-२-५२) ।

३-२-५४ शक्तौ=सामर्थ्ये गम्यमाने, कर्मणोः (३-२-१) हस्तिकपाटयोः= हस्ति (न्) कपाटयोरुपपदयोः, हनः (३-२-४९) टक् (३-२-५२) ।

३-२-५५ पाणि- शिल्पिनि= शिल्पिनि कर्तरि, पाणिघताडघौ निपात्येते=कर्मणोः पाणिताडयोरुपपदयोः, हन्धातोष्टक्, टिलोपः, हकारस्य घत्वं च ।

३-२-५६ आढ्य- अच्वौ=अच्व्यन्तेषु च्व्यर्थेषु, कर्मसु (३-२-१) आढ्य...येषु= आढ्यादिषूपपदेषु, कृञः= कृञ् धातोः, करणे= करणेऽर्थे, ख्युँन्= ख्युँन् प्रत्ययो भवति । आढ्यङ्करणी ४-१-१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-५७ कर्तरि भुवः खिष्णुच्खुकञौ ॥

अनाढ्य आढ्यो भवति=आढ्यंभविष्णुः । आढ्यम्भावुकः ।

३-२-५८ स्पृशोऽनुदके क्विँन् ॥६०

घृतं स्पृशतीति=घृतस्पृक् । मन्त्रेण स्पृशतीति=मन्त्रस्पृक् ।

३-२-५९ ऋत्विग्-दधृक्-स्रग्-दिगुष्णिगञ्चुँ-युजि-क्रुञ्चां च ॥

ऋत्विक् । दधृक् । स्रक् । दिक् । उष्णिक् । प्राङ् । प्रत्यङ् । युङ् । क्रुङ् ।

३-२-६० त्यदादिषु दृशोऽनालोचने कञ्च ॥

तादृक् । तादृशः ।

(समानान्ययोश्चेति वक्तव्यम्)

सदृक् । सदृशः । अन्यादृक् । अन्यादृशः ।

(दृशेः क्सश्च वक्तव्यः)

तादृक्षः । सदृक्षः । अन्यादृक्षः ।

३-२-६१ सत्सू-द्विष-द्रुह-दुह-युज-विद-भिदच्छिद-जि-नी-राजामुपसर्गेऽपि क्विँप् ॥

द्युसत् । उपनिषत् । अण्डसूः । प्रसूः । मित्रद्विट् । प्रद्विट् । मित्रध्रुक् । प्रध्रुक् । गोधुक् । प्रधुक् । अश्वयुक् । प्रयुक् । शास्त्रवित् । सुवित् । काष्ठभित् । प्रभित् । वृक्षच्छित् । प्रच्छित् । शत्रुजित् । विजित् । सेनानीः । अपनीः । विश्वाराट् । सुराट् ।

३-२-६२ भजो ण्विँः ॥६४

अंशभाक् । प्रभाक् ।

नञ्स्नञीकक...इति ङीप् ।

३-२-५७ कर्त- अच्वौ+च्व्यर्थेषु+आढ्यादिषु (३-२-५६) भुवः=भूधातोः, कर्तरि=कर्त्रर्थे, खिष्णुच्खुकञौ= खिष्णुच्खुकञ्प्रत्ययौ भवतः। कर्तृग्रहणं करणनिवृत्त्यर्थम् ।

३-२-५८ स्पृशो- अनुदके =उदकभिन्ने, सुपिँ (३-२-४) स्पृशः=स्पृश्धातोः, क्विँन्= क्विँन् प्रत्ययो भवति । ननु च सकर्मकत्वात् स्पृशेः कर्मैवोपपदं प्राप्नोति ? नैष दोषः । कर्तरीतिपूर्वसूत्रादनुवर्तते, तत्कर्तृप्रचयार्थं विज्ञायते। सुँबन्तमात्रे चोपपदे कर्तृप्रचयो लभ्यते-इति काशिका । सुँबन्तमात्र उपपदे सत्येकः प्रत्ययार्थः कर्ता कर्मण्युपपदे सति भवति, अपरः करणादावुपपदे, तत्र भेदे सति तत्सम्बन्धभेदेन भिद्यमानस्य कर्तुः प्रचयो लभ्यते । इति न्यासः । सर्वापहारिलोपोऽयं प्रत्ययः । तथाहि-ककारस्य १-३-८ लश...इतीत् । नकारस्य १-३-३ हल...इतीत् । इँकारस्य १-३-२ उप...इतीत् । इतां च १-३-९ तस्य...इति लोपः । वकारस्य ६-१-६५ वेर...इति लोपः ।

३-२-५९ ऋत्वि...क्रुञ्चाम्= एतेषां क्विँन्नन्तानां निपातनं भवति । तथाहि-ऋतुशब्दे उपपदे यजेः, धृषेः, सृजेः, दिशेः, उदुपसर्गकात् स्निहेः, सुँबन्तोपपदकादञ्चेः, केवलाद् युजेः, क्रुञ्चेश्च, क्विँन् (३-२-५८) । धृषेर्द्वित्वं सृजेरमागमः, उद्+स्निह् इत्यत्र दकारस्य लोपः सकारस्य षत्वं क्रुञ्चेर्नलोपाऽभावश्च निपात्यन्ते । सर्वत्रोदाहरणेषु पदान्ते ८-२-२६ क्विँन्प्र...इति कुत्वम् ।

३-२-६० त्यदादादिषु= त्यदादिषूपपदेषु, अनालोचने =अनवलोकनेऽर्थेवर्तमानात्, दृशः=दृश्धातोः, क्विँन् (३-२-५८) कञ्च=कञ् प्रत्ययोऽपि भवति । तादृशादयो रूढिशब्दाः । अतो नाऽवयवार्थप्रतीतिः । तथापि व्युत्पत्तये तं पश्यतीत्यादि विगृह्यते । उदाहरणयोः ६-३-९१ आ स...इत्यात्वम् । **समा-सदृक् सदृशः** ६-३-८९ दृग्दृ...इति समानस्य सः । **दृशेः-** उदाहरणेषु पूर्वोक्तसूत्रद्वयस्थाभ्यां दृक्षे...वार्तिकाभ्यामात्वं सादेशश्च ।

३-२-६१ सत्सू- उपसर्गेऽपि=उपसर्गे सति, असत्यपि सुँपि (३-२-४) उपपदे, सत्...राजाम्=सदादिभ्यः, क्विँप्= क्विँप् प्रत्ययो भवति । सू इति द्विषा साहचर्यादादादिकस्य तथाऽकारानुबन्धस्यैव च विदो ग्रहणं न तु लृकारानुबन्धस्य । अत्र सूत्रे 'उपसर्गेऽपि इति ग्रहणम् अनुपसर्गे इत्यस्याऽऽतोनुपसर्गे इति सूत्रादनुवर्तमानस्याऽग्रे निवृत्तिद्योतनायेति नागेशः । ३-२-७६ क्विँप् च इत्यस्यैवायं प्रपञ्चः ।

३-२-६२ भजो- सुँपि (३-२-४) उपसर्गे (३-२-६१)ऽप्युपपदे, भजः=भज्धातोः, ण्विँः=ण्विँप्रत्ययो भवति । सर्वापहारिलोपोऽयं च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-६३ **छन्दसि** सहः ॥६७

पृतनाषाट् ।

३-२-६४ **वहश्च** ॥६६

प्रष्ठवाट् ।

३-२-६५ कव्यपुरीषपुरीष्येषु ञ्युँट् ॥

कव्यवाहनः ।

३-२-६६ हव्येऽनन्तः पादम् ॥

अग्निश्च हव्यवाहनः ।

अनन्तः पादमित्युक्तेर्नेह-

हव्यवाडग्निरजरः पिता नः ।

३-२-६७ जनसनखनक्रमगमो **विँट्** ॥६९

गोजाः । गोषाः । कूपखाः । दधिक्राः । अग्रेगाः ।

३-२-६८ **अदो**ऽनन्ने ॥६९

आममत्तीत्यामात् । सस्यात् ।

अनन्ने इत्युक्तेर्नेह- अन्नादः ।

३-२-६९ क्रव्ये च ॥

क्रव्यात्= आममांसभक्षकः । कथं तर्हि क्रव्यादः?

पक्वमांसशब्दे उपपदे ३-२-१ कर्म...इत्यण् ६-३-१०९ पृषो...इति पक्वमांसशब्दस्य क्रव्यादेशः ।

३-२-७० दुहः कब् घँश्च ॥

कामदुघा ।

३-२-७१ **मन्त्रे** श्वेतवहोक्थशस्पुरोडाशो **ण्विँन्** ॥७२

३-२-७२ अवे **यजः** ॥७३

(श्वेतवाहादीनां डस् पदस्येति-वक्तव्यम्)

श्वेतवाः । श्वेतवाहौ । उक्थशाः । उक्थशासौ ।

पुरोडाः । पुरोडाशौ । अवयाः । अवयाजौ ।

३-२-७३ **विँजु**पे छन्दसि ॥७४

उपयट् ।

३-२-६३ छन्द- सुँपि (३-२-४) सहः=सह्धातोः, ण्विँः (३-२-६२) छन्दसि= वेदे । **पृतनाषट्** ८-३-५६ सहे...इति षत्वम् ।

३-२-६४ वहः=वह्धातोः, शेषोऽर्थः प्राग्वत् ।

३-२-६५ कव्य...ष्येषु= कव्यप्रभृतिषूपपदेषु, वहः (३-२-६४) ञ्युँट्= ञ्युँट् प्रत्ययो भवति, छन्दसि (३-२-६३) ।

३-२-६६ हव्ये- अन्तः शब्दोऽत्र मध्यवाची । पादस्य मध्यमन्तः पादम् । २-१-६ अव्य..इति विभक्त्यर्थेऽव्ययीभावः । तद्विरुद्धमनन्तः पादम् । अतः सूत्रार्थः-हव्ये =हव्यशब्दे उपपदे, अनन्तः पादम्=ऋक्पादमध्याऽवर्तिनः, वहः (३-२-६४) ञ्युँट् (३-२-६५) छन्दसि (३-२-६३) । इति ।

३-२-६७ जन- सुँपि (३-२-४) जन...गमः= जन् प्रभृतिभ्यः, विँट्= विँट् प्रत्ययो भवति, छन्दसि (३-२-६३) । उदाहरणेषु ६-४-४१ विँड्व...इत्यात्वम् । **गोषा:** ८-३-१०८ सनो...इति षत्वम् ।

३-२-६८ अदो- अनन्ने =अन्नशब्दभिन्ने, कर्मणि (३-२-१) अदः=अद्धातोः, विँट् (३-२-६७) ।

३-२-६९ क्रव्ये- कर्मणि (३-२-१) क्रव्ये=, क्रव्यशब्दे उपपदे, अदः (३-२-६८) विँट् (३-२-६७) ।

३-२-७० दुहः कर्मणि (३-२-१) दुहः= दुह्धातोः, कप्= कप्प्रत्ययो भवति, घँश्च= प्रकृतेः स्थाने घँ (अनुबन्धलोपे घ्,) आदेशश्च । १-१-५१ अलो...सूत्रबलेन घकारो हकारस्य स्थाने भवति ।

३-२-७१ मन्त्रे= मन्त्रविषयके प्रयोगे, श्वेत...डाशः= श्वेतोक्थपुरस्सूपपदेषु क्रमाद् वह् शंश् दाश् धातुभ्यो ण्विन्, शँसेर्नलोपो दासेरादेर्डश्च निपात्येते ।

३-२-७२ अवे=अव इत्युपपदे, यजः=यज्धातोः, ण्विँन् (३-२-७१) मन्त्रे (३-२-७१) । **श्वेत...दीनाम्=** श्वेतवाहादीनां मध्ये, पदस्य=पदत्व-भाविनः, डस्प्रत्ययो (ण्विँनोऽपवादो) भवतीति वक्तव्यमिति भावः ।

३-२-७३ विँजु- उपे=उप इत्युपपदे, यजः (३-२-७२) विँच्=विच्प्रत्ययो भवति, छन्दसि=वेदे । ३-२-७५ अन्ये...इति सिद्धे पृथग्विधानम्, उपयजेश्छन्दस्येव न भाषायामिति नियमार्थम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-७४ आतो मनिनँ-क्वनिँब्-वनिँपश्च ॥७५

चकारो विँजनुवृत्त्यर्थः ।

सुदामा । सुधीवा । घृतपावा ।

कीलालपाः ।

३-२-७५ अन्येभ्योऽपि दृश्यन्ते ॥

सुशर्मा । प्रातरित्वा । विजावा । रोट् ।

३-२-७६ क्विँप् च ॥७७

क्रीः । क्रियौ । क्रियः । वाहभ्रट् ।

३-२-७७ स्थः क च ॥

शंस्थः । शंस्थाः ।

३-२-७८ सुँप्यजातौ णिनिँस्ताच्छील्ये ॥८३, ८६

उष्णभोजी । शीतभोजी । अजातावित्युक्तेर्नेह-ब्राह्मणानामन्त्रयिता ।

३-२-७४ आतो-सुँपि (३-२-४) आतः=आकारान्ताद् धातोः, मनिन्...निँपः=मनिँन् क्वनिँप् वनिँप्, विँच् (३-२-७३) च प्रत्यया भवन्ति, छन्दसि (३-२-७३) ।

३-२-७५ अन्येभ्योऽपि=अन्येभ्यो (आकारान्तभिन्नेभ्यो)ऽपिधातुभ्यः, दृश्यन्ते = मनिँन् क्वनिँप् वनिँप् विँच् प्रत्यया दृश्यन्ते । अपि शब्दान्निरुपपदेऽपि । त्रयाणामपि प्रत्ययानां ७-२-८ नेड्व...इतीट्प्रतिषेधः । <u>**प्रातरित्वा**</u> इणः क्वँनिप् । ६-१-६९ ह्रस्व...इति तुँक् । **विजावा** जनेर्वनिँप् । ६-४-४१ विड्व...इत्यात्वम् ।

३-२-७६ क्विँप् च- ७-३-३३ आतो युँक्...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

३-२-७५ अन्येभ्योऽपि दृश्यन्ते ॥ ३-२-७६ क्विँप् च (ख)=दृश्यते ॥ इति । (क)=अन्येभ्योऽपि=उपपदे निरुपपदेऽपि सर्वेभ्यो धातुभ्यः, क्विँप्=क्विँप्प्रत्ययः (ख)=दृश्यते । क्विँप् प्रत्ययो भवतीति तात्पर्यम् । (अत्र च्छात्रेभ्यो नोपदेश्यं शिक्षकेणाऽवधेयं यत्, ३-२-७५ अन्ये...सूत्रस्थेनाऽपिशब्देन ३-२-७४ आतो...सूत्रात्, आत इत्यनुकृष्यते । सोऽर्थश्चाऽत्र चकारेणाकृष्यते । तेन आकारान्तेभ्यस्तदन्येभ्यश्चेत्यर्थः सूत्राक्षरलभ्यः । ततश्च सर्वेभ्यो धातुभ्य इत्यर्थः फलति । बोधगम्यश्च सरलतया छात्राणां तथा भवतीति) इत्यर्थमुपदिश्योदाहरेत् । यथा- क्री (क्र्यादि डुक्रीञ्) धातोः क्विँप्प्रत्ययेऽनुबन्धलोपे सति, क्री+व् इति श्यामपाट्यां लिखित्वा छात्रैरेव 'व्' इत्यस्य कृत्संज्ञां कर्त्रर्थे विधानं च साधयित्वा प्रत्ययलक्षणेन(६-१-६५ वेँर...सूत्रमुद्बोध्य)क्री इत्यस्य प्रातिपदिकसंज्ञां च साधयित्वा क्री इति श्यामपाट्यां लिखित्वा छात्रान् बोधयेत् । वत्साः ? (अङ्गुल्या निर्दिशन्) 'क्री' इति प्रातिपदिकशब्दो निष्पन्नः । इत्थं सर्वे धातवः प्रातिपदिकानि भवन्ति । ततश्च सुँप्रभृतयः प्रत्यया भवन्ति । यथा प्रकृते क्रीशब्दात् सुँप्रत्यये 'क्रीः' इति रूपम् । परन्तु इत्थं प्रातिपदिकत्वेऽपि तेषां धातुत्वं नापगच्छति । यथा प्रकृते एष (क्री) शब्दो धातुत्वमपि न जहाति । तेन, औप्रभृतिष्वजादिषु विभक्तिषु ६-४-७७ अचि...सूत्रेणेयँङादेशो भवति । क्रियौ । क्रियः । इत्यादि । वत्साः? सर्वापहारिलोपि-कृत्प्रत्यये सति शब्दा धातुत्वं प्रातिपदिकत्वं च प्राप्नुवन्ति । इति स्फुटं बोधयेत् । 'क्विँबन्ताश्च विँजन्ताश्च क्विँन्नन्ताश्च तथैव च । ते धातुत्वं न जहति नामत्वं प्राप्नुवन्ति च ॥' अथेत्थं कृत्प्रत्ययदिग्दर्शनप्रसङ्गे निष्ठाप्रत्ययमुपदिदिक्षुः शिक्षको मनसा विमृशेद् यद्, यद्यपि निष्ठाप्रत्ययौ भूते भवतस्तथापि क्तवतुँ प्रत्ययस्तृच् प्रत्यय इव कर्त्रर्थे भवति कृत्संज्ञकश्च । अतः कृत्यप्रत्ययात् पूर्वं क्तवतुँ प्रत्ययमुपदिश्य क्तप्रत्ययोपदेशानन्तरं भावकर्मणोर्विधीयमानाः कृत्यप्रत्यया उपदेश्या इति । अथाऽधोनिर्दिष्टरूपेणच्छात्रानुपदिशेत् । वत्साः ? यथा भूतकाले लुँङ् लकारो विहितः । तथैव भूतकाले धातोः क्त-क्तवतूँ च प्रत्ययौ भवतः । तयोः प्रथमं क्तवतुँप्रत्यय उपदिश्यते । तथाहि-इति वदन् पठ्धातोः क्तवतुँप्रत्ययमुपदिदिक्षुः शिक्षकः प्रथमं १-१-२५ क्त क्त...सूत्रमुपदिशेत् ।

३-२-७७ स्थः क- सुँपि (३-२-४) उपसर्गेऽपि (३-२-६१) स्थः=स्थाधातोः, क=कप्रत्ययो भवतिः, क्विँप् (३-२-७६) च । ३-२-४ सुँपि..इति के ३-२-७७ क्विप्...इति क्विँपि च सिद्धे पुनर्वचनम् ३-२-२४ शमि...इत्यज्बाधनार्थम् ।

३-२-७८ सुँप्य- अजातौ=जातिभिन्नवाचिनि, सुँपि=सुँबन्ते उपपदे, धातोः (३-१-९१) णिनिँः=णिनिँप्रत्ययो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(साधुकारिणि च)

साधुकारी । साधुदायी ।

(ब्रह्मणि वदः)

ब्रह्मवादी ।

३-२-७९ कर्तर्युपमाने ॥

उष्ट्र इव क्रोशति=उष्ट्रक्रोशी ।

कर्तरीत्युक्तेर्नेह-अपूपानिव भक्षयति । उपमाने, इत्युक्तेर्नेह-उष्ट्रः क्रोशति ।

३-२-८० व्रते ॥

स्थण्डिले शेते=स्थण्डिलशायी ।

३-२-८१ बहुलमाभीक्ष्ण्ये ॥

शीताम्बुपायिनः पर्वतीयाः ।

उष्णाम्बुपायिनो मध्यदेश्याः ।

३-२-८२ मनः ।८३

दर्शनीयमानी ।

३-२-८३ आत्ममाने खश्च ॥

दर्शनीयमात्मानं मन्यते=

दर्शनीयंमन्यः, दर्शनीयमानी ।

पण्डितम्मन्यः, पण्डितमानी ।

३-२-८४ भूते ॥१२२

३-२-८५ करणे यजः ॥

सोमेनेष्टवान्=सोमयाजी ।

३-२-८६ कर्मणि हनः ॥९२,८८

पितृव्यं हतवान्=पितृव्यघाती ।

मातुलं हतवान्=मातुलघाती ।

(कुत्सितग्रहणं कर्तव्यम्)

नेह-चौरं हतवान् ।

३-२-८७ ब्रह्मभ्रूणवृत्रेषु क्विँप् ॥

ब्रह्महा । भ्रूणहा । वृत्रहा ।

अत्र काशिका-किमर्थमिदमुच्यते यावता

भवति, ताच्छील्ये=ताच्छील्ये गम्ये । उदाहरणयोः सुँबन्तप्रक्रिया ६-४-१३ सौ च- सूत्रे द्रष्टव्या । प्रत्युदाहरणे ३-२-१३५ तृन् इति तृन् । २-३-६९ नलो...इति कर्मषष्ठ्याः प्रतिषेधः ।

साधु- अताच्छील्यार्थमिदम् । **ब्रह्म-** इदमप्यताच्छील्यार्थम् ।

३-२-७९ कर्तरि=कर्तृवाचिनि, उपमाने =उपमानबोधके, सुँपि (३-२-७८) धातोः (३-१-९१) णिनिँः (३-२-७८) ।

३-२-८० व्रते =प्रकृतिप्रत्ययोपपदसमुदायेन व्रते गम्ये, सुँपि (३-२-७८) धातोः (३-१-९१) णिनिँः (३-२-७८) ।

३-२-८१ बहु- आभीक्ष्ण्ये =पौनः पुन्ये गम्ये, सुँपि (३-२-७८) धातोः (३-१-९१) बहुलम्=बाहुल्येन, णिनिँः (३-२-७८) ।

३-२-८२ मनः-सुँपि (३-२-७८) मनः=मन्यतेः, णिनिँः, (३-२-७८) । बहुलग्रहणानुवृत्तेर्दैवादिकस्य ग्रहणम् । विशेषस्तूत्तरसूत्रे विकरणकृतो भविष्यति ।

३-२-८३ आत्म- सुँपि (३-२-७८) आत्ममाने =आत्मनो मननेऽर्थे वर्तमानात्, मनः (३-२-८२) खश्= खश्प्रत्ययो भवति, णिनिँ (३-२-७८) च । **दर्शनीयंमन्यः** शित्त्वात् ३-४-११३ तिङ्शि...इति सार्वधातुकम् ३-१-६९ दिवा...इति श्यन् । ६-३-६७ अरु...इति मुँम् ।

३-२-८४ भूते =इतोऽग्रे ३-१-१२३ वर्त...इति सूत्रात् प्राग् विधीयमानाः प्रत्यया भूतकाले भवन्ति ।

३-२-८५ करणे=करणे उपपदे, यजः= यज्धातोः, भूते (३-२-८४) णिनिँः (३-२-७८) ।

३-२-८६ कर्मणि=कर्मणि उपपदे, हनः= हन्धातोः, भूते (३-२-७८) णिनिँः (३-२-७८) । **पितृव्यघाती** ७-३-३२ हन...इति नकारस्य तकारः । ७-३-५४ हो ह...इति हकारस्य कुत्वम् । ७-२-११६ अत...इत्युपधावृद्धिः । स्वादिकार्यम् ६-४-१३ सौ च-सूत्रे दृश्यम् ।

३-२-८७ ब्रह्म- कर्मसु (३-२-८६) ब्रह्म...वृत्रेषु=ब्रह्म (न्) भ्रूण वृत्र शब्देषूपपदेषु, हनः (३-२-८६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधातुभ्यः क्विँब् विहित एव ? ब्रह्मादिष्वेव हन्तेर्नाऽन्यस्मिन्नुपपदे, पुरुषं हतवानिति, ब्रह्मादिषु हन्तेरेव नान्यस्मात् स्यात् ब्रह्माधीतवानिति, ब्रह्मादिषु हन्तेर्भूतकाले क्विँबेव, नाऽन्यः प्रत्ययः, तथा भूतकाल एव नान्यस्मिन्, ब्रह्माणं हन्ति हनिष्यति वेति।

तदेतद् वक्ष्यमाणबहुलग्रहणस्य पुरस्तादपकर्षाल्लभ्यत इति। भूते निष्ठा तु भवत्येव, मध्येऽपवाद-न्यायेनाणादीनामेव बाधात्। ब्रह्माणं हतवान्।

३-२-८८ बहुलं छन्दसि ॥

मातृहा। पितृहा। मातृघातः। पितृघातः।

३-२-८९ सुकर्मपापमन्त्रपुण्येषु कृञः ॥

सुकृत्। कर्मकृत्। पापकृत्। मन्त्रकृत्। पुण्यकृत्। अत्र काशिका-त्रिविधश्चात्र नियम इष्यते-धातुनियमं वर्जयित्वा कालोपपदप्रत्ययनियमः। धातोरनियतत्वादन्यस्मिन्नप्युपपदे भवति- शास्त्रकृत्। भाष्यकृत्।

३-२-९० सोमे सुञः।

सोमसुत्। अत्र काशिका-अत्रापि पूर्ववच्चतुर्विधो नियम इष्यते-धातुकालोपपदप्रत्ययविषय इति।

३-२-९१ अग्नौ चे : ॥

अग्निचित्। अत्र काशिका-अत्रापि पूर्ववच्चतुर्विधो नियम इष्यत इति।

३-२-९२ कर्मण्यग्न्याख्यायाम् ॥

श्येन इव चितः=श्येनचित्।

३-२-९३ कर्मणीनिँ विक्रियः ॥

सोमविक्रयी। घृतविक्रयी।

(कुत्सितग्रहणं कर्तव्यम्)

नेह-धान्यविक्रायः।

३-२-९४ दृशेः क्वनिँप् ॥९६

पारं दृष्टवान्=पारदृश्वा।

३-२-९५ राजनि युधिकृञः ॥९६

युधिरन्तर्भावितण्यर्थः। राजानं योधितवान्=राजयुध्वा। राजकृत्वा।

भूते (३-२-८४) क्विँप्=क्विँप् प्रत्ययो भवति।

३-२-८८ बहु- बहुलम्, =बाहुल्येन (उपपदान्तरेष्वपि) हनः (३-२-८६) भूते (३-२-८४) क्विँप् (३-२-८७) छन्दसि =वेदे। पूर्वेण नियमादप्राप्तः क्विँब् विधीयते।

३-२-८९ सुक-कर्मसु (३-२-८६) सु...ण्येषु=सुशब्दे कर्मपापादिषु चोपपदेषु, कृञः= कृञ् धातोः, भूते (३-२-८४) क्विँप् (३-२-८७)। कर्मसु इत्येतत् कर्मपापादिष्वेव सम्बध्यते, न तु सु इत्यत्राऽसम्भवात्।

३-२-९० सोमे- कर्मणि (३-२-८६) सोमे =सोमशब्दे उपपदे, सुञः= सुञ् धातो, भूते (३-२-८४) क्विँप् (३-२-८७)।

३-२-९१ अग्नौ- कर्मणि (३-२-८६) अग्नौ=अग्निशब्दे उपपदे, चेः=चिधातोः, भूते (३-२-८४) क्विँप् (३-२-८७)।

३-२-९२ कर्म- कर्मणि (३-२-८६) चेः (३-२-९१) कर्मणि=कर्मकारके, भूते (३-२-८४) क्विँप् (३-२-८६) अग्न्याख्यायाम्=धातूपपदप्रत्ययसमुदायेन अग्न्याधारस्थलविशेषे गम्ये। एष चाऽर्थ आख्याग्रहणाल्लभ्यते। **श्येनचित्** अग्न्यर्थो य इष्टकानां रचनाविशेषः स श्येनचिदित्युच्यते-इति न्यासः।

३-२-९३ कर्मणि=कर्मण्युपपदे, विक्रियः=व्युपसर्गकात् क्रीधातोः, भूते (३-२-८४) इनिँ=इनिँ प्रत्ययो भवति। कर्मणीति वर्तमाने पुनः कर्मग्रहणं पूर्वसूत्रे प्रत्ययार्थत्वेन निर्दिष्टस्याऽग्रहणेन ३-२-८६ कर्मणि हन इत्यत्रत्यकर्मणो ग्रहणार्थम्। तेन कुत्सानिमित्ते कर्मण्युपपदे विपूर्वात् क्रीधातोरिनिरित्यर्थः फलितः।

३-२-९४ दृशेः-कर्मणि (३-२-१) दृशेः=दृश्धातोः, भूते (३-२-८४) क्वनिँप्= क्वनिँप् प्रत्ययो भवति। ३-२-७५ अन्ये...इति सिद्धे पुनर्वचनं मनिँनादिनिवृत्त्यर्थम्, अणादिनिवृत्त्यर्थञ्च। निष्ठा तु भवत्येव मध्येऽपवादन्यायात्।

३-२-९५ राज- कर्मणि (३-२-१) राजनि=राजन्शब्दे उपपदे, युधिकृञः= युध् कृञ् इति धातुभ्याम्, भूते (३-२-८४) क्वनिँप् (३-२-९४)। **राजयुध्वा** विग्रहो ण्यन्तस्य प्रत्ययस्त्वण्यन्तादेव। **राजकृत्वा** ६-१-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-९६ सहे च ॥

सहयुध्वा । सहकृत्वा ।

३-२-९७ सप्तम्यां जनेर्डः ॥१०१

सरसिजम्, सरोजम् ।

३-२-९८ पञ्चम्यामजातौ ॥

सँस्कारजः । अजातावित्युक्तेर्नेह-अश्वाज्जातः ।

३-२-९९ उपसर्गे च संज्ञायाम् ॥

प्रजाः ।

३-२-१०० अनौ कर्मणि ॥

पुमांसमनुजाता=पुमनुजा ।

३-२-१०१ अन्येष्वपि दृश्यते ॥

अजः । द्विजः । ब्राह्मणजः । अपिशब्दः सर्वोपाधिव्यभिचारार्थः । तेन धात्वन्तरादपि कालान्तरेष्वपि क्वचित् । परितः खाता=परिखा ।

३-२-१०२ निष्ठा ॥

स्नातं मया । अहं स्नातवान् । पठितं काव्यम् । पठितवान् ।

(आदिकर्मणि निष्ठा वक्तव्या)

प्रकरोति कटं देवदत्तः=प्रकृतः कटं देवदत्तः । प्रकृतवान् कटं देवदत्तः ।

३-२-१०३ सुयजोर्ङ्वनिँप् ॥

सुत्वा । यज्वा ।

३-२-१०४ जीर्यतेरतृँन् ॥

जरन् । स्त्रियाम्-जरती ।

३-२-१०५ छन्दसि लिँट् ॥१०७

अहं सूर्यमुभयतो ददर्श । अहं द्यावापृथिवी आततान ।

---

६९ ह्रस्व...इति तुँक् ।

३-२-९६ सहे = सहशब्दे उपपदे, युधिकृञः (३-२-९५) भूते (३-२-८४) क्वनिँप् (३-२-९४) ।

३-२-९७ सप्तम्याम्=सप्तम्यन्ते उपपदे, जनेः=जन्धातोः, भूते (३-२-८४) डः= डप्रत्ययो भवति । **सरसिजम्** डित्त्वाट्टिलोपः । ६-३-१४ तत्पु...इति ङेरलुक् ।

३-२-९८ पञ्च- अजातौ=जातिवाचिभिन्ने, पञ्चम्याम्=पञ्चम्यन्ते उपपदे, भूते (३-२-८४) जनेर्डः (३-२-९७) ।

३-२-९९ उपसर्गे=उपसर्गे सति, जनेर्डः (३-२-९७) भूते (३-२-८४) ।

३-२-१०० अनौ- कर्मणि=कर्मवाचिनि शब्दे उपपदे, अनौ=अनु इत्युपसर्गे सति, भूते (३-२-८४) जनेर्डः (३-२-९७) । **पुमनुजा** इह जनिः सकर्मकः, अनुरोधविशिष्ट-जननवृत्तित्वात् । इति तत्त्वबोधिनी । पुमांसमनुरुध्य जातेत्यर्थः । १-१-६१ प्रत्य...इति पदत्वेन ८-२-२३ संयो...इति सकारस्य लोपः ।

३-२-१०१ अन्येष्वपि=उपपदान्तरेषु च, भूते (३-२-८४) जनेर्डः (३-२-९७) दृश्यते ।

३-२-१०२ निष्ठा- १-१-२५ क्तक्तवतूँ... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

३-१-९१ धातोः ॥ (क) ३-२-८४ भूते ॥ (ख) ३-२-१०२ (क) (ख) निष्ठा ॥ इति ।

(क) =धातोः, (ख) =भूते =भूतकाले, (द्वितीयावृत्तौ तु भूतकालिकक्रियावृत्तेर्धातोरत्यर्थमुपदिशेत्) निष्ठा =निष्ठासंज्ञकौ (क्त क्तवतुँ) प्रत्ययौ भवतः । इत्यर्थमुपदिश्य लक्षणसमन्वयेऽनुबन्धलोपे च 'पठ्+तवत्' इति श्यामपाटचां लिखित्वा तृच्प्रत्यय इव कृत्संज्ञकः कर्त्रर्थे च जात इति, आर्धधातुकसंज्ञकः, अत इड् भवतीति चोद्बोधनपुरस्सरं सिद्धात् 'पठितवत्' इति प्रातिपदिकात् स्वादिकार्ये कर्तव्ये सर्वनामस्थाने विशेषो वर्तत इति वदन् 'पठितवत्+स्' इति श्यामपाटचां लिखित्वा ६-४-१४ अत्वसन्तस्य...सूत्रमुपदिशेत् ।

आदि- वर्तमानकालस्याद्यक्षणवृत्तिक्रिया =आदिकर्म, तत्र, निष्ठा (क्तः, क्तवतुँश्च) वक्तव्या

प्रकृतः ३-४-७१ आदि...इति क्तः कर्तरि च । **प्रकृतवान्** सुँबन्तप्रक्रिया ६-४-१४ अत्व... इत्यत्र द्रष्टव्या ।

३-२-१०३ सुयजोः =सु यज् धातुभ्याम्, ङ्वनिप् =ङ्वनिप् प्रत्ययो भवति, भूते (३-२-८४) ।

३-२-१०४ जीर्यतेः =जॄधातोः, अतृँन् =अतृँन् प्रत्ययो भवति, भूते (३-२-८४) ।

३-२-१०५ छन्द- धातोः (३-१-९१) भूते (३-२-८४) लिँट् =लिँट् प्रत्ययो भवति, छन्दसि=वेदे । ३-४-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-१०६ लिँटः कानज्वा ॥१०९

अग्निं चिक्यानः ।

३-२-१०७ क्वसुँश्च ॥१०९

जक्षिवान् । पपिवान् । क्वसुँकानचौ यद्यपिच्छन्दस्युपदिष्टौ, तथापि कविभिस्तु लोकेऽपि प्रयुज्येते ।

"तं तस्थिवांसं नगरोपकण्ठे"

"श्रेयांसि सर्वाण्यधिजग्मुषस्ते"

३-२-१०८ भाषायां सदवसश्रुवः ॥

सेदिवान् । ऊषिवान् । शुश्रुवान् ।

३-२-१०९ उपेयिवाननाश्वाननूचानश्च ॥

उपेयिवान् । उपेत्यविवक्षितम् ।

ईयिवान् । समीयिवान् । अनाश्वान् । अनूचानः ।

३-२-११० लुँङ् ॥

अभूत् ।

(वसतेर्लुँङ् रात्रिविशेषे जागरणसन्ततौ वक्तव्यः)

क्व भवानुषितः ? अहमत्राऽवात्सम् । मध्ये स्वपता जाग्रता तु लँङेव प्रयोक्तव्यः-अहमत्राऽवसम् ।

३-२-१११ अनद्यतने लँङ् ॥१२२

अभवत् ।

(परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लँङ् वक्तव्यः)

अरुणद् यवनः साकेतम् । अरुणद् यवनो माध्यमिकाम् । अजहात् प्रासादं त्रिभुवनः प्रजातन्त्रकृते । लोकविज्ञाते इत्युक्तेर्नेह-कटं चकार । प्रयोक्तुर्दर्शनविषये इत्युक्तेर्नेह-जघान कंसं किल वासुदेवः ।

संजहार हार्डिसेनां पृथ्विनारायणः सिन्धुलिदुर्गे विंशशतेन (१२०) खड्गभृद्भिः सह ।

---

६ छन्दसि लुङ्...इति सिद्धे सामान्येन विधानार्थमिदम् । धातुसम्बन्धे हि तेन विधीयते ।

३-२-१०६ लिँटः=लिँट्लकारस्य स्थाने, कानज् वा =कानजादेशो वा, छन्दसि (३-२-१०५) । प्रकृतस्य विभक्तिविपरिणामेन सिद्धे पुनर्लिँड्ग्रहणं परोक्षे विहितस्यापि ग्रहणार्थम् ।

३-२-१०७ क्वसुँ- छन्दसि (३-२-१०५) लिँटः (३-२-१०६) वा (३-२-१०६) क्वसुँ =क्वसुँ इत्यादेशो भवति । **जक्षिवान्** २-४-४० लिँटच...इत्यदो घस्लृँ । ७-२-६७ वस्वे...इतीट् । द्वित्वाभ्यासकार्यम् । ६-४-९८ गम...इत्युपधालोपः । ८-३-६० शासि...इति षत्वम् ।

३-२-१०८ भाषायाम्=लोके, सदवसश्रुवः=सद् वस् श्रु धातुभ्यः, भूते (३-२-८४) वा लिँट्, तस्य स्थाने नित्यं क्वसुँ । भूतसामान्ये लिँटः स्थाने क्वसुँरादेशोऽनेन विधीयते, भाषायाञ्च भूतसामान्ये लिँड्विधायकं सूत्रं नास्ति । अत एतस्मादेव ज्ञापकाद् भाषायामपि भूतसामान्ये क्वसोँःस्थानी लिँट् कल्प्यः । स्थानिनो लिँटः क्वसुँनाऽनुमितत्वाद् यदा क्वसुँर्न भवति तदा स्थानी लिँडपि नाऽनुमीयते । तेन भाषायां भूतसामान्ये लिँट्स्थानिकतिङन्तप्रयोगो न भवतीति तात्पर्यम् । **सेदिवान्** ६-४-१२० अत...इत्येत्वाभ्यासलोपौ ।

३-२-१०९ उपे...चानः- निपात्यन्ते- उपपूर्वादिणो भाषयां भूतसामान्ये लिँड् वा तस्य स्थाने नित्यं क्वसुँ । नञ् पूर्वादश्नातेः क्वसुँरिडभावश्च । अनुपूर्वाद् वचेः कर्तरि कानच् ।

३-२-११० लुँङ्- ३-३-१३९ लिँङ् निमित्ते...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

३-१-९१ धातो; ३-२-८४ भूते ३-२-११० (क) (ख) लुँङ् ॥इति। (क)=धातोः, (ख)=भूते=भूतकाले (द्वितीयावृत्तौ तु भूतकालिकक्रियाबोधकाद् धातोः, इत्यर्थमुपदिशेत्) लुँङ्=लुँङ् प्रत्ययो भवति । इत्यर्थमुपदिश्य शिक्षको लँङ् लकारे, इव प्रक्रियां छात्रैरुच्यमानां शृण्वन् प्रक्रियाप्रसङ्गे अभू+ति इति श्यामपाट्यां लिखित्वा शपं बाधित्वा ३-१-४३ च्लिँ लुँङि-सूत्रमुपदिशेत् ।

३-२-१११ अन- ३-४-९३ एत...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- ३-१-९१

(क) (ख)

धातोः ३-२-८४ भूते ॥ ३-२-१११ (क) अनद्यतने (ख) लँङ् ॥इति । (क) =धातोः, अनद्यतने =अद्यतनभिन्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-११२ अभिज्ञावचने लृँट् ।११४

स्मरसि कृष्ण गोकुले वत्स्यामः ।

३-२-११३ न यदि ॥

अभिजानासि कृष्ण यद् गोकुलेऽवसाम ।

३-२-११४ विभाषा साकाङ्क्षे ॥

उभयत्र विभाषेयम् ।

स्मरसि कृष्ण ? वने वत्स्यामस्तत्र गाश्चारयिष्यामः । वासो लक्षणं चारणं लक्ष्यम् । पक्षे लँङ् । स्मरसि कृष्ण यद् गोकुले वत्स्यामस्तत्र गाश्चारयिष्यामः । पक्षे लँङ् ।

३-२-११५ परोक्षे लिँट् ॥११८, ११७

बभूव ।

(अत्यन्तापह्नवे लिँड्वक्तव्यः)

कलिङ्गेष्बवात्सीः ? नाऽहं कलिङ्गान्जगाम ।

३-२-११६ हशश्वतोर्लँङ् च ॥११७

इति हाऽकरोत्, चकार वा । शश्वदकरोत्, चकार वा ।

(ख) =भूते, (द्वितीयावृत्तौ तु अनद्यतन-भूत-कालिक-क्रिया-वृत्तेर्धातोरित्यर्थ उपदेश्यः) लँङ् =लँङ्- प्रत्ययो भवति । इत्यर्थमुपदिश्य ३-२-१२३ वर्त...सूत्रे बोधितं कालभेदमुद्बोध्य प्रकृते च अनद्यतनभूतकालः प्रतीयत इति बोधयता शिक्षकेण लक्षणसमन्वयश्छात्रैः कारयितव्यः । ततस्तैरेवाऽनुबन्धे फालिते पठ्+ल्' इति श्यामपाटचां लिखित्वा ६-४-७१ लुँङ् लँङ्...सूत्रमुपदेश्यम् । **परोक्षे-** लोकविज्ञाते =लोकप्रसिद्धे, परोक्षे =इन्द्रियातीते, प्रयोक्तुः =वाक्यमुच्चारयितुः, दर्शनविषये=शक्यदर्शने, (समकालत्वेन शक्यदर्शने व्यासङ्गादिनाऽननुभूतत्वाच्च परोक्षे इति भावः) अनद्यतने (३-२-१११) भूते (३-२-८४), लँङ् वक्तव्यः ।

३-२-११२ अभिज्ञावचने =स्मृतिवाचिन्युपपदे, अनद्यतने (३-२-१११) भूते (३-२-८४) धातोः (३-१-९१) लृँट् =लृँट् प्रत्ययो भवति । सूत्रे वचनग्रहणं पर्यायार्थम् । लँङोऽपवादः । **वत्स्यामः** ७-४-४९ सःस्या...इति सकारस्य स्थाने तकारः ।

३-२-११३ न य-यदि =यद्योगे, न =पूर्वसूत्रं न प्रवर्तते । **अवसाम** ३-२-१११ अन...इति लङेव ।

३-२-११४ विभा- अभिज्ञावचने (३-२-११२) अनद्यतने (३-१-१११) भूते (३-२-८४) धातोः (३-१-९१) विभाषा=वा, लृँट् (३-२-११२) साकाङ्क्षे =आकाङ्क्षायुक्ते धात्वर्थे सति । साकाङ्क्षश्चेत् प्रयोक्ता, इति काशिका । आकाङ्क्षा चेतनावतो धर्मः । अतः साकाङ्क्षः =प्रयोक्ता, इति तदाशयः । लक्ष्यलक्षणभावेन साकाङ्क्षश्चेद् धात्वर्थ इति दीक्षितः । सम्बन्धज्ञानं चेतनावतो धर्मः । सम्बन्धस्तु धात्वर्थ इति तदाशयः ।

३-२-११५ परो- ७-२-७ अतो हलादे...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

३-१-९१ धातोः ॥ ३-२-८४ भूते ॥ ३-२-१११ अनद्यतने लँङ् ॥ ३-२-११५ (ग) (ख) परोक्षे (क) लिँट् ॥ इति । (ग) =अनद्यतने, (ख) =भूते, परोक्षे =परोक्षार्थे वर्तमानात् (द्वितीयावृत्तौ अनद्यतन-भूत कालिक **परोक्ष** क्रियावृत्तेः) (क) =धातोः, लिँट् =लिँट् प्रत्ययो भवति । इत्यर्थमुपदिश्याऽनुबन्धफालनं छात्रैः साधयेत् । ततश्छात्रानधोनिर्दिष्टरूपेणोत्साहयेत् । वत्साः ? यथा 'पठति' इति प्रयोगे लम्बा प्रक्रियाऽनुभूता । पश्चात् तदाधारेण बहवः प्रयोगाः सरलयैव रीत्या ज्ञाताः । तथैव लिँटि तिपि प्रक्रिया लम्बा प्रतीयते । पश्चात् तदाधारेण बहवः प्रयोगाः सरलयैव रीत्या ज्ञास्यन्ते । इति । अथ कर्तरि लकारस्यार्थे विवक्षिते लँटीव प्रक्रियाक्रमे 'भू+ति' इति श्यामपाटचां लिखित्वा ३-४-११३ तिङ्शि...सूत्रं बाधयित्वा ३-४-११५ लिँट् च-सूत्रमुपदिशेत् ।

३-२-११६ हशश्वतोः=ह शश्वत् इत्येतयोरुपपदयोः, पूर्वविषये, लँङ्=लँङ् प्रत्ययो भवति, लिँट् (३-२-११५) च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-११७ प्रश्ने चाऽसन्नकाले ॥

अगच्छत् किम् ? । जगाम किम् ? ।

अनासन्नकाले तु जघान किं कंसं वासुदेवः ?।

३-२-११८ लँट् स्मे ॥ १२२, ११९

अर्जुनो द्रोणात् पठति स्म ।

३-२-११९ अपरोक्षे च ॥

एवं स्म पिता ब्रवीति ।

३-२-१२० ननौ पृष्टप्रतिवचने ॥१२१

अकार्षीः किम् ? ननु करोमि भोः ।

३-२-१२१ नन्वोर्विभाषा ॥१२२

अकार्षीः किम् ? न करोमि, नाकार्षम् ।

नु करोमि, न्वकार्षम् ।

३-२-१२२ पुरि लुँङ् चाऽस्मे ॥

वसन्तीह पुरा छात्राः, अवात्सुः,
अवसन्, ऊषुर्वा ।

३-२-१२३ वर्तमाने लँट् ॥३-३-१

भवति । एधते ।

३-२-१२४ लँटः शतृँशानचावप्रथमासमानाधिकरणे ॥१२६

पठन्तं छात्रं पश्य । हिण्डमानं जनं पश्य । लँटि

३-२-११७ प्रश्ने- आसन्नकाले =पञ्चवर्षाभ्यन्तरकालविषये, प्रश्ने =प्रष्टव्ये सति, परोक्षे लिँडिति सूत्र विषये, लँङ् (३-२-११६) लिँट् (३-२-११५) च । सूत्रे प्रश्नशब्दः कर्मसाधनो बोध्यः ।

३-२-११८ लँट् स्मे- स्मे =स्मशब्दे उपपदे, ३-२-११५ परो...सूत्रविषये, धातोः (३-१-९१) लँट्=लँट् प्रत्ययो भवति ।

३-२-११९ अपरोक्षे=परोक्षभिन्ने, भूते (३-२-८४) अनद्यतने (३-२-१११)ऽर्थे वर्तमानाद्, धातोः (३-१-९१) लँट्+स्मे (३-२-११८) ।

३-२-१२० ननौ =ननुशब्दे उपपदे, पृष्टप्रतिवचने=पृष्टस्य प्रतिवचने, भूते (३-२-८४) धातोः (३-१-९१) लँट् (३-२-११८) । अत्र अनद्यतने परोक्षे इति न सम्बध्यते, एवमुत्तरसूत्रेऽपि ।

३-२-१२१ नन्वोः =न नु इत्युपपदयोः सतोः, भूते (३-२-८४) धातोः (३-१-९१) विभाषा=वा, लँट् (३-२-११८) ।

३-२-१२२ पुरि-अस्मे =स्मशब्दरहिते, पुरि =पुराशब्दे उपपदे, भूते (३-२-८४) अनद्यतने (३-२-१११)ऽर्थे वर्तमानाद्, धातोः (३-१-९१) विभाषा (३-२-१२१) लुँङ्=लुँङ् प्रत्ययो भवति, लुँङ्, लँट् (३-२-११८) च । ताभ्यां मुक्ते यथाप्राप्तं प्रत्ययाः । अत्राऽनद्यतने इति मण्डूकप्लुत्या सम्बध्यते । यद्येतन्न सम्बध्येत तदा विभाषाऽनुवृत्त्या लँटा मुक्ते लुँङपि भवेदेव किं पुनर्लुँङ्ग्रहणेन ।

३-२-१२३ वर्त- १-३-१ भूवा...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

३-१-१ प्रत्ययः ३-१-२ परश्च ॥ ३-१-९१ धातोः ॥ ३-२-१२३ वर्तमाने (ग) (ख) लँट् (क) ॥इति । वर्तमाने =वर्तमानकाले, (ग) धातोः, (ख) =परः, लँट्, (क) =प्रत्ययः (भवति) । अर्थाद् वर्तमानकाले धातोः परतो लँट् प्रत्ययो भवतीत्यर्थ उपदेश्यः । (द्वितीयावृत्तौ तु वर्तमानकालिकक्रियावृत्तेर्धातोः, इत्यर्थ उपदेश्यः) अत्र सामान्यरूपेण कालभेदाः शिक्षयितव्याः । यथा- कालस्त्रिविधः । अतीतकालः =भूतकालः । आगामिकालः =भविष्यत्कालः । साम्प्रतिककालः =वर्तमानकालः । इति । अथ प्रकृते वर्तमानकालः प्रतीयते । तेन पठ् धातोः परतो लँट् प्रत्ययो जातः । इति बोधयित्वा शिक्षकः 'पठ्+लँट्' इति श्यामपाट्यां लिखेत् । ततश्छात्रैरनुबन्धं फालयित्वा श्यामपाट्यां 'पठ्+ल्' इत्यवशेषयेत् । अथ शिक्षकश्छात्राननुपदिशेत् यद्, वत्साः ? यस्य कस्यापि शब्दस्यार्थो भवति । प्रकृते धातोः (पठ् इत्यस्य) तु 'पठनम्' इत्यर्थो वर्तते, 'ल्' इत्यस्य कोऽर्थः? 'ल्' इत्यस्याऽर्थबोधं विना प्रक्रिया साधयितुं न शक्यते । अतो 'ल्' इत्यस्यार्थबोधनाय ३-४-६९ लः क...सूत्रं प्रस्तूयत इति वदता तत् (३-४-६९ लःक...) सूत्रमुपदेश्यम्

३-२-१२४ लँटः-अप्रथमासमानाधिकरणे=अप्रथमान्तेन समानाधिकरणे लँटि सति, लँटः=लँटः स्थाने,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृते पुनर्लँङ्ग्रहणात् प्रथमासमानाधिकरणेऽपि भवति क्वचित्। गच्छन् पठति। हिण्डमानः पठति।

(माङ्याक्रोशे)

मा पचन्। मा पचमानः।

मा जीवन् यः परावज्ञा-दुःखदग्धोऽपि जीवति।

३-२-१२५ सम्बोधने च ॥

हे पचन्। हे पचमान।

३-२-१२६ लक्षणहेत्वोः क्रियायाः ॥

शयाना भुञ्जते यवनाः। अर्जयन् वसति।

हरिं पश्यन् मुच्यते।

३-२-१२७ तौ सत् ॥

३-२-१२८ पूङ्यजोः शानन् ॥

पवमानः। यजमानः।

३-२-१२९ ताच्छील्यवयोवचनशक्तिषु चानश् ॥

देवभाषायां व्यवहरमाणाः।

कवचं बिभ्राणाः। शत्रुं निघ्नानाः।

३-२-१३० इङ्धार्योः शत्रकृच्छ्रिणि ॥

अधीयन् पारायणम्। धारयन्नुपनिषदम्।

अकृच्छ्रिणीत्युक्तेर्नेह- कृच्छ्रेणाऽधीते। कृच्छ्रेण धारयति।

३-२-१३१ द्विषोऽमित्रे ॥

द्विषन्। अमित्रे, इत्युक्तेर्नेह-द्वेष्टि भार्या पतिम्।

३-२-१३२ सुञो यज्ञसंयोगे ॥

सर्वे सुन्वन्तः।

शतृँशानचौ=शतृँ शानच् इत्येतावादेशौ भवतः। अप्रथमासमानाधिकरणे- समानमधिकरणं यस्य तत् समानाधिकरणम्। अप्रथमा =अप्रथमान्तम्, समानाधिकरणं यस्य तस्मिन् २-३-३७ यस्य...इति सत्सप्तम्यन्तम्।

माङ्या- माङि उपपदे, आक्रोशे गम्ये, लँटः+शतृँ शानचौ (३-२-१२४)। अत एव ज्ञापकाद् ३-३-१७५ माङि...इति बाधित्वाऽऽक्रोशे लँट्।

३-२-१२५ सम्बोधने=सम्बोधने गम्ये, लँटः+शतृँ शानचौ (३-२-१२४)। प्रथमासमानाधिकरणार्थोऽयमारम्भः। वस्तुतः प्रपञ्चार्थः। प्रथमासमानाधिकरणेऽपि पूर्वेणैव सिद्धेरुक्तत्वात्।

३-२-१२६ लक्ष- क्रियायाः=धात्वर्थस्य, लक्षणहेत्वोः =लक्षणे हेतौ चार्थे वर्तमानात्, धातोः (३-१-९१) परस्य, लँटः+शतृँ शानचौ (३-२-१२४)। लक्ष्यतेऽनेन लक्षणम् =चिह्नम्। हेतुः =फलं कारणं च। **शयाना** शयनं यवनकर्तृकभोजनस्य चिह्नम्। ङित्वात् आत्मनेपदम् =शानच्। ७-४-२१ शीङः...इति गुणः।

३-२-१२७ तौ सत्- तौ =शतृँशानचौ, सत् =सत्संज्ञौ भवतः। उदाहरणे ३-३-१४ लृँटः...इति सूत्रे द्रष्टव्ये।

३-२-१२८ पूङ्यजोः =पूङ् यज् धातुभ्याम्, शानन्=शानन् प्रत्ययो भवति। उदाहरणयोः शित्वात् सार्वधातुककार्यम्। ७-२-८२ आने...इति मुँक्।

३-२-१२९ ताच्छी...क्तिषु =ताच्छील्यादिष्वर्थेषु गम्यमानेषु,चानश् =चानश् प्रत्ययो भवति। उदाहरणयोरन्त्ययोः २-३-६९ नलो...इति कर्मषष्ठीप्रतिषेधः।

३-२-१३० इङ्धार्योः =इङो धारयतेश्च, धातोः (३-१-९१) शतृँ=शतृँप्रत्ययो भवति, अकृच्छ्रिणि =अकृच्छ्रिणि कर्तरि। कृच्छ्रम् =कष्टम् =कठिनम्। तद्विरुद्धम् =अकृच्छ्रम् =सुखसाध्यम्। तदस्यास्तीति =अकृच्छ्री। तस्मिन् =अकृच्छ्रिणि।

३-२-१३१ द्विषो- अमित्रे =शत्रौ कर्तरि, द्विषः =द्विष्धातोः, शतृँ (३-२-१३०)।

३-२-१३२ सुञो- यज्ञसंयोगे =यज्ञेन सम्बद्धे (अभिषवेऽर्थे वर्तमानात्,) सुञः=सुञ्धातोः, शतृँ (३-२-१३०)। सूत्रे संयोग इति कर्मणि घञ्। **सर्वे सुन्वन्तः** सर्वे यजमानाः सत्रिण उच्यन्ते न तु याज्ञिकाः। सुञो यज्ञे इति न्यासेन सिद्धे संयोगग्रहणसामर्थ्येन प्रधानकर्तृणामेव ग्रहणात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-१३३ अर्हः प्रशंसायाम् ।

अर्हन् भवान् विद्याम् । प्रशंसायामित्युक्तेर्नेह-अर्हति चौरो वधम् ।

३-२-१३४ आक्वेँस्तच्छील-तद्धर्म-तत्साधुकारिषु ॥१७८

३-२-१३५ तृन् ॥

कर्ता कटान् । मुण्डयिता माणवकान् ।
पठिताऽष्टाध्यायीम् ।

३-२-१३६ अलङ्कृञ्-निराकृञ् प्रजनोत्पचोत्पतोन्मद-रुच्यपत्रप-वृतु-वृधु-सह-चर इष्णुच् ॥१३८

अलङ्करिष्णुरित्यादि ।
(अलङ्कृञो मण्डनार्थाद् युँचः पूर्वविप्रतिषेधेनेष्णुज् वक्तव्यः)

३-२-१३७ णेश्छन्दसि ॥१३८

पारयिष्णवः ।

३-२-१३८ भुवश्च ॥१३९

भविष्णुः ।

३-२-१३९ ग्लाजिस्थश्च ग्स्नुः ॥

ग्लास्नुः । जिष्णुः । स्थास्नुः ।
चाद् भुवः । भूष्णुः ।
(दंशेश्छन्दस्युपसंख्यानम्)
दङ्क्ष्णवः पशवः ।

३-२-१४० त्रसि-गृधि-धृषि-क्षिपेःक्नुः ॥

त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः ।

३-२-१४१ शमित्यष्टाभ्यो घिनुँण् ॥१४५

शमी । तमी । दमी । श्रमी । भ्रमी । क्षमी । क्लमी । मादी ।

३-२-१४२ सम्पृचानुरुधाङ्यमाङ्यस-परिसृ-संसृज-परिदेवि-संज्वर-परिक्षिप-परिरट-परिवद-परिदह-परिमुह-दुष-द्विष-द्रुह-दुह-युजाक्रीड-विविच-त्यज-रज-

---

३-२-१३३ अर्हः = अर्ह्धातोः, प्रशंसायाम्=प्रशंसायां गम्यमानायाम्, शतृँ (३-२-१३०) ।

३-२-१३४ आ क्वेँः =इत ऊर्ध्वम्, क्विँप् (३-२-१७७ भ्राज...) प्रत्ययमभिव्याप्य, तच्छी...रिषु =तच्छीलादिष्वर्थेषु प्रत्यया भवन्तीति बोध्यम् । उदाहरणानि अग्रिमसूत्रेषु द्रष्टव्यानि ।

३-२-१३५ तृन्- धातोः (३-१-९१) तृन् =तृन् प्रत्ययो भवति, तच्छीलादिषु (३-२-१३४) ।

३-२-१३६ अल...चरः=अलङ्कञादिभ्यः, तच्छी...रिषु (३-२-१३४) इष्णुच्=इष्णुच् प्रत्ययो भवति ।

३-२-१३७ णेः- ण्यन्तात्, तच्छी...रिषु (३-२-१३४) इष्णुच् (३-२-१३६) छन्दसि=वेदे । ६-४-५५ अया...इति णेरय् ।

३-२-१३८ भुवः =भूधातोः, प्रागर्थेषु इष्णुच् (३-२-१३६) छन्दसि (३-२-१३७)।अत्र काशिका-चकारोऽनुक्तसमुच्चयार्थः । भ्राजिष्णुना लोहितचन्दनेन । इति ।

३-२-१३९ ग्लाजिस्थः=ग्ला जि स्था धातुभ्यः, भुवश्च (३-२-१३८) ग्स्नुः =ग्स्नुप्रत्ययो भवति, प्रागर्थेषु ।

३-२-१४० त्रसि...क्षिपेः =त्रस्प्रभृतिभ्यः, क्नुः =क्नुप्रत्ययो भवति, प्रागर्थेषु । क्षिप्नुः ८-४-३८ क्षुभ्ना...इति न णत्वम्।

३-२-१४१ शमि...भ्यः =शम्प्रभृतिभ्योऽष्टाभ्यो धातुभ्यः, घिनुँण् =घिनुँण्प्रत्ययो भवति, प्रागर्थेषु । शमादिषु सप्तसु ७-३-३४ नोदा... इति वृद्धिप्रतिषेधः । णित्त्वफलं मादीत्यादौ । ७-१-७० उगि...इति उगिल्लक्षणो नुँम्तु न सर्वत्र । उगिदचामित्यत्र ८-२-२६ झलो...इत्यतो झल्ग्रहणमपकृष्य झलन्तानामेव नुँम्विधानात् । सुँबन्त-प्रक्रिया ६-४-१३ सौ च इत्यत्र द्रष्टव्या ।
घित्त्वफलमुत्तरसूत्रे सम्पर्कीत्यादौ ।

३-२-१४२ सम्पृ...हनः= सम्पृचप्रभृतिभ्यः, घिनुँण् (३-२-१४१) प्रागर्थेषु । सम्पर्की ७-३-५२ चजोः...इति कुत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भजातिचरापचरामुषाभ्याहनश्च ॥

'रञ्जेर्नलोपश्च निपात्यते'

सम्पर्की । अनुरोधी । आयामी । आयासी । परिसारी । संसर्गी । परिदेवी । संज्वारी । परिक्षेपी । परिराटी । परिवादी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । योगी । आक्रीडी । विवेकी । त्यागी । रागी । भागी । अतिचारी । अपचारी । आमोषी । अभ्याघाती ।

३-२-१४३ वौ कषलसकत्थस्रम्भः ॥१४४

विकाषी । विलासी । विकत्थी । विस्रम्भी ।

३-२-१४४ अपे च लसः ॥

अपलासी । विलासी

३-२-१४५ प्रे लपसृद्रुमथवदवसः ॥

प्रलापी । प्रसारी । प्रद्रावी । प्रमाथी । प्रवादी । प्रवासी ।

३-२-१४६ निन्द-हिंस-क्लिश-खाद-विनाश-परिक्षिप-परिरट-परिवादि-व्याभाषासूयो वुँञ् ॥१४७

निन्दकः । हिंसकः । इत्यादि ।

ण्वुँला सिद्धे वुँञ्विधानं ताच्छीलिकेषु वासरूपविधिर्न भवतीति ज्ञापनार्थम् ।

प्रकृते तृजभावः फलम् ।

३-२-१४७ देविक्रुशोश्चोपसर्गे ॥

आदेवकः । आक्रोशकः । उपसर्गे इत्युक्तेर्नेह-देवयिता । क्रोष्टा ।

३-२-१४८ चलनशब्दार्थादकर्मकाद् युँच् ॥ १४९, १५३

चलनः । चोपनः । शब्दनः । रवणः ।

अकर्मकादित्युक्तेर्नेह-पठिता विद्याम् ।

३-२-१४९ अनुदात्तेतश्च हलादेः ॥

वर्तनः । वर्धनः । अनुदात्तेत इत्युक्तेर्नेह-भविता ।

हलादेरित्युक्तेर्नेह-एधिता ।

अकर्मकादित्यनुवृत्तेर्नेह-लब्धा ।

३-२-१५० जु-चङ्क्रम्य-दन्द्रम्य-सृ-गृधि-ज्वल-शुच-लष-पत-पदः ॥

जवनः । चङ्क्रमणः । दन्द्रमणः । सरणः । गर्धनः । ज्वलनः । शोचनः । लषणः । पतनः । पदनः ।

३-२-१५१ क्रुधमण्डार्थेभ्यश्च ॥

क्रोधनः । रोषणः । मण्डनः । भूषणः ।

३-२-१४३ वौ क- वौ =वि इत्युपसर्गे सति, कष...स्रम्भः =कष् प्रभृतिधातुभ्यः, प्रागर्थेषु, घिनुण् (३-२-१४१)।

३-२-१४४ अपे, =अप इत्युपसर्गे, वौ (३-२-१४३) च, लसः =लस् धातोः, पूर्वोक्तार्थेषु, घिनुँण् (३-२-१४१)।

३-२-१४५ प्रे ल- प्रे=प्र इत्युपसर्गे सति, लप...वसः=लप्प्रभृति धातुभ्यः, पूर्वोक्तार्थेषु, घिनुँण् (३-२-१४१)। शब्विकरणस्य वदेः साहचर्याच्छब्विकरण एव वस् गृह्यते, न तु लुग्विकरणोऽपि ।

३-२-१४६ निन्द...सूयः=निन्दप्रभृतिभ्यः, वुँञ्=वुँञ् प्रत्ययो भवति, पूर्वोक्तार्थेषु । विनाश =विपूर्वो नश् हेतुमण्ण्यन्तः । परिवादिरपि तथा । असूय, कण्ड्वादिः ।

३-२-१४७ देविक्रुशोः=देवि (ण्यन्त-दिव्) क्रुश् धातुभ्याम्, उपसर्गे=उपसर्गे सति, पूर्वोक्तार्थेषु, वुँञ् (३-२-१४६) ।

३-२-१४८ चल-अकर्मकात् चलनशब्दार्थात्=कर्मरहितात् चलनार्थकाच् शब्दार्थकाच्च, धातोः (३-१-९१) युँच्=युस् प्रत्ययो भवति, प्रागर्थेषु ।

३-२-१४९ अनुदात्तेतः=अनुदात्तेत्संज्ञकात्, हलादेः=हल्वणदिः, अकर्मकात्+युँच्=(३-२-१४८) प्रागर्थेषु ।

३-२-१५० जुच...पदः=जुप्रभृतिभ्यः, युँच् (३-२-१४८) प्रागर्थेषु । जु इति सौत्रो धातुः । क्रम् द्रम् ३-१-२३ नित्यं....इति यङन्तौ ।

३-२-१५१ क्रुधमण्डार्थेभ्यः=क्रोधार्थेभ्यो मण्डनार्थेभ्यश्च धातुभ्यः, युँच् (३-२-१४८) प्रागर्थेषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-१५२ न यः ॥१५३

क्नूयिता । क्ष्मायिता ।

३-२-१५३ सूददीपदीक्षश्च ॥

सूदिता । दीपिता । दीक्षिता ।

"३-२-१६७ नमिकम्पीति" रप्रत्ययेन बाधेन सिद्धे दीपेः प्रतिषेधवचनं ताच्छीलिकेषु वासरूप-विधिर्नास्तीति ज्ञापकं प्रायिकमिति ज्ञापनार्थम् । तेन कम्रा, कमना इत्यत्र र-युँचोः समावेशः । यदि सूदेर्युँज् न कथं मधुसूदनः? नन्यादिः ।

३-२-१५४ लष-पत-पद-स्था-भू-वृष-हन-कम-गम-शॄभ्य उकञ् ॥

लाषुकः । पातुकः । पादुकः । स्थायुकः । भावुकः । वर्षुकः । घातुकः । कामुकः । गामुकः । शारुकः ।

३-२-१५५ जल्प-भिक्ष-कुट्ट-लुण्ट-वृङः षाकन् ॥

जल्पाकः । भिक्षाकः । कुट्टाकः । लुण्टाकः । वराकः ।

३-२-१५६ प्रजोरिनिँः ॥१५७

प्रजवी ।

३-२-१५७ जि-दृ-क्षि-विश्रीण्-वमाव्यथाभ्यम-परिभू-प्रसूभ्यश्च ॥

जयी । दरी । क्षयी । विश्रयी । अयी । वमी । अव्यथी । अभ्यमी । परिभवी । प्रसवी ।

३-२-१५८ स्पृहि-गृहि-पति-दयि-निद्रा-तन्द्रा-श्रद्धाभ्य आलुच् ॥

स्पृहयालुः । गृहयालुः । पतयालुः । दयालुः । निद्रालुः । तन्द्रालुः । श्रद्धालुः ।

(आलुचि शीङो ग्रहणं कर्तव्यम्)

शयालुः ।

३-२-१५९ दा-धेट्-सि-शद-सदो रुः ॥

दारुः । धारुः । सेरुः । शद्रुः । सद्रुः ।

३-२-१६० सृ-घस्यदः क्मरच् ॥

सृमरः । घस्मरः । अद्मरः ।

३-२-१६१ भञ्जभासमिदो घुरच् ॥

भङ्गुरः । भासुरः । मेदुरः ।

३-२-१६२ विदि-भिदिच्छिदेः कुरच् ॥

विदुरः । भिदुरम् । छिदुरम् ।

३-२-१५२ न यः-यः = यकारान्तात्, धातोः (३-१-९१) न =युँज्न भवति ।

३-२-१५३ सूद...दीक्षः=सूदादिभ्यः, युँज्न (३-२-१५२)

३-२-१५४ लष...शॄभ्यः=लष्प्रभृतिभ्यः, उकञ्=उकञ् प्रत्ययो भवति, प्रागर्थेषु । **स्थायुकः** ७-३-३३ आतो...इति युँक् । **घातुकः** ७-३-३२ हन...इति तकारः । ७-३-५४ हो ह...इति कुत्वम् ।

३-२-१५५ जल्पा...वृङः=जल्पादिभ्यः, षाकन्=षाकन् प्रत्ययो भवति, प्रागर्थेषु ।

३-२-१५६ प्रजोः=प्र इत्युपसर्गपूर्वकाज्जुधातोः, इनिँः=इनिँप्रत्ययो भवति, प्रागर्थेषु । ३-२-१५० जुच...इत्यस्याऽपवादः ।

३-२-१५७ जिदृ...प्रसूभ्यः=जिप्रभृतिभ्यः, इनिँः (३-२-१५६) प्रागर्थेषु ।

३-२-१५८ स्पृहि...श्रद्धाभ्यः=स्पृहिप्रभृतिभ्यः, आलुच्=आलुच् प्रत्ययो भवति, प्रागर्थेषु, तदो नान्तत्वं च निपात्यते । आद्यास्त्रयश्चुराद्यदन्ताः । तत्र ६-४-५५ अया...इति णेरय् ।

३-२-१५९ दाधेट्...सदः=दाप्रभृतिभ्यः, रुः=रुप्रत्ययो भवति, प्रागर्थेषु ।

३-२-१६० सृघस्यदः =सृ घस् अद् इति धातुभ्यः, क्मरच् =क्मरच् प्रत्ययो भवति, प्रागर्थेषु ।

३-२-१६१ भञ्ज...मिदः =भञ्जप्रभृतिभ्यः, घुरच् =घुरच् प्रत्ययो भवति, प्रागर्थेषु । **भङ्गुरः** ७-३-५२ चजोः...इति कुत्वम् । भञ्जेः कर्मकर्तरि प्रत्ययः स्वभावात्, इति काशिका ।

३-२-१६२ विदि...छिदेः=विदादिभ्यः, कुरच्=कुरच् प्रत्ययो भवति, प्रागर्थेषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-१६३ इण्-नश-जि-सर्तिभ्यः क्वरप् ।१६४

इत्वरः । नश्वरः । जित्वरः । सृत्वरः ।

३-२-१६४ गत्वरश्च ॥

गत्वरः ।

३-२-१६५ जागरूकः ॥ १६६

जागरूकः ।

३-२-१६६ यज-जप-दशां यङः ॥

यायजूकः । जञ्जपूकः । दन्दशूकः ।

३-२-१६७ नमि-कम्पि-स्म्यजस-कम-हिंस-दीपो रः ॥

नम्रः । कम्प्रः । स्मेरः । अजस्रम् । कम्रः । हिंस्रः । दीप्रः ।

३-२-१६८ सनाशंसभिक्ष उः ॥१७०

पिपठिषुः । आशंसुः । भिक्षुः ।

३-२-१६९ विन्दुरिच्छुः ॥

विन्दुः । इच्छुः ।

३-२-१७० क्याच्छन्दसि ॥१७१

मित्रयुः ।

३-२-१७१ आदृ-गम-हन-जनः किकिनौ लिँट् च ॥

पपिः सोमम् । ददिर्गाः । चक्रिः । ततुरिः । जगुरिः । जग्मिः । जघ्निः । जज्ञिः ।

(उत्सर्गश्छन्दसि सदादिभ्यो दर्शनम्)

सेदिः । रेमिः । नेमिः । मेनिः । विविचिः ।

(भाषायां धाञ्-कृ-सृ-जनि-गमि-नमिभ्यः)

दधिः । चक्रिः । सस्रिः । जज्ञिः । जग्मिः । नेमिः ।

(सासहिवावहिचाचलिपापतीनां निपातनम्)

सासहिः । वावहिः । चाचलिः ।

पतेर्नीगभावश्च निपातनात् । पापतिः ।

(सहि-वहि-चलि-पतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ)

तान्येवोदाहरणानि ।

३-२-१७२ स्वपितृषोर्नजिँङ् ॥

स्वप्नक् । तृष्णक् ।

(धृषेश्चेति वक्तव्यम्)

धृष्णक् ।

३-२-१६३ इणन...सर्तिभ्यः =इणप्रभृतिभ्यः, क्वरप्=क्वरप् प्रत्ययो भवति, प्रागर्थेषु ।

इत्वरः ३-१-६९ ह्रस्व...इति तुँक् ।

३-२-१६४ गत्वरश्च- गमेः क्वरप् प्रत्ययोऽनुनासिकलोपश्च निपात्यते प्रागर्थेषु । ततः प्रागवत् तुँक् ।

३-२-१६५ जागरूकः- जागृधातोरूकप्रत्ययः, प्रागर्थेषु ।

३-२-१६६ यज- यङः =यङन्तेभ्यः, यज...दशाम्=यज् जप् दंश् इति धातुभ्यः, ऊकः (३-२-१६५) । आद्यात् ३-१-२२- धातो...इति अन्त्याभ्याम् ३-१-२४ लुप... इति यङ् ।

३-२-१६७ नमि...दीपः =नम् प्रभृतिभ्यः, रः =रप्रत्ययो भवति, प्रागर्थेषु । **अजस्रम्** नञ्पूर्वाज्जसेः । स च क्रियासातत्ये वर्तते ।

३-२-१६८ सना...भिक्षः =सन्नन्तादाशंसेर्भिक्षेश्च, उः=उप्रत्ययो भवति, प्रागर्थेषु ।

३-२-१६९ विन्दुरिच्छुः= विदेरिषेश्च, उः (३-२-१६८) विदेर्नुँम्, इषेश्छत्वं च निपात्यते प्रागर्थेषु ।

३-२-१७० क्याच्छ-क्यात्= क्यप्रत्ययान्तात्, उः (३-२-१६८) प्रागर्थेषु, छन्दसि=वेदे । **मित्रयुः** ७-४-३५ नच्छ...इतीत्वप्रतिषेधः ।

३-२-१७१ आदृ...जनः =आकारान्ताद् ऋकारान्ताद् गमि हनि जनिभ्यश्च, किकिनौ =कि किन् प्रत्ययौ भवतः, लिँट् च =तौ लिँड्वच्च भवतः, छन्दसि (३-२-१७०) प्रागर्थेषु ।

उत्सर्गः =अन्येभ्योऽपि किकिनौ । सति बाधे त्याग उत्सर्गः । उदाहरणेषु सद् रम् नम् मन् विच् धातवः । आद्येषु चतुर्षु ६-४-१२० अत...इत्येत्वाभ्यासलोपौ ।

भाषा- किकिनौ लिँट् च (३-२-१७१) । **सासहि-निपातनात्** ७-४-८४ नीगव...इति प्राप्तेः ।

३-२-१७२ स्वपितृषोः = स्वप् तृष् धातुभ्याम्, नजिँङ्=नजिँङ् प्रत्ययो भवति, प्रागर्थेषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-१७३ शॄवन्द्योरारुः ॥

शरारुः । वन्दारुः ।

३-२-१७४ भियः क्रु-क्लुकनौ ॥

भीरुः । भीलुकः ।

(क्रुकन्नपि वक्तव्यः)

भीरुकः ।

३-२-१७५ स्थेश-भास-पिष-कसो वरच् ॥१७६

स्थावरः । ईश्वरः । भास्वरः । पेष्वरः । कस्वरः ।

३-२-१७६ यश्च यङः ॥

यायावरः ।

३-२-१७७ भ्राज-भास-धुर्वि-द्युतोर्जि-पॄ-जु-ग्रावस्तुवः क्विँप् ॥१७९

विभ्राट् । भाः । धूः । धुरौ । द्युत् ।

विद्युत् । ऊर्क् । ऊर्जौ । पूः । पुरौ ।

जवतेर्दीर्घश्च निपात्यते जूः ।

जुवौ । ग्रावस्तुत् ।

३-२-१७८ अन्येभ्योऽपि दृश्यते ॥

युक् । छित् । भित् ।

दृशिग्रहणं विध्यन्तरोपसंग्रहार्थम् ।

क्वचिद्दीर्घः । क्वचिद्द्विर्वचनम् ।

क्वचित् सम्प्रसारणम् । क्वचिदसम्प्रसारणम् । यथा-

(क्विँब्वचि-प्रच्छ्यायतस्तु-कटप्रु-जु-श्रीणां दीर्घोऽसम्प्रसारणं च)

वाक् । वाचौ । प्राट् । प्राशौ । आयतस्तूः ।

कटप्रूः । जूः । श्रीः ।

(द्युति-गमि-जुहोतीनां द्वे च)

दिद्युत् । जगत् ।

(जुहोतेर्दीर्घश्च)

जुहूः ।

(दृ भये इत्यस्य ह्रस्वश्च द्वे च)

दर्दृत् ।

(ध्यायतेः सम्प्रसारणं च)

धीः ।

३-२-१७९ भुवः संज्ञान्तरयोः ॥१८०

विभूर्नाम कश्चित् । प्रतिभूः ।

धनिकाधमर्णयोर्मध्ये विश्वासार्थं यस्तिष्ठति सः ।

३-२-१८० विप्रसंभ्यो ड्वसंज्ञायाम् ॥

विभुः=व्यापकः । प्रभुः=स्वामी । संभुः=जनिता ।

(मितद्रवादिभ्य उपसंख्यानम्)

मितं द्रवतीति-मितद्रुः । शंभुः ।

३-२-१८१ धः कर्मणि ष्ट्रन् ॥१८३

धीयते =धात्री । स्तन्यदायिनी, आमलकी च ।

३-२-१७३ **शॄवन्द्योः** =शॄ वन्द् धातुभ्याम्, आरुः =आरुप्रत्ययो भवति, प्रागर्थेषु ।

३-२-१७४ **भियः** =भीधातोः, क्रुक्लुकनौ =क्रु क्लुकन् प्रत्ययौ भवतः, प्रागर्थेषु ।

३-२-१७५ **स्थेश...कसः** =स्था (स्था ईश्) प्रभृतिभ्यः, वरच् =वरच् प्रत्ययो भवति, प्रागर्थेषु । **ईश्वरः**७-२-८ नेड्व...इतीट्प्रतिषेधः । स्त्रियाम्-ईश्वरा । ईश्वरीति तु अश्नोतेरीच्चेति औणादिके वरट्प्रत्यये बोध्यः ।

३-२-१७६ **यश्च- यङः** =यङन्तात्, यः =याधातोः, वरच् (३-२-१७५) प्रागर्थेषु ।

३-२-१७७ **भ्राज...स्तुवः**=भ्राज् इत्यादिभ्यः, क्विँप्=क्विप् प्रत्ययो भवति, प्रागर्थेषु ।

३-२-१७८ **अन्येभ्योऽपि** =धात्वन्तरेभ्योऽपि, क्विँप् (३-२-१७७) तच्छीलादिषु (३-२-१३४) ।

द्युति-दिद्युत्- ७-४-६७ द्युति...इति सम्प्रसारणम् । **जगत्** ६-४-४० गम...इति मलोपः । ६-१-६९ ह्रस्व...इति तुँक् । **ध्याय-धीः** ६-४-२ हल इति दीर्घः ।

३-२-१७९ **भुवः** =भूधातोः, क्विँप् (३-२-१७७) संज्ञान्तरयोः =संज्ञायामन्तरे च गम्ये ।

३-२-१८० **विप्रसंभ्यः** =वि प्र सम् इत्युपसर्गेभ्यः परस्मात्, भुवः (३-२-१७९) डु =डु प्रत्ययो भवति, असंज्ञायाम्=संज्ञायामगम्यमानायाम् । डित्त्वाट्टिलोपः । **मितद्र्वादिभ्यः**=मितद्रुप्रभृतिसिद्धये डुप्रत्ययस्योपसंख्यानं कर्तव्यम् ।

३-२-१८१ **धः** =धाधातोः, (धेटो धाञश्च), कर्मणि = कर्मणि कारके, ष्ट्रन् =ष्ट्रन् प्रत्ययो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-२-१८२ दाम्नी-शस-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-दश-नहः करणे ॥१८६

दान्त्येननन=दात्रम् । नेत्रम् ।

शस्त्रम् । योत्रम् । योक्त्रम् ।

स्तोत्रम् । तोत्त्रम् । सेत्रम् ।

सेक्त्रम् । मेढ्रम् । पत्त्रम् । दंष्ट्रा । नद्ध्री

३-२-१८३ हलसूकरयोः पुवः ॥

हलस्य पोत्रम् । सूकरस्य पोत्रम् ।

मुखमित्यर्थः ।

३-२-१८४ अर्ति-लू-धू-सू-खन-सह-चर इत्रः ॥१८६

अरित्रम् । लवित्रम् । धवित्रम् । सवित्रम् ।

खनित्रम् । सहित्रम् । चरित्रम् ।

३-२-१८५ पुवः संज्ञायाम् ॥१८६

पूयतेऽनेन=पवित्रम् ।

३-२-१८६ कर्तरि चर्षिदेवतयोः ॥

पूयतेऽनेन=पवित्रोऽयमृषिः । देवतायाम्-अग्निः पवित्रं स मा पुनातु ।

३-२-१८७ ञीतः क्तः ॥१८८

मिन्नः । इद्धः ।

३-२-१८८ मति-बुद्धि-पूजार्थेभ्यश्च ॥

राज्ञां मतो बुद्धः पूजितो वा ।

चकारोऽनुक्तसमुच्चयार्थः । तेन शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि । इत्यादि सिद्धमित्याहुः ।

इति तृतीयाध्याये
द्वितीयः पादः ।

३-२-१८२ दम्नी...नहः=दाप् नी प्रभृतिभ्यः, करणे=करणकारके, ष्ट्रन् (३-२-१८१) । दश इति ६-४-२५ दश...इति नलोपिना शपा निर्देशः । न्यासकारस्तु क्वचिन्नलोपो भवतीति ज्ञापनार्थो निर्देशः । तेन दशन इति सिध्यतीत्यभिप्रैति । **शस्त्रम्** ७-२-९ तितु...इतीद् प्रतिषेधः । **दंष्ट्रा** अजादित्वाट्टाप् । **नद्ध्री** ८-२-३४ नहो...इति धः । ८-२-४० झष...इति धः । ८-४-५२ झलां...इति जश् । ४-१-४१ षिद्गौ...इति ङीष् ।

३-२-१८३ हलसूकरयोः =हलस्य सूकरस्य च अवयवे गम्ये, पुवः =पूधातोः, करणे (३-२-१८२) ष्ट्रन् (३-२-१८१) । सूत्रे हलसूकरयोरित्यवयवषष्ठी ।

३-२-१८४ अर्ति...चरः =ऋ प्रभृतिभ्यः, करणे (३-२-१८२) इत्रः =इत्रप्रत्ययो भवति ।

३-२-१८५ पुवः=पूधातोः, करणे (३-२-१८२) इत्रः (३-२-१८४) संज्ञायाम्=संज्ञायां गम्यमानायाम् ।

३-२-१८६ कर्त- पुवः (३-२-१८५) कर्तरि=कर्तृकारके, करणे (३-२-१८२) च कारके, इत्रः (३-२-१८४) ।

३-२-१८७ ञीतः- २-३-६९ न लोकाव्यय...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

३-२-१२३ वर्तमाने लँट् ॥ ३-२-१८७ (क) ञीतः क्तः ॥इति। (क)= वर्तमाने =वर्तमानकाले, ञीतः='ञि' इत्यनुबन्धकाद् धातोः, क्तः=क्तप्रत्ययो भवति । ञिमिदाँ-मिन्नः । ञि इन्धी-इद्धः । इत्यादि । अर्थात् निष्ठा (क्तक्तवतुँ) प्रत्ययौ भूतकाले सर्वेभ्यो धातुभ्यो भवतः । ञि इत्यनुबन्धकाद्धातोस्तु क्तप्रत्ययो वर्तमानकालेऽपि भवति । इति तात्पर्यं बोधयित्वा भूतकालेऽप्यकर्मकेभ्यस्तथा सकर्मकेभ्यो धातुविशेषेभ्यश्च पक्षे क्तप्रत्ययः कर्तर्यपि भवतीति सँस्काराधानाय ३-४-७२ गत्यर्था...सूत्रमुपदिशेत् ।

३-२-१८८ मति...र्थेभ्यः=इच्छार्थक-बुद्ध्यर्थक-पूजार्थक-धातुभ्यः, वर्तमाने (३-२-१२३) क्तः (३-२-१८७) । मतिः=इच्छा ।

इति तृतीयाऽध्याये द्वितीयः पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तृतीयाध्याये

तृतीयः पादः

३-३-१ उणादयो बहुलम् ॥३

कारु : । वायुः ।

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥

३-३-२ भूतेऽपि दृश्यन्ते ॥

वृत्तं तदिति=वर्त्म ।

३-३-३ भविष्यति गम्यादयः॥१५

गमी । आगामी ।

३-३-४ यावत्पुरानिपातयोर्लट् ॥९

यावद् भुङ्क्ते । पुरा भुङ्क्ते । निपातयोरित्युक्तेर्नेह- यावद् दास्यति तावद् भोक्ष्यते । पुरा यास्यति ।

३-३-५ विभाषा कदाकर्ह्योः ॥९

कदा भुङ्क्ते, भोक्ष्यते, भोक्ता वा ।

कर्हि भुङ्क्ते, भोक्ष्यते, भोक्ता वा ।

३-३-६ किंवृत्ते लिप्सायाम् ॥

कं कतरं कतमं वा भोजयसि, भोजयिष्यसि, भोजयितासि वा । लिप्सायामित्युक्तेर्नेह- कः पाटलिपुत्रं गमिष्यति ।

३-३-७ लिप्स्यमानसिद्धौ च ॥

योऽन्नं ददाति, दास्यति, दाता वा
स स्वर्गं गच्छति, गमिष्यति, गन्ता वा ।

३-३-१ उणा- धातोः (३-१-९१) उणादयः=उण् प्रभृतयः प्रत्ययाः, वर्तमाने (३-२-१२३) संज्ञायाम् (३-२-१८५) बहुलम्=बाहुल्येन भवन्ति । 'कृवापाजिमिस्वदिसाध्यशुभ्य उण्' कारुः । वायुः । पायुः । जायुः। मायुः । स्वादुः । साधुः । आशु । इत्यादि ।

संज्ञासु= नामसु, धातुरूपाणि=प्रकृतौ धातुस्वरूपाणि, ततः परे=धातुभ्य परतः, प्रत्ययाश्च विमृश्यानि । कार्यात्=कार्येण अनुबन्धं विद्यात् । एतत्=इदम्, उणादिषु, शास्त्रम्=अनुशासनं बोध्यम् । यथा भरुः । अत्र प्रकृतिर्भृधातुः । ततः परश्च उ प्रत्ययः कल्प्येते । कारुः अत्र प्रकृतिः कृधातुः । ततः परश्च उण् प्रत्ययः कल्प्येते । वृद्धिदर्शनाद् णिदनुबन्धः कल्प्यते । विश्वः अत्र प्रकृतिर्विश् धातुः । ततः परतश्च क्वन् प्रत्ययः । गुणाऽभावदर्शनेन तन्निषेधाय किदनुबन्धः कल्प्यते । इत्यादि ।

३-३-२ भूतेऽपि=भूतकालेऽपि, दृश्यन्ते =उणादयः प्रत्यया दृश्यन्ते ।

३-३-३ भवि- गम्यादयः=गमि (न्) प्रभृतयः, भविष्यति= भविष्यत्काले भवन्ति । **गमी** गमेरिर्निरितीनिः । **आगामी** आङि णिच्चेति इनिर्णित्वं च णित्त्वादुपधावृद्धिः ।

३-३-४ यावत्... निपातयोः,= निपातसंज्ञकयोर्यावत्पुराशब्दयोरुपपदयोः, धातोः (३-१-९१) भविष्यति (३-३-३) लट्=लट् प्रत्ययो भवति । **भुङ्क्ते** १-३-६६ भुजो...इत्यात्मनेपदम् । **यावद् दास्यति** अत्र यावदिति वतुँप् प्रत्ययान्तम् । पुरा यास्यति अत्र पुरेति पुर् शब्दस्य तृतीयान्तम् ।

३-३-५ विभा- कदाकर्ह्योः=कदा कर्हिशब्दयोर्योगे, भविष्यति (३-३-३) धातोः (३-१-९१) विभाषा=वा, लट् (३-३-४)।

३-३-६ किंवृत्ते- वर्ततेऽस्मिन्नित्यधिकरणे क्तः । किमो वृत्तम्=किंवृत्तम्=किंशब्दावयवकम् । किंशब्दो वर्तते यस्मिन्निति भावः । इह किंशब्दो डतर डतम प्रत्ययान्तः शुद्धश्च सुँबन्तो गृह्यते, न त्वन्यत् किंतमामित्यादि । अथ सूत्रार्थः-किंवृत्ते =किंशब्दावयवके उपपदे, लिप्सायाम्=लिप्सायां गम्यमानायाम्, भविष्यति (३-३-३) धातोः (३-१-९१) विभाषा (३-३-५) लट् (३-३-४) ।

३-३-७ लिप्स्यमानसिद्धौ=लिप्स्यमानेन (अन्नादिना, स्वर्गादि) सिद्धौ गम्यमानायाम्, भविष्यति (३-३-३) धातोः (३-१-९१) विभाषा (३-३-५) लट् (३-३-४) । अकिंवृत्तार्थमिदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-८ **लोँडर्थलक्षणे** च ॥९

उपाध्यायश्चेदागच्छति, आगमिष्यति, आगन्ता वा, अथ त्वं छन्दोऽधीष्व ।

३-३-९ लिँङ् चोर्ध्वमौहूर्तिके ॥

मुहूर्तादूर्ध्वमुपाध्यायश्चेदागच्छति, आगच्छेत्, आगमिष्यति, आगन्ता वा, अथ त्वं छन्दोऽधीष्व ।

३-३-१० तुमुँण्ण्वुँलौ क्रियायां क्रियार्थायाम् ॥

कोशं पठितुं याति । कोशं पाठको याति ।

३-३-११ भाववचनाश्च ॥

पाठाय गच्छति ।

३-३-१२ अण् कर्मणि च ॥

काण्डलावो व्रजति । गोदायो व्रजति ।

३-३-१३ लृँट् **शेषे** च ॥१५

पठिष्यति ।

३-३-८ **लोँडर्थलक्षणे**=लोँडर्थलक्षणेऽर्थे वर्तमानात्, धातोः (३-१-९१) भविष्यति (३-३-३) विभाषा (३-३-५) लँट् (३-३-४) । लोँडर्थः=प्रैषादिः । स लक्ष्यतेऽनेनेति-लोडर्थलक्षणः ।

३-३-९ लिँङ् चो- ऊर्ध्वमौहूर्तिके =मुहूर्तोपरिभवे, भविष्यति (३-३-३) लोडर्थलक्षणे (३-३-८) विभाषा (३-३-५) लिँङ्=लिँङ् प्रत्ययो भवति, लँट् (३-३-४) च । ऊर्ध्वं मुहूर्ताद् भव ऊर्ध्वमौहूर्तिकः । निपातनात् समासे भवार्थे ठञ्, उत्तरपदवृद्धिश्चात्रैव निपातनात् । भवार्थश्च भविष्यतो विशेषणम् ।

३-३-१० तुमुँ-१-२-१८ न क्त्वा सेट्- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

३-१-९१ धातोः॥ ३-३-३ भविष्यति गम्यादयः ॥ ३-३-१० तुमुँण्ण्वुँलौ क्रियायां क्रियार्थायाम् (क) (ख) इति । क्रियार्थायां क्रियायाम्=क्रियानिमित्तकक्रियावाचिनि पदे उपपदे सति, (क)=धातोः, (ख)=भविष्यति=भविष्यत् (भविष्यत्कालिक क्रियावृत्तेर्धातोः) काले, तुमुँण्ण्वुँलौ=तुमुँन् ण्वुँल् प्रत्ययौ भवतः । इत्यर्थमुपदिश्य लक्षणसमन्वयप्रसङ्गे प्रकृते भविष्यत्कालिकक्रिया पठनक्रिया वर्तते । तद्बोधकश्च पठ्धातुर्वर्तते । पठनक्रियानिमित्तिका क्रिया च गमनक्रियाऽस्ति (गमनं खलु पठनार्थम्) तद्वाचकपदं च प्रकृते 'याति' इति वर्तते । तच्च उपपदमस्तीति बोधनाय श्यामपाटयां "श्यामः पठितुं याति" इति वाक्यं लिखेत् । ततश्छात्रैरेव पठ्धातोस्तुमुँन्प्रत्ययं साधयित्वाऽनुबन्धफालनम्, आर्धधातुकनिमित्तकमिडागमं चच्छात्रैः साधयित्वा 'पठितुम्" इति श्यामपाटयां दर्शयित्वाऽत्राप्यव्ययत्वात् सुँपो लुग् भवति । तथाहि, इति वदन् १-१-३८ कृन्मे...सूत्रमुपदिशेत् ।

३-३-११ भाववचनाः=भाववाचिनः=३-३-१८ भावे इत्यधिकारे विधेयाः=प्रत्ययाः, क्रियार्थायां क्रियायाम् (३-३-१०) भविष्यति (३-३-३) भवन्ति । क्रियार्थायां क्रियायामुपपदे विहितेन तुमुँना स्वविषये घञादीनां बाधो माभूदिति पुनर्वचनम् । वाऽसरूपविधिस्तु नास्तीति ण्वुँला (३-३-१०) ज्ञापितम् । **पाठाय** २-३-१५ तुम...इति चतुर्थी ।

३-३-१२ अण् क- क्रियार्थायां क्रियायाम् (३-३-१०) कर्मणि च=कर्मणि च उपपदे, भविष्यति (३-३-३) धातोः (३-१-९१) अण्=अण् प्रत्ययो भवति । समुदाये सत्येवोपपदे सूत्रमिदं प्रवर्तते न त्वन्यतरमात्रोपपदे । अत एव सूत्रे चकारः सार्थकः । ३-१-१३३ ण्वुँल्तृ...ण्वुँलमपवादत्वात् कादीँश्च परत्वाद् बाधते । क्रियार्थायां क्रियायामुपपदे ण्वुँल्विधानेन वाऽसरूविधिना तृजादयो न भवन्तीत्येव ज्ञापितम् । तेन ३-३-१० तुमुँ..इति प्रकरणान्तरस्थो ण्वुँल्तु वाऽसरूपविधिना भवत्येव । अत एव भविष्यत्यकस्य कर्मणि २-३-७० अके...इत्यनेन षष्ठी निषिध्यते । कोशं पाठको व्रजति । इति यथा ।

३-३-१३ लृँट् शे- ६-४-५१ णेरनिटि-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ)

३-१-१ प्रत्ययः ॥ ३-१-२ परश्च ॥ ३-१-९१ धातोः ॥ ३-३-३ भविष्यति गम्यादयः ॥ ३-३-१० तुमुँ...

(ङ) (च)

क्रियायां क्रियार्थायाम् ॥ ३-३-१३ (ग) (ख) लृँट् (क) (च) (ङ) शेषे च ॥ इति । (च)+ (ङ)=क्रियार्थायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-१४ लृँटः सद् वा ॥

पठिष्यन्तं छात्रं पश्य ।
हिण्डिष्यमाणं जनं पश्य ।

३-३-१५ अनद्यतने लुँट् ॥

पठिता

३-३-१६ पद-रुज-विश-स्पृशो घञ् ॥५५

पद्यते =पादः । रुजति=रोगः । विशति=वेशः ।
(स्पृश उपताप इति वक्तव्यम्)
स्पर्शः=उपतापः । अन्यत्र ३-१-१३४ पचाद्यच् ।
स्वरे विशेषः ।

३-३-१७ सृ स्थिरे ॥

सरतीति=सारः ।
(व्याधि-मत्स्य-बलेष्विति वक्तव्यम्)
अतीसारो व्याधिः । विसारो मत्स्यः ।
सारो बलम् ।

३-३-१८ भावे ॥११२

व्याकरणस्य पाठः ।

क्रियायाम्, शेषे च= क्रियार्थायां क्रियायामसत्यामपि, (घ)=भविष्यति, (द्वितीयावृत्तौ-भविष्यत्कालिकक्रियाबोधकात्, इत्युपदिशेत्) (ग)=धातोः, (ख)=परः, लृँट् (क)=प्रत्ययो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयेऽनुबन्धलोपे च लकारार्थे कर्तरि विवक्षिते 'पठति' इत्यत्रैव प्रक्रियाक्रमे 'पठ्+ति' इति श्यामपाट्यां लिखित्वा शपं बाधयित्वा ३-१-३३ स्यतासीँ सूत्रमुपदिशेत् ।

३-३-१४ लृँटः=लृँटः स्थाने, वा=विभाषया, सत्=सत्संज्ञक आदेशो (शतृँ-शानचौ,) भवति । ३-२-१२७ तौ...इति सत्संज्ञा ।

३-३-१५ अन- ६-४-६२ स्यसिँच्...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

३-१-९१ धातोः ॥ ३-३-३ भविष्यति गम्यादयः ॥ ३-३-१५ अनद्यतने (ख) (क) लुँट् ॥ इति ।
अनद्यतने =अद्यतनभिन्ने, (ख)=भविष्यति=भविष्यत्काले, (द्वितीयावृत्तौ तु 'अनद्यतनभविष्यत्कालिकक्रियाबोधकात्' इत्यर्थमुपदिशेत् ।) (क)=धातोः, लुँट्=लुँट् प्रत्ययो भवति । इत्यर्थमुपदिश्य शिक्षको लक्षणसमन्वयेऽनुबन्धलोपे च लकारस्यार्थे कर्तरि विवक्षिते 'पठति' इत्यत्रैव प्रक्रियाक्रमे 'पठ्+ति' इति श्यामपाट्यां लिखित्वा शपं बाधयित्वा ३-१-३३ स्यता...सूत्रमुद्बोध्य लक्षणसमन्वयमनुबन्धलोपमार्धधातुकसंज्ञामिडागमञ्चच्छात्रैः साधयित्वा 'पठितास्+ति' इति श्यामपाट्यां लिखित्वा २-४-८५ लुँटः प्रथमस्य...सूत्रमुपदिशेत् ।

३-३-१६ पद...स्पृशः=पत् (द्) प्रभृतिभ्यः, घञ्=घञ् प्रत्ययो भवति । भविष्यतीति निवृत्तम् । प्रत्ययः ३-४-६७ कर्त...इति कर्त्रर्थे भवति ।

स्पृश- उपतापः=रोगः ।

३-३-१७ सृ =सृधातोः, स्थिरे=स्थिरे कर्तरि, घञ् (३-३-१६) ।

व्याधि-अतीसारः रुधिरादिकमतिशयेन सारयतीति । अन्तर्भावितण्यर्थोऽत्र सरतिः । ६-३-१२२ उप...इति दीर्घः । **विसारो मत्स्यः** विविधं सरतीति । **सारो बलम्** सारयति=चेष्टयतीति-पदमञ्जरी । अत्राप्यन्तर्भावितण्यर्थः सरतिः ।

३-३-१८ भावे- ३-३-११५ ल्युँट् च-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

३-३-९१ धातोः ॥ ३-३-१६ पदरुजविशस्पृशो घञ् ॥ ३-३-१८ भावे (क) (ख) ॥इति। भावे =सिद्धावस्थापन्ने भावे, (क)=धातोः, (ख)=घञ्=घञ् प्रत्ययो भवति । इत्यर्थमुपदिश्य पठनमिति विग्रहे पठ्धातोर्लक्षणसमन्वयं छात्रैः साधयेत् । अथ 'पठ्+अ' इति श्यामपाट्यां लिखित्वा ७-२-११६ अत...सूत्रमुद्बोध्य कृदन्तत्वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-१९ अकर्तरि च कारके संज्ञायाम् ॥११२

प्रास्यते=प्रासः । प्रसीव्यते=प्रसेवः ।

आहरन्ति (रसम्) अस्माद्=आहारः ।

सूत्रे चकारः संज्ञायामित्यस्याऽनन्तरं द्रष्टव्यः । 'संज्ञाया च' इति । तेन संज्ञायामपि भवतीत्यर्थे सति, असंज्ञायामपि क्वचिद् भवति, इति ज्ञायते । को भवता लाभो लब्धः ।

इत उत्तरं 'भावे' 'अकर्तरि च कारके' इति द्वयमनुवर्तते ।

३-३-२० परिमाणाख्यायां सर्वेभ्यः ॥

एकस्तण्डुलनिचायः । द्वौ शूर्पनिष्पावौ ।

(दारजारौ कर्तरि णिलुक् च)

दारयन्तीति=दाराः । जरयन्तीति=जाराः ।

३-३-२१ इङश्च ॥

अध्यायः । उपेत्याऽस्मादधीते=उपाध्यायः ।

(अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष्)

उपाध्यायी, उपाध्याया ।

(शॄ वायु-वर्ण-निवृतेषु)

शारो वायुः । शारो वर्णः । नीशारः=आवरणम् । गौरिवाऽकृतनीशारः प्रायेण शिशिरे कृशः । अकृतप्रावरण इत्यर्थः ।

३-३-२२ उपसर्गे रुवः ॥

संरावः । उपसर्गे इत्युक्तेर्नेह-रवः ।

३-३-२३ समि यु-द्रु-दुवः ॥

संयावः । संद्रावः । संदावः । समीत्युक्तेर्नेह प्रयवः ।

३-३-२४ श्रिणीभुवोऽनुपसर्गे ॥

श्रायः । नायः । भावः । उपसर्गे तु-

प्रश्रयः । प्रणयः । प्रभवः ।

कथं प्रभावो राज्ञ इति ? प्रकृष्टो भाव इति प्रादिसमासः । कथं राज्ञो नय इति ? बाहुलकादच् ।

प्रातिपदिकत्वात् सुँबुत्पत्तिरित्युद्बोधयेत् । अद्य व्याकरणस्य पाठो भवति । इत्यादि । **अथ टु इत्यनुबन्धफलबोधनाय** ३-३-८९ ट्वितो...सूत्रमुपदिशेत् ।

३-३-१९ अक- धातोः (३-१-९१) अकर्तरि+कारके=कर्तृभिन्ने कारके, घञ् (३-३-१६) संज्ञायाम्=संज्ञायां गम्यमानायाम् ।

३-३-२० परि- सर्वेभ्यः=सर्वेभ्यो धातुभ्यः, घञ् (३-३-१६) परिमाणाख्यायाम्=परिच्छित्तेरुक्तौ । आख्याग्रहणं संख्याया अपि ग्रहणार्थम् । अन्यथा प्रस्थादिरूढय एव गृह्येरन् । अजपोर्बाधनार्थमिदम् । स्त्रीप्रत्ययास्तु न बाध्यन्ते-एका तिलोच्छित्तिः । **तण्डुलनिचायः** निचीयते =राशी क्रियते इति निचायः=राशिः । तण्डुलानां निचाय इति षष्ठी समासः । अत्र राश्येकत्वेन परिमाणं गम्यते । **शूर्पनिष्पावौ** निष्पूयेते इति निष्पावौ । ततः करणतृतीयान्तेन शूर्पशब्देन समासः । शूर्पसंख्यया परिमाणं गम्यते । **दार-** घञन्तौ निपात्येते । **जाराः** णेर्लुकि ७-२-११६ अत...इत्युपधावृद्धिः । ६-४-५१ णेर... इति णिलोपे तु तस्य स्थानिवद्भावेन मिन्निमित्तको ६-४-९२ मितां...इति ह्रस्व एव स्यात् । अतो णिलुक्चेत्युक्तम् ।

३-३-२१ इङः=इङ्धातोः, घञ् (३-३-१६) भावे (३-३-१८) अकर्तरि च कारके (३-३-१९) ।

३-३-५६ एरच् इत्यचोऽपवादः । **अध्यायः** कर्मणि भावे वा घञ् । **उपाध्यायः** अपादाने घञ् । **शॄ वायु-** वायु...तेषु=वायौ वर्णे आवरणे च वाच्येषु, शॄ=शॄधातोः, घञ् (३-३-१६) । निव्रियते =आव्रियते शरीरमनेनेति-निवृतम्=आवरणम् ।

३-३-२२ उपसर्गे=उपसर्गे सति, रुवः=रुधातोः, घञ् (३-३-१६) । ३-३-५७ ॠदो...इत्यपोऽपवादः ।

३-३-२३ समि=सम् इत्युपसर्गे सति, युद्रुदुवः= यु द्रु दु धातुभ्यः, घञ् (३-३-१६) ।

३-३-२४ श्रिणी- अनुपसर्गे =उपसर्गाभावे सति, श्रिणीभुवः=श्रि नी भू धातुभ्यः, घञ् (३-३-१६) । आद्ययोः ३-३-५६ एरच् इत्यचि, अन्त्ये ३-३-५७ ॠदो... इत्यपि प्राप्ते बाधकमिदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-२५ वौ क्षुश्रुवः ॥

विक्षावः । विश्रावः । वावित्युक्तेर्नेह-क्षवः । श्रवः । संश्रवः ।

३-३-२६ अवोदोर्नियः ॥

अवनायः उन्नायः । अवोदोरित्युक्तेर्नेह-प्रणयः । कथमुन्नयः ? बाहुलकादच् ।

३-३-२७ प्रे द्रु-स्तु-स्रुवः ॥

प्रद्रावः । प्रस्तावः । प्रस्रावः ।

प्रे इत्युक्तेर्नेह-द्रवः । स्तवः । स्रवः ।

३-३-२८ निरभ्योः पूल्वोः ॥

निष्पावः । अभिलावः । निरभ्योरित्युक्तेर्नेह-यवः । लवः ।

३-३-२९ उन्न्योर्ग्रः ॥३०

उद्गारः । निगारः । उन्न्योरित्युक्तेर्नेह-गरः ।

३-३-३० कॄ धान्ये ॥

उत्कारो निकारो वा धान्यस्य ।

धान्य इत्युक्तेर्नेह- भिक्षोत्करः । पुष्पनिकरः ।

३-३-३१ यज्ञे समि स्तुवः ॥

समेत्य स्तुवन्ति यस्मिन् स देशः संस्तावः ।

यज्ञे इत्युक्तेर्नेह-संस्तवः=परिचयः ।

३-३-३२ प्रे स्त्रोऽयज्ञे ॥३४

छन्दः प्रस्तारः । अयज्ञे इत्युक्तेर्नेह-बर्हिष्प्रस्तरः ।

३-३-३३ प्रथने वावशब्दे ॥

पटस्य विस्तारः । अशब्दे इत्युक्तेर्नेह-वाचां विस्तरः । ग्रन्थस्य विस्तरः ।

३-३-३४ छन्दोनाम्नि च ॥

विस्तीर्यन्तेऽक्षराण्यस्मिन्निति

विष्टारपङ्क्तिच्छन्दः ।

३-३-२५ वौ क्षु- वौ=वि इत्युपसर्गे सति, क्षुश्रुवः=क्षुश्रुधातुभ्याम्, घञ् (३-३-१६) । ३-३-५७ ॠदो...इत्यपोऽपवादः ।

३-३-२६ अवोदो=अव उद् इत्युपसर्गयोः सतोः, नियः=नीधातोः, घञ् (३-३-१६) । ३-३-५६ एरच्..इत्यचोऽपवादः ।

३-३-२७ प्रे द्रु- प्रे=प्र इत्युपसर्गे सति, द्रुस्तुस्रुवः=द्रु स्तु स्रुधातुभ्यः, घञ् (३-३-१६) । ३-३-५७ ॠदो...इत्यपोऽपवादः ।

३-३-२८ निरभ्यो=निर् अभि इत्युपसर्गयोः सतोः, पूल्वोः=(क्रमेण) पूलूधातुभ्याम्, घञ् (३-३-१६) । प्राग्वदपोऽपवादः ।

३-३-२९ उन्न्योः=उद् नि इत्येतयोरुपसर्गयोः सतोः, ग्रः=गॄधातोः, घञ् (३-३-१६) । प्राग्वदपोऽपवादः ।

३-३-३० कॄधा- धान्ये =धान्यविषयेऽर्थे वर्तमानात्, उन्न्योः (३-३-२९) कॄ-कॄधातोः, घञ् (३-३-१६) प्राग्वदपोऽपवादः ।

३-३-३१ यज्ञे =यज्ञविषये प्रयोगे, समि=सम् इत्युपसर्गे सति, स्तुवः=स्तुधातोः, घञ् (३-३-१६) । प्राग्वदपोऽपवादः।

३-३-३२ प्रे स्त्रो- अयज्ञे =यज्ञभिन्नविषये प्रयोगे, प्रे=प्र इत्युपसर्गे सति, स्त्रः=स्तॄधातोः, घञ् (३-३-१६) ।

३-३-३३ प्रथ- अशब्दे =शब्दविषयभिन्ने, प्रथने =विस्तीर्णतायाम्, वौ=वि इत्युपसर्गे सति, स्त्रः (३-३-३२) घञ् (३-३-१६) । प्राग्वदपोऽपवादः ।

३-३-३४ छन्दो- अत्रच्छन्दो नाम न वेदो मन्त्रब्राह्मणात्मकः । किन्तु वृत्तम्=अक्षराणामियत्ताविशिष्टो विन्यासविशेषः । अत एव नामग्रहणं कृतम् । अन्यथा बहुलं छन्दसीत्यत्रैव छन्दसीत्येव ब्रूयात् । छन्दोनाम्नीत्यत्राधिकरणे सप्तमी । घञन्त (विष्टार) शब्दश्च तत्राऽवयवत्वेन वर्तते । यथा- विष्टारपङ्क्तिः, विष्टारबृहती । घञन्तमात्रं तु न च्छन्दोनाम । तेन 'छन्दोनाम्नि गम्यमाने' इति सूत्रार्थो न । किन्तु छन्दोनाम्नि=वृत्तनाम्नि घञन्त (विष्टार) शब्दस्याऽधिकरणे सति, वौ (३-३-३३) स्त्रः (३-३-३२) घञ् (३-३-१६) इति स्वरसतः फलति । उदाहरणे ८-३-९४ छन्दो... इति षत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-३५ उदि ग्रहः ।३६

उद्ग्राहः ।

(छन्दसि निपूर्वादपीष्यते स्रुगुद्यमननिपातनयोः)

उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ।

३-३-३६ समि मुष्टौ ॥

मल्लस्य संग्राहः । मुष्टावित्युक्तेर्नेह-धान्यानां संग्रहः ।

३-३-३७ परिन्योर्नीणोर्द्यूताऽभ्रेषयोः ॥

अक्षादिभिः क्रीडा=द्यूतम् । यथाप्राप्तकरणम्=अभ्रेषः । परिणायेन शारान् हन्ति । समन्तान्नयनेनेत्यर्थः । एषोऽत्र न्यायः । उचितमित्यर्थः । द्यूताभ्रेषयोरित्युक्तेर्नेह-परिणयः=विवाहः । न्ययः=नाशः ।

३-३-३८ परावनुपात्यय इणः ॥

क्रमप्राप्तस्याऽनतिक्रमणम्=अनुपात्ययः । तव पर्यायः । मम पर्यायः । अनुपात्यय इत्युक्तेर्नेह-कालस्य पर्ययः । अतिक्रम इत्यर्थः ।

३-३-३९ व्युपयोः शेतेः पर्याये ॥

तव विशायः । पर्याय इत्यर्थः । तव राजोपशायः । राजानमुपशमयितुं पर्याय इत्यर्थः । पर्याय इत्युक्तेर्नेह- विशयः । संशय इत्यर्थः । उपशयः । समीपशयनमित्यर्थः ।

३-३-४० हस्तादाने चेरस्तेये ॥४२

पुष्पप्रचायः । फलप्रचायः । हस्तादाने इत्युक्तेर्नेह-वृक्षाग्रस्थानां फलानां यष्टचा प्रचयं करोति । अस्तेये इत्युक्तेर्नेह- पुष्पप्रचयश्चौर्येण ।

(उच्चयस्य प्रतिषेधो वक्तव्यः)

पुष्पोच्चयः । फलोच्चयः ।

३-३-४१ निवास-चिति-शरीरोपसमाधानेष्वादेश्च कः ॥४२

काशीनिकायः । आकायमग्निं चिन्वीत । कायः । उपसमाधानम्=राशीकरणम् । गोमयनिकायः । चःकँ इति वक्तव्ये आदेरित्युक्तिर्यङ् लुक्यनभ्यास-चकाराऽग्रहणार्था । गोमयनिकेचायः । निवासाद्युक्तेर्नेह- चयः । समुदाय इत्यर्थः ।

३-३-३५ उदि=उद् इत्युपसर्गे सति, ग्रहः=ग्रह्धातोः, घञ् (३-३-१६) । ३-३-५८ ग्रह...इत्यपोऽपवादः ।

छन्द- निपूर्वादपि, ग्रहः (३-३-३५) इष्यते =घञ् (३-३-१६) इष्यते, स्रुगु...नयोः=स्रुच उद्यमने निपातने च । उद्यमनम्=ऊर्ध्वनयनम् । निपातनम्=अधोनयनम् । उदाहरणयोः ८-२-३५ आह...सूत्रस्थ हृग्र...इति हकारस्य स्थाने भकारः ।

३-३-३६ समि-मुष्टौ =अङ्गुलिसन्निवेशविषयेऽर्थे वर्तमानात्, **समि**=सम् इत्युपसर्गे सति, ग्रहः (३-३-३५) घञ् (३-३-१६) ।

मल्लस्य संग्राहःमुष्टेर्दार्ढ्यमित्यर्थः । **धान्यानां संग्रहः** ३-३-५८ ग्रह...इत्यप् ।

३-३-३७ परिन्योः=परि नि इत्येतयोरुपसर्गयोः सतोः, द्यूताभ्रेषयोः=द्यूताभ्रेषविषयार्थाभ्याम्, नीणोः=नी इण् इति धातुभ्याम्, घञ् (३-३-१६) । यथासंख्यमुपसर्गयोगः ३-३-५६ एरच्...इत्यचोऽपवादः ।

३-३-३८ परौ=परि इत्युपसर्गे सति, इणः=इण् धातोः, घञ् (३-३-१६) अनुपात्यये =क्रमप्राप्तस्याऽनतिक्रमणे गम्यमाने । पूर्ववदचोऽपवादः ।

३-३-३९ व्युपयोः=वि उप इत्युपसर्गयोः सतोः, शेतेः=शीधातोः, पर्याये=पर्यायेऽर्थे, घञ् (३-३-१६) । ३-३-५६ एरच् इत्यचोऽपवादः । अनुपात्ययः पर्याय इत्यनर्थान्तरम् । तथा पूर्वसूत्रादनुपात्यय इत्यनुवृत्त्यैव सिद्धे पर्यायग्रहणम् अभिविधिविवक्षायां परमपि ३-३-४४ अभि...इतीनुँणं बाधित्वा घञ एव विधानार्थमित्याहुः ।

३-३-४० हस्ता-हस्तादानशब्देन प्रत्यासत्तिरादेयस्य लक्ष्यते । हस्तादाने =आदेयस्य प्रत्यासत्तौ प्रतीयमानायाम्, चेः=चिधातोः, घञ् (३-३-१६) अस्तेये =चौर्याऽभावे । प्राग्वदचोऽपवादः ।

उच्चयस्य=उच्चयस्य सिद्ध्यर्थम् ।

३-३-४१ निवा...नेषु= निवासाद्यर्थेषु, चेः (३-३-४०) घञ् (३-३-१६) आदेश्च=आदिवर्णस्य स्थाने च, कँः=कँ (अनुबन्धलोपे क्) आदेशो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-४२ सङ्घे चानौत्तराधर्ये ॥

वैयाकरणनिकायः । अनौत्तराधर्ये इत्युक्तेर्नेह-सूकरनिचयः । सङ्घस्य प्राणिसमुदायत्वान्नेह-प्रमाणसमुच्चयः ।

३-३-४३ कर्मव्यतिहारे णच् स्त्रियाम् ॥

व्यावक्रोशी । व्यावचोरी । क्तिन्युँचोरपवादो न तु गुरोश्चेत्यकारस्यापि । व्यतीक्षा । व्यात्युक्षी, इत्यत्र तु पुनरकारं बाधित्वा णजेव भवति, बाहुलकवैचित्र्यात् । स्त्रियामित्युक्तेर्नेह-व्यतिपाकः ।

३-३-४४ अभिविधौ भाव इनुँण् ॥

सांकूटिनम् । सांराविणम् । भाव इत्यनुवर्तमाने पुनर्भावग्रहणं वासरूपविधिनिरासार्थम् । तेन घञ् न भवति । ल्युँट् तु भवत्येव । संकूटनम् । अभिविधावित्युक्तेर्नेह-संरावः । समीचीनो रव इत्यर्थः ।

३-३-४५ आक्रोशेऽवन्योर्ग्रहः ॥४७

अवग्राहस्ते भूयात् । निग्राहस्ते भूयात् । आक्रोशे इत्युक्तेर्नेह-अवग्रहः पदस्य । निग्रहश्चोरस्य ।

३-३-४६ प्रे लिप्सायाम् ॥

पात्रप्रग्राहेण चरति भिक्षुः । लिप्सायामित्युक्तेर्नेह-प्रग्रहो देवदत्तस्य ।

३-३-४७ परौ यज्ञे ॥

उत्तरपरिग्राहः । अधरपरिग्राहः । यज्ञे इत्युक्तेर्नेह-परिग्रह आढ्यस्य ।

३-३-४८ नौ वृ धान्ये ॥

नीवारा व्रीहयः । धान्ये इत्युक्तेर्नेह-निवरा कन्या ।

३-३-४९ उदि श्रयतियौतिपूद्रुवः ॥

उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः । कथं तर्हि पतनान्ताः समुच्छ्रया इति ? बाहुलकात् ।

३-३-४२ सङ्घे- अनौत्तराधर्ये =औत्तराधर्याविषये, सङ्घे =प्राणिनां समुदाये वाच्ये, चेः (३-३-४०) घञ् (३-३-१६) आदेश्च कः (३-३-४१) । **सूकरनिचयः** स्तनपानार्थं यदोत्तराधरभावेन शेरते तदेदं प्रत्युदाहरणम् । यदा तु पृथक् पृथगेवाऽवतिष्ठन्ते तदा तु सूकरनिकाय इत्येव भवति ।

३-३-४३ कर्मव्यतिहारे=क्रियाविनिमये गम्यमाने, धातोः (३-१-९१) स्त्रियाम्=स्त्रीत्वविशिष्टे, भावे (३-३-१८) णच्=णच् प्रत्ययो भवति । अकर्तरि कारके तु न णच् । अनभिधानादित्याहुः । **व्यावक्रोशी** व्यवक्रोश इति णजन्तात् ५-४-१४ णचः...इत्यञ् । ७-२-११७ तद्धि...इत्यादिवृद्धिः । ७-३-३ नय्वा... इति प्राप्तस्यैचः ७-३-६ न क...इति निषेधः । लाघवाच्च ३-३-९४ स्त्रियां...इत्यधिकारे प्रकृतसूत्रं न पठितम् । तेन वाऽसरूपविधिना क्तिन्नपि-व्यावक्रुष्टिरित्यादि ।

३-३-४४ अभिविधौ=अभिव्याप्तौ गम्यमानायाम्, भावे, धातोः (३-१-९१) इनुँण्=इनुँण् प्रत्ययो भवति । उदाहरणयोः ५-४-१५ अणि...इत्यण् । प्राग्वदादिवृद्धिः । ६-४-१४४ नस्त...इति टिलोपे प्राप्ते ६-४-१६४ इन...इति प्रकृतिभावः ।

३-३-४५ आक्रो- अवन्योः= अव नि इत्येतयोरुपपदयोः सतोः, ग्रहः=ग्रह्धातोः, घञ् (३-३-१६) आक्रोशे =शापे गम्यमाने । ३-३-५८ ग्रह...इत्यपोऽपवादः । अवग्राहः=अभिभवः । निग्राहः=बाधः। अवग्रहः=पदस्यच्छेदः । निग्रहः=दण्डः ।

३-३-४६ प्रे=प्र इत्युपसर्गे सति, ग्रहः (३-३-४५) घञ् (३-३-१६) लिप्सायाम्=लिप्सायां गम्यमानायाम् । लब्धुमिच्छा=लिप्सा । प्रग्रहो मदः प्रकृष्टो वाऽभिनिवेश इति पदमञ्जरी ।

३-३-४७ परौ=परि इत्युपसर्गे सति, ग्रहः (३-३-४५) घञ् (३-३-१६) यज्ञे =यज्ञविषये वाच्ये ।

३-३-४८ नौ=नि इत्युपसर्गे सति, वृ=वृधातोः, घञ् (३-३-१६) धान्ये=धान्ये वाच्ये । उदाहरणे कर्मणि घञ् । ६-३-१२२ उप...इत्युपसर्गदीर्घः । प्रत्युदाहरणे ३-३-५८ ग्रह...इति कर्मण्यप् ।

३-३-४९ उदि=उदुपसर्गे सति, श्रय...द्रुवः=श्रि यु पू द्रु धातुभ्यः, घञ् (३-३-१६) । अजपोरपवादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-५० विभाषाऽऽङि रुप्लुवोः ॥५५

आरावः, आरवः । आप्लावः । आप्लवः ।

३-३-५१ अवे ग्रहो वर्षप्रतिबन्धे ॥५३

अवग्राहः, अवग्रहः । वर्षप्रतिबन्ध इत्युक्तेर्नेह-अवग्रहः पदस्य ।

३-३-५२ प्रे वणिजाम् ॥५४

तुलाप्रग्राहेण तुलाप्रग्रहेण वा चरति वणिगन्यो वा । वणिजामित्युक्तेर्नेह-प्रग्रहो देवदत्तस्य ।

३-३-५३ रश्मौ च ॥

प्रग्राहः, प्रग्रहः ।

३-३-५४ वृणोतेराच्छादने ॥

प्रावारः, प्रवरः । आच्छादने इत्युक्तेर्नेह-प्रवरा गौः । प्रशस्तेत्यर्थः ।

३-३-५५ परौ भुवोऽवज्ञाने ॥

परिभावः, परिभवः । अवज्ञाने इत्युक्तेर्नेह-परिभवः । सर्वतो भवनमित्यर्थः ।

३-३-५६ एरच् ॥

चयः । जयः । अयः ।

(अज्विधौ भयादीनामुपसंख्यानम्)

नपुंसके क्तादिनिवृत्त्यर्थम् । भयम् । वर्षम् ।

(जवसवौ छन्दसि वक्तव्यौ)

ऊर्वोरस्तु मे जवः । पञ्चौदनसवः ।

३-३-५७ ॠदोरप् ॥८७

करः । गरः । शरः । यवः । लवः । स्तवः । पवः ।

३-३-५८ ग्रहवृदृनिश्चिगमश्च ॥

ग्रहः । वरः । दरः । निश्चयः । गमः ।

(वशिरण्योरुपसंख्यानम्)

वशः । रणः ।

(घञर्थे कविधानम्)

प्रतिष्ठन्तेऽस्मिन्निति-प्रस्थः=सानुः ।

प्रपिबन्त्यस्यामिति-प्रपा=पानीयशाला ।

आयुध्यतेऽनेनेत्यायुधम् ।

३-३-५० विभा- आङि=आङ् इत्युपसर्गे सति, रुप्लुवोः=रु प्लु धातुभ्याम्, विभाषा=वा, घञ् (३-३-१६) । पक्षे ३-३-५७ ॠदो...इत्यप् ।

३-३-५१ अवे =अव इत्युपसर्गे सति, ग्रहः=ग्रह्धातोः, विभाषा (३-३-५०) घञ् (३-३-१६) वर्षप्रतिबन्धे =वृष्टिरोधे । पक्षे ३-३-५८ ग्रह...इत्यप् ।

३-३-५२ प्रे-प्र इत्युपसर्गे सति, ग्रहः (३-३-५१) विभाषा (३-३-५०) घञ् (३-३-१६) वणिजाम्=वणिजां सम्बन्धिनि (तुलासूत्रे वाच्ये) ।

३-३-५३ रश्मौ=रज्ज्वां वाच्यायाम्, प्रे (३-३-५२) ग्रहः (३-३-५१) विभाषा (३-३-५०) घञ् (३-३-१६) । रश्मिः=अश्वादिबन्धनार्था रज्जुः । इति काशिका ।

३-३-५४- वृणो- प्रे (३-३-५२) वृणोतेः =वृधातोः, विभाषा (३-३-५०) घञ् (३-३-१६) आच्छादने =आच्छादनविशेषे वाच्ये । पक्षे ३-३-५८ ग्रह...इत्यप् । घञ् पक्षे ६-३-१२२ उप...इत्युपसर्गस्य दीर्घः ।

३-३-५५- परौ=परि इत्युपसर्गे सति, भुवः =भूधातोः, विभाषा (३-३-५०) घञ् (३-३-१६) अवज्ञाने =तिरस्कारे वाच्ये ।

३-३-५६ एः =इवर्णान्ताद्, धातोः (३-१-९१) अच्=अच् प्रत्ययो भवति ।

जब- अपि प्राप्तेऽज् विधीयते । अन्तोदात्तार्थमिदम् । अपि त्वाद्युदात्तं स्यात् ।

३-३-५७ ॠदोः =ॠदन्तादुवर्णान्ताच्च, धातोः (३-१-९१) अप्=अप् प्रत्ययो भवति । सूत्रे दकारो मुखसुखार्थः ।

३-३-५८ ग्रह...गमः=ग्रह् प्रभृतिधातुभ्यः, अप् (३-३-५७) । निश्चिग्रहणं स्वरार्थम् । अचाऽपि रूपसिद्धेः । अन्येषु घञ् बाध्यते ।

वशि- अप् (३-३-५७) वशनम् =वशः । रणन्ति =शब्दं कुर्वन्ति, अस्मिन्निति रणः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-५९ उपसर्गेऽदः ॥६०

प्रघसः । उपसर्गे इत्युक्तेर्नेह-घासः ।

३-३-६० नौ ण च ॥

निघसः । न्यादः ।

३-३-६१ व्यधजपोरनुपसर्गे ॥६५

व्यधः । जपः । उपसर्गे तु घञ् । आव्याधः । उपजापः ।

३-३-६२ स्वनहसोर्वा ॥६५

स्वनः, स्वानः । हसः, हासः । उपसर्गे तु-प्रस्वानः । प्रहासः ।

३-३-६३ यमः समुपनिविषु च ॥

यमः, यामः । संयमः, संयाम इत्यादि ।

३-३-६४ नौ गद-नद-पठ-स्वनः ॥६५

निगदः, निगादः । निनदः, निनादः, । निपठः, निपाठः । निस्वनः, निस्वानः ।

३-३-६५ क्वणो वीणायां च ॥

निक्वणः, निक्वाणः । क्वणः, क्वाणः । कल्याणप्रक्वणा वीणा ।

३-३-६६ नित्यं पणः परिमाणे ॥

मूलकपणः । शाकपणः । संव्यवहाराय मूलकादीनां यः परिमितो मुष्टिर्बध्यते तस्येदमभिधानमिति-काशिका ।

३-३-६७ मदोऽनुपसर्गे ॥

विद्यामदः । धनमदः । उपसर्गे तु-प्रमादः । उन्मादः ।

३-३-६८ प्रमदसंमदौ हर्षे ॥

हर्षादन्यत्र तु-प्रमादः । संमादः ।

३-३-६९ समुदोरजः पशुषु ॥

समजः पशूनाम् । समुदाय इत्यर्थः ।

उदजः पशूनाम् । प्रेरणमित्यर्थः । पशुष्वित्युक्तेर्नेह-समाजो ब्राह्मणानाम् ।

उदाजः क्षत्रियाणाम् ।

३-३-५९ उपसर्गे =उपसर्गे सति, अदः=अद् धातोः, अप् (३-३-५७) । उदाहरणेऽप्, प्रत्युदाहरणे घञ् । उभयत्र २-४-३८ घञ...इत्यदो घस्लृँ ।

३-३-६० नौ =नि इत्युपसर्गे सति, अदः (३-३-५९) ण =णप्रत्यो भवति, अप् (३-३-५७) च । अपि प्राग्वद् घस्लृँ । णे ७-२-११६ अतः...इत्युपधावृद्धिः ।

३-३-६१ व्यध- अनुपसर्गे =उपसर्गाभावे, व्यधजपोः =व्यध् जप् धातुभ्याम्, अप् (३-३-५७) ।

३-३-६२ स्वन- अनुपसर्गे (३-३-६१) स्वनहसोः=स्वन् हस् धातुभ्याम्, वा, =विभाषया, अप् (३-३-५७) । पक्षे घञ् ।

३-३-६३ यम- अनुपसर्गे (३-३-६१) समुपनिविषु च=सम् उप नि वि इति चोपसर्गेषु सत्सु, यमः=यम्धातोः, वा (३-३-६२) अप् (३-३-५७) । पक्षे घञ् ।

३-३-६४ नौ =नि इत्युपसर्गे सति, गद...स्वनः=गदादिभ्यः, वा (३-३-६२) अप् (३-३-६३) । पक्षे घञ् ।

३-३-६५ क्वणो-नौ (३-३-६४) अनुपसर्गे (३-३-६१) च, क्वणः=क्वण् धातोः, वा (३-३-६२) अप् (३-३-५७) वीणायाम् =वीणाविषये । पक्षे घञ् । सोपसर्गार्थं वीणाग्रहणम् । अत्र न्यासः- यदि वीणाविषयेऽप्यनुपसर्गादेव स्याद् वीणाग्रहणमनर्थकं स्यात् सामान्येन विधानाद् वीणायामपि प्रत्ययः सिद्ध इति ।

३-३-६६ नित्यं-पणः =पण्धातोः, नित्यम्, अप् (३-३-५७) परिमाणे=परिमाणे गम्ये ।

३-३-६७ मदो- अनुपसर्गे =उपसर्गाभावे, मदः =मद् धातोः, अप् (३-३-५७) । ३-३-६१ व्यधजपोरनुपसर्गे, इत्यत्रैव मदिग्रहणे कर्तव्ये 'मदोऽनुपसर्गे, इति सूत्रप्रणयनमस्य विधेरनित्यत्वज्ञापनार्थम् । तेन माद इति सिद्धं भवतीति न्यासः ।

३-३-६८ प्रमदसंमदौ,- प्रमद् संमद्प्रकृतिकौ अबन्तौ निपात्येते, हर्षे =हर्षे वाच्ये ।

३-३-६९ समुदोः =सम् उद् इत्युपसर्गयोः सतोः, **पशुषु** =पशुविषयेऽर्थे वर्तमानात्, अजः =अज्धातोः, अप् (३-३-५७) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-७० अक्षेषु ग्लहः ॥

अक्षस्य ग्लहः । व्यात्युक्षीमभिसरणग्लहामदीव्यन् ।

३-३-७१ प्रजने सर्तेः ॥

गवामुपसरः । गर्भाधानाय

गोषु वृषाणां प्रथममुपसरणमित्यर्थः ।

३-३-७२ ह्वः संप्रसारणं च न्यभ्युपविषु ॥७५

निहव इत्यादि । न्यभ्युपविष्वित्युक्तेर्नेह-प्रह्वायः ।

३-३-७३ आङि युद्धे ॥

आहूयन्तेऽस्मिन्नित्याहवः । युद्धादन्यत्र आह्वायः ।

३-३-७४ निपानमाहावः ॥

आहावस्तु निपानं स्यादुपकूपजलाशये

इत्यमरः । निपानादन्यत्र आह्वायः ।

३-३-७५ भावेऽनुपसर्गस्य ॥७६

हवः । उपसर्गे तु-प्रह्वायः ।

३-३-७६ हनश्च वधः ॥८७

वधः । घातः ।

३-३-७७ मूर्तौ घनः ॥८३

अभ्रघनः । कथं घनं दधीति ?

धर्मशब्देन धर्मी भण्यते, इति काशिका ।

मतुँब्लोपादभेदोपचारः । यथा शुक्लः पट इति न्यासः । कथं सैन्धवघनमानय इति ? धर्मशब्देन धर्मी लक्ष्यते, इति भट्टोजिदीक्षितः ।

३-३-७८ अन्तर्घनो देशे ।

अन्तर्घनः । संज्ञीभूतो वाहीकेषु देशविशेष उच्यते । अन्ये णकारं पठन्ति-अन्तर्घणो देश इति । तदपि ग्राह्यमेवेति-काशिका । देशादन्यत्र अन्तर्घातः ।

३-३-७९ अगारैकदेशे प्रघणः प्रघाणश्च ॥

प्रविशद्भिर्जनैः पादाभ्यां प्रकर्षेण हन्यते इति कर्मण्यप् ।

३-३-७० अक्षेषु =देवनविषयेऽर्थे, ग्लहः=ग्लह इति निपात्यते । ग्रह्धातो रेफस्य लकारोऽत्र निपातितः । अप् तु ३-३-५८ ग्रह...इत्यनेनैव सिद्धः । अत्र सूत्रे अक्षशब्देन देवनं लक्ष्यते । तत्र यत् पणरूपेण ग्राह्यं तद् ग्लहशब्देनोच्यते । नेपाली भाषायाम् 'बाजी' इत्युच्यते ।

३-३-७१ प्रजने =प्रथमगर्भग्रहणविषयेऽर्थे वर्तमानात्, सर्तेः =सृधातोः, अप् (३-३-५७) ।

३-३-७२ ह्वःसं-ह्व इति पञ्चम्यन्तं षष्ठयन्तं च । न्यभ्युपविषु =नि अभि उप वि इत्युपसर्गेषु सत्सु, ह्वः =ह्वा धातोः, अप् (३-३-५७) सम्प्रसारणं च =ह्वाधातोःस्थाने सम्प्रसारणं च । **प्रह्वायः** घञ् । ७-३-३३ आतो...इति युँक् ।

३-३-७३ आङि =आङ् इत्युपसर्गे सति, ह्वः+सम्प्रसारणम् (३-३-७२) अप् (३-३-५७) च, युद्धे =युद्धे वाच्ये ।

३-३-७४ निपा-आहावः=आहाव इति निपात्यते, निपानम् =कूपंसमीपजलाशयो वाच्यश्चेत् । आङ्पूर्वाद् ह्वयतेरप् सम्प्रसारणं वृद्धिश्च निपात्यन्ते । पशुपक्ष्यादीनां कृते कूपसमीपे निर्मितो जलाशय आहाव इत्युच्यते ।

३-३-७५ भावे-अनुपसर्गस्य =उपसर्गरहितस्य, ह्वः+सम्प्रसारणम् (३-३-७२) अप् (३-३-५७) च, भावे । ३-३-१८ भावे इत्यनुवर्तमाने पुनर्भावग्रहणम् ३-३-१९ अक...इत्यस्याऽसम्बन्धार्थम् ।

३-३-७६ हनः-अनुपसर्गाद् (३-३-७५) हनः =हन् धातोः, भावे (३-३-७५) अप् (३-३-५७) वधः =तत्सन्नियोगेन प्रकृतेश्च वध इत्यन्तोदात्तादेशः, घञ् (३-३-१६) च । चकारः प्रत्ययेन सम्बध्यते 'अप् च' इति तेन घञपि भवति ।

३-३-७७ मूर्तौ-मूर्ति =काठिन्यम्, तत्र वाच्ये, हनः (३-३-७६) अप् (३-३-५७) घनः =प्रकृतेश्च घन इत्ययमादेशो भवति ।

३-३-७८ अन्तर्घनः =अन्तःपूर्वाद् हन्तेरप् घनादेशश्च निपात्येते, देशे=देशे वाच्ये ।

३-३-७९ अगा-प्रघण प्रघाणश्च=प्रपूर्वाद् हन्तेरप् प्रकृतेर्घनादेशः पक्षे वृद्धिश्च निपात्यन्ते, अगारैकदेशे बाह्ये प्रकोष्ठे वाच्ये । णत्वं तु प्र.८-४-२१ हन्तेः इत्येव सिद्धम् । अत्र पदमञ्जरी- द्वारदेशे द्वौ प्रकोष्ठावलिन्दौ-आभ्यन्तरो बाह्यश्च । तत्र बाह्ये प्रकोष्ठे निपातनम्, नागारैकदेशमात्रे । एतच्च निपातनाल्लभ्यते इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-८० उद्घनोऽत्याधानम् ॥

यस्मिन् काष्ठे स्थापयित्वाऽन्यानि काष्ठानि तक्ष्यन्ते तद् उद्घनः। अत्याधानादन्यत्र उद्घातः।

३-३-८१ अपघनोऽङ्गम् ॥

अपघनः। पाणिः पादो वा, न तु सर्व एकदेश इत्याहुः। अपघातोऽन्यः।

३-३-८२ करणेऽयोविद्रुषु ॥८४

अयो हन्यतेऽनेनेति-अयोघनः। विघनः। द्रुघनः। द्रुघण इति केचित्। संज्ञैषा कुठारस्य।

३-३-८३ स्तम्बे क च ॥

स्तम्बघ्नः। स्तम्बघनः।

३-३-८४ परौ घः ॥

परिहन्यतेऽनेनेति-परिघः, पलिघः।

३-३-८५ उपघ्न आश्रये ॥

आश्रयशब्देन सामीप्यं लक्ष्यते। पर्वतेनोपहन्यते =सामीप्येन गम्यते, इति कर्मण्यप्। पर्वतोपघ्नः। ग्रामोपघ्नः। आश्रयादन्यत्र पर्वतोपघातः।

३-३-८६ सङ्घोद्घौ गणप्रशंसयोः ॥

सङ्घः पशूनाम्। उद्घो मनुष्याणाम्।

३-३-८७ निघो निमितम् ॥

निघा वृक्षाः।

३-३-८८ ड्वितः क्त्रिः ॥

कृत्रिमम्।

३-३-८० उद्घनः =उत्पूर्वाद् हन्तेरधिकरणेऽप् प्रकृतेश्च घनादेशो निपात्यते, अत्याधानम्=अत्याधानं वाच्यं चेत्। अत्याधीयते =उपरि स्थाप्यते यत्र तद् अत्याधानम् =अधिकरणे ल्युँट्। **उद्घनः** अचानो इति नेपालीभाषायाम्।

३-३-८१ अपघनः =अपपूर्वाद् हन्तेरप् प्रकृतेश्च घनादेशः, अङ्गम्=अङ्गं वाच्यं चेत्।

३-३-८२ कर- अयोविद्रुषु =अयस् वि द्रु इत्येतेषूपपदेषु, करणे =करणे कारके, हनः (३-३-७६) अप् (३-३-५७) घनः (३-३-७७)। **द्रुघण इति केचित्** ८-४-३ पूर्व... इति णत्वम्।

३-३-८३ स्तम्बे =स्तम्बशब्दे उपपदे, हनः (३-३-७६) करणे (३-३-८२) क =कप्रत्ययो भवति, अप् (३-३-५७) च, तत्सन्नियोगेन घनः (३-३-७७) कपक्षे ६-४-९८ गम...इत्युपधालोपः। ७-३-५४ हो ह...इति हकारस्य कुत्वम्।

३-३-८४ परौ =परि इत्युपसर्गे सति, हनः (३-३-७६) करणे (३-३-८२) अप् (३-३-५७) घः=प्रकृतेश्च घादेशो भवति। उदाहरणयोः ८-२-२२ परे...इति पक्षे लकारः।

३-३-८५ उपघ्नः =उपपूर्वाद् हन्तेरप् उपधालोपश्च निपात्यते, आश्रये=सामीप्ये गम्ये। कुत्वं तु ७-३-५४ हो ह...इत्येव सिद्धम्।

३-३-८६ सङ्घोद्घौ =सम् उद् इत्येतयोरुपसर्गयोःसतोः हन् धातोरप् टिलोपो घत्वं च निपात्यन्ते, गणप्रशंसयोः=गणे वाच्ये प्रशंसायां च गम्यमानायाम्।

३-३-८७ निघः =निपूर्वस्य हन्तेः पूर्ववन्निपातनम्, निमितम्=समन्तान्मितं वाच्यं चेत्। समन्तात् आरोहतःपरिणाहतश्च मितम् =समारोहपरिणाहम्।

३-३-८८ ड्वितः-३-३-८९ ट्वितो...सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा- ३-१-९१ धातोः ॥ ३-३-१८ भावे ॥ ३-३-८८ ड्वितः (क) (ख) क्त्रिः ॥इति। ड्वितः =डुकारेत्संज्ञकाद् (क) =धातोः, (ख) =भावे, क्त्रिः =क्त्रिप्रत्ययो भवति। इत्यर्थमुपदिश्य धातुपाठे डुकृञ् करणे, धातुं दर्शयित्वा तत्र डुकारस्य १-३-५ आदि...सूत्रेण ञकारस्य च १-३-३ हल...सूत्रेणेत्संज्ञां १-३-९ तस्य...सूत्रेण तयोर्लोपं च साधयित्वा 'कृ' इत्यवशेषयेत्। अथ कृत्या निर्वृत्तमिति विग्रहे कृ धातोः प्रकृतसूत्रेण क्त्रिप्रत्ययेऽनुबन्धलोपे च 'कृत्रि' इति श्यामपाटचां लिखित्वा ४-४-२० क्त्रेर्म...सूत्रमुपदिशेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-८९ ट्वितोऽथुच् ॥

वेपथुः ।

३-३-९० यज-याच-यत-विच्छ-प्रच्छ-रक्षो नङ् ॥

यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । रक्ष्णः ।

३-३-९१ स्वपो नन् ॥

स्वप्नः ।

३-३-९२ उपसर्गे घोः किः ॥९३

प्रदिः । उपधिः ।

३-३-९३ कर्मण्यधिकरणे च ॥

जलं धीयतेऽस्मिन्निति-जलधिः ।

३-३-९४ स्त्रियां क्तिन् ॥ ११२, ९७

कृतिः । चितिः । स्तुतिः ।

(श्रुयजीषिस्तुभ्यः करणे)

श्रूयतेऽनया श्रुतिः । यजेरिषेश्च

इष्टिः । स्तुतिः ।

(ग्लाम्लाज्याहाभ्यो निः)

ग्लानिः । म्लानिः । ज्यानिः । हानिः ।

८-२-४४ ल्वादि...सूत्रस्थेन ॠल्ल्वा...इति वार्तिकेन निष्ठावद्भावः । कीर्णिः । लूनिः । पूनिः ।

(संम्पदादिभ्यः क्विँप्)

सम्पत् । विपत् । आपत् । प्रतिपत् ।

(क्तिन्नपीष्यते)

सम्पत्तिः । विपत्तिः । आपत्तिः ।

३-३-९५ स्थागापापचो भावे ॥

प्रस्थितिः । संगीतिः । संपीतिः ।

पक्तिः । अवस्था, संस्था इत्यादि तु व्यवस्थायामिति ज्ञापकात् ।

३-३-८९ ट्वितो-३-३-१८ भावे-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

३-१-९१ धातोः ॥ ३-३-१८ भावे ॥ ३-३-८९ ट्वितः (क) (ख) अथुच् ॥इति । ट्वितः =टुकारेत्संज्ञकाद्, (क) =धातोः, (ख) =भावे, अथुच् =अथुच् प्रत्ययो भवति । इत्यर्थमुपदिश्य धातुपाठे टुवेपृँ कम्पने धातुं दर्शयित्वा तत्र टु इत्यस्य १-३-५ आदि...सूत्रेण ॠँकारस्य च १-३-२ उप...सूत्रेणेत्संज्ञां १-३-९ तस्य...सूत्रेण तयोर्लोपं च साधयित्वा वेप् इत्यवशेषयेत् । अथ वेपनमिति विग्रहे वेप् धातोः प्रकृतसूत्रेण अथुच् प्रत्ययेऽनुबन्धलोपे च कृदन्तत्वात् प्रातिपदिकत्वेन स्वादिकार्यमित्युद्बोधयेत् । अथ ३-३-८८ ड्वितः...सूत्रमुपदिशेत् ।

३-३-९० यज- भावे (३-३-१८) अकर्तरि (३-३-१९) अनुवर्तेते एव । यज ...रक्षः= यच् (ज्)... प्रभृतिभ्यः,नङ्= नङ् प्रत्ययो भवति । **याच्ञा** अयं स्त्रियामेव प्रयुज्यते । **विश्नः** ६-४-१९ च्छ्वोः...इति च्छोः शः । **प्रश्नः** प्रश्ने (३-२-११७) इति निर्देशात् ६-१-१६ ग्रहि...इति न सम्प्रसारणम् ।

३-३-९२ उपसर्गे=उपसर्गे सति, घोः =घुसंज्ञकाद् धातोः, किः =किप्रत्ययो भवति । उदाहरणयोः १-१-१९ दाधा...इति घुसंज्ञा । ६-४-६४ आतो...इत्याकारलोपः ।

३-३-९३ कर्मणि=कर्मणि उपपदे, घोः (३-३-९२) अधिकरणे=अधिकरणे कारके, किः (३-३-९२) । अधिकरणग्रहणं भावाद्यर्थाऽसम्बन्धार्थम् । चकारः प्रत्ययानुकर्षणार्थः ।

३-३-९४ स्त्रियाम्=स्त्रीत्वविशिष्टे, भावे (३-३-१८) अकर्तरि च कारके (३-३-१९) धातोः (३-१-९१) क्तिन्=क्तिन् प्रत्ययो भवति । **श्रुयजी-इष्टिः** यजेः ६-१-१५ वचि...इति सम्प्रसारणम् । ८-२-३६ व्रश्च...इति षत्वम् । **पूनिः** ८-२-२४ **पूञो**...इति वार्तिकेन तकारस्य नकारः । ननु ल्वादिभ्य इत्युक्तौ कथं पूञो ग्रहणम् ? लुव आदिः =ल्वादिः =पूः । लूः आदिर्येषां ते ल्वादयः । ल्वादिश्च ल्वादयश्चेत्येकशेषस्तत्र द्रष्टव्यः ।

३-३-९५ स्था गापापचः=स्था गा पा पच् धातुभ्यः, स्त्रियाम् (३-३-९४) भावे, क्तिन् (३-३-९४) । ३-३-१०६ आत...इत्यस्य ३-३-१०४ षिद्भि...इत्यस्य चाऽपवादः। उदाहरणेषु, आद्ये -७-४-४० द्यति...इतीत्वम् । मध्ययोः - ६-४-६६ घुमा...इतीत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-९६ मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ॥ प्र.१००

वृष्टिः । इष्टिः । इत्यादि ।

३-३-९७ ऊति-यूति-जूति-साति-हेति-कीर्त्तयश्च ॥

३-३-९८ व्रजयजोर्भावे क्यप् ॥ प्र.१००

व्रज्या । इज्या ।

३-३-९९ संज्ञायां समज-निषद-निपत-मन-विद-षुञ्-शीङ्-भृञिणः ॥

समजन्त्यस्यामिति-समज्या=सभा ।

निषीदन्त्यस्यामिति-निषद्या=आपणः ।

निपतन्त्यस्यामिति-निपत्या=पिच्छिला भूमिः ।

मन्यन्तेऽनयेति-मन्या=गलपार्श्वशिरा ।

विद्यतेऽनयेति-विद्या । सूयतेऽस्यामिति-सुत्या=अभिषवदिवसः । शय्यतेऽस्यामिति-शय्या ।

भरणमिति-भृत्या=जीविका । इयतेऽनयेति-इत्या=शिविका ।

३-३-१०० कृञः श च

योगविभागोऽत्र कर्तव्यः ।

'कृञः' इति ततः 'श च' इति ।

प्र.३-३-१०० कृञः॥

कृत्या ।

द्वि.३-३-१०० श च ॥

क्रिया । कृतिः ।

३-३-१०१ इच्छा ॥

(परिचर्या-परिसर्या-मृगयाऽटाट्याना-मुपसंख्यानम्)

(जागर्तेरकारो वा)

जागरा । जागर्या ।

३-३-९६ मन्त्रे- वृषे...वीराः=वृषादिभ्यः, स्त्रियाम् (३-३-९४) भावे (३-३-९५) उदात्तः, क्तिन् (३-३-९४) । उदात्तार्थं वचनम् । इषेस्तु ३-३-१०१ इच्छा इति शप्रत्ययेन क्तिनः समावेशार्थं च ।

३-३-९७ ऊति...र्तयः =उदात्तक्तिन्नन्ता निपात्यन्ते । ऊतिः =अवतेः क्तिनि ६-४-२० ज्वर...इत्यूठ् । स्वरार्थं वचनम् । यूतिः, जूतिः, अत्र दीर्घत्वं च । सातिः, स्यतेः- ७-४-४० द्यति...इति प्राप्तेत्वाऽभावो निपात्यते । सन् धातोर्वा ६-४-४२ जन...इत्यात्वम् । स्वरार्थं वचनम् । हन्तेर्हिनोतेर्वा हेतिः । हन्तेर्नकारस्येत्वं हिनोतेर्गुणो निपात्यते । कीर्तिः-कृतँ धातुश्चुरादिः (कीर्ति) ततः ३-३-१०७ ण्यास...इति युचं बाधित्वा क्तिन् ।

३-३-९८ व्रजयजो:=व्रजयजभ्याम्, स्त्रियाम् (३-३-९४) भावे, उदात्तः (३-३-९६) क्यप्=क्यप् प्रत्ययो भवति । पित्करणमुत्तरत्र तुँगर्थम् ।

३-३-९९ संज्ञा- सम....ञिणः=समजादिभ्यः, स्त्रियाम् (३-३-९४) भावे (३-३-१८) अकर्तरि च कारके (३-३-१९) उदात्तः (३-३-९६) क्यप् (३-३-९८) संज्ञायाम्=संज्ञायां गम्यमानायाम् । ३-३-१९ अकर्तरि...इत्यत एव संज्ञायामित्यनुवर्तमाने पुनः संज्ञाग्रहणं भावेऽपि संज्ञायामेव विधानार्थम् । अनुवर्तमानं संज्ञायामिति तु ३-३-१९ अकर्तरि....इत्यनेन सम्बद्धम् ।

प्र.३-३-१०० कृञः =कृञ् धातोः, क्यप् (३-३-९८) स्त्रियाम् (३-३-९४) । **द्वि ३-३-१०० श च**-कृञः (प्र.३-३-१००) श=शप्रत्ययो भवति, क्तिन् (३-३-९४) च, स्त्रियाम् (३-३-९४) । **क्रिया** भावे शप्रत्यये ३-१-६७ सार्व...इति यक् ७-४-२८ रिङ्श...इति रिङ् । अकर्तरि (कर्मभिन्ने) कारके तु यकोऽप्राप्तौ प्राग्वद् रिङ् । ततः ६-४-७७ अचि...इतीयँङ् इति विवेकः ।

३-३-१०१ इच्छा-इषेः शप्रत्ययो यगभावश्च निपात्यते । इषेर्भावे शप्रत्ययो भवति, अभिधानशक्तिस्वाभाव्यात्, न कारके । इति न्यासः । ७-३-७७ इष...इतिच्छः । **परि-परिसर्या** अत्र गुणोऽपि निपात्यते । **मृगया** चुरादावदन्तो मृग धातुः । अत्राऽल्लोपाऽभावश्च । **अटाट्या** अत्र यकि ट्यशब्दस्य द्वित्वं पूर्वभागे यकारनिवृत्तिर्दीर्घश्च । यङन्तादप्रत्यये तु ६-४-४८ अतो...इत्यकारलोपे, ६-४-४९ यस्य...इति यलोपे अटाटा इति रूपं सिध्यति । **जाग**-वा शब्दात् पक्षे शः । तदा यकि ७-३-८५ जाग्रो...इति गुणः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC0. In Public Domain. Digitization by eGangotri

३-३-१०२ अ प्रत्ययात् ॥१०३

चिकीर्षा । पुत्रकाम्या ।

३-३-१०३ गुरोश्च हलः ॥

ईहा । चेष्टा ।

(निष्ठायां सेट इति वक्तव्यम्)

स्रस्तिः । ध्वस्तिः ।

३-३-१०४ षिद्भिदादिभ्योऽङ् ॥१०६

त्रपा । भिदा विदारणे । भित्तिरन्या ।

छिदा द्वैधीकरणे । छित्तिरन्या । आरा शस्त्र्याम् ।

धारा प्रपाते ।

(कृपेः सम्प्रसारणं च)

कृपा ।

३-३-१०५ चिन्ति-पूजि-कथि-कुम्बि-चर्चश्च ॥

चिन्ता । पूजा । कथा । कुम्बा । चर्चा । चकाराद् युँजपि भवति । चिन्तना, इति काशिका ।

३-३-१०६ आतश्चोपसर्गे ॥

प्रदा । उपधा ।

३-३-१०७ ण्यासश्रन्थो युँच् ॥

कारणा । आसना । श्रन्थना ।

(घट्टि-वन्दि-विदिभ्य उपसंख्यानम्)

घट्टना । वन्दना । वेदना ।

(इषेरनिच्छार्थस्य युँज्वक्तव्यः)

अन्वेषणा ।

(परेर्वा)

पर्येषणा, परीष्टिः ।

३-३-१०८ रोगाख्यायां ण्वुँल् बहुलम् ॥ ११०

प्रच्छर्दिका । प्रवाहिका ।

बहुलग्रहणात् क्वचिन्न । शिरोर्त्तिः ।

(धात्वर्थनिर्देशे ण्वुँल् वक्तव्यः)

आसिका । शायिका ।

(इक्श्तिपौ धातुनिर्देशे)

३-३-१०२ अ प्र- प्रत्ययात्=प्रत्ययान्तात्, धातोः (३-१-९१) अ=अप्रत्ययो भवति, स्त्रियाम् (३-३-९४) ।

३-३-१०३ गुरो- अत्र गुरुशब्देन गुरुमान् गृह्यते । हलन्तस्य कस्यचिदपि धातोर्गुरुसंज्ञाया अविधानात् । हलः=हलन्तात्, गुरोः=गुरुमतः, धातोः (३-१-९१) अ (३-३-१०२) स्त्रियाम् (३-३-९४) ।

३-३-१०४ षिद्भि- ४-४-२० क्त्रेर्मम्...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र ३-३-९४ स्त्रियां क्तिन्-सूत्रस्यार्थमुदाहरणानि च शिक्षकश्छात्रान् बोधयित्वा तद्बाधकमिदं सूत्रमिति च बोधयन् प्रकृतसूत्रार्थमुपदिशेत् । तथाहि- षिद्भिदादिभ्यः=षकारेत्संज्ञकेभ्यो भिदादिभ्यश्च धातुभ्यः, स्त्रियाम् (३-३-९४) = स्त्रीत्वविशिष्टे, भावे (३-३-१८) अकर्तरि च कारके (३-३-१९) च, अङ्=अङ् प्रत्ययो भवति । इत्यर्थमुपदिश्य त्रपूँष् लज्जायाम् इति धातुपाठं दर्शयित्वा तत्राऽनुबन्धं लोपयित्वा त्रप् इत्यवशेष्य, त्रपणमिति विग्रहे त्रप् धातोः प्रकृतसूत्रेणाऽङ्प्रत्ययमनुबन्धलोपं च साधयित्वा स्त्रीत्वाट्टाबित्युद्बोधयेत् । अथाऽधोनिर्दिष्टरूपेण शिक्षकश्छात्रानुपदिशेत्-वत्साः? नेपाली भाषायां यत्र 'ई' अथवा 'एर' इत्युच्यते, यथा श्याम पढी अथवा पढेर घर आउँछ इत्यादि हिन्दी भाषायां च यत्र 'कर' 'के' 'करके' इच्युच्यते, यथा श्याम पढकर अथवा पढ के अथवा पढ करके घर आता है इत्यादि । तत्र सँस्कृतभाषायां धातुभ्यः क्त्वा प्रत्ययो भवति । वत्साः? पढेर आउँछ पढकर आता है इत्युक्तौ प्रथमं पठनक्रिया पश्चादागमनक्रिया प्रतीयते । इति बोधयित्वा ३-४-२१ समानकर्तृकयोः...सूत्रमुपदिशेत् ।

३-३-१०५ चिन्ति...चर्चः=चिन्तिप्रभृतिभ्यः, अङ् (३-३-१०४) स्त्रियाम् (३-३-९४) । चिन्त्यादयः सर्वे चुरादिणिजन्ताः । ३-३-१०७ ण्यास...इति युँचो बाधः ।

३-३-१०६ आत- उपसर्गे=उपसर्गे सति, आतः=आकारान्ताद् धातोः (३-१-९१) अङ् (३-३-१०४) स्त्रियाम् (३-३-९४) ।

३-३-१०७ ण्यासश्रन्थः=ण्यन्त आस् श्रन्थ् इत्येतेभ्यो धातुभ्यः, स्त्रियाम् (३-३-९४) युँच्=युँच् प्रत्ययो भवति ।

३-३-१०८ रोगा- धातोः (३-१-९१) स्त्रियाम् (३-३-९४) बहुलम्=बाहुल्येन, ण्वुँल्=ण्वुँल् प्रत्ययो भवति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पचिः । पचतिः ।
(वर्णात् कारः)
अकारः । इकारः ।
(रादिफः)
रेफः ।
(मत्वर्थाच्छः)
स्वार्थे । मत्वर्थीयः ।
मतुँबर्थशब्दादपि भवति बहुलवचनात् । मतुँबर्थीयः । शैषिकान्मतुँबर्थीयादिति ।
(इणजादिभ्यः)
आजिः । आतिः ।
(इञ् वपादिभ्यः)
वापिः । वासिः । स्वरे भेदः ।
(इक् कृषादिभ्यः)
कृषिः । किरिः।

३-३-१०९ संज्ञायाम् ॥

उद्दालपुष्पभञ्जिका । शालभञ्जिका ।

३-३-११० विभाषाऽऽख्यानपरिप्रश्नयोरिञ्च ।१११।

कां कारिं कारिकां कृत्यां क्रियां कृतिं वाऽकार्षीः ? सर्वां कारिं कारिकां कृत्यां क्रियां कृतिं वाऽकार्षम् । एवं गणिं गणिकां गणनामित्यादि ।

३-३-१११ पर्यायार्हर्णोत्पत्तिषु ण्वुँच् ॥

भवतः शायिका । इक्षुभक्षिकामर्हति । इक्षुभक्षिकां मे धारयति । इक्षुभक्षिका मे उदपादि । ओदनभोजिका । पयः पायिकेत्यादि । विभाषेत्येव । चिकीर्षोत्पद्यते ।

३-३-११२ आक्रोशे नञ्यनिः ॥

अजीवनिस्ते शठ भूयात् ।

३-३-११३ कृत्यल्युँटो बहुलम् ॥

स्नान्त्यनेन स्नानीयं चूर्णम् ।
दीयतेऽस्मै=दानीयो विप्रः । राज्ञा भुज्यन्ते=राजभोजनाः शालयः ।
प्रपतन्त्यस्मात्=प्रपतनम् ।
'कृत्यल्युँटः' इत्येतावतैव विधानारम्भसामर्थ्येनाऽन्यत्रापि सिद्धौ बहुलग्रहणं कृन्मात्रस्य व्यभिचारार्थम् । पादाभ्यां ह्रियते पादहारकः ।

रोगाख्यायाम्=रोगसंज्ञायाम् । उदाहरणयोः ७-३-४४ प्रत्य...इतीत्वम् । **इक्श्ति-** ७-४-७३ भवतेरः, ६-१-५० विभाषा लीयतेः, इत्यादिनिर्देशाच्छबादयो भवन्ति । **मत्व- मत्वर्थीयः** बाहुलकादभत्वेऽपि ६-४-१४८ यस्ये...इत्यकारलोपः ।

इण- इदमग्रिमवार्तिके च धात्वर्थनिर्देशे प्राप्तस्य ण्वुँलो बाधकानि । **इक् कृ- किरिः** ७-१-१०० ॠत...इतीत् ।

३-३-१०९ संज्ञा-धातोः (३-१-९१) स्त्रियाम् (३-३-९४) ण्वुँल् (३-३-१०८) संज्ञायाम्=संज्ञायां गम्यमानायाम् । उदाहरणयोः २-२-२७ नित्यं...इति समासः ।

३-३-११० विभा- धातोः (३-१-९१) आख्यानपरिप्रश्नयोः=आख्याने परिप्रश्ने चाऽर्थे, विभाषा=वा, इञ्=इञ् प्रत्ययो भवति, ण्वुँल् (३-३-१०८) च, स्त्रियाम् (३-३-९४) । विभषया मुक्ते यथाप्राप्तं प्रत्ययाः ।

३-३-१११ पर्या- धातोः (३-१-९१) पर्योः... तिषु=पर्याय अर्ह ॠण उत्पत्ति इत्येतेष्वर्थेषु द्योत्येषु, विभाषा (३-३-११०) ण्वुँच्=ण्वुँच् प्रत्ययो भवति, स्त्रियाम् (३-३-९४) ।

३-३-११२ आक्रो- नञि=नञि उपपदे, धातोः (३-१-९१) अनिः, =अनि प्रत्ययो भवति, स्त्रियाम् (३-३-९४) आक्रोशे =शापे गम्यमाने ।

३-३-११३ कृत्य ल्युँटः=कृत्यप्रत्यया ल्युँट् प्रत्ययश्च, बहुलम्=बाहुल्येन भवन्ति । उदाहरणेषु क्रमशः करणे अनीयर् । सम्प्रदाने अनीयर् । कर्मणि ल्युँट् । अपादाने ल्युँट् । **पादहारकः** कर्मणि ण्वुँल् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-११४ नपुंसके भावे क्तः ॥११६

हसितम् ।

३-३-११५ ल्युँट् च ॥११७

हसनम् ।

३-३-११६ कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम् ॥

पयः पानं सुखम् । कर्तुरित्युक्तेर्नेह-गुरोः स्नापनं सुखम् ।

शरीरसुखमित्युक्तेर्नेह-पुत्रस्य परिष्वञ्जनं सुखम् । अत्र मानसी प्रीतिः ।

शरीरस्य तु व्यथनमेव, पुत्रेण बलवत्परिष्वज्यमानत्वात् ।

३-३-११७ करणाधिकरणयोश्च ॥१२५

इध्मव्रश्चनः कुठारः । गोदोहनी स्थाली ।

३-३-११८ पुंसि संज्ञायां घः प्रायेण ॥१२५, ११९

दन्तच्छदः । आकरः । पुंसीत्युक्तेर्नेह-प्रसाधनम् । संज्ञायामित्युक्तेर्नेह-प्रहरणो दण्डः ।

३-३-११४ नपुंसके=क्लीबत्वविशिष्टे, भावे, धातोः (३-१-९१) क्तः=क्तप्रत्ययो भवति ।

३-३-११५ ल्युँट् च- ३-१-१२४ ऋहलोर्ण्यत्-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

३-१-९१ धातोः ॥ ३-३-११४ नपुंसके भावे क्तः ॥ ३-३-११५ (ख) (ग) (क) ल्युँट् च ॥इति । (ख)=नपुंसके =नपुंसकत्वविशिष्टे, (ग) =भावे, (क)=धातोः, ल्युँट्= ल्युँट् प्रत्ययो भवति । इत्यर्थमुपदिश्य हसनमिति विग्रहे लक्षणसमन्वयमनुबन्धफालनञ्च साधयित्वा युँवोँ... सूत्रमुद्बोधयेत् । अथाऽधोनिर्दिष्टरूपेण श्यामपाटचां तालिकां कृत्वा बोधयेत् ।

नेपाली	हिन्दी	सँस्कृतम्
हाँस्नु	हसना	हसनम् ।
खेल्नु	खेलना	खेलनम् ।
लेख्नु	लिखना	लेखनम् ।
पढ्नु	पढना	पठनम् ।
बालक हाँस्नु	बालक हँसना	बालकानां हसनम्
इतिहास पढ्नु आवश्यक छ	इतिहास पढना आवश्यक है	इतिहासस्य पठनमावश्यकम् ।
इतिहास लेख्नु आवश्यक हुन्छ	इतिहास लिखना आवश्यक है	इतिहासस्य लेखनमावश्यकम् ।

अथ शिक्षकोऽग्रे पुनरुपदिशेत् । वत्साः ? अस्मिन्नेवाऽर्थे घञ् प्रत्ययोऽपि भवति । परन्तु घञन्ताः शब्दाः पुलिङ्गे भवन्ति पूर्ववदन्यत् सर्वम् । तथाहि, इतिवदन् ३-३-१८ भावे सूत्रमुपदिशेत् ।

३-३-११६ कर्म- सूत्रे संस्पर्शशब्दो भावघञन्तः । अतः २-३-६६ उभ... इति नियमाद् येनेत्यत्र कर्तरि तृतीया । कर्तुरित्यत्र च कर्मणि षष्ठी । अतः सूत्रार्थः-येन कर्तुः संस्पर्शात्, शरीरसुखम्=कर्तुः शरीरसुखमुत्पद्यते, कर्मणि=तद्वाचिनि कर्मबोधकशब्दे उपपदे, धातोः (३-१-९१) नपुंसके+भावे (३-३-११४) ल्युँट् (३-३-११५) ल्युँट् च इत्येव सिद्धे पुनर्विधानम् २-२-१९ उप... इति नित्यसमासार्थम् । **पयःपानं सुखम्** अत्र पदमञ्जरी-तत्र पानेन सुखं न स्पर्शेन, इदं तूदाहर्तुमुचितम्-चन्दनानुलेपनं सुखमिति ? नैष दोषः । यत्र संस्पर्शनमन्तरेण न सुखमुत्पद्यते तद्विषयोपलक्षणं संस्पर्शग्रहणम् । तत्र स्पर्शनादेव सुखं भवतु तत्पूर्वकात् पानादेर्वा सर्वत्र भविष्यतीति ।

३-३-११७ कर- धातोः (३-१-९१) ल्युँट् (३-३-११५) करणाधिकरणयोः=करणेऽधिकरणे चाऽर्थे ।

३-३-११८ पुंसि- धातोः (३-१-९१) करणाधिकरणयोः (३-३-११७) संज्ञायाम्=संज्ञायां गम्यमानायाम् प्रायेण=प्रायः, घः=घप्रत्ययो भवति, पुंसि=पुंलिङ्गे । **दन्तच्छदः** । दन्ताश्छाद्यन्तेऽनेन । ६-४-९६ छादे... इत्युपधाह्रस्वः । **आकरः** आकुर्वन्त्यस्मिन् स आकरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-११९ गोचर-संचर-वह-व्रज-व्यजापण-निगमाश्च ॥

गोचरः । संचरः । वहः । व्रजः । व्यजः । आपणः । निगमः ।

चकारोऽनुक्तसमुच्चयार्थः । कषः । निकषः ।

३-३-१२० अवे तॄस्त्रोर्घञ् ॥१२५

अवतारः । अवस्तारः ।

३-३-१२१ हलश्च ॥

रमन्तेऽस्मिन्-रामः । अपमृज्यतेऽनेनेति-अपामार्गः ।

३-३-१२२ अध्याय-न्यायोद्याव-संहाराश्च ॥

(अवहाराधारावायानामुपसंख्यानम्)

३-३-१२३ उदङ्कोऽनुदके ॥

तैलोदङ्कः चर्ममयं भाण्डम् । उदके तु उदकोदञ्चनः ।

३-३-१२४ जालमानायः ॥

आनायो मत्स्यानाम् ।

३-३-१२५ खनो घ च ॥

आखनः । आखानः ।

(खनेर्डडरेकेकवका वाच्याः)

आखः । आखरः । आखनिकः । आखनिकवकः ।

३-३-१२६ ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ॥१३०,१२७

इषत्करो भवता कटः । दुष्करः । सुकरः ।

३-३-१२७ कर्तृकर्मणोश्च भूकृञोः ॥

ईषदाढ्यम्भवं भवता । दुराढ्यम्भवम् ।

ईषदाढ्यङ्करः ।

स्वाढ्यङ्करो देवदत्तो भवता ।

(कर्तृकर्मणोश्च्व्यर्थयोरिति वक्तव्यम्)

नेह-आढ्येन सुभूयते ।

३-३-११९ गोच...गमाः=गोचरप्रभृतयः, पूर्वस्मिन्नर्थे घप्रत्ययान्ता निपात्यन्ते । ३-३-१२१ हल...इत्यस्यापवादः ।

३-३-१२० अवे =अव इत्युपसर्गे सति, तॄस्त्रोः=तॄस्तॄधातुभ्याम्, घञ्=घञ् प्रत्ययो भवति, करणाधिकरणयोः (३-३-११७) ।

३-३-१२१ हलः=हलन्ताद्, धातोः (३-१-९१) करणाधिकरणयोः (३-३-११७) संज्ञायाम्+पुंसि (३-३-११८) घञ् (३-३-१२०) । घस्याऽपवादः । **अपामार्गः** ७-२-११४ मृजे...इति वृद्धिः ७-३-५२ चजोः... इति कुत्वम् । ६-३-१२२ उप...इति दीर्घः ।

३-३-१२२ अध्या...हाराः=अध्यायप्रभृतयो घञन्ता निपात्यन्ते । अधीयतेऽस्मिन्, नी (नि+ई) यतेऽनेन, उद्युवन्त्यस्मिन्, संह्रियन्तेऽनेनेति विग्रहः ।

अव-अवह्रियतेऽस्मिन्, आध्रियतेऽस्मिन्, आवयन्त्यस्मिन्निति विग्रहः । अन्त्ये आङ्पूर्वाद्वेञो घञ् ७-३-३३ आतो...इति युँक् ।

३-३-१२३ उदङ्क इति- उत्पूर्वादञ्चतेर्घञ्, अनुदके =उदकाऽविषये । उदच्यते =उदध्रियतेऽस्मिन्निति उदङ्कः ।

३-३-१२४ जाल- आनायः= आनाय इति निपात्यते =आङ्पूर्वान्नयतेः करणे घञ्, जालम्=जालं वाच्यं चेत् । आनीयन्ते मत्स्यादयोऽनेनेति विग्रहः ।

३-३-१२५ खनः=खन् धातोः, घ=घप्रत्ययो भवति, चाद् घञ् (३-३-१२०) ।

३-३-१२६ ईष- कृच्छ्राकृच्छ्रार्थेषु, ईषद्दुःसुषु=ईषत् दुर् सु इत्येतेषूपपदेषु, धातोः (३-१-९१) खल्=खल् प्रत्ययो भवति । ३-४-७० तयो...इति भावकर्मणोः ।

३-३-१२७ कर्तृ- कृच्छ्राकृच्छ्रार्थेषु+ईषद्दुः सुषु (३-३-१२६) कर्तृकर्मणोश्च=कर्तृकर्मणोश्चोपपदयोः सतोः, भूकृञोः=भूकृञ्भ्याम्, खल् (३-३-१२६) । यथाक्रमं कर्तर्युपपदे भूधातोः, कर्मण्युपपदे कृञ् धातोरिति ज्ञेयम् । **ईषदाढ्यंभवं भवता** ६-३-६७ अरु...इति मुँम् । ईषदनाढ्येन आढ्येन भूयते, इति विग्रहः । अनाढ्येन भवता सुखेन आढ्येन भूयत इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-१२८ आतो युँच् ॥१३०

ईषत्पानः सोमो भवता । दुष्पानः । सुपानः ।

३-३-१२९ छन्दसि गत्यर्थेभ्यः ॥१३०

सूपसदनोऽग्निः । सूपसदनमन्तरिक्षम् ।

३-३-१३० अन्येभ्योऽपि दृश्यते ॥

सुदोहनामकृणोद् ब्रह्मणे गाम् ।

सुवेदनामकृणोद् ब्रह्मणे गाम् ।

(भाषायां शासि-युधि-दृशि-धृषि-मृषिभ्यो युँज् वाच्यः)

दुःशासनः । दुर्योधनः । दुर्दर्शनः ।

दुर्धर्षणः । दुर्मर्षणः ।

३-३-१३१ वर्तमानसामीप्ये वर्तमानवद् वा ॥१३२

कदा आगतोऽसि ? अयमागच्छामि, आगमं वा । कदा गमिष्यसि ?

एष गच्छामि, गमिष्यामि वा ।

३-३-१३२ आशंसायां भूतवच्च ॥१३३

गुरुश्चेदागमत्, आगच्छति, आगमिष्यति वा व्याकरणमध्यगीष्महि, अधीमहे, अध्येष्यामहे वा ।

(सामान्यातिदेशे विशेषानतिदेशः)

तेन लँङ् लिँटौ न ।

३-३-१३३ क्षिप्रवचने लृँट् ॥

गुरुश्चेत् क्षिप्रं त्वरितं शीघ्रं वा आगमिष्यति, शीघ्रं व्याकरणमध्येष्यामहे । नेति वक्तव्ये लृँङ्ग्रहणं लुँटोऽपि विषये यथा स्यात् ।

श्वः शीघ्रमध्येष्यामहे ।

३-३-१३४ आशंसावचने लिँङ् ॥

गुरुश्चेदुपेयादाशंसेऽधीयीय ।

आशंसे क्षिप्रमधीयीय ।

३-३-१३५ नाऽनद्यतनवत् क्रिया-प्रबन्धसामीप्ययोः ॥१३८

यावज्जीवमन्नमदाद् दास्यति वा ।

सामीप्यम्=तुल्यजातीयेनाऽव्यवधानम् । येयं पौर्णमास्यतिक्रान्ता तस्यामग्नीनाधित, सोमेनाऽयष्ट । येयममावास्याऽऽगामिनी तस्यामग्नीनाधास्यते, सोमेन यक्ष्यते ।

३-३-१२८ आतो- कृच्छ्राकृच्छ्रार्थेषु+ईषद्दुःसुषु (३-३-१२६) आतः=आदन्ताद्, धातोः (३-१-९१) युँच्=युँच्प्रत्ययो भवति ।

३-३-१२९ छन्द- कृच्छ्र....सुषु (३-३-१२६) गत्यर्थेभ्यः=गत्यर्थेभ्यो धातुभ्यः, छन्दसि=वेदे, युँच् (३-३-१२८) ।

३-३-१३० अन्ये- कृच्छ्रा...सुषु (३-३-१२६) अन्येभ्योऽपि=गत्यर्थभिन्नेभ्योऽपि, छन्दसि (३-३-१२९) युँच् (३-३-१२८) ।

भाषा- कृच्छ्रा...र्थेषु+ईषद्दुःसुषु (३-३-१२६) ।

३-३-१३१ वर्त- समीपमेव सामीप्यम् । वर्तमानसामीप्ये =वर्तमानसमीपे =भूते भविष्यति च, वा=विभाषया, वर्तमानवत्=वर्तमानकाले इव प्रत्यया भवन्ति ।

३-३-१३२ आशंयाम्=आशंसायां गम्यमानायाम्, भविष्यत्काले, भूतवत्,=भूतकाले इव, वर्तमानवत् (३-३-१३१) च प्रत्ययाः, वा (३-३-१३१) । अत्र काशिका-आशंसनमाशंसा=अप्राप्तस्य प्रियार्थस्य प्राप्तुमिच्छा, तस्याश्च भवष्यित्कालो विषय इति ।

३-३-१३३ क्षिप्रवचने =क्षिप्रवाचिशब्दे उपपदे, आशंसायाम् (३-३-१३२) भविष्यत्काले, लृँट्=लृँट् प्रत्ययो भवति । वचनग्रहणं पर्यायार्थम् । पूर्वसूत्रापवादः ।

३-३-१३४ आशंसावचने =आशंसावाचिन्युपपदे, भविष्यत्काले, धातोः (३-१-९१) लिङ्=लिँङ् प्रत्ययो भवति । पूर्वसूत्रयोरपवादः ।

३-३-१३५ नान- क्रिया...प्ययोः=क्रियायाः सातत्ये सामीप्ये च गम्ये, अनद्यतनवत्+न=लङ् लुँटौ न भवतः । अनद्यतने भूते लँङ् अनद्यतने भविष्यति लुँङ् विहितौ, तौ निषिद्धौ । **आधित** १-२-१७ स्थाघ्वो...इत्यत्र द्रष्टव्यम् । **अयष्ट** ८-२-२६ झलो...इति सलोपः । ८-२-३६ व्रश्च...इति षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-१३६ भविष्यति' मर्यादावचने'ऽवरस्मिन्' ॥१३९, १३८, १३७

योऽयमध्वा गन्तव्य आ प्रतिष्ठानपुर (प्युठान) स्थ-श्रीदुर्गाहीरेश्वर-मन्दिरात्, तस्य यदवरं तीरं गोमुख्यास्तत्र स्नास्यामः ।

३-३-१३७ कालविभागे' चाऽनहोरात्राणाम्' ॥१३८

योऽयं संवत्सर आगामी तत्र यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे । अनहोरात्राणामित्युक्तेरिह भवत्येव लुँट्-योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्राऽध्येतास्महे ।

३-३-१३८ परस्मिन् विभाषा ॥

योऽयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे, अध्येतास्महे । कालविभागे (३-३-१३७) इत्यनुवृत्तेर्नेह प्रतिषेधः-योऽयमध्वा गन्तव्य आ प्रतिष्ठानपुरस्थ-श्रीदुर्गाहीरेश्वरमन्दिरात्, तस्य यत् परं माण्डव्यास्तत्र कालेयकान्यास्वादयितास्मः, गोमुखी शिशिर-समीरमनुभवितास्मः ।

३-३-१३९ लिंङ्निमित्ते लृँङ् क्रियातिपत्तौ ॥१७३

सुवृष्टिश्चेदभविष्यत्, तदा सुभिक्षमभविष्यत् ।

३-३-१३६ भविष्यति=भविष्यत्काले, मर्यादावचने =मर्यादायामभिविधौ च, अवरस्मिन्=अवरस्मिन् प्रविभागे, अनद्यतनवन्न (३-३-१३५) । अत्र लुँङ् न । मर्यादायामित्येव सिद्धे वचनग्रहणमभिविधेरपि ग्रहणार्थम् । विशेषः १-४-८८ आङ् म...सूत्रे द्रष्टव्यः । अक्रियाप्रबन्धसामीप्यार्थमिदम् ।

३-३-१३७ काल- अनहोरात्राणाम्=अहोरात्रसम्बन्धिभिन्ने, भविष्यति+मर्यादावचने+अवरस्मिन् (३-३-१३६) कालविभागे=समयविभक्तौ, अनद्यतनवन्न (३-३-१३५) । अहोरात्रसम्बन्धिनि विभागे प्रतिषेधार्थमिदम् ।

३-३-१३८ पर- अनहोरात्राणाम् (३-३-१३७) भविष्यति+मर्यादावचने (३-३-१३६) परस्मिन्=परत्र, कालविभागे (३-३-१३७) विभाषा=वा, अनद्यतनवन्न (३-३-१३५) । अप्राप्तविभाषेयम् ।

३-३-१३९ लिङ्नि- ७-४-५२ ह एति-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क) ३-१-९१ धातोः (ख) ३-३-१३६ भविष्यति मर्यादावचनेऽवरस्मिन् ॥ ३-३-१३९. लिँङ्निमित्ते (ख) (क) लृङ् क्रियातिपत्तौ ॥इति । लिँङ्...ते=लिँङ्निमित्ते सति, (ख)=भविष्यति=भविष्यत्काले, (द्वितीयावृत्तौ तु भविष्यत्कालिकक्रियाबोधकात् इत्यर्थः) (क)=धातोः, लृँङ्=लृङ् प्रत्ययो भवति, क्रियातिपत्तौ=क्रियाया अनभिनिर्वृत्तौ=अनिष्पत्तौ गम्यमानायाम् । इत्यर्थमुपदिश्य ६-४-७१ लुँङ्लँ...सूत्रमुद्बोध्य लृंटीव प्रक्रियेत्युपदिश्य ङिल्लकारसम्बन्धिकार्यं चाऽवधेयमित्युपदिश्य मध्ये मध्ये साहाय्यं दददधोनिर्दिष्टानि रूपाणिच्छात्रैरुच्यमानानि शृणुयात् । अभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम । इति । भावे-अभाविष्यत, अभविष्यत । पठ्धातोः अपठिष्यत् । अपठिष्यताम् । अपठिष्यन् । कर्मणि तु-अपठिष्यत । अपठिष्येताम् । अपठिष्यन्त । इत्यादि । आत्मनेपदिनां सकर्मकाणां हलन्तानां कर्तरि कर्मणि च रूपाणि तुल्यानि । यथा-लभ् धातोः कर्तरि कर्मणि च अलप्स्यत । अलप्स्येताम् । अलप्स्यन्त । इत्यादि । अकर्मकाणां तु प्रथमपुरुषैकवचनमात्रे रूपं सिध्यति नान्यत्रेत्युद्बोधनपुरस्सरं कर्तरि शुभ् धातोर्लृँङि च्छात्रैरुच्यमानानि रूपाणि शिक्षकः शृणुयात् । अथ सामान्यभूते विधीयमानो लुँङ् लकार उपदेश्यः । यत्र ङितो लंटीव रूपाणि शिक्षकः शृणुयात् । अथ सामान्यभूते विधीयमानो लुँङ् लकार उपदेश्यः । यत्र निङो लंटीव रूपाणि शिक्षकः शृणुयात् । लिँटि तु सार्वधातुकसंज्ञैव बाध्यते । अतः सर्वधातुकसंज्ञायां विकरणस्य बाधकश्च्लिप्रत्ययो भवति । लिँटि तु सार्वधातुकसंज्ञैव बाध्यते । अतः सर्वधातुकसंज्ञायां विकरणस्य बाधकश्च्लिप्रत्ययो भवति । अथ **'अभूत् प्रथितप्रतापो भूपतिः श्रीपृथ्वीनारायणसाहदेवः'** इति वक्तव्ये स पश्चादुपदेष्टुमुचितः । अथ **'अभूत् प्रथितप्रतापो भूपतिः श्रीपृथ्वीनारायणसाहदेवः'** इति वक्तव्ये 'अभूत्' इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते, इति वदता शिक्षकेण ३-२-११० लुँङ् सूत्रमुपदेश्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-१४० भूते च ॥१४१

सम्यक् चेदपठिष्यत्, परुदेव परीक्षामुदतरीष्यत्।

३-३-१४१ वोताप्योः ॥१५१

कथं नाम तत्र भवान् धर्ममत्यक्ष्यत्, अत्याक्षीद् वा।

३-३-१४२ गर्हायां लँडपिजात्वोः ॥१४४,१४३

अपि जायां त्यजसि। जातु गणिकामाधत्से।

३-३-१४३ विभाषा कथमि लिङ् च ॥

कथं नाम धर्मं त्यजेस्त्यजसि,
त्यक्तासि, त्यक्ष्यसि,
अत्यजः, अत्याक्षीः, तत्यजिथ वा॥

३-३-१४४ किंवृत्ते लिँङ्लृँटौ ॥१४५

कः, कतरः, कतमो वा गुरुं निन्देत्, निन्दिष्यति वा।

३-३-१४५ अनवलकृप्त्यमर्षयोरकिंवृत्तेऽपि ॥१४८

न सम्भावयामि न मर्षये वा भवान् गुरुं निन्देत्, निन्दिष्यति वा। कः कतरः कतमो वा गुरुं निन्देत्, निन्दिष्यति वा॥

३-३-१४६ किंकिलास्त्यर्थेषु लृँट्॥

न श्रद्दधे न मर्षये वा किंकिल त्वमुत्कोचं भोक्ष्यसे। अस्ति भवति विद्यते वा त्वमुत्कोचं भोक्ष्यसे।

३-३-१४७ जातुयदोर्लिँङ्॥ १५०

जातु यद् वा त्वादृशो गुरुं निन्देन्नावकल्पयामि न मर्षयामि।

(यदाययोरुपसंख्यानम्)

यद्रा यदि वा त्वादृशो गुरुं निन्देन्न श्रद्दधे न मर्षये।

३-३-१४८ यच्चयत्रयोः ॥१५०

यच्च यत्र वा त्वमेवं कुर्या न श्रद्दधे न मर्षयामि वा।

३-३-१४० भूते = भूतकाले, लिङ्निमित्ते लृङ् क्रियातिपत्तौ (३-३-१३९)। ३-३-१५२ उताप्योः... इति प्रभृतिलिँङ्निमित्तेष्वेवेदं प्रवर्तते। ततः पूर्वेषूत्तरसूत्रेण विकल्पेन विधानात्।

३-३-१४१ वोता- वा आ उताप्योरितिच्छेदः। आ+उताप्योः=३-३-१५२ उताप्योः... इति सूत्रात् प्राक्, भूते (३-३-१४०) लिङ्निमित्ते+लृङ् (३-३-१३९) वा, क्रियातिपत्तौ (३-३-१३९)। अत्रसूत्रे मर्यादायामाङ् न त्वभिविधौ। ३-३-१५२ उता...सूत्रात् प्राग् यत्र लिङ् विधीयते, तत्र क्रियातिपत्तौ भूते लृँङ् वा, भविष्यति तु नित्यमेवेति विभाव्यम्।

३-३-१४२ गर्हा- अपिजात्वोः=अपि जातु इत्यनयोरुपपदयोः, धातोः (३-१-९१) लँट्=लँट् प्रत्ययो भवति, गर्हायाम्=निन्दायां गम्यमानायाम्। सर्वलकाराऽपवादः, कालसामान्ये विहितत्वात्। तेनाऽत्र लृँङ् लुँङादयो न भवन्ति। उदाहरणे गर्हितार्थे। अत्र क्रियातिपत्तौ लृँङ् न भवति, लिङ्निमित्ताऽभावात्।

३-३-१४३ विभा- कथमि=कथंशब्दे उपपदे, धातोः (३-१-९१) विभाषा=वा, लिँङ्=लिँङ् प्रत्ययो भवति, लँट् (३-३-१४२) च, गर्हायाम् (३-३-१४२)। विभाषेत्युक्तेः पक्षे कालविशेषे यथाविहितं प्रत्यया भवन्ति।

३-३-१४४ किंवृत्ते =किंशब्दावयवके उपपदे, गर्हायाम् (३-३-१४२) धातोः (३-१-९१) लिँङ् लृँटौ=लिँङ् लृँट् प्रत्ययौ भवतः। सर्वलकारापवादः। अत्र किंवृत्तशब्देन सुबन्तं तद्धितान्तप्रकृतिकसुबन्तं च गृह्यते।

३-३-१४५ अन...र्षयोः-अनवक्लृप्तिः=असम्भावना, अमर्षः=अक्षमा, तयोर्गम्यमानयोः, अकिंवृत्तेऽपि=किंवृत्ते अकिंवृत्ते चोपपदे, धातोः (३-१-९१) लिँङ् लृँटौ (३-३-१४४)। गर्हायामिति निवृत्तम्।

३-३-१४६ किङ्किल इति समुदायः क्रोधद्योतकः। अस्त्यर्थाः=अस्ति भवति विद्यतयः। किङ्कि...स्त्यर्थेषु= किङ्किल इति समुदाये अस्त्यर्थकेषु चोपपदेषु, अनवक्लृप्त्यमर्षयोः (३-३-१४५) धातोः (३-१-९१) लृँट्= प्रत्ययो भवति। पूर्वेण लिँङ् लृँटोः प्राप्तयोर्लृँङ्ग्रहणं लिङो बाधनार्थम् (निवृत्त्यर्थम्)। अत्र लिँङो निमित्ताऽभावाल्लृँङ् न।

३-३-१४७ जातुयदोः = जातु यद् इत्येतयोरुपपदयोः, अनवक्लृप्त्यमर्षयोः (३-३-१४५) धातोः (३-१-९१) लिँङ्=लिँङ्प्रत्ययो भवति। ३-३-१४५ अन...इति लिँङ्लृँटोः प्राप्तयोलिँङ्ग्रहणं लृँटो बाधनार्थम्।

३-३-१४८ यच्च यत्रयोः =यच्च यत्र इत्येतयोरुपपदयोः, शेषोऽर्थः प्रागवत्। लृँटोऽपवादश्च प्रागवत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-१४९ गर्हायां च ॥

यच्च यत्र वा त्वमुत्कोचं भुञ्जीथाः। अन्याय्यं तत्।

३-३-१५० **चित्रीकरणे** च ॥१५१

यच्च यत्र वा पङ्गुः पर्वतमारोहेत्। आश्चर्यमेतत्।

३-३-१५१ शेषे लृँडयदौ ॥

आश्चर्यमन्धो नाम पर्वतमारोक्ष्यति। अयदावित्युक्तेर्नेह-आश्चर्यं यदि स भुञ्जीत।

३-३-१५२ उताप्योः समर्थयो**र्लिँङ्** ॥१५५

उत, अपि वा पठेत्। समर्थयोरित्युक्तेर्नेह-उत दण्डः पतिष्यति। अपिधास्यति द्वारम्।

३-३-१५३ कामप्रवेदनेऽकच्चिति ॥

कामो मे भुञ्जीत भवान्। अकच्चितीत्युक्तेर्नेह-पृच्छामि त्वां कच्चित् पठति पुत्रः।

३-३-१५४ **संभावनेऽलमिति चेत् सिद्धाऽप्रयोगे** ॥१५५

अपि पर्वतं शिरसा भिन्द्यात्। सिद्धाप्रयोगे इत्युक्तेर्नेह-अलं देवदत्तो हस्तिनं हनिष्यति।

३-३-१५५ **विभाषा** धातौ संभावनवचनेऽयदि ॥१५६

सम्भावयामि भुञ्जीत भोक्ष्यते वा भवान्। यद्योगे तु-लिँङेव। सम्भावयामि यद् भुञ्जीत भवान्।

३-३-१५६ हेतुहेतुमतोर्लिँङ् ॥

सम्यक् पठेच्चेत् परीक्षामुत्तरेत्। सम्यक् पठिष्यति चेत् परीक्षामुत्तरीष्यति। (भविष्यत्येवेष्यते)

नेह-हन्तीति पलायते।

३-३-१४९ गर्हा- यच्चयत्रयोः (३-३-१४८) धातोः (३-१-९१) लिँङ् (३-३-१४७) गर्हायाम्=निन्दायां गम्यमानायाम्। अनवक्लृप्त्यमर्षयोरिति निवृत्तम्। सर्वलकारापवादः।

३-३-१५० चित्री-यच्चयत्रयोः (३-३-१४८) धातोः (३-१-९१) लिँङ् (३-३-१४७) चित्रीकरणे =आश्चर्ये गम्यमाने। सर्वलकारापवादः।

३-३-१५१ शेषे =यच्च यत्र इत्येताभ्यां भिन्ने उपपदे, चित्रीकरणे (३-३-१५०) धातोः (३-१-९१) लृँट्=लृँट् प्रत्ययो भवति, अयदौ=यदिशब्दप्रयोगाभावे। सर्वलकारापवादः। प्रत्युदाहरणे ३-३-१४७ जातु...सूत्रस्थ-यदा...इति लिँङ्।

३-३-१५२ उता-समर्थयोः=समानार्थयोः, उताप्योः=उत अपि इत्युपपदयोः, धातोः (३-१-९१) लिँङ्=लिँङ् प्रत्ययो भवति। उतापी बाढमित्यर्थे समानार्थौ। अतो बाढमित्यर्थयोरुताप्योरित्यर्थः फलति। सर्वलकारापवादः। इतः प्रभृति लिँङ्निमित्ते क्रियातिपत्तौ भूतेऽपि नित्यं लृँङ्। ३-३-१४१ वोता...इति विकल्पस्य निवृत्तेः। भविष्यति तु सर्वत्रैव नित्यम्।

३-३-१५३ कामः=इच्छा। तस्य, प्रवेदनम्=प्रकाशनम्। कामप्रवेदने =स्वाभिप्रायाविष्करणे गम्यमाने, अकच्चिति=कच्चिदित्युपपदाभावे, धातोः (३-१-९१) लिङ् (३-३-१५२)। सर्वलकारापवादः।

३-३-१५४ संभा- अत्र 'संभावने' इति 'अलम्' इति चावर्त्य क्रमशः संभावनम् इति प्रथमान्तत्वेन, अलम् इति च सप्तम्यन्तत्वेन, विपरिणम्येते। संभावने =भाविवस्तूत्प्रेक्षणे, धातोः (३-१-९१) लिङ् (३-३-१५२) तत् सम्भावनम्, अलम्=पर्याप्तम्=स्वकार्यनिर्वर्तनसमर्थं चेत्, अलम् इति=अलंशब्दे, सिद्धाऽप्रयोगे =प्रयोगं विना प्रतीत्यार्थे। सर्वलकारापवादः।

३-३-१५५ विभा- संभा...चने =भाविवस्तूत्प्रेक्षणवाचिनि, धातौ= धातावुपपदे, अयदि=यच्छब्दप्रयोगाऽभावे, पूर्वसूत्रोक्तेऽर्थे, विभाषा=वा, लिँङ् (३-३-१५२)। पूर्वसूत्रं सर्वमनुवर्तते। अतः 'पूर्वसूत्रोक्तेर्थे' इत्युक्तम्। पूर्वेण नित्यं प्राप्तौ विकल्पार्थं वचनम्।

३-३-१५६ हेतुहेतुमतोः- हेतुहेतुमद्भावे गम्यमाने, भविष्यति, विभाषा (३-३-१५५) लिँङ्=लिँङ्प्रत्ययो भवति। लिँङिति वर्तमाने पुनर्लिँङ्ग्रहणं कालविशेषप्रतिपत्त्यर्थम्। तेन भविष्यतीत्युक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-१५७ इच्छार्थेषु लिङ्लोँटौ ॥१५९

इच्छामि भुञ्जीत भुङ्क्तां वा भवान् । एवं कामये प्रार्थये वा भुञ्जीत भुङ्क्तां वा भवान् ।

(कामप्रवेदन इति वक्तव्यम्)

नेह-इच्छन् करोति ।

३-३-१५८ समानकर्तृकेषु तुमुँन् ॥१५९

इच्छति पठितुम् । समानकर्तृकेष्वित्युक्तेर्नेह-छात्रं पठन्तमिच्छति गुरुः ।

३-३-१५९ लिँङ् च ॥१६०

पठेयमितीच्छति ।

३-३-१६० इच्छार्थेभ्यो विभाषा वर्तमाने ॥

इच्छेत्, इच्छति । कामयेत, कामयते ।

३-३-१६१ विधि-निमन्त्रणामन्त्रणाधीष्ट-संप्रश्न-प्रार्थनेषु लिँङ् ॥१६२

पठेत् ।

विधिः=प्रेरणम्=भृत्यादेर्निकृष्टस्य प्रवर्तनम् । कटं कुर्यात् । निमन्त्रणम्=नियोगकरणम्=आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् (यस्मिन्ननुष्ठिते प्रत्यवायःस्यात्) इह भवान् भुञ्जीत । आमन्त्रणम्=कामचारकरणम् (यत्राऽननुष्ठितेऽपि प्रत्यवायो न) इह भवानासीत ।

अधीष्टः=सत्कारपूर्वको व्यापारः । भवान् पुत्रं पाठयेत् । संप्रश्नः=सम्प्रधारणम् । किं भो वेदं पठेयमुत व्याकरणम् । प्रार्थनम्=अनुनयः । भो भोजनं लभेय ।

३-३-१६२ लोँट् च ॥१६३

पठतु । कटं करोतु । इह भवान् भुङ्क्ताम् । इह भवानास्ताम् । भवान् पुत्रं पाठयतु । किं भो वेदं पठान्युत व्याकरणम् ? भो भोजनं लभै । योगविभाग उत्तरसूत्रे लिँङोऽपरिग्रहार्थः ।

३-३-१५७ इच्छार्थेषु=इच्छार्थेषु धातुषूपपदेषु, धातोः (३-१-९१) लिँङ्लोटौ=लिँङ् लोँट् प्रत्ययौ भवतः । सर्वलकारापवादः । **काम**-एतत्सूत्रवार्तिकप्रतीकमादायोपदिशति तत्र भवान् हरदत्तः- ३-३-१५३ कामप्रवेदनेऽकच्चिति इत्ययं तर्हियोगः किमर्थः, यावता कामो मे भुञ्जीत भवान्, अभिलाषो मे भुञ्जीत भवानित्यत्राप्यनेनैव सिद्धम् ? यत्रेच्छार्थमुपपदं न भवति, अर्थप्रकरणादिना तु कामप्रवेदनं गम्यते, तत्रापि लिँङ् यथा स्यात् । इदं तर्हि किमर्थम् ? लोँडर्थम् । लिँङ्ग्रहणं तु लोँटा बाधा माभूदिति । एवमपि लोँट्च इति वक्तव्ये किं लिँङ्ग्रहणेन ! प्रकृतं लिङ्ग्रहणं विभाषासम्बन्धम्, अतस्तदनुकर्षणे विभाषाग्रहणस्याऽप्यनुकर्षणं संभाव्येतेति ।

३-३-१५८ समानकर्तृकेषु=तुमुँनः प्रकृतेर्यः कर्ता तत्कर्तृकेषु, इच्छार्थेषु (३-३-१५७) धातोः (३-१-९१) तुमुँन्=तुमुँन् प्रत्ययो भवति । पूर्वसूत्रापवादः ।

३-३-१५९ लिँङ् च- समानकर्तृकेषु (३-३-१५८)=लिङः प्रकृतेर्यः कर्ता तत्कर्तृकेषु, इच्छार्थेषु (३-३-१५७) धातोः (३-१-९१) लिँङ्=लिँङ् प्रत्ययो भवति ।

३-३-१६० इच्छार्थेभ्यः =इच्छार्थेभ्यो धातुभ्यः, वर्तमाने=वर्तमानकाले, विभाषा=वा, लिँङ् (३-३-१५९) । पक्षे ३-२-१२३ वर्तमाने...इति लँट् ।

३-३-१६१ विधि- ३-४-१०० इतश्च-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

३-१-९१ धातोः ॥ ३-३-१६१ विधि...नेषु (क) लिँङ् ॥ इति । विधि...प्रार्थनेषु=एष्वर्थेषु, (क)=धातोः, लिँङ्=लिँङ्प्रत्ययो भवति । इत्यर्थमुपदिश्य प्रकृते पठ्धातोर्लिँङ्प्रत्ययेऽनुबन्धलोपे लकारस्यार्थे कर्तरि विवक्षिते कर्त्तरि लँटीव पठति इति रूपे छात्रैः साधिते शिक्षकस्तद्रूपं श्यामपाटचां लिखित्वा ३-४-१०३ यासुँट्...सूत्रमुपदिशेत् ।

३-३-१६२ लोँट् च- २-३-१८ कर्तृकरणयो...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

३-१-९१ धातोः ३-३-१६१ विधि....नेषु लिँङ् ॥ ३-३-१६२ (ख) (क) लोँट् च ॥इति । (ख)=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-१६३ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥ १६७, १६४

भवता कटः करणीयः, कर्तव्यः, कृत्यः, कार्यः ॥ भवान् कटं करोतु।

३-३-१६४ लिँङ् चोर्ध्वमौहूर्तिके ॥१६५

मुहूर्तादूर्ध्वं भवान् कटं कुर्यात्। भवान् कटं करोतु। भवता कटः कर्तव्यः।

३-३-१६५ स्मे लोँट् ॥१६६

ऊर्ध्वं मुहूर्ताद् भवान् कटं करोतु स्म।

३-३-१६६ अधीष्टे च ॥

भवान् पुत्रं पाठयतु स्म।

३-३-१६७ कालसमयवेलासु तुमुँन् ॥

कालः समयो वेलाऽवसरो वा भोक्तुम्।

३-३-१६८ लिँङ् यदि ॥१६९

कालः समयो वेलाऽवसरो वा यद् भुञ्जीत भवान्।

३-३-१६९ अर्हे कृत्यतृचश्च ॥

भवता कन्या वोढव्या। भवान् कन्याया वोढा। भवान् कन्यां वहेत्।

३-३-१७० आवश्यकाधमर्ण्ययोर्णिनिँः ॥१७१

अवश्यंकारी। शतं दायी।

विधि...नेषु=विधिप्रभृतिष्वर्थेषु, (क)=धातोः, लोँट्=लोँट् प्रत्ययो भवति। इत्यर्थमुपदिश्य प्रकृते पठ् धातोर्लोट्प्रत्ययेऽनुबन्धलोपे चच्छात्रैः साधिते लकारस्यार्थे कर्तरि विवक्षिते कर्तरि लँटीव 'पठति' इति रूपे छात्रैः साधिते तद्रूपं श्यामपाटचां लिखित्वा ३-४-८६ एरुः-सूत्रमुपदिशेत्।

३-३-१६३ प्रैषा- प्रैषो विधिः। अतिसर्गः=आमन्त्रणम्। अनयोः पूर्वेण सिद्धे लोँटा मुक्ते वासरूपविधिनैव कृत्येष्वपि सिद्धेषु पुनः कृत्यग्रहणं स्त्र्यधिकारात् परत्र वासरूपविधिरनित्य इति ज्ञापनार्थम्। अनित्य इत्युक्त्या क्वचिद् वासरूपविधिर्भवत्येवेति ज्ञायते। तेन ३-३-१६७ काल...इति तुमुँना ३-३-११५ ल्युँटः समावेशः। कालो भोक्तुम्। कालो भोजनस्येति। चकारेण लोँटोऽनुकर्षणं प्राप्तकालार्थम्। प्रैषा...लेषु=प्रैषादिष्वर्थेषु, धातोः (३-१-९१) कृत्याः=कृत्यसंज्ञकप्रत्यया भवन्ति, लोँट् (३-३-१६२) च।

३-३-१६४ लिँङ् चो- प्रैषा...लेषु (३-३-१६३) ऊर्ध्वमौहूर्तिके =मुहूर्तोपरिभवेऽर्थे वर्तमानात्, धातोः (३-१-९१) लिँङ्=लिँङ् प्रत्ययो भवति, कृत्याः (३-३-१६३) लोँट् (३-३-१६२) च। त्रिष्वप्यर्थेषूदाहरणमेकमेव संभवति। एवमग्रिमसूत्रेष्वपि बोध्यम्।

३-३-१६५ स्मे =स्मशब्दे उपपदे, प्रैषा...लेषु (३-३-१६३) ऊर्ध्वमौहूर्तिके (३-३-१६४) धातोः (३-१-९१) लोँट्=लोँट् प्रत्ययो भवति। लिँङ्कृत्यानामपवादः।

३-३-१६६ अधीष्टे =सत्कारपूर्वकव्यापारेऽर्थे, स्मे (३-३-१६५) धातोः (३-१-९१) लोँट् (३-३-१६५)। लिँङोऽपवादः।

३-३-१६७ काल...लासु=कालादिषूपपदेषु, धातोः (३-१-९१) तुमुँन्=तुमुँन् प्रत्ययो भवति। पर्यायोपादानमर्थग्रहणार्थम्। अत्र काशिका-इह कस्मान्न भवति-कालः पचति भूतानि इति ? प्रैषादिग्रहणमिहाभिसम्बध्यते, इति।

३-३-१६८ लिँङ् य-काल...लासु (३-३-१६७) यदि=यच्छब्दे उपपदे, धातोः (३-१-९१) लिँङ्=लिँङ् प्रत्ययः। तुमुँनोऽपवादः।

३-३-१६९ अर्हे- अर्हतीत्यर्हः पचाद्यच्। अर्हे =योग्ये कर्तरि गम्यमाने, धातोः (३-१-९१) कृत्यतृचः,=कृत्यप्रत्ययाः तृच् प्रत्ययः, लिँङ् (३-३-१६८) च भवन्ति। **वोढा** ८-२-३१ हो ढः इति ढत्वम्। ८-२-४० झषस्तथो...इति तकारस्य धकारः। ष्टुत्वम्। ढलोपः। दीर्घः। ६-३-११२ सहिवहो...इत्याकारस्यौत्वम्।

३-३-१७० आव- अवश्यं भाव आवश्यकम् ५-१-१३२ द्वन्द्वमनोज्ञा...इति मनोज्ञादित्वाद् वुञ्। आव...ण्ययोः=आवश्यकाधमर्ण्यविशिष्टे कर्तरि वाच्ये, धातोः (३-१-९१) णिनिँः=णिनिँ प्रत्ययो भवति। **अवश्यंकारी** २-१-७२ मयूर...इति समासो न तु उप...इत्युपपदसमास इति भ्रमितव्यम्। अत्रोपपदाऽभावात्। **शतंदायी** २-२-७० अकेनो...इति षष्ठचाः प्रतिषेधाद् द्वितीया, दायीत्यत्र ७-३-३३ आतो...इति युँक्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-३-१७१ कृत्याश्च ॥१७२

भवताऽवश्यकरणीयः । शतं देयम् ।

३-३-१७२ शकि लिँङ् च ॥

भवता भारो वोढव्यः । भवान् भारं वहेत् ।

३-३-१७३ आशिषि लिँङ्लोँटौ ॥

चिरं जीव्यात्, जीवतु, जीवताद् वा ।

३-३-१७४ क्तिच्क्तौ च संज्ञायाम् ॥

तनुतात् तन्तिः । देवा एनं देयासुर्देवदत्तः ।

३-३-१७५ माङि लुँङ् ॥१७६

मा भवान् भूत् ।

३-३-१७६ स्मोत्तरे लँङ् च ॥

मा स्म भवत् । मा स्म भूत् ।

इति तृतीयाऽध्याये

तृतीयः पादः ।

३-३-१७१ कृत्याश्च पूर्वसूत्रोक्तार्थे, धातोः (३-१-९१) कृत्याः=कृत्यप्रत्यया भवन्ति । **भवताऽवश्यकरणीयः** ३-१-१२५ ओरा...सूत्रस्थ-लुम्पे...इति मलोपः ।

३-३-१७२ शकि=शक्तौ गम्यमानायाम्, धातोः (३-१-९१) लिँङ्=लिँङ्प्रत्ययो भवति, कृत्याः (३-३-१७) च ।

३-३-१७३ आशि- ६-४-८२ एरनेकाचो...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

३-१-९१ धातोः ३-३-१७३ आशिषि (क) लिँङ् लोँटौ ॥इति । आशिषि=आशीरर्थे गम्यमाने, (क)=धातोः, लिँङ् लोँटौ=लिँङ्लोँट् इति प्रत्ययौ भवतः । इत्यर्थमुपदिश्य पठ्धातोराशिष्यर्थे लोँट् प्रत्यये तिपि विध्यादौ लोँटीव प्रक्रियायां छात्रैः साधितायां 'पठतु' इति श्यामपाटचां लिखित्वा ७-१-३५ तुह्योस्तातँङ्..सूत्रमुपदिशेत् ।

३-३-१७४ क्तिच्क्तौ- आशिषि (३-३-१७३) धातोः (३-१-९१) क्तिच् क्तौ=क्तिच् क्त इति प्रत्ययौ भवतः, संज्ञायाम्=प्रकृतिप्रत्ययसमुदायेन संज्ञायां गम्यमानायाम् । **तन्तिः** ७-२-९ तितुत्र...इति नेट् । ६-४-३९ न क्तिचि...इति दीर्घस्याऽनुनासिकलोपस्य च प्रतिषेधः । **देवदत्तः** कर्मणि क्तः । ७-४-४६ दो दद् इति दथ् ।

३-३-१७५ माङि=माङ्शब्दे उपपदे, धातोः (३-१-९१) लुँङ्=लुँङ् प्रत्ययो भवति । सर्वलकारापवादः । कथं तर्हि 'अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख' इति ? माङ्शब्दपर्यायो मा शब्दोऽप्यस्ति । तस्मिन्नुपपदेऽयं प्रयोगः । **मा भवान् भूत्** ६-४-७४ न माङ्...इत्यडभावः २-४-७७ गाति...इति सिँचो लुक् । ७-३-८८ भूसु...इति गुणप्रतिषेधः ।

३-३-१७६ स्मोत्तरे=स्मशब्दोत्तरके, माङि (३-३-१७५) धातोः (३-१-९१) लँङ्=लँङ् प्रत्ययो भवति, लुँङ् (३-३-१७५) च ।

इति तृतीयाऽध्याये तृतीयःपादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तृतीयाऽध्याये

चतुर्थः पादः

३-४-१ धातुसम्बन्धे प्रत्ययाः ॥६

वसन् ददर्श । वनानि पश्यन् ययौ ।

सोमयाज्यस्य पुत्रो भविता ।

३-४-२ क्रियासमभिहारे लोँट् लोँटो हिस्वौ वा च तध्वमोः ॥३

सर्वलकारापवादः ।

पुनः पुनरतिशयेन वा याति = याहियाहीति याति । याहि याहीति यातः । याहि याहीति याथ, यात यातेति याथ । लभस्व लभस्वेति लभते । लभस्व लभस्वेति लभध्वे, लभध्वं लभध्वमिति लभध्वे । लुनीहि लुनीहीति लुनाति ।

३-४-३ समुच्चयेऽन्यतरस्याम् ॥

पुरीमवस्कन्द लुनीहि नन्दनं
मुषाण रत्नानि हराऽमराङ्गनाः
विगृह्य चक्रे नमुचिद्विषा बली
य इत्थमस्वास्थ्यमहर्दिवं दिवः ।

(मा.स.१ श्लो. ५१)

३-४-४ यथाविध्यनुप्रयोगः पूर्वस्मिन् ॥५

उदाहरणं ३-४-२ क्रिया...सूत्रे द्रष्टव्यम् ।

३-४-५ समुच्चये सामान्यवचनस्य ॥

उदाहरणं ३-४-३ समु...सूत्रे द्रष्टव्यम् ।

३-४-६ छन्दसि लुँङ्-लँङ्-लिँटः ॥

३-४-१ धातु- अत्र धातुशब्दस्य धात्वर्थे लक्षणा । सम्बन्धः=विशेष्यविशेषणभावः । धातुसम्बन्धे =धात्वर्थानां सम्बन्धे, प्रत्ययाः=यत्र काले प्रत्यया विहितास्ततोऽन्यत्रापि भवन्ति । उदाहरणेषु- प्रधानक्रियानुरोधादाद्ययोर्भूतानद्यतनपरोक्षे लँट् (शता=शत्रादेशः) अन्त्ये भविष्यति णिनिः, ३-२-८५ कर...इति विधीयमानः ।

३-४-२ क्रिया...हारे=पौनःपुन्ये भृशार्थे च वर्तमानात्, धातोः (३-१-९१) लोँट्=लोँट् प्रत्ययो भवति, लोँटः=तस्य लोँटः स्थाने, हिस्वौ=लोँट्स्थानिक-हिस्व-वृत्ति-धर्मवन्तौ हि स्व इत्येतावादेशौ भवतः, तध्वमोः=त ध्वम् इत्येतयोर्विषये, वा=विकल्पेन हिस्वौ भवतः । हिस्वौ इत्यस्य लोँट् स्थानिक- हिस्ववृत्ति-धर्मवन्तौ हिस्वइत्येतावादेशौ इत्यर्थः कथं गम्यते ? उच्यते-लोँट् तस्य, इति वक्तव्ये, लोँट् लोँट इति पठनात् । तेन हि स्व इत्यनयोः क्रमशः परस्मैपदात्मनेपदसंज्ञे । परस्मैपदिभ्यः कर्तरि हिः । आत्मनेपदिभ्यः स्वो भावकर्मकर्तृषु । शबादयो यक् च भवन्ति । उभयोस्तिङ्संज्ञा च सिध्यति । मध्यमपुरुषैकवचनसंज्ञे तु न भवतो विधानसामर्थ्यात् । सर्वलकारापवादः । याहियाहीति- क्रियासमभिहारे (८-१-१२ प्रकारे...सूत्रस्थेन) इति वार्तिकेन द्वित्वम् ।

याति ३-४-४ यथा...सूत्रेणाऽनुप्रयुज्यते ।

३-४-३ समुच्चये =अनेकासां क्रियाणां समुच्चये, तद्वाचिभ्यो धातुभ्यः, अन्यतरस्याम्=प्राग्वद् वा ।

३-४-४ यथा- पूर्वस्मिन्=२-३-४ क्रिया...ध्वमोरिति सूत्रेण लोँड्विधाने, यथाविधि=यस्माल्लोँड् विहितस्तस्य (लोँट् प्रकृतेः) अनुप्रयोगः=पश्चात् प्रयोगो भवति । उदाहरणानि ३-४-२ क्रिया...सूत्रे द्रष्टव्यानि ।

३-४-५ समुच्चये= ३-४-३ समुच्चयेऽन्यतरस्याम् इति सूत्रेण लोँड्विधाने, सामान्यवचनस्य=सामान्यक्रियावाचिनो धातोः, अनुप्रयोगः (३-४-४) । उदाहरणम् ३-४-३ समु...सूत्रे द्रष्टव्यम् ।

३-४-६ छन्द- धातोः (३-१-९१) अन्यतरस्याम् (३-४-३) लुँङ्लँङ्लिँटः=लुँङ् लँङ् लिटँ प्रत्यया भवन्ति, छन्दसि=वेदे । अत्र भट्टोजिदीक्षित उदाहरति-देवो देवेभिरागमत् । उपदिशति च अत्र लोँडर्थे लुँङिति । काशिकाकारश्चोदाहरति- शकलाङ्गुष्ठकोऽकरत् । इति । उभावप्युदाहरतः- अहं तेभ्योऽकरं नमः । (यद्यपि दीक्षितोदाहरणे 'इदं तेभ्योऽकरं नमः' इति पाठो दृश्यते, तथापि 'अथो ये अस्य सत्त्वानोऽहन्तेभ्योऽकरं नमः' इति यजुर्वेदमन्त्रेऽहमित्येव पाठः) अग्निमद्य होतारमवृणीतायं यजमानः । अद्य ममार । इति । उपदिशतश्चाऽत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-७ लिँङर्थे लेँट् ॥८

जोषिषत् ।

३-४-८ उपसंवादाशङ्कयोश्च ॥

अहमेव पशूनामीशै । नेज्जिहमायन्तो नरकं पतामः ।

३-४-९ **तुमर्थे** से-सेनसे-असेन्-क्से-कसेनध्यै-अध्यैन्-कध्यै-कध्यैन्-शध्यै-शध्यैन्-तवै-तवेङ्-तवेनः ॥१३...१७

से-वक्षे रायः । सेन्-तावामेषे । असे असेन्-जीवसे । क्से-प्रेषे । कसेन्-भगाय श्रियसे । अध्यै अध्यैन्-जठरं पृणध्यै । कध्यै-इन्द्राग्नी आहुवध्यै । कध्यैन्-श्रियध्यै । शध्यै-सह मादयध्यै । शध्यैन्-वायवे पिबध्यै ।

तवै-सोममिन्द्राय पातवै ।

तवेङ्-सूतवे । तवेन्-कर्तवे ।

३-४-१० प्रयै रोहिष्यै अव्यथिष्यै ।

प्रयै देवेभ्यः । अपामोषधीनां रोहिष्यै । अव्यथिष्यै ।

३-४-११ दृशे विख्ये च ॥

दृशे विश्वाय सूर्यम् । विख्ये त्वा हरामि ।

३-४-१२ शकि णमुँल्-कमुँलौ ॥

अग्निं वै देवा विभाजं नाशक्नुवन् । अपलुपं नाऽशक्नुवन् ।

३-४-१३ ईश्वरे तोसुँन्-कसुँनौ ।

ईश्वरो विचरितोः । विचरितुमित्यर्थः ।

ईश्वरो विलिखः । विलेखितुमित्यर्थः ।

अद्य म्रियत इत्यर्थ इति । सूत्रार्थोपदेशे चोभावपि धातुसम्बन्धे, इत्यनुवृत्तिं स्वीकुरुतः ।

३-४-७ लिँङ- धातोः (३-१-९१) छन्दसि (३-४-६) अन्यतरस्याम् (३-४-३) लिँङर्थे,=लिँङ्लकारस्यार्थे, लेँट्=लेट् प्रत्ययो भवतिं । **जोषिषत्** जुष्धातुः । ३-१-८५ व्यत्य...इति परस्मैपदम् । ३-४-९४ लेँटो...इत्यट् । ३-१-३४ सिँब्ब...इति सिँप् । तस्येट् । ७-३-८६ पुँग...इति गुणः । ८-३-५९ आदे...इति षत्वम् । ३-४-९७ इत...इतीकारलोपः ।

३-४-८ उपसंवादः=पणबन्धः, यदि मे भवानिदं कुर्याद् अहमपि भवते इदं दास्यामि इत्याद्याकारकः । आशङ्का=उत्प्रेक्षा । तयोर्गम्यमानयोः, छन्दसि (३-४-६) धातोः (३-१-९१) लिँङर्थे+लेँट् (३-४-७) । नित्यार्थं वचनम् । **ईशै** आदादिक ईश् धातुः । उत्तमैकवचनमिट् । टेरेत्वम् । ३-४-९६ वैतो...इत्यैकारः । त्रिपुरखननाय देवैः प्रार्थितस्य रुद्रस्योक्तिरियम् । **पताम** पत् धातुः + मस् । ३-४-९४ लेँटो...इत्याट् । इच्छब्द आशङ्कां द्योतयति जिह्माचरणान्नरकपात इति ।

३-४-९ तुमर्थे =तुमुँन्नर्थे, धातोः (३-१-९१) छन्दसि (३-३-६) से...वेनः=से सेन् असे असेन् क्से कसेन् अध्यै अध्यैन् कध्यै कध्यैन् शध्यै शध्यैन् तवै तवेङ् तवेन् इति प्रत्यया भवन्ति । निदनितोः स्वरे विशेषः । उदाहरणेषु १-१-३८ कृन्मे...इत्यव्ययत्वम् । एवं ३-४-१२ शकि... सूत्रावधि ज्ञेयम् ।

३-४-१० प्रयै- तुमर्थे (३-४-९) छन्दसि (३-४-६) प्रपूर्वाद् याधातोः कैः, रुह्- नञ्पूर्वकव्यथ्धातुभ्याम् इष्यैः प्रत्ययौ निपात्येते ।

३-४-११ दृशे- तुमर्थे (३-४-९) छन्दसि (३-४-६) दृशेविख्ये=दृश्-विपूर्वकचक्षधातुभ्याम्, केप्रत्ययो निपात्यते ।

३-४-१२ शकि=शक् धातावुपपदे, तुमर्थे (३-४-९) छन्दसि (३-४-६) धातोः (३-१-९१) णमुँल्कमुँलौ=णमुँल् कमुँल् प्रत्ययौ भवतः । **विभाजम्** ७-२-११६ अत...इत्युपधावृद्धिः । विभक्तुमित्यर्थः । अपलुपम् १-१-५ क्क्ङिति...इति गुणनिषेधः । अपलोप्तुमित्यर्थः ।

३-४-१३ ईश्वरे=ईश्वरशब्दे उपपदे, धातोः (३-१-९१) तुमर्थे (३-४-९) तोसुँन्कसुँनौ=तोसुँन् कसुँन् प्रत्ययौ भवतः, छन्दसि (३-४-६) । उदाहरणयोः १-१-३९ क्त्वा तो...इत्यव्ययत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-१४ **कृत्यार्थे** तवै-केन्-केन्य-त्वनः ॥१५

न म्लेच्छितवै । अवगाहे । दिदृक्षेण्यः । कर्त्वम् ।

३-४-१५ अवचक्षे च ॥

नावचक्षे ।

३-४-१६ **भावलक्षणे** स्थेण्-कृञ् वदि-चरि-हु-तमि-जनिभ्यस्तोसुँन् ॥१७

आसंस्थातोः सीदन्ति । आसमाप्तेः सीदन्तीत्यर्थः ।

उदेतोः ।अपकर्तोः । प्रवदितोः । प्रचरितोः ।

होतोः । आतमितोः । आविजनितोः ।

३-४-१७ सृपितृदोः कसुँन् ॥

पुरा क्रूरस्य विसृपो विरप्शिन् ।

पुरा जत्रुभ्य आतृदः ।

३-४-१८ अलंखल्वोः प्रतिषेधयोः प्राचां **क्त्वा** ॥१८

अलं कृत्वा । खलु कृत्वा । अलं रुदित्वा ।

प्राचामित्युक्तेरुदीचां मते ल्युँट् । अलं रोदनेन ।

३-४-१९ उदीचां माङो व्यतीहारे ॥

अपमित्य याचते । उदीचामित्युक्तेः पक्षे-याचित्वा अपमयते ।

३-४-२० परावरयोगे च ॥

अप्राप्य नदीं पर्वतः । अतिक्रम्य पर्वतं स्थिता नदी ।

३-४-२१ **समानकर्तृकयोः पूर्वकाले** ॥२६

पठित्वाऽऽगच्छति ।

३-४-१४ कृत्या- धातोः (३-१-९१) कृत्यार्थे =कृत्यप्रत्ययार्थे, तवै...त्वनः=तवै केन् केन्य त्वन् प्रत्यया भवन्ति, छन्दसि (३-४-६) । आद्ययोरुदाहरणयोः १-१-३८ कृन्मे...इत्यव्ययत्वम् ।

३-४-१५ अव- कृत्यार्थे (३-४-१४) छन्दसि (३-४-६) अवचक्षे =अवपूर्वाच्चक्ष् धातोः, एश् प्रत्ययो निपात्यते । **नावचक्षे** नावख्यातव्यमित्यर्थः । प्राग्वदव्ययत्वम् ।

३-४-१६ भावलक्षणे =भावो लक्ष्यतेऽनेन तस्मिन्नर्थे वर्तमानेभ्यः, स्थेण्...निभ्यः= स्था इण् प्रभृतिभ्यो धातुभ्यः, तुमर्थे (३-४-९) छन्दसि (३-४-६) तोसुँन्=तोसुँन् प्रत्ययो भवति । उदाहरणेषु १-१-३९ क्त्वातो...इत्यव्ययत्वम् ।

३-४-१७ सृपि- भावलक्षणे (३-४-१६) तुमर्थे (३-४-९) सृपितृदोः=सृप् तृद् धातुभ्याम्, कसुँन्=कसुँन् प्रत्ययो भवति, छन्दसि (३-४-६) । प्राग्वदव्ययत्वम् ।

३-४-१८ अलं- प्रतिषेधयोः=प्रतिषेधवाचिनोः, अलंखल्वोः=अलम् खलु इत्येतयोरुपपदयोः, धातोः (३-१-९१) क्त्वा=क्त्वा प्रत्ययो भवति, प्राचाम्=प्राचामाचार्याणां मते । रुदित्वा १-२-८ रुद...इति कित्त्वम् ।

३-४-१९ उदी- व्यतीहारे=विनिमयेऽर्थे वर्तमानात्, माङः=मेङ् धातोः,क्त्वा (३-४-१८) उदीचाम्=उदीचामाचार्याणां मते । **अपमित्य याचते** पूर्वं याचते ततोऽपमयते इति विग्रहः । समासे ल्यपि ६-४-७० मय...इतीत्वे ६-१-६९ ह्रस्व...इति तुँक् । प्रत्युदाहरणे ३-४-२१ समा...इति क्त्वा ।

३-४-२० परावरशब्दयोः साकाङ्क्षत्वात् पूर्वपरशब्दावध्याह्रियेते । परावरयोगे =परेण पूर्वस्य अवरेण परस्य योगे गम्ये, धातोः (३-१-९१) क्त्वा (३-४-१८) । उदाहरणयोः आद्ये- परनदीयोगः पर्वतस्य । अन्त्ये अवरपर्वतयोगो नद्याः ।

३-४-२१ समा- ३-३-१०४ षिद्भिदा...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

३-१-९१ धातोः (क) ॥ ३-४-१८ अलं खल्वोः...प्राचां क्त्वा (ख) ॥ ३-४-२१ समानकर्तृकयोः पूर्वकाले (क) (ख) ॥ इति । समानकर्तृकयोः=तुल्यकर्तृकयोर्धात्वर्थयोर्मध्ये, पूर्वकाले =पूर्वकालवृत्तिक्रियायां वर्तमानात् (क्रिया-बोधकात्) (क)=धातोः, (ख)=क्त्वा=क्त्वाप्रत्ययो भवति । इत्यर्थमुपदिश्य पूर्वं पठति पश्चादागच्छति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-२२ आभीक्ष्ण्ये णमुँल् च ॥२३, २४

स्मारं स्मारं नमति शिवम्। स्मृत्वा स्मृत्वा।

३-४-२३ न यद्यनाकाङ्क्षे ॥

यदयं भुङ्क्ते ततः पठति। साकाङ्क्षे तु भवत्येव-यदयं भुक्त्वा व्रजति ततोऽधीते।

३-४-२४ विभाषाग्रेप्रथमपूर्वेषु ॥

अग्रेभोजं व्रजति। अग्रे भुक्त्वा व्रजति। प्रथमं भोजं व्रजति। प्रथमं भुक्त्वा व्रजति। पूर्वं भोजं व्रजति। पूर्वं भुक्त्वा व्रजति।

३-४-२५ कर्मण्याक्रोशे कृञः खमुँञ् ॥२८

चौरङ्कारमाक्रोशति। दस्युङ्कारमाक्रोशति।

३-४-२६ स्वादुमि णमुँल् ॥५८

स्वादुङ्कारं भुङ्क्ते। सम्पन्नङ्कारं भुङ्क्ते। अस्वाद्वीं स्वाद्वीं कृत्वा भुङ्क्ते-स्वादुङ्कारं भुङ्क्ते। वासरूपविधिना क्त्वाऽपि। स्वादुं कृत्वा भुङ्क्ते।

३-४-२७ अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ॥ २८

अन्यथाकारं भुङ्क्ते। एवङ्कारं भुङ्क्ते। कथंकारं भुङ्क्ते।

इति विग्रह-बोधन-पुरस्सरं लक्षणसमन्वयप्रसङ्गे प्रकृते पठ् धातोः, आ+गम् धातोश्च कर्ता समानः=एकः (श्यामः) अस्ति। पूर्वकालवृत्तिक्रिया च पठनक्रिया वर्तते। तेन पठ् धातोः क्त्वा प्रत्ययो भवति। इति बोधयित्वाऽनुबन्धमुक्तस्याऽऽर्धधातुकत्वादिडागम इत्युद्बोधनपुरस्सरं पठित्वा इति श्यामपाट्यां लिखित्वा छात्रान् बोधयेत्। यथा-यद्यपि अत्र कृदन्तत्वेन प्रातिपदिकत्वात् स्वादयः प्रत्यया उत्पद्यन्ते, तथापि तेषामव्ययात् परत्वेन २-४-८२ अव्य...इति लुग्भवति। तथाहि इति वदन् १-१-३९ क्त्वातो...सूत्रमुपदिशेत्।

३-४-२२ आभीक्ष्ण्ये =पौनः पुन्ये द्योत्ये, समानकर्तृकयोः+पूर्वकाले (३-४-२१) धातोः (३-१-९१) णमुँल्=णमुँल् प्रत्ययो भवति, क्त्वा (३-४-१८) च। ८-१-४ नित्य...इति द्वित्वम्। १-१-३८ कृन्मे...इत्यव्ययत्वम्।

३-४-२३ न य- यदि=यच्छब्दे उपपदे, न=क्त्वाणमुँलौ न भवतः, अनाकाङ्क्षे=पूर्वोत्तरक्रियावति वाक्येऽपरमनाकाङ्क्षति सति।

३-४-२४ विभा- अग्रे...र्वेषु=अग्रे प्रथम पूर्व शब्देषूपपदेषु, समानकर्तृकयोः+पूर्वकाले (३-४-२१) धातोः (३-१-९१) क्त्वा (३-४-१८) णमुँल् (३-४-२२) च। आभीक्ष्ण्ये इति तु नाऽत्राऽनुवर्तते। अप्राप्तविभाषेयम्। साधनपौर्वकाल्यविषया अग्रेप्रभृतयः। न तु क्रियापौर्वकाल्याः। एवञ्च 'अग्रे भुक्त्वा व्रजति' अन्येभ्यो भोक्तृभ्योऽग्रे भुक्त्वा व्रजतीत्यर्थः। अत्र काशिका- 'विभाषाग्रहणम् एताभ्यां मुक्ते लँडादयोऽपि यथा स्युः। अग्रे भुङ्क्ते ततो व्रजति। ननु च वासरूप इति भविष्यति। क्त्वाणमुँलौ यत्र सह विधीयेते तत्र वासरूपविधिर्नास्तीत्येतदनेन ज्ञाप्यते, तेनाभीक्ष्ण्ये लँडादयो न भवन्ति' इति। उदाहरणेषु समासस्तु न शङ्क्यः, २-२-२० अमै...इति नियमात्।

३-४-२५ कर्मणि=कर्मण्युपपदे, कृञः=कृञ् धातोः, खमुँञ्=खमुँञ् प्रत्ययो भवति, आक्रोशे=आक्रोशे गम्यमाने। चोरं कृत्वा आक्रोशति=चोरशब्दमुच्चार्य आक्रोशति। करोतिरत्रोच्चारणक्रियः। चोरशब्दोच्चारणमाक्रोशस्य सम्पादनार्थम्। नतु वस्तुतश्चौरः क्रियते। एवं दस्युङ्कारमित्यत्रापि बोध्यम्। उपपदसमासे विभक्तेर्लुकि ६-३-६७ अरु...इति मुँम्।

३-४-२६ स्वादुमि=स्वाद्वर्थेषूपपदेषु, समानकर्तृकयोः+पूर्वकाले (३-४-२१) कृञः (३-४-२५) णमुँल्=णमुँल् प्रत्ययो भवति, उपपदस्य मान्तत्वं च निपात्यते। खमुञि अनुवर्त्यमाने खित्त्वादेवोपपदस्य मुमागमेन मान्तत्वे सिद्धे णमुँल्विधानेनोपपदस्य मान्तत्वनिपातनात् स्त्रियामपि ४-१-४४ वोतो...इति ङीष् न भवति मान्तत्वेनोदन्तत्वाऽभावात्। तथा च्व्यन्तेऽपि मान्तत्वं सिध्यति। तत्र ७-४-२६ च्वौ च इति दीर्घश्च न।

३-४-२७ अन्य...थंसु=अन्यथादिषूपपदेषु, कृञः (३-४-२५) णमुल् (३-४-२६) सिद्धाप्रयोगश्चेत्=कृञ् प्रयोगानर्हश्चेत् (विशेषार्थानवगत्या व्यर्थप्रयोग इति भावः)। अन्यथाकारं भुङ्क्ते अन्यथा भुङ्क्ते इत्येवार्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थंकारं भुङ्क्ते। वासरूपविधिना क्त्वापि- अन्यथा कृत्वा भुङ्क्ते इत्यादि। सिद्धाप्रयोग इत्युक्तेर्नेह-शिरोऽन्यथा कृत्वा भुङ्क्ते।

३-४-२८ यथातथयोरसूयाप्रतिवचने॥

यथाकारमहं भोक्ष्ये तथाकारं किं तवाऽनेन। असूयाप्रतिवचने इत्युक्तेर्नेह-यथा कृत्वाऽहं भोक्ष्ये तथा त्वं द्रक्ष्यसि। सिद्धाप्रयोगे इत्येव। नेह-यथा कृत्वाऽहं शिरो भोक्ष्ये किं तवाऽनेन।

३-४-२९ **कर्मणि** दृशिविदोः साकल्ये॥३६

कन्यादर्शं वरयति। ब्राह्मणवेदं भोजयति।

३-४-३० यावति विन्दजीवोः॥

यावद्वेदं भुङ्क्ते। यावज्जीवमधीते।

३-४-३१ चर्मोदरयोः पूरेः॥३२

चर्मपूरं स्तृणाति। उदरपूरं भुङ्क्ते।

३-४-३२ **वर्षप्रमाण** उलोपश्चाऽस्याऽन्यतरस्याम्॥३३

गोष्पदप्रं वृष्टो देवः। गोष्पदपूरं वृष्टो देवः। अस्येत्युक्तेरुपपदोकारस्य लोपो न भवति। मूषिकाबिलप्रं मूषिकाविलपूरं वा वृष्टो देवः।

३-४-३३ चेले क्नोपेः॥

चेलक्नोपं वृष्टो देवः। वस्त्रक्नोपम्। वसनक्नोपम्।

३-४-३४ निमूलसमूलयोः कषः॥

निमूलकाषं कषति। समूलकाषं कषति। निमूलं समूलं कषतीत्यर्थः।

इतः प्रभृति ३-४-४५ उपमाने इति पर्यन्तेषु ३-४-४६ कषादिषु...इति सूत्रेण यथाविध्यनुप्रयोगः।

३-४-३५ शुष्कचूर्णरूक्षेषु पिषः॥

शुष्कपेषं पिनष्टि। चूर्णपेषम्। रूक्षपेषम्।

एवमन्येषूदाहरणेषु च बोध्यम्। प्रत्युदाहरणे कृधातोः प्रयोगाऽभावे शिरो भुङ्क्ते इत्यनिष्टोऽर्थः प्रतीयेत।

३-४-२८ यथातथयोः=यथा तथा इत्युपपदयोः, कृञः (३-४-२५) णमुँल् (३-४-२६) सिद्धाप्रयोगश्चेत् (३-४-२७) असूयाप्रतिवचने =असूयया प्रतिवचने गम्यमाने।

३-४-२९ कर्म-सकलस्य भावः साकल्यम्। अत्र सूत्रे विद् इत्यनेन ज्ञानलाभविचारणार्थकानां ग्रहणं न तु सत्तार्थकस्य तस्याऽकर्मकत्वात्। साकल्ये =साकल्यविशिष्टे, कर्मणि=कर्मणि उपपदे, दृशिविदोः=दृश्विद्भ्याम्, णमुँल् (३-४-२६)। उदाहरणयोः, आद्यस्य- या याः पश्यति ताः सर्वा वरयतीत्यर्थः। अन्त्यस्य- यं यं ब्राह्मणं जानाति लभते विचारयति वा तान् सर्वान् भोजयतीत्यर्थः।

३-४-३० यावति=यावच्छब्दे उपपदे, विन्दजीवोः=तौदादिकविद्धातोर्जीव्धातोश्च, णमुँल् (३-४-२६)। उदाहरणयोः क्रमशः यावल्लभते तावद् भुङ्क्ते। यावज्जीवति तावदधीते। इत्यर्थः।

३-४-३१ चर्मो- कर्मणि (३-४-२९)=कर्मणोः, चर्मोदरयोः=चर्म (न्) उदर इत्येतयोरुपपदयोः, पूरेः=पूरिधातोः, णमुँल् (३-४-२६)। पूरिरयं ण्यन्तः।

३-४-३२ वर्ष- कर्मणि (३-४-२९) पूरेः (३-४-३१) णमुँल् (३-४-२६) अस्य=पूरेः, अन्यतरस्याम्=वा, उलोपश्च=उकारलोपोऽपि भवति, वर्षप्रमाणे =समुदायेन वृष्टेरियत्तायां गम्यमानायाम्।

३-४-३३ चेले =चेलार्थके, कर्मणि (३-४-२९) क्नोपेः =क्नोपि धातोः, णमुँल् (३-४-२६) वर्षप्रमाणे (३-४-३२)। चेलम्=चैलम्=वस्त्रम्। क्नोपिः=क्नूयींशब्दे उन्दने च ण्यन्तः। णिचि ७-३-३६ अर्ति...इति पुँक्। ६-१-६४ लोपो...इति यलोपः...। ७-३-८६ पुँग...इति गुणः।

३-४-३४ निमू- कर्मणि (३-४-२९)=कर्मणोः,निमू...लयोः= निमूल-समूल-शब्दयोरुपपदयोः, कषः=कष्धातोः, णमुँल् (३-४-२६)।

३-४-३५ शुष्क- कर्मणि (३-४-२९)=कर्मसु, शुष्क....क्षेषु=शुष्क प्रभृतिषूपपदेषु, पिषः=पिष्धातोः, णमुँल् (३-४-२६)। उदाहरणानां शुष्कं पिनष्टीत्याद्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-३६ समूलाकृतजीवेषु हन्कृञ्ग्रहः ॥

समूलघातं हन्ति । अकृतकारं करोति । जीवग्राहं गृह्णाति ।

३-४-३७ करणे हनः ॥४०

पाणिघातं हन्ति । अत्र काशिका-पूर्वविप्रतिषेधेन हन्तेर्हिंसार्थस्यापि प्रत्ययोऽनेनैवेष्यते- असिघातं हन्ति । इति ।

३-४-३८ स्नेहने पिषः ॥

उदपेषं पिनष्टि । तैलपेषम् ।

३-४-३९ हस्ते वर्तिग्रहोः ॥

हस्तवर्तं वर्तयति । करवर्तम् । हस्तग्राहं गृह्णाति । करग्राहम् ।

३-४-४० स्वे पुषः ॥

स्वपोषं पुष्णाति । आत्मपोषम् । धनपोषम् । गोपोषम् ।

स्वशब्देन स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणम् ।

३-४-४१ अधिकरणे बन्धः ॥४२

चक्रबन्धं बध्नाति । कीलबन्धम् ।

३-४-४२ संज्ञायाम् ॥

चक्रबन्धं बध्नाति । मयूरिकाबन्धम् । अट्टालिकाबन्धम् ।

३-४-४३ कर्त्रोर्जीवपुरुषयोर्नशिवहोः ॥४५

जीवनाशं नश्यति । पुरुषवाहं वहति ।

३-४-४४ ऊर्ध्वे शुषिपूरोः ॥

ऊर्ध्वशोषं शुष्यति । ऊर्ध्वपूरं पूर्यते ।

३-४-४५ उपमाने कर्मणि च ॥

घृतनिधायं निहितं जलम् ।

अजकनाशं नष्टः ।

३-४-३६ समू- कर्मणि (३-४-२९)=कर्मसु, समू...वेषु= समूलप्रभृतिषूपपदेषु, हन्...ग्रहः=हन् कृञ् ग्रह्धातुभ्यः, णमुँल् (३-४-२६) । १-३-१० यथा...इति यथाक्रमम् । उदाहरणानां समूलं हन्तीत्याद्यर्थः । **जीवग्राहम्** जीवतीति जीवः ३-१-१३५ इगु...इति कः । तं गृह्णाति । जीवन्तं गृह्णातीत्यर्थः ।

३-४-३७ करणे =करणे उपपदे, हनः=हन् धातोः, णमुँल् (३-४-२६) ।

३-४-३८ स्नेहने =स्नेहनवाचिनि, करणे (३-४-३७) पिषः=पिष् धातोः, णमुँल् (३-४-२६) । उदपेषम् ६-३-५८ पेषं...इति उदकस्योदादेशः ।

३-४-३९ हस्ते =हस्तवाचिनि, करणे (३-४-३७) वग्रिहोः=वर्ति ग्रह् धातुभ्याम्, णमुँल् (३-४-२६) । वर्तिः-वृतु वर्तने ण्यन्तः ।

३-४-४० स्वे =स्वशब्दार्थवाचिनि, करणे ((३-४-३७) पुषः=पुष् धातोः, णमुँल् (३-४-२६) । स्वशब्द आत्मात्मीयज्ञातिधनवचनः ।

३-४-४१ अधिकरणे =अधिकरणे उपपदे, बन्धः=बन्ध् धातोः, णमुँल् (३-४-२६) ।

३-४-४२ संज्ञायाम्=संज्ञायां गम्यमानायाम्, बन्धः (३-४-४१) णमुँल् (३-४-२६) । अनधिकरणार्थोऽयमारम्भः । उदाहरणानि बन्धविशेषाणां नामानि ।

३-४-४३ कर्त्रोः=कर्तृवाचिनोः, जीवपुरुषयोः=जीवपुरुषशब्दयोरुपपदयोः, नशिवहोः=नश् वह् धातुभ्याम्, णमुँल् (३-४-२६) । उदाहरणयोः क्रमशः-जीवो नश्यति, पुरुषो वहतीत्यर्थः ।

३-४-४४ ऊर्ध्वे =कर्तृवाचिनि ऊर्ध्वशब्दे उपपदे, शुषिपूरोः=शुष् पूर् धातुभ्याम्, णमुँल् (३-४-२६) । पूर्वसूत्रादनुवर्तमानं कर्त्रोरिति द्विवचनान्तमपि उर्ध्वे इत्येकवचनान्तविशेष्यानुरोधेन एकवचनान्ताय कल्पते-कर्तरि=कर्तृवाचिनि, इति । उदाहरणयोः क्रमशो वृक्षादिरूर्ध्व एव तिष्ठन् शुष्यति । ऊर्ध्वमुख एव घटादिर्वर्षोदकादिना पूर्यत इत्यर्थः ।

३-४-४५ उपमाने,=उपमानवाचिनि, कर्मणि, कर्तरि (३-४-४३) चोपपदे, धातोः (३-१-९१) णमुँल् (३-४-२६) । **घृतनिधायम्** ७-३-३३ आतो...इति युँक् । घृतमिव निहितमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-४६ कषादिषु यथाविध्यनुप्रयोगः ॥

निमूल...(३-४-३४) सूत्रप्रभृतिषु तथैवोदाहृतानि ।

३-४-४७ **उपदंशस्तृतीयायाम्** ।५१

मूलकोपदंशं भुङ्क्ते । मूलकेनोपदंशम् । आर्द्रकोपदंशम् । आर्द्रकेणोपदंशम् ।

इतः प्रभृति २-२-२१ तृती...सूत्रेण विकल्पेन समासः ।

३-४-४८ हिंसार्थानां च समानकर्मकाणाम् ॥

दण्डोपघातं गाः कालयति । दण्डेनोपघातम् । समानकर्मकाणामित्युक्तेर्नेह-चोरं

दण्डेनोपहत्य गाः कालयति ।

३-४-४९ **सप्तम्यां** चोपपीडरुधकर्षः ॥५१

पार्श्वोपपीडं शेते । पार्श्वयोरुपपीडं पार्श्वाभ्यामुपपीडं वा । व्रजोपरोधं गाः स्थापयति । व्रजे उपरोधं व्रजेनोपरोधं वा । पाण्युपकर्षं धानाः संगृह्णाति । पाणावुपकर्षं पाणिनोपकर्षं वा ।

३-४-५० समासत्तौ ॥

केशग्राहं युध्यन्ते । केशेषु ग्राहं केशैर्ग्राहं वा ।

३-४-५१ प्रमाणे च ॥

द्व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति । द्व्यङ्गुले उत्कर्षं द्व्यङ्गुलेनोत्कर्षं वा । त्र्यङ्गुलोत्कर्षम् ।

३-४-५२ अपादाने **परीप्सायाम्** ॥५३

परीप्सा = त्वरा । शय्योत्थायं धावति । शय्याया उत्थायं वा । उखानिःसारं भक्तं भक्षयति । उखाया निःसारं वा । परीप्सायामित्युक्तेर्नेह-आसनादुत्थाय गच्छति ।

३-४-५३ **द्वितीयायां** च ॥५८

यष्टिग्राहं युध्यन्ते ।

३-४-४६ कषादिषु=३-४-३४ निमूलसमूलयोः कषः, इतिसूत्रप्रभृतिषु, यथाविधि=यस्माणणमुँल् विहितस्तस्यैव (णमुँलः प्रकृतेः) अनुप्रयोगः=पश्चात् प्रयोगो भवति । उदाहृतानि च तत्र तत्र तथैव ।

३-४-४७ उप- तृतीयायाम्=तृतीयान्ते उपपदे, उपदंशः=उपपूर्वकदंश्धातोः, णमुँल् (३-४-२६) । उदाहरणे मूलकादीनां भुजिं प्रति करणत्वात् तृतीयान्तत्वम् । उपदंशिं प्रति तु कर्मत्वम् । उपदंशिं प्रति कर्मत्वाऽभावे भुजिं प्रति करणत्वं न स्यात् । भुजिना शाब्द उपदंशिनाऽऽर्थोऽन्वयः । यदि तु शाब्दान्वये एव प्रत्ययोऽभिमतः स्यात् तर्हि करणे इत्येव ब्रूयान्न तु तृतीयायामिति ।

३-४-४८ हिंसा- तृतीयायाम् (३-४-४७) समानकर्मकाणाम्=अनुप्रयोगधातुभिस्तुल्यकर्मकेभ्यः, हिंसार्थानाम्=हिंसार्थकेभ्यो धातुभ्यः, णमुँल् (३-४-२६) ।

३-४-४९ सप्त- उपेत्यस्य प्रत्येकं सम्बन्धः । सप्तम्याम्=सप्तम्यन्ते, तृतीयायाम् (३-४-४७) च=तृतीयान्ते चोपपदे, उप...कर्षः=उपपूर्वकेभ्यः पीड् (पीडि) रुध् भौवादिककृष्धातुभ्यः, णमुँल् (३-४-२६) । कर्ष इति गुणघटितशपा निर्देशात् कृष् धातुर्भौवादिक इति ज्ञायते । सूत्रे तु पञ्चम्यर्थे प्रथमा बोध्या ।

३-४-५० समा- सप्तम्याम् (३-४-४९) तृतीयायाम् (३-४-४७) धातोः (३-१-९१) णमुँल् (३-४-२६) समासत्तौ=सन्निकर्षे गम्यमाने ।

३-४-५१ प्रमा- प्रमाणम्=आयामः, आयामस्तु प्रमाणं स्यात् । दैर्घ्यमिति यावत् । सप्तम्याम् (३-४-४९) तृतीयायाम् (३-४-४७) च, धातोः (३-१-९१) णमुँल् (३-४-२६) प्रमाणे =दैर्घ्ये गम्यमाने । द्व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति द्वयोरङ्गुल्योः समाहारः=द्व्यङ्गुलम् । ५-४-८६ तत्पु...इत्यच् । स्वल्पः खण्डः=खण्डिका । तां द्व्यङ्गुलेन परिच्छिद्य छिनत्तीत्यर्थः ।

३-४-५२ अपादाने =अपादाने उपपदे, धातोः (३-१-९१) णमुँल् (३-४-२६) परीप्सायाम्=त्वरायां गम्यमानायाम् ।

३-४-५३ द्वितीयायाम्=द्वितीयान्ते उपपदे, धातोः (३-१-९१) णमुँल् (३-४-२६) परीप्सायाम् (३-४-५२) । **यष्टिग्राहं युध्यन्ते** त्वरयाऽऽयुधमपि न प्रतीक्षन्ते यत्समीपे लभ्यते तदेव गृहीत्वा युध्यन्ते, इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-५४ स्वाङ्गेऽध्रुवे ॥५५

भ्रूविक्षेपं कथयति । अध्रुवे इत्युक्तेर्नेह-शिर उत्क्षिप्य कथयति ।

३-४-५५ परिक्लिश्यमाने च ॥

उरःपेषं युध्यन्ते । शिरःपेषम् ।

३-४-५६ विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ॥

गेहानुप्रवेशमास्ते । गेहं गेहमनुप्रवेशमास्ते । गेहमनुप्रवेशमनुप्रवेशमास्ते । गेहानुप्रपातमास्ते । गेहं गेहमनुप्रपातम् । गेहमनुप्रपातमनुप्रपातम् । गेहानुप्रपादमास्ते । गेहं गेहमनुप्रपादम् । गेहमनुप्रपादमनुप्रपादम् । गेहावस्कन्दमास्ते । गेहं गेहमवस्कन्दम् । गेहमवस्कन्दमवस्कन्दम् ।

३-४-५७ अस्यतितृषोः क्रियान्तरे कालेषु ॥

द्व्यहात्यासं गाः पाययति, द्व्यहमत्यासम् । द्व्यहतर्षं गाः पाययति, द्व्यहंतर्षम् । अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः ।

३-४-५८ नाम्न्यादिशिग्रहोः ॥

नामादेशमाचष्टे । नामग्राहमाचष्टे ।

३-४-५९ अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुँलौ ॥ ६०,६४

पुत्रस्ते जातः । किं तर्हि नीचैःकृत्य ब्रवीषि ? नीचैः कृत्वा, नीचैः कारम् । कन्या ते गर्भिणी जाता । किं तर्हि ? उच्चैः कृत्य ब्रवीषि ? उच्चैः कृत्वाः, उच्चैःकारम् ।

३-४-५४ स्वाङ्गे- ध्रुवम्=स्थिरम्=नित्यम् । तद्विरुद्धम्=अध्रुवम्=अस्थिरम्=अनित्यम् । यद्यपि शरीरस्य सर्वेऽप्यवयवा अनित्या एव । प्राणिनामेवाऽनित्यत्वात् । तथापि प्राण्यपेक्षमत्राऽनित्यं बोध्यम् । अर्थाद् यस्मिन्नङ्गे छिन्नेऽपि प्राणी न म्रियते तदध्रुवम् । यथा पाणिपादादि । तस्मिन् कदाचित् कारणवशेन च्छिन्नेऽपि प्राणिनां जीवनस्य दर्शनात् । ततश्च स्फुटमेवेदं यद् यस्मिँश्छिन्ने प्राणी म्रियते तद् ध्रुवमिति । यथा शिरःप्रभृति । तस्य प्राणिनि सदा सत्त्वात् । अर्थात् तदभावे जीवनस्याऽप्यसंभवात् । अध्रुवे =अनित्ये, स्वाङ्गे =स्वाङ्गवाचिनि, द्वितीयायाम् (३-४-५३)=द्वितीयान्ते उपपदे, धातोः (३-१-९१) णमुँल् (३-४-२६) ।

३-४-५५ परिक्लिश्यमाने =सर्वतः पीड्यमाने, स्वाङ्गे (३-४-५४) द्वितीयायाम् (३-४-५३) धातोः (३-१-९१) णमुँल् (३-४-२६) ध्रुवार्थोऽयमारम्भः ।

३-४-५६ विशि- द्वितीयायाम् (३-४-५३) विशि...स्कन्दाम्=विशप्रभृतिभ्यो धातुभ्यः, णमुँल् (३-४-२६) व्याप्य...नयोः=व्याप्यमाने आसेव्यमाने चार्थे गम्यमाने । विश्यादि-क्रियादिभिः पदार्थानां (गेहादीनां) साकल्येन सम्बन्धो व्याप्तिः । सा च द्रव्ये गम्यते । आसेवा=आभीक्ष्ण्यम् । तच्च क्रियायां गम्यते । समासेन व्याप्त्यासेवयोरुक्तत्वात् ८-१-४ नित्य....सूत्रेण न द्वित्वम् । यद्यप्येतयोरर्थयोः समासो न विधीयते, तथापि शब्दशक्तिस्वाभाव्यात् तेनैतयोरभिधानम् । असमासे तु व्याप्तौ द्रव्यवचनस्य, आभीक्ष्ण्ये णमुँलन्तस्य द्वित्वं भवत्येव । ३-४-२२ आभी...इत्यनेनैव णमुँलि सिद्धे आसेवायां पुनरत्र विधानमुपपदसंज्ञार्थम् । तेन २-२-१ तृती...समासविकल्पः सिध्यति । पूर्वेण णमुँलि तूपपदत्वाभावे समासो न स्यात् ।

३-४-५७ अस्य- कालेषु =कालवाचिषु, द्वितीयायाम् (२-४-५३)= द्वितीयान्तेषूपपदेषु, क्रियान्तरे=क्रियाव्यवधायकेऽर्थे वर्तमानाभ्याम्, अस्यतितृषोः =अस्यतितृषिभ्याम्, णमुँल् (३-४-२६) । द्व्यहमत्यस्य, द्व्यहं तृषित्वा गाः पाययतीति विग्रहः ।

३-४-५८ नाम्नि- द्वितीयायाम् (३-४-५३) =द्वितीयान्ते, नाम्नि =नाम (न्) शब्दे उपपदे, आदिशिग्रहोः =आङ्पूर्वकदिशेर्ग्रहेश्च, णमुँल् (३-४-२६) । नाम आदिश्य आचष्टे । नाम गृहीत्वा आचष्टे । इति विग्रहः ।

३-४-५९ अव्यये=अव्यये उपपदे, अयथा...ख्याने=अयथाभिप्रेताख्याने गम्यमाने, कृञः=कृञ् धातोः, क्त्वा णमुँलौ=क्त्वा णमुँल्प्रत्ययौ भवतः । प्रियस्य नीचैरप्रियस्योच्चैः कथनम्=अयथाभिप्रेताख्यानम् । वासरूपविधिना क्त्वाप्रत्यये सिद्धे पुनः क्त्वाग्रहणं २-२-२२ क्त्वा च इति पाक्षिकसमासार्थम् । क्त्वा चेत्युक्तौ चकारेण प्रकृतणमुँलोऽनुकर्षे सिद्धे पुनर्णमुँल्ग्रहणमुत्तरत्राऽनुवृत्त्यर्थम् । अन्यथा चानुकृष्टस्योत्तरत्रानुवृत्तिर्न स्यात् । **नीचैः कृत्वा** समासाऽभावे ल्यबभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-६० तिर्यच्यपवर्गे ॥

तिर्यक् कृत्य गतः, तिर्यक्कृत्वा, तिर्यक्कारम् । समाप्य गत इत्यर्थः । अपवर्ग इत्युक्तेर्नेह-काष्ठं तिर्यक् कृत्वा गतः । पार्श्वतः कृत्वेत्यर्थः ।

३-४-६१ स्वाङ्गे तस्प्रत्यये **कृभ्वोः** ॥६२

मुखतःकृत्य गतः । मुखतः कृत्वा, मुखतःकारम् । मुखतोभूय तिष्ठति । मुखतोभूत्वा, मुखतोभावम् ।

३-४-६२ नाधार्थप्रत्यये च्व्यर्थे ॥

अनाना नाना कृत्वा गतः = नानाकृत्य गतः, नानाकृत्वा गतः, नानाकारं गतः । विनाकृत्य, विना कृत्वा, विनाकारम् । नानाभूय, नानाभूत्वा, नानाभावम् । द्विधाकृत्य, द्विधा कृत्वा, द्विधाकारम् । द्विधाभूय, द्विधा भूत्वा, द्विधाभावम् । द्वैधंकृत्य, द्वैधं कृत्वा, द्वैधंकारम् । द्वैधंभूय, द्वैधं भूत्वा, द्वैधंभावम् ।

३-४-६३ तूष्णीमि **भुवः** ॥६४

तूष्णींभूय वसति, तूष्णीं भूत्वा, तूष्णींभावम् ।

३-४-६४ अन्वच्यानुलोम्ये ॥

अन्वग्भूयास्ते, अन्वग्भूत्वा, अन्वग्भावम् । आनुलोम्ये इत्युक्तेर्नेह-
अन्वग्भूत्वा तिष्ठति । पृष्ठतो भूत्वेत्यर्थः ।

३-४-६५ शक-धृष-ज्ञा-ग्ला-घट-रभ-लभ-क्रम-सहार्हास्त्यर्थेषु **तुमुँन्** ॥६६

शक्नोति भोक्तुम् । इत्यादि ।

३-४-६६ पर्याप्तिवचनेष्वलमर्थेषु ॥

पर्याप्तो भोक्तुम् । अलं भोक्तुम् । भोक्तुं समर्थ इत्यर्थः । पर्याप्तिवचनेष्वित्युक्तेर्नेह-अलं कृत्वा । अलमर्थेष्वित्युक्तेर्नेह-पर्याप्तं भुङ्क्ते ।

३-४-६७ **कर्तरि** कृत् ॥६९

पाठकः । पठिता ।

३-४-६८ भव्य-गेय-प्रवचनीयोपस्था-नीयजन्याप्लाव्यापात्या वा ॥

भवतीति-भव्यः । भव्यमनेन वा । गायतीति-गेयो माणवकः साम्नाम् । गेयानि सामानि माणवकेन वा ।

३-४-६० तिर्यचि=तिर्यक्शब्दे उपपदे, कृञः+क्त्वाणमुँलौ (३-४-५९) अपवर्गे =समाप्तौ गम्यमानायाम् ।

३-४-६१ स्वाङ्गे- तस्प्रत्यये =तस्प्रत्ययान्ते, स्वाङ्गे =स्वाङ्गवाचिनि शब्दे उपपदे, कृभ्वोः=कृभूधातुभ्याम्, क्त्वाणमुँलौ (३-४-५९) । तस् प्रत्ययो यस्मादिति बहुव्रीहिः । यथासंख्यमत्र नेष्यते, अस्वरितत्वादिति-काशिका ।

३-४-६२ नाधार्थप्रत्यये =नाधाऽर्थकप्रत्ययान्ते, च्व्यर्थे=च्व्यर्थे वर्तमाने उपपदे, कृभ्वोः (३-४-६१) क्त्वाणमुँलौ (३-४-५९) । **नाधार्थप्रत्यये**-नाधार्थः प्रत्ययो यस्मादिति प्राग्वद् बहुव्रीहिः ।

३-४-६३ तूष्णीमि=तूष्णींशब्दे उपपदे, भुवः=भूधातोः, क्त्वाणमुँलौ (३-४-५९) । भूग्रहणं कृञो निवृत्त्यर्थम् ।

३-४-६४ अन्वचि=अन्वक्शब्दे उपपदे, भुवः (३-४-६३) क्त्वाणमुँलौ (३-४-५९), आनुलोम्ये=अनुकूलत्वे गम्यमाने । अन्वग्भूयास्ते अनुकूलो भूत्वा तिष्ठतीत्यर्थः ।

३-४-६५ शक...र्थेषु=शकादिषूपपदेषु, धातोः (३-१-९१) तुमुँन्=तुमुँन् प्रत्ययो भवति । अस्त्यर्थाः=अस्ति-भवति विद्यतयः । अक्रियार्थोपपदार्थोऽयमारम्भः । क्रियार्थोपपदे तु ३-३-१० तुमुँ...इत्येव सिद्धम् ।

३-४-६६ पर्या- अलमर्थेषु=समर्थार्थेषु, पर्याप्तिवचनेषु=परिपूर्णतावाचिषूपपदेषु, धातोः (३-१-९१) तुमुँन् (३-४-६५) ।

३-४-६७ कर्त- ३-१-१३३ ण्वुँल्तृचौ-सूत्रानन्तरं सूत्रमिदं पाठचम् । कृत्=कृत् (संज्ञकः) प्रत्ययः, कर्तरि=कर्त्रर्थे भवति । इत्यर्थमुपदिश्य प्रकृते वुँ प्रत्ययः कर्त्रर्थे जातः । अर्थात् 'वुँ' इत्यस्यार्थः 'कर्ता' इति बोध्य इतिच्छात्रानुपदिशेत् । अथ ७-१-१ युँवोरनाकौ-सूत्रमुपदिशेत् ।

३-४-६८ भव्य...पात्याः=भव्य गेय प्रवचनीय उपस्थानीय जन्य आप्लाव्य आपात्य इत्येते, कर्तरि (३-४-६७) वा =विभाषया, निपात्यन्ते । ३-४-७० तयो...इत्यस्य वा बाधकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-६९ लः कर्मणि च भावे चाऽकर्मकेभ्यः ॥ | पठति । पठचते । भवति । भूयते ।

३-४-६९ लःक- ३-२-१२३ वर्तमाने..सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)
३-४-६७ कर्तरि कृत् ॥

३-४-६९ लः कर्मणि (क) च भावे (क) च अकर्मकेभ्यः ॥ इति।

एतत्सूत्रार्थोपदेशे ऽधोनिर्दष्टरूपेणच्छात्रा बोधयितव्याः । यथा-अयि वत्साः ? 'वारिशब्दो जले वर्तते' इत्यक्तौ वारिशब्दस्याऽर्थो जलमिति ज्ञायते । 'वह्निशब्दो ऽग्नौ वर्तते' इत्युक्तौ वह्निशब्दस्यार्थो ऽग्निरिति ज्ञायते । इति । तथैव प्रकृतसूत्रार्थेऽपि भावो बोध्यो भवतीति बोधनपुरस्सरं सामान्यरूपेण सूत्रार्थ उपदेश्यः । लः=लकाराः, कर्मणि=कर्मार्थे, (क)=कर्तरि, च भवन्ति । इति । एवमुक्तौ लकाराणामर्थः कर्म, कर्ता चेति ज्ञायते, इतिच्छात्रा बोधयितव्याः । अथ सूत्राग्रिमांशस्याऽर्थ उपदेश्यः । अकर्मकेभ्यः =अकर्मकेभ्यो धातुभ्यो विहिताः, लः=लकाराः, भावे, (क)=कर्तरि च, भवन्ति । इति । अकर्मक-धातुभ्यो विहितानां लकाराणामर्थो यद् वा भावो यद् वा कर्ता भवतीति तात्पर्यमिति बोधयितव्यम् । अत्र श्यामपाटीप्रयोगो यथा-

धातुः

सकर्मकः	अकर्मकः
लकारस्यार्थः	लकारस्यार्थः
कर्ता वा कर्म	कर्ता वा भावः

वत्साः? अर्थाद् धातवो द्विविधा भवन्ति । सकर्मका अकर्मकाश्च । येषां कर्म संभवति ते सकर्मकाः । यथा- पठ् पच् लिख् इत्यादयो धातवः सकर्मकाः । तेषां खलु कर्म संभवति । यथा- व्याकरणं पठति । भक्तं पचति । अनुवादं लिखति । इत्यादि । येषां कर्म न संभवति ते धातवोऽकर्मकाः । यथा हस्, क्रीड्, भू, इत्यादयो धातवोऽकर्मकाः । तेषां खलु कर्म न संभवति । अयि वत्साः ? के धातवःसकर्मकाः ? के चाऽकर्मका ? इति ज्ञानायाऽत्यन्तं सरलतम उपायोऽस्ति । स चैतत्सूत्रार्थोपदेशानन्तरमुपदेक्ष्यते । साम्प्रतं सूत्रार्थं सम्यगवगच्छत । शृणुत वत्साः ? अकर्मकेभ्यः=अकर्मकधातुभ्यो विहिताः, लः =लकाराः, भावे, (क)=कर्तरि च भवन्ति । इति द्वितीय-वाक्यार्थस्य सूत्रेणोपदेशात्, अकर्मकधातुभ्यो विहितानां लकाराणामर्थो भावः कर्ता वेति तात्पर्यं स्फुटमेव जातम् । प्रथमवाक्यार्थद्वारा सूत्रेणोपदिश्यमानार्थस्तु -लः=लकाराः, कर्मणि (क)=कर्तरि चेति । अर्थाल्लकाराणामर्थः कर्म, वा कर्तेति तु ज्ञायते । परन्तु केभ्यो धातुभ्यो (सकर्मकेभ्योऽकर्मकेभ्यो वा) विहिता लकारा इति तु नोपदिश्यते सूत्रेण । तेन पूर्वोक्तः 'कर्म वा कर्ता' इत्यर्थः किं सकर्मकेभ्यो धातुभ्यो विहितानां लकाराणामर्थः ? अथवा ऽकर्मकेभ्यो विहितानाम् ? इति सन्देहो जागर्ति चेत् उच्यते। वत्साः ? सम्यगवधत्त । नास्त्यत्र सन्देहः । यतो धातवो द्विविधा भवन्ति, सकर्मका अकर्मकाश्चेत्युक्तमेवाऽधुनैव पूर्वम् । येषां कर्म भवति ते सर्मकाः । येषां कर्म न भवति ते ऽकर्मका इत्यधुनैवोक्तमुपरि । अतः प्रथमवाक्यार्थे 'लकाराः कर्मणि भवन्ति' इत्युक्त्यैव सकर्मकेभ्यो विहिता लकारा इत्यर्थो ज्ञायत एव । यतः, न खलु अकर्मकधातूनां कर्म भवति । येषां कर्म नास्ति तेभ्यो विहितो लकारः कर्मणि कथं भवेत् ? न खलु कश्चिदपि शशशृङ्गे पुस्तक-प्रसेविकामवलम्ब्य पठितुमागन्तुं शक्नोति । यतः शशशृङ्गमेव न भवति । कथं तत्राऽवलम्बयेत् । अतः स्फुटं सूत्रार्थः फलति - लः=सकर्मकेभ्यो धातुभ्यो विहिता लकाराः, कर्मणि=कर्मार्थे (क)=कर्तरि च=कर्त्रर्थे च भवन्ति । अकर्मकेभ्यः=अकर्मकेभ्यो धातुभ्यो विहिताः, (लः=लकाराः) भावे=भावार्थे, (क) =कर्तरि+च =कर्त्रर्थे च भवन्ति । इति । श्यामपाटी दृश्यताम् । अलमतिविस्तरेण ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्साहोद्भावनम्

वत्साः ? प्रक्रियेयं लम्बा वर्तते । यूयं मिच्छथ किम् ? न मिच्छथ । यद्यपि प्रक्रियेयं लम्बा वर्तते । तथापि एकस्मिन् प्रयोगे सम्यग् ज्ञाते सर्वापि तिङन्त-प्रक्रिया सरलतमा भविष्यतीति वदता शिक्षकेण मध्ये मध्ये छात्राणामुत्साह उद्भावनीयः । अथ अयि वत्साः ? अकर्मकेभ्यो भावे कर्तरि च, सकर्मकेभ्यः कर्मणि कर्तरि च भवन्तीति कथनेन लकाराणामर्थाः कर्ता, कर्म, भावश्चेति निष्कर्षो निःसरति । तत्र भावो नाम धात्वर्थः । अर्थात् अकर्मकधातुभ्यो विहितस्य लकारस्याऽर्थो भावो भवति नाम धातोर्योऽर्थः स एव लकारस्यापीति । यथा हस् धातुरकर्मकः । तस्माद् भावे लकारो विहितश्चेद् यथा धातोरर्थो हसनं तथैव हस्+ल् इत्यत्र लकारस्यापि हसनमेवार्थः । एषोऽपि विषयः सरल एव । यदा तु सकर्मकेभ्यः कर्मणि लकारो विधीयते तदा लकारस्याऽप्यर्थः कर्म भवतीति तु ज्ञायते । परन्तु तत् कर्म किम् ? एवमेव द्विविधेभ्य एव (सकर्मकेभ्यः, अकर्मकेभ्यश्च) कर्तरि लकारो विधीयते । तत्र लकारस्यार्थः कर्तेति तु ज्ञायते । परन्तु स कर्ता कः ? इति तु न ज्ञायते । अतः कर्तृ (कर्तेति) पदार्थं कर्म पदार्थं च साम्प्रतमुपदिशामि, इति च्छात्राः सावधानाः कार्याः । अयि वत्साः ? यः कार्यं करोति स कर्ता इत्युच्यते । अवधीयताम् । यः कार्यं करोति, स कर्ता नाम यो भारं वहति, यो वा हलेन क्षेत्रं कृषति, इत्यादिरीत्या यः प्रयासेनैव साध्यं साधयति स एव कर्तेति तु न मन्तव्यम् । किन्तु प्रयासेन सुखेन वा यः कार्यं साधयति स कर्तेति मन्तव्यम् । यथा यः सशर्करं दुग्धं पिबति, सोऽपि कर्ता, यतः स पानकार्यं करोति । मातरं स्मरति इत्यत्र यः स्मरति स कर्ता, यतः स स्मरणकार्यं करोति । एवमेव यः शय्यायां सुखं स्वपिति सोऽपि कर्ता, यतः स शयनकार्यं करोति । बालकः स्वपिति इत्यत्र बालकः कर्ता वर्तते, यतः स शयनकार्यं करोति । नदी वहति इत्यत्र नदी कर्त्री वर्तते, यतः सा वहन (स्यन्दन) कार्यं करोति । घटः स्फुटति इत्यत्र घटः कर्ता वर्तते, यतः स स्फुटन (विशरण) कार्यं करोति । इत्यादिरीत्या कर्तृपदार्थः (कर्ता) बोधयितव्यः । (१-४-५४ स्वतन्त्र .....सूत्रं तु साम्प्रतं नोपदेश्यम् । भृत्यो भारं वहतीत्यत्र भृत्यः स्वतन्त्रो वर्तते ऽतः स कर्तेति बोधालोको न साम्प्रतं छात्रमस्तिष्के स्फुटं प्रकाशते । यतः सति स्वतन्त्रे कथं परेषां भारं वहेदिति शङ्का छात्राणां मस्तिष्कमाक्राम्यत्येव) अथ यत् क्रियते तत् कर्म । यथा बालको दुग्धं पिबति इत्यत्र दुग्धपानकार्यं बालकेन क्रियते=बालकेन दुग्धं पीयते । दुग्धपानं क्रियते (दुग्धं पीयते) अतो दुग्धं कर्म । व्याकरणं पठन्ति च्छात्राः, इत्यत्र छात्रैर्व्याकरणपठनकार्यं क्रियते (व्याकरणं पठ्यते =पठनं क्रियते) अतो व्याकरणं कर्म)

सम्यग् ज्ञानम्

अयि वत्साः ? कर्मविषयकं सम्यग् ज्ञानं तु अधोनिर्दिष्टरूपेण सम्पादयितुं शक्यते । कस्मिंश्चिदपि वाक्ये उच्चार्यमाणे कस्यचन नवीनवस्तुन उत्पत्तिः प्रतीयते । यतो न कश्चन तादृशो वाक्यप्रयोगो यत्र कस्यचनापि नवीनवस्तुन उत्पत्तिर्न प्रतीयेत । यथा 'बालको हसति' इति श्रुतौ मुखविकासस्योत्पत्तिः प्रतीयते । 'सूदो भक्तं पचति' इति श्रुतौ तण्डुलेषु विक्लत्तिः (मृदुता) उत्पन्नेति प्रतीयते । 'छात्रः पुस्तकं गृह्णाति' इति श्रुतौ छात्रहस्त-पुस्तकयोः संयोगोत्पत्तिः प्रतीयते 'पुत्रः पण्डितो भवति' इति श्रुतौ पुत्रे पण्डितत्यस्योत्पत्तिः प्रतीयते । यन्नवीनमुत्पद्यते वैयाकरणास्तत् फलमित्याहुः । तत् खलु फलं यदि कर्तरि भवति (वसति) तदा धातुरकर्मकः । न तत्र कर्म संभवति । यथा बालको हसति, पुत्रः पण्डितो भवति, इत्यत्र हस् धातुर्भूधातुश्च अकर्मकौ । मुखविकासस्य बालके (कर्तरि) पाण्डित्यस्य च पुत्रे (कर्तरि) विद्यमानत्वात् । यदि कर्तुरन्यत्र फलं भवति (वसति) तदा यत्र फलं वसति तदेव (कर्तृभिन्नं तत्फलाश्रयीभूतं) कर्मेति निश्चीयतां धातुश्च तदा सकर्मकः । यथा 'सूदो भक्तं पचति' इत्यत्र पच् धातुः सकर्मकः । फलभूताया विक्लित्तेः (मृदुतायाः) सूदात् कर्तुरन्यत्र भक्ते विद्यमानत्वात् । फभूताया विक्लित्तेः (मृदृतायाः) आश्रयीभूतं भक्तं च कर्म । छात्रः पुस्तकं गृह्णाति, इत्यत्र ग्रह् धातुः सकर्मकः । संयोगस्य =फलस्य कर्तृ (छात्र) भिन्ने पुस्तके विद्यमान त्वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलस्य =संयोगस्यआश्रयीभूतं पुस्तकं कर्म । वत्साः ? अवधीयताम् ? यद्यपि यथा पुस्तकं संयोगस्याश्रयस्तथैव च्छात्रोऽपि संयोगस्याश्रयो वर्तते, तथापि छात्रः कर्ता ऽस्ति । कर्ता तु कर्म न भवति । यदि कर्तृमात्रे (कर्तर्येव) फलं वसेत्, तदा धातुरकर्मकः स्यात् । यदि कर्तृभिन्ने क्वचित् फलं वसति चेत् तदा कर्तरि वसेद् वा न वसेत् तस्य चर्चा न कार्या । कर्तृभिन्नः फलाश्रयः कर्म भवति धातुश्च तदा सकर्मक इति निर्णेयम् । इति ।

उत्साहोद्भावनम्

छात्राः पाठं भारायमाणं नाऽनुभवन्त्विति शिक्षकेण ते वक्तव्याः - वत्साः ? सम्यग्ज्ञानविषये सार एष यत्, यद् वस्तु नवीनमुत्पद्यते तत् फलमुच्यते । तत्फलं यत्र वसति तत् कर्म । तदा धातुः सकर्मकः । तत् फलं कर्तृमात्रे वसति चेत् तदा धातुरकर्मकः । तत्र कर्म न भवति । फलं कर्तरि, अन्यत्र (कर्तृभिन्ने) च वसति चेत्, अन्यत् (कर्तृभिन्नं) कर्म भवति धातुश्च तदा सकर्मक एवेति । अत एव व्यापाराश्रयः कर्ता, फलाश्रयः कर्मेति वैयाकरण-व्यवहारे प्रसिद्धिः । वत्साः ? कस्मिँश्चिदपि कार्ये कर्तव्ये यत्नोऽपेक्ष्यते । स च यत्नः कस्मिँश्चित् कार्ये कर्तव्ये स्वल्पोऽपेक्ष्यते कस्मिँश्चिच्च महान् । यथा गुरुभारवहने यत्नो महानपेक्ष्यते । दुग्धादिपानाय दुग्धादि-कंस (कंसस्तु पानभाजनम्) ग्रहणे तु यत्नः स्वल्पोऽपेक्ष्यते । सर्वथा यत्नं विना तु दुग्धादि-कंसादिकमपि नोत्थापयितुं शक्यते । अत एव रुजार्दिताः कंसादिकमपि नोत्थाययितुं शक्नुवन्ति, तेषां शक्त्यभावेन यत्नाऽसंभवात् । यत्नं विना कोऽपि किमपि कार्यं सम्पादयितुं न शक्नोति । अर्थात् यः कार्यं करोति, सोऽवश्यं यत्नं करोति । स एव यत्नो व्यापार इत्युच्यते । (इत्थं सरलेनोपायेन बोधयितुं वालोपलालनामनुसरन्नपि शिक्षकः स्वयं तु जानाति, इच्छति, यतते, इत्याद्यनुरोधेन वस्तुतो व्यापारो भावनाऽपरपर्यायो यत्नस्तु तथा नेत्यवदधत् कृञोऽकर्मकताऽऽपत्तेर्नहि यत्नोऽर्थ इष्यते इति सिद्धान्तविरुद्धः सँस्कारश्छात्रमस्तिष्के न प्ररोहेदिति धिया "इत्यवधीयतां साम्प्रतं, वस्तुतस्तु पश्चात् पुनश्चाऽत्र विषयेऽवेतव्याकरणस्वरसाः स्वयमालोडच तत्त्वं निश्चेष्यथ" इत्युपदिश्य पुनः प्रकृतमनुसरेत्) स च व्यापारः सदैव कर्तरि भवति (वसति) अत एव 'व्यापाराश्रयः कर्ता इतिं' वैयाकरणव्यवहारः सर्वथा सङ्गच्छते । अतो व्यापारःकुत्रास्ति ? कर्तरि वा ऽन्यत्रेति विचारो न क्रियते । फलं तु क्वचित् कर्तरि वसति, क्वचिदन्यत्र (कर्तृभिन्ने) वसति । इति प्रतिपादितमेव पूर्वम् । अतः फलं कुत्रास्ति ? कर्तरि वा ऽन्यत्रेति विचार आवश्यको भवति । यदि तु फलं कर्तरि वसति, तदा व्यापारः फलं चैकत्र स्त इति ज्ञायते । यदि फलमन्यत्र (कर्तृभिन्ने) वसति, तदा फलं व्यापारश्च पृथक् पृथग् वसत इति ज्ञायते । अथ-अधिकरणम्, आश्रयः आसनम्, एते पर्यायाः समानम्=अभिन्नम्=एकम् अधिरणम्=आश्रयः=आसनं येषां ते समानाधिकरणाः=समानाश्रयाः=समानासनाः=अभिन्नाधिकरणाः=अभिन्नाश्रयाः=अभिन्नासनाः=एकाधिरणाः=एकाश्रयाः= एकासना इत्युच्यन्ते । विभिन्नम्=पृथक् पृथक्, अधिकरणं येषां ते विभिन्नाधिकरणाः=व्यधिकरणाः =विभिन्नाश्रयाः=व्याश्रयाः=विभिन्नासनाः=पृथक्पृथगासना इत्युच्यन्ते । अत्र श्यामपाटीप्रयोगो यथा-

१- क ख ग घ

२- क ग ख घ

३- क ख ग घ

४- क ख ग घ

अत्र प्रथमपङ्क्तौ क ख वर्णौ समानाधिकरणौ । ग घ वर्णौ च समानाधिरणौ । एकस्मिन्नेवाऽधिकरणे=आसने वर्तमानत्वात् । द्वितीयपङ्क्तौ क ख वर्णौ व्यधिकरणौ ग घ वर्णौ च व्यधिकरणौ । भिन्ने ऽधिकरणे=आसने वर्तमानत्वात् । क ग वर्णौ समानाधिकरणौ । ख घ वर्णौ च समानाधिकरणौ । एकस्मिन्नधिकरणे=आसने वर्तमानत्वात् । तृतीयपङ्क्तौ क ख ग घ एते सर्वे वर्णाः समानाधिकरणाः । एकस्मिन्नेवाऽधिकरणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-७० तयोरेव कृत्य-क्त-खलर्थाः ॥ इषत्करः कटो भवता। ईषदाढचम्भवं भवता। चेतव्यः। एधितव्यम्। पठितम्। क्रीडितम्।

वर्तमानत्वात्। चतुर्थपङ्क्तौ क ख ग घ एते सर्वे वर्णा व्यधिकरणाः। भिन्ने भिन्ने ऽधिकरणे=आसने वर्तमानत्वात्। इत्यादिरीत्या समानाधिकरण-व्यधिकरण-पदार्थ-बोधन-क्रमे शिक्षकः स्फुटप्रतिपत्तये स्वयं पाठचमानान्, एकस्मिन्नासने वसतश्छात्रान् दर्शयन् "यूयं समानाधिकरणाः स्थ" इति, भिन्नासने वसतश्छात्रान् दर्शयन् 'यूयं व्यधिकरणाः स्थ' इति च बोधयेत्। एवं समानाधिकरण-व्यधिकरण-पदार्थं बोधयित्वा शिक्षकः फल-व्यापार-विषयिकां चर्चां पुनरुद्भावयन् वैयाकरणकुले प्रसिद्धे सकर्मका ऽकर्मक-विवेक-सरलोपाय-वचने उपदिशेत्। "फलसमानाधिकरण-व्यापारवाचकत्वमकर्मकत्वम्" फलव्यधिकरण-व्यापारवाचकत्वं सकर्मकत्वम्" इति। अवधेयम् ? व्यापारस्तु सर्वदैव कर्तरि भवति (वसति) नैष विषयो विचारणीयो ऽस्ति। अतः फलं यदि कर्तरि वसेत् तदा व्यापारः फलसमानाधिकरणो भवति। फलं यदि अन्यत्र कर्तृभिन्ने वसेत् तदा व्यापारः फल-व्यधिकरणो भवतीति स्फुटमेव। अन्यत् पूर्वमेव प्रपञ्चितम्। प्रकृतमनुसरामः-श्यामः पठति इत्यत्र पठ् धातुः सकर्मकः। तेन 'पठ्+ल्' इत्यत्र पठ् धातोर्विहितस्य लकारस्यार्थः कर्ता वा कर्म इति स्पष्टमेव। अत्र श्यामपाटी-प्रयोगो यथा- पठ्+ल् कर्ता (अर्थः) पठ्+ल् कर्म (अर्थः) इति। इत्थं श्यामपाट्यां दर्शयता शिक्षकेण च्छात्राः कथनीया यद्, वत्साः? लकारस्यार्थः 'कर्म' इति स्वीकार-वेलायां कीदृशी प्रक्रिया भवेत् सा पश्चादुपदेक्ष्यते। साम्प्रतं लकारस्यार्थः कर्तेति स्वीकारे कदृशी प्रक्रिया भवति सोपदिश्यते, इति। अथ वत्साः ? 'पठ्+ल्' इत्यत्र 'पठ्' इत्यस्यार्थः पठनम्, 'ल्' इत्यस्यार्थः कर्ता, इति न विस्मरेत। इतः परं तदनुसारिणी प्रक्रियोपदिश्यत इति वदता शिक्षकेण ३-४-७७ लस्य ३-४-७८ तिप् तस् .. .. सूत्रे उपदेश्ये।

३-४-७० तयो - ८-२-४५ ओदितश्च-सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामाटी-प्रयोगो यथा -

(क) (ख) (ग)

३-४-६९ लः कर्मणि च भावे च अकर्मकेभ्यः ३-४-७० तयोः=(ख)+(क) एव कृत्यक्तखलर्थाः ॥ इति। अत्र प्रथमं पूर्व =(३-४-६९ लः क....) सूत्रे सविश्लेषणं विशदं बोधितं विषयमुद्बोध्यैव प्रकृतसूत्रार्थं स्फुटं बोधयेत्। कृत्य-क्त- खलर्थाः =कृत्य (संज्ञक)-प्रत्यय-क्तप्रत्यय-खलर्थ-प्रत्ययाः, तयोः=(ख)+(क) एव=भावकर्मणोरेव, अर्थात् (क)=सकर्मकेभ्यः कर्मणि एव, (ग)=अकर्मकेभ्यः, (ख)=भावे, एव भवन्ति। इत्यर्थमुपदिश्य ३-४-६७ कर्तृ....सूत्रं बाध्यतेऽत्र। भावकर्मणोरेव प्रत्यया भवन्तीति भावं स्फुटं बोधयेत्। यथा पठ् धातुः सकर्मकः। तेन अपाठि इति विग्रहे तस्माद् विहितः क्तप्रत्ययः कर्मार्थे भवति। पठितः। पठिता। पठितम्। जीव् धातुरकर्मकः। तेन अजीवि, इति विग्रहे तस्माद् विहितः क्तप्रत्ययो भावे भवति जीवितम्। इति। अथ शिक्षकेणाऽधोनिर्दिष्टरीत्या छात्रा विशेषरूपेण बोधयितव्याः। यथा-वत्साः ? तिङन्ते कतमः पुरुषो भवेदिति निर्णयाय यथा कर्त्रर्थे लकारे विहिते सति कर्ता, कर्मार्थे लकारे विहिते सति च कर्म विचार्येते। तथैव कृदन्ते कतमल्लिङ्गं भवेदिति निर्णयाय कर्त्रर्थे कृत्प्रत्यये सति कर्ता, कर्मार्थे कृत् प्रत्यये सति कर्म विचार्येते। अर्थात् कर्त्रर्थे कृत्प्रत्यये कर्ता यस्मिँल्लिङ्गे वर्तते, कृदन्तं क्रियापदमपि तस्मिँल्लिङ्गे भवति। कर्मार्थे कृत्प्रत्यये सति कर्म यस्मिँल्लिङ्गे भवति, कृदन्तं क्रियापदमपि तस्मिँल्लिङ्गे भवति इति। अथ "व्याकरणशिक्षण-मुख्यप्रयोजनं साधुशब्दज्ञानम्" इति मन्यमानः शिक्षकोऽधो निर्दिष्टरूपेण श्यामपाट्यां लिखित्वोदाहरेत्। यथा-

(क) श्यामः अष्टाध्यायीम् पठितवान्। (ख) रमा व्याकरणम् पठितवती। (ग) छात्रवृन्दम् कोशम् पठितवत्। (घ) श्यामेन अष्टाध्यायी पठिता। (ङ) रमया व्याकरणम् पठितम्। (च) छात्रवृन्देन कोशः पठितः। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-७१ आदिकर्मणि क्तः कर्तरि च ॥७२

प्रकृतः कटं देवदत्तः। प्रकृतः कटो देवदत्तेन। प्रहसितो देवदत्तः। प्रहसितं देवदत्तेन।

३-४-७२ गत्यर्थाऽकर्मकश्लिषशीङ्स्था-सवसजनरुहजीर्यतिभ्यश्च ॥

ग्रामं गतः, ग्रामो गतः। आसितो भवान्, आसितं भवता। उपश्लिष्टो गुरुं भवान्, उपश्लिष्टो गुरुर्भवता। अधिशयितः खट्वाम्, अधिशयिता खट्वा। अधिशयितं भवता। उपस्थितो गुरुं भवान्, उपस्थितो गुरुर्भवता। उपस्थितं भवता। उपासितो गुरुं भवान्, उपासितो गुरुर्भवता। उपासितं भवता। अनूषितो गुरुं भवान्, अनूषितो गुरुर्भवता। अनूषितं भवता। पुत्रमनुजाता पुत्री, पुत्रोऽनुजातः पुत्र्या। आरूढो वृक्षं भवान्, आरूढो वृक्षो भवता। आरूढं भवता। अनुजीर्णो विश्वं भवान्, अनुजीर्णो विश्वो भवता। अनुजीर्णं भवता।

अत्र (क) (ख) (ग) वाक्येषु कृत् (क्तवतुँ) प्रत्ययः कर्त्रर्थकः। तत्र (क) वाक्ये कर्तृवाचकः शब्दः पुंलिङ्गे वर्तते। तेन क्रियापदमपि पुंलिङ्गकम्। (ख) वाक्ये कर्तृ (कर्त्री) वाचकः शब्दः स्त्रीलिङ्गे वर्तते। तेन क्रियापदमपि स्त्रीलिङ्गकम्। (ग) वाक्ये कर्तृवाचकः शब्दो नपुंसकलिङ्गे वर्तते। तेन क्रियापदमपि नपुंसकलिङ्गकम्। (घ) (ङ) (च) वाक्येषु कृत् (क्त) प्रत्ययः कर्मार्थकः। तत्र (घ) वाक्ये कर्मवाचकः शब्दः स्त्रीलिङ्गे वर्तते। ते क्रियापदमपि स्त्रीलिङ्गकम्। (ङ) वाक्ये कर्मवाचकः शब्दो नपुंसकलिङ्गे वर्तते। तेन क्रियापदमपि नुंसकलिङ्गकम् (च) वाक्ये कर्मवाचकः शब्दः पुंलिङ्गे वर्तते। तेन क्रियापदमपि पुंलिङ्गकम्। इति। अथ २-३-१८ कर्तृ...सूत्रार्थ-विवरणक्रमे बोधितं विषयमुद्बोध्याऽधोनिर्दिष्ट-रूपेण बोधयेत्। यथा वत्साः ? भावे प्रत्यये तु क्रियापदं सर्वदैव नपुंसकलिङ्गे भवति। एकवचनान्तमेव च सर्वदा। यथा श्यामेन हसितम्। छात्रैः क्रीडितम्। अप्सरोभिर्नृत्तम्। इत्यादि। इति। अथ २-३-२ कर्म ..... २-३-१८ कर्तृ... सूत्रे सत्यामावश्यकतायामुद्बोध्य निष्ठाप्रत्ययेऽपि कर्तर्यनुक्ते तृतीया कर्मण्यनुक्ते द्वीतीया भिक्तिर्भवतीति स्फुटं बोधयेत्। अथ शिक्षकः २-३-६५ कर्तृ.....सूत्रेण षष्ठी कथं न भवति ? यतः, निष्ठाऽपि तु कृत्प्रत्ययः। इतिच्छात्राणामाकाङ्क्षामुद्भाव्य षष्ठ्याः प्रतिषेधकं सूत्रं वर्तते, इति भणन् २-३-६९ न लोकाव्यय.... सूत्रमुपदिशेत्।

३-४-७१ आदिकर्मणि=आदिकर्मणि विहितः, क्तः=क्तप्रत्ययः, कर्तरि=कर्त्रर्थे, भावे+कर्मणि (३-४-६९) च, भवति। उदाहरणेषु ३-२-१०२ निष्ठा- सूत्रस्थेन आदिकर्मणि....इति वार्तिकेन क्तः।

३-४-७२ गत्य- ३-२-१८७ ञीतःक्तः- सूत्रानन्तरं सूत्रमिदं पाठचम्। गत्यर्था...जीर्यतिभ्यः= गत्यर्थकेभ्योऽकर्मकेभ्यः श्लिषादिभ्यश्च विहितः,क्तः (३-४-७१)=क्तप्रत्ययः, कर्तरि, (३-४-७१)=कर्त्रर्थे,=तयोः (३-४-७०)+च=भावकर्मणोश्च भवति। अर्थात् सर्वेभ्योऽकर्मकेभ्यः, सकर्मकेषु गत्यर्थेभ्यः श्लिषादिभ्यश्च विहितः क्तप्रत्ययः कर्तर्यपि भवति। पक्षेऽकर्मकेभ्यो भावे सकर्मकेभ्यः कर्मणि भवतीति बोधयेत्। अथोदाहरणे गम् धातुः सकर्मकोऽपि गत्यर्थः। अतस्तस्माद् विहितः क्तः कर्तरि कर्मणि च जातः। आस् धातुरकर्मकः। अतस्तस्माद् विहितः क्तः कर्तरि भावे च जातः। उदाहृतं च तथैव मूले। इत्युपदिशेत्।

अथ कृत्यप्रत्ययोपदेशः

अथ कृत्यप्रत्ययानुपदिदिक्षुः शिक्षकः ३-१-९५ कृत्याः ३-१-१३२ चित्या ...सूत्रे दर्शयन्नधोनिर्दिष्टरूपेणच्छात्रानुपदिशेत्। वत्साः ? एतत्सूत्रद्वय-मध्यपातिनः प्रत्ययाः कृत्यसंज्ञका भवन्ति। तथा हि, इति भणन् ३-१-९५ कृत्याः-सूत्रमुपदिशेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-७३ दाशगोघ्नौ सम्प्रदाने ॥

दाशन्त्यस्मै-दाशः । गाम् = वाचम् = आगम्यताम् आस्यताम् इत्यादिरूपाम्, हन्ति = उच्चारयत्यस्मै-गोघ्नोऽतिथिः ।

३-४-७४ भीमादयोऽपादाने ॥

बिभेत्यस्मादिति-भीमः ।

३-४-७५ ताभ्यामन्यत्रोणादयः ॥

वृत्तं तदिति-वर्त्म ।

३-४-७६ क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ॥

मुकुन्दस्यासितमिदमिदं यातं रमापतेः ।
भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः ॥

पक्षे यथाप्राप्तम् । भुक्ता ब्राह्मणा इत्यादिषु तु अर्श आद्यच् बोध्यः ।

३-४-७७ लस्य ॥

३-४-७८ तिप्-तस्-झि-सिप्-थस्-थ-मिब्-वस्-मस्-तातां-झ-थासाथां-ध्वमिड्-वहि-महिङ् ॥

३-४-७९ टित आत्मनेपदानां टेरे ॥८०

एधते । पठ्यते ।

३-४-७३ दाश- दाशगोघ्नौ=दाश गोघ्न इत्येतौ, सम्प्रदाने= सम्प्रदानेऽर्थे, भवतः । दाशः पचाद्यच् । **गोघ्नः** गोशब्दपूर्वकाद् हन्धातोष्टक् प्रत्ययो निपात्यते । ६-४-९८ गम.... इत्युपधालोपः । ७-३-५४ हो हन्ते...इति कुत्वम् ।

३-४-७४ भीमादयः=भीमप्रभृतयः, अपादाने=अपादानेऽर्थे भवन्ति । **भीमः** भीधातोरौणादिको मक् प्रत्ययः ।

३-४-७५ ताभ्या- उणादयः, ताभ्याम्=अपादानसम्प्रदानाभ्याम्, अन्यत्र=अन्यस्मिन् कारके, भवन्ति ।

३-४-७६ क्तोऽधि- ध्रौव्य.... र्थेभ्यः=स्थैर्य-गति-भोजनार्थकेभ्यो धातुभ्यो विहितः, क्तः=क्तप्रत्ययः, अधिकरणे=अधिकरणकारके, भावे+कर्मणि (३-४-६९) च भवति । अकर्मकेभ्यो भावे, सकर्मकेभ्यः कर्मणि, इति भावः ।

३-४-७७ लस्य+३-४-७८ तिप्तस्- ३-४-६९ लःकर्मणि च... सूत्रानन्तरं सूत्रे इमे पाठ्ये । लस्य=लकारस्य स्थाने, तिप्....महिङ्=

तिप्	तस्	झि	त	आताम्	झ
सिप्	थस्	थ	थास्	आथाम्	ध्वम्
पिप्	वस्	मस्	इट्	वहि	महिङ्

एते आदेशा भवन्ति । इत्यर्थ उपदेश्यः । पठ्+ल् इत्यवस्थायाम् एकस्य लकारस्य स्थाने, एते आदेशाः प्राप्ताः । अतोऽत्र श्यामाटीद्वारा बोधनं सुकरं यथा-

पठ्+तिप्	पठ्+तस्	पठ्+झि	पठ्+त	पठ्+आताम्	पठ्+झ
पठ्+सिप्	पठ्+थस्	पठ्+थ	पठ्+थास्	पठ्+आथाम्	पठ्+ध्वम्
पठ्+मिप्	पठ्+वस्	पठ्+मस्	पठ्+इट्	पठ्+वहि	पठ्+महिङ्

इति । ईदृशी प्रक्रियास्थितिर्जाता । अथ शिक्षकेणच्छात्रा अधोनिर्दिष्टरूपेण बोधयितव्याः । यथा-अयि वत्साः ? व्यवहार-सौविध्याय नवीनानामुत्पन्नानां बालानामेकादशेऽह्नि नामकर्म क्रियते । अन्येषां वस्तूनामपि नामानि भवन्ति । यथा वस्त्रेषु परिधेयम्, उपसंव्यानम्, शिरस्त्राणम्, शिरस्त्रम्, कटिबन्धः, परिकरः । एवमेव व्याकरणेऽपि प्रक्रियासौविध्याय नामानि (संज्ञाः) क्रियन्ते । अतः प्रकृतेऽपि नाम (संज्ञा) उपदिश्यते, इत्युपदिशता शिक्षकेण १-४-९८ लः परस्मै... १-४-९९ तङाना... सूत्रे उपदेश्ये ।

३-४-७९ टित-१-१-६३ अचोऽन्त्या... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी-प्रयोगो यथा- ३-४-
(क)
७७ लस्य ३-४-७९ टित (क) आत्मनेपदानां टेरे ॥ इति । टितः=टकारेत्संज्ञकस्य, (क)=लस्य=लकारस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-८० थासः से ॥	एधते । पठ्यसे ।

स्थाने जातानाम्, आत्मनेपदानाम्=आत्मनेपदसम्बन्धिनः, टेः=टि(संज्ञकवर्ण) स्थाने, ए=एकारोदेशो भवति । इत्यर्थः । प्रकृते लँट् प्रत्यये टकारस्येत्संज्ञा जाता । तेन, आत्मनेपदम् ('त' इति) टकारेत्संज्ञकलकारस्य स्थाने जातमस्ति । अतः, टेः ('त' इत्यस्याऽकारस्य) स्थाने, एकारो जातः । पठ्यते ।

विशेषः-

अत्र शिक्षकेण विचारणीयं यत्, छात्राः, 'टि' इति बुद्धवन्तो न वा ? इति । यदि न बुद्धवन्तस्तदाऽधोनिर्दिष्टरूपेण बोधयितव्याः । यथा-वत्साः ? उक्तमेव पूर्वम्, अचां मध्ये योऽन्त्यः स आदिर्यस्य, तत्, टि इति । यथा-मनस् इत्यत्र अचौ द्वौ स्तः । श्यामपाटी-प्रयोगोऽत्र यथा-मनस्=म्+अ+न्+अ+स् अनयोः श्यामपाट्यां निर्दिष्टयोर्द्वयोरचो (अकारयो) मध्ये, अन्त्यः अच् नकारोत्तरवर्ती अकारो वर्तते, इति शिक्षको भणन् अङ्गुल्या दर्शयेत् । स च अकारःकस्य आदौ वर्तते ? अस् भागस्य आदौ वर्तते । अतः मनस् इत्यत्र अस् भागः टि भवति । एवम् आताम् इत्यत्र अचौ द्वौ स्तः । तयोर्मध्येऽन्त्यस्तकारोत्तरवर्ती आकारो वर्तते । स च आकार आम् भागस्य आदौ वर्तते । अत आताम् इत्यत्र आम् भागः, टि भवति । अर्थात् अन्तिमो वर्णः स्वरोऽस्ति चेत् स स्वरः, टि भवति । अन्तिमो वर्णो हल् अस्ति चेत्, हलवर्णात् पूर्वतो यत्र स्वरोऽस्ति तत्स्वरसहितः परभागः टि भवति । ध्वम् इत्यत्र अम् भागः, टि भवति । वहि इत्यत्र 'इ मात्रं' टि (अत्र शिक्षकेण व्यपदेशिवद्भावोऽवधेयो मनसा) भवति । इत्यादि । यदि त्वत्रच्छात्राः सन्दिहयुः - 'आताम् इत्यत्र, अचां मध्येऽन्त्यस्तकारोत्तरवर्ती आकारो वर्तते' इति युक्तम् । परन्तु स आकार आम्भागस्य आदिरिति तु न युक्तम् । यतः, स तु मकारस्य आदिरस्ति, इति । तदाऽधोनिर्दिष्ट-दृष्टान्तेनच्छात्रा बोधयितव्याः । यथा-वत्साः ? "परिहितवस्त्रा जनाः सभायां प्रविष्टाः" इति श्रुतौ सभायां जनाः प्रविष्टाश्चेद् वस्त्राणि फालयित्वा प्रविष्टा इति न प्रतीयते । किन्तु वस्त्रेण वेष्टिता एव प्रविष्टा इति प्रतीयते । तथैव अन्त्यः, अच्, आदिर्यस्य इति श्रुतौ समुदायाद् आद्यवर्णो न त्यज्यते । अर्थाद् आद्यवर्णसहित एव समुदायो गृह्यते । अतः प्रकृते आम् इत्यत्र आकार आम्-भागस्य आदिरिति विचार्य न तु मकारस्यादिरिति । अचोऽन्त्यादि टि-सूत्रे अन्त्यादि इत्यत्र तद्गुणसंविज्ञानो बहुव्रीहिरिति शिक्षकेणाऽवधेयम् ।

आताम्-

छात्रैर्व्याकरणानुवादौ पठ्येते इति वक्तव्ये प्रकृते कर्मणी (व्याकरणानुवादौ) द्वे स्तः । तिङोऽर्थश्च कर्म वर्तते । अर्थात् तिङा कर्म बोधनीयम् (कर्मणी बोधनीये) अतो द्विवचनम् (आताम्) भवति । शेष-प्रक्रिया-यक् प्रत्ययावधि, 'पठ्यते' इत्यत्रेवेति ब्रुवता शिक्षकेण पठ्+आताम् इत्यवधि प्रक्रिया श्रोतव्या । ततस्तां स्थितिं श्यामपाट्यां लिखित्वा शिक्षकः १-२-४ सार्वधातुक... सूत्रमुपदिशेत् ।

३-४-८० थासः ६-१-६४ लोपो....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- ३-४-७७

(क) (ख)

लस्य ॥ ३-४-७९ टित आत्मनेपदानां टेरे ॥ ३-४-८० (ख)(क) थासः से ॥ इति । (ख)+(क)=टितो लस्य=टिल्लकारसम्बन्धिनः, थासः=थासः स्थाने, से=से भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयश्छात्रैः कारयितव्यः । त्वं भण्यसे ।

आथाम्

युवाम् (रामश्यामौ) भण्येथे, इति वक्तव्ये प्रकृते युष्मच्छब्दः कर्म बोधयति । तिङपि कर्म बोधयति । अतो युष्मच्छब्दस्तिङ् च समानाधिकरणौ । तेन १-४-१०४ युष्म.... सूत्रं प्रवर्तते । कर्मणी (रामश्यामौ) द्वे स्तः । अतः १-४-२२ द्व्येक...सूत्रेण द्विवचनं (आथाम्) भवति । शेष-प्रक्रिया पठ्येते, इत्यत्रेव । भण्येथे इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वम्-

यूयम् (रामकृष्णश्यामाः) भण्यध्वे । इति वक्तव्ये युष्मच्छब्दस्तिङ् च कर्म बोधयतः । अत उभौ समानाधिकरणौ । तेन १-४-१०४ युष्म...सूत्रं प्रवर्तते । कर्माणि (रामकृष्णश्यामाः) च बहूनि सन्ति । तेन १-४-२१ बहु....सूत्रेण बहुवचनं (ध्वं) भवति । शेषप्रक्रिया 'पठ्यते' इत्यत्रेव । भण्यध्वे ।

इट्-

अहम् (जनैः) भण्ये । इति वक्तव्ये 'भण्ये' इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते-प्रकृतेऽस्मच्छब्दस्तिङ् च कर्म बोधयतः । अतोऽस्मच्छब्दस्तिङ् च समानाधिकरणौ स्तः । तेन प्रकृते १-४-१०६ अस्म...सूत्रं प्रवर्तते । कर्म च (अहम्) एकमस्ति । तेन १-४-२२ द्व्येक...सूत्रेण, एकवचनं (इट्) भवति । अनुबन्धे छात्रैः फालिते 'अट्+इ' इति श्यामपाट्यां लिखित्वा पठचते इत्यत्रेव छात्रैः कथ्यमानं प्रक्रियाक्रमं शृण्वता शिक्षकेण अच+ए इत्यवस्थायाम् ६-१-९४ अतो....सूत्रमुद्बोधयता छात्रैरुच्यमाना प्रक्रिया श्रोतव्या । भण्ये । इति ।

वहि-

'आवाम् (देवदत्तयज्ञदत्तौ) भण्यावहे' इति वक्तव्ये भण्यावहे इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते-प्रकृतेऽस्मच्छब्दस्तिङ् च कर्म बोधयतः । तेन तौ (अस्मच्छब्दस्तिङ् च) समानाधिकरणौ स्तः । तेन १-४-१०६ अस्म....सूत्रं प्रवर्तते । कर्मणी च द्वे (अवाम्) स्तः । तेन १-४-२२ द्व्येक....सूत्रेण द्विवचनं (वहि) भवति । शेष प्रक्रियायां 'पठ्यते' इत्यत्रेवच्छात्रैः साध्यमानायां अच+वहि इत्यवस्थायां शिक्षकेण ७-३-१०१ अतो.... सूत्रमुद्बोधनीयम् । अथ ३-४-७९ टित....सूत्र-समन्वयश्छात्रैः क्रियमाणः श्रोतव्यः । भण्यावहे । इति ।

महिङ्-

वयम् (देवदत्त-यज्ञदत्त-विष्णुमित्राः) भण्यामहे, इति वक्तव्ये 'भण्यामहे' इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते-प्रकृते कर्माणि (देवदत्त-यज्ञदत्त-विष्णुमित्राः) बहूनि सन्ति । तेन १-४-२१ बहु....सूत्रेण बहुवचनं (महिङ्) भवति । अनुबन्धश्च ङकारो गच्छति । शेषप्रक्रियां 'भण्यावहे' इत्यत्रेवच्छात्रैः साध्यमानां शिक्षकः शृणुयात् । भण्यामहे । इति । एवं पठ् लभ् नम् व्रज्, नद्, पच् प्रभृति-धातूनामपि प्रक्रिया ज्ञेया ।

अत्यन्तमवधेयम्-

अथ शिक्षकेणाऽत्यन्तमवधेयं यत्, १-४-१०४ युष्म...सूत्रे समुपदिष्टः श्यामशब्दः कर्ता नास्ति, किन्तु श्यामशब्दस्यार्थ एव कर्ताऽस्ति, इत्यादि विषयश्छात्रैः सम्यगवहितो न वा ? इति । यदि नावहितस्तर्हि स विषयः पुनरुद्बोधनीयः । तत्प्रसङ्गे एव कर्मविषयेऽप्यधोनिर्दिष्टरूपेण बोधनीयम् । यथा-अयि वत्साः ? 'अहं जलं पिबामि' इत्यस्मिन् वाक्ये 'अहम्' इति कर्तृपदम्, 'जलम्', इति कर्मपदम् 'पिबामि' इति क्रियापदम् । परन्तु 'अहम्' इति पदम् (शब्द) एव कर्ता नास्ति, तथा 'जलम्' इति कर्मपदम् (शब्द) एव कर्म नास्ति । किन्तु हस्तपादाद्यवयववान् कर्ताऽस्ति । तं च 'अहम्' इति पदम् (अस्मच्छब्दो) बोधयति । तेन 'अहम्' इति कर्तृपदम्=कर्तृबोधकं पदमुच्यते । तथैव यत् स्यन्दते तत् कर्मास्ति । तच्च कर्म 'जलम्' इति (जलशब्दो) बोधयति । अतो 'जलम्' इति कर्मपदम्=कर्मबोधकं पदमुच्यते । इति । अथाऽधस्तनानि वाक्यानिच्छात्रैः शोधयितव्यानि- । आवां भणामः । वयं भणावः । यूयं भणन्ति । त्वं भणति । छात्रो व्याकरणं पठसि । अहं नमामः । त्वं किं पठति । वयं व्याकरणं पठथ । वयं व्याकरणं पठन्ति । अथाऽधो निर्दिष्टानि वाक्यानिच्छात्रैः शोधयितव्यानि- । अस्माभिस्त्वं भण्यामहे । त्वया वयं भण्यसे । आवाभ्यां छात्रौ भण्यावहे । छात्रेण वयं भण्यते । अस्माभिर्व्याकरणं पठ्यामहे । इत्यादिभिर्वाक्यैः कर्तृवाच्य-कर्मवाच्यविषये छात्रान् परीक्ष्य शिक्षक उत्तीर्णानेवच्छात्रानग्रिमविषयमुपदिशेत् । यदवधि कर्तृवाच्य-कर्मवाच्य-विषये छात्रप्रतिभा न स्फुरति, तदवधि अग्रिमविषयो विषमिव भवेत् । अतोऽयं विषयः सम्यगवगमयितव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-८१ लिँट्स्तझयोरेशिरेच् ॥८२ रुरुधे । रुरुधिरे । ३-४-८२ परस्मैपदानां णलतुसुस्थल	थुसणल्वमाः ॥८४ बभूव । बभूवतुः । बभूवुः । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ।

कर्तृ-कर्म-विभक्तिः-

अथ शिक्षकोऽधोनिर्दिष्टानि वाक्यानि श्यामपाट्यां लिखेत् । यथा-

कर्तृवाच्यानि	**कर्मवाच्यानि**
१(क) अहं कोशं पठामि	१(ख) मया कोशः पठचते
२(क) त्वं कोशं पठसि	२(ख) त्वया कोशः पठचते
३(क) छात्राः कोशं पठन्ति	३(ख) छात्रैः कोशः पठचते
४(क) वयं कोशं पठामः	४(ख) अस्माभिः कोशः पठचते
५(क) वयं त्वां भणामः	५(ख) अस्माभिस्त्वं भण्यसे
६(क) यूयमस्मान् भणथ	६(ख) युष्माभिर्वयं भण्यामहे । इति ।

अथ शिक्षक उपरितनानि वाक्यानि दर्शयन् इति भणेद् यत्, अत्र (क) वाक्येषु कर्तृपदानि प्रथमान्तानि, कर्मपदानि च द्वितीयान्तानि । (ख) वाक्येषु च कर्तृपदानि तृतीयान्तानि, कर्मवाक्यानि प्रथमान्तानि सन्ति । अर्थात् तिङोऽर्थो यदा कर्ताऽस्ति, तदा कर्तृपदानि प्रथमान्तानि । तिङऽर्थो यदा कर्माऽस्ति तदा कर्मपदानि प्रथमान्तानि सन्ति । अतस्तिङ् यमर्थं (कर्तारं कर्म वा) बोधयति, तद्वाचकानि पदानि प्रथमान्तानि भवन्ति । इति स्फुटं प्रतीयते । किन्तु यदा तिङ् कर्तारं न बोधयति, तदा कर्तृपदानि तृतीयान्तानि, यदा च तिङ् कर्म न बोधयति तदा कर्मपदानि द्वितीयान्तानि च कथं भवन्तीति साम्प्रतमुपदिशामि । इति । पूर्वोक्तोपदेशक्रमे-२-३-१ अनभिहिते... २-३-२ कर्मणि... सूत्रे उपदिशेत् ।

३-४-८१ लिँट ७-२-१३ कृ-सृ-भृ.... सूत्रान्तरं सूत्रमिदं पाठ्यम् । लिँटः=लिट्सम्बन्धिनः, तझयोः=त झ इत्यनयोः स्थाने, एशिरेच्=एश् इरेच् इत्येतौ आदेशौ भवतः । इत्यर्थमुपदिश्य लक्षण-समन्वयक्रमे १-३-१० यथा.... सूत्रम् १-१-५४ अने... सूत्रं चोद्बोध्य प्रकृतादेशयोः प्रथमः शित्वाद् द्वितीयोऽनेकाल्त्वात् सर्वादेशौ इति बोधयित्वा, रुरुधे । रुरुधाते । रुरुधिरे । रुरुधिषे । रुरुधाथे । रुरुधिध्वे । रुरुधे । रुरुधिवहे । रुरुधिमहे । रूपाणीमानिच्छात्रैरुच्यमानानि शिक्षकः शृणुयात् । इत्थमनिटोऽपि धातवो लिँटि सेटो भवन्तीति शिक्षयन् प्रसङ्गाच्च लभ्धातो रूपाणि साधयतेतिच्छात्रान् परीक्षेत । छात्रेभ्यो यथार्थमुत्तरेऽनागते शिक्षको मध्ये मध्ये साहाय्यं ददच्छात्रैरेव साधयेत् । लेभे । लेभाते । लेभिरे । लेभिषे । लेभाथे । लेभिध्वे । लेभे । लेभिवहे । लेभिमहे । इति । अथ तप् धातुरुपदेश्यः । तत्र प्रथमं शिक्षकश्छात्रान् बोधयेत् । वत्साः ? यद्यप्ययं धातुरपि अनुदात्तः (अनिट्) इति तु यूयं जानीथैव । तथापि ७-२-१३ कृसृ.... सूत्रोक्तेन क्रादिनियमेन वमयोरिड् भवति । अन्यत् सर्वं पठ्धाताविवेत्युपदिशन्, तताप । तेपतुः । तेपुः । इति रूपाणिच्छात्रेषु साधितवत्सु, सिपि साम्प्रतं त्यज्यतामित्युपदिशन्, थसादिषु-तेपथुः । तेप । तताप, ततप । तेपिव । तेपिम । इति रूपाणिच्छात्रैः साध्यमानानि शृणुयात् । अथ वत्साः ? सिपि तु विशेषो वर्तते, इति भणन्, 'तप्+थ' इति श्यामपाट्यां लिखित्वा क्रादिनियमादिट् सम्भाव्यते, इत्यवधिच्छात्रान् परीक्ष्य ७-२-६२ उपदेशे... सूत्रमुपदिशेत् ।

३-४-८२ पर ३-४-११५ लिँट् च-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामाटी-प्रयोगो यथा ३-४-८१ (क)

लिँटः तझयोरेशिरेच् ॥ ३-४-८२ (क) परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ॥ इति । (क)=लिँटः=लिँट् सम्बन्धिनाम्, परस्मैपदानाम्=तिप् तस् झि सिप् थस् थ मिप् वस् मस् (३-४-७८ तिप्त... सूत्रात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-८३ विदो लँटो वा ॥८४

वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्वः । विद्मः । पक्षे-वेत्ति । वित्तः । विदन्ति । वेत्सि । वित्थः । वित्थ । वेद्मि । विद्वः । विद्मः ।

३-४-८४ ब्रुवः पञ्चानामादित आहो ब्रुवः ॥

आह । आहतुः । आहुः । आत्थ । आहथुः । पक्षे- ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रवीषि । ब्रूथः ।

३-४-८५ लोँटो लङ्वत् ॥९३

भवताम् । भवतम् । भवत । भवाव । भवाम ।

३-४-८६ एरुः॥

पठतु । हिन्योरुत्वं न, उकारोच्चारणसामर्थ्यात् । पुनीहि । पठानि ।

३-४-८७ सेर्ह्यपिच्च ॥८८

याहि । ब्रूहि ।

तिङोऽनुवृत्तेः । कथमन्यथा यथासंख्यं स्यात् ? क्वसुना समं स्थानिनां दशत्वेन आदेशानां च नवत्वेन समसंख्याभङ्गापतेः) इत्येतेषां स्थाने, णलतुसुस्थलथुसणल्वमाः=णल् अतुस् उस् थल् अथुस् अ णल् व म इत्येते आदेशा भवन्ति । इत्यर्थमुपदिश्य लक्षणसमन्वयमनुबन्धफालनञ्चच्छात्रैः कारयित्वा भू+अ इति श्यामपाट्यां लिखित्वा ६-४-८८ भुवो...सूत्रमुद्बोध्य 'भूव्+अ' इति श्यामपाट्यां लिखित्वा ६-१-८ लिँटि...सूत्रमुपदिशेत् ।

३-४-८३ विदो- पूर्वसूत्रं सर्वमनुवर्तते । विदः=विद्धातोर्विहितस्य, लँटः=लँट् सम्बन्धिनः, वा=प्राग्वद् वा । अत्र विदँ ज्ञाने इत्यादादिकस्यैव ग्रहणं नान्येषां व्याख्यानात् ।

३-४-८४ ब्रुवः=ब्रूधातोर्विहितस्य, लँटः (३-४-८३) आदितः पञ्चानाम्=तिबादीनां पञ्चानाम् स्थाने, वा (३-४-८३) =विकल्पेन णलादयः पञ्च भवन्ति (तत्सन्नियोगेन) ब्रुवः=ब्रूधातोः स्थाने, आहँः=आहँ (अनुबन्धलोपे आह्) इत्यादेशश्च भवति । आन्तरतम्यादाद्याः पञ्चैव णलादयो भवन्ति समानार्थत्वात् । नाऽन्ये भिन्नार्थत्वात् ।

३-४-८५ लोँटो- ३-४-८६ एरुः- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । लोँटः=लोँट् लकारस्य, लङ्वत्=लङ्लकारस्येव कार्यं भवति । इत्यर्थमुपदिश्य "लकारस्य स्थाने तसादेशे सति लँट्लकारे, इवच्छात्रैः पठतस्, इति साधिते" ३-४-१०१ तस्थ...सूत्रमुपदिशेत् ।

३-४-८६ एरुः- ३-३-१६२ लोँट् च- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क)

३-४-८५ लोँटो लङ्वत् ॥ ३-४-८६ (क) एरुः ॥इति॥

=लोँटः=लोँट्लकार-सम्बन्धिनः, एः=इकारस्य स्थाने, उः=उकारादेशो भवति ।

इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । पठतु ।

तस्-

'रामश्यामौ पठताम्' इति वक्तव्ये लोँटि अनुबन्धलोपे पठ्+ल् इत्यवस्थायाम् ३-४-८५ लोँटो...सूत्रमुपदिशेत् ।

३-४-८७ सेर्ह्य- ३-४-१०१ तस्थस्थ...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क)

३-४-८५ लोँटो लङ्वत् ॥

३-४-८७ (क) सेर्ह्यपिच्च ॥ इति ।

(क)= लोँटः=लोँट्लकारसम्बन्धिनः, सेः=सि इत्यस्य स्थाने, हि=हि इत्यादेशो भवति, अपित्+च=पिद्भिन्नोऽपि भवति । इत्यर्थोपदेशक्रमे कः पिद्भिन्नो भवति ? इति प्रश्नं कृत्वा स एव हि इत्युत्तरं देयम् । सि पित् अभूत्, अतस्तत्स्थाने जातो 'हि' आदेशोऽपि पिद् भवेत् । अतः, अपित् इति निषेध इति बोधयित्वा, अपित्फलं पश्चादुपदेक्ष्यते इतिच्छात्रा उपदेश्याः । अथ 'पठ+हि' इति श्यामपाट्यां लिखित्वा ६-४-१०५ अतो...सूत्रमुपदेश्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-८८ वा छन्दसि ॥

प्रीणाहि, प्रीणीहि ।

३-४-८९ मेर्निः ॥

पठानि ।

३-४-९० आमेतः ॥९१

एधताम् । पठ्यताम् ।

३-४-९१ सवाभ्यां वामौ ॥

एधस्व । एधध्वम् । भण्यस्व । भण्यध्वम् ।

३-४-८८ वाच्छ- छन्दसि, वा=पूर्वोक्तो हिरपिद् वा । **प्रीणाहि** पिति ङित्त्वाऽभावाद् ईत्वाभावः । अपित्पक्षे तु ङित्त्वात् ६-४-११३ ई ह...इतीत्वम् ।

३-४-८९ मेर्निः- ३-४-९२ आडुत्तम... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)
३-४-८५ लोँटो लँङ्वत् ॥ ३-४-८९ (क) मेर्निः ॥इति । (क)=लोँटः=लोँट्लकारसम्बन्धिनः, मेः=मि इत्यस्य स्थाने, निः=नि इत्यादेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयायच्छात्रा आदेश्याः । पठानि ।

वस्-

'आवां पठाव' इति वक्तव्ये पूर्ववल्लोँट् । तत्र ३-४-८५ लोँटो...सूत्रमुद्बोध्य, "लँटीव पठावस् इतिच्छात्रैः साध्यमाने प्रक्रियाक्रमे" ३-४-९९ नित्यं...सूत्रमुपदेश्यम् ।

३-४-९० आमे- ३-४-९९ नित्यं...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)
३-४-८५ लोँटो लँङ्वत् ॥

३-४-९० आम् (क) एतः ॥इति। (क)=लोँटः=लोँट् लकारसम्बन्धिनः, एतः=एकारस्य स्थाने, आम्=आमादेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयश्छात्रैः कारयितव्यः । पठ्यताम् ।

आताम्-

व्याकरणकोशौ पठ्येताम्, इति वक्तव्ये पूर्ववल्लोँटि आतामादेशे ततः कर्मणि लँटीव पठ्येते इति रूपे छात्रैः साधिते ३-४-९० आमे...सूत्रमुद्बोधनीयम् । पठ्येताम् ।

झ-

'व्याकरणकाव्यकोशाः पठ्यन्ताम्' इति वक्तव्ये पूर्ववल्लोँटि 'झ' इत्यादेशे ततः कर्मणि लँटीव पठ्यन्ते इति रूपे छात्रैःसाधिते सत्यामावश्यकतायाम् ३-४-९० आमे...सूत्रमुद्बोध्यम् । पठ्यन्ताम् ।

थास्-

'त्वं भण्यस्व' इति वक्तव्ये पूर्ववल्लोँटि थासि ततः कर्मणि लँटीव भण्यसे इति रूपे छात्रैः साधिते ३-४-९० आमे...सूत्रं बाधित्वा ३-४-९१ सवा...सूत्रमुपदेश्यम् ।

३-४-९१ सवा- ३-४-९० आमेतः- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)
३-४-८५ लोँटो लँङ्वत् ॥

(ख)
३-४-९० आम् एतः ॥

३-४-९१ (क) सवाभ्यां (ख) वामौ ॥इति । (क)=लोँटः=लोँट्लकारसम्बन्धिनः, सवाभ्याम्=सकार-वकाराभ्यां परस्य, (ख)=एतः=एकारस्य स्थाने, वामौ='व, अम्' इत्येतौ आदेशौ भवतः । इत्यर्थमुपदिश्य लक्षणसमन्वयक्रमे सत्यावश्यके १-३-१० यथा... सूत्रमुद्बोधनीयम् ।

आथाम्-

'युवां भण्येथाम्' इति वक्तव्ये पूर्ववल्लोँटि, आथामि, ततः कर्मणि लँटीव भण्येथे इति रूपे छात्रैः साधिते ३-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-९२ आड्डुत्तमस्य पिच्च ॥९३	३-४-९३ एत ऐ ॥
पठानि । अदानि । जुहवानि ।	एधै । एधावहै । एधामहै । भण्यै । भण्यावहै । भण्यामहै ।

४-९० आमे...सूत्रमुद्बोधनीयम् । भण्येथाम् ।

ध्वम्-

'यूयम् भण्यध्वम्' इति वक्तव्ये पूर्ववल्लोँटि ध्वमि कर्मणि लँटीव भण्यध्वे इति रूपेच्छात्रैः साधिते ३-४-९० आमे...सूत्रं बाधित्वा प्रकृतं ३-४-९१ सूत्रमुद्बोधनीयम् ।

इट्-

'अहम् भण्यै' इति वक्तव्ये पूर्ववल्लोँटि इटि, कर्मणि लँटीव भण्य+ए इति प्रक्रियाक्रमे ३-४-९२ आड्...सूत्रमुद्बोध्य भण्य+आ+ए इति श्यामपाट्यां लिखित्वा ३-४-९३ एत...सूत्रमुपदेश्यम् ।

३-४-९२ आड्डु- ६-४-१०५ अतो हेः- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

३-४-८५ लोँटो लँङ्वत् ॥

३-४-९२ आट् (क) उत्तमस्य पिच्च ॥इति ।

(क)=लोँटः=लोँट्लकारसम्बन्धिनः, उत्तमस्य=उत्तमपुरुषस्य, आट्=आडागमो भवति, पिच्च=स आट् पिदपि भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयायच्छात्रा आदेश्याः सन्धिकार्याय च । प्रकृतसूत्रविधानफलं पश्चाद् वक्ष्यते इतिच्छात्रा बोधयितव्याः । अथ ३-४-८९ मेर्निः-सूत्रमुपदेश्यम् ।

३-४-९३ एत-३-४-९१ सवाभ्यां...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

३-४-८५ लोँटो लँङ्वत् ॥ ३-४-९२ आट् उत्तमस्य पिच्च ॥ ३-४-९३ (क) (ख) एत ऐ ॥इति ।

(क)=लोँटः=लोट्लकारसम्बन्धिनः, (ख)=उत्तमस्य=उत्तमपुरुषस्य, एतः=एकारस्य स्थाने, ऐ =ऐ भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयायच्छात्राः प्रवर्त्याः । अथ भण्य+आ+ऐ इति श्यामपाट्यां लिखित्वा ६-१-८७ आट...सूत्रमुद्बोध्यम् । भण्य+ऐ । अथ ६-१-८५ वृद्धि...सूत्रस्य प्रवृत्तिः । भण्यै ।

वहि-

आवां भण्यावहै इति वक्तव्ये पूर्ववल्लोँटि ततः कर्मणि लँटीव 'भण्यावहे' इति रूपे छात्रैः साधिते ३-४-९२ आड्...३-४-९३ एत...सूत्रे उद्बोधनीये । ततः सवर्णदीर्घः । भण्यावहे ।

महिङ्-

वयं भण्यामहै, इति वक्तव्ये पूर्ववल्लोँटि महिङादेशे भण्यावहै, इत्यत्रेव प्रक्रिया । भण्यामहै । एवमेव नम्, व्रज् इत्यादि- धातूनामपि प्रक्रिया ज्ञेया ।

कर्तृवाच्यानि	**कर्मवाच्यानि**
(क) श्यामः कोशम् पठतु	(ख) श्यामेन कोशः पठ्यताम्
(क) श्यामः व्याकरणकोशौ पठतु	(ख) श्यामेन व्याकरणकोशौ पठ्येताम्
(क) श्यामः व्याकरणकाव्यकोशान् पठतु	(ख) श्यामेन व्याकरणकाव्यकोशाः पठ्यन्ताम्
(क) श्यामः त्वाम् भणतु	(ख) श्यामेन त्वम् भण्यस्व ।
(क) श्यामः युवाम् भणतु	(ख) श्यामेन युवाम् भण्येथाम्
(क) श्यामः युष्मान् भणतु	(ख) श्यामेन यूयम् भण्यध्वम्
(क) श्यामः माम् भणतु	(ख) श्यामेन अहम् भण्यै
(क) श्यामः आवाम् भणतु	(ख) श्यामेन आवाम् भण्यावहै
(क) श्यामः अस्मान् भणतु	(ख) श्यामेन वयं भण्यामहै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-९४ लेँटो'ऽडाटौ ॥९८

जोषिषत्। पताति।

३-४-९५ आत ऐ' ॥९६

सुप्रयसा मादयैते। आटस्तु विधानसामर्थ्यान्न-पताति विद्युत्।

३-४-९६ वै'तोऽन्यत्र ॥९८

अहमेव पशूनामीशै। ग्रहा गृह्यान्तै।

अन्यत्रेत्युक्तेर्नेह-मादयैते।

३-४-९७ इतश्च लोपः' परस्मैपदेषु' ॥१००

जोषिषत्।

३-४-९८ स' उत्तमस्य' ॥९९

करवाव, करवावः। करवाम, करवामः।

३-४-९९ नित्यं' ङितः' ॥१००, १०१

पठाव। पठाम।

इति श्यामपाट्यां लिखित्वा (क) वाक्येषु कर्तृपदम् प्रथमान्तं कर्मपदानि च द्वितीयान्तानि। (ख) वाक्येषु च कर्तृपदं तृतीयान्तं कर्मपदानि च प्रथमान्तानि सन्ति। अत्र विभक्तिविनिमये कारणं किम्? तथा (क) वाक्येषु (ख) वाक्येषु च कर्तृवाचकः शब्दः सर्वत्र श्यामशब्दो वर्तते, कर्मवाचकाः शब्दाश्च उभयत्र (प्रकृतयः) समाना एव सन्ति। तथापि पुरुष-वचन भेदः कथमिति शिक्षकश्छात्रान् परीक्षताम्।

अथ-लँङ्+तिप्- ह्यः श्यामः कोशम् अपठत् इति वक्तव्ये 'अपठत्' इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते इति ब्रुवता शिक्षकेण ३-२-१११ अनद्यतने...सूत्रमुपदेश्यम्।

३-४-९४ लेँटो- लेँटः= लेँट्लकारस्य, अडाटौ=अट् आट् इत्यागमौ भवतः।

जोषिषत् ३-४-७ लिङः...सूत्रे प्रक्रिया दृश्या।

३-४-९५ आत- लेँटः (३-४-९४) =लेँट्सम्बन्धिनः, आतः = आकारस्य स्थाने ऐ+ऐ भवति।

३-४-९६ वैतो- वा एत इतिच्छेदः। लेँटः (३-४-९४) एतः =एकारस्य स्थाने, वा= विभाषया, ऐ (३-४-९५) अन्यत्र =आत ऐ इत्यस्य विषयादन्यत्र।

३-४-९७ इत- लेँटः (३-४-९४) =लेँट् सम्बन्धिनः, इतः =इकारस्य, वा (३-४-९६) लोपः= लोपो भवति, परस्मैपदेषु। जोषिषत् ३-४-७ लिङः...सूत्रे प्रक्रिया दृश्या।

३-४-९८ स उ- लेँटः (३-४-९४) सः =सकारान्तस्य, उत्तमस्य=उत्तमपुरुषस्य, वा (३-४-९६) लोपः+परस्मैपदेषु (३-४-९७)। यद्यपि सकारान्त उत्तमपुरुषः परस्मैपदे एव संभवति। तथाप्युत्तरार्थमनुवर्तमानमिहाप्युक्तम्। एवमग्रिमसूत्रेऽपि बोध्यम्।

३-४-९९ नित्यं...३-४-८९ मेर्निः- सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र श्यामपाटीप्रयोगो यथा-

(क)
३-४-७७ लस्य

(ख)
३-४-९७ इतश्च लोपः परस्मैपदेषु ॥

(ग) (घ)
३-४-९८ स उत्तमस्य ॥

३-४-९९ नित्यं (ख) ङितः (क) (घ) (ग) ॥ इति।

ङितः+((क) =लस्य)) =ङिल्लकारसम्बन्धिनः, (घ) =उत्तमस्य =उत्तमपुरुषस्य, (ग) =सः =सकारस्य, नित्यं+ ((ख) = लोपः) =नित्यं लोपो भवति। यद्यप्यत्र उत्तरत्रानुवृत्त्यर्थम् ३-४-९७ इत...सूत्रात् परस्मैपदेषु इत्यनुवर्तते, तथापि प्रकृते फलाभावेन (व्यावर्त्याभावेन) तन्नोपदेश्यम्। तथा यद्यप्यत्र तदन्तविधिना सकारान्तस्योत्तमस्य इत्यर्थः स्वारसिकः। तथापि बोधभारापत्त्या उत्तमस्य स इत्यर्थकरणेऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-१०० इतश्च ॥	अपठत् । अपठः ।

अव्याप्त्यतिव्याप्तिदोषाभावाच्च सरलार्थ एवोपयुक्तः । (द्वितीयावृत्तौ तु तदन्तविधिमूलकः सकारान्तस्योत्तमस्येत्यर्थ एवोपदेश्यः । तदा लक्षणसमन्वये १-१-५१ अलो... सूत्रमवधेयम्) पठाव ।

मस्-

'वयं पठाम' इति वक्तव्ये पूर्ववल्लोँटि मसि पठाव इत्यत्रैव प्रक्रियां छात्रैरुच्यमानां शिक्षकः शृणुयात् । पठाम ।

कर्मणि लोँट्- त-

'व्याकरणं पठ्यताम्' इति वक्तव्ये पूर्ववल्लोँटि लकारस्यार्थे कर्मणि विवक्षिते कर्मणि विहिते लँटीव पठ्यते इति रूपे छात्रैः साधिते ३-४-९० आमे...सूत्रमुपदेश्यम् ।

३-४-१०० इत- ६-४-७१ लुँङ्लँङ्... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)
३-४-७७ लस्य

(ख) (ग)
३-४-९७ इतश्च लोपः परस्मैपदेषु ॥

(घ)
३-४-९९ नित्यं ङितः ॥

३-४-१०० (घ) (क) इतश्च (ख) (ग) ॥इति । (घ)+(क) =ङितः+लस्य =ङिल्लकारसम्बन्धिनः, इतः =इकारस्य, (ख) =लोपः =लोपो भवति, (ग) =परस्मैपदेषु (द्वितीयावृत्तौ तु यथासूत्राभिप्रेतमर्थमुपदिशेत् । तथाहि- सूत्रे इत इति षष्ठचेकवचनान्तम् । तदनुरोधेन ३-४-९७ इत...सूत्रादनुवर्तमानं परस्मैपदेषु इति सप्तमीबहुवचनान्तमपि षष्ठचेकवचनान्ताय कल्पते । ततस्तदन्तविधिः । इत्थं सूत्रार्थःफलति-ङितो लस्य इकारान्तस्य परस्मैपदस्य लोप इति । तदा लक्षणसमन्वये १-१-५१ अलो...सूत्रमवधेयम्) । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । अपठत् ।

तस्-

'ह्यः श्यामविष्णुमित्रौ कोशम् अपठताम्' इति वक्तव्ये पूर्ववत् प्रक्रियायाम् अपठ्+ल् इति श्यामपाटचां लिखित्वा कर्तरि लँटि पठत इत्यत्रैव अपठतस् इति रूपे छात्रैः साधिते ३-४-१०१ तस्थ...सूत्रमुद्बोध्य तल्लक्षण-समन्वयायच्छात्रा एवादेश्याः । अपठताम् ।

झि-

'ह्यो रामश्यामविष्णुमित्रा अपठन्' इति वक्तव्ये पूर्ववत् प्रक्रियायाम् अपठ्+ल् इति जाते कर्तरि लँटि पठन्ति इतीव अपठन्ति इति रूपे छात्रैः साधिते प्रकृत ३-४-१०० सूत्रेणेकारलोपे च च्छात्रैः साधिते अपठन्त् इति श्यामपाटचां लिखित्वा १-१-७ हलो...सूत्रं १-४-१४ सुँप्ति...सूत्रं चोद्बोध्य अपठन्त् इति संयोगान्तं पदं वर्तते इतिच्छात्रमस्तिष्के स्फुटं प्रकाशे जागरिते ८-२-२३ सूत्रमुद्बोधयेत् । लक्षणसमन्वये १-१-५१ अलो...सूत्रं चोद्बोधयेत् । अतस्तकारलोपः । अपठन् ।

सिप्-

'ह्यस्त्वम् अपठः' इति वक्तव्ये पूर्ववल्लँङि सिपि अपठत् इतीव अपठस् इति रूपे छात्रैः साधिते रुत्वे विसर्गे च अपठः ।

थस्-

युवां ह्यः कोशम् अपठतम् इति वक्तव्ये पूर्ववत्प्रक्रियाक्रमे थसि अपठथस् इति रूपं श्यामपाटचां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-१०१ तस्थस्थमिपां तान्तन्तामः ॥	३-४-१०२ लिँङः सीयुँट् ॥१०८
अपठताम् । अपठतम् । अपठत । अपठम् ।	एधेत । पठ्येत ।

लिखित्वा ३-४-१०१ तस्थस्...सूत्रमुद्बोधयेत् । अपठतम् ।

थ-

'यूयं ह्यः कोशम् अपठत' इति वक्तव्ये पूर्ववत्प्रक्रियाक्रमे थादेशे पूर्ववत् प्रक्रियायाम्, अपठत ।

मिप्-

'अहं ह्यः कोशम् अपठम्' इति वक्तव्ये पूर्ववत्प्रक्रियायां मिपि पूर्ववत्प्रक्रियाक्रमे छात्रैः साधितम् अपठ+मि इति स्वरूपं श्यामपाटचां लिखित्वा ३-४-१०१ तस्थ...सूत्रम् ६-१-९४ अतो...सूत्रं चोद्बोधयेत् । अपठम् ।

वस्-

'आवां ह्यः कोशम् अपठाव' इति वक्तव्ये पूर्ववल्लँङि वसि च कर्तरि लँटि पठावः इत्यत्रेव प्रक्रियाक्रमे अपठावस् इति रूपे छात्रैः साधिते ३-४-९९ नित्यं...सूत्रमुद्बोधयेत् । अपठाव ।

मस्-

वयं ह्यः कोशम् अपठाम इति वक्तव्ये पूर्ववल्लँङि मसि अपठाव इत्यत्रेव प्रक्रियायाम्, अपठाम ।

अथ कर्मणि लँङ्

कर्मणि लँङि च ६-४-७१ लुँङ्लँङ्...सूत्रेणाऽडागमो भवति । शेषप्रक्रिया सर्वापि कर्मणि लँटीव ज्ञेया ३-४-७९ टित...३-४-८० थासः...सूत्रद्वयवर्जम् । यथा-अपठ्यत । अपठ्येताम् । अपठ्यन्त । अपठ्यथाः । अपठ्येथाम् । अपठ्यध्वम् । इटि- अपठ्य+ इ (६-१-८४ आद्गुणः...) अपठ्ये । अपठ्यावहि । अपठ्यामहि । इति ।

विध्यादि-लिँङ्

श्यामः पठेत् इति वक्तव्ये पठेत् इति प्रयोगः कथं सिध्येदिति जिज्ञासामुद्भाव्य ३-३-१६१ विधि...सूत्रमुपदिशेत् ।

३-४-१०१ तस्थ- ३-४-८५ लोँटो...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- ३-४-७७ लस्य ॥ ३-४-९९ नित्यं ङितः ॥ ३-४-१०१ (ख) (क) तस्थस्थमिपां तान्तन्तामः ॥इति । (ख)+(क) =ङितः+लस्य =ङिल्लकारसम्बन्धिनाम्, तस्थस्थमिपाम् =तस् थस् थ मिप् इत्येतेषां स्थाने, तान्तन्तामः =ताम् तम् त अम् इत्येते आदेशा भवन्ति । इत्यर्थमुपदिश्य लक्षणसमन्वयश्छात्रैः कारयितव्यः । रामश्यामौ पठताम् । अत्र शिक्षकेणच्छात्राः परीक्षणीयाः- प्रकृते तु लकारः (लोँट्) टित् अस्ति । कथं तु प्रकृते ङिल्लकारसम्बन्धि कार्यं (ताम् आदेशः) जातम् ? इति । छात्रेष्वनुत्तरत्सु साम्प्रतमेवोपदिष्टम् ३-४-८५ लोँटो....सूत्रम् । तेन टिल्लकारोऽपि ङिल्लकारवन्मत इत्युद्बोधनीयाः ।

झि-

'रामश्यामविष्णुमित्राः पठन्तु' इति वक्तव्ये पूर्ववत् पठ्धातोर्लोँटि, झि इत्यादेशे लटि इव पठन्ति इति रूपे छात्रैः साधिते 'पठतु' इत्यत्रेव ३-४-८६ एरुः, इत्युकारः । पठन्तु ।

सिप्-

त्वं पठ इति वक्तव्ये पूर्ववत् पठ्धातोर्लोँटि सिपि लँटीव पठसि इति रूपे छात्रैः साधिते ३-४-८७ सेर्ह्य...सूत्रमुपदेश्यम् ।

३-४-१०२ लिँङः- ३-४-१०८ झेर्जुस्- सूत्रानन्तरं सूत्रमिदं पाठचम् । लिँङः =लिँङ्लकारस्य, सीयुँट् =सीयुँडागमो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा पठच+सीय्+त इति श्यामपाटचां कृत्वा ७-२-७९ लिँङः...सूत्रस्य, ६-१-६४ लोपो...सूत्रस्य च प्रवृत्तिरिति बोधयता लक्षणसमन्वयश्छात्रैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-१०३ या॑सुँट् परस्मैपदेषूदात्तो ङिच्च ॥१०४

पायात्। जुहुयात्।

३-४-१०४ किदाशिषि ॥

भूयात्।

३-४-१०५ झस्य रन् ॥

एधेरन्। पठ्येरन्।

३-४-१०६ इटोऽत् ॥

एधेय। पठ्येय।

कारयितव्यः। पठ्येत। आतामि पठ्येयाताम्।

झः-

पठ्धातोः पूर्ववल्लिँङि झादेशे पूर्ववत् प्रक्रियाक्रमे पठ्येय्+झ इत्यवस्थायाम् ३-४-१०५ झस्य... सूत्रमुपदेश्यम्।

३-४-१०३ (क) यासुँ- ३-३-१६१ विधि...सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा-

(क)
३-४-१०२ लिँङः सीयुँट् ॥

३-४-१०३ (क) यासुँट् परस्मैपदेषु उदात्तः ङित् च ॥इति। (क) =लिङः =लिङ् लकारस्य, परस्मैपदेषु =परस्मैपदेषु सत्सु, यासुँट् =यासुँट् आगमो भवति, उदात्तः =स यासुँट् उदात्तो भवति, ङिच्च =ङिदपि भवति। इत्यर्थमुपदिश्य प्रकृते लिँङ्लकारस्य स्थाने जातं परस्मैपदं वर्तत इति स्फुटमेवेति बोधयता शिक्षकेण लक्षणसमन्वयश्छात्रैः कारयितव्यः। सत्यावश्यके ७-१-५४ ह्रस्व...सूत्रे प्रस्तुतं (प्रकृते यासुँटः) टित्त्वफलमुद्बोधयता 'पठ+यास्+ति' इति श्यामपाटचां लिखित्वा ७-२-७९ लिँङः...सूत्रमुपदेश्यम्।

३-४-१०४ किदा- ३-४-१०७ सुँट् ति...सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र श्यामपाटीप्रयोगो यथा-

(क)
३-४-१०२ लिँङः सीयुँट् ॥

(ख)
३-४-१०३ यासुँट् पर...ङिच्च ॥

३-४-१०४ कित् आशिषि (क) (ख) ॥ इति।

आशिषि=आशीर्वादार्थे विधीयमानस्य

(क)=लिँङः=लिँङ् लकारसम्बन्धी, (ख)=यासुँट्=यासुँट् आगमः, कित्=किद् (किद्वद्) भवति। इत्यर्थमुपदिश्य प्रकृतोदाहरणे यास् कित् (किद्वत्) सम्पन्न इति बोधयित्वा ६-४-२४ अनिदितां... सूत्रमुपदिशेत्।

३-४-१०५ झस्य-३-४-१०२ लिँङः...सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा- ३-४-

(क)
१०२ लिँङः सीयुँट् ॥

३-४-१०५ (क) झस्य रन् ॥इति।

(क)=लिँङः=लिँङ् लकारसम्बन्धिनः, झस्य=झ इत्यस्य स्थाने, रन्=रन् आदेशो भवति। इत्यर्थमुपदिश्य लक्षणसमन्वयश्छात्रैः कारयितव्यः। ततः ६-१-६४ लोपो...सूत्रस्य प्रवृत्तिः। पठ्येरन्। थासि-पठ्येथाः। आथामि-पठ्येयाथाम्। ध्वमि-पठ्येध्वम्। इटि- 'पठ्येय्+इ' इत्यवस्थायाम् ३-४-१०६ इटोऽत्-सूत्रमुपदेश्यम्।

३-४-१०६ इटो- ३-४-१०५ झस्य रन् सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा-

(क)
३-४-१०२ लिँङः सीयुँट् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-१०६ (क) इटोऽत् ॥इति ।

(क)=लिँङः=लिँङ्लकारसम्बन्धिनः, इटः=इटः स्थाने, अत्=अ इत्यादेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयश्छात्रैः कारयितव्यः । पठ्येय ।

वहि, महिङ्

सर्वप्रक्रिया 'पठ्येत' इत्यत्रेव ।

पठ्येवहि । पठ्येमहि ।

अथ पदव्यवस्थोद्बोधनम्

अथाऽधोनिर्दिष्टरूपेण पदव्यवस्थाविषये छात्रा उद्बोधयितव्याः । यथा वत्साः ? यद्यपि १-४-१०१ तान्ये...सूत्रे १-३-७८ शेषा...सूत्रे च पदव्यवस्थाविषये सामान्यत उपदिष्टम् । तथापि स एव विषयः स्फुटप्रतिपत्तये पुनरुद्बोध्यते । तथाहि-यदा लकारस्यार्थो भावः कर्म वा भवति तदा १-३-१३ भाव...सूत्रेण आत्मनेपदमेव भवति । अर्थाद् भावे कर्मणि वा लकारस्यार्थे विवक्षिते परस्मैपदं सर्वथा न भवति । लकारस्यार्थे कर्तरि विवक्षिते तु १-३-१३ सूत्रादारभ्य १-३-७७ सूत्रपर्यन्तानामन्यतमस्य निमित्ते सति आत्मनेपदं भवति । तेषां निमित्ताऽभावे तु लकारस्यार्थे कर्तरि विवक्षिते १-३-७८ शेषा...सूत्रेण परस्मैपदं भवति । इत्युक्तमेव । कर्तर्यर्थे आत्मनेपदेऽपि शप् प्रत्ययो भवत्येव । यथा लभ् (डु ल भँ ष्) धातुः अनुदात्तेद् वर्तते । इति धातुपाठ-प्रदर्शनपुरस्सरं बोधयित्वा ततो लँटि 'पठति' इति प्रयोग-साधन-क्रमे १-४-१०१ तान्ये...सूत्रपर्यन्तां प्रक्रियामेव प्रकृतेऽप्याश्रित्य तत्रत्ये १-३-७८ शेषा...सूत्रप्रसङ्गे १-३-१२ अनुदात्तङित...सूत्रं प्रस्तुत्यम् ।

३-४-१०७ सुँट् ति- ८-२-२९ स्कोःसं...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

३-४-१०२ लिँङः सीयुँट् ॥

३-४-१०७ सुँट् (क) तिथोः ॥इति।

(क)=लिँङः=लिङ्सम्बन्धिनोः, तिथोः=तकारथकारयोः, सुँट्=सुँट् आगमो भवति । इत्यर्थमुपदिश्यच्छात्रैरेव लक्षणसमन्वयं कारयित्वा 'पठि+सीस्त' इति लिखित्वा छात्रैरेवाऽग्रिमप्रक्रियां साधयेत् । पठिषीष्ट । आतामि, आथामि च सुँड् भवति । पठिषीयास्ताम् । पठिषीरन् । पठिषीष्ठाः । पठिषीयास्थाम् । पठिषीध्वम् । पठिषीय । पठिषीवहि । पठिषीमहि । इति रूपाणिच्छात्रैरुच्यमानानि शिक्षकः शृणुयात् ।

अथ ढत्व-विवेकः

वत्साः ? नीधातोर्लुँङि ध्वमि अनेढ्वम् इत्यत्र ८-३-७८ इणः....सूत्रेण ढत्वं साधितम् । वत्साः ? पठ्धातोः कर्मणि लुँङि ध्वमि च अपठि+ध्वम् इत्यवस्थायाम् ८-३-७८ सूत्रेण ढत्वं भवति, सिध्यति च रूपम् अपठिढ्वम् इति । पठ् धातोराशीर्लिँङि ध्वमि तु ढत्वं न भवति । अत एवोदाहृतं साम्प्रतमेव पठिषीध्वम् इति । यद्यप्यत्रापि इणः परतः षीध्वंसम्बन्धी धकारो वर्तते । तथापि ढत्वं तु न भवति । अतः कुत्र ढत्वं भवति, कुत्र न भवति, इति स्फुटं बोध्यं भवतीति बोधनपुरःसरं छात्राणामाकाङ्क्षामुद्भाव्याऽऽधोनिर्दिष्टरूपेण कुत्र ढत्वं भवति, कुत्र न भवतीति स्फुटं बोधयेत् । वत्साः ? सम्यग् विचारिते कुत्र ढत्वं भवति, कुत्र न भवतीति स्फुटं ज्ञायते । एतत्तु यूयं जानीथैव यद् ढत्वविधायकं सूत्रम् इणन्तादङ्गात् परेषां षीध्वंलुँङ्लिँटां धकारस्य स्थाने ढकारादेशं करोतीति । तत्र किं नाम अङ्गम् ? इति विषये १-४-१३ यस्मा...सूत्रोपदेशपुरस्सरं वर्णितमेव । पुनश्च ६-४-७१ लुँङ्लँङ्...सूत्रेऽपि तत् प्रपञ्चितम् । वत्साः ? साम्प्रतमेतद् बोध्यं भवति यद् यस्यागमो भवति स आगमस्तस्याऽवयवो मन्यते, इति । अत एव पठिषीध्वम् इत्यत्र ढत्वं न भवति । तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-१०८ झेर्जुस् ॥११२
पठेयुः ।

३-४-१०९ सिँजभ्यस्तविदिभ्यश्च ॥
अपाठिषुः । अजुहवुः । अविदुः ।

हि- अत्र ध्वमः (प्रत्ययस्य) सीयुँडागमो जातः । तेन सीयुँडपि प्रत्ययावयव एव । अथच सीयुँट इडागमो जातः । तेन, इडागमोऽपि प्रत्ययावयव एव । प्रत्यये परे पूर्वभाग एव अङ्गं भवति । अतः पठिषीध्वम् इत्यत्र पठ् इत्यंश एव अङ्गं वर्तते स इणन्तो नास्ति । यश्च इणन्तः 'पठि' इति भागः स नाऽङ्गम्, इकारस्य प्रत्ययाऽवयवत्वात् । तेन षीध्वम् इत्यस्य इणन्तादङ्गात् परत्वाभावेन पठिषीध्वम् इत्यत्र न ढत्वम् । अपठिढ्वम् इत्यत्र तु पठ् धातोर्विहितः प्रत्ययो लुँङ् (ध्वम्) तस्मिन् परे यस्मात् (पठ् धातोः) ध्वम् प्रत्ययो विहितः, तदादि (पठ्धात्वादि) पठ्स् इति समुदायः । अतः सिँज्विशिष्टमेव अङ्गम् । अर्थात् सिँजपि अङ्गावयवः । अतः सिँचो विहित इडागमोऽपि अङ्गावयव एव । एतेन अपठिस् इति अङ्गावयवमिति स्फुटम् । तत्र सकारलोपे अपठि इति इणन्ताङ्गं भवति । अतस्ततः परस्य लुँङ् सम्बन्धिनो धकारस्य स्थाने ढकारो भवति । अपठिढ्वम् । इति । इत्युपदेशेन छात्रमस्तिष्के ढत्वविषयके बोधे स्फुरिते सति पुनश्छात्रान् परीक्ष्यैवाऽग्रे पाठं वर्धयेत् । अथ शिक्षको विचारयेद् यद् अनुबन्धफलोपदेशे इँदनुबन्धफलं नलोपाभाव इति वक्तव्यं भविष्यति । तेन नलोपोदाहरणं प्रथममुपदेश्यमिति । अतो मन्थ् (मन्थँ ४२) धातोराशीर्लिँङि प्रक्रियां प्रदर्शयेत् । यथा मन्थ्+यास्+त् इति श्यामपाट्यां लिखित्वा ३-४-१०४ किदाशिषि-सूत्रमुपदिशेत् ।

३-४-१०८ झेर्जु- ७-२-८० अतो येयः-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)
३-४-१०२ लिँङः सीयुँट् ॥
३-४-१०८ (क) झेर्जुस् ॥इति।

(क)=लिँङः=लिँङ्सम्बन्धिनः, झेः=झिइत्यस्य स्थाने, जुस् =जुस् आदेशो भवति । इत्यर्थमुपदिश्य शेषप्रक्रियां छात्रैरुच्यमानां शिक्षकः शृणुयात् । पठेयुः ।

सिप्-
सिपि तिपीव प्रक्रियायां रुत्वविसर्गौ पठेः ।

थस् थ-
थसि थे च तसीव प्रक्रिया । पठेतम् । पठेत ।

मिप्-
मिपि तसीव प्रक्रियेत्युपदिशता शिक्षकेणच्छात्रैरुच्यमाना प्रक्रिया श्रोतव्या । तत्र यलोपविषये यदिच्छात्राः प्रमाद्येयुस्तदा यलोपे निमित्तं नास्तीति ते बोधयितव्याः । पठेयम् ।

वस् मस्-
वसि मसि च तिपीव प्रक्रिया । केवलं तत्रोद्बोधितेन ३-४-१०० इत...सूत्रेण ३-४-९९ नित्यं...सूत्रं विनिमातव्यम् ।

पठेव । पठेम ।

कर्मणि विध्यादिलिँङ्-
कर्मणि विध्यादिलिँङि टिल्लकारसम्बन्धि-कार्य-वर्जं सर्वामपि शेषप्रक्रियां कर्मणि लँटीव साधयित्वा पठ्य+त इति श्यामपाट्यां लिखित्वा ३-४-१०२ लिँङः सीयुँट्- सूत्रमुपदेश्यम् ।

३-४-१०९ सिँज- ७-१-४ अदभ्यस्तात्-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ)
३-४-७७ लस्य ॥ ३-४-९९ नित्यं ङितः ॥ ३-४-१०८ झेर्जुस्
३-४-१०९. सिज...च (ख) (क) (ग) (घ) ॥इति। सिँजभ्यस्तविदिभ्यः=सिचः अभ्यस्ताद् विदेश्च परस्य,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-११० आ॑तः ॥१११

अपुः । आदन्तादेवेति नियमान्नेह-अभूवन् ।

३-४-१११ ल॑ङः शाकटायनस्यैव॑ ॥११२

अयुः, अयान् ।

३-४-११२ द्विषश्च ॥

अद्विषुः, अद्विषन् ।

३-४-११३ तिङ्शित् सार्वधातुकम् ॥

जुहोति । भवति ।

३-४-११४ आर्धधा॑तुकं शेषः ॥११७

भविष्यति । भवितव्यम् ।

(ख)+(क)=ङितः+ लस्य=ङिल्लकारसम्बन्धिनः (ग)=झेः=झिस्थाने, (घ)=जुस् =जुस् आदेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । अथ अजुहु+उस् इति श्यामपाटचां लिखित्वा १-२-४ सार्व...सूत्रेण ङिद्वद्भावात् ७-३-८४ सार्व...सूत्रेण प्राप्तस्य गुणस्य १-१-५ क्क्ङिति...सूत्रेण निषेध इत्युद्बोधनपुरस्सरं ७-३-८३ जुसि च-सूत्रमुपदिशेत् ।

३-४-११० आतः=सिँज्लुगन्तात् आदन्तादेव, झेर्जुस् (३-४-१०८) । पूर्वसूत्रात् सिँजनुवर्तते । तथा च सिँचः, आदन्तादित्यर्थः सम्भाव्यते । न चोभाभ्यामव्यवहितो झिः सम्भवति । तेन सिँचो लुकि प्रत्ययलक्षण-लभ्यः सिँज् ग्राह्यो भवति । तदा पुनः पूर्वेण सिद्धे नियमार्थमिदम् ।

अपुः २-४-७७ गाति... इति सिँचो लुक् । ६-१-९३ उस्य... इति पररूपम् ।

३-४-१११ लङः-आतः (३-४-११०) आदन्तात् परस्य लङः=लङ्सम्बन्धिनः, झेर्जुस् (३-४-१०८) शाकटायनस्यैव मते ।

३-४-११२ द्विषः=द्विष्धातोः परस्य, लङः (३-४-१११) झेर्जुस् (३-४-१०८) शाकटायनस्यैव (३-४-१११) ।

३-४-११३ तिङ्शि- १-४-१०७ शेषे...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

३-१-२२ धातोः एकाचो...यङ् ॥ ३-१-९१ धातोः ॥

३-४-११३ (क) (ख) तिङ्शित्...कम् ॥इति। (क)+(ख)=धातोः+=धातोः धातोरित्युच्चार्य धातोर्विहितः, तिङ्शित् (३-१-२२) धातो...सूत्रादारभ्य तृतीयाध्यायावसानपर्यन्ताः प्रत्यया इति बोधनक्रमे ३-१-२२ धातोः...सूत्रादारभ्य तृतीयाध्यायान्तावधि ये प्रत्यया विधीयन्ते ते धातोरेव विधीयन्ते, इत्यपि अत्रैव बोधयेत्)=तिङ् शिच्च प्रत्ययः । सार्वधातुकम्=सार्वधातुकसंज्ञो भवति । अत्र लक्षणसमन्वयप्रसङ्गे यद्यपि तिङो न प्रत्ययाः किन्तु आदेशाः । तथापि लँडादयः प्रत्ययास्तत्स्थाने जातत्वात् तिङोऽपि स्थानिवद्भावेन प्रत्यया एवेति शिक्षको बोधयेत् । प्रकृतसूत्रेण 'ति' इत्यस्य सार्वधातुकसंज्ञा जातेति बोधयित्वा ३-१-६८ कर्तरि...सूत्रमुपदिशेत् ।

३-४-११४ आर्ध- ३-१-२५ सत्याप...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

३-१-२२ धातोः ....यङ् ॥ ३-१-९१ धातोः ॥

३-४-११३ तिङ्शित् सार्वधातुकम् ।

३-४-११४ (क) (ख) आर्धधातुकं शेषः ॥इति । सूत्रे शेष इति वर्तते । उक्तादन्यः शेष उच्यते । प्रकृते च ३-४-११३ सूत्रे तिङ्शित् इत्युच्यते । अतः शेषशब्देन तिङ्शिद्भिन्न इत्यर्थो बुध्यते । तत्स्फुटप्रतिपत्तये च श्यामपाटचां ३-४-११३ सूत्रमुपन्यस्तम् । (क)+(ख)=धातोः+धातोः=धातोरित्युच्चार्य धातोर्विहितः (३-४-११३ तिङ्शि...सूत्रे बोधितं विषयं पुनरुद्बोधयेत्) शेषः=तिङ्शिद्भिन्नः प्रत्ययः, आर्धधातुकम्= आर्धधातुकसंज्ञो भवति । इत्यर्थमुपदिश्य प्रकृतोदाहरणे णिचोऽवशेषम् इकारम् आर्धधातुकं विधाय शिक्षकः ७-३-८६ पुँग...सूत्रमुद्बोध्य लक्षणसमन्वयं छात्रैः कारयित्वा चोरि इति श्यामपाटचां लिखित्वा छात्रानधोनिर्दिष्टरूपेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३-४-११५ लिँट् च ॥

बभूविथ ।

३-४-११६ लिँङाशिषि ॥

एधिषीष्ट ।

३-४-११७ छन्दस्युभयथा ॥

वर्धन्तु त्वा सुष्टुतयः। स्वस्तये नावमिवारुहेम ।

इति तृतीयाध्याये

चतुर्थः पादः । इति तृतीयोऽध्यायः ।

बोधयेत्। वत्साः ? एवं णिचि कृते सम्पन्नं 'चोरि' इति । अथेदमवधीयताम् अन्ये भूप्रभृति-धातु-पाठे पठिताः पठ् पच् लभ् मुद् इत्यादयो ये धातवः सन्ति तेषां १-३-१ भूवा...सूत्रेण धातुसंज्ञा भवति । चोरि इत्यादयो णिजन्तास्तु भूप्रभृतिषु न पठिताः । तेन तेषां (चोरि इत्यादीनाम्) सूत्रान्तरेण धातुसंज्ञा भवतीति भणन्

३-१-३२ सनाद्यन्ता...सूत्रमुपदिशेत् ।

३-४-११५ लिँट् च- ३-२-११५ परोक्षे...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

३-४-११४ आर्धधातुकं शेषः ॥

३-४-११५ लिँट् च (क) ॥इति।

लिँट्=लिँट्प्रत्ययः (क)=आर्धधातुकम्=आर्धधातुकसंज्ञको भवति । अर्थात् लिँङादेश आर्धधातुकसंज्ञको भवति (लिँङादेशस्तिङ् इतिं काशिकाकारोक्तिः, भट्टोजिदीक्षितोक्तिश्च मण्डूकप्लुत्यनुवृत्त्याश्रयणगौरवसहा, क्वसुँकानचोरार्धधातुकत्वाय ३-४-११४ आर्ध...इति सूत्रशरणपरा च । अत्र सार्वधातुकसंज्ञा न समाविशति ३-४-१११ लङः...सूत्रादेवकारानुवृत्तेः) इत्युपदिश्य ३-४-८२ परस्मै... सूत्रमुपदिशेत् ।

३-४-११६ लिँङा- ७-१-३५ तुह्योस्तातँङ्...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

३-४-११४ आर्धधातुकं शेषः ॥

३-४-११६ लिँङाशिषि (क) ॥इति।

आशिषि लिँङ्=आशिष्यर्थे विधीयमानस्य लिँङः स्थाने जात आदेशः, (क) आर्धधातुकम्=आर्धधातुकसंज्ञो भवति । इत्यर्थमुपदिश्य प्रकृते शप् प्रत्ययः प्राप्नोति न वा ? इतिच्छात्रान् परीक्ष्य ३-४-१०३ यासुँट्...सूत्रं ३-४-१०० इत...सूत्रं च सत्यावश्यके उद्बोधयन्, छात्रैः साध्यमानं पठ्या+स्त् इति श्यामपाटचां लिखित्वा ८-२-२३ संयोगान्तस्य...सूत्रं बाधयित्वा ८-२-२९ स्कोः सं....सूत्रमुपदिशेत्

३-४-११७ छन्दसि- वेदे, उभयथा=सार्वधातुकसंज्ञाऽर्धधातुकसंज्ञा च । **वर्धन्तु त्वा सुष्टुतयः** । अत्रार्धधातुकत्वाण्णिलोपः । वर्धयन्त्वित्यर्थः । **स्वस्तये नावमिवारुहेम** । अत्र क्तिनः सार्वधातुकत्वादस्तेर्भूभावो न ।

इति तृतीयाऽध्याये

चतुर्थः पादः ।

इति तृतीयोऽध्यायः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ चतुर्थोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ चतुर्थाध्याये

प्रथमः पादः

४-१-१ ङ्याप्प्रातिपदिकात् ॥ ५-४-१६०

४-१-२ स्वौजसमौट्छष्टाभ्यां-भिस्-ङे-भ्यां-भ्यस्-ङसिँ-भ्यां-भ्यस्-ङसोसां-ङ्योस्सुप् ॥

४-१-३ स्त्रियाम् ॥ ८१

४-१-४ अजाद्यतष्टाप् ॥

अजा । रमा । पञ्चाजी ।

(शूद्रा चाऽमहत्पूर्वा जातिः)

शूद्रा । पुंयोगे तु ङीष् शूद्री । अमहत्पूर्वा, इत्युक्तेर्नेह टाप्-महाशूद्री ।

(संभस्त्राजिनशणपिण्डेभ्यः फलात्)

संफला । इत्यादि ।

(सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्)

सत्पुष्पा । प्राक्पुष्पा । प्रत्यक्पुष्पा । इत्यादि ।

(मूलान्नञः)

अमूला ।

४-१-२ **स्वौज**-१-२-४६ कृत्तद्धित... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)	(ख)	(ग)
३-१-१ प्रत्ययः ॥	३-१-२ परश्च ॥	४-१-१ ङ्याप्प्रातिपदिकात् ॥

४-१-२ (ग) स्वौज... सुप् (क) (ख) ॥ इति । (ग) ङ्याप्प्रातिपदिकात् = ङ्यन्तात् आबन्तात् प्रातिपदिकाच्च, स्वौजस... सुप्= सुँ औ जस् (प्रथमा) अम् औट् शस् (द्वितीया) टा भ्याम् भिस् (तृतीया) ङे भ्याम् भ्यस् (चतुर्थी) ङसिँ भ्याम् भ्यस् (पञ्चमी) ङस् ओस् आम् (षष्ठी) ङि ओस् सुप् (सप्तमी) इत्येते, (क)=प्रत्ययः=प्रत्ययाः, (ख)=परः= परे= परतो भवन्ति । अथा ऽग्रिम- सुँबन्त- प्रक्रिया १-४-१०२ सुँपः-सूत्र- सन्दर्भादुपदिष्टैव । अथ शिक्षकेणा ऽवधेयं यद् यद्यपि प्रथमं तव्यदादयः कृत्यप्रत्ययाः पश्चाच्च ण्वुँल्तृजादयः कृत्-प्रत्यया उपदेश्या इत्यापाततः प्रतीयते । किन्तु कृत्यप्रत्ययेषु कृत्संज्ञाया अपि समावेशात् तेषां कर्त्रर्थे विधानं संभाव्य बाधित्वा च भावे कर्मणि वा विधानं कार्यं भवति । वस्तुत उत्सर्गोदाहरण-बोधनं विना ऽपवादोदाहरण-बोधनं गौरव-ग्रस्तं भवति । अतः कृत्यप्रत्ययेभ्यः पूर्वं ण्वुँल्तृजादयः कृत्प्रत्यया उपदेश्या इति । अथ प्रथमं ३-१-१३३ ण्वुँल्तृचौ-सूत्रमुपदिदिक्षुः शिक्षकोऽधोनिर्दिष्टरूपेण-च्छात्राणामाकाङ्क्षामुद्भावयेत् । यथा-वत्साः? यः पठति स पाठक इत्युच्यते । अत एव यो गोरखापत्रं (समाचारपत्रं) पठति, स गोरखापत्रस्य (समाचारपत्रस्य) पाठक इत्युच्यते । यः पश्यति स दर्शक इत्युच्यते । अत एव यो नाटकं पश्यति, स नाटकस्य दर्शक इत्युच्यते । यः कस्मिँश्चित् कार्ये युनक्ति, स योजक इत्युच्यते । यः सेवते, स सेवक इत्युच्यते । अत एव य ईश्वरं सेवते; स ईश्वरस्य सेवक इत्युच्यते । यः कृषति, स कर्षक इत्युच्यते । अत एव यः क्षेत्रं कृषति स क्षेत्रस्य कर्षक इत्युच्यते । यो दोग्धि स दोहक इत्युच्यते । अत एव यो गां दोग्धि स गोर्दोहक इत्युच्यते । वत्साः ? इमे पाठक-दर्शक-योजक-सेवक-कर्षक-दोहक- प्रभृतयः शब्दाः कथं सिध्येयुः ? इति । अथ वत्साः ? तथाविध-शब्दसिद्धये ३-१-१३३ ण्वुँल्तृचौ-सूत्रमुपदिश्यते, इति वदन् सूत्रं तदुपदिशेत् ।

४-१-३ **स्त्रियाम्**=४-१-८२ समर्थानाम्... इति सूत्रात् प्राक् स्त्रियामित्यधिक्रियते ।

४-१-४ **अजा**- २-३-६५ कर्तृकर्मणोः... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क)	(ख)
४-१-१ ङ्याप्प्रातिपदिकात् ॥	४-१-३ स्त्रियाम् ॥

४-१-४ (ख) अजाद्यतः (क) टाप् ॥ इति ।

(ख) = स्त्रियाम्= स्त्रीलिङ्गे वर्तमानात्, अजाद्यतः+ [(क)= प्रातिपदिकात्]= अज- प्रभृतिगणपठितान् अदन्ताच्च प्रातिपदिकात् परतः टाप्=टाप्प्रत्ययो भवति (३-१-१ प्रत्ययः ३-१-२ पर इत्यवधेयम्) । इत्यर्थमुपदिशेत् । अत्र शिक्षकेणा ऽवधेयं यद् भाष्ये पञ्चाजी दशाजी, अत्रापि प्राप्नोतीत्याशङ्क्य नैष दोषः । अजादिभिरत्र स्त्रियं विशेषयिष्यामः अजादीनां या स्त्रीति । इति परिहृतम् । अत एव भट्टोजिदीक्षितो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-५ ऋन्नेभ्यो ङीप् ॥ २४ कर्त्री । दण्डिनी । **४-१-६ उगितश्च ॥** भवती । अतिभवती । पठितवती । ७-१-७०	उगिदचां ... सूत्रे ऽञ्चति-ग्रहणं धातो श्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियमार्थम् । तेनेह- उखास्रद् ब्राह्मणी । अञ्चतेस्तु भवत्येव प्राची । प्रतीची ।

ऽपि अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् इति वृत्तिं पठित्वा अजादिभिः स्त्रीत्वस्य विशेषणान्नेह- पञ्चाजी, इत्युपादिक्षत् । [एवं व्याख्यानं द्वितीयावृत्तौ कार्यम्] साम्प्रतं तु बाललालनामनुसर ता ना ऽयमर्थ उपदेश्यः, बोधभारापत्तेः ।

उपदिष्टश्च भाष्ये ऽपि सरलार्थः- स्त्रियां यत् प्रातिपदिकं वर्तते, तस्माट्टाबादयो भवन्ति स्वार्थे इति । अथ प्रकृते दर्शकयोजकादयः शब्दा अदन्ताः सन्तीनि ततष्टाप्यनुबन्धलोपे दर्शक आ, योजक आ इति श्यामपाटचां लिखित्वा ७-३-४४ प्रत्ययस्थात्... सूत्रमुपदिशेत् ।

शूद्रा= शूद्रशब्दष्टापं लभते, स्त्रियाम् (४-१-३) जातिः= जातिश्चेद् वाच्या । अमहत्पूर्वा=महत्पूर्वः शूद्रशब्द स्टापं न लभते, जातिश्चेद् वाच्या । महाशूद्रशब्दः समुदायो यदा जातिवचनस्तदा न टाप् । महाशूद्री । प्रतिषेधवाक्येऽपि जातिरित्यस्य सम्बन्धाद् महती शूद्रा इत्यर्थे महाशूद्रा इत्यत्र न प्रतिषेधः । समुदायस्य जातिवचनत्वा ऽभावात् । प्रतिषेधोऽयमत्र प्रकरणे तदन्तविधिर्भवतीति ज्ञापयति ।

४-१-५ ऋन्ने-६-४-११ अप्तृन्... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

४- १-१ ङ्याप्प्रातिपदिकात् ॥ ४-१-३ स्त्रियाम् ॥

४-१-५ (ख) ऋन्नेभ्यः (क) ङीप् ॥ इति । (ख)= स्त्रियाम्= स्त्रीलिङ्गे वर्तमानेभ्यः, ऋन्नेभ्यः=ऋदन्तेभ्यः नकारान्तेभ्यश्च, (क)= प्रातिपदिकात्= प्रातिपदिकेभ्यः, ङीप्=ङीप् प्रत्ययो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वाऽनबुन्धलोपे च च्छात्रैः साधिते "पठितृ+ई" इति श्यामपाटचां लिखित्वा छात्रैः सन्धिं साधयित्वा पठित्रीशब्दो निष्पन्न इति बोधनक्रमे सुँबन्तप्रक्रिया ६-१-१०१ दीर्घाज्जसि च सूत्रोपक्रमे प्रस्तुतस्य गौरीशब्दस्येव ज्ञेयेति समुपदिश्य च्छात्रैरुच्यमानानि रूपाणि शिक्षकः शृणुयात् । कोशस्य पठित्री राधिका । व्याकरणस्य पठित्री विष्णुमाया । इत्यादीनि वाक्यान्यप्यनुवादयेत् । अथाऽग्रे शिक्षकः पुनरुपदिशेत् । वत्साः ? इत्थमेव सर्वेभ्यो धातुपाठपठितेभ्यः प्रकारान्तरेणोपदिष्टेभ्यश्च धातुभ्यस्तृच्प्रत्ययेन बहवः शब्दा : सम्पद्यन्ते । यथा- अद्-अत्ता । अत्त्री । रुध्-रोद्धा । रोद्धी । कृ-कर्ता । कर्त्री । वद्-वदिता । वदित्री । भण्-भणिता । भणित्री । चोरि-चोरयिता । चोरयित्री । भू-भविता । भवित्री । क्री-क्रेता । क्रेत्री । इत्यादय इति । इत्यादीन् प्रयोगान् सम्यगभ्यासयन् विद्यार्थिनां मस्तिष्के विषयस्याऽस्य स्फुरणं जातं नवेति तान् परीक्षेत । अथ ३-१-९४ वा ऽ सरूपो... सूत्रमुपदिशेत् ।

४-१-६ उगि-७-१-७० उगिदचां... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

४-१-१ ङ्याप्प्रातिपदिकात् ॥ ४-१-३ स्त्रियाम् ॥ ४-१-५ ऋन्नेभ्यो ङीप् ॥

४-१-६ (ख) उगितश्च (क) (ग) ॥ इति ।

(ख)= स्त्रियाम्= स्त्रीलिङ्गे वर्तमानात्, उगितः उगिदन्तात्, (क)= प्रातिपदिकात् (ग) = ङीप् = ङीप्प्रत्ययो भवति । इत्यर्थमुपदिश्य शिक्षकः साहाय्यं ददच्छात्रैर्लक्षणसमन्वयं कारयेत् । **पठितवती** । ६-१-१०१ दीर्घा... सूत्रोपक्रमे प्रस्तुतस्य गौरीशब्दस्येव रूपाणि भवन्तीति भणन् स्वयं छात्रैरुच्यमानानि रूपाणि शृणुयात् । अथ आँकारानुबन्धफलं दिदर्शयिषुः शिक्षकः श्विताँ (७४१) धातुं धातुपाठे दर्शयित्वा ततः क्तवतुँप्रत्यये श्वित्+तवत् इति श्यामपाटचां लिखित्वा, इटं संभाव्य ७-२-१६ आँदितश्च-सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-७ वनो रँ च ॥

धीवरी । पारदृश्वरी ।

(वनो न हशः)

सहयुध्वा ब्राह्मणी ।

(बहुव्रीहौ वा)

बहुधीवरी । बहुधीवा । पक्षे डाब् वक्ष्यते ।

४-१-८ **पा॑दो** ऽन्यतरस्याम् ॥९

द्विपदी, द्विपात् ।

४-१-९ **टा॑**बृचि ॥१०

द्विपदा ऋक् ।

४-१-१० **न॑** षट्स्वस्रादिभ्यः ॥१२

पञ्च कन्याः । स्वसा । स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा । याता मातेति सप्तैते स्वस्रादय उदाहृताः ॥

४-१-११ मन॑ः ॥ १३

सीमा । सीमानौ ।

(अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति) (परिभाषा)

अतिमहिमा । अतिमहिमानौ ।

४-१-१२ अनो॑ बहुव्रीहेः॑ ॥ १३

बहुयज्वा । बहुयज्वानौ ।

४-१-१३ डाबुभाभ्यामन्यतरस्याम् ॥

सीमा । सीमे सीमानौ । बहुयज्वा । बहुयज्वे, बहुयज्वानौ । डापः प्रतिषेधस्य च विधानारम्भ सामर्थ्यादिव सिद्धौ, अन्यतरस्यां ग्रहणं बहुव्रीहौ ४-१-७ वनो र च इत्यस्यापि विकल्पार्थम् ।

बहुधीवा, बहुधीवरी ।

४-१-१४ **अनुपसर्ज॑नात्** ॥ ८१

४-१-७ **वनो**-वनः= वन्नतात् तदन्ताच्च; प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीप् (४-१-५) रँ च= प्रकृते रँ (अनुबन्धलोपे र्)आदेशश्च । १-१-५९अलो... इति बलेन रेफो नकारस्य स्थाने भवति । ङीपि पूर्वेणैव सिद्धे रेफविधानार्थं वचनम् ।

वनो-हशः + वनः= हशन्ताद् धातोर्विहितो यो वन्, तदन्तात्, न = ङीब्रौ न भवतः ।

४-१-८ **पादः**= पाच्छब्दान्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) अन्यतरस्याम्=वा, ङीप् (४-१-५) । **द्विपदी** ६-४-१३० पाद :... इति पदादेशः ।

४-१-९ **टाबृ**-ऋचि= ऋचि वाच्यायाम्, पादः (४-१-८) प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) टाप्= टाप् प्रत्ययो भवति ।

४-१-१० **न षट्**- षट्स्वस्रादिभ्यः= षट्संज्ञकेभ्यः स्वसृप्रभृतिभ्यश्च, न= ङीप् (४-१-५) टाप् (४-१-४) च न भवतः ।

४-१-११ **मनः**= मन्नन्तात्, प्रातिदिकात् (४-१-१) न (४-१-१०)= ङीप् न भवति ।

४-१-१२ **अनः**+बहुव्रीहेः=अन्नन्ताद् बहुव्रीहेः, स्त्रियाम् (४-१-३) न (४-१-१०)= ङीब् न भवति ।

४-१-१३ **डाबु**= उभाभ्याम्= मनः (४-१-११) अनो बहुव्रीहेश्च (४-१-१२) स्त्रियाम् (४-१-३) अन्यतरस्याम्=वा, डाप्=डाप् प्रत्ययो भवति ।

४-१-१४ अनुपसर्जनात्= इतः प्रभृति ४-१-७७ यूनस्तिरितिपर्यन्ताः प्रत्यया अनुपसर्जनाद् भवन्ति (उपसर्जनान्न भवन्ति) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-१५ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ॥

कुरुचरी । वैनतेयी । कुम्भकारी । औत्सी । ऊरुद्वयसी । ऊरुदघ्नी । ऊरुमात्री ।पञ्चतयी । आक्षिकी । लावणिकी । यादृशी । इत्वरी । अनुपसर्जनादित्यधिकारान्नेह-बहुकुरुचरा ।

(ताच्छीलिके णेऽपि)

चौरी ।

(नञ्स्नञीकक्ख्युँस्तरुणतलुनानामुपसंख्यानम्)

स्त्रैणी । पौंस्नी । शाक्तीकी । आढचङ्करणी । तरुणी सुरा । तलुनी सुरा ।

४-१-१६ यञश्च ॥ १८

गार्गी ।

(आपत्यग्रहणं कर्तव्यम्) ।

नेह-द्वीपे भवा-द्वैप्या ।

४-१-१७ प्राचां ष्फ तद्धितः ॥१९

गार्ग्यायणी । अन्येषां मते गार्गी ।

४-१-१८ सर्वत्र लोहितादिकतन्तेभ्यः ॥

लौहित्यायनी । कात्यायनी ।

४-१-१९ कौरव्यमाण्डूकाभ्यां च ॥

कारव्यायणी । माण्डूकायनी ।

(आसुरेरुपसंख्यानम्)

आसुरायणी ।

४-१-२० वयसि प्रथमे ॥

कुमारी ।

(वयस्यचरम इति वक्तव्यम्)

वधूटी । चिरण्टी । "कन्या" इति तु कन्यायाः कनीन च इति ज्ञापकात् ।

४-१-१५ टिड्ढा-[अनुपसर्जनात् (४-१-१४)] + टिड्ढा... रपः=अनुपसर्जन- टिदाद्यन्तात्, अतः (४-१-४)= अदन्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीप् (४-१-५) । उदाहरणेषु ६-१-१४८ यस्येति... इत्यल्लोपः । **ताच्छी-** अण्वत् कार्यं भवति । ६-४-१७२ कार्म... इतिसूत्रे विशेषो द्रष्टव्यः । **नञ्स्न-** तरुणी सुरा । अभिनवेत्यर्थः । वयसि तु गौरादित्वात् ४-१-४१ षिद्गौ... इति ङीष् ।

४-१-१६ यञः= यञन्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीप् (४-१-५) । गार्गी प्राग्वदल्लोपः ६-४-१५० हल... इति यकारलोपः ।

आपत्यग्रहणम्= अपत्याधिकारस्थयञो ग्रहणम् ।

४-१-१७ प्राचां... यञ : (४-१-१६ प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ष्फ= ष्फ प्रत्यो भवति, तद्धितः= स ष्फप्रत्ययस्तद्धितसंज्ञो भवति, प्राचाम्= प्राचामाचार्याणां मते । **गार्ग्यायणी** ७-१-२ आय...इत्यायन् । ष्फेणोक्तेऽपि स्त्रीत्वे, षित्त्वसामर्थ्यात् ४-१-४१ षिद्गौ... इति ङीष् ।

४-१-१८ सर्व- यञः (४-१-१६)= यञन्तेभ्यः, लोहि... तेभ्यः= लोहितादिभ्यः कतशब्दान्तेभ्यः, प्रातिपदिकेभ्यः (४-१-१) स्त्रियाम् (४-१-३) ष्फ+तद्धितः (४-१-१७) सर्वत्र= सर्वेषामाचार्याणां मते । लोहितादिर्गर्गाद्यन्तर्गणः ।

४-१-१९कौर...काभ्याम्= कौरव्य माण्डूक इति, प्रातिपदिकात् (४-१-१)= प्रातिपदिकाभ्याम्, स्त्रियाम् (४-१-३) ष्फ+ तद्धितः (४-१-१७) । **आसुरेः**= आसुरिप्रातिपदिकात्, स्त्रियाम् (४-१-३) ष्फ+ तद्धितः (४-१-१७) ।

४-१-२० वय -प्रथमे + वयसि= प्रथमवयोवाचिनः, अतः (४-१-४)= अदन्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीप् (४-१-५) । वयांसि चत्वारि । यथाहुः-

आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम् । तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति ॥ केचन पुनर्वयांसि त्रीण्याहुः । यथा- पिता रक्षति कौमारे भर्ता रक्षति यौवने । पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ **वयस्य-** वधूटचिरण्टशब्दौ द्वितीयवयोवचनौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-२१ **द्विगो**ः ॥ २४

सप्तशतीं । अजादित्वात् त्रिफला ।

४-१-२२ अपरिमाणविस्ताचितकम्बल्येभ्यो न **तद्धितलुकि** ॥ २४

पञ्चाश्वा । द्विविस्ता । द्व्याचिता । द्विकम्बल्या । अपरिमाणेत्युक्तेरिह- भवत्येव- द्व्याढकी । तद्धितलुकीत्युक्तेरिह भवत्येव- पञ्चाश्वी ।

४-१-२३ काण्डान्तात् क्षेत्रे ॥

द्विकाण्डा क्षेत्रभक्तिः । "क्षेत्रे" इत्युक्तेरिह भवत्येव-द्विकाण्डी रज्जु : ।

४-१-२४ पुरुषात् प्रमाणे ऽन्यतरस्याम् ॥

द्विपुरुषी, द्विपुरुषा वा परिखा ।

४-१-२५ **बहुव्रीहे**र**ूधसो** ङीष् ॥ २९,२६

कुण्डोध्नी ।

४-१-२६ **संख्या**'**व्ययादे**'**र्ङीप्** ॥ २७,३९

द्व्यूध्नी । अत्यूध्नी ।

४-१-२१ **द्विगो**ः-अत: (४-१-४) द्विगो: = द्विगुसंज्ञकात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीप् (४-१-५) । सप्तशती २-१-५१ तद्धि... इति समाहारे समासे २-१-५२ संख्या... इति द्विगुसंज्ञायाम् २-४-१७ अकारान्तोत्तर... इति वार्तिकेन स्त्रीलिङ्गता ।

४-१-२२ **अप**- सर्वतो मानम्= परिमाणम् । अप... ल्येभ्य:= अपरिमाणान्ताद् विस्त आचित कम्बल्य इत्येतदन्ताच्च, द्विगो: (४-१-२१) प्रातिपदिकात् (४-१-१) न= ङीब् न भवति, तद्धितलुकि=तद्धितस्य लुकि सति । **पञ्चाश्वा** पञ्चभिरश्वैः क्रीतेति विग्रहे २-१-५१ तद्धि... इति समासे प्रागवद् द्विगुसंज्ञायाम्, ५-१-३६ तेन... इति ठक् । तस्य ५-१-२८ अध्य... इति लुक् । **द्विविस्ता** द्वौ विस्तौ पचति पूर्ववत् समासो द्विगुश्च । ५-१-५१ संभ... इति ठञ् । तस्य पूर्ववल्लुक् । **द्व्याचिता** द्वौ आचितौ पचति पूर्ववत् समासो द्विगुश्च । ५-१-५३ द्विगो: ... इति खष्ठनौ । ताभ्यां मुक्ते ठञ् पूर्ववल्लुक् । **द्विकम्बल्या द्वाभ्यां** कम्बल्याभ्यां क्रीता पूर्ववत् समासो द्विगुश्च ५-१-५१ तेन... इति ठञ् । तस्य प्राग्वल्लुक् । **द्व्याढकी** प्रक्रिया द्व्याचितेत्यत्रेव । **पञ्चाश्वी** समाहारे द्विगु: सप्तशतीत्यत्रेव प्रक्रिया ।

४-१-२३ **काण्डान्तात्**= काण्डशब्दान्ताद्, द्विगो: (४-१-२१) न+तद्धितलुकि (४-१-२२) । **द्विकाण्डा** द्वे काण्डे प्रमाणमस्याः क्षेत्रभक्तेः ५-२-३७ प्रमाणे:... इति मात्रच् । तस्य तत्सूत्रस्थेन प्रमाणे ल :- द्विगोर्नित्यम् इति वार्तिकेन लुक् । काण्डम्= मानदण्ड: ।

द्विकाण्डी काण्डशब्दस्याऽपरिमाणवाचित्वात् पूर्वेणैव सिद्धे नियमार्थं वचनमिति- काशिका ।

४-१-२४ **पुरुषात्**-प्रमाणे+पुरुषात्= प्रमाणे य: पुरुषशब्दस्तदन्ताद, द्विगो: (४-१-२१) अन्यतरस्याम्= वा, न+ तद्धितलुकि (४-१-२२) । अपरिमाणान्तत्वान्नित्ये प्रतिषेधे प्राप्ते विफल्पार्थमिदम् । **द्विपुरुषी** तद्धित प्रक्रिया द्विकाण्डेत्यत्रेव ।

४-१-२५ **बहु**- ऊधस:+ बहुव्रीहे:= ऊधो ऽन्ताद् बहुव्रीहे:, स्त्रियाम् (४-१-३) ङीष्=ङीष्प्रत्ययो भवति । **कुण्डोध्नी** कुण्डमिवोधो यस्या इति विग्रहे बहुव्रीहिसमासे ५-४-१३१ ऊध... इति समासान्ते कृते ४-१-५ ऋन्ने... इति प्राप्तस्य ङीप : ४-१-१२ अनो... इति निषेधे ४-१-१३ डाबु... इति डापि च प्राप्ते ऽनेन ङीष् । ६-४-१३४ अल्लो... इत्यल्लोप : । ४-१-२८ अन... इति ङीपो ऽप्ययं बाधक: । तत्राप्यस्य सूत्रस्याऽनुवृत्तेः स्वीकारात् ।

४-१-२६ **संख्याव्ययादे**:=संख्यादेरव्ययादेश्च, ऊधस: + बहुव्रीहे: (४-१-२५) स्त्रियाम् (४-१-३) ङीप्=ङीप् प्रत्ययो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-२७ दामहायनान्ताच्च ॥

द्विदाम्नी । द्विहायनी बाला ।

त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम्)

त्रिहायणी, चतुर्हायणी बाला ।

(वयोवाचकस्यैव हायनस्य ङीब् णत्वं चेष्यते)

नेह-द्विहायना, त्रिहायना, चतुर्हायना शाला ।

४-१-२८ अन उपधालोपिनो ऽन्यतरस्याम् ॥२९

बहुराज्ञी । बहुराजे, बहुराजानौ । उपधालोपिन इत्युक्तेर्नेह-बहुयज्वे, बहुयज्वानौ ।

४-१-२९ नित्यं संज्ञाछन्दसोः ॥३१

संज्ञायाम्-सुराज्ञी, अतिराज्ञी नाम ग्रामः ।

छन्दसि-गौः पञ्चदाम्नी । एकमूर्ध्नी ।

४-१-३० केवल- मामक- भागधेय-पापापर-समानार्यकृत-सुमङ्गल-भेषजाच्च ॥

केवली । भाषायामसंज्ञायाम्- केवला । इत्यादि । अणन्तत्वादेव ङीपि सिद्धे मामकग्रहणं संज्ञाछन्दसोरेवेति नियमार्थम् । तेनाऽसंज्ञायां लोके मामिका ।

४-१-३१ रात्रेश्चाऽजसौ ॥

रात्री व्यख्यत् । असंज्ञायां लोके "रात्री" इति दीर्घेकारान्तस्तु कृदिकारादिति ङीषि बोध्यः ।

४-१-३२ अन्तर्वत्पतिवतोर्नुँक् ॥

अन्तर्वत्नी । पतिवत्नी । गर्भिण्यां जीवद्भर्तृकायामेव निपातनमिष्यते । नेह-अन्तरस्त्यां शालायां घटः । पतिमती पृथिवी ।

४-१-३३ पत्युर्नो यज्ञसंयोगे ॥३५

वसिष्ठस्य पत्नी । यज्ञसंयोगे इत्युक्तेर्नेह-ग्रामस्य पतिरियं ब्राह्मणी । कथं "वृषलस्य पत्नी" इति । उपमानाद् भविष्यतीति-काशिका ।

४-१-२७ दाम -संख्यादेः (४-१-२६) दामहायनान्तात्= दाम (न्) हायनशब्दान्ताद्, बहुव्रीहेः (४-१-२५) स्त्रियाम् (४-१-३) ङीप् (४-१-२६) । अत्र संख्यामात्रमनुवर्तते नाऽव्ययम् । दामान्ताड्डाप्प्रतिषेधविकल्पेषु प्राप्तेषु हायनान्ताट्टापि प्राप्ते वचनम् ।

४-१-२८ अन-उपधालोपिनः=उपधालोपाऽनुभाविनः, अनः= अन्नन्ताद्,बहुव्रीहेः (४-१-२५) अन्यतरस्याम्= वा, ङीप् (४-१-२६) ङीपा मुक्ते डाप्प्रतिषेधौ ।

४-१-२९ नित्यं- उपधालोपिनः+ अनः (४-१-२८) बहुव्रीहेः (४-१-२५) सज्ञाछन्दसोः = संज्ञायां छन्दसि च नित्यम्, ङीप् (४-१-२६) । विकल्पापवादः ।

४-१-३० केवल...भेषजात्= केवलप्रभृतिप्रातिपदिकेभ्यः, संज्ञाछन्दसोः (४-१-२९) स्त्रियाम् (४-१-३) ङीप् (४-१-२६) ।

४-१-३१ रात्रे-अजसौ= जस्विषयादन्यत्र, रात्रेः= रात्रिशब्दात्, संज्ञाछन्दसोः (४-१-२९) स्त्रियाम् (४-१-३) ङीप् (४-१-२६) ।

४-१-३२ अन्तर्वत्पतिवतोः = अन्तर्वत् पतिवत् इत्येतौ निपात्येते तयोः, स्त्रियाम् (४-१-३) नुँक्=नुँगागमो भवति । **अन्तर्वत्** इत्यत्र अन्तरस्त्यस्यां गर्भ इति विग्रहे अन्तः शब्दादप्राप्तो मतुँब् निपात्यते । वत्वं तु ८-२-९ मादु..... इत्यनेन सिद्धम् । पतिवत् इत्यत्र जीवन् पतिरस्त्यस्या इति विग्रहे ५-२-९४ तद... इत्यनेन मतुँप् सिद्धः । वत्वमत्र निपात्यते नुँकि सति नान्तत्वात् ४-१-५ ऋन्ने... इति ङीप् ।

अन्तर्वत्पतिवतोस्तु मतुँब्वत्वे निपातनात् । गर्भिण्यां जीवपत्यां च वाच्छन्दसि तु नुँग्विधिः ॥ तथा च छन्दसि-अन्तर्वत्नी, अन्तर्वती । पतिवत्नी, पतिवती इत्युदाहरणानि सम्भवन्ति ।

४-१-३३ पत्युः = पतिशब्दस्य स्थाने, नः= नँ (अनुबन्धलोपे न्) आदेशो भवति, स्त्रियाम् (४-१-३) यज्ञसंयोगे= यज्ञेन सम्बन्धे गम्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-३४ विभाषा सपूर्वस्य ॥

वृद्धपत्नी, वृद्धपतिः । अत्रानुवर्तमानमुपसर्जनं न पत्युर्विशेषणं किन्तु सपूर्वस्यैव । तेन बहुव्रीहावपीदं प्रवर्तते । दृढपत्नी, दृढपतिः।वृषलपत्नी, वृषलपतिः ।

४-१-३५ नित्यं सपत्न्यादिषु ॥

समानः पतिर्यस्याः सपत्नी ।

४-१-३६ पूतक्रतोरै च ॥

"त्रय एते योगाः पुंयोगप्रकरणे द्रष्टव्याः" इति काशिका । पूतक्रतोः स्त्री पूतक्रतायी। यया तु क्रतवः पूताः स्यात् पूतक्रतुरेव सा ।

४-१-३७ वृषाकप्यग्निकुसितकुसीदानामुदात्तः ॥३८

वृषाकपेः स्त्री वृषाकपायी ।

४-१-३८ मनोरौ वा ॥३९

मनोः स्त्री मनावी, मनायी, मनुः ।

४-१-३९ वर्णादनुदात्तात्तोपधात्तो नः ॥४०

एनी, एता । अनुदात्तादित्युक्तेर्नेह-श्वेता । अत इत्यनुवृत्तेर्नेह-शितिर्ब्राह्मणी ।

(पिशङ्गादुपसंख्यानम्) ।

पिशङ्गी, पिशङ्गा ।

(असितपलितयोः प्रतिषेधः)

असिता । पलिता ।

(तयोः क्नँमित्येके)

असिक्नी । पलिक्नी ।

४-१-४० अन्यतो ङीष् ॥ ६५

सारङ्गी ।

४-१-४१षिद्गौरादिभ्यश्च ॥

नर्तकी । गौरी । मातामही । पितामही ।

"मातरि षिच्च" इति षित्त्वादेव सिद्धे गणे पाठः, अनित्यः षिल्लक्षणो ङीष्" इति ज्ञापनार्थः । तेन दंष्ट्रा इति सिध्यति ।

४-१-३४ **विभा-सपूर्वस्य**= विद्यमानपूर्वस्य, पत्युः (४-१-३३) विभाषा=वा, नः (४-१-३३) स्त्रियाम् (४-१-३) ।

४-१-३५ **नित्यं-** सपत्न्यादिषु= सामानादिषु पूर्वेषु अवयवेषु सत्सु, नित्यम्, पत्युर्नः (४-१-३३) स्त्रियाम् (४-१-३) पूर्वपदस्य समानस्य स्थाने स आदेशश्च निपात्यते । आरम्भसामर्थ्यादेव. नित्यत्वे सिद्धे नित्यग्रहणं विस्पष्टार्थम् ।

४-१-३६ **पूतक्रतोः**=पूतक्रतुशब्दस्य स्थाने, ऐ= ऐकारादेशः, परः (३-१-२) ङीप् (६-१-२६ च) ।

४-१-३७ **वृषा**... दानाम्= वृषाकपिप्रभृतीनां स्थाने, उदात्तः= उदात्तत्वविशिष्टः, ऐ (४-१-३६) परः (३-१-२) ङीप् (४-१-२६) च,स्त्रियाम् (४-१-३) ।

४-१-३८ **मनोः**=मनुशब्दस्य स्थाने, वा= विभाषया, औ= औ इत्यादेशः, उदात्तः (४-१-३७) ऐ (४-१-३६) च,ङीप् (४-१-२६) च, स्त्रियाम् (४-१-३) ।

४-१-३९ **वर्णा-** अनुदात्तात्= अनुदात्तान्तात्, तोपधात्= तकारोपधकात्, वर्णात्= वर्णवाचिनः, अतः (४-१-४) प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) वा (४-१-३८) ङीप् (४-१-२६) तः= तकारस्य स्थाने, नँ= ङीप् संनियोगेन नँ (अनुबन्धलोपे न्.) आदेशश्च । **एनी** वर्णानां तणतिनितान्तानाम्, इत्याद्युदात्तत्वेन शिष्टम् ६-१-१५३ अनु... इत्यनुदात्तम् **श्वेता** घृतादीनां च इत्यन्तोदात्तो ऽयम् । **तयोः-असिक्नी** ४-१-५ ऋन्ने... इति ङीप् ।

४-१-४० **अन्यतः**=तोपधभिन्नात्, अनुदात्तात्+ वर्णात् (४-१-३९) प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीष् =ङीष् प्रत्ययो भवति । सारङ्गी लघावन्ते.इति सारङ्गशब्दस्य मध्योदात्तत्वेन शिष्टं प्रागवदनुदात्तम्

४-१-४१**षिद्गौरादिभ्यः**=षिद्भ्यो गौरादिगणपठितप्रातिपदिकेभ्यश्च, स्त्रियाम् (४-१-३) ङीष् (४-१-४०) । नर्तकी ३-१-१४५ शिल्पिनि... सूत्रस्थ-नृति... इति वार्तिकेन ष्वुँन् । **दंष्ट्रा** ३-२-१८२ दाम्नी... इति ष्ट्रन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-४२ जानपद-कुण्ड-गोण-स्थल-भाज-नाग-काल-नील-कुश-कामुक-कबराद् वृत्त्यमत्रावपनाकृत्रिमा-श्राणा-स्थौल्य-वर्णानाच्छादनाऽयोविकार-मैथुनेच्छा-केशवेषेषु ॥

जानपदी वृत्तिश्चेत् । अन्या जानपदी । स्वरे विशेषः । कुण्डी अमत्रं चेत् । कुण्डा ऽन्या । गोणी आवपनं चेत् । गोणा ऽन्या । स्थली अकृत्रिमा चेत् । स्थलाऽन्या । भाजी श्राणा चेत् । भाजाऽन्या । नागी स्थूला चेत् । नागाऽन्या । जातौ तु ४-१-६३ जाते... इति ङीष् । नागी । हस्तिनी सर्पिणी वा । काली वर्णश्चेत् । काला ऽन्या । नीली अनाच्छादनं चेत् । अनाच्छादने ऽपि न सर्वत्र किन्तु

(नीलादोषधौ)

नीली औषधिः ।

(प्राणिनि च)

नीली गौः ।

(संज्ञायां वा)

नीली, नीला ।

नीली गौः । कुशी अयोविकारश्चेत् । कुशा ऽन्या । कामुकी मैथुनेच्छावती चेत् । कामुका ऽन्या । कबरी केशवेशश्चेत् । कबरा ऽन्या ।

४-१-४३ शोणात् प्राचाम् ॥

शोणी, शोणा ।

४-१-४४ **वोतो** गुणवचनात् ॥ ४५

पट्वी, पटुः । गुणवचनादित्युक्तेर्नेह-आखुः ।

(वसुशब्दाद् गुणवचनाद् ङीप्)

वस्वी ।

(खरुसंयोगोपधान्न) ।

खरुः पतिंवरा कन्या । पाण्डुः ।

४-१-४२ जान ... राद्= जानपदादिभ्यः, वृत्त्य ... षेषु= वृत्तिप्रभृत्यर्थेषु, स्त्रियाम् (४-१-३) ङीष् (४-१-४०) ।

जानपदी स्वरे जानपदशब्दः ४-१-८६ उत्सादिभ्योऽञ् इत्यञन्तः । ६-१-१९२ ञ्नित्यादिर्नित्यम् इत्याद्युदात्तः । ततो ङीषि ३-१-३आद्युदात्तश्च इत्यन्तोदात्तः । ङीपि तु ३-१-४अनुदात्तौ सुँप्पितौ इति ङीपोऽनुदात्तत्वाद्ञ्स्वरेणाद्युदात्तः । **श्राणा-**पक्वेत्यर्थः । **नागी नागा** नागशब्दो जातिवचनो हस्तिवाची सर्पवाची च ।गुणवचनश्च (हस्तिनि स्थौल्यगुणत्वात् सर्पे दैर्घ्यगुणत्वात्) तत्र स्थौल्यगुणयोगात् तद्वत्यां हस्तिनीभिन्नायां स्त्रियां वाच्यायां ङीष् भवति । दैर्घ्यगुणयोगात् तद्वत्यां सर्पिणीभिन्नायां स्त्रियां वाच्यायां टाब् भवति । अर्थाद् गुणवचनस्यैवोदाहरणप्रत्युदाहरणे दृष्टव्ये । न तु जातिवचनस्येति भावः ।

मैथुनेच्छावती सूत्रे मैथुनेच्छाशब्दः ५-२-१२७ अर्शआद्यजन्तः । मैथुनेच्छावतीत्यर्थक इति भावः ।

४-१-४३ शोणात्, =शोणप्रातिपदिकात्, स्त्रियाम् (४-१-३) ङीष् (४-१-४०) प्राचाम्= प्राचामाचार्याणां मते । ४-१-४० अन्यतो... इत्येव सिद्धे सूत्रमिदं 'प्राचामाचार्याणामेवेति नियमार्थम् ।

४-१-४४...वोतो- गुणवचनात्= गुणवद्वाचिन : (यः प्राग्गुणमभिधाय पश्चान्मतुँब्लोपादभेदोपचाराद् वा तद्वति वर्तते स वेदितव्य इति पदमञ्जरी) उतः=उदन्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) वा=विभाषया, ङीष् (४-१-४०) । **वसु-वस्वी** वसुशब्दो नित्त्वादाद्युदात्तः । ङीब्ङीषोर्विशेषो (४-१-४२) जानपदीत्यत्र द्रष्टव्यः । अथ गुणवचनशब्दः कः इति चेत् १-४-१ आकडारादेका संज्ञा इति सूत्रे नागेशः- गुणवचनशब्देन जातिसंज्ञाव्ययकृदन्ततद्धितान्तसमस्तसर्वनामसंख्याशब्दातिरिक्तः शब्दो गृह्यत इति बोध्यमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्त्वे निविशतेऽपैति
पृथग् जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च
सोऽसत्त्वप्रकृतिर्गुणः ।

४-१-४५ बह्वादिभ्यश्च ॥४६

बहुः, बह्वी ।

(शक्तिः, शस्त्रे) ग.सू.

शक्तिः, शक्ती ।

(इतः प्राण्यङ्गात्) ग.सू.

धमनिः, धमनी ।

(कृदिकारादक्तिनः) ग.सू.

रात्रिः, रात्री ।

(सर्वतोऽक्तिन्नर्थादित्येके) ग.सू.

शकटिः, शकटी ।

(चन्द्रभागान्नद्याम्) ग.सू.

चन्द्रभागी, चन्द्रभागा ।

अहन्शब्दो ऽपि गणे पठ्यते, स केवलः स्त्रियां न वर्तते । अतस्तदन्त उदाहार्यः । दीर्घाण्यहान्यस्यां सा दीर्घाह्नी प्रावृट् । पक्षे डाब् ङीप् प्रतिषेधाश्च ।

सत्त्वे निविशते-अत्र न्यासः- व्यवच्छेदफलकत्वात् सर्ववाक्यानां सत्त्व एवेत्यवधारणं द्रष्टव्यम् । सत्त्वम्= द्रव्यम्, तत्रैव निविशते, तदेवाश्रयतीत्यर्थः । अपैति= ततः सत्त्वादपगच्छति, यथा- आम्रफले श्यामता पूर्वमुपैति, रक्ततायामुपजातायां ततोऽपैति । पृथग्जातिषु दृश्यते- पृथग्= नाना जातयो येषां ते पृथग्जातयः, अतस्तेषु पृथग्जातिषु दृश्यते। न हि गोत्वमश्वादिषु व्यक्तिषु दृश्यते । गोव्यक्तौ दृष्टः शङ्खादावपि शुक्लादिर्गुणो दृश्यते । एतेन सर्वेण जातिर्गुणो न भवतीत्युक्तं भवति । न हि जातिर्द्रव्यमेवाश्रयति । यथा हि सत्ता द्रव्यगुणकर्मसु त्रिष्वपि वर्तते, द्रव्यत्वं द्रव्य एव, कर्मत्वं कर्मण्येव, गुणत्वं गुण एव, नापि द्रव्यवर्त्तिनी जातिः सत्त्वादपैति; जन्मनः प्रभृत्याविनाशात् तस्याधारद्रव्यापरित्यागात् न जातिः पृथग्जातिषु दृश्यते । न हि गोत्वमश्वादिव्यक्तिषु दृश्यते, नाप्यश्वत्वं गवादिष्विति नास्ति जातेर्गुणत्वप्रसङ्गः ।

कर्मणस्तु स्यात्; तदपि हि सत्त्व एव निविशते यदा सक्रियं द्रव्यं भवति, अपैति च ततो यदा तु निष्क्रियं भवति । पृथग्जातिषु दृश्यत इति । घटपटादिषु दृश्यते । अतः कर्मणो गुणत्वमपाकर्तुमाह-आधेयश्चेत्यादि । आधेयः= निर्वर्त्यः, उत्पाद्य इत्यर्थः, यथा- पाक्यद्रव्येषु रक्तता गुणः, स ह्यग्निसंयोगेन निष्पाद्यते । अक्रियाजश्चेति । क्रिया=व्यापारः, ततो जातः क्रियाजः,न क्रियाजोऽक्रियाजः= नित्यः, यथा- आकाशादिषु महत्त्वादिर्गुणः । तदेवं गुणस्योत्पाद्यत्वानुत्पाद्यत्वप्रकारद्वयदर्शनेन कर्मणो गुणत्वनिवृत्तिः कृता भवति । तद्ध्युत्पाद्यमेव, नानुत्पाद्यम् । एवमपि द्रव्यस्य गुणत्वं प्राप्नोति, तस्यापि ह्येते धर्मा विद्यन्ते । तथा हि- तदपि यदि निविशते द्रव्य एवारम्भकेऽवयवभूते निविशते, अपैति च ततः, यथा-शरीरमवयवीति । तद्धि हस्तपादादिष्ववयवेषु समवैति, तद्विनाशे च विनाशात् ततोऽपैति । पृथग्जातिषु दृश्यते, हस्त्यादिषु दृश्यते । द्रव्यस्यापि पूर्वोक्तं प्रकारद्वयमस्त्येव । अवयविद्रव्यस्योत्पाद्यत्वादाकाशादेस्तद्वदनुत्पाद्यत्वाद् ? इत्यत आह- सोऽसत्त्वप्रकृतिर्गुण इति । प्रकृतिः= स्वभावः । सत्त्वं द्रव्यं प्रकृतिर्यस्य स सत्त्वप्रकृतिः, न सत्वप्रकृतिरसत्वप्रकृति : यथोक्तैर्धर्मैर्युक्तो यो द्रव्यस्वभावो न भवति स गुणः । द्रव्यम्= द्रव्यस्वभावम्, अतो गुणो न भवति ॥ इति ।

४-१-४५ बह्वादिभ्यः=बहुप्रभृतिगणपठितप्रातिपदिकेभ्यः, स्त्रियाम् (४-१-३) वा (४-१-४४) ङीष् (४-१-४०) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-४६ नित्यं छन्दसि ॥४७

बह्वी ।

४-१-४७ भुवश्च ॥

विभ्वी ।

४-१-४८ पुंयोगादाख्यायाम् ॥४९

गोपस्य स्त्री-गोपी ।

(पालकान्तान्न)

गोपालिका ।

(सूर्याद्देवतायां चाब्वाच्यः)

सूर्यस्य स्त्री (देवता) सूर्या । देवतायामित्युक्तेरिह ङीष्- सूरी कुन्ती । मानुषीयम् ।

४-१-४९ इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-हिमारण्य-यव-यवन-मातुलाचार्याणामानुँक् ॥

इन्द्राणी । वरुणानी । भवानी । शर्वाणी । रुद्राणी । मृडानी ।

(हिमारण्ययोर्महत्त्वे)

महद्धिमं हिमानी । महदरण्यमरण्यानी ।

(यवाद्दोषे)

दुष्टो यवो यवानी ।

(यवनाल्लिप्याम्)

यवनानां लिपिर्यवनानी ।

(मातुलोपाध्याययोरानुँग् वा)

मातुलस्य स्त्री मातुलानी, मातुली । उपाध्यायस्य स्त्री उपाध्यायानी, उपाध्यायी । या तु स्वयमध्यापयति तस्यां वाच्यायां ३-३-२१ इङश्च-सूत्रस्थेन अपादाने... इति वार्तिकेन वा ङीष् भवति ।

(आचार्यादणत्वं च)

आचार्यस्य स्त्री आचार्यानी, आचार्या । आचार्या स्वयं व्याख्यात्री

(अर्यक्षत्रियाभ्यां वा स्वार्थे)

अर्याणी, अर्या । क्षत्रियाणी, क्षत्रिया । पुंयोगे ङीषेव-अर्यी । क्षत्रियी ।

(मुद्गलाच्छन्दसि लिच्च)

मुद्गलानी ।

४-१-४६ नित्यं-बह्वादिभ्यः (४-१-४५) स्त्रियाम् (४-१-३) नित्यम्, ङीष् (४-१-४०) छन्दसि= वेदे ।

४-१-४७ भुवः = भु इत्यन्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) छन्दसि+ नित्यम् (४-१-४६) ङीष् (४-१-४०) । सूत्रे ३-२-१८० विप्रसंभ्यो... इति डुप्रत्ययान्तानुकरणं छान्दस उवँङ्-भुव इति ।

४-१-४८ पुंयो-पुम् इति लुप्तषष्ठीकं पृथक् पदम् । तच्चावर्तमानमाख्यायामित्यत्रापि सम्बध्यते । आख्यायामित्यत्र पञ्चम्यर्थे सप्तमी । पुंयोगादित्यत्र हेतौ पञ्चमी । अतः सूत्रार्थः- पुम् (पुंसः) आख्यायाम्= पूर्वं पुंवाचिनः, अतः (४-१-४) प्रातिपदिकात्, (४-१-१) पुंयोगात्= पुरुषसम्बन्धेन, सम्प्रति स्त्रियाम् (४-१-३) ङीष् (४-१-४०) ।

पाल-गोपालिका ७-३-४४ प्रत्ययस्थात्... इतीत्वम् ।

सूर्याद्-सूरी ६-४-१४९ सूर्य... सूत्रस्थ... सूर्या... इति यलोपः ।

४-१-४९ इन्द्र... याणाम्= इन्द्रप्रभृतीनां स्थाने, आनुँक्= आनुँक् आदेशो भवति, ङीष् (४-१-४०) च, स्त्रियाम् (४-१-३) । यत्र पुंयोगस्तत्राऽनुङ्मात्रं विधीयते, ङीष् तु पूर्वेणैव सिद्धः । पुंयोगाभावे तु ङीषपि विधेयः । इन्द्रादिषट्सु मातुलाचार्ययोश्च पुंयोगो नाऽन्यत्र ।

आचा- आनुँक् (४-१-४९) च, वा ।

मुद्ग-कस्य लित्त्वम् ? ङीषः । तेन ६-१-१८८ लिति इत्यानुँगाकार उदात्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-५० क्रीतात् करणपूर्वात् ॥५१

वस्त्रक्रीती । क्वचिन्न - धनक्रीता ।

४-१-५१ क्तादल्पाख्यायाम् ॥५२

अभ्रलिप्ली द्यौः । अल्पाख्यायामित्युक्तेर्नेह- चन्दनानुलिप्ता ब्राह्मणी । बहुचन्दना- नुलिप्तेत्यर्थः ।

४-१-५२ बहुव्रीहेश्चान्तोदात्तात् ॥५३

ऊरुभिन्नी ।

(जातिपूर्वादिति वक्तव्यम्)

तेन बहुनञ्सुकालसुखादिपूर्वान्न । बहुकृता ।

(जातान्तान्न)

दन्तजाता

(पाणिगृहीती भार्यायाम्)

पाणिगृहीताऽन्या ।

४-१-५३ अस्वाङ्गपूर्वपदाद् वा ५५

पलाण्डुभक्षिती, पलाण्डुभक्षिता ।

(बहुलं संज्ञाछन्दसोरिति वक्तव्यम्)

प्रवृद्धविलूनी, प्रवृद्धविलूना ।

४-१-५४ स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ॥ ५८

सकेशी, सुकेशा । असंयोगोपधादित्युक्तेर्नेह- सुगुल्फा ।

(अङ्गगात्रकण्ठेभ्य उपसंख्यानम्)

मृद्वङ्गी, मृद्वङ्गा । तनुगात्री, तनुगात्रा । स्निग्धकण्ठी, स्निग्धकण्ठा । अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् ॥

सुकेशी, सुकेशा ।

अतत्स्थं तत्र दृष्टं च

सुकेशी, सुकेशा वा रथ्या ।

तस्य चेत् तत् तथायुतम् ॥

सुस्तनी, सुस्तना वा प्रतिमा ।

४-१-५० क्रीता- करणपूर्वात्=करणपूर्वकात् क्रीतात्= क्रीतशब्दान्तात्, अतः (४-१-४) प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीष् (४-१-४०) ।

४-१-५१ क्ता-करणपूर्वात् (४-१-५०) क्तात्= क्तान्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीष् (४-१-४०) अल्पाख्यायाम् = अल्पोक्तौ ।

४-१-५२ बहु- क्तात् (४-१-५१) अतः (४-१-४) अन्तोदात्ताद्+बहुव्रीहेः, स्त्रियाम् (४-१-३) ङीष् (४-१-४०) । ऊरुभिन्नी २-२-३६ निष्ठा-सूत्रस्थ-जाति... इति वार्तिकेन निष्ठान्तस्य परप्रयोगः । ६-२-१६९ जातिकाल... इत्यन्तोदात्तत्वम् ।

४-१-५३ अस्वाङ्गपूर्वपदात्= अस्वाङ्गपूर्वपदकात्, क्तात् (४-१-५१) अतः (४-१-४) अन्तोदात्ताद्+ बहुव्रीहेः (४-१-५२) वा=विभाषया ङीष् (४-१-४०) । पूर्वेण नित्ये प्राप्ते विकल्पार्थं सूत्रम् ।

४-१-५४ स्वाङ्गा- असंयोगोपधात्+ उपसर्जनात्+स्वाङ्गात्= असंयोगोपधम् उपसर्जनं यत् स्वाङ्गवाचिपदं तदन्तात्, अतः (४-१-४) प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) वा (४-१-५३) ङीष् (४-१-४०) ।

अद्रवं- स्वाङ्गं त्रिधा परिभाष्यते - अद्रवम्= द्रवभिन्नम्, मूर्तिमत्, = मूर्तियुक्, प्राणिस्थम्= प्राणिनि वर्तमानम्, अविकारजम्= वातादिवैषम्यादजातम्, स्वाङ्गम्=स्वाङ्गमुच्यते । विशेषणैः क्रमशः कफ-ज्ञान- शालादिमुख- शोफप्रभृतयो निरस्ताः । बहुकफा । बहुज्ञाना । श्लक्ष्णमुखा शाला । बहुशोफा । द्वितीयं परि भाष्यते-अतत्स्थम्- तस्मिन् (प्राणिनि) तिष्ठतीति-तत्स्थम्, तद्विरुद्धम्=अतत्स्थम्= (सम्प्रति) अप्राणिस्थम्, तत्र= प्राणिनि, (कदाचिद्) दृष्टं च स्वाङ्गम् । तृतीयं परिभाष्यते-तस्य= शेषत्वविवक्षायां तृतीयार्थे षष्ठी तेनेत्यर्थः । क्वचित्तथैव पाठः । अप्राणिनेत्यर्थः तद्=मुखादि, तथा युतं चेत्= प्राणिनेव सम्बद्धं चेत्, स्वाङ्गम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-५५ नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ॥

तुङ्गनासिकी, तुङ्गनासिका । कृशोदरी, कृशोदरा । बिम्बोष्ठी, बिम्बोष्ठा । दीर्घजङ्घी, दीर्घजङ्घा । समदन्ती, समदन्ता । चारुकर्णी, चारुकर्णा । तीक्ष्णशृङ्गी, तीक्ष्णशृङ्गा । आद्ययोः पुरस्तादपवादन्यायेन ४-१-५६ नक्रो ... इति बह्वज्लक्षणप्रतिषेधस्य ओष्ठादिषु पञ्चसु मध्येपवादन्यायेन असंयोगोपधात् (४-१-५४) इति पर्युदासस्य बाधकमिदम् । एवञ्च ४-१-५७ सह... इति प्रतषेधं न बाधते ।

(पुच्छाच्चेति वक्तव्यम्)

कल्याणपुच्छी, कल्याणपुच्छा ।

(कबरमणिविषशरेभ्यो नित्यम्)

कबरपुच्छी । मणिपुच्छी ।

विषपुच्छी । शरपुच्छी ।

(उपमानात् पक्षात् पुच्छाच्च)

उलूकपक्षी सेना । उलूकपुच्छी शाला ।

४-१-५६ न क्रोडादिबह्वचः ५८

कल्याणक्रोडा । महाललाटा ।

४-१-५७ सहनञ्विद्यमानपूर्वाच्च ॥

सकेशा । अकेशा । विद्यमानकेशा । सनासिका । अनासिका । विद्यमाननासिका ।

४-१-५८ नखमुखात् संज्ञायाम् ॥

शूर्पणखा । गौरमुखा । संज्ञायामित्युक्तेरिह भवत्येव- ताम्रनखी । चन्द्रमुखी ।

४-१-५९ दीर्घजिह्वी चच्छन्दसि ॥

आसुरी वै दीर्घजिह्वी देवानां यज्ञवाट् ।

४-१-६० दिक्पूर्वपदान्ङीप् ॥

प्राङ्मुखी, प्राङमुखा । प्राङ्नासिकी, प्राङ्नासिका ।

४-१-६१ वाहः ॥

दित्यौही ।

४-१-५५ नासि... शृङ्गात्= (स्वाङ्गमुपसर्जनं (४-१-५४) यन्नासिकादि तदन्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) वा (४-१-५३) ङीष् (४-१-४०) । **पुच्छात्**= पुच्छान्ताद्, स्त्रियाम् (४-१-३) वा (४-१ ५३) ङीष् (४-१-४०) ।

कबर....शरेभ्यः=कबरादिभ्यः परो यः पुच्छशब्दस्तदन्तात्, स्त्रियाम् (४-१-३) नित्यम्, ङीष् (४-१-४०) ।

उपमानात्= उपमानवाचिनः परो यः पक्षशब्दः पुच्छशब्दश्च, तदन्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) नित्यम् ङीष् (४-१-४०) ।

४-१-५६... नक्रो-क्रोडा... बह्वचः= क्रोडाद्यन्ताद् बह्वच्कान्ताच्च, न=४-१-५४ स्वाङ्गादिति प्राप्तो ङीष् न भवति । अश्वानामुरः क्रोडा ।

४-१-५७ सह.. पूर्वात्=सहनञ्विद्यमानशब्दपूर्वकात्, स्वाङ्गात् (४-१-५४) न (४-१-५६)= ४-१-५४ स्वाङ्गात् ... इति प्राप्तः ४-१-५५ नासिको... इति प्राप्तश्च ङीष् न भवति ।

४-१-५८ नखमुखात् =नखमुखान्तात्, प्रातिपदिकात् (४-१-१) संज्ञायाम्=संज्ञायां गम्यमानायाम् न (४-१-५६) । शूर्पणखा ८-४-३ पूर्व ... इति णत्वम् ।

४-१-५९दीर्घजिहवी=दीर्घजिह्वप्रातिपदिकात् ङीष् निपात्यते,छन्दसि=वेदे ।संयोगोपधत्वादप्राप्तौ वचनम् ।

४-१-६० दिक्पूर्वपदात्,=दिग्वाचिशब्दपूर्वपदकात्, स्वाङ्गात् (४-१-५४) परस्य, ङीप्=ङीषः स्थाने ङीब् भवति । ४-१-४० अन्यतो ङीष् इत्यतो ऽनुवर्तमानं ङीष् इति प्रथमान्तं दिक्पूर्वपदादितिपञ्चम्यन्तबलेन षष्ठयन्ताय कल्पते ।

४-१-६१ वाहः=वाहन्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीष् (४-१-४०) । **दित्यौही** ६-४-१३२ वाह... इत्यूठ् । ६-१-८६ एत्ये... इति वृद्धिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-६२ सख्यशिश्वीति भाषायाम् ॥

सखी । अशिश्वी ।

४-१-६३ जातेरस्त्रीविषयादयोपधात् ॥ ६४,६६

"आकृतिग्रहणा जातिः" तटी ।

"लिङ्गानां च न सर्वभाक्, सकृदाख्यातनिर्ग्राह्या"

वृषली । ब्राह्मणीत्यत्र तु ङीषं बाधित्वा ४-१-७३) शार्ङ्ग... इति ङीन् ।

"गोत्रं च चरणैः सह"

औपगवी । कठी । जातेरित्युक्तेर्नेह-मुण्डा ।

अस्त्रीविषयादित्युक्तेर्नेह- मक्षिका ।

अयोपधादित्युक्तेर्नेह-क्षत्रिया ।

(योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधः)

हयी । गवयी । मुकयी । मत्सी । मनुषी ।

४-१-६४ पाक-कर्ण-पर्ण-पुष्प-फल-मूल-बालोत्तरपदाच्च ॥

ओदनपाकी । शङ्कुकर्णी । शालपर्णी । शङ्खपुष्पी । दासीफली । दर्भमूली गोबाली ।

४-१-६२ सख्यशिश्वीति=सखी अशिश्वी इति ङीषन्तौ निपात्येते । इति शब्दः प्रकारे भाषायामित्यस्यानन्तरं द्रष्टव्यः । तेनच्छन्दस्यपि क्वचित् । आधेनवो धुनयन्तामशिश्वीरिति हरदत्तोक्तिसारः ।

४-१-६३ जाते-अस्त्रीविषयात्= नित्यस्त्रीलिङ्गभिन्नात्, अयोपधात्= यकारोपधभिन्नात्, अतः (४-१-४) जातेः= जातिवाचिनः, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीष् (४-१-४०) । **आकृति**-आक्रियते= व्यज्यते ऽनयेत्याकृतिः= अवयवसन्निवेशविशेषः । ग्रहणमिति करणे ल्युँट् । तच्च आकृतिसमानाधिकरणमपि सामान्ये नपुंसकम् । आकृतिः ग्रहणम् (ग्रहणी) यस्याः सा आकृतिग्रहणा= अवयवसन्निवेशविशेषव्यङ्ग्या, जातिः=जातिरुच्यते । यथा- गोत्वतटत्वादिः । लक्षणमिदं ब्राह्मणवृषलत्वादौ न सङ्गच्छत इति द्वितीयं लक्षणमुच्यते-लिङ्गानामित्यादि । लिङ्गानामिति कर्मणि षष्ठी । सर्वशब्दस्य लिङ्गानामित्यस्य विशेषणत्वे ऽपि गमकत्वाद् वृत्तिः । सर्वाणि लिङ्गानि न भजतीत्यर्थः । ब्राह्मणादयः शब्दाः स्त्रीपुंसयोरेव वर्तन्ते, न तु क्लीबे । अतोऽ सर्वलिङ्गत्वं तेषाम् । उपदेशापेक्षमिदं लक्षणम् । असर्वलिङ्गेषु येषु जातित्वमाचार्या उपदिशन्ति तेष्वेव जातित्वमिति भावः । तेन देवदत्तादयो निरस्ताः । सकृदाख्यातनिर्ग्राह्या- सकृत् आख्याता= एकस्मिन् पिण्डे उपदिष्टा (एकस्मिन् गोपिण्डे उपदिष्टा, पिण्डान्तरेष्वपि, तथा एकस्मिन् ब्राह्मणे उपदिष्टा तत्पित्रादिषु पिण्डेष्वपि तथा एकस्मिन् वृषले उपदिष्टा तत्पुत्रादिषु पिण्डेष्वपि) निर्ग्राह्या= निश्चेतुं शक्येति । तृतीयं लक्षणमुच्यते- चरणैः सह गोत्रं च= शाखाध्यायिनो लौकिकं गोत्रं च जातिरिति । **औपगवी** अपत्येऽण् । कठी ४-३-१०४ कला... इति णिनिः । तस्य ४-३-१०७ कठ... इति लुक् । ततः ४-२-५९. तद... इत्यण् । तस्य ४-२-६४ प्रोक्ता... इति लुक् ।

योप- मत्सी ६-४-१९४ सूर्य... सूत्रस्थ-मत्स्य... इति यलोपः ।

मनुषी ६-४-१५० हल... इति यलोपः ।

४-१-६४ पाक...पदात्= पाकाद्युत्तरपदकात्, जातेः (४-१-६३) प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीष् (४-१-४०) । स्त्रीविषयत्वात् पूर्वेणा ऽप्राप्ते वचनम् । **ओदनपाकी** अत्र न्यासः- ओदनस्य पाक इति षष्ठीसमासः । व्युत्पत्तिमात्रार्थं त्वसौ क्रियते, न त्वत्रा ऽवयवार्थो विद्यते । समुदाय एव ह्ययं कस्यांचिज्जातौ वर्तते । एवं शङ्कुकर्णीत्यादिष्वपि वेदितव्यमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-६५ इतो मनुष्यजातेः ॥ ६६

दाक्षी । मनुष्यजातेरित्युक्तेर्नेह- तित्तिरिः । योपधादपि- उदमेयस्या ऽपत्यम्= औदमेयी ।

(इञ उपसंख्यानम्)

सौतङ्गमी ।

४-१-६६ ऊङुतः ॥ ७२

कुरूः। अयोपधादित्यनुवृत्तेर्नेह-अध्वर्युर्ब्राह्मणी ।

(अप्राणिजातेश्चाऽरज्ज्वादीनामुपसंख्यानम्)

कर्कन्धूः । अप्राणीत्युक्तेर्नेह- कृकवाकुः ।

अरज्ज्वादीनामित्युक्तेर्नेह- रज्जुः ।

४-१-६७ बाह्वन्तात् संज्ञायाम् ॥

भद्रबाहूः । असंज्ञायां तु न- वृत्तबाहुः ।

४-१-६८ पङ्गोश्च ।

पङ्गूः ।

(श्वशुरस्योकाराकारयोर्लोपश्च)

श्वश्रूः ।

४-१-६९ ऊरूत्तरपदादौपम्ये ॥७०

करभोरूः । औपम्य इत्युक्तेर्नेह-वृत्तोरुः स्त्री ।

४-१-७० संहितशफलक्षणवामादेश्च ॥

संहितोरूः । शफोरूः । लक्षणोरूः । वामोरूः ।

(सहितसहाभ्यां चेति वक्तव्यम्)

सहितोरूः । सहोरूः ।

४-१-७१ कद्रुकमण्डल्वोश्छन्दसि ॥ ७२

कद्रूः । कमण्डलूः । लोके तु कद्रुः । कमण्डलुः ।

(गुग्गुलु-मधु-जतु-पतयालूनामिति वक्तव्यम्)

गुग्गुलूः ।

४-१-७२ संज्ञायाम् ॥

कद्रूः । कमण्डलूः । असंज्ञायां तु-कद्रुः । कमण्डलुः ।

४-१-६५ इतो- मनुष्यजातेः= मनुष्यजातिवाचिनः, इतः= इदन्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ङीष् (४-१-४०) । **योपधादपि**- 'जातेः' इति वर्तमाने पुनर्जातिग्रहणं योपधादपि यथा स्यात्-इति काशिका । इञः= इञन्तात्, स्त्रियाम् (४-१-३) उपसंख्यानम्= ङीष् भवतीति वक्तव्यम् । अजात्यर्थमिदम् । **सौतङ्गमी** ४-२-८० वुँच्छण्... इति सुतङ्गमादित्वादिञ् ।

४-१-६६ ऊङु- उतः= उकारान्तात्, अयोपधात् (४-१-६३) मनुष्यजातेः (४-१-६५) प्रातिपदिकात् (४-१-१) स्त्रियांम् (४-१-३) ऊङ् =ऊङ् प्रत्ययो भवति । **कुरूः** कुरोरपत्यं स्त्री ४-१-१७० कुरु... इति ण्यः। तस्य ४-१-१७४ स्त्रियामवन्ति... इति लुक् ।

४-१-६७ बाह्वन्तात्= बाहुशब्दान्तात्, प्रातिपदिकात् । (४-१-१) स्त्रियाम् (४-१-३) ऊङ् (४-१-६६) संज्ञायाम् = संज्ञायां गम्यमानायाम् ।

४-१-६८पङ्गोः= पङ्गुशब्दात्, स्त्रियाम् (४-१-३) ऊङ् (४-१-६६) । **श्वशु**... लोपः= श्वशुरशब्दस्योकाराकार योर्लोपः, ऊङ् (४-१-६६) च, स्त्रियाम् (४-१-३) ।

४-१-६९ :ऊरूत्तरपदात्=ऊरु इत्युत्तरपदकात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ऊङ् (४-१-६६) औपम्ये= औपम्ये गम्ये ।

४-१-७० सँहित... मादेः= संहितप्रभृत्यादिकात्, ऊरूत्तरपदात् (४-१-६९) प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ऊङ् (४-१-६६) । अनौपम्यार्थ आरम्भः ।

सहित- सहितसहादिकात्, ऊरूत्तरपदात् (४-१-६९) प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) ऊङ् (४-१-६६) ।

४-१-७१ कद्रुकमण्डल्वोः= कद्रुकमण्डलुशब्दाभ्याम्, स्त्रियाम् (४-१-३) ऊङ् (४-१-६६) छन्दसि=वेदे । **गुग्गु**- छन्दसि (४-१-७१) स्त्रियाम् (४-१-३) ऊङ् (४-१-६६) ।

४-१-७२ संज्ञा-कुद्रुकमण्डल्वोः (४-१-७१) स्त्रियाम् (४-१-३) ऊङ् (४-१-६६) संज्ञायाम्= संज्ञायां गम्यमानायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-७३ शार्ङ्गरवाद्यञो ङीन् ॥

शार्ङ्गरवी। वैदी। जातिलक्षण एव ङीषनेन वाध्यते न तु पुंयोगलक्षणः। वैदस्य स्त्री वैदी।

(नृनरयोर्वृद्धिश्च)

नारी

४-१-७४ यङश्चाप् ॥ ७५

कौशल्या। वाराह्या।

(षाच्च यञः)

शार्कराक्ष्या।

४-१-७५ आवटयाच्च ॥

आवटया।

४-१-७६ तद्धिताः ॥ ५-४-१६०

४-१-७७ यूनस्तिः ॥

युवतिः ॥

४-१-७८ अणिञो रनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ॥ ७९,८१,८०

कारीषगन्ध्या। वाराह्या।

४-१-७९ गोत्रावयवात् ॥

पौणिक्या। भौणिक्या।

४-१-७३ शार्ङ्गरवाद्यञः=शार्ङ्गरवादिभ्यो ऽञन्तेभ्यश्च, प्रातिपदिकेभ्यः (४-१-१) स्त्रियाम् (४-१-३) ङीन्= ङीन् प्रत्ययो भवति। **नृन**- स्त्रियाम् (४-१-३) ङीन् (४-१-७३)। **नारी** द्वयोरेवेदमुदाहरणम्। नरशब्दे ६-४-१४८ यस्ये... इत्यन्तलोपे सत्याद्याकारस्य वृद्धिः।

४-१-७४ यङः= यङन्तात्, प्रातिपदिकात् (४-१-१) स्त्रियाम् (४-१-३) चाप्=। चाप् प्रत्ययो भवति। यङिति ञ्यङ् ष्यङोः सामान्यग्रहणम्। **कौशल्या** ४-१-१६९ वृद्धेत्... इति ञ्यङ्। **वाराह्या** ४-१-९५ अत... इतीञ्। ४-१-७८ अणिञो... इति ष्यङ्। **षाच्च+यञः**= षकारात् परो यो यञ् तदन्तात्, चाप् (४-१-७४) स्त्रियाम् (४-१-३)।

४-१-७५ आवटयात्= आवटयप्रातिपदिकात्, स्त्रियाम् (४-१-३) चाप् (४-१-७४)। ४-१-१६ यञश्च इति ङीपो बाधकम्। **आवटया** अवटशब्दो गर्गादिः। अत्र काशिका- प्राचां ष्फ एव, सर्वत्र ग्रहणात्। आवटयायनी इति।

४-१-७६ तद्धिताः२-३-५० षष्ठी... सूत्रानन्तरं सूत्रमिदं पाठयम्। अत्र शिक्षकः सूत्रमिदं दर्शयित्वा, "इत आरभ्य पञ्चमाध्यायान्तावधि ये प्रत्यया विधीयन्ते, ते सर्वे तद्धितसंज्ञका (तद्धिताः) उच्यन्ते," इति भावबोधनपुरः सरम्, तद्धिताः= इत आरभ्य पञ्चमाध्यायान्तावधिकाः प्रत्ययास्तद्धितसंज्ञका भवन्ति। इत्यर्थमुपदिशेत्। अथ ४-१-८२ समर्थानां... सूत्रमुपदिशेत्।

४-१-७७ यूनः=युव (न्) प्रातिपदिकात्, स्त्रियाम् (४-१-३) तिः=तिप्रत्ययो भवति, तद्धितः (४-१-७६)=स च तद्धितसंज्ञको भवति। ४-१-५ ऋन्नेभ्यो... इति ङीपो ऽपवादः।

४-१-७८ अणि-गुरु उपोत्तमं ययोस्तयोः= गरूपोत्तमयोः। तत्सम्बन्धात् प्रातिपदिकादित्यपि षष्ठीद्विवचनान्ताय कल्पते। त्रिप्रभृतीनामन्त्यमुत्तमम्, तस्य समीपमुपोत्तमम्। एवञ्च सूत्रार्थः फलति- गोत्रे+अनार्षयोः+ अणिञोः= गोत्रे विहितौ+अनार्षौ यौ + अणिञौ तदन्तयोः, गुरूपोत्तमयोः= गुरूपोत्तमयोः प्रातिपदिकयोः स्थाने, स्त्रियाम् (४-१-३) ष्यङ्= ष्यङ् आदेशो भवति। यद्यप्यपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यते, तथाप्यत्र पारिभाषिकमेव गृह्यते न तु लौकिकम्। लौकिके ग्राह्ये हि अनार्षयोरिति पर्युदासेनैव सिद्धे गोत्रग्रहणं व्यर्थं स्यात्। करीषस्येव गन्धो यस्य स करीषगन्धिः। तस्य गोत्रापत्यं स्त्री ४-१-९२ तस्यापत्यम् इत्यण्। वराहस्य गोत्रापत्यं स्त्री ४-१-९५ अत इञ् इतीञ्। तयोः ष्यङ्।

४-१-७९ गोत्रा-गूयन्ते= शब्द्यन्तेऽनेनेति गोत्रम्=मूलपुरुषः सन्तानस्य संज्ञाकारी। यथा रघुः। यदुः। अवयवशब्दश्चाऽप्रधानवाची। विशेषणसमासः। निपातनाद् विशेषणस्य परप्रयोगः। अप्रधानगोत्रमित्यर्थः। अप्राधान्यञ्च प्रवराध्यायापठिततत्वम्। एवञ्च प्रवराध्याये पाठाभावे स्वकुलख्यातयेगोत्रत्वेन स्वीकृताः पुणिक-भुणिक- मुखर-प्रभृतयोऽत्र गोत्रशब्देन गृह्यन्ते। इत्थं सूत्रार्थः फलति-गोत्राऽवयवात्= गोत्रत्वेनाऽभिमतात्, गोत्रे+अणिञोः+ष्यङ् (४-१-७८) स्त्रियाम् (४-१-३)। अगुरूपोत्तमार्थ आरम्भः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-८० क्रौडयादिभ्यश्च ॥

क्रौडया ।

(सूत युवत्याम्) ग.सू.

सूत्या

(भोज क्षत्रिये) ग.सू.

भोज्या ।

४-१-८१ दैवयज्ञि-शौचिवृक्षि-सात्यमुग्रिकाण्डेविद्धिभ्यो ऽन्यतरस्याम् ॥

दैवयज्ञ्या, दैवयज्ञी ।

करुणामयचिन्मूर्तेः सप्ताष्टहायनाकृतेः ।

रमतां जगदम्बायाः पाद्पद्मद्वये मनः ॥

४-१-८२ समर्थानां' प्रथमा'द् वा' ॥

५-२-१४०, ५- ४-६७

४-१-८० क्रौडयादिभ्यः=क्रौडिप्रभृतिप्रातिपदिकेभ्यः, स्त्रियाम् (४-१-३) ष्यङ् (४-१-७८)= ष्यङ्प्रत्ययो भवति । सूत्रे पञ्चम्यन्तनिर्देशात्ष्यङ् प्रत्यये इति गम्यते । अगुरूपोत्तमार्थ आरम्भः । अनणिञर्थश्च । क्रौडिरिञन्तः ।

४-१-८१ दैव...विद्धिभ्यः= दैवयज्ञिप्रभृति प्रातिपदिकेभ्यः, स्त्रियाम् (४-१-३) ष्यङ् (४-१-७८) । अत्र काशिका-गोत्रग्रहणं च नानुवर्तते । तेनोभयत्र विभाषेयम् । गोत्रे पूर्वेण नित्यः ष्यङादेशः प्राप्तो विकल्प्यते । अगोत्रे त्वनन्तरेऽपत्ये पक्षे विधीयते । तेन मुक्ते ४-१-६५ इतो मनुष्यजातेः इति ङीषेव भवतीति ।

४-१-८२ सम- ४-१-७६ तद्धिताः-सूत्रानन्तरं सूत्रमिदं पाठचम् समर्थानामिति निर्धारणे षष्ठी । अथ "प्रथमाद्" "वा" इति पदद्वयं विचार्यते यद्विचारः, सूर्यो जगदिव सम्पूर्णं तद्धितप्रकारणं प्रकाशयति । तथाहि-४-१-१ ङ्याप्प्रा...सूत्रात् ४-१-७५ आव... सूत्रावधि पञ्चम्यन्तनिर्देशात् तत्र अस्माद् ङचन्ताद् आबन्तात् प्रातिपदिकाद् वा प्रत्ययो भवतीति ज्ञायते । तद्धिते तु ४-२-२४ साऽस्य देवता । प्र.

४-२-५९ तदधीते तद् वेद ॥ द्वि.

४-३-१०१ तेन प्रोक्तम ॥तृ. ५-१-५ तस्मै हितम् ॥च.

४-१-९२ तस्या ऽपत्यम् ॥ ष. ४-३-५३ तत्र भवः ॥ स.

इत्यादिषु ५-३-१ प्राग्दिशो... सूत्रात् पूर्वेषु सूत्रेषु पञ्चम्यन्ता ऽनिर्देशात् कस्मात् प्रत्यया विधीयन्त इति न ज्ञायते । अतः कस्मात् प्रत्ययो भवतीति निर्णयाय प्रकृत-सूत्र-स्थस्य= "प्रथमात्" इति पदस्य भावः सम्यग् ज्ञेयः । तथाहि प्रथमात्= प्रथममुच्चार्यमाणात्= सूत्रानुपूर्व्यां प्रथममुच्चार्यमाणात् प्रत्यया भवन्तीति । अथ पूर्वोक्तेषु सूत्रेषु प्रथममुच्चार्यमाणानि पदानि क्रमशः सा (प्रथमान्तम्) तद् (द्वितीयान्तम्) तेन (तृतीयान्तम्) तस्मै (चतुर्थ्यन्तम्) तस्य (षष्ठचन्तम्) तत्र (सप्तम्यन्तम्) सन्ति । अतः प्र. सूत्रस्य देवता इत्युपाधिकात् प्रथमान्तात् अस्य इत्यर्थे प्रत्यया भवन्ति, इत्यर्थः । द्वि. सूत्रस्य द्वितीयान्ताद्, अधीते वेद, इत्यर्थे प्रत्यया भवन्ति, इत्यर्थः । तृ. सूत्रस्य तृतीयान्तात् प्रोक्तमित्यर्थे प्रत्यया भवन्ति, इत्यर्थः । च. सूत्रस्य चतुर्थ्यन्ताद् हितम् इत्यर्थे प्रत्यया भवन्ति, इत्यर्थः ।

ष. सूत्रस्य षष्ठचन्ताद् अपत्यम् इत्यर्थे प्रत्यया भवन्ति, इत्यर्थः । स. सूत्रस्य सप्तम्यन्ताद् भव इत्यर्थे प्रत्यया भवन्ति, इत्यर्थः । इति स्फुटं ज्ञायते । अथ "वा" इति पदेन च ते प्रत्ययाः विकल्पेन भवन्ति इति स्फुटं भवति । इति शिक्षकश्छात्रान् सम्यग् वोधयित्वा, प्रत्ययास्तु भवन्ति ते प्रत्ययाः के ? इति च्छात्राणामाकाङ्क्षामुद्दीप्य पुनरधोनिर्दिष्टरूपेण वोधयेत् । वत्साः ! उपरि यानि प्रत्ययविधायकानि सूत्राणि प्रस्तुतानि तनि तु दिग्दर्शनमात्राणि । प्रत्ययविधायकानि सूत्राणि तु वहून्यन्यान्यपि सन्ति । तत्र केन केन सूत्रेण के के प्रत्यया विधीयन्ते, इति सरलतमेनोपायेन बोधनाय भगवान् पाणिनिः कानिचिदधिकारसूत्रणि, उपदिष्टवानस्ति । तेषु प्रथमं चतुर्थाध्याय-तृतीय- पादान्तावधिकैः सूत्रैः के प्रत्यया भवन्तीति बोधनाय ४-१-८३ प्राग् दीव्यतोऽण् -४-१-८६ उत्सा... सूत्राण्युपदिश्यन्ते । इति ।

अथ नथाहि इनि वदन् ४-१-८३ प्राग् दीव्यतोऽण् सूत्रमुपदिशेन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-८३ प्राग् दीव्यतोऽण् ॥४-३-१६६

४-१-८४ अश्वपत्यादिभ्यश्च ॥४-३-१६६

आश्वपतम् । गाणपतम् ।

४-१-८५ दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ॥४-३-१६६

दैत्यः । आदित्यः । सैनापत्यः ।

४-१-८३ प्राग्दी-४-२-८२ समर्थानां... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र शिक्षकः प्रथमं ४-४-२ तेन दीव्यति... सूत्रे पठितं "दीव्यति" इति पदं दर्शयन् अत्र ४-१-८३ सूत्रे पठितं "दीव्यत्" इति तस्यैव दीव्यति इत्यस्य विकृतनिर्देश इति बोधयित्वा प्रकृतसूत्रार्थमुपदिशेत् । दीव्यतः + प्राक्= ४-४-२ तेन दीव्यति... सूत्रात् पूर्वस्मिन्नर्थे, अण्= अण् प्रत्ययो भवति । इति । अथाधोनिर्दिष्टरूपेण शिक्षको बोधयेत् । वत्साः ? एतेन पूर्वोक्तैः प्र. द्वि. तृ. ष.स. सूत्रैः, अण् प्रत्ययो विधीयत इति, च. सूत्रेण तु अण् प्रत्ययो न भवति तस्य सूत्रस्य ४-४-२ तेन दीव्यति... सूत्रादपि परत्वात् । इति स्फुटं जातम् । इति । अथ पुनरग्रे ऽधोनिर्दिष्टरूपेण बोधयेत् । वत्साः ? यद्यपि साधारणतया ४-४-२ सूत्रात् पूर्वैः सूत्रैरण् प्रययो विधीयत इति प्रतिपादितम् । तथापि कियद्भ्यश्चन प्रातिपदिकेभ्यस्तु अण्प्रत्ययस्य बाधकानि प्रत्ययान्तराणि विधीयन्ते, इति । अथ तथाहि इति वदन् ४-१-८६ उत्सादिभ्योऽञ्-सूत्रमुपदिशेत् ।

४-१-८४ अश्व- ४-१-८५ दित्यदित्यादित्य ... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- (क) (ख) (ग)

४-१-८३ प्राग् दीव्यतः अण् ॥

४-१-८४ (ख) (क) अश्वपत्यादिभ्यश्च (ग) ॥ इति ।

(ख) + (क)= दीव्यतः+ प्राक्= ४-४-२ तेन दीव्यति... सूत्रात् पूर्वस्मिन्नर्थे, अश्वपत्यादिभ्यः= अश्वपति प्रभृति- गणपठित - प्रातिपदिकेभ्यः, (ग)= अण्= अण् प्रत्ययो भवति । अर्थात् ४-१-८३ सूत्रेण अण्प्रत्ययस्याधिकारःप्राप्तस्तं बाधित्वा (पत्युत्तरपदक-प्रातिपदिकत्वात्) ४-१-८५ सूत्रेण ण्यप्रत्ययस्या ऽधिकारः प्राप्तस्तं च बाधित्वा प्रकृत ४-१-८४ सूत्रेण (पत्युत्तरपदकत्वे ऽपि) अश्वपत्यादि-गणपठित-प्रातिपदिकेभ्यः, अण् प्रत्यय एवा ऽधिकृतः । एवञ्च अश्वपति-प्रभृतिप्रातिपदिकात् प्राग्दीव्यतीयार्थः प्रत्ययः अण् एव भवतीति विशदयेत् । अथ शिक्षकः पुनरग्रे छात्रानुपदिशेत् । वत्साः ? स्त्रीपुंस (स्त्री+पुंस्) प्रातिपदिकाभ्यां तु (५-२-१ धान्यानां... सूत्रं दर्शयन्) ५-२-१ धान्यानां ... सूत्रात् प्रागर्थेषु नञ्स्नञौ (क्रमशः स्त्री+ नञ् पुंस्+स्नञ्) प्रत्ययौ भवतः । तथाहि इति वदन् ४-१-८७ स्त्रीपुंसाभ्यां... सूत्रमुपदिशेत् ।

४-१-८५ दित्य- ४-१-८६ उत्सादिभ्योऽञ् सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

४-१-८३ प्राग् दीव्यत अण् ॥

४-१-८५ (क) (ख) दित्य... ण्यः ॥ इति ।

(ख) + (क)= दीव्यतः+ प्राक्= ४-४-२ तेन दीव्यति ... सूत्रात् पूर्वस्मिन्नर्थे दित्यदित्यादित्यपत्युत्तरपदात् = दितिप्रातिपदिकात् अदितिप्रातिपदिकात् आदित्यप्रातिपदिकात् पत्युत्तरपदकात् (यथा सेनापति बृहस्पति इत्यादिकात्) प्रातिपदिकाच्च, ण्यः= ण्यप्रत्ययो भवति । एतेन पूर्वोक्तैः च.- भिन्नैः सूत्रैः दिति अदिति आदित्य इति प्रातिपदिकेभ्यः पत्युत्तरपदकात् (सेनापति बृहस्पति इत्यादिकात्) प्रातिपदिकाच्च अणं बाधित्वा ण्यप्रत्ययो विधीयते इति स्फुटं जातम् । अथाऽधो निर्दिष्टरूपेण श्यामपाट्यां लिखित्वा कस्मात् प्रातिपदिकात् कः प्रत्ययो भवतीति साराशं स्फुटं बोधयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(यमाच्चेति वक्तव्यम्)
याम्यम् ।
वाङ्मतिपितृमतां छन्दस्युपसंख्यानम्)
वाच्यम् । मात्यम् । पैतृमत्यम् ।
(पृथिव्या ञाञौ)
पार्थिवा पार्थिवी ।
(देवाद् यञञौ)
दैव्यय् । दैवम् ।
(बहिषष्टिलोपो यञ्च)
बाह्यः । "अव्ययानां भमात्रे टिलोप"
इत्यनेनैव टिलोपे सिद्धे पुनष्टिलोपवचनं तस्याऽनित्यत्वज्ञापनार्थम् । आरातीयः ।
(ईकक् च)
बाहीकः ।
(स्थाम्नोऽकारः)
अश्वत्थामः । भवार्थे लुग्वक्ष्यते-अश्वत्थामा ।
(लोम्नोऽपत्येषु बहुषु)
औडुलोमिः । औडुलोमी । उडुलोमाः ।
(सर्वत्र गोरजादिप्रत्ययप्रसङ्गे यत्)
सर्वत्र= प्राग्दीव्यतीयेऽन्यत्र च ।
गोरपत्यं गवा चरतीति वा गव्यम् ।
(ण्यादयोऽर्थविशेषलक्षणादपवादात् पूर्वविप्रतिषेधेन)

४-१-८६ उत्सादिभ्योऽञ् ॥४-३-१६६

औत्सः ।

४-१-८७ स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥ ५-१-१३५

स्त्रैणः । पौस्नः । वत्यर्थे न, १-२-६६ स्त्री पुंवच्च इति ज्ञापकात् । स्त्रीवत् । पुंवत् ।

प्रातिपदिकम्	प्राग्दीव्यतीयार्थेषु विधीयमानः प्रत्ययः ।
उत्सादि	अञ्
दिति	ण्य
अदिति	ण्य
आदित्य	ण्य
सेनापति प्रभृति-पत्यन्त	ण्य
पूर्वोक्तभिन्नानि यानि कानिचिदपि	
उपगु, भानु, विवस्वत् प्रभृतीनि	अण्

अथ शिक्षकः पुनरग्रे छात्रान् साकाङ्क्षान् कुर्यात् । तथाहि वत्साः ? अश्वपतिप्रातिपदिकाद् गणपतिप्रातिपदिकाच्च प्राग्दीव्यतीयार्थेषु कः प्रत्ययः स्यात् ? इति । अथच्छात्रेभ्यो ण्यप्रत्ययो भवतीत्युत्तरे प्राप्ते स्मितमुखः शिक्षकस्तानुपदिशेत् । यथा-वत्साः? युष्माभिस्तु सम्यगेवोत्तरं दत्तम् । परन्तु (अश्वपत्यादिगणपाठं दर्शयन्) अश्वपत्यादिगणे पठितेभ्यः प्रातिपदिकेभ्यस्तु, अण् प्रत्यय एव भवति । तथाहि इति वदन् ४-१-८४ अश्व... सूत्रमुपदिशेत् ।

४-१-८६ उत्सा - ४-१-८३ प्राग्दीव्यतोऽण्-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-
(क) (ख)
४-१-८३ प्राग् दीव्यतः अण् ॥
४-१-८६ (ख) (क) उत्सादिभ्यो ऽञ् ॥ इति । (ख) + (क) = दीव्यतः+ प्राक्, उत्सादिभ्यः = उत्सादिगण पठितप्रातिपदिकेभ्यः, अञ्= अञ् प्रत्ययो भवति । एतेन पूर्वोक्तैः, च. भिन्नैः सूत्रैः, उत्सादिगणपठितप्रातिपदिकेभ्यः, अणं बाधित्वा अञ् प्रत्ययो विधीयते, इति स्फुटं जातम् । अथ ४-१-८५ दित्यदित्यादित्य...सूत्रमुपदिशेत् ।

४-१-८७ स्त्रीपुं- ४-१-८४ अश्वपत्यादिभ्यश्च- सूत्रानन्तरं सूत्रमिदं पाठचम् । भवनात् (४-१-८३) प्राक्= धान्या...इतिसूत्रात् पूर्वस्मिन्नर्थे, स्त्री-पुंसाभ्याम्= स्त्रीप्रातिपदिकात् पुं (पुंस्) प्रातिपदिकाच्च, नञ्स्नञौ= नञ् प्रत्ययः स्नञ्प्रत्ययश्च भवतः । क्रमात् स्त्रीप्रातिपदिकाद् नञ्, पुं (पुंस्) प्रातिपदिकात् स्नञ् प्रत्ययो भवति । अथ शिक्षकः पुनरुक्तिदोषं सहमानः स्फुटप्रतिपत्तये सारांशं बोधयितुं सूत्राणि श्यामपाटचां लिखेत् ।

४-१-८३ प्राग् दीव्यतः अण् ॥ ४-१-८४ अश्वपत्यादिभ्यश्च ॥ ४-१-८५ दित्यदित्यादित्यपत्युत्तर पदाण्ण्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-८८ द्विगोर्लुगनपत्ये ॥

पञ्चसु कपालेषु संस्कृतः पञ्चकपालः ।

४-१-८९ गोत्रेऽलुगचि ॥९१

गर्गाणां छात्रा गार्गीयाः ।

४-१-९० यूनि लुक् ॥९१

ग्लुचुकस्य गोत्रापत्यं ग्लुचुकायनिः । तस्या ऽपत्यं (युवा)ग्लौचुकायनः। तस्यच्छात्राः=ग्लौचुकायनाः ।

४-१-९१ फक्फिञोरन्यतरस्याम् ॥

गर्गस्य गोत्राऽपत्यं गार्ग्यः । तस्यापत्यं (युवा) गार्ग्यायणः । तस्यच्छात्रा गार्गीयाः, गार्ग्यायणीयाः । यस्कस्य गोत्रापत्यं यास्कः । तस्यापत्यं (युवा) यास्कायनिः । तस्यच्छात्राः= यास्कीयाः, यास्कायनीयाः ।

४-१-९२ तस्या ऽपत्यम् ॥ ४-१-१७६

उपगोरपत्यम्=औपगवः । दितेरपत्यं दैत्यः । प्रजापतेरपत्यं प्राजापत्यः । अश्वपतेरपत्यम्= आश्वपतः । अश्वत्थाम्नो ऽपत्यम्= अश्वत्थामः । इत्यादि । तस्येदमित्यपत्ये ऽपि बाधनार्थं कृतं भवेत् ।

उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम् ।

४-१-८८ द्विगो- उत्तर-(४-१-८९ गोत्रे...) सूत्रादचीति पदमपकृष्यते ऽत्र सूत्रे। तच्च लुगित्यनेन सम्बद्धस्य प्रत्ययस्य विशेषणत्वात् षष्ठचन्ताय कल्पते । एवञ्च सूत्रार्थः फलति- द्विगोः= द्विगोर्निमित्तस्य, अनपत्ये=अपत्यभिन्ने प्राग्+दीव्यतः (४-१-८३) अर्थे विहितस्य, अचि=अजादेः प्रत्ययस्य, लुक्=लुग् भवति। इति । उदाहरणे प्रक्रिया ४-२-१६ संस्कृतं... सूत्रे द्रष्टव्या । द्विगोर्निमित्तस्येत्युक्तेर्नेह- पञ्चकपालस्येदं पाञ्चकपालम् । अनपत्ये इत्युक्तेर्नेह- द्वयोर्देवदत्तयोरपत्यं द्वैदेवदत्तिः । प्राग्दीव्यत इत्युक्तेर्नेह- द्वौ पारायणौ वर्तयति-द्वैपारायणिकः । अजादेरित्युक्तेर्नेह- पञ्चभ्यो गर्गेभ्य आगतं पञ्चगर्गरूप्यम्, पञ्चगर्गमयम् ।

४-१-८९ गोत्रे- अचि (४-१-८९) =अजादौ, प्राग् दीव्यतः (४-१-८३) = प्राग्दीव्यतीये प्रत्यये विवक्षिते, गोत्रे=गोत्रार्थे विहितस्य प्रत्ययस्य, अलुक्= लुग् न भवति । अचीत्युक्तेरिह लुगेव-गर्गेभ्य आगतं गर्गरूप्यम्, -गर्गमयम् । प्राग्दीव्यत इत्युक्तेरिहापि लुगेव-गर्गेभ्यो हितम्= गर्गीयम् ।

४-१-९० यूनि- अचि (४-१-८९)= अजादौ, प्राग्+दीव्यतः (४-१-८३)=प्राग्दीव्यतीये प्रत्यये विवक्षिते, यूनि= युवार्थे विहितस्य प्रत्ययस्य, लुक्= लुग् भवति । उदाहरणे युवप्रत्ययस्या ऽणो लुकि वृद्धत्वा ऽभावाच्छो न । किन्त्वणेव ।

४-१-९१ फक्फि- अचि (४-१-८९)= अजादौ, प्राग्+दीव्यतः (४-१-८३)= प्राग्दीव्यतीये प्रत्यये विवक्षिते, यूनि= (४-१-९०) युवार्थे विहितयोः, फक्फिञोः= फक्फिञ्प्रत्यययोः, अन्यतरस्याम्= वा, लुक् (४-१-९०) । पूर्वेण नित्ये प्राप्ते विकल्पार्थमिदम् । उदहरणयोः- आद्ये-गोत्रे ४-१-१०५ गर्गा... इति यञ् । ततो युवापत्ये ४-१-१०१ यञि...फक् । द्वितीये- गोत्रे ४-१-११२ शिवा... इत्यण् । ततो युवापत्ये ४-१-१५६ अणो... इति फिञ् ।

४-१-९२ तस्य=षष्ठचन्तात् समर्थात्, अपत्यम्= अपत्यमित्यर्थे, (४-१-८६ प्राग्दीव्यतो ऽण् इत्यादि सूत्राधिकृताः) प्रत्यया भवन्ति । ४-१-८७ स्त्रीपुं... सूत्र- व्याख्याक्रमे ऽ पि सूत्रमिदं व्याख्यातम् । अतो ऽ स्यार्थः सत्यावश्यके तत्रैव द्रष्टव्यः ।

औपगवः ६-४-१४६ ओर्गुण इति गुणः । अथ कारिकाया भावः- ननु ४-३-१२० तस्येदम् इत्यनेनैवा ऽपत्येऽपि सिद्धे सूत्रमिदं व्यर्थमिति चेन्न । एतत्सूत्रा ऽभावे भानोरपत्यं भानव इत्यादिषु ४-२-११४ वृद्धाच्छ इति प्रवर्तेत । अतस्तद्बाधनार्थमिदम् । शैषिके (४-२-९२ शेषे इत्यधिकारे) एव ४-२-११४ वृद्धाच्छ इत्यस्य प्रवृत्तिर्न त्वपत्याधिकारे, तथा च व्यर्थमेवेति चेत् तदपि न । तदा ऽपत्ये ऽर्थे ऽदन्तादिञ्प्रत्ययविधानाय तस्यापत्यमत इञ् इत्येकमेव सूत्रं पठनीयं स्यात् । तदा ऽदन्तप्रातिपदिकसम्बद्धस्यैवापत्यार्थस्यो-पयोगादन्यप्रातिपदिकसम्बद्धा ऽपत्यार्थस्य शेषत्वमेव स्यात् । अतो ऽस्य सूत्रस्य प्रयोजनं वृद्धानां प्रातिपदिकानां कृते बोध्यमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-८६ उत्सादिभ्यः अञ् ॥ ४-१-८७ स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥ इति ।
एवं शिक्षकः प्रातिपदिकानि कानिचित् प्रस्तुत्य, अस्मात् प्रातिपदिकात् कतमः प्रत्ययो भवति ? इति रीत्या छात्रान् परीक्ष्य ज्ञाततात्पर्येभ्य एवच्छात्रेभ्यो ऽग्रे पुनरुपदिशेत् । यथा- (४-१-९२) तस्यापत्यम्=तस्य+अपत्यम् इति सूत्रं श्यामपाट्यां लिखित्वा) वत्साः एवञ्च- अस्य (तस्यापत्यम् इति) सूत्रस्य तस्य= षष्ठचन्तात् (समर्थात्) अपत्यम्= अपत्यम् इत्यर्थे, प्रत्यया भवन्ति इत्यर्थः फलति । तथाऽर्थे सति कस्मात् प्रातिपदिकात् कतमः प्रत्ययो भवेदिति जिज्ञासा पूर्वोक्त ४-१-८२ सम... सूत्र-व्याख्योद्धृत-सूत्रद्वारा शाम्यति । तथाहि- षष्ठचन्तात् स्त्रीप्रातिपदिकात् नञ् प्रत्ययः । षष्ठचन्तात् पुं (पुंस्) प्रातिपदिकात् स्नञ् प्रत्ययः । षष्ठचन्तेभ्य उत्सादिगणपठितप्रातिपदिकेभ्यः अञ् प्रत्ययः ।
षष्ठचन्ताद् दिति प्रातिपदिकात् अदितिप्रातिपदिकात् आदित्यप्रातिपदिकात् पत्युत्तरपदक (यथा सेनापति बृहस्पति इत्यादि) प्रातिपदिकाच्च ण्यप्रत्ययः । शेषेभ्यो ऽण् प्रत्ययः खलु भवन्तीति निष्कर्षः फलति ।
एवमेव ४-२-२४ सा ऽस्य देवता सूत्रस्य देवता = देवता इत्युपाधिकात् सा = प्रथमान्तात्प्रातिपदिकात्, अस्य, इत्यर्थे पूर्ववत् प्रत्यया भवन्ति । ४-२-५९ तदधीते तद्वेद सूत्रस्य तद्= द्वितीयान्तात् प्रातिपदिकात्, अधीते वेद इत्यर्थयोः पूर्ववत् प्रत्यया भवन्ति । ४-३-१०१ तेन प्रोक्तम्, सूत्रस्य तेन= तृतीयान्तात् प्रातिपदिकात्, प्रोक्तम् इत्यर्थे पूर्ववत् प्रत्यया भवन्ति । ४-३-५३ तत्र भवः - सूत्रस्य तत्र= सप्तम्यन्तात् प्रातिपदिकात्, भवः = भव इत्यर्थे पूर्ववत् प्रत्यया भवन्ति । इत्यर्थाः फलन्ति । सावधानम् । ५-१-५ तस्मै हितम्, इति सूत्रस्य तु तस्मै=चतुर्थ्यन्तात् प्रातिपदिकात्, हितम् = हितम् इत्यर्थे प्रत्यया भवन्ति इत्येवार्थ इदानीं ज्ञायते । केच ते प्रत्यया इति तु साम्प्रतं न ज्ञायते । ५-१-५ तस्मै हितम् इति सूत्रस्य ४-४-२ तेन दीव्यति सूत्रात् परत्वात् । इति।अथा ऽधोनिर्दिष्टानां सूत्राणमर्थं स्वयं भणतेतिच्छात्रा आदेश्याः । ४-३-२५ तत्र जातः । ४-२-६८ तेन निर्वृत्तम् । ४-२-६९ तस्य निवासः । ४-२-३७ तस्य समूहः । ४-३-७४ तत आगतः । ४-३-१२० तस्येदम् । ४-३-१३२ तस्य विकारः... । छात्रेषु तेषां सूत्राणामर्थं स्वयं कथयत्सु महत्या प्रशंसया तेषामुत्साहं बर्धयेत् । अन्यथाऽपि मध्ये मध्ये साहाय्यं ददद यथासम्भवं छात्रैरेवाऽर्थं कारयेत् । तेषामुत्साहं च वर्धयेदेव । अथ प्रक्रियोपदेशः । तत्र प्रथमं ८-३-५९ आदेश सूत्र-प्रसङ्गे प्रस्तुतानि दृष्टान्तात्मकानि गङ्गावारि, गङ्गाजलम्, गङ्गा उदकम् = गङ्गोदकम् इत्युदाहरणानि शिक्षक उद्बोध्य तदग्रे बोधितं विषयमपि पुनरुद्बोधयेत् । अथ शिक्षक उद्बोधितांश्छात्रान्, अधो निर्दिष्टरूपेण प्रक्रियां बोधयेत् । अत्र श्यामपाटी प्रयोगो यथा

(क) १ गङ्गा-वारि
(क) २ गङ्गा जलम्
(क) ३ गङ्गा-सलिलम्
(क) ४ गङ्गा उदकम्= गङ्गोदकम्
(ख) १ विवस्वतः (विवस्वत्+ङस्) अपत्यम्
(ख) २ विवस्वतः (विवस्वत् + ङस्) अण्
(ग) १ दितेः (दिति+ङस्) अपत्यम्
(ग) २ दितेः (") ण्य
(घ) १ उत्सस्य (उत्स+ङस्) अपत्यम्
(घ) २ उत्सस्य (उत्स+ङस्) अञ्
(ङ) १ स्त्रियाः (स्त्री+ङस्) अपत्यम्
(ङ) २ स्त्रियाः (स्त्री+ङस्) नञ्
(च) १ पुंसः (पुंस्+ङस्) अपत्यम्
(च) २ पुंसः (पुंस्+ङस्) स्नञ्

वत्साः ? यथा-(क) १ वाक्यं दृष्ट्वा वारिशब्दार्थबोधनाय वारिशब्दस्थाने जलशब्दः सलिलशब्द उदकशब्दो वाऽपि प्रयोक्तुं शक्यत इति ज्ञात्वा (क) २, ३ वाक्ययोः क्रमशो वारि इत्यर्थे जलसलिलशब्दौ प्रयुक्तौ । (क) ४ वाक्ये च "उदक" शब्दः प्रयुक्तः । अर्थात् (क) १,२,३,४ वाक्यानामर्थ एक एव, तथैव, ४-१-९२ तस्यापत्यम् इति सूत्रेण षष्ठचन्तात् परतस्त्यः "अपत्यम्" इत्यर्थः प्रत्ययेन बोध्यते, इति बोधितत्वात् (ख) १ वाक्यस्य (ख) २ वाक्यस्य च अर्थात् विवस्वतः (विवस्वत्+ङस्) अपत्यम्," इत्यस्य, "विवस्वतः (विवस्वत्+ङस्) अण्" इत्यस्य च अर्थ एक एव । सावधानम् ! परन्तु यथा (क) १ वाक्ये वारिशब्दं दृष्ट्वा वरिशब्दार्थ-वोधनाय जलशब्दः सलिल शब्द उदकशब्दो वा ऽ पि प्रयोक्तुं शक्यते, इति ज्ञात्वा ऽपि (क) २, ३ वाक्ययोः गङ्गाजल गङ्गासलिल इति नोक्तम् । किन्तु, अन्त्ये मकारो ऽपि योजितः एवमेव (क) ४ वाक्ये गङ्गा उदक इति नोक्तम् । किन्तु अन्त्ये मकारो ऽपि योजित आदौ च सन्धिः कृतः । तेन अग्रिमकार्ये सूत्रैः प्राप्ते तदपि कर्तव्यमेवेति ज्ञायते । तथैव "विवस्वतः (विवस्वत्+ङस्) अण्" इत्यादयः प्रयोगा न भवन्ति । किन्तु सूत्रैः प्राप्तान्यग्रिमकार्याणि च कर्तव्यानि भवन्ति । तान्येवेतो ऽग्रे समुपदिश्यन्ते । इति वोधनपुरस्सरमग्रिमप्रक्रियामुपदिशेत् । विवस्वत्+ ङस्+अण् इति श्यामपाट्यां लिखित्वा छात्रैः । १-३-३,९, सूत्रसमन्वयं कारयित्वा श्यामपाट्यां "विवस्वत्+ङस्+अ" इत्यवशेष्य तस्य समुदायस्य तद्धितान्ततया १-२-४६ कृत्तद्धित... सूत्रेण प्रातिपदिकसंज्ञां साधयित्वा २-४-७१ सुपो धातु...सूत्रेण प्रातिपदिकावयवस्य अर्थात् "विवस्वत्+ङस्+अ" इति समुदायघटकस्य ङसो लुकि कृते "विवस्वत्+अ" इति श्यामपाट्यामवशेष्य ७-२-११६अत उपधाया इति सूत्रप्राप्तिं सम्भाव्य वाधयित्वा च७-२-११७ तद्धितेष्वचामादेरिति सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-९३ एको गोत्रे ॥

यथा-उपगोरपत्यम्= औपगवः ।

तथा-उपगोर्गोत्रापत्यम्= औपगवः ।

४-१-९४ गोत्राद् यून्यस्त्रियाम् ॥

योगो ऽयं विभज्यते-

प्र. ४-१-९४ गोत्राद् यूनि ॥

गार्ग्यायणः । दाक्षायणः ।

द्वि. ४-१-९४ अस्त्रियाम् ॥

दक्षस्य युवापत्यं स्त्री दाक्षी ।

४-१-९५ अत इञ् ॥९७

दक्षस्या ऽपत्यं दाक्षिः ।

४-१-९६ बाह्वादिभ्यश्च ॥

बाहोरपत्यं बाहविः ।

४-१-९७ सुधातुरकँङ् च ॥

सुधातुरपत्यं सौधातकिः ।

(व्यास-वरुड-निषाद-चण्डाल-बिम्बानां चेति वक्तव्यम्)

वैयासकिः । वारुडकि : ।

४-१-९८ गोत्रे कुञ्जादिभ्यश्च्फञ् ॥ ४-१-१११

कुञ्जस्य गोत्रापत्यं कौञ्जायन्यः । कौञ्जायन्यौ कौञ्जायनाः । गोत्रे इत्युक्तेर्नेह- कुञ्जस्यापत्यं (पुत्रः) कौञ्जिः ।

४-१-९३ एको- ४-१-१६२ अपत्यं... इत्यादिविहितं गोत्रमिह गृह्यते । गोत्रे= गोत्रापत्ये, एकः= एक एवा ऽपत्यप्रत्ययो भवति । यः प्रत्ययः प्रथमे ऽ पत्ये स एव पौत्रे प्रपौत्रादिष्वपि वाच्येषु भवति । यथा- उपगोरपत्यम्= औपगवः= उपगोः पुत्रः पौत्रः प्रपौत्रादिष्वन्यतमश्च । एतत्सूत्रा ऽभावे, अपत्यं पितुरेवेति पक्षे मूलपुरुषभिन्नवंश्यक्रमसंख्यातुल्याः प्रत्यया भवेयु : । पितामहादीनामपीति पक्षे मूलपुरुषात् तृतीयेऽणेष्टे सिद्धेऽप्यणन्तादिञपि स्यात् । अर्थाद् उपगोस्तृतीते वाच्ये यद्यपि औपगव इति रूपं सिध्येत् तथापि औपगविरित्यनिष्टं रूपं च स्यात्, यतः, उपगोस्तृतीय उपगोरपत्यम् औपगवस्याऽप्यपत्यम् । तत्र उपगोः प्रत्यये औपगव : स्यात्, औपगवात् प्रत्यये औपगविरित्यपि स्यात् । इत्थं फगिञोः परम्परायां मूलपुरुषाद् वंश्यक्रमसंख्यायामेकोनसंख्या द्व्यूनसंख्या वा प्रत्यया भवेयुः । एवमग्रिमसूत्रे ऽपि बोध्यम् ।

प्र. ४-१-९४ गोत्राद् - यूनि= युवापत्ये, गोत्रात्= गोत्रप्रत्ययान्तादेव प्रत्ययो भवति । **द्वि. ४-१-९४ अस्त्रि-** अत्र पूर्व (गोत्राद् यूनि) सूत्राद् "यूनि" इत्यनुवर्तते । यूनि= युवसंज्ञाविधायके शास्त्रे, अस्त्रियाम्= अस्त्रियामिति पदमुपतिष्ठते । इत्यर्थः । यथा- ४-१-१६३ जीवति तु वंश्ये युवा । तत्र अस्त्रियामित्युपतिष्ठते । अर्थात् स्त्रियां युवसंज्ञा न भवतीति युवसंज्ञा प्रतिषिध्यते ।उदाहरणे गोत्रत्वात्४-१-९५अत.. इति दक्षशब्दादिञ् ४-१-६५ इतो... इति ङीष् । युवसंज्ञायां तु दाक्षि इति इञन्तात् फक् स्यात् ।

४-१-९५ अतः= अदन्तात्, तस्य+ अपत्यम् (४-१-९२) इञ्=इञ् प्रत्ययो भवति । अणो ऽपवादः ।

४-१-९६ बाह्वादिभ्यः = बाहुप्रभृतिशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) इञ् (४-१-९५) । **बाहविः** ६-४-१४६ ओर्गुण इति गुणः ।

४-१-९७ सुधातुः=सुधातृशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) इञ् (४-१-९५) अकँङ् च= सुधातृशब्दस्य स्थाने अकँङादेशश्च भवति । **व्यास- वैयासकिः** ७-३-३ न य्वाभ्यां... इत्यैच् ।

४-१-९८ गोत्रे-कुञ्जादिभ्यः = कुञ्जप्रभृतिशब्दप्रकृतिकात्, तस्य (४-१-९२) गोत्रे= गोत्रापत्ये, च्फञ्= च्फञ् प्रत्ययो भवति । उदाहरणे ५-३-११३ व्रात... इति च्फञन्ताञ्ञ्यः । तस्य ५-३-११९ ञ्याद... इति तद्राजसंज्ञा, बहुषु २-४-६२ तद्रा... इति लुक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-९९ नडादिभ्यः फक् ॥ १०३

नडस्य गोत्रापत्यं नाडायनः । नडस्याऽपत्यं (पुत्रः) नाडिः ।

४-१-१०० हरितादिभ्योऽञः ॥

हरितस्य युवापत्यं हारितायनः ।

४-१-१०१ यञिञोश्च ॥

गार्ग्यस्याऽपत्यं (गर्गस्य युवापत्यं) गार्ग्यायणः । दाक्षायणः ।

४-१-१०२ शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु ॥

शरद्वतो गोत्राऽपत्यं शारद्वतायनो भार्गवश्चेत् । शारद्वतोऽन्यः । शौनकायनो वात्स्यश्चेत् । शौनकोऽन्यः । दार्भायण आग्रायणश्चेत् । दार्भिरन्यः ।

४-१-१०३ द्रोणपर्वतजीवन्तादन्यतरस्याम् ॥

द्रौणायनः, द्रौणिः । पार्वतायनः, पार्वतिः । जैवन्तायनः, जैवन्तिः ।

४-१-१०४ अनृष्यानन्तर्ये बिदादिभ्योऽञ् ॥

बिदस्य गोत्रापत्यं बैदः । बैदौ । बिदाः । और्वः । और्वौ । उर्वाः । पुत्रस्यापत्यं पौत्रः । दौहित्रः ।

४-१-१०५ गर्गादिभ्यो यञ् ॥१०९

गर्गस्य गोत्रापत्यं गार्ग्यः । वात्स्यः ।

४-१-१०६ मधुबभ्र्वोर्ब्राह्मणकौशिकयोः ॥

माधव्यो ब्राह्मणश्चेत् । माधवोऽन्यः । बाभ्रव्यः कौशिकः । बाभ्रवोऽन्यः ।

४-१-१०७ कपिबोधादाङ्गिरसे ॥ १०९

काप्यः । बौध्यः । अनाङ्गरसे तु कापेयः । बोधिः ।

४-१-९९ नडादिभ्यः=नडप्रभृतिशब्दप्रकृतिकात्, तस्य (४-१-९२) गोत्रे (४-१-९८) फक्=फक् प्रत्ययो भवति ।

४-१-१०० हरिता- अञः+ हरितादिभ्यः= अञन्त-हरितादि-प्रकृतिकात्, तस्य (४-१-९२ युवापत्ये) फक् (४-१-९९)। हरितादिर्बिदाद्यन्तर्गणः । तेन ततो गोत्रे ४-१-१०४ अनृष्या... इत्यञ् प्रत्ययो भवति । न च गोत्रादपरो गोत्रप्रत्ययो भवति । अतो गोत्राऽधिकारेऽपि प्रकृतसूत्रेण युवापत्ये फक् प्रत्ययो भवति, न तु गोत्रापत्ये । अग्रे तु ४-१-१११ भर्गा... इत्यवधि गोत्रे इत्यनुवर्तत एव ।

४-१-१०१ यञि-गोत्रे (४-१-९८) इति यञिञोर्विशेषणात् तदन्तसम्बद्धोऽपत्यार्थो युवापत्यमेव संभवति । गोत्रे यौ यञिञौ तदन्तप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) फक् (४-१-९९) इति सूत्रार्थः ।

४-१-१०२ शर...दर्भात्= शरद्वत् शुनक दर्भ इतिप्रकृतिकात्, तस्य (४-१-९२) गोत्रे (४-१-९८) फक् (४-१-९९) भृगुवत्साग्रायणेषु= भार्गव-वात्स्याऽऽग्रायणेषु वाच्येषु ।

४-१-१०३ द्रोण... वन्तात्= द्रोणपर्वतजीवन्तप्रकृतिकात्, तस्य (४-१-९२) गोत्रे (४-१-९८) अन्यतरस्याम्= वा, फक् (४-१-९९) ।

४-१-१०४ "अनृषि" इति लुप्तपञ्चम्यन्तम् अनन्तरमेव= आनन्तर्यम् । स्वार्थे ष्यञ् । बिदादिभ्यः= (ऋषिवाचि) बिदादिप्रकृतिकात् तस्य (४-१-९२) गोत्रे (४-१-९८) अनृषि= ऋषिभिन्न-वाचि-बिदादि-प्रकृतिकात् आनन्तर्ये= अनन्तरापत्ये एव,अञ्= अञ् प्रत्ययो भवति । **बिदाः** । **उर्वा** इत्यत्र २-४-६४ यञ... इत्यञो लुक् ।

४-१-१०५गर्गादिभ्यः=गर्गादिशब्दप्रकृतिकात्, तस्य (४-१-९२) गोत्रे (४-१-९८) यञ्=यञ् प्रत्ययो भवति ।

४-१-१०६ मधुबभ्र्वो= मधुवभ्रुशब्दप्रकृतिकात्, तस्य (४-१-९२) गोत्रे (४-१-९८) यञ् (४-१-१०५) ब्राह्मणकौशिकयोः=ब्राह्मणे कौशिके च वाच्ये ।

४-१-१०७ कपिबोधात्=कपि बोध शब्दप्रकृतिकात्, तस्य (४-१-९२) गोत्रे (४-१-९८) यञ् (४-१-१०५) आङ्गिरसे=आङ्गिरसे वाच्ये । **कापेयः** ४-१-१२२ इतश्चानिञ इति ढक् । **बौधिः** ४-१-९५ अत इञ् इतीञ् । गर्गादिपाठादेव सिद्धे पूर्व (४-१-१०६ मधु...) सूत्रे बभ्रुशब्दस्याऽत्र कपिशब्दस्य च पाठः कौशिके आङ्गिरसे एवेति नियमार्थः । गर्गादिषु पाठश्चाऽन्तर्गण-कार्यार्थः । बाभ्रव्यायणी । काप्यायनी । ४-१-१८ सर्व... इति ष्फः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-१०८ वतण्डाच्च ॥१०९

वातण्डच आङ्गिरसः । अनाङ्गिरसे तु गर्गादि-शिवादि-पाठात् प्रत्ययद्वयम् । वातण्डचः, वातण्डः ।

४-१-१०९ लुक् स्त्रियाम् ॥

वतण्डी । अणि तु वातण्डी ।

४-१-११० अश्वादिभ्यः फञ् ॥१११

अश्वस्य गोत्रापत्यम्= आश्वायनः ।

४-१-१११ भर्गात् त्रैगर्ते ॥

भर्गस्य गोत्रापत्यं भार्गायणस्त्रैगर्तश्चेत् । भार्गिरन्यः ।

४-१-११२ शिवादिभ्योऽण् ॥ ११९

गोत्रे (४-१-९८) इति निवृत्तम् । शिवस्याऽपत्यं शैवः । गाङ्गः । वैपाशः । ताक्ष्णः ।

४-१-११३ अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः ॥

यमुनाया अपत्यं यामुनः । चिन्तिताया अपत्यं चैन्तितः । अवृद्धादित्युक्तेर्नेह- वासवदत्तेयः । नदीमानुषीभ्य इत्युक्तेर्नेह - वैनतेयः । तन्नामिकाभ्य इत्युक्तेर्नेह-शोभनाया अपत्यं शौभनेयः ।

४-१-११४ ऋष्यन्धकवृष्णिकुरुभ्यश्च ॥

वासिष्ठः । श्वाफल्कः । वासुदेवः । नाकुलः ।

४-१-११५ मातुरुत् संख्यासंभद्रपूर्वायाः॥

षण्णां मातॄणामपत्यं षाण्मातुरः । सांमातुरः । भाद्रमातुरः । संख्याद्युक्तेर्नेहोकारादेशः-सौमात्रः ।

४-१-१०८वतण्डात्= वतण्डशब्दप्रकृतिकात्, तस्य (४-१-९२) गोत्रे (४-१-९८) यञ् (४-१-१०५) आङ्गिरसे (४-१-१०७) । **अनाङ्गिरसे** तु एवञ्च आङ्गिरसे शिवाद्यणो ऽपवादार्थं सूत्रमिति फलितम् ।

४-१-१०९ लुक् स्त्रि- स्त्रियाम्= वतण्डाच्च (४-१-१०८ इति सूत्रेण आङ्गिरस्यां विहितस्य यञः, लुक्= लुग्भवति । उदाहरणे ४-१-७३ शार्ङ्ग... इति ङीन् । अनाङ्गिरस्यां तु वातण्डचायनी, गर्गादित्वाद् यञन्ता ल्लोहित्वादित्वात् ४-१-१८ सर्वत्र... इति ष्फः । **वातण्डी** शिवादित्वादणन्तान् ङीप् । ऋषित्वान्न ष्यङ् ।

४-१-११० अश्वादिभ्यः= अश्वप्रभृतिशब्दप्रकृतिकात्, तस्य (४-१-९२) गोत्रे (४-१-९८) फञ्= फञ् प्रत्ययो भवति ।

४-१-१११ भर्गात्= भर्गशब्दप्रकृतिकात्, तस्य (४-१-९२) गोत्रे (४-१-९८) फञ् (४-१-११०) त्रैगर्ते=त्रैगर्ते वाच्ये ।

४-१-११२ शिवादिभ्यः= शिवप्रभृतिगणपठितशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) अण्= अण्प्रत्ययो भवति । गङ्गाया अपत्यं गाङ्गः । शुभ्रादित्वाड्ढक् (४-१-१२३) गाङ्गेयः । तिकादित्वात् फिञ् (४-१-१५४) गाङ्गायनिः । **वैपाशः** कुञ्जादित्वाच्च्फञ् (४-१-९८) वैपाशायन्यः । ननु च भोः? "गोत्रे" इति निवृत्तमित्युक्तम् । च्फञ् पुनर्गोत्रे विधीयते । इत्थमर्थभेदे विधीयमानयोः कथं समावेशः ? नैष दोषः । अपत्ये विधीयमानो ऽण् गोत्रेऽपि भवति एको गोत्र (४-१-९३) इत्युक्तेः । तेन गोत्रे समावेशः । अनन्तरापत्ये तु अणेव न तु च्फञपि । उदी (१-४-१५३) इतीञं बाधित्वाऽण्- **ताक्ष्णः** । ६-४-१३५ षपू ...इत्युपधालोपः । ४-१-१५२ सेनान्त...इति ण्यस्तु भवत्येव । यतः सुपिष्टादीनामत्र पाठ इञोऽपवादार्थः । तत्साहचर्यात् तक्षन्शब्दपाठोऽपि, इञोऽ (४-१-१५३) पवादार्थो विज्ञायते । ये चा...इति प्रकृतिभावः । ताक्षण्यः ।

४-१-११३ अवृ...काभ्यः= अवृद्धानि यानि नदीनां मानुषीणां च नामानि तत्प्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) अण् (४-१-११२) । ढकोऽपवादः ।

४-१-११४ ऋष्य...रुभ्यः= ऋषिवाचिनः+अन्धक वाचिनः+वृष्णि वाचिनः+कुरुवाचिनश्च, तस्य+अपत्यम् (४-१-९२) । अण् (४-१-११२) ।

४-१-११५ मातु-संख्या....पूर्वायाः= संख्यावाचिशब्दपूर्वकात् सं-भद्र-शब्दपूर्वकाच्च, मातुः=मातृशब्द प्रकृतिकात् (संख्यादिपूर्वकमातृशब्दप्रकृतिकात्) तस्य+ अपत्यम् (४-१-९२) अण् (४-१-११२) उत्=मातृशब्दस्य स्थाने उकारादेशश्च । १-१-५१ अलो...इति ऋकारस्य स्थाने जायमानः १-१-५० उरण्...इति रपरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-११६ कन्यायाः कनीन च ॥

कन्याया अपत्यं कानीनो व्यासः कर्णश्च ।

४-१-११७ विकर्णशुङ्गच्छगलाद् वत्सभरद्वाजात्रिषु ॥

वैकर्णो वात्स्यश्चेत् । वैकर्णिरन्यः । शौङ्गो भारद्वाजश्चेत् । शौङ्गिरन्यः । छागल आत्रेयश्चेत् । छागलिरन्यः ।

४-१-११८ पीलाया वा ॥ ११९

पैलः । पैलेयः ।

४-१-११९ ढक् च मण्डूकात् ॥

माण्डूकेयः, माण्डूकः, माण्डूकिः ।

४-१-१२० स्त्रीभ्यो ढक् ॥१२१, १२७

वैनतेयः ।

(अण् क्रुञ्चाकोकिलात् स्मृतः)

क्रौञ्चः । कौकिलः ।

४-१-१२१ द्व्यचः ॥ १२२

दत्ताया अपत्यं दात्तेयः ।

४-१-१२२ इतश्चाऽनिञः ॥

आत्रेयः । नैधेयः ।

४-१-१२३ शुभ्रादिभ्यश्च ॥

शौभ्रेयः ।

४-१-१२४ विकर्णकुषीतकात् काश्यपे ॥

वैकर्णेयः । कौषीतकेयः । काश्यपेतरत्र तु वैकर्णिः । कौषीतकिः ।

४-१-१२५ भ्रुवो वुँक् च ॥

भ्रौवेयः ।

४-१-१२६ कल्याण्यादीनामिनँङ् ॥

काल्याणिनेयः । सौभागिनेयः । दौर्भागिनेयः ।

४-१-११६ कन्यायाः= कन्याशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) अण् (४-१-११२) कनीन च= प्रकृतेः कनीन इत्यादेशश्च भवति । ४-१-१२० स्त्रीभ्यो...इति ढकोऽपवादः ।

४-१-११७ विक...गलात्= विकर्णादिशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) अण् (४-१-११२) वत्सभरद्वाजात्रिषु= वात्स्ये भारद्वाजे आत्रेये च वाच्येषु। ४-१-१०२ शरद्व... सूत्रे भृगुवत्सशब्दाभ्यां भार्गववात्स्ययोरिव प्रकृतसूत्रेऽपि वत्सादिशब्दैर्वात्स्यादीनां ग्रहणं भवति। अत्र काशिका-शुङ्गाशब्दं स्त्रीलिङ्गमन्ये पठन्ति, ततो ढकं प्रत्युदाहरन्ति-शौङ्गेय इति । द्वयमपि चैतत् प्रमाणम् । उभयथा सूत्रप्रणयनादिति ।

४-१-११८ पीलायाः= पीलाशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) वा=विभाषया, अण् (४-१-११२) । ४-१-११३ अवृद्धा...इत्यणो बाधकं द्व्यचः (४-१-१२१) इति ढकं बाधित्वा पाक्षिकोऽण् ।

४-१-११९ ढक् च-मण्डूकात्= मण्डूकशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) अण् (४-१-११२) ढक् च=ढक् प्रत्ययोऽपि, वा (४-१-११८) । आभ्यां मुक्ते इञ् ।

४-१-१२० स्त्रीभ्यः= स्त्रीप्रत्ययान्तेभ्यः, =स्त्रीप्रत्ययान्तप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) ढक्=ढक् प्रत्ययो भवति । **अण् क्रु** क्रुञ्चाकोकिलाशब्दयोः समाहारद्वन्द्वत्वान्नपुंसकत्वम् ।

४-१-१२१ द्व्यचः= द्व्यच्कात्, स्त्रीभ्यः (४-१-१२०) तस्य+अपत्यम् (४-१-९२) ढक् (४-१-१२०) । ४-१-११३ अवृद्धाभ्यो...इत्यणोऽपवादः ।

४-१-१२२ इत-अनिञः= इञन्तभिन्नात्, इतः= इदन्तात्, द्व्यचः (४-१-१२१) तस्य+अपत्यम् (४-१-९२) ढक् (४-१-१२०) ।

४-१-१२३ शुभ्रादिभ्यः= शुभ्रादिगणपठितशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) ढक् (४-१-१२०) ।

४-१-१२४ विकर्णकुषीतकात् =विकर्णकुषीतकप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) ढक् (४-१-१२०) काश्यपे=काश्यपे वाच्ये ।

४-१-१२५ भ्रुवः= भ्रूशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) ढक् (४-१-१२०) वुँक् च= भ्रूशब्दस्य वुँगागमश्च भवति ।

४-१-१२६ कल्याण्यादीनाम्= कल्याणीप्रभृतीनां स्थाने, इनँङ् = इनँङ् आदेशो भवति, अपत्यप्रत्यय संनियोगेन । इनँङ्मात्रं विधीयते ढक् तु (४-१-१२०) स्त्रीभ्यो इत्यनेनैव । अन्त्योदाहरणयोः ७-३-१९ हृद्भग इत्युभयपदादिवृद्धिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-१२७ कुलटाया वा ॥
कौलटिनेयः, कौलटेयः । सती भिक्षुक्यत्र कुलटा । या तु दुःशीला तत्र ४-१-१३१ क्षुद्राभ्यो इति वा ढ्रक्-कौलटेरः, कौलटेयः ।

४-१-१२८ चटकाया ऐरक् ॥
चटकाया अपत्यं चाटकैरः ।
(चटकाच्चेति वक्तव्यम्:)
चटकस्यापत्यं चाटकैरः ।
(स्त्रीयामपत्ये लुग् वक्तव्यः)
चटकस्य चटकाया वाऽपत्यं स्त्री चटका ।

४-१-१२९ गोधाया' ढ्रक्' ॥ १३०, १३१
गोधाया अपत्यं गौधेरः ।

४-१-१३० आरगुदीचाम् ॥
गौधारः । रका सिद्धे आकारोच्चारणमन्यतोऽपि विधानार्थम् । जडस्यापत्यं जाडारः ।

४-१-१३१ क्षुद्राभ्यो वा ॥
काण्या अपत्यं काणेरः, काणेयः । दासेरः, दासेयः ।

४-१-१३२ पितृष्वसु'श्छण्' ॥ १३३,१३४
पैतृष्वस्रीयः ।

४-१-१३३ ढकि' लोपः' ॥ १३४
पैतृष्वसेयः ।

४-१-१३४ मातृष्वसुश्च ॥
मातृष्वस्रीयः । मातृष्वसेयः ।

४-१-१३५ चतुष्पाद्भ्यो ढञ्' ॥ १३६
जम्बुः शृगालः । तस्यापत्यं जाम्बेयः ।

४-१-१३६ गृष्टयादिभ्यश्च ॥
गार्ष्टेयः ।

४-१-१३७ राजश्वशुराद् यत् ॥
(राज्ञोऽपत्ये जातिग्रहणं कर्तव्यम्)
राजन्यः क्षत्रियश्चेत् ।
अन्यत्र राजनः । श्वशुर्यः ।

४-१-१३८ क्षत्राद् घः ॥
जतावेव क्षत्रियः राजन्यः । क्षात्रिरन्यः ।

४-१-१२७ कुलटायाः= कुलटाशब्दस्य स्थाने, वा =विभाषया, इनङ् (४-१-१२६) अपत्यप्रत्ययसंनियोगेन । ढक् तु ४-१-१२० स्त्रीभ्यो .... इत्यनेनैव सिद्धः ।

४-१-१२८ चटकायाः= चटकाशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) ऐरक्=ऐरक् प्रत्ययो भवति । चटकात्= चटकशब्दप्रकृतिकात् प्रागवत् ।

४-१-१२९ गोधायाः= गोधाशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) ढ्रक=ढ्रक् प्रत्ययो भवति ।

४-१-१३० आर-गोधायाः= (४-१-१२९) तस्य+अपत्यम् (४-१-९२) आरक्=आरक् प्रत्ययो भवति, उदीचाम् =उदीचामाचार्याणां मते ।

४-१-१३१ क्षुद्राभ्यः= अङ्गहीनाः शीलहीनाश्च क्षुद्राः । तद्वाचिनः, तस्य+अपत्यम् (४-१-९२) वा=विभाषया, ढ्रक (४-१-१२९) । पक्षे ४-१-१२० स्त्रीभ्यो ...इति ढक् ।

४ -१-१३२ पितृष्वसुः= पितृष्वसृशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) छण्=छण्प्रत्ययो भवति ।

४-१-१३३ ढकि-पितृष्वसुः= (४-१-१३२)=पितृष्वसृशब्दस्य, लोपः=लोपो भवति, ढकि=ढक्प्रत्यये परे । अत एव ज्ञापकाड्ढक् ।

४-१-१३४ मातृष्वसुः= पितृष्वसुर्यदुक्तं तद् मातृष्वसुरपि भवति ।

४-१-१३५ चतुष्पाद्भ्यः= चतुष्पाज्जातिवाचिनः, तस्य+ अपत्यम् (४-१-९२) ढञ्=ढञ् प्रत्ययो भवति । उदाहरणे ६-४-१४७ ढे लोपोऽकद्रवा इत्युकारलोपः ।

४-१-१३६ गृष्टयादिभ्यः= गृष्टिप्रभृतिगणपठितशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) ढञ् (४-१-१३५) । गृष्टिग्रहणमचतुष्पादार्थम् । यतः सकृत् प्रसूता सर्वाऽपि गृष्टिर्न तु गौरेव ।

४-१-१३७ राजश्वशुरात्=राज (न्) श्वशुर इति शब्दप्रकृतिकात् तस्य+ अपत्यम् (४-१-९२) यत्=यत् प्रत्ययो भवति । यथाक्रममणिञोरपवादः ।

राजन्यः ६-४-१६८ येचा... इति प्रकृतिभावः । राजन इत्यत्र ६-४-१६७ अन् इति प्रकृतिभावः ।

४-१-१३८ क्षत्राद्= क्षत्रशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) घः=घप्रत्ययो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-१३९ कुला'त् खः ॥१४०

कुलीनः । आढ्यकुलीनः ।

४-१-१४० अपूर्वपदादन्यतरस्यां यड्ढकञौ ॥१४२

कुल्यः । कौलेयकः । कुलीनः । बहुकुल्यः । बाहुकुलेयकः । बहुकुलीनः ।

४-१-१४१ महाकुलादञ्खञौ ॥

माहाकुलः । माहाकुलीनः । महाकुलीनः । ।

४-१-१४२ दुष्कुलाड्ढक् ॥

दौष्कुलेयः, दुष्कुलीनः ।

४-१-१४३ स्वसुश्छः' ॥१४४

स्वस्रीयः ।

४-१-१४४ भ्रा'तुर्व्यच्च ॥१४५

भ्रातृव्यः । भ्रात्रीयः ।

४-१-१४५ व्यन् सपत्ने ॥

भ्रातृव्यः =शत्रुः ।

४-१-१४६ रेवत्यादिभ्यष्ठ'क् ॥१४७

रैवतिकः ।

४-१-१४७ गोत्र'स्त्रियाःकुत्सने ण च॥१५०

गार्ग्या अपत्यं गार्गो गार्गिको वा जाल्मः । ग्लुचुकायन्या अपत्यं ग्लौचुकायनः, ग्लौचुकायनिकः । स्त्रिया इत्युक्तेर्नेह- औपगविर्जाल्मः ।

४-१-१४८ वृद्धाट्ठक् सौवीरेषु' बहुल'म् ॥१५०

भगवित्तस्य गोत्रापत्यं भागवित्तिस्तस्याऽपत्यं भागवित्तिकः, भागवित्तायनः ।

४-१-१३९ कुलात्= कुलशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) खः = ख प्रत्ययो भवति । तदन्तादपि भवति, उत्तर (४-१-१४०) सूत्रे अपूर्वपदादित्युक्तेः ।

४-१-१४० अपूर्वपदात्=अपूर्वपदकात्, कुलात् (४-१-१३९) तस्य+ अपत्यम् (४-१-९२) अन्यतरस्याम्=वा, यड्ढकौ= यत् ढक् च प्रत्ययौ भवतः । पक्षे खः (४-१-१३९) । पदग्रहणाद् बहुच्पूर्वादपि ।

४-१-१४१ महाकुलात्= महाकुलशब्दप्रकृतिकात्, तस्य+ अपत्यम् (४-१-९२) अन्यतरस्याम् (४-१-१४०) अञ्खञौ= अञ् खञ् प्रत्ययौ भवतः । पक्षे खः (४-१-१३९) ।

४-१-१४२ दुष्कुलात्= दुष्कुलशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) अन्यतरस्याम् (४-१-१४०) ढक्= ढक् प्रत्ययो भवति । पक्षे खः (४-१-१३९) ।

४-१-१४३ स्वसुः=स्वसृशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) छः=छप्रत्ययो भवति । अणोऽपवादः ।

४-१-१४४ भ्रातुः= भ्रातृशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) व्यत् = व्यत् प्रत्ययो भवति, छः (४-१-१४३) च ।

४-१-१४५ व्यन्- भ्रातुः (४-१-१४४) व्यन्= व्यन् प्रत्ययो भवति, सपत्ने= प्रकृतिप्रत्ययसमुदायेन शत्रौ वाच्ये ।

४-१-१४६ रेवत्यादिभ्यः= रेवत्यादिगणपठितशब्द प्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) ठक्=ठक्प्रत्ययो भवति ।

४-१-१४७ गोत्रस्त्रियाः= गोत्रं या स्त्री तद्वाचकशब्दप्रकृतिकात्, तस्य (४-१-९२) यूनि (प्र.४-१-९४)= युवापत्ये, ण= णप्रत्ययो भवति, ठक् (४-१-१४६) च, कुत्सने=निन्दायां गम्यमानायाम् ।

४-१-१४८ वृद्धा- सौवीरेषु= सौवीरगोत्रवाचिनः, वृद्धात्= वृद्धसंज्ञकात्, तस्य (४-१-९२) यूनि (४-१-९४) बहुलम्=बाहुल्येन, ठक्=ठक् प्रत्ययो भवति, कुत्सने (४-१-१४७) । उदाहरणे ठगभावे ४-१-१०१ यञि इति फक् । अत्र काशिका- वृद्धग्रहणं स्त्रीनिवृत्यर्थम्, इति । बहुलग्रहणमुपाधिवैचित्र्यार्थम् । गोत्रस्त्रि इत्या रभ्य चत्वारो योगाः- तेषु प्रथमः कुत्सने एव, अन्त्यः सौवीरगोत्रे एव, मध्यमौ द्वयोरपि । तदेतद् बहुलग्रहणाल्लभ्यते इति च । "मध्यमौ द्वयोरपि" इत्यस्य ४-१-१४८ वृद्धा । ४-१-१४९ फेश्छ इति द्वे सूत्रे सौवीरकुत्सनयोः प्रवर्तेते इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-१४९ फेश्छ च ॥

यमुन्दस्य गोत्रापत्यं यामुन्दायनिस्तस्याऽपत्यं यामुन्दायनीयः, यामुन्दायनिकः ।

४-१-१५० फाण्टाहृतिमिमताभ्यां णफिञौ ॥

फाण्टाहृतः, फाण्टाहृतायनिः ।

मैमतः, मैमतायनिः । सौवीरभिन्ने तु फाण्टाहृतायनः । मैमतायनः ।

४-१-१५१ कुर्वादिभ्यो **ण्यः** । ५२

कौरव्यः । कौरव्यौ । कौरव्याः ।

४-१-१५२ **सेनान्त-लक्षण-कारिभ्यश्च** ॥१५३

हारिषेण्यः । लाक्षण्यः । नापित्यः ।

४-१-१५३ उदीचामिञ् ॥

हारिषेणिः । लाक्षणिः । नापितशब्दात् तु परत्वात् ४-१-१५७ उदी इति फिञ् ।

नापितायनिः ।

(तक्ष्णोऽण उपसंख्यानम्)

उदीचाम् (४-१-१५३) ताक्ष्णः । ताक्षण्यः ।

४-१-१५४ तिकादिभ्यः **फिञ्** ॥१५९

तैकायनिः ।

४-१-१५५ कौसल्यकार्मार्याभ्यां च ॥

कौसल्यायनिः । कार्मार्यायणिः ।

(दगुकोसलकर्मारच्छागवृषाणां युँट्चाऽऽदिष्टस्य)

दागव्यायनिः । छाग्यायनिः । वार्ष्यायणिः ।

४-१-१५६ अणो द्वचचः ॥

कर्तुश्छात्रः कार्त्रः । तस्यापत्यं कार्त्रायणिः ।

अण इत्युक्तेर्नेह- दाक्षायणः । द्वयच इत्युक्तेर्नेह- औपगविः ।

(त्यदादीनां वा फिञ् वक्तव्यः)

त्यादायनिः, त्यादः ।

४-१-१४९ **फेश्छ** - फेः= फिञन्तात्, सौवीरेषु+ वृद्धात् (४-१-१४८) तस्य (४-१-९२) यूनि (४-१-९४) छः =छप्रत्ययो भवति, ठक् (४-१-१४८) च, कुत्सने (४-१-१४७) । **यामुन्दायनिः** ४-१-१५४ तिका...इति फिञ् ।

४-१-१५० **फाण्टा**- सौवीरेषु (४-१-१४८) फाण्टा... ताभ्याम्= फाण्टाहृतिमिमतशब्दप्रकृतिकात्, तस्य (४-१-९२) यूनि (४-१-९४) णफिञौ= ण फिञ् प्रत्ययौ भवतः । यथासंख्यमिह न भवतीति काशिका । फाण्टाहृतायनः, मैमतायन इत्यत्र क्रमशो : ४-१-१०१ यञि...इति ४-१-९९ नडा... इति च फक् ।

४-१-१५१ **कुर्वादिभ्यः**=कुरुप्रभृतिगणपठितशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) ण्यः= ण्यप्रत्ययो भवति । ४-१-१७० कुरुना... इति क्षत्रियवाचिन एव भवति । तत्र तद्राजत्वाद् बहुषु लुक् च । अत्र पुनर क्षत्रियवाचिनो भवति, बहुषु च न लुक् ।

४-१-१५२ **सेना... रिभ्यः**=सेनान्त- लक्षण-शिल्पिवाचिशब्द-प्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) ण्यः (४-१-१५१) । लक्षण शब्दे स्वरूपग्रहणम् । कारी= शिल्पी ।

४-१-१५३ **तक्ष्णो- ताक्ष्ण** इत्यत्र ६-४-१३५ षपूर्व... इत्यल्लोपः । ताक्षण्य इत्यत्र प्राचां मते ४-१-१५२ सेना.... इति ण्यः । ६-४-१६८ ये चा... इति प्रकृतिभावः ।

४-१-१५४ **तिकादिभ्यः**=तिकादि-गणपठितशब्द-प्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) फिञ्=फिञ् प्रत्ययो भवति ।

४-१-१५५ **कौस**...याभ्याम्= कोसलकर्मारशब्दप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) फिञ् (४-१-१५४) प्रत्यसंनियोगेन प्रकृतेर्यथासंख्यं कौसल्य- कार्यार्य इत्यादेशौ निपात्येते । दगु- फिञ् (४-१-१५४), आदिष्टस्य= आयन्नादेशस्य, युँट् च । दागव्यायनिरित्यत्र ६-४-१४६ ओर्गुण इति गुणः । ६-१-७६ वान्तो यि प्रत्यये इत्यवादेशः ।

४-१-१५६ **अणो**-अणः= अणन्तात्, द्वयचः= द्वयच्कप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) फिञ् ४-१-१५४) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-१५७ उदीचां वृद्धादगोत्रात् ॥१५९

आम्रगुप्तायनिः । प्राचां मते तु आम्रगुप्तिः । वृद्धादित्युक्तेर्नेह- याज्ञदत्तिः ।

४-१-१५८ वाकिनादीनां कुँक् च ॥ १५९

वाकिनकायनिः, वाकिनिः ।

४-१-१५९ पुत्रान्तादन्यतरस्याम् ॥

गार्गीपुत्रकायणिः, गार्गीपुत्रायणिः । प्राचां मते गार्गीपुत्रिः ।

४-१-१६० प्राचामवृद्धात् फिन् बहुलम् ॥

ग्लुचुकायनिः । उदीचां मते ग्लौचुकिः ।

४-१-१६१ मनोर्जातावञ्यतौ षुँक् च ॥

मानुषः । मनुष्यः ।

४-१-१६२ अपत्यं पौत्रप्रभृति गोत्रम् ॥१६५

४-१-१६३ जीवति तु वंश्ये युवा ॥१६५

४-१-१६४ भ्रातरि च ज्यायसि ॥

गार्ग्ये जीवति तस्य कनीयान् भ्राता गार्ग्यायणः । दाक्षौ जीवति तस्य कनीयान् भ्राता दाक्षायणः ।

४-१-१५७ उदी- अगोत्रात्= गोत्रभिन्नात्, वृद्धात्=वृद्धसंज्ञकात्, तस्य+अपत्यम् (४-१-९२) फिञ् (४-१-१५४) उदीचाम्= उदीचां मते ।

४-१-१५८ वाकि-वाकिनादिगणपठितशब्दप्रकृतिकात् तस्य+अपत्यम् (४-१-९२) फिञ् (४-१-१५४), वाकिनादीनाम्= वाकिनप्रभृतीनाम्, कुँक् च= तत्सन्नियोगेन उदीचाम् (४-१-१५७) ।

४-१-१५९ पुत्रा-उदीचां वृद्धादगोत्रात् (४-१-१५७) पुत्रान्तात्= पुत्रशब्दान्तप्रकृतिकात्, तस्य+अपत्यम् (४-१-९२) फिञ् (४-१-१५४) तत्सन्नियोगेन प्रकृतेः, अन्यतरस्याम्= वा, कुँक् च (४-१-१५८) ।

४-१-६० प्राचाम्-अवृद्धात्=वृद्धसंज्ञकभिन्नशब्दप्रकृतिकात् तस्य+अपत्यम् (४-१-९२) बहुलम्= बाहुल्येन, फिन्=फिन् प्रत्ययो भवति, प्राचाम्= प्राचामाचार्याणां मते ।

४-१-१६१ मनोः= मनुशब्दात्, जातौ=जातौ वाच्यायाम्, अञ्यतौ= अञ् यत् इति प्रत्ययौ भवतः । षुँक् च= प्रकृतेः षुँगागमश्च भवति । **मानुषः, मनुष्यः** । अत्र समुदायाज्जातिर्गम्यते । अपत्यार्थस्तु नास्त्येवा ऽत्र । अत एव बहुष्वपि २-४-६४ यञञोश्च इति न लुक् । मानुषाः । अपत्यविवक्षायां त्वणेव । मानवी प्रजा । अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः । स्मृतः । नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः ॥ णत्वविधानार्थमिदम्, अणः सिद्धत्वात् । अनधीतवेदत्वान्मूढत्वम् । विहिताकरणात् प्रतिषिद्धाचरणाच्च कुत्सितत्वम् ।

४-१-१६२ अप- पौत्रप्रभृति= पौत्रादि, अपत्यम्= सन्ततिः, गोत्रम्= गोत्रसंज्ञकं भवति । उदाहरणानि ४-१-९८ गोत्रे... प्रभृतिषु द्रष्टव्यानि ।

४-१-१६३ जीव- वंश्ये= पित्रादौ, जीवति तु= जीवति सति तु, पौत्रप्रभृति+अपत्यम् (४-१-१६२)= पौत्रप्रभृतेरपत्यम् (चतुर्थादि), युवा= युवसंज्ञकमेव न तु गोत्रम् । उदाहरणानि ४-१-१०१ यञि...प्रभृतिषु द्रष्टव्यानि । पौत्रप्रभृति+अपत्यमित्यस्य पौत्रप्रभृतेरपत्यमित्यर्थः कथम् ? इति चेदत्र न्यासः- तस्य च विभक्तिविपरिणामस्या ऽपत्यं हेतुः ।... यदि तर्हि अपत्यग्रहणसामर्थ्यात् पौत्रप्रभृतेः षष्ठीविपरिणामो भवति, पूर्वसूत्रे ऽपि कस्मान्न भवति ? तत्र प्रथमाया अनवकाशत्वात् । पूर्वसूत्रे हि अकृतार्था प्रथमा ततो न शक्यते तस्याः षष्ठीं विपरिणमयितुम् । इह तु कृतार्था शक्यते षष्ठीभावेन विपरिणमयितुमिति ।

४-१-१६४ भ्रात-ज्यायसि+भ्रातरि=वृद्धतरे भ्रातरि, जीवति (४-१-१६३) कनीयान् भ्राता, पौत्रप्रभृतेरपत्यम् + युवा (४-१-१६३) । "कनीयान् भ्राता" इत्यर्थः कुतः फलति ? भ्रातृशब्दस्य सम्बन्धिशब्दत्वात् सूत्रे भ्रातरि इत्यस्य "ज्यायसि" इत्यनेन विशेषितत्वाच्च "कनीयान् भ्राता" संज्ञीति फलति । उदाहरणयोः ४-१-१०१ यञि... इति फक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-१६५ वा ऽन्यस्मिन् सपिण्डे स्थविरतरे जीवति ॥

पितृव्ये पितामहे वयो ऽधिक-पितृव्य-पुत्रादि-भ्रातरि वा जीवति गार्ग्यस्या ऽपत्यं गार्ग्यायणः, गार्ग्यो वा ।

(वृद्धस्य च पूजायाम्)

तत्र भवान् गार्ग्यायणः ।

(यूनश्च कुत्सायाम्)

गार्ग्यो जाल्मः ।

४-१-१६६ जनपदशब्दात् क्षत्रियाद्ञ् ॥१७३,१६७

पञ्चालस्यापत्यं पाञ्चालः ।

(क्षत्रियसमानशब्दाज्जनपदशब्दात् तस्य राजन्यपत्यवत्)

पञ्चालानां राजा=पाञ्चालः ।

४-१-१६७ साल्वेयगान्धारिभ्यां च ॥

साल्वेयस्यापत्यं साल्वेयानां राजा वा साल्वेयः । गान्धारेरपत्यं गान्धारीणां राजा वा गान्धारः ।

४-१-१६८द्वयचञ्मगधकलिङ्गसूरमसादण् ॥

अङ्गस्यापत्यम् अङ्गानां राजा वा आङ्गः । वाङ्गः । मागधः । कालिङ्गः । सौरमसः ।

४-१-१६९ वृद्धेत्कोशलाजादाञ्ञ्यङ् ॥

आम्बष्ठस्यापत्यम्, आम्बष्ठानां राजा वा आम्बष्ठ्यः । सौवीरस्यापत्यं सौवीराणां राजा वा सौवीर्यः । कुन्तेरपत्यं कुन्तीनां राजा वा कौन्त्यः । अवन्तेरपत्यमवन्तीनां राजा वा आवन्त्यः । कौशल्यः । आजाद्यः ।

(पाण्डोर्जनपदशब्दात् क्षत्रियाड् डयण्वक्तव्यः)

पाण्डोरपत्यं पाण्डूनां राजा वा पाण्ड्यः ।

केवलक्षत्रियवाचिनस्त्वणेव-पाण्डोरपत्यं पाण्डवः ।

(पूरोरण्)

पूरोरपत्यं पौरवः ।

४-१-१६५ **वाऽन्य**-अन्यस्मिन्=भ्रातृभिन्ने, सपिण्डे, = सप्तमपुरुषावधिके, स्थविरतरे= स्थानेन वयसा वोत्कृष्टे, जीवति (४-१-१६३) पौत्रप्रभृतेरपत्यम् (४-१-१६३) जीवति= जीवति चेत्, वा = विभाषया, युवा (युवा (४-१-१६३) । **वृद्धस्य**= गोत्रस्य, (गोत्रस्य वृद्धसंज्ञा प्राचाम्) युवा (४-१-१६३)= युवसंज्ञा, पूजायाम्= पूजायां गम्यमानायाम् । **यूनः**=युवापत्यस्य, गोत्रम् (४-१-१६२) कुत्सायाम्= कुत्सायां गम्यमानायाम् । इह विप्रकृष्टमपि गोत्रमिति सम्बध्यते न तु संनिहितो युवा, यूनो युवसंज्ञाविधानस्य वैयर्थ्यापत्तेः ।

४-१-१६६- जनपदशब्दात्+ क्षत्रियात्= जनपदस्य+ क्षत्रियस्य वाचकात्, तस्य+अपत्यम् (४-१-९२) अञ् =अञ् प्रत्ययो भवति । अर्थाद् यथा नाकशब्द आकाशवाची स्वर्गवाची च= आकाशे त्रिदिवे नाक इति । तथैव यः शब्दो जपदवाची क्षत्रियवाची च तस्मादित्यर्थः । इदन्त्त्ववधेयम्- यदा पञ्चालप्रभृतयः शब्दा देशवाचिनस्तदा बहुवचनान्ता भवन्ति । यदा तु क्षत्रियवाचिनस्तदा त्वेकवचनान्ता अपीति ।

४-१-१६७ **साल्वे...रिभ्याम्**= साल्वेयगान्धारिप्रकृतिकात्, तस्य+ अपत्यम् (४-१-९२) तस्य+ राजनि (४-१-१६६ वार्तिकम्) अञ् (४-१-१६६) । ४-१-१६६ जनपद.... इत्यत्रं बाधित्वा ४-१-१६९ वृद्धेत्... इति प्राप्तं ञ्यङं बाधितुं पुनरञ्विधानम् ।

४-१-१६८ **द्व्यञ्म** - जनपदशब्दात्+क्षत्रियात् (४-१-१६६), द्व्यञ्... मसात्= द्व्यच्कप्रकृतिकाद् मगधादि प्रकृतिकाच्च, तस्य+अपत्यम् (४-१-९२)तस्य राजनि (४-१-१६६ वार्तिकम्) अण्=अण् प्रत्ययो भवति ।

४-१-१६९ **वृद्धेत्**-जनपदशब्दात्+ क्षत्रियात् (४-१-१६६) वृद्धेत्... जादात्= वृद्धसंज्ञकप्रकृतिकात्+ इदन्त प्रकृतिकात्+ कोशलप्रकृतिकात्+अजादप्रकृतिकाच्च, तस्य+अपत्यम् (४-१-९२) तस्य राजनि (४-१-१६६ वार्तिकम्) ञ्यङ्=ञ्यङ् प्रत्ययो भवति । **पूरो**-पूरुशब्दो जनपदवाची न । अत्राऽण्विधानं तद्राजसंज्ञार्थम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-१७० कुरुनादिभ्यो ण्यः ॥

कुरोरपत्यं करूणां राजा वा कौरव्यः ।
निषधस्यापत्यं निषधानां राजा वा नैषध्यः ।

४-१-१७१ साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् ॥

उदुम्बरास्तिलखला मद्रकारा युगन्धराः । भुलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञिताः । उदुम्बरस्यापत्यम् उदुम्बराणां राजा वा औदुम्बरिः । प्रात्यग्रथिः । कालकूटिः । आश्मकिः ।

४-१-१७२ ते तद्राजाः ॥१७५

४-१-१७३ कम्बोजाल्लुक् ॥१७५

कम्बोजः । कम्बोजौ ।
(कम्बोजादिभ्यो लुग्वचनं चोलाद्यर्थम्)
कम्बोजः । चोलः । केरलः ।

४-१-१७४ स्त्रियामवन्तिकुन्तिकुरुभ्यश्च ॥१७५

अवन्ती । कुन्ती । कुरूः । स्त्रियामित्युक्तेर्नेह- आवन्त्यः । कौन्त्यः । कौरव्यः ।

४-१-१७५ अतश्च ॥

शूरसेनी । मद्री । कथं "माद्रीसुतौ" इति ! स्वच्छन्दवाच ऋषयः, मद्रीसुतावित्येव वा पाठ्यमिति- हरदत्तः । भर्गादित्वं वा कल्प्यमिति भट्टोजिदीक्षितः ।

४-१-१७० कुरु-जनपदशब्दात्+क्षत्रियात् (४-१-१६६) कु...भ्यः= कुरुशब्दप्रकृतिकान्नकारादिप्रकृतिकाच्च, तस्य+अपत्यम् (४-१-९२) तस्य+राजनि (४-१-१६६ वार्तिकम्) ण्यः= ण्यप्रत्ययो भवति ।

४-१-१७१ साल्वा- जनपदशब्दात्+क्षत्रियात् (४-१-१६६) साल्वा... मकात्= साल्वावयववाचिशब्दप्रकृतिकात् प्रत्यग्रथ कलकूट अश्मक इति प्रकृतिकाच्च, तस्य+अपत्यम् (४-१-९२) तस्य+ राजनि (४-१-१६६ वार्तिकम्) इञ् =इञ् प्रत्ययो भवति । अञोऽपवादः ।

४-१-१७२ ते त - ते= अञ् (४-१-१६६) प्रभृतय इञ् (४-१-१७१) पर्यन्ताः प्रत्ययाः, तद्राजाः= तद्राजसंज्ञका भवन्ति । उदाहरणानि २-१-६२ तद्रा... सूत्रे द्रष्टव्यानि ।

४-१-१७३ कम्बोजात्= कम्बोजशब्दाद् विहितस्य तद्राजस्य (प्रकरणलभ्यो ऽयमर्थः) लुक्= लुग्भवति अबहुवर्थमिदम् ।

४-१-१७४ स्त्रिया-अव... रुभ्यः= अवन्तिप्रभृतिभ्यो विहितस्य तद्राजस्य, लुक् (४-१-१७३) स्त्रियाम्= स्त्रियां वाच्यायाम् । उदाहरणेष्वाद्ययोर्ञ्यङो लुक् । (४-१-६५) इतो... इति ङीष् । अन्त्ये ण्यस्य लुक् । ४-१-६६ ऊङु... इत्यूङ् ।

४-१-१७५ अतः=अकाररूपस्य तद्राजस्य, लुक् (४-१-१७३) स्त्रियाम् (४-१-१७४) । उदाहरणयोराद्येऽञो द्वितीये द्वयचज्लक्षणस्याऽणो लुकि ४-१-६३ जाते... इति ङीष् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-१-१७६न प्राच्य-भर्गादि-यौधेयादिभ्यः ॥
पाञ्चाली । भार्गी । यौधेयी । अत्र भाष्यवार्तिकम् (यौधेयादिप्रतिषेधो ज्ञापकः पर्श्वादिलुकः) भाष्यम्- यदयं "न प्राच्यभर्गादियौधेयादिभ्यः" इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः- भवति पर्श्वादिभ्यो लुगितीति ।

इति चतुर्थाध्याये
प्रथमः पादः ।

४-१-१७६ **न प्राच्य**-प्राच्य... दिभ्यः= प्राच्यभर्गादियौधेयादिभ्यः परस्य, अतः (४-१-१७५) = तद्राजस्य+अतः, न=लुग् न भवति ।

देशोऽयं भारतं वर्षं शरावत्यास्तु योऽवधेः । देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः । पञ्चालादयः शरावत्याः प्राञ्चो जनपदा इति हरदत्तः । पाञ्चालीत्यत्र ४-१-१७५ अत इति स्त्रियां प्राप्तस्य लुकः प्रतिषेधे ४-१-७३ शार्ङ्ग... इति ङीन् । भार्गीत्यत्र द्व्यज्लक्षणस्याणो लुकः प्रतिषेधे ४-१-६३ जातेरस्त्री... इति ङीष् । **यौधेयी** अत्र हरदत्त :- युधाया अपत्यं स्त्री ४-१-१२१ द्व्यचः इति ढक् । ततः स्वार्थे ५-१-११७ पर्श्वादियौधेयादिभ्य इत्यञ् । यद्यञो लुक् स्याड्ढग्लक्षणे ङीपि सति उदात्तनिवृत्तिस्वरः स्यात् । लुकि तु प्रतिषिद्धे शार्ङ्गरवाद्यञ इति ङीनि सत्याद्युदात्तं भवतीति । **यौधेयी-** इत्यत्र यौधेयशब्दात् ५-३-११७ पर्श्वादियौधेयादि... इति सूत्रेण स्वार्थे विहितस्याञो लुकः प्रतिषेधो व्यर्थः । पञ्चमाध्याये विहितस्याञो भिन्नप्रकणस्थत्वेन ४-१-१७५ अतश्च इत्यनेन लुकोऽप्राप्तेरित्याशङ्कायां प्रकृतभाष्यवार्तिकं तद्भाष्यञ्च । अयं भावः- यौधेयादिभ्यः प्रतिषेधारम्भसामर्थ्यात् ४-१-१७५ अतश्च इति सूत्रेण ५-३-११७ पर्श्वादि.. इति सूत्रेण विहितस्य भिन्नप्रकरणस्थस्याप्यञो लुग् भवतीति ज्ञाप्यत इति । तेन पर्शूः । असूरी । इत्यत्र लुक् सिध्यति । तथाहि पर्शुः=क्षत्रियः=जनपदसमानशब्दः । तस्यापत्यं सङ्घः (स्त्रीत्वविशिष्टः) ४-१-१६८ द्व्यञ्मगध... इत्यण् । तस्य ४-१-१७५ अतश्च इति लुक् । ततः ५-३-११७ पर्श्वादि... इति स्वार्थे ऽण् तस्यापि ४-१-१७५ अतश्च इति लुक् । ४-१-६६ ऊङुत इत्यूङ् । असुरीत्यत्र च ४-१-१६६ जनपद... इति विहितस्याञो लुकि पुनः ५-३-११७ पर्श्वादि... इति विहितस्या ऽणो ऽपि पूर्ववल्लुक् । ४-१-६३... जातेर स्त्री... इति ङीष् ।

इति चतुर्थाध्याये
प्रथमः पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ चतुर्थाऽध्याये द्वितीयः पादः

४-२-१ तेन रक्तं रागात् ॥१२,२,२
कषायेण रक्तं वस्त्रं काषायम्।
४-२-२ लाक्षारोचनाट्ठक् ॥
लाक्षया रक्तं वस्त्रं लाक्षिकम्।
रौचनिकम्।
(शकल- कर्दमाभ्यां च)
शाकलिकम्। कार्दमिकम्।
(आभ्यां पक्षे ऽणपीष्यते)
शाकलम्। कार्दमम्।
(नील्या अन् वक्तव्यः)
नील्या रक्तं वस्त्रं नीलम्।
(पीतात् कन् वक्तव्यः)
पीतकम्।
(हरिद्रामहारजनाभ्यामञ् वक्तव्यः)
हारिद्रम्। माहारजनम्।
४-२-३ नक्षत्रेण युक्तः कालः ॥६
पुष्येण युक्तमहः= पौषम्।
पौषी रात्रिः। माघमहः। माघी रात्रिः।
नक्षत्रेणेत्युक्तेर्नेह- चन्द्रेण युक्ता रात्रिः।
काल इत्युक्तेर्नेह- पुष्येण युक्तश्चन्द्रः।
४-२-४ लुबविशेषे ॥ ५
अद्य पुष्यः। अविशेषे इत्युक्तेर्नेह-
पौषमहः। पौषो ऽहोरात्रः। कथं तर्हि
"पुष्ययुक्ता पौर्णमासी पौषी" इति ? विभाषा
फाल्गुनी-श्रवणा- कार्त्तिकी- चैत्रीभ्यः
(२-४-२३) इति निर्देशेन पौर्णमास्यामयं
लुब्नेति ज्ञापितत्वात्। श्रवणाशब्दात्तु
तत्रैव श्रवणेति निर्देशादेव
लुब् युक्तवद्भावाऽभावश्च।
कथं तर्हि श्रावणी पौर्णमासीति ?
अबाधकान्यपि निपातनानि भवन्ति।

४-२-१ तेन- रागात्= रञ्जकद्रव्यवाचिनः, तेन= तृतीयान्तात् समर्थात्, रक्तम्= रक्तमित्यर्थे प्रत्ययः। ४-१-८२ समर्थानां सूत्रे प्रथमादित्युक्तेः प्रकृतसूत्रे च तेनेत्यस्य प्रथमोपस्थितत्वात् तेनेति तृतीयान्तात् प्रत्ययो भवति। रागादिति तु तेनेत्यस्य विशेषणम्। रज्यते ऽनेन= रागः = रञ्जकद्रव्यम्। रञ्जयतीति रञ्जकम्। ण्यन्ताण्ण्वुँल्। प्रत्ययविषये च ४-१-८३ प्राग्दी... इत्यादि न विस्मर्तव्यम्। एवमग्रिमसूत्रेष्वपि।

४-२-२ लाक्षारोचनात्= लाक्षा- रोचनाशब्दप्रकृतिकात्, तेन रक्तम् (४-२-१) ठक्=ठक् प्रत्ययो भवति। उदाहरणयोः ७-३-५० ठस्येक इतीकः। ७-२-११८ किति च इत्यादिवृद्धिः।

शकल- कर्दमाभ्याम्= शकलकर्दमशब्दप्रकृतिकात्, तेन रक्तम् (४-२-१) ठक् (४-२-२)।

नील्याः= नीलीशब्दप्रकृतिकात्, तेन रक्तम् (४-२-१) अन्=अन् प्रत्ययो वक्तव्यः।

पीतात्= पीतशब्दप्रकृतिकात्, तेन रक्तम् (४-२-१) कन्=कन् प्रत्ययो वक्तव्यः।

हरिद्रामहारजनाभ्याम्= हरिद्रा- महारजनशब्दप्रकृतिकात्, तेन रक्तम् (४-२-१) अञ्= अञ् प्रत्ययो वक्तव्यः।

४-२-३ नक्ष- अत्र नक्षत्रशब्देन नक्षत्रसमीपवर्ती चन्द्रो गृह्यते। अन्यथा नक्षत्राणां कालेन सह योगस्य व्यभिचाराभावेन निर्देशो ऽसङ्गतः स्यात्। नक्षत्रेण= नक्षत्रयुक्त- चन्द्रवाचिना, तेन (४-२-१) युक्तः+ कालः= युक्तकाल इत्यर्थे प्रत्ययः।

४-२-४ लुब- लुप्= पूर्वसूत्रेण विहितस्य प्रत्ययस्य लुब् भवति, अविशेषे= षष्टिदण्डात्मककालस्यावान्तरविशेषश्चेन्न गम्यते। षष्टिदण्डात्मककालावध्येकनक्षत्रयुक्तश्चन्द्रो वर्तते। तत्कालस्यैकदेशाभिधानं विशेषः। पौषो ऽहोरात्र इत्यत्र षष्टिदण्डात्मकसमुदायस्वरूपकालस्य प्रतीतावपि, अवयवद्वयात्मक- विशेषस्यापि प्रतीतिः। अतो न लुप्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-५ संज्ञायां श्रवणाश्वत्थाभ्याम् ॥
श्रवणा रात्रिः । अश्वत्थो मुहूर्तः ।
संज्ञायामित्युक्तेर्नेह- श्रावणी रात्रिः ।
आश्वत्थी ।

४-२-६ द्वन्द्वाच्छः ॥
तिष्यपुनर्वसवीयमहः । राधानुराधीया
रात्रिः । अद्य राधानुराधीयम् ।

४-२-७ दृष्टं साम ॥९
वसिष्ठेन दृष्टं वासिष्ठं साम ।
वैश्वामित्रम् ।
(दृष्टे सामनि अण् वा डिद् भवतीति वक्तव्यम्)
उशनसा दृष्टम्= औशनम्, औशनसम् ।
(जाते चार्थे यो ऽन्येन बाधितः पुनरण्
विधीयते स वा डिद् भवतीति वक्तव्यम्)
शतभिषजि जातः= शातभिषः, शातभिषजः ।
(तीयादीकक् स्वार्थे वा वक्तव्यः)
द्वैतीयीकम्, द्वितीयम् ।
(न विद्यायाः)
द्वितीया विद्या ।
(गोत्रादङ्कवदिष्यते)
औपगवेन दृष्टं औपगवकं साम ।
दृष्टे सामनि, जाते च
द्विरण् डिद् वा विधीयते ।
तीयादीकक्, न विद्याया
गोत्रादङ्कवदिष्यते ॥

४-२-८ कलेर्ढक् ॥
कलिना दृष्टं कालेयं साम ।
(सर्वत्रा ऽ ग्निकलिभ्यां ढग् वक्तव्यः)
कलौ भवं कलेरागतं कलेः स्वं वा कालेयम् ।
एवमाग्नेयम् ।

४-२-९ वामदेवाड् ड्यड्ड्यौ ॥
वामदेव्यम् ।
सिद्धे यस्येति लोपेन किमर्थं ययतौ डितौ ।
ग्रहणं मा ऽ तदर्थे भूद् वामदेव्यस्य नञ्स्वरे ।

४-२-५ संज्ञा- श्रवणाश्वत्थाभ्याम्= श्रवण अश्वत्थ इति शब्दाभ्यां युक्तः काल इत्यर्थे विहितस्य प्रत्ययस्य, लुप् (४-२-४) संज्ञायाम्= संज्ञायां गम्यमानायाम् । विशेषार्थो ऽयमारम्भः ।

४-२-६ द्वन्द्वा- नक्षत्रेण (४-२-३) द्वन्द्वात्= द्वन्द्वसमासप्रकृतिकात्, तेन (४-२-१) युक्तः कालः (४-२-३) छः= छप्रत्ययो भवति ।

४-२-७ दृष्टं-तेन (४-२-१) दृष्टम्= दृष्टमित्यर्थे प्रत्ययः, साम= यद् दृष्टं साम चेत् तद् भवति ।
दृष्टे- डित्त्वपक्षे ६-४-१४३ टेः, इति टिलोपः ।
जाते- उदाहरणयोः ४-१-८३ प्राग्दी... इत्यण् ४-३-११ काला... इति ठञा बाधितः , तस्यापि बाधकः पुनः ४-३-१६ सन्धि...इत्यण् । डित्त्वपक्षे टिलोपः ।
न वि- विद्यायाः= विद्यावाचिनस्तीयान्तात्, न= ईकक् प्रत्ययो न भवति ।
गोत्रात्= गोत्रप्रत्ययान्तप्रकृतिकात्, तेन (४-२-१) दृष्टं (४-२-७) अङ्कवत्+ इष्यते= अङ्केऽर्थे इव प्रत्ययो भवति, साम (४-२-७) । उदाहरणे (४-३-१२६ गोत्र... इति वुँञ् ।

४-२-८ कलेः= कलिशब्दप्रकृतिकात् , तेन (४-२-१) दृष्टम् (४-२-७) ढक्= ढक्प्रत्ययो भवति, साम (४-२-७) ।
सर्वत्र= प्राग्दीव्यतीयेषु सर्वेष्वर्थेषु । सूत्रकारः कलिशब्दाद् दृष्टं सामेत्यर्थे, अग्निशब्दाच्च "अस्य देवतेत्यर्थे" ढकमुपदिशति, वार्तिककारस्तु सर्वत्रेत्युपदिशति ।

४-२-९ वामदेवात्= वामदेवशब्दप्रकृतिकात्, तेन (४-२-१) दृष्टम् (४-२-७) ड्यड्ड्यौ= ड्यत् ड्य इत्येतौ प्रत्ययौ भवतः, साम (४-२-७) ।
सिद्धे- निरनुबन्धकग्रहणे न सानुबन्धकस्य, एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य, इति परिभाषाद्वयज्ञापनद्वारा "अवामदेव्यम्" इत्यत्र (६-२-१५५) ययतो... इत्यन्तोदात्तत्वं न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-१० **परिवृतो रथः** ॥१२
वस्त्रेण परिवृतो वास्त्रो रथः । परिवृत इत्युक्तेर्नेह- छात्रैः परिवृतो रथः । रथ इत्युक्तेर्नेह- वस्त्रेण परिवृतः कायः ।

४-२-११ पाण्डुकम्बलादिनिँः ॥
पाण्डुकम्बली ।

४-२-१२ द्वैपवैयाघ्रादञ् ॥
द्वैपः । वैयाघ्रः ।

४-२-१३ कोमारा ऽपूर्ववचने ॥
कौमारः पतिः । कौमारी भार्या ।

४-२-१४ **तत्रो**द्धृतममत्रेभ्यः ॥२०
शरावेषूद्धृतः= शाराव ओदनः ।
अमत्रेभ्य इत्युक्तेर्नेह- पाणावुद्धृत ओदनः ।

४-२-१५ स्थण्डिलाच्छयितरि व्रते ॥
स्थण्डिले शयितुं व्रतमस्य स स्थाण्डिलः ।
व्रतादन्यत्र न । स्थण्डिले शेते गोपः ।

४-२-१६ **सँस्कृतं भक्षाः** ॥२०
भ्राष्ट्रेषु सँस्कृताः= भ्राष्ट्रा अपूपाः ।
पञ्चसु कपालेषु सँस्कृतः पञ्चकपालः ।

४-२-१७ शूलोखाद् यत् ॥
शूल्यम् । उख्यम् ।

अयं भावः- डित्त्वाऽभावे ऽपि ययतोः प्रत्यययोः सतोर्भसंज्ञायां ६-४-१४८ यस्येति चेति सूत्रेणा ऽकारलोपेन वामदेव्यशब्दस्य सिद्धौ डित्त्वं किमर्थम् ? इति प्रश्नः । उत्तरं तु- तथा सिद्धे ऽपि डित्करणं पूर्वोक्ते द्वे परिभाषे ज्ञापयति । तेन ६-२-१५५ ययतोश्चातदर्थे, इति सूत्रे ययच्छब्दाभ्यां डचडचतोर्ग्रहणा ऽभावेन, अवामदेव्यम् इत्यत्र तत् सूत्रं न प्रवर्तत इति ।

४-२-१० परि- तेन (४-२-१) परिवृतः= समन्ताद् वेष्टित इत्यर्थे प्रत्ययो भवति, रथः= यः परिवृतः स रथश्चेत् । छात्रैः परिवृत इत्यत्र वस्त्रादिभिरिवा ऽ वेष्टितत्वान्न भवति ।

४-२-११ पाण्डुकम्बलात्= पाण्डुकम्बलशब्दप्रकृतिकात्, तेन (४-२-१) परिवृतः (४-२-१०) इनिँः= इनिँप्रत्ययो भवति, रथः (४-२-१०) ।

४-२-१२ द्वैपवैयाघ्रात्= द्वैपवैयाघ्रशब्दप्रकृतिकात्, तेन (४-२-१) परिवृतः (४-२-१०) अञ्=अञ् प्रत्ययो भवनि, रथः (४-२-१०) । अणोऽपवादः । स्वरे विशेषः ।

द्वैपः द्वीपिनो विकारो द्वैपम्= चर्म । ४-३-१५२ प्राणि... इत्यञ् । ६-४-१४४ नस्त...इति टिलोपः । द्वैपेन परिवृतो द्वैपो रथः । व्याघ्रस्य विकारो वैयाघ्रम्= चर्म । प्रागवदञ् । ७-३-३ ... न य्वा इत्यैच् । वैयाघ्रेण परिवृतो वैयाघ्रो रथः ।

४-२-१३ कौमा- सूत्रे कौमारेति लुप्तविभक्तिकम् । कौमार= कौमार इति कुमारीशब्दादणन्तो निपात्यते, अपूर्ववचने= पाणिग्रहणस्या ऽपूर्वत्वा ऽभिधाने । अपूर्वपतिं कुमारीं पतिरुपपन्न इति विग्रहे द्वितीयान्तादुपयन्तरि प्रत्ययः । कौमारः पतिः । अपूर्वपतिः कुमारी पतिमुपपन्नेति विग्रहे प्रथमान्तादेव स्वार्थे प्रत्ययो ऽपूर्वत्वे द्योत्ये । कौमारी भार्या । कौमार इति स्त्रीपुंससाधारणनिर्देशादुभयोर्निपातनम् । तत्रोभयोरपि पक्षयोरपूर्वत्वं स्त्रिया एव न तु पुंस इति बोध्यम् । अपूर्वपतिशब्दे अविद्यमानः पूर्वः पतिर्यस्या इति बहुव्रीहिर्बोध्यः ।

४-२-१४ तत्रो- अमत्रेभ्यः= पात्रवाचिशब्दप्रकृतिकात्, तत्र= सप्तम्यन्तात् समर्थात्, उद्धृतम्= उद्धृत्य निहितम् इत्यर्थे प्रत्ययो भवति ।

४-२-१५ स्थण्डिलात्= स्थण्डिलशब्दप्रकृतिकात्, तत्र (४-२-१४) शयितरि= शयितरि अर्थे प्रत्ययो भवति, व्रते= व्रते गम्ये ।

४-२-१६ संस्कृ- तत्र (४-२-१४) संस्कृतम्= संस्कृतमित्यर्थे प्रत्ययो भवति, भक्षाः= "यत् संस्कृतं तद्" भक्षाश्चेत् । यद्यपि अब्भक्षो वायुभक्ष इत्यादयो ऽपि प्रयोगा दृश्यन्ते, तथापि प्रकृते भक्षा इत्यनेन चर्वणेन भोज्यानि कठिनवस्तूनि गृह्यन्ते । **पञ्चकपाल** इत्यत्र २-१-५१ तद्धितार्थोत्तर...इति समासः, ४-१-८८ द्विगोर्लुगनपत्ये इति तद्धितप्रत्ययस्य लुक् ।

४-२-१७ शूलोखात्= शूल उखा इति शब्दप्रकृनिकात्, तत्र (४-२-१४) संस्कृतम् (४-२-१६) यत्= यत् प्रत्ययो भवति, भक्षाः (४-२-१६) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-१८ दध्नष्ठक् ॥१९

दध्नि सँस्कृतं दाधिकम् ।

४-२-१९ उदश्वितोऽन्यतरस्याम् ॥

औदश्वित्कम्, औदश्वितम् ।

४-२-२० क्षीराड्ढञ् ॥

क्षैरेयी यवागूः ।

४-२-२१ साऽस्मिन् पौर्णमासीति संज्ञायाम् ॥२३

पौषी पौर्णमासी अस्मिन्= पौषो मासः ।

४-२-२२ आग्रहायण्यश्वत्थाट्ठक् ॥

आग्रहायणिकः । आश्वत्थिकः ।

४-२-२३ विभाषा फाल्गुनी-श्रवणा-कार्तिकी-चैत्रीभ्यः ॥

फाल्गुनिकः, फाल्गुनः । श्रावणिकः, श्रावणः । कार्तिकिकः, कार्तिकः । चैत्रिकः, चैत्रः ।

४-२-२४ साऽस्य देवता ॥३५

इन्द्रो देवताऽस्य= ऐन्द्रं हविः ।

आदित्यम् । बार्हस्पत्यम् । प्राजापत्यम् ।

४-२-२५ कस्येत् ॥

कः= प्रजापतिः, देवताऽस्य= कायं हविः ।

४-२-२६ शुक्राद् घन् ॥

शुक्रियम् ।

४-२-२७ अपोनप्त्रपान्नप्तृभ्यां घः ॥२८

अपोनप्त्रियम् । अपान्नप्त्रियम् ।

४-२-१८ दध्नः= दधिशब्दप्रकृतिकात्, तत्र (४-२-१४) संस्कृतम् (४-२-१६) ठक्= ठक् प्रत्ययो भवति भक्षाः (४-२-१६) ।

४-२-१९ उदश्वितः= उदश्विच्छब्दप्रकृतिकात्, तत्र (४-२-१४) सँस्कृतम् (४-२-१६) अन्यतरस्याम्= वा, ठक् (४-२-१८) भक्षाः (४-२-१६) । पक्षे ऽण् ।

४-२-२० क्षीराद्=क्षीरशब्दप्रकृतिकात् तत्र (४-२-१४) सँस्कृतम् (४-२-१६) ढञ्=ढञ्प्रत्ययो भवति । अत्र भक्षा इति न सम्बध्यते, तेन यवाग्वामपि भवति ।

४-२-२१ साऽस्मिन्- पौर्णमासी+ इति = पौर्णमास्युपाधिकात्, सा= प्रथमान्तात्, अस्मिन्= सप्तम्यर्थे प्रत्ययो भवति, संज्ञायाम्= संज्ञायां गम्यमानायाम् । **पौषो मासः** । अर्धमासः संवत्सरो वा । दशरात्रादौ भृतकादिमासादौ च न ।

४-२-२२ आग्र- आग्र... थात्= आग्रहायणीशब्दप्रकृतिकादश्वत्थशब्दप्रकृतिकाच्च, पौर्णमासी+इति+सा अस्मिन्+ संज्ञायाम् (४-२-२१) ठक्= ठक् प्रत्ययो भवति । **आग्रहायणी** अग्रे हायनमस्या इति बहुव्रीहिः ५-४-३८ प्रज्ञा... इत्यण् ८-४-३ पूर्व... इति णत्वम् । **अश्वत्थ** इत्यत्र त्वत एव निपातनात् पौर्णमास्यामपि लुप् ।

४-२-२३ विभा- फाल्गुनी... चैत्रीभ्यः= फाल्गुनी- श्रवणा-कार्त्तिकी-चैत्री- प्रकृतिकात्, पौर्णमासी + इति+सा+ अस्मिन् (४-२-२१) विभाषा=वा, ठक् (४-२-२२) संज्ञायाम् (४-२-२१) । पक्षेऽण् ।

४-२-२४ साऽस्य देवता= देवतोपाधिकात्, सा= प्रथमान्तात्, अस्य= 'अस्य' इत्यर्थे प्रत्ययो भवति । सा (४-२-२१) इति प्रकृते पुनः "सा" इति निर्देशः संज्ञानिवृत्त्यर्थः ।

४-२-२५ कस्य= कशब्दस्य स्थाने, इत्= इकारादेशः प्रत्ययसन्नियोगेन । प्रत्ययसन्नियोगेनेत्यर्थः प्रकरणगम्यः । **कायम्** इत्यत्र परत्वात् ७-२-११७ तद्धितेष्वचामादेः इत्यादिवृद्धिः ६-४-१४८ यस्येति चेति लोपं बाधते ।

४-२-२६ शुक्रात्= शुक्रशब्दप्रकृतिकात्, देवता+ सा+ अस्य (४-२-२४) घन्= घन्प्रत्ययो भवति । अणोऽपवादः ।

४-२-२७ अपो- अपोनप्त्रपान्नप्तृभ्याम्= अपोनपाद् इति अपान्नपाद् इति शब्दप्रकृतिकात्, देवता+ सा+ अस्य (४-२-२४) घः= घप्रत्ययो भवति, प्रत्ययसन्नियोगेन प्रकृत्योर्यथासंख्यं अपोनप्तृ अपान्नप्तृ इत्यादेशौ च भवतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-२८ छ च ॥२९

अपोनप्त्रीयम् । अपान्नप्त्रीयम् ।
(छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानम्)
पैङ्गाक्षीपुत्रीयम् । तार्णबिन्दवीयम् ।
(शतरुद्राच्छश्च घश्च)
शतं रुद्रा देवता अस्य = शतरुद्रीयम्, ।
शतरुद्रियम् ।

४-२-२९ महेन्द्राद् घाणौ च ॥

महेन्द्रियम् । माहेन्द्रम् । महेन्द्रीयम् ।

४-२-३० सोमाट्टयण् ॥

सौम्यम् । टित्त्वात् स्त्रियां ङीप् ।
सौमी ऋक् ।

४-२-३१ वाय्वृतुपित्रुषसो यत् ॥३२

वायव्यम् । ऋतव्यम् । पित्र्यम् । उषस्यम् ।

४-२-३२ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च ॥

द्यावापृथिवीयम् । द्यावापृथिव्यम् ।
शुनासीरीयम् । शुनासीर्यम् ।

४-२-३३ अग्नेर्ढक् ॥

आग्नेयम् ।

४-२-३४ कालेभ्यो भववत् ॥

मासो देवताऽस्य मासिकम् ।
वासन्तम् । प्रावृषेण्यम् ।

४-२-३५ महाराजप्रोष्ठपदाट्ठञ् ॥

माहाराजिकम् । प्रौष्ठपदिकम् ।
(ठञ्प्रकरणे तदस्मिन् वर्तत इति नवयज्ञादिभ्य उपसंख्यानम्)
नवयज्ञो वर्तते अस्मिन्=
नावयज्ञिकः कालः । पाकयज्ञिकः ।

४-२-२८ छ च- प्राग्वदर्थः । केवलं घप्रत्ययेन छ प्रत्ययो विनिमातव्यो ऽत्र । योगविभागो यथासंख्य निवृत्त्यर्थः ।

<u>शत</u>- विधानसामर्थ्यात् प्रत्यययोः ४-१-८८ द्विगोर्लुगपत्ये इति न लुक् ।

४-२-२९ महे- देवता (४-२-२४) महेन्द्रात्= महेन्द्रशब्दप्रकृतिकात्, सा+अस्य (४-२-२४) घाणौ= घ अण् इति प्रत्ययौ, छ (४-२-२८) प्रत्ययश्च भवन्ति ।

४-२-३० सोमा- देवता (४-२-२४) सोमात्= सोमशब्दप्रकृतिकात् सा+अस्य (४-२-२४) टयण्= टयण् प्रत्ययो भवति ।

४-२-३१ वायृ- देवता (४-२-२४) वाय्वृतुपित्रुषसः= वायु ऋतु पितृ उषस् इति प्रकृतिकात्, सा+ अस्य (४-२-२४) यत्= यत् प्रत्ययो भवति ।

४-२-३२ द्यावा- देवता (४-२-२४) द्यावा... मेधात्= द्यावापृथिवी शुनासीर मरुत्वत् अग्नीषोम वास्तोष्पति गृहमेध इति प्रकृतिकात्, सा+ (४-२-२४) छ = छप्रत्ययः, यत् (४-२-३१) च= यत्प्रत्ययो ऽपि भवति ।

४-२-३३ अग्ने- देवता (४-२-२४) अग्नेः= अग्निशब्दप्रकृतिकात्, सा+ अस्य (४-२-२४) ढक्= ढक् प्रत्ययो भवति ।

४-२-३४ काले- देवता (४-२-२४) कालेभ्यः= कालवाचिशब्दप्रकृतिकात् सा+अस्य (४-२-२४) भववत्= भवार्थे इव प्रत्यया भवन्ति । यथा मासे भवं मासिकम् । ४-३-११ कालाट्ठञ् इति ठञ् । वसन्ते भवं वासन्तम् । ४-३-१६ सन्धिवेला... इति ठञोऽपवादोऽण् । प्रावृषि भवं प्रावृषेण्यम् । ४-३-१७ प्रावृष एण्य इत्येण्यः । तथा देवता ऽस्येत्यर्थे ऽप्युदाहृतानि मूले ।

४-२-३५ महा- देवता (४-२-२४) महाराजप्रोष्ठपदात्= महाराजप्रोष्ठपदशब्दप्रकृतिकात्, सा+अस्य (४-२-२४) ठञ् = ठञ् प्रत्ययो भवति । पूर्वसूत्रेण ४-३-१६ सन्धिवेला... इति ठञो ऽपवादे नक्षत्रलक्षणेऽणि प्राप्ते ठञ् विधानार्थं प्रोष्ठपदग्रहणम् ।

ठञ्प्र-नवयज्ञादिभ्यः= नवयज्ञप्रभृतिशब्दप्रकृतिकात् तत्=प्रथमान्तात्, अस्मिन्= अस्मिन् इत्यर्थे, ठञ उपसंख्यानम्= ठञ् प्रत्ययो भवतीति वक्तव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-३६ पितृव्यमातुलमातामहपितामहाः ॥

पितुर्भ्राता= पितृव्यः । मातुर्भ्राता= मातुलः । मातुः पिता= मातामहः । पितुः पिता= पितामहः ।

(मातरि षिच्च)

मातुर्माता= मातामही । पितुर्माता= पितामही ।

(अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः)

अवेर्दुग्धम्= अविसोढम् । अविदूसम् । अविमरीसम् ।

(तिलान्निष्फलात् पिञ्जपेजौ)

निष्फलस्तिलः=तिलपिञ्जः । तिलपेजः ।

(पिञ्जश्छन्दसि डिच्च) ।

तिल्पिञ्जः ।

४-२-३७ तस्य समूहः ॥५४,५१

काकानां समूहः काकम् । शौकम् । वाकम् ।

(गुणादिभ्यो ग्रामज् वक्तव्यः)

गुणानां समूहः= गुणग्रामः ।

इन्द्रियग्रामः ।

४-२-३८ भिक्षादिभ्यो ऽण् ॥

भिक्षाणां समूहो भैक्षम् । गर्भिणीनां समूहो गार्भिणम् । युवतीनां समूहो यौवनम् । शत्रन्तादञि यौवतम् ।

४-२-३९ गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद् वुँञ् ॥४०

औपगवानां समूह औपगवकम् ।

औक्षकम् । औष्ट्रकम् । औरभ्रकम् ।

राजकम् । राजन्यकम् । राजपुत्रकम् ।

वात्सकम् । मानुष्यकम् । आजकम् ।

४-२-४० केदाराद् यञ् च ॥४१

कैदार्यम् । कैदारकम् ।

(गणिकाया यञिति वक्तव्यम्)

गाणिक्यम् ।

४-२-३६ **पितृव्य**-एते निपात्यन्ते । भ्रातरि पितृशब्दाद् व्यत् प्रत्ययो भवति, मातृशब्दाड्डुलच् प्रत्ययो भवति । पितरि ताभ्यां डामहच् प्रत्ययो भवति । **मात**-मातृपितृशब्दाभ्यां मातरि डामहच् प्रत्ययो भवति, षिच्च=स प्रत्ययः षिच्च भवति । षित्वात् ४-१-४१ षिद्गौ ....इति ङीष् ।

अवेः=अविशब्दात्, दुग्धे=दुग्धम् इत्यर्थे, सोढ दूस मरीसच् प्रत्ययाः, वक्तव्याः । उदाहरणेषु विधानसामर्थ्याद् ८-३-५९ आदेश... इति षत्वं न ।

तिला- निष्फलात्= निष्फलोपाधिकात्, तिलात्= तिलशब्दात्, पिञ्जपेजप्रत्ययौ भवतः, स्वार्थे ।

पिञ्ज- निष्फलात् तिलात्, पिञ्जः= पिञ्जप्रत्ययो भवति, डिच्च=स प्रत्ययो डिदपि भवति, छन्दसि= वेदे । डित्त्वं टिलोपार्थम् ।

४-२-३७ तस्य= षष्ठचन्तात् समर्थात्, समूहः=समूह इत्यर्थे प्रत्ययः ।

गुणादिभ्यः= गुणादिप्रकृतिकात्, तस्य+समूहः (४-२-३७) ग्रामच्= ग्रामच् प्रत्ययो वक्तव्यः ।

४-२-३८ भिक्षादिभ्यः= भिक्षादिशब्दप्रकृतिकात्, तस्य+समूहः (४-२-३७) अण्= अण् प्रत्ययो भवति । **भैक्षमित्यत्र** ४-२-४७ अचित्त...इति ठक् प्राप्तः । गार्भिणत्यत्र ४-२-४४ अनुदात्तादे... इत्यञ् प्राप्तः । सति तस्मिन् ६-४-१४४ नस्त...इति टिलोपः स्यात् । अणि तु ६-४-१६४ इनण्यन...इति प्रकृतिभावः । ६-३-३५ तसिँ... सूत्रस्थेन भस्याऽढे तद्धिते, इति वार्तिकेन पुवद्भावो ऽत्र बोध्यः ।

शत्रन्तादञि ४-२-४४ अनु... इत्यनेन ।

४-२-३९ गोत्रो... ष्याजात्= अपत्यवाचिशब्दप्रकृतिकात्, उक्षन् उष्ट्र उरभ्र राजन् राजन्य राजपुत्र वत्स मनुष्य अज इतिशब्दप्रकृतिकाच्च, तस्य+समूहः (४-२-३७) वँञ्= वुँञ्प्रत्ययो भवति ।

अपत्याधिकारादन्यत्र लोकिकं गोत्रं गृह्यते, तच्चापत्यमात्रं न तु पौत्रभृत्येव । **औक्षकम्** इत्यत्र ६-४-१४४ नस्तद्धिते इति टिलोपः । **राजन्यकमित्यत्र** ६-४-१६३ प्रकृ... सूत्रस्थेन प्रकृत्या... इति वार्तिकेन प्रकृतिभावाद् ६-४-१५१ आपत्यस्य च ... इति यलोपो न । एवं मानुष्यकमित्यत्रापि ।

४-२-४० केदारात्= केदारशब्दप्रकृतिकात्, तस्य+समूहः (४-२-३७) वुँञ् (४-२-३९) यञ् च= यञ् प्रत्ययो ऽपि भवति ।

गणिकायाः= गणिकाशब्दप्रकृतिकात्, तस्य+ समूहः (४-२-३७) यञ् प्रत्ययो भवतीति वक्तव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-४१ ठञ् कवचिनश्च ॥

कावचिकम् । कैदारिकम् ।

४-२-४२ ब्राह्मणमाणववाडवाद् यन् ॥

ब्राह्मण्यम् । माणव्यम् । वाडव्यम् ।

(यन्प्रकरणे पृष्ठादुपसंख्यानम्)

पृष्ठ्यम् ।

(अह्नः खः क्रतौ)

अहीनः क्रतुः । अहर्गणसाध्य इत्यर्थः ।

क्रतावित्युक्तेर्नेह-आह्नः । अहर्गण इत्यर्थः ।

(पर्श्वा णस् वक्तव्यः)

पर्शूनां समूहः पार्श्वम् ।

(वातादूलः)

वातानां समूहो वातूलः ।

४-२-४३ ग्रामजनबन्धुभ्यस्तल् ॥

तलन्तं स्त्रियाम् । ग्रामाणां समूहो ग्रामता ।

जनता । बन्धुता ।

(गजसहायाभ्यां चेति वक्तव्यम्)

गजानां समूहो गजता । सहायता ।

४-२-४४ अनुदात्तादेरञ् ॥४५

कापोतम् । मायूरम् ।

४-२-४५ खण्डिकादिभ्यश्च ॥

खण्डिकानां समूहः खाण्डिकम् ।

४-२-४६ चरणेभ्यो धर्मवत् ॥

कठानां समूहः काठकम् ।

कालापकम् । छन्दोगानां समूहः=छान्दोग्यम् ।

आथर्वणिकानां समूह आथर्वणम् ।

४-२-४१ ठञ् क- कवचिनः= कवचिन् इतिशब्दप्रकृतिकात्, केदारात् (४-२-४०) च= केदारशब्दप्रकृतिकाच्च, तस्य+ समूहः (४-२-३७) ठञ्=ठञ् प्रत्ययो भवति । केदारशब्दाद् यञ् वुँञ्भ्यां सह त्रीणि रूपाणि सिद्धानि ।

४-२-४२ ब्राह्म... डवात्= ब्राह्मण- माणव-वाडव- शब्दप्रकृतिकात्, तस्य+समूहः (४-२-३७) यन्= यन् प्रत्ययो भवति ।

यन्प्र- पृष्ठात्= पृष्ठशब्दप्रकृतिकात्, तस्य+समूहः (४-२-३७) यन्प्रत्ययस्योपसंख्यानं कर्तव्यम् । **अह्नः**= अह्न इति प्रकृतिकात्, तस्य+समूहः (४-२-३७) खः= खप्रत्ययो भवति, क्रतौ= यज्ञे गम्ये । **आह्न** इत्यत्र ४-२-४५ खण्डिकादिभ्योऽञ् इत्यञ् । ६-४-१४२ अह्नष्टखोरेवेति नियमाद् ६-४-१४४ नस्तद्धिते इति टिलोपो न । **६-४-१३४ अल्लोपो ऽन इत्यकारलोपः ।**

पर्श्वाः= पर्शूशब्दप्रकृतिकात्, तस्य+समूहः (४-२-३७) णस् वक्तव्यः= णस् प्रत्ययो भवतीति वक्तव्यम् । **पार्श्वमित्यत्र** १-४-१६ सिति चेति पदत्वेन भत्वाऽभावान्न गुणः ।

वातात्= वातशब्दप्रकृतिकात्, तस्य+समूहः (४-२-३७) ऊलः = ऊलप्रत्ययो भवति ।

४-२-४३ ग्राम... धुभ्यः= ग्राम जन बन्धु शब्दप्रकृतिकात्, तस्य+ समूहः (४-२-३७) तल्= तल्प्रत्ययो भवति ।

गजसहायाभ्याम्= गजसहायप्रकृतिकात्, तस्य+समूह (४-२-३७) इति वक्तव्यम्= तल्प्रत्ययो भवतीति वक्तव्यम् ।

४-२-४४ अनुदात्तादेः= अनुदात्तादिकशब्दप्रकृतिकात्, तस्य+समूहः (४-२-३७ अञ्= अञ्प्रत्ययो भवति । कपोतमयूरशब्दौ ४२ लघावन्ते... इति फिट्सूत्रेण मध्योदात्तौ ततः ६-१-१५३ अनुदा... इति शेषनिघातादनुदात्तादी ।

४-२-४५ खण्डिकादिभ्यः खण्डिकादिप्रकृतिकात्, तस्य+समूहः (४-२-३७) अञ् (४४) ।

४-२-४६ चरणेभ्यः= शाखाध्येतृवाचिशब्दप्रकृतिकात्, तस्य समूहः (४-२-३७), धर्मवत्= धर्मे इव प्रत्यया भवन्ति । याभ्यः शाखाध्येतृवाचिप्रकृतिभ्यो धर्मे ऽर्थे ये प्रत्यया भवन्ति; ताभ्यः शाखाध्येतृवाचिप्रकृतिभ्यः समूहे ऽर्थे त एव प्रत्यया भवन्ति । **काठकमित्यत्र** ४-३-१२६ गोत्रचरणाद् इति वुँञ् । **छान्दोग्यमित्यत्र** ४-३-१२९ छन्दोगौक्थिक ... इति ञ्यः । **आर्थर्वणमित्यत्र** ४-३-१३१ रैव... सूत्रस्थेन आथर्वणिकस्येक... इति वार्तिकेनाण्, इकलोपश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-४७ अचित्तहस्तिधेनोष्ठक् ॥

अपूपानां समूह आपूपिकम् । हास्तिकम् । धैनुकम् ।

(धेनोरनञ इति वक्तव्यम्)

आधैनवम्, आधेनवम् ।

४-२-४८ केशाश्वाभ्यां यञ्छावन्यतरस्याम् ॥

केशानां समूहः कैश्यम्, कैशिकम् ।

अश्वानां समूहः= अश्वीयम्, आश्वम् ।

४-२-४९ पाशादिभ्यो यः ॥ ५०

पाशानां समूहः पाश्या । तृण्या । स्त्रीत्वं लोकात् ।

४-२-५० खलगोरथात् ॥

खलानां समूहः खल्या । गव्या । रथ्या ।

४-२-५१ इनित्रकट्यचश्च ॥

खलानां समूहः खलिनी । गोत्रा । रथकटचा ।

(खलादिभ्य इनिर्वक्तव्यः)

डाकिनी । कुटुम्बिनी ।

कमलादिभ्यः खण्डच् ।

कमलखण्डम् । अम्भोजखण्डम् ।

(नरकरितुरङ्गेभ्यः स्कन्धच)

नरस्कन्धः । करिस्कन्धः । तुरङ्गस्कन्धः ।

(पूर्वादिभ्यः काण्डः)

पूर्वकाण्डम् । तृणकाण्डम् । कर्मकाण्डम् ।

४-२-५२ विषयो देशे ॥५४

शिवीनां विषयः शैवो देशः ।

देश इत्युक्तेर्नेह- देवदत्तस्य विषयो ऽनुवाकः ।

४-२-५३ राजन्यादिभ्यो वुँञ् ॥

राजन्यानां विषयो राजन्यको देशः ।

४-२-५४ भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ ॥

भौरिकीणां विषयो भौरिकिविधो देशः ।

ऐषुकारिभक्तः ।

४-२-५५ सो ऽस्यादिरितिच्छन्दसः प्रगाथेषु ॥५६

पङ्क्तिरादिरस्य पाङ्क्तः प्रगाथः ।

जागतः । आनुष्टुभः ।

(छन्दसः प्रत्ययविधाने नपुंसके स्वार्थ उपसंख्यानम्)

निष्टुबेव= त्रैष्टुभम् ।

४-२-४७ अचित्तहस्तिधेनोः=चित्तरहितवाचिशब्दप्रकृतिकाद्, हस्तिन् धेनु इति शब्दप्रकृतिकाच्च, तस्य+ समूहः (४-२-३७)ठक्=ठक् प्रत्ययो भवति । धैनुकमित्यत्र- ७-३-५१ इसुसुक्तान्तात् क इति ठस्य कः ।

धेनो-अनञः= नञ्रहितात्, धेनोः= धेनुशब्दात्, इति वक्तव्यम्= ठक्प्रत्ययो भवतीति वक्तव्यम् । आधैनवमित्यत्र ४-१-८६ उत्सादिभ्योऽञ् इत्यञ् । ७-३-२५ जङ्गलधेनु...इत्युत्तरपदा दिवृद्धिर्वा ।

४-२-४८ केशाश्वाभ्याम्=केश अश्व इतिशब्दप्रकृतिकात्, तस्य+समूहः (४-२-३७) अन्यतरस्याम्=वा, यञ्छौ=यञ् छ इति प्रत्ययौ भवतः । पक्षे क्रमात् अचि (४-२-४७) इति ठक् । तस्य (४-२-३७) इत्यण् ।

४-२-४९ पाशादिभ्यः= पाशादिप्रकृतिकात्, तस्य+समूहः (४-२-३७) यः= यप्रत्ययो भवति ।

४-२-५० खलगोरथात्= खल गो रथ शब्दप्रकृतिकात् तस्य+समूहः (४-१-३७) यः (४-२-४९) ।

४-२-५१ इनिँ-खलगोरथात् (४-२-५०) तस्य समूहः (४-२-३७) इनित्रकटचचः=इनिँ-त्र-कटचच् प्रत्यया भवन्ति ।

४-२-५२ विष-तस्य (४-२-३७) विषयः= विषय इत्यर्थे प्रत्ययो भवति, देशे=स विषयो देशश्चेत् । समूह इति निवृत्तम् ।

४-२-५३ राजन्यादिभ्यः=राजन्यादिप्रकृतिकात्, तस्य (४-२-३७) विषयः + देशे (४-२-५२) वुँञ्=वुँञ् प्रत्ययो भवति । राजन्यक इत्येतद्विषये ४-२-३९ गोत्रो... इत्यत्रापि द्रष्टव्यम् ।

४-२-५४ भौरि... दिभ्यः= भौरिक्यादिप्रकृतिकात् ऐषुकार्यादिप्रकृतिकाच्च, तस्य (४-२-३७) विषयः + देशे (४-२-५२) विधल् भक्तलौ= विधल् भक्तल् प्रत्ययौ भवतः ।

४-२-५५ सोऽस्यादि- आदिरिति=आद्युपाधिकात्, छन्दसः=वृत्तवाचिनः, सः=प्रथमान्तात्, अस्य= षष्ठचर्थे प्रत्ययो भवति, प्रगाथेषु=षष्ठचर्थः प्रगाथाश्चेत् । छन्दः शब्दो ऽत्र अक्षराणामियत्तावचनः=वृत्तवाची= पङ्क्तिप्रभृतिवाची । यत्र द्वे ऋचावावृत्त्या तिस्रः क्रियन्ते स प्रगाथः ।

छन्दसः= छन्दोनामवाचिप्रातिपदिकात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-५६ संग्रामे प्रयोजनयोद्धृभ्यः ॥

सुभद्रा प्रयोजनमस्य सौभद्रः संग्रामः ।
भरता योद्धारो ऽ स्य भारतः संग्रामः ।

४-२-५७ तदस्यां प्रहरणमिति क्रीडायां णः ॥

दण्डः प्रहरणमस्यां दाण्डा क्रिया । मौष्टा ।
क्रीडायामित्युक्तेर्नेह- खड्गः प्रहरणमस्यां सेनायाम् ।

४-२-५८ घञः साऽस्यां क्रियेति ञ : ॥

तिलपातो ऽस्यां तैलंपाता स्वधा ।
श्येनपातो ऽस्यां श्यैनम्पाता मृगया ।
दण्डपातो ऽस्यां दाण्डपाता तिथिः ।

४-२-५९ तदधीते तद् वेद ॥६६

व्याकरणमधीते वेत्ति वा वैयाकरणः । नैरुक्तः ।

४-२-६० क्रतूक्थादिसूत्रान्ताट्ठक् ॥

आग्निष्टोमिकः । उक्थमधीते वेत्ति वा औक्थिकः । नैयायिकः । लौकायतिकः । सांग्रहसूत्रिकः ।
(सूत्रान्तादकल्पादेरेवेष्यते)
कल्पसूत्रमधीते वेत्ति वा काल्पसूत्रः ।
(विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम्)
वायसविद्यिकः । गौलक्षणिकः ।
पाराशरकल्पिकः ।
(विद्या चा ऽ नङ्गक्षत्रधर्मत्रिपूर्वा)
ग्राह्या= (अङ्गक्षत्रधर्मत्रिपूर्वान्नेति वाच्यम्)
आङ्गविद्यः । क्षात्रविद्य : । धार्मविद्यः । त्रिविधा विद्या= त्रिविद्या । तामधीते वेत्ति वा त्रैविद्यः ।
(आख्यानाख्यायिकेतिहास-पुराणेभ्यष्ठग् वक्तव्यः)
यवक्रीतमधिकृत्य कृतमाख्यानमुपचाराद् यवक्रीतम् । तदधीते वेत्ति वा यावक्रीतिकः ।
वासवदत्तामधिकृत्य कृता ऽऽ ख्यायिका वासवदत्ता। तामधीते वेत्ति वा वासवदत्तिकः । ऐतिहासिकः । पौराणिकः ।
(सर्वसादेर्द्विगोश्च लः)
सर्ववेदानधीते वेत्ति वा सर्ववेदः ।
वार्तिकान्तमधीते सवार्तिकः । द्विवेदः ।

४-२-५६ संग्रा- प्र...भ्यः- प्रयोजनोपाधिकाद् योद्ध्रुपाधिकाच्च, सोऽस्य (४-२-५५) प्रत्ययः, संग्रामे= षष्ठ्यर्थः संग्रामश्चेत् ।

४-२-५७ तदस्यां- प्रहरणमिति= प्रहरणोपाधिकात्, तत्= प्रथमान्तात्, अस्याम्=अस्यामिति सप्तम्यर्थे, णः= णप्रत्ययो भवति, क्रीडायाम्= सप्तम्यर्थः क्रीडा चेत् ।

४-२-५८ घञ- क्रियेति= क्रियावाचिनः, घञः= घञन्तप्रकृतिकात्, सा= प्रथमान्तात्, अस्याम्= अस्यामिति सप्तम्यर्थे स्त्रीलिङ्गे, ञः= ञप्रत्ययो भवति । कृद्ग्रहणपरिभाषया तिलपातादीनां घञन्तत्वम् । क्रियावाचिन इत्युक्तेर्भावघञन्तादेव भवति न तु कर्मघञन्तादपि । तेनेह न- प्राकारो ऽस्यां वर्तते । आद्योदाहरणयोः । ७-३-७१ श्येन... इति मुँम् । ४-२-५७ तदस्याम् इति प्रकृते पुनः सा ऽस्यां ग्रहणं क्रीडायामित्यस्या ऽसम्बन्धार्थम् ।

४-२-५९ तद- तद्= द्वितीयान्ताद्, अधीते= अधीते इत्यर्थे, तद्= द्वितीयान्तात्, वेद= वेत्तीत्यर्थे प्रत्ययो भवति । **वैयाकरण** इत्यत्र ७-३-३ नयृवा... इत्यैच् । ४-४-२ तेन दीव्यति...इत्यत्र चतुर्ष्वर्थेषु तेनेतीव, एकेनैव तदिति निर्देशेन सिद्धे द्विस्तद्ग्रहणमुत्तरत्रापि द्वाभ्यामर्थाभ्यां सम्बन्धार्थम् । अयं भावः- ४-२-६० क्रतूक्थादिसूत्रे क्रतुशब्दः कर्मवाची ४-२-६३ वसन्तादि... सूत्रे वसन्तादयश्च ऋतुवाचिनः । तेषामध्ययनासंभवात् तत्सहचरितग्रन्थास्तत्र विवक्षणीयाः । तेषां गौणत्वाद् "वेद" इति मुख्यार्थे एव तेभ्यः स्यान्न तु गौणेऽर्थे ऽध्येतरि । द्विस्तद्ग्रहणात् तु गौणे ऽपि भवतीति ।

४-२-६० क्रतू.... त्रान्तात्= क्रतुविशेषवाचिप्रकृतिकात् उक्थप्रभृतिगणपठितशब्दप्रकृतिकात्
सूत्रशब्दान्तप्रकृतिकाच्च, तद्+अधीते+तद्+वेद (४-२-५९) ठक्=ठक् प्रत्ययो भवति ।
क्रतुविशेषवाचिनामेवेह ग्रहणम् । तेभ्यो मुख्यार्थेभ्यो वेदितरि, तत्प्रतिपादकग्रन्थपरेभ्यस्त्वध्येतरि । उक्थं सामविशेषस्तल्लक्षणपरो ग्रन्थविशेषो लक्षणयोक्थम् । इति भट्टोजिदीक्षितः । मुख्यार्थात्तूक्थशब्दाट्ठगणौ नेष्येते ।

विद्या चा- काशिकायां "धर्म संसर्ग त्रि" इति पाठः । सांसर्गविद्य इति चोदाहरणम् ।

आख्या- आद्ययोरर्थग्रहणमन्त्ययोः स्वरूपग्रहणम् । उदाहृतानि च तथैव ।

वासवदत्ता- इत्यत्र ४-३-८७ अधिकृत्य कृते....इत्यधिकारे ४-२-११४ वृद्धाच्छः । तस्य ४-३-८७ अधि....सूत्रस्थेन लुबाख्या....इति वार्तिकेन लुप् । ततः प्रकृतवार्तिकेन ठकि वासवदत्तिकः ।

सर्व- सर्वादिः सादेर्द्विगोश्चोत्पन्नस्याऽध्येतृवेदितृप्रत्ययस्य, लः= लुग् भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(अनुसूर्लक्ष्यलक्षणे च)
आनुसुकः । लाक्षियकः । लाक्षणिकः ।
(इकन् पदोत्तरपदात्)
पूर्वपदिकः । उत्तरपदिकः ।
(शतषष्टेः षिकन् पथः)
शतपथिकः । शतपथिकी । षष्टिपथिकः ।
षष्टिपथिकी ।

४-२-६१ क्रमादिभ्यो वुँन् ॥

क्रमकः । पदकः । मीमांसकः ।

४-२-६२ अनुब्राह्मणादिनिँः ॥

अनुब्राह्मणी ।

४-२-६३ वसन्तादिभ्यष्ठक् ॥

वासन्तिकः । आथर्वणिकः ।

४-२-६४ प्रोक्ताल्लुक् ॥ ६६,६५

पाणिनिना प्रोक्तम्= पाणिनीयम् ।
तदधीते वेत्ति वा पाणिनीया ब्राह्मणी ।

४-२-६५ सूत्राच्च कोपधात् ॥

अष्टकमधीयते=अष्टकाः ।
(संख्याप्रकृतेरिति वक्तव्यम्)
नेह-महावार्तिकं सूत्रमधीते= माहावार्तिकः ।

४-२-६६ छन्दोब्राह्मणानि च तद्विषयाणि ॥

कठेन प्रोक्तमधीयते=कठाः । वाजसनेयेन प्रोक्तमधीयते= वाजसनेयिनः । ताण्डचेन प्रोक्तमधीयते= ताण्डिनः । ऐतरेयिणः । चकारोऽनुक्तसमुच्चयार्थः । कल्पे-काश्यपिनः । सूत्रे- पाराशरिणो भिक्षवः ।

सवार्तिक इत्यत्र अन्तवचनार्थेन सहशब्देन वार्तिकशब्दस्य २-१-६ अव्य... इत्यव्ययीभावसमासे ६-३-८१ अव्य... इति सहस्य सः । ततोऽध्येतृप्रत्ययस्य लुक् । **द्विवेदः** इत्यत्र द्वौ वेदावधीते, इति विग्रहे तद्धि... इति समासः । **अनुसूर्लक्ष्यलक्षणे च** शब्दाः, अधीते+वेद (४-२-५९) ठकमुत्पादयन्ति ।
इकन्- पदोत्तरपदात्= पदशब्द उत्तरपदं यस्य तस्मात् अधीते + वेद (४-२-५९) इकन्=इकन् प्रत्ययो भवति ।
शत-शतषष्टेः= शतषष्टिशब्दाभ्यां परस्मात्, पथः=पथिन्शब्दात्, अधीते + वेद (४-२-५९) षिकन्=षिकन् प्रत्ययो भवति ।
४-२-६१ क्रमादिभ्यः=क्रमादिशब्दप्रकृतिकात्, तदधीते+तद् वेद (४-२-५९)वुँन्=वुँन्प्रत्ययो भवति ।
४-२-६२ अनुब्राह्मणात्=अनुब्राह्मणशब्दप्रकृतिकात्, तदधीते तद् वेद (४-२-५९) इनिँः=इनिँप्रत्ययो भवति ।
४-२-६३ वसन्तादिभ्यः= वसन्तादिशब्दप्रकृतिकात्, तदधीते तद् वेद (४-२-५९) ठक्=ठक् प्रत्ययो भवति । वसन्तर्तुसहचरितो ग्रन्थो वसन्तः । तमधीते वेत्ति वा वासन्तिकः ।
अथर्वणा प्रोक्तो ग्रन्थ उपचारादर्थवा। तमधीते वेत्ति वा **आथर्वणिकः**। ६-२-५९) दाण्डिना... इति निपातनाट्टिलोपाभावः ।
४-२-६४ प्रोक्ता-प्रोक्तात्= प्रोक्तप्रत्ययान्ताद् विहितस्य अध्येतृवेदितृप्रत्ययस्य, लुक्= लुग् भवति । उदाहरणे प्रोक्तार्थे ४-२-११४ वृद्धा... इतिच्छः । ततोऽध्येतृवेदित्रर्थे विहितस्याऽणो लुकि, अणन्तत्वाभावान्न ङीप् ।
४-२-६५ सूत्रा- कोपधात्=ककारोपधकात्, सूत्रात्=सूत्रवाचिनो विहितस्य अध्येतृवेदितृप्रत्ययस्य, लुक् (४-२-६४) ।
४-२-६६ छन्दो- छ.. नि = छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि, तद्विषयाणि= अध्येतृवेदितृप्रत्ययविषयाणि भवन्ति। अयं भावः- यथा ३-३-८८ ड्वितः... इति सूत्रेण क्त्रिप्रत्यये सति ४-४-२० क्त्रेर्म... इति सूत्रेण मब् भवत्येव । न हि निर्वृत्तार्थक-मप्-प्रत्ययं विना "पक्त्रि" इत्यादिरूपः शब्दः प्रयुज्यते, किन्तु निर्वृत्तार्थकमप्प्रत्ययान्त एव (पक्त्रिम इत्यादिरूप एव शब्दः प्रयुज्यते, तथैव च्छन्दोवाचका ब्राह्मणवाचकाश्च केवलप्रोक्तप्रत्ययान्ताः शब्दा न प्रयुज्यन्ते, किन्तु तेभ्यो ऽध्येतृवेदित्रर्थे प्रत्ययान्तरं कृत्वैव प्रयुज्यन्त इति । **कठाः** : इत्यत्र ४-३-१०४ कलापि ... इति प्रोक्तार्थे वैशम्पायनान्तेवासित्वाण्णिनिँः । तस्य ४-३-१०७ कठच... इति लुक् । ततः ४-२-५९ तद... इत्यण् । तस्य ४-२-६४ प्रोक्ता... इति लुक् । **वाजसनेयिनः** इत्यत्र ४-३-१०६ शौन..... इति प्रोक्तार्थे णिनिँः । तदन्तात् ४-२-५९ तद .... इत्यण् । तस्य ४-२-६४ प्रोक्ता.... इति लुक् । **ताण्डिनः** इत्यत्र गर्गादि- यञन्त- ताण्डचशब्दात् प्रोक्तार्थे ४-३-१०५ पुरा.... इति णिनिः । ६-४-१५१ आप.... इति यलोपः । तदन्तात् ४-२-५९ तद .....इत्यण् । तस्य ४-२-६४ प्रोक्ता.... इति लुक् । **ऐतरेयिणः** इत्यत्र शुभ्रादिढगन्तात् ऐतरेयशब्दात् पूर्ववत् ४-३-१०५ पुरा ....इति णिनिँः । ततोऽध्येतृप्रत्ययस्य लुक् । **काश्यपिनः** इत्यत्र काश्यपेन प्रोक्तं कल्पमधीयते, इति विग्रहे प्रोक्तार्थे ४-३-१०३ काश्य... इति णिनिँः । ततो ऽध्येतृप्रत्ययस्य लुक् । **पाराशरिणः** इत्यत्र पाराशर्येण प्रोक्तं सूत्रमधीयते इति विग्रहे प्रोक्तार्थे ४-३-११० पारा... इति णिनिँः । ततो ऽध्येतृप्रत्ययस्य लुक् । छन्दोब्राह्मणानीत्युक्तेः पाणिनिना प्रोक्तं व्याकरणम्= पाणिनीयम् । इति प्रयोगो भवत्येव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-६७ तदस्मिन्नस्तीति देशे तन्नाम्नि ॥ ९१
उदुम्बराः सन्त्यस्मिन् देशे=औदुम्बरः।

४-२-६८ तेन निर्वृत्तम् ॥९१
कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी।

४-२-६९ तस्य निवासः ॥९१
शिवीनां निवासो देशः। शैवः।

४-२-७० अदूरभवश्च ॥ ९१
विदिशाया अदूरभवं नगरं वैदिशम्।

४-२-७१ ओरञ् ॥ ७६
कक्षतवः सन्त्यस्मिन् देशे, कक्षतुभिर्निर्वृत्तो देशः कक्षतूनां निवासोऽ दूरभवो वा देशः काक्षतवः। नद्यां परत्वान्मतुँप् (४-२-८५) इक्षुमती।

४-२-७२ मतोँश्च बह्वजङ्गात् ॥
ऐषुकावतम्। बह्वजङ्गादित्युक्तेर्नेह-आहिमतम्।

४-२-७३ बह्वचः कूपेषु ॥ ७४
दीर्घवरत्रेण निर्वृत्तः कूपः = दैर्घवरत्रः।

४-२-७४ उदक् च विपाशः ॥
दत्तेन निर्वृत्तः कूपः= दात्तः। गौप्तः।

४-२-७५ सङ्कलादिभ्यश्च ॥
सङ्कलेन निर्वृत्तः साङ्कलः।

४-२-७६स्त्रीषु सौवीर-साल्व-प्राक्षु ॥
सौवीरे-दत्तामित्रेण निर्वृत्ता नगरी दात्तामित्री। साल्वे-विधूमागिनना निर्वृत्ता वैधूमाग्नी। प्राचि-ककन्देन निर्वृत्ता काकन्दी।

४-२-७७ सुवास्त्वादिभ्योऽण् ॥ ७९
सुवास्तोरदूरभवं नगरं=सौवास्तवम्। वार्णवम्।

४-२-६७ तद- अस्तीति= अस्ति इत्युपाधिकात् तद्=प्रथमान्तात्, अस्मिन्=अस्मिन्निति सप्तम्यर्थे प्रत्ययो भवति, तन्नाम्नि= प्रत्ययान्तनाम्नि, देशे= देशे वाच्ये। अत्र देशशब्देन पर्वतादिप्रदेशा अपि गृह्यन्ते न तु जनपद एव। अत एव ४-२-८५ नद्यां ४-२-७३ बह्व... इत्यादयः सङ्गच्छन्ते।

४-२-६८ तेन= तृतीयान्तात्, निर्वृत्तम्=सम्पादितम् इत्यर्थे प्रत्ययो भवति, तन्नाम्नि+ देशे (४-२-६७)।

४-२-६९ तस्य= षष्ठ्यन्तात्, निवासः= निवास इत्यर्थे प्रत्ययो भवति, तन्नाम्नि+ देशे (४-२-६७)।

४-२-७० अदू- तस्य (४-२-६९) अदूरभवः= अदूरभव इत्यर्थे प्रत्ययो भवति, तन्नाम्नि+देशे (४-२-६७)। अत्र काशिका-चकारः पूर्वेषां चतुर्णामर्थानामिह सन्निधानार्थः। तेनोत्तरेषु चत्वारोऽप्यर्थाः सम्बध्यन्ते, इति।

४-२-७१ ओर- ओः=उवर्णान्तप्रकृतिक- प्रथमाद्यन्तात्, अञ्=अञ् प्रत्ययो भवति, पूर्वोक्तेषु चतुर्ष्वर्थेषु।

४-२-७२ मतोँ- बह्वजङ्गात्+मतोँः= बह्वजङ्गात् परो यो मतुँप् तदन्तप्रकृतिक-प्रथमाद्यन्तात्, अञ् (४-२-७१)चतुर्ष्वर्थेषु। **आहिमतम्** इत्यत्राऽणेव। स्वरे विशेषः।

४-२-७३ बह्वचः= बह्वच्कप्रकृतिकप्रथमाद्यन्ताद्, अञ् (४-२-७१) चतुर्ष्वर्थेषु, कूपेषु= कूपेषु वाच्येषु।

४-२-७४ उदक्- विपाश उदक्+[कूपेषु (४-२-७३)]= विपाशो नद्या उत्तरे कूले ये कूपास्तेषु वाच्येषु, अञ् (४-२-७१) चतुर्ष्वर्थेषु। अबह्वजर्थ आरम्भः। विपाशो दक्षिणतस्तु अणेव दात्तः। गौप्तः। स्वरे विशेषः। अत्र काशिकाकारः- स्वरेऽप्येवमवधानदर्शनेन सूत्रकारं प्रशंसति-महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्येति।

४-२-७५ सङ्कलादिभ्यः= सङ्कलादिप्रकृतिक (प्रथमाद्यन्तेभ्यः) समर्थेभ्यः अञ् (४-२-७१) चतुर्ष्वर्थेषु। कूपेष्विति निवृत्तम्।

४-२-७६ स्त्रीषु- प्रथमाद्यन्तेभ्यः प्रातिपदिकेभ्यः, अञ् (४-२-७१) तन्नाम्नि (४-२-६७)= तन्नामसु, स्त्रीषु=स्त्रीलिङ्गेषु, सौवीर...प्राक्षु= सौवीर-साल्व-प्राक्षु (देशे ४-२-६७)= देशेषु वाच्येषु।

४-२-७७ सुवास्त्वादिभ्यः= सुवास्तु-प्रभृतिप्रकृतिक-प्रथमाद्यन्तेभ्यः समर्थेभ्यः प्रातिपदिकेभ्यः, अण्= अण् प्रत्ययो भवति, चतुर्ष्वर्थेषु। अञोऽपवादः। अण्ग्रहणं नद्यां मतुँपो (४-२-८५) बाधनार्थम्। सौवास्तवी नदी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-७८ रोणी ॥

रौणः । आजकरोणः ।

४-२-७९ कोपधाच्च ॥

कर्णवेष्टकेन निर्वृत्तः कूपः कार्णवेष्टकः । कृकवाकुना निर्वृत्तं नगरं कार्कवाकवम् ।

४-२-८० वुँञ्-छण्-क-ठजिल-सेनिँ-र-ढञ्-ण्य-य-फक्-फिञ्-इञ्-ञ्य-कक्-ठकोऽरीहण-कृशाश्वर्श्य-कुमुद-काश-तृण-प्रेक्षाश्म-सखि-सङ्काश-बल-पक्ष-कर्ण-सुतङ्गम-प्रगदिन्-वराह-कुमुदादिभ्यः ॥

आरीहणकम् । द्रौघणकम् । कार्शाश्वीयः । आरिष्टीयः । ऋश्यकः । न्यग्रोधकः । कुमुदिकम् । शार्करिकम् । काशिलम् । घाशिलम् । तृणसः ।नडसः । प्रेक्षी । फलकी । अश्मरः । यूषरः ।साखेयम् । साखिदत्तेयम् । साङ्काश्यम् । काम्पिल्यम् । बल्यः । कुल्यः । पाक्षायणः । तौषायणः । कार्णायनिः । वासिष्ठायनिः । सौतङ्गमिः । मौनिचित्तिः । प्रागद्यम् । मागद्यम् । वाराहकम् । पालाशकम् । कौमुदिकम् । गौमथिकम् ।

४-२-८१ जनपदे लुप् ॥ ८३

पञ्चालानां निवासो जनपदः पञ्चालाः । कुरवः । मत्स्याः । अङ्गाः । वङ्गाः ।

४-२-८२ वरणादिभ्यश्च ॥

वरणानामदूरभवं नगरं वरणाः ।

४-२-८३ शर्करायाः वा ॥ ८४

४-२-८४ ठक्छौ च ॥

शर्करा । शार्करिकम् । शार्करम् । शर्करीयम् । शर्करिकम् । शार्करकम् ।

४-२-८५ नद्यां मतुँप् ॥

इक्षुमती ।

४-२-७८**रोणी**=प्रथमाद्यन्ताद् रोणीशब्दात्तदन्ताच्च, अञ् (४-२-७७) चतुर्ष्वर्थेषु । कूपलक्षणस्याञोऽपवादः ।

४-२-७९ कोपधात्= ककारोपध-प्रकृतिक-प्रथमाद्यन्तात् समर्थात् प्रातिपदिकात्, अञ् (४-२-७७) चतुर्ष्वर्थेषु । कूपलक्षणस्योवर्णलक्षणस्य चाऽञोऽपवादः ।

४-२-८० वुँञ् छण्- चतुर्ष्वर्थेषु, प्रथमाद्यन्तेभ्यः अरीहणादिभ्यो वुँञ्, कृशाश्वादिभ्यश्छण्, ऋश्यादिभ्यः कः, कुमुदादिभ्यश्ष्ठच्, काशादिभ्य इलः, तृणादिभ्यः सः, प्रेक्षादिभ्य इनिँः, अश्मादिभ्यो रः, सख्यादिभ्यो ढञ्, सङ्काशादिभ्यो ण्यः, बलादिभ्यो यः, पक्षादिभ्यः फक्, कर्णादिभ्यः फिञ्, सुतङ्गमादिभ्य इञ्, प्रगद्यादिभ्यो ञ्यः, वराहादिभ्यः कक् , कुमुदादिभ्यष्ठक् । अत्र काशिका - शिरीषशब्दो, ऽरीहणादिषु कुमुदादिषु च पठचते, औत्सर्गिकोऽपि तत इष्यते, तस्य च वरणादिषु दर्शनाल्लुग् भवति । (अत्र न्यासः- विशेषविहितानां हि लुपा न भवितव्यम् । अत औत्सर्गिकस्य लुब् भवतीति विज्ञायते) तथा चोक्तम्- शिरीषणामदूरभवो ग्रामः शिरीषाः । तस्य वनं शिरीषवनमिति । इति ।

४-२-८१ जनपदे= जनपदे वाच्ये, लुप्= चातुरर्थिकप्रत्ययस्य लुब् भवति । उदाहरणेषु १-२-५१ लुपि... इति युक्तवद्भावाद् बहुवचनम् । अत्र काशिका-इह कस्मान्न भवति ? उदुम्बरा अस्मिन् सन्ति, औदुम्बरो जनपदः । वैदिशो जनपदः । इति ? तन्नाम्नीति वर्तते । न चाऽत्र लुबन्तं तन्नामधेयं भवति ।

४-२-८२ वरणादिभ्यः= वरणादिप्रातिपदिकेभ्यो विहितस्य चातुरर्थिकप्रत्ययस्य, लुप् (४-२-८१) । अजनपदार्थ आरम्भः । **वरणाः** अत्र १-२-५१ लुपि... इति पुंलिङ्गं बहुवचनं च ।

४-२-८३ शर्करायाः= शर्कराप्रातिपदिकाद् विहितस्य चातुरर्थिकप्रत्ययस्य वा=विकल्पेन, लुप् (४-२-८१) ।

४-२-८४ ठक्छौ- शर्करायाः (४-२-८३)= शर्कराशब्दप्रकृतिक-प्रथमाद्यन्तात् समर्थात् , ठक्छौ=ठक् छ इति प्रत्ययौ भवतः, वा (४-२-८३) लुप् (४-२-८१)+च= प्रत्ययस्य च वा लुप्, चतुर्ष्वर्थेषु । कुमुदादौ वराहादौ च पाठात् पक्षे ठच् ककौ । वाग्रहणसामर्थ्यात् पक्षे औत्सर्गिकोऽण् । तस्य वा लुप् । षड् रूपाणि ।

४-२-८५ नद्यां- प्रथमाद्यन्तेभ्यः प्रातिपदिकेभ्यः, नद्याम्=नद्यां वाच्यायाम्, मतुँप्=मतुँप् प्रत्ययो भवति, चतुर्ष्वर्थेषु । **इक्षुमती** अत्र ४-१-६ उगितश्च इति ङीप् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-८६ मध्वादिभ्यश्च ॥

मधुमान् ।

४-२-८७ कुमुदनडवेतसेभ्यो ड्मतुँप् ॥

कुमुद्वान् । नड्वान् । वेतस्वान् ।

(महिषाच्चेति वक्तव्यम्)

महिष्मान्नाम देशः ।

४-२-८८ नडशादाड् ड्वलच् ॥

नड्वलः । शाद्वलः ।

४-२-८९ शिखाया वलच् ॥

शिखावलं नाम नगरम् ।

४-२-९० उत्करादिभ्यश्छः ॥ ९१

उत्करीयम् ।

४-२-९१ नडादीनां कुँक् च ॥

नडकीयम् । प्लक्षकीयम् ।

४-२-९२ शेषे ॥

सूत्रमिदं लक्षणं चाधिकारश्च ।

प्र. ४-२-९२ शेषे ॥

चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः । दृषदि पिष्टा दार्षदाः सक्तवः । उलूखले क्षुण्णः= औलूखलो यावकः । अश्वैरुह्यते आश्वो रथः । चतुर्भिरुह्यते चातुरं शकटम् । चतुर्दश्यां दृश्यते चातुर्दशं रक्षः ।

द्वि ४-२-९२ शेषे ॥

४-२-९३ राष्ट्रावारपाराद् घखौ ॥

राष्ट्रे जातादिः= राष्ट्रियः । अवारपारीणः ।

(अवारपाराद् विगृहीतादपि विपरीताच्चेति वक्तव्यम्)

अवारीणः । पारीणः । पारावारीणः ।

४-२-८६ **मध्वादिभ्यः**= मधुप्रभृतिभ्यः प्रथमाद्यन्तेभ्यः प्रातिपदिकेभ्यः, मतुँप् (४-२-८५) चतुर्ष्वर्थेषु । अनचर्थ आरम्भः ।

४-२-८७ **कुमुद...सेभ्यः**= कुमुदादिशब्दप्रकृतिकप्रथमाद्यन्तेभ्यः समर्थेभ्यः, ड्मतुँप्=ड्मतुँप् प्रत्ययो भवति, चतुर्ष्वर्थेषु । उदाहरणेषु डित्वाट्टिलोपः । आद्ययोः ८-२-१० झयः इति मो वः । तृतीये तु ८-२-९ मादु...इति मो वः । १-१-५५ अच इति स्थानिवत्त्वेन सकारस्य पदान्तत्वाभावान्न रुँत्वम् । १-१-५७ न पदान्त इति निषेधस्तु न । तत्र पदे परत इत्युक्तेः ।

४-२-८८ **नडशादात्**= नडशादशब्दप्रकृतिकप्रथमाद्यन्ताभ्यां समर्थाभ्यां प्रातिपदिकाभ्याम्, ड्वलच्= ड्वलच् प्रत्ययो भवति, चतुर्ष्वर्थेषु ।

४-२-८९ **शिखायाः**= शिखाशब्दप्रकृतिकप्रथमाद्यन्तात् समर्थात् प्रातिपदिकात्, वलच्=वलच् प्रत्ययो भवति, चतुर्ष्वर्थेषु ।

४-२-९० **उत्करादिभ्यः**= उत्करादिशब्दप्रकृतिकप्रथमाद्यन्तेभ्यः समर्थेभ्यः प्रातिपदिकेभ्यः, छः = छप्रत्ययो भवति, चतुर्ष्वर्थेषु ।

४-२-९१ **नडादीनाम्**= नडादिशब्दप्रकृतिकप्रथमाद्यन्तेभ्यः समर्थेभ्यः प्रातिपदिकेभ्यः, छः, (४-२-९०) कुँक् च= (नडादीनां) कुँगागमश्च, चतुर्ष्वर्थेषु ।

प्र. ४-२-९२ शेषे= अपत्यादिभ्यश्चतुरर्थीपर्यन्तेभ्यो भिन्नेऽर्थे प्रत्यया भवन्ति ।

द्वि. ४-२-९२ शेषे- वक्ष्यमाणा घ (४-२-९३) प्रभृतयष्ट्युँ टयुँ (४-३-२४) लन्ताः प्रत्ययाः, शेषे= अपत्यादिभ्यश्चतुरर्थीपर्यन्तेभ्यो भिन्नेषु (जात ४-३-२५ प्रभृतिषु तस्य विकार ४-३-१३२ इत्यतः पूर्वेषु) अर्थेषु भवन्ति ।

४-२-९३ **राष्ट्रा... पारात्**= राष्ट्र अवार इत्ति प्रातिपदिकाभ्याम्, घ खौ= घ ख प्रत्ययौ भवतः, शेषे (द्वि. ४-२-९२) । ७-१-२ आय...इति घकारखकारयोः क्रमश इय्, ईन् । समर्थविभक्तयोऽर्थविशेषाश्च पश्चाद् वक्ष्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-९४ ग्रामाद् यखञौ ॥
ग्राम्यः । ग्रामीणः ।
४-२-९५ कत्त्र्यादिभ्यो ढकञ् ॥ ९६
कात्त्रेयकः । ग्रामेयकः ।
४-२-९६ कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु ॥
कौलेयकः श्वा । कौलो ऽन्यः । कौक्षेयको ऽसिः । कौक्षो ऽन्यः । ग्रैवेयको ऽलङ्कारः । ग्रैवो ऽन्यः ।
४-२-९७ नद्यादिभ्यो ढक् ॥
नादेयम् । वाराणसेयम् ।
४-२-९८ दक्षिणापश्चात्पुरसस्त्यक् ॥
दाक्षिणात्यः । पाश्चात्त्यः । पौरस्त्यः ।
४-२-९९ कापिश्याः ष्फक् ॥१००
कापिशायनं मधु । कापिशायनी द्राक्षा ।
४-२-१०० रङ्कोरमनुष्ये ऽण् च ।
राङ्कवो गौः । राङ्कवायणो गौः । अमनुष्य इत्युक्तेर्नेह- राङ्कवको मनुष्यः ।
४-२-१०१ द्युप्रागपागुदक्प्रतीचो यत् ॥
दिव्यम् । प्राच्यम् । अपाच्यम् । उदीच्यम् । प्रतीच्यम् । कथम् प्राक्तनम् । इति ?
अव्ययात् कालवाचिनः परत्वाट्ट्युट्युलौ ।
४-२-१०२ कन्थायाष्ठक् ॥१०३
कान्थिकः ।

४-२-९४ ग्रामात्= ग्रामप्रातिपदिकात्, यखञौ= य खञ् प्रत्ययौ भवतः, शेषे (द्वि.४-२-९२) ।
४-२-९५ कात्त्र्यादिभ्यः=कत्त्रिप्रभृतिप्रातिपदिकेभ्यः, ढकञ्= ढकञ् प्रत्ययो भवति, शेषे (द्वि.४-२-९२) । **कत्त्र्या**-कुत्सितास्त्रयः = कत्त्रयः । ६-३-१०१ को कत्... सूत्रस्थेन त्रौ च इति वार्तिकेन कुशब्दस्य कत् ।
४-२-९६ कुल... वाभ्यः= कुल कुक्षि ग्रीवा प्रातिपदिकेभ्यः, ढकञ् (४-२-९५) शेषे (द्वि.४-२-९२) श्वा.. रेषु= श्वा असि अलङ्कार इत्यर्थेषु वाच्येषु ।
४-२-९७ नद्यादिभ्यः= नद्यादिप्रातिपदिकेभ्यः, ढक्=ढक् प्रत्ययो भवति, शेषे (द्वि. ४-२-११८) **नादेयम्** ७-२-११८ किति च इत्यादिवृद्धिः ।
४-२-९८ दक्षिणा... पुरसः= दक्षिणा पश्चात् पुरस् इत्येतेभ्यः प्रातिपदिकेभ्यः, त्यक्= त्यक् प्रत्ययो भवति, शेषे (द्वि.४-२-९२) दक्षिणा इति ५-३-३६ दक्षिणादाच् इत्याजन्तं रूपम् ।
४-२-९९ कापिश्याः= कापिशीप्रातिपदिकात्, ष्फक्= ष्फक् प्रत्ययो भवति, शेषे (द्वि. ४-२-९२) । **कापिशायनी** ४-१-४१ षिद्गौरा... इति ङीष् ।
४-२-१०० रङ्कोः= रङ्कुप्रातिपदिकात्, अमनुष्ये= मनुष्ये अगम्यमाने, शेषे (द्वि. ४-२-९२) अण्= अण् प्रत्ययो भवति, ष्फक् (४-२-१००) च । रङ्कवो जनपदस्ततः ४-१-८३ प्राग्दीव्यतो ऽण् इत्यण् प्राप्तः, तस्य ४-२-१२५ अवृद्धादपि... इति वुँञ् बाधकः । तस्य ४-२-११९ ओर्देशे ठञ्, ततः ४-२-१३२ कोपधादण् ततः ४-२-१३३ कच्छादिभ्यश्च इत्यण् प्राप्तः । ततः ष्फगणौ विधीयेते । कोपधत्वादेव सिद्धे रङ्कुशब्दस्य कच्छादिषु पाठो मनुष्यतत्स्थयोर्वुँञ्विधानार्थ इति पदमञ्जरी । अत्र काशिका- ननु च रङ्कुशब्दः कच्छादिषु पठ्यते, तत्र च ४-२-१३४ मनुष्यतत्स्थयोर्वुँञ् इति मनुष्ये परत्वाद् वुँञैव भवितव्यम्, कच्छादिपाठादमनुष्ये ऽणपि सिद्धः, किमिह मनुष्यप्रतिषेधेनाणग्रहणेन च ? तदुच्यते नैवायं मनुष्यप्रतिषेधः, किं तर्हि ? नञिवयुक्तन्यायेन मनुष्यसदृशे प्राणिनि प्रतिपत्तिः क्रियते । तेन राङ्कवः कम्बल इति ष्फग् न भवति । विशेषविहितेन च ष्फका ऽणो बाधा मा भूदित्यण्ग्रहणमपि क्रियते, इति । राङ्कवको मनुष्य इति प्रत्युदाहरणे ४-२-१३४ मनुष्यतत्स्थयोर्वुँञ् इति वुँञ् ।
४-२-१०१ द्युप्रा...तीचः= दिव्, प्र+अच्, अप+अच्, उद्+अच्,प्रति+अच् इत्येतेभ्यः प्रातिपदिकेभ्यः, यत्= यत् प्रत्ययो भवति, शेषे (द्वि. ४-२-९२) । **प्राच्यम्** अत्र ६-४-१३८ अच इत्यकारलोपः, ६-३-१३८ चौ इति दीर्घः । **उदीच्यम्** अत्र ६-४-१३९ उद ईत् इति अच् इत्यस्याकारस्य ईत् ।
४-२-१०२ कन्थायाः= कन्थाप्रातिपदिकात्, ठक्= ठक् प्रत्ययो भवति, शेषे (द्वि.. ४-२-९२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-१०३ वर्णौ वुँक् ॥
यथा हि जातं हिमवत्सु कान्थकम् ।
४-२-१०४ अव्ययात् त्यप् ॥१०५
(अमेहक्वतसिँत्रेभ्य एव)
अमात्यः । इहत्यः । क्वत्यः । ततस्त्यः । तत्रत्यः ।
परिगणनान्नेह- उपरिष्टाद् भव औपरिष्टः ।
आराद् भव आरातीयः ।
(त्यब् नेर्ध्रुवे)
नित्यः ।
(निसो गते)
त्यप् । निर्गतो वर्णाश्रमेभ्यो निष्टचश्चाण्डालादिः ।
(आविसश्छन्दसि)
त्यप् । आविष्टचः ।
(अरण्याण्णः)
आरण्याः सुमनसः ।
(दुरादेत्यः)
दूरादागतो दूरेत्यः ।
(उत्तरादाहञ्)
औत्तराहः ।
४-२-१०५ ऐषमोह्यःश्वसो ऽन्यतरस्याम् ॥
ऐषमस्त्यम्, ऐषमस्तनम् । ह्यस्त्यम्, ह्यस्तनम् । श्वस्त्यम् । श्वस्तनम् । ४-३-१५ श्वस...इति ठञि शौवस्तिकमित्यपि ।
४-२-१०६ तीररूप्योत्तरपदादञ्ञौ ॥
काकतीरम् । काकतीरी । शैवरूप्यम् । शैवरूप्या ।
४-२-१०७ दिक्पूर्वपदादसंज्ञायां ञः ॥१०८
पौर्वशालः । असंज्ञायामित्युक्तेः संज्ञाभूतायाः प्रकृतेर्न भवति-पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः ।
४-२-१०८ मद्रेभ्योऽञ् ॥१०९
पौर्वमद्रः ।
४-२-१०९ उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् ॥
शैवपुरम् । उदीच्यग्रामादित्युक्तेर्नेह-माथुरम् ।

४-२-१०३ **वर्णौ**= वर्णुदेशविषये ऽर्थे वर्तमानात्, कन्थायाः (४-२-१०२ वुँक्= वुँक् प्रत्ययो भवति, शेषे (द्वि. ४-२-९२) । वर्णुर्नदस्तस्याऽदूरभवो देशो वर्णुः । ४-२-७७ सुवा...इत्यण् ४-२-८१ जन...इति लुप् ।

४-२-१०४ **अव्ययात्**= अव्ययसंज्ञकप्रातिपदिकात्, त्यप्= त्यप् प्रत्ययो भवति, शेषे (द्वि. ४-२-९२) । **औपरिष्टः**, अत्राण् । ६-४-१४४ नस्त...सूत्रे अव्ययानामिति वार्तिकेन टिलोप उक्तः । अनित्यो ऽयं टिलोप, इति चोक्तं ४-१-८५ दित्य...सूत्रस्थे बहिष...इति वार्तिके । तेन **आरातीय** इत्यत्र न टिलोपः । अत्र छप्रत्ययस्तु ४-२-११४ वृद्धा...इति सूत्रेण । **त्यब्** **ने**-ध्रुवे=नियते=नित्येऽर्थे, नेः=निशब्दात्, त्यप्=त्यप्प्रत्ययो भवति ।

निसो- निष्टच इत्यत्र ८-३-१०१ ह्रस्वात्...इति षत्वम् । **अर-आरण्याः** अणि तु ङीप् स्यात् ।

४-२-१०५ **ऐष**....श्वसः= ऐषमस् ह्यस् श्वस् इति प्रातिपदिकेभ्यः, अन्यतरस्याम्= वा, त्यप् (४-२-१०४) । पक्षे ट्युँट्युँलौ (४-३-२३) । **शौवस्तिकम्** इत्यत्र ७-३-४ द्वारा....इत्यैच् ।

४-२-१०६ **तीर**... पदात्= तीर रूप्य इत्युत्तरपदाभ्यां प्रातिपदिकाभ्याम्, अञ्ञौ= अञ् ञ इति प्रत्ययौ भवतः, शेषे (द्वि. ४-२-९२) । तीररूप्यान्तादिति तु नोक्तम् । तेन बहुच्पूर्वादणेव बाहुरूप्यम् । स्वरे विशेषः ।

४-२-१०७ **दिक्पू**- असंज्ञायाम् (विषयत्वं सप्तम्यर्थः)= असंज्ञाविषयात्, दिक्पूर्वपदात्= दिग्वाचिशब्दपूर्वपदकात् प्रातिपदिकात्, ञः= ञ प्रत्ययो भवति, शेषे (द्वि. ४-२-९२) ।

पौर्वशालः- अत्र पूर्वस्यां शालायां भव इति विग्रहे २-१-५१ तद्धि... इति समासस्ततो ञः ।

पूर्वैषुकामशमः-अत्र २-१-५० दिक्सं...इति समासस्तत औत्सर्गिकोऽण, ७-३-१४ प्राचां...इत्युत्तरपदादिवृद्धिः ।

४-२-१०८ **मद्रे**- दिक्पूर्वपदात् (४-२-१०७) मद्रेभ्यः= मद्रप्रातिपदिकात्, अञ्=अञ् प्रत्ययो भवति, शेषे (द्वि. ४-२-९२) ।

४-२-१०९ उदीच्यग्रामात्= उदीच्य- ग्रामवाचिनः, अन्तोदात्तात्, बहवचः= बह्वच्कात् प्रातिपदिकात्, अञ् (४-२-१०८) शेषे (द्वि. ४-२-९२) । शिवपुरशब्दः समासस्वरेणान्तोदात्तः । मथुरा= मध्यदेशग्रामः । प्रातिपदिकस्वरेणान्तोदात्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-११० प्रस्थोत्तरपदपलद्यादिकोपधादण् ॥११३

माद्रीप्रस्थः । पालदः । नैलीनकः ।

४-२-१११ कण्वादिभ्यो गोत्रे ॥११३

काण्व्यस्यच्छात्राः काण्वाः ।

४-२-११२ इञश्च ॥११३

दाक्षाः ॥

४-२-११३ न द्व्यचः प्राच्यभरतेषु ॥

प्राच्ये- प्रौष्ठीयाः । भरते- काशीयाः ।

४-२-११४ वृद्धाच्छः ॥ ११८

शालीयः । मालीयः ।

४-२-११५ भवतष्ठक्छसौ ॥

भावत्कः । भवदीयः । वृद्धादित्यनुवृत्तेः शत्रन्तभवच्छब्दादण् । भावतः ।

४-२-११६ काश्यादिभ्यष्ठञ्ञिठौ ॥११८

काशिकी । काशिका । आच्युतिकी । आच्युतिका ।

(आपदादिपूर्वपदात् कालान्तात्)

आपत्कालिकी । आपत्कालिका ।

और्ध्वकालिकी । और्ध्वकालिका ।

तात्कालिकी । तात्कालिका ।

४-२-११७ वाहीकग्रामेभ्यश्च ॥

शाकलिकी । शाकलिका ।

४-२-११८ विभाषोशीनरेषु ।

सौदर्शनिकी । सौदर्शनिका । सौदर्शनीया ।

४-२-११० प्रस्थो...पधात्=प्रस्थशब्दोत्तरपदकात् पलद्यादिभ्यः ककारोपधाच्च प्रातिपदिकेभ्यः, अण्=अण् प्रत्ययो भवति, शेषे (द्वि ४-२-९२) । उदीच्यग्रामलक्षणस्याञोऽपवादः ।

४-२-१११ कण्वा- गोत्रे= गोत्रार्थविहितप्रत्ययान्तेभ्यः, कण्वादिभ्यः=कण्वादिप्रातिपदिकेभ्यः, अण् (४-२-११०) शेषे (द्वि.४-२-९२) । अत्र पारिभाषिकस्य गोत्रस्य ग्रहणम्, नत्वपत्याधिकारादन्यत्र प्रसिद्धस्या ऽ पत्यमात्रस्य । एतेन प्रकृतसूत्रे गोत्रप्रत्ययो यञेव गृह्यत इत्युक्तं भवति । कण्वादीनां गर्गादित्वात् । **काण्वा** इत्यत्र ६-४-१५१ आपत्यस्य च..... इति यलोपः ।

४-२-११२ इञ- गोत्रे (४-२-११)+ इञः=गोत्रार्थे विहितो य इञ् तदन्तात्, अण् (४-२-११०) शेषे (द्वि. ४-२-९२) ।

४-२-११३ न द्व्यचः- प्राच्यभरतेषु+गोत्रे (४-२-१११) + इञः (४-२-११२)= प्राच्यगोत्रे भरतगोत्रे च विहितो य इञ् तदन्तात्, द्व्यचः= द्व्यच्कात् प्रातिपदिकात्, शेषे (द्वि४-२-९२) न=अण् न भवति । उदाहरणयोः ४-२-११४ वृद्धा... इतिच्छः । **काशीया** इत्यत्र ४-२-११६ काश्या... इति ठञ्ञिठौ तु न, चेदिशब्दसाहचर्याद् देशवाचिन एव काशिशब्दस्य ग्रहणेन गोत्रवाचिनस्तत्राऽग्रहणात् ।

४-२-११४ वृद्धात्= वृद्धसंज्ञकात् प्रातिपदिकात्, छः= छप्रत्ययो भवति, शेषे (द्वि. ४-२-९२) । शालामालाशब्दयोः १-१-७२ वृद्धि... इति वृद्धसंज्ञा ।

४-२-११५ भव- वृद्धात् (४-२-११४)= वृद्धसंज्ञकात्, भवतः= भवच्छब्दात्, ठक्छसौ= ठक् छस् प्रत्ययौ भवतः, शेषे (द्वि.४-२-९२) । **भावत्कः** ७-३-५१ इसु...इति कः । **भवदीयः** १-४-१६ सिति च इति पदसंज्ञा ।

४-२-११६ काश्या- वृद्धेभ्यः (४-२-११४)= अवृद्धेभ्यश्च (गणे पाठारम्भसामर्थ्यात्) काश्यादिभ्यः= काश्यादिप्रातिपदिकेभ्यः, ठञ् ञिठौ= ठञ् ञिठ इत्येतौ प्रत्यौ भवतः, शेषे (द्वि. ४-२-९२) ठञ्ञिठौ, इत्यत्रेकार उच्चारणार्थः ।

आप...लान्तात्= आपदादिपूर्वपदकात् कालशब्दान्तात् प्रातिपदिकात्, ठञ् ञिठौ (४-२-११६) शेषे (द्वि.४-२-९२) ।

४-२-११७ वाहीकग्रामेभ्यः= वाहीकग्रामवाचिभ्यः, वृद्धेभ्यः (४-२-११४) प्रातिपदिकेभ्यः, ठञ् ञिठौ (४-२-११६) शेषे (द्वि. ४-२-९२) ।

४-२-११८ विभाः- उशीनरेषु + वाहीकग्रामेभ्यः (४-२-११७) + वृद्धात् (४-२-११४) = उशीनरेषु ये वाहीकग्रामास्तद्वाचिभ्यो वृद्धेभ्यः, विभाषा = वा, ठञ्ञिठौ (४-२-११६) शेषे (द्वि ४-२-९२) । पक्षे छ (४-२-११४) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-११९ **ओर्देशे** ठञ् ॥१२०, १४५
नैषादकर्षुकः ।
४-२-१२० **वृद्धात्** प्राचाम् । १२६
आढकजम्बुकः । पूर्वेणैव सिद्धे प्राचां वृद्धादेवेति नियमार्थं सूत्रमिदम् । तेनेह न- मल्लवास्तु- माल्लवास्तवः ।
४-२-१२१ धन्वयोपधाद् **वुञ्** ॥१३०
ऐरावतं धन्व- ऐरावतकः । साङ्काश्यकः ।
४-२-१२२ प्रस्थपुरवहान्ताच्च ॥
मालाप्रस्थकः । नान्दीपुरकः । फाल्गुनीवहकः ।
४-२-१२३ रोपधेतोः प्राचाम् ॥
पाटलिपुत्रकः । माकन्दकः ।
४-२-१२४ **जनपदतदवध्योश्च** ॥१२५
आभिसारकः । आदर्शकः ।
औपुष्टकः । श्यामायनकः ।
४-२-१२५ **अवृद्धादपि** बहुवचनविषयात् ॥१२६
अवृद्धाज्जनपदात्- आङ्गकः ।
अवृद्धाज्जनपदावधेः- आजमीढकः ।
वृद्धाज्जनपदात् - दार्वकः । वृद्धाज्जनपदावधेः- कालञ्जरकः ।
बहुवचनादित्येव सिद्धे विषयग्रहणाद् एकशेषेण बहुत्वे न भवति ।
वर्तनी च वर्तनी च वर्तनी च वर्तन्यः ।
तत्र भवो वार्तनः ।
४-२-१२६ कच्छाग्निवक्त्रवर्तोत्तरपदात् ॥
दारुकच्छकः । पैप्पलीकच्छकः । काण्डाग्नकः । वैभुजाग्नकः । ऐन्द्रवक्त्रकः । सैन्धुवक्त्रकः । बाहुवर्तकः । चाक्रवर्तकः ।

४-२-११९ **ओर्दे**-(विषयत्वं सप्तम्यर्थः)=देशविषयात्=देशवाचिनः, ओः=उवर्णान्तात्, ठञ्= ठञ् प्रत्ययो भवति, शेषे (द्वि. ४-२-९२) । अत्र वृद्धादिति न सम्बध्यते । उत्तरसूत्रे पुनर्वृद्धग्रहणात् । अत्र ठञ्ग्रहणं ञिँठनिवृत्त्यर्थम् । **नैषादकर्षुकः** । निषादकर्षूर्देशः । ७-३-५१ इसु....इति ठस्य कः । ७-४-१३ केऽण इति ह्रस्वः ।
४-२-१२० **वृद्धा**- प्राचाम्+ देशे (४-२-११९)= प्राग्देशवाचिनः, ओः (४-२-११९), वृद्धात्= वृद्धसंज्ञकात् प्रातिपदिकात्, ठञ् (४-२-११९) शेषे (द्वि.४-२-९२) । प्राग्वत् कह्रस्वौ ।
४-२-१२१ **धन्व**- धन्व= मरुदेशः, । धन्वयोपधाद्= धन्वविशेषवाचिनो यकारोपधाच्च, देशे (४-२-११९) वृद्धात् (४-२-१२०), वुँञ्=वुँञ् प्रत्ययो भवति, शेषे (द्वि.४-२-९२) ।
४-२-१२२ **प्रस्थ**- वृद्धात् (४-२-१२०), देशे (४-२-११९) प्रस्थ...हान्तात्=प्रस्थ पुर वहशब्दान्तात् प्रातिपदिकात्–
(४-१-१) वुँञ् (४-२-१२१) शेषे (द्वि. ४-२-९२) । पुरान्तग्रहणमप्रागर्थम् । प्राग्देशे तूत्तरसूत्रेण सिद्धम् ।
४-२-१२३ **रोपधेतोः**=रेफोपधकादीकारान्ताच्च, वृद्धात् (४-२-१२०) प्राचाम् (४-२-१२०) देशे (४-२-११९)= प्राग्देशवाचिनः, वुँञ् (४-२-१२१) शेषे (द्वि४-२-९२) माकन्दीशब्दः प्राग्देशवाची ।
४-२-१२४ **जन**... वध्योः= जनपदवाचिनो जनपदरूपावधिवाचिनश्च, वृद्धात् (४-२-१२०) वुँञ् (४-२-१२१) शेषे (द्वि. ४-२-९२) । सूत्रे तदवधिपदे (जनपद) एवा ऽ वधिस्तदवधिरिति विशेषणसमासः । न तु तस्यावधिरिति षष्ठीसमासः । तेनेह न- मौञ्जी नाम वाहीकानामवधिर्ग्रामः । तत्र भवो मौञ्जीयः । तर्हि "जनपदात्" इत्येव सूत्रमस्तु किं तदवधिग्रहणेनेति चेत् अत्र काशिका- बाधकबाधनार्थम् ।

गर्तोत्तरपदाच्छं बाधित्वा वुँञेव जनपदावधेर्भवति । त्रैगर्तक इति । अत्र उत्तर ४-२-१२५ अवृद्धादपि...इति सूत्रेण वुँञ् । आभिसारादर्शशब्दौ जनपदवाचिनौ । औपुष्टश्यामायनशब्दौ जनपदावधिवाचिनौ ।
४-२-१२५ **अवृ**-जनपदतदवध्योः (४-२-१२४) वृद्धात् (४-२-१२०) अवृद्धादपि=अवृद्धाच्च, बहुवचनविषयात्=बहूनामर्थानां वाचकात् प्रातिपदिकात्, वुँञ् (४-२-१२१) शेषे (द्वि. ४-२-९२) । अङ्गादयः शब्दा एकशेषं विनैव बहुवचनान्ताः ।
४-२-१२६ **कच्छा**- देशे (४-२-११९) कच्छा...पदात्=कच्छ अग्नि वक्त्र वर्त इतिशब्दोत्तरपदकात्, वृद्धात्–
(४-२-१२०) अवृद्धादपि (४-२-१२५) प्रातिपदिकात् (४-१-१) वुँञ् (४-२-१२१) शेषे (द्वि. ४-२-९२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-१२७ धूमादिभ्यश्च ॥

धौमकः ।

४-२-१२८ नगरात् कुत्सनप्रावीण्ययोः ॥

नागरकश्चौरः शिल्पी वा । कुत्सनाद्युक्तेर्नेह- नागरा ब्राह्मणाः ।

४-२-१२९ अरण्यान्मनुष्ये ॥

आरण्यको मनुष्यः ।

(पथ्यध्यायन्यायविहारमनुष्यहस्तिष्वति वक्तव्यम्)

आरण्यकः पन्थाः, अध्यायः, न्यायः, विहारः, मनुष्यः, हस्ती वा ।

(वा गोमयेषु)

आरण्यका आरण्या वा गोमयाः ।

पथीत्याद्युक्तेर्नेह- आरण्याः पशवः ।

४-२-१३० विभाषा कुरुयुगन्धराभ्याम् ॥

कौरवकः । कौरवः ।यौगन्धरकः । यौगन्धरः ।

४-२-१३१ मद्रवृज्योः कन् ॥

मद्रकः । वृजिकः ।

४-२-१३२ कोपधादण् ॥ १३३

ऋषिकेषु जातादिः=आर्षिकः ।

४-२-१३३ कच्छादिभ्यश्च ॥ १३४

काच्छः । सैन्धवः ।

४-२-१३४ मनुष्यतत्स्थयोर्वुञ् ॥ १३५,१३६

काच्छको मनुष्यः । काच्छकं हसितम् । नेह- काच्छो गौः ।

४-२-१३५ अपदातौ साल्वात् । १३६

साल्वको मनुष्यः । साल्वकं हसितम् । पदातौ तु न-साल्वः पदातिर्गच्छति ।

४-२-१२७ धूमा- देशे (४-२-११९) धूमादिभ्यः=धूमादिप्रातिपदिकेभ्यः, वुँञ् (४-२-१२१) शेषे (द्वि. ४-२-९२) ।

४-२-१२८ नगरात्= नगरप्रातिपदिकात्,. वुँञ् (४-२-१२१) शेषे (द्वि. ४-२-९२) कुत्सनप्रावीण्ययोः= निन्दायां कौशल्ये च गम्ये ।

४-२-१२९ अरण्यात्=अरण्यप्रातिपदिकात्, वुँञ् (४-२-१२१) शेषे (द्वि. ४-२-९२) मनुष्ये=मनुष्ये गम्ये । **वा गो- आरण्या** इत्यत्र ४-२-१०४ अव्य... सूत्रस्थेन अरण्याण्ण इति णः ।

४-२-१३० विभा- देशे (४-२-११९) कुरुयुगन्धराभ्याम्= कुरुयुगन्धरप्रातिपदिकाभ्याम्, विभाषा= वा, वुँञ् (४-२-१२१) शेषे (द्वि. ४-२-९२) । ४-२-१२५ अवृद्धादपि...इति नित्ये प्राप्ते वचनम् ।

४-२-१३१ मद्र- देशे (४-२-११९), मद्रवृज्योः= मद्रवृजिप्रातिपदिकाभ्याम्, कन्= कन् प्रत्ययो भवति, शेषे (द्वि. ४-२-९२) । ४-२-१२५ अवृद्धादपि इति वुँञो ऽपवादः ।

४-२-१३२ कोप- देशे (४-२-११९), कोपधात्= ककारोपधकात्, प्रातिपदिकात् (४-१-१), अण्= अण्प्रत्ययो भवति, शेषे (द्वि. ४-२-९२) । जनपदवुँञो ऽ पवादः ।

४-२-१३३ कच्छा-देशे (४-२-११९) कच्छादिभ्यः=कच्छादिप्रातिपदिकेभ्यः, अण् (४-२-१३२) शेषे (द्वि. ४-२-९२) ।

४-२-१३४ मनु- देशे (४-२-११९) कच्छादिभ्यः (४-२-१३३) मनुष्यतत्स्थयोः= मनुष्ये मनुष्यस्थे च गम्ये, वुँञ्= वुँञ् प्रत्ययो भवति, शेषे (द्वि ४-२-९२) ।

४-२-१३५ अप- अपदातौ= पदातिभिन्नयोः, मनुष्यतत्स्थयोः (४-२-१३४) देशे (४-२-११९) साल्वात्= साल्वशब्दात्, वुँञ् (४-२-१३४) शेषे (द्वि. ४-२-९२) । साल्वशब्दः कच्छादिषु पठचते, अतो ४-२-१३४ मनुष्यतत्स्थयोवुँञ् इत्येव सिद्धे अपदातावेवेति नियमार्थमिदम् । प्रत्युदाहरणे साल्व इत्यत्र ४-२-१३३ कच्छा...इत्यण् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-१३६ गोयवाग्वोश्च ॥
साल्वको गौः । साल्विका यवागूः ।
४-२-१३७ गर्तोत्तरपदाच्छः ॥४-२-१
वृकगर्तीयम् ।
४-२-१३८ गहादिभ्यश्च ॥
गहीयः ।
(मुखपार्श्वतसोर्लोपश्च)
मुखतीयम् । पार्श्वतीयम् ।
(कुंग् जनस्य परस्य च)
जनकीयम् । परकीयम् ।
(देवस्य चेति वक्तव्यम्)
देवकीयम् ।
(वेणुकादिभ्यश्छण् वक्तव्यः)
वैणुकीयम् ।
(स्वस्य चेति वक्तव्यम्)
स्वकीयम् ।
४-२-१३९ प्राचां कटादेः ॥
कटनगरीयम् ।
४-२-१४० राज्ञः कँ च ॥
राजकीयम् ।
४-२-१४१ वृद्धादकेकान्तखोपधात् ॥१४२
आरीहणकीयम् । आश्वपथिकीयम् ।
आयोमुखीयम् ।
४-२-१४२ कन्थापलदनगर-ग्रामह्रदोत्तरपदात् ॥
दाक्षिकन्थीयम् । दाक्षिपलदीयम् ।
दाक्षिनगरीयम् । दाक्षिग्रामीयम् ।
दाक्षिह्रदीयम् ।

४-२-१३६ गोय- देशे (४-२-११९) (साल्वात् (४-२-१३५) वुञ् (४-२-१३४) गोयवाग्वोः=गवि यवाग्वां च, शेषे (द्वि. ४-२-९२) ।

४-२-१३७ गर्तो- देशे (४-२-११९) गर्तोत्तरपदात्= गर्तोत्तरपदकात्, छः= छप्रत्ययो भवति, शेषे (द्वि. ४-२-९२) । गर्तान्तादित्येव सिद्धे उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थम् । बाहुगर्तम् ।

४-२-१३८ गहा- देशे (४-२-११९) गहादिभ्यः=गहप्रभृतिगणपठितप्रातिपदिकेभ्यः, छः (४-२-१३७) शेषे (द्वि.४-२-९२) । अत्र काशिका- देशाधिकारे ऽपि सम्भवापेक्षं विशेषणम् । न सर्वेषाम्, इति । एतत्प्रतीकमादाय न्यासकार उपदिशति- सम्भवमपेक्षत इति सम्भवापेक्षम् । येषां देशे चादेशे च वृत्तिः सम्भवति गहादीनां तेषामेवेदं विशेषणमिति ।

४-२-१३९ प्राचां- प्राचाम्+ देशे(४-२-११९)= प्राग्देशवाचिनः, कटादेः= कटशब्दादिकात्, छः, (४-२-१३७) शेषे (द्वि.४-२-९.२) ।

४-२-१४० राज्ञः- राजन्शब्दस्य स्थाने, कँ=कँ (अनुबन्धलोपे क्) आदेशो भवति, छः (४-२-१३७) च, शेषे (द्वि. ४-२-९२) । कादेशार्थमिदम् । छप्रत्ययस्तु ४-२-११४ वृद्धा.. इति सिद्धम् ।

४-२-१४१ वृद्धा- देशे (४-२-११९)= देशवाचिनः, अकेकान्तखोपधात्= अक इक इत्यन्तात् खकारोपधकाच्च, वृद्धात्= वृद्धःसंज्ञकप्रातिपदिकात्, छ : (४-२-१३७) शेषे (द्वि. ४-२-९२) । ४-२-१३२ कोपधादण् ४-२-१२३ रोपधेतोः... ४-२-११७ वाहीक... इत्येतेषामपवादः ।

४-२-१४२ कन्था- देशे (४-२-११९) कन्था... पदात्= कन्था-पलद-नगर-ग्राम-ह्रद-शब्दोत्तरपदकात्, वृद्धात् (४-२-१४१) छः (४-२-१३७) शेषे (द्वि. ४-२-९२) । ४-२-११७ वाही... इत्यस्यापवादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-२-१४३ पर्वताच्च । १४४

पर्वतीयः ।

४-२-१४४ विभाषाऽमनुष्ये ॥

पर्वतीयानि पार्वतानि वा फलानि ।

मनुष्ये तु-पर्वतीयो मनुष्यः ।

४-२-१४५ कृकणपर्णाद् भारद्वाजे ॥

कृकणीयम् । पर्णीयम् ।

इति चतुर्थाध्याये
द्वितीयः पादः ।

४-२-१४३ पर्वतात्-पर्वतप्रातिपदिकात्, छः (४-२-१३७) शेषे (द्वि.४-२-९२) ।

४-२-१४४ विभा- पर्वतात् (४-२-१४३) विभाषा=वा, छः (४-२-१३७) अमनुष्ये= अमनुष्ये गम्ये । पक्षेऽण् । **पर्वतीयो** मनुष्यः । सूत्रे अमनुष्ये इत्युक्तेरत्र पूर्वेण नित्यं छः ।

४-२-१४५ कृक- भारद्वाजे+देशे (४-२-११९)= भारद्वाजदेशवाचिनः, कृकणपर्णात्= कृकणशब्दात् पर्णशब्दाच्च, छः (४-२-१३७) शेषे (द्वि. ४-२-९२) । भारद्वाजशब्दोऽत्र देशवाची न तु गोत्रवाची । स च प्रकृतिविशेषणं न तु प्रत्ययार्थः ।

इति चतुर्थाध्याये
द्वितीयः पादः ।

ॐ नमः श्रीजगदम्बायै ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ चतुर्थाध्याये
तृतीयः पादः

४-३-१ **युष्मदस्म'दोरन्यतरस्यां खञ् च** ॥३
युष्मदीयः । अस्मदीयः । खञि, अणि तु-
४-३-२ **त'स्मिन्नणि'** च युष्माकास्माकौ ॥ ३
यौष्माकीणः । यौष्माकः । आस्माकीनः । आस्माकः ।
४-३-३ तवकममकावेकवचने ॥
तावकीनः । तावकः । मामकीनः । मामकः । छे तु- त्वदीयः । मदीयः ।
४-३-४ **अर्धाद् यत्** ॥७, ६
अर्ध्यम् ।
(सपूर्वाट्ठञ् वक्तव्यः)
बालेयार्धिकम् ।
४-३-५ परावराधमोत्तमपूर्वाच्च ॥
परार्ध्यम् । अवरार्ध्यम् । अधमार्ध्यम् उत्तमार्ध्यम् ।

४-३-६ **दिक्पूर्वपदा'ट्ठञ्च** ॥७
पौर्वार्धिकम् । पूर्वार्ध्यम् । दाक्षिणार्धिकम् । दक्षिणार्ध्यम् ।
४-३-७ ग्रामजनपदैकदेशादञ्ठञौ ॥
इमे ऽस्माकं ग्रामस्य जनपदस्य वा पूर्वस्मिन्नर्धे भवाः पौर्वार्धाः । पौर्वार्धिकाः । दाक्षिणार्धाः । दाक्षिणार्धिकाः ।
४-३-८ **मध्या'न्मः** ॥९
मध्यमः ।
(आदेश्चेति वक्तव्यम् ।
आदिमः ।
(अवोऽधसो र्लोपश्च)
अवमम् । अधमम् ।
४-३-९ अ साम्प्रतिके ॥
मध्यं दारु । नातिदीर्घं नातिह्रस्वमित्यर्थः । मध्यो वैयाकरणः । नात्युत्कृष्टो नात्यवकृष्ट इत्यर्थः । मध्या स्त्री ।

४-३-१ युष्मदस्मदोः = युष्मदस्मद्भ्याम्, अन्यतरस्याम् = खञ् = खञ् प्रत्ययो भवति, छः (४-२-१३७) च, वा, शेषे (द्वि. ४-२-९२) । पक्षेऽण् । युष्मदस्मदोः १-१-७३ त्यदा... इति वृद्धत्वेन ४-२-११४ वृद्धा... इति च्छे प्राप्ते त्रयः प्रत्यया भवन्ति । युवयोर्युष्माकं वाऽयमिति विग्रहः । एवम् आवयोरस्माकं वाऽयमिति ।

४-३-२ तस्मि- तस्मिन्खञि, अणि च = अणि परे च,युष्मदस्मदोः (४-३-१)=युष्मदस्मदोः स्थाने, युष्माकास्माकौ= युष्माक अस्माक इत्येतावादेशौ भवतः । तस्मिन्निति तच्छब्देन पूर्वसूत्रे साक्षाद् विहितः खञ् परामृश्यते न तु चकारानुकृष्टश्छो ऽपि । अत्र स्थान्यादेशयोर्यथासंख्यं निमित्तनिमित्तिनोस्तु न व्याख्यानात् । विग्रहः प्राग्वत् ।

४-३-३ तव- एकवचने= एकस्योक्तौ, युष्मदस्मदोः (४-३-१) स्थाने, तवकममकौ=तवक ममक इत्येतावादेशौ भवतः, तस्मिन्नणि च (४-३-२) । तवाऽयमिति विग्रहः । एवं ममाऽयमिति । **त्वदीयः, मदीयः**, इत्यत्र ७-२-९८ प्रत्य... इति मपर्यन्तभागयोः त्व म इत्यादेशौ ।

४-३-४ अर्धात् = अर्धशब्दात्, यत्= यत् प्रत्ययो भवति, शेषे (द्वि ४-२-९२) ।

सपू- बालेयार्धिकम् बल्यर्थं वस्तु बालेयम् ५-१-१३ छदि...इति ढञ् । तस्यार्धम्= एकदेशः । तत्र भवम् ।

४-३-५ परा ... पूर्वात्= पर अवर अधम उत्तम इति पूर्वकात्, अर्धाद् यत् (४-३-४) शेषे (४-२-९२)

४-३-६ दिक्पूर्वपदात्= दिग्वाचिशब्दपूर्वपदकात्, अर्धाद् यत् (४-३-४) ठञ् च = ठञ् प्रत्ययो ऽपि भवति, शेषे (द्वि. ४-२-९२) ।

४-३-७ ग्रामजनपदैकदेशात्= ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च, दिक्पूर्वपदात् (४-३-६) अर्धात् (४-३-४) अञ्ठञौ = अञ् ठञ् इति प्रत्ययौ भवतः, शेषे (द्वि. ४-२-९२) । यतो ऽपवादः । ठञ्ग्रहणं स्पष्टार्थम् । "अञ्च" इत्युक्तौ यदपि संभाव्येत । उदाहरणेषु २-१-५१ तद्धि...इति समासस्ततः प्रत्ययौ ।

४-३-८ मध्यात् = मध्यशब्दात्, मः = म प्रत्ययो भवति, शेषे (द्वि ४-२-९२) । अणो ऽपवादः ।

४-३-९ अ सा - मध्यात् (४-३-८) अ = अप्रत्ययो भवति, सांप्रतिके= उचितेऽर्थे, शषे (द्वि ४-२-९२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-१० द्वीपादनुसमुद्रं यञ् ॥

द्वैप्यम् । अनुसमुद्रमित्युक्तेर्नेह- द्वैपम् । द्वैपकम् ।

४-३-११ कालाट्ठञ् ॥२४, १५

मासिकः । आर्धमासिकः ।

सांवत्सरिकः । अत्र काशिका-यथाकथञ्चिद् गुणवृत्त्याऽपि काले वर्तमानात् प्रत्यय इष्यते । कादम्बपुष्पिकम् । व्रैहिपलालिकम् । इति । अत्र दीक्षितः- कथं तर्हि शार्वरस्य तमसो निषिद्धये, इति कालिदासः, अनुदितौषसराग इति भारविः,समानकालीनं प्राक्कालीनं च । अपभ्रंशा एवैते इति प्रामाणिका इति ।

४-३-१२ श्राद्धे शरदः ॥१३

शारदिकं श्राद्धम् । शारदमन्यत् ।

४-३-१३ विभाषा रोगातपयोः ॥१५

शारदिकः शारदो वा रोग आतपो वा ।

रोगातपयोरित्युक्तेर्नेह-शारदं दधि ।

४-३-१४ निशाप्रदोषाभ्यां च ॥

नैशिकम् । नैशम् । प्रादोषिकम् । प्रादोषम् ।

४-३-१५ श्वसस्तुँट् च ॥

शौवस्तिकः ।

४-३-१६ सन्धिवेलाद्यृतुनक्षत्रेभ्यो ऽण् ॥

सान्धिवेलम् । ग्रैष्मम् । पौषम् ।

(संवत्सरात् फलपर्वणोः)

सांवत्सरं फलं पर्व वा ।

४-३-१७ प्रावृष एण्यः ॥

प्रावृषेण्यः ।

४-३-१८ वर्षाभ्यष्ठक् ॥१९

वार्षिकः ।

४-३-१९ छन्दसि ठञ् ॥२१

वार्षिकः ।

४-३-१० द्वीपा- अनुसमुद्रम्= समुद्रसमीपवाचिनः, द्वीपात्= द्वीपशब्दात्, यञ् = यञ् प्रत्ययो भवति, शेषे (द्वि ४-२-९२) । प्रत्युदाहरणयोः ४-२-१३३ कच्छा... ४-२-१३४ मनु... इति अण् वुञौ ।

४-३-११ कालात् = कालवाचिनः, ठञ् = ठञ् प्रत्ययो भवति, शेषे (द्वि ४-२-९२) । अणो ऽपवादः । वृद्धाच्छं (४-२-११४) च परत्वाद् बाधते । कदम्बपुष्पसाहचर्यात् कालो ऽपि **कदम्बपुष्पः** । व्रीहिपलालसाहचर्यात् कालो ऽपि **व्रीहिपलालः** ।

४-३-१२ श्राद्धे-शरदः=शरच्छब्दात्, श्राद्धे=श्राद्धे गम्ये, ठञ् (४-३-११) शेषे (द्वि ४-२-९२) । ४-३-१६ सन्धि... इति ऋत्वणो ऽपवादः ।

४-३-१३ विभा-शरदः (४-३-१२) विभाषा=वा, ठञ् (४-३-११) रोगातपयोः=रोगे आतपे च गम्ये । ठञोऽभावे प्रत्युदाहरणे च ४-३-१६ सन्धि... इत्यण् ।

४-३-१४ निशा नि...भ्याम्= निशाप्रदोषशब्दाभ्याम्, विभाषा (४-३-१३) ठञ् (४-३-११) शेषे (द्वि ४-२-९२) । ४-३-११ काला... इति नित्ये प्राप्ते विकल्पार्थमिदम् ।

४-३-१५ श्वसः = श्वस् इतिशब्दात्, विभाषा (४-३-१३) ठञ् (४-३-११) तुँट् च= ठञस्तुँडागमश्च, शेषे (द्वि.४-२-९२) । **शौवस्तिकः** ठञ इकादेशे सति तुँडागमो भवति । ७-३-४ द्वारा... इत्यैच् ।

४-३-१६ सन्धि ...त्रेभ्यः = सन्धिवेलादि- ऋतुवाचि- नक्षत्रवाचिप्रातिपदिकेभ्यः, अण्= अण् प्रत्ययो भवति, शेषे (द्वि ४-२-९२) । ठञो (४-३-११) ऽपवादः । नेति वक्तव्ये अण्ग्रहणं वृद्धाच्छ (४-२-११४) स्य बाधनार्थम् । **पौषमित्यत्र** ६-४-१४९ सूर्य... सूत्रस्थ- तिष्य... इति वार्तिकेन यलोपः ।

४-३-१७ प्रावृषः = प्रावृष्शब्दात्, एण्यः = एण्यप्रत्ययो भवति, शेषे (द्वि ४-२-९२) । ४-३-१६ सन्धि... इति ऋत्वणो ऽपवादः ।

४-३-१८ वर्षाभ्यः= वर्षाप्रातिपदिकात्, ठक्= ठक् प्रत्ययो भवति, शेषे (द्वि ४-२-९२) । प्राग्वद् ऋत्वणो ऽपवादः ।

४-३-१९ छन्द= वर्षाभ्यः (४-३-१८) छन्दसि=वेदे, ठञ्=ठञ् प्रत्ययो भवति, शेषे (द्वि ४-२-९२) । स्वरे विशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-२० वसन्ताच्च ॥
वासन्तिकम् ।
४-३-२१ हेमन्ताच्च ॥२२
हैमन्तिकम् ।
४-३-२२ सर्वत्राऽण् च तलोपश्च ॥
हैमनम् । हैमन्तम् ।
४-३-२३ सायंचिरंप्राह्णेप्रगेऽव्यये भ्यष्टयुँटयुँलौ तुँट् च ॥२४
सायन्तनम् । चिरन्तनम् । प्राह्णेतनम् । प्रगेतनम् । दोषातनम् ।
(चिरपरुत्परारिभ्यस्त्नो वक्तव्यः)
चिरत्नम् । परुत्नम् । परारित्नम् ।
(प्रगस्यच्छन्दसि गलोपश्च)
प्रत्नम् ।
(अग्रपश्चाड्डिमच्)
अग्रिमम् । पश्चिमम् । अग्रादिपश्चादिति पठित्वा आदिमम्, इत्यपि केचिदुदाहरन्ति ।
मध्यान्मः ४-३-८ इत्यत्र आदेश्चेति वक्तव्यमिति वार्तिकं न पठनीयमिति तेषामाशयः ।
(अन्ताच्चेति वक्तव्यम्)
अन्तिमम् ।
४-३-२४ विभाषा पूर्वाह्णापराह्णाभ्याम् ॥
पूर्वाह्णेतनम् । पौर्वाह्णिकम् । अपराह्णेतनम् । आपराह्णिकम् । पूर्वाह्णः सोढो ऽस्येत्यादिविग्रहे तु पूर्वाह्णतनम् । इत्यादि ।
अणादयो (४-१-८३) घादय (४-२-९३) श्च प्रत्यया उक्ताः । इतः परं तेषामर्थाः समर्थविभक्तयश्च निर्दिश्यन्ते ।
४-३-२५ तत्र जातः ॥५१, ३७
सुघ्नेषु जातः स्रौघ्नः । उत्से जात औत्सः । राष्ट्रे जातो राष्ट्रियः । अवारपारे जातः= अवारपारीणः । ग्रामे जातो ग्राम्यः । ग्रामीणः । इत्यादि ।
४-३-२६ प्रावृषष्ठप् ॥
प्रावृषिकः
४-३-२७ संज्ञायां शरदो वुँञ् ॥२८
शारदकाः । दर्भविशेषस्य मुद्गविशेषस्य संज्ञेयम् । संज्ञायामित्युक्तेरिहाणेव- शारदं सस्यम् ।

४-३-२० वसन्तात्= वसन्तप्रातिपदिकात् , छन्दसि ठञ् (४-३-१९) शेषे (द्वि ४-२-९२) ।
४-३-२१ हेमन्तात्= हेमन्तप्रातिपदिकात् , छन्दसि ठञ् (४-३-१९) शेषे (द्वि ४-२-९२) ।
४-३-२२ सर्व= हेमन्तात् (४-३-२१) सर्वत्र=लोके वेदे च, अण्=अण् प्रत्ययो भवति, तलोपश्च= अण् प्रत्यय सन्नियोगेन तकारलोपश्च भवति, अण् (४-३-१६) च, शेषे (द्वि ४-२-९२) । प्रकृतसूत्रेणाण्प्रत्यये तलोपः । ऋत्वण्परामर्शे तु तलोपो नेत्यवधेयम् ।
४-३-२३ सायं...येभ्यः= साय चिर प्राह्ण प्रग प्रातिपदिकेभ्यो ऽव्ययाच्च+कालात् (४-३-११), ट्युँट्युँलौ= ट्युँ ट्युँल् प्रत्ययौ भवतः, तुँट् च = तयोस्तुँडागमश्च, शेषे (द्वि. ४-२-९२) । सायचिरशब्दयोर्मकारान्तत्वं प्राह्णप्रगयोरेदन्तत्वं च निपात्यते । तुँडागमः प्रत्यययोरनादेशानन्तरं भवति, अनद्यतन इत्यादिनिर्देशात् । एदन्तत्वनिपातम् ४-३-५२ तदस्य...इत्यादिना प्रत्ययविधाने ऽप्येकारश्रवणार्थम् । ४-३-२५ तत्र जात इत्यादिना प्रत्ययविधाने तु ६-३-१७ घकाल... इत्यनेनैव सिद्धम् । कालाट्ठञो (४-३-११) ऽपवादः ।
४-३-२४ विभा -पूर्वा...भ्याम्= पूर्वाह्ण अपराह्ण इतिशब्दाभ्याम्, विभाषा= वा, ट्युँट्युँलौ तुँट् च (४-३-२३) शेषे (द्वि ४-२-९२) । पक्षे ४-३-११ काला...इति ठञ् । **पूर्वाह्णेतनमित्यादौ** ६-३-१७ घका...इति सप्तम्या अलुक् ।
४-३-२५ तत्र= सप्तम्यन्तात्, जातः=जात इत्यर्थे, प्रत्यया (अणादयो घादयश्च) भवन्ति । उदाहरणेषु क्रमशः अण्, अञ्, घ, ख प्रत्ययाः । ग्रामशब्दात्तु यखञौ ।
४-३-२६ प्रावृषः= प्रावृष्शब्दप्रकृतिकात्, तत्र+जातः (४-३-२५) ठप्=ठप्प्रत्ययो भवति । पकारः स्वरार्थः । ४-३-१७ प्रावृ...इत्यस्यापवादः ।
४-३-२७ संज्ञा-शरदः=शरच्छब्दप्रकृतिकात्, तत्र+जातः (४-३-२५) वुँञ्=वुँञ् प्रत्ययो भवति, संज्ञायाम्=संज्ञायां गम्यमानायाम् । ४-३-१६ सन्धिवेला...इति ऋत्वणोऽपवादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-२८ पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुँन् ॥१३०

पूर्वाह्णकः । अपराह्णकः । आर्द्रकः । मूलकः । प्रदोषकः । अवस्करकः ।

४-३-२९ पथः पन्थ च ॥

पन्थकः ।

४-३-३० अमावास्याया वा ॥ ३१

अमावास्यकः । आमावास्यः ।

एकदेशविकृतस्यानन्यत्वादमावस्याशब्दादपि भवति-अमावस्यकः । आमावस्यः ।

४-३-३१ अ च ॥

अमावास्यः । अमावस्यः ।

४-३-३२ सिन्ध्वपकराभ्यां कन् ॥३३

सिन्धुकः । अपकरकः ।

४-३-३३ अणञौ च ॥

सैन्धवः । आपकरः ।

४-३-३४ श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् ॥ ३७

श्रविष्ठासु जातः श्रविष्ठः । फल्गुन इत्यादि ।

(लुक्प्रकरणे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्)

चित्रायां जाता= चित्रा । रेवती । रोहिणी ।

(फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ)

फल्गुनी । अषाढा ।

(श्रविष्ठाषाढाभ्यां छणपि वक्तव्यः)

श्राविष्ठीयः । आषाढीयः ।

४-३-३५ स्थानान्तगोशालखरशालाच्च ॥

गोस्थानः । अश्वस्थानः । गोशालः । खरशालः ।

४-३-२८ पूर्वाह्णं...करात्= पूर्वाह्ण अपराह्ण आर्द्रा मूल प्रदोष अवस्कर इति प्रकृतिकात्, तत्र+जातः (४-३-२५) वुँन=वुँन् प्रत्ययो भवति । उदाहरणेष्वाद्ययोः ४-३-२४ विभाषा... ततो द्वयोः ४-३-१६ सन्धि...पञ्चमे ४-३-१४ निशा...अन्त्ये ४-१-८३ प्राग् दी...इत्येतेषामपवादः ।

४-३-२९ पथः= पथिन्प्रकृतिकात्, तत्र+जातः (४-३-२५) वुँन् (४-३-२८) पन्थ च=प्रकृतेः पन्थ इत्यादेशश्च । पथि जात इति विग्रहः ।

४-३-३० अमावास्यायाः= अमावास्याशब्दप्रकृतिकात् , तत्र+जातः (४-३-२५) वा= विभाषया, वुँन् (४-३-२८) । पक्षे सन्धिवेला (४-३-१६) दिषु पाठादण् ।

४-३-३१ अ च = अप्रत्ययोऽपि भवति पूर्वसूत्रविषये ।

४-३-३२ सिन्ध्वपकराभ्याम्= सिन्धु अपकर इति प्रकृतिकात्, तत्र+जातः (४-३-२५) कन्=कन्प्रत्ययो भवति । आद्ये ४-२-१३३ कच्छा...इत्यणो ४-२-१३४ मनु..इति वुँञोऽप्यपवादः । द्वितीये ४-१-८३ प्राग्दी... इत्यणोऽपवादः ।

४-३-३३ अण- सिन्ध्वपकराभ्याम् (४-३-३२) तत्र जातः (४-३-२५) । अणञौ= अण् अञ् इति प्रत्ययौ भवतः । योगविभागो यथासंख्यार्थः ।

४-३-३४ श्रवि- श्रवि... हुलात्-श्रविष्ठादिभ्यो जातार्थे विहितस्य प्रत्ययस्य लुक्= लुग्भवति । जातार्थे विहितस्येति प्रकरणगम्यो ऽयमर्थः । बहुलाशब्दः कृत्तिकापर्यायो गृह्यते श्रविष्ठादिसाहचर्यात् । समाहारद्वन्द्वेन क्लीबनिर्देशः । उदाहरणेषु प्रकृतसूत्रेण प्रत्ययस्य लुकि १-२-४९ लुक् तः.. इति स्त्रीप्रत्ययस्य लुक् । लुक्प्र -परस्य जातार्थप्रत्ययस्य । **रेवती रोहिणीत्यत्र** प्रत्ययस्य लुकि स्त्रीप्रत्ययस्य च प्रागवल्लुकि ४-१-४१ गौरा... इति ङीष् ।

फलु... भ्याम्= फल्गुनी अषाढा इति प्रकृतिकात्, तत्र+जातः (४-३-२५) टानौ =ट अन् इति प्रत्ययौ भवतः, स्त्रियाम् । टित्त्वं ङीबर्थम् । नित्त्वं स्वरार्थम् । विधानसामर्थ्यान्न लुक् ।

श्रवि... भ्याम्= श्रविष्ठा अषाढा इति प्रकृतिकात्, तत्र+जातः (४-३-२५) छणपि वक्तव्यः= छण् प्रत्ययोऽपि भवतीति वक्तव्यम् । स्त्रियामिति न सम्बध्यते ।

४-३-३५ स्थाना- स्था... लात्= स्थानशब्दान्तशब्दाद् गोशालखरशालशब्दाभ्यां च जातार्थे विहितस्य प्रत्ययस्य, लुक् (४-३-३४) = लुग्भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-३६ वत्सशालाभिजिदश्वयुक्छतभिषजो वा ॥

वत्सशालः । वात्सशालः । अभिजित् । आभिजितः । अश्वयुक् । आश्वयुजः । शतभिषक् । शातभिषजः ।

४-३-३७ नक्षत्रेभ्यो बहुलम् ॥

रोहिणः । रौहिणः ।

४-३-३८ कृत-लब्ध-क्रीत-कुशलाः ॥

स्रुघ्ने कृतो लब्ध : क्रीत : कुशलो वा स्रौघ्नः । राष्ट्रिय इत्यादि ।

४-३-३९ प्रायभवः ॥४०

सुघ्ने प्रायभवः स्रौघ्नः । राष्ट्रियः । इत्यादि ।

४-३-४० उपजानूपकर्णोपनीवेष्ठक् ॥

औपजानुकः । औपकर्णिकः । औपनीविकः ।

४-३-४१ सम्भूते ॥४२

सुघ्ने सम्भवति स्रौघ्नः । राष्ट्रियः । इत्यादि ।

४-३-४२ कोशाड्ढञ् ॥

कोशे सम्भूतं कौशेयं वस्त्रम् ।

४-३-४३ कालात् साधु-पुष्प्यत्पच्यमानेषु ॥५२

हेमन्ते साधुः = हैमनः प्राकारः । शैशिरमनुलेपनम् । वसन्ते पुष्प्यन्ति वासन्त्यः कुन्दलताः । ग्रैष्म्यः पाटलाः । शरदि पच्यन्ते शारदाः शालयः । ग्रैष्मा यवाः ।

४-३-४४ उप्ते च ॥४६

हेमन्ते उप्यन्ते हैमन्ता यवाः । ग्रैष्मा व्रीहयः ।

४-३-४५ आश्वयुज्या वुँञ् ॥

आश्वयुज्यामुप्ता आश्वयुजका माषाः ।

४-३-४६ ग्रीष्मवसन्तादन्यतरस्याम् ॥

ग्रैष्मकं सस्यम् । ग्रैष्मम् । वासन्तकम् । वासन्तम् ।

४-३-३६ वत्स...षजः= वत्सशालादिभ्यो जातार्थे विहितस्य प्रत्ययस्य, वा= विकल्पेन, लुक् (४-३-३४) ।

४-३-३७ नक्षत्रेभ्यः = नक्षत्रवाचिशब्देभ्यो जातार्थे विहितस्य प्रत्ययस्य, बहुलम् = बाहुल्येन, लुक् (४-३-३४) ।

४-३-३८ कृत- तत्र (४-३-२५) कृत... कुशलाः= कृतादिष्वर्थेषु अणादयो घादयश्च प्रत्यया भवन्ति ।

४-३-३९ प्राय- तत्र (४-३-२५) प्रायभवः= प्रायभव इत्यर्थे, अणादयो घादयश्च प्रत्यया भवन्ति ।

४-३-४० उप- उपजान्वादयो ऽव्ययीभावाः । समाहारद्वन्द्वस्य पुलिङ्गनिर्देशः सौत्रः । उप... नीवेः= उपजानुप्रभृतिप्रकृतिकात्, तत्र (४-३-२५) प्रायभवः (४-३-३९) ठक् = ठक्प्रत्ययो भवति । उदाहरणेषु ७-२-११८ किति... इत्यादिवृद्धि । **औपजानुक** इत्यत्र ७-३-५१ इसु... ठस्य कः । शेषे ७-३-५० ठस्ये... इति ठस्येकः ।

४-३-४१ सम्भू- तत्र (४-३-२५) सम्भूते= सम्भूतेऽर्थे अणादयो घादयश्च प्रत्यया भवन्ति ।

४-३-४२ कोशात् = कोशशब्दप्रकृतिकात्, तत्र (४-३-२५) सम्भूते (४-३-४१) ढञ् = ढञ्प्रत्ययो भवति । **कौशेयं वस्त्रमिति** । रूढिरेषा, तेन कृमौ न ।

४-३-४३ कालात् = कालवाचिनः, तत्र (४-३-२५) साधु... नेषु= साधु पुष्प्यत् पच्यमानम् इत्येतेष्वर्थेषु प्रत्यया भवन्ति । **हैमन** इत्यत्र ४-३-२२ सर्व... इति, **शैशिरमित्यादौ** ४-३-१६ सन्धि... इति सूत्रे द्रष्टव्ये । स्त्रियां ४-१-१५ टिड्ढा... इति ङीप् ।

४-३-४४ उप्ते- कालात् (४-३-४३) तत्र (४-३-२५) उप्ते= उप्तेऽर्थे प्रत्यया भवन्ति ।

४-३-४५ आश्वयुज्याः = आश्वयुजीशब्दप्रकृतिकात्, तत्र (४-३-२५) उप्ते (४-३-४४) वुँञ् = वुँञ् प्रत्ययो भवति । ४-३-११ काला... इति ठञो ऽपवादः । अश्वयुक्= अश्विनी । तद्युक्ता पौर्णमासी आश्वयुजी ।

४-३-४६ ग्रीष्म...सन्तात्= ग्रीष्मवसन्तशब्दप्रकृतिकात्, तत्र (४-३-२५) उप्ते (४-३-४४) अन्यतरस्याम्= वा, वुँञ् (४-३-४५) । ४-३-१६ सन्धि... इति ऋत्वणो ऽपवादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-४७ देयमृणे ॥५०
मासे देयमृणं मासिकम्। सांवत्सरिकम्।
ऋणे -
इत्युक्तेर्नेह- मासे देया भिक्षा।

४-३-४८ कलाप्यश्वत्थयवबुसाद् वुँन् ॥
कलापिनि (काले) देयमृणं कलापकम्।
अश्वत्थकम्। यवबुसकम्।

४-३-४९ ग्रीष्मावरसमाद् वुँञ् ॥५०
ग्रैष्मकम्। आवरसमकम्।

४-३-५० संवत्सराग्रहायणीभ्यां ठञ् च ॥
सांवत्सरकम्। सांवत्सरिकम्।
आग्रहायणकम्। आग्रहायणिकम्।

४-३-५१ व्याहरति मृगः ॥
निशायां व्याहरति नैशो नैशिको वा मृगः।
प्रादोषः प्रादोषिको वा मृगः। मृग इत्युक्तेर्नेह-
निशायां व्याहरत्युलूकः।

४-३-५२ तदस्य सोढम् ॥
निशा सहचरितमध्ययनं निशा।
तत्सोढमस्य नैशो नैशिको वा।
प्रादोषः। प्रादोषिको वा।

४-३-५३ तत्र भवः ॥ ७३
सुघ्ने भवः स्रौघ्नः। राष्ट्रियः।

४-३-५४ दिगादिभ्यो यत् ॥५५
दिश्यम्। वर्ग्यम्।

४-३-५५ शरीरावयवाच्च ॥
दन्त्यम्। कण्ठ्यम्। ओष्ठ्यम्।

४-३-५६ दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् ॥५७
दृतौ भवं दार्तेयम्। कौक्षेयम्। कालशेयम्।
वास्तेयम्। आस्तेयम्। आहेयम्।

४-३-४७ देय- कालात् (४-३-४३) तत्र (४-३-२५) देयम्= देयमित्यर्थे प्रत्यया भवन्ति, ऋणे= यद् देयं तद् ऋणं चेत्। उदाहरणयोः ४-३-११ काला... इति ठञ्।

४-३-४८ कला- कालात् (४-३-४३) कला... सात्= कलापि (न्) प्रभृतिप्रकृतिकात् तत्र (४-३-२५) देयमृणे (४-३-४७) वुँन्= वुँन् प्रत्ययो भवति। यस्मिन् काले मयूराः कलापिनो भवन्ति स कालो ऽपि साहचर्यात् कलापी। एवं यस्मिन् काले ऽश्वत्थाः फलन्ति स कालो ऽप्यश्वत्थः। यस्मिन् काले यवबुसं सम्पद्यते स कालो ऽपि यवबुसशब्देनोच्यते।

४-३-४९ ग्रीष्मा... समात्= ग्रीष्म अवरसमा इतिप्रकृतिकात्, तत्र (४-३-२५) देयमृणे (४-३-४७) वुँञ्= वुँञ् प्रत्ययो भवति। अवरा चासौ समेति विशेषणसमासः। समा=वत्सरः। सूत्रे समाहारद्वन्द्वे क्लीबनिर्देशः।

४-३-५० संव- ... णीभ्याम्= संवत्सर आग्रहायणी इति शब्दप्रकृतिकात्, तत्र (४-३-२५) देयमृणे (४-३-४७) ठञ् = ठञ्प्रत्ययो भवति, वुँञ् (४-३-४९) च। वेति पाठेन वुँञि विकल्पिते पक्षे ४-३-११ काला... इति ठञि सिद्धे ठञ् ग्रहणं फले ऋणत्वेन विवक्षिते ऽपि ४-३-१६ सन्धि... सूत्रस्थ- संव... इत्यणो बाधनार्थम्।

४-३-५१ व्याह- कालात् (४-३-४३) तत्र (४-३-२५) व्याहरति= शब्दायते इत्यर्थे प्रत्यया भवन्ति (यो व्याहरति सः) मृगः = मृगश्चेत्। उदाहरणेषु ४-३-१४ निशा... इति ठञ्, तदभावे ४-३-१६ सन्धि... इत्यण्।

४-३-५२ तद- सोढम् = जितमित्युपाधिकात्, कालात् (४-३-४३) तत्= प्रथमान्तात्, अस्य= अस्येत्यर्थे प्रत्यया भवन्ति। कालो न जीयते, अतो ऽत्र गौणी वृत्तिराश्रयणीया। उदाहरणेषु प्रत्ययौ प्राग्वत्।

४-३-५३ तत्र = सप्तम्यन्तात्, भवः= भव इत्यर्थे, प्रत्यया भवन्ति।

४-३-५४ दिगादिभ्यः = दिगा (श्आ) दिप्रकृतिकात्, तत्र भवः (४-३-५३) यत् = यत्प्रत्ययो भवति।

४-३-५५ शरीरावयवात्= शरीरावयववाचिशब्दप्रकृतिकात्, तत्र भवः (४-३-५३) यत् (४-३-५४)।

४-३-५६ दृति.... हेः= दृति कुक्षि कलशि वस्ति अस्ति अहि इति प्रातिपदिकप्रकृतिकात्, तत्र +भवः (४-३-५३) ढञ्= ढञ् प्रत्ययो भवति। ७-१-२ आय... इति ढकारस्य एय्। अस्तीति विभक्तिप्रतिरूपकमव्ययम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-५७ ग्रीवाभ्योऽण् च ॥

ग्रैवम् । ग्रैवेयम् ।

४-३-५८ गम्भीराञ्ञ्यः ॥५९

गाम्भीर्यम् ।

(पञ्चजनादुपसंख्यानम्)

पाञ्चजन्यम् ।

(चतुर्मासाद् यज्ञे)

चातुर्मास्यानि व्रतानि । चातुर्मास्यो यज्ञः ।

४-३-५९ अव्ययीभावाच्च ॥६१

(परिमुखादिभ्य एवेष्यते)

पारिमुख्यम् । नेह-औपकूलम् ।

४-३-६० अन्तः पूर्वपदाट्ठञ् ॥६१

आन्तर्वेश्मिकम् ।

(समानाच्च)

सामानिकम्

(तदादेश्च)

सामानग्रामिकम् । सामानदेशिकम् ।

(अध्यात्मादिभ्यश्च)

आध्यात्मिकम् । आधिदैविकम् ।

आधिभौतिकम् ।

(ऊर्ध्वन्दमादूर्ध्वदेहाल्लोकोत्तरपदाच्च)

और्ध्वन्दमिकः । और्ध्वदैहिकम् ।

ऐहलौकिकम् । पारलौकिकम् ।

(मध्याच्छः)

मध्यीयः ।

(मण्मीयौ च प्रत्ययौ)

माध्यमम् । मध्यमीयम् ।

(मध्यो मध्यं दिनण् चाऽस्मात्)

मध्ये भवं माध्यन्दिनम् ।

(स्थाम्नो लुग् वक्तव्यः)

अश्वत्थामा ।

(अजिनान्ताच्च)

वृकाजिनः । सिंहाजिनः ।

४-३-६१ ग्रामात् पर्यनुपूर्वात् ॥

पारिग्रामिकः । आनुग्रामिकः ।

४-३-६२ जिह्वामूलाङ्गुलेश्छः ॥

जिह्वामूलीयम् । अङ्गुलीयम् ।

४-३-६३ वर्गान्ताच्च ॥६४॥

कवर्गीयम् ।

४-३-५७ ग्रीवाभ्यः= ग्रीवाशब्दप्रकृतिकात्, तत्र +भवः (४-३-५३) अण्= अण्प्रत्ययो भवति ढञ्, (४-३-५६) च । ४-३-५५ शरी... इति यतो ऽपवादः ।

४-३-५८ गम्भीरात्=गम्भीरशब्दप्रकृतिकात्, तत्र भवः (४-३-२५) ञ्यः=ञ्यप्रत्ययो भवति ।

४-३-५९ अव्ययीभावात्=अव्ययीभावसमासप्रकृतिकात्, तत्र+भवः (४-३-५३) ञ्यः (४-३-५८) ।

४-३-६० अन्तः पूर्वपदात्=अन्तःशब्दपूर्वपदकात्, अव्ययीभावात् (४-३-५९) तत्र भवः (४-३-५३)ठञ्= ठञ् प्रत्ययो भवति । वेश्मनीति= अन्तर्वेश्मम्, अन्तर्वेश्म वा ।

समा- तत्र भवः (४-३-५३) ठञ् (४-३-६०) ।

तदादेः- तच्छब्देन समानशब्दो गृह्यते= समानशब्दादेरित्यर्थः । समानशब्दादिकप्रकृतिकात्, तत्र+भवः (४-३-५३) ठञ् (४-३-६०) ।

अध्या-तत्र भवः (४-३-५३ ठञ् (४-३-६०) । अन्त्योदाहरणयोः । ७-३-२० अनु..... इत्युभयपदादिवृद्धिः ।

ऊर्ध्व-तत्र भवः (४-३-५३ ठञ् (४-३-६०) । अन्त्योदाहरणेषु ७-३-२० अनु... इत्युभयपदादिवृद्धिः ।

मध्यो-मध्यशब्दो मध्यं भावमापद्यते, अस्माद् दिनण् च प्रत्ययो भवार्थे ।

स्थाम्नो-लुक् भवार्थप्रत्ययस्य लुक् । ४-१-८५ स्थाम्नो... इत्यकारप्रत्ययस्य लुक् भवतीति भावः ।

अजि- भवार्थप्रत्ययस्य लुक् ।

४-३-६१ ग्रामा- पर्यनुपूर्वात्= परि अनु इति पूर्वकात्, ग्रामात्= ग्रामान्तात्, अव्ययीभावात् (४-३-५९) तत्र + भवः (४-३-५३) ठञ् (४-२-६०) ।

४-३-६२ जिहवा.... गुलेः = जिह्वामूल अङ्गुलि इति प्रकृतिकात्, तत्र+भवः (४-३-५३) छः = छप्रत्ययो भवति । ४-३-५५ शरी... इति यतो ऽपवादः ।

४-३-६३ वर्गान्तात्= वर्गशब्दान्तप्रकृतिकात्, तत्र+भवः (४-३-५३) छः (४-३-६२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-६४ अशब्दे यत्खावन्यतरस्याम् ॥
वासुदेववर्ग्यः । वासुदेववर्गीणः ।
वासुदेववर्गीयः । अशब्दे इत्युक्तेर्नेह कवर्गीयो वर्णः ।

४-३-६५ कर्णललाटात् कनलङ्कारे ॥
कर्णिका । ललाटिका । अलङ्काराद् भिन्ने तु यदेव । कर्ण्यम् । ललाटचम् ।

४-३-६६ **तस्य व्याख्यान** इति च व्याख्यातव्यनाम्नः ॥७३
सुँपां व्याख्यानः सौँपो ग्रन्थः । सुँप्सु भवं सौँपम् । तिङां व्याख्यानस्तैङः । तिङ्क्षु भवं तैङम् ।

४-३-६७ बह्वचो ऽन्तोदात्ताट्ठञ् ॥
षात्वणत्विकम् । नातानतिकम् ।
अन्तोदात्तादित्युक्तेर्नेह- सांहितम् ।

४-३-६८ क्रतुयज्ञेभ्यश्च ॥
क्रतुभ्यः- अग्निष्टोमस्य व्याख्यानः, अग्निष्टोमे भवो वा आग्निष्टोमिकः । यज्ञेभ्यः-पाकयज्ञस्य व्याख्यानः, पाकयज्ञे भवो वा पाकयज्ञिकः ।

४-३-६९ अध्यायेष्वेवर्षेः ॥
वसिष्ठेन दृष्टो मन्त्रो ऽपि लक्षणया वसिष्ठः । तस्य व्याख्यानस्तत्र भवो वा वासिष्ठिको ऽधयायः । वैश्वामित्रिकः ।
अध्यायेष्वेवेत्युक्तेर्नेह-वासिष्ठी ऋक् ।

४-३-७० पौरोडाशपुरोडाशात् ष्ठन् ॥
पुरोडाशानां सँस्कारको मन्त्रो लक्षणया पुरोडाशः । स एव पौरोडाशः । तस्य व्याख्यानस्तत्र भवो वा पौरोडाशिकः । पुरोडाशिकः ।

४-३-७१ छन्दसो यदणौ ॥
छन्दस्यः । छान्दसः ।

४-३-७२ द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् ॥
ऐष्टिकः । चातुर्होतृकः । ब्राह्मणिकः । आर्चिकः । प्राथमिकः । आध्वरिकः । पौरश्चरणिकः । नामिकः । आख्यातिकः ।
(नामाख्यातग्रहणं संघातविगृहीतार्थम्)
नामिकः । आख्यातिकः । नामाख्यातिकः ।

४-३-६४ अश- वर्गान्तात् (४-३-६३) तत्र+भवः (४-३-५३) अन्यतरस्याम्=वा, यत्खौ=यत् ख प्रत्ययौ भवतः, अशब्दे=प्रत्ययार्थे शब्दभिन्ने गम्ये । पक्षे ४-३-६३ वर्गा... इतिच्छः ।

४-३-६५ कर्णललाटात्=कर्णललाटशब्दप्रकृतिकात्, तत्र+भवः (४-३-५३) कन्=कन् प्रत्ययो भवति, अलङ्कारे=अलङ्कारे वाच्ये । ४-३-५५ शरी... इति यतोऽपवादः ।

४-३-६६ तस्य- व्याख्यातव्यनाम्नः=व्याख्येयनामवाचिनः, तस्य=षष्ठचन्तात्, व्याख्यानः=व्याख्यान इत्यर्थे, तत्र+भवः (४-३-५३) च=सप्तम्यन्ताद् भव इत्यर्थे च, प्रत्यया भवति ।

४-३-६७ बह्वचः=बह्वच्कात्, अन्तोदात्तात्, व्याख्यातव्यनाम्नः+तस्य+व्याख्यान इति (४-३-६६) तत्र भवः (४-३-५३) च, ठञ् = ठञ्प्रत्ययो भवति । **नातानतिकम्** नतः = अनुदात्तः । अनतः= उदात्तः । उदाहरणयोः समासस्वरेणान्तोदात्तत्वं प्रकृतेः । प्रत्युदाहरणे संहिताशब्दो गतिस्वरेणाद्युदात्तः ।

४-३-६८ क्रतुयज्ञेभ्यः = क्रतुयज्ञवाचिशब्दप्रकृतिकात्, तस्य... नाम्नः (४-३-६६) तत्र+भवः (४-३-५३) च, ठञ् (४-३-६७) । अत्र काशिका-क्रतुभ्य इत्येव सिद्धे यज्ञग्रहणमसोमयागेभ्यो ऽपि यथा स्यात्- पाञ्चौदनिकः । दाशौदनिकः । इति । अत्रत्या पदमञ्जरी-अन्यथा क्रतुशब्दस्य सोमयागे रूढत्वादन्यत्र न स्यात् । यज्ञग्रहणात्तु तेभ्यो ऽपि भवति । एवं केवलयज्ञग्रहणे ऽपि स एव दोषो यः केवलक्रतुग्रहणे । तस्माद् गौणमुख्यपरिग्रहार्थमुभयोरुपादानमिति ।

४-३-६९ अध्या- ऋषेः=ऋषिवाचिनः = लक्षणया व्याख्यातव्यनाम्नः, तस्य व्याख्यानः (४-३-६६) तत्र भवः (४-३-५३) ठञ् (४-३-६७) अध्यायेष्वेव =प्रत्ययार्थेष्वध्यायेष्वेव । एवकारः स्पष्टप्रतिपत्त्यर्थः ।

४-३-७० पौरो... डाशात् = पौडाशपुरोडाशशब्दप्रकृतिकात् तस्य+व्याख्यानः (४-३-६६) तत्र+भवः (४-३-५३) ष्ठन्= ष्ठन् प्रत्ययो भवति ।

४-३-७१ छन्दसः= छन्दश्शब्दप्रकृतिकात् , तस्य+व्याख्यानः (४-३-६६) तत्र +भवः (४-३-५३) यदणौ = यत् अण् इति प्रत्ययौ भवतः ।

४-३-७२ द्व्यजृ... ख्यातात्= द्व्यचः, ऋदन्ताद्, ब्राह्मणादेश्च, तस्य+व्याख्यानः (४-३-६६) तत्र +भवः (४-३-५३) ठक् = ठक् प्रत्ययो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-७३ अणृगयनादिभ्यः ॥

आर्गयनः । पादव्याख्यानः । वैयाकरणः

४-३-७४ तत आगतः ॥ ८४, ८२

सुघ्नादागतः स्रौघ्नः । राष्ट्रिय इत्यादि ।

४-३-७५ ठगायस्थानेभ्यः ॥

शुल्कशालाया आगतः शौल्कशालिकः ।

आकरादागतम्=आकरिकम् ।

४-३-७६ शुण्डिकादिभ्योऽण् ॥

शुण्डिकादागतः शौण्डिकः ।

४-३-७७ विद्यायोनिसम्बन्धेभ्यो वुँञ् ॥७८

उपाध्यायादागतम्=औपाध्यायकम् ।

पितामहादागतम्=पैतामहकम् ।

४-३-७८ ऋतष्ठञ् ॥७९

होतुरागतं हौतृकम् । मातुरागतं मातृकम् ।

४-३-७९ पितुर्यच्च ॥

पितुरागतं पित्र्यम् । पैतृकम् ।

४-३-८० गोत्रादङ्कवत् ॥

बिदेभ्य आगतम्= बैदम् । गार्गम् । दाक्षम् । औपगवकम् ।

४-३-७३ अणृ- ऋगयनादिभ्यः= ऋगयनादिप्रकृतिकात्, तस्य +व्याख्यानः (४-३-६६) तत्र+भवः (४-३-५३) अण्= अण् प्रत्ययो भवति ।

४-३-७४ ततः = पञ्चम्यन्तात्, आगतः= आगत इत्यर्थे प्रत्यया भवन्ति ।

४-३-७५ ठगा - आयस्थानेभ्यः = आयस्थानवाचिशब्दप्रकृतिकात्, ततः+आगतः (४-३-७४) ठक् = ठक् प्रत्ययो भवति । आयः = स्वामिग्राह्यो भागः ।

४-३-७६ शुण्डिकादिभ्यः= शुण्डिकप्रभृतिशब्दप्रकृतिकात्, ततः+आगतः (४-३-७४) अण् = अण्प्रत्ययो भवति ।

४-३-७७ विद्यायोनिसम्बन्धेभ्यः = विद्यासम्बन्धवाचि- योनिसम्बन्धवाचि- शब्दप्रकृतिकात्, ततः+आगतः (४-३-७४) वुँञ्= वुँञ् प्रत्ययो भवति ।

४-३-७८ ऋतः + विद्यायोनिसम्बन्धेभ्यः (४-३-७७) = ऋदन्त- विद्यायोनिसम्बन्धवाचिशब्दप्रकृतिकात्, ततः+आगतः (४-३-७४) ठञ् = ठञ् प्रत्ययो भवति । उदाहरणयोः ७-३-५१ इसु... इति ठस्य कः ।

४-३-७९ पितुः = पितृशब्दप्रकृतिकात्, तत+आगतः (४-३-७४) यत्= यत्प्रत्यययो भवति , ठञ् (४-३-७८) च । **पित्र्यमित्यत्र** ७-४-२७ रीङ्... इति ऋतो रीङ् । ६-४-१४८ यस्ये... इतीकारलोपः । **पैतृकमित्यत्र** पूर्वट्ठस्य कः ।

४-३-८० गोत्रात्= गोत्रवाचिनः, (अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यते, इत्यवधेयम् (ततः+आगतः ४-३-७४) अङ्कवत्= = अङ्कार्थे इव प्रत्यया भवन्ति । ४-३-१२० तस्येदम् इति प्रकरणे ४-३-१२७ सङ्घाङ्क... इति सूत्रेण सङ्घाङ्कादिषु अञादिगोत्रप्रत्ययान्तेभ्यो यथा ऽण् विधीयते तथा तत आगत इत्यत्रापि भवति इत्यक्षरार्थः । तथापि लक्षणया ४-३-१२६ गोत्रा... इति वुँञप्यतिदिश्यते । अत्र ४-३-१२६ गोत्रा... ४-३-१२७ सङ्घा... इति सूत्रे सम्यगवधेये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-८१ हेतुमनुष्येभ्यो ऽन्यतरस्यां रूप्यः ॥८२

समादागतं समरूप्यम् । समीयम् ।
देवदत्तादागतं देवदत्तरूप्यम् । दैवदत्तम् ।

४-३-८२ मयट् च ॥

सममयम् । देवदत्तमयम् ।

४-३-८३ प्रभवति ॥८४

हिमवतः प्रभवति हैमवती गङ्गा ।

४-३-८४ विदूराञ्ज्यः ॥

विदूरात् प्रभवति वैदूर्यो मणिः ।

४-३-८५ तद् गच्छति पथिदूतयोः ॥८८

स्रुघ्नं गच्छति स्रौघ्नः पन्था दूतो वा ।

४-३-८६ अभिनिष्क्रामति द्वारम् ॥

स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम् । माण्डवीमभिनिष्क्रामति माण्डवीयं गोमुखी
(हिमरुक्=झिंरुक्) -जलविद्युद्द्वारं श्रीदुर्गा हीरेश्वरशिवपञ्चायतन-देवता-मन्दिर-समक्षं वर्तते ।

४-३-८७ अधिकृत्य कृते ग्रन्थे ॥८८

सुभद्रामधिकृत्य कृतो ग्रन्थः सौभद्रः ।
शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः ।
ग्रन्थे इत्युक्तेर्नेह-सुभद्रामधिकृत्य कृतः प्रासादः ।
(लुबाख्यायिकाभ्यो बहुलम्)
वासवदत्तामधिकृत्य कृता ऽऽख्यायिका वासवदत्ता । बहुलग्रहणान्नेह-भीमरथामधिकृत्य कृताऽऽख्यायिका भैमरथी ।

४-३-८८ शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः ॥

शिशुक्रन्दीयः । यमसभीयः । वाक्यपदीयम् । इन्द्रजननीयम् ।
(द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः)
दैवासुरम् । राक्षोऽसुरम् ।

४-३-८९ सो ऽस्य निवासः ॥१००

स्रुघ्नो निवासो ऽस्य स्रौघ्नः । राष्ट्रियः ।
नेपालो निवासो ऽस्य नैपालकः । नेपालीयः ।
नैपालः । इत्यादि ।

४-३-८१ हेतुमनुष्येभ्यः =हेतुमनुष्यवाचिशब्दप्रकृतिकात्, ततः+आगतः (४-३-७४) अन्यतरस्याम्=वा, रूप्यः = रूप्यप्रत्ययो भवति । समीयमित्यत्र रूप्यप्रत्ययाभावे ४-२-१३८ गहा... इति च्छ ।

४-३-८२ मयट् च = मयट् प्रत्ययोऽपि भवति पूर्वसूत्रविषये । योगविभागो यथासंख्यनिरासार्थः ।

४-३-८३ प्रभ- ततः (४-३-७४) प्रभवति= प्रकाशते= प्रथममुपलभ्यते, इत्यर्थे प्रत्यया भवन्ति ।

४-३-८४ विदूरात्= विदूरशब्दप्रकृतिकात्, ततः (४-३-७४) प्रभवति (४-३-८३) ञ्यः= ञ्यप्रत्ययो भवति ।

४-३-८५ तद ग- तद् = द्वितीयान्तात्, गच्छति= गच्छतीत्यर्थे, प्रत्यया भवन्ति पथिदूतयोः = (यो गच्छति सः) पन्था दूतो वा चेत् ।

४-३-८६ अभि- तद् (४-३-८५) अभिनिष्क्रामति= अभिनिष्क्रामतीत्यर्थे, प्रत्यया भवन्ति, द्वारम् = (यद् अभिनिष्क्रामति, तद्) द्वारं चेत् ।

४-३-८७ अधि- तद् (४-३-८५) अधि... ग्रन्थे= अधिकृत्य कृतो ग्रन्थ इत्यर्थे, प्रत्यया भवन्ति ।
लुबा- आख्यायिकाभ्यः = आख्यायिकाभिधानाय विहितस्य प्रत्ययस्य, बहुलं लुप् । आख्यायिकाभ्य इति तादर्थ्यचतुर्थ्यन्तं बोध्यम् ।

४-३-८८ शिशु... दिभ्यः= शिशुक्रन्दप्रभृतिप्रकृतिकात्, तद् (४-३-८५) अधिकृत्य कृते ग्रन्थे (४-३-८७) छ : = छप्रत्ययो भवति ।

४-३-८९ सोऽस्य - निवासः = निवास इत्युधिकात्, सः = प्रथमान्तात्, अस्य = अस्येत्यर्थे प्रत्यया भवन्ति । **नैपालकः** नेपालशब्दः कदाचिज्जनपदे ऽपि प्रयुज्यते स्म, देशे तु प्रयुज्यत एव । आद्ये वुञ् । अन्त्ये छ । वृद्धसंज्ञाया अभावे ऽण् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-९० अभिजनश्च ॥९४

सुघ्नोऽभिजनोऽस्य स्रौघ्न : । प्रतिष्ठानपुरमभिजनोऽस्य= प्रातिष्ठानपुरः । इत्यादि । यत्र सम्प्रत्युष्यते स निवासः । यत्र पूर्वैरुषितं सोऽभिजनः ।

४-३-९१ आयुधजीविभ्यश्छः पर्वते ॥

हृद्गोलः पर्वतो ऽभिजन एषामायुधजीविनां हृद्गोलीयाः ।

४-३-९२ शण्डिकादिभ्यो ञ्यः ॥

शण्डिको ऽभिजनोऽस्य शाण्डिक्यः ॥

४-३-९३ सिन्धुतक्षशिलादिभ्यो ऽणञौ ॥

सैन्धवः । ताक्षशिलः ।

४-३-९४ तूदीशलातुरवर्मतीकूचवाराड्-ढक्छण्ढञ्यकः ॥

तौदेयः । शालातुरीयः । वार्मतेयः । कौचवार्यः ।

४-३-९५ भक्तिः ॥१००

सुघ्नो भक्तिरस्य स्रौघ्नः । राष्ट्रियः । इत्यादि ।

४-३-९६ अचित्ताददेशकालाट्ठक् ॥

अपूपा भक्तिरस्य आपूपिकः । शाष्कुलिकः ।

४-३-९७ महाराजाट्ठञ् ॥

महाराजो भक्तिरस्य माहाराजिकः ।

४-३-९८ वासुदेवार्जुनाभ्यां वुँन् ॥

वासुदेवकः । अर्जुनकः ।

४-३-९९ गोत्रक्षत्रियाख्येभ्यो बहुलं वुँञ् ॥

औपगवकः । नाकुलकः । बहुलग्रहणान्नेह- पाणिनो भक्तिरस्य पाणिनीयः ।

४-३-१०० जनपदिनां जनपदवत् सर्वं जनपदेन समानशब्दानां बहुवचने ॥

अङ्गा जनपदो भक्तिरस्य आङ्गकः । अङ्गाः क्षत्रिया भक्तिरस्य आङ्गकः ।

४-३-९० अभिजनः= अभिजन इत्युपाधिकात्, सोऽस्य (४-३-८९) प्रत्यया भवन्ति ।

४-३-९१ आयु- पर्वते= पर्वतेऽर्थे वर्तमानात्, अभिजनः (४-३-९०) सोऽस्य (४-३-८९) आयुधजीविभ्यः= आयुधजीविनोऽभिधातुम्, छः=छप्रत्ययो भवति । आयुधजीविभ्य इति तादर्थ्यचतुर्थ्यन्तम् ।

४-३-९२ शण्डि- अभिजनः (४-३-९०) शण्डिकादिभ्यः= शण्डिकादिप्रकृतिकात्, सोऽस्य (४-३-८९) ञ्यः = ञ्यप्रत्ययो भवति ।

४-३-९३ सिन्धु- अभिजनः (४-३-९०) सिन्धु... दिभ्यः = सिन्ध्वादितक्षशिलादिप्रकृतिकात्, सोऽस्य (४-३-८९) अणञौ= अण् अञ् इति प्रत्ययौ (यथासंख्यम्) भवतः ।

४-३-९४ तूदी- अभिजनः (४-३-९०) तूदी... वारात्=तूदीप्रभृति -प्रकृतिकात् , सोऽस्य (४-३-८९) ढक्... यकः = ढगादयः प्रत्यया यथासंख्यम् भवन्ति ।

४-३-९५ भक्ति : - (भज्यते= सेव्यते) भक्तिः = भक्त्युपाधिकात्, सोऽस्य (४-३-८९) प्रत्यया भवन्ति ।

४-३-९६ अचि- भक्तिः (४-३-९५) अदेशकालात् = देशकालवाचिभिन्नात्, अचित्तात् = चित्तरहित-वाचिशब्दप्रकृतिकात्, सोऽस्य (८-३-८९) ठक्= ठक्प्रत्ययो भवति ।

४-३-९७ महा- भक्तिः (४-३-९५) महाराजात्= महाराजशब्दप्रकृतिकात्, सोऽस्य (४-३-८९), ठञ्= ठञ् प्रत्ययो भवति । ठक्यनुवर्तमाने ठञ्ग्रहणं स्वरार्थम् ।

४-३-९८ वासु- भक्तिः (४-३-९५) वासु... नाभ्याम्= वासुदेव अर्जुन इतिप्रकृतिकात् सोऽस्य (४-३-८९) वुँन्= वुँन् प्रत्ययो भवति ।

४-३-९९ गोत्र- भक्तिः (४-३-९५) गोत्रक्षत्रियाख्येभ्यः = अपत्याभिधायिशब्दप्रकृतिकात् क्षत्रियाभिधायिशब्दप्रकृतिकाच्च, सोऽस्य (४-३-८९) बहुलम्= बाहुल्येन, वुँञ्= वुँञ् प्रत्ययो भवति ।

४-३-१०० जन - बहुवचने = बह्वर्थाभिधाने, जनपदेन= जनपदवाचिना शब्देन, समानशब्दानाम् = तुल्यश्रुतीनाम् = समानानुपूर्वीकाणाम्, जनपदिनाम्= जनपदस्वामि (क्षत्रिय) वाचिनाम्, "भक्तिः (४-३-९५) सोऽस्य (४-३-८९) इत्येतस्मिन् विषये" अर्थात् जनपदस्वामिवाचिशब्दप्रकृतिकात्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-१०१ तेन प्रोक्तम् ॥१११
आपिशलिना प्रोक्तम् आपिशलम् ।
काशकृत्स्नम् । पाणिनीयम् ।

४-३-१०२ तित्तिरि- वरतन्तु-खण्डिकोखाच्छण् ॥
तित्तिरिणा प्रोक्तमधीयते= तैत्तिरीयाः ।
वारतन्तवीयाः । खाण्डिकीयाः । औखीयाः ।

४-३-१०३ काश्यपकौशिकाभ्यामृषिभ्यां **णिनिँः** ॥१०६
काश्यपेन प्रोक्तमधीयते
काश्यपिनः ।कौशिकिनः ।

४-३-१०४ कलापिवैशम्पायनान्तेवासिभ्यश्च ॥
हरिद्रुणा प्रोक्तमधीयते= हारिद्रविणः ।
आलम्बिना प्रोक्तमधीयते= आलम्बिनः ।

४-३-१०५ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ॥
ब्राह्मणेषु - माल्लवेन प्रोक्तमधीयते= माल्लविनः । कल्पेषु - पिङ्गेन प्रोक्तः पैङ्गी कल्पः ।

४-३-१०६ शौनकादिभ्यश्**छन्दसि** ॥१११
शौनकेन प्रोक्तमधीयते=शौनकिनः ।

भक्तिः= भक्तिरित्यत्युपाधिकात् सः = प्रथमान्तात्, अस्य, इत्यर्थे, सर्वम् = प्रकृतयः प्रत्ययाश्च, जनपदवत्= जनपदतदवध्योश्च (४-२-१२४) इति प्रकरणे इव भवन्ति। उदाहरणे-जनपदवाचिनोऽङ्गशब्दाद् यथा "भक्ति- (४-३-९५) सोऽस्य (४-३-८९)" इत्येतस्मिन्नर्थे ४-३-१२५ अवृ... सूत्रेण वुँञ् भवति, तथा जनपदिवाचिनो ऽङ्गशब्दादपि वुँञ् प्रत्ययो जातः ।

४-३-१०१ तेन= तृतीयान्तात्, प्रोक्तम्= प्रोक्तम् इत्यर्थे प्रत्यया भवन्ति । उदाहरणेष्वाद्ययोः ४-२-११२ इञ... इत्यण् । अन्त्ये ४-२-११४ वृद्धा... इति च्छ । अत्र, इञश्च इत्यण् तु न, गोत्रार्थे विहितो य इञ् इति तदर्थात् पाणिनिशब्दस्य युवप्रत्ययान्तत्वात् ।

४-३-१०२ तित्ति... कोखात्= तित्तिरिप्रभृतिशब्दप्रकृतिकात्, तेन +प्रोक्तम् (४-३-१०१) छण् =छण् प्रत्ययो भवति । **तैत्तिरीया** इति, अत्र ४-२-६६ छन्दो... सूत्रं द्रष्टव्यम् । प्रक्रिया तु प्रोक्तार्थे छण् । ततः ४-२-५९ तद... इत्यण् । तस्य ४-२-६४ प्रोक्ता... इति लुक् । **वारतन्तवीया** इत्यत्र ६-४-१४६ ओर्गु... इति गुणः ।

४-३-१०३ काश्य-ऋषिभ्याम्= ऋषिवाचिनः, काश्यपकौशिकाभ्याम्= काश्यपकौशिकप्रकृतिकात्, तेन प्रोक्तम् (४-३-१०) णिनिँः = णिनिप्रत्ययो भवति। णित्त्वफलमुत्तरत्र। ऋषिभ्यामित्युक्तेः काश्यपगोत्रप्रभवत्वाद् य इदानीन्तनः काश्यपः, तेन प्रोक्तं काश्यपीयम् । अत्रच्छ एव ।

४-३-१०४ कला... सिभ्यः = कलाप्यन्तेवासिभ्यो वैशम्पायनान्तेवासिभ्यश्च= कल्पाप्यन्तेवासिवाचि-शब्दप्रकृतिकाद् वैशम्पायनान्तेवासिवाचिशब्दप्रकृतिकाच्च, तेन+प्रोक्तम् (४-३-१०१) णिनिँः (४-३-१०३) । हरिद्रुः = कलाप्यन्तेवासी । आलम्बिः = वैशम्पायनान्तेवासी ।

४-३-१०५ पुरा - तेन प्रोक्तम् (४-३-१०१) णिनिँः (४-३-१०३) (ये प्रोक्तास्तेषु) पुराणप्रोक्तेषु= चिरन्तनमुनिप्रोक्तेषु, ब्राह्मणकल्पेषु = ब्राह्मणेषु कल्पेषु च गम्येषु। कल्पे ४-२-६६ छन्दो... इति तद्विषयता न । अत्र काशिका-पुराणप्रोक्तेष्विति किम् ? याज्ञवल्कानि ब्राह्मणानि । आश्मरथः कल्पः । याज्ञवल्क्यादयो ऽचिरकाला इत्याख्यानेषु वार्ता, तया व्यवहरति सूत्रकारः । तद्विषयता कस्मान्न भवति ? प्रतिपदं ब्राह्मणेषु यः प्रत्ययः, तस्य तद्विषयता विधीयते णिनेः । अयं तु याज्ञवल्क्यशब्दस्य कण्वादिषु पाठादण् । न वा ऽयं योगश्छन्दो ऽधिकारमनुवर्तयति तेन कल्पेष्वपि न भवतीति ।

४-३-१०६ शौन- शौनकादिभ्यः = शौनकादिशब्दप्रकृतिकात्, तेन प्रोक्तम् (४-३-१०१) णिनिँः (४-३-१०३) छन्दसि = छन्दस्यभिधेये । **शौनकिनः** - अत्र प्रोक्तार्थे णिनिँस्ततो ऽध्येत्रणः ४-२-६४ प्रोक्ता... इति लुक् । ४-२-६६ छन्दो... इति तद्विषयता । भाष्यकारस्तु प्रकृतसूत्रे याज्ञवल्क्यादिभ्यः प्रतिषेधो वक्तव्य इत्युपदिशति । ४-२-६६ छन्दो... ब्राह्मणानीति सूत्रे चैतदुद्दिश्य तत्रैवं वक्तव्यम्- तद्विषयता च न भवतीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-१०७ कठचरकाल्लुक् ॥
कठेन प्रोक्तमधीयते- कठाः । चरकाः ।
४-३-१०८ कलापिनोऽण् ॥
कलापिना प्रोक्तमधीयते= कालापाः ।
४-३-१०९ छगलिनो ढिनुँक् ॥
छगलिना प्रोक्तमधीयते=छागलेयिनः ।
४-३-११० पाराशर्यशिलालिभ्यां **भिक्षुनटसूत्रयोः**[1] ॥१११
पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते= पाराशरिणो भिक्षवः । शिलालिना प्रोक्तं नटसूत्रमधीयते= शैलालिनो नटाः ।
४-३-१११ कर्मन्दकृशाश्वादिनिँः ॥
कर्मन्देन प्रोक्तं भिक्षुसूत्रमधीयते= कर्मन्दिनो भिक्षवः । कृशाश्वेन प्रोक्तं नटसूत्रमधीयते= कृशाश्विनो नटाः ।
४-३-११२ **तेनैकदिक्** ॥११९, ११४
सुदाम्ना (अद्रिणा) एकदिक्= सौदामनी ।
४-३-११३ **तसिँश्च** ॥११४
सुदामतः । यतस्तु कक्षस्तत एव वह्निः ।
४-३-११४ उरसो यच्च ॥
उरसैकदिक्= उरस्यः । उरस्तः ।
४-३-११५ उपज्ञाते ॥
आपिशलम् । काशकृत्स्नम् ।
पाणिनीयम् ।
४-३-११६ **कृते** ग्रन्थे ॥११९
वररुचिना कृतं वाररुचम्= वार्तिकम् ।

४-३-१०७ **कठचरकात्**= कठशब्दाच्चरकशब्दाच्च परस्य, प्रोक्तप्रत्ययस्य [तेन प्रोक्तम् ४-३-१० इति प्रकृतत्वात् प्रोक्तप्रत्ययस्येत्यर्थलाभः] लुक्= लुग्भवति, छन्दसि (४-३-१०६) । उदाहरणयोः-अध्येत्रणः ४-२-६४ प्रोक्ता... इति लुक् ।

४-३-१०८ **कलापिनः**= कलापि (न्) शब्दप्रकृतिकात्, तेन+प्रोक्तम् (४-३-१०१) अण्= अणप्रत्ययो भवति ।

कालापाः- वैशम्पायनान्तेवासित्वाण्णिनिँः (४-३-१०४) प्राप्तस्तं बाधित्वाऽण् । ६-४-१६४ सूत्रस्थ-नान्त... इति वार्तिकेन टिलोपः । अध्येत्रणः ४-२-६४ प्रोक्ता...इति लुक् ।

४-३-१०९ **छगलिनः**= छगलि (न्) शब्दप्रकृतिकात् , तेन+प्रोक्तम् (४-३-१०१) ढिनुँक्=ढिनुँक्प्रत्ययो भवति । उदाहरणे कलाप्यन्तेवासित्वाण्णिनिँः (४-३-१०४) प्राप्तो बाध्यते । कित्त्वात् ७-२-११८ किति च इत्यादिवृद्धिः । अध्येत्रणः प्राग्वल्लुक् ।

४-३-११० **पारा**...लिभ्याम्:= पाराशर्यशिलालि (न्) शब्दप्रकृतिकात् , तेन+प्रोक्तम् (४-३-१०१) णिनिँः (४-३-१०३) भिक्षु...सूत्रयोः=(यत्प्रोक्तं तस्मिन्) भिक्षुसूत्रे नटसूत्रे च गम्ये । यथासंख्यम् । छन्दोग्रहणमनुवर्त्यम् । अतः ४-२-६६ छन्दो...इति तद्विषयता । भिक्षुनटसूत्रयोश्छन्दस्त्वमौपचारिकम् । एवमग्रिमसूत्रेऽपि । **पाराशरिण** इत्यत्र ६-४-१५१ आप...इति यलोपः । अध्येत्रणः प्राग्वल्लुक् ।

४-३-१११ **कर्म**...शाश्वात्= कर्मन्दकृशाश्वशब्दप्रकृतिकात्, तेन+प्रोक्तम् (४-३-१०१) इनिँः= इनिँप्रत्ययो भवति । भिक्षुनटसूत्रयोः (४-३-११०) । अध्येत्रणः प्राग्वल्लुक् ।

४-३-११२ **तेनै** - तेन=तृतीयान्तात् , एकदिक्=समानदिग् इत्यर्थे प्रत्यया भवन्ति । तेन (४-३-१०१) इति प्रकृते पुनः पाठश्छन्दोऽधिकारनिवृत्त्यर्थः । अतश्छन्दोविषयत्वमपि निवृत्तमिति बोध्यम् । **सौदामनी** । ६-४-१६७ अन् इति प्रकृतिभावः । अणन्तत्वात् स्त्रियां ४-१-१५ टिड्ढा...इति ङीप् ।

४-३-११३ **तसिँः**= तेनैकदिक् (४-३-११२) तसिँः= तसिँ प्रत्ययो भवति । **यतः**, **ततः** इत्यत्र ५-३-८ तसेँ...इति तसिँलादेशः । अतो विभक्तित्वेन ७-२-१०२ त्यदा...इत्यत्वम् । ततः पररूपम् । १-१-३७ तद्धितश्चा...इत्यव्ययत्वम् ।

४-३-११४ **उरसः**= उरश्शब्दप्रकृतिकात् , तेनैकदिक् (४-३-११२) यत्=यत्प्रत्ययो भवति, तसिँः (४-३-३७) च ।

४-३-११५ **उप** तेन (४-३-११२) उपज्ञाते= उपज्ञातेऽर्थे प्रत्यया भवन्ति । विनोपदेशेन ज्ञातम्= उपज्ञातम् । उदाहरणेषु ४-३-१०१ तेन...सूत्रं दृश्यम् ।

४-३-११६ **कृते**- तेन (४-३-११२) कृते= कृतेऽर्थे, प्रत्यया भवन्ति, ग्रन्थे (यत्कृतं तस्मिन्) =ग्रन्थे सति । उत्पादितम्=कृतम् । विद्यमानमेव ज्ञातम्=उपज्ञातम् । इति काशिका ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-११७ **संज्ञायाम्** ॥ ११९

मक्षिकाभिः कृतं माक्षिकम् । सारघम् । पौत्तिकम् ।

४-३-११८ कुलालादिभ्यो वुँञ् ॥

कौलालकम् ।

४-३-११९ क्षुद्राभ्रमरवटरपादपादञ् ॥

क्षुद्राभिः कृतं क्षौद्रम् । भ्रामरम् । वाटरम् । पादपम् ।

४-३-१२० **तस्येदम्** ॥ १३१

उपगोरिदम्=औपगवम् ।

राष्ट्रियम् । अवारपारीणम् । अवारीणम् । पारीणम् । पारावारीणम् ।

(वहेस्तुरणिट् च)

संवोढुरिदं सांवहित्रम् ।

(अग्नीधः शरणे रण् भं च)

अग्नीधः शरणम्=आग्नीध्रम् ।

(समिधामाधाने षेण्यण्)

समिधामाधानः सामिधेन्यो मन्त्रः । सामिधेनी ऋक् ।

४-३-१२१ **रथाद्** यत् ॥ १२२

रथस्येदं रथ्यम् ।

(रथाङ्ग एवेष्यते)

४-३-१२२ पत्त्रपूर्वादञ् ॥ १२३

अश्वरथस्येदम्=आश्वरथम् ।

४-३-१२३ पत्त्राध्वर्युपरिषदश्च ॥

(पत्त्राद् वाह्ये)

अश्वस्येदं वाह्यम्=आश्वम् ।

औष्ट्रम् । आध्वर्यवम् । पारिषदम् ।

४-३-१२४ हलसीराट्ठक् ॥

हलस्येदं हालिकम् । सैरिकम् ।

४-३-११७ संज्ञा- तेन (४-३-११२) कृते (४-३-११६) प्रत्यया भवन्ति, संज्ञायाम्= समुदायेन संज्ञायां गम्यमानायाम् । अग्रन्थार्थमिदम् । उदाहरणानि मधुविशेषस्य संज्ञाः ।

४-३-११८ कुलालादिभ्यः= कुलालादिशब्दप्रकृतिकात्, तेन (४-३-११२) कृते (४-३-११६) वुँञ्=वुँञ् प्रत्ययो भवति, संज्ञायाम् (४-३-११७)॥

४-३-११९ क्षुद्रा...पादपात्= क्षुद्राप्रभृतिशब्दप्रकृतिकात्, तेन (४-३-११२) कृते (४-३-११६) अञ्= अञ् प्रत्ययो भवति, संज्ञायाम् (४-३-११७) । उदाहरणेषु आद्येषु त्रिषु अणोऽपवादः । स्वरे विशेषः । पादपशब्दे तु छस्याऽपवादः ।

४-३-१२० तस्ये- तस्य= षष्ठचन्तात्, इदम्= इदमित्यर्थे प्रत्यया भवन्ति ।

वहेः+तुः= वह्धातुप्रकृतिको यस्तृप्रत्ययस्तदन्तप्रकृतिकात्, अण् = अण् प्रत्ययो भवति, इट् च= तृप्रत्ययस्येडागमश्च । इडागमार्थं वचनम् । अण्प्रत्ययस्तु सिद्ध एव ।

समि- आधीयते= स्थाप्यतेऽनेनेति=आधानम्=मन्त्रादिकम् । समिधामिति करणल्युँडन्तस्य=आधान इत्यस्य कृदन्तस्य कर्मणि षष्ठी । समिधाम्= समिच्छब्दप्रकृतिकषष्ठचन्तात्, आधाने=आधान इत्यर्थे, षेण्यण्= षेण्यण् प्रत्ययो भवति । प्रत्ययस्य १-३-६ षः प्रत्ययस्येति षकारस्येत्त्वेन लोपे णकारोऽपि निमित्तापाये नकाराय क्लृप्त एन्य इति । षित्त्वात् स्त्रियाम् ४-१-४१ षिद्गौ...इति ङीष् ।

४-३-१२१ रथात्= रथशब्दप्रकृतिकात्, तस्य+इदम् (४-३-१२०) यत्= यत् प्रत्ययो भवति ।

४-३-१२२ पत्त्रपूर्वात् + रथात् (४-३-१२१)= वाहनवाचिशब्दपूर्वक- रथशब्दान्तप्रकृतिकात्, तस्य+इदम् (४-३-१२०) अञ्= अञ् प्रत्ययो भवति ।

४-३-१२३ पत्त्रा...षदः= वाहनवाचिशब्दप्रकृतिकादध्वर्युपरिषच्छब्दप्रकृतिकाच्च, तस्य+इदम् (४-३-१२०) , अञ् (४-३-११२) ।

४-३-१२४ हलसीरात्= हलसीरशब्दप्रकृतिकात्, तस्य+इदम् (४-३-१२०) ठक्=ठक् प्रत्ययो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-१२५ द्वन्द्वाद् वुँन् वैरमैथुनिकयोः ॥

काकोलूकस्य वैरम्=काकोलूकिका

कुत्सकुशिकयोर्मैथुनिका=(विवाह-सम्बन्धः)

कुत्सकुशिकिका ।

(वैरे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः)

दैवासुरम् । राक्षोऽसुरम् ।

४-३-१२६ गोत्रचरणाद् वुँञ् ॥१२७

ग्लुचुकायनेरिदं ग्लौचुकायनकम् ।

(चरणाद् धर्माम्नाययोरेव)

कठानां धर्म आम्नायो वा काठकम् ।

४-३-१२७ सङ्घाङ्कलक्षणेष्वञ्यञिञामण् ॥

बैदः सङ्घः । बैदोऽङ्कः । बैदं लक्षणम् ।

यञन्तात्-गार्गः सङ्घोऽङ्को वा । गार्गं लक्षणम् ।

इञन्तात्-दाक्षः सङ्घोऽङ्को वा । दाक्षं लक्षणम् ।

(घोषग्रहणमत्र कर्तव्यम्)

बैदो घोषः । गार्गो घोषः । दाक्षो घोषः ।

४-३-१२८ शाकलाद् वा ॥

शाकल्येन प्रोक्तमधीयते शाकलाः । तेषां सङ्घोऽङ्को घोषो वा शाकलः शाकलको वा । लक्षणं शाकलं शाकलकं वा ।

४-३-१२९ छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः ॥

छन्दोगानां धर्म आम्नायो वा छान्दोग्यम् ।

औक्थिक्यम् । याज्ञिक्यम् ।

बाह्वृच्यम् । नाटचम् ।

४-३-१३० न दण्डमाणवान्तेवासिषु ॥

दाक्षा दण्डमाणवाः शिष्या वा ।

४-३-१३१ रैवतिकादिभ्यश्छः ॥

रैवतिकीयः । स्वापिशीयः ।

(कौपिञ्जलहास्तिपदादण्)

कौपिञ्जलः । हास्तिपदः ।

(आथर्वणिकस्येकलोपश्च)

आथर्वणिकस्य धर्म आम्नायो वा आथर्वणः ।

४-३-१२५ द्वन्द्वात्= द्वन्द्वसमासप्रकृतिकात्, तस्य+इदम् (४-३-१२०) वुँन्=वुँन् प्रत्ययो भवति,, वैरमैथुनिकयोः =एतयोरर्थयोः । वैरम्= विरोधः । मिथुनकर्म= मैथुनिका ५-१-१३२ द्वन्द्व...इति वुँञ् । वुँञन्तं स्वभावतः स्त्रियां वर्तते । मिथुनम्= दम्पती । तयोः, कर्म= क्रियानिष्पादनम्=विवाहसम्बन्धः । **काकोलूकस्येति** २-४-९ येषां...इत्येकवद्भावः ।

४-३-१२६ गोत्रचरणात्= गोत्रवाचिशब्दप्रकृतिकाच्छाखाध्येतृवाचिशब्दप्रकृतिकाच्च, तस्य+इदम् (४-३-१२०), वुँञ्=वुँञ्प्रत्ययो भवति ।

४-३-१२७ सङ्घा- अञ्...ञाम्=अञ् यञ् इञ् रूप गोत्र (पूर्वसूत्राद् गोत्रानुवृत्तेः) प्रत्ययान्तप्रकृतिकात् , तस्येदम् (४-३-१२०) अण्=अण् प्रत्ययो भवति, (इदमर्थेषु) सङ्घा...णेषु=सङ्घे अङ्के लक्षणे च । साक्षात् सम्बन्धो लक्षणम् । यथा विद्या विदानाम् । परम्परासम्बन्धोऽङ्कः । यथा स्वामिनां गवादिस्थः ।

घोष- घोषे च पूर्ववत् । तेन यथासंख्यं न ।

४-३-१२८ शाकलात्= शाकलशब्दप्रकृतिकात्, तस्य+इदम् (४-३-१२०) वा=विभाषया, अण् (४-३-१२७), (इदमर्थेषु) सङ्घाङ्कलक्षणघोषेषु (४-३-१२७) । पक्षे ४-३-१२६ गोत्र...इति चरणलक्षणो वुँञ् । **शाकला** इति शाकल्यशब्दात् ४-३-१११ कण्वा...इत्यणि ६-४-१५१ आप...इति यलोपे शाकल इति जाते ततोऽध्येत्रणि तस्य ४-२-६४ प्रोक्ता...इति लुक् ।

४-३-१२९ छन्दो...नटात्= छन्दोग औक्थिक याज्ञिक बह्वृच नट इतिशब्दप्रकृतिकात्, तस्य+इदम् (४-३-१२०) ञ्यः= ञ्यप्रत्ययो भवति, (इदमर्थयोः) धर्माम्नाययोः (४-३-१२६ सूत्रस्थं वार्तिकम्) । साहचर्यान्नटशब्दादपि तयोरेवार्थयोः । सङ्घादयस्तु निवृत्ताः ।

४-३-१३० न द- दण्ड...सिषु= दण्डप्रधानेषु माणवेषु शिष्येषु च गम्यमानेषु, न=वुँञ् न भवति । ४-३-१२६ गोत्रचरणात् ...इति प्राप्तः प्रतिषिध्यते । दाक्षा इत्यत्र ४-२-११२ इञ...इत्यण् ।

४-३-१३१ रैवतिकादिभ्यः= रैवतिकादिप्रकृतिकात्, तस्य+ इदम् (४-३-१२०) छः= छप्रत्ययो भवति । रैवतिकादयो गोत्रप्रत्ययान्ताः । अतो ४-३-१२६ गोत्र... इति वुँञोऽपवादोऽयम् । **कौपिञ्जल** प्रागवद् वुँञो ऽपवादः । **आथर्वणिकस्येति-** आथर्वणिकशब्दादण्, तत्सन्नियोगेनेकलोपश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-१३२ तस्य विकारः ॥१३६
भस्मनो विकारः= भास्मनः । मार्त्तिकः ।
अश्मनो विकारः= आश्मः ।
४-३-१३३ अवयवे च प्राण्योषधिवृक्षेभ्यः ॥
मयूरस्य विकारो ऽवयवो वा मायूरः । मौर्वं काण्डं भस्म वा । पैप्पलम् ।
४-३-१३४ बिल्वादिभ्योऽण् ॥
बिल्वस्य विकारो ऽवयवो वा= बैल्वः ।
४-३-१३५ कोपधाच्च ॥
तर्कु- तार्कवम् । तित्तिडीक- तैत्तिडीकम् ।
४-३-१३६ त्रपुजतुनोः षुँक् ॥
त्रपुणो विकारः= त्रापुषम् । जातुषम् ।
४-३-१३७ ओरञ् ॥१३९
दैवदारवम् ।
४-३-१३८ अनुदात्तादेश्च ॥
कापित्थम् ।
४-३-१३९ पलाशादिभ्यो वा ॥
पालाशम् ।
४-३-१४० शम्याः ष्लञ् ॥
शामीलं भस्म । शामीली स्रुक् ।

आथर्वणिकः-अथर्वणा प्रोक्तो वेदः तेन (४-३-१०१) इत्यणि ४-२-६६ छन्दो... इति तद्विषयतायामाथर्वणशब्दादध्येतरि ४-२-६३ वस... इति ठक्। तस्य विधानसामर्थ्यात् ४-२-६४ प्रोक्ता... इति न लुक्।

४-३-१३२ तस्य= षष्ठयन्तात् समर्थात्, विकारः= विकार इत्यर्थे प्रत्यया भवन्ति । तस्य (४-३-१२०) इति प्रकृते पुनः पाठः शैषिकनिवृत्त्यर्थः । तेन विकारावयवयोर्घादयो न भवन्ति । प्रकृतेरवस्थान्तरं विकारः । भास्मनः । ६-४-१६७ अन् इति प्रकृतिभावः ।

आश्मः ६-४-१४४ सूत्रस्थेन अश्म... इति वार्तिकेन टिलोपः ।

४-३-१३३ अव- प्राण्योषधिवृक्षेभ्यः= प्राणिवाच्योषधिवाचिवृक्षवाचिशब्दप्रकृतिकात्, तस्य+ विकारः (४-३-१३२) अवयवे च= अवयवे चाऽर्थे प्रत्यया भवन्ति । पूर्वसूत्रमेतच्चाऽऽपादसमाप्तेरनुवर्तेते । अत इत ऊर्ध्वमपि प्राण्योषधिवृक्षेभ्यो विकारावयवयोरन्येभ्यो विकारमात्रे प्रत्यया भवन्ति ।

४-३-१३४ बिल्वादिभ्यः= बिल्वादिशब्दप्रकृतिकात्, तस्य (४-३-१३२) विकारावयवयोरर्थयोः, अण्= अण्प्रत्ययो भवति । ४-३-१३८ अनुदात्तादेश्च इत्यञः, ४-३-१४२ नित्यं वृद्ध... इति मयटश्च यथायोग्यमपवादः ।

४-३-१३५ कोपधात्= ककारोपधप्रकृतिकात्, तस्य (४-३-१३२) अण् (४-३-१३४), विकारावयवयोः । ४-३-१३७ ओरञ्, इति ४-३-१३८ अनुदात्तादेश्च इति चाऽञोऽपवादः ।

४-३-१३६ त्रपुजतुनोः= त्रपुजतुशब्दप्रकृतिकात्, तस्य+ विकारः (४-३-१३२), अण् (४-३-१३४) षुँक्= त्रपुजतुशब्दयोः षुँगागमश्च । अप्राणित्वादवयवे न । ४-३-१३७ ओरञ्, इत्यञो ऽपवादः ।

४-३-१३७ ओरञ्-ओः= उवर्णान्तप्रकृतिकात्, तस्य (४-३-१३२) विकारावयवयोरर्थयोः, अञ्=अञ् प्रत्ययो भवति ।

४-३-१३८ अनुदात्तादेः= अनुदात्तादिशब्दप्रकृतिकात्, तस्य (४-३-१३२) विकारावयवयोरर्थयोः, अञ् (४-३-१३७) । कपित्थशब्दः समासस्वरेणा ऽन्तोदात्तस्तेना ऽनुदात्तादिः ।

४-३-१३९ पलाशादिभ्यः= पलाशादिप्रकृतिकात्, तस्य (४-३-१३२) विकारावयवयोरर्थयोः, वा= विभाषया, अञ् (४-३-१३७) । पक्षे ऽण् । पलाशादिषु चतुर्षु ४-३-१३८ अनुदात्तादेश्च, इति नित्ये प्राप्ते विकल्पार्थं शेषेष्वप्राप्ते वचनम् ।

४-३-१४० शम्याः- शमीशब्दप्रकृतिकात्, तस्य (४-३-१३२) विकारावयवयोरर्थयोः, ष्लञ्= ष्लञ् प्रत्ययो भवति । ४-३-१३८ अनुदात्तादेश्चेत्यञोऽपवादः । शम्याष्टलञ् इति केचित् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-१४१ **मय**'**ड्** वैतयोर्भाषाया'-**मभक्ष्याच्छाद**'**नयोः**। ॥१४९,१४२

अश्ममयम्, आश्मनम् । भस्मयम्, भास्मनम् ।

अभक्ष्याच्छादनयोरित्युक्तेर्नेह- मौद्गः सूपः । कार्पासमाच्छादनम् ।

४-३-१४२ नित्यं वृद्धशरादिभ्यः ॥

आम्रमयम् । शरमयम् ।

(एकाचो नित्यम्)

त्वङ्मयम् । वाङ्मयम् ।

४-३-१४३ गोश्च पुरीषे ॥

गोमयम् ।

४-३-१४४ **पिष्टा**'च्च ॥१४५

पिष्टमयं भस्म ।

४-३-१४५ संज्ञायां कन् ॥

पूपोऽपूपः पिष्टकः स्यात् ।

४-३-१४६ व्रीहेः पुरोडाशे ॥

व्रीहिमयः पुरोडाशः । व्रैहमन्यत् ।

४-३-१४७ असंज्ञायां तिलयवाभ्याम् ॥

तिलमयम् । यवमयम् । संज्ञायां तु तैलम् । यावकः ।

४-३-१४८ द्व्यचश्छन्द'सि ॥१४९

पर्णमयी जुहूः । शरमयं बर्हिः ।

४-३-१४९ नोत्वद्वर्ध्रबिल्वात् ॥

मौञ्जं शिक्यम् । वार्ध्रं चर्म । बैल्वो यूपः ।

तपरकरणादिह भवत्येव- धूममयान्यभ्राणि ।

४-३-१५० तालादिभ्योऽ'**ण्** ॥१५१

(तालाद्धनुषि)

तालं धनुः । तालमयमन्यत् ।

४-३-१५१ जातरूपेभ्यः परिमाणे ॥

हाटकः, सौवर्णो वा निष्कः ।

परिमाण इत्युक्तेर्नेह- हाटकमयी यष्टिः ।

४-३-१४१ मय- अभ... नयो := भक्ष्याच्छादनभिन्नयोः, एतयोः= विकारावयवयोरर्थयोः, तस्य (४-३-१३२) मयड् वा= विकल्पेन मयट् प्रत्ययो भवति, भाषायाम्= लोके ।, पक्षे ऽण् । **आश्मनम्** ६-४-१४४ सूत्रस्थेन अश्म... इति वार्तिकेन टिलोपस्तु न, तत्र पाषाणवाचिन एव ग्रहणात् ।

४-३-१४२ नित्यं- वृद्धशरादिभ्यः= वृद्धसंज्ञकशब्दप्रकृतिकाच् शरादिगणपठितशब्दप्रकृतिकाच्च, तस्य (४-३-१३२) अभक्ष्याच्छादनयोः (४-३-१४१) विकारावयवयोरर्थयोः, नित्यम्, मयट्+ भाषायाम् (४-३-१४१)॥ **एका-** अत्र दीक्षितः- कथं तर्हि आप्यमम्मयमिति ? तस्येदमित्यणन्तात् स्वार्थे ष्यञ् इतीति ।

४-३-१४३ गोः:= गोशब्दप्रकृतिकात्, तस्य (४-३-१३२) पुरीषे= पुरीषेऽर्थे, मयट् (४-३-१४१)॥

४-३-१४४ पिष्टात्= पिष्टशब्दप्रकृतिकात्, तस्य+विकारः (४-३-१३२) मयट् (४-३-१४१) ।

४-३-१४५ संज्ञायाम्= संज्ञायां गम्यमानायाम्, पिष्टात् (४-३-१४४) तस्य+विकारः (४-३-१३२), कन्= कन् प्रत्ययो भवति । मयटो (४-३-१४४)ऽपवादः ।

४-३-१४६ व्रीहेः:= व्रीहिशब्दप्रकृतिकात्, तस्य (४-३-१३२) पुरोडाशे= पुरोडाशेऽर्थे, मयट् (४-३-१४१) । ४-३-१३४ बिल्वा... इत्यणोऽपवादः ।

४-३-१४७ असं- तिलयवाभ्याम्= तिलयवशब्दप्रकृतिकात्, तस्य (४-३-१३२), विकारावयवयोः, मयट् (४-३-१४१), असंज्ञायाम् =संज्ञायामगम्यमानायाम् । **यावकः** ४-३-१३२ तस्य... इत्यण् । ४-४-२९ यावा...इति कन् ।

४-३-१४८ द्व्यचः=द्व्यच्कशब्दप्रकृतिकात्, तस्य (४-३-१३२) मयट् (४-३-१४१) विकारावयवयोः, छन्दसि= वेदे । भाषायां विधानाच्छन्दस्यप्राप्तो विधीयते ।

४-३-१४९ नोत्वद्- उत्वान्= ह्रस्वोकारवान् । उत्वद्वर्ध्रबिल्वात्= ह्रस्वोकारवत्प्रकृतिकाद् वर्ध्र- बिल्व-प्रकृतिकाच्च, तस्य (४-३-१३३) न= पूर्वसूत्रप्राप्तो मयड् न भवति ।

४-३-१५० तालादिभ्यः = तालप्रभृतिगणपठितशब्दप्रकृतिकात्, तस्य (४-३-१३२) विकारावयवयोः, अण्= अण्प्रत्ययो भवति । अञ्मयटोरपवादः ।

४-३-१५१ जातरूपेभ्यः:= सुवर्णवाचिशब्दप्रकृतिकात्, तस्य (४-३-१३२) परिमाणे= परिमाणरूपे विकारेऽर्थे, अण् (४-३-१५०) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-१५२ प्राणिरजतादिभ्यो ऽञ् ॥१५३

कापोतम् । मायूरम् । राजतम् ।

४-३-१५३ ञितश्च तत्प्रत्ययात् ॥

दैवदारवस्य विकारो ऽवयवो वा दैवदारवम् ।
शामीलस्य विकारोऽवयवो वा शामीलम् ।

४-३-१५४ क्रीतवत् परिमाणात् ॥

निष्कस्य विकारो नैष्किकः ।
शतस्य विकारः शत्यः । शतिकः ।

४-३-१५५ उष्ट्राद् वुँञ् ॥१५६

औष्ट्रकः ।

४-३-१५६ उमोर्णयोर्वा ॥

औमम्, औमकम् । और्णम्, और्णकम् ।

४-३-१५७ एण्या ढञ् ॥

ऐणेयं चर्म ।

४-३-१५८ गोपयसोर्यत् ॥१५९

गव्यम् । पयस्यम् ।

४-३-१५९ द्रोश्च ॥१६०

द्रव्यम् ।

४-३-१६० माने वयः ॥

द्रुवयम् । यौतवं द्रुवयं
पाय्यमिति मानार्थकं त्रयम् ॥

४-३-१६१ फले लुक् ॥१६४

आमलक्याः फलम्= आमलकम् ।

४-३-१६२ प्लक्षादिभ्योऽण् ॥१६३

प्लाक्षम् । नैयग्रोधम् ।

४-३-१५२ प्राणि-दिभ्यः= प्राणिवाचिशब्दप्रकृतिकाद्रजतादिगणपठितशब्दप्रकृतिकाच्च, तस्य (४-३-१६२) अञ=अञ् प्रत्ययो भवति, विकारावयवयोः ।

४-३-१५३ ञितः+ तत्प्रत्ययात् (तत्प्रत्ययादित्यत्र तच्छब्देन विकारावयवार्थौ परामृश्यते)= ञकारेत्संज्ञकविकारावयवविहित- प्रत्ययान्तप्रकृतिकात्, तस्य (४-३-१३२) अञ् (४-३-१५२), विकारावयवयोः ।

४-३-१५४ क्रीत- परिमाणात्= परिमाणवाचिशब्दप्रकृतिकात्, तस्य विकारः (४-३-१३२) क्रीतवत्= तेन क्रीतम् (५-१-३६) इति प्रकरण इव प्रत्यया भवन्ति । **नैष्किकः** क्रीतार्थे ५-१-२० अस...इति ठग् भवति । अतः प्रकृते विकारे ऽपि ठक् । शतशब्दाच्च ५-१-२१ शता... इति ठन्यतौ ।

४-३-१५५ उष्ट्रात्= उष्ट्रशब्दप्रकृतिकात्, तस्य (४-३-१३२) विकारावयवयोरर्थयोः, वुँञ्=वुँञ् प्रत्ययो भवति । ४-३-१५२ प्राणि... इत्यञो ऽपवादः ।

४-३-१५६ उमोर्णयोः= उमा ऊर्णा इतिशब्दप्रकृतिकात्, तस्य (४-३-१३२) वा=विभाषया, वुँञ् (४-३-१५५) विकारावयवयोः । पक्षे यथाक्रमं ४-३-१३२ तस्य... इत्यण् । ४-३-१३८ अनु... इत्यञ् ।

४-३-१५७ एण्याः= एणीशब्दप्रकृतिकात्, तस्य (४-३-१३२) विकारावयवयोः, ढञ्=ढञ् प्रत्ययो भवति ।

४-३-१५८ गोपयसोः= गो पयस् इतिशब्दप्रकृतिकात्, तस्य (४-३-१३२) विकारावयवयोः, यत्= यत्प्रत्ययो भवति । **गव्यम्** ६-१-७६ वान्तो यि... इत्यवादेशः ।

४-३-१५९ द्रोः= द्रुशब्दप्रकृतिकात्, तस्य (४)३-१३२) विकारावयवयोः, यत् (४-३-१५८) । **द्रव्यम्** ६-४-१४६ ओर्गुण इति गुणः । पूर्ववदवादेशः ।

४-३-१६० माने- द्रोः (४-३-१५९) तस्य (४-३-१३२) माने= मानरूपे विकारविशेषे, वयः= वयप्रत्ययो भवति ।

४-३-१६१ फले= फलरूपे विकारे ऽवयवे च विहितस्य प्रत्ययस्य, लुक्=लुग्भवति । **आमलकम्** ४-३-१४२ नित्यम्... इति विहितमयटः प्रकृतसूत्रेण लुकि १-२-४९ लुक्त... इति ङीषोऽपि लुक् ।

४-३-१६२ प्लक्षादिभ्यः= प्लक्षादिशब्दप्रकृतिकात्, तस्य (४-३-१३२) फले (४-३-१६१)= फलरूपे विकारे ऽवयवे चाऽर्थे, अण्=अण् प्रत्ययो भवति । अञो ऽपवादः । उवर्णान्तात् ४-३-१३७ ओरञ् इति प्राप्ते शेषेभ्यः ४-३-१३८ अनुदात्ता... इति प्राप्ते । विधानसमर्थ्यादस्या ऽणो न लुक् । **नैयग्रोधम्** ७-३-५ न्यग्रोधस्य... इत्यैच् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-३-१६३ जम्ब्वा वा ॥

जाम्बवम्, जम्बु वा फलम् ।

४-३-१६४ लुप् च ॥ १६५

जम्ब्वाः फलं जम्बूः ।

(फलपाकशुषामुपसंख्यानम्)

व्रीहीणां फलानि व्रीह्यः । मुद्गाः ।

(पुष्पमूलेषु बहुलम्)

मल्लिकायाः पुष्पं मल्लिका । विदार्या मूलं विदारी । बहुलग्रहणान्नेह-पाटलानि पुष्पाणि । शाल्वानि मूलानि । बाहुलकात् क्वचिल्लुक् । अशोकम् । करवीरम् ।

क्वचिदुभयं न- बैल्वानि फलानि ।

४-३-१६५ हरीतक्यादिभ्यश्च ॥

हरीतक्याः फलानि= हरीतक्यः ।

४-३-१६६ कंसीयपरशव्ययोर्यञञौ लुक् च ॥

कंसीयस्य विकारः कांस्यम् । परशव्यस्य विकारः । पारशवः ।

इति प्राग्दीव्यतीयाः ।

इति चतुर्थाध्याये तृतीयः पादः ।

४-३-१६३ जम्ब्वाः= जम्बूशब्दप्रकृतिकात्, तस्य (४-३-१३२) फले (४-३-१६१)= फलरूपे विकारे ऽवयवे चाऽर्थे वा=विभाषया, अण् (४-३-१६२)। पक्षे ४-३-१३७ ओरञ्, इत्यञ्। तस्य तु लुग् भवत्येव ।

४-३-१६४ लुप् च- जम्ब्वाः (४-३-१६३) तस्य (४-३-१३२) फले (४-३-१६१)= फलरूपे विकारे ऽवयवे चाऽर्थे विहितस्य प्रत्यस्य, वा (४-३-१६३) लुप्=लुब्भवति । **जम्बूः** प्रत्ययस्याऽनेन लुपि १-२-५१ लुपि... इति लिङ्गं प्रकृतिवत् । इत्थं त्रीणि रूपाणि- जम्बु, जम्बूः, जाम्बवम् ।

फल-फलानां पाकेन शुष्यन्तीति फलपाकशुषस्तेषाम् +उपसंख्यानम् = तद्वाचिभ्यः फलरूपे विकारेऽवयवे चाऽर्थे विहितस्य प्रत्ययस्य लुब्भवतीति वक्तव्यम् ।

पुष्पमूलेषु= पुष्परूपे मूलरूपे च विकारे ऽवयवे चाऽर्थे विहितस्य प्रत्ययस्य, बहुलम्= बाहुल्येन लुब् भवति ।

४-३-१६५ हरीतक्यादिभ्यः= हरीतकीप्रभृतिगणपठितशब्दप्रकृतिकात्, तस्य (४-३-१३२), फले (४-३-१६१)= फलरूपे विकारे ऽवयवे चाऽर्थे विहितस्य प्रत्ययस्य, लुप् (४-३-१४६)। **हरीतक्यः** १-२-५१ लुपि... इति सूत्रस्थ- हरी... इति वार्त्तिकेन लिङ्गमेव प्रकृतिवत्, वचनं त्वभिधेयवद् भवति ।

४-३-१६६ कंसी- कंसीयपरशव्ययोः= कंसीयपरशव्यशब्दप्रकृतिकात्, तस्य विकारः (४-३-१३२) यञञौ =यञ्, अञ् प्रत्ययौ भवतः, लुक् च= कंसीयपरशव्यघटकयोः (छ यतोः) प्रत्यययोर्लुक् च । कंसाय हितं कंसीयम् । ४-१-५ तस्मै... इतिच्छः । परशवे हितम्= परशव्यम् । ५-१-२ उग... इति सहकृत्य ५-१-५ तस्मै... इति यत् । १-१-६० प्रत्य... सूत्रबलेन लुक्शब्देन प्रत्यय (छ यत्) मात्रस्य लुग् भवति न तु प्रकृतेः ।

इति चतुर्थाध्याये
तृतीयः
पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ चतुर्थाध्याये
चतुर्थः पादः

४-४-१ प्राग्वहतेष्ठक् ॥७३

(तदाहेति माशब्दादिभ्य उपसंख्यानम्)

मा शब्दः कारि इति य आह स माशब्दिकः ।

(आहौ प्रभूतादिभ्यः)

प्रभूतमाह= प्राभूतिकः ।

(पृच्छतौ सुस्नातादिभ्यः)

सुस्नातं पृच्छति = सौस्नातिकः ।

सौखशायनिकः ।

(गच्छतौ परदारादिभ्यः)

परदारान् गच्छति=पारदारिकः ।

गौरुतल्पिकः ।

४-४-२ तेन दीव्यति खनति जयति जितम् ॥२७

अक्षैर्दीव्यति= आक्षिकः । कुद्दालेन खनति = कौद्दालिकः । अक्षैर्जयति= आक्षिकः ।

अक्षैर्जितम् = आक्षिकम् ।

४-४-३ सँस्कृतम् ॥४

दध्ना सँस्कृतम्= दाधिकम् ।

४-४-४ कुलत्थकोपधादण् ॥

कुलत्थैः सँस्कृतम्= कौलत्थम् । तित्तीडीकेन सँस्कृतम् = तैत्तीडीकम् ।

४-४-१ **प्राग्व**- ६-४-१४६ ओर्गुणः - सूत्रानन्तरं सूत्रमिदं पाठचम् । अस्य सूत्रस्य ४-४-७६ तद्व... सूत्रप्रदर्शनपुरस्सरमर्थं बोधयेत् । वहतेः प्राक्= तद्वहति रथयुगप्रासङ्गम्, इति सूत्रात् प्राक्, ठक्= ठक् प्रत्ययो भवति । अर्थात् इतोऽग्रे ४-४-७६ तद् व... सूत्रावधिकैः प्रत्ययविधायकैः सूत्रैः, ठक् प्रत्ययो विधीयते । इति । अथ ४-४-२ तेन दीव्यति... सूत्रमुपदिशेत् ।

तदा- तद्=कर्मवाचिभ्यः, मा... भ्यः=माशब्दप्रभृतिभ्यः, आह=आह इत्येतस्मिन्नर्थे, उपसंख्यानम्=ठक् प्रत्ययो भवतीति वक्तव्यम् । अत्र काशिका- वाक्यादेतत् प्रत्ययविधानम्, इति । अत्र हरदत्तः- न च वाक्याद् द्वितीया संभवति, अप्रातिपदिकत्वात् । तेन तदिति कर्ममात्रं निर्दिश्यते, न तु द्वितीया समर्थविभक्तिरिति ।

आहौ=वक्तरि, प्रभूतादिभ्यः=प्रभूतप्रभृतिभ्यः, ठक् (४-४-१) । अत्र काशिका- क्रियाविशेषणात् प्रत्यय इति । **प्राभूतिकः** ७-२-१८८ किति... इत्यादिवृद्धिः ।

पृच्छ- सौखशायनिक: ७-३-२० अनु... इत्युभयपदादिवृद्धिः ।

४-४-२ **तेन**- ४-४-१ प्राग्वहतेष्ठक् सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र शिक्षको मध्ये मध्ये साहाय्यं ददत् सूत्रार्थं छात्रैः कारयेत् । यथा- तेन=तृतीयान्तात् समर्थात् प्रातिपदिकात्, दीव्यति...जितम्= दीव्यति खनति जयति जितम् इत्येतेष्वर्थेषु, ठक् (४-४-१) = ठक् प्रत्ययो भवतीति ।

समानोऽर्थः

अक्षैर्दीव्यति = अक्षैः (अक्ष+भिस्) ठक् ।

अक्षैर्जयति= " " " ।

अक्षैर्जितम् = " " " ।

कुद्दालेन खनति= कुद्दालेन (कुद्दाल+टा) ठक् ।

एवं श्यामपाटचां लिखित्वा ४-१-८७ स्त्रीपुंसा... सूत्रे इव भावं बोधयित्वा पूर्ववत् प्रक्रियाक्रमे अक्ष+ठ इति श्यामपाटचां लिखित्वा ७-२-११८ किति च सूत्रमुपदिशेत् ।

४-४-३ **सँस्कृ**- तेन (४-४-२) सँस्कृतम्=सँस्कृतमित्यर्थे, ठक् (४-४-१) ।

४-४-४ **कुलत्थकोपधात्** = कुलत्थशब्दप्रकृतिकात् ककारोपधशब्दप्रकृतिकाच्च, तेन (४-४-२) सँस्कृतम् (४-४-३,) अण् = अण्प्रत्ययो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-५ तरति ॥७

उडुपेन तरति = औडुपिकः ।

४-४-६ गोपुच्छाट्ठञ् ॥

गोपुच्छेन तरति= गौपुच्छिकः ।

४-४-७ नौद्व्यचष्ठन् ॥

नावा तरति = नाविकः । प्लवेन तरति= प्लविकः । बाहुभ्यां तरति= बाहुका स्त्री ।

४-४-८ चरति ॥११

हस्तिना चरति= हास्तिकः । दध्ना चरति= दाधिकः ।

४-४-९ आकर्षात् ष्ठल् ॥

आकर्षो निकषोपलः। तेन चरति= आकर्षिकः । आकर्षिकी ।

४-४-१० पर्पादिभ्यः ष्ठन् ॥११

पर्पेण चरति=पर्पिकः । पर्पिकी । येन पीठेन पङ्गवश्चरन्ति स पर्पः ।

४-४-११ श्वगणाट्ठञ्च ॥

श्वगणेन चरति = श्वागणिकः । श्वागणिकी । श्वगणिकः । श्वगणिकी ।

४-४-१२ वेतनादिभ्यो जीवति ॥१४

वेतनेन जीवति = वैतनिकः ।

४-४-१३वस्नक्रयविक्रयाट्ठन् ॥१४

वस्नेन जीवति = वस्निकः । क्रयिकः । विक्रयिकः । क्रयविक्रयग्रहणं संघातविगृहीतार्थम् । क्रयविक्रयिकः ।

४-४-१४ आयुधाच्छ च ॥

आयुधेन जीवति = आयुधीयः, आयुधिकः ।

४-४-१५ हरत्युत्सङ्गादिभ्यः ॥१८

उत्सङ्गेन हरति= औत्सङ्गिकः ।

४-४-५ तर- तेन (४-४-२) तरति= तरतीत्यर्थे, ठक् (४-४-१) ।

४-४-६ गोपुच्छात् = गोपुच्छशब्दप्रकृतिकात्, तेन (४-४-२) तरति (४-४-५) ठञ् = ठञ् प्रत्ययो भवति । ठकोऽपवादः । स्वरे विशेषः ।

४-४-७ नौदव्यचः = नौशब्दप्रकृतिकाद् द्वयच्कशब्दप्रकृतिकाच्च, तेन (४-४-२) तरति (४-४-५), ठन् = ठन् प्रत्ययो भवति । बाहुका ७-३-५१ इसुसु... इति ठस्य कः । सूत्रे षकारः प्रकृतेरवयवो न तु प्रत्ययावयवः । तेन षित्त्वाभावान्न ङीष् ।

४-४-८ चर - तेन (४-४-२) चरति = गच्छति भक्षयति (चरँ गति भक्षणयोः ५५८) इत्येतयोरर्थयोः, ठक् (४-४-१) । **हास्तिकः** ६-४-१४४ नस्त... इति टिलोपः । अथ ४-४-७५ प्रागघि... सूत्रमुपदिशेत् ।

४-४-९ आकर्षात् = आकर्षशब्दप्रकृतिकात्, तेन (४-४-२) चरति (४-४-८) ष्ठल् = ष्ठल् प्रत्ययो भवति । १-३-६ षः प्र... इति षकारस्येत् । षित्वात् स्त्रियाम् - ४-१-४१ षिद्गौ... इति ङीष् ।

४-४-१० पर्पादिभ्यः = पर्पप्रभृतिगणपठितशब्दप्रकृतिकात् तेन (४-४-२) चरति (४-४-८) ठञ् = ठञ् प्रत्ययो भवति, ष्ठन् (४-४-१०) च ।

श्वागणिकः ७-३-४ द्वारा... इति प्राप्तस्यैजागमस्य ७-३-८ श्वादे... इतिसूत्रस्थेन इका... इति वार्तिकेन प्रतिषेधः ।

४-४-१२ वेतनादिभ्यः = वेतनप्रभृतिगणपठितशब्दप्रकृतिकात्, तेन (४-४-२), जीवति = जीवतीत्यर्थे, ठक् (४-४-१)= ठक् प्रत्ययो भवति ।

४-४-१३ वस्नक्रयविक्रयात् = वस्न-क्रय-विक्रय- क्रयविक्रयशब्दप्रकृतिकात्, तेन (४-४-२), जीवति (४-४-१२) ठन्= ठन् प्रत्ययो भवति ।

४-४-१४ आयुधात्= आयुधशब्दप्रकृतिकात्, तेन (४-४-२) जीवति (४-४-१२), छ = छप्रत्ययः, ठन् (४-४-१३) च भवतः ।

४-४-१५ हर- उत्सङ्गादिभ्यः = उत्सङ्गप्रभृतिगणपठितशब्दप्रकृतिकात्, तेन (४-४-२), हरति= हरतीत्यर्थे, ठक् (४-४-१) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-१६ भस्त्रादिभ्यः ष्ठन् ॥१७
भस्त्रया हरति= भस्त्रिकः । भस्त्रिकी ।
४-४-१७ विभाषा विवधवीवधात् ॥
विवधेन हरति= विवधिकः । विवधिकी ।
वीवधिकः । वीवधिकी । वैवधिकः । वैवधिकी ।
४-४-१८ अण् कुटिलिकायाः ॥
कुटिलिकया हरति= कौटिलिकः ।
४-४-१९ निर्वृत्ते ऽक्षद्यूतादिभ्यः ॥२१
अक्षद्यूतेन निर्वृत्तम् = आक्षद्यूतिकं वैरम् ।
४-४-२० क्त्रेर्मम्नित्यम् ॥
कृत्या निर्वृत्तम् = कृत्रिमम् ।
पाकेन निर्वृत्तम्=पक्त्रिमम् ।
(भावप्रत्ययान्तादिमब्वक्तव्यः)
पाकेन निर्वृत्तम् = पाकिमम् ।
४-४-२१ अपमित्ययाचिताभ्यां कक्कनौ ॥
अपमित्य निर्वृत्तम्= आपमित्यकम् । याचितेन निर्वृत्तम्= याचितकम् ।
४-४-२२ संसृष्टे ॥२५
दध्ना संसृष्टम्= दाधिकम् ।
४-४-२३ चूर्णादिनिः ॥
चूर्णैः संसृष्टाः = चूर्णिनो ऽपूपाः ।
४-४-२४ लवणाल्लुक् ॥
लवणेन संसृष्टः = लवणः सूपः । लवणा यवागूः ।

४-४-१६ **भस्त्रादिभ्यः** = भस्त्राप्रभृतिगणपठितशब्दप्रकृतिकात् तेन (४-४-२), हरति (४-४-१५), ष्ठन् = ष्ठन्प्रत्ययो भवति ।

४-४-१७ **विभा** - विवधवीवधात् = विवध-वीवध-शब्द-प्रकृतिकात्, तेन (४-४-२) हरति (४-४-१५) विभाषा= वा, ष्ठन् (४-४-१६) । पक्षे ठक् (४-४-१) । विवधवीवधशब्दावुभयतोबद्धशिक्ये स्कन्धवाह्ये (वहङ्गा इति थारूभाषायां प्रसिद्धे) काष्ठे वर्तेते ।

४-४-१८ **अण्** - कुटिलिकायाः = कुटिलिकाशब्दप्रकृतिकात्, तेन (४-४-२) हरति (४-४-१५), अण्= अण् प्रत्ययो भवति । कुटिलिका= वक्रगतिः कर्मारोपकरणीभूतलोहयष्टिश्च । **कौटिलिकः** = मृगः कर्मारश्च । मृगो वक्रगत्या व्याधं कर्मारश्चोपकरणीभूतलोहयष्टया ऽङ्गारान् हरति ।

४-४-१९ **निर्वृ** - अक्षद्यूतादिभ्यः = अक्षद्यूतप्रभृतिगणपठितशब्दप्रकृतिकात्, तेन (४-४-२) निर्वृत्ते = सम्पन्ने इत्यर्थे, ठक् (४-४-१) ।

४-४-२० **क्त्रेर्म** - ३-३-८८ ड्वितः .. सूत्रानन्तरं सूत्रमिदं पाठचम् । क्त्रेः = क्त्रिप्रत्ययान्तात्, तेन (४-४-२) निर्वृत्ते (४-४-१९) नित्यम्, मप् = मप् प्रत्ययो भवति । क्त्रिप्रत्ययान्ताद् मप् प्रत्ययः कर्तव्य एव । मप्प्रत्ययं विना क्त्रिप्रत्यान्तमात्रशब्दो न प्रयोक्तव्यः । यथा- प्रोक्तप्रत्ययान्तानि छन्दोब्राह्मणानि (४-२-६६) अध्येतृवेदितृप्रत्ययं विना न प्रयुज्यन्ते, तद्वत् कृत्रि इत्यादयः शब्दा न प्रयुज्यन्ते, किन्तु कृत्रिमादय एव प्रयुज्यन्ते, इति भावः । अतः कृत्रिशब्दात् प्रकृतसूत्रेण मप्प्रत्यये कृत्रिमशब्दस्य तद्धितान्तत्वेन प्रातिपदिकसंज्ञायां स्वादिकार्यम् । कृत्रिमम् । अथ - ३-३-१०४ षिद्भि...सूत्रमुपदिशेत् ।
भाव- तेन (४-४-२) निर्वृत्ते (४-४-१९) ।

४-४-२१ **अपमित्ययाचिताभ्याम्** = अपमित्यप्रातिपदिकाद् याचितशब्दप्रकृतिकाच्च, तेन (४-४-२), निर्वृत्ते (४-४-१९), कक् कनौ= कक् कन् प्रत्ययौ भवतः । यथासंख्यम् । ककि ७-२-११८ किति च इत्यादिवृद्धिः ।

४-४-२२ **संसृ** - तेन (४-४-२) संसृष्टे = संसृष्टमित्यर्थे, ठक् (४-४-१) ।

४-४-२३ **चूर्णात्** = चूर्णशब्दप्रकृतिकात्, तेन (४-४-२) संसृष्टे ४-४-२२) इनिः = इनिँ प्रत्ययो भवति ।

४-४-२४ **लवणात्** = लवणशब्दात् सँसृष्टे (४-४-२२) सूत्रेण विहितस्य ठक्प्रत्ययस्य, लुक् = लुग्भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-२५ मुद्गादण् ॥
मुद्गेन संसृष्टो मौद्ग ओदनः ।

४-४-२६ व्यञ्जनैरुपसिक्ते ॥
दध्ना उपसिक्तम् = दाधिकम् ।

४-४-२७ ओजः सहोऽम्भसा वर्तते ॥२९
ओजसा वर्तते=औजसिकः शूरः । साहसिकश्चौरः । आम्भसिको मत्स्यः ।

४-४-२८ तत् प्रत्यन्ववपूर्वमीपलोमकूलम् ॥
प्रतीपं वर्तते= प्रातीपिकः । प्रातिलोमिकः । प्रातिकूलिकः । आन्वीपिकः । आनुलोमिकः । आनुकूलिकः ।

४-४-२९ परिमुखं च ॥
परिमुखं वर्तते = पारिमुखिकः । चकारोऽनुक्तसमुच्चयार्थः । पारिपार्श्विकः ।

४-४-३० प्रयच्छति गर्ह्यम् ॥३१
द्विगुणं (द्विगुणार्थं) प्रयच्छति (उत्तमर्णः) द्वैगुणिकः । त्रैगुणिकः ।
(वृद्धेर्वृधुषिभावो वक्तव्यः)
वृद्धिं (वृद्ध्यर्थं) प्रयच्छति = वार्धुषिकः ।

४-४-३१ कुसीददशैकादशात् ष्ठन्ष्ठचौ ॥
कुसीदं (कुसीदार्थं) प्रयच्छति = कुसीदिकः कुसीदिकी । दशैकादशान् । (एकादशार्थान् दश) प्रयच्छति = दशैकादशिकः । दशैकादशिकी ।

४-४-३२ उञ्छति ॥
बदराण्युञ्छति=बादरिकः ।
कणानुञ्छति= काणिकः ।

४-४-३३ रक्षति ॥
समाजं रक्षति= सामाजिकः ।

४-४-३४ शब्ददर्दुरं करोति ॥
शब्दं करोति = शाब्दिको वैयाकरणः । दर्दुरं करोतिः = दार्दुरिकः ।

४-४-२५ मुद्गात् = मुद्गशब्दप्रकृतिकात्, तेन (४-४-२) संसृष्टे (४-४-२२), अण् = अण् प्रत्ययो भवति ।

४-४-२६ व्यञ्जनैः = व्यञ्जनवाचिशब्दप्रकृतिकात् , तेन (४-४-२), उपसिक्ते = उपसिक्तमित्यर्थे, ठक् (४-४-१)

४-४-२७ ओजः सहो ऽम्भसा = ओजस् सहस् अम्भस् इति शब्दप्रकृतिकात्, तेन (४-४-२), वर्तते= वर्तत इत्यर्थे, ठक् (४-४-१) ।

४-४-२८ प्रत्यन्ववपूर्वम् + ईपलोमकूलम्= प्रति अनु अव इतिपूर्वकं यत् ईप-लोम-कूल-रूपं शब्दस्वरूपं तत्प्रकृतिकात् , (तदन्तप्रकृतिकात्) तद्= द्वितीयान्तात् समर्थात्, वर्तते (४-४-२७), ठक् (४-४-१) । सूत्रे तदिति क्रियाविशेषणत्वाद् द्वितीयान्तम् ।

४-४-२९ परिमुखम् = परिमुखशब्दप्रकृतिकात्, तद् (४-४-२८) वर्तते (४-४-२७) ठक् (४-४-१) ।

४-४-३० प्रय- गर्ह्यम् = गर्हाविषयकशब्दप्रकृतिकात्, तत् (४-४-२८) प्रयच्छति = ददातीत्यर्थे, ठक् (४-४-१) । उदाहरणयोः, उत्तमर्णो द्विगुणं त्रिगुणं ग्रहीतुमेकगुणं ददाति, अतो गर्हा गम्यते । गर्ह्यमित्युक्तेर्नेह-द्विगुणं प्रयच्छत्यधमर्णः ।

वृद्धेः = वृद्धिशब्दस्य स्थाने, वृधुषि.... तव्यः = वृधुषि इत्यादेशो भवतीति वक्तव्यं ठक्प्रत्ययसन्नियोगेन ।

४-४-३१ कुसी- गर्ह्यम् (४-४-३०) + कुसीददशैकादशात् = गर्ह्यविषयक-कुसीद-दशैकादश-शब्दप्रकृतिकात्, तद् (४-४-२८) = द्वितयान्तसमर्थात्, प्रयच्छति (४-४-३०) ष्ठन्ष्ठचौ = ष्ठन् ष्ठच् प्रत्ययौ भवतः । यथासंख्यम् । दशैकादशशब्द एकादशार्थेषु दशसु वर्तते । सूत्रे निपातनात् समासान्ताकारः । एकादशार्थत्वादेकादश ते च ते वस्तुतो दश चेति विग्रहो दीक्षितेन दर्शितो ऽस्ति ।

४-४-३२ उञ्छ - तत् (४-४-२८) उञ्छति = उञ्छतीत्यर्थे, ठक् (४-४-१) ।

४-४-३३ रक्ष - तत् (४-४-२८) रक्षति= रक्षतीत्यर्थे, ठक् (४-४-१) ।

४-४-३४ शब्ददर्दुरम् = शब्ददर्दुरप्रातिपदिकप्रकृतिकात्, तद् (४-४-२८), करोति = करोतीत्यर्थे, ठक् (४-४-१) । शब्दं करोति = प्रकृतिप्रत्ययविभागेन जानातीत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-३५ पक्षिमत्स्यमृगान् हन्ति ॥
पक्षिणो हन्ति= पाक्षिकः । शाकुनिकः ।
मायूरिकः । मात्स्यिकः । मैनिकः ।
शाफरिकः । मार्गिकः । हारिणिकः । सारङ्गिकः ।

४-४-३६ परिपन्थं च तिष्ठति ॥
परिपन्थं तिष्ठति हन्ति वा पारिपन्थिकः ।

४-४-३७ माथोत्तरपद- पदव्यनुपदं धावति ॥३८
दण्डमाथं धावति = दाण्डमाथिकः । पदवीं धावति= पादविकः ।
अनुपदं धावति =आनुपदिकः ।

४-४-३८ आक्रन्दाट्ठञ्च ॥
आक्रन्दं धावति= आक्रन्दिकः । आक्रन्दिकी ।

४-४-३९ पदोत्तरपदं गृह्णाति ॥४०
पूर्वपदं गृह्णाति= पौर्वपदिकः ।
औत्तरपदिकः ।

४-४-४० प्रतिकण्ठार्थललामं च ॥
प्रतिकण्ठं गृह्णाति=प्रातिकण्ठिकः । आर्थिकः ।
लालामिकः ।

४-४-४१ धर्मं चरति ॥
धर्मं चरति = धार्मिकः ।
(अधर्माच्चेति वक्तव्यम्)
अधर्मं चरति =आधर्मिकः ।

४-४-४२ प्रतिपथमेति ठँश्च ॥
प्रतिपथमेति = प्रतिपथिकः, प्रातिपथिकः ।

४-४-४३ समवायान् समवैति ॥४५
समवायान् समवैति= सामवायिकः ।
सामाजिकः । सामूहिकः ।

४-४-४४ परिषदो ण्यः ॥४५
परिषदं समवैति = पारिषद्यः ।

४-४-३५ पक्षि... मृगान्=पक्षि-मत्स्य- मृगवाचि- शब्दप्रकृतिकात्, तद् (४-४-२८), हन्ति = हन्तीत्यर्थे, ठक् (४-४-१)। सूत्रे स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणम्। मत्स्यपर्यायेषु मीनस्यैव। तथैवोदाहृतानि मूले।

४-४-३६ परिपन्थम् = परिपन्थशब्दप्रकृतिकात्, तद् (४-४-२८), तिष्ठति = तिष्ठतीत्यर्थे, हन्ति (४-४-३५) च, ठक् (४-४-१)। तिष्ठतीत्यर्थे क्रियाविशेषणत्वेन द्वितीयान्तं बोध्यम्।

४-४-३७ माथो... पदम् = माथोत्तरपदप्रकृतिकात् पदवी अनुपद इति प्रकृतिकाच्च, तत् (४-४-२८) धावतीत्यर्थे, ठक् (४-४-१)। दण्डमाथः = ऋजुमार्गः।

४-४-३८ आक्रन्दात् = आक्रन्दशब्दप्रकृतिकात्, तत् (४-४-२८) धावति (४-४-३७) ठञ्, = ठञ् प्रत्ययो भवति, ठक् (४-४-१) च। दुःखिनां रोदनस्थानं दुःखिनां त्राता वा = आक्रन्दः। ठक्ठञोः स्वरे विशेषः।

४-४-३९ पदोत्तरपदम् = पदशब्दोत्तरपदकप्रकृतिकात्, तत् (४-४-२८) गृह्णाति= गृह्णातीत्यर्थे, ठक् (४-४-१)।

४-४-४० प्रति... लामम् = प्रतिकण्ठ- अर्थ- ललाम इति प्रकृतिकात्, तत् (४-४-२८) गृह्णाति (४-४-३९) ठक् (४-४-१)।

४-४-४१ धर्मम् = धर्मशब्दप्रकृतिकात्, तत् (४-४-२८) चरति = चरतीत्यर्थे, ठक् (४-४-१)॥

४-४-४२ प्रतिपथम्= प्रतिपथप्रकृतिकात्, तत् (४-४-२८) चरति (४-४-४१) ठन् = ठन्प्रत्ययो भवति, ठक् (४-४-१) च।

४-४-४३ समवायान् = समूहवाचिशब्दप्रकृतिकात् तद् (४-४-२८) समवैति= समागत्य तदेकदेशी भवतीत्यर्थे, ठक् (४-४-१)।

४-४-४४ परिषदः = परिषच्छब्दप्रकृतिकात्, तत् (४-४-२८) समवैति (४-४-४३) ण्यः = ण्यप्रत्ययो भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-४५ सेनाया वा ॥

सेनां समवैति= सैन्यः, सैनिकः ।

४-४-४६ संज्ञायां ललाटकुक्कुटचौ पश्यति ॥

ललाटं पश्यति लालाटिकः । कुक्कुटीं पश्यति कौक्कुटिको भिक्षुः ।

४-४-४७ तस्य धर्म्यम् ॥५०, ४९

आकरस्य धर्म्यम्=आकरिकम् । आपणिकम् ।

४-४-४८ अण् महिष्यादिभ्यः ॥

महिष्या धर्म्यम् = माहिषम् ।

४-४-४९ ऋतोऽञ् ॥

उद्गातुर्धर्म्यम् = औद्गात्रम् ।

(नराच्चेति वक्तव्यम्)

नरस्य धर्म्या = नारी ।

(विशसितुरिड्लोपश्च)

विशसितुर्धर्म्यम्=वैशस्त्रम् ।

(विभाजयितुर्णिलोपश्च)

विभाजयितुर्धर्म्यम् = वैभाजित्रम् ।

४-४-५० अवक्रयः ॥

आकरस्य अवक्रयः = आकरिकः । आपणिकः ।

४-४-५१ तदस्य पण्यम् ॥६५, ५४

अपूपाः पण्यमस्य = आपूपिकः ।

४-४-५२ लवणाट्ठञ् ॥

लवणः पण्यमस्य = लावणिकः ।

४-४-५३ किशरादिभ्यः ष्ठन् ॥५४

किशराः पण्यमस्य = किशरिकः ।

स्त्रियां किशरिकी ।

४-४-५४ शलालुनो ऽन्यतरस्याम् ॥

शलालु पण्यमस्य शलालुकः,

शालालुकः । स्त्रियां शलालुकी, शालालुकी ।

४-४-४५ सेनायाः = सेनाशब्दप्रकृतिकात्, तत् (४-४-२८) समवैति (४-४-४३) वा = विभाषया, ण्यः (४-४-४४) । पक्षे ४-४-४३ सम... इति ठक् ।

४-४-४६ संज्ञा- ललाटकुक्कुट्यौ= ललाट-कुक्कुटी-प्रकृतिकात्, तत् (४-४-२८) पश्यति= पश्यतीत्यर्थे, ठक् (४-४-१) संज्ञायाम् = संज्ञायां गम्यमानायाम् । लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः । कुक्कुटीशब्देन तत्पातार्हः स्वल्पदेशो लक्ष्यते । अत्र काशिका-भिक्षुरविक्षिप्तदृष्टिः पादविक्षेपदेशे चक्षुः संयम्य गच्छति स उच्यते कौक्कुटिक इतीति ।

४-४-४७ तस्य = षष्ठयन्तात् समर्थात्, धर्म्यम् = धर्मादनपेतमित्यर्थे, ठक् (४-४-१) ।

४-४-४८ अण् म-महिष्यादिभ्यः = महिषीप्रभृतिगणपठितशब्दप्रकृतिकात्, तस्य +धर्म्यम् (४-४-४७ अण् = अण् प्रत्ययो भवति । ठको ऽपवादः ।

४-४-४९ ऋतो - ऋतः = ऋदन्तशब्दप्रकृतिकात्, तस्य +धर्म्यम् (४-४-४७) अञ् = अञ् प्रत्ययो भवति ।

४-४-५० अव - तस्य (४-४-४७) अवक्रयः= अवक्रय इत्येतस्मिन्नर्थे, ठक् (४-४-१) । वाणिज्यार्थं तैलधान्यादिकं देशान्तरं नयता ऽस्मिन्, शुल्कस्थाने प्रतिभारमेतावद् देयमिति तद्देशाधिपतिना यत्कल्पितं सो ऽवक्रयः पिण्डक इति चोच्यते, इति पदमञ्जरी । नेपाली भाषायां ठेक्का इत्याहुः ।

४-४-५१ तद- पण्यम्= पणितव्योपाधिकात्, तत् = प्रथमान्तात् समर्थात्, अस्य=अस्येत्यर्थे,ठक् (४-४-१) ।

४-४-५२ लव - पण्यम् (४)४-५१) लवणात् = लवणशब्दप्रकृतिकात्, तत् + अस्य (४-४-५१), ठञ् = ठञ् प्रत्ययो भवति । ठको ऽपवादः । स्वरे विशेषः ।

४-४-५३ किश- पण्यम् (४-४-५१) किशरादिभ्यः= किशरप्रभृतिगणपठितशब्दप्रकृतिकात्, तद्+ अस्य (४-४-५१) ष्ठन् = ष्ठन् प्रत्ययो भवति । किशरादयो गन्धविशेषवाचिनः । किसर इति पाठान्तरम् ।

४-४-५४ शला - पण्यम् (४-४-५१), शलालुनः = शलालुशब्दप्रकृतिकात्, तद्+अस्य (४-४-५१), अन्यतरस्याम् = वा, ष्ठन् (४-४-५३) । पक्षे ठक् (४-४-५१) । शलालुशब्दो गन्धविशेषवाची ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-५५ शिल्पम्॑ ॥५६

मृदङ्गं (मृदङ्गवादनविषयकं) शिल्पमस्य= मार्दङ्गिकः । वैणिकः

४-४-५६ मड्डुकझर्झरादणन्यतरस्याम् ॥

माड्डुकः, माड्डुकिकः । झार्झरः, झार्झरिकः ।

४-४-५७ प्रहरणम् ॥

असिः प्रहरणमस्य= आसिकः ।

धनुः प्रहरणमस्य = धानुष्कः ।

४-४-५८ परश्वधाट्ठञ्च ॥

परश्वधः प्रहरणमस्य पारश्वधिकः ।

४-४-५९ शक्तियष्टचोरीकक् ॥

शक्तिः प्रहरणमस्य = शाक्तीकः । याष्टीकः ।

४-४-६०अस्ति नास्ति दिष्टं मतिः ॥

अस्ति परलोक इत्येवं मतिरस्य=आस्तिकः ।

नास्ति परलोक इत्येवं मतिरस्य=नास्तिकः ।

दिष्टम् = दैवम् (तद्विषया) मतिरस्य = दैष्टिकः ।

४-४-६१ शीलम्॑ ॥६२

अपूपं (अपूपभक्षणविषयकं) शीलमस्य= आपूपिकः । मौदकिकः ।

४-४-६२ छत्रादिभ्यो णः ॥

गुरोर्दोषाणामावरणम्= छत्रम् । तद्विषयकं शीलमस्य = छात्त्रः ।

४-४-६३ कर्मा॑ऽध्ययने॑ वृत्तम्॑ ॥६४

एकमन्यदध्ययने कर्म वृत्तमस्य=ऐकान्यिकः ।

४-४-५५ शिल्पम् = कौशलोपाधिकात् , तद् +अस्य (४-४-५१) ठक् (४-४-१) । मृदङ्गशब्दस्य मृदङ्गवादनविषयके लक्षणा । मुख्यार्थे तु न, अनभिधानात् । एवं वीणावादनविषयकं शिल्पमस्य वैणिक इत्यादिष्वपि बोध्यम् ।

४-४-५६ मड्डु - शिल्पम् (४-४-५५) मड्डुकझर्झरात् = मड्डुक- झर्झरशब्दप्रकृतिकात्, तद्+अस्य (४-४-५१) अन्यतरस्याम् = वा, अण् = अण् प्रत्ययो भवति । पक्षे ठक् (४-४-५५) । मड्डुक - झर्झरशब्दौ लक्षणया तद्वादन- विषयकौ वर्तेते ।

४-४-५७ प्रहरणम्= प्रहरणोपाधिकात्, प्रहरणवाचिशब्दप्रकृतिकात्, तद् +अस्य (४-४-५१) ठक् (४-४-१) ।

धानुष्कः ७-३-५१ इसु... इति ठस्य कः ।

४-४-५८ पर -प्रहरणम् (४-४-५७) = प्रहरणोपाधिकात्, परश्वधात्= परश्वधप्रकृतिकात्, तद् +अस्य (४-४-५१) ठञ्= ठञ् प्रत्ययो भवति, ठक् (४-४-१) च । स्वरे विशेषः ।

४-४-५९ शक्ति - प्रहरणम् (४-४-५७) शक्तियष्टचोः = शक्तियष्टिशब्दप्रकृतिकात्, तद्+अस्य (४-४-५१) ईकक् = ईकक् प्रत्ययो भवति ।

४-४-६० अस्ति - मतिः = मत्युपाधिकात्, अस्तिनास्तिदिष्टम्=अस्ति-नास्ति-दिष्ट-प्रकृतिकात्, तद्+अस्य (४-४-५१) ठक् (४-४-१) ।

४-४-६१ शीलम् = शीलोपाधिकात्, तद्+अस्य (४-४-५१) ठक् (४-४-१) । अपूपशब्दस्य तद्भक्षणविषयके लक्षणा । एवं मोदकादिष्वपि बोध्यम् ।

४-४-६२ छत्रा - शीलम् (४-४-६१) छत्रादिभ्यः =छत्रप्रभृतिगणपठितशब्दप्रकृतिकात् तद्+अस्य (४-४-५१) णः = णप्रत्ययो भवति ।

४-४-६३ कर्मा- अध्ययने+कर्म+वृत्तम् = पठने स्खलनादिरूपं कर्म वृत्तम् = जातम् इत्युपाधिकात्, तद्+अस्य (४-४-५१) ठक् (४-४-१) । एकमन्यदिति सम्यक्पाठापेक्षया ऽन्यदिति भावः । **ऐकान्यिकः** २-१-५१ तद्धि... इति समासः । अत्र काशिका- यस्याध्ययनप्रयुक्तस्य परीक्षाकाले पठतः स्खलितमपपाठरूपमेकं जातं स उच्यते ऐकान्यिक इतीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-६४ बह्वच्पूर्वपदाट्ठच् ॥

त्रयोदशान्यानि कर्माण्यध्ययने वृत्तान्यस्य= त्रयोदशान्यिकः ।

४-४-६५ हितं भक्षाः ॥

अपूपाः (अपूपभक्षणं) हितमस्मै आपूपिकः । मौदकिकः ।

४-४-६६ त'दस्मै दीयते' नियुक्तम्' ॥६८

अग्रभोजनमस्मै नियुक्तं दीयते आग्रभोजनिकः ।

४-४-६७ श्राणामांसौदनाट्टिठन् ॥

श्राणा नियुक्तमस्मै दीयते श्राणिकः । स्त्रियां श्राणिकी । मांसौदनग्रहणं सङ्घातविगृहीतार्थम् । मांसौदनिकः । मांसौदनिकी । मांसिकः । मांसिकी । ओदनिकः । ओदनिकी ।

४-४-६८ भक्तादणन्यतरस्याम् ॥

भक्तमस्मै नियुक्तं दीयते= भाक्तः, भाक्तिकः ।

४-४-६९ तत्र' नियुक्तः' ॥७४, ७०

शुल्कशालायां नियुक्तः शौल्कशालिकः । गौल्मिकः ।

४-४-७० अगारान्ताट्ठन् ॥

देवागारे नियुक्तः = देवागारिकः ।

४-४-७१ अध्यायिन्यदेशकालात् ॥

श्मशाने ऽधीते= श्माशानिकः । चतुर्दश्यामधीते = चातुर्दशिकः ।

४-४-७२ कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति ॥

वंशकठिने व्यवहरति= वांशकठिनिकः । प्रास्तारिकः । सांस्थानिकः ।

४-४-६४ बह्व- अध्ययने+कर्म+वृत्तम् (४-४-६३) बह्वच्पूर्वपदात्= बह्वच्कशब्दपूर्वपदक-प्रकृतिकात्, तद्+अस्य (४-४-५१) ठच्= ठच् प्रत्ययो भवति ।

४-४-६५ हितम्= हितमित्युपाधिकात्, भक्षाः = भक्षवाचिशब्दप्रकृतिकात्, तदस्य (४-४-५१) तत्= प्रथमान्तात् , अस्य= अस्मै इत्यर्थे ठक् (४-४-१)। अस्येत्यनुवर्तमानं षष्ठयन्तमपि हितशब्देन योगाच्चतुर्थ्यन्ताय कल्पते । अपूपशब्दस्य तद्भक्षणे लक्षणा । एवं मोदकादिशब्देष्वपि बोध्यम् ।

४-४-६६ तद - नियुक्तम् नियुक्तम्+दीयते = अव्यभिचरितं वितीर्यते इत्युपाधिकात्, तत् = प्रथमान्तात्, अस्मै = अस्मै इत्यर्थे, ठक् (४-४-१)। नियुक्तमित्यत्र क्रियाविशेषणत्वाद् द्वितीया । अत्र काशिका - केचित्तु नियुक्तम् = नित्यमाहुः । अपूपा नित्यमस्मै दीयन्ते आपूपिक इति । अत्र पक्षे नियुक्तमित्यत्रा ऽत्यन्तसंयोगे द्वितीया बोध्या ।

४-४-६७ श्राणा - नियुक्तम्+ दीयते (४-४-६६)श्राणामांसौदनात् = श्राणा मांस ओदन मांसौदन इतिशब्दप्रकृतिकात्, तद्+अस्मै (४-४-६६) टिँठन् = टिँठन् प्रत्ययो भवति ।

४-४-६८ भक्ता - नियुक्तम्+दीयते (४-४-६६) भक्तात् = भक्तशब्दप्रकृतिकात्, तद्+अस्मै (४-४-६६) अन्यतरस्याम्= वा, अण् = अण्प्रत्ययो भवति । पक्षे ४-४-६६ तदस्मै... इति ठक् ।

४-४-६९ तत्र = सप्तम्यन्तात् समर्थात्, नियुक्तः = नियुक्त इत्यर्थे, ठक् (४-४-१) ।

४-४-७० अगारान्तात् = अगारशब्दान्तप्रकृतिकात्, तत्र +नियुक्तः (४-४-६९) ठन् = ठन् प्रत्ययो भवति ।

४-४-७१ अध्या- अदेशकालात्= निषिद्धदेशकालवाचिशब्दप्रकृतिकात्, तत्र (४-४-६९) अध्यायिनि= अध्येतर्यर्थे, ठक् (४-४-१)। अत्र न्यासः- अध्ययनस्य यौ देशकालौ शास्त्रेण प्रतिषिद्धौ तावदेशकालशब्देनोच्येते इति ।

४-४-७२ कठि- कठि.. नेषु= कठिनशब्दान्तप्रकृतिकात् प्रस्तारसंस्थानशब्दप्रकृतिकाच्च, तत्र (४-४-६९) व्यवहरति= व्यवहरतीत्यर्थे, ठक् (४-४-१)। वंशाः कठिना यस्मिन् देशे स वंशकठिनः । तत्र देशे यादृशो व्यवहारः प्रचलति तथैवानुतिष्ठतीत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-७३ निकटे वसति ॥

निकटे वसति = नैकटिको भिक्षुकः ।

४-४-७४ आवसथात् ष्ठल् ॥

आवसथे वसति= आवसथिकः । षित्त्वात् स्त्रियां ङीष्- आवसथिकी ।

आकर्षात् पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च । आवसथात् किशरादेः षितः षडेते ठगधिकारे । षडिति सूत्रषट्केन विहिता इत्यर्थः । प्रत्ययास्तु सप्त ।

ठकः पूर्णो ऽवधिः ।

४-४-७५ प्राग्घिताद् यत् ॥१४०

४-४-७६ तद् वहति रथ-युग-प्रासङ्गम् ॥ ८६,८२

रथं वहति= रथ्यः । युग्यः । प्रासङ्ग्यः ।

४-४-७७ धुरो यड्ढकौ ॥

धुरं वहति= धुर्यः । धौरेयः ।

४-४-७८ खः[1] सर्वधुरात् ॥७९

सर्वधुरां वहति= सर्वधुरीणः ।

४-४-७९ एकधुराल्लुक् च ॥

एकधुरां वहति= एकधुरः । एकधुरीणः ।

४-४-८० शकटादण् ॥

शकटं वहति= शाकटो ऽनड्वान् ।

४-४-७३ निकटे = निकटशब्दप्रकृतिकात्, तत्र (४-४-६९) वसति = वसतीत्यर्थे, ठक् (४-४-१) ।

४-४-७४ आवसथात्= आवसथशब्दप्रकतिकात्, तत्र (४-४-६९) वसति (४-४-७३) ष्ठल् = ष्ठल् प्रत्ययो भवति ।

४-४-७५ प्राग्घि - ७-३-५० ठस्येकः, इति सूत्रानन्तरं- ४-४-३ सँस्कृतम् ४-४-५ तरति ४-४-८ चरति सूत्राणां ७-३-५० ठस्येकः, इति सूत्रे निर्दिष्टया रीत्या ऽर्थं बोधयित्वा (उदाहरणानि च छात्रैः साधयित्वा) सूत्रमिदं पाठ्यम् । अस्य सूत्रस्या ऽर्थं ५-१-५ तस्मै... सूत्रप्रदर्शनपुरस्सरं बोधयेत् । हितात् प्राक्= तस्मै हितम् इति सूत्रात् प्राक्, यत्= यत् प्रत्ययो भवति । अर्थात् इतो ऽग्रे ५-१-५ तस्मै सूत्रात् पूर्वैः प्रत्ययविधायकैः सूत्रैर्यत् प्रत्ययो विधीयते । इति । अथ ४-४-८६ वशं गतः- सूत्रस्यार्थं तदुदाहरणं च च्छात्रैः साधयित्वा तेषामुत्साहं वर्धयेत् । अथ मध्ये मध्ये साहाय्यं ददच्छात्रैरधो निर्दिष्टानां सूत्राणामर्थमुदाहरणानि च साधयेत् । ४-४-७६ तद् वहति... ४-४-९२ धर्मपथ्यर्थ.. ४-४-९८ तत्र साधुः ४-४-१२० दूतस्य ...। इति अथ ५-१-५ तस्मै.... सूत्रादारभ्य परतः के प्रत्यया भवेयुः ? इति जिज्ञासामुद्भाव्य ५-१-१ प्राक् क्री ... ५-१-२ उग... ५-१-३ कम्ब... ५-१-४ - विभा... सूत्राण्युपदिशेत् ।

४-४-७६ तद् व- रथ... सङ्गम् = रथ-युग-प्रासङ्ग- शब्दप्रकृतिकात्, तद् = द्वितीयान्तात् समर्थात्, वहति= वहतीत्यर्थे, यत् (४-४-७५) ।

४-४-७७ धुरो - धुरः = धुर् इति प्रकृतिकात्, तद्+वहति (४-४-७६) यड्ढकौ= यत् ढक् च प्रत्ययौ भवतः ।

धुर्यः । ८-२-७७ हलि... इति दीर्घे प्राप्ते ८-२-७९ न भ ... इति प्रतिषेधः ।

४-४-७८ खः स- सर्वधुरात् = सर्वधुराशब्दप्रकृतिकात्, तद्+वहति (४-४-७६) खः = ख प्रत्ययो भवति । धूः शब्दस्य स्त्रीलिङ्गत्वेन समस्तशब्दस्यापि २-४-२६ पर... इति सूत्रेण स्त्रीलिङ्गत्वम् । सूत्रे पुंस्त्वनिर्देशस्तु प्रातिपदिकार्थमात्रविवक्षया ।

४-४-७९ एकधुरात् = एकधुराशब्दप्रकृतिकात्, तद्+वहति (४-४-७६) खः (४-४-७८) लुक् च= तस्य खप्रत्ययस्य लुक् च भवति । वचनसामर्थ्यात् पाक्षिको ऽयं लुक् । सूत्रे पुंस्त्वनिर्देशः प्राग्वत् ।

४-४-८० शकटात् = शकटशब्दप्रकृतिकात्, तद्+वहति (४-४-७६) अण्= अण् प्रत्ययो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-८१ हलसीराट्ठक् ॥
हलं वहति= हालिकः । सैरिकः ।
४-४-८२ संज्ञायां जन्या ॥
जनीम्= वधूं वहति= प्रापयति= जन्या ।
४-४-८३ विध्यत्यधनुषा ॥
पादौ विध्यन्ति= पद्याः शर्कराः ।
अधनुषेत्युक्तेर्नेह- पादौ विध्यति धनुषा ।
४-४-८४ धनगणं लब्धा ॥८५
धनं लब्धा= धन्यः । गण्यः ।
४-४-८५ अन्नाण्णः ॥
अन्नं लब्धा= आन्नः ।
४-४-८६ वशं गतः ॥
वशं गतः=वश्यः ।
४-४-८७ पदमस्मिन् दृश्यम् ॥
पदं दृश्यम् द्रष्टुं शक्यम् अस्मिन् = पद्यः कर्दमः ।
नातिशुष्क इत्यर्थः ।
४-४-८८ मूलमस्याबर्हि ॥
मूलमाबर्हि एषाम्= मूल्या मुद्गाः ।
४-४-८९ संज्ञायां धेनुष्या ॥
धेनुष्या बन्धके स्थिता ।
४-४-९० गृहपतिना संयुक्ते ञ्यः ॥
गृहपतिना संयुक्त := गार्हपत्यो ऽग्निः ।

४-४-८१ हलसीरात्= हलसीरशब्दप्रकृतिकात्, तद्+वहति (४-४-७६) ठक् = ठक् प्रत्ययो भवति ।

४-४-८२ संज्ञा- जन्या= जनीशब्दप्रकृतिकाद् द्वितीयान्ताद्, वहतीत्यर्थे यत्प्रत्ययो भवति, संज्ञायाम् = संज्ञायां गम्यमानायाम् ।

४-४-८३ विध्य - तद् (४-४-७६) विध्यति= विध्यत्यर्थे, यत् (४-४-७५) अधनुषा = धनुष्करणं न चेत् ।

४-४-८४ धनगणम् = धनगणशब्दप्रकृतिकात्, तत् (४-४-७४) लब्धा= लब्धेत्यर्थे, यत् (४-४-७५)। सूत्रे लब्धेति तृन्नन्तम् । तृजन्ते तु कर्मणि षष्ठी (२-३-६५ कर्तृ... इति) स्यात् । तृन्नन्ते तु २-३-६९ न लो ... इति षष्ठीप्रतिषेधः ।

४-४-८५ अन्नात् = अन्नशब्दप्रकृतिकात्, तद् (४-४-७६) लब्धा (४-४-८४) णः=णप्रत्ययो भवति ।

४-४-८६ वशम्= वशशब्दप्रकृतिकाद् द्वितीयान्तात्, गतः = गत इत्यर्थे, यत् (४-४-७५) ।

४-४-८७ पद- दृश्यम्= दृश्यार्थोपाधिकात्, पदम्= पदशब्दप्रकृतिकप्रथमान्तात्, अस्मिन्= अस्मिन्नित्यर्थे, यत् (४-४-७५) ।

४-४-८८ मूल- आबर्हि= आबर्हि इत्युपाधिकात्, मूलम्= मूलशब्दप्रकृतिकप्रथमान्तात्, अस्य= अस्येत्यर्थे, यत् (४-४-७५)। आबर्हणम्= आबर्ह उत्पाटनम्। तदस्यास्तीत्याबर्हि। मूल्याः- मूलोत्पाटनेन विना ग्रहीतुमशक्याः । मध्यतो लूयमानेषु कोशस्था अपि यस्यामवस्थायां पतेयुस्तामवस्थां प्राप्ताः । अति शुष्का इति यावत् ।

४-४-८९ संज्ञायाम्= संज्ञायां गम्यमानायाम्, धेनुष्या= धेनुष्या इति निपात्यते स्वार्थे= धेनोः षुँगागमो यश्च प्रत्ययो निपात्यते । न तु प्रकृतो यत् स्वरितस्वरापतेः । अन्तोदात्तश्चेष्यते । अत्र काशिका-या धेनुरुत्तमर्णाय ऋणप्रदानाद् दोहनार्थं दीयते सा धेनुष्या, इति ।

४-४-९० गृहपतिना= गृहपतिशब्दप्रकृतिकतृतीयान्तात्, संयुक्ते = संयुक्त इत्यर्थे, ञ्यः=ञ्यप्रत्ययो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-९१ नौ-वयो-धर्म-विष-मूल-मूल-सीता-तुलाभ्यस्तार्य-तुल्य-प्राप्य-वध्यानाम्य-सम-समित-सम्मितेषु ॥
नावा तार्यम्= नाव्यम् । वयसा तुल्यो वयस्यः सखा । धर्मेण प्राप्यम्= धर्म्यम् । विषेण वध्यो विष्यः । मूलेनानाम्यम्= मूल्यम् । मूलेन समो मूल्यः पटः । उपादानेन समानफल इत्यर्थ इति काशिका । सीतया समितम् = सीत्यं क्षेत्रम् । तुलया सम्मितम्=तुल्यम् ।

४-४-९२ धर्मपथ्यर्थन्यायादनपेते ॥
धर्मादनपेतम्= धर्म्यम् । पथ्यम् । अर्थ्यम् । न्याय्यम् ।

४-४-९३ छन्दसो निर्मिते ॥९४
छन्दसा निर्मितः= छन्दस्यः । इच्छया कृत इत्यर्थः ।

४-४-९४ उरसो ऽण् च ॥
उरसा निर्मितः = औरसः । उरस्यः ।

४-४-९५ हृदयस्य प्रियः ॥९६
हृदयस्य प्रियः = हृद्यः ।

४-४-९६ बन्धने चर्षौ ॥
हृदयस्य वशीकरणो मन्त्रः =हृद्यः ।

४-४-९७ मतजनहलात् करणजल्पकर्षेषु ॥
मतस्य=ज्ञानस्य करणम्= मत्यम् । जनस्य जल्पः=जन्यः । हलस्य कर्षः= हल्यः ।

४-४९८ तत्र साधुः ॥११९, १०६
सामसु साधुः=सामन्यः । शरण्यः ।

४-४-९९ प्रतिजनादिभ्यः खञ् ॥
प्रतिजनं साधुः = प्रातिजनीनः । सांयुगीनः ।

४-४-१०० भक्ताण्णः ॥
भक्ते साधुः = भाक्तः शालिः ।

४-४-९१ **नौव-** नौ... भ्यः = नौप्रभृतिशब्दप्रकृतिकात् तृतीयान्तात् समर्थात्, तार्य... तेषु= तार्यादिष्वर्थेषु, यत् (४-४-७५) । **मूल्यम्-** वणिग्भिर्विनियुक्तं धनं मूलम् । मूलादतिरिक्त आयभागो मूल्यम् । अत्र तत्वबोधिनी-लाभमात्रे व्युत्पादितस्य मूल्यशब्दस्य तद्घटिते संघाते निरूढलक्षणा बोध्येति ।

४-४-९२ **धर्म...** न्यायात्= धर्म पथिन् अर्थ न्याय इत्येतत् प्रकृतिक- पञ्चम्यन्तात्, अनपेते= अनपेत इत्यर्थे, यत् (४-४-७५) । **पथ्यम्** ६-४-१४४ नस्त... इति टिलोपः ।

४-४-९३ **छन्दसः** = छन्दश्शब्दप्रकृतिकतृतीयान्तात्, निर्मिते=निर्मित इत्यर्थे, यत् (४-४-७५) । छन्दश्शब्द इच्छावाचीह गृह्यते । निर्मित इति प्रत्ययार्थसामर्थ्यलभ्या तृतीयेति ।

४-४-९४ **उरसः** = उरश्शब्दप्रकृतिकतृतीयान्तात्, निर्मिते (४-४-९३) अण् = अण् प्रत्ययो भवति, यत् (४-४-७५) च ।

४-४-९५ **हृदयस्य**= हृदयशब्दप्रकृतिकषष्ठचन्तात्, समर्थात्, प्रियः=प्रिय इत्यर्थे, यत् (४-४-७५) । **हृद्यः** ६-३-५० हृदयस्य.... इति हृदयस्य हृदादेशः ।

४-४-९६ **बन्ध-** हृदयस्य (४-४-९५) बन्धने= वशीकरणे, ऋषौ = वेदे वाच्ये, यत् (४-४-७५) । बध्यते= वशीक्रियते ऽनेनेति = बन्धनम् । करणे ल्युँट् ।

४-४-९७ **मत...** हलात्= मतजनहलशब्दप्रकृतिक- षष्ठचन्तात्, करण... कर्षेषु= करणादिष्वर्थेषु, यत् (४-४-७५) । करणादिप्रत्ययार्थसामर्थ्यलभ्या षष्ठी ।

४-४-९८ **तत्र** = सप्तम्यन्तात् समर्थात्, साधुः= साधुरित्यर्थे, यत् (४-४-७५) । अत्र काशिका-साधुरिह प्रवीणो योग्यो वा गृह्यते, नोपकारकः । तत्र हि परत्वात् ५-१-५ तस्मै हितम् इत्यनेन विधिना भवितव्यमिति । **सामन्यः** ६-४-१६८ ये चा ... इति प्रकृतिभावाट्टिलोपो न ।

४-४-९९ **प्रतिजनादिभ्यः**=प्रतिजनप्रभृतिगणपठितशब्दप्रकृतिकात्, तत्र+ साधुः (४-४-९८) खञ्= खञ् प्रत्ययो भवति । प्रतिजनमिति वीप्सायामव्ययीभावः ।

४-४-१०० भक्तात्= भक्तशब्दप्रकृतिकात्, तत्र+ साधुः (४-४-९८) णः= णप्रत्ययो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-१०१ परिषदो ण्यः ॥
योगो ऽयं विभज्यते।
प्र. ४-४-१०१ परिषदः ॥
परिषदि साधुः = पारिषदः ॥
द्वि ४-४-१०१ ण्यः ॥
परिषदि साधुः = पारिषद्यः।
४-४-१०२ कथादिभ्यष्ठक् ॥
कथायां साधुः = काथिकः।
वैतण्डिकः।
४-४-१०३ गुडादिभ्यष्ठञ् ॥
गुडे साधुः = गौडिक इक्षुः।
४-४-१०४ पथ्यतिथिवसतिस्वपतेर्ढञ् ॥
पथि साधु=पाथेयम्। आतिथेयम्। वासतेयं गृहम्।
स्वापतेयं धनम्।
४-४-१०५ सभाया यः ॥१०६
सभायां साधुः = सभ्यः।
४-४-१०६ ढश्छन्दसि ॥
सभायां साधुः = सभेयो युवा। सभ्यो युवेत्यर्थः।
४-४-१०७ समानतीर्थे वासी ॥
समाने तीर्थे वसति = सतीर्थ्यः।
४-४-१०८ **समानोदरे शयित** ओ चोदात्तः ॥१०९
समाने उदरे शयितः = समानोदर्यः।
४-४-१०९ सोदराद् यः
समाने उदरे शयितः = सोदर्यः। समानोदर्यः।

प्र. ४-४-१०१ परिषदः- परिषच्छब्दप्रकृतिकात्, तत्र+ साधुः (४-४-९८) णः (४-४-१००)।
द्वि. ४-४-१०१ ण्यः- परिषदः (प्र. ४-४-१०१) तत्र + साधुः (४-४-९८) ण्यः = ण्यप्रत्ययो भवति।
४-४-१०२ कथादिभ्यः= कथाप्रभृतिगणपठितशब्दप्रकृतिकात्, तत्र + साधुः (४-४-९८) ठक्= ठक् प्रत्ययो भवति।
४-४-१०३ गुडादिभ्यः=गुडप्रभृतिगणपठितशब्दप्रकृतिकात्, तत्र+साधुः (४-४-९८) ठञ्=ठञ् प्रत्ययो भवति।
४-४-१०४ पथ्य... पतेः = पथिन् अतिथि वसति स्वपति इति शब्दप्रकृतिकात्, तत्र+ साधुः (४-४-९८), ढञ्=ढञ् प्रत्ययो भवति।
४-४-१०५ सभायाः= सभाशब्दप्रकृतिकात्, तत्र+ साधुः (४-४-९८), यः= यप्रत्ययो भवति।
४-४-१०६ ढश्छ- सभायाः (४-४-१०५ तत्र+साधुः (४-४-९८), ढः= ढप्रत्ययो भवति, छन्दसि= वेदे।
४-४-१०७ समानतीर्थे= समानतीर्थशब्दप्रकृतिक- सप्तम्यन्तात्, वासी= वास्तव्य इत्यर्थे, यत् (४-४-७५)। **सतीर्थ्यः** समाने तीर्थे वसतीति विग्रहे २-१-५८ पूर्वापरप्रथम... इति समासे ६-३-८७ तीर्थे ये- इति समानस्य सादेशे सतीर्थशब्दाद् यत्। तीर्थशब्देनेह गुरुरुच्यते। सतीर्थ्यः= एकगुरुक इत्यर्थः।
४-४-१०८ समानोदरे= समानोदरप्रकृतिक- सप्तम्यन्तात्, शयितः= शयित इत्यर्थे, यत् (४-४-७५) ओ च = ओकारश्च, उदात्तः= उदात्तो भवति। ६-१-१८० तित् स्वरितम् इति स्वरापवादः। उदाहरणे पूर्ववत् समासः।
४-४-१०९ सोदरात्=सोदरशब्दप्रकृतिकात् सप्तम्यन्तात्, शयितः (४-४-१०८) यः= यप्रत्ययो भवति। **सोदर्यः** पूर्ववत् समासे ६-३-८८ विभाषोदरे- इति समानस्य सादेशे सोदरशब्दाद् यदपवादो यः। ओ चोदात्त इति नानुवर्तते; पुनः प्रत्ययविधानसामर्थ्यात्। सादेशाभावे तु अन्तोदात्तो ऽयम्। पूर्वसूत्रोदाहरणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-११० भवे छन्दसि ॥११८, १४४

मेघ्याय च विद्युत्याय च नमः ।

४-४-१११ पाथोनदीभ्यां डचण् ॥

तमुत्वा पाथ्यो वृषा । चनो दधीति नाद्यो गिरो मे ।

४-४-११२ वेशन्तहिमवद्भ्यामण् ॥

वैशन्तीभ्यः स्वाहा । हैमवतीभ्यः स्वाहा ।

४-४-११३ स्रोतसो विभाषा डचड्डचौ ॥

स्रोत्यः । स्रोतस्यः ।

४-४-११४ सगर्भसयूथसनुताद् यन् ॥

अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । यो नः सनुत्यः ।

४-४-११५ तुग्राद् घन् ॥

त्वमग्ने वृषभस्तुग्रियाणाम् ।

४-४-११६ अग्राद् यत् ॥११७

अग्न्यम् ।

४-४-११७ घच्छौ च ॥

अग्रियम् । अग्रीयम् ।

४-४-११८ समुद्राभ्राद् घः ॥

समुद्रियाणां नदीनाम् । अभ्रियस्येव घोषः ।

भवाधिकारः पूर्णः । छन्दसीत्यनुवर्तत एव ।

४-४-११९ बर्हिषि दत्तम् ॥

बर्हिष्येषु निधिषु प्रियेषु ।

४-४-११० भवे- तत्र (४-४-९८) भवे= भवे इत्यर्थे, यत् (४-४-७५) छन्दसि= वेदे । अत्र काशिका- अणादीनां घादीनां चापवादः । सति दर्शने तेऽपि भवन्ति, सर्वविधीनां छन्दसि व्यभिचारादिति । छन्दसीत्यापादपरिसमाप्तेरधिक्रियते ।

४-४-१११ पाथोनदीभ्याम्= पाथस् नदी इति शब्दप्रकृतिकात् तत्र (४-४-९८) भवे (४-४-११०), डचण्=डचणप्रत्ययो भवति, छन्दसि (४-४-११०) ।

४-४-११२ वेशन्तहिमवद्भ्याम्= वेशन्तहिमवच्छब्दप्रकृतिकात्, तत्र (४-४-९८) भवे (४-४-११०) अण्= अण् प्रत्ययो भवति, छन्दसि (४-४-११०) । **वेशन्तः** पल्वलम् । तत्र भवा वैशन्त्य आपः ।

४-४-११३ स्रोतसः = स्रोतश्शब्दप्रकृतिकात्, तत्र (४-४-९८) भवे (४-४-११०) विभाषा= वा, डचड्डचौ=डचत् डच इति प्रत्ययौ भवतः, छन्दसि (४-४-११०) । पक्षे भवे (४-४-११०) इति यत् । डचे ३-१-३ आद्युदात्तश्च- इत्यन्तोदात्तत्वं, डचति ६-१-१८० तित्स्वरितम् इति स्वरितान्तत्वम् । डित्वाट्टिलोपः । यत्प्रत्यये तु न टिलोपः ।

४-४-११४ सगर्भ- सयूथ- सनुतात्= सगर्भ- सयूथ- सनुतशब्दप्रकृतिकात्, तत्र (४-४-९८) भवे (४-४-११०) यन्= यन् प्रत्ययो भवति, छन्दसि (४-४-११०) । गर्भादिभिः समानशब्दस्य १-२-५८ पूर्वापर... इति कर्मधारये, नुतशब्देन बहुव्रीहौ वा समासे ६-३-८४ समानस्य.... इति समानस्य सादेशे सगर्भादिभ्यो यन् । नित्त्वादाद्युदात्तत्वम् । तिति तु ६-१-१८० तित्स्वरितम् इति स्वरितान्तत्वं स्यात् ।

४-४-११५ तुग्रात् = तुग्रशब्दप्रकृतिकात्, तत्र (४-४-९८) भवे (४-४-११०) घन् = घन् प्रत्ययो भवति, छन्दसि (४-४-११०) ।

४-४-११६ अग्रात्= अग्रशब्दप्रकृतिकात्, तत्र (४-४-९८) भवे (४-४-११०) यत्= प्रत्ययो भवति, छन्दसि (६-४-११०) । ४-४-११० भवे छन्दसि इत्येव सिद्धे पुनर्यद्विधानं घच्छाभ्याम् (४-४-११७) बाधो माभूदित्यर्थम् ।

४-४-११७ घच्छौ- अग्रात् (४-४-११६) तत्र (४-४-९८- भवे (४-४-११०), घच्छौ च= घ छ इति च प्रत्ययौ भवतः, छन्दसि (४-४-११०) ।

४-४-११८ समुद्राभ्रात्= समुद्र अभ्र इतिशब्दप्रकृतिकात्, तत्र (४-४-९८) भवे (४-४-९८- भवे (४-४-११०), घः= घप्रत्ययो भवति, छन्दसि (४-४-११०) ।

४-४-११९ बर्हिषिः= बर्हिः शब्दप्रकृतिकात् सप्तम्यन्तात्, दत्तम्= दत्तमित्यर्थे, यत् (४-४-७५) छन्दसि (४-४-११०) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-१२० दूतस्य भागकर्मणी ॥

दूतस्य भागः= दूत्यः । दूतस्य कर्म= दूत्यम् ।

४-४-१२१ रक्षोयातूनां हननी ॥

रक्षसां हननी= रक्षस्या तनूः । यातूनां हननी= यातव्या ।

४-४-१२२ रेवतीजगतीहविष्याभ्यः प्रशस्ये ॥

रेवत्याः प्रशंसनम्= रेवत्यम् । जगत्यम् । हविष्यम् ।

४-४-१२३ असुरस्य॑ स्वम् ॥ १२४

असुर्यं देवेभिर्धायि विश्वम् ।

४-४-१२४ मायायामण् ॥

आसुरी माया ।

४-४-१२५ तद्वा॑नासा॑मुपधानो॑ मन्त्र॑ इतीष्टकासु॑ लुक्॑ च मतोः ॥१२७

वर्चस्वानुपधानो मन्त्र आसामिष्टकानां वर्चस्याः । ऋतव्याः ।

४-४-१२६ अश्विमानण् ॥

अश्विमानुपधानो मन्त्र आसामिष्टकानाम्= आश्विन्यः । आश्विनीरुपदधाति ।

४-४-१२० दूतस्य= दूतशब्दप्रकृतिक- षष्ठचन्तात्, भागकर्मणी= भागः (अंशः) कर्म (क्रिया) इत्यर्थयोः, यत् (४-४-७५) छन्दसि (४-४-११०) ।

४-४-१२१ रक्षोयातूनाम्= रक्षस्यातुशब्दप्रकृतिकषष्ठचन्तात्, हननी= हननी इत्यर्थे, यत् (४-४-७५) छन्दसि (४-४-११०) । **हननी**- हन्यतेऽ नयेति करणे ल्युँट् । टित्त्वान् ङीप् । **यातव्या** ६-४-१४६ ओर्गुण... इति गुणः । ६-१-७६ वान्तो... इत्यवादेशः ।

४-४-१२२ रेवती.... हविष्याभ्यः= रेवतीजगतीहविष्याशब्दप्रकृतिकषष्ठचन्तात्, प्रशस्ये= प्रशंसनमित्यर्थे, यत् (४-४-७५) छन्दसि (४-४-११०) । सूत्रे प्रशस्य इति प्रपूर्वकशंस्धातोः ३-३-११३ कृत्य... इति सूत्रेण बाहुलकाद् भावे क्यप् । अत एव कृद्योगलक्षणा षष्ठी भवतीति षष्ठचन्तादिति समर्थविभक्तिः षष्ठी दर्शिता । हविष्यम् ६-४-१४८ यस्ये... इत्याल्लोपे ८-४-६३ हलो... इति यकारलोपः ।

४-४-१२३ असुरस्य= असुरशब्दप्रकृतिक- षष्ठचन्तात्, स्वम्= आत्मीयमित्यर्थे यत् (४-४-७५), छन्दसि (४-४-११०) ।

४-४-१२४ माया- असुरस्य (४-४-१२३) स्वम् (४-४-१२३) अण्, = अण् प्रत्ययो भवति, मायायाम्= आत्मीयपदार्थे, मायायां गम्यमानायाम्, छन्दसि (४-४-११०) । पूर्वसूत्रापवादः ।

४-४-१२५ तद्वा- उपधानो मन्त्रः= उपधानो मन्त्र इत्युपाधिकात्, तद्वान्= मत्वन्तप्रकृतिक- प्रथमान्तात्, आसाम्= आसामित्यर्थे, यत् (४-४-७५) मतोः= मतुँप्प्रत्ययस्य, लुक् च= लुगपि भवति, इष्टकासु= आसामित्यनेन निर्दिष्टासु इष्टकासु गम्यमानासु, छन्दसि (४-४-११०) । अत्र काशिका- इतिकरणो नियमार्थः । अनेकपदसंभवे ऽपि केनचिदेव पदेन तद्वान्मन्त्रो गृह्यते, न सर्वेणेति । अत्रैव न्यासः- असतीहेतिकरणे मन्त्रे बहूनां पदानां संभवे सर्वेण पदेन तद्वान् मन्त्रो गृह्यते । अस्मिँस्तु सति तेन नियमार्थेन येनैव पदेन तद्वता मन्त्रेणेष्टकोपलभ्यते, तेनैव सर्वो मन्त्रो गृह्यत इत्येतदुपपन्नं भवतीति । **वर्चस्वान्**- वर्चः शब्दो यस्मिन् मन्त्रे ऽस्ति स वर्चस्वान् भूतं च स्थ भव्यं चेत्यादिकः । एवम् ऋतुशब्दो यस्मिन् मन्त्रे ऽस्ति स ऋतुमान् मधुश्च माधवश्चेत्यादिकः ।

४-४-१२६ अश्वि- उपधानो मन्त्र (४-४-१२५) इत्युपाधिकात्, अश्विमान्= अश्विमच्छब्द प्रकृतिकप्रथमान्तात्, आसाम् ४-४-१२५) इत्यर्थे, अण्,= अण् प्रत्ययो भवति, मतोंश्च+लुक्+ इष्टकासु (४-४-१२५) छन्दसि (४-४-११०) । **आश्विन्यः**- मतुँपो लुकि ६-४-१६४ इनण्यनपत्ये इति प्रकृतिभावान्न टिलोपः । लुक् शब्देन इन्प्रत्ययस्यापि लुक् तु न । पूर्वसूत्रान्मतोँरित्यनुवृत्तिसामर्थ्यात् । अत एवा ऽत्रा ऽनुवृत्त्यर्थं पूर्वसूत्रे मतोँर्ग्रहणं चरितार्थम् । अन्यथा पूर्वसूत्रे मत्वन्ताद् विधानाल्लुगित्यनेन मतोँरेव संभवे पुनर्मतुँग्रहणं व्यर्थं स्यात् । यत् प्रत्ययस्य तु विधानारम्भसामर्थ्यान्न भवेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-१२७ वयस्यासु मूर्ध्नो मतुँप् ॥
मूर्धन्वतीरुपदधाति ।

४-४-१२८ मत्वर्थे मासतन्वोः ॥१३२
नभांसि= अभ्राणि सन्त्यस्मिन् नभस्यो मासः । ओजो ऽस्यामस्ति ओजस्या तनूः ।

४-४-१२९ मधोर्ञ च ॥
माधवो माधव्यो वा मासः । माधवा माधव्या वा तनूः ।

४-४-१३० ओजसोऽहनि यत्खौ ॥
ओजस्यमहः । ओजसीनमहः ।

४-४-१३१ वेशोयशआदेर्भगाद् यल् ॥१३२
वेशोभगो ऽस्त्यस्य= वेशोभग्यः । यशोभग्यः ।

४-४-१३२ ख च ॥१३३
वेशोभगीनः । यशोभगीनः ।

४-४-१३३ पूर्वैः कृतमिनयौ च ॥
पथिभिः पूर्विणैः । पूर्व्यैः । पूर्वीणैः ।

४-४-१३४ अद्भिः सँस्कृतम् ॥
अद्भिः सँस्कृतम्= अप्यं हविः ।

४-४-१३५ सहस्रेण संमितौ घः ॥१३६
सहस्रेण संमितः= (तुल्यः) सहस्रियः ।

४-४-१२७ वयस्यासु= वयश्शब्दवन्मन्त्रोपयेयासु इष्टकासु वाच्यासु, उपधानो मन्त्र (४-४-१२५)=इत्युपाधिकात्, मूर्ध्नः=मत्वन्त-मूर्ध (न्)(मूर्धवत् इति) शब्दप्रकृतिकप्रथमान्तात्, आसाम् (४-४-१२५) मतुँप् = मतुँप् प्रत्ययो भवति मतोँश्च+लुक् + इष्टकासु (४-४-१२५), छन्दसि (४-४-११०)। यस्मिन् मन्त्रे वयश्शब्दो मुर्ध (न्) शब्दश्च वर्तते स वयस्वानपि भवति मूर्धन्वानपि । यतो (४-४-१२५) ऽपवादः । अत्र काशिका-मूर्धन्वत इति वक्तव्ये मूर्ध्न इत्युक्तम्-मतुँपो लुकं भाविनं चित्ते कृत्वा इति । उदाहरणे ८-२-१६ अनो... इति नुँट् ।

४-४-१२८ मत्वर्थे= मतुँबर्थे (अस्तीत्युपाधिकात् प्रथमान्तात्, अस्य अस्मिन्नित्यर्थे, ईत भावः, ५-२-९४ तदस्यास्त्यस्मिन्निति मतुँप् इत्युपदेशात्) यत् (४-४-७५) मासतन्वोः= मासे तन्वां च वाच्ययोः, छन्दसि (४-४-११०)।

४-४-१२९ मधोः=मधुशब्दप्रकृतिकप्रथमान्तात्, मत्वर्थे+ मासतन्वोः (४-४-१२८) ञ=ञप्रत्ययो भवति, यत् (४-४-७५) च ।

४-४-१३० ओजसः= ओजश्शब्दप्रकृतिकप्रथमान्तात्, मत्वर्थे (४-४-१२८) यत्खौ= यत् खश्च प्रत्ययौ, भवतः,अहनि= दिने वाच्ये, छन्दसि (४-४-११०) ।

४-४-१३१ वेशोयशआदेः= वेशस् यशस् इत्यादिकात्, भगात्= भग इत्यन्तात् प्रातिपपदिकात् (वेशोभग यशोभग प्रकृतिक- प्रथमान्तादिति भावः) मत्वर्थे (४-४-१२८) यल्= यल् प्रत्ययो भवति, छन्दसि (४-४-११०)। लित्त्वम् ६-१-१८८ लिति इत्युदात्तार्थम् ।

४-४-१३२ ख च- वेशोयशआदेर्भगात् (४-४-१३१) मत्वर्थे (४-४-१२८) ख=ख प्रत्ययो भवति, छन्दसि (४-४-११०)। योगविभागो यथासंख्यनिरासार्थ उत्तरार्थश्च। चकाराद् यत् इति काशिका ।

४-४-१३३ पूर्वैः= पूर्वशब्दप्रकृतिकतृतीयान्तात्, कृतम्= कृतमित्यर्थे, इनयौ= इन य इत्येतौ प्रत्ययौ, ख (४-४-१३२) च भवन्ति, छन्दसि (४-४-११०)। अत्र काशिका- पूर्वैः= बहुवचनान्तेन पूर्वपुरुषा उच्यन्ते, इति । उदाहरणेषु पूर्विणेभिरितयाद्यपि बोध्यम् । ७-१-१० बहुलं छन्दसीति सूत्रात् ।

४-४-१३४ अद्भिः= अप्शब्दप्रकृतिकतृतीयान्तात्, सँस्कृतम्=सँस्कृतमित्यर्थे, यत् (४-४-७५) छन्दसि (४-४-११०) ।

४-४-१३५ सहस्रेण= सहस्रशब्दप्रकृतिकतृतीयान्तात्, संमितौ= संमित (तुल्य) इत्यर्थे, घः= घप्रत्ययो भवति, छन्दसि (४-४-११०) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४-४-१३६ मतौ च ॥

सहस्रमस्यास्ति= सहस्रियः ।

४-४-१३७ सो॑ममर्हति य॒ः ॥१३८

सोममर्हन्ति= सोम्या ब्राह्मणाः । यज्ञार्हा इत्यर्थः ।

४-४-१३८ मये॑ च ॥१४०

सोम्यं मधु पिबन्ति । सोममयमित्यर्थः ।

४-४-१३९ मधोः ॥

मधव्यान् स्तोकान् । मधुमयानित्यर्थः ।

४-४-१४० वसोः समूहे च ॥

वसव्यः समूहो मयडर्थो वा ।

(अक्षरसमूहे छन्दस उपसंख्यानम्)

ओश्रावयेति चतुरक्षरम्, अस्तु श्रौषडिति चतुरक्षरम्, यजेति द्व्यक्षरम्, ये यजामह इति

पञ्चाक्षरम्, द्व्यक्षरो वषट्कारः, एष वै सप्तदशाक्ष रश्छन्दस्यः ।

(वसुशब्दादपि यद् वक्तव्यः)

हस्तौ गृहीतस्य बहुभिर्वसव्यैः । वसुभिरित्यर्थः ।

अग्निरीशे वसव्यस्य । वसोरित्यर्थः ।

४-४-१४१ नक्षत्राद् घः ॥

नक्षत्रियेभ्यः स्वाहा ।

४-४-१४२ सर्वदेवात् ताति॑ल् ॥१४४

सर्वतातिः । देवतातिः ।

४-४-१४३ शिवशमरिष्टस्य करे ॥१४४

शिवं करोति= शिवतातिः । शन्तातिः ।

अरिष्टतातिः ।

४-४-१४४ भावे च ॥

शिवस्य भावः= शिवतातिः ।

शन्तातिः । अरिष्टतातिः ।

इति चतुर्थाऽध्याये चतुर्थः पादः ।
इति चतुर्थोऽध्यायः ।

४-४-१३६ मतौ= मतुँबर्थे, सहस्रशब्दाद् घः (४-४-१३५) छन्दसि (४-४-११०) ।

४-४-१३७ सोमम्= सोमशब्दप्रकृतिकद्वितीयान्तात्, अर्हति= अर्हतीत्यर्थे, यः= यप्रत्ययो भवति, छन्दसि (४-४-११०) । यति प्रकृते यविधानं स्वरार्थम् ।

४-४-१३८ मये= मयडर्थे, सोमशब्दाद्, यः (४-४-१३७) छन्दसि (४-४-११०) । आगतविकारावयव- प्रकृता मयडर्थाः ४-२-८२ मयट् च ४-३-१४१ मयड्वैतयो... ५-४-२१ तत्प्रकृत... इत्युपदेशात् । समर्थविभक्तिश्च यथायोग्यम् । आद्ये पञ्चमी, ततो द्वयोः षष्ठी, अन्त्ये प्रथमा ।

४-४-१३९ मधोः= मधुशब्दात्, मये (४-४-१३८) यत् (४-४-७५) छन्दसि (४-४-११०) । यस्तु निवृत्तः पूर्वसूत्रे चानुकृष्टत्वात् । चानुकृष्टं नोत्तरत्रेति हि परिभाषा ।

४-४-१४० वसोः= वसुशब्दात्, समूहे= समूहेऽ र्थे, मये (४-४-१३८) च, यत् (४-४-७५) छन्दसि (४-४-११०) । **वसुशब्दा-स्वार्थे** ।

४-४-१४१ नक्षत्रात्= नक्षत्रशब्दात्, घः= घप्रत्ययो भवति, स्वार्थे, छन्दसि (४-४-११०) । समूहे इति नानुवर्तते । अनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवन्ति ।

४-४-१४२ सर्वदेवात्= सर्वदेवशब्दाभ्याम्, तातिल्= तातिल् प्रत्ययो भवति, स्वार्थे, छन्दसि (४-४-११०) ।

४-४-१४३ शिवशमरिष्टस्य= शिव शम् अरिष्ट इति प्रकृतिकसमर्थात्, करे= करोतीत्यर्थे, तातिल् (४-४-१४२) छन्दसि (४-४-११०) । कर इति पचाद्यजन्तम् । तद्योगे कर्मणि षष्ठी ।

करोतीति तिङन्ते द्वितीयान्तम् । अतो विभक्तिर्न निर्दिष्टा । तेन शिवस्य करः शिवं करोतीति वा विग्रहः ।

४-४-१४४ भावे- शिवशमरिष्टस्य (४-४-१४३) भावे= भावेऽ र्थे, तातिल् (४-४-१४२) छन्दसि (४-४-११०) ।

इति चतुर्थाऽध्याये चतुर्थः पादः ।
इति चतुर्थोऽध्यायः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पञ्चमोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पञ्चमाध्याये

प्रथमः पादः

५–१–१ प्राक् क्रीताच्छः ४, १६

५–१–२ उगवादिभ्यो यत् ॥१६

(नाभि नभं च) ग.सू.

नभ्योऽक्षः। नभ्यमञ्जनम्। रथनाभावेवेदम्। शरीरावयववाचिनस्तु ५–१–६ शरी...इति यत्। नाभ्यम्।

(शुनः सम्प्रसारणं वा च दीर्घत्वं तत्सन्नियोगेनचान्तोदात्तत्वम्) ग.सू.।

शूनयम्, शुन्यम्।

(ऊधसोऽनँङ् च) ग.सू.

ऊधन्यः।

५–१–३ कम्बलाच्च संज्ञायाम् ॥१६

५–१–४ विभाषा हविरपूपादिभ्य : ॥१६

५–१–५ तस्मै हितम् ॥१५

वत्सेभ्यो हितो वत्सीयो गोधुक्।

शङ्कवे हितं शङ्कव्यं दारु। गवे हितं गव्यम्। कम्बल्यम् ऊर्णापलशतम्। असंज्ञायां तु कम्बलीया ऊर्णा। पुरोडाश्यास्तण्डुला:, पुरोडाशीया:। अपूप्यम्, अपूपीयम्। हविश्शब्दात्तु गवादिपाठान्नित्यं यत्। हविष्यम्।

५–१–१ प्राक् क्री ४–४–७५ प्राग्घिताद् यत् – सूत्रानन्तरं प्राक् क्री... उग... इमे सूत्रे अग्रिमसूत्रद्वयेन सहैव विवेच्ये।

५–१–३ कम्ब ...५–१–४ विभा – ४–४–७५ प्राग्घि... सूत्रानन्तरं सूत्रे इमे पूर्वसूत्राभ्यां सहाऽधोनिर्दिष्टरूपेण श्यामपाट्यां लिखित्वा भावं बोधयेत्। यथा –

५–१–१ प्राक् क्रीताच्छ : ॥

५–१–२ उगवादिभ्यो यत् ॥

५–१–३ कम्बलाच्च संज्ञायाम् ॥

५–१–४ विभाषा हविरपूपादिभ्य : ॥

वत्सा : (५-१-३६ तेन क्रीतम् इति सूत्रप्रदर्शनपुरस्सरम्) यथा प्राग्दीव्यतीयेष्वर्थेषु प्रातिपदिकभेदेन प्रत्ययभेदा: प्रदर्शिता :। तथैव ५-१-५ तस्मै हितम् इति सूत्रादारभ्य ५-१-३६ तेन क्रीतम् इति सूत्रात् प्राग्वर्तिभिः सूत्रैः प्रातिपदिकभेदेन प्रत्यया भिन्ना विधीयन्ते। तथाहि क्रीतात् प्राक् (५-१-१)=५-१-३६ तेन क्रीतम्, इति सूत्रात् प्राक्, छ:=छ प्रत्ययो भवति। [सम्यगवधेयम् -५-१-१८ प्राग् वतेष्ठञ् इति सूत्रात् प्रागेव छयतावधिक्रियेते ततोऽग्रे प्रत्ययान्तराणामधिकारात्। प्राक् क्रीतादित्युक्तिस्तु प्रत्यय-विधायकसूत्राभिप्रायेणेति] किन्तु उगवादिभ्यः (५-१-२)=उवर्णान्तेभ्यो गोप्रभृतिगणपठितप्राति-पदिकेभ्यश्च, यत्=यत् प्रत्ययो भवति। कम्बलात् (५-१-३)=कम्बलप्रातिपदिकात्, संज्ञायाम्=संज्ञायां गम्यमानायाम्, यत् (५-१-२) प्रत्ययो भवति। हविरपूपादिभ्यः (५-१-४)=हविर्विशेषवाचि (पुरोडाशप्रभृति) प्रादिपदिकेभ्योऽपूपादिगण-पठितप्रातिपदिकेभ्यश्च, विभाषा = विकल्पेन, यत् (५–१–२ प्रत्ययो भवति। यत् प्रत्ययश्छप्रत्ययस्याऽपवादः। इति। एतदर्थोपदेशक्रमे शिक्षको गवादिगणे हविश्शब्दं दर्शयित्वा हविश्शब्दात् ५–१–२ उग... सूत्रबलाद् नित्यं यत् प्रत्ययो भवति; अतः ५–१–४ विभाषा हवि... सूत्रे हविश्शब्देन हविर्विशेषवाचिशब्दा गृह्यन्ते, इति बोधयेत्। अथ ५–१–५ तस्मै... इति सूत्रमुपदिशेत्।

५–१–५ तस्मै –५–१–४ विभाषा हवि...सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अस्य सूत्रस्यार्थं यथासंभवं छात्रैः प्रतिपादयेत्। यथा– तस्मै = चतुर्थ्यन्तात् समर्थात् प्रातिपदिकात्, हितम् = हितमित्यर्थे प्रत्यया भवन्ति। अर्थाच्चतुर्थ्यन्तेभ्य उवर्णान्तेभ्यो गोप्रभृतिगणपठितप्रातिपदिकेभ्यश्च, यत् प्रत्ययो भवति, चतुर्थ्यन्तात् कम्बलप्रातिपदिकात् संज्ञायां यत् प्रत्ययो भवति, असंज्ञायां छप्रत्ययो भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-६ शरीरावयवाद् यत् ॥७

दन्त्यम् । कण्ठ्यम् ।

५-१-७ खलयवमाषतिलवृषब्रह्मणश्च ॥

खल्यम् । यव्यम्, माष्यम्, तिल्यम् ।

वृष्यम् । ब्रह्मण्यम् ।

५-१-८ अजाविभ्यां थ्यन् ॥

अजथ्या यूथिः । अविथ्या ।

५-१-९ आत्मन्विश्वजनभोगोत्तरपदात् खः ॥

आत्मनीनम् । विश्वजनीनम् ।

कर्मधारयादेवेष्यते ।

षष्ठीसमासाद् बहुव्रीहेश्च छ एव भवति ।

विश्वजनीयम् । मातृभोगीणः । पितृभोगीणः ।

(पञ्चजनादुपसंख्यानम्)

पञ्चजनीनम् अत्रापि कर्मधारयादेवेष्यते ।

अन्यत्र पञ्चजनीयम् ।

(सर्वजनाट्ठञ् खश्च)

सार्वजनिकम् । सर्वजनीनम् ।

अत्रापि कर्मधारयादेव । अन्यत्र सर्वजनीयम् ।

(महाजनाट्ठञ्)

माहाजनिकम् । तत्पुरुषादेव । बहुव्रीहेस्तु छ एव । महाजनीयम् ।

(राजाचार्याभ्यां तु नित्यम्)

राजभोगीनः ।

(आचार्यदणत्वं च) ग.सू.

आचार्यभोगीन : ।

५-१-१० सर्वपुरुषाभ्यां णढञौ ॥

(सर्वाण्णो वेति वक्तव्यम्)

सार्वम् । सर्वीयम् ।

हविर्विशेषवाचि (पुरोडाशप्रभृति) – प्रातिपदिकेभ्यो ऽपूपादिगणपठितप्रातिपदिकेभ्यश्च विकल्पेन यत् प्रत्ययो भवति, पक्षान्तरे छप्रत्ययो भवति । अन्येभ्यः प्रातिपदिकेभ्यश्छप्रत्ययो भवतीति ।

अथ – "वत्साय हितम् = वत्साय (वत्स+ङे) छ" इति श्यामपाट्चां लिखित्वा अर्थाद् वत्स+ङे इति चतुर्थ्यन्ताद् हितमित्यर्थे छप्रत्ययो जात इति बोधयित्वा शेषप्रक्रियायां पूर्ववच्छात्रैः साध्यमानायां "वत्स+छ" इति श्यामपाटचां लिखित्वा ७-१-२ आयनेयीनीयियः... सूत्रमुपदिशेत् ।

५-१-६ शरीरावयवात् = शरीरावयववाचिशब्दप्रकृतिकात्, तस्मै+हितम् (५-१-५ यत्= यत् प्रत्ययो भवति । छस्यापवादः ।

५-१-७ खल... ह्मण : = खल-यव-माष-तिल-वृष-ब्रह्म (न्) शब्दप्रकृतिकात्, तस्मै+हितम् (५-१-५) यत् (५-१-६) ।

ब्रह्मण्यम् ६-४-१६८ ये चा... इति प्रकृतिभावः । अत्र काशिका-वृष्णे हितम्, ब्राह्मणेभ्यो हितमिति वाक्यमेव भवति । छप्रत्ययो ऽपि न भवति, अनभिधानादिति । चकारोऽनुक्तसमुच्चयार्थ : , रथाय हिता रथ्या, इति च । सूत्रे तु वृष-शब्दो ऽकारान्तः ।

५-१-८ अजाविभ्याम् = अज अवि इति शब्दप्रकृतिकात्, तस्मै+हितम् (५-१-५) थ्यन्=थ्यन्प्रत्ययो भवति । लिङ्गविशिष्टपरिभाषया, अजाशब्दादपि थ्यनि ६-३-३५ तसिँलादिष्वा... इति पुंवद्भावे रूपम्-अजथ्या, एव ।

५-१-९ आत्मन् ... पदात् = आत्मन् विश्वजन इति शब्दप्रकृतिकाद् भोगोत्तरपदकप्रकृतिकाच्च, तस्मै+हितम् (५-१-५) खः = खप्रत्ययो भवति । **आत्मनीनम्** ६-४-१६९ आत्माध्वानौ खे – इति प्रकृतिभाव : ।

पञ्चजनात्=पञ्च्चजनप्रकृतिकात्, तस्मै+हितम् (५-१-५) खः (५-१-९) ।

राजा-नित्यम् = राजाचार्याभ्यां भोगोत्तरपदाभ्यामेव प्रत्ययो भवति स च खः । केवलाभ्यां राजाचार्याभ्यां प्रत्यय एव न भवति, इति भावः । तेन राज्ञे हितम्, आचार्याय हितमिति वाक्ये एव तिष्ठतः ।

५-१-१० सर्वपुरुषाभ्याम् = सर्व-पुरुषशब्दप्रकृतिकात्, तस्मै+हितम् (५-१-५) णढञौ = ण ढञ् इति प्रत्ययौ भवतः । यथासंख्यम् ।

सर्वा ... वेति-पक्षे छ : (५-१-५) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(पुरुषाद् वधविकारसमूहतेनकृतेष्विति वक्तव्यम्)
पुरुषस्य वधः, विकारः, समूहो वा पौरुषेय :।
पुरुषेण कृतः पौरुषेयो ग्रन्थः।

५–१–११ माणवचरकाभ्यां खञ् ॥

माणवीनम्। चारकीणम्।

५–१–१२ तदर्थं विकृते : प्रकृतौ ॥१५

अङ्गारेभ्यो हितानि = अङ्गारीयाणि काष्ठानि।
शङ्कव्यं दारु।

५–१–१३ छदिरुपधिबलेर्ढञ् ॥

छदिषे हितानि छादिषेयाणि तृणानि।
बालेयास्तण्डुला :।
(उपधिशब्दात् स्वार्थ इष्यते)
उपधि : = रथाङ्गम्। तदेव औपधेयम्।

५–१–१४ ऋषभोपानहोर्ञ्यः ॥

आर्षभ्यो वत्सः। औपानह्यो मुञ्जः।
चर्मण्यपि प्रकृतित्वेन विवक्षिते
पूर्वविप्रतिषेधादयमेवेष्यते – औपानह्यं चर्म।

५–१–१५ चर्मणो ऽञ् ॥

वर्ध्र्यै हितं वार्ध्रं चर्म। वारत्रं चर्म।

५–१–१६ तदस्य तदस्मिन् स्यादिति ॥१७

प्राकार आसां स्यादिति= प्राकारीया इष्टकाः।
प्रासादो ऽस्य स्यादिति प्रासादीयं दारु।
प्राकारो ऽस्मिन् स्यादिति प्राकारीयो देशः।
इति शब्दो विवक्षार्थः। तेनेह न – प्रासादो देवदत्तस्य स्यादिति।

५–१–१७ परिखाया ढञ् ॥

परिखा ऽस्यां स्यात् पारिखेयी भूमि :।
छयतोः पूर्णो ऽवधि :।
इतः परं प्रत्ययान्तराण्युपदिश्यन्ते।

५–१–१८ प्राग् वतेँष्ठञ् ॥१०८

पुरुषात् = पुरुषशब्दप्रकृतिक – समर्थविभक्त्यन्तात्, वध... कृतेषु = वध–विकार–समूह–तेनकृत इत्येतेष्वर्थेषु, ढञ् प्रत्ययो भवति।

५-१-११ माण... काभ्याम् = माणव–चरकशब्दप्रकृतिकात्, तस्मै+हितम् (५–१–५), खञ् = खञ् प्रत्ययो भवति।

५-१-१२ तदर्थम् – तदितिसर्वनाम्ना विकृतिः परामृश्यते। तस्यै इदं तदर्थमिति सामान्ये नपुंसकम्। सौत्रत्वाद् व्यत्ययेन सप्तम्यर्थे प्रथमा। तथा च तदर्थमित्यस्य तदर्थायामित्यर्थः। विकृत्यर्थायामिति यावत्। विकृते : = विकृतिवाचिशब्दप्रकृतिकात्, तस्मै+हितम् (५–१–५) प्रत्ययाः, तदर्थं+प्रकृतौ= विकृत्यर्थायां प्रकृतौ वाच्यायाम्।

५-१-१३ छदि – विकृते : (५–१–१२)+ छदि... लेः = विकृतिवाचि – छदिष् उपधि बलि इति शब्दप्रकृतिकात्, तस्मै+हितम् (५–१–५) ढञ्= ढञ्प्रत्ययो भवति, तदर्थं +प्रकृतौ (५–१–१२)।

५-१-१४ ऋष – विकृतेः +ऋषभोपानहोः = विकृतिवाचि – ऋषभ उपानह् इति शब्दप्रकृतिकात् तस्मै +हितम् (५–१–५) ञ्यः = ञ्यप्रत्ययो भवति, तदर्थं + प्रकृतौ (५–१–१२)।

५-१-१५ चर्मण : +विकृतेः (५–१–१२) = चर्मसम्बन्धिविकृतिवाचिशब्दप्रकृतिकात्, तस्मै+ हितम् (५–१–५) अञ् =अञ् प्रत्ययो भवति, तदर्थं+प्रकृतौ (५–१–१२)। सूत्रे चर्मण इति षष्ठ्यन्तम्। पञ्चम्यन्ते तु चर्म (न्) शब्दादेव स्यात्।

५-१-१६ तद – स्यादिति = स्यादित्युपाधिकात्, तत् = प्रथमान्तात् अस्य = अस्येत्यर्थे, तत् = प्रथमान्तात्, अस्मिन् = अस्मिन्नित्यर्थे प्रत्ययाः। स्यादिति संभावनायां लिंङ्। द्विस्तद्ग्रहणं स्पष्टप्रतिपत्त्यर्थम्।

५-१-१७ परि – स्यादिति (५–१–१६) परिखायाः = परिखाशब्दप्रकृतिकात्, तत् + अस्य तत्+अस्मिन् (५–१–१६) ढञ् = ढञ् प्रत्ययो भवति।

५-१-१८ प्राग्व – ६–१–७६ वान्तो ... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। वतेंः प्राक् = ५–१–११४ तेन... (सूत्रं दर्शयन्) इति सूत्रात् प्राक्, ठञ् = ठञ् प्रत्ययो भवति। किन्त्वितो ऽग्रे ठञो ऽपवादभूतानि प्रत्ययान्तराण्यप्यधिक्रियन्ते। तथाहि, इति वदन् ५–१–१९ आर्हादगोपुच्छ... सूत्रमुपदिशेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-१९ आर्हादगोपुच्छसंख्यापरिमाणाट् ठक् ॥ ६४

५-१-२० असमासे निष्कादिभ्यः ॥२१

नैष्किकम्। समासे तु ठञ् इति फलितम्। परमनैष्किकः। सूत्रेऽस्मिन्नसमासग्रहणं ज्ञापयति – इतः प्राक् तदन्तविधिरिति। तेन ५-१-२ उगवादिभ्यो यत् इति गोशब्दाद्यन्तादपि– यत्। सुगव्यम्। ५-१-४ विभाषा हविरपूपादिभ्य इत्यपूपाद्यन्तादपि वा यत्। यवापूप्यम्, यवापूपीयम्। ५-१-६ शरीरावयवाद् यत्, इति शरीरावयववाच्यन्तादपि यत्। राजदन्त्यम्। इत्यादि सिद्धम्।

(इत ऊर्ध्वं तु संख्यापूर्वपदानां तदन्तग्रहणं प्राग्वतेरिष्यते लुगन्तायास्तु प्रकृतेर्नेष्यते) पारायणिकः। द्वैपारायणिक :। लुगन्तायास्तु प्रकृतेर्नेष्यत इत्युक्तेर्नेह- द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् द्विशूर्पेण क्रीतं द्विशौर्पिकम्।

५-१-२१ शताच्च ठन्यतावशते ॥

शत्यः। शतिक :। अशते इत्युक्तेर्नेह- शतं परिमाणमस्य शतकः सङ्घः। असमासे इत्यनुवृत्तेर्नेह –द्विशतेन क्रीतं द्विशतकम्

५-१-२२ संख्याया अतिशदन्तायाः कन् ॥ प्र. २४

पञ्चभिः क्रीतः पञ्चकः। बहुकः। गणकः। कतिकः। त्यन्तशदन्तायास्तु साप्ततिकः। चात्वारिंशत्कः।

५-१-१९ आर्हा – ५-१-१८ प्राग् वतेँष्ठञ् – सूत्रानन्तरं सूत्रमिदं पाठ्यम्। आर्हात् = (आर्हादित्यत्र आङ् अभिविधौ ज्ञेयः। यदि तु मर्यादा बोधनीया स्यात्, तदा प्रागित्येव ब्रूयात् प्राग्वतेरिति यथा। अर्हादित्येव वा ब्रूयात्। प्रागित्यस्यानुवृत्यैव सिद्धेः) ५-१-६२ तदर्हति इति सूत्रमभिव्याप्य, अगोपुच्छसंख्यापरिमाणात् = गोपुच्छ-संख्यावाचि – परिमाणवाचि – भिन्नेभ्यः प्रातिपदिकेभ्यः, ठक् = ठक् प्रत्ययो भवति। गोपुच्छ-संख्यावाचि-परिमाणवाचिभ्यष्ठञेवेति फलितम्। ठक् ठञोः स्वरे विशेषः (ठकि ६-१-१६० कितः, इति सूत्रेणान्तोदात्तत्वम्। ठञि ६-१-१९२ ञ्नित्या... इत्याद्युदात्तत्वम्। विषयो ऽयं बालकच्छात्रेभ्यो नोपदेश्यः) अथ ५-१-२० अस... सूत्रमुपदिशेत्।

५-१-२० अस – ५-१-१९ आर्हादगोपुच्छ... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। आर्हात् (५-१-१९), निष्कादिभ्यः = निस्कादिप्रातिपदिकेभ्यः, असमासे=समासाऽभावे, ठक् (५-१-१९)। परमनैष्किकः ७-१-१७, परिमाणान्तस्या... इत्युत्तरपदादिवृद्धिः। **ज्ञापयति** – प्रत्यासत्त्या पाञ्चमिकेष्वेवेदम्। अथ ५-१-२१ शताच्च... सूत्रमुपदिशेत्।

इत – द्वैपारायणिकः। ५-१-७१ पारायण... इति ठञ्। **द्विशूर्पम्**। २-१-५१ तद्धितार्थोत्तर... इति समासः। "द्विशूर्प" इति नेयं लुगन्ता प्रकृतिः। अतो ऽत्र शूर्पान्तात् संख्यापूर्वपदादपि ५-१-२६ शूर्पा... इत्यञ्। तस्य च ५-१-२८ अध्यर्ध... इति लुक्। **द्विशौर्पिकम्**। अत्र लुगन्तप्रकृतित्वेन तदन्तविधेः प्रतिषेधात् ५-१-२६ शूर्पा... इति न प्रवर्तते, किन्तु सामान्यविहितष्ठञ् भवति। ७-३-१७ परि... इत्युत्तरपदादिवृद्धिः।

५-१-२१ शता – ५-१-२० असमासे... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। आर्हात् (५-१-१९) शतात् =शतप्रातिपदिकात्, ठन्यतौ = ठन् यत् प्रत्ययौ भवतः, अशते = शते ऽवाच्ये, असमासे (५-१-२०)। शते वाच्ये समासे च ५-१-२२ संख्या... इति कन्। प्रत्युदाहृतं च तथैव मूले। **शतकः सङ्घः**। अत्र वस्तुतः प्रकृत्यर्थात् प्रत्ययार्थो न भिद्यते। अथ ५-१-२२ संख्याया... सूत्रमुपदिशेत्।

५-१-२२ संख्या – ५-१-२१ शताच्च... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। आर्हात् (५-१-१९) अतिशदन्तायाः = त्यन्तशदन्तभिन्नात्, संख्यायाः = संख्यावाचिप्रातिपदिकात्, कन् = कन् प्रत्ययो भवति। (अतिशदन्ताया इत्यस्य अर्थवत्त्यन्तशदन्तभिन्नात् इत्यर्थो वास्तविकः। तेन **कतिक** इत्यत्र भवत्येव कन् , कतिशब्दस्याऽनर्थकत्यन्तत्वात्) प्रत्युदाहरणयोः सामान्यविहितष्ठञ्। **चात्वारिंशत्कः**। ७-३-५१ इसु... इति ठस्य कः। अथ ५-१-२४ विंशति... सूत्रमुपदिशेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५–१–२३ वतोरिड् वा ॥

तावतिकः, तावत्कः ।

५–१–२४ विंशतित्रिंशद्भ्यां ड्वुँन्नसंज्ञायाम् ॥

योगो ऽयं विभज्यते –

प्र. ५–१–२४ विंशतित्रिंशद्भ्याम् ॥

विंशतिकः । त्रिंशत्क : ।

द्वि ५–१–२४ ड्वुँन्नसंज्ञायाम् ॥

विंशकः । त्रिंशक : ।

५–१–२५ कंसाट्टिँठन् ॥

कंसिक : । कंसिकी ।

(अर्धाच्चेति वक्तव्यम्)

अर्धिक : । अर्धिकी ।

(कार्षापणाट्टिँठन् वक्तव्यः प्रतिरादेशश्च वा)

प्रतिकः । प्रतिकी । कार्षापणिकः ।

कार्षापणिकी ।

५–१–२६ शूर्पादञन्यतरस्याम् ॥

शूर्पेण क्रीतं शौर्पम् । शौर्पिकम् ।

५–१–२७ शतमानविंशतिकसहस्रवसनादण् ॥

शातमानम् । वैंशतिकम् । साहस्रम् ॥

वासनम् ।

५–१–२८ अध्यर्धपूर्वद्विगोर्लुग-संज्ञायाम् ॥ ३५, ३१

अध्यर्धकंसेन क्रीतम् = अध्यर्धकंसम् ।

द्विकंसम् । अध्यर्धशूर्पम् । द्विशूर्पम् ।

असंज्ञायामित्युक्तेर्नेह- पाञ्चकलापिकम् ।

५–१–२३ वतोः : = वतुँप्रत्ययान्तात् परस्य, कनः = कन्प्रत्ययस्य वा = विभाषया, इट् = इडागमो भवति आर्हात् (५–१–१९) । कन इत्यर्थः प्रकरणगम्यः ।

प्र. ५-१-२४ विंश - ५-१-२२ संख्याया... सूत्रानन्तरं सूत्रमिदमधस्तनं. च पाठ्चे । आर्हात् (५-१-१९) विंश... शद्भ्याम् = विंशतित्रिंशत्प्रातिपदिकाभ्याम्, कन् (५-१-२२) ।

द्वि. ५-१-२५ ड्वुँन्न – विंशतित्रिंशद्भ्याम् (प्र. ५–१–२४) आर्हात् (५–१–१९) असंज्ञायाम् = संज्ञायामगम्यमानायाम्, ड्वुँन् = ड्वुँन् प्रत्ययो भवति । संज्ञायां तु पूर्वसूत्रेण कन् इति फलितम् । विंशक : । ६–४–१४२ ति विंशतेरिति तिशब्दस्य लोपे ६–१–९४ अतो गुणे – इति पररूपम् । ६–४–१४८ यस्येति चेत्यकारलोपस्तु न ६–४–२२ असिद्धवदत्राभादिति तिलोपस्या ऽसिद्धत्वात् । त्रिंशकः ६–४–१४३ टेः इति टिलोपः । अथ ५–१–२५ कंसाट्ठिन्–सूत्रमुपदिशेत् ।

५–१–२५ कंसा – ५–१–२४ विंशति... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । आर्हात् (५–१–१९) कंसात् = कंसप्रातिपदिकात्, टिँठन्= टिँठन् प्रत्ययो भवति । अथ ५–१–२६ शूर्पा... सूत्रमुपदिशेत् ।

५–१–२६ शूर्पा – ५–१–२५ कंसा... सूत्रानन्तरं सूत्रमिदं पाठचम्। आर्हात् (५–१–१९) शूर्पात् = शूर्पप्रातिपदिकात्, अन्यतरस्याम् = वा, अञ् = अञ्प्रत्ययो भवति । पक्षे सामान्यविहितष्ठञ् । अथ ५–१–२७ शतमान... सूत्रमुपदिशेत् ।

५–१–२७ शत – ५–१–२६ शूर्पा... सूत्रानन्तरं सूत्रमिदं पाठचम् । आर्हात् (५–१–१९) शतमान... वसनात् = शतमान–विंशतिक–सहस्र–वसन–प्रातिपदिकेभ्यः, अण् = अण् प्रत्ययो भवति । अथ – ५–१–२८ अध्यर्ध... सूत्रमुपदिशेत् ।

५–१–२८ अध्य– ५–१–२७ शतमान... सूत्रानन्तरं सूत्रमिदं पाठचम् । अध्यर्धपूर्व–द्विगोः = अध्यर्धशब्दपूर्वकात् परस्य, द्विगोर्निमित्तस्य च, आर्हात् (५–१–१९) = आर्हीयस्य प्रत्ययस्य, लुक् = लुग् भवति, असंज्ञायाम् = संज्ञायामगम्यमानायाम् । अध्यर्धपूर्वद्विगोरिति समाहारद्वन्द्व : सौत्रं पुंस्त्वम् । उदाहरणेषु, आद्ययोः ५–१–२५ कंसाट्टिँठन् इति विहितटिँठनो लुक् । अन्त्ययोः ५–१–२६ शूर्पा... इति विहितस्या ऽञः सामान्यविहितठञश्च लुक् । **पाञ्चकलापिकम्** । पञ्च कलापाः परिमाणमेस्यति विग्रहे ५–१–५६ तदस्य... इति ठञ् । अथ ५–१–३२ विंशतिकात् ख इति सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५–१–२९ विभाषा कार्षापणसहस्राभ्याम् ॥३१
अध्यर्धकार्षापणम् । अध्यर्धकार्षापणिकम् ।
अध्यर्धप्रतिकम् । अध्यर्धसहस्रम् ।
अध्यर्धसाहस्रम् । द्विसहस्रम् । द्विसाहस्रम् ।
(सुवर्णशतमानयोरुपसंख्यानम्)
अध्यर्धसुवर्णम् । अध्यर्धसौवर्णिकम् ।
द्विसुवर्णम् । द्विसौवर्णिकम् ।
अध्यर्धशतमानम् ।
अध्यर्धशातमानम् । द्विशतमानम् ।
द्विशातमानम् ।

५–१–३० द्वित्रिपूर्वान्निष्कात् ॥३१
द्विनिष्कम् । द्विनैष्किकम् । त्रिनिष्कम् ।
त्रिनैष्किकम् ।
(बहुपूर्वाच्चेति वक्तव्यम्)
बहुनिष्कम् । बहुनैष्किकम् ।

५–१–३१ बिस्ताच्च ॥
द्विबिस्तम् । द्विबैस्तिकम् । त्रिबिस्तम् ।
त्रिबैस्तिकम्, बहुबिस्तम् । बहुबैस्तिकम् ।

५–१–३२ विंशतिकात् खः ॥
अध्यर्धविंशतिकीनम् । द्विविंशतिकीनम् ।

५–१–२९ विभा – अध्यर्धपूर्वद्विगो : (५–१–२८) + कार्षापणसहस्राभ्याम् = अध्यर्धशब्दपूर्वकाभ्यां कार्षपणसहस्राभ्यां परस्य कार्षापणसहस्रान्त – द्विगोर्निमित्तस्य च, आर्हात् (५–१–१९) = आर्हीयस्य प्रत्ययस्य, विभाषा =वा, लुक् (५–१–२८) पूर्वेण नित्ये प्राप्ते विकल्पार्थमिदम् । उदाहरणेषु, आद्येषु ५–१–२५ कंसा... सूत्रस्थकार्षा... इति वार्तिकेन टिंठन् । तस्य लुक् । लुगभावे पाक्षिकः प्रतिरादेशश्च । अन्त्येषु ५–१–२७ शत... इत्यण् । तस्य लुक् । लुगभावे ७–३–१५ संख्या... इत्युत्तरपदादिवृद्धिः । अध्यर्धशब्दोऽपि संख्यैव । अत एव पूर्व (५–१–२८) सूत्रे काशिकाकार उपदिशति – अध्यर्धशब्दः संख्यैव, किमर्थं भेदेनोपादीयते ? ज्ञापकार्थम् – क्वचिदस्य संख्याकार्यं न भवति संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुँच् इतीति ।
सुवर्ण – शतमानयोः =अध्यर्धपूर्वकसुवर्णशतमानशब्दाभ्यां परस्य, सुवर्णशतमानान्तद्विगोर्निमित्तस्य च आर्हीयप्रत्ययस्य, उपसंख्यानम् = विभाषया लुग्भवतीति वक्तव्यम् । उदाहरणेषु, आद्येषु ठञो लुक् । लुगभावे ७–३–१७ परि... इत्युत्तरपदादिवृद्धिः । अन्त्येषु ५–१–२७ शत... इति विहितस्याणो लुक् । लुगभावे वृद्धिः पूर्ववत् ।
५–१–३० द्वित्रिपूर्वात् = द्वित्रिपूर्वकात्, निष्कात् = निष्कशब्दात् परस्य, द्विगो : (५–१–२८) = द्विगोर्निमित्तस्य, आर्हात् (५–१–१९) = आर्हीयप्रत्ययस्य, विभाषा (५–१–२९) लुक् (५–१–२८) । उदाहरणेषु – ठकोऽसमासे विधानादत्र ठञ् । तस्य लुक् । लुगभावे वृद्धिः पूर्ववत् ।
बहु–बहुपूर्वात् = बहुशब्दपूर्वकात्, निष्कात् (५–१–३० द्विगोः (५–१–२८) = द्विगोर्निमित्तस्य, आर्हात् (५–१–१९)=आर्हीयस्य प्रत्ययस्य, विभाषा (५–१–२९)लुक्(५–१–२८) । उदाहरणयोः प्रक्रिया प्रागवत् ।
५–१–३१ बिस्तात् = द्वित्रिपूर्वाद् बहुपूर्वाच्च बिस्तात् परस्य, द्विगोः (५–१–२८) = द्विगोर्निमित्तस्य, आर्हात् (५–१–१९) आर्हीयस्य प्रत्ययस्य, विभाषा (५–१–२९) लुक् (५–१–२८) । बिस्तशब्दः परिमाणवाची । तेनोदाहरणेषु ठञ्, वृद्धिश्च प्राग्वत् ।
५–१–३२ विंश – ५–१–२८ अध्यर्ध... सूत्रानन्तरं सूत्रमिदं पाठचम् । अध्यर्धपूर्वद्विगो : (५–१–२८)+ विंशतिकात् = अध्यर्धपूर्वकाद् विंशतिकाद् विंशतिकान्ताद् द्विगोश्च, आर्हात् (५–१–१९) खः = ख प्रत्ययो भवति । द्वित्रि (५–१–३०) इति बहु इति च नानुवर्तते । पूर्व (५–१–३१) सूत्रे चानुकृष्टत्वात् । तथा च परिभाषा पठचते–चानुकृष्टं नोत्तरत्रेति । एतद्विधानाऽभावे ५–१–२७ शतमान.. इत्यणि लुक् स्यात् । विधानसामर्थ्याच्च नाऽस्य लुक् । अथ ५–१–३३ खार्या ... इति सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५–१–३३ खार्या ईकन् ॥

अध्यर्धखारीकम् । द्विखारीकम् ।
(केवलायाश्चेति वक्तव्यम्)
खारीकम् ।
(काकिण्याश्चोपसंख्यानम्)
अध्यर्धकाकिणीकम् । द्विकाकिणीकम् ।
(केवलायाश्चेति वक्तव्यम्)
काकिणीकम् ।

५–१–३४ पणपादमाषशताद् यत् ॥३५

अध्यर्धपण्यम् । द्विपण्यम् । अध्यर्धपाद्यम् ।
द्विपाद्यम् । अध्यर्धमाष्यम् । द्विमाष्यम् ।
अध्यर्धशत्यम् । द्विशत्यम् ।

५–१–३५ शाणाद् वा ॥

अध्यर्धशाण्यम् । अध्यर्धशाणम् ।
द्विशाण्यम् । द्विशाणम् ।
(शताच्चेति वक्तव्यम्)
अध्यर्धशत्यम् । अध्यर्धशतम् । द्विशत्यम् ।
द्विशतम् ।
(द्वित्रिपूर्वादण् च)
द्वैशाणम् । द्विशाण्यम् । द्विशाणम् । त्रैशाणम् ।
त्रिशाण्यम् । त्रिशाणम् ।

इत्थं ठञादयः प्रत्यया उक्ताः । इतः परं समर्थविभक्तयस्तेषां प्रत्ययानामर्थश्च निर्दिश्यन्ते –

५–१–३३ खार्या –५–१–३२ विंशतिकात् ख इति सूत्रानन्तरं सूत्रमिदं पाठचम् । अध्यधपूर्वद्विगोः (५–१–२८) + खार्याः = अध्यर्धपूर्वात् खारीशब्दात् खारीशब्दान्ताद् द्विगोश्च, आर्हात् (५–१–१९) ईकन् प्रत्ययः । एदविधाना ऽभावे ठञि लुक् स्यात् । विधानसामर्थ्याच्च नाऽस्य लुक् । अथ ५–१–३४ पणपाद... सूत्रमुपदिशेत् ।

काकिण्या : – अध्यर्धपूर्वात् काकिणीशब्दात् काकिणीशब्दान्तद्विगोश्च आर्हात् (५–१–१९) ईकन् प्रत्यय इत्यर्थः ।

५–१–३४ पण – ५–१–३३ खार्या... सूत्रानन्तरं सूत्रमिद पाठचम् । अध्यर्धपूर्वद्विगोः (५–१–२८)+ पणपादमाषशतात्= अध्यर्धपूर्वकेभ्यः पणपादमाषशतशब्देभ्यः, पणपादमाषशतान्ताद् द्विगोश्च, आर्हात् (५–१–१९) यत् = यत्प्रत्ययो भवति । एतद्विधाना ऽभावे पणपादमाषशब्देभ्य : ५–१–२० असमासे ...सूत्रे इत्युक्त्या ठको ऽभावे ठञि लुक् स्यात् । शतशब्दादपि ५–१–२१ शताच्च...सूत्रे असमासे इत्यनुवृत्त्या ठन्यतोरभावे ५–१–२२ संख्याया... इति कानि लुक् स्यात् । **अध्यर्धपाद्यम्** ६–३–५३ पद्यत्यतदर्थे, इति पादस्य पद्भावस्तु नेह भवति, प्राण्यङ्गवाचिनस्तत्र ग्रहणात् परिमाणवाची चात्र पादशब्द : । अथ ५–१–३५ शाणाद .. सूत्रमुपदिशेत् ।

५–१–३५ शाणाद् ५–१–३४ पणपाद.. सूत्रानन्तर सूत्रमिदं पाठचम् । अध्यर्धपूर्वद्विगोः (५–१–२८) + शाणात् = अध्यर्धपूर्वक – शाणशब्दाच् शाणशब्दान्तद्विगोश्च, आर्हात् (५–१–१९) वा = विभाषया, यत् (५–१–३४) । पक्षे ठञ् । तस्य लुक् । अथा ऽधोनिर्दिष्टरूपेण श्यामपाटचां लिखित्वा बोधयेत् –

५–१–१९ आर्हात्..........................॥
५–१–२८ „ अर्ध्यधपूर्वद्विगो......... याम् ॥
५–१–३२ „ „ विंशतिकात् खः ॥
५–१–३३ „ „ खार्या ईकन् ॥
५–१–३४ „ „ पणपादमाषशताद् यत् ॥
५–१–३५ „ „ शाणाद् वा ॥

आर्हात् अध्यर्धपूर्वद्विगो : विंशतिकप्रातिपदिकात् खः ।
„ „ खार्या ईकन्
„ „ पणपादमाष प्रातिपदिकेभ्यः यत् ।
„ „ शाणप्रतिपदिकाद् वा यत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-३६ तेन क्रीतम् ॥

आश्विक :। शत्यः। शतिकः। द्विकः। वैंशतिकः।
अध्यर्धविंशतिकीनम्। द्विविशतिकीनम्। अध्यर्धखारीकम्। द्विखारीकम्। पाणिकः। अध्यर्धपण्यम्। नैष्किकः। प्रास्थिकः। साप्ततिक :। गौपुच्छिकः।

५-१-३७ तस्य निमित्तं संयोगोत्पातौ ॥४०

शतिकः शत्यो वा धनपतिसंयोगः। शतिकं शत्यं वा दक्षिणाक्षिस्पन्दनम्। शतस्य निमित्तमित्यर्थः।
(वातपित्तश्लेष्मभ्यः शमनकोप.नयोरुपसंख्यानम्)
वातस्य शमनं. कोपनं वा वातिकम्। पैत्तिकम्। श्लैष्मिकम्।
(सन्निपाताच्चेति वक्तव्यम्)
सन्निपातस्य शमनं कोपनं वा सान्निपातिकम्।

अर्थात् ५-१-२८ अध्यर्ध... सूत्रादारभ्य ५-१-३६ तेन क्रीतम् इति सूत्रात् प्राग्वर्तिभिः सूत्रैर्वार्तिकैश्च विहिताः प्रत्ययाः श्यामपाटचां दर्शिता अदर्शिताश्च शिष्यन्ते। तद्भिन्नानां तु प्रत्ययानां लुग् भवतीति तत्तत्प्रत्यय विधायकानि सूत्राणि मुहुर्मुहुर्दर्शयन् बोधयेत्। अर्थात् ५-१-२८ अध्यर्ध... सूत्रादारभ्य ५-१-३६ तेन क्रीतम् इति सूत्रात् प्राग्वर्तिभिः सूत्रैर्वार्तिकैश्च विहिताः प्रत्ययाः शिष्यन्ते, इति तत्तत्सूत्रप्रदर्शनपुरस्सरं बोधयेत्। प्रकृतश्यामपाटीप्रयोगस्तु आर्हात् अध्यर्धपूर्वद्विगोः इत्यनयोर्बालकैः पठितेषु तत्तत्सूत्रेषु सम्बन्धस्य स्फुटप्रतिपत्तये। अथ ५-१-३६ तेन क्रीतम् इति सूत्रमुपदिशेत्।

शता – अध्यर्धपूर्वद्विगोः (५-१-२८) शतात्, आर्हात् (५-१-१९) वा (५-१-३५) यत् (५-१-३४। पक्षे कन् तस्य लुक्। ठन्यतोस्तु न प्रसङ्गः। तयोरसमासे विधानात्। प्रकृतोदाहरणानि च समासघटितानि।

द्वित्रिपूर्वात् = द्वित्रिशब्दपूर्वकात्, शाणात् (५-१-३५) =शाणशब्दान्ताद्, द्विगोः (५-१-२८) च, अण्, यत् (५-१-३४) च, वा (५-१-३५)। पक्षे ठञ् तस्य लुक्।

इत्थं ठञादयः – ठञ् (५-१-१८) ठक् (५-१-१९) ठन्, यत् (५-१-२१) कन् (५-१-२२) ड्वुँ (५-१-२४) टिँठन् (५-१-२५) अञ् (५-१-२६) अण् (५-१-२७ ख (५-१-३२) ईकन् (५-१-३३) इत्येकादश। काशिकादौ त्रयोदशेत्युक्तिस्तु यत् (५-१-३४) अण् (५-१-३५) वार्तिकम् इत्यनयोः पृथग् गणनया। तद्भिन्नानाम् ५-१-२८ अध्यर्ध ... सूत्र- प्राप्तिविषयाणां प्रत्ययानां तु लुग् भवति।

५-१-३६ तेन– ५-१-३५ शाणाद् वा इति सूत्रानन्तरं सूत्रमिदं पाठचम्। तेन = तृतीयान्तात् प्रातिपदिकात्, क्रीतम्= क्रीतमित्यर्थे, ५-१-१८ प्राग्वते...सूत्रादारभ्य ५-१-३५ शाणाद् वा सूत्रपर्यन्तै स्तत्तत्सूत्रैर्वार्तिकैश्च विधीयमानाः प्रत्यया याथायोग्यं भवन्ति। इत्यर्थमुपदिश्य, अश्वेन क्रीतः, शतेन क्रीतः, द्वाभ्यां क्रीतः, विंशतिकेन क्रीतः, अध्यर्धविंशतिकेन क्रीतम्, द्वाभ्यां विंशतिकाभ्यां क्रीतम्, अध्यर्धखार्या क्रीतम्, द्वभ्यां खारीभ्यां क्रीतम्, पणेन क्रीतः अध्यर्धपणेन क्रीतम्, निष्केण क्रीतः, प्रस्थेन क्रीतः, सप्तत्या क्रीतः, गोपुच्छेन क्रीतः, इति विग्रहेषु क्रमशः ५-१-१९ ठक्, ५-१-२१ यत् ठन्, ५-१-२२ कन्, ५-१-२७ अण, ५-१-३२, ख, ५-१-३२ ख, ५-१-३३ ईकन् ५-१-३३ ईकन्, ५-१-२० ठक्, ५-१-३४ यत्, ५-१-२० ठक्, ५-१-१८ ठञ्, ५-१-१८ ठञ् ५-१-१८ ठञ्। प्रत्यया भवन्तीति मुहुर्मुहुरुद्बोधयेत्। अथ अश्वेन क्रीतः = अश्व+टा+ठक्। पूर्वत्प्रक्रियायाम् अश्व+ठ इति श्यामपाट्या लिखित्वा ४-४-२ तेन दीव्यति... सूत्रे निर्दिष्टे "अक्ष + ठ" इत्यत्रेव च्छात्रैरुच्यमानां प्रक्रियां शिक्षक : श्रृणुयात्। **आश्विकः** अत्र शिक्षकः साहाय्चं ददद् मूलोदाहृतान्यपिच्छात्रैः साधयेत्। **सावधानम्!** यदि तुच्छात्रा भारमनुभवेयुस्तदा ४-१-१८ प्राग्व... ५-१-२९ आर्हा... सूत्रे एवोपदिशेन्नान्यानि अथ ५-१-४४ तस्य वापः -सूत्रमुपदिशेत्।

५-१-३७ तस्य – षष्ठचन्तात्, निमित्तम् = निमित्तमित्यर्थे, प्रत्यया भवन्ति, संयोगोत्पातौ= यन्निमित्तं तत् संयोग उत्पातो वा चेत्। संयोगः = सम्बन्धः। उत्पातः = प्राणिनां शभाशुभसूचकः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५–१–३८गोद्व्यचो ऽसंख्यापरिमाणाश्वादेर्यत् ॥ ३९

गोर्निमित्तं संयोग उत्पातो वा गव्यः। धन्यम्। यशस्यम्। असंख्येत्याद्युक्तेर्नेह– पञ्चकम्। प्रास्थिकम्। आश्विकः।

(ब्रह्मवर्चसादुपसंख्यानम्)

ब्रह्मवर्चस्यम्।

५–१–३९ पुत्राच्छ च ॥

पुत्रीयः। पुत्र्यः।

५–१–४० सर्वभूमिपृथिवीभ्या-मणञौ ॥४२

सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः। पार्थिव :।

५–१–४१ तस्येश्वर : ॥

सार्वभौमः। पार्थिवः।

५–१–४२ तत्र विदित इति च ॥४३

सर्वभूमौ विदितः सार्वभौमः। पृथिव्यां विदितः पार्थिवः।

५–१–४३ लोकसर्वलोकाट्ठञ् ॥

लोके विदितः = लौकिकः। सार्वलौकिकः।

५–१–४४ तस्य वापः ॥४५

प्रास्थिकम्। खारीकम्।

५–१–४५ पात्रात् ष्ठन् ॥

पात्रिकम् = क्षेत्रम्। पात्रिकी क्षेत्रभक्तिः।

५–१–४६ तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते ।४८

पञ्च वृद्धिः, आयः, लाभः, शुल्कः, उपदा वा दीयते अस्मिन् पञ्चकः। शत्यः। शतिकः। साहस्रः।

(चतुर्थ्यर्थ उपसंख्यानम्)

पञ्चा ऽस्मै वृद्धिः, आयः, लाभः, शुल्कः, उपदा वा दीयते पञ्चको देवदत्तः। सममब्राह्मणे दानमितिवदधिकरणत्वविवक्षा वा।

५–१–३८ गोद्व्य– असंख्यापरिमाणाश्वादेः= संख्यावाचि–परिमाणवाच्यश्वादिगणपठितभिन्नात्, गोद्व्यचः = गो–द्व्यच्कप्रकृतिकात्, तस्य+निमित्तं+संयोगोत्पातौ (५–१–३७) यत् =यत् प्रत्ययो भवति।

५–१–३९ पुत्रात् = पुत्रशब्दप्रकृतिकात्, तस्य+निमित्तं+संयोगोत्पातौ (५–१–३०) छ, = छप्रत्ययो भवति यत् (५–१–३८) च।

५–१–४० सर्व... वीभ्याम् = सर्वभूमि – पृथिवीशब्दप्रकृतिकात्, तस्य+निमित्तम् (५–१–३७), अणञौ = अण् अञ् इति प्रत्ययौ भवतः, संयोगोत्पातौ (५–१–३७)।

सार्वभौमः ७–३–२० अनु... इत्युभयपदादिवृद्धिः।

५–१–४१ तस्य = षष्ठ्यन्ताभ्याम्, सर्वभूमिपृथिवीभ्याम् (५–१–४०) = सर्वभूमि –पृथिवीशब्दाभ्याम्, ईश्वरः= ईश्वर इत्यर्थे, अणञौ (५–१–४०)।

५–१–४२ तत्र = सप्तम्यन्ताभ्याम्, सर्व...भ्याम् (५–१–४०) = सर्वभूमि-पृथिवी-प्रातिपदिकाभ्याम्, विदित इति = विदित इत्यर्थे, अणञौ (५–१–४०)।

५–१–४३ लोकसर्वलोकप्रकृतिकात्, तत्र+विदित+इति (५–१–४२) = सप्तम्यन्ताद् विदित इत्यर्थे ठञ् =ठञ् प्रत्ययो भवति। **सार्वलौकिकः** ७–३–२० अनुशतिकादीनां चेत्युभयपदादिवृद्धिः।

५–१–४४ तस्य = षष्ठ्यन्तात्, वापः = वाप इत्यर्थे यथायोग्यं प्रत्यया भवन्ति। ५–१–३६ तेन क्रीतम् – सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र शिक्षकः सूत्रमिदं प्रस्तुत्य वापः = क्षेत्रम्। उप्यते ऽस्मिन् = वापः। इति बोधनपुरस्सरं छात्रान् सूत्रस्यार्थं प्रतिपादयितुमादिश्य प्रस्थस्य वाप इति विग्रहे कः प्रत्ययो रूपं च कीदृशम् ? इति च्छात्रान् परीक्षेत। उत्तरं तु प्रत्ययाः (ठञ् प्रभृतयः) प्रकृते ठञ्। रूपं मूलोक्तम्। अथ ५–१–६२ तदर्हति – सूत्रमुपदिशेत्।

५–१–४५ पात्रात् = पात्रशब्दप्रकृतिकात्, तस्य+वापः (५–१–४४) ष्ठन् = ष्ठन् प्रत्ययो भवति।

५–१–४६ तद – वृद्ध्यादिभिः प्रत्येकं सम्बन्धाद् "दीयते" इत्येकवचनान्तम्। वृद्ध्या... पदा = उत्तमर्णेन मूलातिरिक्तं ग्राह्यं वृद्धिः। ग्रामादिषु स्वामिग्राह्यो भाग आयः। मूल्यादधिकं ग्राह्यं लाभः। राजभागः शुल्कः। उत्कोच उपदा। दीयते = पूर्वोक्तेष्वन्यतमो दीयते इत्युपाधिकात्, तत् = प्रथमान्तात्, अस्मिन् = अस्मिन्नित्यर्थे यथायोग्यं प्रत्ययाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५–१–४७ पूरणार्धाट्ठन् ॥

द्वितीयो वृद्ध्यादिरस्मिन् दीयते द्वितीयिकः । अर्धिकः ।

५–१–४८ भागाद् यच्च ॥

भाग्यं भागिकं शतम् । भाग्या भागिका विंशतिः ।

५–१–४९ तद्धरतिवहत्यावहति भाराद् वंशादिभ्यः ॥५४, ५०

वंशभारं हरति, वहति, आवहति वा वांशभारिकः । भारभूतान् वंशान् हरति वहति आवहति वा वांशिकः ।

५–१–५० वस्नद्रव्याभ्यां ठन्कनौ ॥

वस्नं हरति, वहति, आवहति वा वास्निकः । द्रव्यकः ।

५–१–५१ संभवत्यवहरतिपचति ॥५४

प्रस्थं संभवति प्रास्थिकः कटाहः । प्रस्थमवहरति पचति वा प्रास्थिकी ब्राह्मणी । कौडविकः । खारीकः ।

(तत् पचतीति द्रोणादण् च)

द्रौणी । द्रौणिकी ।

५–१–५२ आढकाचितपात्रात् खोऽन्यतरस्याम् ॥५३

आढकं संभवत्यवहरति पचति वा आढकीना । आढकिकी । आचितीना । आचितिकी । पात्रीणा । पात्रिकी ।

५–१–५३ द्विगोः ष्ठँश्च ॥

द्व्याढकिकी । द्व्याढकीना । द्व्याढकी । द्व्याचितिकी । द्व्याचितीना । द्व्याचिता । द्विपात्रिकी । द्विपात्रीणा । द्विपात्री ।

५-१-४७ पूर – वृद्ध्याय.... दीयते (५–१–४६) इत्युपाधिकात्, पूरणार्धात् = पूरणप्रत्ययान्तशब्द–प्रकृतिकादर्धशब्दप्रकृतिकाच्च, तद्+अस्मिन् (५–१–४६) ठन् = ठन् प्रत्ययो भवति । यथाक्रमं ठक् (५–१–१९)टिँठनो (५–१–२५ वा.) रपवादः । अर्धशब्दो रूपकस्यार्धे रूढः ।

५-१-४८ भागाद् वृद्ध्याय... दीयते (५–१–४६) इत्युपाधिकात्, भागात् = भागशब्दप्रकृतिकात्, तद्+अस्मिन् (५–१–४६) यत् = यत् प्रत्ययो भवति, ठन् (५–१–४७) च ।

५-१-४९ तद्ध – वंशादिभ्यः + भारात् = वंशादिगणपठितशब्देभ्यः परो यो भारशब्दस्तदन्तप्रकृतिकात्, तत् = द्वितीयान्तात् हरति... आवहति = हरति वहति आवहति (उत्पादयति) इत्येतेष्वर्थेषु यथायोग्यं प्रत्ययाः । “भाराद्वंशादिभ्यः” इत्यस्य व्याख्यान्तरम् –

भारभूतेभ्यो वंशादिभ्य इति । अत्र पक्षे वंशादय एव भारभूतवंशादिवाचिनः ।

५-१-५० वस्नद्रव्याभ्याम् = वस्नद्रव्यशब्दप्रकृतिकात्, तद्+हरति+वहति+आवहति (५–१–४९) ठन्कनौ =ठन् कन् प्रत्ययौ भवतः । यथासंख्यम् ।

५-१-५१ संभ – तत् (५–१–४९) संभवति = समावेशयति, अवहरति = उपसंहरति, पचति, इत्येतेष्वर्थेषु यथायोग्यं प्रत्यया भवन्ति ।

५-१-५२ आढ... त्रात्= आढक आचित पात्र इति प्रकृतिकात्, तद् (५–१–४९) संभवत्यवहरति पचति (५–१–५१) अन्यतरस्याम् = वा, खः = खप्रत्ययो भवति । पक्षे ५–१–५१ ठञ् ।

५-१-५३ द्विगोः– आढकाचितपात्रान्तात् (५–१–५२) तद् (५–१–४९) द्विगोः, संभव... पचति (५–१–५१) ष्ठन्, =ष्ठन् प्रत्ययो भवति, खः (५–१–५२) च अन्यतरस्याम् (५–१–५२) । पक्षे ठञ् । तस्य ५–१–२८ अध्यर्ध... इति लुक् । ख–ष्ठनोस्तु न लुक् । विधानसामार्थ्यात् । ष्ठनि षित्वात् ४–१–४१ षिद्गौ... इति ङीष् । द्व्याढकी ४–१–२१ द्विगोः इति ङीप् । द्व्याचिता ४–१–२२ अपरिमाण... इति ङीब्निषेधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-५४ कुलिजाल्लुक्खौ च ॥

खे - द्विकुलिजीना । ष्ठनि- द्विकुलिजिकी । ठञो लुकि-द्विकुलिजी । लुगभावे- द्वैकुलिजिकी ।

५-१-५५ सोऽस्यांऽशवस्नभृतयः ॥

पञ्च अंशो वस्नं भृतिर्वा ऽस्य पञ्चकः । साहस्रः ।

५-१-५६ तदस्य परिमाणम् ॥६१

प्रस्थः परिमाणमस्य प्रास्थिको राशिः । शत्यः । शतिकः । खारशतिकः । वार्षशतिकः । साहस्रः । वार्षसहस्रिकः । षष्टिर्जीवितप्रमाणमस्य षाष्टिकः । साप्ततिकः । ५-१-५५ सोऽस्य इति प्रकृते तदस्येति पुनः पाठः पुनर्विधानार्थः । तेन द्वे षष्टी जीवितपरिमाणमस्य द्विषाष्टिकः । द्विसाप्ततिकः । इत्यादौ । ५-१-५८ अध्यर्ध... इति न लुक् ।

५-१-५७ संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु ॥

संज्ञायाम् - पञ्चैव पञ्चकाः शकुनयः । सङ्घे-पञ्च परिमाणमस्य पञ्चकः सङ्घः । सूत्रे-अष्टावध्याया : परिमाणमस्य अष्टकं पाणिनीयम् । अष्टिका = अष्टाध्यायी । अध्ययने - पञ्चावृत्तय : परिमाणमस्य पञ्चकमध्ययनम् ।

(स्तोमे डविधिः)

पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशः स्तोमः । एकविंशः । सोमयागेषुच्छन्दोगैः क्रियमाणा पृष्टचादिसंज्ञिका स्तुतिः स्तोमः ।

(शन्शतोर्डिनिँश्छन्दसि)

पञ्चदश दिनानि परिमाणमेषां पञ्चदशिनो ऽर्धमासाः । त्रिंशद् दिनानि परिमाणमेषां त्रिंशिनो मासाः ।

(विंशतेश्चेति वक्तव्यम्)

विंशतिः (अवान्तरगोत्राणि) परिमाणमेषां विंशिनो ऽङ्गिरसः ।

५-१-५८ पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ॥

५-१-५४ कुलिजात्= कुलिजशब्दान्तप्रकृतिकात्, तत् (५-१-४९) द्विगोः (५-१-५३) संभव... पचति (५-१-५१) लुक् खौ =प्रत्ययस्य लुक् खप्रत्ययश्च भवतः, ष्ठन् (५-१-५३) च, अन्यतरस्याम् (५-१-५२)। पक्षे ठञ् । तस्य लुगपि विकल्प्यते । द्वैकुलिजिकी- अत्र काशिका- ७-१-१७ परिमाणान्तस्याऽसंज्ञाशाणयोः इत्यत्र कुलिजग्रहणमपीष्यते, तेनोत्तरपदवृद्धिरपि न भवतीति ।

५-१-५५ सोऽस्यां- अंश...भृतयः = अंशः=भागः वस्नम्=मूल्यम् भृतिः = वेतनम् इत्युपाधिकात्, सः =प्रथमान्तात्, अस्य=अस्येत्यर्थे यथायोग्यं प्रत्यया भवन्ति ।

५-१-५६ तद - परिमाणम् = परिमाणोपाधिकात्, तत् = प्रथमान्तात्, अस्य =अस्येत्यर्थे यथायोग्यं प्रत्यया भवन्ति । **खारशतिकः** खारशब्दो ऽदन्तः । **द्विषाष्टिकः** ७-३-१५ संख्यायाः... इत्युत्तरपदादिवृद्धिः ।

५-१-५७ संख्या - तदस्य परिमाणम् (५-१-५६) + संख्यायाः = परिमाणमित्युपाधिकात् संख्यावाचिनः प्रथमान्तात्, अस्येत्यर्थे प्रत्ययाः । संज्ञा... नेषु= संज्ञायां प्राणिसमूहे सूत्रे ऽध्ययने च । तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः । इति काशिका ।

शन्शतो : = शन् शत् इत्येतदन्तात्, तदस्य परिमाणम् (५-१-५६) ।

५-१-५८ पङ्क्ति - एते रूढिशब्दा निपात्यन्ते । दशत् परिमाणमस्य पङ्क्तिः । पङ्क्तिरथ : । दशरथ इत्यर्थः । दशच्छब्दात् ति प्रत्ययः प्रकृतेश्च पञ्च् इत्यादेशः । ८-२-३० चोः कुः इति कुत्वम् । अत्र काशिका - पञ्च पदानि परिमाणमस्य पङ्क्तिश्छन्द इति । पञ्चन्शब्दादेव तिप्रत्ययः प्रकृतेष्टिलोप इति तदाशयः । अत्र पदशब्दः पादपर्याय इति हरदत्तः । अतश्छन्दोविशेषे पञ्चन्शब्दात् प्रत्ययः । संख्यायां तु दशच्छब्दादेव । सूत्रे विंशत्यादिनां क्रमशो दशद्वृद्ध्या निपातनाच्च प्रथम : पङ्क्तिशब्दो ऽपि दशतो वाचक इत्यवधीयत एव । वस्तुतो रूढिशब्दो ऽयं क्रमसन्निवेशे ऽपि प्रयुज्यते । यथा - ब्राह्मणपङ्क्तिः । नाऽत्रा ऽवयवार्यः प्रतीयते । द्वौ दशतौ परिमाणस्य विंशतिः : । द्विदशच्छब्दात्, शतिप्रत्ययः प्रकृतेश्च विन् भावो ऽपदत्वं च । अपदत्वात् ८-४-२४ नश्चा... इत्यनुस्वारः । त्रयो दशतः परिमाणमस्य त्रिंशत् । त्रिदशच्छब्दात्, शत्प्रत्यय : प्रकृतेश्च त्रिन्भावो ऽपदत्वं च । चत्वारो दशतः परिमाणमस्य चत्वारिंशत् । चतुर्दशच्छब्दात्, शत् प्रत्ययः प्रकृतेश्च चत्वारिन्नपदत्वं च । पञ्च दशतः परिमाणमस्य पञ्चाशत् । पूर्ववत् शत् प्रकृतेः पञ्चा इत्यादेशः । षड् दशतः परिमाणमस्य षष्टि : । षड्दशच्छब्दात् तिप्रत्ययः प्रकृतेः षष् अपदत्वं च । सप्त दशतः परिमाणमस्य सप्ततिः । सप्तदशच्छब्दात् तिः, दशद्भागस्य लोपश्च । अष्टौ दशतः परिमाणमस्य अशीतिः । अष्टदशच्छब्दात् तिप्रत्ययः प्रकृतेरशी इत्यादेशः । नव दशतः परिमाणमस्य नवति : । नवदशच्छब्दात् तिप्रत्ययो दशद् भागस्य लोप : । दश दशतः परिमाणमस्य शतम् । दशदशच्छब्दात् तप्रत्ययः प्रकृतेः "श" इत्यादेश : ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-५९ पञ्चद्दशतौ वर्गे वा ॥६०

पञ्चपरिमाणमस्य पञ्चद् वर्गः । पञ्चकः । दश परिमाणमस्य दशद् वर्ग : । दशकः ।

५-१-६० सप्तनोऽञ् छन्दसि ॥

सप्त साप्तान्यसृजन् ।

५-१-६१ त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्॥

त्रिंशदध्यायाः परिमाणमेषां त्रैंशानि ब्राह्मणानि । चात्वारिंशानि ब्राह्मणानि । कानि चिदेव ब्राह्मणान्युच्यन्ते ।

५-१-६२ तदर्हति ॥ ७५, ७०

श्वेतच्छत्रमर्हति= श्वैतच्छत्रिकः । शत्यः । शतिकः । साहस्रः ।

५-१-६३ छेदादिभ्यो नित्यम् ॥ ६४

छेदं नित्यमर्हति= छैदिको वेतसादिः ।

५-१-६४ शीर्षच्छेदाद् यच्च ॥ ६९

शिरश्छेदं नित्यमर्हति= शीर्षच्छेद्यः । शैर्षच्छेदिकः ।

५-१-६५ दण्डादिभ्यो यः ॥

दण्डमर्हति = दण्ड्यः ।

५-१-६६ छन्दसि च ॥

यूपमर्हति= यूप्यः पलाशः ।

५-१-६७ पात्राद् घश्च ॥

पात्रमर्हति= पात्रियः । पात्र्यः ।

५-१-५९ पञ्चद् दशतौ = [पञ्चन् इति दशन् इति च प्रकृतिकात्, तद् परिमाणम्+अस्य (५-१-५६) डतिँ प्रत्ययः] पञ्चत् दशत् इति शब्दौ वा = विभाषया निपात्येते, वर्गे= अस्येतीदंशब्दवाच्यो वर्गश्चेत् । वा वचनात् पक्षे ५-१-२२ संख्याया अति... +संख्यायाः संज्ञा... इति कन् ।

५-१-६० सप्तनः = सप्तन् इति प्रकृतिकात्, परिमाणम् + तद्+अस्य (५-१-५६), वर्गे (५-१-५९), अञ् = अञ् प्रत्ययो भवति, छन्दसि= बेदे ।

५-१-६१ त्रिंशत्... शतोः = त्रिंशच्चत्वारिंशच्छब्दप्रकृतिकात्, परिमाणम् + तद् + अस्य (५-१-५६), डण्=डण् प्रत्ययो भवति, ब्राह्मणे+ संज्ञायाम् = ब्राह्मणस्य संज्ञायाम् । ब्राह्मण-संज्ञाया—मिति षष्ठीसमासेन निर्देष्टव्यमिति-हरदत्तः ।

५-१-६२ तद - ५-१-४४ तस्य वाप इति सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्रापि शिक्षकः सूत्रमिदं प्रस्तुत्य सूत्रार्थं प्रतिपादयितुं छात्रानादिश्य श्वेतच्छत्रमर्हति इति विग्रहे कः प्रत्ययः कीदृशं च रूपम् ? इतिच्छात्रान् परीक्षेत । उत्तरं तु तद्= द्वितीयान्तात्, अर्हति= अर्हतीत्यर्थे प्रत्यया भवन्ति । प्रकृते ठक् । रूपं मूलोक्तम् । अथ ५-१-७१ पारायण...... सूत्रमुपदिशेत् ।

५-१-६३ छेदा-अत्र नित्यशब्दआभीक्ष्ण्यवाची । यथा नित्यप्रहसितो नित्यप्रजल्पित इति । छेदादिभ्यः = छेदप्रभृतिगणपठितशब्दप्रकृतिकात्, तत् (५-१-६२) नित्यम् = आभीक्ष्ण्यम्, अर्हति (५-१-६२) इत्यर्थे प्रत्यया भवन्ति ।

५-१-६४ शीर्षच्छेदात्= शिरश्छेदशब्दप्रकृतिकात्, तद् (५-१-६२) नित्यम् (५-१-६३) अर्हति (५-१-६२) यत् = यत् प्रत्ययो भवति ठक् (५-१-१९) च, प्रत्ययसन्नियोगेन शिरश्शब्दस्य शीर्षभावो निपात्यते ।

५-१-६५ दण्डादिभ्यः = दण्डप्रभृतिगणपठितशब्दप्रकृतिकात्, तद्+अर्हति (५-१-६२), यः= यप्रत्ययो भवति ।

५-१-६६ छन्दसि= वेदे, तदर्हति (५-१-६२) यत् (५-१-६४) । यदेवा ऽनुवर्तते न तु यः । प्रातिपदिकमात्राच्च विधीयते ।

५-१-६७ पात्रात्=पात्रशब्दप्रकृतिकात्, तदर्हति (५-१-६२) घन्= घन् प्रत्ययो भवति यत् (५-१-६४) च= यत् प्रत्ययोऽपि भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-६८ कडङ्गरदक्षिणाच्छ च ॥
कडङ्गरमर्हति = कडङ्गरीयो गौः ।
कडङ्गर्यः । दक्षिणामर्हति= दक्षिणीयः ।
दक्षिण्यः ।

५-१-६९ स्थालीबिलात् ॥
स्थालीबिलमर्हन्ति= स्थालीबिलीयास्तण्डुलाः ।
स्थालीबिल्याः ।

५-१-७० यज्ञर्त्विग्भ्यां घखञौ ॥
यज्ञमर्हति यज्ञियो ब्राह्मणः । ऋत्विजमर्हति=
आर्त्विजीनो ब्राह्मणः ।
(यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम्)
यज्ञकर्मार्हति=यज्ञियो देशः ।
ऋत्विक्कर्मार्हति= आर्त्विजीनं ब्राह्मणकुलम् ।
ठक् (५-१-१९) प्रभृतीनामवधिः पूर्णः ।
इतः परं ठञ् (५-१-१८) एव भवति ।

५-१-७१ पारायणतुरायणचान्द्रायणं वर्तयति ॥
पारायणं वर्तयति= पारायणिकः । तौरायणिकः ।
चान्द्रायणिकः ।

५-१-७२ संशयमापन्नः ॥
संशयमापन्नः सांशयिकः ।

५-१-७३ योजनं गच्छति ॥ ७६
योजनं गच्छति= यौजनिकः ।
(क्रोशशतयोजनशतयोरुपसंख्यानम्)
क्रोशशतं गच्छति= क्रौशशतिकः ।
यौजनशतिकः ।
(ततोऽभिगमनमर्हतीति च वक्तव्यम्)
क्रोशशतादभिगमनमर्हति= क्रौशशतिको
भिक्षुः । यौजनशतिक आचार्यः ।

५-१-७४ पथः ष्कन् ॥ ७५
पन्थानं गच्छति= पथिकः । पथिकी ।

५-१-७५ पन्थो ण नित्यम् ॥
पन्थानं नित्यं गच्छति= पान्थः । पान्था ।

५-१-६८ कडङ्गरदक्षिणात् = कडङ्गर-दक्षिणा-शब्दप्रकृतिकात् तदर्हति (५-१-६२), छ= छप्रत्ययो भवति, यत् (५-१-६४) च= यत् प्रत्ययोऽपि भवति । इह यथासंख्यं न, अल्पाच्तरस्य पूर्वप्रयोगाभावात् । समाहारद्वन्द्वत्वाद् दक्षिणाशब्दस्य क्लीबत्वम् ।

५-१-६९ स्थालीबिलात्-स्थालीबिलप्रकृतिकात्, तदर्हति (५-१-६२) छः (५-१-६८) यत् (५-१-६४) च ।

५-१-७० यज्ञर्त्विग्भ्याम्= यज्ञ ऋत्विज् इति शब्दप्रकृतिकात्, तद्+अर्हति (५-१-६२) घखञौ= घ खञ् प्रत्ययौ भवतः । यथासंख्यम् ।

५-१-७१ पारा-५-१-६२ तदर्हति-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । पारा.... यणम् = पारायण-तुरायण-चान्द्रायण-प्रकृतिक-द्वितीयान्तात्, वर्तयति= निष्पादयति, इत्यर्थे, ठञ् (५-१-१८) । इत्यर्थं बोधयित्वा तुरायणम् = यज्ञविशेषः, इति चोपदिश्य मूलोक्तान्युदाहरणानिच्छात्रैः साधयेत् । तत्प्रसङ्गे सत्यावश्यके ठञ् प्रत्यय एव भवतीति पूर्वोपदिष्टमपि पुनरुद्बोधनपुरस्सरमुपदिशेत् । अथ ५-१-७२ संशय.... सूत्रमुपदिशेत् ।

५-१-७२ संश-५-१-७१ पारायण··सूत्रानन्तरं सूत्रमिदं पाठ्यम् । संशयम्= संशयप्रकृतिक- द्वितीयान्तात्, आपन्नः = प्राप्त इत्यर्थे, ठञ् (५-१-१८) इत्यर्थं मूलोक्तमुदाहरणं च च्छात्रैः साधयेत् । अथ ५-१-७३ योजनं... सूत्रमुपदिशेत् ।

५-१-७३ योजनं- ५-१-७२ संशय... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्रापि योजनम्=योजनप्रकृतिक-द्वितीयान्तात्, गच्छति=गच्छतीत्यर्थे, ठञ् (५-१-१८) ।इत्यर्थं मूलोक्तमुदाहरणं च च्छात्रैः प्रतिपादयेत् । अथ ५-१-११४ तेन तुल्यं..... सूत्रमुपदिशेत् ।

तत :=क्रोशशत-योजनशत-शब्द-प्रकृतिक-पञ्चम्यन्तात्, अभिगमनमर्हतीत्यर्थे, ठञ् (५-१-१८)

५-१-७४ पथः = पथिन् इतिशब्दप्रकृतिकात्, तत् (५-१-६२) गच्छति (५-१-७३) ष्कन् = ष्कन् प्रत्ययो भवति । षित्त्वात् स्त्रियां ४-१-४१ षिद्गौ..... इति ङीष् ।

५-१-७५ पन्थो पथः (५-१-७४) तद् (५-१-६२) नित्यम्= आभीक्ष्ण्यम्, गच्छति (५-१-७३) ण = णप्रत्ययो भवति, पन्थः= प्रकृतेः पन्थादेशश्च । स्त्रियां टप् । अणि तु ४-१-१५ टिड्ढाणञ्... इति ङीप् स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-७६ उत्तरपथेनाहृतं च ॥

उत्तरपथेन आहृतम्=औत्तरपथिकम्
उत्तरपथेन गच्छति= औत्तरपथिकः ।
(आहृतप्रकरणे वारिजङ्गलस्थलकान्तार-पूर्वपदादुपसंख्यानम्) वारिपथेनाहृतं वारिपथिकम् । वारिपथेन गच्छति= वारिपथिकः । जाङ्गलपथिकम् । जाङ्गलपथिकः । स्थालपथिकम् । स्थालपथिकः । कान्तारपथिकम् । कान्तारपथिकः।
(अजपथशङ्कुपथाभ्यां चोपसंख्यानम्)
अजपथेनाहृतम्= आजपथिकम् । अजपथेन गच्छति= आजपथिकः । शाङ्कुपथिकम् । शाङ्कुपथिकः ।
(मधुकमरिचयोरण् स्थलात्)
स्थलपथेनाहृतं स्थालपथं मधुकम् । स्थालपथं मरिचम् ।

५-१-७७ कालात् ॥ द्वि॰ ९५

५-१-७८ तेन निर्वृत्तम् ॥

अह्ना निर्वृत्तम्= आह्निकम् ।
मासिकम् । सांवत्सरिकम् ।

५-१-७९ तमधीष्टो भृतो भूतो भावी ॥

मासमधीष्टो मासिकोऽध्यापकः ।
मासं भृतो मासिकः कर्मकरः ।
मासं भूतो मासिको व्याधिः ।
मासं भावी मासिक उत्सवः ।

५-१-८० मासाद् वयसि यत्खौ ॥ ८१, ८२

मासं भूतो मास्यः । मासीनः ।

५-१-७६ उत्तरपथेन = उत्तरपथशब्दप्रकृतिकतृतीयान्तात्, आहृतम्= आनीतमित्यर्थे, गच्छति (५-१-७३) च, =गच्छतीत्यर्थे च ठञ् (५-१-१८)

आहृत- वारि... पूर्वपदात्= वारिप्रभृतिपूर्वपदक-पथशब्दान्त- प्रकृतिकतृतीयान्तात्, आहृतं गच्छतीत्यर्थे च ठञ् ।

मधु-स्थलात् = स्थलशब्दात् परस्मात्, पथः (५-१-७४) अर्थात् स्थलशब्दात् परो यः पथिन् शब्दः, तदन्तप्रकृतिकात् तृतीयान्तात्, मधुकमरिचयोर्वाच्ययोः, अण् । अत्र मधुकमरिचयोरन्यतरनिर्णयायानुप्रयोगो न विरुद्ध इति हरदत्तः ।

५-१-७७ कालात्= ५-१-९६ व्युष्टादिभ्योऽण् इति सूत्रात् प्राक् कालवाचिप्रकृतिकात् इत्यधिक्रियते ।

५-१-७८ तेन-कालात् (५-१-७७)= कालवाचिशब्दप्रकृतिकात्, तेन= तृतीयान्तात्, निर्वृत्तम्= निष्पादितमित्यर्थे, ठञ् (५-१-१८) । **आह्निकम्** ६-४-१४५ अह्नष्टखोरेवेति नियमान्न टिलोपः । ६-४-१३४ अल्लोपोऽन इत्यल्लोप : ।

५-१-७९ तम-कालात् (५-१-७७), तम्= द्वितीयान्तात्, अधीष्टः= सत्कृत्य व्यापारितः, भृतः= वेतनेन क्रीतः, भूतः = स्वसत्तया व्याप्तः कालः, भावी= स्वसत्तया व्याप्तोऽनागतकालः । इत्येतेष्वर्थेषु, ठञ् (५-१-१८) । सूत्रे 'तमित्यत्र' २-३-५ कालाध्वनोरिति द्वितीया । तेन 'षाण्मासिकी पत्रिका' इत्यत्र ५-१-८३ अवयसि इति ठन्, ण्यच्च न । अत्यन्तसंयोगाभावेन प्रकृतप्रकरणाऽविषयत्वात् । किन्तु शैषिकष्ठञ् । अत्र काशिका-ननु च्याध्येषणं भरणं च मुहूर्तं क्रियते तेन कथं मासो व्याप्यते ? अध्येषण-भरणे क्रियार्थे, तत्र फलभूतया क्रियया मासो व्याप्यामानस्ताभ्यामेव व्याप्त इत्युच्यते,इति ।

५-१-८० मासात्= मासशब्दप्रकृतिकात्, तम् + भूतः (५-१-७९), यत्खौ= यत् ख प्रत्ययौ भवतः, वयसि = वयसि गम्यमाने । यद्यपीह पूर्वसूत्रं सर्वमेवाऽनुवर्तते, तथापि "तम्, भूत" इत्येव सम्बध्यते । न हि मासमधीष्टो भृतो वेत्युक्तौ काचित् कालकृता शरीरावस्था गम्यते । भाविन्यपि न झटिति गम्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-८१ द्विगोर्यप् ॥ ८२
द्वौ मासौ भूतो द्विमास्यः ।

५-१-८२ षण्मासाण्ण्यच्च ॥
षाण्मास्यः । षण्मास्यः । षाण्मासिकः ।

५-१-८३ अवयसि ठँश्च ॥
षण्मासिको रोगः । षाण्मास्यः ।

५-१-८४ समायाः खः ॥ ८५, ८७
समामधीष्टो भृतो भूतो भावी वा समीनः ।

५-१-८५ द्विगोर्वा ॥ ८८, ८७
द्वे समे अधीष्टो भृतो भूतो भावी द्वाभ्यां समाभ्यां निर्वृत्तो वा द्विसमीनः । द्वैसमिकः ।

५-१-८६ रात्र्यहः संवत्सराच्च ॥
द्विरात्रीणः । द्वैरात्रिकः ।
द्व्यहीनः । द्वैयह्निकः । द्विसंवत्सरीणः ।
द्विसांवत्सरिकः ।

५-१-८७ वर्षाल्लुक् च ॥ ८८
द्विवर्षीणो व्याधिः । द्विवर्षः ।
द्विवार्षिकः । भाविनि तु द्वैवर्षिकः ।

५-१-८८ चित्तवति नित्यम् ॥
द्विवर्षो दारकः ।

५-१-८९ षष्टिकाः षष्टिरात्रेण पच्यन्ते ॥
षष्टिको धान्यविशेषः ।

५-१-८१ **द्विगो**-- मासात् (५-१-८०)= मासशब्दान्तात्, तम् (५-१-७९) द्विगोः, भूतः (५-१-७९) यप्= यप् प्रत्ययो भवति, वयसि (५-१-८०) । **द्विमास्यः** । २-१-५१ तद्धितार्थोत्तर... इति समासः ।

५-१-८२ **षण्मासात्**=षण्मासशब्दप्रकृतिकात्, तम्+भूतः (५-१-७९) ण्यत्=ण्यत् प्रत्ययो भवति, यप् (५-१-८१) ठञ् (५-१-१८) च । चकारेण ठञ् समुच्चीयते, यप् (५-१-८१) तु स्वरितत्वप्रतिज्ञानात् ।

५-१-८३ **अव**- षण्मासात् (५-१-८२) तम् (५-१-७९) भूतः (५-१-७९), ठन्, ण्यत् (५-१-८२) च । ठञ् (५-१-१८) तु न समुच्चीयते । पूर्वसूत्रे चानुकृष्टत्वात् । यप् (५-१-८१) अपि नानुवर्तते स्वरितत्वविरहात् ।

५-१-८४ **समायाः**= समाशब्दप्रकृतिकात्, तमधीष्टो भृतो भूतो भावी (५-१-७९) खः= खप्रत्ययो भवति । अत्र काशिका- केचित्तु तेन निर्वृत्तम् (५-१-७८) इति सर्वत्रानुवर्तयन्ति । समया निर्वृत्तः समीनः । इति । अत्र हरदत्तः- पूर्वत्र, अत्र, परत्र च ५-१-९२ तेन परिजय्य- लभ्य-कार्य-सुकरमिति यावत् । इति ।

५-१-८५ **द्विगो**- समायाः (५-१-८४) = समाशब्दान्तात्, द्विगोः, वा= विभाषया खः (५-१-८४) निर्वृत्तादिषु पञ्चष्वर्थेषु । पूर्वेण नित्ये प्राप्ते विकल्प्यते । पक्षे ठञ् (५-१-७८, ७९) ।

५-१-८६ **रात्र्य... सरात्**= रात्रि अहन् संवत्सर इत्यन्ताद्, द्विगोः (५-१-८५) वा (५-१-८५) खः (५-१-८४) निर्वृत्तादिषु पञ्चस्वर्थेषु । पक्षे प्राग्वट्ठञ् । **द्व्यहीनः, द्वैयह्निकः** समासान्तविधेरनित्यत्वान्न टच् (५-४-९१) ६-४-१४५ अह्नष्टखोरेवेति नियमात् खे टिलोपः । ठञि न, ६-४-१३४ अल्लो.... इत्यल्लोपः । **द्विसांवत्सरिकः** । ७-३-१५ संख्यायाः ..... इत्युत्तरपदादिवृद्धिः ।

५-१-८७ **वर्षात्** = वर्षशब्दान्तात्, द्विगोः (५-१-८५) वा (५-१-८५) खः (५-१-८४) निर्वृत्तादिषु पञ्चस्वर्थेषु । पक्षे प्राग्वट्ठञ् तयोश्च लुग् विकल्पेन । **द्विवार्षिकः** । ७-३-१६ वर्ष... इत्युत्तरपदादिवृद्धिः । **द्वैवर्षिकः** । अभविष्यतीत्युक्तेरादिवृद्धिरेव ।

५-१-८८ **चित्त**- वर्षात् (५-१-८७) = वर्षशब्दान्तात्, द्विगोः (५-१-८५) भूते विहितस्य प्रत्ययस्य, नित्यम्, लुक् (५-१-८७) चित्तवति= प्रत्ययार्थे चित्तवति गम्यमाने । पूर्वेण विकल्पेन प्राप्ते वचनम् । अत्र न्यासः- भूत एवास्योत्पन्नस्य प्रत्ययस्य चित्तवति नित्यं लुगिष्यते, न सर्वत्रेति । आरम्भसामर्थ्यादेव नित्यत्वे सिद्धे पुनर्नित्यग्रहणादेतल्लभ्यत इति तदाशयः । तेनाधीष्टादौ पूर्वेण विभाषयैव लुग् भविष्यतीति पदमञ्जरी ।

५-१-८९ **षष्टिका**-षष्टिरात्रेण = षष्टिरात्रशब्दप्रकृतिक- तृतीयान्तात्, पच्यन्ते = पच्यन्त इत्यर्थे, षष्टिकाः = (षष्टिकशब्दो निपात्यते) = कन् प्रत्ययो रात्रभागस्य लोपश्च । बहुवचनमतन्त्रम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-९० वत्सरान्ताच्छश्छन्दसि ॥ ९१

इद्वत्सरीयः । इदावत्सरीयः ।

५-१-९१ संपरिपूर्वात् ख च ॥

संवत्सरीणः । संवत्सरीयः । परिवत्सरीणः । परिवत्सरीयः ।

५-१-९२ तेन परिजय्य-लभ्य-कार्य-सुकरम् ॥

मासेन परिजय्यः = मासिको व्याधिः ।
मासेन लभ्यं कार्यं सुकरं वा मासिकम् ।

५-१-९३ तदस्य ब्रह्मचर्यम् ॥

मासं ब्रह्मचर्यमस्य मासिको ब्रह्मचारी । मासोऽस्य (ब्रह्मचर्यस्य) मासिकं ब्रह्मचर्यम् ।
(महानाम्न्यादिभ्यः षष्ठचन्तेभ्य उपसंख्यानम्)
अत्र दीक्षितः - महानाम्न्यो नाम विदा मघवन्नित्याद्या ऋचः । तासां ब्रह्मचर्यमस्य माहानाम्निकः । इति । अत्र काशिका- माहानामिकम् । इति । अत्र न्यासः - ब्रह्मचर्य एवार्थ इदमुपसंख्यानमिति ।
(तच्चरतीति च)
महानाम्न्य ऋचः । तत्सहचरितं व्रतं तच्छब्देनोच्यते । महानाम्नीश्चरति माहानामिकः ।
(अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः)
तच्चरति । अवान्तरदीक्षां चरति अवान्तरदीक्षी ।
(अष्टाचत्वारिंशतो ड्वुँश्च डिनिँश्च वक्तव्यः)
अष्टाचत्वारिंशद् वर्षाणि व्रतं चरति अष्टाचंत्वारिंशकः । अष्टाचत्वारिंशी ।
(चातुर्मास्यानां यलोपश्च ड्वुँश्च डिनिँश्च वक्तव्यः)
चातुर्मास्यानि चरति-चातुर्मासकः । चातुर्मासी ।
(चतुर्मासाण्ण्यो यज्ञे तत्र भवे)
चतुर्षु मासेषु भवानि चातुर्मास्यानि ।
(संज्ञायामण् वक्तव्यः)
चतुर्षु मासेषु भवा चातुर्मासी पौर्णमासी । आषाढी । कार्तिकी । फाल्गुनी ।

५-१-९४ तस्य च दक्षिणा यज्ञाख्येभ्यः ॥

अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकी ।

५-१-९० वत्सरान्तात्= वत्सरशब्दान्त प्रकृतिकात् +तेन (५-१-७८) + तम् (५-१-५९) छ = छप्रत्ययो भवति निर्वृत्तादिष्वर्थेषु छन्दसि= वेदे ।

५-१-९१ संपरिपूर्वात्=संपरिपूर्वकाद्, वत्सरान्तात्+छन्दसि (५-१-९०) खः = खप्रत्ययो भवति, छ (५-१-९०) च, निर्वृत्तादिष्वर्थेषु ।

५-१-९२ तेन-- कालात् (५-१-७७) तेन= तृतीयान्तात् परि... करम्=परिजय्यादिष्वर्थेषु, ठञ् (५-१-१८) । परिजय्यः = सर्वतो जेतुं शक्य इत्यर्थः । ३-३-१७२ शकि... इति शक्यार्थे कृत्यप्रत्यये ३-१-९७ अचो.... इति यत् प्रत्यये गुणे ६-१-७८ क्षय्य....... इति शक्यार्थे ऽयादेशविधानात् ।

५-१-९३ तद= ब्रह्मचर्यम्= ब्रह्मचर्यमित्युपाधिकात्, कालात् (५-१-७७) तत् = द्वितीयान्तात्, अस्य 'अस्य' इत्यर्थे, ठञ् (५-१-१८) । अत्र पक्षे 'तत्' इत्यत्र २-३-५ काला.... इत्यत्यन्तसंयोगे द्वितीया । **अर्थान्तरं** च-कालात् (५-१-७७) तत् = प्रथमान्तात् 'अस्य' इत्यर्थे, ठञ् (५-१-१८) ब्रह्मचर्यम् = प्रत्ययार्थो ब्रह्मचर्यं चेत् । अत्र पक्षे 'तत्' इति प्रथमान्तम् । अत्र काशिका- पूर्वत्र ब्रह्मचारी प्रत्ययार्थः । उत्तरत्र ब्रह्मचर्यमेव । उभयमपि प्रमाणमुभयथा सूत्रप्रणयनात् । इति । अत्र हरदत्तः - उभयोरर्थयोः सूत्रकारेणैव सूत्रस्य व्याख्यातत्वादित्यर्थ इति । **माहानाम्निकः** । अभाषितपुंस्कत्वं मन्यते । **माहानामिकम्** । यौगिकं मन्यते । अतः ६-३-३५ तसिँ..... सूत्रस्थ - भस्याढे. इति वार्तिकेन पुंवत् । ६-४-१४४ नस्त.... इति टिलोपः ।

अष्टा- अत्र हरदत्तः - वृत्तिविषये वर्षेषु संख्येयेषु अष्टाचत्वारिंशच्छब्दो वर्तते - प्रतिवेदं द्वादश वर्षाणि व्रतचरणाच्चतुर्षु वेदेष्वष्टाचत्वारिंशतं वर्षाणि व्रतं चरतीति ।

चतुर्मासात् = चतुर्मासशब्दप्रकृतिकात्, तत्र= सप्तम्यन्तात्, भवे= भवार्थे, ण्यः, यज्ञे= यज्ञे विषये ।

संज्ञा- चतुर्मासाद् भवे ।

५-१-९४ तस्य- यज्ञाख्येभ्यः = यज्ञवाचिशब्दप्रकृतिकात्, तस्य= षष्ठ्यन्तात्, दक्षिणा= दक्षिणा इत्यर्थे, ठञ् (५-१-१८) । आख्याग्रहणमकालादपि यज्ञवाचिनो विधानार्थम् । अन्यथा कालात् (५-१-७७) इत्यधिकारात्, एकाह-द्वादशाह- प्रभृतिभ्य एव स्यात्, प्राग्वतेः संख्यापूर्वपदानां तदन्तविधिसत्त्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-९५ तत्र च दीयते कार्यं भववत् ॥
अत्र योगो विभज्यते-
प्र. ५-१-९५ **तत्र च दीयते** ॥ ९६, ९७
अग्निष्टोमे दीयते- आग्निष्टोमिकं भक्तम्।
द्वि. ५-१-९५ **कार्यं** भववत् ॥ ९७
मासे दीयते भवं वा मासिकम्। प्रावृषेण्यम्।
शारदम्।
कालाऽधिकारस्य पूर्णोऽवधिः।
इतः परं सामान्येन प्रत्ययविधानम्।

५-१-९६ व्युष्टादिभ्योऽण् ॥
व्युष्टे दीयते कार्यं वा वैयुष्टम्।
(अग्निपदादिभ्य उपसंख्यानम्)
अग्निपदे दीयते कार्यं वाऽऽग्निपदम्।
पैलुमूलम्।

५-१-९७ तेन यथाकथाचहस्ताभ्यां-णयतौ ॥
यथाकथाच दीयते कार्यं वा याथाकथाचम्।
हस्तेन दीयते कार्यं वा हस्त्यम्।

५-१-९८ सम्पादिनि ॥ ९९
कर्णवेष्टकाभ्यां सम्पादि= कार्णवेष्टिकं मुखम्।
वस्त्रयुगेण सम्पादि= वास्त्रयुगिकं शरीरम्।
अवश्यं शोभत इत्यर्थः। विशेषतः शोभते इत्यर्थ इति काशिका।

५-१-९९ कर्मवेषाद् यत् ॥
कर्मणा सम्पादि= कर्मण्यं शौर्यम्।
वेषेण सम्पादी = वेष्यो नटः।

५-१-१०० तस्मै प्रभवति सन्तापादिभ्यः ॥ १०२
सन्तापाय प्रभवति= सान्तापिकः।

५-१-१०१ योगाद् यच्च ॥
योगाय प्रभवति=योग्यः। यौगिकः।

५-१-१०२ कर्मण उकञ् ॥
कर्मणे प्रभवति= कार्मुकं धनुः।

५-१-१०३ समयस्तदस्य प्राप्तम् ॥ ११३, १०६
समयः प्राप्तोऽस्य सामयिकं कार्यम्।

प्र. ५-१-९५ तत्र- यज्ञात्त्विग्भ्यः (५-१-९४) तत्र= सप्तम्यन्तात्, दीयते='दीयते' इत्यर्थे, ठञ् (५-१-१८)।
द्वि. ५-१-९५ कार्य- 'तत्र च दीयते' इत्यनुवर्तते।
कालात् (५-१-७७) तत्र= सप्तम्यन्तात्, दीयते, कार्यम्' इत्येतयोरर्थयोः, भववत् = ४-३-५३ तत्र भव इति प्रकरणे इव प्रत्यया भवन्ति।
५-१-९६ व्युष्टादिभ्यः= व्युष्टप्रभृतिकात्, तत्र दीयते कार्यम् (५-१-९५) अण्= अण् प्रत्ययो भवति। **वैयुष्टम्** ७-३-३ न य्वा..... इत्यैच्।
५-१-९७ तेन- यथा... स्ताभ्याम्=यथाकथाचप्रकृतिकात् हस्तशब्दप्रकृतिकाच्च, तेन= तृतीयान्तात्, दीयते, कार्यम् (५-१-९५) ण - यतौ। (यथासंख्यं)=ण यत् प्रत्ययौ भवतः। 'यथाकथाच' इत्यव्ययसमुदायः। अतस्तत्रार्थमात्रं तृतीयायाः।
५-१-९८ सम्पा- तेन (५-१-९७) सम्पादिनि = अवश्यशोभिन्यर्थे, ठञ् (५-१-१८)।
५-१-९९ कर्मवेषात्=कर्म (न्) वेष- शब्दप्रकृतिकात्, तेन (५-१-९७) सम्पादिनि (५-१-९८) यत्= यत् प्रत्ययो भवति। **कर्मण्यम्** ६-४-१६८ ये चा..... इति प्रकृतिभावः।
५-१-१०० तस्मै-सन्तापादिभ्यः=सन्तापादिप्रकृतिकात्, तस्मै = चतुर्थ्यन्तात्, प्रभवति = समर्थो भवतीत्यर्थे, ठञ् (५-१-१८)।
५-१-१०१ योगात् = योगशब्दप्रकृतिकात्, तस्मै प्रभवति (५-१-१००) यत्= यत् प्रत्ययो भवति, ठञ् (५-१-१८) च।
५-१-१०२ कर्मणः=कर्म (न्) शब्दप्रकृतिकात्, तस्मै प्रभवति (५-१-१००) उकञ्= उकञ् प्रत्ययो भवति। अत्र काशिका- धनुषोऽन्यत्र न भवति, अनभिधानादिति।
५-१-१०३ सम- प्राप्तम्= प्राप्तोपाधिकात्, समयः = समयशब्दप्रकृतिकात्, तत् = प्रथमान्तात्, अस्य='अस्य' इत्यर्थे, ठञ् (५-१-१८) तदिति प्रथमान्तनिर्देश उत्तरार्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-१०४ ऋतोरण् ॥ १०५
ऋतुः प्राप्तोऽस्य आर्तवं पुष्पम् ।
(उपवस्त्रादिभ्य उपसंख्यानम्)
उपवस्ता प्राप्तोऽस्य औपवस्त्रम् ।

५-१-१०५ छन्दसि घस् ॥
अयं ते योनिर्ऋत्वियः ।

५-१-१०६ कालाद्यत् ॥ १०७
कालः प्राप्तोऽस्य काल्यस्तापः । काल्यं शीतम् ।

५-१-१०७ प्रकृष्टे ठञ् ॥
प्रकृष्टो दीर्घः कालोऽस्य कालिकमृणम् ।
कालिकं वैरम् ।

५-१-१०८ प्रयोजनम् ॥ ११३
इन्द्रमहः प्रयोजनमस्य= ऐन्द्रमहिकम् ।

५-१-१०९ विशाखाषाढादण् मन्थदण्डयोः ॥
विशाखा प्रयोजनमस्य वैशाखो मन्थः ।
आषाढो दण्डः ।
(चूडादिभ्य उपसंख्यानम्)
चूडा प्रयोजनमस्य चौडम् ।
श्रद्धा प्रयोजनमस्य श्राद्धम् ।

५-१-११० अनुप्रवचनादिभ्यश्छः ॥ १११
अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयम् ।
(विशि-पूरि-पति- रुहि-प्रकृतेरनात् स-पूर्वपदादुपसंख्यानम् ।
गृहप्रवेशनं प्रयोजनमस्य गृहप्रवेशनीयम् ।
प्रपापूरणीयम् । अश्वप्रपतनीयम् ।
प्रासादारोहणीयम् ।
(स्वर्गादिभ्यो यद् वक्तव्य :)
स्वर्गः प्रयोजनमस्य स्वर्ग्यम् । यशस्यम् ।
(पुण्याहवाचनादिभ्यो लुग् वक्तव्यः)
पुण्याहवाचनं प्रयोजनमस्य पुण्याहवाचनम् ।

५-१-१०४ ऋतोः = ऋतुशब्दप्रकृतिकात्, तदस्य प्राप्तम् (५-१-१०३) अण्= अण् प्रत्ययो भवति ।
उपवस्त्रादिभ्यः = उपवस्तृ-प्रभृतिभ्यः ।
उपवस्ता = उपवासस्य कर्ता ।
५-१-१०५ छन्द- ऋतोः (५-१-१०४) तदस्य प्राप्तम् (५-१-१०३) घस् = घस् प्रत्ययो भवति,छन्दसि= वेदे । अणोऽपवादः । **ऋत्वियः** १-४-१६ सिति.... इति पदत्वाद् भत्वाभावेन ६-४-१४६ ओर्गु..... इति गुणाऽप्राप्तौ ६-१-७४ इको.... इति यण् ।
५-१-१०६ कालात्= कालशब्दप्रकृतिकात्, तदस्य प्राप्तम् (५-१-१०३), यत्=यत् प्रत्ययो भवति ।
५-१-१०७ प्रकृष्टे=प्रकृष्टेऽर्थे वर्तमानात्, कालात् (५-१-१०६) तदस्य (५-१-१०३) ठञ्=ठञ् प्रत्ययो भवति । प्राप्तमिति निवृत्तम् । ठञ्ग्रहणं स्पष्टार्थम् । अन्यथा यतोऽनुवृत्तिराशङ्क्येत ।
५-१-१०८ प्रयोजनम्= प्रयोजनमित्युपाधिकात् तदस्य (५-१-१०३) ठञ् (५-१-१८) । महः= उत्सवः ।
५-१-१०९ विशा- प्रयोजनम् (५-१-१०८) विशाखाषाढात्= विशाखा अषाढा इति प्रकृतिकात्, तदस्य (५-१-१०३) अण् = अण् प्रत्ययो भवति, मन्थदण्डयोः= मन्थदण्डयोर्वाच्ययोः । वैशाखाषाढशब्दौ रूढिरूपेण मन्थदण्डयोर्वर्तेते (क्रमेण) तयोर्यथाकथञ्चिद् व्युत्पत्तिः क्रियते, इति हरदत्तः ।
५-१-११० अनु- प्रयोजनम् (५-१-१०८) अनु... दिभ्यः= अनुप्रवचनप्रभृतिगणपठितप्रकृतिकात्, तद्+अस्य (५-१-१०३) छः = छप्रत्ययो भवति ।
विशि... प्रकृतेः+अनात्= विशप्रभृतिप्रकृतिको योऽनप्रत्ययस्तदन्तात्, स-पूर्वपदात्= विद्यमानपूर्वपदकात्, प्रयोजनम् (५-१-१०८) तदस्य (५-१-१०३) छः (५-१-११०) ।
स्वर्गा- प्रयोजनम् (५-१-१०८), स्वर्गादिभ्यः= स्वर्गप्रभृतिगणपठितशब्द-प्रकृतिकात्, तद्+ अस्य (५-१-१०३) यद् वक्तव्यः ॥
पुण्या- प्रयोजनम् (५-१-१०८) इति विहितस्य प्रत्ययस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-१११ समापनात् स-पूर्वपदात्

व्याकरणसमापनं प्रयोजनमस्य व्याकरणसमापनीयम् ।

५-१-११२ ऐकागारिकट् चौरे ॥

एकमसहायमगारं प्रयोजनमस्य ऐकागारिकः= चौरः । ऐकागारिकी ।

५-१-११३ आकालिकडाद्यन्तवचने ॥

समानकालौ आद्यन्तौ अस्य= आकालिकः स्तनयित्नुः । आशु विनाशीत्यर्थः । आकालिकी विद्युत् ।

(आकालाट्ठँश्च)

आकालिका विद्युत् । आकालिकी ।

५-१-११४ तेन तुल्यं क्रिया चेद् वतिः ॥ ११७

श्यामेन तुल्यं श्यामवत् पठति । ब्राह्मणेन तुल्यं ब्राह्मणवदधीते । क्रिया चेदित्युक्तेर्नेह- पुत्रेण तुल्यः स्थूलः ।

५-१-११५ तत्र तस्येव ॥

गण्डकीतीरे इव गण्डकीतीरवद् गोमुखीतीरे श्रीदुर्गाहीरेश्वर-शिवपञ्चायतन-देवता मन्दिरम् । नीलाश्मन इव नीलाश्मवद् माण्डवीजलकान्तिः ।

५-१-११६ तदर्हम् ॥

विधिमर्हति विधिवत् पूज्यते । क्रिया चेदिति मण्डूकप्लुत्याऽनुवर्तते । तेनेह न- राजानमर्हतिच्छत्रम् ।

५-१-१११ समा- प्रयोजनम् (५-१-१०८) स-पूर्वपदात् + समापनात्= विद्यमानपूर्वपदकसमापनशब्द प्रकृतिकात्, तदस्य (५-१-१०३) छः (५-१-११०) । ठञो (५-१-१८)ऽ पवादः ।

५-१-११२ एका- चौरे = चौरे वाच्ये, ऐकागारिकट्= [प्रयोजनम् (५-१-१०८) एकागारप्रकृतिकात्, तदस्य (५-१-१०३) ठञ्] इति निपात्यते । उदाहरणे २-१-४९ पूर्वकालैक... इति समासे प्रकृतष्ठञ् । ५-१-१०८ प्रयोजनम् इत्येव सिद्धे चौरे एवेति नियमार्थमिदम् । तेनेह न- एकागारं प्रयोजनमस्य भिक्षोरिति । ठञन्तादेव ङीपि सिद्धे टिद् ग्रहणं किमर्थमिति चेत् ? अत्र काशिका-टकारः कार्यावधारणार्थः -ङीबेव भवति, न ञित्स्वरः । अपरे पुनरिकट्प्रत्ययं वृद्धिं च निपातयन्तीति ।

५-१-११३ आका- आद्यन्तवचने= आद्यन्तार्थोपाधिकात्, आकालिकट्=समानकालशब्दात्, 'अस्य' (५-१-१०३) इत्यर्थे, इकट् प्रत्ययः प्रकृतेश्च आकालादेशो निपात्यते । **आशु विनाशीत्यर्थः** यस्मिन् काले मध्याह्नादावुत्पत्तिर्दिनान्तरे तदैव विनाशश्च येषां तानि वोच्यन्ते आकालिकानीति ।

आका- चाट्ठञ् ।

५-१-११४ तेन- ५-१-७३ योजनं... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । तेन= तृतीयान्तात्, तुल्यम् = तुल्यमित्यर्थे, वतिः = वतिँ प्रत्ययो भवति, क्रिया चेत्= तत् तुल्यं (प्रत्ययार्थः) क्रिया चेत् । इत्यर्थमुपदिश्य श्यामेन तुल्यं पठतीत्यत्र पठनक्रियां तुल्यशब्दो बोधयति, इति बोधनपुरस्सरं छात्रैर्लक्षणसमन्वयमग्रिमप्रक्रियां च साधयित्वा "श्यामवत्" इति श्यामपाटचां लिखित्वा १-१-३७ तद्धितश्चा....... सूत्रमुपदिशेत् ।

५-१-११५ तत्र= सप्तम्यन्तात्, तस्य= षष्ठ्यन्ताच्च, इव=इव इत्यर्थे, वतिः (५-१-११४) । क्रिया चेदिति नेहानुवर्तते ।

५-१-११६ तद-तद्= द्वितीयान्तात्, अर्हम्= अर्हतीत्यर्थे, वतिँ+ क्रिया चेत् (५-१-११४) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-११७ उपसर्गाच्छन्दसि धात्वर्थे ॥
यदुद्वतो निवतः । उद्गतान्निर्गतादित्यर्थ इति दीक्षितः ।

५-१-११८ तस्य भावस्त्वतलौ ॥ १३४
गोर्भावः = गोत्वम् । गोता ।

त्वान्तं क्लीबम् । तलन्तं स्त्रियाम् ।

५-१-११९ आ च त्वात् ॥ १३४
प्रथिमा । पृथुत्वम् । पृथुता । पुंस्त्वम् पुंस्ता । पौंस्नम् । स्त्रीत्वम् । स्त्रीता । स्त्रैणम् ।

५-१-११७ उप- धात्वर्थे= धात्वर्थविशिष्टसाधने वर्तमानात्, उपसर्गात्, छन्दसि= वेदे वतिः (५-१-११४)। अत्र धातुशब्देन धात्वर्थः = क्रिया लक्ष्यते, अर्थः =प्रयोजनमस्य साधनस्येति बहुव्रीहिः । उपसर्गाः क्रियायां श्रूयमाणायां तामेव विशिंषन्ति, यथा-आगच्छति । अश्रूयमाणायां क्रियायां क्रियाविशिष्टसाधनमाहुः । अत्र साधनशब्देन शक्तिमद् द्रव्यमुच्यते, न शक्तिमात्रमिति लिङ्गसख्यायोगादन्वर्थाव्ययसंज्ञा न भवतीति हरदत्तः ।

५-१-११८ तस्य-१-१-३७ तद्धितश्चा..... सूत्रानन्तरं सूत्रमिदं पाठचम् । एतत्सूत्रार्थबोधनात् पूर्वं भावपदार्थमधो निर्दिष्टरूपेण श्यामपाटचां लिखित्वा बोधयेत् । यथा-
भावचित्रम्

(क)





वत्सा: ? यथा (क) चित्रे त्रयः पदार्थाः प्रतीयन्ते- उपरि घटः । घटस्याऽधो घटभूतलयोः संयोगः । संयोगस्या ऽधश्च भूतलम् । तत्र उपरितनः पदार्थः (प्रकृते घटः) प्रकार इत्युच्यते । मध्यवर्ती पदार्थः (प्रकृते घटभूतलयोः संयोगः) संसर्ग इत्युच्यते । अधस्तनः पदार्थः (प्रकृते भूतलम्) विशेष्यम्, इत्युच्यते । तथैव (ख) चित्रेऽपि त्रय पदार्थाः प्रतीयन्ते- उपरि घटवृत्ति धर्मः (घटत्वम्) घटवृत्तिधर्मस्य (घटत्वस्य) अधो घट-घटत्वयोः समवायः । समवायस्याऽधश्च घटः । तत्र, उपरिभागः (प्रकृते घटत्वम्) प्रकारः । प्रकारस्याऽधो भागः (प्रकृते घटघटत्वयोः समवायः) संसर्गः । संसर्गस्या ऽधो भागः (प्रकृते घटः) विशेष्यः । (विशेषणशब्दो नित्यं क्लीबे । विशेष्यशब्दस्तु विशेष्यानुसारीत्यवधेयम्) इत्यवधेयम् । अथाऽत्र पुनरग्रे शिक्षको ऽधोनिर्दिष्टरूपेण विशदयेत् । वत्साः ? कदाचिद् रज्जुं दृष्ट्वा सर्प इति भ्रमेण जना उद्विजन्ते । तत्रोद्वेगस्य कारणं रज्जुर्न किन्तु सर्पो ऽयमिति ज्ञानम् । अर्थाद् यथा (क) वाक्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिप्रकाशस्त्रिषु स्थानेषु गच्छति, तथैव (ख) वाक्ये ऽपि बुद्धिप्रकाशस्त्रिषु स्थानेषु गच्छति। तत्र उपरि भागे गच्छन् बुद्धिप्रकाशः प्रकारं प्रकाशयति। यदा उपरितनो बुद्धिप्रकाशो भ्रमयुक्तो भवति तदा रज्जुरपि सर्पः प्रतीयते। अर्थाद् रज्ज्वां वर्तमानः प्रकारः (रज्जुत्वं) प्रकारान्तर (सर्पत्व) मिव धर्मो धर्मान्तरमिव प्रतीयते। अतः कस्मिँश्चिदपि वस्तुनि तद्वर्ती कश्चित् पृथग् धर्मो भवतीति प्रतीयते। स एव उपरि वर्तमानो धर्मः प्रकार उच्यते। स एव च भावपदार्थ इति। एनमेव च भावं प्रकारान्तरेणापि बोधयन्ति। यथा- प्रकृतिजन्यबोधे प्रकारीभूतो धर्मो भावः। प्रकारीभूतेन धर्मेण वस्तु परिचीयते। अतएव शीर्णावयवं वस्तु न परिचीयते प्रकारीभूतधर्मस्या ऽग्राह्यत्वात्। इति। अथ, तस्य= षष्ठ्यन्तात्, भावः='भावः' इत्यर्थे, त्वतलौ = त्व तल् इत्येतौ प्रत्ययौ भवतः। इति सूत्रार्थं छात्रैः प्रतिपाद्य 'घटस्य भावः" इति विग्रहं प्रदर्श्य छात्रैरेव लक्षणसमन्वयं कारयित्वा 'त्वान्तं क्लीबम्,' 'तलन्तं स्त्रियाम्' इत्युपदिश्य घटत्वम्। घटता (घट-वृत्ति-धर्मः) इति रूपे साधयेत्। अथ ५-२-१ धान्यानां... सूत्रमुपदिशेत्।

५-१-११९ आच- आत्वात् = ५-१-१३५ ब्रह्मणस्त्वः, इति सूत्रात् प्राक्, त्वतलौ (५-१-११८) अधिक्रियेते। अपवादैः सह समावेशार्थं कर्मणि विधानार्थं चेदम्। चकारो नञ्स्नञ्भ्यां समावेशार्थः। **प्रथिमा** ५-१-२१ पृथ्वा.... सूत्रं द्रष्टव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-१२० न नञ्पूर्वात् तत्पुरुषादचतुरसङ्गतलवणवटयुधकतरसलसेभ्यः ।

अपतित्वम् । अपटुत्वम् । नञ्पूर्वादित्युक्तेर्नेह निषेधः - प्राजापत्यम् । बार्हस्पत्यम् । एवं बहुव्रीहौ- आपत्यम् । आपटवम् ।
अचतुरेत्याद्युक्तेर्नेहापि निषेधः - आचतुर्यम् । आसङ्गत्यम् । आलवण्यम् । आवट्यम् । आयुध्यम् । आकत्यम् । आरस्यम् । आलस्यम् । सूत्रे युधस्थाने बुध इति पाठान्तरम् । तथा पाठे- आबुध्यम् ।

५-१-१२१ पृथ्वादिभ्य इमनिँज् वा ॥११२

पृथोर्भावः प्रथिमा । पार्थवम् । पृथुत्वम् । पृथुता ।

५-१-१२२ वर्णदृढादिभ्यः ष्यञ् च ॥ २३

शौक्ल्यम् । शुक्लिमा । शुक्लत्वम् । शुक्लता । दार्ढ्यम् । द्रढिमा । दृढत्वम् । दृढता ।

५-१-१२३ गुणवचन-ब्राह्मणादिभ्यः कर्मणि च ॥ १३५

जडस्य भावः कर्म वा जाड्यम् । ब्राह्मण्यम् ।
(अर्हतो नुँम् च) ग.सू.
अर्हतो भावः कर्म वा आर्हन्त्यम् । आर्हन्ती ।
(चतुर्वर्णादीनां स्वार्थ उपसंख्यानम्)
चत्वारो वर्णाश्चातुर्वर्ण्यम् । चातुराश्रम्यम् । सान्निध्यम् । सौख्यम् ।
(चतुर्वेदस्योभयपदवृद्धिश्च) ग.सू.
चतुर्वेद एव=चातुर्वैद्यः । चतुर्विद्यस्येति पाठान्तरम् । चतुर्विद्य एव=चातुर्वैद्यः ।

५-१-१२४ स्तेनाद् यन्नलोपश्च ॥

स्तेनस्य भावः कर्म वा स्तेयम् । स्तेनादिति योगं विभज्य स्तैन्यमिति ष्यञन्तमपि केचिदिच्छन्ति ।

५-१-१२० न नञ्- अचतुर..... लसेभ्यः = चतुरप्रभृतिभिन्नात्, नञ्पूर्वात् = नञ्पूर्वकात्, तत्पुरुषात्=तत्पुरुषसमासात्, न= वक्ष्यमाणा भावप्रत्यया न भवन्ति । उदाहरण-प्रत्युदाहरणेषु- पत्यन्तात् ५-१-१२७ पत्यन्त..... इति यकः प्राप्तिः । पटुशब्दान्तात् ५-१-१३० इगन्ताच्च...... इत्यणः प्राप्तिः । शेषेषु सर्वत्र ब्राह्मणादित्वाद् ५-१-१२३ गुणवचन.... इति ष्यञः प्राप्तिः ।
५-१-१२१ पृथ्वादिभ्यः = पृथुप्रभृतिगणपठितशब्दप्रकृतिकात्, तस्य+भावः (५-१-११८) वा=विभाषया इमनिँच्= इमनिँच् प्रत्ययो भवति । वा वचनमणा (५-१-१३०) दि-समावेशार्थम् । त्वतलौ तु ५-१-११९ आ च त्वादित्यधिक्रियेते एव ।
प्रथिमा ६-४-१६१ र ऋ..... इति रेफादेशः । ६-४-१५५ टेः, इति टिलोपः । **पार्थवम्** ५-१-१३० इग.... इत्यण् । ६-४-१४६ ओर्गु.... इति गुणः ।
५-१-१२२ वर्णदृढादिभ्यः = वर्णवाचिशब्दप्रकृतिकाद् दृढप्रभृतिगणपठित- शब्दप्रकृतिकाच्च, तस्य+भावः (५-१-११८) ष्यञ् =ष्यञ् प्रत्ययः, इमनिँच् (५-१-१२१) च= इमनिँच् प्रत्ययश्च, भवतः ।
५-१-१२३ गुण... दिभ्यः = गुणवाचिशब्दप्रकृतिकाद् ब्राह्मणप्रभृतिगणपठितशब्दप्रकृतिकाच्च, तस्य+ भावः (५-१-११८) कर्मणि च = कर्मार्थेऽपि, ष्यञ् (५-१-१२२) ।
चतुर्वेदस्यो-चतुर्वेदः चतुरो वेदानधीते २-१-५१ तद्धि..... इति समासः । ४-२-५९ तदधीते...इत्यण् । ४-१-८८ द्विगोर्लु... इति तस्य लुक् । **चतुर्विद्यः** ।- ४-२-६० क्रतु..सूत्रस्थेन विद्यालक्षण... इति वार्तिकेन ठक् । तस्य लुक् ।
५-१-१२४ स्तेनात् = स्तेनशब्दप्रकृतिकात्, तस्य+भावः (५-१-११८) कर्मणि च (५-१-१२३), यत् =यत् प्रत्ययो भवति, नलोपश्च= नकारलोपश्च भवति । नेति सङ्घातग्रहणम् ।
ष्यञन्तमपीति- स्तेनात् इत्यत्र ५-१-१२२ वर्ण...... सूत्रात् ष्यञ् इत्यनुवर्त्येति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-१२५ सख्युर्यः ॥

सख्युर्भावः कर्म वा सख्यम् ।

(दूतवणिग्भ्यां चेति वक्तव्यम्)

दूतस्य भावः कर्म वा दूत्यम् । वणिज्यम् । ब्राह्मणा (५-१-१२३) दित्वाद् वाणिज्यमपि ।

५-१-१२६ कपिज्ञात्योर्ढक् ॥

कपेर्भावः कर्म वा कापेयम् । ज्ञातेयम् ।

५-१-१२७ पत्यन्तपुरोहितादिभ्यो यक् ॥

सैनापत्यम् । पौरोहित्यम् ।(राजाऽसे) ग. सू. राज्ञो भावः कर्म वा राज्यम् । समासे तु ब्राह्मणा (५-१-१२३) दित्वात् ष्यञ् । आधिराज्यम् ।

५-१-१२८प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ॥

अश्वस्य भावः कर्म वा आश्वम् ।

कौमारम् । औद्गात्रम् ।

५-१-१२९ हायनान्तयुवादिभ्योऽण् ॥ ३०

द्वैहायनम् । यौवनम् ।

(श्रोत्रियस्य यलोपश्च)

श्रोत्रियस्य भावः कर्म वा श्रौत्रम्

५-१-१३० इगन्ताच्च लघुपूर्वात् ॥

शुचेर्भावः कर्म वा शौचम् ।

मौनम् । अत्र काशिका- कथं काव्यमिति ? ब्राह्मणादिषु कविशब्दो द्रष्टव्य इति ।

५-१-१२५ **सख्युः** = सखिशब्दप्रकृतिकात्,, तस्य+भावः (५-१-११८) कर्मणि च (५-१-१२३), यः = यप्रत्ययो भवति ।

५-१-१२६ **कपिज्ञात्योः** = कपिज्ञातिशब्दप्रकृतिकात्,
तस्य+भावः (५-१-११८) कर्मणि च (५-१-१२३) ढक् = ढक् प्रत्ययो भवति ।

५-१-१२७ **पत्यन्त**पुरोहितादिभ्यः= पतिशब्दान्तशब्दप्रकृतिकात् पुरोहितप्रभृति - गणपठितशब्दप्रकृतिकाच्च, तस्य+भावः (५-१-११८) कर्मणि च (५-१-१२३), यक् = यक् प्रत्ययो भवति ।

राजा= राजन्शब्दः, असे= असमासे, भावः (५-१-११८) कर्मणि च (५-१-१२३) यकं लभते । **आधिराज्यम्** । यद्यपि ब्राह्मणादिषु राजन् शब्दः पठचते, तथापि, अत्रैव असे= असमासे इत्युक्त्या राजन् शब्दे तदन्तविधिरिति ज्ञापनात् तदन्तात् ष्यञ् । असमासे विशेषविधानाद् यगेव ।

५-१-१२८ **प्राण... दिभ्यः** प्राणभृज्जा**ति**वाचिशब्दप्रकृतिकाद् वयोवाचिशब्दप्रकृतिकाद् उद्गातृप्रभृतिगणपठित शब्दप्रकृतिकाच्च, तस्य भावः (५-१-११८) कर्मणि च (५-१-१२३) अञ् = अञ् प्रत्ययो भवति ।

५-१-१२९ हाय.... दिभ्यः = हायनशब्दान्तशब्दप्रकृतिकाद् युव (न्) प्रभृतिगणपठितशब्दप्रकृतिकाच्च, तस्य भावः (५-१-११८) कर्मणि च (५-१-१२३) अण् = अण् प्रत्ययो भवति । **यौवनम्**- ६-४-१६७ अन्, इति प्रकृति भावान्न टिलोपः ।

श्रोत्रियस्य= श्रोत्रियशब्दप्रकृतिकात्, तस्य+भावः (५-१-११८) कर्मणि च (५-१-१२३) अण् (५-१-१२९.) यलोपश्च ।

५-१-१३० **इग- लघुपूर्वात्** (लघुपूर्वावयवकात्)+इगन्तात्= लघुपूर्वावयवकेगन्तप्रकृतिकात्, तस्य+भावः (५-१-११८) कर्मणि च (५-१-१२३) अण् (५-१-१२९.) । अत्र काशिका- लघुः पूर्वोऽवयवोऽस्ये ति लघुपूर्वः । कुतः पुनरसौ लघुः पूर्वः ? इक्सन्निधानादिक इति विज्ञायते, इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-१-१३१ योपधाद् गुरूपोत्तमाद् वुँञ् ॥१३३

रमणीयस्य भावः कर्म वा रामणीयकम्।
योपधादित्युक्तेर्नेह- कुलीनत्वम्।
गुरूपोत्तमादित्युक्तेर्नेह- क्षत्रियत्वम्।
(सहायाद् वा)
साहायकम्। साहाय्यम्।

५-१-१३२ द्वन्द्वमनोज्ञादिभ्यश्च ॥

शैष्योपाध्यायिका। मानोज्ञकम्।

५-१-१३३ गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ॥

गार्गिकया श्लाघते। काठिकया श्लाघते। गार्ग्यत्वेन कठत्वेन च विकत्थते इत्यर्थः। गार्गिकया ऽत्याकुरुते। काठिकयाऽत्याकुरुते। गार्ग्यत्वेन कठत्वेन च अधिक्षिपतीत्यर्थः। गार्गिकामवेतः। काठिकामवेतः। गार्ग्यत्वं कठत्वं च प्राप्त इत्यर्थः। ज्ञातवानिति वाऽर्थः। श्लाघादिष्वविषयेषु तु गार्ग्यत्वम्। कठत्वम्।

५-१-१३४ होत्राभ्यश्छः ॥

होत्राशब्द ऋत्विग्विशेषवचनः। अच्छावाकस्य भावः कर्म वा अच्छावाकीयम्। मित्रावरुणीयम्।

५-१-१३५ ब्रह्मणस्त्वः ॥

ब्रह्मणो भावः कर्म वा ब्रह्मत्वम्।
नेति वक्तव्ये त्ववचनं तलो बाधनार्थम्।
ब्राह्मणपर्यायाद् ब्रह्मन्शब्दात्तु त्वतलौ भवत एव। ब्रह्मत्वम्। ब्रह्मता।
नञ्स्नञोरधिकारः समाप्तः।

इति पञ्चमाध्याये
प्रथमः पादः।

५-१-१३१ योपधात् + गुरूपोत्तमात्= यकारोपधकगुरूपोत्तमकशब्दप्रकृतिकात्, तस्य+भावः (५-१-११८) कर्मणि च (५-१-१२३) वुँञ् = वुँञ् प्रत्ययो भवति। किमिदं गुरूपोत्तमादिति ? त्र्यादीनामन्त्यमुत्तमम्। तस्य समीपम्= उपोत्तमम्। २-१-६ अव्य...... इत्यव्ययीभाव-समासः। ततो गुरु उपोत्तमं यस्येति बहुव्रीहिः। तस्मात्। गुरूपोत्तमकादित्यर्थः।

५-१-१३२ द्वन्द्व... दिभ्यः = द्वन्द्वसमासप्रकृतिकाद् मनोज्ञप्रभृतिगणपठितशब्दप्रकृतिकाच्च, तस्य+ भावः (५-१-११८) कर्मणि च (५-१-२३) वुँञ् (५-१-१३१)।

५-१-१३३ गोत्र-अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यते। चरणशब्दश्च शाखाध्येतृषु रूढः। गोत्रचरणात्= अपत्यवाचिशब्द- प्रकृतिकाच्छाखाध्येतृवाचिशब्दप्रकृतिकाच्च, तस्य+भावः (५-१-११८) कर्मणि च (५-१-१२३) वुँञ् (५-१-१३१) श्लाघा....वेतेषु=श्लाघा= विकत्थनम्। अत्याकारः = अधिक्षेपः। तदवेतः = ते (तच्छब्देन गोत्रचरणयोर्भावकर्मणी परामृश्येते) अवेतः = प्राप्तः, ज्ञातो वा। इणः प्राप्त्यर्थत्वात्, अवपूर्वस्येणो ज्ञानार्थत्वाच्च। तदवेतः। इत्येतेषु विषयभूतेषु।

५-१-१३४ होत्राभ्यः:= ऋत्विग्विशेषवाचिशब्दप्रकृतिकात्, तस्य+भावः (५-१-११८) कर्मणि च (५-१-१२३) छः= छप्रत्ययो भवति। जुहोतेस्त्रन्प्रत्यये होत्राशब्दः सिध्यति। स च ऋत्विग्वाच्यपि स्वभावात् स्त्रीलिङ्गः। बहुवचनं स्वरूपविधिनिरासार्थम्।

५-१-१३५ ब्रह्म-होत्राभ्यः (५-१-१३४) + ब्रह्मणः = होत्रावाचि ब्रह्म(न्) शब्दप्रकृतिकात्, तस्य +भावः (५-१-११८) कर्मणि च (५-१-१२३) त्वः = त्वप्रत्ययो भवति।

इति पञ्चमाध्याये
प्रथमः पादः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पञ्चमाध्याये

द्वितीयः पादः

५-२-१ धान्यानां भवने क्षेत्रे खञ् ॥ ४

मुद्गानां भवनं क्षेत्रम्= मौद्गीनम्

५-२-२ व्रीहिशाल्योर्ढक् ॥

व्रैहेयम् । शालेयम् ।

५-२-३ यवयवकषष्टिकाद् यत् ॥

यव्यम् । यवक्यम् । षष्टिक्यम् ।

५-२-४ विभाषा तिलमाषोमाभङ्गा ऽणुभ्यः ॥

तिल्यम् । तैलीनम् । माष्यम् । माषीणम् । उम्यम् । औमीनम् । भङ्ग्यम् । भाङ्गीनम् । अणव्यम् । आणवीनम् ।

५-२-५ सर्वचर्मणः कृतः खखञौ ॥

सर्वः चर्मणा कृतः सर्वचर्मीणः ।

सार्वचर्मीणः ।

५-२-६ यथामुखसंमुखस्य दर्शनः खः ॥ १५

यथामुखं दर्शनः = यथामुखीनो दर्पणादिः ।

समस्य= सर्वस्य मुखस्य दर्शनः = संमुखीनो मुकुरादिः ।

५-२-१ धान्या– ५-१-११८ तस्य भाव... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र प्रथमं शिक्षकेण मननीयं यथा– भवन्त्यस्मिन्निति भवनम् । ३-३-११७ करणाऽधिकरणयोश्चेत्यधिकरणे ल्युँट् । अथ धान्यानामिति– धान्यशब्दादनुक्ते कर्तरि २-३-१८ कर्तृकरणयो... इति तृतीयां बाधित्वा २-३-६५ कर्तृकर्मणोः... इति षष्ठी । बहुवचनं स्वरूपविधिनिरासार्थमिति । यदिच्छात्राः सोत्साहास्तर्हि तेऽपि तथैव बोधयितव्याः । अथ शिक्षको धान्यशब्देन धान्यवाचीनि प्रातिपदिकानि गृह्यन्ते, इति बोधनपुरस्सरं धान्यानाम्= धान्यवाचिशब्दप्रकृतिकात् षष्ठचन्तात्, "भवने क्षेत्रे" = "भवनं क्षेत्रम्" इत्यर्थे, खञ्= खञ्प्रत्ययो भवति । इति सूत्रार्थं छात्रैः प्रतिपाद्य "मुद्गानां भवनं क्षेत्रम्" इति विग्रहं श्यामपाटचां लिखित्वा "मुद्गानां भवनं क्षेत्रम्"= "मुद्गानां खञ्"="मुद्ग+आम्+खञ्" इति ४-१-८७ स्त्रीपुंसाभ्यां... सूत्रे- दर्शितया रीत्या छात्रान् बोधयँस्तैरेव सति सम्भवे रूपं साधयेत् । सत्यावश्यके ७-१-२ आयनेयीनी... सूत्रमुद्बोधयेत् । अथ ५-२-२६ तेन वित्त... सूत्रमुपदिशेत् ।

५-२-२ व्रीहि-- धान्यानाम् (५-२-१) + व्रीहिशाल्योः = धान्यवाचि- व्रीहिशालिशब्दप्रकृतिक-षष्ठचन्ताद्, भवने+क्षेत्रे (५-२-१)= भवनं क्षेत्रमित्यर्थे, ढक्=ढक् प्रत्ययो भवति । खञोऽपवादः ।

५-२-३ यव- धान्यानाम् (५-२-१)+यव.... षष्टिकात्= धान्यवाचि- यव-यवक-षष्टिक-शब्द-प्रकृतिक-षष्ठचन्तात्, भवने+क्षेत्रे (५-२-१), यत्= यत्प्रत्ययो भवति ।

५-२-४ विभा--धान्यानाम् (५-२-१)+तिल...णुभ्यः = धान्यवाचि-तिल-माष-उमा-भङ्गा- अणु इतिशब्दप्रकृतिकषष्ठचन्तात्, भवने+क्षेत्रे (५-२-१) विभाषा=वा यत् (५-२-३) । पक्षे ५-२-१ धान्या.... इति खञ् । **अणव्यम्** । ६-४-१४६ ओर्गु..... इति गुणः । ६-१-७६ वान्तो..... इत्यवादेशः ।

५-२-५ सर्वचर्मण : = सर्वचर्म (न्) शब्दप्रकृतिकात् तृतीयान्तात्, (कृत इति कर्मप्रत्ययान्तयोगे कर्तृकरणयोस्तृतीयाया एव संभवेन तृतीयान्तादिति) सर्व+कृतः= सर्वःकृत इत्यर्थे खखञौ = ख खञ् प्रत्ययौ भवतः । अत्र सर्वशब्दः= प्रत्ययार्थेन 'कृतः' इत्यनेन सम्बध्यते, न तु चर्मणा । अर्थात्, "चर्मणा सर्वः कृतः" इति विग्रहे सर्वचर्मन्+टा इत्यतस्तद्धितवृत्तिरिष्यते । असामर्थ्येऽपि चर्मणा सह समासस्तु सूत्रे निपातनात् ।

५-२-६ यथा-दृश्यते ऽ स्मिन्निति दर्शनः = आदर्शादिः । अधिकरणे ल्युँट् । यथा.... खस्य = यथामुख-संमुखशब्दप्रकृतिक- षष्ठचन्तात्, दर्शनः = दर्शन इत्यर्थे, खः= ख प्रत्ययो भवति । मुखस्य सदृशं यथामुखम् । निपातनात्–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-७ तत् सर्वादेः पथ्यङ्ग-कर्म-पत्र-पात्रं व्याप्नोति ॥ १७

सर्वपथान् व्याप्नोति सर्वपथीनो रथः ।
सवाङ्गीणो विकासः । सर्वकर्मीणः पुरुषः ।
सर्वपत्रीणः सारथिः । सर्वपात्रीण ओदनः ।

५-२-८ आप्रपदं प्राप्नोति ॥

आप्रपदं प्राप्नोति=आप्रपदीनः पटः ।

५-२-९ अनुपद-सर्वान्नायानयं

बद्धा-भक्षयति-नेयेषु ।
अनुपदं बद्धा= अनुपदीना उपानत् ।
पदप्रमाणेत्यर्थः । सर्वान्नानि भक्षयति= सर्वान्नीनो भिक्षुः । अयानयं नेयः = अयानयीनः शारः ।

५-२-१० परोवर-परम्पर-पुत्रपौत्रमनुभवति ॥

पराँश्चावराँश्चाऽनुभवति= परोवरीणः ।
पराँश्च परतराँश्चाऽनुभवति=परम्परीणः ।
पुत्र-पौत्राननुभवति = पुत्रपौत्रीणः ।

५-२-११ अवारपारात्यन्तानुकामं गामी ॥

अवारपारं गामी=अवारपारीणः ।
अत्यन्तं गामी= अत्यन्तीनः । अनुकामं गामी = अनुकामीनः ।
(अवारपाराद् विगृहीतादपि विपरीताच्चेति वक्तव्यम्)
अवारीणः । पारीणः । पारावारीणः ।

सादृश्ये ऽव्ययीभावः । अत्र विग्रहे २-४-८३ नाव्य.... इति षष्ठ्या अभ्भावः । यत्रादर्शादौ प्रतिबिम्बं दृश्यते स **यथामुखीन** इत्युच्यते । भट्टिस्तु पदार्थानतिवृत्तौ यथाशब्दमाश्रित्य मायामृगं प्रक्रम्योक्तवान् यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन्, इति । **संमुखीनः** । सर्वपर्याय-समशब्दस्य मुखशब्देन कर्मधारयसमासे प्रत्ययसंनियोगेना ऽन्त्यलोपो निपात्यते । यत्रादर्शादौ सर्वं मुखं दृश्यते स संमुखीन इत्युच्यते ।

५-२-७ तत् स- सर्वादे : + पथ्यङ्ग... पात्रम् = सर्वशब्दादिका ये पथिन्, अङ्ग, कर्मन्, पत्र, पात्र, इत्येते शब्दास्तत्प्रकृतिकात्, तद्= द्वितीयान्तात्, व्याप्नोति='व्याप्नोति' इत्यर्थे खः (५-२-६) । **सर्वपथान्** इति- २-१-४९ पूर्वकालैक... इति समासे, ५-४-७४ ऋक्पूरब्धूः पथा.... इति समासान्ताकारः । ततो ऽदन्तात् खः ।

५-२-८ आप्रपदम्= आप्रपदशब्दप्रकृतिक- द्वितीयान्तात्, प्राप्नोति=प्राप्नोतीत्यर्थे, खः (५-२-६) । व्याप्नोति (५-२-७) इति प्रकृते प्राप्नोतीति वचनमर्थभेदात् । सम्बन्धमात्रं प्राप्तिः । साकल्येन सम्बन्धो व्याप्तिः । एतेन आप्रपदमित्यत्र २-१-१३ आङ् मर्यादा.... इति सूत्रेणाऽ व्ययीभावसमासो मर्यादायामिति ज्ञातं भवति ।

५-२-९ अनुपद ... नयम् = अनुपद सर्वान्न अयानय इति शब्दप्रकृतिकाद् द्वितीयान्तात्, बद्धा... येषु=बद्धा भक्षयति नेय (यथासंख्यम्) इत्येतेष्वर्थेषु, खः (५-२-६) । **अनुपदमिति** अनुरायामे सादृश्ये च । २-१-१६ यस्य चायाम इति २-१-६ अव्ययं विभक्ति ...... इति वा समासः । **अयानयीन इति** अयानयशब्दः शाराणां प्रदक्षिण-प्रसव्य-गमने रूढः । अयनमयः । तद्विरुद्धो ऽनयः । इति तु व्युत्पत्तिः । शारा नाम द्यूतसाधनविशेषाः । अत्र न्यासकारः - यत्र फलके ऽ क्षे ऽ क्षैर्दीव्यन्ति तस्य शिरोभूतं यत्र स्थानं कितवानां प्रसिद्धं तत्र स्थितः शारः 'अयानयीनः' इत्युच्यते इति । कितवयोः खलु क्रीडतोरभिमुखयोर्यदेवैकं प्रति प्रदक्षिणं गमनं तदेवेतरं प्रति प्रसव्यं भवति ।

५-२-१० परो-... पौत्रम्= परावर-परपरतर-पुत्रपौत्रशब्दप्रकृतिकाद् द्वितीयान्तात्, अनुभवति='अनुभवति' इत्यर्थे खः (५-२-६) । अवरशब्दस्यादेरुत्वं परपरतरशब्दस्थाने परम्परभावश्च प्रत्ययसन्नियोगेन निपात्येते । परम्पराशब्दस्तु अव्युत्पन्नं शब्दान्तरं स्त्रीलिङ्गम् । तस्मादेव स्वार्थे ष्यञ्ञ पारम्पर्यम् । पारोवर्यवदिति त्वसाधुरेव खप्रत्ययसन्नियोगेनैव परोवरेति निपातनात् ।

५-२-११ अवा- सूत्रे गामीति ३-३-३ भविष्यति गम्यादय इति भविष्यति विहितत्वात् तद्योगे कृत्षष्ठ्याः २-३-७० अकेनो... इति प्रतिषेधात् २-३-२ कर्मणि इति द्वितीया । अवा... कामम्=अवारपार अत्यन्त अनुकाम इति शब्दप्रकृतिक- द्वितीयान्तात्, गामी=गामीत्यर्थे, खः (५-२-६) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-१२ समां समां **विजायते** ॥ १३
समांसमीना गौः ।
सप्तम्यन्तात् प्रत्यय इति पक्षे-
(खप्रत्ययाऽनुत्पत्तौ यलोपो वा वक्तव्यः)
समां समां विजायते । समायां समायां वा ।

५-२-१३ अद्यश्वीना ऽ वष्टब्धे ॥
अद्यश्वो वा विजायते = अद्यश्वीना गौः ।
आसन्नप्रसवेत्यर्थः ।

५-२-१४ आगवीनः ॥
आगु कर्म करोतीति आगवीनः । प्रातर्गा नीत्वा सायं प्रत्यर्पणावधि यः कार्यं करोति स कर्मकर आगवीन इत्युच्यते ।

५-२-१५ **अनुगवलं गामी** ॥ १७
अनुगु पर्याप्तं गच्छति= अनुगवीनो गोपालः ।

५-२-१६ अध्वनो **यत्खौ** ॥ १७
अध्वानम् अलङ्गामी=अध्वन्यः ।
अध्वनीनः ।

५-२-१७ अभ्यमित्राच्छ च ॥
अभ्यमित्रमलङ्गामी = अभ्यमित्रीयः ।
अभ्यमित्र्यः । अभ्यमित्रीणः । अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः

५-२-१२ **समांसमा**मित्यत्र वीप्सा द्रष्टव्या । तेन ८-१-४ नित्य.... इति द्विर्वचनम् । गर्भधारणेन सकलापि समा व्याप्यते, तेनाऽत्यन्तसंयोगे २-३-५ कालाध्वनो.... इति द्वितीया । समांसमामिति द्वितीयान्तात् समुदायात्, विजायते= गर्भं धारयति, इत्यर्थे, खः (५-२-१२) पूर्वपदे सुँपोऽलुग् निपात्यते । अस्मिन् पक्षे समांसमीना वडवा । इत्युदाहरणं सुष्ठु भवति ।

अथवा

समांसमाम् = समायांसमायाम् इति सप्तम्यन्तात् समुदायात्, विजायते = गर्भं मुञ्चति इत्यर्थे खः (५-२-१२) यलोपोऽवशिष्टविभक्तेरलुक् च पूर्वपदे निपात्यते । उत्तरभागे तु सुँपो लुगेव । समांसमीना सा यैव प्रतिवर्षं प्रसूयते ।

५-२-१३ **अद्यश्वीना** इति (अद्यश्वस्, इति प्रकृतिः) खप्रत्ययान्तो निपात्यते, अवष्टब्धे = आसन्ने (८-३-६८ अवाच्चा.... इत्याविदूर्ये षत्वे अवष्टब्ध इति) विजायते (५-२-१२)= विजने= गर्भमोचने इत्यर्थे । ६-४-१४४ नस्त.... सूत्रस्थेन अव्य.... वार्तिकेन टिलोपः ।

अथवा

विजायते (५-२-१२) इति नाऽनुवर्तते । अवष्टब्धमात्रे निपातनम् । अद्यश्वीनं मरणम् । आसन्नमित्यर्थः । अद्यश्वीनो वियोगः । आसन्न इत्यर्थः ।

५-२-१४ **आगवीनः** = आङ्पूर्वाद् गोः कर्मकरे खप्रत्ययो निपात्यते । आगु इति- २-१-१३ आङ्म...... इत्यव्ययीभावसमासे १-२-४८ गोस्त्रि...... इति ह्रस्वः । ततः खे ६-४-१४६ ओर्गु.... इति गुणः ।

५-२-१५ **अनुगु**=अनुगुशब्दात्, अलंगामी= पर्याप्तं गच्छतीत्यर्थे, खः (५-२-६) । अनुगु इति गोः पश्चादनुगु पश्चादर्थे ऽव्ययीभावः ।

५-२-१६ **अध्वनः** = अध्वन्शब्दप्रकृतिकात्, तद् (५-२-७) अलङ्गामी (५-२-१५) यत्खौ =यत् ख प्रत्ययौ भवतः। उदाहरणयोराद्ये ६-४-१६८ ये चा.... इति द्वितीये ६-४-१६९ आत्मा.... इति प्रकृतिभावः । **अध्वानमिति**- कृद्योगषष्ठ्या २-३-७० अके इति प्रतिषेधाद् द्वितीयान्तम् ।

५-२-१७ **अभ्यमित्रात्**= अभ्यमित्रशब्दप्रकृतिकात्, तद् (५-२-७) अलङ्गामी (५-२-१५) छ,=छ प्रत्ययो भवति, यत्खौ (५-२-१६) च= यत् ख प्रत्ययौ च भवतः । **अभ्यमित्रमिति** २-१-१४ लक्षणेनाभिप्रती... इत्यव्ययीभावसमासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-१८ गोष्ठात् खञ् भूतपूर्वे ॥२३
भूतपूर्वो गोष्ठो गौष्ठीनो देशः ।

५-२-१९ अश्वस्यैकाहगमः ॥
अश्वस्य एकाहगम आश्वीनोऽध्वा ।

५-२-२० शालीनकौपीने अधृष्टाकार्ययोः ॥
शालाप्रवेशमर्हति शालीनो जडः ।
कूपपतनमर्हति कौपीनं पापम् ।
पापसाधनत्वात् कौपीनं पुरुषलिङ्गम् ।
तत्सम्बन्धात्तदाच्छादनं च ।

५-२-२१ व्रातेन जीवति ॥
व्रातेन = शरीरायासेन (न तु बुद्धिवैभवेन) जीवति व्रातीनः ।

५-२-२२ साप्तपदीनं सख्यम् ॥
सप्तभिः पदैरवाप्यते = साप्तपदीनम् । सख्यं जनाः साप्तपदीनमाहुः ।

५-२-२३ हैयङ्गवीनं संज्ञायाम् ॥
ह्योगोदोहस्य विकारो हैयङ्गवीनम् = नवनीतम् ।

५-२-२४ तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥ २५
पीलूनां पाकः पीलुकुणः ।
कर्णस्य मूलं कर्णजाहम् ।

५-२-२५ पक्षात् तिः ॥
पक्षस्य मूलं पक्षतिः ।

५-२-२६ तेन वित्तश्चुञ्चुप्चणपौ ॥
विद्यया वित्तो विद्याचुञ्चुः ।
विद्याचणः ।

५-२-१८ गोष्ठात्- भूतपूर्वे= भूतपूर्वोपाधिकात्, गोष्ठात् = गोष्ठशब्दात्, खञ् = खञ् प्रत्ययो भवति । गोष्ठशब्देन सन्निहितगोसमूहो देश उच्यते, इति काशिका ।

५-२-१९ अश्वस्य= अश्वशब्दप्रकृतिक - षष्ठ्यन्तात्, एकाहगमः=एकाहगम इत्यर्थे, खञ् (५-२-१८) । एकाहेन गम्यत इति एकाहगमः ।

५-२-२० शालीन-अधृष्टा ऽ कार्ययोः = अप्रगल्भे अकरणार्हे च वाच्ययोः, शा... ने= शालीन-कौपीनशब्दौ खञ्प्रत्ययान्तौ निपात्येते ।द्वयोरप्युदाहरणयोः खञ् प्रत्यय उत्तरपदलोपश्च निपात्येते । **शालाप्रवेशमिति** अप्रागल्भ्यादन्यत्रासितुमसमर्थः शालामेव प्रवेष्टुमर्हतीत्यर्थः ।

५-२-२१ व्रातेन= व्रातवाचिशब्दप्रकृतिकतृतीयान्त्, जीवति = जीवतीत्यर्थे, खञ् (५-२-१८) । नानाजातीया अनियतवृत्तयः शरीरायासजीविनः संघाः = व्राताः । तेषां कर्म व्रातम् ।

५-२-२२ साप्तपदीनम् = तृतीयान्तात् सप्तपदशब्दात् 'अवाप्यते' इत्यर्थे खञ्, सख्यम्=सख्ये वाच्ये । उदाहरणे २-१-५१ तद्धितार्थोत्तर..... इति समासे सप्तपदशब्दात् प्रत्ययः ।

५-२-२३ हैय-संज्ञायाम्= संज्ञायां गम्यमानायाम्, है... नम्= हैयङ्गवीनमिति निपात्यते= ह्योगोदोहशब्दाद् विकारेऽर्थे खञ् प्रत्ययो भवति प्रकृतेः स्थाने हियङ्गुरादेशश्च । दुह्यते इति दोहः=दुग्धम् ।

५-२-२४ तस्य-पील्वादिकर्णादिभ्यः=पीलुप्रभृतिगणपठितशब्द-प्रकृतिकात् कर्णप्रभृतिगण-पठितशब्द- प्रकृतिकाच्च, तस्य = षष्ठ्यन्तात्, पाकमूले= पाके मूले चार्थे, कु... चौ=कुणप्, जाहच्, इत्येतौ प्रत्ययौ भवतः ।

५-२-२५ पक्षात् = पक्षशब्दप्रकृतिकात्, तस्य+मूले (५-२-२४) तिः = तिप्रत्ययो भवति । पाक इति तु नानुवर्तते, एकदेशमात्रे स्वरितत्वप्रतिज्ञानात् ।

५-२-२६ तेन- ५-२-१ धान्यानां.. सूत्रानन्तरं सूत्रमिदं पाठ्यम् । तेन=तृतीयान्तात्, वित्तः= प्रतीतः= ख्यातः, इत्यर्थे, चु... पौ=चुञ्चुप् चणप् प्रत्ययौ भवतः । इत्यर्थं सति संभवे छात्रैः प्रतिपाद्य मूलोक्तं विग्रहं श्यामपाट्यां लिखित्वा छात्रैः प्रयोगौ साधयेत् । यकारस्य प्रत्यययोरादौ विद्यमानस्य ६-१-६४ लोपो... इति लोपः । तेन प्रत्ययादित्वाऽभावाच्चकारस्य नेत्संज्ञेति शिक्षको विमृशेत् । अथ ५-२-९४ तदस्या ऽस्त्यस्मिन्... सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-२७ विनञ्भ्यां नानाञौ नसह ॥

विना । नाना ।

५-२-२८ वेः[1] शालच्छङ्कटचौ ॥ २९

विस्तृतम्= विशालम् । विशङ्कटम् ।

५-२-२९ सम्प्रोदश्च **कटच्** ॥ ३०

संहतम्= सङ्कटम् । प्रज्ञातम्= प्रकटम् । उद्भूतम्= उत्कटम् । विकृतम्= विकटम् । रूढि- शब्दा एते कथञ्चिद् व्युत्पाद्यन्ते ।

(अलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम्)

अलाबूनां रजः=अलाबूकटम् । तिलकटम् । उमाकटम् । भङ्गाकटम् ।

(गोष्ठजादयः स्थानादिषु पशुनामभ्यः) गवां स्थानं गोगोष्ठम् ।

(सङ्घाते कटच्)

अवीनां सङ्घातोऽविकटः ।

(विस्तारे पटच्)

अवीनां विस्तारोऽविपटः ।

(द्वित्वे गोयुगच्)

द्वावुष्ट्रौ = उष्ट्रगोयुगम् ।

(षट्त्वे षड्गवच्)

षडश्वा अश्वषड्गवम् ।

(स्नेहे तैलच्)

तिलस्य स्नेहः=तिलतैलम् । सर्षपतैलम् ।

(भवने क्षेत्रे शाकट-शाकिनौ)

इक्षूणा भवनं क्षेत्रम्=इक्षुशाकटम् । इक्षुशाकिनम् ।

५-२-३० अवात् कुटारच्च ॥ ३१

अवाचीनोऽवकुटारः । अवकटः ।

अप्रसिद्ध इत्यर्थः ।

५-२-३१ नते नासिकायाः संज्ञायां टीटञ् नाटज्भ्रटचः । ३३, ३४

नासिकाया नतम् = अवटीटम् । अवनाटम् । अवभ्रटम् । तद्योगान्नासिका ऽवटीटा । पुरुषो ऽप्यवटीटः ।

५-२-३२ नेर्बिडज्बिरीसचौ ॥ ३३

नासिकाया नतम्= निबिडम् । निबिरीसम् ।

५-२-२७ विनञ्- नसह= असहार्थे वर्तमानाभ्याम्, विनञ्भ्याम्= विनञ्शब्दाभ्याम्, नानाञौ=ना नाञ् प्रत्ययौ भवतः । स्वार्थे । १-१-३७ तद्धितश्चा... इत्यव्ययम् ।

५-२-२८ वेः:= क्रियाविशिष्टसाधनवाचकाद् विशब्दात्, शा...चौ=शालच् शङ्कटच् प्रत्ययौ भवतः स्वार्थे ।

५-२-२९ सम्प्रोदः:= क्रियाविशिष्टसाधनवाचकेभ्यः सम् प्र उद् इत्येतेभ्यः, वेः (५-२-१८) च= विशब्दाच्च, कटच्=कटच् प्रत्ययो भवति ।

विस्तारे- अप्रसृतावयवःसमूहः सङ्घातः प्रसृतावयवस्तु विस्तार इति तत्त्वबोधिनी ।

द्वित्वे- उष्ट्रगोयुगम् । द्वयं युगमित्यादिवद् द्वचवयवसंघातप्राधान्यादेकवचनम् । एवमग्रेपीऽति- तत्त्वबोधिनी ।

५-२-३० अवात्=क्रियाविशिष्टसाधनवाचकाद् अवशब्दात्, कुटारच्, कटच् (५-२-२९) च प्रत्ययौ भवतः।

५-२-३१ नते- अवात (५-२-३०) = अवशब्दात्, नासिकायाः + नते = नासिकाया नमनमित्यर्थे, टीटञ्-नाटज् भ्रटचः = टीटच् नाटच् भ्रटच् प्रत्यया भवन्ति ।

५-२-३२ नेः= निशब्दात् नासिकायाः+नते (५-२-३१) बिडज्बिरीसचौ= बिडच् बिरीसच् इति प्रत्ययौ भवतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-३३ इनच् पिटच् चिक चि च ॥

नासिकाया नतम् = चिकिनम् । चिपिटम् ।

(कप्रत्ययचिकादेशौ च वक्तव्यौ)

नासिकाया नतम् = चिक्कम् ।

(क्लिन्नस्य चिल् पिल् लश्चास्य चक्षुषी)

क्लिन्ने चक्षुषी अस्य चिल्लः । पिल्लः ।

(चुल् च)

चुल्लः ।

५-२-३४ उपाधिभ्यां त्यकन्नासन्नारूढयोः ॥

पर्वतस्यासन्नं स्थलम्=उपत्यका ।

पर्वतस्यारूढं स्थलम्=अधित्यका ।

५-२-३५ कर्मणि घटो ऽठच् ।

कर्मणि घटते = कर्मठः ।

५-२-३६ तदस्य सञ्जातं तारकादिभ्य इतच् ॥ ४२

तारकाः सञ्जाता अस्य तारकितं नभः ।

५-२-३७ प्रमाणे द्वयसज्-दघ्नञ्मात्रचः । ३८

उरू प्रमाणमस्य ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् ।

"प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम"

ऊरुद्वयसमुदकम् । ऊरुदघ्नमुदकम् ।

(प्रमाणे लः)

शमः प्रमाणमस्य शमः । दिष्टिः । वितस्तिः ।

५-२-३३ इनच्- नेः (५-२-३२) नासिकायाः+नते (५-२-३१) इ... टच् = इनच् पिटच् प्रत्ययौ भवतः, चिक चि च = प्रकृतेश्च स्थाने [इनच्प्रत्यये परे चिक इति पिटच् प्रत्यये परे चि इति यथासंख्यं] चिक चि इत्यादेशौ भवतः ।

कप्रत्यय- नेः (५-२-३२) नासिकायाः+नते (५-२-३१) कप्रत्ययचिकादेशौ= क प्रत्ययः प्रकृतेः स्थाने चिक् इत्यादेशश्च भवतः ।

क्लिन्न- अस्य=अस्य इत्यर्थे, चक्षुषी=चक्षुरित्युपाधिकात्, क्लिन्नस्य+चिल् पिल्+लश्च= क्लिन्नशब्दात् लप्रत्ययः क्लिन्नशब्दस्य स्थाने चिल् पिल् इत्यादेशौ च भवन्ति ।

चुल् च= चक्षुरुपाधिकात् क्लिन्नशब्दात्, अस्य इत्यर्थे लप्रत्ययः क्लिन्नशब्दस्य स्थाने चुल् इत्यादेशश्च भवतः ।

५-२-३४ उपा- आस... ढयोः-आसन्नारूढयोर्वर्तमानाभ्याम्, उपाधिभ्याम् = उप अधि इति शब्दाभ्याम्, त्यकन् =त्यकन् प्रत्ययो भवति, स्वार्थे, संज्ञायाम् (५-२-२१) । संज्ञायामित्यनुवृत्तेः पर्वतस्यासन्नारूढयोरेव सूत्रमिदं प्रवर्तते । उदाहरणयोः ७-३-४५ न या... सूत्रस्थ- त्यकन... वार्तिकेनेत्वप्रतिषेधः ।

५-२-३५ कर्म-घटते इति घटः । पचा (३-१-१३४) द्यच् । कर्मणि= कर्म (न्)शब्दप्रकृतिकसप्तम्यन्तात्, घटः=घटते इत्यर्थे, अठच्=अठच्प्रत्ययो भवति ।

५-२-३६ तद- संजातम्=संजातमित्युपाधिकात्, तारकादिभ्यः=तारकाप्रभृतिगणपठित-शब्दप्रकृतिकात्, तद्= प्रथमान्तात्, अस्य= अस्येत्यर्थे, इतच्= इतच् प्रत्ययो भवति ।

५-२-३७ प्रमाणे= प्रमाणोपाधिकात्, तद्+अस्य (५-२-३६) द्वय.... त्रचः = द्वयसच् दघ्नच् मात्रच् प्रत्यया भवन्ति । प्रथमद्वितीयौ= द्वयसज्दघ्नचौ ऊर्ध्वमाने एव भवतः । मात्रच् प्रत्ययस्तु पुनरविशेषेण । प्रस्थमात्रम् । ऊरुमात्रम् ।

प्रमाणे = प्रमाणे ऽर्थे वर्तमानेभ्यः = (प्रमाणत्वेन ये प्रसिद्धास्तद्वाचिभ्यः) उत्पन्नस्य प्रत्ययस्य, लः = लुग् भवति । ल इति लुकः संज्ञा पूर्वाचार्याणाम् । उदाहरणेषु मात्रचो लुक् । शमादीनामनूर्ध्वप्रमाणत्वेनेतरयोरसंभवात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(द्विगोर्नित्यम्)
द्वौ शमौ प्रमाणमस्य द्विशमम् । द्वौ शमौ प्रमाणमस्य स्यातां न वा द्विशमम् ।
(डट् स्तोमे)
पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशः स्तोमः । पञ्चदशी रात्रिः ।
(शन्शतोर्डिनिँर्वक्तव्यः)
पञ्चदशिनो ऽर्धमासाः । त्रिंशिनो मासाः ।
(विंशतेश्चेति वक्तव्यम्)
विंशिनो ऽङ्गिरसः ।
(प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः)
शमः प्रमाणमस्य स्यान्न वा शममात्रम् । प्रस्थमात्रम् । पञ्चमात्रम्

(वत्वन्तात् स्वार्थे द्वयसज्मात्रचौ बहुलम्)
तावदेव= दावद्द्वयसम् । तावन्मात्रम् ।

५-२-३८ पुरुषहस्तिभ्यामण् च ॥

पुरुषः प्रमाणमस्य पौरुषम् ।
पुरुषद्वयसम् । पुरुषदघ्नम् । पुरुषमात्रम् ।
हास्तिनम् । हस्तिद्वयसमित्यादि ।

५-२-३९ यत्तदेतेभ्यः परिमाणे वतुँप् ॥ ४१

यत् परिमाणमस्य यावान् । तावान् । एतावान् ।
(वतुँप्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम्)
त्वावतः पुरुवसो यज्ञं विप्रस्य मावतः ।

५-२-४० किमिदंभ्यां वो घँः ॥ ४१

किं परिमाणमस्य कियान् । इयान् ।

द्विगोः = प्रमाणवाच्यन्तद्विगोर्विहितस्य नित्यं लुक् । विकल्पाप्रसक्तावपि नित्यग्रहणात् संशये विहितस्यापि मात्रचो लुक् । संशये मात्रज्विधायकं वार्तिकमनुपदमेवा ऽऽगमिष्यति । तत्र वार्तिके तदन्तविधेर्ज्ञापकं च लुग्वचनमिदम् ।

डट्- अत्र हरदत्तः- अत्रायाममानस्यासंभवात् परिच्छेदोपाधिकायाः संख्यायाः स्तोमे ऽभिधेये डट् प्रत्ययः । इति । स्तोमसाहचर्याद् रात्र्यादौ वृत्तिरिति च । टित्त्वात् स्त्रियां ङीप् ।

शन्शतोः = शन् शत् इत्यन्तात् संख्यावाचिनः, संख्येये डिनिँर्वक्तव्यः = डिनिँ प्रत्ययो भवतीति वक्तव्यम् ।

विंशतेः = संख्यावाचि- विंशतिशब्दात्, संख्येये, इति वक्तव्यम् = डिनिँप्रत्ययो भवतीति वाच्यम् ।

५-२-३८ पुरु- प्रमाणे (५-२-३७) पुरुषहस्तिभ्याम्= पुरुषहस्ति (न्) शब्दप्रकृतिकात्, तद्+अस्य (५-२-३६) अण् = अण्प्रत्ययो भवति, द्वयसज्दघ्नञ्मात्रचः (५-२-३७) च । **हास्तिनम्** ६-४-१६४ इन.... इति प्रकृतिभावः ।

५-२-३९ यत्त- परिमाणे= परिमाणोपाधिकात्, यत्तदेतेभ्यः = यद् तद् एतद् इतिप्रकृतिकात्, तद्+अस्य (५-२-३६) वतुँप्=वतुँप्प्रत्ययो भवति । उदाहरणेषु ६-३-९१ आसर्वनाम्न इत्यात्वम् ।

वतुँ- त्वावतः । मावतः ७-२-९८ प्रत्य.... इति त्वमौ । पूर्ववदात्वं च । त्वत्सदृशस्य मत्सदृशस्येत्यर्थः ।

५-२-४० किमि- परिमाणे (५-२-३९) किमिदंभ्याम् = किम् इदम् इति शब्दप्रकृतिकात्, तद्+अस्य (५-२-३६) वतुँप् (५-२-३९) वः = वकारस्य स्थाने, घँः = घँ (अनुबन्धलोपेघ्)आदेशश्च भवति । ७-१-२ आय.... इति घस्येय् । ६-३-९० इदं.... इति प्रकृतेरीश् की । ६-४-१४८ यस्ये.... इतीकारलोपः ।

उदितवति परस्मिन् प्रत्यये शास्त्रयोनौ
गतवति विलयं च प्राकृतेऽपि प्रपञ्चे ।
सपदि पदमुदीतं केवलः प्रत्ययो
यस्तदियदिति मिमीते को हृदा पण्डितोऽपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-४१ किमः संख्यापरिमाणे डति च ॥

का संख्या परिमाणमेषां कति । कियन्तः ।

५-२-४२ संख्याया अवयवे तयप् ॥

पञ्च अवयवा अस्य पञ्चतयं दारु ।

५-२-४३ द्वित्रिभ्यां तयस्यायज् वा ॥ ४४

द्वयम् । द्वितयम् । त्रयम् । त्रितयम् ।

५-२-४४ उभादुदात्तो नित्यम् ॥

उभयो मणिः । उभये देवमनुष्याः ।

५-२-४५ तदस्मिन्नधिकमिति दशान्ताड्डः ॥४६

एकादश अधिका अस्मिन् एकादशं शतम् (१११) एकादशं सहस्रम् (१०११)

(शतसहस्रयोरेवेष्यते)

नेह- एकादशाधिका अस्यां विंशतौ ।

(प्रकृतिप्रत्ययार्थयोः समानजातीयत्व एवेष्यते)

नेह- एकादश माषा अधिका अस्मिन् सुवर्णशते ।

५-२-४६ शदन्तविंशतेश्च ॥

त्रिंशदधिका अस्मिन्= त्रिंशम् ।

एकत्रिंशम् । विंशम् । एकविंशम् ।

५-२-४७ संख्याया गुणस्य निमाने मयट् ॥५०

यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद् यवानाम् ।

गुणस्येत्युक्तेर्नेह- द्वौ व्रीहियवौ निमानमस्योदश्वितः । निमाने इत्युक्तेर्नेह-द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन ।

५-२-४१ किमः- संख्यापरिमाणे= संख्यापरिमाणोपाधिकात्, किमः = किंशब्दप्रकृतिकात्, तद्+अस्य (५-२-३६) डति, वतुँप् (५-२-३९) च प्रत्ययौ भवतः, वः + घँ । (५-२-४०) ।

५-२-४२ संख्या- अवयवे+संख्यायाः = अवयवोपाधिक-संख्यावाचिशब्द- प्रकृतिकात्, तद्+अस्य (५-२-३६), तयप् = तयप् प्रत्ययो भवति ।

५-२-४३ द्वित्रिभ्याम्= द्वित्रिशब्दाभ्यां परस्य, तयस्य=तय (प्) प्रत्ययस्य स्थाने, वा+अयच्=विकल्पेन अयच् इत्यादेशो भवति ।

५-२-४४ उभात् = उभशब्दात् परस्य, तयस्य (५-२-४३) नित्यम्, उदात्तः, अयच् (५-२-४३) । अयच आदिरेवोदात्तः । अन्त्यस्य ६-१-१५८ चित इत्येव सिद्धेरुदात्तवचनवैयर्थ्यापत्तेः । द्वयोस्तु न ६-१-१५३ अनु..... इति विरोधात् ।

५-२-४५ तद- अधिकमिति= अधिकमित्युपाधिकात्, दशान्तात् = दशन् इत्यन्तशब्दप्रकृतिकात् तत् = प्रथमान्तात्, अस्मिन्=अस्मिन्नित्यर्थे, डः = डप्रत्ययो भवति ।

५-२-४६ शद-अधिकमिति (५-२-४५)शदन्तविंशतेः=शदन्तशब्दप्रकृतिकाद् विंशतिशब्दप्रकृतिकाच्च, तद्+अस्मिन्+डः (५-२-४५) ।

५-२-४७ संख्या- गुणस्य=भागस्य, निमाने=मूल्ये वर्तमानात्= भागीय-मूल्योपाधिकात्, संख्यायाः = संख्यावाचिनः, तद्+अस्य (५-२-३६) मयट्= मयट् प्रत्ययो भवति । उदाहरणे द्विशब्दस्य सम्बन्धिशब्दत्वेन नित्यसापेक्षत्वाद् 'यवानाम्' इति पदे सत्यपि तद्धितोत्पत्तिरिहाविरुद्धेति तत्त्वबोधिनी । नन्वेवमपि प्रत्ययान्तस्योदश्विच्छब्देन सामानाधिकरण्यं दुर्लभम् । यत उदश्विद्भागे प्रत्ययो विहितो न तूदश्विति इति चेत्, अत्र काशिका-भागेऽपि तु विधीयमानः प्रत्ययः प्राधान्येन भागवन्तमाचष्टे । तेन सामानाधिकरण्यं भवतीति । भूयसश्च वाचिकायाः संख्यायाः प्रत्यय इष्यते । तेनेह न- एको भागो निमानमस्येति । भूयस इति च प्रत्ययार्थात् प्रकृत्यर्थस्याधिक्यमात्रं विवक्षितम् । बहुत्वमतन्त्रम् । तेन द्विशब्दादपि भवति इति च काशिका ।

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-४८ तस्य पूरणे डट् ॥ ५५, ५८

एकादशानां पूरण एकादशः ।

५-२-४९ नान्तादसंख्यादेर्मँट् ॥ ५०

पञ्चानां पूरणः पञ्चमः । सप्तमः । नवमः ।

असंख्यादेरित्युक्तेर्नेह- एकादशः ।

५-२-५० थँट् च च्छन्दसि ॥

पर्णमयानि पञ्चथानि ।

पञ्चममिन्द्रियमस्यापाक्रामन् ।

५-२-५१ षट्कतिकतिपयचतुरां थुँक् ।

षष्ठः । कतिथः । कतिपयथः । चतुर्थः ।

(चतुरश्छयतावाद्यक्षरलोपश्च)

चतुर्णां पूरणः = तुरीयः । तुर्यः ।

५-२-५२ बहुपूगगणसङ्घस्य तिथुँक् ।

बहुतिथः । पूगतिथः । गणतिथः । सङ्घतिथः ।

५-२-५३ वतोरिथुँक् ॥

तावतिथः ।

५-२-५४ द्वेस्तीयः ॥ ५५

द्वयोः पूरणः = द्वितीयः ।

५-२-५५ त्रेः सम्प्रसारणं च ॥

तृतीयः ।

५-२-५६ विंशत्यादिभ्यस्तमँडन्यतरस्याम् ॥५८

विंशतितमः । विंशः । एकविंशतितमः ।

एकविंशः ।

५-२-४८ तस्य= षष्ठचन्तात्, संख्यायाः (५-२-४७)पूरणे= पूरणेऽर्थे, डट्=डट् प्रत्ययो भवति ।

५-२-४९ नान्ता- असंख्यादेः= आदितः संख्यावाचिशब्दरहितात्, नान्तात्= नकारान्तात्, संख्यायाः (५-२-४७) = परस्य, डट् (५-२-४८)=डटः, मँट्= मँडागमो भवति । अत्रानुर्वमानं 'डट्' इति प्रथमान्तं नान्तादिति पञ्चमी षष्ठचन्तं कल्पयति ।

५-२-५० थट् च- असंख्यादेः + नान्तात् (५-२-४९) संख्यायाः (५-२-४७) परस्य, डटः (५-२-४९) थँट्= थँडागमो भवति, मट् (५-२-४९) च ।

५-२-५१ षट्कति- ... तुराम्= षष्प्रभृतीनाम्, थुँक्= थुँगागमो भवति, डट् (५-२-४८) = डटि । आगमस्य पूरणप्रकरणे षष्ठीनिर्देशेन प्रकृतेर्विधानात्, डट् इति प्रथमान्तमपि सप्तम्यन्ताय क्लृप्तं विज्ञायतेऽत्र । एवमग्रेऽपि बोध्यम् । कतिपयशब्दस्याऽसंख्यात्वे ऽप्यत एव ज्ञापकाड्डट् ।

चतु- नेदं डटो बाधकं डटि परे थुँको विधानात् ।

५-२-५२ बहु- ... संघस्य= बहुप्रभृतीनाम्= तिथुँक्= तिथुँगागमो भवति, डट् (५-२-४८) = डटि । पूगसङ्घयोरसंख्यात्वे ऽप्यत एव ज्ञापकाड्डट् ।

५-२-५३ वतोः : = वतुँप्रत्ययान्तस्य, इथुँक् = इथुँगागमो भवति, डट् (५-२-४८)=डटि ।

५-२-५४ द्वेः = संख्यावाचिद्विशब्दप्रकृतिकात्, तस्य+पूरणे (५-२-४८) तीयः = तीयप्रत्ययो भवति । डटोऽपवादः ।

५-२-५५ त्रेः=संख्यावाचित्रिशब्दप्रकृतिकात्, तस्य+पूरणे (५-२-४८) तीयः (५-२-५४) त्रेः = त्रिशब्दस्य स्थाने, सम्प्रसारणं च = सम्प्रसारणमपि भवति । **तृतीयः**- हलः (६-४-२) इति दीर्घस्तु न, तृतीयेत्यादिनिर्देशात् ।

५-२-५६ विंशत्यादिभ्यः=विंशत्यादिभ्यः परस्य, डट् (५-२-४८)= डटः , अन्यतरस्याम्= वा, तमँट् = तमँडागमो भवति । पूरणार्थप्रत्ययस्यागमो विधीयते; तस्मिन्नर्थे विंशत्यादिभ्यश्च डडेव प्रत्ययः सम्भवति । अतस्तीयप्रकरणेऽपि डट इत्यर्थः फलति । **विंशः** ६-४-१४२ ति विंशते.... इति तिलोपः । ततः पररूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-५७ नित्यं शतादि-मासार्धमाससंवत्सराच्च ॥
शततमः । एकशततमः । सहस्रतमः । एकसहस्रतमः । मासतमः । अर्धमासतमः । संवत्सरतमः ।

५-२-५८ षष्ट्यादेश्चा ऽसंख्यादेः ॥
षष्टितमः । सप्ततितमः ।
असंख्यादेरित्युक्तेरिह विकल्प (५-२-५६) एव- एकषष्टितमः । एकषष्टः । एकसप्ततितमः । एकसप्ततः ।

५-२-५९ मतौ छः सूक्तसाम्नोः ॥ ६२
अच्छावाकशब्दो ऽस्मिन्निति अच्छावाकीयं सूक्तम् । वारवन्तीयं साम ।

५-२-६० अध्यायानुवाकयोर्लुक् ॥ ६२
गर्दभाण्डशब्दो ऽस्मिन्नस्तीति= गर्दभाण्डो गर्दभाण्डीयो ऽध्यायो ऽनुवाको वा ।
दीर्घजीवितः । दीर्घजीवितीयः ।

५-२-६१ विमुक्तादिभ्योऽण् ॥
वैमुक्तः । द्वैवासुरः ।

५-२-६२ गोषदादिभ्यो वुँन् ॥ ६३
गोषदकः । इषेत्वकः ।

५-२-६३ तत्र कुशलः पथः ॥ ६७, ६४
पथि कुशलः पथकः ।

५-२-६४ आकर्षादिभ्यः कन् ॥ ८२
आकर्षे कुशलः = आकर्षकः ।
आकषादिभ्य इति पाठान्तरम् ।
आकषः =निकषः । तत्र कुशलः = आकषकः ।

५-२-६५ धनहिरण्यात् कामे ॥
धने कामः= धनको देवदत्तस्य ।
हिरण्यको देवदत्तस्य ।

५-२-५७ नित्यं-शता... राच्च= शतप्रभृतिशब्दाद् मासशब्दादर्धमासशब्दात् संवत्सरशब्दाच्च परस्य, डट् (५-२-४८) = डटः, नित्यम्, तमँट् (५-२-५६) । ५-२-५८ षष्टया... इत्येव सिद्धे शतादिग्रहणं संख्याद्यर्थम् । मासादीनामसंख्यात्वे ऽप्यत एव ज्ञापकाड्डट् ।

५-२-५८ षष्ट्या= असंख्यादेः= आदितः संख्यावाचिशब्दरहितात्, षष्ट्यादेः = षष्टिप्रभृतिशब्दात् परस्य, डट् (५-२-४८) = डटः, नित्यम् (५-२-५७) तमँट् (५-२-५६) ।

५-२-५९मतौ=मत्वर्थे (प्रातिपदिकमात्रात् प्रथमान्तादस्यास्मिन्नित्यर्थे) छः =छप्रत्ययो भवति सूक्तसाम्नोः=,सूक्ते सामनि च वाच्ययोः ।

५-२-६० अध्या-- मतौ (५-२-५९) = मत्वर्थे उत्पन्नस्य छप्रत्ययस्य, अन्यतरस्याम् (५-२-५६) लुक्= लुग् भवति । अन्यतरस्यामिति मण्डूकप्लुत्यात्रा ऽनुवृत्तिरिति न्यासकाराशयः । विधानसामर्थ्याच्च विकल्पेन लुक् इति दीक्षितः । अत्र काशिका- केन पुनरध्यायानुवाकयोः प्रत्ययः ? इदमेव लुग्वचनं ज्ञापकं तद्विधानस्येति ।

५-२-६१ विमुक्तादिभ्यः+{मतौ५-२-५९)}=विमुक्तप्रभृतिगणपठितशब्दप्रकृतिक-प्रथमान्तादस्यास्मिन्नित्यर्थे, अण् = अण् प्रत्ययो भवति अध्यायानुवाकयोः (५-२-६०) ।

५-२-६२ गोषदादिभ्यः+[मतौ(५-२-५९)]=गोषदप्रभृतिगणपठितशब्दप्रकृतिकप्रथमान्तादस्यास्मि-न्नित्यर्थे, वुँन् = वुँन् प्रत्ययो भवति ।

५-२-६३ तत्र- पथः = पथि (न्) शब्दप्रकृतिकात्, तत्र= सप्तम्यन्तात् समर्थात्, कुशलः=कुशल इत्यर्थे, वुँन् (५-२-६२) ।

५-२-६४ आकर्षादिभ्यः = आकर्षप्रभृतिगणपठितशब्दप्रकृतिकात्, तत्र+कुशलः (५-२-६३' कन् प्रत्ययो भवति ।

५-२-६५ धनहिरण्यात्= धन-हिरण्यशब्दप्रकृतिकात्, तत्र ५-२-६३) कामे= कामः= (इच्छ .त्यर्थे, कन् (५-२-६४)= कन् प्रत्ययो भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-६६ स्वाङ्गेभ्यः प्रसिते ॥ ६७
केशेषु प्रसितः= केशकः ।
केशरचनायां तत्पर इत्यर्थः ।

५-२-६७ उदराट्ठगाद्यूने ॥
उदरे प्रसित औदरिक आद्यूनः ।
आद्यूने इत्युक्तेर्नेह-उदरकः ।

५-२-६८ सस्येन परिजातः ॥
सस्येन परिजातः सस्यकः साधुः ।

५-२-६९ अंशं हारी ॥
अंशं हारी अंशको दायादः ।

५-२-७० तन्त्रादचिरापहृते ॥
तन्त्रादचिरापहृतः= तन्त्रकः पटः ।
नवीन इत्यर्थः ।

५-२-७१ ब्राह्मणकोष्णिके संज्ञायाम् ॥
आयुधजीविनो ब्राह्मणा यस्मिन् देशे स ब्राह्मणकः। अल्पऽमन्नं यस्यां सा उष्णिका यवागूः ।

५-२-७२ शीतोष्णाभ्यां कारिणि ॥
शीतं=मन्दं करोति शीतकोऽलसः ।
उष्णं शीघ्रं करोति उष्णकः शीघ्रकारी ।

५-२-७३ अधिकम् ॥
अधिको द्रोणः खार्याः । अधिको द्रोणः खार्याम् । अधिका खारी द्रोणेन ।

५-२-६६ स्वाङ्गेभ्यः=स्वाङ्गवाचिशब्दप्रकृतिकात् तत्र (५-२-६३) प्रसिते=तत्पर इत्यर्थे, कन् (५-२-६४) =कन् प्रत्ययो भवति । अत्र काशिका- बहुवचनं स्वाङ्गसमुदायशब्दादपि यथा स्यात् । दन्तौष्ठकः । केशनखकः । इति ।

५-२-६७ उदरात्= उदरशब्दप्रकृतिकात्, तत्र (५-२-६३) प्रसिते (५-२-६६) ठक्=ठक् प्रत्ययो भवति, आद्यूने= अविजिगीषौ गम्यमाने । **आद्यूनः**= अविजिगीषुः । ८-२-४९ दिवो... इति, अविजिगीषायां नत्वविधानात् । **औदरिकः** । यो बुभुक्षयाऽत्यन्तं पीडयते स एवमुच्यते । **उदरकः** ५-२-६६ स्वाङ्गे... इति कन् । उदरपरिमार्जनादौ तत्पर इत्यर्थः ।

५-२-६८ सस्येन= सस्यशब्दप्रकृतिकात् तृतीयान्तात्, परिजातः= सर्वतः सम्बद्ध इत्यर्थे, कन् (५-२-६४) । सस्यशब्दोऽत्र गुणवाची न तु धान्यवाची । शस्येनेति पाठान्तरम् ।

५-२-६९ अंशम्= अंशशब्दप्रकृतिकाद् द्वितीयान्तात् हारी=हारी इत्यर्थे, कन् (५-२-६४) । हारीत्यत्र ३-३-१७० आव.... इत्यावश्यके णिनिः । तद्योगे २-३-७ अके... इति कारकषष्ठयाः प्रतिषेधाद् द्वितीया अंशमिति ।

५-२-७० तन्त्रात् = तन्त्रशब्दप्रकृतिक-पञ्चम्यन्तात्, अचिरापहृते= समीपकालापहृत इत्यर्थे, कन् (५-२-६४) ।

५-२-७१ ब्राह्मणकोष्णिके= एतौ निपात्येते, संज्ञायाम्= संज्ञायां विषये । अत्र हरदत्तः - किं पुनरत्र निपात्यते ? ब्राह्मणशब्दादायुधजीव्युपाधिकात् प्रथमान्तात् सप्तम्यर्थे कन् प्रत्ययः, अन्नशब्दादल्पत्वोपाधिकात् सप्तम्यर्थे एव कन् प्रत्ययः, अन्नशब्दस्योष्ण्यादेश इति ।

५-२-७२ शीतोष्णाभ्याम्=शीतोष्णशब्दाभ्यां क्रियाविशेषणाभ्यां द्वितीयान्ताभ्याम्, कन् (५-२-६४) कारिणि=कारिण्यर्थे । कारिणीति आवश्यके णिनिः । अत्र न्यासः- "नेह शीतोष्णशब्दौ स्पर्शविशेषे वर्तमानौ प्रत्ययमुत्पादयतः । क्व तर्हि ? मान्द्ये शैघ्र्ये च यस्मादावश्यके णिनिः । न स पदार्थोऽस्ति यः शीतोष्णस्पर्शौ नियोगतः करोति । तुषारातपावपि हि नावश्यं कुरुतः प्रतिबन्धसम्भवात् । कर्तृशक्तिस्तु पदार्थानां नियतेति सा शक्तिः कर्तृत्वे कश्चिन्नियोगतो मन्दं करोति, कश्चित् शीघ्रमिति प्रयुज्यत एवावश्यकत्वमिति ।

५-२-७३ अधिकम्- अध्यारूढशब्दात् कन्, उत्तरपदलोपश्च निपात्येते । गत्यर्थाद् रुहधातोः ३-४-७२ गत्यर्था.... इति... कर्तरि क्ते द्रोणः खारीमध्यारूढ इति, ग्रामं गत इति यथा । अधिकयोगे च २-३-९ यस्मा.... इति पञ्चमी । ५-२-४५ तदस्मिन्निति निर्देशाच्च सप्तमी । अधिको द्रोणः खार्याः । अधिको द्रोणः खार्यामिति । कर्मणि क्ते तु कर्तरि तृतीया, द्रोणेन खारी अध्यारूढा । अधिका खारी द्रोणेन । कर्मणोऽभिहितत्वात् पञ्चमीसप्तम्यौ नात्र सम्भवतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-७४ अनुकाभिकाभीकः कमिता ॥

अनुकामयते= अनुकः । अभिकामयते =अभिकः । अभीकः ।

५-२-७५ पार्श्वेनाऽन्विच्छति ॥ ७६

अनृजुरुपायः पार्श्वं (न तु कुक्षिः) तेनाऽन्विच्छति पार्श्वकः= मायावी ।

५-२-७६ अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ॥

तीक्ष्ण उपायः = अयःशूलम् ।
तेनाऽन्विच्छति= आयःशूलिकः ।
साहसिक इत्यर्थः । दण्डाजिनम्= दम्भः ।
तेनान्विच्छति=दाण्डाजिनिकः ।
दाम्भिक इत्यर्थः ।

५-२-७७ तावतिथं ग्रहणमिति लुग्वा ॥

द्वितीयं ग्रहणं द्विकं द्वितीयकं वा ग्रहण देवदत्तस्य ।

(तावतिथेन गृह्णातीति कन् वक्तव्यो नित्यं च लुक्)

षष्ठेन रूपेण गृह्णाति= षट्को देवदत्तः । पञ्चकः ।

५-२-७८ स एषां ग्रामणीः ॥

देवदत्तो मुख्योऽस्य देवदत्तकः ।
त्वत्कः । मत्कः ।

५-२-७९ शृङ्खलमस्य बन्धनं करभे ॥

शृङ्खलं बन्धनमस्य करभस्य शृङ्खलकः ।

५-२-८० उत्क उन्मनाः ॥

उत्कः प्रवासी । उत्कण्ठित इत्यर्थः ।

५-२-८१ कालप्रयोजनाद् रोगे ॥

द्वितीयेऽह्नि भवो द्वितीयको ज्वरः ।
विषपुष्पैर्जनितो विषपुष्पकः ।
उष्णं कार्यमस्य उष्णकः ।

५-२-७४ अनु...भीकः= अन्वभिभ्यां कन्, अभेः पाक्षिको दीर्घश्च निपात्यते, कमिता=कमिता इत्यर्थे।

५-२-७५पार्श्वेन= पार्श्वशब्दप्रकृतिक- तृतीयान्तात्, अन्विच्छति= अन्वेषयतीत्यर्थे कन् (५-२-६४) ।

५-२-७६ अयःशूलदण्डाजिनाभ्याम् = अयःशूल- दण्डाजिन-शब्दप्रकृतिक- तृतीयान्तसमर्थात्, अन्विच्छति (५-२-७५), ठक्ठञौ = ठक् ठञ् इति प्रत्ययौ भवतः ।

५-२-७७ ताव- ग्रहणमिति= ग्रहणमित्युपाधिकात्, तावतिथम्=पूरणप्रत्ययान्तात् (तावतां पूरणम् = तावतिथम् । तेन तावतिथशब्देन पूरणप्रत्ययान्तो लक्ष्यते) स्वार्थे, कन् (५-२-६४) लुग्वा= पूरणप्रत्ययस्य वा लुक् (न तु कनः, महाविभाषयैव सिद्धेः) ग्रहीतर्यपि प्रत्ययस्य विधास्यमानत्वेन प्रकृत्युपाधिभूत-ग्रहणस्य नियमेना ऽप्रतीतेरुदाहरणे ग्रहणशब्दप्रयोगः ।

तावतिथेन= पूरणप्रत्ययान्तप्रकृतिकतृतीयान्तात्, गृह्णातीत्यर्थे, कन् प्रत्ययो वक्तव्यः, नित्यं च लुक् पूरणप्रत्ययस्य । अत्र काशिका- इति करणो विवक्षार्थः । तेन ग्रन्थविषयमेव ग्रहणं विज्ञायते, नान्यविषयमिति ।

५-२-७८स एषां "ग्रामणीः= मुख्यः" इत्युपाधिकात्, सः =प्रथमान्तात्, एषाम् =एषामित्यर्थे, कन् (५-२-६४) ।

५-२-७९ शृङ्ख- बन्धनम्=बन्धनमित्युपाधिकात्, शृङ्खलम्= शृङ्खलशब्दप्रकृतिकप्रथमान्तात्, अस्य=अस्य इत्यर्थे, कन् (५-२-६४) करभे = उष्ट्रबालके वाच्ये ।

५-२-८० उत्क- उन्मनाः = उत्कण्ठित इति वाच्ये, उत्कः=उत्क इति निपात्यते= उद्गतमनस्कवृत्तेरुच्छब्दात् स्वार्थे कन् ।

५-२-८१ काल... जनात्=कालवाचिनः पूरणप्रत्ययान्तशब्दप्रकृतिकात् सप्तम्यन्ताद् भवेऽर्थे, कारणवाचिशब्दप्रकृतिकतृतीयान्ताज्जनित इत्यर्थे फलवाचकशब्दप्रकृतिकप्रथमान्तात्, 'कार्यम् अस्य' इत्यर्थे, कन् (५-२-६४) रोगे=रोगे गम्ये । अत्र काशिका-उत्तरसूत्रादिह संज्ञाग्रहणमपकृष्यते । तेनाऽयं प्रकारनियमः सर्वो लभ्यत इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-८२ तदस्मिन्नन्नं प्राये संज्ञायाम् ॥ ८३

गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पौर्णमासी ।

(वटकेभ्य इनिर्वक्तव्यः)

वटकिनी पौर्णमासी ।

५-२-८३ कुल्माषादञ् ॥

कुल्माषाः प्रायेणान्नमस्यां कौल्माषी पौर्णमासी ।

५-२-८४ श्रोत्रियँश्छन्दोऽधीते ॥

छन्दोऽधीते श्रोत्रियः । छान्दसः ।

५-२-८५श्राद्धमनेन भुक्तमिनिँठनौ ॥

श्राद्धं भुक्तमनेन श्राद्धी । श्राद्धिकः ।

५-२-८६ पूर्वादिनिः ॥ ८७, ९१

पूर्वं कृतं भुक्तं पीतं वाऽनेन पूर्वी ।

५-२-८७ सपूर्वाच्च ॥

पूर्वं कृतमनेन कृतपूर्वी कटम् । भुक्तपूर्वी ओदनम् ।

५-२-८८ इष्टादिभ्यश्च ॥

इष्टमनेन इष्टी यज्ञे । अधीतमनेन अधीती व्याकरणे ।

५-२-८९ छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ॥

मा त्वा परिपन्थिनो विदन् । मा त्वा परिपरिणो विदन् ।

५-२-९० अनुपद्यन्वेष्टा ॥

अनुपदी गवाम् ।

५-२-९१ साक्षाद् द्रष्टरि संज्ञायाम् ॥

साक्षाद् द्रष्टा साक्षी ।

५-२-८२ तद- प्राये= प्रायविषयकात् (विषयसप्तमीयम्) अन्नम् = अन्नवाचिनः, तद्= प्रथमान्तात्, अस्मिन्=अस्मिन्नित्यर्थे, कन् (५-२-६४) संज्ञायाम् = संज्ञायां गम्यमानायाम् ।

५-२-८३ कुल्मा [प्राये+अन्नम् (५-२-८२)]+ कुल्माषात्= प्रायविषयकान्नवाचि- कुल्माषशब्दप्रकृतिकात्, तद्+ अस्मिन् (५-२-८२), अञ् = अञ् प्रत्ययो भवति, संज्ञायाम् (५-२-८२) ।

५-२-८४ श्रोत्रि- छन्दः = छन्दश्शब्दप्रकृतिक- द्वितीयान्तात्, अधीते= अधीते इत्यर्थे, वा (५-२-७७)+ श्रोत्रियन् = विकल्पेन घन्प्रत्ययः प्रकृतेश्च श्रोत्रादेशः = श्रोत्रिय इति निपात्यते । पक्षे ४-२-५९ तद.... इत्यण् ।

५-२-८५ श्राद्ध- भुक्तम्= भुक्तमित्युपाधिकात्, श्राद्धम्= श्राद्धशब्दप्रकृतिकप्रथमान्तात्, अनेन= अनेनेत्यर्थे,इनिँठनौ=इनिँ ठन्, च प्रत्ययौ भवतः ।

५-२-८६ पूर्वात्= पूर्वप्रातिपदिकात्, इनिः= इनिँप्रत्य॑यो भवति । अत्र तत्त्वबोधिनी- पूर्वमिति क्रियाविशेषणाद् द्वितीयान्तात् प्रत्ययः । 'अनेन' (५-२-८६) इति कर्तृवाचकमनुवर्तते । न च क्रियामन्तरेण कर्ता संभवतीति कां चित् क्रियामध्याहृत्य प्रत्ययो विधेय इति ।

५-२-८७ सपूर्वात् =विद्यमानपूर्वकात् ,पूर्वात् (५-२-८६) अनेन (५-२-८५) इनिः (५-२-८६) । उदाहरणयोः २-१-४ सह सुपा-इति समासस्ततस्तद्धितः ।

५-२-८८ इष्टादिभ्यः = इष्टप्रभृतिगणपठितप्रातिपदिकेभ्यः, अनेन (५-२-८५) इनिः (५-२-८६) । 'यज्ञे व्याकरणे' इत्यत्र २-३-३६ सप्त... सूत्रस्थेन क्तस्येन्विषयस्य... इति वार्तिकेन सप्तमी ।

५-२-८९ छन्द- पर्यवस्थातरि= शत्रौ वाच्ये, परि... रिणौ =पर्यवस्थातृशब्दात् स्वार्थे इनिः (५-२-८६) अवस्थातृ शब्दस्य स्थाने पन्थि परि इत्यादेशौ निपात्येते, छन्दसि= वेदे ।

५-२-९० अनु-अन्वेष्टा= अन्वेष्टरि, अनुपदी= अनुपदशब्दात्+इनिः (५-२-८६) । पदस्य पश्चादनुपदम् २-१-६ अव्ययं विभक्ति.... इत्यव्ययीभावः । ततो ऽनुपदमन्वेष्टेति विग्रहे, इनिँ प्रत्ययः ।

५-२-९१ साक्षात् = साक्षात् इति शब्दात्, द्रष्टरि=द्रष्टा इत्यर्थे, इनिः (५-२-८६) संज्ञायाम्=संज्ञायां गम्यमानायाम् । **साक्षी** ६-४-१४४ नस्तद्धिते-सूत्रस्थेन अव्ययानां.... वार्तिकेन टिलोपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-९२ क्षेत्रियच् परक्षेत्रे चिकित्स्यः ॥

परक्षेत्रे चिकित्स्यः क्षेत्रियो व्याधिः । असाध्य इत्यर्थः ।

५-२-९३ इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्ट - मिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा ॥

इन्द्रस्य लिङ्गम्, इन्द्रेण दृष्टम् , इन्द्रेण सृष्टम्, इन्द्रेण जुष्टम्, इन्द्रेण दत्तं वा इन्द्रियम् ।

५-२-९४ तदस्यास्त्यस्मिन्निति मतुँप् ॥ १४०

गावोऽस्याऽस्मिन् वा सन्ति गोमान् । बुद्धिमान् ।

५-२-९२ क्षेत्रि-परक्षेत्रे= परक्षेत्रप्रकृतिकसप्तम्यन्तात्, चिकित्स्यः=चिकित्स्य इत्यर्थे, क्षेत्रियच् = घच् प्रत्ययः, परशब्दस्य लोपश्च निपात्यते । "परक्षेत्रे = जन्मान्तरशरीरे चिकित्स्यः" इति वाक्यार्थे क्षेत्रियच् = क्षेत्रिय इति निपात्यत इति भावः ।

५-२-९३ इन्द्रि- इन्द्रलिङ्गम्... इन्द्रदत्तमिति=इन्द्रलिङ्गमित्यादिष्वर्थेषु, इन्द्रियम् = षष्ठचन्तादिन्द्रशब्दाल्लिङ्गमित्यर्थे, तृतीयान्ताद् दृष्टादिष्वर्थेषु घच्प्रत्ययो निपात्यते । इन्द्र आत्मा । अत्र काशिका- इतिकरणः प्रकारार्थः । सति संभवे व्युत्पत्तिरन्यथाऽपि कर्तव्या, रूढेरनियमादितीति । वाशब्दः प्रत्येकमभिसम्बध्यमानो विकल्पानां स्वातन्त्र्यं दर्शयतीति च । इतिशब्दस्य प्रकारार्थत्वाद् इन्द्रेण दुर्जयमित्याद्यपि बोध्यम् । रूढिशब्दोऽयमिति स्फुटमेव ।

५-२-९४ तद- ५-२-२६ तेन वित्त... सूत्रानन्तरं सूत्रमिदं पाठचम् । तद्= प्रथमान्तात् प्रातिपदिकात्, "अस्य अस्ति" "अस्मिन् अस्ति" इति= इत्यर्थे, मतुँप्=मतुँप् प्रत्ययो भवति । इत्यर्थमुपदिश्य "बुद्धिः अस्य अस्ति" इति विग्रहं श्यामपाटचां लिखित्वा छात्रैः साध्यमानं 'बुद्धिमत्' इति श्यामपाटचां लिखित्वा ६-४-१४ अत्वसन्तस्य.... सूत्रे प्रस्तुते 'पठितवत्' इत्यत्रेव प्रक्रियेति बोधनपुरस्सरं छात्रैः साध्यमानं बुद्धिमान् इति प्रयोगं शृणुयात् । एवं 'बुद्धिः अस्याः अस्ति' इति विग्रहे च 'बुद्धिमत्' इतिच्छात्रैः साध्यमानं श्यामपाटचां लिखित्वा ४-१-६ उगितश्च- सूत्रे प्रस्तुते पठितवतीत्यत्रेव प्रक्रियेति बोधनपुरस्सरं छात्रैः साध्यमानं 'बुद्धिमती' इति प्रयोगं शृणुयात् । एवमेव गावः सन्ति अस्मिन् (प्रदेशे) गोमान् । गावः सन्ति अस्याम् (शालायाम्) गोमती, इत्यादयो ऽपि प्रयोगाश्छात्रैः साधयितव्याः । अथाऽत्र शिक्षकमात्रेणाऽवधेयश्छात्रेभ्यो ऽनुपदेश्यो विषयः प्रस्तूयते । सूत्रार्थः- अस्ति= अस्तीत्युपाधिकात्, तद्= प्रथमान्तात्, अस्य, अस्मिन् इति= अस्य अस्मिन् इत्यर्थे मतुँप् । इतिकरणाद् विषयनियमः = अस्ति विवक्षायां विधीयमाना मतुँबादयो भूमादिषु विषयेषु भवन्तीति भावः । तथाहि-

भूम-निन्दा-प्रशंसासु नित्ययोगे ऽ तिशायने ।
संसर्गेऽस्तिविवक्षायां
भवन्ति मतुँबादयः ॥

भूम्नि- गावो ऽस्याऽस्मिन् वा सन्ति
गोमान् । निन्दायाम्- कुष्ठी ।
प्रशंसायां रूपवती कन्या । नित्ययोगे-
क्षीरिणो वृक्षाः । अतिशायने-
उदरिणी कन्या । संसर्गे-दण्डी ।

अथ प्राग्दिशीय- प्रत्ययाः । तत्र प्रथमं शिक्षकः ५-३-१ प्राग्दि... इति सूत्रमुपदिशेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-९५ रसादिभ्यश्च ॥

रसवान् । रूपवान् ।

(गुणात्) ग. सू.

ये रसनेन्द्रियादिग्राह्या गुणास्तेषामेवाऽयं पाठ । तेनेह न- रूपिणी । रूपिकः । शोभायोगोऽत्र गम्यते । रसिको नटः । भावयोगो ऽत्र गम्यते ।

(एकाचः) ग सू

स्ववान् । खवान् ।

५-२-९६ प्राणिस्थादातो लजन्यतरस्याम् ॥

९९,१४०

चूडालः । चूडावान् । प्राणिस्थादित्युक्तेर्नेह-शिखावान् दीपः । आत इत्युक्तेर्नेह-हस्तवान् ।

(प्राण्यङ्गादेव)

नेह-- मेधावान् ।

५-२-९७ सिध्मादिभ्यश्च ॥

सिध्मलः । सिध्मवान् ।

(पार्ष्णिधमन्योर्दीर्घश्च) ग.सू.

पार्ष्णीलः । धमनीलः ।

(वातदन्तबलललाटानामूङ् च)

वातूलः । दन्तूलः । बलूलः । ललाटूलः ।

(क्षुद्रजन्तूपतापयोश्चेष्यते) ग.सू.

क्षुद्रजन्तुः - यूकालः । मक्षिकालः । उपतापः = रोगः । विचर्चिकालः । मूर्छालः ।

५-२-९८ वत्सांसाभ्यां कामबले ॥

वत्सलः पिता । स्नेहवानित्यर्थः । अंसलः । उपचितमांसो बलवानित्यर्थः ।

५-२-९९ फेनादिलच्च ॥

फेनिलः । फेनलः । फेनवान् ।

५-२-९५ रसा- अस्ति (५-२-९४) रसादिभ्यः = रसप्रभृति-गणपठितशब्दप्रकृतिकात्, तद् + अस्य + अस्मिन् + इति + मतुँप् (५-२-९४) ।

एका- अस्ति (५-२-९४) एकाचः = एकाच्शब्दप्रकृतिकात्, तद्+अस्य+अस्मिन्+इति+मतुँप् (५-२+९४) ।

५-२-९६ प्राणि- अस्ति (५-२-९४)-

प्राणिस्थात्+आतः= प्राणिस्थवस्तुवाच्याकारान्तशब्दप्रकृतिकात्, तद्+अस्य+अस्मिन्+इति (५-२-९४) अन्यतरस्याम्= वा, लच्= लच्प्रत्ययो भवति ।

५-२-९७ सिध्मा- अर्थः पूर्वसूत्रवत् । केवलं पूर्वसूत्रस्थेन 'प्राणिस्थादात' इत्यनेन 'सिध्मादिभ्यः = सिध्मप्रभृतिगणपठितशब्दप्रकृतिकात्' इति विनिमातव्यम् । अत्र काशिका- अन्यतरस्यां ग्रहणेन मतुँप् समुच्चीयते, न तु प्रत्ययो विकल्प्यते । तस्मादकारान्तेभ्य इनिँ ठनौ न भवत इति ।

५-२-९८ वत्सां- अस्ति (५-२-९४) वत्सांसाभ्याम्= वत्स अंस इति शब्दप्रकृतिकात्, तद्+अस्य+अस्मिन्+इति (५-२-९४) लच् (५-२-९६) कामबले= कामवति बलवति च । सूत्रे कामबलशब्दावर्शआद्यजन्तौ । अत्र काशिका- न चाऽयमर्थो मतुँपि संभवतीति नित्यं लजेव भवतीति ।

५-२-९९ फेना- अस्ति (५-२-९४), फेनात्= फेनशब्दप्रकृतिकात्, तद्+अस्य+अस्मिन्+इति+मतुँप् (५-२-९४), इलच्= इलच् प्रत्ययो भवति, लच् (५-२-९६) च । अत्र काशिका- अन्यतरस्यां ग्रहणं मतुँप्समुच्चयार्थं सर्वत्रैवा ऽनुवर्तत इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-१०० लोमादि-पामादि-पिच्छादिभ्यः शनेलचः ॥

लोमशः । लोमवान् । पामनः । पामवान् ।

(अङ्गात् कल्याणे) ग.सू.

अङ्गना ।

(शाकी-पलाली-दद्र्वां ह्रस्वत्वं च) ग.सू.

शाकिनम् । पलालिनम् । दद्रुणः ।

(विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः) ग.सू.

विषुणः ।

(लक्ष्म्या अच्च) ग.सू.

लक्ष्मणः ।

पिच्छिलः । पिच्छावान् ।

५-२-१०१ प्रज्ञाश्रद्धार्चाभ्यो णः ।

प्राज्ञः । प्रज्ञावान् । श्राद्धः । श्रद्धावान् ।

आर्चः । अर्चावान् । स्त्रियां टाप्-प्राज्ञा । इत्यादि ।

(वृत्तेश्च)

वार्त्तः । वृत्तिमान् ।

५-२-१०२ तपः सहस्राभ्यां विनीनीं ॥ १०३

तपस्वी । सहस्री ।

५-२-१०३ अण् च ॥ १०५

तापसः । साहस्रः ।

(ज्योत्स्नादिभ्य उपसंख्यानम्)

ज्यौत्स्नः । तामिस्रः ।

५-२-१०४ सिकताशर्कराभ्यां च ॥

सैकतो घटः । शार्करं मधु ।

५-२-१०५ देशे लुबिलचौ च ॥

सिकताः सन्त्यस्मिन् देशे सिकता देशः । सिकतिलः । सैकतः । सिकतावान् । शर्करा देशः । शर्करिलः । शार्करः । शर्करावान् ।

५-२-१०६ दन्त उन्नत उरच् ॥

उन्नता दन्ताः सन्त्यस्य दन्तुरः ।

उन्नत इत्युक्तेर्नेह- दन्तवान् ।

५-२-१०० लोमा- अस्ति (५-२-९४) लोमा... दिभ्यः = लोम (न्) प्रभृतिगणपठितशब्दप्रकृतिकात् पाम (न्) प्रभृतिगणपठितशब्दप्रकृतिकात्, पिच्छाप्रभृतिगणपठितशब्दप्रकृतिकाच्च, तद्+अस्य+अस्मिन्+ इति मतुँप् (५-२-९४) शनेलचः = श न इलच् इति प्रत्यया भवन्ति ।

५-२-१०१ प्रज्ञा- अस्ति (५-२-९४) प्रज्ञाश्रद्धार्चाभ्यः = प्रज्ञा श्रद्धा अर्चा इति शब्दप्रकृतिकात्, तद् + अस्य + अस्मिन् + इति + मतुँप् (५-२-९४) णः = णप्रत्ययो भवति ।

५-२-१०२ तपः- अस्ति (५-२-९४) तपः सहस्राभ्याम्= तपस्सहस्रशब्दप्रकृतिकात्, तद्+अस्य+अस्मिन्+इति (५-२-९४) विनीनीं=विनिँ इनिँ इति प्रत्ययौ भवतः । यथासंख्यम् । असन्तत्वात् ५-२-१२१ अस्मा... इति, अदन्तत्वात् ५-२-११५ अत... इति च सिद्धे पुनर्वचनमणा बाधा माभूदिति । सहस्रात्तु ठनपि बाध्यते ।

५-२-१०३ अण् = अण्प्रत्ययो भवति । शेषोऽर्थः पूर्वसूत्रवत् ।

५-२-१०४ सिक- अस्ति (५-२-९४) सिक... राभ्याम्= सिकताशर्कराशब्दप्रकृतिकात्, तद्+अस्य+अस्मिन्+ इति (५-२-९४) अण् (५-२-१०३) ।

५-२-१०५ देशे- अस्ति (५-२-९४), सिकताशर्कराभ्याम् (५-२-१०४) तद्+अस्य+अस्मिन्+इति+मतुँप् (५-२-९४) लुबिलचौ= प्रत्ययस्य लुप् इलच् प्रत्ययश्च, भवतः, अण् (५-२-१०३) च, देशे=देशे वाच्ये । **सिकता देशः** । लुप् पक्षे १-२-५१ लुपि... इति युक्तवद्भावः । एवं शर्करा देश इत्यत्रापि ।

५-२-१०६ दन्त- अस्ति+इति (५-२-९४) उन्नतः = उन्नत इत्युपाधिकात्, दन्तः=दन्तशब्दप्रकृतिकात्, तद्+अस्य+अस्मिन्+इति (५-२-१९४) उरच् = उरच् प्रत्ययो भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-१०७ ऊषशुषिमुष्कमधो रः ॥

ऊषरः। शुषिरः। मुष्करः। मधुरः।
(रप्रकरणे ख-मुख- कुञ्जेभ्य उपसंख्यानम्)
खरः। मुखरः। कुञ्जरः। कुञ्जो हस्तिहनुः।
(नग-पांसु-पाण्डुभ्यश्चेति वक्तव्यम्)
नगरम्। पांसुरः। पाण्डुरः।
(कच्छ्वा ह्रस्वत्वं च।)
कच्छुरम्।

५-२-१०८ द्युद्रुभ्यां मः ॥

द्युमः। द्रुमः।

५-२-१०९ केशाद् वोऽन्यतरस्याम् ॥ ११०

केशवः। केशी। केशिकः। केशवान्।
(अन्येभ्योऽपि दृश्यते)
मणिवो नागविशेषः। हिरण्यवो निधिविशेषः।
(अर्णसो लोपश्च)
अर्णवः।
(छन्दसीवनिँपौ च वक्तव्यौ)
ईः- सुमङ्गलीरियं वधूः। वनिँप्- मघवानमीमहे। व-मतुँपौ- उद्वा च उद्वती च।
(मेधारथाभ्यामिरन्निरचौ वक्तव्यौ)
छन्दसि। मेधिरः। रथिरः।

५-२-११० गाण्डचजगात् संज्ञायाम् ॥

गाण्डिवम्। गाण्डीवम्। अजगवं पिनाकः।

५-२-१११ काण्डाण्डादीरन्नीरचौ ॥

काण्डीरः। आण्डीरः।

५-२-११२ रजः कृष्यासुतिपरिषदो वलच् ॥ ११३

रजस्वलो वायुः। रजस्वला स्त्री।
आसुतीवलः। परिषद्वलः। पर्षदिति पाठान्तरम्। पर्षद्वलः।
(अन्येभ्यो ऽपि दृश्यते)
भ्रातृवलः। पुत्रवलः।

५-२-११३ दन्तशिखात् संज्ञायाम् ॥

दन्तावलो हस्ती। शिखावलः केकी।

५-२-१०७ ऊष- अस्ति (५-२-९४) ऊष...मधोः= ऊष-शुषि-मुष्क-मधुशब्दप्रकृतिकात्, तद्+ अस्य + अस्मिन्+ इति (५-२-९४) रः =रप्रत्ययो भवति।

५-२-१०८ द्युद्रु- अस्ति (५-२-९४) द्युद्रुभ्याम् = दिव् द्रु इति शब्दप्रकृतिकात्, तद्+अस्य+ अस्मिन्+इति (५-२-९४)मः = मप्रत्ययो भवति। **द्युमः** ६-१-१२१ दिव उत् इत्युत्वम्।

५-२-१०९ केशा- अस्ति (५-२-९४) केशात्= केशशब्दप्रकृतिकात्, तद् +अस्य+अस्मिन्+इति (५-२-९४) अन्यतरस्याम्=वा, वः=वप्रत्ययो भवति। यद्यपि मतुँप् समुच्चयार्थमन्यतरस्या (५-२-९६) मित्यनुवर्तत एव तथापीनिँठनोः (५-२-११५) समावेशार्थं पुनर्वचनम्।

छन्द- वः (५-२-१०९) **मतुँप्** (५-२-९४) च। **उद्वा** वप्रत्यये ४-१-४ अजा... इति टाप्। **उद्वती** मतुँपि ५-४-१११ झय इति वत्वम् ४-१-६ उगि... इति ङीप्।

५-२-११० गाण्डच- अस्ति (५-२-९४) गाण्डचजगात्=गाण्डि गाण्डी अजग इतिप्रकृतिकात्, तद्+अस्य+अस्मिन्+इति (५-२-९४), वः (५-२-१०९) संज्ञायाम्= संज्ञायां गम्यमानायाम्। ह्रस्वदीर्घ (गाण्डि गाण्डी) योर्यणा तन्त्रेण निर्देशः।

५-२-१११ काण्डा- अस्ति (५-२-९४) काण्डाण्डात् = काण्ड आण्ड इतिशब्दप्रकृतिकात्, तद्+अस्य+अस्मिन्+इति (५-२-९४) ईरन्नीरचौ= ईरन् ईरच् इति प्रत्ययौ भवतः। यथासंख्यम्।

५-२-११२ रजः - अस्ति (५-२-९४) रजः ..... षदः = रजस् कृषि आसुति परिषद् (पर्षद्) इति शब्दप्रकृतिकात्, तद्+अस्य+अस्मिन्+इति (५-२-९४), वलच् = वलच् प्रत्ययो भवति।
कृषीवलः। आसुतीवलः ६-३-११८ वले इति दीर्घः।

५-२-११३ दन्त- अस्ति (५-२-९४) दन्तशिखात्= दन्त-शिखा- शब्दप्रकृतिकात्, तद्+अस्य+अस्मिन्+इति (५-२-९४) वलच् (५-२-११२), संज्ञायाम् =संज्ञायां गम्यमानायाम्। दन्तशिखात् इति- दन्तशिखाशब्दयोः समाहारद्वन्द्वेन क्लीबत्वम्। **दन्तावलः**। प्राग्वद् दीर्घः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-११४ ज्योत्स्ना-तमिस्रा-शृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः ।

५-२-११५ अत इनिँठनौ ॥ ११८, ११७

दण्डी । दण्डिकः ।

५-२-११६ व्रीह्यादिभ्यश्च ॥

व्रीही । व्रीहिकः ।

न सर्वेभ्यो व्रीह्यादिभ्यः प्रत्ययद्वयमिष्यते, किं तर्हि? शिखादिभ्य इनिँः, यवखदादिभ्य इकः । शेषेभ्य उभयम् ।

५-२-११७ तुन्दादिभ्य इलच्च ॥

तुन्दिलः । तुन्दी । तुन्दिकः । तुन्दवान् ।

(स्वाङ्गाद् विवृद्धौ) ग.सू.

विवृद्धौ कर्णौ यस्य स कर्णिलः । कर्णी । कर्णिकः । कर्णवान् ।

५-२-११८ एकगोपूर्वाट्ठञ् नित्यम् ॥ ११९

ऐकशतिकः । ऐकसहस्रिकः । गौशतिकः । गौसहस्रिकः । अत (५-२-११५) इत्यनुवृत्तेर्नेह- गोविंशतिरस्यास्तीति ।

५-२-११९ शतसहस्रान्ताच्च निष्कात् ॥

नैष्कशतिकः । नैष्कसहस्रिकः ।

५-२-१२० रूपादाहतप्रशंसयोर्यप् ॥

आहतं रूपमस्य रूप्यो दीनारः ।

प्रशस्तं रूपमस्य रूप्यः पुरुषः ।

आहतप्रशंसयोरित्युक्तेर्नेह- रूपवान् ।

(अन्येभ्यो ऽपि दृश्यते)

हिम्याः पर्वताः । गुण्या ब्राह्मणाः ।

५-२-१२१ अस्मायामेधास्रजो विनिँः ॥ १२२

यशस्वी । यशस्वान् । मायावी । मायावान् । व्रीह्या (५-२-११६) दिपाठदिनिँठनौ । मायी । मायिकः । मेधावी । मेधावान् । स्रग्वी । स्रग्वान् ।

५-२-११४ ज्योत्स्ना-....मलीमसाः-निपात्यन्ते= ज्योतिष उपधालोपो नश्च प्रत्ययः । **ज्योत्स्ना** । तमस उपधाया इत्वं रश्च प्रत्ययः । **तमिस्रा** रात्रिः । स्त्रीत्वमतन्त्रम् । **तमिस्रं** नभः । शृङ्गादिनच् । **शृङ्गिणः** । ऊर्जसो विनिँः । **ऊर्जस्वी ।** वलच् च । **ऊर्जस्वलः** । गोर्मिनिँः । गोमी । मलादिनच् । मलिनः । ईमसश्च । मलीमसः ।

५-२-११५ अत- अस्ति (५-२-९४) अतः = अदन्तप्रकृतिकात्, तद्+अस्य+अस्मिन्+इति (५-२-९४), इनिँठनौ=इनिँ ठन् इति प्रत्ययौ भवतः ।

५-२-११६ व्रीह्या- पूर्वसूत्रस्य 'अतः' इत्यनेन अत्रत्यं 'व्रीह्यादिभ्यः = व्रीहिप्रभृतिगणपठितशब्द प्रकृतिकात्' इति विनिमातव्यं शेषोऽर्थः पूर्वसूत्रवत् ।

५-२-११७ तुन्दादिभ्यः = तुन्दप्रभृतिगणपठितशब्दप्रकृतिकात्, इलच् = इलच् प्रत्ययो भवति, इनिँठनौ (५-२-११५) च, मतुँप् (५-२-९४), शेषोऽर्थः प्राग्वत् ।

स्वाङ्गाद्- विवृद्ध्युपाधिकात् स्वाङ्गवाचिन इलजादयः प्रत्यया भवन्ति ।

५-२-११८ एकगोपूर्वात् + [अतः (५-२-११५)] = एकगोशब्दपूर्वका ऽ दन्तशब्दप्रकृतिकात्, नित्यम्, ठञ्= ठञ् प्रत्ययो भवति, शेषोऽर्थः प्राग्वत् । नित्यग्रहणं मतुँब्बाधनार्थम् । अन्यथा ऽन्यतरस्यांग्रहणेना ऽत्र प्रकरणे मतुँप्समुच्चयादत्रापि स्यादेव ।

५-२-११९ शतसहस्रान्तात्+**निष्कात्**= शत-सहस्रशब्दान्त्यक-निष्कशब्दप्रकृतिकात्, ठञ् (५-२-११८) शेषोऽर्थः प्राग्वत् ।

५-२-१२० रूपा- आहतप्रशंसयोः + रूपात् = आहतप्रशंसाविशिष्टोपाधिकरूपशब्दप्रकृतिकात्, यप्= यप् प्रत्ययो भवति, शेषोऽर्थः प्राग्वत् ।

५-२-१२१ अस्माया..... स्रजः = असन्त-माया-मेधा-स्रज् इतिप्रकृतिकात्, विनिँः = विनिँ प्रत्ययो भवति, शेषोऽर्थः प्राग्वत् ।

अन्यतरस्यां (५-२-९६) ग्रहणेनाऽत्र प्रकरणे मतुँप् समुच्चीयत इति न विस्मरणीयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-१२२ बहुलं छन्दसि ॥

अग्ने तेजस्विन्। न च भवति-सूर्यो वर्चस्वान्।

(छन्दसि विनिँप्रकरणे ऽष्ट्रा-मेखला- द्वयोभय-रुजा-हृदयानां दीर्घत्वं चेति वक्तव्यम्)

अष्ट्रावी । मेखलावी । द्वयावी । उभयावी । रुजावी । हृदयावी ।

(मर्मणश्चेति वक्तव्यम्)

मर्मावी ।

(सर्वत्रामयस्योपसंख्यानम्)

आमयावी ।

(श्रृङ्गवृन्दाभ्यामारकन्)

श्रृङ्गारकः । वृन्दारकः ।

(फलबर्हाभ्यामिनच्)

फलिनः । बर्हिणः

(हृदयाच्चालुरन्यतरस्याम्)

हृदयालुः । हृदयी । हृदयिकः । हृदयवान् ।

(शीतोष्णतृप्रेभ्यस्तन्न सहते)

शीतं न सहते शीतालुः । उष्णालुः । तृप्रालुः ।

(हिमाच्चेलुः)

हिमं न सहते हिमेलुः ।

(बलादूलच्)

बलं न सहते बलूलः ।

(वातात् समूहे च)

वातानां समूहो वातं न सहते वा वातूलः ।

(पर्वमरुद्भ्यां तब(प्) वक्तव्यः)

पर्वतः । मरुत्तः ।

५-२-१२३ ऊर्णाया युस् ॥

ऊर्णाऽस्यास्तीति-ऊर्णायुः ।

५-२-१२४ वाचो ग्मिनिँः ॥ १२५

वाग्मी ।

५-२-१२५ आलजाटचौ बहुभाषिणि ॥

(कुत्सित इति वक्तव्यम्)

वाचालः । वाचाटः । यस्तु सम्यग् बहु वदति स वाग्मीत्येव ।

५-२-१२२ **बहुलम**=बाहुल्येन विनिँः (५-२-१२१) छन्दसि=वेदे ।

छन्द- दीर्घत्वम् द्वयोभयहृदयानि प्रयोजयन्ति । अन्यानि स्वत एव दीर्घाणि ।

सर्वत्र = छन्दसि, भाषायां च ।

५-२-२३ **ऊर्णायाः** = ऊर्णाशब्दप्रकृतिकात्, **युस्** = युस् प्रत्ययो भवति । शेषोऽर्थः प्राग्वत् ।

ऊर्णायुः १-४-१६ सिति....इति पदत्वान्न भत्वम्। अत्र काशिका-केचिच्छन्दो ग्रहणमनुवर्तयन्तीति ।अत्रैव दीक्षितः - युक्तं चैतत्। अन्यथा हि ५-२-१४० अहं शुभमोरित्यत्रैवोर्णाग्रहणं कुर्यादिति ।

५-२-१२४ **वाचः** = वाच्शब्दप्रकृतिकात्, **ग्मिनिँ**= ग्मिनिँ प्रत्ययो भवति । शेषोऽर्थः प्राग्वत् ।

वाग्मी तद्धितत्वात् १-३-८ लश.... इति गकारस्य नेत्त्वम्। प्रकृतेश्चकारस्य जश्त्वे कुत्वे च गकारद्वयघटितं रूपं ज्ञेयम् ।

५-२-१२५ **आल-** अस्ति (५-२-९४) वाचः (५-२-१२४) तद्+अस्य+अस्मिन् इति (५-२-९४), **आलजाटचौ**= आलच् आटच् इति प्रत्ययौ भवतः, **बहुभाषिणि**= अस्य+अस्मिन्नितीदंशब्दा ऽभिधेये बहुभाषिणि गम्ये । ग्मिनेरपवादः ।

कुत्सि- कथं तर्हि "मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम्। यत्कृपा तमहं वन्दे परमानन्दमाधवम् । इति ? न हि भगवत्कृपा कुत्सितवाचं कुर्यात् । वाचायै अलम्वाचालमिति, वाचा अलं करोतीति वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-१२६ स्वामिन्नैश्वर्ये ॥
स्वम्= ऐश्वर्यमस्यास्तीति-स्वामी ।
अनैश्वर्ये तु स्ववान् ।

५-१-१२७ अर्श आदिभ्योऽच् ॥
अर्शसः । उरसः ।

५-२-१२८ द्वन्द्वोपतापगर्ह्यात् प्राणिस्था - दिनिँः ॥१३७
कटकवलयिनी । कुष्ठी । ककुदावर्ती ।

५-२-१२९ वातातीसाराभ्यां कुँक् च ॥
वातकी । अतीसारकी । रोगे चायमिष्यते ।
नेह -वातवती गुहा ।
(पिशाचाच्चेति वक्तव्यम्)
पिशाचकी ।

५-२-१३० वयसि पूरणात् ॥
पञ्चमो मासः संवत्सरो वाऽस्तीति पञ्चमी उष्ट्रः । वयसीत्युक्तेर्नेह-पञ्चमवान् ग्रामरागः ।

५-२-१३१ सुखादिभ्यश्च ॥
सुखी । दुःखी ।
(माला क्षेपे) ग.सू.
माली ।

५-२-१३२ धर्मशीलवर्णान्ताच्च ॥
ब्राह्मणधर्मी । ब्राह्मणशीली ।
ब्राह्मणवर्णी ।

५-२-१३३ हस्ताज्जातौ ॥
हस्ती=करी । जातावित्युक्तेर्नेह-हस्तवान् पुरुषः ।

५-२-१३४ वर्णाद् ब्रह्मचारिणि ॥
वर्णी ।

५-२-१२६ स्वामिन्- ऐश्वर्ये=ऐश्वर्ये गम्यमाने, स्वामिन्= स्वामिन्निति निपात्यते= ऐश्वर्येऽर्थे वर्तमानात् स्वशब्दान्मत्वर्थे आमिनँच् प्रत्ययो भवति ।

५-२-१२७ अर्श आदिभ्यः= अर्शस् इति प्रभृतिगणपठितशब्दप्रकृतिकात्, अच्= अच् प्रत्ययो भवति, शेषोऽर्थः प्राग्वत् ।

५-२-१२८ द्वन्द्वो- प्राणिस्थात्= प्राणिस्थवस्तुवाचिनः, द्वन्द्वोपतापगर्ह्यात्= द्वन्द्वसमास-रोग-निन्द्य-विषयात्, अतः (५-२-११५) इनिँः= इनिँ प्रत्ययो भवति । शेषोऽर्थः प्राग्वत् । ५-२-११५ अत इत्येव सिद्धे पुनर्वचनं ठनो बाधनार्थम् ।

५-२-१२९ वाता...राभ्याम्= वात अतीसार इति शब्दप्रकृतिकात्, इनिँः (५-२-१२८), कुँक् च= प्रत्ययसन्नियोगेन वातातीसारशब्दयोः कुँगागमश्च भवति । शेषोऽर्थः प्राग्वत् ।

५-२-१३० वय- पूरणात्= पूरणप्रत्ययान्तात्, वयसि= वयसि द्योत्ये, इनिँः (५-२-१२८) । शेषोऽर्थः प्राग्वत् । ५-२-११५ अत इत्येंव सिद्धे पुनर्वचनं ठनो बाधनार्थम् ।

५-२-१३१ सुखादिभ्यः= सुखप्रभृतिगणपठितशब्दप्रकृतिकात्, इनिँः (५-२-१२८) । शेषोऽर्थः प्राग्वत् ।

५-२-१३२ धर्म... णान्तात्=धर्म-शील-वर्णान्त-शब्दप्रकृतिकात्, इनिँः (५-२-१२८) । शेषोऽर्थः प्राग्वत् ।

५-२-१३३ हस्तात्= हस्तशब्दप्रकृतिकात्, इनिँः (५-२-१२८) जातौ=जातौ वाच्यायाम् । शेषोऽर्थः प्राग्वत् ।

५-२-१३४ वर्णात्=वर्णशब्दप्रकृतिकात्, इनिँः (५-२-१२८) ब्रह्मचारिणि= ब्रह्मचारिणि वाच्ये । शेषोऽर्थः प्राग्वत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-२-१३५ पुष्करादिभ्यो देशे ॥
पुष्करिणी । पद्मिनी । देश इत्युक्तेर्नेह-पुष्करवान् हस्ती ।
(इनिँप्रकरणे बलाद् बाहूरुपूर्वादुपसंख्यानम्)
बाहुबली । ऊरुबली ।
(सर्वादिश्चेति, वक्तव्यम्)
सर्वधनी । सर्वबीजी ।
(अर्थाच्चासन्निहिते)
असंनिहितोऽर्थोऽस्य=अर्थी ।
असंनिहित इत्युक्तेर्नेह-अर्थवान् ।
(तदन्ताच्चेति वक्तव्यम्)
धान्यार्थी । हिरण्यार्थी ।
५-२-१३६ बलादिभ्यो मतुँबन्यतरस्याम् ॥
बली । बलवान् । उत्साही । उत्साहवान् ।
५-२-१३७ संज्ञायां मन्माभ्याम् ॥
दामिनी । होमिनी । संज्ञायामित्युक्तेर्नेह-होमवान् ।
५-२-१३८ कंशंभ्यां ब-भ-युस्-ति-तु-त-यसः ॥
कम्ब । कम्भः । कंयुः । कन्तिः । कन्तुः । कन्तः । कंयः । शम्बः । शम्भः । शंयुः । शंतिः । शन्तुः । शन्तः । शंयः ।
५-२-१३९ तुन्दिबलिवटेर्भः ॥
तुन्दिभः । बलिभः । वटिभः ।
५-२-१४० अंहशुंभमोर्युस् ॥
अहंयुः । शुभंयुः ।

इति पञ्चमाध्याये द्वितीयः पादः समाप्त : ।

५-२-१३५ पुष्करादिभ्यः= पुष्करप्रभृतिगणपठितशब्दप्रकृतिकात्, इनिँ (५-२-१२८), देशे= प्रकृतिप्रत्ययसमुदायेन देशेऽभिधेये । शेषोऽर्थः प्राग्वत् ।

५-२-१३६ बलादिभ्यः= बलप्रभृतिगणपठितशब्दप्रकृतिकात्, अन्यतरस्याम्= वा मतुँप्=मतुँप् प्रत्ययो भवति । शेषोऽर्थः प्राग्वत् । अन्यतरस्यां ग्रहणेन प्रकृत इनिँ समुच्चीयते । तेन पक्षिकोऽपि ठन् न ।

५-२-१३७ संज्ञा- मन्माभ्याम्=मन्नन्तमशब्दान्त-शब्दप्रकृतिकात् इनिँ (५-२-१२८) **संज्ञायां**= संज्ञायां गम्यमानायाम् । शेषोऽर्थः प्राग्वत् ।

५-२-१३८ कंशंभ्याम्= कम् शम् इति शब्दप्रकृतिकात्, बभ... यसः= ब-भ-युस्-ति-तु-त-यस् इत्येते प्रत्यया भवन्ति । शेषोऽर्थः प्राग्वत् । युस्-यसोः सकारः १-४-१६ सिति... इति पदत्वार्थः । अतो न पूर्वभागस्य भत्वम् । शंतिः **शन्तुः** । अत्र वैकल्पिकः परसवर्णः ।

५-२-१३९ तुन्दि-बलि-वटेः= तुन्दि-बलि-वटि-शब्दप्रकृतिकात्, भः= भप्रत्ययो भवति । शेषोऽर्थः प्राग्वत् ।

५-२-१४० अहंशुभमोः अहं शुभमिति द्वे अपि विभक्तिप्रतिरूपके अव्यये तत्प्रकृतिकात्, युस्=युस् प्रत्ययो भवति । शेषोऽर्थः प्राग्वत् । प्रत्ययसकारफलं प्राग्वत् ।

इति पञ्चमाध्याये
द्वितीयः पादः
समाप्त : ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पञ्चमाध्याये
तृतीयः पादः

५-३-१ प्राग्दिशो विभक्तिः ॥ २६
५-३-२ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ॥ २६
५-३-३ इदम इश् ॥ ४
इतः । इह ।
५-३-४ एतेतौ रथोः ॥
एतर्हि । इत्थम् ।
५-३-५ एतदोऽन् ॥
योगोऽयं विभज्यते-
प्र. ५-३-५ एतदः ॥
एतर्हि । इत्थम् ।
द्वि. ५-३-५ अन् ॥
अतः । अत्र ।
५-३-६ सर्वस्य सोऽन्यतरस्यां दि ॥
सदा । सर्वदा ।

५-३-१ प्राग्दि-५-२-९४ तदस्याऽस्त्यस्मिन्... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र शिक्षकः प्रथमं ५-३-२७ दिक्शब्देभ्य :... सूत्रं दर्शयन् प्रकृत- (५-३-१) सूत्रार्थमुपदिशेत् । तथा हि-दिशः प्राक्= इत आरभ्य ५-३-२७ दिक्शब्देभ्यः.... सूत्रात् प्राग् वर्तमानाः प्रत्ययाः, विभक्तिः= विभक्तिसंज्ञका भवन्ति । इति । अथातः ५-३-२ सूत्रात् ५-३-२६ था हैतौ च.. सूत्रपर्यन्ता ये प्रत्ययास्तेषु विभक्तिकार्यं भवतीति बोधयेत्। अथ एते च प्रत्यया न सर्वेभ्यः प्रातिपदिकेभ्यो भवन्ति । केभ्यस्तर्हि भवन्ति ? इति जिज्ञासामुद्भाव्य ५-३-२ किं सर्वनाम.... सूत्रमुपदिशेत् ।

५-३-२ किं सर्व - ५-३-१ प्राग्दिशो... सूत्रानन्तरं सूत्रमिदं पाठचम् । अद्व्यादिभ्यः= द्विप्रभृति (द्वि, युष्मद्, अस्मद् भवतुँ, किम् इति) भिन्नेभ्यः, किंसर्वनामबहुभ्यः=किंशब्दात् सर्वनामशब्दाद् बहुशब्दाच्च, वक्ष्यमाणाः प्रत्यया भवन्ति । इत्यर्थमुपदिश्य सर्वनामकथनेनैव सिद्धौ किंशब्दस्य पृथक् पाठः कथम् ? इति परीक्षणव्याजेन अद्व्यादिभ्य इति किंशब्दस्यापि निषेधात् पुनः पाठ इतिच्छात्रान् बोधयेत् । अथ ५-३-७ पञ्चम्यास्... सूत्रमुपदिशेत् ।

५-३-३ इदमः= इदंशब्दस्य स्थाने, इश् = इश् आदेशो भवति, प्राग्दिशीये प्रत्यये । प्राग्दिशीये प्रत्यये इति प्रकरणगम्योऽयमर्थः ।

५-३-४ एते- इदमः (५-३-३) एतेतौ = एत इत् इत्येतावादेशौ भवतः, रथोः = रेफादौ थकारादौ च प्राग्दिशीये प्रत्यये ।

प्र. ५-३-५ एतदः = एतच्छब्दस्य स्थाने, एतेतौ (५-३-४) रथोः (५-३-४) ।

द्वि. ५-३-५ अन् - एतदः, (प्र. ५-३-५) अन्=अन् आदेशो भवति प्राग्दिशीये प्रत्यये ।

५-३-६ सर्वस्य- ५-३-१५ सर्वै... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । सर्वस्य= सर्वशब्दस्य स्थाने, अन्यतरस्याम्= वा, सः= स इत्यादेशो भवति, दि=दकारादौ प्राग्दिशीये प्रत्यये परे ।

अथ समासशिक्षणरीतिः

इत्थं सामान्यरीत्या पदानि द्विविधानि भवन्ति तिङन्तानि सुँबन्तानि च । अर्थात् सुँप् तिङ् प्रत्ययं विना शब्दाः सर्वथा न प्रयुज्यन्ते। इति संस्कारं छात्राणां मस्तिष्के द्रढयित्वा समासं शिक्षयितुकामः शिक्षकोऽधोनिर्दिष्टरूपेणच्छात्रान् बोधयेत्। वत्साः ! ज्ञातवन्त एव यूयं यत् प्रातिपदिकानि सुँप्प्रत्ययं विना न प्रयुज्यन्ते इति । यथा छात्रः कलमेन अनुवादं लिखति इति वाक्ये छात्रशब्दात् सुँ प्रत्ययः कृतः, कलमशब्दाट्टाप्रत्ययः, अनुवादशब्दाच्च अम् प्रत्ययः । अत्र 'छात्र कलम लिखति' इति वाक्यं न भवति । श्यामस्य पुस्तकं मञ्जूषायां वर्तते, अत्र वाक्ये श्यामशब्दाद् ङस्प्रत्ययः, पुस्तकशब्दात् सुँप्रत्ययः, मञ्जूषाशब्दाद् ङिप्रत्ययः कृतः । छात्रः कलमेन, अनुवादम्, श्यामस्य, पुस्तकम्, मञ्जूषायाम्, इत्यादीनि पदानि पृथक् पृथक् सन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत्साः ? विषयो ऽ यं तु युष्माभिर्ज्ञात एव। केवलमत्र चर्चामात्रं कृतम्। इत्युपदिश्य शिक्षकः पुनरग्रेऽप्युपदिशेत्। यथा- वत्साः ? यथा पृथक् पृथक् पदानि भवन्ति, तथैव बहूनां पदानां मेलनेन एकं पदमपि भवति। सा प्रक्रिया च समास इत्युच्यते। समासशब्दस्यार्थश्च संक्षेपो वर्तते (समसनम्=समासः संक्षेप इत्यर्थ इति न्यासः) तेन बहूनां पदानां मेलनेन एकपदसम्पादनात् सा प्रक्रिया समासशब्देन व्यवह्रियते। इति वदन् अधो निर्दिष्टरूपेण वाक्यानि श्यामपाटचां लिखित्वा बोधयेत्।

(क) श्यामस्य पुस्तकम् (ख) श्यामपुस्तकम् (क) शास्त्रे निपुणः (ख) शास्त्रनिपुणः (क) दुर्जनाद् भयम् (ख) दुर्जनभयम् (क) शस्त्रेण हतः (ख) शस्त्रहतः। अत्र (क) वाक्येषु पदानि पृथक् सन्ति। (ख) वाक्येषु पदानि समासद्वारा एकीभूतानि सन्ति। पृथक् पदानि व्यस्तानि, एकीभूतपदानि च समस्तानि इति व्यवह्रियन्ते। इत्थम्, अनेकेषां पदानामेकपदीभवनं समास इति स्फुटं भवति। अथातः समासः (अनेकेषां पदानामेकपदीकरणप्रक्रिया) साधारणतयोपदिश्यते। इत्युपदेशप्रसङ्गेऽधस्तनानि वाक्यानि श्यामपाटचां लिखेत्।

यथा- (१) (क) पूर्वं भूतः प्रधानमन्त्री (ख) भूतपूर्वः प्रधानमन्त्री (२) (क) पूर्वं भूतः प्रधानाचार्यः (ख) भूतपूर्वः प्रधानाचार्यः (३) (क) पूर्वं भूतः सेनापतिः (ख) भूतपूर्वः सेनापतिः। इति। अथाऽधोनिर्दिष्टरूपेण शिक्षकश्छात्रान् बोधयेत्। वत्साः ? उपरितनेषु वाक्येषु प्रत्येकं (क) वाक्यस्य प्रत्येकं (ख) वाक्यस्य चाऽर्थः समानः। किन्तु (क) वाक्येषु 'पूर्वं भूतः' इति (पृथक् पृथक्) व्यस्ते पदे स्तः (ख) वाक्येषु तु 'भूतपूर्वः' इति एकमेव (समस्तं) पदं वर्तते। एकीभूतं पदं समस्तम् पृथक् पदं व्यस्तम् इति व्यवह्रियते। इत्यनुपदमुपदिष्टमवधेयम्। वत्साः ? अथेदानीं पृथक् पृथक् पदानि यया प्रक्रियया एकपदाय कल्पन्ते सा प्रक्रिया प्रदर्श्यते। या खलु समास नाम्ना- प्रथते व्याकरणे। तथा हि, इति वदन् उपरि (क) वाक्येषु प्रयुक्ते 'पूर्वं भूतः' इति पदे दर्शयित्वा तदग्रतोऽधोनिर्दिष्टरूपेण लिखेत्। यथा- पूर्वं भूतः = पूर्व+अम् भूत +सुँ इति। अथ २-२-३८ कडाराः कर्मधारये इति सूत्रप्रदर्शनपुरस्सरं २-१-३ प्राक् कडारात् समासः- सूत्रमुपदिशेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-७ पञ्चम्यास्तसिँल् ॥ ९

कुतः । यतः । ततः । बहुतः ।

५-३-८ तसेँश्च ॥

केनैकदिक् = कुतः । यतः । ततः ।

धूमो निवार्येत समीरणेन यतस्तु कक्षस्तत एव वह्निः ॥

५-३-९ पर्यभिभ्यां च ॥

सर्वोभयार्थाभ्यामेव ।

परितः । सर्वत इत्यर्थः । अभितः ।

उभयत इत्यर्थः ।

५-३-१० सप्तम्यास्त्रल् ॥ २२

कुत्र । यत्र । तत्र । बहुत्र ।

५-३-११ इदमो हः ॥

इह ।

५-३-१२ किमोऽत् ॥ १३

क्व । उत्तरसूत्राद् 'वा' इत्येतदपकृष्यते । कुत्र ।

५-३-१३ वा ह च च्छन्दसि ॥

कुह । क्व । कुत्र ।

५-३-१४ इतराभ्योऽपि दृश्यन्ते ॥

दृशिग्रहणाद् भवदादियोग एव ।

स भवान् । ततो भवान् । तत्र भवान् ।

तं भवन्तम् । ततो भवन्तम् । तत्र भवन्तम् । इत्यादि ।

५-३-७ पञ्च- ५-३-२ किंसर्व... सूत्रानन्तरं सूत्रमिदं पाठचम् । किंसर्वनामबहुभ्यः (५-३-२) = किं सर्वनामबहुशब्दप्रकृतिकात्, पञ्चम्याः = पञ्चम्यन्तात्, तसिँल् = तसिँल् प्रत्ययो भवति । **कुतः** ७-२-१०४ कु ति ...... इति किमः कुः ।

यतः, ततः ५-३-१ प्राग्दि.... इति विभक्तिसंज्ञायां ७-२-१०२ त्यदा.... इत्यकारः । ६-१-९४ अतो... इति पररूपम् । १-१-३७ तद्धि... इत्यव्ययत्वम् । एवमग्रेऽपि ५-३-४६ एधाच्च सूत्रावधिकप्रत्ययान्तानामव्ययत्वं ज्ञेयम् । इति बोधयित्वा सर्वेभ्य इति विग्रहे सम्पत्स्यमानं रूपं छात्रैः साधयेत् । अथ ५-३-१० सप्तम्या... सूत्रमुपदिशेत् ।

५-३-८ तसेँः= किंसर्वनामबहुभ्यः परस्य तसिँप्रत्ययस्य स्थाने, तसिँल् (५-३-७)= तसिँल् आदेशो भवति । **के**नैकदिक् इति विग्रहे ४-३-११३ तसिँश्च इति तसिँः । एवं येनैकदिक् तेनैकदिगिति विग्रहः । शेषप्रक्रिया प्राग्वत् ।

५-३-९ पर्यभिभ्याम् = परि अभि इति शब्दाभ्याम् तसिँल् (५-३-७) ।

५-३-१० सप्त- ५-३-७ पञ्चम्यास्...सूत्रानन्तरं सूत्रमिदं पाठचम् । किंसर्वनामबहुभ्यः (५-३-२) = किंसर्वनामबहुशब्दप्रकृतिकात् । सप्तम्याः= सप्तम्यन्तात्, त्रल्= त्रल्प्रत्ययो भवति । अथ ५-३-१५ सर्वैकान्य... सूत्रमुपदिशेत् ।

५-३-११ इदमः = इदंशब्दप्रकृतिकात्, सप्तम्याः (५-३-१०) हः = हप्रत्ययो भवति । इह-५-३-३ इद... इति इदम इश् ।

५-३-१२ किमः= किंशब्दप्रकृतिकात्, सप्तम्याः (५-३-१०) वा (५-३-१३) । अत्= अत्प्रत्ययो भवति । मकारपरित्राणार्थस्थमोँरुँकारः १-३-४ न विभक्तौ... इत्यस्यानित्यत्वं ज्ञापयति; तेन अत्प्रत्ययस्थतकारस्य विभक्तिस्थत्वेऽपि नेत्त्वप्रतिषेधः । **क्व** इत्युदाहरणे प्रकृतेः ७-२-१०५ क्वाति इति क्वादेशः ।

५-३-१४ इतराभ्योऽपि= पञ्चमी-सप्तमी-भिन्नविभक्त्यन्तेभ्योऽपि दृश्यन्ते = तसिँलादयः प्रत्यया दृश्यन्ते । इत्यादि एवं दीर्घायुः प्रभृतिष्वप्युदाहार्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-१५ सर्वैकान्यकिंयत्तदः काले दा ॥ २२

सदा । सर्वदा । एकदा । अन्यदा । कदा । यदा । तदा । काले इत्युक्तेर्नेह-सर्वत्र देशे ।

५-३-१६ इदमो र्हिल् ॥ १८

अस्मिन् काले एतर्हि । काले इत्युक्तेर्नेह- इह देशे ।

५-३-१७ अधुना ॥

अधुना ।

५-३-१८ दानीं च ॥१९

अस्मिन् काले - इदानीम् ।

५-३-१९ तदो दा च ॥

तदा । तदानीम् ।

५-३-२० तयोर्दार्हिलौ चच्छन्दसि ॥

इदा वत्सरीयः । इदं तर्हि । इदानीम् । तदा । तदानीम् ।

५-३-२१ अनद्यतने र्हिलन्यतरस्याम् ॥

कर्हि । कदा । यर्हि । यदा । तर्हि । तदा ।

५-३-२२ सद्यः- परुत्-परार्यैषमः-परेद्यव्यद्य-पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्यु-रधरेद्युरुभयेद्युरुत्तरेद्युः ।

(द्युश्चोभयाद् वक्तव्यः)

उभयस्मिन्नहनि उभयद्युः ।

५-३-१५ सर्वै-५-३-१० सप्तम्यास्...सूत्रानन्तरं सूत्रमिदं पाठचम् ।
सर्वै... तदः =सर्व एक अन्य किम् यद् तद् इति प्रकृतिकात्, सप्तम्याः (५-३-१०) काले= समयेऽर्थे, दा= दाप्रत्ययोभवति । अथ ५-३-६ सर्वस्य... सूत्रमुपदिशेत् ।

५-३-१६ इदमः = इदंशब्दप्रकृतिकात्, सप्तम्याः (५-३-१०) काले (५-३-१५) र्हिल्=र्हिल्प्रत्ययो भवति । उदाहरणे ५-३-४ एतेतौ... इत्येत आदेशः । प्रत्युदाहरणविषये ५-३-११ इदमो हः - सूत्रे द्रष्टव्यम् ।

५-३-१७ अधुना = इदमः (५-३-१६) सप्तम्याः (५-३-१०) काले (५-३-१५ अधुनाप्रत्ययो भवति । अस्मिन् काले-**अधुना** । प्रकृतेः, ५-३-३ इदम इश् इति इश् । ६-४-१४८ यस्येतिचेतीकारलोप : ।

५-३-१८ दानीम्= [इदमः (५-३-१६) सप्तम्याः (५-३-१०) काले (५-३-१५)] दानीम् प्रत्ययो भवति । विभक्तिस्थत्वेन मकारस्य १-३-४ न विभक्तौ इतीत्त्वप्रतिषेधः ।

५-३-१९ तदः= तच्छब्दप्रकृतिकात्, सप्तम्याः (५-३-१०) काले (५-३-१५) दा= दा इति, दानीम् (५-१-१८) च प्रत्ययौ भवतः ।

५-३-२० तयोः= इदमस्तदश्च= इदंशब्दप्रकृतिकात् तच्छब्दप्रकृतिकाच्च, सप्तम्याः (५-३-१०) दार्हिलौ=दा र्हिल् प्रत्ययौ (यथासंख्यम्) भवतः, छन्दसि=वेदे । चाद् यथाप्राप्तम् ।

५-३-२१ अन- किंसर्वनामबहुभ्योऽद्वचादिभ्यः, (५-३-२) सप्तम्याः (५-३-१०) अनद्यतने अद्यतनभिन्ने, काले (५-३-१५) अन्यतरस्याम्= वा, = र्हिल्= र्हिल् प्रत्ययो भवति ।

५-३-२२ सद्यः उत्तरेद्युः -एते निपात्यन्ते । तथाहि समानस्य सभावो निपात्यते द्यश्च प्रत्ययोऽहन्यभिधेये । समानेऽहनि सद्यः । पूर्वशब्दस्य परभावो निपात्यते, उच्च प्रत्ययः संवत्सरेऽभिधेये । पूर्वस्मिन् संवत्सरे परुत् । पूर्वतरशब्दस्य परभावो निपात्यतेऽरिश्च प्रत्ययः संवत्सरेऽभिधेये । पूर्वतरे संवत्सरे-परारि । इदम इश्, समसँण् प्रत्ययश्च निपात्येते संवत्सरेऽभिधेये । अस्मिन् संवत्सरे ऐषमः । परशब्दादेद्यविप्रत्ययो निपात्यतेऽहन्यभिधेये । परस्मिन्नहनि परेद्यवि । इदमोऽश्भावो द्यश्च प्रत्ययो निपात्येतेऽहन्यभिधेये । अस्मिन्नहनि-अद्य। पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस् प्रत्ययो निपात्यतेऽहन्यभिधेये । पूर्वस्मिन्नहनि-पूर्वेद्युः। अन्यस्मिन्नहनि-अन्येद्युः । अन्यतरस्मिन्नहनि-अन्यतरेद्युः । इतरस्मिन्नहनि- इतरेद्युः । अपरस्मिन्नहनि- अपरेद्युः । अधरस्मिन्नहनि अधरेद्युः । उभयस्मिन्नहनि-उभयेद्युः उत्तरस्मिन्नहनि-उत्तरेद्युः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-२३ प्रकारवचने थाल् ॥ २६

येन प्रकारेण यथा। तथा। सर्वथा ॥

५-३-२४ इदमस्थमुँः ॥ २५

अनेन प्रकारेण इत्थम्।

(एतद उपसंख्यानम्)

इत्थम्

५-३-२५ किमश्च ॥ २६

केन प्रकारेण कथम्।

५-३-२६ था हेतौ च च्छन्दसि ॥

कथा ग्रामं न पृच्छसि। केन हेतुना न पृच्छसीत्यर्थः। प्रकारवचने-कथा देवा आसन् पुराविदः।

विभक्तिसंज्ञायाः पूर्णोऽवधिः !

५-३-२७ दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥ ३९

पूर्वस्यां दिशि, पूर्वस्मिन् देशे, पूर्वस्मिन् काले वा पुरस्तात्। अधरस्यामधरस्मिन् वा अधस्तात्। अवरस्यामवरस्मिन् वा अवस्तात्, अवरस्तात्।

५-३-२८ दक्षिणोत्तराभ्यामतसुँच् ॥ २९

दक्षिणस्यां दिशि, दक्षिणे देशे वा दक्षिणतः। उत्तरस्यां दिशि उत्तरस्मिन् देशे काले वा उत्तरतः।

५-३-२९ विभाषा परावराभ्याम् ॥

परतः, परस्तात्।

अवरतः, अवस्तात्, अवरस्तात्।

५-३-३० अञ्चेर्लुक् ॥

प्राचि प्राचः प्राङ् वा, प्राच्यां प्राच्याःप्राची वा प्राक्। प्रतीचि प्रतीचः प्रत्यङ् वा प्रतीच्यां प्रतीच्याः प्रतीची वा प्रत्यक्।

५-३-२३ प्रकारवचने=प्रकारार्थे वर्तमानेभ्यः, किं....दिभ्यः (५-३-२) थाल् = थाल् प्रत्ययो भवति। स्वार्थे।

५-३-२४ इद-प्रकारवचने (५-३-२३) इदमः = इदंशब्दात्, थमुँः = थमुँप्रत्ययो भवति, स्वार्थे। इत्थम् ५-३-४ एतेतौ:... इतीदादेशः।

एतदः- थमुँः (५-३-२४)। **इत्थम्** प्र. ५-३-५ एतद इतीदादेशः।

५-३-२५ किम- प्रकारवचने (५-३-२३) किमः= किंशब्दात्, थमुँः (५-३-२४) स्वार्थे।

कथम् ७-२-१०३ किमः क इति कादेशः।

५-३-२६ था हेतौ - हेतौ, प्रकारवचने (५-३-२३) च वर्तमानात्, किमः (५-३-२५) था=था प्रत्ययो भवति।

५-३-२७ दिक्श- दिग्दे.... लेषु= दिग्-देश-कालेषु वर्तमानेभ्यः, सप्त...माभ्यः= सप्तम्यन्त-पञ्चम्यन्त-प्रथमान्तेभ्यः, दिक्शब्देभ्यः=दिग्वाचिशब्देभ्यः, अस्तातिः = अस्ताति प्रत्ययो भवति। उदाहरणेष्वाद्ययोः ५-३-४० अस्ताति चेति पुर् अध् आदेशौ क्रमशः। अन्त्ये ५-३-४१ विभाषाऽवरस्येत्यवादेशो विकल्पेन।

५-३-२८ दक्षि- दिग्दे... लेषु+सप्तमी... माभ्यः (५-३-२७) दक्षिणोत्तराभ्याम्= दक्षिण उत्तर इति शब्दाभ्याम्, अतसुँच्=अतसुँच् प्रत्ययो भवति। दक्षिणशब्दस्य काले तु वृत्तिर्न संभवति।

५-३-२९ विभा- दिग्दे... लेषु+सप्तमी... माभ्यः (५-३-२७) परावराभ्याम्= पर अवर इति शब्दाभ्याम्, विभाषा=वा, अतसुँच् (५-३-२८)। पक्षे ५-३-२७ दिक्श.... इत्यस्तातिः। अस्तातावरशब्दस्य ५-३-४१ विभाषा... इत्यवादेशो विकल्पेन।

५-३-३० अञ्चेः= अञ्चत्यन्तेभ्य उत्तरस्य, लुक् = अस्तातेर्लुक्। अस्तातेरिति प्रकरणगम्योऽयमर्थः। उदाहरणे स्त्रियां १-२-४९ लुक् तद्धितलुकीति ङीपोऽपि लुक्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-३१ उपर्युपरिष्टात् ॥

उपरि । उपरिष्टात्

५-३-३२ पश्चात् ॥

(दिक्पूर्वपदस्याऽपरस्य पश्चभावो वक्तव्य आतिँश्च प्रत्ययः)

दक्षिणपश्चात् । उत्तरपश्चात् ।

(अर्धोत्तरपदस्य दिक्पूर्वपदस्य पश्चभावो वक्तव्यः)

दक्षिणपश्चार्धः । उत्तरपश्चार्ध : ।

(विनापि पूर्वपदेन पश्चभावो वक्तव्यः)

पश्चार्धः ।

५-३-३३ पश्च पश्चा च च्छन्दसि ॥

५-३-३४ उत्तराधरदक्षिणादातिः ॥ ३५

उत्तरात् । अधरात् । दक्षिणात् ।

५-३-३५एनबन्यतरस्यामदूरेऽपञ्चम्याः ॥

उत्तरेण, उत्तरात् । अधरेण,

अधरात् । दक्षिणेन, दक्षिणात् ।

केचिदिह उत्तरादीननुवर्त्य दिक्शब्द-मात्रादेनप्प्रत्ययमिच्छन्ति । पूर्वेण ग्रामम् । अपरेण ग्रामम् ।

५-३-३६ दक्षिणादाच् ॥ ३७,३८

दक्षिणा ग्रामात् ।

५-३-३१ उप ...रिष्टात् अस्तात्यर्थे निपात्येते= ऊर्ध्वशब्दाद् रिल् रिष्टातिल् च प्रत्ययौ प्रकृतेश्चोपादेशः ।

५-३-३२ पश्चात् अयं निपात्यतेऽस्तात्यर्थे= अपरशब्दादातिँप्रत्ययः प्रकृतेश्च पश्चादेशः ।

दिक्पूर्वपदस्य= दिग्वाचिशब्दपूर्वपदकस्य । दक्षिणस्या अपरस्याश्च दिशोऽन्तरालमिति दक्षिणापरा २-२-२६ दिङ्नामा... इति बहुव्रीहिः । तत आतिँप्रत्ययोऽस्तात्यर्थे । एवम्-उत्तरस्या अपरस्याश्चेत्यादि प्राग्वत् ।

अर्धो-पश्चभावः- अपरस्येत्यर्थः । उदाहरणयोः पूर्ववार्तिकदर्शितसमासानन्तरं षष्ठीसमासोऽर्धशब्देन ।

विनापि- पश्चभावः- अर्धोत्तरपदस्य, अपरस्येत्यर्थः । **पश्चार्धः** २-१-५८ पूर्वापर... इति समासः ।

५-३-३३ पश्चपश्चा- निपात्येते= अपरशब्दात् अ, आ प्रत्ययौ प्रकृतेः पश्चादेशः । चात् पश्चात् ।

५-३-३४ उत्त- दिग्देश... लेषु + सप्तमी... माभ्यः (५-३-२७), उत्त...क्षिणात्= उत्तर अधर दक्षिण इति शब्देभ्यः, आतिः= आतिँप्रत्ययो भवति ।

५-३-३५ एन- अदूरे+ [दिग्देशकालेषु (५-३-२७)]= सन्निहित-दिग्देशकाल- वाचिभ्यः, अपञ्चम्याः + [सप्तमीप्रथमाभ्याम् (५-३-२७)]=सप्तम्यन्त-प्रथमान्तेभ्यः, उत्तराधरदक्षिणात् (५-३-३४) । अन्यतरस्याम्= वा एनप् = एनप् प्रत्ययो भवति । पक्षे आतिः (५-३-३४) दूरे पञ्चम्यन्ताच्च ।

५-३-३६ दक्षि- दिग्दे... लेषु (५-३-२७) अपञ्चम्याः (५-३-३५) = सप्तमीप्रथमाभ्याम् (५-३-२७)= सप्तम्यन्तप्रथमान्तात्, दक्षिणात् =दक्षिणशब्दात्,आच्=आच्प्रत्ययोःभवति। अदूरे (५-३-३५) इति न सम्बध्यतेऽत्र ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-३७ आहि च दूरे ॥ ३८
दक्षिणाहि ग्रामात्। दक्षिणा ग्रामात्।

५-३-३८ उत्तराच्च ॥
उत्तरा, उत्तराहि वा ग्रामात्। अदूरे तु उत्तरेण ग्रामम्। पञ्चम्यन्तात्तु उत्तरतो ग्रामस्य।

५-३-३९ पूर्वाधरावराणामसिँ पुरधवश्चैषाम् ॥ ४०
पुरः। अधः। अवः।

५-३-४० अस्ताति च ॥ ४१
पुरस्तात्। अधस्तात्।

५-३-४१ विभाषाऽवरस्य ॥
अवस्तात्। अवरस्तात्

५-३-४२ संख्याया विधार्थे धा ॥ ४३
एकधा भुङ्क्ते।
द्विधा गच्छति।

५-३-४३ अधिकरणविचाले च ॥
एकं राशिं पञ्चधा कुरु। अष्टधा कुरु। एकमनेकधा कुरु।

५-३-४४ एकाद् धो ध्यमुँञन्यतरस्याम् ॥ ४६
ऐकध्यम्, एकधा।

५-३-४५ द्वित्र्योश्च धमुँञ् ॥ ४६
द्वैधम्, द्विधा। त्रैधम्, त्रिधा।
(धमुँञन्तात् स्वार्थे डदर्शनम्)
मतिद्वैधानि संश्रयन्ते।

५-३-४६ एधाच्च ॥
द्वेधा। द्वैधम्। द्विधा। त्रेधा। त्रैधम्। त्रिधा।

५-३-३७ आहि- दूरे= विप्रकृष्टेषु, दिग्देशकालेषु (५-३-२७) अपञ्चम्याः (५-३-३५) दक्षिणात् (५-३-३६) आहि= आहि इति, आच् (५-३-३६) च प्रत्ययौ भवतः।

५-३-३८ उत्त- दूरे (५-३-३७) दिग्देशकालेषु (५-३-२७) अपञ्चम्याः (५-३-३५) उत्तरात्= उत्तरशब्दात्, आहि (५-३-३७) आच् (५-३-३६) च। **उत्तरेण ग्रामम्** ५-३-३५ एनबन्य.... इत्येनप्। २-३-३१ एनपा.... इति द्वितीया। **उत्तरतो ग्रामस्य** ५-३-२८ दक्षिणोत्तरा... इत्यतसुँच्। २-३-३० षष्ठ्यतसर्थ.... इति षष्ठी।

५-३-३९ पूर्वा- दिग्देशकालेषु + सप्तमी..माभ्यः + दिक्शब्देभ्यः (५-३-२७) पूर्वाधरावराणाम् = पूर्व अधर अवर इति शब्देभ्यः, असिँ=असिँप्रत्ययो भवति, एषाम्= पूर्वाधरावराणां स्थाने, पुरधवश्च= पुर् अध् अव् इत्यादेशाश्च भवन्ति। यथासंख्यम्।

५-३-४० अस्ता-एषाम् + पुरधवः (५-३-३९.) अस्ताति=अस्तातिँप्रत्यये परे। इदमेवादेश-विधानं ज्ञापकम्-अस्तातिँरेभ्यो भवति, असिँ प्रत्ययेन न बाध्यत इति।

५-३-४१ विभा - अवरस्य= अवरशब्दस्य स्थाने, विभाषा= वा, अव् (५-३-३९.) अस्ताति (५-३-४०)।

५-३-४२ संख्या- विधार्थे= क्रियाप्रकारेऽर्थे वर्तमानेभ्यः, संख्यायाः= संख्यावाचिशब्देभ्यः, धा= धाप्रत्ययो भवति, स्वार्थे। कथं तर्हि एकविंशतिधा बाह्वृचम्, नवधाऽथर्वणो वेद इति ? अत्रापि हि सर्वत्र. क्रिया प्रतीयते- उपदिश्यते इति भवतीति वा।

५-३-४३ अधिकरणविचाले= द्रव्यस्य संख्यान्तरापादाने, संख्यायाः+ धा (५-३-४२) स्वार्थे।

५-३-४४ एकाद्=एकशब्दात् परस्य, धः= धाप्रत्ययस्य स्थाने, अन्यतरस्याम्= वा, ध्यमुँञ्= ध्यमुँञादेशो भवति।

५-३-४५ द्वित्र्योः= द्वित्रिशब्दाभ्यां परस्य, धः + अन्यतरस्याम् (५-३-४४) धमुँञ्= धमुँञादेशो भवति। **धमुँ-** अत्र हरदत्तः - धमुँञन्तस्याऽ लिङ्गसंख्यत्वेऽपि तदन्तात् स्वार्थे विहितस्याप्यस्य स्वभावाल्लिङ्गसंख्यायोगः। तेनाव्ययत्वं न भवतीति।

५-३-४६ एधा- द्वित्र्योः (५-३-४५) धः + अन्यतरस्याम् (६-३-४४) एधाच्= एधाजादेशो भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-४७ याप्ये पाशप् ॥

कुत्सितो वैयाकरणो वैयाकरणपाशः ।

५-३-४८ पूरणाद् भागे तीयादन् ॥ ४९,५१

द्वितीयो भागो द्वितीयः ।

(तीयादीकक् स्वार्थे वा वाच्यः)

द्वैतीयीकः । द्वितीयः । तार्तीयीकः । तृतीयः ।

(न विद्यायाः)

द्वितीया विद्या । तृतीया विद्या ।

५-३-४९ प्रागेकादशभ्योऽच्छन्दसि ॥ ५०

पञ्चमः । दशमः ।

५-३-५० षष्ठाष्टमाभ्यां ञ च ॥ ५१

षष्ठो भागः षाष्ठः । षष्ठः ।

आष्टमः । अष्टमः ।

५-३-५१ मानपश्वङ्गयोः कन्लुकौ च ॥ ५२

षष्ठको भागो मानं चेत् । षाष्ठः, षष्ठो वा । अष्टमो भागः पश्वङ्गं चेत् । आष्टमः, अष्टमो वा । मानपश्वङ्गभिन्ने तु षाष्ठः, षष्ठः । आष्टमः, अष्टमः ।

५-३-५२ एकादाकिनिँच्चाऽसहाये ॥

एकाकी । एककः । एकः ।

५-३-४७ याप्ये= कुत्सितेऽर्थे वर्तमानात् प्रातिपदिकात्, पाशप्= पाशप् प्रत्ययो भवति, स्वार्थे। याप्यन्ते= अपनीयन्ते तस्माद् गुणा इति याप्यः । ३-३-११३ कृत्यल्युँटो बहुलम् इत्यपादाने कृत्य इति न्यासः । अत्र काशिका- यो व्याकरणशास्त्रे प्रवीणो दुःशीलः, तत्र कस्मान्न भवति ? यस्य गुणस्य सद्भावाद् द्रव्ये शब्दनिवेशः, तस्य कुत्सायां प्रत्यय इति ।

५-३-४८ पूर- भागे= भागेऽर्थे वर्तमानात्, पूरणात् + तीयात्= पूरणार्थकतीयप्रत्ययान्तात्, अन्= अन् प्रत्ययो भवति स्वार्थे । नित्त्वात् ६-१-१९२ ञ्नित्यादि... इत्याद्युदात्तः फलम् । रूपे तु नास्ति विशेष :।

५-३-४९ प्रागे- अच्छन्दसि=अच्छन्दसि विषये, भागे+ पूरणात् (५-३-४८)= भागेऽर्थे वर्तमानेभ्यः पूरण- प्रत्ययान्तेभ्यः, प्रागेकादशभ्यः = एकादशतः प्राग्वर्तिभ्यः संख्याशब्देभ्यः, अन् (५-३-४८) स्वार्थे ।

५-३-५० षष्ठा- अच्छन्दसि (५-३-४९) भागे (५-३-४८) षष्ठाष्टमाभ्याम्= षष्ठ अष्टम इति शब्दाभ्याम् ञ= ञप्रत्ययो भवति, अन् (५-३-४८) च । स्वार्थे ।

५-३-५१ मान-भागे (५-३-४८) षष्ठाष्टमाभ्याम् (५-३-५०) कन्लुकौ= कन्प्रत्ययो लुक् च भवतः । यथासंख्यम् । अर्थात् षष्ठशब्दात् कन् प्रत्ययः, अष्टमशब्दाद् विहितस्य प्रत्ययस्य (ञप्रत्ययस्य अन् प्रत्ययस्य वा, अष्टमशब्दात् तयोरेव विधानात्) लुक्, च= चकारात् ञ (५-३-५०) अन् (५-३-४९) च ।

५-३-५२ एका- असहाये= असहायेऽर्थे वर्तमानात्, एकात्=एकशब्दात्, आकिनिँच्= आकिनिँच् प्रत्ययो भवति,च= कन्लुकौ (५-३-५१) च । आकिनिँचः कनो वा लुक् । स च विधानसामर्थ्यात् पाक्षिकः ।

“एकाकी हयमारुह्य जगाम गहनं वनम्”

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-५३ भूतपूर्वे चरट् ॥ ५४

भूतपूर्व आढ्यः = आढ्यचरः ।

५-३-५४ षष्ठ्या रूप्य च ॥

देवदत्तस्य भूतपूर्वो गौः = देवदत्तरूप्यः । देवदत्तचरः ।

५-३-५५ अतिशायने तमबिष्ठनौ ॥ ५७, ५६

अयमेषामतिशयेन आढ्यः= आढ्यतमः ।

अयमेषामतिशयेन लघुः= लघिष्ठः ।

५-३-५६ तिङश्च ॥ ७७

अयमेषामतिशयेन पचति=पचतितमाम् ।

५-३-५७ द्विवचनविभज्योपपदे तरबीयसुँनौ ॥

अयमनयोरतिशयेन आढ्यः = आढ्यतरः ।

पटुतरः । पटीयान् । पचतितराम् ।

माथुराः पाटलिपुत्रेभ्य आढ्यतराः ।

५-३-५८ अजादी गुणवचनादेव ॥ ६५

लघिष्ठः । लघीयान् । नेह- पाचकतरः । पाचकतमः ।

५-३-५९ तुश्छन्दसि ॥

करिष्ठः । दोहीयसी धेनु : ।

५-३-६० प्रशस्यस्य श्र : ॥ ६१

अयमेषामतिशयेन प्रशस्यः श्रेष्ठः ।

अयमनयोरतिशयेन प्रशस्यः श्रेयान् ।

५-३-५३ भूतपूर्वे= भूतपूर्वेऽर्थे वर्तमानात् प्रातिपदिकात्, चरट् = चरट् प्रत्ययो भवति, स्वार्थे ।

५-३-५४ षष्ठ्याः= षष्ठ्यन्तात्, भूतपूर्वे (५-३-५३)= भूतपूर्वेऽर्थे, रूप्य= रूप्यप्रत्ययः, चरट् (५-३-५३) च । अत्र काशिका-षष्ठ्यन्तात् प्रत्ययविधानात् सम्प्रति भूतपूर्वग्रहणं प्रत्ययार्थस्य विशेषणम्, न तु प्रकृत्यर्थविशेषणम् । इति ।

५-३-५५ अतिशायने= प्रकर्षविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात्, तमबिष्ठनौ= तमप् इष्ठन् प्रत्ययौ भवतः, स्वार्थे । लघिष्ठः ६-४-१५५ टेः इति टिलोपः ।

५-३-५६ तिङ- अतिशायने (५-३-५५) तिङः= तिङन्तात्, तमप् (५-३-५५) । इष्ठन् प्रत्ययस्तु तिङन्तान्न, ५-३-५८ अजादी... इति नियमात् । उदाहरणे ५-४-११ किंमेत्... इत्यामुँ : ।

५-३-५७ द्विव- विभक्तुं योग्यं विभज्यम् । अत्रैव निपातनाद् यत् । द्विवचनविभज्योपपदे= द्वयोरेकस्याऽतिशायने विभक्तव्ये चोपपदे, तरबीयसुँनौ= तरप् ईयसुँन् प्रत्ययौ भवतः । तमबिष्ठनोरपवादः । **पचतितराम्** ५-४-११ किमेत्.... इत्यामुँप्रत्ययः ।

५-३-५८ अजादी = इष्ठन्नीयसुँनौ , गुणवचनादेव= गुणवाचिशब्दादेव भवतः ।

५-३-५९ तुः = तृ (तृन्, तृच्) प्रत्ययान्तात्, अजादी (५-३-५८) = इष्ठन्नीयसुँनौ भवतः, छन्दसि= वेदे । ५-३-५८ अजादी... इति नियमादप्राप्तौ विधानम् । **करिष्ठः** ६-४-१५४ तुरिष्ठेमेयस्सु इति तृप्रत्ययस्य लोपः । **दोहीयसी** ६-३-३५ तसिँला... सूत्रस्थेन भस्याढे...... इति वार्तिकेन पुंवद्भावे प्राग्वत् तृलोप : ।

५-३-६० प्रश- अजादी (५-३-५८) = अजाद्योः (प्रथमान्तं सप्तम्यन्ताय विपरिणतम्) = इष्ठेयसोः परतः, प्रशस्यस्य= प्रशस्यशब्दस्य स्थाने, श्रः= श्र इत्यादेशो भवति । अत्र काशिका- ननु च प्रशस्यशब्दस्या ऽगुणवचनत्वादजादी न संभवतः ? एवं तर्हि आदेशविधानसामर्थ्यात् तद्विषयो नियमो न प्रवर्तते- अजादी गुणवचनादेवेति । एवमुत्तरेष्वपि योगेषु ज्ञेयमिति । उदाहरणयोः ६-४-१६३ प्रकृ... इति प्रकृतिभावान्न टिलोपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-६१ ज्य च ॥ ६२

ज्येष्ठः । ज्यायान् ।

५-३-६२ वृद्धस्य च ॥

ज्येष्ठः । ज्यायान् । विधानसामर्थ्यात् ६-४-१५७ प्रिय... इति वर्षादेशस्यापि समावेशः । वर्षिष्ठः । वर्षीयान् ।

५-३-६३ अन्तिकबाढयोर्नेदसाधौ ॥

नेदिष्ठः । नेदीयान् । साधिष्ठम् । साधीयः ।

५-३-६४ युवाल्पयोः कनन्यतरस्याम् ॥

कनिष्ठः । कनीयान् । पक्षे-यविष्ठः । यवीयान् । अल्पिष्ठः । अल्पीयान् ।

५-३-६५ विन्मतोर्लुक् ॥

अतिशयेन स्रग्वी स्रजिष्ठः । स्रजीयान् । अतिशयेन त्वग्वान् त्वचिष्ठः । त्वचीयान् ।

५-३-६६ प्रशंसायां रूपप् ॥

प्रशस्तो वैयाकरणो वैयाकरणरूपः । प्रशस्तश्चोरः = चोररूपः । पचतिरूपम् पचन्तिरूपम् । क्रियाया ऐक्यान्न द्विवचनादिकम् ।

५-३-६७ ईषदसमाप्तौ कल्पब्देश्य - देशीयरः ॥ ६८

ईषदूनः पटुः पटुकल्पः । पटुदेश्यः । पटुदेशीयः । पचतिकल्पम् ।

५-३-६८ विभाषा सुँपो बहुच् पुरस्तात्तु ॥ ६९

ईषदूनः पटुर्बहुपटुः ।

५-३-६९ प्रकारवचने जातीयर् ॥

पटुप्रकारः = पटुजातीयः ।

५-३-७० प्रागिवात् कः ॥ ८६

५-३-६१ ज्य च-- प्रशस्यस्य (५-३-६०) ज्य च = ज्य इत्यादेशोऽपि भवति, अजाद्योः (५-३-६०) ।

ज्यायान् ६-४-१६० ज्यादा.... इत्यात्वम् ।

५-३-६२ वृद्धस्य = वृद्धशब्दस्य स्थाने, ज्य (५-३-६१) अजाद्योः (५-३-६०) ।

५-३-६३ अन्तिकबाढयोः = अन्तिकबाढशब्दयोः स्थाने, नेदसाधौ= नेद साध इत्यादेशौ भवतः, अजाद्योः (५-३-६०) ।

५-३-६४ युवाल्पयो= युवन् अल्प इति शब्दयोः स्थाने, अन्यतरस्याम्= वा, कन्= कन् आदेशो भवति । अजाद्योः (५-३-६०) । **यविष्ठः** ६-४-१५६ स्थूल... इति वलोपो गुणश्च ।

५-३-६५ विन्मतोः= विन् मतुँप् प्रत्यययोः, लुक्= लुग् भवति अजाद्योः (५-३-६०) । उदाहरणेषु स्रग्विन् शब्दात् त्वग्वच्छब्दाच्च प्रत्ययौ ।

५-३-६६ प्रशंसायाम्= प्रशंसाविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात्, तिङश्च (५-३-५६)रूपप्= रूपप् प्रत्ययो भवति । **चोररूपः** चौर्यमपि कथं प्राशस्त्यम्? अत्र काशिका-प्रकृत्यर्थस्य वैशिष्ट्यं प्रशंसा भवतीति । नेत्राञ्जनमपि हरति चोररूपः ।

५-३-६७ ईषदसमाप्तौ= ईषदसमाप्तिविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात् तिङश्च (५-३-५६) कल्प... यरः=कल्पप् देश्य देशीयर् इति प्रत्यया भवन्ति ।

५-३-६८ विभा- ईषदसमाप्तौ (५-३-६७) सुँपः = सुँबन्तात्, पुरस्तात्तु= पुर एव, बहुच्=बहुच् प्रत्ययो भवति ।

५-३-६९ प्रकारवचने= प्रकारविशिष्टेऽर्थे वर्तमानात्, सुँपः (५-३-६८) जातीयर्= जातीयर् प्रत्ययो भवति । थाल् (५-३-२३) प्रकारमात्रे विहितः । प्रकारवति च जातीयर् । अतो न मिथो वाध्यबाधकत्वम् ।

५-३-७० प्रागि- इवात् प्राक् = ५-३-९६ इवे प्रतिकृतौ, इत्यतः प्राक्, कः = कप्रत्ययो भवति । यथा- अज्ञातोऽश्वः = अश्वकः ५-३-७३ अज्ञाते इति कः । अत्र काशिका- तिङन्तादयं प्रत्ययो नेष्यते । अकजिष्यते । तिङश्च (५-३-५६) इत्यनुवृत्तमुत्तरसूत्रेणैव सम्बन्धनीयमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-७१ अव्यय'सर्वनाम्नामकँच् प्राक् टेः ॥ ७२
उच्चकैः । सर्वके । पचतकि ।
(ओकारसकारभकारादौ सुँपि सर्वनाम्नष्टेः प्रागकँच्, अन्यत्र तु सुँबन्तस्य टेः)
युवकयोः । आवकयोः । युष्मकासु । अस्मकासु । युष्मकाभिः । अस्मकाभिः । त्वयका । मयका ।
(अकँच्प्रकरणे तूष्णीमः काम् प्रत्ययो वक्तव्यः)
तूष्णीकामास्ते ।
(शीले को मलोपश्च वक्तव्यः)
तूष्णींशीलः = तूष्णीकः ।

५-३-७२ कस्य च दँः ॥
धकित् ।

५-३-७३ अज्ञाते ॥
अज्ञातोऽश्वः = अश्वकः ॥ उच्चकैः । सर्वके । पचतकि । धकित् । जल्पतकि ।

५-३-७४ कुत्सिते' ॥ ७५
कुत्सितोऽश्वः = अश्वकः । नीचकैः । सर्वके ।

५-३-७५ संज्ञायां कन् ॥
ब्राह्मणकः ।

५-३-७६ अनुकम्पायाम्' ॥ ८२
पुत्रकः । उच्चकैः । सर्वके । पचतकि ।

५-३-७७ नीतौ च तद्युक्तात्' ॥ ८१
हन्त ते तिलकाः ।

५-३-७१ अव्य- इवात् प्राक् (५-३-७०) अव्ययसर्वनाम्नाम् = अव्ययानां सर्वनाम्नाम्, तिङश्च (५-३-५६) टेः+प्राक्= टेः पूर्वतः, अकँच्= अकँच् प्रत्ययो भवति । उच्चकैः । सर्वके । पचतकि ।

ओकार- युष्मदस्मच्छब्दविषयकमेतत् । अन्येषां त्वविशेषेण प्रातिपदिकस्यैव टेः प्रागकँच्, न तु सुँबन्तस्य ।

अकँच् - प्रत्यय- मकारस्येत्संज्ञायां लोपे च काप्रत्ययो १-१-४६ मिद.... इत्यचोऽन्त्यात् परः ।

शीले- तूष्णीमः ।

५-३-७२ कस्य= ककारान्तस्य, अव्ययस्य (५-३-७१ स्थाने, दँः= दकारादेशो भवति, अकँच्सन्नियोगेन । अकँच्- सन्नियोगेनेत्यर्थः प्रकरणगम्यः । १-१-५१ अलो.... सूत्रवलेन दकारः ककारस्यैव स्थाने भवति ।

५-३-७३ अज्ञाते= अज्ञातत्वोपाधिके ऽर्थे वर्तमानात् प्रातिपदिकाद, तिङश्च (५-३-५६) यथाविहितं प्रत्यया भवन्ति । अत्र काशिका- स्वेन रूपेण ज्ञाते पदार्थे विशेषरूपेणाज्ञाते प्रत्ययविधानमेतत् । कस्याऽयमश्व इति स्व-स्वामिसम्वन्धेनाऽज्ञातेऽश्वे प्रत्ययः अश्वक इति ।

५-३-७४ कुत्सिते= गर्हितत्वोपाधिकेऽर्थे वर्तमानात् प्रातिपदिकाद् तिङश्च (५-३-५६) यथाविहितं प्रत्यया भवन्ति ।

५-३-७५ संज्ञायाम्= संज्ञायां गम्यमानायाम्, कुत्सिने (५-३-७४)कन्= कन् प्रत्ययो भवति ।

५-३-७६ अनुकम्पायाम्= दयायां गम्यमानायाम्, अनुकम्प्यवाचिप्रातिपदिकात् यथाविहितं प्रत्यया भवन्ति ।

५-३-७७ नीतौ = सामाद्युपाये गम्यमाने, तद्युक्तात् = अनुकम्पायुक्ताद्, यथाविहितं प्रत्यया भवन्ति । अत्र काशिका- पूर्वेण प्रत्यासन्नानुकम्पासम्वन्धाद् अनुकम्प्यमानादेव प्रत्ययो विहितः, सम्प्रति व्यवहितादपि यथा स्यादिति वचनम् । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-७८ बह्वचो मनुष्यनाम्नष्ठज्वा ॥ ८०, ८४, ८०
देविकः । देवदत्तकः । यज्ञिकः । यज्ञदत्तकः ।

५-३-७९ घनिलचौ च ॥ ८०
देवियः । देविलः । देविकः । देवदत्तकः ।

५-३-८० प्राचामुपादेरडज्वुँचौ च ॥
उपडः । उपकः । उपियः । उपिलः ।
उपिकः । उपेन्द्रदत्तकः ।

५-३-८१ जातिनाम्नः कन् ॥ ८२
व्याघ्रकः । सिंहकः । शरभकः ।
वाशब्दश्चाऽत्रा ऽनुवर्तमानः समुच्चयार्थकः ।
व्याघ्रियः । व्याघ्रिलः । विकल्पार्थक इत्यन्ये ।
तन्मते व्याघ्रकः ।

५-३-८२ अजिनान्तस्योत्तरपदलोपश्च ॥ ८४
व्याघ्राजिनो नाम कश्चिन्मनुष्यः ।
अनुकंम्पितो व्याघ्राजिनो व्याघ्रकः ।

५-३-८३ ठाजादावूर्ध्वं द्वितीयादचः ॥ ८४
अनुकम्पितो देवदत्तः = देविकः ।
देवियः । देविलः । उपडः । उपकः ।
उपियः । उपिलः । उपिकः ।
(चतुर्थादच ऊर्ध्वस्य लोपो वक्तव्यः)
अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः ।
बृहस्पतियः । बृहस्पतिलः ।
(अनजादौ विभाषा लोपो वक्तव्यः)
देवदत्तकः । देवकः ।
(लोपः पूर्वपदस्य च ठाजादावनजादौ च)
दत्तिकः । दत्तियः । दत्तिलः । दत्तकः ।
(विनापि प्रत्ययं पूर्वोत्तरपदयोर्विभाषा लोपो वक्तव्यः)
देवदत्तः । दत्तः । देवः ।
(उवर्णाल्ल इलस्य)
भानुलः ।
चतुर्थादनजादौ च लोपः पूर्वपदस्य च
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च ॥
(ऋवर्णादपि)
सवित्रियः । सवितृलः ।
(द्वितीयादचो लोपे सन्ध्यक्षरद्वितीयत्वे तदादेर्लोपवचनम्)
लहोडः । लहिकः । कहोडः । कहिकः ।
(एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः)
वागाशीर्दत्तः । वाचिकः । त्वगाशीर्दत्तः ।
त्वचिकः । अथ कथं पडङ्गुलिदत्तः पडिक इति ?
पपष्ठाजादिवचनात् सिद्धम् ।

५-३-७८ बह्व- अनुकम्पायाम् (५-३-७६) नीतौ च तद्युक्तात् (५-३-७७) वह्वचः= वह्वच्कात्, मनुष्यनाम्नः = मनुष्यनामवाचिशव्दात्, वा= विभाषया, ठच्= ठच् प्रत्ययो भवति । ठजभावे कन् । ठच् पक्षे ५-३-८३ ठाजा... इति दत्तभागस्य लोपः ।

५-३-७९ घनि- वह्वचः+ मनुष्यनाम्नः (५-३-७८) घनिलचौ च=घन् इलच् इति प्रत्ययौ च, वा (५-३-७८) भवतः पूर्वविषये ।

५-३-८० प्राचा- उपादेः =उप इत्याद्यवयवकात्, वह्वचो मनुष्यनाम्नः (५-३-७८) अडज्वुँचौ= अडच् वुँच् प्रत्ययौ, वा (५-३-७८) भवतः, (एतयोरभावे) घनिलचौ (५-३-७९) ठच् (५-३-७८) च वा पूर्वविषये । पक्षे कः ।

५-३-८१ जाति- अत्र काशिका- जातिशव्दो यो मनुष्यनामधेयो व्याघ्रसिंह इत्येवमादिः, तस्मादनुकम्पायां नीतौ च कन् प्रत्ययो भवतीति । **तन्मते व्याघ्रकः** । कप्रत्यय इति भावः । स्वरे विशेषः ।

५-३-८२ अजिनान्तात्, मनुष्यनाम्नः (५-३-७८) अनुकम्पायाम् (५-३-७६) कन् (५-३-८१) अजिनान्तस्योत्तरपदलोपश्च = अजिनान्तशव्दे यदुत्तरपदं (अजिन इति) तस्य लोपश्च भवति । अजिनान्तादित्यर्थः प्रत्यासत्तिलभ्यः ।

५-३-८३ ठाजादौ = ठे, अजादौ च प्रत्यये= अस्मिन् प्रकरणे यष्ठः, अजादिश्च तस्मिन् प्रत्यये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-८४ शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ॥

अनुकम्पितः शेवलदत्तः शेवलिकः । शेवलियः । शेवलिलः । सुपरिकः । सुपरियः । सुपरिलः । विशालिकः । विशालियः । विशालिलः । वरुणिकः । वरुणियः । वरुणिलः । अर्यमिकः । अर्यमियः । अर्यमिलः ।

शेवलादीनां तृतीयादचो लोपः

स चाकृतसन्धीनामिति वक्तव्यम् ।

शेवलेन्द्रदत्तः - शेवलिकः । सुपर्याशीर्दत्तः- सुपरिकः ।

५-३-८५ अल्पे ॥

अल्पं तैलं तैलकम् ।

घृतकम् । सर्वकम् । उच्चकैः ।

५-३-८६ ह्रस्वे ॥ ८७

ह्रस्वो वृक्षो वृक्षकः ।

५-३-८७ संज्ञायां कन् ॥

वंशकः । दण्डकः ।

५-३-८८ कुटीशमीशुण्डाभ्यो रः ॥

ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डारः ।

५-३-८९ कुत्वा डुपच् ॥

ह्रस्वा कुतूः कुतुपः ।

कुतूः कृत्तेः स्नेहपात्रं

ह्रस्वा सा कुतुपः पुमान् ।

५-३-९० कासूगोणीभ्यां ष्टरच् ॥ ९१

ह्रस्वा कासूः कासूतरी । गोणीतरी ।

परतः, द्वितीयात्, अचः, ऊर्ध्वम्= परभागः, लोपः (५-३-८२) = लुप्यते । ठस्येकादेशेन अजादित्वादेव सिद्धे ठग्रहणमुको द्वितीयत्वे कविधानार्थम् । वायुदत्तः । वायुकः । पितृदत्तः । पितृकः ।

अन- द्वितीयादच ऊर्ध्वस्य (५-३-८३) ।

उव- उवर्णात् परस्य, इलस्य, लः = लोपः १-१-५३ आदे... इति बलेन आदेरिकारमात्रस्य लोपो भवति । उदाहरणे अनुकम्पितो भानुदत्त इति विग्रहे ५-३-७९ घनि... इतीलच् । तस्य प्रकृतवार्तिकेनेकारलोपः ।

ऋव- इलस्य लोपः ।

द्विती- एचः सन्ध्यक्षरमिति प्राचां संज्ञा । एचः परस्य लोपे प्राप्ते, एच आरभ्य लोपार्थं वचनम् ।

एका- कथं षडङ्गुलिदत्तः षडिक इति ? भत्वाज्जश्त्वासंभव इति प्रश्नः ।

५-३-८३ ठाजा.... इति सूत्रेणैव लोप इष्यते इत्युत्तरम् ।

५-३-८४ शेवल.... दीनाम् = शेवलप्रभृत्याद्यानाम्, मनुष्यनाम्नाम् (५-३-७८) तृतीयात्, अचः+ ऊर्ध्वम् + ठाजादौ (५-३-८३) लोपः (५-३-८२) = लुप्यते ।

५-३-८५ अल्पे= अल्पेऽर्थे वर्तमानात् प्रातिपदिकाद् यथाविहितं प्रत्यया भवन्ति ।

५-३-८६ ह्रस्वे= ह्रस्वेऽर्थे वर्तमानात् प्रातिपदिकाद् यथाविहितं प्रत्यया भवन्ति ।

५-३-८७ संज्ञायाम्= हस्वत्वहेतुकायां संज्ञायां गम्यमानायां कन्= कन् प्रत्ययो भवति ।

५-३-८८ कुटी- ह्रस्वे (५-३-८६) कुटी... शुण्डाभ्यः=कुटीप्रभृतिशब्देभ्यः, रः=र प्रत्ययो भवति ५-३-८६ ह्रस्वे इति कस्यापवादः ।

कुटीरः ३-३-४३ कर्म... इति स्त्रियामेव णचो विधानेन स्वार्थे तदन्ताद् विधीयमानोऽञ् स्त्रियामेव भवेत्, तथापि ५-४-१४ णचः इत्यत्र स्त्रियामित्युपदेशेन क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गमतिवर्तन्त इति ज्ञाप्यते । अतः पुंस्त्वं युक्तम् ।

५-३-८९ कुत्वा- ह्रस्वे (५-३-८६) कुत्वाः = कुतूशब्दात्, डुपच्= डुपच् प्रत्ययो भवति ।

५-३-९० कासू- ह्रस्वे (५-३-८६) कासूगोणीभ्याम्= कासू-गोणीशब्दाभ्याम्, ष्टरच्= ष्टरच् प्रत्ययो भवति । कासूः = आयुधविशेषः । उदाहरणयोः षित्त्वात् ४-१-४१ षिद्गौ... इति ङीष् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-९१ वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ॥
तनुर्वत्सः = वत्सतरः। उक्षतरः। अश्वतरः। ऋषभतरः।

५-३-९२ किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच् ॥ ९३, ९४
अनयोः कतरः पटुः। यतरः। ततरः।
महाविभाषया अनयोः कः पटुः। यः। सः।

५-३-९३ वा बहूनां जातिपरिप्रश्ने डतमच् ॥ ९४
कतमो भवतां कठः। यतमः। ततमः।
वा ग्रहणमकजर्थम्।यकः। सकः।
महाविभाषया कः। यः। सः।
(किमोऽस्मिन् विषये डतरजपि)
कतरो भवतां कठः।

५-३-९४ एकाच्च प्राचाम् ॥
एकतरो भवतोर्देवदत्तः। एकतमो भवतां देवदत्तः।

५-३-९५ अवक्षेपणे कन् ॥ ९७
व्याकरणकेन गर्वितः।
प्रागिवीयानां पूर्णोऽवधिः।

५-३-९६ इवे प्रतिकृतौ ॥ १११, १००
अश्व इव प्रतिकृतिः = अश्वकः।
प्रतिकृतावित्युक्तेर्नेह-गौरिव गवयः।

५-३-९७ संज्ञायां च ॥
अश्वसदृशस्य संज्ञा अश्वकः। उष्ट्रकः।

५-३-९८ लुम्मनुष्ये ॥
चञ्चा= तृणमयः पुरुषः। चञ्चेव मनुष्यः = चञ्चा।

५-३-९९ जीविकार्थे चापण्ये ॥
वासुदेव इव प्रतिकृतिः = वासुदेवः।
शिवः। स्कन्दः। विष्णुः। आदित्यः।
देवलकानां जीविकार्थाः प्रतिकृतय उच्यन्ते।
अपण्ये इत्युक्तेर्नेह- हस्तिकान् विक्रीणीते।
रामं सीतां लक्ष्मणं जीविकार्थे
विक्रीणीते यो नरस्तं च धिग् धिक्।
अस्मिन् पद्ये योऽपशब्दान् न वेत्ति
व्यर्थप्रज्ञं पण्डितं तं च धिग् धिक् ॥

५-३-९१ वत्सो- तनुत्वे= प्रवृत्तिनिमित्तस्य तनुत्वे, वत्सो... मेभ्यः =वत्सादिभ्यः, ष्टरच् (५-३-९१)। अत्र काशिका-प्रथमवया वत्सः। तस्य (वयसः) तनुत्वं द्वितीयवयसः प्राप्तिः। तरुण उक्षा। तस्य तनुत्वं तृतीयवयसः प्राप्तिः। अश्वेना ऽश्वायामुत्पन्नोऽश्वः। तस्य तनुत्वमन्यपितृकता (गर्दभपितृकता) गर्दभादश्वायामुत्पन्नोऽश्वतरः। अनड्वान्= ऋषभः। तस्य तनुत्वं भारोद्वहने मन्दशक्तिता। इति।

५-३-९२ किंय- समुदायादेकदेशस्य पृथक्करणं निर्धारणम्, द्वयोः= द्वयोर्मध्यात्, एकस्य, निर्धारणे= पृथक्करणे, किंयत्तदः = किम् यद् तद् इति शब्देभ्यः, डतरच्= डतरच् प्रत्ययो भवति।

५-३-९३ वा ब- बहूनाम् = बहूनां मध्यात्, निर्धारणे+किंयत्तदः (५-३-९२) वा= विभाषया, डतमच् = डतमच् प्रत्ययो भवति। 'जातिपरिप्रश्ने' इति प्रत्याख्यातमाकरे।

५-३-९४ एकात्= एकप्रातिपदिकात् द्वयोरेकस्य+निर्धारणे+डतरच् (५-३-९२) बहूनाम् (५-३-९३) निर्धारणे (५-३-९२) डतमच् (५-३-९३) प्राचां ग्रहणं पूजार्थम्। विकल्पाऽनुवृत्तेः।

५-३-९५ अवक्षेपणे- अवक्षिप्यते ऽनेनेति= अवक्षेवणम्। करणे ल्युँट्। येनाऽवक्षिप्यते तस्मिन्नर्थे वर्तमानात् प्रातिपदिकात्, कन् = कन् प्रत्ययो भवति। परस्य कुत्सार्थं यदुपादीयते तदिहोदारणम्। यत्पुनः स्वयमेव कुत्सितं तत्र कुत्सिते इत्यनेन कन् प्रत्ययो भवतीति- काशिका।

५-३-९६ प्रतिकृतौ= प्रतिकृतिविषये, इवे= सादृश्ये ऽर्थे, कन् (५-३-९५)। सादृश्ये ऽर्थे इत्युक्तावपि प्रत्ययस्तु प्रातिपदिकात् सदृशेऽर्थे भवति।

५-३-९७ संज्ञायाम्= संज्ञायां गम्यमानायाम्, प्रातिपदिकात्, इवे (५-३-९६) कन् (५-३-९५)।

५-३-९८ लुम्म- लुप् = संज्ञायां विहितस्य कनो लुब् भवति, मनुष्ये=मनुष्ये गम्यमाने। **चञ्चा** १-२-५१ लुपि... इति लिङ्गं प्रकृतिवत्।

५-३-९९ जीवि- अपण्ये= अविक्रय्ये, जीविकार्थे= जीविकाप्रयोजनके वाच्ये, लुप् (५-३-९८) = कनो लुब् भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-१०० देवपथादिभ्यश्च ॥

देवपथः । हंसपथः ।

अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च ।

इवे प्रतिकृतौ लोपः कनो देवपथादिषु ॥

५-३-१०१ वस्तेर्ढञ् ॥

वस्तिरिव = वास्तेयम् । वास्तेयी ।

५-३-१०२ शिलाया ढः ॥

शिलेव शिलेयम् ।

शिलाया इति योगविभागाड्ढञपीत्येके ।

शैलेयम् ।

५-३-१०३ शाखादिभ्यो यः ॥

शाखेव शाख्यः।मुख्यः ।

५-३-१०४ द्रव्यं च भव्ये ॥

द्रव्योऽयं माणवकः ।

५-३-१०५ कुशाग्राच्छः ॥ १०६

कुशाग्रमिव कुशाग्रीया बुद्धिः ।

सूक्ष्मेत्यर्थः ।

५-३-१०६ समासाच्च तद्विषयात् ॥

काकतालीयो देवदत्तस्य वधः ।

अजाकृपाणीयः ।

५-३-१०७ शर्करादिभ्यो ऽ ण् ।

शर्करेव = शार्करम् ।

५-३-१०८ अङ्गुल्यादिभ्यष्ठक् ॥ १०९

अङ्गुलीवाङ्गुलिकः ।

५-३-१०९ एकशालायाष्ठजन्यतरस्याम् ॥

एकशालेव = एकशालिकः । ऐकशालिकः ।

५-३-१०० देवपथादिभ्यः= देवपथप्रभृतिगणपठितशब्देभ्यः परस्य, कनो लुप् (५-३-९८)। आकृतिगणोऽयम् ।

अर्चा- पूजनार्थासु= गृहेष्वायतनेषु वा याः पूज्यन्ते तासु अर्चासु= प्रतिमासु, चित्रकर्मध्वजाभ्यां तद्‌गताः प्रतिकृतयो लक्ष्यन्त इति- पदमञ्जरी । अर्चासु- शिवः । विष्णुः । चित्रकर्मणि-अर्जुनः ।

ध्वजे- गरुडः । सिंहः ।

५-३-१०१ वस्तेः = वस्तिशब्दात् इवे (५-३-९६) ढञ्= ढञ् प्रत्ययो भवति ।

५-३-१०२ शिलायाः=शिलाशब्दात्, - इवे (५-३-९६) ढः = ढप्रत्ययो भवति ।

५-३-१०३ शाखादिभ्यः= शाखाप्रभृतिगणपठितशब्देभ्यः, इवे (५-३-९६) यः= यप्रत्ययो भवति ।

५-३-१०४ द्रव्यम् = द्रुशब्दादिवार्थे यत्प्रत्ययो निपात्यते, भव्ये= अभिप्रेतार्थपात्रभूते वाच्ये ।

५-३-१०५ कुशाग्रात्= कुशाग्रशब्दात्, इवे (५-३-९६) छ = छप्रत्ययो भवति ।

५-३-१०६ समा- तद्विषयात् (तच्छब्देनाऽत्र इवार्थः परामृश्यते) = इवार्थविषयकात्, समासात्= समस्तप्रातिपदिकात्, इवे (५-३-९६) छ (५-३-१०५)। काकतालीयो देवदत्तस्य वधः । इह काकताल-समागमसदृशश्चौरसमागम इति समासार्थः । तत्प्रयुक्तः काकमरणसदृशस्तु प्रत्ययार्थः । अतर्कितोपनत इति फलितोऽर्थः । समासश्चायमस्मादेव ज्ञापकात्, २-१-६ सह सुँपा इति वा समासः । उभयथाऽपि विशेषसंज्ञाविनिर्मुक्तः । स च छप्रत्ययविषय एव ।

५-३-१०७ शर्करादिभ्यः = शर्कराप्रभृतिगणपठितशब्देभ्यः, इवे (५-३-९६) अण्= अण् प्रत्ययो भवति ।

५-३-१०८ अङ्गुल्यादिभ्यः= अङ्गुली-प्रभृतिगणपठितशब्देभ्यः, इवे (५-३-९६) ठक्= ठक् प्रत्ययो भवति ।

५-३-१०९ एकशालायाः= एकशालाशब्दात् इवे (५-३-९६) अन्यतरस्याम्= वा, ठच्= ठच् प्रत्ययो भवति । अन्यतरस्यां ग्रहणं समुच्चयार्थम् । तेनाऽनन्तरष्ठक् समुच्चीयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-११० कर्कलोहितादीकक् ॥
कर्कः शुक्लोऽश्वः । स इव कार्कीकः । लौहितीकः स्फटिकः ।

५-३-१११ प्रत्नपूर्वविश्वेमात् थाल् छन्दसि ॥
तं प्रत्नथा पूर्वथा विश्वथेमथा ।

५-३-११२ पूगाञ्ज्योऽग्रामणीपूर्वात् ॥ ११२
लौहितध्वज्यः । लौहितध्वज्यौ । लोहितध्वजाः । अग्रामणीपूर्वादित्युक्तेर्नेह- देवदत्तो ग्रामणीर्येषां ते देवदत्तकाः ।

५-३-११३ व्रातच्फञोरस्त्रियाम् ॥
कापोतपाक्यः । कापोतपाक्यौ । कपोतपाकाः । कौञ्जायन्यः । कौञ्जायन्यौ । कौञ्जायनाः । अस्त्रियामित्युक्तेर्नेह- कौञ्जायनी ।

५-३-११४ आयुधजीविसङ्घाञ्ञ्यड् वाहीकेष्वब्राह्मणराजन्यात् ॥ ११७
क्षौद्रक्यः । क्षौद्रक्यौ । क्षुद्रकाः । क्षौद्रकी । अब्राह्मणराजन्यादित्युक्तेर्नेह- गोपालका ब्राह्मणाः । शालङ्कायना राजन्याः ।

५-३-११५ वृकाट्टेण्यण् ॥
वार्केण्यः । वार्केण्यौ । वृकाः । वार्केणी । आयुधजीविसङ्घादित्युक्तेर्जातिवाचिनो न भवति । कामक्रोधौ मनुष्याणां खादितारौ वृकाविव ।

५-३-११६दामन्यादित्रिगर्तषष्ठाच्छः ॥
दामनीयः । दामनीयौ । दामनयः । कौण्डोपरथीयः । कौण्डोपरथीयौ । कौण्डोपरथाः । दाण्डकीयः । दाण्डकीयौ । दाण्डकयः ।
आहुस्त्रिगर्तषष्ठाँस्तु कौण्डोपरथ-दाण्डकी ।
क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जालकिः ॥

५-३-११० कर्कलोहितात्= कर्कलोहितशब्दाभ्याम् इवे (५-३-९६)। ईकक्= ईकक् प्रत्ययो भवति **लौहितीकः स्फटिकः** स्वयमलोहितोऽप्याश्रयवशात् तथा प्रतीयते ।

५-३-१११ प्रत्न...श्वेमात्= प्रत्न पूर्व विश्व इम इतिशब्देभ्यः, इवे (५-३-९६) थाल्= थाल् प्रत्ययो भवति, दन्दसि = वेदे । इमशब्द इदमा समानार्थकः ।

५-३-११२ पूगा- अग्रामणीपूर्वात्, पूगात्=पूगवाचिनः, ञ्यः= ञ्यप्रत्ययो भवति, स्वार्थे । नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगाः । **लोहितध्वजाः** ५-३-११९ ञ्याद... इति तद्राजसंज्ञा । २-४-६२ तद्रा... इति बहुवचने लुक् । एवमग्रिमसूत्रेष्वप्यवधेयम् । **देवदत्तकाः** ५-२-७८ स एषां..... इति कन् । अत्र देवदत्तशब्दो ग्रामणीवचनः पूर्वोऽवयवः । समुदायः पूगवचनः ।

५-३-११३ व्रातचफञोः = व्रातवाचिभ्यश्च्फञन्तेभ्यश्च, ञ्यः (५-३-११२) स्वार्थे, अस्त्रियाम्= स्त्रियां न भवति । नानाजातीया अनियतवृत्तय उत्सेधजीविनः सङ्घा : = व्राता इति काशिका । उत्सेधजीवित्वं व्रातस्य पूगाद् विशेष इति पदमञ्जरी । **कौञ्जायन्यः** ४-१-९८ गोत्रे... सूत्रे द्रष्टव्यम् ।

५-३-११४ आयु- अब्राह्मणराजन्यात्= ब्राह्मण-राजन्यवाचिभिन्नात्, वाहीकेषु+आयुधजीविसङ्घात्= वाहीक-देशवासी य आयुधजीविसङ्घस्तद्वाचिनः, ञ्यट्= ञ्यट् प्रत्ययो भवति, स्वार्थे । ञ्यटष्टित्त्वं स्त्रियां ४-१-१५ टिड्ढा.... इति ङीबर्थम् । अत एवाऽत्र अस्त्रियामिति पूर्वसूत्रान्नानुवर्तत इति ज्ञायते ।

५-३-११५ वृका- आयुधजीविसङ्घात् (५-३-११४) वृकात् = वृकप्रातिपदिकात्, टेण्यण् = टेण्यण् प्रत्ययो भवतिस्वार्थे । टित्त्वात् स्त्रियां ङीप् प्राग्वत् ।

५-३-११६ दाम- दामन्यादित्रिगर्तषष्ठात् = दामन्यादिभ्यःस्त्रिगर्तषष्ठेभ्यश्च आयुधजीविसङ्घ (५-३-११४) वाचिभ्यः प्रातिपदिकेभ्यः छः = छप्रत्ययो भवति, स्वार्थे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-३-११७ पर्श्वादियौधेयादिभ्योऽणञौ ॥
पार्शवः । पार्शवौ । पर्शवः । यौधेयः ।

५-३-११८ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ॥
आभिजित्यः । आभिजित्यौ । आभिजिताः ।
वैदभृत्यः । वैदभृत्यौ । वैदभृताः ।
शालावत्यः । शालावत्यौ । शालावताः ।
शैखावत्यः । शामीवत्यः । और्णावत्यः ।
श्रौमत्यः ।

५-३-११९ ञ्यादयस्तद्राजाः ॥

इति पञ्चमाध्याये
तृतीयः पादः
समाप्तः

५-३-११७ पर्श्वा-आयुधजीविसङ्घ (५-३-११४) वाचिभ्यः,पर्श्वा... दिभ्यः= पर्शुप्रभृतिगणपठितशब्देभ्यो यौधेयप्रभृतिगणपठितशब्देभ्यश्च, अणञौ= अण् अञ् प्रत्ययौ भवतः, स्वार्थे । **यौधेयः** आद्युदात्तः फलम् ।

५-३-११८ अभि-अणः = अणन्तेभ्यः, अभि... श्रुमत्= अभिजित् विद्भृत् शालावत् शिखावत् शमीवत् ऊर्णावत् श्रुमत् इत्येतेभ्यः, प्रातिपदिकेभ्यः, यञ्, = यञ् प्रत्ययो भवति, स्वार्थे । उदाहरणेषु ४-१-९२ तस्या... इत्यण् । ततोऽनेन यञ् । अत्र काशिका-गोत्रप्रत्ययस्यात्राणो ग्रहणमिष्यते । आभिजितो मुहूर्तः । आभिजितः स्थालीपाक इत्यत्र न भवतीति । अत्रैव गोत्रप्रत्ययस्येति प्रतीकमादाय हरदत्त उपदिशति-अपत्यप्रत्ययस्येत्यर्थ इति ।

५-३-११९ ञ्यादयः = ञ्य (५-३-११२) प्रभृतयो यञ् (५-३-१८) पर्यन्ताः प्रत्ययाः, तद्राजाः = तद्राजसंज्ञका भवन्ति । संज्ञाफलं बहुषु २-४-६२ तद्रा.... इति लुक् । उदाहरणानि तत्तत्सूत्रेषु द्रष्टव्यानि ।

इति पञ्चमाध्याये
तृतीयः पादः
समाप्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पञ्चमाध्याये
चतुर्थः पादः

५-४-१ पादशतस्य संख्यादेर्वीप्सायां वुँन् लोपश्च ॥ २

द्वौ द्वौ पादौ ददाति = दिपदिकां ददाति। द्वे द्वे शते ददाति = द्विशतिकां ददाति। स्वभावाद् वुँन्नन्तं स्त्रियामेव वर्तते।

(पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात्)

द्विमोदकिकां ददाति।

५-४-२ दण्डव्यवसर्गयोश्च ॥

द्वौ पादौ दण्डितः = द्विपदिकां दण्डितः। द्वौ पादौ व्यवसृजति = द्विपदिकां व्यवसृजति। द्विशतिकां दण्डितः। द्विशतिकां व्यवसृजति।

५-४-३ स्थूलादिभ्यः प्रकारवचने कन् ॥ ६

स्थूलप्रकारः = स्थूलकः। अणुकः।

(चञ्चद्बृहतोरुपसंख्यानम्)

चञ्चत्प्रकारः = चञ्चत्कः। बृहत्कः।

अत्र काशिका- 'चञ्चबृहयोः' इति केचित् पठन्ति। तेषां- चञ्चकः। बृहकः। इति उदाहरणं द्रष्टव्यमिति।

(सुराया अहौ) ग.सू.

सुरावर्णोऽहिः सुरकः।

५-४-४ अनत्यन्तगतौ क्तात् ॥ ५

छिन्नकम्। ईषच्छिन्नमित्यर्थः।

५-४-५ न सामिवचने।

सामिकृतम्। अर्धकृतम्। नेमकृतम्।

५-४-१ पाद- संख्यादेः=संख्यावाचिशब्दादिकात्, पादशतस्य = पादशतशब्दान्तात् प्रातिपदिकात्, वुँन्= वुँन् प्रत्ययो भवति, लोपश्च= प्रकृतेर्लोपश्च, वीप्सायाम्= वीप्सायां गम्यमानायाम्। ६-४-१४८ यस्ये... इति सिद्धे लोपवचनं स्थानिवद्भावा ऽभावार्थम्। तेन ६-४-१३० पादः .... इति पदादेशः सिध्यति। ६-४-१४८ यस्येति लोपे हि परनिमित्तकत्वेन स्थानिवद्भावे पाद इत्यदन्तप्रतीतौ हलन्तपाच्छब्दाऽभावात् पदादेशो न स्यात्।

५-४-२ दण्ड- दण्डनं दण्डः। दण्डयतेर्भावे ३-३-५६ एरच् इत्यच्। व्यवसर्गः = दानम्। दण्डव्यवसर्गयोः = दण्डदानयोर्गम्यमानयोः, संख्यादेः + पादशतस्य + वुँन् +लोपश्च (५-४-१)। अवीप्सार्थोऽयमारम्भः। **द्विपदिकां दण्डितः** दण्डयतेर्गौणे कर्मणि क्तप्रत्ययस्य विधानात् प्रधानकर्मणोऽनुक्ततया द्वितीया। व्यवसृजति = ददातीत्यर्थः।

५-४-३ स्थूला-प्रकारवचने = प्रकारविशिष्टे ऽ र्थे वर्तमानेभ्यः, स्थूलादिभ्यः= स्थूलप्रभृतिगणपठितशब्देभ्यः, कन्= कन् प्रत्ययो भवति। जातीयरो (५-३-६९) ऽपवादः। तेन कन्नपि प्रकारवति भवतीति ज्ञायते।

५-४-४ अनत्यन्तगतौ- अत्यन्तगतिः = अशेषसम्बन्धः। तदभावोऽनत्यन्तगतिः। तस्यां गम्यमानायाम्, क्तात् = क्तान्तात्, कन् (५-४-३)।

५-४-५ न सामि-सामिवचने= सामि (अर्ध) वाचिन्युपपदे, न= क्तान्तात् कन् न भवति। अत्र काशिका- सामिवचने प्रतिषेधानर्थक्यम् प्रकृत्यभिहितत्वात्। एवं तर्हि नैवायमनत्यन्तगतौ विहितस्य कनः प्रतिषेधः किं तर्हि ? स्वार्थिकस्य। केन पुनः स्वार्थिकः कन् विहितः ? एतदेव ज्ञापकमनुमास्यते भवति स्वार्थे कन्निति। तत्र यदेतदुच्यते एवं हि सूत्रमभिन्नतरकं भवति, एतर्हि बहुतरकं व्याप्यते, इत्येवमादि, तदुपपन्नं भवतीति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-६ बृहत्या आच्छादने ॥

बृहतिका=प्रावारः ।

५-४-७ अषडक्षाशितङ्ग्वलङ्कर्मालं पुंरुषाध्युत्तरपदात् खः[1] ॥ ८

अषडक्षीणो मन्त्रः । द्वाभ्यामेव कृत इत्यर्थः । आशितङ्गवीनमरण्यम् ।

अलङ्कर्मीणः । अलम्पुरुषीणः । ईश्वराधीनः ।

५-४-८ विभाषाञ्चेरदिक्स्त्रियाम् ॥

प्राक् । प्राचीनम् । प्रत्यक् । प्रतीचीनम् । अदिक्स्त्रियामित्युक्तेर्नेह- प्राची दिक् । प्रतीची दिक् । दिक्प्रतिषेधादिह भवति- प्राचीना ब्राह्मणी । स्त्रीप्रतिषेधादिह भवति- प्राचीनं दिग् रमणीयम् ।

५-४-९ जात्यन्ताच्छ बन्धुनि ॥

ब्राह्मणजातीयः । क्षत्रियजातीयः ।

बन्धुनीत्युक्तेर्नेह-ब्राह्मणजातिः शोभना ।

५-४-६ बृह- आच्छादने=आच्छादनेऽर्थे वर्तमानाद्, बृहत्याः= बृहतीशब्दात्, कन् (५-४-३) स्वार्थे ।

५-४-७ अषडक्ष ... पदात्= अषडक्ष आशितङ्गु अलङ्कर्मन् अलम्पुरुष इत्येतेभ्यः अध्युत्तरपदकाच्च प्रातिपदिकात्, खः= खप्रत्ययो भवति, स्वार्थे । **अषडक्षीणः** - अविद्यमानानि षडक्षीण्यस्येति बहुव्रीहिः । ५-४-११३ बहु... इति षच् । ततः खः । **आशितङ्गवीनम्**- आशिता गावोऽस्मिन् इति बहुव्रीहेः खः । निपातनात् पूर्वपदस्य मुँम् । **अलङ्कर्मीणः** - २-२-१८ कुग... सूत्रस्थेन पर्या... वार्तिकेन समासः । इदं काशिकानुसारेण । दीक्षितस्तु द्विगुप्राप्तेति वार्तिके अलं कुमार्यै-अलंकुमारिः । अत एव ज्ञापकात् समास इत्युपदिशति । ततः खः । एवम् - **अलम्पुरुषीणः । ईश्वराधीनः** - अधिशब्देन सह २-१-४ सप्त... इति समासः । ततः खः । नित्योऽयं खः । उत्तरसूत्रे विभाषाग्रहणात् । अन्येऽपि केचित् स्वार्थिकाः प्रत्यया नित्यमिष्यन्ते । तथा च काशिका- तम (५-३-५५ अति...) बादयः प्राक् कनः (५-३-९५ अव...) ञ्या (५-३-११२) पूगा... दयः प्रग् वुँन(५-४-१ पाद...) आमा (५-४-११ किमे...) दयः प्राङ् मयटः (५-४-२१ तत्प्र...) बृहती (५-४-६ बृह...) जात्य (५-४-९ जात्य...) न्ताः । समासान्ताश्चेतीति । अत्र हरदत्तः - बहुवचननिर्देशादेतत्सूत्रविहितस्य खस्य पाशबादीनां च ग्रहणम् ।... तेऽपि तमबादिवन्नित्या एवेति । ५-४-६८ समासान्ता इत्यधिकृत्य विहिताः इति च ।

५-४-८ विभा- अदिक्स्त्रियाम्=अदिक्स्त्रियां वर्तमानात्, अञ्चेः = अञ्चत्यन्तात्, विभाषा=वा, खः (५-४-७) स्वार्थे । **अदिक्स्त्रियाम्** दिक्चासौ स्त्री= दिक्स्त्री तत्र प्रतिषेधः **प्राचीनं दिग् रमणीयम्-** प्राचीशब्दाद् दिग्वाचिनः ५-३-२७ दिक्श... इत्युत्पन्नस्यास्तातेः, ५-३-३० अञ्चे... इति लुक् । ङीपोऽपि १-२-४९ लुक् त... इति लुक् । अतः १-१-३७ तद्धि... इत्यव्ययत्वात् स्त्रीलिङ्गाभावः । खे तु कृते स्वभावादेव नपुंसकत्वम् ।

५-४-९ जात्य- जातेर्व्यञ्जकं द्रव्यमत्र बन्धुशब्देनोच्यते ।

बन्धुनि= जातिव्यञ्जकद्रव्ये वर्तमानात्, जात्यन्तात् = जातिशब्दान्तात्, छः= छ प्रत्ययो भवति स्वार्थे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-१० स्थानान्ताद् विभाषा सस्थानेनेति चेत् ॥

पितृस्थानीयः, पितृस्थानः । सस्थानेनेत्युक्तेर्नेह- गोस्थानम् ।

५-४-११ किमेत्तिङव्ययघादाम्वद्रव्य-प्रकर्षे ॥ १२

किंतराम् । किंतमाम् । पूर्वाह्णेतराम् । पूर्वाह्णेतमाम् । पचतितराम् । पचतितमाम् । उच्चैस्तराम् । उच्चैस्तमाम् । अद्रव्यप्रकर्षे, इत्युक्तेर्नेह- उच्चैस्तरः प्राकारः ।

५-४-१२ अमुँ चच्छन्दसि ॥

प्रतरं नयामः । प्रतरां वस्यः ।

५-४-१३ अनुगादिनष्ठक् ॥

आनुगादिकः ।

५-४-१४ णचः स्त्रियामञ् ॥

व्यावक्रोशी । व्यावहासी ।

५-४-१५ अणिनुँणः ॥ १६

सांराविणं वर्तते ।

५-४-१० स्थाना- समानं स्थानं यस्य स सस्थानः = तुल्यः । ६-३-८५ ज्योति... इति समानस्य सः । स्थानान्तात् = स्थानशब्दान्तात् प्रातिपदिकात्, विभाषा=वा, छ (५-३-९) सस्थानेन= तुल्येन, चेत् = स्थानान्तमर्थवद् भवति चेत् । उदाहरणे पितुरिव स्थानमस्येति बहुव्रीहिस्ततश्छः । इति शब्दः किमर्थः ?

इति चेत्, अत्र काशिका- इतिकरणो विवक्षार्थः । तेन बहुव्रीहिः सस्थानशब्दोऽर्थमुपस्थापयति, न तत्पुरुष इति । अत्र तत्त्वबोधिनी- इति करणं विवक्षार्थम् । तेन तत्पुरुषो बहुव्रीहिर्वा यस्तुल्यस्थानशब्दस्तस्माच्छो न भवतीति ।

५-४-११ किमे... घात्= किम एदन्तात् तिङतात् अव्ययेभ्यश्च परो यो घस्तदन्तात्, आमुँ= आमुँ प्रत्ययो भवति, अद्रव्यप्रकर्षे = द्रव्यप्रकर्षाऽभावे । अत्र काशिका- यद्यपि द्रव्यस्य स्वतः प्रकर्षो नास्ति, तथापि क्रियागुणस्थः प्रकर्षो यदा द्रव्ये उपचर्यते तदाऽयं प्रतिषेध इति । १-१-३७ तद्धि... इत्यव्ययत्वम् । एवमग्रिमेऽमुँप्रत्यये ऽपि बोध्यम् । **पूर्वाह्णेतराम्** ६-३-१७ घका... इति सप्तम्या अलुक् ।

५-४-१२ अमुँ-किमेत्तिङव्ययघात्+अद्रव्यप्रकर्षे (५-४-११) अमुँ= अमुँप्रत्ययो भवति, आमुँ (५-४-११) च, छन्दसि= वेदे ।

५-४-१३ अनुगादिनः=अनुगादि(न्) शब्दात्, ठक्= ठक् प्रत्ययो भवति स्वार्थे । अनुगदतीत्यनुगादी । ततष्ठक् । अत्र हरदत्तः - प्रकृतिस्वरूपप्रदर्शनपरं चैतत् । न त्वयं केवलः प्रयोगार्हः, ठको नित्यत्वादिति ।

५-४-१४ णचः = णजन्तात्, स्त्रियाम्= स्त्रीलिङ्गे, अञ् = अञ् प्रत्ययो भवति, स्वार्थे । उदाहरणयोः ३-३-४३ कर्म... इति णजन्तात् प्रकृतोऽञ् । ७-३-३ न य्वा... इत्यैचि प्राप्ते ७-३-६ न क..... इति तत्प्रतिषेधः । ३-३-४३ कर्म... इति स्त्रियामेव णचो विधानात् स्वार्थे विधीयमानोऽयमञपि स्त्रियामेव भवेत् तथापि पठयमानं स्त्रियामिति ज्ञापयति-स्वार्थिकाः प्रत्यया लिङ्गवचनान्यतिवर्तन्तेऽपीति । तेन देव एव देवतेत्यादि सिद्धं भवति ।

५-४-१५ अणि- इनुँणः = इनुँणन्तात्, अण्= अण् प्रत्ययो भवति, स्वार्थे । **सांराविणम्-** ३-३-४४ अभि... इतीनुँण् । ततोऽण् ६-४-१६४ इन... इति प्रकृतिभावाट्टिलोपो न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-१६ विसारिणो मत्स्ये ॥
वैसारिणो मत्स्यः । मत्स्य इत्युक्तेर्नेह- विसारी देवदत्तः ।

५-४-१७ संख्यायाः क्रियाभ्यावृत्ति-गणने कृत्वसुँच् ॥ २०
पञ्च वारान् भुङ्क्ते= पञ्चकृत्वो भुङ्क्ते । संख्याया इत्युक्तेर्नेह- भूरिवारान् भुङ्क्ते ।

५-४-१८ द्वित्रिचतुर्भ्यः सुँच् ॥ १९
द्विर्भुङ्क्ते, त्रिर्भुङ्क्ते । चतुर्भुङ्क्ते ।

५-४-१९ एकस्य सकृच्च ॥
सकृद् भुङ्क्ते ।

५-४-२० विभाषा बहोर्धाऽविप्रकृष्टकाले ॥
बहुधा दिवसस्य भुङ्क्ते । बहुकृत्वो दिवसस्य भुङ्क्ते । अविप्रकृष्टकाल इत्युक्तेर्नेह- बहुकृत्वो मासस्य भुङ्क्ते ।

५-४-२१ तत्प्रकृतवचने मयट् ॥ २२
प्रकृतमन्नम् = अन्नमयम् । अपूपमयम् । प्रकृतमन्नमस्मिन्= अन्नमयो यज्ञः । अपूपमयं पर्व ।

५-४-२२ समूहवच्च बहुषु ॥
मोदकाः प्रकृताः = मौदकिकम् । मोदकमयम् । मोदकाः प्रकृता अस्मिन् यज्ञे मौदकिको यज्ञः । मोदकमयः ।

५-४-२३अनन्तावसथेतिहभेषजाञ्ञ्यः ॥
अनन्त एव= आनन्त्यम् । आवसथ एव= आवसथ्यम् । इतिह एव= ऐतिह्यम् । भेषजमेव भैषज्यम् ।

५-४-१६ विसारिणः= विसारि(न्) शब्दात्, अण् (५-४-१५) स्वार्थे । **वैसारिणः** पूर्ववट्टिलोपाऽभावः ।

५-४-१७ संख्या-अभ्यावृत्तिः=पौनःपुन्यम्=जन्म । क्रियाभ्यावृत्तिगणने= क्रियाजन्मगणनायां वर्तमानात्, संख्यायाः=संख्यावाचिनः प्रातिपदिकात्, कृत्वसुँच्= कृत्वसुँच् प्रत्ययो भवति ।

५-४-१८ द्वित्रि- क्रियाभ्यावृत्तिगणने (५-४-१७) द्वि... तुर्भ्यः= द्वि त्रि चतुर् इति शब्देभ्यः, सुँच्= सुँच् प्रत्ययो भवति । **चतुर्भुङ्क्ते** ८-२-२४ रात् सस्य इति सलोपः ।

५-४-१९ एक- क्रियागणने+संख्यायाः (५-४-१७) एकशब्दात् (प्रत्यासत्तिलभ्योऽयमर्थः) सुँच् (५-४-१८) एकस्य+एकशब्दस्य स्थाने, सकृच्च = सकृत् इत्यादेशश्च भवति । अभ्यावृत्तिस्त्विह न संभवति । अतः 'क्रियागणने' इत्येवा ऽनुवृत्तम् । **सकृद् भुङ्क्ते** ८-२-२३ संयो.... इति सलोपः ।

५-४-२० विभा- अविप्रकृष्टकाले=आसन्नकाले, क्रियाभ्यावृत्तिगणने (५-४-१७) बहोः = बहुशब्दात्, विभाषा=वा, धा= धाप्रत्ययो भवति । पक्षे कृत्वसुँच् (५-४-१७) । **बहुधा दिवसस्य** २-३-६४ कृत्वो... इति षष्ठी ।

५-४-२१ तत्प्र- प्राचुर्येण प्रस्तुतम्= प्रकृतम् । तस्य वचनम्= प्रतिपादनम् । ३-३-११५ ल्युँट् च इति भावे, ३-३-११७ कर.... इत्यधिकरणे वा ल्युँट् ।

आद्ये- प्रकृतवचने= प्रकृतोपाधिकेऽर्थे वर्तमानात्, तद्=प्रथमान्तात्, मयट् =मयट् प्रत्ययो भवति स्वार्थे । द्वितीये- तद् = प्रथमान्तात्, प्रकृतवचने= प्रकृतवचने वाच्ये, मयट्=मयट् प्रत्ययो भवति । यथाक्रमं प्रस्तुतान्युदाहरणानि ।

५-४-२२ समू- बहुषु= बहुषु प्रकृतेषूच्यमानेषु, समूहवत् = समूहे इव प्रत्यया भवन्ति, मयट् (५-४-२१) च । समूहवदित्यतिदेशे ४-२-३७ तस्य... इत्यत्रैव प्रत्यया भवन्तीति मोदकशब्दात् ४-२-४७ अचि... इति ठक् ।

५-४-२३ अन... षजात्= अनन्तप्रभृतिभ्यः, ञ्यः = ञ्यप्रत्ययो भवति स्वार्थे । **इतिह** निपातसमुदायोऽयमुपदेशपारम्पर्ये वर्तते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-२४ देवतान्तात् तादर्थ्ये यत् ॥२६, २५

अग्निदेवतायै इदम् = अग्निदेवत्यम् ।

पितृदेवत्यम् ।

५-४-२५ पादार्घाभ्यां च ॥

पादार्थमुदकम् = पाद्यम् । अर्घ्यम् ।

(नवस्य नू आदेशस्त्नप्तनप्खाश्च वक्तव्याः)

नूत्नम् । नूतनम् । नवीनम् ।

(नश्च पुराणे प्रात्)

प्रणम् । प्रत्नम् । प्रतनम् । प्रीणम् ।

(भागरूपनामभ्यो धेयः)

भागधेयम् । रूपधेयम् । नामधेयम् ।

५-४-२६ अतिथेर्ञ्यः ॥

अतिथये इदम् = आतिथ्यम् ।

५-४-२७ देवात् तल् ॥

देव एव = देवता ।

५-४-२८ अवेः कः ॥

अविरेव = अविकः ।

५-४-२९ यावादिभ्यः कन् ॥ ३३

याव एव= यावकः ।

५-४-३० लोहितान्मणौ ॥ ३२

लोहितो मणिर्लोहितकः ।

मणावित्युक्तेर्नेह-लोहितः पटः ।

५-४-३१ वर्णे चाऽनित्ये ॥ ३३

लोहितकः कोपेन ।

(लोहिताल्लिङ्गबाधनं वा)

लोहितिका कोपेन । लोहिनिका कोपेन ।

५-४-३२ रक्ते ॥ ३३

लोहितकः पटः ।

लिङ्गबाधनं वेत्येव- लोहितिका लोहिनिका वा शाटी ।

५-४-३३ कालाच्च ॥

कालकं मुखं लज्जया । कालकः पटः ।

कालिका शाटी ।

५-४-२४ देवतान्तात् = देवताशब्दान्तात्, प्रातिपदिकात्, तादर्थ्ये= प्रकृत्यर्थार्थे, यत् = यत् प्रत्ययो भवति । चतुर्थ्यन्ताद् भवति, तादर्थ्ये २-३-१३ चतु... सूत्रस्थ-ताद ...इति वार्तिकेन चतुर्थीविधानात् । तदर्थ एव तादर्थ्यम् । ५-१-१२३ गुण... सूत्रस्थ- चतु... इति वार्तिकेन स्वार्थे ष्यञ् । तच्छब्देन प्रकृत्यर्थो निर्दिश्यते ।

५-४-२५ पादार्घाभ्याम्= पाद अर्घ इति शब्दाभ्याम्, तादर्थ्ये+यत् (५-४-२४) ।

नवस्य= नवशब्दस्य स्थाने, नू आदेशः= नू इत्ययमादेशो भवति प्रत्यय-संनियोगेन, त्नप् तनप् ख इति प्रत्ययाश्च वक्तव्याः स्वार्थे ।

नश्च- पुराणे = पुराणेऽर्थे वर्तमानात्, प्रात् = प्रशब्दात्, नः=नप्रत्ययो भवति, च= त्नप्-तनप्-खाश्च ।

५-४-२६ अतिथेः = अतिथिशब्दात्, ञ्यः = ञ्यप्रत्ययो भवति, तादर्थ्ये (५-४-२४) ।

५-४-२७ देवात् = देवशब्दात्, तल्= तल् प्रत्ययो भवति, स्वार्थे ।

५-४-२८ अवेः = अविशब्दात्, कः= कप्रत्ययो भवति, स्वार्थे ।

५-४-२९ यावादिभ्यः= यावप्रभृतिगणपठितप्रातिपदिकेभ्यः, कन्= कन् प्रत्ययो भवति, स्वार्थे ।

५-४-३० लोहि- मणौ= मणौ वर्तमानाद्, लोहितात्= लोहितशब्दात्, कन् (५-४-२९) स्वार्थे ।

५-४-३१ वर्णे-अनित्ये+वर्णे=अनित्ये वर्णे वर्तमानात्, लोहितात् (५-४-३०) कन् (५-४-२९) स्वार्थे । **लोहितकः कोपेन** कोपशान्तौ लोहितो नश्यति, अतोऽत्राऽनित्यो वर्णः ।

५-४-३२ रक्ते = लाक्षादिना रक्ते वर्तमानात्, लोहितात् (५-४-३०) कन् (५-४-२९) स्वार्थे ।

५-४-३३ काला-अनित्ये+वर्णे (५-४-३१) रक्ते (५-४-३२) च, कालात्=कालशब्दात्, कन् (५-४-२९) स्वार्थे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-३४ विनयादिभ्यष्ठक् ॥ ३५
वैनयिकः । सामयिकः ।
(उपायो ह्रस्वत्वं च) ग.सू.
औपयिकः ।

५-४-३५ वाचो व्याहृतार्थायाम् ॥ ३६
सन्देशवाग् वाचिकं स्यात् । व्याहृतार्थायामित्युक्तेर्नेह- मधुरा वाग् देवदत्तस्य ।

५-४-३६ तद्युक्तात् कर्मणोऽण् । ३८
कर्मैव कार्मणम् । वाचिकानुरूपं क्रियमाणं कर्मेत्यर्थः ।
(अण्प्रकरणे कुलाल-वरुड-निषादकर्मार-चण्डाल- मित्रामित्रेभ्यश्छन्दस्युपसंख्यानम्)
कुलाल एव कौलालः । वारुडः । नैषादः । कार्मारः । चाण्डालः । मैत्रः । आमित्रः ।
(सान्नायानुजावरानुषूक- चातुष्प्राश्य- राक्षोघ्न-वैयात- वैकृत- वारिवस्कृताग्राय- णाग्रहायण- सान्तपना:)
सान्नाय्यम् । आनुजावरः । आनुषूकः । चातुष्प्राश्यम् । राक्षोघ्नः । वैयातः । वैकृतः । वारिवस्कृतः ।
आग्रायणः । आग्रहायणः । सान्तपनः ।

५-४-३७ ओषधेरजातौ ॥
औषधं सेवते । अजातावित्युक्तेर्नेह- ओषधयः क्षेत्रे रूढा भवन्ति ।

५-४-३८ प्रज्ञादिभ्यश्च ॥
प्राज्ञः । स्त्रियां प्राज्ञी ।

५-४-३९ मृदस्तिकन् ॥ ४०
मृदेव मृत्तिका ।

५-४-३४ विनयादिभ्यः= विनयप्रभृतिगणपठितशब्देभ्यः, ठक्= ठक् प्रत्ययो भवति, स्वार्थे ।

५-४-३५ वाचो- व्याहृतार्थायाम् = उक्तार्थायां वर्तमानात्, वाचः = वाच्शब्दात्, ठक् (५-४-३४) स्वार्थे । सन्देशवाग् व्याहृतार्थोच्यते । सन्देष्ट्रा सन्देशहरं प्रति पूर्वमुक्तत्वात् ।

५-४-३६ तद्युक्तात् +कर्मणः = व्याहृतार्थया वाचा (सन्देशवाचा) युक्तं यत् कर्म तद् वाचिनः कर्म(न्) शब्दात्, अण्= अण् प्रत्ययो भवति, स्वार्थे । **कार्मणम्** ६-४-१६७ अन् इति प्रकृतिभावः ।

सान्ना...पनाः- एतेऽणन्ताः स्वार्थिकाश्छन्दसि भाषायां चेष्यन्ते । सान्नाय्यशब्दस्येह-ग्रहणमन्तोदात्तार्थम् । रूपं तु ३-१-१२९ पाय्य... इत्यत्र निपातनादेव सिध्यति ।

आनुजावरः अनुजादवरोऽनुजावरः । अत्रैव निपातनात् समासः । ततोऽण् । **आनुषूकः** षूङ् (१०३१, ११३१ वा) धातोः ३-३-९४ स्त्रियां... सूत्रस्थ सम्पदादिभ्यः .... इति वार्तिकेन क्विँप्-सूः । अनुगता सूरेतमिति २-२-२४ अने... सूत्रस्थ- प्रादि... वार्तिकेन समासः । ५-४-१५४ शेषा... इति कप् । ८-३-१०६ पूर्व... इति —
षत्वम् । ततोऽण् । **चातुष्प्राश्यम्** । चतुर्भिः प्राश्यम्= चतुष्प्राश्यम् । ततोऽण् । **राक्षोघ्नः** । रक्षांसि हन्यतेऽनेनेति रक्षोघ्नः । ३-३-५८ ग्रह... सूत्रस्थ-घत्रर्थे... वार्तिकेन कः । ततोऽण् । वियात-विकृत-वरिवस्कृत् इत्येतेभ्योऽण् । वारिवस्कृत : = पूजकः । अग्रायण, अग्रहायण, इत्यतोऽण् ।

५-४-३७ ओष- अजातौ= जातिभिन्ने वर्तमानात्, ओषधेः = ओषधिशब्दात्, अण् (५-४-३६) स्वार्थे । प्रत्युदाहरणे जातिविशेषेषु फलपाकान्तेष्वोषधिशब्दः ।

५-४-३८ प्रज्ञादिभ्यः=प्रज्ञाप्रभृतिगणपठितप्रातिपदिकेभ्यः, अण् (५-४-३६) स्वार्थे । **प्राज्ञी** । प्राज्ञेति तु ५-२-१०१ प्रज्ञा...इति णान्तं बोध्यम् ।

५-४-३९ मृदः=मृद् इति शब्दात्, तिकन्=तिकन् प्रत्ययो भवति, स्वार्थे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-४० सस्नौ प्रशंसायाम्॥ ४१

प्रशस्ता मृद् = मृत्सा। मृत्स्ना।

५-४-४१ वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि॥

वृकतिः। ज्येष्ठतातिः।

५-४-४२ बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्॥ ४३

बहूनि ददाति बहुशः। अल्पं ददाति अल्पशः। बहुभिर्ददाति बहुशः। अल्पेन ददाति अल्पशः।

(बह्वल्पार्थान्मङ्गलामङ्गलवचनम्)

नेह- बहूनि ददात्यनिष्टेषु। अल्पं ददात्याभ्युदयिकेषु।

५-४-४३संख्यैकवचनाच्च वीप्सायाम्॥

द्वौ द्वौ ददाति द्विशः। माषं माषं ददाति माषशः। प्रस्थशः।

५-४-४४ प्रतियोगे पञ्चम्यास्तसिँः॥ ४५,४९

प्रद्युम्नो वासुदेवतः प्रति।

(तँसिप्रकरणे आद्यादिभ्य उपसंख्यानम्)

आदौ= आदितः। मध्यतः। पार्श्वतः। आकृतिगणोऽयम्।

५-४-४५ अपादाने चाहीयरुहोः॥

ग्रामत आगच्छति। चोरतो बिभेति। अहीयरुहोरित्युक्तेर्नेह-सार्थाद्धीयते। पर्वतादवरोहति। 'मन्त्रो हीनः स्वरतो वर्णतो वा' इत्यत्र तु ५-४-४७ हीय... इति तृतीयान्तात् तसिँः।

५-४-४६अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः॥४७

वृत्तेनाऽतिगृह्यते=वृत्ततोऽतिगृह्यते। वृत्तेनाऽन्यानतिक्रम्य वर्तत इत्यर्थः। वृत्तेन न व्यथते = वृत्ततो न व्यथते। वृत्तेन न चलतीत्यर्थः। वृत्तेन क्षिप्तः = वृत्ततः क्षिप्तः। वृत्तेन निन्दित इत्यर्थः। अकर्तरीत्युक्तेर्नेह- देवदत्तेन क्षिप्तः।

५-४-४० सस्नौ- प्रशंसायाम् = प्रशंसोपाधिकेऽर्थे वर्तमानात्, मृदः (५-४-३९) सस्नौ= स स्न इत्येतौ प्रत्ययौ भवतः, स्वार्थे। ५-३-६६ प्रशं.... इतिरूपपोऽपवादः। अग्रिमसूत्रमपि।

५-४-४१ वृकाज्येष्ठाभ्याम्= वृक ज्येष्ठ शब्दाभ्याम्, तिल्तातिलौ= तिल् तातिल् प्रत्ययौ भवतः, छन्दसि = वेदे, प्रशंसायाम् (५-४-४०)।

५-४-४२ बहव--बहवल्पार्थात्= बहवर्थादल्पार्थाच्च, कारकात्, अन्यतरस्याम्= वा, शस्= शस्प्रत्ययो भवति, स्वर्थे। अर्थग्रहणात् पर्यायेभ्योऽपि भवति। भूरिशो ददाति। स्तोकशो ददाति।

५-४-४३ संख्यै... चनात्= संख्यावाचिन एकार्थवाचिनश्च, कारकात् + अन्यतरस्याम् + शस् (५-४-४२) वीप्सायाम्= वीप्सायां गम्यमानायाम्। एकवचनशब्देन एकार्थ उच्यते ऽनेनेति व्युत्पत्त्या कार्षापणादयः परिमाणशब्दा एवाऽत्र गृह्यन्ते। ते हि वृत्तावेकार्था एव।

५-४-४४ प्रतियोगे= प्रतिशब्दस्य योगे सति, पञ्चम्याः= पञ्चम्यन्तात्, तसिँः = तसिँप्रत्ययो भवति **वासुदेवतः** २-३-११ प्रति... इति पञ्चमी।

५-४-४५ अपा- अहीयरुहोः = जहाति-रोहति-सम्बन्धि- भिन्ने, अपादाने, पञ्चम्यास्तसिँः (५-४-४४)। 'हीय' इति ओँहाक् त्यागे (१०८९) धातोर्यका निर्देशात्, ओँहाङ् इत्यस्य न पर्युदासः। भूमित उज्जिहीते।

५-४-४६ अति... पेषु- अतिक्रम्य ग्रहः = अतिग्रहः। अव्यथनम् = अचलनम्। क्षेपः = निन्दा। एष्वर्थेषु गम्यमानेषु, अकर्तरि+तृतीयायाः = कर्तृभिन्नात् तृतीयान्तात्, तसिँः (५-४-४४)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-४७ हीयमानपापयोगाच्च ॥

वृत्तेन हीयते= वृत्ततो हीयते। वृत्तेन पापः =वृत्ततः पापः। अकर्तरीत्यनुवृत्तेर्नेह- देवदत्तेन हीयते।

५-४-४८ षष्ठ्या व्याश्रये ॥ ४९

देवा अर्जुनतोऽभवन्। आदित्याः कर्णतोऽभवन्। अर्जुनस्य कर्णस्य च पक्षे, इत्यर्थः।

५-४-४९ रोगाच्चापनयने ॥

प्रवाहिकातः कुरु। छर्दिकातः कुरु। प्रतीकारमस्याः कुर्वित्यर्थः। अपनयने इत्युक्तेर्नेह- प्रवाहिकायाः प्रकोपनं कुरु।

५-४-५० कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः ॥ ५७, ५२, ५१

(अभूततद्भाव इति वक्तव्यम्)

अशुक्लं शुक्लं करोति=शुक्लीकरोति। अशुक्लः शुक्लो भवति=शुक्लीभवति। अशुक्लः शुक्लः स्यात्=शुक्ली स्यात्।

५-४-५१ अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ॥

अरूकरोति। उन्मनीकरोति। उच्चक्षूकरोति। विचेतीकरोति। विरहीकरोति। विरजीकरोति।

५-४-५२ विभाषा साति कार्त्स्न्ये ॥ ५३, ५५

अग्निसाद्भवति। अग्नीभवति। उदकसाद्भवति लवणः। उदकीभवति।

५-४-४७ हीयमानपापयोगात्= हीयमानेन पापेन च योगो यस्य तद्वाचिनः, अर्कतरि+तृतीयायाः (५-४-४६) तसिँः (५-४-४४)।

५-४-४८ षष्ठ्या- व्याश्रये= नानापक्षसमाश्रये गम्यमाने, षष्ठ्याः = षष्ठ्यन्तात्, तसिँः (५-४-४४)।

५-४-४९ रोगात् = रोगवाचिनः, षष्ठ्याः (५-४-४८) तसिँः (५-४-४४) अपनयने=निरसने= चिकित्सायाम्।

५-४-५० कृभ्वस्तियोगे= कृ भू अस् इति धातु-योगे, सम्पद्यकर्तरि= सम्पद्यर्थक- धातोः कर्तरि वर्तमानात्, प्रातिपदिकात्, च्विँः = च्विँप्रत्ययो भवति। अत्र हरदत्तः- सम्पद्यर्थस्य यःकर्ता स सम्पद्यकर्तेत्यर्थः। अर्थकथनं चैतत्। विग्रहस्तु सम्पद्यश्चासौ कर्ता चेति, ३-१-१३७ 'पाघ्राध्माधेड्दृशः शः, अस्मादेव निपातनात् सम्पदो (११६८) ऽपि भवति। दिवादित्वात् श्यन्निति।

अभूततद्भावे= विकारात्मतां प्रागनुवत्यां प्रकृतौ वर्तमानाद् विकारवाचिप्रातिपदिकात् इति वाच्यम्।

शुक्ली करोति ७-४-३२ अस्य... इतीत्वम्।

५-४-५१ अरु- कृभ्वस्तियोगे सम्पद्यकर्तरि च्विँः (५-४-५०)अरु... जसाम्= अरुष्-प्रभृतीनाम्, लोपश्च= लोपोऽपि भवति, अभूततद्भावे। १-१-५१ अलो... इत्यन्तलोपः। **अरूकरोति** ७-४-२६ च्वौ च इति दीर्घः।

५-४-५२ विभा-कृभ्वस्तियोगे सम्पद्यकर्तरि (५-४-५०) कार्त्स्न्ये+अभूततद्भावे =द्रव्यस्य सर्वात्मना विकाररूपापत्तौ गम्यमानायां विकारवाचि-प्रातिपदिकात्, विभाषा=वा, सातिँ=सातिँप्रत्ययो भवति। पक्षे ५-४-५० कृभ्व... इति च्विँः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-५३ अभिविधौ सम्पदा च ॥ ५५

अग्निसात् सम्पद्यते । अग्निसाद् भवति ।
अग्नी भवति शस्त्रम् । उदकसाद् भवति ।
उदकीभवति लवणम् ।

५-४-५४ तदधीनवचने ॥ ५५

राजाधीनं करोति= राजसात् करोति ।
राजसाद् भवति । राजसात् स्यात् ।

५-४-५५ देये त्रा च ॥ ५६

ब्राह्मणाधीनं देयं करोति ब्राह्मणत्रा करोति
ब्राह्मणसात् करोति ।

५-४-५६ देव-मनुष्य-पुरुष-पुरु- मर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ॥

देवान् प्रणमति= देवत्रा प्रणमति ।
देवेषु श्रद्दधाति = देवत्रा श्रद्दधाति ।

५-४-५७ अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच् ॥ ६७

पटत् करोति = पटपटा करोति ।
द्व्यजवरार्धादित्युक्तेर्नेह- श्रत्करोति ।
अवरग्रहणादिह भवति-खरटखरटा करोति ।
अनिताविव्युक्तेर्नेह-पटदिति करोति ।

५-४-५३ अभिविधौ= अभिव्याप्तौ गम्यमानायाम्, कृभ्वस्तियोगे (५-४-५०) सम्पदा च= समुपसर्गपूर्वकपद्धातुयोगे च, सम्पद्यकर्तरि (५-४-५०) अभूततद्भावे, विभाषा+सातिँ (५-४-५२)। पक्षे कृभ्वस्तियोगे च्विँः (५-४-५०) सम्पदा योगे तु न । अत्र काशिका- अथाऽभिविधेः कात्स्न्र्यस्य च को विशेषः ? यत्रैकदेशेनापि सर्वा प्रकृतिर्विकारमापद्यते सोऽ भिविधिः । यथा- अस्यां सेनायामुत्पातेन सर्वं शस्त्रमग्निसात् सम्पद्यते । वर्षासु सर्वं लवणमुदकसात् सम्पद्यत इति । कात्स्न्र्यं तु सर्वात्मना द्रव्यस्य विकाररूपापत्तौ भवति इति । तत्र द्रव्यस्य सर्वात्मना विकाररूपापत्तिः, न कश्चिदवयवस्त्यज्यते । यथा-उदकसाद् भवति लवणः । इति भावः ।

५-४-५४ तद- १-४-९६ अधि... इतीश्वरे ऽ र्थे द्योत्ये ऽधीत्यस्य कर्मप्रवचनीयसंज्ञायाम्, २-३-९ यस्मा... इतीश्वरवाचिनस्तच्छब्दात्, सप्तम्यां विभक्तौ, 'तस्मिन् अधि' इत्यवस्थायां २-१-४० सप्त... इति समासे, ५-४-७ अष... इति खप्रत्यये तदधीनशब्दः सिध्यति । ईश्वरश्चेशितव्यापेक्षः । अतस्तच्छब्देन स्वामिसामान्यमुच्यते, अधीनशब्देना- पीशितव्यसामान्यम् । स्वामिविशेषवाचिनः प्रातिपदिकादीशितव्येऽभिधेये सातिँ प्रत्ययो भवति । निष्कृष्टः सूत्रार्थस्तु- कृभ्वस्तियोगे (५-४-५०) सम्पदा च (५-४-५३) सम्पद्यकर्तरि (५-४-५०) सातिँ (५-३-५२) तदधीनवचने=तदायत्तवचने । इति ।

५-४-५५ देये= दातव्ये, तदधीनवचने (५-४-५४) कृभ्वस्तियोगे (५-४-५०) सम्पदा च (५-४-५३) सम्पद्यकर्तरि (५-४-५०) त्रा= त्राप्रत्ययो भवति, सातिँ ५-४-५२) च ।

५-४-५६ देव- द्वितीयासप्तम्योः= द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च, देव... मर्त्येभ्यः = देवप्रभृतिभ्यः, बहुलम्= बाहुल्येन, त्रा (५-४-५५) । अत्र कृभ्वस्तियोगे इति न सम्बध्यते ।

५-४-५७ अव्य-द्व्यजवरार्धात्=द्व्यच् अवरं (न्यूनादपि न्यूनम्, अधिकं भवतु वा न भवतु) अर्धं यस्य तादृशात्, अव्यक्तानुकरणात् = अव्यक्तानुकरणवाचिनः प्रातिपदिकात्, डाच्=डाच् प्रत्ययो भवति, अनितौ= परत इतिशब्दाभावे, कृभ्वस्ति योगे (५-४-५०) । उदाहरणे डाचो विवक्षायां पूर्वं ८-१-११ कर्म... सूत्रस्थ- डाचि... वार्तिकेन द्वित्वे पटत् पटत् इति द्व्यजवरं भवति । ततो डाचि ६-१-९६ नाम्रे... सूत्रस्थ... नित्य...वार्तिकेन पूर्वतकारस्य पररूपे ६-४-४३ टेः, इति टिलोपः ।

खरट खरटा करोति खरटत् करोतीति विग्रहे प्राग्वत् प्रक्रिया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-५८ कृञो द्वितीय-तृतीय-शम्ब-बीजात् कृषौ ॥ ६७, ५९

द्वितीयं कर्षणं करोति= द्वितीया करोति। तृतीया करोति। शम्बा करोति। बीजा करोति।

५-४-५९ संख्यायाश्च गुणान्तायाः ॥

द्विगुणं कर्षणं करोति द्विगुणा करोति।

५-४-६० समयाच्च यापनायाम् ॥

समया करोति। कालं यापयतीत्यर्थः।

५-४-६१ सपत्रनिष्पत्रादतिव्यथने ॥

सपत्रा करोति मृगं व्याधः। सपत्रं बाणं मृगशरीरे प्रवेशयंतीत्यर्थः। निष्पत्रा करोति। बाणस्यापरपार्श्वान्निर्गमनेन निष्पत्रं करोतीत्यर्थः।

५-४-६२ निष्कुलान्निष्कोषणे ॥

निष्कुला करोति दाडिमम्।

५-४-६३ सुखप्रियादानुलोम्ये ॥

सुखा करोति। प्रिया करोति। आनुलोम्ये इत्युक्तेर्नेह- सुखं प्रियं वा करोत्यौषध- पानम्।

५-४-६४ दुःखात् प्रातिलोम्ये ॥

दुःखा करोति स्वामिनम्। प्रातिलोम्ये इत्युक्तेर्नेह-दुःखं करोति प्रवासिस्मृतिः।

५-४-६५ शूलात् पाके ॥

शूला करोति मांसम्। शूलेन पचतीत्यर्थः। पाके इत्युक्तेर्नेह-शूलं करोति कदन्नम्।

५-४-६६ सत्यादशपथे ॥

सत्या करोति भाण्डं वणिक्। क्रेतव्यमिति तथ्यं करोतीत्यर्थः। अशपथे इत्युक्तेर्नेह- सत्यं करोति ब्राह्मणः।

५-४-५८ कृञः=कृञो योगे, कृषौ=कर्षणेऽर्थे, द्विती... बीजात्= द्वितीयप्रभृतिभ्यः, डाच् (५-४-५७)। कृञ्ग्रहणं भ्वस्तिनिवृत्त्यर्थम्। अस्मिन् डाचि द्वित्वं न भवतीति तत्रैव वार्तिके स्पष्टम्।

५-४-५९ संख्या- कृञः + कृषौ (५-४-५८) गुणान्तायाः = गुणशब्दान्तात्, संख्यायाः = संख्यावाचिनः, डाच् (५-४-५७)।

५-४-६० सम-कृञः (५-४-५८) समयात्=समयशब्दात्, डाच् (५-४-५७) यापनायाम्= व्यतिगमनायाम्।

५-४-६१ सप- कृञः (५-४-५८) सपत्रनिष्पत्रात्= सपत्रनिष्पत्रप्रातिपदिकाभ्याम्, डाच् (५-४-५७) अतिव्यथने=अतिबाधायां गम्यमानायाम्।

५-४-६२ निष्कु- कृञः (५-४-५८) निष्कुलात्= निष्कुलप्रातिपदिकात्, डाच् (५-४-५७) निष्कोषणे=निःसारणे। उदाहरणे निर्गतं कुलम्= अन्तरवयवानां समूहो यस्मादिति बहुव्रीहेर्डाच्।

५-४-६३ सुख- कृञः (५-४-५८) सुखप्रियात्= सुखप्रियप्रातिपदिकाभ्याम्, डाच् (५४-४-५७) आनुकूल्ये=आनुकूल्ये गम्यमाने।

५-४-६४ दुःखा-कृञः (५-४-५८) दुःखात्= दुःखप्रातिपदिकात्, डाच् (५-४-४७) प्रातिलोम्ये= प्रातिकूल्ये गम्यमाने। आराध्यप्रतिकूलाचरणं प्राक्लिोम्यम्।

५-४-६५ शूला-कृञः (५-४-५८) शूलात्= शूलप्रातिपदिकात्, डाच् (५-४-५७) पाके= पाके गम्यमाने। **शूलं करोति कदन्नम्**। शूलम् =उदरपीडा। कुत्सितमन्नम्=कदन्नम्।

५-४-६६ सत्या-कृञः (५-४-५८) सत्यात्=सत्यप्रातिपदिकात्, डाच् (५-४-५७) अशपथे=शपथाऽनवगतौ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-६७ मद्रात् परिवापणे ॥

मद्रा करोति । माङ्गल्यमुण्डनेन संस्करोतीत्यर्थः ।

(भद्राच्चेति वक्तव्यम्)

भद्रा करोति कुमारं नापितः । पूर्ववदर्थः ।

५-४-६८ समासान्ताः ॥ १६०

आपादपरिसमाप्तेर्ये प्रत्ययास्ते समासस्यान्तावयवा सन्तो भवन्ति । इत्यधिकृत्य-

५-४-६९ न पूजनात् ॥ ७२

सुराजा । अतिराजा । सुगौः । अतिगौः ।

(पूजायां स्वतिग्रहणं कर्तव्यम्)

नेह प्रतिषेधः - परमराजः ।

(प्राग्बहुव्रीहिग्रहणं च कर्तव्यम्)

सुसक्थः । स्वक्षः ।

५-४-७० किमः क्षेपे ॥

किंराजा । किंसखा । क्षेपे इत्युक्तेरिह भवत्येव- कस्य राजा= किंराजः ।

५-४-७१ नञस्तत्पुरुषात् ॥ ७२

अराजा । असखा । अगौः ।

५-४-७२ पथो विभाषा ॥

अपथम् । अपन्थाः ।

५-४-७३ बहुव्रीहौ संख्येये डजबहुगणात् ॥

उपदशाः । आसन्नदशाः । अदूरदशाः । अधिकदशाः । द्वित्राः । अबहुगणादित्युक्तेर्नेह- उपबहवः । उपगणाः ।

(डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं कर्तव्यं निस्त्रिंशाद्यर्थम्)

निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि देवदत्तस्य । निश्चत्वारिंशानि यज्ञदत्तस्य । निर्गतस्त्रिंशतो ऽङ्गुलिभ्यो निस्त्रिंशः खड्गः ।

५-४-६७ मद्रा-परिवापणे=मुण्डने, कृञः (५-४-५८) मद्रात्=मद्रप्रातिपदिकात्, डाच् (५-४-५७) । मद्रशब्दो मङ्गलवाची ।

५-४-६८ भद्रा-कृञः (५-४-५८) भद्रात्=भद्रप्रातिपदिकात्, डाच् (५-४-५७) परिवापणे (५-४-६७) । भद्रशब्दो मद्रपर्यायः ।

५-४-६९ न पू- पूजनात्= पूजनार्थात् परस्मात्, न= समासान्ता न भवन्ति । उदाहरणेषु २-२-१८ कुग... इति समासः । आद्ययोः ५-४-९१ राजा.... इत्यनेन, अन्त्ययोः ५-४-९२ गोर... इत्यनेन टच् प्राप्तः ।

पूजा- **परमराज** : २-१-६१ सन्म.... इति समासः ।

प्राग्ब- ५-४-११३ बहु.... इत्यादौ प्रतिषेधो न भवति । उदाहरणयोरुक्तसूत्रेण समासान्तः षच् ।

५-४-७० किमः- क्षेपे= क्षेपेऽर्थे वर्तमानात्, किमः = किंशब्दात् परस्मात्, न (५-४-६९) । उदाहरणयोः २-१-६४ किं क्षे.... इति समासः । ५-४-९१ राजा... इति टच् प्राप्तः ।

५-४-७१ नञ - तत्पुरुषात्+नञः=तत्पुरुषान्नञः परस्मात् (५-४-६९) न (५-४-६९) ।

५-४-७२ पथः = पथि (न्) शब्दान्तात्, नञस्तत्पुरुषात् (५-४-७१) विभाषा वा, न (५-४-६९) । **अपथम्** ५-४-७४ ऋक्पू... इति.... अः २-४-३० अप.... इति क्लीबत्वम् । समासान्तनिषेधपक्षे तु २-४-२६ परवल्... इति पुंस्त्वम्-अपन्थाः ।

५-४-७३ बहु-अबहुगणात् =बहुगणभिन्नान्तात्, संख्येये+बहुव्रीहौ= २-२-२५ संख्ययाऽव्यया... सूत्रविहित बहुव्रीहेः (सूत्रे पञ्चम्यर्थे सप्तमी बोध्या) डच्=समासान्तडच्प्रत्ययो भवति । उदाहरणेषु क्रमशः- दशानां समीपाः । दशानामासन्नाः । दशानामदूराः । दशभ्योऽधिकाः । द्वौ वा त्रयो वा । इति विग्रहः । **उपगणाः** डचि अन्तोदात्तत्वं स्यात् । असति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वम् ।

डच्प्र- उदाहरणेषु २-२-१८ कुग... सूत्रस्थ- निरा... वार्तिकेन समासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-७४ ऋक्पूरब्धूः पथामानक्षे ॥

अनृचः। बह्वृचः। विष्णुपुरम्। द्वीपम्। अन्तरीपम्। समीपम्। राजधुरा। महाधुरः। जलपथः। स्थलपथः। अनक्षे इत्युक्तेर्नेह-दृढधूरक्षः।

५-४-७५ अच् प्रत्यन्ववपूर्वात् सामलोम्नः॥ ८७

प्रतिसामम्। अनुसामम्। अवसामम्।
प्रतिलोमम्। अनुलोमम्। अवलोमम्।
कृष्णोदक्पाण्डुसंख्याभ्यो भूमेरच्प्रत्ययः स्मृतः
गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि ॥
कृष्णभूमः। उदग्भूमः। पाण्डुभूमः। द्विभूमः। त्रिभूमः। पञ्चगोदावरम्। पञ्चनदम्।
अत्र (५-४-७५) सूत्रे 'अच्' इति योगविभागादन्यत्रापि। पद्मनाभः।

५-४-७६ अक्ष्णोऽदर्शनात् ॥

पुष्कराक्षम्। वारिजाक्षं भजे। अदर्शनादित्युक्तेर्नेह-ब्राह्मणाक्षि। अचक्षुः पर्यायादित्युक्तेरिह भवत्येव। गवाक्षम्।

५-४-७७ अचतुर-विचतुर - सुचतुर-स्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुव-दारगवोर्वष्ठीव-पदष्ठीव-नक्तन्दिव-रात्रिन्दिवाहर्दिव-सरजस-निःश्रेयस-पुरुषायुष-द्व्यायुष-त्र्यायुषर्ग्यजुष-जातोक्ष-महोक्ष-वृद्धोक्षोपशुन-गोष्ठश्वाः ॥

(चतुरोऽच् प्रकरणे त्र्युपाभ्यामुपसंख्यानम्)
त्रिचतुरा :। उपचतुराः।

५-४-७४ ऋक्पू...पथाम्=ऋच् पुर् अप् धुर् पथिन् इत्येतदन्तानाम् =इत्येतदन्तेभ्यः, समासान्तः (६-४-६८) अ= अप्रत्ययो भवति, अनक्षे= रथाद्यवयवे न। अ अनक्षे, इति इतिच्छेदः। **द्वीपम्** ६-३-९७ द्व्यन्त... इत्यप ईत्। **राजधुरा** षष्ठीसमासः। २-४-२६ पर,... इति परवल्लिङ्गत्वम्।

५-४-७५ अच् प्र- प्रत्य..... पूर्वात् = प्रति अनु अव इतिपूर्वकात्, सामलोम्नः= साम (न्) लोम (न्) शब्दान्तात्, प्रातिपदिकात् (४-१-१) समासान्तः (५-४-६८) अच् = अच् प्रत्ययो भवति।

कृष्णो... संख्याभ्यः= कृष्ण उदच् पाण्डु इत्येतेभ्यः संख्यावचिनश्च परस्माद्, भूमेः= भूमिशब्दात्, संख्यावाचिभ्यः पराभ्यां नदीगोदावरीशब्दाभ्यां च, अच् प्रत्ययः। **कृष्णभूमः**। बहुव्रीहिसमासः। **पञ्चगोदावरम्** २-१-२० नदी... इत्यव्ययीभावः।

५-४-७६ अक्ष्णो- अदर्शनात्+अक्ष्णः=अचक्षुः पर्यायो योऽक्षिशब्दस्तदन्तात्, प्रातिपदिकात्, (४-१-१) समासान्तः (५-४-६८) अच् (५-४-७५)। अत्र काशिका-चक्षुः पर्यायवचनो दर्शनशब्दः प्राण्यङ्गवचन इहाश्रीयते, इति। उदाहरणयोः, आद्ये २-१-५६ उप... इति समासः। अन्त्ये-बहुव्रीहिः।

५-४-७७ अच... गोष्ठश्वाः- एते समासान्ताच्प्रत्ययान्ता निपात्यन्ते। आद्यास्त्रयो बहुव्रीहयः। अचतुरः। विचतुरः। सुचतुरः। तत एकादश द्वन्द्वाः। स्त्रीपुंसौ। धेन्वनडुहौ। ऋक्सामे। वाङ्मनसे। अक्षिभ्रुवम्। २-४-२ द्वन्द्व... इत्येकवद्भावः। दारगवम्। ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम्। टिलोपो निपात्यते। पादौ च अष्ठीवन्तौ च पदष्ठीवम्। पादस्य पद्भावष्टिलोपश्च निपात्यते। नक्तन्दिवम्। रात्रिन्दिवम्। पूर्वपदस्य मान्तत्वं निपात्यते। अहर्दिवम्। अत्र काशिका-पर्यायावेतौ कथमनयोर्द्वन्द्वः वीप्सायां द्वन्द्वो निपात्यते। अहन्यहनीत्यर्थ इति। तत एकोऽव्ययीभावः। रजोऽप्यपरित्यज्य सरजसमभ्यवहरति। २-१-६ अव्य... इति साकल्ये ऽव्ययीभावः। ६-३-८१ अव्य... इति सहस्य सः। बहुव्रीहौ न भवति। सह रजसा सरजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-७८ ब्रह्महस्तिभ्यां वर्चसः ॥

ब्रह्मवर्चसम् । हस्तिवर्चसम् ।

(पल्यराजभ्यां चेति वक्तव्यम्)

पल्यवर्चसम् । राजवर्चसम् ।

५-४-७९ अवसमन्धेभ्यस्तमसः ॥

अवतमसम् । सन्तमसम् । अन्धतमसम् ।

५-४-८० श्वसो वसीयः श्रेयसः ॥

श्वोवसीयसम् । श्वःश्रेयसम् ।

५-४-८१ अन्ववतप्ताद् रहसः ॥

अनुरहसम् । अवरहसम् । तप्तरहसम् ।

५-४-८२ प्रतेरुरसः सप्तमीस्थात् ॥

उरसीति= प्रत्युरसम् ।

५-४-८३ अनुगवमायामे ॥

अनुगवं यानम् । आयामे इत्युक्तेर्नेह- गोः पश्चादनुगु ।

५-४-८४ द्विस्तावा त्रिस्तावा वेदिः ।

द्विस्तावा वेदिः । त्रिस्तावा वेदिः ।

वेदिरित्युक्तेर्नेह- द्विस्तावती त्रिस्तावती रज्जुः ।

पङ्कजमिति । ततस्तत्पुरुषः । निश्चितं श्रेयो निः श्रेयसम् । २-१-१८ कुग... इति प्रादिसमासः । तत्पुरुष एव । नेह- निःश्रेयान् पुरुषः । ततः षष्ठीसमासः । पुरुषस्यायुः=पुरुषायुषम् । द्वन्द्वे न भवति । पुरुषश्च आयुश्च=पुरुषायुषी । ततो द्विगू । द्वे आयुषी=द्व्यायुषम् । त्र्यायुषम् । इह न भवति द्वयोरायुः=द्व्यायुः । त्र्यायुरिति । ततो द्वन्द्वः । ऋक् च यजुश्च=ऋग्यजुषम् । जातादिपूर्वपदा उक्ष(न्)शब्दान्तास्त्रयः कर्मधारयाः । जातोक्षः । महोक्षः । वृद्धोक्षः । बहुव्रीहौ न भवति । जातोक्षा ब्राह्मणः । महोक्षा । वृद्धोक्षेति । ततोऽव्ययीभावः । शुनः समीपम्-उपशुनम् । टिलोपाभावः सम्प्रसारणं च निपात्येते । ततः सप्तमीसमासः । गोष्ठे श्वा= गोष्ठश्वः ।

चतुः उदाहरणयोः २-२-२५ संख्य... इति बहुव्रीहिः ।

५-४-७८ ब्रह्म...भ्याम्= ब्रह्म (न्) हस्ति (न्) शब्दाभ्यां परस्मात्, वर्चसः= वर्चश्शब्दात्, अच्, (५-४-७५) ।

५-४-७९ अव- धेभ्यः= अव सम् अन्ध इति शब्देभ्यः परस्मात्, तमसः= तमश्शब्दात्, अच्, (५-४-७५) ।

५-४-८० श्वसो- श्वसः = श्वसः पराभ्याम्, वसीयः श्रेयसः = वसीयस् श्रेयस् इति शब्दाभ्याम्, अच् (५-४-७५) । वसुशब्दः प्रशस्तवाची तत ईयसुँनि वसीयः । श्वः शब्द उत्तरपदार्थप्रशंसामाशीर्विषयामाह । श्वःश्रेयसं ते भूयात् । शोभनं श्रेयस्ते भूयादित्यर्थः । श्वोवसीयसमित्यस्यैव पर्यायः ।

५-४-८१ अन्ववतप्तात्=अनु अव तप्त इति शब्देभ्यः परस्मात्, रहसः= रहस् इति शब्दात्, अच् (५-४-७५) ।

५-४-८२ प्रते- सप्तमीस्थात् = सप्तम्यर्थे वर्तमानात्, प्रतेः = प्रतिशब्दात् परस्मात्, उरसः= उरस् इति शब्दात्, अच् (५-४-७५) । **प्रत्युरसम्** २-१-६-अव्य... इति विभक्त्यर्थे ऽव्ययीभावः ।

५-४-८३ अनु- आयामे= दैर्घ्ये, अनुगवम्= अनुगवमिति निपात्यते = अनुगुशब्दात् अच् (५-४-७५) । उदाहरणे २-१-१६ यस्य... इत्यव्ययीभावः ।

५-४-८४ द्विस्तावात्रिस्तावा- अत्र समासः अच्प्रत्ययः, टिलोपश्च निपात्यन्ते, वेदिः= वेदिर्वाच्या चेत् । यावती प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा वाऽश्वमेधादौ । तत्रेदं निपातनम् । उदाहरणेषु पूर्वपदानि सुँजन्तानि । प्रत्युदाहरणे व्यस्तपदे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-८५ उपसर्गादध्वनः ॥
प्रगतोऽध्वानं प्राध्वो रथः ।
उपसर्गादित्युक्तेर्नेह-परमाध्वा ।

५-४-८६ तत्पुरुषस्याङ्गुलेः संख्याऽव्ययादेः ॥ १०५, ८८
द्वे अङ्गुली प्रमाणमस्य द्वयङ्गुलम् ।
निर्गतमङ्गुलिभ्यो निरङ्गुलम् ।

५-४-८७ अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥
अहश्च रात्रिश्च=अहोरात्रः ।
सर्वरात्रः । पूर्वं रात्रेः पूर्वरात्रः ।
अपररात्रः । संख्याता रात्रिः=संख्यातरात्रः ।
पुण्या रात्रिः=पुण्यरात्रः । द्वयो रात्र्योः समाहारः=द्विरात्रः । रात्रिमतिक्रान्तः = अतिरात्रः ।

५-४-८८ अह्नोऽह्न एतेभ्यः ॥
सर्वाह्णः । पूर्वाह्णः । संख्याताह्नः ।
पुण्यशब्दात् प्रतिषेधं वक्ष्यति ।
द्वयोरह्नोर्भवः = द्वयह्नः । अहरतिक्रान्तः = अत्यह्नः ।

५-४-८९ न संख्यादेः समाहारे ॥ ९०
द्वयहः । त्र्यहः । समाहारे इत्युक्तेरिह भवत्येव-द्वयोरह्नोर्भवः= द्वयह्नः ।

५-४-९० उत्तमैकाभ्यां च ॥ ९० ॥
पुण्याहः । एकाहः । उत्तमग्रहणमुपान्त्यस्यापि संग्रहार्थमित्येके । तन्मते संख्याताहः ।

५-४-८५ उपसर्गात् = उपसर्गात् परस्मात्, अध्वनः= अध्व (न्) शब्दात्, अच् (५-४-७५) ।

५-४-८६ तत्पु- संख्याव्ययादेः= संख्यादेरव्ययादेश्च, अङ्गुलेः = अङ्गुल्यन्तस्य, तत्पुरुषस्य= तत्पुरुषसमासस्य, समासान्तः (५-४-६८) । अच् (५-४-७५) । सूत्रे षष्ठचन्तपदानि पञ्चम्यन्तानि वा कल्प्यानि । अन्येऽपि ५-४-६८ समासान्ता इति ५-४-१६० निष्प्रवाणिश्चेति च सूत्रयोरन्तराले विधीयमानाः सर्वे प्रत्ययाः समासान्ता एवेति न विस्मरणीयम् । **द्वयङ्गुलम्** २-१-५१ तद्धि... इति समासः । ५-२-३७ प्रमा... इति द्वयसच् । तस्य च तत्सूत्रस्थेनैव द्विगो... इति वार्तिकेन लुक् । **निरङ्गुलम्** २-२-१८ कुग.... सूत्रस्थ.... निरा.... इति वार्तिकेन समासः । **प्राग्**५-४-१०६ द्वन्द्वात्... इति सूत्रात् तत्पुरुषस्येत्यधिक्रियते ।

५-४-८७ अहः... पुण्यात् = अहन् सर्व एकदेशवाचिन् संख्यात पुण्य इत्येतेभ्यः परस्मात्, संख्याव्ययादेः (५-४-८६) च, रात्रेः = रात्रिशब्दान्तात्, तत्पुरुषात् (५-४-८६) अच् (५-४-७५) । अहर्ग्रहणं द्वन्द्वार्थम् । **अहोरात्रः** २-४-२९ रात्रा.... इति पुंसि । **पूर्वरात्रः** । २-२-१ पूर्वा.... इति समासः ।

५-४-८८ अह्नो- एतेभ्यः = सर्वैकदेशसंख्यातपुण्यात्, (५-४-८७) संख्याव्ययादेः (५-४-८६) च, अह्नः = 'अहन्' इति शब्दस्य स्थाने, अह्नः = अह्न इत्यादेशो भवति । **सर्वाह्णः** । ८-४-७ अह्नो... इति नस्य णत्वम् । **द्वयह्नः** २-१-५१ तद्धि.... इति समासः । ५-४-९१ राजा... इति टच् । ४-३-११ काला .... इति ठञ् । तस्य ४-१-८८ द्विगो... इति लुक् ।

५-४-८९ न सं-- संख्यादेः= संख्यावाचिशब्दादेः अह्नः (५-४-८८) = अहन् शब्दस्य स्थाने, न= अह्न आदेशो न भवति, समाहारे ।

५-४-९० उत्त- उत्तमशब्दोऽन्तवचनः पुण्यशब्दमाह । उत्तमैकाभ्याम् = पुण्यशब्दादेकशब्दाच्च परस्य, न (५-४-८९) = अहन् शब्दस्य स्थाने 'अह्न' आदेशो न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-९१ राजाहः सखिभ्यष्टच् ॥ ११२

महाराजः । परमाहः । राजसखः । लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्नेह- नेपालस्य राज्ञी= नेपालराज्ञी ।

५-४-९२ गोरतद्धितलुकि ॥

परमगवः । पञ्चगवम् । अतद्धित- लुकीत्युक्तेर्नेह- पञ्चभिर्गोभिः क्रीतः पञ्चगुः ।

५-४-९३ अग्राख्यायामुरसः ॥

अश्वानामुरः = अश्वोरसम् । मुख्योऽश्व इत्यर्थः । अग्राख्यायामित्युक्तेर्नेह- देवदत्तस्योरः = देवदत्तोरः ।

५-४-९१ राजा- ६-३-३ ओजः .... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क)

५-४-६८ समासान्ताः ॥

(ख)

५-४-८६ तत्पुरुषस्य.... व्ययादेः ॥

५-४-९१ राजाहः सखिभ्यः (ख) (क) टच् इति ॥ अत्र राजाहः सखिभ्य इति पञ्चम्यन्तानुरोधेन अनुवर्तमानं षष्ठ्यन्तमपि तत्पुरुषस्येति पदं पञ्चम्यन्ताय कल्पते-तत्पुरुषादिति । तथा टच् इत्येकवचनानुसारेण समासान्ता इति बहुवचनान्तमपि समासान्त इत्येकवचनान्ताय कल्पते इति शिक्षको विमृश्य सति संभवे छात्रानपि बोधयित्वा सूत्रार्थं बोधयेत् । यथा- राजाहः सखिभ्यः + (ख=तत्पुरुषस्य =तत्पुरुषात्) = राजन् अहन् सखि इत्यन्तात् तत्पुरुषात्, (क)=समासान्तः, टच्=टच् प्रत्ययो भवति । इत्यर्थमुपदिश्य नेपालस्य राजा इति विग्रहे छात्रैः समासादिकार्यं साधयित्वा 'नेपालराजन्' इति श्यामपाटचां लिखित्वा ६-४-१४४ नस्त... सूत्रं २-४-२६ पर.... सूत्रं चोद्बोधयेत् । नेपालराजः । (अथ शिक्षक एवाऽवदध्यात्- **महाराजः** ६-३-४६आन्म...इत्यात्वम् । **परमाहः** २-४-२९ रात्रा... इति पुंसि ।) इति तत्पुरुष-समास-शिक्षण-रीतिः ।

अथ बहुव्रीहि-समास-शिक्षण-रीतिः ।

अत्र प्रथमं शिक्षकोऽधोनिर्दिष्टरूपेण पूर्वप्रयोगविषयं विशदयेत् । यथा- वत्साः ? समासेष्वन्यतमो बहुव्रीहिरपि वर्तते । तत्र अव्ययीभावतत्पुरुषयोरिव १-२-४३ प्रथ.... २-२-३० उप... सूत्राभ्यां समस्यमानानां पदानां मध्ये कस्यचनापि पूर्वप्रयोगो न निर्णीयते । यतः प्रायो बहुव्रीहौ सर्वाणि समस्यमानानि पदानि प्रथमानिर्दिष्टानि (प्रथमान्तपदबोध्यानि) भवन्ति । अतो बहुव्रीहिसमासे पूर्वप्रयोगस्य निर्णायकेष्वन्यतमं २-२-३५ सप्तमी.... सूत्रं प्रथमं प्रस्तूयते, इत्युपदेशपुरस्सरं तत् २-२-३५ सप्तमी.... सूत्रमुपदिशेत् ।

५-४-९२ गोर-गोः = गोशब्दान्तात्, तत्पुरुषात् (५-४-८६) टच् (५-१-९१) अतद्धितलुकि= तद्धितलुकोऽभावे । **पञ्चगुः** ५-१-३६ तेन... इति ठक् । तस्य ५-१-२८ अध्य.... इति लुक् । १-२-४८ गोस्त्रि... इति ह्रस्वः ।

५-४-९३ अग्रा-- अग्रशब्दोऽत्र मुख्यार्थवाची । अग्राख्यायामिति च पञ्चम्यर्थे सप्तमी । अग्राख्यायाम्+उरसः = मुख्यार्थवाची य उरश्शब्दस्तदन्तात्, तत्पुरुषात् (५-४-८६) टच् (५-४-९१) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-९४ अनोऽश्मायस्सरसां जाति-संज्ञयोः ॥

उपानसमिति जातिः । महानसमिति संज्ञा । अमृताश्म इति जातिः । पिण्डाश्म इति संज्ञा । कालायसमिति जातिः । लोहितायसमिति संज्ञा । मण्डूकसरसमिति जातिः । जलसरसमिति संज्ञा ।

५-४-९५ ग्रामकौटाभ्यां च तक्ष्णः ॥

ग्रामस्य तक्षा= ग्रामतक्षः ।

कुटचां भवः = कौटः । स चासौ तक्षा = कौटतक्षः ।

५-४-९६ अतेः शुनः' ॥ ९७

श्वानमतिक्रान्तः = अतिश्वो वराहः । अतिश्वी सेवा ।

५-४-९७ उपमाना'दप्राणिषु ॥ ९८

आकर्षः श्वेव = आकर्षश्वः ।

अप्राणिष्वित्युक्तेर्नेह- वानरः श्वेव वानरश्वा ।

५-४-९८ उत्तरमृगपूर्वाच्च सक्थ्नः ॥

उत्तरसक्थम् । मृगसक्थम् ।

पूर्वसक्थम् । फलकमिव सक्थि= फलकसक्थम् ।

५-४-९९ नावो द्विगोः' ॥ १००, १०१

द्विनावम् । अतद्धितलुकीत्यनुवृत्तेर्नेह- पञ्चभिर्नौभिः क्रीतः = पञ्चनौः ।

५-४-९४ अनो..... रसाम् = अनस् अश्मन्, अयस् सरस् इत्यन्तात्, तत्पुरुषात् (५-४-८६) टच् (५-४-९१) जाति संज्ञयोः = जातौ संज्ञायां च गम्यमानायाम् । **उपानसम्** उपगतमन इति २-२-१८ कुग... इति समासः । **महानसम्** महदन इति २-१-६१ सन्म.... इति समासः । ६-३-४६ आन्म... इत्यात्वम् । **अमृताश्मः** । **पिण्डाश्मः** । २-१-५७ विशे... इति समासः । शेषेषु चतुर्षु २-२-८ षष्ठी इति समासः ।

५-४-९५ ग्रामकौटाभ्याम्+तक्ष्णः=ग्रामकौटशब्दाभ्यां परो यस्तक्ष(न्) शब्दस्तदन्तात्, तत्पुरुषात् (५-४-८६) टच् (५-४-१) ।

५-४-९६ अतेः+शुनः= अतिशब्दात् परो यः श्व(न्) शब्दस्तदन्तात्, तत्पुरुषात् (५-४-८६) टच् (५-४-९१) । **अतिश्वो वराहः** । जववानित्यर्थः । अतिश्वी सेवा । अतिनीचेत्यर्थः ।

५-४-९७ उप-- अप्राणिषु = अप्राणिविषयकात् (विषयत्वं सप्तम्यर्थः) उपमानात् = उपमानवाचिनः परस्मात्, शुनः (५-४-९६) तत्पुरुषात् (५-४-८६) टच् (५-४-९१) । **आकर्षश्वः** २-१-५६ उप... इति समासः ।

५-४-९८ उत्त... वात्+च+ सक्थ्नः = उत्तर-मृग-पूर्व इत्येतेभ्यः+ उपमानात् (५-४-९७) च परो यः सक्थिशब्दस्तदन्तात्, तत्पुरुषात् (५-४-८६) टच् (५-४-९१) ।

५-४-९९ नावो- नावः = नौशब्दान्तात्, द्विगोः= द्विगुसमासात्, टच् (५-४-९१) अतद्धितलुकि (५-४-९२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-१०० **अर्धाच्च** ॥ १०१
अर्धं नावः = अर्धनावम् ।
५-४-१०१ खार्याः **प्राचाम्** ॥१०२
द्विखारम् । द्विखारि । अर्धखारम् । अर्धखारी ।
५-४-१०२ द्वित्रिभ्यामञ्जलेः ॥
द्व्यञ्जलम् । द्व्यञ्जलि । त्र्यञ्जलम् । त्र्यञ्जलि । अतद्धितलुकीत्यनुवृत्तेर्नेह- द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिः त्र्यञ्जलिः ।
५-४-१०३ अनसन्तान्नपुंसकाच्छन्दसि ॥
हस्तिचर्मे जुहोति । ऋषभचर्मे ऽभिषिञ्चति । देवच्छन्दसानि । मनुष्यच्छन्दसानि ।
(अनसन्तान्नपुंसकाच्छन्दसि वा वचनम्)
ब्रह्मसाम । ब्रह्मसामम् । देवच्छन्दः । देवच्छन्दसम् ।
५-४-१०४ **ब्रह्मणो** जानपदाख्यायाम्१०५ ॥
सुराष्टेषु ब्रह्मा= सुराष्टब्रह्मः ।

५-४-१०५ कुमहद्भ्यामन्यतरस्याम् ॥
कुब्रह्मः । कुब्रह्मा । महाब्रह्मः । महाब्रह्मा ।
५-४-१०६ द्वन्द्वाच्चुदषहान्तात् समाहारे ॥
वाक्त्वचम् । समिद्दृषदम् । वाग्विप्रुषम् । छत्रोपानहम् । समाहारे इत्युक्तेर्नेह- प्रावृट्शरदौ ।
५-४-१०७ **अव्ययीभावे** शरत्प्रभृतिभ्यः ॥ ११२
शरदःसमीपम्=उपशरदम् ।
प्रतिविपाशम् । अव्ययीभावे इत्युक्तेर्नेह-परमशरत् ।
(जराया जरश्च)
उपजरसम् ।
(प्रतिपरसमनुभ्योऽक्ष्णः)
अक्ष्णोऽभिमुखम्=प्रत्यक्षम् ।
अक्ष्णः परम्= परोक्षम् । परोक्षा क्रियेत्यादि तु अर्श (५-२-१२७) आद्यचि बोध्यम् । अक्ष्णो योग्यं समक्षम् । अक्ष्णः पश्चादन्वक्षम् ।

५-४-१०० अर्धात्+नावः (५-४-९९)= अर्धशब्दात् परो यो नौशब्दस्तदन्तात्, तत्पुरुषात् (५-४-८६) टच् (५-४-९१) । **अर्धनावम्** । २-२-२ अर्धं... इति समासः । क्लीबत्वं लोकात् ।

५-४-१०१ खार्याः = खारीशब्दान्ताद, द्विगोः (५-४-९९), अर्धाच्च (५-४-१००)+ खार्याः=अर्धशब्दात् परो, यः खारीशब्दस्तदन्तात्, तत्पुरुषात् (५-४-८६) टच् (५-४-९१) प्राचाम्= प्राचामाचार्यणां मते। **द्विखारम् । द्विखारि** । २-४-१७ स न... इति क्लीबत्वम् । **अर्धखारम्** क्लीबत्वं लोकात् ।

५-४-१०२ द्वित्रिभ्याम्+अञ्जलेः=द्वित्रिशब्दाभ्यां परो यो ऽञ्जलिशब्दस्तदन्ताद, द्विगोः (५-४-९९) टच् (५-४-९१) प्राचाम् (५-४-१०१) अतद्धितलुकि (५-४-९२) ।

५-४-१०३ अन--नपुंसकात्+अनसन्तात्= नपुंसके वर्तमानम् अन्नन्तम् असन्तं च यत् प्रातिपदिकं तदन्तात्, तत्पुरुषात् (५-४-८६) टच् (५-४-९१) छन्दसि= वेदे ।

५-४-१०४ ब्रह्मणः = ब्रह्म(न्)शब्दान्तात्, तत्पुरुषात् (५-४-८६) टच् (५-४-९१) जानपदाख्यायाम्= समासेन जानपदत्वमाख्यायते चेत् ।

५-४-१०५ कुमहद्भ्याम्+ ब्रह्मणः (५-४-१०४)कुमहद्भ्यां परो यो (ब्रह्मणः, ५-४-१०४) ब्रह्म (न्)शब्दस्तदन्तात्, तत्पुरुषात् (५-४-८६) टच् (५-४-९१) ।

५-४-१०६ द्वन्द्वा- चुदषहान्तात् = चवर्ग-दकार- षकार-हकारान्तात्, समाहारे = समाहारे विहितात्, द्वन्द्वात्=द्वन्द्वसमासात्, टच् (५-४-९१) ।

५-४-१०७ अव्य- शरत्प्रभृतिभ्यः=शरदादिगणपठितशब्दान्तात्, टच् (५-४-९१) अव्ययीभावे= अव्ययीभावसमासे ।

प्रति-अक्ष्णः परम्=परोक्षम् समासान्तविधानसामर्थ्यादव्ययीभावः । परोक्षे लिँडिति निर्देशात् परस्यौकारादेशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-१०८ अनश्च ॥ १०९
उपराजम् । अध्यात्मम् ॥
५-४-१०९ नपुंसकादन्यतरस्याम् ॥ ११२
उपचर्मम् । उपचर्म ।
५-४-११०नदीपौर्णमास्याग्रहायणीभ्यः ॥
उपनदम् । उपनदि । उपपौर्णमासम् । उपपौर्णमासि ।
उपाग्रहायणम् । उपाग्रहायणि ।
५-४-१११ झयः ॥
उपसमिधम् । उपसमित् ।
५-४-११२ गिरेश्च सेनकस्य ॥
उपगिरम् । उपगिरि ।

५-४-१०८ अन- २-४-८४ तृतीयासप्तम्यो... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी- प्रयोगो यथा-

(क) (ख) (ग)
४-१-१ ङ्याप्प्रातिपदिकात् ॥ **५-४-६८ समासान्ताः** ॥ ५-४-९१ राजाहः सखिभ्यः टच् ॥
(घ)
५-४-१०७ अव्ययीभावे शरत्प्रभृतिभ्यः ॥
५-४-१०८ अनश्च (क) (ख) (ग) (घ) ॥ इति ।

अनः + (क) = अन्नन्तात् प्रातिपदिकात्, (ख) = समासान्ताः = समासान्तः, (ग) = टच् (प्रकृते उपराजन् इति समुदायस्य अन्तावयवष्टच् प्रत्ययो भवति) (घ)= अव्ययीभावसमासे । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा उपराजन्+टच्= उपराजन्+अ इति श्यामपाट्यां लिखित्वा ४-१-७६ तद्धि... सूत्रमुद्बोध्य ४-१-१७ स्वादि... १-४-१८ यचि... इति भपदविषये १-१-६३ अचो... इति विषयेऽपि परीक्ष्य च ६-४-१४४ नस्तद्धिते- सूत्रमुपदिशेत् ।

५-४-१०९ नपुं ६-४-१४४ नस्तद्धिते-सूत्रानन्तरं सूत्रमिदं पाठचम् । नपुंसकात्=नपुंसके वर्तमानात्, अनः (५-४-१०८) अन्यतरस्याम्=वा टच् (५-४-९१) अव्ययीभावे (५-४-१०७) । अथ वर्म(न्) शब्दो नपुंसकलिङ्गे वर्तते,इति बोधयित्वा वर्मनि इति विग्रहे अधिवर्मन् इत्यवधि प्रक्रियां छात्रैः साधयित्वा ५-४-१०८ अन.... सूत्रं बाधयित्वा छात्रैरेव प्रकृतसूत्रसमन्वयं कारयित्वा 'अधिवर्मन् + अ' इति श्यामपाटचां लिखित्वा, 'उपराजम्' इत्यत्रेवाऽग्रिमप्रक्रियां छात्रैरेव साधयेत् । अधिवर्मम् । टचोऽभावपक्षे अधिसरित् (२-१-६ अन्य... सूत्रोदाहृते) इत्यत्रेव छात्रैरुच्यमानां प्रक्रियां शिक्षकः शृण्वन् अधिवर्मन् इत्यवस्थायां सत्यावश्यके ८-२-७ न लो... सूत्रमुद्बोधयेत् । अधिवर्म । अथ ५-४-१११ झयः- सूत्रमुपदिशेत् ।

५-४-११० नदी... णीभ्यः= नदी पौर्णमासी आग्रहायणी इत्यन्तात्, अन्यतरस्याम् (५-४-१०९) टच् (५-४-९१) अव्ययीभावे (५-४-१०७) ।

५-४-१११ झयः-५-४-१०९ नपुंसकादन्य... सूत्रानन्तरं सूत्रमिदं पाठचम् । झयः= झयन्तात् प्रातिपदिकात्, अन्यतरस्याम् (५-४-१०९) टच् (५-४-९१) अव्ययीभावे (५-४-१०७) । इत्यर्थमुपदिश्य पूर्वम् (२-१-६ अव्य... सूत्रे) उदाहृते अधिसरित् इत्यत्र प्रकृतसूत्र-प्रवृत्तौ अधिसरितम् इत्यपि रूपान्तरं सिध्यतीति बोधनपुरस्सरं छात्रैः साध्यमानां प्रक्रियां शृणुयात् । अथ २-१-११ विभाषा... सूत्रमुपदिशेत् ।

५-४-११२ गिरेः= गिरिशब्दान्ताद्, अन्यतरस्याम् (५-४-१०९) टच् (५-४-९१) अव्ययीभावे (५-४-१०७) सेनकस्य = सेनकमुनेर्मते । सेनकग्रहणं पूजार्थम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-११३ बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ॥ १६०, ११४

दीर्घे सक्थिनी यस्य स दीर्घसक्थः ।
विशालाक्षः । जलजाक्षी ।

५-४-११४ अङ्गुलेर्दारुणि ॥

द्व्यङ्गुलं दारु । पञ्चाङ्गुलं दारु ।
अङ्गुलिसदृशावयवं धान्यादीनां विक्षेपणकाष्ठमुच्यते । बहुव्रीहावित्युक्तेर्नेह-द्वे अङ्गुली प्रमाणमस्या द्व्यङ्गुला यष्टिः ।
दारुणीत्युक्तेर्नेह-पञ्चाङ्गुलिर्हस्तः ।

५-४-११५ द्वित्रिभ्यां ष मूर्ध्नः ॥

द्विमूर्धः । त्रिमूर्धः ।

५-४-११६ अप् पूरणीप्रमाण्योः ॥ ११७

कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । ६-३-३४ स्त्रियाः... इत्यत्र, अपूरणीति पुंवद्भावप्रतिषेधः प्रकृतसूत्रेणाप् प्रत्ययश्च प्रधानपूरण्यामेव । रात्रिः पूरणी वाच्या चेत्युक्तोदाहरणे मुख्या । तेनेह न-कल्याणी पञ्चमी यस्मिन् पक्षे कल्याणपञ्चमीकः पक्ष इति । स्त्री प्रमाणी यस्य स्त्रीप्रमाणः ।
(नेतुर्नक्षत्र उपसंख्यानम्)
मृगो नेता यासां रात्रीणां मृगनेत्रा रात्रयः ।
पुष्यनेत्राः । नक्षत्र इत्युक्तेर्नेह देवदत्तनेतृकाः ।
(छन्दसि च नेतुरुपसंख्यानम्)
बृहस्पतिनेत्रा देवाः । सोमनेत्राः ।
(मासाद् भृतिप्रत्ययपूर्वपदाट्ठज्विधिः)
पञ्चको मासो यस्य पञ्चकमासिकः कर्मकरः ।

५-४-११७ अन्तर्बहिर्भ्यां च लोम्नः ॥

अन्तर्लोमः प्रावारः । बहिर्लोमः पटः ।

५-४-११३ बहु - स्वाङ्गात् + सक्थ्यक्ष्णोः-स्वाङ्गवाचिनौ यौ सक्थ्यक्षि (न्) शब्दौ तदन्तात्, षच्= षच् प्रत्ययो भवति, बहुव्रीहौ । षित्वात् स्त्रियां ४-१-४१ षिद्गौ.... इति ङीष् ।

५-४-११४ अङ्गुलेः= अङ्गुल्यन्तात्, षच् (५-४-११३) बहुव्रीहौ (५-४-११३) दारुणि=दारुणि वाच्ये । **द्व्यङ्गुला यष्टिः** । २-१-५१ तद्धि.... इति तत्पुरुषसमासे ५-४-८६ तत्पु.... इत्यच् ।

५-४-११५ द्वित्रिभ्याम् + मूर्ध्नः=द्वित्रिभ्यां परो यो मूर्ध(न्) शब्दस्तदन्तात्, ष= षप्रत्ययो भवति, बहुव्रीहौ (५-४-११३) ।

५-४-११६ अप् पू- पूरणीप्रमाण्योः= पूरणार्थप्रत्ययान्तं यत् स्त्रीलिङ्गं तदन्तात् प्रमाण्यन्ताच्च, अप्= अप् प्रत्ययो भवति, बहुव्रीहौ (५-४-११३) । **तेनेह न-** अपूरणीति पुंवद्भावप्रतिषेधः, अप्प्रत्ययश्च नेति भावः । **कल्याणपञ्चमीकः पक्षः** अत्र तिरोहितावयवभेदस्य पक्षस्यान्यपदार्थतया रात्रिरप्रधानम् । ५-४-१५३ नद्यृ... इति कप् ।

नेतु - देवदत्तनेतृकाः ५-४-१५३ नद्यृ... इति कप् ।

मासा.- भृतिप्रत्ययपूर्वपदात्+मासात्= भृत्यर्थक-प्रत्ययान्त-पूर्वपदकात् परो यो मास- शब्दस्तन्तात्, ठज्विधिः= ठच् प्रत्ययो विधीयते, बहुव्रीहौ (५-४-११३) । उदाहरणे- पञ्च भृतिरस्य मासस्येति विग्रहे ५-१-५५ सोऽस्यां... इति भृत्यर्थे ५-१-२२ संख्या... इति कन् । पञ्चक इति भृत्यर्थकप्रत्ययान्तं तत्पूर्वकश्च मासशब्दः ।

५-४-११७ अन्तर्बहिर्भ्याम्+लोम्नः=अन्तर्बहिश्शब्दाभ्यां परो यो लोम(न्)शब्दस्तदन्तात्, अप् (५-४-११६) बहुव्रीहौ (५-४-११३) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-११८ अञ् नासिकायाः संज्ञायां नसं चाऽस्थूलात् ॥ १२१, ११९

द्रुरिव नासिकाऽस्य=द्रुणसः । गोनसः । संज्ञायामित्युक्तेर्नेह-तुङ्गनासिकः । अस्थूलादित्युक्तेर्नेह-स्थूलनासिको वराहः ।

(खुरखराभ्यां वा नस्)

खुरणाः । खरणाः ।

(पक्षेऽजपीष्यते)

खुरणसः । खरणसः ।

(शितिना अहिना अर्चना इति निगम इष्यते)

शितिः=कृष्णा नासिकास्य=शितिनाः ।

अहेरिव नासिकास्य=अहिनाः ।

अर्चा= प्रतिमा तस्या इवनासिकाऽस्य=अर्चनाः ।

५-४-११९ उपसर्गाच्च ॥

उन्नता नासिकाऽस्य=उन्नसः ।

प्रणसः ।

(वेर्ग्रो वक्तव्यः)

विगता नासिकाऽस्य=विग्रः ।

(ख्यश्च)

विख्यः । अत्र भट्टोजिदीक्षितः-कथं तर्हि विनसा हतबान्धवेति भट्टिः ? विगतया नासिकयोपलक्षितेति व्याख्येयमिति । नासिकापर्यायो नसाशब्दोऽप्यस्तीति केचित् । 'विनासा हतबान्धवा' इति वा पाठः ।

५-४-१२० सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरश्रैणीपदाजपदप्रोष्ठपदाः ॥

शोभनं प्रातरस्य= सुप्रातः । शोभनं श्वोऽस्य= सुश्वः । शोभनं दिवाऽस्य= सुदिवः । शारेरिव कुक्षिरस्य= शारिकुक्षः । चतस्रोऽश्रयोऽस्य= चतुरश्रः । एण्या इव पादावस्य=एणीपदः । अजपदः । प्रोष्ठपदः ।

५-४-१२१ नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥ १२२

अहलः । अहलिः । दुर्हलः । दुर्हलिः ।

सुहलः । सुहलिः । असक्थः । असक्थिः ।

दुःसक्थः । दुःसक्थिः । सुसक्थः । सुसक्थिः ।

हलिशक्त्योरिति केचित् पठन्ति ।

अशक्तः । अशक्तिः । दुःशक्तः ।

दुःशक्तिः । सुशक्तः । सुशक्तिः ।

५-४-१२२नित्यमसिँच् प्रजामेधयोः ॥

अप्रजाः । दुष्प्रजाः । सुप्रजाः ।

अमेधाः । दुर्मेधाः । सुमेधाः ।

५-४-११८ अञ् ना- अस्थूलात् + नासिकायाः = स्थूलपूर्वकभिन्नो यो नासिकाशब्दस्तदन्ताद्, अच्= अच् प्रत्ययो भवति, नसं च= नासिकाशब्दश्च नसादेशं लभते, संज्ञायाम् = समुदायेन संज्ञायां गम्यमानायाम्, बहुव्रीहौ (५-४-११३) । **द्रुणसः** ८-४-३ पूर्व... इति णत्वम् ।

शिति- अर्चनाः ६-३-६३ ङ्यापोः... इति ह्रस्वः ।

५-४-११९ उपसर्गात् = उपसर्गात् परस्मात्, नासिकायाः + अच् + नसं च (५-४-११८) बहुव्रीहौ (५-४-११३) । असंज्ञार्थं वचनम् । **प्रणसः** ८-४-२७ उप... इति णत्वम् ।

५-४-१२० सुप्रा... पदाः-- एतेऽच्प्रत्ययान्ता निपात्यन्ते, बहुव्रीहौ (५-४-११३) । **प्रोष्ठपदः** । प्रोष्ठो गौः ।

५-४-१२१ नञ्दुः सुभ्यः+ हलिसक्थ्योः= नञ् दुःसुभ्यः परौ यौ हलिसक्थिशब्दौ तदन्ताद्, अन्यतरस्याम् =वा, अच् (५-४-११८) बहुव्रीहौ (५-४-११३) ।

५-४-१२२ नित्य- नञ्दुःसुभ्यः (५-४-१२१)+ प्रजामेधयोः = नञ् दुःसुभ्यः परौ यौ प्रजामेधाशब्दौ तदन्ताद्, नित्यम्, असिँच्= असिँच् प्रत्ययो भवति, बहुव्रीहौ (५-४-११३) । अन्यतरस्याम् (५-४-१२१) इत्यननुवृत्त्यैव सिद्धे नित्यग्रहणं किमर्थम् ? इति चेत्, अत्र काशिका- एवं तर्हि नित्यग्रहणेनान्यत्रापि भवतीति सूच्यते ।

श्रोत्रियस्येव ते राजन् मन्दकस्याल्पमेधसः ।

अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी । इति । अत्र अल्पमेधस इति प्रयोगः समर्थित इति बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-१२३ बहुप्रजाश्छन्दसि ॥

बहुप्रजा निर्ऋतिमाविवेश ।
लोके तु बहुप्रजो जनः ।

५-४-१२४ धर्मादनिँच् केवलात् ॥ १२६

कल्याणधर्मा । केवलादित्युक्तेर्नेह- परमःस्वो धर्मोऽस्य= परमस्व-धर्मः ।

५-४-१२५ जम्भा सु-हरित-तृण-सोमेभ्यः ॥

सुजम्भा । हरितजम्भा । तृणं भक्ष्यं यस्य तृणमिव दन्ता यस्येति वा तृणजम्भा । सोमजम्भा । सुहरितेत्याद्युक्तेर्नेह-पतितजम्भः ।

५-४-१२६ दक्षिणेर्मा लुब्धयोगे ॥

दक्षिणे ईर्म= व्रणं यस्य दक्षिणेर्मा मृगः । व्याधेन कृतव्रण इत्यर्थः । लुब्धयोगे इत्युक्तेर्नेह- दक्षिणेर्म शकटम् ।

५-४-१२७ इच् कर्मव्यतिहारे ॥ १२८

केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि । दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तं दण्डादण्डि ।

५-४-१२८ द्विदण्डयादिभ्यश्च ॥

द्वौ दण्डौ यस्मिन् प्रहरणे तद् द्विदण्डि प्रहरणम् । द्विमुसलि ।

५-४-१२९ प्रसंभ्यां जानुनोर्ज्ञुः । १३० ॥

प्रकृष्टे जानुनी अस्य प्रज्ञुः ।
संज्ञुः ।

५-४-१३० ऊर्ध्वाद् विभाषा ॥

ऊर्ध्वज्ञुः । ऊर्ध्वजानुः ।

५-४-१२३ बहुप्रजाः = बहुप्रजस् इति असिँच्प्रत्ययान्तो निपात्यते, बहुव्रीहौ (५-४-११३) छन्दसि= वेदे ।

५-४-१२४ धर्मा- केवलात् + धर्मात्=एकस्मात् पूर्वपदात् परो यो धर्मशब्दस्तदन्तात्, अनिँच्,= अनिँच् प्रत्ययो भवति, बहुव्रीहौ (५-४-११३) ।

५-४-१२५ जम्भा- सुहरिततृणसोमेभ्यः + जम्भा= सुप्रभृतिभ्यः परो यो जम्भशब्दस्तदन्तात्, अनिँच् (५-४-१२४) प्रत्ययो निपात्यते, बहुव्रीहौ (५-४-११३) । जम्भो भक्ष्ये दन्ते च ।

५-४-१२६ दक्षिणेर्मा=दक्षिणेर्मन् इति अनिँच्प्रत्ययान्तो निपात्यते, बहुव्रीहौ (५-४-११३) लुब्धयोगे= व्याधयोगे गम्ये ।

५-४-१२७ इच्-कर्मव्यतिहारे=२-२-२७ तत्र....इति सूत्रेण विहिते बहुव्रीहौ, समासान्तः (५-४-६८) इच्=इच् प्रत्ययो भवति । ६-३-१३७ अन्ये... इति पूर्वपदस्य दीर्घत्वम् । अस्येच्प्रत्ययस्य तिष्ठद्गु (२-१-१७) प्रभृतिषु पाठादव्ययीभावेनाऽव्ययत्वम् ।

५-४-१२८ द्विदण्डयादिभ्यः (तादर्थ्ये चतुर्थ्येषा)=द्विदण्डिप्रभृति-शब्दसिद्धये, इच् (५-४-१२७) । अत्र काशिका-बहुव्रीह्यधिकारेऽपि तत्पुरुषात् क्वचिद् विधानमिच्छन्ति । निकुच्य कर्णौ धावति निकुच्यकर्णि धावति । प्रोह्य पादौ हस्तिनं वाहयति प्रोह्यपादि हस्तिनं वाहयति । मयूरव्यंसका (२-१-७२ दित्वात् समास इति ।

५-४-१२९ प्रसंभ्याम्=प्रसंभ्यां परस्य, जानुनोः=जानुशब्दस्य स्थाने, ज्ञुः=ज्ञु इत्यादेशो भवति, बहुव्रीहौ (५-४-११३) ।

५-४-१३० ऊर्ध्वाद् =ऊर्ध्वशब्दात् परस्य, विभाषा=वा, जानुनोर्ज्ञुः (५-४-१२९) बहुव्रीहौ (५-४-११३) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-१३१ ऊधसोऽनँङ् ॥ १३३
कुण्डमिव ऊधो यस्याः सा कुण्डोध्नी ।
(ऊधसोऽनँङि स्त्रीग्रहणं कर्तव्यम्)
नेह-महोधाः पर्जन्यः । घटोधो धैनुकम् ।

५-४-१३२ धनुषश्च ॥ १३३
पुष्पधन्वा ।

५-४-१३३ वा संज्ञायाम् ॥
शतधन्वा । शतधनुः ।

५-४-१३४ जायाया निङ् ॥
युवतिर्जाया यस्य युवजानिः ।
जानकीजानिः ।

५-४-१३५ गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥ १३७
उद्गन्धिः । पूतिगन्धिः । सुगन्धिः । सुरभिगन्धिः ।
(गन्धस्येत्वे तदेकान्तग्रहणम्)
नेह-शोभना गन्धाः = द्रव्याण्यस्य सुगन्ध आपणिकः ।

५-४-१३६ अल्पाख्यायाम् ॥
सूपो गन्धः = अल्पो यस्मिन् सूपगन्धि भोजनम् ।

५-४-१३७ उपमानाच्च ॥ १३८
पद्मगन्धिः ।

५-४-१३८ पादस्य लोपोऽहस्त्यादिभ्यः ॥
व्याघ्रपात् । अहस्त्यादिभ्य इत्युक्तेर्नेह-हस्तिपादः ।
कुसूलपादः ॥

५-४-१३९ कुम्भपदीषु च ॥
कुम्भपदी । पञ्चपदी ।

५-४-१३१ ऊधसः = ऊधश्शब्दाऽन्तस्य, बहुव्रीहेः (५-४-११३) स्थाने, अनँङ्= अनँङादेशो भवति । **कुण्डोध्नी** ४-१-२५ बहु... इति ङीष् । ६-४-१३४ अल्लो... इत्यल्लोपः ।

५-४-१३२ धनुषः = धनुःशब्दान्तस्य, बहुव्रीहेः (५-४-११३) स्थाने, अनँङ् (५-४-१३१)॥

५-४-१३३ वा सं धनुषः (५-४-१३२) बहुव्रीहेः (५-४-११३) वा= विभाषया, अनँङ् (५-४-१३१) संज्ञायाम् = संज्ञायां गम्यमानायाम् । पूर्वेण नित्ये प्राप्ते विकल्पार्थं वचनम् ।

५-४-१३४ जायायाः= जायाशब्दान्तस्य, बहुव्रीहेः (५-४-११३) स्थाने, निङ् = निङादेशो भवति । उदाहरणयोः ६-१-६४ लोपो... इति यलोपः ।

५-४-१३५ गन्ध- उत्पूतिसुसुरभिभ्यः= उद् पूति सु सुरभि इत्येतेभ्यः परस्य, गन्धस्य= गन्धशब्दस्य स्थाने, इत् = इकारादेशो भवति, बहुव्रीहौ (५-४-११३) ।

गन्धस्येत्वे- एकान्तग्रहणम्- एकान्त एकदेश इव अविभागेन लक्ष्यमाण इत्यर्थ इति भट्टोजिदीक्षितः । गन्धशब्दो गुणवाची द्रव्यवाची च । अत्र न्यासः - गुणगन्धे यथा स्याद्, द्रव्यगन्धे माभूदित्येवमर्थं गन्धस्येत्वे विधेये तदेकान्तग्रहणं कर्तव्यमिति । **आपणिकः** आपणे नियुक्तः ।

५-४-१३६ अल्पाख्यायाम् = अल्पार्थे वर्तमानस्य, गन्धस्य+इत् (५-४-१३५) बहुव्रीहौ (५-४-११३) । उदाहरणे गन्धशब्दोऽल्पवाची । सावधानम् । विग्रहे अल्पो गन्ध इत्यर्थो न । किं तर्हि सूपः अल्प इत्येवार्थः । उक्तं हि गन्धशब्दोऽल्पवाचीति ।

५-४-१३७ उपमानात्= उपमानवाचिशब्दात् परस्य, गन्धस्य+इत् (५-४-१३५) बहुव्रीहौ (५-४-११३) ।

५-४-१३८ पाद- अहस्त्यादिभ्यः = हस्त्यादिवर्जितात्, उपमानात् (५-४-१३७) परस्य, पादस्य= पादशब्दस्य, लोपः= लोपो भवति, बहुव्रीहौ (५-४-११३) ।

५-४-१३९ कुम्भपदीषु= कुम्भपदीप्रभृतिषु पादस्य लोपो ङीप् च निपात्यते स्त्रियाम्, बहुव्रीहौ (५-४-११३) । अत्र काशिका- यत्रोहोपमानपूर्वं संख्यापूर्वं च पठचते, तस्य सिद्धे लोपे नित्यङीबर्थं वचनमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-१४० **संख्यासुपूर्वस्य** ॥ १४१
द्विपात्। सुपात्।

५-४-१४१ वयसि **दन्तस्य दतृँ** ॥ १४५
द्विदन्। सुदन् कुमारः। वयसीत्युक्तेर्नेह- द्विदन्तः कुञ्जरः। सुदन्तः।

५-४-१४२ छन्दसि च ॥
पत्रदतमालभेत। उभयदत आलभते।

५-४-१४३ स्त्रियां संज्ञायाम् ॥
अयोदती। फालदती। संज्ञायामित्युक्तेर्नेह- समदन्ती।

५-४-१४४**विभाषा** श्यावारोकाभ्याम् ॥ १४५
श्यावदन्तः।श्यावदन्। अरोकदन्तः। अरोकदन्।

५-४-१४५ अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ॥
कुड्मलाग्रदन्। कुड्मलाग्रदन्तः। शुद्धदन्। शुद्धदन्तः। शुभ्रदन्। शुभ्रदन्तः। वृषदन्। वृषदन्तः। वराहदन्। वराहदन्तः। अत्र काशिका- अनुक्तसमुच्चयार्थश्चकारः। अहिदन्। अहिदन्तः। मूषिकदन्। मूषिकदन्तः। गर्दभदन्। गर्दभदन्तः। शिखरदन्। शिखरदन्तः। इति।

५-४-१४६ ककुदस्यावस्थायां **लोपः** ॥ १४९
अजातककुत्। पूर्णककुत्।
अवस्थायामित्युक्तेर्नेह-श्वेतककुदः।

५-४-१४७ त्रिककुत् पर्वते ॥
त्रिककुत्। संज्ञैषा पर्वतविशेषस्य। त्रिककुदोऽन्यः।

५-४-१४८ उद्विभ्यां **काकुदस्य** ॥ १४९
उत्काकुत्। विकाकुत्। काकुदं तालु।

५-४-१४० संख्यासुपूर्वस्य= संख्यावाचिशब्दपूर्वस्य सुपूर्वस्य च, पादस्य+लोपः (५-४-१३८) बहुव्रीहौ (५-४-११३)।

५-४-१४१ वय- संख्यासुपूर्वस्य (५-४-१४०) दन्तस्य= दन्तशब्दस्य स्थाने, दतृँ= दतृँ इत्यादेशो भवति, बहुव्रीहौ (५-४-११३) वयसि=वयसि गम्यमाने।

५-४-१४२ छन्दसि= वेदे, दन्तस्य+दतृँ (५-४-१४१) बहुव्रीहौ (५-४-११३)।

५-४-१४३ स्त्रियां- दन्तस्य+दतृँ (५-४-१४१) स्त्रियाम्= स्त्रीलिङ्गे, बहुव्रीहौ (५-४-११३) संज्ञायाम्= संज्ञायां गम्यमानायाम्।

५-४-१४४ विभा- श्यावारोकाभ्याम्=श्याव अरोक इत्येताभ्यां परस्य, दन्तस्य+दतृँ (५-४-१४१) विभाषा= वा, बहुव्रीहौ (५-४-११३)।

५-४-१४५ अग्रा- अग्रशब्दोऽन्ते यस्य सः = अग्रान्तः। कुड्मलाग्र इति यथा। अग्रा...हेभ्यः=अग्रशब्दान्ताच् शुद्धादिभ्यश्च परस्य, दन्तस्य+दतृँ (५-४-१४१) विभाषा (५-४-१४४) बहुव्रीहौ (५-४-११३)।

५-४-१४६ ककुदस्य=ककुदशब्दस्य, समासान्तः (५-४-६८) लोपः=लोपो भवति, अवस्थायाम्= अवस्थायां गम्यमानायाम्, बहुव्रीहौ (५-४-११३)। कालकृता अवयवोपचयादयो वस्तुधर्मा अवस्थाशब्देनोच्यन्ते।

५-४-१४७ त्रिककुत्= त्रिशब्दात् परस्य ककुदशब्दस्य समासान्तलोपो निपात्यते, पर्वते=पर्वते वाच्ये, बहुव्रीहौ (५-४-११३)।

५-४-१४८ उद्विभ्याम्-उद् वि इत्येताभ्यां परस्य, काकुदस्य= काकुदशब्दस्य, लोपः (५-४-१४६) बहुव्रीहौ (५-४-११३)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-१४९ पूर्णाद् विभाषा ॥

पूर्णकाकुत्। पूर्णकाकुदः।

५-४-१५० सुहृद्दुर्हृदौ मित्रामित्रयोः ॥

सुहृन्मित्रम्। दुर्हृदमित्रः।

मित्रामित्रयोरित्युक्तेर्नेह-सुहृदयः कारुणिकः। दुर्हृदयश्चौरः।

५-४-१५१उरः प्रभृतिभ्यः कप् ॥ १५४

व्यूढोरस्कः।

(अर्थान्नञः)

अनर्थकम्।

५-४-१५२ इनः स्त्रियाम् ॥

बहुदण्डिका शाला। बहुवाग्मिका सभा। स्त्रियामित्युक्तेरिह विकल्प (५-४-१५४) एव-बहुदण्डी। बहुदण्डिकः।

५-४-१५३ नद्यृतश्च ॥

बहुकुमारीको देशः। बहुकर्तृकः।

५-४-१४९ पूर्णात्-पूर्णशब्दात् परस्य, काकुदस्य (५-४-१४८) विभाषा=वा, लोपः (५-४-१४६) बहुव्रीहौ (५-४-११३)।

५-४-१५० सुहृद्दुर्हृदौ- सुदुः शब्दाभ्यां परस्य हृदयशब्दस्य स्थाने हृदादेशो निपात्यते, बहुव्रीहौ (५-४-११३) मित्रामित्रयो := मित्रे अमित्रे च वाच्ये। यथासंख्यम्।

५-४-१५१ उरः प्रभृतिभ्यः = उरः प्रभृत्यन्तात्, कप्=कप् प्रत्ययो भवति, बहुव्रीहौः (५-४-११३)। **व्यूढोरस्कः** ८-३-३८ सोप... इति विसर्गस्य सः। अत्र काशिका- पुमान्, अनड्वान्, पयः, नौः, लक्ष्मीरिति विभक्त्यन्ताः पठयन्ते, न तु प्रातिपदिकानि। तत्रेदं प्रयोजनम्- एकवचनान्तानामेव ग्रहणमिह विज्ञायेत, द्विवचनबहुवचनान्तानां मा भूदिति। तत्र ५-४-१५४ शेषाद् विभाषा इति विकल्प एव भवतीति। द्विपुमान्, द्विपुंस्कः। बहुपुमान्, बहुपुँस्कः।

५-४-१५२ इनः = इन्नन्तात्, स्त्रियाम्= स्त्रीलिङ्गे, कप् (५-४-१५१) बहुव्रीहौः (५-४-११३)।

५-४-१५३ नद्यृ- ५-४-१५४ शेषाद्... सूत्रानन्तरं सूत्रमिदं पाठयम्। नद्यृतः = नद्युत्तरपदात्, ऋदन्तोत्तरपदाच्च, कप् (५-४-१५१) बहुव्रीहौः (५-४-११३)। अर्थादत्र कप् प्रत्ययो नित्यं भवति। **बहुकुमारीकः** ७-४-१३ केऽण इति प्राप्तस्य ह्रस्वस्य ७-४-१४ न कपि-इति प्रतिषेधः। पूज्यः पिता यस्य सः पूज्यपितृकः पुत्रः। पूज्या माता यस्य स पूज्यमातृकः पुत्रः। पूज्यः पिता यस्याः सा पूज्यपितृका पुत्री। पूज्या माता यस्याः सा पूज्यमातृका पुत्री। इत्यत्र च्छात्रैः समासप्रक्रियां साधयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-१५४ शेषाद् विभाषा ॥ बहुमालकः । बहुमालाकः । बहुमालः ।	शेषादित्युक्तेर्नेह-व्याघ्रपात् । सुगन्धिः । प्रियपथः ।

इति बहुव्रीहि-समास-शिक्षण-रीतिः ।

अथ द्वन्द्वसमास-शिक्षण-रीतिः । द्वन्द्वसमासशिक्षणे प्रथमं शिक्षकश्चार्थान् मनसा स्वयं विमृशेत्- चार्थेषु मध्ये अन्वाचयेऽर्थे समासो न भवति, तत्र सामर्थ्याभावात्, इति तु स्फुटं प्रतीयते । यतः, भिक्षामट (भिक्षार्थं पर्यट) गां च आनय (यदि लभ्येत तदा गामप्यानय) इत्यत्र प्रधानं भिक्षा, गौरप्रधानम् । समुच्चयेऽर्थेऽपि सामर्थ्याऽभावाद् द्वन्द्वसमासस्तु न भवति । तथापि तत्र सामर्थ्यं कथं नास्ति ? इति विषये पुनरग्रेऽपि स्वयमेव मनसा विमृशेत् । यथा- कारके कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठी विभक्तिर्भवति । अन्यथा तु द्वितीयादयो भवन्ति । तथैव यदा पदार्थानां पृथक् पृथगन्वयविवक्षा तदा समुच्चयः । यथा- ईश्वरं गुरुं च भजस्व इत्यत्र ईश्वरस्य गुरोश्च भजनक्रियायां कर्मत्वेन पृथक्पृथगन्वयविवक्षा वर्तते । अतोऽत्र न समासः । यदा तु समुदितरूपेणाऽन्वयो विवक्ष्यते, तदा भवत्येव समासः । यथा- ईश्वरं च गुरुं च भजस्व= ईश्वरगुरू भजस्व इति । परन्तु विषयोऽयं गभीर इति नैनं विषयं साम्प्रतमुपदिशेत् । प्रथमं प्रविविक्षूणां बालानां मस्तिष्के विषयोऽयं न स्फुरति । अतोऽधोनिर्दिष्टरूपेणोपदिशेत् । वत्साः ? समासेष्वन्यतमो द्वन्द्वसमासोऽपि वर्तते । पूर्वोक्तेभ्यः समासेभ्यः समासोऽयमतीव सरल इति वदन् प्रथमं द्वन्द्वसमासे पूर्वप्रयोगनियमः पृथग् वर्तते इति बोधनपुरस्सरं २-२-३२ द्वन्द्वे घि-सूत्रमुपदिशेत् ।

५-४-१५४ शेषा- १-२-४८ गोस्त्रियो... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

५-४-६८ समासान्ताः ॥

(ख)

५-४-११३ बहुव्रीहौ... षच् ॥

(ग)

५-४-१५१ उरः प्रभृतिभ्यः कप् ॥

५-४-१५४ शेषाद् विभाषा (क) (ग) (ख) ॥ इति । अत्र प्रथमं यत्र, इतः पूर्वं दर्शितैः सूत्रैर्विभिन्नाः प्रत्यया लोपो वा (समासान्ताः) भवन्ति । तद्भिन्नोऽत्र शेषशब्देन बोध्यते, इति बोधयित्वा सूत्रार्थमुपदिशेत् । शेषात्= अनुक्तसमासान्तात् प्रातिपदिकात्, विभाषा+(क)+(ग) = विकल्पेन समासान्तः कप् प्रत्ययो भवति, (ख)= बहुव्रीहौ= बहुव्रीहिसमासे । इति । सरसि जलं स्वच्छम्, इति व्यस्तः प्रयोगः । स्वच्छं जलं यस्मिन् (सरसि) इति विग्रहे पूर्ववद् बहुव्रीहिसमासं छात्रैः साधयित्वा 'स्वच्छजल' इति श्यामपाटचां लिखित्वा, अत्र पूर्वं दर्शितानि (पूर्वोक्तानि) सूत्राणि न प्रवर्तन्ते । अतः प्रकृतसूत्रेण विकल्पेन कप् प्रत्यये स्वच्छजलकशब्दो भवति । अत्रा ऽन्यपदार्थवाची सरश्शब्दः क्लीबे वर्तते । अतः स्वच्छजलकशब्दोऽपि क्लीबे भवति । स्वच्छजलकं सरः । कप् प्रत्यया ऽभावे स्वच्छजलं सरः । इति बोधयेत् ।(**बहुमालकः** ७-४-१५ आपो... इति वैकल्पिक - ह्रस्वः ।) अथ ५-४-१५३ नद्यृ... सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५-४-१५५ न संज्ञायाम् ॥ १६०

विश्वे देवा अस्य विश्वदेवः ।

५-४-१५६ ईयसश्च ॥

बहवः श्रेयांसोऽस्य= बहुश्रेयान् । बह्व्यः श्रेयस्योऽस्य= बहुश्रेयसी ।

५-४-१५७ वन्दिते भ्रातुः ॥

प्रशस्तो भ्राताऽस्य=प्रशस्तभ्राता ।सुभ्राता । वन्दिते इत्युक्तेरिह भवत्येव-मूर्खभ्रातृकः ।

५-४-१५८ ऋतश्छन्दसि ॥

हता माताऽस्य=हतमाता । हतपिता । सुहोता । लोके तु भवत्येव-हतमातृकः । हतपितृकः । सुहोतृकः ।

५-४-१५९ नाडीतन्त्र्योः स्वाङ्गे ॥

बहुनाडिः कायः । बहुतन्त्रीर्ग्रीवा । स्वाङ्गे इत्युक्तेरिह भवत्येव-बहुनाडीकः स्तम्भः । बहुतन्त्रीका वीणा ।

५-४-१६० निष्प्रवाणिश्च ॥

निर्गता प्रवाणी यस्य निष्प्रवाणिः पटः । समाप्तवानः । नव इत्यर्थः ।

इति पञ्चमाध्याये
चतुर्थः पादः

इति पञ्चमोऽध्यायः

५-४-१५५ न सं- बहुव्रीहौ (५-४-११३) संज्ञायाम्=संज्ञायां गम्यमानायाम्, न= कब् न भवति ।

५-४-१५६ ईयसः= ईयसन्ताद्, बहुव्रीहौ (५-४-११३) न (५-४-१५५)। **बहुश्रेयसी** १-२-४८ गोस्त्रि... इति प्राप्तो ह्रस्वस्तत्रैवोक्तेन ईय... इति वार्तिकेन प्रतिषिध्यते ।

५-४-१५७ वन्दिते+भ्रातुः=पूजितेऽर्थे यो भ्रातृशब्दस्तदन्ताद्, न (५-४-१५५) बहुव्रीहौ (५-४-११३) ।

५-४-१५८ ऋतः= ऋदन्ताद्, न (५-४-१५५) बहुव्रीहौ (५-४-११३), छन्दसि= वेदे ।

५-४-१५९ नाडी- स्वाङ्गे + नाडीतन्त्र्योः= स्वाङ्गवाचिनौ यौ नाडीतन्त्रीशब्दौ तदन्ताद् न (५-४-१५५), बहुव्रीहौ (५-४-११३) । **बहुतन्त्रीर्ग्रीवा** तन्त्री- शब्दो धमनीवाची । १-२-४८ गोस्त्रि... इति ह्रस्वस्तु न तन्त्रीशब्दस्य स्त्रीप्रत्ययान्तत्वाऽभावात् ।

५-४-१६० निष्प्रवाणिः = निष्प्रवाणि इति- कबभावविशिष्टो निपात्यते बहुव्रीहौ (५-४-११३। प्रवाणी= तन्तुवायशलाका ।

इति पञ्चमाऽध्याये
चतुर्थः पादः

इति पञ्चमोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ षष्ठोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ षष्ठाध्याये
प्रथमः पादः
॥ ॐ नमः श्री जगदम्बायै ॥

६-१-१ एकाचो द्वे प्रथमस्य ॥ ११
६-१-२ अजादेर्द्वितीयस्य ॥११
६-१-३ न न्द्राः संयोगादयः ॥
उन्दिदिषति । अड्डिडिषति । अर्चिचिषति ।
(यकारपरस्य रेफस्य न प्रतिषेधः)
अरार्यते ।
(ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यम्)
ईर्ष्यियिषति । ईर्ष्यिषिषति ।
(कण्ड्वादीनां तृतीयस्यैकाच इति वक्तव्यम्)
कण्डूयियिषति । असूयियिषति ।
(यथेष्टं नामधातुषु)
पुपुत्रीयिषति । पुतित्रीयिषति ।
पुत्रीयियिषति । पुपुतित्रीयियिषति ।
पुत्रीयिषिषति ।
६-१-४ पूर्वोऽभ्यासः ॥
६-१-५ उभे अभ्यस्तम् ॥६

६-१-१ एका- प्रथमस्य+एकाचः=प्रथमस्य एकाचः स्थाने, द्वे=द्वे उच्चारणे भवत इत्यधिक्रियत आ ६-१-११ चङि-सूत्रात् ।
६-१-२ अजादेः- अच्चासौ आदिः=अजादिः । राजदन्ता (२-२-३१) दित्वादादिशब्दस्य परनिपातः ।
तस्मात्= अजादेः=आदिभूतादचः परस्य, द्वितीयस्य, एकाचः + द्वे (६-१-१) ।
६-१-३ न न्द्रा- अजादेः (६-१-२)=आदिभूतादचः परत्रत्याः, संयोगादयः= संयोगादौ वर्तमानाः, न्द्राः= नकार- दकार- रेफाः, न=द्विर्न भवन्ति।अड्डिडिषति-अड्डँ अभियोगे (३४८) दोपधः । द्विर्वचने कर्तव्ये ष्टुत्वमसिद्धम् ।
यकारपरस्य =यकारः परो यस्मात् स यकारपरः, तस्य । **अरार्यते** ऋ (९३६, १०९७) धातोः ३-१-२२ धातो... सूत्रस्थ- सूचि... वार्तिकेन यङ् । ७-४-३० यङि... इति गुणः ।
ईर्ष्यतेः=ईर्ष्यधातोः,तृतीयस्य=तृतीयव्यञ्जनस्य, इति केचित् । आद्यमुदाहरणं तन्मते । तृतीयैकाच इत्यन्ये । अन्त्यमुदाहरणं तन्मते ।
६-१-४ पूर्वो- ६-१-१० श्लौ... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- ६-१-१ एकाचो द्वे प्रथमस्य ॥
६-१-२ अजादेर्द्वितीयस्य ॥ ६-१-४ पूर्वोऽभ्यासः ॥ इति ॥
अस्मिन् सूत्रे पूर्व इत्युच्यते तत्र कस्य पूर्व इत्याकाङ्क्षा युष्माकं जागर्ति न वा ? इति शिक्षकः पृच्छेच्छात्रान् । तेभ्य उत्तरे आगते ६-१-१ सूत्रे 'द्वे' इति पदं दर्शयता शिक्षकेण यत् प्रकृतं 'द्वे' इति तयोः पूर्व इति बोधयता ६-१-१ एकाचो... इति प्रकरणे द्विरुक्तस्य पूर्वो भाग इति फलितोऽर्थ उपदेश्यः । पूर्वः= ६-१-१ एकाचो... इति प्रकरणे द्विरुक्तस्य पूर्वो भागः, अभ्यासः= अभ्याससंज्ञो भवति= अभ्यास हो= अभ्यास है । प्रकृते प्रथमो हु अभ्याससंज्ञो जात इति तदुपरि √ इदं चिह्नं देयम् । यथा-
'हु हु'+ति । इति श्यामपाट्यां दर्शयितव्यम् । अथ ७-४-६२ कु होश्चुः- सूत्रमुपदेश्यम् ।
६-१-५ उभे- १-१-५ क्ङिति च- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र सूत्रेऽपि पूर्वे (६-१-४ पूर्वो....) सूत्रे इव 'द्वे' इति प्रकृतं (६-१-१) वर्तते । तेन ६-१-१ एकाचो... इति प्रकरणे कृतद्वित्वस्येत्यर्थः स्वीकार्य इति बोधनपुरस्सरमर्थमुपदिशेत् । यथा- उभे=६-१-१ एकाचो...इति प्रकरणे कृतद्वित्वस्य उभे समुदिते, अभ्यस्तम्= अभ्यस्तसंज्ञे भवतः- अभ्यस्त हुन् = अभ्यस्त हैं । इति । अनेन सूत्रेण 'जुहु' इति समुदितमभ्यस्तम् इति बोधयेत् । अथ ७-१-३ झोऽन्त इति सूत्रमुद्बोध्य तस्य बाधकम् ७-१-४ अद... सूत्रमुपस्थापयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-६ जक्षित्यादयः षट् ॥
जक्षिजागृदरिद्राणां चकासेः शास एव च ।
दीधीवेव्योश्च सप्तानां जक्षित्यादावुपग्रहः ॥

६-१-७ तुजादीनां दीर्घोऽभ्यासस्य ॥
तूतुजानः । मामहानः । दाधार । अत्र काशिका- दीर्घश्चैषां छन्दसि प्रत्यय विशेषे एव दृश्यते । ततोऽन्यत्र न भवति । तुतोज शबलान्, इति ।

६-१-८ लिँटि धातोरनभ्यासस्य ॥११
(द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् ।)
यो जागार । दाति प्रियाणि ।

६-१-९ सन्यङोः ॥
पिपठिषति । बोभूयते ।

६-१-१० श्लौ ॥
जुहोति

६-१-६ जक्षि- जक्ष् इत्यादयः, इतिच्छेदः । जक्ष्= जक्ष्धातुः, इत्यादयः+ षट्= जागृप्रभृतयः षड् धातवश्च, अभ्यस्तम् (६-१-५) । इत्यादय इत्यत्र इति शब्देन जक्ष् धातुर्गृह्यते, अतद्गुणसंविज्ञानो बहुव्रीहिः । अतो जागृप्रभृतय इत्युक्तम् । जक्ष् प्रभृतयः सप्त धातवः अभ्यस्तानि इति भावः ।

६-१-८ लिँटि- ३-४-८२ परस्मै... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

	(क)	(ख)	(ग)
६-१-१	एकाचो	द्वे	प्रथमस्य ॥
	(घ)	(ङ)	
६-१-२	अजादेः	द्वितीयस्य	॥

६-१-८ लिँटि धातोरनभ्यासस्य (ग) (क) (ख) (घ) (ङ) (क) (ख) ॥ इति ।

अत्र शिक्षकेण ६-१-१० श्लौ- सूत्रार्थ-शिक्षण- प्रसङ्गे बोधितो विषय उद्बोधनीयः । तत्पश्चादेव प्रकृतसूत्रार्थो बोधयितव्यः । यथा धातोः, अनभ्यासस्य (ग)= प्रथमस्य (क)= एकाचः, (ख)=द्वे, (घ)= अजादेः= आदिभूतादचः परस्य तु (ङ)= द्वितीयस्य, (क)= एकाचः, (ख)=द्वे=द्वे उच्चारणे भवतः, लिँटि=लिँटि परे । इत्यर्थम्, अथवा शिक्षको बालानामुपलालनामनुसृत्य "धातोः प्रथमस्य एकाचः द्वे लिँटि" इत्येतावन्तमेवार्थमुपदिशेत् । अथ लक्षणसमन्वयं छात्रैः कारयित्वा 'भूव् भूव् + अ' इति श्यामपाट्यां लिखित्वा ६-१-४ पूर्वोऽभ्यासः- सूत्रमुद्बोध्य ७-४-६० हलादिः... सूत्रमुपदिशेत् ।

६-१-९ सन्य- ३-१-७ धातोः कर्मणः... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । एतत्सूत्रार्थं ६-१-१० श्लौ- सूत्रस्येव बोध्यः । केवलं तत्र पठ्यमानेन 'श्लौ' इति पदेन अत्र पठ्यमानं 'सन्यङोः' इति पदं विनिमातव्यम् । यथा- सन्यङोः= सन्नन्तस्य यङन्तस्य च, धातोः, अनभ्यासस्य, प्रथमस्य एकाचः, द्वे, अजादेर्द्वितीयस्य द्वे इति । सावधानम् । ६-१-८ लिँटि... सूत्रे लिँटि=लिँटि परे, इतिवत्, सन्यङोः= सनि यङि च परे, इत्यर्थ इति तु न प्रमदितव्यम् । इति बोधयित्वाऽभ्यासकार्यप्रसङ्गे ७-४-७९ सन्य... सूत्रमुद्बोध्य तत् सूत्रं प्रकृते प्रवर्तते न वेतिच्छात्रान् परीक्षेत । अथ 'पिपठ्+इ+स' इति श्यामपाट्यां लिखित्वा छात्रानधोनिर्दिष्टरूपेण बोधयेत् । वत्साः ? प्रथमं व्याकरणमारभमाणाश्छात्राः क आदेशः ? कः प्रत्ययः ? कश्च प्रत्ययावयवः ? इति न बुध्यन्ते । अतः पूर्वम् गृहेषु इत्यत्र ८-३-५७ इण्कोः- सूत्रेण षत्वं साधितं ततः क्रमशोऽग्रेऽपि तथैव कृतम् । वस्तुतस्तु इण्कुभ्यां परस्य यस्य कस्यापि सकारस्य स्थाने षकारो न भवति । किन्तु आदेशरूपस्य, प्रत्ययावयवस्य च सकारस्य स्थाने भवति । इति वदन् ८-३-५९ आदेश... सूत्रमुपदिशेत् ।

६-१-१० श्लौ- २-४-७५ जुहो... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

	(क)	(ख)	(ग)
६-१-१	एकाचो	द्वे	प्रथमस्य ॥
	(घ)	(ङ)	
६-१-२	अजादेः	द्वितीयस्य ॥	
		(च) (छ)	
६-१-८	लिँटि	धातोः अनभ्यासस्य ॥	

(ख) (घ) (ङ) (क) (ख) श्लौ ॥ इति ।

६-१-१० (च) (छ) (ग) (क) (ख) (घ) (ङ) (क) (ख) श्लौ ॥ इति ।

अस्यार्थोपदेशप्रसङ्गे अभ्यासो नाम ६-१-१ एकाचो... इति प्रकरणे द्विरुक्तस्य पूर्वो भाग इति अनुपदमेव स्फुटीभविष्यति इति शिक्षकश्छात्रान् बोधयेत् । अथ प्रकृतसूत्रार्थः - (च)= धातोः, (छ)= अनभ्यासस्य, (ग)= प्रथमस्य, (क)= एकाचः (एकः अच् यस्य स एकाच्, अर्थाद् धातोः प्रथमस्वरेण सह यावन्ति व्यञ्जनान्युच्चारयितुं शक्यन्ते, तावद्व्यञ्जनविशिष्टः प्रथमः स्वरः प्रकृते 'एकाच्' शब्देन बोध्यते । यथा 'प्रच्छ्' इत्यत्र सर्वोऽपि समुदायः प्रथमैकाच् । पठ् इत्यत्र च समुदायं एव प्रथम एकाच् । गणि इत्यत्र गण् इति प्रथम एकाच् । कथि इत्यत्र च कथ् इति प्रथम एकाच् ईप्स ईत्यत्र प्स इति द्वितीय एकाच् । इत्यादि श्यामपाट्यां लिखित्वा बोधयेत्) (ख)= द्वे उच्चारणे भवतः । (घ) अजादेः=आदिभूतादचः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-११ चङि ॥

अचूचुरत्।

६-१-१२ दाश्वान् साह्वान् मीढ्वाँश्च ॥

(कृञादीनां के द्वे भवत इति वक्तव्यम्)

चक्रम्। चिक्लिदम्।

(चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्य)

चराचरः। चलाचलः। पतापतः। वदावदः। पक्षे चरः। चलः। पतः। वदः।

(हन्तेर्घत्वं च)

घनाघनः। हनः।

(पाटेर्णिलुक् चोक् च दीर्घश्चाभ्यासस्य)

पाटूपटः। पाटः।

६-१-१३ ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे ॥१४,३१

कारीषगन्ध्यायाः पुत्रः=कारीषगन्धीपुत्रः।

कारीषगन्धीपतिः।

पुत्रपत्योरित्युक्तेर्नेह-कारीषगन्ध्याकुलम्।

६-१-१४ बन्धुनि बहुव्रीहौ ॥

कारीषगन्ध्या बन्धुरस्य=कारीषगन्धीबन्धुः।

बहुव्रीहावित्युक्तेर्नेह-कारीषगन्ध्याया बन्धुः=कारीषगन्ध्याबन्धुः।

(मातज्-मातृक-मातृषु वा)

कारीषगन्धीमातः। कारीषगन्ध्यामातः।

कारीषगन्धीमातृकः। कारीषगन्ध्यामातृकः।

कारीषगन्धीमाता। कारीषगन्ध्यामाता।

बहुव्रीहावित्युक्तेर्नेह- कारीषगन्ध्याया माता= कारीषगन्ध्यामाता।

परस्य तु, (ङ) द्वितीयस्य,(क)=एकाचः, (ख)= द्वे उच्चारणे भवतः। अर्थात् प्रथमैकाचः। सकृदुच्चारणप्रसङ्गे प्रथमैकाचो द्विरुच्चारणं भवति (यथा हु इत्यस्य प्रथमैकाचः सकृदुच्चारणप्रसङ्गे हुहु इति द्विरुच्चार्यते) श्लौ=परतः श्लौ सति। अत्र "धातोः प्रथमस्य एकाचः द्वे श्लौ" इत्येतावन्तमेवाऽर्थं वा शिक्षको विचार्योपदिशेत्। अत्र लक्षण-समन्वयं यथासंभवं छात्रैः कारयेत्। अथ श्यामपाट्यां 'हुहु+ति' इति लिखित्वा अनुपदमेव स्फुटीभविष्यतीति पूर्वमुक्तं विषयमुपदिशामीति वदन् ६-१-४ पूर्वोऽभ्यासः- सूत्रमुपदिशेत्।

६-१-११ चङि- १-१-४७ एच इग्... इतिसूत्रानन्तरं सूत्रमिदं पाठ्यम्। अस्यापि ६-१-८ लिँटि... सूत्रस्येवार्थः। केवलं तत्रत्येन 'लिँटि' इति पदेन अत्रत्यं चङि इति पदं विनिमातव्यम्। इत्यपदिश्यच्छात्रैरुच्यमानं प्रकृतसूत्रार्थं श्रुत्वा मध्ये मध्ये साहाय्यं ददच्छात्रैरैव लक्षणसमन्वयं कारयित्वा हलादिशेषावधिच्छात्रैः साधयित्वा 'अचु+चुर्+इ+अ+ति' इति श्यामपाट्यां लिखित्वा ७-४-९३ सन्वल्लघुनि... सूत्रमुपदिशेत्।

६-१-१२ दाश्वान्- दाशृँ दाने (८८२) इतिधातोः क्वसौ द्विर्वचनाभाव इडभावश्च निपात्येते। दाश्वांसो दाशुषः सुतमिति। **साह्वान्** षहँ मर्षणे (८५२) इति धातोः परस्मैपदम् उपधादीर्घो द्विर्वचनाभाव इडभावश्च निपात्यन्ते। अनुदात्तेत्वात् परस्मैपदस्यापि निपातनं बोध्यम्। साह्वान् बलाहकः। **मीढ्वान्**- मिहँ सेचने (९९२) इति धातोः क्वसौ द्विर्वचनाभाव इडभाव उपधादीर्घो ढत्वं च निपात्यन्ते। मीढ्वस्तोकाय तनयाय मृडय। एकवचनमतन्त्रम्।

कृञा-चक्रम्। ३-३-५८ ग्रहवृ... सूत्रस्थ- घञर्थे... वार्तिकेन कः।

चरि- आगमविधानसामर्थ्याद् हलादिशेषो न भवति। उदाहरणेषु ३-१-१३४ नन्दि... इत्यच्।

हन्ते-अचि वा द्वित्वमभ्यासहकारस्य घत्वमाक् चाऽभ्यासस्य। अनभ्यासहकारस्य ७-३-५५ अभ्या.. इति कुत्वम्।

पाटे-अचि परे पाटेर्णिलुक्, द्वित्वम्, अभ्यासस्य ऊक्, दीर्घश्च, वा। ६-४-५१ णेर... इति सिद्धे णिलोपवचनं स्थानिवद्भावेनोपधावृद्धिर्माभूदित्यर्थम्।

६-१-१३ ष्यङः=ष्यङन्तस्य स्थाने, सम्प्रसारणम् = सम्प्रसारणं भवति, पुत्रपत्योः= पुत्रपतिशब्दयोरुत्तरपदयोः, तत्पुरुषे= तत्पुरुषसमासे। कारीषगन्ध्या ४-१-७८ अणि... इति ष्यङ्। ४-१-७४ यङः... इति चाप्।

६-१-१४ बन्धु-ष्यङः+ सम्प्रसारणम् (६-१-१३) बन्धुनि= बन्धुशब्दे उत्तरपदे, बहुव्रीहौ= बहुव्रीहिसमासे। अत्र काशिका- बन्धुनीति नपुंसकलिङ्गनिर्देशः शब्दरूपापेक्षया, पुंलिङ्गाभिधेयोऽयं बन्धुशब्द इति।

मात-ष्यङः+ सम्प्रसारणम् (६-१-१३) वा, बहुव्रीहौ (६-१-१४) मातच् प्रभृतिषूत्तरपदेषु। अत एव ज्ञापकाद् मातृशब्दस्य पक्षे मातजादेशः कब्विकल्पश्च। अन्यथा ५-४-१४३ नद्यृ... इति नित्यं कप् स्यात्। चित्त्वसामर्थ्याच्चित्स्वरो बहुव्रीहिस्वरं बाधते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१५ वचिस्वपियजादीनां किति ॥१७,१६

उक्तः । उक्तवान् । उच्यते । सुप्तः । सुप्तवान् । सुप्यते । इष्टः । इष्टवान् । इज्यते ।

यजिर्वपिर्वहिश्चैव वसिर्वेञ् व्येञ् क्रमात्
ततः ह्वेञ् वदिः श्वयतिश्चैव यजाद्याः स्युरिमे नव ॥

६-१-१६ ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छति-भृज्जतीनां ङिति च ॥१७

गृहीतः । गृहीतवान् । गृह्णाति । जीनः । जीनवान् । जिनाति । ऊयतुः । ऊयुः । विद्धः । विद्धवान् । विध्यति । उशितः ।उशितवान् । उशन्ति । विचितः । विचितवान् । विचति । वृक्णः । वृक्णवान् । वृश्चति । पृष्टः । पृष्टवान् । पृच्छति । भृष्टः। भृष्टवान् । भृज्जति ।

६-१-१७ लिँटचभ्यासस्योभयेषाम् ॥

उवाच । सुष्वाप । इयाज । जग्राह । जिज्यौ । उवाय । विव्याध । उवाश । विव्याच । वव्रश्च । पप्रच्छ । बभ्रज्ज ।

६-१-१८ स्वापेश्चङि ॥

असूषुपत् ।

६-१-१९ स्वपि-स्यमि-व्येञां यङि ॥ २१

सोषुप्यते । सेसिम्यते । वेवीयते ।

६-१-२० न वशः ॥

वावश्यते ।

६-१-२१ चायः की ॥

चेकीयते ।

६-१-२२ स्फायः स्फी निष्ठायाम् ॥ २८

स्फीतः । स्फीतवान् ।

६-१-२३ स्त्यः प्रपूर्वस्य ॥

प्रस्तीमः । प्रस्तीतः । प्रस्तीमवान् । प्रस्तीतवान् । प्रपूर्वस्येत्युक्तेर्नेह- स्त्यानः । स्त्यानवान् ।

६-१-१५ वचि...दीनाम्= वचेः स्वपेर्यजादीनां स्थाने, सम्प्रसारणम् (६-१-१३) किति= किति परे । **इष्टः** ८-२-३६ व्रश्च... इति षत्वम् ।

६-१-१६ ग्रहि...तीनाम्=ग्रहप्रभृतीनां स्थाने, सम्प्रसारणम् (६-१-१३) ङिति= ङिति परे, किति (६-१-१५) च । गृहीतः ७-२-३७ ग्रहो... ईत दीर्घः । **जीनः** ६-४-२ हल इति दीर्घः । ८-२-४४ ल्वादिभ्य इति निष्ठानत्वम् । **जिनाति**-प्रागवद् दीर्घे ७-३-८० प्वादी...इति ह्रस्वः ।

विचति तौदादिकः शः । अतः १-२-४ सार्व... इति ङिद्वद्भावः ।

वृक्णः ८-२-३ नमु... सूत्रस्थेन निष्ठा... इति वार्तिकेन षत्वे कर्तव्ये निष्ठादेशः सिद्धः, कुत्वे कर्तव्ये त्वसिद्ध एव । अतः कुत्वे कर्तव्ये झल्परत्वं प्रतीयते; षत्वे कर्तव्ये तु नेति बोध्यम् ।

६-१-१७ लिँटच-उभयेषाम्= वच्यादीनां (६-१-१५) ग्रह्यादीनां (६-१-१६) च अभ्यासस्य=अभ्यासस्य स्थाने, सम्प्रसारणम् (६-१-१३) लिटिँ=लिँटि परे ।

६-१-१८ स्वापेः= ण्यन्तस्य स्वपेः स्थाने, सम्प्रसारणम् (६-१-१३) चङि= चङि परे ।

६-१-१९ स्वपि... व्येञाम्= स्वप्प्रभृतीनां स्थाने सम्प्रसारणम् (६-१-१३) यङि=यङि परे ।

६-१-२० न वशः- वशः= वश्धातोः स्थाने, सम्प्रसारणम् (६-१-१३) न=न भवति, यङि (६-१-१९) । ६-१-१६ ग्रहि... इति प्राप्तौ प्रतिषेधः ।

६-१-२१ चायः= चाय्धातोः स्थाने, की= की इत्यादेशो भवति, यङि (६-१-१९) ।

६-१-२२ स्फायः= स्फाय्धातोः स्थाने, स्फी= स्फी इत्यादेशो भवति, निष्ठायाम्=निष्ठासंज्ञके प्रत्यये परे ।

६-१-२३ स्त्यः-प्रपूर्वस्य= प्रपूर्वकस्य, स्त्यः= स्त्याधातोः स्थाने, सम्प्रसारणम् (६-१-१३) निष्ठायाम् (६-१-२२) । **प्रस्तीमः** ८-२-५४) प्रस्त्यो... इति वैकल्पिकं निष्ठामत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-२४ द्रवमूर्तिस्पर्शयोः श्यः ॥२६
शीनं घृतम् । शीतं जलम् । द्रवमूर्ति-स्पर्शयोरित्युक्तेर्नेह-संश्यानो वृश्चिकः ॥

६-१-२५ प्रतेश्च ॥
प्रतिशीनः । प्रतिशीनवान् ।

६-१-२६ विभाषाऽभ्यवपूर्वस्य ॥२८
अभिशीनम्, अभिश्यानं वा घृतम् ।
अभिशीतः अभिश्यानो वा वायुः ।
अवशीनम्, अवश्यानं वा मेदः ।
अवशीनः अवश्यानो वा वृश्चिकः ।
अवशीतम्, अवश्यानं वा जलम् । अत्र दीक्षितः-व्यवस्थितविभाषेयम् ।
तेनेह न- समवश्यान इति ।

६-१-२७ शृतं पाके ॥
शृतं क्षीरम् । शृतं हविः ।

६-१-२८ प्यायः पी ॥२९
पीनं मुखम् । आपीनोऽन्धुः ।
आपीनमूधः ।

६-१-२९ लिँड्यङोश्च ॥३०
पिप्ये । पेपीयते ।

६-१-३० विभाषा श्वेः ॥३१
शुशाव, शुशुवतुः । शोशूयते । शेश्वीयते ।
(श्वयतेर्लिँटचभ्यासलक्षणप्रतिषेधः)
शिश्वाय । शिश्वियतुः ।

६-१-३१ णौ च संश्चङोः ॥ प्र.३२
शुशावयिषति, शिश्वाययिषति ।
अशूशवत्, अशिश्वयत् ।

६-१-२४ **द्रवमूर्तिस्पर्शयोः**= द्रवस्य मूर्तौ (काठिन्ये) स्पर्शे चार्थे, श्यः= श्याधातोः स्थाने, सम्प्रसारणम् (६-१-१३) निष्ठायाम् (६-१-२२) । आद्योदाहरणे ८-२-४७ श्योऽस्पर्शे-... इति नत्वम् । द्वितीये तु न स्पर्शत्वात् । प्रत्युदाहरणस्य शीतेन संकुचित इत्यर्थः । श्या=श्यैङ् गतौ (९६३) ।

६-१-२५ **प्रतेश्च-** प्रतेः= प्रतिशब्दात् परस्य, श्यः (६-१-२४) सम्प्रसारणम् (६-१-१३) निष्ठायाम् (६-१-२२) अत्र काशिका- द्रवमूर्तिस्पर्शाभ्यामन्यत्रापि यथा स्यादिति सूत्रारम्भः ।

६-१-२६ **विभा-** अभ्यवपूर्वस्य= अभि अव इति पूर्वकस्य, श्यः (६-१-२४) विभाषा=वा, सम्प्रसारणम् (६-१-१३) निष्ठायाम् (६-१-२२) ।

६-१-२७ **शृतं-** पाके=पाके वाच्ये, शृतम्=श्राश्रपयत्योः क्ते शृभावो निपात्यते । अत्र काशिका- व्यवस्थितविभाषा चेयम्, तेन क्षीरहविषोर्नित्यं शृभावो भवति । अन्यत्र न भवति- श्राणा यवागूः । श्रपिता यवागूरितीति । श्रातिरयमकर्मकः । कर्तृकर्मविषयस्य पचेरर्थे वर्तते, स ण्यन्तोऽपि प्राकृतं पच्यर्थमाहेति च ।

६-१-२८**प्यायः**=प्यायधातोः स्थाने, विभाषा (६-१-२६) पी=पी इत्यादेशो भवति, निष्ठायाम् (६-१-२२) । अत्र काशिका- इयमपि व्यवस्थितविभाषैव । तेनानुपसर्गस्य नित्यं भवति । सोपसर्गस्य तु नैव भवति । **आप्यान**श्चन्द्रमाः । आङ्पूर्वस्यान्धूधसोर्भवत्येव । **आपीनो**ऽन्धुः । **आपीनमूध** इतीति । अत्र दीक्षितः- स्वाङ्गे नित्यम् । **पीनं** मुखम् । अन्यत्र **प्यानः, पीनः** स्वेदः इति । सोपसर्गस्य न । प्रप्यानः । आङ्पूर्वस्यान्धूसोः स्यादेव । आपीनोऽन्धुः । आपीनमूधः । इति च ।

६-१-२९ **लिँड्य-** प्यायः+ पी (६-१-२८ लिँड्यङोः= लिँटि यङि च परे । **पिप्ये** ६-१-८ लिँटि... इति द्वित्वे, ६-४-८२ एर... इति यण् ।

६-१-३० **विभा-** श्वेः= श्विधातोःस्थाने, विभाषा, = वा, सम्प्रसारणम् (६-१-१३) लिँड्यङोः (६-१-२९) । उभयत्र विभाषेयम् । लिँटि किति ६-१-१५ वचि... इति प्राप्तेऽन्यत्र लिँटि यङि चाऽप्राप्ते ।

श्वय- पूर्वसूत्रेण सम्प्रसारणाऽभावपक्षे द्वित्वे ऽभ्यासस्य ६-१-१७ लिँटच... इति प्राप्तस्य सम्प्रसारणस्य प्रतिषेधः ।

६-१-३१ **णौ च**-सँश्चङोः=सन्परे चङ्परे च, णौ= णिप्रत्यये परे, श्वेः+ विभाषा (६-१-३०) सम्प्रसारणम् (६-१-१३) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्र. ६-१-३२ ह्वः सम्प्रसारणम् ॥३३,३५

जुहावयिषति । अजूहवत् ।

द्वि.६-१-३२ अभ्यस्तस्य च ॥

जुहाव । जुहूषति ।

६-१-३३ बहुलं छन्दसि ॥३५

देवीं सरस्वतीं हुवे ।

न च भवति- ह्वयामि विश्वान् देवान् ।

६-१-३४ चायःकी ॥

विधुना निचिक्युः ।

६-१-३५ अपस्पृधेथामानृचुरानृहुश्चिच्युषे तित्याज श्राताः श्रितमाशीराशीर्ताः ॥

इन्द्रश्च विष्णो यदपस्पृधेथाम् । अर्कमानृचुः वसून्यानृहुः । चिच्युषे । यस्तित्याज ।

श्रातास्त इन्द्र सोमाः । श्रिता नो ग्रहाः ।

आशिरं दुह्रे । मध्यत आशीर्तः ।

६-१-३६ न सम्प्रसारणे सम्प्रसारणम् ॥४३

विद्धः । विध्यति ।

(ऋचि त्रेः सम्प्रसारणमुत्तरपदादिलोपश्चच्छन्दसि)

तिस्र ऋचो यस्मिन् तृचं सूक्तम् ।

(रयेर्मतौ बहुलम्)

आरेवानेतु नो विशः । बहुलग्रहणान्नेह-रयिमान् पुष्टिवर्धनः ।

६-१-३७ लिँटि वयो यः ॥३९

ऊयतुः । ऊयुः ।

प्र.६-१-३२ ह्वःसं- सँश्चङोः + णौ (६-१-३१) ह्वः=ह्वा (१००८) धातोःस्थाने, सम्प्रसारणम्= सम्प्रसारणं भवति ।

प्रकृतेनैव सिद्धे पुनः सम्प्रसारणग्रहणं विभाषेति निवृत्त्यर्थम् ।

द्वि. ६-१-३२ अभ्यस्तस्य= भाव्यभ्यस्तसंज्ञस्य (यस्याऽभ्यस्तसंज्ञा भाविनी तस्य) ह्वः + सम्प्रसारणम् (प्र. ६-१-३२) ।

६-१-३३ बहुलम्= बाहुल्येन, ह्वः+ सम्प्रसारणम् (प्र. ६-१-३२) छन्दसि= वेदे । **हुवे** ह्वेञो (१००८) लँटचात्मनेपदोत्तमैकवचने २-४-७३) बहु... इति शपो लुकि कृते सम्प्रसारणमुवँङादेशश्च ।

६-१-३४ चायः= चाय् (८८०) धातोः स्थाने, की= की इत्यादेशो भवति, बहुलं छन्दसि (६-१-३३) । **निचिक्युः** लिँटचुसि रूपम् ।

६-१-३५ अपस्पृधेथाम्- अपपूर्वस्य स्पर्धेर् (३) लँङ्चाथाम् । संप्रसारणमकारलोपश्च निपातनात् । ६-४-७५ बहुलं... इत्यडभावः । **आनृचुः, आनृहुः,** अर्चेः (२०४) अर्हे (७३९) श्च लिँटचुसि सम्प्रसारणमकारलोपश्च निपातनात् । **चिच्युषे** च्युङो (९५५) लिँटि थासि, अभ्यासस्य सम्प्रसारणमनिट् च निपातनात् । **तित्याज** त्यजेर् (९८६) लिँटचभ्यासस्य सम्प्रसारणं निपातनात् । **श्राताः** श्रीञ् पाके (१४७४) धातोर्निष्ठायां श्राभावः । **श्रितम्** तस्यैव श्रीञो ह्रस्वत्वं च । **आशिरम्** श्रीञ एवाङ्पूर्वस्य क्विँपि शिरादेशः । द्वितीयैकवचनान्तम् । **आशीर्तः** श्रीञ एवाङ्पूर्वस्य निष्ठायां शिरादेशो निष्ठानत्वाभावश्च । ८-२-७७ हलि च इति दीर्घः ।

६-१-३६ न सम्प्र- सम्प्रसारणे= सम्प्रसारणे परे, सम्प्रसारणम् + न= पूर्वस्य यणः स्थाने सम्प्रसारणं न भवति । **विद्धः** व्यधँ ताडने (११८०) दैवादिकः । ६-१-१६ ग्रहि... इति सम्प्रसारणम् ।

ऋचि= ऋच्शब्दे परे, त्रेः= त्रिशब्दस्य स्थाने, सम्प्रसारणम्, उत्तरपदस्य,आदेः, लोपश्च, छन्दसि ।

रयेः =रयिशब्दस्य स्थाने, बहुलम्= बाहुल्येन, सम्प्रसारणम्, (प्र. ६-१-३२) मतौ= मतुँप्प्रत्यये परे, छन्दसि ६-१-३३ । उदाहरणे ८-२-१५ छन्द...इति मतोर्मकारस्य वकारः । **रयिमान्** इत्यत्र तु वहुलग्रहणादेव—

८-२-१५ छन्द... इति वत्वमपि न भवति ।

६-१-३७ लिँटि- लिँटि परे, वयः= वय्धातोः, यः= यकारस्य स्थाने, न+ सम्प्रसारणम् (६-१-३६) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-३८ वँश्चाऽस्याऽन्यतरस्यां किति ॥
ऊवतुः । ऊयतुः । ऊवुः । ऊयुः ।
६-१-३९ **वेञः** ॥४०
ववौ । ववतुः । ववुः ।
६-१-४० **ल्यपि** च ॥४३
प्रवाय ।
६-१-४१ ज्यश्च ॥
प्रज्याय ॥
६-१-४२ **व्य**श्च ॥४३
प्रव्याय । उपव्याय ।
६-१-४३ विभाषा परेः ॥
परिवीय । परिव्याय ।
६-१-४४ **आदेच उपदेशे** ऽशिति ॥ ५६,६३
ग्लै (९०३) ग्लाता । शो (११४४) शाता ।
उपदेशे इत्युक्तेर्नेह-चि (१६२८) चेता ।
जि (५६०,९४६) जेता ।
६-१-४५ न व्यो लिँटि ॥
विव्याय ।
६-१-४६ स्फुरतिस्फुलत्योर्घञि ॥
स्फारः । स्फालः ।
६-१-४७ क्रीङ्जीनां णौ ।
क्रापयति । अध्यापयति । जापयति ।
६-१-४८ सिध्यतेरपारलौकिके ॥
अन्नं साधयति । अपारलौकिके,
इत्युक्तेर्नेह- सेधयति तपस्तापसः ।
६-१-४९ मीनातिमिनोतिदीङां **ल्यपि** च ॥५०
प्रमाय । प्रमाता । निमाय । निमाता ।
उपदाता । उपदाय ।

६-१-३८ वश्चा- अस्य= वयो यकारस्य स्थाने, अन्यतरस्याम्=वा, वँ= वँ (अनुबन्धलोपे व्) आदेशो भवति, किति, लिँटि (६-१-३७) ।

६-१-३९ वेञः= वेञ् (१००६) धातोः स्थाने, लिँटि (६-१-३७) न सम्प्रसारणम् (६-१-३६) ।

६-१-४० ल्यपि= ल्यप् प्रत्यये परे, वेञः (६-१-३९) न सम्प्रसारणम् (६-१-३६) ।

६-१-४१ ज्यश्च=ज्या (१४९८) धातोःस्थाने ऽपि, ल्यपि (६-१-४०) न सम्प्रसारणम् (६-१-३६) ।

६-१-४२ व्यश्च=व्या (१००७) धातोः स्थानेऽपि, ल्यपि (६-१-४०) न सम्प्रसारणम् (६-१-३६) ।

६-१-४३ विभा- परेः= परीत्युपसर्गात् परस्य, व्यः (६-१-४२) ल्यपि (६-१-४०) विभाषा=वा, न सम्प्रसारणम् (६-१-३६) । **परिवीय** तुँकं बाधित्वा ६-४-२ हल इति परत्वाद् दीर्घः ।

६-१-४४ आदे- उपदेशे, एचः = एजन्तस्य धातोः, आत्= आकारादेशो भवति, अशिति= इत्संज्ञकशकारादौ प्रत्यये ऽविवक्षिते (इत्संज्ञकशकारादौ प्रत्यये विवक्षिते न भवति) ।

६-१-४५ न व्यो- व्यः= व्येञ् (१००७) धातोःस्थाने, न= आकारादेशो न भवति, लिँटि=लिँटि परे । **विव्याय** परमपि हलादिशेषं बाधित्वा ६-१-१७ लिँटच... इत्यभ्यासयकारस्य सम्प्रसारणम्, उभयेषां ग्रहणसामर्थ्यात् । अन्यथा वच्यादीनां ग्रह्यादीनां चाऽनुवृत्त्यैव सिद्धे किं तेन । हलादिशेषे तु वकारस्य सम्प्रसारणं स्यात् ।

६-१-४६ स्फुरति-स्फुलत्योः= स्फुरस्फुल्धात्वोः, एचः+आत् (६-१-४४) घञि = घञ्प्रत्यये परे ।

६-१-४७ क्रीङ्जीनाम्= क्री इङ् जि इत्येतेषां धातूनाम्, एचः+ आत् (६-१-४४) णौ= णिप्रत्यये परे ।

६-१-४८ सिध्य- अपारलौकिके= ऐहलौकिकार्थे वर्तमानस्य, सिध्यतेः= सिध् (११९१) धातोः, एचः+ आत् (६-१-४४) णौ (६-१-४७) ।

६-१-४९ मीना... दीङाम्= उपदेशे+आत् (६-१-४४) ल्यपि= ल्यब् विषये, च= अशिति+एचः (६-१-४४) = शिद्भिन्ने एज् विषये च । अत्र काशिका- उपदेश एवात्वविधानादिवर्णान्तलक्षणः प्रत्ययो न भवति, आकारान्तलक्षणश्च भवति- उपदायो वर्तते । ईषदुपदानमिति घञ्युँचौ भवत इति । **उदाहरणेषु-** मीञ् हिंसायाम् (१४७५) डुमिञ् प्रक्षेपणे (१२४९) दीङ् क्षये (११३३) धातवः क्रमशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-५० विभाषा लीयतेः ॥५५

विलाय । विलीय । विलाता । विलेता ।

(निमि-मी-लियां खलचोरात्वप्रतिषेधो वक्तव्यः)

ईषन्निमयः । दुष्प्रमयः । सुविलयः । निमयः । मयः । लयः ।

(प्रलम्भनाभिभवपूजासु लियो णौ नित्यमात्वम्)

बालमुल्लापयते । श्येनो वर्तिकामुल्लापयते । जटाभिर्लापयते ।

६-१-५१ खिदेश्छन्दसि ॥

चिखाद । चिखेद । छन्दसीत्युक्तेर्लोके न-चित्तं खेदयति ।

६-१-५२ अपगुरो णमुँलि ॥

अपगारमपगारम् । अपगोरमपगोरम् ।

अस्यपगारं युध्यन्ते । अस्यपगोरं युध्यन्ते ।

६-१-५३ चिस्फुरोर्णौ ॥५६

चपयति । चययति । चापयति ।

चाययति । स्फारयति । स्फोरयति ।

६-१-५४ प्रजने वीयतेः ॥

वापयति वाययति वा गाः पुरोवातः ।

गर्भं ग्राहयतीत्यर्थः ।

६-१-५५ बिभेतेर्हेतुभये ॥५६

मुण्डो भापयते । मुण्डो भीषयते ।

हेतुभये इत्युक्तेर्नेह-कुञ्चिकयैनं भाययति ।

६-१-५६ नित्यं स्मयतेः ॥

मुण्डो विस्मापयते । प्रयोजकात् स्मये इत्यर्थान्नेह-कुञ्चिकयैनं विस्माययति ।

६-१-५७ सृजिदृशोर्झल्यमकिति ॥५८

स्रष्टा । द्रष्टा । अकितीत्युक्तेर्नेह - सृष्टः । दृष्टः ।

६-१-५० विभा- लीयतेरिति यका निर्देशो न तु श्यना । अन्यथा लीङ इत्येव ब्रूयात् । तेन लीलीङो (१५०0,११३८) रुभयोर्ग्रहणम् । लीयतेः= लीलीङोः स्थाने, विभाषा=वा, आत् (६-१-४४) ल्यपि (६-१-४९) एज् विषये च (६-१-४४) ।

प्रल- उदाहरणेषु सर्वत्र १-३-७० लियः... इत्यात्मनेपदम् ।

६-१-५१- खिदेः= खिद् (११६९, १४३५,) धातोः, एचः + आत् (६-१-४४) विभाषा (६-१-५०) छन्दसि=वेदे ।

६-१-५२ अपगुरः=अप इत्युपसर्गात् परस्य गुर् (१३९५) धातोः, एचः + आत् (६-१-४४) विभाषा (६-१-५०) णमुँलि= णमुँल्प्रत्यये परे । उदाहरणेष्वाद्ययोः ३-४-२२ आभी... इति, अन्त्ययोः ३-४-५३ द्विती... इति णमुँल् ।

६-१-५३ चिस्फुरोः= चि (१२५०,१६२८) स्फुर् १३८८) धात्वोः, एचः+आत् (६-१-४४) विभाषा (६-१-५०) णौ= णिप्रत्यये परे । **चपयति** चौरादिको ज्ञपादिश्चिञ् । **चापयति** सौवादिकश्चिञ् ।

६-१-५४ प्रजने= गर्भग्रहणेऽर्थे वर्तमानस्य, वीयतेः= वी (१०४८) धातोः, एचः+आत् (६-१४४) विभाषा (६-१-५०) णौ (६-१-५३) ।

६-१-५५ बिभेतेः- भी (१०८३) धातोः स्थाने, विभाषा (६-१-५०) आत् (६-१-४४) णौ (६-१-५३) हेतुभये= प्रयोजकाद् भये गम्यमाने । उदाहरणयोः १-३-६८ भीष्म्यो... इत्यात्मनेपदम् । आत्वाऽभावपक्षे ७-३-४० भियो... इति षुँक् ।

६-१-५६ नित्यं-स्मयतेः= स्मि (९४८) धातोः स्थाने, णौ (६-१-५३) नित्यम्, आत् (६-१-४४) हेतुभये (६-१-५५) = प्रयोजकात् स्मये गम्यमाने । अत्र काशिका- भयशब्देन सामान्यादिह स्मयतेरर्थोऽभिधीयत—

इति । अत्र दीक्षितः- कथं तर्हि विस्मापयन् विस्मितमात्मवृत्ताविति ? मनुष्यवाचेति करणादेव हि तत्र स्मयः । अन्यथा शानजपि स्यात् । सत्यम् । विस्माययन्नित्येव पाठ इति साम्प्रदायिकाः । यद् वा मनुष्यवाक् प्रयोज्यकर्त्री विस्मापयते तया सिंहो विस्मापयन्निति ण्यन्ताण्णौ शतेति (शतृँप्रत्यय इति) व्याख्येयम् । इति ।

६-१-५७ सृजिदृशोः= सृज् (११७७,१४१३) दृश् (९८८ धात्वोः, अम्= अमागमो भवति, अकिति= किद्भिन्ने, झलि= झलादौ प्रत्यये परे । उदाहरणयोः प्रत्युदाहरणयोश्च ८-२-३६ व्रश्च... इति षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-५८ अनुदात्तस्य चर्दुपधस्याऽन्यतरस्याम् ॥

त्रप्ता । तर्प्ता । किति- तृप्तः ।
अनुदात्तस्येत्युक्तेर्नेह-वर्ढा । वर्ढुम् ।

६-१-५९ शीर्षँश्छन्दसि ॥६०

यत्ते शीर्ष्णो दौर्भाग्यम् ।
शीर्ष्णो द्यौः समवर्तत । लोके तु शिरः ।

६-१-६० ये च तद्धिते ॥

शीर्षण्यः । तद्धित इत्युक्तेर्नेह-
शिर इच्छति= शिरस्यति ।
(वा केशेषु)
शीर्षण्याः शिरस्या वा केशाः ।
(अचि शीर्षः)
स्थूलशिरस इदं स्थौलशीर्षम् ।

६-१-६१ पद्दन्नोमास्हृन्निशसन्यूषन्-दोषन् यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥

पदः । पादान् । पदा । पादेन । पद्भ्याम् । पादाभ्याम् । इत्यादि ।
(मांसपृतनासानूनां मांस्पृत्स्नवो वा वाच्याः)
मांसा । मांसेन । पृता । पृतनया । स्नुना सानुना ।
(नासिकाया नस् यत्तस्क्षुद्रेषु)
नस्यम् । नस्तः । नःक्षुद्रः ।
(यति वर्णनगरयोर्नेति वक्तव्यम्)
नासिक्यो वर्णः । नासिक्यं नगरम् ।

६-१-६२ धात्वादेः षः सः ॥ ६३

सुनोति । सेक्-सृप्-सृ-स्तृ-सृज-स्तृ-स्त्याऽन्ये दन्त्याजन्त-सादयः ।
एकाचः षोपदेशाः स्युः ष्वष्क्-स्विद्-स्वदँ-स्वञ्ज्-स्वप्-स्मिङः ।
(सुँब्धातुष्ठिवुँष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः)
षण्डीयति । ष्ठीवति । ष्वष्कते ।

६-१-५८ **अनु-** ऋदुपधस्य = ह्रस्वऋकारोपधस्य अनुदात्तस्य=अनुदात्तस्य धातोः, अन्यतरस्याम्=वा, अम्+ अकिति+झलि (६-१-५७) । वर्ढा वर्ढुम् इति वृहूँ उद्यमने (१३४६) ऊँदित्वात् ७-२-४४ स्वरति... इति वैकल्पिकस्येटोऽभावे प्रत्युदाहरणे ।
६-१-५९ **शीर्षँ-** छन्दसि= वेदे, शीर्षन्= शिरः शब्द-पर्यायः 'शीर्षन्' इति शब्दो निपात्यते ।
६-१-६० **ये च-** ये=यकारादौ, तद्धिते= तद्धिते परे, शीर्षन् (६-१-५९) शिरश्शब्दस्य स्थाने 'शीर्षन्' इत्यादेशो भवति । **शीर्षण्यः** ५-१-६ शरी... इति यत् । ६-४-१६८ ये चा... इति प्रकृतिभावः । **अचि**= अजादौ, तद्धिते (६-१-६०) शीर्षः= शिरश्शब्दस्य स्थाने शीर्ष आदेशः । प्रकृतस्य 'शीर्षन्' इत्यस्यानुवृत्तौ तु ६-४-१६७ अन् इति प्रकृतिभावः स्यात् ।
६-१-६१ **पद्दन्नो**....सन्=पाद-दन्त-नासिका-मास-हृदय-निशा-असृज्-यूष-दोष्-यकृत्-शकृत्-उदक-आस्य, इत्येतेषां शब्दानां स्थाने पद्-दत्-नस्-मास्-हृद्-निश्-असन्-यूषन्-दोषन्-यकन्-शकन्-उदन्-आसन् इत्येते आदेशाः, अन्तरस्याम् (६-१-५८) भवन्ति, शस्प्रभृतिषु=शसादिषु विभक्तिषु परतः । अत्र प्रभृतिग्रहणं प्रकारार्थम् । ककुद्दोषणी । शालादोषणी । अत्र दीक्षितः-यत्तु आसनशब्दस्य आसन्नादेश इति काशिकायामुक्तं तत् प्रामादिकमिति ।
नासि- नस्यम् ५-१-६ शरी...इति यत् । **नस्तः** ५-४-४५ अपा...इति तसिँ । **नः क्षुद्रः** नासिका क्षुद्रा यस्येति बहुव्रीहिः ।
६-१-६२ **धात्वा-**८-२-७७ हलि च-सूत्रानन्तरं सूत्रमिदं पाठचम् । धात्वादेः= धातोरादौ वर्तमानस्य, षः=मूर्धन्यषकारस्य स्थाने, सँः=सँ (अनुबन्धलोपे, स्=दन्त्यसकार) आदेशो भवति । इत्यर्थमुपदिश्यच्छात्रैर्लक्षणसमन्वयं कारयित्वा पचतीत्यत्रेव प्रक्रियाक्रमे 'सु+ति' इति श्यामपाटचां लिखित्वा शपं (३-१-६८) बाधयित्वा ३-१-७३ स्वादिभ्यः...सूत्रमुपदेश्यम् ।
सेक्-सृप् ...स्त्याऽन्ये=सेक् सृप्सृ स्तृ सृज् स्तृ स्त्या इत्येतेभ्यो भिन्नाः, दन्त्याजन्तसादयः-दन्त्यश्च अच्च=दन्त्याचौ, दन्त्याचौ अन्तौ अव्यवहितपरौ यस्य सः=दन्त्याजन्तः, दन्त्याजन्तश्चासौ सः= दन्त्याजन्तसः, दन्त्याजन्तसः आदिर्येषां ते=दन्त्याजन्तसादयः=दन्त्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-६३ णो नः ॥ नमति । (सुँध्धातोरयमपि नेष्यते) णकारमिच्छति=णकारीयति ।	६-१-६४ लोपो[1] व्योर्वलि ॥६८ पठचेते । ६-१-६५ वेरँपृक्तस्य ॥ छात्रति ।

वर्णो वा अच् यस्यान्ते वर्तते तादृश-दन्त्यसकारो येषां धातुनामादौ वर्तते, तादृशाः, एकाचः=एकाचो धातवः, षोपदेशाः=षोपदेशा बोध्याः, ष्वष्क्...स्मिङः=ष्वष्क् स्विद् स्वद् स्वञ्ज् स्वप् स्मिङ् धातवोऽपि षोपदेशाः । दन्त्यः= केवलदन्त्यो न तु दन्तोष्ठजोऽपि, ष्वष्कादीनां पृथग्ग्रहणाज् ज्ञापकात् ।

६-१-६३ णो नः- धात्वादेः (६-१-६२) णः= णकारस्य स्थाने, नः= नँ (अनुबन्धलोपे न्) आदेशो भवति ।

६-१-६४ लोपो- ७-२-८१ आतो... सूत्रानन्तरं सूत्रमिदं पाठचम् । व्योः= वकारयकारयोः, वलि=वल्वर्णे परे, लोपः= लोपो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा 'पठचेताम्' इति श्यामपाटचां लिखित्वा ३-४-७९ टित... इति सूत्रसमन्वयायच्छात्रानादिशेत् । पठचेते इति ।

(झ)

'व्याकरण-काव्य-कोशाः पठचन्ते'

इति वक्तव्ये प्रकृते कर्माणि बहूनि सन्ति । तानि च प्रकृते तिङा बोधनीयानि । अतः १-४-२२ द्व्येक... सूत्रप्रसङ्गे १-४-२१ बहु...सूत्रेण प्रकृते 'झ' भवति । शेषप्रक्रिया- विषये 'पठचते' इति रूपसिद्धिक्रमे 'पठचत' इतीव 'पठच+झ' इत्यवस्थायाम् ७-१-३ झोऽन्तः- सूत्रमुद्बोध्य तल्लक्षणसमन्वयाय, ६-१-९४ अतो... ३-४-७९ टित... सूत्रसमन्वयाय चच्छात्रानादिशेत् ।

(थास्)

(अत्र भण् धातुः शिक्षणीयः) त्वं पठ्यसे, अहं पठ्ये इत्यादीन्युदाहरणानि न शोभन्त इति विभावनीयं शिक्षकेण ।

अथ श्याम ! त्वं भण्यसे इति वक्तव्ये भण्यसे इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते- प्रकृते युष्मच्छब्दः कर्म .(कारकम्) बोधयति । तिङ् अपि कर्म (कारकम्) बोधयति । अतो युष्मच्छब्दोऽपि कर्मणि वर्तते । तिङ् अपि कर्मणि वर्तते । फलतो युष्मच्छब्दस्तिङ् च समानाधिकरणौ स्तः । तेन प्रकृतप्रयोगे १-४-१०४ युष्म... सूत्रं प्रवर्तते । कर्म (त्वम्) च एकमस्ति । तेन १-४-२२ द्वेचक... सूत्रेण एकवचनम्= थास् भवति । शेषप्रक्रिया-विषये पूर्वत्र 'पठच+त' इतीव 'पठच+थास्' इत्यवस्थायाम् ३-४-८० थासः... सूत्रमुपदेश्यम् ।

६-१-६५ वेर- ३-१-११ कर्तुः क्यङ्... सूत्रस्थ- सर्वप्राति... वार्तिकानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क)

६-१-६४ लोपो व्योर्वलि ॥

६-१-६५ वेंः अपृक्तस्य (क) ॥ इति ।

वेंः= विँसम्बन्धिनः, अपृक्तस्य= अपृक्तवर्णस्य (वकारस्य) (क)=लोपः । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा छात्र इति धातुर्निष्पन्न इति बोधनपुरस्सरं पूर्ववत् तिङ्कार्यं छात्रैः कारयेत् । छात्राञ्चकार । छात्रिता । इत्यादि । **इत्युत्तर-तिङन्त- शिक्षण-रीतिः ।**

अथाऽधोनिर्दिष्टरूपेणच्छात्रान् बोधयेत्- वत्साः । कियद्भिः प्रकारैर्धातवो भवन्तीति दिग्दर्शनं कारितम् । सर्वेभ्य एतेभ्यो धातुभ्यः कर्तरि, तथा यथायोग्यं भावे कर्मणि वा लँडादयः प्रत्यया भवन्ति । तेषां दिग्दर्शनं पूर्वं कारितमेव । वत्साः ? धातुभ्यो न केवलं लँडादय एव प्रत्यया भवन्ति । किन्तु तव्यत् ण्वुँल् तृच् इत्यादयोऽपि प्रत्यया भवन्ति । ते कृत्प्रत्ययनाम्ना व्यवह्रियन्ते । अत इतः परं ते प्रत्ययाः शिक्ष्यन्ते । **तिङन्तशिक्षणदिग्दर्शनरीतेरिहैव विरम्यते ।**

इत्युपदिश्य तिङन्तप्रक्रियाशिक्षण- रीतेर्विरमेत् ।

इति तिङन्तशिक्षण-रीतिः । अथ कृदन्तशिक्षणरीतिः ।

तत्रादौ ३-१-९३ कृदतिङ्-सूत्रमुपदेश्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-६६ हल्ङ्याब्भ्यो दीर्घात् सुँतिस्यपृक्तं हल् ॥६७ सरित् । गौरी । कन्या । अहन् ।	६-१-६७ एङ्ह्रस्वात् सम्बुद्धेः ॥ हे अग्ने । हे वायो । हे श्याम ।

६-१-६६ हल्ङ्या- ६-१-६७ एङ्ह्रस्वात्... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । एतत्सूत्रार्थबोधनात् पूर्वमधोनिर्दिष्ट- विषयबोधनमत्यावश्यकम् । यथा-स्वरः (अच्) एकमात्रो ह्रस्वः द्विमात्रो दीर्घः, त्रिमात्रः प्लुतः । व्यञ्जनम् (हल्) अर्धमात्रं भवति । अतो ह्रस्वदीर्घप्लुताः स्वरा अच एव भवन्ति । व्यञ्जनानि= हल्वर्णास्तु ह्रस्वदीर्घप्लुता न भवन्ति । इति । छात्राणामुत्कण्ठायां प्रतीमानायामिदं पद्यं सार्थमुपदेश्यम्- एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चाऽर्धमात्रकम् ॥ इति । १-१-२७ ऊका... सूत्रं तु साम्प्रतं नोपदेश्यम् । दुर्बोधार्थत्वात् । अथ सूत्रार्थ उपदेश्यः । दीर्घात्+हल्ङ्याब्भ्यः= हलन्ताद् दीर्घङ्याबन्ताच्च परम्, सुँतिसि= सुँ-ति-सि- सम्बन्धि, अपृक्तं+हल्= अपृक्तसंज्ञको हल्वर्णः, लोपः (६-१-६४)= लुप्यते । इति । एतत्सूत्रार्थबोधनक्रमे पृक्तम्= अन्यवर्णेन मिलितम् । अपृक्तम्= अन्यवर्णेन न मिलितम्= एकलम्, इत्युपदेश आवश्यकः । अथवा १-२-४१ अपृक्त... इति सूत्रमेवोपदेश्यम् । एवम्, केदारजलदृष्टान्तोद्बोधनपुरस्सरं ६-१-६४ लोपो... सूत्रादनुवर्तमानं लोप इति पदं प्रकृतसूत्रे 'हल्' इति प्रथमान्तेन सम्बन्धाल्लुप्यते इति पदाय कल्पते, इति बोध्यम् । यथा इतिहासस्य पाठः । इतिहासः पठ्यते । तथा हलो लोपः । हल् लुप्यते । इति । "दीर्घात् इति ङ्यापोरेव विशेषणं न तु हलः, इति बोधनायाऽधोनिर्दिष्ट- दृष्टान्तः श्रावयितव्यः । यथा- उद्याने पाटलानि (गुलाब इतिनाम्ना लोके प्रसिद्धानि पुष्पाणि) पीतानि शतपत्राणि (टाँकुले इति नाम्ना लोके प्रसिद्धानि पुष्पाणि) सन्ति । तत्र यदि कश्चिदुपदिशेत् उद्यानाल्लोहितानि पुष्पाणि आनय' इति तत्रैवं ज्ञायते लोहितानि पाटलापुष्पाणि आनेयानि श्वेतानि नाऽऽनेयानि इति । शतपत्राणां तु प्रसङ्ग एव न भवति । यतः शतपत्रपुष्पाणि पीतमात्राणि भवन्ति न तु लोहितानि । अर्थात् लोहितानि इति विशेषणं पाटला-पुष्पाणां न तु शतपत्राणाम् । तत्र तेषां लोहितानामभावात् । पाटलापुष्पाणि तु लोहितानि श्वेतानि च भवन्तीति लोहितानि इति विशेषणमावश्यकम्, अन्यथा श्वेतानामप्यानयन-प्रसङ्गात् । तथैव दीर्घादिति ङ्यापो विशेषणं न तु हलः । हलां दीर्घाणामभावादिति । सावधानम् ! दृष्टान्तस्तया रीत्या देयो यथा- दृष्टान्तः स्फुटप्रतिपत्तये भवेत् । यदि दृष्टान्तो बोधभाराय भवतीति प्रतीयेत तदा दृष्टान्तो न देयः । अर्थाद् यथा सरलया रीत्या सूत्रार्थं छात्रा बुध्यन्ते तया रीत्या सूत्रार्थ उपदेश्यः । इति । लक्षण-समन्वयस्तुच्छात्रैरेव कारयितव्यः । अथ 'कन्ये पुष्पाणि चिनुतः' इति वक्तव्ये 'मुनी' इत्यत्रेव कन्याशब्दात् औ प्रत्यये 'कन्या+औ' इति श्यामपाट्यां लिखित्वा ७-१-१८ औङः... इति सूत्रमुपदेश्यम् ।

६-१-६७ एङ्ह्र- २-३-४९ एकवचनं...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र शिक्षकेण विमृश्यं यद् यद्यपि हे कतरत्, हे कुल इत्यादिप्रयोगोपपत्तये ऽस्य सूत्रस्य एङ्ह्रस्वात्= एङन्ताद् ह्रस्वान्ताच्च अङ्गात् परः, हल् (६-१-६६) लोपः (६-१-६४)= लुप्यते, सम्बुद्धेः= सम्बुद्ध्यवयवश्चेत् इत्यर्थ उचितः । तथापि बालानामुपलालनामनुसृत्य एङ्ह्रस्वात्= एङ्ह्रस्वाभ्यां परस्य, सम्बुद्धेः, लोपः (६-१-६४ लोपो... सूत्रं दर्शयता) इत्यर्थ उपदेश्यः सुगमेन बोधाय । [द्वितीयावृत्तौ तु पूर्वोक्त एवार्थ उपदेश्यः । यद्यपि अङ्गस्य इति सूत्रम् ६-४-१ इत्यत्र वर्तमानं नाऽत्राऽनुवर्तते तथापि सम्बुद्धिः प्रत्ययः प्रत्यये परतश्च पूर्वमङ्गं भवति १-४-१३ यस्मादिति सूत्रेण । अतः सूत्रे पठ्यमानेन सम्बुद्धिशब्देन अङ्गमित्यध्याह्रियते । तच्च एङ्ह्रस्वाभ्यां सम्बध्यते । ततस्तदन्तविधौ पूर्वोक्तार्थः फलति । यथोपदिशति दीक्षितः- सम्बुद्ध्याऽऽक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशेषणान्नेह- हे कतरत् कुलेति, इति] लक्षणसमन्वयश्च च्छात्रैरेव कारयितव्यः । द्विवचनबहुवचनयोः सम्बोधनेऽपि पूर्वोक्तद्विवचनबहुवचन (औजस्) वत् । इति बोधयता शिक्षकेण साधनप्रक्रिया छात्रैरुच्यमाना श्रोतव्या । अयि रामश्यामौ । अयि रामश्यामविष्णुमित्राः! इत्यादि । एवं बालक- मुकुन्द-प्रभृतिशब्दानामदन्तानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपाणिच्छात्रैरुच्चारयितव्यानि लेखयितव्यानि वा । इत्थमेव यस्मात् कस्माच्चिदपि प्रातिपदिकात् स्वादयः प्रत्यया भवन्ति । स्वादिप्रत्ययं विना प्रातिपदिकमात्राणां प्रयोग एव न भवति । पूर्वमुदाहृतेषु प्रयोगेषु सम्यगभ्यस्तेषु प्रातिपदिकान्तराणामपि रूपाणि सरलया रीत्या शिक्षितुं शक्यन्ते । अन्यथा व्याकरणं भाराय भवति, लाभोऽपि न भवति । अतः पठिताः प्रयोगा मुहुर्मुहुरभ्यसनीया इतिच्छात्रानुपदिशता शिक्षकेण कैश्चिद् दिनैश्छात्राअभ्यासयितव्याः । कालो व्यर्थ गच्छतीति भ्रमे न पतनीयम् । महते लाभाय भवेत् समयाकरणमभ्यासेन ।

अनुबन्धविषये विशेषोपदेशः ।

अथाऽभ्यस्ताऽधीतप्रयोगाश्छात्राः शिक्षकेण पुनरुद्बोधनीया अनुबन्धविषये । यथा-अयि वत्साः ? पठितवन्त एव यूयं सुँ औ जस् इत्यादीन् प्रत्ययान् प्रातिपदिकेभ्यो विधेयान् । तत्रानुबन्धफालनप्रक्रियामपि पठितवन्त एव । (अथ सत्यामावश्यकतायामनुबन्धविषयाणि सूत्राण्युद्बोधयता शिक्षकेण श्यामपाटचामधोनिर्दिष्टरूपेण सुँ इत्यादयः प्रत्ययाः सानुबन्धा निरनुबन्धाश्च लेख्याः ।) यथा सुँ ((स्), औ, जस् (अस्) अम्, औट् (औ),शस् (अस्), टा (आ), भ्याम्, भिस्, ङे (ए), भ्याम्, भ्यस् ङसिँ (अस्), भ्याम्, भ्यस्, ङस् (अस्) ओस्, आम्, ङि (इ) ओस्, सुप् (सु) इति ।

अनुबन्धत्याग-विषयेऽधस्तनदृष्टान्तः स्फुटप्रतिपत्तये भवेत् । यथा- अयि वत्साः ? यथा क्षेत्रादिषु समुत्पन्नानि धान्य-व्यञ्जनादीनि गृहमानीयन्ते, तानि पुनस्तुषस्नायुवृन्तादीनि फालयित्वैवोपयुज्यन्ते, नतु तुषस्नायुवृन्तादि-सहितानि । तथैव प्रथमं सुँ औ जस् इत्यादयः प्रत्यया भवन्ति ते पुनरनुबन्ध-विनिर्मुक्ता एव प्रयोज्यन्ते, नतु सानुबन्धा इति । अथ च यथा कलाय-शिम्ब्यादि- व्यञ्जन-स्नायु-फालनप्रक्रियायां सकृज्ज्ञातायां नैव पुनस्तत्क्रियायाः प्रतिदिनं शिक्षणमपेक्ष्यते । तथैवाऽनुबन्ध-फलानप्रक्रियायां सकृत् सम्यग् ज्ञातायाम्, अन्येभ्यः प्रातिपदिकेभ्यः सुँ इत्यादिषु प्रत्ययेषु पुनरनुबन्धफालनप्रक्रिया बोधाय नाऽऽवर्तनीया भवति । तथा सति बहूनां प्रातिपदिकानां रूपाणि सूत्रान्तराऽवबोधं विनैव स्वत एव ज्ञायन्ते । अतोऽनुबन्धफालनप्रक्रियाऽवशेष- प्रत्यय-रूपाणि च सम्यगभ्यसनीयानीतिच्छात्राः प्रबोधयितव्याः ।

अथ स्वत एव रूपज्ञानाय प्रक्रिया । स्फुरित- विनिर्मुक्ताऽनुबन्धक- प्रत्यय- स्वरूपाश्छात्राः शिक्षकेणाऽधोनिर्दिष्टरूपेणोपदेश्याः । अनुबन्धरहिता हलादयो विभक्तयः स्, भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस्, सु, इति । अयि वत्साः ? प्रातिपदिकानि द्विविधानि भवन्ति । अजन्तानि हलन्तानि च । तेषु अजन्तानां भ्यामादिषु हलादिषु विभक्तिषु स्वत एव सूत्रान्तरावबोधं विनैव रूपाणि ज्ञायन्ते । हलन्तानां प्रातिपदिकानां च औप्रभृतिषु अजादिषु विभक्तिषु तथैव ज्ञायन्ते । अथाऽजन्तेषु प्रातिपदिकेषु कानि चिदुदाहरणानि प्रस्तूयन्ते, इत्युपदिशता शिक्षकेणाऽधोनिर्दिष्टरूपेण शयामपाटचां लिखित्वा छात्रा बोधयितव्याः ।

कन्या-कन्या- भ्याम् कन्याभ्याम् ।

कन्या+भिस्=कन्याभिस्= कन्याभिः ।

(पदान्तसकारो विसर्गाय कल्पत इति तु ८-२-६६, सस... ८-३-१५ खर... सूत्रयोः पूर्वमुपदिष्टमेव)

कन्या + भ्याम्=कन्याभ्याम् । कन्या + भ्यस् = कन्याभ्यस् =कन्याभ्यः । कन्या + सु= कन्यासु ।

एवमेव अग्नि-अग्निभ्याम् । अग्निभिः । अग्निभ्यः । अग्निषु । (गृहेषु, इत्यत्रेव सकारस्य षः) इत्यादि । इति । अथ भानु पितृ गो नौ शब्दानां हलादिषु विभक्तिषु रूपाणि लिखतेतिच्छात्रा आदेश्याः । तेभ्यो यथार्थमुत्तरे प्राप्ते, अहो ? व्याकरणे प्रवेशो जातकल्पो युष्माकमिति प्रोत्साहनीयाः ।

अथ अयि वत्साः ? यथा यूयम् अजन्तानां प्रातिपदिकानां हलादिषु विभक्तिषु रूपाणि ज्ञातवन्तः तथैव हलन्तानां प्रातिपदिकानामपि अजादिषु विभक्तिषु रूपाणि ज्ञायन्ते, इति तूक्तमेव । तत्रापि कानिचिदुदाहरणानि प्रस्तूयन्ते । इत्युपदिशता शिक्षकेण प्रथममधोनिर्दिष्टरूपेण श्यामपाटचां लिखित्वा छात्रा बोधयितव्याः । यथा अननुबन्धा अनुबन्धविनिर्मुक्ताश्च अजादयो विभक्तयः- औ, अस्, अम्, औ, अस्, आ, ए, अस्, अस्, ओस्, आम, इ, ओस्, इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-६८ शेश्छन्दसि बहुलम् ॥ या क्षेत्रा । या वना । लोके तु-	यानि क्षेत्राणि । यानि वनानि ।

अयि वत्साः ? अन्तिमः सकारो विसर्गाय कल्पत इति जानीथैव यूयम् । अत उपर्युक्ताः सकारान्ताः प्रत्यया विसर्गान्ता भवन्तीति बोधयता शिक्षकेण श्यामपाटचां सकारं मेटयित्वा विसर्गो लेख्यः । यथा- औ, अः, अम्, औ, अः, आ, ए, अः, अः, ओः, आम्, इ, ओः, इति । अथ हलन्तशब्दात् परतस्त्येषु प्रत्ययेषु वर्णमेलने रूपाणि सिध्यन्तीति बोधयता शिक्षकेण श्यामपाटचामधोनिर्दिष्टरूपेण लिखित्वा छात्रा बोधयितव्याः । यथा-

			पयोमुच्+ आ	=	पयोमुचा ।
पयोमुच्+औ	=	पयोमुचौ ।	पयोमुच्+ए	=	पयोमुचे ।
पयोमुच्+अः	=	पयोमुचः ।	पयोमुच्+अः	=	पयोमुचः ।
पयोमुच्+अम्	=	पयोमुचम् ।	पयोमुच्+अः	=	पयोमुचः ।
पयोमुच्+ औ	=	पयोमुचौ ।	पयोमुच्+ओः	=	पयोमुचोः ।
पयोमुच्+ अः	=	पयोमुचः ।	पयोमुच्+आम्	=	पयोमुचाम् ।
			पयोमुच्+इ	=	पयोमुचि ।
			पयोमुच्+ ओः	=	पयोमुचोः ।
			इत्यादि । इति ।		

अथ वाच् गिर् शरद् इत्यादीनां हलन्तशब्दानामजादि- विभक्तिषु रूपाणि लिखतेतिच्छात्रा आदेश्याः । तेभ्यो यथार्थमुत्तरे प्राप्ते ते पूर्ववत् प्रोत्साहनीयाः । तस्मिन्नेव च क्रमे ते पुनरुद्बोधनीया यत्, अयि वत्साः ? यद्यपि अः, ओः, इति पृथक् प्रत्ययेषु विसर्गो दर्शितः ।
तथापि साधन-प्रक्रियायां तु सकार एवोच्चार्यः । पश्चाच्च ८-२-६६ सस...८-३-१५ खर... सूत्राभ्यां विसर्गः कार्यः । यथा-वाच्+अस्= वाचस् ८-२-६६ सस... ८-३-१५ खर... **वाचः** । इत्यादि । इति ।
इत्थं हलन्तशब्दानामजादिविभक्तौ, अजन्तशब्दानां च भ्यामादिहलादिविभक्तौ प्रायो रूपाणि ज्ञातानि भवन्ति । अत इतः परं हलन्तशब्दानां प्रायो हलादिविभक्तौ, अजन्तशब्दानां च प्रायोऽजादिविभक्तौ सुँप्रत्यये च रूपाणि शिक्षणीयानि भवन्ति । अजन्तेषु च, अकारान्तः शब्दः साधारणतयोपदिष्ट एव ।
अथात आकारान्तः शब्द उपदेश्यः । आकारान्ताः शब्दाः प्रायः स्त्रीलिङ्गे भवन्तीति शिक्षकेण स्त्रीलिङ्गाऽऽकारान्त-शब्द उपस्थाप्यः । तस्य सुँबन्त- रूपसिद्धि- प्रक्रियोपदेशात् पूर्वं शिक्षकेण स्त्रीलिङ्ग शब्दसिद्धि- प्रक्रिया सरलया रीत्या शिक्षणीया । यथा- अयि वत्साः । शब्दानां लिङ्गानि त्रीणि भवन्ति । पुंलिङ्गं स्त्रीलिङ्गं नपुंसकलिङ्गञ्च । तत्र सामान्यतया पुरुषवाचिनः शब्दाः पुंलिङ्गे भवन्ति । स्त्रीवाचिनः स्त्रीलिङ्गे भवन्ति । स्त्रीपुंस- भिन्नवाचिनो नपुंसकलिङ्गे भवन्ति । यथा बहुभिः पत्रैर्मिलितैः पुस्तकं भवति । बहुषु तन्तुषु मिलितेषु पटो भवति । मृत्पाषाणादिषु काष्ठादिषु च मिलितेषु गृहं भवति । तथैव केचन शब्दाः प्रकृतिप्रत्ययेषु मिलितेषु भवन्ति । तेषु स्त्रीवाचिनाम् आकारान्तानां शब्दानाम् अन्तिमाकारः प्रायः टाप् प्रत्यये (१-३-३, ७, ९, प्रवृत्तौ) सम्पद्यते । इत्युपदिशता शिक्षकेण प्रसङ्गेऽस्मिन् स्त्रीलिङ्गे टाप् प्रत्ययो भवतीति गन्धप्रतिपत्तये ४-१-३ स्त्रियाम् ४-१-४ अजा... सूत्रे दर्शयित्वा स्त्रियाम्= स्त्रीलिङ्गे, टाप्= टाप् प्रत्ययो भवति, इत्येतावानेवार्थ उपदेश्यः । (अजाद्यत इत्यंशः साम्प्रतं नोपदेश्यो बोधभारापत्तेः) अतः कन्या, रामा, राधा, सत्यभामा, अञ्जना, मत्स्यगन्धा, इत्यादीनां शब्दानामाकारोऽनुबन्धविनिर्मुक्तष्टाप् प्रत्यय इति ज्ञेयम् । एवञ्च आप् इति कथने, एतेषामाकारो गृह्यते इतिच्छात्राः प्रथमं बोधनीयाः । 'कन्या पुष्पाणि चिनोति' इति वक्तव्ये कन्याप्रातिपदिकात् पूर्ववत् सुँप्रत्ययेऽनुबन्धलोपे 'कन्या+स्' इति श्यामपाटचां लिखित्वा ६-१-६६ हल्ङ्या... सूत्रमुपदेश्यम् ।
६-१-६८ शेश्छ-शेः= शि इत्यस्य, बहुलम्= बाहुल्येन, लोपः (६-१-६४) छन्दसि=वेदे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-६९ ह्रस्वस्य पिति कृति तुँक् ॥७१, द्वि.७३

अग्निचित् । प्रकृत्य ।

६-१-७० संहितायाम् ॥१५३

६-१-७१ छे च ॥७३

गच्छति । चिच्छेद ।

६-१-७२ आङ्माङोश्च ॥

आच्छादयति । माच्छिदत् ।

प्र. ६-१-७३ दीर्घात् ॥

चेच्छिद्यते ।

द्वि. ६-१-७३ पदान्ताद् वा ॥

लक्ष्मीच्छाया । लक्ष्मीछाया ।

६-१-७४ इको यणचि ॥११९

पठति+अयम्= पठत्ययम् । सुधी+उपास्यः= सुध्युपास्यः । पठतु+अयम्= पठत्वयम् । मधु+अरिः=मध्वरिः । पितृ + उपदेशः= पित्रुपदेशः । धातृ+अंशः=धात्रंशः । शक्लृँ+एकः=शक्लेकः । लृ+आकृतिः=लाकृतिः ।

६-१-६९ **ह्रस्वस्य**=ह्रस्ववर्णस्य, पिति=पकारेत्संज्ञके, कृति=कृत्संज्ञके प्रत्यये परे,तुँक् तुँगागमो भवति ।
६-१-७० **संहितायाम् (अव्यवहिते)** इत्यधिक्रियते ६-१-१५३ अनुदात्तं... इति सूत्रात् प्राक् ।
६-१-७१ **छे च**-छे=छकारे परे, ह्रस्वस्य + तुँक् (६-१-६९) संहितायाम् (६-१-७०) ।
६-१-७२ **आङ्माङोः**= आङ्माङ्शब्दयोः, छे (६-१-७१) तुँक् (६-१-६९) । द्वि. ६-१-७३ पदा... इत्यस्याऽपवादः । अङितोस्तु वैकल्पिक एव-आछाया । आच्छाया । प्रमाच्छन्दः । प्रमाछन्दः ।
प्र.६-१-७३ दीर्घात्= दीर्घस्य, छे (६-१-७१) तुँक् (६-१-६९) । दीर्घस्याऽयं तुँक्, विभाषा सेनासुराच्छायेति निर्देशात् ।
द्वि. ६-१-७३ पदान्ताद्+ दीर्घात् (प्र.६-१-७३)= पदान्तस्य दीर्घस्य, छे (६-१-७१) वा=विभाषया, तुँक् (६-१-६९) ।
६-१-७४ **इको**-८-४-५९ तोर्लि... इति सूत्रानन्तरं सूत्रमिदं पाठ्यम् । इकः= इकः स्थाने, यण्= यण् भवति, संहितायाम् (६-१-७०)=अव्यवहिते, अचि= अचि परे । इति सूत्रार्थोपदेश- सन्दर्भे इग् वर्णाः के ? यण्=वणाः के ? अज् वर्णाः के ? इतिच्छात्राः परीक्षणीयाः । ततः प्रागुपदिष्ट-वर्णविच्छेदप्रक्रियामुद्बोध्य प्रकृतसूत्रोदाहरणानि प्रस्तुत्यानि । यथा- पठति+ अयम्= पठत्+ इ+अयम्, इति श्यामपाट्यां लिखित्वा, अङ्गुल्या इकारं दर्शयित्वा इदमक्षरम् इक् प्रत्याहारे वर्तते इति, तस्मात् परतस्त्य ओकारश्च अच्प्रत्याहारे वर्तते इति च्छात्रेभ्य उत्तरं गृहीत्वा छात्रैरेव लक्षण- समन्वयः कारयितव्यः । अथ इकारस्य स्थाने 'य् व् र् ल्' इत्येते वर्णाः प्राप्ता इति बोधनक्रमे इकारस्य स्थानं छात्रेभ्योऽवगत्य श्यामपाट्यामधोनिर्दिष्टरूपेण तालुस्थानवर्णास्तेषामग्रे यण् वर्णाश्च लेख्याः । यथा- इ च् छ् ज् झ् ञ् य् श्= तालुस्थानवर्णाः । य् व् र् ल् = यण्वर्णाः ।
अथ यकारं दर्शयित्वा एष वर्णस्तालुस्थाने वर्तते न वा ? इति परीक्षण-क्रमे छात्रेष्वनुत्तरत्सु उपरितनपङ्क्तिस्थान् पृथक् पृथग् वर्णान् दर्शयता शिक्षकेण एष वर्णो यकारोऽस्ति न वा ? इति च्छात्राः प्रष्टव्याः । इत्थं क्रमशः श्यामपाट्याम् उपरितनानामष्टानामक्षराणां दर्शने, 'अयं वर्णो यकारोऽस्ति' इति च्छात्रोक्तौ श्रूयमाणायाम्, अधस्तनपङ्क्तिस्थ- प्रथमाक्षरोपरि √ इदं चिह्नं देयम् । अथ व् र् ल् वर्णानामपि पूर्वोक्तप्रकारेण-
परीक्षण-क्रमे तेषामुपरि × इदं चिन्हं देयम् । यथा य्$^{\surd}$ व्$^{\times}$ र्$^{\times}$ ल्$^{\times}$ इति । अत इकारस्य स्थाने यकारो (य्) भवतीति बोधनपुरस्सरम्, इकारं कर्तयित्वा तत्सन्निधौ यकारो (य्) लेख्यः । यथा- 'पठत् य्+अयम्' इति । अथ वर्णविच्छेद-प्रक्रियामुद्बोधयता शिक्षकेण खण्डितपादानामक्षराणां परतो मेलनमुपदेश्यम् । यदिच्छात्रा आङ्गल (रोमन) लिपिज्ञास्तर्हि Pathatyayam इति लिपिद्वारापि स्फुटं कार्यम् ।पठत्ययम्। इति । अथ 'पठतु+अयम्' इति श्यामपाट्यां लिखित्वा पूर्ववदुपदेशक्रमे ओष्ठस्थाने वकारो (व्) वर्तते न वा ? इति परीक्षणावसरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-७५ एचोऽयवायावः ॥ ८०
जे+अति=जयति । भो+अति= भवति ।
नै+ अकः =नायकः । भौ+उकः= भावुकः ।
६-१-७६ वान्तो यि प्रत्यये ॥७७

शङ्कव्यम् । गव्यम् । नाव्यम् ।
(गौर्यूतौ छन्दसि)
आनो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् ।
लोके तु गोयूतिः ।

विचारायच्छात्रेभ्योऽवसरो देयः । यदि तुच्छात्रा अधिकवेलावधि अनिश्चयान्दोलित- मानसास्तदा वकारस्य दन्तोष्ठम्, इत्युद्बोधनीयम् । **सावधानम्** ! पवर्गतृतीयमोष्ठचवर्णं वकारं मत्वा ओष्ठस्थाने वकारो वर्तते, इतिच्छात्रेषु प्रमाद्यत्सु ओष्ठ्यः= चीरितोदरः एष (दन्तोष्ठजः व) अचीरितोदर इति भेदः स्फारयित्वा बोधयितव्यः । अन्यत् सर्वं पूर्ववत् । पठत्वयम् । इति । एवम्- पितृ+ उपदेशः= पित्रुपदेशः, लृ+आकृतिः= लाकृतिः, इति श्यामपाट्यां लिखित्वा छात्रा उपदेश्याः । अथाऽभ्यासाय प्रश्ना देयाः । यथा-पचति+अयम् । खादतु + ओदनम् । मातृ+आज्ञा । मुनि+ उपदेशः । मधु + इदम् । दहति+ अग्निः । पचतु+ एषा । पितृ+आज्ञा । इत्यादि । अत्र- मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् । मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ॥
इति नीतिश्लोकस्य सपदकृत्यमर्थे शिक्ष्यमाणे छात्राणां व्याकरणाध्ययने रुचिर्वर्धते । अथ १-१-२ अदे.... सूत्रं पाठ्यम् ।
६-१-७५ एचो- ६-१-९७ अकः सवर्णे... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्राऽधोनिर्दिष्टरूपेण श्यामपाट्यां सूत्रे लेख्ये-

(क)

६-१-७४ इको यण् अचि ॥
६-१-७५ एचः अयवायावः (क) ॥ इति ।

अत्र विधेयांशस्याऽर्थबोधने, अकारेण यकारं तानयत, इत्युपदिश्य स्वस्व- लेख्यपुस्तिकायाम् 'अय्' इति लेखयित्वा पुनर्यकारादग्रे किमक्षरमवशिष्टमिति परीक्ष्य गृहीत्वा चोत्तरम्, तेन अकारेण च वकारं तानयत, इत्युपदिश्य पूर्ववत् 'अव्' इति लेखयित्वा रीत्याऽनया 'आय्, आव्' इत्यपि शिक्षकश्छात्रैर्लेखयेत् । अथोदाहरणेषु लक्षणसन्वय-प्रसङ्गे, अत्र "आदेशा अपि चत्वारः" इति विशदनपुरस्सरं ८-४-३९ स्तोःश्चु... सूत्रोक्त- दृष्टान्तमुद्बोध्य क्रमशो भवन्त्यादेशा इति कथयन् स्फुटप्रतिपत्तयेऽ धोनिर्दिष्टरूपेण स्थानिन आदेशाँश्च श्यामपाट्यां लिखेत् ।

यथा- ए ओ ऐ औ स्थानिनः ।
अय् अव् आय् आव् आदेशाः । इति । अथ सकृद्दुःखकरौ+आद्यौ + अन्तिमस्तु । इत्यत्र यथासंभवं छात्रैरेव लक्षणसमन्वयं कारयेत् । अत्र-अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः । सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे ॥इति नीतिश्लोकस्य सपदकृत्यमर्थे शिक्ष्यमाणे छात्राणां मनः प्रसीदति, जागर्त्युत्साहश्च व्याकरणपठने । अथ ६-१-१०५ एङः पदान्तादति- सूत्रं पाठ्यम् ।
६-१-७६ वान्तो- ७-१-२ आयनेयीनीयियः... सूत्रे-प्रदर्शितात् 'शङ्कु + य' इत्यतोऽग्रे सूत्रमिदं पाठ्यम् । एतत्सूत्रार्थोपदेशात् पूर्वमुपरितनस्य ६-१-७५ एचो... सूत्रस्यार्थमुद्बोध्य अव्, आव् इत्यादेशयोः स्थानिनौ 'ओकारौकारौ' इति विशदयेत् । अथ- यि प्रत्यये= यकारादौ प्रत्यये परे, वान्तः= ओकारौकारयोः स्थाने अव् आव् इत्यादेशौ भवतः । इत्यर्थमुपदिशेत् । अत्र शिक्षको मनसा विमृशेत्- वान्तः= वः (अत्रत्योऽकार उच्चारणार्थः= 'व्' इति वर्ण एव ग्राह्यः) अन्ते यस्य स वान्तः प्रकृते पूर्वसूत्रे अव् आव् इत्युक्तौ तेन वान्तशब्देन अव् आव् इत्यादेशौ गृह्येते इति । लक्षणसमन्वयमग्रिप्रक्रियां चच्छात्रैः साधयेत् ।
अथ-प्रकृतमनुसरामः । पुरोडाशाय हिताः पुरोडाश्याः पुरोडाशीया वा । अपूपाय हितम्=अपूप्यम्, अपूपीयम् । इत्यादिच्छात्रैः साधयेत् । अथ ५-१-३६ तेन... सूत्रादारभ्य परतः के प्रत्ययाः स्युः । इति जिज्ञासामुद्भाव्य शिक्षकः ५-१-१८ प्राग्वतेष्ठञ् सूत्रात् ५-१-३५ शाणाद् वा-पर्यन्तानि सूत्राणि दर्शयन्, एभिः सूत्रैः प्रातिपदिकविशेषेभ्यो विभिन्नाः प्रत्यया अधिक्रियन्ते, तानि सूत्राणि सम्यगवधत्त, इति वदन् सूत्राणां तेषामर्थं विशदयेत् । तदर्थमथ ५-१-१८ प्राग्वतेष्ठञ् सूत्रमुपदिशेत् ।
गोर्यू-गोः=गोशब्दस्य ओकारस्य स्थाने, यूतौ=यूतिशब्दे परे, वान्तः (६-१-७६)=अव् इत्यादेशो भवति, छन्दसि=वेदे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(अध्वपरिमाणे च)
गव्यूतिः ।

६-१-७७ धातोस्तन्निमित्तस्यैव ॥
लव्यम् । अवश्यलाव्यम् । तन्निमित्तस्यैवेति नियमान्नेह-ओयते । औयत ।

६-१-७८ क्षय्यजय्यौ शक्यार्थे ॥
क्षय्यम् । जय्यम् । योग्यार्थे तु क्षेयम् । जेयम् ।

६-१-७९ क्रय्यस्तदर्थे ॥
क्रय्यः कम्बलः । तदर्थे इत्युक्तेर्नेह-धान्यं क्रेयं परन्तु नोपलभ्यतेऽत्र ।

६-१-८० भय्यप्रवय्ये चच्छन्दसि ॥
भय्यं किलासीत् । वत्सतरी प्रवय्या ।
लोके तु भेयम् । प्रवेयम् ।
(ह्रदय्या आप उपसंख्यानम्)
ह्रदय्या आपः ।

६-१-८१ एकः पूर्वपरयोः ॥१०७

६-१-८२ अन्तादिवच्च ॥
शिव+आ+इहि=शिव+एहि=शिवेहि ।वृक्षौ ।

६-१-८३ षत्वतुँकोरसिद्धः ॥
कोऽसौ । अधीत्य ।

६-१-८४ आद् गुणः ॥९३
मम+इदम्= ममेदम् । उप+इन्द्रः=उपेन्द्रः । रमा+ईशः=रमेशः । मम+उदरम्= ममोदरम् । गङ्गा+उदकम्=गङ्गोदकम् ।

अध्व-गोर्यूतौ, अव्, अध्वपरिमाणे=मार्गपरिमाणे गम्ये । लोकार्थमिदम् ।

६-१-७७ धातो- यि+प्रत्यये (६-१-७६) धातोः=धातोरेच (ओदौतो) श्चेत्, वान्तः (६-१-७६) तन्निमित्तस्य+एव=तद्यकारादि-प्रत्यय-निमित्तकस्यैव ओत औतश्च स्थाने भवति ।

६-१-७८ क्षय्यजय्यौ=क्षय्य जय्य इति अंयन्तौ निपात्येते, शक्यार्थे= शक्यार्थे गम्ये ।

६-१-७९ क्रय्य-तदर्थे=क्रयार्थे वस्तुनि वाच्ये, क्रय्यः= क्रय्य इत्ययन्तो निपात्यते । क्रय्यः कम्बलः । क्रयार्थं प्रसारित इत्यर्थः ।

भय्यप्रवय्ये=भय्य प्रवय्या इत्ययन्तौ निपात्येते, छन्दसि=वेदे । **प्रवय्या**-स्त्रियामेवेदं निपातनम् ।

ह्रदय्या- ४-४-११० भवे... इति यत् । अकारस्यायादेशो निपात्यते ।

६-१-८१ एक :- पूर्वपरयोः= पूर्वपरयोः स्थाने, एकः= एक आदेशो भवति । इत्यधिक्रियते ६-१-१०८ स्यत्यात्... सूत्रात् प्राक् ।

६-१-८२ अन्ता- पूर्वपरयोः +एकः (६-१-८१)= पूर्वपरयोः स्थाने जात एकादेशः, अन्तादिवत्= एकादेश- पूर्वस्थानि- घटित-समुदायान्तवत् (...समुदाय- वृत्तिधर्मवान्) एकादेश-परस्थानिघटितसमुदायादिवत् (...समुदायवृत्तिधर्मवान्) भवति । 'अन्तादिशब्दावुपस्थितैकादेशस्थानिपरौ' पूर्वपरशब्दौ च तद्घटित समुदायपरौ । इति नागेशः । **शिवेहि** अत्र पूर्वान्तवद्भावेन एकारस्याऽऽङ्त्वात् ६-१-९२ ओमा... इति पररूपम् । **वृक्षौ** अत्र परादिवद्भावेन सुँबन्तत्वात् १-४-१४ सुँप्ति... इति पदसंज्ञा ।

६-१-८३ षत्वतुँकोः = षत्वे तुँकि च कर्तव्ये, पूर्वपरयोः+ एकः (६-१-८१)=पूर्वपरयोः स्थाने जात एकादेशः, असिद्धः= असिद्धो भवति ।

६-१-८४ आद् गु- १-१-२ अदेङ्...सूत्रार्थोपदेशान्तरं सूत्रमिदं पाठचम् । अत्राऽधोनिर्दिष्टरूपेण श्यामपाटचां सूत्राणि लेख्यानि । यथा-

(क)
६-१-७४ इको यण् अचि ॥
(ख) (ग)
६-१-८१ एकः पूर्वपरयोः ॥
६-१-८४ आद् (क) (ग) (ख) गुणः ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-८५ वृद्धिरेचि ॥ ८९, ८६
मम+एतत्=ममैतत् ।मम+ओकः=ममौकः ।
नेपाल+ऐतिह्यम्=नेपालैतिह्यम् ।
सज्जन+औदार्यम्=सज्जनौदार्यम् ।

आत् (यथा-ग्राम-ग्रामात्, वन- वनात्, तथैव, अ-आत् इति बोधयित्वा) = अवर्णात्, (क)= अचि परे, (ग)= पूर्वपरयोः स्थानेः, (ख)+गुणः= एको गुण आदेशो भवति । इति सूत्रार्थ उपदेश्यः । अथ- मम + इदम् इति श्यामपाट्यां लिखित्वा अकारस्य स्थानं कण्ठः, इकारस्य स्थानं तालु इत्युद्बोधयता शिक्षकेण कण्ठतालुस्थानवर्णौ श्यामपाटचां लिखित्वा तयोरधः अ, ए, ओ वर्णा लेख्याः ।
यथा- ए ऐ (एदैतोः कण्ठतालु) कण्ठतालुवर्णौ ।
अ ए ओ इति प्रसक्तवर्णाः
अथ कण्ठतालुस्थाने अकारोऽस्ति न वा ? एकारोऽस्ति न वा ? ओकारोऽस्ति न वा ? इति प्रश्नानां छात्रेभ्यो यथार्थमुत्तरे प्राप्ते ६-१-७४ इको... सूत्रोदाहरणेष्विव यथायोग्यं √ × चिह्ने देये । यथा- अ× ए√ ओ× इति । अतः पूर्वपरयोः स्थाने एकारादेशे मम् + एदम्= ममेदम् । एवम्- मम+उदरम्= ममोदरम्, इत्यत्रापि ।
ओ औ (आदौतोः कण्ठोष्ठम्) कण्ठोष्ठवर्णौ ।
अ ए ओ इति प्रसक्तवर्णाः इति लिखित्वा पूर्ववद् व्यवहरणीयम् । १-१-४९ स्थाने...सूत्रं साम्प्रतं नोपस्थाप्यम् । अथ नर+ईशः । तथा+इति । गङ्गा+उदकम् । तव+उदरम् । महा+इन्द्रः । मृगेण+उक्तम् । इत्यादयः प्रश्नाः सन्धये देयाः । अथ १-१-५० उर....सूत्रमुपदेश्यम् ।
६-१-८५ वृद्धिः- १-१-१ वृद्धिरादैच्- सूत्रार्थोपदेशानन्तरं सूत्रमिदं पाठचम् । अत्राऽधोनिर्दिष्टरूपेण शयामपाटचां सूत्राणि लेख्यानि-

(क) (ख) (ग)
६-१-८१ एकः पूर्वपरयोः ॥ ६-१-८४ आद् गुणः ।
६-१-८५ वृद्धिः (ग) एचि (ख) (क= एका) ॥ इति ।

अथाऽधोनिर्दिष्टरूपेणच्छात्रा बोधनीयाः -अयि वत्साः ? यथा कुल्याया आगतं जलं त्रिकोणे क्षेत्रे त्रिकोणायते, चतुष्कोणे क्षेत्रे च चतुष्कोणायते, तथैव पदान्यपि यादृशैः पदैः सम्बध्नन्ति तादृशानि भवन्ति । अत एक इत्यनुवर्तमानं पदं वृद्धिरिति स्त्रीलिङ्गशब्देन सम्बन्धाद् एका इति रूपाय कल्पते- एका, वृद्धिरिति । अथ (ग)=आत्=अवर्णात्, एचि=एचि परे, (ख)=पूर्व परयोः स्थाने, (क) एका, वृद्धिः= वृद्धिर्भवति । इत्यर्थ उपदेश्यः । अथ 'मम+एतत्' इति श्यामपाटचां लिखित्वा तत्र ६-१-८४ आद् गु... ६-१-८५ वृद्धि...सूत्रयोः समन्वयं छात्रैरेव कारयित्वा तयोः कतरत् सूत्रं प्रकृते प्रवर्तेत ? इतिच्छात्राणां मनसि दृढाऽऽकाङ्क्षा जागरयितव्या । तदाकाङ्क्षाशमनाय चाऽधोनिर्दिष्टा रीतिः स्वीकार्या । प्रथमं श्यामपाटचां आभ्यन्तर-बाह्यरूपेण वृत्तद्वयं लेख्यम् । यथा-

तत्र क मण्डलं ख मण्डलं च दर्शयता शिक्षकेणच्छात्राः सम्बोध्याः- अयि वत्साः ? यदि श्यामः क मण्डले ममाधिकार इति रामः पुनः ख मण्डले तदभ्यन्तरे क मण्डले च ममैवाऽधिकार इति भणतः । तयोर्विवादे यूयं कतरं निगृह्णीयात ? यदि श्यामो निगृह्यते तदा तस्याऽवकाशो न भवति । रामे तु निगृह्यमाणेऽपि तस्याऽवकाशः ख मण्डले शिष्यते । अतः सावकाशो रामो निगृह्यते न तु निरवकाशः श्यामः । तथैव व्याकरणेऽपि सावकाशो निरवकाशेन बाध्यते । प्रकृते च एच् प्रत्याहारोऽच्प्रत्याहाराभ्यन्तरेऽस्तीति निरवकाशा वृद्धिः सावकाशं गुणं बाधते । इति । **सावधानम्** ? दृष्टान्तश्छात्राणां सरलतया बोधो भवत्विति प्रस्तूयते । यदि तु दृष्टान्त एव भाराय भवतीत्यनुभूयते शिक्षकैस्तदा दृष्टान्तो न देयः । केवलं ६-१-८४ आद् गु... सूत्र-समन्वयं कारयित्वा तेन प्राप्तं गुणं बाधित्वा इत्येवोपदेश्म् । अथ ६-१-९७ अकः...सूत्रमुपदेश्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-८६ एत्येधत्यूठ्सु ॥
उपैति । उपैधते । प्रष्ठौहः ।
एचीत्यनुवृत्तेर्नेह-
उपेतः । मा भवान् प्रेदिधत् ।
'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् इति परभाषया
६-१-९१ एङि...इत्येव बाध्यते, न तु
६-१-९२ ओमा...इति । शिव+आ+इहि= शिवेहि । अव+आ+इहि= अवेहि ।
(अक्षादूहिन्यामुपसंख्यानम्)
अक्षौहिणी ।
(स्वादीरेरिणोः)
स्वैरम् । स्वैरी । स्वैरिणी ।
(प्रादूहोढोढ्येषैष्येषु)
प्रौहः । प्रौढः । अर्थवद्ग्रहणपरिभाषया नेह-प्रोढवान् । प्रौढिः । प्रैषः । प्रैष्यः ।
(ऋते च तृतीयासमासे)
सुखेन ऋतः=सुख+ ऋतः= सुखार्तः । तृतीयेत्युक्तेर्नेह-परमर्तः ।
(प्रवत्सतरकम्बलवसनार्णदशानामृणे)
प्रार्णम् । वत्सतरार्णम् ।
६-१-८७ आटश्च ॥
गौर्यै । गौर्याः ।

६-१-८६ एत्ये- आत् (६-१-८४) एचि (६-१-८५)= एजाद्योः, एत्येधति= इण् एध् इति धात्वोः परयोः, ऊठ्सु=ऊठि च परे, पूर्वपरयोः+एका (६-१-८१) वृद्धिः (६-१-८५) । पररूपगुणापवादः । **उपैधते** १-१-५३ आदेः... सूत्रबलेन परस्यादेः(एध एकारस्य) स्थाने आदेशो भवति । एवमग्रे अक्षादूहिन्यामित्यादिवार्तिकेषु अक्षशब्दाऽवयवादवर्णात् ऊहिनीशब्दावयवेऽचि इत्याद्यर्थस्तथा ६-१-८८ उपसर्गा...इत्यादिषु उपसर्गावयवादवर्णात् ऋति=ऋकारादिधातोरवयवेऽचि इत्याद्यर्थो व्यर्थ एव । अवर्णान्तादक्षशब्दात् ऊहिनीशब्दे परे, अवर्णान्तादुपसर्गात् ऋकारादौ धातौ परे इत्याद्यर्थेऽपि १-१-५१ अलो...सूत्रद्वारा १-१-५३ आदेः... सूत्रद्वारा च पूर्वान्त्यपराद्यवर्णयोरेवादेशसिद्धेः । तथापि गतानुगतिको लोक इत्यनुस्रियतेऽत्राऽपि । **अक्षा-** अर्थ उपरि वर्णितः ।
स्वात्= स्वशब्दावयवाऽवर्णात्, ईरेरिणोः=ईर ईरिन् इति शब्दाऽवयवेऽचि परे, पूर्वपरयोः+एका (६-१-८१) वृद्धिः (६-१-८५) ।
प्रात्= प्रशब्दावयवाऽवर्णात्, ऊहो...ष्येषु=ऊह ऊढ ऊढि एष एष्य इति शब्दाऽवयवेऽचि परे, प्राग्वत् ।
ऋते- आत् (६-१-८४) ऋते= ऋतशब्दाऽवयवेऽचि परे, प्राग्वत् , तृतीयासमासे ।
प्रवत्सतर...दशानाम्= प्र वत्सतर कम्बल वसन ऋण दश-शब्दाऽवयवाऽवर्णात्, ऋणे=ऋणशब्दा ऽवयवेऽचि परे, प्राग्वत् ।
६-१-८७ आट- ७-३-११२ आण्नद्याः- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र ६-१-७४ इको...सूत्रात् अचि इति ६-१-८५ वृद्धि...सूत्राद् वृद्धिरिति ६-१-८१ एकः...इति सूत्रं चा ऽनुवर्तन्त इति बोधनपुरस्सरम्-आटः, अचि, पूर्वपरयोः, एका वृद्धिः, इत्यर्थ उपदेश्यः । लक्षणसमन्वयः सन्धिश्चच्छात्रैरेव साधनीयौ । एवं ङसिँङसोरपि प्रक्रिया छात्रैरुच्यमाना श्रोतव्या । ओसि-गौरी+ओस् इति श्यामपाटचां लिखित्वा रूपसिद्धये छात्राः प्रवर्तयितव्याः । आमि पूर्वं नदीसंज्ञा छात्रैः कारयितव्या । अथ गौरी+आम् इति श्यामपाटचां लिखित्वा रूपसिद्धये छात्राः प्रवर्तयितव्याः । सत्यामावश्यकतायां सबाध्यबाधनं ७-१-५४ ह्रस्व...सूत्रम् ८-४-२ अटकु...सूत्रं चोद्वोधनीयम् । रूपसिद्धये लक्षणसमन्वयस्तु छात्रैरेव कारयितव्यः । गौरीणाम्, इति ।

गौर्याम्

सप्तम्येकवचने गौरी+इ इत्यवस्थायां सबाध्यबाधनं ७-३-११६ ङेराम्...इति सूत्रसमन्वयं छात्रैः कारयित्वा श्यामपाटचां गौरी+आम् इति लिखित्वा ७-३-११६ सूत्रोदाहृते कन्यायाम् इत्यत्र दर्शितया रीत्या छात्रै रूपं साधनीयम् । इयाँस्तु विशेषो यत् तत्रत्येन याटा प्रकृते आड् विनिमातव्य इति । किञ्च ७-३-११२ आण्न...सूत्रप्रवृत्त्यनन्तरम् ६-१-८७ आट...सूत्रप्रवृत्तौ गौरी+आम् इत्यवस्थायां कथं पुनर्न नुँटः प्रवृत्तिरिति यदिच्छात्राः सन्दिह्युस्तदा प्रेष्यप्रेषकदृष्टान्तद्वारा छात्राणां जिज्ञासा प्रशमयितव्या । स्वयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-८८ उपसर्गादृति धातौ ॥ ९१,८९,९१ प्राच्छींति । उपसर्गादित्युक्तेर्नेह-मालर्च्छीति । उपसर्गेणैव धातोराक्षेपे सिद्धे पूनर्धातुग्रहणं शाकल्यनिवृत्त्यर्थम्।तेनोक्तोदाहरणे पाक्षिकोऽपि प्रकृतिभावो न भवति । ६-१-८९ वा सुँप्यापिशलेः ॥ प्रार्षभीयति, प्रर्षभीयति । उपाल्कारीयति, उपल्कारीयति । ६-१-९० औतोऽम्शसोः ॥ गाम । गाः । ६-१-९१ एङि **पररूपम्** ॥९७ प्रेजते । उपोषति । वा सुँप्यापिशले (६-१-८९) रित्यनुवर्त्य वाक्यभेदेन व्याख्यायते-एङादौ सुब्धातौ वेति । उपेडकीयति; उपैडकीयति । प्रोघीयति; प्रौघीयति ।	(शकन्ध्वादिषु पररूपं वाच्यम्) शक+अन्धुः=शकन्धुः । कुल+अटा=कुलटा । मनस्+ईषा मनीषा । (सीमन्तः केशवेशे) ग.सू. सीमान्तोऽन्यः । (सारङ्गः पशुपक्षिणोः) ग.सू. साराङ्गोऽन्यः । आकृतिगणोऽयम् । (एवे चाऽनियोगे) क्वेव भोक्ष्यसे । अनियोगे. इत्युक्तेर्नेह-तवैव । (ओत्वोष्ठयोः समासे वा) स्थूलोतुः स्थूलौतुः । बिम्बोष्ठः, बिम्बौष्ठः । समासे इत्युक्तेर्नेह- बालकस्यौष्ठं पश्य । (एमन्नादिषुच्छन्दसि पररूपं वक्तव्यम्) अपां त्वा+एमन्=अपां त्वेमन् । अपां त्वा+ओद्मन्=अपां त्वोद्मन् ।

शङ्का तु नोद्भावयितव्या । प्रेष्यप्रेषक-दृष्टान्ताकारश्च-उभयोरेकः प्रेष्यो वर्तते । तमेकदैव कश्चन पूर्वं गच्छेति, परश्च पश्चिमं गच्छेति चादिशति चेत् स प्रेष्यः पूर्वतो गच्छेत्तु पश्चिमं न गच्छेत् कालातिपातात् । पश्चिमतो गच्छेत्तु पूर्वतो न गच्छेत् कालातिपातादेवेति । तथैव नुँटः कालातिपातात् पुनः प्राप्तिर्न भवतीति ।

हे गौरि

अत्र नदीसंज्ञा छात्रैरभ्यस्तैव । गौरी+स् इत्यवस्थायाम् ७-३-१०७ अम्बार्थ...सूत्रमुपदेश्म् ।

६-१-८८ **उप**- आत् (६-१-८४)= अवर्णान्तात्, उपसर्गात्, ऋति=ऋकारादौ, धातौ=धातौ परे, पूर्वपरयोः+एका (६-१-८१) वृद्धिः (६-१-८५) । पूर्वभागे १-१-५१ अलो...इति, परभागे १-१-५३ आदेः...इति बलेन पूर्वान्तपरादिवर्णयोः स्थाने वृद्धिर्भवति । **प्रकृतिभावो** ६-१-१२४ ऋत्यक इति विधीयमानः ।

६-१-८९ **वा सुँ**- आत् (६-१-८४) उपसर्गात् (६-१-८८) ऋति (६-१-८८) सुँपि=सुँबन्तप्रकृतिकप्रत्ययान्ते, धातौ (६-१-८८) पूर्वपरयोः+एका (६-१-८१) वृद्धिः (६-१-८५) वा=विभाषया भवति, आपिशलेः=आपिशलिमुनिमते । आपिशलिग्रहणं पूजार्थम्, वा ग्रहणेनैव विकल्पसिद्धेः ।

६-१-९० **औतो**- ७-२-११५ अचो ञ्णिति-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)
६-१-७४ इको यण् अचि ॥
(ख) (ग)
६-१-८१ एकः पूर्वपरयोः ॥
६-१-९० आ ओतः अम्शसोः (क) (ग) (ख) इति ।

ओतः=ओकारात्, अम्शसोः=अम् शस्- सम्बन्धिनि, (क)=अचि, (ग)= पूर्वपरयोः स्थाने, (ख)=एकः, आ= आकारो भवति । इत्यर्थ उपदेश्यः । (अत्र शिक्षकेण विमृश्यं यद् 'अचि' इत्यनुवृत्तिः खलु गतानुगतिकरीत्याऽङ्गीकृतेति । इदं च विमृश्यम्-शसा साहचर्याद् अम् द्वितीयैकवचनमात्रं गृह्यते । तेनेह न-अचिनवम् इति ।) लक्षणसमन्वयस्तु छात्रैरेव कारयितव्यः । गाम् । शसि च ७-२-११५ अचो...सूत्रवर्जं प्राग्वत्, इत्युपदेशपुरस्रं ६-१-९९ तस्मा... सूत्राप्रवृत्तिविषये छात्राः परीक्षणीयाः । ङसिँ ङसोः ६-१-१०६ ङसिँ...इति पूर्वरूपम् । गोः २ । आमि-गवाम् । ङौ-गवि इत्याद्युपदेश्यम् । सम्बोधनेऽपि पूर्वप्रथमावत् । हे गौः । हे गावौ । हे गावः । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-९२ ओमाङोश्च ॥

शिवाय + ॐ नमः = शिवायों नमः ।
शिव+आ+इहि = शिव+ऐहि = शिवेहि ।
अव+आ+इहि = अव +एहि= अवेहि ।

६-१-९३ उस्यपदान्तात् ॥९४

अपुः । अद्युः ।

अथ स्त्रीलिङ्ग-प्रक्रिया
तत्र स्त्रीशब्द-प्रक्रियायां
विशेषः

वत्साः ? कन्याशब्द आकारान्तो (आबन्तः) गौरीशब्दश्च दीर्घेकारान्तः (ङचन्तः) पूर्वमुपदिष्टौ । अतोऽत्र विशेषकार्यभाक्त्वात् स्त्रीशब्दोऽप्युपदिश्यते । इति वदता शिक्षकेण स्त्रीशब्दोऽपि ङचन्त इति बोधयित्वा प्रथमैकवचने गौरीशब्दवत् प्रक्रियेति बोधयता छात्रैरुच्यमाना प्रक्रिया श्रोतव्या । स्त्री । अथ 'स्त्री+औ' इति श्यामपाटचां लिखित्वा सबाध्यबाधनं ६-४-७९ स्त्रियाः सूत्रमुपदेश्यम् ।

६-१-९१ एङिः- आत्+उपसर्गात् (६-१-८४+८८)= अवर्णान्तादुपसर्गात्, एङि=एङादौ, धातौ (६-१-८८) पूर्वपरयोः+एकम् (६-१-८१) पररूपम्=पररूपं भवति । ६-१-८५ वृद्धि...इत्यस्यापवादः ।

शकन्ध्वादिषु= शकन्धु- प्रभृति- गणपठित- शब्द- सिद्धये, पररूपम्= अनुरूपं पररूपं वाच्यम् । तच्च पूर्वस्य टेः परस्यादेशश्च भवति । तेन मनस्+ईषा=मनीषा, इत्यादि सिध्यति ।

एवे- आत् (६-१-८४) अनियोगे=अनिश्चयार्थके, एवे=एवशब्दाऽवयवेऽचि परे, पूर्वपरयोः+ एकम् (६-१-८१) पररूपम् (६-१-९१) ।

ओत्वो- आत् (६-१-८४) ओत्वोष्ठयोः= ओतु ओष्ठ इतिशब्दावयवेऽचि, पूर्वपरयोः+एकम् (६-१-८१) पररूपम् (६-१-९१) वा=विभाषया, समासे=समासे सति ।

६-१-९२ ओमा- आत् (६-१-८४) ओमाङोः=ओमि आङि च परे, पूर्वपरयोः+एकम् (६-१-८१) पररूपम् (६-१-९१) । **एहि** अत्रैकारस्य ६-१-८२ अन्ता....इति पूर्वान्तवद्भावेनाङ्त्वम् ।

६-१-९३ उस्य- ७-३-१०० अदः...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क) (ख)
६-१-८१ एकः पूर्वपरयोः ॥
(ग)
६-१-८४ आद् गुणः ॥
(घ)
६-१-९१ एङि पररूपम् ॥

६-१-९३ उस्यपदान्तात् अपदान्तात् (ग) उसि (ख) (क) (घ) इति । अपदान्तात्=पदान्ताऽवर्तमानात्, (ग)=आत्= अवर्णात्, उसि=उसि परे, (ख)=पूर्वपरयोः स्थाने, (क)+(घ)=एकं पररूपम् । इत्यर्थमुपदिश्य लक्षणसमन्वयं (लक्षणसमन्वये जाग्रत्यां शङ्कायाम् ६-१-८६ एत्ये....सूत्रटिप्पणी दृश्या) छात्रैः कारयेत् । अद्युः । अद्याः । अद्यातम् । अद्यात । अद्याम् । अद्याव । अद्याम । इत्थम् अदादौ विशेषकार्यं विकरणस्य शपो लुग् भवतीति बोधयेत् । कर्मणि लकारे तु गणप्रयुक्तं विशेषकार्यं न भवतीति पूर्वमुपदिष्टमपि पुनरुद्बोधयता शिक्षकेण छात्रैः साध्यमानानि रूपाणि श्राव्याणि । अथ "जुहोत्यादि (हु-प्रभृति) गणप्रयुक्त-विशेषकार्यं विकरणस्य शपः श्लुः" इति बोधनाय जुहोत्यादि-धातुपाठं दर्शयता शिक्षकेण, एते धातवो जुहोत्यादयः (हु-प्रभृतयः) एषु सर्वेषु शपः श्लुर्भवति । इति कथयता हुधातोः कर्तरि लँटि 'पचति' इत्यत्रेव प्रक्रियाक्रमे 'हु+अ+ति' इति श्यामपाटचां लिखित्वा २-४-७५ जुहो...सूत्रमुपदेश्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-९४ अतो गुणे ॥

यः । अपदान्तादित्यनुवृत्तेर्नेह-मम+
अयम्=ममायम् ।

६-१-९५ अव्यक्तानुकरणस्यात इतौ ॥ ९६

पटत्+इति=पटिति ।
(एकाचो न)
श्रदिति ।

६-१-९६नाम्रेडितस्यान्त्यस्य तु वा ॥

पटत्पटेति, पटत्पटदिति ।
(नित्यमाम्रेडिते डाचि)
खटखटा करोति ।

६-१-९७ अकः सवर्णे दीर्घः ॥ १०३,१०२

मम+अयम्=ममायम् । दधि+इदम्=दधीदम् ।
भानु+उदयः=भानूदयः ।
(ऋति सवर्णे ऋ वा)
होतृकारः, होतॄकारः ।

६-१-९४ अतो- ७-२-१०२ त्यदादीनामः- सूत्रानन्तरं सूत्रमिदं पाठयम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)
६-१-८१ एकः पूर्वपरयोः ॥
(ग)
६-१-९१ एङि पररूपम् ॥
(घ)
६-१-९३ उसि अपदान्तात् ॥
६-१-९४ (घ) अतो गुणे (ख) (क) (ग) ॥ इति ।

(घ)= अपदान्तात्, अतः=ह्रस्वाकारात्, गुणे= गुणे (अ ए ओ) परतः, (ख)= पूर्वपरयोः स्थाने, (क)+(ग)=एकं पररूपं भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयायच्छात्रा आदेश्याः । इत्थं सर्वासु विभक्तिषु सर्वेषु वचनेषु प्रक्रियामिमां साधयित्वाऽग्रे सर्वशब्दस्येव प्रक्रिया ज्ञेया । प्रकृते य+स् । रुँत्वे विसर्गे च यः । अन्यानि रूपाणिच्छात्रैरुच्यमानानि शिक्षकः शृणुयात् । त्यद्, तद्, इत्यनयोस्तु सौ विशेषः । यथा 'त्य+स्' 'त+स्' इति श्यामपाटयां लिखित्वा ७-२-१०६ तदोः सः सा..सूत्रं प्रस्तुवीयात् ।

६-१-९५ **अव्यक्तानुकरणस्य**=अव्यक्तध्वन्यनुकारि-शब्द-सम्बन्धिनः, अतः= 'अत्' इति शब्दात्, इतौ=इति शब्दे परे, पूर्वपरयोः+एकम् (६-१-८१) पररूपम् (६-१-९१) । **पटिति** पूर्वभागे 'अत्' इति सर्वस्य स्थाने भवति, न त्वत्र १-१-५१ अलो...सूत्र-प्रवृत्तिः अनर्थकत्वात्, अग्रिमसूत्रे ऽन्त्यग्रहणाज्ज्ञापकाच्च ।

६-१-९६ **नाम्रे-** आम्रेडितस्य=आम्रेडितसंज्ञकस्य, अव्यक्तानुकरणस्य+अतः+इतौ (६-१-९५) न= पररूपं न भवति, अन्त्यस्य तु=अन्त्यवर्णस्य (तकारमात्रस्य) स्थाने तु, वा=विकल्पेन पररूपं भवति । पूर्वभागे तकारमात्रस्य परभागे तु १-१-५३ आदेः इति बलात्, इकारस्य । अर्थात् तकारेकारयोः स्थाने एक इकारो भवतीति भावः ।

नित्य- डाचि= डाजन्ते, आम्रेडिते= आम्रेडिते परे, नित्यम्= पूर्वोक्तं कार्यं नित्यं भवति । अव्यक्तानुकरणस्यातस्तकारमात्रस्य परस्य चाऽऽद्यस्य स्थाने पररूपं भवतीति भावः । उदाहरणे ५-४-५७ अव्यक्तानुकरणाद्...इति डाच् । ८-१-११ कर्म...सूत्रस्थ-डाचि...इति वार्तिकेन डाचि विवक्षिते पूर्वमेव द्वित्वम् ।

६-१-९७ अकः- ६-१-८५ वृद्धिरेचि-सूत्रानन्तरं सूत्रमिदं पाठयम् । अत्राऽधो निर्दिष्टरूपेण सूत्राणि लेख्यानि-

(क)
६-१-७४ इको यण् अचि ॥
(ख) (ग)
६-१-८१ एकः पूर्वपरयोः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(लृति सवर्णे लृ वा) होत्लृकारः, होतॄकारः । ६-१-९८ प्रथमयोः **पूर्वसवर्णः** ॥१०३	मुनि+औ = मुनी । भानु+औ = भानू । बालक+जस् = बालक+अस् = बालकास् = बालकाः ।

६-१-९७ अकः सवर्णे (क) (ग) (ख) दीर्घः ॥इति। अकः=अग् (अक् इति प्रत्याहारः) वर्णात्, सवर्णे= सवर्णसंज्ञके, (क)=अचि, (ग)=पूर्वपरयोः स्थाने, (ख) =एकः, दीर्घः=दीर्घो भवति ।
ततः प्रकृतसूत्रार्थोपदेश- प्रसङ्गे १-१-९ तुल्या...सूत्रस्य तत्रत्यवार्तिकस्य चार्थ उद्बोधनीयः ।
अथ मम+अयम् इति श्यामपाटचां लिखित्वा अत्र कस्य सूत्रस्य प्राप्तिरस्तीच्छात्राः प्रष्टव्याः । यथोचितमुत्तरेऽनागते ६-१-७४, ६-१-८४, ६-१-८५ सूत्राणां प्राप्तिरस्ति न वेति प्रत्येकं सूत्रमुद्दिश्य पृष्ट्वा छात्रेभ्य उत्तरे गृहीते ६-१-८५ वृद्धि...सूत्रोक्त-दृष्टान्त-प्रदर्शन-पुरस्सरं बाधं बोधयित्वा प्रकृतसूत्र-प्रवर्तना-प्रसङ्गे ऽधोनिर्दिष्टरूपेण कण्ठचवर्णा दीर्घवर्णाश्च श्यामपाट्यां लेख्याः-
अ (अ, आ) क् ख् ग् घ् ङ् ह् = कण्ठचवर्णाः ।
आ ई ऊ ॠ ए ऐ ओ औ = दीर्घवर्णाः ।
अथ प्रत्येकं वर्णानुद्दिश्य एष कण्ठस्थाने वर्तते न वेतिच्छात्राः प्रष्टव्याः ।
क्रमे तस्मिन् कण्ठचवर्णोपरि √ चिह्नमिदं देयम् । कण्ठचेतरवर्णोपरि च × चिह्नमिदं देयम् । एवञ्च आ√ ई× ऊ× ॠ× ए× ऐ× ओ× औ× इति वर्णाः श्यामपाटचां दृश्यन्ते । अत आकारो भवतीति च्छात्रा उपदेश्याः । इत्थमुदाहरणान्तरेष्वपि पूर्ववद् बाधबोधनं तालव्यादिवर्णलेखनपुरस्सरं तत्तत्स्थानेषु दीर्घवर्णानां सत्ताबोधनं च कार्यम् । अथ तव+असौ, न+अस्ति, मही+इयम्, धनी+इति, विष्णु+उपकारः, आशु+उदेति, मातृ+ऋणम्, पितृ+ऋद्धिः, इत्यादयः प्रश्नाः समाधानाय देयाः ।
अथ ६-१-७५ एचोऽयवायावः सूत्रमुपदेश्यम् ।
ऋति- अकः (६-१-९७) सवर्णे, ऋति=ह्रस्वे ऋकारे परे, पूर्वपरयोः+एकः (६-१-८१) ॠ वा-नायं ह्रस्वो नापि दीर्घः । नृसिंह इवायम् । अत्र मध्ये द्वौ रेफौ अभित एकमात्रोऽज्भागः । एवमग्रिमलृकारेऽपि मध्ये द्वौ लकारौ शेषं पूर्ववत् ।
लृति- अकः, सवर्णे लृति, पूर्वपरयोः, लृ वा । लृकाराभावे पूर्वसूत्रेण दीर्घो भवन् ॠकारो भवति, न तु लृकारो दीर्घाभावात् ।
६-१-९८ प्रथः-१-४-२२ द्वचेकयो...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)
६-१-७४ इको यण् अचि ॥
(ख) (ग)
६-१-८१ एकः पूर्वपरयोः ॥
(घ) (ङ)
६-१-९७ अकः सवर्णे दीर्घः ॥

६-१-९८ (घ) प्रथमयोः (क) (ग) पूर्वसवर्णः (ख) (ङ) इति । (घ)=अकः, प्रथमयोः= प्रथमाद्वितीया-विभक्ति-सम्बन्धिनि, (क)=अचि, (ग)=पूर्वपरयोः स्थाने, पूर्वसवर्णः=पूर्वस्य सवर्णः, (ख)+(ङ)=एको दीर्घो भवति । अथ लक्षणसमन्वयक्रमे पूर्वोक्तोदाहरणे निजाङ्गुल्या मुनि इत्यस्य इकारं प्रदर्श्य अस्य सवर्णो दीर्घः कः ? इति च्छात्रान् पृष्ट्वा तेभ्यो यथार्थमुत्तरं गृहीत्वैव पूर्वपरयोर्दीर्घेकारे मुनी इति रूपं सिद्धमिति च्छात्रा उपदेश्याः । एवमेव भानू उदित इति वक्तव्ये भानू इति पदं छात्रैः साधयितव्यम् । अत्र शिक्षकेणावधेयं यत् ६-१-९४ अतो...सूत्रेण ६-१-९७अकः...सूत्रमेव बाध्यते; न तु ६-१-९८ प्रथ...सूत्रमपि । यतः, पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् । इति । अथ ६-१-१०० नादिचि-सूत्रमुपदेश्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-९९ तस्माच्छसो नँः पुंसि ॥	६-१-१०० नादिचि ॥ १०१,१०२
बालकान् । रामश्यामविष्णुमित्रान् । अग्नीन् । वायून् । पितॄन् ।	बालकौ । रामश्यामौ ।

६-१-९९ तस्मा- १-३-८ लशक्वतद्धिते-सूत्रानन्तरं सूत्रमिदं पाठचम् । एतत्सूत्रार्थशिक्षणात् पूर्वमेव शिक्षकश्छात्रानुपदिशेत्, यत्, अयि वत्साः ? अनुबन्धविनिर्मुक्तेन शस् (अस्) प्रत्ययेन सह पूर्वसवर्णदीर्घे सति शस् (अस्) प्रत्ययाऽकारः सर्वत्र पूर्वसवर्णदीर्घाय कल्पते । अर्थात् पूर्वसवर्णदीर्घात् परतो दन्त्यसकारमात्रमवशिष्यते । यथा-बालक+शस्=बालक+अस्= बालकास्, अत्र पूर्वसवर्णदीर्घ आकारस्तस्मात् परतो दन्त्यसकारो वर्तते । एवं मुनि+अस्-मुनीस्, भानु+अस्-भानूस्, पितृ+अस्-पितॄस्, इत्यत्र क्रमशः पूर्वसवर्णदीर्घात् ईकारात्, ऊकारात्, ॠकारात् परतो दन्त्यसकारो वर्तत इति । अथ तच्छब्दः पूर्वपरामर्शी भवति । यथा-पुरा प्रतापी राजा गोरक्षाधीशः पृथ्वीनारायणसाहदेवो बभूव । तस्मात् सिंहप्रतापो जज्ञे । अत्र तस्मात्=पृथ्वीनारायणसाहदेवादित्यर्थो ज्ञायते । तथैव प्रकृतसूत्रेऽपि तस्मात् इत्यस्य पूर्वप्रकृतात् इत्यर्थः । किञ्चात्र पूर्वप्रकृतम् ? पूर्वसवर्णदीर्घः (पूर्वप्रकृतः) अतः, तस्मात्= पूर्वसवर्णदीर्घात् परस्य, शसः=शसः स्थाने, इत्यर्थ आपाततः प्रतीयते, किन्तु प्रतिपादितं साम्प्रतमेव नहि पूर्वसवर्णदीर्घात् परतः शस् (अस्) लभ्यते । किं तर्हि लभ्यते ? सकारमात्रमिति । अतः शसः=शसः सकारस्य स्थाने, नँः= नँ (अनुबन्धनलोपे न्) आदेशो भवति, पुंसि=पुलिङ्गे, इत्यर्थो बोधयितव्यः । विशेषः-यदि पूर्वसवर्णदीर्घात् परतः शस् (अस्) न लभ्यते कथं तर्हि तथा निर्देशः ? उच्यते यथा कटोपरि कम्बले विस्तारिते कटस्य कश्चनांशो ऽनाच्छादितश्चेत् 'कटो दृश्यते' इत्युच्यते, तत्रैवं गम्यते कटस्यावयवो दृश्यत इति । तथैव पूर्वसवर्णदीर्घात् परतः शस् न लभ्यते, 'तस्मात् (पूर्वसवर्णदीर्घात् परस्य) शसः' इति च निर्दिश्यते । तत्रैवं ज्ञायते-शसः=शसोऽवयवस्य सकारस्येति । लक्षणसमन्वयश्छात्रैः कारयितव्यः । पुंसीत्युच्यते तेन स्त्रीलिङ्गे न प्रवर्तते । यथा-गुरुः कन्याः पाठयति । अत्र नकारो न ।

भिस्

यद्यपि तृतीयैकवचन (टा प्रत्यय) स्योपदेशः क्रमप्राप्तः । तथापि ७-१-९ अतो...सूत्रार्थबोधं विना ७-१-१२ टा ङ...सूत्रार्थो दुर्बोध इति प्रथमं बहुवचनोपदेश एवोचित इति शिक्षकेण विभावनीयम् । अतः 'फलैः पादपा नमन्ति' इति वक्तव्ये फलैः इति प्रयोगः कथं सिध्येदित्याकाङ्क्षायां फलप्रातिपदिकात् ४-१-२ स्वौज...सूत्रेण टा भ्याम् भिस् इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२१ बहु...सूत्रेण फल+भिस् इति जाते ७-१-९ अतो भिस...सूत्रमुपदेश्यम् ।

६-१-१०० नादि- ६-१-९८ प्रथमयोः...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र 'रामश्यामौ पठतः' इति वाच्ये 'रामश्यामौ' इति प्रयोगः कथं सिध्येदिति जिज्ञासामुद्भाव्य पूर्ववत् प्रक्रियोपक्रमे द्वयोर्वाच्ययोः कतमद् वचनं भवति ? इतिच्छात्रान् पृष्ट्वा तेभ्यस्तथ्यमुत्तरं गृहीत्वा रामश्याम+ औ इति श्यामपाटचां लिखित्वा बाध्ये सूत्रे छात्रैर्बाधयित्वा ६-१-९८ प्रथमयोः...सूत्र-समन्व-क्रमे यदि सूत्रमिदं प्रवर्तेत तदा को वर्णो भवेदिति च्छात्राः परीक्षणीयाः । अथ तेभ्यो यथार्थमुत्तरे प्राप्ते प्रकृतसूत्रं प्रस्तुत्यम् । अर्थस्तु-आत्= अवर्णात्, इचि (परे) न=न भवति । किं न भवति ? इति शङ्कां स्वयं श्रावयित्वा यत् प्राप्तं तन्न भवति, इत्युत्तरं च श्रावयित्वा किं तर्हि प्रकृते प्राप्तम् ? इति च स्वयमुक्त्वा ६-१-९८ प्रथमयोः...सूत्रेण पूर्वसवर्णदीर्घः प्राप्तोऽस्ति । अतः स एव निषिध्यते-पूर्वसवर्णदीर्घो न भवति । इति रीत्या स्फुटं बोधनीयाः शिक्षकेण । अथ यदि बाधकं निषिध्यते तदा बाध्यस्याऽवसरो भवतीति ६-१-८५ वृद्धि....सूत्रप्रवृत्तौ 'रामश्यामौ' इति प्रयोगः सिध्यति । इति । विशेषः-बाधके निषिद्धे बाध्यस्याऽवसरो भवतीति स्फुटं बोधयितुं दृष्टान्त उपस्थाप्यः । यथा-राम-श्याम-विष्णुमित्र-देवदत्त-यज्ञदत्ताः (ये तत्र पठितुं प्रवर्तमानाः) सन्ति । अत्र शिक्षकः सम्बोधयेत्-अयि वत्साः ? यदि कलम एक एवास्ति तं रामो गृहीतवान् । परन्तु तस्मात् पुनः श्याम आच्छिन्नवान् । पुनः श्यामादपि विष्णुमित्रे आच्छेत्तुमुद्युञ्जाने विष्णमित्रं देवदत्तो यदि निवारयेत् तदा कलमः कस्य हस्ते भवेत् ? इति । अथ च्छात्रेभ्यो यथार्थमुत्तरे प्राप्ते शिक्षकः पुनरग्रे तानुपदिशेत्-यथा देवदत्तेन विष्णुमित्रस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१०१ दीर्घाज्जसि च ॥	श्याम+अम्=श्यामम् ।
गौर्यौ । गौर्यः ।	मुनि+अम्=मुनिम् ।
६-१-१०२ वा छन्दसि ॥	भानु+अम्=भानुम् ।
वाराही । वाराह्यौ । मारुतीश्चतस्रः ।	(वा छन्दसि)
मारुत्यश्चतस्रः ।	शमीम् शम्यम् ।
६-१-१०३ अमि पूर्वः ॥ १०६	

निवारणात् कलमः श्यामस्य हस्ते भवति, तथैव प्रकृते ६-१-९८ प्रथमयोः...सूत्रस्य ६-१-१०० नादिचि....सूत्रेण निषेधाद् ६-१-८५ वृद्धिरेचि-सूत्रस्य प्रवृत्तिरिति ।

जस्

अथ राम-श्याम-विष्णुमित्राः पठन्ति (ये तत्र पठितुं प्रवर्तमानाः सन्ति तेषामेव नामानि प्रस्तुत्यानि) इति वाच्ये 'रामश्यामविष्णुमित्राः' इति प्रयोगः कथं सिध्येदिति जिज्ञासामुद्भाव्य रामश्यामविष्णुमित्रशब्दात् ४-१-२ स्वौज...सूत्रेण सुँ, औ, जस्, इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२२ द्वयेक...सूत्रस्य प्राप्तिरस्ति न वा ? इति शिक्षकेण च्छात्रान् परीक्ष्य तेभ्यो यथार्थमुत्तरं गृहीत्वा च १-४-२१ बहुषु...सूत्रमुपदेश्यम् ।

६-१-१०१ दीर्घा- ७-३-१०६ सम्बुद्धौ च-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटचां द्वे सूत्रे लेख्ये यथा-

(क) (ख)

६-१-१०० न आत् इचि ॥

६-१-१०१ दीर्घात् जसि (ख) च (क) ॥ इति ।

नादिचि-सूत्रार्थस्य पूर्वमुपदेशात् प्रकृतसूत्रार्थोऽपि सरलः । तथा हि-दीर्घात्, जसि, (ख)=इचि च, (क)=न=पूर्वसवर्णदीर्घो न भवति । इति लक्षणसमन्वयश्छात्रैः कारयितव्यः । बाधके निषिद्धे उत्सर्गः प्रवर्तत इति यणेव । एवं जसि द्वितीया-द्विवचनेऽपि बोध्यम् । गौर्यः । गौर्यौ । अम्यदन्तशब्दवत् । गौरीम् आवाहयामि इति यथा । शसि कन्याशब्दवत् । गौरीः । तृतीयैकवचने 'गौरी+आ' इति श्यामपाटचां लिखित्वा सन्धये छात्रा आदेश्याः । गौर्या । इति । भ्यामादि-हलादौ तु रूपाणि नोपदेश्यानि । स्वयमेव लिखतेति शिक्षकेण प्रवर्तिताश्छात्रा यदि शुद्धानि लिखेयुस्तदा प्रोत्साहनीयाः । यदि सप्तमी-बहुवचने दन्त्यसकारघटितं रूपं लिखेयुस्तदा ८-३-५७ इण्कोः सूत्रमुद्बोध्य शुद्धं रूपमुपदेश्यम् । गौरीषु । इति यथा ।

गौर्यै

अत्र प्रथमं गौरीशब्दस्य नदी संज्ञायै १-४-३ यू स्त्र्याख्यौ...सूत्रमुपस्थाप्यम् ।

६-१-१०२ वा छ- दीर्घात्+जसि (६-१-१०१) इचि (६-१-१००) च, वा=विकल्पेन पूर्वसवर्णदीर्घो भवति ।

६-१-१०३ अमि- १-३-७ चुटू- सूत्रानन्तरं सूत्रमिदं पाठचम् । एतत्सूत्रार्थ-बोधन-प्रसङ्गे प्रथमम् ६-१-९७ अकः...सूत्रात् 'अकः' इति, ६-१-७४ इको...सूत्रात् 'अचि' इति, ६-१-८१ एक...सूत्रं चाऽनुवर्तन्ते इति शिक्षकेणाऽष्टाध्यायां तत्तत् सूत्राणि दर्शयता बोधनीयम् । ततश्च अकः, अमि= अंसम्बन्धिनि, अचि=अचि परे, पूर्वपरयोः=पूर्वपरयोः स्थाने, एकः, पूर्वः=पूर्वतस्त्यो वर्णो भवति इत्यर्थमुपदिश्य प्रकृतोदाहरणे पूर्वतस्त्यो वर्णोऽकारोऽस्ति, अतः, अकारो भवति । श्याम्+अम्=श्यामम् । इत्युपदेश्यम् । एवम्, मुनि+अम् इत्यत्र पूर्वतस्त्यो वर्ण इकारोऽस्ति । अतस्तत्र इकारो भवति । मुन्+इम्=मुनिम् । भानु+अम् इत्यत्र पूर्वतस्त्यो वर्ण उकारोऽस्ति, अतस्तत्र उकारो भवति । भान्+उम्=भानुम् । इत्यादीन्युदाहरणानि बोधयितव्यानि । विशेषः-अत्र यदिच्छात्राः शङ्केरन् कथम् अम् औट् शस् प्रत्ययाः प्राप्ताः ? सुँ औ जस् प्रत्ययाः कथं न प्राप्ताः इति । तदा शिक्षकेण कुत्र सुँ औ जस् प्राप्नुवन्ति एवं कुत्र टा भ्यामित्यादयः प्राप्नुवन्तीति पश्चादुपदेक्ष्यते । साम्प्रतं तु सुँ औ जस् प्रत्ययेषु कीदृशानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१०४ **सम्प्रसारणाच्च** ॥ उप्तम् । गृहीतम् । ६-१-१०५ **एङः पदान्तादति** ॥१२०, १३०,११८ हरे+अव=हरेऽव । विष्णो+अव=विष्णोऽव ।	६-१-१०६ **ङसिँङसोश्च** ॥ १०८ मुनेः । गोः ।

रूपाणि अम् औट् शस् प्रत्ययेषु च कीदृशानि रूपाणि भवन्ति । एवं टा भ्यामित्यादिषु प्रत्ययेषु कीदृशानि रूपाणीति विभावनीयमितिच्छात्रा उपदेश्याः । यदि तुच्छात्रा न शङ्केरन्, तदा शङ्का शिक्षकेण नोद्भावनीया ।

औट्

'गुरू रामश्यामौ पाठयति' इति वक्तव्ये, 'रामश्यामौ' इति प्रयोगः कथं सिध्येदित्याकाङक्षोद्भावनपुरस्सरं शिक्षकेण रामश्यामशब्दात् ४-१-२ स्वौज...सूत्रेण अम्, औट्, शस् इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२२ द्व्येक...सूत्र-बलेन औट् प्रत्यये कृते सति १-३-३ हलन्त्यम्-सूत्रमुपदेश्यम् ।

६-१-१०४ **सम्प्रसारणात्**, अचि (६-१-७४) पूर्वपरयोः+एकः (६-१-८१) पूर्वः (६-१-१०३) ।

६-१-१०५ **एङः**- ६-१-७५ एचो...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्राऽधोनिर्दिष्टरूपेण श्यामपाटचां सूत्राणि लेख्यानि-

(क) (ख)

६-१-८१ एकः पूर्वपरयोः ॥

(ग)

६-१-१०३ अमि पूर्वः ॥

६-१-१०५ एङः पदान्तात् अति (ख) (क) (ग) ॥ इति । पदान्तात् =पदान्ते वर्तमानात्, एङः = एङ्वर्णात्, अति=ह्रस्वाऽकारे परे, (ख)=पूर्वपरयोः स्थाने, (क)=एकः, (ग)=पूर्वः=पूर्वो वर्णो भवति । इति सूत्रार्थोपदेशप्रसङ्गे ८-३-१५ खर...सूत्रे पूर्वमुपदिष्टः पदपरिचयोपाय उद्बोधनीयः । अथ मूलोक्तोदाहरणयोः, गुरो+अत्र, वने+अत्र, जले+अस्ति, वायो+अत्र, साधो+अर्चय, इत्यादिषूदाहरणेषु च बाध्य-बाधक-सूत्र-विवेचनं छात्रैः कारयितव्यम् । अत्रैव जे+अति, ने+अति, भो+अति, भो+असि, इत्यत्र प्रकृतसूत्राऽप्रवृत्तौ हेतुः पदत्वाऽभावो बोधयितव्यः । अथ ८-२-६६ ससजुषो रुः- सूत्रं पाठयितव्यम् ।

६-१-१०६ **ङसिँ**- ७-३-१११ घेर्ङिति-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

६-१-८१ एकः पूर्वपरयोः ॥

(ग)

६-१-१०३ अमि पूर्वः ॥

(घ) (ङ)

६-१-१०५ एङः पदान्तात् अति ॥

६-१-१०६ (घ) ङसिँङसोश्च (ङ) (ख) (क) (ग) ॥ इति । (घ)=एङः, ङसिँङसोः=ङसिँङस्सम्बन्धिनि, (ङ)=अति परे, (ख)=पूर्वपरयोः स्थाने, (क)=एकः (ग)=पूर्वः=पूर्वो वर्णो भवति । इत्यर्थ उपदेश्यः । लक्षणसमन्वयपुरस्सरं छात्रै रूपं साधयितव्यम् । अथाऽत्र ६-१-१०५ एङः...सूत्रेण कथं न रूपसिद्धिरितिच्छात्राः परीक्षणीयाः । छात्रेभ्य उचित उत्तरे न प्राप्ते शिक्षकेण ते बोधयितव्याः । यथा-अयि वत्साः ? मुनेः (मुनि+ङस्) इति समुदायस्याऽर्थो भवति । अतः समुदायः पदं भवति । अस् इति प्रत्ययभागं त्यक्त्वा 'मुने' इत्यस्यार्थो न भवति । अतः 'मुने' इतिमात्रं पदमपि न भवति । तेन ६-१-१०५ एङः...सूत्रं न प्रवर्तते इति । ततोऽग्रे च शिक्षकेण पुनरुपदेश्याश्छात्राः । यथा-अयि वत्साः ? अत एव ६-१-१०६ प्रकृतसूत्रे 'पदान्तात्' इति नानुवर्तत इत्यपि स्वयमेव ज्ञायते । यतो न हि ङसिँङसोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१०७ ऋत उत् ॥
पितुः ।
६-१-१०८ ख्यत्यात् परस्य ॥
सख्युः । पत्युः ।

६-१-१०९अतो रोँ र'प्लुतादप्लुते ॥ ११०
शिवस्+अर्च्यः=शिवोऽर्च्यः ।

परतः पूर्वो भागः पदं संभवति, इति । ओसि यण्-मुन्योः । आमि ७-१-५४ ह्रस्व...६-४-३ नामि इति च मुनीनाम् । ङौ घिसंज्ञां छात्रैः कारयित्वा द्वि ७-३-११८ अच्च घेः-सूत्रं प्रस्तुत्यम् ।

६-१-१०७ **ऋत**- ८-४-३६ पदान्तस्य - सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)
६-१-८१ एकः पूर्वपरयोः ॥
(ग)
६-१-१०५ एङः पदान्तात् अति ॥
(घ)
६-१-१०६ ङसिँङसोश्च ॥
६-१-१०७ ऋतः (घ) (ग) (ख) (क) उत् ॥ इति ।

ऋतः= ह्रस्वाद् ऋकारात्, (घ)=ङसिँङस्सम्बन्धिनि (ग)= अति=ह्रस्वेऽकारे परे, (ख)=पूर्वपरयोः स्थाने, (क)=एकः, उत्=उकारो भवति । इत्यर्थ उपदेश्यः । लक्षणसमन्वयश्छात्रैः कारयितव्यः । अत्र सत्यामावश्यकतायाम् १-१-५० उर...सूत्रमुद्बोधनीयम् । आदेशश्च पितरौ इत्यत्र अर् इव प्रकृते उर् अन्तरतम इति बोधनीयम् । अथ श्यामपाटचां 'पित्+उर्स्=पितुर्स्' इति लिखित्वा ८-२-२४ रात् सस्य-सूत्रं प्रस्तुत्यम् ।

६-१-१०८ **ख्यत्या** - ७-१-९२ सख्यु...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)
६-१-८१ एकः पूर्वपरयोः ॥
(ख)
६-१-१०५ एङः पदान्तात् अति ॥
(ग)
६-१-१०६ ङसिँङसोश्च ॥
(घ)
६-१-१०७ ऋत उत् ॥
६-१-१०८ ख्यत्यात् परस्य (ग) (ख) (क) (घ) ॥ इति ।

अत्र 'परस्य' इति षष्ठचन्तेन सम्बन्धात् 'अति' अनुवर्तमानं सप्तम्यन्तमपि षष्ठचन्ताय क्लृप्तमिति बोधयित्वा सूत्रार्थ उपदेश्यः । ख्यत्यात् परस्य= कृतयणादेशाभ्यां ख्य् त्य् इत्येताभ्यां परस्य, (ग)= ङसिँङसोः=ङसिँङस्सम्बन्धिनः, (ख)=अति नाम=अतः=ह्रस्वाकारस्य स्थाने, (घ)=उत्= उकारादेशो भवति । लक्षणसमन्वयाय रूपसिद्धये च च्छात्रा एव प्रवर्तयितव्याः । सख्युः । आमि-७-१-५४, ह्रस्व...। ६-४-३ नामि...। सखीनाम् । ङौ-सखि+इ इति श्यामपाटचां लिखित्वा प्र. ७-३-११८ औत्-सूत्रं प्रस्तुत्यम् ।

६-१-१०९ **अतो**- १-३-९ तस्य लोपः-सूत्रानन्तरं सूत्रमिदं पाठचम् । अप्लुतात्+ अतः= प्लुतभिन्नाद् ह्रस्वाकारात् परस्य, = ने.भा. प्लुतभिन्न ह्रस्व अकारदेखि पर रहेका= हि. भा. प्लुत भिन्न ह्रस्व अकारसे पर की ओर रहा हुआ, रोँः= रुँ स्थाने= ने. भा. रुँका स्थानमा= हि. भा. रुँ के स्थान में, उत् (६-१-१०७)= उकारो भवति, अप्लुते+ (अति ६-१-१०५)= प्लुतभिन्ने हस्वाकारे परे= ने.भा. प्लुतभिन्न ह्रस्व अकार पर भएमा= हि. भा. प्लुत भिन्न ह्रस्व अकार परकी ओर रहते । इत्यर्थ उपदेश्यः । अत्र तपरकरणादेव दीर्घप्लतयोर्व्यावृत्तिसिद्धौ अप्लुतात्, अप्लुते, इति किमर्थम् ? इति यदिच्छात्राः स्वयं शङ्केरन्, तदा तु शिक्षकेण तेषामाकाङ्क्षा शर्मयितव्या । अन्यथा शिक्षकः शङ्कां नोत्थापयेत् । कथम् ? इति शङ्का -समाधानं त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-११० हशि च ॥

बालकस्+ हसति= बालको हसति ।

६-१-१११ प्रकृत्याऽन्तःपादमव्यपरे ॥ १२४,११२

सुजाते अश्वसूनृते । उपप्रयन्तो अध्वरम् ।

६-१-११२ अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च ॥

वसुभिर्नो अव्यात् । मित्रमहो अवद्यात् । मा शिवासो अवक्रमुः । ते नो अव्रत ।

शतधारो अयं मणिः।ते नो अवन्तु । कुशिकासो अवस्यवः ।

६-१-११३ यजुष्युरः ॥ ११७

उरो अन्तरिक्षम् ।

६-१-११४ आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे ॥

आपो अस्मान् मातरः । जुषाणो अग्निराज्यस्य । वृष्णो अंशुभ्याम् । वर्षिष्ठे अधिनाके । अम्बे अम्बाले अम्बिके ।

अप्लुतात् अप्लुते इत्यनुक्तौ सत्यपि प्लुते तस्याऽसिद्धत्वात् प्रकृतसूत्रस्य प्राप्तिसम्भावना स्यात् । अप्लुतात्, अप्लुते, इत्युक्तौ तु तत्सामर्थ्यादिव नाऽसिद्धत्वमिति । प्रकृतमनुसरामः । अथ 'शिवस् + अर्च्यः' इति श्यामाटचां लिखित्वा ८-२-६६ सस... १-३-२ उप.... १-३-९ तस्य... सूत्रेषु छात्रैः समन्वयं कारयित्वा श्यामपाटचां 'शिवर्+अर्च्यः' इति लिखित्वा प्रकृतसूत्र- समन्वय- सन्दर्भे शिक्षकेणच्छात्राः प्रष्टव्याः । वत्साः ? शृणुत, ह्रस्वाकारत् परतो 'रुँ' इत्युच्यते चेद् ह्रस्वाकारो रुँ इत्यतः पूर्वतः स्यात् परतो वा ? इति । ततस्तेभ्यो यथार्थमुत्तरं गृहीत्वा प्रकृतोदाहरणस्य रेफं श्यामपाटचां दर्शयता शिक्षकेण, एष 'र्' रुँ इत्यस्याऽवशेषः । इतः पूर्वश्च अ अस्तीति बोधनपुरस्सरं छात्रैरेव लक्षण-समन्वयः कारयितव्यः । अथ 'शिव+ उ+अर्च्यः' इति जाते ' शिव+उ' इत्यत्र किं सूत्रं प्रवर्तते ? इति क्रमशः शिवो+अर्च्यः इत्यत्रापि पूर्ववत् पृष्ट्वा तत्तल्लक्षणसमन्वयो रूपसिद्धिश्च च्छात्रैरेव कारयिव्यौ । अत्र यण्गुणयोः सकृदेव प्राप्तिचर्चा शिक्षकेण न कार्या । छात्रेषु साकाङ्क्षेष्वपि, यथा- शय्याया उत्थाय प्रथमं कोष्ठे टेकध्वे ततोऽङ्गणराजमार्गादिषु गच्छथ, तथैव क्रमशः कार्यं भवतीति दृष्टान्तो देयः । परिभाषा तु नोत्थाप्या । अथ बालकस्+ अयम्, छात्रस्+ अस्ति, मनस्+अस्ति चपलम्, इत्यादयः प्रश्नाः सन्धये देयाः । अथ ६-१-११० हशि च- सूत्रमुपदेश्यम् ।

६-१-११० **हशि**- ६-१-१०९ अतो... सूत्रानन्तरं सूत्रमिदं पाठचम् । अस्यार्थः पूर्व (६-१-१०९ अतो...) सूत्रस्येव बोध्यः । केवलं तत्रत्येन 'अप्लुते अति' 'इत्यंशेन प्रकृतसूत्रस्थो 'हशि' इत्यंशो विनिमातव्यः । शिवस्+वन्द्यः, बालकस्+हसति, छात्रस्+वदति, शिष्यस्+ नमति, इत्यादिषु 'शिवोऽर्च्यः' इत्यत्रैव प्रक्रियाक्रमे ६-१-१०९ अतो... सूत्रेण ६-१-११० हशि... सूत्रं विनिमातव्यमित्युपदिशता शिक्षकेण लक्षणसमन्वयो रूपसिद्धिश्च च्छात्रैरेव कारयितव्यौ । अथ ८-३-१७ भोभगो... सूत्रमुपदेश्यम् ।

६-१-१११ **प्रकृत्या**- अव्यपरे= अवकारयकारपरकेऽपरतो वकारयकाररहिते अति (६-१-१०५) एङ् (६-१-१०५) (एङ इति पञ्चम्यन्तमपि प्रकृते 'प्रकृत्या' इत्यनेन सम्बन्धात् प्रथमान्तायं कल्पते) प्रकृत्या= स्वरूपेणाऽवतिष्ठते, अन्तः पाद्म्= निमित्तकार्यिणौ ऋक्पादमध्ये भवतश्चेत् । अत्र काशिका- अन्तरित्यव्ययमधिकरणभूतं मध्यमाचष्टे । पादशब्देन च ऋक्पादस्यैव ग्रहणमिष्यते न तु श्लोकपादस्येति ।

६-१-११२ **अव्या**-अन्तः पादम् (६-१-१११) एङ् (६-१-१०५) प्रकृत्या (६-१-१११) अव्या... अवस्युषु= अव्यात् अवद्यात् अवक्रमुः अव्रत अयम् अवन्तु अवस्यु इत्येतेषु परेषु । अत्राकारस्य वकारयकार-परकत्वेन पूर्वेणाऽप्राप्तौ वचनम् । अत्र दीक्षितः-यद्यपि बह्वृचैस्ते नोऽवन्तु रथतूः । सोऽयमागात् । तेऽरुणेभिरित्यादौ प्रकृतिभावो न क्रियते, तथापि बाहुलकात् समाधेयम् । प्रातिशाख्ये तु वाचनिक एवायमर्थ इति ।

६-१-११३ **यजुषि**=यजुर्वेदे, उरः=उरश्शब्दसम्बन्धी, एङ्+अति (६-१-१०५) प्रकृत्या (६-१-१११) ।

६-१-११४ **आपो**... वर्षिष्ठे=आपो जुषाणो वृष्णो वर्षिष्ठे इत्येते शब्दाः, अम्बिकेपूर्वे+ अम्बेऽम्बाले= अम्बिकेशब्दात् पूर्वं पठितौ अम्बे अम्बाले शब्दौ च, अति (६-१-१०५) प्रकृत्या (६-१-१११) यजुषि (६-१-११३) । **अम्बे** अस्मादेव निपातनात् ७-१-१०७ अम्बा... इति न ह्रस्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-११५ अङ्ग इत्यादौ च ॥

प्राणो अङ्गे अङ्गे अदीध्यत्।

६-१-११६ अनुदात्ते च कुधपरे ॥ ११७

अयं सो अग्निः। अयं सो अध्वरः।

अनुदात्ते इत्युक्तेर्नेह- अधोऽग्रे। कुधपरे इत्युक्तेर्नेह- सोऽयमग्निः।

६-१-११७ अवपथासि च ॥

त्री रुद्रेभ्यो अवपथाः। अनुदात्ते इत्यनुवृत्तेर्नेह- यद् रुद्रेभ्योऽवपथाः।

६-१-११८ सर्वत्र विभाषा गोः ॥११९,१२०

गो अग्रम्, गोऽग्रम्।

६-१-११९ अवङ् स्फोटायनस्य ॥१२०

गवाग्रम्, गो अग्रम्, गोऽग्रम्।

व्यवस्थितविभाषेयम्। तेन गवाक्ष इत्यत्र नित्यमवङ्।

६-१-१२० इन्द्रे च ॥

गवेन्द्रः।

६-१-१२१ प्लुतप्रगृह्या अचि नित्यम् ॥

आगच्छ कृष्ण ! अत्र गौश्चरति। मुनी इमौ। गुरू एतौ। गङ्गे अमू। अमी ईशाः। रामकृष्णावमू आसाते। इ इन्द्रः। उ उमेशः।

६-१-१२२ आङो ऽनुनासिकश्छन्दसि ॥

अभ्र आँ अपः।

६-१-११५ अङ्गे= अङ्गशब्दे वर्तमान एङ् (६-१-१०५), अति (६-१-१०५) इत्यादौ च= अङ्गशब्दस्याऽऽद्याऽकारे परे पूर्वतो वर्तमान एङ् च, अति (६-१-१०५) प्रकृत्या (६-१-१११) यजुषि (-१-११३)।

६-१-११६ अनु- कुधपरे= कवर्गधकारपरके, अनुदात्ते, अति (६-१-१०५) एङ् (६-१-१०५) प्रकृत्या (६-१-१११) यजुषि (६-१-११३)। अग्न्यध्वरशब्दावन्तोदात्तौ। **अधोऽग्रे** अग्रशब्दः, १९६ ऋजेन्द्राग्र... इत्यौणादिकसूत्रेणाद्युदात्तो निपात्यते।

६-१-११७ अव- अनुदात्ते (६-१-११६) अवपथासि= अवपथाशशब्दे परे, एङ् (६-१-१०५) प्रकत्या (६-१-१११) यजुषि (६-१-११३)। **अवपथाः** वपेर् (१००३) लँङि थास्। उदाहरणे ८-१-२८ तिङ्ङ.. इति निघातः। प्रत्युदाहरणे ८-१-३० निपा... इति निघातप्रतिषेधः।

६-१-११८ सर्वत्र- पदान्तात् (६-१-१०५)= पदान्तस्य, एङः (६-१-१०५)=एडन्तस्य, गोः=गोशब्दस्य, विभाषा =वा, प्रकृत्या (६-१-१११) अति (६-१-१०५) सर्वत्र=लोके वेदे च। अनुवर्तमाने पदान्तात्, एङः, इति पञ्चम्यन्ते पदे 'गोः' इति षष्ठचन्तेन सम्वन्धात् षष्ठचन्ताय कल्पेते।

६-१-११९ अवङ्-पदान्तस्य+ एङन्तस्य (६-१-१११व्या.) गोः (६-१-११८)= गोशब्दस्य स्थाने, अवङ्= अवङ् आदेशो भवति, अचि (६-१-७४) स्फोटायनस्य=फोटायनाचार्यस्य मते। अत्र अति (६-१-१०५) इति न सम्वध्यते। अचि (६-१-७४) इति च सम्वध्यते। विभाषेत्यनुवृत्त्यैव सिद्धे स्फोटायनग्रहणं पूजार्थम्।

६-१-१२० इन्द्रे= इन्द्रशब्दे परे, एङन्तस्य+गोः+ अवङ् (६-१-११९ व्या.) आरम्भसामर्थ्यान्नित्यमिदम्।

६-१-१२१ प्लुत-पदान्तात् (६-१-१०५) (पदान्तादिति पञ्चम्येकवचनान्तमपि प्लुतप्रगृह्या इत्यस्य विशेषकत्वात् प्रथमावहुवचनान्ताय कल्पते)=पदान्ताः, प्लुतप्रगृह्याः= प्लुतसंज्ञकाः प्रगृह्यसंज्ञकाश्च, अचि=अचि परे, नित्यम् = सर्वदैव, प्रकृत्या (६-१-१११)। नित्यग्रहणं नित्यमेव प्रकृतिभावो यथा स्यादित्यर्थम्। तेन ६-१-१२३ इको... इति ह्रस्वसमुच्चितः पाक्षिकः प्रकृतिभावोऽत्र न भवति। उदाहरणणेषु, आद्ये ८-२-८४ दूरा...इति प्लुतः। ततस्त्रिषु-१-१-११ इदू... इति प्रगृह्यम्। ततो द्वयोः १-१-१२ अद... इति, अन्त्ययोः १-१-१४ निपा... इति प्रगृह्यम्।

६-१-१२२ आङो-आङः=ङिदाकारस्य स्थाने, अनुनासिकः= अनुनासिक आदेशो भवति, स च प्रकृत्या (६-१-१११) अचि (६-१-१२१)। आकारस्य ङित्त्वाङित्त्वनिर्णयाय १-१-१४ निपा... सूत्रे पद्यं पठितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१२३ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥ १२४

दधि अत्र, दध्यत्र । कुमारि अत्र, कुमार्यत्र । पदान्ता इत्यनुवृत्तेर्नेह-गौर्यौ ।

(न समासे)

वाप्यामश्वो वाप्यश्वः ।

(सिति च)

पार्श्वम् ।

(ईषा अक्षादिषुच्छन्दसि प्रकृतिभावमात्रं वक्तव्यम्)

ईषा अक्षः । का ईमरे पिशङ्गिला । पथा अगमन् ।

६-१-१२४ ऋत्यकः ॥

ब्रह्म ऋषिः, ब्रह्मर्षिः । खट्व ऋश्यः, खट्वर्श्यः । कुमारि ऋश्यः । कुमार्यृश्यः । होतृ ऋश्यः, होतृृश्यः । समासेऽप्ययं प्रकृतिभावः ।

सप्त ऋषीणाम्, सप्तर्षीणाम् ।

६-१-१२५ अप्लुतवदुपस्थिते ॥१२६

सुश्लोका ३ इति सुश्लोकेति । वत्करणं प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणार्थम् । अग्नी ३ इति । वायू ३ इति ।

६-१-१२६ ई ३ चाक्रवर्मणस्य ॥

अस्तु हीत्यब्रूताम्, अस्तु ही ३ इत्यब्रूताम् । चिनु हीदम्, चिनु ही ३ इदम् ।

'ईकारग्रहणेन नार्थः' इति भाष्यम् ।

वशा इयम्, वशेयम् ।

६-१-१२७ दिव उत् ॥

द्युभ्याम् । द्युभिः । द्युकामः ।

पदान्तस्येत्यनुवृत्तेर्नेह-दिवौ । दिवः ।

६-१-१२८ एतत्तदोः सुँ लोपोऽकोरनञ्समासे हलि ॥१३०,१२९

एष गच्छति । स ददाति । अकोरित्युक्तेर्नेह- एषको ददाति । सको ददाति । अनञ्समासे इत्युक्तेर्नेह- अनेषो ददाति । असो ददाति । हलीत्युक्तेर्नेह- एषोऽस्ति । सोऽस्ति ।

६-१-१२३ इको- पदान्ताः (६-१-१२१ व्या. अत्र 'इकः' इति प्रथमान्तम्) इकः=इग्वर्णाः, असवर्णे= सवर्णभिन्ने, अचि (६-१-१२१) ह्रस्वः= ह्रस्वा भवन्ति, प्रकृत्या (६-१-१११) च, शाकल्यस्य= शाकल्याचार्यस्य मते । अत्र ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्य इति भाष्ये स्थितमिति दीक्षितः ।

सिति- प्रागुक्तं न भवति । **पार्श्वम्** ४-२-४२ ब्राह्म... सूत्रस्थ- पर्श्वा... वार्तिकेन णस् । १-१-१६ सिति... इति पूर्वभागस्य पदत्वम् ।

६-१-१२४ ऋत्य-पदान्ताः (६-१-१२१ व्या.) अकः=अग्वर्णाः, ऋति= ह्रस्वे ऋकारे परे, ह्रस्वः (प्रकृत्या ६-१-१११)+ च+ शाकल्यस्य (६-१-१२३) । सवर्णार्थमनिगर्थञ्च वचनम् ।

६-१-१२५ अप्लु- उपस्थिते= वैदिकभिन्ने इतिशब्दे परे, अप्लुतवत्= प्लुतोऽप्लुतवद् भवति । प्लुतकार्यम्= प्रकृतिभावः, न भवति ।

६-१-१२६ ई३= प्लुत ई३कारः, अचि (६-१-१२१) अप्लुतवत् (६-१-१२५) चाक्रवर्मणस्य= चाक्रवर्मणाचार्यमते । उदाहरणेषु हीत्यव्ययम् आद्ययोः ८-२-९३ विभा... इति प्लुतः । अन्त्ययोः ८-२-१०५ अन... इति प्लुतः ।

६-१-१२७ दिव- ६-१-१०५ एङः... सूत्रादनुवर्तमानं पदान्तादिति पञ्चम्यन्तं दिव इति षष्ठ्यन्तेन सामानाधिकरण्यात् षष्ठ्यन्ताय कल्पते । पदान्तस्य (६-१-१०५) दिवः=दिव्शब्दस्य स्थाने, उत्= उकारादेशो भवति । १-१-५१ अलो... इति बलेन वकारस्य उकारो भवति । ततः ६-१-७४ इको...इति यण् ।

६-१-१२८ एत-अकोः= ककाररहितयोः, एतत्तदोः= एतद् तद् इतिशब्दसम्बन्धिनः, सुँ=सुँ इत्यस्य, लोपः= लोंपो भवति, हलि= हल्वर्णे परे, अनञ्समासे= नञ्समासाऽभावे । सूत्रे सुँ इति लुप्तषष्ठ्यन्तं पदम् । **एषको ददाति, सको ददाति** । साकच्कावपि 'तन्मध्ये पतितस्तद्ग्रहणेन गृह्यते' इति परिभाषया एतत्तच्छब्दग्रहणेन गृह्येते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१२९ स्यश्छन्दसि बहुलम् ॥

एष स्य भानुः । न च भवति-यत्र स्यो निपतेत् । लोके तु स्यो गच्छति । इत्येव ।

६-१-१३० सोऽचि लोपे चेत् पादपूरणम् ॥

सेमामविड्ढि प्रभृतिं य ईशिषे । अत्र
ऋक्पाद एव गृह्यत इति वामनः ।
श्लोकपादोऽपि गृह्यत इत्यन्ये ।
सैष दाशरथी रामः सैष राजा युधिष्ठिरः ।
सैष कर्णो महादानी सैष भीमो महाबलः ।
'स एवमुक्त्वा मघवन्तमुन्मुखः'
'सोऽहमाजन्मशुद्धानाम्'

६-१-१३१ सुँट् कात् पूर्वः ॥१५२,१३७

(अडभ्यासव्यवायेऽपि)

इमे सूत्रवार्तिके अधिकृत्य ।

६-१-१३२ सम्परिभ्यां करोतौ, भूषणे ॥१३३, १३४

संस्करोति । परिष्करोति । समस्करोत् समस्कार्षीत् । पर्यस्करोत् । पर्यस्कार्षीत् । संचस्कार । परिचस्कार । संपूर्वस्य क्वचिदभूषणेऽपि ४-२-१६ संस्कृतं भक्षा इति ज्ञापकात् । संस्कृतमन्नम् ।

६-१-१३३ समवाये च ॥

संस्कुर्वन्ति । परिष्कुर्वन्ति । सङ्घी भवन्तीत्यर्थः ।

६-१-१२९ स्यश्छ- सूत्रे 'स्यः' इति प्रथमैकवचनान्त-त्यच्छब्दस्यानुकरणं लुप्तषष्ठ्यन्तम् । छन्दसि= वेदे, बहुलम्=बाहुल्येन, स्यः= स्यस् इत्यस्य (त्यच्छब्दसम्बन्धिनः) सुँ+लोपः+हलि (६-१-१२८) ।

६-१-१३० सोऽचि- अत्र सूत्रेऽपि 'सः' इति प्रथमैकवचनान्त- तच्छब्दानुकरणं लुप्तषष्ठ्यन्तम् । सः= सस् इत्यस्य (तच्छब्दसम्बन्धिनः) सुँ+लोपः (६-१-१२८) अचि=अचि परे, लोपे पादपूरणं चेत्= लोपे सत्येव पादपूरणं भवति चेत् । **सेमाम**... (ऋ.सं. २।२४।१) **सैष** इत्यत्र लोपे सत्येव पादपूरणं भवति । नाऽन्यथा । स एवमुक्त्वा... (रघुवंशस्य ३ सर्गस्य ५२ पद्यांशः) अत्र सुँलोपे सति पादपूरणं न भवति । सोऽहमाजन्म... (र. १ स. ५ पद्यांशः) अत्र लोपाऽभावेऽपि पादपूरणं भवति । अत उक्तस्थलद्वये सुँलोपो न । लोपे सत्येव पादपूरणं भवति चेदित्युक्तेः ।

६-१-१३१ सुँट् का- अत्र काशिका- कात्पूर्वग्रहणं सुँटोऽभक्तत्वज्ञापनार्थम् । तथाहि-संस्कृषीष्ट संस्क्रियते इति संयोगादिलक्षणाविड्गुणौ न भवतः । संचस्करतुः संचस्करुः इति गुणः कथम् ? तन्मध्यपतितस्तद्ग्रहणेन गृह्यते, इति संयोगोपधग्रहणं च ७-४-१० ऋतश्च संयोगादेर्गुणः इत्यत्र कर्तव्यम् । टित्करणं सुँट्स्तुस्वञ्जाम्, ८-१-७० इत्यत्र विशेषणार्थमिति । अत्र दीक्षितः- कात्पूर्व इति भाष्ये प्रत्याख्यातम् । तथाहि- पूर्वं धातुरुपसर्गेण युज्यते । अन्तरङ्गत्वात् सुँट् । ततो द्वित्वम् । एवं च ७-४-१० ऋतश्च संयोगादेर्गुणः । संचस्करतुः । ७-२-१३ कृ सृ भृ... इति सूत्रे ७-२-६३ ऋतो भारद्वाजस्येति सूत्रे च (कृञोऽसुँट इति वक्तव्यम्) तेन ससुँट्कात् परस्येट् । संचस्करिथ । संचस्करिव । ७-४-२९ गुणोऽर्तीति सूत्रे ७-४-८ नित्यं छन्दसीति सूत्रान्नित्यमनुवर्तते । नित्यं यः संयोगादिस्तस्येत्यर्थात्, सुँटि गुणो न । संस्क्रियात् । ७-२-४३ ऋतश्च संयोगादेरिति लिङ्सिँचोर्नेट् । ७-२-१० एकाच उपदेश इति सूत्रादुपदेश इत्यनुवर्त्य उपदेशे यः संयोगादिरिति व्याख्यानात् । संस्कृषीष्ट समस्कृत समस्कृषाताम् । इति ।

अडभ्यासव्यवायेऽपि= अडभ्यासव्यवधानेऽपि, कात्+ पूर्वः+ सुँट् (६-१-१३१) ।

६-१-१३२ सम्परिभ्याम्=संपरिभ्यां परस्य, करोतौ=करोतेः= कृ (१४७१) धातोः, सुँट्+ कात्+पूर्वः + अडभ्यासव्यवायेऽपि (६-१-१३१) । एवमग्रिमसूत्रेष्वपि बोध्यम् । १-१-६६ तस्मा... इति सप्तमीं षष्ठीं कल्पयति- करोतौ= करोतेरिति ।

६-१-१३३ समवाये= सङ्घातेऽर्थे, प्राग्वत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१३४ **उपात्** प्रतियत्न-वैकृतवाक्याध्याहारेषु च ॥१३६
एधोदकस्योपस्कुरुते । गुणाधानं करोतीत्यर्थः । उपस्कृतं भुङ्क्ते । विकृतमित्यर्थः । उपस्कृतं ब्रूते । वाक्याध्याहारेण ब्रूत इत्यर्थः । उपस्कृता कन्या । अलङ्कृतेत्यर्थः । उपस्कृता ब्राह्मणाः । समुदिता इत्यर्थः ।
अर्थविशेषोपादानान्नेह- उपकरोति ।

६-१-१३५ **किरतौ** लवने ॥१३७
उपस्किरति । लुनातीत्यर्थः ।

६-१-१३६ हिंसायां प्रतेश्च ॥
उपस्किरति । प्रतिस्किरति ।

६-१-१३७ अपाच्चतुष्पाच्छकुनिष्वालेखने ॥
अपस्किरते वृषो हृष्टः । अपस्किरते कुक्कुटो भक्ष्यार्थी । अपस्किरते श्वा आश्रयार्थी ।
आलिख्य विक्षिपतीत्यर्थ इति काशिका ।
चतुष्पाच्छकुनिष्वित्युक्तेर्नेह- अपकिरति देवदत्तः ।
(हर्ष-जीविका-कुलायकरणेष्विति वक्तव्यम्)
नेह- अपकिरति कुसुमम् । अत्र दीक्षितः- हर्षादिमात्रविवक्षायां यद्यपि तङ् प्राप्तस्तथापि सुँडभावे नेत्याहुः । गजोऽपकिरति । इति ।

६-१-१३८ कुस्तुम्बुरूणि जातिः ॥
कुस्तुम्बुरुः= धान्याकम् । जातिरित्युक्तेर्नेह- कुतुम्बुरूणि । कुत्सितानि तिन्दुकीफलानीत्यर्थः ।

६-१-१३९ अपरस्पराः क्रियासातत्ये ॥
अपरस्पराः सार्था गच्छन्ति ।
सततमविच्छेदेन गच्छन्तीत्यर्थः ।
क्रियासातत्य इत्युक्तेर्नेह- अपरपराः सार्था गच्छन्ति । अपरे परे च सकृदेव गच्छन्तीत्यर्थः ।

६-१-१४० गोष्पदं सेवितासेवितप्रमाणेषु ॥
गावः पद्यन्ते यस्मिन् स गोभिः सेवितो देशो गोष्पदः । अगोष्पदान्यरण्यानि । गोष्पदपूरं वृष्टो देवः । अर्थविशेषे विधानान्नेह-गोः पदम्= गोपदम् ।

६-१-१३४ **उपा-** प्रति...रेषु (प्रतियत्नो गुणाधानम् । विकृतमेव वैकृतं विकारः । आकाङ्क्षितैकदेशपूरणं वाक्याध्याहारः ।) एष्वर्थेषु, च= भूषणे (६-१-१३२) समवाये (६-१-१३३) च, उपात्= उपेत्युपसर्गात् परस्य, करोतौ (६-१-१३२) सुँट् (६-१-१३१) । **एधोदकस्योपस्कुरुते** एधश्च दकं च= एधोदकम् । 'एधस्' शब्दः सान्तः क्लीबे । अथवा-एधश्च उदकं च= एधोदकम् । एधशब्दोऽकारान्तः पुंसि । तस्य= एधोदकस्य । २-३-५३ कृञः... इति कर्मणि शेषे षष्ठी । १-३-३२ गन्ध... इत्यात्मनेपदम् । सँस्कारद्वारा गुणानाधत्ते इत्यर्थः ।

६-१-१३५ **किर-**उपात् (६-१-१३४) किरतौ= किरतेः (१४०८) धातोः, सुँट् (६-१-१३१) लवने= छेदनेऽर्थे गम्यमाने ।

६-१-१३६ **हिंसा-** उपात् (६-१-१३४) प्रतेश्च= प्रति इत्युपसर्गाच्च, प्राग्वत्, हिंसायाम् =हिंसायां गम्यमानायाम् ।

६-१-१३७ **अपात्**=अप इत्युपसर्गात् परस्य, किरतौ (६-१-१३५) सुँट् (६-१-१३१) चतुष्पाच्छकुनिषु= चतुष्पात्सम्बन्धिनि शकुनिसम्बन्धिनि च, आलेखने= क्षोदने गम्ये । "चतुष्पाच्छकुनिषु यदालेखनं तस्मिन् विषये" इति काशिका । तत्प्रतीकमादाय "नत्वभिधेये विक्षेप एव त्वभिधेयः' इति पदमञ्जरी । उदाहरणेषु १-३-२१ क्रीडो... सूत्र-स्थ- किर... वार्तिकेनात्मनेपदम् ।
हर्ष-गजोऽपकिरति अत्र हर्षे सत्यपि आलेखनाभावान्न सुँट् ।

६-१-१३८ **कुस्तुम्बुरूणि** अत्र- सुँड् निपात्यते, जातिः= जातिश्चेद् गम्यते ।

६-१-१३९ **अपरस्पराः** -अत्रापि सुँड् निपात्यते, क्रि... त्ये= क्रियायाः सातत्ये गम्ये । अपरे परे चेति द्वन्द्वः ।

६-१-१४० **गोष्पदम्-** अत्र सुँट् षत्वं च निपात्यते, सेवि.... णेषु=सेवितार्थेषु गम्येषु । **अगोष्पदान्यरण्यानि** गोष्पदप्रतिषेधेनैव अगोष्पद इति सिद्धौ, अत्र सूत्रे असेवितग्रहणं व्यर्थमिति चेत्, अत्र काशिका- सत्यमेतत्, यत्र तु सेवितप्रसङ्गो ऽस्ति तत्रैव स्यात्- गोष्पदमिति । यत्र त्वत्यन्तासम्भव एव तत्र न स्यात्- अगोष्पदान्यरण्यानीति । इति । महत्स्वरण्येषु गवामत्यन्ता ऽसम्भव इत्यभिप्रायेणैवमुक्तम् । **गोष्पदपूरं वृष्टो देवः** ३-४-३२ वर्ष... इति णमुँल् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१४१ आस्पदं प्रतिष्ठायाम् ॥
आस्पदमनेन लब्धम् ।
प्रतिष्ठायामित्युक्तेर्नेह-
आ पदात्=आपदम् ।

६-१-१४२ आश्चर्यमनित्ये ॥
आश्चर्यं यदि स भुञ्जीत ।
अनित्य इत्युक्तेर्नेह- आचर्यं कर्म शोभनम् ।

६-१-१४३ वर्चस्केऽवस्करः ॥
अवस्करः = अन्नमलम् । वर्चस्के इत्युक्तेर्नेह- अवकरः ।

६-१-१४४ अपस्करो रथाङ्गम् ॥
अपस्करो रथावयवः । अपकरोऽन्यः ।

६-१-१४५ विष्किरः शकुनौ वा ॥

६-१-१४६ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ॥
हरिश्चन्द्रो मरुद्गणः ।

६-१-१४७ प्रतिष्कशश्च कशेः ॥
सहायः पुरीयायी वा प्रतिष्कश इत्युच्यते ।

६-१-१४८ प्रस्कण्वहरिश्चन्द्रावृषी ॥
प्रस्कण्ड ऋषिः । हरिश्चन्द्रो राजर्षिः ।
ऋषी इत्युक्तेर्नेह- प्रकण्वो देशः ।
हरिचन्द्रो माणवकः ।

६-१-१४९ मस्कर- मस्करिणौ वेणुपरिव्राजकयोः ॥
मस्करो वेणुः । मस्करी परिव्राजकः ।
वेणुपरिव्राजकयोरित्युक्तेर्नेह-
मकरो ग्राहः । मकरी समुद्रः ।

६-१-१५० कास्तीराजस्तुन्दे नगरे ॥
कास्तीरं नाम नगरम् । अजस्तुन्दं नाम नगरम् । अन्यत्र तु ईषत् तीरम्= कातीरम् । अजतुन्दम् ।

६-१-१५१ कारस्करो वृक्षः ॥
अन्यत्र कारकरः ।

६-१-१४१ आस्पदम्- = आस्पदमिति ससुँट्को निपात्यते, प्रतिष्ठायाम्= (आत्मयापनाय स्थानं प्रतिष्ठा) प्रतिष्ठायां वाच्यायाम् । प्रत्युदाहरणे १-४-८८ आङ् म.... इति कर्मप्रवचनीयसंज्ञा २-३-१० पञ्च... इति पञ्चमी २-१-१३ आङ् म... इत्यव्ययीभावसमासः ।

६-१-१४२ आश्चर्यम्- =आश्चर्यमिति ससुँट्को निपात्यते, अनित्ये= अद्भुते ।

६-१-१४३ वर्चस्के= अन्नमले, अवस्करः- =अवस्कर इति ससुँट्को निपात्यते ।

६-१-१५४ अप- रथाङ्गम्= रथाङ्गे वाच्ये, अपस्करः= अपस्कर इति ससुँट्को निपात्यते ।

६-१-१४५ विष्किरः =विष्किर इति, वा=विभाषया सुँट्षत्वविशिष्टो निपात्यते, शकुनौ= पक्षिणि वाच्ये । पक्षे विकिरः । "विकिरः शकुनौ वा" सूत्रमिति हरदत्तः ।

६-१-१४६ ह्रस्वात्= ह्रस्वात् परस्य, चन्द्रोत्तरपदे= चन्द्रशब्दरूपोत्तरपदस्य, सुँट् (६-१-१३१) । उत्तरपदशब्दो हि समासचरमावयवे रूढः । तेनेह न-शुक्रमसि चन्द्रमसि ।

६-१-१४७ प्रतिष्कशः= प्रतिष्कश इति, कशेः= कशँ गतिशासनयोः, (१०२४पा.) इत्येतस्य प्रतिपूर्वस्य पचाद्यचि सुँट् षत्वं च निपात्यते । यद्यपि कशेरेव कशा, तथापि कशेरिति धातोर्ग्रहणमुपसर्गस्य प्रतेर्ग्रहणार्थम् । तेन धात्वन्तरोपसर्गान्न । प्रतिगतः कशां प्रतिकशोऽश्वः । यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञेति प्रतिरत्र गम्धातुं प्रत्युपसर्गो न तु कशधातुं प्रति ।

६-१-१४९ मस्क...रिणौ+वेणु...कयोः= मकरशब्दो ऽव्युत्पन्नस्तस्य वेणौ सुँट् परिव्राजके सुँडिनिँश्च निपात्यन्ते । मस्करशब्दान्मत्वर्थीयेन इनिँना सिद्धेऽत्र निपातनं व्यर्थमिति चेत्, अत्र पदमञ्जरी-संयोगे मत्वर्थीयविधानान्मस्करसंयुक्त एव मस्करीत्युच्येत, मा भूदेवं परिव्राजकमात्रवचनो यथा स्यादितीनिँर्निपात्यते, इति ।

६-१-१५० कास्ती...स्तुन्दे, अत्र सुँड् निपात्यते, नगरे=नगरे वाच्ये । **कातीरमिति** ६-३-१०५ ईष...इति कोः काऽऽदेशः ।

६-१-१५१ कारः-वृक्षः=वृक्षे वाच्ये, कारस्करः= कारस्कर इति ससुँट्को निपात्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१५२ पारस्करप्रभृतीनि च संज्ञायाम् ॥

पारस्करः किष्किन्धा ।

(तद्बृहतोः करपत्योश्चोरदेवतयोः सुँट् तलोपश्च) ग.सू.

तस्करः । बृहस्पतिः ।

(प्रात् तुम्पतौ गवि कर्तरि) ग.सू.

प्रस्तुम्पति गौः । अन्यः प्रतुम्पति ।

(प्रायस्य चित्तिचित्तयोः)

प्रायश्चित्तिः । प्रायश्चित्तम् । वनस्पतिः ।

आकृतिगणोऽयम् ।

६-१-१५३ अनुदात्तं पदमेकवर्जम् ॥

गोपायतं नः ।

(सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वक्तव्यम्)

तेनोक्तोदाहरणे गुपेर्धातुस्वर आयस्य प्रत्ययस्वरश्च न शिष्यते । अर्थाद् धातुस्वरेण यकाराकार उदात्तः शिष्टमनुदात्तम् । अन्यत्र विकरणेभ्य इत्युक्तेर्विकरणस्वरः सति शिष्टोऽपि न शिष्यते । यथा-लुनीतः । पुनीतः ।

(विभक्तिस्वरान्नञ्स्वरो बलीयानिति वक्तव्यम्)

अतिस्रः ।

(विभक्तिनिमित्तस्वराच्च नञ्स्वरो बलीयानिति वक्तव्यम्)

अचत्वारः ।

६-१-१५४ कर्षाऽत्वतो घञोऽन्त उदात्तः १५५, १७०, २१८ ॥

कर्षः । पाकः । त्यागः ।

६-१-१५२ पारस्करप्रभृतीनि- ससुँट्कानि निपात्यन्ते, संज्ञायाम् ।

६-१-१५३ अनु- एकवर्जम्=यस्मिन् पदे यस्योदात्तः स्वरितो वा विहितस्तमेकमचं वर्जयित्वा, पदम्=शेषं तत् पदम्, अनुदात्तम्= अनुदात्तच्कं भवति । **गोपायतम्** अत्र यकाराकारो धतुस्वरेणोदात्तः शिष्टमनुदात्तम् । अत्र भाष्यम्-किमर्थं पुनरिदमुच्यते ? आगमस्य विकारस्य प्रकृतेः प्रत्ययस्य च । पृथक्स्वरनिवृत्त्यर्थमेकवर्जं पदस्वरः ॥ आगमस्य- ७-१-९८ चतुरनडुहोरामुदात्तः । चत्वारः । अनड्वाहः । (अत्रागमस्वरः प्रकृतिस्वरं बाधते) विकारस्य- ७-१-७५ अस्थिदधिसक्थ्यक्ष्णामनँङुदात्तः । अस्थ्ना । दध्ना । (अत्राऽनँङ्स्वरः प्रकृतिस्वरं बाधते) प्रकृतेः- गोपायति । धूपायति । (अत्र प्रकृतिस्वरः प्रत्ययस्वरं बाधते) प्रत्ययस्य च- कर्तव्यम् । तैत्तिरीयः । (अत्र प्रत्ययस्वरः प्रकृतिस्वरं बाधते) एतेषां पदे युगपत् स्वरः प्राप्नोति । इष्यते चैक एव स्यादिति । तच्चान्तरेण यत्नं न सिध्यतीत्यनुदात्तं पदमेकवर्जम् । एवमर्थमिदच्यते । इति ।

सति- यकाराकार उदात्तः अनुदात्तेन शबकारेण सह पररूपेऽपि ८-२-५ एका...इत्युदात्तः । थस्स्थानिकतमः प्रत्ययस्वरस्तु न । प्रत्ययस्वरं बाधित्वा ६-१-१८१ तास्य...इत्यनुदात्तत्वविधानात् । तस्य च ८-४-६५ उदा...इति स्वरितः । तस्मिन् कृते पुनः प्रकृतसूत्रं तु न प्रवर्तते, त्रिपाद्या असिद्धत्वात् ।

न शिष्यते अर्थात् सति शिष्टोऽपि विकरणस्वरः प्रत्ययस्वरं न बाधते ।

लुनीतः अत्र तस एव स्वरः शिष्यते । अर्थात् पदमिदमन्तोदात्तं भवति ।

विभ- अतिस्रः अत्र ६-१-१६१ तिसृ...इति सति शिष्टोऽपि विभक्तिस्वरो नञ्स्वरेण ६-२-२ तत्पु...इति विहितप्रकृतिभावेन बाध्यते ।

विभ- विभक्तिर्निमित्तं यस्य तस्य यःस्वरस्तस्मादित्यर्थः । **अचत्वारः** अत्र आम उदात्तस्वरो नञ्स्वरेण बाध्यते ।

६-१-१५४ कर्षा- घञः= घञन्तस्य, कर्षात्वतः= कर्षतेराकारवतश्च, अन्तः, उदात्तः=उदात्तो भवति । ६-१-१९२ ञ्नित्या... इत्यस्यापवादः । सूत्रे कर्ष इति शबन्तानुकरणम् । तेन भौवादिकस्यैव ग्रहणात् तौदादिको घञन्तः कर्ष इत्याद्युदात्त एव भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१५५ उञ्छादीनां च ॥

उञ्छः । जल्पः ।

६-१-१५६अनुदात्तस्य च यत्रोदात्तलोपः॥

दध्ना ।

६-१-१५७ धातोः ॥

पठति । गोपायति ।

६-१-१५८ चितः ॥ १५९

भङ्गुरम् ।

(चिति प्रत्यये प्रकृति- प्रत्यय-समुदायस्यान्त उदात्त इष्यते)

बहुपटवः । उच्चकैः ।

६-१-१५९ तद्धितस्य ॥१६०

कौञ्जायनाः ।

६-१-१६० कितः ॥

नाडायनः ।

६-१-१६१ तिसृभ्यो जसः ॥

तिस्रः ।

६-१-१६२ चतुरः शसि ॥

चतुरः पश्य ।

६-१-१६३ सावेकाचस्तृतीयादिर्विभक्तिः ॥१६४,१७९

वाचा । वाग्भ्याम् । सावेकाच इत्युक्तेर्नेह- राज्ञा । सप्तमीबहुवचनग्रहणान्नेह- त्वया । त्वयि ।

६-१-१६४ अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ॥१७२

परमवाचा । परमवाचे ।

६-१-१६५ अञ्चेश्छन्दस्यसर्वनाम-स्थानम् ॥१७०

इन्द्रो दधीचो अस्थभिः ।

६-१-१५५ उञ्छा- घञः (६-१-१५४)=घञन्तानाम्, उञ्छादीनाम्,=उञ्छप्रतीनाम्, अन्तः+उदात्तः (६-१-१५४) ।

६-१-१५६ अनु-यत्र=यस्मिन्ननुदात्ते परे, उदात्तलोपः=उदात्तस्य लोपो जातः, अनुदात्तस्य= तस्य अनुदात्तस्य स्थाने, उदात्तः (६-१-१५४) ।

६-१-१५७ धातोः- अन्तः+ उदात्तः (६-१-१५४) ।

६-१-१५८ चितः = चकारेत्संज्ञकस्य, अन्तः +उदात्तः(६-१-१५४) । **भङ्गुरम्** भञ्ज् (१४५४) धातोः ३-२-१६१ भञ्ज... इति घुरच् । ७-३-५२ चजोः...इति कुत्वम् ।

६-१-१५९ तद्धि- चितः (६-१-१५८) तद्धितस्य, अन्तः+ उदात्तः (६-१-१५४) पूर्वेणैव सिद्धे परमपि त्रित्स्वरं बाधितुं वचनम् । **कौञ्जायनाः** ४-१-९८ गोत्रे... इति च्फञ् । ४-३-११३ व्रात... इति ञ्यः । तस्य ५-३-११९ ञ्याद... इति तद्राजसंज्ञा । बहुत्वे २-४-६२ तद्रा... इति लुक् ।

६-१-१६० कितः =ककारेत्संज्ञकस्य, तद्धितस्य (६-१-१५९) अन्तः + उदात्तः (६-१-१५४) । **नाडायनः** ४-१-९९ नडा... इति फक् ।

६-१-१६१ तिसृभ्यः =तिसृ इत्यतः परस्य, जसः= जस्प्रत्ययाकारस्य, उदात्तः (६-१-१५४) । ८-२-४ उदा... इति स्वरितस्याऽपवादः । **तिस्रः** त्रिशब्दः प्रातिपदिकस्वरेणान्तोदात्तः । (तिसृ) आदेशः स्थानिवद्भावेनान्तोदात्तः ।

६-१-१६२ चतुरः=चतुः शब्दस्य, अन्तः+उदात्तः (६-१-१५४) शसि=शसि परे । चतुर्शब्दो नित्वादाद्युदात्तः । चतस्रादेशे स्थानिवद्भावेनैव सिद्धे ७-२-९९ त्रिच...सूत्रे आद्युदात्तनिपातनमस्य स्वरस्य बाधनार्थम् । चतस्रः पश्य ।यणादेशस्य स्थानिवद्भावाद् वाऽत्र प्रकृतसूत्रं न प्रवर्तते ।

६-१-१६३ सावे-सौ+एकाचः=सप्तमीबहुवचने परे य एकाच् ततः परा, तृतीयादिः=तृतीयाप्रभृतिः, विभक्तिः, उदात्तः (६-१-१५४)=उदात्ता । **राज्ञा** राजसु इत्यत्रैकाचोऽभावात् ।

६-१-१६४ अन्तोदात्तात्, उत्तरपदात्=उत्तरपदात् परा, एकाचः+तृतीयादिः+ विभक्तिः (६-१-१६३) अन्यतरस्याम्= वा उदात्ता (६-१-१६३ व्या.) अनित्यसमासे= नित्याधिकारविहितभिन्नसमासे । पक्षे समासान्तोदात्तत्वम् ।

६-१-१६५ अञ्चेः=अञ्च्धातोः परा, असर्वनामस्थानम्=सर्वनामस्थानभिन्ना, विभक्तिः+ उदात्ता=, (६-१-१६३ व्या.) छन्दसि=वेदे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१६६ ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः ॥

उठ्-प्रष्ठौहः । इदम्- आभ्याम् । एभिः । पदादयः= पद्दन्नोमास् इत्येवमादयो निश्पर्यन्ता इह गृह्यन्ते । पद्भ्यां भूमिः । या दतो धावति । अप्-अपां फेनेन । पुम्= पुंसः । रै= राया वयम् । दिव्- उपत्वाग्ने दिवे दिवे ।

(ऊठ्युपधाग्रहणं कर्तव्यम्)

तेनेह न- अक्षद्युवा ।

६-१-१६७ अष्टनो दीर्घात् ॥

अष्टाभिः ।

६-१-१६८ शतुरनुँमो नद्यजादी ॥ १७०

तुदती । तुदता । पुनती । पुनता ।

अनुँम इत्युक्तेर्नेह- तुदन्ती ।

अन्तोदात्तादित्यनुवृत्तेर्नेह-ददती ।

(बृहन्महतोरुपसंख्यानम्)

बृहती । बृहता । महती । महता ।

६-१-१६९ उदात्तयणो हल्पूर्वात् ॥ १७०

कर्त्री । कर्त्रा । उदात्तयण इत्युक्तेर्नेह-कर्त्री । कर्त्रा ।

(नकारग्रहणमपि कर्तव्यम्)

वाक्पत्नीयं कन्या ।

६-१-१७० नोङ्धात्वोः ॥

ब्रह्मबन्ध्वा । खलप्वा ।

६-१-१७१ ह्रस्वनुँड्भ्यां मतुँप् ॥ १७२

अग्निमान् । वायुमान् । अक्षण्वता ।

अन्तोदात्तादित्यनुवृत्तेर्नेह-वसुमान् ।

(रेशब्दाच्च मतुँप उदात्तत्वं वक्तव्यम्)

आरेवान् ।

(त्रेश्च प्रतिषेधो वक्तव्यः)

त्रिवतीर्याज्यानुवाक्या भवन्तीति ।

६-१-१६६ ऊडि.. द्युभ्यः=ऊठ् इदम् पदादि अप् पुंस् रै दिव् इत्येतेभ्यः परा, असर्वनामस्थानम् (६-१-१६५) विभक्तिः+ उदात्ता (६-१-१६३ व्या.) । **आभ्याम् । एभिः** । अत्र काशिका- 'अन्तोदात्तात्' (६-१-१६४) इत्यधिकारादन्वादेशे न भवति- अथो आभ्यां निपुणमधीतमितीति । **निश्पर्यन्ता** इह तेन असन्प्रभृतिभ्यो विभक्तिरनुदात्तैव ।

६-१-१६७ अष्ट दीर्घात् +अष्टनः =दीर्घात् अष्टनः परा, असर्वनामस्थानम् (६-१-१६५)विभक्तिः + उदात्ता (६-१-१६३ व्या.) । ६-१-१७५ झल्यु... इत्यस्याऽपवादः । अष्टञ्शब्दो घृतादिपाठादन्तोदात्तः । अत्र काशिका- इदमेव दीर्घग्रहणमष्टन आत्वविकल्पं ज्ञापयति । कृतात्वस्य च षट्संज्ञां ज्ञापयति । अन्यथा ह्यात्वपक्षे सावकाशो ऽष्टनः स्वरः परत्वादनात्वपक्षे षट्स्वरेण बाधिष्यत इति किं दीर्घग्रहणेन । इति ।

६-१-१६८ शतु- अनुँमः+ शतुः= नुँम्रहितशत्रन्तात्, अन्तोदात्तात् (६-१-१६४) परा, असर्वनामस्थानम् (६-१-१६५)+ नद्यजादी+विभक्तिः (६-१-१६३) नदीसर्वनामस्थानभिन्नाऽ जादिविभक्तिश्च, उदात्ता (६-१-१६३ व्या.) । उदाहरणेषु-शत्रन्तं प्रत्ययस्वरेणान्तोदात्तम् । **ददती** ६-१-१८४ अभ्य...इत्याद्युदात्तो ऽयम् । **बृह**-अत्र हरदत्तः- शतृँभावादेव सिद्धे नियमार्थमिदम् । पृषदादीनां मा भूदितीति ।

६-१-१६९ उदा- हल्पूर्वात्= हल्पूर्वकात्, उदात्तयणः= उदात्तस्थानिकयणः (परा) असर्वनामस्थानम्+ नद्यजादी+विभक्तिः (६-१-१६८ व्या.) उदात्ता ६-१-१६३ व्या.) । उदाहरणे तृजन्ते । प्रत्युदाहरणे तृन्नन्ते ।

६-१-१७० नोङ्धा- ऊङ्धात्वोः= ऊङो धातोश्च, उदात्तयणः (६-१-१६९) परा, न= अजाद्यसर्वनामस्थानविभक्तिरुदात्ता न भवति । उदात्ते प्रतिषिद्धे ८-२-४ उदा... इति स्वरितः ।

६-१-१७१ ह्रस्वनुँड्भ्याम्= ह्रस्वान्तात् (अन्तोदात्तात् ६-१-१६४) नुँटश्च परः, मतुँप्= मतुँप् प्रत्ययः उदात्तः (६-१-१५४) । **अक्षण्वता** ७-१-७६ छन्द... इत्यनँङ् । ८-२-१६ अनो... इति नुँट् । **वसुमान्** निदित्यधिकारे शृस्वृ.... इत्यौणादिकसूत्रेण वसेरुप्रत्ययः । तेन नित्वाद् वसुशब्द आद्युदात्तः । अतोऽत्र मतुँबनुदात्त एव । अत्र काशिका-अत्र च 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इत्येषा परिभाषा नाश्रीयते । नुँड्ग्रहणात् । तेन मरुत्वान् इत्यत्र न भवतीति ।

रेशब्दा-आरेवान् ६-१-३६ नस... सूत्रस्थ- रये... वार्तिकेन रयिशब्दस्य सम्प्रसारणम् । ततः पूर्वरूपे गुणः । ८-२-१५ छन्द... इति मतोर्मकारस्य वकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१७२ नामन्यतरस्याम् ॥१७३

चेतन्ती सुमतीनाम् । वायूनाम् ।
कर्तॄणाम् ।

६-१-१७३ ङ्याश्छन्दसि बहुलम् ॥

देवसेनानामभिभञ्जतीनाम् ।
बहुलग्रहणान्नेह- जयन्तीनां मरुतः ।

६-१-१७४ षट्त्रिचतुर्भ्यो हलादिः ॥ १७६

षड्भिः । पञ्चानाम् ।
त्रिभिः । चतुर्णाम् ।

६-१-१७५ झल्युपोत्तमम् ॥१७६

पञ्चभिः । तिसृभिः । चतुर्भिः ।
झलीत्युक्तेर्नेह- पञ्चानाम् । उपोत्तममित्युक्तेर्नेह-षड्भिः ।

६-१-१७६ विभाषा भाषायाम् ॥

पञ्चभिः । तिसृभिः । चतुर्भिः ।

६-१-१७७ न गो-श्वन्- सावर्ण- राडङ्-क्रुङ्- कृद्भ्यः ॥१७९

गवा । गोभ्याम् । शुना । श्वभ्याम् ।
तेभ्यः । केभ्यः । राजा । राड्भिः । प्राचा ।
प्राङ्भ्याम् । क्रुञ्चा । क्रुङ्भ्याम् । कृता ।
कृद्भ्याम् ।

६-१-१७८ दिवो झल् ॥१७९

द्युभ्याम् । द्युभिः । झलित्युक्तेरिह न प्रतिषिध्यते- दिवा ।

६-१-१७९ नृ चान्यतरस्याम् ॥

नृभ्याम् । नृभिः ।

६-१-१८० तित् स्वरितम् ॥

क्व ।

६-१-१८१ तास्यनुदात्तेन्ङिददुपदेशाल्ल-सार्वधातुकमनुदात्तमहन्विङोः ॥१८७

कर्ता । कर्तारौ । कर्तारः । आस्ते ।
शेते । तुदतः । पठतः । चित्स्वरोऽप्यनेन बाध्यते- पचमानः । उपदेशग्रहणादिह भवति- पचावः । पचामः । इह च न भवति- हतः । हथः । अहन्विङोरित्युक्तेर्नेह-ह्नुते । यदधीते ।
(विन्दीन्धिखिदिभ्यो नेति वक्तव्यम्)
विन्ते । इन्धे । खिन्ते ।

६-१-१७२ नाम- पूर्वसूत्रादनुवर्तमानो मतुँप् सप्तम्यन्ताय कल्पते । तेन च तत्सूत्रादेवा ऽ नुवर्तमानो ह्रस्वो विशेष्यते । मतुँपि यो ह्रस्वस्तदन्तात्, अन्तोदात्तात् (६-१-१६४) परः, नाम्=नामित्यस्याकारः, अन्यतरस्याम्=वा, उदात्तः (६-१-१५४) । मतुँपमननुवर्त्य ह्रस्वमात्रा ऽनुवृत्त्या मतुँपि यो ह्रस्व इत्यनुक्तौ ह्रस्वात् परो नामित्यर्थापत्त्या तिसृणामित्यादावेव सूत्रमेतत् प्रवर्तेत नतु मूलोक्तोदाहरणेषु ।

६-१-१७३ ङ्याः=ङ्यन्तात् परः, नाम् (६-१-१७२) बहुलम्=बाहुल्येन, उदात्तः (६-१-१५४)छन्दसि=वेदे ।

६-१-१७४ षट्त्रिचतुर्भ्यः=षट्संज्ञकेभ्यस्त्रिचतुर्भ्यां च परा, हलादिः=हलादिर्विभक्तिः, उदात्ता (६-१-१५४) ।

६-१-१७५ झल्यु- त्रिप्रभृतीनामन्त्यमुत्तमम् । तत्समीपमुपोत्तमम् । षट्त्रिचतुर्भ्य इत्यनुवर्तते पूर्वसूत्रात् । झलादौ विभक्तौ परतस्तेषां त्रिप्रभृत्यक्षरासंभवाद् झलादिविभक्त्यन्तं पदं गृह्यते । तथाहि - झलि = षट्त्रिचतुः शब्दप्रकृतिक-झलादिविभक्त्यन्तपदे, उपोत्तमम्, उदात्तम्, (६-१-१५४) ।

६-१-१७६ विभा- भाषायाम्= लोके विभाषा=वा प्राग्वत् ।

६-१-१७७ न गो-गो, श्वन्, सावर्णम्=सौ (प्रथमैवकचने) यदवर्णान्तम्, राज्, अङ् (अलुप्तनकारोऽञ्च्), क्रुञ्च् कृत्, इत्येतेभ्यः, न=प्रागुक्तं न भवति । उदाहरणेषु ६-१-१६३ सावे... इति प्राप्त उदात्तः प्रतिषिद्धः ।

६-१-१७८ दिवः= दिवः परा, झल्= झलादिर्विभक्तिः, न (६-१-१७७) = उदात्ता न भवति । प्राप्तिः प्राग्वत् ।

६-१-१७९ नृ= नृ इत्येतस्मात् परा, झल् (६-१-१७८) अन्यतरस्याम्= वा न (६-१-१७७) ।

६-१-१८० तित्स्व- तित्= तकारेत्संज्ञकम्, स्वरितम्= स्वरितं भवति ।

क्वः ५-३-१२ किमोऽत् इत्यत् प्रत्ययः ७-२-१०५ क्वाति इति क्व आदेशः ।

६-१-१८१ तास्यनुदात्तेन्ङिददुपदेशात्= तासेँः, अनुदात्तेतः, ङितः, अदुपदेशाच्च (अदन्तोपदेशाच्च) परम्, लसार्वधातुकम्=लकारस्थानिकं सार्वधातुकम्, अनुदात्तम्=अनुदात्तं भवति, अहन्विङोः=ह्नुङम् इङं च वर्जयित्वा । अदुपदेशादित्यस्य विश्लेषणम्-उपदिश्यते इत्युपदेशः । अच्चासावुपदेशः= अदुपदेशः । तत्र तदन्तविधौ अदन्तोपदेश इत्यर्थः । शशपौ च अदन्तावुपदिष्टौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१८२ **आदिः सिँचोऽन्यतरस्याम्** ॥१८३
मा हि कार्ष्टम् । पक्षे प्रत्ययस्वरेणान्तोदात्तः । मा हि लाविष्टाम् । पक्षे मध्योदात्तः सिँचः स्वरेण ।

६-१-१८३ **स्वपादिहिंसामच्यनिटि** ॥१८४
स्वपन्ति । श्वसन्ति । हिंसन्ति ।
(क्ङित्येवेष्यते)
नेह- स्वपानि । हिनसानि ।

६-१-१८४ **अभ्यस्तानामादिः** ॥१८७, १८६
ददति । दधति । जक्षति । जाग्रति ।

६-१-१८५ अनुदात्ते च ॥
ददाति । दधाति ।

६-१-१८६ सर्वस्य सुँपि ॥
सर्वः । सर्वे ।
(सर्वस्वरोऽ नकँच्कस्येति वक्तव्यम्)
सर्वकः । सर्वके ।

६-१-१८७ भी-ह्री-भृ-हु-मद-जन-धन-दरिद्रा जागरां **प्रत्ययात् पूर्वं** पिति ॥१८८
बिभेति । जिह्रेति । बिभर्ति । जुहोति । ममत्तु नः परिज्मा । जजनदिन्द्रम् । दधनत् ।
दरिद्राति । जागर्ति ।

६-१-१८८ लिति ॥
चिकीर्षकः ।

६-१-१८९ **आदिर्णमुँल्यन्यतरस्याम्** ॥१९१
लोलूयं लोलूयम् ।

शबपि कथमदन्तः ? अनुबन्धस्याऽनेकान्तत्वात् । अत्र ङित इति प्रतीकमादाय तत्त्वबोधिनी- अस्याप्युपदेशविशेषणान्नेह । शृणुते जरितुर्हवम् । अत्र श्नुरतिदेशेन ङित् । इति ।
६-१-१८२ **आदिः**-सिँचः= सिँजन्तस्य, आदिः=आदिरच्, अन्यतरस्याम्=वा, उदात्तः (६-१-१५४) । **मध्योदात्तः** 'सिँचश्चित्करणादागमानुदात्तत्वं हि बाध्यते' इति काशिका ।
६-१-१८३ **स्वपा-** ६-१-१८१ तास्य... सूत्रादनुवर्तमानं 'लसार्वधातुकम्' इति अच्यनिटि इत्यनेन सम्बन्धात सप्तम्यन्ताय कल्पते । अनिटि = इड्भिन्ने, अचि=अजादौ, लसार्वधातुके (६-१-१८१) :स्वपादीनां हिंसेश्च, आदिः+अन्यतरस्याम् (६-१-१८२) उदात्तः (६-१-१५४) पक्षे प्रत्ययस्वरेण मध्योदात्तः । **क्ङि- स्वपानि** धातुस्वरेणाद्युदात्तत्वम् । विशेषस्तु हिनसानि इत्यत्र तन्मध्यपातितन्यायद्वारा धातुस्वरेण नकाराकार उदात्तः । ततः परस्य अनुदात्तस्य स्वरितः ।
६-१-१८४ **अभ्य-** अनिटि+अचि (६-१-१८३) लसार्वधातुके (६-१-१८१) अभ्यस्तानाम्= अभ्यस्तसंज्ञकधातूनाम्, आदिः=आदिरच्, उदात्तः (६-१-१५४) । आदिः (६-१-१८२) इति वर्तमाने पुनरादिग्रहणं नित्योर्थम् ।
६-१-१८५ **'अनुदात्ते'** इत्यत्र बहुव्रीहिर्बोध्यः तथाहि- अविद्यमानोदात्ते, लसार्वधातुके (६-१-१८१) अभ्यस्तानामादिः (६-१-१८४) उदात्तः (६-१-१५४) । अनजाद्यर्थ आरम्भः । बहुव्रीह्याश्रयणाद् मा हि स्म दधात्, दधात्यत्र इत्यत्र लोपे यणि चाऽनुदात्तपरत्वाऽभावेऽपि सूत्रमिदं प्रवर्तते ।
६-१-१८६ **सर्वस्य**= सर्वशब्दस्य, सुँपि=सुँपि परे, आदिः । (६-१-१८४) उदात्तः (६-१-१५४) ।
सर्वस्वरो-उदाहरणयोः ६-१-१५८ चितः-इत्यन्तोदात्तत्वम् ।
६-१-१८७ **भी...** जागराम्= भीप्रभृतीनाम् अभ्यस्तानाम् (६-१-१८४) लसार्वधातुके (६-१-१८१) पिति, प्रत्ययात्, पूर्वम्, उदात्तम्, (६-१-१५४) । १-१-६५ तस्मिन्... इत्यनेनैव पूर्वस्य सिद्धे प्रकृतसूत्रे पूर्वग्रहणं स्वरविधौ सप्तम्यस्तदन्तसप्तम्यो भवन्तीति ज्ञापनार्थम् । तेन ६-१-१८६ सर्वस्य सुँपि= सुँबन्ते सर्वशब्दे, रिति (६-१-२१२)= रिदन्ते, चङि (६-१-२१३)= चङन्ते, ञ्निति (६-१-१९२)= ञिदन्ते निदन्ते चेत्याद्यर्थस्तत्र तत्र फलति । स्फुटप्रतिपत्तये सुँबन्तस्य सर्वशब्दस्य, रिदन्तस्य, चङन्तस्य, ञिदन्तस्य, निदन्तस्येत्यादिर्वा तत्र तत्र षष्ठ्यन्तेन विवरीतुं शक्यते । तथा चाऽत्रत्यं भाष्यम्- उपोत्तमं रिति रिदन्तस्य चङ्यन्यतरस्याम्, चङन्तस्य । इति ।
६-१-१८८ **लिति**= लकारेत्संज्ञके प्रत्यये परे, प्रत्ययात्+ पूर्वम् (६-१-१८७), उदात्तम् (६-१-१५४) । अत्र लिदन्ते लिदन्तस्य वेत्यर्थ इति न प्रमाद्यम् । पूर्व (६-१-१८७) सूत्रात् प्रत्ययात् पूर्वमित्यनुवृत्तेः ।
६-१-१८९ **आदि-**णमुँलि= णमुँलि परतः, अन्यतरस्याम्=वा, आदिः=आदिरच्, उदात्तः (६-१-१५४) । अत्र काशिका-आम्रेडितानुदात्तत्वे कृते पूर्वो लोलूयं शब्द एकत्राद्युदात्तः, अपरत्र लित्स्वरेण मध्योदात्त इति । ८-१-३ अनु... इत्याम्रेडितानुदात्तत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-१९० अचः कर्तृयकि ॥

लूयते केदारः स्वयमेव ।

कीर्यते । जायते ।

६-१-१९१ थलि च सेटीडन्तो वा ॥

लुलविथ ।

६-१-१९२ ञ्नित्यादिर्नित्यम् ॥ २११

गार्ग्यः । वासुदेवकः ।

६-१-१९३ आमन्त्रितस्य च ॥

देवदत्त ! देवदत्तौ ! देवदत्ताः ! ।

६-१-१९४पथिमथोः सर्वनामस्थाने ॥

पन्थाः । पन्थानौ । मन्थाः, मन्थानौ ।

६-१-१९५ अन्तश्च तवै युगपत् ॥

कर्तवै ।

६-१-१९६ क्षयो निवासे ॥

क्षये जागृहि प्रपश्यन् ।

६-१-१९७ जयः करणम् ॥

जयः ।

६-१-१९८ वृषादीनां च ॥

वृषः ।

६-१-१९९ संज्ञायामुपमानम् ॥२००

चञ्चा । खरकुटी ।

उपमानमित्युक्तेर्नेह- देवदत्तः ।

६-१-२०० निष्ठा च द्व्यजनात् ॥ २०८

दत्तः । गुप्तः । अनादित्युक्तेर्नेह-त्रातः ।

आप्तः ।

६-१-१९० अचः- ६-१-१८१ तास्य... सूत्रात् अदुपदेशाददिति समस्तंमपि स्वरितत्वप्रतिज्ञानादुपदेशमात्रमिह सम्बध्यते तच्चाऽर्थात् सप्तम्यन्ताय कल्पते । उपदेशे (६-१-१८१) अचः= अजन्ताम्, आदिः + अन्यतरस्याम् (६-१-१८२), उदात्तः (६-१-१५४) कर्तृयकि=कर्तृवाचिनि सार्वधातुके परे विहिते यकि परे । **लूयते** आदिमध्यौ पर्यायेणोदात्तौ । एतदप्रवृत्तिपक्षे ६-१-१८१ तास्य... इति निघाते कृते यकः स्वरस्य स्थितत्वात् ते इति ६-१-१८१ तास्य... इत्यनुदात्तः । **जायते** जनिरत्राऽन्तर्भावितण्यर्थः। अतः कर्मकर्तरि प्रत्ययः । अत्र काशिका-जनादीनामुपदेश एवात्वं द्रष्टव्यम्, तत्राप्ययं स्वर इष्यते । **जायते** स्वयमेव । सायते स्वयमेव । खायते स्वयमेव । इति । उपदेशे, इत्यस्य सम्बन्धात् 'कीर्यते' इत्यादीनां संग्रहः ।

६-१-१९१ थलि-सेटि+थलि=इडागमसहिते थलि, इट्, अन्तः, आदिः (६-१-१८९) वा, अन्यतरस्याम् (६-१-१८९) उदात्तः (६-१-१५४) । पक्षे लित् (६-१-१८८) स्वरः । इत्थं पर्यायेणाऽत्र चत्वारः स्वराः । अन्यतरस्यामिति वर्तमाने वा ग्रहणं कार्यिविकल्पार्थमिति हरदत्तः ।

६-१-१९२ ञ्निति=ञिदन्ते निदन्ते च । आदिः = आदिरच्, नित्यम्, उदात्तः, (६-१-१५४) । गार्ग्यः ४-१-१०५ गर्गा.... इति यञ् । वासुदेवकः ४-३-९८ वासु... इति वुँन् ।

६-१-१९३ आमन्त्रितस्य= आमन्त्रितसंज्ञकपदस्य, आदिः (६-१-१९२) उदात्तः (६-१-१५४) । उदाहरणेषु ६-२-१४७) कार... इति बाध्यते ।

६-१-१९४ पथिमथोः= पथि (न्) मथि (न्) शब्दयोः, आदिः (६-१-१९२) उदात्तः (६-१-१५४) सर्वनामस्थाने= सर्वनामस्थाने परे ।

६-१-१९५ अन्तश्च- तवै=तवैप्रत्ययान्तस्य, अन्तः, आदिः (६-१-१९२) च, युगपत्= एकदैव, उदात्तः (६-१-१५४) । युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम् । अन्यथा, एकवर्जम् । (६-१-१५३) इति वचनाद् एकदैव न स्यात् ।

६-१-१९६ क्षयो-निवासे=निवासे वाच्ये, क्षयः= क्षयशब्दस्य, आदिः (६-१-१९२) उदात्तः (६-१-१५४) ।

६-१-१९७ जयः- करणम्= करणवाचिनः, जयः=जयशब्दस्य, आदिः (६-१-१९२) उदात्तः (६-१-१५४) । **जयः** जयन्त्यनेन ३-३-११८ पुँसि... इति घः ।

६-१-१९८ वृषादीनाम्= वृषप्रभृतीनाम्, आदिः (६-१-१९२) उदात्तः (६-१-१५४) ।

६-१-१९९ संज्ञा-उपमानम्=उपमानवाचिनः शब्दस्य, आदिः (६-१-१९२) उदात्तः (६१-१५४) संज्ञायाम् =संज्ञायां गम्यमानायाम् ।

६-१-२०० निष्ठा= निष्ठान्तस्य, द्व्यच् = द्व्यच्कस्य, अनात् = आकारभिन्नः, आदिः (६-१-१९२ उदात्तः (६-१-१५४) संज्ञायाम् (६-१-१९९) । प्रत्ययस्वरापवादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-२०१ शुष्कधृष्टौ ॥

शुष्कः । धृष्टः ।

६-१-२०२ आशितः कर्ता ॥

आशितो देवदत्तः ।

६-१-२०३ **रिक्ते** विभाषा ॥ २०४

रिक्तः ।

६-१-२०४ **जुष्टार्पिते** च च्छन्दसि ॥२०५

जुष्टः । अर्पितः ।

६-१-२०५ नित्यं मन्त्रे ॥

जुष्टं देवानाम् । अर्पितं पितृणाम् ।

६-१-२०६ **युष्मदस्मदोर्ङसि** ॥७०२

तव स्वम् । मम स्वम् ।

६-१-२०७ ङयि च ॥

तुभ्यं हिन्वानः ।

मह्यं वातः पवताम् ।

६-१-२०८ यतोऽनावः ॥

चेयम् । जेयम् । दन्त्यम् । कण्ठ्यम् ।

अनाव इत्युक्तेर्नेह- नाव्यम् । द्व्यच इत्यनुवृत्तेर्नेह- चिकीर्ष्यम् । ललाट्यम् ।

६-१-२०९ईडवन्दवृशंसदुहां ण्यतः ॥

ईड्यम् । वन्द्यम् । वार्यम् । शंस्यम् । दोह्यम् ।

६-१-२१० **विभाषा** वेण्विन्धानयोः ॥ २११

वेणुः । इन्धानः ।

६-१-२०१ शुष्कधृष्टौ = शुष्कधृष्टयोः, आदिः (६-१-१९२) उदात्तः (६-१-१५४) । पूर्वेणैव सिद्धेरसंज्ञार्थ आरम्भः ।

६-१-२०२ आशि- कर्ता = कर्तृवाचिनः, आशितः=आशितशब्दस्य, आदिः (६-१-१९२) उदात्तः (६-१-१५४) । **आशितः** अत्र काशिका-अशेरयमाङ्पूर्वादविवक्षिते कर्मणि कर्तरि क्तः । इति ।

६-१-२०३ रिक्ते = रिक्तशब्दे, आदिः (६-१-१९२) विभाषा= वा, उदात्तः (६-१-१५४) । अत्र काशिका-संज्ञायां '६-१-२०० निष्ठा च द्व्यजनात्' इत्यनेन पूर्वविप्रतिषेधेन नित्यमाद्युदात्त इति ।

६-१-२०४ जुष्टार्पिते=जुष्ट अर्पित इत्येतयोः, आदिः (६-१-१९२) विभाषा (६-२-१०३) उदात्तः (६-१-१५४) । छन्दसीत्युक्तेर्भाषायां प्रत्ययस्वरेणान्तोदात्तावेतौ ।

६-१-२०५ नित्यं- मन्त्रे= मन्त्रविषये, जुष्टार्पिते (६-१-२०४) आदिः (६-१-१९२) नित्यम्, उदात्तः (६-१-१५४) । अत्र काशिका- केचिदत्र 'जुष्ट' इत्येतदेवानुवर्तयन्ति । अर्पितशब्दस्य विभाषा मन्त्रेऽपीच्छन्ति । अन्तोदात्तोऽपि ह्ययं मन्त्रे पठ्यते - तस्मिन् साकं त्रिशता न शङ्क्वोऽर्पिता, इति । इति ।

६-१-२०६ युष्मदस्मदोः= युष्मदस्मच्छब्दयो :, आदिः (६-१-१९२) उदात्तः (६-१-१५४) ङसि= ङस्प्रत्ये परे ।

६-१-२०७ ङयि-युष्मदस्मदोः (६-१-२०६) आदिः (६-१-१९२) उदात्तः (६-१-१५४) ङयि=ङे-प्रत्यये परे । योगविभागो यथासंख्यशङ्का-निवृत्त्यर्थः ।

६-१-२०८ यतो-६-१-२०० निष्ठा... सूत्रादनुवर्तमानं 'द्व्यच्' इति यत इत्यनेन सम्बन्धात् षष्ठ्यन्ताय कल्पते द्व्यच इति । तथाहि- यतः=यत्प्रत्ययान्तस्य, द्व्यचः (६-१-२००) आदिः (६-१-१९२) उदात्तः (६-१-१५४) अनावः = नौ शब्दात् परो यत्प्रत्ययो न चेत् । ६-१-१८० तित् स्व.... इति स्वरितस्यापवादः ।

६-१-२०९ ईड-ण्यतः=ण्यदन्तानाम्, ईड...दुहाम्= ईड्-वन्द्-वृ-शंस्-दुह्धातूनाम्, आदिः (६-१-१९२) उदात्तः (६-१-१५४) । **वार्यम्** वृङ् संभक्तौ (१५०८) इति धातोर्ण्यत् । क्यप् तु वृञ (१२५३) एव भवति ।

६-१-२१० विभा-वेण्विन्धानयोः= वेणु इन्धान इति शब्दयोः, आदिः (६-१-१९२) विभाषा= वा, उदात्तः (६-१-१५४) । वेणुशब्दः, ३२५ अजिवृरीभ्यो निच्च इत्यौणादिक-णुप्रत्ययान्तः । तेन नित्वादाद्युदात्ते नित्यं प्राप्ते । इन्धानशब्दश्चानशन्तश्चेच्चित्स्वरेणान्तोदात्तः । शानजन्तश्चेत् ६-१-१८१ तास्य... इत्यनुदात्तत्वे कृते श्नमोऽकारलोपे ६-१-१५६ अनु...इति मध्योदात्तः । एवं च इन्धानशब्दे त्वप्राप्तौ पक्षे विधीयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-२११ त्याग-राग-हास-कुह-श्वठ-क्रथानाम् ॥

त्यागः । रागः । हासः । कुहः । श्वठः । क्रथः ।

६-१-२१२ उपोत्तमं रिति ॥ २१३

करणीयम् । पटुजातीयः ।

६-१-२१३ चङ्चन्यतरस्याम् ॥

मा हि चीकरताम् ।

६-१-२१४ मतोँः पूर्वमात् संज्ञायां स्त्रियाम् ॥

उदुम्बरावती । शरावती ।

६-१-२१५ अन्तोऽवत्याः ॥ २१८

खदिरवती ।

६-१-२१६ ईवत्याः ॥

अहीवती ।

६-१-२१७ चौ ॥

दधीचः । मधूचः ।

(चावतद्धित इति वक्तव्यम्)

दाधीचः । माधूचः ।

६-१-२१८ समासस्य ॥

राजपुरुषः । विधानपरिषत् ।

इति षष्ठाऽध्याये प्रथमः पादः ।

६-१-२११ त्याग...थानाम्=एषाम्, आदिः (६-१-१९२) विभाषा (६-१-२१०) उदात्तः (६-१-१५४) । आद्यास्त्रयो घञन्ताः । तेन पक्षान्तरे ६-१-१५४ कर्षा...इत्यन्तोदात्ताः । शेषाः पचाद्यजन्ताः पक्षान्तरे चित्स्वरेणान्तोदात्ताः ।

६-१-२१२ उपो-रिति=रिदन्ते, उपोत्तमम्, उदात्तम् (६-१-१५४) । त्र्यादीनामन्त्यमुत्तमम् । तस्य समीपमुपोत्तमम् ।

६-१-२१३ चङ्च-चङि=चङन्ते, उपोत्तमम् (६-१-२१२) अन्यतरस्याम्=वा, उदात्तम् (६-१-१५४) । **चीकरताम्** ण्यन्तकृधातोर्लुङि तसि रूपम् । ६-४-७४ न माङ्...इत्यडभावः । ६-१-१८१ तास्य... इत्यदुपदेशात् परत्वेन तामोऽनुदात्तत्वे प्रत्ययस्वरेण चङ एव उदात्तत्वे प्राप्ते प्रकृतसूत्रेण पक्षे धात्वकार उदात्तः ।

६-१-२१४ मतोँः+पूर्वम्+आत्=मतुँप्प्रत्ययात् पूर्व आकारः, उदात्तः (६-१-१५४) स्त्रियाम्=स्त्रीलिङ्गे संज्ञायाम्= संज्ञायां गम्यमानायाम् । सूत्रे पूर्वमिति नपुंसकनिर्देशः शब्दरूपापेक्षया ।

६-१-२१५ अन्तो-अवत्याः= अवतीशब्दान्तस्य, अन्तः, उदात्तः (६-१-१५४) स्त्रियां+संज्ञायाम् (६-१-२१४) ।

६-१-२१६ ईवत्याः= ईवतीशब्दान्तस्य, अन्तः (६-१-२१५) उदात्तः (६-१-१५४) स्त्रियाम्+संज्ञायाम् (६-१-२१४) । **अहीवती** ६-३-१२० शरा...इति दीर्घः ८-२-११ संज्ञा...इति वत्वम् । योगविभागश्चिन्त्यप्रयोजन इति हरदत्तः ।

६-१-२१७ चौ=लुप्ताकारनकारे अञ्चतौ परे, अन्तः (६-१-२१५)= पूर्वस्यान्तः, उदात्तः (६-१-१५४) ।

चाव- दाधीचः । माधूचः । प्रत्ययस्वरोऽत्र भवति ।

६-१-२१८ समासस्य=समस्तशब्दस्य, अन्तः (६-१-२१५) उदात्तः (६-१-१५४) । **विधानपरिषत्** स्वरविधौ व्यञ्जनमविद्यमानवद् भवति । अतो हलन्तेऽप्यचां मध्येऽन्त्यस्याऽयं स्वरो भवति ।

इति षष्ठाऽध्याये प्रथमः पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ नमः श्रीजगदम्बायै ।

अथ षष्ठाध्याये द्वितीयः पादः ।

६-२-१ बहुव्रीहौ **प्रकृत्या पूर्वपदम्** ॥ ६३,१०८
कार्ष्णोत्तरासङ्गः । अध्यापकपुत्रः । मनुष्यनाथः ।
६-२-२ **तत्पुरुषे** तुल्यार्थ-तृतीया-सप्तम्युपमानाव्यय- द्वितीया- कृत्याः ॥२३
तुल्यश्वेतः । तुल्यमहान् । सदृक्श्वेतः । सदृग्महान् । शङ्कुलया खण्डः= शङ्कुलाखडः । अक्षेषु शौण्डः =अक्षशौण्डः ।
न्यग्रोधपरिमण्डला ।
अब्राह्मणः । कुपुरुषः । अतिखट्वः ।
मुहूर्तं सुखम् = मुहूर्तसुखम् ।
भोज्योष्णम् ।
(अव्ययये नञ्कुनिपातानामिति वक्तव्यम्)
नेह- स्नात्वाकालकः ।
६-२-३ वर्णो वर्णेष्वनेते ॥
कृष्णसारङ्गः । लोहितसारङ्गः ।
वर्ण इत्युक्तेर्नेह-परमकृष्णः ।
वर्णेष्वित्युक्तेर्नेह-कृष्णतिलाः ।
अनेते इत्युक्तेर्नेह-कृष्णैतः ।
६-२-४ गाधलवणयोः प्रमाणे ॥
शम्बगाधमुदकम् । गोलवणम् ।
प्रमाणे इत्युक्तेर्नेह-परमगाधम् ।
परमलवणम् ।
६-२-५ दायाद्यं दायादे ॥
धनदायादः ।

६-२-१ बहु -- अत्र सूत्रे पूर्वपदशब्दः तत्स्थपरः । मञ्चा हसन्तीत्यत्र मञ्चशब्दवत् । तत्स्थश्च उदात्तः स्वरितो वा स्वरो ग्राह्यः । तथा हि-बहुव्रीहौ = बहुव्रीहिसमासे, पूर्वपदम् = पूर्वपदस्थ उदात्तः स्वरितो वा स्वरः, प्रकृत्या = स्वरूपेणाऽवतिष्ठते । ६-१-२१८ समा.... इत्यन्तोदात्तापवादः । **कार्ष्णोत्तरासङ्गः** कृष्णः =मृगः । तस्य विकारःकार्ष्णः । ४-३-१५२ प्राणि.... इत्यञ् । ६-१-१९२ ञ्नित्या.... इत्याद्युदात्तः । **अध्यापकशब्दः** ६-१-१८८ लिति इति मध्योदात्तः । मनुष्यशब्दः ६-१-१८ तित्स्व.... इति स्वरितान्तः । सर्वानुदात्ते पूर्वपदे सति तु ६-१-२१८ समा.... इत्यन्तोदात्तत्वमेव । समपादः ।

६-२-२ तत्पुरुषे = तत्पुरुषसमासे, तुल्यार्थ..... कृत्याः = तुल्यार्थं तृतीयान्तं सप्तम्यन्तम्, उपमानवाचि, अव्ययम्, द्वितीयान्तं कृत्यप्रत्ययान्तं च, पूर्वपदम् + प्रकृत्या (६-२-१) । **तुल्यश्वेतः** ४-४-९१ नौ व.... इति यदन्तस्तुल्यशब्दः । ६-१-२०८ यतो.... इत्याद्युदात्तः । सदृक्शब्दः ६-२-१३८ गति..... सूत्रेण कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । एतेषु चतुर्षूदाहरणेषु २-१-६८ कृत्य .... इति कर्मधारयसमासः । शङ्कुलाक्षशब्दावन्तोदात्तौ । **न्यग्रोधपरिमण्डला** ७-३-५ न्यग्रो...... इत्यत्र निपातनान्न्यग्रोधशब्दो मध्योदात्तः । २-१-५५ उप.... इति समासः । अव्ययान्याद्युदात्तानि । **मुहूर्तसुखम्** मुहूर्तशब्दोऽन्तोदात्तः । २-१-२९ अत्य..... इति समासः । **भोज्योष्णम्** भोज्यशब्दो ण्यत्प्रत्ययान्तः स्वरितान्तः । २-१-६८ कृत्य.... इति समासः ।

अव्य-- स्नात्वाकालकः २-१-७२ मयू.... इति समासः ।

६-२-३ वर्णः = वर्णवाचि, पूर्वपदम् + प्रकृत्या (६-२-२) अनेते= एतभिन्नेषु, वर्णेषु = वर्णवाचिषूत्तरपदेषु परतः, तत्पुरुषे (६-२-२) । कृष्णशब्दोऽन्तोदात्तः । लोहितशब्द इतन्प्रत्ययान्त आद्युदात्तः । उदाहरणयोः २-१-६९ वर्णो..... इति समासः । प्रत्युदाहरणेष्वन्तोदात्तत्वमेव ।

६-२-४ गाधलवणयोः = गाधलवणशब्दयोरुत्तरपदयोः, प्रमाणे = इयत्तापरिच्छेदे, तत्पुरुषे (६-२-२) पूर्वपदम् +प्रकृत्या (६-२-१) । बन् प्रत्ययान्तः शम्बशब्द आद्युदात्तः । **शम्बगाधम्** शम्बप्रमाणमित्यर्थः । डोप्रत्ययान्तो गोशब्दोऽन्तोदात्तः । **गोलवणम्** - यावद् गवे दीयते तावदित्यर्थः । अत्र काशिका-स्वर-व्यङ्ग्यं च प्रमाणविशेषविषयत्वमिति । समासस्तु षष्ठीतत्पुरुषः ।

६-२-५ दायाद्यम् = दायाद्यवाचि, पूर्वपदम् +प्रकृत्या (६-२-१) दायादे = दायादशब्दे उत्तरपदे, तत्पुरुषे (६-२-२) । दायः = अंशः । तमादत्ते = दायादः । मूलविभुजादित्वात् कः । दायादस्य भावो दायाद्यम् = दायस्यादानं तत्सम्बन्धो वा । परन्तु प्रकृते लक्षणया दायाद्यशब्द आदीयमाने दाये वर्तते । **धनदायादः** धनशब्दः क्युँप्रत्ययान्तः प्रत्ययस्वरेणाद्युदात्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-६ प्रतिबन्धि चिरकृच्छ्रयोः ॥

गमनचिरम् । गमनकृच्छ्रम् ।

६-२-७ पदेऽपदेशे ॥

मूत्रपदेन प्रस्थितः । अपदेशे,
इत्युक्तेर्नेह-विष्णोः पदम्= विष्णुपदम् ।

६-२-८ निवाते वातत्राणे ॥

कुटीनिवातम् । कुडचनिवातम्

६-२-९ शारदेऽनार्तवे ॥

रज्जुशारदमुदकम् ।

६-२-१० अध्वर्युकषाययोर्जातौ ॥

प्राच्याध्वर्युः । दौवारिककषायम् ।

६-२-११ सदृशप्रतिरूपयोः सादृश्ये ॥

पितृसदृशः । मातृसदृशः । पितृप्रतिरूपः ।
मातृप्रतिरूपः ।

६-२-१२ द्विगौ प्रमाणे ॥

प्राच्यसप्तशमः ।

६-२-१३ गन्तव्यपण्यं वाणिजे ॥

काश्मीरवाणिजः । गोवाणिजः ।

६-२-६ प्रतिबन्धि = प्रतिबन्धिवाचि, पूर्वपदम् +प्रकृत्या (६-२-१) चिरकृच्छ्रयोः = चिरकृच्छ्र शब्दयोरुत्तरपदयोः, तत्पुरुषे (६-२-२)। गमनशब्दो ल्युँडन्तः ६-१-१८८ लिति - सूत्रेणाद्युदात्तः । अत्र काशिका-गमनं हि कारणविकलतया चिरकालभावि कृच्छ्रयोगि वा प्रतिबन्धि जायते। इति। उदाहरणयोर्विशेषणसमासः ।

६-२-७ पदे-- अपदेशे = व्याज़वाचिनि, पदे= पदशब्दे उत्तरपदे, पूर्वपदम् + प्रकृत्या (६-२-१) तत्पुरुषे (६-२-२)। मूत्रपदेन = मूत्रव्याजेनेत्यर्थः। मूत्रशब्दो घञन्तः ष्ट्रन्नन्तो वाऽऽ द्युदात्तः। प्रत्युदाहरणमन्तोदात्तम् ।

६-२-८ निवा-- वातत्राणे = वातत्राणवाचिनि, निवाते= निवातशब्दे उत्तरपदे, पूर्वपदम् + प्रकृत्या (६-२-१) तत्पुरुषे (६-२-२)। वातस्याऽभावो निवातम्, अर्थाऽभावे ऽव्ययीभावः। कुटीहेतुके कुटीशब्दो वर्तते। अतः समानाधिकरणेन निवातशब्देन विशेषणसमासः। कुटचेव निवातम्= कुटीनिवातम्। कुटीशब्दो गौरादि- ङीषन्तोऽन्तोदात्तः। कुडचशब्दः कु (९५१) धातोरौणादिको यत्प्रत्ययान्त इति मते ६-१-२०८ यतोऽनाव इत्यनेनाद्युदात्तः। डचक्प्रत्ययान्त इति मतेऽन्तोदात्तः ।

६-२-९ शार-- अनार्तवे = (ऋतौ भवम्= आर्तवम्, तद्भिन्नमनार्तवम्) = अनार्तववाचिनि, शारदे= शारदशब्दे उत्तरपदे, पू. + प्र. (६-२-१) तत्पुरुषे (६-२-२)। **रज्जुशारदम्** रज्जुशब्दो निदधिकारे उप्रत्ययान्त आद्युदात्तः। अत्र काशिका- शारदशब्दोयं प्रत्यग्रवाची तस्य नित्यसमासः, अस्वपदविग्रह इष्यते। सद्यो रज्जूद्धृतमुदकं प्रत्यग्रमनुपहतं रज्जुशारदमुच्यते। इति। प्रत्यग्रम् =अभिनवम् ।

६-२-१० अध्वर्युकषाययोः = अध्वर्यु- कषायशब्दयोरुत्तरपदयोः, जातौ= जातिवाचिनि, तत्पुरुषे (६-२-२) पू.+प्र. (६-२-१)। प्राच्यशब्दो ६-१-२०८ यतो.... इत्याद्युदात्तः। ठक्प्रत्ययान्तो दौवारिकशब्दः ६-१-१६० कित इत्यन्तोदात्तः। विशेषणसमासः ।

६-२-११ सदृ-सादृश्ये= सादृश्यवाचिनि, तत्पुरुषे (६-२-२) सदृशप्रतिरूपयोः = सदृशप्रतिरूपशब्दयोरुत्तरपदयोः, पू.+प्र. (६-२-१)। मातृपितृशब्दावन्तोदात्तौ ।

६-२-१२ द्विगौ- प्रमाणे = प्रमाणवाचिनि, तत्पुरुषे (६-२-२) द्विगौ = द्विगौ उत्तरपदे, पू.+प्र (६-२-१)। **प्राच्यसप्तशमः** सप्त शमाः = चतुरङ्गुलाः (शमस्तु चतुरङ्गुलाः, इति यादवः) प्रमाणमस्य सप्तशमः। ५-२-३७ प्रमाणे..... सूत्रस्थ-द्विगो..... इति वार्तिकेन मात्रचो लुक्। प्राच्यशब्दो ६-१-२०८ यतो..... इत्याद्युदात्तः। षष्ठीसमासः ।

६-२-१३ गन्त-- वाणिजे = वाणिजशब्दे उत्तरपदे, तत्पुरुषे (६-२-२) गन्तव्यपण्यम् = गन्तव्यवाचि पण्यवाचि च, पू. +प्र (६-२-१)। काश्मीरशब्दः पृषोदरादित्वान्मध्योदात्तः। गोशब्दोऽन्तोदात्तः। उदाहरणयोराद्ये सप्तमीसमासः। काश्मीरे गत्वा व्यवहरतीत्यर्थः। अन्त्ये षष्ठीसमासः। अत्र पण्यं गौः। वणिगेव = वाणिजः ५-४-३८-प्रज्ञा.... इत्यण् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१४ मात्रोपज्ञोपक्रमच्छाये नपुंसके ॥
भिक्षामात्रं न ददाति याचितः ।
पाणिन्युपज्ञम् । नन्दोपक्रमम् ।
इषुच्छायम् । नपुंसक इत्युक्तेर्नेह-
कुडचच्छाया ।

६-२-१५ सुखप्रिययोर्हिते ॥१६
गमनसुखम् । गमनप्रियम् ।

६-२-१६ प्रीतौ च ॥
ब्राह्मणसुखं पायसम् ।
छात्रप्रियोऽनध्यायः ।

६-२-१७ स्वं स्वामिनि ॥
गोस्वामी । धनस्वामी ।

६-२-१८ पत्यावैश्वर्ये ॥२०
गृहपतिः । सेनापतिः । धान्यपतिः ।
ऐश्वर्ये इत्युक्तेर्नेह-ब्राह्मणो वृषलीपतिः ।

६-२-१९ न भू-वाक्-चिद्-दिधिषु ॥
भूपतिः । वाक्पतिः । चित्पतिः ।
दिधिषूपतिः ।

६-२-२० वा भुवनम् ॥
भुवनपतिः ।

६-२-२१ आशङ्काबाधनेदीयस्सु संभावने ॥
गमनाशङ्कं वर्तते । गमनाबाधम् ।
गमननेदीयः ।

६-२-१४ मात्रो..... छाये = मात्रा उपज्ञा उपक्रम छाया इत्येतेषूत्तरपदेषु, नपुंसके = नपुंसकवाचिनि, तत्पुरुषे (६-२-२) पू.+प्र. (६-२-१) । **भिक्षामात्रम्** अत्र काशिका- मात्रशब्दोऽयं वृत्तिविषय एव तुल्यप्रमाणे वर्तते । तत्र भिक्षायास्तुल्यप्रमाणमित्यस्वपद- विग्रहः षष्ठीसमास इति । भिक्षा शब्दोऽन्तोदात्तः । **पाणिन्युपज्ञम्** पाणिनिशब्द आद्युदात्तो ञिदन्तत्वात् । षष्ठीसमासः २-४-२१ उप.... इति क्लीबत्वम् । **नन्दोपक्रमम्** नन्दशब्दोऽन्तोदात्तः । पूर्ववत् क्लीबत्वम् । **इषुच्छायम्** इषुशब्दो निदित्यधिकारे उप्रत्ययान्त आद्युदात्तः । २-४-२२ छाया.... इति क्लीबत्वम् ।

६-२-१५ सुखप्रिययोः = सुखप्रिय इत्येतयोरुत्तरपदयोः, हिते= हितवाचिनि, तत्पुरुषे (६-२-२) पू.+प्र. (६-२-१) । गमनशब्दे ६-१-१८८ लिति इति लित्स्वरः । उदाहरणयोर्विशेषणसमासः ।

६-२-१६ प्रीतौ = प्रीतौ गम्यमानायाम् सुखप्रिययोः (६-२-१५) तत्पुरुषे (६-२-२) पू.+प्र. (६-२-१) । ब्राह्मणच्छात्रशब्दावन्तोदात्तौ । अत्र काशिका- सुखप्रिययोः प्रीत्यव्यभिचारादिह प्रीतिग्रहणं तदतिशयप्रतिपत्यर्थमिति तेनेह न - **राजसुखम्** । **राजप्रियम्** । अत्र न्यासः - अत्र यद्यपि सुखप्रिययोः प्रीत्यव्यभिचारित्वात् प्रीतिर्गम्यते । तथाप्यतिशयेन या प्रीतिः सा न गम्यत इति भवति प्रत्युदाहरणमिति । कनिन्प्रत्ययान्तो राज(न्) शब्दः ६-१-१९२ ञ्नित्या.... इत्याद्युदात्तः । किन्तु प्रकृतसूत्राऽप्रवृत्या समस्तं पदं ६-१-२१८ समा..... इत्यन्तोदात्तम् ।

६-२-१७ स्वं स्वा- स्वामिनि= स्वामि (न्) शब्दे उत्तरपदे, स्वम् = स्ववाचि, पू.+प्र. (६-२-१) तत्पुरुषे (६-२-२)॥ गोशब्दो डोप्रत्ययान्तोऽन्तोदात्तः । धनशब्दः क्युँप्रत्ययान्तः प्रत्ययस्वरेणाद्युदात्तः ।

६-२-१८ पत्यौ = पतिशब्दे उत्तरपदे, ऐश्वर्ये = ऐश्वर्यवाचिनि, तत्पुरुषे (६-२-२) पू.+प्र. (६-२-१) । गृहशब्दोऽन्तोदात्तः । सेनाशब्द आद्युदात्तः । धान्यशब्दोऽन्तस्वरितः । **वृषलीपतिः** वृषल्या भर्ता, इत्यर्थः । समासस्वरेणान्तोदात्तोऽयम् ।

६-२-१९ न भू - पत्यौ+ऐश्वर्ये (६-२-१८) तत्पुरुषे (६-२-२) भू......... दिधिषु = भू वाच् चित् दिधिषू इत्येतानि, न = पू.+प्र. (६-२-१) = न भवन्ति । उदाहरणेषु पूर्वपदानि, अन्तोदात्तानि । षष्ठीसमासे पूर्वेण प्राप्तस्य प्रतिषेधात् समस्तपदानि ६-१-२१८ समा..... इत्यन्तोदात्तानि । सूत्रे द्वितीये पदे समाहारद्वन्द्वः । तेन दिधिषु इति ह्रस्वनिर्देशः ।

६-२-२० वा भु - पत्यौ +ऐश्वर्ये (६-२-१८) तत्पुरुषे (६-२-२) भुवनम् = भुवनशब्दः, वा= विभाषया पू.+प्र. (६-२-१) । भुवनशब्दः क्युँन्प्रत्ययान्त आद्युदात्तः ।

६-२-२१ आश...... नेदीयस्सु = आशङ्क आबाध नेदीयस् इत्येतेषूत्तरपदेषु, संभावने= संभावनवाचिनि, तत्पुरुषे (६-२-२) पू.+प्र. (६-२-१) । गमनशब्दः ६-१-१८८ लिति- सूत्रेणाऽऽद्युदात्तः । उदाहरणेषूत्तरपदानि क्रियाविशेषणानि । विशेषणसमासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-२२ पूर्वे भूतपूर्वे ॥

आढ्यो भूतपूर्वः = आढ्यपूर्वः ।

६-२-२३ सविध- सनीड-समर्याद-सवेश-सदेशेषु सामीप्ये ॥

नेपालसविधम् । नेपालसनीडम् ।
नेपालसमर्यादम् । नेपालसवेशम् ।
नेपालसदेशम् ।

६-२-२४ विस्पष्टादीनि गुणवचनेषु ।

विस्पष्टं कटुकम् = विस्पष्टकटुकम् ।

६-२-२५ श्र-ज्यावम-कन्-पापवत्सु भावे कर्मधारये ॥२८

गमनश्रेष्ठम् । वचनज्येष्ठम् ।
गमनावमम् । गमनकनिष्ठम् ।
गमनपापिष्ठम् । गमनपापीयः ।

६-२-२६ कुमारश्च ॥२८

कुमारश्रमणा ।

६-२-२७ आदिः प्रत्येनसि ॥२८

कुमारप्रत्येनाः ।

६-२-२८ पूगेष्वन्यतरस्याम् ॥

कुमारचातकाः । कुमारजीमूताः ।

६-२-२९ इगन्तकालकपालभगालशरावेषु द्विगौ ॥ ३०, ३१

पञ्चारत्निः । दशारत्निः । पञ्चमास्यः । दशमास्यः ।
पञ्चवर्षः । दशवर्षः । पञ्चकपालः ।
पञ्चभगालः । पञ्चशरावः ।

६-२-२२ पूर्वे- भूतपूर्वे = भूतपूर्वार्थके, पूर्वे= पूर्वशब्दे उत्तरपदे, तत्पुरुषे (६-२-२) पू.+प्र. (६-२-१)। आढ्यशब्द आङ्पूर्वध्यायतेः कर्मघञर्थककप्रत्ययान्तः । ६-२-१४३ थाथ... इत्यन्तोदात्तः । पूर्वशब्दो वृत्तिविपये भूतपूर्वे वर्तते ।

६-२-२३ सविध.... सदेशेषु = सविधादिषुत्तरपदेषु, सामीप्ये= सामीप्यवाचिनि, तत्पुरुषे (६-२-२) पू.+प्र. (६-२-१)। नेपालशब्दो ४७ जनपदशब्दानामषान्तानामिति बाधित्वा ४८ हयादीना... इति फिट्सूत्रेणादिरन्त्यात्पूर्वो वोदात्तः । सविधादयः शब्दाः समीपवाचिनः । षष्ठीतत्पुरुष उदाहरणेषु ।

६-२-२४ विस्पष्टादीनि= विस्पष्टप्रभृतीनि, पू.+प्र. (६-२-१) गुणवचनेषु= गुणवचनेषूत्तरपदेषु । विस्पष्टशब्दो ६-२-४९ गति.... इत्याद्युदात्तः । २-१-४ सह... इति समासः । अत एव प्रकृतसूत्रे 'तत्पुरुषे' इति न सम्बद्धम् ।

६-२-२५ श्र... वत्सु= श्र ज्य अवम कन् इति घटितेषु पापशब्दघटितेषु चोत्तरपदेषु, कर्मधारये= कर्मधारयसमासे, भावे= भावार्थे वर्तमानम्, पू.+प्र. (६-२-१)। पूर्वपदानि ल्युँडन्तानि ६-१-१८८ लिति इत्याद्युदात्तानि । उदाहरणेषु मयूरव्यंसकादित्वाद् विशेष्यस्य पूर्वनिपात इति पदमञ्जरी । अत्र काशिका-(सूत्रे) श्र-ज्य-कनामादेशानां ग्रहणमिति सामर्थ्यात् तद्वदुत्तरपदं गृह्यत इति । अत एव घटितेषु इत्यर्थ उक्त ।

६-२-२६ कुमारः = कुमारशब्दः, पू.+प्र. (६-२-१) कर्मधारये (६-२-२५) । पचाद्यजन्तः कुमारशब्दोऽन्तोदात्तः । २-१-७० कुमारः... इति समासस्तु कुमारी-शब्दस्य । सामानाधिकरण्याऽनुरोधात् । ६-३-४२ पुंवत्... इति पुवंद्भावः ।

६-२-२७ आदिः -- प्रत्येनसि = प्रत्येनश्शब्दे उत्तरपदे, कर्मधारये (६-२-२५) आदिः = कुमारशब्दस्यादिः , उदात्तो भवति । पूर्वसूत्रेण कुमारशब्दे यः स्वरः स्थापितः सोऽत्रादेर्विधीयते । पूर्वसूत्रेण च उदात्तस्वरः स्थापितः । अत उदात्तो भवतीत्यर्थ उक्तः । 'आदि': इत्यस्य कुमारशब्दस्यादिः, इत्यर्थोऽपि प्रकरणगम्यः । प्रतिगतमेनो यस्य प्रत्येना ।

६-२-२८ पूगेषु = सङ्घवाचिपूत्तरपदेषु, कर्मधारये (६-२-२५) आदिः (६-२-२७) = कुमारशब्दस्यादिः, अन्यतरस्याम्= वा, आद्युदात्तः । आद्युदात्ताऽभावपक्षे ६-२-२६ कुमा.... इति पूर्वपदप्रकृतिस्वरः ।

६-२-२९ इगन्त... शरावेषु = इगन्ते कालवाचिनि कपालादिषु चोत्तरपदेषु, द्विगौ = द्विगुसमासे, पू.+प्र. (६-२-१)। **पञ्चारत्निः** पञ्चारत्नयः प्रमाणमस्येति तद्धितार्थे द्विगुः । ५-२-३७ प्रमा.... सूत्रस्थ-द्विगो.... वार्तिकेन मात्रचो लुक् । एवं दशारत्निरित्यत्रापि । **पञ्चमास्यः** पञ्च मासान् भूतो भृतो भावी वेति तद्धितार्थे ५-१-८१ द्विगो .... इति यप् । २८ 'न्रः संख्यायाः' इति फिट्सूत्रेण पञ्चन् शब्द आद्युदात्तः । एवं दशमास्य इत्यत्रापि । **पञ्चवर्षः** पूर्ववत् तद्धितार्थे ५-१-८७ वर्षा... इति ठञो लुक् । एवं दशवर्ष इत्यत्रापि । **पञ्चकपालः** पञ्चसु कपालेषु संस्कृत इति तद्धितार्थे द्विगौ ४-२-१६ संस्कृ... इत्यणि तस्य ४-१-८८ **द्विगो...** इति लुक् । एवमग्रिमोदाहरणयोरपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-३० बह्वन्यतरस्याम् ॥३१

बहुरत्निः । बहुमास्यः । बहुकपालः ।
बहुभगालः । बहुशरावः ।

६-२-३१ दिष्टिवितस्त्योश्च ॥

पञ्चदिष्टिः । पञ्चवितस्तिः ।

६-२-३२ सप्तमी सिद्धशुष्कपक्वबन्धे-ष्वकालात् ॥

साङ्काश्यसिद्धः । निधनशुष्कः । भ्राष्ट्रपक्वः ।
चक्रबन्धः । अकालादित्युक्तेर्नेह-
पूर्वाह्णसिद्धः ।

६-२-३३ परिप्रत्युपापा वर्ज्यमानाहो-रात्रावयवेषु ॥

परित्रिगर्तं वृष्टो देवः । प्रतिपूर्वाह्णम् ।
उपपूर्वाह्णम् । प्रतिपूर्वरात्रम् ।
उपपूर्वरात्रम् । अपत्रिगर्तं वृष्टो देवः ।

६-२-३४ राजन्यबहुवचनद्वन्द्वे ऽन्धक-वृष्णिषु ॥३७

श्वाफल्कचैत्रकाः । शिनिवासुदेवाः । राजन्य
इत्युक्तेर्नेह-द्वैप्यभौमायनाः ।
बहुवचनग्रहणान्नेह-सङ्कर्षणवासुदेवौ ।
अन्धकवृष्णिष्वित्युक्तेर्नेह-कुरुपञ्चालाः ।

६-२-३५ संख्या ॥

एकादश । द्वादश । त्रयोदश ।

६-२-३० बहु = बहुशब्दरूपम्, पू. (६-२-१) अन्यतरस्याम्=वा, प्र. (६-२-१) इगन्त... शरावेषु +द्विगौ (६-२-२९)। पूर्वेण नित्ये प्राप्ते विकल्पः। बहुशब्दोऽन्तोदात्तः। उदाहरणेषु प्रक्रिया पूर्वसूत्रोदाहरणवत्। बहुशब्दस्य प्रकृतिस्वरे कृते यत्र यणादेशस्तत्र ८-२-४ उदा... इति स्वरो भवति। यथा -बह्वरत्निः।

६-२-३१ दिष्टिवितस्त्योः = दिष्टिवितस्ति इत्येतयोरुत्तरपदयोः, द्विगौ (६-२-२९) अन्यतरस्याम् (६-२-३०) पू.+प्र. (६-२-१)। अबह्वर्थोऽयमारम्भः। उदाहरणयोः पञ्चारत्नि (६-२-२९ टी.) रित्यत्रेव प्रक्रिया।

६-२-३२ सप्तमी = सप्तम्यन्तम्, पू.+प्र. (६-२-१) सिद्ध... बन्धेषु= सिद्धप्रभृतिषूत्तरपदेषु, अकालात्=सा सप्तमी कालवाचिनः परा न चेत्। साङ्काश्यशब्दः ४-२-८० वुँञ्छ... सूत्रेण ण्यान्तो ऽन्तोदात्तः। निधनशब्दः क्युँप्रत्ययान्तः। ६-२-१३८ गति... इति कृदुत्तरपदप्रकृतिस्वरेण मध्योदात्तः। भ्राष्ट्रशब्दः ष्ट्रन् प्रत्ययान्त आद्युदात्तः। चक्रशब्दः कप्रत्ययान्तोऽन्तोदात्तः। उदाहरणेषु २-१-४१ सिद्ध... इति समासः। अत्र न्यासः- ६-२-२ तत्पुरुषे... इत्यादिना सप्तम्याः प्रकृतिभावेन यः स्वरो विधीयते स परत्वात् ६-२-१४३ थाथघञ्... इत्यादिना विहितेन स्वरेणान्तोदात्तेन बाधितः, तेन पुनर्विधीयते। इति।

६-२-३३ परिप्रत्युपापाः = परि प्रति उप अप इति पू.+प्र. (६-२-१), वर्ज्य... वेषु = वर्ज्यवाचिनि अहरवयववाचिनि रात्र्यवयववाचिनि चोत्तरपदे। **परित्रिगर्तम्** त्रिगर्तान् वर्जयित्वेत्यर्थः। २-१-१२ अप... इत्यव्ययीभावसमासः। **प्रतिपूर्वाह्णम्**। २-१-१४ लक्ष... इति समासः। एवं प्रतिपूर्वरात्रम्। **उपपूर्वाह्णम्**। २-१-६ अव्य... इति समासः। एवम्-उपपूर्वरात्रम्। **अपत्रिगर्तम्** परित्रिगर्तमितिवत्। ८१ 'उपसर्गाश्चाभिवर्जम्' इति फिट्सूत्रेण पर्यादय आद्युदात्ताः।

६-२-३४ राज-अन्धक-वृष्णिषु = अन्धकवृष्णिषु वर्तमाने, राजन्य... द्वन्द्वे= राज्यन्यवाचिनां बहुवचनान्तानां (असमस्तानां बहुवचनान्तानामित्यभिप्रायः) द्वन्द्वे, पू.+प्र. (६-२-१)। श्वाफल्कशब्दः ४-१-११४ ऋष्य... इत्यणन्तो ऽन्तोदात्तः। शिनिशब्दो निन् प्रत्ययान्त आद्युदात्तः। स च तदपत्यवाची लक्षणया। **द्वैप्यभौमायनाः** अन्धकवृष्णय एते न तु राजन्याः। राजन्यग्रहणमिहाभिषिक्तवंश्यानां क्षत्रियाणां ग्रहणार्थम्। एते च नाऽभिषिक्तवंश्याः।

६-२-३५ संख्या = संख्यावाचि, पू.+प्र. (६-२-१) द्वन्द्वे (६-२-३४)। एकशब्दः कन्प्रत्ययान्त आद्युदात्तः। त्रयसादेशो ऽन्तोदात्तो निपात्यते, इति काशिका। वस्तुतस्तु-त्रयोदश च मे इति लक्ष्यानुरोधादाद्युदात्तो निपात्यत इति बोध्यमिति-सुबोधिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-३६ आचार्योपसर्जनश्चान्तेवासी ॥
आपिशलपाणिनीयाः । आचार्योपसर्जन इत्युक्तेर्नेह-छान्दसवैयाकरणाः । अन्तेवासीत्युक्तेर्नेह- आपिशलपाणिनीये शास्त्रे ।

६-२-३७ कार्तकौजपादयश्च ॥
कार्तकौजपौ । सावर्णिमाण्डूकेयौ ।

६-२-३८ महान् व्रीह्यपराह्णगृष्टी- ष्वासजाबालभारभारतहैलिहिलरौरव- प्रवृद्धेषु ॥३९
महाव्रीहिः । महापराह्णः । महागृष्टिः । महेष्वासः ।
महाजाबालः । महाभारः । महाभारतः । महाहैलिहिलः । महारौरवः । महाप्रवृद्धः ।

६-२-३९ क्षुल्लकश्च वैश्वदेवे ॥
महावैश्वदेवम् । क्षुल्लकवैश्वदेवम् ।

६-२-४० उष्ट्रः सादिवाम्योः ॥
उष्ट्रसादी । उष्ट्रवामी ।

६-२-४१ गौः सादसादिसारथिषु ॥
गोसादः । गोसादी । गोसारथिः ।

६-२-४२ कुरुगार्हपतरिक्तगुर्वसूतजर- त्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च ।
कुरूणां गार्हपतम्= कुरुगार्हपतम् । रिक्तो गुरुः =रिक्तगुरुः । असूता जरती=असूतजरती । अश्लीला दृढरूपा=अश्लीलदृढरूपा । पारेवडवेव=पारेवडवा । तैतिलानां कद्रूः = तैतिलकद्रूः । पण्यकम्बलः । दास्या भारो दासीभारः ।

६-२-३६ आचा-- सूत्रे षष्ठीबहुवचनस्थाने प्रथमैकवचनम् । आचार्य उपसर्जनं येषां तेषाम् । आचार्योपसर्जनः = आचार्योपसर्जनकानाम्, अन्तेवासी=अन्तेवासि (शिष्य) वाचिनाम्, द्वन्द्वे (६-२-३४) पू.+प्र. (६-२-१) । आपिलशब्दः अणन्तत्वात् प्रत्ययस्वरेणान्तोदात्तः । तथा हि-अपिशलस्यापत्यम् = आपिशालिराचार्यः । ४-१-९५ अत.... इतीञ् । तेन प्रोक्तमधीयते इत्यर्थे ४-२-११२ इञ.... इत्यणि तदन्ताद् विहितस्य तद्धितस्य ४-२-६४ प्रोक्ता.... इति लुक् । आपिशलेर्वा छात्रा आपिशलाः पूर्ववदण् । व्युत्पत्तिद्वयेऽपि शिष्या एव प्रधानानि, आचार्य उपसर्जनमेव । आचार्योपसर्जनग्रहणं द्वन्द्वविशेषणार्थम् । सकलो द्वन्द्व आचार्योपसर्जनो यथा विज्ञायेत । तेनेह न- पाणिनीयदेवदत्तौ । पूर्वपदविशेषणे तु स्यादेवात्रापि ।

६-२-३७ कार्त-- अत्रापि सूत्रे षष्ठ्यर्थे प्रथमा । कार्तकौजपादयः =कार्तकौजपादीनाम्, द्वन्द्वे (६-२-३४), पू.+प्र. (६-२-१) । अणन्तत्वात् कार्तशब्दः प्रत्ययस्वरेणान्तोदात्तः । इञन्तः सावर्णिशब्दो ञित्स्वरेणाद्युदात्तः ।

६-२-३८ महान् = महच्छब्दरूपम्, पू.+प्र. (६-२-१) व्रीह्य... प्रवृद्धेषु = व्रीह्यादिषूत्तरपदेषु । द्वन्द्वे इति निवृत्तम्, तस्य पूर्वसूत्रे चानुकृष्टत्वात् । अत्र काशिका-महच्छब्दो ऽन्तोदात्तः । तस्य प्रतिपदोक्तो यः समासः २-१-६१ सन्महत्परमोत्तमोत्कृष्टाः, इति तत्रैव स्वरः । तेनैषां षष्ठीसमासे ऽन्तोदात्त एव भवति - महतो व्रीहिः = महद्व्रीहिरिति । ६-२-४६ कर्मधारयेऽनिष्ठा, इत्ययमपि २-१-५९ श्रेण्यादिसमासे विधिरिति प्रवृद्धशब्द इह पठचते, इति च ।

६-२-३९ क्षुल्ल- महान् (६-२-३८) क्षुल्लकश्च=क्षुल्लकशब्दरूपंच पू.+प्र. (६-२-१), वैश्वदेवे= वैश्वदेवशब्दे उत्तरपदे । कप्रत्ययान्तः क्षुल्लकशब्दो ऽन्तोदात्तः ।

६-२-४० उष्ट्रः = उष्ट्रशब्दः, पू.+प्र. (६-२-१) सादिवाम्योः = सादि (न्) शब्दे वामीशब्दे चोत्तरपदे । उष्ट्रशब्दः ष्ट्रन्प्रत्ययान्तो नित्त्वादाद्युदात्तः ।

६-२-४१ गौः =गोशब्दः, साद.... थिषु= सादप्रभृतिषूत्तरपदेषु, पू.+प्र. (६-२-१) । गोशब्दः प्रत्ययस्वरेणान्तोदात्तः । अत्र सादसादिनोः ६-२-१३८ गति... इति कृत्स्वरापवादः । सारथौ तु ६-१-२१८ समा... इति समासस्वरापवादः ।

६-२-४२ कुरु— अत्र पाण्डुकम्बलपर्यन्तानि कुरुगार्हपत इत्येवमादीनि सप्त समस्तानि पृथक् पृथक् पदानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(कुरुवृज्योर्गार्हपत इति वक्तव्यम्)
वृजीनां गार्हपतम्= वृजिगार्हपतम्।
(पण्यकम्बलः संज्ञायामिति वक्तव्यम्)

६-२-४३ चतुर्थी तदर्थे ॥४५

यूपदारु। कुण्डलहिरण्यम्।
(प्रकृतिविकारभावे स्वरोऽयमिष्यते)
नेह-कुबेरबलिः।

६-२-४४ अर्थे ॥

मात्रे इदम् = मात्रर्थम्। पित्रर्थम्। देवतार्थम्।

६-२-४५ क्ते च ॥४९

अश्वहितम्। गोरक्षितम्।

६-२-४६ कर्मधारये ऽनिष्ठा ॥

श्रेणिकृताः। कर्मधारय इत्युक्तेर्नेह-
श्रेण्या कृतः = श्रेणिकृतः।
अनिष्ठेत्युक्तेर्नेह-कृताकृतम्।

६-२-४७ अहीने द्वितीया ॥

कष्टश्रितः। ग्रामगतः। अहीन
इत्युक्तेर्नेह- कान्तारातीतः।
(द्वितीया ऽनुपसर्ग इति वक्तव्यम्)
नेह-सुखप्राप्तः। सुखापन्नः।

तत्राद्ययोर्द्वयोः षष्ठयाः सौत्रो लुक्। शेषाणां पञ्चानां षष्ठयाः स्थाने प्रथमैकवचनमिति बोध्यम्। दासीभाराणामिति पृथक् पदस्यापि बहुवचनान्तत्वाद् दासीभारादयो गृह्यन्ते। तथा च सूत्रार्थः - कुरुगार्हपत, रिक्तगुरु, असूतजरती, अश्लीलदृढरूपा, पारेवडवा, तैतिलकद्रू, पण्यकम्बल, इत्येतेषां दासीभारप्रभृतीनां च, पू.+प्र. (६-२-१)। अत्र काशिका- यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्वरत्वमिष्यते, न च विहितं स सर्वो दासीभारादिषु द्रष्टव्य इति। कुरुशब्दः प्रत्ययस्वरेणान्तोदात्तः। रिक्तशब्दः ६-१-२०३ रिक्ते... इतिसूत्रेणाद्युदात्तो ऽन्तोदात्तो वा। असूताश्लीलशब्दौ नञ्समासत्वादाद्युदात्तौ। पारेवडवा निपातनादिवार्थे समासो विभक्त्यलोपश्च। पारशब्दो घृतादित्वादन्तोदात्तः। तैतिलशब्दो ऽणन्तः प्रत्ययस्वरेणान्तोदात्तः। पण्यशब्दो यदन्तत्वाद् ६-१-२०८ यतो... इत्याद्युदात्तः। दासीशब्दो ६९८ दंसे... इति टप्रत्ययान्तत्वेन टित्त्वाद् ङीबन्त (६-१-१५६ अनु... इति) उदात्तनिवृत्तिस्वरेणान्तोदात्तः। देवशब्दः पचाद्यजन्तः प्रत्ययस्वरेणान्तोदात्तः।

कुरु-- इन्प्रत्ययान्तो वृजिशब्द आद्युदात्तः।

पण्य-- अन्यत्र पणितव्ये समासान्तोदात्तत्वमेव। ६-२-२ तुल्या... इति तु नेह प्रवर्तते। प्रकृते २-१-५७ विशे.... इति सामान्येन समासस्य विधेयत्वात् २-१-६८ कृत्य.... इति प्रतिपदोक्तसमासे एव च तस्य प्रवर्तनात्।

६-२-४३ चतु--- तदर्थे, इत्यत्र तच्छब्देन चतुर्थ्यन्तार्थो गृह्यते, तस्मै इदं तदर्थम्। तदर्थे= चतुर्थ्यन्तार्थाय यत् तद्वाचिन्युत्तरपदे, चतुर्थी = चतुर्थ्यन्तम्, पू.+प्र. (६-२-१)। निदिति वर्तमाने ३१४ कुयुभ्यां च-इति पप्रत्ययान्तो यूपशब्द आद्युदात्तः। १११ वृषादिभ्यश्चिदिति कलप्रत्ययान्तः कुण्डलशब्दो ऽन्तोदात्तः।

६-२-४४ अर्थे = अर्थशब्दे उत्तरपदे, चतुर्थी (६-२-४३) पू.+प्र. (६-२-१)। मातृपितृशब्दावन्तोदात्तौ। देवता शब्दः ६-१-१८८ लिति, इति लित्स्वरेण मध्योदात्तः।

६-२-४५ क्ते = क्तान्ते उत्तरपदे, चतुर्थी (६-२-४३) पू.+प्र. (६-२-१)। १५७ अशूँप्रुषि... इति क्वन् प्रत्ययान्तोऽश्वशब्द आद्युदात्तः। गोशब्दो ऽन्तोदात्तः।

६-२-४६ कर्मधारये = कर्मधारयसमासे, क्ते (६-२-४५) अनिष्ठा = निष्ठान्तभिन्नम्, पू.+प्र. (६-२-१)। **श्रेणिकृताः** २-१-५९ श्रेण्या.... इति समासः। **श्रेणिशब्दो** निन्प्रत्ययान्त आद्युदात्तः। **कृताकृतम्** २-१-६० क्तेन....... इति समासः।

६-२-४७ अहीने = अत्यक्तवाचिनि (हीनम्=त्यक्तम्। ओँहाक् त्यागे (१०८९) धातोर्निष्ठान्तम्। तद्विरुद्धम् = अहीनम् = अत्यक्तम्) समासे, क्ते (६-२-४५) द्वितीया = द्वितीयान्तम्, पू.+प्र. (६-२-१)। ६-२-१४२ थाथ... इत्यस्यापवादः। कष्टशब्दो ऽन्तोदात्तः। मन्प्रत्ययान्तो ग्रामशब्द आद्युदात्तः।

द्वितीया= द्वितीयान्तम्, पू.+प्र. (६-२-१), अनुपसर्गे =उपसर्गरहिते, क्ते (६-२-४५) इति वक्तव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-४८ तृतीया कर्मणि ॥४९

अहिहतः । वज्रहतः । कर्मणीत्युक्तेर्नेह- रथेन यातो रथयातः ।

६-२-४९ गतिरनन्तरः ॥५२

प्रकृतः । प्रहृतः । अनन्तर इत्युक्तेः समुद्धृतः समुदाहृत इत्यादौ समादीनां न । अनन्तरस्य तु भवत्येव ।

कारकपूर्वपदस्य तु सति शिष्टत्वात् ६-२-१४२ थाथ... स्वर एव भवति दूरादागतः ।

कर्मणीत्यनुवृत्तेर्नेह- प्रकृतः कटं देवदत्तः ।

६-२-५० तादौ च निति कृत्यतौ ॥

प्रकर्ता । प्रकर्तुम् । प्रकृतिः ।

अतावित्युक्तेर्नेह- आगन्तुः ।

६-२-५१ तवै चान्तश्च युगपत् ॥

अन्वेतवै । परिपातवै ।

६-२-५२ अनिगन्तो ऽञ्चतौ वप्रत्यये ॥५३

पराङ् । पराञ्चौ । पराञ्चः । अनिगन्त इत्युक्तेर्नेह- प्रत्यङ् । प्रत्यञ्चौ । प्रत्यञ्चः । वप्रत्यय इत्युक्तेर्नेह-उदञ्चनः ।

६-२-५३ न्यधी च ॥

न्यङ् । न्यञ्चौ । न्यञ्चः । अध्यङ् । अध्यञ्चौ । अध्यञ्चः ।

६-२-५४ ईषदन्यतरस्याम् ॥६३

ईषत्पिङ्गलः ।

६-२-५५ हिरण्यपरिमाणं धने ॥

द्विसुवर्णधनम् ।

६-२-४८ तृती-- कर्मणि = कर्मवाचिनि, क्ते (६-२-४५) तृतीया = तृतीयान्तम्, पू.+प्र. (६-२-१) । ६-२-१४२ थाथ... इत्यस्यापवादः । अहिशब्दो ऽन्तोदात्तः । केचिदाद्युदात्तमिच्छन्तीति काशिका । वज्रशब्दोऽन्तोदात्तः । **रथयातः** ३-४-७२ गत्य.... इति कर्तरि क्तः ।

६-२-४९ गति-- कर्मणि (६-२-४८) क्ते (६-२-४५) अनन्तरः = अव्यवहितः, गतिः, पू.+प्र. (६-२-१) । **प्रकृतः** ८१ उपसर्गाश्चाभिवर्जम् इत्युपसर्गा आद्युदात्ताः । **दूरादागतः** आङो गतिसमासे सत्यनेन प्रकृतिस्वरः । ततो दूरादागत इत्यत्र २-१-३९ स्तोका.... इति समासे थाथादिस्वरः । ६-३-२ पञ्च.... इति पञ्चम्या अलुक् । **प्रकृतः** कटं देवदत्तः ३-४-७१ आदि.... इति कर्तरि क्तः ।

६-२-५० तादौ-- अतौ = तुभिन्ने, तादौ= तकारादौ, निति= नकारेत्संज्ञके, कृति= कृत्प्रत्यये परतः, (नकारेत्संज्ञक-कृत्प्रत्ययान्ते परत इत्यर्थः) अनन्तरः + गतिः (६-२-४९) च, पू.+प्र. (६-२-१) । ६-२-१३८ गति... इति कृत्स्वरापवादः । **प्रकर्ता** तृन्नन्तमेतत् ।

६-२-५१ तवै = तवैप्रत्ययान्तस्य, अन्तः = अन्त उदात्तो भवति, अनन्तरः + गतिः (६-२-४९) च पू.+प्र. (६-२-१) युगपत् = एतदुभयमेकदैव भवति । भोः ? तवैप्रत्यान्तस्य अन्त उदात्त इत्यर्थ उक्तः । अन्तरेणोदात्तग्रहणं कथमुदात्तो भवतीत्यर्थो लभ्यते ? लभ्यत इत्याह- प्रकृत्या इति वर्तते तत्रैवमभिसम्बन्धः क्रियते तवैप्रत्ययान्तस्य यः प्रकृत्याश्रयः स्वरः प्राप्तः सोऽन्त्यस्य भवतीति स चोदात्त एवेति । ६-२-१३८ गति... इति कृत्स्वरापवादः । युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम् ।

६-२-५२ अनि-- वप्रत्यये= वप्रत्ययान्ते, अञ्चतौ =अञ्चुधातौ परे, अनिगन्तः = इगन्तभिन्नः, अनन्तरः + गतिः, (६-२-४९) पू.+प्र. (६-२-१) ।

६-२-५३ न्यधी-- वप्रत्यये+अञ्चतौ (६-२-५२) न्यधी=नि अधि इत्येतौ, पू.+प्र. (६-२-१) । **न्यङ्** ८-२-४ उदा... इत्यञ्चतेरकारः स्वरितः ।

६-२-५४ ईषत्= ईषच्छदः, अन्यतरस्याम्= वा, पू.+प्र. (६-२-१) । **ईषत्पिङ्गलः** २-२-७ ईष... इति समासः । ईषच्छब्दो ऽन्तोदात्तः ।

६-२-५५ हिर- धने = धनशब्दे उत्तरपदे, हिरण्यपरिमाणम् = हिरण्यपरिमाणवाचि, पू.+प्र. (६-२-१) अन्यतरस्याम् (६-२-५४) । **द्विसुवर्णधनम्** सुवर्णशब्दो हिरण्यपरिमाणविशेषवाची । द्वे सुवर्णे परिमाणमस्येति २-१-५१ तद्धि... इति समासे ५-१-५६ तद... इति ठञि ५-१-२८ अध्य... इति तस्य लुकि धनशब्देन कर्मधारयसमासः । द्विसुवर्णं धनं यस्येति बहुव्रीहावपि परत्वादेष एव विकल्पो न तु ६-२-१ बहु... इति नित्यो विधिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-५६ प्रथमोऽचिरोपसम्पत्तौ ॥

प्रथमवैयाकरणः । सम्प्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः । अचिरोपसम्पत्तेरित्युक्तेर्नेह- प्रथमवैयाकरणः । वैयाकरणानामाद्यो मुख्यो वेत्यर्थः ।

६-२-५७ कतरकतमौ कर्मधारये ॥५९

कतरकठः । कतमकठः ।

६-२-५८ आर्यो ब्राह्मणकुमारयोः ॥५९

आर्यब्राह्मणः । आर्यकुमारः । कर्मधारय इत्युक्तेर्नेह-आर्यस्य ब्राह्मणः = आर्यब्राह्मणः ।

६-२-५९ राजा च ॥६०

राजब्राह्मणः । राजकुमारः । कर्मधारय इत्यनुवृत्तेर्नेह- राज्ञो ब्राह्मणो राजब्राह्मणः । राज्ञः कुमारो राजकुमारः ।

६-२-६० षष्ठी प्रत्येनसि ॥

राज्ञः प्रत्येनाः =राजप्रत्येनाः । षष्ठीत्युक्तेर्नेह-राजा चासौ प्रत्येनाश्च राजप्रत्येनाः ।

६-२-६१ क्ते नित्यार्थे ॥

नित्यप्रहसितः । सततप्रहसितः । नित्यार्थ इत्युक्तेर्नेह-मुहूर्तप्रहसितः ।

६-२-६२ ग्रामः शिल्पिनि ॥६३

ग्रामनापितः । ग्रामकुलालः । शिल्पिनीत्युक्तेर्नेह-ग्रामरथ्या ।

६-२-६३ राजा च प्रशंसायाम् ॥

राजनापितः । राजकुलालः । शिल्पिनीत्यनुवृत्तेर्नेह- राजहस्ती ।

६-२-५६ प्रथ-- अचिरोपसम्पत्तौ = अचिरकालसम्बन्धे = अभिनवत्वे गम्यमाने, प्रथमः = प्रथमशब्दः, पू.+प्र. (६-२-१) अन्यतरस्याम् (६-२-५४)। अमच् प्रत्ययान्तः प्रथमशब्दः ६-१-१५८ चितः- इति चित्स्वरेणान्तोदात्तः । प्रत्युदाहरणे नित्यमन्तोदात्तत्वम् ।

६-२-५७ कत-कर्मधारये= कर्मधारयसमासे, कतरकतमौ=कतरकतमशब्दौ, पू.+प्र. (६-२-१) अन्यतरस्यम् (६-२-५४)। कतरकतमशब्दौ चित्स्वरेणान्तोदात्तौ ।

६-२-५८ आर्यो-- ब्राह्मणकुमारयोः=ब्राह्मणकुमारशब्दयोरुत्तरपदयोः सतोः, आर्यः=आर्यशब्दः, पू.+प्र. (६-२-१) अन्यतरस्याम् (६-२-५४) कर्मधारये (६-२-५७)। आर्यशब्दो ण्यदन्तः ६-१-१८० तित्स्व... इत्यन्तस्वरितः । प्रत्युदाहरणे ६-१-२१८ समा... इत्यन्तोदात्तत्वम् ।

६-२-५९ राजा = राज(न्) शब्दः, पू.+प्र. (६-२-१) अन्यतरस्याम् (६-२-५४) ब्राह्मणकुमारयोः (६-२-५८)। कनिँन्प्रत्ययान्तो राज(न्) शब्द आद्युदात्तः ।

६-२-६० षष्ठी= षष्ठ्यन्तम्, राजा (६-२-५९) पू.+प्र. (६-२-१) अन्यतरस्याम् (६-२-५४) प्रत्येनसि=प्रत्येनश्शब्दे उत्तरपदे । प्रतिगतमेनः = पापं यस्य स प्रत्येनाः ।

६-२-६१ क्ते = क्तान्ते उत्तरपदे, नित्यार्थे =नित्यार्थे समासे, अन्यतरस्याम् (६-२-५४) पू.+प्र. (६-२-१)। नित्यप्रहसितः २-१-२८ कालाः, इति समासः । त्यबन्तो नित्यशब्द आद्युदात्तः । सततशब्दस्तु भावक्तान्तः २-१-१४३ थाथ... इत्यन्तोदात्तः । कर्मक्तान्तस्तु ६-२-४९ गति... इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तः ।

६-२-६२ ग्रामः = ग्रामशब्दः, पू.+प्र. (६-२-१) अन्यतरस्याम् (६-२-५४) शिल्पिनि = शिल्पिवाचिन्युत्तरपदे । ग्रामशब्द आद्युदात्तः ।

६-२-६३ राजा = राजञ्शब्दः, पू.+प्र. (६-२-१) अन्यतरस्याम् (६-२-५४) शिल्पिनि (६-२-६२) प्रशंसायाम्=प्रशंसायां गम्यमानायाम् । अत्रोदाहरणविषये काशिका- कर्मधारये राजगुणाध्यारोपेणोत्तरपदार्थस्य प्रशंसा । षष्ठी समासे च राजयोग्यतया तस्येति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-६४ आदिरुदात्तः ॥९१, १३५

६-२-६५ सप्तमीहारिणौ धर्म्येऽहरणे ॥

स्तूपेशाणः । मुकुटेकार्षापणम् ।
याज्ञिकाश्वः । वैयाकरणहस्ती । अहरण
इत्युक्तेर्नेह- वाडवहरणम् ।

६-२-६६ युक्ते च ॥

गोलबल्लवः ।

६-२-६७ विभाषाऽध्यक्षे ॥ ६८

गवाध्यक्षः ।

६-२-६८ पापं च शिल्पिनि ॥

पापनापितः । २-१-५४ पापाणके...
इति प्रतिपदोक्तसमानाधिकरणे ऽयं
स्वरः प्रवर्तते । नेह-पापस्य नापितः =
पापनापितः ।

६-२-६९ गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे ॥

भार्यासौश्रुतः । कुमारीदाक्षाः ।
भिक्षामाणवः । भयब्राह्मणः ।
गोत्रादिष्वित्युक्तेर्नेह- दासीश्रोत्रियः ।
क्षेपे इत्युक्तेर्नेह- परमब्राह्मणः ।

६-२-६४ आदि -- पूर्वपदम् (६-२-१) आदिः +उदात्तः = आद्युदात्तं भवति, इत्यधिक्रियते । तत्र आदिरिति प्राक् २-२-९२ अन्तः, इति सूत्रात् । उदात्त इति प्राक् ६-२-१३६ प्रकृत्या भगालम्, इति सूत्रात् । अत्र सूत्रे यद्यपि पूर्वपदमर्थानुरोधात् षष्ठ्यन्ताय कल्पेत । तथा सति पूर्वपदस्य आदिरुदात्त इत्यर्थः फलेत् । तथाप्यग्रिमसूत्रेषु सर्वत्र तदनुरोधेन प्रथमान्तानि षष्ठ्यन्तेभ्य कल्प्यानि भवन्तीति, 'आदिरुदात्तः' इत्यस्यैव बहुव्रीहिः कृतः सामानाधिकरण्याय ।

६-२-६५ सप्त-- अहरणे = हरणशब्दभिन्ने, धर्म्ये (जनपदे ग्रामे कुले वा परम्परयाऽऽयातः सदाचारो धर्मस्तस्मादनपेतं धर्म्यम् । ४-४-९२ धर्म..... इति यत् । धर्मेण प्राप्यमित्यर्थे च ४-४-९१ नौ व.... इति यत् आचारवशादवश्यकर्तव्यमित्यर्थः) = धर्म्यवाचिन्युत्तरपदे, सप्तमीहारिणौ= सप्तम्यन्तं हारिवाचि च पूर्वपदम् (६-२-१) आद्युदात्तम् (६-२-६४ टी.) । देयं यः स्वीकरोति स हारीत्युच्यते । हृ (८९९) धातोः ३-३-१७० आव... इति णिनिः ।

स्तूपेशाणः २-१-४४ संज्ञा... इति समासः । ६-३-१० कार... इति विभक्तेरलुक् । एवं मुकुटे कार्षापणमित्यत्रापि । **वाडवहरणम्** वडवाया अयं वाडवः । तस्य बीजनिषेकादुत्तरकालं शरीरपुष्टयर्थं यद् दीयते तद् हरणमित्युच्यते । सोऽयमाचारः क्वचिद् व्यवस्थितः । स च हरणशब्दः कर्मसाधनः । अत्राऽस्मिन् स्वरे निवृत्ते ६-२-१३८ गति... इति प्राप्तमुत्तरपदप्रकृतिस्वरं बाधित्वा ६-२-१४९ अनो... इत्युत्तरपदान्तोदात्तत्वं भवति । इह परत्वादेव स स्वरो भविष्यति, किम् अहरण इति पर्युदासेन ? इति चेत्, सत्यम् । एष एव पर्युदासो ज्ञापयति परोऽपि कृत्स्वरो हारिस्वरेण बाध्यत इति । तेन वाडवहार्यम् इत्यादौ हारिस्वरः सिद्धो भवति ।

६-२-६६ युक्ते= युक्तवाचिन्युत्तरपदे, पू. (६-२-१) आद्युदात्तम् (६-२-६४ टी.) युक्तः = समाहितः = कार्ये तत्परः । गोबल्लवः षष्ठीसमासः । गवां पालक इत्यर्थः ।

६-२-६७ विभा-- अध्यक्षे = अध्यक्षशब्दे उत्तरपदे, विभाषा=वा, पूर्वपदम् (६-२-१) आद्युदात्तम् (६-२-६४ टी.) । अध्यक्षशब्दोऽपि समासे युक्तवाची । अतः पूर्वेण सिद्धे विकल्पार्थं वचनम् ।

६-२-६८ पापम् = पापशब्दरूपम्, पूर्वपदम् (६-२-१) विभाषा (६-२-६७) आद्युदात्तम् (६-२-६४ टी.) शिल्पिनि = शिल्पिवाचिन्युत्तरपदे । पक्षे समासस्वरेणान्तोदात्तत्वम् ।

६-२-६९ गोत्रा... णेषु = गोत्रवाचिनि अन्तेवासिवाचिनि माणवब्राह्मणयोश्चोत्तरपदेषु, पू. (६-२-१) आद्युदात्तम् (६-२-६४ टी.) क्षेपे निन्दावाचिनि समासे । अपत्याधिकारदन्यत्र लौकिकं गोत्रं गृह्यते । अन्तेवासीत्यत्र ६-३-१८ शय... इति सप्तम्या अलुक् । **भार्यासौश्रुतः** भार्याप्रधानः सौश्रुतः (सुश्रुतोऽपत्यम्) । **कुमारीदाक्षा** : कुमारीलाभकामा दाक्षाः (दक्षेण प्रोक्तमधीयानाः) । **भिक्षामाणवः** भिक्षालाभकामो माणवः (भिक्षां लप्स्ये ऽहमिति माणवो भवति न श्रद्धया) । **भयब्राह्मणः** राजदण्डादि भयेन ब्राह्मणाचारं करोति । आद्येषु त्रिषु शाकपार्थिवादित्वात्, अन्त्ये तृतीयेति योगविभागात् समासः । **दासीश्रोत्रियः** दासीकामः श्रोत्रियः शाकपार्थिवादिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-७० अङ्गानि मैरेये ॥
गुडमैरेयः । मधुमैरेयः । मैरेय इत्युक्तेर्नेह-पुष्पासवः ।

६-२-७१ भक्ताख्यास्तदर्थेषु ॥
भिक्षाकंसः । भाजीकंसः । भक्ताख्या इत्युक्तेर्नेह-समाशशालयः । तदर्थेष्वित्युक्तेर्नेह-भिक्षाप्रियः ।

६-२-७२ गोविडालसिंहसैन्धवेषूपमाने ॥
धान्यगवः । भिक्षाविडालः । काष्ठसिंहः । सक्तुसैन्धवः । उपमान इत्युक्तेर्नेह-परमसिंहः ।

६-२-७३ अके जीविकार्थे ॥७४
दन्तलेखकः । नखलेखकः । अवस्करशोधकः । अक इत्युक्तेर्नेह-रमणीयकर्ता । जीविकार्थ इत्युक्तेर्नेह-इक्षुभक्षिकां मे धारयसि ।

६-२-७४ प्राचां क्रीडायाम् ॥
उद्दालपुष्पभञ्जिका । शालभञ्जिका । प्राचामित्युक्तेर्नेह - जीवपुत्रप्रचायिका । क्रीडायामित्युक्तेर्नेह- नवपुष्पप्रचायिका ।

६-२-७५ अणि नियुक्ते ॥७७
छत्रधारः । नियुक्त इत्युक्तेर्नेह-काण्डलावः । शरलावः ।

६-२-७६ शिल्पिनि चाऽकृञः ॥७७
तन्तुवायः । शिल्पिनीत्युक्तेर्नेह-काण्डलावः । अकृञ इत्युक्तेर्नेह- कुम्भकारः ।

६-२-७७ संज्ञायां च ॥
तन्तुवायो नाम कीटः । वालवायो नाम पर्वतः । अकृञ इत्यनुवृत्तेर्नेह - रथकारो नाम ब्राह्मणः ।

६-२-७० अङ्गा-- मैरेये = मैरेयशब्दे उत्तरपदे, अङ्गानि = मैरेयाङ्गवाचीनि, पू. (६-२-१) आद्युदात्तानि (६-२-६४ टी.) । मैरेयः = मद्यम् । **गुडमैरेयः** गुडस्य मैरेयः । अतो मैरेयस्याङ्गं गुडो भवति ।

६-२-७१ **भक्ताख्याः** = अन्नवाचिनः शब्दाः, तदर्थेषु=तदर्थेषूत्तरपदेषु, आद्युदात्ताः (६-२-६४ टी.) । वहुवचननिर्देशादेव स्वरूपनिरासे सिद्धे, आख्याग्रहणं भक्तविशेषवाचिनां भिक्षादीनामपि ग्रहणार्थम् । अन्यथा पर्यायाणामन्नादीनामेव स्यात् । **समांशशालयः** समशनं समाश इति क्रियामात्रं नत्वन्नम् । **भिक्षाप्रियः** ६-२-१ बहु... इति पूर्वपदान्तोदात्तः ।

६-२-७२ **गोवि**-उपमाने=उपमानवाचिषु, गो....षु=गो विडाल सिंह सैन्धव इत्येतेषूत्तरपदेषु, पू(६-२-१) आद्युदात्तम् (६-२-६४ टी.) । **धान्यगवः** अत्र काशिका-धान्यं गौरिवेति विगृह्य व्याघ्रादेराकृतिगणत्वात् २-१-५६ उपमितं व्याघ्रादिभिः इति समासः । उपमानार्थो ऽपि यथासंम्भवं यथाप्रसिद्धि च योजयितव्यः । गवाकृत्या सन्निवेशितं धान्यगवशब्देनोच्यत इति ।

६-२-७३ **अके**-जीविकार्थे = जीविकावाचिनि, अके= अकप्रत्ययान्ते, उत्तरपदे, पू. (६-२-१) आद्युदात्तम् (६-२-६४ टी.) उदाहरणेषु ३-३-१०९ संज्ञा... इति ण्वुँल् । २-२-१७ नित्यं..... इति समासः । दन्तलेखनादिभिर्येषां जीविका ते उदाहरणवाच्याः । प्रत्युदाहरणयोः ६-२-१३८ गति... इत्युत्तरपदान्तोदात्तत्वम् ।

६-२-७४ **प्राचाम्**+क्रीडायाम् = प्राग्देशवाचिनां या क्रीडा तद्वाचिनि समासे, अके (६-२-७३) पू. (६-२-१) आद्युदात्तम् (६-२-६४ टी.) । उदाहरणयोर्ण्वुँल्समासौ पूर्ववत् । प्रत्युदाहरणयोः, आद्ये ण्वुँल्समासौ पूर्ववदेव । ६-२-१३८ गति... इति लित्स्वरेणोत्तरपदं मध्योदात्तम् । इयमुदीचां संज्ञा । द्वितीये ३-३-१११ पर्या... इति ण्वुँच् २-२-८ षष्ठी इति समासः । ६-२-१३८ गति....इति चित्स्वरेणोत्तरपदमन्तोदात्तम् ।

६-२-७५ **अणि**=अणन्ते उत्तरपदे, नियुक्ते=नियुक्तवाचिनि समासे, पू. (६-२-१) आद्युदात्तम् (६-२-६४ टी.) । **छत्रधारः** अत्र काशिका-नियुक्तः = अधिकृतः । स च कस्मिँश्चित् कर्तव्ये तत्परो न भवतीति नियुक्त इत्यनेन सिध्यतीति ।

६-२-७६ **शिल्पिनि** = शिल्पिवाचिनि समासे, अणि (६-२-७५) पू. (६-२-१) आद्युदात्तम् (६-२-६४) अकृञः = स चेदण् कृञः परो न चेत् ।

तन्तुवायः तन्तून् वयतीति ३-२-२ ह्वावामश्च इत्यण् ।

६-२-७७ संज्ञायांइ=संज्ञायां=विषये, अणि (६-२-७५) पू. (६-२-१) आद्युदात्तम् (६-२-६४) अकृञः (६-२-७६) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-७८ गोतन्तियवं पाले ॥
गोपालः । तन्तिपालः । यवपालः ।
पाल इत्युक्तेर्नेह- गोरक्षः ।
६-२-७९ णिनि ॥८०
पुष्पहारी ।
६-२-८० उपमानं शब्दार्थप्रकृतावेव ॥
उष्ट्रक्रोशी । शब्दार्थप्रकृतावित्युक्तेर्नेह-
वृकवञ्ची ।
६-२-८१ युक्तारोह्यादयश्च ॥
युक्तारोही । आगतयोधी ।
६-२-८२ दीर्घकाशतुषभ्राष्ट्रवटं जे ॥८३
कुटीजः । काशजः । तुषजः । भ्राष्ट्रजः । वटजः ।
६-२-८३ अन्त्यात् पूर्वं बह्वचः ॥
उपसरजः । आमलकीजः ।
६-२-८४ ग्रामे ऽनिवसन्तः ॥
मल्लग्रामः । वणिग्ग्रामः । अनिवसन्त
इत्युक्तेर्नेह- दाक्षिग्रामः ।
६-२-८५ घोषादिषु च ॥
दाक्षिघोषः । आश्रममुनिः ।
६-२-८६ छात्र्यादयः शालायाम् ॥
छात्रिशाला । छात्रिशालम् ।

६-२-७८ गो... यवम् गो-तन्ति- यव इति पू. (६-२-१) आद्युदात्तम् (६-२-६४) पाले= पालशब्दे उत्तरपदे । अनियुक्तार्थ आरम्भः ।

६-२-७९ णिनि= णिन्नन्ते उत्तरपदे, पू.(६-२-१) आद्युदात्तम् (६-२-६४) ।

६-२-८० उपमानम् = उपमानवाचि, पू. (६-२-१) आद्युदात्तम् (६-२-६४) शब्दार्थप्रकृतौ+एव, णिनि (६-२-७९) । **उष्ट्रक्रोशी** ३-२-७९ कर्तर्युपमाने इति णिनिँः ।

अत्र काशिका- प्रकृतिग्रहणं किम् ? प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्था भवति तत्रैव यथा स्यात्, इह माभूद् गर्दभोच्चारी । कोकिलाभिव्याहारीति । इति । (उच्चारीत्यत्र उपसर्गरहितस्य चरधातोर्गतिभक्षणार्थत्वात्, अभिव्याहारीत्यत्र च उपसर्गरहितस्य हरणार्थत्वात् सूत्रमिदं न प्रवर्तते) एवकारकरणमुपमानावधारणार्थम् । शब्दार्थप्रकृतौ त्वनुपमानमुपमानं चाद्युदात्तं भवति । सिंहविनर्दी । पुष्कलजल्पी । इति च ।

६-२-८१ युक्तारोह्यादयः = युक्तारोहिप्रभृतयः, आद्युदात्ताः (६-२-६४) । ६-२-७९ णिनि इत्येवसिद्धे पूवोत्तरपदनियमार्थ आरम्भः । अर्थाद् यत्र युक्तादीन्येव पूर्वपदानि, आरोह्यादीन्येव चोत्तरपदानि तत्रैव यथा स्यादित्यर्थ इति भावः । तेनेह न-वृक्षारोही युक्ताध्यायी । अत्र आद्ये पूर्वपदमन्यत् ।अन्ते उत्तरपदमन्यत् । अत्र काशिका- पात्रेसमितादयश्च युक्तारोह्यादयः । ततस्ते ऽप्याद्युदात्ता भवन्ति । इति ।

६-२-८२ दीर्घ... वटम् = दीर्घान्तं काशादिकं च पू. (६-२-१) जे = जशब्दे उत्तरपदे, आद्युदात्तम् (६-२-६४) ।

६-२-८३ अन्त्या - जे (६-२-८२) बह्वचः= बहवच्कस्य पूर्वपदस्य (६-२-१) अन्त्यात् पूर्वम्, उदात्तम् (६-२-६४) । दीर्घान्ते ऽपि बह्वचि परत्वादयमेव स्वरः ।

६-२-८४ ग्रामे= ग्रामशब्दे उत्तरपदे, पू. (६-२-१) आद्युदात्तम् (६-२-६४) अनिवसन्तः = ग्रामशब्दो निवासवाची न चेत् । निपूर्वाद् वस्धातोरधिकरणे औणादिके झच् प्रत्यये निवसन्त इत्यदन्तः शब्दः सिध्यति । निवसन्त-विरुद्धः= अनिवसन्तः । उदाहरणयोर्ग्रामशब्दः समूहवाची । प्रत्युदाहरणे निवासवाची ।

६-२-८५ घोषादिषु=घोषादिषूत्तरपदेषु, पू. (६-२-१) आद्युदात्तम् (६-२-६४)

६-२-८६ छात्र्या-शालायाम्=शालाशब्दे उत्तरपदे, छात्र्यादयः = छात्रिप्रभृतयः आद्युदात्ताः (६-२-६४) । यदापि शालान्तः समासो २-४-२५ विभा... सूत्रेण नपुंलकलिङ्गो भवति, तदापि ६-२-१२२ तत्पुरुषे शाला..... इत्येतस्मात् पूर्वविप्रतिषेधेनायमेव स्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-८७ प्रस्थे ऽवृद्धमकर्क्यादीनाम् ॥८८

इन्द्रप्रस्थः । सुवर्णप्रस्थः । अवृद्धमित्युक्तेर्नेह-दाक्षिप्रस्थः । अकर्क्यादीनामित्युक्तेर्नेह-कर्कीप्रस्थः ।

६-२-८८ मालादीनां च ॥

मालाप्रस्थः । शालाप्रस्थः ।

६-२-८९ अमहन्नवं नगरे ऽनुदीचाम् ॥९०

सुह्मनगरम् । अनुदीचामित्युक्तेर्नेह कान्तीनगरम् ।

६-२-९० अर्मे चाऽ वर्णं द्व्यच् त्र्यच् ॥९१

गुप्तार्मम् । कुक्कुटार्मम् । अवर्णमित्युक्तेर्नेह-बृहदर्मम् । द्व्यच्त्र्यजित्युक्तेर्नेह-कपिञ्जलार्मम् ।

अमहन्नवमित्यनुवृत्तेर्नेह-महार्मम् । नवार्मम् ।

६-२-९१ न भूताधिकसञ्जीवमद्राश्मकज्जलम् ॥

भूतार्मम् । अधिकार्मम् । सञ्जीवार्मम् । मद्रार्मम् । अश्मार्मम् । मद्राश्मार्मम् । कज्जलार्मम् ।

(आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम्)

दिवोदासाय गायत । वध्र्यश्वायदाशुषे ।

६-२-९२ अन्तः ॥१०९

६-२-९३ सर्वं गुणकार्त्स्न्ये ॥

सर्वश्वेतः । सर्वमहान् । सर्वमित्युक्तेर्नेह-परमश्वेतः । गुणेत्युक्तेर्नेह-सर्वसौवर्णः । सर्वराजतः । कार्त्स्न्ये इत्युक्तेर्नेह-सर्वेषां श्वेततरः = सर्वश्वेतः ।

६-२-९४ संज्ञायां गिरिनिकाययोः ॥

अञ्जनागिरिः । शापिण्डिनिकायः ।

संज्ञायामित्युक्तेर्नेह-परमगिरिः । ब्राह्मणनिकायः ।

६-२-८७ प्रस्थे= प्रस्थशब्दे उत्तरपदे, अकर्क्यादीनाम्= कर्क्यादिभिन्नम्, अवृद्धम्= वृद्धभिन्नम्, पू. (६-२-१) आद्युदात्तम् (६-२-६४) ।

६-२-८८ मालादीनाम्= मालाप्रभृतीनाम्, आदिरुदात्तः (६-२-६४) प्रस्थे (६-२-८७) । वृद्धार्थ आरम्भः ।

६-२-८९ अमहन्नवम्= महद्नवभिन्नम्, पू. (६-२-१) आद्युदात्तम् (६-२-६४), नगरे = नगरशब्दे उत्तरपदे, अनुदीचाम् = तन्नगरमुदीचां न चेत् । प्राचामित्यनुक्त्वा ऽनुदीचामिति कथनेन मध्यदेशनगरे भवत्येव-विराटनगरम् ।

६-२-९० अर्मे = अर्मशब्दे उत्तरपदे, अमहन्नवम् (६-२-८९) अवर्णम्= अवर्णान्तम्, द्व्यच्त्र्यच्= द्व्यच्कं त्र्यच्कं च, पू. (६-२-१) आद्युदात्तम् (६-२-६४) । अवर्णान्तमित्युक्तेर्महच्छब्दपर्युदासो व्यर्थ इति तु न प्रमदितव्यम् । विशेषणसमासे, आत्वे कृते प्राप्तिसत्वात् ।

६-२-९१ न भू- अर्मे (६-२-९०) भूता... कज्जलम् = भूत अधिक सञ्जीव मद्र अश्म मद्राश्म कज्जल इति रूपम् पू. (६-२-१) न = आद्युदात्तं (६-२-६४) न भवति । मद्राश्मग्रहणं संघातविगृहीतार्थम् । समासान्तोदात्तत्वमेवा ऽत्र भवति ।

मद्राश्मार्मम् ५-४-९४ अनोऽश्मायस्सरसां ... इति समासान्ते सत्यवर्णान्तमेतत् ।

६-२-९२ अन्तः = ६-२-११० उत्तरपदादिः, इत्येतस्मत् प्राक्, "अन्तः, उदात्तः (६-२-६४)" "अन्तोदात्तम्" इत्यधिक्रियते ।

६-२-९३ सर्व- गुणकार्त्स्न्ये = गुणकार्त्स्न्ये वर्तमानम्, सर्वम् = सर्वशब्दस्वरूपम्, पूर्वपदम् ६-२-१) अन्तोदात्तम् (६-२-९२ टी.) । **परमश्वेतः** आश्रयव्याप्त्या परमत्वं श्वेतस्येति गुणकार्त्स्न्ये वर्तत इति काशिका । **सर्वसौवर्णः** २-१-९४ पूर्व...इति समासः । **सर्वश्वेत** इत्युदाहरणे च । प्रत्युदाहरणे तु २-२-९ याज...सूत्रस्थ गुणा...इति वार्तिकेन समासः ।

६-२-९४ संज्ञायाम्=संज्ञायां गम्यमानायाम्, पू. (६-२-१) अन्तोदात्तम् (६-२-९२ टी.) गिरिनिकाययोः=गिरि निकाय इत्येतयोरुत्तरपदयोः । **अञ्जनागिरिः** २-२-८ षष्ठी-इति समासः । ६-३-११७ वन...इति दीर्घः । शापिण्डिशब्द इञन्तः समासः प्रागवत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-९५ कुमार्यां वयसि ॥

वृद्धकुमारी । जरत्कुमारी । वयसीत्युक्तेर्नेह-परमकुमारी

६-२-९६ उदके ऽ केवले ॥

गुडोदकम् । तिलोदकम् । अकेवले इत्युक्तेर्नेह-शीतोदकम् ।

६-२-९७ द्विगौ क्रतौ ॥

गर्गत्रिरात्रम् । क्रतावित्युक्तेर्नेह-बिल्वसप्तरात्रम् ।

६-२-९८ सभायां नपुंसके ॥

गोपालसभम् । नपुंसके इत्युक्तेर्नेह-राजसभा । प्रतिपदनपुंसकग्रहणान्नेह-रमणीयसभम् ।

६-२-९९ पुरे प्राचाम् ॥१०१

काञ्चीपुरम् । प्राचामित्युक्तेर्नेह - शिवपुरम् ।

६-२-१०० अरिष्टगौडपूर्वे च ॥

अरिष्टपुरम् । गौडपुरम् ।

६-२-१०१ न हास्तिनफलकमार्देयाः ॥

हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् ।

६-२-१०२ कुसूलकूपकुम्भशालं बिले ॥

कुसूलबिलम् । कूपबिलम् । कुम्भबिलम् । शालाबिलम् । कुसूलादिग्रहणान्नेह-सर्पबिलम् । बिल इत्युक्तेर्नेह-कुसूलस्वामी ।

६-२-१०३ दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु ॥ १०५

पूर्वेषुकामशमी । पूर्वपञ्चालाः । पूर्वयायातम् । पूर्वचानराटम् ।

६-२-९५ कुमार्याम्= कुमारीशब्दे उत्तरपदे, वयसि= वयसि गम्यमाने, पू. (६-२-१) अन्तोदात्तम् (६-२-९२ टी.) । कुमारीशब्दः पुंसा सहाऽसम्प्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिर्वयोवचनैः समानाधिकरणो भवति । तच्च वय इह गृह्यते, न कुमारत्वमेव । अयं भावः- प्रथमवयोवाचकादेव ४-१-२० वय...इति ङीपि कुमारीशब्दः सिध्यति । कथं वृद्धशब्देन सामानिधिकरण्यं तस्येति शङ्का । उत्तरम्-द्वे प्रवृत्तिनिमित्ते वयः पुंसा सहाऽसम्प्रयोगश्च । प्रकृते आद्यमर्थं त्यक्त्वा द्वितीयमात्रे वर्तते, इति । वृद्धा चासौ कुमारी= वृद्धकुमारी । ६-३-४२ पुंव...इति पुंवद्भावः ।

६-२-९६ उदके= उदकशब्दे उत्तरपदे, अकेवले= मिश्रवाचिनि समासे, पू. (६-२-१) अन्तोदात्तम् (६-२-९२ टी.) उदाहरणयोः स्वरे कृते एकादेशः ८-२-६ स्वरि...इति पक्षे स्वरितः । पक्षान्तरे च ८-२-५ एका...इत्युदात्तः ।

६-२-९७ द्विगौ= द्विगावुत्तरपदे, क्रतौ= क्रतुवाचिनि समासे, पू. (६-२-१) अन्तोदात्तम् (६-२-९२ टी.)। उदाहरणे प्रत्युदाहरणे चोत्तरपदे द्विगुः । ५-४-८७ अह...इत्यच् । २-४-२९ रात्रा...सूत्र-दत्त-संख्या...इति वचनेन क्लीबत्वम् । **बिल्वसप्तरात्रम्** बिल्वहोमस्य सप्तरात्रमित्यर्थः । बिल्वशब्दस्य बिल्वहोमे लक्षणेति भावः ।

६-२-९८ सभायाम्= सभाशब्दे उत्तरपदे, नपुंसके=नपुंसकलिङ्गे समासे, पू. (६-२-१) अन्तोदात्तम् (६-२-९२) । उदाहरणे २-४-२४ अशा...इति क्लीबत्वम् । **रमणीयसभम्** समासोऽत्र बहुव्रीहिः । अन्यपदार्थानुकूलं क्लीबत्वम् । न तु प्रतिपदोक्तत्वम् ।

६-२-९९ पुरे= पुरशब्दे उत्तरपदे, प्राचाम्= प्राचां देशे, पू. (६-२-१) अन्तोदात्तम् (६-२-९२) ।

६-२-१०० अरिष्टगौडपूर्वे =अरिष्ट-गौड-पूर्वके समासे, पुरे (६-२-९९) पू. (६-२-१) अन्तोदात्तम् (६-२-९२) । अत्र काशिका-पूर्वग्रहणं किम् । इहापि यथा स्यात्-अरिष्टश्रितपुरम् गौडभृत्यपुरम् । इति ।

६-२-१०१ न हा- हास्ति...देयाः= हास्तिन-फलक-मार्देय इत्येतानि, पू.(६-२-१) पुरे (६-२-९९) न= अन्तोदात्तानि न भवन्ति । ६-२-९९ पुरे...इति प्राप्तिः प्रतिषिध्यते । **मार्देयपुरम्** मृदोरपत्ये ४-१-१२३ शुभ्रा...इति ढक् । ६-४-१४७ ढे लो...इत्युकारलोपः ।

६-२-१०२ कुसूल...शालम्= कुसूल-कूप-कुम्भ-शाला इति, पू. (६-२-१) बिले=बिलशब्दे उत्तरपदे, अन्तोदात्तम् (६-२-९२) ।

६-२-१०३ दिक्शब्दाः-दिग्वाचिशब्दाः (दिग्वाचिशब्दरूपम् एवमग्रिसूत्रद्वयेऽपि) पू. (६-२-१) अन्तोदात्तम् (६-२-९२) ग्राम.....टेषु ग्रामवाचिषु जनपदवाचिषु आख्यानवाचिषु चानराटशब्दे चोत्तरपदेषु । शब्दग्रहणं कालवाचिनो ऽपि दिक्शब्दस्य परिग्रहार्थम् । अन्यथा पूर्वयायातमित्यत्र न स्यात् । ययातिमधिकृत्य कृतमाख्यानं यायातम् । ४-३-८७ अधि... इत्यण् । आद्योदाहरणे २-१-५० दिक्सं.... इति समासः । द्वितीये २-१-५८ पूर्वा... इति समासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१०४ आचार्योपसर्जनश्चान्तेवासिनि ॥
पूर्वपाणिनीयाः । अपरकाशकृत्स्नाः ।
आचार्योपसर्जन इत्युक्तेर्नेह- पूर्वशिष्यः ।
अन्तेवासिनीत्युक्तेर्नेह-पूर्वपाणिनीयं शास्त्रम् ।
६-२-१०५ उत्तरपदवृद्धौ सर्वं च ॥
सर्वपाञ्चालकः । पूर्वपाञ्चालकः ।
६-२-१०६ बहुव्रीहौ विश्वं संज्ञायाम् ॥१०९, प्र. १०७
विश्वयशाः । विश्वमहान् ।

प्र.६-२-१०७ उदराश्वेषुषु ॥ द्वि. १०७
दामोदरः। हर्यश्वः । सुवर्णपुङ्खेषुः ।
द्वि६-२-१०७ क्षेपे ॥
कुण्डोदर : । कटुकाश्वः । अनिघातेषुः ।
६-२-१०८ नदी बन्धुनि ॥
गार्गीबन्धुः । वात्सीबन्धुः । बन्धुनीत्युक्तेर्नेह-गार्गीप्रियः ।

६-२-१०४ आचार्योपसर्जन : (इदम् अन्तेवासिनि, इत्यस्य विशेषणम्, सप्तम्यर्थे प्रथमा) = आचार्योपसर्जनके, अन्तेवासिनि = छात्रवाचिनि शब्दे उत्तरपदे, दिक्शब्दाः (६-२-१०३) पू. (६-२-१) अन्तोदात्तम् (६-२-९२) । **पूर्वपाणिनीयाः** पाणिनेरन्तेवासिनः = पाणिनीयाः । ततः २-१-५८ पूर्वा... इति समासः । **अपरकाशकृत्स्नाः** काशकृत्स्नेरन्तेवासिनः = काशकृत्स्नाः ४-२-११२ इञ... इत्यण् । समासः प्राग्वत् । **पूर्वपाणिनीयं शास्त्रम्** पाणिनीयं शास्त्रं चिरन्तनमित्यर्थः ।

६-२-१०५ उत्तरपदवृद्धौ ७-३-१० "उत्तरपदस्य" इत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे परे, सर्वम् = सर्वशब्दरूपम्, दिक्शब्दा : (६-२-१०३) च, पू. (६-२-१) अन्तोदात्तम् । (६-२-९२) । अत्र पदमञ्जरी-वृद्धौ इत्येतावतैव तद्वदुत्तरपदपरिग्रहे सिद्धे उत्तरपदग्रहणात् तदधिकारो लक्ष्यत इति । **सर्वपाञ्चालकः** १-१-७१ येन... सूत्रस्थ-सुस... इति वार्तिकेन तदन्तविधिना ४-२-१२५ अवृ... इति वुँञ् । ७-३-१२ सुस... इत्युत्तरपदवृद्धिः । **पूर्वपाञ्चालकः** पूर्ववद् वुँञ् । ७-३-१३ दिशो...इत्युत्तरपदादिवृद्धिः ।

६-२-१०६ बहुव्रीहौ= बहुव्रीहिसमासे, विश्वम् = विश्वशब्दरूपम् पू. (६-२-१) अन्तोदात्तम्, (६-२-९२) संज्ञायाम्=संज्ञायां गम्यमानायम् । विश्वशब्दः १५७ अशूँप्रुषि... इत्यौणादिकक्वनि सिध्यति । नित्त्वादाद्युदात्तः ।

अत्र न्यासः - बहुव्रीहौ विश्वं संज्ञायाम् इति पूर्वपदान्तोदात्तस्यावकाशः - विश्वदेवः । विश्वयशाः । इति । ६-२-१६४ संज्ञायां मित्राजिनयोः, इत्युत्तरपदान्तोदात्तस्यावकाशः कूलमित्रम् । कुलाजिनमिति । विश्वामित्रः । विश्वाजिन इत्यत्रोभयं प्राप्नोति, संज्ञायां मित्राजिनयोः, इत्येतत्तु भवति विप्रतिषेधेनेति ।

प्र. ६-२-१०७ उदराश्वेषुषु = उदर अश्व इषु इत्येतेषूत्तरपदेषु, पू. (६-२-१) अन्तोदात्तम् (६-२-९२) बहुव्रीहौ+संज्ञायाम् (६-२-१०६) । दामन्शब्दो मनिन्प्रत्ययान्तः । हरिशब्द इन्प्रत्ययान्तः । अतो नित्त्वादाद्युदात्तौ तौ । **सुवर्णपुङ्खेषुः** शोभनो वर्णो येषां ते सुवर्णाः । ६-२-१७१ नञ्सु... इत्यन्तोदात्तत्वम् । सुवर्णाः पुङ्खा येषां ते सुवर्णपुङ्खाः ६-२-१ बहु... इति पूर्वपदप्रकृतिस्वरेण मध्योदात्तत्वम् । पुनरिषुशब्देन बहुव्रीहौ पूर्वपदान्तोदात्तत्वम् । एकादेशस्तु ८-२-६ स्वरि... इति पक्षे स्वरितः ।

६-२-१०७ क्षेपे = क्षेपे गम्यमाने, उदराश्वेषुषु (प्र. ६-२-१०७) बहुव्रीहौ (६-२-१०६) पू. (६-२-१) अन्तोदात्तम् (६-२-९२) । कुण्डशब्दो २६ नब्विषयस्यानिषन्तस्येति । फिट्सूत्रेणाद्युदात्त : । कन्प्रत्ययान्तः कटुकशब्दो नित्वादाद्युदात्तः । निघातशब्दो घञन्त आद्युदात्तः । तद्विरुद्धः = अनिघातः । ६-२-२ तत्पु... इत्यव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तः । अनुदरः । सूदर इत्यत्र ६-२-१७१ नञ्सु... इत्येतद् भवति विप्रतिषेधेन ।

६-२-१०८ नदी= नद्यन्तम्, पू. (६-२-१) अन्तोदात्तम् । (६-२-९२) बन्धुनि= बन्धुशब्दे उत्तरपदे, बहुव्रीहौ (६-२-१०६) । गार्गी वात्सी शब्दौ ञित्वादाद्युदात्तौ । प्रत्युदाहरणे ६-२-१ बहु... इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमेव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१०९ निष्ठोपसर्गपूर्वमन्यतरस्याम् ॥
प्रक्षालितपादः । उपसर्गपूर्वमित्युक्तेर्नेह-शुष्कमुखः ।

६-२-११० उत्तरपदादिः । ११८, १३५

६-२-१११ कर्णो वर्णलक्षणात् ॥११२
श्वेतकर्णः । शङ्कूकर्णः । कर्ण इत्युक्तेर्नेह-श्वेतपादः । वर्णलक्षणादित्युक्तेर्नेह-शोभन-कर्णः ।

६-२-११२ संज्ञौपम्ययोश्च ॥११४
मणिकर्णः । गोकर्णः ।

६-२-११३ कण्ठपृष्ठग्रीवाजङ्घं च ॥
नीलकण्ठः । उष्ट्रकण्ठः । काण्डपृष्ठः । गोपृष्ठः । सुग्रीवः । गोग्रीवः । तालजङ्घः । गोजङ्घः ।

६-२-११४ शृङ्गमवस्थायां च ॥
स्थूलशृङ्गः । ऋष्यशृङ्गः । गोशृङ्गः ।

६-२-११५ नञो जरमरमित्रमृताः ॥
अजरः । अमरः । अमित्रः । अमृतः ।

६-२-११६ सोर्मनसी अलोमोषसी ॥११९
सुकर्मा । सुपयाः । सोरित्युक्तेर्नेह-कृतकर्मा । कृतयशाः । अलोमोषसी इत्युक्तेर्नेह-सुलोमा । सूषाः ।

६-२-१०९ निष्ठो- उपसर्गपूर्वम्= उपसर्गपूर्वकम्, निष्ठा= निष्ठान्तम्, पू. (६-२-१) अन्यतरस्याम्=वा, अन्तोदात्तम् (६-२-९२) बहुव्रीहौ (६-२-१०६)। **प्रक्षालितपादः** प्रक्षालितशब्दः ६-२-४९ गति... इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तः । **शुष्कमुखः** शुष्कशब्दः प्रत्ययस्वरेणान्तोदात्तः । अत्र ६-२-१ बहु.... इति पूर्वपदप्रकृतिस्वरेण नित्यमेव पूर्वपदान्तोदात्तत्वम् ।

६-२-११० उत्त- उत्तरपद इति पृथक् पदं लुप्तषष्ठीकम् । तस्य (उत्तरपदस्येत्यस्य) आपादपरिसमाप्तेरकिारः । आदिरिति च पृथक् पदम् । तस्य चाधिकारः ६-२-१३६ प्रकृत्या... इति सूत्रात् प्राक् । ६-२-६४ आदि... इतिसूत्रादुदात्त इत्यनुवर्तते । तत्र तत्र प्रथमान्तसामानाधिकरण्याय उत्तरपदमाद्युदात्तमिति बोध्यम् ।

६-२-१११ कर्णो- बहुव्रीहौ (६-२-१०६) वर्णलक्षणात् = वर्णवाचिनो लक्षणवाचिनश्च (परम्) कर्णः = कर्णशब्दरूपम्, उत्तरपदम् +आद्युदात्तम् (६-२-११० टी.)। कर्णशब्दो ऽतिदिष्टनित्क- नप्रत्ययान्तः । तेनाद्युदात्तः । **शङ्कूकर्ण** ६-३-११५ कर्णे... इति दीर्घः । अत्र काशिका- पशूनां विभागज्ञापनार्थं दात्रशङ्कुप्रतिरूपकं कर्णादिषु चिह्नं यत् क्रियते तदिह लक्षणं गृह्यते (एतच्च वर्णग्रहणाज्ज्ञाप्यते, अन्यथा वर्णस्यापि लक्षणत्वेन लक्षणग्रहणेनैव सिद्धे वर्णग्रहणं व्यर्थं स्यात्) तेन स्थूलकर्ण इत्यत्र न भवतीति/श्वेतशङ्कुशब्दौ प्रत्ययस्वरेणान्तोदात्तौ । प्रत्युदाहरणयोः ६-२-१ बहु... इति पूर्वपदप्रकृतिस्वरः । एवमग्रे ऽपि ६-२-१२० कूल... सूत्रात् प्राक् सर्वत्र प्रत्युदाहरणेषु बोध्यम् ।

६-२-११२ संज्ञौपम्ययोः = संज्ञायामौपम्ये च, बहुव्रीहौ (६-२-१०६) कर्णः (६-२-१११) उत्तरपदमाद्युदात्तम् (६-२-११० टी.)/मणिशब्द इन्नन्त आद्युदात्तः । गोशब्दो ऽन्तोदात्तः ।

६-२-११३ कण्ठ- संज्ञौपम्ययोः (६-२-११२) बहुव्रीहौ (६-२-१०६) कण्ठ... जङ्घम्= कण्ठ-पृष्ठ-ग्रीवा - जङ्घा इत्येतानि, उत्तरपदानि+आद्युदात्तानि (६-२-११० टी.)। सूत्रोक्ताः शब्दाः सर्वे ऽन्तोदात्ताः ।

६-२-११४ शृङ्ग- अवस्थायाम्=अवस्था (गवादेर्वयोविशेषा ऽवस्था) यां गम्यमानायाम्, संज्ञौपम्ययोश्च (६-२-११२) बहुव्रीहौ (६-२-१०६) शृङ्गम् = शृङ्गरूपम्, उत्तरपदम्+आद्युदात्तम् (६-२-११० टी.)। गन् प्रत्ययान्तः शृङ्गशब्दो नित्त्वादाद्युदात्तः । **स्थूलशृङ्गः** अत्रा ऽवस्था प्रतीयते । **ऋष्यशृङ्गः** संज्ञैषा मुनेः ।

६-२-११५ नञः = नञः (पराणि) जर... मृताः= जर-मर-मित्र-मृत-रूपाणि, उत्तरपदानि+आद्युदात्तानि (६-२-११० टी.)। जरणम्= जरः । ३-३-५७ ऋदो... इत्यप् । मरणम्= मरः । अत एव ज्ञापकादप् । मरणम्= मृतम् । ३-३-११४ नपुं... इति क्तः । ६-२-१७१ नञ्सु... इत्यस्यापवादः ।

६-२-११६ सोः =सोरुत्तरम्, मनसी= मन्नन्तम् असन्तं च, उत्तरपदम्+आद्युदात्तम् (६-२-११० टी.) बहुव्रीहौ (६-२-१०६) अलोमोषसी = लोमन् उषस् इति शब्दौ वर्जयित्वा । मनिन्प्रत्ययान्तः कर्मन्शब्दो ऽसुन् प्रत्ययान्तः पयश्शब्दश्च नित्त्वादाद्युदात्तौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-११७ क्रत्वादयश्च ॥

सुक्रतुः । सुप्रतीकः ।

६-२-११८ आद्युदात्तं द्व्यच् छन्दसि ॥११९

स्वश्वास्त्वा सुरथामर्जयेम ।

आद्युदात्तमित्युक्तेर्नेह- सुबाहुः ।

द्व्यजित्युक्तेर्नेह-सुहिरण्यः ।

६-२-११९ वीरवीर्यौ च ॥

सुवीरेण ते । सुवीर्यस्य पतयः स्याम ।

६-२-१२० कूल-तीर-तूल-मूल-शालाक्ष-सममव्ययीभावे ॥

उपकूलम् । उपतीरम् । उपतूलम् ।

उपमूलम् । उपशालम् । उपाक्षम् । सुषमम् ।

६-२-१२१ कंस-मन्थ-शूर्प-पाय्य-काण्डं द्विगौ ॥

द्विकंसः । द्विमन्थः । द्विशूर्पः ।

द्विपाय्य : । द्विकाण्डः । द्विगावित्युक्तेर्नेह-परमकंसः । उत्तमकंसः ।

६-२-११७ क्रत्वा- सोः (६-२-११६) क्रत्वादयः = क्रतुप्रभृनीति, उत्तरपदानि+आद्युत्तादानि (६-२-११० टी.) बहुव्रीहौ (६-२-१०६)। क्रतुप्रतीकशब्दावाद्युदात्तौ ।

६-२-११८ आद्यु- सोः (६-२-११६) परम्, आद्युदात्तम्= आद्युदात्तकम्, द्व्यच्=द्व्यच्कम्, उत्तरपदम्+आद्युदात्तम् (६-२-११०)। अश्वरथशब्दौ नित्स्वरेणाद्युदात्तौ। बाहुशब्दः प्रत्ययस्वरेणान्तोदात्तः । हिरण्यशब्दः २६ नब्विषयस्यानिसन्तस्येति फिट्सूत्रेणाद्युदात्तः ।

६-२-११९ वीर- सोः (६-२-११६) वीर-वीर्यौ= वीर वीर्य इति, उत्तरपदे+आद्युदात्ते (६-२-११०) बहुव्रीहौ (६-२-१०६) छन्दसि (६-२-११८)। अत्र काशिका- वीर्यमिति यत्प्रत्ययान्तम् तत्र ६-१-२०८ यतो ऽनाव इति आद्युदात्तत्वं न भवतीत्येतदेव वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वेणैव सिद्धं स्यात् । इति ।

तदभावे ६-१-१८० तित् ... इत्यन्तस्वरितस्या ऽऽद्युदात्तविधानं स्वांशे चारितार्थ्यम्। वीरशब्दो ऽन्तोदात्तः । वीर्यशब्दः स्वरितान्तः ।

६-२-१२० कूल... समम् = कूलप्रभृतीनि, उत्तरपदानि+आद्युदात्तानि (६-२-११० टी.) अव्ययीभावे= अव्ययीभावसमासे । **सुषमम्** २-१-११७ तिष्ठ... इत्यव्ययीभावसमासः । ८-३-८८ सुवि... इति षत्वम् । अत्र काशिका-पर्यादिभ्यः कूलादीनामाद्युदात्तत्वं विप्रतिषेधेन भवति । परिकूलम् । उपकूलम् । इति । अत्रत्य-न्यासः - ६-२-३३ परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु इत्यस्यावकाशो यत्र कूलादयो न सन्ति-परित्रिगर्तमिति । कूलादीनामाद्युदात्तस्यावकाशो यत्र पर्यादयो न विद्यन्ते- अपकूलमिति, परिकूलमित्यत्र तूभयं प्राप्नोति तत्र विप्रतिषेधेनेदमेवाद्युदात्तत्वं भवतीति । अत्र न्यासे परिकूलमिति कथनेन उपकूलमपि गृहीतं भवतीति तु स्फुटमेव ६-२-३३ परि... इति चा ऽव्ययीभावार्थमिति तत्रैव स्पष्टम् । कूलादि-शालान्ता आद्युदात्ताः । अक्षसमावन्तोदात्तौ । सर्वादिगणे पठयमानः समशब्दस्त्वनुदात्तः ।

६-२-१२१ कंस... काण्डम् = कंसादीनि, उत्तरपदानि+आद्युदात्तानि (६-२-११० टी.) द्विगौ=द्विगुसमासे । **द्विकंसः** द्वाभ्यां कंसाभ्यां क्रीत इति विग्रहे २-१-५१ तद्धि... इति समासे ५-१-२५ कंसा... इति टिँठनि तस्य ५-१-२८ अध्य... इति लुक् । कंसशब्दः सप्रत्ययान्तः प्रत्ययस्वरेणान्तोदात्तः ।

द्विमन्थः ५-१-१९ आर्हा... इति ठक् । शेषं प्रागवत् । मन्थशब्दो घञन्त आद्युदात्तः । **द्विशूर्पः** ५-१-२६ शूर्पा... इत्यञ् । शेषं प्रागवत् । शूर्पशब्दो निदधिकारे पप्रत्ययान्त उणादौ निष्पन्नो, घञन्तो वा ऽऽद्युदात्तः । **द्विपाय्यः** ५-१-१८ प्रागव... इति ठञ् । शेषं प्रागवत् । पाय्यशब्दो ण्यत्प्रत्ययान्तो ऽन्तस्वरितः । **द्विकाण्डः** द्वे काण्डे प्रमाणमस्य ५-२-३७ प्रमा...इति मात्रच् । तस्य ५-२-३७ प्रमा... सूत्र-स्थ-द्विगो... इति वार्तिकेन लुक् । काण्डशब्द आद्युदात्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१२२ तत्पुरुषे शालायां नपुंसके ॥ १३६, १२४

ब्राह्मणशालम्। तत्पुरुष इत्युक्तेर्नेह-दृढशालं ब्राह्मणकुलम्। शालायामित्युक्तेर्नेह-ब्राह्मणसेनम्। नपुंसक इत्युक्तेर्नेह-ब्राह्मणशाला।

६-२-१२३ कन्था च ॥१२४

सौशमिकन्थम्। नपुंसक इत्युक्तेर्नेह-दाक्षिकन्था।

६-२-१२४ आदिश्चिहणादीनाम् ॥

चिहणकन्थम्। कुक्कुटकन्थम्।

६-२-१२५ चेलखेटकटुककाण्डं गर्हायाम् ॥

पुत्रचेलम्। नगरखेटम्। दधिकटुकम्। प्रजाकाण्डम्। गर्हायामित्युक्तेर्नेह-परमचेलम्।

६-२-१२६ चीरमुपमानम् ॥

वस्त्रचीरम्। उपमानमित्युक्तेर्नेह-परमचीरम्।

६-२-१२७ पललसूपशाकं मिश्रे ॥

घृतपललम्। घृतसूपः। घृतशाकम्। मिश्र इत्युक्तेर्नेह-परमपललम्।

६-२-१२८ कूलसूदस्थलकर्षाः संज्ञायाम् ॥

दाक्षिकूलम्। देवसूदम्। दाण्डायनस्थलम्। दाक्षिकर्षः। संज्ञायामित्युक्तेर्नेह-परमकूलम्।

६-२-१२९ अकर्मधारये राज्यम् ॥१३०

क्षत्रियराज्यम्। अकर्मधारय इत्युक्तेर्नेह-परमराज्यम्।

(चेलराज्यादिस्वरादव्ययस्वरो भवति पूर्वप्रतिषेधेन)

कुचेलम्। कुराज्यम्।

६-२-१२२ तत्पु - शालायाम् = शालाशब्दान्ते, तत्पुरुषे= तत्पुरुषसमासे, नपुंसके= नपुंसकलिङ्गे, उत्तरपदम्+आद्युदात्तम् (६-२-११० टी)। **ब्राह्मणशालम्** २-४-२५ विभा... इति क्लीबत्वम्। शालाशब्दो घञन्त आद्युदात्तः स्त्रीत्वं तु प्रकृतसूत्रे शालायामिति निर्देशात्।

दृढशालम् बहुव्रीहिरत्र। तेन ६-२-१ बहु... इतिपूर्वपदप्रकृतिस्वरः। पूर्वपदञ्च निष्ठान्तत्वादन्तोदात्तम्। **ब्राह्मणसेनम्** उदाहरणवत् क्लीबत्वम् ६-१-२१८ समा... इत्यन्तोदात्तत्वम्।

६-२-१२३ कन्था= कन्थान्ते, तत्पुरुषे+नपुंसके (६-२-१२२) उत्तरपदम्+ आद्युदात्तम् (६-२-११० टी.)। **सौशमिकन्थम्** शोभनः शमो यस्य सुशमस्तस्यापत्यम् ४-१-९५ अत... इतीञ्। सौशमेः कन्था= **सौशमिकन्थम्**। २-४-२० संज्ञा... इति क्लीबत्वम्। कन्थाशब्दो ऽकारप्रत्ययान्तो ऽन्तोदात्तः।

६-२-१२४ आदि- कन्था (६-२-१२३) तत्पुरुषे +नपुंसके (६-२-१२२) चिहणादीनाम्= चिहणप्रभृतीनां पूर्वपदानाम्, आदिः, उदात्तः (६-२-६४)। ६-२-११० उत्त.... इति सूत्रादादिरिति वर्तमाने पुनरादिग्रहणं पूर्वपदाद्युदात्तार्थम्। चिहणकुक्कुटशब्दावन्तोदात्तौ।

६-२-१२५ चेल... कण्डम् = चेलप्रभृतीनि, उत्तरपदानि+आद्युदात्तानि (६-२-११०) तत्पुरुषे (६-२-१२२) गर्हायाम्= निन्दायां गम्यमानायाम्। चेलादयः सर्वेऽप्याद्युदात्ताः। चेलादिसादृश्येन पुत्रादीनां गर्हा। २-१-५६ उप... इति समास उदाहरणेषु।

६-२-१२६ चीर- उपमानम् = उपमानवाचि, चीरम्= चीरशब्दरूपम्, उत्तरपदम्+आद्युदात्तम् (६-२-११० टी.) तत्पुरुषे (६-२-१२२)। **वस्त्रचीरम्** समासः प्राग्वत्। चीरशब्दः क्रन्प्रत्ययान्तो नित्त्वादाद्युदात्तः।

६-२-१२७ पलल... शाकम्= पलल-सूप-शाक-रूपाणि, उत्तरपदानि+आद्युदात्तम् (६-२-११० टी.) मिश्रे=मिश्रवाचिनि, तत्पुरुषे (६-२-१२२)। पललशब्दो ऽन्तोदात्तः। सूपशाकावाद्युदात्तौ आद्यो निदधिकारे पप्रत्ययान्तः। द्वितीयः कन्प्रत्यान्तः। उदाहरणेषु २-१-३५ भक्ष्ये... इति समासः।

६-२-१२८ कूल... कर्षा : = कूलप्रभृतीनि, उत्तरपदानि+आद्युदात्तानि (६-२-११० टी.) तत्पुरुषे (६-२-१२२) संज्ञायाम्=संज्ञायां गम्यमानायाम्। उदाहरणानि ग्रामसंज्ञाः। कूल-शब्दो घञन्त आद्युदात्तः। सूदः कप्रत्ययान्तो ऽन्तोदात्तः। स्थलं पचाद्यजन्तमन्तोदात्तम्। कर्षः ६-१-१५४ कर्षा... इत्यन्तोदात्तः।

६-२-१२९ अकर्मधारये = कर्मधारयभिन्ने, तत्पुरुषे (६-२-१२२) राज्यम् = राज्यशब्दरूपम्, उत्तरपदम्+ आद्युदात्तम् (६-२-११०टी.)। राज्यशब्दः ष्यञन्त आद्युदात्तः। **चेलराज्यादिस्वरात्**= ६-२-१२५ चेल... इति ६-२-१२९ अक... इतिस्वरात्, अव्ययस्वरः ६-२-२ तत्पु... इत्यव्ययस्वरः,। आदिशब्देन ६-२-१३० वर्ग्यादिस्वरपरिग्रह इति न्यासः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१३० वर्ग्यादयश्च ॥

वासुदेववर्ग्यः । वासुदेवपक्ष्यः ।
अकर्मधारय इत्यनुवृत्तेर्नेह- परमवर्ग्यः ।

६-२-१३१ पुत्रः पुंभ्यः ॥१३२

कौनटिपुत्रः । माहिषकपुत्रः ।
पुत्र इत्युक्तेर्नेह- कौनटिमातुलः ।
पुंभ्य इत्युक्तेर्नेह-गार्गीपुत्रः ।

६-२-१३२ नाचार्यराजर्त्विक्संयुक्त-ज्ञात्याख्येभ्यः ॥

आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः ।
राजपुत्रः । ईश्वरपुत्रः । महेन्द्रपुत्रः ।
ऋत्विक्पुत्रः ।
याजकपुत्रः । होतुः पुत्रः । संयुक्तपुत्रः ।
सम्बन्धिपुत्रः । श्यालपुत्रः । ज्ञातिपुत्रः ।
भ्रातुष्पुत्रः ।

६-२-१३३ चूर्णादीन्यप्राणिषष्ठ्याः ॥१३४

मुद्गचूर्णम् । अप्राणीत्युक्तेर्नेह- मत्स्यचूर्णम् ।
षष्ठ्या इत्युक्तेर्नेह-परमचूर्णम् ।

६-२-१३४ षट् च काण्डादीनि ॥

दर्भकाण्डम् । दर्भचीरम् । तिलपललम् ।
मुद्गसूपः । मूलकशाकम् । नदीकूलम् ।
षडित्युक्तेर्नेह-राजसूदः ।

६-२-१३५ कुण्डं वनम् ॥

दर्भकुण्डम् । वनमित्युक्तेर्नेह-मृत्कुण्डम् ।

६-२-१३६ प्रकृत्या भगालम् ॥१४१

कुम्भीभगालम् । कुम्भीकपालम् ।
कुम्भीनदालम् ।

६-२-१३० वर्ग्यादयः = वर्ग्यप्रभृतीनि, उत्तरपदानि+आद्युदात्तानि (६-२-११०) अकर्मधारये (६-२-१२९) तत्पुरुषे (६-२-१२२)। वर्ग्यादयो दिगादि (४-३-५४) यदन्ताः । तेषु द्व्यचस्ते ६-१-२०८ यतो... इत्याद्युदात्ताः । शेषाः ६-१-१८० तित्स्व... इत्यन्तस्वरिताः ।

६-२-१३१ पुत्र- पुंभ्यः = पुंवाचकशब्देभ्यः परम्, पुत्रः = पुत्रशब्दरूपम्, उत्तरपदम्+आद्युदात्तम् (६-२-११० टी.) तत्पुरुषे (६-२-१२२)। क्त्रप्रत्ययान्तः पुत्रशब्दो ऽन्तोदात्तः । कुनटस्यापत्यं कौनटिः । इञन्तत्वादाद्युदात्तः । कन्नन्तो माहिषकशब्दो ऽप्याद्युदात्त एव ।

६-२-१३२ नाचा- अत्र सूत्रे आख्याग्रहणात् स्वरूपाणां पर्यायाणां विशेषाणां च ग्रहणम् । आचार्याः = उपाध्यायाः, राजानः =ईश्वराः, ऋत्विजः = याजकाः, संयुक्ताः = स्त्रीसम्बन्धिनः श्यालादयः, ज्ञातयः= मातापितृसम्बन्धिनो बान्धवाः । आचा.... ख्येभ्यः = आचार्याद्याख्येभ्यः परः, पुत्रः (६-२-१३१) न= आद्युदात्तो न भवति । ६-२-१३१ पुत्रः... इति प्राप्तं प्रतिषिध्यते । तेन ६-१-२१८ समा... इत्यन्तोदात्तत्वम् । **होतुः पुत्रः** ६-३-२३ ऋतो... इति षष्ठ्या अलुक् । **भ्रातुष्पुत्रः** पूर्ववत् षष्ठ्या अलुक् । ८-३-४८ कस्का... इति षत्वम् ।

६-२-१३३ चूर्णा- अप्राणिषष्ठ्याः = अप्राणिवाचिनः षष्ठ्यन्तात् पराणि, चूर्णादीनि= चूर्णप्रभृतीनि, उत्तरपदानि+आद्युदात्तानि (६-२-११०) तत्पुरुषे (६-२-१२२)। चूर्णशब्दो निष्ठान्तो ऽन्तोदात्तः ।

६-२-१३४ षट् च- अप्राणिषष्ठ्याः (६-२-१३३) काण्डादीनि षट् (६-२-१२५+१२६+१२७+१२८ इत्यत्र पठितानि)= काण्ड-चीर-पलल-सूत्र-शाक-कूलरूपाणि, उत्तरपदानि+आद्युदात्तानि (६-२-११०) तत्पुरुषे (६-२-१२२)। काण्डं गर्हायाम् (६-२-१२५) इत्युक्तम् । अगर्हायामपि भवति- दर्भकाण्डम् । चीरमुपमानम् (६-२-१२६) इत्युक्तम् । अनुपमानमपि भवति- दर्भचीरम् । पललसूपशाकं मिश्रे (६-२-१२७) इत्युक्तम् । अमिश्रे ऽपि भवति- तिलपललम् । मुद्गसूपः । मूलकशाकम् । कूल... संज्ञायाम् । (६-२-१२८) इत्युक्तम् । असंज्ञायामपि भवति- नदीकूलम् । दर्भकाण्डादिषु सर्वेषु षष्ठीसमासः । **राजसूदः** सूदशब्दः षड्भ्यः परतः पठ्यते । तेनात्र ६-१-२१८ समा... इत्यन्तोदात्तत्वम् ।

६-२-१३५ कुण्डम् - वनम्= वनवाचि, कुण्डम्= कुण्डरूपम्, उत्तरपदम्+आद्युदात्तम् (६-२-११०) तत्पुरुषे (६-२-१२२)। अत्र न्यासः - यथा कुण्डं कस्य चिदुदकादेराश्रयस्तथा वनमपि । अतः कुण्डसादृश्येनात्र कुण्डशब्दो वने वर्तते । भवति हि सादृश्येन ताच्छब्द्यं यथा- अग्निर्माणवक इतीति ।

६-२-१३६ प्रकृ- भगालम्= भगालवाचि, उत्तरपदम् (६-२-११०) प्रकृत्या= प्रकृतिस्वरं भवति, तत्पुरुषे (६-२-१२२)। ङीषन्तकुम्भीशब्दोऽन्तोदात्तः । भगालादयः शब्दा ४२ लघावन्ते द्वयाश्चेति फिट् सूत्रेण मध्योदात्ताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१३७ शितेर्नित्याबह्वज् बहुव्रीहावभसत् ॥

शितिपादः । शितेरित्युक्तेर्नेह-दर्शनीयपादः
नित्यग्रहणान्नेह- शितिककुत् ।
अबह्वजित्युक्तेर्नेह- शितिललाटः ।
बहुव्रीहावित्युक्तेर्नेह- शितेः पादः = शितिपादः ।
अभसदित्युक्तेर्नेह- शितिभसत् ।

६-२-१३८ **गतिकारकोपपदात्** कृत् ॥१४५

प्रकारकः । पलाशशातनः । ईषत्करः ।

६-२-१३९ **उभे** वनस्पत्यादिषु **युगपत्** ॥१४०

वनस्पतिः । बृहस्पतिः ।

६-२-१४० देवताद्वन्द्वे च ॥

इन्द्राबृहस्पती । देवताग्रहणान्नेह-प्लक्षन्यग्रोधौ ।
द्वन्द्वग्रहणान्नेह-अग्निष्टोमः ।

६-२-१४१नोत्तरपदे ऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु ॥

इन्द्राग्नी । अपृथिवीत्याद्युक्तेर्नेह प्रतिषेधः-
द्यावापृथिव्यौ । सोमारुद्रौ । इन्द्रापूषाणौ ।
शुक्रामन्थिनौ ।

६-२-१३७ शितेः = शितिशब्दात् परम्, अभसत्= भसच्छब्दभिन्नम्, नित्याबह्वच्= नित्यं यदबह्वच्, तद्, उत्तरपदम् (६-२-११०) प्रकृत्या (६-२-१३६) बहुव्रीहौ= बहुव्रीहिसमासे । शितिशब्दः ३३ वर्णानां तणति... इति फिषाऽऽ द्युदात्तः । पादशब्दश्च ६-१-१९८ वृषा.... इतिसूत्रेणाद्युदात्तः । **शितिककुत्** ५-४-१४६ ककु... इत्यवस्थायां लोपः । अवस्थाया अन्यत्र लोपाभावेन शितिककुद इति बह्वजुत्तरं भवति । अतो न नित्याबह्वच् । ६-२-१ बहु... इत्यस्यापवादः ।

६-२-१३८ गति... पदात् = गतेः कारकात् उपपदाच्च परम्, कृत्= कृदन्तम्, उत्तरपदम् (६-२-११०) प्रकृत्या (६-२-१३६) तत्पुरुषे (६-२-१२२) । उदाहरणेषूत्तरपदेषु ६-१-१८८ लिति-इति प्रत्ययात्पूर्वमुदात्तम् । अत्र काशिका- गतिकारकोपपदादिति किम् ? देवदत्तस्य कारको देवदत्तकारकः । देवदत्तस्येति शेषलक्षणा षष्ठी । कृद्ग्रहणं विस्पष्टार्थम् । प्रपचतितराम् । प्रपचतितमाम्- इत्यत्र तरबाद्यन्तेन समासे कृते पश्चादाम् । तत्र सति शिष्टत्वादाम एव स्वरो भवतीत्येके । प्रपचतिदेश्यार्थं तु कृद्ग्रहणं दृश्यत एवेति ।

६-२-१३९ उभे-वनस्पत्यादिषु वनस्पतिप्रभृतिषु, उभे पूर्वोत्तरपदे, युगपत्= एकदैव प्रकृत्या (६-२-१३६) **वनस्पतिः** वनशब्दो २६ नब्विषय... इति फिषा ऽद्युदात्तः । पतिशब्दो ऽपि डतिप्रत्ययान्तः ३-१-३ आद्यु... इत्याद्युदात्तः । ६-१-१५२ पार... इति सुँट् । **बृहस्पतिः** बृहच्छब्दो ऽन्तोदात्तः । ६-१-१५२ पार... सूत्रस्थ-तद्बृ... वार्तिकेन सुँट् तलोपश्च ।

६-२-१४० देवताद्वन्द्वे= देवतावाचिनां द्वन्द्वसमासे, उभे (६-२-१३९) प्रकृत्या (६-२-१३६) । **इन्द्राबृहस्पती** इन्द्रशब्दो रन् प्रत्ययान्त आद्युदात्तः । ६-३-२६ देव... इति पूर्वपदस्यानँङ् । बृहस्पतिशब्दश्च ६-२-१३९ उभे इति उभयोदात्तः । अतोऽत्र त्रय उदात्ताः । प्रत्युदाहरणयोः ६-१-२१८ समा... इत्यन्तोदात्तत्वम् ।

६-२-१४१ नोत्त- अपृथि... न्थिषु= पृथिवी रुद्र- पूष (न्)- मन्थि (न्)- भिन्ने, अनुदात्तादौ= अनुदात्तादिके, उत्तरपदे, न = देवताद्वन्द्वे च (६-२-१४०) इति सूत्रं न प्रवर्तते । **इन्द्राग्नी** इन्द्रशब्दो रन् प्रत्ययान्त आद्युदात्तः । अग्निशब्दो निप्रत्ययान्तः प्रत्ययस्वरेणान्तोदात्तः । द्यावापृथिव्यौ द्यावाशब्द आद्युदात्तो निपातितः । पृथिवीशब्दो ङीषन्तो ऽन्तोदात्तः । **सोमारुद्रौ** मन्प्रत्ययान्तः सोमशब्द आद्युदात्तः रक्प्रत्ययान्तो रुद्रशब्दो ऽन्तोदात्तः । **इन्द्रापूषाणौ** पूषा ऽन्तोदात्तो निपात्यते । **शुक्रामन्थिनौ** । रन्प्रत्ययान्तः शुक्रशब्द आद्युदात्तः । इनिँप्रत्ययान्तो "मन्थिन्" इत्यन्तोदात्तः । प्रत्युदाहरणेषु ६-२-१४० देव... सूत्रं प्रवर्तत एव । उदाहरण-प्रत्युदाहरणेषु ६-३-२६ देव... इति पूर्वपदस्यानँङ् । द्यावापृथिव्यौ इत्यत्र तु ६-३-२९ दिवो... इति द्यावादेशः । अत्र काशिका-उत्तरपदग्रणम् अनुदात्तादौ इत्युत्तरपदविशेषणं यथा स्याद् द्वन्द्वविशेषणं माभूदिति । तेन "चन्द्रासूर्यौ" इत्यत्र चन्द्रशब्दस्यान्तोदात्तत्वेन अनुदात्तादित्वाद् द्वन्द्वस्या ऽनुदात्तादित्वे ऽपि उत्तरपदस्या ऽनुदात्तादित्वाभावान्न प्रतिषेधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१४२ अन्तः ॥१९७

६-२-१४३ थाथघञ्क्ताजबित्रकाणाम् ॥

अवभृथः । आवसथः । प्रभेदः । दूरादागतः ।
प्रक्षयः । प्रलवः । प्रलवित्रम् । गोवृषः ।
गतिकारकोपपदादित्यनुवृत्तेर्नेह- सुस्तुतम् ।

६-२-१४४ सूपमानात् क्तः ॥१४८

सुकृतम् । सिंहविनर्दितम् ।
गतिकारकोपपदादित्यनुवृत्तेर्नेह-सुस्तुतं भवता ।

६-२-१४५ संज्ञायामनाचितादीनाम् ॥१४७

उपहूतः शाकल्यः । परिजग्धः कौण्डिन्यः ।
धनुष्खाता नदी । हस्तमृदिता भूमिः ।
अनाचितादीनामित्युक्तेर्नेह-आचितम् । इत्यादि ।
(संहिता ऽ गवि) ग.सू.

६-२-१४६ प्रवृद्धादीनां च ॥

प्रवृद्धं यानम् ।

६-२-१४७ कारकाद्दत्तश्रुतयोरेवाशिषि ॥१५०

देवा एनं देयासुर्देवदत्तः । विष्णुश्रुतः ।
दत्तश्रुतयोरित्युक्तेर्नेह- देवपालितः ।

६-२-१४२ अन्तः- उत्तरपदस्य (६-२-११०) अन्तः, उदात्तः (६-२-६४) । "अन्तः उदात्तः" इत्यनयोरग्रिमसूत्रेषु क्वचित् पदान्तरेण सामानाधिकरण्याय बहुव्रीहिःस्वीकार्यः । अन्तोदात्तमित्यादि । क्वचिच्च विभक्तिवचनव्यत्ययो यथायोग्यम् ।

६-२-१४३ थाथ- गतिकारकोपपदात् (६-२-१३८) परेषाम्, थाथ... काणाम् = थ अथ घञ् क्त अच् अप् इत्र क इत्यन्तानाम्, उत्तरपदानाम् (६-२-११०) अन्तः (६-२-१४२) उदात्तः (६-२-६४)। अवभृथ इत्यादिषु ६-२-१३८ गति... इति कृदुत्तरपदप्रकृतिस्वरे प्राप्ते उत्तरपदान्तोदात्तार्थं वचनम् । अवभृथ इति क्थन् प्रत्ययान्तो नित्त्वादाद्युदात्तः । आवसथ इति अथन् प्रत्ययान्तः प्राग्वत्। भेद इति घञन्तः ञित्त्वादाद्युदात्तः ।

दूरादागतः आगत इत्यत्र कर्मणि क्त : । गतिसमासे ६-२-४९ गति... इति पूर्वपदप्रकृतिस्वरेण आगत इत्याद्युदात्तः । अथ दूरादित्यस्य २-१-३९ स्तोका... इति समासे ६-३-२ पञ्च... इति पञ्चम्या अलुक् । **प्रक्षयः** क्षयशब्दः ६-१-१९६ क्षयो... इत्याद्युदात्तः । लवशब्दो ऽप्प्रत्ययान्तो ऽनुदात्तान्तः । लवित्रशब्द इत्र प्रत्ययान्तः प्रत्ययस्वरेण मध्योदात्तः । **गोवृषः** मूलविभुजादित्वात् कः । ६-१-१९८ वृषा.. इति वृषशब्द आद्युदात्तः । **सुस्तुतम्** १-४-९३ सुः पू... इति कर्मप्रवचनीयसंज्ञया गतिसंज्ञाया बाधः । तेना ऽत्र ६-२-२ तत्पु... इत्यव्ययपूर्वपदप्रकृतिस्वरः ।

६-२-१४४ सूप - गतिकारकोपपदरूपात् (६-२-१३८) सूपमानात् = सु इत्येतस्मादुपमानाच्च परम्, क्तः = क्तान्तम्, उत्तरपदम्+अन्तोदात्तम् (६-२-१४२ टी.) । **सुकृतम्** ६-२-१४३ थाथ... इति बाधित्वा ६-२-४९ गति... इति प्राप्ते वचनम्। **सिंहविनर्दितम्** सिंहेनेव विनर्दितमिति विग्रहः । अत्र ६-२-४८ तृती... इति प्राप्ते ऽन्तोदात्तत्वमनेन ।

६-२-१४५ संज्ञा- गतिकारकोपपदात् (६-२-१३८) क्तः (६-२-१४४) उत्तरपदम्+अन्तोदात्तम् (६-२-१४२ टी.) संज्ञायाम्=संज्ञायां गम्यमानायाम्, अनाचितादीनाम्= आचितादीन् वर्जयित्वा । **परिजग्धः** ६-२-४९ गति ... इति प्राप्ते । **धनुष्खाता हस्तमृदिता** ६-२-४८ तृती... इति प्राप्ते । **संहिता**-संहिताशब्दो यदा गोरन्यस्य संज्ञा तदान्तोदात्तो न भवति । यदा तु गोः संज्ञा तदान्तोदात्त एव ।

६-२-१४६ प्रवृद्धादीनाम् = प्रवृद्धप्रभृतीनाम्, - क्तः (६-२-१४४) उत्तरपदम्+अन्तोदात्तम् (६-२-१४२ टी.) । असंज्ञार्थो ऽयमारम्भः । प्रवृद्धादिराकृतिगणः ।

६-२-१४७ कार- संज्ञायाम् (६-२-१४५) आशिषि=आशिषि गम्यमानायाम्, कार....तयोः+एव=कारकादुत्तरयोर्दत्तश्रुतयोरेव, अन्तः (६-२-१४२) उदात्तः (६-२-६४)। गतिकारकोपपदादित्यनुवर्तमाने कारकादित्युक्तिर्गत्युपपदाऽसम्बन्धार्था । तेन संभूतो रामायण इत्यत्र ६-२-१४५ संज्ञा... इत्यन्तोदात्तत्वं भवत्येव। **देवदत्तः** ३-३-१४७ क्तिच्क्तौ.... इति क्तः । **देवपालितः** एतस्मान्नियमादत्र ६-२-१४५ संज्ञा... इत्यन्तोदात्तत्वं न भवति, किन्तु ६-२-४८ तृती... इति प्रवर्तते । सूत्रे- यत एवकारस्ततो ऽन्यत्रावधारणम् । अतः अकारकादपि दत्तश्रुतयोरन्त उदात्तो भवति । संश्रुतः । विश्रुतः । आशिषीत्युक्तेर्नेह नियमः- देवैः खाता देवखाता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१४८ इत्थं भूतेन कृतमिति च ॥
सुप्तप्रलपितम् । प्रमत्तगीतम् ।

६-२-१४९ अनो भावकर्मवचनः ॥
पयःपानं सुखम् । राजभोजनाः शालयः । अन इत्युक्तेर्नेह-हस्तहार्यम् । भावकर्मवचन इत्युक्तेर्नेह-दन्तधावनम् ।
कारकादित्यनुवृत्तेर्नेह-निदर्शनम् ।

६-२-१५० मन्-क्तिन्-व्याख्यान-शयनासन-स्थान-याजकादि-क्रीताः ॥
रथवर्त्म । पाणिनिकृतिः । छन्दोव्याख्यानम् । राजशयनम् । राजासनम् । गोस्थानम् । ब्राह्मणयाजकः । अश्वक्रीतः ।
कारकादित्यनुवृत्तेर्नेह-प्रकृतिः ।

६-२-१५१ सप्तम्याः पुण्यम् ॥
अध्ययने पुण्यम् = अध्ययनपुण्यम् । सप्तम्या इत्युक्तेर्नेह-वेदेन पुण्यम् = वेदपुण्यम् ।

६-२-१५२ ऊनार्थकलहं तृतीयायाः ॥१५३
माषोनम् । माषविकलम् । वाक्कलहः ।

कारकाद्दत्तश्रुतयोराशिष्येवेत्ययमत्र नियम इष्यते । तेनाहतो नदति देवदत्त इत्यत्र न भवति । अर्थात् ६-२-४८ तृती... इत्येव प्रवर्तते । अत्र देवदत्त इति कस्यचित्, शङ्खस्य अर्जुन शङ्खस्य नाम । देवदत्तं धनञ्जय इति गीतोक्तेः ।

६-२-१४८ इत्थं भूतेन कृतमिति= इत्थं भूतेन कृतमित्यर्थे यः समासस्तत्र, क्तः (६-२-१४४) उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) । ६-२-४८ तृती.... इत्यस्यापवादः ।

६-२-१४९ अनो - कारकात् (६-२-१४७) भावकर्मवचनः = भाववचनः कर्मवचनश्च, अनः= योऽनप्रत्ययस्तदन्तम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) । ६-२-१३८ गति... इत्यस्यापवादः । **पयःपानम्** ३-३-११६ कर्म.... इति भावे ल्युँट् । तेन पानशब्दो लित्स्वरेणाद्युदात्तः । **राजभोजनाः** ३-३-११३ कृत्य... इति कर्मणि ल्युँट् । प्रत्युदाहरणेषु सर्वत्र ६-२-१३८ गति... इत्युत्तरपदप्रकृतिस्वरः ।

६-२-१५० मनक्ति- कारकात् (६-२-१४७) मन् .... क्रीताः= मन्नन्तं क्तिन्नन्तं व्याख्यान शयन आसन स्थान इत्येतानि याजकादीनि क्रीत इत्येतच्च, उत्तरपदानि (६-२-११०) अन्तोदात्तानि (६-२-१४२) । ६-२-१३८ गति.... इत्यस्यापवादः । क्रीतशब्दे तु ६-२-४८ तृती... इत्यस्यापवादः । ६-२-१४९ अनो... इत्येव सिद्धे व्याख्यानादीनां ग्रहणमभावकर्मार्थम् । **प्रकृतिः** ६-२-५० तादौ.... इति पूर्वपदप्रकृतिस्वरः ।

६-२-१५१ सप्तम्याः = सप्तम्यन्तात् परम्, पुण्यम्= पुण्यशब्दरूपम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) । **अध्ययनपुण्यम्** ६-२-२ तत्पु.... इति प्राप्ते । यदि तु पुण्यशब्द औणादिको ऽपि व्युत्पन्नस्तदा यत्प्रत्ययान्तत्वेन ६-१-२०८ यतो... इत्याद्युदात्तस्तदा ६-२-१३८ गति ... इत्युत्तरपदाद्युदात्तः प्राप्तो ऽन्तोदात्तो विधीयते । अव्युत्पत्तिपक्षे ऽपि २६ नब्विषयस्येत्याद्युदात्त एव । तदा ६-२-२ तत्पु... इत्यस्य प्राप्तिरिति विशेषः । **वेदपुण्यम्** अव्युत्पत्तिपक्षे ६-२-२ तत्पु... इति पूर्वपदप्रकृतिस्वरः । व्युत्पत्तिपक्षे ६-२-१३८ गति... इति पुण्यशब्दस्याद्युदात्तत्वम् । ल्युँडन्तो ऽध्ययनशब्दः ६-२-१३८ गति... इति मध्योदात्तः । वेदशब्दो घञन्त आद्युदात्तः ।

६-२-१५२ ऊना -तृतीयायाः = तृतीयान्तात् परम्, ऊनार्थकलहम्= ऊनार्थकं कलहशब्दरूपं च, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) । **माषोनम्** माषशब्दो घञन्तो ञित्वादाद्युदात्तः । नक्प्रत्ययान्त ऊनशब्दो ऽन्तोदात्तः । **माषविकलम्** ६-२-१ बहु.... इति पूर्वपदप्रकृतिस्वरेण विकलशब्द आद्युदात्तः । **वाक्कलहः** कलं हन्तीति कलहः । ३-२-१०१ अन्ये.. इति डप्रत्यया ऽन्तोदात्तः । सर्वत्रोदाहरणेषु २-१-३१ पूर्व ...इति समासः । ६-२-२ तत्पु... इति पूर्वपदप्रकृति- स्वरप्राप्तिः । अत्र काशिका- अत्र केचिदर्थ इति स्वरूपग्रहणमिच्छन्ति । धान्येनार्थो धान्यार्थः । ऊनशब्देनैव त्वर्थनिर्देशार्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वादेव तृतीयासमासपरिग्रहे सिद्धे तृतीयाग्रहणं विस्पष्टार्थमिति । अर्थ इति स्वरूपस्य ग्रहणे ऽपि, ऊनशब्दस्त्वर्थपर एव न तु स्वरूपपर इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१५३ मिश्रं चानुपसर्गमसन्धौ ॥

गुडमिश्राः । मिश्रमित्युक्तेर्नेह-गुडधानाः । अनुपसर्गमित्युक्तेर्नेह-गुडसंमिश्राः । असन्धावित्युक्तेर्नेह-ब्राह्मणमिश्रो राजा ।

६-२-१५४ नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः॥१६०, १५६

कर्णवेष्टकाभ्यां सम्पादि= कार्णवेष्टकिकम् । न कार्णवेष्टकिकम् = अकार्णवेष्टकिकम् । छेदमर्हति= छैदिकः । नच्छैदिको ऽच्छैदिकः ॥ वत्सेभ्यो हितो वत्सीयः । न वत्सीयः = अवत्सीयः । सन्तापाय प्रभवति= सान्तापिकः । न सान्तापिकः = असान्तापिकः । नञ इत्युक्तेर्नेह- गर्दभरथमर्हति = गार्दभरथिकः । विशिष्टो गार्दभरथिकः = विगार्दभरथिकः । गुणप्रतिषेधे इति नञो विशेषणान्नेह- गार्दभरथिकादन्यो ऽगार्दभरथिकः । सम्पाद्याद्युक्तेर्नेह- पाणिनीयमधीते पाणिनीयः । न पाणिनीयः = अपाणिनीयः । तद्धिता इत्युक्तेर्नेह-वोढुमर्हति= वोढा । न वोढा= अवोढा ।

६-२-१५५ ययतोश्चा ऽतदर्थे ॥

पाशानां समूहः पाश्या । न पाश्या = अपाश्या । अदन्त्यम् । अतदर्थे इत्युक्तेर्नेह-पादार्थमुदकं पाद्यम् । न पाद्यम्= अपाद्यम् । तद्धिताः (६-२-१५४) इत्यनुवृत्तेर्नेह- अदेयम् । गुणप्रतिषेधे + नञः (६-२-१५४) इत्यनुवृत्तेर्नेह-दन्त्यादन्यत्= अदन्त्यम् । निरनुबन्धकैकानुबन्धकयोर्ययतोर्ग्रहणान्नेह-न वामदेव्यम्= अवामदेव्यम् ।

६-२-१५३ मिश्रं - तृतीयायाः (६-२-१५२) अनुपसर्गम्= उपसर्गरहितम्, मिश्रम्= मिश्रशब्दरूपम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) असन्धौ = सन्धावगम्यमाने । गुडशब्द इगुपधकप्रत्ययान्तो ऽन्तोदात्तः । मिश्रशब्दश्च रक् प्रत्ययान्तो ऽन्तोदात्तः । अत्र सूत्रे ऽनुपसर्गग्रहणं ज्ञापकम्- अन्यत्र मिश्रग्रहणे सोपसर्गग्रहणस्य । तेन २-१-३१ पूर्वसदृश.... मिश्र... इत्यनेन सोपसर्गेणापि मिश्रशब्देन समासो भवति - गुडसंमिश्राः । **ब्राह्मणमिश्रो राजा** ब्राह्मणैः सह संहितः= ऐकार्थ्यमापन्नः । अत्र काशिका-सन्धिरिति हि पणबन्धेनैकार्थ्यमुच्यते । केचित् पुनराहुः- गृह्यमाणविशेषा प्रत्यासत्तिः = सन्धिरिति । अत्र राज्ञो ब्राह्मणैः सह देशप्रत्यासत्तावपि सत्यां मूर्तिविभागरूपभेदो गृह्यत इति ब्राह्मणमिश्रो राजेति प्रत्युदाह्रियते । उदाहरणेष्वविभागापत्तिरेव- गुडमिश्रा इति । इति ।

६-२-१५४ नञो- गुणप्रतिषेधे= गुणप्रतिषेधे वर्तमानात्, नञः= नञः पराणि, सम्पाद्यर्हहितालमर्थाः = सम्पादि +अर्ह+हित+अलम् इत्यर्थकतद्धितान्तानि (६-२-१४२) उत्तरपदानि (६-२-११०) अन्तोदात्तानि । सूत्रे सम्पादि-गुणोत्कर्षः = सम्पत्तिः । ३-३-१७० आवश्यकाधमर्ण्ययोर्णिनिः इत्यावश्यके णिनिः । कर्णवेष्टकाभ्यां सम्पद्यते= शोभते, सम्पादि = शोभनम् । कार्णवेष्टकिकम् । ५-१-९८ सम्पादिनि इति ठञ् । **छैदिकः** ५-१-६३ छेदादिभ्यो .... इति ठक् । **वत्सीयः** ५-१-५ तस्मै... इतिच्छ । **विगार्दभरथिकः अगार्दभरथिकः** अत्र काशिका-- गुण इति तद्धितार्थप्रवृत्तिनिमित्तं सम्पादित्वाद्युच्यते । तत्प्रतिषेधो यत्रोच्यते समासे तत्रायं विधिः । कर्णवेष्टकाभ्यां न सम्पादि मुखमिति । इति । **वोढा**- ३-३-१६९ अर्हे... इति तृच् । प्रत्युदाहरणेषु ६-२-२ तत्पु... इत्यव्ययपूर्वपदप्रकृतिस्वरः । आ ६-२-१६० विभा... सूत्रादेवं ज्ञेयम् । ६-२-२ तत्पु... सूत्राऽपवादः ।

६-२-१५५ यय- गुणप्रतिषेधे+ नञः (६-२-१५४) अतदर्थे+ययतोः +तद्धितयोः (६-२-१५४) = अतदर्थे विहितौ यौ ययतौ तद्धितौ तदन्तम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) । पाश्याशब्दः ४-२-४९ पाशा... इति यप्रत्ययान्तः प्रत्ययस्वरेणान्तोदात्तः । अदन्त्यम् ४-३-५५ शरी.... इति यत् । ६-१-२०८ यतो... इत्याद्युदात्तत्वम् । **अदेयम्** ३-१-९७ अचो... इति यत् । ६-४-६५ ईद्... इतीत्वम् । गुणः । **अवामदेव्यम्** ४-२-९ वाम... इति डयडयतौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१५६ अच्कावशक्तौ ॥१५७
अपचः । अविक्षिपः । अविलिखः ।
अशक्तावित्युर्नेह-
अपचो दीक्षितः । गुणप्रतिषेधे नञः (६-२-१५४) इत्यनुवृत्तेर्नेह- पचादन्यः = अपचः ।

६-२-१५७ आक्रोशे च ॥१५८
अपचो जाल्मः । अविक्षिपः ।

६-२-१५८ संज्ञायाम् ॥
अदेवदत्तः ।

६-२-१५९ कृत्योकेष्णुच्चार्वादयश्च ॥
अकर्तव्यम् । अनागामुकः ।
अनलङ्करिष्णुः । अनाढ्यम्भविष्णुः । अचारुः ।
(वर्तमान-वर्धमान-त्वरमाण-ध्रियमाण-क्रियमाण-रोचमान-शोभमानाः संज्ञायाम्)
अवर्तमानः ।
(विकारसदृशे व्यस्तसमस्ते)
अविकारः । असदृशः । अविकारसदृशः ।
(राजाह्नोश्छन्दसि)
अराजा । अनहः । भाषायां नञ्स्वर एव भवति ।

६-२-१६० विभाषा तृन्नन्नतीक्ष्णशुचिषु ॥
अकर्ता । अनन्नम् । अतीक्ष्णम् । अशुचिः ।

६-२-१६१ बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ॥ १७६
इदम्प्रथमः । इदन्द्वितीयः । एतत्प्रथमः ।
एतद्द्वितीयः । तत्प्रथमः । तद्द्वितीयः ।
बहुव्रीहावित्युक्तेर्नेह- अनेन प्रथमः = इदम्प्रथमः ।
इदमेतत्तद्भ्य इत्युक्तेर्नेह-यत्प्रथमः ।
प्रथमपूरणयोरित्युक्तेर्नेह-तानि बहून्यस्य तद्बहु । क्रियागणन इत्युक्तेर्नेह-अयं प्रथम एषां त इदम्प्रथमाः । गणन इत्युक्तेर्नेह- अयं प्रथम एषामिदम्प्रथमाः ।
उत्तरपदस्य कार्यित्वात् कप्प्रत्यये सति कपः पूर्वमन्तोदात्तम् । इदम्प्रथमकः ।

६-२-१५६ अच्का- गुणप्रतिषेधे +नञः (६-२-१५४) अच्कौ= अच् क इत्यन्तम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) अशक्तौ= असामर्थ्ये गम्यमाने । **अपचः** ३-१-१३४ नन्दि... इति पचाद्यच् । पक्तुमसमर्थ इत्यर्थः । अविक्षिपः ३-१-१३५ इगु... इति कः । अत्र हरदत्तः - वक्ष्यमाणैः कृत्योकेष्णु (६-२-१५९) भिः साहचर्यादच्कयोः कृतोरिदं ग्रहणम् । तेन कृद्ग्रहणपरिभाषया विक्षिपशब्दस्य कान्तत्वम् । इति । **अपचो दीक्षितः** शास्त्रप्रतिषिद्धत्वाद् दीक्षितो न पचति, न त्वशक्त्या ।
६-२-१५७ आक्रो- नञः (६-२-१५४) अच्कौ (६-२-१५६) उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२ टी.) आक्रोशे=आक्रोशे गम्यमाने । **अपचो जाल्मः** पक्तुं शक्तोऽप्येवमाक्रुश्यते ।
६-२-१५८ संज्ञा- नञः (६-२-१५४) उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२ टी.). आक्रोशे (६-२-१५७) संज्ञयाम्=संज्ञायां गम्यमानायाम् । देवदत्तशब्दः फिट्स्वरेणान्तोदात्तः ।
६-२-१५९ कृत्यो- नञः (६-२-१५४) कृत्यो...दयः= कृत्यसंज्ञक उक इष्णुच् इत्यन्तानि चारुप्रभृतीनि च, उत्तरपदानि (६-२-११०) अन्तोदात्तानि (६-२-१४२ टी.)। **अनाढ्यम्भविष्णुः** इष्णुज्ग्रहणे द्व्यनुबन्धकस्य खिष्णुचोऽपि ग्रहणम् । इकारादेर्विधानसामर्थ्यात् । अन्यथा खस्नुच् इति विधानेऽपि खकारेऽनुबन्धे गते वलाद्यार्धधातुकत्वेन इडागमे षत्वेऽपि सिद्धे इकारादिखिष्णुज्विधानं व्यर्थं स्यात् । तव्यत्प्रत्ययान्तः कर्तव्यशब्दः ६-१-१८० तित्स्व...इत्यन्तस्वरितः । तव्यप्रत्ययान्तस्तु ३-१-३ आद्यु...इति मध्योदात्तः । उकञ् प्रत्ययान्तो गामुकशब्दो ञित्त्वादाद्युदात्तः । अत आगामुकशब्दः ६-२-१३८ गति...इतिकृत्स्वरेण मध्योदात्तः । अलङ्करिष्णुशब्द इष्णुच्प्रत्ययान्तः । अतः ६-१-१५८ चितः, इत्यन्तोदात्तः । एवं खिष्णुच्यपि ।
६-२-१६० विभा- नञः (६-२-१५४) तृन्न... चिषु= तृन्नन्ते अन्न-तीक्ष्ण-शुचिषु च उत्तरेषु, उत्तरपदस्य (६-२-११०) अन्तः (६-२-१४२) विभाषा=वा, उदात्तः (६-२-६४)। पक्षे ६-२-२ तत्पु... इत्यव्ययस्वर एव भवति। **अकर्ता** कर्तृशब्दो नित्स्वरेणाद्युदात्तः। **अनन्नम्** अन्नशब्दो ऽपि २६ नब्विषयस्येति फिट्सूत्रेणाद्युदात्तः। क्स्नप्रत्ययान्तस्तीक्ष्णशब्दः प्रत्ययस्वरेणान्तोदात्तः। इन्प्रत्ययान्तः शुचिशब्दो नित्स्वरेणाद्युदात्तः ।
६-२-१६१ बहु- इदमेतत्तद्भ्यः= इदम् एतद् तद् इत्येतेभ्यः परयोः, क्रियागणने= क्रियागणने ऽर्थे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१६२ **संख्यायाः स्तनः** ॥१६३

द्विस्तना। संख्याया इत्युक्तेर्नेह-दर्शनीयस्तना। स्तन इत्युक्तेर्नेह-द्विशिराः।

६-२-१६३ विभाषा छन्दसि ॥

द्विस्तनां कुर्याद् वामदेवः।
चतुः स्तनां करोति पशूनां दोहनाय।

६-२-१६४ संज्ञायां मित्राजिनयोः ॥

देवमित्रः। कृष्णाजिनः।
(ऋषिप्रतिषेधो मित्रे)
विश्वामित्र ऋषिः।

६-२-१६५ व्यवायिनो ऽन्तरम् ॥

वस्त्रमन्तरं यस्य स वस्त्रान्तरः। व्यवायिन इत्युक्तेर्नेह-आत्मा= स्वभावः, अन्तरः= अन्यो यस्य स आत्मान्तरः।

६-२-१६६ **मुखं स्वाङ्गम्** ॥१६८

गौरमुखः। स्वाङ्गमित्युक्तेर्नेह-दीर्घमुखा शाला।

६-२-१६७ नाव्ययदिक्शब्दगोमहत् स्थूलमुष्टिपृथुवत्सेभ्यः ॥

उच्चैर्मुखः। प्राङ्मुखः। गोमुखः।
महामुखः। स्थूलमुखः। मुष्टिमुखः। पृथुमुखः।
वत्समुखः।

वर्तमानयोः, प्रथमपूरणयोः = प्रथमशब्द-पूरणप्रत्ययान्तशब्दयोः उत्तरपदयोः, उत्तरपदस्य (६-२-११०) अन्तः (६-२-१४२) उदात्तः (६-२-६४) बहुव्रीहौ= बहुव्रीहिसमासे। उदाहरणेषु-इदं (गमनं भोजनं वा) प्रथममस्येत्यादि विग्रहः। प्रत्युदाहरणेषु- **इदम्प्रथमः** तृतीयेति योगविभागात् समासः। ६-२-२ तत्पु... इति पूर्वपदप्रकृतिस्वरो ऽत्र। **यत्प्रथमः** ६-२-१ बहु... इतिपूर्वपदप्रकृतिस्वरोऽत्र। एवमुत्तरेष्वप्यस्मिन् बहुव्रीह्यधिकारे प्रत्युदाहरणेषु बोध्यम्। **इदम्प्रथमाः** द्रव्यगणनमत्र। **इदम्प्रथमाः** (द्वितीये) इदम्प्रधाना इत्यर्थः। अत्र प्रधानवाची प्रथमशब्दो नत्वेकसंख्यावाचीति भावः। **कपः पूर्वमन्तोदात्तम्** अर्थात् उत्तरपदशब्दः समासचरमावयवे रूढः। कप्प्रत्ययश्च समासस्यान्तावयवो नतूत्तरपदमात्रस्येति भावः। इदमेतत्तदो ऽन्तोदात्ताः। अमच्प्रत्ययान्तः प्रथमशब्दश्चित्स्वेरणान्तोदात्तः। द्वितीयशब्दः प्रत्ययस्वरेण मध्योदात्तः।

६-२-१६२ **संख्यायाः** = संख्यावाचिनः परम्, स्तनः= स्तनशब्दस्वरूपम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) बहुव्रीहौ (६-२-१६१)। द्विशब्दः १ फिषः इत्यन्तोदात्तः। स्तनशब्दो घञन्त आद्युदात्त इति न्यासः। **दर्शनीयस्तना** दर्शनीयशब्दः ६-१-२१२ उपो... इति रित्स्वरेण मध्योदात्तः। बहुव्रीहौ ६-१-१ बहु... इति पूर्वपदप्रकृतिस्वरः। **द्विशिरा** शिरश्शब्दो २६ नब्विषयस्येति फिट् सूत्रेणाद्युदात्तः। पूर्ववत् पूर्वपदप्रकृतिस्वरः।

६-२-१६३ **विभाषा**= वा प्राग्वत्, छन्दसि= वेदे। अत्र पदमञ्जरी- द्विस्तना इत्यन्तोदात्तम्। चतुःस्तना इत्याद्युदात्तम् इति। उरन्प्रत्ययान्तश्चतुः शब्दो नित्त्वादाद्युदात्तः।

६-२-१६४ **संज्ञा**- मित्राजिनयोः = मित्र अजिन इत्येतयोरुत्तरपदयोः, उत्तरपदस्य (६-२-११०) अन्तः (६-२-१४२) उदात्तः (६-२-६४) बहुव्रीहौ (६-२-१६१) संज्ञायाम्= संज्ञायां गम्यमानायाम्। मित्रा ऽजिनकृष्णशब्दा अन्तोदात्ताः। कृष्णशब्दः कृष्णमृगविकारवाची प्रकृतिविकारयोर्भेदस्या ऽविवक्षणात्। **विश्वामित्रः** अत्र परत्वात् प्रकृतसूत्रप्राप्तस्यान्तोदात्तत्वस्य प्रतिषेधात्, ६-२-१०६ बहु... इति पूर्वपदान्तोदात्तत्वम्।

६-२-१६५ **व्यवायिनः**= व्यवधानवाचिन : परम्, अन्तरम्= अन्तरशब्दरूपम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) बहुव्रीहौ (६-२-१६१)। **वस्त्रान्तरः** अन्तरम्= व्यवधायकम्।

६-२-१६६ **मुखं**- स्वाङ्गम् = स्वाङ्गवाचि, मुखम्= मुखरूपम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) बहुव्रीहौ (६-२-१६१)। गौरशब्दो ऽन्तोदात्तः। मुखशब्द आद्युदात्तः। अत्र काशिका- स्वाङ्गमद्रवादिलक्षणमिह गृह्यते, इति।

६-२-१६७ **नाऽव्य** - अव्यय... वत्सेभ्यः = अव्यय-दिग्वाचि-गो-महत्-स्थूल-मुष्टि-पृथु-वत्स इत्येतेभ्यः शब्देभ्यः परम्, स्वाङ्गम्+मुखम् (६-२-१६६) न = अन्तोदत्तं न भवति, बहुव्रीहौ (६-२-१६१)। अत्र सर्वत्रोदाहरणेषु यथायोगं पूर्वपदप्रकृतिस्वरः। अत्र काशिका-गोमुष्टिवत्सपूर्वस्योपमानलक्षणो (६-२-१६८ निष्ठो) विकल्पः पूर्वविप्रतिषेधेन बाध्यत इति। उच्चैः शब्दोऽन्तोदात्तः। प्राक्शब्दः ६-२-५२ अनि... इति पूर्वपदप्रकृत्या ऽऽद्युदात्तः। गोमहत्स्थूलमुष्टिपृथुवत्सशब्दा अन्तोदात्ताः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१६८ निष्ठोपमानादन्यतरस्याम् ॥
प्रक्षालितमुखः । सिंहमुखः ।
६-२-१६९ जातिकालसुखादिभ्यो ऽनाच्छादनात् क्तो ऽकृतमितप्रतिपन्नाः ॥१७०
सारङ्गजग्धः । मासजातः । सुखजातः ।
जातीत्याद्युक्तेर्नेह - पुत्रजातः ।
अनाच्छादनादित्युक्तेर्नेह- वस्त्रच्छन्नः ।
अकृतेत्याद्युक्तेर्नेह-कुण्डकृतः ।
कुण्डमितः । कुण्डप्रतिपन्नः ।
६-२-१७० वा जाते ॥
दन्तजातः । मासजातः । सुखजातः ।
६-२-१७१ नञ्सुभ्याम् ॥१७३
अयवो देशः । सुयवः ।
६-२-१७२ कपि पूर्वम् ॥१७३
अब्रह्मबन्धूकः । सुकुमारीकः ।
६-२-१७३ ह्रस्वान्ते ऽन्त्यात् पूर्वम् ॥
अयवको देशः । सुयवकः ।

६-२-१६८ निष्ठोपमानात्= निष्ठान्तादुपमानवाचिनश्च परम्, स्वाङ्गम्+ मुखम् (६-२-१६६) उत्तरपदम् (६-२-११०) अन्यतरस्याम्= वा अन्तोदात्तम् (६-२-१४२) बहुव्रीहौ (६-२-१६१) । **प्रक्षालितमुखः** अन्तोदात्तत्वा ऽभावपक्षे ६-२-१०९ निष्ठो... इति पूर्वपदान्तोदात्तत्वम् । तदभावे च ६-२-४९ गति... इति प्रक्षालितशब्दस्य पूर्वपदप्रकृतिस्वरविधानात् प्रक्षालितमुख इति बह्व्रीहिसमासे ६-२-१ बहु... इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वम् । इत्थं स्वरभेदेन त्रीणि रूपाणि । सिंहशब्दः पचाद्यजन्तोऽन्तोदात्तः ।

६-२-१६९ जाति- अनाच्छादनात् = आच्छादनभिन्नेभ्यः, जातिकालसुखादिभ्यः= जातिवाचिकालवाचिभ्यः सुखादिभ्यश्च परम्, अकृतमितप्रतिपन्नाः = कृत-मित-प्रतिपन्नभिन्नम्, क्तः= क्तप्रत्ययान्तम्, उत्तरपदम् (६-२-११०) अन्तोदत्तम् (६-२-१४२) बहुव्रीहौ (६-२-१६१) । सारङ्गशब्दो ऽन्तोदात्तः । घञन्तो मासशब्द आद्युदात्तः । सुखशब्दो ऽन्तोदात्तः । उदाहरणेषु २-२-३६ निष्ठा - सूत्रस्थ- जाति... वार्तिकेन निष्ठान्तस्य परप्रयोगः । **पुत्रजातः** पुत्रशब्दो ऽन्तोदात्तः । २-२-३७ वा ऽऽहिताग्न्यादिषु इति जातशब्दस्य परप्रयोगः । **वस्त्रच्छन्नः** वस्त्रशब्द आद्युदात्तः ष्ट्रन्प्रत्ययान्तत्वात् । कुण्डशब्दो २६ नब्विषयस्येति फिट् सूत्रेणाद्युदात्तः । कृतमितप्रतिपन्नानां निष्ठान्तानामस्मादेव ज्ञापकात् परनिपातः । प्रत्युदाहरणेषु सर्वत्र ६-२-१ बहु... इति पूवपदप्रकृतिस्वरः ।

६-२-१७० वा जा- जातिकालसुखादिभ्यः (६-२-१६९) जाते = जातशब्दे उत्तरपदे, उत्तरपदस्य (६-२-११०) अन्तः (६-२-१४२) वा= विभाषया, उदात्तः (६-२-६४) बहुव्रीहौ (६-२-१६१) । पक्षे ६-२-१ बहु... इति पूर्वपदप्रकृतिस्वरः । दन्तशब्दस्तन्प्रत्ययान्तो नित्त्वादाद्युदात्तः ।

६-२-१७१ नञ्सुभ्याम् = नञ्सुभ्यां परम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) बहुव्रीहौ (६-२-१६१) । यवशब्दः, २७ तृणधान्या... इति फिट्सूत्रेणाद्युदात्तः ।

६-२-१७२ कपि- नञ्सुभ्याम् (६-२-१७१) उत्तरपदम् (६-२-११०) कपि = कप्प्रत्यये परे, पूर्वम्,= पूर्वतो वर्तमानम्, अन्तोदात्तम् (६-२-१४२) । पूर्वसूत्रेणैव सिद्धे सूत्रमिदं ज्ञापयति पूर्वसूत्रं समासस्यैवान्तोदात्तत्वं करोति, न तूत्तरपदस्येति । तेन "अनृचः" इत्यत्र समासान्ते कृते पूर्वसूत्रेणान्तोदात्तत्वं भवति । अन्यथा समासान्तप्रत्ययस्य समुदायावयवत्वेन उत्तरपदानवयवत्वान्न स्यात् ।

६-२-१७३ ह्रस्वान्ते = ह्रस्वः अन्ते यस्य तस्मिन् उत्तरपदे समासे वा, नञ्सुभ्याम् (६-२-१७१) परस्य अन्त्यात् पूर्वम्, उदात्तम् (६-२-६४) कपि (६-२-१७२), बहुव्रीहौ (६-२-१६१) । अत्र काशिका-पूर्वमिति वर्तमाने पुनः पूर्वग्रहणं प्रवृत्तिभेदेन नियमप्रतिपत्त्यर्थम्-ह्रस्वान्ते ऽन्त्यादेव पूर्वमुदात्तं भवति न कपि पूर्वमिति । तेन अविद्यमाना ज्ञा यस्य अज्ञकः, शोभना ज्ञा यस्य सुज्ञकः, इत्यादिषु ६-२-१७१ नञ्सुभ्यामिति कबन्तस्यैवा ऽन्तोदात्तत्वम् । एतन्नियमा ऽभावे तु नञ्सुभ्यां परतः कपः पूर्वस्मादन्त्यवर्णाच्च पूर्वतो वर्णाऽभावेन प्रकृतसूत्रा ऽप्रवृत्तौ ६-२-१७२ कपि... सूत्रं प्रवर्तेत । नियमे तु सति तन्न प्रवर्तते । **अयवको देशः** अत्र न्यासः- अत्र कपि परतो यव इत्येतद् ह्रस्वान्तमुत्तरपदम्, अयव इत्ययं वा समासः । तत्रान्त्याद् वकरात् पूर्वमक्षरं यकाराकार उदात्तो भवति । अनया दिशा ऽन्यत्रापि वेदितव्यमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१७४ बहोर्नञ्वदुत्तरपदभूम्नि ॥१७५
नञ्सुभ्याम् (६-२-१७१) इत्युक्तम्। बहोरपि तथा भवति - बहुयवो देशः। कपि पूर्वम् (६-२-१७२) इत्युक्तम्। बहोरपि तथा भवति- बहुकुमारीको देशः। नञो जरमर (६-२-११५) इत्युक्तम्। बहोरपि तथा भवति - बहुजरः। बहुमरः। बहुमित्रः। बहुमृतः।
उत्तरपदभूम्नीत्युक्तेर्नेह-बहुषु मानो ऽस्य= बहुमानः।

६-२-१७५ न गुणादयो ऽवयवाः ॥
बहुगुणा रज्जुः। बह्वक्षरं पदम्।
बह्वध्यायः। गुणादिराकृतिगणः। अवयवा इत्युक्तेर्नेह निषेधः - बहुगुणो ब्राह्मणः।
अध्ययनश्रुतसदाचारादयो ऽत्र गुणाः।

६-२-१७६ उपसर्गात् स्वाङ्गं ध्रुवमपर्शु ॥१९५
प्रपृष्ठः। उपसर्गादित्युक्तेर्नेह-दर्शनीयललाटः। स्वाङ्गमित्युक्तेर्नेह- उद्बाहुः। अपर्शु इत्युक्तेर्नेह-विपर्शु।

६-२-१७७ वनं समासे ॥१७८
प्रवणम्।

६-२-१७८ अन्तः ॥
अन्तर्वणो देशः।

६-२-१७९ अन्तश्च ॥१८०
प्रान्तः। पर्यन्तः।

६-२-१८० न निविभ्याम् ॥
न्यन्तः। व्यन्तः।

६-२-१७४ बहो - उत्तरपदभूम्नि = उत्तरपदबहुत्वे वर्तमानात्, बहोः = बहुशब्दात्, नञ्वत् = नञ इव स्वरो भवति। अत्र न्यासः - ६-२-१७१ "नञ्सुभ्याम्" इत्यादिभिर्योगैर्नञ उत्तरस्य यत् स्वरविधानं तद् बहोरपि यथा स्यादित्येवमर्थमिदमिति। **बहुमानः** बहुशब्दः कुप्रत्ययान्तो ऽन्तोदात्तः। ६-२-१ बहु... इति पूर्वपदप्रकृतिस्वरो ऽत्र।

६-२-१७५ न गु- उत्तरपदभूम्नि +बहोः (६-२-१७४) पराणि, अवयवाः = अवयववाचीनि, गुणादयः = गुणप्रभृतीनि उत्तरपदानि, न = अन्तोदात्तानि न भवन्ति, बहुव्रीहौ (६-२-१६१)।

६-२-१७६ उपसर्गात् = उपसर्गात् परम्, ध्रुवम् = एकरूपम्, पर्शु= पशुभिन्नम्, स्वाङ्गम् = स्वाङ्गवाचि उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) बहुव्रीहौ (६-२-१६१)। **प्रपृष्ठः** अत्र काशिका-सततं यस्य प्रगतं पृष्ठं भवति स प्रपृष्ठ इतीति। **उद्बाहुः** बाहोरेकरूपत्वं नास्ति कदाचिदधोबाहुनापि क्रोशनात्। पृष्ठशब्दो ऽन्तोदात्तः। दर्शनीयशब्दः ६-१-२१२ उपो... इति मध्योदात्तः। आटप्रत्ययान्तो लालटशब्दो ऽपि प्रत्ययस्वरेण मध्योदात्तः। शाखाशब्दो ऽन्तोदात्तः। शुन्प्रत्ययान्तः पर्शुशब्दो न्त्वित्वादाद्युदात्तः।

६-२-१७७ वनं - समासे= समासमात्रे, उपसर्गात् (६-२-१७६) वनम् = वनरूपम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२)। उत्तरपदमित्यनुवृत्त्यैव समास इत्यर्थलाभे सिद्धे समासग्रहणं समासमात्रग्रहणार्थम्। अन्यथा बहुव्रीहावेव स्यात्। **प्रवणम्** प्रकृष्टं वनमस्येति बहुव्रीहिः। प्रकृष्टं वनमिति तत्पुरुषो वा। ८-४-५ प्रनि.... इति णत्वम्। वनशब्द आद्युदात्तः।

६-२-१७८ अन्तः = अन्तः शब्दात् परम्, वनम् (६-२-१७७) उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२)। अनुपसगार्थ आरम्भः। उदाहरणे णत्वं प्राग्वत्।

६-२-१७९ अन्त- उसर्गात् (६-२-१७६), अन्तः = अन्तशब्दरूपम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२)। अन्तशब्दस्तन् प्रत्ययान्तत्वादाद्युदात्तः।

६-२-१८० न नि- निविभ्याम् = नि वि इत्येताभ्यां परम्, अन्तः (६-२-१७९) उत्तरपदम् (६-२-११०) न = अन्तोदात्तं न भवति। **न्यन्तः** निवि शब्दौ ८१ उपसर्गाश्चाभिवर्जमिति फिट्सूत्रेणाद्युदात्तौ। तत्पुरुष समासे ६-२-२ तत्पु... इत्यनेन, बहुव्रीहि समासे ६-२-१ बहु... इत्यनेन पूर्वपदप्रकृतिस्वरे, शेषनिघाते य णि, ८-२-४ उदा... इति स्वरित :।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१८१ परेरभितोभावि मण्डलम् ॥

परिकूलम् । परिमण्डलम् ।

६-२-१८२ प्रादस्वाङ्गं संज्ञायाम् ॥

प्रगृहम् । अस्वाङ्गमित्युक्तेर्नेह - प्रपदम् ।
संज्ञायामित्युक्तेर्नेह - प्रपीठम् ।

६-२-१८३ निरुदकादीनि च ॥

निरुदकम् । निरुपलम् ।
(परेर्हस्तपादकेशकर्षाः)
परिहस्तः । परिपादः । परिकेशः । परिकर्षः ।

६-२-१८४ अभेर्मुखम् ॥१८५

अभिमुखम् ।

६-२-१८५ अपाच्च ॥१८६

अपमुखः । अपमुखम् ।

६-२-१८६ स्फिगपूतवीणाऽञ्जोध्वकुक्षिसीरनाम नाम च ॥

अपस्फिगम् । अपपूतम् । अपवीणम् ।
अपाञ्जः । अपाध्वा । अपकुक्षिः ।
अपसीरम् । अपहलम् । अपनाम ।

६-२-१८१ परेः= परीत्यस्मात् परम्, अभितोभावि= अभितोभाविवाचि, मण्डलम्= मण्डलरूपञ्च, उत्तरपदम् ६-२-११०) अन्तोदात्तम् (६-२-१४२)। परिकूलम् बहुव्रीहिः प्रादिसमास. २-१-१२ अप... इत्यव्ययीभावसमासो वा। तत्र बहुव्रीहौ ६-२-१ बहु..... इत्यनेन तत्पुरुषे ६-२-२ तत्पु... इत्यनेन, पूर्वपदप्रकृतिस्वरे प्राप्ते, अव्ययीभावे तु ६-२-३३ परि... इत्यनेन ६-२-१२० कूल... इत्यनेन च प्राप्ते। घञन्तः कूलशब्द आद्युदात्तः मण्डलशब्दो ऽन्तोदात्तः।

६-२-१८२ प्रात्= प्रात् परम्, अस्वाङ्गम्= अस्वाङ्गवाचि, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) संज्ञायाम् = संज्ञायां गम्यमानायाम्। कप्रत्ययान्तो गृहशब्दो ऽन्तोदात्तः। पदशब्दः, २६ नब्विषयस्येति फिट्सूत्रेणाद्युदात्तः।

६-२-१८३ निरुदकादीनि = निरुदकप्रभृतीनि, अन्तोदात्तानि (६-२-१४२)। **निरुदकम्** प्रादिसमासो बहुव्रीहिर्वा। बहुव्रीहौ ६-२-१ बहु... इति, तत्पुरुषे ६-२-२ तत्पु... इति बाधनार्थमिदम्। अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम्। उदकोपलशब्दावन्तोदात्तौ।

परेः= परिशब्दात् परतस्त्याः, हस्त... कर्षाः = हस्तप्रभृतयः, अन्तोदात्ताः (६-२-१४२) हस्तपादकेशाः २९ स्वाङ्गशिटा..... इत्याद्युदात्ताः। घञन्तः कर्षशब्दः ६-१-१५४ कर्षा... इत्यन्तोदात्तः।

६-२-१८४ अभेः = अभिशब्दात् परम्, मुखम् = मुखरूपम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२)। ६-२-१७६ उप... इति सिद्धे अबहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थं चेदम्। अभिमुखा शाला।

६-२-१८५ अपात् = अपशब्दात् परम्, मुखम् (६-२-१८४) अन्तोदात्तम् (६-२-१४२)। **अपमुखम्** २-१-१२ अप... इत्यव्ययीभावसमासः। समासस्वरं बाधित्वा ६-२-३३ परि... इति पूर्वपदप्रकृतिस्वरे प्राप्ते।

६-२-१८६ स्फिग- अपात् (६-२-१८५) स्फिग... नाम= स्फिग, पूत, वीणा, अञ्जस्, अध्वन्, कुक्षि, सीरवाचिन्, नामन्, इत्येतानि, उत्तरपदानि (६-२-११०) अन्तोदात्तानि (६-२-१४२)। स्फिगपूतशब्दौ २९ स्वाङ्गशिटामदन्तानाम् इति फिट्सूत्रेणाद्युदात्तौ। केचितु स्फिगशब्दं घृतादित्वादन्तोदात्तमिच्छन्तीति न्यासः। वीणाशब्द आद्युदात्तः। असुँन्प्रत्ययान्तो ऽञ्जः शब्दो ऽप्याद्युदात्तः। क्वनिँप्प्रत्ययान्तो ऽध्वन् शब्दो ऽप्याद्युदात्तः। क्सिप्रत्ययान्तः कुक्षिशब्दो ऽन्तोदात्तः। हलसीरशब्दौ २६ नब्विषयस्येत्याद्युदात्तौ। नामन् शब्दो मनिँन्प्रत्ययान्त आद्युदात्तः। अत्र हरदत्तः- नामग्रहणं सीरशब्देनैव सम्बध्यते, न स्फिगादिभिः, स्फिगपूतकुक्षीणां पृथग् ग्रहणादिति। तेन स्फिगपूतकुक्षयः पर्याया इति ज्ञायते। **अपाध्वा** ५-४-८५ उप... इति समासान्ता ऽभावे, इदम्। तस्मिन् सति चित्वादेव सिद्धम्। एतदेव ज्ञापकं समासान्ता ऽनित्यत्वे। स्फिगपूतकुक्षीणां ग्रहणमबहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थञ्च। यदा ह्येतानि स्वाङ्गवाचीनि ध्रुवाणि च भवन्ति, बहुव्रीहिश्च समासस्तदा ६-२-१७६ उप... इत्येव सिद्धम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१८७ अधेरुपरिस्थम् ॥

अधिदन्तः । उपरिस्थमित्युक्तेर्नेह-अधिकरणम् ।

६-२-१८८ अनोरप्रधानकनीयसी ॥१८९

अनुगतो ज्येष्ठम् = अनुज्येष्ठः ।

अनुगतः कनीयान् = अनुकनीयान् ।

अप्रधानकनीयसी इत्युक्तेर्नेह- अनुगतो ज्येष्ठो ऽनुज्येष्ठः ।

६-२-१८९ पुरुषश्चान्वादिष्टः ॥

अन्वादिष्टः पुरुषो ऽनुपुरुषः ।अन्वादिष्ट इत्युक्तेर्नेह - अनुगतः पुरुषो ऽनुपुरुषः ।

६-२-१९० अतेरकृत्पदे ।

अत्यङ्कुशो नागः । अतिपदा गायत्री ।

अकृत्पदे इत्युक्तेर्नेह - अतिकारकः ।

(अतेर्धातुलोप इति वक्तव्यम्)

तेनेह न - शोभनो गार्ग्यः = अतिगार्ग्यः । इह च भवति- अतिक्रान्त कारकादतिकारकः ।

६-२-१९१ नेरनिधाने ॥

निमूलम् । न्यक्षम् । अनिधाने इत्युक्तेर्नेह- निहितो दण्डो निदण्डः ।

६-२-१९२ प्रतेरंश्वादयस्तत्पुरुषे ॥१९५

प्रत्यंशुः । प्रतिराजा । तत्पुरुष इत्युक्तेर्नेह- प्रतिगता अंशवो ऽस्य = प्रत्यंशुः ।

६-२-१९३ उपाद् द्व्यजजिनमगौरादयः ॥

उपगतो देवम् = उपदेवः । उपाजिनम् ।

अगौरादय इत्युक्तेर्नेह- उपगौरः । उपतैषः ।

तत्पुरुषे इत्यनुवृत्तेर्नेह- उपगतः सोमो ऽस्य = उपसोमः ।

६-२-१८७ **अधेः** = अधिशब्दात् परम्, उपरिस्थम् = उपरिस्थवाचि, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२)। **अधिदन्तः** अध्यारूढो दन्तः। शाकपार्थिवादित्वादुत्तरपदलोपः। दन्तस्योपरिजातो दन्त इत्यर्थः। **अधिकरणम्** अत्र ६-२-१३८ गति... इति कृदुत्तरपदप्रकृतिस्वरेण ककाराकार उदात्तः।

६-२-१८८ **अनोः** = अनुशब्दात् परम्, अप्रधानकनीयसी = अप्रधानवाचि कनीयश्शब्दरूपं च, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२)। उदाहरणयोः आद्ये- पूर्वपदार्थप्रधानः प्रादिसमासः। अन्त्ये - उत्तरपदार्थप्रधानः। सूत्रे प्रधानार्थं कनीयोग्रहणम्। इष्ठन्नीयसुँन्नन्तौ ज्येष्ठकनीयश्शब्दौ नित्स्वरेणाद्युदात्तौ।

६-२-१८९ **पुरु-** अनोः (६-२-१८८) अन्वादिष्टः = अन्वादिष्टवाचि, पुरुषः = पुरुषशब्दरूपम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२)। अन्वादिष्टः = अप्रधानशिष्टः। यथा भिक्षामट गां चानयेति। अत्र काशिका-अन्वादिष्टः = अन्वाचितः, कथितानुकथितो वेति। कुषन् प्रत्ययान्तः पुरुषशब्दो नित्त्वादाद्युदात्तः।

६-२-१९० **अतेः** = अतिशब्दात् परम्, अकृत्पदे = अकृदन्तं पदशब्दरूपं च, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२)। उशच्प्रत्ययान्तो ऽङ्कुशशब्दो ऽन्तोदात्तः। घप्रत्ययान्तः पदशब्दो ऽप्यन्तोदात्त एव। **अतिकारकः** अत्र ६-२-२ तत्पु... इति पूर्वपदाव्ययस्वरः। **अतेर्धातुलोपे** - सूत्रे अकृत्पदे इत्यपनीय धातुलोपे इति वक्तव्यमिति भावः। अङ्कुश इत्यादौ वृत्तिविषयेऽतिशब्दोऽतिक्रान्तार्थवृत्तिरिति क्रमेरप्रयोग एव धातुलोपः।

६-२-१९१ **नेः** = निशब्दात् परम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) अनिधाने = प्रकाशने। निधानम् = अप्रकाशनम्। तद्भिन्नमनिधानम् = प्रकाशनम्। उदाहरणयोः प्रादिसमासो वहुव्रीहिर्वा। अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम्।

६-२-१९२ **प्रते** : = प्रतिशब्दात् पराणि, अंश्वादयः = अंशुप्रभृतीनि, उत्तरपदानि (६-२-११०) अन्तोदात्तानि (६-२-१४२) तत्पुरुषे= तत्पुरुषसमासे। **प्रतिराजा** समासान्तविधेरनित्यत्वान्न टच्। टचि तु चित्त्वादेवान्तोदात्तत्वं सिद्धम्। **प्रत्यंशुः** इति प्रत्युदाहरणे ६-२-१ बहु ... इति पूर्वपदप्रकृतिस्वरः।

६-२-१९३ उपात् = उपशब्दात् परम्, अगौरादयः = गौरादिभिन्नम्, द्व्यजजिनम् = द्व्यच्कम् अजिनशब्दरूपं च, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) तत्पुरुषे (६-२-१९२)। देवशब्दो ऽजिनशब्दश्चान्तोदात्तौ। गौरशब्दो ऽप्यन्तोदात्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१९४ सोरवक्षेपणे ॥

सुप्रत्यवसितः । सोरित्युक्तेर्नेह-कुब्राह्मणः । अवक्षेपण इत्युक्तेर्नेह- शोभनेषु तृणेषु= सुतृणेषु ।

६-२-१९५ विभाषोत्पुच्छे ॥१९७

उत्क्रान्तः पुच्छात्= उत्पुच्छः । तत्पुरुषे इत्यनुवृत्तेर्नेह-उदस्तं पुच्छमस्य = उत्पुच्छः ।

६-२-१९६ द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ॥

द्विपात् । त्रिपात् । द्विदन् । त्रिदन् । द्विमूर्धा । त्रिमूर्धा । द्विमूर्धः । त्रिमूर्धः । द्वित्रिभ्यामित्युक्तेर्नेह- कल्याणमूर्धा । पाद्दन्मूर्धसु, इत्युक्तेर्नेह- द्विहस्तम् । बहुव्रीहावित्युक्तेर्नेह-द्वयोर्मूर्धा =द्विमूर्धा ।

६-२-१९७ सक्थं चाक्रान्तात् ॥

गौरसक्थः । अक्रान्तादित्युक्तेर्नेह- चक्रसक्थः ।

६-२-१९४ सोः = सुशब्दात्परम्, उत्तरपदम् (६-२-११०) अन्तोदात्तम् (६-२-१४२) तत्पुरुषे (६-२-१९२) अवक्षेपणे = निन्दायाम् । **सुप्रत्यवसितः** सुशब्दो ऽत्र पूजायामेव । वाक्यार्थस्तु अवक्षेपणमसूयया तथा ऽभिधानात् ।

६-२-१९५ विभा - उत्पुच्छे = उत्पुच्छशब्दे, अन्तः (६-२-१४२) विभाषा=वा, उदात्तः (६-२-६४) तत्पुरुषे (६-२-१९२ । यदा पुच्छमुदस्यति उत्पुच्छयते ३-३-५६ एरच् उत्पुच्छः । तदा ६-२-१४३ थाथ... इति नित्यमन्तोदात्तत्वे प्राप्ते विकल्पो ऽयमिति सेयमुभयत्र विभाषा ।

६-२-१९६ द्वित्रिभ्याम् = द्वित्रिशब्दाभ्यां परेषु पाद्दन्मूर्धसु= पाद् दत् मूर्धन् इत्येतेषूत्तरपदेषु, अन्तः (६-२-१४२) विभाषा (६-२-१९५) उदात्तः (६-२-६४) बहुव्रीहौ = बहुव्रीहिसमासे । पाद् इति ५-४-१४० संख्या... इति कृताकारलोपस्य पादशब्दस्य ग्रहणम् । दत् इति ५-४-१४१ वय... इति कृतदत्रादेशस्य दन्तशब्दस्य ग्रहणम् । मूर्धन् इति तु अकृतसमासान्तो नान्त एव मूर्धन्शब्दः । तच्च सूत्रे "मूर्धसु" इति निर्देशाज्ज्ञायते । अन्यथा मूर्धेषु इति स्यात् । तस्यैतत् प्रयोजनम् - असत्यपि समासान्ते ऽन्तोदात्तत्वं यथा स्यात् । एतदपि ज्ञापयति - अनित्य : समासान्तो भवतीति । यदा ऽपि समासान्तः क्रियते, तदापि बहुव्रीहेः कार्यित्वात् तदेकदेशत्वाच्च प्रकृतसूत्रेणैव समासान्तस्योदात्तत्वं पक्षे भवत्येव । ५-४-११५ द्वित्रि ... इति सामासान्तः षः । पाददन्तशब्दावाद्युदात्तौ । तेन पाद्दतावप्याद्युदात्तौ तथा मूर्धन्शब्दो ऽपि । **कल्याणमूर्धा** कल्याणशब्दो २६ नब्विषयस्येति फिट्सूत्रेणाद्युदात्तः । ६-२-१ बहु ... इति पूर्वपदप्रकृतिस्वरः । **द्वयोर्मूर्धा = द्विमूर्धा** अत्र ६-१-११८ समा... इत्यन्तोदात्तत्वम् ।

६-२-१९७ सक्थं - अक्रान्तात् = (क्रो ऽन्ते ऽस्य = क्रान्तः । तद्भिन्नः = अक्रान्तः) क्रान्तभिन्नात् परम्, सक्थम्= सक्थशब्दरूपम्, उत्तरपदम् (६-२-११०) विभाषा (६-२-१९५) अन्तोदात्तम् (६-२-१४२) बहुव्रीहौ (६-२-१९६) । सक्थमिति ५-४-११३ बहु... इति कृतसमासान्तस्य सक्थिशब्दस्य ग्रहणम् । **चक्रसक्थः** अत्र समासान्तषचश्चित्त्वात् ६-१-१५८ चित इति नित्यमन्तोदात्तत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-२-१९८ परादिश्छन्दसि बहुलम् ॥
अञ्जिसक्थमालभेत । विभाषा ऽनुवृत्त्यैव सिद्धे बहुलग्रहणादन्यत्रापि - ऋजुबाहुः । वाक्पतिः । चित्पतिः ।
अत्र वार्तिकम्
परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते ।
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः ॥
परादिरुदाहृतः । परान्तः -
(अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसंख्यानम्)
त्रिचक्रेण । त्रिबन्धुरेण । त्रिवृत्रा रथेन ।
पूर्वान्तः-
(पूर्वान्तोदात्तप्रकरणे मरुद्वृद्धादीनां छन्दस्युपसंख्यानम्)
मरुद्वृद्धः । पूर्वादिः-
(पूर्वपदाद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम्)
"दिवोदासाय सामगाय ते"
इत्येवमादि सर्वं संगृहीतं भवति । इति ।

इति षष्ठाऽध्याये
द्वितीयः पादः
समाप्तः ।

६-२-१९८ परादिः = सक्थशब्दस्यादिः, बहुलम्=बाहुल्येन, उदात्तः (६-२-६४) छन्दसि=वेदे । अत्र परशब्देन सक्थशब्दो गृह्यते सन्निहिते पूर्वसूत्रे पठितत्वेन प्रत्यासत्ते :। अनुवृत्त्यैव सिद्धे परग्रहणं व्यर्थमिति तु न शङ्क्यम् । तथा सति बहुव्रीहेरप्यनुवृत्तेः शङ्काया उदयापत्तेः ।

इति षष्ठाऽध्याये
द्वितीयः पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ षष्ठाऽध्याये तृतीयः
पादः
ॐ नमः श्रीजगदम्बायै ॥

६-३-१ **अलुगुत्तरपदे** ।२४,१३९

६-३-२ पञ्चम्याः स्तोकादिभ्यः ॥

(ब्राह्मणाच्छंशिन उपसंख्यानम्)

ब्राह्मणाच्छंशी ।

६-३-३ ओजः सहोऽम्भस्तमसस्तृतीयायाः ॥६

ओजसाकृतम् । सहसाकृतम् ।

अम्भसाकृतम् । तमसाकृतम् ।

(अञ्जस उपसंख्यानम्)

अञ्जसाकृतम् ।

(पुंसानुज जनुषान्ध इति च वक्तव्यम्)

पुंसानुजः । जनुषान्धः ।

६-३-४ **मनसः** संज्ञायाम् ॥५

मनसागुप्ता । संज्ञायामित्युक्तेर्नेह-
मनसा दत्ता=मनोदत्ता ।

६-३-५ आज्ञायिनि च ॥

मनसाऽऽज्ञायी ।

६-३-६ **आत्मनश्च** ॥७

आत्मनापञ्चमः ।

(पूरण इति वक्तव्यम्)

तेनेह लुगेव-आत्मकृतम् ।

६-३-७ **वैयाकरणाख्यायां चतुर्थ्याः** ॥८

आत्मनेपदम् । आत्मनेभाषा ।

६-३-१ **अलु-** उत्तरपदे= उत्तरपदे परतः, अलुक्=लुग् न भवति । इत्यधिकृत्य-

६-३-२ **पञ्च-** स्तोकादिभ्यः= स्तोकादिभ्यः परस्याः, पञ्चम्याः=पञ्चम्या विभक्तेः, अलुक्+ उत्तरपदे (६-३-१) । २-१-३९ स्तोका... इति सूत्रे स्तोकादय उदाहरणानि च द्रष्टव्यानि ।

ब्राह्मणाच्छंसी ब्राह्मणं शंसतीति ब्राह्मणाच्छंसी=ऋत्विग्विशेषः । उपसंख्यानाद् द्वितीयार्थे पञ्चमी । ब्राह्मणे विहितानि शास्त्राणि उपचाराद् ब्राह्मणानि ।

६-३-३ **ओजः-** २-१-४० सप्तमी... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

	(क)	(ख)
६-३-१	अलुक्	उत्तरपदे ॥

६-३-३ ओज... तृतीयायाः (क) (ख) ॥ इति । ओजः सहोऽम्भस्तमसः=ओजस् सहस् अम्भस् तमस् इत्येतेभ्यः परस्याः, तृतीयायाः=तृतीयाविभक्तेः (क)=अलुक्=लुग् न भवति, (ख)=उत्तरपदे=उत्तरपदे परे । इत्यर्थमुपदिश्य, अतोऽत्र समासेऽपि ओजश्शब्दात् परतस्त्यायास्तृतीयाविभक्तेर्लुग् न भवति । कृतशब्दात् परस्याः सुँविभक्तेस्तु भवत्येव लुक् । इति बोधयित्वा समासानन्तरम् ओजसाकृतशब्दात् स्वादिकार्यं भवतीति बोधयेत् । अथ तत्पुरुषसमासेऽपि क्वचित् समासान्तप्रत्यया भवन्तीति दिग्दर्शनाय ५-४-९१ राजाहः....सूत्रमुपदिशेत् ।

पुंसानुजः=यस्या ऽग्रजः पुमान् सः ।

६-३-४ **मनसः**=मनश्शब्दात् परस्याः, तृतीयायाः (६-३-३) अलुक्+ उत्तरपदे (६-३-१) संज्ञायाम्= संज्ञायां गम्यमानायाम् ।

६-३-५ **आज्ञा-** मनसः (६-३-४) तृतीयायाः (६-३-३) अलुक् (६-३-१) आज्ञायिनि=आज्ञायि (न्) शब्दे उत्तरपदे (६-३-१) ।

६-३-६ **आत्म-**आत्मनः= आत्मन्शब्दात् परस्याः, तृतीयायाः (६-३-३) अलुक्+ उत्तरपदे (६-३-१) । जनार्दनस्त्वात्मचतुर्थ एवेत्यत्र आत्मा चतुर्थोऽस्येति वहुव्रीहिः ।

पूरणे= पूरणप्रत्ययान्ते उत्तरपदे, इति वक्तव्यम्= आत्मनः परस्यास्तृतीयाया अलुक् इति वक्तव्यम् ।

६-३-७ वैया- आत्मनः (६-३-६) चतुर्थ्याः= चतुर्थ्या विभक्तेः, अलुक्+उत्तरपदे (६-३-१)

वैयाकरणाख्यायाम्= वैयाकरणसंज्ञायाम् । उदाहरणयोः २-१-३६ चतुर्थीति योगविभागात् समासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-८ परस्य च ॥

परस्मैपदम् । परस्मैभाषा ।

६-३-९ हलदन्तात् सप्तम्याः संज्ञायाम् ॥१८,२०

त्वचिसारः । युधिष्ठिरः । अरण्येतिलकाः ।

(हृद्द्युभ्यां च)

हृदिस्पृक् । दिविस्पृक् ।

६-३-१० कारनाम्नि च प्राचां हलादौ ॥

मुकुटेकार्षापणम् । दृषदिमाषकः ।

कारनाम्नीत्युक्तेरिह लुगेव-अभ्यर्हिते पशुः=अभ्यर्हितपशुः । प्राचामित्युक्तेरिह लुगेव-यूथे पशुः=यूथपशुः । हलादावित्युक्तेरिह लुगेव-अविकटे उरणः=अविकटोरणः ।

हलदन्तादित्यनुवृत्तेरिह लुगेव- नद्यां दोहिनी= नदीदोहिनी ।

६-३-११ मध्याद् गुरौ ॥

मध्येगुरुः ।

(अन्ताच्चेति वक्तव्यम्)

अन्तेगुरुः ।

६-३-१२ अमूर्धमस्तकात् स्वाङ्गादकामे ॥

कण्ठे कालो ऽस्य= कण्ठेकालः ।

उरसिलोमा । अमूर्धमस्तकादित्युक्तेरिह लुगेव-मूर्धशिखः । मस्तकशिखः । अकाम इत्युक्तेरिह लुगेव- मुखे कामोऽस्य= मुखकामः ।

६-३-१३ बन्धे च विभाषा ॥

हस्तेबन्धः । हस्तबन्धः ।

हलदन्तादित्यनुवृत्तेरिह नित्यमेव लुक्-गुप्तिबन्धः ।

६-३-८ परस्य=परशब्दाद् परस्याः, चतुर्थ्याः (६-३-७) अलुक्+ उत्तरपदे (६-३-१) वैयाकरणाख्यायाम् (६-३-७) । उदाहरणयोः समासः प्राग्वत् ।

६-३-९ हलदन्तात्= हलन्ताददन्ताच्च परस्याः, सप्तम्याः= सप्तम्या विभक्तेः, अलुक्+ उत्तरपदे (६-३-१) संज्ञायाम्= संज्ञायां गम्यमानायाम् । उदाहरणेषु २-१-४४ संज्ञा... इति समासः । ८-३-९५ गवि... इति षत्वम् । तद्वचनादेव च गविष्ठिर इत्यत्राऽपि सप्तम्या अलुक् ।

हृद्द्युभ्याम्=हृद् दिव् इत्येताभ्यां परस्याः, सप्तम्याः (६-३-९) अलुक्+उत्तरपदे (६-३-१) संज्ञायाम्= संज्ञायां गम्यमानायम् । उदाहरणयोः

३-२-५८ स्पृशो... इति क्विँन् । सप्तम्या अलुग्विधानसामर्थ्याद् द्वितीयार्थे सप्तमी । हृदयं स्पृशति, दिवं स्पृशति, इति विग्रहः ।

६-३-१० कार-राज्ञे देयो भागः करः । कर एव= कारः ५-४-३८ प्रज्ञा... इत्यण् । प्राचां + कारनाम्नि= प्राचां देशे यत् कारनाम, तत्र, हलादौ, उत्तरपदे (६-३-१) हलदन्तात्+सप्तम्याः (६-३-९) अलुक् (६-३-१) । पूर्वेण सिद्धे नियमार्थमिदम् । कारनाम्न्येव । प्राचामेव । हलादावेवेति च । अभ्यर्हिपशुः कारादन्यस्यैतद्द्वेयस्य नाम ।

६-३-११ मध्यात्= मध्यशब्दात् परस्याः, सप्तम्याः (६-३-९) अलुक् (६-३-१) गुरौ= गुरुशब्दे, उत्तपदे (६-३-१) ।

६-३-१२ अमूर्धमस्तकात्= मूर्ध (न्) मस्तक भिन्नात् स्वाङ्गात्= स्वाङ्गवाचिनः, हलदन्तात्+ सप्तम्याः (६-३-९) अलुक् (६-३-१) अकामे= कामशब्दभिन्ने, उत्तरपदे (६-३-१) ।

६-३-१३ बन्धे- = बन्धशब्दे, उत्तरपदे (६-३-१) हलदन्तात्+ सप्तम्याः (६-३-९) अलुक् (६-३-१) । अत्र काशिका- बन्धे इति घञन्तो गृह्यते, इति।अनेन घञन्ते बध्नातौ विभाषा । प्रत्ययान्तरे तु प्रतिषेध (६-३-१९ नेन्सिद्ध...) इति दर्शितं भवतीति- न्यासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-१४ तत्पुरुषे कृति बहुलम् ॥
स्तम्बेरमः । स्तम्बरमः । कर्णेजपः ।
कर्णजपः । क्वचिन्न- कुरुचरः ।

६-३-१५ प्रावृट्शरत्कालदिवां जे ॥
प्रावृषिजः । शरदिजः । कालेजः । दिविजः ।

६-३-१६ **विभाषा** वर्षक्षरशरवरात् ॥१८
वर्षेजः । वर्षजः । क्षरेजः । क्षरजः । शरेजः ।
शरजः । वरेजः । वरजः ।

६-३-१७ घकालतनेषु कालनाम्नः ॥
पूर्वाह्णेतरे, पूर्वाह्णतरे । पूर्वाह्णेतमे,
पूर्वाह्णतमे । पूर्वाह्णेकाले, पूर्वाह्णकाले ।
पूर्वाह्णेतने; पूर्वाह्णतने । कालनाम्न
इत्युक्तेर्नेह- शुक्लतरे । शुक्लतमे ।
हलदन्तादित्यनुवृत्तेर्नेह प्रतिषेधः-रात्रितरायाम् ।

६-३-१८ शयवासवासिष्वकालात् ॥
खेशयः, खशयः । ग्रामेवासः, ग्रामवासः ।
ग्रामेवासी, ग्रामवासी । अकालादित्युक्तेर्नेह-
पूर्वाह्णशयः । हलदन्तादित्यनुवृत्तेर्नेह
भूमिशयः ।
(अपो योनियन्मतुँषु सप्तम्या अलुग् वक्तव्यः)
अप्सुयोनिः । अप्सव्यः। अप्सुमन्तावाज्यभागौ ।

६-३-१९ नेन्सिद्धबध्नातिषु च ॥
स्थण्डिलवर्ती । साङ्काश्यसिद्धः । चक्रबद्धः ।

६-३-१४ तत्पुरुषे = तत्पुरुषसमासे, कृति=कृदन्ते, उत्तरपदे (६-३-१) सप्तम्याः ६-३-९) बहुलम्=बाहुल्येन, अलुक् (६-३-१) । उदाहरणेषु- ३-२-१३ स्तम्ब... इत्यच् । **कुरुचरः** ३-२-१६ चरेष्ट इति टः ।

६-३-१५ प्रावृट्... दिवाम् = प्रावृष्प्रभृतिभ्यः परस्याः, · सप्तम्याः (६-३-९) अलुक् (६-३-१) जे= जशब्दे, उत्तरपदे (६-३-१) । सूत्रे काल इति स्वरूपग्रहणम् । प्रावृट्शरदोः पृथग्ग्रहणात् । उदाहरणेषु- ३-२-९७ सप्त.... इति डः । पूर्वस्यायं प्रपञ्चः ।

६-३-१६ विभा-जे (६-३-१५) वर्ष... वरात्=वर्षप्रभृतिभ्यः परस्याः, सप्तम्याः (६-३-१) विभाषा= वा अलुक् (६-३-१) ।

६-३-१७ घका-कालनाम्नः=कालवाचिनः, हलदन्तात्+सप्तम्याः (६-३-९) विभाषा (६-३-१६) अलुक् (६-३-१) घकालतनेषु=घसंज्ञक (तरप्तमपोः)+कालशब्दे+ तनप्रत्यये च परतः । तन इति ट्युँट्युँलोरादेशस्य स-तुँक्कस्याऽ नुकरणम् । अत्र काशिका- उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्नेष्यते ६-३-५० हृदयस्य हृल्लेख.... इति लेखग्रहणाल्लिङ्गात् । तेन घतनग्रहणे तदन्तग्रहणं न भवतीति ।

६-३-१८ शय-अकालात्=कालवाचिभिन्नात्, हलदन्तात्+सप्तम्याः (६-३-९) विभाषा (६-३-१६) अलुक् (६-३-१) शय..वासिषु=शयप्रभृतिषूत्तरपदेषु ।

अपो- अप्सुयोनिः अप्सु योनिः=उत्पत्तिरस्येति बहुव्रीहिः । **अप्सव्यः** अप्सु भव इति विग्रहे ४-३-५४ दिगा... इति यत् । **अप्सुमन्तावाज्यभागौ** न हि सप्तम्यन्ताद् मतुँब् भवति; अतः अप्सु इति सप्तम्यन्तानुकरणं द्रष्टव्यम् । अप्सुशब्दोऽस्ति ययोस्तौ अप्सुमन्तौ । अप्स्वग्ने सधिष्टव, अप्सु मे सोमो अब्रवीत्, इत्याज्यभागमन्त्रयोरप्सुशब्दो ऽस्ति । तद्द्वारा च आज्यभागयोरपि अप्सुमत्त्वम् ।

६-३-१९ नेन्सि- इन्सिद्धबध्नातिषु= इन्नन्ते सिद्धशब्दे चोत्तरपदे बध्नातौ च परतः ('धातुग्रहणे तदादिविधिः' इति परिभाषाऽवधेया) सप्तम्याः (६-३-९) अलुक् (६-३-१) न= न भवति । ६-३-१४ तत्पु... इति प्राप्तं प्रतिषिध्यते । **चक्रबन्ध इति** विषये तु ६-३-१३ बन्धे.... इति सूत्रं द्रष्टव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-२० स्थे च भाषायाम् ॥

समस्थः । विषमस्थः । भाषायामित्युक्तेरिह न प्रतिषेधः- कृष्णोऽस्याखरेष्ठः ।

६-३-२१ षष्ठ्या आक्रोशे ।।२४, २२

चौरस्यकुलम् । आक्रोश इत्युक्तेर्नेह- ब्राह्मणकुलम् ।

(वागदिक्पश्यद्भ्यो युक्तिदण्डहरेषु)

वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः ।

(आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति च)

आमुष्यायणः । आमुष्यपुत्रिका ।

आमुष्यकुलिका ।

(देवानांप्रिय इति च मूर्खे)

अन्यत्र देवप्रियः ।

(शेपपुच्छलाङ्गूलेषु शुनः)

शुनः शेपः । शुनः पुच्छः । शुनोलाङ्गूलः ।

(दिवश्च दासे)

दिवोदासः ।

६-३-२२ पुत्रेऽन्यतरस्याम् ॥+२५

दास्याः पुत्रः; दासीपुत्रः । आक्रोशे इत्युनुवृत्तेर्नेह-ब्राह्मणीपुत्रः ।

६-३-२३ ऋतो विद्यायोनिसम्बन्धेभ्यः ।२४,२५

होतुरन्तेवासी । होतुः पुत्रः । पितुरन्तेवासी । पितुः पुत्रः । ऋत इत्युक्तेर्नेह- आचार्यपुत्रः । मातुलपुत्रः ।

(विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणम्)

तेनेह न-होतृधनम् । पितृधनम् ।

६-३-२४ विभाषा स्वसृपत्योः ॥

मातुःष्वसा; मातुःस्वसा । मातृष्वसा ।

पितुः ष्वसा; पितुः स्वसा । पितृष्वसा ।

६-३-२५ आनँङ् ऋतो द्वन्द्वे ॥२६

होतापोतारौ । मातापितरौ ।

अत्र सूत्रे ६-३-२२ पुत्रे... सूत्रात् "पुत्रे" इति मण्डूकप्लुत्या ऽनुवर्तते ।

पितापुत्रौ । मातापुत्रौ ।

६-३-२० स्थे=स्थशब्दे, उत्तरपदे (६-३-१) सप्तम्याः (६-३-९) अलुक् (६-३-१) न (६-३-१९) भाषायाम्=लोके । उदाहरणयोः प्रत्युदाहरणे च ३-२-४ सुँपि... इति कः । प्रत्युदाहरणे ८-३-१०६ पूर्व... इति षत्वम् ।

६-३-२१ षष्ठ्याः=षष्ठ्या विभक्तेः, अलुक्+उत्तरपदे (६-३-१) आक्रोशे=आक्रोशे गम्यमाने । **चौरस्यकुलम्** । आक्रोशप्रतिपादनपरमेतत्; न त्वनेन तस्य सम्बन्धो विवक्षित इति न्यासः ।

वागदि-षष्ठ्याः (६-३-२१) अलुक् (६-३-१) ।

आमु-उदाहरणेषु-आद्ये अमुष्य गोत्रापत्यमिति विग्रहे ४-१-९९ नडा... इति फक् । द्वितीये अमुष्यपुत्रस्य भाव इति विग्रहे ५-१-१३२ द्वन्द्व... इति वुँञ् । तृतीये-अमुष्य कुलस्य भाव इति विग्रहे प्रागवद् वुँञ् ।

शेप-षष्ठ्याः (६-३-२१) अलुक् (६-३-१) ।

६-३-२२ पुत्रे=पुत्रशब्दे, उत्तरपदे (६-३-१) षष्ठ्याः + आक्रोशे (६-३-२१) अन्यतास्याम्=वा अलुक् (६-३-१) ।

६-३-२३ ऋतः- ऋदन्तेभ्यः, विद्या... भ्यः=विद्यायोनिसम्बन्धवाचिभ्यः परस्याः, षष्ठ्याः (६-३-२१) अलुक्+ उत्तरपदे (६-३-१) ।

विद्या-"विद्यायोनिसम्बन्धेभ्यः" इत्यत्र, तत्पूर्वोत्तरपदग्रहणम् – तेषाम्=विद्यायोनिसम्बन्धवाचिनाम्, पूर्वपदभूतानामुत्तरपदभूतानां च ग्रहणं कर्तव्यमित्यर्थः ।

६-३-२४ विभा-ऋतो विद्यायोनिसम्बन्धेभ्यः (६-३-२३) षष्ठ्याः (६-३-२१) विभाषा=वा अलुक् (६-३-१) स्वसृपत्योः= स्वसृ- पतिशब्दयोः, उत्तरपदयोः (६-३-१) । उदाहरणेषु- अलुक्पक्षे- (८-३-८५) मातुः... इति विकल्पेन षत्वम् । लुक्पक्षे ८-३-८४ मातृ... इति नित्यं षत्वम् ।

६-३-२५ आनँ- ऋतः= ऋदन्तानाम्, विद्यायोनिसम्बन्धवाचिनाम् (६-३-२३) द्वन्द्वे= द्वन्द्वसमासे, पूर्वस्य स्थाने, आनँङ्= आनँङ् आदेशो भवति, उत्तरपदे (६-३-१) । पूर्व (६-३-२३) सूत्रादनुवर्तमानं विद्यायोनिसम्बन्धेभ्य इति द्वन्द्वे इत्यनेन सम्बन्धाद् ऋत इत्यस्य विशेषकत्वाच्च षष्ठ्यन्ताय क्लृप्तम् । उत्तरपदे इत्यनेन "पूर्वस्य स्थाने" इत्यर्थ आक्षिप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-२६ देवताद्वन्द्वे च ॥३१

इन्द्रावरुणौ । इन्द्राबृहस्पती ।
अत्र काशिका द्वन्द्वे इति वर्तमाने पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यार्थम् । अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्येतन्निपात्यते । तत्र ये लोके प्रसिद्धसाहचर्याः, वेदे च ये सहवापनिर्दिष्टास्तेषामिह ग्रहणं भवति । तेन ब्रह्मप्रजापती, शिववैश्रवणावित्येवमादौ न भवतीति ।
(वायोः प्रयोगे प्रतिषेधो वक्तव्यः)
अग्निवायू । वाय्वग्नी ।

६-३-२७ ईदग्नेः सोमवरुणयोः ॥

अग्नीषोमौ । अग्नीवरुणौ ।

६-३-२८ इद् वृद्धौ ॥

आग्निवारुणं कर्म । आग्निमारुतम् ।
वृद्धावित्युक्तेर्नेह- आग्नेन्द्रः ।
(विष्णौ न)
आग्नावैष्णवम् ।

६-३-२९ दिवो द्यावा ॥३०

द्यावाभूमी ।

६-३-३० दिवसँश्च पृथिव्याम् ॥

दिवस्पृथिव्यौ, द्यावापृथिव्यौ ।

६-३-३१ उषासोषसः ॥

उषासासूर्यम् ।

६-३-३२ मातरपितरावुदीचाम् ॥

मातरपितरौ । प्राचां मते तु मातापितरौ ।

६-३-२६ देवताद्वन्द्वे= देवतावाचिनां द्वन्द्वमासे, पूर्वपदस्य स्थाने+ आनँङ् (६-३-२५ टी.) उत्तरपदे (६-३-१) । "अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्येतन्निपात्यते" इति काशिकायाः "८-१-१५ द्वन्द्वं... इति सूत्रेणा ऽभिव्यक्त्यर्थे निपातितो द्वन्द्वशब्दोऽत्र गृह्यते" इति भावः ।

६-३-२७ ईद- अग्नेः=अग्निशब्दस्य स्थाने, ईत्= दीर्घेकारादेशः, सोमवरुणयोः= सोमशब्दे वरुणशब्दे च, उत्तरपदे (६-३-१) देवताद्वन्द्वे (६-३-२६) । **अग्नीषोमौ** ८-३-८२ अग्नेः... इति षत्वम् ।

६-३-२८ इद् वृ- वृद्धौ=वृद्धिमति, उत्तरपदे (६-३-१) अग्नेः (६-३-२७) इत्=ह्रस्व इकारो भवति, देवताद्वन्द्वे (६-३-२६) । वृद्धेरुत्तरपदस्या ऽसंभवाद् वृद्धिशब्देना ऽत्र वृद्धिमदुच्यते । **आग्निवारुणम्** अग्नीवरुणौ देवते अस्येति विग्रहे ४-२-२४ सा ऽस्य... इत्यणो विवक्षायां द्वन्द्वे अग्निवरुण इत्यवस्थायाम् पूर्वोक्तेऽणि, ७-३-२१ देव... इत्युभयपदादि वृद्धौ, ६-३-२६ देव... ६-३-२७ ईद...इति सूत्रे बाधित्वा ह्रस्वेकारः । इकारस्येकारविधानं तयोर्बाधनार्थम् । प्रकल्प्य चापवादविषयमिति परिभाषया तद्धितात् पूर्वमपि न ते सूत्रे प्रवर्तेते । **आग्निमारुतम्** अग्नामरुतौ देवते अस्येति विग्रहे ऽपि ६-३-२६ देव... इति सूत्रं बाध्यम् । शेषं प्रागवत् । **आग्नेन्द्रः** ७-३-२२ नेन्द्र... इति उत्तरपदादिवृद्धिप्रतिषेधः । **विष्णौ**=वृद्धिमति विष्णुशब्दे उत्तरपदे, न=(इद्वृद्धौ इति सूत्रेण) ह्रस्वेकारो न भवति ।

६-३-२९ दिवो-देवताद्वन्द्वे (६-३-२६) उत्तरपदे (६-३-१) दिवः= दिव्शब्दस्य स्थाने, द्यावा= द्यावा इत्यादेशो भवति ।

६-३-३० दिव-दिवः (६-३-२९) दिवसँ=दिवसँ (अनुबन्धलोपे दिवस्) आदेशो भवति, द्यावा (६-३-२९) च, पृथिव्याम्= पृथिवीशब्दे उत्तरपदे, देवताद्वन्द्वे (६-३-२६) ।

६-३-३१ उषा-उषसः=उषश्शब्दस्य स्थाने, उषासा=उषासा इत्ययमादेशो भवति उत्तरपदे (६-३-१) देवताद्वन्द्वे (६-३-२६) ।

६-३-३२ मातरपितरौ=मातृशब्दस्य स्थाने, अरङ् आदेशो भवतिः, पितृशब्दे उत्तरपदे, उदीचाम्=उदीचामाचार्याणां मते । **मातापितरौ** ६-३-२५ आनँ.. इति पूर्वपदस्यानँङ् ७-३-१० ऋतो... इति गुणः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-३३ पितरामातरा च च्छन्दसि ॥

आमा गन्तां पितरामातरा । अत्र दीक्षितः-चाद्विपरीतमपि । मातरापितरा नू चिदिष्टौ इति । लोके तु मातापितरौ, इत्येव ।

६-३-३४ स्त्रियाःपुंवद् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥४३,४१,४३

चित्रा गावोऽस्य=चित्रगुः । रूपवती भार्या ऽस्य=रूपवद्भार्यः । अत्र भट्टोजिदीक्षितः-चित्रा जरती गौर्यस्येति विग्रहे अनेकोक्तेर्बहूनामपि बहुव्रीहिः । अत्र केचित्-चित्राजरतीगुः । जरतीचित्रागुर्वा । एवं दीर्घातन्वीजङ्घः । तन्वीदीर्घाजङ्घः । त्रिपदे बहुव्रीहौ प्रथमं न पुंवत्, उत्तरपदस्य मध्यमेन व्यवधानात्, द्वितीयमपि न पुंवत्, पूर्वपदत्वा ऽभावात् । उत्तरपदशब्दो हि समासस्य चरमावयवे रूढः । पूर्वपदशब्दस्तु प्रथमावयव इति वदन्ति । वस्तुतस्तु नेह पूर्वपदमाक्षिप्यते । ६-३-२५ आनँङ् ऋत इत्यत्र यथा । तेनोपान्त्यस्य पुंवदेव । चित्राजरद्गुरित्यादि । अत एव चित्राजरत्यौ गावौ यस्येति द्वन्द्वगर्भेऽपि चित्राजरद्गुरिति भाष्यम् । कर्मधारयपूर्वपदे द्वयोरपि पुंवत् । जरच्चित्रगुः। कर्मधारयोत्तरपदे तु चित्रजरद्गवीकः । इति । स्त्रिया इत्युक्तेर्नेह पुंवत्-ग्रामणि कुलं दृष्टिरस्य ग्रामणिदृष्टिः । भाषितपुंस्कादित्युक्तेर्नेह-गङ्गाभार्यः । अनूङ् इत्युक्तेर्नेह-वामोरूभार्यः । समानाधिकरणे इत्युक्तेर्नेह-कल्याण्या माता कल्याणीमाता । स्त्रियामित्युक्तेर्नेह-कल्याणी प्रधानमेषां कल्याणीप्रधाना इमे । अपूरणीप्रियादि ष्वित्युक्तेर्नेह-कल्याणीपञ्चमा रात्रयः । कल्याणीप्रियः । कथं तर्हि दृढा भक्तिर्यस्य दृढभक्तिरित्यादि ? (सामान्ये नपुंसकम्) स्त्रीत्वविवक्षायां तु दृढाभक्तिरिति दीक्षितः ।

६-३-३३ पित...तरा-पूर्वपद (पितृशब्द) स्याराङादेशो निपात्यते, मातृशब्दे उत्तरपदे छन्दसि = वेदे उत्तरपदे तु ७-१-३९ सुपां... इत्यौविभक्तेराकारादेशः । गुणः । प्राग्वत्

६-३-३४ स्त्रियाः २-२-२४ अनेक...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । "अत्र भट्टोजिदीक्षितः-भाषितपुंस्कादनूङ् ऊङोऽ भावो यस्यामिति बहुव्रीहिः । निपातनात् पञ्चम्या अलुक्, षष्ठ्याश्च लुगिति" विषयमिमं शिक्षकः स्वयं विमृशेत्, छात्रान् नोपदिशेत्, बोधभारापत्तेः । किञ्च स्वकीयाऽऽकाङ्क्षाशमनायैव कल्याणीपञ्चमा रात्रय इति मूलोक्तप्रत्युदाहरणविषये च ५-४-११६ अप्पू... सूत्रं पश्येत् । अथच्छात्रानुद्दिश्य भाषित-पुंस्कादनूङ्=अनूङन्तभाषितपुंस्कस्य (ऊङ् अन्त्यमा न हुने भाषितपुंस्क) **स्त्रियाः**=स्त्रीवाचकशब्दस्य, पुंवत्=पुंवाचकशब्दस्येव रूपं भवति (स्त्रीप्रत्ययस्य निवृत्तिर्भवति) समानाधिकरणे+स्त्रियाम्=समानाधिकरणे स्त्रीलिङ्गवर्तिनि, उत्तरपदे (६-३-१) अपूरणीप्रियादिषु=पूरण्यां (पूरणप्रत्ययान्ते) प्रियादौ च परतो न भवति । इत्यर्थं बोधयित्वा प्रकृते कन्याशब्दः पूरणप्रत्ययान्तो ऽपि नास्ति, प्रियादिगणे ऽपि नास्ति, इति बोधनपुरस्सरं सुशीलाशब्दस्य पुंवद्भावं छात्रैः साधयित्वा सुशीलकन्या इति श्यामपाट्यां लिखित्वा १-२-४४ एकविभक्ति .... सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-३५ तसिँलादिष्वाकृत्वसुँचः ॥

बह्वीभ्यः=बहुतः । बह्वीषु=बहुत्र ।
दर्शनीयतरा । दर्शनीयतमा । ६-३-४३
घरूप..इति ह्रस्वः परत्वात् पुंवद्भावं बाधते ।
पट्वितरा । पट्वितमा ।
तसिँलादिषु परिगणनं कर्तव्यम्- त्रतसौ, तरप्तमपौ, चरड्जातीयरौ, कल्पब्देशीयरौ, रूपप्पाशपौ, थाल्, तिल्थ्यनौ ।
(शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः)
बह्वीभ्यो देहि बहुशः । अल्पाभ्यो देहि अल्पशः ।
(त्वतलोर्गुणवचनस्य)
पट्व्या भावः= पटुत्वम् । पटुता ।
गुणवचनस्येत्युक्तेर्नेह-कर्त्र्या भावः कर्त्रीत्वम् । कर्त्रीता ।
(भस्याऽढे तद्धिते)
हस्तिनीनां समूहो हास्तिकम् । अढे इत्युक्तेर्नेह-रौहिणेयः । अत्र दीक्षितः-स्त्रीभ्यो ढगिति ढोऽत्र गृह्यते, अग्नेर्ढक् इति ढकि तु पुंवदेव । अग्नायी देवताऽस्य स्थालीपाकस्याग्नेयः ।
इति । सपत्नीशब्दस्त्रिधा- शत्रुपर्यायात् सपत्नशब्दाच्छार्ङ्गरवादित्वाद् ङीन्येकः । समानः पतिर्यस्या इति विग्रहे विवाहनिबन्धनपतिशब्दमाश्रित्य नित्यस्त्रीलिङ्गो द्वितीयः । स्वामिपर्यायपतिशब्देन भाषितपुंस्कस्तृतीयः । आद्ययोः४-१-११२ शिवा... इत्यण् । सपत्न्या अपत्यम्= सापत्नः । तृतीयात्तु लिङ्गविशिष्टपरिभाषया ४-१-८५ दित्य.. इति पत्युत्तरपदो ण्य एव । न त्वण् । शिवादौ रूढयोरेव ग्रहणात् । सापत्यः । इति ।
(ठक्छसोश्च)
भवत्याश्छात्राः=भावत्काः । भवदीयाः ।

६-३-३६ क्यङ्मानिनोश्च ॥

एनीवाचरति=एतायते । दर्शनीयां मन्यते= दशीनीयमानिनी ।

६-३-३७ न कोपधायाः ॥४१

पाचिकाभार्यः । रसिकाभार्यः ।
मद्रिकायते । मद्रिकामानिनी ।
(कोपधप्रतिषेधे तद्धितवुँग्रहणम्)
नेह-पाका भार्या यस्य पाकभार्यः ।

६-३-३५ तसिँ- भाषितपुंस्कादनूङ्+स्त्रियाः+पुंवत् (६-३-३४) **आकृत्वसुँचः**= कृत्वसुँच्पर्यन्तेषु, तसिलादिषु=तसिँल्प्रभृतिषु प्रत्ययेषु परेषु ।

६-३-३५ भस्या- हास्तिकम् । ४-२-४७ अचि...इति ठक् । पुंवद्भावे, ६-४-१४४ नस्त...इति टिलोपः । **रौहिणेयः** रोहितशब्दः स्त्रियां ४-१-३९ वर्णा... इत्यनेन ङीब्नकारयोः सतो रोहिणी इति सम्पद्यते । अतः सति पुंवद्भावे रौहितेय इति स्यात् । **ठक्छ-** उदाहरणयोः ४-२-१५ भव...इति ठक्छसौ । छस... सित्वात् १-४-१६ सिति... इति पदत्वेन भत्वा ऽभावाद् भस्या ऽढे .... इत्यस्या ऽप्रवृत्तिः ।

६-३-३६ क्यङ्मा- भाषितपुंस्कादनूङ् स्त्रियाः+पुंवत् (६-३-३४) क्यङ्मानिनोः= क्यङ्प्रत्यये मानि (न्) शब्दे चोत्तरपदे । अत्र काशिका-मानिनो ग्रहणमस्त्र्यर्थम्, असमानाधिकरणार्थञ्च । इह तु दर्शनीयामात्मानं मन्यते दर्शनीयमानिनीति पूर्वेणैव सिद्धमिति ।

६-३-३७ न को- कोपधायाः= ककारोपधायाः, स्त्रियाः (६-३-३४) न= न पुंवत् । उदाहरणेषु- आद्ययोः ६-३-३४ स्त्रियाः... इति, अन्त्ययोः ६-३-३६ क्यङ्मा... इति प्राप्ते ।

कोपधप्रतिषधे=न कोपधाया इति निषेधे कर्तव्ये, तद्धि.... हणम्=तद्धितस्य वुँ इत्यस्य च ग्रहणं भवति । **पाका-**७४१ अर्भकपृथुकपाका वयसि इत्युणादिषु निपातितात् पाकशब्दात् स्त्रियां ४-१-२० वय...इति वाधित्वाऽजादित्वाट्टाप् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-३८ संज्ञापूरण्योश्च ॥

दत्ताभार्यः । पञ्चमीभार्यः । दत्तायते । पञ्चमीयते ।

६-३-३९ वृद्धिनिमित्तस्य च तद्धितस्याऽरक्तविकारे ॥

स्रौघ्नीभार्यः । माथुरीयते । माथरीमानिनी । वृद्धिनिमित्तस्येत्युक्तेर्नेह-मध्यमभार्यः । तद्धितस्येत्युक्तेर्नेह-काण्डलावभार्यः । वृद्धिशब्देन तद्भावितग्रहणम् । तेनेह पुंवदेव-तावद्भार्यः ।
अरक्तविकारे इत्युक्तेरिह पुंवदेव-काषायी कन्था यस्य काषायकन्थः । हैमी मुद्रिका यस्य हैममुद्रिकः ।

६-३-४० स्वाङ्गाच्चेतः ॥

सुकेशीभार्यः । स्वाङ्गादित्युक्तेरिह पुंवदेव-पटुभार्यः । ईत इत्युक्तेरिहापि पुंवदेव-अकेशा भार्या यस्य अकेशभार्यः ।
(अमानिनीति वक्तव्यम्)
सुकेशमानिनी ।

६-३-४१ जातेश्च ॥

शूद्राभार्यः । ब्राह्मणीभार्यः । अत्र काशिका-अयं प्रतिषेध औपसंख्यानिकस्य पुंवद्भावस्य नेष्यते । हस्तिनीनां समूहो हास्तिकमिति ।

६-३-४२ पुंवत् कर्मधारयजातीयदेशीयेषु ॥

महानवमी । महाप्रिया । पाचकस्त्री । दत्तभार्या । पञ्चमभार्या । स्रौघ्नभार्या । सुकेशभार्या । ब्राह्मणभार्या । पाचकजातीया । पाचकदेशीया । पञ्चमजातीया । पञ्चमदेशीयेत्यादि ।
भाषितपुंस्कादित्यनुवृत्तेर्नेह-खट्वावृन्दारिका । अनूङ् इत्यनुवृत्तेर्नेह-ब्रह्मबन्धूवृन्दारिका ।
(कुक्कुटचादीनामण्डादिषु)
कुक्कुटाण्डम् । मृगपदम् ।
अत्र काशिका-पुंवद्भावाद् ह्रस्वत्वं खिद्घादिषु भवति विप्रतिषेधेन । खित् कालिम्मन्या । हरिणिम्मन्या । घादि- पट्वितरा । पटिवतमा । पट्विरूपा । पट्विकल्पा । पट्विका । मृद्विका । इति ।

६-३-३८ संज्ञापूरण्योः=संज्ञाया; पूरण्याश्च, स्त्रियाः+पुंवत् (६-३-३४) न (६-३-३७) । अत्र दत्ताशब्दविषये भट्टोजिदीक्षितः- दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञाभूतोऽयमिति भाषितपुंस्कत्वमस्तीति ।

६-३-३९ वृद्धि-अरक्तविकारे+वृद्धिनिमित्तस्य+तद्धितस्य=रक्त-विकार-भिन्ने ऽर्थे विहितो वृद्धेर्निमित्तं यस्तद्धितस्तदन्तायाः, स्त्रियाः (६-३-३४) न (६-३-३७) । **काषायी** ४-२-१ तेन... इत्यणि ४-१-१५ टिड्ढा... इति ङीप् । **हैमी** ४-३-१३८ अनु... इत्यञ् ।

६-३-४० स्वाङ्गात् +ईतः= स्वाङ्गवाचिनः परो य ईकारः, तदन्तायाः, स्त्रियाः (६-३-३४) न (६-३-३७) । **सुकेशी** ४-१-५४ स्वाङ्गा... इति ङीष् । **अकेशा** ४-१-५७ सह... इति ङीषो निषेधाट्टाप् ।

६-३-४१ जातेः= जातिवाचिनः, स्त्रियाः (६-३-३४) = स्त्रीवाचकशब्दस्य, न (६-३-३७) । **हास्तिकम्** ६-३-३५ तसिँ... सूत्रस्थेन भस्याऽढे.... इति वार्तिकेन पुंवद्भावः ।

६-३-४२ पुंवत्- १-२-४२ तत्पुरुषः... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

६-३-३४ स्त्रियाः पुंवद् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियाम् अपूरणीप्रियादिषु ॥ ६-३-४२ (ख) (क) पुंवत् (ग) कर्मधारयजातीयदेशीयेषु ॥ इति ।

(ख)= भाषितपुंस्कादनूङ्=अनूङन्त-भाषितपुंस्कस्य (ऊङ् अन्त्यमा नहुने भाषितपुंस्क) (क)= स्त्रियाः= स्त्रीवाचकशब्दस्य, पुंवत्=पुंवाचकशब्दस्येव रूपं भवति (स्त्रीप्रत्ययस्य निवृत्तिर्भवति)

(ग)= स्त्रियाम्=स्त्रीलिङ्गे उत्तरपदे, कर्मधारयजातीयदेशीयेषु= कर्मधारयसमासे, जातीय (र्) देशीय (र्) प्रत्यययोश्च परतः । इत्यर्थमुपदिश्य (शिक्षको मनसा विमृशेत् ६-३-३४ स्त्रियाः... इत्यनेन पूरणीप्रियादिष्वप्राप्तः, ६-३-३७ न को.... प्रभृतिभिः प्रतिषिद्धश्च पुंवद्भावो ऽनेन विधीयते इति) अतः शुक्ला इत्यत्र टापो निवृत्तिर्भवतीति बोधयेत् । शुक्लशाटी । इति । अथ २-१-२४ द्वितीया... सूत्रमुपदिशेत् ।

कुक्कु- पुंवद्भावो वक्तव्यः । ननु तसिँलादिषु कप्रत्ययो न परिगणितः "**पट्विका**" इत्यत्र केन पुंवद्भावः प्राप्तः ? अत्र हरदत्तः- एवं तर्हि विप्रतिषेधादेव कप्रत्ययो ऽपि तत्राभ्युपगम्यत इति अनुमीयत इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-४३ घ-रूप- कल्प- चेलड्- ब्रुव- गोत्र-मत- हतेषु ङ्योऽनेकाचो ह्रस्वः ॥४५

ब्राह्मणितरा । ब्राह्मणितमा । ब्राह्मणिरूपा । ब्राह्मणिकल्पा । ब्राह्मणिचेली ।ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रा । ब्राह्मणिमता ।

ब्राह्मणिहता । ङ्य इत्युक्तेर्नेह- दत्तातरा । भाषितपुंस्कादित्यनुवृत्तेर्नेह-आमलकीतरा । कुवलीतरा ।

६-३-४४ नद्याः शेषस्याऽन्यतरस्याम्॥४५

ब्रह्मबन्धुतरा; ब्रह्मबन्धूतरा ।

स्त्रितरा; स्त्रीतरा ।

(कृन्नद्याः प्रतिषेधो वक्तव्यः)

लक्ष्मीतरा ।

६-३-४५ उगितश्च ॥

विदुषितरा; विद्वत्तरा ।

६-३-४६ आन्महतः समानाधिकरण-जातीययोः ॥४९

महादेवः । महावैयाकरणः । महाबाहुः । समानाधिकरणजातीययोरित्युक्तेर्नेह महतः पुत्रो महत्पुत्रः । आदिति योगविभागादात्वम् । ५-३-४९ प्रागेकादशभ्य इति निर्देशाद् वा । एकादशः । इति दीक्षितः । महतीशब्दस्य ६-३-४२ पुंवत्..इति पुंवद्भावे कृते आत्वम् । महाजातीया ।

(महदात्वे घासकरविशिष्टेषूपसंख्यानं पुवद्वचनं चाऽसमानाधिकरणार्थम्)

महतो महत्या वा घासो महाघासः । महाकरः । महाविशिष्टः ।

(अष्टनः कपाले हविष्युपसंख्यानम्)

अष्टाकपालं चरु । हविषीत्युक्तेर्नेह- अष्टकपालं ब्राह्मणस्य ।

(ग वि च युक्ते)

अष्टागवं शकटम् ।

६-३-४३ घरूप.. हतेषु=घादिप्रत्ययेषु चेलडादिषु च, उत्तरपदेषु (६-३-१) भाषितपुंस्कात् (६-३-३४) परः, ङ्यः=यो ङी तदन्तस्य, अनेकाचः=अनेकाचः स्थाने, ह्रस्वः= ह्रस्वो भवति । अत्र दीक्षितः-चेलडादीनि वृत्तिविषये कुत्सनवाचीनि तैः २-१-५३ कुत्सितानि कुत्सनैरिति समासः । इति । ब्रूञः पचाद्यचि वच्यादेशगुणयोरभवो ऽपि निपात्यते । इति च ।

६-३-४४ नद्याः-शेषस्य+ नद्याः=अङ्यन्तनद्या ङ्यन्तैकाचश्च, अन्यतरस्याम्=वा, ह्रस्वः+घरूप...हतेषु (६-३-४३)। पूर्वसूत्रे "ङ्यो ऽनेकाच" इत्युक्त्या प्रकृतसूत्रे शेषस्येत्युक्त्या च अङ्यन्तनद्या ङ्यन्तैकाचश्चेत्यर्थः फलितः ।

भाषितपुंस्कादनूङ्-(६-३-३४) इति निवृत्तम् ।

६-३-४५ उगितः=उगितः परस्याः, नद्याः+अन्यतरस्याम् (६-३-४४) ह्रस्वः+घादिषु (६-३-४३)। उदाहरणयोर्ह्रस्वाभावपक्षे ६-३-३५ तसिँ...इति पुंवत् ।

६-३-४६ आन्म-महतः=महच्छब्दस्य स्थाने, आत्=आकारादेशो भवति, समानाधिकरणजातीययोः= समानाधिकरणे उत्तरपदे (६-३-१) जातीये च परे। **महत्पुत्रः** अत्र दीक्षितः- लाक्षणिकं विहाय प्रतिपदोक्तः २-१-६१ सन्महत्... इति समासो ऽत्र ग्रहीष्यते इति चेत्- महाबाहुर्न स्यात् । तस्मात् लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्येति परिभाषा नेह प्रवर्तते, समानाधिकरणग्रहणसामर्थ्यात् । इति । **अष्ट- अष्टकपालं ब्राह्मणस्य** समाहारे द्विगुः । २-४-१७ स न... सूत्रस्थ- पात्रा...वार्तिकेन स्त्रीत्वा ऽभावः ।

गवि=गोशब्दे परे युक्त इत्यर्थे गम्यमाने अष्टन आत्वम् इत्यर्थः । अत्र दीक्षितः- ५-४-७५ अच् प्रत्यन्वेत्यत्राजिति योगविभागाद् बहुव्रीहावप्यच् । अष्टानां गवां समाहारः अष्टगवम् । तद्युक्तत्वाच्छकटमष्टागवमिति वा । इति । अत्र ५-४-९२ गोर... इति टच् । ततः शकटे वाच्ये ५-२-१२७ अर्श... इत्यच् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-४७ द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ॥४९

द्वादश । अष्टादश । द्व्यष्टन इत्युक्तेर्नेह- पञ्चदश । संख्यायामित्युक्तेर्नेह- द्वैमातुरः । अबहुव्रीह्यशीत्योरित्युक्तेर्नेह-द्वित्राः । द्व्यशीतिः ।

(प्राक् शतादिति वक्तव्यम्)

द्विशतम् । द्विसहस्रम् ।

अष्टशतम् । अष्टसहस्रम् ।

६-३-४८ त्रेस्त्रयः ॥४९

त्रयोदश । अबहुव्रीह्यशीत्योरित्यनुवृत्तेर्नेह त्रिदशाः । त्र्यशीतिः ।

(प्राक् शतादित्येव)

त्रिशतम् । त्रिसहस्रम् ।

६-३-४९ विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ॥

द्विचत्वारिंशत् । द्वाचत्वारिंशत् ।

अष्टाचत्वारिंशत् । अष्टचत्वारिंशत् ।

त्रिचत्वारिंशत्; त्रयश्चत्वारिंशत् ।

एवं पञ्चाशत्- षष्टि- सप्तति- नवतिषु ।

(प्राक् शतादित्येव)

द्विशतम् । अष्टशतम् । त्रिशतम् ।

६-३-५० हृदयस्य हृल्लेखयदण्लासेषु ॥५१

हृदयं लिखतीति= हृल्लेखः । घञि तु- हृदयस्य लेखः=हृदयलेखः । हृदयस्य प्रियम्= हृद्यम् । हृदयस्येदम्=हार्दम् । हृदयस्य । लासो हृल्लासः ।

६-३-५१ वा शोक-ष्यञ् रोगेषु ॥

हृच्छोकः, हृदयशोकः । सौहार्द्यम्, सौहृदय्यम् । हृद्रोगः, हृदयरोगः ।

६-३-५२ पादस्य पदाज्यातिगोपहतेषु ॥५३

पादाभ्यामजति=पदाजिः । पदातिः । पादाभ्यां गच्छति=पदगः । पादाभ्यामुपहतः =पदोपहतः ।

६-३-४७ **द्व्यष्टनः**=द्विशब्दस्याऽष्ट(न्) शब्दस्य च स्थाने, आत् (६-३-४६) संख्यायाम्= संख्यावाचिन्युत्तरपदे, अबहुव्रीह्यशीत्योः=बहुव्रीहिसमासमुत्तरपदाशीतिशब्दं च वर्जयित्वा । **द्वैमातुरः** । ४-१-११५ मातु... इत्यत्र द्रष्टव्यम् । **द्वित्राः** २-२-२५ संख्य... इति बुहव्रीहिः ।

६-३-४८ **त्रेः**=त्रिशब्दस्य स्थाने, त्रयः= त्रयस् आदेशो भवति, संख्यायामबहुव्रीह्यशीत्योः (६-३-४७) ।

६-३-४९ **विभा-सर्वेषाम्**=द्व्यष्टनः (६-३-४७) त्रेः (६-३-४८) च, विभाषा= प्रागुक्तं वा, चत्वारिंशत्प्रभृतौ=चत्वारिंशदादिषु परेषु, -अबहुव्रीह्यशीत्योः (६-३-४७) ।

६-३-५० **हृदयस्य**=हृदयशब्दस्य स्थाने, हृद्=हृद् आदेशो भवति, लेख...सेषु= अणन्तलेखशब्दे, यत्प्रत्यये, अण्प्रत्यये, लासशब्दे च परे । लेख इत्यणन्तस्य ग्रहणं व्याख्यानात् । **हृद्यम्** ४-४-९५ हृद... इति यत् ।

६-३-५१ **वा शो-** हृदयस्य+ हृद् (६-३-५०) वा=विभाषया, शोक... रोगेषु= शोकशब्दे ष्यञ्प्रत्यये रोगशब्दे च परे । **सौहार्द्यम्**, ५-१-१२३ गुण... इति ब्राह्मणादित्वात् ष्यञ् । हृदादेशपक्षे ७-३-१९ हृद्भ... इत्युभयपदादिवृद्धिः । अत्र काशिका- हृदयशब्देन समानार्थो हृच्छब्दः प्रकृत्यन्तरमस्ति, तेनैव सिद्धे विकल्पविधानं प्रपञ्चार्थमिति ।

६-३-५२ **पादस्य**= पादशव्दस्य स्थाने, पद= पद इत्यादेशोः भवति, आज्या....तेषु= आजि आति ग उपहत इत्येतेषु, उत्तरपदेषु (६-३-१) । उदाहरणेषु आद्ययोः- ५८० अज्यतिभ्याम्... इत्यौणादिक इण्प्रत्ययः । तृतीये- ३-२-१०१ अन्ये...इति डः । तुरीये- २-१-३२ कर्तृ.... इति समासः । सूत्रे पद इत्यदन्नं सौत्रत्वाद् विभक्ति-लुक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-५३ पद् यत्यतदर्थे

पादौ विध्यन्ति=पद्याः कण्टकाः।अतदर्थे इत्युक्तेर्नेह-पादार्थमुदकंपाद्यम् ।शरीरावयववचनस्य पादशब्दस्य ग्रहणमिष्यते, तेन ५-१-३४ पणपादमाषशताद् यत् इत्यत्र पदादेशो न भवति । द्विपाद्यम् । त्रिपाद्यम् इति ।

(इके चरतावुपसंख्यानम्)

पादाभ्यां चरति=पदिकः ।

६-३-५४ हिमकाषिहतिषु च ॥

पद्धिमम् । पत्काषी । पद्धतिः ।

६-३-५५ ऋचः शे ॥

पच्छो गायत्रीं शंसति । ऋच इत्युक्तेर्नेह पादशः कार्षापणं ददाति ।

६-३-५६ वा घोष-मिश्र- शब्देषु ॥

पद्घोषः, पादघोषः । पन्मिश्रः, पादमिश्रः । पच्छब्दः, पादशब्दः ।

(निष्के चेति वक्तव्यम्)

पन्निष्कः । पादनिष्कः ।

६-३-५७ उदकस्योदः संज्ञायाम् ॥६०

उदमेघः । संज्ञायामित्युक्तेर्नेह-उदकगिरिः ।

(उत्तरपदस्य चेति वक्तव्यम्)

क्षीरोदः ।

६-३-५८ पेषं-वास-वाहन-धिषु च ॥

उदपेषं पिनष्टि । उदवासः । उदवाहनः । उदधिः ।

६-३-५९ एकहलादौ पूरयितव्ये ऽन्यतरस्याम् ॥६१

उदकुम्भः, उदककुभः ।एकहलादावित्युक्तेर्नेह-उदकस्थालम् । पूरयितव्ये इत्युक्तेर्नेह- उदक-पर्वतः ।

६-३-५३ पद् य- पादस्य (६-३-५२) पद्=पद् आदेशो भवति, अतदर्थे=तदर्थभिन्नेऽर्थे विहिते, यति= यत्प्रत्यये परे । **पद्याः** ४-४-८३ विध्य... इति यत् । **पाद्यम्** ५-४-२५ पादा... इति यत् । **इके-** चरतौ+इके= चरत्यर्थे विहिते इकप्रत्यये परे **पादस्य** (६-३-५२) पद् (६-३-५३) । **पदिकः** ४-४-१० पर्पा... इति ष्ठन् ।

६-३-५४ हिम- पादस्य (६-३-५२) पद् (६-३-५३) हिम... तिषु=हिम काषि (न्) हति इत्येतेषु, उत्तरपदेषु (६-३-१) ।

६-३-५५ ऋचः= ऋक्सम्बन्धिनः पादस्य (६-३-५२) पद् (६-३-५३) शे= शे परे । सूत्रे "शे=श" इति शस् प्रत्ययस्यैकदेशानुकरणम् । उदाहरणे प्रत्युदाहरणे च ५-४-४३ संख्यै... इति शस्प्रत्ययः ।

६-३-५६ वा घो- पादस्य (६-३-५२) वा= विभाषया, पद् (६-३-५३) घोष... शब्देषु= घोष मिश्र शब्द इत्येतेषु, उत्तरपदेषु (६-३-१) ।

६-३-५७ उदकस्य= उदकशब्दस्य स्थाने, उदः= उद इत्यादेशो भवति, उत्तरपदे (६-३-१) संज्ञायाम्= संज्ञायां गम्यमानायाम् । सादृश्यात् कस्यचित् पुरुषस्येयं संज्ञा ।

६-३-५८ पेष- उदकस्य+ उदः (६-३-५७) पेषं.... धिषु=पेषं वास वाहन धि इत्येतेषु, उत्तरपदेषु (६-३-१) **उदपेषम्** ३-४-३८ स्नेह... इति णमुँल् ।

उदधिः ३-३-९३ कर्म... इति किः । उदधिः= घटादिः । सागरे तु पूर्वेणैव सिद्धिः ।

६-३-५९ एकहलादौ- पूरयितव्ये= पूरयितव्यवाचिनि, एकहलादौ= असंयुक्तहलादिशब्दे, उत्तरपदे (६-३-१) अन्यतरस्याम् =वा, उदकस्य+उदः (६-३-५७) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-६० मन्थौदन-सक्तु-बिन्दु-वज्र-भार-हार- वीवध-गाहेषु च ॥

उदमन्थः, उदकमन्थः । उदौदनः, उदकौदनः । उदसक्तुः, उदकसक्तुः । उदबिन्दुः, उदकबिन्दुः । उदवज्रः उदकवज्रः । उदभारः उदकभारः, । उदहारः, उदकहारः । उदवीवधः उदकवीवधः । उदगाहः, उदकगाहः ।

६-३-६१ इको ह्रस्वोऽङ्यो गालवस्य ॥६६

ग्रामणिपुत्रः, ग्रामणीपुत्रः।ब्रह्मबन्धुपुत्रः; ब्रह्मबन्धूपुत्रः । इक इत्युक्तेर्नेह- रमापतिः । अङ्य इत्युक्तेर्नेह-गौरीपुत्रः । अत्र काशिका-व्यवस्थितविभाषा चेयम् । तेनेह न भवति-कारीषगन्धीपुत्र इतीति ।

(इयँङुवँङ्भाविनामव्ययानां च नेति वक्तव्यम्)

श्रीकुलम् । भ्रूभङ्गः । शुक्लीभावः ।

(भ्रुकुंसादीनां तु भवत्येव)

भ्रुकुंसः, भ्रूकुंसः । भ्रुकुटिः, भ्रूकुटिः ।

अपर आह

(भ्रुकुंसादीनामकारो भवतीति वक्तव्यम्)

भ्रकुंसः । भ्रकुटिः ।

६-३-६२ एक तद्धिते च ॥

एकस्या आगतम्= एकरूप्यम् । एकमयम् । एकस्या भावः= एकत्वम् । एकता । एकस्याः क्षीरम्= एकक्षीरम् ।

६-३-६३ ङ्यापोः संज्ञाछन्दसोर्बहुलम् ॥६४

रेवतिपुत्रः । अजक्षीरम् ।

६-३-६४ त्वे च ॥

रोहिणित्वम्, रोहिणीत्वम् । अजत्वम्, अजात्वम् ।

६-३-६५ इष्टकेषीकामालानां चिततूलभारिषु ॥

इष्टकचितम् । पक्वेष्टकचितम् । इषीकतूलम् । मुञ्जेषीकतूलम् । मालभारी । उत्पलमालभारी ।

६-३-६६ खित्यनव्ययस्य ॥६९,६७

नासिकन्धमः । नाडिन्धमः । अनव्ययस्येत्युक्तेर्नेह- दोषामन्यमहः । दिवामन्या रात्रिः ।

६-३-६० मन्थौ- उदकस्य+उदः (६-३-५७) अन्यतरस्याम् (६-३-५९) मन्थौ... हेषु= मन्थप्रभृतिषु उत्तरपदेषु, (६-३-१) ।

६-३-६१ इको- अङ्यः=अङ्यन्तस्य, इकः= इगन्तस्य पूर्वपदस्य स्थाने अन्यतरस्याम् (६-३-५९) ह्रस्वः= ह्रस्वो भवति, उत्तरपदे (६-३-१) गालवस्य= गालावाचार्यस्य मते । गालवग्रहणं पूजार्थम् । विकल्पस्याऽन्यतरस्यामित्यनुवृत्त्यैव सिद्धेः ।

६-३-६२ एक= एकशब्दस्य स्थाने, ह्रस्वः (६-३-६१) तद्धिते= तद्धिते परे, उत्तरपदे (६-३-१) च । सूत्रे एक इत्यविभक्तिको निर्देशः । लिङ्गविशिष्टपरिभाषया एकाशब्दस्य ग्रहणम् । प्रयोजनमपि तस्यैव ।

६-३-६३ ङ्यापोः= ङी इत्यस्य आपश्च, बहुलम्= बाहुल्येन, ह्रस्वः (६-३-६१) उत्तरपदे (६-३-१) संज्ञाछन्दसोः = संज्ञायां गम्यमानायां वेदे च ।

६-३-६४ त्वे=त्वप्रत्यये परे, ङ्यापोः+बहुलम् (६-३-६३) ह्रस्वः (६-३-६१) । अत्र काशिका-संज्ञायामसंभवाच्छन्दस्येवोदाहरणानि भवन्ति । इति ।

६-३-६५ इष्ट... लानाम्= इष्टकादीनां तदन्तानां च, ह्रस्वः (६-३-६१) चित... रिषु= चितादिषु,उत्तरपदेषु (६-३-१) ।

६-३-६६ खिति=खिदन्ते, उत्तरपदे (६-३-१) अनव्ययस्य= अव्ययभिन्नपूर्वपदस्य, ह्रस्वः (६-३-६१) । अनव्ययस्येति खिदन्तस्य ज्ञापकम् । अन्यथा अव्ययात् परतः खित्प्रत्ययस्या ऽसंभवात् तद् व्यर्थं स्यात् । उदाहरणयोः- आद्ये ३-२-२९ नासि... इति, अन्त्ये ३-२-३० नाडी... इति खश् । उभयत्र ६-२-६७ अरु... इति मुँम् । प्रत्युदाहरणयोः ३-२-८३ आत्म...इति खश् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-६७ अरुर्द्विषदजन्तस्य मुँम् ॥७२

अरुन्तुदः । द्विषन्तपः । परन्तपः ।
अनव्ययस्येत्यनुवृत्तेर्नेह- दोषामन्यमहः ।
दिवामन्या रात्रिः ।

६-३-६८ इच एकाचो ऽम्प्रत्ययवच्च ॥

गाम्मन्यः । स्त्रियम्मन्यः, स्त्रीम्मन्यः ।
नरम्मन्यः । भुवम्मन्यः । अत्र दीक्षितः-
श्रियमात्मानं मन्यते श्रिमन्यं कुलम् ।
भाष्यकारवचनात्, श्रीशब्दस्य ह्रस्वो
मुँममोरभावश्चेति ।

६-३-६९ वाचंयमपुरन्दरौ च ॥

वाचंयमः । पुरन्दरः ।

६-३-७० कारे सत्यागदस्य ॥

सत्यङ्कारः । अगदङ्कारः ।
(अस्तोश्चेति वक्तव्यम्)
अस्तुङ्कारः ।
(भक्षस्य च्छन्दसि)
भक्षङ्कारः । लोके तु भक्षकारः ।
(धेनोर्भव्यायाम्)
धेनुम्भव्या ।
(लोकस्य पृणे)
लोकम्पृणः ।
(इत्येऽनभ्याशस्य)
अनभ्याशमित्यः ।
(भ्राष्ट्राग्न्योरिन्धे)
भ्राष्ट्रमिन्धः । अग्निमिन्धः ।
(गिले ऽगिलस्य)
तिमिङ्गिलः । अगिलस्येत्युक्तेर्नेह-गिलगिलः ।
(गिलगिले च)
तिमिङ्गिलगिलः ।
(उष्णभद्रयोः करणे)
उष्णङ्करणम् । भद्रङ्करणम् ।

६-३-७१ श्येनतिलस्य पाते ञे ॥

श्यैनम्पाता मृगया । तैलम्पाता स्वधा । ञे
इत्युक्तेर्नेह- श्येनपातः । तिलपातः ।

६-३-७२ रात्रेः कृति विभाषा ॥

रात्रिञ्चरः रात्रिचरः । खिति पूर्वविप्रतिषेधेन
नित्यं मुँम् । रात्रिम्मन्या ।

६-३-६७ अरु- खिति+ अनव्ययस्य ६-३-६६ अरु... जन्तस्य= अरुष् द्विषत् इत्येतयोः अजन्तस्य च पूर्वपदस्य, मुँम्= मुँमागमो भवति । उदाहरणेषु- आद्ये ३-२-३५ विध्व... इति खश् । अन्त्ययोः ३-२-३९ द्विष... इति खच् ।

६-३-६८ इच- सूत्रे "अम्" इत्यावर्तते । इचः= इजन्तात्, एकाचः, अम्= अम्प्रत्ययो भवति, अम्प्रत्ययवच्च= स च अम्प्रत्यय इव (स्वाद्यमिव) भवति, खिति (६-३-६६) । उदाहरणेषु- ३-२- ८३ आत्म...इति खश् । आद्ये ६-१-९० औतो... इत्याकारादेशः । द्वितीये ६-४-८० वाऽम्श... इति वेयँङ् । तृतीये- नृशब्दस्य ७-३-११० ऋतो... इति गुणः । चतुर्थे ६-४-७७ अचि... इत्युवँङ् ।

६-३-६९ वाचं... दरौ =वाचंयम पुरन्दर इति पूर्वपदस्यामन्तत्वं निपात्यते । आद्ये ३-२-४० वाचि... इति अन्त्ये ३-२-४१ पूःस... इति खच् ।

६-३-७० कारे= कारशब्दे, उत्तरपदे (६-३-१) सत्यागदस्य= सत्य अगद इत्येतयोः, मुँम् ६-३-६७) ।

६-३-७१ श्येन- ञे= ञप्रत्ययान्ते, पाते= पातशब्दे, उत्तरपदे (६-३-१) श्येनतिलस्य= श्येन तिल इत्येतयोः, मुँम् (६-३-६७) । उदाहरणयोः- ४-२-५८ घञः... सूत्रे प्रक्रिया दृष्टव्या ।

६-३-७२ रात्रेः=रात्रिशब्दस्य, कृति कृदन्ते, उत्तरपदे (६-३-१) विभाषा=वा, मुँम् (६-३-६७) । **नित्यं मुँम्** अतोऽ प्राप्तविभाषेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-७३ न लोपो नञः ॥७७

अब्राह्मणः ।

(नञो नलोपस्तिङि क्षेपे)

अपचसि त्वं जाल्म । अकरोषि त्वं जाल्म ।

६-३-७४ तस्मान्नुँडचि ॥

अनश्वः ।

६-३-७५ नभ्राण्नपान्नवेदा नासत्या नमुचि नकुल- नख- नपुंसक- नक्षत्र- नक्र- नाकेषु प्रकृत्या ॥७७

नभ्राट् । नपात् । नवेदाः । नासत्याः । नमुचिः । नकुल : । नखम् । नपुंसकम् । नक्षत्रम् । नक्रः । नाकः ।

६-३-७६ एकादिश्चैकस्य चादुँक् ॥

एकान्नविंशतिः । एकान्नत्रिंशत् ।

६-३-७७ नगोऽप्राणिष्वन्यतरस्याम् ॥

नगाः, अगाः, वा वृक्षाः पर्वता वा ।

अप्राणिष्वित्युक्तेर्नेह- अगो जनः शीतेन ।

६-३-७८ सहस्य सः संज्ञायाम् ॥८३,८९

सपलाशम् । संज्ञायामित्युक्तेर्नेह- सहयुध्वा ।

६-३-७९ ग्रन्थान्ताधिके च ॥

समुहूर्तं ज्यौतिषमधीते । सद्रोणा खारी ।

३-३-७३ न लो- नञः, न= नकारस्य, लोपः= लोपो भवति, उत्तरपदे (६-३-१) ।

६-३-७४ तस्मात्= लुप्तनकारान्नञः परस्य, अचि= अजादेः, उत्तरपदस्य (६-३-१) नुँट्= नुँडागमः । तच्छब्दः पूर्वपरामर्शी । पूर्वसूत्रे च नञो नकारो लुप्तः । अतः तस्मादित्यस्य लुप्तनकारान्नञ इत्यर्थः प्रदर्शितः । अचि इति उत्तरपदे इत्यस्य विशेषणम् । अतः, यस्मिन् विधिरिति परिभाषया अजादावुत्तरपदे इत्यर्थप्रसक्तौ १-१-६६ तस्मा... इति सूत्रबलेन सप्तम्यन्तं षष्ठचन्ताय कल्पते । अतः, अजादेरुत्तरपदस्येत्यर्थः प्रदर्शितः ।

६-३-७५ नभ्राण्... नाकेषु= नभ्राट् प्रभृतिषु, प्रकृत्या= नञ् प्रकृत्या वर्तते (नञो नलोपो न भवति) । उदाहरणेषु- आद्ये ३-२-१७७ भ्राज... इति क्विँप् । द्वितीये- शतृँप्रत्ययः । तृतीयेऽसुँन्प्रत्यः । **नासत्याः-** सत्सु साधवः सत्याः ४-४-९८ तत्र... इति यत् । न सत्याः= असत्याः । न असत्याः= नासत्याः । एतदन्तानि चत्वारि पृथक् पदानि । नासत्या इति बहुवचनमविवक्षितम्, "नासत्यावश्विनौ दस्रौ" इत्यमरे दर्शनादिति दाधिमथी । **नमुचिः** ५६९ इगुपधात् कित् इत्यौणादिक इन् प्रत्ययः । न खमस्य= नखम् । न स्त्रीपुमान्= नुपंसकम्, स्त्रीपुंसयोः पुंसकभावो निपातनात् । नक्रामतीति नक्रः, क्रमेर्डो निपातनात् । **नाकः** कम्=सुखम् । तद्विरुद्धम्= अकम्= दुःखम् । न अकं यस्मिन् स नाकः= स्वर्गः ।

६-३-७६ एकादिः=एकशब्दादिको नञ्, प्रकृत्या (६-३-७५), एकस्य= एकशब्दस्य, अदुँक् च=अदुँगागमश्च भवति । **एकान्नविंशतिः-** पूर्वं नञो विशत्यादिभिः समासं कृत्वा पश्चात् तृतीयासमासः कर्तव्य इति - पदमञ्जरी । नञो विंशत्या सह समासे कृते एकशब्देन सह तृतीयेति योगविभागात् समास इति दीक्षितः । वस्तुतस्तु नञो विंशत्या समासे नञ एकादित्वाभावेन प्रकृतिभावाऽप्राप्त्या नलोपापत्तिर्दुर्वारैव । तस्मात्... पूर्वम् "एकेन न" इत्येवं विग्रहे २-१-३१ पूर्वसदृश... इति सूत्रेण नशब्देनोनार्थकेन तृतीयान्तैकशब्दस्य विना कष्टं समासे "एकन" इत्यस्य "एकोना" इत्यर्थकस्य विंशत्या समानाधिकरणसमासे "एकनविंशतिः" इत्यत्र ६-३-७३ "न लोपो नञः" इति न लोपे प्राप्ते नञ एकादित्वात् प्रकृतिभावो ऽपि विना गुरुकल्पनां निर्वहतीति- दाधिमथी । ८-४-४४ यरो... इत्यनुनासिकाऽभावे- **एकाद् न विंशतिः** । एकोनविंशतिरित्यर्थः ।

६-३-७७ नगो- अप्राणिषु= प्राणिभिन्नेषु वाच्येषु, अन्यतरस्याम्=वा, नगः= नग इत्यत्र नञ् प्रकृत्या ।

६-३-७८ सहस्य= सहशब्दस्य स्थाने, सः= स इत्यादेशो भवति, उत्तरपदे (६-३-१) संज्ञायाम=संज्ञायां गम्यमानायाम् । **सपलाशम्** २-२-२८ तेन... इति समासः । **सहयुध्वा** ३-२-९६ सहे... इति क्वनिँप् । अत्र काशिका- सादेश उदात्तो निपात्यत इति ।

६-३-७९ ग्रन्थान्ताधिके= ग्रन्थान्ते अधिके चा ऽर्थे, सहस्य + सः (६-३-७८) उत्तरपदे (६-३-१) । **समुहूर्तम्** मुहूर्तः कालविशेषः । तत्सहचरितो ग्रन्थोऽपि मुहूर्तः । अन्तवचने २-१-६ अव्य... इत्यव्ययीभावसमासः । **सद्रोणा** २-२-२८ तेन ... इति समासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-८० द्वितीये चाऽनुपाख्ये ॥
सराक्षसीका निशा ।
६-३-८१ अव्ययीभावे चाऽकाले ॥
चक्रेण युगपत्= सचक्रम् । तृणमप्यपरित्यज्य सतृणम् । अकाले इत्युक्तेर्नेह- पूर्वाह्णमप्यपरित्यज्य सहपूर्वाह्णम् ।
६-३-८२ वोपसर्जनस्य ॥
सपुत्रः, सहपुत्रः । उपसर्जनस्येत्युक्तेर्नेह- सहकृत्वा ।
६-३-८३ प्रकृत्या ऽऽ शिषि ॥
स्वस्ति राज्ञे सहपुत्राय सहामात्याय ।
(अगोवत्सहलेष्विति वक्तव्यम्)
स्वस्ति राज्ञे सगवे सवत्साय सहलाय ।
६-३-८४ **समानस्य**च्छन्दस्यमूर्ध- प्रभृत्युदर्केषु ॥८८
अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्याः ।
यो नः सनुत्यः । अमूर्धादिष्वित्युक्तेर्नेह- समानमूर्धा । समानप्रभृतयः। समानोदर्काः ।

अत्र काशिका- "समानस्य" इति योगविभाग इष्टसिद्धचर्थः क्रियते । तेन सपक्षः । साधर्म्यम् । सजातीयः । इत्येवमादयः सिद्धा भवन्तीति । अत्र दीक्षितः- अथवा सहशब्दः सदृशवचनो ऽप्यस्ति । सदृशः सख्या= ससखि, इति यथा । तेनायमस्वपदविग्रहो बहुव्रीहिः समानः पक्षोऽस्येत्यादि, इति ।
६-३-८५ ज्योतिर्जनपदरात्रिनाभि- नामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु ॥
सज्योतिः । सजनपदः । सरात्रिः । सनाभिः । सनामा । सगोत्रः । सरूपः । सस्थानः । सवर्णः । सवयाः । सवचनः । सबन्धुः ।
६-३-८६ चरणे ब्रह्मचारिणि ॥
समानो ब्रह्मचारी= सब्रह्मचारी ।
६-३-८७ तीर्थे ये ॥८८
समाने तीर्थे= गुरौ वसति सतीर्थ्य एकगुरुकः ।

६-३-८० **द्वितीये**= अप्रधाने, अनुपाख्येये= अनुमेये, सहस्य+सः (६-३-७८) । **सराक्षसीका** राक्षसी साक्षादनुपलभ्यमाना निशयाऽ नुमीयते ।
६-३-८१ **अव्य-** सहस्य+ सः (६-३-७८) अव्ययीभावे= अव्ययीभावसमासे, अकाले= न तु काले । उदाहरण- प्रत्युदाहरणेषु २-१-६ अव्य ... इत्यव्ययीभावसमासः ।
६-३-८२ **वोप-** उपसर्जनस्य, सहस्य+सः (६-३-७८) वा= विभाषया । उदाहरणयोः २-२-२८ तेन... इति समासः ।
६-३-८३ **प्रकृ-** सहस्य (६-३-७८) प्रकृत्या= प्रकृत्या स्थितिः, अशिषि= आशीर्वादे गम्यमाने ।
६-३-८४ **समानस्य**= समानशब्दस्य स्थाने, सः (६-३-७८) अमूर्ध...दर्केषु=मूर्धादिभिन्नेषूत्तरपदेषु, छन्दसि=वेदे । **सगर्भ्यः** ४-४-११४ सग... सूत्रे द्रष्टव्यम् ।
६-३-८५ **ज्योति-** समानस्य (६-३-८४) सः (६-३-७८) ज्योति... बन्धुषु= ज्योतिरादिषूत्तरपदेषु । **सवयाः** ६-४-१४ अत्व... इति दीर्घः ।
६-३-८६ **चरणे**= शाखायां गम्यमानायाम्, ब्रम्ह्मचारिणि= ब्रह्मचारि (न्) शब्दे, उत्तरपदे (६-३-१) समानस्य (६-३-८४) सः (६-३-७८) । **सब्रह्मचारी** ब्रह्म वेदः । तदध्ययनार्थं व्रतमपि ब्रह्म । तच्चरतीति ब्रह्मचारी । समानो ब्रह्मचारीत्यर्थः । ब्रह्मचारिणः समानत्वं च ब्रह्मणः समानत्वात् । ततश्च समाने ब्रह्मणि व्रतचारीति फलितो ऽर्थः ।
६-३-८७ **तीर्थे-** ये= यादौ प्रत्यये विवक्षिते, तीर्थे= तीर्थशब्दे, उत्तरपदे (६-३-१) समानस्य (६-३-८४) सः (६-३-७८) । **सतीर्थ्यः** ४-४=१०७ समा... सूत्रे स्फुटम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-८८ विभाषोदरे ॥

सोदर्यः, समानोदर्यः ।

६-३-८९ दृग्दृशवतुँषु ॥९१

सदृक् । सदृशौ । सदृशः ।
सदृशः । सदृशौ । सदृशाः ।
(दृक्षे चेति वक्तव्यम्)
सदृक्षः । सदृक्षौ । सदृक्षाः

६-३-९० इदंकिमोरीश्की ॥

ईदृक् । ईदृशः । इयान् । कीदृक् । कीदृशः । कियान् ।
(दृक्षे चेति वक्तव्यम्)
ईदृक्षः । कीदृक्षः ।

६-३-९१ आ सर्वनाम्नः ॥९२

तादृक् । तादृशः । तावान् ।
(दृक्षे च)
तादृक्षः ।

६-३-९२ विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये ॥९५

विश्वद्र्यङ् । देवद्र्यङ् । अदसो ऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत् । केचिदन्त्यसदेशस्य नेत्येके ऽ सेर्हि दृश्यते । अमुद्र्यङ् । अमुमुयङ् । अदमुयङ् । अदद्र्यङ् ।
अप्रत्यय इत्युक्तेर्नेह-
विष्वगञ्चनम् । अप्रत्ययग्रहणमन्यत्र धातुग्रहणे तदादिविधिप्रतिपत्त्यर्थम् । तेन अयस्कार इत्यत्र ८-३-४६ अत... इति सत्वं सिध्यति ।
(छन्दसि स्त्रियां बहुलमिति वक्तव्यम्)
विश्वाची च घृताची चेत्यत्र न भवति ।
कद्रीचीत्यत्र तु भवत्येवेति काशिका ।

६-३-८८ विभा- ये (६-३-८७) उदरे = उदरशब्दे, उत्तरपदे (६-३-१) समानस्य (६-३-८४) विभाषा=वा, सः (६-३-७८) । **सोदर्यः** ४-४-१०९. सोद... सूत्रे स्फुटम् ।

६-३-८९ दृग्दृ- समानस्य (६-३-८४) सः (६-३-७८) दृग्दृशवतुँषु= दृश् दृश वतुँ इत्येतेषु परेषु । उदाहरणेषु ३-२-६० त्यदा... सूत्रस्थ-समा... वार्तिकेन क्विँन्, कञ्च । सूत्रे वतुँग्रहणमुत्तरार्थम् ।
दृक्षे.. सदृक्षः ३-२-६० त्यदा... सूत्रस्थ- दृशे... वार्तिकेन क्सः ।

६-३-९० इदंकिमोः= इदंशब्दस्य किंशब्दस्य च स्थाने, ईश्की= ईश् की इत्यादेशौ भवतः (क्रमात्)- दृग्दृशवतुँषु (६-३-८९) । उदाहरणेषु- आद्ययोश्चतुर्थपञ्चमयोश्च ३-२-६० त्यदा... क्विन् कञ्च । **इयान् कियान्** ५-२-४० किमि... सूत्रे स्फुटम् ।
दृक्षे=दृक्ष-शब्दे, उत्तपदे (६-३-१) इदकिमोः+ ईश्की (६-३-९०) । ३-२-६० त्यदा... सूत्रस्थ- दृशेः वार्तिकेन क्सः ।

६-३-९१ आ स- सर्वनाम्नः= सर्वनाम्नः स्थाने, आ= आकारादेशो भवति, दृग्दृशवतुँषु (६-३-८९) उदाहरणेषु- आद्ययोः-३-२-६० त्यदा... इति क्विँन् कञ्च । अन्त्ये ५-२-३९ यत्त... इति वतुँप् ।
दृक्षे=दृक्षशब्दे, उत्तरपदे (६-३-१) सर्वनाम्नः+ आ (६-३-९१) । **तादृक्षः** ३-२-६० त्यदा... सूत्रस्थ- दृशेः... वार्तिकेन क्सः ।

६-३-९२ विष्वग्देवयोः=विष्वच्शब्दस्य देवशब्दस्य, सर्वनाम्नः (६-३-९१) च, टेः, अद्रि= "अद्रि" **इत्यादेशो भवति, अप्रत्यये**= लुप्तप्रत्ययान्ते, अञ्चतौ= अञ्च्धातुप्रकृतिके, उत्तरपदे (६-३-१) । अदसो ऽद्रेः- पृथङ्मुत्वमिति मते अमुद्र्यङ् । केचिदिच्छन्ति लत्ववत् । यथा चलीक्लृप्यते इत्यत्र ८-२-१८ कृपो... सूत्रेणोभयत्र लत्वं भवति; तथैवोभयत्रैव मुत्वं भवतीति केचिदिच्छन्तीति भावः । तन्मते अमुमुयङ् । अन्त्यसदेशस्येति मते अदमुयङ् ।
असेर्हि अः= अकारः, सि= सकारस्थाने यस्य सः= असिः । तस्य= असेः, अदसः ७-२-१०२ त्यदा... इति विहिताकारस्यैवादसो मुत्वं भवति । तेन "अद्रि" इत्यादेशे मुत्वं न भवतीति केचिदिति भावः । तन्मते- अदद्र्यङ् । **मुत्वम्**= ८-२-८० अद... इति विधीयमानम् । उदाहरणेषु- ३-२-५९. ऋत्वि... इति क्विँन् ।
छन्द- कद्रीची किमष्टेरद्रिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-९३ समः समि ॥
सम्यङ् । सम्यञ्चौ ।
६-३-९४ तिरसस्तिर्यलोपे ॥
तिर्यङ् । तिर्यञ्चौ । अलोपे इत्युक्तेर्नेह- तिरश्चः । तिरश्चा ।
६-३-९५ **सहस्य** सध्रिः ॥९६
सध्र्यङ् । सध्र्यञ्चौ । सध्रीचः । सध्रीचा ।
६-३-९६ सध मादस्थयोश्छन्दसि ॥
सधमादो द्युम्न एकास्ताः । सधस्थाः ।
६-३-९७ द्व्यन्तरुपसर्गेभ्यो ऽप ईत् ॥९८
द्वीपम् । अन्तरीपम् । समीपम् ।
कृतसमासान्तग्रहणान्नेह- स्वप् । स्वपी ।
(अवर्णान्ताद् वा)
प्रेपम्, प्रापम् । परेपम्, परापम् ।
६-३-९८ ऊदनोर्देशे ॥
अनूपो देशः । देश इत्युक्तेर्नेह- अन्वीपम् ।

६-३-९९ **अषष्ठचतृतीयास्थस्या ऽन्यस्य दुँगाशीराशा ऽऽस्थाऽऽस्थितोत्सुकोतिकारकरागच्छेषु** ॥१००
अन्यदाशीः । अन्यदाशा । अन्यदास्था ।
अन्यदास्थितः । अन्यदुत्सुकः । अन्यदूतिः ।
अन्यत्कारकः । अन्यद्रागः । अन्यस्मिन् भवः=अन्यदीयः । अषष्ठचतृतीयास्थस्येत्युक्तेर्नेह-अन्यस्य आशीः= अन्याशीः । अन्येन आस्थितः=अन्यास्थितः ।
(कारके छे च नाऽयं निषेधः)
अन्यस्य कारकम्= अन्यत्कारकम् ।
अन्यस्येदम्=अन्यदीयम् ।
६-३-१०० अर्थे विभाषा ॥
अन्यदर्थः; अन्यार्थः ।
६-३-१०१ **कोः कत्** तत्पुरुषेऽचि ।१०८, १०३
कदश्वः। कदन्नम् ।अचीत्युक्तेर्नेह-कुब्राह्मणः ।
(त्रौ च)
कुत्सितास्त्रयः= कत्त्रयः ।

६-३-९३ समः- अप्रत्यये+ अञ्चतौ (६-३-९२) उत्तरपदे (६-३-१) समः=सम् इत्यस्य स्थाने, समि= समि इत्यादेशो भवति । उदाहरणयोः ३-२-५९ ऋत्वि... इति क्विँन् ।
६-३-९४ तिर- अप्रत्यये+ अञ्चतौ (६-३-९२) तिरसः =तिरश्शब्दस्य स्थाने, तिरि= "तिरि" इत्यादेशो भवति, अलोपे= अकारस्य लोपा ऽभावे । उदाहरणप्रत्युदाहरणेषु प्रागवत् क्विँन् । **तिरश्चः** ६-४-१३८ अच इत्यकारलोपः ।
६-३-९५ सह- अप्रत्यये+अञ्चतौ (६-३-९२) उत्तरपदे (६-३-१) सहस्य= सहशब्दस्य स्थाने, सध्रिः = सध्रि इत्यादेशो भवति ।
६-३-९६ सध- सहस्य (६-३-९५) सध= सध इत्यादेशो भवति, मादस्थयोः = माद-स्थ शब्दयोरुत्तरपदयोः, छन्दसि= वेदे ।
६-३-९७ द्व्यन्त- अप इति कृतसमासान्तस्याऽ नुकरणम् । षष्ठचर्थे प्रथमा । द्व्यन्तरुपसर्गेभ्यः=द्वि अन्तर्, इत्येताभ्याम् उपसर्गेभ्यश्च परस्य, अप= अप इत्यस्य स्थाने, ईत्= दीर्घेकारादेशः । १-१-५३ आदेः... सूत्रबलेन अप इत्यस्यादेरकारस्य स्थाने ईकारो भवति । समापं नाम देवयजनमिति तु समा आपो यस्मिन्निति बोध्यम् । सूत्रे उपसर्गग्रहणं प्राद्युपलक्षणार्थम् । अप्शब्दं प्रति क्रियायोगाऽभावात् ।
अवर्णान्तात्=अवर्णान्तादुपसर्गात्= प्रादेः परस्य, वा= प्रागवद् वा ।
६-३-९८ उद- अनोः- अनुशब्दात् परस्य, अप (६-३-९७) ऊत्= ऊकारादेशो भवति, देशे= देशे वाच्ये ।
६-३-९९ अष... स्थस्य= षष्ठी- तृतीयार्थाऽविद्यमानस्य, अन्यस्य= अन्यशब्दस्य, दुँक् = दुँगागमो भवति, आशी... छेषु= आशीरादिषूत्तरपदेषु छप्रत्यये च परे ।अन्यदाशीः प्रभृतिष्वष्टसूदाहरणेषु विशेषणसमासः । **अन्यदीयः** ४-२-१३८ गहा... इतिच्छः ।
६-३-१०० अर्थे= अर्थशब्दे उत्तरपदे, अन्यस्य+ दुँक् (६-३-९९) विभाषा= वा ।
६-३-१०१ कोः कत्- अचि= अजादौ, उत्तरपदे (६-३-१) कोः= कुशब्दस्य स्थाने, कत्= कत् इत्यादेशो भवति, तत्पुरुषे= तत्पुरुषसमासे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-१०२ रथवदयोश्च ॥

कद्रथः । कद्वदः ।

६-३-१०३ तृणे च जातौ ॥

कत्तृणम् । जातावित्युक्तेर्नेह- कुत्सितानि तृणानि= कुतृणानि ।

६-३-१०४ का पथ्यक्षयोः ॥ १०८

कापथम् । काक्षः ।

६-३-१०५ ईषदर्थे ॥

कामधुरम् । अजादावपि परत्वात् का ऽऽदेशः । ईषदम्लम्= का ऽऽम्लम् ।

६-३-१०६ विभाषा पुरुषे ॥१०८

कापुरुषः । कुपुरुषः ।

ईषदर्थे पूर्वविप्रतिषेधेन नित्यं कादेशः ।

ईषत्पुरुषः -कापुरुषः ।

६-३-१०७ कवं चोष्णे ॥

कवोष्णम्, कोष्णम्, कदुष्णम् ।

६-३-१०८ पथि च च्छन्दसि ॥

कवपथः । कापथः । कुपथः ।

६-३-१०२ रथ- कोः+ कत्+ तत्पुरुषे (६-३-१०१) रथवदयोः= रथवदशब्दयोरुत्तरपदयोः ।

६-३-१०३ तृणे= तृणशब्दे, उत्तरपदे (६-३-१) कोः+ कत् (६-३-१०१) जातौ = जातौ वाच्यायाम् ।

६-३-१०४ का प- कोः (६-३-१०१) का=का इत्यादेशो भवति, पथ्यक्षयोः= पथि (न्) शब्दे, अक्षशब्दे च, उत्तरपदे (६-३-१) । **कापथम्** ५-४-७४ ऋक्पू... इति समासान्तोऽकारः । २-४-१८ अव्य... सूत्रस्थ-पथ... इति वार्तिकेन क्लीबत्वम् । **काक्षः** अक्षशब्देन तत्पुरुषः । अत्र हरदत्तः- अक्षशब्देन तत्पुरुषः । अक्षिशब्देन बहुव्रीहिर्वेति । एषैव पङ्क्तिरुक्ता दीक्षितेनापि । ६-३-१०१ कोः कत्... सूत्रे दाधिमथः शिवदत्तश्च पङ्क्तिमेनां समर्थयते । बहुव्रीहिपक्षे ५-४-११३ बहु... इति समासान्तः षजिति तेषामाशयः । ततो ऽपि प्राग्वर्ती न्यासकारः- कुत्सितोऽक्ष इति तत्पुरुषः । अथवा- कुत्सिते अक्षिणी अस्येति बहुव्रीहिः । "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" इति षच् समासान्त इति । इत्थं बहुव्रीहावप्यादेशस्वीकारात् प्रकृतसूत्रे तत्पुरुषे इति नानुवर्तत इत्युक्तप्रायम् । परन्तु ६-३-१०२ रथवदयोश्चेति सूत्रे न्यासकारः पुनरुपदिशति- "अनजाद्यर्थोऽयं योगः । एवमुत्तरत्रापि" इति । अजादौ तु कोः कदित्येव सिध्यतीति तदभिप्रायः । तत्र सूत्रे च तत्पुरुषे इति वर्तते । अत एतन्न्यासवचनात् ६-३-१०५ ईषदर्थे- सूत्रे अजादावपि परत्वात् कादेश एव भवति, इति हरदत्तवचनात्, अजादावपि परत्वात् कादेश इति दीक्षितवचनाच्च सूत्राणीमानि तत्पुरुषे एव सूत्रमिदं तु बहुव्रीहावपि प्रवर्तन्त इति लभ्यते ।

६-३-१०५ इषदर्थे=ईषदर्थे वर्तमानस्य, कोः (६-३-१०१) का (६-३-१०४) उत्तरपदे (६-३-१) ।

६-३-१०६ विभा- कोः (६-३-१०१) विभाषा= वा, का (६-३-१०४) पुरुषे= पुरुषशब्दे, उत्तरपदे (६-३-१) ।

६-३-१०७ कवं- कोः (६-३-१०१) कवम् = कव इत्यादेशो भवति, का (६-३-१०४) च, विभाषा (६-३-१०६)उष्णे= उष्ण शब्दे, उत्तरपदे (६-३-१) ।

६-३-१०८ पथि = पथिन्शब्दे, उत्तरपदे (६-३-१) कोः (६-३-१०१) विभाषा (६-३-१०६) कवम् (६-३-१०७) का (६-३-१०४) च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-१०९पृषोदरादीनि यथोपदिष्टम् ॥

पृषत उदरम्= पृषोदरम्। वारिवाहको बलाहकः। ब्रुवन्तो ऽस्यां सीदन्तीति= बृसी।
वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।
भवेद् वर्णागमाद् धंसः सिंहो वर्णविपर्ययात्।
गूढोत्मा वर्णविकृतेर्वर्णनाशात् पृषोदरम्॥
(दिक्शब्देभ्यस्तीरस्य तारभावो वा)
दक्षिणतारम्, दक्षिणतीरम्। उत्तरतारम्, उत्तरतीरम्।
(वाचो वादे डत्वं च लभावश्चोत्तरपदस्येञि प्रत्यये भवति)
वाचं वदतीति= वाग्वादः। तस्यापत्यम्= वाड्वालिः।
(षष उत्वं दतृँ-दश-धासूत्तरपदादेष्टुत्वं च)
षोडन्। षोडश।
(धासु वेति वाच्यम्)
षोढा, षड्धा।
(दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेश्च ष्टुत्वम्)
दूडाशः। दूणाशः। दूडभः। दूढ्यः।
(स्वरो रोहतौ छन्दस्यूत्वं वक्तव्यम्)
जाय एहि स्वो रोहाव।
(पीवोपवसनादीनां च लोपो वक्तव्यः)
पीवोपवसनानाम्। पयोपवसनानाम्।

६-३-११० संख्या- वि-साय-पूर्वस्याह्नस्या ऽहनन्यतरस्यां ङौ ॥

द्वयोरह्नोर्भवः=द्वयह्नः। द्व्यह्नि, द्व्यहनि, द्व्यह्ने। व्यपगतमहो व्यह्नः। व्यह्नि,व्यहनि; व्यह्ने। अह्नः सायः=सायाह्नः। सायाह्नि, सायाहनिः, सायाह्ने। संख्याविसायपूर्वस्येत्यु-क्तेर्नेह- पूर्वाह्णे। अपराह्णे।

६-३-१०९ **पृषो-** अत्र दीक्षितः- पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युरिति। अत्र काशिका- पृषोदरप्रकाराणि शब्दरूपाणि, येषु लोपागमवर्णविकाराः शास्त्रेण न विहिताः दृश्यन्ते च तानि यथोपदिष्टानि साधूनि भवन्ति। यानि यथोपदिष्टानि= शिष्टैरुच्चारितानि, प्रयुक्तानि, तानि तथैवा ऽनुगन्तव्यानि। इति। अत्र हरदत्तः- निरुक्तादिशास्त्रसिद्धानामसमासपदानाम् "उणादयो बहुलम्" इति सिद्धिरुक्ता, अनेन तु समासपदानां जीमूतबलाहकादीनां सिद्धिरुच्यते। प्रकारवचनो ऽयमादिशब्द इति पृषोदरम् तकारलोपः। बलाहकः पूर्वपदस्य बः, उत्तरपदादेश्च लत्वम्।
बृसी सदेरधिकरणे डट् ब्रुवच्छब्दस्य बृइत्यादेशः।
वर्णा- अर्थातिशयः=अर्थविशेषः। प्रसिद्धादर्थादर्थान्तरं तेन धातोर्योगः=सम्बन्धः। यथा मह्यां रौतीति= मयूरः। रौतेरचि टिलोपः। महीशब्दस्य मयूभावः। अत्र रौते रमणेनार्थेनातिशयेन योगः इति न्यासः।
दुरो- त्रिषूदाहरणेषु खल्। **दूडाशः**- दाशृँ (८८२) **दूणाशः**- णशँ (११९३) ण्यन्तः। **दूडभः** दम्भुँ (१२६९) निपातनान्नलोपः। **दूढ्यः** दुष्टं दुःखेन वा ध्यायतीति विग्रहे ३-१-१३६ आत... इति, कः।
पीवो- उदाहरणयोः सकारलोपः।
६-३-११० **संख्या**...पूर्वस्य = संख्यावाचि-वि-साय-शब्दपूर्वकस्य, अह्नस्य= अह्न इत्यस्य स्थाने, अन्यतरस्याम्= वा, अहन्= अहन् आदेशो भवति, ङौ = ङिविभक्तौ परतः। **द्व्यह्नः** ५-४-८८ अह्नो... इत्यत्र द्रष्टव्यम्। **द्व्यह्नि** ६-४-१३६ विभा... इत्यल्लोपो वा। **सायाह्नि** अत्र काशिका- एकदेशिसमासः। पूर्वादिभ्यो ऽन्यस्यापि भवतीत्येतदेव विसायपूर्वस्याह्नस्य ग्रहणं ज्ञाकम्। तेन मध्यमह्नो मध्याह्न इत्यपि भवतीति। सायपूर्वस्याह्नस्य ग्रहणं ज्ञापकमिति तद्भावः। विपूर्वे **व्यह्न** इत्यत्र २-२-१८ कुग... सूत्रस्थ-प्रादयो... इति वार्तिकेन समासः। प्रत्युदाहरणयोः। ८-४-७ अह्नो... इति णत्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-१११ ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥ ११२, (६-४-१८)

लीढः । पुना रमते । हरी रम्यः । शम्भू राजते ।

६-३-११२ सहिवहोरोदवर्णस्य ॥

सोढा । वोढा । अवर्णस्येत्युक्तेर्नेह- ऊढः । ऊढवान् ।

६-३-११३ साढ्यै साढ्वा साढेति निगमे ॥

निगम इत्युक्तेर्भाषायां सोढ्वा । सोढेति ।

६-३-११४ संहितायाम् ॥१३५

इत्यधिक्रियते ।

६-३-११५ कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य ॥

द्विगुणाकर्णः । लक्षणस्येत्युक्तेर्नेह-शोभनकर्णः । अविष्टाष्टेत्यादुक्तेर्नेह- विष्टकर्णः । अष्टकर्णः । इत्यादि ।

६-३-१११ ढ्रलो- ८-३-१३ ढो ढे.. सूत्रानन्तरं सूत्रमिदं पाठचम् । ढ्रलोपे- ढ्रौ=ढकार- रेफौ लोपयतीति ढ्रलोपः । तस्मिन् ढ्रलोपे=ढकाररेफयोर्लोपे निमित्तयोर्ढकाररेफयोः परतः (नेपालीभाषायाम्- ढकार र रेफको लोप गराउने ढकार र रेफ पर भएमा, हिन्दीभाषायाम्- ढकार और रेफका लोप करवाने वाले ढकार और रेफ पर रहते) पूर्वस्य+अणः= पूर्वस्य अणः स्थाने, दीर्घः= दीर्घो भवति । इत्यर्थवोधनक्रमे अर्थात् ढकारलोपनिमित्ते ढकारे परे, रेफलोपनिमित्ते च रेफे परे पूर्वस्याऽणो दीर्घो भवतीति भावो वोधनीयः । अथ सूत्रसमन्वये लीढः । अत्र सूत्रार्थवोधने त्वरा न कार्या । यदि च्छात्राः सलीलं बुद्धवन्तस्तदा सुष्ठु । यदि तु वोधे काठिन्यमनुभवन्तीति शिक्षकेणा ऽनुभूयते, तदा ऽधोनिर्दिष्टरीत्या वोधनीयाः । अयि वत्साः ? यूयम् अक्षराणि लेखितुं शक्नुथ न वा ? इति प्रश्नः कार्यः । ततः शक्नुम इतिच्छात्रेभ्य उत्तरे आगते केन लिखथ ? इति पुनः प्रश्नः कार्यः । ततः कलमेनेत्युत्तरे छात्रेभ्य आगते पुनस्ते वोधनीयाः- वत्साः ? यथा कलमे विद्यमाने लेखितुं शक्नुथ, कलमे अविद्यमाने तु न शक्नुथ । तथैव ढकारे परतो विद्यमाने ,पूर्वतस्त्यस्य ढकारस्य ८-३-१३ ढो ढे... सूत्रेण लोपो भवति । ढकारे परतः अविद्यमाने तु ढकारस्य लोपो न भवति । अतो यथाऽ क्षराणां लेखने कलमो निमित्तं तथैव परतस्त्यढकारः पूर्वतस्त्यस्य ढकारस्य लोपे निमित्तं भवति । तत्र च ढकारात् पूर्वस्याणः स्थाने प्रकृत (६-३-१११) सूत्रेण दीर्घो भवति । अथवा घटेन जलम् आनीयते । अर्थाद् घटे विद्यमाने जलम् आनेतुं शक्यते । घटाभावे जलम् आनेतुं न शक्यते । अतो जलानयने घटो निमित्तं भवति । तथैव ढकारे परे सति ढकारस्य लोपो भवति । ढकारे परतोऽसति ढकारस्य लोपो न भवति । अतः पूर्वतस्त्यढकारस्य लोपे परतस्त्यढकारो निमित्तं भवति । इत्यादयोऽपि दृष्टान्ताः प्रस्तोतुं शक्यन्ते । इत्थं रेफविषयेऽपि वोध्यमिति । अथ ८-३-१४ रो रि सूत्रमुपदेश्यम् ।

६-३-११२ सहिवहोः= सह् वह् इति धात्वोः, अवर्णस्य= अवर्णस्य स्थाने, ओत्= ओकारो भवति, ढ्रलोपे (६-३-१११) = ढलोपे ।

६-३-११३ साढ्यै- आद्यं द्वयं क्त्वाप्रत्ययान्तम् ओत्वा ऽ भावः पक्षे क्त्वो ध्यै भावः । तृतीयं तृजन्तं रूपमेतदिति काशिका । तृनि तृतीयं निपात्यते- इति दीक्षितः । इति शब्दः प्रकारार्थः । तेन निष्ठायामपि निपातनं वोध्यम् ।"आषाहल् अग्ने वृक्षभः" इति सुवोधिनी ।

६-३-११४ संहितायाम् = अव्यवधानेनोच्चारणे ।

६-३-११५ कर्णे= कर्णशब्दे, उत्तरपदे (६-३-१) अविष्टा... कस्य=विष्टादिभिन्नस्य लक्षणस्य= चिह्नवाचिनः पूर्वपदस्य,दीर्घः (६-३-१११) संहितायाम् (६-३-११४) । यत् पशूनां स्वामिविशेषज्ञापनार्थं दात्राकारादि क्रियते तदिह लक्षणं गृह्यत इति काशिका । लक्ष्यते ऽनेन स्वामिविशेषस्य सम्वन्ध इति लक्षणम्= चिह्नम् । इति न्यासः । संहितायामित्यधिकाराद् द्विगुणाकर्ण इत्यादौ अवग्रहे दीर्घो न भवतीत्याहुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-११६ नहि- वृति- वृषि- व्यधि-रुचि-सहि-तनिषु क्वौ ॥
उपानत्। नीवृत्। प्रावृट्। मृगाविृत्। अभीरुक्। ऋतीषट्। परीतत्।

६-३-११७ वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् ॥१२०
कोटरावणम्। मिश्रकावणम्। सिध्रकावणम्। सारिकावणम्। किंशुलुकागिरिः। अञ्जनागिरिः।
कोटरकिंशुलुकादीनामित्युक्तेर्नेह- असिपत्रवनम्। कृष्णगिरिः।

६-३-११८ वले ॥
कृषीवलः। दन्तावलः। संज्ञायामित्यनुवृत्तेर्नेह- पुत्रवलः।

६-३-११९ मतौ बह्वचो ऽनजिरादीनाम् ॥१२०
उदुम्बरावती। बह्वच इत्युक्तेर्नेह- व्रीहिमती। अनजिरादीनामित्युक्तेर्नेह- अजिरवती। संज्ञायामित्यनुवृत्तेर्नेह वलयवती।

६-३-१२० शरादीनां च ॥
शरावती।

६-३-१२१ इको वहे ऽपीलोः ॥
कपीवहम्। मुनीवहम्। इक इत्युक्तेर्नेह- पिण्डवहम्। अपीलोरित्युक्तेर्नेह-पीलुवहम्।
(अपील्वादीनामिति वक्तव्यम्)
दारुवहम्।

६-३-१२२ उपसर्गस्य घञ्यमनुष्ये बहुलम् ॥१२४
अपामार्गः। बहुलग्रहणान्नेह- प्रसारः। अमनुष्ये इत्युक्तेर्नेह-निषादः।
(सादकारयोः कृत्रिमे दीर्घो भवति)
प्रासादः। प्राकारः। कृत्रिमे इत्युक्तेर्नेह- प्रसादः। प्रकारः।

६-३-११६ **नहि- क्वौ**= क्विँबन्तेषु, नहि... तनिषु= नहप्रभृतिषु, उत्तरपदेषु (६-३-१) पूर्वपदस्य, अणः+ दीर्घः (६-३-१११)। **उपानत्** ८-२-३४ नहो.... इति हकारस्य धकारः। **ऋतीषट्** ८-३-१०९ सहेः.... इति चात् षत्वम्। **परीतत्** ६-४-४० गमः... सूत्रस्थ- गमा... वार्तिकेना ऽनुनासिककोपः। ततस्तुँक्।
६-३-११७ वनगिर्योः= वन गिरि इत्येतयोः उत्तरपदयोः (६-३-१) (यथासंख्यं) कोट...दीनाम्= कोटरादीनां किंशुलुकादीनां च, पूर्वपदानाम्, दीर्घः (६-३-१११) संज्ञायाम्= संज्ञायां गम्यमानायाम्। वनान्तेषूदहरणेषु ८-४-४ वनं..... इति णत्वम् ॥
६-३-११८ **वले**= वलप्रत्यये परे, पूर्वस्य, अणः+दीर्घः (६-३-१११) संज्ञायाम् (६-३-११७)। उत्तरसूत्रस्थमतुँप्साहचर्याद् वल इति प्रत्ययो गहयते न तु प्रातिपदिकम्। **कृषीवलः** ५-१-११२ रजः... इति वलच्। **दन्तावलः** ५-२-११३ दन्त... इति वलच्। **पुत्रवलः** ५-२-११२ रजः ... सूत्रस्थेन अन्ये ... वार्तिकेन वलच्।
६-३-११९ **मतौ**= मतुँप्प्रत्यये परे, अनजिरादीनाम्= अजिरादिभिन्नस्य, बह्वचः= बह्वच्कस्य, पूर्वस्य, अणः+दीर्घः (६-३-१११) संज्ञायाम् (६-३-११७)। उदाहरणे ४-२-८५) नद्यां... इति मतुँप्। ८-२-९ मादु... इति वत्वम्। प्रत्युदाहरणेषु ५-२-९४ तद... इति मतुँप्। अन्त्ययोः प्राग्वद् वत्वम्।
६-३-१२० **शरादीनाम्**, = शरप्रभृतीनां स्थाने, दीर्घः (६-३-१११) मतौ (६-३-११९) संज्ञायाम् (६-३-११७)। **शरावती** ८२-८५ नद्यां... इति मतुँप्। वत्वं प्राग्वत्।
६-३-१२१ **इको-** अपीलोः= पीलुभिन्नस्य, इकः= इगन्तस्य, पूर्वपदस्य, दीर्घः (६-३-१११) वहे= वहशब्दे, उत्तरपदे (६-३-१)।
६-३-१२२ **उपसर्गस्य=** उपसर्गस्य स्थाने, घञि= घञन्ते, उत्तरपदे (६-३-१) दीर्घः (६-३-१११)।
साद- कृत्रिमे= पुरुषव्यापारादिनिर्वृत्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-१२३ इकः काशे ॥१२४

नीकाशः। अनूकाशः। इक इत्युक्तेर्नेह-प्रकाशः।

६-३-१२४ दस्ति ॥

नीत्तम्। इक इत्यनुवृत्तेर्नेह-प्रत्तम्।
तीत्युक्तेर्नेह-सुदत्तम्।

६-३-१२५ अष्टनःसंज्ञायाम् ॥१२६

अष्टावक्रः। संज्ञायामित्युक्तेर्नेह-अष्टपुत्रः।

६-३-१२६ छन्दसि च ॥

आग्नेयमष्टाकपालं निर्वपेत्।

६-३-१२७ चितेः कपि ॥

एकचितीकः।

६-३-१२८ विश्वस्य वसुराटोः ॥१३०

विश्वावसुः। विश्वाराट्। राट् इति पदान्तोपलक्षणम्। विश्वाराड्भ्याम्। नेह-विश्वराजौ।

६-३-१२९ नरे संज्ञायाम् ॥

विश्वानरः। संज्ञायामित्युक्तेर्नेह- विश्वे नरा यस्य स विश्वनरः।

६-३-१३० मित्रे चर्षौ ॥

विश्वामित्रो नाम ऋषिः।
ऋषावित्युक्तेर्नेह- विश्वमित्रो माणवकः।

६-३-१३१मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ ॥१३२

सोमावती। अश्वावती। इन्द्रियावती। विश्वदेव्यावती।

६-३-१३२ ओषधेश्च विभक्तावप्रथमायाम् ॥

नमः पृथिव्यै नम ओषधीभ्यः।
अप्रथमायामित्युक्तेर्नेह- स्थिरेयमस्त्वोषधिः।

६-३-१२३ इकः= इगन्तस्य, उपसर्गस्य (६-३-१२२) दीर्घः (६-३-१११) काशे= काशशब्दे, उत्तरपदे (६-३-१)। अत्र काशिका- पचाद्यजन्तो ऽयं काशशब्दः। न तु घञन्त इति। घञन्ते पूर्वेणैव सिद्धिरिति तदाशयः। "इगन्तस्यैव काशे" इति नियमार्थमिदम्। तेन प्रकाश इत्यत्र न दीर्घ इति केचित्। इक इत्यनुवर्तमाने पुनः इक इति ग्रहणं किमर्थम् ? इति चेत् अत्र पदमञ्जरी "इको वहेऽपीलोः" इत्यत्र पूर्वपदमात्रस्येष्यते इह तूपसर्गस्य; तेन द्विरिक इत्युक्तमिति।

६-३-१२४ दस्ति- दः+ति= दाधातोः स्थाने यस्तकारादेशस्तदादौ, उत्तरपदे (६-३-१) इकः (६-३-१२३)+ उपसर्गस्य (६-३-१२२) = इगन्तस्योपसर्गस्य, दीर्घः (६-३-१११)। **नीत्तम्** (६-३-११) नि+दा+क्तः। ७-४-४७ अच... इति तकारादेशः। **सुदत्तम्** ७-४-४६ दोद... सूत्रस्थेन अव... इतीष्टवचनेन तकाराभावः।

६-३-१२५ अष्टनः= अष्ट (न्) शब्दस्य स्थाने, दीर्घः (६-३-१११) उत्तरपदे (६-३-१)।

६-३-१२६ छन्द- अष्टनः (६-३-१२५) उत्तरपदे (६-३-१) दीर्घः (६-३-१११) संज्ञायाम्= संज्ञायां गम्यमानायाम्।

६-३-१२७ चितेः =चितिशब्दस्य स्थाने, दीर्घः (६-३-१११) कपि= कपि परे।

६-३-१२८ विश्वस्य=विश्वशब्दस्य स्थाने, दीर्घः (६-३-१११) वसुराटोः= वसुशब्दे राट्शब्दे च, उत्तरपदे (६-३-१)।

६-३-१२९ नरे=नरशब्दे, उत्तरपदे (६-३-१) विश्वस्य (६-३-१२८) दीर्घः (६-३-१११) संज्ञायाम्=संज्ञायां गम्यमानायाम्।

६-३-१३० मित्रे=मित्रशब्दे, उत्तरपदे (६-३-१) विश्वस्य (६-३-१२८) दीर्घः (६-२-१११) ऋषौ=ऋषौ वाच्ये।

६-३-१३१ मन्त्रे=मन्त्रविषये, सोमा... व्यस्य=सोमप्रभृतीनां स्थाने, दीर्घः (६-३-१११) मतौ=मतुँप्प्रत्यये परे। उदाहरणेषु ८-२-९. मादु... इति वत्वम्।

६-३-१३२ ओषधेः =ओषधिशब्दस्य स्थाने, दीर्घः (६-३-१११) अप्रथमायां विभक्तौ= प्रथमाभिन्नायां विभक्तौ परतः, मन्त्रे (६-३-१३१)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-३-१३३ ऋचि तु-नु-घ- मक्षु-तङ्-कु- त्रोरुष्याणाम् ॥१३६

तु- आ तू न इन्द्र वृत्रहन्।

नु-नू मर्तः। घ- उत वा घा श्यालात्। मक्षु-मक्षू गोमन्तमीमहे। तङ्- भरता जातवेदसम्। अत्र काशिका-तङिति थादेशस्य ङित्त्वपक्षे ग्रहणम्। तेनेह न-शृणोत ग्रावाण :।

कु- कूमनाः। त्र-यत्रा नश्चक्रा। उरुष्य- उरुष्या णो ऽग्नेः।

६-३-१३४ इकः सुञि ॥

अभीषु णः।

६-३-१३५ द्व्यचो ऽतस्तिङः ॥

विद्मा हि चक्रा जरसम्। अत इत्युक्तेर्नेह-आदेवान् वक्षि। ६-३-११४ संहि... इत्यधिकारात् पदपाठे दीर्घो न।

६-३-१३६ निपातस्य च ॥

एवा ते। अच्छा ते।

६-३-१३७ अन्येषामपि दृश्यते ॥

पुरुषः, पूरुषः। दण्डादण्डि।

(शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु)

श्वादन्तः। श्वादंष्ट्रः। श्वाकर्णः।

६-३-१३८ चौ ॥

प्राचः। प्रतीचः। दधीचः। मधूचः।

६-३-१३९ सम्प्रसारणस्य ॥६-४-२

कारीषगन्धीपुत्रः। कारीषगन्धीपतिः।

इति षष्ठाध्याये
तृतीयः पादः।

६-३-१३३ **ऋचि**= ऋग्विषये, तु...णाम्= तु- प्रभृतीनाम्, दीर्घः (६-३-१११) **भरता** ३-४-१०४ तस्थ... इति तादेशस्य तस्य १-२-४ सार्व... इति ङित्वं पिद्भिन्नत्वात्। **शृणोत** ७-१-४५ तप्त.... इति तबादेशस्य पित्त्वेन ङित्वाभावान्न दीर्घः। अत एव गुणनिषेधोऽ पि न।

६-३-१३४ इकः= इगन्तस्य, पूर्वपदस्य, दीर्घः (६-३-१११) सुञि=सुञ् इति निपाते परे, ऋचि (६-३-१३३)। अभीषु णः ८-३-१०७ सुञ इति षत्वम्। ८-४-२६ नश्च... इति नस्य णत्वम्।

६-३-१३५ **द्व्यचो-** तिङः= तिङन्तस्य, द्व्यचः =द्व्यच्कस्य, अतः=अदन्तस्य, दीर्घः (६-३-१११) ऋचि (६-३-१३३)। **विद्मा** विदँ ज्ञाने (१०६४) लँट्। ३-४-८३ विदो... इति मसो म आदेशः। **चक्रा** कृ (१४७१)+लिँटो मध्यमपुरुषबहुवचनम्। **वक्षि** वहे (१००४) र्लँटि सिप्। ३-१-३४ सिब्ब... इति तु नेह प्रवृत्तम्, बहुलवचनात्।

६-३-१३६ **निपातस्य**= निपातस्य स्थाने, दीर्घः (६-३-१११) ऋचि (६-३-१३३)।

६-३-१३७ **अन्येषामपि** = इतरेषामपि,- दीर्घः (६-३-१११) दृश्यते= अवलोक्यते। **दण्डादण्डि** २-२-२७ तत्र.... इति समासः।

६-३-१३८ **चौ-** अञ्च्धातोर्धातुनिर्देशे इक्प्रत्यये "अञ्चि" इति। ततो ङौ= अञ्चौ। तत्र अकारनकारयोर्लोपानुकृतौ "चौ" इति।

चौ= लुप्ताकारनकारे ऽञ्चतौ परे, पूर्वपदस्य स्थाने दीर्घः (६-३-१११)। **प्राचः** प्र+अञ्च् (१८८, ८६२) धातोः ३-२-५९ ऋत्वि... इति क्विँन्। ६-४-२४ अनि... इति नलोपः। शसि ६-४-१३८ अच इत्यकारलोपे प्रकृतसूत्रेण पूर्वपदस्य दीर्घः। अकृतव्यूहपरिभाषया न पूर्वं सन्धिकार्यम्।

६-३-१३९ **सम्प्रसारणस्य**=सम्प्रसारणस्य स्थाने, दीर्घः (६-३-१११) उत्तरपदे (६-३-१)। उदाहरणयोः ६-१-१३ ष्यङः... इति सम्प्रसारणम्।

इति षष्ठाध्याये
तृतीयः पादः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ षष्ठाध्याये
चतुर्थः पादः
ॐ नमः श्रीजगदम्बायै ॥

६-४-१ अङ्गस्य ॥७-४-९७

६-४-२ हलः ॥

जीनः । आहूतः । हल इत्युक्तेर्नेह- उतः ॥

अङ्गावयवादित्यर्थान्नेह- निरुतम् ।

तदन्तस्येत्यर्थान्नेह-विद्धः । कथं तृतीयः ? तृतीयेति निर्देशात् ।

६-४-३ नामि ॥७

बालानाम् । मुनीनाम् । भानूनाम् । पितॄणाम्

६-४-१ अङ्ग-आसप्तमाध्यायपरिसमाप्तेरिदमधिक्रियते ।

६-४-२ हलः-अङ्गग्रहणमावर्तयितव्यम्, हल्विशेषणार्थम्, अङ्गकार्यप्रतिपत्त्यर्थंचेति काशिका । १-१-७१ येन... इति तदन्तविधिः । अङ्गस्य (६-४-१) + हलः +सम्प्रसारणस्य (६-३-१३९)+अङ्गस्य=अङ्गावयवाद् हलः परं यत् सम्प्रसारणं तदन्तस्या ऽङ्गस्य, दीर्घः (६-३-१११) । जीनः ज्या (१४९८)+क्तः । ६-१-१६ ग्रहि... इति सम्प्रसारणम् । ८-२-४४ ल्वादि... इति निष्ठानत्वम् । आहूतः आ+ ह्वे (१००८) + क्तः । ६-१-१५ वचि... इति सम्प्रसारणम् । उतः वेञ् (१००६)+क्तः । ६-१-१५ वचि... इति सम्प्रसारणम् । निर्देशात् दीर्घाभावः ।

६-४-३ नामि- १-१-४५ आद्यन्तौ... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र शिक्षकेण विचारणीयं यद् यद्यपि ६-३-१११ ढ्रलो... इति सूत्राद् दीर्घ इत्यनुवृत्त्या १-२-२८ अच... इत्यतोऽच उपस्थितौ तस्य च, अङ्गस्य (६-४-१) इत्यस्योपस्थितस्य विशेषणत्वेन १-१-७१ येन... इति तदन्तविधौ अजन्ताङ्गस्य दीर्घो नामि परे इत्यर्थः । अत एव वर्त्मनाम् । धनिनाम् । इत्यादौ न दीर्घः । तथापि बालानामुपलालनामनुसृत्य ६-३-१११ ढ्रलो.... इति सूत्राद् दीर्घ इत्यनुवर्तत इति वदता शिक्षकेण नामि=नामि परे, दीर्घ (६-३-१११)= दीर्घो भवति । इत्येतावानेवाऽर्थ उपदेश्यः । [द्वितीयावृत्तौ तु यथासूत्राभिमतं पूर्वोक्तार्थ एवोपदेश्यः] अथच्छात्रैर्लक्षणसमन्वयं कारयित्वा "रामश्यामविष्णुमित्रानाम्" इति श्यामपाट्यां लिखित्वा ८-४-२ अट्कु...सूत्रमुद्बोधनीयम् ।

ङि-"गृहे जनाः सन्ति" इति वक्तव्ये "गृहे" इति कथं सिध्येदिति जिज्ञासायां गृहशब्दात् ४-१-२ स्वौज... सूत्रेण ङि ओस् सुप् इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२२ द्व्येक... सूत्रेण ङिप्रत्यये गृह+ङि १-३-८, ९ गृह+ इ इत्यत्र सन्धिकार्यायच्छात्रा एव प्रवर्तयितव्याः । गृहे । इति ।

ओस्-एकस्मिन् गृहे पञ्च जनाः परस्मिन् गृहे पञ्च जनाः सन्ति । इत्थं द्वयोर्गृहयोर्दश जनाः सन्ति । इति बोधयता शिक्षकेण "गृहयोर्दश जनाः सन्ति" इत्युदाहरणं प्रस्तुत्यम् । अथाऽत्र गृहप्रातिपदिकात् पूर्वत्रैव ङि ओस् सुप् प्रत्ययेषु प्राप्तेषु कतमद् वचनं ? कथं भवतीति ? च्छात्राः प्रष्टव्याः । छात्रेभ्यो यथार्थमुत्तरे प्राप्ते· गृह+ओस् इति श्यामपाट्यां लिखित्वा षष्ठीद्विवचने इव प्रक्रियेत्युपदेश्यम् । गृहयोः । इति ।

सुप्- ग्रामे बहूनि गृहाणि सन्ति । तेषु गृहेषु जना वसन्ति । इत्यादिवाक्यद्वारा बहुत्वं बोधयता शिक्षकेण "गृहेषु जनाः सन्ति" इत्युदाहरणं प्रस्तुत्यम् । अथात्र गृहप्रातिपदिकात् पूर्वत्रैव ङि ओस् सुप् इत्येतेषु प्रत्ययेषु प्राप्तेषु कतमद् वचनं कथं भवति ? इतिच्छात्राः प्रष्टव्याः । छात्रेभ्यो यथार्थमुत्तरे प्राप्ते गृह+सुप् इति श्यामपाट्यां लिखित्वा १-३-३, ९ सूत्रे उद्बोधयता शिक्षकेण पकारं कर्तयित्वा "गृह+सु" इति श्यामपाट्यामवशेषणीयम् । अथ प्रकृते कतमत् सूत्रं प्रवर्तेत ? इति च्छात्राः परीक्षणीयाः । छात्रेभ्य उत्तरे ऽप्राप्ते ७-३-१०३ बहु... सूत्रमुद्बोधनीयम् । लक्षणसमन्वयस्तुच्छात्रैरेव कारयितव्यः । अथ गृह+सु इति श्यामपाट्यां लिखित्वा प्रस्तावमर्हदपि ८-३-५९ आदे... इति सूत्रं कठिनार्थं मत्वा तदनादृत्य ८-३-५७ इण्कोः सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-४ न तिसृचतसृ ॥
तिसृणाम्। चतसृणाम्।
६-४-५ छन्दस्युभयथा ॥६
धातृणामिति बह्वृचाः। तैत्तिरीयास्तु ह्रस्वमेव पठन्तीति दीक्षितः।

६-४-६ नृ च ॥
नृणाम्, नृणाम्।
६-४-७ नोपधायाः॥१०,१८
पञ्चानाम्।

६-४-४ न ति- ७-२-१०० अचि र... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र श्यामपाटीप्रयोगो यथा-
क
६-४-३ नामि ॥
६-४-४ न तिसृचतसृ (क) ॥ इति।
तिसृचतसृ=तिसृचतसृशब्दयोः स्थाने, न=दीर्घो न भवति, (क)=नामि। पूर्वसूत्रेण दीर्घविधानान्निषेधोऽपि दीर्घस्यैवेतिच्छात्रा बोधयितव्याः। अथ ८-४-१ अट्कु...सूत्रस्थम् ऋव...इति वार्तिकमुद्बोधनीयम्। सुपि-तिसृषु। क्लीबे जश्शसोः-त्रीणि। शेषं पुंवत्। चतुर् शब्दात् पुंसि जसि "चतुर+अस्" इति श्यामपाट्यां लिखित्वा ७-१-९८ चतुरन .... सूत्रं प्रस्तुत्यम्।
६-४-५ छन्दसि=वेदे उभयथा=दीर्घो वा, नामि (६-४-३)। **६-४-६ नृ च-** "नृ" इति षष्ठ्या लुका निर्देशः। नृ= नृशब्दस्य स्थाने, उभयथा (६-४-५) नामि (६-४-३)।
६-४-७ नोप-७-१-२२ षड्भ्यो... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र श्यामपाटीप्रयोगो यथा-
(क) (ख) (ग)
६-३-१११ ढ्लोपे पूर्वस्य दीर्घः अणः ॥ ६-४-१ अङ्गस्य ६-३-३ नामि ॥
६-४-७ नोपधायाः= न (ख) उपधायाः (क) (ग) ॥ इति।
न+ (ख)= अङ्गस्य= नकारान्तस्य अङ्गस्य, उपधायाः= उपधायाः स्थाने, (क)= दीर्घः, (ग)= नामि। इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा पञ्चान्+ नाम् इति श्यामपाट्यां लिखित्वा १-४-१७ स्वादि... ८-२-७ न लो ...सूत्रे प्रवर्तयितव्ये। पञ्चानाम्। एवं सप्तन्, अष्टन्, नवन् दशन् इति शब्देष्वपि बोध्यम्। षष्शब्दे तु जश्शसोः षट्, षड्। तथाहि १-१-२३ ष्णान्ता... इति षट्संज्ञा ७-१-२२ षड्भ्यो... इति जश्शसोर्लुकि षष् इति जाते ८-२-३९ झलां....इति जश्त्वे षड् ८-४-५५ वाऽव... इति वैकल्पिके चर्त्वे षट्, षड्। इति। आमि षष्+आम् ७-१-५५ षट्च... इति नुँटि षष्+नाम्, जश्त्वे ष्टुत्वे ८-४-४४ यरो...सूत्रस्थ-प्रत्य... इति वार्तिकेनाऽनुनासिके-षण्णाम्। षट्संज्ञकाः शब्दास्त्रिष्वपि लिङ्गेषु सरूपा भवन्ति। संख्यावाचिनां शब्दानां त्रयाणामेव लिङ्गानां सर्वाणि रूपाणिच्छात्रैरुच्यमानानि शिक्षकः शृणुयात्। एका गौः पयस्विनी वर्तते। तस्या एको वत्सो वर्तते। तस्यां शाखायाम् एकं फलं वर्तते। द्वौ वृषौ क्षेत्रं कृषतः। द्वे गावौ दुग्धं दत्तः। पशूनामपि नेत्रे द्वे भवतः। त्रयश्छात्रा अत्र सन्ति। तिस्रः कन्याः पठन्ति। अस्मिन् क्षुपे त्रीणि फलानि सन्ति। वेदाः चत्वारः सन्ति। दिशश्च चतस्रः प्रसिद्धाः सन्ति। यद्यपि दिशो दश सन्ति। प्रायः प्रमाणानि चत्वारि प्रथन्ते। कामस्य वाणाः पञ्च सन्ति। पञ्च गावः पयस्विन्यः सन्ति। तस्यां शाखायां पञ्च फलानि सन्ति। इत्यादीनि वाक्यानि प्रयुज्य लिङ्गभेदेन संख्यावाचिशब्दरूपभेदाँश्छात्रानभ्यासयेत्। **अथाऽव्ययप्रकरणं शिक्षणीयम्। अथाऽव्ययम्** अत्र शिक्षकः प्रथमम् १-१-३६ स्वरा...सूत्रमुपदिशेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-८ **सर्वनामस्थाने** चाऽसम्बुद्धौ ॥११,१४
पिता । राजा । राजानौ । राजानः । राजानम् । राजानौ । वनानि । सर्वनामस्थाने इत्युक्तेर्नेह- यज्वनः । यज्वना । यज्वने । असम्बुद्धावित्युक्तेर्नेह-हे राजन् ।

६-४-९ वा षपूर्वस्य निगमे ॥
स तक्षाणं तिष्ठन्तमब्रवीत्,
स तक्षणं तिष्ठन्तमब्रवीत् । ऋभुक्षाणमिन्द्रम्, ऋभुक्षणमिन्द्रम् । निगमे इत्युक्तेर्नेह
विकल्पः- तक्षा । तक्षाणौ । तक्षाणः ।

६-४-१० सान्तमहतः संयोगस्य ॥
श्रेयान् । श्रेयांसौ । श्रेयांसः । महान् । महान्तौ । महान्तः । यशांसि । महान्ति । असम्बुद्धावित्यनुवृत्तेर्नेह- हे श्रेयन् । हे महन् ।

६-४-११ अप्तृन्तृच्स्वसृनप्तृ- नेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ॥
आपः । पठितारौ । पठितारः । स्वसारौ । स्वसारः । असम्बुद्धावित्यनुवृत्तेर्नेह-हे पठितः । हे स्वसः ।

६-४-८ **सर्व**-१-१-४२ सुँडनपुं...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ)
६-३-१११ ढ्रलोपे पूर्वस्य दीर्घः अणः ॥ ६-४-१ अङ्गस्य ६-४-७ नोपधायाः= न उपधायाः ॥
६-४-८ (ग) (ख) (घ) (क) सर्वनामस्थाने च असम्बुद्धौ ॥ इति ।

(ग)+(ख)=न+ अङ्गस्य= नकारान्तस्य अङ्गस्य, (घ)=उपधायाः=उपधायाः स्थाने, (क)=दीर्घः, असम्बुद्धौ=सम्बुद्धिभिन्ने, सर्वनामस्थाने=सर्वनामस्थाने परे । इत्यर्थ उपदेश्यः । प्रकृते पितन् इति अङ्गम् अस्ति तत् पश्चादुपदेक्ष्यते, इति भणनीयं (न तु १-४-१३ यस्मात्... सूत्रं साम्प्रतमेव प्रस्तुत्यम्) ततो लक्षणसमन्वयश्छात्रैः कारयितव्यः । अथ पितान्+स् इति श्यामपाटचां लिखित्वा प्रकृते किं सूत्रं प्रवर्तेत ? इति च्छात्राः परीक्षणीयाः । छात्रेभ्यो यदि नागच्छेदुत्तरं तदा ६-१-६८ हल्ङ्या... सूत्रमुद्बोधनीयम् । लक्षणसमन्वयस्तु छात्रैरेव कारयितव्यः । अथ श्यामपाटचां "स्" इत्यंशो मेटनीयः । अर्थात् श्यामपाटचां "पितान्" इत्यंशो ऽवशेष्यः । ततः ८-२-७ न लोपः... सूत्रं प्रस्तुत्यम् ।

६-४-९ वा ष- न (६-४-७) + अङ्गस्य (६-४-१)= नकारान्तस्य अङ्गस्य, षपूर्वस्य= षकारपूर्वायाः उपधायाः (६४-७) वा=विभाषया, दीर्घः (६-३-१११) असम्बुद्धौ+सर्वनामस्थाने (६-४-८) ।

६-४-१० सान्त- सूत्रे "सान्त" इति लुप्तषष्ठीकं पृथक्पदम्, संयोगस्येत्यस्य विशेषणम् । अत्रोपधाशब्देन पूर्वो लक्ष्यते नकारात् पूर्वत्रोपधाया असंभवात् । तथा च सूत्रार्थः- सान्त= सकारान्तस्य, संयोगस्य, महतः= महच्छब्दस्य च, न+उपधायाः (६-४-७)= नकारात् पूर्वस्य, दीर्घः (६-३-१११) असम्बुद्धौ+ सर्वनामस्थाने (६-४-८) । **श्रेयान्** अत्र ७-१-३६ विदेः- सूत्रोदाहरणे विद्वान् इत्यत्रेव प्रक्रिया बोध्या ।

६-४-११ अप्तृ- ७-३-४४ प्रत्ययस्थात्... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)
६-३-१११ ढ्रलोपे पूर्वस्य दीर्घः अणः ॥ ६-४-१ अङ्गस्य ॥
(ग) (घ) (ङ)
६-४-७ नोपधायाः= न उपधायाः ॥ ६-४-८ सर्वनामस्थाने च असम्बुद्धौ ॥
६-४-११ अप्तृन्तृच्.... प्रशास्तॄणाम् (ख) (ग) (क) (ङ) (घ) ॥ इति ।

अप्तृन्तृच्... प्रशास्तॄणाम्+(ख)= अप्- तृन्प्रत्ययान्त- तृच्प्रत्ययान्त- स्वसृ- नप्तृ- नेष्टृ- त्वष्टृ- क्षत्तृ- होतृ- पोतृ- प्रशास्तॄणाम् अङ्गानाम्, (ग)=उपधायाः स्थाने, (क)= दीर्घः, (ङ)= असम्बुद्धौ (घ) सर्वनामस्थाने । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा सप्तस्वपि विभक्तिषु सम्बोधने चच्छात्रैरुच्यमानानि रूपाणि शिक्षकः शृणुयात् ।

अथाऽत्र शिक्षको मनसा ऽवदध्यात्- "उणादयो व्युत्पन्नानि प्रातिपदिकानि" उणादयोऽ व्युत्पन्नानि प्रातिपदिकानि" इति पक्षद्वयं व्याकरणशास्त्रे प्रथते । अतो नप्त्रादिग्रहणमव्युत्पत्तिपक्षे विध्यर्थम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१२ इन्हन्पूषार्यम्णां शौ ॥ १३
दधीनि । बहुवृत्रहाणि । बहुपूषाणि । बह्वर्यमाणि । शावेवेतिनियमान्नेह- विद्यार्थिनौ । विद्यार्थिनः । वृत्रहणौ । वृत्रहणः । पूषणौ । पूषणः । अर्यमणौ । अर्यमणः । अनिनस्मन्निति परिभाषयाऽनर्थकेऽपि तदन्तविधिः । यशस्विनौ । यशस्विनः । उपधाया एव नियमादिह भवत्येव दीर्घः- धनीयति । वृत्रहायते । इत्यादि ।

व्युत्पत्तिपक्षे नियमार्थम्- उणादिनिष्पन्नानां तृन्तृजन्तानां संज्ञाशब्दानां चेदुपधादीर्घस्तर्हि नप्त्रादीनामेवेति । तेनेह न-पितरौ । पितरः । मातरौ । मातरः । इति ।
अथा-ऽधोनिर्दिष्टरूपेण साम्प्रतमेवोपदिष्टमपि विषयं पुनरुद्बोधयेत् । वत्साः ? उक्तमेव पूर्वं ७-१-१ युँवौं... इति सूत्रे कृद्योगे अनुक्तयोः कर्तृकर्मणोः षष्ठी विभक्तिर्भवतीति । तत्सन्दर्भे च २-३-६५ कर्तृ... सूत्रमप्युपदिष्टम् । अतः "श्यामः कोशं पाठकः" "कोशं पाठकः श्यामः" इत्यादीनि वाक्यानि सर्वथा भवन्त्यशुद्धानि । यतः कृत्प्रत्यये कर्मणि अनुक्ते २-३-२ कर्म... सूत्रं बाधित्वा २-३-६५ कर्तृ... सूत्रेण षष्ठी विभक्तिर्भवति । तथा च श्यामः कोशस्य पाठकः । कोशस्य पाठकः श्यामः । व्याकरणस्य पाठकश्छात्रः । इत्यादीनि षष्ठचन्त--कर्मपदघटितानि वाक्यान्येव साधूनि भवन्ति । इति ।
अथाऽग्रे पुनरुपदिशेत् । वत्साः ? उक्तमेव तृच् प्रत्ययोऽपि कृत्प्रत्यय इति, तस्यार्थः कर्तेति च । तेन तृजन्तानामपि कर्मणि षष्ठी विभक्तिर्भवति । अतः "श्यामः कोशं पठिता" कोशं पठिता श्यामः" इत्यादीनि वाक्यानि सर्वथा भवन्त्यशुद्धानि । किन्तु "श्यामः कोशस्य पठिता" कोशस्य पठिता श्यामः" "व्याकरणस्य पठिता छात्रः" इत्यादीनि षष्ठचन्त- कर्मपदघटितानि वाक्यान्येव साधूनि भवन्ति । इति ।
अथ ऽग्रे पुनरुपदिशेत् । वत्साः ? यथा ण्वुँलन्ताः पाठक- प्रभृतयः शब्दाः स्त्रियां पाठिका- प्रभृतिभ्यः कल्पन्ते, अर्थात् पुँसि निष्पन्नाः पाठकप्रभृतयः शब्दाः स्त्रियां टापि पाठिकाप्रभृतयो भवन्ति । तथैव तृच्प्रत्यये पुंसि निष्पन्नाः पठितृप्रभृतयः शब्दाः स्त्रियां ङीपि पठित्री–प्रभृतयो भवन्ति । तथाहि- इति वदन् ४-१-५ ऋन्नेभ्यो.... सूत्रमुपदिशेत् ।
६-४-१२ इन्ह- ६-४-१३७ न संयोगाद... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्राऽधोनिर्दिष्टरूपेणच्छात्राणां जिज्ञासा जागरयितव्या । यथा- अयि वत्साः ? इन्, हन्, पूषन्, अर्यमन्, एते शब्दा नकारान्ताः सन्ति । शि इति च १-१-४१ शि स... सूत्रेण सर्वनामस्थानसंज्ञकम् । अतो ऽत्र ६-४-८ सर्व.... सूत्रेणैव दीर्घे सिद्धे प्रकृतसूत्रं किमर्थं स्यात् ? इति । अथ च्छात्राणामाकाङ्क्षायामुद्दीप्तायां प्रथममधोनिर्दिष्टो दृष्टान्तो देयः ।
यदि श्यामगृहाद् विष्णुमित्रगृहे चुल्लीनिमन्त्रणाऽऽगता । तदा यदि विष्णुमित्रस्तन्निमन्त्राणायां श्यामगृहे गन्तुं स्वकीयपरिवारस्या ऽन्यतममादिशति चेत्, तदादेशेन शेषसदस्या न गच्छन्तु, इति ज्ञायते, सिद्धे सत्यारभ्यमाणस्य नियामकत्वनियमात्, इति । वत्साः ? व्याकरणेऽपि स एव नियमः । प्रथते चैतद्वचनं व्याकरणे- "सिद्धे सत्यारभ्यमाणो विधिर्नियमाय भवति" इति । अतः प्रकृतसूत्रेण नियमः क्रियते "इन्नादीनाम् उपधायाः (६-४-७) शौ परे एव दीर्घो भवति" इति । [द्वितीयावृत्तौ तु यथासूत्राभिप्रेतमर्थ उपदेश्यः । तथाहि इन्हन्पूषार्यम्णामिति बहुवचनानुरोधेन ६-४-१ अङ्गस्य सूत्रमनुवर्तमानं बहुवचनान्ताय कल्पते । १-१-७१ येन... इति तदन्तविधिः । एवं च सूत्रार्थः फलति-इन्नाद्यन्तानामिति शेषोऽर्थः प्राग्वत् । पूषा इत्यादौ च व्यपदेशिवद्भावेन सूत्रप्रवृत्तिः] तेन विद्यार्थि (न्) शब्दस्य औकारादि-सर्वनामस्थाने परे न दीर्घः । विद्यार्थिनौ । विद्यार्थिनः । इत्यादि । सौ तु प्रकृतनियमेन ६-४-८ सर्व... सूत्राऽप्रवृत्तौ ६-४-१३ सौ च सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१३ सौ च ॥१४
विद्यार्थी । दण्डी । वृत्रहा । पूषा । अर्यमा । असम्बुद्धावित्यनुवृत्तेर्नेह- हे विद्यार्थिन् । हे दण्डिन् । हे वृत्रहन् । हे पूषन् । हे अर्यमन् ।

६-४-१४ अत्वसन्तस्य चाऽधातोः ॥
पठितवान् । धीमान् । वेधाः । सुयशाः । असम्बुद्धावित्यनुवृत्तेर्नेह- हे धीमन् । हे वेधः । हे सुयशः । अधातोरित्युक्तेर्नेह- पिण्डं ग्रसते पिण्डग्रः । असन्तस्यैव विशेषणत्वात्तस्य गोमानिवाचरतीति गोमान् इत्यादौ भवत्येव दीर्घः ।

६-३-१३ सौ च- ६-४-१२ इन्हन्... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र सूत्रे ६-३-१११ ढ्रलो... सूत्राद् दीर्घ इति, ६-४-७ नोप... सूत्राद् उपधाया इति, ६-४-८ सर्व... सूत्राद् असम्बुद्धौ इति, ६-४-१२ इन्ह... सूत्राद् इन्हन्पूषार्यम्णामिति चा ऽनुवर्तन्ते, इति बोधनपुरस्सरम् "इन्नादीनामुपधाया दीर्घो ऽसम्बुद्धौ, सौ= सुँपरे" इत्यर्थ उपदेश्यः । द्वितीयावृत्तौ तु पूर्वसूत्रदर्शितरीतिराश्रयणीया श्यामपाटी वा प्रयोक्तव्या तत्तत्सूत्रोट्टङ्कनाय । विद्यार्थी । सम्बुद्धौ- हे विद्यार्थिन्, इति रूपं छात्रैः साधयितव्यम् । शौ तु दीर्घो भवत्येव । यथा ६-४-१२ इन्ह... सूत्रोदाहरणेषु । **अथ सर्वनामशब्दा उपदेश्याः** । अयि वत्साः ? अकारान्ताः शब्दाः सामान्यनियमभाजः पूर्वमुपदिष्टाः । तत्र सर्वनामशब्दाः क्वचिद् विशेषनियमभाजो भवन्ति । त इदानीमुपदिश्यन्ते, इति च्छात्रान् साकाङ्क्षमानसान् कृत्वा ऽधोनिर्दिष्टरूपेणोपदिशेत् । यथा- अयि वत्साः ? सर्वनामशब्दा अपि सर्वासु विभक्तिषु सर्वेषु वचनेषु च सर्वत्रैव विशेषनियमं न भजन्ते । किन्तु पुंसि जस्, ङे, ङसिँ, आम् ङि इत्येतेष्वेव विशेषनियमं भजन्ते । अतः शेष-विभक्तिवचनेषु पूर्वोपदिष्टसामान्यनियमेन रूपाणि साध्यानि, इत्युपदिश्य सर्वशब्दात् सुँप्रत्यये कृते सतिच्छात्रैः साध्यमानां प्रक्रियां श्रुत्वा छात्रैरेवोच्चार्यमाणं रूपं लेखयेत् । अथ औ प्रभृतिषु शेषवचनेष्वपि च्छात्रैरेव रूपाणि साधयेत् । यत्र यत्र च्छात्राः प्रमाद्यन्ति सन्दिहन्ति वा तत्र तत्र शिक्षकः पूर्वोक्तान् नियमानुद्बोधयन् पूर्वोक्त- जसादि- पञ्चवचनातिरिक्तवचनरूपाणि च्छात्रैः साधयित्वा लेखयित्वा वाचयित्वा च स्मेरमुखः शिक्षकश्छात्राणामुत्साहं वर्धयेत् । अयि वत्साः ? आ ! व्याकरणे लब्धप्रवेशा यूयम् । सर्वनामशब्दानामपि प्रायः सर्वाणि रूपाणि ज्ञातवन्त एव । अतः "सर्वे बालकाः पठन्ति व्याकरणम्" इति वक्तव्ये "सर्वे" इति रूपं कथं सिध्येत् ? इति च्छात्राणामाकाङ्क्षामुद्भाव्य १-१-२६ सर्वादीनि... सूत्रं प्रस्तुवीयात् ।

६-४-१४ अत्व- ३-२-१०२ निष्ठा-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । सूत्रे अतुँ इति लुप्तषष्ठीकं पृथक् पदम् । चशब्दस्त्वर्थे । अतः "अधातोः" इति "असन्तस्य" इत्यनेनैव सम्बध्यते । अत्र श्यामपाटीप्रयोगो यथा-

(अ) (क)
६-४-१ अङ्गस्य ॥ ६-३-१११ ढ्रलोपे पूर्वस्य दीर्घः अणः ॥
(ख) (ग)
६-४-७ न उपधायाः ॥ ६-४-८ सर्वनामस्थाने च असम्बुद्धौ ॥
(घ)
६-४-१३ सौ च ॥ ६-४-१४ अतुँ असन्तस्य च अधातोः (अ) (ख) (क) (ग) (घ) ॥ इति ।

अतुँ= अत्वन्तस्य, अधातोः+ असन्तस्य च= धातुभिन्नस्य असन्तस्य च, (अ)= अङ्गस्य, (ख)= उपधायाः स्थाने (क) = दीर्घः, (ग)= असम्बुद्धौ, (घ)= सौ परे । इत्यर्थमुपदिश्य च्छात्रैर्लक्षणसमन्वयं कारयित्वा "पठितवात्+स्" इति श्यामपाट्यां लिखित्वा ७-१-७० उगिदचां ... सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१५ अनुनासिकस्य क्विँझलोः क्ङिति ॥२१,१९

प्रशान्। प्रशामौ। शान्तः। शान्तिः। शंशान्तः। झलादावित्युक्तेर्नेह- गम्यते। क्ङितीत्युक्तेर्नेह-गन्ता।

६-४-१६ अज्झनगमां सनि ॥१७

जिगीषति। तुष्टूषति। चिकीर्षति। जिघांसति। अधिजिगांसते। अजादेशगमेरित्यर्थान्नेह- जिगंस्यते।

६-४-१७ तनोतेर्विभाषा ॥१८

तितांसति, तितंसति। झलादावित्यनुवृत्तेर्नेह- तितनिषति।

६-४-१८ क्रमश्च क्त्वि ॥

क्रान्त्वा, क्रन्त्वा। झलादावित्यनुवृत्तेर्नेह- क्रमित्वा।

६-४-१९ च्छ्वोः शूडनुनासिके च ॥२०,२१

प्रश्नः। खौनाति। शब्दप्राट्। अक्षद्यूः। पृष्टः। द्यूतः।

६-४-२० ज्वरत्वरस्रिव्यविमवामुपधायाश्च ॥

जूः। जूरौ। जूरः। जूर्तिः। तूः। तूरौ। तूरः। स्रूः।स्रुवौ। स्रुवः। स्रूतिः। ऊः। उवौ। उवः। ऊतिः। मूः। मुवौ। मुवः। मूतिः।

६-४-१५ अनु- अत्र "क्ङिति" इति झलादेरेव विशेषणं नतु "क्विँ" इत्यस्य। तत्र कित्त्वस्याऽव्यभिचाराद्, ङित्त्वस्याऽसंभावत्। अनुनासिकस्येत्यत्र १-१-७१ येन... इति तदन्तविधिः। झलि तदादिविधिः। अनुनासिकस्य= अनुनासिकान्तस्य, अङ्गस्य (६-४-१) उपधायाः (६-४-७) दीर्घः (६-३-१११) क्विँझलोः+क्ङिति= क्विँप्रत्यये झलादौ क्ङिति च परे। **शंशान्तः** यङ्लुकि लँटि तसो ङित्वाद् दीर्घः।

६-४-१६ अज्झनगमाम्= अजन्तानां हन्तेरजादेशगमेश्च, अचः (१-२-२८) दीर्घः (६-३-१११) झलादौ (६-४-१५) सनि। **जिगीषति** ७-३-५७ सल्लिँ... इति कुत्वम्। **चिकीर्षति** ७-१-१०० ॠत.. इतीत्वम्। **जिघांसति** ७-३-५५ अभ्या... इति कुत्वम्। **अधिजिगांसते** २-४-४८ इङ... इतीङो गमादेशः। **जिगंस्यते** गमेः सनि कर्मणि तङ्।

६-४-१७ तनोतेः=तन्धातोः, अचः (१-२-२८) विभाषा=वा, दीर्घः (६-३-१११) झलादौ (६-४-१५) सनि (६-४-१६)। प्रत्युदाहरणे ७-२-४९ सनी... सूत्रस्थ- तनि... वार्तिकेन वैकल्पिक इट्। इडभावे तूदाहरणे।

६-४-१८ क्रमः= क्रम् धातोः, अचः (१-२-२८) विभाषा (६-४-१७) दीर्घः (६-३-१११) झलादौ (६-४-१५) क्त्वि= क्त्वाप्रत्यये परे। प्रत्युदाहणे ७-२-५६ उदि... इति क्त्वो वेट्। इडभावे तूदाहरणे।

६-४-१९ च्छ्वोः= सतुँक्कच्छकारस्य वकारस्य च स्थाने, शूठ्= श् ऊठ् इत्येतौ आदेशौ भवतः, अनुनासिके=अनुनासिके परे, क्विँझलोः+ क्ङिति (६-४-१५) च = क्वौ झलादौ क्ङिति च परे। **प्रश्नः** प्रच्छ् (१४१२) धातोः ७-३-६६ यज... इति नङ्प्रत्ययः। **खौनाति** खवँ (१५३० वान्तो ऽयमित्येके) क्रयादिः। ऊठि ६-१-८६ एत्ये... इति वृद्धिः। **शब्दप्राट्** ३-२-१७८ अन्ये... सूत्रस्थ- क्विँब्व.. इति वार्तिकेन क्विँब् दीर्घश्च। ८-३-८६ व्रश्च.. इति षः। जश्त्वचर्त्वे। **अक्षद्यूः** अक्षैर्दीव्यतीति क्विँप्। **पृष्टः** प्रच्छ्+क्तः। **द्यूतः** दिव् (११०६)+क्तः। प्रकृतसूत्रसम्बन्धिनि विषये ७-४-९२ ॠतः... सूत्रे दीक्षितः- यकारवकारान्तानां तूठ्भाविनां यङ्लुङ् नास्तीति च्छ्वोरिति सूत्रे भाष्ये ध्वनितम्। कैयटेन च स्पष्टीकृतम्। इदं च्छ्वोरिति यत्रोठ् तद्विषयम्। ज्वरत्वरेत्यूठ्भाविनोः स्रिविमव्योस्तु यङ्लुगस्त्येवेति न्याय्यम्, । माधवादिसंमतं चेति।

६-४-२० ज्वर- अत्र पूर्वसूत्राद् वकारस्यैवाऽनुवृत्तिः, नतु च्छकारस्य, असंभवात्। अत एव आदेशोऽपि "ऊठ्" इत्येवानुवर्तते। पूर्वसूत्रे स्थान्यादेशयोस्तथैव निर्णीतत्वात्। इत्थं सूत्रार्थः फलति- ज्वर... याश्च= ज्वरप्रभृतीनां वकारस्य उपधायाश्च स्थाने, ऊठ् +अनुनासिके (६-४-१९) क्विँझलोः (६-४-१५) च=क्वौ झलादौ च प्रत्यये। अत्र दीक्षितः- अत्र क्ङितीति नानुवर्तते, अवतेस्तुनि कृते ओतुरिति दर्शनात्। अनुनासिकग्रहणं चानुवर्तते, अवतेर्मन्प्रत्यये तस्य टिलोपे ओम् इति दर्शनादिति। **स्रुवौ** ६-४-७७ अचि... इत्युवँङ्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-२१ राल्लोपः ॥

मूर्मा । मूः । मुरौ । मुरः । मूर्तिः । मूर्तः । हूर्मा । हूः । हुरौ । हुरः । हूर्तिः । हूर्णः। तूर्मा । तूः । तुरौ । तुरः । तूर्तिः । तूर्णः । तोतोर्ति ।

६-४-२२ असिद्धव॑दत्रा॑ऽऽभात् ॥१७५

शाधि । जहि । आभादित्युक्तेर्नेह नलोपाऽसिद्धत्वम्- अभाजि । रागः । अत्र= समानाश्रय इत्युक्तेः पपुषः, चिच्युषः, लुलुवुष इत्यत्र वसुँसम्प्रसारणमाल्लोपे यणादेशे उवँङादेशे च कर्तव्ये नाऽसिद्धं भवति । (वुँग्युँटावुवँङ्यणोः सिद्धौ वक्तव्यौ) बभूव । बभूवतुः । बभूवुः । दिदीये । दिदीयाते । दिदीयिरे ।

६-४-२१ रात्= रेफात् परयोः, च्छ्वोः (६-४-९)= छकारवकारयोः, लोपः=लोपो भवति, अनुनासिके (६-४-१९ क्विँझलोः (६-४-१५)=क्वौ झलादौ प्रत्यये, च (६-४-२०) । **मूर्मा** मुर्छाँ (२१२) धातोर्मनिँन् । १-१-४ न धा... इति गुणप्रतिषेधः । ८-२-७७ हलि...इति दीर्घः । **मूर्तः** ७-२-१६ आदि..इतीट् प्रतिषेधः । ८-२-५७ न ध्या... इति निष्ठानत्वा ऽभावः । एवं हुर्छाँ धातोरपि बोध्यम् । निष्ठानत्वं त्वत्र भवत्येव, एवं तुर्वी (५६९) धातोरपि । **तोतोर्ति** यङ्लुकि रूपम् । मूः, हूः, तूः इत्यत्र ८-२-७६ र्वोरु ... इति दीर्घः । **६-४-२२ असि-** ६-४-२४ अनिदितां... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र प्रथमं शिक्षक एव पठेत् । छात्रान् नोपदिशेत् । आभात्= भाधिकारमभिव्याप्य (आपादपरिसमाप्तेरिति भावः) अत्र= अत्र प्रकरणे समनाश्रये आभीये कार्ये कर्तव्ये (अत्र ग्रहणं समानाश्रयप्रतिपत्त्यर्थम्) असिद्धवत्= पूर्वकृतमाभीयकार्यमसिद्धवद् भवति । **शाधि** ६-४-३५ शा हौ- इति शाऽऽदेशस्या ऽसिद्धत्वेन ६-४-१०१ हुझ.... इति झलन्तलक्षणो धिः । **जहि** ६-४-३६ हन्ते... इति जादेशस्या ऽसिद्धत्वेन ६-४-१०५ अतो... इति न हेर्लुक् । **अभाजि** ६-४-३३ भञ्जे ... इति न लोपः । ७-२-११६ अत... इत्युपधावृद्धिः । **रागः** ६-४-२७ घञि... इति नलोपः । पूर्ववद् वृद्धिः । ७-३-५२ चजोः... इति कुत्वम् । वसुँसम्प्रसारणम्= ६-४-१३१ वसोः... इति विहितं सम्प्रसारणम्, नाऽसिद्धं भवति । आल्लोपादीनि वसौ, वस्वन्तस्य विभक्तौ सम्प्रसारणमिति समानाश्रयत्वं नास्ति । अथच्छात्रानुपदिशेत् पूर्वोक्तं सूत्रार्थम्- आभात्= भस्येत्यधिकारावधि, अत्र= अस्मिन् प्रकरणे अर्थात् ६-४-२२ सूत्रादारभ्य पादसमाप्त्यवधि, असिद्धवत्= पूर्वकृतं कार्यमकृतमिव भवति, इत्युपदिश्य ६-४-५१ णेर... सूत्रं ६-४-६२ स्यसिँच्... सूत्रं च अस्मिन् प्रकरणे वर्तेते इति तत्तत्सूत्रस्थलप्रदर्शनपुरस्सरं बोधयित्वा भावकर्मणोः ६-४-६२ स्यसिँच्... इति चिण्वदिटोऽसिद्धत्वेन ६-४-५१ णेर... सूत्रेण चिण्वदिट्पक्षे णिलोपो भवति, इति प्रतिपाद्य चोरिता । चोरिष्यते । चोरिषीष्ट । अचोरिषाताम् । अचोरिष्यत । इत्यादीनि रूपाणि । पक्षान्तरे तु चोरयिता । चोरयिष्यते । चोरयिषीष्ट । अचोरयिषाताम् । अचोरयिष्यत । इत्यादीनि च रूपाणिच्छात्रैः साध्यमानानि शिक्षकः शृणुयात् ।

अथाऽधोनिर्दिष्टरूपेण शिक्षकश्छात्रानुपदिशेत् । यथा- वत्साः ? उक्तमेव पूर्वं ६-४-११२ श्नाभ्य... सूत्रे ३-१-२५ सत्या... सूत्रेण चुरादयो णिजन्ता एव भवन्तीति । तेन सर्वे ऽपि चुरादयो ऽनेकाचो भवन्ति । अनेकाचां धातूनां च लिँटि आम्प्रत्यये विशेषप्रक्रिया भवति । णिजन्तानां धातूनां कर्तरि लुँङि च्लेश्चङि विशेषप्रक्रिया भवति । **अतश्चुरादिगणपठितधातूनां लिँटि कर्तरि लुँङि च क्रमशः प्रक्रियोपदिश्यते,** इति । अथ ३-४-११४ आर्ध... सूत्रे प्रस्तुतात्, "चोरि" धातोर्लिँटि चोरि+ल् इति श्यामपाटचां लिखित्वा ३-१-३५ कास्प्र... सूत्रं प्रस्तुत्य तत्र वार्तिककृता पठितं कास्य... वार्तिकमुपदिशेत् । **बभूव** ६-४-८८ भुवो... इति वुँगागमः । **दिदीये** ६-४-६३ दीङो... इति युँडागमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-२३ श्नान्नलोपः ॥ ३३

भनक्ति । हिनस्ति ।

६-४-२४ अनिँदितां हल उपधायाः क्ङिति ॥ ३४

मथ्यात् । मथ्नाति । अनिँदितामित्युक्तेर्नेह- वन्यते । वन्दितः । क्ङितीत्युक्तेर्नेह- मन्थिता । मन्थिष्यति ।

(अनिँदितां नलोपे लङ्गिकम्प्योरुपतापशरीर विकारयोरुपसंख्यानम्)

विलगितः । विकपितः ।

उपतापशरीरविकारयोरित्युक्तेर्नेह-विलङ्गितः । विकम्पितः ।

(रञ्जेर्णौ मृगरमण उपसंख्यानम्)

रजयति मृगान् । मृगरमण इत्युक्तेर्नेह- रञ्जयति वस्त्राणि । मृगेत्युक्तेर्नेह- रञ्जयति पक्षिणः ।

(अस्यकेऽने च रञ्जेर्नलोपो वक्तव्यः)

रजः । रजकः । रजनम् ।

६-४-२५ दंशसञ्जस्वञ्जां शपि ॥२६

दशति । सजति । स्वजते ।

६-४-२६ रञ्जेश्च ॥२७

रजति ।

६-४-२७ घञि च भावकरणयोः ॥२९

रागः । भावकरणयोरित्युक्तेर्नेह- रजन्त्यस्मिन्निति रङ्गः ।

६-४-२८ स्यदो जवे ॥

स्यदः । जव इत्यर्थः । जवे इत्युक्तेर्नेह- तैलस्यन्दः ।

६-४-२९अवोदैधौद्मप्रश्रथहिमश्रथाः ॥

अवोदः । एधः ।ओद्म । प्रश्रथः । हिमश्रथः ।

६-४-२३ श्नात्= श्नमः परस्य, न= नकारस्य, लोपः=लोपो भवति ।

६-४-२४ अनि- ३-४-१०४ किदाशिषि-सूत्रानन्तरं सूत्रमिदं पाठचम् । अनिँदिताम्=(इँत्=ह्रस्व इँकारः, इत्=इत्यसंज्ञकः, येषां त इँदितः । तद्भिन्नाः=अनिँदितः । तेषाम्)=ने.भा. अन्त्यमा ह्रस्व इँकारको इत्संज्ञा न हुने, हलः=हलन्तानाम्, अङ्गानाम् (६-४-१) उपधायाः=उपधासंज्ञकस्य, न+लोपः (६-४-२३)= नकारस्य लोपो भवति, क्ङिति= किति ङिति च परे । इत्यर्थमुपदिशेत् । लक्षणसमन्वयप्रसङ्गे यद्यपि ङित्त्वेनापि प्रकृते सिध्येत् । तथापि अन्यत्रावश्यकं प्रथितं कित्त्वमिहाप्युपदिष्टमिति बोधयेत् । मथ्यात् । **अथ चुरादिविषये सिंहावलोकनम्**=अथा ऽधोनिर्दिष्टरूपेण शिक्षकश्छात्रानुपदिशेत् । यथा- वत्साः ? साधारणरीत्या चुरादिगणविषये ६-४-११२ श्नाभ्य...सूत्रे तदग्रे च पूर्वमुपदिष्टमेव । वलाद्यार्धधातुके च भूधाताविव इड्गुणप्रक्रिया ज्ञेया तत्र । यथा लुँटि-चोरयिता । लृँटि-चोरयिष्यति । आशीर्लिँङि चोर्यात् । तत्रात्मनेपदे-चोरयिषीष्ट । इनि । कर्मणि चिण्वदिटि तु विशेषो वर्तते, इति कथयन् ६-४-२२ असिद्ध... सूत्रमुपदिशेत् ।

रजयति ८१७ स्वनँ- धातुस्थेन जनीजृष्... इति गणसूत्रेण मित्त्वात् ६-४-९२ मितां... इति ह्रस्वः ।

६-४-२५ दंश.. ञ्जाम्= दंश् सञ्ज् स्वञ्ज् धातूनाम्, न+लोपः (६-४-२३) शपि= शप्प्रत्यये परे ।

६-४-२६ रञ्जेः= रञ्ज् धातोः, न+लोपः (६-४-२३) शपि= शप्प्रत्यये परे ।

६-४-२७ घञि- रञ्जेः (६-४-२६) न+लोपः (६-४-२३) भावकरणयोः+ घञि= भावकरणार्थे घञि परे । **रागः** ३-३-१८ भावे इति भावे ३-३-१२१ हल इति करणे च घञ् । ८-२-३ चजोः... इति कुत्वम् ।

६-४-२८ स्यदः- स्यन्देर्घञि नलोपो वृद्धचभावश्च निपात्येते, जवे=वेगे वाच्ये ।

६-४-२९ अवो...श्रथाः= अवपूर्वाद् उन्देर्घञि नलोपः । इन्धेर्घञि नलोपः, १-१-४ न धा... इति निपेधे प्राप्ते गुणश्च । उन्देर्मनिँनि नलोपो गुणश्च । प्रहिमपूर्वाच् श्रन्थेर्घञि नलोपो वृद्धचभावश्च । इत्येते निपात्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-३० नाञ्चेः पूजायाम् ॥ ३२

अञ्चिता गुरवः। पूजायामित्युक्तेरिह लोप एव-उदक्तमुदकं कूपात्। उद्धृतमित्यर्थः।

६-४-३१ क्त्वि स्कन्दिस्यन्दोः ॥३२

स्कन्त्वा, स्कन्त्त्वा। स्यन्त्वा, स्यन्त्त्वा। स्यन्दित्वा।

६-४-३२ जान्तनशां विभाषा ।३३

रक्त्वा, रङ्क्त्वा। नष्ट्वा, नंष्ट्वा। इट्पक्षे नशित्वा।

६-४-३३ भञ्जेश्च चिणि ॥

अभाजि, अभञ्जि।

६-४-३४ शास इदङ्हलोः ॥३५

अशिषत्। शिष्टः। शिष्यः।

(क्वौ च शास इत्वं भवतीति वक्तव्यम्)

आर्यशीः। मित्रशीः। अत्र काशिका- यस्मात् शासेरङ् विहितः शासु अनुशिष्टौ (१०७५) इति तस्यैवेदं ग्रहणमिष्यते। आङः शासुँ इच्छायाम् (१०२२) इत्यस्य न भवति- आशास्ते, आशास्यमानः। (क्विँप्प्रत्यये तु तस्यापि भवतीति वक्तव्यम्)

आशीः। आशिषौ। आशिषः। क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् (८-२-१०४) इति निपातनाद् वा सिद्धमिति।

६-४-३५ शा हौ ॥३६

शाधि।

६-४-३६ हन्तेर्जः ॥

जहि।

६-४-३७ अनुदात्तोपदेश- वनति- तनोत्यादीनामनुनासिकलोपो झलि क्ङिति ॥ ३९,४०

हतः। वतिः। ततिः। अतत। अनुदात्तोपदेशाद्युक्तेर्नेह- शान्तः।

६-४-३८ वा ल्यपि ॥

व्यवस्थितविभाषेयम्। मान्तानिटां वा नान्तानिटां वनादीनां च नित्यम्। आगत्य, आगम्य। आहत्य। प्रवत्य। वितत्य।

६-४-३० **नाञ्चेः**-अञ्चेः=अञ्च्धातोः, नलोपः (६-४-२३) न=नभवति, पूजायाम्=पूजायां गम्यमानायाम्। **अञ्चिताः**। ७-२-५३ अञ्चेः... इतीट्। **उदक्तम्**। ७-२-१५ यस्य .. इतीट्प्रतिषेधः।

६-४-३१ **क्त्वि-स्कन्दिस्यन्दोः**=स्कन्द् स्यन्द् इति धात्वोः, नलोपः (६-४-२३) न (६-४-३०) क्त्वि= क्त्वाप्रत्यये परे। **स्यन्दित्वा** ७-२-४४ स्वर...इतीट्पक्षे १-२-१८ न क्त्वा...इति कित्त्वप्रतिषेधान्नलोपप्राप्तिरेव न।

६-४-३२ **जान्तनशाम्**=जकारान्तानाम्, अङ्गानाम् (६-४-१) नशेश्च, नलोपः (६-४-२३) विभाषा=वा, न (६-४-३०) क्त्वि (६-४-३१)। **नंष्ट्वा** ७-१-६० मस्जि... इति नुँम्। **नशित्वा** ७-२-४५ रधा..इति वेट्।

६-४-३३ **भञ्जेः**= भञ्ज्धातोः, विभाषा (६-४-३२) नलोपः (६-४-२३) चिणि=चिणि परे। अत्र प्राप्त्यभावेन निषेधाऽयोगाद् विधिः।

६-४-३४ **शासः**=शास्धातोः, उपधायाः (६-४-२४) इत्=इकारादेशो भवति, अङ्हलोः=अङि हलादौ कङिति (६-४-२४) च।

अशिषत् ३-१-५६ सर्ति... इति च्लेरङ्। ८-३-६० शासि... इति षत्वम्।

६-४-३५- **शा हौ**- शासः (६-४-३४) शा= शा इत्यादेशो भवति, हौ= हिप्रत्यये परे। **शाधि** ६-४-२२ असि.. सूत्रे द्रष्टव्यम्।

६-४-३६ **हन्तेः**=हन्धातोः स्थाने, जः=ज इत्यादेशो भवति, हौ (६-४-३५)। **जहि** ६-४-२२) असि... सूत्रे द्रष्टव्यम्।

६-४-३७ **अनु**-अनुनासिक=अनुनासिकान्तानाम्, अनुदात्तो...दीनाम्=अनदात्तोपदेशानां वनति तनोत्यादीनां च, लोपः=लोपो भवति, झलि+ क्ङिति=झलादौ क्ङिति परे। **हतः** लँटि तसि २-४-७२ अदि... इति शपो लुक्। लोपः=लोपो भवति, ... **वतिः** क्तिन्प्रत्ययान्तमेतत्। **अतत** १-२-४ सार्व... इति ङित्त्वम्। क्तप्रत्ययो वा। २-४-७९ तना...इति सिँचो लुकि त इत्यस्य १-२-४ सार्व.. इति ङित्त्वम्। **शान्तः** ६-४-१५ अनु.... इति दीर्घः।

६-४-३८ **वा ल्य**- अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपः (६-४-३७) वा=विभाषया भवति, ल्यपि= ल्यपि परे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-३९ न क्तिचि दीर्घश्च ॥

यन्तिः । रन्तिः । तन्तिः । क्तिनि तु यतिः । रतिः । ततिः । अनुदात्तेत्याद्यनुवृत्तेरिह दीर्घो भवत्येव-कान्तिः । शान्तिः ।

६-४-४० गमः क्वौ ॥

श्रीदुर्गाहीरेश्वर- मन्दिर- गत् । अङ्गत् ।

(गमादीनामिति वक्तव्यम्)

संयत् । परीतत् ।

(ऊङ् च गमादीनामिति वक्तव्यम्)

श्रीदुर्गाहीरेश्वर- मन्दिर- गूः । अङ्गूः ।

६-४-४१ विँड्वनोरनुनासिकस्यात् ।४५

अब्जाः । गोषा इन्द्रो नृषा असि । कूपखाः । दधिक्राः । अग्रेगाः । विजावा ।

६-४-४२ जनसनखनां सञ्झलोः ॥४३

सिषासति । जातः । सातः । खातः । झलादौ सनीत्युक्तेर्नेह- जिजनिषते । सिसनिषति । चिखनिषति ।

६-४-४३ ये विभाषा ॥४४

जायते, जन्यते । सायते, सन्यते । खायते, खन्यते । जनेः श्यनि तु जायते, इत्येव । सायात्, सन्यात् । खायात्, खन्यात् । जाजायते, जञ्जन्यते । सासायते, संसन्यते ।

६-४-३९ न क्ति- क्तिचि= क्तिच्प्रत्यये परे, अनुदात्तोपदेशवनतितनोत्यादीनाम् (६-४-३७) दीर्घः+ अनुनासिकलोपः (६-४-३७ च, न= न भवतः ।

६-४-४० गमः= गम् धातोः, अनुनासिकलोपः (६-४-३७) क्वौ= क्विँप्रत्यये परे ।

परीतत् ६-३-११६ नहि... इति दीर्घः ।

ऊङ् च- अनुनासिकलोपः (६-४-३७) ऊङ् च= ऊकारादेशश्चेत्यर्थः । उदाहरणे अनुनासिकलोपे, १-१-५१ अलो... इत्यकारस्योकारादेशः । ङित्करणं चिन्त्यप्रयोजनम् ।

६-४-४१ विँड्व-अनुनासिकस्य=अनुनासिकस्य स्थाने, आत्=आकारादेशो भवति, विँड्वनोः=विट् वन् इति प्रत्यययोः परयोः । अनुनासिकस्य (६-४-४५) इत्यनुवर्तमाने पुनरनुनासिकग्रहणमनुनासिकमात्र-ग्रहणार्थम् । अन्यथा, अनुदात्तोपदेशेत्याद्यप्यनुवर्तेत । आद्येषु षट्सूदाहरणेषु ३-२-६७ जन.. इति विँट् । गोषा नृषा इत्यत्र ८-३-१०८ सनो... इति षत्वं च । अन्त्ये ७-२-७५ अन्ये... इति वनिप् ।

६-४-४२ जन- ६-४-३७ अनु... सूत्रादनुवर्तमानं "झलि" इति प्रकृतसुत्रे सनो विशेषणम् । तस्मादेव सूत्रादनुवर्तमानं "क्ङिति" इति च प्रकृतसूत्रे झलो विशेष्यम् । अतः सूत्रार्थः फलति- जनसनखनाम्=जन् सन् खन् धातूनां स्थाने, आत् (६-४-४१), झलि+क्ङिति (६-४-३७)+ सञ्झलोः=झलादौ सनि झलादौ किति ङिति च ।

सिषासति ७-२-४९ सनी... वेट् । तदभावपक्षे रूपमिदम् । **सिसनिषति** ८-३-६१ स्तौति... इति नियमान्न षत्वम् । अत्र काशिका- अत्र झलादौ क्ङिति सनोतेर्विप्रतिषेधाद् आत्वमनुनासिकलोपं वाधते । "घुमास्थागापाजहातिसां हलि" इति हल्ग्रहणं ज्ञापकम्-अस्मिन्नसिद्धप्रकरणे विप्रतिषेधो भवतीति । अत्र न्यासः- कथं कृत्वा ज्ञाकम् ? हल्ग्रहणस्यैतदेव प्रयोजनम् हदालावीत्वं यथा- स्यात् । इह मा भूद्-आतो ऽनुपसर्गे कः" गोदः, कम्बलद इति । यदि चात्र विप्रतिषेधो न स्याद् हल्ग्रहणमनर्थकं स्यात् । अस्त्वत्रेत्वम् तस्याऽसिद्धत्वाल्लोपो भविष्यति । पश्यति त्वाचार्यः- भवती‌ैहप्रकरणे विप्रतिषेधः, इति यतो हल्ग्रहणं करोति । इत्यादि ।

६-४-४३ ये= यकारादौ, क्ङिति (६-४-३७) जनसनखनाम् (६-४-४२) विभाषा=वा, आत् (६-४-४१) । आद्येषु त्रिषूदाहरणेषु भावे कर्मणि च यक् । **श्यनि तु जायते इत्येव** ७-३-७९ ज्ञाज... इति नित्यं जा ऽऽ देशः । मध्ययोर्द्वयोराशिषि लिंङ् । अन्त्ययोर्द्वयोर्यङि, आत्वपक्षे ७-४-८३ दीर्घो.. इत्यभ्यासस्य दीर्घः । आत्वाभावपक्षे ७-४-८५ नुंग...इत्यभ्यासस्य नुंक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-४४ तनोतेर्यकि ॥

तायते, तन्यते ।

६-४-४५ सनः क्तिचि लोपश्चास्यान्यतरस्याम् ॥

सातिः, सतिः, सन्तिः ।

६-४-४६ आर्धधातुके ॥६८

६-४-४७ भ्रस्जो रोपधयो रँमन्यतरस्याम् ॥

भर्जनम्, भ्रज्जनम् । भर्ष्टुम्, भ्रष्टुम् ।

(भ्रस्जादेशात् संप्रसारणं पूर्वविप्रतिषेधेन)

भृज्ज्यते । भृज्ज्यात् ।

६-४-४८ अतो लोपः ॥५४ ।

पिपठिषाञ्चकार । गोपायिष्यति । कथयति ।

अत इति तपरकरणान्नेह-यास्यति ।

(ण्यल्लोपावियँङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन)

गणकः । पिपठिषकः । पिपठिष्यते ।

६-४-४९ यस्य हलः ॥५०

पापठाञ्चक्रे । बेभिदिता । बेभिदितुम् ।

६-४-४४ तनोतेः=तन् धातोः स्थाने, विभाषा (६-४-४३) आत् (६-४-४१) यकि=यक्प्रत्यये परे ।

६-४-४५ सनः=सनोतेः, क्तिचि=क्तिच्प्रत्यये परे, विभाषा (६-४-४३) आत् (६-४-४१) अस्य= सन्धातोः, अन्यतरस्याम्=वा, लोपश्च =लोपोऽपि भवति । १-१-५१ अलो... इति नकारस्य लोपः । **सन्तिः** ६-४-३९ न क्तिचि... इति दीर्घप्रतिषेधः ।

६-४-४६ आर्धधातुके- इत्यधिक्रियते, ६-४-६९ न ल्यपि इति सूत्रात् प्राक् । अत्र न्यासः- यदार्धधातुकसामान्यं विवक्ष्यते तदा सामान्ये पौर्वापर्यासंभवाद् विषयसप्तमीयम् । यदार्धधातुकव्यक्तिस्तदा परसप्तमीति ।

६-४-४७ भ्रस्जः= भ्रस्ज्धातोः, रोपधयोः=रेफस्योपधायाश्च स्थाने, अन्यतरस्याम्=वा रँम्= रँमागमो भवति, आर्धधातुके (६-४-४६) । रोपधयोरिति स्थानषष्ठीनिर्देशाद् रोपधयोर्निवृत्तिः । **भ्रस्जादेशात्**= रँमागमात्, पूर्वविप्रतिषेधेन संप्रसारणं भवति ।

६-४-४८ अतो- १-३-६२ पूर्ववत्... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र शिक्षकेण विचारणीयं यत्, अत्र सूत्रे ६-४-३७ अनु... सूत्रात्, उपदेशे इत्यनुवर्तते । अतः, यद्यपि आर्धधातुकोपदेशे यददन्तं तस्यातो लोप आर्धधातुके, इत्यर्थः । अत एव अयतेः क्विँपि अत् इत्यत्र ना ऽकारस्य लोप इति । तथापि बालानामुपलालनामनुसृत्य "अतः, लोपः, आर्धधातुके (६-४-४६)" इति सामान्यार्थ उपदेश्यः । छात्रैर्लक्षणसमन्वयं कारयित्वा ऽग्रिमप्रक्रियां च च्छात्रैरेव साधयेत् सः । पिपठिषाञ्चकार । पिपठिषाम्बभूव । पिपठिषामास । एवमार्धधातुके ऽ कारलोपः । पिपठिषिता ।पिपठिषिष्यति॥ इत्यादि । कर्मण्यपि यक आर्धधातुकत्वादल्लोपः । पिपठिष्यते । एवमिच्छार्थे बोधयितव्ये सर्वेभ्यो धातुभ्यः सन्प्रत्ययं कृत्वा सन्नन्ता धातवः प्रयोक्तव्याः । किन्तु विकल्पेन सन्विधानात् पठितुमिच्छतीत्यादीनि वाक्यान्यपि साधून्येवेति बोधयेत् ।**इति सन्नन्तशिक्षणरीतिः । अथ प्रकारान्तरैरुपदिष्टेषु धातुष्वन्यतमः प्रकारो यङ्प्रत्यय उपदिश्यते-** तथाहि इति वदन् प्रथमं ३-१-२२ धातोरेकाचो... सूत्रमुपदिशेत् ।

६-४-४९ यस्य-७-४-८३ दीर्घो... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र शिक्षकेणा ऽवधेयम्- यस्य इत्यत्र य इति समुदायो गृह्यते । तेन ईर्ष्यिता, ईर्ष्यितुमित्यादौ, अर्थवद्ग्रहणपरिभाषया पुत्रकाम्यिता इत्यादौ च न दोषः । इति । हलः= हलः परस्य, यस्य= यशब्दस्य, लोपः (६-४-४८) आर्धधातुके (६-४-४६) परे । इत्यर्थमुपदिश्य लक्षणसमन्वय- प्रसङ्गे १-१-५३ आदेः.... सूत्रमुद्बोध्य अकारवर्जं यकारमात्रं लोपयित्वा "पापठ्+अ+आम्+ल्" इति श्यामपाट्यां लिखित्वा ६-४-४८ अतो... सूत्रमुद्बोध्य "पापठाम्+ल्" इति श्यामपाट्यां शेषयित्वाऽग्रिमप्रक्रियां छात्रैः साधयेत् सः । पापठाञ्चक्रे । एवं पापठिता । पापठिष्यते । इत्यादीनि रूपाणि च्छात्रैः साधयेत् । अथ भूधातोर्यङि "बुभूय" इत्यवधिच्छात्रैः साधयित्वा ७-४-८२ गुणो... सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-५० क्यस्य विभाषा ॥

समिधिता । समिध्यिता ।

६-४-५१ णेरनिटि ॥५७

चोर्यते । पाठचते । अनिटीत्युक्तेर्नेह-पाठयिष्यति ।

(ण्यल्लोपावियँङ्य्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन)

अततक्षत् । आशिशत् । कारणा । कारकः । कार्यते ।

६-४-५२ निष्ठायां सेटि ॥

पाठितः । पाठितवान्

६-४-५३ जनिता मन्त्रे ॥

अन्यत्र जनयिता ।

६-४-५४ शमिता यज्ञे ॥

शमयिता ऽन्यत्र ।

६-४-५५ अयामन्ताल्वाय्येत्न्विष्णुषु ॥५७

चोरयाञ्चकार । गण्डयन्तः । स्पृहयालुः । स्पृहयाय्यः । स्तनयित्नुः । पारयिष्णवः ।

६-४-५६ ल्यपि लघुपूर्वात् ॥

प्रशमय्य । विगणय्य ।

लघुपूर्वादित्युक्तेर्नेह-निपात्य ।

६-४-५० क्यस्य- हलः (६-४-४९) क्यस्य=क्यप्रत्ययस्य, विभाषा=वा, लोपः (६-४-४८) आर्धधातुके (६-४-३६) । क्यस्येति सामान्येन क्यच्क्यङोर्ग्रहणम् ।

६-४-५१ णेर- १-३-७४ णिचश्च... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- (क) (ख)

६-४-४६ आर्धधातुके ॥ ६-४-४८ अतो लोपः ॥

६-४-५१ णेरनिटि= णेः (ख) अनिटि (क) ॥ इति ।

णेः=णिप्रत्ययस्य, (ख)=लोपः, अनिटि=अनिडादौ, (क)=आर्धधातुके परे । इत्यर्थमुपदिश्यच्छात्रैरेव लक्षणसमन्वयं कारयेत् । चोर्यते । चोर्यताम् । अचोर्यत । चोर्येत । इत्यादि । अथ, इत्थं साधारणतया गणभेदप्रयुक्त- विशेषकार्य- संस्कारं छात्रमस्तिष्केषु द्रढयित्वा सर्वगणसमान- शबादिविनिमातव्य-स्यप्रत्ययं लँट्तुल्यशेषप्रक्रियं लृँट्प्रत्ययमुपदिशेत् । तथाहि "श्यामः पठिष्यति" इति वक्तव्ये पठिष्यति इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते-पठ्धातोः पठति इत्यत्रेव ३-२-१२३ वर्त...' सूत्रं प्रवर्तते न वा ? इतिच्छात्रान् परीक्षेत । न प्रवर्तते, प्रकृते भविष्यत्कालप्रतीत्या वर्तमानकाला ऽप्रतीतेरिति निश्चये दृढे जाते ३-३-१३ लृँट् शे... सूत्रमुपदिशेत् ।

६-४-५२ निष्ठा- णेः (६-४-५१) लोपः (६-४-४८) सेटि=इडागमसहिते, निष्ठायाम्=निष्ठासंज्ञके प्रत्यये परे ।

६-४-५३ जनिता इति तृजन्तम् । इडादावपि तृचि परे णिलोपो निपात्यते, मन्त्रे । ८१७ स्वनँ धातुस्थ-जनीँजृष् ...इति मित्त्वाद् ह्रस्वत्वम् ।

६-४-५४ शमिता- इडादावपि तृचि परे णिलोपो निपात्यते, यज्ञे ।

६-४-५५ अया- ३-१-३५ कास्प्रत्यया... सूत्रस्थ- कास्यनेकाच... वार्तिकानन्तरं सूत्रमिदं पाठचम् । णेः (६-४-५१) अय्=अय् आदेशो भवति, आमन्ताल्वाय्येत्न्विष्णुषु=आम् अन्त आलु आय्य इत्नु इष्णु इत्येतेषु प्रत्ययेषु परेषु । इत्यर्थमुपदिश्य (शिक्षको मूलोक्तोदाहरणेषु स्वयं विमृशेत्- **गण्डयन्तः** ४१५ तृभू... इत्यौणादिको झच् । ७-१-३ झोऽन्तः । **स्पृहयाय्य** : श्रुद...इत्यौणादिक आय्यः । **स्तनयित्नुः** ३१६ स्तनि...इत्यौणादिक इत्नुच् । **पारयिष्णवः** ३-२-१३७ णेश्छ... इतीष्णुच्) छात्रैर्लक्षणसमन्वयं कारयित्वा "चोरयाम्+ल्" इति श्यामपाट्यां लिखित्वा २-४-८१ आमः सूत्रमुपदिशेत् ।

६-४-५६ ल्यपि-लघुपूर्वात्=(लघुः पूर्वो यस्मादिति बहुव्रीहिः । अन्यपदार्थो वर्णः) लघुपूर्वकाद् वर्णात् परस्य, णेः (६-४-५१) अय् (६-४-५५) ल्यपि=ल्यपि परे । **प्रशमय्यं** मकारात् पूर्वो वर्णः=अकारो लघुः । अतो मकारो लघुपूर्वकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-५७ विभाषाऽऽपः ॥
प्रापय्य, प्राप्य ।

६-४-५८ युप्लुवोर्दीर्घश्छन्दसि ॥६१
वियूय । विप्लूय । लोके तु वियुत्य । आप्लुत्य ।

६-४-५९ क्षियः ॥६१
प्रक्षीय ।

६-४-६० निष्ठायामण्यदर्थे ॥६१
क्षीणः । क्षीणवान् । अण्यदर्थे इत्युक्तेर्नेह- क्षितः कामो मया । क्षितं कामेन ।

६-४-६१ वाऽऽक्रोशदैन्ययोः ॥
क्षीणायुरेधि, क्षितायुरेधि । क्षीणो ऽ यं तपस्वी क्षितोऽयं तपस्वी । अण्यदर्थे इत्यनुवृत्तेर्नेह- क्षितं सर्वस्वमस्य । क्षितमस्य तपस्विनः ।

६-४-६२ स्य-सिँच्-सीयुँट्- तासिँषु भावकर्मणोरुपदेशे ऽज्झनग्रहदृशां वा चिण्वदिट् च ॥

भाविता, भविता । भाविष्यते, भविष्यते । भाविषीष्ट, भविषीष्ट । अन्वभाविषाताम्, अन्वभविषाताम् । अभाविष्यत, अभविष्यत । घानिता, हन्ता । घानिष्यते, हनिष्यते । घानिषीष्ट, वधिषीष्ट । अघानिषाताम्, अहसाताम्, अवधिषाताम् । अघानिष्यत, अहनिष्यत । ग्राहिता, ग्रहीता । ग्राहिष्यते, ग्रहीष्यते । दर्शिता, द्रष्टा । दर्शिष्यते, द्रक्ष्यते । उपदेशे इत्युक्तेः स्मारिता, स्मारिष्यते इत्यादौ परत्वान्नित्यत्वाच्च गुणे रपरे च अजन्तत्वाऽभावेऽपि उपदेशेऽजन्तत्वाच्चिण्वदिट् । ६-४-२२ असि... सूत्रेण चिण्वदिटोऽसिद्धत्वेन ६-४-५१ णेर... इति णिलोपः । भाविता, भावयिता । भाविष्यते, भावयिष्यते ।

६-४-५७ विभा- आपः= आप्धातोः परस्य, णेः (६-४-५१) विभाषा=वा, अय् (६-४-५५) ल्यपि (६-४-५६) । अत्र काशिका- इङादेशस्य लाक्षणिकत्वान्न भवति- अध्याप्य गत इति ।

६-४-५८ युप्लुवोः= युप्लुधात्वोः स्थाने, दीर्घः=दीर्घो भवति, ल्यपि (६-४-५६) छन्दसि=वेदे ।

६-४-५९ क्षियः=क्षिधातोः स्थाने, दीर्घः (६-४-५६) ल्यपि (६-४-५६) ।

४-४-६० निष्ठा- (ण्यदर्थो भावकर्मणी, भावे कर्मणि च ण्यतो विधीयमानत्वात्) अण्यदर्थे= ण्यदर्थादन्यत्र, निष्ठायाम्=निष्ठासंज्ञके प्रत्यये परे, क्षियः (६-४-५९) दीर्घः (६-४-५८) । **क्षीणः** अकर्मकत्वाद् ३-४-७२ गत्य... इति कर्तरि क्त : ८-२-४६ क्षियो.... इति निष्ठानत्वम् । **क्षितः कामो** अन्तर्भावितण्यर्थोऽत्र क्षिधातुः । अतः कर्मणि क्तः । **क्षितं कामेन** भावे क्तः ।

६-४-६१ वा ऽऽ क्रो- निष्ठायामण्यदर्थे (६-४-६०) क्षियः (६-४-५९) वा=विभाषया, दीर्घः (६-४-५८) **आक्रोशदैन्ययोः=**आक्रेशे दैन्ये च गम्यमाने । आक्रोशदैन्याभ्यामन्यत्र पूर्वेण नित्यम् ।

६-४-६२ स्यसिँच्- ७-२-१० एकाच... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- (क)
६-४-१ अङ्गस्य
६-४-६२ स्य- सिँच्.........ग्रहदृशां (क) वा चिण्वदिट् च ॥ इति ।

उपदेशे, अज्झनग्रहदृशाम्+ [(क)= अङ्गानाम्] = अजन्तानां हन् ग्रह् दृश् इत्येतेषां च अङ्गानाम्, वा= विकल्पेन, चिण्वत्= चिणीव कार्यं भवति, भावकर्मणोः = भावे कर्मणि च गम्ये, स्य.... सिँषु= स्य सिँच् सीयुँट् तासिँ इत्येतेषु प्रत्ययेषु परेषु, इट् च= स्य-सिँच्-सीयुँट्- तासीँनामिडागमश्च भवति । इत्यर्थमुपदिश्य, चिण्वत् पक्षेऽयमिडपीति बोधयित्वा प्रकृते ऽजन्ताङ्गमस्तीति चिण्वद्भावे, इटि च ७-२-११५ अचो...सूत्रमुद्बोध्य शिक्षकेण मध्ये मध्ये साहाय्यं ददता रूपसिद्धये छात्रा आदेश्याः । भाविष्यते । चिण्वदिडभावपक्षे कर्तरि लृँटीव इड्गुणौ भवत इत्युपदिशता रूपान्तरसिद्धये छात्रा आदेश्याः । भविष्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-६३ दीङो युँडचि क्ङिति ॥६४,६८
दिदीये । दिदीयाते । दिदीयिरे ।
क्ङितीत्युक्तेर्नेह- उपदानम् ।

६-४-६४ आतो लोप इटि च ॥६९
पपिथ । पपतुः । पपुः । गोदः । प्रदा । उपधा ।

६-४-६५ ईद् यति ॥६६
देयम् ।

इत्थमजन्तानामेकाचामनुदात्तानामपि पक्षे चिण्वदिट् च भवतः। नाऽनेन विधीयमान इट् ७-२-१० एका... सूत्रेण निषिध्यते। इति बोधयता शिक्षकेण जि नी क्री नम् धातूनां कर्मणि लृँटि रूपसिद्धये छात्रा आदेश्याः। सत्यावश्यके मध्ये मध्ये साहाय्यं ददता जायिष्यते, जेष्यते। नायिष्यते, नेष्यते। क्रायिष्यते, क्रेष्यते। नंस्यते। इत्यादिरूपाणि साधयितव्यानि। शिक्षकेण स्वयमेवाऽवधेयमत्र-घानिष्यते इत्यादौ चिण्वदतिदेशेन वधादेशो न, अङ्गाधिकारविहितकार्यस्यैवाऽतिदेशादिति। ग्राहिता इत्यादौ च ७-२-३७ ग्रहो.... इत्यनेन चिण्वदिटो न दीर्घः। तेन प्रकृतस्य वलादिलक्षणस्यैवेटो दीर्घविधानादिति च। अथ सु तन् रुध् धातूनां कर्मणि लृँटि रूपाणिच्छात्राः प्रष्टव्याः। अथ प्रक्रियादृष्टचा भविष्यत्कालभेददृष्टचा च लुँट् लकार उपदेश्यः। श्यामः श्वो व्याकरणं पठिता। इति वक्तव्ये पठिता इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते, इति वदता शिक्षकेण भविष्यत्काले ३-३-१३ लृँट्....सूत्रेण प्राप्तं लृँट्प्रत्ययं बाधयित्वा ३-३-१५ अनद्यतने लुँट्- सूत्रमुपदेश्यम्।

६-४-६३ दीङो- १-१-६६ तस्मा.... इति सूत्रबलेन "अचि क्ङिति" इति सप्तम्यन्ते पदे षष्ठ्यन्ताय कल्प्येते। यस्मिन् विधिरिति परिभाषया च तदादिविधिः। अतः सूत्रार्थः फलति- दीङः=दीङ्धातोः परस्य, अचि=अजादेः, क्ङितिः- क्ङितः, युँट्। इति। **दिदीये** ६-४-८२ एर....इति यणि कर्तव्ये ६-४-२२ असि.... इत्यसिद्धत्वं तु न, तत्रैव वुँग्युँ.... इति वार्तिकेन सिद्धत्वप्रतिपादनात्।

६-४-६४ आतो-३-२-३ आतो ऽनुपसर्गे कः-सूत्रानन्तरं सूत्रमिदं पाठचम्। इटि= इडादौ, अचि+क्ङिति (६-४-६३) च=अजादौ किति ङिति च, आर्धधातुके (६-४-४६) आतः=आकारस्य; लोपः= लोपो भवति। [**पपिथ** ७-३-२३ ऋतो... इति भारद्वाजमते इट्। वमयोः ७-३-१०६ कृसृ... इति नियमादिट्। **गोदः** ३-२-३ आतो.... इति कः। अन्त्ययोः- ३-३-१०६ आत... इत्यङ्] इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः साधयित्वा "गो+ङस्+द" इति श्यामपाट्यां लिखित्वा कुम्भकार इत्यत्रेव समासादिकार्यं छात्रैः साधयेत्। गोदः। एवं कम्बलं ददाति यः स कम्बलदः। इत्यादीन् प्रयोगान् स्वयं साधयितुं छात्रानादिशेत्। अथ प्रकृते शिक्षको ऽधोनिर्दिष्टरूपेण बोधयेत्। वत्साः ? अण् प्रत्यये क प्रत्यये चाऽनुबन्धलोपे "अ" इति सरूपः प्रत्ययो भवति। अतः प्रकृते कप्रत्ययेन= ३-२-३ आतो.... सूत्रेण अण् प्रत्ययः= ३-२-१ कर्म... सूत्रं नित्यं बाध्यते। अतः पक्षान्तरे ऽपि प्रकृते ऽण् प्रत्ययो न भवति। ण्वुँल्तृचौ तु विरूपौ। तेन पक्षान्तरे नौ भवत एव। यथा- तृचि गोर्दाता। ण्वुँलि च गोर्दायकः। तथा हि इति वदन् दा+ण्वुँल्= दा+अक इनि श्यामपाट्यां लिखित्वा ७-३-३३ आतो युँक्... सूत्रमुपदिशेत्।

६-४-६५ ईद् य-आनः (६-४-६४)· ईन्=दीर्घेकारादेशो भवति, यति=यत्प्रत्यये परे। दीर्घेकारविधानमुत्तरार्थम्। **देयम्** ३-१-९७ अचो.... इति यत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-६६ **घु- मा- स्था-गा-पा-जहाति-सां हलि** ॥६९

दीयते । देदीयते । धीयते । देधीयते । मीयते । मेमीयते । स्थीयते । तेष्ठीयते । गीयते । जेगीयते । पीयते । पेपीयते । पा इति पिबतेरेव ग्रहणम् । तेन पातेर्न-पायते । पापायते । हीयते । जेहीयते । हा इति ओँहाक् त्यागे (१०८९) इत्यस्यैव ग्रहणम् । जहातीति निर्देशात् । तेन ओहाङ् गतौ (१०८८) इत्यस्य न-हायते । जाहायते ।

६-४-६७ **एर्लिँङि** ।।६८

देयात् । धेयात् । मेयात् । स्थेयात् । गेयात् । पेयात् । पातेस्तु पायात् । हेयात् । सेयात् । क्ङितीत्यनुवृत्तेर्नेह-दासीष्ट । धासीष्ट ।

६-४-६८ वा ऽन्यस्य संयोगादेः ॥

ग्लेयात्, ग्लायात् । संयोगादेरित्युक्तेर्नेह- यायात् । अन्यस्येत्युक्तेरिह पूर्वेण नित्यमेव- स्थेयात् । क्ङितीत्यनुवृत्तेर्नेह- ग्लासीष्ट । संयोगादेरङ्गस्येत्युक्तेर्नेह- निर्यायात् ।

६-४-६९ न **ल्यपि** ॥७०

प्रदाय । प्रधाय । प्रमाय । प्रस्थाय । प्रगाय । प्रपाय । प्रहाय । अवसाय ।

६-४-७० मयतेरिदन्यतरस्याम् ॥

अपमित्य, अपमाय ।

६-४-७१ **लुँङ् लँङ् लृँङ् क्ष्वडुदात्तः** ॥७५,७२

अपाठीत् । अपठत् । अपठिष्यत् ।

६-४-७२ **आडजादीनाम्** ॥ ७५

ऐधिष्ट । ऐधत । ऐधिष्यत ।

६-४-६६ **घुमा**...साम्=घुसंज्ञकप्रभृतीनाम्, आतः (६-४-६४) ईत् (६-४-६५) हलि=हलादौ, क्ङिति (६-४-६३) आर्धधातुके (६-४-४६) ।

६-४-६७ **एर्लिँ**- घुमास्थागापाजहातिसाम् (६-४-६६), आतः (६-४-६४) एः=एकारादेशः, क्ङिति (६-४-६३) आर्धधातुके (६-४-४६) लिँङि= लिँङि परे। यद्यपि ङिदनुवृत्तिर्व्यर्था तथापि दोषाभावादर्थ-करणसौविध्याच्च ङिदनुवृत्तिरपि स्वीकृता ।

६-४-६८ **वाऽन्य**-अन्यस्य=घुमास्था (६-४-६६) दिभिन्नस्य, आतः (६-४-६४)=आकारान्तस्य, संयोगादेः= संयोगादिकस्य, अङ्गस्य (६-४-१) वा=विभाषया, एः (६-४-६७) क्ङिति (६-४-६३) आर्धधातुके (६-४-४६) लिँङि (६-४-६७) ।

६-४-६९ **न**= घुमास्था.... (६-४-६६) सूत्रं न प्रवर्तते ल्यपि=ल्यपि परे ।

६-४-७० **मयतेः**= मेङ् धातोः, आतः (६-४-६४) अन्यतरस्याम्=वा, इत्= ह्रस्वेकारादेशो भवति, ल्यपि (६-४-६९) ।

६-४-७१-**लुँङ्लँ**-३-२-१११ अनद्यतने... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- (क)

६-४-१ अङ्गस्य ॥

६-४-७१ लुँङ्लँङ्लृँङ्क्षु (क) अड् उदात्तः ॥ इति । लुँङ्लँङ्लृङ्क्षु= एतेषु परेषु, (क)= अङ्गस्य, उदात्तः, अट्=अडागमो भवति । इत्यर्थोपदेशक्रमे शिक्षकेण छात्रा वक्तव्याः । यथा-

वत्साः प्रकृते परतो लँङ् वर्तत इति तु ज्ञायत एव । परन्तु अङ्गस्य इत्युच्यते तत् किं नाम अङ्गम् ? इति च्छात्राः परीक्षणीयाः । उत्तरेऽनागते पूर्वमुपदिष्टं १-४-१३ यस्मा...इति सूत्रार्थं पुनरुद्बोध्य, प्रकृते ल्प्रत्यये परतः पठ् इति प्रकृत्यंशो ऽङ्गमिति बोधयित्वा प्रकृतसूत्रसमन्वयायच्छात्राः प्रवर्त्याः । अथ अपठ्+ ल् इति श्यामपाट्यां लिखित्वा लकारस्यार्थे कर्तरि विवक्षिते कर्तरि लँटि पठति इव अपठति इति रूपे छात्रैः साधिते शिक्षकः ३-४-१०० इतश्च- सूत्रमुपदिशेत् ।

६-४-७२ **आड**- ६-४-१०१ हुझल्भ्यो... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी- प्रयोगो यथा- (क) (ख) (ग)

६-४-१ अङ्गस्य ॥ ६-४-७१ लुँङ्लँङ्लृँङ्क्षु अडुदात्तः ॥

६-४-७२ (ग) आट् अजादीनाम् (क) (ख) ॥ इति ।

अजादीनाम्, (क)= अङ्गानाम्, (ग)= उदात्तः, आट्= आडागमो भवति, (ख)= लुँङ् लँङ् लृङ्क्षु । इत्यर्थमुपदिश्य च्छात्रैर्लक्षणमन्वयं कारयित्वा “आ+अद्+ल्” इति श्यामपाटचां लिखित्वा, अत्र किं सूत्रं प्रवर्तेतेति च्छात्रान् परीक्षमाणः सत्यावश्यके ६-१-८७ आटः... सूत्रमुद्बोध्य लक्षणसमन्वयं छात्रैः कारयित्वा “आद्+ल्” इति श्यामपाटचां लिखेत् । ततो लँटीव प्रक्रियायाम् आद्+ति इति श्यामपाटचां लिखित्वा ३-४-१०० इत ... सूत्रमुद्बोध्य लक्षणसमन्वयं छात्रैः कारयित्वा ‘आद्+त्” इति श्यामपाटचां लिखित्वा ७-३-१०० अदः.... सूत्रमुपस्थापयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-७३ छन्दस्यपि दृश्यते ॥
सुरुचोवेन आवः ।

६-४-७४ न माङ्योगे ॥७५
मा भवान् भूत् ।
मा भवानेधिष्ट ।

६-४-७५ बहुलं छन्दस्यमाङ्योगेऽपि ॥ ७६
जनिष्ठा उग्रः । काममूनयीः । मा वः क्षेत्रे परबीजान्यवाप्सुः । मा आवः ।

६-४-७६ इरयो रे ॥
गर्भं प्रथमं दध्र आपः ।
बहुलमित्यनुवर्तनान्नेह-अग्निकर्माणि चक्रिरे ।

६-४-७७ अचि श्नु- धातु-भ्रुवां य्वोरियँङुवँङौ ॥ १००,८०
शक्नुवन्ति । जिह्रियति । ब्रुवन्ति । सुभ्रुवौ । भ्रुवौ ।
(इयँङुवँङ्भ्यां गुणवृद्धी भवतो विप्रतिषेधेन)
चयनम् । चायकः । लवनम् । लावकः ।
(इयँङुवँङ्प्रकरणे तन्वादीनां छन्दसि बहुलमुपसंख्यानं कर्तव्यम्)
तन्वं पुषेम, तनुवं पुषेम । विष्वं पुषेम, विषुवं पुषेम । स्वर्गो लोकः, सुवर्गो लोकः । त्र्यम्बकं यजामहे, त्रियम्बकं यजामहे ।

६-४-७३ छन्द- आट् (६-४-७२) (अनजादीनामपीति भावः) लुँङ्लँङ्लृँङ्क्षु (६-४-७१) छन्दसि=वेदे, दृश्यते=अवलोक्यते । **आवः** वृञ् (१२५३)+ लुँङ् २-४-८० मन्त्रे... इति च्लेर्लुक् ।

६-४-७४ न मा-न=अट् (६-४-७१ आट् (६-४-७२) च न भवतः, माङ्योगे=माङ्शब्देन योगे ।

६-४-७५ बहु-अमाङ्योगेऽपि=माङ्योगाऽभावे ऽपि अट् आट् च न भवतः, माङ् योगे ऽपि भवतश्च तौ, बहुम्=वाहुल्येन, छन्दसि=वेदे । **जनिष्ठाः** अत्र अट् न । **ऊनयीः** ३-१-५१ नोन... इति चङ्प्रतिषेधः । ७-२-५ ह्यन्त... इति वृद्धिप्रतिषेधः । अत्र आट् न । **अवाप्सुः** वपे (१००३) र् लुँङि माङ्योगे ऽप्यट् । **मा आवः** वृञो (१२५३) लुँङ्, आट् । २-४-८० मन्त्रे... इति च्लेर्लुक् ।

६-४-७६ इरयोः= इरे इत्येतस्य स्थाने, छन्दसि+बहुलम् (६-४-७५) रे=रे इत्ययमादेशः । अत्र **काशिका-** अत्र रेशब्दस्य सेटां धातूनामिटि कृते पुना रेभावः क्रियते । तदर्थम् "इरयोः" इत्ययं द्विवचननिर्देश इति । **दध्रे** ६-४-२२ असि...इति रेभावस्याऽसिद्धत्वात्, ६-४-६४ आतो...इत्याकारलोपः ।

६-४-७७ अचि- ७-२-६३ ऋतो... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र शिक्षकः प्रथममुपदिशेद् यत्, वत्साः ? अनेन सूत्रेण अङ्गानां कार्यं क्रियते । अङ्गस्य ६-४-१ इत्यधिकारात् । अङ्गं च प्रत्यये परस्मिन् सत्येव भवति । तथा चोपदिष्टम् १-४-१३ यस्मा... सूत्रम् । अतः प्रकृतसूत्रस्य प्रत्यये परे इत्यर्थः फलति, इति । अथात्र शिक्षकः प्रकृतसूत्रस्यार्थं मनसा विमृशेत् । यथा-यद्यपि श्नुप्रत्ययो भ्रूशब्दश्चोकारान्तावेव । अतो व्यभिचाराभावेन य्वोरिति तयोर्विशेषणं व्यर्थमेव । तस्माद् धातोरेव विशेषणं तत् "इवर्णोवर्णान्तस्य धातो" रित्यर्थप्रतिपत्तये । तथाप्येवं सविश्लेषमुपदेशश्छात्रमस्तिष्के भारो भवेत् । अतः सलीलं बोधनाय श्नुभ्रुवोरपि विशेषणे धातु- भ्रुवोश्च तदन्तानामित्यर्थाकरणे ऽपि क्षतिर्नास्तीति । अतः सलील- बोधनानुकूलमर्थमुपदिशेत् । य्वोः= इवर्णोवर्णान्तानाम्, श्नुधातुभ्रुवाम्= श्नुप्रत्ययान्तानां धातूनां भ्रू इत्येतस्य च, अङ्गानाम् (६-४-१) इयँङुवँङौ= इयँङ् उवँङ् इत्येतौ आदेशौ भवतः, अचि=अजादौ प्रत्यये परे इति । भ्रूइत्येतदन्तानामित्युक्तौ भ्रुवौ इत्यादौ व्यपदेशिवद्भावेन सूत्रप्रवृत्तिः । अथाऽत्र शिक्षको वोधयेत्- अनुबन्धविनिर्मुक्तौ इय् उव् इत्यवशिष्येते । तौ च ङित्त्वादन्त्यस्य स्थाने भवतः । किञ्च स्थानत आन्तर्यात् इकारस्य स्थाने इय् उकारस्य स्थाने उव् आदेशौ भवतः । यथासंख्यं तु न, प्रकृते स्थान्यादेशानां समसंख्यत्वाभावादिति । एवञ्च प्रकृतोदाहरणे इयँङ् । चिक्रियतुः । चिक्रियुः । अत्र थलि च्छात्रैरेव रूपे साधयेत् । चिक्रयिथ, चिक्रेथ, इति । चिक्रियथुः । चिक्रिय इति रूपे च शृणुयात् । मिपि ७-१-९१ णलु...सूत्रमुद्वोधयन्, चिक्राय, चिक्रय इति रूपे छात्रैः साधयेत् । वस्मसोरात्मनेपदे च मध्ये मध्ये साहाय्यं ददच्छात्रैरेव यथासंभवं रूपाणि साधयेत् । ध्वमि तु छात्रैः साध्यमानं चिक्रियि+ध्वम् इति रूपं श्यामपाट्यां लिखित्वा ८-३-७९ विभाषेटः सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-७८ अभ्यासस्याऽसवर्णे ॥

इयेष । उवोख । असवर्णे इत्युक्तेर्नेह-ईषतुः । ऊखतुः ।

६-४-७९ स्त्रियाः ॥८०

स्त्रियौ । स्त्रियः । परत्वान्नुँट् (७-१-५४) स्त्रीणाम् ।

६-४-८० वा ऽम्शसोः ॥

स्त्रियम्, स्त्रीम् । स्त्रियः, स्त्रीः ।

६-४-८१ इणो यण् ॥८७

यन्ति ।

६-४-८२ एरनेकाचोऽसंयोगपूर्वस्य ॥ ८७

प्रध्यौ । प्रध्यः । निन्यतुः । निन्युः । अनेकाच इत्युक्तर्नेह- नियौ । नियः ।

असंयोगपूर्वस्येत्युक्तेर्नेह- यवक्रियौ । यवक्रियः । धात्ववयव-संयोगा ऽपूर्वकेत्यर्थादिह भवत्येव-उन्न्यौ । उन्न्यः ।

(गतिकारकेतर-पूर्वपदस्य यण् नेष्यते)

शुद्धधियौ । परमनियौ ।

६-४-७८ अभ्या- य्वोः (६-४-७७)= इवर्णोवर्णान्तस्य, अभ्यासस्य=अभ्यासस्य स्थाने, इयँङुवँङौ (६-४-७७) असवर्णे=सवर्णभिन्ने, अचि (६-४-७७)=अचि परे । अजादौ प्रत्यये इति तु न प्रमदितव्यम् । अभ्यासात् परतः प्रत्यया ऽसम्भवात् ।

६-४-७९ स्त्रियाः-६-१-९० औतो ऽम्शसो :- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- (क) (ख)

६-४-७७ अचि.... य्वोरियँङुवँङौ ॥ ६-४-७९ स्त्रियाः (ख) (क) ॥ इति ।

स्त्रियाः= स्त्रीशब्दस्य स्थाने, (ख)= इयँङुवँङौ= इयँङ् उवँङ् इत्यादेशौ भवतः (क)= अचि= अजादौ प्रत्यये । इत्यर्थ उपदेश्यः । अथोऽनुबन्धविनिर्मुक्तयोः "इय् उव्" आदेशयोः स्त्री इति सम्पूर्णस्य स्थाने प्राप्तौ १-१-५१ अलो... सूत्रबलेन ईकारस्य स्थाने द्वयोः प्राप्तौ स्थानेनान्तरतम्याद् इय् आदेशो भवति, इत्युपदेश्यम् । अत्र १-१-५२ ङिच्च सूत्रं नोपदेश्यम् । अधुनावधि १-१-५४ अने... सूत्रार्थ- बोधाऽभावेन तस्य साम्प्रतमनावश्यकत्वात् । जसि- स्त्रियः । औटि-स्त्रियौ । अमि शसि च श्यामपाट्यां स्त्री+अम्, स्त्री+अस् इति लिखित्वाऽग्रिमं ६-४-८० वा ऽम्शसोः-सूत्रं प्रस्तुत्यम् ।

६-४-८० वाऽम्श- ६-४-७९ स्त्रियाः-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । स्त्रियाः (६-४-७९) वा=पूर्ववत् कार्यं विकल्पेन भवति, अम्शसोः=अमि शसि च परे । इत्यर्थमुपदिश्यच्छात्रैरेव लक्षणसमन्वयः कारयितव्यः । इयँङभावपक्षे अमि पूर्वरूपे स्त्रीम् । शसि पूर्वसवर्णदीर्घे स्त्रीः । इत्युद्बोधयता स्त्रीः इत्यत्र नत्वं कथं नेतिच्छात्राः परीक्षणीयाः । तृतीयैकवचने छात्रैरुच्यमाना प्रक्रिया श्रोतव्या । ङिद्विभक्तौ गौरीशब्दवत् प्रक्रियामुद्बोधयता स्त्री + ऐ, स्त्री + आस् २ स्त्री + ङि = स्त्री + आम् इत्यवस्थायाम् पूर्वसूत्रसमन्वयायच्छात्रा आदेश्याः । स्त्रियै । स्त्रियाः२। स्त्रियाम् । इति । आमि स्त्री+आम् इति श्यामपाट्यां लिखित्वा ७-१-५४ ह्रस्व.. इत्यस्य ६-४-७९ स्त्रियाः- इत्यस्य च प्राप्तिं सम्भावयता शिक्षकेण १-४-२ विप्र... सूत्रमुद्बोधनीयम् । स्त्रीणाम् । सम्बुद्धौ गौरीवत् । हे स्त्रि । भ्यामादिहलादौ नोपदेशापेक्षा । अथ मतिशब्द उपदेश्यः । तत्र प्रथमं सर्वनामस्थाने मुनिशब्दस्येव रूपाणिच्छात्रैरुच्यमानानि श्रुत्वा शसि नत्वाऽभावकारणं तृतीयैकवचने नाभावाऽभावकारणं चोद्बोध्य ङिद् विभक्तौ १-४-६ ङिति ह्रस्वश्च- सूत्रमुपदेश्यम् ।

६-४-८१ इणो-इणः= इण् धातोः स्थाने, यण्= यण् आदेशो भवति, अचि (६-४-७७)= अजादौ प्रत्यये परे । मध्ये ऽ पवादन्यायेन, इयङो (६-४-७७) ऽपवादोऽयं परत्वाद् गुणवृद्धिभ्यां वाध्यते । अयनम् । आयकः ।

६-४-८२ एर- ८-३-७९ विभाषेटः- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- (क) (ख) (ग) (घ)

६-४-१ अङ्गस्य ॥ ६-४-७७ अचि श्नु- धातु- भ्रुवां ... ॥ ६-४-८१ इणो यण् ।

६-४-८२ एः (ग) अनेकाचः (क) (ग) असंयोगपूर्वस्य (घ) (ख) ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-८३ ओः सुँपि ॥८६

खलप्वौ । खलप्वः ।असंयोगपूर्वस्येत्यनुवृत्तेर्नेह- कटप्रुवौ । कटप्रुवः । धात्ववयव- संयोगाऽभावपूर्वकेत्यर्थादिह भवत्येव- सकृल्ल्वौ । सकृल्ल्वः । अनेकाच इत्यनुवृत्तेर्नेह- लुवौ । लुवः ।

सुँपीत्युक्तेर्नेह- लुलुवतुः । लुलुवुः । (गतिकारकेतरपूर्वपदस्य यण् नेष्यते) परमलुवौ । परमलुवः ।

अत्र प्रथमं शिक्षकश्छात्रान् बोधयेत् । यथा- अनेन सूत्रेण एः (इवर्णान्तस्य) इत्युच्यते श्नुभ्रुवौ च इवर्णान्तौ न सम्भवतः । अतः ६-४-७७ अचि... सूत्रात् तौ नानुवर्तेते । तयोस्त्यागे च धातुरेकवचनान्तो भवति- "धातोः" इति । स चानुवर्तमान आवर्तते धातोः धातोः इति । (शिक्षकेणावधेयम्- यद्यपि सूत्रमिदमियँङ्बाधनार्थम् । अधातोश्चेयँङः प्रसङ्ग एव न भवति । तेन कुमारीम्, कुमारीरित्यादौ दोषाभावेन निष्प्रयोजनेयमावृत्तिः । अत एवोपदिशति तत्र भवान् हरदत्तः- इयँङ्बाधनार्थो यण् । न चा ऽ धातोरियँङः प्रसङ्गो ऽस्तीति । तथापि बालानां स्फुटप्रतिपत्तये तथोपदेश उचितो न वा ? इति) [(ग) = धातोः+ असंयोगपूर्वस्य+एः+(ग)= धातोः]=धात्ववयवसंयोगा ऽभाव पूर्वकेकारान्त- धात्वन्तस्य (ने.भा. धातुको अवयव संयोग पूर्वमा न हुने जो इकार; त्यो (इकार) अन्त्यमा हुने जो धातु त्यो (धातु) अन्त्यमा हुने) (धातोरित्यस्या ऽनावृत्तौ तु- "धात्ववयवसंयोगा ऽपूर्वकेकारान्तस्य" इतीषत्सुखवोध्यो ऽर्थो भवति) अनेकाचः, (क)= अङ्गस्य, (घ)= यण् (ख) = अचि= अजादौ प्रत्यये । अयं भावः- अङ्गेन अनेकाचा भाव्यम् । अङ्गान्त्येन धातुना भाव्यम् । तत्रापि धातोरन्ते इकारेण भाव्यम् । इकारात् पूर्वतश्च धात्ववयवसंयोगेन न भाव्यम् । धात्ववयवभिन्नः संयोगो भवतु वा न भवतु । इति । **निन्यतुः** । अत्र शिक्षकश्छात्रान् बोधयेद् यत्, प्रक्रियादशायामनेकाच् अङ्गं भवेत् तु प्रकृतसूत्रं प्रवर्तते । अत उपदेशे ऽनेकाजपेक्ष्यत इति न प्रमदितव्यम् । तेन प्रकृतोदाहरणे यण् जात इति । निन्युः । अथ थलि निनयिथ, निनेथ इति रूपद्वयं छात्रैः साधयेत् । शेषरूपाणि च च्छात्रैरुच्यमानानि शिक्षकः शृणुयात् । अथ कर्मणि लिँटि च कर्तरि लिँटि आत्मने पदे इव रूपाणि भवन्तीति शिक्षको बोधयेत् । अथा ऽधोनिर्दिष्टरूपेण शिक्षकश्छात्रान् बोधयेत् । यथा- वत्साः ? लँडादि- प्रत्ययाः सामान्यत उपदिष्टाः । ते पुनर्लँडादयः सूत्रान्तरैरपि कालभेदेऽर्थभेदे ऽपि विधीयन्ते, विधीयन्तां नाम । प्रक्रिया तु सैव । भिन्ना न भवति । केवलमाशिषि लोँटि लिँङि च विधीयमाने प्रक्रियापि काचिद् भिन्ना भवति । अतोऽथ क्रमश आशिषि लोँट् लिँङ् चोपदिश्येते इति । एवं बोधनक्रमे ३-३-१७३ आशिषि... सूत्रमुपदिशेत् ।

६-४-८३ ओः सुँ- पूर्व ६-४-८२ सूत्रस्थेन "एः" इत्येनन प्रकृत-सूत्रस्थम् "ओः" इति विनिमातव्यम् । तथा तत्रा ऽनुवृत्तेन "अचि प्रत्यये" इत्यनेन "अचि सुँपि" इति विनिमातव्यम् । शेषोऽर्थः पूर्वसूत्रार्थवत् । तथाहि- धातोः+ असंयोगपूर्वस्य+ ओः+धातोः= धात्ववयवसंयोगाऽभावपूर्वकोकारान्तधात्वन्तस्य, अनेकाचः, अङ्गस्य, यण्, अजादौ सुँपि । इति । पूर्वसूत्रार्थे सम्यग् ज्ञाते ऽस्य सूत्रस्या ऽर्थः सरलायते । ननु च भोः सुँपीत्युच्यते प्रातिपदिकादेव हि स्वादयः । न च धातवः प्रातिपदिकानि । इति चेत् ? उच्यते- क्विँबन्ताश्च विँजन्ताश्च क्विँन्नन्ताश्च तथैव च । ते धातुत्वं न जहति नामत्वं प्राप्नुवन्ति च ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-८४ वर्षाभ्वश्च ॥

वर्षाभ्वौ । वर्षाभ्वः ।

(दृन्करपुनः पूर्वस्य भुवो यण् वक्तव्यः)

दृन्भ्वौ । दृन्भ्वः । करभ्वौ । करभ्वः । अत्र दीक्षितः- दीर्घपाठे तु कर एव कारः स्वार्थिकः प्रज्ञाद्यण्। कारभ्वौ। कारभ्वः। इति। दृग्भूकाराभूशब्दौ स्वयंभूवदिति च। पुनर्भ्वौ। पुनर्भ्वः।

६-४-८५ न भूसुधियोः । ८६

प्रतिभुवौ । प्रतिभुवः । सुधियौ । सुधियः ।

६-४-८६ छन्दस्युभयथा ॥

वनेषु चित्रं विभ्वं विशे, विभुवं वा। सुध्यो हव्यमग्ने, सुधियो वा ।

६-४-८७ हुश्नुवोः सार्वधातुके ॥

जुह्वति । चिन्वन्ति । असंयोगपूर्वस्ये त्यनुवृत्तेर्नेह- आप्नुवन्ति ।

६-४-८८ भुवो वुँग् लुङ्लिँटोः ॥

बभूव । अभूवन् ।

७-४-८९ ऊदुपधाया गोहः ॥९१, १००

गूहति । गूहनम् । अचीत्यनुवृत्तेर्नेह- गोढा । गोढुम् ।

६-४-९० दोषो णौ ॥९१,९४

दूषयति ।

६-४-९१ वा चित्तविरागे ॥

चित्तं दूषयति, दोषयति वा। प्रज्ञां दूषयति, दोषयति वा ।

६-४-८४ **वर्षाभ्वः**= वर्षाभूशब्दस्य स्थाने, यण् (६-४-८१) अचि (६-४-७७) सुँपि (६-४-८३)। ६-४-८५ न भू... इति प्रतिषेधबाधनार्थमिदम् ॥

६-४-८५ न भू- भूसुधियोः= भूधातोः सुधीशब्दस्य च स्थाने, अचि (६-४-७७) सुँपि (६-४-८३) न= यण् न भवति। **प्रतिभुवौ** ३-२-१७९ भुवः.... इति क्विँप्। **सुधियौ** ३-२-१७८ अन्ये.... सूत्रस्थ-ध्याय.... वार्तिकेन क्विँप् सम्प्रसारणं च ।

६-४-८६ छन्दसि- वेदे, भूसुधियोः (६-४-८५)उभयथा = यण् च प्रतिषेधश्च, अचि (६-४-७७) सुँपि (६-४-८३)।

६-४-८७ हुश्नु-असंयोगपूर्वस्य (६-४-८२) + ओः (६-४-८३)= संयोगा ऽभावपूर्वकोवर्णान्तस्य, (संयोगाभावपूर्वको य उवर्णस्तदन्तस्य) हुश्नुवोः= जुहोतेः श्नुप्रत्ययान्तस्य च, अनेकाचः (६-४-८२) अङ्गस्य (६-४-१) यण् (६-४-८१) अचि (६-४-७७) सार्वधातुके=सार्वधातुके परे। हुश्नुवोः= जुहोतेः श्नुप्रत्ययान्तस्य च, अनेकाचः, अङ्गस्य, असंयोगपूर्वस्य, ओः= उवर्णस्य, यण्, अचि, सार्वधातुके। इति वा सरलार्थः ।

६-४-८८ भुवो- ७-३-८८ भूसु.. सूत्रानन्तरं सूत्रमिदं पाठचम्। भुवः=भूधातोः, वुँक्=वुँगागमो भवति, लुँङ्लिँटोः=लुँङलिँट्- सम्बन्धिनि, अचि (६-४-७७) परे। इत्यर्थमुपदिश्य च्छात्रैर्लक्षणसमन्वयं कारयित्वा "अभूवन्ति" इति श्यामपाट्यां लिखित्वा ऽग्रिमप्रक्रियां (इकारलोपं संयोगान्तलोपं च) छात्रैरेव साधयेत्। अभूवन्। अभूः। अभूतम्। अभूत। अभूवम्। अभूव। अभूम। भावे लुँङि तु अ+भू+ त इति श्यामपाट्यां लिखित्वा सार्वधातुकसंज्ञां छात्रैः कारयित्वा यकं च बाधयित्वा च्लिँप्रत्यय मनुबन्धफालनञ्चच्छात्रैः साधयित्वा अ+भू+ल्+त इति श्यामपाट्यां लिखित्वा सिँचं बाधयित्वा ३-१-६६ चिण् भाव... सूत्रमुपदिशेत्।

६-४-८९ ऊदु- गोहः=सम्भाव्यमानगुणस्य गुह्धातोः, उपधाया=उपधायाः स्थाने, ऊत्=दीर्घोकारादेशो भवति, अचि (६-४-७७) प्रत्यये ।

६-४-९० दोषः=सम्भाव्यमानगुणस्य दुष् धातोः, उपधायाः+ ऊत् (६-४-८९) णौ= णिप्रत्यये परे ।

६-४-९१ वा चि- दोषः + णौ (६-४-९०) उपधायाः + ऊत् (६-४-८९) वा=विभाषया, चित्तविरागे= चित्तस्याऽप्रीततायां गम्यमानायाम् । विरागः=अप्रीतता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-९२ मितां ह्रस्वः ॥९३

घटयति। शमयति। अत्र काशिका-केचिदत्र वा (६-४-९१) इत्युनुवर्तयन्ति,सा च व्यवस्थितविभाषा। तेन उत्क्रामयति। संक्रामयतीत्येवमादि सिद्धं भवति। इति।

६-४-९३ चिण्णमुँलोर्दीर्घो ऽन्यतरस्याम् ॥

अशमि, अशामि। शमंशमम्, शामंशामम्।

६-४-९४ खचि ह्रस्वः ॥९७

परन्तपः। पुरन्दरः।

६-४-९५ ह्लादो निष्ठायाम् ॥

प्रह्लन्नः। प्रह्लन्नवान्। अत्र काशिका-ह्लाद इति योगविभागः क्रियते क्तिन्यपि यथा स्यात्-प्रह्लत्तिरितीति।

६-४-९६ छादेर्घे ऽद्व्युपसर्गस्य ॥९७

प्रच्छदः। दन्तच्छदः।

६-४-९७ इस्मन्त्रन्क्विँषु ॥

छदिः। छद्म। छत्रम्। उपच्छत्।

६-४-९८ गम हन जन खन घसां लोपः क्ङित्यनङि ॥१००, १२६

जग्मतुः। जघ्नतुः। जज्ञे। चख्नतुः। जक्षतुः। क्ङितीत्युक्तेर्नेह- गमनम्। हननम्। अनङीत्युक्तेर्नेह- अगमत्। अचीत्यनुवृत्तेर्नेह- गम्यते। हन्यते।

६-४-९९ तनिपत्योश्छन्दसि ॥१००

वितत्निरे कवयः। शकुना इव पप्तिम। लोके तु- वितेनिरे। पेतिम।

६-४-१०० घसिभसोर्हलि च ॥

सग्धिश्च मे। बब्धः। बप्सति।

६-४-९२ मिताम्=मितां धातूनाम्, उपधायाः (६-४-८९) ह्रस्वः=ह्रस्वो भवति, णौ (६-४-९०)।

६-४-९३) चिण्णमुँलोः= चिण्परके णमुँल्परके च, णौ (६-४-९०) मिताम् (६-४-९२) उपधायाः (६-४-८९) अन्यतरस्याम्=वा, दीर्घः= दीर्घो भवति।

६-४-९४- खचि= खच्परके, णौ (६-४-९०) उपधायाः (६४-८९) ह्रस्वः=ह्रस्वो भवति। **परन्तपः** ३-२-३९ द्विष... इति खच्। ६-३-६७ अरु... इति मुँम्। **पुरन्दरः** ३-२-४१- पूःस... इति खच्। ६-३-६९ वाचं... इति पूर्वभागस्यामन्तत्वम्।

६-४-९५ ह्लादः=ह्लाद्धातोः, उपधायाः (६-४-८९) ह्रस्वः (६-४-९४) निष्ठायाम्= निष्ठायां परतः।

६-४-९६ छादे-अद्व्युपसर्गस्य= द्विप्रभृत्युपसर्गरहितस्य, छादेः= छादिधातोः, उपधायाः (६-४-८९) ह्रस्वः (६-४-९४) घे= घप्रत्यये परे। उदाहरणयोः ३-३-११८ पुंसि... इति घः। णिलोपस्य चा ऽसिद्धत्वं (६-४-२२) स्थानिवद्भावो (१-१-५६) वा वचनसामर्थ्यादत्र न भवति। अत आकारस्योपधात्वमक्षतम्।

६-४-९७ इस्म- छादेः (६-४-९६) उपधायाः (६-४-८९) ह्रस्वः (६-४-९४) इस्.. क्विँषु=इस्-मन्-त्रन्- क्विँप्रत्ययेषु परेषु।

६-४-९८ गम.... घसाम्= गम्प्रभृतीनाम्, उपधायाः (६-४-८९) लोपः=लोपो भवति अनङि= अङ्भिन्ने, अचि (६-४-७७)+क्ङिति= अजातौ किति ङिति च परे। **जक्षतुः** ८-३-३० शासि... इति षत्वम्।

६-४-९९ तनिपत्योः=तन् पत् इति धात्वोः, उपधायाः (६-४-८९) लोपः (६-४-९८) अचि (६-४-७७)+ क्ङिति (६-४-९८)। प्रत्युदाहरणयोः ६-४-१२० अत... इत्येत्वाभ्यासलोपौ।

६-४-१०० घसिभसोः= घस् भस् इति धात्वोः, उपधायाः (६-४-८९) लोपः (६-४-९८) अचि+ (६-४-७७) हलि च, = हलादौ च, क्ङिति (६-४-९८) छन्दसि (६-४-९९)। **सग्धिः** अद्+क्तिन्। २-४-३९ बहु... इति घस्लृँ इत्यादेशः। उपधालोपे सति, ८-२-२६ झलो... इति सकारलोपः। ६-२-४० झष... इति धकारः। ८-४-५२ झलां...इति जश्त्वम्। ततो ग्धिशब्देन समानशब्दस्य समासे पुंवद्भावे ६-३-८४ समा... इति समानस्य सः। **बब्धः** भस्+ लँट् +तस्। २-४-७५ जुहो... इति श्लुः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१०१ हुझल्भ्यो हेर्धिः ॥१०३
जुहुधि । अद्धि ।
६-४-१०२ श्रुशृणुपॄकृवृभ्यश्छन्दसि ॥१०३
श्रुधी हवमिन्द्र । शृणुधी गिरः ।
रायस्पूर्धि । उरुणस्कृधि । अपावृधि ।
६-४-१०३ अङितश्च ॥

रारन्धि । प्रयन्धि । युयोधि ।
६-४-१०४ चिणो लुक् ॥१०६
अदीपि । अभावि । अपाचि । अदीपितराम् अपाचितमाम् इत्यादौ तु तलोपस्याऽसिद्धत्वात् तरप्तमपोर्न लुक् ।

६-१-१०१ श्लौ- इति द्वित्वम् । उपधालोप- सलोप- धकार- जश्त्वानि पूर्ववत् । **बप्सति** भस्+ झि प्राग्वत् श्लौ द्वित्वे च ७-१-४ अद... इति झकारस्यात् । तत उपधालोपे चर्त्वम् ।

६-४-१०१ हुझ- २-४-७२ अदिप्रभृतिभ्यः... सूत्रानन्तरं सूत्रमिदं पाठचम् । हुझल्भ्यः= हुधातोर्झलन्तधातुभ्यश्च परस्य, हेः= हि इत्यस्य स्थाने, धिः=धि इत्यादेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयाय शिक्षकेणच्छात्राः प्रवर्त्याः । अद्धि । अत्तम् । अत्त । अथ शिक्षकः ३-४-९२ आडु... सूत्रे "पश्चाद् वक्ष्यते" इति प्रतिज्ञातं छात्रानुद्‌बोधयन् सूत्रस्य तस्य फलं विशदयेत् । अदानि । अदाव । अदाम । लँङि- अद्+ ल् इति श्यामपाट्यां लिखित्वा ६-४-७१ लुँङ्लँ... इत्यस्य बाधकम् ६-४-७२ आडजादीनाम्- सूत्रमुपदिशेत् ।

६-४-१०२ **श्रुशृ..वृभ्यः**=श्रु शृणु पॄ कृ वृ इत्येतेभ्यः परस्य, हेर्धिः (६-४-१०१) । शृणुधीत्येतस्मादन्येषूदाहरणेषु ३-१-८५ व्यत्य... इति शप् । तस्य २-४-७३ बहु... इति लुक् । उदाहरणेषु- आद्ययोः ६-३-१३७ अन्ये... इति दीर्घः । द्वितीये धिभावविधानसामर्थ्यात् ६-४-१०६ उत... इति न हेर्लुक् । **उरुणस्कृधि** ८-४-२६ नश्च .... इति णत्वम् ।

६-४-१०३ **अङितः**= ङिद्भिन्नस्य, हेर्धिः (६-४-१०१) छन्दसि (६-४-१०२) । **रारन्धि** ३-१-८५ व्यत्य... इति रमेः (८५३) परस्मैपदम् । २-४-७६ बहु... इति शपः श्लुः । ७-१-७ तुजा... इत्यभ्यासदीर्घः । ३-४-८८ वा छ... इति पाक्षिकं पित्त्वम् । तेन ६-४-३७ अनु... इति मलोपो ऽपि न । **प्रयन्धि** । २-४-७३ बहु... इति शपो लुक् । पित्त्वं पूर्ववत् । **युयोधि** २-४-७६ बहु... इति शपः श्लु । पित्त्वं पूर्ववत् ।

६-४-१०४ **चिणो-** ३-१-६६ चिण् भाव... सूत्रानन्तरं सूत्रमिदं पाठचम् । चिणः= चिणः परस्य प्रत्ययस्य (अङ्गस्येत्यधिकारात् प्रत्ययस्येत्यर्थो लभ्यते) लुक्=लुग् भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । अभावि । एवं जि नी क्री धातुभ्यः । कर्मणि लुँङि । अजायि । अनायि । अक्रायि । इति रूपाणि च्छात्रैः साधयित्वा द्विवचनादौ पक्षे चिण्वदिट् । अजायिषाताम् । अजायिषत । अनायिषाताम् । अनायिषत । अक्रायिषाताम् । अक्रायिषत । इत्यादीनि रूपाणि शिक्षकेण मध्ये मध्ये साहाय्यं ददता छात्रैरेव साधयितव्यानि । चिण्वदिडभावपक्षे च इट्प्रतिषेधो गुणश्चोद्‌बोधयितव्यौ । अजेषाताम् । अजेषत । अनेषाताम् । अनेषत । अक्रेषाताम् । अक्रेषत । अथ-भू धातोः कर्तरि लुँङि सिचो लुग् जातः । सिँचि श्रूयमाणे प्रायो रूपाणि यादृशानि भवन्ति तेषां दिग्दर्शनाय दिव् धातुर्नी धातुश्चोपदेश्यौ । तत्र प्रथमं तावद् दिव् धातोः कर्तरि लुँङि शिक्षकः "अदिव्+ति" इति श्यामपाटचां लिखित्वा तिङः सार्वधातुकसंज्ञां कारयित्वा शपो बाधकं श्यनं च बाधयित्वा च्लिँप्रत्ययं सिँजादेशमनुबन्धलोपं च च्छात्रैः साधयित्वा अदिव्+स्+ति" इति श्यामपाट्यां लिखित्वा छात्रैः "स्" इत्यस्यार्धधातुकमिडागमं च कारयित्वा "अदिव्+इस्+ति" इति श्यामपाट्यां लिखेत् । अथ गुणमिलोपं वर्णसंमेलनं च च्छात्रैः साधयित्वा "अदेविस्+त्" इति श्यामपाट्यां लिखित्वा ७-३-९६ अस्ति...सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१०५ अतो हेः ॥

पठ ।

६-४-१०६ **उतश्च प्रत्ययादसंयोगपूर्वात्** ॥११०,१०७

शृणु । सुनु । चिनु । असंयोगपूर्वादित्युक्तेर्नेह- आप्नुहि । तक्ष्णुहि ।

(उतश्च प्रत्ययाच्छन्दो वा वचनम्)

आतनुहि यातुधानाम् । धिनुहि यज्ञपतिम् ।

६-४-१०७ **लोपश्चास्या ऽन्यतरस्यां म्वोः** ॥ १०९,१०८

शृण्वः, शृणुवः । शृण्मः, शृणुमः । सुन्वः, सुनुवः । सुन्मः, सुनुमः । तन्वः, तनुवः । तन्मः, तनुमः । मिपि तु परत्वाद् गुणः । शृणोमि । सुनोमि । तनोमि । असंयोगपूर्वस्येत्यर्थान्नेह-शक्नुवः । शक्नुमः।

६-४-१०५ अतो- ३-४-८७ सेर्ह्यपिच्च- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

६-४-१०४ चिणो लुक् ॥ ६-४-१०५ अतो हेः (क) ॥ इति ।

अतः= ह्रस्वाकारात् परस्य, हेः= हि इत्यस्य, लुक्= लुग् भवति । लक्षणसमन्वयश्छात्रैरेव कारयितव्यः । पठ । थस्-युवां पठतम् इति वक्तव्ये पूर्ववल्लोँट् ततो लँटीव पठथस् इति छात्रैः साधिते ३-४-१०१ तस्थ...सूत्रमुद्बोध्य लक्षणसमन्वयश्छात्रैः कारयितव्यः । पठतम् । थ- यूयं पठत इति वक्तव्ये पूर्ववल्लोँट् । ततो लँटीव पठथ इति च्छात्रैः साधिते ३-४-१०१ तस्थ... सूत्रमुद्बोधनीयम् । पठत । मिप्-अहं पठानि इति वक्तव्ये पूर्ववल्लोँट् । ततो लँटीव पठामि इति रूपे छात्रैः साधिते ३-४-९२ आडु... सूत्रं प्रस्तुत्यम् ।

६-४-१०६ उत- ७-१-५ आत्मने... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो

यथा- (क) (ख)

६-४-१०४ चिणो लुक् ॥ ६-४-१०५ अतो हेः ॥

६-४-१०६ उतश्च प्रत्ययादसंयोगपूर्वात् (ख) (क) ॥ इति ।

अत्र शिक्षकेण मनसा ऽवधेयं यत् ८-३-५९ आदे... सूत्रे इवाऽत्र सूत्रे ऽपि प्रत्ययशब्दः प्रत्ययावयवपर इति । असंयोगपूर्वात्= असंयोगपूर्वकात् (पूर्वतःसंयोगरहितात्) प्रत्ययात्= प्रत्यया ऽवयवात्, उतः= उकारात् परस्य, (ख)= हेः, (क)=लुक् । इत्यर्थमुपदिश्य लक्षणसमन्वयश्छात्रैः कारयितव्यः । सुनु । सुनुतम् । सुनुत । उत्तमपुरुषे सत्यावश्यके, आट् (३-४-९४) स च पित्, इत्युद्बोधनीयम् । सुनवानि सुनवाव । सुनवाम । आत्मनेपदे- सुनुताम् । सुन्वाताम् । सुन्वताम् । सुनुष्व ।सुन्वाथाम् । सुनुध्वम् । सुनवै । सुनवावहै । सुनवामहै । इति रूपाणि च्छात्रैः साध्यमानानि शिक्षकः शृणुयात् । इत्थं स्वादिगणप्रयुक्तं विशेषकार्यं शपो बाधकः श्नुर्भवतीतिच्छात्रान् सम्यग् बोधयित्वा भावकर्मणोस्तु हुधाताविव । ७-४-२५ अकृ... सूत्रे प्रक्रियारीतिर्द्रष्टव्येति बोधयित्वा छात्रैरुच्यमानां प्रक्रियां शृणुयात् ।

तुदादिगणप्रयुक्तं विशेषकार्यं शपो बाधकः शः ।

अथ तुदादि-धातुपाठं दर्शयता शिक्षकेण, एते धातवस्तुदादयः । एषु सर्वेषु विकरणं शपो बाधकः शप्रत्ययो भवतीति कथयता तुद् तुदँ धातोः कर्तरि लँटि पचति इत्यत्रैव प्रक्रियाक्रमे तुद्+ति इति श्यामपाट्यां लिखित्वा शपं बाधयित्वा ३-१-७७ तुदादि भ्यः शः- सूत्रमुपदेश्यम् ।

उत- उतश्चप्रत्ययादित्यत्र "छन्दसि वा" इति वक्तव्यम् ।

६-४-१०७ लोप- ३-१-७३ स्वादिभ्यः ... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी- प्रयोगो यथा-

६-४-१०६ उतश्च प्रत्ययादसंयोगपूर्वात् ॥

६-४-१०७ लोपश्चाऽस्या ऽन्यतरस्यां म्वोः ॥ इति ।

एतत्सूत्रर्थोपदेशात् पूर्वं छात्रा अधोनिर्दिष्टरूपेण बोधयितव्याः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१०८ **नित्यं करोतेः** ॥१०९, ११०
कुर्वः । कुर्मः ।
६-४-१०९ ये च ॥
कुर्यात् ।
६-४-११० अत उत् **सार्वधातुके** ॥१११
कुरुतः । क्ङितीत्यनुवृत्तेर्नेह- करोति ।

६-४-१११ श्नसोरल्लोपः ॥११२
रुन्द्धः, रुन्धः । स्तः । क्ङितीत्यनुवृत्तेर्नेह- रुणद्धि । अस्ति ।
६-४-११२ **श्ना ऽभ्यस्तयोरातः** ॥११३,११४
क्रीणन्ति । जहति ।

यथा- वत्साः ? अत्र श्यामपाट्यां ६-४-१०६ उत... सूत्रं ६-४-१०७ लोप... सूत्रे ऽनुवर्तते, इति धिया नोपन्यस्तम् । किन्तु १०७ लोप... सूत्रे पठितम् "अस्य" इति पदम् कं पदार्थं बोधयतीति विचारप्रसङ्गे सर्वनामानि पूर्वप्रकृतं परामृशन्ति (बोधयन्ति) इति बोधे सति किमत्र पूर्वप्रकृतम् ? इत्याकाङ्क्षा जागर्ति तामाकाङ्क्षां शमयितुमुपन्यस्तम् । तथा च षष्ठयन्तेन परामृष्टत्वात् पूर्वत्र पञ्चम्यन्तान्यपि षष्ठयन्तानि भवन्ति । इति । अस्य= असंयोगपूर्वस्य प्रत्ययावयवस्य उकारस्य, अन्यतरस्याम्=वा, लोपः=लोपो भवति, म्वोः= मकारवकारयोः परयोः । इत्यर्थमुपदिश्य लक्षणसमन्वयश्छात्रैः कारयितव्यः । सुन्वः, सुनुवः । सुन्मः, सुनुमः । ञित्त्वादात्मनेपदमपीति सत्यावश्यके उद्बोधनीयम् । सुनुते । सुन्वाते । झ- प्रत्यये ७-१-३ झोन्तः- सूत्रस्य बाधकम् ७-१-५ आत्मने... सूत्रमुपस्थाप्यम् ।

६-४-१०८ **नित्यं-** करोतेः=कृधातोः, प्रत्ययस्य +उतः (६-४-१०६) नित्यम्, लोपः+म्वोः (६-४-१०७) । **कुर्वः** ८-२-७७ हलि...इति दीर्घे प्राप्ते, ८-२-७९ न भ... इति तत्प्रतिषेधः ।

६-४-१०९ **ये च-** करोतेः (६-४-१०८) प्रत्ययस्य+ उतः (६-४-१०६) नित्यम् (६-४-१०८) लोपः (६-४-१०७) ये= यादौ प्रत्यये परे । **कुर्यात्** । दीर्घप्राप्तिस्तत्प्रतिषेधश्च प्राग्वत् ।

६-४-११० **अत-** प्रत्ययस्य+उतः (६-४-१०६)= प्रत्ययरूपोकारान्तस्य, करोतेः (६-४-१०८) अतः= अकारस्य स्थाने, उत्= उकारादेशो भवति, क्ङिति (६-४-९८) सार्वधातुके= सार्वधातुके परे । **कुरुतः** उत् इति तपरकरणाल्लघूपधगुणो न ।

६-४-१११ **श्नसो-** ८-२-४० झष... सूत्रानन्तरं सूत्रमिदं पाठचम् । श्न+अस्= श्नस्, तयोःश्नसोः, शकन्ध्वादित्वात् पररूपम् । श्नसोः= श्नम्प्रत्ययस्य अस्धातोश्च, अत्=अकारस्य, लोपः=लोपो भवति, क्ङिति (६-४-१८) सार्वधातुके (६-४-११०) । इत्यर्थमुपदिश्यच्छात्रैर्लक्षणसमन्वयं कारयित्वा रुन्+ध्+तस् इति श्यामपाट्यां लिखित्वा अत्र नकारस्य स्थाने ८-४-२ अट्कु... सूत्रेण णकारो भवेद् वा ८-३-२४ नश्चा... सूत्रेणा ऽनुस्वारो भवेद् ? इति शिक्षकेणच्छात्राः परीक्षणीयाः । अथ ८-२-१ पूर्व... सूत्रबलेन ८-३-२४... नश्चा... सूत्रेणा ऽनुस्वारो भवतीनि निर्णीते रुं+ध्+तस् इति श्यामपाट्यां लिखित्वा ८-४-५७ अनु... सूत्रमुद्बोधयितव्यम् । अथ रुन्+ ध्+तस् इति इति श्यामपाट्यां लिखित्वा पुनरत्र ८-४-२ अट्कु... सूत्रेण णकारो भवेन्न वा ? इति च्छात्राः परीक्षणीयाः । सत्यावश्यके ८-२-१ सूत्रमुद्बोध्य परसवर्णासिद्धत्वेन णकारो न भवतीति स्फुटं बोधयितव्यम् । ततस्तु रुणद्धि इत्यत्रैव धत्वजश्त्वे रुन्द्धः । रुन्धन्ति रुन्द्धे । रुन्धाते । रुन्धते । रुणद्धु । सिपि ६-४-१०१ हुझ... सूत्रमुदबोधयितव्यम् । रुन्द्धि । उत्तमपुरुषे रुणधानि । रुणधाव । रुणधाम । रुणधै । रुणधावहै । रुणधामहै । इमानि रूपाणिच्छात्रैः साधयितव्यानि । अथ लङि- अरुणध्+नि-अरुणध्+त् इति शिक्षकः श्यामपाट्यां लिखित्वा ६-१-६६ हल्ङ्या- सूत्रमुद्वोध्य श्यामपाट्याम् "अरुणध्" इत्यवशेष्य ८-२-३९. झलां... सूत्रं ८-४-५५ वाऽव... सूत्रं चोद्बोधयेत् । अरुणत्, अरुणद् । सिपि- अरुणद् इनि च्छात्रैः साधितं रूपं श्यामपाट्यां लिखित्वा ८-२-७५ दश्च- सूत्रमुपदिशेत् ।

६-४-११२ **श्नाभ्य-** ६-४-११३ ई हल्यघोः- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

६-४-९८ गम... क्ङिति अनङि ॥ ६-४-११० अत उत् सार्वधातुके ॥ ६-४-१११ श्नसोरल् लोपः ॥
६-४-११२ श्नाभ्यस्तयोरातः (ग) (क) (ख) ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-११३ ई हल्यघोः ॥

क्रीणीतः । मिमीते । क्ङितीत्यनुवृत्तेर्नेह- क्रीणाति । जहाति ।

६-४-११४ इद् दरिद्रस्य ॥११७

दरिद्रितः । हलीत्यनुवृत्तेर्नेह- दरिद्रति ।

(दरिद्रातेरार्धधातुके विवक्षिते आलोपो वक्तव्यः)

दरिद्रातीति- दरिद्रः ।

(लुङि वा)

अदरिद्रीत्, अदरिद्रासीत् ।

न दरिद्रायके लोपो दरिद्राणे च नेष्यते ।

दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा ॥

श्नाभ्यस्तयोः= श्नाप्रत्ययस्य अभ्यस्तसंज्ञकधातोश्च, आतः= आकारस्य, (ग)= लोपः, (क)= क्ङिति (ख)= सार्वधातुके । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । क्रीणन्ति । एतत्प्रयोग-सिद्ध्यनन्तरं छात्रानधोनिर्दिष्टरूपेण बोधयेत् । यथा- ६-४-११३ ई ह... सूत्रं ६-४-११२ श्नाभ्य... सूत्रस्य बाधकम् । तेना ऽजादौ क्ङित्येव ६-४-११२ श्नाभ्य... सूत्रं प्रवर्तते । अतो हलादौ क्ङिति आकारस्य ईकारादेशः । क्रीणीते । क्रीणाते । क्रीणते । लोँटि-क्रीणातु । क्रीणीताम् । लँङि- अक्रीणात् । अक्रीणीत । विधिलिँङि- क्रीणीयात् । क्रीणीत । इत्यादीनि रूपाणिच्छात्रैः साधयेत् । इत्थं क्र्यादौ विशेषकार्यं शपो बाधकः श्नाप्रयत्यो भवति । हलादौ क्ङिति तस्याकारस्य स्थाने ईकारादेशो भवति । अजादौ क्ङिति आकारस्य लोपो भवति । पिति तु आकार एव श्रूयते, इति स्फुटं बोधयेत् । कर्मणि तु यगेव । क्रीयते । क्रीयताम् । अक्रीयत । क्रीयेत । इत्यादि ।

अथ चुरादिगणप्रयुक्तं विशेषकार्यं णिच् ।

अथ चुरादिधातुपाठं दर्शयता शिक्षकेणा ऽधोनिर्दिष्टरूपेणच्छात्रा बोधयितव्याः । यथा- वत्साः ? यथा गणान्तरेषु विशेषकार्याणि शपो बाधकानि विशेषविकरणान्यभूवन्, तथाऽत्र चुरादिगणे शपो बाधकं विशेषविकरणं किमपि नास्ति । किन्तु प्रथममेव धातोर्णिच्प्रत्यये तद्विशिष्ट एव धातुर्भवति । ततश्च लँडादिप्रत्यये विकरणं तु शबेव भवति । तदेतच्चुरादिगणस्य विशेषकार्यम् । इति । एवं शिक्षयता शिक्षकेण चुरादिधातुपाठं दर्शयता एते धातवश्चुरादयः । एषु सर्वेषु प्रथमं धातोर्णिच्प्रत्यये सति णिज्विशिष्टो धातुः प्रयुज्यते, इति कथयता चुर् (चुरँ) धातुमुदाहरता ३-१-२५ सत्याप...सूत्रं प्रस्तुत्यम् ।

६-४-११३ ई ह- ३-१-८१ क्र्यादिभ्यः श्ना- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ)

६-४-९८ गम...लोपः क्ङिति अनङि ॥ ६-४-११० अत उत् सार्वधातुके ॥ ६-४-११२ श्नाभ्यस्तयोः आतः ॥

६-४-११३ (ग) (घ) ई हलि (क) (ख) अघोः ॥ इति ।

अघोः= घुसंज्ञकधातुं वर्जयित्वा, (ग)= श्नाभ्यस्तयोः,(घ)= आतः = आकारस्य स्थाने, ई= ईकारादेशो भवति, हलि= हलादौ, (क)= क्ङिति, (ख)= सार्वधातुके परे । इत्यर्थमुपदिश्यच्छात्रैरेव लक्षणसमन्वयं कारयेत् । क्रीणीतः । झिप्रत्यये क्री+णा+ अन्ति इति श्यामपाट्यां लिखित्वा ६-४-११२ श्नाभ्य.. सूत्रमुपदिशेत् ।

६-४-११४ इद् द- दरिद्रस्येति सौत्रत्वाद् ह्रस्वान्तम् । दरिद्रस्य= दरिद्राधातोः, आतः (६-४-११२) इत् =ह्रस्वेकारादेशो भवति, हलि (६-४-११३) क्ङिति (६-४-९८) सार्वधातुके (६-४-११०) । **दरिद्रति** ६-१-६ जक्षि... इत्यभ्यस्तसंज्ञा । ७-१-४ अद... इत्यत् । ६-४-११२ श्नाभ्य... इत्याल्लोपः ।

दरि- दरिद्रः पचाद्यच् । **विवक्षिते-** आर्धधातुके परे लोपविधाने तु ३-१-१४१ श्याद्व्य... इति णप्रत्ययः स्यात् । ततश्च ७-३-३३ आतो... इति युँकि दरिद्राय इत्यनिष्टं रूपं स्यात् ।

न द- दिदरिद्रिषतीति ७-२-४९ सनी... सूत्रस्थ- तनि... इति वार्तिकेन सन इडागमपक्षे ६-४-६४ आतो... इत्याल्लोपः । इडभावपक्षे प्रकृतवार्तिकेन तु लोपो न-दिदरिद्रासति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-११५ भियो ऽन्यतरस्याम् ॥११७

बिभितः, बिभीतः । सार्वधातुके इत्यनुवृत्तेर्नेह-भीयते ।

६-४-११६ जहातेश्च ॥ ११८

जहितः, जहीतः । सार्वधातुके इत्यनुवृत्तेर्नेह-हीयते ।

६-४-११७ आ च हौ ॥

जहाहि, जहिहि, जहीहि ।

६-४-११८ लोपो यि ॥

जह्यात् । सार्वधातुके इत्यनुवृत्तेर्नेह-हीयते । विहाय ।

६-४-११९ घ्वसोरेद्धावभ्यासलोपश्च ॥१२६

देहि । धेहि । एधि ।

६-४-१२० अत एकहल्मध्येऽनादेशादेर्-लिँटि ॥१२६

पेठतुः । पेठुः । लिँटि+ अनादेशादेरित्युक्तेर्नेह-जगदतुः । जगदुः । लिँट आदेशविशेषणादिह भवत्येव- नेमतुः । नेमुः । सेहे । सेहाते । आदेशस्य विरूपविशेषज्ञापनादिह भवत्येव- पेठतुः । पेठुः । एकहल्मध्ये इत्युक्तेर्नेह-वव्रजतुः । वव्रजुः । कितीत्यनुवृत्तेर्नेह- पपठ । (श्रन्थि-ग्रन्थि-दम्भीनामेत्वाभ्यासलोपौ वक्तव्यौ)

६-४-११५ भियः=भीधातोः स्थाने, अन्यतरस्याम्=वा, इत् (६-४-११४) हलि (६-४-११३) क्ङिति (६-४-९८) सार्वधातुके (६-४-११०) ।

६-४-११६ जहातेः= हा (ओँहाक्) धातोः स्थाने, अन्यतरस्याम् (६-४-११५) इत् (६-४-११४) हलि (६-४-११३) क्ङिति (६-४-९८) सार्वधातुके ६-४-११०) ।

६-४-११७ आ च- जहातेः (६-४-११६) अन्यतरस्याम् (६-४-११५) आ= आकारादेशो भवतिः, इत् (६-४-११४) च, हौ= हि इत्येतस्मिन् परे । इदातोरभावे ६-४-११३ ई ह... इतीत् ।

६-४-११८ लोपो-जहातेः (६-४-११६) लोपः=लोपो भवति, यि=यकारादौ, क्ङिति (६-४-९८) सार्वधातुके (६-४-११०) ।

६-४-११९ घ्वसोः= घुसंज्ञकस्य अस्तेश्च धात्वोः स्थाने, एत्= एकारादेशः, अभ्यासलोपश्च=अभ्यासस्य लोपोऽपि भवतः, हौ= हि इत्येतस्मिन् परे । अभ्यासलोपग्रहणं घुसंज्ञार्थम् । न त्वस्त्यर्थम् । तस्या ऽभ्यासाऽभावात् । **एधि** ६-४-२२ असि... इत्येत्वस्या ऽसिद्धत्वेन ६-४-१०१ हुझ्... इति झलन्तलक्षणो हेर्धिः ।

६-४-१२० अत- १-२-५ असंयोगा... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो

यथा- (क) (ख) (ग) (घ)

६-४-१ अङ्गस्य ॥ ६-४-९८ गम... क्ङिति ६-४-११९ घ्वसोः एत् हौ अभ्यासलोपश्च ॥

६-४-१२० अत एकहल्मध्ये ऽनादेशादेः (क) (ग) (घ) (ख) लिँटि ॥ इति ।

अथ "शिक्षकेण अत्र सूत्रे लिँटि इति पदमावर्त्यते । एकत्र सप्तम्यर्थो निमित्तम् । १-१-५ क्ङिति च इत्यत्र यथा । इत्युपदिश्य सूत्रार्थ उपदेश्यः" लिँटि+ अनादेशादेः= लिण्निमित्तकवैरूप्यसंपादकादेश-रहितस्य, (६-४-१२६ न श... इति सूत्रेण शसिदद्योः प्रतिषेधसामर्थ्येन विरूपविशेषणमादेशस्य ज्ञाप्यते, अन्यथा- अनादेशादेरिति पर्युदासेनैव, एत्वाभ्यासलोपयोरप्राप्तौ प्रतिषेधविधानं व्यर्थं स्यात्= ने.भा. लिँट्लाई निमित्त मानेर वैरूप्य संपादक आदेश आदिमा न हुने) (क)= अङ्गस्य, एकहल्मध्ये= असंयुक्तयोर्हलोर्मध्येवर्तमानस्य, अतः= ह्रस्वाकारस्य स्थाने, ग= एत्= एकारादेशो भवति, (घ)= अभ्यासलोपश्च= अभ्यासस्य लोपश्च भवति (ख)= किति+ लिँटि= किति लिँटि परे । इत्यर्थोपदेशे यद्यपि ६-४-९८ गम.. सूत्रात् क्ङिति किति ङिति, इत्यनुवर्तते, तथापि क्वचिदपि लिट् ङिन्न लभ्यते । अतो ङिदंशस्त्यज्यते । इति च्छात्रा बोधयितव्याः । यदि तुच्छात्रास्तथोपदेशं भारं मन्यन्ते तदा क्ङिति लिँटि इत्यर्थ उपदेश्यः (तथोपदेशे ऽ पि प्रक्रियायां दूषणा ऽषणा ऽभावाद् वेदे लिँटोऽपि ङित्त्वसम्भवाच्च) इत्यर्थमुपदिश्य मध्ये मध्ये शिक्षकः साहाय्यं ददच्छात्रैरेव लक्षणसमन्वयं कारयेत् । पेठतुः । पेठुः । सिपि-पपठ्+इथ इति श्यामपाट्यां लिखित्वा ६-४-१२१ थलि... सूत्रमुपदिशेत् ।

श्रन्थि- कित्वान्नलोपपक्षे विधी इमौ । दम्भधातावपि ६-४-२२ असि... सूत्रेण नलोपस्या ऽसिद्धत्वप्रतिपादनात् सूत्रस्य न प्राप्तिः । उदाहरणानि १-२-६ इन्धि... सूत्रस्थ- श्रन्थि... वार्तिके द्रष्टव्यानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१२१ थलि च सेटि ॥१२५
पेठिथ। सेटीत्युक्तेर्नेह- ततप्थ। इटि तेपिथ, इत्यपि।

६-४-१२२ तृफलभजत्रपश्च ॥
तेरतुः। तेरिथ। फेलतुः। फेलिथ। भेजतुः। भेजिथ। त्रेपे।

६-४-१२३ राधो हिंसायाम् ॥
अपरेधतुः। अपरेधिथ। हिंसायामित्युक्तेर्नेह- रराधतुः। रराधिथ।

६-४-१२४ वा जृभ्रमुंत्रसाम् ॥१२५
जेरतुः, जजरतुः। जेरिथ, जजरिथ। भ्रेमतुः, बभ्रमतुः। भ्रेमिथ, बभ्रमिथ। त्रेसतुः, तत्रसतुः। त्रेसिथ, तत्रसिथ।

६-४-१२५ फणां च सप्तानाम् ॥
फेणतुः, पफणतुः। फेणिथ पफणिथ। इत्यादि।

६-४-१२६न शसददवादिगुणानाम् ॥
शशसतुः। शशसिथ। ददде। ववनतुः। ववनिथ। पपरतुः। पपरिथ।

६-४-१२७ अर्वणस्त्रसावनञः ॥१२८
अर्वन्तौ। अर्वन्तः। असावित्युक्तेर्नेह-अर्वा। अनञ इत्युक्तेर्नेह- अनर्वाणौ।

६-४-१२८ मघवा बहुलम् ॥
मघवान्। मघवन्तौ। मघवन्तः। मघवा। मघवानौ। मघवानः। स्त्रियाम्- मघवती। मघोनी।

६-४-१२१ थलि- ६-४-१२० अत एक... सूत्रानन्तरं सूत्रमिदं पाठचम्। शेषः सर्वो ऽप्यर्थः पूर्वसूत्रस्येव, केवलं तत्रत्येन "किति लिँटिँ" इत्यंशेन, अत्रत्यः "थलि च सेटि," (सेटि= इडागमसहिते, थलि= थलि परे) इत्यंशो विनिमातव्यः। इत्युपदिश्य लक्षणसमन्वयं छात्रैः कारयेत्। पेठिथ। पेठथुः। पेठ। मिपि-पपठ्+ अ इति श्यामपाट्यां लिखित्वा ७-१-९१ णलु... सूत्रमुपदिशेत्।

६-४-१२२ तृ..त्रपः=तृ फल् भज् त्रप् इति धातूनाम्, अतः (६-४-१२०) एत्+ अभ्यासलोपश्च (६-४-११९) किति (६-४-९८) लिँटि (६-४-१२०) सेटि+थलि च (६-४-१२१)। तृधातोः, ७-४-११ ऋच्छ... इति गुणे ६-४-१२६ न श... इति प्रतिषेधे प्राप्ते, फल्भज्धात्वोर्विरूपादेशादिकत्वेन, त्रप् धातोरकारस्यैकहल्मध्यत्वा ऽभावेना ऽप्राप्तौ विधिरयम्।

६-४-१२३ राधः=राध्धातोः अतः (६-४-१२०)= अवर्णस्येत्यर्थः (ह्रस्वा ऽकारस्या ऽत्रा ऽसम्भवात्), हिंसायाम्=हिंसायां गम्यमानायाम्, अन्यत् प्राग् (६-४-११२) वत्।

६-४-१२४ वाजृ- जृ... त्रसाम्= जृ भ्रम् त्रस् धातूनाम् वा=विभाषया, प्राग् (६-४-१२०-१२१) वत्।

६-४-१२५ फणाम्... सप्तानाम्= फणादीनां सप्तानां धातूनाम्, वा (६-४-१२४) प्राग् (६-४-१२०, १२१) वत्। फणँ-राजृँ- भ्राजृँ- भ्राशृँ- भ्लाशृँ- स्यमुँ- स्वनँ, इति फणादयः सप्त।

६-४-१२६ न श-शस... णानाम्= शसेर्ददेर्वकारदीनां कृतगुणानां च, न= प्राग् (६-४-१२०, १२१) वन्न भवतः।

६-४-१२७ अर्व-अर्वणः तृँ असौ अनञः, इति च्छेदः। अनञः= नञा रहितस्य, अर्वणः= अर्वञ्शब्दस्य स्थाने, तृँ=तृँ इत्यादेशो भवति, असौ= परतः सुँप्रत्ययाभावे।

६-४-१२८ मघ- मघवा षष्ठचर्थे प्रथमा। मघवा= मघव (न्) शब्दस्य स्थाने, बहुलम्=बाहुल्येन, = तृँ (६-४-१२७)। असौ इति तु नानुवर्तते। **मघवान्** इह्रोपधादीर्घे कर्तव्ये संयोगान्तलोप (८-२-२३) स्याऽसिद्ध (८-२-१) त्वं न भवति बहुलग्रहणात्। नलोपे (८-२-७) कर्तव्ये त्वसिद्धत्वं भवत्येव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१२९ भस्य ॥१७५

६-४-१३० पादः पत् ॥

सुपदः । सुपदा । भस्येत्यधिकारान्नेह-सुपाद्भ्याम् ।

६-४-१३१ वसोँःसम्प्रसारणम् ॥१३३

विदुषः । पपुषः ।

६-४-१३२ वाह ऊठ् ॥

प्रष्ठौहः । भस्येत्यधिकारान्नेह-प्रष्ठवाड्भ्याम् ।

६-४-१३३ श्वयुवमघोनामतद्धिते ॥

शुनः । यूनः । मघोनः । अन इत्यपकृष्यमाणत्वान्नेह- मघवतः । मघवता । अतद्धिते इत्युक्तेर्नेह- शौवम् । यौवनम् । माघवनम् ।

६-४-१३४ अल्लोपो ऽनः ॥१३९,१४५,१३७

राज्ञः । राज्ञा । राज्ञे ।

६-४-१२९ भस्य- ८-२-३० चोः कुः- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । (भस्य=भसंज्ञकस्य कार्यं भवतीत्यधिक्रियते आपादपरिसमाप्तेः) अयि वत्साः ? एतत्=६-४-१२९ सूत्रात् परत आपादपरिसमाप्तेर्यानि सूत्राणि सन्ति तानि भस्यैव कार्यं कुर्वन्ति । इति बोधयित्वा ६-४-१३४ अल्लोपोऽनः-सूत्रं प्रस्तुत्यम् ।

६-४-१३० पादः= पाच्छन्दान्तस्य (१-१-७१ येन.... इति तदन्तविधिः) भस्य (६-४-१२९)=भसंज्ञकस्य, अङ्गस्य (६-४-१) स्थाने, पत्=पद् आदेशो भवति । निर्दिश्यमानपरिभाषया पाच्छब्दस्यैव पदादेशः ।

६-४-१३१ वसोँः=वस्वन्तस्य, भस्य (६-४-१२९) अङ्गस्य (६-४-१) स्थाने, सम्प्रसारणम्=सम्प्रसारणं भवति । १-१-४४ इग् य.... सूत्रं द्रष्टव्यम् । **पपुषः** पा+क्वसुँ+शस् । ६-४-६४ असि....इत्यसिद्धत्वं तु नेति तत्रैवोक्तम् ।

६-४-१३२ वाहः=वाह् इत्यन्तस्य, भस्य (६-४-१२९) अङ्गस्य (६-४-१) स्थाने, सम्प्रसारणम् (६-४-१३१)= भाविसम्प्रसारणसंज्ञकः, **ऊठ्=** ऊठ् इत्यादेशो भवति । सम्प्रसारणसंज्ञक इत्यर्थाद् १-१-४४ इग् य....इति सूत्रबलाद् वकारमात्रस्य ऊठ्, ६-१-१०४ सम्प्र.... इति पूर्वरूपं च सिध्यतः । **प्रष्ठौहः** प्रष्ठवाह्+शस् । ६-१-८६ एत्ये....इति वृद्धिः ।

६-४-१३३ श्वयु- अनः (६-४-१३४ अल्लो....इत्यतोऽपकृष्यते ततः १-१-७१ येन...इति तदन्तविधिः)= अन्नन्तानाम्, भानाम् (६-४-१२९) श्व...घोनाम्= श्वन् युवन् मघवन् इत्येतेषाम्, अङ्गानाम् (६-४-१) स्थाने, सम्प्रसारणम् (६-४-१३१) अतद्धिते=तद्धितभिन्ने प्रत्यये परे । **शौवम्** शुनो विकार इति विग्रहे ४-३-१५२ प्राणि... इत्यञ् । ७-३-४ द्वारा.... इत्यैच् । ६-४-१४४ नस्त...इति टिलोपः । **यौवनम्** ५-१-१२९ हाय... इत्यण् । ६-४-१६७ अन्- इति प्रकृतिभावः । **माघवनम्** ४-२-२४ साऽस्य....इत्यण् । प्रकृतिभावः प्राग्वत् ।

६-४-१३४ अल्लो-६-४-१२९ भस्य-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- (क) (ख)

६-४-१ अङ्गस्य ॥ ६-४-१२९ भस्य ॥

६-४-१३४ (ख) (क) अल्लोपो ऽनः ॥ इति ।

अनः= अन्नन्तस्य (ख)= भस्य, (क)=अङ्गस्य, अत्=(प्रत्यासत्त्या तस्य अन एव) अकारस्य, लोपः=लोपो भवति । इत्यर्थ उपदेश्यः । अथवा बालानामुपलालनामनुसृत्य भस्य, अङ्गस्य, अनः अत्= अकारस्य लोपः । इत्येवार्थ उपदेश्यः । अनसा । मनसा इत्यादौ दाषो नोद्भावनीयः । एवमेव ६-४-१३६ विभाषा ङिश्योरित्यत्रापि व्यवहरणीयम् । ततो लक्षणसमन्वये छात्रैः कृते राज्+ न् + अस् इति श्यामपाट्यां लिखित्वा अत्र किं सूत्रं प्रवर्तेत ? इति च्छात्राः परीक्षणीयाः । ततो राज्+ञ्+अस् इति श्यामपाट्यां लिखित्वा यथा 'कष संयोगे क्षः (क्+ष्= क्ष) इत्युच्चार्यते, तथैव जञोर्ज्ञः (ज्+ञ्=ज्ञ्) यथा- राज् + ञ्= राज्ञ् इति च्छात्रा बोधयितव्याः । राज्ञः । राज्ञा । राज्ञे । राज्ञाम् । ङौ तु ६-४-१३४ अल्लो...सूत्रं बाधित्वा ६-४-१३६ विभा. ...सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१३५ षपूर्वहन्धृतराज्ञामणि ॥

ताक्ष्णः । वार्त्रघ्नः । धार्तराज्ञः । षपूर्वहन् धृतराज्ञामित्युक्तेर्नेह-सामनः । अणीत्युक्तेर्नेह-ताक्षण्यः ।

६-४-१३६ विभाषा ङिश्योः ॥

राज्ञि, राजनि । साम्नी, सामनी ।

६-४-१३७ न संयोगाद् वमन्तात् ॥

यज्वनः । यज्वना । ब्रह्मणः । ब्रह्मणा । संयोगादित्युक्तेरिह भवत्येव लोपः- प्रतिदीव्ना । साम्ना । वमन्तादित्युक्तेरिह भवत्येव लोपः- लक्ष्णः । तक्ष्णा ।

६-४-१३८ अचः ॥१३९

प्राचः । प्रतीचः । दधीचः । मधूचः ।

६-४-१३९ उद ईत् ॥

उदीचः । उदीचा ।

६-४-१४० आतो धातोः ॥

विश्वपः । विश्वपा । धातोरित्युक्तेर्नेह- खट्वाः । मालाः । अत्र काशिका- आत इति योगविभागः, तेन 'क्त्वो ल्यप्' 'हलः श्नः शानच्' इत्येवमादि सिद्धं भवतीति ।

६-४-१३५ षपू... राज्ञाम्= षपूर्वकस्य हन् धृतराजन् इत्येतयोश्च, अनः+अत्+लोपः (६-४-१३४) अणि=अणि परे । **ताक्ष्णः** ४-१-१५३ उदी... सूत्र स्थ- तक्ष्णो... वार्तिकेनाऽण् । **धार्तराज्ञः** धृतराजन् इति बहुव्रीहिः । सामनः ६-४-१६७ अन् इति प्रकृतिभावः ।

ताक्षण्यः ४-१-१५२ सेना...इति ण्यः । ६-४-१६८ ये चा....इति प्रकृतिभावः ।

६-४-१३६ विभा- ६-४-१३४ अल्लोपोऽनः- सूत्रानन्तरं सूत्रमिदं पाठचम् । अनः (६-४-१३४) भस्य (६-४-१२९) अङ्गस्य (६-४-१) अत् (६-४-१३४) विभाषा=वा, लोपः (६-४-१३४) ङिश्योः= ङि शी इत्येतयोः परयोः । अथवा बानामुपलालनामनुसृत्य ६-४-१३४ अल्लो...सूत्रे इव भस्य अङ्गस्य अनः अत् विभाषा लोपः इत्येवार्थ उपदेश्यः । राज्ञि, राजनि । भ्यामादि- हलादौ तु ८-२-७ नलोपः प्राति... सूत्रमुद्बोधनीयम् । ततो दीर्घादिप्राप्तिशङ्कायां ८-२-१ पूर्वत्राऽसिद्धम्, इति सूत्रमुद्बोधनीयम् । ८-२-२ नलोपः सुँप्स्वर.... सूत्रं तु नोपदेश्यम् । साम्प्रतं व्यावर्त्योदाहरणस्य दुरधिगमत्वात् । राजभ्याम् । राजभिः । राजभ्यः । राजसु । उपरितनेषूदाहरणेषु अल्लोपे नलोपे च कर्तव्ये सत्यावश्यके भपदव्यवस्था सम्यगुद्बोधयितव्या । सम्बुद्धौ- राजन्+स् ६-१-६६ हल्ङ्या...., राजन् । ततः १-१-६१ प्रत्यय लोपे... सूत्रबलेन ८-२-७ न लोपः.... इति प्राप्तौ ८-२-८ न ङिबुद्धयोः- सूत्र प्रस्तुत्यम् ।

६-४-१३७ न सं- ८-२-८ न ङि सम्बुद्धयोः- सूत्रानन्तरं सूत्रमिदं पाठचम् । वमन्तात्= वकारमकारान्तात्, संयोगात्=संयोगात् परस्य, अनः+अत् (६-४-१३४) न=लोपो न भवति । यथा- दुर्गाप्रसादशर्मणः । इत्यादि । भनिमित्तभिन्ने स्वादौ तु राज (न्) शब्दवत् । शर्मा । शर्माणौ । शर्मभ्याम् । इत्यादि । एवं यज्वन् ब्रह्मन् इत्यादिशब्देषु शिक्षकश्छात्रान् परीक्षेत । अथ ६-४-१२ इन् हन्..... सूत्रमुपदेश्यम् ।

६-४-१३८ अचः- भस्य (६-४-१२९) अचः= लुप्तनकारस्याञ्चतेः, अत्+लोपः (६-४-१३४) । अत्र सूत्रे अञ्च् इत्यस्य नकारलोपेन निर्देशः- अच् । तस्य= अचः इति । उदाहरणविषये ६-३-१३८ चौ- सूत्रे द्रष्टव्यम् ।

६-४-१३९ उदः= उदः परस्य, भस्य (६-४-१२९) अचः (६-४-१३८) अत् (६-४-१३४)=अकारस्य स्थाने, ईत्= ईकारादेशो भवति ।

६-४-१४० आतो- आतः+धातोः=आकारान्तधात्वन्तस्य (आकारान्तो यो धातुस्तदन्तस्य) भस्य (६-४-१२९)=भसंज्ञकस्य, अङ्गस्य (६-४-१) लोपः (६-४-१३४) । १-१-५१ अलो...इत्याकारस्यैव लोपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१४१ मन्त्रेष्वाङ्यादेरात्मनः ॥

त्मना देवेषु। मन्त्रेष्वित्युक्तेर्नेह- आत्मना कृतम्।
(आङोऽन्यत्राऽपि दृश्यते)
त्मन्या समञ्जत।

६-४-१४२ ति विंशतेर्डिति ॥ १४३

विंशकः। विंशं शतम्। विंशः। एकविंशः। आसन्नविंशाः।

६-४-१४३ टेः ॥१४५

कतरत्। हे कतरत्। कतमत्। हे कतमत्।

६-४-१४४ नस्तद्धिते ॥१४९

उपराजम्। औडुलोमिः।
(नान्तस्य टिलोपे सब्रह्मचारि- पीठसर्पि- कलापि- कुथुमि- तैतिलि- जाजलि- लाङ्गलि- शिलालि- शिखण्डि-सूकरसद्म-सुपर्वणामुपसंख्यानम्)

सब्रह्मचारिण इमे=साब्रह्मचाराः। इत्यादि।
(अश्मनो विकार उपसंख्यानम्)
अश्मनो विकार आश्मः। आश्मनो ऽन्यः।
(चर्मणः कोश उपसंख्यानम्)
चार्मः कोशः। चार्मणोऽन्यः
(शुनः संकोच उपसंख्यानम्)
शौवः संकोचः। शौवनोऽन्यः।
(अव्ययानां भानामुपसंख्यानम्)
सायंप्रातिकः। अनित्योऽयमव्ययानां टिलोपः। बहिषष्टिलोपविधानसामर्थ्यात्। तेन आरातीयः। शाश्वतम् इत्यादिसिद्धिः।

६-४-१४५ अह्नष्टखोरेव ॥

द्वयोरह्नोः समाहारः=द्व्यहः।
अहीनः क्रतुः। टखयोरेवेति नियमान्नेह- आह्निकम्।

६-४-१४१ **मन्त्रे**=मन्त्रविषयके प्रयोगे, आङि=टायाम् (आङिति टासंज्ञा प्राचाम्) आत्मनः=आत्मन् शब्दस्य, आदेः=आदिवर्णस्य (आकारस्य) लोपः (६-४-१३४)। **आङो-त्मन्या** इति सप्तम्यन्तम्। ७-१-३९ सुपां...इति ङेः 'या' इत्यादेशः।

६-४-१४२ **ति विं-** भस्य (६-४-१२९) विंशतेः=विंशतिशब्दघटकस्य, ति=तिशब्दस्य (सूत्रे ति इति लुप्तषष्ठ्यन्तं बोध्यम्) लोपः (६-४-१३४) डिति=डित्प्रत्यये परे। उदाहरणेषु, आद्ये- द्वि. ५-१-२४ डुवुँन्न... इति ड्वुँन्। द्वितीये-५-२-४६ शंद...इति डः। तृतीयचतुर्थयोः-५-२-४८ तस्य...इति डट्। पञ्चमे-२-२-२५ संख्य....इति समासः। ५-४-७३ बहु....इति डच्।

६-४-१४३ **टेः**- भस्य (६-४-१२९) अङ्गस्य (६-४-१) टेः = टिसंज्ञकभागस्य, लोपः (६-४-१-३४) डिति (६-१-९८)। उदाहरणेषु ७-१-२५ अद्ड्... इत्यद्डादेशः, टिलोपात् ६-१-९८ प्रथ...इति द्वितीयचतुर्थयोः ६-१-६७ एङ्ह्र...इति च न प्रवर्तेते।

६-४-१४४ **नस्त**-५-४-१०८ अनश्च-सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र श्यामपाटीप्रयोगो

यथा- (क) (ख) (ग) (घ)
६-४-१ अङ्गस्य ६-४-१२०. भस्य ६-४-१३४ अत् लोपः अनः ॥ ६-४-१४३ टेः

६-४-१४४ **नः** (ख)(क)(घ)(ग) तद्धिते ॥ इति। नः= नकारान्तस्य (१-१-७१ येन.... इति तदन्तविधिः) (ख)=भस्य, (क)= अङ्गस्य, (घ)= टेः, (ग)= लोपः, तद्धिते= तद्धिते परे। इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा उपराज इति श्यामपाट्यां लिखित्वाऽग्रिमप्रक्रियाम् अधिवनम् इत्यत्रेवच्छात्रैः साध्यमानां शिक्षकः शृणुयात्। उपराजम् इति। (**औडुलोमिः**-उडुलोमन् शब्दात् ४-१-०.६ वाह्वा...इतीञ्) अथ ५-४-१००. नपुंसकादन्य....सूत्रमुपदिशेत्।

नान्तस्य=नकारान्तस्य, भस्य (६-४-१२०.) तद्धिते (६-४-१४४) टिलोपे= टिलोपे कर्तव्ये, सब्रह्मचारिन् प्रभृतीनामुपसंख्यानं कर्तव्यम्। इन्नन्तानाम् ६-४-१६४ इन.... इत्यनेन, अन्नन्तानाम् ६-४-१६७ अन्- इत्यनेन प्रकृतिभावे प्राप्ते पुनर्विधिः।

अव्य-सायंप्रातिकः ४-३-११ काला इति ठञ्।

६-४-१४५ **अहनः**-अहन्शब्दस्य, टेः (६-४-१४३) टखोः+एव=ट-ख- प्रत्यययोः परयोरेव, लोपः (६-४-१३४)। **द्व्यहः** २-१-५१ तद्धि....इति समासः। ५-४-०.१ राजा....इति टच्। **अहीनः** ४-२-३७ नस्य....सूत्रस्थेन अह्नः खः ....इति वार्तिकेन खः।
आह्निकम् ५-१-७८ तेन...इति ठञ्। ६-४-१३४ अल्लो....इत्यल्लोपः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१४६ ओर्गुणः ॥ १४७

वारतन्तवम् । औपगवः । ओरोदिति वक्तव्ये गुणवचनं संज्ञापूर्वको विधिरनित्य इति ज्ञापनार्थम् । तेन स्वायंभुव इत्यादि सिद्धम् ।

६-४-१४७ ढे लोपोऽकद्र्वाः ॥१५६

कामण्डलेयः । अकद्र्वा इत्युक्तेर्नेह-काद्रवेयः ।

६-४-१४८ यस्येति च ॥१५०

सखी । कुरुचरी । आत्रेयः । दाशरथिः ।

(औङः श्यां प्रतिषेधो वक्तव्यः)

फले । दधिनी ।

६-४-१४९ सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ॥१५२,१५०

(सूर्यागस्त्ययोश्छे च ङ्यां च)

सौरीयः । सूरी । आगस्तीयः । आगस्ती ।

(तिष्यपुष्ययोर्नक्षत्राणि)

तैषम् । पौषम् ।

(मत्स्यस्य ङ्याम्)

मत्सी ।

६-४-१४६ ओर्गु-६-४-१४८ यस्येति च- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । ओः= उवर्णान्तस्य (१-१-७१ येन...इति तदन्तविधिः) भस्य (६-४-१२९) अङ्गस्य (६-४-१) गुणः=गुणो भवति, तद्धिते (६-४-१४४) । इत्यर्थम्, उपलालनामनुसृत्य तदन्तविधिरहितं भस्य अङ्गस्य ओः=उकारस्य स्थाने गुणः । इत्येव वार्थमुपदिशेत् । लाघवात् प्रक्रियायां दोषाभावाच्च । लक्षणसमन्वयं छात्रैः कारयेत् । उपगोः+अपत्यम्- उपगु+ङस्+अण्=औपगवः । विष्णोः + इदम्- विष्णु+ङस्+अण्= वैष्णवम् । दृषदः + विकारः- दृषद्+ङस्+अण्=दार्षदः इत्यादि च च्छात्रैः साधयेत् । अथ ४-४-२ तेन दीव्यति...इत्यतः परतः के प्रत्यया भवेयुः ? इति जिज्ञासायामुद्भावितायां ४-४-१ प्राग्वहतेष्ठक्- सूत्रमुपदिशेत् ।

६-४-१४७ ढे लोपो- अकद्र्वाः=कद्रूभिन्नस्य, ओः (६-४-१४६) भस्य (६-४-१२९) लोपः=लोपो भवति, ढे=ढप्रत्यये परे । **कामण्डलेयः** ४-१-१३५ चतु... इति ढञ् । कमण्डलुशब्दश्चतुष्पाज्जातिवाची वर्तते । **काद्रवेयः** ऊङन्तकद्रूशब्दात् ४-१-१२० स्त्रीभ्यो...इति ढक् ।

६-४-१४८ यस्ये- ७-२-११७ तद्धितेष्वचा...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा- (क) (ख) (ग) (घ)

६-४-१ अङ्गस्य ॥ ६-४-१२९ भस्य ॥ ६-४-१४४ नः तद्धिते ॥ ६-४-१४७ ढे लोपः अकद्र्वाः ॥ ६-४-१४८ (ख)(क) यस्य (घ) ईति (ग) च इति । (ख)= भस्य, (क)= अङ्गस्य, यस्य (इ+अ=य, तस्य= यस्य) = इवर्णस्य अवर्णस्य च (घ)= लोपः, ईति= दीर्घेकारे, (ग)=तद्धिते, च परे । (इवर्णावर्णान्तस्य भस्य अङ्गस्य इत्यर्थं तु शिक्षको मनसाऽवदध्यात्) इत्यर्थमुपदिश्यच्छात्रैर्लक्षणसमन्वयं स्वादिकार्यं च कारयेत् । दितेरपत्यं दैत्यः । एवमेव अदितेरपत्यम्= आदित्यः प्रयोगाविमौ छात्रैः साध्यमानौ शिक्षकः शृणुयात् ।

इन्द्रो देवताऽस्य (इन्द्र+सुँ+अण्)= ऐन्द्रः । कोशम् अधीते (कोश+अम्+अण्)= कौशः । वृक्षे भवम् (वृक्ष+ङि+अण्)=वार्क्षम् (फलम्) इत्यादीन्युदाहरणानिच्छात्रैरुच्यमानानि मध्ये मध्ये साहाय्यं ददता शिक्षकेण श्राव्याणि । वरतन्तुना प्रोक्तम् (वरतन्तु+टा+अण्)= वारतन्तवम् शास्त्रम्) अत्र तु शिक्षको वारतन्तु+अ इत्यवस्थायाम्, श्यामपाट्यां तथा लिखित्वा ६-४-१४६ ओर्गु.... सूत्रमुपदिशेत् ।

औङः- उदाहरणयोः ७-१-१९ नपुं...इति शी ।

६-४-१४९ सूर्य-भानाम् (६-४-१२९) सूर्य... मत्स्यानाम्= सूर्यप्रभृतीनाम्, उपधायाः= उपधायां वर्तमानस्य, यः= यकारस्य, लोपः (६-४-१४७) ईति (६-४-१४८) तद्धिते (६-४-१४४) च ।

सूर्या- सौरीयः अणन्त-सौर्यशब्दाद् ४-२-११४ वृद्धा... इतिच्छः । **सूरी** सूर्यस्य स्त्री ४-१-४८ पुंयो...इति ङीष् ।

तिष्य-तैषम् तिष्येण युक्तमहः । **पौषम्** पुष्येण युक्तमहः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१५० हल'स्तद्धितस्य ॥१५२

गार्गी ।

६-४-१५१ आपत्य'स्य च तद्धिते'-नाति ॥ १५२, १५७।

गार्गीयाः । गार्गकम् । आपत्यस्येत्युक्तेर्नेह-साङ्काश्यकः । अनातीत्युक्तेर्नेह-गार्ग्यायणः ।

६-४-१५२ क्यच्व्योश्च ॥

गार्गीयति । गार्गायते । गार्गी भवति ।

६-४-१५३ बिल्वकादिभ्यश्छस्य लुक् ॥

बैल्वकाः ।

६-४-१५४ तुरिष्ठेमेय'स्सु ॥१६३

करिष्ठः । दोहीयसी धेनुः ।

६-४-१५५ टेः ॥

लघिष्ठः । लघिमा । लघीयान् ।

(णाविष्ठवत् प्रातिपदिकस्य कार्यं भवतीति वक्तव्यम्)

एनीमाचष्टे- एतयति । पृथुमाचष्टे-प्रथयति । पटुमाचष्टे-पटयति । स्रग्विणमाचष्टे-स्रजयति । वसुमन्तमाचष्टे वसयति । युवानमाचष्टे-यवयति । प्रियमाचष्टे-प्रापयति ।

६-४-१५० हलः= हलः परस्य, तद्धितस्य, उपधायाः +यः (६-४-१४९) लोपः (६-४-१४७) ईति (६-४-१४८) । अत्र तद्धिते इति तु नानुवर्तते अत एवोत्तरसूत्रे पुनः पठचते 'तद्धिते' इति । **गार्गी** ४-१-१६ यञ...इति ङीप् ।

६-४-१५१ आप- हलः (६-४-१५०) आपत्यस्य=अपत्यार्थे विहितस्य, यः (६-४-१४९) लोपः (६-४-१४७) अनाति= आकारभिन्ने, तद्धिते= तद्धिते परे। आभीयत्वेनाऽप्यल्लोपो नाऽसिद्धः, आरम्भसामर्थ्यादिति तत्त्वबोधिनी । अत एव च स्थानिवद्भावोऽपि न । **गार्गीयाः** । गर्गाणामिमे इति विग्रहे छप्रत्यय विवक्षायां २-४-६४ यञ.... इति प्राप्तलुकः ४-१-८९ गोत्रे...इति प्रतिषेधे गार्ग्यशब्दाद् ४-२-११४ वृद्धा... इति च्छः । **गार्गकम्** गर्गाणां समूह इति विग्रहे पूर्ववद् गार्ग्यशब्दाद् ४-२-३९ गोत्रो....इति वुँञ् । **साङ्काश्यकः** ४-२-८० वुञ्छ.... इति ण्यप्रत्ययेन सिद्धात् साङ्काश्यशब्दाज्जातादौ ४-२-१२१ धन्व.... इति वुँञ् । **गार्ग्यायणः** ४-१-१०१ यञि... इति गार्ग्यशब्दात् फक् ।

६-४-१५२ क्यच्व्योः= क्य च्विँ इत्येतयोः प्रत्यययोः परयोः, हलः (६-४-१५०) आपत्यस्य (६-४-१५१) यः (६-४-१४९) लोपः (६-४-१३४) । **गार्गीयति** ३-१-८ सुँप...इति क्यच् ७-४-३३ क्यचि.... इतीत्वम् । **गार्गायते** ३-१-११ कर्तुः .... इति क्यङ् । ७-४-२५ अकृ....इति दीर्घः । **गार्गी भवति** ५-४-५० कृभ्व...इति च्विँः । ७-४-३२ अस्य....इतीत्वम् । ईकारेण व्यवधानात् पूर्वेण यलोपप्राप्तिर्न ।

६-४-१५३ बिल्वकादिभ्यः=बिल्वकादिभ्यः परस्य, भस्य (६-४-१२९)= भसंज्ञकावयवस्य, छस्य= छप्रत्ययस्य, लुक्= लुग् भवति, तद्धिते (६-४-५१) । बिल्वादयो नडादिषु पठचन्ते । ४-२-९१ नडा... इति कृत- कुँगागमा बिल्वकादयो भवन्ति । छग्रहणं छमात्रस्य लुगर्थम् । अन्यथा सन्नियोगशिष्टन्यायेन कुँकोऽपि निवृत्तिः स्यात् । लोप (६-४-१३४) इत्यनुवर्तमाने लुग् ग्रहणं सर्वलोपार्थम् । **बैल्वकाः** बिल्वकीयशब्दात् ४-३-४३ तत्र... इत्यादिभिः ४-३-८३ प्रागदीव्यतीयोऽण् ।

६-४-१५४ तुरि-इष्ठेमेयस्सु=इष्ठन् इमनिँच् ईयसुँन् इत्येतेषु प्रत्ययेषु परेषु, तुः=तृ (तृनः, तृचश्च) प्रत्ययस्य, लोपः (६-४-१४७) । लुक् (६-४-१५३) तु नानुवर्तते । तदनुवृत्तौ तु दोहीयसी इत्यादौ तृप्रत्यस्य लुकि १-१-६१ प्रत्य...इति प्रत्ययलक्षणेन गुणो न स्यात् १-१-६२ न लु.... इति प्रतिषेधात् । इमनिँज्ग्रहणमुत्तरार्थम् ।

६-४-१५५टेः= टिसंज्ञकभागस्य, लोपः (६-४-१४७) इष्ठेमेयस्सु (६-४-१५४) ।

णावि-इष्ठवत्=इष्ठे यथा प्रातिपदिकस्य पुंवद्भाव- (६-३-३५ तसिँ... सूत्रस्थ- भस्या...इति वार्तिकेन)-रभाव-(६-४-१०१ र ऋ...सूत्रेण) टिलोप-(६-४-१५५ टेः-सूत्रेण)- विन्मतुँब्लोप-(५-३-६५ विन्म...सूत्रेण)-यणादिलोप- (६-४-१५६ स्थूल...इति सूत्रेण) प्रस्थस्फाद्यादेश- (६-४-१५७ प्रिय... इति सूत्रेण) भसंज्ञा- (१-४-१८ यचि...इति सूत्रेण) भवन्ति, तथा णौ= णिप्रत्यये परे ऽपि भवन्ति । **स्रजयति** 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' इति न वृद्धिः । **यवयति** प्रागवन्न वृद्धिः । **प्रापयति** ७-२-११५ अचो... इति वृद्धौ ७-३-३६ अर्ति.... इति पुँक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१५६ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादि परं पूर्वस्य च गुणः ॥

स्थविष्ठः । स्थवीयान् । दविष्ठः । दवीयान् । यविष्ठः । यवीयान् । ह्रसिष्ठः । ह्रसीयान् । क्षेपिष्ठः । क्षेपीयान् । क्षोदिष्ठः क्षोदीयान् । ह्रस्व-क्षिप्रक्षुद्रशब्दाः पृथ्वादिषु पठचन्ते । तेभ्यः ५-१-१२१ पृथ्वा...इति इमनिँच ह्रसिमा । क्षेपिमा । क्षोदिमा ।

६-४-१५७ प्रिय-स्थिर- स्फिरोरु-बहुल-गुरु-वृद्ध-तृप्र-दीर्घ-वृन्दारकाणां प्र-स्थ स्फ-वर्-बंहि-गर्- वर्षि-त्रब्-द्राघि-वृन्दाः ॥

प्रेष्ठः । प्रेयान् । स्थेष्ठः । स्थेयान् । स्फेष्ठः । स्फेयान् । वरिष्ठः । वरीयान् । बंहिष्ठः । बंहीयान् । गरिष्ठः ।गरीयान् । वर्षिष्ठः । वर्षीयान् । त्रपिष्ठः । त्रपीयान् । द्राघिष्ठः । द्राघीयान् । वृन्दिष्ठः । वृन्दीयान् । प्रियोरुबहुलगुरुदीर्घाः पृथ्वादिषु पठचन्ते । तेभ्य इमनिँच (५-१-१२१ पृथ्वा...) प्रेमा । वरिमा । बंहिमा । गरिमा । द्राघिमा ।

६-४-१५८ बहोर्लोपो भू च बहोः ॥१५९

भूमा । भूयान् ।

६-४-१५९ इष्ठस्य यिट् च ॥

भूयिष्ठः ।

६-४-१६० ज्यादादीयसः ॥

ज्यायान् ।

६-४-१६१ र ऋतो हलादेर्लघोः ॥१६२

प्रथिष्ठः । प्रथिमा । प्रथीयान् । अत्र काशिका-परिगणनं कर्तव्यम्-

पृथुं मृदुं भृशं चैव कृशं च दृढमेव च ।
परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत् ॥

इति । तेनेह न- कृतयति ।

६-४-१६२ विभाषर्जोश्छन्दसि ॥

रजिष्ठमेति पन्थानम् । त्वमृजिष्ठः ।

६-४-१५६ स्थूल...द्राणाम्= एतेषाम्, परम्= परतो वर्तमानम्, यणादि=यणादिकभागः, लोपः (६-४-१४७)= लुप्यते, पूर्वस्य=पूर्वभागस्य, इकः (१-१-३) स्थाने, गुणः+च=गुणोऽपि भवति, इष्ठेमेयस्सु (६-४-१५४) ।

६-४-१५७ प्रिय...काणाम्=प्रियप्रभृतीनां स्थाने, प्र...वृन्दाः= प्र, स्थ प्रभृतय आदेशा भवन्ति, इष्ठेमेयस्सु (६-४-१५४) । **प्रेष्ठः** ६-४-१६३ प्रकृ...इति प्रकृतिभावः ।

६-४-१५८ बहोः=बहुशब्दात् परेषाम्, इष्ठेमेयसाम् (६-४-१५४) (१-१-६६ तस्मा...इति बलेन सप्तम्यन्तमनुवर्तमानमिह षष्ठचन्ताय क्लृप्तम्) लोपः=लोपो भवति, (१-१-५३ आदेः इत्यादेर्भवति), वहोः+च=वहुशब्दस्य स्थाने च, भू= भू इत्ययमादेशो भवति ।

६-४-१५९ इष्ठ-वहोः (६-४-८५)=वहुशब्दात् परस्य, इष्ठस्य=इष्ठप्रत्यस्य, लोपः (६-४-१५८) यिट्+च=इष्ठप्रत्ययस्य (१-१-५३ आदेः... इति बलेन इकारलोपात् ष्ठ भागस्य) यिडागमश्च भवति, वहोः+भू च (६-४-१५८) ।

६-४-१६०ज्यात्=ज्यशब्दात् परस्य, ईयसः=ईयसः स्थाने, आत्=आकारादेशो भवति । १-१-५३ आदे... इतीकारस्य भवति । **ज्यायान्** प्रशस्यशब्दादीयसुँनि (५-३-५५) ५-३-६१ ज्य च इति ज्यादेशः । वृद्धशब्दादपि ईयसुँनि ५-३-६२ वृद्ध... इति ज्यादेशः । इत्युभयविधसाधनो ज्यायश्शब्दः ।

६-४-१६१ र ऋ- हलादेः=हल्वर्णादिकस्य, लघोः=लघुसंज्ञकस्य, ऋतः=ह्रस्वस्य ऋकारस्य स्थाने, रः=र आदेशो भवति, इष्ठेमेयस्सु (६-४-१५४) । **परिपूर्व वृढम्**= परिवृढम् । **कृतयति** परिगणनाऽभावे ६-४-१५५ टेः- सूत्रस्थ-णावि....इनीष्ठवदित्यतिदेशात् स्यादेवाऽत्र रत्वम् ।

६-४-६२ विभा-विभाषा+ऋजोरितिच्छेदः । ऋजोः-ऋजुशब्दस्य, ऋतः (६-४-१६१) विभाषा=वा, रः (६-४-१६१) इष्ठेमयस्सु (६-४-१५४) छन्दसि=वेदे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-४-१६३ प्रकृत्यैकाच् ॥१६९

प्रेष्ठः । प्रेमा । प्रेयान् ।

(प्रकृत्या ऽके राजन्य-मनुष्य-युवानः)

राजन्यकम् । मानुष्यकम् । यौवनिका ।

६-४-१६४ इनण्यनपत्ये ॥१६६,१७३

सांराविणम् । अणीत्युक्तेरिह टिलोप एव- दण्डिनां समूहो दाण्डम् । अनपत्ये इत्युक्तेरिह टिलोपः-मेधाविनोऽपत्यं मैधावः ।

६-४-१६५ गाथि-विदथि-केशि-गणि-पणिनश्च ॥

गाथिनोऽपत्यं गाथिनः । वैदथिनः । कैशिनः । गाणिनः । पाणिनः ।

६-४-१६६ संयोगादिश्च ॥

वज्रिणोऽपत्यं वाज्रिणः ।

६-४-१६७ अन् ॥१७०

राजनः ।

६-४-१६८ ये चाऽभावकर्मणोः ॥

राजन्यः । सामन्यः ।

अभावकर्मणोरित्युक्तेर्नेह- राज्यम् ।

६-४-१६९ आत्माध्वानौ खे ॥

आत्मनीनः । अध्वनीनः ।

६-४-१७० न मपूर्वोऽपत्येऽवर्मणः ॥

भद्रसाम्नो ऽपत्यं भाद्रसामः । मपूर्व इत्युक्तेर्नेह निषेधः- सुत्वनोऽपत्यं सौत्वनः । अपत्ये इत्युक्तेर्नेह निषेधः- चर्मणा परिवृतो रथः= चार्मणः । अवर्मण इत्युक्तेर्नेह प्रतिषेधः- चक्रवर्मणोऽपत्यं चाक्रवर्मणः ।

(हितनाम्नो वा)

हितनाम्नोऽपत्यं हैतनामः, हैतनामनः ।

६-४-१७१ ब्राह्मोऽजातौ ॥

योगोऽयं विभज्यते-

प्र.६-४-१७१ ब्राह्मः ।

ब्राह्ममस्त्रम् । ब्राह्मं हविः ।

६-४-१६३ प्रकृ-एकाच्=एकाच्प्रकृतिः, प्रकृत्या=स्वरूपेणावतिष्ठते, इष्ठेमेयस्सु (६-४-१५४) । ६-४-१४८ यस्ये....इति ६-४-१५५ टेः, इति च लोपे प्राप्ते ।

प्रकृ-राजन्यकम् ४-१-१३७ राज...इति निष्पन्नाद् राजन्यशब्दाद् ४-२-३९ गोत्रो.... इति वुँञ् । ६-४-१५१ आप.... इति प्राप्तो यलोपः प्रकृत्याऽवतिष्ठते । **मानुष्यकम्** ४-१-१६१ मनो...इति निष्पन्नमनुष्यशब्दाद् वुँञ् । शेषं प्रागवत् । **यौवनिका** ५-१-१३२ द्वन्द्व...इति वुँञ् । ६-४-१४४ नस्त...इति प्राप्ते प्रकृतिभावः ।

६-४-१६४ **इन्**=इन् इति, अनपत्ये= अपत्यभिन्नेऽर्थे विहिते, अणि=अण्प्रत्यये परे, प्रकृत्या (६-४-१६३) । **सांराविणम्** । ५-४-१५ अणि...सूत्रे द्रष्टव्यम् । **दाण्डम्** ४-२-४४ अनु...इत्यञ् ।

६-४-१६५ **गाथि**.... पणिनः= गाथिन्प्रभृतयः, अणि (६-४-१६४) प्रकृत्या (६-४-१६३) । अपत्यार्थोऽयमारम्भः ।

६-४-१६६ **संयोगादिः**=संयोगादिकः, इन्+अणि (६-४-१६४) प्रकृत्या (६-४-१६३) ।

६-४-१६७ **अन्**=अन् इति, अणि (६-४-१६४) प्रकृत्या (६-४-१६३) ।

राजनः । अजातावपत्येऽण् ।

६-४-१६८ **ये चा**- अभावकर्मणोः= भावकर्मभिन्नेऽर्थे विहिते, ये=यकारादौ, तद्धिते (६-४-१५१) अन् (६-४-१६७) प्रकृत्या (६-४-१६३) । **राजन्यः** ४-१-१३७ राज....इति यत् । **सामन्यः** ४-४-९८ तत्र...इति यत् ।

६-४-१६९ **आत्माध्वानौ**= आत्मन् अध्वन् इत्येतौ, खे=खप्रत्यये परे, प्रकृत्या (६-४-१६३) । **आत्मनीनः** ५-१-९ आत्म... इति खः । **अध्वनीनः** ५-२-१६ अध्व....इति खः ।

६-४-१७० **न म**-अवर्मणः=वर्मन्शब्दं वर्जयित्वा, मपूर्वः=मकारपूर्वकः, अन् (६-४-१६७) अणि (६-४-१६४) न+ (प्रकृत्या ६-४-१६३)=स्वरूपेण नाऽवतिष्ठते । **चार्मणः** ४-२-१० परि...इत्यण् ।

६-४-१७१ **ब्राह्मः**= अनपत्येऽणि ब्रह्मन् शब्दस्य टिलोपो निपात्यते । यद्यपत्येऽणि निपात्येत, तदा निपातनं व्यर्थं स्यात्, ६-४-१७० न म.... इति प्रकृतिभावप्रतिषेधाट्टिलोपेनैव सिद्धेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वि. ६-४-१७१ अजातौ ॥

ब्रह्मणो ऽपत्यं ब्राह्मणः । जातावित्युक्तेरिह टिलोप एव -ब्राह्मो नारदः ।

६-४-१७२ कार्मस्ताच्छील्ये ॥

कार्मः । ६-४-१४४ नस्त...इत्येव सिद्धे "ताच्छीलिके णेऽण्कृतानि भवन्ति" इति ज्ञापनार्थमिदम् । तेन तपः शीलमस्याः- तापसी, इत्यादौ ङीप् सिध्यति । ताच्छील्ये इत्युक्तेर्नेह-दण्डः प्रहरणमस्यां क्रीडायां दाण्डा ।

६-४-१७३ औक्षमनपत्ये ॥

औक्षं पदम् । अनपत्ये इत्युक्तेर्नेह- उक्ष्णोऽपत्यम्= औक्ष्णः ।

६-४-१७४ दाण्डिनायन-हास्तिनाय-नाथर्वणिक-जैह्माशिनेय-वासिनायनि-भ्रौणहत्य- धैवत्य-सारवैक्ष्वाक-मैत्रेय-हिरण्मयानि ॥

दाण्डिनायनः । हास्तिनायनः । आथर्वणिकः । जैह्माशिनेयः । वासिनायनिः । भ्रौणहत्यम् । धैवत्यम् । सारवमुदकम् । ऐक्ष्वाकः । मैत्रेयः । हिरण्मयम् ।

६-४-१७५ ऋत्व्य-वास्त्व्य-वास्त्व-माध्वी-हिरण्ययानि च्छन्दसि ॥

ऋत्व्यम् । वास्त्व्यम् । वास्त्वम् ।माध्वीर्नः सन्त्वोषधीः । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ।

इति षष्ठाऽध्याये
चतुर्थः पादः

इति षष्ठोऽध्यायः

द्वि. ६-४-१७१ अ जा- अपत्ये (६-४-१७०) अणि (६-४-१६४) अ=ब्रह्मणष्टिलोपो न भवति, जातौ । सूत्रे नञो जात्या सह सम्बन्धाऽभावेऽपि सौत्रत्वात् समासः ।

६-४-१७२ कार्म-ताच्छील्ये=ताच्छीलिके णे, कार्मः=कर्मन्शब्दस्य टिलोपो निपात्यते । **कार्मः** ४-४-६२ छत्रा...इति णः । **ज्ञापनार्थम्** ६-४-१६७ अन्- इति प्रकृतिभावाऽभावः स्वांशे चारितार्थ्यम् । **तापसी** णः प्राग्वत् । **ङीप्** ४-१-१५ टिड्ढा... इति सूत्रेण ।

६-४-१७३ औक्ष-अनपत्ये=अपत्यभिन्नेऽर्थे विहिते, अणि (६-४-१६४) औक्षम्=उक्षन्शब्दस्य टिलोपो निपात्यते ।

औक्ष्णः ६-४-१३५ षपू...इत्यल्लोपः

६-४-१७४ दाण्डि... यानि- एतानि निपात्यन्ते । तत्र, आद्येषु पञ्चसु प्रकृतिभावः, भ्रूणहन् धीवन् शब्दयोः ष्यञि तकारादेशः, 'सरयू' घटक 'यू' इत्यस्य वकारोऽणि, इक्ष्वाकुशब्दादञि अणि च उकारलोपः, मित्रयुघटकस्य यु इत्यस्य ढे लोपः, हिरण्य- घटकस्य य इत्यस्य मयटि लोपः ।

दाण्डिनायनः ४-१-९९ नडा...इति फक् । एवं हास्तिनायन इत्यत्रापि । **आथर्वणिकः** ४-२-६३ वस... सूत्रे द्रष्टव्यम् । **जैह्माशिनेयः** जिह्माशिन् शब्दात् ४-१-१२३ शुभ्रा... इति ढक् । **वासिनायनिः** वासिन् शब्दात् ४-१-१६० प्राचा...इति फिन् । **सारवम्** सरय्वां भवम् । **ऐक्ष्वाकः** इक्ष्वाकोरपत्यमिति विग्रहे ४-१-१६६ जन..इत्यञ् । इक्ष्वाकुषु जनपदेषु भव इति विग्रहे ४-२-१३२ कोप ...इत्यण् । **मैत्रेयः** ४-१-१३६ गृष्टया...इति ढक् । **हिरण्मयम्** ४-३-१४१ मय...इति मयट् ।

६-४-१७५ ऋत्व्य...यानि-एतानि निपात्यन्ते । तत्र, ऋतुवास्तुशब्दयोर्यति, वस्तुशब्दस्याण्युकारस्य मधुशब्दस्याणि स्त्रियामुकारस्य यणादेशः । हिरण्यशब्दाद् विहितस्य मयटो 'म' शब्दस्य लोपः, छन्दसि= वेदे । **ऋत्व्यम्** ४-४-११० भवे...इति यत् । एवं वास्त्व्यमित्यत्रापि । **वास्त्वम्** ४-३-१२० तस्ये.... इत्यण् । एवं **माध्वी** इत्यत्रापि मधु शब्दात् प्राग्वदणि स्त्रियां ४-१-१५ टिड्ढा...इति ङीप् । **हिरण्ययेन** ५-४-२१ तत्प्र...इति मयट् । ४-३-१४१ मय...इति तु नेह प्रवर्तते । तस्य भाषायां प्रवृत्तेः प्रकृते च च्छन्दसि निपातनात् ।

इति षष्ठाध्याये
चतुर्थः पादः ।

इति षष्ठोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ सप्तमोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ नमः श्रीजगदम्बायै ॥

अथ सप्तमाऽध्याये

प्रथम : पादः

७-१-१ युँवोँरनाकौ ॥

पठनम् । नन्दनः । पाठकः । वासुदेवकः।	अनुनासिक-यण्- घटितयोर्ग्रहणान्नेह-ऊर्णायुः ।

७-१-१ **युँवोँ**- ३-४-६७ कर्तरि.... सूत्रानन्तरं सूत्रमिदं पाठ्यम् (युँवोँरिति समाहारद्वन्द्व इतरेतरयोगद्वन्द्वो वा । आद्ये आगमशास्त्रस्याऽ नित्यत्वाद् नुँमभावः । द्वितीये सौत्रत्वाद् वकारलोपः । समाहारद्वन्द्वेऽपि लिङ्गस्याऽ शिष्यत्वात् पुंलिङ्गनिर्देशो वा युँ वुँ इति अनुनासिक- यण्घटितौ **गृह्येते** । **पठनम्** ३-३-११५ ल्युँट् च- इति ल्युँट् । **नन्दनः** । ३-१-१३४ नन्दि....इति ल्युँ । पाठकः ३-१-१३३ ण्वुँल्तृचौ..... इति ण्वुँल् । **वासुदेवकः** ४-३-९८ वासु .... इति वुँन् । **ऊर्णायुः** ५-२-१२३ ऊर्णा....इति युस् ।) एतत् ( ) कोष्ठान्तर्गतो विषयः केवलं शिक्षकेण मनसाऽ वधेयो न तु च्छात्रेभ्य उपदेश्यः । अथाऽग्रे छात्रेभ्य उपदेश्यम्-युँवोँः= युँ वुँ इत्येतयोः स्थाने, अनाकौ= अन अक इत्येतौ आदेशौ भवतः । इत्यर्थमुपदिश्य यथासंख्यं छात्रैरेव साधयित्वा पठ्+ अक इति श्यामपाट्यां लिखित्वा ७-२-११६ अत.......इति सूत्रमुद्बोध्य लक्षणसमन्वयं छात्रैः कारयित्वा पाठ्+ अक= पाठक इति श्यामपाट्यां लिखित्वा तस्य कृदन्तत्वेन १-२-४६ कृत्त..... सूत्रेण प्रातिपदिकसंज्ञायां ४-१-२ स्वौज.....सूत्रेण स्वाद्युत्पत्तौ पाठकः । पाठकौ । पाठकाः । पाठकम् । पाठकौ । पाठकान् । इत्यादीनि रूपाणि १-२-४६ कृत्त..... सूत्रादारभ्य ६-१-६७ एङ्ह्र ....सूत्रपर्यन्तं दर्शितया रीत्या छात्रैः साधयेत् ।

अथाऽत्र शिक्षकोऽ धोनिर्दिष्टरूपेणच्छात्रानुपदिशेत् । यथा- वत्साः ? ३-४-८० थासः से–सूत्रे उपदिष्टं यत् तिङोऽर्थो यदा कर्ताऽस्ति तदा कर्तृपदानि प्रथमान्तानि । तिङो ऽर्थो यदा कर्माऽस्ति तदा कर्मपदानि प्रथमान्तानि सन्ति । अतस्तिङ् यमर्थं (कर्तारं कर्म वा) बोधयति; तद्वाचकानि पदानि प्रथमान्तानि भवन्ति, इति स्फुटं प्रतीयते, इति । वत्साः ? तदानीं तिङन्त-प्रक्रिया- शिक्षणाऽवसर आसीत्; तेन लाघवेन ज्ञानाय तिङ एवाऽर्थविषये उक्तम् । वस्तुतस्तु यस्य कस्यापि प्रत्ययस्याऽर्थो यदा कर्ता भवति; तदा कर्तृपदानि प्रथमान्तानि भवन्ति । इत्युपदिश्य प्रकृते पाठक इत्यत्र ण्वुँल् (अक) प्रत्ययस्याऽर्थः कर्ता वर्तते । अतः 'श्यामः पठति' इत्यत्रेव "श्यामः पाठकः" इत्यत्रापि 'श्यामः' इति कर्तृपदं प्रथमान्तं भवति ।

सावधानम् ! वत्साः ? ३-४-८० थासःसे–सूत्रे एवं तिङ्क्षु कर्तृवाचकेषु कर्मणो ऽ नुक्तत्वेन कर्मपदानि द्वितीयान्तानि प्रदर्शितानि-'छात्राः कोशं पठन्ति' इत्यादीनि । ततश्च अनुक्ते कर्मणि द्वितीया विभक्तिर्भवतीत्यर्थकं २-३-२ कर्म....सूत्रमुपदिष्टम् । अतो यथा- 'श्यामः कोशम् पठति' इत्यत्र तिङा कर्मणो ऽनुक्तत्वेन कोशम् इति द्वितीयाविभक्त्यन्तम् । तथैव 'पाठकः' इत्यत्र ण्वुँल् (अक) प्रत्ययेन कर्मणो ऽनुक्तत्वात् कोशम् इति द्वितीयान्त- कर्मपद- घटितं ' श्यामः कोशं पाठकः' 'कोशम् पाठकः श्यामः' इत्यादीनि वाक्यान्यशुद्धानि भवन्ति सर्वथा । यतः कृत्प्रत्ययेन कर्मण्यनुक्ते २-३-२ कर्म.... सूत्रं बाधित्वा २-३-६५ कर्तृ....सूत्रेण षष्ठी विभक्तिर्भवति । तथा च 'श्यामः कोशस्य पाठकः' 'कोशस्य पाठकः श्यामः' 'व्याकरणस्य पाठकश्छात्रः' इत्यादीनि षष्ठ्यन्त- कर्मपद- घटितानि वाक्यान्येव साधूनि भवन्ति । इति बोधनपुरस्सरं २-३-६५ कर्तृकर्मणोः......सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-२ आयनेयीनीयियः फढखच्छघां प्रत्यया'दीनाम् ॥ ५

नाडायनः । वैनतेयः । कुलीनः । वत्सीयम् । राष्ट्रियः । प्रत्ययग्रहणान्नेह-फक्कति । ढौकते । खनति । छिनत्ति । घूर्णते । आदिग्रहणान्नेह-जानुदघ्नम् ।

७-१-३ झो'ऽन्तः ॥ ७

पठन्ति । अदन्ति ।

७-१-२ आय-५-१-५ तस्मै हितम्- सूत्रानन्तरं सूत्रमिदं पाठचम् । प्रत्ययादीनाम् =प्रत्ययस्यादौ वर्तमानानाम्, फ..... घाम्= फ्, ढ्, ख्, छ्, घ्, इत्येतेषां वर्णानां स्थाने, आय... यियः= आयन्, एय्, ईन्, ईय्, इय्, इत्येते आदेशा भवन्ति । इत्यर्थमुपदिश्य, फकारादीनां व्यञ्जनानामेव स्थाने आदेशा भवन्ति, अकारस्तूच्चारणार्थ उपदिष्टः सूत्रे, इति बोधयित्वा लक्षणसमन्वयमग्रिमप्रक्रियां च च्छात्रैः साधयेत् । **वत्सीयं** दुग्धम् । (**नाडायनः**४-१-९ नडा.... इति फक् । **वैनतेयः** ४-१-१२० स्त्रीभ्यो....इति ढक् । **कुलीनः** ४-१-१३९ कुला.... इति खः ।

राष्ट्रियः ४-२-९३ राष्ट्रा.... इति घः ।) एतत् ( ) कोष्ठान्तर्गतं छात्रान्नोपदिशेत् । अथाग्रेच्छात्रानुपदिशेत्-अथ-"शङ्कवे हितम्= 'शङ्कवे (शङ्कु+ङे) यत्" इति श्यामपाटचां लिखित्वा छात्रैः पूर्ववत्प्रक्रियायां साध्यमानायां 'शङ्कु+य' इति श्यामपाटचां लिखित्वा ६-४-१४६ ओर्गुणः- सूत्रमुद्बोध्य 'शङ्को+य' इति श्यामपाटचां लिखित्वा ६-१-७६ वान्तो यि...... सूत्रमुपदिशेत् ।

७-१-३ झोऽन्तः- ३-१-६८ कर्तरि....सूत्रानन्तरं सूत्रमिदं पाठचम् । (एतत्कोष्ठान्तर्गतं शिक्षकेणाऽवधेयम्, न तु च्छात्रेभ्य उपदेश्यम्- अत्र सूत्रे पूर्वसूत्रात् प्रत्यय इत्येवाऽनुवर्तते; आदि इति तु नाऽनुवर्तते । गृह्यान्तै इत्यादौ ३-४-९४ लेटो....इत्याटि, अनादित्वेन अन्तादेशाऽनापत्तेः । अतः प्रत्यय (७-१-२)= प्रत्ययावयवस्य, इत्यर्थ उचितस्तथापि वालानामुपलालनामनुसृत्य) झः= झकारस्य स्थाने, अन्तः= अन्त (अनुबन्धलोपे अन्त्) इत्यादेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयक्रमेऽनुबन्धं फालयित्वा पठ+ (अन्त्+इ)= पठ+ अन्ति इति श्यामपाटचां लिखित्वा स-बाध्यबाधनं ६-४-९४ अतो.... सूत्रमुद्बोध्य छात्रैरेव लक्षणसमन्वयं कारयित्वा रूपं साधयेत् । पठन्ति, इति । अत्र पुनश्छात्रा उद्बोधनीयाः । यथा-वत्साः ? लकारस्यार्थे कर्तरि स्वीकृते युष्मद् (त्वम्, युवाम्, यूयम्) अस्मद् (अहम्, आवाम्, वयम्) इति शब्दद्वयं विना ये केऽपि शब्दाः कर्तारं बोधयेयुस्तदा प्रथमपुरुषो भवति । युष्मच्छब्दः कर्तारं बोधयेत्तु मध्यमपुरुषो भवति । अस्मच्छब्दः कर्तारं बोधयेत्तु उत्तमपुरुषो भवतीति ।

सिप्

'त्वम् पठसि' इति वक्तव्ये 'पठसि' इति प्रयोगः कथं सिध्येदिति जिज्ञासायां पठ् धातोः सर्वा प्रक्रिया पठति इत्यत्रेवेति बोधनक्रमे "प्रकृते युष्मच्छब्दः कर्तारं बोधयति । यः शब्दो यमर्थं बोधयति स शब्दस्तत्र वसतीति मन्तव्यमिति तु पूर्वमुक्तमेव । अतः प्रकृते युष्मच्छब्दः कर्तरि वसति । तिङो ऽर्थश्च कर्ता । अतस्तिङ्ङपि कर्तरि वर्तते । फलतः प्रकृते युष्मच्छब्दस्तिङ् च समानाधिकरणौ स्तः । तेनात्र १-४-१०४ युष्म........ सूत्रेण मध्यमपुरुषो (सिप्, थस्, थ,) भवति" इति बोधयितव्याः । अस्मिन् प्रसङ्गे १-४-१०७ शेषे....सूत्रस्य कथं न प्रवृत्तिरितिच्छात्राः परीक्षणीयाः । सत्यावश्यके शेषत्वाऽभावान्न प्रवृत्तिरिति विलम्बेनोपदेश्यम् । अथ प्रकृते कर्ता (त्वम्) एकोऽस्ति । तेन १-१-२२ द्व्येक....सूत्रेण सिप्, भवति । अथाऽनुबन्धं छात्रैः फालयित्वा 'पठ्+सि' इति श्यामपाटचां लिखित्वा 'पठति' इत्यत्रेव शेषप्रक्रियां छात्रैः साधयेत् । पठसि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-४ अ'दभ्यस्तात् ॥ ७ जुह्वति । ददति । जक्षति । जाग्रति । **७-१-५ आत्मनेपदेष्वनतः ॥**	ऐधिषत । सुन्वते । पुनते । आत्मनेपदेष्वित्युक्तेर्नेह- पुनन्ति । अनत इत्युक्तेर्नेह- वर्धन्ते ।

थस्
'युवां पठथः' इति वक्तव्ये अत्र कर्तारौ द्वौ (युवाम्) स्तः । अतः १-४-२२ द्व्येक...सूत्रेण द्विवचनं (थस्) भवति । शेषप्रक्रिया पठसि इत्यत्रेव । रुँत्वविसर्गौ च न विस्मरणीयौ । पठथः ।
थ
'यूयं पठथ' इति वक्तव्ये अत्र कर्तारः बहवः (यूयम्) सन्ति । अतः पूर्वत्रोदाहरणयोः १-४-२२ द्व्येक....सूत्रप्रसङ्गेऽत्र १-४-२१ बहु.....सूत्रेण बहुवचनं (थ) भवति । शेषप्रक्रियां प्राग्वच्छात्रैः साधयेत् । पठथ ।
मिप्
'अहं पठामि' इति वक्तव्ये 'पठामि' इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते-अत्र 'अहम्' कर्ताऽस्ति, अर्थात्, अस्मच्छब्दः कर्तारं बोधयति । अतो ऽस्मच्छब्दः कर्तरि वर्तते, तिङ् च कर्तरि वर्तते । फलतः, अस्मच्छब्दस्तिङ् च समानाधिकरणौ । तेनाऽत्र १-४-१०६ अस्म....सूत्रेणोत्तमपुरुषो (मिप्, वस्, मस्) भवति । तत्र १-४-१०४ युष्म १-४-१०७ शेषे..... सूत्रे कथं न प्रवर्तेते ? इतिच्छात्राः परीक्षणीयाः । सत्यावश्यके समानाधिकरण- युष्मच्छब्दोपपदाभावात् १-४-१०४ युष्म....सूत्रं न प्रवर्तते । शेषत्वाभावाच्च १-४-१०७ शेषे.....सूत्रं न प्रवर्तते, इति विलम्बेनोपदिश्यताम् । उपदेशश्च तथा दीयतां यथा छात्रमस्तिष्के पुरुषविषयकज्ञानं स्फुटं प्रकाशेत । अत्र प्रकृते कर्ता (अहम्) एकोऽस्ति । तेन १-१-२२ द्व्येक... सूत्रेण मिप्, भवति । अग्रिमप्रक्रियां पठसि इत्यत्रेव च्छात्रैः साधयित्वा 'पठ + मि' इति श्यामपाट्यां लिखित्वा ७-३-१०१ अतो दीर्घो........ सूत्रमुपदिशेत् ।
७-१-४ अद- ६-१-५ उभे....सूत्रानन्तरं सूत्रमिदं पाठ्यम् [एतत्कोष्ठान्तर्गतं छात्रेभ्यो नोपदेश्यम् । ददति ६-४-११२ श्नाभ्य....इत्याल्लोपः । जक्षति । जाग्रति ६-१-६ जक्षि....इत्यभ्यस्तसंज्ञा] अत्र श्यामपाटीप्रयोगो यथा-
(क)
७-१-३ झः + अन्तँः ॥ ७-१-४ अत् + अभ्यस्तात् (क) ॥ इति । अभ्यस्तात्= अभ्यस्तसंज्ञकाद् धातोः परस्य, (क)= झः=झकारस्य स्थाने, अत्= अत् इत्यादेशो भवति । अत्र लक्षणसमन्वयं छात्रैः कारयित्वा 'जुहु+अति' इति श्यामपाट्यां लिखित्वा प्राप्तं गुणं छात्रैर्निषेध्य ६-१-७४ इको.... सूत्रेण यण्विषये छात्रा बोधयितव्याः । यथा-यद्यपि प्रकृते सूत्रान्तरेण यण् भवति; तथापि युष्माभिस्तत्सूत्रं न पठितं यथाकथमपि यणेव भवति इति सूत्रान्तरं प्रवर्तते ऽत्रेति संस्कारमात्रं छात्रमस्तिष्के समुत्पाद्यम् । ६-४-८७ हुश्नु....सूत्रं तु साम्प्रतं नोपदेश्यम् । ६-४-७७ अचि....सूत्रार्थोपदेशात् पूर्वं ६-४-८७ हुश्नु....सूत्रोपदेशे तत्सूत्रारम्भ-विशेष- प्रयोजनाऽप्रतीतेः । लोँटि-जुहोतु । जुहुताम् । जुह्वतु । सिपि-'जुहु+हि' इति रूपे छात्रैः साधिते शिक्षकः ६-४-१०१ हुझ....सूत्रमुद्बोधयेत् । जुहुधि । अत्र ३-४-८७ सेर्ह्य...सूत्रे अपिद्ग्रहणस्य फलं बोधयेत् । यथा 'हि' इत्यस्य अपित्करणेन १-२-४ सार्व...सूत्रेण ङिद्वद्भावात् ७-३-८४ सार्व ....सूत्रेण प्राप्तस्य गुणस्य १-१-५ क्ङिति च- सूत्रेण निषेध इति । जुहुतम् । जुहुत । उत्तमपुरुषे- जुहवानि । जुहवाव । जुहवाम । अत्र ३-४-९२ आडु.....सूत्रमुद्बोध्य तत्र पित्करणफलं बोधयेत् । यदि आट् पिन्न स्यात् तदा वस्मसोः पिद्भिन्नत्वेन १-२-४ सार्व....सूत्रेण ङिद्वद्भावात् १-१-५ क्ङिति.....सूत्रेण गुणो निषिध्येतेति । लँङि- अजुहोत् । अजुहुताम् । झि प्रत्यये- अजुहु+ झि इति रूपे छात्रैः साधिते ३-४-१०९ सिँज....सूत्रमुपदिशेत् ।
७-१-५ आत्म-६-४-१०७ लोपश्चा... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-६ शीङो रुँट् ॥ ८

शेरते ।

७-१-७ वेत्तेर्विभाषा ॥

संविद्रते; संविदते । वेत्तेरिति लुका निर्देशान्नेह- विन्दते ।

७-१-८ बहुलं छन्दसि ॥

अदुह्र न च भवति- अदुहत । बहुलवचनादन्यत्रापि भवति-अदृश्रमस्य केतवः ।

७-१-९ अतो भिस ऐस् ॥ १७, ११

फलैः । अत इति तपरकरणान्नेह-मालाभिः ।

७-१-१०बहुलं छन्दसि ॥

नद्यैः ॥ देवेभिः ।

(क) (ख)

७-१-३ झः अन्तः । ७-१-४ अत् अभ्यस्तात् ।

७-१-५ आत्मनेपदेषु अनतः (क)(ख) इति । अनतः= ह्रस्वाकारभिन्नात् परस्य, (क)=झः= झकारस्य स्थाने, (ख)= अत्= अत् इत्यादेशो भवति, आत्मनेपदेषु । इत्यर्थमुपदिश्य लक्षणसमन्वयश्छात्रैः कारयितव्यः । सुन्वते । सुनुषे । सुन्वाथे । सुनुध्वे । सुन्वे । सुन्वहे; सुनुवहे । सुन्महे; सुनुमहे । लोँटि- सुनोतु । सुनुताम् । सुन्वन्तु । सिपि- 'सुनु+हि' इति श्यामपाटचां लिखित्वा ६-४-१०६ उतश्च..... सूत्रमुपदेश्यम् ।

७-१-६ शीङो-शीङः= शीङ् धातोः परस्य, झः (७-१-३)= झादेशस्य, अत् (७-१-४)= अत् इत्यस्य, रुँट्= रुँडागमो भवति । झः, अत्, इत्यनुवर्तेते १-१-६६ तस्मा....इति सूत्रबलेन शीङ इति पञ्चमी 'अत्' इति प्रथमान्तं षष्ठचन्ताय कल्पयति । **शेरते** ७-४-२१ शीङः....इति गुणः ।

७-१-७ वेत्तेः= विद्धातोः परस्य, झः (७-१-३)+ अत् (७-१-४)= झादेशस्यातः, विभाषा= वा, रुँट् (७-१-६) । **संविद्रते** १-३-२९. समो....सूत्रस्थ-विदि....वार्तिकेनात्मनेपदम् । **विन्दते** ३-१-७८ रुधा.... इति श्नम् ।

७-१-८ बहु- झः (७-१-३)+ अत् (७-१-४)= झादेशस्यातः, बहुलम्= वाहुल्येन, रुँट् (७-१-६) छन्दसि= वेदे । **अदुह्र** दुहेर्लङि अदादेशे रुँट् । ७-१-४१ लोप....इति तकारलोपः । ६-१-९४ अतो... इति पररूपम् । **अदृश्रम्**+ लुँङ् । च्लेँरङि वाहुलकाद् ७-४-१६ ऋदृ...इति गुणाऽभावः । व्यत्ययेन प्रथमपुरुषबहुवचनस्थाने मिप् । तस्याऽमादेशे रुँट् पररूपं च ।

७-१-९ अतो- ६-१-९.९. नस्माच्छसो..... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र शिक्षकेणाऽवधेयं यद् यद्यपि अङ्गस्य (६-४-१) इत्यनुवृत्त्या अत इति पञ्चम्यन्तानुरोधेन पञ्चम्यन्ततया विभक्तिविपरिणामेन तदन्तविधिना च 'अदन्तादङ्गात् परस्य' इत्यर्थ उचितस्तथापि शव्दशास्त्रे प्रथमं प्रविविक्षूणां छात्राणां तादृशार्थस्य दुर्वोधतया नितरामुद्वेगकरत्वेन वालानामुपलालनामनुसृत्याऽर्थः शिक्षयितव्य इति । यथा- अतः= अतःपर स्य (नेपाली भाषायाम्- अ देखि पर रहेका, हिन्दीभाषायाम्- असे पर रहे 'ह्रस्व अ देखि' 'ह्रस्व अ से' इत्यपि नोपदेश्यं तथा सत्यपि वोधभारो भवति) भिसः= भिसः स्थाने, ऐस्= ऐस् (आदेशो) भवति इति {द्वितीयावृत्तौ तु यथासूत्राभिप्रेतं पूर्वोक्त एवार्थ उपदेश्यः} अथ लक्षणसमन्वयं छात्रैः कारयित्वा छात्र+ ऐस् इति श्यामपाटचां लिखित्वा सवाध्यवाधनं सन्धिकार्यं ८-२-६६ सस.... सूत्रसमन्वयश्चच्छात्रैः साधयितव्यम् । अथ टा प्रत्यय उपदेश्यः ।

टा

'कलमेन लिखामि' इति वक्तव्ये 'कलमेन' इति कथं सिध्येदिति जिज्ञासायां कलम इति प्रातिपदिकात् ४-१-२ स्वौज....सूत्रेण टा भ्याम् भिस् इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२२ द्व्येक..... १-३-७ चुटू १-३-९. तस्य....सूत्रसमन्वये 'कलम+ आ' इति श्यामपाटचां लिखित्वा सवाध्यवाधनं ७-१-१२ टाङसिँ..... सूत्रं प्रस्तुत्यम् ।

७-१-१० बहुलं - छन्दसि= वेदे, वहुलम्= वाहुल्येन, भिसः + ऐस् (७-१-९) । **नद्यैः** अनतः परस्याऽप्यैस् । **देवेभिः** अतः परस्याऽप्यैस् न । ७-३-१०३ वहु.... इत्येत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-११ नेदमदसोरकोः ॥

एभिः । अमीभिः । अकोरित्युक्तेरिह न प्रतिषेधः- इमकैः । अमुकैः ।

७-१-१२ टा-ङसिँ-ङसामिनात्स्याः ॥

देवेन । देवात् । देवस्य । कलमेन ।

७-१-१३ ङेर्यः ॥ १४

देवाय ।ॐ नमः शिवाय ।

७-१-११ नेद..... ७-२-११३ हलि लोपः- सूत्रानन्तरं सूत्रमिदं पाठचम् । अकोः= ककाररहितयोः, इदमदसोः= इदमदश्शब्दयोः, न= भिसः स्थाने ऐस् न भवति । इत्यर्थमुपदिश्य लक्षणसमन्वये छात्रैः कृते ७-३-१०३ बहु..... सूत्रमुद्बोधनीयम् । लक्षणसमन्वयस्तुच्छात्रैरेव कारयितव्यः । एभिः । ङे ङसिँ ङस् ङि इत्येतेषु प्रकृतिभागे इद इति जाते सर्वशब्दे इव विभक्तिकार्ये छात्रैः साधिते भ्यामीव ७-२-११३ हलि....सूत्रप्रवृत्तौ अस्मै । अस्मात्; अस्माद्, अस्य । अस्मिन् । इति रूपाणि साधयितव्यानि । आमि पूर्ववत् प्रक्रियायाम् अ+ साम्' इति जाते ७-३-१०३ बहु.....८-३-५७ इण्कोः (८-३-५९ आदे....) सूत्रसमन्वयश्छात्रैः कार यितव्यः । एषाम् । इदंशब्दप्रयोगा मुहुर्मुहुः साधयितव्याश्छात्रैः ।

अथ इदंशब्दस्यैव स्त्रीलिङ्ग-प्रक्रियोपदिश्यते

इयं बालिका कस्य पुत्री ? इति वक्तव्ये इदं शब्दात् सुँप्रत्यये कृते ' इदम्+ स्' इति श्यामपाटचां लिखित्वा ७-२-११० यँः सौ-सूत्रं प्रस्तुत्यम्

७-१-१२ टाङ- ७-१-९ अतो भिस.... सूत्रानन्तरं सूत्रमिदं पाठचम् । प्रकृतसूत्रे ७-१-९ अतो....सूत्रात् 'अतः' इत्यनुवर्तते इत्युपदिशता शिक्षकेण अतः परेषाम्,टाङसिँङसाम्= टा ङसिँ ङस् इत्येतेषां स्थाने, इनात्स्याः= इन आत् स्य इत्येते आदेशा भवन्तीत्यर्थ उपदेश्यः । द्वितीयावृत्तौ तु ७-१-९ अतो........ सूत्र-दत्त-निर्देशः पालनीयः ।

टा ङसिँ ङस्

इन आत् स्य

इति रीत्या श्यामपाटचां लिखित्वा लक्षणसमन्वयं छात्रैः कारयित्वा "अस्य स्थाने अयमादेशः, तेन प्रकृते टा (आ) इत्यस्य स्थाने अयमादेशो भवति" इति च्छात्रैरेव निर्णाययितव्यम् । अथ 'कलम+इन' इत्यत्राऽग्रिमप्रक्रियाऽपिच्छात्रैरेव साधयितव्या ।

भ्याम्

'नेत्राभ्यां पश्यामि' इति वक्तव्ये नेत्राभ्याम् इति प्रयोगः कथं सिध्येदित्याकाङ्क्षायां नेत्रप्रातिपदिकात् ४-१-२ स्वौज.....सूत्रेण टा भ्याम् भिस् इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२२ द्वयेक....सूत्रेण नेत्र+भ्याम् इति जाते १-३-३ हल....सूत्रेण प्राप्तिं १-३-४ न वि....सूत्रेण तत्प्रतिषेधं च बोधयित्वा ७-३-१०२ सुँपि च-सूत्रमुपदेश्यम् ।

७-१-१३ ङेर्यः- ७-३-१०२ सुँपि च....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र ७-१-९. अतो... सूत्रस्थम् 'अतः' इति पदं दर्शयता शिक्षकेण अतः परस्य, ङेः= ङे इत्येतस्य स्थाने, यः=य इत्यादेशो भवतीत्यर्थ उपदेश्यः । द्वितीयावृत्तौ तु ७-१-९ अतो..... सूत्रदत्तनिर्देशः पालनीयः । लक्षणसमन्वयस्तु च्छात्रैः कारयितव्यः । अथ 'शिव+य' इति श्यामपाटचां लिखित्वा शिक्षकोऽधोनिर्दिष्टरूपेण बोधयेत् । यथा- वत्साः ? यस्य स्थाने यो भवति स स्थानीव भवति । यथा शिक्षकेण मुक्ते तत्स्थाने यः कोऽपि नियुज्यते सोऽपि शिक्षक इत्युच्यते। हलिना मुक्ते तत्स्थाने यः को ऽपि नियुज्यते स हलीत्युच्यते । तथैव 'ङे' सुँप् प्रत्ययोऽस्ति, अतस्तत्स्थाने विहितो य आदेशोऽपि सुँप् प्रत्यय इव व्यवह्रियते, इति । १-१-५५ स्थानि.... सूत्रं न प्रस्तुवीयात्; तत्सूत्रप्रस्तुतौ अलनल्विषयकबोधभारापत्तिः । अथ ७-३-१०२ सुँपि... सूत्र- समन्वयाय च्छात्राः प्रवर्तयितव्याः । स्वयं तु धीरं श्राव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-१४ सर्वनाम्नः स्मै ॥ १७

सर्वस्मै ।

७-१-१५ ङसिँङ्योः स्मात्स्मिनौ ॥ १६

सर्वस्मात् । सर्वस्मिन् ।

७-१-१६ पूर्वादिभ्यो नवभ्यो वा ॥

पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे ।

७-१-१७ जसः शी ॥१९

सर्वे ।

भ्याम्-'गौरी शङ्कराभ्यां नमः' इति वक्तव्ये 'गौरीशङ्करप्रातिपदिकात् ४-१-२ स्वौज..... सूत्रेण ङे भ्याम् भ्यस् इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२२ द्व्येक.... सूत्रेण भ्याम् प्रत्यये 'गौरीशङ्कर +भ्याम्' इति जाते शेषप्रक्रिया तृतीया-द्विवचने इवेत्युपदिशता शिक्षकेण तैरुच्यमाना प्रक्रिया श्रोतव्या ।

भ्यस्

'रामश्यामविष्णुमित्रेभ्यः पुस्तकानि ददामि' इति वक्तव्ये रामश्यामविष्णुमित्रप्रातिपदिकात् ४-१-२ स्वौज.... सूत्रेण ङे भ्याम् भ्यस् इत्येतेषु प्रत्ययेषु प्राप्तेषु १-४-२१ बहु....सूत्रं प्रवर्त्य रामश्यामविष्णुमित्र+ भ्यस् इति श्यामपाट्यां लिखित्वा शिक्षकः ७-३-१०२ सुँपि....सूत्रसमन्वयं छात्रैः कारयित्वा ७-३-१०३ बहुवचने.... सूत्रमुपस्थापयेत् ।

७-१-१४ सर्व- ७-१-१७ जशःशी- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगः ७-१-१७ जसः... इत्यत्रेव कार्यः । अतः (७-१-९) = अदन्तादङ्गात् परस्य, सर्वनाम्नः= सर्वनाम्नो विहितस्य, ङेः (७-१-१३) =ङे इत्येतस्य स्थाने, स्मै= स्मै इत्यादेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयायच्छात्रा आदेश्याः । सर्वस्मै । अथ पञ्चम्येकवचने पूर्ववत् संज्ञां कारयित्वा ङसिँप्रत्यये कृते सर्व+ अस् इति श्यामपाट्यां लिखित्वा ७-१-१२ टाङ....सूत्रसमन्वयावधिच्छात्रैः साधयित्वा बाधयित्वा च ७-१-१५ ङसिँङ्योः.....सूत्रं प्रस्तुत्यम् ।

७-१-१५ ङसिँ- ७-१-१४ सर्वनाम्नः स्मै- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)	(ख)
७-१-९ अतो भिस ऐस् ॥	७-१-१४ सर्वनाम्नः स्मै ॥

७-१-१५ (क) (ख) ङसिँङ्योः स्मात्स्मिनौ ॥ इति । (क)= अतः,= अदन्तादङ्गात् परयोः । (ख)= सर्वनाम्नः, = सर्वनाम्नो विहितयोः, ङसिँङ्योः= ङसिँ ङि इत्येतयोः स्थाने, स्मात्स्मिनौ= स्मात् स्मिन् इत्येतावादेशौ भवतः । इत्यर्थमुपदिश्य शिक्षको लक्षणसमन्वयक्रमे यथाक्रमं छात्रैरेव प्रतिपादयेत् । अथ सर्वस्मात् इति रूपे सिद्धे ८-२-३९ झलां..... ८-४-५४ वाऽव.....सूत्रोद्बोधनपुरस्सरं रूपद्वयं बोधयेत् । सर्वस्मात्, सर्वस्माद्, इति यथा । ङौ च पूर्ववत् । केवलं क्रमेण आदेशः स्मिन् भवति । सर्वस्मिन्, इति यथा । आमि पूर्ववत् संज्ञां कारयित्वा आम् प्रत्यये कृते 'सर्व+ आम्' इति श्यामपाट्यां लिखित्वा

७-४-५४ ह्रस्व....सूत्रसमन्वयावधिच्छात्रैः साधयित्वा बाधयित्वा (तक्रकौण्डिन्यन्यायः साम्प्रतं नोपस्थाप्यः । वालानामुपलालना ऽनुसर्तव्या) च ७-१-५२ आमि सर्व.... सूत्रं प्रस्तुत्यम् ।

७-१-१६ पूर्वादिभ्यः+ नवभ्यः = पूर्वप्रभृतिभ्यो नवभ्यो विहितयोः, ङसिँङ्योः+ स्मात् स्मिनौ (७-१-१५) वा= विभाषया, भवतः । **७-१-१७ जसः-** १-१-२६ सर्वादीनि.....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)	(ख)
७-१-९ अतो भिस ऐस् ॥	७-१-१४ सर्वनाम्नः स्मै ॥

७-१-१७ (क) (ख) जशः शी ॥ इति । (क)= अतः= अदन्तादङ्गात् परस्य, (ख)= सर्वनाम्नः= सर्वनाम्नो विहितस्य, जसः= जसः स्थाने, शी= शी इत्यादेशो भवति । इत्यर्थ उपदेश्यः । लक्षणसमन्वयं छात्रैः साधयित्वा ७-१-१३ ङेर्यः- सूत्रोक्तं दृष्टान्तमुद्बोध्याऽनुबन्धं फालयित्वा 'सर्व+ई' इति श्यामपाट्यां लिखित्वा कतमः सन्धिः स्यादत्रेतिच्छात्राः परीक्षणीयाः । रूपे सिद्धे ६-१-९८ प्रथ....सूत्रं कथं न प्रवर्तते ? इति च्छात्राः परीक्षणीयाः । उत्तराऽनुपलब्धौ ६-१-१०० नादि.....सूत्रमुद्बोधनीयम् । अथ चतुर्थ्येकवचने- पूर्ववत् संज्ञां कारयित्वा ङे प्रत्यये कृते सर्व+ए' इति श्यामपाट्यां लिखित्वा ७-१-१३ ङे र्यः- सूत्रसमन्वययावधिच्छात्रैः साधयित्वा बाधयित्वा च ७-१-१४ सर्वनाम्नः स्मै- सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-१८ औङ आपः ॥ १९

कन्ये ।

७-१-१९ **नपुंसकाच्च** ॥ २०

फले । दधिनी । मधुनी ।

७-१-२० **जश्शसोः** शिः ॥ २२

फलानि । दधीनि । मधूनि ।

७-१-१८ औङ- ६-१-६६ हल्ङ्याब्भ्यो....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-१-१७ जसः शी ॥ ७-१-१८ औङ (क) आपः ॥ इति । आपः= आपः परस्य (यद्यपि ७-३-११३ याडा.....इत्यत्रैव 'आबन्तादङ्गात् परस्य' इत्यर्थस्तथापि बालानामुपलालनामनुसृत्य 'आपः परस्य' इत्युपदिष्टम् ।) औङः=औकारस्य स्थाने, (औङित्यौकारविभक्तेः संज्ञा प्राचाम्) (क)= शी= शी इत्यादेशो भवति । इत्यर्थ उपदेश्यः । अत्र औङ इति षष्ठचन्तम्' आप इति पञ्चम्यन्तम् इति च औङ् शब्दाद् ङस् प्रत्यये, आप्शब्दाद् ङसिँप्रत्यये च सिध्यत इति पयोमुच्शब्दस्येवेति वर्णनपुरस्सरमुपदेश्यं येन सलीलमर्थबोधो भवेत् । यदि तूपदेशमिमं भारमनुभवेयुश्छात्रास्तदा हलन्तशब्दानामजादिविभक्तिषु रूपसिद्धिप्रक्रियायां छात्रा अप्रवीणा इति समवदधता शिक्षकेण पयोमुच्शब्दस्याऽजादौ शिक्षिता प्रक्रिया पुनरुद्बोधनीया । अथ प्रकृते लक्षणसमन्वयश्छात्रैरेव कारयितव्यः । अथ कन्या+शी इत्यवस्थायां ७-१-१३ ङेर्यः- सूत्रोक्त-दृष्टान्तोद्बोधनद्वारा औकार (प्रत्यय) स्थाने जातः शी, प्रत्यय इव भवतीत्युद्बोध्य सत्यामावश्यकतायां १-३-८, ९ लश..... तस्य..... उद्बोध्य ' कन्या+ ई' इति श्यामपाटचां लिखित्वा ऽग्रिमप्रक्रिया (गुणबाधनं पूर्वसवर्णदीर्घनिषेधः) छात्रैरेव साधनीया । सत्यामावश्यकतायां बाधके निषिद्धे उत्सर्गः प्रवर्तत इति ६-१-१०० नादिचि-सूत्रे प्रस्तुतो दृष्टान्तः शिक्षकेणोद्बोधनीयः । एवं द्वितीया- द्विवचनेऽपि ज्ञेयम् । यथा- शारदनवरात्र- द्वितीयायां भक्ताः कन्ये पूजयन्तीति । जसि अमि चादन्तशब्दवत् । जसि पूर्वसवर्णदीर्घनिषेधेऽपि रूपे विशेषाऽभावात् । कन्याः पुष्पाणि चिन्वन्ति । शसि चाऽदन्तशब्दवत् प्रक्रिया ज्ञेया नत्वं तु न भवति । पुंसीत्युच्यते, तेन स्त्रीलिङ्गे न प्रवर्तत इति पूर्वमुपदिष्टमपि सत्यामावश्यकतायामुद्बोधनीयम् । शारदनवरात्रनवम्यां भक्ताः कन्याः पूजयन्ति, इति यथा । **कन्यया** कन्याशब्दात् पूर्ववट्टाप्रत्यये कृते छात्रैर नुबन्धं फालयित्वा 'कन्या+आ' इति श्यामपाटचां लिखित्वा बाध्यबाधनं छात्रैरेव कारयित्वा ७-३-१०५ आङि.....सूत्रमुपस्थाप्यम् ।

७-१-१९ नपुं-७-१-२३ स्वमोर्नपुंसकात्- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-१-१७ जसः शी ॥ ७-१-१८ औङ आपः ॥

७-१-१९ नपुंसकाच्च (ख) (क) ॥ इति । नपुंसकात् = नपुंसकलिङ्गे वर्तमानादङ्गात् परस्य, (ख)= औङः,= औकारस्य स्थाने (क)= शी= शी इत्यादेशो भवति । इत्यर्थ उपदेश्यः । ७-१-१३ ङेर्य इत्यत्र वर्णितरीत्या स्थानिवद्भावमुद्बोध्य १-३-८ लश....सूत्र- समन्वयं छात्रैः कारयित्वा दधि+ औ=दधि+शी=दधि+ई, मधु+औ= मधु+शी= मधु+ई, इति श्यामपाटचां लिखित्वा ७-१-७३ इकोऽचि.....सूत्रमुपदिदिक्षुः सूत्रार्थ-स्फारणकृते प्रथमं १-१-७१ येन...... सूत्रमुपदिशेत् ।

७-१-२० जश्श-१-१-४६ मिदचोऽन्त्यात्......सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-१-१९ नपुंसकाच्च ॥ ७-१-२० (क) जश्शसोः शिः॥इति । (क)= नपुंसकात्, (७-१-२३ स्वमो .....इत्यत्रैवाऽर्थः) जश्शसोः= जस् शस् इत्येतयोः स्थाने, शिः= शि इत्यादेशो भवति । इत्यर्थं प्रक्रियाञ्चोपदिश्य 'दधिन्+ इ', 'मधुन्+ इ' इति श्यामपाटचां लिखित्वा १-१-४१ शि स.... सूत्रमुद्बोध्य ६-४-८ सर्व....सूत्रोद्बोधनपुरस्सरं समन्वयायच्छात्रा एव प्रवर्तयितव्याः । दधीनि । मधूनि । इति । सावधानम् ! यद्यपि दधिमधुशब्दयो रूपाणि सहैव दर्शितानि । तथापि प्रतिवचनं प्रथमं दधिशब्दस्य ततो मधुशब्दस्य रूपाणि शिक्षयितव्यानि । सहैव शिक्षणे बालानां बुद्धिर्भिद्यत इव । अत्र द्विवचन- बहुवचनयो रूपेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-२१ अष्टाभ्य औश् ॥

अष्टौ । कृताकारनिर्देशान्नेह- अष्ट ।

७-१-२२ षड्भ्यो लुक् ॥ २३

पञ्च । षट् । कति ।

बहुवचननिर्देशेनार्थप्राधान्यसूचनान्नेह- प्रियपञ्चानः । प्रियषषः ।

७-१-२३ स्वमोर्नपुंसकात् ॥ २६

दधि । मधु ।

अन्त्योपान्त्यस्वरौ ह्रस्वदीर्घौ कथं व्यतिगच्छत इति च्छात्राः परीक्षणीयाः । यदिच्छात्रेभ्य उत्तरं नागच्छेत् तदाऽधोनिर्दिष्टरूपेण ते बोधनीयाः । यथा-शृणुत, द्विवचने ७-१-१९ नपुं......सूत्रेण विधीयमानः 'शी' इत्यादेशो दीर्घेकारघटितोऽस्ति । अतोऽनुबन्धमुक्त 'ई' इति दीर्घेकारो ऽ वशिष्यते । अतोऽन्त्यः स्वरो दीर्घो भवति । स च न सर्वनामस्थानम् । १-१-४१ शि स.....सूत्रे 'शि' इति ह्रस्वेकारघटितनिर्देशात्, १-१-४२ सुँड.....सूत्रे अनपुंसकस्येति पर्युदासाच्च । अतः ६-४-८ सर्व......सूत्राऽप्रवृत्त्या उपान्त्यस्वरो ह्रस्व एव तिष्ठति । बहुवचने तु ७-१-२० जश्श..... सूत्रेण 'शि' इति ह्रस्वेकारघटितस्य विधानादनुबन्धमुक्तोऽन्त्यः स्वरो ह्रस्वो भवति । स च १-१-४१ शि स.....सूत्रेण सर्वनामस्थानसंज्ञको भवति । अतः ६-४-८ सर्व.....सूत्रप्रवृत्त्या उपान्त्यो दीर्घः सम्पद्यत इति । ६-४-१२ इन्ह..... सूत्रं तु साम्प्रतं नोपदेश्यम्, बोधभारापत्तेः प्रकृते व्यावर्त्योदाहरणाऽभावेन फला ऽभावाच्च । तृतीयादि-विभक्तौ दधिशब्दस्य विशेषप्रक्रियाऽस्ति । अतः स इदानीं नोपदिश्यत इति वदता शिक्षकेण मधुशब्दस्य रूपाणि च्छात्रैरुच्यमानानि श्रोतव्यानि । ङिद्विभक्तौ गुणः कथं न ? ङौ कथमौत्वं न ? इति यदिच्छात्राः सन्दिह्युस्तदा १-४-२ विप्र.....सूत्रस्थ-वृद्धचौ.... इति वार्तिकमुपदेश्यं नान्यथा । **अथाऽदन्तशब्द उदाहार्यः** । फलशब्दः क्लीबे वर्तत इति बोधयित्वा ततः सुँप्रत्यये कृते फल+स् इति श्यामपाट्यां लिखित्वा ७-१-२३ स्वमोः..... सूत्रं बाधयित्वा ७-१-२४ अतोऽ म्-सूत्रमुपदेश्यम् ।

७-१-२१ अष्टाभ्यः= कृताकारादष्टनः परयोः, जश्शसोः (७-१-२०) औश्=औश् इत्यादेशो भवति । अयमेव कृताकारनिर्देशो जश्शसोर्विषये ऽपि ७-२-८४ अष्ट.....इति सूत्रं प्रवर्तत इति ज्ञापयति । अन्यथा अष्टभ्य इत्येव वदेत् ।

७-१-२२ षड्भ्यो- १-१-२३ ष्णान्ता....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क)

७-१-२० जश्शसोः शिः ॥ ७- १-२२ षड्भ्यो (क) लुक् ॥ इति । षड्भ्यः= षट्संज्ञकशब्देभ्यः परयोः, (क)= जश्शसोः= जसः शसश्च, लुक्= लुग्भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा श्यामपाट्यां पञ्चन् इति शेषयित्वा १-१-६१ प्रत्य..... १-४-१४ सुँप्ति...... ८-२-७ न लो.....सूत्राणि उद्बोधनीयानि । पञ्च । आमि- ७-१-५५ षट्च..... सूत्रं प्रवर्त्य पञ्चन्+ नाम् इति श्यामपाट्यां लिखित्वा ६-४-७ नोप.... सूत्रं प्रस्तुत्यम् ।

७-१-२३ स्वमो-१-४-६ ङिति ह्रस्वश्च-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-१-२२ षड्भ्यो लुक् ॥ ७-१-२३ स्वमोः (क) नपुंसकात् ॥ इति । नपुंसकात्= नपुंसकलिङ्गे वर्तमाना दङ्गात् परयोः (यदिच्छात्राः काठिन्यमनुभवेयुस्तदा 'नपुंसकात् परयोः' इत्येवार्थ उपदेश्यः) स्वमोः= सुँ अम् इत्येतयोः, (क) = लुक् = लुग् भवति । इत्यर्थ उपदेश्यः । अथ शिक्षकेण दधि-मधु- शब्दौ क्लीवे वर्तेते इति च्छात्रा बोधयितव्याः । ततो लक्षणसमन्वयश्छात्रैरेव कारयितव्यः । एवम् अम्यपि दधि+ अम्, मधु+ अम्, इति श्यामपाट्यां लिखित्वा पूर्ववद् रूपसिद्धये लक्षणसमन्वयायच्छात्रा आदेश्याः । दधि खादामि, मधु लेह्मि । इति । प्रथमा-द्वितीया- द्विवचनयोः- दधि+ औ, मधु,+औ, इति श्यामपाट्यां लिखित्वा ७-१-१९ नपुंसकाच्च-सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-२४ अतोऽम् ॥

फलम् । हे फल ।

७-१-२५ अद्ड् डतरादिभ्यः पञ्चभ्यः ॥२६

कतरत् । हे कतरत् । कतमत् । अन्यत् ।

अन्यतरत् । अन्यतमशब्दस्य तु अन्यतममित्येव ।

इतरत् ।

(एकतरात् प्रतिषेधो वक्तव्यः)

एकतरम् ।

७-१-२६ नेतराच्छन्दसि ॥

वार्त्रघ्नमितरम् । लोके तु- इतरत् काष्ठम् ।

७-१-२७ युष्मदस्मद्भ्यां ङसोऽश् ॥ ३३

तव । मम ।

७-१-२८ ङे प्रथमयोरम् ॥

तुभ्यम् । मह्यम् । त्वम् । अहम् । युवाम् ।आवाम् ।

यूयम् । वयम् । त्वाम् । माम् । युवाम् । आवाम् ।

७-१-२४ अतो- ७-१-२० जश्शसोः.....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

६-४-१ अङ्गस्य (अङ्गात्) ॥ ७-१-२३ स्वमोः नपुंसकात् ॥ ७-१-२४ (ग) अतः (क) (ख) अम् ॥ इति । अत्र सूत्रे अत इति पञ्चम्यन्तम् । तेन ६-४-१ 'अङ्गस्य' इति सूत्रं षष्ठचन्तमपि प्रकृतसूत्रेऽ नुवर्तमानं पञ्चम्यन्ताय कल्पत इति जल- केदार-दृष्टान्तोद्बोधनपुरस्सरं बोधयित्वा वाक्यार्थो बोधयितव्यः । यथा-(ग)= नपुंसकात्= नपुंसकलिङ्गे वर्तमानात्, अतः= अदन्तात्, (क)= अङ्गात् परयोः, (ख)= स्वमोः= सुँ अम् इत्येतयोः स्थाने, अम्=अम् आदेशो भवति । इति । लक्षणसमन्वयायच्छात्रा आदेश्याः । अग्रिमप्रक्रियाऽपिच्छात्रैः साधयितव्या । फलम् । एवमम्यपि रूपं प्रक्रिया च बोध्ये । द्विवचने- फले इति रूपं छात्रैः साध्यमानं शिक्षकः शृणुयात् । प्रकृते ६-४-१४८ यस्येति.... सूत्रं नोपदेश्यम् इति पूर्वमुक्तम् । तेन तत्सूत्र- स्थम् औङः.... इति वार्तिकमपि नोपदेश्यं भवतीति प्रक्रियालाघवम् । अथ जश्शसोः फल+अस् इति श्यामपाटचां लिखित्वा ७-१-२० जश्श.....१-१-४१ शि स.....सूत्रसमन्वयं छात्रैः कारयित्वा फल+इ इति श्यामपाटचां लिखित्वा ७-१-७२ नपुंसकस्य......सूत्रं प्रस्तुत्यम् ।

७-१-२५ अद्ड्- नपुंसकात् (७-१-२३)= नपुंसकेभ्यः, डत.... ञ्चभ्यः= डतरादिभ्यः पञ्चभ्यः परयोः, स्वमोः (७-१-२३) अद्ड्= अद्ड् इत्यादेशो भवति । डतर डतमौ प्रत्ययौ । प्रत्ययग्रहणे तदन्तग्रहणम् । डित्करणं ६-४-१४३ टेः इति टिलोपार्थम् । हे **कतरत्** ह्रस्वान्ताङ्गात् परत्वाऽभावात् ६-१-६७ एङ्ह्र..... इति तकारलोपो न ।

७-१-२६ नेत- इतरात्= इतरशब्दात् परयोः, स्वमोः (७-१-२३) अद्ड् (७-१-२५) न=न भवति छन्दसि= वेदे ।

७-१-२७ युष्म-७-२-९६ तव..... सूत्रानन्तरं सूत्रमिदं पाठचम् । युष्मदस्मद्भ्याम्= युष्मदस्मच्छब्दाभ्यां परस्य, ङसः+ ङसः स्थाने, अश्= अश् इत्यादेशो भवति । लक्षणसमन्वयप्रसङ्गे १-३-३,९ हल....तस्य....सूत्रे उद्बोध्य शकारस्य (शइत्यस्य) लोपे, आदेशः 'अ' इत्यवशिष्यते, इति बोधयित्वा 'तवद्+अ,' 'ममद्+अ' इति श्यामपाटचां लिखित्वा ७-२-९० शेषे....६-१-९४ अतो.....सूत्रसमन्वयाय च च्छात्राः प्रवर्तयितव्याः ।

ओसि-**युवयोः । आवयोः ।**

ओस् प्रत्यये कृते सति युष्मद्+ओस्, अस्मद्+ओस्, इति श्यामपाटचां लिखित्वा ७-२-९२ युवा.... ६-१-९४ अतो....सूत्रसमन्वयं छात्रैः कारयित्वा युवद्+ओस्, आवद्+ओस्, इति श्यामपाटचां लिखित्वा ७-२-८९ योऽचि-सूत्रसमन्वयायाऽग्रिमप्रक्रियायै च च्छात्राः प्रवर्तयितव्याः । आमि- **युष्माकम् । अस्माकम् ।** आम्प्रत्यये कृते युष्मद्+आम्, अस्मद्+आम्, इति श्यामपाटचां लिखित्वा ७-१-३३ साम.....सूत्रं प्रस्तुत्यम् ।

७-१-२८ ङे प्र-८-२-३ न मु ने-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र सूत्रार्थोपदेशात् पूर्वमधोनिर्दिष्टरूपेणच्छात्रा बोधयितव्याः । यथा- अयि वत्साः ! अत्र सूत्रे ङे इति पृथक् पदं लुप्त- षष्ठचन्तम् । क्वचित् सूत्रेषु सुँपो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-२९ शसो नँ ॥

युष्मान् अस्मान् ।

७-१-३० भ्यसो भ्यम् ॥ ३१

युष्मभ्यम् । अस्मभ्यम् ।

७-१-३१ पञ्चम्या अत् ॥ ३२

युष्मत् । अस्मत् ।

७-१-३२ एकवचनस्य च ॥

त्वत् ॥ मत् ।

लुग् भवति (इति वदन् स्फुटप्रतिपत्तये शिक्षक: ७-१-३९ सुँपां....सूत्रे तद्घटकं लुक् पदं दर्शयेत् । समन्वयं न कारयेत् । केवलं लुग् भवतीति ज्ञानमपेक्षितम्) इति बोधनीयम् । अथ प्रथमयोरिति च षष्ठचन्तं पृथक् पदम् । वत्सा: ? द्वयोर्वाच्ययोर्द्विवचनं भवति, अत: प्रथमयोरिति द्विवचनान्तदर्शनेन द्वयो: प्रथमयो:= द्वयो: प्रथमाविभक्त्योरित्यर्थ: प्रतीयते । न हि द्वे प्रथमाविभक्ती संभवत: । तस्मात् एका प्रथमा=प्रथमा विभक्ति: । अन्या प्रथमा=द्वितीया विभक्तिरिति ज्ञेयम् । (उपदेशोऽयं सूत्रार्थ- बोधे सारल्यं स्यादित्युपयोज्य: । यदि तु उपदेशमिममेव भारमनुभवेयुश्छात्रास्तदा नोपदेशो ऽ यमुचित:) इति । अथ सूत्रार्थोपदेशाय श्यामपाटीप्रयोग: । यथा-

(क)

७-१-२७ युष्मदस्मद्भ्यां ङसो ऽश् ॥ ७-१२८ (क) ङे प्रथमयोरम् ॥ इति । (क)= युष्मदस्मद्भ्याम्= युष्मदस्मद्भ्यां परेषाम्, ङे=ङे इत्यस्य स्थाने, प्रथमयो: = प्रथमाद्वितीयाविभक्त्योश्च स्थाने, अम्= अम् आदेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयायच्छात्रा: प्रवर्तयितव्या: । अथ श्यामपाटचां युष्मद् + अम्, अस्मद्+ अम्,इति लिखित्वा ७-२-९४ त्वा ऽहौ सौ-सूत्रं प्रस्तुत्यम् ।

७-१-२९ शसो- ७-२-८७ द्वितीयायां च- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोग: ७-१-२८ ङे प्र.....सूत्रवत् । (क)= युष्मदस्मद्भ्याम् परस्य, शस: = शस: स्थाने, नँ= नकारो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयक्रमे अस् भागस्य सर्वस्य स्थाने नकार: (न्) प्राप्त इति प्रबोध्य १-१-५१ अलो.... सूत्रबलेन सकारस्य स्थाने प्राप्तिमुद्बोध्य बाधयित्वा च १-१-५३ आदे: ....सूत्रं प्रस्तुत्यम् ।

७-१-३० भ्यसो- ७-२-९५ तुभ्यमह्यौ.... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्रापि श्यामपाटीप्रयोग: ७-१-२८ ङे प्र... सूत्रवत् । (क)= युष्मदस्मद्भ्यां परस्य, भ्यस:= भ्यस: स्थाने, अभ्यम्= अभ्यम् इत्यादेशो भवति । इत्यर्थमुपदिश्य शेषप्रक्रियायै पूर्ववच्छात्रा: प्रवर्तयितव्या: ।

ङसौ- त्वत् । मत् ।

ङसिँप्रत्यये कृते युष्मद् + अस्, अस्मद्+ अस्, इति श्यामपाटचां लिखित्वा ७-२-९७ त्वमा ....सूत्रप्रक्रियान्तं छात्रै: साधयित्वा त्वद्+अस्, मद्+अस्, इति श्यामपाटचां लिखित्वा ७-१-३२ एक.... सूत्रं प्रस्तुत्यम् ।

७-१-३१ पञ्च-७-१-३२ एक....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-१-२७ युष्मदस्मद्भ्यां ङसो ऽश् ॥ ७-१-३० भ्यस: अभ्यम् ॥

७-१-३१ (क) पञ्चम्या: (ख) अत् ॥ इति । (क)= युष्मदस्मद्भ्यां परस्य, पञ्चम्या:=पञ्चम्या विभक्ते:, (ख)=भ्यस:= भ्यस: स्थाने:, अत्= अत् (इति तकारान्त:) आदेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयाय ७-२-९७ त्वमा .....सूत्रवर्जं पूर्ववत् प्रक्रियायै च च्छात्रा: प्रवर्तयितव्या: । ङसि-**तव । मम ।**

ङस्प्रत्यये युष्मद्+ अस्, अस्मद् +अस्, इति श्यामपाटचां लिखित्वा ७-२-९६ तव....सूत्रं प्रस्तुत्यम् ।

७-१-३२ एक-७-१-३० भ्यसो...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

७-१-२७ युष्मदस्मद्भ्यां ङसो ऽश् ॥ ७-१-३१ पञ्चम्या अत् ॥

७-१-३२ (क)(ख) एकवचनस्य च (ग) ॥ इति । (क)= युष्मदस्मद्भ्यां परस्य, (ख)= पञ्चम्या:= पञ्चमी-विभक्ते:, एकवचनस्य= एकवचनस्य स्थाने (ङसेँ: स्थाने, इत्यभिप्राय:) (ग)= अत् =अत् इत्यादेशो भवति । इत्यर्थमुपदिश्य च्छात्रैर्लक्षणसमन्वयं कारयित्वा ७-२-९० शेषे....६-१-९४ अतो.....सूत्रे उद्बोधनीये । भ्यामि प्रागुक्तम् । पञ्चमी-भ्यसि- **युष्मत् । अस्मत् ।** पञ्चमी-सम्बन्धिनि भ्यस्प्रत्यये कृते युष्मद्+ भ्यस्, अस्मद्+भ्यस् इति श्यामपाटचां लिखित्वा ७-१-३१ पञ्चम्या....सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-३३ साम आकम् ॥

युष्माकम् । अस्माकम् ।

७-१-३४ आत औ णलः ॥

पपौ । ददौ । दधौ ।

७-१-३५ तुह्योस्तातँङ्ङाशिष्यन्यतरस्याम् ॥३६

पठतात्; पठतु । पठतात्; पठ । आशिषीत्युक्तेर्नेह-पठतु पत्रम् । पठ पत्रम् ।

७-१-३६ विदेः शतुर्वसुँः ॥

विद्वान्; विदन् ।

७-१-३३ साम-७-१-२७ युष्मदस्मद्भ्यां...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगः७-१-२८ ङे प्र....सूत्रवत् । (क)= युष्मदस्मद्भ्यां (७-१-२७) परस्य, सामः= भावि-सुँट्- सहितस्य आमः स्थाने, आकम्= आकम् इत्यादशो भवति । एतल्लक्षणेन "आमः स्थाने आकम् भवति, इत्यभिप्रायः । भावि-सुँट्-सहितस्येत्यस्य तात्पर्यमनुपदं वर्णयिष्यामि" इति शिक्षक उपदिशेत् । अथ युष्मद् + आकम्, अस्मद्+ आकम्, इति श्यामपाटचां लिखित्वा ७-२-९० शेषे....सूत्र- प्रवर्तनायै छात्रा आदेश्याः । अथ युष्म+आकम् अस्म+ आकम् इति श्यामपाटचां लिखित्वा छात्राः परीक्षणीयाः । यथा- अयि वत्साः । अत्र ७-१-५२ आमि.... सूत्रं प्रवर्तेत न वा ? इति । छात्रेभ्यः प्रवर्तते इत्युत्तरे प्राप्ते शिक्षकः स्मेरमुखो वदेत्- युक्तम् । सुँट् प्राप्नुयादेव किन्तु वत्साः ? भावि-सुँट्- सहितस्य आमः स्थाने आकमो विधानान्न भवति । अतः सवर्णदीर्घे रूपसिद्धिरिति । ङौ- **त्वयि** । **मयि** । ओसि- पूर्वमुक्तम् । सुपि- **युष्मासु । अस्मासु** । पूर्वोक्तानि रूपाणि सम्यगभ्यास्यैवाऽग्रे समुपदिशेत् । यथा- अयिवत्साः ? युष्मदस्मदोः षष्ठी- चतुर्थी- द्वितीयाविभक्तिषु यानि रूपाणि साधितानि; तानि यदि वाक्येषु पदात् परतो भवन्ति, तदा रूपान्तेरभ्यः कल्पन्ते । इति । अथ इतः परं तान्युपदेष्टुकामः प्रथमं तादृशप्रयोगसम्बन्धीनि सूत्राणि ८-१-२० युष्मदस्मदोः.....८-१-२१ बहुवचनस्य ८-१-२२ तेमया.... ८-१-२३ त्वामौ....सूत्राणि प्रस्तुवीयात् ।

७-१-३४ आतः:= आदन्तात्, अङ्गात् (६-४-१) परस्य, णलः=णलः स्थाने, औ= औ इत्यादेशो भवति ।

७-१-३५ तुह्योः- ३-३-१७३ आशिषि....सूत्रानन्तरं सूत्रमिदं पाठचम् । आशिषि= आशिष्यर्थे गम्यमाने, तुह्योः= तु हि इत्येतयोः स्थाने, अन्यतरस्यां तातँङ्= विकल्पेन तातँङ् आदेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयक्रमे १-१-५२ ङिच्च-सूत्रं प्रकृते न प्रवर्तते । इत्युपदिश्य यत्र ङित्वफलं तत् (१-१-५२ ङिच्च) सूत्रप्रवृत्तिमात्रं भवति तत्रैव तत् (१-१-५२ ङिच्च-सूत्रं) प्रवर्तते । यथा तस्मिन्नेव सूत्रे उदाहृते **सखा** इत्यत्र अनँङि ङित्त्वफलं तत् (१-१-५२ ङिच्च) सूत्रप्रवृत्तिमात्रं वर्तते । तातँङि ङित्त्वं तु ६-१-९३ उस्य.... सूत्रात् क्रमशः उपदिष्ट-रीत्या हुधातोराशिषि लोँटि जुहु+तु इत्यवस्थायां तातँङि जुहुतात् इत्यादौ गुणनिषेधफलकमपि इति विशदयेत् । अत्रत्य- ङित्त्वविषये- श्रीदधिराम-मरासिनी-गुरुचरणानां पद्यमिदं प्रथते-

ङित्त्वं हि सर्वहरगर्वहरं प्रसिद्धं तादृङ् न तातँङि तदेव स-हेतुकत्वात् ।
ज्ञात्वैवमीश- भजनं फलनिर्व्यपेक्षं संसारदुःखशमनं भज नीलकण्ठम् ॥ इति । सिपि- पठ+हि इत्यवस्थायां तातँङि पठतात् इति रूपम् । पक्षान्तरे तु विध्यादाविव हेर्लुक् । स षट् शास्त्राणि पठतात् । त्वं षट् शास्त्राणि पठतात् । स विद्वान् भवतात् । त्वं विद्वान् भवतात् । इत्यादि । शेषं विध्यादि- लोँटीव ज्ञेयमिति । अथाऽऽशिषि लिँङ् उपदेश्यः

तथा हि- पठ्-धातोराशिषि लिँङि तिपि पठ्+ ति इति श्यामपाटचां लिखित्वा छात्रेषु ३-४-११३ तिङ्शि....सूत्रेण सार्वधातुकसंज्ञां सम्भावयत्सु तां बाधयित्वा ३-४-११६ लिँङाशिषि- सूत्रमुपस्थापयेत् ।

७-१-३६ विदेः:= विद्धातोः परस्य, शतुः= शतृँप्रत्ययस्य स्थाने, अन्यतरस्याम् (७-१-३५)= वा, वसुँः=वसुँ इत्यादेशो भवति । **विद्वान्** ७-१-७० उगि....इति नुँम् । ६-४-१० **सान्त**....इति दीर्घः । ८-२-२३ संयो....इति सकारलोपः । तस्याऽसिद्धत्वात् ८-२-७ नलो.....इति नलोपो न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-३७ समा॑से ऽनञ्॒पूर्वे क्त्वो॑ ल्यप्॑ ॥ ३८

प्रकृत्य । समासे इत्युक्तेर्नेह-कृत्वा । अनञ्पूर्वे इत्युक्तेर्नेह- अकृत्वा ।

७-१-३८ क्त्वाऽपिच्छन्द॑सि ॥ ५०

कृष्णं वासो यजमानं परिधापयित्वा । ल्यबपि भवति-उद्धृत्य जुहोति ।

७-१-३९ सुँपां सुँ-लुक्- पूर्वसवर्णाच्छे- या-डा- ड्या- याजालः ॥

(इयाडियाजीकाराणामुपसंख्यानम्)

उर्विया । दार्विया । उरुणा । दारुणा । इति प्राप्ते । सुक्षेत्रिया । सुक्षेत्रिणा इति प्राप्ते । दृतिं न शुष्कं सरसी शयानम् । सरसि इति प्राप्ते ।

(आङयाजयारामुपसंख्यानम्)

प्रबाहवा । स्वप्नया । सिन्धुमिव नावया ।

७-१-४० अमो मँश् ॥

वधीं वृत्रम् ।

७-१-४१ लोपस्त आत्मनेपदेषु ॥

दक्षिणतः शये । शेते इति प्राप्ते ।

७-१-४२ ध्वमो ध्वात् ॥

अन्तरेवोष्माणं वारयध्वात् ।
वारयध्वमिति प्राप्ते ।

७-१-४३ यजध्वैनमिति च ॥

यजध्वैनं प्रियमेधाः ।

७-१-४४ **तस्य॑** तात् ॥ ४५

सूर्यं चक्षुर्गमयतात् गमयतेति प्राप्ते ।

७-१-३७ समा-अनञ्पूर्वे= नञ्भिन्नेऽव्ययपूर्वे, समासे=समासे सति, क्त्वः= क्त्वाप्रत्ययस्य स्थाने, ल्यप्= ल्यप् आदेशो भवति । नञ्भिन्नं सादृश्यादव्ययं गृह्यते । **प्रकृत्य** २-२-१८ कुग....इति समासः । ६-१-६९ ह्रस्व.....इति तुँक् । १-१-३९ क्त्वातो.....इत्यव्ययम् ।

७-१-३८ क्त्वाऽपि- अनञ्पूर्वे+ समासे+ क्त्वः (७-१-३७) क्त्वा+ अपि= क्त्वा ल्यप् (७-१-३७) च आदेशौ भवतः, छन्दसि=वेदे । अत्र काशिका- वा छन्दसि इति नोक्तम् । सर्वोपाधिव्यभिचारार्थम् । तेनाऽसमासे ल्यब्भवति- अर्च्य तान् देवान् गतः । इति ।

७-१-३९ सुँपां= सुपां स्थाने,सुँ....जालः= सुँ लुक् पूर्वसवर्ण आ आत् शे या डा ड्या याच् आल् एते आदेशा भवन्ति, छन्दसि (७-१-३८) । ऋजवः सन्तु पन्थाः । पन्थान इति प्राप्ते जसः सुँ । परमे व्योमन् । व्योम्नि; व्योमनि इति वा प्राप्ते ङेर्लुक् । धीती । मती । सुष्टुती । धीत्या । मत्या । सुष्टुत्या । इति प्राप्ते तृतीयैकवचने पूर्वसवर्णः । धीति+इ इत्यवस्थायाम् ६-१-९७ अकः.....इति सवर्णदीर्घः । या सुरथा रथीतमा दिविस्पृशा अश्विना । यौ सुरथौ रथीतमौ दिविस्पृशौ अश्विनौ इति प्राप्ते औकारस्य आ । न ताद् ब्राह्मणाद् निन्दामि । तान् ब्राह्मणान् इति प्राप्ते शस आत् । न युष्मे वाजबन्धवः । युष्मासु, इति प्राप्ते सुपः शे । अस्मे इन्द्राबृहस्पती । अस्मभ्यम् इति प्राप्ते भ्यसः शे । उरुया । धृष्णुया । उरुणा । धृष्णुना । इति प्राप्ते तृतीयैकवचने या । नाभा पृथिव्याम् । नाभौ इति प्राप्ते ङेर्डा । अनुष्ट्या च्यावयतात् । अनुष्टुभा इति प्राप्ते तृतीयैकवचने ड्या । साधुया । साधु इति सौंर्लुकि प्राप्ते याच् । वसन्ता यजेत । वसन्ते, इति प्राप्ते ङेराल् ।

इया- उर्विया तृतीयैकवचने इया । सुक्षेत्रिया डियाच् । **सरसी** ङेरीकारः । अत्र दीक्षितः- तत्राद्युदात्ते पदे प्राप्ते व्यत्ययेनान्तोदात्तता । वस्तुतस्तु- ङीषन्ताद् ङेर्लुक् । ईकारादेशस्य तूदाहरणान्तरं मृग्यम् । इति ।

आङ- प्रबाहवा प्रबाहुना इति प्राप्ते तृतीयैकवचने आङ् । ङित्त्वाद् ७-३-१११ घेर्ङिति- इति गुणः । **स्वप्नया** स्वप्नेन इति प्राप्ते अयाच् । **नावया** नावा इति प्राप्ते अयार् ।

७-१-४० अमः= मिबादेशस्याऽमः स्थाने, मँश्= मँश् इत्यादेशो भवति, छन्दसि (७-१-३८) । **वधीम्** २-४-४२ हनो..... इति वधादेशः । ६-४-७५ बहु.....इत्यडागमप्रतिषेधः ।

७-१-४१ लोप- तः= तकास्य, लोपः= लोपो भवति, आत्मनेपदेषु, छन्दसि (७-१-३८) ।

७-१-४२ ध्वमः= ध्वमः स्थाने, ध्वात्= ध्वात् इत्यादेशो भवति, छन्दसि (७-१-३८) ।

७-१-४३ यजध्वैनम्=एनमित्येतस्मिन् परे यजध्वमित्यस्य मकारस्य लोपो निपात्यते, छन्दसि(७-१-३८) ।

७-१-४४ तस्य= लोण्मध्यमपुरुष-बहुवचनस्य स्थाने, तात्=तात् इत्यादेशो भवति, छन्दसि (७-१-३८) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-४५ तप्-तनप्- तन-थनाश्च ॥

शृणोत ग्रावाणः । शृणुत इति प्राप्ते । संवरत्रा दधातन। धत्त इति प्राप्ते। जुजुष्टन। जुषध्वमिति प्राप्ते । यदिष्ठन । यदिच्छतेति प्राप्ते ।

७-१-४६ इदन्तो मसि ॥

पुनस्त्वां दीपयामसि । दीपयाम इति प्राप्ते । नमो भरन्त एमसि । एम इति प्राप्ते ।

७-१-४७ क्त्वो यक् ।

दत्त्वाय सविता धियः ।
दत्त्वा इति प्राप्ते ।

७-१-४८ इष्ट्वीनमिति च ॥

इष्ट्वीनं देवान् । इष्ट्वा देवान् इति प्राप्ते ।

७-१-४९ स्नात्व्यादयश्च ॥

स्नात्वी मलादिव । स्नात्वेति प्राप्ते । पीत्वी सोमस्य वावृधे । पीत्वेति प्राप्ते ।

७-१-५० आ'ज्जसेरसुँक् ॥५२,५१

ब्राह्मणासः पितरः सोम्यासः ।

७-१-५१ अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥

(अश्ववृषयोर्मैथुनेच्छायाम्)
अश्वस्यति वडवा । वृषस्यति गौः । अन्यत्र न भवति- अश्वीयति । वृषीयति ।
(क्षीरलवणयोर्लालसायाम्)
क्षीरस्यति बालः । लवणस्यत्युष्ट्रः । अन्यत्र न भवति- क्षीरीयति । लवणीयति ।
(सर्वप्रातिपदिकानां क्यचि लालसायां सुँगसुँकौ)
दधिस्यति; दध्यस्यति । मधुस्यति; मध्वस्यति ।

७-१-५२ आमि' सर्वनाम्नः सुँट् ॥ ५७

सर्वेषाम् । सर्वासाम् । तेषाम् । तासाम् ।

७-१-४५ **तप्त-** छन्दसि (७-१-३८) तस्य (७-१-४४) तप्..... थनाः= तप् तनप् तन थन इत्यादेशा भवन्ति । उदाहरणेषु - आद्ये तप् । द्वितीये तनप् । **जुजुष्टन** ३-१-८५ व्यत्य....इति परस्मैपदम् । २-२-७६ बहु..... शपः श्लुः । तनादेशः । **यदिष्ठन** बाहुलकात् शप्रत्ययस्य लुक् । थनादेशः ।

७-१-४६ **इदन्तो-मसि**= मस् इत्ययं शब्द इकारान्तो भवति, छन्दसि (७-१-३८) । **एमसि** आङ्+इण्, लँट्, मस् ।

७-१-४७ **क्त्वो**-क्त्वः=क्त्वाप्रत्ययस्य, यक्=यगागमो भवति, छन्दसि (७-१-३८) ।

७-१-४८ **इष्ट्वीनम्**= इष्ट्वा इत्यस्याऽन्त्यस्य ईनमित्यादेशो निपात्यते, छन्दसि (७-१-३८) । अत्र काशिका- पीत्वीनमित्यपीष्यते । चकारस्याऽनुक्तसमुच्चयार्थत्वात् सिद्धम् । इति ।

७-१-४९ **स्नात्व्यादयः**= स्नात्वा इत्यादिषु आकारस्य ईकारो निपात्यते, छन्दसि (७-१-३८) ।

७-१-५० **आज्ज- आत्**= अवर्णात् परस्य, जसेः= जसः, असुँक्= असुँगागमो भवति, छन्दसि (७१-३८) । अत्र न्यासः -जसेरिति पूर्वाचार्यनिर्देशः । पूर्वाचार्या हि जसिरित्येवं विहितवन्त इति ।

७-१-५१ **अश्व**..... णानाम्= अश्व क्षीर वृष लवण शब्दानाम्, असुँक् (७-१-५०) क्यचि= क्यच्प्रत्यये परे, आत्मप्रीतौ= आत्मप्रीतौ गम्यमानायाम् ।

अश्वस्यति ६-१-९४ अतो....इति पररूपम् । १-४-१५ नः क्ये-इति नियमेन पदत्वाऽभावाद् रुँत्वं न । **अश्वीयति** ७-४-३३ क्यचि.....इतीत्वम् ।

७-१-५२ **आमि**-७-१-१५ ङसिङ्योः.....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-
(क)
७-१-५० आज्जसेरसुँक् ॥ ७-१-५२ (क) आमि सर्वनाम्नः सुँट् ॥ इति । अत्र प्रथमं छात्रा अधोनिर्दिष्टरूपेण बोधयितव्याः । यथा- अयि वत्साः ? यथा श्यामशब्दस्य पञ्चम्येकवचने श्यामात्, श्यामाद् । वनशब्दस्य वनात्, वनाद् । वृक्षशब्दस्य च वृक्षात्, वृक्षाद् इति रूपाणि सिध्यन्ति; तथैव अ शब्दस्य आत्, आद्, इति रूपे सिध्यतः । दकारश्च जकारेण मिलितो जकाराय कल्पते ८-४-३९ स्तोःश्चु..... सूत्रेण । अतः प्रकृते प्रथमसूत्रे आत्, आद् इति वा छेदो ज्ञेय इति । अथ-(क)= आत्=अवर्णात् परस्य, सर्वनाम्नः = सर्वनाम्नो विहितस्य, आमि= आमः, सुँट्= सुँट् आगमो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-५३ त्रेस्त्रयः ॥

त्रयाणाम् । परमत्रयाणाम् ।

गौणेऽप्यस्य प्रवृत्तिः । प्रियत्रयाणाम् ।

७-१-५४ ह्रस्वनद्यापो नुँट् ॥ ५७

बालानाम् । मुनीनाम् । वायूनाम् ।

पितॄणाम् । गौरीणाम् । कन्यानाम् ।

७-१-५४ ह्रस्व....सूत्रवत् प्रक्रिया सत्यामावश्यकतायामुद्बोधनीया । अथ सर्व+साम् इति श्यामपाटचां लिखित्वा ऽधस्तन-दृष्टान्तनिदर्शनपुरस्सरं छात्रा बोधयितव्याः । अयि वत्साः ? यथा कस्यचित् षट् अङ्गुल्यो भवेयुश्चेत् तर्हि षष्ठी अङ्गुल्यपि तस्यैवाऽवयवो भवति, तथैव कस्यचिदागमो भवति चेत् स आगमः आगमिनोऽ वयवो भवति । अतः प्रकृते 'साम्' इति सुँप् प्रत्यय एवेति । क आगमः ? कश्च आदेशः? यो मिलित्वा वसति स आगमः । नुँट् सुँटौ आम आदौ तमविकार्येव मिलित्वा वसतः । अतो नुँट्सुँटौ आगमौ । अन्यं विनाश्य यो वसति स आदेशः । यथा- टा-ङसिँ-ङसो विनाश्य इन आत् स्य इत्येते भवन्ति । अत इनादय आदेशाः । अत एव प्रथेते वाक्ये इमे- 'शत्रुवदादेशः' 'मित्रवदागमः' इति । अथ गृह+सु-गृहेसु-गृहेषु इत्यत्रेव प्रक्रिया । सर्वेषाम्, इति यथा । सारांशः- सर्वनामशब्दानां जस्-ङे-ङसिँ- आम्-ङि इत्येतेषु पञ्चसु वचनेषु प्रथमं सर्वनामसंज्ञा कार्या । ततः पूर्वोक्ता प्रक्रिया साधयितव्या । **अथ त्यदादिगण उपदेश्यः ।** तत्प्रसङ्गे विश्वप्रभृतिशब्दानां रूपाणि छात्रैः साधयितव्यानि । **अथ शेषः सर्वादिगण उपदेश्यः ।**

यद्

त्यदादिशब्दोपदेशे प्रथमं यच्छब्दस्य रूपाणि साधनीयानि प्रक्रियालाघवात् । तथाहि- यच्छब्दात् सुँप्रत्यये कृते 'यद्+स्' इति श्यामपाटचां लिखित्वा ७-२-१०२ त्यदा.....सूत्रमुपदेश्यम् ।

७-१-५३ त्रेस्त्र- १-४-८ पतिः....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-१-५२ आमि सर्वनाम्नः सुँट् ॥ ७-१-५३ त्रेस्त्रयः (क) ॥ इति । त्रेः= त्रिशब्दस्य स्थाने, त्रयः= त्रय इत्यादेशो भवति, (क)= आमि= आमि परे । इत्यर्थमुपदिश्य लक्षणसमन्वयश्छात्रैः कारयितव्यः । अथ 'त्रय+ आम्' इति श्यामपाटचां लिखित्वा ७-४-५४ ह्रस्व.....सूत्रोदाहरणवत् प्रक्रिया छात्रैः साधयितव्या । स्त्रियां तु ७-२-९९ त्रिचतुरोः..... सूत्रं प्रस्तुत्यम् ।

७-१-५४ ह्रस्व- ७-३-१०४ ओसि च-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-१-५२ आमि सर्वनाम्नः सुँट् ॥ ७-१-५४ ह्रस्वद्यापो (क) नुँट् ॥ इति । अत्र शिक्षकेणाऽवधेयम्- ह्रस्वनद्याप इति पञ्चम्यन्तानुरोधेन ६-४-१ अङ्गस्य इति सूत्रमिहा ऽनुवर्तमानं पञ्चम्यन्ताय कल्पमानं सद् विशेष्यं भवति । अतो विशेषणस्य तदन्तविधौ ह्रस्वनद्याप इत्यस्य ह्रस्वान्ताद् नद्यन्ताद् आबन्ताच्च अङ्गात् परस्य इत्यर्थः फलति इति । तथापि बालानामुपलालनामनुसृत्य सुखेन बोधनाय ह्रस्वात्, नद्याः आपश्च परस्य,आमि= आमः, नुँट्= नुँड् (आगमो) भवतीत्यर्थ उपदेश्यः (द्वितीयावृत्तौ तु यथासूत्राभिमतं पूर्वोक्तोऽर्थ एवोपदेश्यः) अथ लक्षणसमन्वयक्रमे श्यामपाटचां निजाङ्गुल्या आम् प्रत्ययं दर्शयता शिक्षकेण अस्मात् पूर्वं किमक्षरमस्तीति च्छात्राः प्रष्टव्याः । अथ च्छात्रेभ्यो यथार्थमुत्तरे प्राप्ते तदक्षरं ह्रस्वं दीर्घं वेतिच्छात्राः पुनः प्रष्टव्याः । अथच्छात्रैर्लक्षणसमन्वयं कारयित्वा अत्र नुँट् आम्प्रत्ययस्य जात इति च्छात्राः स्फुटं बोधयितव्याः । अथ १-३-३ हल....१-३-२ उप....सूत्रे प्रवर्तेते इति च्छात्रैः स्वयमेव चिह्नादिना ज्ञेयमिति ते बोधनीयाः । अथ नकारः (न्) कुत्र भवेत् । (वसेत् !) इति च्छात्राणामाकाङ्क्षां जागरयित्वा १- १-४५ आद्य......सूत्रं प्रस्तोतुकामेन प्रथमं यत्र ककारस्येत्संज्ञायां लोपे चाऽवशिष्टभागो लभ्यते सोऽ वशिष्टभागः कित् इत्युच्यते । खकारस्येत्संज्ञायां लोपे चाऽवशिष्टभागः खित् इत्युच्यते । एवं प्रकारेण पकारस्येत्संज्ञायामवशिष्टभागः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१-४-२ **विप्र**....सूत्रस्थेन नुँमचिर...इति वार्तिकेन नुँट्-वारीणाम्। तिसृणाम्। क्रोष्टूनाम्।

७-१-५५ षट्चतुर्भ्यश्च ॥

षण्णाम्। पञ्चानाम्। चतुर्णाम्। बहुवचननिर्देशेनाऽर्थप्राधान्यविवक्षणान्नेह- प्रियषषाम्। प्रियपञ्च्ञाम्। प्रियचतुराम्।

७-१-५६ श्रीग्रामण्योश्छन्दसि ॥

श्रीणामुदारो धरुणो रयीणाम्। अप्यत्र सूत ग्रामणीनाम्।

७-१-५७ गोः पादान्ते ॥

विद्मा हित्वा सत्पतिं शूरगोनाम्। पादान्ते इत्युक्तेर्नेह- गवां गोत्रमुदसृजो यदङ्गिरः। अत्र काशिका-'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति पादान्तेऽपि क्वचिन्न भवति। हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् इति।

७-१-५८ इँदितो नुँम् धातोः ॥८३

मथिँ-मन्थ्- मन्थति। ककिँ-कङ्क्- कङ्कते। इँदिति तपरकरणान्नेह- चितीँ-चेतति।

७-१-५९ शे मुचादीनाम् ॥

मुञ्चति।

(शे तृम्फादीनामुपसंख्यानम्)

तृम्फति। ये नकारा ऽनुषक्तास्ते तृम्फादयः। ये नकाराऽनुषक्ता न, तेषां न नुँम्- तृफति।

पित्, टकारस्येत्संज्ञायामवशिष्टभागः टित्, इत्युच्यते। इति स्फुटं बोधयित्वा प्रकृते नकारः (न्) कित् खित् गित् घित् टित् पित्सु कोऽस्तीतिच्छात्रान् पृष्ट्वा तेभ्यो यथार्थमुत्तरे प्राप्ते सति, एकदेशः अवयव इत्युच्यते। यथा- देहस्य अवयवः- हस्तः, पादः, मुखम् इत्यादि पृथक् पृथग् भागः। मिलितश्च अवयवी इत्युच्यते। यथा- हस्तपादमुखादियुक्तो देहः अवयवी भवति। इति स्फुटं बोधयित्वा १-१-४५ आद्यन्तौ...सूत्रार्थ उपदेश्यः।

७-१-५५ षट्च-७-१-९८ चतुरन....सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-१-५२ आमि सर्वनाम्नः सुँट्॥ ७-१-५४ ह्रस्वनद्यापो नुँट्॥ ७-१-५५ षट्चतुर्भ्यश्च (क) (ख) ॥ इति। षट्चतुर्भ्यः= षट्संज्ञकेभ्यश्चतुश्शब्दाच्च परस्य, (क)= आमि= आमः, (ख)= नुँट्। इत्यर्थमुपदिश्य च्छात्रैः समन्वयं कारयित्वा ८-४-१ रषा.....सूत्रमुद्बोधनीयम्। चतुर्णाम्। सुपि-चतुर्षु। यद्यत्र कथं न विसर्गः ? इति च्छात्रा जिज्ञासेरन्, तदा ८-३-१६ रोः सु....इति नियमसूत्रमुपदेश्यं नाऽन्यथा। स्त्रियां स्त्रीलिङ्ग- त्रिशब्दवत्। चतस्रः। चतस्रः। चतसृभिः। चतसृभ्यः। चतसृणाम्। चतसृषु। क्लीबे जश्शसोः- चत्वारि। शेषं पुंवत्। पञ्च (पञ्चन्) प्रभृतयो दशान्ताः शब्दाः षट्संज्ञका भवन्ति। अतो ऽथ १-१-२३ ष्णान्ता....सूत्रमुपदेश्यम्।

७-१-५६ श्रीग्रामण्योः= श्री ग्रामणी शब्दाभ्यां परस्य, आमि (७-१-५२)= आमः,नुँट् (७-१-५४)। श्री शब्दस्य पाठः १-४-५ वाऽऽमि इति नदीत्वा ऽभावपक्षेऽपि नुँडर्थः।

७-१-५७ गोः पा- गोः= गोशब्दात् परस्य, आमि (७-१-५२) नुँट् (७-१-५४) छन्दसि (७-१-५६) पादान्ते =पादस्यान्ते।

७-१-५८ इँदितः+धातोः= अन्त्येदितो धातोः, नुँम्= नुँमागमो भवति। अन्त्येदित इत्युक्त्या चक्षिँङ्- चष्टे इत्यत्र न नुँम्।

७-१-५९ शे मु- मुचादीनाम्= मुच्प्रभृतीनां धातूनाम्, नुँम् (७-१-५८) शे= शप्रत्यये परे। मुचादय स्तुदाद्यन्तर्गताः।

तृम्फति ६-४-२४ अनिँ....इति नलोपे प्रकृतवार्तिकेन नँम।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-६० मस्जिनशोर्झलि ॥

मङ्क्ता । नंष्टा । झलीत्युक्तेर्नेह- मज्जनम् । नशनम् ।

७-१-६१ रधिजभोरचि ॥ ६४

रन्धकः । जम्भकः ।

७-१-६२ नेटचलिँटि रधेः ॥

रधिता । रधितुम् । इटीत्युक्तेर्नेह प्रतिषेधः- रन्धनम् । अलिँटीत्युक्तेर्नेह निषेधः- ररन्धिव । ररन्धिम । क्वसौ- रेधिवान् ।

७-१-६३ रभेरशब्लिँटोः ॥ ६४

आरम्भः । आरम्भकः । अशब्लिँटोरित्युक्तेर्नेह- आरभते । आरेभे ।

७-१-६४ लभेश्च ॥ ६९

लम्भकः । लम्भयति । अशब्लिँटोरित्यनुवृत्तेर्नेह- लभते । लेभे ।

७-१-६५ आङो यि ॥ ६६

आलम्भ्या गौः । आङ इत्युक्तेर्नेह- लभ्यम् ।

७-१-६६ उपात् प्रशंसायाम् ॥

उपलम्भ्या विद्या । प्रशंसायामित्युक्तेर्नेह- उपलभ्यमस्मात् किञ्चित् ।

७-१-६७ उपसर्गात् खल्घञोः ॥ ६८

ईषत्-प्रलम्भः । प्रलम्भः । उपसर्गादेवेति नियमान्नेह-ईषल्लभः । लाभः ।

७-१-६८ न सुदुर्भ्यां केवलाभ्याम् ॥

सुलभम् । दुर्लभम् । सुलाभः । दुर्लाभः । केवलाभ्यामित्युक्तेरिह न प्रतिषेधः- सुप्रलम्भः । दुष्प्रलम्भः । कथं तर्हि अतिसुलभम् । अतिदुर्लभम् । इति ? अत्र स्वती कर्मप्रवचनीयौ । यदा तु कर्मप्रवचनीयौ न तदा तु भवत्येव नुँम्- अतिसुलम्भः । अतिदुर्लम्भः ।

७-१-६० मस्जिनशोः= मस्ज् नश् धात्वोः, नुँम् (७-१-५८) झलि= झलादौ प्रत्यये परे। **मङ्क्ता** १-१-४६ मिद..... सूत्र-स्थेन मस्जे....इति सकारजकारयोर्मध्ये नकारः । ८-२-२९ स्कोःसं.....इति सकारलोपः । ८-२-३० चोः कुः, इति कुत्वम् । **नंष्टा** ८-२-३६ व्रश्च....इति षत्वम् ।

७-१-६१ रधिजभोः= रध् जभ् धात्वोः, नुँम् (७-१-५८) अचि= अजादौ प्रत्यये, परे ।

७-१-६२ नेटच-अलिँटि= लिँड्भिन्ने, इटि= इडादौ प्रत्यये परे, रधेः= रध् धातोः, न= नुँम् न भवति । **रेधिवान्** एत्वाऽभ्यासलोपयोः सतोः कृतद्विर्वचनैकाज् भवतीति पूर्वं तयोः सतोः पश्चाद् ७-२-६७ वस्वे....इतीडागमस्ततो नुँमागमस्तस्य च क्वसुँ- कित्त्वमाश्रित्य लोपः ।

७-१-६३ रभेः=रभ्धातोः, नुँम् (७-१-५८) अशब्लिँटोः= शब् (प्) लिँड्भिन्ने, अचि (७-१-६१) ।

७-१-६४ लभेः= लभ्धातोः, नुँम् (७-१-५८) अशब्लिटोः (७-१-६३) अचि (७-१-६१) ।

७-१-६५ आङः= आङुपसर्गात् परस्य, लभेः (७-१-६४ नुँम् (७-१-५८) यि= यकारादि- प्रत्यये विक्षिते । नुँमि कृतेऽदुपधत्वा ऽभावात् ३-१-९८ पोर.....इत्यस्याऽप्रवृत्तौ ३-१-१२४ ऋहृ....इति ण्यत् । तेन ६-२-१३८ गति....इत्यन्तस्वरितत्वम् । यति तु ६-१-१०८ यतो....इत्याद्युदात्तत्वं स्यात् । प्रत्युदाहरणे तु नुँमभावाददुपधत्वात् ३-१-९८ पोर..... इति यत् ।

७-१-६६ उपात् उपेत्युपसर्गात् परस्य, लभेः (७-१-६४) नुँम् (७-१-५८) यि (७-१-६५) । उदाहरण- प्रत्युदाहरणयोः प्रत्ययौ प्राग्वत् ।

७-१-६७ उप- खल्घञोः= खलि घञि च परे, उपसर्गात्= उपसर्गात् परस्यैव, लभेः (७-१-६४) नुँम् (७-१-५८) । ७-१-६४ लभे....इत्येव सिद्धे नियमार्थमिदम्- उपसर्गात् परस्यैवेति ।

७-१-६८ न सु- केवलाभ्याम्= उपसर्गान्तररहिताभ्याम्, सुदुर्भ्याम्= सुदुर्भ्याम् परस्य, लभेः (७-१-६४) न= नुँम् न भवति, खल्घञोः (७-१-६७) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-६९ विभाषा चिण्णमुँलोः ॥
अलम्भि; अलाभि । लम्भंलम्भम्, लाभंलाभम् । अत्र काशिका-व्यवस्थितविभाषा चेयम् । तेनाऽनुपसृष्टस्य विकल्पः । उपसृष्टस्य नित्यं नुँम्भवति-प्रालम्भि । प्रलम्भम् । इति ।

७-१-७० उगिदचां सर्वनामस्थानेऽधातोः ॥७२
भवान् । भवन्तौ । शत्रन्तस्य- भवन् । प्राङ् । प्रत्यङ् । धातुभिन्नानामित्यर्थान्नेह-उखास्रत् । पर्णध्वत् । अधातोरितिग्रहणसामर्थ्येन भूतपूर्वाऽधातोरित्यर्थादिह भवत्येव नुँम्-गोमानिवाऽऽ चरति- गोमान् ।

७-१-७१ युजेरसमासे ॥
युङ् । युञ्जौ । असमासे इत्युक्तेर्नेह-अश्वयुक् । युजेरिति धातुपाठपठितेकारनिर्देशादिह न- युज्यते युक् ।

७-१-७२ नपुंसकस्य झलचः ॥ ७७
यशांसि । फलानि ।
नपुंसकस्येत्युक्तेर्नेह-विश्वजित् क्षत्रियः ।

७-१-६९ विभा-लभेः (७-१-६४) विभाषा=वा, नुँम् (७-१-५८) चिण्णमुँलोः= चिणि णमुँलि च प्रत्यये परे ।

७-१-७० उगि-६-४-१४ अत्वसन्तस्य....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र शिक्षकः स्वयं मनसा विमृशेत्-उगित्त्वादेव सिद्धेऽञ्चति- ग्रहणं धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियमार्थम् । अत उगिदचामित्यस्य धातुभिन्नानामुगितामञ्चतेश्चेत्यर्थः फलति (न हि अञ्च्धातौ अधातोरिति विशेषणं सङ्गच्छते) तथापि पुनः 'अधातोः' इति वचनं भूतपूर्वाऽधातोरपि नुँमर्थम् । तेन धात्वर्थक्विँबन्तात् कर्तरि क्विँपि गोमान् इति मूलोदाहृते नुँम् सिध्यतीति । छात्राँस्तु उपलालनामनुसृत्योपदिशेत्- तत्रापि सूत्रार्थोपदेशात् पूर्वम् उगित्+ अचाम्= उगिदचाम् इति श्यामपाट्यां लिखित्वा अचामित्यँशमङ्गुल्या निर्दिशन् 'अच्' इति 'अञ्च्' इत्यस्य लुप्तनकारको भागः । इति बोधयेत् । अथ- अधातोः+उगिदचाम्= धातुभिन्नानामुगितां लुप्तनकार स्याऽञ्च्धातोश्च, नुँम् (७-१-५८) सर्वनामस्थाने= सर्वनामस्थाने परे । इत्यर्थमुपदिश्य लक्षण- समन्वयक्रमे १-१-४६ मिद......सूत्रमुद्बोध्य पठितवान्त्+ स् इति श्यामपाट्यां लिखित्वा ६-१-६६ हल्ङ्या....सूत्रमुद्बोध्यच्छात्रैर्लक्षणसमन्वयं साधयित्वा 'पठितवान्त्' इति श्यामपाट्यामवशेष्य १-१-६१ प्रत्य....१-४-१४ सुँप्ति....सूत्रे उद्बोध्य ८-२-२३ संयोगान्तस्य.....सूत्रमुद्बोधयेत् । पठितवान् । अत्र ८-२-७ नलो....सूत्रेण कथं न नकारलोपः ? इति च्छात्रान् परीक्षेत । उत्तरं तु ८-२-१ सूत्रात् । पठितवन्तौ । पठितवन्तः । पठिवन्तम् । पठितवन्तौ । हे पठितवन् । अत्र कथं न दीर्घः ? इतिच्छात्रान् परीक्षेत । स्त्रीलिङ्गे तु यथा ण्वुँलि टाप् प्रत्ययो भवति । तथाऽत्र ङीप् प्रत्यये सति पठितवतीशब्दः सिध्यति । तथाहि इति वदन् ४-१-६ उगितश्च-सूत्रमुपदिशेत् ।

७-१-७१ युजेः= युज् धातोः, नुँम् (७-१-५८) सर्वनामस्थाने (७-१-७०) असमासे=समासाऽभावे, । युङ् युजिर्+क्विँन् । ८-२-२३ संयो....इति जकारलोपः । ८-२-६२ क्विँन्प्र....इति कुत्वम् । **युक्** युजँ समाधौ दिवादिः । ३-२-६१ सत्सू....इति क्विँप् । ८-२-३० चोः कुः इति कुत्वम् ।

७-१-७२ नपुं- ७-१-२४ अतोऽम्-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क)
७-१-५८ इँदितो नुँम् धातोः ॥

(ख)
७-१-७० उगिदचां सर्वनामस्थाने ऽ धातोः ॥

७-१-७२ नपुंसकस्य झलचः (क)(ख) ॥ इति । झलचः= झलन्तस्याऽजन्तस्य च, नपुंसकस्य= नपुंसके वर्तमानस्य, अङ्गस्य (६-४-१) (क)=नुँम्, (ख)= सर्वनामस्थाने परे । इत्यर्थ उपदेश्यः । लक्षणसमन्वयोऽग्रिमप्रक्रिया च च्छात्रैः प्रतिपाद्यमानौ शिक्षकेण श्रोतव्यौ । फलानि । इति । सारांशः- नपुंसकेऽदन्तशब्दे स्वमोरम्भवति । अन्येषु शब्देषु स्वमोर्लुग् भवति । प्रथमा- द्वितीययोर्द्विवचनयोःशी (ई) भवति । सुँ, औ, अम्, औट्, सर्वनामस्थानं न भवन्ति । जश्शसोः शि (इ) भवति; तच्च सर्वनामस्थानं भवति । तृतीयादौ-अदन्तशब्दाः पुंवत् । इगन्तशब्दास्तु अजादि- विभक्तौ नुँमा विशेषं भजन्ति । प्रथमाविभक्तौ यादृशानि रूपाणि; द्वितीयाविभक्तावपि तादृशानि रूपाणि भवन्तीति सारः स्फुटमुपदेश्यः । **इति नपुंसक-प्रक्रिया । इत्यजन्त-शब्द- शिक्षण-रीतिः ॥ अथातो हलन्तशब्दा उपदेश्याः ॥** तत्र प्रथमं भ- पद- संज्ञे स्फुटं बोधनीये । यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(बहूर्जि प्रतिषेधो वक्तव्यः)
(अन्त्यात् पूर्वो वा नुँम्)
बहूर्जि; बहूर्न्जि वा ब्राह्मण- कुलानि ।

७-१-७३ इकोऽचि विभक्तौ ॥ ७४,७५

दधिनी । मधुनी । १-४-२ विप्र....... सूत्रस्थेन गुणवृद्ध्यौत्व...... इति वार्तिकेन नुँम् । वारिणे । अतिसखीनि । वारिणि । प्रियक्रोष्टूनि । रादेशात् पूर्वविप्रतिषेधेन नुँम् । प्रियतिसृणी । प्रियतिसृणि ।

७-१-७४ तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य ॥७५

अनादये; अनादिने । तृतीयादिष्वित्युक्तेर्नेह- शुचिनी ब्राह्मणकुले । भाषितपुंस्कमित्युक्तेर्नेह- जतुने । प्रवृत्तिनिमित्तैक्ये इत्यर्थात्- पीलुर्वृक्षः । फलं पीलु । तस्मै पीलुने, इत्येव । प्रवृत्तिनिमित्त-भेदात् ।

७-१-७५ अस्थिदधिसक्थ्यक्ष्णामनँङुदात्तः॥ ७७,७६

अस्थ्ना । दध्ना । तृतीयादिष्वित्यनुवृत्तेर्नेह अस्थिनी । दधिनी । अचीत्यनुवृत्तेर्नेह- अस्थिभ्याम् । दधिभ्याम् ।

७-१-७६ छन्दस्यपि दृश्यते ॥ ७७

विहितादन्यत्रापि दृश्यते । अचि इत्युक्तम् । अनजादावपि दृश्यते- भद्रं पश्येमाक्षभिः । तृतीयादिष्वित्युक्तम् । अतृतीयादिष्वपि दृश्यते- अस्थान्युत्कृत्य जुहोति । विभक्तौ इत्युक्तम् । अविभक्तावपि दृश्यते- अक्षण्वता लाङ्गलेन ।

अयि वत्साः ? उक्तं पूर्वम् ८-३-१५ खर....सूत्रे 'यस्यार्थो भवति, तत् पदम्' इत्युच्यते, इति । सामान्य रीत्या पदज्ञानाय तथोपदेशः कृतः । वास्तविक-रीत्या साम्प्रतमुपदिश्यते । इत्युपदिशता शिक्षकेण पुनरग्रेऽपिच्छात्रा उपदेश्याः । यथा यूयं जानीथ यद् यत् किमपि प्रातिपदिकं सुँप्रभृतिप्रत्ययान् विना न प्रयुज्यते, अर्थाद् यस्मात् कस्मादपि प्रातिपदिकात् परतः सुँप्रभृतिष्वन्यतमान् प्रत्ययान् विधायैव सिद्धानि रूपाणि प्रयुज्यन्त इति । अवधत्त ! धातवोऽपि तिङादिप्रत्ययान् विना न प्रयुज्यन्ते । किन्तु तिङादिप्रत्यान् परतो विधायैव सिद्धानि रूपाणि प्रयुज्यन्ते । यद्यपि यूयं नेदानीं तिङ्प्रत्ययान् पठितवन्तस्तथापि पठ् पठति, पठतः, पठन्ति । लिख्- लिखति, लिखतः, लिखन्ति । खाद्-खादति, खादतः, खादन्ति । इत्यादिषु पूर्वभागो धातुः । उत्तरभागे- ति, तः, न्ति, भागश्च तिङ् ज्ञेयः । एवं प्रत्ययाँस्तु साधारण- रीत्या पठितवन्त एव । इत्युपदिश्य १-४-१४ सुप्तिङन्तं....सूत्रं प्रस्तुत्यम् ।

७-१-७३ इको- १-१-७१ येनविधि....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)	(ख)	(ग)
६-४-१ अङ्गस्य ॥	७-१-५८ इँदितो नुँम् धातोः ॥	७-१-७२ नपुंसकस्य झलचः ॥

७-१-७३ (ग) इकः (क) (ख) अचि विभक्तौ ॥ इति । (ग)= नपुंसकस्य= नपुंसके वर्तमानस्य, इकः= इगन्तस्य, (क)= अङ्गस्य, (ख)=नुँम्, अचि+ विभक्तौ= अजादौ विभक्तौ परतः । इत्यर्थ उपदेश्यः । लक्षणसमन्वयोऽनुबन्धफालनञ्चच्छात्रैः कारयितव्ये । अथाऽ वशिष्टो नकारः क्व भवेत् ? इति च्छात्राणां जिज्ञासामुद्भाव्य १-१-४६ मिदचोऽन्त्यात्.... सूत्रं प्रस्तुत्यम् । **रादेशात्** अत्र प्रियतिसृणी प्रियतिसृणि इति भाष्यं मानमिति-तत्त्ववोधिनी ।

७-१-७४ तृती-भाषितः पुमान् अस्मिन्नर्थे (प्रवृत्तिनिमित्ते) स भाषितपुंस्कः अर्थः (भाषितपुंस्कं प्रवृत्तिनिमित्तम्) सोऽ स्यास्तीति ५-२-१२७ अर्श...इत्यच् । अतः प्रवृत्तिनिमित्तैक्ये इत्यर्थः फलति । भाषितपुंस्कमिति प्रथमान्तेन सम्बन्धात् ७-१-७२ नपुं......सूत्रादनुवर्तमानं नपुंसकस्य' इति ७-१-३ इको....सूत्रादनुवर्तमानम् इक इति च षष्ठ्यन्ते अपि पदे प्रथमान्ताभ्यां कल्प्येते । 'तृतीयादिषु' इति बहुवचनान्तेन सम्बन्धात् ७-१-७३ इको.....सूत्रादनुवर्तमाने अचि इति विभक्तौ इति चैकवचनान्तेअपि बहुवचनान्ताभ्यां कल्प्येते । उदाहरणे-गालवमते पुंवद्भावे नुँमभावः । अन्येषां मते पुवद्भावाऽभावात् क्लीवत्वेन ७-१-७३ इको....इति नुँम् । भाषितपुंस्कम्= प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कम्, इक् (७-१-७३)= इगन्तम्, नपुंसकम् (७-१-७२) = नपुंसकलिङ्गे वर्तमानमङ्गम्, पुंवत्= पुंलिङ्गवद् भवति, तृतीयादिषु= तृतीयाप्रभृतिषु, अजादिषु+ विभक्तिषु (७-१-७३) परतः सतीषु, गालवस्य= गालवस्याचार्यस्य मते ।

७-१-७५ अस्थि....क्ष्णाम्= अस्थि दधि सक्थि अक्षि इत्येतेषामङ्गानां स्थाने, उदात्तः= उदात्तत्वविशिष्टः, अनँङ्= अनँङ् आदेशो भवति, तृतीयादिषु (७-१-७४) (७-१-७३) अजादिषु+ विभक्तिषु (७-१-७४) ।

७-१-७६ छन्दसि= वेदे, अपि, दृश्यते= अस्थ्यादीनां स्थाने उदात्तोऽनँङ् दृश्यते । **अक्षण्वता** अक्षिशब्दान्मतुँपि तृतीयैकवचनान्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-७७ ई च द्विवचने ॥

अक्षी ते इन्द्र पिङ्गले कपेरिव । अक्षीभ्यां ते नासिकाभ्याम् ।

७-१-७८ नाऽभ्यस्ताच्छतुः ॥७९,८१

ददत् । ददतौ । जक्षत् । जक्षतौ । जाग्रत् । जाग्रतौ ।

७-१-७९ वा नपुंसकस्य ॥

ददन्ति; ददति । जाग्रन्ति; जाग्रति ।

७-१-८० आच्छीनद्योर्नुँम् ॥ ८१,८२

तुदन्ती; तुदती वा ब्रह्मणकुले । तुदन्ती; तुदती वा ब्राह्मणी ।

७-१-८१ शप्श्यनोर्नित्यम् ॥

पठन्ती ब्राह्मणकुले । पठन्ती कन्या । नृत्यन्ती नटकुले । नृत्यन्ती नटी ।

७-१-८२ सावनडुहः ॥ ८५

अनड्वान् । हे अनड्वन् ।

७-१-८३ दृक्स्ववस्स्वतवसां छन्दसि ॥

कीदृङ्ङिन्द्रः । स्ववान् । स्वतवान् ।

७-१-८४ दिव औत् ॥

द्यौः ।

७-१-८५ पथिमथ्यृभुक्षामात् ॥८८

७-१-८६ इतोऽत् सर्वनामस्थाने ॥९८

७-१-७७ ई च- अस्थि.... क्ष्णाम् (७-१-७५), ई= ईकारो भवति, द्विवचने= द्विवचने परे, छन्दसि (७-१-७६) । **अक्षी** नुँमागमं परत्वाद् वाधित्वा ईकारे सकृद्गतिन्यायेन पुनर्न नुँम् ।

७-१-७८ नाऽभ्य- अभ्यस्तात्+ शतुः= अभ्यस्तात् परो यः शतृँप्रत्ययस्तदन्तस्य, अङ्गस्य (६-४-१) **न**= नुँम् न भवति ।

७-१-७९ वा न- अभ्यस्तात्+ शतुः (७-१-७८)= अभ्यस्तात् परो यः शतृँप्रत्ययस्तदन्तस्य, नपुंसकस्य, =क्लीबे वर्तमानस्य, अङ्गस्य (६-४-१) वा= विभाषया, नुँम् (७-१-५८) सर्वनमस्थाने । नपुंसके शत्रन्तस्य सर्वनामस्थाने ७-१-७२ नपुं....इति प्राप्तस्य नुँमागमस्य ७-१-७८ नाऽभ्य....इति प्रतिषेधे प्राप्ते विकल्पोऽयं निषेधविकल्पः । अतः सर्वनामस्थाने इत्यर्थः फलति । विधिविकल्प- निषेधविकल्पयोः फलैक्यात्तु 'वा नुँम्' इति विधिविकल्पो दर्शितः ।

७-१-८० आत्= अवर्णान्तात्, अङ्गात् (६-४-१) परः, शतुः (७-१-७८)= यः शतृँप्रत्ययावयवस्तदन्तस्य, अङ्गस्य (६-४-१), वा (७-१-७९) नुँम् (७-१-५८) शीनद्योः= शीनद्योः परयोः । आत् इति पञ्चम्यन्तेन सम्बन्धात् अङ्गस्येति षष्ठ्यन्तं पञ्चम्यन्ताय क्लृप्तम् । अत्र शतृँशब्दस्तदवयवरः । यतः, सन्धौ न हि क्वापि अवर्णान्तात् परः शतृँप्रत्ययः समुदायो लभ्यते । **तुदन्ती** नपुंसके ७-१-१९ नपुं....इति शी । स्त्रियाम् ४-१-६ उगि....इति ङीप् ।

७-१-८१ शप्श्यनोः= शप्श्यन्सम्बन्धिनः, आत् (७-१-८०) = अवर्णात् परः,शतुः (७-१-७८)= यः शतृँप्रत्ययावयवस्तदन्तस्य, अङ्गस्य (६-४-१) नित्यम्, नुँम् + शीनद्योः (७-१-८०) **पठन्ती** । नृत्यन्ती । शीङीपौ प्राग्वत् । **उभे शरीरे मिलिता च कान्तिर्महेश्वरस्याऽपि महेश्वरायाः । बोधं किरन्ती विपदं हरन्ती चित्तं सदा स्तां परितः स्फुरन्ती** ।सदा स्ताम् सदा आस्तामिति श्लेषः स्त्रीलिङ्गैकवचन-क्लीवद्विवचनयोश्च ।

७-१-८२ साव- अनडहुः= अनडुह् इत्यस्य, आत् (७-१-८०)=अवर्णात् परः, नुँम् (७-१-८०) सौ= सुँप्रत्ये परे । **अनड्वान् हेअनड्वन्** । आत् इत्यनुवृत्त्या आद्ये-७-१-९८ चतु.... इत्यामि, अन्त्ये- ७-१-९९ अम् स... इत्यमि सति प्रकृतसूत्रेण नुँम् । अतो न वाध्यवाधकभावप्रसङ्गः ।

७-१-८३ दृक्..... वसाम्= दृश्प्रभृतीनाम्, नुँम् (७-१-८०) सौ (७-१-८२) छन्दसि= वेदे एव । कीदृङ्ङिन्द्रः ३-२-६० त्यदा..... इति क्विँन् । ६-३-९० इदं....इति की । नुँमि, ८-२-२३ संयो....इति शकारलोपे ८-२-६२ क्विँन् प्र....इति कुत्वम् । ८-३-३२ ङमो....इति ङमुँट् । **स्ववान् । सु+ अव्+ असुँन् । स्वतवान् । तु+ असुँन्** । स्वं तवो= वृद्धिर्यस्य ७-१-७० उगि.....इति सिद्धे ऽनयोर्ग्रहणं छन्दसि सावेवेति नियमार्थम् । तेन औकारादिषु न नुँम् स्ववसौ । स्वतवसौ ।

७-१-८४ दिवः= दिव्शब्दस्य स्थाने, औत्= औ इत्यादेशो भवति, सौ (७-१-८२) ।

७-१-८५ पथि...... भुक्षाम्= पथिन् मथिन् ऋभुक्षिन् इत्येतेषां स्थाने, आत्= आकारादेशो भवति, सौ (७-१-२२) ।

७-१-८६ इतो- पथि....भुक्षाम् (७-१-८५) =पथिन् मथिन् ऋभुक्षिन् शब्दानाम्, इतः= इकारस्य स्थाने, अत्= अकारादेशो भवति, सर्व....ने= सर्वनामस्थाने परे । आदित्यनुवर्तमाने अद्वचनं वेदे ऋभुक्षणमित्यादौ ६-४-९ वा ष.....इति वैकल्पिकदीर्घेण पाक्षिक-ह्रस्वश्रवणार्थम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-८७ थो न्थः ॥

पन्थाः । पन्थानौ । पन्थानः । मन्थाः । मन्थानौ । मन्थानः । ऋभुक्षाः । ऋभुक्षाणौ । ऋभुक्षाणः ।

७-१-८८ भस्य टेर्लोपः ॥

पथः । पथा । मथः । मथा । ऋभुक्षः । ऋभुक्षा ।

७-१-८९ पुंसोऽसुँङ् ॥

पुमान् । पुमांसौ ।

७-१-९० गोतो णित् ॥ ९२

गौः । गावौ । गावः । हे गौः ।

(ओतो णिदिति वाच्यम्)

द्यौः । द्यावौ । द्यावः । हे द्यौः ।

७-१-९१ णलुत्तमो वा ॥

पपाठ; पपठ ।

७-१-८७ थो न्थः- थः= पथिमथोः थकारस्य स्थाने न्थः= न्थ आदेशो भवति, सर्वनामस्थाने (७-१-८६)। ऋभुक्षिन् नात्र सम्बध्यते थकाराऽभावात्।

७-१-८८ भस्य= भसंज्ञकानाम्, पथिमथ्यृभुक्षाम् (७-१-८५)= पथिन् मथिन् ऋभुक्षिन् इत्येतेषाम्, टेः= टिभागस्य, लोपः= लोपो भवति । सर्वनामस्थाने, इत्यनुवर्तमानमप्यत्र न सम्बध्यते; भस्येत्यनेन विरोधात् । अग्रे त्वनुवर्तत एव ।

७-१-८९ पुंसः= पुंस् इति शब्दस्य स्थाने, असुँङ्= असुँङ् आदेशो भवति, सर्वनामस्थाने (७-१-८६)=सर्वनामस्थाने विवक्षिते । विवक्षिते इत्युक्त्या परमपुमानित्यादौ परत्वादसुँङि कृते ५-४-६८ समा....इत्यन्तोदात्तत्वं भवदसुँङोऽकारस्य भवति । परसप्तम्यां तु विभक्त्युत्पत्तेः प्राक् पुंशब्दोकारस्योदात्तत्वे कृते स्रंसनधर्मिणो हलः स्थाने अनुदात्त आदेशः स्यात् । पुमानिति तु प्रत्ययस्वरेणाद्युदात्तः । **पुमान्** ७-१-७० उगि....इति नुँम् । ६-४-१० सान्त....इति दीर्घः । ८-२-२३ संयो.....इति सलोपः ।

७-१-९० गोतो - ८२-२४ रात्सस्य-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-१-८६ इतोऽत् सर्वनामस्थाने ॥ ७-१-९० गोतो (क) णित् ॥ इति । अत्र णिदिति प्रथमान्तेन सम्बन्धात् (क)= सर्वनामस्थाने इति सप्तम्यन्तमपि प्रथमान्ताय कल्पते सर्वनामस्थानमिति । अथ गोतः= गोशब्दात् परम्, (क)= सर्वनामस्थाने नाम= सर्वनामस्थानम्, णित्=णिद्वत् भवति । इत्यर्थं बोधयित्वा भावं च विशदय्य ७-**२**-११५ अचो ञ्णिति- सूत्रं प्रस्तुत्यम् ।

७-१-९१ णलु- ६-४-१२१ थलि च....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-१-९० गोतो णित् ॥ ७-१-९१ णलुत्तमो वा (क) ॥ इति । उत्तमो णल्, =उत्तमपुरुषसम्बन्धी णल्, वा= विभाषया (क) = णित्= णिद्वद् भवति । इत्यर्थोपदेशप्रसङ्गे शिक्षकेणाऽधोनिर्दिष्टरूपेणच्छात्रा बोधयितव्याः । यथा- वत्साः ? अनेन सूत्रेण णकारस्येत्संज्ञा विकल्पेन क्रियते, इति तु न प्रमदितव्यम् । णकारस्येत्संज्ञा तु १-३-७- चुटू, इति सूत्रेण नित्यं भवति । तेन सूत्रेण णकारस्य नित्यमित्संज्ञायामपि प्रकृतसूत्रेण णिद्वद्भावो विकल्पेनाऽतिदिश्यते । अतो णित्प्रयुक्तं कार्यं विकल्पेन भवति । तेन प्रकृते ७-२-११६ अत....सूत्रं पक्षे प्रवर्तते । पपाठ । पक्षान्तरे तु पपठ । इति रूपद्वयं सिध्यतीति । वमयोरिट् । पेठिव पेठिम । अथ रुध् धातुरुपदेश्यः

एतदुपदेशसन्दर्भे प्रथमं शिक्षकोऽधोनिर्दिष्टरूपेण च्छात्रानुद्वोधयेत् । यथा-वत्साः ? उपदिष्टमेव प्राक् १-२-५ असं....सूत्रे यद् 'असंयोगात् परोऽपिल्लिँट् किद् भवति' इति । तिप् सिप् मिप् च पित इत्यपि जानीथैव । अतोऽवधेयं यद् रुध् धातोः परे लिँडादेशाः कितो भवन्ति तिप् सिव् मिव् वर्जम् । तेन तिप् सिव् मिप्सु परेषु ७-३-७६ पुँग..... सूत्रेण गुणो भवति । अन्यत्र तु १-१-५ क्क्ङिति.....सूत्रेण गुणो निषिध्यत इति । अथ प्रक्रिया- रुध् धातोर्लिँटि, नामग्राहं भूधातोर्विहितं विधिं वर्जयित्वा, भूधातुवत् प्रक्रिया ज्ञेया प्रायः । इत्युपदिशन् मध्ये मध्ये साहाय्यं ददच्छात्रैरेव शिक्षको रूपाणि साधयेत् । रुरोध । रुरुधतुः । रुरुधुः । सिपि तु- 'रुध्+थ' इति शिक्षकः श्यामपाटयां लिखित्वा छात्रेषु ७-२-३५ आर्ध....सूत्रं सम्भाव्य ७-२-१० एका.....सूत्रमुपतिष्ठापयिषुषु ७-२-१३ कृसृभृ.....सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-९२ सख्युरसम्बुद्धौ ॥ ९३,९५
सखायौ । सखायः । सखायम् । सखायौ ।

७-१-९३ अनँङ् सौ ॥ ९४
सखा । असम्बुद्धावित्यनुवृत्तेर्नेह-हे सखे ।
(उशनसः सम्बुद्धौ वाऽनँङ् नलोपो वा वाच्यः)
हे उशन; हे उशनन्; हे उशनः ।

७-१-९४ ऋदुशनस्पुरुदंसोऽनेहसां च ॥
पिता । उशना । पुरुदंसा । अनेहा ।
असम्बुद्धावित्यनुवृत्तेर्नेह- हे पितः । इत्यादि ।

७-१-९५ तृज्वत् क्रोष्टुः ॥ ९७
क्रोष्टा । क्रोष्टारौ । क्रोष्टारः ।
प्रियक्रोष्टूनि । असम्बुद्धावित्यनुवृत्तेर्नेह-हे क्रोष्टो ।

७-१-९२ सख्यु- ७-१-९३ अनँङ्.... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-१-८६ इतोऽत् सर्वनामस्थाने ॥ ७-१-९० गोतो णित् ॥ ७-१-९२ सख्युरसम्बुद्धौ (क)(ख) ॥

इति । अत्र ७-१-९० गोतो....सूत्रोक्त-रीत्या सप्तम्यन्ते पदे प्रथमान्ताभ्यां कल्पेते । सख्युः= सखिशब्दात् [द्वितीयावृत्तौ तु सखिशब्दान्तादङ्गात् इत्यर्थ उपदेश्यः । तदा सखायौ इत्यादौ व्यपदेशिवद्भावेन सूत्रप्रवृत्तिः ।] परम्, असम्बुद्धौनाम= असम्बुद्धि= सम्बुद्धिभिन्नम्, (क)= सर्वनामस्थाने नाम= सर्वनामस्थानम्, (ख)= णित् । इत्यर्थमुपदिश्य ७-२-११५ अचो.....सूत्रमुद्बोध्य समन्वयायाऽग्रिमप्रक्रियायै चच्छात्राः प्रवर्तयितव्याः । शसि-१-३-८ लश....६-१-९. तस्मा....सूत्रयोर्द्रष्टव्यम् । सखीन् । टा ङे ङसिँ ङस्सु असखि इति पर्युदासेन घिसंज्ञककार्याऽभावाद् यण्, ओसि च । सख्या । सख्ये । ओसि- सख्योः । इत्युपदिश्य ङसिँ ङसोः- सख्य्+ अस् इति श्यामपाटचां लिखित्वा ६-१-१०८ ख्यत्या....सूत्रं प्रस्तुत्यम् ।

७-१-९३ अनँ- १-१-५२ ङिच्च- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क) (ख)

७-१-९२ सख्युः असम्बुद्धौ ॥ ७-१-९३ (क) अनँङ् (ख) सौ ॥ इति । (क)=सख्युः= सखिशब्दस्य स्थाने, [द्वितीयावृत्तौ तु सखिशब्दान्तस्याङ्गस्य स्थाने इत्यर्थ उपदेश्यः । तदा सखा इत्यत्र व्यपदेशिवद्भावेन सूत्रप्रवृत्तिः] अनँङ्= अनँङ् आदेशो भवति, (ख)= असम्बुद्धौ= सम्बुद्धिभिन्ने, सौ= सुँप्रत्यये परे । इत्यर्थमुपदिश्यानुबन्धफालनं छात्रैः साधयितव्यम् । सत्यामावश्यकतायामर्धचन्द्र- चिह्नेनैव १-३-२ उप....सूत्रस्य विषयं प्रकाशयेत् खलु शिक्षकः । यथाऽवशिष्टोऽन् भाग आदेशः १-१-५१ अलो ....सूत्रेणाऽन्त्यस्य स्थाने प्राप्तः । तं बाधित्वा १-१-५४ अने.... सूत्रेणाऽनेकाल्त्वेन सर्वस्य स्थाने प्राप्तः । तं च बाधित्वा १-१-५२ ङिच्च-सूत्रेणान्त्यस्य (इकारस्य) स्थाने जातः । इति बोधनपुरस्सरं 'सख्+अन्+स्= सखन्+ स्' इति श्यामपाटचां लिखित्वाऽग्रिम-प्रक्रिया ६-४-८ सर्व....सूत्रोदाहृते 'पिता' इत्यत्रैवेत्युपदिशता शिक्षकेण श्रोतव्या । औप्रभृतिषु औट् पर्यन्तेषु प्रत्ययेषु ७-१-९२ सख्युरसम्बुद्धौ सूत्रं प्रस्तुत्यम् ।

७-१-९४ ऋदु ७-३-१०८ ह्रस्वस्य.... सूत्रानन्तरं सूत्रमिदं पाठचम् अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

७-१-९२ सख्युः असम्बुद्धौ ॥ ७-१-९३ अनँङ् सौ ॥ ७-१-९४ ऋदु.....(ख)(क)(ग) ॥

इति । ऋदुशनस्पुरुदंसोऽनेहसाम्= ह्रस्वस्य ऋकारस्य, उशनस् पुरुदंसस् अनेहस् इत्येतेषां च स्थाने, (ख)= अनँङ्= अनँङ् भवति, (क)= असम्बुद्धौ =सम्बुद्धिभिन्ने, (ग)=सौ=सुँप्रत्यये परे । इत्यर्थ उपदेश्यो न तु तदन्तविधिमूलकः । तदुपपादने काठिन्यापत्तेः । तथा च प्रकृते ऽ लोन्त्यविधिरपि नापेक्षित इति प्रक्रियापि लघीयसी भवति, [द्वितीयावृत्तौ तु ऋदन्तानामुशनस्प्रभृत्यन्तानां चाङ्गानामित्यर्थ उपदेश्य एव । तदा उशना इत्यादौ व्यपदेशिवद्भावेनाऽनँङ् इति बोध्यम् ।] लक्षणसमन्वयोऽनुबन्धफालनविधिरपि च्छात्रैः कारयितव्यः । अथ श्यामपाटचां पितृ+स् इति मेटयित्वा पित्+ अन्+ स्= पितन् + स् इति लिखित्वा १-१-६४ अलो ऽन्त्यात्....सूत्रमुपदेश्यम् ।

७-१-९५ तृज्व- क्रोष्टुः= क्रोष्टुशब्दः, तृज्वत्=तृजन्तवद् रूपं लभते, असम्बुद्धौ (७-१-९२) सर्वनामस्थाने (७-१-८६) । **तृज्वत्** तच्च पक्तृ गन्तृ इत्यादिषु प्राप्तेषु अर्थत आन्तर्यात् क्रोष्टृ इति भवति । उदाहरणेषु ६-४-११ अप्तृ....इति दीर्घः । प्रियक्रोष्टूनि ७-१-७३ इको...सूत्र दर्शित-....गुणवृद्ध्यौ....वार्तिकेन नुँम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-१-९६ स्त्रियां च ॥

क्रोष्ट्री ।

७-१-९७ विभाषा तृतीयादिष्वचि ॥

क्रोष्ट्रा; क्रोष्टुना । क्रोष्टूनाम् । प्रियक्रोष्टुने । तृतीयादिष्वित्युक्तेर्नेह- क्रोष्टून्। अचीत्युक्तेर्नेह- क्रोष्टूभ्याम् । क्रोष्टुभिः ।

७-१-९८ चतुरनडुहोरामुदात्तः ॥९९

चत्वारः । प्रियचत्वारः । अनड्वान् । अनड्वाहौ । प्रियानड्वान् ।
(अनडुहः स्त्रियां वेति वक्तव्यम्)
अनड्वाही, अनडुही ।

७-१-९९ अम् सम्बुद्धौ ॥

हे प्रियचत्वः । हे अनड्वन् ।

७-१-१०० ॠत इद् धातोः॥ १०३, १०१, १०३

किरति । इत्वोत्वाभ्यामिति (१-४-२ विप्र....सूत्रस्थेन) वार्तिकेन गुणवृद्धी भवतः । करिता । चकार । आस्तरणम् । आस्तारकः । धातोरित्युक्तेर्नेह-मातॄणाम् । पितॄणाम् ।

७-१-१०१ उपधायाश्च ॥

कीर्तयति ।

७-१-१०२ उदोष्ठ्यपूर्वस्य ॥

पिपूर्तः । पूर्तः । वुवूर्षति । इत्वोत्वाभ्यामिति (१-४-२ विप्र........ सूत्रस्थेन) वार्तिकेन गुणवृद्धी भवतः । पिपर्ति । पपार ।

७-१-१०३ बहुलं छन्दसि ॥

'ओष्ठ्यपूर्वस्य' इत्युक्तम्, अनोष्ठ्य'चपूर्वस्यापि भवति- ततुरिः । जगुरिः । ओष्ठ्यपूर्वस्यापि न भवति- पप्रितमम् । क्वचिद् भवति- पपुरिः ।

इति सप्तमाऽध्याये
प्रथम : पादः ।

७-१-९६ स्त्रियाम्= स्त्रियां वर्तमानः, क्रोष्टुः+ तृज्वत् (७-१-९५) । क्रोष्ट्री । ४-१-५ ऋन्ने......... इति ङीप् ।

७-१-९७ विभा-क्रोष्टुः (७-१-९५) विभाषा= वा, तृज्वत् (७-१-९५) अचि= अजादिषु, तृतीयादिषु= तृतीयाप्रभृतिषु विभक्तिषु परतः सतीषु । **क्रोष्टूनाम्** ७-१-५४ ह्रस्व....सूत्रदर्शित- नुम..... वार्तिकवलेन नुँट् । **प्रियक्रोष्टुने** ७-१-७३ इको....सूत्रदर्शित-वृद्ध्यौ....वार्तिकवलेन नुँम् ।

७-१-९८ चतु- ६-४-४ न तिसृ.....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । चतुनडुहोः= चतुर्शब्दस्य अनडुह् शब्दस्य च, उदात्तः + आम्= उदात्त आमागमो भवति, सर्वनामस्थाने (७-१-८६) । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा १-१-४६ मिद....सूत्रमुद्वोधनीयम्। अथ 'चतु+आर्+ अस्' इति श्यामपाट्यां लिखित्वा छात्रै रूपं साधयितव्यम्। चत्वारः छात्राः पठन्ति । शसि चतुरः । चतुरः छात्रान् पश्य । आमि- 'चतुर्+आम्' इति श्यामपाट्यां लिखित्वा ७-१-५५ षट् च....सूत्रं प्रस्तुत्यम् ।

अन-उदाहरणयोः ४-१-४१ षिद्गौ....इति गौरादित्वान् ङीष् ।

७-१-९९ अम् स- चतुरनडुहोः (७-१-९८) अम्= अमागमो भवति, सम्वुद्धौ= सम्वुद्धौ परतः ।

७-१-१०० ॠतः+ धातोः= ॠदन्तस्य धातोः स्थाने, इत्= इकारादेशो भवति ।

७-१-१०१ उप- धातोः (७-१-१००) उपधायाः= उपधासंज्ञकस्य, ॠतः+इत् (७-१-१००) । **कीर्तयति** कॄत (१६५२) धातुश्चौरादिकः । ८-२-७८ उप....इति दीर्घः

७-१-१०२ उदो- धातोः (७-१-१००) ओष्ठ्यपूर्वस्य= ओष्ठ्यवर्णपूर्वकस्य, ॠतः (७-१-१००) ॠकारस्य स्थाने, उत्=उकारादेशो भवति । आद्योदाहरणयोः पॄ (१०८५) धातुर्जौहोत्यादिकः । तत्राऽद्ये लँट् तस् । द्वितीये क्तः ।**वुवूर्षति** वृञ् (१२५३)+ सन् ७-२-४१ इट् स....इतीडभावे १-२-९, इको.... इति सनः कित्त्वे गुणप्रतिषेधे ६-४-१६ अज्झ....इतिदीर्घे, उत्वम् ।

७-१-१०३ बहु- छन्दसि= वेदे, वहुलम्,= वाहुल्येन, ॠतः (७-१-१००) धातोः (७-१-१००) उत् (७-१-१०१) । ततुरिः, जगुरिः ३-२-१७१ आदृ....... इति किकिनौ । **पप्रितमम्** पॄ धातोः पूर्ववत् किकिनौ । ततस्तमप् ।

इति सप्तमाऽध्याये
प्रथम : पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ सप्तमाध्याये
द्वितीयः पादः

७-२-१ सिँचि वृद्धिः परस्मैपदेषु ॥ ७

अनैषीत् । अपावीत् । अकार्षीत् ।

७-२-२ अतो ल्रान्तस्य ॥

अस्खालीत् । अत्सारीत् । मा भवानालीत् ।

७-२-३ वदव्रजहलन्तस्याचः ॥ ४

अवादीत् । अव्राजीत् । अपाक्षीत् । अरौत्सीत् ।

७-२-४ नेटि ॥ ५

अगोपीत् । अदेवीत् ।

७-२-१ सिँचि- ८-२-३ न मु..... सूत्रस्थ- सिँज्लोप....वार्तिकानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

६-४-१ अङ्गस्य ॥ ७-२-१ (क) सिँचि वृद्धिः परस्मैपदेषु ॥ इति । अत्र पूर्वं व्याख्याते १-१-३ इको....इति, १-१-७१ येन....इति च सूत्रे उद्बोध्य प्रकृतसूत्रार्थ उपदेश्यः । इकः (१-१-३) + (क= अङ्गस्य)= इगन्तस्य अङ्गस्य स्थाने, वृद्धिः= वृद्धिर्भवति, परस्मैपदेषु + सिँचि= परस्मैपदपरके सिँचि परे । इत्यर्थ उपदेश्यः । अथ शिक्षकः प्रकृते छात्रैर्लक्षणसमन्वयं कारयन् १-१-५१ अलो....सूत्रमुद्बोध्य 'अनै+स्+ति' इति श्यामपाटचां लिखित्वा इलोपम्, ईडागमं षत्वं चच्छात्रैः साधयेत् । अनैषीत् । अनैष्टाम् । अनैषुः । आत्मनेपदे-अनेष्ट । अनेषाताम् । अनेषत । अनेष्ठाः । अनेषाथाम् । इति रूपाणिच्छात्रैः साधयित्वा ध्वमि- अनेस्+ध्वम् इतिच्छात्रैः साधिते ८-२-२५ धि च-सूत्रमुद्बोध्य 'अने +ध्वम्' इति श्यामपाटचां लिखित्वा ८-३-७८ इणः.... सूत्रमुपदिशेत् ।

७-२-२ अतो-१-१-७१ येन....इत्येव सिद्धे अत्र सूत्रे पुनरन्तग्रहणं समीपवाचिनो ग्रहणार्थम् । अत इति चावर्तते । अतः सूत्रार्थ एवं फलति- अतः+ ल्रान्तस्य= अतः समीपौ यौ ल्रौ तदन्तस्य, अङ्गस्य (६-४-१), अतः=अकारस्य स्थाने, वृद्धिः+ परस्मैपदेषु+सिँचि । इति । ७-२-४ नेटि, ७-२-७ अतो..इत्यनयोरपवादः ।

७-२-३ वद- ३-१-५७ इरि....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

७-२-१ सिँचि वृद्धिः परस्मैपदेषु ॥ ७-२-३ वदव्रजहलन्तस्याचः (ख)(ग)(क) ॥ इति । वदव्रजहलन्तस्य= वद्धातोर्व्रज्धातोर्हलन्तधातोश्च, अचः= अचः स्थाने, (ख)=वृद्धिः= वृद्धिर्भवति, (ग)+(क)= परस्मैपदेषु+ सिँचि= परस्मैपदपरके सिँचि परे । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । सत्यावश्यके ८-४-५४ खरि.....सूत्रमुद्बोधयेत् । अरौत्सीत् । अत्र सूत्रे हलन्तत्वादेव सिद्धे पृथग् वदिव्रजिग्रहणम् ७-२-७ अतो....इति विकल्पबाधनार्थम् । इति बोधयेत् । तसि- छात्रैः साध्यमानम् 'अरौध् + स्+ ताम्' इति श्यामपाटचां लिखित्वा ८-२-२६ झलो....सूत्रमुपदिशेत् ।

७-२-४ नेटि- १-२-११ लिङ् सिँ....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ)

७-२-१ सिँचि वृद्धिः परस्मैपदेषु ॥ ७-२-३ वदव्रजहलन्तस्याचः ॥ ७-२-४ नेटि=(ग) (घ) न (ख) इटि (क) इति । एतत्सूत्रार्थोपदेशात् पूर्वं शिक्षकश्छात्रानधोनिर्दिष्टरूपेण वोधयेत् । यथा- वत्साः , प्रथमं सूत्रार्थस्तु इटि+ (क+सिँचि)= इडादौ सिँचि परे, न = न भवति । इति प्रतीयते । ततः किं न भवति ? इत्याकाङ्क्षायां प्रकृते प्राप्तं न भवति, इति स्वतः प्रतीतौ किमत्र प्रकृतप्राप्तमित्याकाङ्क्षायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-५ ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥

अग्रहीत् । अस्यमीत् । अहयीत् । अक्षणीत् । अश्वसीत् । अजागरीत् । औनयीत् ।अश्वयीत् । अहसीत् ।

७-२-६ ऊर्णोतेर्विभाषा ॥ ७

और्णावीत्, और्णुवीत्, और्णवीत्, ।

जाग्रत्यां ७-२-३ वद...सूत्रेण वृद्धिः प्राप्तेति बोधनाय शिक्षकेण तत्सूत्रमुद्‌बोधनीयम् (तत्रापि वद् व्रज् धातू हलन्तौ वर्तेते । 'हलन्तस्याचः' इत्येतावता सूत्रेणैव तयोरपि सिद्धौ तयोः पृथग् ग्रहणाद् अवादीत् । अव्राजीत् । इत्यादौ न प्रकृतसूत्रेण वृद्धिनिषेधः । किन्तु तद्‌भिन्नानां हलन्तत्वेन प्राप्ताया एव निषेधः । इति पूर्वमुपदिष्टमपि सत्यावश्यके पुनरुक्तिदोषमगणयन् पुनरावर्तयेत्) 'परस्मैपदेषु' इति तु प्रकृतसूत्रे नानुवर्तितम् । परस्मैपदेष्वेव प्राप्ताया वृद्धेर्निषेधकतया व्यावर्त्याभावेन तदनुवृत्तेर्वैयर्थ्यात् । इति । इत्थञ्च सूत्रार्थः फलति- इटि+ (क = सिँचि) = इडादौ सिँचि परे, न + (ख = वृद्धिः) = हलन्तत्वेन प्राप्ता वृद्धिर्न भवति । इति । अथ 'अदिव्+ इस् + ईत्' इत्यत्र ७-३-८६ पुँग...सूत्रेण प्राप्तं गुणं बाधित्वा ७-२-३ वद....सूत्रेण प्राप्ताया वृद्धेः प्रकृत (७-२-४ नेटि) सूत्रेण निषेधे, ७-३-८६ पुँग....सूत्रेण गुण एवेति । अथ शिक्षकः पठ्धातो लुँङि च्छात्रैः साध्यमानम् 'अपठ् + इस् + ईत्' इति श्यामपाटचां लिखित्वा छात्रैः पूर्वत्रेव ७-२-३ वद....सूत्रेण प्राप्ताया वृद्धेः ७-२-४ नेटि-सूत्रेण निषेधे ७-२-७ अतो....सूत्रमुपदिशेत् ।

७-२-५ ह्म्यन्त- ३-१-५५ पुषादि... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ)

७-२-१ सिँचि वृद्धिः परस्मैपदेषु ॥ ७-२-४ नेटि= न इटि ॥ ७-२-५ ह्म्यन्त....दिताम् (ग)(ख) (घ) (क) ॥ इति ॥ ह्म्यन्त...दिताम्= हकार- मकार- यकारान्तानां धातूनां क्षण्-श्वस्-जागृ-धातूनां ण्यन्त-धातूनां श्विधातोः एँकारेत्संज्ञकधातूनां च, (ग)+(ख)=न वृद्धिः, (घ)=इटि=इडादौ (क)=सिँचि=सिँचि परे । इति सूत्रार्थः । परस्मैपदेष्विति पूर्वसूत्रे यथा-नानुवर्तितं तथैवाऽत्रापि बोध्यम् । एँकारानुबन्धकोदाहरणं यथा-हसेँ-हस् लुँङि सिँचि इडागमावधिच्छात्रैः साध्यमानम् 'अहस्+इस्+ईत्' इति श्यामपाटचां लिखित्वा ७-२-३ वद....सूत्रेण प्राप्तां वृद्धिं ७-२-४ नेटि-सूत्रेण निषेध्य ७-२-७ अतो.... सूत्रेण प्राप्तां वृद्धिं प्रकृतसूत्रेण निषेधयेत् । अहसीत् । इत्यादि । अत्र शिक्षको ऽवदध्यात्-ह्म्यन्तक्षणश्वसामेदितां च ७-२-७ अतो.... इति वैकल्पिकप्राप्तौ प्रतिषेधः।जागृ-णि श्वीनां तु ७-२-१ सिँचि.........इति प्राप्ता वृद्धिः प्रतिषिध्यते । ण्यन्तस्यापि इडादिसिँच्परकत्वं तु ३-१-५१ नोन... इति च्लेश्चङः प्रतिषेधात् । अत एव औनयीत् इत्युदाहृतं मूले । इति । इरनुबन्धफलम्-३-१-५७ इरि.... सूत्रेण विकल्पेन च्लेरङ् , उदाहृतं च तत्सूत्रे एव अरुधत्, अरौत्सीत्, इति । इत्यादि । इति तिङन्त-प्रक्रियोपयोज्यधात्वनुबन्धोपदेशः ॥ **इति पूर्वतिङन्तोपदेश-रीतिः ।** !

अथोत्तर-तिङन्त-शिक्षण-रीतिः अथ प्रथमं शिक्षको ऽधोनिर्दिष्टरूपेण च्छात्रानुपदिशन्, उत्तरतिङन्तविषयिकां जिज्ञासामुद्‌भावयेत्।वत्साः ? उक्तमेव पूर्वं यद् धातवो नवसु गणेषु विभक्ताः सन्तीति । उपदिष्टा च तेषां सामान्यप्रक्रिया । परन्तु । वत्साः ? पाणिनिना धातुपाठे पठिता एव धातवः सन्ति, ना ऽन्ये, इति तु न प्रमदितव्यम् । यतः केचन धातवः पाणिनिनाऽऽ नुपूर्वीरूपेण धातुपाठे पठिताः । ते नवसु गणेषु विभक्ताः । ये तु पाणिनिना कण्ठरवेण नोक्ताः, किन्तु प्रकारान्तरैरुपदिष्टास्ते तु धातवोऽसङ्ख्येयाः सन्ति । तथाविध-धातुवोधन-रीते दिंग्दर्शनं साम्प्रतं प्रस्तूयत इति । अथातस्तेषु प्रकारेष्वन्यतमः प्रकारो णिच्प्रत्यय उपदिश्यते । इति वदता शिक्षकेण वत्साः को नाम कर्ता ? इति विषये ३-४-६९ लः क.... सूत्रे साधारणतयोपदिष्टम् । इत्युद्‌वोधयताऽऽ गमनपद्धतिमनुसरता १-४-५४ स्वतन्त्र..... सूत्रमुपदेश्यम् ।

७-२-६ ऊर्णोतेः= ऊर्णुधातोः स्थाने, विभाषा= वा, वृद्धिः (७-२-१) परस्मैपदेषु ७-२-१)= परस्मैपदपरके, इटि (७-२-४) + सिँचि (७-२-१)= इडादौ सिँचि परे । **और्णुवीत्** १-२-३ विभा....इति ङित्त्वपक्षे ६-४-७७ अचि....इत्युवँङ् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-७ अतो हलादेर्लघोः ॥

अपाठीत्, अपठीत् ।

७-२-८ नेड् वशि कृति ॥ ३४, ९

शर्मा । याच्ञा ।

७-२-९ ति-तु-त्र-त-थ-सि-सु-सर-क-सेषु च ॥

दीप्तिः । सक्तुः । शस्त्रम् । पोतः । त इत्यौणादिकस्यैव ग्रहणं न तु निष्ठायाः । हसितम् । काष्ठम् । कुक्षिः । इक्षुः । अक्षरम् । शल्कः । वत्सः । कृति (७-२-८)इत्यनुवृत्तेर्नेह प्रतिषेधः- रोदिति । स्वपिति ।

(तितुत्रेष्वग्रहादीनामिति वक्तव्यम्)

निगृहीतिः । निपठितिः ।

७-२-१० एकाच उपदेशे ऽनुदात्तात् ॥ ११

जेता । जेष्यति । शक्ता । शक्ष्यति ।

ऊदृदन्तैर्योतिरुक्ष्णुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः ।
वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥

हलन्तेषु-कान्तेषु- शक्लृँ एकः । चान्तेषु पच् मुच् रिच् वच् विच् सिच् षट् । छान्तेषु- प्रच्छ् एकः । जान्तेषु- त्यज् निजिर् भज् भञ्ज् भुज् भ्रस्ज्, मस्ज्, यज् युज् रुज् रञ्ज् विजिर् सञ्ज् स्वञ्ज् सृज् पञ्चदश । दान्तेषु- अद् क्षुद् खिद् छिद् तुद् नुद् पद्य, भिद् विद्य विनद् विन्द् शद् सद् स्विद्य, स्कन्द् हद् षेडश । धान्तेषु- क्रुध् क्षुध् बुध्य बन्ध् युध् रुध् राध् व्यध् शुध् साध् सिध्य एकादश । नान्तेषु मन्य हन् द्वौ । पान्तेषु- आप् क्षिप् छुप् तप् तिप्, तृप्य, दृप्य लिप् लुप्, वप् शप् स्वप् सृप् त्रयोदश । भान्तेषु यभ् रभ् लभ् त्रयः । मान्तेषु गम् नम् रम् यम् चत्वारः । शान्तेषु- क्रुश् दंश् दिश् दृश् मृश् रिश् रुश् लिश् विश् स्पृश् दश । षान्तेषु- कृष् त्विष् तुष् द्विष् दुष् पुष्य पिष् विष् शिष् शुष् श्लिष्य एकादश । सान्तेषु- घस् वसति द्वौ । हान्तेषु- दह् दुह् दिह् नह् मिह् रुह् लिह् वह् अष्टौ ।

एते धातवोऽनुदात्ताः

७-२-७ अतो- ७-२-४ नेटि-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ) (ङ)

७-२-१ सिँचि वृद्धिः परस्मैपदेषु ॥ ७-२-४ नेटि= न इटि ७-२-६ ऊर्णोतेः विभाषा ॥

७-२-७ अतो हलादेर्लघोः (ङ)(ख) (ग) (घ) (क) इति । हलादेः+ लघोः + अतः= हलादिकस्य लघुसंज्ञकस्याऽकारस्य स्थाने, (ङ)= विभाषा, (ख)= वृद्धिः, (ग)= परस्मैपदेषु = परस्मैपदपरके, (घ)= इटि= इडादौ, (क)= सिँचि= सिँचि परे । इत्यर्थमुपदिश्य च्छात्रैरेव लक्षणसमन्वयं कारयेत् । अपाठीत् । अपाठिष्टाम् । अपाठिषुः । इत्यादि । प्रकृतसूत्राऽप्रवृत्तौ तु= अपठीत् । अपठिष्टाम् । अपठिषुः । इत्यादि रूपाणि चच्छात्रैः साध्यमानानि शिक्षकः शृणुयात् । अथ लिँट् प्रत्यय उपदेश्यः ।

हिमालखण्डे पृथ्वीनारायणसाहदेवो नाम प्रथितप्रतापो भूपो राष्ट्रनिर्माता बभूव । इति वक्तव्ये बभूव इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते । इति वदता शिक्षकेण भूधातुं धातुपाठे दर्शयित्वा ३-२-११५ परो.......... सूत्रेण लिँट् प्रत्यय उपदेश्यः ।

७-२-८ नेड्-वशि=वशादेः, कृति= कृतः= कृत्संज्ञकप्रत्ययस्य, न +इट्= इडागमो न भवति ।

७-२-९तितु- कृति (७-२-८)+तितु-.... सेषु= कृत्संज्ञक- ति तु प्रभृतिप्रत्ययानाम्, नेट् (७-२-८) । **दीप्तिः** क्तिच् (३-३-१७४) । **सक्तुः** सचतेः सितनि (७२)....इत्यौणादिकस्तुन् । **शस्त्रम्** ३-२-१८२ दाम्नी....इति ष्ट्रन् । **पोतः** हसि (३७३) ....इत्यौणादिकस्तन् । **काष्ठम्** हनि (१६७) इत्यौणादिकः काशेः क्थन् । **कुक्षिः** कुषेः प्लुषि (४४३) इत्यौणादिकः क्सिः । **इक्षुः** इषेः क्सुः (४४५) इत्यौणादिकः क्सुः । **अक्षरम्** अश्नोतेः अशेः (३५७) इत्यौणादिकः सरः । **शल्कः** शलतेः इण्भी...(३३०) इत्यौणादिकः कन् । **वत्सः** वृतॄ (३४९) इत्यौणादिको वदेः सः । **रोदिति, स्वपिति** ७-२-७६ रुदा....इतीट् ।

७-२-१० एका- ७-२-३५ आर्धधातुकस्येड्....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(क)

७-२-८ नेड् वशि कृति ॥ ७-२-१० एकाच उपदेशे ऽनुदात्तात् (क) ॥ इति । अत्र सूत्रे उपदेशे इत्यस्य देहलीदीपन्यायेनोभयत्र (एकाच इत्यत्र, अनुदात्तादित्यत्र च) अन्वयः । अतः, उपदेशे एकाचः, उपदेशे अनुदात्ताच्च (अर्थात् उपदेशे यो धातुरेकाच्, उपदेशे अनुदात्तश्च ततः परस्य) वलादेरार्धधातुकस्य, (क)= नेट=इड् न भवति । इत्यर्थः । अत्र वलादेरार्धधातुकस्येति सूत्रे नास्ति, नाप्यनुवर्तते ।कथं सोऽर्थो ज्ञायेत ? इति शिक्षको जिज्ञासामुद्भाव्याऽधोनिर्दिष्टरूपेण बोधयेत् यथा- 'इडागमो न भवति' इत्युच्यते । यस्येडागमः सम्भाव्यमानो भवेत् तस्यैव निषेधः कर्तव्यः । इडागमश्च वलादेरार्धधातुकस्यैव सम्भाव्यमानः । तेन वलादेरार्धधातुकस्येति ज्ञायते सूत्रेऽनुक्तावपि । इति । अथ पुनरधोनिर्दिष्टरूपेणच्छात्रा बोधयितव्याः । यथा- वत्साः ? उपदेशे एकाचः, उपदेशे अनुदात्ताच्च धातोः परस्येति कथनेन अनेकाचो धातवः सर्वेऽपि सेट एव, न तत्र प्रकृतसूत्रं प्रवर्तत इति स्फुटमेव भवति । यथा-जागृ धातुरनेकाज् वर्तते । तेनाऽयं धातुः सेडेव । तस्माल्लृँटि जागरिष्यति इत्यादीनि रूपाणि सिध्यन्ति । नाऽत्र सेडनिड् वाऽयमिति विचार आवश्यकः । भू,क्री, पठ्, पच्, धातव एकाचः । तेनेमे धातवः सेटोऽ निटो वेति विचार आवश्यकः । यतः, उपदेशे एकाच् अनुदात्तश्च धातुश्चेत् ततः परस्य वलादेरार्धधातुकस्येडागमो न भवति । एकाजपि उपदेशेऽनुदात्तो नास्ति चेत् ततः परस्य वलादेरार्धधातुकस्येडागमो भवत्येव । अर्थाद् धातुरनेकाच् चेत् प्रकृतसूत्रेण तत्र सर्वथा निषेधो न भवति । एकाच् चेत् उपदेशे ऽनुदात्तश्चेत् प्रकृतसूत्रेण निषेधो भवति, अनुदात्तो नास्ति चेन्निषेधो न भवति । इति । अत एकाज्धातुषु के धातवोऽनुदात्ताः के चोदात्ता इति ज्ञानं सर्वथाऽ पेक्ष्यते । यद्यपीदं ज्ञानं धातुपाठादेवाऽर्जनीयं बभूव पुरा । तथा ऽ प्यद्यत्वे विकृतायां परम्परायां ततो न सम्भवति (अतः पुनश्चिह्नादिना सा विकृतिरपनेया वर्तते) अतः साम्प्रतं प्रकृते प्रकारान्तरेण, उदात्तानुदात्तपरिचयो दीयते; इति वदन्नधो निर्दिष्टरूपेणच्छात्रान् बोधयेत् । यथा-

धातवः

अनेकाचः	एकाचः
सर्वेषामिडागमो भवति । अतो नैषां विषये विचार आवश्यकः । (सेटः सर्वे)	उदात्ताः सेटः केचित् । अनुदात्ता अनिटः केचित् । ते च धातवो द्विविधाः । अजन्ता, हलन्ताश्चेति । तत्र प्रथमं तावत् अजन्तेषु के धातवो ऽनुदात्ताः के चोदात्ता इति परचयो दीयतेऽग्रे तथाहि-

ऊदॄ-७-२-१० एका....सूत्राभिप्रायबोधनप्रसङ्गे कारिकेयं पठनीया । अजन्तेषु= अजन्तधातूनां मध्ये, एकाचः= एकाज् धातवः, निहताः = अनुदात्ताः, स्मृताः= परम्परया ज्ञाताः । किं सर्वेऽ प्येकाचो धातवो ऽनुदात्ताः ? नेत्याह- 'विना' इति । कैर्विना ? ऊदॄदन्तैः यौति....श्रिभिः, वृङ्....विना, इति । अर्थात् अजन्तेषु, ऊदॄदन्तैः= दीर्घोकारान्तदीर्घर्का (दीर्घ ॠका) रान्तैर्धातुभिर्विना = एतान् धातून् विहाय, यौति....श्रिभिः= यौति (अदादेर्युधातुः) रु क्ष्णु शीङ् स्नु नु क्षु श्वि डीङ् श्रि- धातुभिर्विना= एतान् धातून् विहाय, वृङ्वृञ्भ्यां च विना- एतौ धातू च विहाय, अन्ये एकाचो धातवो ऽ नुदात्ताः । इति । इत्थं खण्डान्वयेन बोधयित्वा पुनः "अजन्तेषु ऊदॄदन्तैः, यौति.....श्रिभिः, वृङ्वृञ्भ्यां च विना, एकाचः, निहताः स्मृताः" इति दण्डान्वयेन वोधयेत् । एवञ्च भूधातुरेकाजपि सेट्, दीर्घोकारान्तत्वात् । यथा- भू+लृँट्+भविष्यति । तॄ धातुरेकाजपि सेट्, दीर्घर्का (दीर्घॠका) रान्तत्वात् । यथा- तॄ+लृँट्-तरिष्यति, तरीष्यति । अदादेर्युधातुरेकाजपि सेट् पर्युदासात् । यथा- यु+लृँट्-यविष्यति । वृङ् वृञावनुवन्धविनिर्मुक्तौ वृ इति रूपाय क्लृप्तौ अजन्तौ एकाचौ सेटौ च पर्युदासात् । यथा- वृ+लृँट्-वरिष्यते, वरीष्यते । वरिष्यति वरीष्यति । जि अनिट् । यथा- जि+लृँट्-जेष्यति । चि-चेष्यति । नी नेष्यति । इत्यादि । प्रसङ्गादत्र शिक्षकोऽधो निर्दिष्टरूपेणापि च्छात्रान् वोधयेत् । यथा- वत्साः ? धातुषु अनुवन्धविनिर्मुक्तेष्वेव एकाजनेकाज्विचारः कार्यः । यथा- धातुपाठे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-११ श्र्युकः क्किति ॥ १२	७-२-१२ सनिग्रहगुहोश्च ॥
श्रितः । भूतः । भूष्णुः । एकाच इत्यनुवृत्तेर्नेह प्रतिषेधः- जागरितः । जागरितवान् । (ऊर्णोतेर्णुवद्भावो वक्तव्यः) ऊर्णुतः । ऊर्णुतवान् ।	जिघृक्षति । जुघुक्षति । बुभूषति ।

डुपचँष् इति स्वरत्रयघटितोऽ नेकाच् पठचते । परन्तु अनुबन्धविनिर्मुक्तस्तु 'पच्' इत्येकाजवशिष्यते । अतः पच् धातुरेकाजेवेति स्वीक्रियत इति । एष च सेडनिड्वेति विचारो हलन्तेषु प्रकारान्तरेण कार्यः । अथ हलन्तेषु के धातवो ऽ नुदात्ताः के चोदात्ता इति मूले परिचयो दीयते ।

शक्लृँ= लृँकारानुबन्धः शक् । निजिर्= इरनुबन्धो निज् । विजिर् इरनुबन्धो विज् । पद्य= दैवादिकः पद् । विद्य= दैवादिको विद् । विनद्= रौधादिको विद् । विन्द्= तौदादिको विद् । स्विद्य= दैवादिकः स्विद् । बुध्य= दैवादिको बुध् । सिध्य= दैवादिकः सिध् । मन्य= दैवादिको मन् । तृप्य दृप्य दैवादिकौ तृप् दृप् । पुष्य श्लिष्य= दैवादिकौ पुष् श्लिष् । वसति= भौवादिकः शब्विकरणो वस् । **एते धातवो ऽनुदात्ताः** । अर्थाद् हलन्तेष्वेकाज्धातुषु मध्ये एते धातवो ऽ निटः । शेषाः सेटः । इत्थं सेडनिड्व्यवस्थां छात्रान् सम्यग् बोधयेत् । अथा ऽधोनिर्दिष्टरूपेणच्छात्रान् पुनरुपदिशेत् । यथा- वत्साः ? यथा प्रथमं वर्णमालायाः सम्यगभ्यासो ऽ पेक्षितः । व्याकरणारम्भे च वर्णसमाम्नायसूत्राणां सम्यगभ्यासोऽ पेक्षितः (अन्येषां सूत्राणां तु अर्थघोषणप्रसङ्गा देवाऽभ्यासो भवति) तथैव सेडनिड्व्यवस्था-बोधाय, अजन्तेषु कारिका हलन्तेषु उपर्युक्ता धातवः सम्यगभ्यसनीयाः । इति । विषयो ऽ यं छात्रमस्तिष्के स्फुरितो न वेति ज्ञानाया ऽधोनिर्दिष्टरूपेण शिक्षकेणच्छात्राः परीक्षणीयाः । भू लभ् अद् हु दिव् सु तुद् रुध् तन् क्री पठ् नम् चोरि, एते धातवः सेटो ऽ निटो वा ? एषां लृँटि रूपाणि कीदृशानि ? इति । यदि तुच्छात्रा यथार्थं नोत्तरेयुस्तदा मध्ये मध्ये शिक्षयता शिक्षकेण रूपसिद्धये छात्रा एव प्रवर्तयितव्याः । भविष्यति । लप्स्यते । अत्स्यति । होष्यति । देविष्यति । सोष्यति । सोष्यते । तोत्स्यति । तोत्स्यते । रोत्स्यति । रोत्स्यते । तनिष्यति । तनिष्यते । क्रेष्यति । क्रेष्यते । पठिष्यति । नंस्यति । चोरयिष्यति । चोरयिष्यते । इत्यादि ।

अथ भावकर्मणोर्लृँट्

भावे कर्मणि वा लृँटि च यकं बाधित्वा स्य प्रत्ययो भवति । यथा- पठ्धातोः कर्मणि लृँटि- पठिष्यते । पठिष्येते । पठिष्यन्ते । दिव्धातोर्भावे कर्मणि वा लृँटि- देविष्यते । तुद्धातोः कर्मणि लृँटि तोत्स्यते । तोत्स्येते । तोत्स्यन्ते । इत्यादिरूपाणि स्वयमुपदिश्य रुध्धातोः कर्मणि लृँटि कीदृशानि रूपाणि भवन्तीति च्छात्राः परीक्षणीयाः । अथ शिक्षकश्छात्रेभ्य उत्तरे ऽनागते रोत्स्यते, इत्यादीनि रूपाणि मध्ये मध्ये स्वयं शिक्षयन् यथासम्भवं छात्रैः साधयेत् । अथ वत्साः ? अजन्तधातुभ्यो भावे कर्मणि वा लृँटि तु विशेष-प्रक्रिया भवति । इति वदन् शिक्षको भूधातोर्भावे लृँटि भू+स्य+त इति श्यामपाटचां लिखित्वा ६-४-६२ स्य सिँच्........सूत्रमुपदिशेत् ।

७-२-११ **श्र्युकः**= श्रिञ उगन्ताच्च, एकाचः (७-२-१०) = एकाचो धातोः परयोः, क्किति= गित्कितोः, नेट् (७-२-८) । **गित्** अत्र सूत्रे क्किति इति चर्त्वेन गकारः प्रश्लिष्ट इति भावः । **भूष्णुः** ३-२-१३९ ग्लाजि....इत्यत्र चकाराद् भुवो ग्स्नुप्रत्ययः ।

उर्णोतेः = ऊर्णुधातोः, णुवद् भावो वक्तव्यः । तेनैकाच्त्वादिट्प्रतिषेधः ।

७-२-१२ **सनि**- ग्रहगुहोः= ग्रहेर्गुहेः, उकः (७-२-११) च= उगन्ताच्च धातोः परस्य, सनि= सनः, नेट् (७-२-८) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-१३ कृ सृ भृ वृ स्तु द्रु स्रु श्रुवो लिँटि ॥

रुरोधिथ । रुरुधिव । रुरुधिम ।

(कृञोऽसुँट्कस्येति वक्तव्यम्)

संचस्करिव । संचस्करिम । ऋतो भारद्वाजस्य (७-२-६३) इत्येतदप्यसुँट्कस्यैवेष्यते- संचस्करिथ ।

७-२-१४ श्वीँदितो निष्ठायाम् ॥ ३४

शूनः । शूनवान् । दीप्तः । दीप्तवान् । नृत्तः । नृत्तवान् ।

७-२-१३ कृ सृ-७-१-९१ णलुत्तमो वा- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-२-८ नेड् वशि कृति ७-२-१३ कृ सृ भृ वृ स्तु द्रु स्रु श्रुवो लिँटि (क) ॥ इति । एतत्सूत्रार्थोपदेशात् पूर्वं शिक्षकः कृ सृ भृ स्तु द्रु स्रु श्रु धातवः सेटो ऽनिटो वेति च्छात्रान् परीक्ष्य तेभ्यो यथार्थमुत्तरं प्राप्ते (यदि यथार्थमुत्तरं न प्राप्तं तदा पुनः पूर्वोपदिष्टां सेडनिड्व्यवस्थामुद्बोधयेत्) अथाऽग्रे-तर्हि 'एभ्यः परस्य लिँट इड् न' इत्युपदेशाय पुनः प्रकृतं सूत्रान्तरमपेक्ष्यते न वा ? इति पृच्छेत् । 'नापेक्ष्यत इति' तेभ्य उत्तरे आगते पुनरग्रे- वत्साः ? यथैतेषां कृते सूत्रान्तरस्य नापेक्षा,तथैव वृधातोः कृतेऽपि नापेक्षा इत्युपदिशेत् । यदि कथं नापेक्षेतिच्छात्रा जिज्ञासेरन्, तदा यथाकथं भवतु स विषयः साम्प्रतं नोपदिश्यते इति वदेत् । बहूनां विषयाणामेकदैवोपदेशे स उपदेशश्छात्राणां भाराय भवति । अत्यावश्यकविषयश्चच्छात्राणां मस्तिष्के न स्फुरति । (शिक्षकस्तु स्वयं मनसाऽवदध्याद् यत् ७-२-६४ बभू... सूत्रेण वेदे ववर्थेतीडभावनिपातनेन लोके वृधातोस्थलीडभावः प्रयत्नसहस्रेणापि साधयितुमशक्यः । वमादिषु तु ७-२-११ श्र्युकः..... सूत्रेणैवेट् प्रतिषेधः सिद्धः । अतो वृग्रहणमपि व्यर्थं सज्ज्ञापकं भवतीति) अथाऽधो निर्दिष्टं लौकिकदृष्टान्तं बोधयेत् । यथा- वत्साः ? देवदत्तो विष्णुमित्रस्य भगिनीं पर्यणैषीत् । तस्यां त्रयः पुत्रा उत्पनाः । कृतोपनयनसँस्कारास्ते त्रयः कदाचिन्मातुलेन (विष्णुमित्रेण) निमन्त्रिता भवेयुः । अत्र यूयं भणत ते त्रयः स्वकीयमातुलगृहं सर्वे गच्छेयुर्न वा ? अथ च्छात्रेभ्यो गच्छेयुरित्युत्तरे प्राप्ते पुनरग्रे शिक्षकः पृच्छेत्-'यदि ज्येष्ठो गच्छतु' इति पिता (देवदत्त) आज्ञापयेत्, तदा सर्वे गच्छेयुर्न वा ? इति । अथ 'सर्वे न गच्छेयुर्ज्येष्ठ एव गच्छेत् इति च्छात्रेभ्य उत्तरे आगते शिक्षको बोधयेत्- वत्साः ? प्रकृतसूत्रस्यार्थस्तु कृसृ...... स्रुश्रुवः= कृ सृ भृ वृ स्तु द्रु स्रु श्रु इत्येतेभ्यो धातुभ्यः परस्य, लिँटि=लिँटःनेट् (७-२-८)= इड् न भवति । इत्यक्षरतो निःसरति । परन्तु एभ्यः परस्य वलादेरार्धधातुकस्य इड् न भवति इति तु ७-२-१० एका....सूत्रेणैवोपदिष्टमिति प्रपञ्चितमेव । अतः, यथा- पूर्वोक्त- लौकिकदृष्टान्ते आमन्त्रणेन सर्वेषां गमनं सम्भावितं तथा सम्भावनायां सत्यामपि 'ज्येष्ठो गच्छतु' इति पुनरेकस्य कृते गमनादेशेन, इतरौ न गच्छतामित्यादेशस्य तात्पर्यं बुध्यते । तथैव 'कृ सृ प्रभृतिभ्यः परस्य लिट इड् न' इत्युपदेशेन, अन्येभ्यःपर-स्य इड् भवति इति तात्पर्यं निः सरति । तथा च सूत्रार्थः फलति- कृसृ....स्रुश्रुवः= कृ सृ भृ वृ स्तु द्रु स्रु श्रु इत्येतेभ्यः परस्यैव, लिँटि= लिँटः (क)=, नेट् (७-२-८) = इड् न भवति, अन्येभ्यः परस्य तु भवत्येव । इति । अथ लक्षणसमन्वयं रूपसिद्धिं चच्छात्रैः कारयेत् । रुरोधिथ । रुरुधथुः । रुरुध । रुरोध । रुरुधिव । रुरुधिम । आत्मनेपदे तु सर्वत्र किदेव क्वचिदपि पित्त्वाभावादित्युद्बोध्य तझयोर्विशेषसूत्रं प्रवर्तत इत्युपदिशन् ३-४-८१ लिँटस्तझ....सूत्रमुपदिशेत् ।

७-२-१४ श्वीँदि- ८-२-४२ रदाभ्यां..... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-२-८ न इट् वशि कृति ॥ श्वीँदितो निष्ठायाम् (क) (ख) ॥ इति । श्वीँदितः= श्विधातोः ईँदितश्च धातोः परस्याः, निष्ठायाम्= निष्ठायाः{(क)= न, (ख)= इट्} = इडागमो न भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा मद्+तवत् इति श्यामपाट्यां लिखित्वा ८-२-४२ रदा....सूत्रस्य प्राप्तिं सम्भाव्य ८-२-५७ न ध्याख्या....सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-१५ यस्य विभाषा ॥

गूढः । वृद्धः । अनित्यो ऽयमिट्प्रतिषेधः । ७-२-५७ सेऽ सिँ....इति वेट्त्वादेव सिद्धे नृतीँ इत्यत्र दीर्घेकारानुबन्धात् । पतितः । पतितवान् ।

७-२-१६ आँदि॑तश्च ॥ १७

शिवत्तः । शिवत्तवान् ।

७-२-१७ विभाषा भावादिकर्मणोः ॥

भिन्नमनेन; मेदितमनेन । प्रभिन्नः, प्रमेदितः । अत्र काशिका-सौनागाः कर्मणि निष्ठायां शकेरि टमिच्छन्ति विकल्पेन । शकितो घटः कर्तुम् । शक्तो घटः कर्तुमिति ।

७-२-१८ क्षुब्ध स्वान्त-ध्वान्त-लग्न म्लिष्ट-विरिब्ध-फाण्ट-बाढानि मन्थमनस्तमः सक्ताविस्पष्ट-स्वरानायास- भृशेषु ॥

क्षुब्धो मन्थ दण्डः । क्षुभितमन्यत् । स्वान्तं मनः । स्वनितमन्यत् । स्वनितो मृदङ्गः । ध्वान्तं तमः । ध्वनितमन्यत् । लग्नं सक्तम् । लगितमन्यत् । म्लिष्टम्= अविस्पष्टम् । म्लेच्छितमन्यत् । विरिब्धं स्वरः । विरेभितमन्यत् । फाण्टम्=अनायासः । बाढं भृशम् । बाहितमन्यत् ।

७-२-१९ धृषिशसी वैयात्ये ॥

धृष्टोऽयम् । विशस्तोऽयम् । अन्यत्र धर्षितः । विशसितः ।

७-२-१५ यस्य + विभाषा= यस्य क्वचिद् विभाषया इड् विहितस्ततः परस्याः, निष्ठायाः, (७-२-१४) नेट् (७-२-८) । **दीर्घेकारानुबन्धात्** स हि ७-२-१४ श्वीँदि....इतीट्प्रतिषेधार्थः ।

७-२-१६ आँदि- ४-१-६ उगितश्च-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-
(क)(ख) (ग)
७-२-८ न इट् वशि कृति ॥ ७-२-१४ श्वीँदितो निष्ठायाम् ॥ ७-२-१६ आँदितः च (ग) (क) (ख) ॥ इति । आँदितः= आँकारेत्संज्ञकाद् धातोः परस्याः, (ग)= निष्ठायाः, (क)+(ख)= न इट् । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । शिवत्तवान् । अथ अभिदत्, अभैत्सीदिति वा विग्रहे भिद् धातोः क्तवतुँप्रत्ययं विधाय भिद् +तवत् इति श्यामपाटचां लिखित्वा ८-२-४२ रदाभ्यां....सूत्रमुपदिशेत् ।

७-२-१७ विभा- आँदितः (७-२-१६) भावादिकर्मणोः= भावे आदिकर्मणि च विहितायाः, निष्ठायाः ७-२-१४) विभाषा=वा, नेट् (७-२-४) । **प्रमेदितः** १-२-१९ निष्ठा....इति कित्त्वप्रतिषेधाद् गुणः । १-२-१९. निष्ठा शीङ्....... सूत्रेऽप्युदाहरणानि द्रष्टव्यानि । पूर्वसूत्रे काशिका- योगविभागकरणं किमर्थम् ? आँदितश्च विभाषा भावादिकर्मणोः, इत्येवं पठितव्यम्, अन्यत्र हि भावादिकर्मभ्याम् 'यस्य विभाषा' इति प्रतिषेधो भवष्यिति ? ज्ञापनार्थमेतत् । ज्ञापयति- 'यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः' इति तेन ७-२-६८ विभा.... इत्यत्र विदेर्लाभार्थस्य विभाषेति ज्ञानार्थस्य प्रतिषेधो न भवति । विदितः । विदितवान् । इति ।

७-२-१८ क्षुब्ध..... बाढानि= क्षुब्धप्रभृतीन्यनिट्कानि निपात्यन्ते, मन्थ....भृशेषु= मन्थप्रभृतिषु(क्रमशो) वाच्येषु । क्षुभ् (७५०+१२३८) स्वन् (८२७) ध्वन् (८२८) लग् (७८५) म्लेच्छ् (२०५) रेभ् (३८४) फण् (८२१) बाह् (६४४) धातवः क्रमात् । आद्ये ८-२-४० झष.....इति धत्वम् । ततो द्वयोः- ६-४-१५ अनुनासिक.....इति दीर्घः । तुरीये निष्ठानत्वं च निपातनात् । पञ्चम षष्ठयोः- धातोरेकारस्येत्वं च निपातनात् । **फाण्टम्** अत्र काशिका-यदश्टतमपिष्टं च कषायमुदकसम्पर्कमात्राद् विभक्तरसमीषदुष्णं तत् फाण्टम् । तदल्पप्रयत्नसाध्यत्वादनायाससाध्यं लक्ष्यत इति । अन्त्ये- ढत्वधत्वष्टुत्वढलोपाः ।

७-२-१९ धृषि-वैयात्ये= अविनये एव, धृषिशसी= धृष् (१२६८) शस् (७२६) इत्येतयोः, निष्ठायाः .(७-२-१४) नेट् (७-२-४) । **धर्षितः** १-२-१९ निष्ठा.... इति कित्त्वप्रतिषेधाद् गुणः । अत्र सूत्रे दीक्षितः-भावादिकर्मणोस्तु वैयात्ये धृषिर्नास्ति । अत एव नियमार्थमिदं सूत्रमिति वृत्तिः । धृषेरादित्त्वे फलं चिन्त्यमिति हरदत्तः । माधवस्तु भावादिकर्मणोरवैयात्ये विकल्पमाह-धष्टम । धर्षितम् । प्रधृष्टः, प्रधर्षितः । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-२० दृढः स्थूलबलयोः ॥

दृढः स्थूलः । दृढो बलवान् ।

दृहितं दृंहितमन्यत्र ।

७-२-२१ प्रभौ परिबृढः ॥

परिबृढः कुटुम्बी । अन्यत्र

परिबृहितः । परिबृंहितः ।

७-२-२२ कृच्छ्रगहनयोः कषः ॥

कष्टो मोहः । कष्टं व्याकरणम् । कृच्छ्रगहनयोरि त्युक्तेर्नेह प्रतिषेधः- कषितं सुवर्णम् ।

७-२-२३ घुषिरविशब्दने ॥

घुष्टा रज्जुः । अविशब्दने इत्युक्तेरिह न प्रतिषेधः- अवघुषितं वाक्यमाह ।

७-२-२४ अर्देः संनिविभ्यः ॥२५

समर्ण्णः । न्यर्ण्णः । व्यर्ण्णः । अर्दितः ।

७-२-२५ अभेश्चाविदूर्ये ॥

अभ्यर्ण्णा सेना । आविदूर्ये इत्युक्तेर्नेह- अभ्यर्दितः= पीडितः ।

७-२-२६ णेरध्ययने वृत्तम् ॥ २७

वृत्तं छन्दश्छात्रेण । अध्ययनादन्यत्र- वर्तिता रज्जुः ।

७-२-२७ वा दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-च्छन्न-ज्ञप्ताः ॥ २९

दान्तः, दमितः । शान्तः, शमितः । पूर्णः, पूरितः । दस्तः, दासितः । स्पष्टः, स्पाशितः । छन्नः, छादितः । ज्ञप्तः, ज्ञपितः ।

७-२-२० दृढः- दृहेर् (७३२) दृंहे (७३३)र्वा निष्ठाया इडभावो हलोपस्तकरस्य ढत्वं च । द्वितीयस्य नलोपश्च निपात्यते, स्थूलबलयोः= स्थूले बलवति च । सूत्रे बलशब्दः ५-२-१२७ अर्श....इत्यजन्तः ।

७-२-२१ प्रभौ=प्रभौ गम्ये, परिबृढः= परिपूर्वकस्य बृहेर्बृंहेर्वा पूर्ववन्निपातनम् ।

७-२-२२ कृच्छ्र-कषः= कष् (६८४) धातोः परस्याः, निष्ठायाः (७-२-१४) नेट् (७-२-४) कृच्छ्रगहनयोः= (कृच्छ्रम्= दुःखं तत्कारणं च, मोहः= दुःखहेतुः । गहनम्= दुरवगाहम्) एतयोरर्थयोः । कष्टं व्याकरणम् । दुरवगाहमित्यर्थः ।

७-२-२३ घुषि- अविशब्दने-शब्देन स्वाभिप्रायाविष्करणम्= विशब्दनम्, तद्भिन्नेऽर्थे, घुषिः = घुषेः= घुष् (६५२) धातोः परस्याः, निष्ठायाः (७-२-१४) नेट् (७-२-४) । **अवघुषितम्**= शब्देन प्रकटिताभिप्रायम् ।

७-२-२४ अर्देः- संनिविभ्यिः = सम् नि वि इत्युपसर्गेभ्यः परस्मात्, अर्देः= अर्द् (५५) धातोः परस्याः, निष्ठायाः (७-२-१४) नेट् (७ -२-४) ।

७-२-२५ अभेः= अभि इत्युपसर्गात् परस्मात्, अर्देः (७-२-२४) निष्ठायाः (७-२-१४) नेट् (७-२-४) आविदूर्ये= सामीप्ये ।

७-२-२६ णेः= ण्यन्तस्य वृतेः,[वृत् (११५७) धातोः] 'वृत्तम्=वृत्तम् इति क्तान्तं निपात्यते, अध्ययने= अध्ययने ऽर्थे । निपातनं च- इडभावस्य, णिलुकश्च । वृत्तम्= अधीतम् ।

७-२-२७ वा दान्त- दान्त.......ज्ञप्ताः= दमादीनां ण्यन्तानामिडभावो णिलोपश्च वा निपात्येते । ननु च भोः इडभाव एव निपात्यतां णिलोपस्तु ६-४-५१ णेर.....इत्यनेनैव सिध्येत्? नेत्याह-तथा सति स्थानिवद्भावेन दान्तः शान्त इत्यत्र ६-४-१५ अनु....इति दीर्घो न स्यात् । णिचा व्यवधानेन झल्परत्वाऽभावात् । दस्तः, स्पष्टः, छन्नः, इत्यत्र च ७-२-११६ अत.... इत्युपधावृद्ध्यापत्तिः स्यात् । **ज्ञपितः** ७-२-४९ सनी..... इति ज्ञपेर्विकल्पेनेड्विधानाद् ७-२-१५ यस्य....इति नित्ये प्रतिषेधे प्राप्ते विकल्पार्थमिह ग्रहणम् । दम् (१२०२) शम् (१२००) पूर् (११५०) दस् (१२१२) स्पश् (८८७) छद् (१७३३) ज्ञप् (१६२३)+ ज्ञा ८११ च) एते मूलधातवः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-२८ रुष्यमत्वरसंघुषास्वनाम् ॥

रुष्टः, रुषितः । अभ्यान्तः, अभ्यमितः । तूर्णः, त्वरितः । संघुष्टं वाक्यमाह, संघुषितं वाक्यमाह । संघुष्टौ दम्यौ, संघुषितौ दम्यौ । आस्वान्तो देवदत्तः, आस्वनितो देवदत्तः

७-२-२९ हृषेर्लोमसु ।

हृष्टानि लोमानि; हृषितानि लोमानि । हृष्टं लोमभिः, हृषितं लोमभिः । हृष्टाः, हृषिता वा केशाः । हृष्टं हृषितं वा केशैः । लोमसु इत्युक्तेर्नेह हृष्टो देवदत्तः । हृषितो देवदत्तः

(विस्मितप्रतिघातयोश्चेति वक्तव्यम्)

हृष्टो हृषितो वा देवदत्तः । विस्मित इत्यर्थः । हृष्टा हृषिता वा दन्ताः । प्रतिहता इत्यर्थः ।

७-२-३० अपचितश्च ॥

अपचितः, अपचायितः ।

(क्तिनि नित्यमिति वक्तव्यम्)

अपचितिः ।

७-२-३१ ह्रु ह्वरेश्छन्दसि ॥ ३४

अह्रुतमसि । लोके तु-ह्वृतम् ।

७-२-३२ अपरिह्वृताश्च ॥

अपरिह्वृताः सनुयाम वाजम् ।

७-२-३३ सोमे ह्वरितः ॥

मा नः सोमह्वे ह्वरितः ॥

७-२-२८ रुष्य...स्वनाम्= रुष् (६९२+१२२९) अम् (४६४) त्वर् (७७४) संघुष् (६५२) आस्वन् (८२७) इत्येतेषाम्, निष्ठायाः (७-२-१४) वा (७-२-२७) नेट् (७-२-४) । रुषेः ७-२-४८ तीष.... इति वेट्त्वात् ७-२-१५ यस्य....इति प्राप्ते, त्वरेः ७-२-१६ आँदि....इति प्राप्ते विकल्पार्थमिह ग्रहणम् । **तूर्णः** ६-४-२० ज्वर...इत्यूठ् । ८-२-४२ रदा.....इति निष्ठानत्वम् । संपूर्वस्य घुषेरविशब्दने ऽपि परत्वादयमेव विकल्पो भवति । आस्वनेश्च मनस्यपि वाच्ये परत्वादयमेव विकल्पः ७-२-१८ क्षुब्धस्वान्त...... इति निपातनं बाधते ।

७-२-२९ हृषेः= हृष् (७०८+१२२८) धातोः परस्याः, निष्ठायाः (७-२-१४) वा (७-२-२७) नेट् (७-२-४) लोमसु=रोमसु । उभयत्र विभाषेयम् । प्रत्युदाहरणयोः- हृषुँ अलीके, हृषँ तुष्टौ धातू क्रमशः।

७-२-३० अपचितः= अपचित इति निपात्यते- अपपूर्वस्य चायते (८८०) श्चिभावो निष्ठाया इडभावश्च, वा (७-२-२७) ।

७-२-३१ ह्रु- ह्वरेः=ह्वृ (९३१+९३४) धातोः स्थाने, ह्रु=ह्रु इत्यादेशो भवति, निष्ठायाम् (७-२-१४) छन्दसि= वेदे ।

७-२-३२ अपरिह्वृताः= पूर्वेण प्राप्तस्यादेशस्याभावो निपात्यते ।

७-२-३३ सोमे-ह्वरितः= ह्वृधातोर्निष्ठायामिडागमो गुणश्च निपात्येते, छन्दसि (७-२-३१) सोमे=सोमे गम्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-३४ ग्रसित-स्कभित- स्तभितोत्तभित- चत्त- विकस्ता विशस्तृ-शंस्तृ-शास्तृ-तरुतृ- तरूतृ-वरुतृ-वरूतृ-वरूत्रीरुज्ज्वलिति-क्षरिति- क्षमिति- वमित्यमितीति च ॥

युवं शचीभिर्ग्रसितामसुञ्चतम् । विस्कभिते अजरे । येन स्वः स्तभितम् । सत्येनोत्तभिता भूमिः । चत्ता इतश्चत्तामुतः । त्रिधाहश्यावमश्विना विकस्तम् । उत्तानाया हृदयं यद् विकस्तम् । एकस्त्वष्टुरश्वस्याविशस्ता । ग्रावग्राभ उत शंस्ता । प्रशास्ता पोता । तरुतारं रथानाम् । तरूतारम् । वरुतारम् । वरूतारम् । वरूत्रीभिः सुशरणो नो अस्तु । अग्निरुज्ज्वलिति । स्तोकं क्षरिति । स्तोमं क्षमिति । यः सोमं वमिति । अभ्यमिति वरुणः । भाषायां तु ग्रस्त- स्कब्ध- स्तब्धोत्तब्ध- चतित विकसिताः । विशसिता । शंसिता । शासिता । तरिता, तरीता । वरिता, वरीता । उज्ज्वलति । क्षरति । क्षमति । वमति । अमति । अत्र काशिका-इतिकरणं प्रदर्शनार्थम् । तेन क्वचिदीकारो भवति- रविमभ्यमीति वरुणः, इत्यपि वेदे पठयते, इति । अत्र दीक्षितः= इह क्षरितीत्यस्यानन्तरं क्षमितीत्यपि केचित् पठन्ति । तत्र क्षमूँष् सहने धातुर्बोध्य इति ।

७-२-३५ आर्धधातुकस्येड् वलादेः ॥ ७५,७८

पठिष्यति ।

७-२-३४ ग्रसित...... अमितीति= निपात्यन्ते-ग्रसुँ स्कम्भुँ स्तम्भुँ इत्येतेषामुँदित्त्वेन क्त्वायां वेट्त्वाद् ७-२-१५ यस्य.....इति प्रतिषेधे प्राप्ते, इडागमो निपात्यते । स्तभित इति निपातनेनैव सिद्धे पुनरुत्पूर्वस्य निपातनमन्योपसर्गव्यावृत्त्यर्थम् । चतेँ याचने कसँ गतौ अनयोः क्तस्येडभावः । सूत्रे ग्रसितादि-विकस्तान्तो द्वन्द्वः । तेन वहुवचनान्तं विकस्ता इति । अत एकवचनान्तोऽपि प्रयोगः साधुः । शसुँ शंसुँ शासुँ एषां तृच इडभावः । तरतेर्वृङ्वृञोश्च तृच उठ् ऊठ् इत्येतावागमौ । वरूत्रीतिङीवन्तनिपातनं प्रपञ्चार्थम् । वरूतृ इत्यतो ङीपैवेष्टसिद्धेः । उज्ज्वलादिभ्यः पञ्चभ्यः शप इकारादेशो निपात्यते (तत्र ज्वल् (८३१) क्षर् (८५१) क्षम् (४४१) वम् (८४९) अम् (४६४) एते धातवः क्रमशः । छन्दसि (७-२-३१) । **प्रदर्शनार्थम्** एवम्प्रकारस्यान्यस्यापि प्रदर्शनार्थमितिकरणमिति भावः । **केचित् पठन्ति**- तथैवाऽत्र सूत्रे पाठो दर्शितः ।

७-२-३५ आर्ध-३-१-३३ स्यतासीँ....सूत्रानन्तरं सूत्रमिदं पाठचम् । वलादेः= वल्वर्णादेः, आर्धधातुकस्य =आर्धधातुकसंज्ञकप्रत्ययस्य, इट्= इडागमो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा पठ्+इ+स्य+ति= पठिस्यति इति श्यामपाटचां लिखित्वा ८-३-५७ इण्कोः, इति सूत्रे निर्दिष्टां षत्वव्यवस्थामुद्वोधयेत् । पठिष्यति । अत्र शिक्षकश्छात्रान् सावधानान् कुर्याद् यत्, लृँट् प्रत्यये स्यप्रत्ययमात्रमार्धधातुकं तिङ् तु सार्वधातुकमेवेति । तेनोत्तमपुरुषे ७-३-१०१ अतो....सूत्रेण दीर्घो भवत्येव । पठिष्यामि । पठिष्यावः । पठिष्यामः । एवम्- भू भविष्यति । इत्यादि । अथाऽ धोनिर्दिष्टरूपेणाऽपि च्छात्रान् सम्यक् शिक्षको वोधयेत् । यथा- वत्साः ? लृँट् प्रत्यये यथा स्यप्रत्ययेन शप्प्रत्ययो वाधितस्तथैव शपो वाधकाः श्यन् श्ना प्रभृतयोऽपि वाध्यन्ते । यथा- दिव्धातोर्लृँटि शपो वाधकं श्यन्प्रत्ययं वाधित्वा स्य प्रत्ययो भवति । देविष्यति, इति । तन्धातोर्लृँटि शपो वाधकम् उप्रत्ययं वाधित्वा स्यप्रत्ययो भवति । तनिष्यति । तनिष्यते । इति । भावकर्मणोश्च यकमपि वाधित्वा स्यप्रत्यय एव भवति । यथा- पठ्धातोः कर्मणि लृँटि पठिष्यते । पठिष्येते । पठिष्यन्ते । पठिष्यसे । पठिष्येथे । पठिष्यध्वे । पठिष्ये । पठिष्यावहे । पठिष्यामहे । इत्यादि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-३६ स्नुक्रमोरनात्मनेपदनिमित्ते ॥ प्रस्नविष्यति । प्रस्नवितुम् । प्रस्नवितव्यम् । क्रमिष्यति । प्रस्नोष्यते । प्रक्रंस्यते । निमित्तग्रहणात् प्रस्नवितेवाचरति= प्रस्नवित्रीयते । इत्यादाविडेव ।

(क्रमेस्तु कर्तर्यात्मनेपदविषयादसत्यात्मनेपदे कृति प्रतिषेधो वक्तव्यः) प्रक्रन्ता । उपक्रन्ता । कर्तरीत्युक्तेरिह भवत्येवेट्-प्रक्रमितव्यम् । उपक्रमितव्यम् । आत्मनेपदविषयादित्युक्तेरिहेडेव- निष्क्रमिता ।

७-२-३७ ग्रहोऽलिँटि दीर्घः ॥ ३८,४०

ग्रहीता । ग्रहीतुम् । ग्रहीष्यति ।

अलिँटीत्युक्तेर्नेह- जग्रहिथ । जगृहिव । एकाच इत्यनुवृत्तेर्नेह- जाग्रहिता । प्रकृतस्येटो ग्रहणाच्चिण्वदिटो न दीर्घः । ग्राहिता । ग्राहिष्यते ।

अथ सेडनिड्- व्यवस्था

अथ शिक्षकश्छात्रान् सावधानान् कृत्वोपदिशेत् । यथा- वत्साः ? वलादेरार्धधातुकस्येड् भवतीति जानीथ यूयम् । वलाद्यार्धधातुकप्रत्ययाश्च व्याकरणे बहवः सन्ति । तत्र प्राय इडागमो भवति । किन्तु केषुचिद् धातुषु स इडागमो निषिध्यते । अतो येषु धातुषु वलादेरार्धधातुकस्येड् भवति ते धातवः सेटः (सेट् इति) येषु निषेधः, अर्थात् फलत इडागमो न भवति; ते धातवोऽ निटः (अनिट् इति) उच्यन्ते । तत्र साधारणरूपेणेडागमस्तूपदिष्ट एव । साम्प्रतं येष्विडागमो न भवति, तेषु धातुष्विडागमस्य निषेधकं सूत्रमुपदिशामि । इति । एवं कथयता शिक्षकेण ७-२-१० एकाच....सूत्रमुपदेश्यम् ।

७-२-३६ स्नुक्रमोः= स्नुक्रम्धातुभ्यां परस्य, वलादेः+आर्धधातुकस्य (७-२-३५) अना.... मित्ते= आत्मनेपदनिमित्ताभावे एव, इट् (७-२-३) । नियमार्थं सूत्रमिदम् । तेनात्मनेपदे नेट् । **प्रस्नोष्यते** १-३-१३ भाव....इत्यात्मनेपदम् । **प्रक्रंस्यते** १-३-४२ प्रोपा....इत्यात्मनेपदम् । **प्रस्नवित्रीयते** अत्र क्यङन्तमात्मनेपदस्य निमित्तं न तु स्नुः । **क्रमेस्तु**- वार्तिके 'कर्तरि' इति 'कृति' इत्यस्य विशेषणम् ।

७-२-३७ ग्रहो...३-१-१३४ नन्दिग्रहि....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी-प्रयोगो यथा-

(क)	(ख)
७-२-१० एकाच उपदेशेऽनुदात्तात् ॥	७-२-३५ आर्धधातुकस्य इट् वलादेः ॥

७-२-३७ (क) ग्रहः अलिँटि (ख) दीर्घः ॥ इति । अत्र प्रथमं छात्रानधोनिर्दिष्ट- रूपेण भावं बोधयित्वाऽर्थमुपदिशेत् । यथा-वत्साः ? अनेन सूत्रेण दीर्घो भवतीत्युच्यते, प्रकृतश्च ७-२-३५ आर्ध.... सूत्रेण विधीयमान इड् वर्तते, अतः ७-२-३५ आर्ध....सूत्रेण विहितस्य इटः स्थाने दीर्घ इति बोध्यम् (शिक्षकस्तु मनसा ऽवदध्याद् यत्, इट् इत्यनुवृत्तं प्रथमान्तमपि प्रकृतसूत्रस्थेन 'ग्रहः' इति पञ्चम्यन्तेन षष्ठ्यन्तं कल्प्यते, इति) इति । अथ- (क)= एकाचः, ग्रहः= ग्रह् धातोः परस्य प्रकृत(७-२-३५ आर्ध....)सूत्रेण विहितस्य इटः स्थाने, दीर्घः= दीर्घो भवति, अलिँटि=लिँटि परे तु न भवति । इत्यर्थः । लक्षणसमन्वयं छात्रैः कारयेत् । अथ पच् धातोस्तृचि पच् + तृ इति श्यामपाटचां लिखित्वा ७-२-३५ आर्ध....सूत्रप्रवृत्तिसम्भावनायाम् ७-२-१० एका....सूत्रेण निषेधमुद्बोध्य ८-२-३० चोःकुः-सूत्रमुद्बोध्य पक्तृ इति साधयित्वा ७-३-४४ प्रत्ययस्थात्.... सूत्रप्रस्तुत- पठितृशब्दवत् प्रक्रियाऽग्रिमेति वदन्, छात्रैरुच्यमानानि रूपाणि शृणुयात् । अथ ३-२-१ कर्मण्यण्....सूत्रमुपदिदिक्षुः शिक्षकः प्रथमं ३-१-९२ तत्रोपपदं..... सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-३८ वॄतो वा ॥

वरिता, वरीता । वरिष्यते, वरीष्यते । वरिष्यति, वरीष्यति । वरितुम्, वरीतुम् । तरिता, तरीता । तरिष्यति, तरीष्यति । तरितुम्, तरीतुम् । लिँटि तु-ववरिथ । तेरिथ ।

७-२-३९ न' लिँङि ॥ ४०

वरिषीष्ट । स्तरिषीष्ट ।

७-२-४० सिँचि च परस्मैपदेषु ॥

अवारिष्टाम् । अतारिष्टाम् । परस्मैपदेष्वित्युक्तेरिह भवत्येव-अवरिष्ट, अवरीष्ट ।

७-२-४१ इ'ट् सनि वा' ॥ ४३

विवरिषते, विवरीषते, वुवूर्षते । विवरिषति, विवरीषति वुवूर्षति । तितरिषति, तितरीषति, तितीर्षति ।

७-२-४२ लिँङ'सिँचोरात्मने'पदेषु ॥ ४३

वरिषीष्ट, वृषीष्ट । अवरिष्ट, अवरीष्ट, अवृत । स्तरिषीष्ट, स्तीर्षीष्ट । अस्तरिष्ट, अस्तरीष्ट, अस्तीर्ष्ट । आत्मनेपदेष्वित्युक्तेर्नेह- अवारिषुः । अस्तारिषुः ।

७-२-४३ ऋतश्च संयोगादेः ॥

स्मरिषीष्ट, स्मृषीष्ट । अस्मरिषाताम्, अस्मृषाताम् । संयोगादेरित्युक्तेर्नेह- कृषीष्ट । हृषीष्ट । आत्मनेपदेष्वित्यनुवृत्तेर्नेह- अस्मार्षीत् । अत्र काशिका-संस्कृषीष्ट, समस्कृत, इत्यत्रोपदेशाधिकारात् अभक्तत्वाच्च सुट इडागमो न भवतीति ।

७-२-४४ स्वरति- सूति-सूयतिधूञूँदितो वा' ॥ ५१

सस्वरिथ, सस्वर्थ । स्वरिता, स्वर्ता । स्वरिष्यतीत्यत्र तु ७-२-७० ऋद्ध..इति विप्रतिषेधेन । सविता, सोता । सविष्यते, सोष्यते । धविता, धोता । गोपिता, गोप्ता । किति सूत्रमिदं बाधित्वा ७-२-११ श्र्युकः.... इति प्रतिषेधः । स्वृत्वा । सूत्वा । धूत्वा । किति लिँटि श्र्युकः किति इति प्राप्ते क्रादिनियमान्नित्यमिट् । सस्वरिव । सस्वरिम । सुषुविषे ।

७-२-३८ वॄतः= (वृङ् वृञ् च, ॠत्= ॠदन्तः) वृङ् वृञ्भ्यामृदन्ताच्च, परस्य इटः स्थाने (७-२-३७ टी.) वा= विभाषया, दीर्घः+ अलिँटि (७-२-३७) ।

७-२-३९ न= ७-२-३८ वॄतो वा इति प्राप्त इटो दीर्घो न भवति, लिँङि= लिँङ् लकारे सति ।

७-२-४० सिँचि- परस्मैपदेषु= परस्मैपदपरके, सिँचि= सिँचि परे, न (७-२-३९) ।

७-२-४१ इट् सनि- वॄतः (७-२-३८) सनि= सनः, वा= विभाषया, इट्= इडागमो भवति । **विवरीषते** ७-२-३५ आर्ध.... इति विहितस्यैवेटः ७-२-१२ सनि...इति प्रतिषेधे प्राप्ते प्रकृत-सूत्रेण पाक्षिक इट् प्रतिप्रसूयते । अतोऽत्र ७-२-३८ वॄतो....इति प्रवर्तत एव ।

७-२-४२ लिँङ्सिँ- वॄतः (७-२-३८) लिँङ्सिँचोः= लिँङः सिँचश्च, इट्+ वा (७-२-४१) आत्म....देषु= आत्मनेपदेषु सत्सु । **वृषीष्ट** १-२-१२ उश्च-इति कित्त्वाद् गुणाभावः ।

७-२-४३ ऋत- संयोगादेः= संयोगादिकात्, ऋतः= ऋदन्ताद् धातोः परयोः, लिँङ्सिँचोः+आत्मनेपदेषु (७-२-४२) इड्+वा (७-२-४१) । उदाहरणेषु १-३-१३ भाव....इत्यात्मनेपदम् । तेन चिण्वद्भावपक्षे स्मारिषीष्ट, अस्मारिषातामित्याद्यपि वोध्यम् ।

७-२-४४ स्वरति- ७-४-७९ सन्यतः सूत्रानन्तरं सूत्रमिदं पाठ्यम् । स्वरति... दितः= स्वरत्यादिभ्य ऊँदितश्च परस्य, वलादेः + आर्धधातुकस्य + इट् (७-२-३५) वा = अन्यतरस्याम् । स्वरतेः ७-२-१० एका..... इति प्रतिषेधे प्राप्तेऽन्येषां तु विकल्पार्थमिदम् । **श्र्युकःकिति इति प्राप्ते** पुरस्तात् प्रतिषेधकाण्डारम्भसामर्थ्यात् प्रतिषेधे प्राप्ते । वा (७-२-४१) इति वर्तमाने पुनर्वाग्रहणं लिँङ्सिँचोर्निवृत्त्यर्थम् । गुपूँ (३९४) धातुंर्दीर्घोकारानुबन्धकः । तेन तस्य वलादेरार्धधातुकस्य वैकल्पिक इट्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-४५ रधादिभ्यश्च ॥

ररन्धिथ, ररद्ध । रधिता, रद्धा । नशिता, नंष्टा । तर्पिता, त्रप्ता, तर्प्ता । दर्पिता, द्रप्ता, दर्प्ता । द्रोहिता, द्रोग्धा, द्रोढा । मोहिता, मोग्धा, मोढा । स्नोहिता, स्नोग्धा, स्नोढा । स्नेहिता, स्नेग्धा, स्नेढा ।

७-२-४६ निरः कुषः ॥ ४७

निष्कोषिता,निष्कोष्टा ।

७-२-४७ इण् निष्ठायाम् ॥

निष्कुषितः । निष्कुषितवान् ।

७-२-४८ तीषसहलुभरुषरिषः ॥

एषिता, एष्टा । सहिता, सोढा । लोभिता, लोब्धा । रोषिता, रोष्टा । रेषिता, रेष्टा ।

(इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेधः)

इषँ गतौ । इष्यति । एषिता ।

७-२-४९ सनीवन्तर्धभ्रस्जदम्भुँश्रिस्वृयूर्णुभरज्ञपिसनाम् ॥

दिदेविषति, दुद्यूषति । अर्दिधिषति, ईर्त्सति । विभर्जिषति, विभर्क्षति, बिभ्रज्जिषति, बिभ्रक्षति । दिदम्भिषति, धिप्सति, धीप्सति । शिश्रयिषति, शिश्रीषति । सिस्वरिषति, सुस्वूर्षति । यियविषति, युयूषति । ऊर्णुनुविषति, ऊर्णुनविषति, ऊर्णुनूषति । बिभरिषति, बुभूर्षति । जिज्ञपयिषति, ज्ञीप्सति । सिसनिषति, सिषासति ।

(तनिपतिदरिद्रातिभ्यः सनो वाच्यः)

तितनिषति, तितांसति, तितंसति । पिपतिषति, पित्सति । दिदरिद्रिषति, दिदरिद्रासति ।

इति ज्ञायते । यथा- थलि- जुगोपिथ, जुगोप्थ । वस्मसोः- जुगुपिव, जुगुप्व । जुगुपिम, जुगुप्म । लुँटि- गोपिता, गोप्ता । लृँटि-गोपिष्यति, गोप्स्यति । इत्यादि । **ऋकारानुबन्धफलम् ।ऋकारानुबन्धफलं** ७-४-१ णौ च....सूत्रेण प्राप्तस्य ह्रस्वस्य ७-४-२ नाग्लोपि....सूत्रेण निषेधः, इति कथयन् सूत्रं तदुपदिशेत् ।

७-२-४५ रधादिभ्यः= रधादिधातुभ्यः परस्य, वलादेः+ आर्धधातुकस्य+ इट् (७-२-३५) वा (७-२-४४) । रधादयोऽष्टौ दिवादिगणान्तर्गताः ।

७-२-४६ निरः= निर् इत्युपसर्गात् परस्मात्, कुषः= कुष्धातोः परस्य, प्राग्वत् ।

७-२-४७ इण् नि- निरः + कुषः (७-२-४६) निष्ठायाम्= निष्ठायाः, इट् = इडागमो भवति । ७-२-१५ यस्य...इति प्रतिषेधे प्राप्ते वचनम् ।

७-२-४८ तीष- इष......रिषः= इषादिभ्यः परस्य, ति= तादावार्धधातुके= तादेरार्धधातुकस्य, वा (७-२-४४) इट् (७-२-३५) । **सोढा** ६-३-११२ सहि....इत्योत् ।

७-२-४९ सनी- इवन्त...सनाम्= इवन्तानाम् ऋध् भ्रस्ज्-प्रभृतीनां च, सनि=सनः, वा (७-२-४४) इट् (७-२-३५) । **ईर्त्सति** । ७-४-५५ आप्ज्ञ....इतीत् । ७-४-५८ अत्र....इत्यभ्यासलोपः । **धिप्सति, धीप्सति** ७-४-५६ दम्भ...इतीत्वमीत्वं च । १-२-१० हल...इति कित्त्वान्नकारलोपः । पूर्ववदभ्यासलोपः । शिश्रीषति १-२-९ इको....... इति कित्त्वम् । ६-४-१६ अज्झ.....इति दीर्घः । सुस्वूर्षति । पूर्ववद्दीर्घः ७-१-१०२ उदो....इत्युत्वम् ८-२-७७ हलि च इति दीर्घः । बुभूर्षति । सूत्रे 'भर' इति शपा निर्देशाज्जौहोत्यादिकस्य बिभर्तेस्तु बुभूर्षतीत्येव । **सिसनिषति** ८-३ -६१ स्तौति....इति नियमान्न षत्वम् ।

तितांसति ६-४-१७ तनो.....इति वा दीर्घः । **पित्सति** ७-४-५४ सनि....इत्यच इस् । ८-२-२९ स्कोः सं....इति सलोपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-५० क्लिशः क्त्वानिष्ठयोः ॥५४

क्लिशित्वा, क्लिष्ट्वा । क्लिशित; क्लिष्टः । क्लिशितवान्, क्लिष्टवान् ।

७-२-५१ पूङश्च ॥

पवित्वा, पूत्वा । पवितः, पूतः। पवितवान्, पूतवान् ।

७-२-५२ वसतिक्षुधोरिट् ॥

उषित्वा । उषितः । उषितवान् । क्षुधित्वा, क्षोधित्वा । क्षुधितः । क्षुधितवान् ।

७-२-५३ अञ्चेः पूजायाम् ।।

अञ्चित्वा । अञ्चितः । अञ्चितवान् । पूजायामित्युक्तेर्नेह-उदक्तमुदकं कूपात् ।

७-२-५४ लुभोऽविमोहने ॥

लुभित्वा, लोभित्वा । लुभितः । लुभितवान् । 'अविमोहने' इत्युक्तेर्नेह- लुब्धः । गृद्ध (गृध्नुः) इत्यर्थः । लुब्ध्वा, लुभित्वा, लोभित्वा । गर्धित्वेत्यर्थः ।

७-२-५५ जॄव्रश्च्योः क्त्वि ॥ ५६

जरित्वा, जरीत्वा । व्रश्चित्वा ।

७-२-५६ उँदितो वा ॥ ५७

शमित्वा, शान्त्वा ।

७-२-५० क्लिशः= क्लिश् (११६०+१५२१) क्लिश् धातोः परयोः, क्त्वानिष्ठयोः= क्त्वाप्रत्ययस्य निष्ठायाश्च, वा (७-२-४४) इट् (७-२-३५) । क्लिशः- ऊँदितः क्त्वायां विकल्पे सिद्धे निष्ठायां ७-२-१५ यस्य....इति प्राप्ते, अनूँदितस्तु उभयत्र नित्यमिडागमे प्राप्ते विकल्पविधिरयम् । **क्लिशित्वा** १-२-७ मृड....इति कित्त्वम् ।

७-२-५१ पूङः= पूङ्धातोः परयोः, कत्वानिष्ठयोः (७-२-५०) इट् (७-२-३५) वा (७-२-४४) । ७-२-११ श्र्युक....इति प्रतिषेधे प्राप्ते विकल्पो विधीयते । **पवितः** १-२-२२ पूङः.... इति कित्त्वप्रतिषेधाद् गुंणः ।

७-२-५२ वसतिक्षुधोः= वस् (१००५) क्षुध् (११८९) धातुभ्यां परयोः, क्त्वानिष्ठयोः (७-२-५०) इट्= इडागमो भवति । पुनरिड्ग्रहणं नित्यार्थम् । **उषित्वा** १-२-७ मृड....... इति कित्त्वम् । ६-१-१५ वचिस्वपि....इति सम्प्रसारणम् । ८-३-६० शासिवसि....इति षत्वम् । **क्षुधित्वा** १-२-२६ रलो..... इति पाक्षिकं कित्त्वम् ।

७-२-५३ अञ्चेः = अञ्च् धातोः परयोः, क्त्वानिष्ठयोः (७-२-५०) इट् (७-२-५२) पूजायाम्=पूजायां गम्यमानायाम् । ७-२-५६ उदि.... इति क्त्वाप्रत्ययस्य वैकल्पिके प्राप्ते निष्ठायास्तु ७-२-११ यस्य....इति प्रतिषेधे प्राप्ते वचनम् । **अञ्चितः** ६-४-३० नाञ्चेः.....इति नलोपप्रतिषेधः । **उदक्तमुदकं कूपात्** । उद्धृतमित्यर्थः ।

७-२-५४ लुभो-लुभः= लुभ्धातोः परयोः, क्त्वानिष्ठयोः (७-२-५०) इट् (७-२-५२) अविमोहने= अगार्ध्ये । तत्र क्त्वायां ७-२-४८ तीष...इति विकल्पे, निष्ठायां ७-२-११ यस्य ....इति प्रतिषेधे प्राप्ते विधिरयम् । **लुभित्वा** १-२-२६ रलो....इति पाक्षिकः कित् ।

७-२-५५ जॄव्रश्च्योः= जॄ व्रश्च् धातुभ्यां परस्य, क्त्वि= क्त्वः,= क्त्वाप्रत्ययस्य, इट् (७-२-५२) । क्त्वाग्रहणं निष्ठानिवृत्त्यर्थम् । जॄधातोः ७-२-११ श्र्युकः....इति प्रतिषेधे प्राप्ते व्रश्चेरूँदित्वाद् विकल्पे प्राप्ते वचनम् ।

७-२-५६ उँदितः= ह्रस्वोकारेत्संज्ञकधातोः परस्य, क्त्वः (७-२-५५) वा = विभाषया, इट् (७-२-५२) । **शान्त्वा** ६-४-१५ अनु....इति दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-५७ से'ऽसिँचि कृतचृतच्छृदतृदनृतः ॥ ६०

कर्तिष्यति, कर्त्स्यति । चिकर्तिषति, चिकृत्सति । चर्तिष्यति, चर्त्स्यति । छर्दिष्यति, छर्त्स्यति । तर्दिष्यति, तर्त्स्यति । नर्तिष्यति, नर्त्स्यति । असिँचीत्युक्तेर्नेह- अकर्तीत् । अनर्तीत् ।

७-२-५८ गमेरि'ट् परस्मै'पदेषु ॥७८,६०

गमिष्यति । जिगमिषति । संजिगमिषिता । अधिजिगमिषिता व्याकरणस्य । संजिगमिष त्वम् । अत्र काशिका- पदशेषकारस्य पुनरिदं दर्शनम्-गम्युपलक्षणार्थं परस्मैपदग्रहणम्, पर स्मैपदेषु यो गमिरुपलक्षितस्तस्मात् सकारादेरार्धधातुकस्येड् भवति । तन्मतेन संजिगंसिता, अधिजिगांसिता व्याकरणस्य- इत्येव भवितव्यमिति ।

७-२-५९ न' वृद्भ्यश्चतुर्भ्यः ॥६५

वर्त्स्यति । विवृत्सति । विवृत्सिता । विवृत्स त्वम् । शर्त्स्यति । शिशृत्सति । स्यन्त्स्यति । सिस्यन्त्सति । स्यन्द् धातौ ऊँदिल्लक्षणं ७-२-४४ स्वर.....इत्यन्तरङ्गमपि विकल्पं बाधित्वा प्रतिषेधश्चतुर्ग्रहणसामर्थ्यात् । परस्मैपदेष्वित्यनुवृत्तेरि हेडेव-वर्तिष्यते । विवर्तिषते ।

७-२-६० ता'सि च क्लृपः ॥ ६३

कल्प्तासि । कल्प्स्यति । चिक्लृप्सति । पर स्मैपदेष्वित्यनुवृत्तेरिह ७-२-४४ स्वर....इति विधीयमान ऊँदिल्लक्षणो विकल्प एव- कल्पितासे, कल्प्तासे । कल्पिष्यते, कल्प्स्यते । चिकल्पिषते , चिक्लृप्सते । चिक्लृप्सिता । चिक्लृप्स त्वम् ।

७-२-६१ अचस्तास्व'त् थल्'यनिटो' नित्य'म् ॥६३,६६

निनेथ । जुहोथ ।

७-२-५७ सेऽसिँ-कृत....नृतः=कृत् प्रभृतिभ्यः परस्य, असिँचि= सिँज्भिन्ने= सिँज्भिन्नस्य, से= सकारादावार्धधातुके= सकारादेरार्धधातुकस्य, वा (७-२-५६) इट् (७-२-५२)। सूत्रे से इति सप्तम्यन्तं कृत... नृतः, इति पञ्चम्यन्तेन षष्ठ्यन्ताय कल्प्यते। अतस्तथैवोक्तम्। आर्धधातुकस्येति तु ७-२-३५ आर्ध....सूत्रादनुवर्तत एव। व्यभिचाराभावेन तु मध्यगेषु सूत्रेषु नोक्तम्।

७-२-५८ गमे- अत्रेड्ग्रहणं नित्यार्थम्। गमेः= गम्धातोः परस्य, से (७-२-५७)= सकारादेः, आर्धधातुकस्य (७-२-३५) इट्=, इडागमो भवति, परस्मैपदेषु (तङानयोरभावे, इति दीक्षितः। तेन कृत्यपि भवति पर स्मैपदलुकि च) **संजिगमिषिता** सम्+ गम्+सन्+ तृच्। परस्मैपदाभावेऽप्यत्रेट्। **अधिजिगमिषिता** अधि+ इङ्+ सन्। प्राग्वदिट्। जिगमिष त्वम् गम्+ सन् + लोँटि मध्यमपुरुषैकवचनम्। ६-४-१०५ अतो...इति परस्मैपदस्य= हेर्लुक्यप्यत्रेट्। **संजिगंसिता** गम् धातोः सन्। अतो न दीर्घः। अधिजिगांसिता इत्यत्र तु २-४-४८ इङः.....इति इङो गम्। अतोऽत्र ६-४-१६ अज्झ....इति दीर्घः।

७-२-५९ नवृ-वृद्....तुर्भ्यः= वृत् वृध् शृध् स्यन्द् इत्येतेभ्यश्चतुर्भ्यो धातुभ्यः परस्य, से (७-२-५७) आर्धधातुकस्य (७-२-३५) न= न इट्, परस्मैपदेषु (७-२-५८)। उदाहरणेषु १-३-९२ वृद्भ्यः....इति पाक्षिकं परस्मैपदम्। **विवृत्सति**, इत्यत्र १-२-१० हल....इति सनः कित्वाद् गुणप्रतिषेधः। **विवृत्सिता** वृत् (वृध् वा)+ सन्+ तृच्। **विवृत्स त्वम्**। प्राग्वत् सन्। लोँटि मध्यमपुरुषैकवचनम्।

७-२-६० तासि- क्लृपः= क्लृपः परस्य, से (७-२-५७) आर्धधातुकस्य (७-२-३५) तासि च= तासेश्च, न (७-२-५९) परस्मैपदेषु (७-२-५८)।

७-२-६१ अच- उत्तरसूत्रात् प्रकृतसूत्रे उपदेशे इत्यपकृष्य तासि (७-२-६०)= तास्प्रत्यये, नित्यम्+ अनिटः = नित्यम् इड्रहितात्, उपदेशे (७-२-६२) अचः = अजन्ताद् धातोः परस्य, थलि= थलः, तास्वत्= तासेरिव, न (७-२-५९)। तास्वत् इति ५-१-११५ तत्र....इति षष्ठ्यन्ताद् वतिँप्रत्ययान्तम्। तास्वदितिनिर्देशेन च तासौ यस्य प्रयोगो भवति, इडागमश्च तासेँर्न भवति तस्यैव थलि प्रतिषेध इति ज्ञायते। तेन जघसिथ इत्यत्र नाऽयं प्रतिषेधः। लुँटि घस्लादेशाऽभावेन तासि प्रयोगाभावात्। अच इति पञ्चम्यन्तेन थलीति सप्तम्यन्तं षष्ठ्यन्ताय कल्प्यते- थलि= थलः, इति। ७-२-१३ कृ सृ....इति नियम-प्राप्तस्यायं प्रतिषेधः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-६२ उपदेशेऽत्वतः ॥	ततप्थ ।

७-२-६२ उप- ३-४-८१ लिंटस्तझ....सूत्रानन्तरं सूत्रमिदं पाठयम्। अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

७-२-५८ गमेः इट् परस्मैपदेषु ॥ ७-२-५९ न वृद्भ्यश्चतुर्भ्यः ॥ ७-२-६० तासि च क्लृपः ॥

(घ) (ङ) (च) (छ)

७-२-६१ अचः तास्वत् थलि अनिटः नित्यम् ॥

७-२-६२ उपदेशेऽत्वतः (ग)(छ)(च) (ङ) (घ) (ख) (क) ॥ इति । उपदेशेऽत्वतः=उपदेशे ह्रस्वाकारवतः, (ग)= तासि (छ)= नित्यम्, (च)= अनिटः= इड्रहिताद् .(तासिँ प्रत्यये नित्यम् इड्रहितात्, इति भावः) धातोः परस्य,(ङ)= थलि= थलः, (घ)= तास्वत्= तासिँ प्रत्ययस्येव, (ख)+(क)=न इट्=इडागमो न भवति । इत्यर्थोपदेशप्रसङ्गे शिक्षकः सूत्रस्यास्य भावार्थमधोनिर्दिष्टरूपेण विशदयेत् ।

यथा- अर्थाद् यो धातुरुपदेशे ह्रस्वाकारवान् वर्तते, ततो लुँट् प्रत्यये तासिँ प्रत्ययस्य इडागमः सर्वथा न भवति चेत् तस्माद् धातोः परस्य थल इडागमो न भवति । इति । अथ शिक्षकः स्वयं लक्षणसमन्वयमपि वोधयेत् । यथा- प्रकृते तप् धातुरुपदेशे ह्रस्वाकारवान् वर्तते, तप् धातोर्लुँटि तासिँ प्रत्यये तप्ता इत्यादिषु इडागमोऽपि सर्वथा न भवति । ७-२-१० एका....सूत्रेण निषेधात् । अतः प्रकृते ७-२-१३ कृ सृ....इति नियमेन प्राप्तो ऽपीट् प्रकृतसूत्रेण प्रतिषिध्यत इति । अथेत्थम् इट् प्रतिषेधसंभावनायां छात्र-मस्तिष्के सम्यक् स्फुरितायां शिक्षकश्छात्रान् वदेत्- वत्साः ? प्रकृतप्रयोगे यद्यपि ७-२-६२ उप....सूत्रं प्रवर्तते ७-२-६१ अच.....सूत्रं न प्रवर्तते तथापि प्रकृतसूत्रार्थस्तत्सूत्रार्थाऽनुबन्धी वर्तते । अतः प्रथमं ७-२-६१ अच...सूत्रार्थमुपदिश्यैव प्रकृत- प्रक्रियामग्रत उपदेक्ष्यामीति । अथ- तत्सूत्रार्थोपदेशे श्यामपाटी-प्रयोगो-

यथा- (क) (ख) (ग)

७-२-५८ गमेः इट् परस्मैपदेषु ॥ ७-२-५९ न वृद्भ्यश्चतुर्भ्यः ॥ ७-२-६० तासि च क्लृपः ॥

(ज)

७-२-६१ (ज) अचः तास्वत् थलि (ख)(क) अनिटः (ग) नित्यम् ॥ ७-२-६२ उपदेशेऽत्वतः ॥ इति । एतत्सूत्रार्थोपदेशात् पूर्वं शिक्षकश्छात्रान् वोधयेत्- वत्साः ? यथा प्राय उपरितनात् क्षेत्रादधस्तने क्षेत्रे जलमायाति; क्वचित्तु अधस्तनात् क्षेत्रादुपरितने क्षेत्रेऽपि गतं दृश्यते । तथैवा ऽ नुवृत्तिरपि प्राय उपरि तनसूत्रादधस्तने सूत्रे भवति । क्वचित्तु अधस्तनसूत्रादुपरितने सूत्रेऽपि अपकर्षो भवति । प्रकृते च ७-२-६२ उप.... सूत्रात् ७-२-६१ अच सूत्रे उपदेशे इत्यपकृष्यते, इति । एवमुपदिश्य सूत्रार्थमुपदिशेत्- यथा-(ज)=उपदेशे, अचः= अजन्ताद्, (ग)=तासि, नित्यम्, अनिटः= इड्रहितात् (तासिँ प्रत्यये सर्वथा इड् रहिताद्) धातोः परस्य, थलि= थलः, तास्वत्= नासिँ प्रत्ययस्येव, (ख)+(क)=न+ इट् इति । अस्यापि भावार्थः पूर्ववत् । केवलं तत्रत्येन 'उपदेशे ह्रस्वाकारवान्' इत्यंशेन 'उपदेशे ऽ जन्तः' इत्यंशो विनिमातव्यः । अस्य सूत्रस्योदाहरणाय नीधातोर्लिटि "नी+थ" इति श्यामपाट्यां लिखित्वा छात्रैरेव क्रादिनियमेन इडागमप्राप्तिं संभाव्य स्वयमस्य सूत्रस्य समन्वयं वोधयेत् । यथा- नीधातुरुपदेशेऽजन्तो वर्तते, तस्माल्लुँटि तासिँप्रत्यये नेता इत्यादौ इडागमो ऽपि सर्वथा न भवति, ७-२-१० एका.....इति निषेधात् । इति । इत्थं नी+ थ इत्यत्र ७-२-१३ कृसृ..... इति नियमेन प्राप्त इट् ७-२-६१ अच....सूत्रेण प्रतिषिध्यते, इति च्छात्रमस्तिष्के प्रतिषेधसम्भावनायां सम्यक् स्फुरितायां 'तप्+थ' 'नी+थ' इति श्यामपाट्यां लिखित्वा ७-२-६३ ऋतो....सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-६३ ऋतो भारद्वाजस्य ॥
निनयिथ । जुहविथ । तेपिथ । अन्येषां मते- निनेथ । जुहोथ । ततप्थ । ऋदन्तस्य तु जहर्थ । चकर्थ । इत्येव ।

७-२-६३ ऋतो- ७-२-६१ अचस्तास्वत्... ७-२-६२ उपदेशे....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख (ग)
७-२-५८ गमेः इट् परस्मैपदेषु ॥ ७-२-५९ न वृद्भ्यश्चतुर्भ्यः ॥ ७-२-६० तासि च क्लृपः ॥
(घ) (ङ) (च) (छ)
७-२-६१ अचः तास्वत् थलि अनिटः नित्यम् ॥ ७-२-६३ (ग)(छ)(च) ऋतः (ङ)(घ)(ख)(क) भारद्वाजस्य ॥

इति । (ग)= तासि (छ)= नित्यम्, (च)= अनिटः, ऋतः=ऋदन्ताद् धातोः परस्य (ङ)=थलि= थलः, (घ)= तास्वत् (ख)+(क)=न+इट्, भारद्वाजस्य= भारद्वाजस्य मते । इत्यर्थः सूत्राक्षरैर्लभ्यते । इति वदता शिक्षकेणच्छात्रा अधो निर्दिष्टरूपेण बोधयितव्याः । वत्साः ? प्रकृतसूत्रेण ऋदन्ताद् धातोः परस्य थल इट् प्रतिषिध्यते । ७-२-६१ अच....सूत्रेण च अजन्ताद् धातोः परस्य थल इट् प्रतिषिध्यते ,। ऋकारोऽपि अच् प्रत्याहारे वर्तत एव । अतः ७-२-६३ ऋतो....सूत्रं किमावश्यकं प्रतीयते ? इति प्रश्नपूर्वकं छात्रैर्विमर्श्य 'नावश्यकं प्रतीयते' इति तेभ्य उत्तरे आगते शिक्षकः ७-२-१३ कृसृ...सूत्रे प्रस्तुतं मातुलनिमन्त्रणादृष्टान्तमुद्बोध्य स्फुटमर्थं बोधयेत् । तासि नित्यम् अनिटः ऋदन्तादेव धातोः परस्य थलः, तास्वत् न इट्, अन्येभ्यः परस्य तु इट् भवत्येव भारद्वाजस्य मते । इत्यर्थमुपदिश्य लक्षणसमन्वयप्रसङ्गे बोधयेत्-तप् धातुर्नीधातुश्च ऋदन्तौ न स्तः । अतोऽत्र थल इड् भवति । इत्युपदिश्य नीधातुं साम्प्रतं त्यक्त्वा तप् धातुमेव प्रथममुपदिशेत् । 'तप्+इथ' इति श्यामपाटचां लिखित्वा ऽग्रिमप्रक्रियां पठ्धाताविवेत्युपदिशन् प्रक्रियां छात्रैरुच्यमानां शृण्वन् तेपिथ इति रूपे साधिते पुनरग्रे बोधयेत्- वत्साः ? ७-२-६३ ऋतो....सूत्रेण नियमस्तु भारद्वाजस्य मते क्रियते । अन्येषां मते तु नियमाभावात् ७-२-६२ उप....सूत्रेण इटः प्रतिषेध एव भवति । इति वदन् 'ततप्थ' इति रूपान्तरं तैः साधयित्वा तत्र कथमेत्वाभ्यासलोपौ नेतिच्छात्रान् परीक्षेत । इत्थमकारवतस्थलो विकल्पेन इडागमो भवति । एवम् ऋकारभिन्नानामजन्तानामपि भारद्वाजमते थल इड् भवति, अन्येषां मते न भवति । एवञ्च तेषामपि थलो विकल्पेनेडागमः फलति । यथा पूर्वं प्रस्तुते 'नी+थ' इत्यत्र विकल्पेन इड् भवतीति बोधयेत् । निनयिथ, निनेथ, इति रूपद्वयसिद्धिं छात्रैः कारयेत् । प्रकृत-तप् धातोर्वस्मसोस्तु ७-२-१३ कृसृ.... नियमादिट् । इत्युपदिशन् तेपिव, तेपिम, इति रूपे छात्रैः साधयेत् ।

अथोल्वणोपदेशः

अत्र शिक्षकेणावधेयं यद् इडागमविषयकोऽयमुपदेशो छात्राणां मस्तिष्के भाराय जातोऽस्तीति । अत इतः परं नोपदिशेत् । तद्दिने ऽभ्यासाया ऽवकाशं दद्यात् । अन्येद्युः पुनरिडागमचर्चां प्रस्तुवन् स्मयमानः शिक्षकोऽधो निर्दिष्टरूपेणोपदिशेत् । वत्साः ? यूयम् इडागमविषये कान्तारे प्रविष्टा इव जाताः किमु ? न विषीदत । ज्ञायते स्फुटमेव । सावधानं शृणुत । एतत् तु यूयं जानीथ एव यत्, ये एकाचः , अनुदात्ता अजन्ता हलन्ताश्च धातवः पूर्वमुपदिष्टाः, तेषां लुँङ् लकारादौ तास्यादिप्रत्ययस्य इडागमः प्रतिषिध्यते इति । 'एतत् तु जानीमः' इति च्छात्रेभ्य उत्तरे आगते शिक्षकः सस्मितं तर्हि तु ज्ञातकल्प एवायं विषयो युष्माभिरिति वदन्नग्रे वदेत्- येषामनुदात्तानां धातूनां लुँङ्लकारादौ तास्यादिप्रत्ययस्येट् प्रतिषिध्यते, तेषां (कृ सृ प्रभृतिभिन्नानां) सर्वेषां लिँटि तु इड् भवति । ७-२-१३ कृ सृ....इति सूत्रेण नियमात् । यथा पूर्वम् रुध् धातो लिँटि इडागमो विहितः- रुरोधिथ । रुरुधिव । रुरुधिम । रुरुधिषे । रुरुधिध्वे । रुरुधिवहे । रुरुधिमहे । रूपाणि च ७-२-१३ कृ सृ...सूत्रे ३-४-८१ लिँट ...सूत्रे चोदाहृतानि । अर्थात् कृ सृ भृ वृ स्तु द्रु स्रु श्रु धातूनामेव लिँटि इट् प्रतिषेधो भवति, अन्येषां तु अनुदात्तधातूनामपि लिँटि इडागमो भवति । इति बुद्धं न वा ? 'इदमपि बुद्धम्' इति च्छात्रेभ्य उत्तरे आगते पुनः शिक्षको ऽग्रे उपदिशेत् । वत्साः ७-२-१३ कृ सृ....इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-६४बभूथाततन्थजगृभ्मववर्थेति निगमे ॥

त्वं हि होता प्रथमो बभूथ। येनान्तरिक्षमुर्वाततन्थ। जगृभ्म ते दक्षिणमिन्द्र हस्तम्। ववर्थ त्वं हि ज्योतिषा। भाषायां तु-बभूविथ। आतेनिथ। जगृहिम। ववरिथ।

७-२-६५ विभाषा सृजिदृशोः ॥

ससर्जिथ; सस्रष्ठ। ददर्शिथ; दद्रष्ठ।

७-२-६६ इडत्त्यर्तिव्ययतीनाम् ॥

आदिथ। आरिथ। विव्ययिथ।

७-२-६७ वस्वेकाजाद्घसाम् ॥ ६९

आदिवान्। पपिवान्। जक्षिवान्। नियमान्नेह-विभिद्वान्। बभूवान्। जगद्वान्।

नियमेन कृ सृ प्रभृतिभिन्नानां लिँट इडागमस्तु भवति, परन्तु अजन्तधातूनां (नी क्री प्रभृतीनां) हलन्तेषु च ह्रस्वाकारवतां (तप् प्रभृतीनां) थलः ७-२-१३ कृ सृ.... इति नियममात्रेण इडागमो न भवति। किन्तु भारद्वाजमते इडागमो भवति। अन्येषां मते न भवति। अर्थात् तेषां थलि द्वे रूपे भवतः। ऋकारान्तात् पर स्य तु थलः सर्वथा इडागमो न भवति। इति। एवं बोधयित्वा ऽ धोनिर्दिष्टानां धातूनां लिँटि सिपि वस्मसोश्च रूपाणि लिखतेति परीक्षेत। भिद् शक् युज् खिद् तुद् सद् लिप् नम् इति। यदि तुच्छात्रा अशुद्धमुत्तरेयुस्तदा शिक्षकः कारणबोधनपुरस्सरं शोधयेत्। यदवधि इडागमव्यवस्थां छात्राः सम्यङ् न बुध्यन्ते; तदवधि शिक्षकेण पाठोऽग्रे न वर्धयितव्यः। तप् धातोः कर्मणि लिँटि अपि ७-२-१३ कृ सृ....इति नियमेनेट्। तेपे। तेपाते तेपिरे। तेपिषे। तेपाथे। तेपिध्वे। तेपे। तेपिवहे। तेपिमहे। इमानि रूपाणि च्छात्रैरुच्यमानानि शिक्षकः शृणुयात्। अथ- क्री धातुं लिँटि उपदेष्टुकामः सत्यावश्यके ७-४-६२ कुहो.... सूत्रमुद्बोध्य च्छात्रैः साध्यमानं 'चिक्री+ अ' इति श्यामपाटचां लिखित्वा ६-१-७४ इको....७-३-८४ सार्व....सूत्रे बाधयित्वा ७-२-११५ अचो.... सूत्रमुद्बोध्य लक्षणसमन्वयं छात्रैः कारयित्वा 'चिक्रै+ अ' इति श्यामपाटचां लिखित्वा छात्रैरेवायादेशं कारयेत्। चिक्राय। तसि-'चिक्री + अतुस्' इति श्यामपाटचां लिखित्वा १-२-५ असं...... सूत्रमुद्बोधयन् कित्त्वेन गुणाऽभाव इति बोधयित्वा ६-४-७७ अचि श्नु...... सूत्रमुपदिशेत्।

७-२-६४बभूधा...... ववर्थेति= एते इड्रहिता निपात्यन्ते, निगमे= वेदे। भू, आ+तन्, वृ धातूनां थलीडभावः। आद्ये गुणाऽभावश्च। ग्रह्धातोस्तु मसि (म आदेशे सति) इडभावः। **लोके तु- बभूविथ** नित्यत्वाद् वुँग् गुणं बाधते। आतेनिथ। जगृहिम। **ववर्थ** ७-२-१३ कृ सृ.... इति सूत्रेणैव प्रतिषेधे सिद्धे ववर्थेति निपातनं वेदे एवेति नियमार्थम्। तेन भाषायां थलीट्- ववरिथ। ववृम।

७-२-६५ विभा- सृजिदृशोः= सृज् दृश् धातुभ्यां परस्य, थलि (७-२-६१)=थलः, विभाषा= वा, इट् (७-२-५८)। ७-२-१३ कृ सृ....इति नियमान्नित्यमिडागमे प्राप्ते विकल्पार्थमिदम्। **सस्रष्ठ, दद्रष्ठ** ६-१-५७ सृजि....इत्यमागमः। ८-२-३६ व्रश्च..... इति षत्वम्।

७-२-६६ इड- अत्त्य....तीनाम्= अत्ति= (अद्१०११) अर्ति (ऋ ९३६+१०९७) व्ययति (व्येञ् १००७) इत्येतेषाम्, थलि (७-२-६१) इट् = इडागमो भवति। अत्तिव्ययत्योर्भारद्वाजनियमेन वैकल्पिके इडागमे प्राप्ते अर्तेर्नित्यं प्रतिषेधे प्राप्ने वचनम्। विव्ययिथ ६-१-४५ न व्यो.... इत्यात्वप्रतिषेधः।

७-२-६७ वस्वे- एकाचाद्घसाम्= कृतद्विर्वचनानामेकाचामादन्तानां घसेश्च, इत्येतेभ्य एव परस्य, वसुँ= वसोः, इट् (७-२-६१)। ७-२-१३ कृसृ....इति नियमात् प्राप्त इड् नियम्यते। कृतद्विर्वचनानामित्यर्थः कथं लभ्यते ? उच्यते= अकृते द्विर्वचने को ऽपि धातुरनेकाज् न संभवति किमर्थं सूत्रे एकाज्ग्रहणम् ? तद् व्यर्थं सज् ज्ञापयति-कृतद्विर्वचनानामिति। ननु च ऊर्णु जागृ वर्तेते, तयोर्व्यावृत्त्यर्थमेकाज्ग्रहणं स्यात्, इति चेन्न। आद्ये णुवद्भावाद् द्वितीयेऽ पि जागर्तेर्न इत्येव ब्रूयात्। अत्र काशिका- दरिद्रातेस्तु कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमित्यामा भवितव्यम्। दरिद्राञ्चकार। अथाम् न क्रियते तथापि च दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधौ इति प्रागेव प्रत्ययोत्पत्तेराकारे लुप्ने इडागमस्य निमित्तं विहनमिति न इडागमो भवनि। ददरिद्वान् इनि भविनव्यमिनि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-६८ विभाषा गमहनविदविशाम् ॥

जग्मिवान्, जगन्वान् । जघ्निवान्, जघन्वान् । विविदिवान्, विविद्वान् । विशिसाहचर्यात् तौदादिकस्यैव विदेर्ग्रहणम् । तेनादादिकस्य विदेर्विविद्वानित्येव । विविशिवान्, विविश्वान् ।

(दृशेश्चेति वक्तव्यम्)

ददृशिवान्, ददृश्वान् ।

७-२-६९ सनिंससनिवांसम् ॥

अग्निंत्वाग्ने सनिंससनिवांसम् । सनिंपूर्वादन्यत्र सेनिवांसमित्येव भवति ।

७-२-७० ऋद्धनोः स्ये ॥

करिष्यति । हनिष्यति । ७-२-४४ स्वर... इत्यतः परत्वादयमिट्- स्वरिष्यति ।

७-२-७१ अञ्जेः सिँचि ॥ ७३

आञ्जीत् । आञ्जिष्टाम् । आञ्जिषुः ।

७-२-७२ स्तुसुधूञ्भ्यः परस्मैपदेषु ॥

अस्तावीत् । असावीत् । अधावीत् । परस्मैपदेष्वित्युक्तेरिह न- अस्तोष्ट । असोष्ट । इह च विकल्प एव- अधविष्ट, अधोष्ट ।

७-२-७३ यमरमनमातां सँक् च ॥

अयंसीत् । व्यरंसीत् । अनंसीत् । अयासीत् । परस्मैपदेष्वित्यनुवृत्तेर्नेह- आयंस्त । अरंस्त । अनंस्त ।

७-२-७४ स्मिपूङ्रञ्ज्वशां सनि ॥७५

सिस्मयिषते । पिपविषते । अरिरिषति । अञ्जिजिषति । अशिशिषते ।

७-२-७५ किरश्च पञ्चभ्यः ॥

चिकरिषति । जिगरिषति, जिगलिषति । अत्रे (७-२-३८ वृतो....इती) टो दीर्घो नेष्यते । दिदरिषते । दिधरिषते । पिपृच्छिषति ।

७-२-६८ **विभा-** गम....विशाम्= गम्प्रभृतिभ्यः परस्य, वसुँ (७-२-६७) विभाषा=वा, इट् (७-२-५८) ।

७-२-६९ **सनिं**...... वांसम्= सनिंपूर्वस्य सनेः क्वसाविदं निपात्यते । सनतेः सनोतेर्वा एत्वाभ्यासलोपाभावः क्वसोरिट् च निपात्येते । छन्दसीदं निपातनं विज्ञायते । इति काशिका ।

७-२-७० **ऋद्धनोः**= ऋदन्ताद् धातोर्हन्तेश्च परस्य, स्ये= स्यस्य, इट् (७-२-५८) ।

७-२-७१ **अञ्जेः**= अञ्ज् धातोः परस्य, सिँचि= सिँचः, इट् (७-२-५८) । ऊँदित्वात् ७-२-४४ स्वर....इति विकल्पे प्राप्ते नित्यमिट् ।

७-२-७२ **स्तुसुधूञ्भ्यः**= स्तुप्रभृतिभ्यः परस्य, सिँचि (७-२-७१) इट् (७-२-५८) परस्मैपदेषु= परस्मैपदेषु परेषु । स्तु सु इत्येतावनुदात्तौ । तयोः ७-२-१० एका....इति प्रतिषेधे प्राप्ते, धूञस्तु ७-२-४४ स्वर....इति विकल्पे प्राप्ते वचनम् ।

७-२-७३ **यम**....माताम्= यमादीनामादन्तानां च धातूनाम्, सँक्= सँगागमो भवति, सिँचः (७-२-७१) =एभ्यः परस्य सिँचश्च, इट् (७-२-५८) परस्मैपदेषु (७-२-७२) । **व्यरंसीत्** १-३-८३ व्याङ्परि....इति परस्मैपदम् । **आयंस्त** १-३-२८ आङो...इत्यात्मनेपदम् । **अनंस्त** कर्मकर्तर्यात्मनेपदम् । ३-१-८९ न दु....इति चिणः प्रतिषेधः ।

७-२-७४ **स्मि**.....शाम्= स्मिङ् पूङ् ऋ अञ्जूँ, अश् (१२६३) इत्येतेभ्यः परस्य, सनि= सनः, इट् (७-२-५८) । अञ्जेरशेरूँदित्वाद् ७-२-४४ स्वर...इति वैकल्पिके प्राप्ते ऋस्म्योरेकाजनुदात्तत्वात् ७-२-१० एका....इति प्रतिषेधे प्राप्ते पूङः ७-२-१२ सनि..... इति प्रतिषेधे प्राप्ते वचनम् ।

७-२-७५ **किरः+** पञ्चभ्यः= कॄ गॄ दृङ् धृङ् प्रच्छ् इत्येतेभ्यः पञ्चभ्यः परस्य, सनः (७-२-७४) इट् (७-२-५८) । आद्ययोः ७-२-१२ सनि....इति प्रतिषेधं बाधित्वा ७-२-४१ इट् स... इति विकल्पेन प्राप्ते, शेषेषु त्रिषु ७-२-१० एका..... इति प्रतिषेधे प्राप्ते वचनम् । **दीर्घो नेष्यते** ७-२-३७ ग्रहो.... सूत्रे स्पष्टमेतत् । **पिपृच्छिषति** १-२-८ रुद......इति कित्त्वात् ६-१-१६ ग्रहि....इति सम्प्रसारणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-७६ रुदादिभ्यः सार्वधातुके ॥ ८१

रोदिति । रुदितः । स्वपिति । स्वपितः । श्वसिति । श्वसितः । अनिति । अनितः । जक्षिति । जक्षितः । वलादेरित्यनुवृत्तेर्नेह- रुदन्ति । स्वपन्ति । श्वसन्ति । अनन्ति । जक्षति । सार्वधातुके इत्युक्तेर्नेह :- स्वप्ता ।

७-२-७७ ईशः से ॥ ७८

ईशिषे । ईशिष्व । ईशिध्वे । ईशिध्वम् ।

७-२-७८ ईडजनोर्ध्वे च ॥

ईडिषे । ईडिध्वे । ईडिष्व । ईडिध्वम् । जनी प्रादुर्भावे इत्यस्य छन्दसि श्यनो लुक् उपधालोपाभावश्च । जनिषे । जनिध्वे । जनिष्व । जनिध्वम् । जनँ जनने इति श्लुविकरणस्य कर्मव्यतिहारे-व्यतिजज्ञिषे । व्यतिजज्ञिष्व । व्यतिजज्ञिध्वे । व्यतिजज्ञिध्वम् । अत्र पूर्वसूत्रात् ईश इत्यनुवर्तते, तेन ईशोऽपि ध्वे इत्यस्य इडागमः । ईशिध्वे । ईशिध्वम् । सेध्वे इति विकृतनिर्देशान्नेह- ऐड्ढ्वम् ।

७-२-७९ लिँङः स लोपोऽनन्त्यस्य ॥

अद्यात् । अद्याताम् । अद्युः । एधेत । एधेयाताम् । एधेरन् ।

७-२-८० अतो येयः ॥ ८२,८१

पठेत् । पठेताम् । पठेयुः ।

७-२-७६ रुदा- पञ्चमी सप्तमीं षष्ठीं कल्पयति । रुदादिभ्यः= रुद् स्वप् श्वस् अन् जक्ष् इत्येतेभ्यः , पञ्चभ्यः (७-२-७५) परस्य, वलादेः (७-२-३५) सार्वधातुके= सार्वधातुकस्य, इट् (७-२-५८) । अत्र वलादे (७-२-३५) रित्यनुवर्तत एव । मध्ये व्यभिचाराभावात्तु न दर्शितम् । **जक्षति** ६-१-६ जक्षि.... इत्यभ्यस्तत्वात् ७-१-४ अद..... इत्यत् ।

७-२-७७ ईशः= ईश् धातोः परस्य, सार्वधातुकस्य (७-२-७६) से= से इत्येतस्य, इट् (७-२-५८) । **ईशिष्व** एकदेशविकृतमनन्यवद् भवति । **ईशिध्वे** इत्यस्याग्रिमसूत्रेणेड् भविष्यति ।

७-२-७८ ईडजनोः= ईड् जन् धातुभ्यां परस्य, सार्वधातुकस्य (७-२-७६) ध्वे= ध्वे इत्यस्य, से (७-२-७७) च, इट् (७-२-५८) । शेषं मूले स्फुटम् ।

७-२-७९ लिँङः- ३-४-१०३ यासुँट्...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र शिक्षको ऽनुवर्तमाने सार्वधातुके इति पदविषयेऽधस्तनीं हरदत्तोक्तिं मनसाऽवदध्यात्- नैषा परसप्तमी सार्वधातुकपरस्य लिँङोऽसम्भवात् । तस्मान्निर्धारणे सप्तमी । जातावेकवचनम् । सार्वधातुकेषु मध्ये यो लिङ् सार्वधातुकसंज्ञकस्तस्येत्यर्थः । इति । अथाऽत्र श्यामपाटीप्रयोगो यथा-

(क)

७-२-७६ रुदादिभ्यः सार्वधातुके ७-२-७९ (क) लिँङः स लोपो ऽनन्त्यस्य ॥ इति । अत्र 'स' इति लुप्तषष्ठयन्तं पृथक् पदम् । तच्च अनन्त्यस्येत्यस्य विशेष्यमित्यवगच्छता शिक्षकेण सूत्रार्थ उपदेश्यः- (क)= सार्वधातुके= सार्वधातुकस्य, लिँङः= लिँङ् सम्बन्धिनः, अनन्त्यस्य, अन्त्याऽवर्तमानस्य, स= सकारस्य, लोपः = लोपो भवति । इति । लक्षणसमन्वयं छात्रैः कारयित्वा 'पठ+या+ति' इति श्यामपाटचामवशेष्य ७-२-८० अतो येयः-सूत्रमुपदेश्यम् ।

७-२-८० अतो- ७-२-७९ लिँङः.... सूत्रानन्तरं सूत्रमिदं पाठचम् । अतः+ अङ्गात् (६-४-१)= अदन्तादङ्गात् परस्य, सार्वधातुके (७-२-७६)= सार्वधातुकस्य= सार्वधातुकावयवस्य, या=या इत्यस्य स्थाने, इयँः= इयँ (कृतानुबन्धलोप इय्) आदेशो भवति । इत्यर्थः । (अत्र शिक्षकेणाऽवधेयम्- भव+ या+ उस् इत्यवस्थायाम्= अत्र दीक्षितः "परत्वान्नित्यत्वाच्चातो येय इति प्राञ्चः" इति प्राचामुक्तिमुद्धरन् यद्यप्यन्तरङ्गत्वात् पररूपं न्याय्यं, तथापि यास् इत्येतस्य इय् इति व्याख्येयम् । एवं च सलोपस्यापवाद इय् । अतो येय इत्यत्र तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-८१ आतो ङितः ॥

पचेते । पचेथे । पठचेते । पठचेथे । अत इत्यनुवृत्तेर्नेह- चिन्वाते । चिन्वाथे । ङित इत्युक्तेर्नेह- पचावहै । पचामहै ।

७-२-८२ आने मुंक् ॥ ८३

पचमानं चैत्रं पश्य ।

७-२-८३ ईदासः ॥

आसीनं पश्य ।

७-२-८४ अष्टन आ विभक्तौ ॥ ८८,११३

अष्टाभिः, अष्टभिः । जश्शसोस्तु :-अष्टौ, अष्ट। बहुव्रीहौ-प्रियाष्टानः । शसि- प्रियाष्ट्नः । हलादौ तु प्रियाष्टाभिः, प्रियाष्टभिरित्यादि ।

७-२-८५ रायो हलि ॥

राः । राभ्याम् । राभिः । प्ररि । एकदेशविकृत-मनन्यवद् भवति । प्रराभ्याम् । प्रराभिः ।

७-२-८६ युष्मदस्मदोरनादेशे ॥९८,८९

युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः । युष्मासु । अस्मासु ।

सन्धिरार्ष इत्युपदिशति । पूर्वोपस्थितनिमित्तकस्याऽ प्यन्तरङ्गत्वेनान्तरङ्गत्वस्य तुल्यत्वे परत्वान्नित्यत्वाच्चेति प्राचामाशयः । पररूपे कृतेऽपि पूर्वान्तवद्भावेनेयादेशस्य प्राप्त्या नित्यत्वं बोध्यम् ।) लक्षणसमन्वयो ऽनुबन्धलोपश्चच्छात्रैः कारयितव्यः । अथ 'पठ+इय्+ति' पठेय्+ ति इति श्यामपाटचां लिखित्वा ६-१-६४ लोपो.....सूत्रमुद्बोधनीयम् । अथ श्यामपाटचां पठे+ ति इत्यवशेष्य ३-४-१०० इतश्च....सूत्रमुद्बोधनीयम् । पठेत् ।

तस्-

तसि पूर्ववत् प्रक्रियायां ३-४-१०१ तस् थस्....सूत्रं प्रवर्तत इति वदता शिक्षकेण च्छात्रैरुच्यमाना प्रक्रिया श्रोतव्या । **झि-**

झि इत्यादेशे पूर्ववत् प्रक्रियायां पठेय्+झि इत्यवस्थायाम् ३-४-१०८ झेर्जुस्-सूत्रमुपदेश्यम् ।

७-२-८१ आतो- १-२-४ सार्वधातुक....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-२-८० अतो या इयँः ॥ ७-२-८१ (क) आतः (ख) ङितः ॥ इति । (क)= अतः= ह्रस्वाकारात् परस्य, ङितः+ आतः= ङित्सम्बन्धिन आकारस्य स्थाने (ख)= इयँः = इयँ (अनुबन्धलोपे, इय्) आदेशो भवति । लक्षणसमन्वयं छात्रैः कारयित्वा पठच+इय्+ ताम् इति श्यामपाटचां लिखित्वा छात्रैः सन्धिं कारयित्वा पठचेय्+ ताम् इति श्यामपाटचां लिखित्वा ६-१-६४ लोपो....सूत्रमुपस्थापयेत् ।

७-२-८२ आने- अङ्गस्य (६-४-१) अतः (७-२-८०)= ह्रस्वाकारस्य, मुँक्= मुँगागमो भवति, आने= आने परे ।

७-२-८३ ईदा- आस इति पञ्चम्यन्तेन आने (७-२-८२) इति सप्तम्यन्तं षष्ठचन्तं कल्प्यते । आसः= आस् धातोः परस्य, आने (७-२-८२)= आनस्य स्थाने, ईत् =ईकारादेशो भवति । विधीयमान ईकार आकारस्यैव स्थाने भवति १-१-५३ आदेः....इति सूत्रवलात् ।

७-२-८४ अष्टनः= अष्टन्शब्दस्य स्थाने, आ= आकारादेशो वा, हलि (७-२-८५)= हलादौ, विभक्तौ= विभक्तौ परतः, । (६-१-१६७ अष्ट....इति सूत्रे दीर्घग्रहणाज्ज्ञापकाद् वैकल्पिकोऽयं विधिरिति ज्ञायते) हलि (७-२-८५) उत्तरसूत्रादत्रापकृष्यते । **अष्टौ** ७-१-२१ अष्टा....इत्यत्र द्रष्टव्यम् ।

७-२-८५ रायः= रैशब्दस्य स्थाने, आ (७-२-८४) हलि= हलादौ, विभक्तौ (७-२-८४) ।

७-२-८६ युष्म- ७-२-८९. योऽचि-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

७-२-८४ अष्टन आ विभक्तौ ॥ ७-२-८५ रायो हलि ७-२-८६ युष्मदस्मदोः (क) अनादेशे (ग) (ख) ॥ इति । युष्मदस्मदोः= युष्मदस्मच्छब्दयोः स्थाने, (क)=आ= आकारादेशो भवति, अनादेशे = आदेशभिन्नायाम्, [(ग)= हलि, (ख)= विभक्तौ] =हलादौ विभक्तौ परतः। इत्यर्थमुपदिश्य लक्षणसमन्वयायाऽग्रिमकार्याय च च्छात्राः प्रवर्तयितव्याः । युवाभ्याम् । आवाभ्याम् । भिसि सुपि च ७-२-९२ युवा.....सूत्रवर्जं पूर्ववत् । युष्माभिः । अस्माभिः । युष्मासु । अस्मासु । इति । ङे प्रत्यये ७-१-२८ ङे प्र....सूत्रसमन्वयं छात्रैः कारयित्वा 'युष्मद्+अम् । अस्मद्+ अम्' इति श्यामपाटचां लिखित्वा ७-२-९५ तुभ्यमह्यौ....सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-८७ द्वितीयायां च ॥

त्वाम् । माम् । युवाम् । आवाम् ।
युष्मान् । अस्मान् ।

७-२-८८प्रथमायाश्च द्विवचने भाषायाम् ॥

युवाम् । आवाम् । वेदे तु- युवं वस्त्राणि ।

७-२-८९ यो ऽ चि ॥

त्वया । मया । युवयोः । आवयोः ।
त्वयि । मयि । अनादेशे इत्यनुवृत्तेर्नेह- त्वत् । मत् ।

७-२-८७ द्विती- ७-२-९७ त्वमावेक.... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-२-८४ अष्टन आ विभक्तौ ॥ ७-२-८६ युष्मदस्मदोः अनादेशे ॥ ७-२-८७ (ख)(क) द्वितीयायां च ॥ इति । (ख)= युष्मदस्मदोः= युष्मदस्मच्छब्दयोः स्थाने, (क)= आ= आकारादेशो भवति, द्वितीयायाम्= द्वितीयायां विभक्तौ परतः । लक्षणसमन्वये 'त्व+आ+ अम्' 'म+आ+अम्' इति श्यामपाटचां लिखित्वा रूपसिद्धये छात्राः प्रवर्तयितव्याः । औटि प्रथमाद्विवचनवत् । परन्त्वत्र ७-२-८८ प्रथ....सूत्रेण ७-२-८७ द्विती....सूत्रं विनिमातव्यम् ।

शसि-युष्मान् । अस्मान् । युष्मान् पाठयामि । अस्मान् पाठयतु । इति वक्तव्ये शस् प्रत्यये कृते युष्मद्+ अस्, अस्मद्+ अस् इति श्यामपाटचां लिखित्वा ७-१-२८ ङे प्रथ.... सूत्रं बाधित्वा ७-१-२९ शसो नँ-सूत्रं प्रस्तुत्यम् ।

७-२-८८ प्रथ- ७-२-९२ युवावौ....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-२-८४ अष्टन आ विभक्तौ ॥ ७-२-८६ युष्मदस्मदोः अनादेशे ॥ ७-२-८८ (ख)(क) प्रथमायाश्च द्विवचने भाषायाम् ॥ इति । (ख)= युष्मदस्मदोः= युष्मदस्मच्छब्दयोः स्थाने, (क)= आ= आकारादेशो भवति, प्रथमायाः= प्रथमाविभक्तेः, द्विवचने= द्विवचने परे, भाषायाम्= लैकिकभाषायाम् (वैदिकभाषायां तु नेति बोध्यम्) । अथ शिक्षकेण लक्षणसमन्वयायाऽग्रिमप्रक्रियायै च च्छात्राः प्रवर्तयितव्याः । युवाम् । आवाम् । एवमौटचपि रूपे ज्ञेये । प्रक्रियायां तु तत्र ७-२-८८ प्रथ.... सूत्रेण ७-२-८७ द्विती....सूत्रं विनिमातव्यम् । जसि-यूयम् । वयम् । यूयं पठथ । वयम् पठामः । इति वक्तव्ये । पूर्ववदमि श्यामपाटचां युष्मद्+अम्, अस्मद्+अम्' इति लिखित्वा ७-२-९३ यूय...सूत्रं प्रस्तुत्यम् ।

७-२-८९ योऽचि- ८-२-२३ संयोगान्तस्य.... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

७-२-८४ अष्टन आ विभक्तौ ॥ ७-२-८६ युष्मदस्मदोः अनादेशे ॥ ७-२-८९ (ख) यः (ग) अचि (क) ॥ इति । (ख)=युष्मदस्मदोः, यँः=यँ (अनुबन्धलोपे य्) इत्यादेशो भवति, (ग)= अनादेशे, अचि= अजादौ, (क)= विभक्तौ परतः । इत्यर्थमुपदिश्य लक्षणसमन्वयायच्छात्राः प्रवर्तयितव्याः । अत्र यदि १-१-५१ अलो....सूत्रं छात्रा नावदध्युस्तदा, अनवदधानैर्गणितं व्याकरणं च दुर्बोधं भवतीति शिक्षको धीर माक्षिपेत् । त्वया । त्वयि । मया । मयि । भ्यामि- युवाभ्याम् । आवाभ्याम् । भ्याम्प्रत्यये-युष्मद्+भ्याम्, अस्मद्+भ्याम्, इति श्यामपाटचां लिखित्वा ७-२-९२ युवा...सूत्रसमन्वयाय पररूपाय चच्छात्राः प्रवर्तयितव्याः । अथ युवद्+ भ्याम्, आवद्+भ्याम्, इति श्यामपाटचां लिखित्वा ७-२-८६ युष्मदस्मदो....सूत्रं प्रस्तुत्यम् ।

७-२-९० शेषे- ७-२-९४ त्वाहौ सौ- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र प्रकृतसूत्रार्थोपदेशात् पूर्वं छात्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-९० शेषे लोपः ॥

त्वम् । अहम् । यूयम् । वयम् । अथ-त्वं स्त्री । अहं स्त्री । इत्यत्र, त्व+अम्, अह+ अम्, इत्यवस्थायां परमपि पूर्वरूपं बाधित्वाऽ न्तरङ्गत्वाट्टाप् प्राप्नोति । संनिपातपरिभाषया न भवति । यद् वा 'अलिङ्गे युष्मदस्मदी'। केचित्तु शेषे इति सप्तमी स्थानिनोऽधिकरणत्वविवक्षया । शेषश्च वक्ष्यमाणमपर्यन्तापेक्षः। अतः शेषे= मपर्यन्ताच्छेषस्य (अद् इत्यस्य) लोपः । इत्यर्थ इत्याहुः । अन्तरङ्गे ६-१-९४ अतो....इति पररूपे कृते अद् इत्यस्य लोपेऽदन्तत्वाऽभावान्न टाप् ।

७-२-९१ मपर्यन्तस्य ॥ ९८

७-२-९२ युवावौ द्विवचने ॥

युवाम् । आवाम् । युवाभ्याम् । आवाभ्याम् ।

अधोनिर्दिष्टरूपेण बोधयितव्याः । अयि वत्साः ? प्रकृतसूत्रार्थः, ७-२-८६ युष्म...७-२-८९ योऽचि-सूत्रयो रर्थे ज्ञाते सति सरलो भवति । अतः तयोरर्थ उपदिश्यते । इति । अथ तयोरर्थमात्रमुपदिश्य प्रकृतोदाहर णयोर्द्वे एव सूत्रे न प्रवर्तेते इति बोधयित्वा प्रकृत-सूत्रार्थ उपदेश्यः । शेषे (उक्तादन्यः शेषः)= आत्वयत्वनिमित्तेतर -विभक्तौ परतः, युष्मदस्मदोः (७-२-८६)= युष्मदस्मच्छब्दयोः, लोपः =लोपो भवति । इति । अत्र लक्षणसमन्वय-प्रसङ्गे १-१-५१ अलो.... सूत्रमुद्बोधनीयम् । एवमग्रेऽप्यवधेयम् । अथ त्व + अम्, अह + अम्, इति श्यामपाटचामवशेष्य रूपसिद्धये छात्राः प्रवर्तयितव्याः । त्वम् । अहम् ।

विशेषशिक्षा

अयि वत्साः ? यद्यपि यूयम्, 'त्वम् अहम्' इति रूपे साधितवन्तः । तथापि पृच्छाम्यहम्- युष्म् भागस्य स्थाने 'त्व' इति अस्म् भागस्य स्थाने 'अह' इति कथमभूत् ? विपरीत आदेशः कथं न भवति ? द्वयोरेव स्थाने द्वौ एव वा आदेशौ कथं न भवतः ? इति । अथ यदिच्छात्राः ८-४-३९ स्तोः श्चु....सूत्रोपदिष्टं भागग्रहणदृष्टान्तमुपस्थापयेयुस्तदा 'युक्तम्' इति भणन् पुनः शिक्षकस्तानुपदिशेत् । अयि वत्साः, यद्यप्यहं पूर्वं बोधभारभीत्या दृष्टान्तमात्रं प्रस्तुतवान् पाणिनिसूत्रं नोपन्यस्तवान् । साम्प्रतं तु युष्माकं व्याकरणे प्रवेशो जातकल्पः । अतः क्रमविषये पाणिनेः सूत्रमेव प्रस्तवीमि । इति कथयन् १-३-१० यथासंख्यमनु....सूत्रं प्रस्तुवीयात् ।

७-२-९१ मपर्यन्तस्य= मपर्यन्तभागस्य स्थाने, इत्यधिक्रियते । एतदधिकारात् त्वया, मया, इत्यादौ न दोषः । अन्यथा समुदायस्यैव त्व म आदेशे त्व+आ, म+आ, इत्यवस्थायां ७-२-८९ योऽचि इति प्रवृत्तौ त्व्या म्या इत्यनिष्टे रूपे स्याताम् ।

७-२-९२ युवा-१-३-१० यथासंख्यमनु....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा- (क) (ख) (ग)

७-२-८४ अष्टन आ विभक्तौ ॥ ७-२-८६ युष्मदस्मदोः अनादेशे ॥ ७-२-९१ मपर्यन्तस्य ॥

७-२-९२ (ख)(ग) युवावौ द्विवचने (क) ॥ इति । अथ शिक्षकः सावधानं शृणुत इतिवदन्नर्थमुपदिशेत्- यथा- द्विवचने= द्वयोरुक्तौ, (द्विवचने इति नायं पारिभाषिकः शब्दः, किन्तु वचनमिति भावे ल्युँद । द्वयोर्वचनम्= द्विवचनम्, इति यौगिकः शब्दः) (ख)= युष्मदस्मदोः = युष्मदस्मच्छब्दयोः (ग)= मपर्यन्तस्य = मपर्यन्तभागस्य स्थाने, युवावौ= युव आव इत्येतौ आदेशौ भवतः, (क)= विभक्तौ परतः । इति । अथ लक्षणसमन्वयं छात्रैः कारयित्वा युव+ अद्+ अम्, आव+ अद्+ अम्, इति श्यामपाटचां लिखित्वा स-गुणसवर्णदीर्घबाधनम् ६-१-९४ अतो...... सूत्रसमन्वयं छात्रैरेव कारयित्वा युवद्+ अम्, आवद् + अम्, इति श्यामपाटचां लिखित्वा ७-२-८८ प्रथमायाश्च....सूत्रं प्रस्तुवीयात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-९३ यूयवयौ जसि ॥

यूयम् । वयम् ।

७-२-९४ त्वाहौ सौ ॥

त्वम् । अहम् ।

७-२-९५ तुभ्यमह्यौ ङयि ॥

तुभ्यम् । मह्यम् ।

७-२-९६ तवममौ ङसि ॥

तव । मम ।

७-२-९७ त्वमावेकवचने ॥ ९८

त्वाम् । माम् । त्वया । मया । त्वयि । मयि ।

अथ प्रकृतोपयोगीनि दीक्षितपद्यान्युद्ध्रियन्ते-
समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी ।
समासार्थोऽन्यसंख्यश्चेत् स्तो युवावौ त्वमावपि ।
(१)

सुँ-जस्-ङे-ङस्सु परत आदेशाः स्युः सदैव ते ।
त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि ।
(२)

एते परत्वाद् बाधन्ते युवावौ विषये स्वके ।
त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः ॥
(३)

द्व्येकसङ्ख्यः समासार्थो बह्वर्थे युष्मदस्मदी ।
तयोरद्व्येकतार्थत्वान्न युवावौ त्वमौ न च ॥ इति ।
(४)

त्वां मां वा अतिक्रान्त इति विग्रहे-अतित्वम् । अत्यहम् । अतित्वाम् । अतिमाम् । अतियूयम् । अतिवयम् । अतित्वाम् २ । अतिमाम् २ । अतित्वान् । अतिमान् । अतित्वया । अतिमया । अतित्वाभ्याम् । अतिमाभ्याम् ।अतित्वाभिः । अतिमाभिः । अतितुभ्यम् । अतिमह्यम् । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वभ्यम् । अतिमभ्यम् । ङसिँभ्यसोः- अतित्वत् २ । अतिमत् २ । भ्यामि प्राग्वत् । अतितव । अतिमम । अतित्वयोः । अतिमयोः । अतित्वाकम् । अतिमाकम् । अतित्वयि । अतिमयि । अतित्वयोः । अतिमयोः । अतित्वासु । अतिमासु ॥युवाम् आवां वा अतिक्रान्त इति विग्रहे सुँजस्ङेङस्सु प्राग्वत् । औअम्औट्सु-अतियुवाम् ३ । अत्यावाम् ३ । अतियुवान् । अत्यावान् । अतियुवया ।

७-२-९३ यूय- ७-२-८८ प्रथमायाश्च.... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-
(क) (ख)
७-२-९१ युष्मदस्मदोः अनादेशे ॥ ७-२-९१ मपर्यन्तस्य ॥ ७-२-९३ (क)(ख) यूयवयौ जसि ॥ इति । (क)= युष्मदस्मदोः, (ख)= मपर्यन्तस्य=मपर्यन्तभागस्य स्थाने, यूयवयौ= यूय वय इत्यादेशौ भवतः, जसि= जस्प्रत्यये परे । इत्यर्थमुपदिश्य लक्षणसमन्वयायाऽग्रिमप्रक्रियायै च च्छात्राः प्रवर्त्याः । यूयम् । वयम् । अमि- त्वाम् । माम् । त्वाम् पाठयामि । माम् पाठयतु । इति वक्तव्ये अम् प्रत्यये तत्स्थाने ऽपि पूर्ववदमि (अमः स्थाने, अमो, विधानं यकारादेशनिवृत्त्यर्थम्) युष्मद्+ अम्, अस्मद् + अम्, इति श्यामपाट्यां लिखित्वा ७-२-९७ त्वमावेक....सूत्रं प्रस्तुत्यम् ।

७-२-९४ त्वाहौ- ७-१-२८ ङे प्रथमयो...... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्रापि श्यामपाटीप्रयोगः पूर्वसूत्रवत् केवलं पूर्वसूत्रेण प्रकृतसूत्रं विनिमातव्यम् । युष्मदस्मदोः (७-२-८६) मपर्यन्तस्य (७-२-९१) त्वाहौ= त्व, अह इत्येतौ आदेशौ भवतः, सौ= सुँप्रत्यये परे । इत्यर्थमुपदिश्य लक्षणसमन्वयाय- च्छात्राः प्रवर्तयितव्याः । अथ त्व+ अद्+ अम्, अह+अद्+ अम्, इति श्यामपाट्यां लिखित्वा पररूपं छात्रैः कारयित्वा श्यामपाट्यां त्वद्+अम्, अहद् + अम्, इति कृत्वा ७-२-९० शेषे....सूत्रं प्रस्तुत्यम् ।

७-२-९५ तुभ्य- ७-२-८६ युष्मदस्मदो..... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्रापि श्यामपाटीप्रयोगः प्राग्वत् । युष्मदस्मदोः (७-२-८६) मपर्यन्तस्य (७-२-९१) तुभ्यमह्यौ= तुभ्य मह्य इत्येतौ आदेशौ भवतः, ङयि=ङेप्रत्यये परे । इति । शेषप्रक्रिया प्राग्वत्, इति वोधयितव्यम् । चतुर्थी-भ्यसि युष्मभ्यम् । अस्मभ्यम् । चतुर्थी-सम्वन्धिनि भ्यस् प्रत्यये कृते युष्मद्+भ्यस्, अस्मद्+भ्यस्, इति श्यामपाट्यां लिखित्वा ७-१-३० भ्यसो भ्यम्-सूत्रं प्रस्तुत्यम् ।

७-२-९६ तव- ७-१-३१ पञ्चम्या....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्रापि श्यामपाटीप्रयोगः प्राग्वत् । युष्मदस्मदोः (७-२-८६) मपर्यन्तस्य (७-२-९१) तवममौ= तव मम इत्येतौ आदेशौ भवतः, ङसि= ङस्प्रत्यये परे । प्रकृतलक्षणसमन्वयम् ६-१-९४ अतो....सूत्रसमन्वयं च च्छात्रैः कारयित्वा तवद्+ अस्, ममद् + अस्, इति श्यामपाट्यां लिखित्वा ७-१-२७ युष्मदस्मद्भ्यां.... सूत्रं प्रस्तुत्यम् ।

७-२-९७ त्वमा- ७-२-९३ यूयवयौ....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । ७-२-९२ युवा..... सूत्रस्येवार्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्यावया । अतियुवाभ्याम् ३ । अत्यावाभ्याम् ३ । अतियुवाभिः । अत्यावाभिः । भ्यसि-अतियुवभ्यम् । अत्यावभ्यम् । ङसिँभ्यसोः-अतियुवत् २ । अत्यावत् २ । ओसि-अतियुवयोः २ । अत्यावयोः २ । अतियुवाकम् । अत्यावाकम् । अतियुवयि । अत्यावयि । अतियुवासु । अत्यावासु । युष्मानस्मान्वेति विग्रहे सुँजसड्ङेङस्सु प्राग्वत् । औअम्औट्सु-अतियुष्माम् ३ । अत्यस्माम् ३ । अतियुष्माभिः । अत्यस्माभिः । भ्यसि-अतियुष्मभ्यम् । अत्यस्मभ्यम् । ङसिँभ्यसोः - अतियुष्मत् २ । अत्यस्मत् २ । ओसि-अतियुष्मयोः २ । अत्यस्मयोः २ । अतियुष्माकम् । अत्यस्माकम् । अतियुष्मयि । अत्यस्मयि । अतियुष्मासु । अत्यस्मासु ॥

७-२-९८ प्रत्ययोत्तरपदयोश्च ॥

तव इदम्- त्वदीयम् । मम इदम्-मदीयम् । तव पुत्रः = त्वत्पुत्रः । मम पुत्रः= मत्पुत्रः । एकवचन इत्यनुवृत्तेर्नेह- युवयोर्युष्माकं वेदम् युष्मदीयम् । आवयोरस्माकं वेदम्= अस्मदीयम् । युवयोर्युष्माकं वा पुत्रः= युष्मत्पुत्रः । आवयोरस्माकं वा पुत्रः= अस्मत्पुत्रः ।

७-२-९९ त्रिचतुरोः स्त्रियां तिसृचतसृ ॥

तिस्रः । तिसृभिः । चतस्रः । चतसृभिः । स्त्रियामिति त्रिचतुरोर्विशेषणादिह भवति- प्रियास्तिस्रो यस्य स प्रियतिसा । इह च न भवति- प्रियास्त्रयोऽस्याः प्रियत्रिः । मतिवत् । आमि तु प्रियत्रयाणामितिविशेषः ।

(तिसृभावे कन्युपसंख्यानं कर्तव्यम्)

तिसृका नाम ग्रामः ।

तथाहि-एकवचने= एकस्योक्तौ, युष्मदस्मदोः, मपर्यन्तस्य, त्वमौ=त्व म इत्येतौ आदेशौ भवतः, विभक्तौ (७-२-८४) परतः । इति । अथ च्छात्रैर्लक्षणसमन्वये पररूपे च कृते त्वद् + अम्, मद् + अम् इति श्यामपाट्यां लिखित्वा ७-२-८७ द्वितीयायां च- सूत्रं प्रस्तुत्यम् ।

७-२-९८ प्रत्य- एकवचने (७-२-९७) युष्मदस्मदोः (७-२-८६) मपर्यन्तस्य (७-२-९१) त्वमौ (७-२-९७) प्रत्य....दयोः= प्रत्यये उत्तरपदे च परतः । उत्तरपदशब्दो हि समासचरमावयवे रूढः ।

७-२-९९ त्रिच- ७-१-५३ त्रेस्त्रयः-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । स्त्रियाम्= स्त्रीलिङ्गे वर्तमानयोः, त्रिचतुरोः= त्रि चतुर् इत्येतयोः शब्दयोः स्थाने, तिसृ चतसृ= तिसृ चतसृ इत्यादेशौ भवतः, विभक्तौ (७-२-८४) । [द्वितीयावृत्तौ तु यथा सूत्राऽभिप्रेतमर्थ उपदेश्यः । तथाहि-स्त्रियामिति त्रिचतुरोर्विशेषणम् । अङ्गस्य (६-४-१) इत्यनुवर्तते । १-१-७१ येन....इति तदन्तविधिः । एवञ्च सूत्रार्थः फलति-स्त्रीवाचिनौ यौ त्रिचतुः शब्दौ, तदन्तस्याऽङ्गस्य स्थाने तिसृ चतसृ इत्येतावादेशौ भवतः, विभक्तौ (७-२-८४) इति । निर्दिश्यामानपरिभाषया च त्रिचतुरोः स्थाने एवादेशौ भवतः । स्त्रियामिति त्रिचुतुरोर्विशेषणात् प्रियास्तिस्रो यस्य स प्रियतिसा । प्रियास्त्रयो यस्याः सा प्रियत्रिः । इत्यादावव्याप्त्यतिव्याप्तिदोषो न भवति । प्रियास्तिस्रो यस्य तत् प्रियत्रि । स्वमोर्लुका लुप्तत्वेन १-१-६१ प्रत्यय..... इति प्रत्ययलक्षणस्य १-१-६२ न लुमता.... इति प्रतिषेधात् तिस्रादेशो न । न लुमतेत्यस्याऽनित्यत्वात् पक्षे प्रियतिसृ । ७-१-७३ रादेशात् पूर्वविप्रतिषेधेन नुँम्-प्रियतिसृणी । प्रियतिसृणि । ७-१-७४ तृतीयादिषु.... प्रियतिस्रा, प्रियतिसृणा । प्रियतिसृभ्याम् । इत्यादि । तिस्रः । चतस्रः । इत्यादौ च व्यपदेशिवद्भावेनादेशौ भवतः । इति ।] अथ स्त्रीलिङ्गे त्रिशब्दाज्जस्प्रत्यये कृते त्रि+अस् इति श्यामपाट्यां लिखित्वा प्रकृतसूत्रसमन्वयायच्छात्रा आदेश्याः । अथ तिसृ+ अस् इति श्यामपाट्यां लिखित्वा बाध्यानि बाधित्वा ७-२-१०० अचि र.....सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-१०० अचि रँ ऋतः ॥ १०१

तिस्रः । चतस्रः । तिसृणाम् । चतसृणाम् ।

७-२-१०१ जराया जरसन्यतरस्याम् ॥

जरसौ, जरे । निर्जरसौ, निर्जरौ । निर्जरैः ।

७-२-१०२ त्यदादीनामः ॥ १०६

स्यः । त्यौ । त्ये । सः । तौ । ते । यः । यौ । ये । द्वौ । द्वाभ्याम् । द्विपर्यन्तानामेवेष्टिः । नेह- भवतुँ- भवान् । संज्ञायामुपसर्जनत्वे च नात्वम्, सर्वाद्यन्तर्गणकार्यत्वात् । त्यद् नाम कश्चित्- त्यद् । त्यदौ । त्यदः । द्विर्नाम कश्चिद्- द्विः । द्वी । द्वयः । तमतिक्रान्तः= अतितत् । द्वावतिक्रान्तः= अतिद्विः ।

७-२-१०३ किमः कः ॥ १०५

कः । कौ । के । साकच्कस्याऽप्ययमादेशः ।

७-२-१०० अचि- ७-२-९९ त्रिचतुरोः ... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र अर्थोपदेशे छात्रा अधोनिर्दिष्टरूपेण बोधयितव्याः । यथा- वत्साः ? ऋत इत्यस्य यद्यपि ऋकारस्य स्थाने इत्येवार्थः सम्भवति । तथापि पूर्वसूत्रे तिसृ चतसृ शब्दोपात्तत्वात् प्रकरणबलात् 'तिसृचतसृशब्दसम्बन्धिन ऋकारस्य स्थाने' इत्यर्थो बोध्यः । इति । ऋतः= तिसृचतसृ-शब्दसम्बन्धिन ऋकारस्य स्थाने, रँः= रँ (अनुबन्धलोपे र्) आदेशो भवति, अचि = अजादौ, विभक्तौ (७-२-८४) । इत्यर्थमुपदिश्य लक्षणसमन्वयायच्छात्रा आदेश्याः । तिस्रः कन्याः सन्ति । तिस्रः कन्याः पश्य । आमि त्रयादेशात् परत्वात् तिसृ इत्यादेशे तिसृ + आम् इति श्यामपाटचां लिखित्वा (शिक्षकेण १-४-२ विप्र.... सूत्रस्थ नुँम.... वार्तिकं दृष्ट्वा) ७-१-५४ ह्रस्व.... सूत्रं छात्रैः समनुगमय्य 'तिसृ+नाम्' इति श्यामपाटचां लिखित्वा ६-४-३ नामि- सूत्रप्राप्तिं संभाव्य ६-४-४ न तिसृ...सूत्रं प्रस्तुत्यम् ।

७-२-१०१ जरायाः= जराशब्दस्य जराशब्दान्तस्य च, अङ्गस्य (६-४-१) स्थाने, अन्यतरस्याम्= वा, जरस्= जरस् आदेशो भवति, अचि (७-२-१००) विभक्तौ (७-२-८४) । पदाङ्गाधिकारे तस्य च तदन्तस्य च । इति जराशब्दान्तस्य चेत्यर्थः कृतः । **निर्जरसौ** एकदेशविकृतन्यायेन 'जर' शब्दस्यापि जराशब्दत्वाज्जरस् । **निर्जरैः** सन्निपातपरिभाषया न जरस् ।

७-२-१०२ त्यदा- ७-१-५२ आमि....सूत्रानन्तरं सूत्रमिदं पाठचम् । त्यदादीनाम्= द्विपर्यन्तानां त्यदादीनां स्थाने, अः= अकारो भवति, विभक्तौ (७-२-८४) । इत्यर्थ उपदेश्यः । लक्षणसमन्वयाय च्छात्रा आदेश्याः । सत्यामावश्यकतायाम् १-१-५१ अलो....सूत्रमुद्बोधनीयम् । अथ 'य + अ + स्' इति श्यामपाटचां लिखित्वा किमत्र सूत्रं प्रवर्तते ? इतिच्छात्राः प्रष्टव्याः । अथ तैः ६-१-८४ आद् गुणः- सूत्रं बाधित्वा ६-१-९७ अकः...... सूत्रसमन्वये कृते सति तद् बाधयित्वा ६-१-९४ अतो गुणे- सूत्रं प्रस्तुत्यम् ।

७-२-१०३ किमः- ७-२-१०६ तदोः सः सा..... सूत्रानन्तरं सूत्रमिदं पाठचम् । किमः= किंशब्दस्य स्थाने, कः= क इत्यादेशो भवति, विभक्तौ (७-२-८४) परतः । इत्यर्थमुपदिश्य लक्षणसमन्वयायच्छात्रा आदेश्याः । अथाऽग्रे सर्वशब्दवत् प्रक्रियां छात्रैरुच्यमानां शिक्षकः शृणुयात् ।

अथ सर्वनाम्नां स्त्रीलिङ्गे सामान्यप्रक्रियोपदेश्या । यद्यपि इदमादयः सर्वनामशब्दा अवश्योपदेश्या भवन्ति । तथापि पूर्वोक्तानां त्यदादीनां प्रक्रिया समाना । इदमादीनां तु पृथगिति समानप्रक्रियाभाजां त्यदादीनां प्रथमोपदेशे सरलया रीत्या छात्रा विषयमवबुध्यन्ते । अतः प्रथमं त एवोपदेश्याः । ते च सर्वाशब्दप्रक्रियामनुगच्छन्ति । तस्मात् प्रथमं सर्वाशब्दोऽधोनिर्दिष्टरूपेणोपदेश्यः । अयि वत्साः ? उपदिष्टं पूर्वम् ६-१-६७ एङ्.... सूत्रे यत् स्त्रीलिङ्गे टाप् प्रत्ययेन आकारान्ताः शब्दाः सम्पद्यन्त इति । यः पुंवाची सर्वशब्दः स तूपदिष्ट एव । स एव सर्वशब्दो यदा स्त्रीवाची भवति तदा टाप् प्रत्ययेन सर्वाशब्दो भवति । प्रातिपदिकग्रहणे लिङ्ग (बोधक प्रत्यय= ङीप्टाप् प्रभृति) विशिष्टस्यापि ग्रहणं भवति । अतः सर्वशब्दग्रहणे सर्वाशब्दस्यापि ग्रहणं भवति । तेन १-१-२६ सर्वा......सूत्रेण सर्वाशब्दस्य सर्वनामसंज्ञा भवति । सर्वनामसंज्ञायाः फलम्, आमि- ७-१-५२ आमि...... सूत्रे सारांशरूपेणोपदिष्टमेव । सर्वासाम् । (अत्र सर्वेषाम् इत्यत्रेव षत्वं कथं नेतिच्छात्राः परीक्षणीयाः) नाऽत्र विशेषोपदेशापेक्षा । केवलं ङिद् विभक्तौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-१०४ कु तिहोः ॥

कुतः । कुत्र । कुह ।

७-२-१०५ क्वाति ॥

क्व ।

७-२-१०६ तदोः सँः सावनन्त्ययोः ॥१०८

स्यः । सः । एषः । असौ ।

७-२-१०७ अदस औ सुँलोपश्च ॥

असौ ।

(औत्वप्रतिषेधः साकँच्कस्य वा वक्तव्यःसादुत्वं च)

असकौ । असुकः ।

७-२-१०८ इदमो मँः ॥ ११३, १०९

अयम् । इयम् ।

(ङे, ङसिँ, ङस्, ङि, इत्यत्र) विशेषोपदेशोऽपेक्ष्यते । यथा- 'सर्वा+ए' इति श्यामपाटचां लिखित्वा ७-३-११३ याडा.... इति सूत्रसमन्वयावधि च्छात्रैः साधयित्वा बाधयित्वा च ७-३-११४ सर्वनाम्नः स्याड्... सूत्रं प्रस्तुत्यम् ।

७-२-१०४ कु ति- किमः (७-२-१०३ कु= कु इत्ययमादेशो भवति, तिहोः= तकारादौ हकारादौ च, विभक्तौ (७-२-८४) । कुतः ५-३-१ प्रागिद....इति विभक्तिसंज्ञा । कुह ५-३-१३ वा ह....इति हप्रत्ययः ।

७-२-१०५ क्वाति- किमः (७-२-१०३) क्व= क्व इत्ययमादेशो भवति, अति= अत् इत्येतस्याम्, विभक्तौ (७-२-८४) । अत्र काशिका- आदेशान्तरवचनमोर्गुणनिवृत्त्यर्थम् । किमो ड्वत् इति प्रत्ययान्तरं न विधीयते साकँच्कार्थमिति ।

७-२-१०६ तदोः- ६-१-९४ अतो गुणे- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-२-१०२ त्यदादीनाम् अः ॥ ७-२-१०६ (क) तदोः सँः सावनन्त्ययोः ॥ इति । (क)= त्यदादीनाम्, अनन्त्ययोः= अन्त्या ऽवर्तमानयोः, तदोः= तकार-दकारयोः स्थाने, सँः= सँ (अनुबन्धलोपे स्) आदेशो भवति, सौ= सुँप्रत्यये परें । इत्यर्थमुपदिश्य लक्षणसमन्वयाय च्छात्रा आदेश्याः । एतच्छब्दे तु एसस् इत्यवस्थायाम् ८-३-५७ इण्कोः- सूत्रमुद्बोधनीयम् (शिक्षकस्तु ७-३-५९ आदे....सूत्रमप्यवदध्यात्) । स्यः । सः । एषः । अन्यानि रूपाणि छात्रैः साधयितव्यानि । सारांशः- त्यदादिशब्देषु अकारः पररूपञ्च कार्यम् । ततः सर्वशब्दवत् । त्यद् तद् एतद्, इत्येतेषां विशेष उक्त एवेति । किंशब्दे ऽपि विभक्तौ परतः ७-२-१०३ किमः.....सूत्रं प्रस्तुत्यम् ।

७-२-१०७ अद- ७-२-११० यँः सौ- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-२-१०६ तदोः सँः सौ अनन्त्ययोः ॥ ७-२-१०७ अदस औ (क) सुँलोपश्च ॥ अदसः= अदशब्दस्य स्थाने, औ= औकारो भवति, (क)= सौ= सुँप्रत्यये परे, सुँलोपश्च= सुँप्रत्ययस्य लोपश्च भवति । इत्यर्थमुपदिश्य ७-२-१०२ त्यदा..... सूत्रं बाधित्वा प्रकृतसूत्रसमन्वयप्रसङ्गे १-१-५१ अलो..... सूत्रमुद्बोधनीयम् । शेषप्रक्रियां छात्रैरुच्यमानां शिक्षकः शृणुयात् । असौ । शेषवचनेषु- ७-२-१०२ त्यदा.... ६-१-९४ अतो.... सूत्रप्रवृत्त्या प्रकृतिभागे 'अद' इति रूपाय क्लृप्ते सर्वशब्दे इव प्रक्रियायां सत्याम् ८-२-८० अद..... ८-२-८१ एत.... अनयोरन्यतरस्मिन् सूत्रे यथायोग्यं प्रवर्तमाने रूपाणि सिध्यन्ति । ८-२-१ पूर्व...सूत्रबलेन पूर्वं विभक्तिकार्यं पश्चाद् ८-२-८० अद....८-२-८१ एत.... सूत्रयोरन्यतरस्य प्रवृत्तिः । इति बोधयता शिक्षकेण अदौ, अदे, अदम्, अदान्, इत्यादीनि तृतीयाविभक्त्यन्तवर्जं स्वयमुच्चारणीयानि । तृतीयाविभक्तौ विशेषो वक्ष्यते, इति च वाच्यम् । अथ 'अदौ' इति श्यामपाटचां लिखित्वा ८-२-८० अदसो.....सूत्रं प्रस्तुत्यम् ।

७-२-१०८ इद- १-१-६२ न लुमता...... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-२-१०६ तदोः सँः सौ अनन्त्ययोः ॥ ७-२-१०८ इदमो मँः (क) ॥ इति । इदमः= इदंशब्दस्य स्थाने, मँः= मँ (अनुबन्धलोपे म्) आदेशो भवति, (क)= सौ = सुँप्रत्यये परे ।

इत्यर्थमुपदिश्य लक्षणसमन्वयप्रसङ्गे १-१-५१ अलो..... सूत्रमुद्बोध्य मकारस्य स्थाने मकारविधानमकार (७-२-१०२) बाधनार्थमिति स्फुटं बोधयित्वा ७-२-१११ इदोऽय् पुंसि-सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-१०९ दश्च ॥

इमौ । इमे ।

७-२-११० यँः सौ ॥ १११

इयम् ।

७-२-१११ इदोऽय् पुंसि ॥ ११२

अयम् । पुंसीत्युक्तेर्नेह-इयं कन्या ।

७-२-१०९ दश्च-७-२-१११ इदो ऽय्....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

७-२-८४ अष्टन आ विभक्तौ ॥ ७-२-१०८ इदमः मँः ॥ ७-२-१०९ (ख) दश्च(ग)(क) ॥ इति । (ख)= इदमः= इदंशब्दस्य, दः= दकारस्य स्थाने, (ग)= मँः= मँ [अनुबन्धलोपे म्] आदेशो भवति, (क)= विभक्तौ परतः । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा इम+औ, इम+ अस् इत्यादि श्यामपाटचां लिखित्वा सर्वशब्दवत् प्रक्रियेत्युपदिशता शिक्षकेण छात्रैरुच्यमानानि सिद्धरूपाणि श्रोतव्यानि । टा, ओस्, इत्येतयोः सतोः इद+आ, इद+ओस् इति श्यामपाटचां लिखित्वा ७-२-११२ अनाऽप्यकः– सूत्रं प्रस्तुत्यम् ।

७-२-११० यँःसौ- ७-१-११ नेदम..... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) ख)

७-२-१०८ इदमः मँः ॥ ७-२-१०९ दश्च ॥ ७-२-११० (क)(ख) यँः सौ ॥ इति । (क)= इदमः= इदंशब्दस्य, (ख)=दः= दकारस्य स्थाने, यँः= यँ (अनुबन्धलोपे य्) आदेशो भवति । सौ= सुँप्रत्यये परे । इत्यर्थमुपदिश्य लक्षणसमन्वयायाऽग्रिमप्रक्रियायै च च्छात्राः प्रवर्तयितव्याः । इयम् । औ प्रभृतिषु शस्पर्यन्तेषु प्रकृतिभागे पुंसि इव इम इति च्छात्रैः साधिते टापि इमा इति जाते सर्वा शब्दे इव प्रक्रिया । इमे । इमाः । इमाम् । इमे । इमाः । टौसोः पुंसीव प्रकृतिभागे अन इति साधिते टापि अना इति जाते सर्वा (कन्या) शब्दवत् प्रक्रिया । अनया । अनयोः । शेषवचनेषु इदा इति प्रकृतिभागे साधिते सर्वा शब्दवत् प्रक्रियायां छात्रैः साधितायां ७-२-११३ हलि....सूत्रसमन्वयायच्छात्रा आदेश्याः । आभ्याम् । आभिः । आभ्यः २ । अस्यै । अस्याः २ । आसाम् । अस्याम् । आसु । **अथ इदं शब्दस्यैव क्लीबे प्रक्रिया** - स्वमोः, त्यद्, तद् इत्यत्रेव । इदम् । अत्र अत्वमत्वे न भवतः । १-१-६१ प्रत्य..... सूत्रस्य १-१-६२ न लु..... सूत्रेण निषेधादित्युद्बोधनीयम् । प्रथमा-द्वितीया- द्विवचनयोः प्रकृतिभागे इम इति जाते फलशब्दस्येव प्रक्रिया । तृतीयादौ पुंसीवेति निर्देशनपुरस्सरं रूपसिद्धये छात्राः प्रवर्तयितव्याः ।

अथ अदशब्द उपदेश्यः पुंसि-

'असौ छात्रः पठति' इति वक्तव्ये अदस्+स् इति श्यामपाटचां लिखित्वा ७-२-१०२ त्यदा....सूत्रं वाधयित्वा ७-२-१०७ अदस....सूत्रं प्रस्तुत्यम् ।

७-२-१११ इदो- ७-२-१०८ इदमो मँः- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-२-१०८ इदमः मँः ७-२-११० यँः सौ ॥ ७-२-१११ (क) इदोऽय् (ख) पुंसि ॥ इति । (क)= इदमः= इदंशब्दस्य, इदः= इद्भागस्य स्थाने, अय्= अय् आदेशो भवति, (ख)= सौ= सुँप्रत्यये परे, पुंसि= पुंलिङ्गे । इत्यर्थमुपदिश्य लक्षणसमन्वयाया ऽग्रिमप्रक्रियायै ६-१-६६ हल्ङ्या.... सूत्रसमन्वयाय च च्छात्राः प्रवर्तयितव्याः । औकारादिषु तु ७-२-१०२ त्यदा.... ६-१-९४ अतो...सूत्रयोः समन्वयं छात्रैः कारयित्वा इद इति प्रकृतिभागे जातेऽग्रिमप्रक्रियोपदेश्या । यथा- इद+ औ, इद+ अस् (जस्), इद+ अम्, इद+औ, (औट्) इद+ अस् (शस्) इति श्यामपाटचां लिखित्वा ७-२-१०९ दश्च- सूत्रमुपस्थाप्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-११२ अनाप्यकः ॥

अनेन । अनयोः ।

७-२-११३ हलि लोपः ॥

आभ्याम् । एभिः ।

७-२-११४ मृजेर्वृद्धिः ॥७-३-३५

मार्ष्टि । मार्जनम् ।

(क्ङित्यजादौ वेष्यते)

मृजन्ति, मार्जन्ति । ममृजतुः, ममार्जतुः ।

ममृजुः, ममार्जुः ।

७-२-११५ अचो ञ्णिति ॥ ७-३-३१;३५

कारः । हारः । गौः । गावौ । गावः ।

७-२-११२ अना- ७-२-१०९ दश्च- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

७-२-८४ अष्टन आ विभक्तौ ॥ ७-२-१०८ इदमः मँः ॥ ७-२-१११ इदः अय् पुंसि ॥

७-२-११२ (ख)(ग) अनाप्यकः (क) ॥ इति । अकः= ककाररहितस्य, (ख)= इदमः= इदंशब्दस्य, (ग) इदः= इद्भागस्य स्थाने, अन्= अन् भवति, आपि= टाप्रभृतौ, (क)= विभक्तौ परतः । (आप् इति प्रत्याहारः= टा इत्यस्य आकारात् सुपः पकारावधिकः) इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा अन्+ अ= अन । अन+ आ, अन + ओस् इति श्यामपाटचां लिखित्वाऽग्रिमप्रक्रियाऽदन्तशब्दे इवेति उपदिशता शिक्षकेण रूपे साधयितुं छात्राः प्रवर्तयितव्याः । अनेन । अनयोः । भ्यामि-इद+ भ्याम् इति श्यामपाटचां लिखित्वा ७-२-११२ अना....सूत्रं बाधयित्वा ७-२-११३ हलि....सूत्रं प्रस्तुत्यम् ।

७-२-११३ हलि-७-२-११२ अनाऽप्यकः-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

७-२-८४ अष्टन आ विभक्तौ ॥ ७-२-१०८ इदमः मँः ॥ ७-२-१११ इदःअय् पुंसि ॥

(घ) (ङ)

७-२-११२ अन् आपि अकः ॥ ७-२-११३ (ङ)(ख)(ग)(घ) हलि (क) लोपः ॥ इति । (ङ)= अकः, (ख)= इदमः, (ग)= इदः= इद्भागस्य, लोपः= लोपो भवति (घ)=आपि=टा प्रभृतौ, हलि= हलादौ, (क)= विभक्तौ परतः । इत्यर्थमुपदिश्य सूत्रसमन्वयं छात्रैः कारयित्वा (शिक्षकस्तु 'नाऽनर्थकेऽ लोन्त्यविधिरनभ्यासविकारे इति परिभाषया १-१-५१ अलो....सूत्रमत्र न प्रवर्तत इति मनसाऽवदध्यात्) अ+ भ्याम् इति श्यामपाटचां लिखित्वा ७-३-१०२ सुँपि....सूत्रमुद्बोधनीयम् । आभ्याम् । सुपि-पूर्ववत् प्रक्रियायाम्, अ+ सु ७-३-१०३ बहु....८-३-५७ इण्कोः, एषु । भिसि पूर्ववत् प्रक्रियायां छात्रैः साधितायाम् अ+भिस् इति श्यामपाटचां लिखित्वा ७-१-९ अतो.....सूत्रप्राप्तिं सम्भाव्य ७-१-११ नेदम....सूत्रं प्रस्तुत्यम् ।

७-२-११४ मृजे- अङ्गस्य (७-४-१) मृजेः= मृज्धातोः, इकः (१-१-३) वृद्धिः= वृद्धिभवति प्रत्यये परे । विभक्ताविति निवृत्तम् । मार्ष्टि २-४-७२ अदि..... इति शपो लुक् । ८-२-३६ व्रश्च....इति षत्वम् । ८-४-४० ष्टुना.... इति ष्टुत्वम् । **क्ङित्य-** १-१-३ इको....सूत्र स्थ- भाष्यमूलकं वार्तिकमिदम् ।

७-२-११५ अचो- ७-१-९०. गोतो णित्- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-२-११४ मृजेः वृद्धिः ॥ ७-२-११५ अचः (क) ञ्णिति ॥ इति । अचः= अचः स्थाने, (क)= वृद्धिः= वृद्धिर्भवति, ञ्णिति= ञिति णिति च प्रत्यये परे । इत्यर्थ उपदेश्यः । अत्र शिक्षकेण मनसा ऽवधेयम्- यद्यप्यत्र अङ्गस्य (६-४-१) इत्यनुवृत्त्या तदन्तविधिना च 'अजन्तस्याङ्गस्य' इत्यर्थः फलति । तथापि तथा नोपदेश्यः प्रक्रियालाघवात् पूर्वोक्तार्थेऽ पि दोषाभावाच्चेति (द्वितीयावृत्तौ तु यथासूत्राभिप्रेतमेवार्थ उपदेश्यः) लक्षणसमन्वये स्फुटं भावो बोधयितव्यः । औजसोः, औटि च प्रकृतप्रक्रियां छात्रैः साधयित्वा श्यामपाटचां 'गौ+औ' गौ+अस्, इति लिखित्वा सन्धये छात्राः प्रवर्तयितव्याः । अमि- गो+ अम् इति श्यामपाटचां लिखित्वा ७-२-११५ अचो....सूत्रं बाधयित्वा ६-१-९० औतो ऽम्शसोः- सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-२-११६ अत उपधायाः ॥

पाठः । पपाठ ।

७-२-११७ तद्धितेष्वचामादेः ॥ ७-३-३१

दाक्षिः । वैवस्वतः । औपगवः ।इयमादि—

वृद्धिरन्त्योपधावृद्धी बाधते ।

त्वाष्ट्रः । जागतः ।

७-२-११८ किति च ॥ ७-३-३१

आक्षिकः ।

इति सप्तमाध्याये

द्वितीयः पादः ।

७-२-११६ अत- ७-४-७३ भवतेरः- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-२-११४ मृजे: वृद्धिः ॥ ७-२-११५ अचः ञ्णिति ॥ ७-२-११६ अतः (क) उपधायाः(ख) ॥ इति । उपधायाः= उपधासंज्ञकस्य, (सत्यावश्यके १-१-६४ अलो.... सूत्रमुद्बोधयेत् ।) अतः= अकारस्य स्थाने (क)= वृद्धिः= वृद्धिर्भवति, (ख)= ञ्णिति= ञिति णिति च प्रत्यये परे । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । पपाठ । तसि-पठ्+ अतुस् इति श्यामपाटचां लिखित्वा १-२-५ असंयोगा....सूत्रमुपदिशेत् ।

७-२-११७ तद्धि- ४-१-८७ स्त्रीपुंसाभ्यां.... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी प्रयोगो यथा-

(क) (ख) (ग) (घ)

६-४-१ अङ्गस्य ॥ ७-२-११४ मृजे: वृद्धिः ॥ ७-२-११५ अचो ञ्णिति ॥ ७-२-११७ (घ) तद्धितेषु (क) अचाम् आदेः (ग) (ख) ॥ इति ।

(घ)= ञ्णिति= ञित्सु णित्सु च, तद्धितेषु= तद्धितसंज्ञकेषु प्रत्ययेषु परेषु (क)=अङ्गस्य, अचाम्= अचां मध्ये, आदेः, =आद्यस्य (ग)=अचः स्थाने, (ख)= वृद्धिः= वृद्धिर्भवति । इत्यर्थमुपदिश्य 'यद्यपि अङ्गस्य= विवस्वत् इत्यस्य आदौ वकारोऽस्तिः, अर्थात् अच् नास्ति ; तथापि अचां मध्ये तु आदौ इकारोऽस्ति । इति बोधनपुरस्सरं छात्रैर्लक्षणसमन्वयं कारयित्वा वैवस्वत्+ अ= वैवस्वत इति श्यामपाटचां लिखित्वा छात्रैः स्वादिकार्यं साधयेत् । वैवस्वतः । इति रूपं साधयित्वाऽधोनिर्दिष्टरूपेण श्यामपाटचां लिखित्वा ऽर्थं बोधयेत् । यथा- विवस्वतोऽपत्यम्= वैवस्वतः । इति । प्रसङ्गे ऽस्मिन् ७-२-११७ तद्धि ... सूत्रप्राप्तिस्थले ७-२-११५ अचो..... ७-२-११६ अत....सूत्रयोरपि प्राप्तौ लक्ष्यभेदेऽपि तयोर्बाधो भवतीति च बोधयेत् । अथ दितेरपत्यमिति विग्रहेऽपि ण्य प्रत्यये १-३-७ चुटू १-३-९ तस्य.... इत्यनुवन्धलोपे दिति + य इति श्यामपाटचां लिखित्वा ७-२-११५ अचो....सूत्रं वाधयित्वाऽऽदिवृद्धौ दैति+य इति श्यामपाटचां लिखित्वा अत्र पूर्वभागो 'भं वा पदम् ?' इति च्छात्रान् परीक्ष्य 'भम्' इति स्फुटप्रतिपत्तौ ६-४-१४८ यस्येति च- सूत्रमुपदिशेत् ।

७-२-११८ किति- ४-४-२ नेन दीव्यति.... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ) (ङ) (च)

६-४-१ अङ्गस्य ॥ ७-२-११४ मृजे: वृद्धिः ॥ ७-२-११५ अचः ञ्णिति ॥ ७-२-११७ तद्धितेषु अचाम् आदेः ॥ ७-२-११८ किति (घ)(क)(ङ)(च)(ग)(ख) च ॥ इति । किति + (घ)= किति तद्धिते परे, (क)= अङ्गस्य, (ङ)= अचाम्= अचां मध्ये, (च)=आदेः (ग)=अचः=अचः स्थाने, (ख)=वृद्धिः= वृद्धिर्भवति । इत्यर्थमुपदिश्य च्छात्रैर्लक्षणसमन्वयं कारयित्वा आक्ष+ठ इति श्यामपाटचां लिखित्वा ७-३-५० ठस्येकः- सूत्रमुपदिशेत् ।

इति सप्तमाध्याये

द्वितीयः पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ नमः श्रीजगदम्बायै ॥

अथ सप्तमाध्याये तृतीयः पादः

७–३–१ देविका–शिंशपा–दित्यवाड् दीर्घसत्र–श्रेयसामात् ॥

देविकायां भवं दाविकमुदकम् ।
देविकाकूले भवा दाविकाकूलाः शालयः ।
शिंशपाया विकारः शांशपश्चमषः ।
दित्यौह इदं दात्यौहम् ।
दीर्घसत्रे भवं दार्घसत्रम् । श्रेयसि भवं श्रायसम् ।
(वहीनरस्येद्वचनं कर्तव्यम्)
वहीनरस्यापत्यं वैहीनरिः ।

७–३–२ केकय–मित्रयु–प्रलयानां यादेरियँः ॥

केकयस्यापत्यं कैकेयः । मैत्रेयिकया श्लाघते ।प्रलयादागतं प्रालेयम् ।

७–३–३ न यवाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ॥९

व्यसने भवं वैयसनम् । व्याकरण–मधीते वेत्ति वा वैयाकरणः। स्वश्वस्यापत्यं सौवश्वः । अत्र काशिका- प्रतिषेधवचनमैचोर्विषयप्रक्लृप्त्यर्थम् । इह मा भूद्-दाध्यशिवः । माध्वशिवः । न ह्यत्र ट्वाभ्यामुत्तरस्य वृद्धिप्रसङ्गोऽस्ति वृद्धेरभावात् प्रतिषेधोऽपि नास्तीत्यप्रसङ्ग इति ।

७–३–४ द्वारादीनां च ॥

द्वारे नियुक्तो दौवारिकः ।
द्वारपालस्येदं दौवारपालम् ।
स्वरमधिकृत्य कृतो ग्रन्थः सौवरः ।
सौवर्यः सप्तम्यः । स्वर्भवः सौवः । स्वस्येदं सौवम् । स्वग्रामे भवः सौवग्रामिकः।

७–३–५न्यग्रोधस्य च केवलस्य ॥

न्यग्रोधस्य विकारो नैयग्रोधः ।
केवलस्येत्युक्तेर्नेह प्रवर्तते– न्यग्रोधमूले भवा न्याग्रोधमूलाः शालयः ।

७–३–१ देवि... यसाम्= देविकाप्रभृतीनाम्, अचाम्+आदेः (७–२–११७) आत्= आकारादेशः, ञ्णिति (७–२–११५) किति च (७–२–११८) तद्धितेषु (७–२–११७) । शांशपः ४–३–१३८ अनु...... इत्यञ् । पलाशादित्वाद् वा पक्षेऽण् । **वही**–पूर्वविषये । वहीनरस्य इत् इतिच्छेदः **वैहिनरिः** ४–१–९५ अत...... इतीञ् । इत्वं तत आदिवृद्धिः ।

७–३–२ केक– ... यानाम्= केकयप्रभृतीनाम्, यादेः= (य आदिर्यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः) य इत्यस्य यु इत्यस्य च स्थाने, इयँः= इयँ आदेशो भवति । ञ्णिति (७-२-११५) किति च (७–२–११८) तद्धितेषु (७–२–११७) । **कैकेयः** ४–१–१६६ जन... इत्यञ् । **मैत्रेयिकया** ५–१–१३३ गोत्र... इति वुँञ् ।

७–३–३ न यवा- पदान्ताभ्याम्+यवाभ्याम्= पदान्त–यकारवकाराभ्यां परस्य, अचाम्+आदेः (७–२–११७) न= वृद्धिर्न भवति, तु= किन्तु, ताभ्याम्= यकारवकाराभ्याम्, पूर्वौ = पूर्वतः, ऐच्= ऐजागमौ भवतः (पूर्वोक्तेषु निमित्तेषु परेषु) । सूत्रे ऐच् इति सौत्रत्वाद् भिन्नवचनान्तं यथासंख्येन यकारात् पूर्वमैकारो वकारात् पूर्वमौकार इति बोध्यम् । **सौवश्वः** ४–१–११२ शिवा... इत्यण् । **प्रक्लृप्त्यर्थम्** अत्र पदमञ्जरी– प्रतिषेधवचने सति याभ्यां यवाभ्यां परस्य वृद्धिः प्राप्ता प्रतिषिध्यते, ताभ्यामेव पूर्वावैचौ भवत इत्यर्थो भवति, असति हि तस्मिन् यौ कौचन यवौ गृह्येयाताम् । इति ।

७–३–४ द्वारादीनाम्= द्वारप्रभृतिगणपठितशब्दानाम्, शेषोऽर्थः पदान्ताभ्यामितिवर्जं प्राग्वत् अपदान्तार्थमिदम् । **दौवारपालम्** 'संज्ञापूर्वको विधिरनित्य': इति वृद्धलक्षणश्छो न भवति..... इति पदमञ्जरी । **सौवः** ६–४–१४४ नस्त... सूत्रस्थेन अव्य... इति वार्तिकेन टिलोपः । **सौवग्रामिकः** ४–३–६० अन्त... सूत्रस्थेन अध्या.... वार्तिकेन ठञ् ।

७–३–५ न्यग्रो– प्रागवत्कल्पो ऽर्थः- केवलस्य= शब्दान्तररहितस्य, न्यग्रोधस्य= न्यग्रोधशब्दस्य, यकारात् परस्य अचामादेरचः स्थाने वृद्धिर्न भवति, यकारात् पूर्वमैकारागमश्च भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–६ न कर्मव्यतिहारे ॥ ९

व्यावक्रोशी । व्यावहासी ।

७–३–७ स्वागतादीनां च ॥

स्वागतिकः । व्याडिः । व्यावहारिकः ।

७–३–८ श्वादेरिञि ॥

श्वाभस्त्रिः । श्वादंष्ट्रिः ।

(इकारादाविति वाच्यम्)

श्वागणिकः ।

७–३–९पदान्तस्यान्यतरस्याम् ॥

श्वापदम्, शौवापदम्।

७–३–१० उत्तरपदस्य ॥३१

७–३–११ अवयवादृतोः ॥

पूर्ववार्षिकम्।पूर्वहैमनम् ।

अवयवादित्युक्तेर्नेह–पूर्वासु वर्षासु भवं पौर्ववर्षिकम् ।

७–३–१२सुसर्वार्धाज्जनपदस्य॥१३

सुपाञ्चालकः। सर्वपाञ्चालकः ।

अर्धपाञ्चालकः।

७–३–१३ दिशोऽमद्राणाम् ॥ १४

पूर्वपाञ्चालकः । अपरपाञ्चालकः ।

दिश इत्युक्तेर्नेह –पञ्चालानां पूर्वः पूर्वपञ्चालः तत्र भवः पौर्वपञ्चालकः ।

अमद्राणामित्युक्तेर्नेह–पौर्वमद्रः। आपरमद्रः ।

७–३–६ न= प्रागुक्तं न = वृद्धिप्रतिषेध ऐजागमश्च न भवत इति भावः, कर्मव्यतिहारे= कर्मव्यतिहारे गम्ये ।.उदाहरणयोः ३–३–४३ कर्म... इति णच् । ५–४–१४ णचः... इत्यञ् ।

७–३–७ स्वागतादीनाम्= स्वागतप्रभृतिगणपठितशब्दानाम्, न (७–३–६) । **स्वागतिकः** ४–४–१ प्रागव... सूत्रस्थेन– तदा... वार्तिकेन ठक् । **व्याडिः** ४–१–१५ अत... इतीञ् । **व्यावहारिकः** ४–४–८ चर... इति ठक् ।

७–३–८ श्वादेः= श्वादेरङ्गस्य, न (७–३–६) इञि=इञ्प्रत्यये परे । अत्र काशिका-श्वन् शब्दो द्वारादिषु पठचते, तत्र च तदादिविधिर्भवतीत्येतदेव वचनं ज्ञापकमिति । उदाहरणयोः श्वभस्त्रश्वदंष्ट्रशब्दाभ्याम् ४–१–९५ अत... इतीञ् ।

इका– श्वादेः (७–३–८) न (७–३–६) । **श्वागणिकः** ४–४–८ चर... इति ठक् ।

७–३–९ पदान्तस्य= पदशब्दान्तस्य, श्वादेः (७–३–८) अन्यतरस्याम्=वा, न (७–३–६) । ७–३–४ द्वारा... इति प्राप्ते पाक्षिकः प्रतिषेधः।

७–३–१० उत्तर– अधिकारोऽयं ७–३–३२ हन... इत्येतस्मात् प्राक् ।

७–३–११ अवयवात्= अवयववाचिनः परस्य, ऋतोः= ऋतुवाचिनः, उत्तरपदस्य (७–३–१०) अचाम्+आदेः (७–२–११७) वृद्धिः (७–२–११४) ञ्णिति (७–२–११५)+ किति च (७–२–११८)+ तद्धितेषु (७–३–११७) । उदाहरणयोः–वर्षाणां हेमन्तस्य पूर्वमिति विग्रहे २–२–१ पूर्वा... इत्येकदेशिसमासः । ततः ४–३–१८ वर्षा... ४–३–२२ सर्व... इति क्रमशः, ठक् अण् । १–१–७१ येन.... सूत्रस्थेन ऋतो... इति वार्तिकेन् तदन्तविधिविधानात् । प्रत्युदाहरणे २–१–५१ तद्धि... इति समासे ४–३–११ काला... इति ठञ् । पूर्ववट्ठक् तु न, अनवयवत्वेन तदन्तविधेरभावात् ।

७–३–१२ सुसर्वार्धात्=सुप्रभृतिभ्यः परस्य, जनपदस्य= जनपदवाचिनः, शेषोऽर्थः प्रागवत्= उत्तरपदस्य अचाम् आदेः वृद्धिः ञ्णिति किचि च तद्धितेषु । उदाहरणेषु –४–२–१२५अवृ..... इति वुञ् । १–१–७१ येन... सूत्रस्थेन– सुस...: इति वार्तिकेन तदन्तविधिविधानात् ।

७–३–१३ दिशो– दिशः= दिग्वाचिनः परस्य, अमद्राणाम्= मद्रभिन्नस्य , जनपदस्य (७–३–१२) उत्तरपदस्य (७–३–१०) प्रागवत् । **पूर्वपाञ्चालकः** पूर्वेषु पञ्चालेषु भव इति विग्रहे २–१–५१ तद्धि ... इति समासे ४–२–१५ अवृ... इति वुञ् । **पौर्वपञ्चालकः** २–२–१ पूर्वा...इति समासः। अवयववाची पूर्वशब्दोऽत्र न तु दिग्वाची । **पौर्वमद्रः। आपरमद्रः।** ४–२–१०८ मद्रे.... इत्यञ् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–१४ प्राचां ग्रामनगराणाम् ॥
पूर्वैषुकामशमः । पूर्वपाटलिपुत्रकः ।
७–३–१५ **संख्यायाः** संवत्सरसंख्यस्य च ॥ १६
द्विसांवत्सरिकः । द्विषाष्टिकः ।
७–३–१६ वर्षस्याऽभविष्यति ॥
द्वे वर्षे अधीष्टो भृतो भूतो वा
द्विवार्षिकः । त्रिवार्षिकः ।
अभविष्यतीत्युक्तेर्नेह–
द्वे वर्षे भावि द्वैवर्षिकं धान्यम् । अभविष्यति तद्धितार्थेऽधीष्टभृतयोरभविष्यतीति प्रतिषेधो न भवति । द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः ।

७–३–१७परिमाणान्तस्याऽसंज्ञाशाणयोः॥
परमनैष्किकः । द्विकौडविकः ।
असंज्ञाशाणयोरित्युक्तेर्नेह–
पाञ्चकलापिकम् । द्वैशाणम् ।
७–३–१८ जे प्रोष्ठपदानाम् ॥
प्रोष्ठपदासु जातः प्रोष्ठपादो माणवकः ।
बहुवचननिर्देशात् पर्यायो ऽपि गृह्यते ।
भद्रपदासु जातो भद्रपादः ।
७–३–१९ हृद्भगसिन्ध्वन्ते **पूर्वपदस्य** च ॥ २५
सौहार्दम् । सौभाग्यम् । साक्तुसैन्धवः।

७–३–१४ **प्राचां**– दिशः (७–३–१३) प्राचाम्= प्राग्देशवर्तिनाम्, ग्रामनगराणाम् प्राग्वत् । सूत्रे ग्रामत्वादेव सिद्धे नगरग्रहणं भेदेन सम्बन्धप्रतिपत्त्यर्थम् । तथा हि ग्रामाणामित्यस्य अङ्गस्य इत्यनेन सम्बन्धः= ग्रामवाचिनामङ्गानामवयवस्येत्यर्थः । पूर्वेषुकामशमीति समुदायो ग्रामनामधेयम् । नगराणामित्यस्य च उत्तरपदस्य, इत्यनेन सम्बन्धः। पाटलिपुत्रादिरुत्तरपदमेव नगरवाचीति बोध्यम् । **पूर्वैषुकामशमः** पूर्वा चासाविषुकामशमी चेति विग्रहे २–१–५० दिक्सं... इति समासे ४–२–१०७ दिक्पू... इति ञः । **पूर्वपाटलिपुत्रकः** पूर्वस्मिन् पाटलिपुत्रे भवः । पूर्ववत्समासः। ४–२– १२३ रोप...... इति वुँञ् ।
७–३–१५ **संख्यायाः**= संख्यावाचिनः परस्य, उत्तरपदस्य (७–३–१०) संव... ख्यस्य= संवत्सरशब्दस्य संख्यावाचिनश्च, प्राग्वत् । ७–३–१३ परि... इत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याऽग्रहणार्थम् । तेन द्वैसमिकः, त्रैसमिक इत्यादावुत्तरपदवृद्धिर्न । उदाहरणयोः ५–१–७९ तम... इति ठञ् ।
७–३–१६ **वर्ष**– संख्यायाः (७–३–१५) उत्तरपदस्य (७–३–१०) वर्षस्य= वर्षशब्दस्य, अचाम्+आदेः (७–२–११७) वृद्धिः (७–२–११४) अभविष्यति=भविष्यदर्थकप्रत्ययभिन्ने, ञ्णिति (७–२–११५) किति च (७–२–११८) तद्धितेषु (७–२–११७) । **द्विवार्षिको मनुष्यः** अत्र पदमञ्जरी –वर्षाल्लुक्, 'चित्तवति नित्यम्' इति नित्यं लुग् न भवति । भूतार्थ एव हि स इष्यते, अन्यत्र चित्तवत्यपि विकल्प एवेति ।
७–३–१७ **परिमाणान्तस्य**, अङ्गस्य (६–४–१) उत्तरपदस्य (७–३–१०) प्राग्वत् । परमनैष्किकः ५–१–३६ तेन... इति ठञ् । द्विकौडविकः ५–१–१०८ प्रयो...इति ठञ् । अनार्हीयत्वाद् ५–१–२८ अध्य... इति न लुक् । **पाञ्चकलापिकम्** पञ्च कलापाः परिमाणमस्य ५–१–५६ तद ...इति ठञ् । तद्धितान्तसमुदायः संज्ञा । द्वैशाणम् ५–१–३५ शाणा... सूत्रस्थेन= द्वित्रि...इति वार्तिकेनाऽण् ।
७–३–१८ **जे प्रो**–प्रोष्ठपदानाम्, उत्तरपदस्य (७–३–१०) अचाम्+ आदेः (७–२–११७) वृद्धिः (७–२–११४) जे= जातार्थे ञिदादौ । 'ज' इति जातशब्दस्यैकदेशनिर्देशः। **प्रोष्ठपदासु** प्रोष्ठपदाभिर्युक्तः कालः प्रोष्ठपदाः, ४–२–३ नक्ष... इत्यण् ४–२–६ लुव... लुप् । ततो जातार्थे ४–३–१६ सन्धि... इत्यण् ।
७–३–१९ हृद्भ....ध्वन्ते= हृद् भग सिन्धु इत्यन्ते, अङ्गे (६–४–१) पूर्वपदस्य, उत्तरपदस्य (७–३–१०) च, प्राग्वत् । उदाहरणेषु– सुहृद् + (५–१–१२०. हाय ...इति) अण् । सुभग+ (५–१–१२३ गुण... इति) ष्यञ् । सक्तुसिन्धु + (४–२–११९. ओर्दे... इति ठञं बाधित्वा ४–२–१३३ कच्छा... इति) अण् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–२० अनुशतिकादीनां च ॥

अनुशतिकस्येदम् = आनुशातिकम् ।
आध्यात्मिकम् । आधिदैविकम् ।
आधिभौतिकम् ।

७–३–२१ देवताद्वन्द्वे च ॥ २३

आग्निमारुतं कर्म ।

७–३–२२ नेन्द्रस्य परस्य ॥ २३

सौमेन्द्रः। परस्येत्युक्तेरिहोभयपदवृद्धिर्भवत्येव । ऐन्द्राग्नः ।

७–३–२३ दीर्घाच्च वरुणस्य ॥

ऐन्द्रावरुणम्।
दीर्घादित्युक्तेरिहोभयपदवृद्धिर्भवत्येव–
आग्निवारुणीमनड्वाहीमालभेत ।

७–३–२४ प्राचां नगरान्ते ॥

सुह्मनगरे भवः= सौह्मनागरः ।
पौण्ड्रनागरः । प्राचामित्युक्तेर्नेह–
मद्रनगरे भवः =माद्रनगरः।

७–२–२५ जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ॥

कुरुजङ्गलेषु भवं कौरुजङ्गलम्,
कौरुजाङ्गलम् ।
वैश्वधेनवम्, वैश्वधैनवम् ।
सौवर्णवलजः, सौवर्णवालजः ।

७–३–२६ अर्धात् परिमाणस्य पूर्वस्य तु वा॥ २७,३१,३०

अर्धद्रोणेन क्रीतमार्धद्रौणिकम्,अर्धद्रौणिकम् ।
आर्धकौडविकम्, अर्धकौडविकम् ।

७–३–२७ नाऽतः परस्य ॥

आर्धप्रस्थिकः, अर्धप्रस्थिकः ।
अत इत्युक्तेर्नेह प्रतिषेधः–आर्धकौडविकः ।

७–३–२० अनुशतिकादीनाम्= अनुशतिकप्रभृतिगणपठितशब्दानाम्, पूर्वपदस्य (७–३–१९) उत्तरपदस्य (७–३–१०) च (७–३–१९.) प्राग्वत् । **आनुशातिकम्** ४–३–१२० तस्ये... इत्यण्। शेषेषु– ४–३–६० अन्त... सूत्रस्थेन अध्या..... वार्तिक्रेन ठञ् ।

७–३–२१ देवताद्वन्द्वे=देवतावाचिशब्दानां द्वन्द्वसमासे, पूर्वपदस्य +उत्तरपदस्य च, (७–३–२०टी.) प्राग्वत्। उदाहरणे तद्धितविवक्षायां द्वन्द्वे ६–३–२६ देव.... इत्यानँङं बाधित्वा ६–३–२८ इद् वृ... इतीत् । ततः ४–२–२४ साऽस्य... इत्यण् ।

७–३–२२ नेन्द्र– परस्य = परतो वर्तमानस्य, इन्द्रस्य= इन्द्रशब्दस्य , न= प्रागुक्तं न भवति ।

७–३–२३ दीर्घात् = दीर्घात् परस्य (७–३–२२) वरुणस्य= वरुणशब्दस्य, न (७–३–२२) । **आग्निवारुणीम्** आग्निमारुतमित्यत्रेव प्रक्रिया। विशेषोऽत्र ईद्बाधनं स्त्रीत्वान् ङीप् च ।

७–३–२४ प्राचां + नगरान्ते = प्राचां देशे नगरान्ते, अङ्गे (६–४–१) पूर्वपदस्य+उत्तरपदस्य च (७–३–२० टी.) अचाम्+आदेः (७–२–११७) वृद्धिः (७–२–११४) ञ्णिति (७–२–११५) किति च (७–२–११८) तद्धितेषु (७–२–११७) । **माद्रनगरः** मद्रनगरमुदक्षु ।

७–३–२५ जङ्ग.....न्तस्य= जङ्गलाद्यन्तस्य अङ्गस्य (६-४-१) पूर्वपदस्य (७–३–१९.) प्राग्वत्, उत्तरम्+विभाषितम्= उत्तरपदस्य तु विकल्पेन प्राग्वत् ।

७–३–२६ अर्धात्= अर्धशब्दात् परस्य, परिमाणस्य= परिमाणवाचिनः, उत्तरपदस्य (७–३–१०) प्राग्वत्, पूर्वस्य तु= पूर्वपदस्य तु, वा= वा प्राग्वत् ।

७–३–२७ नाऽतः– अर्धात् (७–३–२६) परस्य=परतो वर्तमानस्य, परिमाणस्य (७-३-२६) उत्तरदस्य (७-३-१०) अतः, = अकारस्य, न = न वृद्धिः, पूर्वस्य + तु+ वा (७–३ २६) प्राग्वत् । परस्येत्यनुक्तौ अदन्तस्योत्तरपदस्येत्यर्थः स्यात् । ततश्च अर्धद्रौणिकम्, अर्धकौडविकमित्यादावपि प्रतिषेधः स्यात् । पूर्वो विधिस्तु अर्धमौष्टिक इत्यादौ चरितार्थः स्यान् । तपरकरणात् अर्धखार्या भवा अर्धखारी । सा भार्या यस्येति बहुव्रीहौ अर्धखारीभार्य इत्यत्र ६–३–३९. वृद्धि... इति पुवद्भाव–प्रतिषेधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–२८ प्रवाहणस्य ढे ॥२९

प्रवाहणस्याऽपत्यं प्रावाहणेयः, प्रवाहणेयः।

७–३–२९ तत्प्रत्ययस्य च ॥

प्रावाहणेयिः, प्रवाहणेयिः।

७–३–३० नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ॥३१

आशौचम्, अशौचम्। आनैश्वर्यम्, अनैश्वर्यम्। आक्षैत्रज्ञ्यम्, अक्षैत्रज्ञ्यम्। आकौशलम्, अकौशलम्। आनैपुण्यम्, अनैपुण्यम्।

७–३–३१ यथातथ–यथापुरयोः पर्यायेण ॥

आयथातथ्यम्, अयाथातथ्यम्।
आयथापुर्यम्, अयाथापुर्यम्।

७–३–३२ हनस्तोऽचिण्णलोः ॥

घातयति। घातकः। घातः।
अचिण्णलोरित्युक्तेर्नेह–अघानि। जघान।

७–३–३३ आतो युँक् चिण्कृतोः॥ ३५

अदायि।·दायः। दायकः। गोसंदायः।

७-३-२८ प्रवाहणस्य= प्रवाहणशब्दस्य, उत्तरपदस्य (७–३–१०) अचाम्+आदेः(७–२–११७) वृद्धिः (७–२–११४) पूर्वस्य+ तु+ वा (७–२–२६) ढे = ढप्रत्यये परे। उदाहरणयोः ४–१–१२३ शुभ्रा... इति ढक्। उत्तरपदस्य वृद्धिविधानं प्रवाहणेयीभार्य इत्यादौ ६–३–३९ वृद्धि... इति पुंवद्भावप्रतिषेधार्थम्।
७-३-२९ तत्प्रत्ययस्य= ढप्रत्ययान्तस्य, प्रवाहणस्य (७–३–२८) उत्तरपदस्य (७–३–१०) अचाम्+ आदेः (७–२–११७) वृद्धिः(७–२–११४) पूर्वपदस्य+तु +वा (७–३–२६) ञ्णिति (७–२–११५) किति च (७-२-११८) तद्धितेषु (७–२–१७)। पूर्वेणैव सिद्धे सूत्रमिदं ढप्रत्ययान्तस्य तद्धितान्तरप्रत्ययेऽपि पूर्वपदस्य विकल्पेनैव वृद्धिसिद्ध्यर्थम्।
७-३-३० नञः= नञः परेषाम्, शुचि... णानाम्= शुचिप्रभृतीनाम्, उत्तरपदानाम् (७–३–१०) प्राग्वत्, पूर्वपदस्य+तु+वा (७–३–२६) प्राग्वत्।
७-३-३१ यथा– नञः (७–३–३०) उत्तरपदस्य (७–३–१०)=उत्तरपदयोः, यथा.... रयोः= यथातथयथापुरशब्दयोः पूर्वपदस्य (७–३–२६) उत्तरपदस्य (७-३-१०) च, पर्यायेण, अचाम्+आदेः (७-२-११७) वृद्धिः (७-२-११४) ञ्णिति (७-२-११५) + किति च (७-२-११८)+तद्धितेषु (७-२-११७)।
७-३-३२ हनः= हन्धातोः स्थाने, तः = तँ (अनुबन्धलोपे त्) आदेशो भवति, अचिण्णलोः= चिण्णल्भिन्ने, ञ्णिति (७–२–११५) प्रत्यये। तद्धितेषु (७–२–११७) इति, तत्सम्बद्धं किति (७–२–११८) इति च निवृत्तम्।
७-३-३३ आतो– ६–४–६४ आतो लोप... सूत्रानन्तरं सूत्रमिदं पाठचम्। आतः= आकारान्तस्य, अङ्गस्य (६–४–१) युँक्=युँगागमः, ञ्णिति (७–२–११५)+चिण्कृतोः= चिणि ञ्णिति कृति च। (चिणि ञितो ऽसम्भवाण्णितो ऽव्यभिचाराच्च "ञ्णिति" इति कृतो विशेषणम्) इत्युपदिश्य अथवा छात्राणां विच्छिद्यान्वयबोधे काठिन्याच्चिणि सविशेषणे दोषा ऽभावाच्च सारल्येन बोधनाय "ञ्णितोः+चिण्कृतोः" इति वा समुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत्। सत्यावश्यके १–१–४५ आद्य... सूत्रमुद्बोधयेत्। अथ शिक्षकश्छात्रानुद्बोधयेद्। यथा– वत्साः? ३–२–३ आतो... सूत्रे अनुपर्गे इत्युक्त्या सत्युपसर्गे तु तत्सूत्रं न प्रवर्तते, किन्तु ३–२–१ कर्म... सूत्रेण अण् प्रत्ययो भवति। यथा– गां संददाति इति विग्रहे अणि कृते संदा+अ ७–३–३३ आतो..., संदाय इति। अथ गोङस्+संदाय इति जाते कुम्भकार इत्यत्रेव समासादि– प्रक्रियेति बौधयेत्। गोसंदायः। पक्षान्तरे तु ण्वुँल् तृचोः– गोः संदायकः। गोः संदाता। इत्यादि तु मुहुर्मुहुरुपदिष्टप्राय एवैष विषय इति। अथ सर्वधातुभ्यो विधीयमानं क्विँप्प्रत्ययमुपदिदिक्षुः शिक्षको ऽधोनिर्दिष्टरूपेणच्छात्रान् बोधयेत्। यथा– वत्साः! पूर्वोक्ता ण्वुँल्तृजादयो यस्मिन्नर्थे विहितास्तस्मिन्नेवार्थे सर्वेभ्यो धातुभ्यः क्विँप्प्रत्ययो ऽपि भवति। इति। अथ तथाहि इति वदन् ३–२–७६ क्विँप् च– सूत्रमुपस्थापयेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–३४ नोदात्तोपदेशस्य मान्तस्याऽनाचमेः ॥

अशमि । अदमि । शमः । दमः ।
उदात्तोपदेशस्येत्युक्तेर्नेह निषेधः– विरामः ।
अनाचमेरित्युक्तेर्नेह निषेधः–आचामकः ।
(अनाचमिकमिवमीनामिति वक्तव्यम्)
आचामकः । कामुकः । वामकः ।

७–३–३५ जनिवध्योश्च ॥

अजनि । जनकः। प्रजनः। अवधि। वधकः।

७–३–३६ अर्ति–ह्री–ब्ली–री– क्नुयीं –क्ष्माय्यातां पुँङ् णौ ॥ ४३

अर्पयति । ह्रेपयति। ब्लेपयति । रेपयति ।
क्नोपयति । क्ष्मापयति । स्थापयति ।

७–३–३७ शाच्छासाह्वाव्यावेपां युँक् ॥

शाययति । छाययति । साययति ।
ह्वाययति । व्याययति वाययति । पाययति ।
(पातेर्णौ लुँग् वक्तव्यः)
पालयति ।
(धूञ्प्रीञोर्नुँग् वक्तव्यः)
धूनयति । प्रीणयति ।

७–३–३८ वो विधूनने जुँक् ॥

वाजयति । विधूनन इत्युक्तेर्नेह–केशान् वापयति ।

७–३–३९ लीलोर्नुँग्लुँकावन्यतरस्यां स्नेहविपातने ॥

घृतं विलीनयति, विलालयति विलापयति, विलाययति, वा । ईकारप्रश्लेषाद् ६–१–५० विभा... इत्यात्वपक्षे न नुँक् । स्नेहविपातने इत्युक्तेर्नेह–लोहं विलाययति, विलापयति वा ।

७–३–४० भियो हेतुभये षुँक् ॥

मुण्डो भीषयते । अत्रापि सूत्रे भी+ई इतीकारप्रश्लेषो बोध्यः । तेन कृतात्वस्य न षुँक् । मुण्डो भापयते ।
हेतुभये इत्युक्तेर्नेह–कुञ्चिकयैनं भाययति ।

७–३–४१ स्फायो वँः ॥

स्फावयति ।

७–३–३४ नोदा– उदात्तोपदेशस्य, अनाचमेः= आङ्पूर्वकचमिभिन्नस्य , मान्तस्य = मकारान्तस्य धातोः, न = उपधावृद्धिर्न भवति, ञ्णिति (७–२–११५) + चिण्कृतोः (७–३–३३) । ७–२–११६ अत... इति प्राप्ता वृद्धिःप्रतिषिध्यते । कार्यान्तरस्य प्रतिषेधस्तु न, प्रसङ्गाऽभावात् । कृदुपजीवनार्थम् ७–२–११६ अत... इत्यनन्तरमपठित्वाऽत्र पठितम् ।
७–३–३५ जनिवध्योः= जन् वध् धात्वोः, न (७–३–३४) ञ्णिति (७–२–११५) चिण्कृतोः (७–३–३३) ।
७–३–३६ अर्ति... ययाताम्= ऋप्रभृतीनामाकारान्तानां च, अङ्गानाम् (६–४–१) पुँक्= पुँगागमो भवति, णौ= णिप्रत्यये परे । **ह्रेपयति** पुँगन्तत्वात् ७–३–८६ पुँग... इति गुणः ।
७–३–३७ शाच्छा....वेपाम्= शाप्रभृतीनाम्, युँक्= युँगागमो भवति, णौ (७–३–३६) । **वाययति** वेञ् (१००६) ६–१–४४ आदे... इत्यात्वम् ।
७–३–३८ वो– वः= वा (१०५०) धातोः, जुँक् =जुँगागमो भवति, णौ (७–३–६३) विधूनने =कम्पनेऽर्थे ।
७–३–३९ लीलोः= ईकारान्तस्य लीधातोर्लाधातोश्च , अन्यतरस्याम् = वा, नुँग्लुँकौ=नुँक् लुँक् इत्यागमौ भवतः, णौ (७–३–३६) स्नेहविपातने= स्नेहस्य द्रवत्वापादने । सूत्रे ली + ई = ली इतीकारः प्रश्लिष्यते । स्नेहः= घृतादिः ।
७–३–४० भियः= ईकारान्तस्य भीधातोः, षुँक्= षुँगागमो भवति , णौ (७–३–३६) हेतुभये=प्रयोजकाद् भये गम्यमाने । **भीषयते** १–३–६८ भीस्म्यो... इत्यात्मनेपदम् । **भापयते** ६–१–५५ बिभे.... इत्यात्वम् । **भाययति** नात्र प्रयोजकाद् भयं किन्तु कुञ्चिकातः करणात् ।
७–३–४१ स्फायः= स्फाय्धातोः स्थाने, वँः= वँ (अनुवन्धलोपे व्) आदेशो भवति, णौ (७–३–३६) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–४२ शदेरगतौ तः॥
शातयति । अगतावित्युक्तेर्नेह–गाः शादयति गोपालः ।

७–३–४३ रुहः पोऽन्यतरस्याम् ॥
रोपयति, रोहयति वा ।

७–३–४४ प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुँपः॥४९
सर्विका । कारिका । दर्शिका । योजिका । प्रत्ययस्थादित्युक्तेर्नेह– शक्नोतीति शका । कादित्युक्तेर्नेह–मण्डना । पूर्वस्येत्युक्तेः परस्य न–कटुका । असुँप इत्युक्तेर्नेह– बहुपरिव्राजका नगरी ।

७–३–४२ शदेः= शद्धातोः स्थाने, तः= तँ (अनुवन्धलोपे त्) आदेशो भवति, णौ (७–३–३६) अगतौ= गत्यर्थाऽ नवगमे । **शादयति** गमयतीत्यर्थः ।

७–३–४३ रुहः=रुह्धातोः स्थाने, अन्यतरस्याम् =वा, पँः = पँ (अनुवन्धलोपे प्) आदेशो भवति, णौ (७–३–३६) ।

७–३–४४ प्रत्य– ४–१–४ अजाद्यतष्टाप्– सूत्रानन्तरं सूत्रमिदं पाठचम् । प्रत्ययस्थात्=प्रत्ययवर्तिनः, कात्= ककारात् , पूर्वस्य= पूर्वतो विद्यमानस्य, अतः= अकारस्य स्थाने, इत्=इकारादेशो भवति, असुँपः+ आपि=सुँपः परतोऽस्थिते आपि परे । इत्यर्थमुपदिश्य प्रकृतोदाहरणयोः ककारः प्रत्ययस्थो वर्तत एव , ततः पूर्ववर्ती च अकारो वर्तते । परतश्च आप् (आ) वर्तते । स च आप् (आ) सुँपः परतः स्थितो नास्ति । अतः ककारात् पूर्वस्य अकारस्य स्थाने इकारो भवति, इति लक्षणसमन्वयं वोधयित्वा दर्शिक + आ, योजिक+आ इति श्यामपाटचां लिखित्वाऽधोनिर्दिष्टरूपेण च्छात्रान् वोधयेत् । वत्साः ? यद्यपि 'क' इत्यतः पूर्वोऽकारः "क" इत्यतः परतस्त्य आप् (आ) च क = क् + अ इत्यनेन व्यवहितौ स्तः, तथापि तावता व्यवधानेऽपि, इत्वं भवति, विधानारम्भसामर्थ्यात् । सवर्णदीर्घेऽकारव्यवधानाऽभावाच्च । अधिकव्यवाये तु न भवति । यथापुत्रकाम्या इत्यादौ न भवति । इति । अथच्छात्रैः सन्धिं साधयित्वा दर्शिका योजिका इति श्यामपाटचां लिखित्वा कन्याशव्दस्येव रूपाणिच्छात्रैरुच्चार्यमाणानि शिक्षकः शृणुयात् । एवमेव कर्षक–दोहक–सेवक–शब्दानां स्त्रीलिङ्गे छात्रैः साध्यमानानि कर्षिका दोहिका सेविका रूपाणि शिक्षकः शृणुयात् । अथाऽधोनिर्दिष्टरूपेण शिक्षकश्छात्रान् बोधयेत् । यथा–वत्साः? यथा दृश् युज् कृष् दुह् सेव् धातुभ्यो ण्वुँलि पुंसि दर्शक–योजक–कर्षक–दोहक–सेवक–शब्दाः सम्पन्नाः। स्त्रीलिङ्गे च दर्शिका–योजिका=कर्षिका–दोहिका–सेविका–शब्दाः सम्पन्नाः । तथैव पाणिनिना कण्ठरवेण (धातुपाठे) उपदिष्टेभ्यः प्रकारान्तरेणोपदिष्टेभ्यश्च (सन्नन्तादिभ्यश्च) सर्वेभ्यो धातुभ्यो ण्वुँल्प्रत्ययेन बहवः शब्दाः सम्पद्यन्ते। यथा–अद्–आदकः, आदिका । दिव्–देवकः, देविका । रुध्–रोधकः, रोधिका । तुद्–तोदकः, तोदिका । क्री–क्रायकः, क्रायिका । इत्यादीनि रूपाणि सिध्यन्ति । इतिबोधनक्रमे ण्वुँल् आर्धधातुकमित्युद्बोधनपुरस्सरं चोरि धातोः– चोरकः, चोरिका । वोभूयधातोः–वोभूयक, बोभूयिका । पिपठिषधातोः– पिपठिषकः, पिपठिषिका। इत्यादीनि रूपाणि च्छात्राणां मस्तिष्के स्फुटं प्रकाशयेत् । अथाऽधोनिर्दिष्टरूपेणच्छात्रानुपदिशेत्– वत्साः ? यथा सर्वेभ्यो धातुभ्यो ण्वुँल्प्रत्ययेन पाठकः पाठिका इति प्रभृतीनि पदानि सिध्यन्तीति सामान्यरीतिर्निर्दर्शिता, तथैव सर्वेभ्यो धातुभ्यः प्रकृत ३–१–३३ ण्वुँल्तृ... सूत्रेण तृच् प्रत्ययेन पठिता , पठित्री । इतिप्रभृतीनि पदान्यपि सिध्यन्तीति । अथ– तथाहि, इति वदन् पठ्धातोस्तृच्प्रत्यये चकारेऽनुवन्धे गते तृ इत्यस्याऽऽर्धधातुकसंज्ञायामिडागमे पठितृशब्दः सिध्यति । तृ(च्)प्रत्ययोऽपि ण्वुँल् प्रत्यय इव कृत्प्रत्ययोऽस्ति, कर्त्रर्थे च भवति= अर्थात् तृ (च्)प्रत्ययस्याऽर्थः कर्ता वर्तते। तृ(च्)प्रत्ययान्नाः पठितृ– प्रभृतयः शब्दाः कृदन्ता भवन्ति । तेन तेषामपि पाठक–प्रभृतीनामिव, १–२–४६ कृत्त... सूत्रेण प्रादिपदिकसंज्ञायां स्वाद्युत्पत्तिः, स्वादिप्रक्रिया च पितृशव्दस्येव ज्ञेया । विशेषः–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(मामक–नरकयोरुपसंख्यानम्)
मामिका । नरिका ।
(त्यक्त्यपोश्च)
दाक्षिणात्यिका । इहत्यिका ।
७–३–४५ न यासयोः ॥ ४८
यका । सका । यकाम् । तकाम् ।
(त्यकनश्च न)
उपत्यका । अधित्यका ।
(पावकादीनां छन्दसि न)
हिरण्यवर्णाः शुचयः पावकाः।
यासु अलोमकाः। लोके तु–पाविका ।
(आशिषि वुँनश्च न)
जीवतात्=जीवका ।
(उत्तरपदलोपे न)
देवदत्तिका । देवका ।
(क्षिपकादीनां च न)
क्षिपका । ध्रुवका ।
(तारका ज्योतिषि)
तारिकाऽन्या।
(वर्णका तान्तवे)
अन्यत्र वर्णिका ।
(वर्तका शकुनौ प्राचाम्)
उदीचां तु वर्तिका ।

(अष्टका पितृदेवत्ये)
अष्टका=पितृकर्म। पितृदेवत्ये
इत्युक्तेरिहेत्वमेव–अष्टिका=अष्टाध्यायी ।
(सूतक–पुत्रिक–वृन्दारकाणां वेति वक्तव्यम्)
सूतका, सूतिका । पुत्रका, पुत्रिका ।
वृन्दारका, वृन्दारिका ।
७–३–४६ उदीचामातः स्थाने
यकपूर्वायाः ॥४८,४९,
आर्यका, आर्यिका । चटकका, चटकिका ।
यकपूर्वेत्युक्तेरिह नित्यम्–अश्विका ।
स्त्रीप्रत्ययेति विवक्षितत्वादिह
नित्यम्–शुभं यातीति शुभंयाः ।
अज्ञाता शुभंयाः शुभंयिका ।
(धात्वन्तयकोस्तु नित्यम्)
सुनयिका । सुपाकिका ।
७–३–४७ भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ॥
निर्भस्त्रका, निर्भस्त्रिका ।
एषका । एषिका ।कृतषत्वनिर्देशान्नेह
विकल्पः– एतिके । एतिकाः। अजका,
अजिका ।ज्ञका, ज्ञिका । द्वके, द्विके । निः
स्वका, निः स्विका । आत्मीयायां स्विका ।
परमस्विका । इत्यादौ नित्यमेवेत्वम् ।

केवलं सर्वनामस्थाने (औप्रभृतिषु औट्पर्यन्तासु विभक्तिषु पितृशब्दस्य पितरौ / पितरः । पितरम् । पितरौ । इति रूपाणि भवन्ति। पठितृशब्दस्य तु पठितर्+औ, पठितर्+अस् , पठितर्+अम् पठितर्+औ, इत्यवस्थायामुपधादीर्घे पठितारौ । पठितारः । पठितारम् । पठितारौ । इति रूपाणि सिध्यन्ति । इति । तथा हि – इति वदन् ६ –४–११ अप्तृन् ... सूत्रमुपदिशेत् ।

माम–मामिका ४–१–३० केव... इति नियमान्नेह ङीप् । **नरिका** नरान् कायतीति ३–२–३ आतो... इति कः ।

त्यक्त्यपो– कात् + पूर्वस्य + अतः + इत् + आपि (७–३–४४) । ७–३–४६ उदी... इति विकल्पो माभूदिति वचनारम्भः ।

७–३–४५ न या– यासयोः= यत्तदोः, न = पूर्वोक्तं न = ७–३–४४ प्रत्य... इतीत्वं न ।

सूत– अत्र दीक्षितः– **वेति–** इह वा+अ इतिच्छेदः । कात्पूर्वस्याकारादेशो वेत्यर्थः । तेन पुत्रिकाशब्दे ङीन इवर्णस्य पक्षेऽकारः । अन्यत्रेत्यबाधनार्थमकारस्यैव पक्षेऽकारः । इति ।

७–३–४६ उदी– यकपूर्वायाः+ आतः+ स्थाने= यकारककारपूर्वकस्य स्त्रीप्रत्ययाकारस्य स्थाने जातस्य, प्रत्ययस्थात्+कात्+पूर्वस्य+ अतः (७–३–४४) न (७–३–४५) उदीचाम्=उदीचामाचार्याणां मते । अर्थगतं स्त्रीत्वमाकारे आरोप्य सूत्रे यकपूर्वाया इति स्त्रीलिङ्गनिर्देशः । तेन स्त्रीप्रत्ययाकारस्येत्यर्थः फलितः । उदीचां मते नेत्युक्तेः प्राचां मते तु भवत्येव । तेन विकल्पः सिद्धः ।

धात्वन्तयकोः=धात्वन्तयकारककारपूर्वकस्य स्त्रीप्रत्ययाकारस्य स्थाने जातस्य,
प्रत्ययस्थात्+कात्+पूर्वस्य+ अतः (७–३–४४) नित्यम्, इत्+आपि (७–३–४४) ।

७–३–४७ भस्त्रै– नञ्पूर्वाणामपि=नञ्पूर्वाणाम् अनञ्पूर्वाणामपि=अन्यपूर्वाणां केवलानां च,भस्त्रै...द्वास्वा= भस्त्राप्रभृतीनाम्, न (७–३–४५) उदीचाम् (७–३–४६) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–४८ अभाषितपुँस्का॑च्च ॥ ४९
खट्वका, खट्विका ।
७–३–४९ आदाचार्याणाम् ॥
खट्वाका , खट्वका , खट्विका ।
७–३–५० ठ॑स्येकः ॥ ५१
आक्षिकः । लावणिकः ।
७–३–५१ इसुसुक्तान्तात् कः ॥
सार्पिष्कः। धानुष्कः । धैनुकम् । पैतृकम् ।
इसुसोः प्रतिपदोक्तयोर्ग्रहणान्नेह– आशिषा चरति–आशिषिकः । उषा चरति–औषिकः ।
(दोष उपसंख्यानम्)
दोर्भ्यां चरति– दौष्कः ।
७–३–५२ चजो॑ः कु॑
घिण्ण्यतोः ॥ ६९
पाकः । त्यागः । पाक्यम् । मार्ग्यः ।
(निष्ठायामनिट इति वक्तव्यम्)
तेनेह न – गर्ज्यम् ।

भस्त्राग्रहणमुपसर्जनार्थम् । अन्यस्य तु ७–३–४८ अभा... इत्येव सिद्धम्–भस्त्रका, भस्त्रिका। एषा द्वा इत्येतयोः सपूर्वयोर्नेत्वम्, अन्तर्वर्तिनीं विभक्तिमाश्रित्य, असुपँ इति प्रतिषेधात् । अनेषका । परमैषका । अद्वके । परमद्वके । अत्र सूत्रे 'आतः स्थाने' (७–३–४६) इत्यनुवृत्तं स्वशब्दस्यातो विशेषणं न तु द्वैषयोरसंभवात् । नाप्यन्येषामव्यभिचारात् । स्वशब्दस्त्वनुपसर्जनमात्मीयवाची अकजर्हः । अर्थान्तरे तु न स्त्री । संज्ञोपसर्जनीभूतस्तु भवत्युदाहरणम् । एवञ्च स्वशब्दग्रणं संज्ञोपसर्जनार्थम् ।

७–३–४८ अभाषितपुंस्कात्= अभाषितपुंस्काद् विहितस्य, आतः+स्थाने (७–३–४६) (जातस्य) प्रत्ययस्थात् + कात् + पूर्वस्य + अतः (७–३–४४) न (७–३–४५) उदीचाम् (७–३–४६) । बहुव्रीहौ ५–४–१५४ शेषाद्... इति कप्रत्यये विकल्प एव । अखट्वका, अखट्विका । अविद्यमाना खट्वा यस्याः सा अखट्वा । तत्र तद्धिते कप्रत्यये भाषितपुंस्कत्वान्नित्यमेवेत्वम् । अखट्विका । एवं खट्वामतिक्रान्ता अतिखट्वा । तत्र तद्धिते कप्रत्यये च नित्यमेव । अतिखट्विका ।

७–३–४९ आदा– अभाषितपुंस्कात् (७–३–४८) आतः+ स्थाने (७–३–४६ जातस्य) प्रत्ययस्थात्+ कात् + पूर्वस्य + अतः (७–३–४४) आत् = आकारादेशो भवति, आपि (७–३–४४) आचार्याणाम्= आचार्याणां मते ।

७–३–५० ठस्ये– ७–२–११८ किति च–सूत्रानन्तरं सूत्रमिदं पाठचम् । ठस्य=ठ इत्यस्य स्थाने, इकः= इक इत्यादेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा आक्ष+इक इति श्यामपाटचां लिखित्वा ६–४–१४८ यस्ये..... सूत्रमुद्बोध्यच्छात्रैः रूपं साधयेत् । (द्वितीयावृत्तौ तु अक्ष ठ इत्यवस्थायामेव ठस्येकादेशः, ततः स्थानिवद्भावेन कित्त्वमाश्रित्य आदिवृद्धिः, ततः यस्येति....इति प्रक्रियाक्रमो बोध्यः) आक्षिकः। आक्षिकम् । एवं कुद्दालेन खनति, इति विग्रहे कौद्दालिक इति रूपं छात्रैः साधयेत् । अथाऽधोनिर्दिष्टसूत्राणामर्थं स्वयं भणत इति शिक्षकश्छात्रानादिशेत् ४–४–४१ धर्मं चरति ४–४–६९, तत्र नियुक्तः । ४–४–७३ निकटे वसति ।

छात्रेषु यथार्थमुत्तरत्सु भूरिप्रशंसया छात्रा उत्साहयितव्याः । अन्यथापि मध्ये मध्ये साहाय्चं ददता छात्रैरर्थं कारयित्वा तेषामुत्साहो वर्धयितव्य एव । अथोदाहरणान्यपि शिक्षको यथासंभवं छात्रैः प्रस्तावयेत् । अथ ४–४–३ सँस्कृतम् । ४–४–५ तरति । ४–४–८ चरति । इत्येतेषु सूत्रेपु ४–४–२ तेन..... सूत्रात् तेन इत्यनुवर्तते इति वोधनपुसस्सरं छात्रैस्तेषामर्थं तदुदाहरणान्यपि यथासम्भवं साधयित्वा तद्धितप्रकरणमतीव सरलं भवतीति तेपां मनसि भावनां जागरयेत् । अथ ४–४–७६ तद् व..... इति सूत्रादारभ्य परतः के प्रत्यया भवेयुः ? इति जिज्ञासामुद्भाव्य ४–४–७५ प्राग्घिताद् यत्-सूत्रमुपदिशेत् ।

७–३–५१ इसु...... तान्तात्= इस् उस् उक् त् इत्येतदन्तात् परस्य, ठस्य (७–३–५०) कः =क आदेशो भवति । **सार्पिष्कः** ४–४–५१ तद... इति ठक् । ८–३–३९, इणः...... इति पत्वम् । **धानुष्कः** ४–४–५७ प्रह... इति ठक् । पत्वं प्राग्वत् । **धैनुकम्** ४–२–४७ अचि..... इति ठक् । **पैतृकम्** ४–३–७०, पितु...इति ठञ् । **उषा** वसेः क्विँपि–उप् ।

७–३–५२ चजोः= चकारजकारयोः स्थाने , कु= कवर्गो भवति, घिण्ण्यतोः= घिति ण्यति च परे । इह स्थानिनिमित्तयोर्यथासंख्यं न, तेन रक्तं रागादिति निर्देशात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–५३ न्यङ्क्वादीनां च ॥
न्यङ्कुः ।
७–३–५४ हो हन्तेर्ञ्णिन्नेषु ॥५६,५५
घातः । घातकः । घ्नन्ति ।
७–३–५५ अभ्यासाच्च ॥५८
जघनिथ, जघन्थ ।
७–३–५६ हेरचङि ॥
जिघाय । अचङीत्युक्तेर्नेह–अजीहयत् ।
७–३–५७ सन्लिटोर्जेः ॥ ५८
जिगीषति । जिगाय ।
७–३–५८ विभाषा चेः ॥
चिकीषति, चिचीषति । चिकाय, चिचाय ।
७–३–५९ न क्वादेः ॥ ६९
गर्ज्यम् । वार्तिककारस्तु निष्ठायामनिट इति पूरयित्वा न क्वादेरित्यादि प्रत्याख्यातवान् ।
तेन अर्जि तर्जि प्रभृतीनां न कुत्वं निष्ठायां सेट्त्वात् । ग्रुचुँग्लुचुँ प्रभृतीनां तु क्वादित्वेऽपि कुत्वं भवत्येव । सूत्रमते तु यद्यपि विपरीतं प्राप्तं तथापि यथोत्तरं मुनीनां प्रामाण्यमिति दीक्षितः ।
७–३–६० अजिव्रज्योश्च ॥
समाजः । उदाजः । परिव्राजः ।
परिव्राज्यम् ।
७–३–६१ भुजन्युब्जौ पाण्युपतापयोः ॥
भुजः=पाणिः । न्युब्जः = रोगः।
अन्यत्र भोगः। समुद्गः।
७–३–६२ प्रयाजानुयाजौ यज्ञाङ्गे ॥
पञ्च प्रयाजाः । पञ्चानुयाजाः ।
यज्ञाङ्गे इत्युक्तेर्नेह –प्रयागः । अनुयागः ।

७–३–५३ न्यङ्क्वादीनाम्= न्यङ्कुप्रभृतिगणपठितशब्दसिद्धये कुत्वं निपात्यते ।
७–३–५४ हो ह–ञ्णिन्नेषु = ञिति णिति प्रत्यये अव्यवहितनकारे च परे, हन्तेः=हन्धातोः, हः= हकारस्य स्थाने, कु (७–३–५२) ।
७–३–५५ अभ्यासात् = अभ्यासत् परस्य, हन्तेः + हः (७–३–५४) कु (७–३–५२) ।
७–३–५६ हेर– अभ्यासात् (७–३–५५), हेः= हिधातोः, हः (७–३–५४) कु (७–३–५२) अचङि= परतश्चङोऽभावे ।
७–३–५७ सन्लिटोः=सन्लिड्निमित्तकात् (सन्निमित्तकात्, लिण्निमित्तकाच्च), अभ्यासात् (७–३–५५) जेः= जिधातोः स्थाने (१–१–५३ आदे.... सूत्रबलेन जकारस्य स्थाने) कु (७–३–५२) ।
७–३–५८ विभा– सन्लिटोः (७–३–५७) अभ्यासात् (७–३–५५) चेः=चिधातोः (पूर्वोक्तरीत्या चकारस्य) स्थाने, विभाषा=वा, कु(७–३–५२)।
७–३–५९ न क्वा– क्वादेः = कवर्गादेर्धातोः, न= चजोः कु न भवति ।
७–३–६० अजिव्रज्योः =अज् व्रज् धात्वोः, न (७–३–५९) २–४–४६ अजे... इति वीभावस्य विधानादजेर्ण्यति नास्त्युदाहरणम् ।
७–३–६१ भुजन्युब्जौ= भुज न्यूब्ज इति निपात्येते, पाण्युपतापयोः= पाणौ (हस्ते) उपतापे (रोगे) च । उदाहरणयोः– आद्ये ३–३–१२१ हलश्चेति करणे घञ् गुणाभावः कुत्वाभावश्च निपात्यते । अन्त्ये ऽधिकरणे घञ्, कुत्वाभावो दकारस्य बत्वं च निपात्यतेः । भुज् (१४५३) नि+ उब्ज् (१३०२) इति प्रकृतिः क्रमशः । समुद्ग इति प्रत्युदाहरणे–निष्ठायां सेट्त्वात् कथं कुत्वम् ? इति चेत् अत्र ७–३–५९ न क्वा... इति सूत्रे पदमञ्जरी– कथं शोकः समुद्ग इति ... शुच्युब्ज्योर्घञि इति वक्ष्यामि तच्च यथान्यासे ऽपि वक्तव्यम्– घञ्येव यथा स्यात्, ण्यति माभूदिति अशोच्यानन्वशोचस्त्व–मिति । तदेव वार्तिककारपक्षे विध्यर्थं भविष्यतीति ।
७–३–६२ प्रयाजानुयाजौ = प्रयाज अनुयाज इति कुत्वाऽभावविशिष्टौ निपात्येते, यज्ञाङ्गे=यज्ञाङ्गे गम्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–६३ वञ्चेर्गतौ ॥
वञ्च्यं वञ्चन्ति वणिजः ।
गतावित्युक्तेर्नेह–वङ्क्यं काष्ठम् ।
७–३–६४ ओक उचः के ॥
ओकः= गृहम् ।
७–३–६५ ण्य आवश्यके ॥ ६९
अवश्यपाच्यम् । आवश्यके इत्युक्तेर्नेह निषेधः–पाक्यम् ।
७–३–६६ यजयाचरुचप्रवचर्चश्च ॥
याज्यम् । याच्यम् । रोच्यम् । प्रवाच्यम् । अर्च्यम् ।
(ण्यति प्रतिषेधे त्यजेरुपसंख्यानम्) त्याज्यम् ।
७–३–६७ वचोऽशब्दसंज्ञायाम् ॥
वाच्यम् । शब्दसंज्ञायां तु वाक्यम् ।
७–३–६८ प्रयोज्यनियोज्यौ शक्यार्थे ॥
प्रयोक्तुं शक्यः प्रयोज्यः। नियोक्तुं शक्यो नियोज्यः । शक्यार्थे इत्युक्तेरिह कुत्वमेव– प्रयोक्तुं योग्यः प्रयोग्यः । नियोक्तुं योग्यो नियोग्यः।
७–३–६९ भोज्यं भक्ष्ये ॥
भोज्य ओदनः । भोग्यमन्यत् ।
७–३–७० घोर्लोपो लेटि वा ॥७२
दधद् रत्नानि दाशुषे । यदग्निरग्नये ददात् ।
७–३–७१ ओतः श्यनि ॥
शो (११४४) श्यति । दो (११४७) द्यति ।
७–३–७२ क्सस्याचि ॥ ७३
अधुक्षाताम् । अधुक्षि ।
७–३–७३ लुग् वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये॥
अदुग्ध, अधुक्षत । अदुग्धाः, अधुक्षथाः । अदुह्वहि, अधुक्षावहि ।
७–३–७४शमामष्टानां दीर्घः श्यनि ॥७६
शाम्यति । ताम्यति । दाम्यति । श्राम्यति । भ्राम्यति । क्षाम्यति । क्लाम्यति । माद्यति ।

७-३-६३ **वञ्चेः**=वञ्च् धातोः, न (७-३-५९) गतौ = गतौ गम्यमानायाम् । **वञ्च्यं वञ्चन्ति** कुटिलं गच्छन्तीत्यर्थ इति पदमञ्जरी । वङ्क्यम्= कुटिलमित्यर्थः।
७-३-६४ **ओकः** = ओक इति, उचः = उच् धातोः, के = कप्रत्यये, निपात्यते । निपातनं च- गुणः कुत्वं च । अदन्तोऽयं शब्द इगुपध–कान्तः । अत्र काशिका–दिवौकसः, जलौकसः– इत्येवमादावप्यसुनि प्रत्यये 'उणादयो बहुलम्' इति कुत्वं द्रष्टव्यम् इति ।
७-३-६५ **ण्ये**= ण्यप्रत्यये परे, न (७-३-५९) आवश्यके = आवश्यके गम्ये ।
७-३-६६ **यज**.....चर्चः= यजादीनाम्, ण्ये (७-३-६५) न (७-३-६९) । प्रवचर्च= प्रवच् ऋच् **अर्च्यम्** अत्र काशिका–ऋदुपधादपि ऋचेरत एव निपातनाद् ण्यद् भवतीति ।
७-३-६७ **वचः**=वच्धातोः,न (७-३-५९)ण्ये (७-३-६५) अशब्दसंज्ञायाम् = शब्दसंज्ञायाम् गम्यमानायाम् ।

७-३-६८ **प्रयो.... योज्यौ** = **प्रयोज्य** नियोज्य इति, शक्यार्थे = शक्यार्थे गम्ये, कुत्वा ऽभावविशिष्टौ निपात्येते ।
७-३-६९ **भोज्यम्** = **भोज्यम्** इति कुत्वाऽभावो निपात्यते, भोज्ये= अशनीये गम्ये ।
७-३-७० **घोः**= घुसंज्ञकधातोः, वा = विभाषया, लोपः= लोपो भवति, लेटि= लेटिँ परे ।
७-३-७१ **ओतः**= ओकारस्य, लोपः (७-३-७०) श्यनि= श्यन्प्रत्यये परे ।
७-३-७२ **क्सस्या**- क्सस्य= क्स इत्यस्य, लोपः (७-३-७) अचि = अजादौ प्रत्यये परे ।
७-३-७३ **लुग् वा**- दुह.... गुहाम्= दुहगुहादीनाम्, क्सस्य (७-३-७२) वा= विभाषया, लुक्= लुग् भवति, दन्त्ये= दन्त्यवर्णादिके, आत्मनेपदे= आत्मनेपदे परे । लोपः (७-३-७०) इत्यनुवर्तमाने लुग्ग्रहणं सर्वादेशार्थम् ।
७-३-७४ **शमाम्** = शम्प्रभृतीनाम्, अष्टानाम्= अष्टानां धातूनाम् अचः (१-२-२८) दीर्घः = दीर्घो भवति, श्यनि= श्यन्प्रत्यये परे । उदाहरणेषु क्लाम्यति भ्राम्यति इत्यत्र ३-१-७० वा भ्रा... इति वा श्यन् । शेषेषु-३-१-६९ दिवा... इति नित्यं श्यन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-३-७५ ष्ठिवुँक्लमुँचमां शिति ॥ ८२

ष्ठीवति । क्लामति ।
(आङि चम इति वक्तव्यम्)
आचामतिनेह-चमति । विचमति ।

७-३-७६ क्रमः परस्मैपदेषु ॥

क्राम्यति, क्रामति । परस्मैपदेष्वित्युक्तेर्नेह-आक्रमते सूर्यः ।

७-३-७७ इषगमियमां छः ॥

इच्छति । गच्छति । संगच्छते । यच्छति ।

७-३-७८ पा - घ्रा - ध्मा - स्था - म्ना -दाण्- दृश्यर्ति- सर्ति- शद- सदां पिब- जिघ्र- धम- तिष्ठ- मन- यच्छ- पश्यर्च्छ- धौ- शीय- सीदाः ॥

पिबति जिघ्रति । धमति । तिष्ठति । मनति । यच्छति । पश्यति । ऋच्छति । धावति । अत्र काशिका-सर्तेर्वेगितायां गतौ धावादेशमिच्छन्ति । अन्यत्र सरति । अनुसरतीत्येव भवतीति ।
शीयते । सीदति ।

७-३-७९ ज्ञाजनोर्जा ॥

जानाति । जायते ।

७-३-८० प्वादीनां ह्रस्वः ॥ ८१

पुनाति । लुनाति ।

७-३-८१ मीनातेर्निगमे ॥

प्रमिणन्ति व्रतानि । लोके तु- प्रमीणाति ।

७-३-८२ मिदेर्गुणः ॥ ८८

मेद्यति ।

७-३-८३ जुसि च ॥

अजुहवुः । अबिभरुः ।
येन नाप्राप्तिन्यायेन सार्वधातुक-ङिन्निमित्तकः प्रतिषेधो बाध्यते, न तु यासुँड्निमित्तकः । चिनुयुः ।

शम् तम् दम् श्रम् भ्रम् क्षम् क्लम् मद् इत्येते शमादयः शमुँ उपशमे, इत्यादिरीत्या दिवादिगणे क्रमशः पठचन्ते ।

७-३-७५ ष्ठिवुँ... चमाम्-ष्ठिवुँ क्लमुँ चम्धातूनाम्, अचः (१-२-२८) दीर्घः (७-३-७४) शिति= इत्संज्ञकशकारादौ प्रत्यये परे । **ष्ठीवति** ६-२-६२ धात्वा... सूत्रस्थेन- सुँब्धा....... इति वार्तिकेन सत्वप्रतिषेधः ।

७-३-७६ क्रमः=क्रम् धातोः, अचः (१-२-२८) दीर्घः (७-३-७३) परस्मैपदेषु= परस्मैपदपरके, शिति (७-३-७५)। उदाहरणयोः ३-१-७० वा भ्रा... इति वा श्यन्। प्रत्युदाहरणे १-३-४० आङ... इत्यात्मनेपदम् ।

७-३-७७ इष...यमाम्= इष् गम् यम् धातूनां स्थाने, छः= छँ (अनुबन्धलोपे, छ) आदेशो भवति, शिति (७-३-७५) ।

७-३-७८ पाघ्रा...सदाम्= पा घ्रा ध्मा स्था म्ना दाण् दृश् ऋ सृ शद् सद् इत्येतेषां धातूनां स्थाने, पिब....सीदाः= पिब जिघ्र धम तिष्ठ मन यच्छ पश्य ऋच्छ धौ शीय सीद इत्येते आदेशा भवन्ति, शिति (७-३-७५)। **पिबति** पिवोऽदन्तः। पररूपम्। अतो न लघूपधगुणः। **शीयते** १-३-६० शदेः........ इत्यात्मनेपदम् ।

७-३-७९ ज्ञाजनोः= ज्ञा जन् धात्वोः स्थाने, जा= जा इत्यादेशो भवति, शिति (७-३-७५) ।

७-३-८० प्वादीनाम्= पूप्रभृतिधातूनाम् स्थाने, ह्रस्वः= ह्रस्वो भवति, शिति (७-३-७५) । प्वादयः क्र्यादिगणपाठे द्रष्टव्याः ।

७-३-८१ मीनातेः=क्र्यादेर्मीधातोः स्थाने, ह्रस्वः (७-३-८०) शिति (७-३-७५) निगमे= वेदे । उदाहरणप्रत्युदाहरणयोः ८-४-१५ हिनु... इति णत्वम् ।

७-३-८२ मिदेः= मिद्धातोः, इकः (१-१-३) गुणः= गुणो भवति, शिति(७-३-७५) ।

७-३-८३ जुसि-३-४-१०९ सिंजभ्यस्त... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–८४ **सार्वधातुकार्धधातुकयोः**॥ ८६ भवति । भविष्यति । ७–३–८५ जाग्रोऽविचिण्णल्ङित्सु ॥	जागरयति । जागरकः । जागरितः। जागरितवान् । अविचिण्णल्ङित्सु इत्युक्तेर्नेह– जागृविः। अजागारि । जजागार । जागृतः । जाग्रति ।

(क) (ख)
६–४–१ **अङ्गस्य ॥ ७–३–८२ मिदेः गुणः ॥ ७–३–८३ (क) (ख) जुसि च ॥ इति** । एतत्सूत्रार्थोपदेशे ७–३–८४ सार्व... सूत्रे प्रपञ्चितं विषयं शिक्षको विमृश्य सूत्रार्थमुपदिशेत् । (क)= अङ्गस्य= इगन्तस्य अङ्गस्य स्थाने, (ख)= गुणः, जुसि= जुसि परे । लक्षणसमन्वयं छात्रैः कारयेत् । अजुहवुः। अजुहोः। अजुहुतम् । अजुहुत । अजुहवम् । अजुहुव । अजुहुम । विध्यादि– लिँङि– यासुँटो ङित्त्वाद् गुणो निषिध्यते । शेषप्रक्रिया अद्धाताविव । केवलं लुका श्लुर्विनिमातव्यो द्वित्वं च कार्यम् । जुहुयात्। जुहुयाताम् । जुहुयुः । जुहुयाः। जुहुयातम् । जुहुयात। जुहुयाम् जुहुयाव । जुहुयाम । इत्थं जुहोत्यादौ विशेषकार्यं विकरणस्य (शपः) श्लुर्भवति धातोश्च तन्मूलकं द्वित्वं भवतीति बोधयेत् । कर्मणि लकारे तु यगेव । अत्र हु+य+त इत्यवस्थायाम् ७–४–२५ अकृत्... सूत्रं प्रवर्तत इति ब्रुवन् , तत् (अकृत्...) सूत्रमुपदिदिक्षुरधो निर्दिष्टरूपेण च्छात्रान् बोधयेत् । अयि वत्साः ? प्रकृतसूत्रेण दीर्घः क्रियते । यथा गुणवृद्धी इकः स्थाने भवत इति बोधकम् १–१–३ इको... सूत्रं पठितं युष्माभिः। तथैव ह्रस्वदीर्घप्लुता अचः स्थाने भवन्तीति बोधकं प्रथते सूत्रान्तरमिति वदन् १–२–२८ अचश्च– सूत्रमुपस्थापयेत् ।

७–३–८४ सार्व १–३–७२ स्वरित... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा–

(क) (ख)
६–४–१ अङ्गस्य ॥ ७–३–८२ मिदेः गुणः॥ ७–३–८४ (क) (ख) सार्वधातुकार्धधातुकयोः॥ इति । एवं श्यामपाट्यां लिखित्वा, अनेन सूत्रेण गुणो विधीयते इत्येतावन्मात्रमुपदिशता शिक्षकेण, अस्यार्थोपदेशात् पूर्वम् १–१–३ इको... सूत्रमुपदिश्यैतत्— सूत्रार्थ उपदेश्यः ७–३–८४ इकः = इकः स्थाने, (ख)= गुणः= गुणो भवति , सार्वधातुकार्धधातुकयोः= सार्वधातुके आर्धधातुके च परतः । इति । द्वितीयावृत्तौ तु–इकः (१–१–३) + [(क)= अङ्गस्य] = इगन्तस्य अङ्गस्य स्थाने, (ख)= गुणः = गुणो भवति, सार्वधातुकार्धधातु कयोः= तयोः परयोः। इति । सत्यावश्यके १–१–७१ येन... सूत्रमुद्बोध्यम्। तदा लक्षणसमन्वये १–१–५१ अलो... सूत्रं चोद्बोध्यम् । अथ प्रकृतोदाहरणे लक्षणसमन्वयप्रसङ्गे उकारस्य स्थाने गुणवर्णेषु (अ ए ओ इत्येतेषु) ओष्ठ्यः कतमः स्यादिति विचारे श्यामपाटीप्रयोगः कथं कार्यः ? इति च्छात्रा एव परीक्षणीयाः । यदिच्छात्राः समुचितं श्यामपाटीप्रयोगं न कर्तुं शक्नुयुस्तदा शिक्षकोऽधोनिर्दिष्टरूपेण ६–१–७४ इको... सूत्रे दर्शितं श्यामपाटीप्रयोगविधिं पुनरुद्बोधयेत् । यथा उ प् फ् ब् भ् म् ओ औ (ओदौतोः कण्ठोष्ठम्) ओष्ठ्यवर्णाः । अ ए ओ गुणवर्णाः । इति। अत्र प्रत्येकमक्षरं दर्शयता शिक्षकेण ओष्ठस्थाने अकारो नास्तीति बोधयता सता अकारोपरि + चिह्नमिदं देयम् । एवमेव एकारोपर्यपि × चिह्नमिदं देयम् । ओकारस्तु ओष्ठस्थानेऽस्तीति तदुपरि √ चिह्नमिदं देयम्। एवञ्च श्यामपाट्यां वर्णा अधोनिष्टरूपा भवन्ति ।

× × √
अ+ए+ ओ इति । अत एव ओकारो जातः। अथ श्यामपाट्यां भो+ अति इति लिखित्वा सन्धये छात्रा आदेश्याः। **भवति** । अत्र ६–१–१०५ एङः... सूत्रं न प्रवर्तते ? इतिच्छात्राः परीक्षणीयाः । एवं तसादिष्वपि । लोँटि लँङि विध्यादिलिँङि च गुण एवाऽत्र विशेषोऽन्या सर्वापि प्रक्रिया पठ्धाताविवेत्युपदिशता शिक्षकेण छात्रैरुच्यमानानि रूपाणि श्रव्याणि । भावे तु यगेव । नापि गुणादिविशेषः। भूयते । भूयताम् । अभूयत । भूयेत । इति । अत्र गुण प्राप्तिस्तन्निषेधश्च नोपदेश्यौ । साम्प्रतं यक आर्धधातुकसंज्ञाकरणस्य प्रयोजनाभावात् । अथ शिक्षको मुद् (मुदँ १६)– धातुपाठ– प्रदर्शनपुरस्सरं मुद्धातुरनुदात्तेत् , इति च्छात्रान् बोधयित्वा कर्तरि लँटि लभ् धातोः कर्तरि लँटीव प्रक्रियाक्रमे मुद्+अ+त इति श्यामपाट्यां लिखित्वा १–४–१० ह्रस्वं... सूत्रमुपदिशेत् ।

७–३–८५ जाग्रो– अवि... ङित्सु= विचिण्णल्ङिद्भिन्ने वृद्धिविषये प्रतिषेधविषये च, जाग्रः= जागृधातोः स्थाने, गुणः (७–३–८२) । 'वृद्धिविषये प्रतिषधविषये च' इत्यर्थः, चिण्णल्ङित्पर्युदासलभ्यः । अन्यत्र तु पूर्वेणैव सिद्धः । **जागरयति** गुणविधानसामर्थ्यात् ७–२–११६ अत... इति न वृद्धिः । **जागृविः** ५०३ जॄ शॄ... इत्युणादि क्विन् । सूत्रे 'वि' इत्यत्र इकार उच्चारणार्थ इति मते क्वसावपि न-जजागृवान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–८६ पुँगन्तलघूपधस्य च ॥८७
ह्रेपयति । सेधति । शोचति । वर्तते । मोदते । येन नाऽव्यवधानं तेन व्यवहितेऽपि भवति । ततोऽधिकेन व्यवहिते न भवति। भिनत्ति।

७–३–८७ नाऽभ्यस्तस्याऽचि पिति सार्वधातुके ॥ ८९,९४
नेनिजानि । वेविजानि । वेविषाणि । मोमुदीति ।वरीवृतीति । अभ्यस्तस्येत्युक्तेरिह भवत्येव– वेदानि । अचीत्युक्तेरिह भवत्येव– नेनेक्ति । सार्वधातुके इत्युक्तेरिह भवत्येव– निनेज । लघूपधस्येत्यनुवृत्तेरिह भवत्येव– जुहवानि ।
(बहुलं छन्दसीति वक्तव्यम्)
जुजोषत् ।

७–३–८८ भूसुवोस्तिङि ॥
अभूत् । सुवै । सुवावहै । सुवामहै । सार्वधातुके (७–३–८७) इत्यनुवृत्तेरिह भवत्येव– व्यतिभविषीष्ट । बोभवीति, इत्यादौ यङ्लुकि न प्रतिषेधः । वेदे ७–४–६५ दाधर्ति...सूत्रेण बोभूतु इति गुणाभावनिपातनेन लोके गुणप्रतिषेधाऽभावबोधनात् ।

७–३–८६ पुँग– १–४–१० ह्रस्वं... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा–
(क) (ख) (ग)
६–४–१ अङ्गस्य ७–१–८२ मिदेः गुणः ॥ ७–३–८४ सार्वधातुकार्धधातुकयोः ॥ ७–३–८६ पुँगन्तलघूपधस्य च (क) (ख) (ग) ॥ इति । अत्रापि पूर्वमुपदिष्टं १–१–३ इको... सूत्रमुद्बोध्य प्रकृतसूत्रार्थमुपदिशेत् । यथा–पुँगन्तलघूपधस्य= पुँगन्तस्य लघूपधस्य च, (क)=अङ्गस्य, इकः (१–१–३) स्थाने , (ख) = गुणः, (ग) = सार्वधातुकार्धधातुकयोः । इति । लक्षणसमन्वयं रूपसिद्धिं च च्छात्रैः साधयेत् । अथ–अत्र विशेषो धातोर्गुण एव। शेषप्रक्रिया लभ्धाताविवेति वदता शिक्षकेण छात्रैरुच्यमानानि रूपाणि श्रव्याणि । मोदते । मोदताम् । अमोदत । मोदेत । भावे तु यक् । नापि गुणादिविशेषः । मुद्यते । मुद्यताम् । अमुद्यत । मुद्येत । इति । **अथ अदादिगणप्रयुक्तं विशेषकार्यं शपो लुग्** भवतीत्युपदिशता शिक्षकेण धातुपाठं दर्शयता धातव एतेऽदादयः। एषु सर्वेषु शपो लुग् भवतीति छात्राः शिक्षयितव्याः । तत्क्रमे अद् (अदँ भक्षणे १०११) धातुं पुरस्कृत्य पठ्धाताविव सर्वा प्रक्रियां छात्रैः साधयता अद्+अ+ति इति श्यामपाटचां लिखित्वा २–४–७२ अदिप्रभृतिभ्यः... सूत्रमुपदेश्यम् ।
७–३–८७ नाऽभ्य– अभ्यस्तस्य= अभ्यस्तसंज्ञकस्य , लघूपधस्य (७–३–८६) अङ्गस्य (६–४–१) अचि+पिति+सार्वधातुके = अजादौ पिद्विशिष्टे सार्वधातुके परे, न= न गुणः। आद्यानि त्रीण्युदाहरणानि जौहोत्यादिकानि । अन्तिमे द्वे यङ्लुगन्ते ।
बहुलं–जुजोषत् ३–१–८५ व्यत्य...इति शपः श्लुः परस्मैपदं च । ३–४–९४ लेटोँ.. इत्यट् । ३–४–९७ इत... इतीकारलोपः ।
७–३–८८ भूसु– २–४–७७ गातिं... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा–
(क)
मिदेः गुणः ॥
(ख) (ग)
७–३–८७ न....सार्वधातुके ॥
७–३–८८ भूसुवोः (ख) (क) (ग) तिङि ॥ इति । भूसुवोः= भूधातोः सूधातोश्च स्थाने , (ख)+(क)= न गुणः, (ग) सार्वधातुके, तिङि= तिङि परे। इत्यर्थमुपदिश्यच्छात्रैर्लक्षणसमन्वयं कारयित्वा रूपं साधयेत् । अभूत् । अभूताम् । भ्लिप्रत्यये सिँचो लुकि, अन्तादेशे 'अभू+अन्ति' इति श्यामपाटचां लिखित्वा --[अन्त्यानि त्रीण्युदाहरणानि षूङ् (१०३१ धातोः]-
६–४–८८ भुवो... सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–८९ उतो वृद्धिर्लुकि **हलि** ॥ ९०,१००
यौति । स्तौति । लुकीत्युक्तेर्नेह-जुहोति । पिति (७–३–८७) इत्यनुवृत्तेर्नेह–युतः । स्तुतः । नाऽभ्यस्तस्येत्यनुवृत्तेर्नेह– योयोति । ङिच्च पिन्न भवति । युयात् ।

७–३–९० ऊर्णोतेर्विभाषा ॥ ९१
ऊर्णौति , ऊर्णोति ।

७–३–९१ गुणोऽपृक्ते ॥
और्णोत् । और्णोः ।

७–३–९२ तृणह इम् ॥ तृणेढि । हलि (७–३–८९) इत्यनुवृत्तेर्नेह–तृणहानि । पिति (७–३–८७) इत्यनुवृत्तेर्नेह–तृण्ढः ।

७–३–९३ ब्रुव ईट् ॥९८
ब्रवीति । ब्रवीषि । ब्रवीमि ।

७–३–९४ यङो वा ॥ ९५
बोभवीति, बोभोति ।

७–३–८९ उतो– हलि= हलादौ, पिति+सार्वधातुके (७–३–८७) उतः= उकारस्य स्थाने, वृद्धिः= वृद्धिर्भवति, लुकि= लुकि सति, अभ्यस्तस्य+ न (७–३–८७) ।
७–३–९० ऊर्णो– ऊर्णोतेः = ऊर्णुधातोः , उतः (७–३–८९) विभाषा, = वा, वृद्धिः + हलि (७–३–८९) पिति + सार्वधातुके (७–३–८७) ।
७–३–९१ गुणो– ऊर्णोतेः (७–३–९०) उतः (७–३–८९) गुणः =गुणो भवति, अपुक्ते = अपृक्तसंज्ञके, हलि (७–३–८९) पिति+सार्वधातुके (७–३–८७) ।
७–३–९२ तृणहः= कृतश्नमस्तृह्धातोः, इम्= इमागमो भवति, हलि (७–३–८९) पिति + सार्वधातुके (७–३–८७) ।
७–३–९३ ब्रुवः= ब्रूधातोः परस्य, हलि (७–३–८९) + पिति+ सार्वधातुके (७–३–८७)=हलादेः पितः सार्वधातुकस्य (१–१–६६ तस्मा... सूत्रद्वारा सप्तम्यन्तं षष्ठयन्ताय क्लृप्तम्) ईट्= ईडागमो भवति ।
७–३–९४ यङो– २–४–७४ यङोऽचि च-सूत्रानन्तरं सूत्रमिदं पाठयम् । अत्र श्यामपाटी प्रयोगो

(क) (ख) (ग) (घ)

यथा– ७–३–८७ नाभ्यस्त... पिति सार्वधातुके ॥ ७–३–८९ उतो ... हलि ७–३–९३ ब्रुव ईट् ७–३–९४ यङः (ग) (क) (ख) वा (घ) ॥ इति । यङः = यङन्ताद् धातोः परस्य, (ग) +(क) +(ख) =हलि पिति सार्वधातुके =हलादेः पितः सार्वधातुकस्य, वा=विकल्पेन (घ)= ईट्= ईडागमो भवति । इत्यर्थमुपदिश्य च्छात्रैर्लक्षणसमन्वयं कारयित्वा 'बोभू + ईति, ईडभावे बोभू+ति' इति श्यामपाट्यां लिखित्वा ७–३–८४ सार्व... सूत्रमुद्बोध्य रूपे साधयेत् । बोभवीति, बोभोति । इति । यदि तु च्छात्राः ७–३–८८ भूसु... सूत्रेण कथं न गुणनिषेधः ? इति शङ्केरन् , तदा यङ्लुकि तत्सूत्रं न प्रवर्तते ७–४–६५ दाधर्ति... सूत्रेण बोभूतु.. इतिच्छन्दसि गुणाभावनिपातनात् । यदि तु यङ्लुकि तत्सूत्रं प्रवर्तेत तर्हि तेनैव गुणनिषेधे सिद्धे गुणाभावनिपातनं व्यर्थं स्यादिति स्फुटं बोधयेत् । १–२–४ सार्व... सूत्रेण ङित्त्वे १–१–५ क्क्ङिति... सूत्रेण तु निषेधो भवत्येव । बोभूतः । ६–१–५ उभे... ७–१–४ अद... ६–४–७७ अचि... बोभुवति । लिँटि– वोभवाञ्चकार । बोभवाम्बभूव । बोभवामास । लँङि– झिप्रत्यये ३–४–१०९ सिँज... ७–३–८३ जुसि... सूत्रे उद्बोधयेत् । अबोभवुः । लुँङि– तिपि २–४–७७ गाति... इति सिँचो लुकि, प्रकृतेन ७–३–९४ यङो... सूत्रेण ईट् पक्षे ६–४–८८ भुवो...सूत्रेण वुँक् । अँबोभूवीत्, अबोभोत् । इत्याद्युपदिश्य **शितपा शपाऽनुबन्धेन निर्दिष्टं यद् गणेन च यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि** ॥ अस्याः कारिकाया भावं सोदाहरणं बोधयेत् । यथा- शितपा- ८-४-१७ नेर्गद.... प्रणिहन्ति । नेह- प्रनिजङ्घनीति । शपा- ७-२-४९ सनीवन्त.... बिभरिषति, बुभूर्षति । नेह- वर्भरिषति । अनुवन्धेन- ३-१-५५ पुषादि....अगमत् । नेह-अजङ्गमीत् । एकाज्ग्रहणम् ७-२-१० एकाच....गन्ता । नेह- जङ्गमिता । इत्युदाहरणानि । इति **यङ्लुगन्तप्रक्रिया-शिक्षण –रीतिः । अथ नामधातु–प्रक्रिया –शिक्षण–रीतिः।** अथ शिक्षकः प्रथममधो निर्दिष्टरूपेणच्छात्रान् साकाङ्क्षान् कुर्यात् । यथा–वत्साः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-३-९५ तु-रु-स्तु-शम्यमः सार्वधातुके ॥
तवीति, तौति । तुवीतः, तुतः ।
रवीति, रौति ।
रुवीतः, रुतः । स्तवीति, स्तौति ।
स्तुवीतः, स्तुतः ।
शम् अम् धात्वोश्छन्दस्युदाहरणम्–
शमीध्वम् । अभ्यमीति ।

७-३-९६ **अस्तिसिँचोऽपृक्ते** ॥९७,१००
आसीत् । अदेवीत् । अकार्षीत् ।
अपृक्ते इत्यक्तेर्नेह – अस्ति ।

७-३-९७ बहुलं छन्दसि ॥
आप एवेदं सलिलं सर्वमाः । सर्वमासीदिति प्राप्ते सर्वमाः । गोभिरक्षाः । अक्षारीदिति प्राप्ते अक्षाः ।

७-३-९८ **रुदश्च पञ्चभ्यः** ॥ ९९
अरोदीत् ।अस्वपीत् । अश्वसीत् । आनीत् । अजक्षीत् । अपृक्तस्येत्यनुवृत्तेर्नेह-रोदिति ।

७-३-९९ **अड्** गार्ग्यगालवयोः। १००
अरोदत् । अस्वपत् । अश्वसत् ।
आनत् । अजक्षत् ।

एतदवधि मूलधातवो गणपठिता निदर्शिताः । तेभ्यो णिजादिप्रत्यये पुनर्धात्वन्तराणि च निदर्शितानि । इतः परं नामधातवो निदर्श्यन्ते । अर्थात् , नामानि= प्रातिपदिकानि च प्रत्ययविशेषे धातवो भवन्ति । अत एव ते नामधातव उच्यन्ते । इति । अथ तथाहि इति वदन् ३-१-८ सुँप... सूत्रमुपदिशेत् ।

७-३-९५ तुरु....म्यमः=तु रु स्तु शम् अम् इति धातुभ्यः परस्य , हलि (७-३-८९) = हलादेः, सार्वधातुके= सार्वधातुकस्य, वा (७-३-९४) ईट् (७-३-९३) । सार्वधातुके (७-३-८७) इत्यनुवर्तमाने पुनः सार्वधातुकग्रहणं पिति इत्यस्य निवृत्त्यर्थम् । **शमीध्वम्** व्यत्ययेन आत्मनेपदम् । व्यत्ययेन शप् । बाहुलकात्तस्य लुक् । **अभ्यमीति** शपः प्राग्वल्लुक् । ७-३-९६ **अस्ति**- ६-४-१०४ चिणो...... सूत्रानन्तरं —

(क) (ख)

सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा ७-३-८९ उतो... हलि ७-३-९३ ब्रुव ईट् । ७-३-९६ अस्तिसिँचः अपृक्ते (क) (ख) ॥ इति । अस्तिसिँचः=अस् धातोः सिँचश्च परस्य, अपृक्ते= अपृक्तस्य, (क) = हलि= हलः, (ख) = ईट् । इत्यर्थमुपदिश्य च्छात्रैर्लक्षणसमन्वयं कारयित्वा अवेदिस् + ईत् इति श्यामपाट्यां लिखित्वा ८-२-२८ इट... सूत्रमुपदिदिक्षुः शिक्षकः स्वान्तः सुखायाऽध उद्धृतेंऽशद्वयेऽपि दृष्टिं दद्यात् । अत्र काशिका-'आहिभुवोरीटि प्रतिषेधः' इति स्थानिवद्भावप्रतिषेधः। तेनेह न भवति- आत्थ । अभूदिति । अत्र दीक्षितः- सिच्च अस् चेति समाहारद्वन्द्वः । सिच्छब्दस्य सौत्रं भत्वम् । अस्तीत्यव्ययेन कर्मधारयः। ततः पञ्चम्याः सौत्रो लुक् । विद्यमानात् सिचोऽस्तेश्च परस्या पृक्तस्य हल ईडागमः स्यात् । इतीट् न । इह सिँचो लुप्तत्वात् । इति । अभूदित्यत्र विद्यमानस्य सिँचोऽभावादिति तदाशयः । अथ ८-२-२८ इट... सूत्रमुपदिशेत् ।

७-३-९७ बहु- अस्तिसिँचः (७-३-९७) अपृक्ते (७-३-९६)= अपृक्तस्य, हलि (७-३-८९)= हलः, सार्वधातुके (७-३-९५) = सार्वधातुस्य, बहुलम्= बाहुल्येन, ईट् (७-३-९३), छन्दसि= वेदे । **अक्षाः** क्षर् (८५१) धातोर्लुँङि ७-२-२ अतो..... इति वृद्धिः। सिँच इडभावश्छान्दसः। ६-१-६९ हल्ङ्या.... इति तकारलोपः। ८-२-२४ रात्सस्य.... इति सकारलोपः।

७-३-९८ रुदश्च पञ्चभ्यः:= रुदादिभ्यः पञ्चभ्यः परस्य, अपृक्तस्य (७-३-९६) हलादेः (७-३-८९) सार्वधातुकस्य (७-३-९५) । ईट् (७-३-९३) । रुद् स्वप् श्वस् अन् जक्ष् इत्येते पञ्च धातवो रुदिर् अश्रुविमोचने, इत्यादिरीत्याऽदादिगणे पठ्यन्ते ।

७-३-९९ अड् गा-रुदश्च+पञ्चभ्यः (७-३-९८) अपृक्तस्य (७-३-९६) हलादेः (७-३-८९) सार्वधातुस्य (७-३-९५) अट्=अडागमो भवति, गार्ग्यगालवयोः= गार्ग्यगालवाचार्यमते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–१०० अदः सर्वेषाम् ॥ आदत् । आदः । ७–३–१०१ **अतो दीर्घो यञि**॥१०४,१०२	भवामि । भवावः । भवामः । पठामि। पठावः । पठामः ।

७–३–१०० अदः– ६–४–७२ आडजा... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-
(क) (ख) (ग)
(७–३–९५) तुरु.... सार्वधातुके ॥ ७–३–९६ अस्ति... अपृक्ते ॥ ७–३–९९ अड् गार्ग्य.....॥ ७–३–१०० अदः (ख) (क) (ग) सर्वेषाम् ॥ इति । अत्र सूत्रार्थोपदेशप्रसङ्गे 'पञ्चमी स्वस्याः परां सप्तमीं षष्ठीं कल्पयति' । प्रकृते च अद इति पञ्चम्यन्तम् । तेन अपृक्ते इति सार्वधातुके इति च षष्ठचन्ताय कल्पेते इति शिक्षक उपदिशेत् । यदि तु तमुपदेशमेव छात्रा भारमनुभवेयुस्तदा 'अपृक्ते' नाम अपृक्तस्य, 'सार्वधातुके' नाम सार्वधातुकस्येति सूत्रार्थोपदेशे बोधयेत् । अदः =अद् धातोः परस्य, (ख)= अपृक्तस्य, (क)= सार्वधातुकस्य, (ग) =अट्=अट् आगमो भवति, सर्वेषाम्= सर्वेषामाचार्याणां मते । इत्यर्थमुपदिश्यच्छात्रैर्लक्षणसमन्वयं कारयेत्। आदत् । सिपि आदः । विध्यादिलिँङि शपि लुकि यासुँटि अद्यास् + ति इत्यवस्थायाम्७–२–७९ लिँङः.... सूत्रमुद्बोध्य लक्षणसमन्वयं छात्रैः कारयेत् । अद्यात् । अद्याताम् । झिप्रत्यये जुसि 'अद्या+उस्' इति श्यामपाट्यां लिखित्वा ६–१–९३ उस्य.... सूत्रपमुदिशेत् ।

७–३–१०१ अतो –७–१–३ झोन्तः– सूत्रानन्तर सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा–
(क)
७–३–९५ । तुरु.... सार्वधातुके ॥ ७–३–१०१ अतो दीर्घो यञि(क) ॥ इति । अत्र शिक्षको मनसाऽवदध्याद् यद् यद्यपि अङ्गस्येत्यनुवृत्त्या तदन्तविधौ च अदन्ताङ्गस्य इत्यर्थः। तथापि साम्प्रतं तादृशार्थस्य दुर्बोधत्वात्,तथा नोपदेश्य इति । अतोऽधोनिर्दिष्टरूपमर्थं शिक्षयेत्– अतः= अकारस्य स्थाने, दीर्घः= दीर्घो भवति, यञि= यञादौ, (क)= सार्वधातुके परे । इति । [द्वितीयावृत्तौ तु तदन्तविधिमूलक एवाऽर्थ उपदेश्यः । तदा लक्षणसमन्वये १– १–५१ अलो... सूत्रमवधेयम्] अथ लक्षणसमन्वयाय शिक्षकेण च्छात्रा एव प्रवर्तयितव्याः । पठामि । **वस्** - 'आवाम् पठावः' इति वक्तव्ये अत्र कर्तारौ (आवाम्) द्वौ स्तः । तेन १–४–२२ द्वचेक... सूत्रेण द्विवचनं (वस्) भवति । अथ सर्वा प्रक्रिया 'पठामि' इत्यत्रेव । विशेषो रुँत्वविसर्गविषयक एव । पठावः । वयं पठामः' इति वक्तव्ये 'पठामः' इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते–अत्र कर्तारः (वयम्) बहवःसन्ति। तेन १–४–२१ बहु .... सूत्रेण बहुवचनं (मस्) भवति । शेषप्रक्रिया सर्वापि 'पठावः' इत्यत्रेवेति बोधयता शिक्षकेण च्छात्रैरुच्यमाना प्रक्रिया श्रोतव्या । पठामः । एवं वद् भण् नम् व्रज् इत्यादिधातूनामपि प्रक्रिया ज्ञेया । अथाऽधोनिर्दिष्टानि वाक्यानि शोधयितुं छात्रा आदेश्याः। यूयं पठन्ति । वयं पठथ । त्वं जलं पिबति । त्वं किं भणति । बालकः दुग्धं पिबसि । बालकाः क्रीडथः । युवां पठथ । यूयम् पठथः । आवाम् पठामः । वयं भणावः । इति ।

कर्मणि लकारः अथाऽधोनिर्दिष्टरूपेण शिक्षकः प्रथमं छात्रानुपदिशेद् यथा –अयि वत्साः? ३–४–६९ लः क.... सूत्रे सकर्मकधातुभ्यो विहितस्य लकारस्य कर्ता वा कर्म अर्थो भवतीत्युपदिष्टम्। तत्र लकारस्यार्थः कर्ता इति पक्षे प्रक्रिया प्रदर्शिता । साम्प्रतं लकारस्यार्थः कर्मेति विवक्षायां प्रक्रिया प्रस्तूयते, इति । अथ 'श्यामेन कोशः पठ्यते, इति वक्तव्ये पठचते इति प्रयोगः कथं सिध्येदिति जिज्ञासायां प्रक्रियेयमुच्यते । इति वदता शिक्षकेण च्छात्राः सम्बोध्याः-अयि वत्साः ? अस्मिन् वाक्ये श्यामः (श्यामेन) कर्ता अस्ति । यतः, यः करोति (प्रकृते पठति) स कर्ता उच्यते इति पूर्वमुक्तमेव । कोशः कर्म अस्ति। यत् क्रियते (प्रकृते पठ्यते) तत् कर्मेति च पूर्वमुक्तमेवेति । अथ प्रक्रिया तु प्रारम्भिकी सर्वापि लकारस्यार्थः कर्ता ,इति विवक्षायामिव । केवलमत्र लकारस्यार्थः कर्मेति मन्तव्यम् । किन्तु १–३–७८ शेषा.... सूत्रस्य प्रसङ्गे प्रकृते १–१–१३भाव...सूत्रं प्रवर्तते । १–३–७८ शेषा... सूत्रं तु प्रकृते न प्रवर्तते, यतो लकारस्यार्थः कर्ता नास्ति किन्तु कर्म वर्तते, इति बोधयित्वा १–३–१३ भावकर्मणोः–सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–१०२ सुँपि च ॥ ११५

रामाय । रामाभ्याम् । वनाय ।
वनाभ्याम् । नेत्राभ्याम्

७–३–१०३ बहुवचने झल्येत् ॥ १०६

रामेभ्यः । रामेषु । वनेभ्यः। वनेषु ।
रामश्यामविष्णुमित्रेभ्यः ।

७–३–१०४ ओसि च ॥ १०५

रामयोः । वनयोः । रामश्यामयोः ।

७–३–१०५ आङि चापः ॥ १०६

रमया । रमयोः । मालया ।
मालयोः । कन्यया । कन्ययोः ।

७–३–१०२ सुँपि –७–१–१२ टाङसिँ.... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा–
(क) (ख) (ग)
७–३–१०१ अतो दीर्घो यञि ॥ ७–३–१०२ (क) (ख)(ग) सुँपि च ॥ इति । पूर्वसूत्रे इव स्वयं मनसा तदन्तविधिमूलकमर्थमवदधताऽपि शिक्षकेण लाघवेनाऽर्थबोधनायाऽधस्तनरीत्या श्यामपाट्यां पदानि दर्शयताऽर्थ उपदेश्यः । [द्वितीयावृत्तौ तु पूर्वसूत्रदर्शितनिर्देशः पालनीयः] यथा– (क)= अतः= अकारस्य स्थाने, (ख)= दीर्घः =दीर्घो भवति, (ग)= यञि = यञादौ, सुँपि = सुँपि परे । इति । लक्षणसमन्वयश्छात्रैरेव कारयितव्यः । **ङे– ॐ नमः शिवाय** इति वक्तव्ये **शिवाय** इति प्रयोगः कथं सिध्येदिति जिज्ञासायां शिवप्रातिपदिकात् ४–१–२ स्वौज... सूत्रेण ङे भ्याम् भ्यस् इत्येतेषु प्रत्ययेषु प्राप्तेषु १–४–२२ द्व्येक.......१– ३–८, लश... १–३–९ तस्य... सूत्रबलात्, शिव+ए इति जाते स–बाध्यबाधनं ७–१–१३ ङेर्यः– सूत्रं प्रस्तुत्यम् ।

७–३–१०३ बहु– ७–१–१३ ङेर्यः–. सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र ७–३–१०१ अतो... सूत्रात् "अतः" इति , ७–३–१०२ सुँपि... सूत्रात् 'सुँपि' इति चाऽनुवर्तेते इति भणता शिक्षकेण 'अतः' (७–३–१०१) = ह्रस्वाकारस्य स्थाने, एत्= एकारो भवति, झलि + बहुवचने+ सुँपि (७–३–१०२) = झलादो बहुवचने सुँपि परे। इत्यर्थ उपदेश्यः। [द्वितीयावृत्तौ तु ७–३–१०१ अतो....... सूत्रदर्शितनिर्देशः पालनीयः] । लक्षणसमन्वयं छात्रैः कारयित्वा प्रकृते किं ७–३–१०२ सुँपि... सूत्रं प्रवर्तेत ? वा
७–३–१०३ बहु... सूत्रं प्रवर्तेत ? इत्याकाङ्क्षां जागरयित्वा १–४–२ विप्रतिषेधे... सूत्रं प्रस्तुत्यम् ।

७–३–१०४ ओसि– १–४–२ विप्रतिषेधे... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा–
(क) (ख)
७–३–१०१ अतो दीर्घो यञि ७–३–१०३ बहुवचने झलि एत् ॥ ७–३–१०४(क) (ख) ओसि च ॥ इति । (क)= अतः= ह्रस्वाकारस्य स्थाने, (ख)= एत्= एकारो भवति, ओसि= ओसि परतः। इत्यर्थमुपदिश्य लक्षणसमन्वयश्छात्रैरेव कारयितव्यः । [द्वितीयावृत्तौ तु पूर्वसूत्रेष्विव निर्देशः पालनीयः] अथ रामश्यामे+ओस् इति श्यामपाट्यां लिखित्वा ६–१–७५ एचो... ८–२–६९ सस... सूत्रादिसमन्वयोऽपिच्छात्रैरेव कारयितव्यः। स्वयं धीरं श्राव्यञ्च ।

आम्– 'रामश्यामविष्णुमित्राणां पुस्तकानि' इति वक्तव्ये रामश्यामविष्णुमित्रप्रातिपदिकात् ४–१–२ स्वौज......सूत्रेण ङस् ओस् आम् इत्येतेषु प्रत्ययेषु प्राप्तेषु १–४–२१ बहु... सूत्रेण रामश्यामविष्णुमित्र + आम् इति जाते, तच्च श्यामपाट्यां लिखित्वा स–बाध्यबाधनं ७–१–५४ ह्रस्वनद्यापो...सूत्रं प्रस्तुत्यम् ।

७–३–१०५ आङि– ७–१–१८ औङ आपः– सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा
(क) (ख)
७–३–१०३ वहुवचने.... एत् ॥ ७–३–१०४ ओसि च ॥ ७–३–१०५ आङि(ख) च आपः (क) ॥ इति । आङि= तृनीयैकवचने (आङिति टासंज्ञा प्राचाम्) (ख)= ओसि च परे, आपः= आपः स्थाने, (क)=एत्= एकारो भवति । इत्यर्थोपदेशसन्दर्भे प्रकृतसूत्रे आप इति षष्ठ्यन्तम् आप् शब्दात् ङस्प्रत्यये सिध्यति । ७–१–१८ औङ... सूत्रे नु पञ्चम्यन्तमिति पूर्वमुपदिष्टंमेवेति तथा स्फुटं वोधयितव्यं यथा सूत्रार्थश्छात्राणां बुद्धौ स्फुरेत् [द्वितीयावृत्तौ तु अङ्गस्य (६–४–१) इत्यनुवृत्तौ १–१–७१ येन..... इति नदन्तविधौ च आवन्तस्याङ्गस्य इति, शेषोऽर्थश्च प्राग्वदेवोपदेश्यः] लक्षणसमन्वयश्छात्रैः कारयितव्यः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–१०६ **सम्बुद्धौ** च ॥ १०८	७–३–१०७ अम्बार्थनद्योर्ह्रस्वः ॥
हे रमे । हे कन्ये ।	हे अम्ब । हे अक्क । हे अल्ल । हे गौरि । हे वधु ।

अथ कन्ये+आ इति श्यामपाटचां लिखित्वा छात्रैरेव सन्धिकार्यं साधयितव्यम्। भ्यामादिहलादौ तु नोपदेशापेक्षेति पूर्वमुपदिष्टमेव । कन्याभ्याम् ३ । कन्याभिः । कन्याभ्यः२ । कन्यासु । इति यथा ।

कन्यायै

कन्याशब्दान् ङे प्रत्ययेऽनुबन्धलोपे 'कन्या+ ए' इति श्यामपाटचां लेख्यम् । अथ गुणं वृद्धिं च च्छात्रैर्बाधयित्वा ७–३–११३ याडापः– सूत्रमुपदेश्यम् ।

७–३–१०६ सम्बु–७–३–११६ ङेराम्...सूत्रानन्तरं सूत्रमिदं पाठचम्। आपः (७–३–१०५) एत् (७–३–१०३) सम्बुद्धौ= सम्बुद्धौ परतः। इत्यर्थ उपदेश्यः। [द्वितीयावृत्तौ तु पूर्वसूत्रदर्शितनिर्देशः पालनीयः] लक्षण समन्वयश्छात्रैः कारयितव्यः। अथ लोपविषये विचारायच्छात्रेभ्यो ऽवसरो देयः क्षणम्। सत्यामावश्यकतायामन्ते ६–१–६७ एङ्ह्र...... सूत्रमुद्बोधनीयम्। लक्षणसमन्वयश्छात्रैः कारयितव्यः। द्विवचनबहुवचनयोः सम्बोधनेऽपि पूर्वोक्तप्रथमान्तवत्। अयि कन्ये ? अयि कन्याः ? इति यथा। इत्थमेव रमा राधा सत्यभामाप्रभृतिशब्दानां रूपाणि च्छात्रैर्लेखयितव्यानि। सत्यामावश्यकतायां रमाशब्दस्यामि ८–४–२ अट्कु... सूत्रमुद्बोधनीयम्। **अथात ईकारान्तः शब्द उपदेश्यः** यद्यपि वर्णक्रमानुसारेण आकारान्तशब्दोपदेशानन्तरमिकारान्तशब्द एवोपदेश्य इत्यापाततः प्रतीयते। तथापि गभीरं विचारणायां दीर्घेकारान्तः शब्द एव प्रथममुपदेश्यः। यतः, यदि पतिशब्द उपदिश्येत, न स शब्दान्तराणां प्रातिनिध्यं करोति। सखिशब्दस्तु प्रक्रियाबहुलश्च। अन्ये शब्दा घिसंज्ञापेक्षिणः। घिसंज्ञासूत्रबोधश्च नदीसंज्ञानुबन्धी। नदीसंज्ञा च प्रथमं दीर्घेकारान्तस्य भवति। इति। ईकारान्तः शब्दो नदीसंज्ञकः प्रायः स्त्रीलिङ्गे भवति । अतः शिक्षकेणच्छात्रा अधोनिर्दिष्टरीत्या बोधयितव्याः। अयि वत्साः? यथा टाप्प्रत्ययेन आकारान्ताः स्त्रीलिङ्गे शब्दाः सिध्यन्ति, तथैव ङी (ङीप् ङीष् ङीन्) प्रत्ययेन दीर्घेकारान्ताः स्त्रीलिङ्गशब्दाः सिध्यन्ति प्रायः, इति। अस्मिन्नेव प्रसङ्गे ४–१–४० अन्य... ४–१–४१ षिद्गौ... दर्शयता शिक्षकेण ४–१–४० सूत्रात् ४–१–४१ सूत्रे ङीष् अनुवर्तते, ततश्चगौरीशब्दः सिध्यति। अतो गौरीशब्दे श्रूयमाण ईकारो 'ङी' अस्ति, इत्यपि बोधनीयम्। इति। परन्तु प्रक्रियया गौरीशब्दसिद्धिस्तु न कार्या बोधभारापत्तेः।

गौरी कल्याणं कुरुतात्

अत्र गौरी + स् इति श्यामपटचां लिंखित्वा ६–१–६६ हल्ङ्या... सूत्रसमन्वयायच्छात्रा आदेश्याः स्वयं श्रोतव्यं तैरक्तम्।

गौर्यौ

गौरी+औ इति श्यामपाटचां लिखित्वा स–बाध्यबाधनं ६–१–९८ प्रथं... सूत्रसमन्वयं च कारयित्वा ६–१–१०१ दीर्घाज्जसि च-सूत्रमुपदेश्यम्।

७–३–१०७ अम्बा– ६–१–८७ आटश्च-सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा-

७–३–१०६

(क)

सम्बुद्धौ च ॥ ७–३–१०७ अम्बार्थनद्योर्ह्रस्वः (क) ॥ इति । अम्बार्थनद्योः= अम्बार्थक–नदीसंज्ञकशब्दयोः स्थाने, ह्रस्वः= ह्रस्वो भवति, (क)= सम्बुद्धौ परतः सत्याम्। इत्यर्थ उपदेश्यः। [द्वितीयावृत्तौ तु अङ्गस्य (६–४–१) इत्यनुवर्त्य १–१–७१ येन... इति तदन्तविधिं साधयित्वा अम्बार्थकान्तानां नद्यन्तानां चाऽङ्गनाम् इति शेषोऽर्थः प्राग्वत् उपदेश्यः। अतो जगदम्ब ! इत्यादिसिद्धिः। इति] लक्षणसमन्वयक्रमे छात्राणां जिज्ञासायामनुद्भूतायामपि स्वयं जिज्ञासयित्वा १–१–५१ अलो... सूत्रमुपदेश्यम्। **(अथ १–१–५१ अलो... सूत्रं पाठयिव्यम्। तत्सूत्रानन्तरमत्रैवाऽग्रे पाठचम्)** एवं पत्नी देवी–कुमारी वधूशब्दानां रूपाणि छात्रैः साधयितव्यानि। बधूशब्दे सम्बुद्धिभिन्नसुँलोपः कथं न भवतीति च्छात्राः परीक्षणीयाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न)
हे अम्बाडे ।हेअम्बाले । हे अम्बिके ।
(छन्दसि वेति वक्तव्यंम्)
हे अम्बाड हे अम्बाडे । हे अम्बाल, हे अम्बाले ।
हे अम्बिक, हे अम्बिके ।

(तलो ह्रस्वो वा ङिसम्बुद्ध्योरिति वक्तव्यम्)
देवते भक्तिः, देवतायां भक्तिः। हे देवत ! हे देवते ! लोके तु देवतायाम् । हे देवते । इत्येव ।
(मातृणां मातच् पुत्रार्थमर्हते)
गार्गीमात ।

अम्वार्थकशब्दानां ह्रस्वविधायि– प्रकृत– सूत्रप्रसङ्गेऽत्र कन्याशब्दस्य रूपाणि च्छात्रैर्वाचयितव्यानि। सम्बुद्धौ लक्षणसमन्वयोऽपि पूर्वमुक्तः कारयितव्यः । अथ ते शिक्षकेणोपदेश्याः । अयि वत्साः? यथा कन्याशब्दस्य रूपाणि साध्यन्ते तथैव राधाप्रभृतीनां रूपाणि । षरन्तु अम्वार्थकशब्दानां सम्बुद्धौ तु प्रकृतसूत्रेण ह्रस्वविधानात् प्रक्रियाभेदो ज्ञेयः । यथा– अम्वा अक्का अल्ला इमे शब्दा अम्वार्थकाः । तेषां सम्बुद्धौ हे अम्व! हे अक्क ! हे अल्ल ! इति रूपाणि भवन्ति । अत्र ७–३–१०७ अम्बा... सूत्रं ७–३–१०६ सम्बु... सूत्रस्य वाधकं भवति । इति । (अथाऽग्रिमम् असंयुक्ता... इति वार्तिकं पठनीयम्) । **असं**–७–३–१०७ अम्वार्थ... सूत्रक्रमे वार्तिकमिदं पाठ्यम् । अथ क्रमशोऽग्रे पाठ्यम्–हे अम्ब । हे अक्क । हे अल्ल । इत्यत्र ह्रस्वः । हे अम्बाडे । हे अम्बाले । हे अम्बिके इत्यत्र तु न ह्रस्वः । कथम् ? इति । तथा द्वितीयेषु रूपेषु ह्रस्वनिषेधः । प्रथमेषु रूपेषु तु कथं न निषेधः? इति च शिक्षकेण च्छात्राः परीक्षणीयाः ।

सिंहावलोकनम्

कन्यादिशब्दानां गौरीप्रभृतिशब्दानां च रूपसाधने दक्षान् कृत्वा शिक्षकः पुनरग्रे छात्रान् सिंहावलोकनन्यायेनोपदिशेत् । अयि वत्साः? यद्यपि आकारान्त – शब्दोपदेशे स्त्रीलिङ्गस्य आवन्तः कन्याशब्दः, ईकारान्तशब्दोपदेशे च स्त्रीलिङ्गस्य ङचन्तगौरीशब्द उदाहृतः । एतेन आकारान्ताः शब्दाः स्त्रीलिङ्गस्य आवन्ता एव, ईकारान्ताः शब्दाश्च स्त्रीलिङ्गस्य ङचन्ता एवेति न प्रमदितव्यम् । भवन्त्येव आवन्तभिन्ना आकारान्ता ङचन्तभिन्ना ईकारान्ताश्च पुंलिङ्गेऽपि स्त्रीलिङ्गेऽपि । यथा–हाहाशब्दः पपीशब्दश्च पुंलिङ्गे वर्तते । अनयोः प्रथमैकवचने सुँलोपो न भवति । किन्तु सकारस्य रुँत्वविसर्गौ । हाहाः । पपीः । इति यथा । औजसोः– ६–१–१०१ दीर्घा... सूत्रेण पूर्वसवर्णदीर्घनिषेर्घः। हाहौ । पप्यौ । हाहाः। पप्यः। अमि ६–१–१०३ अमि... इति पूर्वरूपम् । हाहाम् । पपीम् । शसि– ६–१–९८ प्रथ... ६–१–९९ तस्मा... हाहान् । पपीन् । अथ हाहाशब्दस्य टा ङसिँ–ङस्सु सवर्णदीर्घः। हाहा । हाहाः २ इति । ङयोसोर्वृद्धिः– हाहै । हाहौः२ इति । ङौ–गुणः। हाहे । पपीशब्दस्य तु ङौ सवर्णदीर्धः । पपी । इति । अन्यत्राऽजादौ यण् । पप्या । पप्ये । पप्यः २ पप्योः २ । पप्याम् । इति । एवं थापा वातप्रम्यादयोऽपि शब्दा ज्ञेया इति । ङचन्तभिन्न ईकारान्तः स्त्रीलिङ्गस्य शब्दश्च यथा– लक्ष्मीः । अत्र अङचन्तत्वान्न सुँलोपः। अचीतन्त्रीतरीलक्ष्मीधीह्रीश्रीणामुणादिषु । सप्तस्त्रीलिङ्गशब्दानां सुँलोपो न कदाचन ॥ **अथात इकारान्तः शब्द उपदेश्यः** पुंलिङ्गे तपस्यति मुनिः । मुनी तपस्यतः। अत्र मुनिः, मुनी इति च्छात्रैः साधिते रूपे शिक्षकेण श्रोतव्ये। जसि तु मुनि+ अस् इति श्यामपाट्यां लिखित्वा ७–३–१०९ जसि च – सूत्रं प्रस्तुत्यम् ।

छन्द–असंयुक्ता ये डलकास्तद्वतां ह्रस्वः, वा, सम्बुद्धौ (७–३–१०६) छन्दसि= वेदे ।

तलो– छन्दसि ।

मातृ– अर्हते= प्रशंसापात्रभूताय, पुत्रार्थम्= पुत्राय= पुत्रमभिधातुम्, मातृशब्दस्य, मातजादेशः सम्बुद्धौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–१०८ ह्रस्वस्य गुणः१०९, १११ हे हरे । हे विष्णो । हे मुने । हे वटो । ७–३–१०९ जसि च ॥	मुनयः । वटवः। (जसादिषुच्छदसि वा वचनं प्राङ् णौ चङ्युपधाया इत्येतस्मात्) अम्बे । दर्वि । शतक्रत्वः । पश्वे ।

(७–३–१०६) । **पुत्राय** अत्र पदमञ्जरी– समासे गुणीभूतस्यापि पुत्रस्य बुद्ध्या प्रविभज्य निर्देशः। इति । यः पुत्रः श्लाघ्यगुणत्वात् कुलसम्भूतया मात्रा व्यपदेशमर्हतीत्यर्थ इति । यत्र तु पितुरसंविज्ञानेन मात्रा व्यपदेशस्तत्र न भवतीति च । **गार्गीमात** ५–४–१५३ नद्यृ... इति समासान्तापवादः ।

७–३–१०८ **ह्रस्व**– द्वि. ७–३–११८ अच्च घेः– सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो

(क)

यथा– ७–३–१०६ सम्बुद्धौ च ॥ ७–३–१०८ ह्रस्वस्य गुणः (क) ॥ इति । ह्रस्वस्य= ह्रस्वस्य स्थाने, गुणः= गुणो भवति, (क)= सम्बुद्धौ परतः। इत्यर्थ उपदेश्यः [द्वितीयावृत्तौ तु यथासूत्राभिप्रेतमर्थ उपदेश्यः– तथा हि– अङ्गस्य (६–४–१) इत्यनुवर्तते । ततः १–१–७१ येन........ इति तदन्तविधिः । एवञ्च सूत्रार्थः फलति– ह्रस्वान्तस्याङ्गस्य स्थाने गुणः, सम्बुद्धौ (७-३-१०६) इति । लक्षणसमन्वये १–१–५१ अलो... सूत्रमवधेयम् ।] प्रकृतलक्षणसमन्वयः, ६–१–६७ एङ्ह्र......... सूत्रसमन्वयश्चच्छात्रै रेव कारयितव्यः। सम्बोधन– द्विवचनबहुवचनयोरपि पूर्वप्रथमायामिवेति छात्रैरुच्यमाना प्रक्रिया श्रोतव्या । इत्थमेव कवि हरि प्रभृतीनां रूपाणि साध्यानीत्युपदिशता शिक्षकेण च्छात्रैरुच्यमाना प्रक्रिया श्रोतव्या । विशेषेण हरिशब्दे हरिणा हरीणामित्यत्र णत्वं विचारणीयम्। अथैवमेव भानुगुरुप्रभृतिशब्दानां रूपाणि साधनीयानीत्युपदिशता शिक्षकेणच्छात्रैरुच्यमाना प्रक्रिया श्रोतव्या । सावधानम् ! जसि गुणे भानयः, ङसिँङसोः– भानेः, सम्बुद्धौ–हे भाने । इत्यादीन्यशुद्धानि रूपाणि कदाचिच्छात्राः कथयेयुरपि । अतः सावधानं प्रक्रिया श्रोतव्या । तथा सति उकारस्य स्थानमोष्ठौ तत्र ओकारो वर्तते । ओदौतोः कण्ठोष्ठम् । इत्यादिरीत्या शुद्धानि रूपाणि बोधयितव्यानि । भानवः । भानोः । हे भानो । इति यथा । अथात ऋकारान्तः शब्द **उपदेश्यः**

'पिता पुत्रं स्निह्यति' इति वक्तव्ये पितृशब्दात् सुँप्रत्यये कृते पितृ+स् इति श्यामपाट्यां लिखित्वा ७–१–९४ ऋदुशनस्... सूत्रं प्रस्तुत्यम् ।

७–३–१०९ **जसि**– ७–३–१०७ अम्बा... सूत्र स्थात् असंयुक्ता... वार्तिकादनन्तरं सूत्रमिदं

(क) (ख)

पाठचम् । अत्र श्यामपाटीप्रयोगो यथा –७–३–१०८ ह्रस्वस्य गुणः ॥ ७–३–१०९ (क) (ख) जसि च ॥ इति । (क)= ह्रस्वस्य स्थाने, (ख)= गुणो भवति, जसि= जसि परतः। इत्यर्थ उपदेश्यः। (द्वितीयावृत्तौ तु पूर्वसूत्रवद् 'ह्रस्वान्तस्याऽङ्गस्य' इत्यर्थो बोध्यः) लक्षणसमन्वयश्छात्रैः कारयितव्यः । तत्र तालुस्थाने छात्रा एकारं न प्राप्नुयुस्तु शिक्षकेण विचारायावसरो देयः। अन्त्ये सत्यामावश्यकतायामधोनिर्दिष्टरूपेण च्छात्रा बोधयितव्याः यथा– अवधीयताम् ! पठितमेव युष्मामिः पूर्वम् 'एदैतोः कण्ठतालु' इति । तस्य भावश्च एकारः कण्ठस्थानेऽपि वर्तते, तालुस्थानेऽपि वर्तते। एवमेव ऐकारोऽपि। इति शिक्षकेणोद्बोधनीयम् । अथ मुने+अस् इति श्यामपाटचां लिखित्वा सन्धिकार्यं छात्रैः साधनीयम् तत् प्रसङ्गे ६–१–१०५ एङः..... सूत्रेण पूर्वरूपं कथं न ? इति च्छात्राः परीक्षणीयाः। 'तपस्यन्ति मुनयः' इत्युदाहरणम् । अमि–

६–१–१०३ अमि....... सूत्रे उपदिष्टम् । औटि प्रथमाद्विवचनवत् । शसि– ६–१–९८ प्रथ... ६–१–९९ तस्मा... मुनीन् । इति ।

मुनिना

अत्र प्रयोगमिमं श्यामपाट्यां लिखित्वा प्रयोगोऽयं साधनीय इत्युपदिशता शिक्षकेण प्रथमं १–४–७ शेषो घ्यसखि– सूत्रमुपदेश्यम् ।

जसादिषु= ७–३–१०७ अम्बा... इति प्रकरणे । आदिशब्दः प्रकारे । तेन जस्प्रकारे= जस्सदृशे प्रत्यये=७–३–१०७ अम्बार्थनद्योरिति प्रकरणे । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–११०ऋतोङिसर्वनामस्थानयोः॥
पितरि । पितरौ । पितरः ।

७–३–१११ घेर्ङिति ॥ ११५
मुनये । वटवे । सुँपि(७–३–१०२)
इत्यनुवृत्तेर्नेह–पट्वी ।

७–३–११२ आण्नद्याः॥
गौर्यै । गौर्याः । वध्वै । वध्वाः ।

७–३–११० ऋतो– १–४–१३ यस्मात् प्रत्यय... सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र श्यामपाटीप्रयोगो यथा– (क)

७–३–१०८ ह्रस्वस्य गुणः ॥ ७–३–११० ऋतः (क) ङिसर्व........॥ इति । ऋतः= ह्रस्वस्य ऋकारस्य स्थाने, (क)= गुणः, ङिसर्वनामस्थानयोः= ङौ सर्वनामस्थाने च परे । इत्यर्थ उपदेश्यः । [द्वितीयावृत्तौ तु ७–३–१०८ ह्रस्वस्य....... सूत्रनिर्दिष्टरीत्या ऋदन्तस्याङ्गस्य इति, शेषोऽर्थः प्राग्वत् उपदेश्यः। लक्षणसमन्वये च १–१–५२ ङिच्च सूत्रमवधेयम् इति ।] अत्र लक्षणसमन्वयप्रसङ्गे सर्वनामस्थानं किम् ? इति च्छात्राः परीक्षणीयाः। अथ १–१–५० उर........ सूत्रसमन्वयप्रसङ्गे श्यामपाटीप्रयोगोऽधोनिर्दिष्टरीत्या कार्यः । यथा–ऋ ट् ठ् ड् ढ् ण् र् ष= मूर्धन्यवर्णाः। अर्, अल् , ए, ओ= आदेशाः सम्भाव्यमानाः । अत्र सम्भाव्यमानेषु आदेशेषु पूर्णो मूर्धन्य आदेशः कोऽपि नास्ति । तथापि अर् इत्यस्य रेफो मूर्धन्यो वर्तते । अतोऽन्येभ्यो ऽन्तरतमः 'अर्' एव अस्ति, इति बोधनीयम् । पित्+अर्+औ=पितरौ । इति । एवं जसि, अमि, औटि च–पितरः। पितरम् । पितरौ । इति । शसि–प्रक्रिया १– ३–८ लश... ६–१–९९ तस्मा...... सूत्रयोर्निर्दिष्टा । रूपं तु पितॄन् इति । अत्राऽयं विशेषो यद् ८–४–१ रषा..... सूत्रस्थेन ऋव........वार्तिकेन णत्वं कथं नेति शङ्कित्वा ८–४–३६ पदान्तस्य–सूत्रमुपदेश्यम् ।

७–३–१११ घेर्ङि–७–३–११९आङो ना... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा
(क) (ख)
७–३–१०२ सुँपि च ॥ ७–३–१०८ ह्रस्वस्य गुणः ॥ ७–३–१११ घेः (ख) ङिति (क) ॥ इति । घेः= घिसंज्ञकस्य [द्वितीयावृत्तौ तु घिसंज्ञकस्य, अङ्गस्य (६–४–१) इत्युपदेश्यम् ।] स्थाने (ख)= गुणः, ङिति=ङिद्विशिष्टे, (क)= सुँपि इत्यर्थ उपदेश्यः । अथ १–१–५१ अलो... सूत्रोद्बोधनपुरस्सरं लक्षणसमन्वयश्छात्रैः कारयितव्यः। अथ 'मुने+ए' इति श्यामपाटयां लिखित्वा सन्धये छात्रान् प्रवर्त्य मुनये इति रूपं लिखित्वा ८–३–१९ लोपः... सूत्रं प्रवर्तते न वा ? इति च्छात्राः परीक्षणीयाः । ङसिँङसोरपि–पूर्ववच्छात्रैरुच्यमानां प्रक्रियां श्रुत्वा मुने+ अस् इति श्यामपाटयां लिखित्वा ६–१–७५ एचो... सूत्रप्राप्तिविषये छात्रान् परीक्ष्य ६–१–१०६ ङसिँङसोश्च– सूत्रमुपदेश्यम् ।

७–३–११२ आण्न– १–४–३ यू स्त्र्याख्यौ...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा–
(क)
७–३–१११ घेः ङिति ॥ ७–३–११२ आट् नद्याः (क) ॥ इति । नद्याः= नदीसंज्ञकशब्दात् परस्य , (क)= ङिति+ [सुँपि (७-३-१०२)] = ङितः सुँपः, आट्= आट् आगमो भवति । इत्यर्थ उपदेश्यः [द्वितीयावृत्तौ तु यथा सूत्राभिप्रेतमर्थ उपदेश्यः। तथा हि–नद्या इति पञ्चम्यन्तानुरोधेन अङ्गस्य (६–४–१) इत्यनुवर्तमानं षष्ठयन्तमपि प्रकृते पञ्चम्यन्ताय कल्पते । ततः १–१–७१ येन... इति तदन्तविधिः। तथा ङिति (७–३–१११) इत्यनुवर्तमानं सप्तम्यन्तमपि नद्या इति पञ्चमी १–१–६६ तस्मा....... सूत्रद्वारा षष्ठयन्तं कल्पयति । एवञ्च सूत्रार्थः फलति–नद्यन्तादङ्गात् परस्य ङित्सुँपः, आट् इति] लक्षणसमन्वयश्छात्रैः कारयितव्यः। सत्यामावश्यकतायां टित्त्वफलमुद्बोधनीयम् । अथ गौरी+आ+ए इति शयामपाटयां लिखित्वा स–बाध्यबाधनम् ६–१–८७ आटश्च–सूत्रमुपदेश्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–११३ याडापः॥ ११४	७–३–११४ सर्वनाम्नः स्याड् ढ्रस्वश्च ॥ ११५
रमायै । रमायाः । रमायाम् । कन्यायै । कन्यायाः। कन्यायाम् ।	सर्वस्यै । सर्वस्याः । सर्वस्याम् ।

७–३–११३ याडा– ७–३–१०५ आङि चापः – सूत्रानन्तरं सूत्रमिदं पाठयम् अत्र श्यामपाटीप्रयोगो यथा–
(क)
७–३–१११ घेः ङिति ॥ ७–३–११३ याट् आपः (क) ॥ इति । अत्रापि 'आपः'इति पञ्चम्यन्तमित्युपदिश्य सूत्रार्थोऽधोनिर्दिष्टरीत्योपदेश्यः। आपः= आपः परस्य (क)= ङिति + [सुँपि (७-३-१०२)] = ङितः + सुँपः = ङित्सुँपः, याट्=याडागमो भवतीति । द्वितीयावृत्तौ तु १–१–६६ तस्मा... सूत्रमुपस्थाप्य पूर्वसूत्रोक्तरीत्या आबन्तादङ्गात् परस्य ङित्सुँपो याडित्यर्थ उपदेश्यः । अत्र लक्षणसमन्वयप्रसङ्गे सत्यामावश्यकतायाम् १–१–४५ आद्य..... सूत्रमुद्बोधनीयम् । ७–१–५४ ह्रस्व ...... सूत्रे समुपदिष्टं टित् कित् इत्यादीनां तात्पर्यं तथा बोधनीयं यथा प्रकृतोदाहरणे ए इत्यस्यादौ या भवतीति च्छात्राः स्फुटं जानीयुः। कन्यायै । एवं ङसिँङसोः– कन्यायाः , इति रूपं छात्रैः साधयितव्यम् ।

कन्ययोः–

कन्याशब्दात् ओस्प्रत्यये कृते श्यामपाट्यां कन्या+ओस् इति लेख्यम् । ततः प्रकृते ७–३–१०५ आङि... सूत्रं प्रवर्तत इत्येवोपदेश्यम् । सर्वमन्यद् बाध्यबाधनं लक्षणसमन्वयादिकं च च्छात्रैरेव साधयितव्यम् ।

कन्यानाम्

७–१–५४ ह्रस्व..... सूत्रे दर्शितरीत्या साधनं कार्यम् । तच्च यथासम्भवं छात्रैरेव साधयितव्यम् ।

कन्यायाम्

कन्याशब्दात् पूर्ववन्ङिप्रत्ययेऽनुबन्धलोपे च च्छात्रैः कारिते कन्या+इ इति श्यामपाट्यां लिखित्वा ७–३–११६ ङेरा... सूत्रमुपदेश्यम् ।

७–३–११४ सर्व– ७–२–१०३ किमः कः–सूत्रानन्तरं सूत्रमिदं पाठयम् । अत्र श्यामपाटीप्रयोगो यथा–
(क) (ख)
७–१–१११ घेः ङिति ॥ ७–३–११३ याट् आपः ॥ ७–३–११४ (ख) सर्वनाम्नः (क) स्याट् ह्रस्वश्च ॥ इति । (ख)= आपः= आपः परस्यः सर्वनाम्नः= सर्वनाम्नो विहितस्य, ङिति= ङितः=ङित्सुँपः, स्याट्= स्याडागमो वभति, ह्रस्वश्च= आपः स्थाने ह्रस्वश्च भवति । इत्यर्थ उपदेश्यः [द्वितीयावृत्तौ तु ७–३–११२ आण्नद्या इति सूत्रोक्तरीत्या– आबन्तादङ्गात् परस्य, सर्वनाम्नो विहितस्य ङित्सुँपः स्याट्, इति । शेषोऽर्थः प्राग्वत् उपदेश्यः ।] सर्वस्यै । एवं ङसिँङसोः– सर्वस्याः, इतिरूपं छात्रैः साध्यमानं शिक्षकः शृणुयात् । ङौ– [कन्यायाम् ङेरा... (७–३–११६) इत्यत्रेव । केवलमत्रत्येन ७–३–११३ याडा... सूत्रेण ७–३–११४ सर्व... सूत्रं विनिमातव्यम् । याटं बाधित्वा स्याट् कार्यः ।] सर्वस्याम् । शेषरूपाणि कन्याशब्दस्येवेतिच्छात्रानुपदिशता शिक्षकेणंच्छात्रोच्चरितानि रूपाणि श्रोतव्यानि । एवमेव त्यद् तद् एतद् इत्येतेषां शब्दानां पुसीव विभक्तौ परतः त्य त एत इति रूपेभ्यः क्लृप्तौ स्त्रियां टापि त्या ता एता इति रूपेभ्यःक्लृप्तौ सर्वाशब्दवदग्रिमप्रक्रियोद्बोधनीया । सौ तु सत्वषत्वे अपि उद्बोधनीये । तथा किंशब्देऽपि विभक्तौ परत कादेशे स्त्रियां टापि का इति जाते शेषप्रक्रिया सर्वाशब्दस्येवेति वदता शिक्षकेणच्छात्रोच्चारितानि रूपाणि श्रोतव्यानि ।

ल्कीबे-

क्लीबे सर्वशब्दस्य प्रथमाद्वितीययोः फलशब्दे इव तृतीयादौ पुंस्युदाहृतसर्वशब्दे इव प्रक्रियेति शिक्षको बोधयेत् । त्यद् तद् एतद् इत्येतेषां शब्दानां स्वमोरत्वसत्वे न, ७–१–२३ स्वमोः...... सूत्रेण लुका लुप्तत्वेन निमित्ताभावात् । तेन त्यत्, त्यद् । तत्, तद् । यत्, यद् । एतत्, एतद्, । इति रूपाणि भवन्तीति शिक्षकः स्फुटं बोधयेत् । अथ १–१–६१ प्रत्य... सूत्रमुद्बोध्य अत्वसत्वनिमित्तमुज्जीव्य कथं नात्व सत्वे ? इति च्छात्राणां मनसि शङ्का जागरयितव्या शिक्षकेण । ततस्तेषामुद्दीप्तामाकाङ्क्षां शमयितुं शिक्षकः १–१–६२ न लुमता... सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–३–११५ विभाष द्वितीयातृतीयाभ्याम् ॥
द्वितीयस्यै, द्वितीयायै । तृतीयस्यै, तृतीयायै ।
७–३–११६ ङेराम् नद्याम्नीभ्यः ॥ द्वि ११८,११७
कुमार्याम् । कन्यायाम् । नियाम् । सेनान्याम् ।

७–३–११७ इदुद्भ्याम् ॥ द्वि.११८
मत्याम्, मतौ ।
प्र. **७–३–११८ औत्** ॥ द्वि.११८
पत्यौ । सख्यौ ।

७–३–११५ विभा– द्वितीयस्मै, द्वितीयायेत्यादिसिद्धये पठितव्येन 'तीयस्य ङित्सु वा' इति वार्तिकेन लिङ्गविशिष्टपरिभाषाद्वाराऽत्रापि विकल्पेन स्याट् सिध्यतीति सूत्रमिदमदृष्टफलकम्। अर्थस्तु द्वितीयातृतीयाशब्दाभ्यां परस्य ङित्सुँपः, विकल्पेन स्याडागम आपो ह्रस्वश्च भवतीति ।

७–३–११६ ङेरा– ७–३–११३ याडापः– सूत्रानन्तरं सूत्रमिदं पाठचम् । नद्याम्नीभ्यः= नदी आप् नी इत्येतेभ्यः परस्य, ङेः= ङि इत्यस्य स्थाने, आम्= आम् भवतीत्यर्थ उपदेश्यः। [द्वितीयावृत्तौ तु यथासूत्राभिमतमर्थ उपदेश्यः । तथाहि नद्याम्नीभ्य इति पञ्चम्यन्तानुरोधेन अङ्गस्य (६–४–१) इत्यनुवर्तमानं षष्ठचन्तमपि प्रकृते पञ्चम्यन्ताय कल्पते । ततः १–१–७१ येन... इति तदन्तविधिः। एवञ्च सूत्रार्थः फलति– नद्यन्तादाबन्तान्नीशब्दान्ताच्चाङ्गत् परस्य, इति। शेषोऽर्थः प्राग्वत् । तदा नियामित्यत्र च व्यपदेशिवद्भावेन आम् , । इति ।] लक्षणसमन्वश्छात्रैः कारयितव्यः। अथ श्यामपाटचां कन्या+आम् इति लिखित्वा ७–१–१३ ङेर्यः– सूत्रे निदर्शितरीतिमुद्बोधयता शिक्षकेण आम् प्रत्ययो ङित् सुँब्विभक्तिश्चेति स्फुटं बोधनीयम् । तत्प्रसङ्गे ७–३–११३ याडा...... ७–१–५४ ह्रस्व..... सूत्रसमन्वयं छात्रैः कारयित्वा कतरत् सूत्रं प्रवर्तेत ? इति च्छात्राणामाकाङ्क्षा समुद्भावनीया । यदि क्षणानन्तरमपि नाऽऽ काङ्क्षा शाम्येत् तदा १–४–२ विप्र...... सूत्रे वर्णितमुद्बोधनीयम्। ततो रूपसिद्धिरपिच्छात्रैः कारयितव्या ।

अयि कन्ये

कन्याशब्दात् सम्बोधने सुँप्रत्यये कृतेऽनुबन्धे फालिते सम्बुद्धि (२–३–४९) संज्ञायां छात्रैः कारितायां ७–३–१०६ सम्बुद्धौ च - सूत्रमुपदेश्यम् ।

७–३–११७ इदुद्भ्याम् =नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य, ङेः+ आम् (७–३–११६) । पूर्वसूत्रे नदीत्यंशे स्वरितत्वप्रतिज्ञानेनाऽत्र तस्या ऽनुवृत्त्या नदीसंज्ञकाभ्यामित्युक्तम् । ७–३–११६ ङेरा... इति सूत्रं वाधित्वा परत्वात् प्र. ७–३–११८ औत्, इति प्राप्ते पुनर्विधानम् । **मतौ** १–४–६ ङिति... इति नदीत्वाऽभावे घिसंज्ञायाम् द्वि ७–३–११८ अच्च... इत्यौदच्च ।

प्र.७–३–११८ औत् ६-१-१०८ ख्यत्यात्.... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-
(क) (ख)
७-३-११६ ङेः आम् नद्याम्नीभ्यः ॥ ७-३-११७ इदुद्भ्याम् ॥ प्र. ७–३–११८ (ख) (क) औत् ॥ इति । (ख)= इदुद्भ्याम् परस्य, (क)=ङेः= ङि इत्यस्य स्थाने, औत्= औकारादेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयायाऽ ग्रिमप्रक्रियायै चच्छात्राः प्रवर्तयितव्याः। सख्यौ । सुपि–सखिषु । सम्बुद्धौ ७–३–१०८ ह्रस्व... ६–१–६७ एङ्ह्र... सूत्रसमन्वयश्छात्रैरेव कारयितव्यः । द्विवचन– बहुवचनयोः प्राग्वत् । हे सखायौ। हे सखायः।

अथ पतिशब्द उपदेश्यः अयि वत्साः ? पतिशब्दोऽपि सर्वनामस्थानभिन्नेषु सखिशब्दमनुकरोति। अतः, मुनिशब्दोपदेशप्रसङ्गेऽ नुपदिश्य सोऽपीदानीमेवोपदिश्यते । यथा प्रथमाद्वितीययोर्मुनिशब्दवद् रूपाणि भवन्ति । अन्यत्र सखिशब्दस्येवेति निर्दिशता शिक्षकेण रूपाणिच्छात्रोच्चारितानि श्रव्याणि । तत्र कथं न घिसंज्ञाकार्यम् ? इत्याकाङ्क्षामुद्भाव्य १–४–८ पतिः... सूत्रमुपदेश्यम् ।

द्वि. ७–३–११८ अच्च– ६–१–१०६ ङसिँङसोश्च-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो
(क) (ख) (ग)
यथा– ७–३–११६ ङेः आम् नद्याम्नीभ्यः॥ ७–३–११७ इदुद्भ्याम् ॥। प्र.७–३–११८ औत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वि. ७–३–११८ अच्च घेः ॥ ११९ मुनौ । भानौ । ७–३–११९ आङो नाऽऽस्त्रियाम् ॥ मुनिना । भानुना । अस्त्रियामित्युक्तेर्नेह–मत्या ।	इति सप्तमाध्याये तृतीयःपादः

द्वि.७–३–११८ (ख) (क) (ग) अत् च घेः॥ इति । (ख)= इदुद्भ्यां परस्य, (क)= ङेः = ङि इत्यस्य स्थाने,
(ग)= औत्= औकारो भवति, घेः= घिसंज्ञकस्य स्थाने, अत् च = अकारोऽपि भवति। इत्यर्थ उपदेश्यः। लक्षण–समन्वयश्छात्रैः कारयितव्यः। 'घेः अत् च' इत्यंशसमन्वये १–१–५१ अलो.... सूत्रमुद्बोधनीयम्। मुनौ। इति रूपं सिद्धं ज्ञेयम्। हे मुने– सम्बोधने (सम्बुद्धौ) ७–३–१०८ ह्रस्वस्य..... सूत्रमुपदेश्यम्।
७–३–११९ आङो– १–४–७ शेषो घ्यसखि– सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र श्यामपाटीप्रयोगो-
(क)
यथा– द्वि. ७–३–११८ अच्च घेः ॥ ७–३–११९ (क) आङो नाऽस्त्रियाम्॥ इति। आङिति टासंज्ञा प्राचामिति बोधयता शिक्षकेण सूत्रार्थो बोधनीयः। यथा –(क)= घेः= घिसंज्ञकशब्दात् परस्य, आङः =टा इत्यस्य स्थाने, ना= ना इत्यादेशो भवति, अस्त्रियाम्= स्त्रीलिङ्गे न भवति। (द्वितीयावृत्तौ तु–सूत्रे आङ इति षष्ठ्यन्तम्। पूर्वसूत्रे पठितं 'घेः' इति षष्ठ्यन्तं प्रकृतेऽनुवर्तमानम् आङ इत्यस्य विशेषणमसंभवमिति पञ्चम्यन्ताय कल्पते। इत्यप्युदेश्यम्) प्रकृतोदाहरणे छात्रैर्लक्षणसमन्वयः कारयितव्यः। रूपसिद्ध्यनन्तरं छात्रा बोधनीयाः। यथा–अयि वत्साः? अस्त्रियामित्युक्तेर्घिसंज्ञायां सत्यामपि स्त्रीलिङ्गे नाऽऽदेशो न भवति। यथा मतिशब्दः स्त्रीलिङ्गे वर्तते। तस्य घिसंज्ञा तु भवति। तथापि तृतीयैकवचने नाऽऽदेशो न भवति। मति + आ=मत्या। इति । प्रकृतमनुसरामः भ्यामादिहलादौ तु नोपदेशापेक्षा। मुनिभ्याम् ३। मुनिभिः । मुनिभ्यः२। मुनिषु । इति। चतुर्थ्येकवचने छात्रैर्घिसंज्ञां कारयित्वा मुनि+ए इति श्यामपाट्यां लिखित्वा ७–३–१११ घेर्ङि... सूत्रमुपदेश्यम्।

इति सप्तमाध्याये
तृतीयःपादः
समाप्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ सप्तमाध्याये
चतुर्थः पादः

७–४–१ णौ चङ्युपधाया ह्रस्वः ॥८,३
अचूचुरत् । द्वितीयद्विर्वचनस्थले यद्यपि द्विर्वचनं नित्यं तथाप्युपधाह्रस्वेन तद् बाध्यते । ओणेरॄदित्करणसामर्थ्यात् । मा भवानटिटत् । णि इत्याकृतिनिर्देशः । चोरितवन्तं प्रैरिरत्= अचूचुरत् ।

७–४–२ नाऽग्लोपिशास्वृँदिताम् ॥
मरुतमाख्यत्=अममारत् । अशशासत् । अययाचत् । अलुलोकत् ।

७–४–३ भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ॥
अबिभ्रजत् , अबभ्राजत् । अबीभसत्, अबभासत् । अबीभषत्, अबभाषत् । अदीदिपत्, अदिदीपत् । अजीजिवत्,अजिजीवत् । अमीमिलत् अमिमीलत् । अपीपिडत् , अपिपीडत् । (काण्यादीनां चेति वक्तव्यम्) अचीकणत्, अचकाणत् ।

७–४–४ लोपः पिबतेरीच्चाऽभ्यासस्य ॥
अपीप्यत् ।

७–४–५ तिष्ठतेरित् ॥ ६
अतिष्ठिपत् ।

७–४–६ जिघ्रतेर्वा ॥ ७
अजिघ्रिपत्, अजिघ्रपत् ।

७–४–७ उर्ऋत् ॥ ८
अचीकृतत्, अचिकीर्तत् । अवीवृतत्, अववर्तत् । अमीमृजत्, अममार्जत् ।

७–४–१ णौ च– ३–१–४८ णि श्रि..... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा– (क)
६–४–१ अङ्गस्य ॥ ७–४–१ णौ चङि (क) उपधाया ह्रस्वः ॥ इति । चङि+णौ=चङ्परके णिप्रत्यये परे, (क)= अङ्गस्य, उपधायाः =उपधायाः स्थाने, ह्रस्वः= ह्रस्वो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयप्रसङ्गे ओकारस्य स्थाने स्थानेनान्तरतम्याद् अकारे उकारे च प्राप्ते १–१–४७ एच इग्..... सूत्रमुपदिशेत् ।
७–४–२ नाऽग्लो– ७–२–४४ स्वरति... सूत्रानन्तरं सूत्रमिदं पाठचम् । अग्लोपिशास्वृँदिताम्= णिच्यग्लोपिनः शास ॠदितां च धातूनाम्, न =पूर्वसूत्रेण उपधाया ह्रस्वो न भवति । इति सूत्रार्थः । यथा लोकृँ (१७७७ चुरादिः) लोक्+णिचि, लुङि– छात्रैः साध्यमानम् अलोक्+इ+अ+ति इति श्यामपाटचां लिखित्वा (अथवा णिलोपे अलोक् + अ+ति इत्यवस्थायां स्थानिवद्भावेन) अत्र ७–४–१ णौ च... सूत्रेण उपधाया ह्रस्वे प्राप्ते ७–४–२ नाग्लो... सूत्रेण निषेध ॠदित्वात् । शेषप्रक्रियां छात्रैः साध्यमानां शिक्षकः शृणुयात् । अलुलोकत् । इत्यादि । लृँकाराऽनुबन्धफलम्-लुँङि. परस्मैपदे ३–१–५५ पुषादि... सूत्रेण च्लेरङ् । इति भणन्, तत्सूत्रमुपदिशेत् ।
७–४–३ भ्राज...पीडाम्=भ्राज्प्रभृतीनाम्, चङि+णौ+उपधायाः+ ह्रस्वः (७–४–१), अन्यतारस्याम् = वा ।
७–४–४ लोपः– पिबतेः=भौवादिकस्य पाधातोः, उपधायाः (७–४–१) लोपः, अभ्यासस्य=अभ्यासस्य स्थाने, ईच्च=दीर्घेकारादेशश्च भवति, चङि+णौ (७–४–१) ।
७–४–५ तिष्ठतेः = स्थाधातोः, उपधायाः (७–४–१) इत्= इकारादेशो भवति, णौ + चङि (७–४–१) ।
७–४–६ जिघ्रतेः= घ्राधातोः वा=वा प्राग्वत् ।
७–४–७ उर्ऋ– णौ+चङि+उपधायाः (७–४–१) उः =ऋवर्णस्य स्थाने, वा (७–४–६) ऋत्=ह्रस्व ऋकारो भवति । तपरकरणाद् दीर्घेऽपि स्थानिनि ह्रस्व एवादेशः । इरराराम्पवादः । **अचिकीर्तत्** ७–१–१०१ उप.... इतीत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-८ **नित्यं** छन्दसि ॥९

अवीवृधत् पुरोडाशेन ।

७-४-९ दयतेर्दिगि **लिँटि** ॥ १२

दिग्ये ।

७-४-१० ऋतश्च संयोगादेर्गुणः॥११

मस्मार । सस्मरतुः। सस्मरुः ।

७-४-११ ऋच्छत्यृताम् ॥

आनर्च्छ । आर । तस्तरतुः ।

७-४-१२ शृदृप्रां ह्रस्वो वा ॥ १५

शश्रतुः, शशरतुः । दद्रतुः, ददरतुः।

पप्रतुः, पपरतुः । कित्येव प्रवृत्तेर्नेह

–शशार । ददार । पपार ।

७-४-१३ **केऽणः** ॥२४

ज्ञका । कुमारिका । अण इत्युक्तेर्नेह–

गोका । नौका ।

७-४-१४ **न कपि** ॥ १५

बहुकुमारीक॰।

७-४-१५ आपो ऽन्यतरस्याम् ॥

बहुमालकः, बहुमालाकः।

७-४-१६ ऋदृशोऽङि गुणः॥२०

आरत् । जरा । अदर्शत् ।

७-४-१७ अस्यतेस्थुँक् ॥

आस्थत् ।

७-४-१८ श्वयतेरः ॥

अश्वत् ।

७-४-१९ पतः पुँम् ॥

अपप्तत् ।

७-४-८ नित्यम्= नित्यं प्राग्वत्, छन्दसि= वेदे ।

७-४-९ दयतेः= देङ्धातोः स्थाने, दिगि= दिगि इत्यादेशो भवति, लिँटि= लिँटि परे । दय्धातोस्तु ३-१-३७ दया ..... इत्याम् । दिग्यादेशेन द्विर्वचनस्य बाधनमिष्यते । विभाषाया अप्रसक्तावपि पूर्वसूत्रादनुवर्त्यमान–नित्यशब्देन, यदन्यत् प्राप्नोति तस्य निवर्तनं क्रियते ।

७-४-१० ऋतः= ऋदन्तस्य, संयोगादेः=संयोगादिकस्य, अङ्गस्य (६-४-१) गुणः=गुणो भवति, लिँटि (७-४-९) । किदर्थमिदम् ।

७-४-११ ऋच्छत्यृताम्= ऋच्छतेः, ऋधातोः, ॠदन्तानां च, अङ्गानां स्थाने, गुणः (७-४-१०) लिँटि (७-४-९) । ऋर्च्छतेरलघूपधत्वादकिदर्थमपीदम् ।

७-४-१२ शृदृप्राम्- शृदृपृ–धातूनां स्थाने, वा=विभाषया, ह्रस्वः=ह्रस्वो भवति, किति लिँटि (७-४-९) । 'किति' इति कथं ज्ञायते ? ७-४-१० ऋत... सूत्रं किदर्थमित्युक्तमत्रापि तदनुरोधेन तथैव ज्ञायते ।

७-४-१३ केऽणः–के= कप्रत्यये परे, अणः = अणः स्थाने, ह्रस्वः(७-४-१२) ।

७-४-१४ न कपि - कपि= कप्प्रत्यये परे, अणः (७-४-१३) न= ह्रस्वो न भवति ।

७-४-१५ आपः= आपः स्थाने, अन्यतरस्याम्=वा, ह्रस्वः (७-४-१२) कपि (७-४-१४) ।

७-४-१६ ऋदृशः = ऋकारान्तस्य दृश् धातोश्च, इकः (१-१-३) गुणः= गुणो भवति, अङि= अङ्प्रत्यये परे। **आरत्** ३-१-५६ सर्ति... इत्यङ् । **अदर्शत्** ३-१-५७ इरि... इत्यङ् । **जरा** ३-३-१०४ षिद्भि... इत्यङ् ।

७-४-१७ अस्यतेः =अस् धातोः, थुँक्= थुँगागमो भवति, अङि (७-४-१६) ।

७-४-१८ श्वयतेः= श्विधातोः स्थाने, अः= अकारादेशोः भवति, अङि (७-४-१६) । **अश्वत्** ३-१-५८ जृस्त... इत्यङ् ।

७-४-१९ पतः =पत धातोः, पुँम्=पुँम् आगमो भवति, अङि (७-४-१६) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–४–२० वच उम् ॥
अवोचत् ।
७–४–२१ **शीङः** सार्वधातुके गुणः॥ २२
शेते ।
७–४–२२ अयँङ् यि क्ङिति ।२९,२५
शय्यते । शाशय्यते । क्ङितीत्युक्तेर्नेह–शेयम् ।
७–४–२३ **उपसर्गाद्ध्रस्व** ऊहतेः॥ २४
समुह्यात् । समुह्य । क्ङिति(७–४–२२) इत्यनुवृत्तेर्नेह– समूह्योऽयमर्थः । अणः (७–४–१३) इत्यनुवृत्तेर्नेह– सम् + आ + ऊह्यते= समोह्यते ।
७–४–२४ एतेर्लिँङि ॥
उदियात् । अन्वियात् । अण (७–४–१३) इत्यनुवृत्तेर्नेह–सम्+आ+ईयात् =समेयात् ।
७–४–२५**अकृत्सार्वधातुकयोर्दीर्घः**॥२९,२६
चीयात् । स्तूयात् । हूयते ।
अकृत्सार्वधातुकयोरित्युक्तेर्नेह–प्रकृत्य । चिनुयात् ।
७–४–२६ **च्वौ** च ॥ २७
शुची भवति । पटू भवति ।
७–४–२७ **रीङृतः** ॥ ३०
मात्रीयति । चेक्रीयते । मात्रीभवति । पितुरागतं पित्र्यम् । तपरकरणान्नेह–चेकीर्यते । जेगिल्यते ।

७-४-२० **वचः**= वच्धातोः, उम्= उमागमो भवति, अङि (७–४–१६) । अवोचत् ३–१–५२ अस्य... इत्यङ् । ७-४-२१ **शीङः**= शीङ्धातोः स्थाने, गुणः= गुणो भवति, सार्वधातुके= सार्वधातुके परे ।
७-४-२२ **अयँ**–शीङः (७–४–२१) अयँङ्=अयँङ् आदेशो भवति, यि=यादौ, क्ङिति=किति ङिति च परे ।
७-४-२३ **उपसर्गात्**=उपसर्गात् परस्य, ऊहतेः= ऊह्धातोः, अणः (७-४-१३) ह्रस्वः, =ह्रस्वो भवति, यि क्ङिति (७–४–२२) । समुह्यात् १–३–३ निस.....सूत्रस्थेन उप... वार्तिकेन पाक्षिकं परस्मैपदम् । आशीर्लिंङ् ।
७-४-२४ **एते**- उपसर्गात् (७–४–,२३) एतेः=इण्धातोः, अणः (७–४–१३) ह्रस्वः (७–४–२३) क्ङिति (७–४–२२) लिँङि=लिँङि परे । उदाहरणयोः आशीर्लिंङि ७-४-२५ अकृ..... इति दीर्घे ऽनेन ह्रस्वः।
७-४-२५ **अकृत्** – १–२–२८ अचश्च-सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा–

(क) (ख)

७-४-२२ अयँङ् यि क्ङिति ॥ ७-४-२५ अकृत्सार्वधातुकयोः (क) (ख) दीर्घः ॥ इति । अकृत्सार्वधातुकयोः= कृत्सार्वधातुकाभ्यां भिन्ने (क)=यि=यादौ (ख)=क्ङिति प्रत्यये, अचः (१–२–२८) स्थाने, दीर्घः=दीर्घो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । [द्वितीयावृत्तौ तु अङ्गस्य (६–४–१) इत्यप्यनुवर्त्य तदन्तविधिं च कृत्वा अजन्तस्य अङ्गस्य स्थाने, इत्यर्थमुपदिश्य लक्षणसमन्वये १–१–५१ अलो... सूत्रमवधेयम् ।]
हूयते । हूयेते । हूयन्ते । हूयताम् । अहूयत । हूयेत । इत्यादि । अथ दिवादिगणप्रयुक्तं विशेषकार्यं शपो बाधकः **श्यन्** । अत्र दिवादिधातुपाठं दर्शयता शिक्षकेण एते धातवो दिवादयः । एषु सर्वेषु विकरणं शपो बाधकः श्यन् भवति, इति कथयता दिव् (दिवुँ ११०६) धातोः कर्तरि लँटि पचति इत्यत्रेव प्रक्रियाक्रमे दिव्+ ति इति श्यामपाट्यां लिखित्वा शपं बाधयित्वा ३–१–६९ दिवादिभ्यः..... सूत्रमुपदेश्यम् ।
७-४-२६ **च्वौ च** – अचः (१–२–२८) + अङ्गस्य (६–४–१) = अजन्तस्याङ्गस्य स्थाने, दीर्घः (७–४–२५) च्वौ=च्विँप्रत्यये परे ।
७-४-२७ **रीङ्-ऋतः** = ऋदन्तस्य, अङ्गस्य (६–४–१) रीङ् =रीङ् आदेशो भवति, अकृत्सार्वधातुकयोः (७–४–२५) यि (७–४–२२) च्वौ च (७–४–२६) । **पित्र्यम्** अत्र सूत्रे क्ङिति (७–४–२२) इत्यननुवृत्तेः ।
जेगिल्यते ८–२–२० ग्रो य ... इति लत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–४–२८ रिङ् शयग्लिँङ्क्षु ॥ २९

आद्रियते । क्रियते । क्रियात् ।
अकृत्सार्वधातुकयो (७–४–२५)
रित्यनुवृत्तेर्नेह–कृत्यम् । बिभृयात् ।
यीत्यनुवृत्तेर्लिँङ्यपि न–कृषीष्ट ।

७–४–२९ गुणोऽर्तिसंयोगाद्योः ॥ ३०

अर्यते । अर्यात् । स्मर्यते । स्मर्यात् ।
नेह– संस्क्रियते । संस्क्रियात् ।

७-४-३० यङि च ॥ ३१

अरार्यते । सास्मर्यते ।
(हन्तेर्हिंसायां यङि घ्नीभावो वक्तव्यः)
जेघ्नीयते । गतौ तु-जङ्घन्यते ।

७-४-३१ ई घ्राध्मोः ॥३३

जेघ्रीयते । देध्मीयते ।

७-४-३२ अस्य च्वौ ॥

शुक्ली भवति । गङ्गी स्यात् ।

७-४-३३ क्यचि च ॥३९

पुत्रीयति । मालीयति ।

७-४-३४ अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु ॥

अशनायति । उदन्यति । धनायति ।
बुभुक्षादावगम्यमाने तु अशनीयति ।
उदकीयति । धनीयति ।

७-४-३५ न च्छन्दस्यपुत्रस्य ॥ ३९

मित्रयुः । देवाञ्जिगाति सुम्नयुः ।
अपुत्रस्येत्युक्तेर्नेह प्रतिषेधः-पुत्रीयन्तः सुदानवः ।
(अपुत्रादीनामिति वक्तव्यम्)
जनीयन्तोऽन्वग्रवः ।

७–४–२८ रिङ्- शयग्लिँङ्क्षु = शे यकि, (असार्वधातुके ७–४–२५, यि ७–४–२२)= सार्वधातुकभिन्ने यादौ लिँङि च, ऋतः (७–४–२७)+अङ्गस्य (६–४–१) = ऋदन्तस्याङ्गस्य स्थाने, रिङ्=रिङ् आदेशो भवति । यि इति असार्वधातुकेऽद्विचाऽनुवर्तमानौ संभवव्यभिचाराभ्यां लिङमेव विशेषयतः, न तु शयकौ ।

७–४–२९ गुणो– अर्तिसंयोगाद्योः+ऋतः (७–४-२७) + अङ्गस्य (६–४–१)= ऋधातोः संयोगादेर्ऋदन्तस्य च अङ्गस्य, गुणः=गुणो भवति, यकि (७-४-२८)= यक्प्रत्यये परे, यि (४-७-२२)+असार्वधातुके (७-४-२५) +लिङि (४-७-२८) च = यकारादावार्धधातुके लिँङि च परे । 'श=शे' इति तु नानुवर्ततेऽसम्भवात् । **नेह**– ४-७-८ नित्यं........ इति सूत्रान्नित्यमित्यनुवर्त्य नित्यं यः संयोगादिस्तस्येति व्याख्यानात् ।

७-४-३० यङि- ऋधातोः + संयोगादेर्ऋदन्तस्य (७-४-२९) च + अङ्गस्य (६–४–१) गुणः (७-४-२९) यङि=यङ्प्रत्यये परे । **अरार्यते** ३-१-२२ धातोः... सूत्रस्थ-सूचि... वार्तिकेन यङ् । यकारपरस्य रेफस्य न द्विर्वचनप्रतिषेधः अरार्यते, इति भाष्योदाहरणात् । **जङ्घन्यते** यङि, ७-४-८५ नुँग... इति नुँक् ।

७-४-३१ ईघ्रा- घ्राध्मोः= घ्राध्माधात्वोः स्थाने, ई = ईकारादेशो भवति, यङि (७-४-३०) ।

७-४-३२ अस्य = अवर्णस्य स्थाने, ई (७-४-३१) च्वौ= च्विँप्रत्यये परे ।

७-४-३३ क्यचि- २-४-७१ सुँपो... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-४-३१ ई घ्राध्मोः ॥ ७-४-३२ अस्य च्वौ ॥ ७-४-३३ (ख) (क) क्यचि च ॥ इति । (ख)= अस्य= अवर्णस्य स्थाने, (क)= ई= ई इत्यादेशो भवति,क्यचि= क्यच्पत्यये परे । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैरेव कारयित्वा पुत्रीय इति धातुर्निष्पन्न इतिच्छात्रान् बोधयित्वा तिङ्कार्यं (लँट् तिप् शप् पररूपं च) छात्रैः साधयेत् । पुत्रीयति । लिँटचाम् । अतो लोपः। पुत्रीयाञ्चकार । पुत्रीयिता । इत्यादि । अथ ३-१-११ कर्तु... सूत्रस्थं सर्वप्राति.........वार्तिकमुपदिशेत् ।

७-४-३४ अश..... धनायाः= अशनायप्रभृतयः क्यजन्ता निपात्यन्ते, बुभु....धेषु= बुभुक्षाद्यर्थेषु गम्यमानेषु । सद्यो भोक्तुमशनमिच्छति,पातुमुदकमिच्छति, धने सत्यपि पुनर्धनमिच्छतीत्यर्थेषु गम्यमानेषु भवन्त्युदाहरणानि । तत्र उदकशब्दस्योदन् । अन्ययोरीत्वाऽभावः ७-४-२५ अकृ... इति दीर्घः । कालान्तरोपभोगायाशनमिच्छति, स्नातुमुदकमिच्छति, दरिद्रः सन् धनमिच्छतीत्यर्थेषु गम्यमानेषु तु प्रत्युदाहरणानि ।

७-४-३५ नच्छ- अपुत्रस्य = पुत्रभिन्नस्य, अस्य (७-४-३२), न = दीर्घः (७-४-२५)+ई (७-४-३३) च न भवतः, क्यचि (७-४-३३) छन्दसि= वेदे । दीर्घस्याऽप्ययं प्रतिषेध इति ज्ञायते ; ७-४-२५ अकृ... इत्येव सिद्धे ७-४-३७ अश्वा... इत्यात्वविधानसामर्थ्यात् । **मित्रयुः** ३-२-१७० क्याच्छ........इत्युः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-३६ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति ॥
लोके तु-दुष्टीयिता । द्रविणीयिता ।
वृषीयति । रिष्टीयति ।
७-४-३७ अश्वाघस्यात् ॥ ३८
अश्वायन्तो मघवन् ।
मा त्वा वृका अघायवो विदन् ।
७-४-३८ देवसुम्नयोर्यजुषि काठके ॥
देवायन्तो यजमानाय । सुम्नायन्तो हवामहे ।
यजुषीत्युक्तेर्नेह-देवाञ्जिगाय सुम्नयुः ।
७-४-३९ कव्यध्वरपृतनस्यर्चि लोपः ॥
कव्यन्तः सुमनसः । अध्वर्यन्तः ।
पृतन्यन्तस्तिष्ठन्ति ।
७-४-४० द्यति- स्यति- मा- स्थामित्ति किति ॥४७
दितः । दितवान् । सितः । सितवान् ।
मितः। मितवान् । स्थितः । स्थितवान् ।
'ति' इत्युक्तेर्नेह-अवदाय ।
कितीत्युक्तेर्नेह-अवदाता ।
७-४-४१ शाच्छोरन्यतरस्याम् ॥
निशितः, निशातः। निशितवान्, निशातवान् ।
अवच्छितम्, अवच्छातम् ।
अवच्छितवान्, अवच्छातवान् ।
व्यवस्थितविभाषेयम् । तेन व्रतविषये
श्यतेर्नित्यम् । संशितं व्रतम् । संशितो
ब्राह्मणः । देवत्रातो गलो ग्राह इति योगे च
सद्विधिः । मिथस्ते न विभाष्यन्ते गवाक्षः
संशितव्रतः ॥
७-४-४२ दधातेर्हिः ॥ ४४
हितम् । परिहितवान् ।
७-४-४३ जहातेश्च क्त्वि ॥४४
हित्वा याति । जहातेरित्युक्तेर्जिहातेर्न -
हात्वा ।
७-४-४४ विभाषा छन्दसि ॥ ४५
हित्वा, हात्वा । लोके तु हित्वा इत्येव ।

७-४-३६ दुर....ण्यति= दुरस्युप्रभतयः, छन्दसि (७-४-३५) निपात्यन्ते = क्यचि दुष्टशब्दस्य दुरस्, द्रविणस्य द्रविणस् , वृषस्य वृषण्, रिष्टस्य रिषण् इत्यादेशाः । **दुष्टीयिता** लोके तु ३-२-१७० क्याच्छ... इत्यप्रवृत्त्या तत्समानार्थकस्तृन् ।

७-४-३७ अश्वा- छन्दसि (७-४-३५) अश्वाघस्य= अश्व अघ इति शब्दयोः स्थाने आत् = आकारादेशो भवति, क्यचि (७-४-३३) ।

७-४-३८ देवसुम्नयोः = देव सुम्नशब्दयोः स्थाने, आत् (७-४-३७) क्यचि (७-४-३३) यजुषि= यजुर्वेदे, काठके= कठशाखायाम् । **सुम्नयुः** बह्वृचानामप्यस्ति कठशाखा, ततो भवति प्रत्युदाहरणम् । अनन्ता वै वेदाः। इति हरदत्तः ।

७-४-३९ कव्य......... नस्य= कवि अध्वर पृतना इत्येतेषाम्, लोपः = लोपो भवति, क्यचि (७-४-३३) ऋचि= ऋग्विषये । **कव्यन्तः** क्यजन्तप्रकृतिकशत्रन्ताज्जस् ।

७-४-४० द्यति....स्थाम्-=दोप्रभृतीनां स्थाने, इत्=ह्रस्वेकारादेशो भवति, ति= तादौ, किति = किति परे । दो (११४७), षो (११४६), मा (१०६२), माङ् (९६०), मेङ् (१०८७, ११४१) , ष्ठा (९२८), धातवः प्रयुक्ता ज्ञेया उदाहरणेषु । आद्ये ७-४-४६ दो द... इति प्राप्ते, शेषेषु ६-४-६६ घुमा... इति प्राप्ते ।

७-४-४१ शाच्छोः = शा छा धात्वोः स्थाने, अन्यतरस्याम् = वा, इत्+ति + किति (७-४-४०) । **संशितं व्रतम्** । सम्यक् सम्पादितमित्यर्थः । **संशितो** ब्राह्मणः । व्रतविषयकयत्नवानित्यर्थः ।

७-४-४२ दधातेः= धाधातोः स्थाने, हिः= हि इत्यादेशो भवति, ति+किति (७-४-४०) ।

७-४-४३ जहातेः= हा (ओँहाक्) धातोः स्थाने, हिः (७-४-४२) क्त्वि= क्त्वा प्रत्यये परे ।

७-४-४४ विभा- जहातेः+ क्त्वि (७-४-४३) विभाषा=वा, हिः (७-४-४२) छन्दसि= वेदे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-४५ सुधित - वसुधित - नेमधित - धिष्व-धिषीय च ॥
लोके तु - सुहितम् । वसुहितम् । नेमहितम् । धत्स्व । धासीय ।

७-४-४६ दो दद् घोः ॥ ४७
दत्तः । दत्तवान् । दत्तिः ।
घोरित्युक्तेर्नेह-दातं (दाप् लवने १०५९) बर्हिः । अवदातं (दैप् शोधने ९२४) मुखम् ।
अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥

७-४-४७ अच उपसर्गात् तः ॥ ४९
प्रत्तः । अवत्तः । नीत्तम् ।
घोरित्यनुवृत्तेर्नेह-अवदातं मुखम् ।
(द्यतेरित्वादचस्त इत्येतद् भवति विप्रतिषेधेन)
अवत्तम् । प्रत्तम् ।

७-४-४८ अपो भि ॥
अद्भिः । अद्भ्यः । भीत्युक्तेर्नेह-अप्सु ।
(स्ववः स्वतवसोर्मास उषश्च च्छन्दसि)
स्वद्भिः । स्वतवद्भिः । माद्भिः । समुषद्भिः ।

७-४-४९ सः स्यार्धधातुके ॥५२, ५७
वत्स्यति । विवत्सति । जिघत्सति ।
स इत्युक्तेर्नेह - वक्ष्यति ।

७-४-५० तासस्त्योर्लोपः ॥५२,५३
भवितासि । पठितासि । असि ।

७-४-४५ सुधि....षीय=सुधितप्रभृतयः, छन्दसि (७-४-४४) निपात्यन्ते। आद्येषु त्रिषु दधातेः क्तप्रत्यये, इत्वं निपात्यते । चतुर्थे लोँटि थासि द्वित्वाऽभाव इत्वं च । अन्त्ये आशीर्लिङि आत्मनेपदोत्तमैकवचने, इत्वम् ।
७-४-४६ दो द- घोः= घुसंज्ञकस्य, दः= दाधातोः स्थाने, दथ्= दथ् आदेशो भवति, ति+किति (७-४- ४०) । 'दथ्' इति -
तान्ते दीर्घत्वाख्यो दोषो दान्ते दोषो निष्ठानत्वम् । धान्ते दोषो धत्वाख्यः स्यान्निर्दोषत्वात् थान्तो ग्राह्यः॥
वस्तुतस्तु तकारान्तादेशेऽपि दीर्घविधायकसूत्रस्य तकारादावुत्तरपदे इत्यर्थाद् दान्ते धान्ते च सन्निपात परिभाषया न दोषः ।
७-४-४७ अचः= अजन्तात्, उपसर्गात् = उपसर्गात् परस्य,घोः + दः (७-४-४६) तः= तँ (अनुबन्धलोपेत्) आदेशो भवति, ति + किति (७-४-४०) ।
'तँ' इति- अँकार उच्चारणार्थः । १-१-५१ अलो... इत्याकारस्य तकारे पूर्वदकारस्य चर्त्वे ७-४-६१ झरो... इति पाक्षिको लोपः । १-१-५३ आदे... इति तु नेह प्रवर्तते, अच इति द्विरावर्त्य पञ्चम्यन्तस्यैकस्य उपसर्गविशेषणत्वेऽन्यस्य षष्ठ्यन्तस्य स्थानित्वे स्वीकृते सत्याकारस्य प्राप्नोति । **नीत्तम्** ६-३-१२४ दस्ति- इति दीर्घः ।
७-४-४८ अपः= अप्शब्दस्य स्थाने, तः (७-४-४७) भि= भादौ प्रत्यये परे ।
७-४-४९ सः स्या- सः= सकारस्य स्थाने, तः (७-४-४७) सि= सादौ, आर्धधातुके = आर्धधातुके परे ।
७-४-५० तास- ७-४-५१ रि च- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-
(क) (ख)
७-४-४९ सः सि आर्धधातुके ॥ ७-४-५० तासस्त्योः (क) लोपः (ख) ॥ इति । तासस्त्योः= तास्प्रत्ययस्य अस्धातोश्च, (क)= सः= सकारस्य, लोपः = लोपो भवति, (ख)=सि=सादौ प्रत्यये परे । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । पठितासि । पठितास्थः । पठितास्थ । पठितास्मि । पठितास्वः । पठितास्मः । इति प्रयोगान् स्थालीपुलाकन्यायेन श्रुत्वा शिक्षकोऽधोनिर्दिष्टरूपेण वोधयेत् । वत्साः ? यत्र भविष्यत्कालः, अनद्यतनः प्रतीयते अद्यतनो न प्रतीयते तत्र लुँट् प्रत्ययः । लुँटो विषयाऽभावे भविष्यति लृँट् प्रत्ययो भवति । यथा– श्वः पठिता । श्यामः पठिष्यति । अद्य श्यामः पठिष्यति । अद्य श्वश्च श्यामः पठिष्यति । इति । अथ अव् भू अद् हु सु दिव् रुध् तुद् नम् क्री धातूनां कर्तरि लुँटि छात्रैः पठ्यमानानि रूपाणि शिक्षकः शृणुयात् । यथा अविता । भविता । अत्ता । होता । सोता । देविता । रोद्धा । तोत्ता । नन्ता । क्रेता । इति । अथाऽत्र सूत्रप्रसङ्गात्, अस् (१०६५) धातोर्लँटि सिपि च रूपं छात्रान् पुनरुद्वोधयेत् । असि । इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-५१ रि च ॥

भवितारौ । भवितारः । पठितारौ । पठितारः।

७-४-५२ हँ एति ॥

एधिताहे । व्यतिहे । पठिताहे ।

७-४-५३ यीवर्णयोर्दीधीवेव्योः ॥

आदीध्य गतः । आवेव्य गतः । आदीध्यते । आवेव्यते । आदीधिता । आवेविता । आदीधीत । आवेवीत । यीवर्णयोरित्युक्तेर्नेह- आदीध्यनम् । आदीध्यकः । आवेव्यनम् । आवेव्यकः ।

७-४-५४ सनि मी-मा-घु-रभ लभ-शक-पत-पदामच इस् ॥ ५७, ५६

मित्सति । मित्सते। दित्सति । धित्सति । रिप्सते । लिप्सते । शिक्षति । पित्सति । पित्सते। सि (७-४-४९) इत्यनुवृत्तेर्नेह- पिपतिषति ।

(सनि राधो हिंसायामच इस् वक्तव्यः)

प्रतिरित्सति । हिंसायामित्युक्तेर्नेह- आरिरात्सति ।

भावकर्मणोर्लुँटि तु भू हु सु क्री धातूनां पक्षे चिण्वदिट् । ताविता । भाविता । हाविता । साविता । क्रायिता । इत्यादीनि रूपाणि पाक्षिकाणि, इति बोधयेत् । अथ प्रथमपुरुषे ३-४-७९ टित... सूत्रं कथं न प्रवर्तते ? इति यदिच्छात्रा जिज्ञासेरन्, तदा शिक्षको विषयोऽयं लिँट्लकारोपदेशे स्फुटो भविष्यति, इत्युपदिशेत् । यदि स्वयं छात्रा न जिज्ञासेरन्, तदा शिक्षकस्तद्विषयिकां चर्चां न कुर्यात् । छात्राणां भारानुभवापत्तेः । कर्मणि लुँटि थासि ३-४-८० थासः... सूत्रे प्रकृत ७-४-५० तास... सूत्रे च प्रवृत्ते रूपसिद्धिः । यथा- पठ्धातोः पठितासे । इति । ध्वमि तु पठितास् + ध्वे इति श्यामपाट्यां लिखित्वा ८-२-२५ धि च-सूत्रमुपदिशेत्

७-४-५१ रि च-२-४-८५ लुँटः प्रथमस्य.... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

७-४-४९ सः सि अर्धधातुके ॥ ७-४-५० तासस्त्योः लोपः ॥ ७-४-५१ (ख) (क) (ग) रि च ॥ इति । (ख)=तासस्त्योः=तास् प्रत्ययस्य अस् धातोश्च, (क)=सः=सकारस्य, (ग)=लोपः, रि=रेफादौ प्रत्यये परे । इत्यर्थमुपदिशेत् । यद्यप्यत्र अलोन्त्यविधिनैव सिद्धे ७-४-४९ सूत्रात्सकाराऽनुवृत्तिः, लुँटि अस् धातोरसम्भवेन ७-४-५० सूत्रात् अस् धातोरनुवृत्तिश्च, नापेक्ष्येते; तथापि अनुवृत्तौ दोषाभावादर्थबोधसुकरत्वाच्च तथाविधमेवार्थमुपदिशेत् । लक्षणसमन्वयं छात्रैः कारयेत् । पठितारौ । पठितारः । सिपि-पठितास्+सि इति श्यामपाट्यां लिखित्वा ७-४-५० तासस्त्यो.....सूत्रमुपदिशेत् ।

७-४-५२ हँ ए- ८-२-२५ धि च - सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-४-४९ सः स्यार्धधातुके ॥ ७-४-५० तासस्त्योः लोपः ॥

७-४-५२ (ख) (क) हँ एति ॥ इति । (ख)=तासस्त्योः,(क)=सः=सकारस्य स्थाने, हँः=हँ (अनुबन्धलोपे ह्) आदेशो भवति, एति= एकारे परे। इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । पठिताहे । आत्मनेपदिनां हलन्तानां तु कर्तरि कर्मणि च लुँटि रूपाणि तुल्यानि । इति बोधयता शिक्षकेण, उदाहरणार्थानि लभ् धातो रूपाणि मध्ये मध्ये साहाय्यं ददता छात्रैः साधयितव्यानि । यथा- लब्धा । लब्धारौ । लब्धारः । लब्धासे । लब्धासाथे । लब्धाध्वे । लब्धाहे । लब्धास्वहे । लब्धास्महे । इति । **अथ शिक्षको लृँङ्प्रत्ययमुपदिशेत्** । 'सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत्' इति वक्तव्ये 'अभविष्यत्' इति प्रयोगः कथं सिध्येदिति जिज्ञासायामुच्यते, इति वदन् शिक्षकः ३-३-१३९ लिँङ् निमत्ते.....सूत्रमुपदिशेत् ।

७-४-५३ यीवर्णयोः= यवर्णादौ इवर्णादौ च प्रत्यये परे, दीधीवेव्योः=दीधीवेवीधात्वोः, लोपः(७-४-५०) । **यीवर्णयोः** यिश्च इवर्णश्चेति द्वन्द्वः । 'यि' इत्यत्र इकार उच्चारणार्थः । **आदीधीत** विधिलिँङि सीयुँट् । **आदीध्यनम्** १-१-६ दीधी ....इति गुणप्रतिषेधात् ६-४-८२ एर ....इति यण् ।

७-४-५४ सनि- मी..... पदाम्= मीप्रभृतीनां धातूनाम्, अचः= अचः स्थाने, इस्= इस् इत्यादेशो भवति, सि (७-४-४९) =सादौ, सनि= सनि परे । **मित्सति** ७-४-४९ सः स्या........इति तकारः । **पिपतिषति** ७-२-४९ सनी... सूत्रस्थ-तनि... वार्तिकेन वैकल्पिक इट् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-५५ आप्ज्ञप्यृधामीत्' ॥ ५६

ईप्सति । ज्ञीप्सति । ईर्त्सति ।
सि इत्यनुवृत्तेर्नेह-जिज्ञपयिषति ।
अर्दिधिषति ।

७-४-५६ दम्भ इच्च ॥

धिप्सति, धीप्सति, दिदम्भिषति ।

७-४-५७ मुचोऽकर्मकस्य गुणो वा ॥

मोक्षते, मुमुक्षते वा वत्सः स्वयमेव ।
अकर्मकस्येत्युक्तेर्नेह-मुमुक्षति वत्सं कृष्णः ।

७-४-५८ अत्र लोपोऽभ्यासस्य' ॥ ९७

७-४-५९ ह्रस्वः ॥

चकाशे । निनाय । डुढौके ।

७-४-६० हलादिः शेषः' ॥६१

जग्लौ । पपाठ । आटतुः ।

७-४-६१ शर्पूर्वाः खयः ॥

तिष्ठासति । पस्पन्दे ।

७-४-५५ आपज्ञप्यृधाम्= आप् ज्ञपि ऋध् इति धातूनाम्, सि (७-४-४९) सनि+अचः (७-४-५४) ईत्= ईकारादेशो भवति । प्रत्युदाहरणयोः ७-४-४९ सनी... इति वेट् ।
७-४-५६ दम्भः=दम्भ्धातोः, अचः (७-४-५४) ईत् (७-४-५५) इच्च=ह्रस्वेकारादेशश्च, सि (७-४-४९) सनि (७-४-५४) । उदाहरणेषु- प्रागवद् वेट् । इडभावे १-२-१० हल... इति कित्त्वम् । ततो नलोपो भष्भावोऽभ्यासलोपश्च ।
७-४-५७ मुचो- अकर्मकस्य=कर्मरहितस्य, मुचः= मुच्धातोः, इकः (१-१-३) गुणः = गुणो भवति, सि (७-४-४९) सनि (७-४-५४) ।
७-४-५८ अत्र= ७-४-५४ सनि.....इति प्रकरणकार्ये सति, अभ्यासस्य, लोपः= लोपो भवति । तथैवोदाहृतानि । अभ्यासस्येत्याध्यायपरिसमाप्तेरनुवर्तते ।
७-४-५९ ह्रस्वः- ७-४-६० हलादिः..सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-
(क)
७-४-५८ अत्र लोपोऽभ्यासस्य ॥
७-४-५९ (क) ह्रस्वः ॥ इति ।
१-२-२८ अच..... सूत्रमुद्बोध्यैव तदर्थमूलकं प्रकृतसूत्रार्थमुपदिशेत् । (क)=अभ्यासस्य, अचः (१-२-२८) स्थाने [द्वितीयावृत्तौ तु अचः + अभ्यासस्य= अजन्तस्याभ्यासस्येत्यर्थो बोध्यः । लक्षणसमन्वये च १-१-५१ अलो...सूत्रमवधेयम् । यद्यपि हलादिशेषेऽ भ्यासोऽनजन्तो न संभवति, तथापि सार्वत्रिकनियमः- पालनीय इति तदन्तविधिमूलकोऽर्थो ज्ञेय एव] ह्रस्वः = ह्रस्वो भवति । इत्यर्थमुपदिशेत् । (यद्यपि प्रकृतसूत्रोपदिष्टावनुपदिष्टावपि ७-४-७३ सूत्रेणाकारो भवतीति प्रकृतसूत्रोपदेशो व्यर्थ इव प्रतीयते । तथापि निनाय, इत्यादावुपदेशावश्यकत्वेन प्रक्रियाविशदनाय प्रकृतेऽप्युपदेश उचित एव) लक्षणसमन्वयं छात्रैः कारयित्वा 'भु भूव् + अ' इति श्यामपाट्यां लिखित्वा ७-४-७३ भवतेरः– सूत्रमुपदिशेत् ।
७-४-६० हला- ६-१-८ लिँटि...... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा ७-४-५८
(क)
अत्र लोपः..... अभ्यासस्य ॥ ७-४-६० (क) हलादिः शेषः ॥ इति । (क)= अभ्यासस्य, आदिः=आदौ वर्तमानः, हल् =हल्वर्णः, शेषः= शिष्यते । इत्यर्थमुपदिश्यच्छात्रा बोधयितव्याः । यथा वत्साः ? सूत्रस्यास्य तात्पर्यं बुद्धवन्तो यूयम् ? विमृशत तु अभ्यासस्य आदिर्हल् शिष्यते इत्युच्यते । लोपाप्रसक्तौ सर्वत्र वर्णाः शिष्यन्त एव किं पुनरुपदेशेन ? इति । अथ ते बोधयितव्याः- अभ्यासस्य आदिर्हल् शिष्यते इति कथनेन, अभ्यासस्यान्ये हलो लुप्यन्ते, इति बुध्यते इति । तथा च पूर्णः सूत्रार्थः फलति- अभ्यासस्य आदिः हल् शेषः= शिष्यते, अन्ये हलो लुप्यन्ते । इति । लक्षणसमन्वयं छात्रैः कारयित्वा शिक्षकः श्यामपाट्यां 'भू भूव्+अ' इति लिखित्वा ७-४-५९ ह्रस्वः- सूत्रमुपदिशेत् ।
७-४-६१ शर्पू- अभ्यासस्य (७-४-५८) शर्पूर्वाः,= शर्पूर्वकाः, खयः, = खय्वर्णाः, शेषः (७-४-६०)= शिष्यन्तेऽन्ये हलो लुप्यन्ते । खय इति वहुवचनान्तेन योगाच्छिष्यन्ते इत्यपि वहुवचनान्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-६२ कुहोश्चुः ॥६४

चकार । जगाम । जहार । जुहोति ।

७-४-६३ न कवतेर्यङि ॥६४

कोकूयते । कौतिकुवत्योस्तु चोकूयते ।

यङीत्युक्तेर्नेह प्रतिषेधः- चुकुवे ।

७-४-६४ कृषेश्छन्दसि ॥६५

करीकृष्यते । लोके तु-चरीकृष्यते ।

७-४-६५ दाधर्ति-दर्धर्ति-दर्धर्षि-बोभूतु-तेतिक्तेऽलर्ष्यापनीफणत् -संसनिष्यदत् -करिक्रत् कनिक्रदद्-भरिभ्रद्- दविध्वतो दविद्युतत्तरित्रतः सरीसृपतंवरीवृजन्मर्मृज्यागनी-गन्तीति च ॥

७-४-६२ **कुहो** - ६-१-४ पूर्वो... सूत्रानन्तरं सूत्रमिदं पाठचम् अत्र श्यामपाटीप्रयोगो यथा-
(क)
७-४-५८ अत्र लोपः अभ्यासस्य ॥ ७-४-६२ (क) कुहोश्चुः ॥ इति । (क)= अभ्यासस्य,= अभ्याससम्बन्धिनोः, कुहोः= कवर्गहकारयोः स्थाने, चुः= चवर्गो भवति । इत्यर्थ उपदेश्यः, । अत्र लक्षणसमन्वये बाह्यप्रयत्नेषु - हकारस्य स्थाने जायमानेषु चवर्गवर्णेषु - कतमः स्यादिति विचारे श्यामपाटीप्रयोगायच्छात्रा आदेश्याः । छात्रैर्यथार्थमकृतेऽधोनिर्दिष्टरूपेण शिक्षकस्तं विधिं दर्शयेत् । यथा-

	विवारश्वासाऽघोषाः	संवारनादघोषाः	अल्पप्राणाः	महाप्राणाः
स्थानी-ह	×	√	×	√
आदेशाः ↓				
च्	√	×	√	×
छ	√	×	×	√
ज्	×	√	√	×
झ्	×	√	×	√
ञ्	×	√	√	×

अथ श्यामपाटचां 'हु+हु+ति' इति 'झु+हु+ति' इति रूपाय परिवर्त्य ८-४-५३ अभ्यासे... सूत्रमुदिशेत् ।
७-४-६३ न क-कवतेः= भौवादिकस्य कुधातोः,- अभ्यासस्य (७-४-५८) चुः (७-४-६२) न=न भवति, यङि=यङ्प्रत्यये परे । **चोकूयते** शपा निर्देशान्नेह प्रतिषेधः ।
७-४-६४ कृषे-:= कृष्धातोः, अभ्यासस्य (७-४-५८) चुः (७-४-६२) न +यङि(७-४-६३) छन्दसि=वेदे ।
७-४-६५ दाधर्ति.....गन्तीति=दाधर्तिप्रभृतयो निपात्यन्ते, छन्दसि (७-४-६५) । आद्येषु त्रिषु निपातनमनेकधा । तथा हि **दाधर्ति**-धृङ् (९६० भ्वा.) धृङ् (१४११ तु.) धृञ् (९०० भ्वा.) इत्येतेषां ण्यन्तानां २-४-७६ बहु.... इति शपः श्लौ णिलुगभ्यासदीर्घश्च निपात्यते । अथवा धृङ् (९६० भ्वा.) धातोरेव ३-१-८५ व्यत्ययो.... इति परस्मैपदे प्राग्वच्छपः श्लावभ्यासस्य दीर्घत्वं निपात्यते । (धृङ् १४११ तु.) धातोर्वा ३-१-८५ व्यत्ययो....इति शप् । शेषं प्राग्वत् । तयोरुभयोर्वा यङलुकि ७-४-९१ रुँग्रि.... इति बाधकमभ्यासस्य दीर्घत्वं निपात्यते । **दर्धर्ति** धृङ् (९६० भ्वा.) धातोर्व्यत्ययेन परस्मैपदे, धृङ् (१११४ तु.) धातोर्वा व्यत्ययेन परस्मैपदे व्यत्ययेनैव शपि चोभयत्रैव प्राग्वच्छपःश्लावभ्यासस्य रुँगागमो निपात्यते । अथवा तयोरेव यङ्लुकि दाधर्तीति निपातनप्राप्तदीर्घस्याऽभावो निपात्यते । रुँक् तु ७-४-९ । रुँग्रि... इत्यनेनैव सिद्धः । **दर्धर्षि**- धृङ् (९६० भ्वा.) धातोर्व्यत्ययेन परस्मैपदे शपि धृङ् (१११४ तु.) धातोरेव वा व्यत्ययेन परस्मैपदे व्यत्ययेनैव शपि चोभयत्रैव प्राग्वच्छपःश्लावभ्यासस्य रुँगागमो निपात्यते । यङ्लुक्पक्षे तु न किमपि निपातनम् । **बोभूतु** भूधातोर्यङ्लुकि गुणाभावो निपात्यते । अत्र यदन्यद् वक्तव्यं तद् ७-३-९४ यङो वा इत्यत्रोक्तम् । तेतिक्ते तिज् (९७१) धातोर्यङ्लुगन्तात् तङ् निपात्यते । अलर्षि ऋ (१०९७) धातोरभ्यासस्य हलादिशेषापवादो रेफस्य लत्वमित्वाभावश्च निपात्यते । सिपा निर्देशो ऽतन्त्रम्, तिप्यपि दृश्यते अलर्ति दक्ष इति काशिका ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-६६ उरत् ॥	चकार । ववृते । चोरयाञ्चकार ।

आपनीफणत् फण् (८२१) धातोराङ्पूर्वस्य यङ्लुगन्तस्य शतर्यभ्यासस्य नीगागमो निपात्यते। **संसनिष्यदत्** स्यन्द् (७६०) धातोः सम्पूर्वस्य यङ्लुगन्तस्य शतर्यभ्यासस्य निक्, धातुसकारस्य षत्वं च निपात्यते। न चाऽस्य सम्पूर्वता तन्त्रम्, अन्यत्रापि हि दृश्यते- आसनिष्यददितीति- काशिका। **करिक्रत्** कृ (१४७१) धातोर्यङ्लुगन्तस्य शतर्यभ्यासस्य चुत्वाभावो निपात्यते। **कनिक्रदत्** क्रन्द् (७१,७७२) धातोर्लुँङि च्लेरङ् नलोपो द्विर्वचनमभ्यासस्य चुत्वाऽ भावो निगागमश्च निपात्यते। ६-४-७५ बहु... इत्यऽभावः। अक्रन्दीदित्यर्थः। **भरिभ्रत्** भृ (१०८६) धातोर्यङ्लुगन्तस्य शतर्यभ्यासस्य जश्त्वाभावो निपात्यते। दविध्वतः ध्वृ (९३९) धातोर्यङ्लुगन्तस्य शतर्यभ्यासस्य विगागमो धातोर्ऋकारलोपश्च निपात्यते। जसन्तं रूपमेतत्। दविध्वतो रश्मयः सूर्यस्य। **दविद्युतत्** द्युत् (७४०) धातोर्यङ्लुगन्तस्य शतर्यभ्यासस्य ७-४-६७ द्युति..... इति प्राप्तसम्प्रसारणाभावो ऽत्वं विगागमश्च निपात्यते। **तरित्रतः** तृ (९६९) धातोः शतरि २-४-७६ बहु....इति शप श्लावभ्यासस्य रिगागमो निपात्यते षष्ठचेकवचने। **सरीसृपतम्** सृप् (९८३) धातोः शतरि प्राग्वच्छपः श्लावभ्यासस्य रीगागमो निपात्यते द्वितीयैकवचने। **वरीवृजन्** वृज् (१०२९ वा १४६०) धातोराद्यस्य व्यत्ययेन परस्मैपदे, शपि, अन्त्यस्य व्यत्ययेन शपि, उभयत्र २-४-७६ बहु इति श्लावभ्यासस्य रीगागमो निपात्यते। **मर्मृज्य** मृज् (१०६६) धातोर्लिँटि णल्यभ्यासस्य रुँगागमो धातोश्च युँगागमो निपात्यते। **आगनीगन्ति** आङ्पूर्वस्य गम् (९८२) धातोर्लँटि शपः प्राग्वच्छ्लावभ्यासस्य चुत्वाभावो नीगागमश्च निपात्यते। वक्ष्यन्तीवेदागनीगन्ति कर्णम्। यत्र श्लुस्तत्र ६-१-१० श्लौ इति द्वित्वं ततो ऽभ्यासकार्यादीति सम्यगवधेयम्। इति करणमेवंप्रकाराणामन्येषामप्युपसंग्रहार्थमिति- काशिका। चकारश्छन्सीत्यनुकर्षणार्थ इति- न्यासः।

७-४-६६ उर- १-१-५८ द्विर्वचनेऽचि-सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा -

(क) ख

६-४-१ अङ्गस्य ॥ ७-४-५८ अत्र लोपः अभ्यासस्य ॥

७-४-६६ (क) (ख) उः अत् (प्रत्यये) इति। अत्रापि सूत्रार्थोपदेशात् पूर्वं शिक्षकश्छात्रानुपदिशेद् यथा- वत्साः? अनेन सूत्रेण अङ्गस्य कार्यं क्रियते। नहि असति परतः प्रत्ययेऽङ्गसंज्ञा भवति। तेन 'प्रत्यये' इति स्वतः प्रतीयते तदेवाऽत्र ( ) कोष्ठे दर्शितमिति। अथ सूत्रार्थः- (क)= अङ्गस्य=अङ्गसम्बन्धिनः (ख)= अभ्यास्य, उः= ऋवर्णस्य स्थाने, अत्= अकारो भवति, प्रत्यये परे। इति। अत्र लक्षणसमन्वयप्रसङ्गे १-१-५० उर... सूत्रमुद्बोध्य श्यामपाटचां 'चोरयाम् + कर् + कृ + अ' इति परिवर्त्य ६-४-६० हला......सूत्रं ७-४-६२ कुहो... सूत्रं चोद्बोध्यच्छात्रैरेव लक्षणसमन्वयं च कारयित्वा ' चोरयां + च कृ + अ' इति श्यामपाटचां लिखित्वा ७-२-११५ अचो... सूत्रं प्रवर्तयेत्। चोरयांचकार। साम्प्रतं ७-२-११५ अचो... सूत्रप्रवृत्तौ १-१-५८ द्विर्व... सूत्रं न प्रतिबन्धकम् ? इतिच्छात्रान् परीक्षेत। उत्तरं तु द्वित्वं कर्तव्यं नास्ति किन्तु कृतचरम्। इति। [एतत् प्रयोगे यद्यपि ७-२-११५ अचो... सूत्रेण द्वित्वात् पूर्वं वृद्धावपि इष्टरूपसिद्धिर्भवति। तथापि अतुसादौ किति तु द्वित्वात् परत्वात् ६-१-७४ इको... सूत्रेण यणि प्राप्ते तन्निषेधार्थं १-१-५८ द्विर्व... सूत्रमवश्योपदेश्यम्। तस्मादिहापि प्रक्रियाशुद्धये प्रस्तुतम्।] अतुसिच्छात्रैः साध्यमानं 'चोरयाम् + कृ + अतुस्' इति श्यामपाटचां लिखित्वा १-२-५ सूत्रमुद्बोध्य यणं बाधित्वा ७-३-८४ सार्व... सूत्रेण सम्भाविते गुणे १-१-५ क्ङिति... सूत्रेण निषिद्धे सति ६-१-७४ इको... सूत्रेण पुनर्यणि प्राप्ते ६-१-८ लिँटि... सूत्रेण द्वित्वे च प्राप्ते १-४-२ विप्र... सूत्रबलेन ६–१–७४ इको... सूत्रेण यणि प्राप्ते १-१-५८ द्विर्व... सूत्रेण तन्निषेधे सति द्वित्वेऽभ्यासादिकार्ये यणि च चोरयांचक्रतुः। एवमेव चोरयांचक्रुः, इति प्रयोगं छात्रैः साध्यमानं शिक्षकः शृणुयात्। अथ शिक्षकश्छात्रानुपदिशेत्-वत्साः ? उक्तमेव पूर्वं यत्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-६७ द्युतिस्वाप्योः **सम्प्रसारणम्** ६८
दिद्युते । सुष्वापयिषति ।
७-४-६८ व्यथो **लिँटि** ॥ ७४
विव्यथे । लिँटीत्युक्तेर्नेह- व्याव्यथ्यते ।
७-४-६९ **दीर्घ** इणः किति ॥७०

ईयतुः । ईयुः। कितीत्युक्तेर्नेह- इयाय ।
७-४-७० अत आदेः ॥
आत । आततुः। चोरयामास ।

'चोरयाम्' इति धातुकार्यं न लभते, इति । 'कृ' धातुश्चाऽनुदात्त एकाच् । तेन थलादौ नेडिति । चोरयाञ्चकर्थ । चोरयांचकृव । चोरयांचकृम । चोरयाञ्चक्रे । चोरयांचकृढ्वे । इत्यादिरूपाणिच्छात्रैः साध्यमानानि शिक्षकः सावधानं शृण्वन् चोरयांचकृव, चोरयांचकृम, इत्यत्र कथं न गुणः ? इति परीक्षेत । कर्मणि लिँटि च पूर्ववत् । चोरयांचक्रे । इत्यादि । इत्युपदिशेत् ।
अथात्र शिक्षकश्छात्रानुद्बोधयेत्-वत्साः ? उक्तमेव पूर्वमनेकाज्धातुभ्यो लिँटि आम् प्रत्ययो भवतीति । तेन चुरादावेव आम् प्रत्यय इति न प्रमदितव्यम् । इति । अथाऽग्रे पुनरुपदिशेत् । अनुप्रयोगात् कृञः, आमः प्रकृतेरिव पदं भवति । यथा- चकास्धातुरनेकाच् परस्मैपदी । तस्माल्लिँटि 'चकासाञ्चकार' इत्यादिषु परस्मैपदमेव । दयँ धातुरात्मनेपदी । तस्माल्लिँटि ३-१-३७ दया....सूत्रेण आमि दयाञ्चक्रे । इत्यादिषु आत्मनेपदमेव । अनुप्रयोगाद् भूधातोरस्धातोस्तु कर्तरि सर्वत्र परस्मैपदमेव । यथा- चोरयाम्बभूव । चकासाम्बभूव । दयाम्बभूव । इत्यादि । अस् धातोरनुप्रयोगे 'चोरयाम्+अस्+अ' इति श्यामपाटयां लिखित्वा द्वित्वाऽभ्यासादिकार्यं छात्रैः साधयित्वा चोरयाम्+अ+अस्+अ इति श्यामपाटयां लिखित्वा ७-४-७० अत आदेः - सूत्रमुपदिशेत् ।
७-४-६७ **द्युतिस्वाप्योः**= द्युत् स्वापि धात्वोः, अभ्यासस्य (७-४-५८) सम्प्रसारणम्= सम्प्रसारणं भवति ।
७-४-६८ **व्यथः** = व्यथ् धातोः, अभ्यासस्य (७-४-५८) सम्प्रसारणम् (७-४-६०) लिँटि= लिँटि परे ।
७-४-६९ **दीर्घ-** इणः= इण् धातोः, अभ्यासस्य (७-४-५८) दीर्घः= दीर्घो भवति, किति+लिँटि (७-४-३८) परे ।
७-४-७० **अत-** ७-४-६६ उरत्-सूत्रानन्तरं सूत्रमिदं पाठचम् । शिक्षकोऽत्र मनसाऽवदध्यात् "आदेरित्युक्तेर्नेह-जगाद । जगदतुः । जगदुः । तपरकरणादौपदेशिकह्रस्वस्यैव दीर्घः । नेह-आञ्छ । अत्र सति दीर्घे ७-४-७१ तस्मा...इति नुँट स्यात् इति" । अथ श्यामपाटीप्रयोगेणोपदिशेत् । यथा-

(क)
७-४-५८ अत्र लोपः अभ्यासस्य ॥
(ख)
७-४-६८ व्यथो लिँटि ॥
(ग)
७-४-६९ दीर्घ इणः किति ॥

७-४-७० अतः (क) आदेः, (ग)(ख) ॥ इति । (क)=अभ्यासस्य, आदेः= आदौ वर्तमानस्य, अतः= ह्रस्वाकारस्य स्थाने, (ग)= दीर्घः, (ख)= लिँटि (परे) । इत्यर्थमुपदिश्यच्छात्रैर्लक्षणसमन्वयं कारयित्वा श्यामपाटयां 'चोरयाम् + आ + अस् + अ' इति लिखित्वा ७-२-११६ अत....सूत्रमुद्बोध्य लक्षणसमन्वयं छात्रैरेव कारयित्वा 'चोरयाम्+आ+आस्+अ' इति श्यामपाटयां कृत्वा छात्रैः सन्धिकार्यं साधयेत् । चोरयामास । एवमेव चकासामास । दयामास । इत्यादि । भूधातोरनुप्रयोगे प्रक्रिया तु ३-१-११५ परो... सूत्रात् ७-४-७३ भव... सूत्रावधि दर्शितैव । भावकर्मणोस्तु-१-३-१३ भाव... सूत्रेणात्मनेपदमेव । चोरयाञ्चक्रे । चोरयाम्बभूवे । चोरयामासे । चकासाञ्चक्रे । चकासाम्बभूवे । चकासामासे । दयाञ्चक्रे । दयाम्बभूवे । दयामासे इत्यादिरूपाणि सम्यग् बोधयेत् । **अथ कर्तरि लुँङि प्रक्रियामुपदिशेत् ।**
यथा- चोरि धातोः कर्तरि लुँङि च्लिँप्रत्ययावधि च्छात्रैः प्रक्रियां साधयित्वा 'अचोरि+ल्+ति' इति श्यामपाटयां लिखित्वा ३-१-४४ च्लेः सिँच् -सूत्रं वाधयित्वा ३-१-४८ णिश्रि......सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-७१ तस्मान्नुँड् द्विहलः ॥७२

आनर्च । द्विहल्ग्रहणमनेकहलुपलक्षणम् । आनर्च्छ । द्विहल इत्युक्तेर्नेह-आट ।आटतुः । (नुँड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते)

आनर्ध । आनृधतुः। आनृधुः।

७-४-७२ अश्नोतेश्च ॥

आनशे । अश्नातेस्तु आश।

७-४-७३ भवतेरः ॥७४

बभूव । लिँटीत्यनुवृत्तेर्नेह– बुभूषति ।

७-४-७४ ससूवेति निगमे ॥

लोके तु-सुषुवे ।

७-४-७५ निजां त्रयाणां गुणः श्लौ ॥

नेनेक्ति । वेवेक्ति । वेवेष्टि ।

श्लावित्युक्तेर्नेह । निनेज ।

७-४-७१ अत्र सूत्रे तस्मादिति तच्छब्देन प्रकृतो दीर्घीभूताऽभ्यासाऽकारो गृह्यते । द्विहलः=द्विहलो धातोः,तस्मात्=दीर्घीभूताऽभ्यासाऽकारात् परस्य, नुँट् =नुँट् आगमो भवति ।

७-४-७२ अश्नोतेः= सौवादिकस्य अशधातोः, तस्मात् + नुँट् (७-४-७१) । **आश** सूत्रे श्नुविकरणस्य निर्देशान्न नुँट् ।

७-४-७३ भव- ७-४-५९ ह्रस्वः -सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

७-४-५८ अत्र लोपः, अभ्यासस्य ॥ ७-४-६८ व्यथो लिँटि ॥

७-४-७३ भवतेः (क) अः,(ख) ॥ इति । भवतेः=भूधातोः , (क)= अभ्यासस्य=अभ्यासस्य स्थाने, अः= अकारो भवति, (ख)= लिँटि परे । इत्यर्थमुपदिश्य च्छात्रैर्लक्षणसमन्वयं कारयन् , सत्यावश्यके १-१-५१ अलो... सूत्रमुद्बोधयेत् । अथ श्यामपाटयां भ + भूव् + अ इति लिखित्वा ८-४-५३ अभ्या... सूत्रमुद्बोध्यच्छात्रै रूपं साधयेत् । बभूव । बभूवतुः । बभूवुः । सिपि- भू+थ इति श्यामपाटयां लिखित्वा ७-२-३५ आर्ध......सूत्रमुद्बोध्य 'भू+इथ' इति श्यामपाट्यां लिखित्वा छात्रैः पूर्ववत् प्रक्रियां साधयेत् । बभूविथ । बभूवथुः । बभूव । बभूव । वमयोरिट् इत्युद्बोधनपुरस्सरं छात्रैरेव रूपे साधयेत्, बभूविव । बभूविम । **शिक्षकेणाऽवधेयम् ।**

अत्र शिक्षकेणाऽवधेयं यद् येऽनुदात्ता (अनिटः) धातवस्तेष्वपि केषां चिल्लिँटि, इडागमो भवति । अजन्तानामकारवतां च थलि विकल्पेनेडागमो भवति । ऋदन्तानां स्तुद्रुप्रभृतीनां च थलीड् न भवति । इति । तत्र लिँटि केषामिड् भवति., केषां नेतिच्छात्राः स्फुटं बोधयितव्याः। तत्राऽकारवतां सर्वथोपदेश आवश्यकस्थलि वेड् भवतीति स्फुटप्रतिपत्तये। अकारवत्सु च यदि तप् धातुरुपदिश्येत; तत्र एत्वाभ्यासलोपावपि सर्वथोपदेश्यौ भवतः । थलि इड्व्यवस्थाया एत्वाभ्यासलोपयोश्च सहैव विधीयमान उपदेशश्चच्छात्राणां भाराय भवेत् । अतः प्रथमं सेड्धातोरेत्वाभ्यासलोपोदाहरणानि प्रस्तुत्यानि । ततः क्रमशः क्रादिनियमेन लिँटि इड्वतः यथा रुध् धातोः, ततः थलि वेटोऽकारवतः, यथा तप् धातोः, थलिवेटोऽजन्तस्य, यथा क्रीधातोर्नीधातोश्च,ततःथलिसर्वथाऽनिटो हृधातोरुदाहरणानि उपदेश्यानि । थलि वेट्स्वजन्तेष्वपि प्रथमं क्रीधातुस्तत्पश्चादेव नीधातुरुपदेश्यः । यतः किति इयङ्घटितमुदाहृत्य तद्बाधक-यण्-घटितोदाहरणमुचितम् । यद्यपि अजन्तधातुषु थलि ७-२-६१ अच...सूत्रम्, अकारवत्सु तु तदुत्तरम् ७-२-६२ उप... सूत्रं प्रवर्तते । अतः सूत्रार्थोपदेशदृष्ट्याऽकारवतः पूर्वमजन्तधातुरुपदेश्य इति प्रतीयते तथापि, अत्र नीक्रीभ्यां पूर्वं तप्धातूपदेशे हेतुस्तु तप्धातौ केवलं थलि इड्मात्रं विचार्यते, नीक्रियोस्तु किति यणियँङावपि चर्च्यौ भवतः । इति । अतः क्रमशः पठ् रुध् तप् क्री नी धातव उपदेश्याः । तथाहि पठ्धातोर्लिँटि तिपिच्छात्रैः साध्यमानं प पठ्+अ इति शिक्षकः श्यामपाट्यां लिखित्वा ७-२-११६ अत...सूत्रमुपदिशेत् ।

७-४-७४ ससुव इति- षूङ् प्राणिगर्भविमोचने (१०३१), इति धातोर्लिँटि परस्मैपदं वुँगागमो ऽभ्यासस्याऽत्वं च (७-४-७३) निपात्यन्ते, निगमे=वेदे ।

७-४-७५ निजाम्= निज्प्रभृतीनाम्, त्रयाणाम्= निज् विज् विष् इत्येतेषाम् , अभ्यासस्य (७-४-५८) गुणः=गुणो भवति, श्लौ= श्लौ परे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-७६ भृञामित् ॥८१
बिभर्ति । मिमीते । जिहीते ।
श्लावित्यनुवृत्तेर्नेह-बभार ।

७-४-७७ अर्तिपिपर्त्योश्च ॥
इयर्ति । पिपर्ति ।

७-४-७८ बहुलं छन्दसि ॥
पूर्णां विवष्टि ।

७-४-७९ सन्यतः ॥८१
पिपठिषति । सनीत्युक्तेर्नेह- पपाठ ।

७-४-७६ **भृञाम्**= भृञ्प्रभृतीनाम् , त्रयाणाम् (७-४-७५) भृञ् माङ् ओहाङ्, इत्येतेषाम्, अभ्यासस्य (७-४-५८) इत्=इकारादेशो भवति, श्लौ (७-४-७५) ।
७-४-७७ **अर्तिपिपर्त्योः**= ऋ पॄ धात्वोः, अभ्यासस्य (७-४-५८) इत् (७-४-७६) श्लौ (७-४-७५) ।
७-४-७८ **बहु-** अभ्यासस्य(७-४-५८) बहुलम्= वाहुल्येन, इत् (७-४-७६) श्लौ (७-४-७५) छन्दसि=वेदे । **विवष्टि** वशँ कान्तौ (१०८०) २-४-७६ बहु....इति शपः श्लुः । ८-२-३६ व्रश्च...इति षत्वम् ।
७-४-७९ **सन्य-** ३-१-३१ आयादय....... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटी प्रयोगो यथा-

(क)

७-४-५८ अत्र लोपः अभ्यासस्य ॥

(ख)

७-४-७६ भृञाम् इत् ॥
७-४-७९ सनि (क) अतः (ख) ॥ इति । (क)= अभ्यासस्य, अतः= अकारस्य स्थाने (ख)= इत्= इकारो भवति, (द्वितीयावृत्तौ तु अतः=अदन्तस्य, अभ्यासस्येत्यर्थमुपदिशेत् तेन यङ्लुगन्तात् सनि बर्भरिषतीत्यादौ न दोषः) सनि = सन् प्रत्यये परे । इत्यर्थमुपदिश्य लक्षणसमन्वयं च यथासंभवं छात्रैः साधयित्वा 'अ + चि + कम् + इ + अ + त' इति श्यामपाटचां लिखित्वा ७-४-९४ दीर्घो.....सूत्रं छात्रैः प्रवर्तयेत् । ततो णिलोपवर्णसंमेलने च च्छात्रैः कारयेत् । अचीकमत । णिङभावपक्षे तु कम् धातोरेव लुँङि च्लिप्रत्ययावधि प्रक्रियां छात्रैः साधयित्वा ३-४-४८ णिश्रि....सूत्रस्थ-कमे..........वार्तिकमुपदिश्य अकम्+अ त इति श्यामपाटचां लिखित्वा ६-१-११ चङि-सूत्रमुद्वोधयेत् । अचकमत । अथात्र शिक्षकः सन्वद्भावादिकं कथं न ? इति च्छात्रान् परीक्षेत । उत्तरं तु णिर्नास्तीति । अथ सार्वधातुकविषये तु नित्यमेव णिङ् । कामयते, इत्यादि । इत्युपदिश्य कथमत्र १-१-५ क्ङिति..... सूत्रेण वृद्धेर्न निषेधः ? इतिच्छात्रान् परीक्षेत । उत्तरं तु इकः स्थाने विधीयमाने एव गुणवृद्धी अनेन निषिध्येते । प्रकृते तु ७-२-११६ अत....... सूत्रेणोपधाया अतः स्थाने विधीयमाना वृद्धिरिति । **अथाऽनुबन्धफलोपदेशः ।**
अथाऽधो निर्दिष्टरूपेणाऽनुबन्धफलमुपदिशेत् । वत्साः ? यथा- '४+४=८' इत्यत्र '+' अनेन चिह्नेन उभयतस्त्यौ चतुष्कौ अङ्कौ योजनीयौ इति ज्ञायते । '=' अनेन चिह्नेन च उभयोश्चतुष्कयोर्योजने या सङ्ख्या भवति सा सङ्ख्या ८ सङ्ख्या भवति, इति ज्ञायते, ४×४ इत्यत्र '×' अनेन चिन्हेन चतुष्केणाङ्केन चतुष्कोऽङ्को गुणनीय इति ज्ञायते । इत्यादीनां चिह्नानामुपयोगो लाघवाय क्रियते । तथैव व्याकरणेऽपि लाघवेन व्याकरणोपदेशाय पाणिनिनानुबन्धरूपाणि, इत्संज्ञयाऽपनेयानि विभिन्नानि चिह्नानि प्रयुक्तानि । यथा-तिङ्क्षु-तिप् सिप् मिप्सु इत्संज्ञयाऽपनेयः पकारः पठितः । तेन ति सि मि एते १-२-४ सार्व...सूत्रेण ङितो न भवन्ति । अन्ये च ङितो भवन्तीति ज्ञायते । इति तु यूयं जानीथैव । एवमेव लाघवेन व्याकरणोपदेशाय धातुष्वपि विभिन्नानि इत्संज्ञयाऽपनेयानि अनुबन्धरूपाणि चिह्नानि प्रयुक्तानि सन्ति । तेषु तिङन्तप्रक्रियायामपेक्ष्याणि चिह्नानि तत्फलानि चोपदिश्यन्तेऽत्र । तथाहि-अन्त्ये उदात्ताकारोपदेशफलं मुखसुखार्थम् । यथा पठँ=पठ्-पठति । ङिदनुदात्तस्वरेत्फलम्= आत्मनेपदम् । यथा पूङ्-पवते । मुदँ= मुद्-मोदते । ञित्-स्वरितस्वरेत्फलम्-उभयपदे । यथा- श्रिञ्= श्रि- श्रयति । श्रयते । डुपचँष्= पच्- पचति । पचते । इँदित्फलम्- ७-१-५८ इँदि... सूत्रेण नुँमागमः । यथा मथिँ (४६)= मन्थ्- मन्थति । वत्साः ? पूर्वम् ६-४-२४अनि... सूत्रे मन्थँ= मन्थ् नकारोपधो धातुरुपदिष्टः । अत्र तु मथिँ धातुरुपदिष्टः । प्रकृतप्रक्रियायां च मन्थ् इति नकारोपध एव जातः । अत्र युष्माकं मनसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-८० ओः पुयण्ज्यपरे ॥८१
पिपविषते । यियविषति । जिजावयिषति । बिभावयिषति । अत्र पययोरिति वक्तव्ये वर्गप्रत्याहारग्रहणं ज्ञापयति-'णिच्यच आदेशो न द्वित्वे कर्तव्ये' इति । यत्र द्विरुक्तावभ्यासोत्तरखण्डस्याद्योऽच् प्रक्रियायां परिनिष्ठितरूपे वाऽवर्णो लभ्यते तत्रैवाऽयं निषेधः, ज्ञापकस्य सजातीयापेक्षत्वात् । तेनाऽचिकीर्तदित्यादि सिद्धम् । अपरे इत्युक्तेर्नेह-बुभूषति ।

७-४-८१ स्रवति- शृणोति- द्रवति- प्रवति- प्लवति- च्यवतीनां वा ॥
सिस्रावयिषति , सुस्रावयिषति । शिश्रावयिषति,शुश्रावयिषति । दिद्रावयिषति, दुद्रावयिषति ।अपरे इत्यनुवृत्तेर्नेह-सुस्रूषति । शुश्रूषते ।

७-४-८२ गुणो यङ्लुकोः ॥ ९०
बोभूयते । बोभवीति, बोभोति ।

७-४-८३ दीर्घोऽकितः ॥
पापच्यते । पापचीति, पापक्ति । अकित इत्युक्तेर्नेह-जङ्गम्यते । जङ्गमीति, जङ्गन्ति ।

शङ्का जागृयाद् यद्, यद् वा इँदनुबन्धा धातवः सर्वेऽपि नोपधकाः पाठ्याः । तेषु धातुषु इँकारो न पठनीयः । ७-१-५८ इँदि... सूत्रं च न पठनीयम् । यद् वा ये नोपधका धातवस्ते सर्वेऽपि नोपधका न पठनीयाः किन्तु इँकारविशिष्टाः पाठ्या इति । अतः सम्यगवधत्त- ये नोपधकाः पठ्यन्ते तेषां किति ङिति नकारस्य लोपो भवति ।. यथा- मथ्यात् मथ्नाति । इत्यत्र ६-४-२४ अनि....... सूत्रेण नलोपो जातः । उदाहृतं च तथैव तत्र सूत्रे । इँदितस्तु नलोपो न भवति; नलोपविधायके ६-४-२४ अनि... सूत्रे अनिँदितामिति पर्युदासात् । तेन प्रकृतोपात्तमन्थ्धातोराशीर्लिङि मन्थ्यात् । इत्यादीनि रूपाणि भवन्ति । तेन इँदितः स्वरसतः फलम्- नलोपाऽभावः । इति सम्यग् बोधयेत् । दीर्घोकारानुबन्धफलम् ७-२-४४ स्वरति... इति सूत्रेण वलादेरार्धधातुकस्य विकल्पेनेट् । इति कथयन् सूत्रं तदुपदिशेत् ।

७-४-८० ओः पु- अभ्यासस्य (७-४-५८) ओः= उवर्णस्य स्थाने, इत् (७-४-७६) सनि (७-४-७९) अपरे + पुयण्जि= अवर्णपरकेषु पवर्गयण्जकारेषु परेषु ।

७-४-८१ स्रव..... च्यवतीनाम्= सुप्रभृतीनाम्, अभ्यासस्य (७-४-५८) ओः (७-४-८०) वा,=विभाषया, इत् (७-४-७६) सनि (७-४-७९) अपरे (७-४-८०)= अवर्णपरके धात्वक्षरे परे । "अवर्णपरके यणि परे" इत्यर्थः प्रकृतः । यद्यपि यण् वर्णान्तरेण व्यवहितो भवति; तथापि सूत्रारम्भसामर्थ्यादिकेन वर्णेन व्यवधाने ऽपि सूत्रं प्रवर्तते । अत उक्तं 'धात्वक्षरे परे' इति ।

७-४-८२ गुणो - ६-४-४९ यस्य... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

७-४-५८ अत्र लोपः, अभ्यासस्य ॥ ७-४-८२ (क) गुणः यङलुकोः ॥ इति । (क) = अभ्यासस्य, इकः (१-१-३) (स्थाने), गुणः=गुणो भवति, यङ्लुकोः= यङि परे यङ् लुकि च । १-१-३ इको.....सूत्रोद्बोधनपुरस्सरमर्थमिमं बोधयित्वा [द्वितीयावृत्तौ तु तदन्तविधौ इगन्तस्याऽभ्यासस्येत्यर्थमुपदिशेत्] छात्रैर्लक्षणसमन्वयं कारयित्वा ऽग्रिमप्रक्रियामपिच्छात्रैः साधयेत् । बोभूयते । आर्धधातुके ६-४-४८ अतो..... इत्यल्लोपः । बोभूयाञ्चके । बोभूयिता । बोभूयिष्यते । इत्यादि । अस्मिन् क्षेत्रे धान्यमतिशयेन भवति= अस्मिन् क्षेत्रे धान्यं बोभूयते । अङ्कुराश्छिन्ना अपि पुनः पुनः प्ररोहन्ति = अङ्कुराश्छिन्ना अपि प्ररोरुह्यन्ते । इति श्यामपाट्यां दर्शयित्वा 'पुनः पुनः' इति 'अतिशयः' इति च यङ्प्रत्ययो बोधयतीति शिक्षको बोधयेत् । इति यङन्त -शिक्षण -रीतिः । **अथ यङ्लुगन्त-शिक्षण-रीतिः**

अथ शिक्षकः प्रथममधोनिर्दिष्टरूपेणच्छात्रानुपदिशेत् । यथा- वत्साः ? यङ्प्रत्ययान्तप्रक्रिया तु सामान्यरीत्योपदिष्टैव । किन्तु कदाचिद् यङो लुकि यङ्लुगन्ता अपि धातवः प्रयुज्यन्ते । तथाहि- इति वदन् २-४-७४ यङो ऽचि च-सूत्रमुपदिशेत् ।

७-४-८३ दीर्घो- ३-१-२२ धातोरेकाचो... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-८४ नीग् वञ्चुँस्रंसुँध्वंसुँपतप दस्कन्दाम् ॥

वनीवच्यते । वनीवञ्चीति । इत्यादि ।

७-४-८५ नुँगतो ऽनुनासिकान्तस्य ॥ ८७

नुँगित्यनेनाऽनुस्वारो लक्ष्यते । स च पदान्तवद् वाच्यः । जङ्गम्यते, जंगम्यते । तपरकरणादौपदेशिकह्रस्वस्यैव । नेह– बाभाम्यते

७-४-८६ जपजभदहदशभञ्जपशां च ॥

जञ्जप्यते । जञ्जपीति ।

७-४-८७ चरफलोश्च ॥ ८९

७-४-८८ उत् परस्यातः ॥८९

चञ्चूर्यते, चंचूर्यते । चञ्चुरीति, चंचुरीति । पम्फुल्यते । पम्फुलीति । परस्येत्युक्तेरभ्यासस्य न ।

अत्र काशिका–उदिति तपरकरणं चञ्चूर्ति, पम्फुल्ति इत्यत्र लघूपधगुणनिवृत्त्यर्थम् । दीर्घस्याऽसिद्धत्वादिह लघुत्वं न निवर्तते । इति ।

७-४-८९ ति च ॥

चूर्तिः । फुल्तिः । प्रफुल्ताः सुमनसः ।

७-४-९० रीगृदुपधस्य च ॥९२,९१

वरीवृत्यते । नरीनृत्यते ।

(रीगृत्वत इति वक्तव्यम्)

वरीवृश्च्यते । परीपृच्छ्यते ।

७-४-९१ रुँग्रिकौ च लुकि ॥९२

वर्वृतीति, वरिवृतीति, वरीवृतीति, वर्वर्त्ति, वरिवर्त्ति, वरीवर्त्ति ।

(मर्मृज्यते मर्मृज्यमानास इत्युपसंख्यानम्)

(क) (ख)

७-४-५८ अत्र लोपः अभ्यासस्य ॥ ७-४-८२ गुणो यङ्लुकोः ॥ ७-४-८३ दीर्घः अकितः (क) (ख) ॥ इति । अकितः= किद्भिन्नस्य, (क) = अभ्यासस्य स्थाने, दीर्घः= दीर्घो भवति, (ख) = यङ्लुकोः= यङि परे यङ्लुकि च । १-२-२८ अच... सूत्रोद्बोधनपुरस्सरमर्थमिममुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा पापठच इति श्यामपाट्यां लिखित्वा धातुसंज्ञां ङित्वादात्मनेपदं शबादिकार्यं पररूपं चच्छात्रैः साधयेत् । पापठचते । अथा ऽ धोनिर्दिष्टरूपेण च्छात्रान् स्फुटं बोधयेत्–वत्साः ! यथा प्रेरणायां सर्वेभ्यो धातुभ्यो णिज् भवति, इच्छायां च सर्वेभ्यो धातुभ्यः सन् भवति, तथैव क्रियासमभिहारे (पौनः पुन्ये, अतिशये च) सर्वेभ्यो धातुभ्यो यङ् न भवति, किन्तु हलादेरेकाच एव धातोर्भवति नाऽन्येभ्यः । तेन पुनः पुनर्जागर्ति , अतिशयेन ईक्षते, इति विग्रहे जागृधातोः ईक्ष्धातोश्च न यङ् । पापठच इत्यतो लिँटि आमि 'पापठ्+य+आम्+ल्' इति श्यामपाट्यां लिखित्वा ६-४-४९ यस्य.... सूत्रमुपदिशेत् ।

७-४-८४ नीगव– वञ्चुँ....स्कन्दाम्= वञ्चुँप्रभृतीनाम्, अभ्यासस्य (७-४-५८) नीक्= नीगागमो भवति, यङ्लुकोः (७-४-८२) ।

७-४-८५ नुँग- अनुनासिकान्तस्य = अनुनासिकान्तस्य धातोः, अभ्यासस्य (७-४-५८) अतः =ह्रस्वाकारस्य, नुँक् =नुँक् आगमो भवति, यङ्लुकोः (७-४-८२) ।

७-४-८६ जप... पशाम्= जप्प्रभृतीनाम्, अभ्यासस्य (७-४-५८) नुँक् (७-४-८५) यङ्लुकोः (७-४-८२) ।

७-४-८७ चरफलोः= चर्फल्धात्वोः, अभ्यासस्य (७-४-५८) नुँक् (७-४-८५) यङ्लुकोः (७-४-८२) ।

७-४-८८ उत् प- चरफलोः (७-४-८७) परस्य=अभ्यासात् परस्य, अतः=ह्रस्वाकारस्य स्थाने उत्=उकारादेशो भवति, यङ्लुकोः (७-४-८२) ।

७-४-८९ ति च – चरफलोः (७-४-८७) अतः + उत् (७-४-८८) ति = तादौ प्रत्यये । प्रफुल्ताः ७-२-१६ आँदि··· इतीट् प्रतिषेधः ।

७-४-९० रीग्- ऋदुपधस्य =ह्रस्व ऋकारोपधस्य धातोः, अभ्यासस्य (७-४-५८) रीक्=रीगागमो भवति, यङ्लुकोः (७-४-८२) । **नरीनृत्यते** ८-४-३८ क्षुभ्ना··· इति णत्वप्रतिषेधः ।

७-४-९१ रुँग्रि- ऋदुपधस्य, (७-४-९०) धातोः, अभ्यासस्य (७-४-५८) रुँग्रिकौ= रुँक् रिँक् इत्यतौ, रीक् (७-४-९०) च भवन्ति, लुकि=यङ्लुकि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७-४-९२ ऋतश्च ॥
चर्करीति, चरिकरीति, चरीकरीति, चर्कर्ति, चरिकर्ति, चरीकर्ति । ऋत इति तपरकरणान्नेह-चाकरीति, चाकर्ति ।

७-४-९३ सन्वल् लघुनि चङ्परेऽनग्लोपे ॥९४, ९७, ९४
अचीकमत । अचूचुरत् । असिस्रवत्, असुस्रवत् । अनग्लोपे इत्युक्तेर्नेह- अचकथत् ।

७-४-९४ दीर्घो लघोः ॥
अचूचुरत् । अचीकमत । अबीभवत् । लघोरित्युक्तेर्नेह- अबिभ्रजत् । लघुनीत्यनुवृत्तेर्नेह- अररक्षत् । अनग्लोपे इत्यनुवृत्तेर्नेह-अचकथत् ।

७-४-९२ ऋतः= ऋदन्तस्य, धातोः अभ्यासस्य (७-४-५८) रुँग्रिकौ (७-४-९१) रीक् (७-४-९०) च + लुकि (७-४-९१) ।
७-४-९३ सन्व- ६-१-११ चङि- सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-
(क) (ख)
६-४-१ अङ्गस्य ॥ ७-४-५८ अत्र लोपः अभ्यासस्य ॥
७-४-९३ (क) (ख) सन्वत् लघुनि चङ्परे, अनग्लोपे ॥ इति । अत्र प्रथमं शिक्षकः स्वयं मनसा सूत्रस्थानि पदानि सम्यगालोडयेत् । यथा- लघुनि, चङ्परे, इति व्यधिकरणे सप्तम्यौ । चङ्परे इति- चङ् परो यस्मादिति बहुव्रीहिः । अन्यपदार्थश्च णिर्बोध्यः । अन्येषामभावात् । चङ्परक-श्रिद्रुसुवां संभवे ऽपि तत्पूर्वस्या ऽङ्गत्वा ऽसम्भवात् । एवं स्वयं विमृश्य सूत्रार्थं छात्रानुपदिशेत् । [चङ्परे + (क) = अङ्गस्य] = चङ्परक-णिपरकं यदङ्गं तत्सबन्धिनः, (ख) = अभ्यासस्य, लघुनि = लघ्वक्षरे परे, सन्वत्= सनीव कार्यं भवति, अनग्लोपे = णिनिमित्तकाऽग्लोपाऽभावे सति । मध्ये मध्ये साहाय्यं ददद् यथासम्भवं छात्रैरेव लक्षणसमन्वयं कारयितुं प्रयतेत । [द्वितीयावृत्तौ तु सूत्रस्याऽस्य व्याख्यानान्तरमप्युपदिशेत् । तथाहि- अत्र दीक्षितः- चङ्परे इति बहुव्रीहिः । स चाङ्गस्येति च द्वयमप्यावर्तते, इति । (क)= अङ्गस्य+चङ्परे= अङ्गसंज्ञानिमित्तं यश्चङ्परो णिस्तत्परके, लघुनि= लघ्वक्षरे परे, (क)= अङ्गस्य= अङ्गावयवस्य, (ख)= अभ्यासस्य, सन्वत्, शेषोऽर्थः प्राग्वत् । अस्मिन् पक्षे चङ्परकश्रिद्रुसुवां संभवेन तत्रा ऽतिव्याप्तिवारणाय अङ्गसंज्ञानिमित्तमिति विशेषणम् । अस्मिन् पक्षे चकासृँ (१०७४) धातोर्णिचि अचचकासत् इत्यादौ न सन्वद्भावः । पूर्वार्थस्वीकारे तु भवत्येव सन्वद्भावस्तत्रापि । अचीचकासत्, इत्यादि । द्वावपि पक्षौ शास्त्रसंमतौ । चङ्परे (=णौ) इत्यस्य तु पूर्वस्मिन्नर्थे ऽप्यावृत्तिः स्वीकार्या । अत एव अनग्लोपे इत्यस्य 'णिनिमित्तकाऽग्लोपाऽभावे सति' इत्यर्थ उक्तः । स चाऽर्थ :, चङ्परे (=णौ) + अनग्लोपे इत्यस्य बोध्यो नतु 'अनग्लोपे' इति मात्रस्य इति ।]
अथ ७-४-९४ दीर्घो ... सूत्रमुपदिशेत् ।
७-४-९४ दीर्घो-७-४-९३ सन्वल्लघुनि... सूत्रानन्तरं सूत्रमिदं पाठचम् । पूर्वसूत्रेऽनुवृत्तानि पदानि 'सन्वत्' इत्यंशवर्जं पूर्वसूत्रञ्चाऽत्राऽ नुवर्तन्ते । एवञ्चाऽर्थः फलति- चङपरे + अङ्गस्य (६-४-१)= चङ् परक- णिपरकं यदङ्गं तत् सम्बन्धिनः, लघोः = लघुसंज्ञकस्य, अभ्यासस्य (७-४-५८) स्थाने, लघुनि =लघ्वक्षरे परे, दीर्घः=दीर्घो भवति, अनग्लोपे (७-४-९३) [शिक्षकस्तु मनसा ऽवदध्यात्- पूर्वसूत्रवदत्रापि व्याख्यानान्तरमाश्रयणीयम् । तथाहि- अङ्गस्य + चङ्परे= अङ्गसंज्ञानिमित्तं यश्चङ्परो णिस्तत्परके लघुनि= लघ्वक्षरे परे, अङ्गस्य= अङ्गावयवस्य, लघोः= लघुसंज्ञकस्य, अभ्यासस्य स्थाने, दीर्घः, शेषोऽर्थः प्राग्वत् । अचचकासदित्यादौ न दीर्घः । पूर्वसूत्रे यन्मतं तदेवाऽत्राऽपि बोध्यं समानपदोपात्तत्वात् । अतो नाऽव्याप्त्यतिव्याप्तिदोषः । अत एव दीक्षितः- लघोरभ्यासस्य दीर्घः स्यात् सन्वद्भावविषये इति फलितार्थकथनपरां वृत्तिं पठति इति ।]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७–४–९५ अत् स्मृ–दृ–त्वर– प्रथ–म्रद– स्तृ– स्पशाम्॥ ९७
असस्मरत् । अददरत् ।

७–४–९६ विभाषा वेष्टिचेष्टचोः ॥
अववेष्टत्, अविवेष्टत् ।
अचचेष्टत्, अचिचेष्टत् ।

७–४–९७ ई च गणः ॥
अजगणत्,अजीगणत् ।

इति सप्तमाध्याये चतुर्थः पादः
इति सप्तमोऽध्यायः

इत्यर्थमुपदिश्य लक्षणसमन्वयं यथासंभवं छात्रैः कारयेत् । अथ अचू+चुर्+इ+अति इति श्यामपाटचां लिखित्वा ६-४-५१ णेर... ३-४-१०० इतश्च सूत्रे उद्बोधयेत् । अचूचुरत् । अचूचुरताम् । अचूचुरन् । अचूचुरत । इत्यादि । अथाऽधोनिर्दिष्टरूपेणच्छात्रा उपदेश्याः । वत्साः । ३-१-४८, ७-४-९३, ७-४-९४ सूत्राणि चुरादावेव प्रवर्तन्त इति न प्रमदितव्यम् । चुरादयः प्रायो ण्यन्ता एव भवन्तीति चुरादि-सिंहावलोकने तानि सूत्राणि प्रस्तुतानि । वस्तुतस्तु स्वे स्वे निमित्ते विद्यमानेऽन्यत्रापि प्रवर्तन्ते । यथा-अचीकमत । अत्र शिक्षकः तथाहि इति वदन् कम् कमुँ (४४२) धातोर् लुँङ्लकारविवक्षायाम् ३-१-३१ आया.... सूत्रमुपस्थापयेत् ।

**७–४–९५ अत् स्मृ - स्मृ... पशाम्= स्मृप्रभृतीनाम्, अभ्यासस्य (७-४-५८) अत्= अकारोदेशो भवति, चङ्परे+णौ (७-४-९३) ।

**७–४–९६ विभा - वेष्टि चेष्टयोः= वेष्ट् चेष्ट् धात्वोः, अभ्यासस्य (७-४-५८) विभाषा=वा, अत् (७-४-९५) चङ्परे + णौ (७-४-९३) ।

७–४–९७ ई च गणः= गण् धातोः, अभ्यासस्य (७-४-५८) अत् (७-४-९५) ई च= दीर्घेकारादेशश्च भवति, चङ्परे + णौ (७-४-९३) ।

इति सप्तमाध्याये चतुर्थः पादः

इति सप्तमोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अष्टमोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाऽष्टमाऽध्याये

प्रथम : पाद :

८-१-१ सर्वस्य द्वे ॥ १५

इत्यधिकृत्य ।

८-१-२ तस्य परमाम्रेडितम् ॥ ३

८-१-३ अनुदात्तं च ॥

भुङ्क्ते भुङ्क्ते । दिवे दिवे ।

८-१-४ नित्यवीप्सयोः ॥

पचति पचति । भुक्त्वा भुक्त्वा व्रजति । भोजं भोजं व्रजति । ग्रामो ग्रामो रमणीयः ।

८-१-५ परेर्वर्जने ॥

परिपरि त्रिगर्तेभ्यो वृष्टो देव : । वर्जन इत्युक्तेर्नेह - ओदनं परिषिञ्चति ।

(परेर्वर्जने ऽसमासे वेति वक्तव्यम्)

परिपरि त्रिगर्तेभ्यो वृष्टो देव :, परि त्रिगर्तेभ्यः । समासे तु वर्जनस्य तेनैवोक्तत्वान्न द्विरुच्यते । परित्रिगर्तं वृष्टो देवः ।

८-१-६ प्रसमुपोदः पादपूरणे ॥

प्रप्रायमग्नि : । संसमिद्युवसे । उपोप मे परामृश । किं मो दुदु हर्षसे । लोके त्वेवं विधप्रयोगाणामभावेन च्छन्दस्येवेदं विधानमित्याहुः ।

८-१-७ उपर्यध्यधस : सामीप्ये ॥

उपर्युपरि लोकम् । अध्यधि लोकम् । अधोऽधो लोकम् । सामीप्य इत्युक्तेर्नेह- भुव उपरि चन्द्रमा : ।

८-१-८ वाक्यादेरामन्त्रितस्यासूया-संमति-कोप-कुत्सन-भर्त्सनेषु ॥

सुन्दर ३ सुन्दर वृथा ते सौन्दर्यम् ।

देव ३ देव वन्द्यो ऽसि । दुर्विनीत ३ दुर्विनीत इदानीं ज्ञास्यसि । धानुष्क ३ धानुष्क वृथा ते धनु : । चौर ३ चौर घातयिष्यामि त्वाम् ।

८-१-१ सर्वस्य= पूर्णस्य पदस्य स्थाने, द्वे= द्वे भवतः (सम्पूर्णस्य पदस्य द्वित्वं भवति) ।

८-१-२ तस्य = द्विरुक्तस्य (प्रकृतत्वात्) परम्=परो भागः आम्रेडितम्= आम्रेडितसंज्ञको भवति ।

८-१-३ अनु- आम्रेडितम् (८-१-२) अनुदात्तम्= अनुदात्तं भवति । उदाहरणयोः ८-४-४ नित्य..... इति द्वित्वम् ।

८-१-४ नित्यवीप्सयोः= नित्ये वीप्सायां च, सर्वस्य द्वे (८-४-१) । अत्र काशिका- तिङ्क्षु नित्यता, अव्ययकृत्सु च, कुत एतत् आभीक्ष्ण्यमिह नित्यता । आभीक्ष्ण्यं च क्रियाधर्म : । यां क्रियां कर्ता प्राधान्येना ऽ नुपरमन् करोति तन्नित्यम् । पचति पचति । भुक्त्वा भुक्त्वा व्रजति । भोजं भोजं व्रजति । लुनीहि लुनीहीत्येवायं लुनाति । क्त्वाणमुँलोर्लोँटश्च द्विर्वचनापेक्षायामेव पौनः पुन्य- प्रकाशने शक्तिः यङ् तु तन्निरपेक्षः प्रकाशयति- पुनः पुनः पचति= पापच्यत इति । अथ सुप्सु वीप्सा । ननाभूतार्थवाचिनां शब्दानां यान्यधिकरणानि वाच्यानि तेषां क्रियागुणाभ्यां युगपत्प्रयोक्तुमिच्छा वीप्सा । ग्रामो ग्रामो रमणीयः । पुरुषः पुरुषो निधनमुपैति ।

८-१-५ परे- वर्जने= वर्जनेऽर्थे (द्योतकत्वेन) वर्तमानस्य, परेः= परिशब्दस्य, द्वे (८-१-१) । परित्रिगर्तम् १-२-१२ अप....इति समासः ।

८-१-६ प्रस.....दः= प्र सम् उप उद् इत्येतेषाम्, द्वे (८-१-१) पादपूरणे=पादपूरणे कर्तव्ये ।

८-१-७ उप-.....धसः= उपरि अधि अधस् इत्येतेषाम्, द्वे (८-१-१) सामीप्ये =सान्निध्येऽर्थे गम्ये । उदाहरणेषु २-३-२ कर्म.... सूत्रस्थेन उभ....श्लोकवार्तिकेन द्वितीया । अत्र काशिका- इह कस्मान्न भवति- उपरि शिरसो घटं धारयति?औत्तराधर्यमेव विवक्षितं न सामीप्यमिति द्विर्वचनं न भवतीति ।

८-१-८- वाक्यादेः=वाक्यादिस्थस्य, आमन्त्रितस्य, =आमन्त्रितसंज्ञकपदस्य, द्वे (८-१-१) असू....नेषु= असूयादिष्वर्थेषु गम्यमानेषु । गुणेषु दोषाविष्करणमसूया । आद्येषु चतुर्षूदाहरणेषु ८-२-१०३ स्वरि....सूत्रेण प्लुतः । अन्त्ये ८-२-९५ आम्रे....इति पर्यायेण प्लुतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-१-९ एकं बहुव्रीहिवत् ॥१०

एकैकमक्षरम् । एकैकयाऽऽ हुत्या । एकैकस्मै देहि ।

८-१-१० आबाधे च ॥

गतगत: । गतगता ।

८-१-११ कर्मधारयवदुत्तरेषु ॥ १५

८-१-१२ प्रकारे गुणवचनस्य ॥

पटुपटु: । पटुसदृश इत्यर्थ: ।

(आनुपूर्व्ये द्वे वाच्ये)

मूले मूले स्थूल: ।

(सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्ध:)

सर्प: सर्प: । बुध्यस्व बुध्यस्व । सर्प: सर्प: सर्प: । बुध्यस्य बुध्यस्य बुध्यस्व ।

(क्रियासमभिहारे द्वे वाच्ये)

लुनीहि लुनीहीत्येवायं लुनाति ।

(डाचि बहुलं द्वे भवत:)

पटपटा करोति । बहुलग्रहणादव्यक्तानुकरण-डाच्येव द्विर्वचनमिष्यते । तेनेह न - द्वितीया करोति । तृतीया करोति ।

(कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्)

बहुलग्रहणादन्यपरयोर्न समासवत् । इतरशब्दस्य तु नित्यम् ।

(असमासवद्भावे पूर्वपदथस्य सुँप: सुँर्वक्तव्य:)

अन्योऽन्यं विप्रा नमन्ति । अन्योऽन्यस्मै दत्तम् । अन्योऽन्येषाम् । एवं परस्परम् । इतरेतरम् । इतरेतरेण ।

(स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेरामभावो वा वक्तव्य:)

अन्योऽन्याम्, अन्योऽन्यम्, परस्पराम्, परस्परम् इतरेतराम्, इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयत:। दलद्वये टाबभाव: क्लीबे चाऽद्ड् विरह: स्वमो: । समासे सोरलुक् चेति सिद्धं बाहुलकात् त्रयम् ॥

८-१-१३ अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् ॥

प्रियप्रियेण ददाति । सुखसुखेन ददाति । प्रियेण ददाति । सुखेन ददाति । अखिद्यमानो ददातीत्यर्थ: ।

८-१-१४ यथास्वे यथायथम् ॥

यथायथम् । यथास्वभावम्, यथात्मीयमिति वा ।

८-१-९ एकम्= द्विरुक्त (प्रकरणगम्यो ऽयमर्थ:) एकशब्द:, द्वे (८-१-१) बहुव्रीहिवत्= बहुव्रीहिवच्च भवति । उदाहरणेषु ८-१-४ नित्य.... इति द्वित्वम् । बहुव्रीहिवद्भावात् सुँब्लोपपुंवद्भावौ । पूर्वभागे पुंवद्भावादवग्रहे विशेष: । **एकैकस्मै** १-१-२७ विभाषा... इत्यतोऽनुवृत्त्यैव सिद्धे १-१-२८ न ब .... इत्यत्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थम् । तेना ऽतिदिष्टबहुव्रीहौ सर्वनामसंज्ञा भवत्येवेति काशिकाऽभिप्राय:। दीक्षितस्तु बहुव्रीह्यर्थे ऽलौकिके विग्रहे निषेधकं न तु बहुव्रीहावितीहातिदेशशङ्कैव नास्तीति वर्णयति ।

८-१-१० आबाधे=पीडायाम्, द्वे (८-१-१) बहुव्रीहिवत् (८-४-९) च । पीडा =प्रयोक्तृधर्म:, नत्वभिधेयधर्म: ।

८-१-११ कर्म- उत्तरेषु=इत उत्तरेषु द्विर्वचनेषु, कर्मधारयवत्= कर्मधारयवत् इत्यधिक्रियते ।

८-१-१२ प्रकारे= सादृश्ये गम्ये, गुणवचनस्य = गुणवाचिन: पदस्य, द्वे (८-१-१) कर्मधारयवत् (८-१-११) च । **आनु-** तुल्यजातीयानां भिन्नानां वीप्सा भवति यथा- ग्रामाणाम् । वेणुप्रभृतीनां मूलं तु मुख्यमेकमेवेति नात्र वीप्सा । वार्तिकेषु कर्मधारयवत् (८-१-११) इति न सम्बध्यते ऽतो न सुँब्लुक् । **क्रिया** ८-१-४ नित्य....इति सिद्धे भृशार्थमिदम् । **डाचि**= डाच्प्रत्यये विवक्षिते । उदाहरणे ६-१-९५ अव्य.... इति डाच् । ६-१-९६ नाम्रे....सूत्रस्थ- नित्य....इति वार्तिकेन पररूपम् । ६-४-१४३ टे: इति टिलोप: । **अस-परस्परम्** ८-३-४८ कस्का...... इति स: ।

८-१-१३ अकृच्छ्रे -कृच्छ्रम्= दु:खम् । तदभावोऽकृच्छ्रम्= अकृच्छ्रेऽ र्थे वर्तमानयो:, प्रियसुखयो:= प्रियसुखपदयो:, अन्यतरस्याम्=वा, द्वे (८-१-१) कर्मधारयवत् (८-१-११) च ।

८-१-१४ यथास्वे- स्वशब्द आत्म (स्वभाव); वाची आत्मीयवाची च । आत्मा यत्नो धृतिर्बुद्धि: स्वभावो ब्रह्म वर्ष्म च, इत्यमर: । तेन यथाशब्दस्य वीप्सायामव्ययीभाव:)= यो य आत्मा, यद् यदात्मीयं तस्मिन्नर्थे, 'यथायथम्' इति = यथाशब्दस्य द्वित्वं क्लीबत्वं च निपात्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-१-१५ द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगा ऽभिव्यक्तिषु ॥

द्वन्द्वं मन्त्रयते । आचतुरं हीमे पशवो द्वन्द्वं मिथुनीयन्ति। द्वन्द्वं व्युत्क्रान्ताः। द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति। द्वन्द्वं सङ्कर्षणवासुदेवौ। योगविभागादन्यत्रा ऽपि द्वन्द्व इष्यते- द्वन्द्वं युद्धं वर्तते ।

८-१-१६ पदस्य ॥ ८-३-५४

८-१-१७ पदात् ॥ ६८

८-१-१८ अनुदात्तं सर्वमपादादौ ॥ ७४

८-१-१९ आमन्त्रितस्य च ॥

पचसि देवदत्त ।

८-१-२० युष्मदस्मदोः षष्ठी- चतुर्थी- द्वितीया- स्थयोर्वांनावौ ॥ २६

८-१-२१ बहुवचनस्य वस्नसौ ॥

८-१-२२ तेमयावेकवचनस्य ॥ २३

८-१-१५ द्वन्द्वम्= द्वन्द्व इति निपात्यते- द्विशब्दस्य द्वित्वं (कर्मधारयवद्भावे सुँपो लुकि) पूर्वपदेकारस्याम् उत्तरपदेकारस्याऽत् एकवद्भावश्च, रहस्य..... व्यक्तिषु= रहस्यादिष्वर्थेषु । रहस्यं द्वन्द्वशब्दस्य वाच्यम् । इतरे विषयभूताः । **द्वन्द्वं मन्त्रयते** द्वौ द्वौ भूत्वा रहस्यं मन्त्रयेते इत्यर्थः। मर्यादा= स्थित्यनतिक्रमः । **आचतुरं मिथुनीयन्ति** अत्र तत्त्वबोधिनी- २-१-१३ आङ्म....इत्यव्ययीभावः। ५-४-१०७ अव्ययी...इति टच् । चतुः शब्दोऽत्र चतुर्णां पूरणे दृष्टव्यः। आचतुर्थादित्यर्थ इति । अत्र पदमञ्जरी- मिथुनशब्देन मैथुनं तत्कर्म लक्ष्यते, तदिच्छतीति क्यच् इति । माता पुत्रेण मिथुनं गच्छति, पौत्रेण, प्रपौत्रेणापीति मर्यादार्थः। व्युत्क्रमणम्= पृथगवस्थानम्। **द्वन्द्वं व्युत्क्रान्ताः** द्वौ पक्षौ भूत्वा पृथगवस्थिता इत्यर्थः। द्वन्द्वं न्यञ्चि= न्यग्भूतानि= अवाग्बिलानि, यज्ञपात्राणि प्रयुनक्ति । द्वे द्वे इत्यर्थः । द्वन्द्वं सङ्कर्षणवासुदेवौ साहचर्येणा ऽभिव्यक्तावित्यर्थः ।

८-१-१६ पदस्य - ८-३-५५ अप.... इत्यतः प्रागिदमधिक्रियते ।

८-१-१७ पदात् - ८-१-६९ कुत्स..... इत्यत : प्रागिदमधिक्रियते ।

८-१-१८ अनु- अपादादौ= अपादादौ वर्तमानम्, सर्वम्= कृत्स्नम्, अनुदात्तम्= अनुदात्तं भवति । आपाद-परिसमाप्तेरिदमधिक्रियते। अत्र काशिका-सर्वग्रहणं सर्वमनूद्यमानं विधीयमानं चानुदात्तं यथा स्यादितीति।

८-१-१९ आम- पदात् (८-१-१७ परस्य) अपादादौ (८-१-१८ वर्तमानस्य) आमन्त्रितस्य = आमन्त्रितसंज्ञकपदस्य, सर्वम्+अनुदात्तम् (८-१-१८)। ६-१-१९३ आम......इत्याद्युदात्तत्वे प्राप्ते वचनम् ।

८-१-२० युष्म- ७-१-३३ साम.... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्राऽधो = निर्दिष्टरूपेण सूत्राणि प्रस्तुवीयात् । यथा-

(क) (ख) (ग)

८-१-१५ पदात् ।। ८-१-२० (क) युष्मदस्मदोः षष्ठी- चुतुर्थी- द्वितीयास्थयोर्वांनावौ ।। ८-१-२१ (क) (ग) बहुवचनस्य (ख) वस्नसौ । (घ)

८-१-२२ (क) तेमयौ (ग) एकवचनस्य (ख) ।। ८-१-२३ (क) त्वामौ द्वितीयायाः (घ) (ख) ॥ इति । अथ प्रथमं ८-१-२० सूत्रार्थः (क) = पदात् =पदात् परयोः, अपादादौ(८-१-१८)=अपादादौ स्थितयोः (ग)=षष्ठी-चतुर्थी-द्वितीयास्थयोः= षष्ठीचतुर्थीद्वितीयाविभक्तिविशिष्टयोः, युष्मदस्मदोः= युष्मदस्मच्छब्दयोः स्थाने, अनुदात्तम् (८-१-१८)=अनुदात्तौ, वानावौ= वाम् नौ इत्येतावादेशौ भवतः । इति । अथ ८-१-२१ सूत्रार्थः (क) = पदात्=पदात् परयोः, अपादादौ (८-१-१८) = अपादादौ स्थितयोः, (ग) + बहुवचनस्य = षष्ठीचतुर्थीद्वितीयाविभक्तिसम्बन्धि-बहुवचनान्तयोः, (ख)= युष्मदस्मदोः, अनुदात्तम् (८-१-१८)= अनुदात्तौ, वसनसौ=वस् नस् इत्यादेशौ भवतः । इति । अथ ८-१-२२ सूत्रार्थः- (क) पदात्, अपादादौ (८-१-१८)= अपादादौ स्थितयोः, (ग) + एकवचनस्य= षष्ठीचतुर्थीद्वितीयाविभक्ति-सम्बन्ध्येकवचनान्तयोः, (ख) = युष्मदस्मदोः, अनुदात्तम् (८-१-१८) अनुदात्तौ, तेमयौ= ते मे इत्येतावादेशौ भवतः। इति । अथ ८-१-२३ सूत्रार्थः- (क) = पदात्, (द्वितीयायाः+ [(घ)=एकवचनस्य]= द्वितीयाविभक्तिसम्बन्ध्येकवचनान्तयोः, (ख) = युष्मदस्मदोः अनुदात्तम् (८-१-१८)= अनुदात्तौ, त्वामौ = त्वा मा इत्येतावादेशौ भवतः । इति । अथ ६-१-८५ वृद्धि....सूत्रे निर्दिष्टं बाध्यबाधकदृष्टान्त-मुद्बोधयता शिक्षकेण प्रकृतेषु चतुर्षु सूत्रेषु बाध्यबाधकता स्फुटं प्रकाशयितव्या। यथा बहुवचनान्तेषु ८-१-२० युष्म...... सूत्रं ८-१-२१ बहु..... सूत्रेण बाध्यते। षष्ठीचतुर्थ्येक=वचनान्तेषु। ८-१-२२ तेम...सूत्रेण बाध्यते। द्वितीयैकवचनान्तयोः ८-१-२० सूत्रं ८-१-२२ तेम..सूत्रेण बाध्यते तच्च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-१-२३ त्वामौ द्वितीयायाः ॥

श्रीशस्त्वा ऽवतु मा ऽपीह दत्तात् ते मे ऽ मि शर्म सः । स्वामी ते मे ऽ पि स हरिः पातु वामपि नौ विभुः ॥ सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः। सो ऽ व्याद् वो न : शिवं वो नो दद्यात् सेव्यो ऽत्र वः स नः ॥(

अपादादावित्युक्तेर्नेह- रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ।

स एव नाथो भगवानस्माकं शत्रुमर्दनः ॥

पादग्रहणेना ऽत्र ऋक्पादः श्लोकपादश्च गृह्यते। स्थग्रहणं श्रूयमाणविभक्तिकस्यैव स्थानित्वलाभार्थम् । तेनेह न-इति युष्मत्पुत्रो ब्रवीति । इत्यस्मत्पुत्रो ब्रवीति ।

(समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः) ओदनं पच तव भविष्यति । ओदनं पच मम भविष्यति । इह तु स्यादेव- शालीनां ते ओदनं दास्यामि ।

(एते वांनावादय आदेशा अनन्वादेशे वा वक्तव्याः) अन्वादेशे तु नित्यं भवन्ति । धाता ते भक्तो ऽस्ति, धाता तव भक्तो ऽस्तीति वा । तस्मै ते नमः।

८-१-२४ न च वा हाहैवयुक्ते ॥

हरिस्त्वां मां च रक्षतु । कथं त्वां मां वा न रक्षेत् । ग्रामस्तव ह स्वम् । ग्रामस्तवाह स्वम् । ग्रामस्तवैव स्वम् । युक्तग्रहणात् साक्षाद्योगे ऽयं प्रतिषेध : । परम्परासम्बन्धे तु स्यादेवा ऽऽ देशः । हरो हरिश्च मे स्वामी ।

८-१-२३ त्वामौ...... सूत्रेण बाध्यते । इति । अतो द्विवचनान्तेष्वेव ८-१-२० युष्म....सूत्रस्य वस्तुतः प्रवृत्तिरिति । अथोदाहरणानि श्यामपाटचां लिखेद् । यथा-

स्थानिपदानि	आदेशपदानि	स्थानिपदानि	आदेशपदानि
गुरु : त्वां पाठयति =	गुरुः त्वा पाठयति ।	गुरु : मां पाठयति =	गुरुः मा पाठयति ।
गुरु : तुभ्यं कलमं ददाति=	गुरुः ते कलमं ददाति ।	गुरुः मह्यं कलमं ददाति=	गुरुः मे कलमं ददाति ।
इदं तव पुस्तकम्=	इदं ते पुस्तकम् ।	इदं मम पुस्तकम्=	इदं मे पुस्तकम् ।
गुरु : युवां पाठयति=	गुरुः वां पाठयति ।	गुरुः आवाम् पाठयति=	गुरुः नौ पाठयति ।
गुरुः युवाभ्यां कलमं ददाति=	गुरुः वां कलमं ददाति ।	गुरुः आवाभ्यां कलमं ददाति=	गुरु : नौ कलमं ददाति ।
इदं युवयोः पुस्तकम्=	इदं वां पुस्तकम् ।	इदम् आवयोः पुस्तकम्=	इदं नौ पुस्तकम् ।
गुरुः युष्मान् पाठयति=	गुरुःवः पाठयति ।	गुरुः अस्मान् पाठयति=	गुरुः नः पाठयति ।
गुरुः युष्भभ्यं कलमं ददाति=	गुरुः वः कलमं ददाति ।	गुरु : अस्मभ्यं कलमं ददाति=	गुरु : नः कलमं ददाति ।
इदं युष्माकं पुस्तकम्=	इदं वः पुस्तकम् ।	इदम् अस्माकं पुस्तकम्=	इदं नः पुस्तकम् । इति ।

अत्र मध्ये मध्ये निर्दिशता शिक्षकेण च्छात्रैर्लक्षणसमन्वयः कारयितव्यः । अग्रे चच्छात्राः सावधानाः कार्याः । यथा- अयि वत्साः ? पदात् परतस्त्येष्वेव त्वाम् माम् इत्यादिषु आदेशा भवन्ति नान्यथा । अत एव त्वा गुरुः पाठयति । ते गुरुः कलमं ददाति । इत्यादीनि वाक्यान्यशुद्धानि, पदात् परत्वाभावात् । अतस्तत्र त्वां गुरुः पाठयति । तुभ्यं गुरुः कलमं ददाति इत्यादीन्येव वाक्यानि शुद्धानि भवन्ति ।

विशेष- शिक्षा

अयि वत्साः सावधानं शृणुत अवधत्त च इति शिक्षको ब्रुवन्नधोनिर्दिष्टरूपेण च्छात्रान् सार्वत्रिकान् नियमान् स्फुटं बोधयेत् । यथा- पूर्वम् १-१-५१ अलो..... सूत्रमुपदिष्टम् । अत एव च तत्रैव हे गौरि इत्यत्र नदी (गौरी) शब्दस्य स्थाने प्राप्तो ह्रस्वो ऽन्त्यस्येकारस्य स्थाने जातः । एवमेव ७-३-१११ घेर्ङि....सूत्रेण मुनये इत्यत्र घि (मुनि) शब्दस्य स्थाने प्राप्तो गुणो ऽन्त्येकारस्य स्थाने जातः । ७-२-१०२ त्यदा..... सूत्रेण त्यदादीनां स्थाने विधीयमानो ऽप्यकारो ऽन्त्यस्यैव स्थाने जातः । अयि वत्साः ? एष विषयस्तु युष्माभिरपि ज्ञातचर एव । अथा ऽत्र विषये युष्माकं मनसि सन्देहमुत्पादयामि । यथा- ७-२-१०३ किमः.... सूत्रेण विधीयमानः कादेशः सम्पूर्णस्य स्थाने कथमभूत् । कथं तत्र १-१-५१ अलो....सूत्रस्य न प्रवृत्तिः ? इति प्रथमो ऽयं सन्देहविषयः । अथ च १-१-५३ आदेः.... सूत्रमुपदिष्टम् । अत एव च तत्रैव युष्मान् अस्मान् इत्यत्रः शसः (शस् अस् इत्यस्य) स्थाने विधीयमानो नकार आदेः (अकारस्य) स्थाने जातश्चेत् ७-१-३० भ्यसो....... सूत्रेण भ्यसः स्थाने विहितो ऽ भ्यमादेशः कथमादेर्ना ऽभूत् । द्वितीयो ऽयं सन्देहविषय : । एवमेव षष्ठी-चतुर्थी- द्वितीयाविभक्ति-विशिष्टयोर्युष्मदस्मदोः स्थाने विधीयमाना आदेशाः कथं सर्वस्य स्थाने जाताः ? इत्यादि । अथ च्छात्रेषु साकाङ्क्षेषु शिक्षकः १-१-५४ अनेकाल्.....सूत्रमुपदिशेत् ।

८-१-२४ न च - चवा....युक्ते= च वा ह अह एव इत्येतैर्युक्ते, न= युष्मदस्मदोःस्थाने वांनावादय आदेशा न भवन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-१-२५ पश्यार्थैश्चानालोचने ॥
चेतसा त्वां समीक्षते । परम्परासम्बन्धे ऽप्ययं प्रतिषेधः । भक्तस्तव रूपं ध्यायति । आलोचने तु भक्तस्त्वा पश्यति चक्षुषा ।

८-१-२६सपूर्वायाः प्रथमाया विभाषा ॥
भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम् । हरिस्त्वा त्रायते स मा इति वा ।

८-१-२७ तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः॥
जल्पति गोत्रम् । जल्पति जल्पति गोत्रम् । कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणं तेना ऽन्यत्रापि गोत्रादिग्रहणे कुत्सनादावेव कार्यं भवति । तेन देवः पचति गोत्रम् इत्यत्र ८-१-५७ चन.....इति कुत्सनादावेवा ऽनुदात्तप्रतिषेधः ।

८-१-२८ तिंङ्ङतिङः ॥६६
देवदत्तः पचति ।

८-१-२९ न लुँट् ॥६६
श्वः कर्ता । श्वः कर्तारौ ।

८-१-३० निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण् कच्चिदयत्रयुक्तम् ॥
यत् करोति । यदि करोति । हन्त करोति । कुवित् करोति । नेज्जिह्मायन्तो नरकं पताम । स चेद् भुङ्क्ते । अयं च मरिष्यति । कच्चिद् भुङ्क्ते । यत्र भुङ्क्ते ।

८-१-३१ नह प्रत्यारम्भे ॥
नह भोक्ष्यसे । प्रत्यारम्भे इत्युक्तेर्नेह प्रतिषेधः- नह वै तस्मिँश्च लोके दक्षिणामिच्छन्ति ।

८-१-३२ सत्यं प्रश्ने ॥
सत्यं भोक्ष्यसे ॥
प्रश्ने इत्युक्तेर्नेह प्रतिषेधः- सत्यं वक्ष्यामि नानृतम् ।

८-१-२५ **पश्या-** दृशिरत्र ज्ञानार्थकः, अनालोचने इति प्रतिषेधात् । पश्येति च भावशप्रत्ययान्तो बाहुलकात् । पश्यार्थे : + युक्ते (८-१-२४)= ज्ञानार्थकधातुभिर्युक्ते, न (८-१-२४) अनालोचने= अचाक्षुषे ।

८-१-२६ **सपूर्वायाः** = विद्यमानपूर्वात्, प्रथमाया : = प्रथमान्तात्, पदात् (८-१-१७) परयोः, युष्मदस्मदोः (८-१-२०) विभाषा = अन्वादेशेऽपि वां नावादयो विकल्पेन भवन्ति ।

८-१-२७ **तिङो** तिङः = तिङन्तात्, पदात् (८-१-१७) पराणि, गोत्रादीनि = गोत्रप्रभृतिगणपठितपदानि, कुत्सनाभीक्ष्ण्ययोः = कुत्सने आभीक्ष्ण्ये चार्थे वर्तमानानि, अनुदात्तानि (८-१-१८) । अत्र सूत्रे तिङो गोत्रादीनि इत्येको योगो ऽनुदात्तविधानार्थः । कुत्सनाभीक्ष्ण्योः इति द्वितीयो योगः । अत्र गोत्रादीनि इत्यनुवर्तते । तथा च 'अत्र शास्त्रे गोत्रादीनि कुत्सनाभीक्ष्ण्यविषयाणि' इत्यर्थः संभवति । तेन मूलोक्तं सिध्यति । उदाहरणयोः आद्ये- भोजनाद्यर्थं गोत्रं ख्यापयति । द्वितीयस्मिन्- विवाहादौ पुनः पुनर्गोत्रं ख्यापयति । अत्र कुत्साया अभावात् आभीक्ष्ण्यम् । **पचति गोत्रम्** पचिर्व्यक्तीभावे, यथा लोकपक्तिरितीति पदमञ्जरी ।

८-१-२८ **तिङ्ङ** - अतिङः = अतिङन्तात्, पदात् ८-१-१७)= पदात् परम्, तिङ्=तिङन्तं पदम्, अनुदात्तम् (८-१-१८) ।

८-१-२९ **न लुँट्-** लुँट्= लुँट्सम्बन्धि, तिङ् (८-१-२८) न= अनुदात्तं न भवति । **श्वः कर्ता** ६-१-१८१ तास्य..... इति तिङो ऽ नुदात्तत्वे टिलोपे सति ६-१-१५६ अनु...... इत्याकार उदात्तः । **श्वः कर्तारौ** पूर्ववत् तिङो ऽनुदात्तत्वे तासिरुदात्तोऽत्र ।

८-१-३० **निपातैः**= निपातसंज्ञकैः, यद्.....युक्तम्= यद्यदिप्रभृतिभिर्युक्तम्, तिङ् (८-१-२८) न (८-१-२९) । यदि **करोति** इदंमुकारस्योदात्तत्वान्मध्योदात्तम् । **नरकं पताम** ६-१-१८१ तास्य....इत्यनुदात्तत्वे कृते धातुस्वरेणाद्युदात्तम् । **स चेद् भुङ्क्ते** पूर्ववत् तिङो ऽनुदात्तत्वे श्नमोऽल्लोपे ६-१-१५६ अनु.....इत्युदात्तत्वम् । **अयं च मरिष्यति** णिद्विशिष्टोऽयं चशब्दश्चेदर्थे वर्तते । अयं चेन्मरिष्यतीत्यर्थः ।

८-१-३१ **नह-** नह इति निपातसमुदायो निषेधे वर्तते । नह= नहशब्देन, युक्तम् (८-१-३०) तिङ् (८-१-२८)न (८-१-२९) प्रत्यारम्भे = प्रतिषेधयुक्तारम्भे । भुङ्क्ष्वेति कर्तव्यतयोपन्यस्तस्य भोजनादेरवज्ञाते सति तस्याऽवज्ञातुरुपालिप्सया तस्यैव भोजनादेः प्रतिषेधेन सम्बन्धः प्रत्यारम्भः । **भोक्ष्यसे** से इति ६-१-१८१ तास्य...... इत्यनुदात्तम् । स्यः प्रत्ययस्वरेणोदात्तः ।

८-१-३२ **सत्यम्**=सत्यम् इत्यनेन,. युक्तम् (८-१-३०) तिङ् (८-१-२८) न (८-१-२९) प्रश्ने=पृच्छायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-१-३३ अङ्गाप्रातिलोम्ये ॥ ३४

अङ्ग पठ। अप्रातिलोम्ये इत्युक्तेर्नेह प्रतिषेध :- अङ्ग कूज वृषल इदानीं ज्ञास्यसि जाल्म।

८-१-३४ हिं च ॥ ३५

स हि पठ। प्रातिलोम्ये तु न प्रतिषेधः- स हि कूज वृषल इदानीं ज्ञास्यसि जाल्म।

८-१-३५ छन्दस्यनेकमपि साकाङ्क्षम् ॥

अनृतं हि मत्तो वदति, पाप्मा एनं विपुनाति।

८-१-३६ यावद्यथाभ्याम् ॥ ३८

यावद् भुङ्क्ते। यथा भुङ्क्ते।

८-१-३७ पूजायां नानन्तरम् ॥ ३८

यावत् पचति शोभनम्। यथा पचति शोभनम्। पूजायामित्युक्तेरिह प्रतिषेध एव- यावद् भुङ्क्ते यथा भुङ्क्ते। अनन्तरमित्युक्तेरिहापि प्रतिषेध एव- यावद् देवदत्तः पचति शोभनम्। यथा देवदत्तः करोति चारु।

८-१-३८ उपसर्गव्यपेतं च ॥

यावत् प्रपचति शोभनम्। यथा प्रपचति शोभनम्। शब्दान्तरव्यवधाने तु प्रतिषेध एव- यावद् देवदत्तः प्रपचति शोभनम्। यथा विष्णुमित्रः प्रकरोति चारु।

८-१-३९ तुपश्यपश्यताहैः पूजायाम् ॥४०

माणवकस्तु भुङ्क्ते शोभनम्। पश्य माणवको भुङ्क्ते शोभनम्। पश्यत माणवको भुङ्क्ते शोभनम्। अह माणवको भुङ्क्ते शोभनम्। पूजायामित्युक्तेर्नेह प्रतिषेधः-पश्य मृगो धावति।

८-१-४० अहो च ॥ ४१

अहो देवदत्तः पचति शोभनम्।

८-१-४१ शेषे विभाषा ॥ ४२

कटमहो करिष्यसि।

८-१-३३ अङ्ग = अङ्ग इत्यनेन, युक्तम् (८-१-३०) तिङ् (८-१-२८) न (८-१-२९) अप्रातिलोम्ये= आनुलोम्ये। **पठ** धातुस्वरेणाद्युदात्तमेतत्। **कूज** कूजनमनभिमतमसौ कुर्वन् प्रतिलोमो भवति।

८-१-३४ हि= हि इत्यनेन, युक्तम् (८-१-३०) तिङ् (८-१-२८) न (८-१-२९) अप्रातिलोम्ये (८-१-३३)।

८-१-३५ छन्द- हि (८-१-३४) युक्तम् (८-१-३०) तिङ् (८-१-२८) साकाङ्क्षम् =आकाङ्क्षायुक्तम्, अनेकम्+अपि= अनेकमेकमपि न (८-१-२९) छन्दसि = वेदे। अत्र पदमञ्जरी-अत्र हेतुहेतुमद्भावस्य द्योतको हिरित्यनेकमपि तिङन्तं हियुक्तं भवति। तत्र पूर्वेण सर्वस्य निघातप्रतिषेधे प्राप्ते क्वचिदनेकस्य क्वचिदेकस्य यथा स्यादिति वचनमितीति। उदाहरणे तिङन्तद्वयमपि न निहन्यते। अत्र द्वयोरपि तिङन्तयोर्हेतुहेतुमद्भावे साकाङ्क्षता। पाप्मा= मद उच्यते। यस्मादनृतं मत्तो वदति तस्मात् पाम्मा एनं विपुनाति= शुद्धिमापादयति, मत्तस्यानृतमदोष इति कृत्वेति- न्यासः।

८-१-३६ याव- यावद्यथाभ्याम्,= यावत् यथा इति शब्दाभ्याम्, युक्तम् (८-१-३० तिङ् (८-१-२८) न (८-१-२९)।

८-१-३७ पूजा- यावद्यथाभ्याम् (८-१-३६) युक्तम् (८-१-३०) अनन्तरम्= अव्यवहितम्, तिङ् (८-१-२८) न= प्रतिषिद्धानुदात्तं न भवति, अर्थादनुदात्तं भवति, पूजायाम्= पूजायां गम्यमानायाम्। **प्रतिषेध एव** ८-१-३६ याव.... इत्येन।

८-१-३८ उप- यावद्यथाभ्याम् (८-१-३६) युक्तम् (८-१-३०) उपसर्गव्यपेतम् = उपसर्गव्यवहितम्, तिङ् (८-१-२८) पूजायां +न (८-१-३७)। पूर्वमनन्तरमित्युक्तम्। उपसर्गव्यवधानार्थमिदम्।

८-१-३९ तु पश्य...ताहैः= तुप्रभृतिभिः, युक्तम् (८-१-३०) तिङ् (८-१-२८) न (८-१-२९)=अनुदात्तं न भवति, पूजायाम् = पूजायां गम्यमानायाम्। अत्राऽनुवर्तमानो न शब्द : ८-१-२९ न लुट् इत्यतो ऽनुवृत्तः। न तु ८-१-३७ पूजा.....इत्यतो ऽनुवृत्तः। अत एव पूजायामित्यनुवर्तमानेऽपि पुनः पूजायामित्युक्तम्। तद्धि अनुदात्तनिषेधप्रतिषेधकनकारेण सम्बद्धम्। प्रकृते च अनुदात्तप्रतिषेधकोऽपेक्ष्यत इति।

८-१-४० अहो=अहो इत्यनेन, युक्तम् (८-१-३०) तिङ् (८-१-२८) न (८-१-२९) पूजायाम् (८-१-३९)।

८-१-४१ शेषे- अहो (८-१-४०) युक्तम् (८-१-३०) तिङ् (८-१-२८) विभाषा=वा, न (८-१-२९) शेषे= अपूजायाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-१-४२ पुरा च परीप्सायाम् ॥

अधीष्व माणवक पुरा विद्योतते विद्युत्। परीप्सायामित्युक्तेर्नेहप्रवर्तते- न तेन स्म पुराधीयते।

८-१-४३ नन्वित्यनुज्ञैषणायाम् ॥

ननु गच्छामि भोः। अनुज्ञैषणायामित्युक्तेर्नेह- अकार्षीः कटं देवदत्त ? ननु करोमि।

८-१-४४ किं क्रियाप्रश्ने ऽनुपसर्गमप्रतिषिद्धम् ॥४५

किं देवदत्तः पचति आहोस्विद् भुङ्क्ते। क्रियाप्रश्ने इत्युक्तेर्नेह- किं देवदत्त ओदनं पचति आहोस्विच्छाकम्। अनुपसर्गमित्युक्तेर्नेह- किं देवदत्तः प्रपचति आहोस्वित् प्रकरोति। अप्रतिषिद्धमित्युक्तेर्नेह-किं देवदत्तो न पठति आहोस्विन्न करोति।

८-१-४५ लोपे विभाषा ॥

देवदत्तः पचति, आहोस्वित् पठति।

८-१-४६ एहि मन्ये प्रहासे लृँट् ॥

एहि मन्ये ओदनं भोक्ष्यसे भुक्तं तत्वतिथिभि :। प्रहासे इत्युक्तेर्नेह- एहि मन्यसे ओदनं भोक्ष्ये इति सुष्ठु मन्यसे। ८-१-५१ गत्य.... इत्येव सिद्धे नियमार्थो ऽयमारम्भः। एहि मन्ये युक्ते प्रहास एव नान्यत्र। एहि मन्यसे ओदनं भोक्ष्ये।

८-१-४७ जात्वपूर्वम् ॥४९

जातु भोक्ष्यसे। अपूर्वमित्युक्तेर्नेह- कटं जातु करिष्यति।

८-१-४८ किंवृत्तं च चिदुत्तरम् ॥

कश्चिदधीते। केनचित् करोति। कस्मैचिद् ददाति। कतरश्चित् करोति। कतमश्चिद् भुङ्क्ते। चिदुत्तरमित्युक्तेर्नेह- को भुङ्क्ते अपूर्वमित्यनुवृत्तेर्नेह- देवदत्तः किञ्चित् पठति।

८-१-४९ आहो उताहो चानन्तरम् ॥ ५०

आहो भुङ्क्ते। उताहो भुङ्क्ते। अपूर्वम् इत्यनुवृत्तेरिह ८-१-२८ तिङ्ङ...इति निघात एव- देवदत्त आहो भुङ्क्ते। देवदत्त उताहो भुङ्क्ते। अन्तरे = व्यवहिते तु-

---

८-१-४२ पुरा=पुरा इत्यनेन, युक्तम् (८-१-३०) तिङ् (८-१-२८) विभाषा (८-१-४१) न (८-१-२९) परीप्सायाम्= त्वरायाम्। अधीष्व माणवक त्वरितमधीष्वेत्यर्थ :। पुराशब्दोऽत्र भविष्यदासत्तिं द्योतयतीति- काशिका।

८-१-४३ नन्वि- ननु इति=ननु इत्यनेन, युक्तम् (८-१-३०) तिङ् (८-१-२८) न (८-१-२९) अनुज्ञैषणायाम्= अनुज्ञाप्रार्थनायाम्। किञ्चित् कर्तुं स्वयमेवोद्यतस्य एवं क्रियतामित्यभ्युपगमोऽनुज्ञा। तस्या एषणा= प्रार्थना। **ननु गच्छामि भोः** अनुजानीहि मां गच्छन्तमित्यर्थः। **ननु करोमि** पृष्टप्रतिवचनमेतन्नानुज्ञैषणा। ३-२-१२० ननौ....इति भूते लँट्।

८-१-४४ किं क्रि-क्रियाप्रश्ने=क्रियाप्रश्ने वर्तमानेन, किम्= किंशब्देन, युक्तम् (८-१-३०) अनुपसर्गम्= उपसर्गरहितम्, अप्रतिषिद्धम्= अप्रतिषिद्धार्थम्, तिङ् (८-१-२८) न (८-१-२९)।

८-१-४५ लोपे=किमो लोपे = किंशब्दाऽप्रयोगे तदर्थे च गम्यमाने, अनुसर्गम् + अप्रतिषिद्धम् (८-१-४४) तिङ् (८-१-२८) विभाषा=वा, न (८-१-२९)। प्राप्तविभाषेयं किमर्थेन योगादिति काशिका। पूर्ववत् प्रत्युदाहरणानि किंशब्दरहितानि। उदाहरणे विनैव किमा प्रश्नोऽवगम्यते।

८-१-४६ एहि मन्ये = एहि मन्ये इत्यनेन, युक्तम् (८-१-३०) लृँट्= लृँट्सम्बन्धि, तिङ् (८-१-२८) न (८-१-२९) प्रहासे= उपहासे गम्यमाने।

८-१-४७ जात्व- अपूर्वम्+ जातु = अविद्यमानपूर्वकेण जातुशब्देन, युक्तम् (८–१-३०) तिङ् (८-१-२८) न (८-१-२९)।

८-१-४८ किंवृ - अत्र पदमञ्जरी-वृत्तमित्यधिकरणे क्तः। किमो वृत्तं किंवृत्तमिति। २-३-६८ अधि.... इति कर्तरि षष्ठी। २-३-१३ अधि....इति समासप्रतिषेधे प्राप्ते ऽ स्मादेव निपातनात् समास इति। अपूर्वम् (८-१-४७) चिदुत्तरम्+किंवृत्तम्= चिदुत्तरकेण किंवृत्तेन, युक्तम्। (८-१-३०) तिङ् (८-१-२८) न (८-१-२९)।

८-१-४९ आहो-अपूर्वम् (८-१-४७) आहो उताहो= आहो उताहो इत्येताभ्याम्, युक्तम् (८-१-३०) अनन्तरम् = अव्यवहितम्, तिङ् (८-१-२८) न (८-१-२९)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-१-५० शेषे विभाषा ॥

आहो देवदत्तः पठति । उताहो देवदत्तः पठति ।

८-१-५१ गत्यर्थलोँटा लृँण्नचेत्कारकं सर्वान्यत् ॥ ५३

आगच्छ देवदत्त ग्रामं द्रक्ष्यस्येनम् । उहचन्तां देवदत्तेन शालयः, यज्ञदत्तेन भोक्ष्यन्ते । गत्यर्थेत्युक्तेर्नेह-पच देवदत्तौदनं भोक्ष्यस एनम् । लोँटित्युक्तेर्नेह- आगच्छेर्देवदत्त ग्रामं द्रक्ष्यस्येनम् । न चेत् कारकं सर्वान्यत् इत्युक्तेर्नेह- आगच्छ देवदत्त ग्रामं पिता ते ओदनं भोक्ष्यते । उह्यन्तां देवदत्तेन शालयः सक्तवस्तेन पास्यन्ते । सर्वग्रहणात् आगच्छ देवदत्त ग्रामं त्वं चाऽहं च द्रक्ष्याव एनम् । अत्र निघातप्रतिषेधो भवति ।

८-१-५२ लोँट् च ॥५४

आगच्छ देवदत्त ग्रामं पश्य । पृथग् योगकरण-मुत्तरार्थम् ।

८-१-५३ विभाषितं सोपसर्गमनुत्तमम् ॥ ५४

आगच्छ देवदत्तं ग्रामं प्रविश । सोपसर्गमित्युक्तेर्नेह विकल्पः- आगच्छ देवदत्त ग्रामं पश्य । अनुत्तममित्युक्तेर्नेह विकल्पः- आगच्छानि देवदत्त ग्रामं प्रविशानि ।

८-१-५४ हन्त च ॥

हन्त प्रविश ।

८-१-५५ आम एकान्तरमान्त्रितमनन्तिके ॥

आम् पचसि देवदत्त । एकान्तरमित्युर्नेह - आम् प्रपचसि देवदत्त । आमन्त्रितमित्युक्तेर्नेह - आम् पचति देवदत्तः । अनन्तिक इत्युक्तेर्नेह - आम् पचसि देवदत्त ।

८-१-५६ यद्धितुपरं छन्दसि ॥

उदसृजो यदङ्गिरः । उशन्ति हि । आख्यास्यामि तु ते । नियमार्थदिम्-एभिरेव परैर्योगे प्रतिषेधो भवति, नान्यैरिति । तेनेह न भवति- जाये स्वो रोहावेहि ।

८-१-५७ चनचिदिवगोत्रादि-तद्धिताम्रेडितेष्वगतेः ॥ ५८

देवदत्तः पचति चन । देवदत्तः पचति चित् । देवदत्तः पचतीव । देवदत्तः पचति गोत्रम् । देवदत्तः पचतिकल्पम् । देवदत्तः पचति पचति । अगतेरि त्युक्तेर्नेह - देवदत्तः प्रपचति चन ।

८-१-५० शेषे= अन्तरे, विभाषा = वा प्रागवत् । पूर्वसूत्रे अनन्तरमित्युक्तं तच्छेषश्चाऽन्तरम् ।

८-१-५१ गत्यर्थलोँटा= गत्यर्थकधातुप्रकृतिक- लोडन्तेन, युक्तम् (८-१-३०) लृँट्= लृँट्सम्बन्धि, तिङ् (८-१-२८) न (८-१-२९) कारकम्, सर्वान्यत्= सर्वमन्यत्, न चेत् । कर्तृकर्मणी एवात्र तिङन्तवाच्ये कारकग्रहणेन गृह्येते, न करणादि कारकारम् - इति काशिका । **निघातप्रतिषेधो भवति** अत्र पदमञ्जरी- अक्रियमाणे सर्वग्रहणे यत्र वाच्यं न भिद्यते तत्रैव भवितव्यम् इह च भिद्यते वाच्यम्- एकत्रैकम्, अपरत्र द्वयमिति निघातप्रतिषेधो न स्यादिति ।

८-१-५२ लोँट् च- गत्यर्थलोँटा (८-१-५१) युक्तम् (८-१-३०) लोँट्= लोँट्सम्बन्धि, तिङ् (८-१-२८) न (८-१-२९) कारकं+ सर्वान्यत्+ न चेत् (८-१-५१) । अत्र काशिका- लोँडन्तयोरेकं कारकं यदि भवतीत्यर्थ इति ।

८-१-५३ विभा- गत्यर्थलोँटा (८-१-५१) युक्तम् (८-१-३०) अनुत्तमम् = उत्तमपुरुषभिन्नम्, सोपसर्गम्= उपसर्गविशिष्टम्, लोँट् (८-१-५२) तिङ् (८-१-२८) विभाषितम्= विकल्पेन अनुदात्तं न भवति, कारकं + सर्वान्यत् + न + चेत् (८-१-५१) ।

८-१-५४ हन्त= हन्त इत्यनेन, युक्तम् (८-१-३०) अनुत्तमम् + सोपसर्गम् (८-२-५३) लोँट् (८-१-५२) तिङ् (८-१-२८) विभाषितम् (८-१-५३) ।

८-१-५५ आमः = आमः परम्, एकान्तरम् (अन्तरयतीत्यन्तरम् = व्यवधायकम् । एकमन्तरं यस्य तदेकान्तरम्)=एकेन पदेन व्यवहितम्, आमन्त्रितम्= आमन्त्रितसंज्ञकपदम्, अनन्तिके= दूरे गम्ये, न (८-१-२९) । उदाहरणे ८-१-१९ आम.... इति प्राप्तानुदात्तत्वस्य प्रतिषेधे ६-१-१९३ आम ....इत्याद्युदात्तत्वम् ।

८-१-५६ यद्धितुपरम्= यत्परं हिपरं तुपरं च, तिङ् (८-१-२८) न (८-१-२९) छन्दसि= वेदे । **नियमार्थमिदम्** ८-१-३० निपा... ८-१-३४ हि च ८-१-३९ तु प.... इति सिद्धे :। **रोहावेहि** एहि इत्यनेन गत्यर्थलोँडन्तेन युक्तस्य रोहाव इत्येतस्य लोँडन्तस्य निघातो भवत्येव । **रोहावेहि** इत्यत्र ६-१-९२ ओमा..इति पररूपम् ।

८-१-५७ चन- अगते := गतिभिन्नात् परम्, तिङ् (८-१-२८) न (८-१-२९) चन.....तेषु = चनप्रभृतिषु परेषु । गोत्रादि = ८-१-२७ तिङो....सूत्रोक्तानि । **अगतेः** अत्र सूत्रे ८-१-६८ सग....सूत्रे च ८-१-५३ विभा....सूत्रात् सोपसर्गं मण्डूकप्लुत्या ऽनुवर्त्य, उपसर्गसंज्ञकगतिः= प्रादिरिति स्वरसतो ऽर्थः स्वीकार्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-१-५८ चादिषु च ॥

देवदत्तः पचति च खादति च ।
देवदत्तः पचति वा खादति वा ।
देवदत्तः पचति ह खादति ह ।
देवदत्तः पचत्यह खादत्यह । देवदत्तः पचत्येव खादत्येव ।

८-१-५९ चवायोगे **प्रथमा'** ॥६५

गाश्च चारयति वीणां च वादयति । गर्दभान् वा कालयति वीणां वा वादयति ।

८-१-६० हेति **क्षिया'याम्** ॥ ६१

स्वयं ह रथेन याति ३ उपाध्यायं पदातिं गमयति ।

८-१-६१ अहेति विनियोगे च ॥

त्वमह ग्रामं गच्छ ३ त्वमहारण्यं गच्छ। स्वयमह रथेन याति ३ उपाध्यायं पदातिं गमयति ।

८-१-६२ चाह॑लोप एवेत्यवधारणम् ॥

देवदत्त एव ग्रामं गच्छतु, स देवदत्त एवारण्यं गच्छतु । देवदत्त एव ग्रामं गच्छतु, यज्ञदत्त एवारण्यं गच्छतु। अवधारणमित्युक्तेर्नेह- देवदत्तः क्वेव भोक्ष्यते ।

८-१-६३ चादिलोपे **विभाषा'** ॥ ६५

चलोपे-शुक्ला व्रीहयो भवन्ति। श्वेता गा आज्याय दुहन्ति । भवन्तीत्येतद् विकल्पेन न निहन्यते । वालोपे - व्रीहिभिर्यजेत। यवैर्यजेत। एवं शेषेष्वपि यथादर्शनमुदाहार्यमिति काशिका ।

८-१-६४ वैवावेति च **च्छन्दसि'** ॥ ६५

अहर्वै देवानामासीत्। अयं वाव हस्त आसीत्।

८-१-६५ एकान्याभ्यां समर्थाभ्याम् ॥

अजामेकां जिन्वति । तयोरन्यः पिप्पलं स्वाद्वत्ति । समर्थाभ्यामित्युक्तेर्नेह-एको देवानुपातिष्ठत् ।

८-१-५८ चादि - अगते : (८-१-५७) तिङ् (८-१-२८) न (८-१-२९) चादिषु=चादिषु परेषु । इह चादयः प्रत्यासत्त्या ८-१-२४ न च..... इत्यत्रोक्ता गृह्यन्ते, न तु गणपठिताः । उदाहरणेषु प्रथमानां निघातप्रतिषेधः । द्वितीयानां तु निघातो न प्रसक्त एकवाक्यत्वाऽभावात् ।

८-१-५९ चवायोगे = च वा इत्येताभ्यां योगे, प्रथमा= प्रथमोच्चारिततिङ्विभक्त्यन्तम्, न (८-१-२९) । प्रथमेति स्त्रीलङ्गनिर्देशो विभक्त्यपेक्षः । प्रथमात्वं तस्य पुनः प्रथममुच्चारणाद् वेदितव्यमिति- न्यासः ।

८-१-६० हेति= ह इत्यनेन, योगे + प्रथमा (८-१-५९) न (८-१-२९) क्षियायाम् = धर्मव्यतिक्रमे= शिष्टाचारव्यतिक्रमे । **याति** ३, ८-२-१०४ क्षिया....इति प्लुतः

८-१-६१ अहेति= अह इत्यनेन, योगे + प्रथमा (८-१-५९) न (८-१-५९) विनियोगे = विविधप्रयोजनके व्यापारणे, क्षियायाम् (८-१-६०) च । **गच्छ ३ याति ३ प्रागवत्** प्लुतः । आद्ये प्रैषे द्वितीये क्षियायाम् ।

८-१-६२ चाहलोपे = च अह इत्येतयोर्लोपे = एतयोः प्रयोगं विनाप्येनयोरर्थे गम्यमाने, प्रथमा (८-१-५९) न (८-१-२९) अवधारणम् + एव+ इति = अवधारणार्थकैवशब्दप्रयोगे । चशब्दः समुच्चयार्थः । अहशब्दः केवलार्थः । समानकर्तृके चलोपः । नानाकर्तृके अहलोपः । आद्योदाहरणस्य ग्रामं चारण्यं च गच्छत्वित्यर्थः । अन्त्योदाहरणस्य ग्रामं केवलमरण्यं केवलमित्यर्थः । प्रत्युदाहरणे अनवक्लृप्तावेवशब्दः । ६-१-९१ एङि.... सूत्रस्थेन एवे..... इति वार्तिकेन पररूपम् ।

८-१-६३ चादिलोपे = ८-१-२४ न च....सूत्रोक्तानां शब्दानां प्रयोगं विनाऽपि तदर्थेषु गम्यमानेषु, प्रथमा (८-१-५९) न (८-१-२९) । उदाहरणेषु चवा (८-१-५९) इति प्राप्ते विभाषा । शेषेष्वप्राप्ते ।

८-१-६४ वैवावेति = वै वाव इत्येताभ्याम्, योगे+ प्रथमा (८-१-५९) विभाषा (८-१-६३) न (८-१-२९) छन्दसि=वेदे ।

८-१-६५ एका- समर्थाभ्याम् = तुल्यार्थाभ्याम् (अन्यार्थेऽनयोस्तुल्यार्थता) अन्यार्थाभ्याम्, एकान्याभ्याम् = एक अन्य इत्येताभ्याम्, योगे + प्रथमा (८-१-५९) विभाषा (८-१-६ ३) न (८-१-२९) छन्दसि (८-१-६४) । प्रत्युदाहरणे एकशब्द : संख्यावाची ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-१-६६ यद्वृत्तान्नित्यम् ॥
यो भुङ्क्ते । यं भोजयति । येन भुङ्क्ते । यस्मै ददाति । पञ्चमीनिर्देशेऽप्यत्र व्यवहितेऽपि कार्यमिष्यते । यदग्निङ् वायुर्वाति ।
(यथाकाम्ये वेति वक्तव्यम्)
यत्र क्वचन यजन्ते ।

८-१-६७ पूजनात्' पूजित'मनुदा'त्तं काष्ठादिभ्यः ॥ ६८
काष्ठाध्यापकः । दारुणाध्यापकः ।
(मलोपश्च वक्तव्यः)
दारुणाध्यापकः ।

८-१-६८ **सगति**'रपि तिं'ङ् ॥ ६९
यत् काष्ठं पचति । यत् काष्ठं प्रपचति । गतिग्रहणेनोसर्गसंज्ञाविशिष्टस्य ग्रहणान्नेह-यत् काष्ठं शुक्लीकरोति ।

८-१-६९ कुत्सने च सुँप्यगोत्रादौ ॥
पचति पूति । प्रपचति पूति । अगोत्रादावित्युक्तेर्नेह- पचति गोत्रम् ।
(क्रियाकुत्सन इति वक्तव्यम्)
कर्तुः कुत्सने मा भूत्- पचति पूतिर्देवदत्तः ।
(पूतिश्च चानुबन्धो भवतीति वक्तव्यम्)
(विभाषितं चापि बह्वर्थमनुदात्तं भवतीति वक्तव्यम्)
पचन्ति पूति । प्रपचन्ति पूति ।

८-१-७० **गति**'र्गतौ ॥ ७१
अभ्युद्धरति । समुदानयति । गतिरित्युक्तेर्नेह- देवदत्तः प्रपचति ।

८-१-७१ तिङि चोदात्तवति, ॥
यत् प्रपचति ।

८-१-६६ **यद्वृत्तात्**- (८-१-४८ किंवृ.....इत्यत्रेव वृत्तशब्दस्य ब्युत्पत्तिर्बोध्या)=यद्वृत्तात् परम्, तिङ् (८-१-२८) नित्यम्, न (८-१-२९) । प्रथमा इति, छन्दसि इति, च नानुवर्तेते । **व्यवहितेऽपि कार्यमिष्यते** एतच्चोत्तरसूत्रे ज्ञापयिष्यते । **यथाकाम्ये**= यथेच्छ (देशकालानपेक्ष) प्रवृत्तौ, प्रागवद् वा ।

८-१-६७ **पूजनात्**= पूजनवाचिभ्यः, (काष्ठादिभ्य इति बुहवचनान्तानुरोधेन बहुवचनान्तमङ्गीकृतम्) काष्ठादिभ्यः=काष्ठादिभ्यः परम्, पूजितम् = पूजितवाचि पदम्, अनुदात्तम्=अनुदात्तम् भवति । अनुदात्तम् (८-१-११) इति वर्तमाने पुनरनुदात्तग्रहणं प्रतिषेधनिवृत्त्यर्थम् । काष्ठादयोऽद्भूतपर्यायाः पूजनवचना भवन्ति । क्रियाविशेषणानां तेषां द्वितीयान्तानां मयूरव्यंसकादित्वात् समासः । इति समासान्तोदात्तत्वापवाद इति च काशिका । **मलो**- समासे कृते विभक्तेर्लुकि स्वाभाविकी मकारनिवृत्तिर्यत्र भवति तत्र (समासे) अनुदात्तं भवति । हरदत्तस्त्वन्येषां मतमुपस्थापयति-यदि समास एवैतदभिमतमभविष्यत् 'समासे' इत्येवा ऽवक्ष्यत् । मलोपवचनात्तु वाक्यविषयमेवैतत् । दारुणमध्यापक इत्यादिकं तु रूपं यदीष्यते विकल्पेन मलोपो वक्तव्य इति । पूजनादित्येव पूजितपरिग्रहे सिद्धे पूजितग्रहणमनन्तरपूजितप्रतिपत्त्यर्थम् । एतदेव ज्ञापकम्-इह प्रकरणे पञ्चमीनिर्देशेऽपि नानान्तर्यमाश्रीयत इति ।

८-१-६८ **सग**- पूजनेभ्यः+ काष्ठादिभ्यः+ पूजितम् (८+१-६७) सगतिरपि= सगतिरगतिरपि, तिङ्= तिङन्तम्, अनुदात्तम् (८-१-६७) । **सगतिरिति** तुल्ययोगे ऽत्र सहशब्दः । यथा सपुत्रो भोज्यतामित्युक्ते पितापुत्रयोर्द्वयोरपि भोजनेन सम्बन्धो भवति; तथात्रापि सगतिरित्युक्तावगतेरपि तिङन्तस्य निघातेन सम्बन्धो विज्ञायते । अत्र हरदत्तः- अपिग्रहणं यत्र गतिर्न प्रयुज्यते तत्र केवलस्यापि तिङन्तस्य यथा स्यात्, गति प्रयोगे तु द्वयोः सहैव भवति । तिङ्ग्रहणेन पूर्वसूत्रोक्तो निघातः सुँबन्तविषय एव विज्ञायत इति । ८-१-३० निपा इति प्रतिषेधे प्राप्ते पुनर्विधानम् । **ग्रहणान्नेह** विशेषः ८-१-५७ चन....सूत्र-टिप्पण्यां द्रष्टव्यः।

८-१-६९ **कुत्स**- अगोत्रादौ = गोत्रादिभिन्ने, सुँपि = सुँबन्ते परतः, सगतिरपि + तिङ् (८-१-६८) अनुदात्तम् (८-१-६७) कुत्सने= कुत्सायां गम्यमानायाम् । **क्रिया**-उदाहरणे कर्तृत्वमात्रं कुत्स्यतेऽस्येदमयुक्तमिति **क्रिया** तु मनोज्ञैव । **चानुबन्धो** तेनाऽयं चकारानुबन्धत्वादन्तोदात्तो भवति ।

८-१-७० **गतिः**=गतिसंज्ञकं पदम्, गतौ= गतिसंज्ञकपदे परतः, अनुदात्तम् (८-१-६७) ।

८-१-७१ **तिङि**- उदात्तवति = उदात्तविशिष्टे, तिङि= तिङन्ते परतः, गतिः (८-१-७०) अनुदात्तम् (८-१-६७) । **प्रपचति** ८-१-३० निपा..... इति निघातप्रतिषेधात् तिङन्तमुदात्तवत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-१-७२ आमन्त्रितं पूर्वमविद्यमानवत् ॥७४

अग्ने तव । देवाऽस्मान् पाहि । अग्ने नय । अग्न इन्द्र वरुण मित्र देवाः । सर्वदा रक्ष देव नः । इमं मे गङ्गे यमुने ।

८-१-७३ नामन्त्रिते समानाधिकरणे सामान्यवचनम् ॥ ७४

हरे दयालो न : पाहि । अग्ने तेजस्विन् ।

८-१-७४ विभाषितं विशेषवचने ॥

अत्र भाष्यम्- बहुवचनमिति वक्ष्यामीति । यूयं प्रभवः ! देवाः शरण्याः !

युष्मान् भजे वो भजे इति वा ।

इत्यष्टमाध्याये
प्रथम : पादः ।

८-१-७२ आम- पूर्वम्= पूर्वतो विद्यमानम्, आमन्त्रितम्= आमन्त्रितसंज्ञकं पदम्, अविद्यमानवत्= अविद्यमानमिव भवति । उदाहरणेषु - २-३-४८ साऽऽम.... इत्यामन्त्रितसंज्ञा । अविद्यमानवत्त्वेन पदात् परत्वाऽभावात्, आद्ययोर्युष्मदस्मदोरादेशौ, तृतीये ८-१-२८ तिङ्ङ....इति निघातः, चतुर्थे ८-१-१९ आम.... इत्यनुदात्तश्च न । **देव नः** अत्र देवस्याऽ विद्यमानवद्भावेऽपि ततः प्राचीनं रक्षेत्येतदाश्रित्यादेशः । अन्त्ये मे शब्दमाश्रित्य निघातः ।

८-१-७३ नाम- सामान्यवचनम्= विशेष्यवाचि पदम्, समानाधिकरणे + आमन्त्रिते= समानाधिकरणे आमन्त्रितसंज्ञके पदे परे, न = न अविद्यमानवत्, अर्थाद् विद्यमानवदेव भवति । उदाहरणयोः आद्ये- दयालो इत्यस्याऽविद्यमानवद्भावे ऽपि हरे इत्यस्य विद्यमानवत्त्वेन तन्निमित्तको नसादेशः । अन्त्ये-अग्ने इत्यस्य विद्यमानवत्त्वेन तेजस्विन् इत्स्य ८-१-१९ आम.... इत्यनेन्न सर्वानुदात्तत्वम्

८-१-७४ विभा- बहुवचनम्= बहुवचनान्तम्, सामान्यवचनम् + समानाधिकरणे+आमन्त्रिते (८-१-७३) विशेषवचने= विशेषणे परे, विभाषितम्= अविद्यमानवद् वा । उदाहरणेऽन्वादेशे ऽ पि विकल्पेनादेशः ।

इत्यष्टमाध्याये
प्रथम : पादः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाऽष्टमाध्याये
द्वितीय : पादः

८-२-१ **पूर्वत्रा'ऽसिद्धम्** ॥८-४-६७

भो अम्ब । भगो एहि । अघो अपसर ।	छात्रा इमे । गुरा उत्कः ।

८-२-१ पूर्व- ८-३-१९ लोपः शाकल्यस्य-सूत्रानन्तरं सूत्रमिदं पाठचम् । एतत्सूत्रार्थोपदेशसन्दर्भे छात्रा एवं बोधयितव्याः- अयि वत्साः ? सर्वत्र 'पूर्वः' इत्युक्तौ कस्मात् पूर्वः ? इति 'परः' इत्युक्तौ च कस्मात् परः ? इत्याकाङ्क्षा जागर्ति । अत एव एकमेव स्थलं स्थलान्तरात् पूर्वं पश्चिमं च भवति । यथा प्रतिष्ठानपुरं काष्ठमण्डपात् पश्चिमं तदेव पुनर्दाङ्गशल्यानाभ्यां पूर्वं भवति । इति । अतः प्रकृतसूत्रे पूर्वत्र = पूर्वत्र विद्यमाने शास्त्रे इत्युक्तौ कस्मात् पूर्वत्रेत्याकाङ्क्षायाम्, अष्टमाध्यायस्य द्वितीयपादारम्भात्, पूर्वत्रेति ज्ञायते । यतः प्रकृतसूत्रं ८-२-१ वर्तते । अतः पूर्वत्र = सपादसप्ताध्यायी (७१/४) स्थे शास्त्रे, परं शास्त्रम् (इत्याकाङ्क्षालभ्यम्) = अष्टमाध्यायस्य द्वितीयपादादारभ्य चतुर्थपादान्तावधि वर्तमानं शास्त्रम्, असिद्धम्= असिद्धं भवति । इति सूत्रार्थो भवति । अधिकारसूत्रमिदम् अष्टाध्याय्यन्तावध्यपि गच्छति । अतोऽष्टमाध्यायस्य द्वितीयपादारभ्मादष्टाध्यायीसमाप्तिपर्यन्तमपि पूर्वं शास्त्रं प्रति परं शास्त्रमसिद्धं भवति । अत एव सिद्धान्तकौमुद्यां प्रकृतसूत्रस्य सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धमिति वृत्तिं पठति दीक्षितः । अत एव च ८-४-६७ अअ इति सूत्रेण विवृताकारस्य स्थाने विहितस्य संवृताकारस्य शास्त्रदृष्टचा विवृतत्वेन 'प्रक्रियादशायां तु विवृतमेवेति, च पठ्यते । विषयोऽयं पूर्वत्रासिद्धम्, इति सूत्रं ततः पूर्वाणि पराणि च सूत्राणि दर्शयित्वैव बोधयितव्यः । अथ- अत : ८-३-१९ लोपः....सूत्रेण कृतेऽपि यकारव्वकारलोपे, ६-१-१०५ एङः....... ६-१-७५ एचो....... ६-१-७४ आद्गु....... सूत्राणि मध्ये यकारं वकारं वा वर्तमानमेव सम्भावयन्ति । अतो न तानि सूत्राणि प्रवर्तन्ते इति बोधनक्रमे स्फुटोपपत्तयेऽधोनिर्दिष्ट- प्रयोगो विधेयः । यथा- सूचीमुखं तीक्ष्णाग्रं कण्टकं वोर्ध्वमुखं स्थापयित्वा छात्रेषु पश्यत्सु शिरस्त्रेण केनचिद् वा वस्त्रेणा ऽऽ च्छाद्य शिक्षकेण अयि वत्साः ? किं युष्मासु कोऽपि शिरस्त्रमिदं वस्त्रं वा (यथायोग्यम्) करतलेन प्रहर्तुं शक्नोतीतिच्छात्राः प्रष्टव्याः नेत्युत्तरे प्राप्ते कथम् ? इति ते पुनः प्रष्टव्याः । अथ सूची कण्टको वा विध्यतीति न शक्नुम इत्युत्तरे प्राप्ते आम् ! यदि अस्याऽभ्यन्तरे सूची कण्टको वा न भवेत्, तदा तु सर्वे यूयं शक्नुयात इति कथयता शिक्षकेण केनचिद् व्याजेन च्छात्राः कक्षातो बहिः प्रेष्याः । यथा- प्रत्येकं बहिर्गत्वा एकैकं स्वल्पं पाषाणखण्डमन्योन्यमदर्शयन्त आनयत इति (अन्योन्यादर्शनम् इति कथनं केवलं प्रकारान्तराकाङ्क्षाजागरणाय) अथ तेषु बहिर्गतेषु शिक्षकः सूचीं वा कण्टकं निभृतं निः सारयेत् । अथ च्छात्रेष्वागतेषु सर्वेभ्यस्तेभ्यः पाषाणान् गृहीत्वा पुनः शिक्षको ब्रूयात्- शिरस्त्रमिदं (वस्त्रमिदं वा) प्रहर्तुं न शक्नुथ तु ? इति । न शक्नुम इत्युत्तरे प्राप्ते शिरस्त्रं वस्त्रं वा छात्रेषु पश्यत्सु उत्थापयेत् । अथ शिक्षकेण स्मेरमुखेण सता छात्रा उपदेश्याः । यथा-सूचीं कण्टकं वा निभृतं मयि अपसारितवत्यपि यूयं सूची कण्टको वा ऽत्रैवास्तीति मत्वा करतलेन वस्त्रं शिरस्त्रं वा न प्रहृतवन्तः । तथैव ८-३-१९ लोपः..सूत्रेण यकारस्य वकारस्य वा लोपेऽपि ६-१-१०५ एङ ६-१-७५ एचो ६-१-८४ आदगु..... सूत्राणि भो अम्ब, भगो एहि, अघो अपसर, छात्रा इमे, गुरा उत्कः, इत्यत्र मध्ये यकारं वकारं वा वर्तमानमिव संभाव्य न प्रवर्तन्त इति । शाकल्येतरमते छात्रायिमे इति यकारघटितमपि गुरावुत्क इत्यत्र च वकार घटितमपि पाक्षिकं रूपं ज्ञेयमिति । भो भगो अघो पूर्वस्य यकारस्य तु शाकल्येतरमतेऽपि ८-३-२० ओतो.... सूत्रेण नित्यं लोपाद् भो अम्ब, भगो एहि, अघो अपसर, इत्युदाहरणानां यकारघटितानि रूपान्तराणि न भवन्ति । लघुप्रयत्नतरयकारघटितानि तु शाकटायनमते भवन्त्येवेति शिक्षको ऽवदधानः सन् बालबुद्धिग्राह्यमात्रमुपदिशेत् । अथ शिक्षकेणाऽवधेयं यत् काशिकासिद्धान्तकौमुदीप्रभृतीनां पङ्क्तिं दृष्टवा भो अम्व इत्यादीन्युदाहरणानि ८-३-१९ लोप....सूत्रस्य नेति न मन्तव्यम्, गार्ग्यमतेन गतार्थतामवगत्यैव भो इत्यादीनां तत्राऽसमावेशो न तु तत्र भो इत्यादीनामननुवृत्त्या । प्रकृते तु भो इत्यादीनामनुवृत्त्यैवार्थः सरलो भवति, त्यागे तु क्लेशो भवतीति । अथ ८-३-२२ हलि सर्वेषाम्-सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-२ नलोपः सुँप्स्वरसंज्ञातुँग्विधिषु कृति ॥
सुँब्विधौ- राजभिः । राजभ्याम् । राजसु ।
स्वरविधौ-राजवती । संज्ञाविधौ-पञ्च कुमार्यः ।
कृति तुँग्विधौ- वृत्रहभ्याम् । कृतीत्युक्तेरिह सिद्ध एव- वृत्रहच्छत्रम् । पूर्वेणैव सिद्धे सूत्रमिदं नियमार्थम् । तेन राजाश्व इत्यादि सिध्यति ।

८-२-३ न मु ने ॥
अमुना ।
(एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः)
वृक्ष इदम् । अन्तरङ्ग इत्युक्तेर्वहिरङ्गस्याऽसिद्धत्वमेव । पचतीति ।
(संयोगान्तलोपो रौँरुत्वे सिद्धो वक्तव्यः)
हरिवो मेदिनं त्वा ।
(सिँज्लोप एकादेशे सिद्धो वाच्यः)
अवेदीत् । अदेवीत् ।
(निष्ठादेशः षत्व-स्वर-प्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः)
वृक्णः । वृक्णवान् । क्षीबः । क्षीबिकः ।
(प्लुतविकारस्तुँग्विधौ छे सिद्धो वक्तव्यः)
अग्ना ३ इच्छत्रम् । पटा ३ उच्छत्रम् ।
(श्चुत्वं धुँटि सिद्धं वक्तव्यम्)
अट् श्च्योतति । रट् श्च्योतति ।
(अभ्यासजश्त्वचर्त्वे एत्वतुँकोः सिद्धे वक्तव्ये)
बभणतुः । विचिच्छित्सति ।
(द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम्)
य लँ लँ लोकम् ।
(पदाधिकारश्चेल्लत्वघत्वढत्वनत्वरुँत्वषत्वणत्वानुनासिकच्छत्वानि सिद्धानि वक्तव्यानि)
गलो गलः । गरो गरः । द्रोग्धा द्रोग्धा । द्रोढा द्रोढा । नुन्नो नुन्नः । नुत्तो नुत्तः । अभिनोऽ भिनः । अभिनदभिनत् । मातुष्ष्वसा मातुष्ष्वसा । मातुः : स्वसा मातुः स्वसा । माषवापाणि माषवापाणि । माषवापानि माषवापानि । वाङ्नयनं वाङ्नयनम् । वाग्नयनं वाग्नयनम् वाक्छयनं वाक्छयनम् । वाक्शयनं वाक्शयनम् ।

८-२-२ नलो- सूत्रे विधिशब्दस्य प्रत्येकं योगः । कृति इत्येतत् संभवव्यभिचाराभ्यां तुँग्विधिनैव सम्बध्यते । एवञ्चाऽर्थः फलति- सुँप्.... कृति= सुँबविधौ स्वरविधौ संज्ञाविधौ कृति तुँग्विधौ च कर्तव्ये, नलोपः = नकारस्य लोपः, पूर्वत्र+ असिद्धम् (८-२-१) इति । **सुँब्विधौ** क्रमशः ७-१-९ अतो...... इति ऐस्, ७-३-१०२ सुँपि ...इति दीर्घः, ७-३-१०३ बहु... इत्येत्वं च न । **राजवती** ६-१-२१५ अन्तो ....इत्यन्तोदात्तत्वं न । कनिन्प्रत्ययान्तस्य राजन्शब्दस्य नित्स्वरेणाद्युदात्तत्वाद् राजवतीशब्दो ऽ प्याद्युदात्त एव । **पञ्च कुमार्यः** नलोपस्यासिद्धत्वेन १-१-२३ ष्णान्ता.... इति षट्संज्ञायां ४-१-१० न ष.... इति टाप् प्रतिषेधः । **वृत्रहभ्याम्** ६-१-६९ ह्रस्व.... इति न तुँक् । **वृत्रहच्छत्रम्** ६-१-७१ छे च- इति तुँक् ।

८-२-३ न मु- ८-२-८१ एत ईद्.... इति सूत्रानन्तरं सूत्रमिदं पाठचम् । ने= नाभावे कर्तव्ये कृते च, मु= मु (उत्वं मत्वं च), न= नाऽसिद्धम् । प्रकृते च नाभावः कर्तव्यो ऽस्ति, तेन मु नाऽसिद्धम् । अतः ८-२-८० अद....सूत्रस्य प्रवृत्तिः । अथ अमु + आ' इति श्यामपाट्यां लिखित्वा ७-३-११९ आङो.....सूत्रोदाहृते मुनिना इत्यत्रेव प्रक्रिया । अमुना । भ्यामि- पूर्वोपदिष्टरीत्या अदाभ्याम् इति सिद्धौ तत ऊत्वे मत्वे च अमूभ्याम् । इति । भिसि- अद + भिस् इति श्यामपाट्यां लिखित्वा ७-१-९ अतो..... ७-१-११ नेद.... ७-३-१०३ बहु... सूत्राण्युद्वोधयितव्यानि । इत्थम् अदेभिस् इति जाते ८-२-८१ एत....सूत्रप्रवृत्तौ अमीभिस्- अमीभिः । इति ।

अथाऽदशब्दस्यैब स्त्रीलिङ्गे प्रक्रियोपदेशः

सौ पुंसीव । असौ । अन्यत्र प्रकृतिभागे अद इति जाते टापि अदा इति रूपाय क्लृप्ते सर्वाशब्दे इव प्रक्रियायाम् ८-२-८० अद.... ८-२-८१ एत....अनयोरन्यतरसूत्रप्रवृत्तौ रूपाणि सिध्यन्तीति शिक्षकः स्फुटमुपदिशेत् । ततो मध्ये मध्ये सत्यावश्यके निर्दिशन् सावधानं छात्रैरुच्यमानां प्रक्रियां सिद्धरूपाणि च शृणुयात् । अमू २ । अमूः । अमुया । अमूभ्याम् ३ । अमूभिः । अमूभ्यः २ । अमुष्यै ८-३-५७ इण्कोः ८-३-५९ आदे.... इति षत्वम् । अमुष्याः २ । अमुयोः २ । अमूषाम् । अमुष्याम् । अमूषु । इति । अथ

क्लीबेऽदश्शब्दस्यैव प्रक्रिया

स्वमोः त्यद्., तद्, इत्यत्रेव । अदः । शेषवचनेषु च तच्छब्दस्येव प्रक्रियायां यथायोगयम् ८-२-८० अद.... ८-२-८१ एत..... इत्येतयोरन्यतरप्रवृत्तौ रूपाणि सिध्यन्तीति शिक्षयता शिक्षकेण पूर्वद् व्यवहरणीयम् ।

अथ युष्मदस्मच्छब्दावुपदेश्यौ

यद्यपि अत्र द्वयोः शब्दयोः साधनप्रक्रिया सहैव प्रदर्श्यते । तथापि शिक्षकस्तु पृथक् पृथगुपदिशेत् ।

सौ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-४ उदात्तस्वरितयोर्यणः स्वरितो ऽ **नुदात्तस्य**' ॥ ६
कुमार्यौ । खलप्व्याशा ।

८-२-५ **एकादेश**' उदात्तेनो'दात्त': ॥
अग्नी । वायू ।

यथा- प्रथमम्, त्वम्, ततः अहम् । त्वं किं पठसि ? इति वक्तव्ये, अहं व्याकरणं पठामि इति वक्तव्ये च युष्मदस्मच्छब्दाभ्यां सुँप्रत्यये कृते युष्मद्+स् इति अस्मद्+स् इति च श्यामपाट्यां लिखित्वा ७-१-२८ ङे प्रथमयो....सूत्रं प्रस्तुत्यम् ।

एकादेश- वृक्ष इदम् वृक्षशब्दः फिट्स्वरेणान्तोदात्तः । सप्तम्येकवचनम्, ३-१-४ अनु....इत्यनुदात्तम् । तयोरेकादेशः ८-२-५ एका....इत्युदात्तः । अस्य सिद्धत्वेऽयादेशोऽप्युदात्तः । अस्याऽ सिद्धत्वे तु स्थानिन उदात्तानुदात्तरूपत्वेन आन्तरतम्यात् स्वरितः स्यात् । **पचतीति** पचतीत्यस्येकारः पित्त्वादनुदात्तः । इति शब्दः फि. ८० निपाता आद्युदात्ताः इत्याद्युदात्तः । सवर्णदीर्घः पदद्वयाश्रयत्वेन बहिरङ्गः अतस्तदाश्रयः स्वरोऽपि बहिरङ्गः । तस्या ऽ सिद्धत्वात् ६-१-१५३ अनु....सूत्रं नाऽत्र प्रवर्तते । **संयोगान्त हरिवो** हरिशब्दान्मतुँपि ८-२-१५ छन्द....इति वत्वे सम्बुद्धौ संयोगान्ततकारलोपे ८-३-१ मतुँ.... इति रुत्वे संयोगान्तलोपाऽ सिद्धत्वेन तकारेण व्यवधानात् ६-१-११० हशि चेत्युत्वं न स्यात् । **सिँज्लो-** ८-२-२८ इट... सूत्रानन्तरं वार्तिकमिदं पाठ्यम् । एकादेशे = एकादेशे कर्तव्ये । अदेवीत् । तसि- अदेविष्टाम् । झिप्रत्यये: अदेविस्+ झि इति श्यामपाट्यां लिखित्वा ३-४-१०९ सिँज.... सूत्रमुद्बोध्य च्छात्रै रूपं साधयेत्- अदेविषुः । अथ नी धातोः कर्तरि लुँङि, अनी + ति इति श्यामपाट्यां लिखित्वा सार्वधातुकसंज्ञां कारयित्वा शपं बाधयित्वा च्लिँप्रत्यये सिँचि अनुबन्धलोपे च छात्रैः साधिते अनी+ स् + ति इति श्यामपाट्यां लिखित्वा सिच इडागमं छात्रैर्निषेध्य ७-२-१ सिँचि वृद्धिः .... सूत्रमुपदिशेत् । **निष्ठादेशः......वृक्णः । वृक्णवान्** ओँव्रश्चूँ (१२९१) + निष्ठा ८-२-४५ ओँदि.... इति नत्वम् । तस्य षत्वे सिद्धत्वं कुत्वे त्वसिद्धत्वमेव । **क्षीब : क्षीबिकः** अत्र काशिका- स्वरप्रत्ययविधीड्विधिषु क्षीबशब्द उदाह्रियते तत्र च ८-२-५५ अनु.... इति सूत्रेण निपातनमनेकधा समाश्रीयते । यदा क्षीबेर्निष्ठायामिटि कृते 'इत्' शब्दलोपो निपात्यते, तदा क्षीब इति संज्ञायामित्- शब्दलोपासिद्धत्वात् ६-१-२०० निष्ठा इत्येष स्वरो न प्राप्नोति । क्षीबेण तरति क्षीबिकः, इति द्व्यज्लक्षणः ४-४-७ नौद्व्य.... इति ठन् न प्राप्तोति । यदा तु तकारलोपो निपात्यते तदा तस्याऽसिद्धत्वादिडागमः प्राप्नोति । इति ।

प्लुतविकारः = प्लुतसहितो विकारः । उदाहरणयोः- अग्निपटशब्दयोः सम्बुद्धिनिमित्तके गुणे ८-२-१०७ एचो....सूत्रेण पूर्वार्धस्याकारः प्लुत उत्तरस्य त्विदुतौ । अत्र प्लुतविकारस्याऽसिद्धत्वात् ६-१-७१ छे च इति ह्रस्वलक्षणो नित्यस्तुँग् न स्यात् ।

श्चुत्वं- उदाहरणयोः श्च्युतिर् क्षरणे इति धातुः सकारादिः पठ्यते । तस्य श्चुत्वस्या ऽ सिद्धत्वात् ८-३-२९ ङः सि...इति धुँट् स्यात् । **अभ्या- एत्वतुँकोः**= एत्वे तुँकि च कर्तव्ययोः । उदाहरणयोः- आद्ये- अभ्यासजश्त्वाऽसिद्धत्वात् ६-४-१२० अत..... अनादेशा.....इत्येत्वं स्यात् । अन्त्ये- अभ्यासचर्त्वाऽसिद्धत्वादभ्यासस्य ६-१-७ छे च इति तुँक् स्यात् ।

द्विर्वचने= द्विर्वचने कर्तव्ये । उदाहरणे परसवर्णस्याऽ सिद्धत्वात् ८-४-४६ अनचि च.... इति सूत्रेण लँकारस्य द्विर्वचनं न स्यात् । **पदा**-अत्र काशिका- तदेतत् सर्वं न मु ने इति योगविभागेन साध्यते । न इत्येतावदनिष्टे विषये पूर्वत्राऽसिद्धस्य प्रतिषेधार्थम् । ततः 'मु ने' इति न इत्येतदनुवर्तते, इति । अत्र प्रवर्तमानो यथा पूर्वत्र प्रवर्तते तथा नियोगतः परत्रापि न प्रवर्तेत इत्यनियोगो लभ्यते नियमकारणाऽभावात् । ततश्चाऽनिष्टो विकल्पः स्यात्- पूर्वपरयोरेकत्र प्रवृत्तेः अपरत्राऽप्रवृत्तेः नेष्टोऽनिष्टो विकल्पः । तथा सति गरो गलः गलो गर इत्येवमाद्यनिष्टमापद्येत । इति ।

८-२-४ उदा.....यणः = उदात्तस्वरितयोः स्थाने जाताद् यणः परस्य, अनुदात्तस्य=अनुदात्तस्य स्थाने स्वरितः= स्वरितो भवति । **कुमार्यौ** कुमारीशब्दस्येकारः ६-१-१५६ अनु....इत्युदात्तः । तस्य यण् । स उदात्तयण् । ३-१-४ अनु.....: इत्यौविभक्तिरनुदात्ता । उदात्तयणः परस्यास्तस्याः स्वरितत्वम् **खलप्व्याशा** खलपूशब्द : ६-२-१३८ गति..... इति प्रकृतिभावात् कृत्स्वरेणान्तोदात्तः । तस्य सप्तम्येकवचनेऽ नुदात्ते परे यणि, उदात्तयणः परत्वेन सप्तम्येकवचनस्याऽनेन स्वरितत्वम् । तस्य यणादेशः= स्वरितस्थाने जातो यण् । ततः परस्य आशाशब्दस्याऽ नुदात्ताकारस्य स्थाने प्रकृतसूत्रेण स्वरितः ।

८-२-५ एका- उदात्तेन= उदात्तेन सह जातः, अनुदात्तस्य (८-२-४) =अनुदात्तस्य स्थाने जातः, एकादेशः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-६ स्वरितो वाऽनुदात्ते पदादौ ॥
सूत्थितः ।

८-२-७ **नलोप**ः **प्रातिप**दिकान्त**स्य ॥८
राजा । राजभ्याम् । पिता ।
(अह्नो नलोपप्रतिषेधो वक्तव्यः)
अहः । अहोभ्याम् । अहोभिः ।

८-२-८ न ङिसम्बुद्ध्योः ॥
परमे व्योमन् । हेराजन् ।
(ङावुत्तरपदे प्रतिषेधस्य प्रतिषेधो वक्तव्यः)
ब्रह्मनिष्ठः ।
(वा नपुंसकानाम्)
हे व्योम । हे व्योमन् ।

८-२-९ मादुपधायाश्च मतोर्वोऽयवादिभ्यः ॥ १६,१५
शंवान् । लक्ष्मीवान् । वृक्षवान् । मालावान् । यशस्वान् । भास्वान् । अयवादिभ्य इत्युक्तेर्नेह- यवमान् । भूमिमान् ।

उदात्तः = उदात्तो भवति । **अग्नी । वायू** प्रकृतिभागः फिट् स्वरेणान्तोदात्तः । विभक्तेश्च ३-१-४ अनु.....इत्यनुदात्तत्वम् । तयोरेकादेश उदात्तः ।

८-२-६ **स्वरि**-पदादौ= पदादौ वर्तमाने, अनुदात्ते= अनुदात्ते परे, उदात्तेन+ एकादेशः (८-२-५) वा =विभाषया, स्वरितः= स्वरितो भवति । पक्षे पूर्वेणोदात्तः । **सूत्थितः** सु शब्द आद्युदात्तः । १-४-९३ सुः पू.... इति कर्मप्रवचनीयत्वेन गतित्वाऽभावाद् ८-१-७० गति .... इति न निघातः । प्रादिसमासे कृते, ६-२-२ तत्पु..... इत्यनेन पूर्वपदप्रकृतिस्वरत्वादाद्युदात्तः शेषमनुदात्तम् । अनुदात्ते पदादावेकादेशो भवति ।

८-२-७ **नलो** -६-४-८सर्वनामस्थाने सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)
८-१-१६ पदस्य ८-२-७ न लोपः प्रातिपदिक (क) अन्तस्य ॥ इति । अत्र सूत्रे 'न' इति 'प्रातिपदिक' इति च लुप्तषष्ठ्यन्ते पदे इति बुध्यमानः शिक्षकः प्रातिपदिक= प्रातिपदिकसंज्ञस्य (क)= पदस्य, अन्तस्य = अन्ते वर्तमानस्य, न= नकारस्य, लोपः =लोपो भवति । इत्यर्थमुपदिश्य मध्ये मध्ये साहाय्यं ददत् समन्वयं छात्रैः कारयेत् । अत्र पदविषये १-१-६१ प्रत्य.....सूत्रं न प्रस्तुवीयात् प्रकारान्तरेण पदज्ञानोपायस्य पूर्वमुपपादितत्वात् । अथ रूपसिद्धावपि प्रक्रियां द्वित्रवारानावर्त्य प्रक्रियायां स्फुटं स्फुरितायाम्, अङ्गम् इति पूर्वं प्रसक्तं विशदयितुं १-४-१३ यस्मात् प्रत्ययविधि.... सूत्रमुपदिशेत् । **अह्नो**- रत्वे रुँत्वे ऽपि तयोरसिद्धत्वाल्लोपः प्रवर्तेत । अतो रुँत्वविधायकम् ८-२-६८ अहन् - इति सूत्रमावर्त्य 'अहन्' इति रूपान्वाख्यानं क्रियते, नलोपाभावार्थम् । तेनैतद् वचनं फलति ।

८-२-८ **न ङि**- ६-४-१३६ विभाषा ङिश्योः- सूत्रानन्तरं सूत्रमिदं पाठ्यम् । ङिसम्बुद्ध्योः=ङौ सम्बुद्धौ च परतः, न = नलोपो न भवति । इत्यर्थ उपदेश्यः । लक्षणसमन्वयश्छात्रैः कारयितव्यः । हे राजन् । अथ ६-४-१३७ न संयोगाद्..... सूत्रमुपदेश्यम् ।

८-२-९ **माद्**- अयवादिभ्यः= यवादिभिन्नात्, मात् + उपधायाश्च=मवर्णावर्णान्ताद् मवर्णावर्णोपधाच्च प्रातिपदिकात् परस्य, मतोः= मतोर्मकारस्य, वँः = वँ (अनुबन्धलोपे व्) आदेशो भवति । अत्र मतुँपा प्रातिपदिकादिति स्वतः प्रतीयते । यतो न हि प्रातिपदिकं विना मतुँप् संभवति । तच्च विशेष्यम् । अतस्तदन्तविधिः । मतोर्मकारस्येति तु १-१-५३ आदेः .... सूत्रबलात् फलति । **यशस्वान् । भास्वान्** १-४-१९ तसौ...... इति भत्वाद् रुँत्वाभावः । **अयवादिभ्यः** अत्र काशिका-अकृतवत्वो मतुँब् यवादिषु द्रष्टव्यः । यस्य सति निमित्ते मतुँपो वत्वं न दृश्यते स यवादिषु द्रष्टव्यः । इह नृमत इदं नार्मतमिति वहिरङ्गलक्षणत्वादवर्णोपधस्य मतुँपो वत्वं न भवतीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-१० झयः ॥
मरुत्वान् । दृषद्वान् ।

८-२-११ संज्ञायाम् ॥
अहीवती । मुनीवती ।

८-२-१२आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ॥
आसन्दीवान् ग्रामः । आसनवानन्यत्र । अष्ठीवान् ऋषिः । अस्थिमानन्यत्र । चक्रीवान् राजा । चक्रवानन्यत्र । कक्षीवान् ऋषिः । कक्ष्यावानन्यत्र । रुमण्वान् पर्वतः ।लवणवानन्यत्र। चर्मण्वती नदी । चर्मवत्यन्यत्र ।

८-२-१३ उदन्वानुदधौ च ॥
उदन्वान् समुद्रः । उदन्वान् ऋषिः । अन्यत्र उदकवान् घट इत्यादि ।

८-२-१४ राजन्वान् सौराज्ये ॥
राजन्वान् देशः । राजन्वती पृथ्वी । राजवानन्यत्र ।

८-२-१५ छन्दसीरः ॥१७
हरि॑वो मेदिनं त्वा
गीर्वान् । लोके तु मतिमान् ।

८-२-१६ अनो नुट् ॥ १७
अक्षण्वन्तः कर्णवन्तः ।

८-२-१७ नाद् घस्य ॥
सुपथिन्तरः । दस्युहन्तमः ।
(भूरिदाव्नस्तुँड् वक्तव्यः)
भूरिदावत्तरः ।
(ईद् रथिनः)
रथीतरः ।

८-२-१८ कृपो रो लः ॥ २२
कल्पते । चक्लृपे ।
(बालमूललघ्वसुरालमङ्गुलीनां वा रो लमापद्यत इति वक्तव्यम्)
बालः, बारः । मूलम्, मूरम् । लघु, रघु । असुलः, असुरः । अलम्, अरम् । अङ्गुलिः, अङ्गुरिः ।
(कपिलकादीनां संज्ञाछन्दसोर्वा रो लमापद्यत इति वक्तव्यम्)
कपिलकः, कपिरकः । लोमानि, रोमाणि ।

८-२-१० **झयः**= झयन्तात् प्रातिपदिकात् परस्य, मतोः + वः (८-२-९) । **मरुत्वान्** प्राग्वद् भत्वाज्जश्त्वाभावः ।
८-२-११ **संज्ञा**-मतोः + वः (८-२-९) संज्ञायाम्= संज्ञायां गम्यमानायाम् । उदाहरणयोः ४-२-८५ नद्यां..... इति मतुँप् । ६-३-१२० शरा..... इति दीर्घः ।
८-२-१२ **आस**- एतानि निपात्यन्ते- क्रमश आसनशब्दस्यासन्दीभावः । अस्थिशब्दस्याष्ठीभावः चक्रशब्दस्य चक्रीभावः । कक्ष्यायाः सम्प्रसारणम्, ६-४-२ हल इति दीर्घः । एषु ८-२-११ संज्ञा इति वत्वम् । लवणशब्दस्य रुमणभावः । चर्मणो नलोपाभावो णत्वं च । ८-४-२ अट्कु.... इत्यनेन तु न संभवति ८-४-३६ पदा..... इति प्रतिषेधप्रवृत्तेः । उभयत्र ८-२-९ मादु....इति वत्वम् ।
८-२-१३ उद- उदधौ= समुद्रे वाच्ये, संज्ञायाम् (८-२-११) च, उदन्वान्= उदन्वान् इति निपात्यते उदकशब्दस्योदन् मतौ ।
८-२-१४ **राजन्वान्**= राजन्वत् इति मतुँपि नलोपाभावो निपात्यते, सौराज्ये=सौराज्ये गम्ये ।
८-२-१५ **छन्द-इरः**= इवर्णान्ताद् रेफान्ताच्च प्रातिपदिकात् परस्य, मतोः + वः (८-२-९)छन्दसि=वेदे ।
८-२-१६ **अनो**- अनः=अन्नन्तात् प्रातिपदिकात् परस्य, मतोः (८-२-९) नुँट् =नुँडागमो भवति, छन्दसि (८-२-१५) । **अक्षण्वन्तः** ७-१-७६ छन्द...... इत्यनँङ् । नुँटोऽ सिद्धात्वात्तस्य वत्वं न भवति ततः परस्य च भवति ।
८-२-१७ **नात्**= नकारान्तात् प्रातिपदिकात् परस्य, घस्य = तरप्तमपोः, नुँट् (८-२-१६) छन्दसि (८-२-१५) । घस्य १-१-२१ तरप्तमपौ घः ।
भूरिदाव्नः= भूरिदावन् प्रातिपदिकात् परस्य, घस्य (८-२-१७) तुँट्= तुँडागमो वक्तव्यः । **ईद्**- रथिनः, ईद्, घे परे । रथिन इति स्थानषष्ठीनिर्देशाद् घे परे इत्यर्थः फलितः । **रथीतरः** नलोपे कृते, इकारस्य ईकारः । न तु नकारस्थाने तस्याऽसिद्धत्वात् सवर्णदीर्घानापत्तेः ।
८-२-१८ **कृपो**- अत्र दीक्षितः- कृप उः इति च्छेदः । कृप इति लुप्तषष्ठीकम् । तच्चावर्तते । कृपो यो रेफस्तस्य लः स्यात् । कृपेर्ऋकारस्यावयवो यो रेफसदृशस्तस्य च लकारसदृशः स्यात् इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-१९ उपसर्गस्यायतौ ॥
प्लायते । पलायते । निस्दुसो रुँत्वस्याऽसिद्धत्वान्न लत्वम् । निरयते । दुरयते । निर्दुरोस्तु भवत्येव- निलयते । दुलयते ।

८-२-२० ग्रो' यङि ॥२१
जेगिल्यते । यङीत्युक्तेर्नेह-निगीर्यते ।

८-२-२१ अचि विभा'षा ॥ २२
निगिलति, निगिरति । निगलनम्, निगरणम् । गिरौ । गिरः, इत्यत्र न भवति । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात् ।

८-२-२२ परेश्च घाङ्कयोः ॥
पलिघः, परिघः । पल्यङ्कः, पर्यङ्कः ।
(योगे चेति वक्तव्यम्)
पलियोगः, परियोगः ।

८-२-२३ संयोगान्त'स्य लोपः ॥ २४,२९
गोमान् । कृतवान् । युष्मान् । अस्मान् ।
(यणः प्रतिषेधो वाच्यः)
दध्यस्ति । मध्वस्ति ।

८-२-२४ रात् सस्य' ॥ २८
पितुः । नेह- ऊर्क् । अवर्वर्त् ।

८-२-१९ **उपसर्गस्य** = उपसर्गावयवस्य रः + लँः (८-२-१८ अयतौ= अयतौ परे ।
८-२-२० **ग्रो-ग्रः**= गृधातोः, रः + लः (८-२-१८) यङि= यङ्प्रत्यये परे । जेगिल्यते ३-१-२४ लुप.... इति भावगर्हायां यङ् ।
८-२-२१ **अचि-** ग्रः (८-२-२०) विभाषा=वा, रः + लँः (८-२-१८) अचि= अजादौ प्रत्यये परे ।
८-२-२२ **परेः**= परिशब्दस्य, रः + लँः (८-२-१८) विभाषा (८-१-२१) घाङ्कयोः=घशब्दे अङ्कशब्दे च परे । घ इति स्वरूपं गृह्यते न तु तरप्तमपौ ।
८-२-२३ **संयो-** १-१-७ हलो ऽनन्तराः..... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-
(क)
८-१-१६ पदस्य ॥ ८-२-२३ संयोगान्तस्य (क) लोपः ॥ इति ।
संयोगान्तस्य, (यस्यान्ते संयोगस्तस्य) (क)= पदस्य, लोपः = लोपो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयप्रसङ्गे सर्वस्य पदस्य (युष्मान्स् इत्यस्य अस्मान्स् इत्यस्य च) लोपे प्राप्ते, १-१-५१ अलो ..... सूत्रमुद्बोधनीयम् । युष्मान् । अस्मान् । टा- ङ्योः- त्वया । त्वयि । मया । मयि ।
टा प्रत्यये ङि प्रत्यये च ७-२-९७ त्वमा..... सूत्रप्रवृत्तौ श्यामपाटचामधोनिर्दिष्टरूपेण पृथक् पृथग् लेख्यम् । यथा- त्वद्+ आ, त्वद्+ इ, मद्+ आ, मद्+ इ, इति । अथ ७-२-८९ योऽचि-सूत्रं प्रस्तुत्यम् ।
८-२-२४ **रात् स-** ६-१-१०७ ऋत उत्-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-
(क)
८-२-२३ संयोगान्तस्य लोपः ॥ ८-२-२४ रात् सस्य (क) ॥ इति । रात्= रेफात् परस्य, सस्य=सकारस्य, (क)= लोपः= लोपो भवति ।
साम्प्रतमित्येवार्थ उपदेश्यः । नियमप्रक्रिया साम्प्रतं नोचिता बोधभारापत्तेः (द्वितीयावृत्तौ तु यथासूत्राभिप्रेतमर्थ उपदेश्यः । तथाहि- रात्+ सस्य+ [संयोगान्तस्य (८-२-२३)] = रेफात्परो यः सकारस्तदुभयरूपो यः संयोगस्तदन्तस्य, पदस्य लोपः । इत्यर्थः । एवं स्थितौ पूर्वेणैव सिद्धे सूत्रमिदं नियमार्थम् - संयोगान्त-पदस्यान्तस्य रेफात् परस्य वर्णस्य लोपो भवति चेत् तर्हि सकारस्यैव नान्यस्येति । तेन ऊर्क् अवर्वर्त् इत्यादौ न पूर्वसूत्रेण ककारादिलोप इति ।) लक्षणसमन्वयश्छात्रैः कारयितव्यः । अथ श्यामपाटचां पितुर्स् इत्यत्रत्यः सकारः कर्तनीयः । यथा- पितुर्स्=पितुर् । अथ विसर्गाय च्छात्रा आदेश्याः । ओस्यपि तृतीयैकवचने इव प्रक्रिया श्रोतव्या । आमि- ७-१-५४ ह्रस्व.... ६-४-३ नामि- सूत्रयोः प्रक्रिया निदर्शिता । सम्बोधने-पितृ+ स् ७-३-११० ऋतो....पित्+अर्+ स्= पितर् + स् ६-१-६६ हल्ङ्या..... पितर्, ८-३-१५ खर.... पितः । भोः पितः । इति रूपं छात्रैः साधयित्वा, अत्र ७-१-९४ ऋदु....सूत्रं कथं न प्रवर्तते इति च्छात्राः परीक्षणीयाः । सम्बोधनेऽपि औजसोः पूर्वयोरौजसोरिवेति बोध्यम् ।

अथात ओकारान्तः शब्द उपदेश्यः

'गौः पयस्विनी वर्तते' इति वक्तव्ये गोशब्दात् सुँप्रत्ये कृते गो+ स् इति श्यामपाटयां लिखित्वा १-१-४२ सुँड...... सूत्रमुद्बोध्य ७-१-९० गोतो णित्-सूत्रं प्रस्तुत्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-२५ धि च ॥
एधिताध्वे । पठिताध्वे ।

८-२-२६ झलो झलि ॥ ३६
अरौद्धाम् ।

८-२-२७ ह्रस्वादङ्गात् ॥
अकृत । अकृथाः ।

८-२-२८ इट ईटि ॥
अदेवीत् ।

८-२-२९ स्कोः संयोगाद्योरन्ते च ॥३६
पठ्यात् । तष्टः ।

८-२-२५ धि च- ७-४-५० तासस्त्यो..... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

८-२-२३ संयोगान्तस्य लोपः ॥ ८-२-२४ रात् सस्य ॥ ८-२-२५ (ख)(क) धि च ॥ इति । ख)= सस्य, = सकारस्य, (क)= लोपः, धि= धकारादौ प्रत्यये परे । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । पठिताध्वे । इटि- पठितास्+ ए इति श्यामपाट्यां लिखित्वा ७-४-५२ ह एति-सूत्रमुपस्थापयेत् ।

८-२-२६ झलो- ७-२-३ वदव्रज....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

८-२-२३ संयोगान्तस्य लोपः ॥ ८-२-२४ रात् सस्य ॥ ८-२-२६ झलो (ख)(क) झलि ॥ इति । झल : = झलः परस्य, (ख)= सस्य, (क)= लोपः, झलि= झलादौ प्रत्यये परे । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा 'अरौध्+ताम्' इति श्यामपाटचामवशेष्य ८-२-४० झष..... सूत्रं ८-४-५२ झलां....सूत्रं चोद्बोधयेत् । अरौद्धाम् । अरौत्सुः । इत्यादि । रूपाणि छात्रैः साधयेत् । आत्मनेपदे- छात्रैः साध्यमानम् 'अरुध्+स्+ त' इति श्यामपाटचां लिखित्वा १-२-११ लिँङ्सिँ...... सूत्रमुपदिशेत् ।

८-२-२७ ह्रस्वात्+अङ्गात्= ह्रस्वान्तादङ्गात् परस्य, सस्य (८-२-२४) लोपः (८-२-२३) झलि (८-२-२६) ।

८-२-२८ इट-७-३-९६ अस्ति... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

८-२-२३ संयोगान्तस्य लोपः ॥ ८-२-२४ रात् सस्य ॥ ८-२-२८ इट (ख)(क) ईटि ॥ इति । इटः = इटः परस्य, (ख)= सस्य, (क)= लोपः, ईटि= ईटि परे । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा 'अदेवि+ईत्' इति श्यामपाट्यां लिखित्वा ८-२-१ पूर्व..सूत्रोद्बोधनपुरस्सरं सर्वणदीर्घाऽप्राप्तिं सम्भाव्य ८-२-३ नमु.....सूत्र-स्थं सिँज्लो.......वार्तिकमुपदिशेत् ।

८-२-२९ स्कोः सं- ३-४-११६ लिँङाशिषि-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

८-१-१६ पदस्य ॥ ८-२-२३ संयोगान्तस्य लोपः ॥ ८-२-२६ झलो झलि ॥ ८-२-२९ स्कोः संयोग आद्योः (क) अन्ते (ग) च (ख) ॥ इति । (क)= पदस्य+ अन्ते= पदस्य अन्ते वर्तमानस्य, (ग)= झलि+ च = झलिपरे (पूर्वतः) वर्तमानस्य च, संयोग=संयोगस्य, आद्योः=आदौ वर्तमानयोः, स्कोः= सकारककार योः, (ख)= लोपः । इत्यर्थमुपदिश्य लक्षणसमन्वये, प्रकृते पदस्य अन्ते वर्तमानः संयोगः 'स्त्' इति, तदादिश्च सकारः (स्) । अतः प्रकृते सकारलोपो भवतीत्युपदिशेत् । पठ्यात् । तसि-पठ्यास्ताम् । अत्र पूर्वत्रेव कथं न सकारलोपः? इति च्छात्रान् परीक्षेत । उत्तरं तु स्ताम् इत्यत्र सकारतकारयोः संयोगः पदान्ते नास्ति । संयोगात् परतो झलपि नास्ति । इति । पठ्यासुः । सिपि- यासुँटः सकारस्य पूर्ववल्लोपः सिपः सकारस्य रुँत्वमिति बोधयेत् । पठ्याः । अथ पठ्यास्तम् । पठ्यास्त । पठ्यासम् । पठ्यास्व । पठ्यास्म । इति रूपाणि शृणुयात् । कर्मणि आशीर्लिङि तु पठ्+ त इति श्यामपाटचां लिखित्वा कर्तरीवार्धधातुकसंज्ञायां छात्रैः कारितायां ३-४-१०२ लिँङः.......... सूत्रमुद्बोध्य सत्यावश्यके ७-२-३५ आर्ध.... ६-१-६४ लोपो......... सूत्रे उद्बोध्य पठि+सी+त इति श्यामपाट्यां लिखित्वा ७-२-७९ लिँङः ..... सूत्रेण कथं न सकारलोपः ? इति च्छात्रान् परीक्ष्य ३-४-१०७ सुँट् ति......सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-३० चोः कुः ॥

वाक्। वाग्भिः। पक्ता। पक्तुम्।

पयोमुक्। पयोमुग्भ्याम्।

परौ व्रजेः षश्च पदान्ते (२२७उ.सू.)

परित्यज्य सर्वं व्रजति-परिव्राट्। परिव्राजौ।

८-१-३१ हो ढः ॥ ३५

लिट्, लिड्। लीढः।

८-२-३२ दादेर्धातोर्घः ॥३८,३३

धुक्, धुग्। दोग्धा। दोग्धुम्।

८-२-३३ वा द्रुहमुहष्णुहष्णिहाम् ॥

धुक्, धुग्, धुट्, धुड्। द्रोग्धा, द्रोढा। मुक्। मुग्, मुट्, मुड्। मोग्धा, मोढा। स्नुक्, स्नुग्, स्नुट्, स्नुड्। स्नोग्धा स्नोढा। स्निक्, स्निग्,स्निट्, स्निड्। स्नेग्धा, स्नेढा।

८-२-३४ नहो धः ॥

नद्धा। उपानत्।

८-२-३० चोः कुः-१-१-६१ प्रत्ययलोपे..... सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटी-प्रयागो यथा-

(क) ८-२-१६ पदस्य ॥ (ख) ८-२-२६ झलो झलि ॥ (ग) ८-१-२९ स्कोः संयोगाद्योः अन्ते च ॥

८-२-३० (क)(ग)(ख) चोःकुः ॥ इति। (क)=पदस्य, (ग)=अन्ते (वर्तमानस्य), (ख)= झलि च,= झलि परे (पूर्वतः) वर्तमानस्य च, चोः= चवर्गस्य स्थाने, कुः= कवर्गो भवति। इत्यर्थमुपदिश्य अर्थात् पदान्ते वर्तमानस्यापि चवर्गस्य स्थाने कवर्गो भवति,परतो झल् वर्णे सत्यपि चवर्गस्य स्थाने कवर्गो भवतीति भावं विशदय्य लक्षणसमन्वयश्छात्रैः कारयितव्य :। ८-४-३९ स्तोः श्चु.... सूत्रे दर्शितया रीत्या यथाक्रमं कार्यं भवतीति विभावनीयम्। अथ पयोमुक् इति श्यामपाट्यां लिखित्वा ८-२-३९ झलां..... सूत्रमुद्बोधनीयम्। ततः पयोमुग् इति श्यामपाट्यां लिखित्वा ८-४-५५ वाऽव....सूत्रमुद्बोधनीयम्। एवञ्च पयोमुक्, पयोमुग् इति रूपद्वयं बोधयितव्यम्। अथ ६-१-६७ एङ्-ह.....सूत्रे निदिर्शितया रीत्याऽजादौ चकारो मेलयितव्यः। भ्यामादिहलादौ पूर्वभागो ऽपि पदं भवति इति उद्बोधनपुस्सरं ८-३-३० चोः कुः ८-२-३९ झलां...सूत्रे उद्बोधनीये। पयोमुग्भ्याम्। पयोमुग्भिः। पयोमुग्भ्यः। सुपि- पयोमुग्+ सु इति श्यामपाट्यां लिखित्वा ८-२-५७ इण्कोः ८-४-५४ खरि..... सूत्रे उद्बोधनीये। (८-३-५९ आदे.... सूत्रं साम्प्रतमवधि नोपदिष्टमिति तच्चर्चा न कार्या) कषसंयोगे क्षः = अर्थात् क-ष-वर्णयोर्मिलितयोः क्ष इत्युच्चारणं भवति। पयोमुक्+षु= पयोमुक्षु। अजादौ तु सर्वनामस्थानभिन्ने ऽ पि परे कुत्वजश्त्वे न भवत इति भपदव्यवस्थामुद्बोधयता स्फुटं बोधयितव्यम्। पयोमुचः। पयोमुचा। पयोमुचे। पयोमुचः। पयोमुचोः। पयोमुचाम्। पयोमुचि। इति यथा। अथ राजन् शब्द उपदिश्यते- राजा प्रजाः पालयति इति वक्तव्ये राजन् शब्दात् सुँ प्रत्यये राजन्+ स् इति श्यामपाट्यां लिखित्वा ६-४-८ सर्व.... सूत्रे पितन्+स् पिता इतिवत्। राजा इति रूपं छात्रैः साध्यमानं शिक्षकेण श्रव्यम्। पदविषये तु नेतः परं तत्रत्य उपाय आदृत्यः। १-१-६१ प्रत्य... सूत्रस्योपदेशात्। औकारादिसर्वनामस्थाने सत्यावश्यके राजन्+ औ, राजन्+ अस्, राजन्+अम्, इति श्यामपाट्यां लिखित्वा ६-४-८ सर्व,... सूत्रमुद्बोधनीयम्। राजानौ। राजानः। राजानम्। राजानौ। शसि- राजन्+ अस् इति श्यामपाट्यां लिखित्वा ६-४-१२९ भस्य- सूत्रमुपदेश्यम्।

परौ= परिशब्दे उपपदे व्रजेः= व्रज्धातोः, क्विँप्+ दीर्घश्च (२२५) पदान्ते षश्च।

८-२-३१ हो ढः-हः= हकारस्य स्थाने, ढः= ढँ (अनुबन्धलोपे ढ्) आदेशो भवति प्राङ् निमित्ते। (पदस्य अन्ते वर्तमानस्य झलि परे पूर्वतो वर्तमानस्य च हः ढः)। **लीढः** ८-२-४० झष...८-४-४० ष्टुना..... ८-३-१३ ढो ढे..... ६-३-१११ ढ्रलो.... ।

८-२-३२ दादेः+**धातोः**= उपदेशे दकारादेर्धातोः, हः (८-२-३१) घः= घँ (अनुबन्धलोपे घ्) आदेशो भवति प्राङ् निमित्ते। दादेरित्यस्यावृत्त्या औपदेशिकदादेरित्यर्थलाभः।

८-२-३३ वा द्रु- द्रुह.... ष्णिहाम्= द्रुहप्रभृतीनाम्, वा= प्राङ्निमित्ते वा प्रागवत्।

८-२-३४ नहो- प्राङ् निमित्ते, नहः =नह् धातोः, हः (८-२-३१) धः=धँ (अनुबन्धलोपे ध्) आदेशो भवति। **उपानत्** उप+नह्+ क्विप्। ६-३-११६ नहि....इति दीर्घः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-३५ आहस्थँः ॥

आत्थ ।
(हृग्रहोर्भश्छन्दसि हस्येति वक्तव्यम्)
मध्वा जभार । गृभ्णामि ते ।

८-२-३६ व्रश्चँ भ्रस्जसृजमृज-यजराजभ्राजच्छशां षँः ॥

मूलवृट् । व्रष्टुम् । धानाभृट् । भ्रष्टुम् । रज्जुसृट् । स्रष्टुम् । परिमृट् । मार्ष्टुम् । देवेट् । यष्टुम् । राट् । भ्राट् । राजिसाहचर्यात् ८२३ टुभ्राजृँ दीप्ताविति फणादिरेव गृह्यते । १८१ भ्राजृँ दीप्तावित्यस्य तु कुत्वमेव । विभ्राक्, विभ्राग् । विभ्राग्भ्यामित्यादि । प्राट् । प्रष्टुम् । विट् । वेष्टुम् ।

८-२-३७ एकाचो बशो' भष्' झषन्तस्य' स्ध्वोः' ॥ ३८

भोत्स्यते । अभुद्ध्वम् । धुक् । धुग् । एकाच इत्युक्तेर्नेह - दामलिट् । स्ध्वोरित्युक्तेः पदस्य (८-१-१६) अन्ते (८-२-२९) इत्यनुवृत्तेश्च नेह- बोद्धुम् ।

८-२-३८ दधस्तथोश्च ॥

धत्तः । धत्थः । धत्से । धद्ध्वे ।

८-२-३९ झलां जशोऽन्ते ॥

वागीशः । सरिदुदकम् । अबुद्भवः । अन्तग्रहणं झलीत्यस्य निवृत्त्यर्थम् । तेनेह न-वस्ता । वस्तव्यम् ।

८-२-३५ आहः= आह्धातोः स्थाने, थँः= (अनुबन्धलोपे थ्) आदेशो भवति, झलि (८-२-२६) । पदस्य (८-१-१६)+ अन्ते (८-२-२९) इति तु नात्र सम्बध्यते, पदान्ते आहोऽ सम्भवात् । प्रकृतो धकारोऽ पि न विहितः ८-२-४० झष....इत्यस्य प्रवृत्त्यापत्तेः । **आत्थ** स्थानिवद्भावेन ७-३-९३ ब्रुव..... इति न प्रवर्तते, झलि थकारविधानात् ।

८-२-३६ व्रश्च- पदस्य (८-१-१६) अन्ते (८-२-२९) झलि (८-२-२६) च (८-२-२९) व्रश्च.... छशाम्= व्रश्च् प्रभृतिधातूनां छकारशकारान्तयोश्च, षँः= (अनुबन्धलोपे ष्) आदेशो भवति, राजभ्राजोः पदान्त एवोदाहरणसंभवः । न तु झल्यपि ।

८-२-३७ एका- धातोः (८-२-३२) + एकाचः + झषन्तस्य= धातोरवयवो य एकाज् झषन्तस्तदवयवस्य, बशः= बशः स्थाने, भष् = भष् भवति, स्ध्वोः= सकारध्वशब्दयोः परयोः, पदस्य (८-१-१६) अन्ते (८-२-२९) च । धातोः, एकाचः, झषन्तस्य, इत्यत्र अवयवषष्ठी बोध्या । अत्र झलि इति न सम्बध्यते; स्ध्वोर्ग्रहणात् । **भोत्स्यते** बुधँ + लृँट् । **अभुद्ध्वम्** बुध् + लुँङ्, ध्वम् । १-२-११ लिङ्सिँ....इति कित्वाद् गुणप्रतिषेधः । **दामलिट्** दामलिह्स्य इति नामधातोः क्विँपि रूपमिदम् ।

८-२-३८ दध= झषन्तस्य (८-२-३७) दधः= कृतद्विर्वचनस्य दधातेः, बशः + भष् (८-२-३७) तथोः= तकारथकारयोः परयोः, स्ध्वोः (८-२-३७) च । **धत्तः** वचनारम्भसामर्थ्यात् आतो लोपस्य स्थानिवद्भावः, अभ्यासजश्त्वस्याऽसिद्धत्वं च न भवतः ।

८-२-३९ झलां-८-३-३७ कुप्वोः.... सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र श्यामपाट्यां सूत्रमिदं लिखित्वा ८-१-१६ पदस्य सूत्रं पश्यतेतिच्छात्रा वाच्याः । छात्रेषु तत्सूत्रं पश्यत्सु तत् सूत्रं प्रकृतसूत्रेऽनुवर्तते, इति बोधनीयम् । अथ ८-३-२३ मोऽनु..... सूत्रे बोधितं पदज्ञानोपायमुद्बोध्य सपदच्छेदं सूत्रार्थः शिक्षणीयः। यथा- पदस्य+अन्ते= पदस्य अन्ते वर्तमानानाम्, झलाम्= (झल्प्रत्याहारोद्बोधनपुरस्सरं) झलां स्थाने, जशः = (जश् प्रत्याहारोद्बोधनपुरसरं) जशः भवन्ति, इति । अथ 'सरित्+उदकम्' इति श्यामपाट्यां लिखित्वा ऽधोनिर्दिष्टया रीत्या छात्रा बोधनीयाः । अयि वत्साः ? सरित् इति नदी उच्यते । अतः तत् पदम् इति ज्ञातम् । तस्यान्ते च तकारो वर्तते । तकारो झल्प्रत्याहारे वर्तते न वा ? इति पृष्ट्वा छात्रेभ्यो यथार्थमुत्तरे प्राप्ते सति, अतः सरित् इत्यस्य तकारः पदस्यान्ते वर्तमानो झल् वर्तते । अतस्तस्य स्थाने जश्= ज् ब् ग् ड् द् वर्णाः प्राप्ताः । कतमो वर्णो भवेदिति निर्णयाय स्थानं विचारणीयं भवतीति तकारस्य स्थानं ब्रूत इतिच्छात्राः प्रष्टव्याः । छात्रैर्यथार्थमुत्तरे दत्ते ऽधोनिर्दिष्टरूपेण श्यामपाट्यां लेख्यम् । यथा- तकारस्य स्थानं दन्ताः । दन्तस्थाने लृ त् थ् द् ध् न् ल् स् - एते वर्णाः सन्ति । प्रकृतसूत्रेण तकारस्य स्थाने ज् ब् ग् ड् द् - एते वर्णाः प्राप्ताः सन्ति । इति । अथ शिक्षकेण लृकारादारभ्य सकारावधि प्रत्येकमक्षराणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-४० झषस्तथोर्धोऽधः ॥
रुणद्धि । लब्धा । दोग्धा । अध इत्युक्तेर्नेह- धत्तः । धत्थः ।

८-२-४१ षढोः कँः सि ॥
पेक्ष्यति । लेक्ष्यति ।

८-२-४२ रदाभ्यां निष्ठातो नँः पूर्वस्य च दः॥ ६१
शीर्णः । शीर्णवान् । भिन्नः । भिन्नवान् ।

अङ्गुल्या दर्शयता एष वर्णः जकारोऽस्ति न वा ? इति प्रश्न कार्यः । यथा- लृकारं दर्शयित्वा अयं वर्णः जकारो न वा ? इति । एवं प्रत्येकं वर्णेष्वपि बोध्यम् । ततश्छात्रेभ्यो नाऽयं जकारः लृकारोऽयम्, नाऽयं जकारः, तकारोऽयम् इत्यादि- रीत्या सर्वेषां वर्णानां विषये उत्तरे प्राप्ते दन्तस्थाने जकारो नास्ति इति बोधयता शिक्षकेण श्यामपाटचां निर्दिष्टस्य जकारस्योपरि × इदं चिह्नं देयम् । अथैवं रीत्या सर्वेषामन्येषां क्रमेण विचारप्रसङ्गे ब् ग् ड् एतेषामुपरि च × चिह्नमिदं देयम् । द् इति तु तवर्गस्य तृतीयो वर्णः । अतः स दन्तस्थाने वर्तते । अतो दकारोपरि √ इदं चिह्नं देयम् ।

× × × × √

एवञ्च ज् ब् ग् ड् द् इति श्यामपाट्यां लिखितान् दर्शयता शिक्षकेण तकारस्य स्थाने दकारो जात इति बोधयता श्यामपाट्यां सरित्= सरिद्+ उदकम्= सरिदुदकम् । इति स्फुटं प्रकाशनीयम् । अथ वाक् + अर्थौ, वाक्+ ईशः, अप्+ उद्भवः, महत्+इदम्, बृहत्+ उदरम्, भास्वत्+रश्मिः, विवस्वत्+ अंशः, विष्वक्+ आविर्भावः । इत्यादिषु छात्रैर्लक्षणसमन्वयः कारयितव्यः । सिद्धरूपाणि च लेखयितव्यानि। अस्मिन्नेव प्रसङ्गे प्रकतसूत्रोदाहरणत्वेन १-१-१ वृद्धि..... सूत्रस्य १-१-२ अदे....सूत्रस्य च पदच्छेदः शिक्षयितव्यः । तयोर्वाक्यार्थ-शिक्षणं तु साम्प्रतं नातीवोपयोगि । छात्राणामुत्कटाकाङ्क्षायां सत्यां तु वाक्यार्थोऽप्युपदेश्य एव । १-१-१ वृद्धि.....सूत्रस्य प्रथमपदच्छेदसन्दर्भे विशेषोपदेशोऽप्यत्यन्तमावश्यकः । यथा- अयि वत्साः ? सूत्राणां पदच्छेदो नाम सूत्राणां प्रत्येकं पदानां पृथक्कार उच्यते । अतः सावधानं पश्यतेति वदता शिक्षकेण श्यामपाट्यां १-१-१ सूत्रं वृद्धिरादैच् इति लिखित्वा अत्र सूत्रे त्रीणि पदानि सन्ति । वृद्धिः आत् ऐच् इति । द्वितीयस्य पदस्य आत् इत्यस्य तकारस्य स्थाने प्रकृतसूत्रेण जश्त्वेन दकारो भवतीति यद्यपि प्रथमं पदं रेफान्तम्= वृद्धिर् इति प्रतीयते । तथापि पदच्छेद (पृथक्कार) वेलायां परतः कोऽपि वर्णो न भवति । अर्थात् अवसानं भवति । अवसाने च पदान्तरेफस्य स्थाने विसर्गो भवति । अतो रेफो विसर्गाय क्लृप्त उच्चरणीयः । वृद्धिः इति । एवं सर्वत्र ज्ञेयमिति बोधयता ८-३-१५ खर.....सूत्रार्थोऽप्युद्बोधनीयः । अथवा प्रकृते १-१-१ वृद्धि....सूत्रं न प्रस्तुत्यम् । किन्तु १-१-२ अदे.....सूत्रमात्रं प्रस्तुत्यम् । अत्+एङ्= अद्+ एङ्= अदेङ् इति । अथ ८-४-५२ झलां... सूत्रमुपदेश्यम् ।

८-२-४० झष- ३-१-७८ रुधादिभ्यः.... सूत्रानन्तरं सूत्रमिदं पाठचम् । अधः = धाधातुभिन्नात्, झष := झषन्ताद् धातोः परयोः, तथो := तकारथकारयोः स्थाने, धँः= धँ (अनुबन्धलोपे ध्) आदेशो भवति । इत्यर्थमुपदश्यिच्छात्रैर्लक्षणसमन्वयं कारयित्वा रुणध्+ धि इति श्यामपाट्यां लिखित्वा ८-४-५२ झलां.... सूत्रमुद्बोध्य तैरेव समन्वयं कारयेत् । रुणद्धि । सिपि - रुणत्सि । मिपि-रुणध्मि । इति रूपाणिच्छात्रैः साधयेत् । तसादौ पिद्भिन्ने तु रुनध् + तस् इत्यवस्थायाम् १-२-४ सार्व....सूत्रमुदबोध्य ६-४-१११ श्नसो....सूत्रमुपदिशेत् ।

८-२-४१ षढोः = षकारढकारयोः स्थाने, कँः = कँ (अनुबन्धलोपे क्) आदेशो भवति, सि= सकारादौ प्रत्यये परे । **पेक्ष्यति** कषसंयोगे क्ष := ककार- षकारयोः संयोगे सति क्ष इत्युच्चारणं भवति ।

८-२-४२ रदा -७-२-१६ आदितश्च- सूत्रानन्तरं सूत्रमिदं पाठचम् । रदाभ्याम्= रेफदकाराभ्याम् परस्य, निष्ठातः= निष्ठाप्रत्ययस्य तकारस्य स्थाने, पूर्वस्य+ दः+च = निष्ठाप्रत्ययात् पूर्वस्य दकारस्य स्थाने च, नँः= नँ (अनुबन्धलोपे न्) आदेशो भवति । इत्यर्थोपदेशप्रसङ्गे द्वयोः स्थाने एक आदेशो न, किन्तु पृथक् पृथकगेवादेशौ, इति बोधयित्वा छात्रेषु लक्षणसमन्वयं कुर्वत्सु शिक्षकः सावधानं शृणुयात् । भिन्नवान् । भिन्नवती । अथ छिद् धातोः क्तवतुँप्रत्यये कीदृशानि रूपाणि भवन्तीति च्छात्रान् परीक्षेत । अथ, ईदनुबन्धफलमुपदिदिक्षुः, मद् (मदीँ १२०७ इति दिवादौ धातुपाठे दर्शयित्वा) धातोः क्तवतुँप्रत्यये मद्+तवत् इत्यवस्थायाम् इटं सम्भाव्य ७-२-१४ श्वीदि....सूत्रमुपदिशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-४३ संयोगादेरातो धातोर्यण्वतः ॥
निद्राणः । निद्राणवान् । म्लानः । म्लानवान् ।
८-२-४४ ल्वादिभ्यः ॥
लूनः । लूनवान् । धूनः । धूनवान् । जीनः । जीनवान् ।
(ऋॄल्ल्वादिभ्यः क्तिन्निष्ठावद् भवतीति वक्तव्यम्)
कीर्णिः । गीर्णिः लूनिः । धूनिः ।
पूनिः । पवित्रायां तु पूतिः ।
(दुग्वोर्दीर्घश्च)
दूनः । गूनः ।
(पूञो विनाशे)
पूना यवाः । विनष्टा इत्यर्थः । विनाश इत्युक्तेर्नेह- पूतं धान्यम् ।
(सिनोतेर्ग्रासकर्मकर्तृकस्य)
सिनो ग्रासः स्वयमेव ।
ग्रासकर्मकर्तृकस्येत्युक्तेर्नेह-सिता पाशेन सूकरी । ग्रासोऽपि यदा कर्मैव भवति, न कर्मकर्ता, तदा न भवति- सितो ग्रासो देवदत्तेन ।
८-२-४५ ओदितश्च ॥
भुग्नः । शूनः । उद्विग्नवान् ।
(स्वादय ओदितः)
सूनः । सूनवान् । उड्डीनः । उड्डीनवान् ।
८-२-४६ क्षियो दीर्घात् ॥
क्षीणस्तपस्वी । क्षीणवान् ।
८-२-४७ श्योऽस्पर्शे ॥
शीनं घृतम् । अस्पर्शे इत्युक्तेर्नेह- शीतं जलम् । शीतो वायुः ।

८-२-४३ संयोगादेः, = संयोगादिकात्, आतः = आकारान्तात्, यण्वतः, =यण्घटितात्, धातोः =धातोः परस्य, निष्ठातः + नँः (८-२-४२) ।

८-२-४४ ल्वादिभ्यः= लूञ्प्रभृतिगणपठितधातुभ्यः परस्य, निष्ठातः + नँः (८-२-४२) ।

ऋॄल्वादिभ्यः- लुवः आदिः= ल्वादिः= पूः । लूः आदिर्येषां ते ल्वादयः । ल्वादिश्च ल्वादयश्च ल्वादयः । ऋॄच्च ल्वादयश्च ऋॄल्वादयः । तेभ्यः परः, क्तिन् निष्ठावद् भवतीति वक्तव्यम् । तेन ल्वादिशब्देन पूञ्धातुरपि गृहीतः । **पूनिः** ८-२-४४ ल्वादि- सूत्रस्थेन पूञो....वार्तिकेन-नत्वम् ।

दुग्वोः = दु गु धात्वोः, निष्ठातः + नँः, (८-२-४२) दीर्घश्च प्रकृतेः ।

पूञो- निष्ठातः+नँः (८-२-४२) ।

सिनो- निष्ठातः+नँः (८-२-४२) ।

८-२-४५ **ओदि**- ८-२-५७ न ध्याख्या....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)
८-२-४२ रदाभ्यां निष्ठातः नँः पूर्वस्य च दः ॥ ८-२-४५ ओदितः च (क)(ख) ॥ इति ।

ओदितः= ओकारेत्संज्ञकाद् धातोः परस्य, (क)= निष्ठातः= निष्ठाप्रत्ययतकारस्य स्थाने, (ख)= नँः= नँ (अनुबन्धलोपे न्) आदेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयित्वा विज्+ नवत् इति श्यामपाट्यां लिखित्वा ८-२-३० चोः कुः-सूत्रं प्रकृतोदाहरणे प्रवर्तेत न वा ? इति च्छात्रान् परीक्षेत । यदि सयुक्ति,प्रवर्तते इति च्छात्रा ब्रूयुस्तदा तेषामुत्साहं वर्धयेत् प्रशंसया । अन्यथा ८-२-१ पूर्व.....सूत्रमुद्वोधयेत् । विग्नवत् । विग्नवान् । विग्नवती । उद् इति उपसर्गे उद्विग्नवत् । उद्विग्नवान् । उद्विग्नवती । अथाऽधो निर्दिष्टरूपेण क्तप्रत्ययमुपदिशेत् । वत्साः ? यथा भूते क्तवतुँप्रत्ययः कृतः । तथैव क्तप्रत्ययो ऽपि भवति, किन्तु क्तवतुँ प्रत्ययः कर्त्रर्थे साधितः । क्तप्रत्ययस्तु साधारणरूपेण भावकर्मणोः साध्यते= सकर्मकेभ्यः कर्मणि, अकर्मकेभ्यो भावे । इति । तथा हि इति वदन् ३-४-७० तयोरेव....सूत्रमुपदिशेत् ।

स्वाद-गणसूत्रमिदं दैवादिकम् ११३९ धातुस्थम् ।

८-२-४६ **क्षियो**- दीर्घात्= दीर्घीभूतात्, क्षियः=क्षिधातोः परस्य, निष्ठातः+नँः (८-२-४२) । उदाहरणानि ६-४-६०,६१ सूत्रयोरपि द्रष्टव्यानि ।

८-२-४७ **श्योऽस्प**- श्यः= श्याधातोः परस्य, निष्ठातः+नँः (८-२-४२) अस्पर्शे= स्पर्शाऽनवगमे । **शीनं शीतम्** ६-१-२४ द्रव.....इति सम्प्रसारणम् । ६-४-२ हलः- इति दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-४८ अञ्चोऽनपादाने ॥

समक्नः । अनपादान इत्युक्तेर्नेह- उदक्तमुदकं कूपात् ।

८-२-४९ दिवोऽविजिगीषायाम् ॥

द्यूनः । विजिगीषायां तु द्यूतम् ।

८-२-५० निर्वाणोऽवाते ॥

निर्वाणो ऽग्निर्मुनिर्वा । वाते तु निर्वातो वातः ।

८-२-५१ शुषः कँः ॥

शुष्कः । शुष्कवान् ।

८-२-५२ पचो वँः ॥

पक्वः । पक्ववान् ।

८-२-५३ क्षायो मँः ॥ ५४

क्षामः । क्षामवान् ।

८-२-५४ प्रस्त्योऽन्यतरस्याम् ॥

प्रस्तीमः, प्रस्तीतः । प्रस्तीमवान्, प्रस्तीतवान् ।

८-२-५५ अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः॥

फुल्लः । क्तवत्वेकदेशस्यापीदं निपातनमिष्यते । फुल्लवान् । क्षीबो मत्तः । क्षीबादिषु क्तप्रत्यय एव निपातनम् । कृशस्तनुः । उल्लाघो निर्गतो गदात् । अनुपसर्गादित्युक्तेर्नेह- प्रफुल्तः । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । प्रफुल्लमिति तु फुल्लँ विकसने, धातोः पचाद्यचि बोध्यम् । (उत्फुल्लसम्फुल्लयोरुपसंख्यानम्)

उत्फुल्लः सम्फुल्लः ।

८-२-५६ नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ॥

नुन्नः, नुत्तः । विन्नः, वित्तः । वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते । विन्तेर्विन्नश्च वित्तश्च भोगवित्तश्च विन्दतेः ॥ उन्नः, उत्तः । त्राणः, त्रातः । घ्राणः, घ्रातः । ह्रीणः, ह्रीतः ।

८-२-५७ न ध्याख्यापॄमूर्छिमदाम् ॥ ६१

ध्यातः । ध्यातवान् । ख्यातः । ख्यातवान् । पूर्तः । पूर्तवान् । मूर्तः । मूर्तवान् । मत्तः । मत्तवान् ।

८-२-५८ वित्तो भोगप्रत्यययोः ॥

वित्तम् धनमित्यर्थः । वित्तः । प्रतीतः=ख्यात इत्यर्थः।

८-२-४८ अञ्चो- अञ्चः= अञ्च्धातोः परस्य, निष्ठातः+नँः (८-२-४२) अनपादाने = अपादानाऽनवगमे । **समक्नः** सङ्गत इत्यर्थः । ७-२-१५ यस्य....... इतीट्प्रतिषेधः । ६-४-२४ अनि.:... इति नलोपः । नत्वस्याऽसिद्धत्वात् ८-२-३० चोः कुः इति कुत्वम् ।

८-२-४९ दिवो-दिवः=दिव् धातोः परस्य, निष्ठातः+नँः (८-२-४२) अविजिगीषायाम् = द्यूतानवगमे ।

८-२-५० निर्वा-निर्वाण इति निष्ठातस्य नत्वं निपात्यते, अवाते=वातानवगमे ।

८-२-५१ शुषः- =शुष्धातोः परस्य, निष्ठातः (८-२-४२) कँः =कँ (अनुबन्धलोपे क्) आदेशो भवति ।

८-२-५२ पचो-पचः= पच्धातोः परस्य, निष्ठातः (८-२-४२) वँः=वँ (अनुबन्धलोपे व्) आदेशो भवति । **पक्वः** वत्वस्याऽसिद्धत्वात् ८-२-३० चोः कुः-इति कुत्वम् ।

८-२-५३ क्षायो-क्षायः= क्षैधातोः परस्य, निष्ठातः (८-२-४२) मँः=मँ (अनुबन्धलोपे म्) आदेशो भवति ।

८-२-५४ प्रस्त्यो- प्रस्त्यः=प्रपूर्वकस्त्याधातोः परस्य, निष्ठातः (८-२-४२) अन्यतरस्याम्=वा (८-२-५३) । उदाहरणेषु ६-१-२३ स्त्यः प्र....इति सम्प्रसारणम् ।

८-२-५५ अनु-फुल्लः निष्ठातकारस्य लत्वम् । ञिफलाँ (५१४)+क्तः ७-२-१६ आँदि...इतीट् प्रतिषेधः । ७-४-८९ ति च-इत्युत्वम् । **बोध्यम्** सूत्रं तु फुल्तादिनिवृत्त्यर्थम् । **क्षीबो मत्तः** । क्षीबादिषु निपातनं ८-२-३ न मु..... सूत्रस्थे निष्ठा.....इति वार्तिके दृश्यम् ।

८-२-५६ नुद .... ह्रीभ्यः= नुद् इति प्रभृतिभ्यः परस्य, निष्ठातः +पूर्वस्य +दः (८-२-४२) च, अन्यतर स्याम् = वा, नँः (८-२-४२) । **विन्नः**...विदँ विचारणे (११७०) इति श्नंविकरणस्य ग्रहणम्, उन्दिसाहचर्यात् । **भोगवित्तश्च** भोगग्रहणं प्रत्ययस्याप्युपलक्षणम् । वित्तो भोगप्रत्यययोः (८-२-५८) इत्युक्तेः ।

८-२-५७ न ध्या- ७-२-१४ श्वीदितो...सूत्रानन्तरं सूत्रमिदं पाठ्यम् । ध्या...: मदाम्= ध्या ख्या पॄ मूर्छ् मद् धातूनाम्, न= निष्ठातकारस्य स्थाने नकारो न भवति । लक्षणसमन्वयं छात्रैः कारयित्वा ८-४-५४ खरि ....सूत्रमुद्बोधयेत् । मत्तवान् । अथ ओँकारानुबन्धफलमुपदिदिक्षुः, विज् (ओँ विजीँ १२८८ तुदादौ धातुपाठे दर्शयित्वा) धातोः क्तवतुँ प्रत्यये छात्रैः ७-२-१४ श्वीदि..... सूत्रेणेटो निषेधं साधयित्वा विज्+तवत् इति श्यामपाट्यां लिखित्वा ८-२-४५ ओदितश्च - सूत्रमुपदिशेत् ।

८-२-५८ वित्तो -भोगप्रत्यययोः= भोग्ये प्रतीत्ये च, वित्तः= वित्त इति नत्वाऽभावो निपात्यते । सूत्रे भोग प्रत्ययशब्दौ कर्मसाधनौ । भुज्यत इति भोगः, प्रतीयते इति प्रत्यय इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-५९ भित्तं शकलम् ॥

भिन्नमन्यत् ।

८-२-६० ऋणमाधमर्ण्ये ॥

ऋणं ददाति । ऋणं धारयति । आधमर्ण्ये इत्युक्तेर्नेह-ऋतं ब्रवीमि ।

८-२-६१ नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानिच्छन्दसि ॥

८-२-६२ क्विँन्प्रत्ययस्य कुः ॥ ६३

तादृक्, तादृग् । तादृग्भ्याम् । क्विँनः कुः इत्येव वक्तव्ये प्रत्ययग्रहणं बहुव्रीहिलाभार्थम् । तेन क्वचित् क्विँन् प्रत्ययो भवति चेदन्यत्रापि कुत्वम् । दृक्, दृग् । दृग्भ्याम् ।

८-२-६३ नशेर्वा ॥

नक्, नग्, नट्, नड् । नग्भ्याम्, नड्भ्याम् । इत्यादि ।

८-२-६४ मोंनों धातोः ॥ ६५

प्रशान् । पदस्येत्यनुवृत्तेर्नेह- प्रशामौ । प्रशामः ।

८-२-६५ म्वोश्च ॥

चक्षण्वहे । चक्षण्महे ।

८-२-६६ ससजुषो रुँः ॥ ७४,७१

बालकः । अग्निः । वायुः। सजूः । छात्राः ।

८-२-५९ **भित्तं**- शकलम्= खण्डे वाच्ये, भित्तम्= भित्त इति निष्ठानत्वाऽभावविशिष्टं निपात्यते । भित्तं शकलं खण्डमिति पर्यायाः ।

८-२-६० **ऋण**- आधमर्ण्ये= आधमर्ण्ये वाच्ये, ऋणम्= ऋण इति (ऋधातोः परस्य निष्ठातकारस्य नत्वम्) निपात्यते ।

८-२-६१ **नसत्त**....तानि= निपात्यन्ते, छन्दसि = वेदे । सदेर्नञ्पूर्वान्निपूर्वाच्च निष्ठानत्वा ऽभावो नञो नलोपाभावश्चाचे निपात्येते । असन्नं निषण्णमिति प्राप्ते नत्वाऽभावः उन्देर्नञ्पूर्वस्या ऽनुत्तम् । अत्रापि नत्वाऽभावः । अनुन्नमिति प्राप्ते । त्वरतेः, तुर्वीं इत्यस्य वा प्रतूर्तम् । प्रतूर्णमिति प्राप्ते नत्वाऽभावः । सृ इत्येतस्य उत्वं नत्वाऽभावश्च । सूर्तम् । सृतमिति प्राप्ते । गूर्तम् । गुरीँ इत्येतस्य नत्वाऽभावः । गूर्णमिति प्राप्ते ।

८-२-६२ **क्विन्प्रत्ययस्य**=क्विन्प्रत्ययान्तस्य, पदस्य (८-१-१६) कुः = कवर्गादेशो भवति । १-१-५१ अलो.....इत्यन्तस्यैव कुत्वम् । **तादृक्** ३-२-६० त्यदा....इति क्विँन् ।

८-२-६३ **नशेः**= नश्धात्वन्तस्य (१-१-७१ येन... इति तदन्तविधिः) पदस्य (८-१-१६) = पदस्य स्थाने, वा = विभाषया, कुः (८-२-६२) । उदाहरणेषु व्यपदेशिवद्भावेन सूत्रप्रवृत्तिः । आदेशस्तु १-१-५१ अलो... इति बलादन्त्यस्याऽलः स्थाने भवति ।

८-२-६४ **मो नो**- मः + धातोः = मकारान्तो यो धातुस्तदन्तस्य, पदस्य(८-१-१६)= पदस्य स्थाने, नँः = नँ (अनुबन्धलोपे न्) आदेशो भवति । उदाहरणेऽन्त्यादेशः प्रागवत् । **प्रशान्** नत्वस्याऽसिद्धत्वात् ८-२-७ न लो... इति नलोपो न । एवं प्रशान्भ्याम् ।

८-२-६५ **म्वोश्च**- मः+ धातोः (८-२-६४) = मकारान्तधातोः स्थाने, नँः (८-२-६४) म्वोः= मकारवकार योः परयोः । उदाहरणयोः क्षमूँष् सहने (४४१)+लिँट् । ऊँदित्त्वेन वेट्त्वादिडभावे रूपे इमे ।

८-२-६६ **सस**- ६-१-१०५ एङः पदान्ता.... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र सूत्रे विधेयांशः सानुनासिकः 'रुँ' इति ज्ञेयः । यस्तु निरनुनासिकः 'रुः' इति पठचते स तु परम्परीणस्वाध्यायविकृतिमूलकः । एवमग्रेऽपि तत्र तत्र स्थलेष्वपि बोध्यम् । विषयोऽयम् १-३-२ उप....सूत्रे विशेषेण पूर्वं विचारितः । अथ शिक्षको मनसाऽवदध्याद् यद्, यद्यपि ८-१-१६ पदस्य इत्यनुवृत्त्या १-१-७१ येन....सूत्रेण तदन्तविधौ सकारान्तस्य सजुष्शब्दान्तस्य च पदस्य स्थाने रुँः । इति सूत्रार्थः । १-१-५१ अलो.....सूत्रबलेन चाऽन्त्यस्य स्थाने रुँर्भवति [द्वितीयावृत्तौ तु तथाऽर्थ एवोपदेश्यः । तदा सजूः इत्यादौ च व्यपदेशिवद्भावेन रुँरिति बोध्यम्] तथापि बालानामुपलालनामनुसृत्य सूत्रार्थ उपदेश्यः (एवमन्यत्र ८-३-२३ मोऽनु ..... इत्यादिष्वपि बोध्यम्) तदर्थमधोनिर्दिष्टरूपेण श्यामपाटचां सूत्राणि लेख्यानि ।

(क)

८-१-१६ पदस्य ॥

(ख)

८-२-३९ झलां जशः अन्ते ॥

८-२-६६ (क) (ख) ससजुषो रुँः ॥ इति । अथ (क)=पदस्य, (ख)= अन्ते (वर्तमानयोः) ससजुषोः = सकारस्य सजुष्शब्दस्य च स्थाने, रुँ := रुँ इत्यादेशो भवतीति । तथा शिक्षितेऽपि साम्प्रतं सजुष्शब्दो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-६७ अवयाः श्वेतवाः पुरोडाश्च ॥

चकारोऽनुक्तसमुच्चयार्थः । हे उक्थशाः । इति काशिका ।

८-२-६८ अहन् ॥ ६९

अहोभ्याम् । अहःसु ।

८-२-६९ रोऽसुँपि ॥ ७१

अहरहः । अहर्गणः ।

(रूपरात्रिरथन्तरेषु रुँत्वं वाच्यम्)

अहोरूपम् । गतमहो रात्रिरेषा । एकदेशविकृतमनन्यवत् ।

अहोरात्रः । अहोरथन्तरम् ।

८-२-७० अम्नरूधरवरित्युभयथा छन्दसि ॥

अम्न एव, अम्नरेव । ऊध एव, ऊधरेव । अव एव, अवरेव ।

(छन्दसि भाषायां च प्रचेतसो राजन्युपसंख्यानं कर्तव्यम्)

प्रचेतो राजन्, प्रचेता राजन् ।

(अहरादीनां पत्यादिषु वा रेफः)

अहर्पतिः, अहᳲ पतिः, अहःपतिः । गीर्पतिः । धूर्पतिः ।

८-२-७१ भुवश्च महाव्याहृतेः ॥

भुव इत्यन्तरिक्षम्, भुवरित्यन्तरिक्षम् । महाव्याहृते रित्युक्तेरिह रुँरेव-भुवो विश्वस्य ।

८-२-७२ वसुँ- स्रंसुँ-ध्वंस्वनडुहां दः ॥

विद्वद्भ्याम् । उखास्रत् । पर्णध्वत् ।

अनडुद्भ्याम् ।

'स' इत्यनुवृत्तेर्नेह-विद्वान् ।

८-२-७३ तिप्यनस्तेः ॥

अचकात् । अन्वशात् ।

अनस्तेरित्युक्तेर्नेह-आप एवेदं सलिलं सर्वमाः ।

८-२-७४ सिपि- धातो रुँर्वा ॥ ७५,७९,७५

अचकात् त्वम्, अचकास्त्वम् । अन्वशात् त्वम्, अन्वशास्त्वम् ।

नोदाहार्यः । बोधभारापत्तेः । अतो दन्त्यसकारान्तान्येवोदाहरणान्यधोनिर्दिष्टरीत्या प्रस्तुत्यानि । अयि वत्साः ? ८-३-१५ खर...... सूत्रे यान्युदाहरणानि रेफान्तानि दत्तानि तानि प्रथमं दन्त्यसकारान्तानि । यथा पठन्ति व्याकरणं छात्रास् । हसन्ति बालकास् । बालकस्+ स्वपिति । कीनाशस्+खनति । वृक्षास्+ फलन्ति । सूदस्+पचति । इति । तत्र प्रकृतसूत्रेण दन्त्यसकार (स् इत्यस्य) स्थाने रुँ इत्यादेशो भवति । यथा पठन्ति व्याकरणं छात्रा रुँ इत्यादि । अथ १-३-२ उपदेशे...सूत्रमुपदेश्यम् ।

८-२-६७ अव- ३-२-७१ मन्त्रे....इति ३-२-७२ अवे....इति च ण्विंन् प्रसङ्गे ३-२-७२ अवे.... सूत्रस्थ श्वेत.....वार्तिकविहितडस् प्रत्ययान्तानां सम्बुद्धौ दीर्घो निपात्यते ।

८-२-६८ अहन्= अहन्नन्तस्य, पदस्य (८-१-१६) रुँः (८-२-६६) । सूत्रमिदमावर्त्य प्रथमेन नलोपाऽभावं निपात्य द्वितीयेन रुँर्विधेयः । ८-२-७ नलोपः ..... सूत्रे पठितं वचनमेतन्मूलकं बोध्यम् ।

८-२-६९ रोऽसुँ-अहन् (८-२-६८) पदस्य (८-१-१६) रः= रेफादेशो भवति, असुँपि= परतः सुँप्यसति । पूर्वसूत्रापवादः ।

८-२-७० अम्न...रिति= अम्नस् प्रभृतिषु, उभयथा= रुँर्वा रेफो वा, छन्दसि= वेदे ।

छन्द- उभयथा (८-२-७०) । उदाहरणं सम्बुद्ध्यन्तम् । रुँत्वपक्षे ६-१-११० हशि चेत्युत्वम् । रेफपक्षे ८-३-१४ रो रि इति रेफलोपः । अह-आदिशब्द उभयत्र प्रकारार्थः । अर्थात् 'अहन्' शब्दसदृशब्दानां स्थाने, पतिशब्दसदृशशब्देषु परेषु वा रेफ इति । १-१-५१ अलो...इत्यन्तवर्णस्य स्थाने भवत्यादेशः ।

८-२-७१ भुव= भुव इत्येतदव्ययमन्तरिक्षवाचि- महाव्याहृतिस्तस्य स्थाने, उभयथा (८-२-७०) ।

८-२-७२ वसुँ- ८-२-६६ सस....सूत्रात् 'स' इत्यनुवर्तते, तस्य च तदन्तविधिः । वसुँ... डुहाम्= सान्त-वसँप्रत्ययान्तस्य, स्रंसुँप्रभृत्यन्तस्य च, पदस्य (८-१-१६) दः=दँ (अनुबन्धलोपे द्) आदेशो भवति ।

८-२-७३ तिप्य-अनस्तेः= अस्धातुभिन्नस्य, स (८-२-६६) (स्य)= सकारान्तस्य, पदस्य (८-१-१६) दः (८-२-७२) तिपि= तिपि परे । **सर्वमाः** अस्तेर्लँङि तिपि ७-३-९७ बहु.... इति नेट् । आः ।

८-२-७४ सिपि- स (८-२-६६) (स्य) = सकारान्तस्य, पदस्य (८-१-१६)=पदसंज्ञकस्य, धातोः=धातोः स्थाने, वा= विभाषया, रुँः = रुँ इत्यादेशो भवति, सिपि= सिपि परे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-७५ दश्च ॥	८-२-७७ हलि च ॥
अरुणः, अरुणत्, । अवेत् त्वम्, अवेस्त्वम् ।	शीर्णः । दीव्यति ।
८-२-७६ र्वोरुपधाया दीर्घ इकः॥ ७९	८-२-७८ उपधायां च ॥
गीः । पूः ।	मूर्छीति । कूर्दते ।

८-२-७५ दश्च-६-४-१११ श्नसो........ सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र प्रथमं ८-२-६६ सस...सूत्र मवेक्ष्य तत्त्वं विदन्नपि बालानामुपलालनामनुसृत्य श्यामपाटीप्रयोगोऽधोनिर्दिष्टरूपेण कार्यः । यथा-

(क) (ख) (ग) (घ) (ङ)(च)

८-१-१६ पदस्य ॥ ८-२-३९ झलां जशः अन्ते ॥ ८-२-७४ सिपि धातो रुर्वा ॥

८-२-७५ (क) (ख) दश्च (घ) (ङ) (ग) ॥ इति । (क)= पदस्य, (ख)= अन्ते वर्तमानस्य, दः= दकारान्तस्य (घं)= धातोः= धातोः स्थाने, (ङ)=रुः (च)= वा (ग)= सिपि । इत्यर्थमुपदिश्यच्छात्रैर्लक्षणसमन्वयं कार येत् । अरुणः, अरुणत्, अरुणद् । रुन्ध्यात् । इत्यादीनि रूपाणिच्छात्रैः साधयेत् । इत्थं रुधादौ विशेषकार्यं श्नम् प्रत्ययो ङिति तस्याकारस्य च लोपो भवतीति स्फुटं बोधयेत् । कर्मणि तु यगेव । रुध्यते । रुध्यताम् । अरुध्यत । रुध्येत । इत्यादि । **सिंहावलोकनम्**-अथात्र सिंहावलोकनन्यायेन शिक्षकेण च्छात्रा बोधयितव्याः । यथा वत्साः? तसादौ पिद्भिन्ने श्नम् प्रत्ययाकारस्य लोपो भवतीति तु साम्प्रतमेव पठितवन्तः श्नसोर ल्लोपः, इति सूत्रम् । तच्च अस् धातोरकारस्यापि लोपो भवति, इति कथयति । अस् धातुश्च अदादिगणे वर्तते । इति वदन् अदादिधातुपाठे अस् धातुं शिक्षको दर्शयन् उपदिशेत्- अत्र शपो लुकि तिप् सिप् मिव् भिन्नेषु अकारस्य लोपो भवति । यथा-स्तः । सन्ति । स्थः । स्थ । स्वः । स्मः । पिति तु न भवति । यथा अस्ति । अस्मि । इति । अनुवादे प्रथितत्वात् प्रसङ्गेनाप्यस्योपदेश उचितः । असि इत्यत्र सलोपश्चोपदेश्यः । अथ तनादिगणप्रयुक्तं विशेषकार्य शपो बाधक उः । अथ तनादिधातुपाठं दर्शयता शिक्षकेण 'इमे धातवस्तनादयः, एषु सर्वेषु शपो बाधक उप्रत्ययो भवति' इति कथयता तन् (तनुँ १४६२) धातोः कर्तरि लँटि पचति इत्यत्रेव प्रक्रियाक्रमे तन्+ति इति श्यामपाटचां लिखित्वा शपं बाधयित्वा ३-१-७९ तनादि..... सूत्रमुपदेश्यम् ।

८-२-७६ **र्वोरु**- पदस्य (८-१-१६) =पदसंज्ञकस्य, र्वोः= रेफवकारान्तस्य, धातोः (८-२-७४) उपधायाः, =उपधायां वर्तमानस्य, इकः= इकः स्थाने, दीर्घः = दीर्घो भवति । वकारग्रहणमुत्तरार्थम् ।

८-२-७७ **हलि**- ३-१-६९ दिवादिभ्यः.....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ) (ङ)

८-२-७४ सिंपि धातोः रुँर्वा ८-२-७६ र्वोः उपधाया दीर्घ इकः ॥ ८-२-७७ (ख) (क) (ग) (ङ).(घ) हलि च ॥ इति । (ख):=र्वोः= रेफवकारान्तस्य (क)=धातोः (ग)=उपधायाः, (ङ) =इकः=इकः स्थाने, (घ) =दीर्घः, हलि= हलि परे । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । दीव्यति । दीव्यतु । अदीव्यत् । दीव्येत् । इत्यादि । इत्थं दिवादौ विशेषकार्यं शपो बाधकः श्यन् भवतीति बोधयेत् । भावे तु यगेव । दीव्यते । दीव्यताम् । अदीव्यत । दीव्येत । इति । अथ स्वादिधातुपाठं दर्शयता शिक्षकेण "एते धातवः स्वादयः" एषु सर्वेषु विकरणं शपो बाधकः श्नुर्भवतीति बोधयता प्रथमधातोरनुबन्धं (ञकारं) फालयित्वा षु इति श्यामपाट्यां लिखित्वा ६-१-६२ धात्वादेः..... सूत्रमुपदेश्यम् ।

८-२-७८ **उप** - हलि (८-२-७७)= हलि परे (अत्र हल् धात्ववयव एव, न तु प्रत्ययावयवः । यथा मुर्छ् इत्यत्र छकारः कुर्द् इत्यत्र दकारः) धातोः (८-२-७४) उपधायाम्= उपधायां विद्यमानयोः, र्वोः (रेफवकारयोः)+ उपधायाः (रेफवकाराभ्यां पूर्वस्येति भावः)+इकः + दीर्घः (८-२-७६) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-७९ न भकुर्छुराम् ॥

धुर्यः । कुर्यात् । छुर्यात् ।

८-२-८० अदसोऽसेर्दादु दो मः ॥ ८१

अमू । अमुम् । अमून् ।

अमुना । अमुष्मै । अत्र केचित् 'असेः' इत्यस्य अः= अकारः, सेः=सकारस्य स्थाने, यस्येति व्याचक्षते । तन्मते यत्र त्यदाद्यत्वं तत्रैवोत्वमत्वे । तेनेह न-अदद्र्यङ् ।

८-२-८१ एत ईद् बहुवचने ॥

अमी । अमीभिः । अमीभ्यः । अमीषाम् । अमीषु ।

८-२-८२ वाक्यस्य टेः प्लुतः उदात्तः ॥१०५,९९

८-२-८३ प्रत्यभिवादेऽशूद्रे ॥

अभिवादये देवदत्तोऽहम्, भो आयुष्मानेधि देवदत्त ३ । आयुष्मानेधि सोमसु३त् । आयुष्मानेधि अग्निभूता ३ इ । आयुष्मानेधि पटा ३ उ । अशूद्रे इत्युक्तेर्नेह – भो आयुष्मानेधि तुषजक ।

(स्त्रियां न)

भो आयुष्मती भव गार्गि ।

(नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रज्युते तत्रैव प्लुत इष्यते)

तेनेह न- आयुष्मानेधि ।

(भोराजन्यविशां वेति वक्तव्यम्)

आयुष्मानेधि देवदत्त भोः ३ आयुष्मानेधि देवदत्त भोः । आयुष्मानेधीन्द्रवर्म ३ न्, आयुष्मानेधीन्द्रवर्मन् । आयुष्मानेधीन्द्रपालित ३, आयुष्मानेधीन्द्रपालित ।

८-२-७९ न भ- भकुर्छुराम् =भस्य कुर् छुरोश्च, न = उपधाया दीर्घो न भवति ।

८-२-८० अद-७-२-१०७ अदस....सूत्रानन्तरं सूत्रमिदं पाठचम् । अदसः असेः दात् उ, दः मः इतिच्छेदः । इति शिक्षणीयम् । अथ असेः= असकारान्तस्य, अदसः= अदश्शब्दस्य, दात्= दकारात् परस्य वर्णस्य स्थाने, उ= ह्रस्वोकारदीर्घोकारौ भवतः, दः= दकारस्य स्थाने, मः= मँ (अनुबन्धलोपे म्) आदेशो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयप्रसङ्गे ह्रस्वस्य स्थाने ह्रस्व उकारः, दीर्घस्य स्थाने दीर्घ ऊकारो भवतीति बोधनपुरस्सरं प्रकृते औकारो दीर्घः तेन, तस्य स्थाने दीर्घ ऊकारो भवतीति बोधयितव्यम् । यथा- अमू । शसि अदान्-अमून् । ङयि-अदस्मै-अमुष्मै । अत्र अकारो ह्रस्वस्तेन ह्रस्व उकारः । ८-३-५७ इण्कोः इति षत्वम् । अदस्मात्- अमुष्मात् । अदस्य-अमुष्य ।

अदयोः- अमुयोः । अदस्मिन्-अमुष्मिन् इति । बहुवचने तु सति एकारे ८-२-८० अद....सूत्रं बाधित्वा ८-२-८१ एत....सूत्रं प्रवर्तते । यथा जसि अदे इति जाते ८-२-८१ एत....सूत्रमुपदेश्यम् ।

८-२-८१ एत..... ८-२-८० अदसो...सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ) (ङ)

८-२-८० अदसः असेः दात् दः मः ॥ ८-२-८१ (ख) (क) (ग) एत इद् (घ) (ङ) बहुववचने ॥ इति । (ख) = असेः=असकारान्तस्य ॥ (क)=अदसः, (ग)= दकारात् परस्य, एतः= एकारस्य स्थाने, ईत्= दीर्घ इकारो भवति, (घ)=दः= दकारस्य स्थाने (ङ)=मः= मँ (अनुबन्धलोपे म्) आदेशो भवति, बहुवचने । इत्यर्थमुपदिश्य लक्षणसमन्वयाय च्छात्रा आदेश्याः । अमी । भ्यसि-अदेभ्यः- अमीभ्यः । आमि-अदेषाम् - अमीषाम् । सुपि-अदेषु-अमीषु । अथ तृतीयाविभक्तौ- अद+आ इति श्यामपाट्यां लिखित्वाऽधोनिर्दिष्टरूपेणच्छात्रा बोधयितव्याः । यथा-अयि वत्साः ? उपर्युक्तोदाहरणेष्वि प्रकृतोदाहरणे तु ८-२-८० अद.... सूत्रप्रवृत्तेः पूर्व विभक्तिकार्यं न भवति इति वदता ८-२-३ न मु....सूत्रमुपदेश्यम् ।

८-२-८२ वाक्य– आपादपरिसमाप्तेरिदमधिक्रियते । वाक्यग्रहणमनन्त्यस्य पदस्य प्लुताभावार्थम् । टिग्रहणं हलन्त्यस्याऽप्यचः प्लुतार्थम् । टेः प्लुतः, परिशिष्टस्यैकश्रुत्यम् । इत्थं वाक्ये प्लुतैकश्रुत्योः समावेशः ।

८-२-८३ प्रत्य- अशूद्रे= अशूद्रविषये, प्रत्यभिवादे, वाक्यस्य टेः प्लुत उदात्तः (८-२-८२) । अभिवाद्यमानेन गुरुणा प्रयुज्यमानाशीः प्रत्यभिवादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-८४ दूरा'द्धूते' च ॥ ८६

आगच्छ भो देवदत्त ३ ।

सक्तून् पिब देवदत्त ३ ।

८-२-८५ हैहेप्रयोगे हैहयोः ॥

हे ३ देवदत्त ।

देवदत्त है ३ ।

८-२-८६ गुरोरनृतोऽनन्त्यस्या ऽप्येकैकस्य प्राचाम् ॥

दे३वदत्त । देवद३त्त । देवदत्त ३ । गुरोरित्युक्तेर्वकारात् परस्याकारस्य न । अनृत इत्युक्तेर्नेह- कृष्णा ३ । इह प्राचामिति योगो विभज्यते । तेन "सर्व एव प्लुतः साहसमनिच्छता विभाषा कर्तव्यः" इति भाष्यमुपपन्नं भवति ।

८-२-८७ ओमभ्यादाने ॥

ओ ३ म् अग्निमीले पुरोहितम् ।

अभ्यादाने इत्युक्तेर्नेह–ओमित्येतदक्षरमुद्गीथमुपासीत ।

८-२-८८ ये यज्ञकर्मणि' ॥९२

ये३यजामहे । यज्ञकर्मणीत्युक्तेरभ्यासकाले न ।

८-२-८९ प्रणवष्टेः' ॥९०

अपां रेतांसि जिन्वतो३म् ।

८-२-९० याज्यान्तः ॥

जिह्वामग्ने चकृषे हव्यवाहा ३ म् ।

स्तोमैर्विधेमाग्नया ३ इ ।

८-२-९१ ब्रूहि-प्रेष्य-श्रौषड्-वौषडा-वहानामादेः ॥ ९२

अग्नयेनुब्रू ३ हि।अग्नये गोमयानि प्रे३ष्य । अस्तु श्रौ ३ षट् । सोमस्याग्ने ब्रीही वौ ३ षट् । अग्निमा ३ वह ।

८-२-९२ अग्नीत्प्रेषणे परस्य च ॥

आ ३ श्रा ३ वय । ओ ३ श्रा३वय ।

८-२-८४ **दूरात्=विप्रकृष्टात्, हूते**= सम्बोधने ऽर्थे वर्तमानस्य, वाक्यस्य+टेः+प्लुत+उदात्तः (८-२-८२) । यत्र प्राकृतात् प्रयत्नाद् विशेषेऽनुपादीयमाने सन्देहो भवति, 'श्रोष्यति न श्रोष्यति वा' इति तद् दूर मिहावगम्यते । इति भाष्यम् ।

८-२-८५ **हैहे**-दूरात्+हूते (८-२-८४)हैहेप्रयोगे= हैहेशब्दयोः प्रयोगे, हैहयोः=है हे इत्येतयोरेव, प्लुतः (८-२-८२) । पुनर्हैहेग्रहणमनन्त्यार्थम् ।

८-२-८६ **गुरो**- अत्र काशिका-प्रत्यभिवादेऽशूद्रे- इत्येवमादिना यः प्लुतो विहितः, तस्यैवायं स्थानविशेष उच्यते,इति । दूरात्+हूते (८-२-८४) अनृतः= ऋद्भिन्नस्य, अनन्त्यस्य=अन्त्यभिन्नस्य, गुरोः=गुरुसंज्ञकस्य, अपि=अपिशब्दात् टेः (८-२-८२)= अन्त्यस्य गुरोरगुरोश्च, एकैकस्य= पर्यायेण, प्लुतः (८-२-८२) प्राचाम्= प्राचामाचार्याणां मते । **उपपन्नं भवति** अर्थात् सर्वोऽपि प्लुतो विकल्प्यते, इति भावः ।

८-२-८७ **ओम**- अभ्यादाने= स्वाध्यायादेः प्रारम्भे, ओम्= ओंशब्दस्य, प्लुतः (८-२-८२) ।

८-२-८८ **ये- यज्ञकर्मणि** =यागकर्मणि, ये=ये इत्यस्य, प्लुतः (८-२-८२) ।

८-२-८९ **प्रण**-यज्ञकर्मणि (८-२-८८) टेः= टिभागस्य स्थाने, प्रणवः= ओ३म् इत्यादेशो भवति ।

८-२-९० **याज्यान्तः**= याज्याकाण्डे पठितानां मन्त्राणामन्त्यस्य, टेः (८-२-८९) प्लुतः (८-२-४२) यज्ञकर्मणि (८-२-८८) । **विधेमाग्नया** ३इ ८-२-१०७ एचो....इति प्लुतविकारः । अत्र काशिका- याज्या नाम ऋचः काश्चिद् वाक्यसमुदायरूपाः, तत्र यावन्ति वाक्यानि, तेषां सर्वेषां टेः प्लुतः प्राप्नोति सर्वान्तस्यैवेष्यते, तदर्थमन्तग्रहणमिति ।

८-२-९१ **ब्रूहि**.... हानाम्= ब्रूहिप्रभृतीनाम्, आदेः=आद्यस्य, प्लुतः (८-२-८२) यज्ञकर्मणि (८-२-८८) ।

८-२-९२ **अग्नीत्प्रेषणे**= ऋत्विग्नियोजने, आदेः (८-२-९१)= आद्यस्य, परस्य च= आद्यात् परस्य च, प्लुतः (८-२-८२) यज्ञकर्मणि (८-२-८८) । अग्निमिन्धे इत्यग्नीत्= ऋत्विग् विशेषः । ञि इन्धीँ दीप्तौ (१४४७) इत्यतः क्विँप् । तस्य प्रेषणम्= नियोजनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-९३ विभाषा पृष्टप्रतिवचने हेः ॥९४

अकार्षीः किम् ? अकार्षं ही ३, अकार्षं हि ।

८-२-९४ निगृह्यानुयोगे च ।

अनित्यः शब्द इत्यात्थ ३, अनित्यः शब्द इत्यात्थ ।

८-२-९५ आम्रेडितं **भर्त्सने** ॥ ९६

चौर३ चौर, चौर चौर ३ ।

८-२-९६ अङ्गयुक्तं तिङाकाङ्क्षम् ॥

अङ्ग कूज ३, अङ्ग व्याहर ३, इदानीं ज्ञास्यसि ।

८-२-९७ **विचार्यमाणानाम्** ॥९८

होतव्यं दीक्षितस्य गृहा ३ इ । न होतव्य ३ म् ।

८-२-९८ पूर्वं तु भाषायाम् ।

अहिर्नु ३ रज्जुर्नु ।

८-२-९९ प्रतिश्रवणे च ॥

गां मे देहि, अहं ते ददामि ३ ।

नित्यः शब्दो भवितुमर्हति ३ ।

देवदत्त किमात्थ३ ।

८-२-१०० **अनुदात्तं** प्रश्नान्ताऽभिपूजितयोः ॥ १०२

प्रश्ने- अगम ३ःपूर्वा ३न् ग्रामा ३न् अग्निभूता ३इ । अगम ३ःपूर्वा ३न् ग्रामा ३न् पटा ३उ ।

अभिपूजिते-शोभनः खल्वसि अग्निभूता ३इ । शोभनः खल्वसि पटा ३उ ।

८-२-९३ विभा- पृष्टप्रतिवचने= जिज्ञासितोत्तरेऽर्थे वर्तमानस्य, वाक्यस्य (८-२-८२) हेः= हि इत्यस्य विभाषा=वा, प्लुतः (८-२-८२) ।

८-२-९४ निगृह्य= स्वमतात् प्रच्याव्य, अनुयोगे= तस्यैव मतस्य शब्देन आविष्करणे, विभाषा (८-२-९३) वाक्यस्य+टेः+प्लुतः (८-२-८२) । उदाहरणे-अनित्यः शब्द इति केनचित् प्रतिज्ञातम्, तमुपालिप्सुरुपपत्तिभिर्निगृह्य साभ्यसूयमनुयुङ्क्ते 'अनित्यः शब्द इत्यात्थ' इति ।

८-२-९५ आम्रे- भर्त्सने= भत्सनेऽर्थे वर्तमानस्य, वाक्यस्य (८-२-८२) आम्रेडितम्= आम्रेडितस्य, प्लुतः (८-२-८२) । आम्रेडितग्रहणं द्विरुक्तोपलक्षणम् । द्विरुक्तयोः पर्यायेण भवति । न तु यौगपद्येन । अन्यतरप्लुत्यैव भर्त्सनस्य द्योतितत्वात् । प्लुतो हि भर्त्सनद्योतनफलः । ८-१-८ वाक्या...... इति द्वित्वम् ।

८-२-९६ अङ्ग- आकाङ्क्षतीति= आकाङ्क्षम्= सापेक्षम्, अङ्गयुक्तम्= अङ्गशब्दयुक्तम्, तिङ्= तिङन्तम्, प्लवते (८-२-८२) भर्त्सने (८-२-९५) । प्रथमान्तानुरोधेन प्लवते इत्युक्तम् । यद् वा सूत्रे प्रथमान्तानि षष्ठ्यन्तेभ्यः कल्पनीयानि= अङ्गयुक्तस्य, आकाङ्क्षस्य= सापेक्षस्य, तिङ्=तिङन्तस्य, टेः+प्लुतः (८-२-८२) इति । उदाहरणे द्वे एव वाक्ये इदानीं ज्ञास्यसि इति वाक्यमपेक्षेते ।

८-२-९७ विचार्यमाणानाम्= विमृश्यमानानाम्, वाक्यानां+टेः+ प्लुतः (८-२-८२) । प्रमाणैर्वस्तुपरीक्षणं विचारः । तेन विषयीक्रियमाणानि विचार्यमाणानि । उदाहरणे- होतव्यं न होतव्यमिति विचार्यते । गृहे इत्यत्र ८-२-१०७ एचो.... इति पूर्वार्धस्याकारः, उत्तरार्धस्येकारः । तस्याकारस्यानेन प्लुतः ।

८-२-९८ पूर्व- विचार्यमाणानाम् (८-२-९७) पूर्वं तु= पूर्वमेव, प्लुतः (प्लवते ८-२-८२) भाषायाम् । तु शब्दस्त्विष्टतो ऽवधारणार्थ इति पदमञ्जरी । पूर्वत्वं च प्रयोगापेक्षम् । अत्र भाषाग्रहणात् पूर्वसूत्रं छन्दोविषयमिति विज्ञायते ।

८-२-९९ प्रतिश्रवणे= प्रतिश्रवणेऽर्थे, वाक्यस्य+टेः+प्लुतः (८-२-८२) भाषायाम् (८-२-९८) । प्रतिश्रवणम्= अभ्युपगमः, प्रतिज्ञानम्, श्रवणाभिमुख्यं च ।

८-२-१०० अनु- प्रश्ना... तयोः= प्रश्नान्ते अभिपूजिते च, वाक्यस्य +टेः+प्लुतः (८-२-८२) अनुदात्तम्= अनुदात्तो भवति । सूत्रे सामान्ये नपुंसकम् । **अग्निभूता ३इ पटा३उ** ८-२-१०७ एचो....इति सूत्रेण पूर्वार्धस्याकारादेशो विहितः, स च प्लुतः कृतः स चानेनाऽनुदात्तो भवति । अन्येषां पदानां तु ८-२-१०५ अन....इति स्वरितः प्लुतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-२-१०१ चिदिति चोपमार्थे प्रयुज्यमाने ॥
अग्नि चिद् भाया३त्। अग्निरिव भायादित्यर्थः। उपमार्थे इत्युक्तेर्नेह-कथञ्चिदाहुः। प्रयुज्यमाने इत्युक्तेर्नेह-अग्निर्माणवको भायात्।

८-२-१०२ उपरिस्विदासीदिति च ॥
उपरिस्विदासी ३ त्।

८-२-१०३ **स्वरित**मामेडिते ऽसूया-सम्मति-कोप-कुत्सनेषु ॥ १०५
(असूयादिषु वा वचनम्)
उदाहरणानि ८-१-८
वाक्या..... सूत्रे द्रष्टव्यानि।

८-२-१०४ क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् ॥
स्वयं ह रथेन याति ३उपाध्यायं पदातिं गमयति। सुताँश्च लप्सीष्ट ३ धनं च तात। कटं कुरु३ ग्रामं च गच्छ।आकाङ्क्षमित्युक्तेर्नेह-दीर्घं ते आयुरस्तु।

८-२-१०५ अनन्त्यस्यापि प्रश्नाख्यानयोः ॥
प्रश्ने-अगम३ः पूर्वा३न् ग्रामा३न् अग्निभूता३इ। अगम३ः पूर्वा३न् ग्रामा३न् पटा ३ उ। आख्याने-अगम३ः पूर्वा३न् ग्रामा ३न् भो ३ः।

८-२-१०६ प्लुतावैच इदुतौ ॥
ऐ ४ तिकायन। औ ४ पमन्यव।

८-२-१०७ एचोऽप्रगृह्यस्याऽदूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ॥
परिगणनं कर्तव्यम् ॥
(प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवाद-याज्यान्तेष्विति वक्तव्यम्।)
उदाहरणानि-८-२-१०० अनु...तथा ८-२-९७ विचा....८-२-८३ प्रत्य ८-२-९९ याज्या... सूत्रेषु द्रष्टव्यानि।
परिगणनान्नेह-विष्णुभूते विष्णुभूते ३ घातयिष्यामि त्वाम्। अप्रगृह्यस्येत्युक्तेर्नेह-शोभने खलु स्तः खट्वे३

८-२-१०१ **चिदि-** उपमार्थे+चिदिति+प्रयुज्यमाने=उपमार्थे 'चित्' इति निपाते प्रयुज्यमाने सति, वाक्यस्य+टेः+ प्लुतः (८-२-८२) अनुदत्तः (८-२-१००)।

८-२-१०२ **उप** ...दिति= उपरिस्विदासीत् इत्यस्य, टेः+ प्लुतः (८-२-८२) अनुदात्तः (८-२-९९)। ८-२-९७ विचार्यमाणानाम् इति विहितस्य प्लुतस्याऽनुदात्तत्वमात्रं विधीयतेऽनेन।

८-२-१०३ **स्वरि-** असु ...नेषु= असूयादिष्वर्थेषु गम्येषु, आमेडिते= आमेडिते परे, टेः (८-२-८२) स्वरितम्= स्वरितः, प्लुतः (८-२-८२)। सूत्रे स्वरितमिति सामान्ये नपुंसकम्।

८-२-१०४ **क्षिया**=धर्मव्यतिक्रमः, आशीः = इष्टाशंसनम्, प्रैषः= व्यापारणम्। एषु गम्यमानेषु, आकाङ्क्षम् +तिङ्= यत् साकाङ्क्षं तिङन्तं तस्य, टेः+प्लुतः (८-२-८२)। आकाङ्क्षतीति **आकाङ्क्षम्** पचाद्यच्।

८-२-१०५ **अनन्त्यस्य**+अपि= अनन्त्यस्य अन्त्यस्य च, पदस्य (८-१-१६) टेः स्वरितः (८-२-१०३) +प्लुतः (८-२-८२) प्रश्नाख्यानयोः= प्रश्ने आख्याने च गम्यमाने। अग्निभूता ३इ, पटा ३उ ८-२-१०० अनु....इति पाक्षिकोऽनुदात्तः। अत्र हरदत्तः- यद्यप्यत्र विकल्पो न श्रुतः तथाप्यनेनापिशब्देनान्त्यस्याप्ययं स्वरितः प्लुतो भवति, ततश्चानुदात्तप्लुतः पाक्षिकः सम्पद्यत इति।

८-२-१०६ **प्लुता- ऐचः**= ऐचः प्लुत प्रसङ्गे (पूर्वसूत्रैः प्लुतो विहितः, तत्प्रसङ्गे) इदुतौ= ऐचोऽवयवभूताविदुतौ, प्लुतौ = प्लुतौ भवतः। ऐचौ समाहारवर्णौ तत्राऽवर्णस्यैका मात्रा। इवर्णोवर्णयोरपि एकैव मात्रेति मते इवर्णोवर्णयोः प्लुतयोस्तिस्रो मात्राः। अकारस्यैका। सङ्कलनया चतुर्मात्र ऐच् सम्पद्यते। अवर्णस्याऽर्धमात्रा इवर्णोवर्णयोरध्यर्धमात्रेति पक्षे तु प्लुताविदुतौ त्रिमात्रौ। अवर्णोऽर्धमात्र इति सङ्कलनया सार्धत्रिमात्र ऐच् सम्पद्यते। आद्यमतमेव भाष्यसंमतम्। तथा च भाष्यम्-इष्यते चतुर्मात्रः प्लुत इति।

८-२-१०७ **एचो-** अप्रगृह्यस्य= प्रगृह्यभिन्नस्य, अदूराद्धूते= दूराद्धूतभिन्ने, एचः= एचः प्लुतप्रसङ्गे (पूर्वसूत्रैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः ।) अग्ना ३इ पत्नी वः ।

८-२-१०८ तयोर्य्वावचि संहितायाम् ॥ ८-४- ६७

अग्ना३याशा । पटा ३ वाशा । इत्यष्टमाऽध्याये द्वितीयः पादः ।

इत्यष्टमाऽध्याये द्वितीयः पादः ।

प्लुतो विहितस्तत्प्रसङ्गे) पूर्वस्य अर्धस्य,अत्= अकार आदेशः, स च प्लुतः, उतरस्य= उत्तरभागस्य स्थाने, इदुतौ= इदुतौ भवतः । विष्णुभूते ३, ८-१-८ वाक्या....इति द्वित्वम् ८-२-९५ आम्रे...इति प्लुतः । खट्वे ३ अभिपूजिते ८-२-१०० अनु ... इति प्लुतः । आम-अप्राप्ते एव प्लुते वचनम् ।

८-२-१०८ **तयोः**= अनन्तरविहितयोरिदुतोः स्थाने, य्वौ= यकारवकारौ भवतः, अचि= अचि परे, संहितायाम् । इदुतोरसिद्धत्वेन ६-१-७४ इको.....इत्यस्याऽप्रवृत्तौ वचनम् । संहितायामित्याध्यायपरिसमाप्तेर धिक्रियते ।

इत्यष्टमाऽध्याये द्वितीयः पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाष्टमाध्याये
तृतीयः पादः

८-३-१ मतुँवसोँ रुँ सम्बुद्धौ छन्दसि ॥१२
इन्द्र मरुत्व इह पाहि सोमम्।
मीढ्वस्तोकाय तनयाय इन्द्र सात्वः।
(वन उपसंख्यानम्)
यस्त्वायन्तं वसुना प्रातरित्वः।
(विभाषा भवद्-भगवदघवतामोच्चावस्य)
हे भोः,हे भवन्। हे भगोः,हे भगवन्। हे अघोः, हे अघवन्। अथवा-भोस् भगोस् अघोस् इति सान्ता निपताः। यतोऽसम्बुद्धावपि दृश्यन्ते - भो देवदत्तयज्ञदत्तौ। भो देवदत्त - यज्ञदत्त-विष्णुमित्राः। स्त्रियामपि दृश्यते-भो ब्राह्मणि।

८-३-२ अत्राऽनुनासिकः पूर्वस्य तु वा ॥४,३
उदाहरणानि ८-३-५ समः .....प्रभृतिसूत्रेषु द्रष्टव्यानि।

८-३-३ आतोऽटि नित्यम् ॥
महाँ असि।

८-३-४ अनुनासिकात् परोऽनुस्वारः ॥
उदाहरणानि ८-३-५ समः......प्रभृतिसूत्रेषु द्रष्टव्यानि।

८-३-५ समः सुँटि ॥
(संपुंकानां सो वक्तव्यः)
सँस्स्कर्ता, संस्स्कर्ता।
(समो वा लोपमेके)
सँस्कर्ता, संस्कर्ता।

८-३-६ पुमः खय्यम्परे ॥८
पुँस्पुत्रः, पुंस्पुत्रः पुँस्कोकिलः, पुंस्कोकिलः।
(ख्यात्रादेशे न)
पुंख्यानम्।

८-३-१ **मतुँवसोः**=मत्वन्तस्य वस्वन्तस्य च, पदस्य (८-१-१६),=पदस्य स्थाने, रुँ=रुँ भवति, सम्बुद्धौ =सम्बुद्धौ परतः, छन्दसि=वेदे। **मरुत्व** मरुच्छब्दाद् मतुँप्। ८-२-१० झय इति वत्वम्। सम्बुद्धेः ६-१-६६ हल्ङ्या...इति लोपः। संयोगान्तलोपे प्रत्ययलक्षणेन सम्बुद्धिपरकत्वाद् रुँत्वे ८-३-१७ भो भगो...इति यकारे तस्य ८-३-१९ लोपः...इति लोपः। **मीढ्वस्तोकाय** ६-१-१२ दाश्वान्......इति क्वसन्तं निपात्यते-मीढ्वस् इति। **वन इति** क्वनिब्वनिपोः सामान्येन ग्रहणम्। **प्रातरित्वः** प्रातः पूर्वात् इणः ३-२-७५ अन्ये.....इति क्वनिँप्।

विभा- भवद् ... वताम्=भवत् भगवत् अघवत् इत्येतेषां स्थाने, विभाषा=वा, रुँ+सम्बुद्धौ (८-३-१), अवस्य=अवभागस्य स्थाने, ओच्च =ओकारादेशश्च भवति। छन्दसीति नानुवर्तते।

८-३-२ **अत्र**=इहाऽग्रिमे रुँप्रकरणे, पूर्वस्य तु=रुँप्रकरणस्थविधेयात् पूर्वस्य तु, वा=विभाषया, अनुनासिकः=अनुनासिको भवति। 'रुँ नित्यः, पूर्वस्याऽनुनासिकस्तु वा' इति विशेषद्योतनार्थस्तुशब्दः।

८-३-३ **आतो**-अत्र+पूर्वस्य (८-३-२) आतः= आकारस्य स्थाने, नित्यम्, अनुनासिकः (८-३-२) अटि= अटि परे। पूर्वेण विकल्पेन प्राप्ते नित्यार्थं वचनम्। आरम्भसामार्थ्यादेव नित्यत्वे सिद्धे नित्यग्रहणं स्पष्टार्थम्। **महाँ असि** ८-३-९ दीर्घा.........इति रुँत्वम्। अत्र काशिका-केचिदनुस्वारमधीयते स च च्छान्दसो व्यत्ययो द्रष्टव्य इति।

८-३-४ **अनु**-अत्र (८-३-२) अनुनासिकात्=अनुनासिकं विहाय= अनुनासिकपक्षं विहाय, पूर्वस्मात् (८-३-२) रुँप्रकरणस्थविधेयात् पूर्वस्माद् वर्णात्, परः=परतः, अनुस्वारः = अनुस्वारो भवति। **अनुनासिकात्** ३-२-२८ अपा......सूत्र-स्थ-ल्यब्लो....वार्तिकेन पञ्चमी। **पूर्वस्मात्** पूर्वत्र (८-३-२) सूत्रे 'पूर्वस्य'इति षष्ठ्यन्तमपि परशब्दयोगेऽत्र पञ्चम्यन्ताय कल्पते।

८-३-५ **समः**=संशब्दस्य स्थाने,-रुँ (८-३-१) सुँटि=सुँडागमे परे। **संपु**-उदाहरणयोः ६-१-१३२ संप...इति सुँट्। ८-३-३६ वा शरि-सूत्रं तत्रत्यं खर्प..... इतिवार्तिकं च बाधित्वा सः।

समो- एके=केचिदाचार्याः, समः संशब्दस्य, वा+ लोपम्=विकल्पेन लोपमिच्छन्ति, सुँटि (८-३-५)। उदाहरणयोः-लोपस्यापि रुँप्रकरणस्थ-विधेयत्वादनुनासिकानुस्वारौ।

८-३-६ **पुमः**-अम्परे=अम्परके, खयि=खयि परे,पुमः= पुंशब्दस्य स्थाने, रुँ(८-३-१)। उदाहरणेषु ८-३-३७ कुप्वोः...सूत्रं बाधित्वा ८-३-५ समः....सूत्रस्थ-संपुं.......वार्तिकेन सः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-७ **नश्छव्यप्रशान्** ॥ १२,८

भवाँस्तरति, भवांस्तरति । छवीत्युक्तेर्नेह-भवान् करोति । अम्परे इत्युक्तेर्नेह-भवान् त्सरुकः । अप्रशान् इत्युक्तेर्नेह-प्रशान् तनोति ।

८-३-८ उभयथर्क्षु ॥

तस्मिँस्त्वा दधाति, तस्मिन्त्वा दधाति ।

८-३-९ दीर्घादटि समानपादे ॥

परिधीँरति । देवाँ अच्छादीव्यत् । महाँ इन्द्रो य ओजसा । समानपादे इत्युक्तेर्नेह-यातुधानानुपस्पृशः । उभयथा । (८-३-८) इत्यनुवृत्तेर्नेह-आदित्यान् हवामहे ।

८-३-१० नॄन् पे ॥

नॄँः पाहि, नॄंः पाहि, नॄँः पाहि, नॄंः पाहि, नॄन् पाहि ।

८-३-११ स्वतवान् पायौ ॥

स्वतवाँ : पायुरग्ने ।

८-३-१२ कानाम्रेडिते ॥

काँस्कान्, कांस्कान् ।

८-३-१३ ढो ढे **लोपः** ॥१४

लीढः ।

८-३-१४ **रो** रि ॥१५

पुना रमते । हरी रम्यः ।
शम्भू राजते । अजर्घाः ।

८-३-७ **नश्छ**-अम्परे (८-३-६) छवि= छवि (छव् इति प्रत्याहारो बोध्यः) परे, अप्रशान्= प्रशान् भिन्नस्य, नः= नकारान्तस्य, पदस्य (८-३-१६) रुँ (८-३-१) । अप्रशान् इति प्रथमान्तानुकरणं लुप्तषष्ठ्यन्तम् । त्सरुकः कुशल इत्यर्थः । ५-२-६४ आक...इति कन् ।

८-३-८ **उभ**-ऋक्षु = ऋचासु, उभयथा=पूर्वसूत्रोक्तं वा ।

८-३-९ **दीर्घात्**+नः (८-३-७) +पदस्य (८-१-१६)=दीर्घात् परो यो नकारस्तदन्तस्य पदस्य स्थाने, रुँ (८-३-१) उभयथा (८-३-८) अटि=अटि परे, समानपादे=एकस्मिन् पादे । ऋक्षु (८-३-८) इति प्रकृतत्वाद् ऋक्पाद एव गृह्यते, इति काशिका ।

८-३-१० **नॄन्** इति द्वितीयान्तानुकरणं. लुप्तषष्ठ्यन्तम् । नॄन्= नॄन् इत्यस्य स्थाने, उभयथा (८-३-८) रुँ (८-३-१) पे=पकारे परे । उदाहरणे ८-३-३७ कुप्वोः.....सूत्रं प्रवर्तते ।

८-३-११ **स्वतवान्** इति प्रथमान्तानुकरणं लुप्तषष्ठ्यन्तम् । स्वतवान्= स्वतवान् इत्येतस्य स्थाने, रुँ (८-३-१) पायौ=पायुशब्दे परे ।

८-३-१२ **कान्**= कान् इत्यस्य स्थाने, रुँ (८-३-१) आम्रेडिते=आम्रेडिते परे । उदाहरणे ८-३-३७ कुप्वोः ....वाधित्वा ८-३-५ समः....सूत्रस्थ संपुं.....वार्तिकेन ८-३-४८ कस्का.......सूत्रेण वा सः ।

८-३-१३ **ढो ढे**- ८-३-३२ मोऽनु.......सूत्रानन्तरं सूत्रमिदं पाठ्यम् । शिक्षको मनसाऽवदध्यात् सत्यपि पदाधिकारे न तस्यात्र सम्बन्धो ढकारे परे पदान्तढकारस्याऽसम्भवात् । इति । अथ-ढः=ढकारस्य, ढे=ढकारे परे, लोपः=लोपो भवति । इत्यर्थमुपदिश्य लिढ्+ढः, इति श्यामपाट्यां लिखित्वा लक्षणसमन्वयं छात्रैः कारयित्वा लि+ढः इति श्यामपाट्यामवशेष्य ६-३-१११ ढ्रलो...सूत्रमुपदिशेत् ।

८-३-१४ **रो रि**-६-३-१११ ढ्रलो......सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्रापि शिक्षको मनसाऽवदध्याद् यत्, पदस्य (८-१-१६) इत्यनुवृत्तावपि सूत्रेऽत्र'रः' इत्यवयवषष्ठी स्वीकार्या । अत एव अजर्घा इत्यत्रापि लोपः सिध्यति । इति । छात्रेभ्यस्तु नाऽयं विषय उपदेश्यः । अत्र श्यामपाटीप्रयोगो यथा-

(क)

८-३-१३ ढो ढे लोपः । ८-३-१४ रो रि (क) ॥ इति । अत्र 'रः, रि इति पदच्छेदकार्यः । ततः केदार-जल-दृष्टान्तोद्‌बोधनपुरस्सरं ८-३-१३ ढो ढे.....सूत्राद्, लोप इत्यनुवर्तते इत्युपदिश्य ८-३-१३ सूत्रार्थं ब्रूतेतिच्छात्रा वाच्याः । छात्रेभ्य उत्तरे आगते सति प्रकृतसूत्रस्यापि रीत्याऽनयाऽर्थं ब्रूतेतिच्छात्रा आदेश्याः । यदिच्छात्रा यथार्थं ब्रूयुस्तदा सुष्ठु । यदि तुच्छात्रा : स्खलेयुस्तदा पूर्वसूत्रार्थेन सह प्रकृतसूत्रार्थस्य साम्यं दर्शयता शिक्षकेणच्छात्रा बोधनीयाः । रः=रेफस्य, रि=रेफे परे, (क)=लोपः=लोपो भवति इति । अथ पुनर्+रमते, हरिर्+रम्यः । शम्भुर् +राजते । प्रातर्+राजते धनुर्+रणनम् । शिशुर्+रोदिति इत्यादिषु मध्ये मध्ये स्वयं शिक्षयता शिक्षकेण लक्षणसमन्वयायच्छात्रा आदेश्याः। रूपसिद्ध्यनन्तरम्, आः स्वयमेव युष्माभिर्लक्षणसमन्वयः कृत इति ते प्रोत्साहनीयाः । अथ ८-३-१५ खर......सूत्रं पाठ्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-१५ खरवसानयोर्विसर्जनीयः ॥ १६

जनः करोति। कीनासः खनति। सूदः पचति। वृक्षाः फलन्ति। पठन्तिच्छात्राः। हसन्ति बालकाः।

८-३-१६ रोः सुपि ॥ १७

यशःसु। पयःसु। नेह-गीर्षु। पूर्षु।

८-३-१७ भो भगो अघो अपूर्वस्य योऽशि। २२, २०

उदाहरणानि अग्रिमेषु १९,२०,२२ सूत्रेषु द्रष्टव्यानि।

८-३-१८ व्योर्लघुप्रयत्नतरः शाकटायनस्य ॥ २२

भोयम्ब। भगोयेहि। अघोयपसर। छात्रायिमे। अन्येषां मतेऽग्रिम १९,२० सूत्रयोर्द्रष्टव्यम्।

८-३-१५ खर-८-३-१४ रो रि-सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्रापि ८-३-२३ मोऽनु.......इत्यत्र प्रतिपादितरीत्या ८-१-१६ पदस्य-सूत्रस्य, ८-२-३९ झलां........सूत्रघटकस्य अन्ते इति पदस्य ८-३-१४ रो रि-सूत्राद् 'रः'इति पदस्य चाऽनुवृत्तिर्भवतीति बोधनीयम्। ततः पदमिति किम् ? इतिच्छात्राणां जिज्ञासायां सत्यां ८-३-२३ मोऽनु.....इत्यत्रोक्त उपायः पुनरुद्बोधनीयः। अथ सूत्रार्थो बोधनीयः। अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग)

८-१-१६ पदस्य ॥ ८-३-३९ झलां जशः अन्ते ॥ ८-३-१४ रः रि ॥ ८-३-१५ खरवसानयोः (क) (ख) (ग) विसर्जनीयः ॥ इति ; खरवसानयोः=खरि परे अवसाने च परे (१-४-१०९ विरामो......सूत्रस्य भावार्थो बोधयितव्यः, सूत्रं तु नोपदेश्यम्) (क) =पदस्य, (ख)=अन्ते =अन्ते वर्तमानस्य, (ग)=रः=रेफस्य स्थाने, विसर्जनीयः=विसर्गो भवति। (विशेषस्तु ८-३-२३ मोऽनु... सूत्रे द्रष्टव्यः) पठन्ति व्याकरणं छात्रार्। बालकर्+स्वपिति। कीनासर्+खनति। वृक्षार्+फलन्ति। सूदर्+पचति। इत्यादिषु मध्ये मध्ये स्वयं शिक्षयता शिक्षकेण यथासम्भवं लक्षणसमन्वयं छात्रैरेव कारयित्वा तेषामुत्साहो बर्धनीयः। इतः परं ८-३-३४ विस........सूत्रं पाठचम्।

८-३-१६ रोः सु-सुपि=सप्तमीबहुवचने सुपि परे, रोः=रुँ सम्वन्धिन एव, रः (८-३-१४) विसर्जनीयः (८-३-१५)। सिद्धे सत्यारभ्यमाणो विधिर्नियमाय भवति, अत एवेत्युक्तम्।

८-३-१७ भोभ-६-१-११० हशि च- सूत्रानन्तरं सूत्रमिदं पाठचम्। भोस्+अम्व। भगोस्+एहि। अघोस्+अपसर। छात्रास्+इमे। इत्यत्र रुँत्वे कृते भोर्, भगोर्, अघोर्, छात्रार् इति जाते प्रकृतसूत्रार्थः कार्यः। अत्राऽधो निर्दिष्टरूपेण सूत्रे लेख्ये- ८-३-१६ (क) रोः सुपि ॥ ८-३-१७ भो भगो अघो अपूर्वस्य (क) योऽशि ॥ इति। अथ विधेये यँ इत्यत्राऽकार उच्चारणार्थः। स चाऽनुनासिक इत्संज्ञायां लुप्यते अर्थात् 'य्' इत्यादेश इति बोधयित्वा सूत्रार्थबोधनारम्भे यथा -१-१-५०उर ....इति सूत्रे यस्य परतो रेफो भवति स रपर इति ज्ञायते, तथा ऽत्रापि यस्य पूर्वभागो भो इंति भवति स भोपूर्वो वर्तते। एवमेव भगोर्। अघोर्। छात्रार्। इत्यत्र रेफः क्रमशो भगोपूर्वः, अघोपूर्वः,अवर्णपूर्वो ज्ञेयः। इतिच्छात्रा बोधयितव्याः। अथ-भो भगो अघो अपूर्वस्य=भोपूर्वस्य भगोपूर्वस्य अघोपूर्वस्य अवर्णपूर्वस्य च (क)=रोः=रुँ इत्यस्य स्थाने, यँः=यँ (अनुबन्धलोपे य्) आदेशो भवति , अशि=अशि परे। इत्यर्थं सम्यग् बोधयित्वा यथासम्भवं छात्रैर्लक्षणसमन्वयं कारयित्वा भो+य्+अम्ब भगो+य् +एहि। अघो+य्+अपसर। छात्रा+य्+इमे। इति श्यामपाटचां लिखित्वा ८-३-१९ लोपः शाकल्यस्य- सूत्रमुपदेश्यम्।

८-३-१८ व्योर्ल- भो भगो अघो अपूर्वस्य (८-३-१७)+व्योः= भोपूर्वकौ भगोपूर्वकौ अघोपूर्वकौ अवर्णपूर्वकौ च यौ वकारयकारौ तदन्तस्य, पदस्य(८-३-१६) लघुप्रयत्नतरः= लघुप्रयत्नतरौ वकार-यकारौ भवतः, अशि (८-३-१७)। १-१-५१ अलो......सूत्रवलेन अन्त्ययोर्वकारयकारयोः स्थाने यकारौ भवतः, अथवा वकारयकारौ भवन्तौआन्तरतम्याद् वकारस्य वकारो यकारस्य यकारो भवति अथवा बालानामुपलालनामनुसृत्य सूत्रार्थोऽधो निर्दिष्टरूपेण कार्यः-भो भगो अघो अपूर्वस्य (८-३-१७)=भोपूर्वकयोः, भगोपूर्वकयोः, अघोपूर्वकयोः, अवर्णपूर्वकयोश्च पदस्य (८-३-१६)अन्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-१९ लोपः शाकल्यस्य ॥

भो अम्ब । भगो एहि । अघोअपसर । छात्रा इमे, छात्रायिमे ।

८-३-२० ओतो गार्ग्यस्य ॥

भो अच्युत । भगो अत्र । अघो अत्र । लघुप्रयत्नपक्षे तु भोयच्युत । भगोयत्र । अघोयत्र । इत्येव ।

८-३-२१ उञि च पदे ॥

स उ एकाग्निः । पदे इत्युक्तेर्नेह-तन्त्रयुतम् ।

८-३-२२ हलि सर्वेषाम् ॥२३

भो देवाः । भगो नमस्ते । अघो याहि । देवा यान्ति ।

(८-३-२९) वर्तमानयोः, व्योः= वकारयकारयोः स्थाने, लघुप्रयत्नतरः= लघुप्रयत्नतरौ वकारयकारौ भवतः, अशि
(८-३-१७) इति ।

८-३-१९ लोपः-८-३-१७ भोभगो........सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख) (ग) (घ)
८-३-१६ पदस्य ॥ ८-३-३९ झलां जशः अन्ते ॥ ८-३-१७ भोभगो अघो अपूर्वस्य यँः अशि ॥
(ङ)
८-३-१८ व्योः लघुप्रयत्नतरः शाकटायनस्य ॥ ८-३-१९ (ग) (क) (ख) (ङ) लोपः (घ) शाकल्यस्य ॥इति ॥ (ग) भोभगो अघो अपूर्वस्य =भोपूर्वकभगोपूर्वकाऽघोपूर्वकाऽवर्णपूर्वकयोः =भो पूर्वमा हुने भगो पूर्वमा हुने अघोपूर्वमा हुने अवर्ण पूर्वमा हुने, (क)= पदस्य, (ख)= अन्ते= अन्ते वर्तमानयोः, (ङ)= व्योः= वकारयकारयोः, लोपः= लोपो भवति, (घ)= अशि=अशिपरे,शाकल्यस्य= शाकल्यस्याचार्यस्य मते । (अत्र शिक्षको मनसाऽवदध्याद् यद् बालोपलालनामनुसृत्यैवायमर्थःकृतः । वस्तुस्तस्तु भोप्रभृतिपूर्वकवकारयकारान्तपदस्य लोप इत्यर्थः १-१-५१ अलो...इति बलेन वकारयकारयोर्लोपो भवतीति) । लक्षणसमन्वयाय छात्राणामुत्साहो वर्धयितव्यः । अथ-भो अम्ब, भगो एहि, अधो अपसर, छात्रा इमे । इत्यत्र क्रमश आद्ये तृतीये च ६-१-७५ एचो.....६-१-१०५ एङः.......सूत्रयोः;द्वितीये ६-१-७५ एचो....... सूत्रस्य, चतुर्थे ६-१-८४ आद्गु ...सूत्रस्य प्रवृत्तिविषयिकां छात्राणामाकाङ्क्षामुद्भाव्य ८-२-१ पूर्वत्राऽसिद्धम्-सूत्रमुपदेश्यम् ।

८-३-२० ओतः=ओकारात् परस्य, पदस्य (८-१-१६) अन्ते (८-२-३९) वर्तमानस्य, यकारस्य, लोपः(८-३-१९)=नित्यं लोपः, अशि (८-३-१७) । विकल्पस्य पूर्वेणैव सिद्धौ पुनरारम्भान्नित्यत्वमवगम्यते । गार्ग्यग्रहणं पूजार्थम् । वकारस्याऽत्राऽसम्भवाद् 'यकारस्य' इत्येवोक्तम् ।

८-३-२१ उञि+पदे =उञ् इति पदे परे, अपूर्वयोः (८-३-१७) पदस्य (८-१-१६) अन्ते (८-३-३९) वर्तमानयोः, व्योः(८-३-१८) लोपः(८-३-१९) । अवर्णपूर्वक-वकार-यकारान्तस्य पदस्य लोप उञि पदे' इति तु वास्तविकोऽर्थः । १-१-५१ अलो......इत्यन्तस्यैव लोपःसिध्यति ।

८-३-२२ हलि-८-२-१पूर्वत्राऽसिद्धम्-सूत्रानन्तरं सूत्रमिदं पाठचम् । अस्य सूत्रस्याऽर्थः ८-३-१९ लोप.......सूत्रस्येव ज्ञेयः । केवलम्'अशि' इत्यनेन 'हलि' इति 'शाकल्यस्य' इत्यनेन च 'सर्वेषाम्'इति विनिमातव्यम् । तथा हि -भोभगो अघोअपूर्वयोः (८-३-१७) पदस्य (८-१-१६) अन्ते (८-२-३९) वर्तमानयोः,व्योः (८-३-१८)लोपः (८-३-१९) हलि=हलि परे, सर्वेषाम्=सर्वेषामाचार्याणां मते । इति । उदाहरणेषु भोस्, भगोस् अघोस्, देवास् , इत्यत्र रुँत्वे यत्वे च प्रकृतसूत्रं प्रवर्तयितव्यम् । यद्यप्यत्र वकारोदाहरणं न लभ्यते तथापि विशेषबोधने भारानुभूतेः पूर्वसूत्रार्थवद् बोधनेऽप्युत्कटदोषाभावाच्च पूर्ववदर्थ उपदेश्यः । विशेषः ६-१-१०९ अतो...... ६-१-११० हशि.....सूत्रयोरन्यतरस्य ८-३-१७ भो भ ....सूत्रस्य च प्राप्तौ ८-२-१ पूर्वत्रा ....सूत्रेण निर्णयः कार्यः । सावधानम् ? इत्थं सन्धिप्रक्रियायां छात्रेषु स्फुरत्प्रतिभेष्वेव शिक्षकैरग्रे सुँबन्तप्रक्रिया शिक्षयितव्या । अतः कियन्तिचन दिनानि पठिताभ्यासायच्छात्राः प्रवर्तयितव्याः । इति सन्धि-शिक्षण-रीतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-२३ मोऽनुस्वारः ॥	खट्वायां स्वपिति ।

अथ सुँबन्त-शिक्षण-रीतिः

अत्र तावत् प्रथमं शिक्षकेणाऽवधेयं यद् व्याकरणं खलु शब्दान् न निर्मिमीते; किन्तु विद्यमानानेव शब्दानन्वाचष्ट इति । अतो व्यवहारद्वारा सँस्कृतभाषां शिक्षयित्वा सामान्यव्यवहारं सँस्कृतभाषयैव सम्पादयितुं छात्राः प्रवर्तयितव्याः । यदिच्छात्रैः सह प्रतिदिनं क्षणमेव सम्पर्को भवति, न चिरकालं तदापि सामान्यव्यवहारोपयोगीनि वाक्यानि त्ववश्यशिक्षयितव्यानि । यदि तु सामान्यवाक्यान्यपि शिक्षयितुं शिक्षको नेहते वा छात्राः शिक्षितुं नेहन्तेः तर्हि तु व्याकरणोपदेशो भारायैव भवेद् व्यर्थश्च । आस्ताम् । अथ ज्ञातसामान्यसँस्कृत-पदेभ्यो ज्ञात-सन्धिकार्येभ्यश्च विद्यार्थिभ्यः, अष्टाध्याय्यामेव सूत्रप्रदर्शनपुरस्सरं ३-१-१ प्रत्ययः ३-१-२ परश्च -इत्यत आरभ्य ५-४-१६० निष्प्र...सूत्रान्ता विधेयाः प्रत्ययशब्देन व्यवह्रियन्ते । ते च परतो भवन्ति (बहुजकँचोश्चर्चा न कार्या) इत्युपदेशो देयः । अथ४-१-२ स्वौज....सूत्रं दर्शयता शिक्षकेण सुँ औ जस् प्रथमा । अम् औट् शस् द्वितीया । टा भ्याम् भिस् तृतीया । ङे भ्याम् भ्यस् चतुर्थी । ङसिँ भ्याम् भ्यस् पञ्चमी । ङस् ओस् आम् षष्ठी । ङि ओस् सुप् सप्तमी । इत्युपदिश्य १-४-१०२ सुँपः- सूत्रमुपदिशेत् । ८-३-२३ **मोऽनु**-८-४-४० ष्टुना......सूत्रानन्तरं सूत्रमिदं पाठचम् । प्रथमं सरलार्थानां सूत्राणामभ्यासद्वारा व्याकरणप्रवेशसँस्कार उद्बोधनीयः । ततः प्रातिपदिकेभ्यः सुँप्प्रत्यया भवन्ति, धातुभ्यश्च तिङादयो भवन्ति,स्त्रीलिङ्गद्योतनाय स्त्रीप्रत्यया भवन्ति, अपत्याद्यर्थबोधनाय तद्धितप्रत्यया भवन्ति, स्थलविशेषे विभक्तिविशेषज्ञानाय कारकप्रकरणं भवति, बहूनां पदानामेकपदीकरणाय समासप्रकरणं भवतीत्यादि-सामान्यज्ञानसँस्कारं द्रढयित्वा १-१-१वृद्धि .....सूत्रात् क्रमशो व्याकरणं पठनीयं भवति । अतः ८-४-४०ष्टुना....सूत्र- बोधनानन्तरं ८-३-२३ मोऽनु....सूत्रं प्रस्तुत्यम् । अत्र शिक्षकैरवधेयं यत्, साम्प्रतं छात्रा व्याकरणे प्रविविक्षवः सन्ति । सूत्रार्थे कठिने जाते ते खलूद्विजन्ते, इति । अतोऽत्र १-१-७१येन.....सूत्रेण तदन्तविधिः, तथा च 'मः=मकारान्तस्य पदस्य' इति वास्तविकोऽर्थो नोपदेश्यः । सूत्रार्थप्रतिपादने क्लेशापत्तेः । लक्षणसमन्वये १-१-५१ अलो.......सूत्रोपस्थापनक्लेशापत्तेश्च । एवम् ८-३-१५ खर....इत्यादिष्वपि बोध्यम् । द्वितीयावृत्तौ तु मकारान्तस्य पदस्य, रेफान्तस्य पदस्येत्यादिक एवार्थ उपदेश्यः । मः अनुस्वारः इति पदच्छेदः कार्यः । ततः ८-४-४० ष्टुना.....सूत्रोक्तकेदार-जल-दृष्टान्तोद्बोधन-पुरस्सरं प्रकृत-सूत्रे ८-१-१६ पदस्य इति सूत्रस्य, ८-२-३९ झलां ....सूत्रघटकस्य अन्ते इति पदस्य ८-३-२२ हलि....... सूत्रघटकस्य हलि इति पदस्य चाऽनुवृत्तिर्भवतीति बोधयता शिक्षकेणाऽधोनिर्दिष्टरूपेण श्यामपाटचां लेख्यम् ।

(क)	(ख)	(ग)
८-१-१६ पदस्य ॥	८-२-३९ झलां जशः अन्ते ॥	८-१-२२ हलि सर्वेषाम् ॥

८-३-२३ (क) (ख) मः अनुस्वारः (ग) इति। ततोऽङ्गुल्या शलाकया वा पदानि दर्शयताऽर्थो वाच्यः । (क)=पदस्य (ख)= अन्ते वर्तमानस्य, मः= मकारस्य स्थाने, अनुस्वारः= अनुस्वारो भवति, (ग)= हलि= हलि परे । इत्येवार्थः शिक्षयितव्यः । पदान्तस्यैव मकारस्याऽनुस्वारो भवति, न त्वपदान्तस्येति सँस्कारदाढर्चाय 'पदस्य, अन्ते' इत्यनुवृत्तिप्रदर्शनमावश्यकम् । सरलतमोपायेनोपदेशाय क्वचित् प्रथममतथ्योपदेशोऽपि पौरस्त्यशिक्षणविधौ स्वीक्रियते । अत एव-अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ॥ विष्टभ्याऽहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ इति पश्चादुपदेक्ष्यन्नपि भगवान् श्रीकृष्णः प्रथमं 'नराणां च नराधिपः' इत्याद्युपदिष्टवान् । । अत एव च भर्तृहरिश्चोपदिशति-

उपायाः शिक्षमाणानां बालानामुपलालना । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥ इति । अथ पदमिति किम् ? इतिच्छात्राणामाकाङ्क्षाशमनाय 'यस्यार्थो भवति, तत् पदमित्युच्यते'यथा-छात्राः व्याकरणं पठन्ति , अत्र त्रीणि पदानि सन्ति । इत्युपदेश्यम् । १-४-१४ सुँप्ति.....सूत्रं तु नोपदेश्यम् । साम्प्रतं सुँबन्त-तिङन्त - ज्ञानाऽभावेन पदज्ञानाऽसम्भवात् । साम्प्रतं कुतः पूर्वः? कुतःपर? इति च बोधयितव्यम् । यथा- खट्वायाम्← पूर्वः परः →शेते । =खट्वायाम्+शेते इति श्यामपाटचां लिखित्वाऽङ्गुल्या मकारं दर्शयित्वा, अस्य मकारस्य स्थाने अनुस्वारो भवति, यदि मकारात् परतो हल् भवेत् । परतश्चाऽत्र शकारो वर्तते, शकारो हल्प्रत्याहारे वर्तते न वा ? इतिच्छात्राः प्रष्टव्याः । तेभ्य उत्तरं तथ्यं गृहीत्वा, अतोऽत्र मकारस्य स्थानेऽनुस्वारो भवतीत्युपदिशता खट्वायां शेते इति रूपं दर्शयितव्यम् । अथ खट्वायाम्+अस्ति अत्राऽनुस्वारो भवति नवेतिच्छात्राः प्रष्टव्याः । यदवधि सत्यमुत्तरं नायाति तदवधि पुनर्विचारयतेति वक्तव्यम् । तथ्योत्तरप्राप्तौ पुनरभ्यासाय प्रश्ना देयाः । बालकम्+शायय । खट्वायाम्+स्वपिति वस्त्रम्+सीव्यति । शोकम्+हरति । मन्दम्+हसति । अत्यन्तम्+रमते । इत्यादयः । इतः परं ८-३-१३ ढो ढे.....सूत्रमुपदेश्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-२४ नश्चाऽपदान्तस्य झलि ॥
यशांसि । आक्रंस्यते ।
८-३-२५ मो राजि समः क्वौ ॥ २७
सम्राट् । साम्राज्यम् ।
८-३-२६ हे मपरे वा ॥२७,३१
किम् ह्मलयति, किं ह्मलयति ।
(यवलपरे यवला वा)
कियँ ह्यः, किं ह्यः । किवँ ह्वलयति, किं ह्वलयति । किलँ ह्लादयति, किं ह्लादयति ।

८-३-२७ नपरे नँः ॥
किन् ह्नुते,किं ह्नुते ।
८-३-२८ ङ्णोः कुँक् टुँक् शरि ॥
प्राङ् क्षष्ठः, प्राङ् षष्ठः । सुगण्ट् षष्ठः, सुगण् षष्ठः ।
(चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्) प्राङ्ख् षष्ठः । सुगण्ठ् षष्ठः ।
८-३-२९ डःसि धुँट् ॥३०
षट्त्सन्तः, षट् सन्तः ।

८-३-२४ **नश्चा**-८-४-६२ शश्छो........सूत्रस्थ-च्छत्व....वार्तिकानन्तरं सूत्रमिदं पाठचम् । यद्यपि प्रथमं सन्धिं जिज्ञासुभ्यश्छात्रेभ्यः पदान्वाख्यान-प्रयोजनस्य प्रकृतसूत्रस्योपदेशो नातीवोपयोगी । तथापि ८-४-५८वा प ....सूत्रं त्ववश्योपदेश्यम् । ८-४-५८ सूत्रे च ८-४-५७ अनु....सूत्रं सम्पूर्णमनुवर्तते । ८-४-५७ सूत्रोदाहरणाय च प्रकृतसूत्रमत्यावश्यकम् । अतःपदान्वाख्यानप्रयोजनकमपि ८-३-२४ नश्चा...सूत्रमुपदेश्यमेव । उपदेशे च श्यामपाटीप्रयोगो यथा-

(क) (ख)

८-३-२३ मः अनुस्वारः ॥

८-३-२४ (क) नःच अपदान्तस्य (ख) झलि ॥ इति । अङ्गुल्या पदानि दर्शयता शिक्षकेण सूत्रार्थ उपदेश्यः-अपदान्तस्य,= पदस्यान्ते अवर्तमानस्य (क)=मः=मकारस्य स्थाने, नः+च=नकारस्य स्थाने च, (ख) =अनुस्वारः=अनुस्वारो भवति, झलि=झलि परे । इति यशान्+सि, आक्रम्+स्यते, गम्+स्यते आगम्+स्यते,हन्+सि इत्यादिषूदाहरणेषुच्छात्रैर्लक्षणसमन्वयः कारयितव्यः। यदि तत्रच्छात्रा असमर्थास्तदा पुनःसूत्रार्थ एव बोधयितव्यः । न तु शिक्षकेण लक्षणसमन्वयः कार्यः । अथ ८-४-५७ अनु........सूत्रमुपदेश्यम् ।

८-३-२५ **मो रा**-क्वौ=क्विँबन्ते,राजि=राज्धातौ परे, समः=संशब्दस्य स्थाने, मँः=मँ (अनुबन्धलोपे म्) आदेशो भवति । १-१-५१ अलो....सूत्रबलेन समो मकारस्य स्थाने मकारो भवति । मकारस्य मकारविधानमनुस्वारनिवृत्त्यर्थम् ।

८-३-२६ **हेम**-मपरे=मकारपरके,हे=हकारे परे,मः+पदस्य (८-३-२३) वा, = विभाषया, मँः (८-३-२५) पूर्वोक्तरीत्या मकारस्य स्थाने मकारो वा । **यवलपरे**=यकारवकारलकारपरके हे (८-३-२६)=हकारे परे, मः+पदस्य (८-३-२३) यवला + वा = यकारवकारलकारा विकल्पेन भवन्ति । १-१-५१ अलो......सूत्रद्वारा मकारस्य स्थाने, यथासंख्यं भवन्त आन्तरतम्यादनुनासिका भवन्ति । नागेशमते विधीयमानत्वेन सवर्णानामग्रहणाद् अननुनासिका एवेति बोध्यम् ।

८-३-२७ **नपरे**= नकारपरके,हे (८-३-२६)मः+पदस्य (८-३-२३)वा (८-३-२६) नँः=नँ (अनुबन्धलोपे न्) आदेशो भवति । पूर्वोक्तरीत्या मकारस्य स्थाने नकारो वा ।

८-३-२८ **ङ्णोः** = ङकारणकारयोः, कुँक् टुँक्= कुँगागम-टुँगागमौ, वा (८-३-२६) शरि= शरि परे । **चयो**-८-४-४७ **नादिन्या**....सूत्रस्थं भाष्यवार्तिकमिदम् । उदाहरणयोः- वर्गप्रथमस्य वर्गद्वितीयः पाक्षिकः।

८-३-२९ डःसि-डः=डकारान्तात्, पदात् (८-१-१७) परस्य, सि=सः=सकारस्य, धुँट्=धुँडागमः, वा (८-३-२६) । सूत्रे सि इति सप्तम्यन्तमपि १-१-६६ तस्मा ....सूत्रबलेन षष्ठचन्ताय कल्पते । उदाहरणे ८-४-४१ न प ...इतिष्टुत्वप्रतिषेधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-३० **नश्च** ॥३१

सन्त्सः, सन्सः ।

८-३-३१ शि तुँक् ॥

भवाञ्छेते, भवाञ्च्छेते,भवाञ्च्शेते, भवाञ्शेते ।

ञछौ ञचछा ञचशा ञशाविति चतुष्टयम् ।

रूपाणामिह तुँक् छत्वचलोपानां विकल्पनात् ।

८-३-३२ङमो **ह्रस्वादचि** ङमुँण् नित्यम् ॥३३

प्रत्यङ्ङात्मा । सुगण्णीशः । सन्नच्युतः ।

८-३-३३ मय उञो वो वा ॥

किम्वुक्तम्, किमु उक्तम् ।

८-३-३४ **विसर्जनीयस्य** सँः ॥५४

यशस्तनोति । विष्णुस्त्राता । यैस्तु ।

८-३-३० **नः**=नकारान्तात्, पदात् (८-१-१७) परस्य, सि+धुँट् (८-३-२९)वा (८-३-२६) ।

८-३-३१ शि तुँक्- नः (८-१-३०)=नकारान्तस्य, पदस्य (८-१-१६) शि=शकारे परे,तुँक्=तुँगागमः, वा (८-३-२६)। सूत्रे शि इत्यत्रत्याऽकृतार्था सप्तमी पूर्वसूत्रे कृतार्थां नः इत्यत्रत्यां पञ्चमीमिह षष्ठीं कल्पयति ।

८-३-३२ ङमो- ह्रस्वात्+ङमः+पदात् (८-१-१७)= ह्रस्वात् परो यो ङम् तदन्तम् (१-१-७१ येन....इति तदन्तविधिः.....) यत् पदम् तस्मात् परस्य, अचि=अचः (उभयनिर्देशे पञ्चमी निर्देशो बलीयान्, अतः१-१-६६ तस्मा...इति सूत्रबलेन अचि इति सप्तम्यन्तं षष्ठचन्ताय कल्पते) नित्यम्, ङमुँट्= ङमुँडागमो भवति । १-३-१० यथा....१-१-४५ आद्य...सूत्राभ्याम् क्रमश आदौ ङणनाः ।

८-३-३३ **मयः**=मयःपरस्य, उञः=उञःस्थाने,वा+वँः= विकल्पेन वँ (अनुबन्धलोपे व्) आदेशो भवति, अचि (८-३-३२)। उदाहरणे -१-१-१४ निपा...इति प्रगृह्यत्वात् प्रकृतिभावे प्राप्ते वकारो विधीयते । अस्याऽसिद्धत्वाच्च मकारस्य नाऽनुस्वारः ।

८-३-३४विसर्ज- ८-३-१५ खर....सूत्रानन्तरं सूत्रमिदं पाठचम् । विसर्जनीयस्य=विसर्गस्य स्थाने,सँः=सँ (अनुबन्धलापे स्) आदेशो भवति इत्यर्थमुपदिश्य प्रथमं यैः+तु = यैस्तु इत्युदाहरणे लक्षणसमन्वयं कारयित्वा यैस्तु भक्त्या स्मृता नूनं तेषां सिद्धिः प्रजायते । इति कवचं श्रावयितव्यम् । ततो यत्र कुत्रापि विसर्गस्य स्थाने सकारो भवति वा स्थलविशेषे भवतीति छात्राणां जिज्ञासा जागरयितव्या । अथाऽध्येतृषु प्रौढेषु प्रथमं, यत्र विसर्गो लभ्यते, तत्र भवति, यत्र विसर्गो न लभ्यते, तत्र न भवति, यतो विसर्गस्य स्थाने इत्यच्यते इति बोधनीयम् । ततः कुत्र विसर्गो लभ्यते ? इति च्छात्राः प्रष्टव्याः । कियताचन समयेनाऽप्युत्तरेऽनागते स्वयमेव शिक्षकेण स्मेरमुखं ८-३-१५ खर......सूत्रार्थमुद्बोधयता खरि परे अवसाने च विसर्गो लभ्यत इति सँस्कारो जागरयितव्यः । अथ १-१-२ अदे....सूत्रं दर्शयता शिक्षकेण 'अदेङ् गुणः', ? अत्र तु विसर्गो दृश्यते । तस्य स्थाने सकारो न कृतः सूत्रकारेंण । अतोऽवसाने विसर्गे लब्धेऽपि तस्य स्थाने सकारो न भवति; इति ज्ञायते । तस्मात् खरि परे विसर्गस्य स्थाने सकारो भवतीति स्फुटं प्रतीयते । अतः ८-३-३४ विस....सूत्रे 'खरि परे' इत्यप्यर्थो ज्ञेय इतिच्छात्रा बोधयितव्याः । यदि तुच्छात्रा बालाः कोमलमतयः सन्ति तदा तु पूर्वोक्तः प्रपञ्चो नोत्थाप्यः । किन्तु ८-३-३४ विस...सूत्रस्याऽग्रे 'खरि परे' इत्येव लिखित्वा सूत्रार्थः शिक्षयितव्यः। सूर्यः+तपति । तपः+तेपे मुनिः+तपस्यति । कः+थकारं पठति । शिशुः+थकारं पठति । इत्यादिषु लक्षणसमन्वयश्छात्रैः कारयितव्यः । ततः,उदेति सूर्यः । पठन्ति बालकाः । क्रीडन्ति शिशवः । पाठयन्ति गुरवः । इत्यादिषु विसर्गस्य स्थाने सकारो भवति न वेति प्रश्नः कार्यः । यदि भवतीत्युत्तरमायाति तदा पुनः सूत्रार्थ उद्बोधनीयः । यदि न भवतीत्युत्तरमायाति तदा कथं न भवतीति हेतुं प्रष्टव्याः । अथ ८-३-३५ शर्प......सूत्रमुपदेश्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-३५ शर्परे **विसर्जनीयः** ॥ ३७
कः त्सरुः । अद्भिः प्सातम् ।
घनाघनःक्षोभणः । अत्र काशिका-न इति वक्तव्ये विसर्जनीयस्य विसर्जनीयादेशविधानं विकारनिवृत्त्यर्थम् । तेन जिह्वामूलीयोपध्मानीयौ न भवत इति ।

८-३-३६ वा शरि ॥
हरिः शेते, हरिश्शेते । बालकः षष्ठः, बालकष्षष्ठः ।
बालकः स्वपिति, बालकस्स्वपिति।

८-३-३५ शर्प -८-३-३४ विस....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्राऽधोनिर्दिष्टरूपेण श्यामपाट्यां
(क) (ख)
लेख्यम्- ८-३-३४ विसर्जनीयस्य सः (खरि) ॥ ८-३-३५ शर्परे (ख) (क) विसर्जनीयः ॥ इति । अत्र ८-३-३५ सूत्रे पूर्व ८-३-३४ सूत्रात् प्रतीयमानं खरि परे इत्यप्यनुवर्तत इति बोधयित्वा सूत्रार्थः शिक्षणीयः । तत्र 'शर्परे खरि परे' इत्यस्यार्थबोधनप्रकार इत्थम्-राम-श्याम-गोविन्द-निधिराम-धनेश्वर - घनश्यामान् साम्प्रतं शिक्षकः पाठयति । आसनक्रमः
रामः श्यामः गोविन्दः निधिरामः धनेश्वरः घनश्यामः इति वर्तते । अथ शिक्षकेण रामः सम्बोध्यः – अयि राम ! त्वत् परतः कोऽस्ति ? इति । तदा रामो मत् परतः श्यामोऽस्तीत्युत्तरं दास्यति । ततः पुनः शिक्षकेण रामः प्रष्टव्यः-त्वत्परतस्तु श्यामोऽस्ति, श्यामः किंपरकोऽस्ति ? इति । तदा 'किंपरकः'इत्यस्यार्थबोधे द्वैतधी राम उत्तरं न सम्यग् दद्यात् । अतः क्षणानन्तरं शिक्षकेणच्छात्रान् दर्शयता वक्तव्यम्-गोविन्दःश्यामात् परतोऽस्ति, अतः श्यामो गोविन्दपरकोऽस्ति । एवमेव धनेश्वराद् घनश्यामः परतोऽस्ति । अतो धनेश्वरो घनश्यामपरकोऽस्ति । निधिरामात् परतो घनश्यामपरको घनेश्वरो वर्तते । निधिरामात् परतो धनेश्वरो वर्तते । अतो निधिरामो धनेश्वरपरको वर्तते । गोविन्दात् परतो निधिरामो वर्तते, अतो गोविदो धनेश्वरपरक-निधिराम-परको वर्तते । तथैव श्यामो गोविन्दपरकोऽस्ति ।
रामश्च गोविन्दपरक-श्यामपरको वर्तते इति । ततो मुहुर्मुहुः शिक्षकेण त्वत् परतः कोऽस्ति ? त्वत् परतः किंपरकःकोऽस्ति ? इत्यादि नामग्राहं छात्राः प्रष्टव्याः । छात्रेभ्यो यथार्थमुत्तरेषु प्राप्तेषु पुनरधोनिर्दिष्टरूपेण प्रश्नाः कार्याः। क ख ग घ ङ च छ अत्र'क 'इत्यतः परतःकिंपरकं किमक्षरमस्ति ? एवं प्रत्येकं वर्णानुद्दिश्य प्रश्नाः कार्याः । ततः 'पृच्छा'इत्यत्र पकारात् परः किं परकः को वर्णो वर्तते । 'पृच्छा' इत्यत्र ऋकारात् परतः किं परकः को वर्णो वर्तते ? 'पृच्छा' इत्यत्र चकारात् परतः किंपरकः को वर्णो वर्तते ? इत्यादि । अथाऽत्र सूत्रे सति सम्भवे शर् परो यस्मात् स शर्पर इति व्युत्पत्तिरपि पुरस्कार्या । परन्तु शिक्षकेण विचारणीयं यत् सूत्रार्थबोधने छात्राः काठिन्यं नाऽनुभवन्तु इति धिया व्युत्पत्तिः पुरस्क्रियते । यदि तु व्युत्पत्तिमेवच्छात्रा भारान्तरमनुभवन्तीति प्रतीयेत तदा व्युत्पत्तिर्न पुरस्कार्येति । अध्यापकानामिदं परमकर्तव्यमस्ति यद् ये यावद् बुध्यन्ते तावत् पाठयन्तु । तथा मध्ये मध्ये पृच्छन्तु । अतिरिक्तपाठनेन हानिरेव भविष्यति लाभो न भविष्यति । नियमोऽयं सार्वत्रिको नत्वत्रत्य एव । अथ कः+त्सरुं गृह्णाति । त्सरुः= खड्गमुष्टिः । वीरः त्सरुं गृह्णाति । वीरः क्षत्रियः । मनः क्षोभः । कातरः क्षोभते । पयः प्सातम् । इत्यादिषु ८-३-३४ विस.....सूत्रसमन्वयायच्छात्रा आदेश्याः/तेषु यथोक्तं कुर्वत्सु तेन सूत्रेण दन्त्यसकारे प्राप्ते तं बाधित्वा प्रकृतसूत्रं प्रवर्तते इति वोधयता शिक्षकेण प्रकृतसूत्रसमन्वयः शिक्षयितव्यः । अत्र सूत्रे मुहुर्मुहुरभ्यासः कारयितव्यः । अथ ८-३-३६ वा शरि-.....सूत्रमुपदेश्यम् ।
८-३-३६ वा शरि- ८-३-३५ शर्प.....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्राऽधोनिर्दिष्टरूपेण त्रीणि सूत्राणि श्यामपाट्यां लेख्यानि । यथा -
(क) (ख)
८-३-३४ विसर्जनीयस्य सः ॥ ८-३-३५ शर्परे विसर्जनीयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(खपरि शरि वा विर्सगस्य लोपो वक्तव्यः)
बुद्धि स्फुरति, बुद्धिः स्फुरति, बुद्धिस्स्फुति ।

८-३-३७ कुप्वोः ≍क≍पौ च ॥

अत्र दीक्षितः-येन नाप्राप्त इति न्यायेन विसर्जनीयस्य स इत्यस्याऽपवादोऽयं न तु शपरि विसर्जनीय इत्यस्येति । काशिकायामपि प्रतिपादितमुक्तमेव ८-३-३५ शपरि... सूत्रे । कः करोति, क≍करोति । कः खनति, क≍ खनति । सूदः पचति, सूद≍पचति । वृक्षः फलति,वृक्ष≍फलति ।

८-३-३६ (क) वा (ख) शरि ॥ इति । ततःसाङ्गुलीनिर्देशं ८-३-३४ सूत्राद् विसर्जनीयस्येति ८-३-३५ सूत्राद् विसर्जनीय इति च प्रकृत (८-३-३६) सूत्रेऽनुवर्तेते इति शिक्षयित्वा (क)=विर्सजनीयस्य=विसर्गस्य स्थाने, वा+[(ख)=विसर्जनीयः] =विकल्पेन विसर्गो भवति, शरि=शरि परे । इत्यर्थः शिक्षयितव्यः । अथ खड्गः स्यति,कः सुप्तवान्, जातेः साङ्कर्यम् , वपुः सितम् ,इत्यादिषु प्रकृतसूत्रप्रवृत्त्या, प्रकृतसूत्रेण मुक्ते ८-३-३४ विस...सूत्रप्रवृत्त्या च विसर्गघटित-द्विसकारघटित-भेदेन द्वे द्वे रूपे बोधयित्वा बालकः शेते, सुमंनः+शय्या, पयः+शीतम्, यश : +श्वेतम् । इत्यादिषु ८-३-३४ विस....सूत्र प्रवृत्तिपक्षे ८-३-३९ स्तोःश्चु...सूत्रमपि प्रवर्तते इत्यप्युद्‌बोधनीयम् । अथाऽग्रिमवार्तिकं पठनीयम् ।

खर्परे-८-३-३६ वा श ....सूत्रानन्तरं वार्तिकमिदं पाठयम् । वार्तिकमिदं प्रस्तुवता शिक्षकेण स्मितमुखं छात्राः प्रष्टव्याः । अयि वत्साः ? व्याकरणं कठिनं भवतीति जल्पन्त्यद्यत्वे जनाः । यूयमपि तथा मन्यध्वे न वा ? व्याकरणपठने युष्माकं बुद्धिः स्फुरति न वा ? इति । तत्प्रसङ्गे बुद्धिः स्फुरति, इत्यत्र कियन्ति कीदृशानि रूपाणि भवेयुरिति च्छात्राणामाकाङ्क्षां जागरयित्वा लक्षणसमन्वयपुरस्सरं त्रिविधानि रूपाणि बोधयितव्यानि । यथा लोपपक्षे विसर्गरहितम्, लोपाऽभावे ८-३-३६ वा श इति सूत्रप्रवृतौ विसर्गघटितम्, ८-३-३६ वा शरि-सूत्राप्रवृत्तौ ८-३-३४ विस...इति सत्वे सकारद्वयघटितम् । अर्थाद् विसर्गपक्षे विसर्गलोपपक्षे च सकारः परतस्त्य एक एव । सत्वपक्षे तु विसर्गस्थानिकः परतस्त्यश्चेति सकारद्वयं ज्ञेयम् । अथ-पुरः+स्थाता,-व्रणः+स्फुटति । मनः+स्थितिः,पयः+स्थाप्यम्, पाषाणः+स्थण्डिले, वचः+स्पष्टम्,पयःश्चोतति,कतमःस्तरः,इत्यादयः प्रश्ना देयाः । अथ ८-३-३७ कुप्वोः...सूत्रमुपदेश्यम् ।

८-३-३७ कुप्वोः- ८-३-३६ वा शरि.....सूत्रस्थ-खर्परि.....वार्तिकानन्तरं सूत्रमिदं पाठचम् । अत्र प्रथमं≍क ≍पौ इत्यत्र दृश्यमानाया लिपेस्तात्पर्यं बोधयितव्यम् । यथा-अयि वत्साः ? पुरातनसमये विसर्गस्य सङ्केतिका लिपिर्वलयद्वयाकारा (8)बभूव । अतोऽर्धविसर्गसदृशस्य संङ्केतिका लिपिरपि अर्धवलयद्वयाकारा (≍) प्रयुज्यते स्म । यद्यप्यद्यत्वे विसर्गस्य सङ्केतिका लिपिर्बिन्दुद्वयरूपा (:) प्रयुज्यते । तथापि अर्धविसर्गसदृशस्य सङ्केतिका लिपिस्तु यथापूर्वम् अर्धवलयद्वयाकारैव(≍) प्रयुज्यते । अर्धविसर्गसदृशश्च ककारखकाराभ्यां पूर्वो जिह्वामूलीयः । पकारफकाराभ्यां पूर्वस्तूपध्मानीय इत्युच्यते । अतःप्रकृतसूत्रे≍क इत्यत्र ककारात् पूर्वाऽर्धविसर्गसदृशी लिंपिर्जिह्वामूलीयविसर्गं सङ्केतयति,≍पौ इत्यत्र पकारात् पूर्वाऽर्धविसर्गसदृशी लिपिश्चोपध्मानीयविसर्गं सङ्केतयति । इति । अर्धविसर्गसदृशोच्चारणं च "क,ख,प,फ" वर्णेभ्यः पूर्वत एव संभवति,नाऽन्यत्र । अद्यत्वे लौकिकभाषायां प्रयुज्यमाने दुःखशब्दे यद्यप्युच्चारणं जिह्वामूलीयस्य भवति । तथापि लिपिस्तु पूर्ण (सामान्य) विसर्गस्येवोपयुज्यते । अत एव दुक्ख इति लिपिरुचितेति साम्प्रतिकाः प्राज्ञंमन्याः प्रजल्पन्ति । तत्र पूर्ण(सामान्य) विसर्गस्योच्चारणाऽभावात्, अर्धविसर्गदृशस्य=जिह्वामूलीयस्य च प्राज्ञंमन्यानां ज्ञानाभावात् । अथाऽधो निर्दिष्टरूपेण त्रीणि सूत्राणि श्यामपाटचां लेख्यानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-३८ सो ऽपदादौ ॥ ५४,३९

पयस्पाशम् । पयस्कल्पम् ।
यशस्कम् । यशस्काम्यति ।
(पाशकल्पककाम्येष्विति वाच्यम्)
(अनव्ययस्येति वक्तव्यम्)
नेह-प्रातः कल्पम् ।
(काम्ये रोरेवेति वाच्यम्)
नेह-गीःकाम्यति ।

८-३-३९ इणः षँः ॥४८

सर्पिष्पाशम् । सर्पिष्कल्पम् ।
सर्पिष्कम् । सर्पिष्काम्यति ।
(इत उत्तरम् 'सँः'(८-३-३८) इति; इणःषँः (८-३-३९) इति चानुवर्तेते) तत्रेणः परस्य विसर्गस्य षँः, अन्यस्य तु सँ इति बोध्यम् ।

८-३-४० नमस्पुरसोर्गत्योः ॥

नमस्कृत्य । पुरस्कृत्य ।
गत्योरित्युक्तेर्नेह-पूः, पुरौ, पुरः प्रवेष्टव्याः ।

८-३-४१ इदुदुपधस्य चाप्रत्ययस्य ॥

निष्कृतम् । दुष्कृतम् । निष्प्रत्यूहम् ।
दुष्पीतम् । अप्रत्ययस्येत्युक्तेर्नेह-अग्निः करोति । वायु : करोति ।'एकादेशशास्त्र-निमित्तकस्य न षत्वम्' कस्कादिषु भ्रातुष्पुत्र-शब्द- पाठ-सामर्थ्यात् । मातुः कृपा । पितुः कृपा ।
(मुहुसः प्रतिषेधः)
मुहुःकामः ।

(क) (ख)

८-३-३४ विसर्जनीयस्य सः ॥ ८-३-३५ शर्परि विसर्जनीय : ॥ ८-३-३७ कुँप्वोः (क) ≍क≍पौ (ख) च ॥ इति । अथाङ्गुल्या पदानि दर्शयता शिक्षकेण सूत्रार्थो बोधयितव्यः । **कुप्वोः**= कवर्गपवर्गयोः परयोः, (क)=विसर्जनीयस्य=विसर्गस्य स्थाने, ≍क ≍पौ=जिह्वामूलीयोपध्मानीयौ विसर्गौ भवतः, (ख) =विसर्जनीयः + च=पूर्ण (सामान्य) विसर्गोऽपि भवति । इति । अथ ज्ञातसूत्रार्थाश्छात्रा अधो निर्दिष्टरूपेण श्यामपाट्यां लिखित्वा कवर्गे परे जिह्वामूलीयः,पवर्गे परे उपध्मानीयो भवतीति बोधयितव्याः । यथा-

जिह्वामूलीयः(क ख) कवर्गे परे । उपध्मानीयः (प फ) पवर्गे परे ।

अत्रापि ८-४-३९ स्तोः श्चु.......सूत्रे इव भोजनभागग्रहण-दृष्टान्त उपस्थाप्यः । एतावाँस्तु विशेषो यत् तत्र, षण्णां भागग्रहणम् प्रकृतसूत्रे द्वयोरिति । कः करोति । कर्मकरः करोति । कः खनति । कीनासः खनति । कः पचति । सूदः पचति । वृक्षः फलति । जनः फालयति । इत्यादिषु लक्षणसमन्वयः कारयितव्यः । यदिच्छात्राः १-३-१० यथा.. सूत्रार्थशिक्षणाय साकाङ्क्षास्तदा तत्सूत्रमत्रावतार्यं नान्यथा । अथ ८-३-३४..... ३७ स-वार्तिक-सूत्रोदाहरणानि सङ्कीर्णानि पृच्छता शिक्षकेण यथोचितं द्वित्राणि दिनानि छात्रा अभ्यासाय प्रवर्तयितव्याः । इतःपरम्-यद्यपि ६-१-१०९ अतो......सूत्रस्याऽध्ययनक्रमःप्राप्त इत्यापाततः प्रतीयते, तथापि अच्सन्धि -ज्ञानात् पूर्वं तत्सूत्रोदाहरण-बोधनस्य दुष्करतया तत् सूत्रं मुक्त्वा ८-२-३९ झलां......सूत्रमुपदेश्यम् ।

८-३-३८ सोऽप-विसर्जनीयस्य (८-३-३४) सँः, = सँ (अनुबन्धालोपे स्) आदेशो भवति, अपदादौ=अपदाद्योः, कुप्वोः (८-३-३७) । सूत्रे द्विवचनस्थाने व्यत्ययेनैकवचनम् ।
पाश-सम्भवप्रदर्शनमात्रमेतन्न तु परिगणनम्;,व्यावर्त्याऽभावात् ।

८-३-३९ इणः= इणः परस्य, विसर्जनीयस्य (८-३-३४) षँः = षँ (अनुबन्धलोपे ष्) आदेशो भवति, अपदाद्योः (८-३-३८) कुप्वोः (८-३-३७)= पाशकल्पककाम्येषु ।

८-३-४० नमः-गत्योः= गतिसंज्ञकयोः, नमस्पुरसोः= नमस् पुरस् इति शब्दसम्बन्धिनः, विसर्जनीयस्य (८-३-३४) सँः (८-३-३८) कुप्वोः (८-३-३७) । 'अपदादौ' इति निवृत्तम् । उदाहरणयोः क्रमशः- नमः शब्दस्य १-४-७३ साक्षा....इत्यनेन पुरश्शब्दस्य १-४-६६ पुरो.....इत्यनेन गतिसंज्ञा ।

८-३-४१ इदुदुपधस्य= ह्रस्वेकारह्रस्वोकारोपधस्य, अप्रत्ययस्य= प्रत्ययसम्बन्धिभिन्नस्य, विसर्जनीयस्य (८-३-३४) षँः (८-३-३९) कुप्वोः (८-३-३७) । **एकादेश**... न षत्वम्= एकादेशशास्त्रं निमित्तं यस्य ततः परस्य विसर्गस्य न षत्वमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-४२ **तिरसोऽन्यतरस्याम्** ॥४४

तिरः कर्ता,तिरस्कर्ता ।

गतेरित्यनुवृत्तेर्नेह-तिरःकृत्वा काष्ठं गतः ।

८-३-४३ **द्विस्त्रिश्चतुरिति कृत्वोऽर्थे** ॥

द्विष्करोति,द्विः करोति ।

त्रिष्करोति, त्रि : करोति ।

चतुष्करोति, चतुः करोति ।

कृत्वोऽर्थे इत्यक्तेर्नेह-चतुष्कपालम् ।

८-३-४४ **इसुसोः सामर्थ्ये** ॥ ४५

सामर्थ्यमिह व्यपेक्षा ।

सर्पिष्करोति, सर्पिःकरोति ।

धनुष्करोति, धनुःकरोति । सामर्थ्य इत्युक्तेर्नेह-तिष्ठतु सर्पिः पिब त्वमुदकम् ।

८-३-४५ **नित्यं समासेऽनुत्तर पदस्थस्य** ॥४८,४७

सर्पिष्कुण्डिका । धनुष्कपालम् ।

अनुत्तरपदस्थस्येत्युक्तेर्नेह-परमसर्पिः कुण्डिका । परमधनुः कपालम् ।

८-३-४६ **अतः कृकमिकंसकुम्भपात्र कुशाकर्णीष्वनव्ययस्य** ॥

अयस्कारः । अयस्कामः। अयस्कंसः । अयस्कुम्भः । अयस्पात्रम् । अयस्कुशा । अयस्कर्णी । अत इत्युक्तेर्नेह-गीः कारः। धूः कारः । तपरकरणान्नेह-भाः करणम् ।

भास्कर इति तु कस्कादिषु द्रष्टव्यः ।

अनव्ययस्येत्युक्तेर्नेह-पुनः कारः । समास इत्यनुवृत्तेर्नेह-यशः करोति ।

अनुत्तरपदस्थस्येत्यनुवृत्तेर्नेह- परमयशः कारः ।

८-३-४२ तिर- गतेः (८-३-४०) तिरसः= तिरशशब्दसम्बन्धिनः, विसर्जनीयस्य (८-३-३४) अन्यतरस्याम्, =वा, सः (८-३-३८) कुप्वोः (८-३-३७) । माधवस्तु पराभवे तिरस्कार इति प्रयोगदर्शनात् सत्वविधौ गतिग्रहणानुवृत्तिं केचिंन्नेच्छन्तीत्याहेति १-४-७१ विभा... सूत्रे तत्त्वबोधिनी । उदाहरणे तिरशशब्दस्य १-४-७१ विभा..... इति गतिसंज्ञा ।

८-३-४३ द्विस्त्रि- कृत्वोऽर्थे=कृत्वसुँजर्थे वर्तमानानाम्, द्विस्त्रिश्चतुरिति= द्विस् त्रिस् चतुर् इत्येतेषाम्, विसर्जनीयस्य (८-३-३४) अन्यतरस्याम् (८-३-४२) षः (८-३-३९) कुप्वोः (८-३-३७) । **कृत्वोऽर्थे द्विस्** त्रिस् इति सुँजन्तसाहचर्येण चतुरित्यस्यापि सुँजन्तस्यैव ग्रहणे सिद्धे कृत्वोऽर्थग्रहणं साहचर्यपरिभाषाया अनित्यत्वज्ञापनार्थम् । तेन १-१-६ दीधी.....इत्यत्र इट आगमस्य ग्रहणम् । तेन भविता इत्यादौ लुँटि गुणप्रतिषेधः सिध्यति । अन्यथा धातुसाहचर्यादिटो धातोरेव ग्रहणं स्यान्नत्विडागमस्य ।

८-३-४४ इसुसोः= इस् उस् सम्बन्धिनः, विसर्जनीयस्य (८-३-३४) अन्यतरस्याम् (८-३-४२) षः (८-३-३९) कुप्वोः (८-३-३७) सामर्थ्ये=व्यपेक्षारूपे सामर्थ्ये गम्ये । **व्यपेक्षा** पृथगर्थानां पदानामाकाङ्क्षादिवशाद् यः परस्परसम्बन्धः सा व्यपेक्षा । प्रत्युदाहरणे- सर्पिरित्यस्य तिष्ठतु इत्यत्राऽन्वयः । अतः पिब इत्यनेन नास्ति सामर्थ्यम् ।

८-३-४५ नित्यं - इसुसोः (८-३-४४) अनुत्तरपदस्थस्य= अनुत्तरपदवर्तिनः, विसर्जनीयस्य (८-३-३४) नित्यम्, षः (८-३-३९) कुप्वोः (८-३-३७) समासे= समासे सति । **अनुत्तरपदस्थस्य** अत्र काशिका- एतदेव **अनुत्तरपदस्थस्य** इति वचनं ज्ञापकम्- इसुसोः प्रत्ययग्रहणे यस्मात् स विहितस्तदादेः इत्ययं नियमो न भवति । तेन परमसर्पिष्करोति, परमसर्पिः करोति । ८-३-४४ इसुसोः इत्येतद् भवति । व्यपेक्षा च तत्र सामर्थ्यमाश्रितमिति समासे न भवतीति । **सर्पिष्कुण्डिका** अत्र दीक्षितः-कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽ समासे व्यपेक्षाविरहेऽपि षत्वार्थः । व्यपेक्षायां नित्यार्थश्चेति ।

८-३-४६ अतः= अतः परस्य, अनुत्तरपदस्थस्य (८-३-४५) विसर्जनीयस्य (८-३-३४) नित्यम् (८-३-४५) सः (८-३-३८) समासे (८-३-४५) कृ... करणीषु= कृकम्याद्यावयवकेषु कंसादिषु च परेषु । **अयस्कर्णी** अत्र काशिका- शुनष्कर्ण इत्ययं तु कस्कादिषु द्रष्टव्य इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-४७ अधः शिरसी पदे ॥

अधस्पदम् । शिरस्पदम् ।
अनुत्तरपदस्थस्येत्यनुवृत्तेर्नेह-परम शिरः पदम् । समास इत्यनुवृत्तेर्नेह-अधःपदम् ।

८-३-४८ कस्कादिषु च ॥

कस्कः । कौतस्कुतः । सर्पिष्कुण्डिका । धनुष्कपालम् । आकृतिगणोऽयम् ।

८-३-४९ छन्दसि वाऽप्राम्रेडितयोः ॥ ५४

अयः पात्रम्, अयस्पात्रम् । अग्ने प्रातर्र्ऋतस्कविः । गिरिर्न विश्वतस्पृथुः ।
नेह- वसुर्नः पूर्व्यः पतिः ।
अप्राम्रेडितयोरित्युक्तेर्नेह-अग्निः प्रविद्वान् । पुरुषः पुरुषः ।

८-३-५० कः करत् करति कृधि कृतेष्वनदितेः ॥

विश्वतस्कः । विश्वतस्करत् । पयस्करति । उरुणस्कृधि । सदस्कृतम् । अनदितेरित्युक्तेर्नेह- यथा नो अदितिः करत् ।

८-३-५१ पञ्चम्याः परावध्यर्थे ॥

दिवस्परि प्रथमं जज्ञे । अग्निर्हिमवतस्परि । पञ्चम्या इत्युक्तेर्नेह-अहिरिव भोगैः पर्येति बाहुम् । अध्यर्थ इत्युक्तेर्नेह-दिवसस्पृथिव्याः पर्योजः ।

८-३-५२ पातौ च बहुलम् ॥

दिवस्पातु । परिषदः पातु ।

८-३-५३ षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ॥ ५४

वाचस्पतिं विश्वकर्माणम् । दिवस्पुत्राय सूर्याय ।
दिवस्पृष्ठे धावमानं सुपर्णम् । अगन्म तमसस्पारम् ।
इडस्पदे समिध्यसे । दिवस्पयो दिधिषाणाः । रायस्पोषं यजमानेषु ।

८-३-५४ इडाया वा ॥

इडायास्पतिः, इडायाः पति : । इडायास्पुत्रः, इडायाः पुत्रः । इडायास्पृष्ठम्, इडायाः पृष्ठम् । इडायास्पारम्, इडायाः पारम् । इडायास्पदम्, इडायाः पदम् । इडायास्पयः, इडायाः पयः इडायास्पोषम्, इडायाः पोषम् ।

८-३-४७ 'अधः शिरसी' इति व्यत्ययेन षष्ठी स्थाने प्रथमा । अधः शिरस् इत्येतयोः, अनुत्तरपदस्थस्य (८-३-४५) विसर्जनीयस्य (८-३-३४) नित्यम् (८-३-४५) सँः (८-३-३८) समासे (८-३-४५) पदे=पदशब्दे परे । **अधस्पदम्** २-१-७२ मयू....इति समासः । शिरस्पदम् २-२-८ षष्ठी- इति समासः ।

८-३-४८ कस्कादिषु=कस्कप्रभृतिगणपठितशब्देषु, यथायोग्यम् इणः परस्य विसर्गस्य षँः (८-३-३९) अन्येभ्यः परस्य सँः (८-३-३८) कुप्वोः ८-३-३७) ।

८-३-४९ छन्द-विसर्जनीयस्य (८-३-३४) वा= विभाषया, सँः (८-३-३८) अप्राम्रेडितयोः= प्रशब्दाऽऽम्रेडितभिन्नयोः, कुप्वोः (८-३-३७) छन्दसि= वेदे ।

८-३-५० कःक -अनदितेः =अदितिशब्दसम्वन्धिभिन्नस्य, विसर्जनीयस्य (८-३-३४) सँः (८-३-३८) कः...कृतेषु= कः करत् करति कृधि कृत इत्येतेषु परेषु,छन्दसि (८-३-४९) ।

८-३-५१ पञ्चम्याः=पञ्चमीविभक्तिसम्बन्धिनः, विसर्जनीयस्य (८-३-३४) सँः (८-३-३८) अध्यर्थे=उपरिभावार्थे, परौ=परिशब्दे परतः, छन्दसि (८-३-४९) । **पर्योजः** अत्र परिः सर्वतोभावे ।

८-३-५२ पातौ=पाधातौ परे, पञ्चम्याः (८-३-५१) विसर्जनीयस्य (८-३-३४) बहुलम्= बहुल्येन, सँः (८-३-३८) छन्दसि (८-३-४९) ।

८-३-५३ षष्ठ्याः=षष्ठीविभक्तिसम्बन्धिनः, विसर्जनीयस्य (८-३-३४) सँः (८-३-३८) पति........पोषेषु=पति पुत्र पृष्ठ पार पद पयस् पोष इत्येतेषु परेषु, छन्दसि (८-३-४९) ।

८-३-५४ इडा-षष्ठ्याः (८-३-५३)=षष्ठ्यन्तायाः, इडायाः इडाया इत्यस्य, विसर्जनीयस्य (८-३-३४) वा =विभाषया, सँः (८-३-३८) पति.........पोषेषु (८-३-५३) छन्दसि (८-३-४९) । पूर्वेण नित्ये प्राप्ते विकल्पार्थं चनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-५५ **अपदान्तस्य मूर्धन्यः** ॥११९
आपादपरिसमाप्तेरिदमधिक्रियते ।
८-३-५६ सहेःसाडः सः ॥११९
तुराषाट्, तुराषाड् । साड इत्युक्तेर्नेह-तुरासाहौ ।
८-३-५७ **इण्कोः** ॥११९
आपादपरिसमाप्तेरिदमधिक्रियते ।

८-३-५८ **नुँम्विसर्जनीयशर्व्यवायेऽपि** ॥ ११९
इदमप्यापादपरिसमाप्तेरधिक्रियते ।
८-३-५९ आदेशप्रत्यययोः ॥
सिषेध । सिषेवे । अग्निषु । वायुषु । वनेषु । कर्तृषु । वक्ष्यति ।

८-३-५५ **अपदान्तस्य**= पदान्ता ऽ वर्तिनो वर्णस्य स्थाने, मूर्धन्यः= मूर्धन्यवर्णो भवति ।
८-३-५६ **सहेः**- साडः=साड्रूपस्य, सहेः=सह् धातोः, सः=सकारस्य स्थाने, मूर्धन्यः (८-३-५५) । **तुराषाट्** ६-३-१३७ अन्ये ...इति तुरशब्दस्य दीर्घः ।
८-३-५७ **इण्को**:-६-४-३ नामि -सूत्रानन्तरं सूत्रमिदं पाठचम् । एतदर्थबोधनेऽधोनिर्दिष्टरीत्या सूत्राणि लेख्यानि । यथा -(क) (ख) (ग)
८-३-५५ अपदान्तस्य मूर्धन्यः ॥ ८-३-५६ सहेः साडःसः ॥
८-३-५७ इण्कोः (क) (ग) (ख) ॥ इति । अत्र बालानामुपलालनामनुसृत्य, इण्को :=इण्कवर्गाभ्यां परस्य, (ग)=सः=सकारस्य स्थाने,(ख)=मूर्धन्यः=मूर्धस्थानीयवर्णो भवति । इत्येवार्थ उपदेश्यः । यतः, शनैः कथा शनैः पन्थाः शनैः पर्वतलङ्घनम् । शनैर्वित्तं शनैर्विद्या पञ्चैतानि शनैः शनैः । (शिक्षकस्तु-नेदं वस्तुतः षत्वविधायकं सूत्रं किन्तूत्तरसूत्रेषु निमित्तमात्रमुपदिशति इति मनसाऽवदध्यात् । अत एवोदाहरणानि मूले न दत्तानि ।) अथ लक्षणसमन्वयक्रमे ईषद्विवृतप्रयत्नवन्तो वर्णाः श् ष् स् ह् इति श्यामपाट्यां लिखित्वा मूर्धस्थानीयेषु कतमो वर्णोऽस्तीतिच्छात्रा एव प्रष्टव्याः । ततः सिद्धं रूपं'गृहेषु'इति श्यामपाट्यां लेख्यम् । अथ 'पाठशालासु च्छात्राः पठन्ति' इति वाक्यघटके 'पाठशाला+सु' इत्यत्र षत्वं भवति न वेतिच्छात्राः परीक्षणीयाः । अथ सम्बुद्धिः-
अयि श्याम ? पठ इति वक्तव्ये श्याम इति प्रयोगः कथं सिध्येदिति जिज्ञासायां २-३-४७ सम्बोधने च-सूत्रमुपदेश्यम् ।
८-३-५८ **नुँम्विस**.........वायेऽपि=नुँम्स्थानिकानुस्वारेण विसर्गेण शर्वर्णेन च प्रत्येकं व्यवधानेऽपि, इण्कोः (८-३-५७) सः ८-३-५६ मूर्धन्यः (८-३-५५) । हवींषि । यजूंषि । सर्पिःषु । यजुःषु । सर्पिष्षु । यजुष्षु । प्रत्येकमित्युक्तेर्नेह-निंस्से । अत्र नुँस्थानिकानुस्वारेण शरा च व्यवधानम् । **अधिक्रियते** अर्थात् अग्रिमसूत्रैर्विधीयमानं षत्वं नुँमादिभिः प्रत्येकं व्यवहितेऽपि भवति इति भावः । न त्विदमेव विधायकम् ।
८-३-५९ **आदे**- ६-१-९ सन्य...-सूत्रानन्तरं सूत्रमिदं पाठचम् । इण्कोः (८-३-५७)=इण्कवर्गाभ्यां परस्य, अपदान्तस्य ८-३-५५) आदेशप्रत्यययो :=आदेशरूपस्य प्रत्ययावयवस्य च, सः (८-३-५६)=सकारस्य स्थाने, मूर्धन्यः (८-३-५५)=मूर्धन्यवर्णो भवति । इति । द्वितीयावृत्तौ षोपदेशसोपदेशधातुविवेकाय ६-१-६२ धात्वा...सूत्रस्थं सेक्सृप.........स्वप् स्मिङः ॥ इति पद्यं तद्व्याख्यां चोद्बोधयेत् ! प्रकृते प्रत्ययः 'स' इति । तदवयवः सकारश्च अकारात् पूर्ववर्ती । तेन सकारस्य षः । इति बोधयित्वा पिपठिष इति श्यामपाटयां लिखित्वा ३-१-३२ सना.......सूत्रं धातुसंज्ञायै समुद्बोधयेत् । ततो लँटि तिपि शपि पिपठिष+अति इति श्यामपाटयां लिखित्वा ६-१-४८ आद् गु....६-१-९७ अकः....सूत्रे बाधयित्वा ६-१-९४ अतो......सूत्रमुद्बोधयेत् । पिपठिषति । इत्यादि । अत्राऽधोनिर्दिष्टश्यामपाटीप्रयोगविधिना छात्रान् बोधयेत् । यथा गङ्गावारि गङ्गाजलम् गङ्गासलिलम् गङ्गा उदकम्=गङ्गोदकम् । वत्साः ? कश्चनच्छात्रो गङ्गावारि इति लिखितवान्, तादृशं प्रयोगं दृष्ट्वा शिक्षकस्तं छात्रमुपदिष्टवान् यथा त्वं वारिशब्दं प्रयुक्तवान्, तथैव वारिशब्दार्थबोधनाय जलशब्दः सलिलशब्द उदकशब्दो वाऽपि प्रयोक्तुं शक्यते । अर्थात् गङ्गावारि एष प्रयोगोऽपि साधुः । परन्तु एष एव साधुः । अन्ये तदर्थबोधनाय साधवः प्रयोगा न सन्ति, इति भ्रमो नाऽनुभाव्यः । वारिशब्दस्य स्थाने जलशब्दः सलिलशब्दः, उदकशब्दो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-६० शासिवसिघसीनां च ॥
शिष्टः । अशिषत् । उषितः । उषित्वा ।
जक्षतुः । जक्षुः ।
८-३-६१ स्तौतिण्योरेव
षण्यभ्यासात् ॥ ६२
तुष्टूषति । सिषेवयिषति । सिषाधयिषति ।
सिद्धे सत्यारभ्यमाणं नियमार्थम् । नेह-
सिसिक्षति । सुसूषते । षणीति
मूर्धन्यनिर्देशादिह न **नियमः** सुषुप्सति ।
तिष्ठासति । अत्र काशिका- अभ्यासादिति
किम् ? अभ्यासाद् या प्राप्तिस्तस्या नियमो
यथा स्याद् धातोर्या प्राप्तिस्तस्या नियमोमा
भूत् । प्रतीषिषति । अधीषिषति । इति ।

वाऽपि प्रयोक्तुं शक्यते । इति श्रुत्वा यदि गङ्गाजल गङ्गासलिल गङ्गा उदक इतिच्छात्रो लिखेत् तु शिक्षकः "अशुद्धं प्रयोगं लिखितवानसि" इति सतर्कयन् पुनरुपदिशेद् यद्, जल सलिल उदक इत्येते शब्दा यथेच्छं प्रयोक्तुं तु शक्यन्ते । परन्तु शब्दविशेषेऽग्रिमप्रक्रियाविशेषस्तु न त्याज्यः । यथा जलसलिलशब्दयोर्विभिन्नकार्यैरन्ते मकारयोजनम् -गङ्गाजलम्, गङ्गासलिलम्, इति । उदकशब्दे च विभक्तिकार्यैरन्त्ये मकारयोजनम् , आदेः उकारस्य स्थाने च गङ्गाशब्दस्याकारेण सह गुणैकादेशोऽपि गङ्गोदकम् । इति यथेति । प्रकृतमनुसरामः । वत्साः ? उपरितनेन दृष्टान्तेन पठितुमिच्छति =पिपठषति इत्यत्र भाव : स्फुरति । अत्र श्यामपटीप्रयोगो यथा-
पठितुम् इच्छति =पठ् इष् । वत्सा : ? पठितुम् । (पठ्+इतुम्=पठितुम्) इत्यत्र 'इतुम्' इति विषये, इच्छति (इष्+ति=इच्छति) इत्यत्रत्ये च 'ति'इति विषये ऽत्र चर्चा नास्ति । तयोर्विषये चर्चा तु जलसलिलशब्दयोर्मकारयोजनमिवेति विमृशत । अतः प्रकृते 'पठ् इष्' विषये एव चर्चा क्रियते । चर्चा चेयम्-'पठ्+इष्' इत्यत्रत्य इष्धातोरर्थः सन्प्रत्ययेन बोध्यते । अर्थात् पठ्+इष् इति कथनम्, 'पठ+सन्' इति कथनञ्च समानमेवेति । परन्तु यथा वारिशब्दे उदकशब्दे च प्रयुक्ते अर्थे तुल्ये युक्तेऽपि गङ्गाउदक इति न लिख्यते नाप्युच्चार्यते किन्तु गङ्गोदकम् इति लिख्यते गङ्गोदकमित्येव चोच्चार्यते । तथैव पठ्+सन् इत्यत्रापि अग्रिमप्रक्रियायां पिपठिष इति लिख्यते तथैव पठचते चेति । इच्छार्थे बोधयितव्ये सर्वेभ्यो धातुभ्यः सन्प्रत्ययं कृत्वा सन्नन्ता धातवः प्रयुज्यन्ते । यथा हसितुमिच्छति जिहसिषति । इत्यादि । अत्र शिक्षकोऽधोनिर्दिष्टरूपेण विशेषं बोधयेत् । यथा- वत्साः ? एकोऽन्यो विषयः प्रकृते बोद्धव्य : यत्,अकर्मका अपि धातवो १-३-२६ हेतु........सूत्रेण णिचि णिजन्ताः सकर्मका भवन्ति । सन् प्रत्यये सति तु अकर्मका धातवः सन्नन्ता अपि अकर्मका एव भवन्ति । सकर्मकास्तु सकर्मका भवन्तीति । वत्साः ? प्रेरणायां णिचि णिजन्तात् साधारणतया १-३-७४ णिच ....सूत्रेण कर्त्रभिप्राये क्रियाफले आत्मनेपदमुपदिष्टम् । अकर्त्रभिप्राये च १-३-७८ शेषा.........सूत्रेण परस्मैपदं भवति । सन्प्रत्यये तु सनः प्रकृतेरात्मनेपदं भवति चेत् सन्नन्तादपि आत्मनेपदमेव भवति । यथा रम्-रमते-रिरंसते । मुद्-मोदते-मुमोदिषते, मुमुदिषते । सन : प्रकृतेः परस्मैपदं भवति चेत् सन्नन्तादपि परस्मैपदं भवति । यथा पठ्-पठति- पिपठिषति । सनः प्रकृतेरुभे पदे भवतश्चेत् सन्नन्तादपि उभे पदे भवतः । यथा -णीञ्-नयनि, नयते-निनीषति, निनीषते । तथा हि इति वदन् १-३-६२ पूर्ववत्.......सूत्रमुपदिशेत् ।

८-३-६० शासि- ....सीनाम्, =शास् वस् घस् धातूनाम्, इण्कोः (८-३-५७) सः (८-३-५६) मूर्धन्यः (८-३-५५) । **शिष्टः** ६-४-३४ शास ...इतीत्वम् । **अशिषत्** ३-१-५६ सर्ति.....इत्यङ्, प्राग्वदित्वम् । **उषितः** ७-२-५२ वस...इतीट् । जक्षतुः ६-४-९८ गम...इत्युपधालोपः ।

८-३-६१ स्तौति- षणि= षभूते सनि,अभ्यासात्= अभ्यासेण उत्तरस्य, स्तौतिण्योः= स्तौतिण्योरेव= स्तुधातोर्ण्यन्तानामेव च, सः (८-३-५६) मूर्धन्यः (८-३-५५) नान्येषाम् । **प्रतीषिषति अधीषिषति** इण् इक् इति धातुभ्यां सनि रूपे इमे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-६२ सँ स्विदिस्वदिसहीनां च ॥

सिस्वेदयिषति । सिस्वादयिषति ।
सिसाहयिषति ।

८-३-६३ प्राक् सितादड्व्यवायेऽपि ॥७०

उदाहरणान्यग्रिमसूत्रेषु द्रष्टव्यानि ।

८-३-६४ स्थादिष्वभ्यासेन चाऽभ्यासस्य ॥

योगो ऽयं विभज्यते -

प्र.८-३-६४ स्थादिष्वभ्यासेन ॥

उदाहरणान्यग्रिमसूत्रेषु द्रष्टव्यानि ।

द्वि. ८-३-६४ चाऽभ्यासस्य ॥ ७०

अभिसुषाव । अभिसुसूषति ।
अभिससौ । अभिसिषासति ।

८-३-६५ उपसर्गात् सुनोति सुवति स्यति स्तौति स्तोभति स्था सेनय सेध सिच सञ्ज स्वञ्जाम् ॥

अभिषुणोति । ८-३-६३ प्राक् सि.........अभ्यषुणोत् । अभिषुवति । अभ्यषुवत् । अभिष्यति । अभ्यष्यत् । अभिष्टौति । अभ्यष्टौत् । अभिष्टोभते । अभ्यष्टोभत । अभिष्ठास्यति । अभ्यष्ठात् । द्वि ८-३-६४ चाऽभ्या .....अभितष्ठौ । अभिषेणयति । ८-३-६३ प्राक् सि.....अभ्यषेणयत् । प्र.८-३-६४ स्थादि... अभिषिषेणयिषति । अभिषेधति । अभ्यषेधत् । अभिषिषेधिषति । सेध इति शपा निर्देशान्नेह-अभिसिध्यति । अभिषिञ्चति । अभ्यषिञ्चत् । अभिषिषिक्षति । अभिषजति । अभ्यषजत् । अभिषिषङ्क्षति । अभिष्वजते अभ्यष्वजत । अभिषिष्वङ्क्षते । अभिषस्वञ्जे । उपसर्गादित्युक्तेर्नेह -दधि सिञ्चति । मधु सिञ्चति । अभिसावकीयतीत्यत्र सुनोतिं प्रत्युसर्गत्वाऽभावान्न षत्वम् । अभिषावयतीत्यत्र तु सुनोतिं प्रत्येवोपसर्गत्वाद् भवत्येव षत्वम् ।

८-३-६६ सदिरप्रतेः ॥

निषीदति । न्यषीदत् । निषसाद ।
अप्रतेरित्युक्तेर्नेह-प्रतिसीदति ।

८-३-६२ **सँ स्वि**-स्विदि....हीनाम्=ण्यन्तानां स्विदिप्रभृतीनाम्, षणि+अभ्यासात् (८-३-६१) सः (८-३-५६) सँ= सँ (अनुबन्धलोपेस्) आदेशः । सकारस्य सकारविधानं षत्ववारणार्थम् । षत्वप्राप्तिश्च ण्यन्तानामेव भवतीति ण्यन्तानामिति सामर्थ्यगम्योऽर्थ इति ध्येयम् । सूत्रे सँ इत्यविभक्तिको निर्देशः ।

८-३-६३ **प्राक् सि-सितात्** प्राक्=सित (८-३-७०) शब्दात् प्राक्,अड्व्यवायेऽपि=अटा व्यवधानेऽपि,सः (८-३-५६) मूर्धन्यः (८- ३-५५) ।

प्र. ८-३-६४ स्थादि -प्राक् सितात् (८-३-६३) स्थादिषु =स्था -सेनय प्रभृतिषु,अभ्यासेन,व्यावयेऽपि (८-३-६३) सः (८-३-५६) मूर्धन्यः(८-३-५५) ।

द्वि.८-३-६४ चाऽभ्या-प्राक् सितात् (८-३-६३) स्थादिषु (प्र.८-३-६४)=स्थादिष्वेव, अभ्यासस्य च, सः (८-३-५६) मूर्धन्यः (८-३-५५) न तु सुनोत्यादीनाम् । इति नियमार्थमिदम् ।अभ्यासस्य षत्वं स्थादीनामेव न तु सुनोत्यादीनामिति भावः । **अभिसुसूषति** अनभ्याससकारस्य ८-३-६१ स्तौनि ....इतिनियमादभ्याससकारस्य प्रकृतसूत्रनियमान्न षत्वम् ।

८-३-६५ **उपसर्गात्**= उपसर्गस्थान्निमित्तात् (८-३-५७ इण्कोः इत्युक्तम् । उपसर्गे कवर्गाऽसंभवादिण्मात्रं निमित्तं ज्ञेयम्) परेषाम्, सुनोति.... स्वञ्जाम्= सुनोतिप्रभृतीनाम्, सः (८-३-५६) मूर्धन्यः (८-३-५५) । **अभिषेणयति** सेनयाऽभियातीति विग्रहे ३-१-२५ सत्या.... इति णिच्, । **अभिषस्वञ्जे** ८-३-११८ सदे :.... सूत्रस्थ-स्वञ्जे.......... वार्तिकेन षत्वप्रतिषेधः । १-२-६ इन्धि.... सूत्र-स्थ-श्रन्थि.... वार्तिकेन कित्त्वपक्षे ६-४-२४ अनि....इति नलोपः- अभिषस्वजे । **उपसर्गत्वा ऽभावान्न षत्वम्** सावकीयं प्रति हि उपसर्गत्वम् ।

८-३-६६ **सदि-अप्रतेः**= प्रतिभिन्नात्, उपसर्गात् (८-३-६५) सदिः= (सदिरिति षष्ठचर्थे प्रथमा) सदेः= सद्धातोः, सः (८-३-५६) मूर्धन्यः (८-३-५५) । **निषीदति** ७-३-७८ पाघ्रा.....इति सीदादेशः । **निषसाद** ८-३-११८सदेः.... इत्यभ्यासात् परस्य षत्वप्रतिषेधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-६७ स्तन्भेः[1] ॥ ६८

अभिष्टभ्नाति । अभ्यष्टभ्नात् । अभितष्टम्भ । प्रतिष्टभ्नाति

८-३-६८ अवाच्चालम्बनाविदूर्ययोः ॥ ६९

यष्टिमवष्टभ्य तिष्ठति । अवष्टब्धा सेना । आलम्बनाविदूर्ययोरित्युक्तेर्नेह - अवस्तब्धः शीतेन । अभ्यर्दित इत्यर्थ : ।

८-३-६९ वेश्च स्वनो भोजने ॥

विष्वणति । सशब्दं भुङ्क्ते, इत्यर्थः । व्यष्वणत् । विषष्वाण । अवष्वणति । अवाष्वणत् । अवषष्वाण । भोजन इत्युक्तेर्नेह-विस्वनति मृदङ्गः । अवस्वनति वीणा ।

८-३-७० **परिनिविभ्यः**[1] सेव -सित-सय-सिवुँ-सह-सुँट्-स्तु-स्वञ्जाम् ॥ ७१

परिषेवते । पर्यषेवत । निषेवते । न्यषेवत । विषेवते । व्यषेवत । परिषिषेविषते । विषिषेविषते । निषिषेविषते । परिषितः । निषितः। विषितः। परिषयः । निषयः । विषयः । परिषीव्यति । निषीव्यति । विषीव्यति । ८-३-७१ सिवा...पर्यषीव्यत्, पर्यसीव्यत् । न्यषीव्यत्, न्यसीव्यत् । परिषहते । निषहते । विषहते । पर्यषहत, पर्यसहत । न्यषहत, न्यसहत । व्यषहत, व्यसहत । परिष्करोति । पर्यष्करोत्, पर्यस्करोत् ।परिष्टौति । निष्टौति । विष्टौति । पर्यष्टौत्, पर्यस्तौत् । न्यष्टौत्, न्यस्तौत् । व्यष्टौत्, व्यस्तौत् । परिष्वजते । निष्वजते । विष्वजते । पर्यष्वजत, पर्यस्वजत, । न्यष्वजत, न्यस्वजत । व्यष्वजत, व्यस्वजत ।

८-३-७१ सिवादीनां **वा**ऽड्व्यवायेऽपि ॥ ७२

उदाहरणानि पूर्वसूत्रे दत्तानि ।

८-३-७२ अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ॥

अनुष्यन्दते,अनुस्यन्दते वा जलम् ।
विष्यन्दते, विस्यन्दते वा जलम् ।
परिष्यन्दते,परिस्यन्दते वा जलम् ।
अभिष्यन्दते,अभिस्यन्दते वा जलम् ।
निष्यन्दते,निस्यन्दते वा जलम् ।
अप्राणिष्वित्युक्तेर्नेह-अनुस्यन्दते मत्स्य उदके । अप्राणिष्विति पर्युदासः । तेनेह षत्वं भवत्येव-अनुष्यन्देते, अनुस्यन्देते वा मत्स्योदके ।

८-३-६७ स्तन्भेः- उपसर्गात् (८-३-६५) स्तन्भेः,=स्तन्भ्धातोः, सः (८-३-५६) मूर्धन्यः (८-३-५५) । **अभिष्टभ्नाति** ३१-८२ स्तम्भुँ..........इति श्ना । **प्रतिष्टभ्नाति** अप्रतेरिति नेहानुवर्तते । बाहुप्रतिम्भविवृद्धमन्युः, इति कालिदासः ।

८-३-६८ **अवात्**=अवेत्युपसर्गात् परस्य, स्तन्भेः (८-३-६७) सः (८-३-५६) मूर्धन्यः (८-३-५५) आल...ययोः=आलम्बने आविदूर्ये चार्थे । आलम्बनम्=आश्रयणम् । आविदूर्यम्=सामीप्यम् । **अवष्टब्धा सेना** अत्र न्यासः- आसन्नेत्यर्थः । अथवा नाप्यासन्ना नातिविप्रकृष्टेत्यर्थः । एष त्वर्थभेदः प्रकरणादिगम्यः । इति । इकोऽभावेन पूर्वेणाऽप्राप्तौ सूत्रमिदम् ।

८-३-६९ **वेः**= वि इत्युपसर्गात्, अवात् (८-३-६८) च, स्वनः=स्वन् धातोः, सः (८-३-५६) मूर्धन्यः (८-३-५५) , भोजने=भोजनेऽर्थे ।

८-३-७० **परिनिविभ्यः**=परि नि वि इत्येतेभ्य उपसर्गेभ्यः परेषाम्, सेव.........स्वञ्जाम्=सेव्धातुः सितशब्दः सयशब्दः सिवुँधातु : सह्धातुः सुँट् आगमः स्तु धातुः स्वञ्ज्धातुः इत्येतेषाम्, सः (८-३-५६) मूर्धन्यः (८-३-५५) । परिष्करोति ६-१-१३२ संप..........इति सुँट् । **परिष्वजते** ६-४-२५ दंश ....इति नलोपः । ६-३-६५ उप.......... इत्येव सिद्धे स्तुस्वञ्जिग्रहणमुत्तरार्थम् ।

८-३-७१ **सिवा-** परिनिविभ्यः (८-३-७०) सिवादीनाम्=सिवुँ-सह-सुँट्-स्तु-स्वञ्जां पूर्वसूत्रे पठितानाम्, अड्व्यवायेऽपि,=अटा व्यवधाने ऽपि, सः (८-३-५६) वा = विभाषया, मूर्धन्यः (८-३-५५) ।

८-३-७२ **अनु**......निभ्यः= अनु वि परि अभि नि इत्येतेभ्यः परस्य, स्यन्दतेः,= स्यन्द् धातोः, सः (८-३-५६) वा (८-३-७१) मूर्धन्यः (८-३-५५) अप्राणिषु= प्राणिभिन्नेषु कर्तुषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-७३ वेः स्कन्देरनिष्ठायाम् ॥

विष्कन्तुम्,विस्कन्तुम् । विष्कन्तव्यम्, विस्कन्तव्यम् । अनिष्ठायामित्युक्तेर्नेह- विस्कन्नः । कृत्येव प्रवृत्तेर्नेह-विस्कन्दति ।

८-३-७४ परेश्च ॥

परिष्कन्तुम्, परिस्कन्तुम् । परिष्कण्णः, परिस्कन्नः ।

८-३-७५ परिस्कन्दः प्राच्यभरतेषु ॥

परिस्कन्दः ।

८-३-७६ स्फुरतिस्फुलत्योर्निर्निविभ्यः ॥

निष्ष्फुरति, निस्स्फुरति । निष्फुरति, निस्फुरति । विष्फुरति, विस्फुरति । निष्ष्फुलति, निस्स्फुलति । निष्फुलति, निस्फुलति । विष्फुलति विस्फुलति ।

८-३-७७ वेः स्कभ्नातेर्नित्यम् ॥

विष्कभ्नाति, विष्कभ्नोति । विष्कम्भिता ।

८-३-७८ इणः षीध्वं लुँङ् लिँटां धोऽङ्गात् ॥ ७९

कृषीढ्वम् । अकृढ्वम् । अनेढ्वम् । चकृढ्वे । इण्कोः (८-३-५७) इति वर्तमाने पुनरिण्ग्रहणं कवर्गनिवृत्त्यर्थम् । पक्षीध्वम् । अङ्गादित्युक्तेर्नेह- एधिषीध्वम् ।

८-३-७३ **वेः**=वि इत्युपसर्गात् परस्य,स्कन्देः = स्कन्द्धातोः, सः (८-३-५६) वा (८-३-७१) मूर्धन्यः (८-३-५५) अनिष्ठायाम्=निष्ठाभिन्ने कृति परे । **अनिष्ठायामिति** पर्युदासः । पर्युदासः सदृग्ग्राही भवति । अतो निष्ठासादृश्यात् कृदेव गृह्यते। नञर्थौ द्वौ समाख्यातौ पर्युदासप्रसज्यकौ । पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत् ॥ **विस्कन्नः** ६-४-२४ अनि ....इति नलोपः । ८-२-४२ रदा ....इति नत्वम् ।

८-३-७४ **परेः**=परि इत्युपसर्गात् परस्य, स्कन्देः (८-३-७३) सः(८-३-५६) वा (८-३-७१) मूर्धन्यः (८-३-५५) । अनिष्ठायामिति नेहाऽनुवर्तते । पृथग्योगकरणसामर्थ्यात् ।

८-३-७५ **परि**-प्राच्यभरतेषु=प्राच्यभरतेषु प्रयोगविषयेषु, परिस्कन्दः=परिस्कन्द इति मूर्धन्याभावो निपात्यते । पूर्वेण प्राप्ते, अचि निपातनम् । अथवा निष्ठातकारस्य लोप इति काशिका ।

८-३-७६ **स्फुर**- नि.......भ्यः=निर् नि वि इत्येतेभ्य उपसर्गेभ्यः परयोः, स्फुरतिस्फुलत्यो :,= स्फुर् स्फुल् धात्वोः, सः (८-३-५६) वा (८-३-७१) मूर्धन्यः (८-३-५५) ।

८-३-७७ **वेः**=वि इत्युपसर्गात् परस्य, स्कभ्नातेः=स्कम्भ् धातोः, सः (८-३-५६) नित्यम्, मूर्धन्यः (८-३-५५) । **विष्कभ्नाति** ३-१-८२ स्तम्भुँ...इति श्ना श्नुश्च ।

८-३-७८ **इणः**...- ७-२-१ सिँचि वृद्धिः... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क)

८-३-५५ अपदान्तस्य मूर्धन्यः ॥ ८-३-७८ इणः षीध्वं लुँङ् लिँटां धः (क) अङ्गात् ॥ इति । इणः+अङ्गात्=इणन्तादङ्गात् परेषाम्,षीध्वंलुँङ्लिँटाम्= षीध्वं-लुँङ्-लिँट्-सम्बन्धिनः, धः=धकारस्य स्थाने, (क)=मूर्धन्यः=मूर्धन्यवर्णो भवति । इत्यर्थमुपदिश्य लक्षणसमन्वयं छात्रैः कारयेत् । तत्र वाह्यप्रयत्नेन आन्तरतम्याड्ढकारो भवतीति वोधनाय ७-४-६२ कुहो........सूत्रे दर्शितं श्यामपाटीप्रयोगविधिमुद्वोधयेत् । अनेढ्वम् । अनेषि । अनेष्वहि । अनेष्महि । कर्मणि लुँङि तु प्रागुक्तमेव । केवलं ध्वमि चिण्वदिट्पक्षे अनायि+ध्वम् इत्यवस्थायाम्८-३-७८इणः ....सूत्रं बाधित्वा ८-३-७९. विभा.........सूत्रं पश्चाद् व्याख्यास्यमानं प्रवर्तते । अनायिढ्वम्, अनायिध्वम् । इति ।

अथ शिक्षकेणावधेयम् ।

अथ शिक्षकेणाऽवधेयं यद् धातूनामनुवन्धोपदेशफलोपदेशे एँकारानुवन्धफलं ७-२-५ ह्म्यन्त.......सूत्रेण वृद्धिनिषेध इति उपदेश्यं भविष्यति । अतो वृद्धेरुदाहरणमवश्योपदेश्यम् । स च निषेधः ७-२-३ वद.......सूत्रेण प्राप्ताया वृद्धेः ७-२-४ —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-७९ विभाषेटः ॥
चिक्रियिढ्वे, चिक्रियिध्वे। अयिषीढ्वम्, अयिषीध्वम्। आयिढ्वम्, आयिध्वम्। लुलुविढ्वे, लुलुविध्वे।

८-३-८० **समासे**ऽङ्गुलेः सङ्गः ॥ ८५
अङ्गुलिषङ्गः। समास इत्यक्तेर्नेह- अङ्गुलेः सङ्गः।

८-३-८१ भीरोः स्थानम् ॥
भीरुष्ठानम्। समास इत्यनुवृत्तेर्नेह- भीरोःस्थानम्।

८-३-८२ अग्नेः स्तुत्स्तोमसोमाः ॥
अग्निष्टुत्। अग्निष्टोमः। अग्नीषोमौ।

८-३-८३ ज्योतिरायुषः स्तोमः ॥
ज्योतिष्टोमः। आयुष्टोमः।

८-३-८४ मातृपितृभ्यां **स्वसा** ॥८५
मातृष्वसा। पितृष्वसा।

नेटि-सूत्रेण निषेधे सति पुनः ७-२-७ अतो.....सूत्रेण विधीयमानाया भवति। अतः सरलया रीत्या स्फुटप्रतिपत्तये प्रथमं ७-२-३ वद.........सूत्रोदाहरणं ततः ७-२-४ नेटि-सूत्रोदाहरणं ततश्च ७-२-७ अतो............सूत्रोदाहरणं प्रस्तुत्यम्। इति। अतः क्रमशो रुध् (रुधिर्) दिव् पठ् धतवः प्रस्तुत्याः। तत्र प्रथमं शिक्षको रुध् धोतोर्लुँङि च्लिँप्रत्यये'अरुध्+ल्+ति' इति श्यामपाटयां लिखित्वा ३-१-४४ च्लेः ....सूत्रं बाधयित्वा ३-१-५७ इरि......सूत्रमुपदिशेत्।

८-३-७९ **विभा**-६-४-७७अचि श्नु.........सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा-
(क) (ख) (ग) (घ)
८-३-५५ अपदान्तस्य मूर्धन्यः ॥ ८-३-७८ इणः षीध्वं.......धःअङ्गात् ॥ ८-३-७९ विभाषा (क) (ख) इटः (ग) (घ) ॥ इति। [(ख)= इणः] + इटः= इणः परस्माद् इटः परेषाम्, (ग)= षीध्वं लुङ् लिँटाम्= षीध्वं- लुङ् लिँट्-सम्बन्धिनः, (घ) =धः=धकारस्य स्थाने, विभाषा +[(क)=मूर्धन्यः]=विकल्पेन मूर्धन्यवर्णो भवति। अत्र लक्षणसमन्वये शिक्षकोऽधोनिर्दिष्टरूपेण साङ्गुलिनिर्देशं बोधयेत्। प्रकृतोदाहरणे इण् यकारो वर्तते, ततः पर इट् च इकारो वर्तत एव। तस्मादपि परश्च लिँट्सम्बन्धी धकारो वर्तते। अतोऽत्र धकारस्य स्थाने मूर्धन्यवर्णेषु प्राप्तेषु बाह्यप्रयत्नत आन्तरतम्याड् ढकारो भवति। इति। अत्र श्यामपाटीप्रयोगविषये छात्रान् परीक्षेत। सत्यावश्यके क्षणानन्तरं ७-४-६२ कुहो......सूत्रे दर्शितमेव, विधिं बोधयेत्। चिक्रियिढ्वे, चिक्रियिध्वे। कर्मणि लिँटि च कर्तृलिँटो नास्ति विशेष आत्मनेपदात्, इति वदन् मध्ये मध्ये साहाय्यं ददन्यानि रूपाणि च्छात्रैरेव साधयेत्। अथ लिँटि नीधातुमुपदेष्टुकामः, तिपि चिक्राय इत्यत्रैव वृद्ध्यायादेशौ निनाय। इत्युक्त्वा तसि-निनी+अतुस् इति श्यामपाट्यां लिखित्वा ६-४-८२ एरनेकाचो.........सूत्रमुपदिशेत्।

८-३-८० **समा**-अङ्गुलेः= अङ्गुलिशब्दात् परस्य, सङ्गः =सङ्गशब्दस्य सः (८-३-५६) मूर्धन्यः (८-३-५५) समासे =समासे सति। सूत्रे सङ्ग इति षष्ठचर्थे प्रथमा। एवमग्रिमसूत्रेष्वपि ज्ञेयम्। **अङ्गुलेः सङ्गः** ५-३-५८ नुँम्वि........इति प्राप्तिप्रसङ्गः।

८-३-८१ **भीरोः**=भीरुशब्दात् परस्य, स्थानम्=स्थानशब्दस्य, सः (८-३-५६) मूर्धन्यः (८-३-५५) समासे (८-३-८०)।

८-३-८२ **अग्नेः**=अग्निशब्दात् परेषाम्, स्तुत्........सोमाः=स्तुत् स्तोम सोम शब्दानाम्, सः (८-३-५६) मूर्धन्यः (८-३-५५) समासे (८-३-८०)। **अग्निष्टुत्** सम्पदादित्वादधिकरणे क्विँप्। यत्राऽग्निः स्तुयते सोऽ ग्निष्टुत् =क्रतुविशेष इति पदमञ्जरी। **अग्नीषोमौ** ६-३-२७ ईद..........इतीत्वम्।

८-३-८३ **ज्योतिरायुषः**=ज्योतिष् आयुष् इत्येताभ्यां परस्य, स्तोमः=स्तोमशब्दस्य, सः (८-३-५६) मूर्धन्यः (८-३-५५) समासे (८-३-८०)।

८-३-८४ **मातृपितृभ्याम्**= मातृपितृशब्दाभ्यां परस्य, स्वसा= स्वसृशब्दस्य, सः (८-३-५६) मूर्धन्यः (८-३-५५) समासे (८-३-८०)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-८५ मातुःपितुर्भ्यामन्यतरस्याम् ॥ ८६
मातुःष्वसा, मातुः स्वसा। पितुः ष्वसा, पितुः स्वसा। समासाऽभावे तु मातुः स्वसा। पितुःस्वसा। इत्येव।

८-३-८६ अभिनिसः स्तनः शब्दसंज्ञायाम् ॥
अभिनिःष्टानो वर्णः। शब्दसंज्ञायामित्युक्तेर्नेह- अभिनिः स्तनति। मृदङ्गः

८-३-८७ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ॥
निष्यात्। निषन्ति। प्रादुः ष्यात्। प्रादुः षन्ति।

८-३-८८ सुविनिर्दुर्भ्यःसुपिसूतिसमाः ॥
सुषुप्तः। विषुप्तः। निः षुप्तः। दुः षुप्तः। सुपि इति कृतसम्प्रसारणनिर्देशान्नेह- सुस्वापः। विस्वापः। निः स्वापः। दुः स्वापः। सुसुष्वाप। इह भवत्येव- सुषुषुपतुः। सुषुषुपुः। सुषूतिः। विषूतिः। निःषूतिः। दुःषूतिः। सुषमम्। विषमम्। निःषमम्। दुःषमम्।

८-३-८९ निनदीभ्यां स्नातेः कौशले ॥
निष्णातः कटकरणे। नदीष्णः। कौशल इत्युक्तेर्नेह - निस्नातः। नदीस्नातः।

८-३-९० सूत्रं प्रतिष्णातम् ॥
प्रतिष्णातं सूत्रम्। शुद्धमित्यर्थः। प्रतिस्नातमन्यत्र।

८-३-९१ कपिष्ठलो गोत्रे ॥
कपिष्ठलस्य पुत्रः कापिष्ठलिः।

८-३-९२ प्रष्ठोऽग्रगामिनि ॥
प्रष्ठः= अग्रगामी। प्रस्थोऽन्यः।

८-३-८५ **मातुःपितुर्भ्याम्**= **मातुर् पितुर्** इत्येताभ्यां परस्य, स्वसा (८-३-८४) सः (८-३-५६) अन्यतरस्याम्=वा, मूर्धन्यः (८-३-५५) समासे (८-३-८०)। उदाहरणेषु ६-३-२४ विभा.........इति षष्ठ्या अलुक्

८-३-८६ **अभिनिसः**=अभिनिस् इति समुदायात् परस्य, स्तनः=स्तन् धातोः, सः(८-३-५६) मूर्धन्यः (८-३-५५) शब्दसंज्ञायाम् = शब्दसंज्ञायां गम्यमानायाम्।

८-३-८७ **उपसर्गप्रादुर्भ्याम्**=उपसर्गेणः प्रादुश्शब्दाच्च परस्य, यच्परः=यकारपरकस्याऽच्परकस्य च, अस्तिः= अस् धातोः, सः (८-३-५६) मूर्धन्यः (८-३-५५)। इण्कोः (८-३-५७) इति वर्तते। उपसर्गे कवर्गाऽसम्भवादिण इति सम्बध्यते। अत 'उपसर्गेणः 'इत्युक्तम्। **यच्पर** य् च अच् च=यचौ। तौ परौ यस्मात् स **यच्परः**। षष्ठ्यर्थे प्रथमा। यकारपरकस्याऽच्परकस्य च, एवम् अस्तिः अस्तेरिति।

८-३-८८ **सुविनिर्दुर्भ्यः**=सु वि निर् दुर् इत्येतेभ्य उपसर्गेभ्यः परेषाम्, सुपिसूतिसमाः=सुप् रूपस्य स्वप्धातोः सूतिशब्दस्य समशब्दस्य च, सः (८-३-५६) मूर्धन्यः (८-३-५५)। **सुसुष्वाप** अत्र सुष्वाप इति लिँटि रूपम्। ततः पूर्वः सु इत्युपर्गः इह परमपि हलादिशेषं बाधित्वा ६-१-१७ लिंटच .....इति पूर्वं सम्प्रसारणम्। ततो हलादि शेषे पकारनिवृत्तौ सुप्रूपाऽभावान्न षः। **सुषुषुपतुः** ६-१-१५ वचि ...इति सम्प्रसांरणम्।पूर्वत्राऽसिद्धमद्विर्वचने इति षत्वे कृते द्विर्वचनम्।

८-३-८९ **निनदीभ्याम्** = निनदीशब्दाभ्यां परस्य, स्नातेः=स्नाधातोः, सः (८-३-५६) मूर्धन्यः(८-३-५५) कौशले =नैपुण्ये गम्यमाने। **नदीष्णः** नदीस्नाने कुशल इत्यर्थ :। कवयस्तु कुशलमात्रे प्रयुञ्जत इति पदमञ्जरी।

८-३-९० **प्रतिष्णातम्=प्रतिष्णातमिति** निपात्यते=प्रतेः स्नातेःसः (८-३-५६) मूर्धन्यः (८-३-५५) सूत्रम्= सूत्रं चेत्।

८-३-९१ **कपिष्ठलः**= कपिष्ठल इति निपात्यते= कपिशब्दात् परस्य स्थलशब्दस्य सः (८-३-५६) मूर्धन्यः (८-३-५५) गोत्रे=गोत्रे गम्ये। प्रवराध्यायपठितं गोत्रमिह गृह्यते। अर्थात् स्वसन्तानस्य व्यपदेशहेतुराद्यः पुरुषो गोत्रम्।

८-३-९२ **प्रष्ठः**= **प्रष्ठ इति** निपात्यते= प्रशब्दात् परस्य स्थस्य सः (८-३-५६) मूर्धन्यः (८-३-५५) अग्रगामिनि=अग्रगामिनि वाच्ये।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-९३ वृक्षासनयोर्विष्टरः ॥९४

विष्टरो वृक्षः। विष्टरमासनम्। वृक्षासनयोरित्युक्तेर्नेह -वाक्यस्य विस्तरः।

८-३-९४ छन्दोनाम्नि च ॥

विष्टारपङ्क्तिश्छन्दः।

८-३-९५ गवियुधिभ्यां स्थिरः ॥

गविष्ठिरः। युधिष्ठिरः।

८-३-९६ विकुशमिपरिभ्यः स्थलम् ॥

विष्ठलम्। कुष्ठलम्। शमिष्ठलम्। परिष्ठलम्।

८-३-९७ अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ॥

अम्बष्ठः। आम्बष्ठः। गोष्ठः। भूमिष्ठः। सव्येष्ठः। अपष्ठः। द्विष्ठः। त्रिष्ठः। कुष्ठः। शेकुष्ठः। शङ्कुष्ठः। अङ्गुष्ठः। मञ्जिष्ठः। पुञ्जिष्ठः। परमेष्ठः। बर्हिष्ठः। दिविष्ठः। अग्निष्ठः। स्थ इति कप्रत्ययान्तानुकरणं षष्ठ्यर्थे प्रथमान्तम्। तेनेह न - गोस्थानम्।

(स्थास्थिन्स्थॄणामिति वक्तव्यम्)

सव्येष्ठाः। परमेष्ठी। सव्येष्ठृ-सारथिः।

८-३-९८ सुषामादिषु च ॥

सुषामा।

(गौरिषक्थः संज्ञायाम्) ग.सू.

८-३-९९ एति संज्ञायामगात् ॥१००

हरिषेणः। एतीत्युक्तेर्नेह-हरिसक्थम्। संज्ञायामित्युक्तेर्नेह-पृथुसेनो राजा। अगादित्युक्तेर्नेह - विष्वक्सेनः।

८-३-१०० नक्षत्राद् वा ॥

रोहिणीषेणः, रोहिणीसेनः। अगादित्यनुवृत्तेर्नेह-शतभिषक्सेनः

८-३-९३ वृक्षासनयोः= वृक्षे आसने च वाच्ये, विष्टरः= विष्टर इति निपात्यते= विपूर्वस्य स्तॄ धातोः, सः (८-३-५६) मूर्धन्यः(८-३-५५)। विस्तीर्यते इति विष्टरः ३-३-३३ प्रथ.......इति घञि प्राप्ते अस्मादेव निपातनादप्। प्रत्युदाहरणे तु अशब्दे इति प्रतिषेधाद् घञोऽप्राप्तिः। ३-३-५७ ऋृदो.......इत्यप्।

८-३-९४ छन्दोनाम्नि- छन्दांसि=बृहत्यादीनि वृत्तानि, तेषां नामनि, विष्टार इति निपात्यते= विपूर्वस्य स्तॄधातोः सः (८-३-५६) मूर्धन्यः (८-३-५५)। यद्यपि विष्टर इति प्रकृतं तथापि छन्दसि वाच्ये ३-३-३४ छन्दो.........इति घञो विधानाद् विष्टर इति च्छन्दोनामाऽभावाच्च विष्टार इति निपात्यते।

८-३-९५ गवियुधिभ्याम् = गवियुधिभ्यां परस्य, स्थिरः=स्थिरशब्दस्य, सः (८-३-५६) मूर्धन्यः (८-३-५५)। उदाहरणयोः २-१-४४ संज्ञा........इति समासः। आद्येऽत एव ज्ञापकात् सप्तम्या अलुक्।अन्त्ये तु ६-३-९ हल ...... इत्यलुक्।

८-३-९६ विकु ....रिभ्यः= वि कु शमि परि इत्येतेभ्यः परस्य, स्थलम्=स्थलशब्दस्य,सः (८-३-५६) मूर्धन्यः (८-३-५५)। **शमिष्ठलम्** शमीनां स्थलमिति षष्ठीसमासः। ६-३-६३ ङ्यापोः........इति ह्रस्वः।

८-३-९७ अम्बा........ग्निभ्यः=अम्ब आम्ब इत्यादिभ्यः परस्य, स्थः=स्थ इत्यस्य, सः (८-३-५६) मूर्धन्यः (८-३-५५)। **अम्बष्ठः** ६-३-६३ ङ्यापो ......इति ह्रस्वः। **सव्येष्ठः** ६-३-९ हल इति सप्तम्या अलुक्। **अपष्ठः** अपतिष्ठतीत्यपष्ठः ३-२-४ सुँपि...........इति कः। आपष्ठ इति क्वचित् पाठः। तत्र ६-३-१३७ अन्ये....इति दीर्घः।

८-३-९८ सुषामादिषु=सुषामादिगणपठितशब्देषु, स : (८-३-५६) मूर्धन्यः (८-३-५५)। गौरिषक्थः ६-३-६३ ङ्यापो......इति ह्रस्वः।

८-३-९९ एति-अगात्=गकारभिन्नात्, इण्कोः (८-३-५७) सः (८-३-५६) मूर्धन्यः (८-३-५५) एति=एकारे परे, संज्ञायाम्=संज्ञायां गम्यमानायाम्। **पृथुसेनो राजा** पृथ्वी सेना यस्येति बहुव्रीहिः। ६-३-३४ स्त्रिया.......इति पुंवद्भावः।

८-३-१०० नक्षत्रात्= नक्षत्रवाचिशब्दसम्बन्धिनः, अगात् (८-३-९९) इण्कोः (८-३-५७) प्रागवद्, वा, एनि+ संज्ञायाम् (८ ३-९९)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-१०१ ह्रस्वात् तादौ तद्धिते ॥ १०४

सर्पिष्टरम् । सर्पिष्टमम् । सर्पिष्ट्वम् । चतुष्टयम् ।
(तिङन्तस्य प्रतिषेधो वक्तव्यः)
भिन्द्युस्तमाम् ।

८-३-१०२ निसस्तपतावनासेवने ॥

निष्टपति । अनासेवन इत्युक्तेर्नेह-निस्तपति सुवर्णं सुवर्णकारः । पुनः पुनस्तपतीत्यर्थः ।

८-३-१०३ युष्मत्तत्ततक्षुःष्वन्तःपादम् ॥१०४

अग्निष्ट्वं नामासीत् । अग्निष्ट्वा वर्धयामसि । अग्निष्टे विश्वमानय । अप्स्वग्ने सधिष्टव । अग्निष्टद् विश्वमापृणोति । द्यावापृथिवी निष्टतक्षुः । अन्तःपादमित्युक्तेर्नेह-यन्म आत्मनो मिन्दाभूदग्निस्तत् पुनराह जातवेदा विचर्षणिः ।

८-३-१०४ यजुष्येकेषाम् ॥१०६

अर्चिभिष्ट्वम्, अर्चिभिस्त्वम् । अग्निष्टेऽग्रम्, अग्निस्तेऽग्रम् । अग्निष्टत् अग्निस्तत् । अर्चिभिष्टतक्षुः, अर्चिभिस्ततक्षुः ।

८-३-१०५ स्तुतस्तोमयोश्छन्दसि ॥ १०९

त्रिभिष्टुतस्य, त्रिभिस्तुतस्य । गोष्टोमं षोडशिनम्, गोस्तोमं षोडशिनम् ।

८-३-१०६ पूर्वपदात् ॥१०९

द्विषन्धिः,द्विसन्धिः । त्रिषन्धिः, त्रिसन्धिः, । मधुष्ठानम्, मधुस्थानम् । असमासेऽपि यत् पूर्वपदं तदपीह गृह्यते । त्रिः षमृद्धत्वाय,त्रिः समृद्धत्वाय ।

८-३-१०७ सुत्रः ॥

अभीषुणः सखीनाम् । ऊर्ध्व ऊषुणः ।

८-३-१०१ **ह्रस्वात्**= ह्रस्वादिणः परस्य, सः (८-३-५६) मूर्धन्यः (८-३-५५) तादौ= तकारादौ, तद्धिते= तद्धिते परे ।

८-३-१०२ **निसः**,= निस् इत्यस्य, सः(८-३-५६) मूर्धन्यः(८-३-५५) तपतौ= तप्धातौ परे, अनासेवने=पुनःपुनः करणाभावे । आसेवनम्= पुनः पुनः करणम् । तद्विरुद्धमनासेवनम् ।

८-३-१०३ **युष्मत्तत्**.......क्षुः षु इति बहुवचनान्तानुरोधेन, तादौ(८-३-१०१) इत्यनुवर्तमानमपि बहुवचनान्ताय कल्पते । विशेषणमिदं युष्मदर्थम् , इतरयोर्व्यभिचाराऽभावात् । पादस्य मध्ये इति विग्रहे २-१-६ अव्य.........इत्यव्ययीभावे अन्तः पादम् इति । अन्तः शब्दो मध्यवाची । अतः सूत्रार्थ एवम्-तादिषु (८-३-१०१) युष्म.......क्षुः षु=युष्मद् तद् ततक्षुः इत्येतेषु परेषु, इण्कोः (८-३-५७)अन्तः पादम्=पादमध्ये वर्तमानस्य,सः (८-३-५६) मूर्धन्यः (८-३-५५) । युष्मदादेशाः -त्वं त्वा ते तव इति संभवन्ति । **अग्निस्तत्पुनराह** अत्राग्निरिति पूर्वपादस्यान्तो न तु मध्यः ।

८-३-१०४ **यजु-** तादिषु (८-३-१०१) युष्मत्तत्ततक्षुःषु (८-३-१०३) इण्को : (८-३-५७) सः (८-३-५६) मूर्धन्यः (८-३-५५) यजुषि=यजुर्वेदे, एकेषाम्= एकेषामाचार्याणां मते ।

८-३-१०५ **स्तुत-**इण्कोः (८-३-५७) स्तुतस्तोमयोः,= स्तुतस्तोमशब्दयोः, सः (८-३-५६) मूर्धन्यः (८-३-५५) छन्दसि= वेदे, एकेषाम् (८-३-१०४) । ८-३-१०६ पूर्व.........इत्येव सिद्धे प्रपञ्चार्थमिदम् । वक्ष्यति हि तत्र-असमासेऽपि यत् पूर्वपदं तदपीह गृह्यत इति ।

८-३-१०६ **पूर्वपदात्**= पूर्वपदस्थान्निमित्तादुत्तरस्य, सः (८-३-५६) मूधन्यः (८-३-५५) छन्दसि (८-३-१०५) एकेषाम् (८-३-१०४) ।

८-३-१०७ **सुत्रः**-पूर्वपदात् (८-३-१०६)सुत्रः=सुत्र इति निपातस्य, सः (८-३-५६) मूर्धन्यः (८-३-५५) छन्दसि (८-३-१०५) । उदाहरणविषये ६-३-१३४ इकः ....सूत्रे द्रष्टव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-१०८ सनोतेरनः ॥

गोषाः । नृषाः । अन इत्युक्तेर्नेह-गोसनिं वाचमुदीरयन् ।

८-३-१०९ सहेः पृतनर्ताभ्यां च ॥

पृतनाषाहम् । ऋताषाहम् । चाद् - ऋतीषाहम् ।

८-३-११० न रपर सृपि सृजि स्पृशि स्पृहि सवनादीनाम् ॥११९

उस्रः । विस्रंसिकायाः काण्डं जुहोति । पुरा क्रूरस्य विसृपः । वाचो विसर्जनात् । दिविस्पृशम् । निस्पृहं कथयति । सवने सवने । अश्वसनिमश्वसनिम् । अश्वसनिग्रहणमनिणः परस्यापि षत्वं भवतीति ज्ञापनार्थम् । जलाषाहम् ।

८-३-१११ सात्पदाद्योः ॥

अग्निसात् करोति । मधु सिञ्चति ।

८-३-११२ सिचो यङि ॥

सेसिच्यते । परिसेसिच्यते । अभिसेसिच्यते । यङीत्युक्तेर्नेहप्रतिषेधः- अभिषिषिक्षति ।

८-३-११३ सेधतेर्गतौ ॥

गङ्गां विसेधति । अभिसेधयति गाः । गतावित्युक्तेर्नेहप्रतिषेधः- शिष्यमकार्यात् प्रतिषेधयति ।

८-३-११४ प्रतिस्तब्धनिस्तब्धौ च ॥

प्रतिस्तब्ध :। निस्तब्ध : ।

८-३-११५ सोढ : ॥

परिसोढः । परिसोढुम् । सोढ्भूतग्रहणान्नेह प्रतिषेधः-परिषहते ।

८-३-११६ स्तम्भुँसिवुँसहां चङि ॥

पर्यतस्तम्भत् । पर्यसीषिवत् । न्यसीषहत् । (उपसर्गादिति वक्तव्यम्)
तेनाऽभ्यासात् परस्य षत्वं भवत्येव ।

८-३-१०८ **सनो**-पूर्वपदात् (८-३-१०६) अनः (अविद्यमानो न्=नकारो यस्य तस्य) =अनकारान्तस्य, सनोतेः=सन् धातोः, सः (८-३-५६) मूर्धन्यः(८-३-५५) । उदाहरणयोः ३-२-६७ जन.....इति विंट्। ६-४-४१ विंड्व.......इत्यात्वम् ।

८-३-१०९ **सहेः**-पृतनर्ताभ्याम्=पृतना ऋतइत्येताभ्याम्, चात्= (चकारोऽनुक्तसमुच्चयार्थः) ऋति शब्दाच्च परस्य,सहेः=सह् धातोः,-सः(८-३-५६) मूर्धन्यः (८-३-५५) । उदाहरणेषु-३-२-६३ छन्द.....इति ण्विँः। ६-३-१३७ अन्ये....इति ऋति ऋतयो : पूर्वपदयोर्दीर्घः ।

८-३-११० **न** र-रपर......दीनाम्=रेफपरकस्य सृप्यादीनां सवनादीनां च सः (८-३-५६) न= न मूर्धन्यः (८-३-५५) । **उस्रः** ८-३-६० शासि......इतिप्राप्तौ शेषोदाहरणेषु ८-३-१०६ पूर्व... इति प्राप्ते प्रतिषेधः । **दिविस्पृशम्** ३-२-५८ स्पृशो.....इति क्विँन् । ६-३-१४ तत्पु....इति ङेरलुक् । **सवने सवने** ८-३-४ नित्य....इति वीप्सायां द्विर्वचनम् ।

८-३-१११ **सात्पदाद्यो** := सात् इत्यस्य पदादेश्च, सः (८-३-५६) न (८-३-११०) । **अग्निसात् करोति** ५-४-५२ विभा... इति सातिँः । अत्र प्रत्ययावयवत्वाद्, अन्त्योदाहरणे आदेशरूपत्वात् ८-३-५९ आदे... इति प्राप्ते प्रतिषेधः ।

८-३-११२ **सिचो**- सिचः= सिच्धातोः, सः (८-३-५६) यङि,= यङ्प्रत्यये परे, न (८-३-११०) ।

८-३-११३ **सेधतेः**= सिध् धातोः, सः (८-३-५६) न (८-३-११०) गतौ= गत्यर्थे गम्ये ।

८-३-११४ **प्रति**...स्तब्धौ=प्रतिस्तब्ध निस्तब्ध इत्येतौ षत्वरहितौ निपात्येते । ८-३-६७ स्तम्भे : इति प्राप्ते ।

८-३-११५ सोढः= सोढ्रूपस्य सहे :, सः (८-३-५६) न (८-३-११०) ।

८-३-११६ **स्तम्भुँ** ...सहाम्= स्तम्भुँ सिवुँ सह् धातूनाम्, सः (८-३-५६) न (८-३-११०) चङि= चङि परे । आद्ये- ८-३-६३ प्राक् सि.... इति प्र. ८-३-६४ स्थादि... इति च सहकृत्य ८-३-६७ स्तन्भेः, इति प्राप्ते । अन्त्ययोः ८-३-७१ सिवा...इति प्राप्ते । **उप-षत्वं भवत्येव**- तथैवोदाहृतम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-३-११७ सुनोतेः स्यसनोः ॥
परिसोष्यति । पर्यसोष्यत् । सनि-अभिसुसूः।
स्यसनोरित्युक्तेर्नेहप्रतिषेध :- सुषाव ।
८-३-११८ सदेः परस्य लिँटि ॥
निषसाद ।
(स्वञ्जेरुपसंख्यानम्)
परिषस्वजे ।

८-३-११९ निव्यभिभ्योऽड्व्यवाये वा छन्दसि ॥
न्यसीदत्,न्यषीदत् । अभ्यस्तौत्, अभ्यष्टौत्

इत्यष्टमाध्याये
तृतीयः पादः ।

८-३-११७ **सुनो**- स्यसनोः= स्ये सनि च, सुनोतेः,= सुधातोः सः (८-३-५६) न (८-३-११०) । **अभिसुसूः** अत्र काशिका-सनि किमुदाहरणम् ? अभिसुसूषति । नैतदस्ति प्रयोजनम् तत्र ८-३-६१ स्तौतिण्योरेव षण्यभ्यासात् इति नियमान्न भविष्यति । इदं तर्हि अभिसुसूषते(?) एतदपि नास्ति ८-३-६४ स्थादिष्वभ्यासेन चाम्यासस्य इति नियमात् । इदं तर्ह्यभिसुसूषतेरप्रत्ययः, अभिसुसूरुदाहरणमिति । अत्र हि सन् षभूतो न भवतीत्यभ्यासात् प्राप्तिरस्तीति ।

८-३-११८ **सदेः**, = सद्धातोः, परस्य= अभ्यासात् परस्य, सः (८-३-५६) न (८-३-११०) लिँटि= लिँटि परतः । **निषसाद**

८-३-६६ सदि+प्र.८-३-६४ स्थादि ..इति प्राप्ते ।

परिषस्वजे १-२-६ इन्धि ...सूत्रस्थ -श्रन्थि ...वर्तिकेन कित्त्वाद् ६-४-२४ अनि... इति नलोपः । ८-३-६५ उप....+प्र. ८-३-६४ स्थादि...इति षत्वे प्राप्ते प्रतिषेधः ।

८-३-११९ **निव्यभिभ्यः** : = नि वि अभि इत्येतेभ्यः परस्य, सः (८-३-५६), मूर्धन्यः (८-३-५५) (अस्मिन् प्रकरणे प्राप्तः) अड्व्यवाये, = अटा व्यवधाने, वा = **विभाषया**, न (८-३-११०) छन्दसि= वेदे ।

इत्यष्टमाध्याये
तृतीयः पादः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाष्टमाध्याये
चतुर्थः पादः

८-४-१ रषाभ्यां नो णः समानपदे ॥ ३८ अवतीर्णः । चतुर्णाम् । पुष्णाति । समानपद इत्युक्तेर्नेह- वायुर्नयति ।	(ऋवर्णाच्चेति वक्तव्यम्) नृणाम् । वृणीते । पितॄणाम् । मातॄणाम् । **८-४-२ अट्कुप्वाङ्नुँम्व्यवायेऽपि ॥** छात्रेण । रामाणाम् ।

८-४-१ रषा-८-४-६१ झयो....सूत्रानन्तरं सूत्रमिदं पाठ्यम्। यद्यपि सूत्रमिदं पदान्वाख्यानप्रयोजनकं तथापि सरलतमार्थकं सूत्रं पठतां छात्राणां व्याकरणाध्ययने जागर्त्युत्साहः। सूत्रञ्चैतद् बहुप्रयोगविषयकञ्चेति सूत्रमिदं (८-४-१) पाठ्यम्। सूत्रार्थश्च स्फुट एव सूत्रे -रषाभ्याम्= रेफषकाराभ्यां परस्य, नः= नकारस्य स्थाने, णँः= णँ (अनुबन्धलोपे ण्) आदेशो भवति, समानपदे= एकस्मिन् पदे । इति । अवतीर्+नः, अवतीर्+नवान्, पुष्+नाति, पुष्+नन्ति, चतुर्+नाम्, उत्कीर्+नम्, पूर्+नम्, शीर्+नवान् इत्यादिषु लक्षणसमन्वयश्छात्रै कारयितव्यः। अत्र शिक्षकोऽवदध्यात्- पुष्णातीत्यादौ ८-४-४० ष्टुना...इति सिद्धे षग्रहणमुत्तरत्राऽनुवृत्त्यर्थम्। तेन पोषणमित्यादौ ८-४-२ अट्कु...सूत्रेण णत्वं सिध्यतीति। अथाऽग्रिमम्ऋवर्णा... वार्तिकं पाठचम्।

ऋव-८-४-१ रषा ...सूत्रानन्तरं वार्तिकमिदं पाठचम्। ऋवर्णात् परस्य, नः+णँः+समानपदे (८-४-१)। नृ+नाम्,वृ+नीते,पितॄ+नाम्,मातॄ+नाम्, अत्र लक्षणसमन्वयश्छात्रैरेव कारयितव्यः । अथ ८-४-२ अट्कु...सूत्रं पाठचम्।

८-४-२ अट्कु -८-४-१ रषा...सूत्रस्थ -ऋव...वार्तिकानन्तरं सूत्रमिदं पाठ्यम्। अत्र श्यामपाटीप्रयोगो यथा- (क) (ख) (ग) (घ) (ङ)

८-४-१ रषाभ्यां नः णँः समानपदे ॥ ८-४-१ ऋवर्णाच्च इति वक्तव्यम् ॥

८-४-२ अट्कुप्वाङ्नुँम्व्यवायेऽपि (क) (ङ) (ख) (ग) (घ) ॥ इति ॥

अथैतत्सूत्रघटकस्य "नुँम्" इत्यस्याऽर्थबोधनेऽधस्तनदृष्टान्त उपस्थाप्यः। यथा-कश्चित् सविनयं सपरिहासं वा भणति "ग्रासमेकं भक्तं ददासि चेदद्य तव गृहेऽतिथिर्भवामि" इति। ततो भवतु दद्यामिति भणन्नप्यातिथेयो गृहस्वामी न केवलं ग्रासमेकं भक्तमात्रं ददाति किन्तूदरपूरमेव सव्यञ्जनादिकं ददाति। तथैव "नुँम्"इत्येतावानेवाऽर्थो न मन्तव्यः। अपि तु नुँम्स्थानिकाऽनुस्वार इत्यर्थो बोध्य इति। अदीयमाने दृष्टान्ते सूत्रार्थो भाराय भवेद् विस्मर्येत च च्छात्रैः कालान्तरे। अथ सूत्रार्थः-अट्कुप्वाङ् नुँम्व्यवायेऽपि=अट् कवर्ग पवर्ग आङ् नुँम्स्थानिकानुस्वार इत्येतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि, (क)= रषाभ्याम्, (ङ)= ऋवर्णाच्च परस्य (ख)= नः,(ग)= णँः, (घ)= समानपदे। इति। अथ'छात्रे+न' इति श्यामपाट्यां लिखित्वा तदग्रे च 'छा त् र् ए+न' इति लिखित्वा रेफनकारयोर्मध्ये को वर्णोऽस्ति ? स च अट् कवर्ग पवर्ग आङ् नुँम्स्थानिकानुस्वार इत्येतेषां मध्ये को वर्तते ? इतिच्छात्राः प्रष्टव्याः। तैरेव च समन्वयः कारयितव्यः। रामा+नाम्= र् आ म् आ+न् आ म् इत्यत्र च रेफनकारयोर्मध्ये वर्तमाना वर्णाः क्रमशः अट् प्रभृतिषु विचारणीयाः। तत्र भवेत् तु चिह्नमिदं √ देयम्।

√ √ √

यथा- र् आ म् आ न् आम् इति। रामाणाम्। यदि तु अट्प्रभृतिषु न भवेत् तदा चिह्नमिदं x देयम्।

यथा- x √ x √

वर्तुलानि=वर् त् उ ल् आ न् इ इति। अत्र अट्प्रभृतिभिन्नवर्ण -व्यवहिततया णत्वं न भवति। वर्तुलानि। शरे +न, शर्+मना, कर्+मना, कर्+नेन, कर्+गलेन, मन्दिरे +न, इत्यादिषु क्व णत्वं क्व च नेति परीक्षणीयम्। अथाऽत्र सूत्रे शिक्षकेणाऽवधेयम्-अड्व्यवाये इत्येव सिद्धे आङ् ग्रहणं ८-४-३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-३ पूर्वपदात् संज्ञायामगः ॥१३,५

शूर्पणखा । अग इत्युक्तेर्नेह-ऋगयनम् ।

८-४-४ वनं पुरगा-मिश्रका-सिध्रका-सारिका-कोटराग्रेभ्यः ॥६

पुरगावणम् । मिश्रकावणम् । सिध्रकावणम् । सारिकावणम् । कोटरावणम् । अग्रेवणम् । पूर्वेणैव सिद्धे नियमार्थमिदम् । तेनेह न-कुबेरवनम्, असिपत्रवनम् ।

८-४-५ प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ॥

प्रवणम् । निर्वणम् । अन्तर्वणम् । शरवणम् । इक्षुवणम् । प्लक्षवणम् । आम्रवणम् । कार्ष्यवणम् खदिरवणम् । पीयूक्षावणम् ।

८-४-६ विभाषौषधिवनस्पतिभ्यः ॥

दूर्वावणम्, दूर्वावनम् । शिरीषवणम्, शिरीषवनम् ।

(द्व्यच्त्र्यज्भ्यामेव)

नेह -देवदारुवनम् ।

(इरिकादिभ्यः प्रतिषेधो वक्तव्यः)

इरिकावनम् । मिरिकावनम् ।

८-४-७ अह्नोऽदन्तात् ॥

पूर्वाह्णः । अपराह्णः । अदन्तादित्युक्तेर्नेह-निरह्नः । दुरह्नः । तपरकरणान्नेह पराह्नः । अह्न इत्यकारान्तनिर्देशान्नेह - दीर्घाह्नी ।

८-४-८ वाहनमाहितात् ॥

इक्षुवाहणम् । शरवाहणम् । आहितादित्युक्तेर्नेह- इन्द्रवाहनम् ।

८-४-९ पानं देशे ॥१

क्षीरपाणा उशीनराः ।

पद...इति प्रतिषेधबाधनार्थम् । तेन पर्याणद्धम् इत्यादिषु ८-४-१४ उप...इति णत्वं सिध्यतीति । अथ १-१-८ मुख.......सूत्रमुपदेश्यम् ।

८-४-३ पूर्व- अगः=गकाराऽव्यवहितात्, पूर्वपदात्=पूर्वपदस्थनिमित्तात्(परस्य) नः+णँः(८-४-१) संज्ञायाम्= संज्ञायां गम्यमानायाम् ।

८-४-४ वनं-सूत्रे वनमित्यत्र षष्ठचर्थे प्रथमा । पुरगा....ग्रेभ्यः=पुरगाप्रभृतिभ्यः,पूर्वपदात्(८-४-३) =पूर्वपदेभ्यः परस्य, वनम्=वनशब्दस्य, नः+णँः (८-४-१) संज्ञायाम्(८-४-३) । उदाहरणपूर्वपदेषु ६-३-११७ वन.....इति दीर्घः । **अग्रेवणम्** षष्ठीसमासः। २-२-३१ राज ..... इति वनशब्दस्य परप्रयोगः । **नियमार्थमिदम्** पूर्वपदस्थनिमित्तात् परस्य वनशब्दस्य नकारस्य स्थाने णकारो भवति चेत् पुरगादिभ्य एव परस्य नान्येभ्य इति । अग्रेशब्दे त्वसंज्ञायां विध्यर्थमित्याहुरिति पदमञ्जरी ।

८-४-५ प्रनि....क्षाभ्यः=प्र निर् अन्तर् शर इक्षु प्लक्ष आम्र कार्ष्य खदिर पीयूक्षा इत्येतेभ्यः परस्य, वनस्य (८-४-४) नः+णँः (८-४-१) संज्ञायाम् (८-४-३) असंज्ञायामपि= संज्ञायामगम्यमानायामपि।

८-४-६ विभा- ओषधिवनस्पतिभ्यः=ओषधिवाचि-वनस्पतिवाचि-पूर्वपदस्थ-निमित्तात् परस्य, वनस्य विभाषा=वा, नः + णँः (८-४-१) । वनस्पतिशब्देनेह वृक्षमात्रमुपलक्ष्यते ।

८-४-७ अह्नो- अदन्तात्=अदन्तपूर्वपदस्थनिमित्तात् परस्य, अह्नः=अह्न इत्यस्य, नः+णँः (८-४-१) । अत्र सूत्रे अह्न इति षष्ठचर्थे प्रथमा । अतः, अह्न इत्यस्येत्युक्तम् । उदाहरणयोः २-२-१ पूर्वा ...इति समासः। ५-४-६१ राजा....इति टच् । ५-४-८८ अह्नो ....इत्यह्नादेशः । प्रत्युदाहरणत्रये २-२-१८ कुग ...इति समासः शेषं प्राग्वत् । **दीर्घाह्नी** दीर्घाण्यहानि यस्यामिति बहुव्रीहिः । अतो न टच् ।

८-४-८ वाह - आहितात्= (आरोप्य यदुह्यते तदाहितम्) आहितवाचिपूर्वपदस्थनिमित्तात् परस्य, वाहनम्= वाहनशब्दस्य, नः +णँः (८-४-१) ।

८-४-९ पानं-पूर्वपदात् (८-४-३) पानम्=पानशब्दस्य, नः+णँः(८-४-१)देशे=देशाभिधाने । **क्षीरपाणाः** पीयत इति पानम् । बाहुलकात् कर्मणि ल्युँट् । क्षीरं पानं येषां ते क्षीरपाणाः । अत्र काशिका-मनुष्याभिधानेऽपि देशाभिधानं गम्यते, इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-१० वा भावकरणयोः ॥११
क्षीरपाणम्, क्षीरपानम् ।
क्षीरपाणः, क्षीरपानः ।
(वा प्रकरणे गिरिनद्यादीनामुपसंख्यानम्)
गिरिणदी, गिरिनदी । चक्रणितम्बा, चक्रनितम्बा ।

८-४-११ प्रातिपदिकान्तनुँम्विभक्तिषु च ॥१३
माषवापिणौ, माषवापिनौ । व्रीहिवापाणि, व्रीहिवापानि । माषवापेण, माषवापेन ।
प्रातिपदिकं नाम यदुत्तरपदं प्रातिपदिकं तदन्तस्यैव ग्रहणम् । तेनेह न-गर्गाणां भगिनी गर्गभगिनी ।
(युवादेर्न)
रम्ययूना । परिपक्वानि ।

८-४-१२ एकाजुत्तरपदे णँः ॥
वृत्रहणौ । क्षीरपाणि । क्षीरपेण ।

८-४-१३ कुमति च ॥
वस्त्रयुगिणौ । वस्त्रयुगाणि । वस्त्रयुगेण ।

८-४-१४ उपसर्गादसमासेऽपि णोपदेशस्य ॥२२
प्रणामकः । प्रणमति । णोपदेशस्येत्युक्तेर्नेह-प्रनर्दकः । प्रनर्दति । णोपदेशास्त्वनर्द्-नाटि-नाथ्-नाध्-नन्द्-नक्क-नृ-नृतः ।
नाटेर्दीर्घाऽर्हस्य पर्युदासाद् घटादिर्णोपदेश एवेति । तवर्गचतुर्थान्तनाधतेर्नृनन्द्योश्च केचिण्णोपदेशतामाहुरिति च ६-१-६३ णो नँ इति सूत्रे दीक्षित : ।

८-४-१५ हिनुमीना ॥
प्रहिणोति । प्रमीणाति । प्रमीणीतः ।

८-४-१६ आनि लोँट् ॥
प्रभवाणि । लोँडित्युक्तेर्नेह-प्रकृष्टा वपा येषु तानि प्रवपानि ।

८-४-१० **वा भा** -पूर्वपदात् (८-४-३) भावकरणयोः=भावे करणे च विद्यमानस्य, पानम्(८-४-९) वा = विभाषया, नः+णँः (८-४-१) ।

८-४-११ **प्राति**-पूर्वपदात् (८-४-३) प्राति....तिषु=प्रातिपदिकान्ते नुँमि विभक्तौ च वर्तमानस्य, नः+णँः (८-४-१) वा (८-४-१०) । **ग्रहणम्** एतच्चात्रैव सूत्रे नुँम् ग्रहणाज्ज्ञाप्यते । अन्यथा व्रीहिवापाणि इत्यादिषु प्रातिपदिकान्तत्वेनैव सिद्धे तद् व्यर्थं स्यात् । ज्ञापिते त्वस्मिन् नुँम् समुदायावयवत्वात् स्वांशे चारितार्थ्यम् । **गर्गभगिनी** अत्रोत्तरपदं भगिनी, न तस्यान्ते नकारः । यद्यपि भगिन् इत्यपि प्रातिपदिकं तथापि न तदुत्तरपदम् । गर्गाणां भग इति विग्रहे समासे ततो मत्वर्थे इनि स्त्रियां तु गर्गभगिणीति नित्यं णत्वं भवति ८-४-२ अट्कु.....इति सूत्रेण ।

८-४-१२ **एका**....पदे=एकाजुत्तरपदके समासे, पूर्वपदात् (८-४-३) प्राति......तिषु (८-४-११) नः (८-४-१) णँः=णँ (अनुबन्धलोपे ण्) आदेशो भवति । उत्तरपदशब्दो हि समासचरमावयवे रूढः । अतोऽन्यपदार्थः समास इति ज्ञायते । तथैवोक्तञ्च । णँ इत्यनुवर्तमाने पुनर्णँग्रहणं वेति निवृत्त्यर्थम् ।

८-४-१३ **कुमति**+उत्तरपदे (८-४-१२) =कवर्गवदुत्तरपदके समासे, पूर्वपदात् (८-४-३) प्राति.....तिषु (८-४-११)नः (८-४-१) णँः(८-४-१२) ।

८-४-१४ **उपसर्गात्**=उपसर्गस्थ-निमित्तात् परस्य, णोपदेशस्य=णोपदेशधातोः, न : (८-४-१) णँः (८-४-१२), असमासेऽपि=समासे असमासेऽपि । उपसर्गादित्यनेन धातुराक्षिप्यते । यतो नहि क्रियायोगं विनोपसर्गसंज्ञा । अतो धातोरित्युक्तम् ।

८-४-१५ **हिनु-सूत्रे** हिनुमीना इति लुप्तषष्ठचन्तम् । उपसर्गात् (८-४-१४) हिनुमीना=हिनु मीना इत्येतयोः नः (८-४-१) णँः(८-४-१२) ।

८-४-१६ **आनि**-उपसर्गात् (८-४-१४) लोँट्=लोँडादेशस्य, आनि=आनि इत्येतस्य नः (८-४-१) णँः (८-४-१२) । सूत्रे द्वे एव पदे लुप्तषष्ठचन्ते । उपसर्गेण धातोराक्षेपात् उपसर्गात् इत्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-१७ नेर्गदनदपतपदघुमास्यति हन्ति याति वाति द्राति प्सति वपति वहति शाम्यति चिनोति देग्धिषु च ॥

प्रणिगदति । प्रणिनदति । प्रणिपतति ।
प्रणिपद्यते । प्रणिददाति । प्रणिदधाति ।
प्रणिद्यति ।
प्रणिधयति । प्रणिमिमीते । प्रणिमयते ।
प्रणिष्यति ।
प्रणिहन्ति । प्रणियाति । प्रणिवाति ।
प्रणिद्राति ।प्रणिप्साति । प्रणिपवति ।
प्रणिवहति ।
प्रणिशाम्यति । प्रणिचिनोति । प्रणिदेग्धि ।
प्रण्यगदत् ।

८-४-१८ शेषे विभाषाऽकखादावषान्त उपदेशे ॥

प्रणिभवति, प्रनिभवति ।
अकखादावित्युक्तेर्नेह
प्रनि करोति । प्रनिखनति । अषान्त इत्युक्तेर्नेह-
प्रनिपिनष्टि । उपदेश इत्युक्तेरिह-न भवति प्रनिचकार ।प्रनिपेक्ष्यति । इह च भवति-विश्
प्रणिवेष्टा । प्रणिवेक्ष्यति ।

प्र. ८-४-१९ अनितेः ॥२०

प्राणिति ।

द्वि ८-४-१९ अन्तः ॥

हे प्राण् ।

८-४-२० उभौ साभ्यासस्य ॥

प्राणिणत् । प्राणिणिषति ।

प्र. ८-४-२१ हन्तेः ॥ २३

प्रहणनम् । प्रहण्यात् । प्रहण्यते ।

द्वि. ८-४-२१ अत्पूर्वस्य ॥

प्रघ्नन्ति । प्राघानि । वृत्रघ्नः ।

उपसर्गस्थान्निमित्तात् परो यो धातुस्ततः परस्येत्यर्थो बोध्यः । **प्रवपानि** ८-४-११ प्राति.....इति वैकल्पिकस्तु भवत्येव ।

८-४-१७ **नेर्ग**-उपसर्गात्(८-४-१४) नेः=नि इत्यस्य, नः (८-४-१) णः (८-४-१२) गद.......देग्धिषु=गदनदप्रभृतिषु परेषु । सूत्रे घु मा इत्यत्र मध्ये प्रकृति इति पाठेन तस्य देहलीदीपन्यायेनोभयत्र सम्बन्धः । मा शब्देन च माङ् लक्ष्यते । अतः, घुः=घुसंज्ञकः, प्रकृतिः=घुप्रकृतिः, मा=माङ्, माङ्प्रकृतिश्च इत्यर्थो बोध्यः । तथैवोदाहृतानि च डुदाञ्-प्रणिददाति । डुधाञ्-प्रणिदधाति । माङ्-प्रणिमिमीते । मेङ्-प्रणिमयते । इति । नेह-मा माने-प्रणिमाति, प्रनिमाति । प्रणिमातव्यम्, प्रनिमातव्यम् । ८-४-१८ शेषे...इति वैकल्पिकं णत्वम् ।

८-४-१८ **शेषे-उपसर्गात्** (८-४-१४) नेः (८-४-१७) नः (८-४-१) विभाषा=वा, णः=(८-४-१२) उपदेशे=उपदेशकाले, अकखादौ= कादिखादिभिन्ने, अषान्ते = षान्तभिन्ने च, शेषे=गदनदादिभिन्ने धातौ परे ।

प्र. ८-४-१९ अनि-उपसर्गात् (८-४-१४) अनितेः= अन् धातोः, नः (८-४-१) णः (८-४-१२) ।

द्वि. ८-४-१९ अन्तः- अनितेः प्र.(८-४-१९) अन्तः=पदस्यान्ते वर्तमानस्य,नः (८-४-१) णः (८-४-१२) । ८-४-३६ पदा ...इति प्रतिषेधापवादोऽयम् । अतोऽन्तः पदस्य बोध्यो नत्वनितेर्व्यभिचाराऽभावात् ।

८-४-२० **उभौ**-उपसर्गात् (८-४-१४) साभ्यासस्य=अभ्याससहितस्य, अनितेः (प्र ८-४-१९) उभौ= उभौ नकारौ,णः (८-४-१२) = णत्वं प्राप्नुतः । पूर्वं णत्वं कृत्वा द्विर्वचने कृतेऽपि प्राणिणदित्यादिषु सिद्धेष्वपि पुनरारम्भः 'पूर्वत्रासिद्धमद्विर्वचने" इत्यस्यानित्यत्वज्ञापनार्थः । तेन ऊर्णुनाव, इत्यदौ णत्वात् पूर्वमेव नु शब्दस्य द्वित्वेऽभ्यासादुत्तरस्य णत्वाऽभावः सिध्यति । ऊढमाख्यत्- औजढत् इत्यत्र च ह्त् इत्यस्य द्वित्वं सिध्यति ।

प्र. ८-४-२१ हन्तेः- उपसर्गात् (८-४-१४) हन्तेः=हन्धातोः, नः (८-४-१) णः (८-४-१२) ।

द्वि.८-४-२१ अत्पूर्वस्य = -हन्तेः (प्र. ८-४-२१) अत्पूर्वस्य= अत्पूर्वस्यैव नः (८-४-१) णः (८-४-१२) नान्यस्य । इति नियमार्थमिदम् । तपरकरणात् प्राघानि, इत्यत्र न । **वृत्रघ्नः** योगविभागसामर्थ्याद् अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायं बाधित्वा ८-४-१३ कुम...इति प्राप्तमपि णत्वं निवार्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-२२ वमोर्वा ॥

प्रहण्मि, प्रहन्मि । प्रहण्वः, प्रहन्वः ।
प्रहण्मः, प्रहन्मः।

८-४-२३ अन्तरदेशे ॥२४

अन्तर्हणनम् ।अत्पूर्वस्येत्यनुवृत्तेर्नेह-अन्तर्घ्नन्ति ।
तपरकरणान्नेह-अन्तरघानि ।
देशे तु अन्तर्हननः ।

८-४-२४ अयनं च ॥

अन्तरयणं वर्तते । देशे तु अन्तरयनः ।

८-४-२५ छन्दस्यृदवग्रहात् ॥

नृमणाः । पितृयाणम् ।

८-४-२६ नश्च धातुस्थोरुषुभ्यः ॥२७

अग्ने रक्षा णः । उरुणस्कृधि । अभी षु णः ।

८-४-२७ उपसर्गादनोत्परः ॥

अत्र अनोत्पर इत्यंशमपनीय बहुलग्रहणं च कृत्वा भाष्यकार आह

८-४-२७ उपसर्गाद् बहुलम् ॥

प्रणसः।प्रण : ।

८-४-२८ कृत्यचः ॥३३, ३१

प्रयाणम् । प्रहीणवान् ।
अच इत्युक्तेर्नेह-प्रमग्नः ।
(निर्विण्णस्योपसंख्यानम्)
निर्विण्णः ।

८-४-२९ णेर्विभाषा ॥३०

प्रयापणम्, प्रयापनम् ।
प्रयापणीयम्, प्रयापनीयम् ।

८-४-२२ **वमो**-उपसर्गात् (८-४-१४) हन्तेः (प्र.८-४-२१) नः (८-४-१) वा=विभाषया, णँः (८-४-१२) वमोः= वकारमकारयोः परयोः ।

८-४-२३ **अन्तः**=अन्तः शब्दात् परस्य, हन्तेः (प्र.८-४-२१) अत्पूर्वस्य (द्वि.८-४-२१) नः (८-४-१) णँः (८-४-१२) अदेशे =देशाऽनवगमे । अन्तरित्यव्ययम् । तस्य द्वि. १-४-५८ उप... सूत्रस्थेन अन्तः... वार्तिकेनोपसर्गत्वाद् हन्तेरत्पूर्वस्य इत्येव सिद्धे पुनर्विधानं देशप्रतिषेधार्थम् । **अन्तर्हणनम्** मध्ये हननमित्यर्थः ।

८-४-२४ **अय**-अन्तः(८-४-२३) अयनम्=अयनशब्दस्य, नः (८-४-१) णँः (८-४-१२) अदेशे (८-४-२४) ।

८-४-२५ **छन्द**-ऋदवग्रहात्=ऋदन्तादवग्रहात् पूर्वपदात् (८-४-३) परस्योत्तरपदस्थस्य, नः (८-४-१)णँः (८-४-१२) छन्दसि =वेदे । अवगृह्यते=विच्छिद्य पठ्यत इत्यवग्रहः ।

८-४-२६ **नश्च**-धातु.....भ्यः=धातुस्थान्निमित्तात् उरुशब्दात् षुशब्दाच्च परस्य, नः=नस् इत्यस्य, नः (८-४-१) णँः (८-४-१२) छन्दसि (८-४-२६)। **रक्षा णः** ६-३-१३५ द्व्यचो....इति दीर्घः । ८-१-२१ बहु...इति नस् । **उरुणस्कृधि** नस् प्राग्वत् । ६-४--१०२ श्रुशृ.....इति हेर्धिः । ८-३-५० कः क....इति विसर्गस्य सः । **अभी षु णः** ६-३-१३४ इकः .....इति दीर्घः । ८-३-१०७ सुञ इति षत्वम् ।

८-४-२७ **उपसर्गात्**=उपसर्गस्थान्निमित्तात् परस्य, नः (८-४-२६) नः (८-४-१) णँः (८-४-१२) बहुलम् । 'अनोत्परः' इति पाठे ओकारात् परस्य, ओकारे परे वा न भवतीत्यर्थः । उभयथाऽप्यव्याप्त्यतिव्याप्तिसम्भवाद् व्याख्यात(द्वितीय) एव पाठो वृत्तिकारेणाश्रित इति पदमञ्जरी । **प्रणसः** प्रगता नासिका यस्येति बहुव्रीहौ ५-४-११९ उप ....इत्यच्, नसादेशच । **प्रणः** ८-१-२१ बहु.....इति नस् । बहुलग्रहणाद् भाषायामपि भवति । प्रणसं मुखमिति-काशिका ।

८-४-२८ **कृत्य**-उपसर्गात् (८-४-२७) कृति=कृति वर्तमानस्य, अचः=अच उत्तरस्य, नः (८-४-१) णँः (८-४-१२) ।

८-४-२९ **णेर्वि**-उपसर्गात् (८-४-२७) णेः=ण्यन्ताद् विहिते, कृति+अचः (८-४-२८) नः (८-४-१) विभाषा=वा, णँः (८-४-१२) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-३० हलश्चेजुपधात् ॥३१
प्रकोपणम्, प्रकोपनम्। हलइत्युक्तेर्नेह-प्रोहणम्। इजुपधादित्युक्तेर्नेह-प्रवपणम्।
अच इत्यनुवृत्तेर्नेह- प्रभुग्नः।

८-४-३१ इजादेः सनुँमः ॥
प्रेङ्खणम्। अत्र दीक्षितः-
नुँम्ग्रहणमनुस्वारोपलक्षणार्थम्।
अट् कुप्वाङ्..... इति सूत्रेऽप्येवम्।
तेनेह न- प्रेन्वनम्। इह तु स्यादेव - प्रोम्भणम्, इति।
इजादेरेवेति नियमान्नेह-प्रमङ्गनम्।

८-४-३२ वा निंसनिक्षनिन्दाम् ॥
प्रणिंसितव्यम्, प्रनिंसितव्यम्।
प्रणिक्षितव्यम्, प्रनिक्षितव्यम्।
प्रणिन्दितव्यम्, प्रनिन्दितव्यम्।
कृतीत्यनुवृत्तेरिह नित्यमेव-प्रणिंस्ते।

८-४-३३ न भाभूपूकमिगमिप्यायीवेपाम् ॥३८
प्रभानीयम्। प्रभवनीयम्। प्रपवनीयम्।
पू इति पूञो ग्रहणम्। तेन पूङो णत्वमेव। प्रपवणीयम्। प्रकमनीयम्। प्रगमनीयम्।
प्रप्यायनीयम्। प्रवेपनीयम्।
(ण्यन्तभादीनामुपसंख्यानम्)
प्रभापनीयम्। प्रभावनीयम्। इत्यादि।

८-४-३४ षात् पदान्तात् ॥
निष्पानम्। दुष्पानम्। सर्पिष्पानम्।
पदान्तादित्युक्तेरिह भवत्येव-पुष्णाति। अत्र काशिका-पदे अन्तः पदान्तः,इति सप्तमी समासोऽयम् तेनेह न भवति-सुसर्पिष्केण, इति।

८-४-३५ नशेःषान्तस्य ॥
प्रनंष्टा। प्रनङ्क्ष्यति।

८-४-३० **हल**-उपसर्गात् (८-४-२७) हलः=हलादेः, (इजुपधस्य सर्वस्य हलन्तत्वादिह हल्ग्रहणमादिविशेषणमिति कशिका) इजुपधात्=इजुपधाद् धातोः परस्मिन्, कृति+अचः (८-४-२८)नः (८-४-१) विभाषा (८-४-२९) णँः (८-४-१२)। **प्रोहणम् प्रवपणम्** ८-४-२८ कृत्यच इति नित्यं णत्वम्।

८-४-३१ **इजा**-उपसर्गात् (८-४-२७) कृति (८-४-२८) अचः (८-४-२८) नः (८-४-१) णँः (८-४-१२)=णँ (अनुबन्धलोपे ण्) आदेशः, सनुँमः=नुँमा सहिताद् धातोर्विहितस्य भवति चेत् तर्हि, हलः (८-४-३०) =हलन्तात् (हल इत्यनुवृत्तं तदन्तपरं न तु (तदादिपरम्। इजादेर्हलादित्वासम्भवात्) इजादेः=इजादेर्विहितस्यैव नान्यस्य। (सिद्धे सत्यारभ्यमाणस्य नियमार्थत्वात्)। **अनुस्वारोपलक्षणार्थम्** अत्र विषये न्यासः- यदि हि नुँम् ग्रहणं नुँम एव प्रतिपादकं स्यान्नानुस्वारोपलक्षणार्थम्, तदानीम् इवेः इत्येव ब्रूयात्, नहीवेरन्यो धातुरिजादिर्हलन्तः सनुँम् सम्भवति। इखिप्रभृतयः सम्भवन्तीति चेत् ? न, अनुस्वारे कृते नुँमोऽभावात्। इति। हल इत्यनुवृत्तिप्रयोजनं किम् ? इति चेत्। अत्र काशिका-हल इत्यधिकाराद् ण्यन्ते नित्यं विध्यर्थमेतन्न भवति इति।

८-४-३२ **वा निं**-उपसर्गात् (८-४-२७) निंस....निन्दाम्= निंस् निक्ष् निन्द् इत्येतेषां धातूनाम्, नः (८-४-१) वा= विभाषया, णँः (८-४-१२) कृति=कृत्प्रत्यये परे। कृति वर्तमानस्य इति तु नार्थः। धातुनकारेण व्यवधानेन कृन्नकारस्य णत्वप्रसक्तेरसंभवात्। ८-४-१४ उप....इति नित्ये प्राप्ते विकल्पः।

८-४-३३ **न भा**-उपसर्गात् (८-४-२७) भाभू...वेपाम्=भा भू पू कम् गम् प्याय् वेप् इत्येतेषां धातूनाम्' कृति (८-४-२८)=कृति वर्तमानस्य, (अत्र तु धातूनां नकाराऽसंभवात् कृत्प्रत्यस्यैव नकारो गृह्यते) नः(८-४-१) णँः (८-४-१२) न= न भवति।

८-४-३४ **षात् प**- पदान्तात्, षात्=षकारात् परस्य, नः (८-४-१) णँः(८-४-१२) न (८-४-३३)। उदाहरणेष्वाद्ययोः ८-३-४१ इदु... इति षत्वम्। ८-४-२८ कृत्य...इति प्राप्ते प्रतिषेधः। अन्त्ये ८-४-४५ नित्यं....इति षत्वम्। ८-४-१० वा भा...इति प्राप्ते प्रतिषेधः। **पदे अन्तः** पदे=पदे परत इत्यर्थः। **न भवति** = प्रतिषेधो न भवति। **सुसर्पिष्केण** शोभनं सर्पिर्यस्येति बहुव्रीहौ ५-४-१५४ शेषा....इति वैकल्पिकः कप्। स च केवलः पदं न।

८-४-३५ **नशेः**- षान्तस्य=षकारान्तस्य, नशेः=नश् धातोः, नः (८-४-१) णँः (८-४-१२) न (८-४-३३)। प्रनंष्टा ७-२-४५ रधा...इतीडभावे रूपम्। **प्रनङ्क्ष्यति** १-१-७१ येन...इत्येव सिद्धे षान्तग्रहणं भूतपूर्वषान्तग्रहणार्थम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-३६ पदान्तस्य ॥
सुरान्। गिरीन्। पितॄन्।
८-४-३७ पदव्यवायेऽपि ॥
माषकुम्भवापेन।
चतुरङ्गयोगेन। प्रावनद्धम्।
(अतद्धित इति वक्तव्यम्)
आर्द्रगोमयेण।
८-४-३८ क्षुभ्नादिषु च ॥
क्षुभ्नााति। नरीनृत्यते।

(आचार्यादणत्वं च) ग.सू.
व्यवस्थितविभाषेयम्।
आचार्यभोगीनः, आचार्यानी,
इत्यत्र णत्वं न। आचार्येण।
आचार्याणाम्। इत्यादिषु नित्यं णत्वम्।
८-४-३९ स्तोः श्चुना श्चुः ॥४१,४३
बालकश्शेते। सुमनश्चयः। सच्चित्।
तज्जयः।

८-४-३६ पदा- ७-३-११० ऋतो ङि...सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र श्यामपाटीप्रयोगो यथा-
(क) (ख) (ग)
८-४-१ रषाभ्यां नो णँः समानपदे ॥ ८-४-३३ न भा भू पू ....वेपाम् ॥
८-४-३६ पदान्तस्य (क) (ख) (ग) ॥ इति। अथ पदान्तस्य = पदस्यान्ते वर्तमानस्य, (क)=नः=नकारस्य स्थाने, (ख)=णँः (ग) =न= न भवति। इत्युपदेश्यम्। तृतीयैकवचने श्यामपाटचां 'पितृ+आ' इति लिखित्वा रूपसिद्धये छात्राः प्रवर्तयितव्याः। पित्रा, इति यथा। भ्यामादिहलादौ नोपदेशापेक्षा। चतुर्थ्येकवचनेऽपि तृतीयैकवचन इव प्रक्रियेति वदता शिक्षकेण छात्रैरुच्यमाना **प्रक्रिया श्रोतव्या।**

पितुः-ङसिँ ङसोः'पितृ+अस्'इति श्यामपाटचां लिखित्वा यणं बाधयित्वा ६-१-१०७ ऋत उत्-सूत्रमुपदेश्यम्।

८-४-३७ **पदव्यवायेऽपि**=पदेन व्यवधानेऽपि, नः(८-४-१) णँः(८-४-१२) न(८-४-३४)। उदाहरणेषु क्रमशः ८-४-११ प्राति...८-४-१३ कुम...८-४-१४ उप.....इति प्राप्तिः।

८-४-३८ **क्षुभ्नादिषु** = क्षुभ्न-प्रभृतिगणपठितशब्देषु, नः (८-४-१) णँः (८-४-१२) न (८-४-३४)।
आचा-अणत्वम्=णत्वाभावः, च=णत्वं च।

८-४-३९ **स्तोःश्चु**-१-१-९ तुल्या...सूत्रस्थ ऋव......वार्तिकानन्तरं सूत्रमिदं पाठयम्। एतत् सूत्रं श्यामपाटचां लिखित्वा सूत्रमेतत् त्रिपदमिति भणता शिक्षकेणाऽङ्गुल्या तानि पदानि दर्शयितव्यानि। ततःकु चु टु तु पु-बोध्या वर्णाः के ? इति प्रश्नः कार्यः। यदि सत्यमुत्तरमागच्छेत् तदा सुष्ठु। यदि नोत्तरमागच्छेत् तदा स्थानोपदेशप्रसङ्गे पूर्वमुक्तं पुनरुद्‌बोधनीयम्। अथ स्तु इति श्यामपाटचां लिखित्वा अत्र प्रथममक्षरं किमिति पृच्छता शिक्षकेण 'दन्त्यसकारः' इति च्छात्रेभ्य उत्तरं ग्राह्यम्। ततः, तु=त् थ् द् ध् न्, इत्युत्तरं ग्राह्यम्। ततः श्चुः इति श्यामपाटचां लिखितं प्रकृतसूत्रावयवं दर्शयित्वा स्तु इत्यत्रेव व्यवहार्यम्। अथ प्रकृतसूत्रावयवं स्तोः इति पदं दर्शयित्वा यथा गुरुः, गुरोः। भानुः,भानोः। शम्भुः, शम्भोः। वायुः, वायोः। तथैव स्तुःस्तोः, इति जानीतेतिच्छात्रा बोधयितव्याः। अथ सूत्रार्थ उपदेश्यः। यथा-श्चुना=शकारचवर्गाभ्यां सह मिलितयोः (नेपालीभाषायाम्) तालव्य शकार र चवर्ग (च् छ् ज् झ् ञ्) सङ्ग मिलेका (हिन्दी भाषायाम्-) तालव्य शकार और चवर्ग (च् छ् ज् झ् ञ्) से मिले हुए, स्तोः=दन्त्यसकारतवर्गयोः स्थाने (नेपालीभाषायाम्) दन्त्य सकार र तवर्ग (त् थ् द् ध् न्) का स्थानमा, हिन्दी भाषायाम्- दन्त्य सकार और तवर्ग (त् थ् द् ध् न्) के स्थान में, श्चुः=तालव्यशकारचवर्गौ भवतः (ने.भा) तालव्य शकार र चवर्ग(च् छ् ज् झ् ञ्) हुन्छन्, (हि.भा.) तालव्य शकार और चवर्ग (च्,छ् ज् झ् ञ्) होते हैं। इति। अत्राऽधोनिर्दिष्टरूपेण भावो बोधनीयः- तालव्यशकारेण चवर्गेण वा सह मिलितयोर्दन्त्यसकारतवर्गयोः स्थाने तालव्यशकारचवर्गौ भवत इनि। अथ सूत्रार्थो मुहुर्मुहुः सूत्रस्थपदान्युच्चार्यैव शिक्षणीयः। अष्टाध्याय्यां सूत्रं दृष्ट्वैवेति तु पूर्वमप्युक्तं सर्वत्रैव विभावनीयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-४० ष्टुना ष्टुः ॥४२	पेष्टा । उड्डीयते । पिष्टम् ।
बालकष्टेकते । रामषषष्ठः ।	

अथ ज्ञातसूत्रार्थाश्छात्रा अधोनिर्दिष्टरूपेण श्यामपाट्यां वर्णाल्ँ लिखित्वा दृष्टान्तप्रस्तुतिपुरस्सरं बोधनीयाः । यथा- स् त् थ् द् ध् न्

श् च् छ् ज् झ् ञ् इति लिखित्वा छात्राः सम्बोध्याः । अयि वत्साः ? यदि षड् जना भोजनाय बद्धश्रेणयो वसेयुः, सूदः (ओदनस्य पाचकः) तेषामग्रे क्रमशः षड् भागान् स्थापयेत्, तदा भोक्तारः स्वस्य स्वस्याग्रे वर्तमानं भागं भक्षयेयुर्वा अन्योन्येषामग्रे वर्तमानान् भागान् भक्षयेयुः, इति पृष्ट्वा स्वस्य स्वस्याग्रे वर्तमानं भागं भक्षयन्ति इत्युत्तरे छात्रेभ्य आगते पुनरग्रे ते बोधयितव्याः । यथा भोजने क्रमशो भागं गृह्णन्ति इति बुध्यते; तथैव सकारतवर्गयोः स्थाने शकारचवर्गौ भवत इत्यर्थे ज्ञाते (श्यामपाटयामङ्गुल्या वर्णान् दर्शयता) क्रमशः सकारस्य स्थाने शकारः, तकारस्य स्थाने चकारः, थकारस्य स्थाने छकारः, दकारस्य स्थाने जकारः, धकारस्य स्थाने झकारः, नकारस्य स्थाने ञकारो भवतीति विभावनीयमिति । प्रकृते १-३-१० यथा...... सूत्रं नोपस्थापनीयम्; बोधभारापत्तेः । वरमधस्तने पद्ये दृष्टान्ताय प्रस्तुत्ये । छन्दोबद्धपद्यपठने च जागर्ति रुचिश्छात्राणाम् ।

शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जय ॥
दीपनिर्वाणगन्धं च सुहद्वाक्यम् अरुन्धतीम् ।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः ॥

अथ श्यामपाटचां बालकस्+शेते इति लिखित्वा दन्त्यसकारं तालव्यशकारं च दर्शयता शिक्षकेण अत्र तालव्यशकारेण सह मिलितो दन्त्यसकारो वा तवर्गो वा वर्तते ? इति च्छात्राः प्रष्टव्याः । तदानीं दन्त्यसकारेण सह मिलितस्तालव्यशकारोऽस्ति" इत्यप्युत्तरमागन्तुं शक्नोति । तथा सति शिक्षकेण स्मेरमुखेण सता पुनश्छात्रा बोधयितव्याः । वत्साः ? सत्यमेव युष्माभिरुक्तं दन्त्यसकारेण मिलितस्तालव्यशकारोऽस्तीति । किन्तु यथा प्रश्नशैली वर्तते; उत्तरशैली तथा न मिलिता । अतः पुनः शृणुतेति वदता शिक्षकेण पुनरुपरितनः प्रश्नः प्रस्तुत्यः । यदवधि तालव्यशकारेण सह मिलितो दन्त्यसकारोऽस्तीत्युत्तरं नाऽऽयाति तदवधि मुहुर्मुहुः प्रश्न आवर्तयितव्यः । उत्तरं च श्रोतव्यम् । कदाचित् तु तालव्यशकारेण सह मिलितस्तवर्गोऽस्तीत्यप्युत्तरमायाति तथापि शिक्षकेण कोपो न प्रदर्शनीयः । किन्तु अङ्गुल्या दन्त्यसकारं दर्शयता किमेष तकारः ? इति प्रश्नः कार्यः । नेत्युत्तरे प्राप्ते किं तर्हि थकारः ? इत्यादिक्रमेण नकारावधि प्रतिवर्णं प्रश्नः कार्यः । एवं सति छात्राणां स्फुटप्रतिपत्तिर्भवति । एकस्मिन्नुदाहरणे स्फुटं बोधगोचरे च उदाहरणान्तराणि सरलानि प्रतीयन्ते । अथाऽभ्यासाय तद्+जयः, सुमनस्+चयः, सुमनस्+शय्या, सकृत्+चिनोति, सत्+चित्, इत्+छा । अत्र केन सह मिलितः कोऽस्ति ? तथा कस्य स्थाने किं भवति ? रूपाणि च कीदृशानि भवन्ति ? इत्यादयः प्रश्ना देयाः । अत्र शिक्षकेण पाठवर्धनाय त्वरा न कार्या । वरं द्वित्राणि दिनानि यथायोगयं प्रतिदिनं होरामितः समयो वा व्यतिगच्छन्तु सूत्रस्याऽस्य भावं सम्यगवगमय्यैव पाठोऽग्रे वर्धनीयः । अथ ८-४-४० ष्टुना....सूत्रं पाठचम् ।

८-४-४० ष्टुना-८-४-३९ स्तोः श्चु....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्राऽधोनिर्दिष्टरूपेण श्यामपाटी प्रयोक्तव्या । (क)

८-४-३९ स्तोः श्चुना: श्चुः ॥ ८-४-४० (क) ष्टुना ष्टुः ॥ इति । अथच्छात्रा दृष्टान्तप्रदर्शनपुरस्सरं बोधयितव्याः-अयि वत्साः ? यथोपरितनात् केदारात् (क्षेत्रात्) परीवाहेण (जलनिर्गमनमार्गेण) अधस्तने केदारे जलमायाति; तथैव८-४-३९ सूत्रात् ८-४-४० सूत्रे (साङ्गुलिनिर्देशं) स्तोः इति पदमनुवर्तते । अर्थात् पूर्वसूत्रात् स्तोः इति पदमागच्छति । पूर्वसूत्रादुत्तरसूत्रे आगच्छति इति वक्तव्ये अनुवर्तते इत्युच्यते अतः सूत्रार्थः फलति-ष्टुना= मूर्धन्यषकारटवर्गाभ्यां सह मिलितयोः, (क)=स्तोः=दन्त्यसकारतवर्गयोः स्थाने, ष्टुः=मूर्धन्यषकारटवर्गौ भवतः। इति । सर्वमन्यत् ८-४-३९ स्तोः श्चु ...सूत्रे इव व्यवहरणीयम् । बालकस्+टेकते, रामस्,+षष्ठः पेष्+ता, उद्+डीयते, पिष्+तम्, पुष्+तः, रामस्+टीकते इत्यादीन्युदाहरणानि श्यामपाटचां लिखित्वा केन सह मिलितः कोऽस्तीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-४१ न पदान्ताट्टोरनाम् ॥४३
षट् सन्तः । षट् ते ।
पदान्तादित्युक्तेरिह ष्टुत्वमेव-ईट्टे ।
टोरित्युक्तेरिह ष्टुत्वमेव-सर्पिष्टमम् ।
अनामित्युक्तेरिहापि ष्टुत्वमेव-षण्णाम्।
(अनाम्नवतिनगरीणामिति वाच्यम्)
षण्णवतिः, षड्णवतिः ।
षण्णगर्यः, षड्णगर्यः ॥
८-४-४२ तोः षि ॥
सन् षष्ठः ।
८-४-४३ शात् ॥
विश्नः । प्रश्नः ।
८-४-४४यरोऽनुनासिकेऽनुनासिको वा ॥ ४६
एतन्मुरारिः, एतद् मुरारिः । तन्मे, तद् मे ।
(प्रत्यये भाषायां नित्यम्)
वाङ्मयम् । तन्मात्रम् । चिन्मयम् ।

पूर्ववत् प्रश्नान् पुरस्कुर्वता शिक्षकेण विमृश्यं छात्राः काठिन्यमनुभवन्ति न वेति। यदि काठिन्यमनुभवन्ति तदा यद् वा पूर्वसूत्रविषये सम्यग् ज्ञानं नाऽभूत्, यद्वाऽभ्यासः सम्यङ् न जात इति मत्वा प्रसङ्गमत्रत्यं मुक्त्वा पुनः पूर्वसूत्रविषये तथा चर्चा कार्या यथाच्छात्राणां मस्तिष्के पूर्वसूत्रविषयः सम्यक् स्फुरेत् । ततोऽग्रे पुनः प्रकृतसूत्रविषये चर्चा कार्या पूर्वसूत्रे इव । अथ ८-३-२३ मोऽनु...सूत्रमुपदेश्यम् ।

८-४-४१ पदान्तात् = पदस्यान्ते वर्तमानात्, टोः=टवर्गात् परस्य, अनाम्= नांशब्दाऽवयवभिन्नस्य, स्तोः (८-४-३९) न=ष्टुर्न भवति। सूत्रे 'अनाम्' इति लुप्तषष्ठ्यन्तं पदम्। **सर्पिष्टमम्** ८-३-१०१ ह्रस्वा...इति षत्वम् ।

अना-उदाहरणेषु ८-४-४४ यरो....इति वाऽनुनासिकः ।

८-४-४२ तोः= तवर्गस्य स्थाने, षि=षकारे परे, न (८-४-४१)=न भवति। किं न भवति ? यत् प्राप्तं तन्न भवति। किं च प्राप्नोति ? षकारयोगे ८-४-४० ष्टुना... इति ष्टुत्वं प्राप्नोति। अतः ष्टुत्वं न भवतीत्यर्थ :।

८-४-४३ शात्=शकारात् परस्य, तोः(८-४-४२) न (८-४-४१)= न भवति। किं न भवति ? यत् प्राप्तं तन्न भवति। किंच प्राप्नोति ? शकारयोगे ८-४-३९ स्तोः श्चु....इति श्चुत्वं प्राप्नोति। अतः श्चुत्वं न भवतीत्यर्थ :।

८-४-४४ यरो-१-१-८ मुख....सूत्रानन्तरं सूत्रमिदं पाठ्यम्। अत्र सूत्रे यर इति षष्ठ्यन्तानुरोधेन ८-४-४१ न प... सूत्रादनुवर्तमानं पदान्तादिति पञ्चम्यन्तं पदान्तस्येति षष्ठ्यन्ताय कल्पते इत्यवदधता शिक्षकेण अङ्गुल्या पदानि दर्शयता पदान्तात् नाम= पदान्तस्य, यरः=यरः स्थाने, अनुनासिके= अनुनासिके परे, वा=विभाषया, अनुनासिकः =अनुनासिको भवति । इत्यर्थ उपदेश्यः। अथ तद्+मे इत्युदाहरणं श्यामपाटचां लिखित्वा दकारो यर् प्रत्याहारे वर्तते न वा ? तस्मात् परतः को वर्णो वर्तते ? स चाऽनुनासिकोऽस्ति न वा ? इति च्छात्राः प्रष्टव्याः। छात्रेभ्यो यथार्थमुत्तरे प्राप्ते एव अग्रिमप्रक्रिया पुरस्कार्या। यथा दकारस्थानं किमिति प्रश्नानन्तरं छात्रेभ्य उत्तरे आगते श्यामपाटचां दन्तस्थानवर्णा लेख्याः। तदधश्चाऽनुनासिकवर्णा लेख्याः। यथा- लृ लॄँ त् थ् द् ध् न् ल् लँ् स्ः दन्त्यवर्णाः।अँ इँ उँ ऋँ लृँ एँ ओँ ऐँ औँ यँ् वँ् लँ् ङ् ञ् ण् न् म् = अनुनासिकवर्णाः। अथ प्रत्येकमक्षराणि दर्शयता शिक्षकेण अयं वर्णो दन्तस्थाने वर्तते न वा ? इति प्रश्नक्रमे सत्यामावश्यकतायां प्रत्येकं वर्णान् दर्शयता एष दन्त्यवर्णः ? इति प्रकारेणापि प्रश्नः कार्यः। तदा सति दन्त्यवर्णे तदुपरि √ चिह्नमिदं देयम्। असति × चिह्नमिदं देयम्। तदानीं श्यामपाटचां वर्णा एवं दृश्यन्ते-

× × × × √ × × × × × × √ × × × √
अँ इँ उँ ऋँ लृँ एँ ओँ ऐँ औँ यँ् वँ् लँ् ङ् ञ् ण् न् म् इति। अतः लृँ लँ् न् एते प्राप्ता अन्ये निवृत्ता इति बोधनक्रमे दकारस्य आभ्यन्तरप्रयत्नं छात्रेभ्योऽवगत्य स्पृष्टप्रयत्ने पूर्वोक्तेषु त्रिषु वर्णेषु कतमोऽस्तीतिच्छात्रा एव प्रष्टव्याः। तेभ्यः प्राप्तमुत्तरं श्रुत्वा तर्हि दकारस्य स्थाने नकारो भवतीतिच्छात्रा बोधयितव्याः। विकल्पेन विधानात् तन्मे, तद् मे इत्युभयथापि प्रयोक्तुं शक्यते इति च बोधनीयम्। विशेषः-यदि तु दन्त्यवर्ण परीक्षणावसरे वँ् इत्यप्यस्तीतिच्छात्राः कथयेयुस्तदा स्पृष्टप्रयत्ने चतुर्षु वर्णेषु कतमोऽस्तीति प्रश्नः कार्यः। यद्+न, तद्+मे, इति प्रयोगयोर्लक्षणसमन्वयं कारयता शिक्षकेण छात्रै रूपे साधिते सति, ... यन्न कस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-४५ अचो रहाभ्यां द्वे ॥४६,५१

अर्क्कः, अर्कः । ब्रह्म्मा ब्रह्मा ।

८-४-४६ अनचि च ॥

दद्ध्यस्ति, दध्यस्ति। वाक्क्, वाक् ।

(यणो मयो द्वे वाच्ये)

उल्क्का, उल्का । दध्य्यस्ति, दध्यस्ति ।

(शरः खयो द्वे वाच्ये)

स्त्थाता, स्थाता । वत्त्सः, वत्सः ।

८-४-४७ नादिन्याक्रोशे पुत्रस्य ॥५१

पुत्रादिनी त्वमसि पापे ।

तत्त्वकथने तु द्वित्वं भवत्येव ।

पुत्त्रादिनी सर्पिणी ।

(तत्परे च)

पुत्रपुत्रादिनी त्वमसि पापे ।

(वा हतजग्धयोः)

पुत्त्रहती, पुत्रहती । पुत्त्रजग्धी, पुत्रजग्धी ।

(चयो द्वितीयाः शरि पौष्करसादेरिति वक्तव्यम्)

वथ्सः, वत्सः । अफ्सरसः, अप्सरसः ।

८-४-४८ शरोऽचि ॥

वर्षति । चतुर्षु ।

अचीत्युक्तेरिह न प्रतिषेधः-दर्श्श्यते ।

८-४-४९ त्रिप्रभृतिषु शाकटायनस्य ॥

इन्द्रः । राष्ट्रम् ।

८-४-५० सर्वत्र शाकल्यस्य ॥

अर्कः । ब्रह्मा ।

८-४-५१ दीर्घादाचार्याणाम् ॥

पात्रम् । सूत्रम् ।

चिदाख्यातं तन्मे ब्रूहि पितामह ॥ इति कवचं श्रावयित्वा अत्रैव 'चिद्+आख्यातम्' इत्यत्र प्रकृतसूत्रं प्रवर्तते न वेति च विचाराय च्छात्राः प्रवर्तयितव्याः । अथाऽग्रिम (प्रत्य...) वार्तिकं पाठ्यम् । **प्रत्य** ८-४-४४ यरो.......सूत्रानन्तरं वार्तिकमिदं पाठ्यम् । अत्र प्रथमं ३-१-१ प्रत्य.....सूत्रं दर्शयित्वा इत आरभ्य ५-४-१६० निष्प्र...सूत्रात् प्राग् धातोः प्रातिपदिकाद् वा परतो ये विधीयन्ते ते प्रत्यया इत्युच्यन्ते इतिच्छात्रा बोधयितव्याः । यदिच्छात्राः प्रतिभावन्तस्तर्हि न केवलं परतो विधीयमाना एव प्रत्ययाः किन्तु पूर्वतो विधीयमानो बहुच् टेः प्राग् विधीयमानोऽकँच् च प्रत्यय एवेति बोधयितव्याः । यदि तुच्छात्रा भारमनुभवन्ति तर्हि इत आरभ्य परतो ये योज्यन्ते ते प्रत्यया इत्युपदेशः कर्तव्यः । अथ तद्+मात्रम् इति श्यामपाटचां लिखित्वा ५-२-३७ प्रमा......सूत्रं दर्शयित्वा तत्रत्यं चवर्जं मात्रशब्दं दर्शयित्वा प्रकृतोदाहरणस्य मात्र इत्यंशः प्रत्ययोऽस्तीति बोधनीयम् । अथ वार्तिकार्थः-पदान्तात् (८-४-४१)=पदान्तस्य, यरः (८-४-४४) = यरः स्थाने, अनुनासिके (८-४-४४) + प्रत्यये अनुनासिकादौ प्रत्यये परे, नित्यम्=नित्यमनुनासिको भवति, भाषायाम्=लौकिकभाषयाम् । इति । लक्षणसमन्वयश्छात्रैर्यथासम्भवं कारयितव्यः । अत्र शिक्षकेण च्छात्रा बोधयितव्या यत् प्रत्ययप्रकरणे पठिष्यमाणे कः प्रत्ययः कश्च नेति स्फुटं ज्ञानं भविष्यतीति । अथ ८-४-५९ तोर्लि-सूत्रं पाठचम् ।

८-४-४५ अचः =अचः पराभ्याम्, रहाभ्याम्=रेफहकाराभ्याम् परस्य,(अचः परौ यौ रेफहकारौ ततः परस्येत्यर्थः) यरः +वा (८-४-४४) द्वे=द्वे भवतः=द्वित्वं भवति ।

८-४-४६ अन-अचः (८-४-४५)=अचःपरस्य, यरः+वा (८-४-४४) द्वे (८-४-४५)अनचि=अचि परे न । **यणो**-वा (८-४-४४) द्वे (८-४-४५) । यण इति मय इति च पर्यायेण पञ्चम्यन्त-षष्ठ्यन्ते । एवञ्च यणः परस्य मयः, मयः परस्य यण इत्यर्थः फलति । एवं शरः खय इत्यत्रापि बोध्यम् ।

८-४-४७ नादि-आदिनी=आदिनीशब्दे परे, पुत्रस्य=पुत्रशब्दावयवस्य, यरः (८-४-४४) न=द्वे न भवतः, आक्रोशे=आक्रोशे गम्यमाने । सूत्रे-आदिनीति ङचन्तानुकरणं लुप्तसप्तमीकमिति-नागेशः ।

८-४-४८ शरो- शरः=शर्वर्णस्य अचि= अचि परे, न (८-४-४७) ।

८-४-४९ त्रिप्रभृतिषु=त्र्यादिषु वर्णेषु संयुक्तेषु, न (८-४-४७) शाकटायनस्य= शाकटायनाचार्यमते ।

८-४-५० सर्वत्र = सर्वत्र स्थलेषु, न (८-४-४७) शाकल्यस्य= शाकल्याचार्यस्य मते ।

८-४-५१ दीर्घात्=दीर्घात् परस्य, न (८-४-४७) आचार्याणाम्=अचार्याणां मते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-५२ झलां जश् झशि ॥	८-४-५३ अभ्यासे चर्च ॥
बद्धः । लब्धम् ।	जुहोति । बभौ। डुढौके । पफाल । चखाद ।

८-४-५२ झलां-८-२-३९ झलां....सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र प्रत्येकं पदानि पुस्तके दर्शयित्वा सूत्रार्थ उपदेश्यः । तथाहि- झलाम्= झलां स्थाने, जश्= जश् आदेशो भवति, झशि= झशि परे । इति । ततः श्यामपाटचामधोनिर्दिष्टरूपेण उदाहरणं लेख्यम् -'बध् +धः' इति । अथ झल् प्रत्याहारे धकारोऽस्ति न वा ? इति च्छात्राः प्रष्टव्याः । तथा परतस्त्यधकारो झश् प्रत्याहारेऽस्ति न वा ? इति च । छात्रेभ्य उत्तरे आगते दन्तस्थानवर्णा जश्वर्णाश्च श्यामपाटचां लेख्याः । यथा-
लृ त् थ् द् ध् न् ल् स्=दन्त्यवर्णाः । ज् ब् ग् ड् द् =जश्वर्णाः । इति । अथ प्रतिवर्णमङ्गुल्या दर्शयता शिक्षकेण जकारो दन्तस्थानेऽस्ति न वा ? बकारो दन्तस्थानेऽस्ति न वा ? इत्यादिरीत्या प्रश्नः कार्यः । छात्रेभ्य उत्तरे आगते दन्त्येतर वर्णोपरि × चिह्नमिदं देयम्, दकारोपरि च √ चिह्नमिदं देयम् । यथा-

× × × × √
ज् ब् ग् ड् द् इति । अतो धकारस्य स्थाने दकारो भवतीति बोधयता शिक्षकेण श्यामपाटचां निर्दिष्टोदाहरणे धकारं मेटयित्वा तत्स्थाने दकारो लेख्यः । यथा -बद्धः, इति । लभ्+धः, नध्+धः, दुघ्+धम्, मुघ्+धः, बभ्+धः, इत्यादयः प्रश्नाः समाधानाय देयाः । अथ ८-४-५४ खरि...सूत्रमुपदेश्यम् ।

८-४-५३ अभ्या-७-४-६२ कुहोश्चुः-सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा -

(क) (ख)
८-४-५२ झलां जश् झशि ॥ ८-४-५३ अभ्यासे (क) (ख) चर् च॥ इति । अभ्यासे=अभ्यासे वर्तमानानाम्, (क) =झलाम्=झलां स्थाने, (ख)=जश्,= जश् आदेशः, चर् च=चर् आदेशश्च, भवतः । अत्राऽधोनिर्दिष्टतालिकया निर्देशनद्वारा च भावार्थो बोधयितव्यः । यथा-

	विवारश्वासाघोषाः	संवारनादघोषाः	अल्पप्राणाः	महाप्राणाः
झष्	X	"	X	"
जश्	X	"	"	X
ख फ छ ठ थ	"	×	X	"
चर्=				
(क) चय्	"	X	"	X
(ख) शर्	"	X	X	"

यथा हरति इत्यदौ मूर्धस्थानिन् ऋकारस्य स्थाने अर् अल् ए ओ इत्येतेषु प्राप्तेषु अर् इति समुदायस्य मूर्धस्थानाऽभावेऽपि तदेकदेशरेफमात्रस्याऽपि मूर्धस्थानत्वेन इतरादेशापेक्षया अर् इति समुदायस्य आन्तर्यं स्वीक्रियते, तथैव झषः स्थाने विधीयमानयोर्जश्चरोर्मध्ये बाह्यप्रयत्नेषु प्राणभेदेऽपि संवारनादघोषसाम्याज्जश्वर्णानामान्तर्यम् । चय्वर्णानां तूभयत्रैवाऽनान्तर्यम् । यद्यपि शरो घोषभेदेऽपि महाप्राणसाम्यं वर्तते तथाप्याभ्यन्तरप्रयत्नद्वारा निस्तारः । ख फ छ ठ थ वर्णानां स्थाने विधीयमानयोरादेशयोर्मध्ये च प्राणभेदेऽपि विवारश्वासाघोषसाम्याच्चय्वर्णानामान्तरतम्यम् । शरस्तु प्रागवदाभ्यन्तरप्रयत्नद्वारा निस्तारः । एवञ्च झशां स्थाने जशः खरां स्थाने चरो भवन्तीति । स एष विषयः श्यामपाटचां लिखित्वैव बोधयितव्यः शिक्षकेण । अथ लक्षणसमन्वयं छात्रैः कारयित्वा ७-३-८४ सार्व...सूत्रमुद्बोध्य लक्षणसमन्वयायच्छात्रा आदेश्याः । जुहोति । एवं सिपि जुहोसि इति रूपे छात्रैः साधिते ८-३-५७ इण्कोः- सूत्रे व्यवस्थापितरीत्या षत्वमुद्बोधयितव्यम् । जुहोषि । मिपि-जुहोमि । तसि तु जुहुतस् इति च्छात्रैः साधिते १-२-४ सार्व... सूत्रमुद्बोध्य जुहोति इत्यत्रेव ७-३-८४ सार्व....सूत्रेण गुणप्राप्तिं सम्भाव्य १-१-५ क्ङिति....सूत्रमुपदेश्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-५४ खरि च ॥

उत्तिष्ठति । तत्कुरु ।

८-४-५५वाऽवसाने ॥५६

आनय तत्, आनय तद् । शोभते शरत्, शोभते शरद् ।

८-४-५६ अणोऽप्रगृह्यस्याऽनुनासिकः ॥

दधिँ, दधि । मधुँ, मधु ।

अण इत्युक्तेर्नेह-कर्तृ । भर्तृ ।

अप्रगृह्यस्येत्युक्तेर्नेह-अग्नी । वायू ।

८-४-५४ खरि-८-४-५२ झलां....सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्र प्रथममधोनिर्दिष्टरूपेण सूत्राणि श्यामपाट्यां लेख्यानि । यथा-

(क) (ख)

८-४-५२ झलां जश् झशि ॥ ८-४-५३ अभ्यासे चर् च ॥ ८-४-५४ (क) (ख) खरि च ॥ इति । अथ केदारजलदृष्टान्तोद्बोधनपुरस्सरं पूर्वसूत्राभ्यामनुवर्तनीये पदे अनुवर्तेते इति बोधयता शिक्षकेण साङ्गुलिनिर्देशं तत् तत् सूत्रे पदानि दर्शयता सता सूत्रार्थ उपदेश्यः (क)=झलाम्=झलां स्थाने, (ख)=चर्=चर् भवति, खरि=खरि परे इति । अत्र के खर्वर्णाः के च चर् वर्णाः ? इति चच्छात्राः प्रष्टव्याः । छात्रेभ्य उत्तरे आगते श्यामपाट्याम् उद्+तिष्ठति, इत्युदाहरणं लिखित्वा ८-४-५२ झलां.....सूत्रोदाहरणे इव प्रश्नं कृत्वा लब्धे चोत्तरे तत्सूत्रोदाहरणे इव स्थानादिविचारोपि श्यामपाट्यां वर्णाल्ँ लिखित्वैव कार्यः । यथा-

अत्र स्थानी दकारो दन्त्यः । लृ त् थ् द् ध् न् ल् स्=दन्त्याः । च् ट् त् क् प् श् ष् स्=चर्वर्णाः । इति । अथ च ८-४-५२ झलां.......सूत्रोदाहरणे इव प्रश्नान् कुर्वता छात्रेभ्य उत्तरं च गृह्णता शिक्षकेण×इति √ इति च चिह्ने देये । यथा-

× ×√ × ×× ×√

च् ट् त् क् प् श् ष् स् इति । अथ तकारसकारौ प्राप्तौ शेषवर्णा निवृत्ता इति बोधयित्वा तकारसकारयोः कतरवर्णो भवेदिति जिज्ञासामुद्भाव्य स्थानेन निर्णयाऽसम्भवे प्रयत्नेनाऽपि निर्णयः कार्य इति बोधनक्रमे दकारस्याऽभ्यन्तरप्रयत्नः कः ? इतिच्छात्राः प्रष्टव्याः । तेभ्य उत्तरे आगते तत्र तकारसकारयोर्मध्ये कतरोऽस्तीति पुनःप्रश्नः कार्यः । छात्रेभ्यो यथार्थमुत्तरे प्राप्ते, शिक्षकेण आम्, इति वदता, अतो दकारस्य स्थाने तकारो भवतीति छात्रानुपदिशता श्यामपाट्यां निर्दिष्टोदाहरणस्य दकारं मेटयित्वा तत्स्थाने तकारो लेख्यः । यथा उद् +तिष्ठति=उत्तिष्ठति, इति । अथ तद्+कुरु,तद्+किम्, एतद्+तव, उद्+कीर्णम्, अद्+ति, अद्+सि, यद्+करोषि, तद्+कुरुष्व, इत्यादयः प्रश्नाः समाधानाय देयाः । अथ ८-४-५५ वाऽव...सूत्रं पाठ्यम् ।

८-४-५५ वाऽव-८-४-५४ खरि च सूत्रानन्तरं सूत्रमिदं पाठ्यम् । अत्राऽधोनिर्दिष्टरूपेण सूत्राणि श्यामपाट्यां लेख्यानि- (क) (ख)

८-४-५२ झलां जश् झशि ॥ ८-४-५३ अभ्यासे चर् च ॥ ८-४-५५ (क) वा (ख)ऽवसाने ॥ इति । अत्र ८-३-१५ खर... इत्यत्रैव १-४-१०९ विरा... सूत्रस्य भावार्थं बोधयित्वा प्रकृतसूत्रार्थस्तत्तत् सूत्रे पदानि दर्शयतैव बोधयितव्यः । (क)= झलाम्= झलां स्थाने, वा+ [(ख)= चर्] = विकल्पेन चर् भवति, अवसाने = परतो वर्णानामभावे । किम् एतद्, नय तद्, सोऽवोचद्, आगतो वनाद्, गृहं गच्छेद्, मनोज्ञा वाग्, वर्षति पयोमुग् । इत्यादिषु द्विविधानि रूपणि लेख्यानि । अथ ८-४-६२ शश्छो... सूत्रं पाठ्यम् ।

८-४-५६ अणो- अप्रगृह्यस्य= प्रगृह्यभिन्नस्य, अणः= अणः स्थाने, अनुनासिकः=अनुनासिक आदेशः, वा+अवसाने (८-४-५५) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-५७ अनुस्वारस्य ययि परसवर्णः ॥ ५८,५९,६१
शान्तः । अङ्कितः । पठन्ति । कुर्वन्ति ।
८-४-५८ वा पदान्तस्य ॥
त्वङ्करोषि, त्वं कारोषि ।

८-४-५९ तोर्लि ॥
तल्लयः । विद्वाल्ँ लिखति ।
८-४-६० उदः स्थास्तम्भोः पूर्वस्य ॥६१
उत्थानम् । उत्तम्भनम् ।

८-४-५७ अनु- ८-३-२४ नश्चा... सूत्रानन्तरं सूत्रमिदं पाठचम् । शाम्+ तः, अन्+ कितः, पठन्+ ति । इत्यत्र ८-३-२४ नश्चा... सूत्रसमन्वयश्छात्रैः कार्यः । ततः परसवर्णक्रमे सत्यामावश्यकतायामपि ञ म ङ ण ना नां नासिका चेति विलम्बेनैवोद्बोधनीयम् । अथ ८-४-५८ वा प... सूत्रं पाठचम् ।

८-४-५८ वा प- ८-४-५७ अनु... सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र प्रथमं श्यामपाटचामधो निर्दिष्टरूपेण सूत्रद्वयं लेख्यम् । यथा- (क) (ख) (ग)

८-४-५७ अनुस्वारस्य ययि परसवर्णः ॥ ८-४-५८ वा (ग) पदान्तस्य (क) (ख) ॥ इति । पदान्तस्य=पदस्यान्ते वर्तमानस्य, (क)=अनुस्वरस्य (स्थाने), (ख) ययि= ययि (परे) वा= विभाषया, (ग)= परसवर्णः । किम्+करोषि, त्वम्+ गच्छ, दुग्धम्+ पिब, अहम्+ पठामि, इत्यादिषु ८-३-२ सूत्रसमन्वयश्छात्रै : कारयितव्यः । ततः प्रकृतसूत्रेण परसवर्णे कर्तव्येऽपि ८-४-५७ अनु... सूत्रोदाहरणवत् कार्यो व्यवहारः । अथ- ८-४-६१ झयो... सूत्रं पाठचम् ।

८-४-५९ तोर्लि- ८-४-४४ यरो... सूत्रस्थ-प्रत्य... वार्तिकानन्तरं सूत्रमिदं पाठचम् । अत्र प्रथममधोनिर्दिष्टरूपेण श्यामपाट्यां सूत्राणि लेख्यानि । यथा- (क)

८-४-५७ अनुस्वारस्य ययि परसवर्णः ॥

८-४-५९ तोर्लि (क) ॥ इति । तोः= तवर्गस्य स्थाने, लि=लकारे परे, (क)= परसवर्णः=परसवर्णो भवति । अथ तद्+लयः, विद्वान् + लिखति, इत्यत्र लक्षणसमन्वयक्रमे दृष्टान्त उपस्थाप्यो यथा- कस्मिँश्चिदपि महाविद्यालये विभागा विभिन्ना भवन्ति । तत्रोपस्थितेषु विद्वत्सु व्याकरणविभागे वैयाकरणो न्यायविभागे नैयायिको मीमांसाविभागे मीमांसकोऽधीष्यते= ससत्कारं नियुज्यते; नतु व्याकरणविभागे नैयायिकमीमांसकादयो नापि न्यायःविभागे वैयाकरणमीमांसकादयो नापि मीमांसाविभागे वैयाकरणनैयायिकादयः । तथा प्रकृते ऽपि अननुनासिकवर्ण- स्थाने अननुनासिकलकारो भवति, अनुनासिकवर्ण (नकार) स्थाने अनुनासिक (लँ) वर्णो भवतीति । यथा- तद्+लयः= तल्लयः विद्वान्+ लिखति= विद्वाल्ँ लिखति । विशेषः- लकार एवाऽत्रानुनासिको न तु तत्पूर्वः स्वरः । अतः 'विद्वाँल्लिखति' इति लिपिरशुद्धेति शिक्षकैरुपदेश्यम् । इति हल् – सन्धि- शिक्षणरीतिः । अथाऽच्सन्धि-शिक्षणरीतिः । तत्र प्रथमम् ६-१-७४ इको... सूत्रं पाठचम् ।

८-४-६० उदः=उदः परयोः, स्थास्तम्भोः= स्थाधातोः स्तम्भ् धातोश्च स्थाने, पूर्वस्य=पूर्ववर्णस्य, सवर्णः (८-४-५७)=सवर्णो भवति । उदाहरणयोः १-१-५३ आदेः...सूत्रबलेन सकारस्य स्थाने पूर्वसवर्णे बाह्यप्रयत्नत आन्तरतम्यात् थकारे तस्य च ८-४-६४ झरो...सूत्रेण पाक्षिको लोपः । लोपाभावे थकारस्यैव श्रवणम् पूर्वसर्वणस्याऽसिद्धत्वेन ८-४-५४ खरि.....सूत्राऽप्रवृत्तेः । उत्थ्थानम्, उत्थ्तम्भनम् इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-६१ झयो होऽन्यतरस्याम् ॥ ६२, ६४ ईषद्धास्यम्, ईषद् हास्यम् । अथ बाह्यप्रयत्नाः -खरो विवारा : श्वासा अघोषाश्च । हशः संवारा नादा घोषाश्च । वर्गाणां प्रथम-तृतीय-पञ्चमा यणश्चाल्पप्राणाः । वर्गाणां द्वितीय - चतुर्थौ शलश्च महाप्राणा : ।	अचःसंवारनादघोषाल्पप्राणाः । ८-४-६२ शश्छोऽटि ॥ तच्छ्रुत्वा, तच्श्रुत्वा । (छत्वममीति वाच्यम्) यावच्छ्लोकम्, यावच्श्लोकम् ।

८-४-६१ झयो- ८-४-५८ वा प ......सूत्रानन्तरं सूत्रमिदं पाठचम् । अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

८-४-५७ अनुस्वारस्य ययि पर-सवर्णः ॥ ८-४-६० उदः स्थास्तम्भोः पूर्वस्य ।

८-४-६१ झयो होऽन्यतरस्याम् (ख) (क) ॥ इति । ततः, झयः=झयः परस्य, हः= हकारस्य स्थाने, अन्यतरस्याम्=विकल्पेन [(ख)=पूर्वस्य+(क)=सवर्णः]= (नेपाली भाषायाम्) पूर्वको सवर्ण हुन्छ। (हिन्दी-भाषायाम्) पूर्वका सवर्ण होता है। इति सूत्रार्थ उपदेश्यः। अथ 'ईषद्+हास्यम्'इति श्यामपाट्यां लिखित्वा हकारस्य स्थाने पूर्वसवर्णानाम् (त् थ् द् ध् न्) इत्येतेषां वर्णानां मध्ये कतमो भवेदिति विचारप्रसङ्गे स्थानाभ्यन्तरप्रयत्नाभ्यामनिर्णये सति बाह्यप्रयत्ना उपदेश्याः। तत्र हलां घोषाऽघोषयोरन्यतरस्य, अल्पप्राणमहाप्राणयोरन्यतरस्य च समुदायेन बाह्यप्रयत्नो निर्णीयते। अचां तु स्फुटमेव मूले। अथ क्रमशः तकारो हश् प्रत्याहारेऽस्ति न वेति च्छात्राः प्रष्टव्याः। छात्रेभ्य उत्तरे आगते तकारोपरि। × इदं चिह्नं देयम् । एवं थकारोपरि । अस्मिन् क्रमे दकारो हश्प्रत्याहारेऽस्तीतिछात्रेभ्य उत्तरे आगते महाप्राणेषु दकारोऽस्ति न वेति प्रश्नः कार्यः। छात्रेभ्य उत्तरे आगते दकारोपर्यपि × इदं चिह्नं देयम्। ततो धकारो हश्प्रत्याहारे महाप्राणेषु च वर्तते , इतिच्छात्रेभ्य उत्तरे आगते धकारोपरि √ इदं चिह्नं देयम्। ततः

× × ×√ ×

पूर्वोक्तरीत्या नकारोपरि+इदं चिह्नं देयम्। एवञ्च श्यामपाट्यां त् थ् द् ध् न् इति वर्णा दृश्यन्ते। अतो हकारस्य स्थाने धकारो भवतीत्युपदेश्यम्। ईषद् धास्यम्। विकल्पेन विधानाद् ईषद् हास्यम् इत्यपि सिध्यतीति। अथ ८-४-१ रषा......सूत्रं पाठचम्।

८-४-६२ शश्छो- ८-४-५५ वाऽव.....सूत्रानन्तरं सूत्रमिदं पाठचम्। अत्र श्यामपाटीप्रयोगो यथा-

(क) (ख)

८-४-६१ झयो होऽन्यतरस्याम् ॥ ८-४-६२ (क) शः (ख) छः अटि ॥ इति। अथ तत् तत् पदान्यङ्गुल्या दर्शयता शिक्षकेणाऽधोनिर्दिष्टरूपेणाऽर्थ उपदेश्यः। यथा-(क)=भयः=झयः परस्य शः=शकारस्य स्थाने, (ख)=अन्यतरस्याम्=विकल्पेन, छ :=छकारो भवति, अटि=अटि परे। इति। पदान्तादिति तु साम्प्रतं नोपदेश्यम्। तद्बोधने प्रत्युदाहरणबोधने च साम्प्रतमसुकरत्वात्। द्वितीयावृत्तौ तूपदेश्यमेव। अन्यथा विरप्शम् इत्यादौ दोषः स्यात् । अथ 'तद्+श्रुत्वा'इति श्यामपाट्यां लेखित्वा छात्रैः ८-४-३९ स्तोःश्चु......सूत्रसमन्वयं कारयित्वा तज्+श्रुत्वा इति कारयित्वा छात्रैरेव ८-४-५४ खरि....सूत्रसमन्वयं च कारयित्वा तच्+श्रुत्वा इति कारयित्वा प्रकृतसूत्रसमन्वयक्रमे प्रथमं छात्रा अधोनिर्दिष्टरूपेण बोधयितव्याः। यथा-अयि वत्साः ? झयः परस्य शकारस्य स्थाने छकारो भवतीत्युच्यते, तत्र झयवर्णः कुतोऽपेक्ष्यते ? शकारात् पूर्वतः ? परतो वा ? इति चर्चाप्रसङ्गे यदि शकारात् परतोऽपेक्ष्येत तदा झयः परतः शकारो न भवेत् किन्तु शकारः पूर्वतो भवेत्, अतः शकारात् पूर्वत एव झय् वर्णोऽपेक्ष्यत इति। अथ ते प्रष्टव्याः प्रकृते (तच्+श्रुत्वा इत्यत्र) शकारात् पूर्वतः को वर्णो वर्तते ? इति। यथार्थमुत्तरे प्राप्ते चकारो झय् प्रत्याहारे वर्तते नवेति पुनः प्रश्नःकार्यः। यथार्थमुत्तरे प्राप्ते अतः प्रकृते झयः परः शकारो वर्तते, इति बोधयित्वा शकारात् परतःको वर्णो वर्तते ? इति प्रश्नः कार्यः। समुचितोत्तराऽप्राप्तौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-६३ **हलो** यमां यमि **लोपः** ॥६४
आदित्यः। आदित्य्यः ।
८-४-६४ झरो झरि सवर्णे ॥
रुन्धः,रुन्द्धः ।
८-४-६५ उदात्तादनुदात्तस्य स्वरितः ॥ ६६
गार्ग्यः पठति । अग्निमीले ।
८-४-६६ नोदात्तस्वरितोदयमगार्ग्यकाश्यप-गालवानाम् ।।
गार्ग्यस्तत्र । गार्ग्यः क्व ।

वर्णविच्छेदप्रक्रिया पुनरुद्बोधयितव्या । यथार्थमुत्तरे प्राप्ते च रेफः अट् प्रत्याहारे वर्तते न वेति प्रश्नः कार्यः । यथार्थमुत्तरे प्राप्ते च अतः परतः अट् अस्तीति बोधयित्वा 'तच्छ्रुत्वा' इति रूपं शिक्षयितव्यम् । विकल्पेन विधानात्, 'तच् श्रुत्वा' इत्यपि रूपं साधु भवतीत्यपि बोधनीयम् । एतद्+श्रृणु, लसत्+शय्या, तद्+श्रृणु, सरित्+शुष्यति, तस्मात्+शास्त्रम्, सत्+शिष्यः । इत्यादीन्युदाहरणान्यभ्यासाय कल्प्यानि । तस्मात्+शास्त्रम् इत्यस्योत्तरे प्राप्ते छात्ररुचिवर्धनाय तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ इति गीतोपदेश्या । अथाऽग्रिम (छत्व) वार्तिकं पाठचम् ।
छत्व-८-४-६२ शश्छो...सूत्रानन्तरं वार्तिकमिदं पाठचम् । अत्र वार्तिकार्थोपदेशनात् पूर्वमधस्तनसन्दर्भ उपदेश्यः । यथा अयि वत्साः ? प्रथमं पूर्वसूत्रार्थं स्फुटं बुध्यध्वम्-अर्थात् झयः परस्य तालव्यशकारस्य स्थाने विकल्पेन छकारो भवतीति । किम् अविशेषेण ? नेत्याह-अटि= शकारात् परतः अटि सति, इति । एतत् सूत्रं दृष्ट्वा वार्तिककारः कथयति- 'अटि'इति न 'अमि' इति वाच्यम् इति । अमि इत्युक्तौ यावच्+ श्लोकम् इत्यादौ शकारात् परतो लकारे विद्यमानेऽपि लकारस्य अम्प्रत्याहारघटकत्वेन शकारस्य स्थाने विकल्पेन छकारो भवति । यदि अमि इति नोच्येत तदा तु लकारस्य अट्प्रत्याहारे पाठाऽभावात् पूर्वसूत्रेण शकारस्य स्थाने छकारो न स्यादिति । अर्थात् 'शश्छोऽमि' इति सूत्रं पठनीयमिति वार्तिककाराशयं बोधयित्वा वार्तिकार्थो बोधयितव्यः । यथा- झयः (८-४-६१) शः (८-४-६२) अन्यतरस्याम् (८-४-६१) छत्वम् इति वाच्यम्, अमि= अमि परे । इति । ततो मूलोक्तस्योदाहरणस्य प्रथमा स्थितिः प्रदर्शनीया-यावत्+श्लोकम्, इति । अथ ८-३-२४ नश्चा....सूत्रं पाठचम् ।
८-४-६३ हलो- हलः= हलः परेषाम् **यमाम्**= यम् वर्णानाम्, अन्यतरस्याम् (८-४-६१) लोपः= लोपो भवति, यमि= यम्वर्णे परे । उदाहरणयोः-अदितिशब्दाद् आदित्यशब्दाच्च ८-४-८५ दित्य....इति ण्यः । आद्ये ८-४-४६ अन...सूत्रस्थ.....यणो.....इति वार्तिकेन द्वित्वम् । अत्र दीक्षितः यमां यमीति यथासङ्ख्यविज्ञानान्नेह-माहात्म्यम् । इति ।
८-४-६४ झरो-हलः (८-४-६३) झरः= झर्वर्णस्य, अन्यतरस्याम् (८-४-६१) लोपः (८-४-६३) सवर्णे+झरि= सवर्णे झरि परे । अत्र काशिका-सर्वणग्रहणसामर्थ्यादिह संख्यातानुदेशो न भवति, सवर्णमात्रे लोपो विज्ञायते इति ।
८-४-६५ उदात्तात् = उदात्तात् परस्य, अनुदात्तस्य= अनुदात्तस्य स्थाने, स्वरितः= स्वरित ओदेशो भवति । **गार्ग्यः** ४-१-१०५ गर्गा.....इति यञो ञित्वाद् ६-१-१९२ ञ्नित्या.... इत्याद्युदात्तत्वे ६-१-१५३ अनु.......इति शेषनिघाते तस्य स्वरितः । **पठति** तिप्शपोः पित्वाद् ३-१-४अनु.....इत्यनुदात्तत्वे धातोरकारस्योदात्तत्वे शपोऽकारस्य स्वरितत्वम् । **अग्निमीले-** अग्निशब्दः प्रत्ययस्वरेण घृतादित्वाद् वाऽन्तोदात्तः । अम् सुप्त्वादनुदात्तः । अमि पूर्वरूपे ८-२-५ एकादेश........ इत्येकादेश उदात्तः । ईले इति ८-१-२८ तिङ्ङः..... इति निघातः । तत ईकारस्य प्रकृतसूत्रेण स्वरितः । अस्य स्वरितस्याऽसिद्धत्वेन ६-१-१५३ अनु......इत्यस्याऽप्रवृत्त्या, उदात्तस्वरितावुभौ श्रूयेते ।
८-४-६६ नोदा-उदात्तस्वरितोदयम्= उदात्तपरकस्य स्वरितपरकस्य च, अनुदात्तस्य (८-४-६५) न= स्वरितो न भवति, अगा...वानाम्= गार्ग्य-काश्यप-गालव-भिन्नानामाचार्याणां मते । पूर्वसूत्रेण प्राप्तस्य प्रतिषेधः । अगार्ग्य...इत्युक्तेर्गार्ग्यादि-मते स्वरितो भवत्येव । **गार्ग्यस्तत्र** तत्रशब्दः ५-३-१० सप्त...इति त्रलो लित्वेन ६-१-१८८ लिति...इत्याद्युदात्तः । **क्व** ५-३-१२ किमो...इत्यतस्तित्वेन ६-१-१८० तित्स्व ....इति स्वरितत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८-४-६७ अ अ ॥
परमात्मा ।
कृतिर्हरिप्रसादस्य व्याख्येयं शारदाप्रभा ।
प्रीत्यै स्ताज्जगदम्बायाः सप्ताष्टहायनाकृतेः ॥

इत्यष्टमाध्याये
चतुर्थः पादः
इत्यष्टमोऽध्यायः

८-४-६७ अ अ- अकारो लोकव्यवहारे संवृतः प्रथते। आकारश्च विवृतः। अत आभ्यन्तरप्रयत्नभेदेन सावर्ण्याऽभावादकारस्य आकारस्य च सवर्णदीर्घो न स्यात्। अतः सूत्रकारो भगवान् पाणिनिर्वर्णसमाम्नाये अकारं विवृतमुपदिश्य ग्रन्थान्ते 'अ अ' इति सूत्रमुपदिश्य विवृतस्य अकारस्य स्थाने संवृतं विदधात्यादेशम्। अस्य च सूत्रस्य सम्पूर्णामष्टाध्यायीं प्रत्यसिद्धत्वात् सूत्रान्तराणां दृष्टौ विवृत एव भवतीति अकार आकारश्च सवर्णौ भवतः। परम+आत्मा= परमात्मा। अत्र सूत्रे पठित आद्यः अकारो विवृतःस च उद्देश्यः। द्वितीयः अकारः संवृतः। स च विधेयः। अतः सूत्रार्थं - अ= विवृतस्य अकारस्य स्थाने, अ= संवृतः अकारो भवति। इति फलति। अकारो वासुदेवः, वृद्धिरात् १-१-१= आत्= वासुदेवात् वृद्धिः= जगदुत्पत्तिर्विवर्तरूपा। अ अ ८-४-६७ विवर्तरूपः परमात्मा संवृतः= त्यक्तविवर्तरूपः सम्पद्यते ब्रह्मैव विवर्तरूपं ब्रह्मणि निलीयते। ॐ तत्सत्।

इत्यष्टमाध्याये
चतुर्थः पादः
इत्यष्टमोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुँबन्तप्रकरणम्

अथ २-२-२९ चार्थे द्वन्द्व इति सूत्रानन्तरं पाठचम्, उपजीव्य- वैयाकरणसिद्धान्तकौमुदीकं वर्णसमाम्नायोपदिष्टक्रमानुसार्यकारादिवर्णान्त- प्रातिपदिकप्रकृतिक-सुँबन्तप्रकरणम् ।

करुणामयचिन्मूर्तेः सप्ताष्टहायनाकृतेः ।
रमतां जगदम्बायाः पादपद्मद्वये मनः ॥

तत्रादावजन्तपुंलिङ्गप्रकरणम् । रामः । रामेषु । हे राम । अत्र १-४-१०२ सुँपः- सूत्रादारभ्य प्रक्रिया द्रष्टव्या श्यामशब्दवत् । विशेषः- ८-४-२ अट्कु... रामेण । रामाणाम् । ८-४-३६ पदान्तस्य-रामान् । एवं कृष्णमुकुन्दादयः । **सर्वः । सर्वेषु** । १-१-२६ सर्वादीनि.... सूत्रात् प्रक्रिया द्रष्टव्या । **उभशब्दो** नित्यं द्विवचनान्तः । तस्य सर्वादिगणे पाठोऽकँजर्थः । उभौ२ । उभाभ्याम् ३ । उभयोः २ । **उभयः** । जसि उभयशब्दस्य स्थानिवद्भावेन तयप्प्रत्ययान्ततया १-१-३२ प्रथम... इति विकल्पे प्राप्ते विभक्तिनिरपेक्षत्वेनाऽन्तरङ्गत्वान्नित्यैव संज्ञा भवति-उभये । **पूर्वः । १-१-३३ पूर्वपरा...** -पूर्वे, पूर्वाः । ७-१-१६ **पूर्वादिभ्यो... –** पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे । **स्वः । १-१-३४ स्वमज्ञाति...** -स्वे, स्वाः । **अन्तरः । १-१-३५ अन्तरं...** -अन्तरे, अन्तराः । **सर्वो नाम कश्चित् तस्मै-** १-१-२६ संज्ञोपसर्जन... -सर्वाय देहि । अतिक्रान्तः सर्वमतिसर्वस्तस्मै अतिसर्वाय देहि । **मासपूर्वः । १-१-२९ तृतीयासमासे-** मासपूर्वाय । मासेन पूर्वाय । **वर्णाश्रमेतरशब्दस्य** जसि- १-१-३१ **विभाषा...-** वर्णाश्रमेतरे, वर्णाश्रमेतराः । आमि-१-१-३० **द्वन्द्वे च-** वर्णाश्रमेतराणाम् । **प्रथमः । १-१-३२ प्रथमचरम...** -प्रथमे, प्रथमाः । द्वितयः । द्वितये, द्वितयाः । शेषं श्यामवत् । नेमः । नेमे, नेमाः । शेषं सर्ववत् । **द्वितीयः १-१-३५ तीयस्य...** -द्वितीयस्मै, द्वितीयायेत्यादि । एवं तृतीयः । अर्थवद्ग्रहणान्नेह- पटुजातीयाय । **निर्जरः । ७-२-१०१ जराया...** -निर्जरसौ, निर्जरौ । इनादीन् बाधित्वा परत्वाज्जरस् । निर्जरसा, निर्जरेण । निर्जरसः, निर्जरात् । पक्षे हलादौ च रामवत् । **पादः । पादौ ६-१-६१ पद्दन्नोमास्...** -पदः, पादान् । पदा, पादेन । पद्भ्याम्, पादाभ्याम् । दन्तः । दन्तौ । दतः, दन्तान् । दद्भ्याम्, दन्ताभ्याम् । मासः । मासा, मासेन । माभ्याम्, मासाभ्याम् । यूषः । यूषौ ६-४-१३४ **अल्लोपोऽनः-** यूष्णः, यूषान् । ८-२-७ **नलोपः प्राति...+८-२-२-नलोपः सुँप्स्वर...**-यूषभ्याम्, यूषाभ्याम् । यूषभिः, यूषैः । ६-४-३६ **विभाषा...**- यूष्णि, यूषणि, यूषे । पक्षे रामवत् ।

द्व्यह्नः । ६-३-११० संख्याविसाय... -द्व्यह्नि, द्व्यहनि, द्व्यह्ने । व्यह्नः । व्यह्नि, व्यहनि, व्यह्ने । सायाह्नः । सायाह्नि, सायाहनि, सायाह्ने । इत्यदन्ताः ।

हाहाः । ६-१-१०१ दीर्घाज्जसि च - हाहौ । हाहाः । विश्वपाः । विश्वपौ । विश्वपाः । **६-४-१४० आतो...**-विश्वपः । विश्वपाभ्याम् । इत्यादन्ताः ।

मुनिः । मुनिषु । हे मुने । **अत्र प्रक्रिया ७-३-१०९ जसि च-** सूत्राद् द्रष्टव्या । **सखा । सखिषु । हे सखे । अत्र प्रक्रिया ७-१-९३ अनँङ् सौ-** सूत्राद् द्रष्टव्या । शोभनः सखा-सुसखा । सुसखायौ । सुसखायः । अनँङ्णिद्वद्भावयोराङ्गत्वात् तदन्ते ऽपि प्रवृत्तिः । समुदायस्य सखिरूपत्वाऽभावादसखीति निषेधाऽप्रवृत्तेर्घिसंज्ञा । सुसखिना । सुसखये । सुसखेः । सुसखौ । एवमतिशयितः सखा- अतिसखा । परमः सखा यस्येति विग्रहे परमसखा । परमसखायौ । परमसखाय इत्यादि । गौणत्वे ऽप्यनँङ्णित्त्वे प्रवर्तेते । सखीमतिक्रान्तो ऽतिसखिः । लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्न टच् । मुनिवत् । इहाऽनँङ् णित्त्वे न भवतः । १-२-४८गोस्त्रियो... इति ह्रस्वत्वेन सखिशब्दस्य लाक्षणिकत्वात् । (प.) लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात् । पतिः । पतिषु ।

अत्र प्रक्रिया १-४-८ पतिः... -सूत्रे दृश्या । कतिशब्दो नित्यं बहुवचनान्तः । १-१-२२ बहुगण.... +१-१-२४ डति च+७-१-२२ षड्भ्यो...+ १-१-६० प्रत्ययस्य लुक्...+१-१-६१ प्रत्ययलोपे ... एतेनोपायेनः ७-३-१०९ जसि च - इति प्राप्ते १-१-६२ न लुमताऽङ्गस्य- कति । कति । कतिषु । **त्रयः । त्रिषु । अत्र प्रक्रिया** १-४-८ पतिः समास.... सूत्रावसानाद् द्रष्टव्या । **७-२-१०२ त्यदादीनामः-** द्वौ । द्वाभ्याम् । द्वयोः । संज्ञोपसर्जनविषये तत्रैव द्रष्टव्यम् । **औडुलोमिः । औडुलोमी** । बहुवचने तु ४-१-८५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोम्नोऽपत्येषु... - उडुलोमाः। औडुलोमिम्। औडुलोमी। उडुलोमान्। इतीदन्ताः। **वातप्रमीशब्दः** ४४९ उ. सूत्रेण ईप्रत्ययान्तः। वातप्रमीः। वातप्रम्यौ। वातप्रम्यः। वातप्रमीम्। वातप्रम्यौ। वातप्रमीन्। वातप्रम्या। वातप्रमीभ्याम् ३। वातप्रम्ये। वातप्रम्यः २। वातप्रम्योः २। वातप्रम्याम्। ङौ तु सवर्णदीर्घः- वातप्रमी। वातप्रमीषु। एवं ययी पप्यादयः। ययीपपीशब्दौ ४४७ यापोः... इति उ. सूत्रेण ई प्रत्ययान्तौ। **क्विँबन्तवातप्रमीशब्दस्य तु अमि शसि ङौ च विशेषः।** तत्र हि **६-४-८४ एरनेकाचो...** -इति यण् -वातप्रम्यम्। वातप्रम्यः। वातप्रम्यि।

बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी। दीर्घङ्यन्तत्वाद् **६-१-६६ हल्ङ्या...** इति सुँलोपः।

१-४-३ प्रथमलिङ्ग... इति नदीसंज्ञा। शेषं गौरीशब्दवत्। तत्प्रक्रिया च ७-३-१०६ सम्बुद्धौ च-सूत्राऽवसाने द्रष्टव्या। अङ्यन्तत्वान्न सुँलोपः- अतिलक्ष्मीः। शेषं बहुश्रेयसीवत्। कुमारीमिच्छन् कुमारीवाचन् वा ब्राह्मणः कुमारी। क्यजन्तादाचारक्विँबन्ताद् वा कर्तरि क्विँप्। ६-१-६६ हल्ङ्या... इति सुँलोपः। हे कुमारि। अजादौ- **६-४-७७ अचिश्नु...** इति बाधित्वा **६-४-८२ एरनेकाचो...** -कुमार्यौ। कुमार्यः। कुमार्यम्। कुमार्यौ। कुमार्यः। कुमार्यै। कुमार्याः। परत्वात् ७-१-५४ह्रस्वनद्यापो...- कुमारीणाम्। ङौ- कुमार्याम्। **प्रधीः। प्रागवद् यण्- प्रध्यौ। प्रध्यः।** प्रध्यम्। प्रध्यः। नदीत्वाऽभावान्न नुँट्। **प्रध्याम्।** प्रध्यि। उन्नयतीति उन्नीः। धातुना संयोगस्य विशेषणादिह भवत्येव यण् -उन्न्यौ। उन्न्यः। **७-३-११६ ङेराम्** ... -उन्न्याम्। एवं ग्रामणीः। **शुद्धधीः। ६-४-८२ गतिकारकेतर...** -शुद्धधियौ। शुद्धधियः। दुर्धिय इत्यादौ तु दुःस्थिता धीर्येषामिति विग्रहे दुरित्यस्य धीशब्दं प्रति गतित्वमेव नास्ति। यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा। वृश्चिकभियेत्यादौ वृद्धिकृतमपादानं न विवक्षितम्। वृश्चिकसम्बन्धिनी भीर्वृश्चिकभीरित्युत्तरपदलोपो वा। **सुधीः।** ६-४-८२ **एर... इति यणि प्राप्ते-६-४-८५ न भूसुधियोः-** सुधियौ। सुधियः। **सखायमिच्छति।** ततः क्विँप्। अल्लोपयलोपौ। अल्लोपस्य स्थानिवत्त्वाद् यणि प्राप्ते **१-१-५७ क्वौ लुप्तं न स्थानिवत्।** एकदेशविकृतस्या ऽनन्यतया ऽनँङ्णित्त्वे। सखा। सखायौ। सखायः। हे सखीः। अमि पूर्वरूपात् परत्वाद् यणि प्राप्ते ततोऽपि परत्वात् ७-१-९२ सख्युर... इति णिद्वद्भावाद् ७-२-११५ अचो ञ्णिति इति वृद्धिः। सखायम्। सखायौ। शसि यण् - सख्यः। सह खेन वर्तत इति सखः। सखमिच्छतीति सखीः। सख्यौ। ६-१-१०८ ख्यत्यात्.... - सख्युः। एवं सुखमिच्छतीति सुखीः। सुख्यौ। सुख्युः। सुतमिच्छतीति सुतीः। सुत्यौ। सुत्युः। लूनमिच्छतीति लूनीः। लून्यौ। **निष्ठानत्वस्या** ऽसिद्धत्वात् ६-१-१०८ ख्यत्यात्... इत्युत्वम्- लून्युः। एवं क्षाममिच्छतीति क्षामीः। **प्रस्तीममिच्छतीति** प्रस्तीमीः। निष्ठामत्वस्याऽसिद्धत्वात् प्राग्वदुत्वम्। क्षाम्युः। प्रस्तीम्युः। शुष्कमिच्छतीति शुष्कीयति। ततः क्विँप्। शुष्कीः। ईवर्णस्य संयोगपूर्वकत्वान्न यण्। ६-४-७७ अचि....इतीयँङ्। शुष्कियौ। शुष्कियः। ङसिङसोरपि शुष्कियः। इति ईदन्ताः। **शंभुर्मुनिवत्।** एवं विष्णुवायुभान्वादयः। कोष्टुशब्दस्य सर्वनामस्थाने ७-१-९५ तृज्वत्क्रोष्टुरिति तृज्वद्भावः। सौ- ७-३-११० ऋतो... इति बाधित्वा ७-१-९४ ऋदुशन....+ ६-४-११ अप् तृन्.... - क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। क्रोष्टारम्। क्रोष्टारौ। क्रोष्टून्। ७-१-९७ विभाषा तृतीया... - क्रोष्ट्रा, क्रोष्टुना। क्रोष्ट्रे, क्रोष्टवे। ६-१-१०७ ऋत उत्+ ८-२-२४ रात्सस्य- क्रोष्टुः २। क्रोष्टोः २। आमि परत्वात् तृज्वद्भावे प्राप्ते- १-४-२ नुमचिर...- क्रोष्टूनाम्। क्रोष्टरि, क्रोष्टौ। हे क्रोष्टो। पक्षे हलादौ च शंभुवत्। इत्युदन्ताः। हूहूः। हूह्वौ। हूह्वः। हूहूम्। हूह्वौ। हूहून्। **अतिचमूशब्दे तु नदीकार्यं विशेषः।**

हे अतिचमु। अतिचम्वै। अतिचम्वाः। अतिचमूनाम्। अतिचम्वाम्। **खलपूः। ६-४-८३ ओः सुँपि- खलप्वौ।** खलप्वः। एवं सुल्वादयः। स्वभूः। ६-४-८५ न भूसुधियोः- स्वभुवौ। स्वभुवः। एवं स्वयंभूः। **वर्षाभूः।** ६-४-८४ वर्षाभ्वश्च- वर्षाभ्वौ। वर्षाभ्वः। वर्षाभ्वम्। दृम्भूः (४६ अन्दू दृम्भू... इत्यौणादिककूप्रत्ययान्तः) दृम्भ्वौ। दृम्भ्वः। दृम्भूम्। दृम्भ्वौ। दृम्भून्। शेषं हूहूवत्। दृन्निति नान्ते हिंसार्थे ऽव्यये भुवः क्विँप्। दृन्भूः। ६-४-८४ दृन्कर... - दृन्भ्वौ। दृन्भ्वः। दृन्भ्वम्। दृन्भ्वौ। दृन्भ्वः। खलपूवत्। करभूः। करभ्वौ। करभ्वः। करभ्वम्। दीर्घपाठे तु कर एव कारः। ५-४-३८ प्रज्ञा... इत्यण्। कारभ्वौ। कारभ्वः। पुनर्भूर्यौगिकः पुंसि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनर्भ्वौ। पुनर्भ्व इत्यादि। दृग्भूकाराभूशब्दौ तु स्वभूवत्। दृग्भुवौ। दृग्भुवः। काराभुवौ। काराभुव इत्यादि। इत्यूदन्ताः। **धातृशब्दस्तृजन्तस्तृन्नन्तो वा**। सौ ७-१-९४ ऋदु...-+६-४-११ अप्तृन्... +६-१-६६ हल्ङ्या... +८-२-७ नलोपः... -धाता। सुभिन्ने सर्वनामस्थाने ७-३-११० ऋतो...+ ६-४-११ अप्तृन्...- धातारौ। धातारः। हे धातः। ८-४-१ ऋवर्णाच्चेति... -धातृणाम्। धातरि। उद्गाता। उद्गातारौ। **पितृशब्दः** २६० नप्तृनेष्टृ... इत्युणादिसूत्रेण तृन्नन्तस्तृजन्तो वा। सौ ६-४-८ सर्वनाम... इति दीर्घः। पिता। ६-४-११ अप्तृन्... सूत्रे नप्त्रादिग्रहणस्य व्युत्पत्तिपक्षे उणादिनिष्पन्नानां तृन्तृजन्तानामुपधादीर्घश्चेन्नप्त्रादीनामेवेति नियमार्थत्वान्नप्त्रादौ पाठाभावाच्च न दीर्घः। पितरौ। पितरः। हे पितः। एवं जामातृ-भ्रात्रादयः। नृशब्दः २६५ नयतेर्डिच्चेत्युणादिसूत्रेण ऋप्रत्ययान्तः। ना। नरौ। नरः। हे नः। ६-४-६ नृ च- नृणाम्, नृणाम्। नरि। इति ऋदन्ताः। कृ तृ अनयोरनुकरणे प्रकृतिवदनुकरणमिति वैकल्पिकातिदेशात् [इत्वे रपरत्वम्। कीः (८-२-७६ र्वोरिति दीर्घः) किरौ। किरः। तीः तिरौ तिरः] इत्वाभावपक्षे ७-१-९४ ऋदुशन...+ ७-३-११० ऋतो ङि... इत्यत्र तपरकरणादनँङ्गुणौ न। कृः। क्रौ। क्रः। कृम् क्रौ। कॄन्। तृः। त्रौ। त्रः। तृम्। त्रौ। तॄन्। इत्यादि। इति ऋदन्ताः। **गम्लृ शक्लृ** अनयोरनुकरणे ऽनँङ्। गमा। शका। गुणे लपरत्वम्। गमलौ। शकलौ। पूर्वसवर्णदीर्घे गमॄन्। शकॄन्। ६-१-१०७ ऋत उत् इत्युत्वे लपरत्वे ८-२-२३ संयोगान्तस्य... इति सकारलोपः। गमुल्। शकुल्। इति लृदन्ताः। **सेः। सयौ। सयः**। स्मृतेः। स्मृतयौ। स्मृतयः। इत्येदन्ताः। ७-१-९० **गोतो णित्**+ ७-२-११५ **अचो... -गौः**। गावौ। गावः। अमि-६-१-९० औतोऽम्... -गाम्। गावौ। गाः। ६-१-१०६ ङसिँङसोश्च- गोः २। ७-१-९० ओतो णिदिति... -सुद्यौः। सुद्यावौ। सुद्याम्। स्मृतौः। स्मृतावौ। स्मृताम्। ७-२-८५ **रायो हलि- राः**। रायौ। रायः। रायम्। रायौ। रायः। राभ्यामित्यादि। इत्येदन्ताः। **ग्लौः। ग्लावौ**। ग्लावम्। ग्लौभ्यामित्यादि।

इत्यजन्तपुंलिङ्गप्रकरणम्।

अथाऽजन्तस्त्रीलिङ्गप्रकरणम्।

रमा। रमासु। हे रमे। अत्र ६-१-६७ एङ्ह्रस्वात्...... सूत्रमारभ्य प्रक्रिया द्रष्टव्या कन्याशब्दवत्। एवं दुर्गादयः। **सर्वा। सर्वासु**। अत्र ७-२-१०३ किमः क इत्यतः प्रक्रिया द्रष्टव्या। ७-३-११५ विभाषा द्वितीया..... + १-१-३५ तीयस्य...-द्वितीयस्यै, द्वितीयायै। इत्यादि। एषं तृतीया। **अम्बा**। ७-३-१०७ **अम्बार्थ... -हे अम्ब**। हे अक्क। हे अल्ल। ७-३-१०७ असंयुक्ता... - हे अम्बाडे। हे अम्बाले। हे अम्बिके। **जरा**। ७-२-१०१जराया... इति शीभावात् परत्वाज्जरस्- जरसौ, जरे। आमि नुँटः परत्वाज्जरस् - जरसाम्, जराणाम्। पक्षे हलादौ च कन्यावत्। यद्यपि जरसादेशस्य स्थानिवद्भावेनाबन्तत्तामाश्रित्य ७-१-१८ औङ आपः, ७-३-१०५ आङि चापः, ७-३-११३ याडापः, ७-१-७४ ह्रस्वनद्यापो नुँट्, ७-३-११६ ङेराम्... इति पञ्चापि विधयः प्राप्ताः। एवं नस् निश् पृत्सु। तथाप्यनल्विधावित्युक्तेर्न भवन्ति। आ आबिति प्रश्लिष्य आकाररूपस्यैवाऽऽपः सर्वत्र ग्रहणात्। एवं ६-१-६६ हल्ङ्या... सूत्रे ऽपि आ आप् ङी ई इति प्रश्लेषादतिखष्ट्वः निकोशाम्बिरित्यादिसिद्धेर्दीर्घग्रहणं प्रत्याख्येयम्। न चैवमप्यतिखट्वायेत्यत्र स्वाश्रयमाकारत्वं स्थानिवद्भावेनाप्त्वं चाश्रित्य याट् स्यादिति वाच्यम्, आबन्तं यदङ्गं ततः परस्य याड्विधानात्। उपसर्जनस्त्रीप्रत्यये तदादिनियमात्। नासिका। नासिके। नासिकाः। ६-१-६१ पद्दन्नोमास्...- नसः, नासिकाः। नसा, नासिकया। नोभ्याम्, नासिकाभ्याम्। पक्षे सुँटि च कन्यावत्। निड्भ्याम्, निशाभ्याम्। निड्भिः, निशाभिः। सुपि - ८-३-२९ ङः सि... इति पाक्षिको धुँट् ८-४-५४ खरि च- इति चर्त्वम्। तस्याऽसिद्धत्वात् ८-३-२८ चयो द्वितीयाः... इति न प्रवर्तते। ८-४-४१ न पदान्ताट्टो.... - निट्त्सु, निट्सु। जश्त्वात् पूर्वं ८-३-४१ षढोः कः सि इति तु नेह प्रवर्तते।, जश्त्वं प्रत्यसिद्धत्वात्। केचित्तु ८-२-३६ व्रश्च... सूत्रे ८-२-३२ दादेर्धातोर्घ इति सूत्राद् धातोरित्यनुवर्तयन्ति। तन्मते जश्त्वेन जकारे निज्भ्याम्। निज्भिः। सुपि -

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जश्त्वम्। श्चुत्वम्। चर्त्वम्। निच्शु। ८-२-३० चोः कुरिति कुत्वं तु न भवति, जश्त्वस्याऽसिद्धत्वात्। पृतना। ६-१-६१ मांसपृतना...- पृतः, पृतनाः। पृता, पृतनया। पक्षे सुँटि च कन्यावत्। गोपाः (विँजन्तोऽयम्)। विश्वपावत्। **मतिः।** शसि-मतीः। मत्या। १-४-६ ङिति...- मत्यै, मतये। ङौ- नदीसंज्ञापक्षे ७-३-११६ ङेराम्... + प्र. ७-३-११८ औत् इत्यनयोः प्राप्तौ परत्वादौत्वे प्राप्ते ७-३-११७ इदुभ्याम्-मत्याम्। नदीत्वा ऽभावे मतौ। एवं श्रुतिस्मृत्यादयः।
७-२-१०२ त्यदादी... + ४-१-४ अजाद्य... + ७-१-१८ औङ...-द्वे २। द्वाभ्याम् ३। द्वयोः २। **गौरी। गौरीषु। हे गौरि।** अत्र प्रक्रिया ७-३-१०६ सम्बुद्धौ च- सूत्रावसानाद् द्रष्टव्या। एवं वाणीनद्यादयः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् ७-१-९३ अनँङ् सौ+ ७-१-९२ सख्यु... इत्यनँङ् णिद्वद्भावयोः प्राप्तयोः, विभक्तौ लिङ्गविशिष्टाग्रहणम्- सखी। सख्यौ। सख्यः। इत्यादि। गौरीवत्। **अङ्यन्तत्वान्न सुँलोपः**-लक्ष्मीः। शेषं गौरीवत्। एवं तरीतन्त्र्यादयः। अवी तन्त्री तरी लक्ष्मी धी ह्री श्रीणामुणादिषु। सप्त स्त्रीलिङ्गशब्दानां सुँलोपो न कदाचन ॥ स्त्री। स्त्रीषु। अत्र प्रक्रिया ६-१-१०६ ङसिँङसोश्च- सूत्राऽवसानाद् द्रष्टव्या। **अत्र विशेषः- स्त्रियमतिक्रान्तोऽतिस्त्रिः।**

गुणनाभावौत्वनुँड्भिः परत्वात् पुंसि बाध्यते।
क्लीबे नुँमा च स्त्रीशब्दस्येयँङित्यवधार्यताम् ॥

७-१-१०९ जसि च- अतिस्त्रयः। हे अतिस्त्रे। हे अतिस्त्रियौ। हे अतिस्त्रयः। ६-४-८० वाऽम्शसोः- अतिस्त्रियम्, अतिस्त्रिम्। अतिस्त्रियौ। अतिस्त्रियः, अतिस्त्रीन्। ७-३-११९ आङो ना...- अतिस्त्रिणा। ७-३-१११ घेर्ङिति-अतिस्त्रये। अतिस्त्रेः २। अतिस्त्रियोः २। ७-१-५४ ह्रस्वनद्यापो नुँट्- अतिस्त्रीणाम्। द्वि. ७-३-११८ अच्च घेः- अतिस्त्रौ।

ओस्यौकारे च नित्यं स्यादम्शसोस्तु विभाषया।
इयादेशोऽचि नाऽन्यत्र स्त्रियाः पुंस्युपसर्जने ॥

तथैवोदाहृतानि। **क्लीबे** - अतिस्त्रि। ७-१-७३ इकोऽचि...- अतिस्त्रिणी। अतिस्त्रीणि। अतिस्त्रिणा। ७-१-७४ तृतीयादिषु...- अतिस्त्रये, अतिस्त्रिणे। अतिस्त्रेः२, अतिस्त्रिणः २। अतिस्त्रियोः २, अतिस्त्रिणोरित्यादि। स्त्रियां तु प्रायेण पुंवत्। शसि तु- अतिस्त्रीः। अतिस्त्रिया। १-४-६ ङिति ह्रस्वश्च- इति ह्रस्वान्तत्वप्रयुक्तो विकल्पः। अस्त्रीति तु इयँङुवँङ्स्थानावित्यस्यैव पर्युदासः। तत्सम्बद्धस्यैवाऽनुवृत्तेर्दीर्घस्याऽयं निषेधो न तु ह्रस्वस्य। अतिस्त्रियै, अतिस्त्रये। अतिस्त्रियाः २ अतिस्त्रेः २।
अतिस्त्रीणाम्। अतिस्त्रियाम्, अतिस्त्रौ। **श्रीः। अङ्यन्तत्वान्न सुँलोपः।** अचि श्नु...- श्रियौ। श्रियः। १-४-४ नेयँङुवँङ्... - हे श्रीः। १-४-६ ङिति ह्रस्वश्च- श्रियै, श्रिये। श्रियाः २, श्रियः २। १-४-५ वाऽऽमि- श्रीणाम्, श्रियाम्। श्रियाम्, श्रियि। प्रधीशब्दस्य तु वृत्तिकारादीनां मते लक्ष्मीवद् रूपम्। पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति स्वीकारात्। लिङ्गान्तरानभिधायकत्वं तदिति कैयटमते तु पुंवद् रूपम्। प्रकृष्टा धीरिति विग्रहे तु लक्ष्मीवद् रूपम्। अमि शसि च प्रध्यम्, प्रध्य इति विशेषः। सुष्ठु धीर्यस्याः सुष्ठु ध्यायति वेति विग्रहे वृत्तिमते सुधीः श्रीवत्। मतान्तरे तु पुंवत्। सुष्ठु धीरिति विग्रहे तु श्रीवदेव। ग्रामणीः पुंवत्। ग्रामनयनस्योत्सर्गतः पुंधर्मतया पदान्तरं विना स्त्रियामप्रवृत्तेः। एवं खलपवनादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यम्। **धेनुर्मतिवत्। ७-१-९६ स्त्रियां च+ ४-१-५ ऋन्ने... - क्रोष्ट्री।** क्रोष्ट्र्यौ। क्रोष्ट्र्यः। **वधूर्गौरीवत्।** भ्रूः। हे सुभ्रूः। श्रीवत्। कथं तर्हि हापितः क्वासि हे सुभ्रु ? इति भट्टिः। प्रमाद एवायमिति बहवः। खलपूः। पुंवत्। पुनर्भूः। ६-४-४८ दृन्कर... इति यणा उवँङो बाधात् १-४-४ नेयँङ्... इति निषेधो न- हे पुनर्भु। पुनर्भ्वम्। पुनर्भ्वौ। पुनर्भ्वः। ६-४-४८ दृन्कर.... इति यणं बाधित्वा परत्वात् ७-१-५४ ह्रस्वनद्यापो... इति नुँट् +८-४-१२ एकाजुत्तर... - पुनर्भूणाम्। वर्षाभूः। भेकजातौ नित्यस्त्रीत्वाऽभावात् कैयटमते- हेवर्षाभूः। मतान्तरे तु- हे वर्षाभु। पुनर्नवायां तु हेवर्षाभु। भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान् इति यादवः। वर्षाभ्वौ। वर्षाभ्वः। **४-१-१० न षट्... ६-४-११ अप्तृन्... -स्वसा।** स्वसारौ। स्वसारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुँबन्तप्रकरणम्

स्वस्रादयस्तत्रैव = ४-१-१० न षट्... सूत्रे द्रष्टव्याः । माता । पितृवत् । शसि तु- मातृः । **द्यौर्गोवत् ।** **नौग्लौवत् ।**

इत्यजन्त- स्त्रीलिङ्गप्रकरणम् ।

अथाऽजन्तनपुंसकलिङ्गप्रकरणम् ।

फलम् । फलेषु । अत्र प्रक्रिया ७-१-२० जश्शसोः शि इति सूत्रावसानाद् द्रष्टव्या । एवं धनवनज्ञानादयः । ७-१-२५ अद्ड्.... + ६-४-१४३ टेः- कतरत्, कतरद् । हे कतरत् । कतमत् । अन्यत् । अन्यतरत् । इतरत् । अन्यतमशब्दस्य तु अन्यतममित्येव । ७-१-२५ एकतरात्... -एकतरम् । सौंरमादेशे कृते सन्निपातपरिभाषया न जरस्- अजरम् । अजरसी, अजरे । परत्वाज्जरसि कृते झलन्तत्वात् - ७-१-७२ नपुंसकस्य... इति नुँमि- ६-४-१० सान्तमहतः... - अजरांसि, अजराणि । अमि लुकोऽपवादमम्भावं बाधित्वा परत्वाज्जरस् । ततः सन्निपातपरिभाषयाऽमो न लुक्- अजरसम्, अजरम् । अजरसी, अजरे । अजरांसि, अजराणि । शेषं पुं (निर्जर शब्द) वत् । हृदयम् । हृदये । हृदयानि । हृदयम् । हृदये । ६-१-६१ पद्दन्नोमास्... - हृन्दि, हृदयानि । हृदा, हृदयेन । एवम्-उदकम् । उदानि, उदकानि । आस्यम् । आसानि, आस्यानि । मांसम् । मांसि, मांसानि । संयोगान्तलोपस्याऽसिद्धत्वान्नलोपो न - मान्भ्याम्, मांसाभ्याम् । श्रीपाशब्दो विँजन्तः- १-२-४७ ह्रस्वो नपुं...- श्रीपम् । फलवत् । सन्निपातपरिभाषया ६-४-१४० आतो... इत्याकारलोपो न- श्रीपाय । **७-१-२३ स्वमो**..-वारि २ । ७-१-७३ इकोऽचि... -वारिणी२ । वारीणि२ । १-१-६१ प्रत्यय... इति बलेन ७-३-१०८ ह्रस्वस्य... इति गुणे प्राप्ते १-१-६२ न लुमता... इति निषेधे- हे वारि, न लुमतेत्यस्याऽनित्यत्वात् पक्षे गुणः- हे वारे । ७-३-११९ आङो ना...- वारिणा । नुँमागमात् परत्वात् ७-३-१११ घेर्ङिति इति गुणे प्राप्ते १-४-२ गुणवृद्ध्यौत्व...- वारिणे । वारिणः । वारिणोः । ७-१-५४ ह्रस्व... इति नुँटः पत्वाद् नुँमि प्राप्ते १-४-२ नुँमचिर... -वारीणाम् । वारिणि । वारिणोः । हलादौ मुनिवत् । अनादि । अनादिनी । अनादीनि । हे अनादे, हे अनादि । ७-१-७४ तृतीयादिषु... - अनादये, अनादिने । इत्यादि । शेषं वारिवत् । पीलुर्वृक्षस्तत्फलं पीलु । तस्मै पिलुने । अत्र न पुंवत्, प्रवृत्तिनिमित्तभेदात् । दधि । ७-१-७५ अस्थि दधि...-+-६-४-१३४ अल्लोपोऽनः- दध्ना । ६-४-१३६ विभाषा ङिश्योः- दध्नि, दधनि । शेषँ वारिवत् । एवमस्थिसक्थ्यक्षि । तदन्तस्याऽप्यनँङ्- अनिदध्ना । सुधि । सुधिनी । सुधीनि । हे सुधे, हेसुधि । ७-१-७४ तृतीयादिषु...- सुधिया, सुधिना । प्रधि । प्रध्या, प्रधिना । **मधु । मधुनी ।** मधूनि । हे मधो, हे मधु । एवमम्ब्वादयः । सानु । सानुनी । सानूनि । ६-१-६१ मांसपृतना...- स्नूनि, सानूनि । प्रियक्रोष्टु । प्रियक्रोष्टुनी । १-४-२ गुणवृद्ध्यौत्व... इति तृज्वद्भावात् पूर्वविप्रतिषेधेन नुँम्- प्रियक्रोष्टूनि । टाप्रभृत्यजादौ पक्षे पुंवत्-प्रियक्रोष्ट्रा, प्रियक्रोष्टुना । प्रियक्रोष्ट्रे । प्रियक्रोष्टवे । पुंवद्भावाऽभावे १-४-२ गुणवृद्ध्यौत्व... इति तृज्वद्भावात् पूर्वविप्रतिषेधेन नुँमेव । प्रियक्रोष्टुने ।

१-४-२ नुँमचिर... - प्रियक्रोष्टूनाम् । सुलु । सुलुनी । सुलूनि । हे सुलो, हेसुलु । सुल्वा, सुलुना । **धातृ । धातृणी** । धातृणि । हे धातः, हे धातृ । धात्रा, धातृणा । एवं ज्ञातृकर्त्रादयः । **१-१-४७ एच इग्... प्रद्यु । प्रद्युनी** । प्रद्यूनि । प्रद्युना । प्रद्युने । अत्र न पुंवत् । यदिगन्तं प्रद्यु इति तस्य भाषित-पुंस्कत्वाऽभावात् । एवमग्रेऽपि । **प्ररि । प्ररिणी** । प्ररीणि । प्ररिणा । एकदेशविकृतस्याऽनन्यत्वाद् ७-२-८५ रायो.... - प्राराभ्याम् । प्रराभिः । प्ररीणाम् । **सुनु । सुनुनी** । सुनूनि । सुनुना । सुनुने । **इत्यजन्तनपुंसकलिङ्गप्रकरणम् ॥**

अथ हलन्तपुंलिङ्गप्रकरणम् ।

लिह् शब्दः क्विँप्प्रत्ययान्तः । ततः सुँप्रत्यये ६-१-६६ हल्ङ्या... + १-१-६१ प्रत्ययलोपे...+ १-४-१४ सुँप्तिङन्तं.... +८-२-३१ हो ढः +८-२-३९ झलां.... +८-४-५५ वाऽवसाने- लिट्, लिड् । लिहौ । लिहः । लिड्भ्याम् । ८-३-२९ डः सि... - लिट्त्सु, लिट्सु । दुह् शब्दोऽपि क्विँबन्तः । ८-२-३२ दादे... +८-२-३७ एकाचो बशो...- धुक्, धुग् । दुहौ । दुहः । धुग्भ्याम् । षत्वचर्त्वे - धुक्षु । ८-२-३३ वा द्रुह... - ध्रुक्, ध्रुग् ध्रुट्, ध्रुड् । द्रुहौ । द्रुहः । ध्रुग्भ्याम्, ध्रुड्भ्याम् । ध्रुक्षु, ध्रुट्त्सु, ध्रुट्सु । मुक्, मुग्, मुट्, मुड् । मुग्भ्याम्, मुड्भ्याम् । मुक्षु, मुट्त्सु, मुट्सु । एवं ष्णुह् ष्णिहोः । विश्ववाट्, विश्ववाड् । विश्ववाहौ । विश्ववाहः । विश्ववाहम् । विश्ववाहौ । ६-४-१३२ वाह ऊठ् +६-१-१०४ सम्प्रसारणाच्च+

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६-१-८६ एत्येधत्यूठ्सु- विश्वौहः । विश्वौहा । विश्ववाड्भ्याम् । विश्ववाट्त्सु, विश्ववाट्सु । ७-१-९८ चतुरन...+७-१-८२ सावनडुहः- अनड्वान् । अनड्वाहौ । अनड्वाहः । ७-१-९९ अम् सम्बुद्धौ- हे अनड्वन् । ८-२-७२ वसुँ स्रंसुँ...- अनडुद्भ्याम् । ८-३-५६ सहेः साडः सः- तुराषाट्, तुराषाड् । तुरासाहौ । तुराषाड्भ्याम् । इत्यादि । **७-१-८४ दिव औत्-सुद्यौः** । सुदिवौ । सुदिवः । सुदिवम् । ६-१-१२७ दिव उत्- सुद्युभ्यामित्यादि **७-१-९८ चतुरन...- चत्वारः** । चतुरः । चतुर्भिः । चतुर्भ्यः । ७-१-५५ षट् चतुर्भ्यश्च- चतुर्णाम् । ८-४-४५ अचो रहा...- चतुर्ण्णाम् । ८-३-१६ रोः सुपि + ८-४-४८ शरोऽचि- चतुर्षु । प्रियचत्वाः । हे प्रियचत्वः । प्रियचत्वारौ । प्रियचत्वारः । गौणत्वे तु नुँड् नेष्यते- प्रियचतुराम् । प्राधान्ये तु भवत्येव- परमचतुर्णाम् । **कुमलं कमलां वा आचक्षाणः- कमल्** । कमलौ । षत्वम्- कमल्षु । **प्रशाम्यतीति क्विँप् ८-२-६४ मो नोँ :.धातोः- नत्वस्याऽसिद्धत्वान्नलोपो न -प्रशान्** । प्रशामौ । प्रशामः । प्रशान्भ्यामित्यादि । ७-२-१०३ **किमः कः - कः । कौ । के** । सर्ववत् । **अथेदंशब्दस्य प्रक्रिया-** १-१-६२ न लुमताङ्गस्य- सूत्रावसानाद् द्रष्टव्या । तत्र विशेषः- २-४-३४ द्वितीयाटौस्स्वेनः । एनम् । एनौ । एनान् । एनेन । एनयोः । **गण (१८५३) यतेर्विंच्- सुगण् । सुगणौ** । सुगण्ठ्सु, सुगण्ट्सु, सुगण्सु । क्विँपि तु ६-४-१५ अनुनासिकस्य... इति दीर्घः- सुगाण् । शेषं प्रागवत् । **अथ राजन्शब्दस्य प्रक्रिया-** ८-२-३० चोः कुः- इति सूत्रावसानाद् द्रष्टव्या । तत्र ८-२-१ पूर्वत्रा... सूत्रप्रसङ्गे ८-२-२ नलोपः सुँप्स्वर... सूत्रमप्यवधेयम् । प्रदिदिवञ् (न्) शब्दः (१६२ कनिँन् यु......इत्यौणादिकसूत्रेण) कनिँन् प्रत्ययान्तः । प्रतिदिवा । प्रतिदिवानौ । भसंज्ञायामल्लोपे सति -८-२-७७ हलि च- प्रतिदीव्नः । प्रतिदीव्नेत्यादि । यज्वा । यज्वानौ । यज्वानः । ६-४-१३७ न संयोगाद्... - यज्वनः । यज्वना । यज्वभ्याम् । ब्रह्मा । ब्रह्माणौ । ब्रह्माणः । ब्रह्माणम् । ब्रह्माणौ । ब्रह्मणः । ब्रह्मणा । ब्रह्मभ्यामित्यादि । ६-४-१३ सौ च- वृत्रहा । ६-४-१२ इन् हन्... + ८-४-१२ एकाजुत्तरपदे णः- वृत्रहणौ । वृत्रहणः । वृत्रहणम् । वृत्रहणौ । ७-३-५४ हो हन्ते.......-वृत्रघ्नः । वृत्रघ्ना । एवं शार्ङ्गिन्यशस्विन्नर्यमन्पूषन् । यशस्विन्नित्यत्र विनिँप्रत्ययो इनोऽनर्थकत्वेऽपि 'अनिनस्मन्निति परिभाषया' ६-४-१२ इन्हन्.... इत्यत्र तस्य ग्रहणं भवत्येव- यशस्वी । यशस्विनौ । इत्यादि । ६-४-१२८ मघवा... + ७-१-७० उगिदचां.... - मघवान् । मघवन्तौ । मघवन्तः । मघवन्तम् । मघवन्तौ । मघवतः । मघवता । मघवद्भ्याम् इत्यादि । तृँभावाऽभावे मघवा । मघवानौ । मघवानः । मघवानम् । मघवानौ । ६-४-१३३ श्वयुवमघोना...+ ६-१-१०४ सम्प्रसारणाच्च + ६-१-८४ आद् गुणः - मघोनः । मघोना । मघवभ्यामित्यादि । श्वा । श्वानौ । श्वानः । श्वानम् । श्वानौ । शुनः । शुना । श्वभ्यामित्यादि । युवा । युवानौ । भविषये- ६-१-३६ न सम्प्रसारणे...- यूनः । यूना । युवभ्यामित्यादि ।

अर्वा । हे अर्वन् । ६-४-१२७ अर्वणस्त्रसा...- अर्वन्तौ । अर्वन्तः । अर्वन्तम् । अर्वन्तौ । अर्वतः । अर्वता । अर्वद्भ्यामित्यादि । ७-१-८५ पथिमथ्यृ...+ ७-१-८६ इतोऽत्.... + ७-१-८७ थो न्थः- पन्थाः । पन्थानौ । पन्थानः । पन्थानम् । पन्थानौ । ७-१-८८ भस्य टेर्लोपः- पथः । पथा । पथिभ्यामित्यादि । एवं मन्थाः । ऋभुक्षाः । १-१-२३ ष्णान्ता षट्+ ७-१-२२ षड्भ्यो लुक्- पञ्च । शतानि सहस्राणीत्यादौ सन्निपातपरिभाषया न लुक् । पञ्चभिः ।

७-१-५५ षट्चतुर्भ्यश्च + ६-४-७ नोपधायाः- पञ्चानाम् । पञ्चसु । परमपञ्च । परमपञ्चानाम् । गौणत्वे तु लुग्नुँटौ न - प्रियपञ्चा । प्रियपञ्चानौ । प्रियपञ्चानः । प्रियपञ्चाम् । एवं सप्तन् नवन् । दशन् । ७-२-८४ अष्टन आ...+ ७-१-२१ अष्टाभ्य औश्-अष्टौ । अष्टाभिः । अष्टाभ्यः । अष्टानाम् । अष्टासु । आत्वाऽभावे- अष्ट २ । पञ्चवत् । प्रियाष्टा । प्रियाष्टानौ । जश्शसोरनुमीयमानमात्वं प्राधान्य एव, न तु गौणतायाम् । प्रियाष्टानः । भविषये- ६-४-१३४ अल्लोपोऽनः + १-१-५६ अचः परस्मिन्... सूत्रे पूर्वविधावित्यत्र पूर्वस्माद् विधिरिति पञ्चमीसमासस्वीकारे स्थानिवद्भावान्न ष्टुत्वम् + कार्यकालपक्षे बहिरङ्गस्याऽल्लोपस्याऽसिद्धत्वाद् वा- प्रियाष्ट्नः । प्रियाष्ट्ना । प्रियाष्ट्नाम् । प्रियाष्ट्नो राजवत् सर्वं हाहावच्चापरं हलि । **८-२-३७ एकाचो बशो ... + ८-२-३९ झलां...+८-४-५५ वाऽवसाने-भुत्, भुद्** । बुधौ । बुधः । बुधा । भुद्भ्याम् । भुत्सु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुँबन्तप्रकरणम्

३-२-६१ **ऋत्विग्दधृक्....** - ऋतु + यज्+व् ६-१-१५ वचिस्वपि... - ऋत्विज् + व् ३-१-९३ कृदतिङ् + ६-१-६५ वेँरपृक्तस्य + १-१-६१ प्रत्ययलोपे...+ कृत्तद्धित...- इति प्रातिपदिकसंज्ञायाम् - ऋत्विज् इत्यतः सुँप्रत्यये हल्ङ्यादिलोपे प्रत्ययलक्षणेन पदसंज्ञायाम् ८-२-३६ व्रश्च भ्रस्ज.... सूत्रे सृजमृजयजेति विशिष्य ग्रहणात् षत्वं कुत्वाऽपवाद इति मते ३-२-६१ सूत्रे ऋत्विगिति निपातनात् कुत्वम् । षत्वं कुत्वापवादो नेति मते षत्वं जश्त्वं ८-२-६२ क्विँन्प्र....इति कुत्वम् । ऋत्विक्, ऋत्विग् । एवं स्रक्शब्देऽपि बोध्यम् । असृक्शब्दस्तु आद्यमते- अस्यतेरौणादिके ऋच्प्रत्यये बोध्यः । मतान्तरे तु सृजेः क्विँनो विधानात् असृजः पदान्ते षत्वं जश्त्वं कुत्वम् ।८-२-६२ क्विँन्प्रत्ययस्य इत्यत्र क्विँन् प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणात् । देव+यज्+ क्विँप् -देवेट् , देवेड् । देवेड्भ्याम् । विश्वसृड्, विश्वसृड्भ्यामित्यादौ तु ६-१-५७ सृजिदृशो... सूत्रे रज्जुसृड्भ्यामिति भाष्यप्रयोगदर्शनेन अनव्ययपूर्वपदे कुत्वाऽभावबोधनान्न कुत्वम् । ऋत्विजौ । ऋत्विजः । ऋत्विभ्याम् । इत्यादि । ७-१-७१ युजेरसमासे + ८-२-६२ क्विँन्प्रत्ययस्य कुः- युङ् । युञ्जौ । युञ्जः । युजा । युग्भ्याम् । इत्यादि । खजिँ (२३३)+ क्विँप् । ततः सुँप्रत्यये हल्ङ्यादिलोपे संयोगान्तलोपः - खन् । खञ्जौ । खञ्ज इत्यादि । ८-२-३६ व्रश्च भ्रस्ज....- राट्, राड् । राजौ । राजः । राट्त्सु, राट्सु । एवं विभ्राट् । परिमृट्, परिमृड् । परिमृजौ । २२७ उ. परौ व्रजेः....- परिव्राट्, परिव्राड् । परिव्राजौ । परिव्राड्भ्यामित्यादि । ६-३-१२८ विश्वस्य.... - विश्वाराट् । विश्वाराड् । विश्वराजौ । विश्वाराड्भ्यामित्यादि । भ्रस्ज्+क्विँप् ६-१-१६ ग्रहिज्या... - ततः सौ हल्ङ्यादिलोपे ८-२-२३ संयोगान्तस्य.... इति लोपं बाधित्वा ८-२-२९ स्कोः संयोगाद्यो...- भृज् इति जाते ८-२-३६ व्रश्चः... + ८-२-३९ झलां जशोऽन्ते + ८-४-५५ वाऽवसाने- भृट्, भृड् । शकारस्य श्चुत्वेन शकारः । तस्य ८-४-५२ झलां जश्.... -भृज्जौ । भृज्जः । ८-२-२४ रात्सस्य- इति नियमान्न संयोगान्तलोपः- ऊर्क्, उर्ग् । ऊर्जौ । ऊर्जः । ऊर्ग्भ्यामित्यादि ।

७-२-१०२ **त्यदादीनामः** + ७-२-१०६ **तदोः सँः सा... -स्यः । त्यौ । त्ये** । त्यम् । त्यौ । त्यान् । सः । तौ । ते । परमसः । परमतौ । परमते । द्विपर्यन्तानामित्येव । नेह- त्वम् । संज्ञायां गौणे चात्वसत्वे न । त्यद् । त्यदौ । त्यदः । अतित्यद् । अतित्यदौ । अतित्यदः । यः । यौ । ये । एषः । एतौ । एते । एतम् । एतौ । एतान् । अन्वादेशे तु- २-४-३४ द्वितीया... - एनम् । एनौ । एनान् । एनेन । एनयोः ।

युष्मदस्मच्छब्दयोः प्रक्रिया ८-२-३ न मुने- सूत्राद् द्रष्टव्या । ततो बांनावादय आदेशाश्च ८-१-२० युष्मदस्मदोः - इति सूत्राद् द्रष्टव्या । **सुपात्, सुपाद्** । सुपादौ, सुपादः । सुपादम् । सुपादौ । ६-४-१३० पादः: पत्- सुपदः । सुपदा । सुपाद्भ्यामित्यादि । प्र+अञ्च् इत्यतः ३-२-५९ ऋत्विग्दधृक्... -क्विँन्+ ६-४-२४ अनिँदितां...+६-१-६५ वेँरपृक्तस्य +ततः सुँप्रत्यये ७-१-७० उगिदचां... + ६-१-६६ हल्ङ्या..+ ८-२-२३ संयोगान्तस्य...+ ८-२-६२ क्विँन्प्रत्ययस्य कुः - प्राङ् । शेषसर्वनामस्थाने ऽपि हल्ङ्यादिलोपसंयोगान्तलोपवर्जं प्रागवत् । प्राञ्चौ । प्राञ्चः । प्राञ्चम् । प्राञ्चौ । भविषये- अकृतव्यूहाः पाणिनीयाः= निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्ति । अतः सन्धिरहितादेव (प्र+अच्, प्रति+अच् इत्यादित एव) शसादिप्रत्यये ६-४-१३८ अचः + ६-३-१३८ चौ- प्राचः । प्राचा । प्राग्भ्याम् । प्राक्षु । प्रत्यङ् । प्रत्यञ्चौ । प्रत्यञ्चः । प्रत्यञ्चम् । प्रत्यञ्चौ । प्रतीचः । प्रतीचा । प्रत्यग्भ्याम् । प्रत्यक्षु । उदङ् । उदञ्चौ । उदञ्चः । उदञ्चम् । उदञ्चौ । भविषये-

६-४-१३९ उद ईत्- उदीचः । उदीचा ।

उदग्भ्याम् । उदक्षु । ६-३-९३ समः समि- सम्यङ् । सम्यञ्चौ । सम्यञ्चः । समीचः । समीचा । सम्यग्भ्याम् । सम्यक्षु । ६-३-९५ सहस्य सध्रिः- सध्र्यङ् । सध्रीचः । सध्र्यग्भ्याम् । सध्र्यक्षु । ६-३-९४ तिरसस्तिर्य- तिर्यङ् । तिर्यञ्चौ । तिर्यञ्चः । तिर्यञ्चम् । तिर्यञ्चौ । तिरश्चः । तिरश्चा । तिर्यग्भ्याम् । तिर्यक्षु । ६-४-३० नाऽञ्चे-..... प्राङ् । प्राञ्चौ । प्राञ्चः । प्राञ्चम् । प्राञ्चौ । प्राञ्चः । प्राञ्चा ।

संयोगान्तलोपे ८-२-६२ क्विँन्प्रत्ययस्य कुः- प्राङ्भ्याम् । ८-३-२८ ङ्णोः...- प्राङ्ख्षु, प्राङ्क्षु, प्राङ्षु । एवं पूजार्थे प्रत्यङ्ङादयः । ८-२-३० **चोः कुः - पयोमुक् , पयोमुग्** । पयोमुचौ । पयोमुचः । पयोमुग्भ्याम् ।

पयोमुक्षु । सु+ व्रश्च्+क्विँप् ६-१-१६ ग्रहि.... - सुवृश्च् । ततः सुँप्रत्यये हल्ङ्यादिलोपे संगोन्तलोपं बाधित्वा ८-२-२९ स्कोः संयोगाद्यो... + ८-२-३६ व्रश्च भ्रस्ज... + जश्त्वचर्त्वे -सुवृट्, सुवृड् । सुवृश्चौ । सुवृश्चः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुवृद्त्सु, सुवृद्सु। महच्छब्दः २५० वर्तमाने... इत्यौणादिकातिँप्रत्ययान्तः। शतृँवद्भावेनोगित्त्वात् सर्वनामस्थाने ७-१-७० उचिदचां ...+६-४-१० सान्तमहतः ...+ हल्ङ्यादिलोपसंयोगान्तलोपौ। संयोगान्तलोपस्याऽसिद्धत्वात् ८-२-७ नलोपः प्राति... इति नलोपो न - महान्। महान्तौ। महान्तः। हे महन्। महतः। महता। महद्भ्यामित्यादि। धीमच्छब्दो मतुँप्प्रत्ययान्तः। परं नित्यं च नुँमं बाधित्वा ६-४-१४ अत्वसन्तस्य... इति वचनसामर्थ्यादादौ दीर्घस्ततो नुँम् -धीमान्। ७-१-७० उगिदचां... सूत्रे अज्ग्रहणस्य धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियमार्थत्वेन स्रंसुँध्वंसुँ= स्रंस् ध्वंस् धातुभ्यां क्विँपि स्रत्। ध्वत्। इत्यादौ न नुँम्। तत्र सूत्रे अधातोरिति तु अधातुभूतपूर्वस्यापि नुँमर्थम्। तेन गोमन्तमिच्छति, गोमानिवाचरतीति वेति विग्रहे क्यजन्तादाचारक्विँबन्ताद् वा कर्तरि क्विँपि भवत्येव नुँम् -गोमान्। गोमन्तौ गोमन्त इत्यादि। भातेरौणादिके डवतुँप्रत्यये निष्पन्नस्य भवच्छब्दस्य- भवान्। भवन्तौ। भवन्तः। हे भवन्। शत्रन्तभवच्छब्दस्य त्वत्वन्तत्वा ऽभावान्न दीर्घः- भवन्। ६-१-५ उभे...+ ७-१-७८ नाऽभ्यस्ता... - ददत्, ददद्। ददतौ। ददतः।

६-१-६ जक्षि... -जक्षत्,जक्षद्। जक्षतौ। जक्षतः। एवम्- जाग्रत्। दरिद्रत्। शासत्। चकासत्। दीधीवेव्योर्ङित्त्वेऽपि। छान्दसत्वाद् व्यत्ययेन परस्मैपदम्। दीध्यत्। वेव्यत्। **गुप्, गुब्**। गुपौ। गुपः। गुब्भ्यामित्यादि। **३-२-६० त्यदादिषु...+** ६-३-९१आ सर्वनाम्नः + ८-२-३६ व्रश्च... +८-२-३९ झलां...+ ८-२-६२ क्विन्प्रत्य... +८-४-५५ वाऽवसाने- **तादृक्, तादृग्**। तादृशौ। तादृशः। तादृग्भ्यामित्यादि।

विश् (१४२०) + क्विँप् ८-२-३६ व्रश्च...+ ८-२-३९ झलां....+ ८-४-५५ वाऽवसाने- विट्, विड्। विशौ। विशः। विड्भ्यामित्यादि। ८-२-६३ नशेर्वा- नक्, नग्, नट्, नड्। नशौ। नशः। नग्भ्याम्, नड्भ्यामित्यादि। ३-२-५८ स्पृशोऽनुदके.... - घृतस्पृक्, घृतस्पृग्। घृतस्पृशौ। घृतस्पृशः। घृतस्पृग्भ्याम्। घृतस्पृक्षु। ८-२-६२ क्विँन्प्रत्ययस्य... इत्यस्य क्विँन्प्रत्ययो यस्मादित्युक्तम्। तेन क्विँप्यपि कुत्वम्- स्पृक्, स्पृग्। स्पृशौ। स्पृशः। स्पृग्भ्याम्। **३-२-५९ ऋत्विग्... इत्यत्र निपातितो दधृष् शब्दः**। ततः सुँप्रत्यये हल्ङ्यादिलोपे च प्रत्ययलक्षणेन पदान्तत्वात् षकारस्य जश्त्वेन डकारस्ततः ८-२-६२ क्विँन्प्रत्ययस्य कुः + ८-४-५५ वाऽवसाने- दधृक्, दधृग्। दधृषौ। दधृग्भ्यामित्यादि। रत्नमुष्शब्दः क्विँबन्तः। जश्त्वचर्त्वे- रत्नमुट्, रत्नमुड्। रत्नमुषौ। रत्नमुड्भ्यामित्यादि। १-२-२३ ष्णान्ता षट् +७-१-२२ षड्भ्यो लुक्- षट्, षड्। षड्भिः। षड्भ्यः। आमि-७-१-५५ षट्चतुर्भ्यश्च+ ८-२-३९ झलां.... -षड्नाम् -८-४-४० ष्टुना... -षड्णाम्- ८-४-४१ न पदान्ता... इति निषेधस्तु न शङ्क्यः, तत्रैव अनामिति पर्युदासात्, ततः ८-४-४४ प्रत्यये... इति नित्यमनुनासिकः- षण्णाम्। षट्त्सु, षट्सु। परमषट्। परमषण्णाम्। गौणत्वे तु लुग्नुँटौ न- प्रियषषः। प्रियषषाम्। ८-२-६६ ससजुषोरुँरिति रुँत्वं प्रति ८-३-५९ आदेश... इति षत्वस्या ऽसिद्धत्वात् ससजुषो रुँरिति रुँत्वम् +८-२-७६ र्वोरुपधाया... -पिपठीः। पिपठिषौ। पिपठिषः। पिपठिषा। पिपठीर्भ्याम्। ८-३-३६ वा शरि+८-३-५८ नुँम्विसर्जनीय... इति षत्वम् +पूर्वस्य ष्टुत्वेन षः- पिपठीःषु, पिपठीष्षु। ८-२-२४ रात् सस्य इति सलोपे, विसर्गः - चिकीः। चिकीर्षौ। चिकीर्षः। चिकीर्भ्याम्। ८-३-१६ रोः सुपि- चिकीर्षु। दोष्शब्दो दमेर्डोस्प्रत्यये सिध्यति। प्राग्वत् षत्वस्याऽसिद्धत्वाद् रुँत्वविसर्गौ- दोः। दोषौ। दोषः। दोषम्। दोषौ। ६-१-६१ पदन्नोमास्... - दोष्णः। दोष्णा। सन्नन्ताद् विश् (१४२३) धातोः क्विँपि कत्वस्या ऽसिद्धत्वात् संयोगान्तलोपः +८-२-३६ व्रश्च... +जश्त्वचर्त्वे- विविट्, विविड्। विविक्षौ। विविक्षः। ८-२-२९ स्कोः संयोगाद्योः... इति कलोपः - तट्, तड्। तक्षौ। तक्षः। तड्भ्यामित्यादि। गोरट्, गोरड्। गोरक्षौ। गोरक्षः। गोरड्भ्यामित्यादि। ण्यन्ताभ्यां तक्षिरक्षिभ्यां क्विँपि तु ८-२-२९ स्कोः संयोगाद्यो... इति न प्रवर्तते, णिलोपस्य स्थानिवद्भावात्। १-१-५७ पूर्वत्रासिद्धीये... इत्यस्य तु नेह प्रवृत्तिः १-१-५७ तस्य दोषः ... इति निषेधात्।

तक्, तग्। गोरक्, गोरग्। ८-२-२९ स्कोः संयोगाद्यो... इति कलोपम्प्रति ८-२-३० चोः कुः इति कुत्वस्याऽसिद्धत्वात् ८-२-२३ संयोगान्तस्य लोपः। पिपक्, पिपग्। एवम्- विवक्। दिधक्। **सुपिश्**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुँबन्तप्रकरणम्

(स्)शब्दः क्विँबन्तः। ८-२-७६ र्वोरुपधाया... - सुपीः। सुपिसौ। सुपिसः। सुपिसा। सुपीर्भ्याम्। सुपीःषु, सुपीष्षु। एवं क्विँबन्त- सुतुश(स्) शब्दस्य सुतूः। सुतुसौ। सुतूर्भ्याम्। सुतूःषु, सुतूष्षु। **विद्वश् (स्) शब्दो वस्वन्तः। विद्वान्। हे विद्वन्।**
विद्वांसौ। विद्वांसः। ६-४-१३१ **वसोः सम्प्रसारणम्-** विदुषः। विदुषा। ८-२-७२ वसुँ स्रंसुँ...- विद्वद्भ्याम्। विद्वत्सु। सेदिवान्। सेदिवांसौ। सेदिवांसः। सेदिवांसम्। सेदिवांसौ। अकृतव्यूहपरिभाषया नेट्- सेदुषः। सेदुषा। सेदिवद्भ्याम्। ६-४-१० सान्तमहतः... इत्यत्र सान्तसंयोगोऽपि प्रातिपदिकस्यैव गृह्यते, न तु धातोः, महच्छब्दसाहचर्यात्। सुष्ठु हिनस्तीति- सुहिन्। सुहिंसौ। सुहिंसः। सुहिन्भ्याभ्। सुहिन्त्सु, सुहिन्सु। ८-२-७२ वसुँस्रंसुँ...- ध्वत्, ध्वद्। ध्वसौ। ध्वसः। ध्वसा। ध्वद्भ्याम्। एवं स्रत्। पुं (स्) शब्दः ६२७ पातेर्डुंसुँन् इत्यौणादिकसूत्रेण डुंसुँन् प्रत्यये निष्पन्नः +७-१-८९ पुंसोऽसुँङ्- पुमान्। हे पुमन्। पुमांसौ। पुमांसः। पुंसा। पुंभ्याम्। पुंसु। ७-१-९४ ऋदुशनस्...-उशना। उशनसौ। उशनसः। (अस्य सम्बुद्धौ वाऽनँङ् नलोपश्च वा वाच्यः) हे उशन, हे उशनन्, हे उशनः। उशनोभ्यामित्यादि। अनेहा। हे अनेहः। अनेहसौ। अनेहसः। अनेहोभ्याम्। अनेहःसु, अनेहस्सु। ६-४-१४ अत्वसन्तस्य... - वेधाः। हे वेधः। वेधसौ। वेधसः। वेधोभ्याम्। वेधःसु, वेधस्सु ६-४-१४ अत्वसन्तस्य... इत्यत्र अधातोरित्युक्तेर्नेह दीर्घः - सुष्ठु वस्ते- सुवः। सुवसौ। सुवसः। पिण्डं ग्रसते पिण्डग्रः। एवं पिण्डग्लः। **अदश् (स्) शब्दस्य प्रक्रिया** ८-२-३ न मु ने - सूत्राद् द्रष्टव्या। **इति हलन्तपुंलिङ्गप्रकरणम्।**

अथ हलन्तस्त्रीलिङ्गप्रकरणम् ६-३-११६ नहिवृति... + ८-२-३४ नहो धः- **उपानत्, उपानद्।** उपानहौ। उपानहः। उपानद्भ्याम्। उपानत्सु। ३-२-५९ ऋत्विग् दधृक् +८-२-६२ क्विन्प्रत्ययस्य कुः- उष्णिक्, उष्णिग्। उष्णिहौ। उष्णिहः। उष्णिग्भ्याम्। उष्णिक्षु। **७-१-८४ दिव औत्- द्यौः। दिवौ। दिवः।** ६-१-१२७ दिव उत्-द्युभ्याम्। द्युषु। ८-२-७६ **र्वोरुपधाया... -गीः। गिरौ।** गिरः। गीर्भ्याम्। ८-३-१६ रोः सुपि-गीर्षु। एवं पूः। पुरौ। पूर्भ्याम्। पूर्षु। ७-२-९९ त्रिचतुरो...- चतस्रः। **६-४-४ न तिसृचतसृ- चतसृणाम्।** चतसृषु। ७-२-१०३ **किमः कः + ४-१-४ अजाद्यतष्टाप् - का के काः।** सर्वावत्। **इदंशब्दस्य प्रक्रिया** ७-१-११ नेदमदसोः... सूत्राद् द्रष्टव्या। अन्वादेशे-एनाम्। एने। एनाः। एनया। एनयोः २। **७-२-५९ ऋत्विग्दधृक्... - स्रक्, स्रग्।** स्रजौ। स्रजः। स्रग्भ्याम्। स्रक्षु। ७-२-१०२ त्यदादीनामः +४-१-४ अजाद्यतष्टाप् + ७-२-१०६ तदोः सः सा... - स्या। त्ये। त्याः। सा। ते। ताः। या। ये। याः। ८-३-५९ आदेशप्रत्यययोः- एषा। एते। एताः। **८-२-३० चोः कुः- वाक्, वाग्!** वाचौ। वाचः। वाचा। वाग्भ्याम्। वाक्षु। **अप्शब्दो नित्यं बहुवचनान्तः।** ६-४-११ अप्तृन्तृच्...- आपः। अपः। ७-४-४८ अपो भि-अद्भिः। अद्भ्यः २। अपाम्। अप्सु। **३-२-५९ ऋत्विग् दधृक्...+ क्विँन्प्रत्ययस्य कुः- दिक्, दिग्।** दिशौ। दिशः। दिग्भ्याम्। दिक्षु। ३-२-६० त्यदादिषु... इति क्विँनो विधानात्। ८-२-६२ क्विँन्प्रत्ययस्य इत्यस्य च बहुव्रीह्याश्रयणादन्यत्रापि कुत्वम्-दृक्, दृग्। दृग्भ्यामित्यादि। **जश्त्वचर्त्वे- त्विट्, त्विड्।** त्विषौ। त्विषः। त्विड्भ्याम्। । त्विटत्सु, त्विट्सु। ८-२-६६ ससजुषो रुँः +८--७६ र्वोरुपधाया...- सजूः। सजुषौ सजुषः। सजूर्भ्याम्। सजूःषु, सजूष्षु। षत्वस्याऽसिद्धत्वाद् रुँत्वम्+ ८-२-७६ र्वो... - आशीः। आशिषौ। आशिषः। आशीर्भ्यामित्यादि। **अदश्शब्दस्य प्रक्रिया** ८-२-३ न मु ने - सूत्राद् द्रष्टव्या। इति हलन्तस्त्रीलिङ्गप्रकरणम्।

अथ हलन्त -नपुंसकलिङ्गप्रकरणम्।
८-२-७२ **वसुँस्रंसुँ... - स्वनडुत्, स्वनडुद्।** स्वनडुही। ७-१-९८ चतुरनडुहो... + ७-१-७२ नपुंसकस्य... - स्वनड्वांहि। स्वनडुद्भ्यामित्यादि। **६-१-७२ दिव उत्- विमलद्यु** । १-१-६१ प्रत्ययलोपे... इति बलेन दिव् इत्यस्य १-४-१४ सुँप्तिङन्तं... इति पदसंज्ञायां प्राप्तायाम् १-१-६२ उत्तरपदत्वे... इति प्रतिषेधादुत्वं न- विमलदिवी। विमलदिवि। **वाः। वारी। वारि।** वार्भ्यामित्यादि। ७-१-९८ चतुरन... - चत्वारि। १-१-६१ प्रत्ययलोपे... इति बलेन **७-२-१०३ किमः** क इति प्राप्तौ १-१-६२ **न लुमता ऽङ्गस्य- किम्। के। कानि।** इदम्। इमे। इमानि। अन्वादेशेऽमि २-४-३४ एनदिति नपुंसकैकवचने- एनत्, एनद्। अन्यत्र एनादेशेनैव रूपसिद्धिः- ऐने। एनानि। एनेन। एनयोः। **ब्रह्म।** ब्रह्मणी। ब्रह्माणि। ८-२-८ वा नपुंसकानाम्- हे ब्रह्म, हे ब्रह्मन्। ८-२-६९ रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽसुँपि - अहर्भाति । ६-४-१३६ विभाषा ङिश्योः - अह्नी, अहनी । अहानि । ८-२-६८ **अहन्-** अहोभ्याम् । अहोभिः । तदन्तस्यापि रुँत्वरत्वे - दीर्घाण्यहानि यस्मिन् स दीर्घाहा निदाघः । इह ६-१-६६ हल्ङ्यादिलोपे १-१-६१ प्रत्ययलक्षणेन असुँपीति निषेधाद् ८-२-६९ रोऽसुँपि इत्यस्याऽप्रवृत्तौ ८-२-६८ अहन् इति रुँः । तस्याऽसिद्धत्वात् ६-४-८ सर्वनामस्थाने... इति नान्तलक्षण उपधादीर्घः । सम्बुद्धौ तु हे दीर्घाहो निदाघ । दीर्घाहानौ । दीर्घाहानः । दीर्घाह्ना । दीर्घाहोभ्यामित्यादि । दण्डि । दण्डिनी । ६-४-१२ इन् हन्... - दडीनि । स्रग्वि । स्रग्विणी । ४-१-११ अनिनस्मन्... - स्रग्वीणि । वाग्मि । वग्मिनी । वाग्ग्मीनि । बहुवृत्रहाणि । बहुपूषाणि । बह्वर्यमाणि । **असृक्शब्दस्य कृत्वविषये पुंस्युक्तम् । असृक्, असृग् ।** असृजी । असृञ्जि । ६-१-६१ पद्दन्नो... इत्यसन् वा- असानि , असृञ्जि । अस्ना, असृजा । असभ्याम्, असृग्भ्यामित्यादि । ऊर्क्, ऊर्ग् । ऊर्न्जि । नरजानां संयोगः । अतो न श्चुत्वम् । ७-१-७२ बहूर्जि प्रतिषेधो... +अन्त्यात् पूर्वो वा- बहूर्जि, बहूर्न्जि कुलानि । **त्यत्, त्यद् । त्ये** । त्यानि । तत्, तद् । ते । तानि । यत्, यद् । ये । यानि । एतत्, एतद् । एते । एतानि । अम्यन्वादेशे-२-४-३४ एनदिति...- एनत् । बेभिद्यतेः क्विँप्- बेभित्, बेभिद् । बेभिदी । शावल्लोपस्य स्थानिवत्त्वादझलन्तत्वान्न नुँम् + अजन्तलक्षणश्च नुँम् न, स्वविधौ स्थानिवत्त्वा ऽभावात्- बेभिदि ब्राह्मणकुलानि । एवं चेच्छिदि । **गवाक्शब्दस्य रूपाणि** क्लीबेऽर्चागतिभेदतः । असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम् ॥१॥

स्वम्सुप्सु नव षड् भादौ षट्के स्युस्त्रीणि जश्शसोः । चत्वारि शेषे दशके रूपाणीति विभावय ॥२॥

तथाहि- गामञ्चतीति विग्रहे ३-२-५९ ऋत्विग्... इति क्विँन्+ गतौ ६-४-२४ अनिदिनां... इति नकारलोपः + ६-१-११९ अवङ्... इत्यवङ् -गवाक्, गवाग् । ६-१-११८ सर्वत्र विभाषा गोरिति प्रकृतिभावे गो अक्, गो अग् । ६-१-१०५ एङः... इति पूर्वरूपे- गोऽक्, गोऽग् । पूजायां तु ६-४-३० ना ऽञ्चेः पूजायामिति नलोपप्रतिषेधात् ८-२-६२ क्विँन्प्रत्ययस्य कुरिति नकारस्य कुत्वेन ङकारः - गवाङ्, गो अङ्, गोऽङ् । अम्यप्येतान्येव नव । गतौ= औङः शी +भत्वात् ६-४-१३८ अच इत्यल्लोपः - गोची । पूजायां तु- गवाञ्ची, गो अञ्ची, गोऽञ्ची । जश्शसोः शिः । शेः सर्वनामस्थानत्वान्नलोपपक्षेऽपि नुँमि गतिपूजनयोः समानानि रूपाणि त्रीण्येव- गवाञ्चि, गो अञ्चि, गोऽञ्चि । प्रावद् गतौ नलोपः पूजायां न - गोचा । गवाञ्चा, गो अञ्चा, गोऽञ्चा । गवाग्भ्याम्, गो अग्भ्याम्, गोऽग्भ्याम् । गवाङ्भ्याम्, गो अङ्भ्याम्, गोऽङ्भ्याम् । इत्यादि । सुपि तु ङकारान्तानां ८-३-२८ ङ्णोः... इति पाक्षिकः कुँक् । तत्पक्षे ८-३-२८ + ८-४-४७ च यो... इति पाक्षिको द्वितीयः । गवाङ्ख्षु, गो अङ्ख्षु, गोऽङ्ख्षु । गवाङ्क्षु, गो अङ्क्षु, गोऽङ्क्षु । गवाङ्षु, गो अङ्षु, गोऽङ्षु । गवाक्षु, गो अक्षु, गोऽक्षु । अत्र पक्षे चर्त्वस्याऽसिद्धत्वाद् द्वितीयादेशो न । कारिकायां स्वम्सुप्सु नवेत्युक्तिर्नवाधिकशतमित्युक्तिश्च द्वितीयादेशानामनपेक्षयेति बोध्यम् ।

ऊह्यमेषां द्विर्वचनानुनासिकविकल्पनात् ॥

रूपाण्यश्वाक्षिभूतानि (५२७) भवन्तीति मनीषिभिः ॥

६-३-९४ तिरस... - तिर्यक् । तिरश्ची । तिर्यञ्चि । पूजायां तु तिर्यङ् । तिर्यञ्ची । तिर्यञ्चि । **यकृत् । यकृती । यकृन्ति ।** ६-१-६१ पद्दन्नो... यकानि, यकृन्ति । यक्ना, यकृता । यकभ्याम्, यकृद्भ्यामित्यादि । शकृत् । शकृती । शकृन्ति । शकानि, कशृन्ति । शक्ना, शकृता । शकभ्याम्, शकृद्भ्यामित्यादि । **ददत् । ददती । ७-१-७९ वा नपुं... ददन्ति, ददति ।** तुदत् । ७-१-८० आच्छीनद्यो... - तुदन्ती, तुदती । तुदन्ति । भात् । भान्ती, भाती । भान्ति । पचत् । ७-१-८१ **शप्श्यनो...- पचन्ती** । पचन्ति । दीव्यत् । दीव्यन्ती । दीव्यन्ति । **स्वप्, स्वब्** । स्वपी । नित्यात् परादपि ७-१-७२ नपुंसकस्य...- इति नुँमः प्राक् ६-४-११ अप्तृन्...- इति दीर्घः प्रतिपदोक्तत्वात् । ततो नुँम्- स्वाम्पि । निरवकाशत्वं प्रतिपदोक्तत्वमिति मते तु प्रकृते निरवकाशत्वा ऽभावान्नुँमेव- स्वम्पि । स्वपा । ७-४-४८ अपो भि- स्वद्भ्याम् । स्वद्भिरित्यादि । २८२ अर्ति ... इति धनेरौणादिक उस्प्रत्ययः- **धनुः । धनुषी** । ६-४-१० सान्तमहतः ....+ ८-३-५८ नुम्बिसर्जनीय... - धनूंषि । धनुषा । धातुत्वाऽभावात् ८-२-७६ र्वोरुप... इति दीर्घो न- धनुर्भ्यामित्यादि । एवं चक्षुर्हविरादयः । पिठिषतेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्विँप् +८-२-७६ र्वो... इति दीर्घः- पिपठी : । पिपठिषी । अल्लोपस्य स्थानिवत्त्वाज्झल्लक्षणो नुँम्न+ स्वविधौ स्थानिवत्त्वा ऽभावादजन्तलक्षणो ऽपि नुँम्न- पिपठिषि । पिपठीर्भ्यामित्यादि । **पयः । पयसी ।** ६-४-१० सान्त...- पयांसि । पयोभ्यामित्यादि । सुपुम् । सुपुंसी । ७-१-८९ पुंसोऽसुँङ्- सपुमांसि । अदः । विभक्तिकार्यम्+उत्वमत्वे- अमू । अमूनि । शेषं पुंवत् ।

इति हलन्तनपुंसकलिङ्गप्रकरणम् ।

अथाऽव्ययप्रकरणम्- १-१-३६ **स्वरादि... सूत्रात् प्रक्रिया द्रष्टव्या** । ततः १-१-३७ तद्धितश्चा... इत्यतः १-१-४० अव्ययीभावश्च इत्यवधि क्रमशः सूत्राणि पाठ्यानि । **अथ धातुपाठः पाठ्यः ।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ धातुपाठः

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
(१)

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाऽज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥
(२)

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनि-त्रयम् ॥
(३)

अथ सुँबन्तप्रकरणानन्तरं पाठ्यो धातुपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१ भू सत्तायाम् । उदात्तः परस्मैपदी ।
२ एधँ वृद्धौ ।
अथ कत्थ्यन्ताः षट्त्रिंशदात्मनेपदिनः ।
३ स्पर्धँ संघर्षे ।
४ गाधृँ प्रतिष्ठालिप्सयोर्ग्रन्थे च ।
५ बाधृँ लोडने ।
६ नाथृँ नाधृँ याच्ञोपतापैश्वर्याशीःषु ।
८. दधँ धारणे ।
९. स्कुदिँ आप्रवणे ।
आप्रवणमुत्प्लवनमुद्धरणं च ।
१० श्विदिँ श्वैत्ये । अकर्मकः ।
११ वदिँ अभिवादनस्तुत्योः ।
१२ भदिँ कल्याणे सुखे च ।
१३ मदिँ स्तुतिमोदमदस्वप्नकान्तिगतिषु ।
१४ स्पदिँ किञ्चिच्चलने ।
१५ क्लिदिँ परिदेवने । शोक इत्यर्थः ।
सकर्मकः ।
१६ मुदँ हर्षे ।
१७ ददँ दाने ।
१८ ष्वदँ १९ स्वर्दँ आस्वादने ।
इमावनुभवे सकर्मकौ रुचावकर्मकौ ।
२०. उर्दँ माने क्रीडायां च ।
२१. कुर्दँ २२ खुर्दँ २३ गुर्दँ
२४ गुदँ क्रीडायामेव ।
२५ षूदँ क्षरणे ।
२६ ह्लादँ अव्यक्ते शब्दे ।
२७ ह्लादीँ सुखे च । चादव्यक्ते शब्दे ।
२८. स्वादँ आस्वादने ।
२९. पर्दँ कुत्सिते शब्दे । गुदरव इत्यर्थः ।
३० यतीँ- प्रयत्ने ।
३१. युतृँ ३२ जुतृँ भासने ।
३३ विथृँ ३४ वेथृँ याचने ।
३५ श्रथिँ शैथिल्ये ।
३६ ग्रथिँ- कौटिल्ये ।
३७ कत्थँ श्लाघायाम् ।
एधँ प्रभृतयोऽनुदात्तेत आत्मनेपदिनो गताः । अथाष्टात्रिंशत्तवर्गीयान्ताः परस्मैपदिनः ॥
३८ अतँ सातत्यगमने ।
३९ चितीँ संज्ञाने ।
४० च्युतिर् आसेचने। सेचनमार्द्रीकरणम् । आडीषदर्थेऽभिव्याप्तौ च ।
४१ श्च्युतिर् (श्चुतिर्) क्षरणे ।

---

१ भवति । ६-४-८८ भुवो वुँग् ...+ ७-४-७३ भवतेरः- बभूव । भविता । भविष्यति । भवतु । अभवत् । भवेत् । ३-४-१०४ किदा....+८-२-२९ स्कोः सं-भूयात् । २-४-७७ गातिस्था...+७-३-८८ भूसुवो....- अभूत् । अभविष्यत् । २ एधते । ३-१-३६ इजादेश्च...-एधाञ्चक्रे । ८-३-७८ इणः षीध्वं...- एधाञ्चकृढ्वे । एधाम्बभूव । ७-४-७० अत आदेः- एधामास । एधिता । एधिष्यते । एधताम् । ऐधत । एधेत । एधिषीष्ट । एधिषीध्वम् । ऐधिष्ट । ७-१-५ आत्मनेपदेष्व ...-ऐधिषत । ऐधिढ्वम् । ऐधिष्यत । ३ स्पर्धते । ७-४-६१ शर्पूर्वाः .... -पस्पर्धे । ४ गाधते । जगाधे । ५ लोडनं प्रतिघातः । बाधते । ६ १-३-२१ क्रीडो... सूत्रस्थम् आशि... -नाथते । आशीरन्यत्र नाथति । नाधते । ८ दधते । ६-४-१२० अत एक...-देधे । ९ ७-१-५८ इँदितो.... -स्कुन्दते । चुस्कुन्दे । १० श्विन्दते । शिश्विन्दे । ११ वन्दते । ववन्दे । १२ भन्दते । बभन्दे । १३ मन्दते । ममन्दे । १४ स्पन्दते । प्रस्पन्दे । १५ क्लिन्दते रिपुम् । चिक्लिन्दे । १६ मोदते । मुमुदे । १७ ददते । ६-४-१२६ न शस... -ददे । दददाते । ददिरे । १८-१९ ६-१-६२ धात्वादेः...- स्वदते । सस्वदे । स्वर्दते । सस्वर्दे । २० ८-२-७८ उपधायां च- ऊर्दते । ऊर्दाञ्चक्रे । २१-२४ कूर्दते । चकूर्दे । खूर्दते । चुखूर्दे । गूर्दते । जुगूर्दे । गोदते । जुगुदे । २५सूदते । सुषूदे । २६ ह्लादते । जह्लादे । २७ ह्लादते । जह्लादे । २८ स्वादते । सस्वादे । २९ पर्दते । पपर्दे । ३० यतते । येते । ३१-३२ योतते । युयुते । जोतते । जुजुते । ३३-३४ वेथते । विविथे । वेथते । विवेथे । ३५ श्रन्थते । शश्रन्थे । ३६ ग्रन्थते । जग्रन्थे । ३७ कत्थते । चकत्थे । ३८ अतति । ७- ४-७० अतः.. -आत । आततुः । ७-३-९६ अस्तिसिँचो... -आतीत् । ३९ चेतति । चिचेत । ७-२-३ वदव्रज...प्राप्तौ ७-२-४ नेटि- अचेतीत् । अचेतिष्टाम् । ३-४-१०९ सिँजभ्यस्त...- अचेतिषुः । ४० १- ३-७ चुटू सूत्रस्थम् इर... -च्योतति । चुच्योत । ३-१-५७ इरितो वा - अच्युतत्, अच्योतीत् । ४१ श्च्योतति । चुश्च्योत । अश्च्युतत्, अश्च्योतीत् । (श्चोतति । चुश्चोत ।)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४२ मन्थँ विलोडने । विलोडनं प्रतीघातः ।
४३ कुथिँ
४४ पुथिँ
४५ लुथिँ
४६ मथिँ हिंसासंक्लेशनयोः ।
४७ षिधँ गत्याम् ।
४८ षिधूँ शास्त्रे माङ्गल्ये च। शास्त्रम्= शासनम् ।
४९ खादृँ भक्षणे ।
५० खदँ स्थैर्ये हिंसायां च । चाद् भक्षणे ।
५१ बदँ स्थैर्ये । पवर्गीयादिः ।
५२ गदँ व्यक्तायां वाचि ।
५३ रदँ विलेखने । विलेखनम्= भेदनम् ।
५४ णदँ अव्यक्ते शब्दे ।
५५ अर्दँ गतौ याचने च ।
५६ नर्दँ
५७ गर्दँ शब्दे ।
५८ तर्दँ हिंसायाम् ।
५९ कर्दँ कुत्सिते शब्दे । कुत्सिते कौक्षे
६० खर्दँ दन्दशूके। दंशहिंसादिरूपायां दन्दशूकक्रियायामित्यर्थः ।
६१ अतिँ
६२ अदिँ बन्धने ।
६३ इदिँ परमैश्वर्ये ।
६४ बिदिँ अवयवे । पवर्गतृतीयादिः । भिदिँ इति पाठान्तरम् ।
६५ गडिँ वदनैकदेशे ।
अन्तत्यादयः पञ्चैते न तिङ्विषया इति काश्यपः । अन्ये तु तिङमपीच्छन्ति ।
६६ णिदिँ कुत्सायाम् ।
६७ टुनदिँ समृद्धौ ।
६८ चदिँ आह्लादे ।
६९ त्रदिँ चेष्टायाम् ।
७० कदिँ
७१ क्रदिँ
७२ क्लदिँ आह्वाने रोदने च ।
७३ क्लिदिँ परिदेवने ।
७४ शुन्धँ शुद्धौ ।

अतँ- प्रभृतयः परस्मैपदिनो गताः । अथ कवर्गीयान्ता आत्मनेपदिनो द्विचत्वारिंशत् ।

७५ शीकृँ सेचने । तालव्यादिः । दन्त्यादिरित्येके ।
७६ लोकृँ दर्शने ।

---

४२ मन्थति । ममन्थ । ३-४-१०४ किदा...+६-४-२४ अनिदितां... -मथ्यात् । ४३-४६ कुन्थति । इँदित्त्वाद् ६-४-२४ अनिदितां... इति न प्रवर्तते- कुन्थ्यात् । ४७ सिषेध । असेधीत् । ४८ सेधति । सिषेध । ७-२-४४ स्वरति...- सिषेधिथ, ८-२-४० झषस्तथो... + ८-४-५२ झलां जश्... -सिषेद्ध । सेधिता, सेद्धा । सेधिष्यति, सेत्स्यति । असेधीत् । असेधिष्टाम् । असेधिषुः । पक्षे-७-२-३ वदव्रज...- असैत्सीत् । ८-२-२६ झलो झलि-असैद्धाम् । असैत्सुः । इट् पक्षे तु ७-२-४ नेटि इति वृद्धिप्रतिषेधः । ४९ खादति । चखाद । ५० खदति । ७-२-११६ अत उप... -चखाद । ७-१-९१ णलुत्तमो वा -चखाद, चखद । ७-२-७ अतो हलादे... -अखादीत्, अखदीत् । ५१ बदति । बबाद । बेदतुः । बेदुः । बबाद, बबद । बदादीत्, अबदीत् । ५२ गदति ८-४-१७ नेर्गद... -प्रणिगदति । ७-४-६२ कुहोश्चुः- जगाद । जगदतुः । अगादीत्, अगदीत् । ५३ रदति । रराद । रेदतुः । अरादीत्, अरदीत् । ५४ ६-१-६३ णो नः- नदति । ननाद । नेदतुः । ८-४-१४ उपसर्गादस.... -प्रणदति । ८-४-१७ नेर्गद.... -प्रणिनदति । ५५ अर्दति । ६-४-७० अत आदेः + ७-४-७१ तस्मान्नुँड्... -आनर्द । आर्दीत् । ५६-५७ नर्दति । ननर्द । गर्दति । ५८ तर्दति । ततर्द । अतर्दीत् । ५९ कर्दति । चकर्द । ६० खर्दति । चखर्द । अखर्दीत् । ६१-६२ अन्तति । आनन्त । अन्दति । आनन्द । ६३ इन्दति । ३-१-३६ इजादेश्च...-इन्दाञ्चकार । ६४ बिन्दति । अवयवं करोतीत्यर्थः । भिन्दति । बिभिन्द । ६५ गण्डति । ६६ निन्दति । प्रणिन्दति । इँदित्त्वात् ६-४-२४ अनिदितां... सूत्रेण न लोपो न-निन्द्यात् । ६७ १-३-५ आदि...-नन्दति । नन्द्यात् । ६८ चन्दति । चन्द्यात् । ६९ त्रन्दति/तत्रन्द । त्रन्द्यात् । ७०-७२ कन्दति । चकन्द । क्रन्दति । चक्रन्द । क्लन्दति । चक्लन्द । ७३ क्लिन्दति । चिक्लिन्द । क्लिन्द्यात् । ७४ शुन्धति । ६-४-२४ अनि... इति नकारलोपः-शुध्यात् । ७५ शीकते । शिशीके । सीकते । सिसीके । ७६ लोकते । लुलोके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७७ श्लोकृँ संघाते । संघातो ग्रन्थः । स चेह ग्रथ्यमानस्य व्यापारो ग्रन्थितुर्वा । आद्ये अकर्मको द्वितीये सकर्मकः ।
७८ द्रेकृँ
७९ ध्रेकृँ शब्दोत्साहयोः । उत्साहो वृद्धिरौद्धत्यं च ।
८० रेकृँ शङ्कायाम् ।
८१ सेकृँ
८२ स्रेकृँ
८३ स्रकिँ
८४ श्रकिँ
८५ श्लकिँ गतौ । आद्यास्त्रयो दन्त्यादयः । ततो द्वौ तालव्यादी ।
८६ शकिँ शङ्कायाम् ।
८७ अकिँ लक्षणे ।
८८ वकिँ कौटिल्ये ।
८९ मकिँ मण्डने ।
९० ककँ लौल्ये । लौल्यं गर्वश्चापल्यं च ।
९१ कुकँ
९२ वृकँ आदाने ।
९३ चकँ- तृप्तौ प्रतिघाते च ।
९४ ककिँ
९५ वकिँ
९६ श्वकिँ
९७ त्रकिँ
९८ ढौकृँ
९९ त्रौकृँ
१०० ष्वष्कँ
१०१ वष्कँ
१०२ मष्कँ
१०३ टिकृँ
१०४ टीकृँ
१०५ तिकृँ
१०६ तीकृँ
१०७ रघिँ
१०८ लघिँ गत्यर्थाः । तृतीयो दन्त्यादिरित्येके । लघिँ- भोजननिवृत्तावपि ।
१०९ अघिँ
११० वघिँ
१११ मघिँ गत्याक्षेपे । आक्षेपो निन्दा । गतौ गत्यारम्भे चेत्यन्ये । मघिँ- कैतवे च ।
११२ राघृँ
११३ लाघृँ
११४ द्राघृँ सामर्थ्ये । धाघृँ इत्यपि केचित् । द्राघृँ आयामे च । आयामो दैर्घ्यम् ।
११५ श्लाघृँ कत्थने ।
शीकृँप्रभृतय आत्मनेपदिनो गताः । अथ कवर्गीयान्ताः परस्मैपदिनः पञ्चाशत् ।
११६ फक्कँ नीचैर्गतौ । नीचैर्गति र्मन्दगमनमसद्व्यवहारश्च ।
११७ तकँ हसने ।
११८ तकिँ कृच्छ्रजीवने ।
११९ बुक्कँ भषणे भषणं श्वरवः ।
१२० कखँ हसने ।
१२१ ओखृँ
१२२ राखृँ
१२३ लाखृँ
१२४ द्राखृँ
१२५ धाखृँ शोषणालमर्थयोः ।
१२६ शाखृँ
१२७ श्लाखृँ व्याप्तौ ।

---

७७ श्लोकते । शुश्लोके । ७८-७९ द्रेकते । दिद्रेके । ध्रेकते । दिध्रेके । ८० रेकते । रिरेके । ८१-८५ सेकते । सिसेके । अषोपदेशान्न षः । ८६ शङ्कते । शशङ्के । ८७ अङ्कते । ७-४-७० अत...+७-४-७१ तस्मा.... -आनङ्के । ८८ वङ्कते । ८९ मङ्कते । ९० ककते । चकके । ९१-९२ कोकते । चुकुके । वर्कते । ववृके । ९३ चकते । ६-४-१२० अत एक...-चेके । ९४-१०८ कङ्कते । वङ्कते । श्वङ्कते । स्वङ्कते । त्रङ्कते । ढौकते । डुढौके । त्रौकते । तुत्रौके । ६-१-६२ धात्वा... सूत्रस्थं सुँध्यातु.... ष्वष्कते । षष्वष्के । वष्कते । ववष्के । मष्कते । ममष्के । टेकते । टिटिके । टीकते । टिटीके । तेकते । तीकते । रङ्घते । लङ्घते । १०९-१११ अङ्घते । आनङ्घे । वङ्घते । मङ्घते । ११२-११४ राघते । लाघते । द्राँघते । ११५ श्लाघते । ११६ फक्कति । पफक्क । ११७ तकति । ११८ तङ्कति । ११९ बुक्कति । १२० कखति । १२१-१२५ ओखति । ओखाञ्चकार । १२६-१२७ शाखति । श्लाखति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२८ उखँ
१२९ उखिँ
१३० वखँ
१३१ वखिँ
१३२ मखँ
१३३ मखिँ
१३४ णखँ
१३५ णखिँ
१३६ रखँ
१३७ रखिँ
१३८ लखँ
१३९ लखिँ
१४० इखँ
१४१ इखिँ
१४२ ईखिँ
१४३ वल्गँ
१४४ रगिँ
१४५ लगिँ
१४६ अगिँ
१४७ वगिँ
१४८ मगिँ
१४९ तगिँ
१५० त्वगिँ
१५१ श्रगिँ
१५२ श्लगिँ
१५३ इगिँ
१५४ रिगिँ

१५५ लिगिँ गत्यर्थाः । द्वितीयान्ताः पञ्चदश । तृतीयान्तास्त्रयोदश । इह खान्तेषु रिखँ त्रखँ त्रिखिँ शिखिँ इत्यपि चतुरः केचित् पठन्ति । त्वगिँ कम्पने च ।
१५६ युगिँ
१५७ जुगिँ
१५८ वुगिँ वर्जने ।
१५९ घघँ हसने ।
१६० मघिँ मण्डने ।
१६१ शिघिँ आघ्राणे ।

फक्कँ प्रभृतयः परस्मैपदिनो गताः । अथ चवर्गीयान्ताः । तत्रात्मनेपदिन एकविंशतिः ।

१६२ वर्चँ दीप्तौ ।
१६३ षचँ सेचने सेवने च ।
१६४ लोचृँ दर्शने ।
१६५ शचँ व्यक्तायां वाचि ।
१६६ श्वचँ
१६७ श्वचिँ गतौ ।
१६८ कचँ बन्धने ।
१६९ कचिँ
१७० काचिँ दीप्तिबन्धनयोः ।
१७१ मचँ
१७२ मुचिँ कल्कने । कल्कनं दम्भः शाठ्यं च । कथन इत्यन्ये ।
१७३ मचिँ धारणोच्छ्रायपूजनेषु ।
१७४ पचिँ व्यक्तीकरणे ।
१७५ ष्टुचँ प्रसादे ।
१७६ ऋजँ गतिस्थानार्जनोपार्जनेषु ।
१७७ ऋजिँ
१७८ भृजीँ भर्जने ।
१७९ एजृँ
१८० भ्रेजृँ
१८१ भ्राजृँ दीप्तौ ।
१८२ ईजँ गतिकुत्सनयोः ।

वर्चँ प्रभृतय आत्मनेपदिनो गताः । अथ व्रज्यन्ताः परस्मैपदिनो द्विसप्ततिः ।

१८३ शुचँ शोके ।
१८४ कुचँ शब्दे तारे ।
१८५ कुन्चँ
१८६ क्रुन्चँ कौटिल्याल्पीभावयोः ।
१८७ लुन्चँ अपनयने ।
१८८ अन्चुँ गतिपूजनयोः ।

१२८-१५५ओखति । ६-४-७८ अभ्यासस्या...-उवोख ३-१-३६ इजादेश्च... इत्याम् तु न सन्निपातपरिभाषाया जागरूकत्वात् । ऊखतुः । ऊखुः । उङ्खति । उङ्खाञ्चकार । वखति । वङ्खति । मखति । मेखतुः । मेखुः । मङ्खति । ममङ्ख । १५६-१५८ युङ्गति । जुङ्गति । वुङ्गति । १५९ घघति । जघाघ । १६० मङ्घति । १६१ शिङ्घति । १६२ वर्चते । १६३ सचते । सेचे । सचिता । १६४ लोचते । लुलोचे । १६५ शचते । शेचे । १६६-१६७ श्वचते । शश्वचे । श्वञ्चते । शश्वञ्चे । १६८ कचते । चकचे । १६९-१७० कञ्चते । चकञ्चे । काञ्चते । चकाञ्चे । १७१-१७२ मचते । मेचे । मुञ्चते । मुमुञ्चे । १७३ मञ्चते । ममञ्चे । १७४ पञ्चते । १७५ स्तोचते । तुष्टुचे । १७६ अर्जते । नुँड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते । तेन ७-४-७१ तस्मान्नुँड्.. इति नुँट्- आनृजे । १७७-१७८ ऋञ्जते । ऋञ्जाञ्चक्रे । भर्जते । बभृजे । १७९-१८१ एजते । एजाञ्चक्रे । भ्रेजते । बिभ्रेजे । भ्राजते । बभ्राजे । १८२ ईजते । ईजाञ्चक्रे । १८३ शोचति । शुशोच । अशोचीत् । १८४ कोचति । चुकोच । अकोचीत् । १८५-१८६ कुञ्चति । कुच्यात् । क्रुञ्चति । क्रुच्यात् । १८७ लुञ्चति । लुच्यात् । १८८ अञ्चति । आनञ्च । गतौ ६-४-२४ अनिदितां...-अच्यात् । पूजायां तु ६-४-६० नाञ्चेः...-अञ्च्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८९ वञ्चुँ
१९० चञ्चुँ
१९१ तञ्चुँ
१९२ त्वञ्चुँ
१९३ म्रुञ्चुँ
१९४ म्लुञ्चुँ
१९५ म्रुचुँ
१९६ म्लुचुँ गत्यर्थाः ।
१९७ ग्रुचुँ
१९८ ग्लुचुँ
१९९ कुजुँ
२०० खुजुँ स्तेयकरणे ।
२०१ ग्लुञ्चुँ
२०२ षस्जँ गतौ । अयमात्मनेपद्यपि ।
२०३ गुजिँ अव्यक्ते शब्दे ।
२०४ अर्चँ पूजायाम् ।
२०५ म्लेच्छँ अव्यक्ते शब्दे । अस्फुटेऽपशब्दे चेत्यर्थः ।

२०६ लच्छँ
२०७ लाछिँ लक्षणे ।
२०८ वाछिँ इच्छायाम् ।
२०९ आछिँ आयामे ।
२१० ह्रीच्छँ लज्जायाम् ।
२११ हुर्छाँ कौटिल्ये । कौटिल्यमपसरणमिति- मैत्रेयः ।
२१२ मुर्छाँ मोहसमुच्छ्राययोः ।
२१३ स्फुर्छाँ विस्तृतौ ।
२१४ युच्छँ प्रमादे ।
२१५ उछिँ उञ्छे । उञ्छः कणश आदानं कणिशाद्यर्जनं शिलमिति यादवः ।
२१६ उच्छीँ विवासे । विवासः= समाप्तिः । प्रायेणायं विपूर्वः ।
२१७ ध्रजँ

२१८ ध्रजिँ
२१९ धृजँ
२२० धृजिँ
२२१ ध्वजँ
२२२ ध्वजिँ गतौ ।
२२३ कूजँ अव्यक्ते शब्दे ।
२२४ अर्जँ
२२५ षर्जँ अर्जने ।
२२६ गर्जँ शब्दे ।
२२७ तर्जँ भर्त्सने ।
२२८ कर्जँ व्यथने ।
२२९ खर्जँ पूजने च ।
२३० अजँ गतिक्षेपणयोः ।
२३१ तेजँ पालने ।
२३२ खजँ मन्थे ।
२३३ खजिँ गतिवैकल्ये ।
२३४ एजृँ कम्पने ।
२३५ टु ओँ स्फूर्जाँ वज्रनिर्घोषे ।

१८९-१९६ वञ्चति । वच्यात् । चञ्चति । चच्यात् । तञ्चति । तच्यात् । त्वञ्चति । त्वच्यात् । म्रुञ्चति । म्रुच्यात् । अम्रुञ्चीत् । म्लुञ्चति । म्लुच्यात् । अम्लुञ्चीत् । म्रोचति । ३-१-५८ जृस्तम्भुँ... इत्यङ् वा- अम्रुचत्, अम्रोचीत् । म्लोचति । अम्लुचत्, अम्लोचीत् । १९७-२०० ग्रोचति । जुग्रोच । प्रागवदङ् वा- अग्रुचत्, अग्रोचीत् । ग्लोचति । जुग्लोच । अग्लुचत्, अग्लोचीत् । कोजति । अकोजीत् । खोजति । अखोजीत् । २०१-२०२ अग्लुचत्, अग्लुञ्चीत् । सज्जति । सस्य श्चुत्वेन शः । तस्य जश्त्वेन जः । अयमात्मनेपद्यपि सज्जते । २०३ गुञ्जति । गुञ्ज्यात् । २०४ अर्चति । आनर्च । २०५ म्लेच्छति । मिम्लेच्छ । २०६-२०७ लच्छति । ललच्छ । लाञ्छति । ललाञ्छ । २०८ वाञ्छति । २०९ आञ्छति । आञ्छ । ७-४-७१ तस्मान्नुँड्... इति तु नेह प्रवर्तते । ७-४-७० अत आदेरित्यत्र तपरकरणेन स्वाभाविकह्रस्वस्यैव तत्र ग्रहणेन प्रकृते स्वाभाविकह्रस्वाकारस्याऽभावेन दीर्घाऽप्रवृत्त्याऽस्य नुँटोऽप्राप्तेः । तपरकरणं मुखसुखार्थमिति मते तु नुँट् । आनाञ्छ । २१० ह्रीच्छति । जिह्रीच्छ । २११ ८-२-७८ उपधायां च- हूर्छति । जुहूर्छ । २१२ मूर्छति । २१३ स्फूर्छति । २१४ युच्छति । २१५ उञ्छति । उञ्छाञ्चकार । २१६ व्युच्छति । २१७-२२२ ध्रजति । ध्रञ्जति । धर्जति । धृञ्जति । ध्वजति । ध्वञ्जति । २२३ कूजति । चुकूज । २२४-२२५ अर्जति । आनर्ज । सर्जति । ससर्ज । २२६ गर्जति । जगर्ज । २२७ तर्जति । ततर्ज । २२८ कर्जति । चकर्ज । २२९ खर्जति । चखर्ज । २३० अजति । २-४-५६ अजेर्व्यघञपोः...- विवाय । ६-४-८२ एरनेकाचो...- विव्यतुः । विव्युः । २-४-५६ अजे... सूत्रस्थं वलादावार्ध... + भारद्वाजमते इट् । भारद्वाज नियमः क्रादिनियमश्च सम्यगवधेयः । अन्यथा तिङन्तप्रकरणमेव क्लिष्टं भवति । विवयिथ, विवेथ, आजिथ । क्रादिनियमादिट्- विव्यिव । आजिव । विव्यिम । आजिम । वेता, अजिता । वेष्यति, अजिष्यति । अजतु । आजत् । अजेत् । वीयात् । ७-२-१ सिँचि वृद्धिः-अवैषीत्, आजीत् । अवेष्यत्, आजिष्यत् । २३१ तेजति । तितेज । २३२ खजति । चखाज । अखाजीत्, अखजीत् । २३३ खञ्जति । चखञ्ज । अखञ्जीत् । २३४ एजति । एजाञ्चकार । २३५ स्फूर्जति । पुस्फूर्ज ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२३६ क्षि क्षये। अकर्मकः। अन्तर्भावितण्यर्थस्तु सकर्मकः।
२३७ क्षीजँ अव्यक्ते शब्दे।
२३८ लजँ
२३९ लजिँ भर्जने।
२४० लाजँ
२४१ लाजिँ भर्त्सने च।
२४२ जजँ
२४३ जजिँ युद्धे।
२४४ तुजँ हिंसायाम्।
२४५ तुजिँ पालने।
२४६ गजँ
२४७ गजिँ
२४८ गृजँ
२४९ गृजिँ
२५० मुजँ
२५१ मुजिँ शब्दार्थाः। गजँ मदे च।
२५२ वजँ
२५३ व्रजँ गतौ।
शुचँ प्रभृतयः परस्मैपदिनो गताः। अथ टवर्गीयान्ताः शाडचन्ता आत्मनेपदिनः षट्त्रिंशत्।
२५४ अट्टँ अतिक्रमहिंसयोः। दोपधोऽयम्। तोपध इत्येके।
२५५ वेष्टँ वेष्टने।
२५६ चेष्टँ चेष्टायाम्।
२५७ गोष्टँ
२५८ लोष्टँ संघाते।
२५९ घट्टँ चलने।
२६० स्फुटँ विकसने।
२६१ अठिँ गतौ।
२६२ वठिँ एकचर्यायाम्।
२६३ मठिँ
२६४ कठिँ शोके। शोक इह आध्यानम्।
२६५ मुठिँ पालने।
२६६ हेठँ विबाधायाम्।
२६७ एठँ च।
२६८ हिडिँ गत्यनादरयोः।
२६९ हुडिँ सङ्घाते।
२७० कुडिँ दाहे।
२७१ वडिँ विभाजने।
२७२ मडिँ च।
२७३ भडिँ परिभाषणे।
२७४ पिडिँ सङ्घाते।
२७५ मुडिँ मार्जने। मार्जनं शुद्धिर्न्यग्भावश्च।
२७६ तुडिँ तोडने। तोडनं दारणं हिंसनं च।
२७७ हुडिँ वरणे। वरणं स्वीकारः। हरण इत्येके।
२७८ चडिँ कोपे।
२७९ शडिँ रुजायां संघाते च।
२८० तडिँ ताडने।
२८१ पडिँ गतौ।
२८२ कडिँ मदे।
२८३ खडिँ मन्थे।
२८४ हेडृँ
२८५ होडृँ अनादरे।
२८६ बाडृँ आप्लाव्ये।
२८७ द्राडृँ
२८८ धाडृँ विशरणे।
२८९ शाडृँ श्लाघायाम्।
अट्टँप्रभृतय आत्मनेपदिनो गताः। अथ आटवर्गीयान्तसमाप्तेः परस्मैपदिनो द्विसप्ततिः।

---

२३६ क्षयति। चिक्षाय। ६-४-७७ अचि श्नु...-चिक्षियतुः। चिक्षियुः। भारद्वाजमते इट्- चिक्षयिथ, चिक्षेथ। क्रादिनियमादिट्-चिक्षियिव। चिक्षियिम। क्षेता। क्षेष्यति। ७-४-२५ अकृत्सार्व...-क्षीयात्। अक्षैषीत्। २३७ क्षीजति। चिक्षीज। २३८-२३९ लजति। ललाज। लञ्जति। ललञ्ज २४०-२४१ लाजति। लाज्यात्। लाञ्जति। लाञ्ज्यात्। २४२-२४३ जजति जजाज। जेजतुः। अजाजीत्, अजजीत्। जञ्जति। जञ्ज्यात्। अजञ्जीत्। २४४ तोजति। तुतोज। २४५ तुञ्जति। तुञ्ज्यात्। २४६-२५१ अगाजीत्, अगजीत्। गञ्ज्यात्। अगञ्जीत्। २५२-२५३ अवाजीत्, अवजीत्। ७-२-३ वदव्रज...- अव्राजीत्। २५४ अट्टते। आनट्टे। २५५ वेष्टते। विवेष्टे। अवेष्टिष्ट। अवेष्टिषत। २५६ चेष्टते। चिचेष्टे। अचेष्टिष्ट। अचेष्टिषत। २५७-२५८ गोष्टते। जुगोष्टे। लोष्टते। लुलोष्टे। २५९ घट्टते। जघट्टे। २६० स्फोटते। पुस्फुटे। २६१ अण्ठते। आनण्ठे। २६२ वण्ठते। ववण्ठे। २६३-२६४ मण्ठते। ममण्ठे। कण्ठते। चकण्ठे। २६५ मुण्ठते। मुमुण्ठे। २६६ हेठते। जिहेठे। २६७ एठते। एठाञ्चक्रे। २६८ हिण्डते। जिहिण्डे। २६९ हुण्डते। जुहुण्डे। २७० कुण्डते। चुकुण्डे। २७१ वण्डते। ववण्डे। २७२ मण्डते। ममण्डे। २७३ परिहासः सनिन्दोपालम्भश्च **परिभाषणम्**। भण्डते। बभण्डे। २७४ पिण्डते। पिपिण्डे। २७५ मुण्डते। मुमुण्डे। २७६ तुण्डते। तुतुण्डे। २७७ हुण्डते। जुहुण्डे। २७८ चण्डते। चचण्डे। २७९ शण्डते। शशण्डे। २८० तण्डते। ततण्डे। २८१ पण्डते। पपण्डे। २८२ कण्डते। चकण्डे। २८३ खण्डते। चखण्डे। २८४-२८५ हेडते। जिहेडे। होडते। जुहोडे। २८६ वाडते। ववाडे। २८७-२८८ द्राडते। दद्राडे। धाडते। दधाडे। २८९ शाडते। शशाडे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२९० शौटृँ गर्वे ।

२९१ यौटृँ बन्धे ।

२९२ म्लेटृँ

२९३ म्रेडृँ उन्मादे । अत्र दीक्षितः- द्वितीयो डान्तः । टान्तमध्ये- पाठस्त्वर्थसाम्यान्नाथतिवदिति ।

२९४ कटेँ वर्षावरणयोः । चटेँ इत्येके ।

२९५ अटँ

२९६ पटँ गतौ ।

२९७ रटँ परिभाषणे ।

२९८ लटँ बाल्ये ।

२९९ शटँ रुजाविशरणगत्यवसादनेषु ।

३०० वटँ वेष्टने ।

३०१ किटँ

३०२ खिटँ त्रासे ।

३०३ शिटँ

३०४ षिटँ अनादरे ।

३०५ जटँ

३०६ झटँ संघाते ।

३०७ भटँ भृतौ ।

३०८ तटँ उच्छ्राये ।

३०९ खटँ काङ्क्षायाम् ।

३१० णटँ नृत्तौ ।

३११ पिटँ शब्दसंघातयोः ।

३१२ हटँ दीप्तौ ।

३१३ षटँ अवयवे ।

३१४ लुटँ विलोडने । डान्तोऽयमित्येके ।

३१५ चिटँ परप्रेष्ये ।

३१६ विटँ शब्दे ।

३१७ बिटँ आक्रोशे । ओष्ठ्यादिः । हिटेत्येके ।

३१८ इटँ

३१९ किटँ

३२० कटीँ गतौ । केचित् पुनः कटी इति पठित्वा कटिँ इ ई इति धातुत्रयं स्वीकुर्वन्ति ।

३२१ मडिँ भूषायाम् ।

३२२ कुडिँ वैकल्ये ।

३२३ मुडँ

३२४ प्रुडँ मर्दने ।

३२५ चुडिँ अल्पीभावे ।

३२६ मुडिँ खण्डने । पुडिँ चेत्येके ।

३२७ रुटिँ

३२८ लुटिँ स्तेये । रुठिँ लुठिँ इत्येके । रुडिँ लुडिँ इत्यपरे ।

३२९ स्फुटिर् विशरणे । स्फुटिँ इत्यपि केचित् ।

३३० पठँ व्यक्तायां वाचि ।

३३१ वठँ स्थौल्ये ।

३३२ मठँ मदनिवासयोः ।

३३३ कठँ कृच्छ्रजीवने ।

३३४ रटँ परिभाषणे । रठँ इत्येके ।

३३५ हठँ प्लुतिशठगत्योः । वलात्कार इत्येके ।

३३६ रुठँ

३३७ लुठँ

३३८ उठँ उपघाते । ऊठँ इत्येके ।

---

२९० शौटति । शुशौट । २९१ यौटति । युयौट । २९२-२९३ म्लेटति । मिम्लेट । म्रेडति । मिम्रेड । २९४ कटति । चकाट । चकटतुः । ७-२-५ ह्म्यन्तक्षण....- अकटीत् । चटति । चचाट । चेटतुः । अचटीत् । २९५-२९६ अटति । आट । आटतुः । पटति । पपाट । पेटतुः । अपाटीत्, अपटीत् । २९७ रटति । रराट । रेटतुः । रेटुः । अराटीत्, अरटीत् । २९८ रटतिवत् । २९९ रटतिवत् । ३०० वटति । ववाट । ६-४-१२६ न शस... -ववटतुः । अवाटीत्, अवटीत् । ३०१-३०२ केटति । चिकेट । ७-२-४ नेटि अकेटीत् । खेटति । चिखेट । अखेटीत् । ३०३-३०४ शेटति । शिशेट । अशेटीत् । सेटति । सिषेट । असेटीत् । ३०५-३०६ जटति । जजाट । जेटतुः । जेटुः । अजाटीत्, अजटीत् । झटति । जझाट, जझटतुः । जझटुः । शेषं जटतिवत् । ३०७ बभाट । बभटतुः । शेषं जटतिवत् । ३०८ जटतिवत् । ३०९ चखटतुः । शेषं जटतिवत् । ३१० नटति । ननाट । नेटतुः । अत्र तत्त्वबोधिनी-प्रणटति । णोपदेशपर्युदासे नाटीति सवृद्धिकनिर्देशेन नट अवस्यन्दने इति चौरादिकस्यैव ग्रहणादयं णोपदेश एवेति । ३११ पेटति । अपेटीत् । ३१२ जहाट । जहटतुः । अहाटीत्, अहटीत् । ३१३ सटति । सेटतुः । असाटीत्, असटीत् । ३१४ लोटति । ३१५ अचेटीत् । ३१६ अवेटीत् । ३१७-३२० एटति । केटति । कटीँ इति ईदित्त्वान्निष्ठायां ७-२-१४ श्वीदितो...इतीट्प्रतिषेधः । मतान्तरे - कण्टति । अयति । इयाय । अयाञ्चकार । इयाय- ६-४-७८ अभ्यासस्या... । अयाञ्चकार-३-१-३६ इजादेश्च... । ३२१ मण्डति । ३२२ कुण्डति । ३२३-३२४ मोडति । प्रोडति । ३२५ चुण्डति । ३२६ मुंण्डति । पुण्डति । ३२७-३२८ रुण्टति । लुण्टति । रुण्ठति । लुण्ठति । रुण्डति । लुण्डति । ३२९ स्फोटति । पुस्फोट । ३-१-५७ इरितो वा - अस्फुटत्, अस्फोटीत् ।स्फुण्टति । ३३० पठति । पपाठ । पेठतुः । पेठिथ । अपाठीत्, अपठीत् । ३३१ ववठतुः । ववठिथ । शेषं पठतिवत् । ३३२ पठतिवत् । ३३३ चकठतुः ।चकठिथ । शेषं पठतिवत् । ३३४ पठतिवत् । ३३५ हठति । जहाठ । जहठतुः । ३३६-३३८ रोठति । लोठति । ओठति । उवोठ । ऊठति । ऊठाञ्चकार ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३३९ पिठँ हिंसासंक्लेशनयोः ।
३४० शठँ कैतवे च ।
३४१ शुठँ प्रतिघाते ।
शुठिँ इति स्वामी ।
३४२ कुठिँ च ।
३४३ लुठिँ आलस्ये प्रतिघाते च ।
३४४ शुठिँ शोषणे ।
३४५ रुठिँ
३४६ लुठिँ गतौ ।
३४७ चुड्डँ भावकरणे । भावकरणमभिप्रायसूचनम् ।
३४८ अड्डँ अभियोगे ।
३४९ कड्डँ कार्कश्ये ।
चुड्डादयस्त्रयो दोपधाः । तेन क्विँपि चुत् अत् कत् इत्यादि ।
३५० क्रीडृँ विहारे ।
३५१ तुडृँ तोडने ।
तूडृँ इत्येके ।
३५२ हुडृँ
३५३ हूडृँ
३५४ होडृँ गतौ ।
३५५ रौडृँ अनादरे ।
३५६ रोडृँ
३५७ लोडृँ उन्मादे ।
३५८ अडँ उद्यमे ।
३५९ लडँ विलासे ।
३६० कडँ मदे । कडि इत्येके ।
३६१ गडिँ वदनैकदेशे । **शौटृँ प्रभृतयः परस्मैपदिनो गताः । अथ पवर्गीयान्ताः । तत्रात्मनेपदिनः स्तोभत्यन्ताश्चतुस्त्रिंशत् ।**
३६२ तिपृँ
३६३ तेपृँ
३६४ ष्टिपृँ
३६५ ष्टेपृँ क्षरणार्थाः । तेपृँ कम्पने च ।
३६६ ग्लेपृँ दैन्ये ।
३६७ टुवेपृँ कम्पने ।
३६८ केपृँ
३६९ गेपृँ
३७० ग्लेपृँ च ।
३७१ मेपृँ
३७२ रेपृँ
३७३ लेपृँ गतौ ।
३७४ त्रपूँष् लज्जायाम् ।
३७५ कपिँ चलने ।
३७६ रबिँ
३७७ लबिँ
३७८ अबिँ शब्दे । लबिँ अवस्रंसने च ।
३७९ कबृँ वर्णे ।
३८० क्लीबृँ अधाष्टचे
३८१ क्षीबृँ मदे ।
३८२ शीभृँ कत्थने ।
३८३ चीभृँ च ।
३८४ रेभृँ शब्दे ।
अभिँ रभिँ क्वचित् पठचेते ।
३८५ ष्टभिँ
३८६ स्कभिँ प्रतिबन्धे-
३८७ जभीँ
३८८ जृभिँ गात्रविनामे ।
३८९ शल्भँ कत्थने ॥

३३९-३४१ शोठति । शुण्ठति । ३४२ कुण्ठति । कुण्ठचात् । ३४३ लुण्ठति । लुण्ठचात् । ३४४ शुण्ठति । शुण्ठचात् । ३४५-३४६ रुण्ठति । रुण्ठचात् । लुण्ठति । लुण्ठचात् । ३४७ चुड्डति । चुचुड्ड । अचुड्डीत् । ३४८ अड्डति । आनड्ड । ३४९ कड्डति । ३५० क्रीडति । चिक्रीड । अक्रीडीत् । ३५१ तोडति । तूडति । ३५२-३५४ होडति । हूडति । होडति । ३५५ रौडति । रुरौड । ३५६-३५७ रोडति । रुरोड । लोडति । लुलोड । ३५८ अडति । आड । ३५९ लडति । लडयोर्ललयोश्चैकत्वस्मरणाल्ललतीति स्वाम्यादय इति दीक्षितः । ३६० कडति । कण्डति । ३६१ गण्डति । ३६२-३६५ तेपते । तितिपे । क्रादिनियमादिट्-तितिपिषे । तेप्ता । तेप्स्यति । १-२-११ लिङ्सिँचा....- तिप्सीष्ट । ८-२-२६ झलो झलि- अतिप्त । तेपते । तितेपे । स्तेपते । तिष्टिपे । तिष्टेपे । ३६६ ग्लेपते । जिग्लेपे । ३६७ वेपते । ३६८-३७० अत्र दीक्षितः-चात् कम्पने गतौ च । सूत्रविभागादिति-स्वामी (योगविभागात् पूर्वोत्तरार्थौ चकारेणाऽनुकृष्येते इति तद्भावः) मैत्रेयस्तु चकारमन्तरेण पठित्वा कम्पने इत्यपेक्षत इत्याह । ग्लेपेरर्थभेदात् पुनः पाठ इति । ३७१-३७३ मेपते । मिमेपे । रेपते । रिरेपे । लेपते । लिलेपे । ३७४ त्रपते । ६-४-१२२ तृफल... - त्रेपे । ७-२-४४ स्वरति...- त्रेपिषे, त्रेप्से । त्रपिता, त्रप्ता । त्रपिषीष्ट, त्रप्सीष्ट । अत्रपिष्ट, अत्रप्त । अत्रपिष्यत, अत्रप्स्यत । ३७५ कम्पते । चकम्पे । ३७६-३७८ रम्बते । ररम्बे । लम्बते । ललम्बे । अम्बते । आनम्बे । ३७९ कबते । चकबे । ३८० क्लीबते । चिक्लीबे । ३८१ क्षीबते । चिक्षीबे । ३८२ शीभते । ३८३ चीभते । ३८४ रेभते । रिरेभे । अम्भते । आनम्भे । रम्भते । ररम्भे । ३८५-३८६ स्तम्भते । ६-४-६० उदः स्था... उत्तम्भते । केचिदस्य टकार औपदेशिक इत्याहुः । तन्मते- ष्टम्भते । टष्टम्भे । स्कम्भते । चस्कम्भे । ३८७-३८८ ७-१-६१ रधिजभो...- जम्भते । जजम्भे । जृम्भते । जजृम्भे । ३८९ शल्भते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३९० वल्भँ भाजने ।
३९१ गल्भँ धाष्ट्र्ये ।
३९२ श्रम्भुँ प्रमादे । तालव्यादिर्दन्त्यादिश्च ।
३९३ ष्टुभुँ स्तम्भे । तिपृँ प्रभृतय आत्मनेपदिनो गताः । अथ पवर्गीयान्ताः परस्मैपदिन एकचत्वारिंशत् ।
३९४ गुपूँ रक्षणे ।
३९५ धूपँ सन्तापे ।
३९६ जपँ
३९७ जल्पँ व्यक्तायां वाचि । जपँ मानसे च ।
३९८ चपँ सान्त्वने ।
३९९ षपँ समवाये ।
४०० रपँ
४०१ लपँ व्यक्तायां वाचि ।
४०२ चुपँ मन्दायां गतौ ।
४०३ तुपँ
४०४ तुम्पँ
४०५ त्रुपँ
४०६ त्रुम्प
४०७ तुफँ
४०८ तुम्फँ
४०९ त्रुफँ
४१० त्रुम्फँ हिंसार्थाः ।
४११ पर्पँ
४१२ रफँ
४१३ रफिँ
४१४ अर्बँ
४१५ पर्बँ
४१६ लर्बँ
४१७ बर्बँ
४१८ मर्बँ
४१९ कर्बँ
४२० खर्बँ
४२१ गर्बँ
४२२ शर्बँ
४२३ षर्बँ
४२४ चर्बँ गतौ । आद्यः प्रथमान्तः । ततो द्वौ द्वितीयान्तौ । तत एकादश तृतीयान्ताः । द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः ।
४२५ कुबिँ आच्छादने ।
४२६ लुबिँ
४२७ तुबिँ अर्दने ।
४२८ चुबिँ वक्त्रसंयोगे ।
४२९ षृभुँ
४३० षृम्भुँ हिंसार्थौ । षिभुँ षिम्भुँ इत्येके ।
४३१ शुभँ
४३२ शुम्भँ भाषणे । भासने इत्येके । हिंसायामित्यन्ये ।

गुपादयः परस्मैपदिनो गताः । अथाऽनुनासिकान्ता आत्मनेपदिनो दश ।

४३३ घिणिँ
४३४ घुणिँ
४३५ घृणिँ ग्रहणे ॥
४३६ घुणँ
४३७ घूर्णँ भ्रमणे ।
४३८ पणँ व्यवहारे स्तुतौ च । पनिसाहचर्यात् पणेरपि स्तुतावेवाय्प्रत्ययः । व्यवहारे तु न ।
४३९ पनँ च । स्तुतावित्येव सम्बध्यते पृथङ् निर्देशात् ।

---

३९० ववल्भे । ३९१ गल्भते । ३९२ श्रम्भते । स्रम्भते । ३९३ स्तोभते । ८-३-६५ उपसर्गात् सुनोति... - विष्टोभते । ३९४ ३-१-२८ गुपूँधूप... –गोपायति । ३-१-३१ आयादय...+ ३-१-३५ कास्प्रत्यया... सूत्रस्थं कास्यनेकाच... -गोपायाञ्चकार । जुगोप । ७-२-४४ स्वरति... - जुगोपिथ, जुगोप्थ । गोपायिता, गोपिता, गोप्ता । अगोपायीत्, अगोपीत्, अगौप्सीत् । ३९५ धूपायति । धूपायाञ्चकार, दुधूप । धूपायिता, धूपिता । धूपायिष्यति, धूपिष्यति । अधूपायीत्, अधूपीत् । ३९६-३९७ जपति । जजाप । जेपतुः । जल्पति । जजल्प । ३९८ चपति । चचाप । चेपतुः । चेपुः । ३९९ सपति । चपतिवत् ४००-४०१ चपतिवत् । ४०२ चोपति । चुचोप । चोपिता । ४०३-४१० तोपति । तुतोप । तुम्पति । तुतुम्प । तुतुम्पतुः । तुप्यात् । ६-१-१५२ पारस्कर... सूत्रस्थं प्रात् तुम्पतौ... वार्तिकं दृश्यम् । इहाद्यौ द्वौ पञ्चमषष्ठौ च नीरेफाः । अन्ये सरेफाः । आद्याश्चत्वारः प्रथमान्ताः । ततो द्वितीयान्ताः । अष्टावप्युकारवन्तः । ४११-४२४ पर्पति । पपर्प । रफति । रराफ । रेफतुः । रम्फति । अर्बति । आनर्ब । पर्बति । लर्बति । बर्बति । मर्बति कर्बति । खर्बति । गर्बति । शर्बति । सर्बति । चर्बति । ४२५ कुम्बति । ४२६-४२७ लुम्बति लुम्ब्यात् । तुम्बति । ४२८ चुम्बति । चुम्ब्यात् । ४२९-४३० सर्भति । ससर्भ । सर्भिता । सृम्भति । ससृम्भ । सृभ्यात् । सेभति । सिम्भति । ४३१-४३२ शोभति । शुशोभ । शुम्भति । शुशुम्भ । शुभ्यात् । ४३३-४३५ घिण्णते । जिघिण्णे । घुण्णते । जुघुण्णे । घृण्णते । जघृण्णे । ४३६-४३७घोणते । घूर्णते । इमौ तुदादौ परस्मैपदिनौ । ४३८ ३-१-२८ गुपूँधूप...- पणायति । पणते । पेणे । ४३९ पनायति । ३-३-३१ आयादय...- पनायाञ्चकार, पेने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४४० भामँ क्रोधे ।
४४१ क्षमूँष् सहने ।
४४२ कमुँ कान्तौ ।
घिणिँप्रभृतय आत्मनेपदिनो गताः ।
अथ क्रम्यन्तास्त्रिंशत् परस्मैपदिनः ।
४४३ अणँ
४४४ रणँ
४४५ वणँ
४४६ भणँ
४४७ मणँ
४४८ कणँ
४४९ क्वणँ
४५० व्रणँ
४५१ भ्रणँ
४५२ ध्वणँ शब्दार्थाः ।
धणँ इत्यपि केचित् ।
४५३ ओणृँ अपनयने ।
४५४ शोणृँ वर्णगत्योः ।
४५५ श्रोणृँ संघाते ।
४५६ श्लोणृँ च ।
४५७ पैणृँ गतिप्रेरण - श्लेषणेषु । प्रैणृँ इत्यपि क्वचित् ।
४५८ ध्रनँ शब्दे ।
बणँ इत्यपि केचित् ।
४५९ कनीँ दीप्तिकान्ति - गतिषु ।
४६० ष्टनँ
४६१वनँ शब्दे ।
४६२ वनँ
४६३ षँण सम्भक्तौ ।
वनेरर्थभेदात् पुनः पाठः ।
४६४ अमँ गत्यादिषु ।
४६५ द्रमँ
४६६ हम्मँ
४६७ मीमृँ गतौ । मीमृँ शब्दे च ।
४६८ चमुँ
४६९ छमुँ
४७० जमुँ
४७१ झमुँ अदने ।
जिमुँ इति केचित् ।
४७२ क्रमुँ पादविक्षेपे ।
अणँप्रभृतयः परस्मैपदिनो गताः ।

अथ रेवत्यन्ता आत्मनेपदिनः ।

४७३ अयँ
४७४ वयँ
४७५ पयँ
४७६ मयँ
४७७ चयँ
४७८ तयँ
४७९ णयँ गतौ ।
४८० दयँ दानगतिरक्षण-हिंसादानेषु । आदानम्= ग्रहणम् ।

---

४४० भामते । बभामे । ४४१ क्षमते । चक्षमे । ७-२-४४ स्वरति...- चक्षमिषे, चक्षंसे । चक्षमिवहे, ८-२-६५ म्वोश्च- चक्षण्वहे । चक्षमिमहे, चक्षण्महे । क्षमिता, क्षन्ता । क्षमिष्यते, क्षंस्यते । अक्षमिष्ट, अक्षंस्त । ४४२ ३-१-३० कमेर्णिङ् - कामयते । ६-४-५५ अयामन्ता...- कामयाञ्चक्रे । ३-१-३१ आयादय...इति णिङभावे- चकमे । कामयिता, कमिता । लुँङि- ३-१-४८ णिश्रिद्रु...., + ६-४-५१ णेरनिटि, +७-४-१ णौचङ्युप..., +६-१-११ चङि, +७-४-९३ सन्वल्लघुनि, +७-५-७९ सन्यतः, +७-४-९४ दीर्घो लघोः- अचीकमत, णिङभावे- ३-१-४८ णिश्रिद्रु...सूत्रस्थं कमे...इति चङ्-अचकमत । अकामयिष्यत, अकमिष्यत । ४४३-४५२ अणति । रणति । रराण । रेणतुः । वणति । ववाण । ६-४-१२६ न शस... -ववणतुः । धणति । ४५३ ओणति । ओणाञ्चकार । ४५४ शोणति । शुशोण । ४५५ श्रोणति । ४५६ श्लोणति । ४५७ पैणति । प्रैणति । पिप्रैण । ४५८ ८-४-२ अट्कुँप्वाङ्... -ध्रणति । नोपदेशफलं यङ्लुकि -दन्ध्रन्ति । बणति । बबाण । बेणतुः । बेणुः । ४५९ कनति । चकान । चकनतुः । अकानीत्, अकनीत् । ४६०-४६१ स्तनति । तस्तान । तस्तनतुः । वनति । ववान । ववनतुः । ४६२-४६३ ववनतुः । सनति । ससान । सेनतुः । ६-४-४३ ये विभाषा- सायात्, सन्यात् । ४६४ कनीँ(४५९) दीप्तिकान्तिगतीत्यत्र गतेः परयोः शब्दसंभक्त्योरादिशब्देन ग्रह इति दीक्षितः । अमति । आम । ४६५-४६७ द्रमति । दद्राम । ७-२-५ ह्म्यन्त... अद्रमीत् । हम्मति । जहम्म । मीमति । मिमीम । ४६८-४७१ ७-३-७५ ष्ठिवुँक्लमुँ... सूत्रस्थम्- आङि... -आचामति । चमति । विचमति । अचमीत् । जेमति । ४७२ ३-१-७० वा भ्राश... +७-३-७६ क्रमः परस्मै... -क्राम्यति, क्रामति । ७-२-३६ स्नुक्रमो...- क्रमिता । क्रमिष्यति । अक्रमीत् । ४७३-४७९ अयते । ३-१-३७ दयायासश्च- अयाञ्चक्रे । अयिषीष्ट । ८-३-७९ विभाषेटः- अयिषीढ्वम्, अयिषीध्वम् । आयिढ्वम्, आयिध्वम् । उपसर्गस्यायतौ -प्लायते । पलायते । कथं तर्हि उदयति दिशि यस्यां भानुमान् सैव पूर्वेति ? अत्र दीक्षितः- इट किट कटीत्यत्र प्रश्लिष्टस्य भविष्यति । यद्वा-अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् । चक्षिङो ङित्करणाज्ज्ञापकादिति । वयते । ववये । पयते । पेये । मयते । मेये । चयते । चेये । तयते । तेये । नयते । प्रणयते । नेये । ४८० दयते । ३-१-३७ दयाया... - दयाञ्चक्रे । दयिषीढ्वम्, दयिषीध्वम् । अदयिढ्वम्, अदयिध्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४८१ रयँ गतौ ।
४८२ ऊयीँ तन्तुसन्ताने ।
४८३ पूयीँ विशरणे दुर्गन्धे च ।
४८४ क्नूयीँ शब्दे उन्दे च ।
४८५ क्ष्मायीँ विधूनने ।
४८६ स्फायीँ
४८७ ओँप्यायीँ वृद्धौ ।
४८८ तायृँ सन्तानपालनयोः । सन्तानः= प्रबन्धः ।
४८९ शलँ चलनसंवरणयोः ।
४९० वलँ
४९१ वल्लँ संवरणे संचरणे च ।
४९२ मलँ
४९३ मल्लँ धारणे ।
४९४ भलँ
४९५ भल्लँ परिभाषणहिंसादानेषु ।
४९६ कलँ शब्दसंख्यानयोः ।
४९७ कल्लँ अव्यक्ते शब्दे । अशब्द इति स्वामी अशब्दस्तूष्णीं भाव इति च ।

४९८ तेवृँ
४९९ देवृँ देवने ।
५०० षेवृँ
५०१ गेवृँ
५०२ ग्लेवृँ
५०३ पेवृँ
५०४ मेवृँ
५०५ म्लेवृँ सेवने ।
शेवृँ खेवृँ क्लेवृँ इत्यप्येके ।
५०६ रेवृँ प्लवगतौ । प्लवगतिः= प्लुतगतिः ।

अयादय आत्मनेपदिनो गताः ।

अथावत्यन्ताः परस्मैपदिनः

५०७ मव्यँ बन्धने ।
५०८ सूर्क्ष्यँ
५०९ ईर्क्ष्यँ
५१० ईर्ष्यँ ईर्ष्यार्थाः ।
५११ हयँ गतौ ।
५१२ शुच्यँ अभिषवे । अवयवानां शिथिलीकरणं सुरायाः सन्धानं वा ऽभिषवः स्नानं च । च्युच्यँ इत्येके ।

५१३ हर्यँ गतिकान्त्योः ।
५१४ अलँ भूषणपर्याप्तिवारणेषु । अयं स्वरितेदित्येके ।
५१५ ञिफलाँ विशरणे ।
५१६ मीलँ
५१७ श्मीलँ
५१८ स्मीलँ
५१९ क्ष्मीलँ निमेषणे । निमेषणं संकोचः । द्वितीयस्तालव्यादिः । तृतीयो दन्त्यादिः ।
५२० पीलँ प्रतिष्टम्भे । प्रतिष्टम्भो=रोधनम् ।
५२१ नीलँ वर्णे ।
५२२ शीलँ समाधौ ।
५२३ कीलँ बन्धने ।
५२४ कूलँ आवरणे ।

---

४८१ रयते । रेये । ४८२ ऊयते । ऊयाञ्चक्रे । ४८३ पूयते । पुपूये । ४८४ क्नूयते । चुक्नूये । ४८५ क्ष्मायते । चक्ष्माये । ४८६-४८७ स्फायते । पस्फाये । प्यायते । ६-१-२९ लिँड्यङोश्च +६-४-८२ एरनेकाचो...- पिप्ये । ३-१-६१ दीपजन... +६-४-१०४ चिणो लुक्- अप्यायि, अप्यायिष्ट । ४८८ तायते । अतायि, अतायिष्ट । ४८९ शलते । शेले । अशलिढ्वम्, अशलिध्वम् । ४९०-४९१ वलते । ववले । वल्लते । ववल्ले ४९२-४९३ मलते । मेले । मल्लते । ममल्ले ४९४-४९५ भलते । बभले । भल्लते । बभल्ले । ४९६ कलते । चकले । ४९७ कल्लते । चकल्ले । ४९८-४९९ तेवते । तितेवे । देवते । दिदेवे । ५००-५०५ सेवते । ८-३-७० परिनिविभ्यः...- परिषेवते । सिषेवे । गेवते । जिगेवे । ग्लेवते । जिग्लेवे । पेवते । पिपेवे । मेवते । मिमेवे । म्लेवते । मिम्लेवे । शेवते । शिशेवे खेवते । चिखेवे । क्लेवते । चिक्लेवे । ५०६ रेवते । रिरेवे । ५०७ मव्यति । ममव्य । ५०८-५१० सूर्क्ष्यति । सुषूर्क्ष्य । ईर्क्ष्यति । ईर्क्ष्याञ्चकार । ईर्ष्यति । ईर्ष्याञ्चकार । ५११ हयति । जहाय । जहयतुः । ७-२-५ ह्म्यन्तक्षण...- अहयीत् । ५१२ शुच्यति । शुशुच्य । च्युच्यति । चुच्युच्य । ५१३ हर्यति । जहर्य । ५१४ अलति । आल । ७-२-२ अतो ल्रान्तस्य- मा भवानालीत् । मतान्तरे- अलते इत्याद्यपि । ५१५ फलति । पफाल ६-४-१२२ तॄफल...- फेलतुः । फेलिथ । ७-२-२ अतो ल्रान्तस्य-अफालीत् । ५१६-५१९ मीलति । अमीलीत् । ५२० पीलति । अपीलीत् । ५२१ नीलति । अनीलीत् । ५२२ शीलति । अशीलीत् । ५२३ कीलति । चिकील । ५२४ कूलति । चुकूल । अकूलीत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५२५ शूलँ रुजायां संघोषे च ।
५२६ तूलँ निष्कर्षे । निष्कर्षः= निष्कोषणम् । तच्चान्तर्गतस्य बहिर्निःसारणम् ।
५२७ पूलँ संघाते ।
५२८ मूलँ प्रतिष्ठायाम्
५२९ फलँ निष्पत्तौ ।
५३० चुल्लँ भावकरणे । भावकरणमभिप्रायाविष्करणम् ।
५३१ फुल्लँ विकसने ।
५३२ चिल्लँ शैथिल्ये भावकरणे च ।
५३३ तिलँ गतौ ।
तिल्लँ इत्येके ।
५३४ वेलृँ
५३५ चेलृँ
५३६ केलृँ
५३७ खेलृँ
५३८ क्ष्वेलृँ
५३९ वेल्लँ चलने । पञ्च ॠँदितः षष्ठो लोपधः ।
५४० पेलृँ
५४१ फेलृँ
५४२ शेलृँ गतौ । त्रयोऽप्यॄँदितः ।
षेलृँ इत्येके ।
५४३ स्खलँ संचलने ।
५४४ खलँ संचये ।
५४५ गलँ अदने ।
५४६ षलँ गतौ ।
५४७ दलँ विशरणे ।
५४८ श्वलँ
५४९ श्वल्लँ आशुगमने ।
५५० खोलृँ
५५१ खोरॄँ गतिप्रतिघाते । ॠँदितौ ।
५५२ धोरॄँ गतिचातुर्ये ।
५५३ त्सरँ छद्मगतौ ।
५५४ क्मरँ हूर्छने । हूर्छनम्= कौटिल्यम् ।
५५५ अभ्रँ
५५६ वभ्रँ
५५७ मभ्रँ
५५८ चरँ गत्यर्थाः । चरतिर्भक्षणेऽपि ।
५५९ ष्ठिवुँ निरसने
५६० जि जये ।
५६१ जीवँ प्राणधारणे ।
५६२ पीवँ
५६३ मीवँ
५६४ तीवँ
५६५ णीवँ स्थौल्ये ।
५६६ क्षीवुँ
५६७ क्षेवुँ निरसने ।
५६८ उर्वीँ
५६९ तुर्वीँ
५७० थुर्वीँ
५७१ दुर्वीँ
५७२ धुर्वीँ हिंसार्थाः ।
५७३ गुर्वीँ उद्यमने ।
५७४ मुर्वीँ बन्धने ।
५७५ पुर्वँ
५७६ पर्वँ
५७७ मर्वँ पूरणे ।
५७८ चर्वँ अदने ।
५७९ भर्वँ हिंसायाम् ।
५८० कर्वँ
५८१ खर्वँ
५८२ गर्वँ दर्पे ।

५२५-५२९फर्लाति । ६-४-१२२ तृफल...- फेलतुः । फेलिथ । ७-२-२ अतोल्रा...- अफालीत् । ५३०-५३३ तेर्लाति । तिर्ल्लाति । ५३४-५३९ वेर्लाति । विवेल । चेलति । चिचेल । केलति । चिकेल । खेलति । चिखेल । क्ष्वेर्लाति । चिक्ष्वेल । वेल्लति । विवेल्ल । ५४०-५४२ पेलति । फेलति । शेलति । सेलति । सिषेल । ५४३ स्खर्लाति । चस्खाल । ७-२-२ अतोल्रा...- अस्खालीत् । ५४४ खलति । चखाल । चखलतुः । अखालीत् । ५४५ गलति । जगाल । जगलतुः । अगालीत् । ५४६ सलति । सेलतुः । असालीत् । ५४७ दर्लाति । देलतुः । अदालीत् । ५४८-५४९ श्वलति । शश्वाल । अश्वालीत् । श्वर्ल्लाति । शश्वल्ल । अश्वल्लीत् । ५५० खोलति । ५५१ खोरति । ५५२ धोरति । ५५३ त्सरति । तत्सार । ७-२-२ अतो...- अत्सारीत् । ५५४ क्मरति । चक्मार । अक्मारीत् ५५५-५५८ अभ्रति । आनभ्र । वर्भ्राति । अवभ्रीत् । मर्भ्राति । अमभ्रीत् । चरति । अचारीत् । ५५९ ७-३-७५ ष्ठिवुँ...- ष्ठीवति । अस्य द्वितीयस्थकारष्ठकारो वेति वृत्तिरिति दीक्षितः । तिष्ठेव । तिष्ठिवतुः । तिष्ठिवुः । टिष्ठेव । टिष्ठिवतुः । टिष्ठिवुः । ८-२-७७ हलि च - ष्ठीव्यात् । ५६० जयति । ७-३-५७ सर्ल्लिटोर्जेः- जिगाय । जिग्यतुः । जीयात् । अजैषीत् । ५६१ जीवति । जिजीव । अजीवीत् । ५६२-५६५ पीवति । पिपीव । मीर्वाति । मिमीव । तीवति । तितीव । नीवति । निनीव । ५६६-५६७ क्षीवति । चिक्षीव । क्षेवति । चिक्षेव । ५६८-५७२ ८-२-७८ उपधायां च - ऊर्वति । ऊर्वाञ्चकार । तूर्वति । थूर्वति । दूर्वति । धूर्वाति । गूर्वाति । जुगूर्व । ५७४ मूर्वति । ५७५-५७७ पूर्वति । पर्वति । मर्वति । ५७८ चर्वति । ५७९ भर्वाति । ५८०-५८२ कर्वति । चकर्व । खर्वति । चखर्व । गर्वति । जगर्व ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५८३ अर्वँ ५८४ शर्वँ ५८५ षर्वँ हिंसायाम् ।
५८६ इविँ व्याप्तौ ।
५८७ पिविँ
५८८ मिविँ
५८९ णिविँ सेचने । सेवने इति तरङ्गिण्याम् । तृतीयः षिविँ इत्येके ।
५९० हिविँ
५९१ दिविँ
५९२ धिविँ
५९३ जिविँ प्रीणनार्थाः ।
५९४ रिविँ
५९५ रविँ
५९६ धविँ गत्यर्थाः ।
५९७ कृविँ हिंसाकरणयोश्च । चाद् गतौ ।
५९८ मवँ बन्धने ।
५९९ अवँ रक्षण-गति-कान्ति-प्रीति-तृप्त्यवगम-प्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु ।

मव्यँप्रभृतयः परस्मैपदिनो गताः ।
अथोभयपदी ।
६०० धावुँ गतिशुद्ध्योः ।
अथोष्मान्ता आत्मनेपदिनः
६०१ धुक्षँ
६०२ धिक्षँ सन्दीपन क्लेशनजीवनेषु ।
६०३ वृक्षँ वरणे ।
६०४ शिक्षँ विद्योपादाने ।
६०५ भिक्षँ भिक्षायामलाभे लाभे च ।
६०६ क्लेशँ अव्यक्तायां वाचि । बाधन इति दुर्गः ।
६०७ दक्षँ वृद्धौ शीघ्रार्थे च ।
६०८ दीक्षँ मौण्डचेज्योपनयननियमव्रतादेशेषु ।
६०९ ईक्षँ दर्शने ।
६१० ईषँ गतिहिंसादर्शनेषु ।
६११ भाषँ व्यक्तायां वाचि ।
६१२ वर्षँ स्नेहने ।
६१३ गेषृँ अन्विच्छायाम् । ग्लेषृँ इत्येके ।
६१४ पेषृँ प्रयत्ने ।
६१५ जेषृँ
६१६ णेषृँ
६१७ एषृँ
६१८ प्रेषृँ गतौ ।
६१९ रेषृँ
६२० हेषृँ
६२१ ह्रेषृँ अव्यक्ते शब्दे । आद्यो वृकशब्दे । ततो द्वावश्वशब्दे ।
६२२ कासृँ शब्दकुत्सायाम् ।
६२३ भासृँ दीप्तौ
६२४ णासृँ
६२५ रासृँ शब्दे ।
६२६ णसँ कौटिल्ये ।
६२७ भ्यसँ भये ।
६२८ आङः शासिँ इच्छायाम् ।
६२९ ग्रसुँ
६३० ग्लसुँ अदने ।
६३१ ईहँ चेष्टायाम् ।
६३२ वहिँ
६३३ महिँ वृद्धौ ।
६३४ अहिँ गतौ ।

५८३-५८५अर्वति । आनर्व । शर्वति । शशर्व । सर्वति । ससर्व । ५८६ इन्वति । इन्वाञ्चकार । ५८७-५८९ पिन्वति । पिपिन्व । मिन्वति । मिमिन्व । निन्वति । निनिन्व । षिविँ इति मते- सिन्वति । सिषिन्व । ५९०-५९३ हिन्वति । दिन्वति । ३-१-८० धिन्वि...- धिनोति । धिनुतः । धिन्वन्ति । ६-४-१०७ लोपश्चा...- धिन्वः, धिनुवः । धिन्मः, धिनुमः । मिपि तु परत्वाद् गुणः । धिनोमि । धिनोतु । ६-४-१०६ उतश्च...- धिनु । नित्यत्वादुकारलोपात् पूर्वमाट्-धिनवाव । धिनवाम । जिन्वति । ५९४-५९६ रिण्वति । रण्वति । धन्वति । ५९७ कृणोति । धिनोतिवत् । ५९८ मवति । मेवतुः । मेवुः । अमावीत्, अमवीत् । ५९९ अवति । आव । आवीत् । ६०० धावति । धावते । ६०१-६०२ धुक्षते । दुधुक्षे । धिक्षते । दिधिक्षे । ६०३ वृक्षते । ववृक्षे । ६०४ शिक्षते । ६०५ भिक्षते । ६०६ क्लेशते । चिक्लेशे । ६०७ दक्षते । ददक्षे । ६०८ दीक्षते । दिदीक्षे । ६०९ ईक्षते । ईक्षाञ्चक्रे । ६१० ईषते । ईषाञ्चक्रे । ६११ भाषते । बभाषे । ६१२ वर्षते । ववर्षे । ६१३ गेषते । जिगेषे । ग्लेषते । जिग्लेषे । ६१४ पेषते । पिपेषे । ६१५-६१८ जेषते । जिजेषे । नेषते । निनेषे । एषते । एषाञ्चक्रे । प्रेषते । पिप्रेषे । ६१९-६२१ रेषते रिरेषे । हेषते । जिहेषे । ह्रेषते । जिह्रेषे । ६२२ कासते । ३-१-३५ कास्प्रत्यया... - कासाञ्चक्रे । ६२३ भासते । बभासे । ६२४-६२५ नासते । प्रणासते । रासते । ६२६ नसते । प्रणसते । नेसे । ६२७ भ्यसते । बभ्यसे । ६२८ आशंसते । आशशंसे । ६२९-६३० ग्रसते । जग्रसे । ग्लसते । जग्लसे । ६३१ ईहते । ईहाञ्चक्रे । ६३२-६३३ वंहते । ववंहे । मंहते । ममंहे । ६३४ अंहते । आनंहे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६३५ गर्हँ ६३६ गल्हँ कुत्सायाम्।
६३७ बर्हँ
६३८ बल्हँ प्राधान्ये।
६३९ वर्हँ
६४० वल्हँ परिभाषणहिंसाच्छादनेषु।
६४१ प्लिहँ गतौ।
६४२ वेहृँ
६४३ जेहृँ
६४४ बाहृँ प्रयत्ने। जेहृँ गतावपि।
६४५ दाहृँ निद्राक्षये। निक्षेप इत्येके।
६४६ काशृँ दीप्तौ।
६४७ ऊहँ वितर्के।
६४८ गाहूँ विलोडने।
६४९ गृहूँ ग्रहणे।
६५० ग्लहँ च।
६५१ घुषिँ कान्तिकरणे। घषँ इति केचित्।

धुक्षँप्रभृतय आत्मनेपदिनो गताः। अथ अर्हत्यन्ताः परस्मैपदिनः।

६५२ घुषिर् अविशब्दने। विशब्दनं प्रतिज्ञानं ततोऽन्यस्मिन्नर्थे इत्येके। शब्दे इत्यन्ये पेठुः।
६५३ अक्षूँ व्याप्तौ
६५४ तक्षूँ
६५५ त्वक्षूँ तनूकरणे।
६५६ उक्षँ सेचने।
६५७ रक्षँ पालने।
६५८ णिक्षँ चुम्बने।
६५९ तृक्षँ
६६० स्तृक्षँ
६६१ णक्षँ गतौ।
६६२ वक्षँ रोषे। संघात इत्येके।
६६३ मृक्षँ संघाते। म्रक्षँ इत्येके।

६६४ तक्षँ त्वचने। त्वचनं संवरणं त्वचो ग्रहणं च। पक्षँ परिग्रह इत्येके।
६६५ षूर्क्षँ आदरे।
६६६ काक्षिँ
६६७ वाक्षिँ
६६८ माक्षिँ काङ्क्षायाम्।
६६९ द्राक्षिँ
६७० धाक्षिँ
६७१ ध्वाक्षिँ घोरवासिते च।
६७२ चूषँ पाने।
६७३ तूषँ तुष्टौ।
६७४ पूषँ वृद्धौ।
६७५ मूषँ स्तेये।
६७६ लूषँ
६७७ रूषँ भूषायाम्।
६७८ शूषँ प्रसवे। प्रसवोऽभ्यनुज्ञानम्।
६७९ यूषँ हिंसायाम्।
६८० जूषँ च।
६८१ भूषँ अलङ्कारे।
६८२ ऊषँ रुजायाम्।

६३५-६३६ गर्हते। जगर्हे। गल्हते। जगल्हे। **६३७-६४०** अत्र दीक्षितः केचित्तु पूर्वयोर्दन्त्योष्ठ्यादितामनयोरोष्ठ्यादितां चाहुरिति। **६४१** प्लेहते। पिप्लिहे। **६४२-६४४** अत्र दीक्षितः- आद्यो दन्त्योष्ठ्यादिः। अन्त्यः केवलोष्ठ्यादिः। उभावप्योष्ठ्यादी इत्येके। दन्त्योष्ठ्यादी इत्यपरे। इति। **६४५** दाहते। ददाहे। **६४६** काशते। चकाशे। **६४७** ऊहते। ऊहाञ्चक्रे। **६४८** गाहते। जगाहे। ७-२-४४ स्वरति... - जगाहिषे, जघाक्षे। जगाहिध्वे, जघाढ्वे। गाहिता, गाढा। गाहिष्यते, घाक्ष्यते। गाहिषीष्ट, घाक्षीष्ट। अगाहिष्ट, अगाढ। **६४९** गर्हते। जगृहे। जगृहिषे, जघृक्षे। गर्हिता, गर्ढा। लुङि - अगर्हिष्ट। इडभावे-३-१-४५ शल...अघृक्षत। ७-३-७२ क्सस्याचि - अघृक्षाताम्। अघृक्षन्त। **६५०** ग्लहते। जग्लहे। **६५१** घुंषते। जुघुंषे। घषते। जघषे। अथ अर्हत्यन्ताः परस्मैपदिनः। **६५२** घोषति। जुघोष। घोषिता। ३-१-५७ इरितो वा- अघुषत्, अघोषीत्। **६५३** ३-१-७५ अक्षोऽन्य...-अक्ष्णोति। अक्ष्णुतः। अक्ष्णुवन्ति। अक्षति। अक्षतः। अक्षन्ति। आनक्ष। आनक्षिथ, इडभावे- ८-२-२९ स्कोः संयोगा...- आनष्ठ। अक्षिता, अष्टा। अक्षिष्यति, इडभावे ८-२-४१ षढोः...- अक्ष्यति। अक्ष्णोतु। अक्ष्णुहि। आक्षीत्। आक्षिष्टाम्, आष्टाम्। आक्षिषुः, आक्षुः। आक्षिष्यत्, आक्ष्यत्। **६५४-६५५** ३-१-७६ तनूकरणे...- तक्ष्णोति, तक्षति। ततक्षिथ, ततष्ठ। तक्षिता, तष्टा। अतक्षीत्, अताक्षीत्। अतक्षिष्टाम्, अताष्टाम्। त्वक्षति। तत्वक्षिथ, तत्वष्ठ। त्वक्षिता, त्वष्टा। **६५६** उक्षति। उक्षाञ्चकार। **६५७** रक्षति। **६५८** निक्षति। **६५९-६६१** तृक्षति। स्तृक्षति। नक्षति। **६६२** वक्षति। **६६३** मृक्षति। म्रक्षति। **६६४** तक्षति। पक्षति। **६६५** सूर्क्षति। सुषूर्क्ष। **६६६-६६८** काङ्क्षति। चकांङ्क्ष। वाङ्क्षति। माङ्क्षति। **६६९-६७१** द्राङ्क्षति ध्राङ्क्षति। ध्वाङ्क्षति **६७२** चूषति। चुचूष। **६७३** तूषति। तुतूष। **६७४** पूषति। पुपूष **६७५** मूषति। मुमूष। **६७६-६७७** लूषति। लुलूष। रूषति। रुरूष। **६७८** शूषति। शुशूष। **६७९** यूषति। युयूष। **६८०** जूषति। जुजूष। **६८१** भूषति। बुभूष। **६८२** ऊषति। ऊषाञ्चकार। ३-१-३८ उषविद... इति तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६८३ ईषँ उञ्छे ।
६८४ कषँ
६८५ खषँ
६८६ शिषँ ६८७ जषँ
६८८ झषँ
६८९ शषँ
६९० वषँ
६९१ मषँ
६९२ रुषँ
६९३ रिषँ हिंसार्थाः ।
तृतीयषष्ठौ तालव्योष्मादी सप्तमो दन्त्योष्ठ्यादिः ।
६९४ भषँ भर्त्सने । इह भर्त्सनं श्वरवः ।
६९५ उषँ दाहे ।
६९६ जिषुँ
६९७ विषुँ
६९८ मिषुँ सेचने ।
६९९ पुषँ पुष्टौ ।
७०० श्रिषुँ
७०१ शिलषुँ
७०२ पृषुँ
७०३ प्लुषुँ दाहे ।
७०४ पृषुँ
७०५ वृषुँ
७०६ मृषुँ सेचने । मृषुँ सहने च । इतरौ हिंसासंक्लेशनयोश्च ।
७०७ घृषुँ संघर्षे ।
७०८ हृषुँ अलीके ।
७०९ तुसँ
७१० ह्रसँ
७११ ह्लसँ
७१२ रसँ शब्दे ।
७१३ लसँ श्लेषणक्रीडनयोः ।
७१४ घस्लृँ अदने । अत्र दीक्षितः- अयं न सार्वत्रिकः । लिँटचन्यतरस्यामित्यदेर्घस्ला देशविधानात् । ततश्च यत्र लिङ्गं वचनं वा ऽस्ति तत्रैवास्य प्रयोगः । अत्रैव पाठः शपि परस्मैपदे लिङ्गम् । लृँदित्करणमङि । अनिट्कारिकासु पाठो वलाद्यार्धधातुके । क्मरचि तु विशिष्योपादानमिति ।
७१५ जर्जँ ।
७१६ चर्चँ ।
७१७ झर्झँ परिभाषणहिंसातर्जनेषु ।
७१८ पिसृँ ।
७१९ पेसृँ गतौ ।
७२० हसेँ हसने ।
७२१ णिशँ समाधौ ।
७२२ मिशँ
७२३ मशँ शब्दे रोषकृते च ।
७२४ शवँ गतौ ।
७२५ शशँ प्लुतगतौ ।

नेह प्रवर्तते, तत्र ह्रस्वोकारोपधस्य ग्रहणादत्र च दीर्घोकारोपधत्वात् । ६८३ ईषति । ईषाञ्चकार । ६८४-६९३ कर्षति । चकाष । चकषतुः । खषति । चखाष । चखषतुः । शेषति । शिशेष । शिशेषिथ । शिशिषिव । शिशिषिम । शेष्टा । शेक्ष्यति । ३-१-४५ शल...- अशिक्षत् । जषति । जजाष । जेषतुः । झषति । जझाष । जझषतुः । शषति । शशाष । शेषतुः । वषति । ववाष । ववषतुः । मषति । ममाष । मेषतुः । रोषति । ७-२-४८ तीषसह...- रोषिता, रोष्टा । रोषिष्यति । अरोषीत् । रेषति । रेषिता, रेष्टा । रेषिष्यति । अरेषीत् । ६९४ भषति । बभाष । बभषतुः । ६९५ ओषति । ३-१-३८ उष विद...- ओषाञ्चकार । आमभावे- ६-४-७८ अभ्यासस्या....-उवोष । ऊषतुः । ऊषुः । उवोषिथ । ऊषिव । ऊषिम । ६९६-६९८ जेषति । जिजेष । वेषति । विवेष । क्रादिनियमादिट्- विवेषिथ । विविषिव । विविषिम । वेष्टा । वेक्ष्यति । अविक्षत् । मेषति । मेषिता । अमेषीत् । ६९९ पोषति । अनिट्केषु श्यना निर्देशादयं सेट् । पोषिता । अत एव न क्सः । अङ्विधौ दैवादिकस्य ग्रहणान्नाङ् । अपोषीत् । ७००-७०३ श्रेषति । शिश्रेष । श्रेषिता । श्लेषति । शिश्लेष । अयमपि सेट् । श्लेषिता । अनिट्सु श्लिष्य इति श्यना निर्देशात् । प्रोषति । पुप्रोष । प्रोषिता । प्लोषति । पुप्लोष । प्लोषिता । ७०४-७०६ पर्षति । पपर्ष । पपृषतुः । वर्षति । ववर्ष । ववृषतुः । मर्षति । ममर्ष । ममृषतुः । ७०७ घर्षति । जघर्ष । जघृषतुः । ७०८ हर्षति । जहर्ष । जहृषतुः । ७०९-७१३ लसति । लेसतुः । ७१४ घसति । घस्ता । ७-४-४९ सः स्यार्ध...- घत्स्यति । घसतु । अघसत् । घसेत् । लिङ्गाद्यभावादाशीर्लिङ्चस्या ऽप्रयोगः । ३-१-५५ पुषादिद्युता...- अघसत् । ७१५-७१७ जर्जति । जजर्ज । चर्चति । चचर्च । झर्झति । जझर्झ । ७१८-७१९ पेसति । पिपिसतुः । पिपेसतुः। ७२० हसति । जहास । जहसतुः । ७-२-५ ह्म्यन्तक्षण...- अहसीत् । ७२१ णिशँ समाधौ । ७२१ नेशति । प्रणेशति । ७२२-७२३ मेशति मिमिशतुः । मशति । मेशतुः । ७२४ शवति । शेवतुः । ७२५ शशति । शेशतुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७२६ शसुँ हिंसायाम् ।
७२७ शंसुँ स्तुतौ । अयं दुर्गतावपीति दुर्गः ।
७२८ चहँ परिकल्कने । परिकल्कनं शाठ्यम् ।
७२९ महँ पूजायाम् ।
७३० रहँ त्यागे ।
७३१ रहिँ गतौ ।
७३२ दृहँ
७३३ दृहिँ
७३४ बृहँ
७३५ बृहिँ वृद्धौ । बृहिँ शब्दे च ।
७३६ तुहिर्
७३७ दुहिर्
७३८ उहिर् अर्दने ।

७३९ अर्हँ पूजायाम् ।
घुषिर् प्रभृतयः परस्मैपदिनो गताः । अथ कृपूँपर्यन्ता आत्मनेपदिनः ।
७४० द्युतँ दीप्तौ ।
७४१ श्विताँ वर्णे ।
७४२ ञिमिदाँ स्नेहने ।
७४३ ञिष्विदाँ स्नेहनमोचनयोः । मोहनयोरित्येके । ञिक्ष्विदाँ चेत्येके ।
७४४ रुचँ दीप्तावभिप्रीतौ च ।
७४५ घुटँ परिवर्तने ।
७४६ रुटँ
७४७ लुटँ

७४८ लुठँ प्रतिघाते ।
७४९ शुभँ दीप्तौ ।
७५० क्षुभँ सञ्चलने ।
७५१ णभँ
७५२ तुभँ हिंसायाम् ।
आद्योऽभावेऽपि
७५३ स्रंसु
७५४ ध्वंसुँ
७५५ भ्रंसुँ अवस्रंसने । स्रंसते ।
७५६ स्रम्भुँ विश्वासे ।
७५७ वृतुँ वर्तने ।
७५८ वृधुँ वृद्धौ ।
७५९ शृधुँ शब्दकुत्सायाम् ।
७६० स्यन्दूँ प्रस्रवणे ।

---

७२६ शसति । ६-४-१२७ न शसदद...- शशसतुः । शशसिथ । ७२७ शंसति । शशंस । शशंसतुः । कित्त्वान्नलोपः- शस्यात् । ७२७ चहति । चचाह । चेहतुः । ७-२-५ ह्म्यन्तक्षण...- अचहीत् । ७२९ मेहतुः । अमहीत् । ७३० रेहतुः । अरहीत् । ७३१ रंहति । ररंहतुः । रंह्यात् । ७३२-७३५ दर्हति । ददर्ह । ददृहतुः । दृंहित । ददृंह । ददृंहतुः । बृंहति । मतान्तरे । बर्हति । ३-१-५७ इरितो वा-अबृहत्, अबर्हीत् । ७३६-७३८ तोहति, अतुहत् । अतोहीत् । दोहति । अदुहत्, अदोहीत् । अनिट्स्वस्य दुहेर्ग्रहणं नेच्छन्ति । ओहति । उवोह । ऊहतुः । औहत्, औहीत् । ७३९ अर्हति । ७४० द्योतते । ७-४-६७ द्युतिस्वाप्योः...- दिद्युते । १-३-९१ द्युद्भ्यो लुँङि +३-१-५५ पुषादिद्युता...-अद्युतत्, अद्योतिष्ट । अद्योतिष्यत । ७४१ श्वेतते । शिश्विते । अश्वितत्, अश्वेतिष्ट । ७४२ मेदते । मिमिदे । अमिदत्, अमेदिष्ट । ७४३ स्वेदते । सिष्विदे । अस्विदत्, अस्वेदिष्ट । क्ष्वेदते । चिक्ष्विदे । अक्ष्विदत्, अक्ष्वेदिष्ट । ७४४ रोचते सूर्यः । वालकाय रोचते दुग्धम् । अरुचत्, अरोचिष्ट । ७४५ घोटते । जुघुटे । अघुटत्, अघोटिष्ट । ७४६-७४८ रोटते । अरुटत्, अरोटिष्ट । लोटते । अलुटत्, अलोटिष्ट । लोठते । अलुठत्, अलोठिष्ट । ७४९ शोभते । अशुभत्, अशोभिष्ट । ७५० क्षोभते । अक्षुभत्, अक्षोभिष्ट । ७५१-७५२ नभते । नेभे । अनभत्, अनभिष्ट । तोभतेतुतुभे । अतुभत्, अतोभिष्ट । ७५३-७५५ अस्रसत्, अस्रंसिष्ट । ध्वंसते । अध्वसत्, अध्वंसिष्ट । भ्रंसते । अभ्रसत्, अभ्रंसिष्ट । भ्रंशुँ इत्यपि केचित् । भ्रंशते । अभ्रशत्, अभ्रंशिष्ट । तृतीय एव तालव्यान्त इत्यन्ये । ७५६ स्रम्भते । विस्रम्भते । अस्रभत्, अस्रंभिष्ट । ७५७ वर्तते । ववृते । १-३-९२ वृद्भ्यः स्यसनोः +७-२-५९ न वृद्भ्यश्चतुर्भ्यः-वर्त्स्यति, वर्तिष्यते । अवृतत्, अवर्तिष्ट । अवर्त्स्यत्, अवर्तिष्यत । ७५८ प्राग्वत् । ७५९ अयमपि प्राग्वत् । ७६० स्यन्दते । सस्यन्दे । ७-२-४४ स्वरति...- सस्यन्दिषे, सस्यन्त्से । सस्यन्दिध्वे, सस्यन्द्ध्वे । स्यन्दिता, स्यन्ता स्यन्त्ता । १-३-९२ वृद्भ्यः... इति परस्मैपदपक्षे ७-२-४४ स्वरति...इति अन्तरङ्गमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यात् ७-२-५९ न वृद्भ्य... इति निषेधः – स्यन्त्स्यति । स्यन्दिस्यते, स्यन्त्स्यते । स्यन्दिषीष्ट, स्यन्त्सीष्ट । १-३-९१ द्युद्भ्यो...इति परस्मैपदपक्षेऽङि ६-४-२४ अनिदितां... इति नलोपः - अस्यदत् । अस्यन्दिष्ट, इभावे- ८-२-२६ झलो झलि-अस्यन्त अस्यन्त्त । अस्यन्दिषाताम्, अस्यन्त्साताम् । अस्यन्दिषत, अस्यन्त्सत । अस्यन्त्स्यत् । अस्यन्दिष्यत, अस्यन्त्स्यत । ८-३-७२ अनुविपर्य...- अनुष्यन्दते, अनुस्यन्दते वा जलम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७६१ कृपूँ सामर्थ्ये ।
वृत् । सम्पूर्णो द्युतादिर्वृतादिश्चेत्यर्थः । अथ त्वरत्यन्तास्त्रयोदशात्मने -पदिनः षितश्च ।
७६२ घटँ चेष्टायाम् ।
७६३ व्यथँ भयसंचलनयोः ।
७६४ प्रथँ प्रख्याने ।
७६५ प्रसँ विस्तारे ।
७६६ म्रदँ मर्दने ।
७६७ स्खदँ खदने ।
७६८ क्षजिँ गतिदानयोः ।
७६९ दक्षँ गतिहिंसनयोः ।
७७० क्रपँ कृपायां गतौ च ।
७७१ कदिँ
७७२ क्रदिँ
७७३ क्लदिँ वैक्लव्ये । वैकल्ये इत्येके ।
त्रयो ऽप्यनिँदित इति नन्दी । ईँदित इति स्वामी । कदिँ क्रदीँ ईँदितौ क्रदँ क्लदँ इति चानिँदिताविति मैत्रेयः ।
७७४ ञित्वराँ संभ्रमे ।
घटादयः षितः ॥

घटादिष्वात्मनेपदिनो गताः । अथ फणान्ताः परस्मैपदिनः ।
७७५ ज्वरँ रोगे ।
७७६ गडँ सेचने ।
७७७ हेडँ वेष्टने ।
७७८ वटँ
७७९ भटँ परिभाषणे ।
७८० णटँ नृत्तौ ।
७८१ ष्टकँ प्रतिघाते ।
७८२ चकँ तृप्तौ ।
७८३ कखेँ हसने ।

---

७६१ ८-२-१८ कृपो- रो लः- कल्पते । चक्लृपे । चक्लृपिषे, चक्लृप्से । १-३-९३ लुँटि च क्लृपः +७-२-६० तासि च क्लृपः- कल्प्तासि । कल्प्तास्थः । कल्पितासे, कल्प्तासे । कल्प्सचति । कल्पिष्यते, कल्प्स्यते । कल्पिषीष्ट, इडभावे- १-२-११ लिँङ्सिचा...-क्लृप्सीष्ट । अक्लृपत्, अकल्पिष्ट, अक्लृप्त । अकल्प्स्यत् । अकल्पिष्यत, अकल्प्स्यत । ७६२ घटते ।जघटे । स्वन (८१७) धात्वग्रे 'घटादयो मितः, इति पठिष्यते । तत्फलम्- ६-४-९२ मितां ह्रस्वः-घटयति । ६-४-९३ चिण्णमुँलो...-घाटं घाटम्, घटं घटम् । अघाटि, अघटि । अत्र दीक्षितः- कथं तर्हि कमलवनोद्घाटनं कुर्वते ये । प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिवेत्यादि । शृणु । घटँ संघात इति चौरादिकस्येदम् । न च तस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयमिति वाच्यम्, नान्ये मितोऽहेताविति निषेधात् । इति । ७६३ व्यथते । ७-४-६८ व्यथो लिँटि -विव्यथे । व्यथयति । व्याथं व्याथम्, व्यथं व्यथम् । अव्याथि, अव्यथि । एवमग्रेऽप्यूह्यम् । ७६४ प्रथते । पप्रथे । ७६५ प्रसते । पप्रसे । ७६६ म्रदते । मम्रदे । ७६७ स्खदते । चस्खदे । ७६८ क्षञ्जते । चक्षञ्जे । अत्र दीक्षितः- मित्त्वसामर्थ्यादनुपधात्वेऽपि चिण्णमुलोरिति दीर्घ विकल्पः । अक्षाञ्जि, अक्षञ्जि । क्षञ्जं क्षञ्जम् । क्षाञ्जं क्षाञ्जम् । इति ७६९ अत्र दीक्षितः- योऽयं वृद्धिशैध्ययोरनुदात्तेत्सु पठितस्तस्येहार्थविशेषे मित्त्वार्थोऽनुवादः । इति । ७७० क्रपते । चक्रपे । ७७१-७७३ कन्दते । क्रन्दते । क्लन्दते । अत्र दीक्षितः- कदिँ क्रदिँ क्लदीँनामाह्वानरोदनयोः परस्मैपदिषूक्तानां पुनरिह पाठो मित्त्वार्थ आत्मनेपदार्थश्च । इति । ७७४ त्वरते । तत्वरे । षित्त्वफलम्- ३-३-१०४ षिद्भिदादिभ्योऽङ्-घटा व्यथा । प्रथा । इत्यादि । ७७५ ज्वरति । जज्वार । ७७६ गडति । जगाड । ७७७ अत्र दीक्षितः- हेडृँ अनादरे इत्यात्मनेपदिषु गतः, स एवोत्सृष्टानुबन्धोऽनूद्यते अर्थविशेषे मित्त्वार्थम् । परस्मैपदिभ्यो ज्वरादिभ्यः प्रागेवानुवादे कर्तव्ये तन्मध्ये ऽनुवादसामार्थ्यात् परस्मैपदम् । हेडति । जिहेड । हिडयति । अहिडि, अहीडि । अनादरे तु हेडयति । इति । ७७८-७७९ अत्र दीक्षितः- वटँ वेष्टने, भटँ भृताविति पठितयोः परिभाषणे मित्त्वार्थो ऽनुवादः । ७८० अत्र दीक्षितः- इत्थमेव पूर्वमपि पठितम् । तत्रायं विवेकः । पूर्वं पठितस्य नाटचमर्थः । यत्कारिषु नटव्यपदेशः । वाक्यार्थाऽभिनयो नाटचम् । घटादौ तु नृत्यं नृत्तं चाऽर्थः । यत्कारिषु नर्तकव्यपदेशः । पदार्थाभिनयो नृत्यम् । गात्रविक्षेपमात्रं नृत्तम् । केचित्तु घटादौ नटँ नताविति पठन्ति । णोपदेशपर्युदासवाक्ये भाष्यकृता नाटीति दीर्घपाठाद् घटादिर्णोपदेश इति । ७८१ गताविलन्ये । स्तकति । तस्ताक । अस्तकीत्, अस्ताकीत् । ७८२ अत्र दीक्षितः । तृप्तिप्रतीघातयोः पूर्वं पठितस्य तृप्तिमात्रे मित्वार्थोऽनुवादः । आत्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात् परस्मैपदम् । इति । चकति । चचाक । चेकतुः अचाकीत् अचकीत् । कखति । चकाख । चकखतुः । ७-२-५ ह्म्यन्त... । अकखीत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७८४ रगेँ शङ्कायाम् ।
७८५ लगेँ सङ्गे ।
७८६ ह्रगेँ
७८७ ह्लगेँ
७८८ षगेँ
७८९ ष्टगेँ संवरणे ।
७९० कगेँ नोच्यते ।
७९१ अकँ
७९२ अगँ कुटिलायां गतौ ।
७९३ कणँ
७९४ रणँ गतौ ।
७९५ चणँ
७९६ शणँ
७९७ श्रणँ दाने च । शणँ गतावित्यन्ये ।
७९८ श्रथँ
७९९ श्लथँ
८०० क्रथँ
८०१ क्लथँ हिंसार्थाः ।
८०२ वनँ च । हिंसायामिति शेषः ।
८०३ वनुँ च नोच्यते ।
८०४ ज्वलँ दीप्तौ ।
८०५ ह्वलँ
८०६ ह्मलँ चलने ।
८०७ स्मृ आध्याने ।
८०८ दॄ भये ।
८०९ नॄ नये ।
८१० श्रा पाके ।
मारणतोषणनिशामनेषु ८११ ज्ञा ॥
८१२ चलिः कम्पने ।
८१३ छदिर् ऊर्जने ।

---

७८४ रगति । रराग । रेगतुः । अरगीत् । ७८५ लगति । ललाग । लेगतुः । अलगीत् । ७८६-७९० अत्र दीक्षितः- अस्यायमर्थ इति विशिष्य नोच्यते । क्रियासामान्यार्थत्वात् । अनेकार्थत्वादित्यन्ये । इति । ७९१-७९२ अकति । आक । अगति । आग । ७९३-७९४ कणति । चकाण । चकणतुः । रणति । रराण । रेणतुः । ७९५-७९७ चणति । चेणतुः । शणति । शेणतुः । श्रणति । शश्रणतुः । ७९८-८०१ अत्र दीक्षितः-जासिनिप्रहणेति सूत्रे क्राथेति मित्त्वेऽपि वृद्धिर्निपात्यते । क्राथयति । मित्त्वं तु निपातनात् परत्वाच्चिण्णमुंलोरिति दीर्घे चरितार्थम् । अक्रथि अक्राथि । क्रथं क्रथम् । क्राथं क्राथम् । इति । ८०२-८०३ अत्र दीक्षितः-वनुं इत्यपूर्व एवाऽयं धातुर्न तु तानादिकस्याऽनुवादः उँदित्करणसामर्थ्यात् । तेन क्रियासामान्ये वनतीत्यादि । प्रवनयति । अनुपसृष्टस्य तु मित्त्वविकल्पो वक्ष्यते । इति । ८०४ अत्र दीक्षितः- णप्रत्ययार्थं पठिष्यमाण एवाऽयं मित्वार्थमनूद्यते । प्रज्वलयति । इति । अनुपसृष्टौ तु मित्त्वविकल्पो वक्ष्यते । ज्वलयति, ज्वालयति । ८०५-८०६ ह्वलति । जह्वाल । ह्मलति । जह्माल । प्रह्वलयति । प्रह्मलयति । अनुपसृष्टौ तु मित्त्वविकल्पो वक्ष्यते । ह्वलयति, ह्वालयति । ह्मलयति, ह्मालयति । ८०७ अत्र दीक्षितः- चिन्तायां पठिष्यमाणस्य आध्याने मित्त्वार्थोऽनुवद इति । आध्यानमुत्कण्ठापूर्वकं स्मरणम् । ८०८ अत्र दीक्षितः- दॄ विदारणे इति क्र्यादेरयं मित्त्वार्थोऽनुवादः । दृणन्तं प्रेरयति-दरयति । भयादन्यत्र दारयति । धात्वन्तरमेवेदमिति मते तु दरतीत्यादि । केचिद् घटादौ ७-४-९५ अत्स्मृदॄत्वरेति सूत्रे च दॄ इति दीर्घस्थाने ह्रस्वं पठन्ति । तन्नेति माधवः । इति । ८०९ अत्र दीक्षितः- क्र्यादिषु पठिष्यमाणस्याऽनुवादः । नयादन्यत्र नारयति । इति । ८१० अत्र दीक्षितः- श्रा पाके । श्रै इति कृतात्वस्य श्रा इत्यादादिकस्य च सामान्येना ऽनुकरणम् । लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य, लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्- इति परिभाषाभ्याम् । श्रपयति । विक्लेदयतीत्यर्थः । पाकादन्यत्र श्रापयति । स्वेदयतीत्यर्थः । इति । ८११ अत्र दीक्षितः- निशामनं चाक्षुषज्ञानमिति माधवः । ज्ञापनमात्रमित्यन्ये । निशानेष्विति पाठान्तरम् । निशानं तीक्ष्णीकरणम् । एष्वेवार्थेषु जानातिर्मित् । ज्ञप मिच्चेति चुरादौ । ज्ञापनं मारणादिकं च तस्यार्थः । कथं विज्ञापना भर्तृषु सिद्धिमेतीति । तज्ज्ञापयत्याचार्य इति च । श्रृणु । माधवमते ऽचाक्षुषज्ञाने मित्त्वा ऽभावात् । ज्ञापनमात्रे मित्त्वमिति मते तु ज्ञा नियोग इति चौरादिकस्य, धातूनामनेकार्थत्वात् । निशानेष्विति पठतां हरदत्तादीनां मते तु न काप्यनुपपत्तिरिति । ८१२ चलँ (८३२) कम्पने इति ज्वलादिः । चलयति शाखाम् । कम्पनादन्यत्र तु शीलं चालयति अन्यथा करोतीत्यर्थः । हरतीत्यर्थ इति स्वामी । सूत्रं चालयति । क्षिपतीत्यर्थः । ८१३ छदं अपवारण इति चौरादिकस्य स्वार्थे णिजभावे मित्त्वाऽर्थोऽयमनुवादः । अनेकार्थत्वादूर्जेरर्थे वृत्तिः । छदन्तं प्रयुङ्क्ते छदयति । बलवन्तं प्राणवन्तं वा करोतीत्यर्थः । अन्यत्र छादयति । अपवारयन्तं प्रयुङ्क्त इत्यर्थः । स्वार्थे णिचि तु छादयति । बलीभवति प्राणीभवति अपवारयति वेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिह्वोन्मथने ८१४लडिः ।
८१५ मदीँ हर्षग्लेपनयोः ।
८१६ ध्वनँ शब्दे ।
दलि-वलि- स्खलि-रणि-ध्वनि-त्रपि- क्षपयश्चेति भोजः ।
८१७ स्वनँ अवतंसने ।
घटादयो मितः (ग.सू.)
जनीँजॄष्क्नसुँरञ्जोऽमन्ताश्च ॥ (ग.सू.) केचित्तु जनीँजॄष्णसुँ इति पठित्वा ष्णसुँ निरसने इति दैवादिकमुदाहरन्ति । ज्वलँ ह्वलँह्मलँनमामनुपसर्गाद् वा (ग.सू.)ग्ला-स्ना-वनुँ- वमां च ॥ (ग.सू.) न कम्यमिचमाम् ॥ .(ग.सू.)
८१८ शमो दर्शने ॥ (ग.सू.)
८१९ यमोऽपरिवेषणे ॥ (ग.सू.)
८२० स्खदिर् अवपरिभ्यां च ॥ (ग.सू.)
८२१ । फणँ गतौ ।
वृत् । ~~घटादिः समाप्तः~~ । फणेः प्रागेव वृदित्येके । तन्मते फाणयतीत्येव । ज्वरँप्रभृतयः ~~परस्मैपदिनो गताः~~ ।
~~अथोभयपदी~~ ।
८२२ राजृँ दीप्तौ ।
अथात्मनेपदिनः ।
८२३ टुभ्राजृँ
८२४ टुभ्राशृँ
८२५ टुम्लाशृँ दीप्तौ ।

८१४लडँ विलासे इति पठितस्य मित्त्वार्थोऽनुवादः । उन्मथनं ज्ञापनम् । जिह्वाशब्देन षष्ठीतत्पुरुषः । लडयति जिह्वाम् । तृतीयातत्पुरुषो वा । लडयति जिह्वया । अन्ये तु जिह्वाशब्देन तद्व्यापारो लक्ष्यते । समाहारद्वन्द्वो ऽयम् । लडयति शत्रुम् । लडयति दधि । अन्यत्र लाडयति पुत्रम् । **८१५** ग्लेपनं दैन्यम् । दैवादिकस्य मित्त्वार्थोऽयमनुवादः । मदयति । हर्षयति, ग्लेपयति वेत्यर्थः । अन्यत्र मादयति । चित्तविकारमुत्पादयतीत्यर्थः । ८१६ भाव्ययं मित्त्वार्थमनूद्यते । ध्वनयति घण्टाम् । अन्यत्र ध्वानयति । अस्पष्टाक्षरमुच्चारयतीत्यर्थः । तत्र ध्वनिरणी उदाहृतौ । दलँ विशरणे । वलँ संवरणे । स्खलँ संचलने । त्रपूँष् लज्जायामिति गताः । तेषां णौ-दलयति । वलयति । स्खलयति । त्रपयति । क्षै क्षये इति वक्ष्यमाणस्य कृतात्वस्य पुँका निर्देशः क्षपयति । ८१७ शब्दे इति पठिष्यमाणस्याऽनुवादः । स्वनयति । अन्यत्र स्वानयति । घटादयः = ७६२ घटँ चेष्टायाम् इति प्रभृतयः, मितः= मित्संज्ञका भवन्ति । मित्त्वफलं प्रागुक्तमेव । जनी-जॄष् क्नसुँ-रञ्ज् धातवः, अमन्ताश्च धातवः, मितः। जॄष् इति षित्त्वनिर्देशाज्जीर्यतेर्ग्रहणम् । जॄणातेस्तु जारयति ॥ ज्वल (ग.सू.) एषां मित्त्वं वा । प्राप्तविर्भाषेयम् । ज्वलयति, ज्वालयति । उपसृष्टे तु नित्यं मित्त्वम् । प्रज्वलयति । कथं तर्हि प्रज्वालयति, उन्नामयतीति । घञन्तात् तत्करोतीति णौ । कथं संक्रामयतीति, मितां ह्रस्व इति सूत्रे वा चित्तविरागे इत्यतो वेत्यनुवर्त्य व्यवस्थितविभाषाश्रायणादिति वृत्तिकृत् । एतेन रजो विश्रामयन् राज्ञाम्, धुर्यान् विश्रामयेति स इत्यादि व्याख्यातम् । ग्लास्ना- (ग.सू) अनुपसर्गादेषां मित्त्वं वा । आद्ययोरप्राप्ते, इतरयोः प्राप्ते विभाषा । न कम्य (ग.सू.)एषाम् (अमन्तत्वात् प्राप्तं मित्वं) न=न भवति । कामयते । आमयति । चामयति । ८१८ शमः = शम् धातुः, दर्शने = दर्शनेऽर्थे न मित् । निशामयति रूपम् । अन्यत्र तु प्रणयिनो निशमय्य वधूः कथाः । कथं तर्हि निशामय तदुत्पत्तिं विस्तराद् गदतो ममेति ? शमं आलोचने इति चौरादिकस्य । धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिः शाम्यतिवत् । **यमो** ८१९ परिवेषणं भोजनानुकूलव्यापारः । ततोऽन्यस्मिन्नर्थे, यमः=यम् धातुः, न मित् । आयामयति । द्राघयति, व्यापारयति वेत्यर्थः । परिवेषणे तु यमयति दीनान् । भोजयतीत्यर्थः । पर्यवसितं नियमयन्नित्यादि तु नियमवच्छब्दात्तत्करोतीति णौ बोध्यम् । **स्खदिर्** ८२० अवस्खादयति । परिस्खादयति । अपावपरिभ्य इति न्यासकारः । स्वामी तु न कमीति नञमुत्तरत्रिसूत्र्यामननुवर्त्य शमः अदर्शने इति चिच्छेद । यमस्त्वपरिवेषणे मित्त्वमाह । तन्मते पर्यवसितं नियमयन्नित्यादि सम्यगेव । उपसृष्टस्य स्खदेश्चेदवादिपूर्वस्येति नियमात् प्रस्खादयतीत्याह । तस्मात् सूत्रद्वये उदाहरणप्रत्युदाहरणयोर्व्यत्यासः फलितः । इदं च मतं वृत्तिन्यासादिविरोधादुपेक्ष्यम् । इति दीक्षितः । ८२१ नेति निवृत्तमसंभवात् । निषेधात् पूर्वमसौ न पठितः, फणादिकार्यानुरोधात् । फणति । पफाण । ६-४-१२५ फणां च.- फेणतुः, पफणतुः । फेणुः, पफणुः । फेणिथ, पफणिथ । फणयति । ८२२ राजति । राजते । ६-४-१२५ फणां च... इत्यत्र अत इत्यनुवृत्तावपि विधानसामर्थ्यादात एत्वम्- रेजतुः, रराजतुः । रेजे, रराजे । अथात्मनेपदिनः । ८२३-८२५ भ्राजते । भ्रेजे, बभ्राजे । ३-१-७० वा भ्राश...-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यात्मनेपदिनः ।
अथ क्षरत्यन्ताः परस्मैपदिनः ।
८२६ स्यमुँ
८२७ स्वनँ
८२८ ध्वनँ शब्दे ।
८२९ षमँ
८३० ष्टमँ अवैकल्ये ।
८३१ ज्वलँ दीप्तौ ।
८३२ चलँ कम्पने ।
८३३ जलँ घातने । घातनं तैक्ष्ण्यम् । लजँ इत्येके ।
८३४ टलँ
८३५ ट्वलँ वैक्लव्ये ।
८३६ ष्ठलँ स्थाने ।
८३७ हलँ विलेखने ।
८३८ णलँ गन्धे । बन्धन इत्येके ।
८३९ पलँ गतौ ।
८४० बलँ प्राणने धान्यावरोधने च ।
८४१ पुलँ महत्वे ।
८४२ कुलँ संस्त्याने बन्धुषु च ।
८४३ शलँ
८४४ हुलँ
८४५ पत्लृँ गतौ । हुलँ हिंसायां संवरणे चेति केचित् ।
८४६ क्वथेँ निष्पाके ।
८४७ पथेँ गतौ ।
८४८ मथेँ विलोडने ।
८४९ टुवमँ उद्गिरणे ।
८५० भ्रमुँ चलने ।
८५१ क्षरँ सञ्चलने ।
८५२ षहँ मर्षणे ।
८५३ रमुँ क्रीडायाम् ।

भ्राश्यते, भ्राशते । भ्रेशे, बभ्राशे । भ्लाश्यते, भ्लाशते । भ्लेशे, बभ्लाशे । द्वावपीमौ तालव्यान्तौ । भ्राजतेरिह पाठः फणादिकार्यार्थः । पूर्वं पाठस्तु व्रश्चादि षत्वाऽभावार्थः । तत्र हि राजिसाह चर्यात् फणादेरेव ग्रहणम् । इत्यात्मनेपदिनः । ८२६-८२८ स्यमति । सस्याम । स्येमतुः , सस्यमतुः । अस्यमीत् । स्वनति । सस्वान । स्वेनतुः, सस्वनतुः । अस्वानीत्, अस्वनीत् । ८-३-६९ वेश्च स्वनो.... - विष्वणति । अवष्वणति । सशब्दं भुङ्क्ते इत्यर्थः । फणादयो गताः । ध्वनति । दध्वान । दध्वनतुः । ८२९-८३० समति । ससाम । सेमतुः । स्तमति । तस्ताम । तस्तमतुः । ८३१ ज्वलति । जज्वाल । जज्वलतुः ७-२-२ अतो ल्रान्तस्य- अज्वालीत् । ८३२ चलति । चेलतुः । अचालीत् । ८३३ जलति । जेलतुः । अजालीत् । लजति । लेजतुः । अलाजीत्, अलजीत् । ८३४-८३५ टलति । टेलतुः । अटालीत् । टट्वलतुः । अट्वालीत् । ८३६ स्थलति । तस्थलतुः । अस्थालीत् । ८३७ हलति । जहलतुः । अहालीत् । ८३८ नलति । प्रणलति । नेलतुः । अनालीत् । ८३९ पलति । पेलतुः । अपालीत् । ८४० बलति । बेलतुः । अबालींत् । ८४१ पोलति । पुपोल । पुपुलतुः । अपोलीत् । ८४२ संस्त्यानं संघातः । बन्धुशब्देन तद्व्यापारो गृह्यते । कोलति । चुकोल । अकोलीत् । ८४३-८४५ शलति । शेलतुः । अशालीत् । होलति । जुहोल । जुहुलतुः । अहोलीत् । पतति । पपात । पेततुः । ३-१-५५ पुषादि... । ७-४-१९ पतः पुँम् - अपप्तत् । ८-४-१७ नेर्गद...- प्रणिपतति । प्रण्यपप्प्र । ८४६ क्वथति । चक्वाथ । चक्वथतुः । ७-२-५ ह्म्यन्त...-अक्वथीत् । ८४७ पथति । पेथतुः । अपथीत् । ८४८ मथति । मेथतुः । अमथीत् । ८४९ 'उद्गिरणे' इत्यत्र इहैव निपातनादृत इत्वमिति सुधाकरः । वमति । ववाम । ६-४-१२६ न शस दद..- ववमतुः । केचित्तु वेत्यकारान्तसंघातग्रहणेनेष्टसिद्धेरादिग्रहणमौपदेशिकप्रतिपत्त्यर्थम् । तथा च नायं वादिः किन्तु ट्वादिः ।अत एत्वाम्यासलोपौ भवत इत्याहुः । अत एव भागवृत्तौ वेमतुरित्युदाहृतम् । वेमुश्च केचिद् रुधिरम्, इति सप्तशतीप्रयोगोऽत्राऽनुकूलः । ८५० ३-१-७० वा भ्राश... भ्रम्यति, भ्रमति । ७-३-७४ शमामष्टा...इति तु दिवादावेव प्रवर्तते, नाऽत्र । बभ्राम । ६-४-१२४ वा जृभ्रमुँ... - भ्रेमतुः, बभ्रमतुः । अभ्रमीत् । ८५१ क्षरति । अक्षारीत् । स्यमुँ प्रभृतयः परस्मैपदिनो गताः । अथ द्वावात्मनेपदिनौ । ८५२ सहते । ८-३-७० परिनिविभ्यः...- परिषहते । सेहे । ७-२-४८ तीषसह...- सहिता । इडभावे ढत्वधत्वष्टुत्वढलोपदीर्घेषु ६-३-११२ सहिवहो....- सोढा । ८-३-११५ सोढः - परिसोढा । ७-३-७१ सिवादीनां...- पर्यषहत, पर्यसहत । ८५३ रमते । रेमे । रन्ता । रंस्यते । अरंस्त । इत्यात्मनेपदिनौ गतौ । अथ कसन्ताः परस्मैपदिनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८५४ षद्लृँ विशरणगत्यवसादनेषु
८५५ शद्लृँ शातने।
८५६ क्रुशँ आह्वाने रोदने च।
८५७ कुचँ सम्पर्चन-कौटिल्य-प्रतिष्टम्भ-विलेखनेषु।
८५८ बुधँ अवगमने।
८५९ रुहँ बीजजन्मनि प्रादुर्भावे च।
८६० कसँ गतौ।
षद्लृँप्रभृतयः परस्मैपदिनो गताः। वृत्। ज्वलादिगणः समाप्तः। अथ गूहत्यन्ताः स्वरितेत उभयपदिनः।
८६१ हिक्कँ अव्यक्ते शब्दे।
८६२ अञ्चुँ गतौ याचने च। अचुँ इत्येके। अचिँ इत्यपरे।
८६३ टुयाचृँ याच्ञायाम्।
८६४ रेटृँ परिभाषणे।
८६५ चतेँ
८६६ चदेँ याचने।
८६७ प्रोथृँ पर्याप्तौ।
८६८ मिदृँ
८६९ मेदृँ मेधाहिंसनयोः।
थान्ताविमाविति स्वामी। धान्ताविति न्यासः।
८७० मेधृँ सङ्गमे च।
८७१ णिदृँ
८७२ णेदृँ कुत्सासन्निकर्षयोः।
८७३ शृधुँ
८७४ मृधुँ उन्दने।
८७५ बुधिर् बोधने।
८७६ उँ बुन्दिर् निशामने।
८७७ वेणृँ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु। नान्तोऽप्ययम्।
८७८ खनुँ अवदारणे।
८७९ चीवृँ आदानसंवरणयोः।
८८० चायृँ पूजानिशामनयोः।
८८१ व्ययँ गतौ।
८८२ दाशृँ दाने।
८८३ भेषृँ भये। गतावित्येके।
८८४ भ्रेषृँ
८८५ भ्लेषृँ गतौ।
८८६ असँ गतिदीप्त्यादानेषु। अषँ इत्येके।
८८७ स्पशँ बाधनस्पर्शनयोः। स्पर्शनं ग्रन्थनम्।
८८८ लषँ कान्तौ
८८९ चषँ भक्षणे।

८५४ ७-३-७८ पाघ्राध्मा....- सीदति। ससाद। सेदतुः। सेदिथ, ससत्थ। सेदिव। सेदिम। ३-१-५५ पुषादि...- असदत्। ८-३-६६ सदि.... निषीदति। ८-३-६३ प्राक्सिता.... -न्यषीदत्। ८-३-११८ सदेः परस्य...- निषसाद। निषेदतुः। ८५५ १-३-६० शदे... +७-३-७८ पाघ्रा...- शीयते। शशाद। शेदतुः। शेदिथ, शशत्थ। शत्तां। अशदत्। ८५६ क्रोशति। चुक्रोश। क्रोष्टा। ३-१-४५ शल इगु...- अक्रुक्षत्। ८५७ कोचति। चुकोच। ८५८ बोधति। बुबोध। बोधिता। बोधिष्यति। ८५९ रोहति। आरोहति। रुरोह। रुरोहिथ। रुरुहिव। रुरुहिम। रोढा। रोक्ष्यति। ३-१-४५ शल... - अरुक्षत्। ८६० चकसतुः। अकासीत्, अकसीत्। ८६१ हिक्कति। हिक्कते। जिहिक्क। जिहिक्के। ८६२ अञ्चति। अञ्चते। आनञ्च। ६-४-२४ अनिदितां... अच्यात्। ६-४-३० नाञ्चेः...- अञ्च्यात्। ८६३ याचति। याचते। ८६४ रेटति। रेटते। ८६५-८६६ चतति। चतते। चचात। चेते। ७-२-५ ह्म्यन्त अचतीत्। अचतिष्ट। चदति। चदते। चचाद। चेदे। अचदीत्। अचदिष्ट। ८६७ प्रोथति। प्रोथते। पुप्रोथ। पुप्रोथे। ८६८-८६९ मेदति। मेदते। मिमेद। मिमिदे। मिमेदे। ८७० मेधति। मेधते। मिमेध। मिमेधे। ८७१-८७२ नेदति। नेदते। निनेद। निनिदे। निनेदे। ८७३-८७४ उन्दनं क्लेदनम्। शर्धति। शर्धते। शशर्ध। शर्धिता। मर्धति। मर्धते। मर्धिता। ८७५ बोधति। बोधते। ३-१-५७ इरितो वा - अबुधत्, अबोधीत्। अबोधिष्ट। ८७६ बुन्दति। बुन्दते। ३-१-५७ इरितो वा- अबुदत्, अबुन्दीत्। ८७७ वेणति। वेणते। वेनति। वेनते। ८७८ खनति। खनते। चखान। ६-४-९८ गम हन...- चख्नतुः। चख्नुः। ६-४-४३ ये विभाषा- खायात्, खन्यात्। अखानीत्, अखनीत्। ८७९ चीवति। चीवते। चिचीव। चिचीवे। ८८० चायति। चायते। चचाय। चचाये। ८८१ व्ययति। व्ययते। ७-२-५ ह्म्यन्त... - अव्ययीत्। अव्ययिष्ट। ८८२ दाशति। दाशते। ददाश। ददाशे। ८८३ भेषति। भेषते। ८८४-८८५ बिभ्रेष। बिभ्रेषे। बिभ्लेष। बिभ्लेषे। ८८६ असति। असते। आस। आसे। अषति। अषते। आष। आषे। ८८७ स्पशति। स्पशते। पस्पाश। पस्पशे। ८८८ ३-१-७० वा भ्राश...- लष्यति, लषति। लष्यते, लषते ललाष। लेषे। ८८९ चषति। चषते। चचाष। चेषतुः। चेषे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८९० छषँ हिंसायाम् ।
८९१ झषँ आदानसंवरणयोः ।
८९२ भ्रक्षँ
८९३ भ्लक्षँ अदने ।
भक्षँ इति मैत्रेयः ।
८९४ दासृँ दाने ।
८९५ माहृँ माने ।
८९६ गुहूँ संवरणे ।
हिक्कँ प्रभृतयः स्वरितेत उभयपदिनो गताः । अथाऽजन्ता उभयपदिनः ।
८९७ श्रिञ् सेवायाम् ।
८९८ भृञ् भरणे ।
८९९ हृञ् हरणे ।
हरणं प्रापणं स्वीकारः स्तेयं नाशनं च
९०० धृञ् धारणे ।
९०१ णीञ् प्रापणे ।
श्रिञ्प्रभृतय उभयपदिनो गताः । अथाऽजन्ताः परस्मैपदिनः ।
९०२ धेट् पाने ।
९०३ ग्लै
९०४ म्लै हर्षक्षये । हर्षक्षयो धातुक्षयः ।
९०५ द्यै न्यक्करणे ।
न्यक्करणं तिरस्कारः ।
९०६ द्रै स्वप्ने ।
९०७ ध्रै तृप्तौ ।
९०८ ध्यै चिन्तायाम्
९०९ रै शब्दे ।
९१० स्त्यै
९११ ष्ट्यै शब्दसंघातयोः ।
९१२ खै खदने ।
९१३ क्षै
९१४ जै
९१५ षै क्षये ।
९१६ कै
९१७ गै शब्दे ।

---

८९० छषति । छषते । चच्छाष । चच्छषतुः । चच्छषे । ८९१ झषति । झषते । जझाष । जझषतुः । जझषे । ८९२-८९३ भ्रक्षति । भ्रक्षते । भ्लक्षति । भ्लक्षते । भक्षति । भक्षते । ८९४ दासति । दासते । ८९५ माहति । माहते ८९६ ६-४-८९ ऊदुपधाया...- गूहति । गूहते । ७-२-४४ स्वरति...-जुगूहिथ, जुगोढ । गूहिता, गोढा । गूहिष्यति, घोक्ष्यति । गूहेत् । गुह्यात् । अगूहीत् । इडभावे- ३-१-४५ शल इगु...- अघुक्षत् । ७-३-७३ लुग्वा दुह...अगूढ, अघुक्षत । ७-३-७२ क्सस्याचि- अघुक्षाताम् । अघुक्षन्त । अगुह्वहि, अघुक्षावहि । अघुक्षामहि । ८९७ श्रयति । श्रयते । शिश्राय । ६-४-७७ अचि श्नु... - शिश्रियतुः । शिश्रिये । श्रयितासि । श्रयितासे । श्रयिष्यति श्रयिष्यते । ३-१-४८ णिश्रि... - अशिश्रियत् । अशिश्रियत । ८९८ भरति । भरते । बभार । बभ्रतुः । बभर्थ । बभृव । बभृम । बभ्रे । बभृषे । बभृढ्वे । भर्तासि । भर्तासे । ७-२-७० ऋद्धनोः स्ये - भरिष्यति । भरिष्यते । ७-४-२८ रिङ् शयग्लिङ्क्षु - भ्रियात् । १-२-१२ उश्च- भृषीष्ट । भृषीढ्वम् । अभार्षीत् । अभार्ष्टाम् । अभार्षुः । ८-२-२७ ह्रस्वादङ्गात् - अभृत । अभृढ्वम् । अभरिष्यत् । अभरिष्यत । ८९९ हरति । हरते । जहार । जह्रतुः । जहर्थ । जह्रिव । जह्रिम । जह्रे । जह्रिषे । ८-३-७९ विभाषेटः- जह्रिढ्वे जह्रिध्वे । हर्तासि । हर्तासे । हरिष्यति । हरिष्यते । ह्रियात् । हृषीष्ट । अहार्षीत् । अहृत । ९०० धरति । धरते । ध्रियात् । धृषीष्ट । अधार्षीत् । अधृत । ९०१ नयति । नयते । निनाय । ६-४-८२ एरनेकाचो...- निन्यतुः । निन्ये । ७-२-१ सिँचि वृद्धिः... अनैषीत् । अनेष्ट । अनेष्यत् । अनेष्यत । ९०२ धयति । ६-१-४४ आदेच... + ७-१-३४ आत औ...- दधौ । ६-४-६४ आतो लोप...- दधतुः । दधुः । दधिथ, दधाथ । दधिव । दधिम । धाता । धास्यति । १-१-१९ दाधा... +६-४-६७ एर्लिँङि- धेयात् । ३-१-४९ विभाषा धेट्श्व्योः + ६-४-११ चङि- अदधत् । अदधताम् । चङभावे २-४-७८ विभाषा घ्राधेट्...- अधात् । अधाताम् । ६-१-९३ उस्य.... अधुः । लुगभावे- ७-२-७३ यमरम...- अधासीत् । अधासिष्टाम् । अधासिषुः । अधास्यत् । ९०३-९०४ ग्लायति । जग्लौ । जग्लिथ, जग्लाथ । जग्लिव । जग्लिम । ६-४-६८ वान्यस्य...-ग्लेयात्, ग्लायात् । अग्लासीत् । म्लायति । मम्लौ । म्लेयात्, म्लायात् । अम्लासीत् । ९०५ द्यायति । दद्यौ । द्येयात्, द्यायात् । अद्यासीत् । ९०६-९११ स्त्यायति । षोपदेशस्यापि सत्वे कृते रूपं तुल्यम् । स्त्यायति । षोपदेशफलं तु तिष्टचासतीत्यादौ षत्वम् । ९१२-९१५ क्षायति । चक्षौ । जायति । जजौ । सायति । ससौ । सायात् । असासीत् । ६-४-६ घुमास्था..., तदपवादः- ६-४-६७ एर्लिँङि, २-४-७८ विभाषा घ्रा धेट्... इत्येतेषां तु नेह प्रवृत्तिः । तत्र दैवादिकस्यैव स्यतेर्ग्रहणात् । ९१६-९१७ कायति । कायात् । गायति । ६-४-६७ एर्लिँङि-गेयात् । अगासीत् । २-४-७७ गाति स्था... इति तु नेह प्रवर्तते । इणादेशस्यैव गारूपस्य तत्र ग्रहणात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९१८ शै
९१९ श्रै पाके ।
९२० पै
९२१ ओँवै शोषणे ।
९२२ ष्टै वेष्टने ।
९२३ ष्णै वेष्टने ।
शोभायां चेत्येके । शौच इत्यन्ये ।
९२४ दैप् शोधने ।
९२५ पा पाने ।
९२६ घ्रा गन्धोपादाने ।
९२७ ध्मा शब्दाग्निसंयोगयोः ।
९२८ ष्ठा गतिनिवृत्तौ ।
९२९ म्ना अभ्यासे ।
९३० दाण् दाने ।
९३१ ह्वृ कौटिल्ये ।
९३२ स्वृ शब्दोपतापयोः ।
९३३ स्मृ चिन्तायाम् ।
९३४ ह्वृ संवरणे ।
९३५ सृ गतौ ।
९३६ ॠ गतिप्रापणयोः ।
९३७ गृ
९३८ घृ सेचने ।
९३९ ध्वृ हूर्छने ।
९४० स्रु गतौ ।
९४१ षु प्रसवैश्वर्ययोः । प्रसवोऽभ्यनुज्ञानम् ।
९४२ श्रु श्रवणे ।
९४३ ध्रु स्थैर्ये ।
९४४ दु
९४५ द्रु गतौ ।

९१८-९२१ पायति । पायात् । अपासीत् । ६-४-६ घुमास्था..., तदपवादः ६-४-६७ एर्लिँङि २-४-७७ गातिस्था... इति तु नेह प्रवर्तन्ते । पारूपस्य लाक्षणिकत्वात् । ९२२ स्तायति । स्तेयात्, स्तायात् । ९२३ स्नायति । सस्नौ । स्नायात्, स्नेयात् । ९२४ दायति । दायात् । अदासीत् । एत्वसिँज्लुकौ तु न । घुसंज्ञायामदाबिति पर्युदासात् । ९२५ ७-३-७८ पाघ्राध्मास्था ...- पिबति । पपौ । ६-४-६७ एर्लिँङि- पेयात् । २-४-७७ गातिस्था...- अपात् । ९२६ जिघ्रति । ६-४-६८ वाऽन्यस्य... -घ्रेयात्, घ्रायात् । २-४-७८ विभाषा घ्राधेट्... -अघ्रात्, अघ्रासीत् । ९२७ धमति । दध्मौ । ध्मेयात्, ध्मायात् । अध्मासीत् । ९२८ तिष्ठति । तस्थौ । प्र. ८-३-६४ स्थादिष्व..- अधितष्ठौ । ८-३-६५ उपसर्गात् सुनोति...- अधिष्ठाता । ६-४-६७ एर्लिँङि- स्थेयात् । २-४-७७ गाति स्था...- अस्थात् । ९२९ मनति । मम्नौ । म्नेयात्, म्नायात् । अम्नासीत् । ९३० यच्छति । ८-४-१७ नेर्गद...- प्रणियच्छति । देयात् । अदात् । ९३१ ह्वरति । ७-४-१० ऋतश्च...- जह्वार । जह्वरतुः । जह्वर्थ । जह्वरिव । जह्वरिम । ह्वर्ता । ७-२-७० ऋद्धनोः स्ये- ह्वरिष्यति । ७-४-२९ गुणोऽर्ति...- ह्वर्यात् । अह्वार्षीत् । अह्वरिष्यत् । ९३२ स्वरति । सस्वार । सस्वरतुः । ७-२-४४ स्वरति....- सस्वरिथ, सस्वर्थ । वमयोस्तु- परमपि स्वरत्यादिविकल्पं बाधित्वा पुरस्तात् प्रतिषेधकाण्डारम्भसामर्थ्यात् ७-२-११ श्र्युकः किति इत्यनेन निषेधे प्राप्ते ७-२-१३ कृसृभृ ....इति नियमान्नित्यमिट् - सस्वरिव । सस्वरिम । परत्वात् ७-२-७० ऋद्धनोः स्ये- स्वरिष्यति । स्वर्यात् । अस्वारीत्, अस्वार्षीत् । ९३३ स्मरति । सस्मरतुः । स्मर्यात् । ९३४-९३५ सरति । शीघ्रगतौ तु ७-३-७८ पाघ्राध्मा...इति धौरादेशः- धावति । ससार । ससर्थ । ससृव । सर्ता । सरिष्यति । ७-४-२८ रिङ् शयग्...-स्रियात् । असार्षीत् । ३-१-५६ सर्तिशास्त्यर्ति... इति तु नेह प्रवर्तते । लुप्तशपा शासिना साहचर्यात् तत्र जौहोत्यादिकयोः सर्त्यर्त्योरेव ग्रहणात् । ९३६ ऋच्छति । ७-४-११ ऋच्छत्यॄताम्- आर । आरतुः । ७-२-६६ इडत्यर्ति...- आरिथ । आरिव । अर्ता । अरिष्यति । ७-४-२९ गुणोऽर्ति.... अर्यात् । आर्षीत् । आर्ष्टाम् । आर्षुः । ९३७-९३८ गरति । जगार । जगर्थ । जग्रिव । जग्रिम । गर्ता । गरिष्यति । ७-४-२८ रिङ् शयग्...- ग्रियात् । अगार्षीत् । ९३९ ध्वरति । ९४० स्रवति । सुस्रोथ । सुस्रुव । सुस्रुम । ७-४-२५ अकृत्सार्व...- स्रूयात् । ३-१ ४८ णिश्रिद्रुसु...- असुस्रुवत् । ९४१ सवति । सुषाव । सुषविथ । सुषोथ । सुषुविव । सुषुविम । सोता । ७-२-७२ स्तुसुधूञ्भ्यः...- असावीत् । तत्र सूत्रे पूर्वोत्तराभ्यां ञिद्भ्यां साहचर्यात् सुनोतेरेव ग्रहणमिति पक्षे- असौषीत् । ९४२ ३-१-७४ श्रुवः शृ च- श्टणोति । १-२-४ सार्वधातुकमपित्- शृणुतः । ६-४-८७ हुश्नुवोः सार्व...- शृण्वन्ति । शृणोमि । ६-४-१०७ लोपश्चास्यान्य...- शृण्वः, शृणुवः । शृण्मः, शृणुमः । शुश्राव । ६-४-७७ अचि श्नुधातु...- शुश्रुवतुः । शुश्रोथ । शुश्रुव । श्रोता । श्रोष्यति । शृणोतु । ६-४-१०६ उतश्च...- शृणु । शृणवानि । शृणुयात् । श्रूयात् । अश्रौषीत् । ९४३ ध्रवति । ९४४-९४५ दुदविथ, दुदोथ । दुदुविव । दुदुविम । दुद्रोथ । दुद्रुव । दुद्रुम । ३-१-४८ णिश्रि...- अदुद्रुवत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९४६ जि
९४७ ज्रि अभिभवे ।
धेट् प्रभृतयः, परस्मैपदिनो गताः । अथ डीङन्ता ङितः ।
९४८ ष्मिङ् ईषद्धसने ।
९४९ गुङ् अव्यक्ते शब्दे ।
९५० गाङ् गतौ ।
९५१ कुङ्
९५२ घुङ्
९५३ उङ्
९५४ ङुङ् शब्दे ।
उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्यन्ये ।
९५५ च्युङ्
९५६ ज्युङ्
९५७ प्रुङ्
९५८ प्लुङ् गतौ ।
क्लुङ् इत्येके ।
९५९ रुङ् गतिरेषणयोः । रेषणं हिंसा ।
९६० धृङ् अवध्वंसने ।
९६१ मेङ् प्रणिदाने । प्रणिदानं विनिमयः प्रत्यर्पणं च ।
९६२ देङ् रक्षणे ।
९६३ श्यैङ् गतौ ।
९६४ प्यैङ् वृद्धौ ।
९६५ त्रैङ् पालने ।
९६६ पूङ् पवने ।
९६७ मूङ् बन्धने ।
९६८ डीङ् विहायसा गतौ ।
ष्मिङ्प्रभृतय आत्मनेपदिनो गताः । अथ परस्मैपदी ।
९६९ तॄ प्लवनतरणयोः ।
परस्मैपदी गतः ।
अथाष्टावात्मनेपदिनः ।
९७० गुपँ गोपने ।
९७१ तिजँ निशाने ।
९७२ मानँ पूजायाम् ।
९७३ बधँ बन्धने ।
९७४ रभँ राभस्ये ।
९७५ डुलभँष् प्राप्तौ ।
९७६ ष्वञ्जँ परिष्वङ्गे ।
९७७ हदँ पुरीषोत्सर्गे ।
गुपँप्रभृतय आत्मनेपदिनो गताः । अथ परस्मैपदिनः ।
९७८ ञिष्विदाँ अव्यक्ते ।
९७९ स्कन्दिर् गतिशोषणयोः ।

९४६-९४७ अभिभवो न्यूनीकरणं न्यूनीभवनं च । आद्ये सकर्मकः । शत्रूञ्जयति । द्वितीये त्वकर्मकः । शत्रुभ्यः पराजयते । अत्र १-३-१९ विपराभ्यां जेः १-४-२६ पराजेरसोढः इति प्रवर्तेते । ९४८ स्मयते । सिष्मिये ८-३-७९ विभाषेटः-सिष्मियिढ्वे, सिष्मियिध्वे । ९४९ गवते । जुगुवे । ९५० गाते । गाते । गाते । इट एत्वे कृते वृद्धौ-गै । अगात । इटि- अगे । विध्यादिलिँङि- गेत । गेयाताम् । गेरन् । गासीष्ट । १-२-१ गाङकुटादिभ्योऽञ्... इति सूत्रे इङादेशस्यैव गाङो ग्रहणात् अत्र ६-४-६६ घु-मा स्था.... इतीत्वं न-अगास्त । ९५१-९५४ कवते । चुकुवे । घवते । जुघुवे । अवते । वार्णादाङ्गं बलीयः इत्युवँङ् ततः सवर्णदीर्घः- ऊवे । ओता । ओष्यते । ओषीष्ट । औष्ट । ङवते । जुङुवे । ङोता । ९५५-९५८ च्यवते । चुच्युवे । ज्यवते । जुज्युवे । प्रवते । पुप्रुवे । प्लवते । पुप्लुवे । पुप्लुवे लवणार्णवम् । ९५९ रवते । रुरुवे । रविता । रविष्यते । अरविष्ट । ९६० धरते । दध्रे । धर्ता । धरिष्यते । ९६१ मयते । ८-४-१७ नेर्गद...- प्रणिमयते । ९६२ प्रणिदयते । ७-४-९ दयते....- दिग्ये । दासीष्ट । १-२-१७ स्थाघ्वोरिच्च- अदित । ९६३ श्यायते । शश्ये । अश्यास्त । ९६४ प्यायते । पप्ये । प्याता । प्यास्यते । ९६५ त्रायते । तत्रे । ९६६ पवते । पुपुवे । पविता । पविष्यते । ९६७ मवते । मुमुवे । मविता । मविष्यते । अमविष्ट । ९६८ डयते । डिड्ये । डयिता । डयिष्यते । ९६९ तरति । ७-४-११ ऋच्छत्यृताम्, इति गुणे ६-४-१२० अत एकहल्...इत्यस्य ६-४-१२६ न शस... इत्यनेन निषेधे, ६-४-१२२ तॄफल...- तेरतुः । तेरुः । ७-२-३८ वॄतो वा - तरीता, तरिता । ७-१-१०० ॠत इद् धातोः +८-२-७७ हलि च - तीर्यात् । तरति इत्यत्र तु १-४-२ इत्वो...इति बलेन गुणो बोध्यः । अतारीत् । ७-२-४० सिँचि च...- अतारिष्टाम् । अतारिषुः । अतरिष्यत्, अतरीष्यत् । ९७०-९७१ ३-१-५ गुप्तिज्...- जुगुप्सते । तितिक्षते । ९७२-९७३ ३-१-६ मान्बध...- मीमांसते । बीभत्सते । ९७४ रभते । आरभते । आरेभे । ८-२-४० झषस्तथो...- आरब्धा । आरप्स्यते । ९७५ लभते । लेभे । लब्धा । लप्स्यते । ९७६ ६-४-२५ दंशसञ्ज...- स्वजते । ८-३-६५ उपसर्गात् सुनोति...- परिष्वजते । १-२-६ - इन्धि... सूत्रस्थं श्रन्थिग्रन्थि...-सस्वजे, सस्वञ्जे । ८-३-११८ सदेः परस्य.... सूत्रस्थं स्वञ्जे...-परिषस्वजे, परिषस्वञ्जे । सस्वजिषे, सस्वञ्जिषे । स्वङ्क्ता । स्वङ्क्ष्यते । स्वजताम् । अस्वजत । स्वजेत । स्वङ्क्षीष्ट । अस्वङ्क्त । ८-३-६३ प्राक् सिता...-प्रत्यष्वङ्क्त । ८-३-७१ सिवादीनां... -पर्यष्वङ्क्त, पर्यस्वङ्क्त । ९७७ हदते । जहदे । हत्ता । हत्स्यते । हदताम् । अहदत । हदेत । हत्सीष्ट । अहत्त । अहत्स्यत । ९७८ स्वेदति । स्वेदिता । ७-२-१० एकाच... इति निषेधस्तु नेह, तत्र दैवादिकस्यैव स्विदो ग्रहणात् । ९७९ स्कन्दति । ८-३-७४ परेश्च- परिष्कन्दति, परिस्कन्दति । चस्कन्द । चस्कन्दिथ, चस्कन्त्थ । चस्कन्दिव । चस्कन्दिम । स्कन्ता, स्कन्त्ता । स्कन्त्स्यति । स्कद्यात् । ३-१-५७ इरितो वा-अस्कदत्, अस्कान्त्सीत् । अस्कान्ताम् । अस्कान्त्सुः । अस्कन्त्स्यत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९८० यभँ मैथुने ।
९८१ णमँ प्रह्वत्वे शब्दे च ।
९८२ गम्लृँ
९८३ सृप्लृँ गतौ ।
९८४ यमँ उपरमे ।
९८५ तपँ सन्तापे ।
९८६ त्यजँ हानौ ।
९८७ षञ्जँ सङ्गे ।
९८८ दृशिर् प्रेक्षणे ।
९८९ दंशँ दशने ।
नकारजावनुस्वारपञ्चमौ झलि धातुषु । सकारजः शकारश्चे षाट्टवर्गस्तवर्गजः ।
९९० कृषँ विलेखने । विलेखनमाकर्षणम् ।
९९१ दहँ भस्मीकरणे ।
९९२ मिहँ सेचने ।
९९३ कितँ निवासे रोगापनयने च । ञिष्विदाँ प्रभृतयः परस्मैपदिनो गताः । अथ वहत्यन्ता उभयपदिनः ।
९९४ दानँ खण्डने ।
९९५ शानँ तेजने ।
९९६ डुपचँष् पाके ।
९९७ षचँ समवाये ।
९९८ भजँ सेवायाम् ।
९९९ रञ्जँ रागे ।
१००० शपँ अक्रोशे ।
१००१ त्विषँ कान्तौ ।
१००२ यजँ देवपूजासँगतिकरणदानेषु ।

---

९८० यभति । येभिथ, ययब्थ । यब्धा । यप्स्यति । अयाप्सीत् । ९८१ नमति । ८-४-१४ उपसर्गादस...- प्रणमति । ननाम । नेमतुः । नेमिथ, ननन्थ । नन्ता । नंस्यति । ७-२-७३ यमरम...- अनंसीत् । ९८२-९८३ ७-३-७७ इषगमि...- गच्छति । जगाम ६-४-९८ गमहन...- जग्मतुः । जग्मुः । जगमिथ, जगन्थ । गन्ता । ७-२-५८ गमेरिट्....- गमिष्यति । ३-१-५५ पुषादि...- अगमत् । सर्पति । ससर्प । ससृपतुः । क्रादिनियमादिट् - ससर्पिथ । ससृपिव । ससृपिम । ६-१-५८ अनुदात्तस्य चर्दु...- स्रप्ता, सर्प्ता । स्रप्स्यति, सर्प्स्यति । असृपत् । ९८४ यच्छति । ययाम । येमतुः । येमिथ, ययन्थ । यन्ता । अयंसीत् । ९८५ तपति । ८-३-१०३ निसस्तप-निष्टपति । तेपतुः । तेपिथ, ततप्थ । तप्ता । अताप्सीत् । अताप्ताम् । ९८६ त्यजति । तत्याज । तत्यजिथ, तत्यक्थ । त्यक्ता । त्यक्ष्यति । अत्याक्षीत् । अत्याक्ताम् । अत्याक्षुः । ९८७ ६-४-२५ दंशसञ्ज...- सजति । ससञ्ज । ससञ्जिथ, ससङ्क्थ । सङ्क्ता । असाङ्क्षीत् । असाङ्क्ताम् । ९८८ ७-३-७८ पाघ्राध्मा...- पश्यति । ददर्श । ७-२-६५ विभाषा सृजि...- ददर्शिथ । इडभावे- ६-१-५७ सृजिदृशो...- दद्रष्ठ । ददृशिव । ददृशिम । द्रष्टा । द्रक्ष्यति । दृश्यात् । ३-१-५७ इरितो वा इत्यङि ७-४-१६ ऋदृशो... - अदर्शत् । अङभावे ३-१-४५ शल... इति प्राप्ते ३-१-४७ न दृशः इति निषेधे, सिँचि अमागमे । ७-२-३ वदव्रज...- अद्राक्षीत् । ९८९ ६-४-२५ दंशसञ्ज...-दशति । ददंशिथ, ददंष्ठ । दंष्टा । दङ्क्ष्यति । दश्यात् । अदाङ्क्षीत् । ९९० कर्षति । चकर्ष । चकर्षिथ । चकृषिव । क्रष्टा, कर्ष्टा । क्रक्ष्यति, कर्क्ष्यति । ३-१-४३ च्लेः सिँच् सूत्रस्थं स्पृशमृश...- अक्राक्षीत् । अक्राष्टाम् । अकार्क्षीत् । अकार्ष्टाम् । सिँजभावे क्सः-अकृक्षत् । अकृक्षताम् । ९९१ दहति । ददाह । देहिथ, ददग्ध । दग्धा । धक्ष्यति । अधाक्षीत् । अदाग्धाम् । अधाक्षुः । ९९२ मेहति । मिमेह । मिमेहिथ । मिमिहिव । मेढा । मेक्ष्यति । अमिक्षत् । ९९३ ३-१-५ गुप्तिज्किद्...- चिकित्सति । संशये प्रायेणायं विपूर्वः । विचिकित्सा तु संशय इत्यमरः । ९९४-९९५ ३-१-६ मान्बध... दीदांसति । दीदांसते । शीशांसति । शीशांसते । ९९६ पचति । पचते । पपाच । पेचतुः । पेचुः । पेचिथ, पपक्थ । पेचे । पक्ता । पक्ष्यति । अपाक्षीत् । अपाक्ताम् । अपाक्षुः । अपक्त । ९९७ सचति । संचते । सेचतुः । सेचिथ । सचिता । ९९८ भजति । भजते । बभाज । ६-४-१२२ तॄफल...- भेजतुः । भेजिथ, बभक्थ । भक्ता । भक्ष्यति । भक्ष्यते । अभाक्षीत् । अभक्त । ९९९ ६-४-२६ रञ्जेश्च- रजति । रजते । ररञ्जिथ, ररङ्क्थ । ररञ्जिव । रङ्क्ता । अराङ्क्षीत् । अरङ्क्त । १००० शपति । शपते । शशाप । शेपतुः । शेपिथ, शशप्थ । शप्ता । शेपे । अशाप्सीत् । अशप्त । १००१ त्वेषति । त्वेषते । तित्वेष । तित्विषे । त्वेष्टा । त्वेक्ष्यति । त्विष्यात् । त्विक्षीष्ट । अत्विक्षत् । अत्विक्षत । १००२ यजति । यजते । ६-१-१७ लिँटचभ्यासस्यो...-इयाज । ६-१-१५ वचिस्वपि...- ईजतुः । ईजुः । इयजिथ, इडभावे- ८-२-३६ व्रश्चभ्रस्ज... -इयष्ठ । ईजिव । ईजिम । ईजे । यष्टा । यक्ष्यति । यक्ष्यते । इज्यात् । यक्षीष्ट । अयाक्षीत् । अयाष्टाम् । अयष्ट ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१००३ डुवप् बीजसन्ताने। बीजसन्तानं क्षेत्रे विकरणं गर्भाधानं च। अयं छेदनेऽपि।
१००४ वहँ प्रापणे।
दानँ प्रभृतय उभयपदिनो गताः। अथ परस्मैपदी।
१००५ वसँ निवासे।
परस्मैपदी गतः। **अथ त्रय उभयपदिनः।**

१००६ वेञ् तन्तुसन्ताने।
१००७ व्येञ् संवरणे।
१००८ ह्वेञ् स्पर्धायां शब्दे च।
वेञ् प्रभृतय उभयपदिनो गताः। अथ द्वौ परस्मैपदिनौ।
१००९ वदँ व्यक्तायां वाचि।

१०१० टु ओँ श्वि गतिवृद्ध्योः। **वृत्** यजादिगणः समाप्तः। भ्वादिस्त्वाकृतिगणः। तेन चुलुम्पत्यादयश्च भ्वादौ द्रष्टव्याः। ऋतिः सौत्रः। स जुगुप्साकृपयोः। इति **शब्विकरणा भ्वादयः। अथादादयः। द्वौ परस्मैपदिनौ।**
१०११ अदँ भक्षणे।

१००३ केशान् वपति। उवाप। ऊपतुः। ऊपे। वप्ता। उप्यात्। वप्सीष्ट। ८-४-१७ नेर्गद...- प्रण्यवाप्सीत्। अवप्त। **१००४** वहति। वहते। उवाह। ऊहतुः। उवहिथ, इडभावे ढत्वधत्वष्टुत्वढलोपदीर्घेषु- ६-३-११२ सहिवहो...- उवोढ। ऊहे। वोढा। वक्ष्यति। वक्ष्यते। अवाक्षीत्। अवोढाम्। अवाक्षुः। अवोढ। अवक्षाताम्। अवक्षत। अवोढाः। अवोढ्वम्। **१००५** वसति। उवास। ८-३-६० शासि वसि...-ऊषतुः। ऊषुः। उवसिथ, उवस्थ। वस्ता। ७-४-४९ सः स्यार्ध...- वत्स्यति। उष्यात्। अवात्सीत्। अवात्ताम्. ८-२-२६ झलो झलि इति सलोपस्या ऽसिद्धत्वात् तकारनिवृत्तिर्न। **१००६** वयति। वयते। २-४-४१ वेञो वयिः उवाय। ६-१-१६ ग्रहिज्या... इति यकारस्य सम्प्रसारणे प्राप्ते ६-१-३७ लिँटि वयो य इति प्रतिषेधे वकारस्य सम्प्रसारणे ६-१-३८ वँश्चास्यान्य...- ऊवतुः, ऊयतुः। ऊवुः, ऊयुः। वयेस्तासावभावात् थलि नित्यमिट्- उवयिथ। ऊवे, ऊये। वयादेशाभावे पिति -६-१-१७ लिँटयभ्यासस्यो.... इत्यनेन, किति -६-१-१५ वचि स्वपि... इत्यनेन प्राप्ते ६-१-३९ वेञः- ववौ। ववतुः। ववुः। वविथ, ववाथ। वविव। ववे। वाता। ऊयात्। वासीष्ट। अवासीत्। अवास्त। **१००७** व्ययति। व्ययते। ६-१-४४ आदेच.... इति प्राप्ते ६-१-४५ न व्यो लिँटि-विव्याय। विव्यतुः। विव्युः। ७-२-६६ इडत्त्यर्ति...- विव्ययिथ। विव्याय, विव्यय। विव्ये। व्याता। वीयात् व्यासीष्ट। अव्यासीत्। अव्यास्त। **१००८** ह्वयति। ह्वयते।६-१-३२ अभ्यस्तस्य च- जुहाव। जुहुवतुः। जुहविथ, जुहोथ। जुहुवे। ह्वाता। ह्वास्यति। ह्वास्यते। हूयात्। ह्वासीष्ट। ३-१-५३ लिपिसिचि...+ ६-४-६४ आतो लोप...- अह्वत्। ३-१-५४ आत्मनेपदेष्वन्य... - अह्वत, अह्वास्त। **१००९** वदति। उवाद। ऊदतुः। उवदिथ। वदिता। उद्यात्। ७-२-३ वदव्रज...- अवादीत्। **१०१०** श्वयति। ६-१-३० विभाषा श्वेः- शुशाव। शुशुवतुः। तदभावे- तत्-सूत्रस्थं श्वयतेर्लिँट्यभ्यास...-शिश्वाय। शिश्वियतुः। श्वयिता। श्वयिष्यति। शूयात्। ३-१-५८ जॄस्तम्भु...- इत्यङि- ७-४-१८ श्वयतेरः- अश्वत्। अङभावे- ३-१-४९ विभाषा धेट्श्व्योः-अशिश्वियत्। चङभावे- सिँचि इटि ७-२-१ सिँचि वृद्धिः.... इति प्राप्तौ ७-२-५ ह्म्यन्त...- अश्वयीत्। **ऋतिः** ३-१-२९ ऋतेरीयङ् +३-१-३२ सनाद्यन्ता...- ऋतीयते। ३-१-३१ आयादय...- ऋतीयाञ्चक्रे। ईयङभावे- परस्मैपदम्। आनर्त। ऋतीयिष्यते, अर्तिष्यति। आर्तीयिष्ट, आर्तीत्।
१०११ २-४-७२ अदिप्रभृतिभ्यः...- अत्ति। अत्तः। अदन्ति। २-४-४० लिँटचन्य...- जघास। ६-४-९८ गमहन... +८-३-६० शासिवसि.... -जक्षतुः। जक्षुः। घसस्तासावभावात् थलि नित्यमिट्- जघसिथ। घस्लादेशाऽभावे- आद। आदतुः। आदुः। ७-२-६६ इडत्त्यर्ति...- आदिथ। आदिव। आदिम। अत्ता। अत्स्यति। अत्तु। ६-४-१०१ हुझल्भ्यो...- अद्धि, अत्तात्। अदानि। ७-३-१०० अदः...- आदत्। आत्ताम्। आदन्। आदम्। आद्व। आद्म। ७-२-७९ लिँङः सलोपो....- अद्यात्। अद्याताम्। अद्युः। अद्यात्। अद्यास्ताम्। अद्यासुः। २-४-३७ लुँङ्सनो.... +३-१-५५ पुषादि...- अघसत्। आत्स्यत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०१२ हनँ हिंसागत्योः ।

परस्मैपदिनौ गतौ । अथ चत्वार उभयपदिनः ।

१०१३ द्विषँ अप्रीतौ ।

१०१४ दुहँ प्रपूरणे ।

१०१५ दिहँ उपचये ।

१०१६ लिहँ आस्वादने ।

द्विषँप्रभृतय उभयपदिनो गताः ।

१०१७ चक्षिँङ् व्यक्तायां वाचि । अयं दर्शनेऽपि । इँकारोऽनुदात्तः ३-२-१४९ अनुदात्तेतश्च... इति युँजर्थः । विचक्षण इति यथा । ङकारस्तु अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति ज्ञापनार्थः । तेन अनुक्तमप्यूहति पण्डितो जनः, इत्यादिसिद्धिः ।

अथ शीङन्ता आत्मनेपदिनः ।

१०१८ ईरँ गतौ कम्पने च ।

१०१९ ईडँ स्तुतौ ।

१०२० ईशँ ऐश्वर्ये ।

१०२१ आसँ उपवेशने ।

१०२२ आङः शासुँ इच्छायाम् ।

१०२३ वसँ आच्छादने ।

१०२४ कसिँ गतिशासनयोः । अयमनिँदिदित्येके । कशँ इत्यपि ।

१०२५ णिसिँ चुम्बने ।

१०२६ णिजिँ शुद्धौ ।

१०२७ शिजिँ अव्यक्ते शब्दे ।

१०२८ पिजिँ वर्णे । सम्पर्चने इत्येके । उभयत्रेत्यन्ये । अवयवे इत्यपरे । अव्यक्ते शब्दे इतीतरे । पृजिँ इत्येके ।

१०२९ वृजीँ वर्जने । वृजिँ इत्यन्ये ।

१०३० पृचीँ सम्पर्चने ।

१०३१ षूङ् प्राणिगर्भविमोचने ।

१०३२ शीङ् स्वप्ने ।

ईरँ प्रभृतय आत्मनेपदिनो गताः । अथ कौत्यन्ताः परस्मैपदिनः । ऊर्णुस्तूभयपदी ।

१०१२ हन्ति । प्रणिहन्ति । ६-४-३७ अनुदात्तोपदेश...- हतः । ६-४-९८ गमहन... +७-३-५४ हो हन्ते...- घ्नन्ति । ८-४-२२ वमोर्वा- प्रहण्मि, प्रहन्मि । प्रहण्वः, प्रहन्वः । प्रहण्मः । प्रहन्मः । जघान । जघ्नतुः । जघ्नुः । ७-३-५५ अभ्यासाच्च- जघनिथ, जघन्थ । हन्ता ७-२-७० ऋद्धनोः स्ये- हनिष्यति । विलङ्घ्य लङ्कां निकषा हनिष्यति । हन्तु । हतात् । हताम् । घ्नन्तु । ६-४-३६ हन्तेर्जः- जहि । हन्यात् । प्र. ८-४-२१ प्रहण्यात् । २-४-४२ हनो वध... -वध्यात् । २-४-४३ लुङि च- अवधीत् । अहनिष्यत् । १०१३ द्वेष्टि । द्विष्टे । द्वेष्टा । द्वेक्ष्यति । द्वेक्ष्यते । द्वेष्टु, द्विष्टात् । द्विड्ढि । द्वेषाणि । द्वेषाव । द्वेषाम । द्विष्टाम् । द्विड्ढ्वम् । द्वेषै । द्वेषावहै । द्वेषामहे । अद्वेट् । अद्विष्टाम् । ३-४-११२ द्विषश्च-अद्विषुः, अद्विषन् । अद्वेषम् । द्विष्यात् । द्विषीत । द्विष्यात् । द्विक्षीष्ट । अद्विक्षत् । अद्विक्षत । १०१४ दोग्धि । दुग्धः । धोक्षि । दुग्धे । धुक्षे । धुग्ध्वे । दोग्धु । दुग्धि । दोहानि । धुक्ष्व । धुग्ध्वम् । दोहै । अधोक् । अदोहम् । अदुग्ध । अधुग्ध्वम् । ३-१-४५ शल इगु...- अधुक्षत् । ७-३-७३ लुग्वा दुह...- अदुग्ध, अधुक्षत । अदुग्धाः, अधुक्षथाः । अधुग्ध्वम्, अधुक्षध्वम् । अदुह्वहि, अधुक्षावहि । अधुक्षामहि । १०१५ देग्धि । प्रणिदेग्धि । शेषं दुहिवत् । १०१६ लेढि । लीढः । लिहन्ति । लेक्षि । लीढे । लिक्षे । लीढ्वे । लेढु । लीढि । लेहानि । लीढाम् । लीढ्वम् । लेहै । अलेट् । अलिक्षत् । अलीढ, अलिक्षत । अलिक्षाताम् । अलिह्वहि, अलिक्षावहि । अलिक्षामहि । १०१७ चष्टे । चक्षाते । चक्षते । २-४-५५ वा लिँटि-चख्यौ, चक्शौ । चख्ये, चक्शे । चचक्षे । २-४-५४ चक्षिङः ख्याञ्- ख्याता, क्शाता । ख्यास्यति, क्शास्यति । ख्यास्यते, क्शास्यते । अचष्ट । चक्षीत । ख्यायात्, ख्येयात्, क्शायात्, क्शेयात् । ३-१-५२ अस्यति...- अख्यत्, अक्शासीत् । अख्यत, अक्शास्त । १०१८ ईर्ते । ईराञ्चक्रे । ईर्ताम् । ईर्ष्व । ईर्ध्वम् । ईरै । ऐरिष्ट । ऐरिढ्वम्, ऐरिध्वम् । ऐरिष्यत । १०१९ ईट्टे । ७-२-७८ ईडजनोर्ध्वे च- ईडिषे । ईडिध्वे । ईडिष्व । ईडिध्वम् । १०२० ईष्टे । ७-२-७७ ईशः से- ईडिषे । ७-२-७८ ईडजनो...-ईशिध्वे । १०२१ आस्ते । आध्वे । ३-१-३७ दयायासश्च- आसाञ्चक्रे । आस्स्व । आध्वम् । आसिष्ट । १०२२ आशास्ते । अत्र दीक्षितः-आङ्पूर्वत्वं प्रायिकम् । तेन नमोवाकं प्रशास्महे इति सिद्धमिति । १०२३ वस्ते-वस्से । वध्वे । ववसे । वसिता । वसिष्यते । १०२४ कंस्ते । कंसाते । कंसते । कस्ते । कष्टे -कशाते । कक्षे । कड्ढ्वे । १०२५ निंस्ते । १०२६ निङ्क्ते । निङ्क्षे । निञ्जिता । १०२७ शिङ्क्ते । १०२८ पिङ्क्ते । पृङ्क्ते । १०२९ वृक्ते । वृजाते । वृङ्क्ते । १०३० पृक्ते । १०३१ सूते । सुषुवे । सुषुविषे । ७-२-४४ स्वरतिसूति...- सविता, सोता । ७-३-८८ भूसुवो...- सुवै । सविषीष्ट, सोषीष्ट । असविष्ट, असोष्ट । १०३२ ७-४-२१ शीङः सार्व...- शेते । शयाते । ७-१-६ शीङो रुँट्- शेरते । शेषे । शेध्वे । शिश्ये । शयिता । शयिष्यते । अशयिष्ट । अशयिष्यत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०३३ यु मिश्रणेऽमिश्रणे च ।
१०३४ रु शब्दे ।
तु इति सौत्रो धातुः-गतिवृद्धिहिंसासु ।
१०३५ णु स्तुतौ ।
१०३६ टु क्षु शब्दे ।
१०३७ क्ष्णु तेजने ।
१०३८ ष्णु प्रस्रवणे ।
१०३९ ऊर्णुञ् आच्छादने ।
१०४० द्यु अभिगमने ।
१०४१ षु प्रसवैश्वर्ययोः । प्रसवोऽभ्यनुज्ञानम् ।
१०४२ कु शब्दे । **युप्रभृतयः परस्मैपदिनो (ऊर्णुञ् तूभयपदी) गताः । अथ द्वावुभयपदिनौ ।**
१०४३ ष्टुञ् स्तुतौ ।
१०४४ ब्रूञ् व्यक्तायां वाचि ।
उभयपदिनौ गतौ । अथ शास्यन्ताः परस्मैपदिनः । इङ् त्वात्मनेपदी ।
१०४५ इण् गतौ
१०४६ इङ् अध्ययने । अयं नित्यमधिपूर्वः ।

१०३३ ७-३-८९ उतो वृद्धि...- यौति । युतः । युवन्ति । युयाव । युयुवतुः । यविता । यविष्यति । युयात् । यूयात् । अयावीत् । अयविष्यत् । १०३४ ७-३-९५ तुरुस्तु...- रवीति, रौति । रुवीतः, रुतः । रुवन्ति । रुवीयात्, रुयात् । रूयात् । अरावीत् । अरविष्यत् । तवीति, तौति । तुवीतः, तुतः । तोता । तोष्यति । अतवीत्, अतौत् । तुवीयात्, तुयात् । तूयात् । अतौषीत् । १०३५ नौति । नुनाव । नविता । अनावीत् । अनविष्यत् । १०३६ क्षौति । चुक्षाव । क्षविता । १०३७ क्ष्णौति । चुक्ष्णाव । क्ष्णविता । १०३८ स्नौति । सुष्णाव । स्नविता । स्नुयात् । स्नूयात् । अस्नावीत् । १०३९ ७-३-९० ऊर्णोते....- ऊर्णौति, ऊर्णोति । ऊर्णुतः । ऊर्णुवन्ति । ऊर्णुते । ऊर्णुवाते । ऊर्णुवते । ३-१-३६ इजादे.... सूत्रस्थम् ऊर्णोतेः... +६-१-३ नन्द्रा... ऊर्णुनाव । ऊर्णुनुवतुः १-२-३ विभाषोर्णोः-ऊर्णुनुविथ, ऊर्णुनविथ । ऊर्णुविता, ऊर्णविता । ऊर्णुविष्यति, ऊर्णविष्यति । ऊर्णुविष्यते, ऊर्णविष्यते । ऊर्णौतु, ऊर्णोतु । ऊर्णवानि । ऊर्णवै । ७-३-९१ गुणोऽपृक्ते- और्णोत् । और्णुताम् । और्णोः । और्णवम् । और्णुविष्यत्, और्णविष्यत् ।ऊर्णुयात् । ऊर्णूयात् । ऊर्णुविषीष्ट, ऊर्णविषीष्ट । ७-२-६ ऊर्णोते...- और्णावीत्, और्णुवीत्, और्णवीत् । १०४० द्यौति । द्युतः । द्युवन्ति । दुद्याव । द्योता । १०४१ सौति । सुषाव । असौषीत् । १०४२ कौति । चुकाव । कोता । १०४३ स्तवीति, स्तौति । स्तुवीतः, स्तुतः । स्तुवन्ति । स्तुवीते, स्तुते । ७-२-७२ स्तुसु... अस्तावीत् । ८-३-३३ प्राक् सिता...- अभ्यष्टौत् । ८-३-७१ सिवादीनां...- पर्यष्टौत्, पर्यस्तौत् । १०४४ ३-४-८४ ब्रुवः पञ्चाना...- आह । आहतुः । आहुः । ८-२-३५ आहस्थः- आत्थ । आहथुः । ७-३-९३ ब्रुव ईट्- ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रूते । ब्रूषे । २-४-५३ ब्रुवो वचिः - उवाच । ऊचतुः । ऊचुः । उवचिथ, उवक्थ । ऊचिव । ऊचिम । ऊचे । वक्तासि । वक्तासे । ब्रूतात् । ब्रवीतु । ब्रवाणि । ब्रवै । अब्रवीत् । ब्रूयात् । उच्यात् । ३-१-५२ अस्यति.... +७-४-२० वच उम्- अवोचत् । अवोचत । अवक्ष्यत् । अवक्ष्यत । १०४५ एति । इतः । ६-४-८१ इणो यण्- यन्ति । ६-४-७८ अभ्यासस्या....- इयाय । ७-४-६९ दीर्घ इणः...- ईयतुः । ईयुः । इययिथ, इयेथ । एता । एष्यति । इतात् । एतु । इहि । अयानि । ऐत् । ऐताम् । आयन् । इयात् । ७-४-२५ अकृत्....- ईयात् । ७-४-२४ एतेर्लिँङि- निरियात् । उभयत आश्रयणे नान्तादिवत् । अभीयात् । समीयात् इति तु भौवादिकस्य । २-४-४५ इणो गा...- अगात् । अगाताम् । अगुः । ऐष्यत् । १०४६ अधीते । अधीयाते । अधीयते । २-४-४९ गाङ् लिँटि-अधिजगे । अधिजगाते । अधिजगिरे । अध्येता । अध्येष्यते । अधीताम् । गुणायादेशयोः कृतयोरुपसर्गस्य यण्-अध्ययै । पूर्वं धातुरुपसर्गेण युज्यते इति मते ऽन्तरङ्गत्वात् पूर्वं सवर्णदीर्घः प्राप्तः । ७-२-२६ णेरध्ययने इति निर्देशान्न भवति । अध्यैत । इयँङ् आट् वृद्धिस्तत उपसर्गस्य यण् -अध्यैयाताम् । अध्यैयत । अध्यैयि । अध्यैवहि । अध्यैमहि । अधीयीत । अधीयीयाताम् । अधीयीरन् । अधीयीध्वम् । अधीयीय । अध्येषीष्ट । २-४-५० विभाषा लुङ्... +१-२-१ गाङ्कुटा... +६-४-६६ घुमास्था...- अध्यगीष्ट, अध्यैष्ट । अध्यगीष्यत, अध्यैष्यत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०४७ इक् स्मरणे । अयमप्यधिपूर्वः ।

१०४८ वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु । प्रजनं गर्भग्रहणम् । असनं क्षेपणम् । ई च प्रश्लिष्टः ।

१०४९ या प्रापणे ।

१०५० वा गतिगन्धनयोः । गन्धनं सूचनम् ।

१०५१ भा दीप्तौ ।

१०५२ ष्णा शौचे ।

१०५३ श्रा पाके ।

१०५४ द्रा कुत्सायां गतौ ।

१०५५ प्सा भक्षणे ।

१०५६ पा रक्षणे ।

१०५७ रा दाने ।

१०५८ ला आदाने । द्वावपि दाने इति चन्द्रः ।

१०५९ दाप् लवने ।

१०६० ख्या प्रकथने ।

१०६१ प्रा पूरणे ।

१०६२ मा माने ।

१०६३ वचँ परिभाषणे ।

१०६४ विदँ ज्ञाने ।

१०६५ असँ भुवि ।

१०६६ मृजूँ शुद्धौ ।

१०६७ रुदिर् अश्रुविमोचने ।

१०४७ अध्येति । अधीतः । २-४-४५ इणो ....सूत्रस्थम् इण्वदिक...- अधियन्ति । अध्यगात् । केचित्तु आर्धधातुकाधिकारे वार्तिकपाठात् तदधिकारोक्तानामेवातिदेश इत्याहुः । तन्मते इयँङि- अधीयन्ति । तथा च भट्टिः- ससीतयो राघवयोरधीयन्निति । अत्र २-३-५२ अधीगर्थ... इति कर्मणि षष्ठी । ससीतौ राघवौ स्मरन्नित्यर्थः । १०४८ वेति । वीतः । वियन्ति । वेषि । वेमि । विवाय । विव्यतुः । विवयिथ, विवेथ । वेता । वेष्यति । वेतु । वीहि । वयानि । अवेत् । अवीताम् । अवियन् । अडागमे सत्यनेकाच्त्वाद् यण् इति केचित् । तन्मते- अव्यन् । एति । ईतः । इयन्ति । ऐत् । ईयात् । ऐषीत् । ऐष्यत् । १०४९ याति । प्रणियाति । ययौ । ययतुः । ययिथ, ययाथ । ययिव । ययिम । याता । यास्यति । यातु । अयात् । ३-४-१११ लङः शाकटा...- अयुः, अयान् । यायात् । यायाताम् । यायात् । यायास्ताम् । ७-२-७३ यमरम...- अयासीत् । १०५०-१०५१ भाति । बभौ । १०५२ स्नाति । सस्नौ । १०५३ श्राति । शश्रौ । १०५४ द्राति । दद्रौ । १०५५ प्साति । पप्सौ । १०५६ पाति । पपौ । पायात् । पायास्ताम् । अपासीत् । १०५७ राति । ररौ । १०५८ लाति । ललौ । १०५९ दाति । प्रणिदाति, प्रनिदाति । दायास्ताम् । अदासीत् । १०६० अयं सार्वधातुकमात्रविषयः । २-४-५४ चक्षिङः ख्याञ् इति सूत्रस्थं सस्थानत्वं नमः ख्यात्रे इति वार्तिकं तद्भाष्यं चेह लिङ्गम् । संपूर्वस्य ख्यातेः प्रयोगो नेति- न्यासकारः । ख्याति । १०६१ प्राति । पप्रौ । १०६२ माति । प्रणिमाति, प्रनिमाति । १०६३ वक्ति । वक्तः । अयमन्तिपरो न प्रयुज्यते । बहुवचनपर इत्यन्ये । झिपर इत्यपरे । वग्धि । वच्यात् । उच्यात् । अवोचत् । १०६४ ३-४-८३ विदो...- वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षान्तरे- वेत्ति । वित्तः विदन्ति । ३-१-३८ उषविद...- विदाञ्चकार । विवेद । विविदतुः । वेदिता । वेदिष्यति । ३-१-४१ विदाङ्कुर्वन्त्वि...- विदाङ्करोतु । ६-४-१०६ उतश्च...- विदाङ्कुरु । विदाङ्करवाणि । पक्षान्तरे वेत्तु, वित्तात् । ६-४-१०१ हुझल्भ्यो...-विद्धि । अवेत् , अवित्ताम् । ३-४-१०९ सिँजभ्यस्त...- अविदुः । ८-२-७५ दश्च- अवेः, अवेत् । १०६५ अस्ति । ७-४-१११ श्नसोरल्लोपः- स्तः । सन्ति । ७-४-५० तासस्त्यो...-असि । स्थः । स्थ । अस्मि । स्वः । स्मः । २-४-५२ अस्तेर्भूः- बभूव । भविता । भविष्यति । अस्तु । स्तात् । स्ताम् । सन्तु । ६-४-११९ घ्वसोरेद्धा- एधि, स्तात् । स्तम् । स्त । असानि । असाव । असाम । ७-३-९६ अस्तिसिँचो...- आसीत् । अल्लोपस्य आभीयत्वेनाऽसिद्धत्वादाट्- आस्ताम् । आसन् । स्यात् । स्याताम् । स्युः । भूयात् । अभूत् । अभविष्यत् । ८-३-८७ उपसर्गप्रादुर्भ्यां...-निष्यात् । प्रादुः ष्यात् । निषन्ति । प्रादुः षन्ति । १०६६ ७-२-११४ मृजेर्वृद्धिः +८-२-३६ व्रश्चभ्रस्ज....- मार्ष्टि । मृष्टः । ७-२-११४ मृजे... सूत्रस्थं क्ङित्यजादौ ...-मृजन्ति, मार्जन्ति । ममार्ज । ममार्जतुः, ममृजतुः । ममार्जुः, ममृजुः । ७-२-४४ स्वरति...- ममार्जिथ, ममार्ष्ठ । मार्जिता, मार्ष्टा । मार्ष्टु । मृड्ढि । अमार्ट् । अमार्जम् । अमार्जीत्, अमार्क्षीत् । अमार्जिष्टाम्, अमार्ष्टाम् । अमार्जिष्यत्, अमार्क्ष्यत् । १०६७ ७-२-७६ रुदादिभ्यः... -रोदिति । रुदितः । रुदन्ति । रोदितु । रुदिहि । ७-३-९८ रुदश्च... +७-३-९९ अड् गार्ग्य...- अरोदीत्, अरोदत् । अरुदिताम् । अरुदन् । अरोदीः, अरोदः । अरोदम् । अरुदिव । अरुदिम । अडिड्भ्यामन्तरङ्गत्वाद् यासुँट् । रुद्यात् । ३-१-५७ इरितो वा- अरुदत्, अरोदीत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०६८ ञिष्वप् शये ।
१०६९ श्वसँ प्राणने ।
१०७० अनँ च ।
१०७१ जक्षँ भक्षहसनयोः ।
रुदादयः पञ्च गताः ।
१०७२ जागृ निद्राक्षये ।
१०७३ दरिद्रा दुर्गतौ ।
१०७४ चकासृँ दीप्तौ ।
१०७५ शासुँ अनुशिष्टौ ।
इणप्रभृतयः परस्मैपदिनो (इङ् त्वात्मनेपदी) गताः । अथ द्वावात्मनेपदिनौ ।
१०७६ दीधीङ् दीप्तिदेवनयोः ।
एतदादयः पञ्च धातवश्छान्दसाः ।
१०७७ वेवीङ् वेतिना तुल्ये ।
आत्मनेपदिनौ गतौ । अथ त्रयः परस्मैपदिनः ।
१०७८ षसँ
१०७९ षस्तिँ स्वप्ने ।

१०६८ स्वपिति । स्वपितः । स्वपन्ति । सुष्वाप । सुषुपतुः । सुषुपुः । सुष्वपिथ, सुष्वप्थ । ८-३-८८ सुवि निर्दुर्भ्यः...- सुषुषुपतुः । सुषुषुपुः । सुपिरूपाभावान्नेह- सुसुष्वाप । सुस्वप्ता । सुस्वप्स्यति । अस्वपीत्, अस्वपत् । स्वप्यात् । सुस्वप्यात् । सुप्यात् । सुषुप्यात् । अस्वाप्सीत् । अस्वप्स्यत् । १०६९ श्वसिति । श्वसितः । श्वसन्ति । श्वसिता । श्वसितु । श्वसिहि । अश्वसीत्, अश्वसत् । श्वस्यात् । श्वस्याताम् । श्वस्यात् । श्वस्यास्ताम् । ७-२-५ ह्म्यन्त...-अश्वसीत् । १०७० अनिति । प्र.८-४-१९ अनितेः- प्राणिति । आन । अनिता । अनितु । आनीत्, आनत् । अन्यात् । आनीत् । १०७१ जक्षिति । जक्षितः । ६-१-६ जक्षित्या...- ७-१-४ अदभ्यस्तात्- जक्षति । अजक्षीत्, अजक्षत् । ३-४-१०९ सिँजभ्यस्त...- अजक्षुः ।१०७२ जागर्ति । जागृतः । ६-१-६ जक्षित्या...- जाग्रति । ३-१-३८ उषविद...- जागराञ्चकार । जजागार । जागराञ्चक्रतुः । ७-३-८५ जाग्रोऽविचिण्....- जजागरतुः । जागर्तु । अजागः । अजागृताम् । ३-४-१०९ सिँजभ्यस्त...+७-३-८३ जुसि च- अजागरुः । जागृयात् । जागृयाताम् । जागृयुः । आशीर्लिँङि- जागर्यात् । जागर्यास्ताम् । जागर्यासुः । लुँङि- अजागृ + इस्+ति यणं बधित्वा ७-३-८४ सार्वधातु.... इत्यस्य प्राप्तिः । तस्य बाधकम्- ७-२-१ सिँचि वृद्धिः । तस्य बाधकेन ७-३-८५ जाग्रोऽविचिण्... इत्यनेन गुणे रपरे अजागर् इस्+ति, इत्यवस्थायां ७-२-३ वदव्रज... इति प्राप्ताया वृद्धेः ७-२-४ नेटि इति निषेधे, ततः ७-२-७ अतो हलादे... इति वैकल्पिकीं वृद्धिं बाधित्वा ७-२-२ अतो ल्रान्तस्य... इति नित्यं प्राप्ताया वृद्धेः ७-२-५ ह्म्यन्त...इति प्रतिषेधः । यथाहुः-गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् । पुनर्वृद्धिर्निषेधोऽ तो यण्पूर्वाः प्राप्तयो नव ॥ इति । अजागरीत् । १०७३ दरिद्राति । ६-४-११४ इद् दरिद्रस्य- दरिद्रितः । ६-४-११२ श्नाभ्यस्तयो...- दरिद्रति । ३-१-३५ कास्प्रत्य... सूत्रस्थं कास्यनेकाच...- दरिद्राञ्चकार । ७-१-३४आत औ णल इत्यत्र ओ इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृते औकारश्रवणार्थम् । अत एव ज्ञापकादाम्नेत्येके । तन्मते-ददरिद्रौ । ददरिद्रतुः । ६-४-११४ इद् दरिद्रस्य सूत्रस्थं दरिद्राते... -दरिद्रिता । तत्रत्यमेव लुङि वा-अदरिद्रीत्, अदरिद्रासीत् । १०७४ चकास्ति । ६-१-६ जक्षित्या... +७-१-४ अदभ्यस्तात् - चकासति । चकासाञ्चकार । चकास्तु । चकाधि । ८-२-२५ धि च इति सलोपः सिँच एवेति केचित् । तन्मते चकाद्धि । ८-२-७३ तिप्यनस्तेः- अचकात्, अचकाद् । अचकासुः । ८-२-७४ सिपि धातो...- अचकाः, अचकात्, अचकाद् । १०७५ शास्ति । ६-४-३४ शास इदङ्... +८-३-६० शासि वसि-शिष्टः । शासति । शशास । शशासतुः । शिष्टात् । शास्तु । शिष्टाम् । शासतु । ६-४-३५ शा हौ- शाधि । अशात् । अशाद् । अशिष्टाम् । अशासुः । अशाः, अशात्, अशाद् । ३-१-५६ सर्तिशास्त्यर्ति...- अशिषत् । अशासिष्यत् । १०७६ दीधीते । ६-४-८२ एरनेकाचो...- दीध्याते । ७-३-५३ यीवर्णयो... इति लोपं बाधित्वा नित्यत्वाट्टेरेत्वम् । दीध्ये । १-१-६ दीधी...- दीध्याञ्चक्रे । ७-३-५३ यीवर्णयोः.... दीधिता । दीधिष्यते । १०७७ वी गतीत्यादिना तुल्येऽर्थे वर्तत इत्यर्थः । १०७८-१०७९ सस्ति ।. सस्तः । ससन्ति । ससास । सेसतुः । सस्तु । ८-२-२५ धि च, तस्य ८-२-१ पूर्वत्राऽसिद्धमित्यनेनाऽसिद्धत्वात् ६-४-१०५ अतो हेः, इति न लुक्- सधि । असत् । असस्ताम् । असः, असत्, असद् । सस्यात् । असासीत्, अससीत् । सन्ति । सन्तः संस्तन्ति । बहूनां समवाये द्वयोः संयोगसञ्ज्ञा नेत्याश्रित्य ८-२-२९ स्को....इति सलोपाऽभावात् संस्ति । संस्त इत्येके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०८० वशँ कान्तौ । चर्करीतं च ।
१०८१ ह्नुङ् अपनयने । इत्यदादयः ।
अथ जुहोत्यादयः । चत्वारः परस्मैपदिनः ।
१०८२ हु दानादनयोः । आदाने चेत्येके । प्रीणनेऽपीति भाष्यम् । दानं चेह विधिबोधितद्रव्यस्याऽऽहवनीये प्रक्षेपः ।
१०८३ ञिभी भये ।
१०८४ ह्री लज्जायाम् ।
१०८५ पॄ पालनपूरणयोः । पृ इत्येके ।
परस्मैपदिनो गताः ।
१०८६ डुभृञ् **धारणपोषणयोः ।**
उभयपदी । अथ द्वावात्मनेपदिनौ ।
१०८७ माङ् माने शब्दे च ।
१०८८ ओँ हा ङ् गतौ ।
आत्मनेपदिनौ गतौ ।
१०८९ ओँहाक् त्यागे ।
परस्मैपदी ।
अथ पञ्चोभयपदिनः ।
१०९० डुदाञ् दाने ।

१०८० कान्तिरिच्छा । वष्टि । ६-१-१६ ग्रहिज्या... -उष्टः । उशन्ति । वक्षि । उष्ठः । उवाश । ऊशतुः । वशिता । वष्टु । उष्टात् । उड्ढि । अवट् । औष्टाम् । औशन् । अवशम् । उश्यात् । उश्याताम् । उश्यात् । उश्यास्ताम् । अवाशीत्, अवशीत् । **चर्करीतमिति** यङ्लुगन्तस्य संज्ञा । तददादौ बोध्यम् । तेन यङ्लुगन्ते शपो लुक् । बोभवीति, बोभोति । १०८१ ह्नुते । जुह्नुवे । ह्नुवीत । ह्नोषीष्ट । अह्नोष्ट । १०८२ २-४-७५ जुहोत्या...- श्लुः +६-१-१० श्लौ - जुहोति । जुहुतः । ६-१-५ उभे... +७-१-४ अदभ्यस्तात् +६-४-८७ हुश्नुवो... - जुह्वति । ३-१-३९ भीह्री भृ हुवां...- जुहवाञ्चकार । जुहवाञ्चकर्थ । जुहाव । जुहविथ । जुहोथ । होता । होष्यति । जुहोतु । जुहुतात् । ६-४-१०१ हुझल्भ्यो...- जुहुधि । ६-४-८७ हुश्नु.... इत्यतः परत्वात् ७-३-८४ सार्वधातुका...- जुहवानि । ७-३-८३ जुसि च- अजुहवुः । जुहुयात् । ७-४-२५ अकृत्.... -हूयात् । ७-२-१ सिँचि वृद्धिः...- अहौषीत् । १०८३ बिभेति । ६-४-११५ भियो...- बिभितः, बिभीतः । ६-४-८२ एर... बिभ्यति । बिभयाञ्चकार, बिभाय । भेता । बिभेतु । बिभिहि, बिभीहि । अबिभयुः । १०८४ जिह्रेति । जिह्रीतः । ६-४-७७ अचिश्नु...- जिह्रियति । जिह्रयाञ्चकार, जिह्राय । जिह्रेतु । जिह्रीहि । अजिह्रेत् । अजिह्रयुः । १०८५ ७-४-७७ अर्तिपिप...- पिपर्ति । ७-१-१०२ उदोष्ठ्य.... +८-२-७७ हलि च- पिपूर्तः । पिपुरति । पपार । किति लिँटि ७-४-११ ऋच्छत्यॄताम् इति प्राप्ते ७-४-१२ शॄ दॄ प्रां...- पप्रतुः । पप्रुः । ह्रस्वाऽभावे पूर्वसूत्रेण गुणः । पपरतुः । पपरुः । पपरिथ । ७-३-३८ वॄतो वा- परीता, परिता । अपिपः । अपिपूर्ताम् । अपिपरुः । पिपूर्यात् । पूर्यात् । अपारीत् । ७-२-४० सिँचि च ....- अपारिष्टाम् । पिपर्ति । पिपृतः । पिप्रति । पर्ता । परिष्यति । पिपृयात् । ७-४-२८ रिङ् श....- प्रियात् । अपार्षीत् । अपरिष्यत् । अत्र दीक्षितः- पाणिनीयमते तु तं रोदसी पिपृतमित्यादौ छान्दसत्वं शरणमिति । १०८६ ७-४-७६ भृञामित्- बिभर्ति । बिभृतः । बिभ्रति । बिभृते । बिभ्राते । बिभ्रते । ३-१-३९ भीह्री...- बिभराञ्चकार, बभार । बभर्थ । बभृव । भर्ता । भरिष्यति । बिभर्तु । बिभृहि । बिभराणि । बिभृताम् । बिभृध्वम् । बिभरै । अबिभः । अबिभृताम् । अबिभरुः । बिभृयात् । भ्रियात् । १-२-१२ उश्च- भृषीष्ट । भृषीढ्वम् । अभार्षीत् । अभृत । अभृढ्वम् । १०८७ ६-४-११३ ई हल्यघोः- मिमीते । ६-४-११२ श्नाभ्यस्त...- मिमाते । मिमते । ८-४-१७ नेर्गद...- प्रणिमिमीते । अमास्त । अमास्यत । १०८८ जिहीते । जिहाते । जिहते । जहे । हाता । हास्यते । अहास्त । अहास्यत । १०८९ जहाति । ६-४-११६ जहातेश्च- जहितः, जहीतः । जहति । जहौ । जहिथ, जहाथ । जहिव । हाता । जहातु । जहिताम्, जहीताम् । जहतु । ६-४-११७ आ च हौ- जहाहि, जहिहि, जहीहि । अजहात् । अजहिताम्, अजहीताम् । अजहुः । ६-४-११८ लोपो यि- जह्यात् । ६-४-६७ एर्लिँङि- हेयात् । अहासीत् । १०९० ददाति । ८-४-१७ नेर्गद...- प्रणिददाति । दत्तः । ददति । दत्ते । ददौ । ददे । दातासि । दातासे । दास्यति । दास्यते । ददातु । दत्ताम् । ददतु । ६-४-११९ घ्वसोरेद्धा....- देहि । ददानि । ददाव । ददाम । दत्ताम् । ददाताम् । ददताम् । दत्स्व । ददाथाम् । दद्ध्वम् । ददै । ददावहै । ददामहै । अददात् । अदत्ताम् । अददुः । दद्यात् । देयात् । २-४-७७ गाति स्था...- अदात् । अदाताम् । अदुः । १-२-१७ स्थाघ्वोरिच्च-अदित ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०९१ डुधाञ् धारणपोषणयोः । दानेऽप्येके ।
१०९२ णिजिर् शौचपोषणयोः ।
१०९३ विजिर् पृथग्भावे ।
१०९४ विष्लृँ व्याप्तौ ।
पञ्चोभयपदिनो गताः । अथ आगणान्तम् परस्मैपदिनश्छान्दसाश्च ।
१०९५ घृ क्षरणदीप्त्योः ।
१०९६ हृ प्रसह्यकरणे ।
१०९७ ऋ
१०९८ सृ गतौ । ७-४-७८ बहुलं छन्दसीत्येव सिद्धे ७-४-७७ । अर्तिपिपर्त्योश्चेती-त्वविधानादयं भाषायामपि ।
१०९९ भसँ भर्त्सनदीप्त्योः ।
११०० कि ज्ञाने ।
११०१ तुरँ त्वरणे ।
११०२ धिषँ शब्दे ।
११०३ धनँ धान्ये ।
११०४ जनँ जनने ।
११०५ गा स्तुतौ ।
इति जुहोत्यादयः । अथ दिवादयः । तत्र भ्रूषन्ताः परस्मैपदिनः ।
११०६ **दिवुँ क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु ।**
११०७ षिवुँ तन्तुसन्ताने ।
११०८ स्रिवुँ गतिशोषणयोः ।
११०९ ष्ठिवुँ निरसने ।
१११० ष्णुसुँ अदने । आदान इत्येके । अदर्शन इत्यपरे ।
११११ ष्णसुँ निरसने ।
१११२ क्नसुँ ह्वरणदीप्त्योः ।

१०९१ दधाति । प्रणिदधाति ।८-२-३८ दधस्तथोश्च- धत्तः । दधति । दधासि । धत्थः । दध्वः । दध्मः । धत्ते । धत्से । धद्ध्वे । धेहि । धेयात् । अधात् । अधित । १०९२ ७-४-७५ निजां त्रयाणां...- नेनेक्ति । नेनिक्तः । नेनिजति । नेनिक्ते । नेनिजाते । नेनिजते । निनेज । निनेजिथ । निनिजे । निनिजिषे । नेक्तासि । नेक्तासे । नेक्ष्यति । नेक्ष्यते । नेनेक्तु । नेनिग्धि । ७-३-८७ नाभ्यस्तस्याचि...- नेनिजानि । नेनिक्ताम् । नेनिजै । अनेनेक् । अनेनिक्ताम् । अनेनिजुः । नेनिज्यात् । नेनिजीत । निज्यात् । १-२-११ लिँङसिँचा.... -निक्षीष्ट । ३-१-५७ इरितो वा - अनिजत्, अनैक्षीत् । अनिक्त । १०९३ वेवेक्ति । वेविक्ते । विवेजिथ । अत्र १-२-२ विज इट् इति ङित्त्वं तु न, तत्र १२८८ ओँविजीँ १४५९ ओँ विजीँ इत्यनयोरेव ग्रहणात् । विविजे । अवैक्षीत् । अविक्त । १०९४ वेवेष्टि । वेविष्टे । वेविषाणि । ३-१-५५ पुषादि...- अविषत् । ३-१-४५ शल इगु....- अविक्षत । ७-३-७२ क्सस्याचि- अविक्षाताम् । अविक्षन्त । १०९५ जिघर्म्यग्निं हविषा घृतेन । ७-४-७८ बहुलं छन्दसि इतीत्वम् । १०९६ अयं सुवो अभिजिहर्ति होमान् । १०९७-१०९८ ६-४-७८ अभ्यासस्याऽसवर्णे- इयर्ति । इयृतः । इय्रति । आर । ७-४-११ ऋच्छत्यृताम्- आरतुः । ७-२-६६ इडत्त्यर्ति...- आरिथ । अर्ता । अरिष्यति । इयर्तु । इयराणि । ऐयः । ऐयृताम् । ऐयरुः । इयृयात् । ७-४-२९ गुणोऽर्त्ति...- अर्यात् । ३-१-५६ सर्तिशास्त्यर्ति....- आरत् । ससर्ति । १०९९ बभस्ति । ६-४-१०० घसिभसो.... +८-२-२६ झलो झलि +८-२-४० झषस्तथो....- बब्धः । बप्सति । ११०० चिकेति । ११०१ तुतोर्ति । तुतूर्तः । तुतुरति । ११०२ दिधेष्टि । दिधिष्टः । ११०३ दधन्ति । दधन्तः । दधनति । ११०४ जजन्ति । ६-४-४२ जनसनखनां.... -जजातः । ६-४-९८ गम हन जन.... -जज्ञति । जजंसि । जजाथः । जजान । ६-४-४३ ये विभाषा- जजायात्, जजन्यात् । जायात्, जन्यात् । ११०५ देवाञ्जिगाति सुम्नयुः । ७-४-७८ बहुलं छन्दसि इतीत्वम् । ६-४-११३ ई हल्यघोः- जिगीतः । ६-४-११२ श्नाभ्यस्तयो....- जिगति । ११०६ ३-१-६९ दिवादिभ्यः श्यन् +३-४-११३ तिङ्शित्.... +१-२-४ सार्वधातुकमपित् +१-१-५ क्ङिति च +८-२-७७ हलि च- दीव्यति । दिदेव । देविता । देविष्यति । दीव्यतु । अदीव्यत् । दीव्येत् । दीव्यात् । अदेवीत् । अदेविष्यत् । ११०७ सीव्यति । ८-३-७० परिनिविभ्यः.... -परिषीव्यति । परिषिषेव । अत्र द्वि. ८-३-६४ चाऽभ्यासस्य इति नियमस्तु न । तत्र प्राक् सितादित्यनुवृत्तेः । अस्य चाऽ प्राक्सितत्वात् । ८-३-७१ सिवादीनां...- न्यषेवीत्, न्यसेवीत् । ११०८ स्रीव्यति । सिस्रेव । ११०९ ष्ठीव्यति । विशेषः ५५९ धातौ द्रष्टव्यः । केचिदिहेमं न पठन्ति । १११० स्नुस्यति । सुष्णोस । ११११ स्नस्यति । सस्नास । सस्नसतुः । अस्नासीत्, आस्नसीत् । १११२ ह्वरणं कौटिल्यम् । क्नस्यति । चक्नास । चक्नसतुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११९३ व्युषँ दाहे ।
१११४ प्लुषँ च ।
१११५ नृतीँ गात्रविक्षेपे ।
१११६ त्रसीँ उद्वेगे ।
१११७ कुथँ पूतीभावे ।
१११८ पुथँ हिंसायाम् ।
१११९ गुधँ परिवेष्टने ।
११२० क्षिपँ प्रेरणे ।
११२१ पुष्पँ विकसने ।
११२२ तिमँ
११२३ ष्टिमँ
११२४ ष्टीमँ आर्द्रीभावे ।
११२५ व्रीडँ चोदने लज्जायां च ।
११२६ इषँ गतौ ।
११२७ षहँ
११२८ षुहँ चक्यर्थे ।
११२९ जॄष्
११३० झॄष् वयोहानौ ।
दिवुँ प्रभृतयो झॄषन्ताः परस्मैपदिनो गताः । अथ प्रीङन्ता आत्मनेपदिनः ।
११३१ षूङ् प्राणिप्रसवे ।
११३२ दूङ् परितापे ।
११३३ दीङ् क्षये ।
११३४ डीङ् विहायसा गतौ ।
११३५ धीङ् आधारे ।
११३६ मीङ् हिंसायाम् ।
११३७ रीङ् स्रवणे ।
११३८ लीङ् श्लेषणे ।
११३९ व्रीङ् वृणोत्यर्थे ।
(स्वादय ओँदितः) ग.सू.
११४० पीङ् पाने ।
११४१ माङ् माने ।
११४२ ईङ् गतौ ।
११४३ प्रीङ् प्रीतौ ।
षूङ्प्रभृतय आत्मनेपदिनो गताः । अथ चत्वारः परस्मैपदिनः ।
११४४ शो तनूकरणे ।
११४५ छो छेदने ।
११४६ षो अन्तकर्मणि ।
११४७ दो अवखण्डने ।
शोप्रभृतयः परस्मैपदिनो गताः । अथात्मनेपदिनः पञ्चदश

१११३ व्युष्यति । वुव्योष । १११४ प्लुष्यति । पुप्लोष । अप्लोषीत् । १११५ नृत्यति । ननर्त । नर्तिता । ७-२-५७ सेऽसिँचि...- नर्तिष्यति, नर्त्स्यति । नृत्यतु । अनृत्यत् । नृत्येत् । नृत्यात् । अनर्तीत् । अनर्तिष्यत्, अनर्त्स्यत् । १११६ ३-१-७० वा भ्राश...- त्रस्यति, त्रसति । तत्रास । ६-४-१२४ वा जॄभ्रमु...- त्रेसतुः, तत्रसतुः । १११७ पूतीभावो दौर्गन्ध्यम् । कुथ्यति । चुकोथ । १११८ पुथ्यति । १११९ गुध्यति । ११२० क्षिप्यति । चिक्षेपिथ । क्षेप्ता । क्षेप्स्यति ।११२१ पुष्यति । पुपुष्प । पुष्पिता । ११२२-११२४ तिम्यति । तितेम । स्तिम्यति । तिष्टेम । स्तीम्यति । तिष्टीम । ११२५ व्रीडचति । विव्रीड । ११२६ इष्यति । इयेष । एषिता । ७-२-४८ तीषसह... इति तु नेह प्रवर्तते । इषेस्ताकारे.... इति तत्सूत्रस्थेन वार्तिकेन निषेधात् । ११२७-११२८ चक्यर्थस्तृप्तिः । सह्यति । ससाह । सेहतुः । सुह्यति । सुषोह । ११२९-११३० जीर्यति । जजार । ७-४-११ ऋच्छत्यृताम् +६-४-१२४ वा जॄ...- जेरतुः, जजरतुः ।, जेरिथ, जजरिथ । ७-२-३८ वृतो वा- जरीता, जरिता । ३-१-५८ जॄस्तम्भु.... +७-४-१६ ऋदृशोऽङि गुणः- अजरत्, अजारीत् । ७-२-४० सिँचि च...- अजारिष्टाम् । झीर्यति । जझरतुः । अझारीत् । ११३१ **सूयते** । सुषुवे । ७-२-४४ स्वरति.... सूत्रे दृश्यम् । सुषुविषे । सुषुविवहे । सविता, सोता । ११३२ दूयते । दुदुवे । दविता । ११३३ दीयते । ६-४-६३ दीङो युँडचि... +६-४-२२ असिद्ध... सूत्रस्थं वुँण्युटा... -दिदीये । ६-१-४९ मीनाति....- दाता । दास्यते । अदास्त । सन्निपातपरिभाषया १-२-१७ स्थाघ्वो....इति न प्रवर्तते । अदास्थाः । अदास्यत । ११३४ डीयते । प्रायेणायमुत्पूर्वः । उड्डीयते । डिड्ये । डयिता । डयिष्यते । ११३५ धीयते । दिध्ये । धेता । धेष्यते । ११३६ हिंसाऽत्र प्राणवियोगः । मीयते । मिम्ये । मेता । मेष्यते । ११३७ रीयते ॥ ११३८ लीयते । लिल्ये । ६-१-५० विभाषा लीयतेः- लाता, लेता । लास्यते, लेष्यते । ११३९ व्रीयते । विव्रिये । **स्वादय ओँदित्फलम्** । ८-२-४५ ओँदितश्चेति निष्ठानत्वम् । यथा सूनः । दूनः । दीनः । इत्यादि । ११४० पीयते । पिप्ये । ११४१ मायते । ममे । ११४२ ईयते । अयाञ्चक्रे । ११४३ सकर्मकः । प्रीयते । पिप्रिये । ११४४ ७-३-७१ ओतः श्यनि- श्यति । श्यतः । श्यन्ति । शशौ । शशतुः । शाता । शास्यति । २-४-७८ विभाषा घ्राधेट् ...- अशात्, अशासीत् । ११४५ छ्यति । चच्छौ । छाता । अच्छात्, अच्छासीत् । ११४६ स्यति । ससौ । ८-३-६५ उपसर्गात्.... -अभिष्यति । ८-३-६३ प्राक् सिता... अभ्यष्यत् । प्र. ८-३-६४ चाऽभ्यासस्य - अभिससौ । ११४७ द्यति । ददौ । प्रणिदाता । देयात् । अदात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११४८ जनीँ प्रादुर्भावे ।
११४९ दीपीँ दीप्तौ ।
११५० पूरीँ आप्यायने ।
११५१ तूरीँ
गतित्वरणहिंसनयोः ।
११५२ धूरीँ
११५३ गूरीँ हिंसागत्योः ।
११५४ घूरीँ
११५५ जूरीँ
हिंसावयोहान्योः ।
११५६ शूरीँ
हिंसास्तम्भनयोः ।
११५७ चूरीँ दाहे ।
११५८ तपँ ऐश्वर्ये वा ।
पतँ इति पाठान्तरम् ।
११५९ वृतुँ वरणे ।
११६० क्लिशँ उपतापे ।
११६१ काशृँ दीप्तौ ।
११६२ वाशृँ शब्दे ।
जनीँप्रभृतय आत्मनेपदिनो गताः ।
अथ पञ्च स्वरितेतः ।
११६३ मृषँ तितिक्षायाम् ।
११६४ शुचि॑र् पूतीभावे ।
११६५ णहँ बन्धने ।
११६६ रञ्जँ रागे ।
११६७ शपँ आक्रोशे । **मृषँप्रभृतयः स्वरितेतो गताः ।**
अथैकादश आत्मनेपदिनः ।
११६८ पदँ गतौ ।
११६९ खिदँ दैन्ये ।
११७० विदँ सत्तायाम् ।
११७१ बुधँ अवगमने ।
११७२ युधँ संप्रहारे ।
११७३ अनो रुधँ कामे ।
११७४ अणँ प्राणने । अनँ इत्येके ।
११७५ मनँ ज्ञाने ।
११७६ युजँ समाधौ ।
११७७ सृजँ विसर्गे ।
११७८ लिशँ अल्पीभावे ।
पदँप्रभृतय आत्मनेपदिनो गताः । अथागणान्तं परस्मैपदिनः ।
११७९ राधोऽकर्मकाद् वृद्धावेव ।

११४८ ७-३-७९ ज्ञाजनोर्जा- जायते । ६-४-९८ गमहन...- जज्ञे । जज्ञाते । जज्ञिरे । जनिता । जनिष्यते । ३-१-६१ दीपजन.... +७-३-३५ जनिवध्योश्च- अजनि, अजनिष्ट । अजनिषाताम् । अजनिषत । ११४९ दीप्यते । दिदीपे । अदीपि, अदीपिष्ट । ११५० पूर्यते । अपूरि, अपूरिष्ट । ११५१ तूर्यते । तुतूरे । अतूरिष्ट । ११५२-११५३ धूर्यते । दुधूरे । गूर्यते । जुगूरे । ११५४-११५५ घूर्यते । जुघूरे । जूर्यते । जुजूरे । ११५६ शूर्यते । शुशूरे । ११५७ चूर्यते । चुचूरे । ११५८ अयं धातुरैश्वर्ये वा तङ्श्यनौ लभते । अन्यदा तु शब्विकरणः परस्मैपदीत्यर्थः । केचित्तु वाग्रहणमग्रिम (वृतुँ) धातोराद्यावयवमिच्छन्ति । तप्यते । तेपे । तप्ता । पत्यते । ११५९ वृत्यते । मतान्तरे- वावृत्यते । ततो वावृत्यमाना सा रामशालां न्यविक्षत इति भट्टिः । ११६० क्लिश्यते । क्लेशिता । ११६१ काश्यते । चकाशे । ११६२ वाश्यते । ११६३ मृष्यति । मृष्यते । ममर्ष । मर्षिता । ११६४ शुच्यति । शुच्यते । शुशोच । शुशुचे । ३-१-५७ इरितो वा- अशुचत्, अशोचीत् । अशोचिष्ट । ११६५ नह्यति । नह्यते । ननाह । नेहतुः । नेहिथ, ८-२-३४ नहो धः- ननद्ध । नद्धा । अनात्सीत् । ८-२-२६ झलो झलि - अनद्ध । ११६६ रज्यति । रज्यते । ररञ्जिथ, ररङ्क्थ । ११६७ शप्यति । शप्यते । ११६८ पद्यते ८-४-१७ नेर्गद...-प्रणिपद्यते । पेदे । पत्ता । पत्स्यते । पद्येत । पत्सीष्ट । ३-१-६० चिण् ते...-अपादि । अपत्साताम् । अपत्सत । ११६९ खिद्यते । चिखिदे । खेत्ता । अखित्त । ११७० विद्यते । वेत्ता । अवित्त । ११७१ बुध्यते । बुबुधे । बोद्धा । भोत्स्यते । ३-१-६१ दीपजन...- अबोधि, अबुद्ध । अभुत्साताम् । अभुत्सत । अभोत्स्यत । ११७२ युध्यते । युयुधे । योद्धा । अयुद्ध । ११७३ अनुरुध्यते । अनुरोद्धा । अन्वरुद्ध । ११७४ अण्यते । आणे । अणिता । अन्यते । आने । अनिता । ११७५ मन्यते । मेने । मन्ता । मंस्यते । अमंस्त । ११७६ युज्यते । योक्ता । अयुक्त । ११७७ अकर्मकः । सृज्यते । ससृजे । ससृजिषे । ६-१-५७ सृजिदृशोः.... +८-२-३६ व्रश्चभ्रस्ज...- स्रष्टा । ८-२-४१ षढोः...- स्रक्ष्यते । १-२-११ लिङ्सिँचा... इति कित्त्वान्न गुणो नाऽप्यम्-सृक्षीष्ट । असृष्ट । असृक्षाताम् । ११७८ लिश्यते । लेष्टा । लेक्ष्यते । लिक्षीष्ट । ३-१-४५ शल इगु...-अलिक्षत । अलिक्षाताम् । ११७९ अत्र दीक्षितः- एवकारो भिन्नक्रमः । राधोऽकर्मकादेव श्यन् । उदाहरणमाह- वृद्धाविति । यन्मह्यमपराध्यति । द्रुह्यतीत्यर्थः । विराध्यन्तं क्षमेत कः । द्रुह्यन्तमित्यर्थः । राध्यत्योदनः । सिध्यतीत्यर्थः । कृष्णाय राध्यति । दैवं पर्यालोचयतीत्यर्थः । दैवस्य धात्वर्थेऽन्तर्भावाज्जीवत्यादिवदकर्मकत्वम् । रराध । रराधतुः । रराधिथ । राधो हिंसायामित्येत्वाभ्यासलोपाविह न । हिंसार्थस्य सकर्मकतया दैवादिकत्वायोगात् । इति । राद्धा । रात्स्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११८० व्यधँ ताडने ।
११८१ पुषँ पुष्टौ ।
११८२ शुषँ शोषणे ।
११८३ तुषँ प्रीतौ ।
११८४ दुषँ वैकृत्ये ।
११८५ श्लिषँ आलिङ्गने ।
११८६ शकँ विभाषितो मर्षणे। विभाषितः= उभयपदी ।
११८७ ष्विदाँ गात्रप्रक्षरणे। ञिष्विदाँ इत्येके ।
११८८ क्रुधँ क्रोधे ।
११८९ क्षुधँ बुभुक्षायाम् ।
११९० शुधँ शौचे ।

धातुपाठे दिवादयः

११९१ षिधुँ संराद्धौ ।
११९२ रधँ हिंसासंराद्ध्योः ।
११९३ णशँ अदर्शने ।
११९४ तृपँ प्रीणने ।
११९५ दृपँ हर्षमोहनयोः ।
११९६ द्रुहँ जिघांसायाम् ।
११९७ मुहँ वैचित्त्ये ।
११९८ ष्णुहँ उद्गिरणे ।
११९९ ष्णिहँ प्रीतौ । वृत् । रधादयः समाप्ताः ।
पुषादयस्त्वागणान्तात् ।
१२०० शमुँ उपशमे ।
१२०१ तमुँ काङ्क्षायाम् ।
१२०२ दमुँ उपशमे ।
१२०३ श्रमुँ तपसि खेदे च ।
१२०४ भ्रमुँ अनवस्थाने ।
१२०५ क्षमूँ सहने ।
अयमषित् । भौवादिक (४४१) स्तु षित् । तेन भौवादिकात् ३-३-१०४ षिद्भिदा... इत्यङ्- क्षमा । अस्मात्तु ३-३-९४ स्त्रियां क्तिन् इति क्तिन्- क्षान्तिः ।
१२०६ क्लमुँ ग्लानौ ।
१२०७ मदीँ हर्षे ।
शमादयोऽष्टौ गताः ।

११८० ६-१-१६ ग्रहिज्या...- विध्यति । ६-१-१७ लिंटचभ्यासस्यो...- विव्याध । विविधतुः । विव्यधिथ, विव्यद्ध । व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत् । ११८१ पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । पुष्यतु । अपुष्यत् । पुष्येत् । पुष्यात् । ३-१-५५ पुषादि... इत्यङ्, अपुषत् । ११८२ शुष्यति । शुशोषिथ । शोष्टा । प्राग्वदङ् । एवमग्रेऽपि । अशुषत् । ११८३ तुष्यति । तुतोषिथ । तोष्टा । अतुषत् । ११८४ दुष्यति । दुदोषिथ । दोष्टा । ११८५ श्लिष्यति । शिश्लेषिथ । श्लेष्टा । श्लेक्ष्यति । ३-१-४६ श्लिष आलिङ्गने सूत्रे द्रष्टव्यम् । अश्लिक्षत् कन्यां देवदत्तः । अनालिङ्गने तु समश्लिषज्जतु काष्ठम् । ११८६ शक्यति । शक्यते । शशाक । शेकिथ । शेके । अनिट्केषु लृँदनुबन्धघटितः पठितः । शकिता । शकिष्यति । शकिष्यते । अनिट्कोऽयमपीत्यन्ये । तन्मते - शक्ता । शक्ष्यति । शक्ष्यते । अशकत् । अशक्त । ११८७ स्विद्यति । सिष्वेद । सिष्वेदिथ । स्वेत्ता । अस्विदत् । ११८८ क्रुध्यति । क्रोद्धा । क्रोत्स्यति । अक्रुधत् । ११८९ क्षुध्यति । क्षोद्धा । अक्षुधत् । ११९० शुध्यति । शोद्धा । अशुधत् । ११९१ सिध्यति । सेद्धा । सेत्स्यति । असिधत् । ११९२ रध्यति । ७-१-६१ रधिजभोरचि -ररन्ध । ररन्धतुः । ७-२-४५ रधादिभ्यश्च इति वेट् । एवमग्रेऽपि । ररन्धिथ, ररद्ध । ररन्धिव, रेध्व । ७-१-६२ नेटचलिंटि...- रधिता, रद्धा । रधिष्यति, रत्स्यति । अङि नुँमि ६-४-२४ अनिदितां...- अरधत् । ११९३ नश्यति । ननाश । नेशतुः । नेशिथ, ७-१-६० मस्जिनशोर्झलि- ननंष्ठ । नेशिव, नेश्व । नेशिम, नेश्म । नशिता, नंष्टा । नशिष्यति, नङ्क्ष्यति । नश्येत् । नश्यात् । अनशत् । ८-४-१४ उपसर्गादस...- प्रणश्यति । ८-४-३५ नशेः षान्तस्य- प्रनंष्टा । प्रनङ्क्ष्यति । ११९४ प्रीणनँ तृप्तिस्तर्पणं च । तृप्यति । ततर्प । ततर्पिथ, ६-१-५८ अनुदात्तस्य...-तत्रप्थ, ततर्प्थ । तर्पिता, त्रप्ता, तर्प्ता । ३-१-४४ च्लेः सिँच् सूत्रस्थम्- स्पृशमृश...- अतर्पीत्, अत्राप्सीत्, अताप्र्सीत्, अतृपत् । सिँच्पक्षे वैकल्पिक इट् । इडभावे वैकल्पिकोऽम् । सिँचोऽभावेऽङ् । ११९५ मोहनं गर्वः । दृप्यति । तृप्यतिवत् सर्वम् । रधादित्वाद् वेट्कयोरनयोरनुदात्तेषु पाठोऽमर्थः । ११९६ द्रुह्यति । दुद्रोहिथ, ८-२-३३ वा द्रुह...- दुद्रोग्ध, ८-२-३१ हो ढः- दुद्रोढ । द्रोहिता, द्रोग्धा, द्रोढा । द्रोहिष्यति, ध्रोक्ष्यति । घत्वे चर्त्वे, ढत्वे च -८-२-४१ षढोः कः । रूपं तुल्यम् । अद्रुहत् । ११९७ वैचित्यमविवेकः । मुह्यति । मुमोहिथ, मुमोग्ध, मुमोढ । मोहिता, मोग्धा, मोढा । मोहिष्यति, मोक्ष्यति । अमुहत् । ११९८ स्नुह्यति । सुष्णोह । सुष्णोहिथ, सुष्णोग्ध, सुष्णोढ । सुष्णुहिव, सुष्णुह्व । स्नोहिता, स्नोग्धा, स्नोढा । स्नोहिष्यति, स्नोक्ष्यति । अस्नुहत् । ११९९ स्निह्यति । सिष्णेह । स्नुह्यतिवत् । १२०० अयमकर्मकः । ७-३-७४ शमामष्टानां... इति दीर्घः । एवमग्रेऽपि । शाम्यति । ८-४-१७ नेर्गद.... -प्रणिशाम्यति । शशाम । शेमतुः । शमिता । अशमत् । १२०१ ताम्यति । तमिता । अतमत् । १२०२ सकर्मकोऽयम् । दाम्यति । अदमत् । १२०३ श्राम्यति । अश्रमत् । १२०४ ३-१-७० वा भ्राश...- भ्राम्यति, भ्रमति । बभ्राम । ६-४-१२४ वा जृभ्रमु...- भ्रेमतुः, बभ्रमतुः । अभ्रमत् । १२०५ क्षाम्यति । चक्षाम । चक्षमिथ, चक्षन्थ । चक्षमिव, ८-२-६५ म्वोश्च- चक्षण्व । चक्षमिम, चक्षण्म । क्षमिता, क्षन्ता । अक्षमत् । १२०६ ३-१-७० वा भ्राश... इति श्यन् पक्षे ७-३-६४ शमामष्टानां.... इति दीर्घः- क्लाम्यति, श्यनोऽभावे शपि ७-३-७५ ष्ठिवुँक्लमुँ... इति दीर्घः- क्लामति । श्यन्पक्षेऽप्यनेनैव दीर्घे सिद्धे शमादिषु पाठः ३-२-१४१ शमित्यष्टाभ्यो...इति घिनुँणर्थः । अक्लमत् । १२०७ माद्यति । अमदत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२०८ असुँ क्षेपणे ।
१२०९ यसुँ प्रयत्ने ।
१२१० जसुँ मोक्षणे ।
१२११ तसुँ उपक्षये ।
१२१२ दसुँ च ।
१२१३ वसुँ स्तम्भे ।
बसुँ इति केचित् ।
१२१४ व्युषँ विभागे ।
ब्युसँ (ओष्ठचादि-दन्त्यान्तः) इत्यन्ये । वुसँ (यकाररहितः) इत्यपरे ।
१२१५ प्लुषँ दाहे ।
१२१६ बिसँ प्रेरणे ।
१२१७ कुसँ संश्लेषणे ।
१२१८ बुसँ उत्सर्गे ।
१२१९ मुसँ खण्डने ।
१२२० मसीँ परिणामे ।
समीँ इत्येके ।
१२२१ लुठँ विलोडने ।
१२२२ उचँ समवाये ।
१२२३ भृशुँ
१२२४ भ्रंशुँ अधः पतने ।
१२२५ वृशँ वरणे ।
१२२६ कृशँ तनूकरणे ।
१२२७ ञितृषँ पिपासायाम् ।
१२२८ हृषँ तुष्टौ ।
१२२९ रुषँ
१२३० रिषँ हिंसायाम् ।
१२३१ डिपँ क्षेपे ।
१२३२ कुपँ क्रोधे ।
१२३३ गुपँ व्याकुलत्वे ।
१२३४ युपँ
१२३५ रुपँ
१२३६ लुपँ विमोहने ।
१२३७ लुभँ गार्ध्ये ।
१२३८ क्षुभँ संचलने ।
१२३९ णभँ
१२४० तुभँ हिंसायाम् ।
१२४१ क्लिदूँ आर्द्रीभावे ।
१२४२ ञिमिदाँ स्नेहने ।
१२४३ ञिक्ष्विदाँ स्नेहनमोचनयोः ।
१२४४ ऋधुँ वृद्धौ ।
१२४५ गृधुँ अभिकाङ्क्षायाम् ।
वृत् । पुषादयो दिवादयश्च **वृत्ताः ।** केचित्तु पुषादिसमाप्त्यर्थमेव वृत्करणम् । दिवादिस्तु भ्वादिवदाकृतिगणः । तेन क्षीयते । मृग्यतीत्यादिसिद्धिरित्याहुः ।

इति दिवादयः ।

अथ स्वादयः

१२४६ षुञ् अभिषवे ।

१२०८ अस्यति । आस । असिता । ७-४-१७ अस्यतेस्थुँक्- आस्थत् । पुषादित्वादेव सिद्धे ३-१-५२ अस्यति...इति वचनफलं तत्रैव सूत्रे द्रष्टव्यम् । १२०९ ३-२-७१ यसोऽनुपसर्गात्-यस्यति, यसति । ३-१-७२ संयसश्च- संयस्यति । संयसति । प्रयस्यति । अयसत् । १२१० जस्यति । अजसत् । १२११ तस्यति । अतसत् । १२१२ दस्यति । अदसत् । १२१३ वस्यति । ६-४-१२६ न शस...- ववसतुः । मतान्तरे -बस्यति । बेसतुः । बेसुः । १२१४ व्युष्यति । अव्युषत् । ब्युस्यति । अब्युसत् । १२१५ प्लुष्यति । अप्लुषत् । १२१६ बिस्यति । अबिसत् । १२१७ कुस्यति । अकुसत् । १२१८ बुस्यति । अबुसत् । १२१९ मुस्यति । अमुसत् । १२२० मस्यति । अमसत् ।सम्यति । असमत् । १२२१ लुठचति । अलुठत् । १२२२ उच्यति । उवोच । औचत् । १२२३-१२२४ भृश्यति । बभर्श । अभृशत् । ६-४-२४ अनिदितां ...- भ्रश्यति । अभ्रशत् । १२२५ वृश्यति । अवृशत् । १२२६ कृश्यति । अकृशत् । १२२७ तृष्यति । अतृषत् । १२२८ हृष्यति । जहर्ष । अहृषत् । १२२९-१२३० रुष्यति । ७-२-४८ तीषसह...-रोषिता, रोष्टा । अरुषत् । रिष्यति । रेषिता, रेष्टा अरिषत् । १२३१ डिप्यति । अडिपत् । १२३२ कुप्यति । अकुपत् । १२३३ गुप्यति । अगुपत् । १२३४-१२३६ युप्यति । अयुपत् । रुप्यति । अरुपत् । लुप्यति । लोपिता । ७-२-१० एकाच इति निषेधस्तु न । अनिट्केषु लिपिसाहचर्यात् तौदादिकस्यैव ग्रहणात् । अलुपत् । १२३७ लुभ्यति । ७-२-४८ तीषसह.... लोभिता, लोब्धा । अलुभत् । अत्र दीक्षितः-भ्वादेरवृत्कृतत्वाल्लोभतीत्यपीत्याहुरिति । १२३८ क्षुभ्यति । क्षोभिता । अक्षुभत् । १२३९-१२४० नभ्यति । अनभत् । तुभ्यति । अतुभत् । १२४१ क्लिद्यति । चिक्लेद । चिक्लेदिथ, चिक्लेत्थ । चिक्लिदिव, चिक्लिद्व । चिक्लिदिम, चिक्लिद्म । क्लेदिता, क्लेत्ता । १२४२ ७-३-८२ मिदेर्गुणः- मेद्यति । अमिदत् । १२४३ क्ष्विद्यति । अक्ष्विदत् । १२४४ ऋध्यति । आनर्ध । आर्धत् । १२४५गृध्यति । जगर्ध । अगृधत् । १२४६ अभिषवः स्नपनं पीडनं स्नानं सुरासन्धानं च । ३-१-७३ स्वादिभ्यः श्नुः- सुनोति । सुनुतः । ६-४-८७ हुश्नुवोः...- सुन्वन्ति । सुनोमि । ६-४-१०७ लोपश्चा...- सुन्वः, सुनुवः । सुन्मः, सुनुमः । सुनुते । सुन्वहे, सुनुवहे । सुन्महे, सुनुमहे । ८-३-६५ उपसर्गात् सुनोति...- अभिषुणोति । सुषाव । सुषुवे । द्वि. ८-३-६४ चाऽभ्यासस्य- अभिसुषाव । सोता । सोष्यति । ८-३-११७ सुनोतेः स्यसनोः -विसोष्यति । सोष्यते । सुनोतु । ६-४-१०६ उतश्च.. - सुनु । सुनवानि । सुनुताम् । सुनवै । असुनोत् । ८-३-६३ प्राक् सिता...- अभ्यषुणोत् । सुनुयात् । सूयात् । ७-२-७२ स्तुसु... असावीत् । असोष्ट ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२४७ षिञ् बन्धने ।
१२४८ शिञ् निशाने ।
१२४९ डुमिञ् प्रक्षेपणे ।
१२५० चिञ् चयने ।
१२५१ स्तृञ् आच्छादने ।
१२५२ कृञ् हिंसायाम् ।
१२५३ वृञ् वरणे ।
१२५४ धुञ् कम्पने ।
धूञ् इत्येके ।
षुञ् प्रभृतय उभयपदिनो गताः । अथ परस्मैपदिनः ।
१२५५ टु दु उपतापे ।
१२५६ हि गतौ वृद्धौ च ।
१२५७ पृ प्रीतौ ।
१२५८ स्पृ प्रीतिपालनयोः ।
प्रीतिचलनयोरित्यन्ये ।
चलनम्=जीवनम् इति स्वामी ।
स्मृ इत्येके ।
पृणोत्यादयस्त्रयोऽपि छान्दसा इत्याहुः ।
१२५९ आप्लृँ व्याप्तौ ।
१२६० शक्लृँ शक्तौ ।
१२६१ राधँ ।
१२६२ साधँ संसिद्धौ ।
टु दु प्रभृतयः परस्मेपदिनो गताः ।
अथ द्वावात्मनेपदिनौ ।
१२६३ अशूँ व्याप्तौ संघाते च । अश्नुते ।
१२६४ ष्टिघँ आस्कन्दने ।
अथ आगणान्तं परस्मैपदिनः ।
१२६५ तिकँ ।
१२६६ तिगँ गतौ च ।
१२६७ षघँ हिंसायाम् ।
१२६८ ञिधृषाँ प्रागल्भ्ये ।
१२६९ दम्भुँ दम्भने ।
१२७० ऋधुँ वृद्धौ ।
तृपँ प्रीणने इत्येके ।
(छन्दसि) ग.सू.
आगणान्तमधिकारोऽयम् ।
१२७१ अहँ व्याप्तौ ।
१२७२ दघँ घातने पालने च ।
१२७३ चमुँ भक्षणे ।

१२४७ सिनोति । विसिनोति । सिषाय । सिष्ये । सेता । १२४८ शिनोति । शिनुते । शेता । १२४९ मिनोति । मिनुते । ६-१-४९ मिनाति...- ममौ । मिम्यतुः । ममिथ, ममाथ । मिम्ये । माता । मास्यति । मास्यते । मिनोतु । अमिनोत् । मिनुयात् । मीयात् । अमासीत् । अमासिष्टाम् । अमास्त । १२५० चिनोति । चिनुते । ८-४-१७ नेर्गद.... प्रणिचिनोति ७-३-५८ विभाषा चेः -चिकाय, चिचाय । चिकयिथ, चिकेथ, चिचयिथ, चिचेथ । चिक्यिव, चिच्यिव । चिक्यिम, चिच्यिम । चिक्ये, चिच्ये । चेता । चेष्यति । चेष्यते । अचैषीत् । अचेष्ट १२५१ स्तृणोति । स्तृणुते । ७-४-१० ऋतश्च...- तस्तार । तस्तरतुः । स्तर्ता । ७-२-७० ऋद्धनोः स्ये - स्तरिष्यति । स्तरिष्यते । ७-४-२९ गुणोऽर्ति...- स्तर्यात् । ७-२-४३ ऋतश्च संयोगादेः- स्तरिषीष्ट, स्तृषीष्ट । अस्तार्षीत् । अस्तरिष्ट, अस्तृत । १२५२ कृणोति । कृणुते । चकार । चकर्थ । चक्रे । क्रियात् । कृषीष्ट । अकार्षीत् । अकृत । १२५३ वृणोति । वृणुते । ववार । ७-२-१३ कृसृ भृ वृ...इति सूत्रेण निषेधे सिद्धेऽपि ७-२-६४ बभूथाततन्थ... इति सूत्रेण ववर्थेति वेदे इडभावनिपातनं वेदे एव थलीड्निषेधो न तु लोके इति ज्ञापनार्थम् । ववरिथ । ववृव । ववृम । वरिता, वरीता । ७-२-४२ लिँङ्सिँचो.. +७-२-३९ न लिँङि-वरिषीष्ट, वृषीष्ट । अवारीत् । ७-२-४० सिँचि च ...- अवारिष्टाम् । अवरिष्ट, अवरीष्ट, अवृत । १२५४ धुनोति । धुनुते । दुधाव । दुधविथ, दुधोथ । दुधुविव । दुधुवे । धोता । अधौषीत् । अधोष्ट । अधोष्यत् । अधोष्यत । धूनोति । धूनुते । ७-२-४४ स्वरति...- दुधविथ, दुधोथ । किति तु ७-२-११ श्र्युकः किति इति निषेधे प्राप्ते ७-२-१३ कृसृभृवृ.... इति नियमान्नित्यमिट्- दुधुविव । दुधुविम । ७-२-७२ स्तु सु धूञ्भ्यः- अधावीत् । अधविष्ट, अधोष्ट । १२५५ दुनोति । १२५६ हिनोति । ८-४-१५ हिनुमीना- प्रहिणोति । ७-३-५६ हेरचङि-जिघाय । १२५७ पृणोति । पर्ता । १२५८ स्पृणोति । पस्पार । स्मृणोति/ सस्मार । १२५९ आप्नोति । आप्नुतः । आप्नुवन्ति । आप्नुवः । आप्नुमः । आप । आप्ता । आप्स्यति । आप्नोतु । आप्नुहि । ३-१-५५ पुषादि...-आपत् । १२६० शक्नोति । शशाक । शेकिथ, शशक्थ । शेकिव । शेकिम । शक्ता । शक्ष्यति । अशकत् । १२६१-१२६२ राध्नोति । ६-४-१२३ राधो हिंसायाम्- अपरेधतुः । अपरेधुः । अपरेधिथ । राद्धा । साध्नोति ।ससाधिथ । ससाधिव । ससाधिम । साद्धा । सात्स्यति । असात्सीत् । असाद्धाम् । असात्सुः । १२६३ अश्नुते । ७-४-७२ अश्नोतेश्च -आनशे । आनशिषे, आनक्षे । अशिता, अष्टा । अशिष्यते, अक्ष्यते । अश्नुताम् । आश्नुत । अश्नुवीत । अशिषीष्ट, अक्षीष्ट । आशिष्ट, ८-२-२६ झलो झलि- आष्ट । आक्षाताम् । १२६४ स्तिघ्नुते । तिष्टिघे । स्तेघिता । १२६५-१२६६ चादास्कन्दने । तिक्नोति । तिग्नोति । १२६७ सघ्नोति । १२६८ धृष्णोति । दधर्ष । धर्षिता । १२६९ दम्भनं दम्भः । लोकवञ्चनाय विहितकर्मानुष्ठानं दम्भः । दभ्नोति । ददम्भ । ६-४-१२० अत... सूत्रस्थ-श्रन्थि... वार्तिकमप्यत्राऽवश्यद्रष्टव्यम् । १२७० ऋध्नोति । आनर्ध । ८-४-३८ क्षुभ्नादिषु च- तृप्नोति । १२७१ अह्नोति । आह । आहतुः । १२७२ दघ्नोति । ददाघ । देघतुः । १२७३ चम्नोति । चचाम । चेमतुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२७४ रि
१२७५ क्षि
१२७६ चिरि
१२७७ जिरि
१२७८ दाशँ
१२७९ दृ हिंसायाम् । क्षि भाषायामपीत्येके । ऋक्षि इत्येक एवाजादिरित्यन्ये । वृत् । इति स्वादयः ।
अथ तुदादयः ।
१२८० तुदँ व्यथने । इतः षड्भयपदिनः ।
१२८१ णुदँ प्रेरणे ।
१२८२ दिशँ अतिसर्जने ।
१२८३ भ्रस्जँ पाके ।
१२८४ क्षिपँ प्रेरणे ।
१२८५ कृषँ विलेखने । **तुदँ प्रभृतयः षड्भयपदिनो गताः ।**
१२८६ ऋषीँ गतौ ।
परस्मैपदी । अथ चत्वार आत्मनेपदिनः ।
१२८७ जुषीँ प्रीतिसेवनयोः ।
१२८८ ओँ विजीँ भयचलनयोः ।
१२८९ ओँ लजीँ ।
१२९० ओँलस्जीँ व्रीडायाम् ।
जुषीँप्रभृतय **आत्मनेपदिनो गताः । अथ परस्मैपदिनः ।**
१२९१ ओँव्रश्चूँ छेदने ।
१२९२ व्यचँ व्याजीकरणे ।
(व्यचेः कुटादित्वमनसि)
१२९३ उछिँ उञ्छे ।
१२९४ उच्छीँ विवासे ।
१२९५ ऋच्छँ गतीन्द्रियप्रलयमूर्तिभावेषु ।
१२९६ मिच्छँ उत्क्लेशे ।
१२९७ जर्जँ ।
१२९८ चर्चँ ।
११९९ झर्झँ परिभाषणभर्त्सनयोः ।
१३०० त्वचँ संवरणे ।
१३०१ ऋचँ स्तुतौ ।
१३०२ उब्जँ आर्जवे ।
१३०३ उज्झँ उत्सर्गे ।
१३०४ लुभँ विमोहने ।

१२७४-१२७९ रिणोति । क्षिणोति । नतद् यशः शस्त्रभृतां क्षिणोति । क्षिणुँ हिंसायाम् इति तानादिकस्य वा रूपं क्षिणोतीति । ऋक्षिणोति । चिरिणोति । जिरिणोति । ८-४-४३ शात्-दाश्नोति । दृणोति ।१२८० ३-१-७७ तुदादिभ्यः शः-तुदति । तुदते । तुतोद । तुतुदतुः । तुतोदिथ । तुतुदे । तोत्ता । तोत्स्यति । तोत्स्यते । तुद्यात् । १-२-११ लिङ्सिँचा... तुत्सीष्ट । अतौत्सीत् । अतुत्त । १२८१ नुदति । नुदते । नुनोद । नुनोदिथ । नुनुदे । नोत्ता । नोत्स्यति । नोत्स्यते । नुद्यात् । नुत्सीष्ट । अनौत्सीत् । अनुत्त । १२८२ अतिसर्जनम्= दानम् । दिशति । दिशते । दिदेशिथ । देष्टा । देक्ष्यति । देक्ष्यते । ३-१-४५ शल इगु...- अदिक्षत् । अदिक्षत । १२८३ जलं विना मकायादेर्भर्जनमिह पाकः । ६-१-१६ ग्रहिज्या... भृस्ज् ८-४-३९ स्तोः श्चु.... भृश्ज् ८-४-५२ झलां जश्- भृज्जति । भृज्जते । ६-४-४७ भ्रस्जो....- बभर्ज । बभर्जतुः । बभर्जिथ, ८-२-३६ व्रश्चभ्रस्ज ...-बभर्ष्ठ । बभर्जे । रँमभावे- बभ्रज्ज । संयोगात्परत्वेन कित्त्वाऽभावान्न सम्प्रसारणम् । बभ्रज्जतुः । बभ्रज्जिथ, इडभावे ८-२-२९ स्कोः संयोगाद्यो...- बभ्रष्ठ । बभ्रज्जे । भर्ष्टा, भ्रष्टा । भर्क्ष्यति, भ्रक्ष्यति । भर्क्ष्यते, भ्रक्ष्यते । ६-४-४७ भ्रस्जादेशात्.... -भृज्ज्यात् । भृज्ज्यास्ताम् । भर्क्षीष्ट, भ्रक्षीष्ट । अभार्क्षीत्, अभ्राक्षीत् । ८-२-२६ झलो झलि इति लोपस्याऽसिद्धत्वाद् ६-१-१६ ग्रहिज्या...इति ङिन्निमित्तकं सम्प्रसारणं न -अभर्ष्ट, अभ्रष्ट । १२८४ क्षिपति । क्षिपते । चिक्षेपिथ । चिक्षिपिषे । क्षेप्तासि । क्षेप्तासे । अक्षैप्सीत् । अक्षिप्त । १२८५ कृषति । कृषते । चकर्षिथ । चकृषिषे । ६-१-१५६ अनुदात्तस्य...-क्रष्टा, कर्ष्टा । कृष्यात् । कृक्षीष्ट । ३-१-४३ च्लेः सिँच्-सूत्रस्थं स्पृशमृष...-अक्राक्षीत्, अकार्क्षीत् । सिँजभावे ३-१-४५ शल इगु...- अकृक्षत् । अकृक्षत । अकृक्षाताम् । अकृक्षन्त । १२८६ ऋषति । आनर्ष । १२८७ जुषते । जुजुषे । जोषिता । १२८८ प्रायेणायमुत्पूर्वः उद्विजते । १-२-२ विज इट्- उद्विजिता उद्विजिष्यते । उदविजिष्ट । १२८९-१२९० लजते । लेजे । लज्जते । ललज्जे । १२९१ ६-१-१६ ग्रहिज्या...- वृश्चति । लिँटि- द्वित्वे ६-१-१७ लिटच...इति संप्रसारणे वृश्च् व्रश्च् ७-४-६६ उरत् -वर्श्च् व्रश्च् ७-४-६० हलादिः शेषः-वव्रश्च, उरत् इत्यत्वस्य १-१-५६ अचः परस्मिन्निति स्थानिवद्भावात् ६-१-१७ लिंटच... इत्यनेन वकारस्य स्थाने प्राप्तं सम्प्रसारणम् ६-१-३६ न सम्प्रसारणे... सूत्रेण प्रतिषिध्यते- वव्रश्च । संयोगात् परत्वात् कित्त्वाभावेन न सम्प्रसारणम्-वव्रश्चतुः । वव्रश्चिथ, वव्रष्ठ । व्रश्चिता, व्रष्टा । व्रश्चिष्यति, व्रक्ष्यति ।वृश्च्यात् । अव्रश्चीत्, अव्राक्षीत् । अव्रश्चिष्यत्, अव्रक्ष्यत् । १२९२ विचति । विव्याच । विविचतुः । व्यचिता । व्यचिष्यति । विच्यात् । अव्याचीत्, अव्यचीत् । व्यचेः... इति तु नेह प्रवर्तते । अनसीति पर्युदासेन कृन्मात्रविषयत्वात् । १२९३ । उञ्छति । उञ्छाञ्चकार । १२९४ उच्छति । १२९५ ऋच्छति । ७-४-११ ऋच्छत्यृताम् इति गुणः । ७-४-७१ तस्मान्नुँड् द्विहल इत्यत्र द्विहल्ग्रहणस्या ऽनेकहलुपलक्षणत्वान्नुँट्- आनर्छ । आनर्छतुः । ऋच्छिता । १२९६ मिच्छति । मिमिच्छ । अमिच्छीत् । १२९७-११९८ जर्जति । चर्चति । झर्झति । १३०० त्वचति । तत्वाच । १३०१ ऋचति । आनर्च । १३०२ उब्जति । उब्जाञ्चकार । अयमुपदेशे दकारोपधः । ७-३-६१ भुजन्युब्जौ...- सूत्रेण दकारस्य बकारो निपात्यते । णिचि चङि ६-१-३ नन्द्राः... इति प्रवर्तते । औब्जिजत् । १३०३ उज्झति । उज्झाञ्चकार । १३०४ लुभति । ७-२-४८ तीषसह... - लोभिता, लोब्धा । लोभिष्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३०५ रिफँ कत्थनयुद्धनिन्दा-हिंसादानेषु । रिहँ इत्येके ।
१३०६ तृपँ ।
१३०७ तृम्फ तृप्तौ ।
द्वावपि द्वितीयान्तावित्यन्ये ।
१३०८ तुपँ ।
१३०९ तुम्पँ ।
१३१० तुफँ ।
१३११ तुम्फँ हिंसायाम् ।
१३१२ दृपँ ।
१३१३ दृम्फँ उत्क्लेशे ।
१३१४ ऋफँ
१३१५ ऋम्फँ हिंसायाम् ।
१३१६ गुफँ १३१७ गुम्फँ ग्रन्थे ।
१३१८ उभँ १३१९ उम्भँ पूरणे ।
१३२० शुभँ १३२१ शुम्भँ शोभार्थे ।
१३२२ दृभीँ ग्रन्थे ।
१३२३ चृतीँ हिंसाग्रन्थनयोः ।
१३२४ विधँ विधाने ।
१३२५ जुडँ गतौ ।
१३२७ पृडँ च ।
१३२८ पृणँ प्रीणने ।
१३२९ वृणँ च ।
१३३० मृणँ हिंसायाम् ।
१३३१ तुणँ कौटिल्ये ।
१३३३ मुणँ प्रतिज्ञाने ।
१३३२ पुणँ कर्मणिशुभे ।
१३३४ कुणँ शब्दोपकरणयोः ।
१३३५ शुनँ गतौ ।
१३३६ द्रुणँ हिंसागतिकौटिल्येषु ।
१३३७ घुणँ १३३८ घूर्णँ भ्रमणे ।
१३३९ षुरँ ऐश्वर्यदीप्त्योः ।
१३४० कुरँ शब्दे ।
१३४१ खुरँ छेदने ।
१३४२ मुरँ संवेष्टने ।
१३४३ क्षुरँ विलेखने ।
१३४४ घुरँ भीमार्थशब्दयोः ।
१३४५ पुरँ अग्रगमने ।
१३४६ वृहूँ उद्यमने ।
१३४७ तृहूँ ।
१३४८ स्तृहूँ ।
१३४९ तृंहू हिंसार्थाः ।

१३०५ रिफति । रिरेफ । रिहति । रिरेह । शिशुं न विप्रा मतिभी रिहन्ति (यजुर्वेदः, अ. ७ ऋक् १६) विप्राः=मेधाविनो ब्राह्मणाः, तम्=लतात्मकं सोमम्, शिशुं न=बालकमिव, मतिभिः=मतिपूर्वाभिर्वाग्भिः, रिहन्ति= स्तुवन्ति । इति तदर्थः । १३०६-१३०७ आद्यः प्रथमान्तः । द्वितीयो द्वितीयान्तः । तृपति । ततर्प । तर्पिता । स्पृशमृशेति सिँज् विकल्पः पौषादिकस्यैव अङपवादत्वात् । तेनाऽत्र नित्यं सिँच् इति दीक्षितः । अतर्पीत् । १-२-४ सार्वधातुकमपित् इति ङित्त्वेन ६-४-२४ अनिदितां....इत्यनेन नलोपे-७-१-५९ शे मुचादीनाम्- सूत्रस्थं शे तृम्फादीनाम्- तृम्फति । ततृम्फ-तृफ्यात् । अद्यत्वे तु ७-१-५९ शे मुचादीनाम् इति सूत्रे भाष्ये शे तृम्पादीनाम् इति वार्तिकं दृश्यते तृम्पति तृम्फति च तत्रोदाहरणे दृश्येते । अतो भाष्यरीत्या प्रथमोऽपि मोपधः तृम्पँ इति प्रतीयते । तत्रैवोद्योते च 'अधुना तु तृप तृम्प तृप्तावित्यादिक्रमेण पठचन्ते, इति दृश्यते । अत उद्योतरीत्या द्वितीयोऽपि प्रथमान्तः प्रतीयते । १३०८-१३११ तुपति । तुम्पति । प्राग्वन्नुँम् । एवमग्रेऽपि । तुफति । तुम्फति । १३१२-१३१३ प्रथमः प्रथमान्तः । द्वितीयो द्वितीयान्तः । दृपति । दृम्फति । प्रथमोऽपि द्वितीयान्त इत्येके । १३१४-१३१५ ऋफति । आनर्फ । ऋम्फति । ऋम्फाञ्चकार । १३१६-१३१७ गुफति । जुगोफ । गुम्फति । जुगुम्फ । १३१८-१३१९ उभति । उवोभ । उम्भति । उम्भाञ्चकार । १३२०-१३२१ शुभति । शुशोभ । शुम्भति । शुशुम्भ । १३२२ दृभति । ददर्भ । १३२३ चृतति । चचर्त । चर्तिता । ७-२-५७ सेऽ सिँचि...- चर्तिष्यति, चर्त्स्यति । अचर्तीत् । १३२४ विधति । विवेध । वेधिता । १३२५ जुडति । जुनँ इत्येके । जुनति । १३२६ मृडँ सुखने । मृडति । ममर्ड । मर्डिता । १३२७ पृडति । पपर्ड । १३२८ पृणति । पपर्ण । १३२९ वृणति । ववर्ण । १३३० मृणति । ममर्ण । १३३१ तुणति । तुतोण । १३३२ पुणति । पुपोण । निपुण इत्यस्यैव धातोः इगुवधकान्तं रूपम् । १३३३ मुणति । १३३४ कुणति । चुकोण । १३३५ शुनति । १३३६ द्रुणति । दुद्रोण । १३३७ - १३३८ घुणति । जुघोण । घूर्णति । जुघूर्ण । १३३९ सुरति । सुषोर । ८-२-७७ हलि च-सूर्यात् । १३४० कुरति । चुकोर । कूर्यात् । ८-२-७९ न भ...इति निषेधस्तु नेह, तत्र करोतेरेव ग्रहणादित्याहुरिति-दीक्षितः । १३४१ खुरति । चुखोर । खूर्यात् । १३४२ मुरति । मुमोर । मूर्यात् । १३४३ क्षुरति । चुक्षोर । क्षूर्यात् । १३४४ घुरति । जुघोर । घूर्यात् । १३४५ पुरति । पूर्यात् । अस्यैव धातोः इगुपधकान्तस्य ४-३-११३ तसिश्च इति तस्यन्तं रूपं पुरत इति । १३४६ वृहति । ववर्ह । ७-२-४४ स्वरति...- ववर्हिथ, ववर्ढ । वर्हिता, वर्ढा । वर्हिष्यति, वर्क्ष्यति । अवर्हीत् । इडभावे- ३-१-४५ शल इगु...- अवृक्षत् । बृहूँ इत्यन्ये । १३४७ - १३४९ तृहति । ततर्ह । तर्हिता, तर्ढा । अतर्हीत्, अतृक्षत् । स्तृहति । तस्तर्ह । स्तर्हिता, स्तर्ढा । अस्तर्हीत्, अस्तृक्षत् । तृंहति । ततृंह । तृंहिता, इडभावे ढलोपस्याऽसिद्धत्वान्नोपधागुणः- तृण्ढा । अतृंहीत्, अताईक्षीत् । अतृंहिष्टाम्, अताण्र्ढाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३५० इषँ इच्छायाम् ।
१३५१ मिषँ स्पर्धायाम् ।
१३५२ किलँ श्वैत्यक्रीडनयोः ।
१३५३ तिलँ स्नेहने ।
१३५४ चिलँ वसने । वसनम्= परिधानम् ।
१३५५ चलँ विलसने ।
१३५६ इलँ स्वप्नक्षेपणयोः ।
१३५७ विलँ संवरणे ।
१३५८ बिलँ भेदने ।
१३५९ णिलँ गहने ।
१३६० हिलँ भावकरणे ।
१३६१ शिलँ १३६२ षिलँ उञ्छे ।
१३६३ मिलँ श्लेषणे ।
१३६४ लिखँ अक्षरविन्यासे ।
१३६५ कुटँ कौटिल्ये ।
१३६६ पुटँ संश्लेषणे ।
१३६७ कुचँ संकोचने ।
१३६८ गुजँ शब्दे ।
१३६९ गुडँ रक्षायाम् ।
१३७० डिपँ क्षेपे ।
१३७१ छुरँ छेदने ।
१३७२ स्फुटँ विकसने ।
१३७३ मुटँ आक्षेपमर्दनयोः ।
१३७४ त्रुटँ छेदने ।
१३७५ तुटँ कलहकर्मणि ।
१३७६ चुटँ ।
१३७७ छुटँ छेदने ।
१३७८ जुडँ बन्धने ।
१३७९ कडँ मदे ।
१३८० लुटँ संश्लेषणे ।
१३८१ कृडँ घनत्वे ।
१३८२ कुडँ बाल्ये ।
१३८३ पुडँ उत्सर्गे
१३८४ घुटँ प्रतिघाते ।
१३८५ तुडँ तोडने ।
१२८६ थुडँ ।
१३८७ स्थुडँ संवरणे । खुडँ छुडँ इत्येके ।
१३८८ स्फुरँ ।
१३८९ स्फुलँ सञ्चलने । स्फुरँ स्फुरणे स्फुलँ संचलन इत्येके । स्फरँ इत्यकारोपध इत्यन्ये ।
१३९० स्फुडँ ।
१३९१ चुडँ ।
१३९२ व्रुडँ संवरणे ।
१३९३ क्रुडँ ।
१३९४ मृडँ निमज्जन इत्येके । **ओँव्रस्चूँ प्रभृतयः परस्मैपदिनो गताः ।**
१३९५ गुरीँ_उद्यमने ।
अयमनुदात्तेत् ।
अथ चत्वारः परस्मैपदिनः ।
१३९६ णू स्तवने ।
१३९७ धू विधूनने ।
१३९८ गु पुरीषोत्सर्गे ।

१३५० ७-३-७७ इषगमि...- इच्छति । इयेष । ७-२-४८ तीषसह...- एषिता, एष्टा । एषिष्यति । इष्यात् । ऐषीत् । १३५१ मिषति । मेषिता । अमेषीत् । १३५२ किलति । चिकेल । अकेलीत् । १३५३ तिलति । अतेलीत् । १३५४ चिलति । अचेलीत् । १३५५ चलति । ७-२-२ अतो ल्रान्तस्य- अचालीत् । १३५६ इलति । इयेल । मा भवानेलीत् । १३५७ दन्त्योष्ठ्यादिः । १३५८ ओष्ठ्यादिः । १३५९ निलति । १३६० हिलति । जिहेल । अहेलीत् । १३६१-१३६२ शिलति । सिलति । सिषेल । १३६३ मिलति । मिमेल । अमेलीत् । १३६४ लिखति । लिलेख । लेखिष्यति । अलेखीत् । १३६५ कुटँ कौटिल्ये । कुटति । चुकोट । चुकुटतुः । चुकुटुः, १-२-१ गाङ्कुटा.... इति ङित्त्वम् आ कूङ् धातोः । चुकुटिथ । चुकुटथुः । चुकुट । चुकोट, चुकुट । कुटिता । कुटिष्यति । अकुटीत् । १३६६ पुटति । पुटिता । अपुटीत् । १३६७ कुचति । चुकोच । कुचिता । अकुचीत् । १३६८ गुजति । जुगोज । गुजिता । अगुजीत् । १३६९ गुडति । जुगोड । अगुडीत् । १३७० डिपति । अडिपीत् । १३७१ छुरति । चुच्छोर । ८-२-७९ न भकुर्छुराम्- छुर्यात् । अच्छुरीत् । १३७२ स्फुटति । पुस्फोट । अस्फुटीत् । १३७३ मुटति । मुटिष्यति । अमुटीत् । १३७४ ३-१-७० वा भ्राश...- त्रुट्यति, त्रुटति । तुत्रोट । त्रुटिता । अत्रुटीत् । १३७५ तुटति । तुतोट । तुटिता । अतुटीत् । १३७६-१३७७ चुटति । अस्यैव धातोर्घञन्तं रूपं चोट इति । छुटति । चुच्छोट । १३७८ जुडति । जुजोड । जुडिता । अजुडीत् । १३७९ कडति । चकाड । १३८० लुटति । लुटिष्यति । अलुटीत् । १३८१ घनत्वम्= सान्द्रता । कृडति । चकर्ड । कृडिता । कृडिष्यति । अकृडीत् । १३८२ कुडति । चुकोड । कुडिता । अकुडीत् । १३८३ पुडति । पुडिता । अपुडीत् । १३८४ घुटति । घुटिता । अघुटीत् । १३८५ तुडति । तुडिता । अतुडीत् । १३८६-१३८७ थुडति । तुथोड । स्थुडति । तुस्ठोड । तुस्थोड इति दीक्षितः । खुडति । चुखोड । छुडति । चुच्छोड । १३८८-१३८९ स्फुरति । पुस्फोर स्फुरिष्यति । स्फुलति । पुस्फोल । स्फुलिष्यति । ८-३-७६ स्फुरतिस्फलत्यो...-निः ष्फुरति, निः स्फुरति । निः ष्फुलति, निः स्फुलति । स्फरति । पस्फार । १३९०-१३९२ स्फुडति । पुस्फोड । चुडति । चुचोड । व्रुडति । वुव्रोड । व्रुडिता । अव्रुडीत् । १३९३-१३९५ गुरते । जुगुरे । गुरिष्यते । अगुरिष्ट । १३९६ नुवति । नुविता । अनुवीत् । १३९७ धुवति । धुविता । अधुवीत् । १३९८ गुवति । गुता । अगुषीत् । ८-२-२७ ह्रस्वादङ्गात्- अगुताम् । अगुषुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३९९ धु गतिस्थैर्ययोः ।
धुवँ इत्येके । **णूप्रभृतयः परस्मैपदिनो गताः । अथ त्रय आत्मनेपदिनः ।**
१४०० कूङ् शब्दे ।
वृत् । कुटादयो गताः ।
१४०१ पृङ् व्यायामे ।
प्रायेणायं व्याङ्पूर्वः ।
१४०२ मृङ् प्राणत्यागे ।
कूङ्प्रभृतय आत्मनेपदिनो गताः । अथ परस्मैपदिनः सप्त ।
१४०३ रि ।
१४०४ पि गतौ ।
१४०५ धि धारणे ।
१४०६ क्षि निवासे ।
१४०७ षू प्रेरणे ।
१४०८ कॄ विक्षेपे ।
१४०९ गॄ निगरणे ।
रिप्रभृतयः परस्मैपदिनो गताः । अथ द्वावात्मनेपदिनौ ।
१४१० दृङ् आदरे ।
१४११ धृङ् अवस्थाने ।
आत्मनेपदिनौ गतौ । अथ षोडश परस्मैपदिनः ।
१४१२ प्रच्छँ ज्ञीप्सायाम् ।
वृत् । किरादयो वृत्ताः ।
१४१३ सृजँ विसर्गे ।
१४१४ टुमस्जोँ शुद्धौ ।
१४१५ रुजोँ भङ्गे ।
१४१६ भुजोँ कौटिल्ये ।
१४१७ छुपँ स्पर्शे ।
१४१८ रुशँ ।
१४१९ रिशँ हिंसायाम् ।
१४२० लिशँ गतौ ।
१४२१ स्पृशँ संस्पर्शने ।
१४२२ विच्छँ गतौ ।
१४२३ विशँ प्रवेशने ।
१४२४ मृशँ आमर्शने ।
१४२५ णुदँ प्रेरणे ।
१४२६ षद्लृँ विशरणगत्यवसादनेषु ।

१३९९ धुवति । धुता । अधुषीत् । अधुताम् । गुवतिवत् । धुवति । धुविता । धुविष्यति । ८-२-७७ हलि च- धूव्यात् । अधुवीत् । अधुविष्टाम् । १४०० दीर्घान्त इति कैयटादयः । कुवते । कुविता । अकुविष्ट । ह्रस्वान्त इति न्यासकारः । कुता । कुष्यते । अकुत । १४०१ ७-४-२८ रिङ् शयग्...+६-४-७७ अचिश्नु धातु...- व्याप्रियते । व्यापप्रे । व्यापर्ता । व्यापरिष्यते । व्यापृत । व्यापृषाताम् । १४०२ १-३-६१ म्रियतेर्लुङ्....- म्रियते । ममार । ममर्थ । मर्तासि । मरिष्यति । म्रियताम् । अम्रियत । म्रियेत । मृषीष्ट । अमृत । अमरिष्यत् । १४०३-१४०४ शप्रत्ययस्य ङित्वाद् ङिन्निमित्तकस्य ७-३-८४ सार्वधातुकार्ध...इति गुणस्य १-१-५ क्क्ङिति च इति प्रतिषेधः । तिङ्निमित्तके ७-३-८६ पुँगन्तलघूपधस्य च, इति गुणे, ६-४-७७ अचि श्नुधातु.... इतीयँङि च प्राप्ते ऽन्तरङ्गत्वादियँङ्-रियति । पियति । रेता । पेता । १४०५ धियति । धेता । १४०६ क्षियति । क्षेता । १४०७ सुवति । सविता । १४०८ ७-१-१०० ॠत इद्धातोः- किरति । चकार । ७-२-३८ वृतो वा -करिता, करीता । कीर्यात् । अकारीत् । ७-२-४० सिँचि च परस्मैपदेषु- अकारिष्टाम् । ६-१-१३५ किरतौ...- उपस्किरति । उपचस्कार । उपास्किरत् । ६-१-१३६ हिंसायां...-उपस्किरति । प्रतिस्किरति । १४०९ ८-२-२१ अचि विभाषा-गिलति, गिरति । जगार, जगाल । जगरिथ, जगलिथ । गरिता, गरीता, गलिता, गलीता । १४१० ७-४-२८ रिङ् शयग्...-द्रियते । आद्रियते । आदद्रे । आदद्रिषे । आदर्ता । ७-२-७० ऋद्धनोः स्ये- आदरिष्यते । १-२-१२ उश्च-आदृषीष्ट । ८-२-२७ ह्रस्वा...- आदृत । १४११ ध्रियते । दध्रे । दृङ्वत् । १४१२ ६-१-१६ ग्रहिज्या...- पृच्छति । पप्रच्छ । पप्रच्छतुः । पप्रच्छिथ, पप्रष्ठ । पप्रच्छिव । प्रष्टा । प्रक्ष्यति । पृच्छ्यात् । अप्राक्षीत् । अप्राष्टाम् । १४१३ सृजति । ससर्ज । ७-२-६५ विभाषा सृजिदृशो... ससर्जिथ, इडभावे ६-१-५७ सृजिदृशोः... +८-२-३६ व्रश्चभ्रस्ज...- सस्रष्ठ । स्रष्टा । स्रक्ष्यति । सृज्यात् । अस्राक्षीत् । १४१४ मज्जति । ममज्ज । ममज्जिथ, इडभावे ७-१-६० मस्जिनशो...+ ८-२-२९ स्कोः संयोगाद्यो...+ ८-२-३० चोः कुः- ममङ्क्थ । मङ्क्ता । मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः । १४१५ रुजति । रुरोजिथ । रुरुजिव । रुरुजिम । रोक्ता । रोक्ष्यति । अरौक्षीत् । अरौक्ताम् । अरौक्षुः । १४१६ रुजिवत् । १४१७ छुपति । छोप्ता । अच्छौप्सीत् । अच्छौप्ताम् । १४१८-१४१९ रुशति । रोष्टा । रोक्ष्यति । अरुक्षत् । रिशति । रेष्टा । रेक्ष्यति । अरिक्षत् । १४२० लिशति । लेष्टा । लेक्ष्यति । अलिक्षत् । १४२१ स्पृशति । पस्पर्श । पस्पर्शिथ । पस्पृशिव । ६-१-५९ अनुदात्तस्य चर्दु...- स्प्रष्टा, स्पर्ष्टा । स्प्रक्ष्यति, स्पर्क्ष्यति । ३-१-४४ च्लेः सिँच् सूत्रस्थम्- स्पृशमृश...- अस्प्राक्षीत्, अस्पार्क्षीत्, सिँजभावे क्सः-अस्पृक्षत् । १४२२ ३-१-२८ गुपूँधूप....- विच्छायति ३-१-३१ आयादय...- विच्छायाञ्चकार, विविच्छ । विच्छायिता, विच्छिता । १४२३ विशति । वेष्टा । अविक्षत् । अवेक्ष्यत् । १४२४ आमर्शनम्=स्पर्शः । मृशति । म्रष्टा, मर्ष्टा । अम्राक्षीत्, अमार्क्षीत्, अमृक्षत् । स्पृशिवत् । १४२५ पुनः पाठः कर्त्रभिप्रायेऽपि क्रियाफले परस्मैपदार्थः । नुदति । अनौत्सीत् । १४२६ ७-३-७८ पाघ्राध्मा...- सीदति । ससाद । सेदतुः । सत्स्यति । लृँदित्त्वादङ्- असदत् । ८-३-६६ सदिरप्रतेः- निषीदति । ८-३-६३ प्राक्सिता...- न्यषीदत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१४२७ शद्लृँ शातने ।
पृच्छत्यादयः परस्मैपदिनो गताः । अथ षट् स्वरितेतः ।
१४२८ मिलँ सङ्गमे ।
१४२९ मुच्लृँ मोक्षणे ।
१४३० लुप्लृँ छेदने ।
१४३१ विद्लृँ लाभे ।
१४३२ लिपँ उपदेहे
१४३३ षिचँ क्षरणे ।
मिलँप्रभृतयः स्वरितेतो गताः । अथ त्रयः परस्मैपदिनः ।
१४३४ कृतीँ छेदने ।
१४३५ खिदँ परिघाते ।
१४३६ पिशँ अवयवे ।
अयं दीपनायामपि । वृत् । मुचादयो वृत्तास्तुदादयश्च । इति तुदादयः । अथ रुधादयः । आद्या नव स्वरितेत इरितश्च ।
१४३७ रुधिँर् आवरणे ।
१४३८ भिदिँर् विदारणे ।
१४३९ छिदिँर् द्वैधीकरणे ।
१४४० रिचिँर् विरेचने ।
१४४१ विचिँर् पृथग्भावे ।
१४४२ क्षुदिँर् संपेषणे ।
१४४३ युजिँर् योगे ।
१४४४ उँच्छृदिँर् दीप्तिदेवनयोः ।
१४४५ उँतृदिँर् हिंसानादरयोः ।
रुधिँर् इति प्रभृतयः स्वरितेतो गताः ।
१४४६ कृतीँ वेष्टने । परस्मैपदी । **अथ त्रय आत्मनेपदिनः ।**
१४४७ ञिइन्धीँ दीप्तौ ।
१४४८ खिदँ दैन्ये ।
१४४९ विदँ विचारणे ।
ञि इन्धीँ प्रभृतय आत्मनेपदिनो गताः ।
अथ परस्मैपदिनः ।
१४५० शिष्लृँ विशेषणे ।

१४२७ १-३-६० शदेः शितः-शीयते । शशाद । शत्स्यति । अशदत् । अथ षट् स्वरितेतः । १४२८ मिलति । मिलते । मिमेल । मिमिले । १४२९ ७-१-५९ शे मुचादीनाम् इति नुँम् । एवमग्रेऽपि बोध्यम् । मुञ्चति । मुञ्चते । मोक्तासि । मोक्तासे । मुच्यात् । १-२-११ लिङ्सिँचावात्मनेपदेषु- मुक्षीष्ट । अमुचत् । अमुक्त । अमुक्षाताम् । अमुक्षत । १४३० लुम्पति । लुम्पते । लोप्ता । लुप्यात् । लुप्सीष्ट । अलुपत् । अलुप्त । १४३१ विन्दति । विन्दते । विवेद । विविदे । व्याघ्रभूत्यादिमते सेट्कोऽयम् । वेदिता । भाष्यमते ऽनिट्कः । वेत्ता । अविदत् । १४३२ लिम्पति । लिम्पते । लेप्ता । ३-१-५३ लिपि...- अलिपत् । ३-१-५४ आत्मनेपदे...- अलिपत, अलिप्त । १४३३ सिञ्चति । सिञ्चते । सेक्ता । प्राग्वदङ्- असिचत् । असिचत, असिक्त । ८-३-६५ उपसर्गात् सुनोति...-अभिषिञ्चति । अभिषिषेच । ८-३-६३ प्राक् सिता...- अभ्यषिञ्चत् । १४३४ कृन्तति । चकर्त । कर्तिता । ७-२-५७ सेऽसिँचि...-कर्तिष्यति, कर्त्स्यति । अकर्तीत् । १४३५ खिन्दति । चिखेद । खेत्ता । अखैत्सीत् । अखैत्ताम् । अखैत्सुः । १४३६ पेशिता । १४३७ । ३-१-७८ रुधादिभ्यः श्नम्+ १-१-४६ मिदचो...-रुणद्धि । ६-४-१११ श्नसोरल्लोपः, णत्वस्याऽसिद्धत्वादनुस्वारः, परसवर्णः, तस्याऽसिद्धत्वाण्णत्वं न, अनुस्वारपरसवर्णयोः कर्तव्ययोरल्लोपस्य स्थानिवत्त्वं न, १-१-५७ न पदान्त... इति निषेधात्, ८-४-६४ झरो झरि...- रुन्धः, रुन्द्धः । रुन्धन्ति । रुन्धे, रुन्द्धे । रोद्धा । रोत्स्यति । रोत्स्यते । रुणद्धु । रुणधानि । रुणधै । अरुणत् । रुन्ध्यात् । रुन्धीत । रुध्यात् । रुत्सीष्ट । ३-१-५७ इरितो वा-अरुधत्, अरौत्सीत् । अरुद्ध । १४३८ भिनत्ति । भिन्त्ते । भेत्ता । भेत्स्यति । भेत्स्यते । अभिनत् । सिपि-८-२-७५ दश्च-अभिनः, अभिनत्, अभिनद् । अभिदत्, अभैत्सीत् । अभित्त । १४३९ । छिनत्ति । छिन्त्ते । छेत्स्यति । छेत्स्यते । अच्छिदत्, अच्छैत्सीत् । अच्छित्त । १४४० रिणक्ति । रिङ्क्ते । रेक्ता । अरिणक् । अरिचत्, अरैक्षीत् । अरिक्त । १४४१ । विनक्ति । विङ्क्ते । वेक्ता । अविचत्, अवैक्षीत् । अविक्त । १४४२ । क्षुणत्ति । क्षुन्त्ते । क्षोत्ता । अक्षुदत्, अक्षौत्सीत् । अक्षुत्त । १४४३ युनक्ति । युङ्क्ते । योक्ता । अयुजत्, अयौक्षीत् । अयुक्त । १४४४ छृणत्ति । छृन्त्ते । चच्छर्द । चच्छृदे । ७-२-५७ सेऽसिँचि...- चच्छृदिषे, चच्छृत्से । छर्दिता । छर्दिष्यति, छर्त्स्यति । छर्दिष्यते, छर्त्स्यते । अच्छृदत्, अच्छर्दीत् । अच्छर्दिष्ट । १४४५ तृणत्ति । इत्यादिच्छृदिवत् । १४४६ कृणत्ति । आर्धधातुके तौदादिक-कृतीँ (१४३४) वत् ।
१४४७ ञिइन्धीँ दीप्तौ । ६-४-२३ श्नान्नलोपः + ६-४-१११ श्नसोरल्लोपः-इन्धे, इनद्धे । इन्त्से । इन्धाञ्चक्रे । इन्धिता । इन्धाम् । इनधै । ऐन्ध । ऐन्धाः । ऐन्धिष्ट । १४४८ खिन्ते, खिन्त्ते खेत्ता । अखित्त । १४४९ विन्ते, विन्त्ते । वेत्ता । अवित्त । १४५० शिनष्टि । शिंष्टः । शिंषन्ति । शिशेषिथ । शेष्टा । शेक्ष्यति । शिनष्टु । ६-१-१०१ हुझल्भ्यो... +६-४-११६ श्नसो...., +८-४-५२ झलां जश्...., ष्टुत्वम्, ८-४-६४ झरो- झरि...+८-३-२४ नश्चा... +८-४-५७ अनुस्वारस्य-शिण्ढि, शिण्ड्ढि । १-१-५७ नपदान्त... सूत्रस्थ- शब्दरत्नानुसारेणाऽनुस्वारघटितः पाठ उचित इति विशेषजिज्ञासायां तत्रैव द्रष्टव्यम् । एवम्- १४५४ तृहँ-तृण्ढ इत्यत्राऽपि बोध्यम् । शिनषाणि । अशिनट् । लृँदित्त्वादङ् - अशिपत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१४५१ पिष्लृँ संचूर्णने ।
१४५२ भञ्जोँ आमर्दने ।
१४५३ भुजँ पालनाभ्यवहारयोः ।
१४५४ तृहँ ।
१४५५ हिसिँ हिंसायाम् ।
१४५६ उन्दीँ क्लेदने ।
१४५७ अञ्जूँ व्यक्तिम्रक्षणकान्तिगतिषु ।
१४५८ तञ्चूँ संकोचने ।
१४५९ ओँ विजीँ भयचलनयोः ।
१४६० वृजीँ वर्जने ।
१४६१ पृचीँ सम्पर्के । वृत् । रुधादयः समाप्ताः । इति **रुधादयः ।**

अथ तनादयः ।

आद्याः सप्त स्वरितेतः ।
१४६२ तनुँ विस्तारे ।
१४६३ षणुँ दाने ।
१४६४ क्षणुँ हिंसायाम् ।
१४६५ क्षिणुँ च ।
१४६६ ऋणुँ गतौ ।
१४६७ तृणुँ अदने ।
१४६८ घृणुँ दीप्तौ ।
तनुँप्रभृतयः स्वरितेतो गताः ।
अथ द्वावनुदात्तेतौ ।
१४६९ वनुँ याचने ।
अयं चन्द्राचार्यमते परस्मैपदी ।
१४७० मनुँ अवबोधने ।
१४७१ डुकृञ् करणे ।
इति तनादयः ।

१४५१ पिनष्टि । शिषिवत् । १४५२ । ६-४-२३ श्नान्नलोपः-भनक्ति । बभञ्जिथ, बभङ्क्थ । भङ्क्ता । अभाङ्क्षीत् । अभाङ्क्ताम् । १४५३ भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् । अभौक्षीत् । अभौक्ताम् । १४५४-१४५५ ७-३-९२ तृणह इम्- तृणेढि । तृण्ढः, तृण्ड्ढः । ततर्ह । तर्हिता अतृणेट् । तृंह्यात् । तृह्यात् । अतर्हीत् । हिनस्ति । हिंस्तः । जिहिंस । हिंसिता । अहिंसीत् । १४५६ उनत्ति । उन्तः । उन्दन्ति । उन्दाञ्चकार । औनत् । औन्ताम् । औन्दन् । ८-२-७५ दश्च- औनः, औनत् । औनदम् । उन्द्यात् । उद्यात् । औन्दीत् । मा भवानुन्दीत् । औन्दिष्यत् । १४५७ अनक्ति । अङ्क्तः । अञ्जन्ति । आनञ्ज । आनञ्जिथ, आनङ्क्थ । अञ्जिता, अङ्क्ता । अनक्तु । अङ्ग्धि । अनजानि । आनक् । अञ्ज्यात् । अज्यात् । ७-२-७१ अञ्जेः सिँचि- आञ्जीत् । आञ्जिष्यत्, आङ्क्ष्यत् । १४५८ तनक्ति । तञ्चिता, तङ्क्ता । अतञ्चीत्, अताङ्क्षीत् । अतञ्चिष्यत्, अतङ्क्ष्यत् । १४५९ विनक्ति । विङ्क्तः । विवेज । १-२-२ विज इट्-विविजिथ । विजिता । अविनक् । विञ्ज्यात् । विज्यात् । अविजीत् । अविजिष्यत् । १४६० वृणक्ति । ववर्ज । वर्जिता । १४६१ पृणक्ति । पपर्च । पर्चिता । अपर्चीत् । १४६२ ३-१-७९ तनादि...- तनोति । ६-४-१०७ लोपश्चास्या...- तन्वः, तनुवः । तन्मः, तनुमः । तनुते । ततान । तेने । तनोतु । ६-४-१०६ उतश्च-तनु । अतानीत्, अतनीत् । २-४-७९ तनादिभ्यः... + ६-४-३७ अनुदात्तोपदेश...- अतत, अतनिष्ट । अतथाः, अतनिष्ठाः । थासा साहचर्यादेकवचनं तशब्दो गृह्यते । तेनेह न- यूयमतनिष्ट, यूयमतानिष्ट । १४६३ सनोति । सनुते । ६-४-४३ ये विभाषा- सायात्, सन्यात् । असानीत्, असनीत् । ६-४-४२ जनसनखनां..- असात, असनिष्ट । असाथाः, असनिष्ठाः । १४६४ क्षणोति । क्षणुते । ७-२-५ ह्म्यन्तक्षण...- अक्षणीत् । ६-४-३७ अनुदात्तोपदेश...- अक्षत, अक्षणिष्ट । अक्षथाः, अक्षणिष्ठाः । १४६५ उप्रत्ययनिमित्तो लघूपधगुणो न भवति, संज्ञापूर्वकविधेरनित्यत्वादित्यात्रेयादयः । भवत्येवेत्यन्ये । क्षिणोति, क्षेणोति । क्षेणिष्यति । क्षेणिष्यते । अक्षेणीत् । अक्षित, अक्षेणिष्ट । १४६६ ऋणोति, ऋणुतः । ऋण्वन्ति । अर्णोति । अर्णुतः । अर्ण्वन्ति । आनर्ण । आनृणे । अर्णिष्यति । अर्णिष्यते । आर्णीत् । आत्मनेपदे- आर्ण् स् त इत्यवस्थायाम् २-४-७९ तनादिभ्य...-आर्ण्त इति जाते ६-४-३७ अनुदात्तोपदेश...- आर्त, आर्णिष्ट । आर्थाः, आर्णिष्ठाः । १४६७ तृणोति, तर्णोति । तृणुते, तर्णुते । अतर्णीत् । अतृत, अतर्णिष्ट । अतृथाः, अतर्णिष्ठाः । १४६८ घृणोति, घर्णोति । घृणुते, घर्णुते । जघर्ण । जघृणे । अघर्णीत् । अघृत, अघर्णिष्ट । अघृथाः, अघर्णिष्ठाः । १४६९ वनुते । ६-४-१२६ न शसदद...- ववने । वनोति । ववान । १४७० मनुते । मेने । अनिट्केषु मन्य इति श्यना निर्देशादयं सेट् । मनिता । मनिष्यते । अमत, अमनिष्ट । अमथाः, अमनिष्ठाः । १४७१ करोति । ६-४-११०अत् उत् सार्वधातुके -कुरुतः । ८-२-७९ न भकुर्छुराम् - कुर्वन्ति । ६-४-१०८ नित्यं करोतेः - कुर्वः । कुर्मः । चकार । चक्रतुः । चक्रुः । चकर्थ । चकृव । चकृम । चक्रे । चकृषे । चकृढ्वे । कर्ता । करिष्यति । करिष्यते । ६-४-१०९ ये च- कुर्यात् । कुर्याताम् । कुर्युः । कुर्वीत । ७-४-२८ रिङ् शयग्- क्रियात् । १-२-१२ उश्च- कृषीष्ट । अकार्षीत् । २-४-७९ तनादिभ्य... इति लुको ऽभावेऽपि ८-२-२७ ह्रस्वादङ्गात्- अकृत । अकृथाः । ६-१-१३२ संपरिभ्यां... +६-१-१३३ समवाये च +६-१-१३४ उपात् प्रतियत्न... इमानि सूत्राण्येतेषामुदाहरणानि च सम्यगवधेयानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ क्र्यादयः ।

१४७२ डुक्रीञ् द्रव्यविनिमये ।

१४७३ प्रीञ् तर्पणे कान्तौ च ।

१४७४ श्रीञ् पाके ।

१४७५ मीञ् हिंसायाम् ।

१४७६ षिञ् बन्धने ।

१४७७ स्कुञ् आप्रवणे ।

स्तन्भ्वादयश्चत्वारः सौत्राः । सर्वे रोधनार्था इत्येके । प्रथमतृतीयौ स्तम्भार्थौ द्वितीयो निष्कोषाणार्थ-श्चतुर्थो धारणार्थ इति माधवः सर्वे परस्मैपदिनः ।

१४७८ युञ् बन्धने ।

१४७९ क्नूञ् शब्दे ।

१४८० द्रूञ् हिंसायाम् ।

१४८१ पूञ् पवने ।

१४८२ लूञ् छेदने ।

१४८३ स्तृञ् आच्छादने ।

१४८४ कृञ् हिंसायाम् ।

१४८५ वृञ् वरणे ।

१४८६ धूञ् कम्पने । अथ **बध्नात्यन्ताः परस्मैपदिनः ।**

१४८७ शॄ हिंसायाम् ।

१४८८ पॄ पालनपूरणयोः ।

१४८९ वॄ वरणे । भरण इत्येके ।

१४९० भॄ भर्त्सने । भरणेऽप्येके ।

१४७२ ३-१-८१ क्र्यादिभ्यः श्ना- क्रीणाति । ६-४-११३ ई हल्यघोः- क्रीणीतः । ६-४-११२ श्नाभ्यस्तयोरातः- क्रीणन्ति । क्रीणीते । क्रीणाते । ७-१-५ आत्मनेपदेष्वनतः- क्रीणते । चिक्राय । चिक्रियतुः । चिक्रयिथ, चिक्रेथ । चिक्रियिव । चिक्रियिम । चिक्रिये । चिक्रियिषे । ८-३-७९ विभाषेटः- चिक्रियिढ्वे, चिक्रियिध्वे । क्रेता । क्रेष्यति । क्रेष्यते । अक्रीणात् । अक्रीणीत । क्रीणीयात् । क्रीणीत । क्रीयात् । क्रेषीष्ट । अक्रैषीत् । अक्रेष्ट । १४७३ प्रीणाति । प्रीणीते । १४७४ श्रीणाति । श्रीणीते । १४७५ मीनाति । मीनीते । ८-४-१५ हिनुमीना- प्रमीणाति । प्रमीणीते । ६-१-४९ मीनातिमिनोति-ममौ । मिम्यतुः । मिम्युः । ममिथ, ममाथ । मिम्यिव । मिम्यिम । मिम्ये । माता । मास्यति । मास्यते । अमीनात् । मीनीत । मीनीयात् । मीनीत । मीयात् । अमासीत् । अमास्त । १४७६ सिनाति । सिनीते । सिषाय । सिष्ये । सेता । १४७७ ३-१-८२ स्तन्भुँ स्तुन्भुँ...- स्कुनोति । स्कुनुते । स्कुनाति । स्कुनीते । चुस्काव । चुस्कुवे । स्कोता । स्कोष्यति । स्कोष्यते । अस्कौषीत् । अस्कोष्ट । ६-४-२४ अनिदितां...- स्तभ्नोति । स्तभ्नाति । ८-३-६७ स्तन्भेः- विष्टभ्नोति । विष्टभ्नाति । प्रतिष्टभ्नाति । ८-३-६८ अवाच्चा...- अवष्टभ्नाति । प्र. ८-३-६४ स्थादिष्वभ्यासेन- वितष्टम्भ । प्रतितष्टम्भ । अवतष्टम्भ । ३-१-५८ जॄस्तम्भु...-अस्तभत्, अस्तम्भीत् । ८-३-६३ प्राक् सिता...- व्यष्टभत्, व्यष्टम्भीत् । अवाष्टभत्, अवाष्टम्भीत् । प्रत्यष्टभत्, प्रत्यष्टम्भीत् । स्तभ्नातु, स्तभ्नोतु । ३-१-८३ हलः श्नः...- स्तभान, स्तभ्नुहि । स्तुभ्नाति स्तुभ्नोति, । स्तुभ्नुहि, स्तुभान । स्कभ्नाति, स्कभ्नोति । ८-३-७७ वेः स्कभ्नाते..- विष्कभ्नाति, विष्कभ्नोति । सूत्रे शितपानिर्देशे श्नाश्नुविकरणयोरन्यतरस्यावश्यं प्राप्तौ श्नाविकरणेन निर्देशः कृतः । अतो धातुमात्रस्य ग्रहणं न तु श्नाविशिष्टमात्रस्य । स्कुभ्नाति, स्कुभ्नोति । १४७८ युनाति । युनीते । योता । योष्यति । अयौषीत् । १४७९ क्नूनाति । क्नूनीते । क्नविता । अक्नावीत् । १४८० द्रूणाति । द्रूणीते । द्रविता । अद्रावीत् । १४८१ ७-३-८० प्वादीनां...- इति ह्रस्वः । एवमग्रेऽपि बोध्यम् । पुनाति । पुनीते । पविता । अपावीत् । अपविष्ट । १४८२ लुनाति । लुनीते । लविष्यति । अलावीत् । अलविष्ट । १४८३ स्तृणाति । स्तृणीते । ७-४-११ ऋच्छत्यृताम् । तस्तरतुः । तस्तरुः । ७-२-३८ वॄतो वा-स्तरिता, स्तरीता । स्तृणीयात् । स्तृणीत । स्तीर्यात् । ७-२-४२ लिङ्सिचोरात्म..+७-२-३९ न लिङि -स्तरिषीष्ट । इडभावपक्षे १-२-१२ उश्च- स्तीर्षीष्ट । अस्तारीत् । ७-२-४० सिचि च...- अस्तारिष्टाम् । अस्तरिष्ट, अस्तरीष्ट, अस्तीर्ष्ट । १४८४ कृणाति । कृणीते । चकार । चकरे । १४८५ वृणाति । वृणीते । ववार । ववरे । वरिता, वरीता । वृणीयात् । वृणीत । ७-१-१०२ उदोष्ठ्य...- वूर्यात् । वरिषीष्ट, वूर्षीष्ट । अवारीत् । अवारिष्टाम् । अवारिषुः । अवरिष्ट, अवरीष्ट, अवूर्ष्ट । १४८६ धुनाति । धुनीते । ७-२-४४ स्वरति...- दुधविथ, दुधोथ । दुधुविव । दुधुविम । धविता, धोता । ७-२-७२ स्तुसुधूञ्भ्यः...-अधावीत् । अधविष्ट, अधोष्ट । १४८७ शृणाति । ७-४-११ ऋच्छत्यृताम् -शशार । ७-४-१२ शॄदॄप्रां... -शश्रतुः, शशरतुः । शश्रुः, शशरुः । शश्रिव, शशरिव । शश्रिम, शशरिम । शरिता, शरीता । शृणातु । शृणीहि । अशृणात् । शृणीयात् । ७-१-१० ॠत इद्धातोः- शीर्यात् । अशारीत् । अशारिष्टाम् । १४८८ पृणाति । ७-१-१०२ उदोष्ठ्य...- पूर्यात् । शेषं शृणातिवत् । १४८९ वृणाति । पृणातिवत् । १४९० बभार । शेषं वृणातिवत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१४९१ मॄ हिंसायाम्।
१४९२ दॄ विदारणे।
१४९३ जॄ वयोहानौ।
झॄ इत्येके। धॄ इत्यन्ये।
१४९४ नॄ नये।
१४९५ कॄ हिंसायाम्।
१४९६ ॠ गतौ।
१४९७ गॄ शब्दे।
१४९८ ज्या वयोहानौ।
१४९९ री गतिरेषणयोः।
१५०० ली श्लेषणे।
१५०१ व्ली वरणे।
१५०२ प्ली गतौ। वृत्।
ल्वादयो गताः। प्वादयोऽ पीत्येके। तन्मते ऽग्रिमाणां त्रयाणां धातूनां ह्रस्वो न।
१५०३ व्री वरणे।

१५०४ भ्री भये। भरणे इत्येके।
१५०५ क्षीष् हिंसायाम्।
मतान्तरे प्वादयः समाप्ताः।
१५०६ ज्ञा अवबोधने।
१५०७ बन्धँ बन्धने।
१५०८ वृङ् संभक्तौ।
अथ परस्मैपदिनः।
१५०९ श्रन्थँ विमोचनप्रतिहर्षयोः।
१५१० मन्थँ विलोडने।
१५११ श्रन्थँ
१५१२ ग्रन्थँ सन्दर्भे।
१५१३ कुन्थँ संश्लेषणे। संक्लेशे इत्येके। कुथँ इति दुर्गः।
१५१४ मृदँ क्षोदे।

१५१५ मृडँ च। अयं सुखेऽपि।
१५१६ गुधँ रोषे।
१५१७ कुषँ निष्कर्षे।
१५१८ क्षुभँ संचलने।
१५१९ णभँ
१५२० तुभँ हिंसायाम्।
१५२१ क्लिशूँ विबाधने।
१५२२ अशँ भोजने।
१५२३ उँ ध्रसँ उञ्छे।
उध्रसँ इत्येके।
१५२४ इषँ आभीक्ष्ण्ये।
१५२५ विषँ विप्रयोगे।
१५२६ प्रुषँ
१५२७ प्लुषँ स्नेहनसेवनपूरणेषु।

१४९१ मृणाति। ममार। ममरतुः। १४९२ दृणाति। दद्रतुः,ददरतुः। १४९३ जृणाति। जजरतुः। १४९४ नृणाति। ननरतुः। १४९५ कृणाति। चकरतुः। १४९६ ऋणाति। अराञ्चकार। अरिता, अरीता। ऋणातु। आर्णात्। ऋणीयात्। ईर्यात्। आरीत्। आरिष्टाम्। १४९७ गृणाति। जगरतुः। १४९८ ६-१-१६ ग्रहिज्या...+६-४-२ हलः +७-३-८० प्वादीनां...- जिनाति। ६-१-१७ लिँटचभ्यासस्यो.... - जिज्यौ। ६-१-१६ ग्रहिज्या...- जिज्यतुः। १४९९ रेषणं वृकशब्दः। रिणाति। १५०० लिनाति। ६-१-५० विभाषा लीयतेः- ललौ, लिलाय। लिल्यतुः। लाता, लेता। १५०१ व्लिनाति। १५०२ प्लिनाति। १५०३ व्रिणाति। व्रीणाति। १५०४ भ्रिणाति। भ्रीणाति। १५०५ क्षिणाति। क्षीणाति। १५०६ ७-३-७९ ज्ञाजनोर्जा -जानाति। दीर्घनिर्देशसामर्थ्यान्न ह्रस्व इति दीक्षितः। १५०७ बध्नाति। बबन्ध। बबन्धिथ, ववन्द्ध, बबन्ध। बन्द्धा, बन्धा। भन्त्स्यति। बध्नातु। ३-१-८३ हलः श्नः...- बधान। अभान्त्सीत्। ८-२-२६ झलो झलि- अबान्धाम्। प्रत्ययलक्षणेन भष्भावो न १-१-६१ प्रत्ययलोपे...- सूत्रं प्रति (झलो झलि सूत्रस्य त्रिपादीस्थत्वेन) सलोपस्याऽसिद्धत्वात्। अभान्त्सुः। १५०८ वृणीते। वव्रे। ववृषे। ववृढ्वे। वरिता, वरीता। ७-२-४२ लिँङ्सिँचो....+७-२-३९ न लिँङि-वरिषीष्ट, १-२-१२ उश्च-वृषीष्ट। अवरिष्ट, अवरीष्ट, ८-२-२७ ह्रस्वादङ्गात्- अवृत। १५०९ श्रथ्नाति। शश्रन्थ। १-२-६ इन्धि...सूत्रस्थं श्रन्थि... वार्तिकं द्रष्टव्यम्-श्रेथतुः, शश्रन्थतुः। १५१० मथ्नाति। ममन्थ। ममन्थतुः। मथ्नातु। मथान। १५११-१५१२ अर्थभेदात् पुनः पाठः श्रन्थेः। रूपाणि प्रागवत्। ग्रन्थिरपिँ श्रथ्नातिवत्। १५१३ कुथ्नाति। चुकुन्थ। कुथ्नाति। चुकोथ। १५१४ मृद्नाति। ममर्द। मृद्नातु। मृदान। १५१५ ष्टुत्वम्-मृड्णाति। १५१६ गुध्नाति। १५१७ कुष्णाति। कोषिता। ७-२-४६ निरः कुषः- निष्कोषिता, निष्कोष्टा। निरकोषीत्, निरकुक्षत्। १५१८ ८-४-३८ क्षुभ्नादिषु च- क्षुभ्नाति। चुक्षोभ। क्षोभिता। क्षुभ्नातु। क्षुभाण। यत्र भकारनकारयोः संयोगस्तत्रैव प्रतिषेधः। १५१९-१५२० नभ्नाति। नेभतुः। अनाभीत्, अनभीत्। तुभ्नाति। तुतुभतुः। अतोभीत्। १५२१ ८-४-४३ शात्- क्लिश्नाति। क्लेशिता, क्लेष्टा। अक्लेशीत्, अक्लिक्षत्। १५२२ अश्नाति। आश। १५२३ ध्रस्नाति। दध्रास। उध्रस्नाति। उध्रसाञ्चकार। १५२४ इष्णाति। ७-२-४८ तीषसह...- एषिता, एष्टा। १५२५ विष्णाति। विवेषिथ। वेष्टा। १५२६-१५२७ प्रुष्णाति। प्लुष्णाति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१५२८ पुषँ पुष्टौ ।
१५२९ मुषँ स्तेये ।
१५३० खचँ भूतप्रादुर्भावे । खवँ इत्येके ।
१५३१ हिठँ च ।
१५३२ ग्र्हँ उपादाने । अयं स्वरितेत् । **इति क्र्यादयः ।**

अथ चुरादयः ।

१५३३ चुरँ स्तेये ।
१५३४ चितिँ स्मृत्याम् । चिन्तेति पठितव्ये इँदित्करणं णिचः पाक्षिकत्वे लिङ्गम् । तेन णिजभावपक्षेऽपि चिन्त्यात् । चिन्त्यते । इत्यादौ नलोपो न । चिन्तति । चिन्तेत् । एतच्च ज्ञापकं सामान्यापेक्षमित्येके । अत एव काशिकायाम्- ६-४-१२० अत एकहल्...सूत्रे जगणतुः । जगणुरित्युदाहृतम् । विशेषापेक्षमित्यपरे । अत एव 'आधृषाद् वा' इति चरितार्थं भवति ।
१५३५ यत्रिँ संकोचे ।
१५३६ स्फुडिँ परिहासे । स्फुटिँ इति पाठान्तरम् ।
१५३७ लक्षँ दर्शनाङ्कयोः ।
१५३८ कुद्रिँ अनृतभाषणे ।
१५३९ लडँ उपसेवायाम् ।
१५४० मिदिँ स्नेहने ।
१५४१ ओलडिँ उत्क्षेपणे । औँलडिँ इत्येके । उलडिँ इत्यन्ये ।
१५४२ जलँ अपवारणे । लँज इत्येके ।
१५४३ पीडँ अवगाहने ।
१५४४ नटँ अवस्यन्दने ।
१५४५ श्रथँ प्रयत्ने । प्रस्थान इत्येके ।
१५४६ बधँ संयमने । बन्धँ इति चन्द्रः ।
१५४७ पॄ पूरणे ।
१५४८ ऊर्जँ बलप्राणनयोः ।
१५४९ पक्षँ परिग्रहे ।
१५५० वर्णँ
१५५१ चूर्णँ प्रेरणे । वर्णँ वर्णन । इत्येके ।
१५५२ प्रथँ प्रख्याने ।
१५५३ पृथँ प्रक्षेपे । पथँ इत्येके ।
१५५४ षम्बँ सम्बन्धने ।
१५५५ शम्बँ च । साम्बँ इत्येके ।
१५५६ भक्षँ अदने ।
१५५७ कुट्टँ छेदनभर्त्सनयोः । पूरण इत्येके ।
१५५८ पुट्टँ
१५५९ चुट्टँ अल्पीभावे ।

१५२८ पुष्णाति । पोषिता । अपोषीत् । १५२९ मुष्णाति । मोषिता । १५३० भूतप्रादुर्भावो ऽभिनिष्क्रान्तोर्त्पात्तिरिति दीक्षितः । खच्नाति । चखचतुः । ६-४-१९ च्छ्वोः शूड...+६-१-८६ एत्येधत्यूठसु- खौनाति । खौनीहि । अत्र शानचः परत्वादूठ् । १५३१ हिठ्णाति । १५३२ ६-१-१६ ग्रहिज्या...- गृह्णाति । गृह्णीते । जग्राह । जगृहतुः । जग्रहिथ । ७-२-३७ ग्रहोऽलिँटि...- ग्रहीता । गृह्यात् । ग्रहीषीष्ट । ७-२-५ ह्म्यन्त...- अग्रहीत् । अग्रहीष्टाम् । अग्रहीष्ट । अग्रहीषाताम् । अग्रहीषत । अग्रहीष्यत् । अग्रहीप्यत । १५३३ ३-१-२५ सत्यापपाश...- चोरयति । १-३-७४ णिचश्च- चोरयते । चोरयाञ्चकार । चोरयाञ्चक्रे । चोरयाम्बभूव । चोरयामास । चोरयितासि । चोरयितासे । चोर्यात् । चोरयिषीष्ट । ३-१-४८ णिश्रि +७-४-१ णौ चङ्यु...- +६-१-११ चङि- +७-४-६०, हलादिः...+७-४-९३ सन्वल्लघुनि + ७-४-९४ दीर्घो लघोः -अचूचुरत् । अचूचुरत । १५३४ चिन्तयति । अचिचिन्तत् । १५३५ यन्त्रयति । अत्र दीक्षितः- यन्त्रेति पठितुं शक्यम् । यत्तु इँदित्करणाद् यन्त्रतीति माधवेनोक्तं तच्चिन्त्यम् । एवं कुद्रिंतन्त्रिंमन्त्रिंपु इति । १५३६ फुण्डयति । इँदित्करणात् स्फुण्डति । स्फुण्टयति । स्फुण्टति । १५३७ लक्षयति । १५३८ कुन्द्रयति । १५३९ लाडयति । १५४० मिन्दयति, मिन्दति । १५४१ ओलण्डयति, ओलण्डति । लण्डयति, लण्डति । उलण्डयति, । १५४२ जालयति । लाजयति । १५४३ पीडयति । ७-४-३ भ्राजभासभाष...- अपीपिडत्, अपिपीडत् । १५४४ अवस्यन्दनम्=नाटचम् । नाटयति । १५४५ श्राथयति । १५४६ वाधयति । वन्धयति । १५४७ पारयति । दीर्घोच्चारणं णिचः पाक्षिकत्वे लिङ्गम् । परति । १५४८ ऊर्जयति । १५४९ पंक्षयति । १५५०-१५५१ वर्णयति । चूर्णयति । १५५२ प्राथयति । नान्ये मितोऽहेतौ इति मित्त्वस्य प्रतिषेधः । ७-४-९५ अत्स्मृ...- अपप्रथत् । १५५३ पर्थयति । ७-४-७ उर्ऋत्- अपीपृथत्, अपपर्थत् । पाथयति । १५५४ सम्वयति । अससम्वत् । १५५५ शम्वयति । अशशम्वत् । साम्वयति । अससाम्वत् । १५५६ भक्षयति । १५५७ कुट्टयति । अचुकुट्टत् । १५५८-१५५९ पुट्टयति । अपुपुट्टत् । चुट्टयति । अचुचुट्टत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१५६० अट्टँ १५६१ षुट्टँ अनादरे ।
१५६२ लुण्ठँ स्तेये ।
लुण्टँ इति केचित् ।
१५६३ शठँ
१५६४ श्वठँ असँस्कारगत्योः । श्वठिँ इत्येके ।
१५६५ तुजिँ
१५६६ पिजिँ हिंसाबलादाननिकेतनेषु । तुजँ पिजँ इति केचित् । लजिँ लुजिँ इत्येके ।
१५६७ पिसँ गतौ ।
१५६८ षान्त्वँ सामप्रयोगे ।
१५६९ श्वल्कँ
१५७० वल्कँ परिभाषणे ।
१५७१ ष्णिहँ स्नेहने । स्फिटँ इत्येके ।
१५७२ स्मिटँ अनादरे । ष्मिङ् इत्येके ।
१५७३ श्लिषँ श्लेषणे ।
१५७४ पथिँ गतौ ।
१५७५ पिच्छँ कुट्टने ।
१५७६ छदिँ संवरणे ।
१५७७ श्रणँ दाने ।
१५७८ तडँ आघाते ।
१५७९ खडँ
१५८० खडिँ
१५८१ कडिँ भेदने ।
१५८२ कुडिँ रक्षणे ।
१५८३ गुडिँ वेष्टने । रक्षणे इत्येके । कुठिँ इत्यन्ये । गुठिँ इत्यपरे ।
१५८४ खुडिँ खण्डने ।
१५८५ वटिँ विभाजने ।
वडिँ इत्येके ।
१५८६ मडिँ भूषायां हर्षे च ।
१५८७ भडिँ कल्याणे ।
१५८८ छर्दँ वमने ।
१५८९ पुस्तँ
१५९० बुस्तँ आदरानादरयोः ।
१५९१ चुदँ संचोदने ।
१५९२ नक्कँ
१५९३ धक्कँ नाशने ।
१५९४ चक्कँ
१५९५ चुक्कँ व्यथने ।
१५९६ क्षलँ शौचकर्मणि ।
१५९७ तलँ प्रतिष्ठायाम् ।
१५९८ तुलँ उन्माने ।
१५९९ दुलँ उत्क्षेपे ।
१६०० पुलँ महत्त्वे ।
१६०१ चुलँ समुच्छ्राये ।
१६०२ मूलँ रोहणे ।
१६०३ कलँ
१६०४ विलँ क्षेपे ।
१६०५ बिलँ भेदने ।
१६०६ तिलँ स्नेहने ।
१६०७ चलँ भृतौ ।
१६०८ पालँ रक्षणे ।
१६०९ लूषँ हिंसायाम् ।
१६१० शुल्बँ माने ।
१६११ शूर्पँ च ।
१६१२ चुटँ छेदने ।

१५६०-१५६१ अट्टयति । अयं दोपधः । ष्टुत्वस्याऽसिद्धत्वात् । ६-१-३ न न्द्राः...- इति प्रतिषेधः- आट्टिटत् । सुट्टयति । असुषुट्टत् । १५६२ लुण्ठयति । लुण्टयति । १५६३-१५६४ शाठयति । अशीशठत् । श्वाठयति । अशिश्वठत् । श्वण्ठयति । अशश्वण्ठत् । १५६५-१५६६ तुञ्जयति । ईदित्करणात् तुञ्जति । पुञ्जयति । पुञ्जति । तोजयति । पेजयति । लञ्जयति, लञ्जति । लुञ्जयति । लुञ्जति । १५६७ पेसयति । अपीपिसत् । १५६८ सान्त्वयति । अससान्त्वत् । १५६९-१५७० श्वल्कयति । अशश्वल्कत् । १५७१ स्नेहयति । असिष्णिहत् । स्फेटयति । अपिस्फिटत् । १५७२ स्मेटयति । असिस्मिटत् । स्मिङ्-ङित्वस्याऽवयवे ऽचरितार्थत्वाण्णिजन्तात् तङ् इति दीक्षितः । स्माययते । १५७३-१५७४ पन्थयति, पन्थति । १५७५-१५७६ छन्दयति, छन्दति । १५७७ श्राणयति । प्रायेणायं विपूर्व इति दीक्षितः- विश्राणयति । विश्राणनाच्चान्यपयस्विनीनाम् । १५७८ ताडयति । १५७९-१५८१ खाडति । खण्डयति, खण्डति । कण्डयति । कण्डति । १५८२ कुण्डयति, कुण्डति । १५८३ गुण्डयति, गुण्डति । कुण्ठयति, कुण्ठति । गुण्ठयति, गुण्ठति । १५८४ खुण्डयति, खुण्डति । १५८५ वण्टयति, वण्टति । वण्डयति, वण्डति । १५८६ मण्डयति, मण्डति । १५८७ भण्डयति, भण्डति । १५८८ छर्दयति । अचच्छर्दत् । १५८९-१५९१ चोदयति । अचूचुदत् । १५९२-१५९३ नक्कयति । प्रनक्कयति । १५९४-१५९६ क्षालयति । १५९७-१५९८ तोलयति । तोलयामास । अतूतुलत् । अत्र दीक्षितः- कथं तुलयति तुलना इत्यादि । अतुलोपमाभ्यामिति निपातनादङन्तस्य तुलाशब्दस्य सिद्धौ ततो णिच् । इति । १५९९ दोलयति । १६००-१६०१ पोलयति । चोलयति । १६०२ मूलयति । १६०३-१६०४ कालयति । वेलयति । १६०५ वेलयति । १६०६ तेलयति । १६०७ चालयति । १६०८ पालयति । अपीपलत् । १६०९ लूषयति । अलूलुषत् । १६१०-१६१२ चोटयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१६१३ मुटँ संचूर्णने ।
१६१४ पडिँ
१६१५ पसिँ नाशने ।
१६१६ व्रजँ मार्गसंस्कारगत्योः । केचित् तु मारगँ इति धात्वन्तरमाहुः ।
१६१७ शुल्कँ अतिस्पर्शने ।
१६१८ चपिँ गत्याम् ।
१६१९ क्षपिँ क्षान्त्याम् ।
१६२० क्षजिँ कृच्छ्रजीवने ।
१६२१ श्वरतँ गत्याम् ।
१६२२ श्वभ्रँ च ।
१६२३ ज्ञपँ ज्ञानज्ञापनमारणतोषणनिशाननिशामनेषु ।मिच्च ।
१६२४ यमँ च परिवेषणे । चान्मित् ।
१६२५ चहँ परिकल्कने । चपँ इत्येके ।
१६२६ रहँ त्यागे ।
१६२७ बलँ प्राणने ।
१६२८ चिञ् चयने ।
(नाऽन्ये मितो ऽ हेतौ) ग.सू.
१६२९ घट्टँ चलने ।
१६३० मुस्तँ सङ्घाते ।
१६३१ खट्टँ संवरणे ।
१६३२ षट्टँ
१६३३ स्फिट्टँ
१६३४ चुबिँ हिंसायाम् ।
१६३५ पूलँ संघाते । पूरणँ इत्येके । पुणँ इत्यन्ये ।
१६३६ पुंसँ अभिवर्धने ।
१६३७ टकिँ बन्धने ।
१६३८ धूसँ कान्तिकरणे । मूर्धन्यान्त इत्येके । तालव्यान्त इत्यपरे ।
१६३९ कीटँ वर्णे ।
१६४० चूरणँ संकोचने ।
१६४१ पूजँ पूजायाम् ।
१६४२ अर्कँ स्तवने । तपन इत्येके ।
१६४३ शुठँ आलस्ये ।
१६४४ शुठिँ शोषणे ।
१६४५ जुडँ प्रेरणे ।
१६४६ गजँ
१६४७ मार्जँ शब्दार्थौ ।
१६४८ मर्चँ च ।
१६४९ घृ प्रस्रवणे । स्रावण इत्येके ।
१६५० पचिँ विस्तारवचने ।
१६५१ तिजँ निशाने ।
१६५२ कृतँ संशब्दने ।
१६५३ वर्धँ छेदनपूरणयोः ।
१६५४ कुबिँ आच्छादने । कुभिँ इत्येके ।
१६५५ लुबिँ
१६५६ तुबिँ अदर्शने । अर्दन इत्येके ।
१६५७ ह्लपँ व्यक्तायां वाचि । क्लपँ इत्येके ।
१६५८ चुटिँ छेटने ।
१६५९ इलँ प्रेरणे ।
१६६० म्रक्षँ म्लेच्छने ।
१६६१ म्लेच्छँ अव्यक्तायां वाचि ।
१६६२ ब्रूसँ
१६६३ बर्हँ हिंसायाम् । केचिदिह गर्जँ गर्दँ शब्दे । गर्धँ अभिकाङ्क्षायाम् इति पठन्ति । १६६४ गुर्दँ
१६६५ पूर्वँ निकेतने । केचित्तु गर्दँ पूर्वनिकेतने इति पठित्वा गुर्दँ धातुः पूर्वनिवासे वर्तत इत्याहुः ।

१६१३ मोटयति । १६१४-१६१५ पण्डयति, पण्डति, पंसयति, पंसति । १६१६-१६१८ चम्पयति, चम्पति । १६१९ क्षम्पयति, क्षम्पति । १६२० क्षञ्जयति, क्षञ्जति । १६२१ श्वर्तयति । १६२२ श्वभ्रयति । १६२३ मिच्च=ज्ञप् धातुर्मित्संज्ञको भवति । ६-४-९४ मितां ह्रस्वः- ज्ञपयति । अजिज्ञपत् । १६२४ अत्र दीक्षितः- परिवेषणमिह वेष्टनम् । न तु भोजना नापि वेष्टना । यमयति चन्द्रम् । परिवेष्टत इत्यर्थ इति । १६२५ चहयति । अचीचहत् । अचचहत् इति तु कथादेः । चपयति । अचीचपत् । १६२६ रहयति । अरीरहत् । अररहत् इति तु कथादेः । १६२७ बलयति । १६२८ ६-१-५३ चिस्फुरोर्णौ+ ७-३-३६ अर्तिह्री...- चपयति, चययति । ञित्करणं णिचः पाक्षिकत्वे लिङ्गम् । चयति । चयते । ८-४-१८ शेषे विभाषाऽकखादा...- प्रणिचयति, प्रनिचयति । ८-४-१७ नेर्गद... इति तु नेह प्रवर्तते । तत्र चिनोतीति निर्देशेन स्वादेरेव चिधातोर्ग्रहणात् । **नाऽन्ये-**अहेतौ=स्वार्थे णिचि, अन्ये= ज्ञपादिभ्य इतरे धातवः न मितः= मित्संज्ञका न भवन्ति । अर्थाच्चुरादिषु ज्ञपँ प्रभृतय एव मितो भवन्ति, अन्ये न भवन्ति । ज्ञपं प्रभृतयश्च मुख्यमते पञ्च । मतान्तरे सप्त बोध्याः । १६२९-१६३४सट्टयति । स्फिट्टयति । चुम्बयति, चुम्बति । १६३५-१६३७ टङ्कयति, टङ्कति । १६३८-१६४४ शुण्ठयति, शुण्ठति । १६४५-१६४७ गाजयति । मार्जयति । १६४८ मर्चयति । १६४९-१६५० पञ्चयति, पञ्चति । १६५१ तेजयति । १६५२ ७-१-१०१ उपधायाश्च+ ८-२-७८ उपधायां च-कीर्तयति । ७-४-७ उर्ऋत्-अचीकृतत्, अचिकीर्तत् । १६५३-१६५४ कुम्बयति, कुम्बति । कुम्भयति, कुम्भति । १६५५-१६५६ लुम्बयति, लुम्बति । तुम्बयति, तुम्बति । १६५७-१६५८ चुण्टयति, चुण्टति । १६५९ एलयति । ऐलिलत् । १६६०-१६६५ गूर्दयति । पूर्वयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१६६६ जसिँ रक्षणे । मोक्षण इति केचित् ।
१६६७ ईडँ स्तुतौ ।
१६६८ जसुँ हिंसायाम् ।
१६६९ पिडिँ संघाते ।
१६७० रुषँ रोषे । रुठँ इत्येके ।
१६७१ डिपँ क्षेपे ।
१६७२ ष्टुपँ समुच्छ्राये ।

आकुस्मादात्मनेपदिनः ।

१६७३ चितँ संचेतने ।
१६७४ दशिँ दंशने ।
१६७५ दसिँ दर्शनदंशनयोः । दसँ इत्यप्येके ।
१६७६ डपँ
१६७७ डिपँ संघाते ।
१६७८ तत्रिँ कुटुम्बधारणे । कुटुम्बँ इति धात्वन्तरमिति चान्द्राः
१६७९ मत्रिँ गुप्तपरिभाषणे ।
१६८० स्पशँ ग्रहणसंश्लेषणयोः ।
१६८१ तरजँ
१६८२ भर्त्सँ तर्जने ।
१६८३ वस्तँ
१६८४ गन्धँ अर्दने ।
१६८५ विष्कँ हिंसायाम् । हिष्कँ इत्येके ।
१६८६ निष्कँ परिमाणे ।
१६८७ ललँ ईप्सायाम् ।
१६८८ कूणँ संकोचने ।
१६८९ तूणँ पूरणे ।
१६९० भ्रूणँ आशाविशङ्कयोः ।
१६९१ शठँ श्लाघायाम् ।
१६९२ यक्षँ पूजायाम् ।
१६९३ स्यमँ वितर्के ।
१६९४ गूरँ उद्यमने ।
१६९५ शमँ
१६९६ लक्षँ आलोचने ।
१६९७ कुत्सँ अवक्षेपणे ।
१६९८ त्रुटँ छेदने । कुटँ इत्येके ।
१६९९ गलँ स्रवणे ।
१७०० भलँ आभण्डने ।
१७०१ कूटँ आप्रदाने । अवसादने इत्येके ।
१७०२ कुट्टँ प्रतापने ।
१७०३ वञ्चुँ प्रलम्भने ।
१७०४ वृषँ शक्तिबन्धने ।
१७०५ मदँ तृप्तियोगे ।
१७०६ दिवुँ परिकूजने ।
१७०७ गृ विज्ञाने ।
१७०८ विदँ चेतनाख्याननिवासेषु ।
१७०९ मानँ स्तम्भे ।
१७१० यु जुगुप्सायाम् ।
(कुस्मनाम्नो वा) ग.सू. ।।
१७११ कुस्मेति धातुः कुत्सितस्मयने वर्तते । अथवा कुस्मेति प्रातिपदिकम् । ततो धात्वर्थे णिच् । इत्याकुस्मीयाः ।
१७१२ चर्चँ । अध्ययने ।
१७१३ वुक्कँ भषणे ।
१७१४ शब्दँ उपसर्गादाविष्कारे च । ग.सू. चाद् भषणे । (अनुपसर्गाच्च) ग.सू. आविष्कारे इत्येव
१७१५ कणँ निमीलने ।
१७१६ जभिँ नाशने ।
१७१७ षूदँ क्षरणे ।
१७१८ जसुँ ताडने ।

१६६६ जंसयति, जंसति । १६६७-१६६८ जासयति, जसति । १६६९ पिण्डयति, पिण्डति । १६७०-१६७२ स्तोपयति । अतुष्टुपत् । **आकुस्मा** 'कुस्मनाम्नो वा' इति वक्ष्यते । तमभिव्याप्य, आत्मनेपदिनः । अकर्तृगामिफलार्थमिदम् । १६७३ चेतयते । अचीचितत । १६७४ दंशयते । अददंशत । इँदित्करणं णिचः पाक्षिकत्वे लिङ्गम् । दंशति । आकुस्मीयमात्मनेपदं णिच्सन्नियोगेनैवेति व्याख्यातारः । ६-४-२५ दंशसञ्ज... इति तु नेह प्रवर्तते, सञ्जिसाहचर्याद् दंशेरपि भ्वादेरेव ग्रहणात् । १६७५ दंसयतें, दंसति । १६७६-१६७८ तन्त्रयते । कुटुम्बयते । १६७९ मन्त्रयते । १६८० स्पाशयते । अपिस्पशत । १६८१-१६८२ तर्जयते । अततर्जत । भर्त्सयते । अबभर्त्सत । १६८३-१६८४ वस्तयते । गन्धयते । १६८५-१६८७ लालयते । १६८८-१६९३ स्यामयते । नान्ये... (१६२८ चित्र् धातोरधः स्थेन) इतिग. सूत्रेण मित्त्वप्रतिषेधः । एवमग्रे शमादिष्वपि बोध्यम् । १६९४ गूरयते । अजूगुरत । १६९५-१६९६ शामयते । १६९७ कुत्सयते । १६९८ त्रोटयते । १६९९ गालयते । १७०० आभण्डनं निरूपणमित्याहुरिति-तत्त्वबोधिनी । १७०१-१७०४ शक्तिबन्धनं प्रजननसामर्थ्यं शक्तिबन्धश्चेति-दीक्षितः । वर्षयते । १७०५-१७०७ गारयते । १७०८ वेदयते । १७०९ मानयते । १७१० यावयते । १७११ कुस्मयते । अचुकुस्मत । १७१२ चर्चयति । चचर्चत् । १७१३-१७१४ प्रतिशब्दयति । प्रतिश्रुतमाविष्करोतीत्यर्थः । **अनुप** शब्दयति । १७१५ काणयति । ७-४-३ -भ्राज. भास...- सूत्रस्थं काण्यादीनां...- अचीकणत्, अचकाणत् । १७१६ जम्भयति, जम्भति । १७१७ सूदयति । असूषुदत् । १७१८ जासयति, जसति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७१९ पशँ बन्धने ।
१७२० अमँ रोगे ।
१७२१ चटँ
१७२२ स्फुटँ भेदने ।
१७२३ घटँ संघाते ।
(हन्त्यर्थाश्च) ग. सू.
१७२४ दिवुँ मर्दने ।
१७२५ अर्जँ प्रतियत्ने ।
१७२६ घुषिर् विशब्दने ।
१७२७ आङः क्रन्दँ सातत्ये ।
१७२८ लसँ शिल्पयोगे ।
१७२९ तसिँ
१७३० भूषँ अलङ्करणे ।
१७३१ मोक्षँ असने ।
१७३२ अर्हँ पूजायाम् ।
१७३३ ज्ञा नियोगे ।
१७३४ भजँ विश्राणने ।
१७३५ शृधुँ प्रहसने ।
१७३६ यतँ निकारोपस्कारयोः ।
१७३७ रकँ
१७३८ लगँ आस्वादने । रघँ इत्येके । रगँ इत्यन्ये ।
१७३९ अञ्चुँ विशेषणे ।
१७४० लिगिँ चित्रीकरणे ।
१७४१ मुदँ संसर्गे ।
१७४२ त्रसँ धारणे । ग्रहण इत्येके । वारण इत्यन्ये ।
१७४३ उँध्रसँ उञ्छे । उकारो धात्ववयव उध्रसँ इत्येके । नेत्यन्ये ।
१७४४ मुचँ प्रमोचने मोदने च ।
१७४५ वसँ स्नेहच्छेदापहरणेषु ।
१७४६ चरँ संशये ।
१७४७ च्यु सहने । हसने चेत्येके । च्युसँ इत्येके ।
१७४८ भुवोऽवकल्कने ।
१७४९ कृपेश्च ।
(आ स्वदः सकर्मकात्) ग.सू.
१७५० ग्रसँ ग्रहणे ।
१७५१ पुषँ धारणे ।
१७५२ दलँ विशरणे ।
१७५३ पटँ
१७५४ पुटँ
१७५५ लुटँ
१७५६ तुजिँ
१७५७ मिजिँ
१७५८ पिजिँ
१७५९ लुजिँ
१७६० भजिँ
१७६१ लघिँ
१७६२ त्रसिँ
१७६३ पिसिँ
१७६४ कुसिँ
१७६५ दशिँ
१७६६ कुशिँ
१७६७ घटँ
१७६८ घटिँ
१७६९ बृहिँ
१७७० बर्हँ
१७७१ बल्हँ
१७७२ गुपँ
१७७३ धूपँ
१७७४ विच्छँ
१७७५ चीवँ
१७७६ पुथँ
१७७७ लोकृँ
१७७८ लोचृँ
१७७९ णुदँ
१७८० कुपँ
१७८१ तर्कँ
१७८२ वृतुँ
१७८३ वृधुँ भाषार्थाः ।

१७१९ पाशयति । १७२० आमयति । १७२१-१७२२ चाटयति । स्फोटयति । १७२३ घाटयति । **हन्त्य-**नवगण्यामुक्ता अपि हन्त्यर्था धातवो णिचं लभन्ते । तेन हन्ति घातयति इत्येतौ समानार्थौ । १७२४ उँदित्करणं णिचः पाक्षिकत्वे लिङ्गम् । देवयति, देवति । १७२५ अर्जयति । अत्र दीक्षितः- अयमर्थान्तरेऽपि द्रव्यमर्जयतीति । १७२६ घोषयति । इरित्करणं णिचः पाक्षिकत्वे लिङ्गम् । घोषति । अजूघुषत्, णिजभावे- ३-१-५७ इरितो वा- अघुषत्, अघोषीत् । १७२७ अत्र दीक्षितः- भौवादिकः क्रन्दधातुराह्वानाद्यर्थे उक्तः स एवाङ्पूर्वो णिचं लभते सातत्ये । आक्रन्दयति । अन्ये तु आङ्पूर्वो घुषिः क्रन्दसातत्ये इत्याहुः- आघोषयति । इति । १७२८-१७३० अवतंसयति, अवतंसति । भूषयति । १७३१ मोक्षयति । १७३२-१७३३ आज्ञापयति १७३४-१७३५ शर्धयति । शर्धति । ७-४-७ उर्ऋत्- अशीशृधत्, अशशर्धत् । १७३६-१७३९ अञ्चयति, अञ्चति । १७४० लिङ्गयति, लिङ्गति । १७४१ मोदयति सक्तून् घृतेन । १७४२-१७४३ ध्रासयति, ध्रसति । उध्रासयति १७४४-१७४७ च्यावयति । च्योसयति । १७४८ अवकल्कनं मिश्रीकरणमित्येके । चिन्तनमित्यन्ये । तस्मिन्नर्थे भूधातोर्णिच् । भावयति । मिश्रीकरोति, चिन्तयति इति वाऽर्थः । १७४९ अवकल्कने कृपधातोर्णिच् । कल्पयति । **आ स्वदः** इतःपरं स्वदिमभिव्याप्य संभवत्कर्मभ्य एव णिच् । १७५० ग्रासयति फलम् । १७५१ पोषयत्याभरणम् । १७५२ दालयति माषान् । १७५३-१७८३ पाटयति । पोटयति । लोटयति । तुञ्जयति, तुञ्जति । इँदित्सु सर्वत्र णिच् पाक्षिकः । लोकयति । ७-४-२ नाऽग्लोपि...- अलुलोकत् । अलुलोचत् । वर्तयति, वर्तति । वर्धयति, वर्धति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७८४ रुटँ
१७८५ लजिँ
१७८६ अजिँ
१७८७ दसिँ
१७८८ भृसिँ (भृशिँ इति केचित्)
१७८९ रुशिँ
१७९० शीकँ
१७९१ रुसिँ
१७९२ नटँ
१७९३ पुटिँ
१७९४ जिचिँ
(जि.चि इति धातु द्वयमित्येके जुचिँ इत्यपरे)।
१७९५ रघिँ
१७९६ लघिँ
१७९७ अहिँ
१७९८ रहिँ
१७९९ महिँ च ।
१८०० लडिँ
१८०१ तडँ
१८०२ नलँ च ।

१८०३ पूरीँ आप्यायने ।
१८०४ रुजँ हिंसायाम् ।
१८०५ ष्वदँ आस्वादने ।
स्वादँ इत्येके ।
इत्यास्वदीयाः ।
(आ धृषाद् वा) ग.सू.
१८०६ युजँ
१८०७ पृचँ संयमने ।
१८०८ अर्चँ पूजायाम् ।
१८०९ षहँ मर्षणे ।
१८१० ईरँ क्षेपे ।
१८११ ली द्रवीकरणे ।
१८१२ वृजीँ वर्जने ।
१८१३ वृञ् आवरणे ।
१८१४ जॄ वयोहानौ ।
१८१५ ज्रिँ च ।
१८१६ रिचँ वियोजन-संपर्चनयोः ।
१८१७ शिषँ असर्वोपयोगे ।
१८१८ तपँ दाहे ।
१८१९ तृपँ तृप्तौ । संदीपन इत्येके ।

१८२० छृदीँ सन्दीपने ।
चृपँ छृपँ दृपँ सन्दीपन इत्येके ।
१८२१ दृभीँ भये ।
१८२२ दृभँ सन्दर्भे ।
१८२३ श्रथँ मोक्षणे ।
हिंसायामित्येके ।
१८२४ मी गतौ ।
१८२५ ग्रन्थँ बन्धने ।
१८२६ शीकँ आमर्षणे ।
१८२७ चीकँ च ।
१८२८ अर्दँ हिंसायाम् ।
अयं स्वरितेत् ।
१८२९ हिसिँ हिंसायाम् ।
१८३० अर्हँ पूजायाम् ।
१८३१ आङः षदँ पद्यर्थे ।
१८३२ शुन्धँ शौचकर्मणि ।
१८३३ छदँ अपवारणे ।
अयं स्वरितेत् ।
१८३४ जुषँ परितर्कणे ।
१८३५ घूञ् कम्पने । ।

१७८४-१८०३ पूरयति, पूरति । १८०४-१८०५ स्वादयति । असिष्वदत् । असिस्वदत् । आ धृषा-इत ऊर्ध्वं धृषँधातुमभिव्याप्य वा णिच् । १८०६-१८०७ योजयति, योजति । योजयिता, योक्ता । अयूयुजत्, अयौक्षीत् । पर्चयति, पर्चति पर्चयिता, पर्चिता । ७-४-७ उर्ऋत्-अपीपृचत्, अपपर्चत् । णिजभावे-अपर्चीत् १८०८ अर्चयति, अर्चति । अर्चयाञ्चकार, आनर्च । आर्चिचत्, आर्चीत् । १८०९ साहयति, सहति । १८१०-१८११ लाययति । ७-३-३९ लीलोर्नुंग्... इति तु नेह प्रवर्तते साहचर्यपरिभाषया हेतुमण्णावेव तस्य प्रवृत्तेः । णिजभावे-लयति । लेता । ६-१-५० विभाषा लीयतेः इत्यपि नेह प्रवर्तते, लिनातिलीयत्योर्यका निर्देश इति भाष्योक्तेः । १८१२ वर्जयति, वर्जति । अवीवृजत्, अववर्जत्, अवर्जीत् । १८१३ वारयति, वरति, वरते । वारयिता, वरिता, वरीता । १८१४ जारयति, जरति । जरिता, जरीता । १८१५ ज्राययति, ज्रयति । ज्रेता । १८१६ रेचयति, रेचति । रेक्ता । १८१७ शेषयति, शेषति । शेष्टा । अशीशिषत्, ३-१-४५ शल इगु...- अशिक्षत् । १८१८ तापयति, तपति । तप्ता । १८१९ तर्पयति, तर्पति । तर्पिता । १८२० छर्दयति, छर्दति । छर्दिता । छर्दिष्यति । ७-२-५८ सेऽसिँचि... इति तु नेह प्रवर्तते । साहचर्यपरिभाषया तत्र रौधादिकस्यैव ग्रहणात्, चर्पयति, चर्पति । छर्पयति, छर्पति । दर्पयति, दर्पति । १८२१ दर्भयति, दर्भति । दर्भिता । १८२२-१८२४ माययति, मयति । मेता । १८२५ ग्रन्थयति, ग्रन्थति । १८२६-१८२८ अर्दयति, अर्दति, अर्दते । १८२९ हिंसयति, हिंसति । १८३०-१८३१ आसादयति । णिजभावे-७-३-७८ पाघ्राध्मास्था... आसीदति । आसत्ता । आसात्सीत् । १८३२ शुन्धयति, शुन्धति । शुन्धिता । अशुन्धीत् । १८३३ छादयति, छदति, छदते । १८३४ परितर्कणमूहो हिंसा वा । परितर्पण इत्यन्ये । परितर्पणं परितृप्तिक्रिया । जोषयति, जोषति । १८३५ ७-३-३७ शाच्छा... सूत्रस्थेन धूञ्प्रीञो... इति वार्तिकेन नुंक्- धूनयति । केचित्तु तत्र वार्तिके धूञ्प्रीणोरिति पठित्वा प्रीणाति साहचर्याद् धुनातेरेव नुंकमाहुः । तेषां मते- धावयति, धवति । धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तम् । वायुर्विधूनयति चम्पकपुष्परेणून् तत्कानने धवति चन्दनमञ्जरीश्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८३६ प्रीञ् तर्पणे ।
१८३७ श्रन्थँ
१८३८ ग्रन्थँ सन्दर्भे ।
१८३९ आप्लृँ लम्भने । आप्लृँ स्वरितेदयमित्येके
१८४० तनुँ श्रद्धोपकरणयोः । (उपसर्गाच्च दैर्घ्ये) ग.सू. चनँ श्रद्धोपहननयोरित्येके ।
१८४१ वदँ सन्देशवचने । अयं स्वरितेत् । वदँ (अनुदात्तेत्) इत्येके ।
१८४२ वचँ भाषणे ।
१८४३ मानँ पूजायाम् ।
१८४४ भू प्राप्तावात्मनेपदी । णिच्संनियोगेनैवात्मनेपदमित्येके ।
१८४५ गर्हँ विनिन्दने ।
१८४६ मार्गँ अन्वेषणे ।
१८४७ कठिँ शोके । उत्पूर्वः प्रायेणाऽयमुत्कण्ठावचनः ।
१८४८ मृजूँ शौचालङ्कारयोः ।
१८४९ मृषँ तितिक्षायाम् । अयं स्वरितेत् ।
१८५० धृषँ प्रसहने ।
इत्याधृषीयाः । अथाऽदन्ताः ।
१८५१ कथ वाक्यप्रबन्धे ।
१८५२ वर ईप्सायाम् ।
१८५३ गण संख्याने ।
१८५४ शठ
१८५५ श्वठ सम्यगवभाषणे ।
१८५६ पट
१८५७ वट ग्रन्थे ।
१८५८ रह त्यागे ।
१८५९ स्तन
१८६० गदी देवशब्दे ।
१८६१ पत गतौ वा । वा णिजन्तः । वाऽदन्त इत्येके ।
१८६२ पष अनुपसर्गात् । गतावित्येव ।
१८६३ स्वर आक्षेपे ।
१८६४ रच प्रतियत्ने ।
१८६५ कल गतौ संख्याने च ।
१८६६ चह परिकल्कने ।
१८६७ मह पूजायाम् ।
१८६८ सार
१८६९ कृप
१८७० श्रथ दौर्बल्ये ।
१८७१ स्पृह ईप्सायाम् ।
१८७२ भाम क्रोधे ।
१८७३ सूच पैशुन्ये ।
१८७४ खेट भक्षणे । खेड इत्येके । खोट इत्यन्ये ।
१८७५ क्षोट क्षेपे ।
१८७६ गोम उपलेपने ।
१८७७ कुमार क्रीडायाम् ।
१८७८ शील उपधारणे ।
१८७९ साम सान्त्वप्रयोगे ।
१८८० वेल कालोपदेशे । काल इति धात्वन्तरमित्येके ।

१८३६ प्रीणयति । मतान्तरे-प्राययति, प्रयति, प्रयते । १८३७-१८३९ आपयति । आपति । आप्ता । आपिपत्, आपत् । मतान्तरे आपते, इत्यपि । १८४० तानयति, तनति । उप-उपसर्गात् परस्मात् तनुँ धातोः दैर्घ्येऽर्थे णिच् । वितानयति, वितनति । चानयति, चनति । १८४१ वादयति वदति, वदते । ववदतुः । ववदिथ । ववदे । वद्यात् । ६-१-५५ वचिस्वपि... इति तु नेह प्रवर्तते । साहचर्यपरिभाषया तत्र भौवादिकस्यैव वदेर्ग्रहणात् । १८४२ वाचयति, वचति । वक्ता । अवाक्षीत् ३-१-५२ अस्यति वक्ति... इति तु नेह प्रवर्तते । तत्र वक्तीति लुका निर्देशेन आदादिकस्यैव ग्रहणात् । १८४३ मानयति, मानति । १८४४ भावयते, भवते । भवति । १८४५ गर्हयति, गर्हति । १८४६ मार्गयति, मार्गति । १८४७ कण्ठयति, कण्ठति । उत्कण्ठयति, उत्कण्ठति । १८४८ मार्जयति, मार्जति । मार्जिता, मार्ष्टा । १८४९ मर्षयति, मर्षति, मर्षते । १८५० धर्षयति, धर्षति । १८५१ णिचि, ६-४-४८ अतो लोपः, अल्लोपस्य स्थानिवद्भावान्नोपधावृद्धिः- कथयति । अग्लोपित्वात् सन्वद्भावाऽप्रवृत्या नेत्वदीर्घौ अचकथत् । १८५२ वरयति । अववरत् । १८५३ गणयति । ७-४-९७ ई च गणः- अजीगणत्, अजगणत् । १८५४-१८५५ शठयति । श्वठयति । १८५६-१८५७ पटयति । अपपटत् । वटयति । अववटत् १८५८ रहयति । अररहत् । १८५९-१८६० स्तनयति । गदयति । धातुपाठे इका निर्देशः । धातुस्तु गद इति बोध्यम् । १८६१ पतयति, पतति । पताञ्चकार । अपतीत् । मतान्तरे- पातयति । अपीपतत् । इत्याद्यपि । १८६२ पषयति । १८६३ स्वरयति । १८६४ रचयति । अररचत् । १८६५ कलयति । अचकलत् । १८६६ परिकल्कनं दम्भः शाठचं च । चहयति । अचचहत् । १८६७ महयति । १८६८-१८७० सारयति । कृपयति । श्रथयति । १८७१ स्पृहयति । १८७२ भामयति । अबभामत् । १८७३ सूचयति । अषोपदेशत्वान्न षः- असुसूचत् । १८७४-१८७६ गोमयति । अजुगोमत् । १८७७ कुमारयति । अचुकुमारत् । १८७८ उपधारणमभ्यासः । १८७९ सामयति । अससामत् । १८८० वेलयति । कालयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८८१ पल्पूल लवनपवनयोः। पल्यूल इति केचित्।

१८८२ वात सुखसेवनयोः। गतिसुखसेवनेष्वित्येके।

१८८३ गवेष मार्गणे।

१८८४ वास उपसेवायाम्।

१८८५ निवास आच्छादने।

१८८६ भाज पृथक्कर्मणि।

१८८७ सभाज प्रीतिसेवनयोः। प्रीतिदर्शनयोरित्येके।

१८८८ ऊन परिहाणे।

१८८९ ध्वन शब्दे। ध्वनयति। अदध्वनत्।

१८९० कूट परितापे। परिदाहे इत्यन्ये।

१८९१ संकेत

१८९२ ग्राम

१८९३ कुण

१८९४ गुण चामन्त्रणे। चात् कूटोऽपि। अत्र माधवः- अपरे तु पठन्ति- १८९५ केत श्रावणे निमन्त्रणे च। केतयति। निकेतयति। कुण गुण चामन्त्रणे। चकारात् केत चेति। १८९६ कूण सङ्कोचन इति वा तत्र पठन्ति। इति।

१८९७ स्तेन चौर्ये।

आ गर्वादात्मनेपदिनः।

१८९८ पद गतौ।

१८९९ गृह ग्रहणे।

१९०० मृग अन्वेषणे।

१९०१ कुह विस्मापने।

१९०२ शूर

१९०३ वीर विक्रान्तौ।

१९०४ स्थूल परिबृंहणे।

१९०५ अर्थ उपयाच्ञायाम्।

१९०६ सत्र सन्तानक्रियायाम्।

१९०७ गर्व माने। इत्यागर्वीयाः।

१९०८ सूत्र वेष्टने।

१९०९ मूत्र प्रस्रवणे।

१९१० रूक्ष पारुष्ये।

१९११ पार

१९१२ तीर कर्मसमाप्तौ।

१९१३ पुट संसर्गे।

१९१४ धेक दर्शन इत्येके।

१८८१-१८८३ गवेषयति अजगवेषत्। १८८४-१८८५ निवासयति। अनिनिवासत्। १८८६-१८८७ सभाजयति। अससभाजत्। १८८८ ऊनयति। णिच्यच आदेशो न द्वित्वे कर्तव्ये, इति वचनम् ७-४-८० ओः पुयण्ज्यपरे इति सूत्रे द्रष्टव्यम्। अतो न शब्दस्य द्वित्वम्- औननत्। मा भवानूननत्। १८८९-१८९० कूटयति। अचुकूटत्। १८९१-१८९४ संकेतयति। ग्रामयति। कुणयति। गुणयति। १८९५-१८९७ स्तेनयति। अतिस्तेनत्। १८९८ पदयते। अपपदत। १८९९ गृहयते। अजगृहत। १९०० मृगयते। अममृगत। १९०१ कुहयते। अचुकुहत। १९०२ शूरयते। अशुशूरत। १९०३ वीरयते। अविवीरत। १९०४ स्थूलयते। अतुस्थूलत। १९०५ अर्थयते। णिच्यच...-८-४-८० ओः पुयण्... इत्यत्र द्रष्टव्यम्। आर्तथत। १९०६ सत्रयते। अससत्रत। १९०७ गर्वयते। अत्र दीक्षितः- अदन्तत्वसामर्थ्याण्णिज्विकल्पः। धातोरन्त उदात्तो लिट्याम् च फलम्। एवमग्रेऽपीति। १९०८ सूत्रयति। असुसूत्रत्। १९०९ मूत्रयति। अमुमूत्रत्। १९१० रूक्षयति। अरुरूक्षत्। १९११-१९१२ पारयति। अपपारत्। तीरयति। अतितीरत्। १९१३ पुटयति। अपुपुटत्। १९१४ धेकयति। अदिधेकत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९१५ कत्र शैथिल्ये । कर्त इत्यप्येके । (प्रातिपदिकाद् धात्वर्थे बहुलम्) ग.सू. पटुमाचष्टे= पटयति । प्रियमाचष्टे= प्रापयति । (तत् करोति तदाचष्टे) ग.सू. पटुं करोति पटुमाचष्टे वा पटयति । (कर्तृकरणाद् धात्वर्थे ग.सू.	सूदेन पाचयति= सूदयति असिना हन्ति= असयति । (तेनाऽतिक्रामति) ग.सू. अश्वेनाऽतिक्रामति= अश्वयति । (धातुरूपं च) (आख्यानात् कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्ययापत्तिः प्रकृतिवच्च कारकम्) कंसवधमाचष्टे = कंसं घातयति । राजागमनमाचष्टे राजानमागमयति ।	(आङ्लोपश्च कालात्यन्तसंयोगे मर्यादायाम्) आरात्रि विवासमाचष्टे= रात्रिं विवासयति । (चित्रीकरणे प्रापि) ग.सू. दाङ्गात् प्रस्थितः श्रीदुर्गाहीरेश्वर-शिवपञ्चायतन-देवतामन्दिरे सूर्योद्गमनं करोति=सूर्यमुद्गमयति ।

१९१५ कत्रयति, कत्रति । कर्तयति, कर्तति । **प्रातिपदिकात्** धात्वर्थे बहुलम्, णिच् (३-१-२५) । **पटयति** ६-४-१५५ टेः - सूत्रस्थेन णाविष्टवत्... इति वार्तिकेनेष्ठवद्भावाट्टिलोपः । **प्रापयति** ६-४-१५७ प्रिय... इति प्रादेशः । ततो वृद्धिः पुँक् च **तद्**= द्वितीयाप्रकृतेः प्रातिपदिकात्, करोतीत्यर्थे, आचष्टे इत्यर्थे च, णिच् (३-१-२५) । पूर्वस्यैवायं प्रपञ्चः । **कर्तृकरणात्**= कर्तृकरणवाचिप्रातिपदिकात्, धात्वर्थे, णिच् (३-१-२५) । **तेन**= तृतीयान्तप्रकृतेः, अतिक्रामतीत्यर्थे, णिच् (३-१-२५) । ग.सू. **धातुरूपम्**= णिच्प्रकृतिर्धातुरूपं प्रतिपद्यते । **आख्यानात्**= आख्यानं वृत्तकथाप्रबन्धस्तद्वाचिनः, कृतः= कृदन्तात्, तद्= द्वितीयाप्रकृतेः, आचष्टे इत्यर्थे णिच् (३-१-२५) कृल्लुक्= कृत्प्रत्ययस्य लुग् भवति, प्रकृतिप्रत्यापत्तिः= कृतः प्रकृतिर्विकारत्यागेन स्वमेव रूपं (यथा वध्= हन् इत्यादि) प्रतिपद्यते, (चकारो भिन्नक्रमः स च कार्यार्थः) कारकम्+च = कारकम् अडागमः कुत्वतत्वादिकार्यं च, प्रकृतिवत्= हेतुण्णिचः प्रकृतेरिव भवति । **आङ्लोपश्च**- मर्यादायाम्+ आङ्लोपः = मर्यादार्थे वर्तमानस्य आङो लोपः, च = णिच् कृल्लुगादि कार्यं च भवति, कालात्यन्तसंयोगे । उदाहरणे-रात्रेर्विवासः = रात्रिविवासः । ततः २-१-१३ आङ् म... इति समासे आरात्रिविवासम् । **चित्री-प्रापि**= प्राप्त्यर्थकविषये, चित्रीकरणे=आश्चर्ये गम्यमाने, द्वितीयाप्रकृतेः प्रतिपदिकात्, णिच् कृल्लुगादि कार्यं च भवति । **सूर्यमुद्गमयति** श्रीदुर्गाहीरेश्वर शिवपञ्चायतनदेवता-मन्दिर प्रतिष्ठानपुरे गोमुखीतीरे विराजते दाङ्गाद् दूरतरे तत्राऽल्पसमयेन प्रापणमाश्चर्यकरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९१६ वष्क दर्शने ।
१९१७ चित्र चित्रीकरणे (आलेख्यकरण इत्यर्थः) कदाचिद्दर्शने ।
१९१८ अंस समाघाते ।
१९१९ वट विभाजने ।
१९२० लज प्रकाशने । वटिँ लजिँ इत्येके ।
१९२१ मिश्र सम्पर्के ।
१९२२ संग्राम युद्धे । अयमनुदत्तेत् अनुदात्ताकारस्य प्रश्लेषात् ।
१९२३ स्तोम श्लाघायाम् ।
१९२४ छिद्र कर्णभेदने । करणभेदन इत्यन्ये । कर्ण इति धात्वन्तरमित्यपरे ।
१९२५ अन्ध दृष्टयुपघाते । उपसंहार इत्यन्ये ।
१९२६ दण्ड दण्डनिपातने ।
१९२७ अङ्क पदे लक्षणे च ।
१९२८ अङ्ग च ।
१९२९ सुख
१९३० दुःख तत्क्रियायाम् ।
१९३१ रस आस्वादनस्नेहनयोः ।
१९३२ व्यय वित्तसमुत्सर्गे ।
१९३३ रूप रूपक्रियायाम् ।
१९३४ छेद द्वैधीकरणे ।
१९३५ छद अपवारणे ।
१९३६ लाभ प्रेरणे ।
१९३७ व्रण गात्रविचूर्णने ।
१९३८ वर्ण वर्णक्रियाविस्तार-गुणवचनेषु ।
(बहुलमेतन्निदर्शनम्) ग.सू. अदन्तधातुनिदर्शनमित्यर्थः । बाहुलकादन्येऽपि बोध्याः । ते यथा-
१९३९ पर्ण हरितभावे ।
१९४० विष्क दर्शने ।
१९४१ क्षप प्रेरणे
१९४५ वस निवासे ।
१९४६ तुत्थ आवरणे ।
एवम्- आन्दोलयति प्रेङ्खोलयति विडम्बयति अवधीरयति । इत्यादि । अन्ये तु दशगणीपाठो बहुलमित्याहुः । तेनेहाऽपठिता अपि सौत्रा लौकिका वैदिकाश्च द्रष्टव्याः । अपरे तु नवगणीपाठो बहुलमित्याहुः । तेनेहाऽपठितेभ्योऽपि क्वचित् स्वार्थे णिच् । रामो राज्यमचीकरत् इति यथेत्याहुः । चुरादिभ्य एव बहुलं णिजित्यर्थ इत्यन्ये । सर्वे पक्षाः प्राचां ग्रन्थे स्थिता इति दीक्षितः ।
(णिङङ्गान्निरसने) ग.सू. हस्तौ निरस्यति=हस्तयते । पादयते ।
श्वेताश्वाश्वतरगालोडिताह्वर-काणामश्वतरेतकलोपश्च) ग.सू श्वेताश्वमाचष्टे श्वेताश्वेनातिक्रामति वा श्वेतयति । श्वेतयते । पुच्छादिषु धात्वर्थ इत्येव सिद्धम् ।
सिद्धशब्दो ग्रन्थान्ते मङ्गलार्थः । इति चुरादयः ।

१९१६-१९१७ चित्रकरणकदाचिद्दर्शनयोः इति सुवचमिति- तत्त्वबोधिनी । १९१८-१९२० वण्टयति, वण्टति । लञ्जयति, लञ्जति । अदन्तेषु पाठबलाददन्तत्वे वृद्धिरित्यन्ये । वण्टापयति । लञ्जापयति । शाकटायनस्तु कथादीनां सर्वेषां पुँकमाह । तन्मते-कथापयति । गणापयतीत्यादि । १९२१-१९२२ प्रश्लेषात्-तेनाऽवशिष्टाकारस्येष्ठवद्भावेन लोपः । संग्रामयते । अग्लोपित्वान्नोपधाह्रस्वः - अससंग्रामत । १९२३ स्तोमयति । अतुस्तोमत् । १९२४-१९२५ अन्धयति । आन्दधत् । १९२६-१९२७ अङ्कयति । आञ्चकत् । १९२८ अङ्गयति । आञ्जगत् । १९२९-१९३० सुखयति । दुःखयति । १९३१ रसयति । १९३२ व्यययति । अवव्ययत् । १९३३ रूपस्य दर्शनं करणं वा रूपक्रिया । १९३४ छेदयति । अचिच्छेदत् । १९३५ छदयति । अचच्छदत् । १९३६-१९३८ सुवर्णं वर्णयति । कथां वर्णयति । विस्तृणातीत्यर्थः । हरिं वर्णयति । स्तौतीत्यर्थः । १९३९ पर्णयति । अपपर्णत् । णिङ- अङ्गात= अङ्गवाचिनः प्रातिपदिकात्, निरसने= निरसनेऽर्थे, णिङ्=णिङ् प्रत्ययो भवति । श्वेता-अत्र केचिण्णिचमनुवर्तयन्ति, केचिच्च णिङम् । श्वेता...काणाम्= श्वेताश्वप्रभृतिभ्यः प्रत्ययः, (एतद्घटकानाम्) अश्व...लोपश्च=अश्व तर इत क इत्येतेषां लोपश्च । **सिद्धम्** णिजन्तादेव बहुलवचनादात्मनेपदमस्तु । मास्तु पुच्छभाण्ड... इति णिङ्विधिरिति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्राणां सूची

अ

अ अ ८-४-६७
अङ्ग इत्यादौ च ६-१-११५
अङ्गयुक्तं तिङा. ८-२-९६
अङ्गस्य ६-४-१
अङ्गानि मैरेये ६-२-७०
अङ्गात् प्रातिलोम्ये ८-१-३३
अङ्गुलेर्दारुणि ५-४-११४
अङ्गुल्यादि ५-३-१०८
अ च ४-३-३१
अच उपसर्गात्तः ७-४-४७
अचः ६-४-१३८
अचः कर्तृयकि ६-१-१९०
अचः कर्मकर्तरि ३-१-६२
अचः परस्मिन्. १-१-५६
अचतुरविचतुर. ५-४-७७
अचश्च १-२-२८
अचस्तास्वत्थ. ७-२-६१
अचित्तहस्ति. ४-२-४७
अचित्तादेश. ४-३-९६
अचि र ऋतः ७-२-१००
अचि विभाषा ८-२-२१
अचि श्नुधातु. ६-४-७७
अचो ञ्णिति ७-२-११५
अच्चप्रत्यन्वव. ५-४-७५
अजर्यं संगतम् ३-१-१०५
अजादी गुण. ५-३-५८
अजादेर्द्वितीयस्य ६-१-२
अजाद्यतष्टाप् ४-१-४
अजाद्यदन्तम् २-२-३३
अजाविभ्यां थ्यन् ५-१-८
अजिनान्तस्योत्तर. ५-३-८२
अजिव्रज्योश्च ७-३-६०
अंशं हारी ५-२-६९
अकः सवर्णे. ६-१-९७
अकथितं च १-४-५१
अकर्तरि च. ३-३-१९
अकर्तर्यृणे. २-३-२४
अकर्मकाच्च १-३-२६
अकर्मकाच्च १-३-३५
अकर्मकाच्च १-३-४५
अकर्मधारये. ६-२-१२९
अकृच्छ्रे प्रियसुख. ८-१-१३
अकृत्सार्वधातु. ७-४-२५
अके जीविकार्थे ६-२-७३
अकेनोर्भविष्य. २-३-७०
अक्षशलाका. २-१-१०
अक्षेषु ग्लहः ३-३-७०
अक्षोऽन्यतरस्याम् ३-१-७५
अक्ष्णोऽदर्शनात् ५-४-७६
अगारान्ताट्ठन् ४-४-७०
अगारैकदेशे. ३-३-७९
अचोऽन्त्यादि टि १-१-६३
अचो यत् ३-१-९७
अचो रहाभ्यां द्वे ८-४-४५
अच्कावशक्तौ ६-२-१५६
अच्च घेः द्वि. ७-३-११८
अच्छ गत्यर्थ. १-४-६८
अग्नीत्प्रेषणे. ८-२-९२
अग्नेःस्तुत्स्तोम. ८-३-८२
अग्नेर्ढक् ४-२-३३
अग्नौ चेः ३-२-९१
अग्नौ परि. ३-१-१३१
अग्राख्यायामुरसः ५-४-९३
अग्राद् यत् ४-४-११६
अग्रान्तशुद्ध. ५-४-१४५
अङितश्च ६-४-१०३
अजेर्व्यघञपोः २-४-५६
अज्झनगमां सनि ६-४-१६
अज्ञाते ५-३-७३
अञ्चेः पूजायाम् ७-२-५३
अञ्चेर्लुक् ५-३-३०
अञ्चेश्छन्दस्य. ६-१-१६५
अञ्चोऽनपादाने ८-२-४८
अञ्जेः सिँचि ७-२-७१
अञ्नासिकायाः ५-४-११८
अट्कुँप्वाङ्. ८-४-२
अड् गार्ग्य. ७-३-९९
अणञौ च ४-३-३३
अणावकर्म. १-३-८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अणिञोरनार्ष. ४-१-७८
अणि नियुक्ते ६-२-७५
अणिनुँण: ५-४-१५
अणुदित्सवर्णस्य. १-१-६८
अणृगयनादिभ्य: ४-३-७३
अणो द्व्यच: ४-१-१५६
अणोऽप्रगृह्य.८-४-५६
अण् कर्मणि च ३-३-१२
अण् कुटिलिकाया: ४-४-१८
अण् च ५-२-१०३
अण् महिष्यादिभ्य: ४-४-४८
अत आदे: ७-४-७०
अत इञ् ४-१-९५
अत इनिँठनौ ५-२-११५
अत उत्सार्व. ६-४-११०
अत उपधाया: ७-२-११६
अत एकहल्. ६-४-१२०
अत: कृकमि. ८-३-४६
अतश्च ४-१-१७५
अतिग्रहाव्यथन. ५-४-४६
अतिथेर्ञ्य: ५-४-२६
अतिरतिक्रमणे च १-४-९४
अतिशायने. ५-३-५५
अते: शुन: ५-४-९६
अतेरकृत्पदे ६-२-१९०
अतो गुणे ६-१-९४
अतो दीर्घो यञि ७-३-१०१
अतो भिस ऐस् ७-१-९
अतोऽम् ७-१-२४
अतो येयँ: ७-२-८०
अतो रोरप्लुताद. ६-१-१०९
अतो लोप: ६-४-४८
अतो ल्रान्तस्य ७-२-२
अतो हलादेर्लघो : ७-२-७
अतो हे: ६-४-१०५
अत्पूर्वस्य द्वि. ८-४-२१
अत्यन्तसंयोगे च २-१-२९
अत्र लोपो ऽभ्यासस्य ७-४-५८
अत्रानुनासिक:. ८-३-२
अत्रिभृगुकुत्स २-४-६५
अत्वसन्तस्य. ६-४-१४
अत्स्मृदृत्वरप्रथ. ७-४-९५
अद: सर्वेषाम् ७-३-१००
अदभ्यस्तात् ७-१-४
अदर्शनं लोप: १-१-५९
अदस औ सु. ७-२-१०७
अदसो मात् १-१-१२
अदसोऽसेर्दादु. ८-२-८०
अदिप्रभृतिभ्य: .२-४-७२
अदूरभवश्च ४-२-७०
अदेङ् गुण: १-१-२
अदो जग्धिर्ल्यप्ति. २-४-३६
अदोऽनन्ने ३-२-६८
अदोऽनुपदेशे १-४-६९
अद्ड् डतरादिभ्य:. ७-१-२५
अद्भि: सँस्कृतम् ४-४-१३४
अद्यश्वीनावष्टब्धे ५-२-१३
अध: शिरसी पदे ८-३-४७
अधिकम् ५-२-७३
अधिकरणवाचि. २-३-६८
अधिकरणवाचि. २-२-१३
अधिकरणविचाले. ५-३-४३
अधिकरणे बन्ध: ३-४-४१
अधिकरणे शेते: ३-२-१५
अधिकरणैता. २-४-१५
अधिकृत्य कृते. ४-३-८७
अधिपरी अनर्थकौ १-४-९२
अधिरीश्वरे १-४-९६
अधिशीङ्स्था. १-४-४६
अधीगर्थदयेशां. २-३-५२
अधीष्टे च ३-३-१६६
अधुना ५-३-१७
अधे: प्रसहने १-३-३३
अधेरुपरि. ६-२-१८७
अध्ययनतोऽवि. २-४-५
अध्यर्धपूर्वा. ५-१-२८
अध्यायन्यायो. ३-३-१२२
अध्यायानुवाक. ५-२-६०
अध्यायिन्यदेश. ४-४-७१
अध्यायेष्ववर्षे: ४-३-६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्वनो यत्खौ ५-२-१६
अध्वर्युकषाय. ६-२-१०
अध्वर्युक्रतुर. २-४-४
अन् द्वि .५-३-५
अन् ६-४-१६७
अन उपधालोपि. ४-१-२८
अनँङ् सौ ७-१-९३
अनचि च ८-४-४६
अनत्यन्तगतौ क्तात् ५-४-४
अनत्याधान. १-४-७४
अनद्यतने र्हिल् ५-३-२१
अनद्यतने लँङ् ३-२-१११
अनद्यतने लुँट् ३-३-१५
अनन्तावसथ. ५-४-२३
अनन्त्यस्यापि. ८-२-१०५
अनभिहिते २-३-१
अनवक्लृप्त्यमर्ष . ३-३-१४५
अनश्च ५-४-१०८
अनसन्तान्नपुं. ५-४-१०३
अनाप्यकः ७-२-११२
अनिगन्तोऽञ्चतौ ६-२-५२
अनितेः प्र. ८-४-१९
अनिदितां हल. ६-४-२४
अनुकम्पायाम् ५-३-७६
अनुकरणं चानिति. १-४-६१
अनुकाभिका. ५-२-७४
अनुगवमायामे ५-४-८३
अनुगादिनष्ठक् ५-४-१३
अनुग्वलंगामी ५-२-१५
अनुदात्तं सर्वम. ८-१-१८
अनुदात्तङ्ति. १-३-१२
अनुदात्तं च ८-१-३
अनुदात्तं पद. ६-१-१५३
अनुदात्तं प्रश्ना. ८-२-१००
अनुदात्तस्य च यत्रो. ६-१-१५६
अनुदात्तस्य चर्दुप. ६-१-५८
अनुदात्तादेरञ् ४-२-४४
अनुदात्तादेश्च ४-३-१३८
अनुदात्ते च ६-१-१८५
अनुदात्ते च कु. ६-१-११६
अनुदात्तेतश्च. ३-२-१४९
अनुदात्तोपदेश. ६-४-३७
अनुदात्तौ सुँप्पितौ ३-१-४
अनुनासिकस्य. ६-४-१५
अनुनासिकात्. ८-३-४
अनुपदसर्वान्नाया. ५-२-९
अनुपद्यन्वेष्टा ५-२-९०
अनुपराभ्यां कृञः १-३-७९
अनुपसर्गाज्ज्ञः १-३-७६
अनुपसर्गात् फुल्ल. ८-२-५५
अनुपसर्गाद् वा १-३-४३
अनुपसर्गाल्लिम्प. ३-१-१३८
अनुपसर्जनात् ४-१-१४
अनुप्रतिगृणश्च १-४-४१
अनुप्रवचनादि. ५-१-११०
अनुब्राह्मणादिनिँः ४-२-६२
अनुर्यत्समया २-१-१५
अनुर्लक्षणे १-४-८३
अनुवादे चरणानाम् २-४-३
अनुविपर्यभि. ८-३-७२
अनुशतिकादीनां च ७-३-२०
अनुस्वारस्य. ८-४-५७
अनृष्यानन्तर्ये. ४-१-१०४
अनेकमन्यपदार्थे २-२-२४
अनेकाल्शित्. १-१-५४
अनो नुँट् ८-२-१६
अनो बहुव्रीहेः ४-१-१२
अनो भावकर्म. ६-२-१४९
अनोरकर्मकात् १-३-४९
अनोरप्रधान. ६-२-१८८
अनोश्मायः. ५-४-९४
अनौ कर्मणि ३-२-१००
अन्तः ६-२-९२
अन्तः ६-२-१४२
अन्तः ६-२-१७८
अन्तः द्वि. ८-४-१९
अन्तः पूर्वपदाट्ठञ् ४-३-६०
अन्तरं बहिर्योगो. १-१-३५
अन्तरदेशे ८-४-२३
अन्तरपरिग्रहे १-४-६४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तरान्तरेण युक्ते २-३-४
अन्तर्घनो देशे ३-३-७८
अन्तर्धौ येना. १-४-२८
अन्तर्बहिर्भ्यां. ५-४-११७
अन्तर्वत्पति. ४-१-३२
अन्तश्च ६-२-१७९
अन्तश्च तवै. ६-१-१९५
अन्तात्यन्ताध्व. ३-२-४८
अन्तादिवच्च ६-१-८२
अन्तिकबाढयोर्नेद. ५-३-६३
अन्तोदात्तादु. ६-१-१६४
अन्तोऽवत्या: ६-१-२१५
अन्त्यात् पूर्वं बह्वचः ६-२-८३
अन्नाण्णः ४-४-८५
अन्नेन व्यञ्जनम् २-१-३४
अन्य तोडीष् ४-१-४०
अन्यथैवंकथमि. ३-४-२७
अन्यपदार्थे च. २-१-२१
अन्यारादितरर्ते. २-३-२९
अन्येभ्योऽपि. ३-२-१७८
अन्येभ्योऽपि ३-३-१३०
अन्येभ्योऽपि ३-२-७५
अन्येषामपि. ६-३-१३७
अन्येष्वपि. ३-२-१०१
अन्वच्यानुलोम्ये ३-४-६४
अन्ववतप्ताद् रहसः ५-४-८१
अपगुरो णमुँणि ६-१-५२
अपघनोऽङ्गम् ३-३-८१
अपचितश्च ७-२-३०
अपत्यं पौत्र. ४-१-१६२
अपथं नपुंसकम् २-४-३०
अपदातौ साल्वात् ४-२-१३५
अपदान्तस्य मूर्ध. ८-३-५५
अपपरिबहिरञ्चवः. २-१-१२
अपपरी वर्जने १-४-८७
अपमित्ययाचिता. ४-४-२१
अपरस्परा: ६-१-१३९
अपरिमाणबिस्ता. ४-१-२२
अपरिह्वृताश्च ७-२-३२
अपरोक्षे च ३-२-११९
अपवर्गे तृतीया २-३-६
अपस्करो रथाङ्गम्. ६-१-१४४
अपस्पृधेथामा. ६-१-३५
अपह्नवे ज्ञः १-३-४४
अपाच्च ६-२-१८५
अपाच्चतुष्पा. ६-१-१३७
अपादाने चाहीय. ५-४-४५
अपादाने पञ्चमी २-३-२८
अपादाने परी. ३-४-५२
अपाद् वदः १-३-७३
अपिः पदार्थसं. १-४-९५
अपूर्वपदादन्य. ४-१-१४०
अपृक्त एकाल्. १-२-४१
अपे क्लेशतमसोः ३-२-५०
अपे च लषः ३-२-१४४
अपेतापोढमुक्त. २-१-३८
अपोनप्त्रपान्नप्तृ. ४-२-२७
अपो भि ७-४-४८
अप् तृन् तृच् स्वसृ. ६-४-११
अप्पूरणीप्रमा. ५-४-११६
अ प्रत्ययात् ३-३-१०२
अप्लुतवदुप. ६-१-१२५
अभाषितपुंस्काच्च ७-३-४८
अभिजनश्च ४-३-९०
अभिजिद्विदभृ. ५-३-११८
अभिज्ञावचने. ३-२-११२
अभिनिविशश्च १-४-४७
अभिनिष्कामति. ४-३-८६
अभिनिसः स्तनः. ८-३-८६
अभिप्रत्यतिभ्यः. १-३-८०
अभिरभागे १-४-९०
अभिविधौ भाव. ३-३-४४
अभिविधौ सम्पदा. ५-४-५३
अभेर्मुखम् ६-२-१८४
अभेश्चाविदूर्ये ७-२-२५
अभ्यमित्राच्छ च ५-२-१७
अभ्यस्तस्य च द्वि. ६-१-३२
अभ्यस्तानामा. ६-१-१८४
अभ्यासस्याऽसवर्णे ६-४-७८
अभ्यासाच्च ७-३-५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासे चर्च ८-४-५३
अभ्युत्सादयां प्रज. ३-१-४२
अमनुष्यकर्तृके च ३-२-५३
अमहन्नवं नगरे. ६-२-८९
अमावस्यदन्य. ३-१-१२२
अमावास्याया वा ४-३-३०
अमि पूर्वः ६-१-१०३
अमुँ चच्छन्दसि ५-४-१२
अमूर्धमस्तका. ६-३-१२
अमैवाऽव्ययेन २-२-२०
अमो मँश् ७-१-४०
अम्नरूधरवरित्यु. ८-२-७०
अम्बाम्बगोभूमि. ८-३-९७
अम्बार्थनद्यो. ७-३-१०७
अम् सम्वुद्धौ ७-१-९९
अयःशूलदण्डा. ५-२-७६
अयँङ् यि क्ङिति ७-४-२२
अयनं च ८-४-२४
अयस्मयादीनि. १-४-२०
अयामन्ताल्वाय्ये. ६-४-५५
अरण्यान्मनुष्ये ४-२-१२९
अरिष्टगौडपूर्वे च ६-२-१००
अरुर्द्विषदजन्तस्य ६-३-६७
अरुर्मनश्चक्षुश्चे. ५-४-५१
अर्तिपिपर्त्योश्च ७-४-७७
अर्तिलूधूसूखन. ३-२-१८४
अर्ति ह्रीब्लीरी. ७-३-३६
अर्थवदधातुर. १-२-४५
अर्थे ६-२-४४
अर्थे विभाषा ६-३-१००
अर्देः संनिविभ्यः ७-२-२४
अर्धं नपुंसकम् २-२-२
अर्धर्चाः पुंसि च २-४-३१
अर्धाच्च ५-४-१००
अर्धात् परिमाणस्य. ७-३-२६
अर्धाद् यत् ४-३-४
अर्मे चावर्णं द्व्यच् ६-२-९०
अर्यः स्वामि. ३-१-१०३
अर्वणस्त्रसाव. ६-४-१२७
अर्शआदिभ्योऽच्. ५-२-१२७
अर्हः ३-२-१२
अर्हः प्रशंसायाम् ३-२-१३३
अर्हे कृत्यतृचश्च ३-३-१६९
अलंकृञ्निराकृञ्. ३-२-१३६
अलं खल्वोः. ३-४-१८
अलुगुत्तरपदे ६-३-१
अलोऽन्त्यस्य १-१-५१
अलोऽन्त्यात् पूर्व. १-१-६४
अल्पाख्यायाम् ५-४-१३६
अल्पाच्तरम् २-२-३४
अल्पे ५-३-८५
अल्लोपोऽनः ६-४-१३४
अवक्रयः ४-४-५०
अवक्षेपणे कन् ५-३-९५
अवङ् स्फोटायनस्य ६-१-११९
अवचक्षे च ३-४-१५
अवद्यपण्यवर्या. ३-१-१०१
अवपथासि च ६-१-११७
अवयवादृतोः ७-३-११
अवयवे च. ४-३-१३३
अवयसि ठँश्च ५-१-८३
अवयाः श्वेतवाः. ८-२-६७
अवसमन्धेभ्य. ५-४-७९
अवाच्चालम्बना. ८-३-६८
अवात् कुटारच्च ५-२-३०
अवाद् ग्रः १-३-५१
अवारपारात्य. ५-२-११
अवृद्धादपि बहु. ४-२-१२५
अवृद्धाभ्यो नदी. ४-१-११३
अवेः कः ५-४-२८
अवे ग्रहो वर्ष. ३-३-५१
अवे तृस्त्रोर्घञ् ३-३-१२०
अवे यजः ३-२-७२
अवोदैधौघ्मप्रश्रथ. ६-४-२९
अवोदोर्नियः ३-३-२६
अव्यक्तानुकरणस्यात. ६-१-९५
अव्यक्तानुकरणाद्. ५-४-५७
अव्ययं विभक्ति. २-१-६
अव्ययसर्वनाम्ना. ५-३-७१
अव्ययात् त्यप् ४-२-१०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्ययादाप्सुँपः २-४-८२
अव्ययीभावः २-१-५
अव्ययीभावश्च १-१-४०
अव्ययीभावश्च २-४-१८
अव्ययीभावाच्च ४-३-५९
अव्ययीभावे चा. ६-३-८१
अव्ययीभावे शर. ५-४-१०७
अव्ययेऽयथाभिप्रे. ३-४-५९
अव्यादवद्यादव. ६-१-११२
अशनायोदन्यध. ७-४-३४
अशब्दे यत्खाव. ४-३-६४
अशला च २-४-२४
अश्नोतेश्च ७-४-७२
अश्वक्षीरवृषलव. ७-१-५१
अश्वपत्यादिभ्यश्च ४-१-८४
अश्वस्यैकाहगमः ५-२-१९
अश्वाघस्यात् ७-४-३७
अश्वादिभ्यः फञ् ४-१-११०
अशिवमानण् ४-४-१२६
अषडक्षाशितंग्वलं. ५-४-७
अषष्ठचतृतीयास्थ. ६-३-९९
अष्टन आ विभक्तौ ७-२-८४
अष्टनः संज्ञायाम् ६-३-१२५
अष्टनो दीर्घात् ६-१-१६७
अष्टाभ्य औश् ७-१-२१
असंयोगाल्लिँट्. १-२-५
असंज्ञायां तिल. ४-३-१४७
असमासे निष्का. ५-१-२०
अ साम्प्रतिके ४-३-९
असिद्धवदत्राभात् ६-४-२२
असुरस्य स्वम् ४-४-१२३
असूर्यललाटयार्दृशि. ३-२-३६
अस्तं च १-४-६७
अस्ताति च ५-३-४०
अस्तिनास्ति. ४-४-६०
अस्तिसिँचोऽपृक्ते ७-३-९६
अस्तेर्भूः २-४-५२
अस्त्रियाम् द्वि. ४-१-९४
अस्थिदधिसक्थ्य. ७-१-७५
अस्मदो द्वयोश्च १-२-५९
अस्मद्युत्तमः १-४-१०६
अस्मायामेधा. ५-२-१२१
अस्य च्वौ ७-४-३२
अस्यतितृषोः. ३-४-५७
अस्यतिवक्तिख्या. ३-१-५२
अस्यतेस्थुँक् ७-४-१७
अस्वाङ्गपूर्वपदाद् वा ४-१-५३
अहः सर्वैकदेश. ५-४-८७
अहंशुभमोर्युस् ५-२-१४०
अहन् ८-२-६८
अहीने द्वितीया ६-२-४७
अहेति विनियोगे च ८-१-६१
अहो च ८-१-४०
अह्नष्टखोरेव ६-४-१४५
अह्नोऽदन्तात् ८-४-७
अह्नोऽह्न एतेभ्यः ५-४-८८

आ

आकडारादेका. १-४-१
आकर्षात् ष्ठल् ४-४-९
आकर्षादिभ्यः कन् ५-२-६४
आकालिकडा. ५-१-११३
आक्रन्दाट्ठञ्च ४-४-३८
आक्रोशे च ६-२-१५७
आक्रोशे नञ्यनिः ३-३-११२
आक्रोशेऽवन्योर्ग्रहः ३-३-४५
आक्वेस्तच्छील. ३-२-१३४
आख्यातोपयोगे १-४-२९
आगवीनः ५-२-१४
आगस्त्यकौण्डि. २-४-७०
आग्रहायण्यश्व. ४-२-२२
आङ उद्गमने १-३-४०
आङि चापः ७-३-१०५
आङि ताच्छील्ये ३-२-११
आङि युद्धे ३-३-७३
आङो दोऽनास्य. १-३-२०
आङो नाऽस्त्रियाम् ७-३-११९
आङोऽनुनासि. ६-१-१२२
आङो यमहनः १-३-२८
आङो यि ७-१-६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आङ् मर्यादाभि. २-१-१३
आङ् मर्यादावचने १-४-८८
आङ्माङोश्च ६-१-७२
आ च त्वात् ५-१-११९
आ च हौ ६-४-११७
आचार्योपसर्जन. ६-२-३६
आचार्योपसर्जन. ६-२-१०४
आच्छीनद्योर्नुम् ७-१-८०
आज्जसेरसुँक् ७-१-५०
आज्ञायिनि च ६-३-५
आटश्च ६-१-८७
आडजादीनाम् ६-४-७२
आडुत्तमस्य पिच्च ३-४-९२
आढकाचित. ५-१-५२
आढ्यसुभगस्थूल. ३-२-५६
आण्नद्याः ७-३-११२
आत ऐ ३-४-९५
आत औ णलः ७-१-३४
आतः ३-४-११०
आतश्चोपसर्गे ३-१-१३६
आतश्चोपसर्गे ३-३-१०६
आतो ङितः ७-२-८१
आतोऽटि नित्यम् ८-३-३
आतो धातोः . ६-४-१४०
आतोऽनुपसर्गे कः ३-२-३
आतो मनिन्.३-२-७४
आतो युँक् चिण् .७-३-३३
आतो युँच् ३-३-१२८
आतो लोप इटि च ६-४-६४
आत्मनश्च ६-३-६
आत्मनेपदेष्वनतः ७-१-५
आत्मनेपदेष्व. २-४-४४
आत्मनेपदेष्वन्य. ३-१-५४
आत्मन्विश्वजन. ५-१-९
आत्ममाने खश्च. (३-२-८३)
आत्ममाने खश्च ३-२-८३
आत्माध्वानौ खे ६-४-१६९
आदरानादरयोः १-४-६२
आदाचार्याणाम् ७-३-४९
आदिः प्रत्येनसि (६-२-२७)
आदिः सिंचो. ६-१-१८२
आदिकर्मणिक्तः ३-४-७१
आँदितश्च ७-२-१६
आदिरन्त्येन. १-१-७०
आदिरुदात्तः ६-२-६४
आदिर्ञिटुडवः १-३-५
आदिर्णमुल्यन्य. ६-१-१८९
आदिश्चहणा. ६-२-१२४
आदृगमहनजन. ३-२-१७१
आदेः परस्य १-१-५३
आदेच उपदेशे. ६-१-४४
आदेशप्रत्यययोः ८-३-५९
आद् गुणः ६-१-८४
आद्यन्तवेदकस्मिन् (१-१-२०)
आद्यन्तौ टकितौ १-१-४५
आद्युदात्तं द्व्यच्छ. ६-२-११८
आद्युदात्तश्च ३-१-३
आधारोऽधिकरणम् १-४-४५
आनँङृतो द्वन्द्वे ६-३-२५
आनाय्योऽनित्ये ३-१-१२७
आनि लोँट् ८-४-१६
आने मुँक् ७-२-८२
आन्महतः. ६-३-४६
आपत्यस्य च. ६-४-१५१
आपोजुषाणो. ६-१-११४
आपोऽन्यतर. ७-४-१५
आपृज्ञप्यृधामीत् ७-४-५५
आप्रपदं प्राप्नोति ५-२-८
आबाधे च ८-१-१०
आभीक्ष्ण्ये णमुँल् च ३-४-२२
आम एकान्तर. ८-१-५५
आमः २-४-८१
आमन्त्रितं पूर्वम. ८-१-७२
आमन्त्रितस्य च ६-१-१९३
आमन्त्रितस्य च ८-१-१९
आमि सर्वनाम्नः .७-१-५२
आमेतः ३-४-९०
आम्प्रत्ययवत् १-३-६३
आम्रेडितं भर्त्सने ८-२-९५
आयनेयीनीयियः ७-१-२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आयादय आर्ध .३-१-३१
आयुक्तकुशला. २-३-४०
आयुधजीविभ्यश्छ. ४-३-९१
आयुधजीविस. ५-३-११४
आयुधाच्छ च ४-४-१४
आरगुदीचाम् ४-१-१३०
आर्धधातुकं शेषः ३-४-११४
आर्धधातुकस्येड् ७-२-३५
आर्धधातुके २-४-३५
आर्धधातुके ६-४-४६
आर्यो ब्राह्मणकु.६-२-५८
आहार्दगोपुच्छ. ५-१-१९
आलजाटचौ. ५-२-१२५
आवटयाच्च ४-१-७५
आवश्यकाधम. ३-३-१७०
आवसथात् ष्ठल् ४-४-७४
आशंसायां. ३-३-१३२
आशंसावचने. ३-३-१३४
आशङ्काबाधने. ६-२-२१
आशितः कर्ता ६-१-२०२
आशिते भुवः .३-२-४५
आशिषि च ३-१-१५०
आशिषि नाथः २-३-५५
आशिषि लिंङ् .३-३-१७३
आशिषि हनः ३-२-४९
आश्चर्यमनित्ये ६-१-१४२
आश्वयुज्या वुंञ् ४-३-४५
आसन्दीवदष्ठी. ८-२-१२
आ सर्वनाम्नः ६-३-९१
आसुयुवपि. ३-१-१२६
आस्पदं प्रतिष्ठा. ६-१-१४१
आहस्थः ८-२-३५
आहि च दूरे ५-३-३७
आहो उताहो. ८-१-४९

इ

इकः काशे ६-३-१२३
इकः सुञि ६-३-१३४
इको गुणवृद्धी १-१-३
इकोऽचि विभक्तौ ७-१-७३
इको झल् १-२-९
इको यणचि ६-१-७४
इको वहेऽपीलोः ६-३-१२१
इको ऽसवर्णे शाक. ६-१-१२३
इको ह्रस्वोऽङ्यो. ६-३-६१
इगन्तकालकपाल. ६-२-२९
इगन्ताच्च लघु. ५-१-१३०
इगुपधज्ञाप्री. ३-१-१३५
इग् यणः सम्प्र. १-१-४४
इङश्च २-४-४८
इङश्च ३-३-२१
इङ्धार्योःशत्र. ३-२-१३०
इच एकाचोऽम्प्र. ६-३-६८
इच् कर्मव्यतीहारे ५-४-१२७
इच्छा ३-३-१०१
इच्छार्थेभ्यो. ३-३-१६०
इच्छार्थेषु लिंङ्. ३-३-१५७
इजादेः सनुंमः ८-४-३१
इजादेश्च गुरुमतो. ३-१-३६
इञः प्राचाम् २-४-६०
इञश्च ४-२-११२
इट ईटि ८-२-२८
इटोऽत् ३-४-१०६
इट् सनि वा ७-२-४१
इडत्त्यर्तिव्ययती. ७-२-६६
इडाया वा ८-३-५४
इणः षः ८-३-३९
इणः षीध्वंलुंङ् .८-३-७८
इणो गा लुंङि २-४-४५
इणो यण् ६-४-८१
इण्कोः ८-३-५७
इण्नशजि. ३-२-१६३
इणिनष्ठायाम् ७-२-४७
इतराभ्योऽपि. ५-३-१४
इतरेतरान्योन्यो. १-३-१६
इतश्च ३-४-१००
इतश्च लोपः .३-४-९७
इतश्चानिञः ४-१-१२२
इतोऽत् सर्वनाम. ७-१-८६
इतो मनुष्यजातेः (४-१-६५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थं भूतलक्षणे २-३-२१
इत्थं भूतेन कृत. ६-२-१४८
इदंकिमोरीश्की ६-३-९०
इदन्तो मसि ७-१-४६
इदम इश् ५-३-३
इदमस्थमुः ५-३-२४
इदमोऽन्वादेशे .२-४-३२
इदमो मः ७-२-१०८
इदमो र्हिल् ५-३-१६
इँदमो हः ५-३-११
इँदितो नुँम् धातोः ७-१-५८
इदुदुपधस्य चा. ८-३-४१
इदुद्भ्याम् ७-३-११७
इदोऽय् पुंसि ७-२-१११
इद् गोण्याः १-२-५०
इद् दरिद्रस्य ६-४-११४
इद् वृद्धौ ६-३-२८
इनः स्त्रियाम् ५-४-१५२
इनच्पिटच् चिकचि. ५-२-३३
इनण्यनपत्ये ६-४-१६४
इनित्रकटचचश्च ४-२-५१
इन्द्रवरुणभवशर्व. ४-१-४९
इन्द्रियमिन्द्रलिङ्ग. ५-२-९३
इन्द्रे च ६-१-१२०
इन्धिभवतिभ्यां च १-२-६
इन्हन्पूषार्यम्णां .६-४-१२
इरयो रे ६-४-७६
इरितो वा ३-१-५७
इवे प्रतिकृतौ ५-३-९६
इषगमियमां छः ७-३-७७
इष्टकेषीका. ६-३-६५
इष्टादिभ्यश्च ५-२-८८
इष्ट्वीनमिति च ७-१-४८
इष्ठस्य यिट् च ६-४-१५९
इसुसुक्तान्तात् कः ७-३-५१
इसुसोः सामर्थ्ये ८-३-४४
इस्मन्त्रन्क्विँषु च ६-४-९७

ई

ई घ्राध्मोः ७-४-३१
ई च खनः ३-१-१११
ई च गणः ७-४-९७
ई च द्विवचने ७-१-७७
ई ३ चाक्रवर्मणस्य ६-१-१२६
ईडजनोर्ध्वे च ७-२-७८
ईडवन्दवृशंसदु. ६-१-२०९
ईदग्नेः सोमवरुण. ६-३-२७
ईदासः ७-२-८३
ईदूतौ च सप्तम्यर्थे १-१-१८
ईदूदेद् द्विवचनं. १-१-११
ईद्यति ६-४-६५
ईयसश्च ५-४-१५६
ईवत्याः ६-१-२१६
ईशः से ७-२-७७
ईश्वरे तोसुँन्कसुँनौ ३-४-१३
ईषदकृता २-२-७
ईषदन्यतरस्याम् ६-२-५४
ईषदर्थे ६-३-१०५
ईषदसमाप्तौ कल्प. ५-३-६७
ईषद्दुःसुषु कृच्छ्रा. ३-३-१२६
ई हल्यघोः ६-४-११३
ई ३ चाक्रवर्म. ६-१-१२६

उ

उगवादिभ्यो यत् ५-१-२
उगितश्च ४-१-६
उगितश्च ६-३-४५
उगिदचां सर्व. ७-१-७०
उग्रंपश्येरंमद. ३-२-३७
उच्चैरुदात्तः १-२-२९
उच्चैस्तरां वा .१-२-३५
उञः प्र. १-१-१७
उञि च पदे ८-३-२१
उञ्छति ४-४-३२
उञ्छादीनां च ६-१-१५५
उणादयो बहुलम् ३-३-१
उतश्च प्रत्यया. ६-४-१०६
उताप्योः सम. ३-३-१५२
उतो वृद्धिर्लुकि. ७-३-८९
उत्क उन्मनाः . ५-२-८०
उत्करादिभ्यश्छः ४-२-९०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तमैकाभ्यां च ५-४-९०
उत्तरपथेनाहृ. ५-१-७६
उत्तरपदवृद्धौ .६-२-१०५
उत्तरपदस्य ७-३-१०
उत्तरपदादिः ६-२-१११
उत्तरमृगपूर्वाच्च .५-४-९८
उत्तराच्च ५-३-३८
उत्तराधरदक्षि. ५-३-३४
उत्परस्यातः ७-४-८८
उत्सादिभ्योऽञ् ४-१-८६
उद ईत् ६-४-१३९
उदः स्थास्तम्भोः .८-४-६०
उदकस्योदः .६-३-५७
उदकेऽकेवले ६-२-९६
उदक् च विपाशः ४-२-७४
उदङ्कोऽनुदके ३-३-१२३
उदन्वानुदधौ च ८-२-१३
उदराट्ठगाद्यूने ५-२-६७
उदराश्वेषुषु प्र. ६-२-१०७
उदश्चरः सकर्मकात्. १-३-५३
उदश्वितोऽन्यतर. ४-२-१९
उदात्तयणो. ६-१-१६९
उदात्तस्वरितपरस्य. १-२-४०
उदात्तस्वरितयोर्यणः .८-२-४
उदात्तादनुदात्तस्य. ८-४-६५
उदि कूले रुजि. ३-२-३१
उदि ग्रहः ३-३-३५
उदितो वा ७-२-५६
उदि श्रयतियौति. ३-३-४९
उदीचां वृद्धा. ४-१-१५७
उदीचामातः .७-३-४६
उदीचामिञ् ४-१-१५३
उदीचां माङो. ३-४-१९
उदीच्यग्रामाच्च. ४-२-१०९
उदुपधाद् भावादि. १-२-२१
उदोऽनूर्ध्वकर्मणि १-३-२४
उदोष्ठ्यपूर्वस्य ७-१-१०२
उद्घनोऽत्याधानम् ३-३-८०
उद्विभ्यां काकु. ५-४-१४८
उद्विभ्यां तपः १-३-२७
उन्न्योर्ग्रः ३-३-२९
उपकादिभ्यो. २-४-६९
उपघ्न आश्रये ३-३-८५
उपजानूपकर्णो. ४-३-४०
उपज्ञाते ४-३-११५
उपज्ञोपक्रमं तदा. २-४-२१
उपदंशस्तृतीयायाम्. ३-४-४७
उपदेशेऽजनुना. १-३-२
उपदेशेऽत्वतः ७-२-६२
उपधायां च ८-२-७८
उपधायाश्च ७-१-१०१
उपपदमतिङ् २-२-१९
उपपराभ्याम् १-३-३९
उपमानं शब्दार्थ. ६-२-८०
उपमानाच्च ५-४-१३७
उपमानादप्राणिषु ५-४-९७
उपमानादाचारे ३-१-१०
उपमानानि सा. २-१-५५
उपमाने कर्मणि च. ३-४-४५
उपमितं व्याघ्रा. २-१-५६
उपरिस्विदा. ८-२-१०२
उपर्यध्यधसः सा. ८-१-७
उपर्युपरिष्टात् ५-३-३१
उपसंवादाशङ्क. ३-४-८
उपसर्गप्रादुर्भ्या. ८-३-८७
उपसर्गव्ययेतं च ८-१-३८
उपसर्गस्य घञ्य ६-३-१२२
उपसर्गस्यायतौ ८-२-१९
उपसर्गाः क्रिया. द्वि. १-४-५८
उपसर्गाच्च ५-४-११९
उपसर्गाच्छन्द. ५-१-११७
उपसर्गात् खल्घञोः ७-१-६७
उपसर्गात् सुनोति. ८-३-६५
उपसर्गात् स्वाङ्गं. ६-२-१७६
उपसर्गादध्वनः ५-४-८५
उपसर्गादनोत्परः ८-४-२७
उपसर्गादसमासे. ८-४-१४
उपसर्गादृति धातौ ६-१-८८
उपसर्गाद्ध्रस्व. ७-४-२३
उपसर्गाद् बहुलम् ८-४-२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसर्गे घोः किः ३-३-९२
उपसर्गे च संज्ञायाम् ३-२-९९
उपसर्गेऽदः ३-३-५९
उपसर्गे रुवः ३-३-२२
उपसर्जनं पूर्वम् २-२-३०
उपसर्या काल्या. ३-१-१०४
उपाच्च १-३-८४
उपाजेऽन्वाजे १-४-७२
उपात् प्रतियत्न. ६-१-१३४
उपात् प्रशंसायाम् ७-१-६६
उपाद् द्व्यजजि. ६-२-१९३
उपाद् यमः स्वकरणे १-३-५६
उपाधिभ्यां त्यक. ५-२-३४
उपान्मन्त्रकरणे १-३-२५
उपान्वध्याङ्वसः १-४-४८
उपेयिवाननाः. ३-२-१०९
उपोत्तमं रिति ६-१-२१२
उपोऽधिके च १-४-८६
उप्ते च ४-३-४४
उभयथर्क्षु ८-३-८
उभयप्राप्तौ कर्मणि २-३-६६
उभादुदात्तो. ५-२-४४
उभे अभ्यस्तम् ६-१-५
उभे वनस्पत्या. ६-२-१३९
उभौ साभ्यासस्य ८-४-२०
उमोर्णयोर्वा ४-३-१५६
उरः प्रभृतिभ्यः कप् ५-४-१५१
उरण् रपरः १-१-५०
उरत् ७-४-६६
उरसोऽण् च ४-४-९४
उरसो यच्च ४-३-११४
उर्ऋत् ७-४-७
उश्च १-२-१२
उषविदजागृ. ३-१-३८
उषासोषसः ६-३-३१
उष्ट्रः सादिवाम्योः ६-२-४०
उष्ट्राद् वुञ् ४-३-१५५
उस्यपदान्तात् ६-१-९३

ऊ

ऊँ द्वि. १-१-१७
ऊकालोऽज्झ्रस्वदीर्घप्लुतः १-२-२७
ऊङुतः ४-१-६६
ऊडिदम्पदाद्यप्. ६-१-१६६
ऊतियूतिजूतिसा. ३-३-९७
ऊदनोर्देशे ६-३-९८
ऊदुपधाया. ६-४-८९
ऊधसोऽनँङ् ५-४-१३१
ऊनार्थकलहं. ६-२-१५२
ऊरूत्तरपदादौ. ४-१-६९
ऊर्णाया युस् ५-२-१२३
ऊर्णोतेर्विभाषा ७-२-६
ऊर्णोतेर्विभाषा ७-३-९०
ऊर्ध्वाद् विभाषा ५-४-१३०
ऊर्ध्वे शुषिपूरोः ३-४-४४
ऊर्यादिच्विँडाचश्च १-४-६०
ऊषशुषिमुष्क. ५-२-१०७

ऋ

ऋक्पूरब्धूःपथा. ५-४-७४
ऋचः शे ६-३-५५
ऋचि तु नु घ म. ६-३-१३३
ऋच्छत्यृताम् ७-४-११
ऋणमाधमर्ण्ये ८-२-६०
ऋत उत् ६-१-१०७
ऋतश्च ७-४-९२
ऋतश्च संयोगादेः ७-२-४३
ऋतश्च संयोगादे. ७-४-१०
ऋतश्छन्दसि ५-४-१५८
ऋतष्ठञ् ४-३-७८
ऋतेरीयङ् ३-१-२९
ऋतो ङिसर्वना. ७-३-११०
ऋतोऽञ् ४-४-४९
ऋतो भारद्वाजस्य ७-२-६३
ऋतोरण् ५-१-१०४
ऋतो विद्यायोनि. ६-३-२३
ऋत्यकः ६-१-१२४
ऋत्विग्दधृक्स्र. ३-२-५९
ऋत्व्यवास्त्व्य. ६-४-१७५
ऋदुपधाच्चाक्लृ. ३-१-११०
ऋदुशनस्पुरुदंसो. ७-१-९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋदृशोऽङि गुण: ७-४-१६
ऋद्धनो:स्ये ७-२-७०
ऋषभोपानहोर्ञ्य: ५-१-५
ऋषभोपनहोर्ञ्य: ५-१-१४
ऋष्यन्धक. ४-१-११४
ऋहलोर्ण्यत् ३-१-१२४

ॠ

ॠत इद्धातो: ७-१-१००
ॠदोरप् ३-३-५७

ए

एक: पूर्वपरयो: ६-१-८१
एकगोपूर्वा. ५-२-११८
एक तद्धिते च ६-३-६२
एकधुराल्लुक् च ४-४-७९
एकं बहुव्रीहिवत् ८-१-९
एकवचनं सम्बुद्धि: २-३-४९
एकवचनस्य च ७-१-३२
एक विभक्ति चा. १-२-४४
एकशालायाष्ठज. ५-३-१०९
एकश्रुति दूरात्. १-२-३३
एकस्य सकृच्च ५-४-१९
एकहलादौ पूर. ६-३-५९
एकाच उपदेशे. ७-२-१०
एकाचो द्वे प्रथमस्य ६-१-१
एकाचो बशो. ८-२-३७
एकाच्च प्राचाम् ५-३-९४
एकाजुत्तरपदे णँ: ८-४-१२
एकादाकिनिँच्चा. ५-३-५२
एकादिश्चैक. ६-३-७६
एकादेश उदात्ते. ८-२-५
एकाद्धो ध्यमुँ. ५-३-४४
एकान्याभ्यां ८-१-६५
एको गोत्रे ४-१-९३
एङ: पदान्ता. ६-१-१०५
एङि पररूपम् ६-१-९१
एङ् प्राचां देशे १-१-७४
एङ्ह्रस्वात् सम्बुद्धे: ६-१-६७
एच इग्घ्रस्वादेशे १-१-४७
एचोऽप्रगृह्यस्या. ८-२-१०७
एचोऽयवायाव: ६-१-७५
एजे: खश् ३-२-२८
एण्या ढञ् ४-३-१५७
एत ईद् बहुवचने ८-२-८१
एत ऐ ३-४-९३
एतत्तदो: सुँलोपो. ६-१-१२८
एतदस्त्रतसोस्त्रत. २-४-३३
एतद: प्र. ५-३-५
एति संज्ञायाम् ८-३-९९
एतिस्तुशास्वृ. ३-१-१०९
एतेतौ रथो: ५-३-४
एतेर्लिँङि ७-४-२४
एत्येधत्युठ्सु ६-१-८६
एधाच्च ५-३-४६
एनपा द्वितीया २-३-३१
एनबन्यतरस्याम. ५-३-३५
एरच् ३-३-५६
एरनेकाचोऽसं. ६-४-८२
एरु: ३-४-८६
एर्लिँङि ६-४-६७
एहि मन्ये प्रहासे. ८-१-४६

ऐ

ऐकागारिकट् चौरे ५-१-११२
ऐषमोह्य:श्वसो. ४-२-१०५

ओ

ओ: पुयण्ज्यपरे ७-४-८०
ओ: सुँपि ६-४-८३
ओक उच: के ७-३-६४
ओज: सहोऽम्भसा. ४-४-२७
ओज: सहोऽम्भस्त. ६-३-३
ओजसोऽहनि. ४-४-१३०
ओत् १-१-१५
ओत: श्यनि ७-३-७१
ओतो गार्ग्यस्य ८-३-२०
ओँदितश्च ८-२-४५
ओमभ्यादाने ८-२-८७
ओमाङोश्च ६-१-९२
ओरञ् ४-२-७१
ओरञ् ४-३-१३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओरावश्यके ३-१-१२५
ओर्गुणः ६-४-१४६
ओर्देशे ठञ् ४-२-११९
ओषधेरजातौ ५-४-३७
ओषधेश्च वि. ६-३-१३२
ओसि च ७-३-१०४

औ

औक्षमनपत्ये ६-४-१७३
औङ आपः ७-१-१८
औत् प्र. ७-३-११८
औतोऽम्शसोः ६-१-९०

क

कः करत्करति. ८-३-५०
कंशंभ्यां बभयुस्. ५-२-१३८
कंसमन्थशूर्प. ६-२-१२१
कंसाट्टिठन् ५-१-२५
कंसीयपरशव्य. ४-३-१६६
ककुदस्यावस्था. ५-४-१४६
कच्छाग्निवक्त्र. ४-२-१२६
कच्छादिभ्यश्च ४-२-१३३
कठचरकाल्लुक् ४-३-१०७
कठिनान्तप्रस्ता. ४-४-७२
कडङ्गरदक्षिणा. ५-१-६८
कडाराः कर्मधा. २-२-३८
कणेमनसी श्रद्धा. १-४-६५
कण्ठपृष्ठग्रीवा. ६-२-११३
कण्ड्वादिभ्यो यक् ३-१-२७
कण्वादिभ्यो. ४-२-१११
कतरकतमौ कर्म. ६-२-५७
कतरकतमौ जा. २-१-६३
कत्र्यादिभ्यो ढ. ४-२-९५
कथादिभ्यष्ठक् ४-४-१०२
कद्रुकमण्डल्वो. ४-१-७१
कन्था च ६-२-१२३
कन्थापलद. ४-२-१४२
कन्थायाष्ठक् ४-२-१०२
कन्यायाः क. ४-१-११६
कपिज्ञात्योर्ढक् ५-१-१२६
कपि पूर्वम् ६-२-१७२
कपिबोधादा. ४-१-१०७
कपिष्ठलो गोत्रे ८-३-९१
कमेर्णिङ् ३-१-३०
कम्बलाच्च संज्ञा. ५-१-३
कम्बोजाल्लुक् ४-१-१७३
करणाधिकरण. ३-३-११७
करणे च स्तो. २-३-३३
करणे यजः ३-२-८५
करणेऽयोविद्रुषु ३-३-८२
करणे हनः ३-४-३७
कर्कलोहितादी. ५-३-११०
कर्णललाटात् क. ४-३-६५
कर्णे लक्षण. ६-३-११५
कर्णो वर्णलक्ष. ६-२-१११
कर्तरि कर्मव्य. १-३-१४
कर्तरि कृत् ३-४-६७
कर्तरि च २-२-१६
कर्तरि चर्षिदे. ३-२-१८६
कर्तरि भुवः .३-२-५७
कर्तरि शप् ३-१-६८
कर्तर्युपमाने ३-२-७९
कर्तुः क्यङ् सलो. ३-१-११
कर्तुरीप्सिततमं. १-४-४९
कर्तृकरणयो. २-३-१८
कर्तृकरणे कृता. २-१-३२
कर्तृकर्मणोः कृति २-३-६५
कर्तृकर्मणोश्च. ३-३-१२७
कर्तृस्थे चाशरीरे. १-३-३७
कर्त्रोर्जीवपुरुषयो. ३-४-४३
कर्मण उकञ् ५-१-१०२
कर्मणा यमभि. १-४-३२
कर्मणि घटोऽठच् ५-२-३५
कर्मणि च २-२-१४
कर्मणि च येन. ३-३-११६
कर्मणि दृशि. ३-४-२९
कर्मणि द्वितीया २-३-२
कर्मणि भृतौ ३-२-२२
कर्मणि हनः ३-२-८६
कर्मणीनिनँ. ३-२-९३
कर्मणो रोमन्थ. ३-१-१५
कर्मण्यग्न्या. ३-२-९२
कर्मण्यण् ३-२-१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मण्यधिकरणे च ३-३-९३
कर्मण्याक्रोशे. ३-४-२५
कर्मधारयवद्. ८-१-११
कर्मधारयेऽनिष्ठा ६-२-४६
कर्मन्दकृशा. ४-३-१११
कर्मप्रवचनीययुक्ते. २-३-८
कर्मप्रवचनीयाः १-४-८२
कर्मवत् कर्मणा. ३-१-८७
कर्मवेषाद् यत् ५-१-९९
कर्मव्यतिहारे. ३-३-४३
कर्माध्ययने वृत्तम् ४-४-६३
कर्षात्वतो घञन्त. ६-१-१५४
कलापिनोऽण् ४-३-१०८
कलापिवैशम्पा. ४-३-१०४
कलाप्यश्वत्थय. ४-३-४८
कलेर्ढक् ४-२-८
कल्याण्यादी. ४-१-१२६
कवं चोष्णे ६-३-१०७
कव्यध्वरपृतन. ७-४-३९
कषादिषु यथा. ३-४-४६
कष्टाय क्रमणे ३-१-१४
कस्कादिषु च ८-३-४८
कस्य च दः ५-३-७२
कस्येत् ४-२-२५

का

काण्डाण्डादी. ५-२-१११
काण्डान्तात् क्षेत्रे ४-१-२३
कानाम्रेडिते ८-३-१२
का पथ्यक्षयोः ६-३-१०४
कापिश्याः ष्फक् ४-२-९९
कामप्रवेदने. ३-३-१५३
काम्यच्च ३-१-९
कारकाद्दत्त. ६-२-१४७
कारके १-४-२३
कारनाम्नि च ६-३-१०
कारस्करो वृक्षः ६-१-१५१
कारे सत्यागदस्य ६-३-७०
कार्तकौजपादय. ६-२-३७
कार्मस्ताच्छील्ये ६-४-१७२
कालप्रयोजना. ५-२-८१
कालविभागे. ३-३-१३७
कालसमयवे. ३-३-१६७
कालाः २-१-२८
कालाः परिमा. २-२-५
कालाच्च ५-४-३३
कालाट्ठञ् ४-३-११
कालात् ५-१-७७
कालात् साधुपु. ४-३-४३
कालाद् यत् ५-१-१०६
कालाध्वनोरत्यन्त. २-३-५
कालेभ्यो भव. ४-२-३४
कालोपसर्जने. १-२-५७
कव्यपुरीषपुरी. ३-२-६५
काश्यपकौशि. ४-३-१०३
काश्यादिभ्य. ४-२-११६
कासूगोणीभ्यां. ५-३-९०
कास्तीराजस्तु. ६-१-१५०
कास्प्रत्ययादाम. ३-१-३५

कि

किंकिलास्त्य. ३-३-१४६
किं क्रियाप्रश्ने. ८-१-४४
किं क्षेपे २-१-६४
किंयत्तदो निर्धा. ५-३-९२
किंवृत्तं च चिद्. ८-१-४८
किंवृत्ते लिँङ्. ३-३-१४४
किंवृत्ते लिप्सा. ३-३-६
किंसर्वनामबहु. ५-३-२
कितः ६-१-१६०
किति च ७-२-११८
किदाशिषि ३-४-१०४
किमः कः ७-२-१०३
किमः क्षेपे ५-४-७०
किमः संख्याप. ५-२-४१
किमश्च ५-३-२५
किमिदंभ्यां. ५-२-४०
किमेत्तिङव्य. ५-४-११
किमोऽत् ५-३-१२
किरतौ लवने ६-१-१३५
किरश्च पञ्चभ्यः ७-२-७५
किशरादिभ्यः .४-४-५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कु

कुगतिप्रादयः २-२-१८
कुटीशमीशुण्डा. ५-३-८८
कुण्डं वनम् ६-२-१३५
कु तिहो: ७-२-१०४
कुत्वा डुपच् ५-३-८९
कुत्सने च ८-१-६९
कुत्सितानि. २-१-५३
कुत्सिते ५-३-७४
कुप्वोः≈क≈पौ च ८-३-३७
कुमति च ८-४-१३
कुमहद्भ्याम. ५-४-१०५
कुमारः श्रम. २-१-७०
कुमारशीर्ष. ३-२-५१
कुमारश्च ६-२-२६
कुमार्यां वयसि ६-२-९५
कुमुदनड. ४-२-८७
कुम्भपदी. ५-४-१३९
कुरुगार्हपत. ६-२-४२
कुरुनादिभ्यो. ४-१-७०
कुर्वादिभ्यो ण्यः ४-१-१५१
कुलकुक्षिग्रीवा. ४-२-९६
कुलटाया वा ४-१-१२७
कुलत्थकोपधादण् ४-४-४
कुलात्खः ४-१-१३९
कुलालादिभ्यो. ४-३-११८
कुलिजाल्लु. ५-१-५४
कुल्माषादञ् ५-२-८३
कुशाग्राच्छः ५-३-१०५
कुषिरञ्जोः प्राचां .३-१-९०
कुसीददशैकाद. ४-४-३१
कुसूलकूपकुम्भ. ६-२-१०२
कुस्तुम्बुरूणि. ६-१-१३८
कुहोश्चुः ७-४-६२
कूलतीरतूल. ६-२-१२०
कूलसूदस्थल. ६-२-१२८
कृकणपर्णाद्भार. ४-२-१४५
कृच्छ्रगहनयोः ७-२-२२
कृञः प्रयत्ने २-३-५३
कृञः श च ३-३-१००
कृञो द्वितीयतृ. ५-४-५८
कृञो हेतुता. ३-२-२०
कृञ्चाऽनुप्रयु. ३-१-४०
कृत-लब्ध-क्रीत. ४-३-३८
कृते ग्रन्थे ४-३-११६
कृत्तद्धितसमा. १-२-४६
कृत्यचः ८-४-२८
कृत्यतुल्याख्या. २-१-६८
कृत्यल्युँटो बहु. ३-३-११३
कृत्याः ३-१-९५
कृत्यानां. २-३-७१
कृत्यार्थे तवै. ३-४-१४
कृत्याश्च ३-३-१७१
कृत्यैरधिकार्थ. २-१-३३
कृत्यैर्ऋणे २-१-४३
कृत्योकेष्णुच्चा. ६-२-१५९
कृत्वोऽर्थप्रयोगे. २-३-६४
कृदतिङ् ३-१-९३
कृन्मेजन्तः १-१-३८
कृपो रो लँः ८-२-१८
कृभ्वस्तियोगे. ५-४-५०
कृ मृ दृ रुहि. ३-१-५९
कृषेश्छन्दसि ७-४-६४
कृसभृवृस्तु. ७-२-१३
कॄ धान्ये ३-३-३०
केकयमित्रयु. ७-३-२
केऽणः ७-४-१४
केदाराद् यञ्च ४-२-४०
केवलमामक. ४-१-३०
केशाद् वोऽन्यतर. ५-२-१०९
केशाश्वाभ्यां य. ४-२-४८
कोः कत्तत्पुरु. ६-३-१०१
कोपधाच्च ४-२-७९
कोपधाच्च ४-३-१३५
कोपधादण् ४-२-१३२
कोशाड्ढञ् ४-३-४२
कौमारापूर्व. ४-२-१३
कोरव्यमाण्डू. ४-१-१९
कौशल्यकार्मा. ४-१-१५५
क्ङिति च १-१-५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तक्तवतू निष्ठा १-१-२५
क्तस्य च वर्तमाने २-३-६७
क्तादल्पाख्यायाम् ४-१-५१
क्तिच्क्तौ च सं. ३-३-१७४
क्ते च ६-२-४५
क्तेन च पूजा. २-२-१२
क्तेन नञ्विशि. २-१-६०
क्तेनाहोरात्रा. २-१-४५
क्ते नित्यार्थे ६-२-६१
क्तोऽधिकरणे. ३-४-७६
क्त्रेर्मम् नित्यम् ४-४-२०
क्त्वा च २-२-२२
क्त्वातोसुँन्क. १-१-३९
क्त्वापि च्छन्द. ७-१-३८
क्त्वि स्कन्दिस्य. ६-४-३१
क्त्वो यक् ७-१-४७
क्यङ्मानि. ६-३-३६
क्यचि च ७-४-३३
क्यच्व्योश्च ६-४-१५२
क्यस्य विभाषा ६-४-५०
क्याच्छन्दसि ३-२-१७०
क्रतुयज्ञेभ्यश्च ४-३-६८
क्रतूक्थादिसूत्रा. ४-२-६०
क्रतौ कुण्डपाय्य. ३-१-१३०
क्रत्वादयश्च ६-२-११७
क्रमः परस्मै. ७-३-७६
क्रमश्च क्त्वि ६-४-१८
क्रमादिभ्यो. ४-२-६१
क्रय्यस्तदर्थे ६-१-७९
क्रव्ये च ३-२-६९
क्रियार्थोपपदस्य. २-३-१४
क्रियासमभिहारे. ३-४-२
क्रीङ्जीनां णौ ६-१-४७
क्रीडोऽनुसंपरि. १-३-२१
क्रीतवत् परिमा. ४-३-१५४
क्रीतात् करणपूर्वात् ४-१-५०
क्रुधद्रुहेर्ष्यासू. १-४-३७
क्रुधद्रुहोरुपसृ. १-४-३८
क्रुधमण्डार्थेभ्य. ३-२-१५१
क्रौडचादिभ्यश्च ४-१-८०
क्र्यादिभ्यः श्ना ३-१-८१
क्लिशः क्त्वा. ७-२-५०
क्वणो वीणायां च ३-३-६५
क्वसुँश्च ३-२-१०७
क्वाति ७-२-१०५
क्विँन्प्रत्ययस्य. ८-२-६२
क्विँप् च ३-२-७६
क्षत्राद् घः ४-१-१३८
क्षयो निवासे ६-१-१९६
क्षचयजचयौ श. ६-१-७८
क्षायो मँः ८-२-५३
क्षिप्रवचने लृँट् ३-३-१३३
क्षियः ६-४-५९
क्षियाशीः प्रैषेषु. ८-२-१०४
क्षियो दीर्घात् ८-२-४६
क्षीराड्ढञ् ४-२-२०
क्षुद्रजन्तवः २-४-८
क्षुद्राभ्यो वा ४-१-१३१
क्षुद्राभ्रमरवट. ४-३-११९
क्षुब्धस्वान्त. ७-२-१८
क्षुभ्नादिषु च ८-४-३८
क्षुल्लकश्च वैश्व. ६-२-३९
क्षेत्रियच् परक्षेत्रे. ५-२-९२
क्षेपे २-१-४७
क्षेपे द्वि. ६-२-१०७
क्षेममप्रियमद्रे. ३-२-४४
क्सस्याचि ७-३-७२

ख

खः सर्वधुरात् ४-४-७८
ख च ४-४-१३२
खचि ह्रस्वः ६-४-९४
खट्वा क्षेपे २-१-२६
खण्डिकादि. ४-२-४५
खनो घ च ३-३-१२५
खरवसानयोर्वि. ८-३-१५
खरि च ८-४-५४
खलगोरथात् ४-२-५०
खलयवमाष. ५-१-७
खार्या ईकन् ५-१-३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खार्याः प्राचाम् ५-४-१०१
खित्यनव्ययस्य ६-३-६६
खिदेश्छन्दसि ६-१-५१
ख्यत्यात् परस्य ६-१-१०८

ग

गतिकारकोप. ६-२-१३८
गतिबुद्धिप्रत्यव. १-४-५२
गतिरनन्तरः ६-२-४९
गतिर्गतौ ८-१-७०
गतिश्च १-४-५९
गत्यर्थकर्मणि. २-३-१२
गत्यर्थलोँटा. ८-१-५१
गत्यर्थाकर्मक. ३-४-७२
गत्वरश्च ३-२-१६४
गदमदचरयम. ३-१-१००
गन्तव्यपण्यं. ६-२-१३
गन्धनावक्षेपण. १-३-३२
गन्धस्येदुत्पूति. ५-४-१३५
गमः क्वौ ६-४-४०
गमश्च ३-२-४७
गमहनजनखन. ६-४-९८
गमेरिट् परस्मै. ७-२-५८
गम्भीराञ्ज्यः ४-३-५८
गर्गादिभ्यो यञ् ४-१-१०५
गर्तोत्तरपदाच्छः ४-२-१३७
गर्हायां लँडपि. ३-३-१४२
गर्हायां च ३-३-१४९
गवाश्वप्रभृतीनि २-४-११
गवियुधिभ्यां. ८-३-९५
गस्थकन् ३-१-१४६
गहादिभ्यश्च ४-२-१३८
गाङ्कुटादिभ्यो. १-२-१
गाङ् लिँटि २-४-४९
गाण्डचजगात्. ५-२-११०
गातिस्थाघुपा. २-४-७७
गाथिविदथिके. ६-४-१६५
गाधलवणयोः .६-२-४
गापोष्टक् ३-२-८
गिरेश्च सेनकस्य ५-४-११२
गडादिभ्यष्ठञ् ४-४-१०३
गुणवचनब्राह्म. ५-१-१२३
गुणोऽपृक्ते ७-३-९१
गुणो यङ्लुकोः ७-४-८२
गुणोऽर्तिसंयो. ७-४-२९
गुपूधूपविच्छि. ३-१-२८
गुपेश्छन्दसि ३-१-५०
गुप्तिज्किद्भ्यः सन् ३-१-५
गुरोरनृतोऽनन्त्य. ८-२-८६
गुरोश्च हलः ३-३-१०३
गृधिवञ्च्योः प्रल. १-३-६९
गृष्टचादिभ्यश्च ४-१-१३६
गृहपतिना संयुक्ते. ४-४-९०
गेहे कः ३-१-१४४
गोः पादान्ते ७-१-५७
गोचरसंचर. ३-३-११९
गोतन्तियवं. ६-२-७८
गोतो णित् ७-१-९०
गोत्रक्षत्रियाख्ये. ४-३-९९
गोत्रचरणा. ५-१-१३३
गोत्रचरणाद् वुँञ् ४-३-१२६
गोत्रस्त्रियाः .४-१-१४७
गोत्रादङ्कवत् ४-३-८०
गोत्राद्यू. प्र. ४-१-९४
गोत्रान्तेवासि. ६-२-६९
गोत्रावयवात् ४-१-७९
गोत्रे कुञ्जादिभ्य. ४-१-९८
गोत्रेऽलुगचि ४-१-८९
गोत्रोक्षोष्ट्रो. ४-२-३९
गोद्व्यचोऽसंख्या. ५-१-३८
गोधाया ढ्रक् ४-१-१२९
गोपयसोर्यत् ४-३-१५८
गोपुच्छाट्ठञ् ४-४-६
गोबिडालसिंह. ६-२-७२
गोयवाग्वोश्च ४-२-१३६
गोरतद्धितलुकि ५-४-९२
गोश्च पुरीषे ४-३-१४३
गोषदादिभ्यो. ५-२-६२
गोष्ठात् खञ् भूत. ५-२-१८
गोष्पदं सेविता. ६-१-१४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोस्त्रियोरुप. १-२-४८
गौः सादसादि. ६-२-४१
ग्रन्थान्ताधिके च ६-३-७९
ग्रसितस्कभित. ७-२-३४
ग्रहवृदृनिश्चि. ३-३-५८
ग्रहिज्यावयिव्य. ६-१-१६
ग्रहोऽलिँटि दीर्घः ७-२-३७
ग्रामः शिल्पिनि ६-२-६२
ग्रामकौटाभ्यां च. ५-४-९५
ग्रामजनपदैक. ४-३-७
ग्रामजनबन्धु. ४-२-४३
ग्रामात् पर्यनुपूर्वात् ४-३-६१
ग्रामाद् यखञौ ४-२-९४
ग्रामेऽनिवसन्तः ६-२-८४
ग्राम्यपशुसङ्घेष्व. १-२-७३
ग्रीवाभ्योऽण् च ४-३-५७
ग्रीष्मवसन्ताद. ४-३-४६
ग्रीष्मावरसमाद्. ४-३-४९
ग्रो यङि ८-२-२०
ग्लाजिस्थश्च. ३-२-१३९

घ

घक्रालतनेषु. ६-३-१७
घच्छौ च ४-४-११७
घञः सास्यां. ४-२-५८
घञपोश च २-४-३८
घञि च भाव. ६-२-२७
घनिलचौ च ५-३-७९
घरूपकल्प. ६-३-४३
घसिभसोर्हलि. ६-४-१००
घुमास्थागापा. ६-४-६६
घुषिरविशब्दने ७-२-२३
घेर्ङिति ७-३-१११
घोर्लोपो लेँटि ७-३-७०
घोषादिषु च ६-२-८५
घ्वसोरेद्धाव. ६-४-११९

ङ

ङमो ह्रस्वादचि. ८-३-३२
ङयि च ६-१-२०७
ङसिँङसोश्च ६-१-१०६
ङसिँङ्योः स्मा. ७-१-१५
ङिच्च १-१-५२
ङिति ह्रस्वश्च १-४-६
ङे प्रथमयोरम् ७-१-२८
ङेराम्नद्याम्नीभ्यः ७-३-११६
ङेर्यः ७-१-१३
ङ्णोः कुँक्टुँक्. ८-३-२८
ङ्यापोः संज्ञा. ६-३-६३
ङ्याप्प्रातिपदि. ४-१-१
ङ्याश्छन्दसि. ६-१-१७३

च

चक्षिङः ख्याञ् २-४-५४
चङि ६-१-११
चङ्यन्तर. ६-१-२१३
चजो कुँ घिण्ण्यतोः ७-३-५२
चटकाया ऐरक् ४-१-१२८
चतुरः शसि ६-१-१६२
चतुरनडुहो. ७-१-९८
चतुर्थी चाशिष्या. २-३-७३
चतुर्थी तदर्था. २-१-३६
चतुर्थी तदर्थे ६-२-४३
चतुर्थी सम्प्रदाने २-३-१३
चतुर्थ्यर्थे बहु. २-३-६२
चतुष्पादो गर्भि. २-१-७१
चतुष्पाद्भ्यो. ४-१-१३५
चनचिदिव. ८-१-५७
चरणे ब्रह्मचा. ६-३-८६
चरणेभ्यो धर्म. ४-२-४६
चरति ४-४-८
चरफलोश्च ७-४-८७
चरेष्टः ३-२-१६
चर्मणोऽञ् ५-१-१५
चर्मोदरयोः पूरेः ३-४-३१
चलनशब्दा. ३-२-१४८
चवायोगे प्रथमा ८-१-५९
चादयोऽसत्वे १-४-५७
चादिलोपे विभा. ८-१-६३
चादिषु च ८-१-५८
चाभ्यासस्य द्वि. ८-३-६४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चायःकी ६-१-२१
चायःकी ६-१-३४
चार्थे द्वन्द्वः २-२-२९
चाहलोप. ८-१-६२
चिणो लुक् ६-४-१०४
चिण्णमुँलोर्दी. ६-४-९३
चिण् ते पदः ३-१-६०
चिण् भावकर्मणोः ३-१-६६
चितः ६-१-१५८
चितेः कपि ६-३-१२७
चित्तवति नित्यम् ५-१-८८
चित्याग्निचित्ये च ३-१-१३२
चित्रीकरणे च ३-३-१५०
चिदिति चोप ८-२-१०१
चिन्तिपूजि. ३-३-१०५
चिस्फुरोर्णौ ६-१-५३
चीरमुपमानम् ६-२-१२६
चुटू १-३-७
चूर्णादिनिँः ४-४-२३
चूर्णादीन्यप्रा. ६-२-१३३
चेकखेटकटुक ६-२-१२५
चेले क्नोपेः ३-४-३३
चोः कुः ८-२-३०
चौ ६-१-२१७
चौ ६-३-१३८
च्छ्वोः शूडनु. ६-४-१९
च्लिँ लुँङि ३-१-४३
च्लेँः सिँच् ३-१-४४
च्वौ च ७-४-२६

छ

छगलिनो ढि. ४-३-१०९
छ च ४-२-२८
छत्रादिभ्यो णः ४-४-६२
छदिरुपधिबलेर्ढञ् ५-१-१३
छन्दसि गत्यर्थे. ३-३-१२९
छन्दसि घस् ५-१-१०५
छन्दसि च ५-१-६६
छन्दसि च ५-४-१४२
छन्दसि च ६-३-१२६
छन्दसि ठञ् ४-३-१९
छन्दसि निष्ट. ३-१-१२३
छन्दसि परि. ५-२-८९
छन्दसि परेऽपि १-४-८०
छन्दसि पुनर्व. १-२-६१
छन्दसि लिँट् ३-२-१०५
छन्दसि लुँङ्लङ् .३-४-६
छन्दसि वनस. ३-२-२७
छन्दसि वा प्रा. ८-३-४९
छन्दसि शायज. ३-१-८४
छन्दसि सहः ३-२-६३
छन्दसीरः ८-२-१५
छन्दसो निर्मिते ४-४-९३
छन्दसो यदणौ ४-३-७१
छन्दस्यनेकमपि. ८-१-३५
छन्दस्यपि दृश्यते ६-४-७३
छन्दस्यपि दृश्यते ७-१-७६
छन्दस्युभयथा ३-४-११७
छन्दस्युभयथा ६-४-५
छन्दस्युभयथा ६-४-८६
छन्दस्यृदवग्रहात् ८-४-२५
छन्दोगौक्थि. ४-३-१२९
छन्दोनाम्नि च ३-३-३४
छन्दोनाम्नि च ८-३-९४
छन्दोब्राह्मणानि. ४-२-६६
छात्र्यादयः शा. ६-२-८६
छादेर्घेऽद्व्युपस. ६-४-९६
छाया बाहुल्ये २-४-२२
छे च ६-१-७१
छेदादिभ्यो नि. ५-१-६३

ज

जक्षित्यादयः षट् ६-१-६
जङ्गलधेनुवल. ७-३-२५
जनपदतद. ४-२-१२४
जनपदाशब्दा. ४-१-१६६
जनपदिनां ज. ४-३-१००
जनपदे लुप् ४-२-८१
जनसनखनक्रम. ३-२-६७
जनसनखनां स. ६-४-४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनिकर्तुः प्रकृतिः १-४-३०
जनिता मन्त्रे ६-४-५३
जनिवध्योश्च ७-३-३५
जपजभदहदश. ७-४-८६
जम्ब्वा वा ४-३-१६३
जम्भा सुहरित. ५-४-१२५
जयः करणम् ६-१-१९७
जराया जरस. ७-२-१०१
जल्पभिक्षकुट्ट. ३-२-१५५
जश्शसोः शि ७-१-२०
जसः शी ७-१-१७
जसि च ७-३-१०९
जहातेश्च ६-४-११६
जहातेश्च क्त्वि ७-४-४३
जागरूकः ३-२-१६५
जाग्रोऽविचिण्ण. ७-३-८५
जातरूपेभ्यः ४-३-१५१
जातिकालसु. ६-२-१६९
जातिनाम्नः कन् ५-३-८१
जातिरप्राणिनाम् २-४-६
जातुयदोर्लिंङ् ३-३-१४७
जातेरस्त्रीविषया. ४-१-६३
जातेश्च ६-३-४१
जात्यन्ताच्छ. ५-४-९
जात्याख्याया. १-२-५८
जात्वपूर्वम् ८-१-४७
जानपदकुण्ड. ४-१-४२
जान्तनशां वि. ६-४-३२
जायाया निङ् ५-४-१३४
जालमानायः ३-३-१२४
जासिनिप्रहण. २-३-५६
जिघ्रतेर्वा ७-४-६
जिदृक्षिविश्री. ३-२-१५७
जिह्वामूलाङ्गुले. ४-३-६२
जीर्यतेरतृन् ३-२-१०४
जीवति तु. ४-१-१६३
जीविकार्थे चा. ५-३-९९
जीविकोपनिषः १-४-७८
जुचङ्क्रम्यद. ३-२-१५०
जुष्टार्पिते च. ६-१-२०४
जुसि च ७-३-८३
जुहोत्यादिभ्यः २-४-७५
जॄव्रश्च्योः क्त्वि ७-२-५५
जॄस्तम्भुम्रुचुँम्लु. ३-१-५८
जे प्रोष्ठपदानम् ७-३-१८
ज्ञाजनोर्जा ७-३-७९
ज्ञाश्रुस्मृदृशां १-३-५७
ज्ञोऽविदर्थस्य. २-३-५१
ज्य च ५-३-६१
ज्यश्च ६-१-४१
ज्यादादीयसः ६-४-१६०
ज्योतिरायुषः ८-३-८३
ज्योतिर्जनपद. ६-३-८५
ज्योत्स्नातमि. ५-२-११४
ज्वरत्वरस्रिव्य. ६-४-२०
ज्वलितिक. ३-१-१४०

झ

झयः ५-४-१११
झयः ८-२-१०
झयो होऽन्यतर. ८-४-६१
झरो झरि सवर्णे ८-४-६४
झलां जशोऽन्ते ८-२-३९
झलां जश् झशि ८-४-५२
झलो झलि ८-२-२६
झल्युपोत्तमम् ६-१-१७५
झषस्तथोर्धोऽधः ८-२-४०
झस्य रन् ३-४-१०५
झेर्जुस् ३-४-१०८
झोऽन्तः ७-१-३

ञ

ञितश्च तत्प्र. ४-३-१५३
ञीतः क्तः ३-२-१८७
ञ्नित्यादिर्नि. ६-१-१९२
ञ्यादयस्तद्राजाः ५-३-११९

ट

टाङसिँङसामिना. ७-१-१२
टाबृचि ४-१-९
टिड्ढाणञ्द्वय. ४-१-१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टित आत्मनेपदा. ३-४-७९
टेः ६-४-१४३
टेः ६-४-१५५
ट्वितोऽथुच् ३-३-८९

ठ

ठक्छौ च ४-२-८४
ठगायस्थानेभ्यः ४-३-७५
ठञ् कवचिनश्च ४-२-४१
ठस्येकः ७-३-५०
ठाजादावूर्ध्वं द्वि. ५-३-८३

ड

डः सि धुँट् ८-३-२९
डति च १-१-२४
डाबुभाभ्याम. ४-१-१३
ड्वितः क्त्रिः ३-३-८८
ड्वुन्नसंज्ञायाम् द्वि. ५-१-२४

ढ

ढकि लोपः ४-१-१३३
ढक्च मण्डूकात् ४-१-११९
ढश्छन्दसि ४-४-१०६
ढे लोपोऽकद्र्वाः ६-४-१४७
ढो ढे लोपः ८-३-१३
ढ्रलोपे पूर्वस्य. ६-३-१११

ण

णचः स्त्रियामञ् ५-४-१४
णलुत्तमो वा ७-१-९१
णिचश्च १-३-७४
णिनि ६-२-७९
णिश्रिद्रुस्रु. ३-१-४८
णेरणौ यत्कर्म. १-३-६७
णेरध्ययने वृत्तम् ७-२-२६
णेरनिटि ६-४-५१
णेर्विभाषा ८-४-२९
णेश्छन्दसि ३-२-१३७
णो नः ६-१-६३
णौ गमिरबोधने २-४-४६
णौ चङ्युपधा. ७-४-१
णौ च सँश्चङोः २-४-५१
णौच सँश्चङोः ६-१-३१
ण्य आवश्यके ७-३-६५
ण्यक्षत्रियार्ष २-४-५८
व्यासश्रन्थो युँच् ३-३-१०७
ण्युँट् च ३-१-१४७
ण्वुँल्तृचौ ३-१-१३३

त

तङानावात्मने. १-४-९९
तत आगतः ४-३-७४
तत्पुरुषः २-१-२२
तत्पुरुषः समा. १-२-४२
तत्पुरुषस्याङ्गु .५-४-८६
तत्पुरुषे कृति. ६-३-१४
तत्पुरुषे तुल्यार्थ. ६-२-२
तत्पुरुषे शाला. ६-२-१२२
तत्पुरुषोऽनञ्कर्म. २-४-१९
तत्प्रकृतवचने. ५-४-२१
तत्प्रत्यन्वव. ४-४-२८
तत्प्रत्ययस्य च ७-३-२९
तत्प्रयोज़को. १-४-५५
तत्र २-१-४६
तत्र कुशलः पथः ५-२-६३
तत्र च दीयते. ५-१-९५
तत्र जातः ४-३-२५
तत्र तस्येव ५-१-११५
तत्र तेनेदमिति. २-२-२७
तत्र नियुक्तः ४-४-६९
तत्र भवः ४-३-५३
तत्र विदित इति च ५-१-४२
तत्र साधुः ४-४-९८
तत्रोद्धृतमम. ४-२-१४
तत्रोपपदं सप्त. ३-१-९२
तत्सर्वादेः ५-२-७
तथा युक्तं चानी. १-४-५०
तदधीते तद्वेद ४-२-५९
तदधीनवचने ५-४-५४
तदर्थं विकृतेः. ५-१-१२
तदर्हति ५-१-६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदर्हम् ५-१-११६
तदशिष्यं संज्ञा. १-२-५३
तदस्मिन्नधिक. ५-२-४५
तदस्मिन्नन्नं. ५-२-८२
तदस्मिन्नस्ती. ४-२-६७
तदस्मिन् वृ. ५-१-४६
तदस्मै दीयते ४-४-६६
तदस्य तदस्मि. ५-१-१६
तदस्य पण्यम् .४-४-५१
तदस्य परिमाणम् ५-१-५६
तदस्य ब्रह्मचर्यम् ५-१-९३
तदस्य सञ्जातं. ५-२-३६
तदस्य सोढम् ४-३-५२
तदस्यां प्रहरण. ४-२-५७
तदस्यास्त्य. ५-२-९४
तदोः सँः साव.७-२-१०६
तदो दा च ५-३-१९
तद् गच्छति पथि. ४-३-८५
तद्धरतिवहत्या. ५-१-४९
तद्धितश्चासर्व. १-१-३७
तद्धितस्य ६-१-१५९
तद्धिताः ४-१-७६
तद्धितार्थोत्तर. २-१-५१
तद्धितेष्वचामादेः ७-२-११७
तद्युक्तात् कर्मणो. ५-४-३६
तद्राजस्य बहुषु. २-४-६२
तद् वहतिरथ. ४-४-७६
तद्वानासामुप. ४-४-१२५
तनादिकृञ्भ्य. ३-१-७९
तनादिभ्यस्त. २-४-७९
तनिपत्योश्छन्द. ६-४-९९
तनूकरणे तक्षः ३-१-७६
तनोतेर्यकि ६-४-४४
तनोतेर्विभाषा ६-४-१७
तन्त्रादचिराप. ५-२-७०
तपः सहस्राभ्यां . ५-२-१०२
तपरस्तत्कालस्य १-१-६९
तपस्तपः कर्म ३-१-८८
तपोऽनुतापे च ३-१-६५
तप्तनप्तनथनाश्च ७-१-४५
तमधीष्टो भृतोभू. ५-१-७९
तयोरेव कृत्य. ३-४-७०
तयोर्दार्हिलौ च . ५-३-२०
तयोर्य्वावचि. ८-२-१०८
तरति ४-४-५
तरप्तमपौ घः १-१-२१
तवकममका. ४-३-३
तवममौ ङसि ७-२-९६
तवै चान्तश्च ६-२-५१
तव्यत्तव्यानीयरः ३-१-९६
तसिँलादिष्वाकृ. ६-३-३५
तसिँश्च ४-३-११३
तसैँश्च ५-३-८
तसौ मत्वर्थे १-४-१९
तस्थस्थमिपां. ३-४-१०१
तस्माच्छसो नः ६-१-९९
तस्मादित्युत्तरस्य १-१-६६
तस्मान्नुँडचि ६-३-७४
तस्मान्नुँड् द्विहलः ७-४-७१
तस्मिन्नणि च. ४-३-२
तस्मिन्निति. १-१-६५
तस्मै प्रभवति. ५-१-१००
तस्मै हितम् ५-१-५
तस्य च दक्षि. ५-१-९४
तस्य तात् ७-१-४४
तस्य धर्म्यम् ४-४-४७
तस्य निमित्तं. ५-१-३७
तस्य निवासः ४-२-६९
तस्य परमाम्रे. ८-१-२
तस्य पाकमूले. ५-२-२४
तस्य पूरणे डट् ५-२-४८
तस्य भावस्त्व. ५-१-११८
तस्य लोपः १-३-९
तस्य वापः ५-१-४४
तस्य विकारः ४-३-१३२
तस्य व्याख्यान. ४-३-६६
तस्य समूहः ४-२-३७
तस्यादित उदा. १-२-३२
तस्यापत्यम् ४-१-९२
तस्येदम् ४-३-१२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्येश्वरः ५-१-४१
ताच्छील्यव. ३-२-१२९
तादौ च निति ६-२-५०
तान्येकवचन. १-४-१०१
ताभ्यामन्यत्रो. ३-४-७५
तालादिभ्योऽण् ४-३-१५०
तावतिथं ग्रहण. ५-२-७७
तासस्त्योर्लोपः ७-४-५०
तासि च क्लृपः ७-२-६०
तास्यनुदात्ते. ६-१-१८१
तिककितवादि. २-४-६८
तिकादिभ्यः .४-१-१५४
तिङश्च ५-३-५६
तिङस्त्रीणि त्री. १-४-१००
तिङि चोदात्तवति ८-१-७१
तिङो गोत्रादी. ८-१-२७
तिङ्ङतिङ : ८-१-२८
तिङ्शित् सार्व. ३-४-११३
ति च ७-४-८९
ति तु त्र त थ. ७-२-९
तित्तिरिवर. ४-३-१०२
तित्स्वरितम् ६-१-१८०
तिप्तस्झिसिप्. ३-४-७८
तिप्यनस्तेः ८-२-७३
तिरसस्तिर्यलोपे ६-३-९४
तिरसोऽन्यतर. ८-३-४२
तिरोऽन्तर्धौ १-४-७०
तिर्यच्यपवर्गे ३-४-६०
ति विंशतेर्डिति ६-४-१४२
तिष्ठतेरित् ७-४-५
तिष्ठद्गुप्रभृ. २-१-१७
तिष्यपुनर्वस्वो. १-२-६३
तिसृभ्यो जसः ६-१-१६१
तीररूप्योत्तर. ४-२-१०६
तीर्थे ये ६-३-८७
तीषसहलुभ. ७-२-४८
तुग्राद्घन् ४-४-११५
तुजादीनां दीर्घो. ६-१-७
तुदादिभ्यः शः ३-१-७७
तुन्दशोकयोः परि. ३-२-५
तुन्दादिभ्य. ५-२-११७
तुन्दिबलि. ५-२-१३९
तुपश्यपश्यता .८-१-३९
तुभ्यमह्यौ ङयि ७-२-९५
तुमर्थाच्च भाव. २-३-१५
तुँमर्थे सेसेनसे. ३-४-९
तुमुँण्ण्वुँलौ क्रिया. ३-३-१०
तुरिष्ठेमेयः सु ६-४-१५४
तुरुस्तुशम्यमः. ७-३-९५
तुल्यार्थैरतुलोप. २-३-७२
तुल्यास्यप्रयत्नं १-१-९
तुश्छन्दसि ५-३-५९
तुह्योस्तातँङ्ङा. ७-१-३५
तूदीशलातुर .४-३-९४
तूष्णीमि भुवः ३-४-६३
तृजकाभ्यां कर्तरि २-२-१५
तृज्वत् क्रोष्टुः ७-१-९५
तृणह इम् ७-३-९२
तृणे च जातौ ६-३-१०३
तृतीया कर्मणि ६-२-४८
तृतीया च होश्छ .२-३-३
तृतीया तत्कृता .२-१-३०
तृतीयादिषु भा. ७-१-७४
तृतीयाप्रभृती. २-२-२१
तृतीयार्थे १-४-८४
तृतीयासप्तम्यो. २-४-८४
तृतीयासमासे १-१-२९
तृन् ३-२-१३५
तृषिमृषिकृषेः .१-२-२५
तृफलभजत्रपश्च ६-४-१२२
तेँ तद्राजाः ४-१-१७२
तेन क्रीतम् ५-१-३६
तेन तुल्यं क्रि. ५-१-११४
तेन दीव्यति. ४-४-२
तेन निर्वृत्तम् ४-२-६८
तेन निर्वृत्तम् ५-१-७८
तेन परिजय्य. ५-१-९२
तेन प्रोक्तम् ४-३-१०१
तेन यथाकथा. ५-१-९७
तेन रक्तं रागात् ४-२-१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेन वित्तश्चु. ५-२-२६
तेन सहेति तुल्य. २-२-२८
तेनैकदिक् ४-३-११२
ते प्राग् धातोः १-४-७९
तेमयावेकवच. ८-१-२२
तोः षि ८-४-४२
तोर्लि ८-४-५९
तौ सत् ३-२-१२७
त्यदादिषु दृशो. ३-२-६०
त्यदादीनामः ७-२-१०२
त्यदादीनि च १-१-७३
त्यदादीनि सर्वै. १-२-७२
त्यागरागहास. ६-१-२११
त्रपुजतुनोः षुंक् ४-३-१३६
त्रसिगृधिधृषि. ३-२-१४०
त्रिंशच्चत्वारिंश. ५-१-६१
त्रिककुत् पर्वते ५-४-१४७
त्रिचतुरोः स्त्रियां ७-२-९९
त्रिप्रभृतिषु शा. ८-४-४९
त्रेः सम्प्रसारणं च ५-२-५५
त्रेस्त्रयः ६-३-४८
त्रेस्त्रयः ७-१-५३
त्वमावेकवचने ७-२-९७
त्वामौ द्वितीयायाः ८-१-२३
त्वाहौ सौ ७-२-९४
त्वे च ६-३-६४

थ

थँट् चच्छन्दसि ५-२-५०
थलि च सेटि ६-४-१२१
थलि च सेटीड. ६-१-१९१
थाथघञ्क्ताजबि. ६-२-१४३
थासः से ३-४-८०
था हेतौ चच्छ. ५-३-२६
थो न्थः ७-१-८७

द

दंशसञ्जस्वञ्जां. ६-४-२५
दक्षिणादाच् ५-३-३६
दक्षिणापश्चात्पुर. ४-२-९८
दक्षिणेर्मा लु. ५-४-१२६
दक्षिणोत्तराभ्या. ५-३-२८
दण्डव्यवस. ५-४-२
दण्डादिभ्यो यः ५-१-६५
ददातिदधात्यो. ३-१-१३९
दधस्तथोश्च ८-२-३८
दधातेर्हिः ७-४-४२
दध्नष्ठक् ४-२-१८
दन्त उन्नत. ५-२-१०६
दन्तशिखात्. ५-२-११३
दम्भ इच्च ७-४-५६
दयतेर्दिगि. ७-४-९
दयायासश्च ३-१-३७
दश्च ७-२-१०९
दश्च ८-२-७५
दस्ति ६-३-१२४
दाणश्च सा चे. १-३-५५
दाण्डिनायन. ६-४-१७४
दादेर्धातोर्घः ८-२-३२
दाधर्ति दर्धर्ति. ७-४-६५
दाधा घ्वदाप् १-१-१९
दाधेट्सिशदस. ३-२-१५९
दानीं च ५-३-१८
दामन्यादित्रि. ५-३-११६
दामहायनान्ताच्च ४-१-२७
दाम्नीशसयुयुज. ३-२-१८२
दायाद्यं दायादे ६-२-५
दाशगोघ्नौ सम्प्र. ३-४-७३
दाश्वान्साह्वा. ६-१-१२
दिक्शब्दा ग्राम. ६-२-१०३
दिक्शब्देभ्यः ५-३-२७
दिक्पूर्वपदाट्ठञ्च ४-३-६
दिक्पूर्वपदाद. ४-२-१०७
दिक्पूर्वपदान् ङीप् ४-१-६०
दिक्संख्ये संज्ञा. २-१-५०
दिगादिभ्यो. ४-३-५४
दिङ्नामान्यन्त. २-२-२६
दित्यदित्यादित्य. ४-१-८५
दिव उत् ६-१-१२७
दिव औत् ७-१-८४
दिवः कर्म च १-४-४३
दिवसश्च पृथि. ६-३-३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवस्तदर्थस्य २-३-५८
दिवादिभ्यः ३-१-६९
दिवाविभानि. ३-२-२१
दिवो झल् ६-१-१७८
दिवो द्यावा ६-३-२९
दिवोऽविजिगी. ८-२-४९
दिशोऽमद्राणाम् ७-३-१३
दिष्टिवितस्त्यो. ६-२-३१
दीङो युँडचि. ६-४-६३
दीधीवेवीटाम् १-१-६
दीपजनबुध. ३-१-६१
दीर्घ इणः किति ७-४-६९
दीर्घकाशतुषभ्रा. ६-२-८२
दीर्घजिह्वी च. ४-१-५९
दीर्घं च १-४-१२
दीर्घाच्च वरुणस्य ७-३-२३
दीर्घाज्जसि च. ६-१-१०१
दीर्घात् प्र. ६-१-७३
दीर्घादटि समान. ८-३-९
दीर्घादाचार्या. ८-४-५१
दीर्घोऽकितः ७-४-८३
दीर्घो लघोः ७-४-९४
दुःखात् प्राति. ५-४-६४
दुन्योरनुपसर्गे ३-१-१४२
दुरस्युर्द्रविण. ६-४-३६
दुष्कुलाड्ढक् ४-१-१४२
दुहः कब् घँश्च ३-२-७०
दुहश्च ३-१-६३
दूतस्य भागक. ४-४-१२०
दूराद् धूते च ८-२-८४
दूरान्तिकार्थेभ्यो. २-३-३५
दूरान्तिकार्थैः २-३-३४
दृक्स्ववस्स्वत. ७-१-८३
दृग्दृशवतुँषु ६-३-८९
दृढः स्थूलबल. ७-२-२०
दृतिकुक्षिकल. ४-३-५६
दृशेः क्वनिँप् ३-२-९४
दृशेविख्ये च ३-४-११
दृष्टं साम २-३-४७
देयमृणे ४-३-४७
देये त्रा च ५-४-५५
देवताद्वन्द्वे च ६-२-१४०
देवताद्वन्द्वे च ६-३-२६
देवताद्वन्द्वे च ७-३-२१
देवतान्तात्ता. ५-४-२४
देवपथादि. ५-३-१००
देवब्रह्मणोरनु. १-२-३८
देवमनुष्यपुरुष. ५-४-५६
देवसुम्नयोर्यजुषि. ७-४-३८
देवात् तल् ५-४-२७
देविकाशिंशपा. ७-३-१
देविक्रुशोश्चोप. ३-२-१४७
देशे लुबिल. ५-२-१०५
दैवयज्ञिशौचि. ४-१-८१
दो दद् घोः ७-४-४६
दोषो णौ ६-४-९०
द्यतिस्यतिमा. ७-४-४०
द्यावापृथिवीशु. ४-२-३२
द्युतिस्वाप्योः .७-४-६७
द्युद्भ्यो लुँङि १-३-९१
द्युद्रुभ्यां मः ५-२-१०८
द्युप्रागपागुदक्.४-२-१०१
द्रवमूर्तिस्पर्शयोः .६-१-२४
द्रव्यं च भव्ये ५-३-१०४
द्रोणपर्वतजीव. ४-१-१०३
द्रोश्च ४-३-१५९
द्वन्द्वं रहस्य. ८-१-१५
द्वन्द्वमनोज्ञा. ५-१-१३२
द्वन्द्वश्च प्राणितूर्य. २-४-२
द्वन्द्वाच्चुदषहा. ५-४-१०६
द्वन्द्वाच्छः ४-२-६
द्वन्द्वाद् वुँन् वैर. ४-३-१२५
द्वन्द्वे घि २-२-३२
द्वन्द्वे च १-१-३०
द्वन्द्वोपतापगर्ह्या. ५-२-१२८
द्वारादीनां च ७-३-४
द्विगुरेकवचनम् २-४-१
द्विगुश्च २-१-२३
द्विगोः ४-१-२१
द्विगोः ष्ठँश्च ५-१-५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विगोर्यप् ५-१-८१
द्विगोर्लुगनपत्ये ४-१-८८
द्विगोर्वा ५-१-८५
द्विगौ क्रतौ ६-२-९७
द्विगौ प्रमाणे ६-२-१२
द्वितीयतृतीयच. २-२-३
द्वितीयाटौस्स्वेनः २-४-३४
द्वितीया ब्राह्मणे २-३-६०
द्वितीयायां च ३-४-५३
द्वितीयायां च ७-२-८७
द्वितीया श्रिता. २-१-२४
द्वितीये चानुपा. ६-३-८०
द्वित्रिचतुर्भ्यः .५-४-१८
द्वित्रिपूर्वान्नि. ५-१-३०
द्वित्रिभ्यां ष. ५-४-११५
द्वित्रिभ्यां तय. ५-२-४३
द्वित्रिभ्यामञ्जलेः ५-४-१०२
द्वित्रिभ्यां पाद्द. ६-२-१९६
द्वित्र्योश्च धमुँञ् ५-३-४५
द्विदण्डयादि. ५-४-१२८
द्विर्वचनेऽचि १-१-५८
द्विवचनविभ. ५-३-५७
द्विषत्परयोस्तापेः ३-२-३९
द्विषश्च ३-४-११२
द्विषोऽमित्रे ३-२-१३१
द्विस्तावात्रि. ५-४-८४
द्विस्त्रिश्चतु. ८-३-४३
द्वीपादनुसमुद्रं. ४-३-१०
द्वेस्तीयः ५-२-५४
द्वैपवैयाघ्रा. ४-२-१२
द्व्यचः ४-१-१२१
द्व्यचश्छन्दसि ४-३-१४८
द्व्यचोऽतस्तिङः ६-३-१३५
द्व्यजृद्ब्राह्मण. ४-३-७२
द्व्यञ्मगधकलि. ४-१-१६८
द्व्यन्तरुपसर्गेभ्यो. ६-३-९७
द्व्यष्टनः संख्याया. ६-३-४७
द्व्येकयोर्द्विवचनैक. १-४-२२

ध

धः कर्मणि ष्ट्रन् ३-२-१८१
धनगणं लब्धा ४-४-८४
धनहिरण्यात् कामे ५-२-६५
धनुषश्च ५-४-१३२
धन्ययोपधाद् वुँञ् ४-२-१२१
धर्मं चरति ४-४-४१
धर्मपथ्यर्थन्याया. ४-४-९२
धर्मशीलवर्णा. ५-२-१३२
धर्मादनिच् केवलात् ५-४-१२४
धातुसम्बन्धे .३-४-१
धातोः ३-१-९१
धातोः ६-१-१५७
धातोः कर्मणः. ३-१-७
धातोरेकाचो .३-१-२२
धातोस्तन्निमि. ६-१-७७
धात्वादेः षः सः ६-१-६२
धान्यानां भवने. ५-२-१
धारेरुत्तमर्णः १-४-३५
धि च ८-२-२५
धिन्विकृण्व्योर. ३-१-८०
धुरो यड्ढकौ ४-४-७७
धूमादिभ्यश्च ४-२-१२७
धृषिशसी वै. ७-२-१९
ध्रुवमपायेऽपादा. १-४-२४
ध्वमो ध्वात् ७-१-४२
ध्वाङ्क्षेण क्षेपे २-१-४२

न

नः क्ये १-४-१५
न कपि ७-४-१४
न कर्मव्यतिहारे ७-३-६
न कवतेर्यङि ७-४-६३
न कोपधायाः ६-३-३७
न क्तिचि दीर्घश्च ६-४-३९
न क्त्वा सेट् १-२-१८
न क्रोडादिबह्व. ४-१-५६
न क्वादेः ७-३-५९
नक्षत्राद् घः ४-४-१४१
नक्षत्राद् वा ८-३-१००
नक्षत्रे च लुपि २-३-४५
नक्षत्रेण युक्तः. ४-२-३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नक्षत्रेभ्यो बहु. ४-३-३७
नखमुखात् संज्ञा. ४-१-५८
न गतिहिंसार्थे. १-३-१५
नगरात् कुत्सन. ४-२-१२८
न गुणादयोऽव. ६-२-१७५
न गोपवनादि. २-४-६७
नगोऽप्राणिष्व. ६-३-७७
न गोश्वन्सा. ६-१-१७७
न ङिसम्बु. ८-२-८
न चवाहाहै. ८-१-२४
न च्छन्दस्य. ७-४-३५
नञ् २-२-६
नञः शुचीश्वर. ७-३-३०
नञस्तत्पुरुषात् ५-४-७१
नञो गुणप्रति. ६-२-१५४
नञो जरमरमि. ६-२-११५
नञ् दुः सुभ्यो. ५-४-१२१
नञ्सुभ्याम् ६-२-१७१
नडशादाड्ड्व. ४-२-८८
नडादिभ्यः फक् ४-१-९९
नडादीनां कुँक् च ४-२-९१
न तिसृचतसृ ६-४-४
नते नासिकायाः. ५-२-३१
न तौल्वलिभ्यः २-४-६१
न दण्डमाणवा. ४-३-१३०
न दधिपय. २-४-१४
नदीपौर्णमा. ५-४-११०
नदी बन्धुनि ६-२-१०८
नदीभिश्च २-१-२०
न दुहस्नुनमां. ३-१-८९
न दृशः ३-१-४७
नद्याः शेषस्या. ६-३-४४
नद्यादिभ्यो ढक् ४-२-९७
नद्यां मतुँप् ४-२-८५
नद्यृतश्च ५-४-१५३
न द्वयचः प्राच्य. ४-२-११३
न धातुलोप आर्ध. १-१-४
नध्याख्यापॄमू. ८-२-५७
न नञ् पूर्वात् तत्पुरुषा. ५-१-१२०
न निर्धारणे २-२-१०
न निविभ्याम् ६-२-१८०
ननौ पृष्टप्रति. ३-२-१२०
नन्दिग्रहिपचा. ३-१-१३४
न न्द्राः संयोगादयः ६-१-३
नन्वित्यनुज्ञैष. ८-१-४३
नन्वोर्विभाषा ३-२-१२१
न पदान्तद्विर्व. १-१-५७
न पदान्ताट्टोर. ८-४-४१
नपरे नँः ८-३-२७
न पादम्याङ्य. १-३-८९
नपुंसकमनपुंसके. १-२-६९
नपुंसकस्य झलचः ७-१-७२
नपुंसकाच्च ७-१-१९
नपुंसकादन्य. ५-४-१०९
नपुंसके भावे. ३-३-११४
न पूजनात् ५-४-६९
न प्राच्यभर्गा. ४-१-१७६
न बहुव्रीहौ १-१-२८
न भकुर्छुराम् ८-२-७९
न भाभूपूकमि. ८-४-३३
न भूताधिकसं. ६-२-९१
न भू वाच् चि. ६-२-१९
न भूसुधियोः ६-४-८५
न भ्राणनपान्न. ६-३-७५
नमः स्वस्तिस्वा. २-३-१६
न मपूर्वोऽपत्ये. ६-४-१७०
नमस्पुरसोर्गत्योः ८-३-४०
न माङ्योगे ६-४-७४
नमिकम्पिस्म्य. ३-२-१६७
न मु ने ८-२-३
नमोवरिवश्चित्र. ३-१-१९
न यः ३-२-१५२
न यदि ३-२-११३
न यद्यनाकाङ्क्षे ३-४-२३
न यासयोः ७-३-४५
न य्वाभ्यां पदा. ७-३-३
न रपरसृपिसृ. ८-३-११०
न रुधः ३-१-६४
नरे संज्ञायाम् ६-३-१२९
न लिँङि ७-२-३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न लुँट् ८-१-२९
न लुमताऽङ्गस्य १-१-६२
न लोकाव्यय. २-३-६९
नलोपः प्रातिपदि. ८-२-७
नलोपः सुँप्स्वर. ८-२-२
न लोपो नञः ६-३-७३
न ल्यपि ६-४-६९
न वशः ६-१-२०
न विभक्तौ तुस्माः १-३-४
न वृद्भ्यश्चतुर्भ्यः ७-२-५९
नवेति विभाषा १-१-४३
न व्यो लिँटि ६-१-४५
न शब्दश्लोक. ३-२-२३
न शंसददवादि. ६-४-१२६
नशेः षान्तस्य ८-४-३५
नशेर्वा ८-२-६३
नश्च ८-३-३०
नश्च धातुस्थो. ८-४-२६
नश्चापदान्तस्य. ८-३-२४
नश्छव्यप्रशान् ८-३-७
न षट्स्वस्रादिभ्यः ४-१-१०
न संयोगाद् वमन्तात् ६-४-१३७
न संख्यादेः .५-४-८९
न संज्ञायाम् ५-४-१५५
नसत्तनिषत्तानु. ८-२-६१
न सम्प्रसारणे सं. ६-१-३६
न सामिवचने ५-४-५
न सुदुर्भ्यां केव. ७-१-६८
न सुब्रह्मण्यायां. १-२-३७
नस्तद्धिते ६-४-१४४
नह प्रत्यारम्भे ८-१-३१
न हास्तिनफ. ६-२-१०१
नहिवृतिवृषि. ६-३-११६
नहो धः ८-२-३४
नाग्लोपिशास्वृ. ७-४-२
नाचार्यराजर्त्वि. ६-२-१३२
नाज्झलौ १-१-१०
नाञ्चेः पूजायाम् ६-४-३०
नाडीतन्त्र्योः .५-४-१५९
नाडीमुष्टचोश्च ३-२-३०
नातः परस्य ७-३-२७
नादिचि ६-१-१००
नादिन्याक्रोशे. ८-४-४७
नाद् घस्य ८-२-१७
नाधार्थप्रत्यये .३-४-६२
नानद्यतनवत्. ३-३-१३५
नानोर्ज्ञः १-३-५८
नान्तादसंख्या. ५-२-४९
नाभ्यस्तस्याचि. ७-३-८७
नाभ्यस्ताच्छतुः ७-१-७८
नामन्त्रिते समा. ८-१-७३
नामन्यतरस्याम् ६-१-१७२
नामि ६-४-३
नाम्न्यादिशि. ३-४-५८
नाम्रेडितस्या. ६-१-९६
नावो द्विगोः ५-४-९९
नाव्ययदिक् .६-२-१६७
नाव्ययीभावाद. २-४-८३
नासिकास्तन. ३-२-२९
नासिकोदरौ. ४-१-५५
निकटे वसति ४-४-७३
निगरणचलना. १-३-८७
निगृह्यानुयोगे च ८-२-९४
निघो निमितम् ३-३-८७
निजां त्रयाणां. ७-४-७५
नित्यं करोतेः ६-४-१०८
नित्यं कौटिल्ये. ३-१-२३
नित्यं क्रीडाजी. २-२-१७
नित्यं ङितः ३-४-९९
नित्यं छन्दसि ४-१-४६
नित्यं छन्दसि ७-४-८
नित्यं पणः परि. ३-३-६६
नित्यं मन्त्रे ६-१-२०५
नित्यं वृद्धशरा. ४-३-१४२
नित्यं शतादिमा. ५-२-५७
नित्यं संज्ञाछन्द. ४-१-२९
नित्यं सपत्न्या. ४-१-३५
नित्यं समासे. ८-३-४५
नित्यं स्मयतेः ६-१-५६
नित्यं हस्तेपा. १-४-७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यमसिँच् प्रजा. ५-४-१२२
नित्यवीप्सयोः ८-१-४
निनदीभ्यां. ८-३-८९
निन्दहिंसक्लि. ३-२-१४६
निपात एकाजनाङ् १-१-१४
निपातस्य च ६-३-१३६
निपातैर्यद्यदिह. ८-१-३०
निपानमाहावः ३-३-७४
निमूलसमूलयोः. ३-४-३४
निरः कुषः ७-२-४६
निरभ्योः पूल्वोः ३-३-२८
निरुदकादीनि च ६-२-१८३
निर्वाणोऽवाते ८-२-५०
निर्वृत्तेऽक्षद्यू. ४-४-१९
निवाते वात. ६-२-८
निवासचिति. ३-३-४१
निव्यभिभ्यो. ८-३-११९
निशाप्रदोषा. ४-३-१४
निष्कुलान्निष्को. ५-४-६२
निष्ठा २-२-३६
निष्ठा ३-२-१०२
निष्ठा च द्व्यज. ६-१-२००
निष्ठायां सेटि ६-४-५२
निष्ठायामण्यदर्थे ६-४-६०
निष्ठा शीङ्स्वि. १-२-१९
निष्ठोपमानाद. ६-२-१६८
निष्ठोपसर्गपूर्व. ६-२-१०९
निष्प्रवाणिश्च ५-४-१६०
निसमुपविभ्यो. १-३-३०
निसस्तपता. ८-३-१०२
नीग्वञ्चुँस्रंसुँ. ७-४-८४
नीचैरनुदात्तः १-२-३०
नीतौ च तद्युक्तात् ५-३-७७
नुँगतोऽनुनासि. ७-४-८५
नुदविदोन्द. ८-२-५६
नुँम्विसर्जनीय. ८-३-५८
नृ च ६-४-६
नृ चान्यतर. ६-१-१७९
नॄन् पे ८-३-१०
नेटि ७-२-४
नेटचलिँटि रधेः ७-१-६२
नेड् वशि कृति ७-२-८
नेतराच्छन्दसि ७-१-२६
नेदमदसोरकोः ७-१-११
नेन्द्रस्य परस्य ७-३-२२
नेन्सिद्धबध्ना. ६-३-१९
नेयँङुवँङ्स्थाना. १-४-४
नेरनिधाने ६-२-१९१
नेर्गदनदपत. ८-४-१७
नेर्बिडज्बिरी. ५-२-३२
नेर्विशः १-३-१७
नोङ्धात्वोः ६-१-१७०
नोत्तरपदेऽनु. ६-२-१४१
नोत्वद्वर्ध्रबि. ४-३-१४९
नोदात्तस्वरितो. ८-४-६६
नोदात्तोपदेश. ७-३-३४
नोनयतिध्वनय. ३-१-५१
नोपधात् थफा. १-२-२३
नोपधायाः ६-४-७
नौ गदनदपठ. ३-३-६४
नौ ण च ३-३-६०
नौद्व्यचष्ठन् ४-४-७
नौवयोधर्मविष. ४-४-९१
नौ वृ धान्ये ३-३-४८
न्यग्रोधस्य च. ७-३-५
न्यङ्क्वादीनां च ७-३-५३
न्यधी च ६-२-५३

प

पक्षात्तिः ५-२-२५
पक्षिमत्स्यमृ. ४-४-३५
पङ्क्ति विंशति. ५-१-५८
पङ्गोश्च ४-१-६८
पचो वँः ८-२-५२
पञ्चद्दशतौ. ५-१-५९
पञ्चमी भयेन २-१-३७
पञ्चमी विभक्ते २-३-४२
पञ्चम्यपाङ्परिभिः २-३-१०
पञ्चम्या अत् ७-१-३१
पञ्चम्याः पराव. ८-३-५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चम्याः स्तोका. ६-३-२
पञ्चम्यामजातौ ३-२-९८
पञ्चम्यास्तसिँल् ५-३-७
पणपादमाष. ५-१-३४
पतः पुँम् ७-४-१९
पतिः समास. १-४-८
पत्यन्तपुरोहि. ५-१-१२७
पत्यावैश्वर्ये ६-२-१८
पत्युर्नो यज्ञ. ४-१-३३
पत्रपूर्वादञ् ४-३-१२२
पथः पन्थ च ४-३-२९
पथः ष्कन् ५-१-७४
पथि च च्छन्दसि ६-३-१०८
पथिमथोः सर्व. ६-१-१९४
पथिमथ्यृभुक्षा. ७-१-८५
पथो विभाषा ५-४-७२
पथ्यतिथिवस. ४-४-१०४
पदमस्मिन् दृश्यम् ४-४-८७
पदरुजविशस्पृ. ३-३-१६
पदव्यवायेऽपि ८-४-३७
पदस्य ८-१-१६
पदात् ८-१-१७
पदान्तस्य ८-४-३६
पदान्तस्यान्य. ७-३-९
पदान्ताद् वा द्वि. ६-१-७३
पदास्वैरिबाह्या. ३-१-११९
पदेऽपदेशे ६-२-७
पदोत्तरपदं गृ. ४-४-३९
पद्दन्नोमास्हृ. ६-१-६१
पद्यत्यतदर्थे ६-३-५३
पन्थो ण नित्यम् ५-१-७५
परः सन्निकर्षः .१-४-१०८
परवल्लिङ्गं. २-४-२६
परश्च ३-१-२
परश्वधाट्ठञ्च ४-४-५८
परस्मिन् विभाषा ३-३-१३८
परस्मैपदानां. ३-४-८२
परस्य च ६-३-८
पराजेरसोढः १-४-२६
परादिश्छन्दसि ६-२-१९८
परावनुपात्यय. ३-३-३८
परावरयोगे च ३-४-२०
परावराधमोत्तम. ४-३-५
परिक्रयणे संप्र. १-४-४४
परिक्लिश्यमा. ३-४-५५
परिखाया ढञ् ५-१-१७
परिनिविभ्यः ८-३-७०
परिन्योर्नीणोर्द्यूता. ३-३-३७
परिपन्थं च तिष्ठति ४-४-३६
परिप्रत्युपापा. ६-२-३३
परिमाणाख्यायां .३-३-२०
परिमाणान्तस्यासं. ७-३-१७
परिमाणे पचः ३-२-३३
परिमुखं च ४-४-२९
परिवृतो रथः ४-२-१०
परिव्यवेभ्यः क्रियः १-३-१८
परिषदो ण्यः ४-४-४४
परिषदो ण्यः ४-४-१०१
परिस्कन्दः प्राच्य. ८-३-७५
परेरभितो भावि. ६-२-१८१
परेर्मृषः १-३-८२
परेर्वर्जने ८-१-५
परेश्च ८-३-७४
परेश्च घाङ्कयोः ८-२-२२
परोक्षे लिँट् ३-२-११५
परोवरपरम्पर. ५-२-१०
परौ घः ३-३-८४
परौ भुवोऽवज्ञाने ३-३-५५
परौ यज्ञे ३-३-४७
पर्पादिभ्यः ष्ठन् ४-४-१०
पर्यभिभ्यां च ५-३-९
पर्याप्तिवचनेष्व. ३-४-६६
पर्यायार्हर्णोत्प. ३-३-१११
पर्वताच्च ४-२-१४३
पर्श्वादियौधेया. ५-३-११७
पललसूपशाकं .६-२-१२७
पलाशादिभ्यो. ४-३-१३९
पश्च पश्चा च. ५-३-३३
पश्चात् ५-३-३२
पश्यार्थैश्चाना. ८-१-२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाककर्णपर्ण. ४-१-६४
पाघ्राध्माधेड्दृ .३-१-१३७
पाघ्राध्मास्था. ७-३-७८
पाणिघताडघौ .३-२-५५
पाण्डुकम्बला. ४-२-११
पातौ च बहुलम् ८-३-५२
पात्रात् ष्ठन् ५-१-४५
पात्राद् घँश्च ५-१-६७
पात्रेसमितादयश्च २-१-४८
पाथोनदीभ्यां .४-४-१११
पादः पत् ६-४-१३०
पादशतस्य. ५-४-१
पादस्य पदा. ६-३-५२
पादस्य लोपो. ५-४-१३८
पादार्घाभ्यां च ५-४-२५
पादोऽन्यतरस्याम् ४-१-८
पानं देशे ८-४-९
पापं च शिल्पिनि ६-२-६८
पापाणके कुत्सितैः २-१-५४
पाय्यसांनाय्य. ३-१-१२९
पारस्करप्रभृ. ६-१-१५२
पारायणतुरायण. ५-१-७१
पाराशर्यशि. ४-३-११०
पारेमध्ये षष्ठया. २-१-१८
पार्श्वेनान्विच्छति ५-२-७५
पाशादिभ्यो यः ४-२-४९
पितरामातरा. ६-३-३३
पिता मात्रा १-२-७०
पितुर्यच्च ४-३-७९
पितृव्यमातुल .४-२-३६
पितृष्वसुश्छण् ४-१-१३२
पिष्टाच्च ४-३-१४४
पीलाया वा ४-१-११८
पुंयोगादाख्या. ४-१-४८
पुंवत् कर्मधार. ६-३-४२
पुंसि संज्ञायां. ३-३-११८
पुंसोऽसुङ् ७-१-८९
पुँगन्तलघू. ७-३-८६
पुच्छभाण्डची. ३-१-२०
पुत्रः पुंभ्यः ६-२-१३१
पुत्राच्छ च ५-१-३९
पुत्रान्तादन्यतर. ४-१-१५९
पुत्रेऽन्यतरस्याम् ६-३-२२
पुमः खय्यम्परे ८-३-६
पुमान् स्त्रिया १-२-६७
पुरा च परीप्सा. ८-१-४२
पुराणप्रोक्तेषु. ४-३-१०५
पुरि लुँङ् चास्मे ३-२-१२२
पुरुषश्चान्वा .६-२-१८९
पुरुषहस्तिभ्या. ५-२-३८
पुरुषात् प्रमाणे. ४-१-२४
पुरे प्राचाम् ६-२-९९
पुरोऽग्रतोऽग्रेषु. ३-२-१८
पुरोऽव्ययम् १-४-६६
पुवः संज्ञायाम् ३-२-१८५
पुषादिद्युता. ३-१-५५
पुष्करादिभ्यो. ५-२-१३५
पुष्यसिध्यौ. ३-१-११६
पूः सर्वयोर्दारि. ३-२-४१
पूगाञ्ञ्योऽग्रा. ५-३-११२
पूगेष्वन्यतर. ६-२-२८
पूङः क्त्वा च १-२-२२
पूङश्च ७-२-५१
पूङ्यजोः शानन् ३-२-१२८
पूजनात् पूजित. ८-१-६७
पूजायां नान. ८-१-३७
पूतक्रतोरै च ४-१-३६
पूरणगुणसुहि. २-२-११
पूरणाद् भागे. ५-३-४८
पूरणार्धाट्ठन् ५-१-४७
पूर्णाद् विभाषा ५-४-१४९
पूर्वं तु भाषायाम् ८-२-९८
पूर्वकालैकसर्व. २-१-४९
पूर्वत्राऽसिद्धम् ८-२-१
पूर्वपदात् ८-३-१०६
पूर्वपदात् संज्ञा. ८-४-३
पूर्वपरावरदक्षि. १-१-३३
पूर्ववत् सनः १-३-६२
पूर्ववदश्ववडवौ २-४-२७
पूर्वसदृशसमो. २-१-३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वादिनिँ: ५-२-८६
पूर्वादिभ्यो. ७-१-१६
पूर्वाधरावराणा. ५-३-३९
पूर्वापरप्रथम. २-१-५८
पूर्वापराधरोत्तर. २-२-१
पूर्वाह्णापराह्णा. ४-३-२८
पूर्वे कर्तरि ३-२-१९
पूर्वे भूतपूर्वे ६-२-२२
पूर्वैः कृतमिनयौ च ४-४-१३३
पूर्वोऽभ्यासः ६-१-४
पृथग्विना. २-३-३२
पृथ्वादिभ्य. ५-१-१२१
पृषोदरादीनि. ६-३-१०९
पेषंवासवाहन. ६-३-५८
पैलादिभ्यश्च २-४-५९
पोटायुवति. २-१-६५
पोरदुपधात् ३-१-९८
पौरोडाशपुरो. ४-३-७०
प्यायः पी ६-१-२८
प्रकारवचने जाती. ५-३-६९
प्रकारवचने थाल् ५-३-२३
प्रकारे गुणव. ८-१-१२
प्रकाशनस्थे. १-३-२३
प्रकृत्याऽन्तः .६-१-१११
प्रकृत्या भगा. ६-२-१३६
प्रकृत्याशिषि ६-३-८३
प्रकृत्यैकाच् ६-४-१६३
प्रकृष्टे ठञ् ५-१-१०७
प्रजने वीयतेः ६-१-५४
प्रजने सर्तेः ३-३-७१
प्रजोरिनिँः ३-२-१५६
प्रज्ञादिभ्यश्च ५-४-३८
प्रज्ञाश्रद्धार्चा. ५-२-१०१
प्रणवष्टेः ८-२-८९
प्रणाय्यो. ३-१-१२८
प्रतिः प्रतिनि. १-४-९१
प्रतिकण्ठार्थ. ४-४-४०
प्रतिजनादि. ४-४-९९
प्रतिनिधिप्रति. २-३-११
प्रतिपथमे. ४-४-४२
प्रतिबन्धिचिर. ६-२-६
प्रतियोगे पञ्च. ५-४-४४
प्रतिश्रवणे. ८-२-९९
प्रतिष्कशश्च. ६-१-१४७
प्रतिस्तब्धनिस्त. ८-३-११४
प्रतेरंश्वादयस्त. ६-२-१९२
प्रतेरुरसः सप्त. ५-४-८२
प्रतेश्च ६-१-२५
प्रत्नपूर्वविश्वे. ५-३-१११
प्रत्यपिभ्यां ग्रहेः ३-१-११८
प्रत्यभिवादे. ८-२-८३
प्रत्ययः ३-१-१
प्रत्ययलोपे. १-१-६१
प्रत्ययस्थात् का. ७-३-४४
प्रत्ययस्य लुक्. १-१-६०
प्रत्ययोत्तरपद. ७-२-९८
प्रत्याङ्भ्यां श्रुवः १-३-५९
प्रत्याङ्भ्यां श्रुवःपूर्व.१-४-४०
प्रथने वाव. ३-३-३३
प्रथमचरम. १-१-३२
प्रथमयोःपूर्व. ६-१-९८
प्रथमानिर्दिष्टं. १-२-४३
प्रथमायाश्च. ७-२-८८
प्रथमोऽचिरोप. ६-२-५६
प्रधानप्रत्ययार्थ. १-२-५६
प्रनिरन्तःशरेक्षु .८-४-५
प्रभवति ४-३-८३
प्रभौ परिवृढ : ७-२-२१
प्रमदसंमदौ. ३-३-६८
प्रमाणे च ३-४-५१
प्रमाणे द्वयस.५-२-३७
प्रयच्छति गर्ह्यम् ४-४-३०
प्रयाजानुयाजौ .७-३-६२
प्रयैरोहिष्यै. ३-४-१०
प्रयोजनम् ५-१-१०८
प्रयोज्यनियो . ७-३-६८
प्रवाहणस्य ढे ७-३-२८
प्रवृद्धादीनां च ६-२-१४६
प्रशंसायां रूपप् ५-३-६६
प्रशंसावचनैश्च २-१-६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रशस्यस्य श्रः ५-३-६०
प्रश्ने चासन्न. ३-२-११७
प्रष्ठोऽग्रगामिनि ८-३-९२
प्रसमुपोदः पाद. ८-१-६
प्रसंभ्यां जानु .५-४-१२९
प्रसितोत्सुकाभ्यां. २-३-४४
प्रस्कण्वहरि. ६-१-१४८
प्रस्त्योऽन्यतर. ८-२-५४
प्रस्थपुरवहा.४-२-१२२
प्रस्थेऽवृद्धमक. ६-२-८७
प्रस्थोत्तरपद. ४-२-११०
प्रहरणम् ४-४-५७
प्रहासे च मन्यो.१-४-१०५
प्राक् कडारात्. २-१-३
प्राक् क्रीताच्छः ५-१-१
प्राक् सितादड्. ८-३-६३
प्रागिवात् कः ५-३-७०
प्रग्घिताद् यत् ४-४-७५
प्रागिदशो विभक्तिः ५-३-१
प्राग्दीव्यतोऽण् ४-१-८३
प्राग्रीश्वरान्निपाताः १-४-५६
प्राग्वतेष्ठञ् ५-१-१८
प्राग्वहतेष्ठक् ४-४-१
प्राचां कटादेः ४-२-१३९
प्राचां क्रीडायाम् ६-२-७४
प्राचां ग्रामनगरा. ७-३-१४
प्राचां नगरान्ते ७-३-२४
प्राचां ष्फ तद्धितः ४-१-१७
प्राचामवृद्धा. ४-१-१६०
प्राचामुपादेरड. ५-३-८०
प्राणभृज्जाति. ५-१-१२८
प्राणिरजता. ४-३-१५२
प्राणिस्थादातो.५-२-९६
प्रातिपदिकान्त.८-४-११
प्रातिपदिकार्थ. २-३-४६
प्रादय : प्र. १-४-५८
प्रादस्वाङ्गं संज्ञा. ६-२-१८२
प्राद्वहः १-३-८१
प्राध्वं बन्धने १-४-७७
प्राप्तापन्ने च द्विती. २-२-४
प्रायभवः ४-३-३९
प्रावृट्शरत्का. ६-३-१५
प्रावृष एण्यः ४-३-१७
प्रावृषष्ठप् ४-३-२६
प्रियवशे वदः ३-२-३८
प्रियस्थिरस्फि.६-४-१५७
प्रीतौ च ६-२-१६
प्रुसृल्व : सम. ३-१-१४९
प्रे दाज्ञ : ३-२-६
प्रे द्रुस्तुस्रुव : ३-३-२७
प्रे वणिजाम् ३-३-५२
प्रे लपसृद्रु . ३-२-१४५
प्रे लिप्सायाम् ३-३-४६
प्रेष्यब्रुवोर्हवि २-३-६१
प्रे स्त्रोऽयज्ञे ३-३-३२
प्रैषातिसर्ग . ३-३-१६३
प्रोक्ताल्लुक् ४-२-६४
प्रोपाभ्यां युजे. १-३-६४
प्रोपाभ्यां समर्था. १-३-४२
प्लक्षादिभ्योऽण् ४-३-१६२
प्लुतप्रगृह्या. ६-१-१२१
प्लुतावैच इदुतौ ८-२-१०६
प्वादीनां ह्रस्वः ७-३-८०

फ

फंक्फिञोरन्य. ४-१-९१
फणां च सप्ता. ६-४-१२५
फलेग्रहिरात्मं. ३-२-२६
फले लुकृ ४-३-१६१
फल्गुनीप्रोष्ठ. १-२-६०
फाण्टाहृतिमि. ४-१-१५०
फेनादिलच्च ५-२-९९
फेश्छ च ४-१-१४९

ब

बन्धने चर्षौ ४-४-९६
बन्धुनि बहुव्रीहौ ६-१-१४
बन्धे च विभाषा ६-३-१३
बभूथाततन्थ. ७-२-६४
बर्हिषि दत्तम् ४-४-११९
बलादिभ्यो. ५-२-१३६
बहुगणवतुं. १-१-२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुपुगगण. ५-२-५२
बहुप्रजाश्छ. ५-४-१२३
बहुलं छन्दसि २-४-३९
बहुलं छन्दसि २-४-७३
बहुलं छन्दसि २-४-७६
बहुलं छन्दसि ३-२-८८
बहुलं छन्दसि ५-२-१२२
बहुलं छन्दसि ६-१-३३
बहुलं छन्दसि ७-१-८
बहुलं छन्दसि ७-१-१०
बहुलं छन्दसि ७-१- १०३
बहुलं छन्दसि ७-३- ९७
बहुलं छन्दसि ७-४-७८
बहुलं छन्दस्य .६-४-७५
बहुलमाभीक्ष्ण्ये ३-२-८१
बहुवचनस्य. ८-१-२१
बहुवचने झल्येत् ७-३-१०३
बहुव्रीहाविद. ६-२-१६१
बहुव्रीहेरूधसो. ४-१-२५
बहुव्रीहेश्चान्तो. ४-१-२५
बहुव्रीहौ प्रकृत्या. ६-२-१
बहुव्रीहौ विश्वं. ६-२-१०६
बहुव्रीहौ सक्थ्य. ५-४-११३
बहुव्रीहौ संख्येये. ५-४-७३
बहुषु बहुवचनम् १-४-२१
बहोर्नञ्वदुत्तर. ६-२-१७४
बहोर्लोपो भू च. ६-४-१५८
बह्वच इञ : .२-४-६६
बह्वचः कूपेषु ४-२-७३
बह्वचोऽन्तो. ४-३-६७
बह्वचो मनुष्य. ५-३-७८
वह्वच्पूर्वपदा. ४-४-६४
बह्वन्यतरस्याम् ६-२-३०
बह्वल्पार्थाच्छस्. ५-४-४२
बह्वादिभ्यश्च ४-१-४५
बाष्पोष्मभ्या. ३-१-१६
बाह्वन्तात् संज्ञा. ४-१-६७
बाह्वादिभ्यश्च ४-१-९६
बिभेतेर्हेतुभये ६-१-५५
बिल्वकादिभ्य. ६-४-१५३
बिल्वादिभ्यो. ४-३-१३४
बिस्ताच्च ५-१-३१
बृहत्या आच्छादने ५-४-६
बुधयुधनशज. १-३-८६
ब्रह्मणस्त्वः ५-१-१३५
ब्रह्मणो जान. ५-४-१०४
ब्रह्मभ्रूणवृत्रे. ३-२-८७
ब्रह्महस्तिभ्यां .५-४-७८
ब्राह्मणकोष्णिके .५-२-७१
ब्राह्मणमाणव. ४-२-४२
ब्राह्मोऽजातौ ६-४-१७१
ब्रुव ईट् ७-३-९३
ब्रुवः पञ्चाना. ३-४-८४
ब्रूवो वचि : २-४-५३
ब्रूहिप्रेष्यश्रौष. ८-२-९१

भ

भक्ताख्यास्त. ६-२-७१
भक्ताण्णः ४-४-१००
भक्तादणन्य. ४-४-६८
भक्ति : ४-३-९५
भक्ष्येण मिश्री .२-१-३५
भजो ण्विः ३-२-१६१
भञ्जभासमिदो .३-२-१६१
भञ्जेश्च चिणि ६-४-३३
भय्यप्रवय्ये च. ६-१-८०
भर्गात् त्रैगर्ते ४-१-१११
भवतष्ठक्छसौ ४-२-११५
भवतेरः ७-४-७३
भविष्यति गम्या. ३-३-३
भविष्यति मर्यादा. ३-३-१३६
भवे छन्दसि ४-४-११०
भव्यगेयप्रवचनी. ३-४-६८
भस्त्रादिभ्य : ष्ठन् ४-४-१६
भस्त्रैषाजाज्ञा. ७-३-४७
भस्य ६-४-१२९
भस्य टेर्लोप : ७-१-८८
भागाद्यच्च ५-१-४८
भावकर्मणो : १-३-१३
भावलक्षणे. ३-४-१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाववचनाश्च ३-३-११
भावे ३-३-१८
भावे च ४-४-१४४
भावेऽनुपसर्गस्य ३-३-७५
भाषायां सदवस. ३-२-१०८
भासनोपसंभाषा. १-३-४७
भिक्षादिभ्यो ऽण् ४-२-३८
भिक्षासेनादाये. ३-२-१७
भित्तं शकलम् ८-२-५९
भिद्योद्ध्यौ. ३-१-११५
भियः क्रुक्लुकनौ ३-२-१७४
भियोऽन्यतर.६-४-११५
भियो हेतुभये. ७-३-४०
भीत्रार्थानां भय. १-४-२५
भीमादयोऽपा. ३-४-७४
भीरोः स्थानम् ८-३-८१
भीस्म्योर्हेतुभये १-३-६८
भीह्रीभृहुमद. ६-१-१८७
भीह्रीभृहुवां .३-१-३९
भुजन्युब्जौ. ७-३-६१
भुजोऽनवने १-३-६६
भुवः प्रभवः १-४-३१
भुवः संज्ञान्त.३-२-१७९
भुवश्च ३-२-१३८
भुवश्च ४-१-४७
भुवश्च महा. ८-२-७१
भुवो भावे ३-१-१०७
भुवो वुँग् लुँङ् . ६-४-८८
भूतपूर्वे चरट् ५-३-५३
भूते ३-२-८४
भूते च ३-३-१४०
भूतेऽपि दृश्यन्ते ३-३-२
भूवादयो धातवः १-३-१
भूषणेऽलम् १-४-६३
भूसुवोस्तिङि ७-३-८८
भृञामित् ७-४-७६
भृञोऽसंज्ञायाम् ३-१-११२
भृशादिभ्यो. ३-१-१२
भोज्यं भक्ष्ये ७-३-६९
भो भगो अघो. ८-३-१७
भौरिक्य्याद्यैषु. ४-२-५४
भ्यसो भ्यम् ७-१-३०
भ्रस्जो रोपधयो. ६-४-४७
भ्राजभासधु. ३-२-१७७
भ्राजभासभाष. ७-४-३
भ्रातरि च. ४-१-१६४
भ्रातुर्व्यच्च ४-१-१४४
भ्रातृपुत्रौ स्वसृ. १-२-६८
भ्रुवो वुँक् च ४-१-१२५

म

मघवा बहुलम् ६-४-१२८
मड्डुकझर्झरा. ४-४-५६
मतजनहलात्. ४-४-९७
मतिबुद्धिपूजा. ३-२-१८८
मतुँवसोँ रुँ सं. ८-३-१
मतोः पूर्व. ६-१-२१४
मतोश्च बह्वज.४-२-७२
मतौ च ४-४-१३६
मतौ छः सूक्त. ५-२-५९
मतौ बह्वचो. ६-३-११९
मत्वर्थे मास. ४-४-१२८
मदोऽनुपस. ३-३-६७
मद्रवृज्योः कन् ४-२-१३१
मद्रात् परिवापणे ५-४-६७
मद्रेभ्योऽञ् ४-२-१०८
मधुबभ्रुवोर्ब्राह्म. ४-१-१०६
मधोः ४-४-१३९
मधोर्ञ च ४-४-१२९
मध्याद् गुरौ ६-३-११
मध्यान्मः ४-३-८
मध्ये पदे निव. १-४-७५
मध्वादिभ्यश्च ४-२-८६
मनः ३-२-८२
मनः ४-१-११
मनसः संज्ञायाम् ६-३-४
मनुष्यतत्स्थ. ४-२-१३४
मनोरौ वा ४-१-३८
मनोर्जातावञ्. ४-१-१६१
मन्क्तिन्व्याख्या. ६-२-१५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्त्रे घसह्वर. २-४-८०
मन्त्रे वृषेषपच. ३-३-९६
मन्त्रे श्वेतवहो. ३-२-७१
मन्त्रेष्वाङ्चादे . ६-४-१४१
मन्त्रे सोमा. ६-४-१३१
मन्थौदनसक्तु . ६-३-६०
मन्यकर्मण्यना. २-३-१७
मपर्यन्तस्य ७-२-९१
मय उञो वो वा ८-३-३३
मयट् च ४-३-८२
मयड् वैतयो. ४-३-१४१
मयतेरिदन्य. ६-४-७०
मयूरव्यंसकाद. २-१-७२
मये च ४-४-१३८
मस्करमस्क. ६-१-१४९
मस्जिनशो. ७-१-६०
महाकुलाद .४-१-१४१
महान् व्रीह्यप . ६-२-३८
महाराजप्रोष्ठ. ४-२-३५
महाराजाट्ठञ् ४-३-९७
महेन्द्राद् घाणौ च ४-२-२९
माङि लुँङ् ३-३-१७५
माणवचरकाभ्यां. ५-१-११
मातरपितरा. ६-३-३२
मातु : पितुर्भ्याम.८-३-८५
मातुरुत्संख्या. ४-१-११५
मातृपितृभ्यां. ८-३-८४
मातृष्वसुश्च. ४-१-१३४
मात्रोपज्ञोप. ६-२-१४
माथोत्तरपद. ४-४-३७
मादुपधायाश्च. ८-२-९
मानपश्वङ्ग. ५-३-५१
माने वयः ४-३-१६०
मान्बधदान्. ३-१-६
मायायामण् ४-४-१२४
मालादीनां च ६-२-८८
मासाद् वयसि. ५-१-८०
मितनखे च ३-२-३४
मितां ह्रस्वः ६-४-९२
मित्रे चर्षौ ६-३-१३०
मिथ्योपपदा.१-३-७१
मिदचोऽन्त्या. १-१-४६
मिदेर्गुणः ७-३-८२
मिश्रं चानुप. ६-२-१५३
मीनातिमिनो . ६-१-४९
मीनातेर्निगमे ७-३-८१
मुखं स्वाङ्गम् ६-२-१६६
मुखनासिका. १-१-८
मुचोऽकर्मक. ७-४-५७
मुण्डमिश्र. ३-१-२१
मुद्गादण् ४-४-२५
मूर्तौ घन : ३-३-७७
मूलमस्याबर्हि४-४-८८
मृजेर्विभाषा ३-१-११३
मृजेर्वृद्धिः ७-२-११४
मृडमृदगुध. १-२-७
मृदस्तिकन् ५-४-३९
मृषस्तिति . १-२-२०
मेघर्तिभयेषु. ३-२-४३
मेर्नि : ३-४-८९
मोऽनुस्वार : ८-३-२३
मो नो धातो : ८-२- ६४
मो राजि सम :.८-३-२५
म्रियतेर् लुँङ्लि. १-३-६१
म्वोश्च ८-२-६५

य

यँ : सौ ७-२-११०
यङश्चाप् ४-१-७४
यङि च ७-४-३०
यङोऽचि च २-४-७४
यङो वा ७-३-९४
यचि भम् १-४-१८
यच्चयत्रयोः३-३-१४८
यजजपदशां यङः ३-२-१६६
यजध्वैनमिति च ७-१-४३
यजयाचयत. ३-३-९०
यजयाचरुच. ७-३-६६
यजुष्युर : ६-१-११३
यजुष्येकेषाम् ८-३-१०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यजेश्च करणे २-३-६३
यज्ञकर्मण्यजप. १-२-३४
यज्ञर्त्विग्भ्यां. ५-१-७०
यज्ञे समि स्तुव : ३-३-३१
यात्रोश्च २-४-६४
यञश्च ४-१-१६
यञिञोश्च ४-१-१०१
यञश्च ४-१-१०१
यतश्च निर्धारणम् २-३-४१
यतोऽनावः ६-१-२०८
यत्तदेतेभ्य : परि. ५-२-३९
यथातथयथापुर. ७-३-३१
यथातथयोरसू. ३-४-२८
यथामुखसंमुख. ५-२-६
यथाविध्यनुप्र. ३-४-४
यथासंख्यमनु. १-३-१०
यथा सादृश्ये २-१-७
यथास्वे यथा . ८-१-१४
यद्धितुपरं छन्द. ८-१-५६
यद्वृत्तान्नित्यम् ८-१-६६
यमः समुपनि. ३-३-६३
यमरमनमातां सँ. ७-२-७३
यमो गन्धने १-२-१५
ययतोश्चातदर्थे ६-२-१५५
यरोऽनुनासिके. ८-४-४४
यवयवकषष्टि. ५-२-३
यश्च यङ : ३-२-१७६
यसोऽनुपसर्गात् ३-१-७१
यस्कादिभ्यो . २-४-६३
यस्मात् प्रत्यय. १-४-१३
यस्मादधिकं यस्य. २-३-९
यस्य च भावेन. २-३-३७
यस्य चायाम : २-१-१६
यस्य विभाषा ७-२-१५
यस्य हल : ६-४-४९
यस्येति च ६-४-१४८
याजकादिभिश्च २-२-९
याज्यान्त : ८-२-९०
याडाप : ७-३-११३
याप्ये पाशप् ५-३-४७
यावति विन्द. ३-४-३०
यावत्पुरानिपा. ३-३-४
यावदवधारणे २-१-८
यावद्यथाभ्याम् ८-१-३६
यावादिभ्यः कन् ५-४-२९
यासुँट् परस्मै. ३-४-१०३
यीवर्णयोर्दी. ७-४-५३
युक्तारोह्या. ६-२-८१
युक्ते च ६-२-६६
युग्यं च पत्रे ३-१-१२१
युजेरसमासे ७-१-७१
युप्लुवोर्दीर्घ:. ६-४-५८
युवा खलति . २-१-६७
युवाल्पयोः क. ५-३-६४
युवावौ द्विव. ७-२-९२
युँवोँरनाकौ ७-१-१
युष्मत्ततत‌क्षु : .८-३-१०३
युष्मदस्मदोः .८-१-२०
युष्मदस्मदोरना. ७-२-८६
युष्मदस्मदोरन्य. ४-३-१
युष्मदस्मदोर्ङसि ६-१-२०६
युष्मदस्मद्भ्यां. ७-१-२७
युष्मद्युपपदे. १-४-१०४
यूनस्तिः ४-१-७७
यूनि लुक् ४-१-९०
यूयवयौ जसि ७-२-९३
यू स्त्र्याख्यौ नदी १-४-३
ये च ६-४-१०९
ये च तद्धिते ६-१-६०
ये चाभावकर्म.६-४-१६८
येन विधिस्तद. १-१-७१
येनाङ्गविकार : २-३-२०
ये यज्ञकर्मणि ८-२-८८
ये विभाषा ६-४-४३
येषां च विरोध : .२-४-९
योगप्रमाणे च . १-२-५५
योगाद् यच्च ५-१-१०१
योऽचि ७-२-८९
योजनं गच्छति ५-१-७३
योपधाद् गुरू. ५-१-१३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र

र ऋतो हला. ६-४-१६१
रक्ते ५-४-३२
रक्षति ४-४-३३
रक्षोयातूनां. ४-४-१२१
रङ्कोरमनुष्ये. ४-२-१००
रजः कृष्यासु. ५-२-११२
रञ्जेश्च ६-४-२६
रथवदयोश्च ६-३-१०२
रथाद् यत् ४-३-१२१
रदाभ्यां निष्ठातो. ८-२-४२
रधादिभ्यश्च ७-२-४५
रधिजभोरचि ७-१-६१
रभेरशब्लिंटो : ७-१-६३
रलो व्युपधाद् ध. १-२-२६
रश्मौ च ३-३-५३
रषाभ्यां नो णः .८-४-१
रसादिभ्यश्च ५-२-९५
राजदन्तादिषु. २-२-३१
राजनि युधि . ३-२-९५
राजन्यबहुवचन.६-२-३४
राजन्यादिभ्यो . ४-२-५३
राजन्वान् सौराज्ये ८-२-१४
राजश्वशुराद् यत् ४-१-१३७
राजसूयसूर्य. ३-१-११४
राजा च ६-२-५९
राजा च प्रशंसा . ६-२-६३
राजाह : सखि. ५-४-९१
राज्ञःकँ च ४-२-१४०
रात्राह्ना : पुं. २-४-२९
रात्रेः कृति वि. ६-३-७२
रात्रेश्चाजसौ ४-१-३१
रात्र्यहः संवत्स. ५-१-८६
रात् सस्य ८-२-२४
राधीक्ष्योर्यस्य. १-४-३९
राधो हिंसायाम् ६-४-१२३
रायो हलि ७-२-८५
राल्लोप : ६-४-२१
राष्ट्रावारपा . ४-२-९३
रिक्ते विभाषा ६-१-२०३
रिङ् शयग्लिँङ्क्षु ७-४-२८
रि च ७-४-५१
रीगृदुपधस्य च ७-४-९०
रीङृत : ७-४-२७
रुग्रिकौ च लुकि ७-४-९१
रुच्यर्थानां प्रीय. १-४-३३
रुजार्थानां भाव. २-३-५४
रुदविदमुष. १-२-८
रुदश्च पञ्चभ्य : ७-३-९८
रुदादिभ्यः सार्व. ७-२-७६
रुधादिभ्य : श्नम् ३-१-७८
रुष्यमत्वरसं .७-२-२८
रुहः पोऽन्यतर. ७-३-४३
रूपादाहतप्र. ५-२-१२०
रेवती जगती ४-४-१२२
रेवत्यादि. ४-१-१४६
रैवतिकादिभ्य. ४-३-१३१
रोँः सुपि ८-३-१६
रोगाख्यायां. ३-३-१०८
रोगाच्चापनयने ५-४-४९
रोणी ४-२-७८
रोपधेतो : प्रा. ४-२-१२३
रो रि ८-३-१४
रोऽसुँपि ८-२-६९
र्वोरुपधाया. ८-२-७६

ल

लः कर्मणि च. ३-४-६९
लः परस्मैपदम् १-४-९८
लक्षणहेत्वो : ३-२-१२६
लक्षणे जायाप. ३-२-५२
लक्षणेत्थंभूता. १-४-८९
लक्षणेनाभिप्रती. २-१-१४
लङः शाकटायन. ३-४-१११
लँटः शतृँशान .३-२-१२४
लँट् स्मे ३-२-११८
लभेश्च ७-१-६४
लवणाट्ठञ् ४-४-५२
लवणाल्लुक् ४-४-२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लशक्वतद्धिते १-३-८
लषपतपद . ३-२-१५४
लस्य ३-४-७७
लाक्षारोचना. ४-२-२
लिंङः सलोपो. ७-२-७९
लिंङ :सीयुँट् ३-४-१०२
लिँङर्थे लेँट् ३-४-७
लिँङाशिषि ३-४-११६
लिँङ् च ३-३-१५९
लिङ् चोर्ध्वमौ. ३-३-९
लिङ् चोर्ध्वमौ. ३-३-१६४
लिँङ्निमित्ते ३-३-१३९
लिँङ् यदि ३-३-१६८
लिँङयाशिष्यङ् ३-१-८६
लिँङ्सिँचावा. १-२-११
लिँङ्सिँचोरात्म. ७-२-४२
लिँट : कानज् वा ३-२-१०६
लिँटस्तभ्रयोरेशि. ३-४-८१
लिँटि धातोरनभ्या. ६-१-८
लिँटि वयो य : ६-१-३७
लिँट् च ३-४-११५
लिँटचन्यतर. २-४-४०
लिँटचभ्यासस्यो. ६-१-१७
लिँड्यडोश्च ६-१-२९
लिति ६-१-१८८
लिपिसिचिह्वश्च ३-१-५३
लिप्स्यमानसि. ३-३-७
लिय : संमानन. १-३-७०
लीलोर्नुँग्लुँकाव.७-३-३९
लुक् तद्धितलुकि १-२-४९
लुक् स्त्रियाम् ४-१-१०९
लुग्वा दुहदिह. ७-३-७३
लुँङ् ३-२-११०
लुँङि च २-४-४३
लुँङ्लँङ्लृँङ् .६-४-७१
लुँङ्सनोर्घस्लृँ २-४-३७
लुँट : प्रथमस्य. २-४-८५
लुँटि च क्लृप : १-३-९३
लुपसदचर. ३-१-२४
लुपि युक्तवद्. १-२-५१
लुप् च ४-३-१६४
लुबविशेषे ४-२-४ .
लुब्योगाप्रख्या. १-२-५४
लुभो विमोहने ७-२-५४
लुम्मनुष्ये ५-३-९८
लृँटः सद् वा ३-३-१४
लृँट् शेषे च ३-३-१३
लेँटोऽडाटौ ३-४-९४
लोकसर्वलोका. ५-१-४३
लोँटो लँङ्वत् ३-४-८५
लोँट् च ३-३-१६२
लोँट् च ८-१-५२
लोँडर्थलक्षणे च ३-३-८
लोप : पिबतेरी. ७-४-४
लोपःशाकल्यस्य ८-३-१९
लोपश्चास्यान्य. ६-४-१०७
लोपस्त आत्म. ७-१-४१
लोपे विभाषा ८-१-४५
लोपो यि ६-४-११८
लोपो व्योर्वलि ६-१-६४
लोमादिपामा. ५-२-१००
लोहितादिडा .३-१-१३
लोहितान्मणौ ५-४-३०
ल्यपि च ६-१-४०
ल्यपि लघुपूर्वात् ६-४-५६
ल्युँट् च ३-३-११५
ल्वादिभ्यः ८-२-४४

व

वच उम् ७-४-२०
वचिस्वपियजा. ६-१-१५
वचोऽशब्दसं. ७-३-६७
वञ्चिलुञ्च्यृ. १-२-२४
वञ्चेर्गतौ ७-३-६३
वतण्डाच्च ४-१-१०८
वतोँरिड् वा ५-१-२३
वतोरिथुँक् ५-२-५३
वत्सरान्ताच्छ. ५-१-९०
वत्सशालाभि.४-३-३६
वत्सांसाभ्यां. ५-२-९८
वत्सोक्षाश्व. ५-३-९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदः सुँपि क्यप्. ३-१-१०६
वदव्रजहल. ७-२-३
वनं समासे ६-२-१७७
वनगिर्यो : संज्ञा. ६-३-११७
वनं पुरगामिश्र. ८-४-४
वनो रँ च ४-१-७
वन्दिते भ्रातु : ५-४-१५७
वमोर्वा ८-४-२२
वयसि च ३-२-१०
वयसि दन्तस्य. ५-४-१४१
वयसि पूरणात् ५-२-१३०
वयसि प्रथमे ४-१-२०
वयस्यासु मूर्ध्नो. ४-४-१२७
वरणादिभ्यश्च ४-२-८२
वर्गान्ताच्च ४-३-६३
वर्ग्यादयश्च ६-२-१३०
वर्चस्केऽवस्कर : ६-१-१४३
वर्णदृढादिभ्यः ५-१-१२२
वर्णादनुदात्ता. ४-१-३९
वर्णाद् ब्रह्मचारि. ५-२-१३४
वर्णे चाऽनित्ये ५-४-३१
वर्णो वर्णेन २-१-६९
वर्णो वर्णेष्व. ६-२-३
वर्णौ वुँक् ४-२-१०३
वर्तमानसामीप्ये. ३-३-१३१
वर्तमाने लँट् ३-२-१२३
वर्णप्रमाण ऊ.३-४-३२
वर्षस्याऽभवि. ७-३-१६
वर्षाभ्यष्ठक् ४-३-१८
वर्षाभ्वश्च ६-४-८४
वर्षाल्लुक् च ५-१-८७
वले ६-३-११८
वँशं गत : ४-४-८६
वँश्चास्यान्य. ६-१-३८
वसतिक्षु. ७-२-५२
वसन्ताच्च ४-३-२०
वसन्तादिभ्य. ४-२-६३
वसुँ स्रंसुँ ध्वं. ८-२-७२
वसौः समूहे च ४-४-१४०
वसौः सम्प्रसा. ६-४-१३१
वस्तेर्ढञ् ५-३-१०१
वस्नक्रयविक्र. ४-४-१३
वस्नद्रव्याभ्यां. ५-१-५०
वस्वेकाजाद्घ. ७-२-६७
वहश्च ३-२-६४
वहाभ्रे लिहः ३-२-३२
वह्यं करणम् ३-१-१०२
वाकिनादीनां. ४-१-१५८
वा क्यष : १-३-९०
वाक्यस्य टे : प्लु.८-२-८२
वाक्यादेराम. ८-१-८
वा क्रोशदैन्य. ६-४-६१
वा गम : १-२-१३
वा घोषमिश्र. ६-३-५६
वाचंयमपुरं. ६-३-६९
वा चित्तविरागे ६-४-९१
वाचि यमो व्रते ३-२-४०
वाचो ग्मिनिँ. ५-२-१२४
वाचो व्याहृता. ५-४-३५
वा छन्दसि ३-४-८८
वा छन्दसि ६-१-१०२
वा जाते ६-२-१७०
वा जृभ्रमुँत्रसाम् ६-४-१२४
वातातीसारा. ५-२-१२९
वा दान्तशान्त. ७-२-२७
वा द्रुहमुह. ८-२-३३
वा नपुंसकस्य ७-१-७९
वा निंसनिक्ष. ८-४-३२
वान्तो यि प्रत्यये ६-१-७६
वान्यस्मिन् स. ४-१-१६५
वान्यस्य संयो. ६-४-६८
वा पदान्तस्य ८-४-५८
वा बहूनां जा. ५-३-९३
वा भावकरणयो : ८-४-१०
वा भुवनम् ६-२-२०
वा भ्राशम्लाश. ३-१-७०
वामदेवाड्डयड्ड्यौ ४-२-९
वाऽऽमि १-४-५
वाऽम्शसोः ६-४-८०
वा यौ २-४-५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्राणां सूची

वाय्वृतुपित्रु. ४-२-३१
वारणार्थाना. १-४-२७
वा लिँटि २-४-५५
वा ल्यपि ६-४-३८
वाऽवसाने ८-४-५५
वा शरि ८-३-३६
वा शोकष्यञ्रो. ६-३-५१
वा षपूर्वस्य. ६-४-९
वा संज्ञायाम् ५-४-१३३
वाऽसरूपोऽस्त्रि. ३-१-९४
वासुदेवार्जुना. ४-३-९८
वा सुँप्यापिशले : ६-१-८९
वाह ऊठ् ६-४-१३२
वाह : ४-१-६१
वाह च. ५-३-१३
वाहनमाहि. ८-४-८
वाहिताग्न्या. २-२-३७
वाहीकग्रामे. ४-२-११७
विंशतिकात् खः ५-१-३२
विंशतित्रिंशद्. प्र. ५-१-२४
विंशत्यादिभ्य. ५-२-५६
विकर्णकुषीतका. ४-१-१२४
विकर्णशुङ्ग. ४-१-११७
विकुशमि. ८-३-९६
विचार्यमाणा. ८-२-९७
विज इट् १-२-२
विजुपे छन्दसि ३-२-७३
विड्वनोरनु. ६-४-४१
वित्तो भोग. ८-२-५८
विदांकुर्वन्त्वि. ३-१-४१
विदिभिदिच्छि. ३-२-१६२
विदूराञ्ज्य : ४-३-८४
विदे : शतुर्वसुँ : ७-१-३६
विदो लँटो वा ३-४-८३
विद्यायोनिसं. ४-३-७७
विधिनिमन्त्र. ३-३-१६१
विध्यत्यध. ४-४-८३
विध्वरुषोस्तुदः ३-२-३५
विनञ्भ्यां ना. ५-२-२७
विनयादिभ्यष्ठक् ५-४-३४
विन्दुरिच्छुः ३-२-१६९
विन्मतोर्लुक् ५-३-६५
विपराभ्यां जेः १-३-१९
विपूयविनीय. ३-१-११७
विप्रतिषिद्धं २-४-१३
विप्रतिषेधे. १-४-२
विप्रसंभ्योड्व ३-२-१८०
विभक्तिश्च १-४-१०३
विभाषर्जोश्छ. ६-४-१६२
विभाषा २-१-११
विभाषा कथमि. ३-३-१४३
विभाषा कदाकर्ह्यो ३-३-५
विभाषा ऽकर्मकात् १-३-८५
विभाषा कार्षाप. ५-१-२९
विभाषा कुरुयुग. ४-२-१३०
विभाषा कृञि १-४-७१
विभाषा कृञि १-४-९७
विभाषा कृवृषो : ३-१-१२०
विभाषाऽऽख्यान. ३-३-११०
विभाषा गमहन. ७-२-६८
विभाषा गुणे. २-३-२५
विभाषा ग्रहः ३-१-१४३
विभाषा ऽग्रेप्रथम. ३-४-२४
विभाषा घ्राधेट्. २-४-७८
विभाषाऽऽ ङि रुप्लु. ३-३-५०
विभाषा ङिश्यो : ६-४-१३६
विभाषा चत्वारिं . ६-३-४९
विभाषा चिण्ण. ७-१-६९
विभाषा चेः ७-३-५८
विभाषा छन्दसि १-२-३६
विभाषा छन्दसि ६-२-१६३
विभाषा छन्दसि ७-४-४४
विभाषा जसि १-१-३१
विभाषाऽ ञ्चेरदिक्. ५-४-८
विभाषा तिलमा. ५-२-४
विभाषा तृतीया. ७-१-९७
विभाषा तृन्न. ६-२-१६०
विभाषा दिक्स. १-१-२७
विभाषा द्वितीया. ७-३-११५
विभाषा धातौ. ३-३-१५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभाषा धेट्श्व्योः ३-१-४९
विभाषाऽध्यक्षे ६-२-६७
विभाषाऽऽपः ६-४-५७
विभाषा परावरा. ५-३-२९
विभाषा परेः ६-१-४३
विभाषा पुरुषे ६-३-१०६
विभाषा पूर्वाह्णा. ४-३-२४
विभाषा पृष्ठप्रति. ८-२-९३
विभाषा फाल्गु. ४-२-२३
विभाषा बहोर्धा. ५-४-२०
विभाषा भावा. ७-२-१७
विभाषा भाषा. ६-१-१७६
विभाषा ऽभ्यवपूर्व. ६-१-२६
विभाषाऽमनुष्ये ४-२-१४४
विभाषा रोगा. ४-३-१३
विभाषा लीयतेः ६-१-५०
विभाषा लुँङ्लृँङोः २-४-५०
विभाषा ऽवरस्य ५-३-४१
विभाषा वर्षक्षर. ६-३-१६
विभाषा विप्रलापे १-३-५०
विभाषा विवध. ४-४-१७
विभाषा वृक्षमृ. २-४-१२
विभाषा वेण्वि. ६-१-२१०
विभाषा वेष्टिचे. ७-४-९६
विभाषा श्यावा. ५-४-१४४
विभाषा श्वेः ६-१-३०
विभाषा सपूर्वस्य ४-१-३४
विभाषा समीपे २-४-१६
विभाषा साका. ३-२-११४
विभाषा सातिँ. ५-४-५२
विभाषा सुँपो. ५-३-६८
विभाषा सृजिदृशोः ७-२-६५
विभाषा सेनासु. २-४-२५
विभाषा स्वसृप. ६-३-२४
विभाषा हविरपू. ५-१-४
विभाषितं विशे. ८-१-७४
विभाषितं सोप. ८-१-५३
विभाषेटः ८-३-७९
विभाषोत्पुच्छे ६-२-१९५
विभाषोदरे ६-३-८८
विभाषोपपदेन. १-३-७७
विभाषोपयमने १-२-१६
विभाषोपसर्गे २-३-५९
विभाषोर्णोः १-२-३
विभाषोशीनरेषु ४-२-११८
विभाषौषधिवन. ८-४-६
विमुक्तादिभ्योऽण् ५-२-६१
विरामोऽवसानम् १-४-१०९
विशाखयोश्च १-२-६२
विशाखाषाढा. ५-१-१०९
विशिपतिपदि. ३-४-५६
विशिष्टलिङ्गो नदी. २-४-७
विशेषणं विशेष्ये. २-१-५७
विशेषणानां चा. १-२-५२
विश्वस्य वसुँरा. ६-३-१२८
विषयो देशे ४-२-५२
विष्किरः शकुनौ. ६-१-१४५
विष्वग्देवयोश्च. ६-३-९२
विसर्जनीयस्य सँः ८-३-३४
विसारिणो मत्स्ये ५-४-१६
विस्पष्टादीनि. ६-२-२४
वीरवीर्यौ च ६-२-११९
वुञ् छण् कठ. ४-२-८०
वृकज्येष्ठाभ्यां. ५-४-४१
वृकाट्टेण्यण् ५-३-११५
वृक्षासनयोर्विष्टरः ८-३-९३
वृणोतेराच्छादने ३-३-५४
वृत्तिसर्गताय. १-३-३८
वृद्धस्य च ५-३-६२
वृद्धाच्छः ४-२-११४
वृद्धाट्ठक् सौवीरे. ४-१-१४८
वृद्धात् प्राचाम् ४-२-१२०
वृद्धादकेकान्त. ४-२-१४१
वृद्धिनिमित्तस्य. ६-३-३९
वृद्धिरादैच् १-१-१
वृद्धिरेचि ६-१-८५
वृद्धिर्यस्याचा. १-१-७२
वृद्धेत्कोसला. ४-१-१६९
वृद्धो यूना तल्ल. १-२-६५
वृद्भ्यः स्यसनोः १-३-९२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृन्दारकनाग. २-१-६२
वृषाकप्यग्नि. ४-१-३७
वृषादीनां च ६-१-१९८
वृतो वा ७-२-३८
वेः पादविहरणे १-३-४१
वेः शब्दकर्मणः १-३-३४
वेः शालच्छङ्कटचौ ५-२-२८
वेः स्कन्देरनि. ८-३-७३
वेः स्कभ्नातेर्नि. ८-३-७७
वेञः ६-१-३९
वेञो वयिः २-४-४१
वेतनादिभ्यो. ४-४-१२
वेत्तेर्विभाषा ७-१-७
वेरपृक्तस्य ६-१-६५
वेशन्तहिम. ४-४-११२
वेशोयश आदे. ४-४-१३१
वेश्च स्वनो. ८-३-६९
वैतोऽन्यत्र ३-४-९६
वैयाकरणाख्या. ६-३-७
वैवावेति. ८-१-६४
वोताप्योः ३-३-१४१
वोतो गुणवचनात् ४-१-४४
वोपसर्जनस्य ६-३-८२
वो विधूनने. ७-३-३८
वौ कषलस. ३-२-१४३
वौ क्षुस्रुवः ३-३-२५
व्यक्तवाचां समु. १-३-४८
व्यन्जनैरुप. ४-४-२६
व्यत्ययो बहु. ३-१-८५
व्यथो लिँटि ७-४-६८
व्यधजपोरनु. ३-३-६१
व्यन् सपत्ने ४-१-१४५
व्यवहिताश्च १-४-८१
व्यवहृपणोः स. २-३-५७
व्यवायिनोऽन्तरम् ६-२-१६५
व्यश्च ६-१-४२
व्याङ्परिभ्यो. १-३-८३
व्याहरति मृगः ४-३-५१
व्युपयोः शेतेः. ३-३-३९
व्युष्टादिभ्योऽण् ५-१-९६
व्योर्लघुप्रयत्नतर : .८-३-१८
व्रजयजोर्भावे. ३-३-९८
व्रते ३-२-८०
व्रश्चभ्रस्जसृज. ८-२-३६
व्रातच्फञोर. ५-३-११३
व्रातेन जीवति ५-२-२१
व्रीहिशाल्यो. ५-२-२
व्रीहेः पुरोडाशे ४-३-१४६
व्रीह्यादिभ्यश्च ५-२-११६

श

शकटादण् ४-४-८०
शकधृषज्ञाग्ला. ३-४-६५
शकि. णमुँल्क. ३-४-१२
शकि लिँङ् च ३-३-१७२
शकिसहोश्च ३-१-९९
शक्तियष्टचोरीकक् ४-४-५९
शक्तौ हस्तिक. ३-२-५४
शण्डिकादिभ्यो. ४-३-९२
शतमानविंश. ५-१-२७
शतसहस्रान्ता. ५-२-११९
शताच्च ठन्यता. ५-१-२१
शतुरनुँमो नद्य. ६-१-१६८
शदन्तविंशतेश्च ५-२-४६
शदेः शित : १-३-६०
शदेरगतौ तः ७-३-४२
शप्श्यनोर्नित्यम् ७-१-८१
शब्ददर्दुरं करोति ४-४-३४
शब्दवैरकलहा. ३-१-१७
शमामष्टानां दीर्घः .७-३-७४
शमिता यज्ञे ६-४-५४
शमित्यष्टाभ्यो. ३-२-१४१
शमि धातोः . ३-२-१४
शम्याः ष्लञ् ४-३-१४०
शयवासवासि. ६-३-१८
शरद्वच्छुनक. ४-१-१०२
शरादीनां च ६-३-१२०
शरीरावयवाच्च ४-३-५५
शरीरावयवाद् यत् ५-१-६
शरोऽचि ८-४-४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शर्करादिभ्योऽण् ५-३-१०७
शर्कराया वा ४-२-८३
शर्परि विसर्जनीयः ८-३-३५
शर्पूर्वाः खयः ७-४-६१
शल इगुपधा. ३-१-४५
शलालुनोऽन्यतर. ४-४-५४
शश्छोऽटि ८-४-६२
शसो न ७-१-२९
शाकलाद् वा ४-३-१२८
शाखादिभ्यो यः ५-३-१०३
शाच्छासाह्वाव्या. ७-३-३७
शाच्छोरन्यतर. ७-४-४१
शाणाद् वा ५-१-३५
शात् ८-४-४३
शारदेऽनार्तवे ६-२-९
शार्ङ्गरवाद्यञो. ४-१-७३
शालीनकौपीने. ५-२-२०
शास इदङ्हलो :६-४-३४
शासिवसिघ. ८-३-६०
शा हौ ६-४-३५
शिखाया वलच् ४-२-८९
शि तुँक् ८-३-३१
शितेर्नित्यावह्व.६-२-१३७
शिलाया ढः ५-३-१०२
शिल्पम् ४-४-५५
शिल्पिनि चा. ६-२-७६
शिल्पिनि ष्वुँन् ३-१-१४५
शिवशमरिष्टस्य.४-४-१४३
शिवादिभ्योऽण् ४-३-८८
शिशुक्रन्दयम .४-३-८८
शि सर्वनाम. १-१-४१
शीङः सार्वधातुके. ७-४-२१
शीङो रुँट् ७-१-६
शीतोष्णाभ्यां. ५-२-७२
शीर्र्षंश्छन्दसि ६-१-५९
शीर्षच्छेदाद्यच्च ५-१-६४
शीलम् ४-४-६१
शुक्राद् घन् ४-२-२६
शुण्दिकादि. ४-३-७६
शुभ्रादिभ्यश्च ४-१-१२३
शुषःकः ८-२-५१
शुष्कचूर्णरू .३-४-३५
शुष्कधृष्टौ ६-१-२०१
शूद्राणामनिर. २-४-१०
शूर्पादञन्यतर. ५-१-२६
शूलात् पाके ५-४-६५
शूलोखाद् यत् ४-२-१७
शृङ्खलमस्य. ५-२-७९
शृङ्गमव.६-२-११४
शृतं पाके ६-१-२७
शृदृप्रां ङ्र . ७-४-१२
शृवन्द्योरारुः ३-२-१७३
शे १-१-१३
शे मुचादीनाम् ७-१-५९
शेवलसुपरिवि. ५-३-८४
शेश्छन्दसि ब. ६-१-६८
शेषात् कर्तरि. १-३-७८
शेषाद् विभाषा ५-४-१५४
शेषे ४-२-९२
शेषे प्रथमः १-४-१०७
शेषे लृँडयदौ ३-३-१५१
शेषे लोपः ७-२-९०
शेषे विभाषा ८-१-४१
शेषे विभाषा ८-१-५०
शेषे विभाषाऽकख. ८-४-१८
शेषो घ्यसखि १-४-७
शेषो बहुव्रीहिः २-२-२३
शोणात् प्राचाम् ४-१-४३
शौनकादिभ्य. ४-३-१०६
श्नसोरल्लोपः ६-४-१११
श्नान्नलोपः ६-४-२३
श्नाभ्यस्तयो. ६-४-११२
श्याद्व्यधास्रुसं. ३-१-१४१
श्येनतिलस्य पाते. ६-३-७१
श्योऽस्पर्शे ८-२-४७
श्रज्यावमकन् ६-२-२५
श्रविष्ठाफल्गु. ४-३-३४
श्राणामांसौद. ४-४-६७
श्राद्धमनेन भुक्त.५-२-८५
श्राद्धे शरदः ४-३-१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्राणां सूची

श्रिणीभुवोऽनु .३-३-२४
श्रीग्रामण्योश्छ .७-१-५६
श्रुवः शृ च ३-१-७४
श्रुशृणुपृकृ. ६-४-१०२
श्रोण्यादयः कृता. २-१-५९
श्रोत्रियँश्छ. ५-२-८४
श्युकः किति ७-२-११
श्लाघहनुङ्स्था. १-४-३४
श्लिष आलिङ्गने ३-१-४६
श्लौ ६-१-१०
श्वगणाट्ठञ्च ४-४-११
श्वयतेरः ७-४-१८
श्वयुवमघोना. ६-४-१३३
श्वशुरः श्वश्र्वा १-२-७१
श्वसस्तुँट् च ४-३-१५
श्वसोवसीयः ५-४-८०
श्वादेरिञि ७-३-८
श्वीदितो निष्ठा .७-२-१४

ष

षः प्रत्ययस्य १-३-६
षट्कतिकतिपय. ५-२-५१
षट् च काण्डा. ६-२-१३४
षट्चतुर्भ्यश्च ७-१-५५
षट्त्रिचतुर्भ्यो. ६-१-१७४
षड्भ्यो लुक् ७-१-२२
षढोः कः सि ८-२-४१
षण्मासाण्ण्यच्च ५-१-८२
षत्वतुँकोरसिद्धः ६-१-८३
षपूर्वहन्धृत. ६-४-१३५
षष्टिका : षष्टिरा. ५-१-८९
षष्टयादेश्चासंख्या. ५-२-५८
षष्ठाष्टमाभ्यां. ५-३-५०
षष्ठी २-२-८
षष्ठी चानादरे २-३-३८
षष्ठी प्रत्येनसि ६-२-६०
षष्ठी युक्तश्छन्दसि वा १-४-९
षष्ठी शेषे २-३-५०
षष्ठी स्थानेयोगा १-१-४८
षष्ठी हेतुप्रयोगे २-३-२६
षष्ठचतसर्थं. २-३-३०
षष्ठ्या आक्रोशे ६-३-२१
षष्ठ्या : पतिपुत्र. ८-३-५३
षष्ठ्या रूप्य च ५-३-५४
षष्ठ्या व्याश्रये ५-४-४८
षात् पदान्तात् ८-४-३४
षिद्गौरादि. ४-१-४१
षिद्भिदादि. ३-३-१०४
ष्टुना ष्टु : ८-४-४०
ष्ठिवुँक्लमुँचमां. ७-३-७५
ष्णान्ता षट् १-१-२३
ष्यङः सम्प्रसार. ६-१-१३

स

स उत्तमस्य ३-४-९८
स एषां ग्रामणी : ५-२-७८
सः स्यार्धधातुके ७-४-४९
सः स्विदिस्वदि. ८-३-६२
संयसश्च ३-१-७२
संयोगादिश्च ६-४-१६६
संयोगादेरातो. ८-२-४३
संयोगान्तस्य. ८-२-२३
संयोगे गुरु १-४-११
संवत्सराग्रहा. ४-३-५०
संशयमापन्नः ५-१-७२
संसृष्टे ४-४-२२
सँस्कृतम् ४-४-३
सँस्कृतं भक्षा : ४-२-१६
संहितशफ. ४-१-७०
संहितायाम् ६-१-७०
संहितायाम् ६-३-११४
सक्थं चाक्रा. ६-२-१९७
सख्यशिश्वीति .४-१-६२
सख्युरसम्बुद्धौ ७-१-९२
सख्युर्य : ५-१-१२५
सगतिरपि तिङ् ८-१-६८
सगर्भसयूथ. ४-४-११४
संकलादिभ्यश्च ४-२-७५
संख्ययाव्ययास. २-२-२५
संख्या ६-२-३५
संख्यापूर्वो द्विगुः २-१-५२
संख्याया अति. ५-१-२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संख्यायाः अवयवे ५-२-४२
संख्यायाः क्रिया. ५-४-१७
संख्यायाः संवत् ७-३-१५
संख्यायाः संज्ञा. ५-१-५७
संख्यायाः स्तनः ६-२-१६२
संख्याया गुणस्य. ५-२-४७
संख्याया विधार्थे. ५-३-४२
संख्यायाश्च गुणा. ५-४-५९
संख्या वंश्येन २-१-१९
संख्याविसाय ६-३-११०
संख्याऽव्ययादे. ४-१-२६
संख्यासुपूर्वस्य ५-४-१४०
संख्यैकवचना. ५-४-४३
संग्रामे प्रयोजन. ४-२-५६
सङ्घाङ्कलक्षणे. ४-३-१२७
संघे चानौत्तरा. ३-३-४२
संघोद्घौ गण .३-३-८६
संज्ञापूरण्योश्च ६-३-३८
संज्ञायाम् २-१-४४
संज्ञायाम् ३-३-१०९
संज्ञायाम् ३-४-४२
संज्ञायाम् ४-१-७२
संज्ञायाम् ४-३-११७
संज्ञायाम् ६-२-१५८
संज्ञायाम् ८-२-११
संज्ञायां लला. ४-४-४६
संज्ञायां शरदो ४-३-२७
संज्ञायां श्रवणा. ४-२-५
संज्ञायां समज. ३-३-९९
संज्ञायां कन् ४-३-१४५
संज्ञायां कन् ५-३-७५
संज्ञायां कन् ५-३-८७
संज्ञायां कन्थोशी २-४-२०
संज्ञायां गिरि. ६-२-९४
संज्ञायां च ५-३-९७
संज्ञायां च ६-२-७७
संज्ञायां जन्या ४-४-८२
संज्ञायां धेनुष्या ४-४-८९
संज्ञायामना. ६-२-१४५
संज्ञायामुमा.६-१-१९९
संज्ञायां भृतॄवृजि. ३-२-४६
संज्ञायां मन्मा. ५-२-१३७
संज्ञायां मित्रा.६-२-१६४
संज्ञोऽन्यतर. २-३-२२
संज्ञौपम्ययोश्च ६-२-११२
सत्यं प्रश्ने ८-१-३२
सत्यादशपथे ५-४-६६
सत्यापपाशरूप. ३-१-२५
सत्सूद्विषद्रुह. ३-२-६१
सदिरप्रतेः ८-३-६६
सदृशप्रतिरूप. ६-२-११
सदेः परस्य लिँटि ८-३-११८
सद्यः परुत् परार्यै. ५-३-२२
सध मादस्थ. ६-३-९६
सनः क्तिचि लो. ६-४-४५
स नपुंसकम् २-४-१७
सनाद्यन्ता धातवः ३-१-३२
सनाशंसभिक्ष उः ३-२-१६८
सनिंससनिवांसम् ७-२-६९
सनि ग्रहगुहोश्च ७-२-१२
सनि च २-४-४७
सनिमीमाघुर. ७-४-५४
सनीवन्तर्ध. ७-२-४९
सनोतेरनः ८-३-१०८
सन्धिवेलाद्यृतु. ४-३-१६
सन्महत्परमो. २-१-६१
सन्यङोः ६-१-९
सन्यतः ७-४-७९
सन्वल्लघुनि. ७-४-९३
सपत्रनिष्पत्रा. ५-४-६१
सपूर्वाच्च ५-२-८७
सपूर्वायाःप्रथमा. ८-१-२६
सप्तनोऽञ्छन्दसि ५-१-६०
सप्तमीपञ्चम्यौ. २-३-७
सप्तमीविशेषणे. २-२-३५
सप्तमी शौण्डैः २-१-४०
सप्तमी सिद्धशु. ६-२-३२
सप्तमी हारिणौ. ६-२-६५
सप्तम्यधिकरणे च २-३-३६
सप्तम्याः पुण्यम् ६-२-१५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तम्यां चोप. ३-४-४९
सप्तम्यां जनेर्ड. ३-२-९७
सप्तम्यास्त्रल् ५-३-१०
सभायां नपुंसके ६-२-९८
सभाया यः ४-४-१०५
सभा राजामनु. २-४-२३
समः क्ष्णुवः १-३-६५
समः प्रतिज्ञाने १-३-५२
समः समि ६-३-९३
समः सुँटि ८-३-५
समयस्तदस्य. ५-१-१०३
समयाच्च याप. ५-४-६०
समर्थः पदविधिः २-१-१
समर्थानां प्रथ. ४-१-८२
समवप्रविभ्यः. १-३-२२
समवायान् सम. ४-४-४३
समवाये च ६-१-१३३
समस्तृतीया. १-३-५४
समांसमां वि. ५-२-१२
समानकर्तृकयोः पूर्व. ३-४-२१
समानकर्तृकेषु. ३-३-१५८
समानतीर्थे ४-४-१०७
समानस्यच्छन्द ६-३-८४
समानोदरे श. ४-४-१०८
समापनात् स. ५-१-१११
समायाः खः ५-१-८४
समासत्तौ ३-४-५०
समासस्य ६-१-२१८
समासाच्च तद्वि ५-३-१०६
समासान्ताः ५-४-६८
समासेऽङ्गुलेः. ८-३-८०
समासेऽनञ्पूर्वे. ७-१-३७
समाहारः स्वरितः १-२-३१
समि ख्यः ३-२-७
समि मुष्टौ ३-३-३६
समि युद्रुदुवः ३-३-२३
समुच्चयेऽन्यतर. ३-४-३
समुच्चये सामान्य. ३-४-५
समुदाङ्भ्यो. १-३-७५
समुदोरजःपशु. ३-३-६९
समुद्राभ्राद् घः ४-४-११८
समूलाकृत. ३-४-३६
समूहवच्च ब. ५-४-२२
समो गम्यृ. १-३-२९
संपरिपूर्वात्. ५-१-९१
संपरिभ्यां करोतौ. ६-१-१३२
सम्पादिनि ५-१-९८
संपृचानुरुधा. ३-२-१४२
संप्रतिभ्या. १-३-४६
संप्रसारणस्य ६-३-१३९
संप्रसारणाच्च ६-१-१०४
संप्रोदश्च कटच् ५-२-२९
संबुद्धौ च ७-३-१०६
संबुद्धौ शाकल्य. १-१-१६
संबोधने च २-३-४७
संबोधने च ३-२-१२५
संभवत्यवहर. ५-१-५१
संभावनेऽलमि. ३-३-१५४
संभूते ४-३-४१
संमाननोत्सञ्जना. १-३-३६
संयोगान्तस्य. ८-२-२३
सरूपाणामेकशे. १-२-६४
सर्तिशास्त्यर्ति. ३-१-५६
सर्वकूलाभ्रकरी. ३-२-४२
सर्वँ गुणकार्त्स्न्ये ६-२-९३
सर्वचर्मणः कृत. ५-२-५
सर्वत्र लोहितादि. ४-१-१८
सर्वत्र विभाषा. ६-१-११८
सर्वत्र शाकल्यस्य ८-४-५०
सर्वत्राण् च. ४-३-२२
सर्वदेवात्तातिल् ४-४-१४२
सर्वनामस्थाने. ६-४-८
सर्वनाम्नः स्मै ७-१-१४
सर्वनाम्नः स्याड्. ७-३-११४
सर्वनाम्रस्तृतीया च २-३-२७
सर्वपुरुषाभ्यां. ५-१-१०
सर्वभूमिपृथि. ५-१-४०
सर्वस्य द्वे ८-१-१
सर्वस्य सुँपि ६-१-१८६
सर्वस्य सोऽन्यतर. ५-३-६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वादीनि सर्व. १-१-२६
सर्वैकान्यकिं. ५-३-१५
सल्लिँटोर्जे. ७-३-५७
सवाभ्यां वामौ ३-४-९१
सविधसनीड. ६-२-२३
ससजुषो रुँः ८-२-६६
ससूवेति निगमे ७-४-७४
सस्नौ प्रशंसायाम् ५-४-४०
स्रस्येन परिजातः ५-२-६८
सहनञ्विद्यमान. ४-१-५७
सहयुक्तेऽप्रधाने २-३-१९
सह सुँपा २-१-४
सहस्य सः सं. ६-३-७८
सहस्य सध्रिः ६-३-९५
सहस्रेण संमितौ. ४-४-१३५
संहितायाम् ६-१-७२
सहिवहोरोद. ६-३-११२
सहेःपृतनर्ता. ८-३-१०९
सहेः साडः सः ८-३-५६
सहे च ३-२-९६
साक्षात्प्रभृतीनि. १-४-७३
साक्षाद् द्रष्ट. ५-२-९१
साढचै साढ्वा. ६-३-११३
सात्पदाद्योः ८-३-१११
साधकतमं करणम् १-४-४२
साधुनिपुणा. २-३-४३
सान्तमहतः. ६-४-१०
साप्तपदीनं. ५-२-२२
साम आकम् ७-१-३३
सामन्त्रितम् २-३-४८
सामि २-१-२७
सायं चिरं. ४-३-२३
सार्वधातुकमपित् १-२-४
सार्वधातुकार्ध. ७-३-८४
सार्वधातुके यक् ३-१-६७
साल्वावयवप्र. ४-१-१७१
साल्वेयगान्धा. ४-१-१६७
सावनडुहः ७-१-८२
सावेकाचस्तृती. ६-१-१६३
सास्मिन् पौर्णमासीति. ४-२-२१
साऽस्य देवता ४-२-२४
सिकताशर्करा. ५-२-१०४
सिँचि च पर. ७-२-४०
सिँचि वृद्धि : पर. ७-२-१
सिचो यङि ८-३-११२
सिँजभ्यस्त. ३-४-१०९
सिति च १-४-१६
सिद्धशुष्कपक्व. २-१-४१
सिध्मादिभ्यश्च ५-२-९७
सिध्यतेरपार. ६-१-४८
सिन्धुतक्षशिला. ४-३-९३
सिन्ध्वपकराभ्यां. ४-३-३२
सिपि धातो रुँर्वा ८-२-७४
सिँब् बहुलं. ३-१-३४
सिवादीनां वा ऽड्. ८-३-७१
सुःपूजायाम् १-४-९३
सुकर्मपापमन्त्र.३-२-८९
सुखप्रिययोर्हिते ६-२-१५
सुरुप्रियादानु. ५-४-६३
सुखादिभ्यः कर्तृ.३-१-१८
सुखादिभ्यश्च ५-२-१३१
सुञः ८-३-१०७
सुञो यज्ञसंयोगे ३-२-१३२
सुँट् कात् पूर्वः ६-१-१३१
सुँट् तिथोः ३-४-१०७
सुँडनपुंसकस्य १-१-४२
सुधातुरकँङ् च ४-१-९७
सुधितवसुधित. ७-४-४५
सुनोतेः स्यसनोः ८-३-११७
सुँप आत्मनः क्यच् ३ -१-८
सुँपः १-४-१०२
सुँपां सुँलुक्पूर्वस. ७-१-३९
सुँपि च ७-३-१०२
सुँपि स्थः ३-२-४
सुँपो धातुप्राति. २-४-७१
सुँप्तिङन्तं पदम् १-४-१४
सुँप् प्रतिना.२-१-९
सुँप्यजातौ णिनिँ. ३-२-७८
सुप्रातसुश्व. ५-४-१२०
सुँबामन्त्रिते. २-१-२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुयजोर्ङ्वनिँप् ३-२-१०३
सुवास्त्वादि. ४-२-७७
सुविनिर्दुर्भ्यः. ८-३-८८
सुषामादिषु च ८-३-९८
सुसर्वार्धाज्ज. ७-३-१२
सुहृद्दुर्हृदौ. ५-४-१५०
सूत्रं प्रतिष्णातम् ८-३-९०
सूत्राच्च कोपधात् ४-२-६५
सूददीपदीक्षश्च ३-२-१५३
सूपमानात् क्तः. ६-२-१४४
सूर्यतिष्याग.६-४-१४९
सृघस्यदः क्मरच् ३-२-१६०
सृजिदृशोर्झल्य. ६-१-५७
सृपितृदोः कसुँन् ३-४-१७
सृ स्थिरे ३-३-१७
सेधतेर्गतौ ८-३-११३
सेनान्तलक्षण. ४-१-१५२
सेनाया वा ४-४-४५
सेर्ह्यपिच्च ३-४-८७
सेऽसिँचि कृतचृत. ७-२-५७
सोऽचि लोपे. ६-१-१३०
सोढः ८-३-११५
सोदराद् यः ४-४-१०९
सोऽपदादौ ८-३-३८
सोममर्हति यः ४-४-१३७
सोमाट्ट्यण् ४-२-३०
सोमे सुञः ३-२-९०
सोमे ह्वरितः ७-२-३३
सोरवक्षेपणे ६-२-१९४
सोर्मनसी अलो. ६-२-११६
सोऽस्य निवासः ४-३-८९
सोऽस्यांशवस्नभृ. ५-१-५५
सोऽस्यादिरिति. ४-२-५५
सौ च ६-४-१३
स्कोः संयोगाद्यो. ८-२-२९
स्तम्भुँस्तुम्भुँस्क. ३-१-८२
स्तम्बकर्णयो. ३-२-१३
स्तम्बशकृतोरिन् ३-२-२४
स्तम्बे क च ३-३-८३
स्तम्भुँसिवुँसहां. ८-३-११६
स्तन्भे : ८-३-६७
स्तुतस्तोमयो. ८-३-१०५
स्तुसुधूञ्भ्यः पर. ७-२-७२
स्तेनाद्यन्नलोपश्च ५-१-१२४
स्तोः श्चुना श्चुः ८-४-३९
स्तोकान्तिकदूरा. २-१-३९
स्तौतिण्योरेव. ८-३-६१
स्त्यः प्रपूर्वस्य ६-१-२३
स्त्रियाः ६-४-७९
स्त्रियाः पुंवद् भा. ६-३-३४
स्त्रियाम् ४-१-३
स्त्रियां संज्ञायाम् ५-४-१४३
स्त्रियां क्तिन ३-३-९४
स्त्रियां च ७-१-९६
स्त्रियामवन्तिकु. ४-१-१७४
स्त्री पुंवच्च १-२-६६
स्त्रीपुंसाभ्यां नञ्. ४-१-८७
स्त्रीभ्यो ढक् ४-१-१२०
स्त्रीषु सौवीरसा. ४-२-७६
स्थः क च ३-२-७७
स्थण्डिलाच्छयि .४-२-१५
स्थागापापचो. ३-३-९५
स्थाघ्वोरिच्च १-२-१७
स्थादिष्वभ्यासेन प्र.८-३-६४
स्थानान्तगोशाल. ४-३-३५
स्थानान्ताद् विभा. ५-४-१०
स्थानिवदादेशो. १-१-५५
स्थानेऽन्तरतमः १-१-४९
स्थालीबिलात् ५-१-६९
स्थूलदूरयुवह्र. ६-४-१५६
स्थूलादिभ्यः प्रका. ५-४-३
स्थे च भाषायाम् ६-३-२०
स्थेशभासपि. ३-२-१७५
स्नात्व्यादयश्च ७-१-४९
स्नुक्रमोरनात्म. ७-२-३६
स्नेहने पिषः ३-४-३८
स्पर्धायामाङः १-३-३१
स्पृशोऽनुदके. ३-२-५८
स्पृहिगृहिपति. ३-२-१५८
स्पृहेरीप्सित : १-४-३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फायः स्फी नि. ६-१-२२
स्फायो वँ: ७-३-४१
स्फिगपूतवीणा. ६-२-१८६
स्फुरतिस्फुलत्योर्घञि ६-१-४६
स्फुरतिस्फुलत्योर्नि. ८-३-७६
स्मिपूङ्रञ्ज्वशां. ७-२-७४
स्मे लोँट् ३-३-१६५
स्मोत्तरे लँङ् च ३-३-१७६
स्यतासीँ लृं लुँटो : ३-१-३३
स्यदो जवे ६-४-२८
स्यश्छन्दसि बहु. ६-१-१२९
स्यसिँच्सीयुँट्ता.६-४-६२
स्रवतिशृणोतिद्र. ७-४-८१
स्रोतसो विभा. ४-४-११३
स्वं रूपं शब्दस्या. १-१-६७
स्वं स्वामिनि ६-२-१७
स्वतन्त्रः कर्ता १-४-५४
स्वतवान् पायौ ८-३-११
स्वनहसोर्वा ३-३-६२
स्वपादिहिं. ६-१-१८३
स्वपितृषोर्नजिँङ् ३-२-१७२
स्वसिस्यमिव्येञां ६-१-१९
स्वपो नन् ३-३-९१
स्वमज्ञातिध. १-१-३४
स्वमोर्नपुंसकात् ७-१-२३
स्वयं क्तेन २-१-२५
स्वरतिसूतिसू. ७-२-४४
स्वरादिनिपात. १-१-३६
स्वरितञितः कर्त्र. १-३-७२
स्वरितमाम्रेडिते. ८-२-१०३
स्वरितात्संहिता. १-२-३९
स्वरितेनाधिकारः १-३-११
स्वरितो वानुदात्ते. ८-२-६
स्वसुश्छः ४-१-१४३
स्वागतादीनां च ७-३-७
स्वाङ्गाच्चेतः ६-३-४०
स्वाङ्गाच्चोपस. ४-१-५४
स्वाङ्गे तस्प्रत्यये. ३-४-६१
स्वाङ्गे ऽध्रुवे ३-४-५४
स्वाङ्गेभ्यः प्रसिते ५-२-६६
स्वादिभ्वः श्नुः. ३-१-७३
स्वादिष्वसर्व. १-४-१७
स्वादुमि णमुँल् ३-४-२६
स्वापेश्चङि ६-१-१८
स्वामिन्नैश्वर्ये ५-२-१२६
स्वामीश्वराधि. २-३-३९
स्वे पुषः ३-४-४०
स्वौजसमौट्छष्टा. ४-१-२

ह

ह एति ७-४-५२
हनः सिँच् १-२-१४
हनश्च वधः ३-३-७६
हनस्तँ च ३-१-१०८
हनस्तोऽचिण्णलोः. ७-३-३२
हनो वध लिँङि २-४-४२
हन्त च ८-१-५४
हन्तेः प्र. ८-४-२१
हन्तेर्जः ६-४-३६
हरतेरनुद्यमनेऽच् ३-२-९
हरतेर्दृतिनाथयोः. ३-२-२५
हरत्युत्सङ्गादिभ्य ४-४-१५
हरितादिभ्योऽञ. ४-१-१००
हरीतक्यादिभ्यश्च ४-३-१६५
हलः ६-४-२
हलः श्नः शानज्झौ ३-१-८३
हलदन्तात् सप्त. ६-३-९
हलन्ताच्च १-२-१०
हलन्त्यम् १-३-३
हलश्च ३-३-१२१
हलश्चेजुपधात् ८-४-३०
हलसीराट्ठक् ४-३-१२४
हलसीराट्ठक् ४-४-८१
हलसूकरयोः पुवः ३-२-१८३
हलस्तद्धितस्य ६-४-१५०
हलादिः शेषः ७-४-६०
हलि च ८-२-७७
हलि लोपः ७-२-११३
हलि सर्वेषाम् ८-३-२२
हलोऽनन्तराः सं. १-१-७
हलो यमां यमि.८-४-६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हल्ङ्याब्भ्योदीर्घा.६-१-६६
हव्येऽनन्तः पादम् ३-२-६६
हशश्वतोर्लङ् च ३-२-११६
हशि च ६-१-११०
हश्च व्रीहि. ३-१-१४८
हस्ताज्जातौ ५-२-१३३
हस्तादाने चेर. ३-३-४०
हस्ते वर्तिग्रहोः ३-४-३९
हायनान्तयुवा. ५-१-१२९
हिंसायां प्रतेश्च ६-१-१३६
हिसार्थानां च स. ३-४-४८
हि च ८-१-३४
हितं भक्षा. ४-४-६५
हिनुमीना ८-४-१५
हिमकाषिहतिषु च ६-३-५४
हिरण्यपरिमाणं ध. ६-२-५५
हीने १-४-८५
हीयमानपाप. ५-४-४७
हुझल्भ्यो हेर्धिः ६-४-१०१
हुश्नुवोःसार्व. ६-४-८७
हृक्रोरन्यतर. १-४-५३
हृदयस्य प्रिय : ४-४-९५
हृदयस्य हृल्ले. ६-३-५०
हृद्भगसिन्ध्वन्ते. ७-३- १९
हृषेर्लोमसु ७-२-२९
हेति क्षियायाम् ८-१-६०
हेतुमति च ३-१-२६
हेतुमनुष्येभ्यो. ४-३-८१
हेतुहेतुमतोर्लिङ् ३-३-१५६
हेतौ २-३-२३
हेमन्तशिशिराव. २-४-२८
हेमन्ताच्च ४-३-२१
हे मपरे वा ८-३-२६
हेरचङि ७-३-५६
हैयङ्गवीनं सं. ५-२-२३
हैहेप्रयोगे हैहयो ८-२-८५
हो ढः ८-२-३१
होत्राभ्यश्छ ५-१-१३४
हो हन्तेर्ञ्णिन्नेषु ७-३-५४
ह्म्यन्तक्षणश्वस. ७-२-५
ह्रस्वः ७-४-५९
ह्रस्वं लघु १-४-१०
ह्रस्वनद्यापो नुट् ७-१-५४
ह्रस्वनुड्भ्यां मतुँ. ६-१-१७१
ह्रस्वस्य गुण : ७-३-१०८
ह्रस्वस्य पिति कृति. ६-१-६९
ह्रस्वाच्चन्द्रोत्तर. ६-१-१४६
ह्रस्वात्तादौ त. ८-३-१०१
ह्रस्वादङ्गात् ८-२-२७
ह्रस्वान्तेऽन्त्या. ६-२-१७३
ह्रस्वे ५-३-८६
ह्रस्वो नपुंसके. १-२-४७
ह्रु ह्वरेश्छन्दसि ७-२-३१
ह्लादो निष्ठायाम् ६-४-९५
ह्वः सम्प्रसारणम् प्र. ६-१-३२
ह्वः सम्प्रसारणं च ३-३-७२
ह्वावामश्च ३-२-२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्तिकादीनां सूची

अकँच्प्रकरणे तूष्णीमः. (५-३-७१)
अकारान्तोत्तरपदो.(२-४-१७)
अक्षरसमूहे छन्दस. (४-४-१४०)
अक्षादूहिन्यामुप. (६-१-८६)
अगोवत्सहलेष्विति. (६-३-८३)
अग्निपदादिभ्य. (५-१-९६)
अग्नीधः शरणे. (४-३-१२०)
अग्रपश्चाड्डिमच्. (४-३-२३)
अङ्गगात्रकण्ठेभ्य. (४-१-५४)
अङ्गक्षत्रधर्मत्रिपूर्वाद्. (४-२-६०)
अङ्गात् कल्याणे (५-२-२०)
अचि शीर्षः. (६-१-६०)
अच् प्रकरणे शक्तिलाङ्गलाङ्कुश. (३-२-९)
अजपथ. (५-१-७६)
अजिनान्ताच्च. (४-३-६०)
अज्विधिः सर्वधातुभ्यः.(३-१-१३४)
अज्विधौ भयादीनामुप. (३-३-५६)
अञ्जस उपसंख्यानम्. (६-३-३)
अडभ्यासव्यवायेऽपि. (६-१-१३१)
अण् क्रुञ्चा. (४-१-१२०)
अण् प्रकरणे कुलाल. (५-४-३६)
अतद्धित इति वक्तव्यम् (८-४-३७)
अतेर्धातुलोप इति. (६-२-१९०)
अत्यन्तापह्नवे लिँङ्. (३-२-११५)
अत्यादयः क्रान्ताद्यर्थे. (३-२-१८)
अत्रे (वृतो.इती) टो दीर्घो नेष्यते(७-२-७५)
अदसोऽद्रेः. (६-३-९२)
अदेः प्रतिषेधो वक्तव्यः (१-३-८७)
अद्रवं मूर्तिमत् स्वाङ्गं. (४-१-५४)
अद्वन्द्वतत्पुरुष. (१-२-७२)
अधर्माच्चेति. (४-४-४१)
अधिकरणाच्चेति. (३-१-१०)
अध्यात्मादिभ्यश्च (४-३-६०)
अध्वपरिमाणे च (६-१-७६)
अनजादौ विभाषा. (५-३-८३)
अनडुहः स्त्रियां वेति. (७-१-९८)
अनव्ययस्येति वक्तव्यम् (८-३-३८)
अनाचमिकमि. (७-३-३४)
अनाम्नवतिनगरीणामिति. (८-४-४१)
अनिँदितां नलोपे. (६-४-२४)
अनिनस्मन्ग्रहणा. (४-१-११)
अनुसूर्लक्ष्य. (४-२-६०)
अनेकप्राप्तावेकस्य. (२-२-३२)
अनेकशफेष्विति. (१-२-७३)
अनो नलोपश्च वा (२-४-१७)
अन्तरमिति गणसूत्रे अपुरि. (१-१-२६)
अन्तः शब्दस्याङ्किविधि. (१-४-५८)
अन्ताच्चेति. (६-३-११)
अन्ताच्चेति. (४-३-२३)
अन्तोदात्तप्रकरणे त्रिचक्रा. (६-२-१९८)
अन्त्यात् पूर्वो वा (७-१-७२)
अन्नवधक. (२-४-५४)
अन्यत्रापि दृश्यत इति. (३-२-४८)
अन्येभ्योऽपि दृश्यते (५-२-१०९+५-२-११२+५-२-१२०)
अपादाने स्त्रियामुप. (३-३-२१)
अपील्वादीनामिति. (६-३-१२१)
अपुत्रादीनामिति. (७-४-३५)
अपो योनियन्मतुँषु (६-३-१८)
अप्रत्यादिभिरिति. (२-३-४३)
अप्राणिजातेश्चारज्ज्वादीना. (४-१-६६).
अब्राह्मणगोत्रमात्राद्. (२-४-५८)
अभितः परितः समया. (२-३-२)
अभिवादिदृशोरात्मने. (१-४-५३)
अभूततद्भाव इति. (५-४-५०)
अभ्यर्हितं च (२-२-३५)
अभ्यासजश्त्वचर्त्वे (८-२-३)
अमानिनीति वक्तव्यम् (४-३-४०)
अमुष्येत्यन्तः (१-२-३७)
अमेहक्वतसिँत्रेभ्य. (४-२-१०४)
अरण्याणः. (४-२-१०४)
अर्चासु पूजनार्थासु. (५-३-१००)
अर्णसो लोपश्च (५-२-१०९)
अर्तिश्रुदृशिभ्यश्च (१-३-२९)
अर्थनिबन्धनेयं संज्ञा (१-४-४१)
अर्थाच्चासंनिहिते (५-२-१३५)
अर्थान्नञः (५-४-१५१) ग.सू.
अर्थेन नित्यसमासो. (२-१-३६)
अर्धाच्चेति वक्तव्यम् (५-१-२५)
अर्धोत्तरपदस्य... पश्च. (५-३-३२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्यक्षत्रियाभ्यां वा. (४-१-४९)
अर्हतो नुँम च (५-१-१२३) ग.सू.
अलङ्कञो मण्डनार्थाद्.(३-२-१३६)
अलमित्यर्थग्रहणम् (२-३-१६)
अलाबूतिलोमा. (५-२-२९)
अवरस्योपसंख्यानम् (२-१-३१)
अवर्णान्ताद् वा. (६-३-९७)
अवहाराधारावाया. (३-३-१२२)
अवादयः क्रुष्टाद्यर्थे. (२-२-१८)
अवान्तरदीक्षादिभ्यो.(५-१-९३)
अवारपाराद् विगृहीता.(४-२-९३+५-२-११)
अवेर्दुग्धे सोढदूस. (४-२-३६)
अवोधसोर्लोपश्च. (४-३-८)
अव्ययप्रतिषेधे तोसुँन्. (२-३-६९)
अव्ययस्य च्वावितीत्वं नेति. (७-४-३२)
अव्ययानां प्रतिषेधो. (२-१-२)
अव्ययीभावस्य त्विष्यत एव. (२-१-२)
अव्ययानां भानामुप. (६-४-१४४)
अव्यये नञ्कुनिपाता. (६-२-२)
अशिष्टव्यवहारे दाणः. (२-३-१३)
अश्मनो विकार. (६-४-१४४)
अश्ववृषयोर्मैथु. (७-१-५१)
अष्टका पितृदेवत्ये (७-३-४५)
अष्टनः कपाले हविषि. (६-३-४६)
अष्टाचत्वारिंशतो. (५-१-९३)
असनयोश्च (२-४-५४)
असमासवद्भावे पूर्व. (८-१-१२)
असंयुक्ता ये डलका. (७-३-१०७)
असावित्यन्तः. (१-२-३७)
अस्येकेऽने च रञ्जे.(६-४-२४)
असितपलितयोः प्रति. (४-१-३९)
असूयादिषु वा. (८-२-१०३)
अस्तोश्चेति. (६-३-७०)
अस्मदः सविशेषणस्य. (१-२-५९)
अहरादीनां पत्यादिषु. (८-२-७०)
अर्हाणां कर्तृत्वेऽनर्हा. (२-३-३६)
अह्नः खः क्रतौ (४-२-४२)
अह्नो नलोप प्रतिषेधो. (८-२-७)
आकालाट्ठँश्च (५-१-११३)
आकृतिग्रहणा जातिः. (४-१-६३)
आख्यातमाख्यातेन. (२-१-७२) ग.सू.
आख्यानाख्यायिकेतिहास. (४-२-६०)
आख्यानात्कृतस्तदाचष्टे.(१९१५कत्र धातौ)
आगमेः क्षमायाम् (१-३-२१)
आङयाजयारा. (७-१-३९)
आङः स्थः प्रतिज्ञाने (१-३-२२)
आङि चम इति. (७-३-७५)
आङि नुपृच्छयोः (१-३-२१)
आङोऽन्यत्रापि. (६-४-१४१)
आङ्पूर्वस्यान्धूधसोः. (६-१-२८ टी.)
आङ्पूर्वादञ्जेः. (३-१-१०९)
आङयाजयारामुप. (७-१-३९)
आचारेऽवगल्भ. (३-१-११)
आचार्यादणत्वं च (४-१-४९+५-१-९+८-४-३८)
आथर्वणिकस्येकलोपश्च (४-३-१३१)
आदिकर्मणि निष्ठा. (३-२-१०२)
आदिखाद्योर्न (१-४-५२)
आदेश्चेति वक्तव्यम् (४-३-८)
आद्युदात्तप्रकरणे दिवोदासादीनां. (६-२-९१)
आधृषाद् वा (१८०५ धातौ) ग.सू.
आनुपूर्व्ये द्वे वाच्ये (८-१-१२)
आपत्यग्रहणं.(४-१-१६)
आपदादिपूर्वपदात्. (४-२-११६)
आभ्यां पक्षेऽणपीष्यते (४-२-२)
आमन्त्रिते छन्दसि. (८-२-१०७)
आमुष्यायणामुष्य. (६-३-२१)
आमो मित्त्व. (३-१-३५)
आलस्यसुखाहरण. (३-१-५)
आलुचि शीङो ग्रहणं. (३-२-१५८)
आविसश्छन्दसि (४-२-१०४)
आशङ्कायामुप. (३-१-७)
आशिषि नाथः (१-३-२१)
आशिषि वुँनश्च न (७-३-४५)
आसुरेरुपसंख्यानम् (४-१-१९)
आस्यविहरणसमान. (१-३-२०)
आस्वदः सकर्मकात् (१७४९ धातौ) ग.सू.
आहुस्त्रिगर्तषष्ठाँस्तु. (५-३-११६)
आहौ प्रभूतादिभ्यः (४-४-१)
आहृतप्रकरणे वारि. (५-१-७६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्तिकादीनां सूची

इकन् बहुलं पदोत्तर. (४-२-६०)
इकारादाविति. (७-३-८)
इके चरतावुप. (६-३-५३)
इक् कृष्यादिभ्यः (३-३-१०८)
इक्श्तिपौ धातुनिर्देशे (३-३-१०८)
इञ उपसंख्यानम् (४-१-६५)
इञ् वपादिभ्यः (३-३-१०८)
इणजादिभ्यः (३-३-१०८)
इण्वदिक इति. (२-४-४५+४७)
इत ऊर्ध्वं तु संख्या. (५-१-१९)
इतः प्राण्यङ्गात् (४-१-४५) ग.सू.
इत्येऽनभ्याशस्य (६-३-७०)
इत्वोत्वाभ्यां गुणवृद्धी. (१-४-२)
इदमेतदोरन्वादेशे नपुंसके. (२-४-३४)
इनिँप्रकरणे बलाद् बाहूरुपूर्वा. (५-२-१३५)
इयँङुवँङ्प्रकरणे तन्वादीना. (६-४-७७)
इयँङुवँङ् भाविना. (६-३-६१)
इयँङुवङ्भ्यां गुणवृद्धी. (६-४-७७)
इर उपसंख्यानम् (१-३-७)
इरिकादिभ्यः प्रतिषेधो. (८-४-६)
इवेन सह समासो. (२-२-१८)
इषेरनिच्छार्थस्य (३-३-१०७)
इषेस्तकारे श्यन्प्र. (७-२-४८)
ईकक् च (४-१-८५)
ईकारग्रहणेन नार्थः (६-१-१२६)
ईक्षिक्षमिभ्यां च (३-२-१)
ईद् रथिनः (८-२-१७)
ईयसो बहुव्रीहेर्नेति. (१-२-४८)
ईषदर्थे. (१-१-१४)
ईषद् गुणवचनेनेति. (२-२-७)
ईषा अक्षादिषु. (६-१-१२३)
ईर्ष्यतेस्तृतीयस्य द्वे. (६-१-३)
उकप्रतिषेधे कमे. (२-३-६९)
उच्चयस्य प्रति. (३-३-४०)
उतश्च प्रत्ययाच्छन्दो. (६-४-१०६)
उत्तरपदस्य चेति. (६-३-५७)
उत्तरपदत्वे चापदादिविधौ. (१-१-६२)
उत्तरपदेन परि. (२-२-५)
उत्तरपदलोपे न (७-३-४५)
उत्तरादाहञ् (४-२-१०४)
उत्तानादिषु कर्तृषु (३-२-१५)
उत्पातेन ज्ञापिते च (२-३-१३)
उत्फुल्लसंफुल्लयो. (८-२-५५)
उत्सर्गश्छन्दसि सदादिभ्यो. (३-२-१७१)
उद ईहायाम् (१-३-२४)
उपधिशब्दात्. (५-१-१३)
उपपदविभक्तेः कारक. (२-३-१६)
उपमानात् पक्षात्. (४-१-५५)
उपवस्त्रादिभ्य. (५-१-१०४)
उपसर्गविभक्ति. (१-४-५७)
उपसर्गादस्यत्यूह्यो. (१-३-३०)
उपसर्गादिति. (८-३-११६)
उपाद् देवपूजा. (१-३-२५)
उपायो ह्रस्वत्वं च (५-४-३४)
उभयप्राप्तौ कृत्ये. (२-३-७१)
उभयसंज्ञान्यपीति. (१-४-२०)
उभसर्वतसोः कार्या. (२-३-२)
उरसो लोपश्च (३-२-४८)
उवर्णाल्ल इलस्य (५-३-८३)
उशनसः सम्बुद्धौ वाऽनँङ्. (७-१-९४)
उष्णभद्रयोः करणे (६-३-७०)
उस्योमाङ्क्ष्वाटः. (६-१-९२)
ऊङ् च गमादीना. (६-४-४०)
ऊठ्युपधाग्रहणं. (६-१-१६६)
उदृदन्तैर्यौति. (७-२-१०)
ऊधसोऽनँङ् च (५-१-२) ग.सू.
ऊधसोऽनँङि स्त्रीग्रहणं. (५-४-१३१)
ऊर्णोतेर्णुवद्भावो. (७-२-११)
ऊर्णोतेः प्रतिषेधो. (३-१-३५+३६)
ऊर्ध्वन्दमा. (४-३-६०)
ऋलृवर्णयो. (१-१-९)
ऋचि त्रेः सम्प्रसारण. (६-१-३६)
ऋति सवर्णे ऋ वा (६-१-९७)
ऋतुनक्षत्राणां. (२-३-३४)
ऋते च तृतीयासमासे (६-१-८६)
ऋदुपधेभ्यो. (१-२-५)
ऋल्वादिभ्यः क्तिन् निष्ठावद्. (८-२-४४)
ऋवर्णादपि (५-३-८३)
ऋवर्णाच्चेति. (८-४-१)
ऋषिप्रतिषेधो मित्रे (६-२-१६४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लृति सवर्णे लृ वा (६-१-९७)
एकतरात् प्रतिषेधो. (७-१-२५)
एकविभक्तावषष्ठचन्त. (१-२-४४)
एकाक्षरपूर्वपदाना. (५-३-८३)
एकाच:. (५-२-९५) ग.सू.
एकाचो न (६-१-९५)
एकाचो नित्यम् (४-३-१४२)
एकादेशस्वरोऽन्तरङ्ग:. (८-२-३)
एतद उपसंख्यानम् (५-३-२४)
एते वांनावादय आदेशा. (८-१-२३)
एमन्नादिषुच्छन्दसि. (६-१-९१)
एवे चानियोगे (६-१-९१)
एहीडादयोऽन्यपदार्थे (२-२-७२) ग.सू.
ओकारसकारभकारादौ. (५-३-७१)
ओजसोऽप्सरसो नित्यमित. (३-१-११)
ओतो णिदिति वाच्यम् (७-१-९०)
ओत्वोष्ठयो: समासे वा (६-१-९१)
औङ: श्यां प्रतिषेधो वक्तव्य: (६-४-१४८)
औत्वप्रतिषेध: साकँच्कस्य. (७-२-१०७)
कच्छ्वा ह्रस्वत्वं च (५-२-१०७)
कण्ड्वादीनां तृतीयस्यै. (६-१-३)
कपिलकादीनां. (८-२-१८)
कप्रत्ययचिकादेशौ. (५-२-३३)
कबरमणिविष. (४-१-५५)
कमलादिभ्य:. (४-२-५१)
कमेरुपसंख्यानम् (३-१-४८)
कम्बोजादिभ्यो.... चोला. (४-१-१७३)
कर्तृकरणाद् धात्वर्थे (१९१५ कत्र धातो) ग.सू.
कर्तृकरणयोश्च्व्यर्थ. (१९१५ कत्र धातौ)
कर्तृकर्मणोश्च्व्यर्थ. (१९१५ कत्र धातौ)
कर्मणि समि च (३-२-४९)
कर्मव्यतिहारे सर्व. (८-१-१२)
कविधौ सर्वत्र सम्प्र. (३-२-३)
काकिण्याश्चोप. (५-१-३३)
काण्यादीनां वेति. (७-४-३)
कामप्रवेदन इति. (३-३-१५७)
काम्ये रेँरिवेति. (८-३-३८)
कारके छे च. (६-३-९९)
कारिकाशब्दस्योप. (१-४-५९)
कार्षापणाट्टिठन्. (५-१-२५)
कालभावाध्व. (१-४-५१)
कास्यनेकाच इति. (३-१-३५)
किमोऽस्मिन् विषये. (५-३-९३)
किंयत्तद्बहुषु कृञो. (३-२-२१)
किरतेर्हर्ष. (१-३-२१)
कुक्कुट्यादीनामण्डा. (६-३-४२)
कुँजनस्य परस्य च (४-२-१३८)
कुत्सितग्रहणं कर्तव्यम् (३-२-८६+९३)
कुत्सित इति. (५-२-१२५)
कुरुवृज्योर्गार्हपत. (६-२-४२)
कुस्मनाम्नो वा (१७१० धातौ) ग.सू.
कृञादीनां के द्वे भवत इति. (६-१-१२)
कृञोऽसुँट्कस्येति. (७-२-१३)
कृत्यग्रहणे. (२-१-३२)
कृदिकारादक्तिन: (४-१-४)
कृद्ग्रहणे गति. (२-१-३२)
कृद्योगा षष्ठी समस्यत. (२-२-८)
कृन्नद्या: प्रतिषेधो. (६-३-४४)
कृष्णोदक्पाण्डुसंख्याभ्यो. (५-४-७५)
केचिदविशेषेण. (२-३-६६)
केलिमर उपसंख्यानम् (३-१-९६)
केवलायाश्चेति वक्तव्यम् (५-१-३३)
कोपधप्रतिषेधे तद्धित. (६-३-३७)
कौपिञ्जलहास्तिपदा. (४-३-१३१)
क्ङित्यजादौ वेष्यते (७-२-११४)
क्ङित्येवेष्यते (६-१-१८३)
क्तस्येन्विषयस्य कर्मण्युप. (२-३-३६)
क्तिनि नित्य. (७-२-३०)
क्तिन्नपीष्यते (३-३-९४)
क्रपे: सम्प्रसारणं च (३-३-१०४) ग.सू.
क्रमेस्तु कर्तर्यात्मनेपद. (७-२-३६)
क्रियया यमभिप्रैति. (१-४-३२)
क्रियाकुत्सन इति. (८-१-६९)
क्रियाविशेषणानां च. (२-४-१८)
क्रियासमभिहारे द्वे वाच्ये (८-१-१२)
क्रुकन्नपि. (३-२-१७४)
क्रुञ्चा ह्रस्वत्वं च (४-२-९१)
क्रोशशतयोजनशत. (५-१-७३)
क्लिन्नस्य चिल् पिल्. (५-२-३३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्लृपि सम्पद्यमाने. (२-३-१३)
क्वचिन्न (२-२-३५+३६)
क्विँप्रत्यये तु तस्यापि. (६-४-३४)
क्विँब्वचिप्रच्छ्यचा. (३-२-१७८)
क्वौ च शास इत्वं. (६-४-३४)
क्वौ लुप्तं न स्थानिवत् (१-१-५७)
क्षत्रियसमानशब्दाज्जन. (४-१-१६६)
क्षिपकादीनां च (७-३-४५)
क्षीरलवणयो. (७-१-५१)
क्षुद्रजन्तूपताप. (५-२-९७)
खच्च डिद् वा वाच्यः (३-२-३८)
खच्प्रकरणे गमेः सुँप्युप. (३-२-३८)
खनेर्डडरेकेकवका. (३-३-१२५)
खप्रत्ययानुत्पत्तौ. (५-२-१२)
खरुसंयोगोपधान्न (४-१-४४)
खर्परे शरि वा. (८-३-३६)
खलतिकादिषु वचनम् (१-२-५१)
खलादिभ्य इनिँ. (४-२-५१)
खश्प्रकरणे वातशुनी. (३-२-२८)
खुरखराभ्यां वा नस् (५-४-११८)
ख्यश्च (५-४-११९)
ख्याञादेशे न (८-३-६)
गच्छतौ परदारादिभ्यः (४-४-१)
गजसहायाभ्यां. (४-२-४३)
गड्वादिभ्यः सप्तम्यन्तं. (२-२-३५)
गणिकाया यञिति. (४-२-४०)
गतिकारकेतरपूर्वपदस्य. (६-४-८२+८३)
गतिकारकोपपदानां. (२-२-१९)
गन्धस्येत्वे तदेकान्त. (५-४-१३५)
गमादीनामिति. (६-४-४०)
गम्यमानापि क्रिया. (२-३-२८)
गवादिषु विन्देः. (३-१-१३८)
गवि च युक्ते (६-३-४६)
गापोर्ग्रहणे. (२-४-७७)
गिरौ डश्छन्दसि (३-२-१५)
गिलगिले च (६-३-७०)
गुग्गुलुमधुजतु. (४-१-७१)
गुणकर्मणि वेष्यते (२-३-६५)
गुणवचनेभ्यो मतुँपो. (५-२-९४)
गुणवृद्ध्यौत्व. (१-४-२)
गुणात् (५-२-९५) ग.सू.
गुणात्तरेण तरलोपश्चे. (२-२-९)
गुणादिभ्यो ग्रामज्. (४-२-३७)
गोत्रादङ्कवदिष्यते (४-२-७)
गोत्रान्ता. (१-१-७२)
गोर्यूतौ छन्दसि (६-१-७६)
गोष्ठजादयः स्थाना. (५-२-२९)
गौरिषक्थः. (८-३-९८)
ग्लाम्लाज्या. (३-३-९४)
ग्लास्नावनुँ. (८१७ स्वनँ धातौ)
घञपोः प्रतिषेधे क्यप. (२-४-५६)
घञर्थे कविधानम् (३-३-५८)
घटादयः षितः (७७४ ञित्वराँ धातौ)
घटादयो मितः (८१७ स्वनँ धातौ)
घटीखारीखरीषूप. (३-२-३०)
घट्टि वन्दि विदि. (३-३-१०७)
घस्लृँभावेऽच्युप. (२-४-३७)
घोषणग्रहणमत्र. (४-३-१२७)
ङावुत्तरपदे प्रति. (८-२-८)
चञ्चद्बृहतो. (५-४-३)
चटकाच्चेति. (४-१-१२८)
चतुरश्छयतावाद्यक्षर. (५-२-५१)
चतुर्मासाद् यञ्ञे (४-३-५८)
चतुरोऽच्प्रकरणे त्र्युपाभ्यामुप. (५-४-७७)
चतुर्थादच ऊर्ध्वस्य. (५-३-८३)
चतुर्थ्यर्थ उप. (५-१-४६)
चतुर्मासाण्यो. (५-१-९३)
चतुर्वर्णादीनां स्वार्थ. (५-१-१२३)
चतुर्वेदस्योभयपदवृद्धिश्च (५-१-१२३) ग.सू.
चतुष्पाज्जातिरिति. (२-१-७१)
चन्द्रभागान्नद्याम् (४-१-४५) ग.सू.
चयो द्वितीयाः शरि. (८-३-२८+८-४-४७)
चरणाद् धर्माम्नाययो. (४-३-१२६)
चरिचलिपति. (६-१-१२)
चरेराङि चाऽगुरौ (३-१-१००)
चर्करीतं च (१०८० वशँ धातौ)
चर्मणः कोश. (६-४-१४४)
चातुर्मास्यानां. (५-१-९३)
चारौ वा (६-१-२१७)
चावतद्धित. (६-१-२१७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिति प्रत्यये प्रकृतिप्रत्यय. (६-१-१५८)
चित्रीकरणे प्रापि (१९१५ धातौ)
चिरपरुत्परारिभ्य. (४-३-२३)
चीवरादर्जने परिधाने च (३-१-२०)
चुल्च (५-२-३३)
चूडादिभ्य उपसंख्या. (५-१-१०९)
चेलराज्यादिस्वरा. (६-२-१२९)
छत्वममीति. (८-४-६२)
छन्दसः प्रत्ययविधाने. (४-२-५५)
छन्दसि (१२७० धातौ) ग.सू.
छन्दसि परेच्छायामिति. (३-१-८)
छन्दसि पूर्वाङ्गवच्चेति. (२-१-२)
छन्दसि भाषायां च प्रचेतसो. (८-२-७०)
छन्दसि वेति. (७-३-१०७)
छन्दसि स्त्रियां बहुल. (६-३-९२)
छन्दसि विनिप्रकरणे. (५-२-१२२)
छन्दसीति वक्तव्यम् (३-१-११८)
छन्दसीवनिँपौ (५-२-१०९)
छप्रकरणे पैङ्गाक्षी. (४-२-२८)
जनीँजृष्. (८१७ स्वनँधातौ)
जराया जरश्च. (५-४-१०७) ग.सू.
जल्पतिप्रभृतीना. (१-४-५२)
जवसवौ. (३-३-५६)
जसादिषुच्छन्दसि. (७-३-१०९)
जहिकर्मणा. (२-१-७२)
जागर्तेरकारो वा (३-३-१०१)
जातान्तान्न (४-१-५२)
जातिकालसुखा. (२-२-३६)
जातिपूर्वादिति. (४-१-५२)
जाते चार्थे योऽन्येन. (४-२-७)
जिघ्रतेः संज्ञायां प्रतिषेधो. (३-१-१३७)
जिह्वाकात्य. (१-१-७२)
जुगुप्साविराम. (१-४-२४)
जुहोतेर्दीर्घश्च (३-२-१७८)
ज्योतिरुद्गमन. (१-३-४०)
ज्योत्स्नादिभ्य. (५-२-१०३)
ज्वलँ ह्वलँ ह्मलँ (८१७ स्वनँ धातौ)
झलादाविति वाच्यम् (६-४-३२)
ठक्छसोश्च (६-३-३५)
ठञ्प्रकरणे तदस्मिन् वर्तत इति. (४-२-३५)
डच्प्रकरणे संख्यायास्ततपुरुषस्यो. (५-४-७३)
डट् स्तोमे (५-२-३७)
डप्रकरणे सर्वत्रपन्नयो. (३-२-४८)
डाचि बहुलं. (८-१-१२)
डे च विहायसो विहादेशो. (३-२-४८)
णाविष्ठवत्. (६-४-१५५)
णिङ्ङ्गान्निरसने (१९४६ तुत्थ धातौ)
णिच्यच. (७-४-८०)
ण्यति प्रतिषेधे त्यजेरुप. (७-३-६६)
ण्यत्प्रकरणे लपिदभिभ्या. (३-१-१२४)
ण्यन्तभादीनामुप. (८-४-३३)
ण्यल्लोपावियँङ्यण् (६-४-४८+५१)
ण्यादयोऽर्थविशेष. (८-१-८५)
तकिशसिचति. (३-१-९७)
तक्षन्नलोपश्च (४-२-९१)
तक्ष्णोऽण उप. (४-१-१५३)
तच्चरतीति च (५-१-९३)
ततोऽभिगमनमर्हतीति. (५-१-७३)
तत्करोति तदाचष्टे (१९१५ कत्र धातौ)
तत्पचतीति द्रोणादण् च. (५-१-५१)
तत्परे च (८-४-४७)
तत्स्थैश्च. (२-२-९)
तदन्ताच्चेति. (५-२-१३५)
तदादेश्च (४-३-६०)
तदाहेति माशब्दादि. (४-४-१)
तद्बृहतोः करपत्यो. (६-१-१५२)
तद्युक्तात् कालात् सप्तमी. (२-३-२८)
तद्युक्तादध्वनः प्रथमासप्तम्यौ (२-३-२८)
तद्राजाच्चाणः (२-४-५९) ग.सू.
तनिपति. (७-२-४९)
तनोतेर्णस्योप. (३-१-१४०)
तन्वादीनां छन्दसि. (६-४-८६)
तपसः परस्मैपदं च (३-१-१५)
तप् पर्वमरुद्भ्याम् (५-२-१२२)
तयोः क्नमित्येके (४-१-३९)
तलो ह्रस्वो वा. (७-३-१०७)
तसिँप्रकरणे आद्यादिभ्य. (५-४-५४)
तस्य दोषः. (१-१-५७)
तस्येदमित्यपत्येऽपि. (४-१-९२)
ताच्छीलिके णेऽपि (४-१-१५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादर्थ्ये चतुर्थी. (२-३-१३)
तारका ज्योतिषि (७-३-४५)
तालाद्धनुषि (४-३-१५०) ग.सु.
तावतिथेन गृह्णातीति. (५-२-७७)
तिङन्तस्य प्रतिषेधो. (८-३-१०१)
तितुत्रेष्वग्रहादीना. (७-२-९)
तिलान्निष्फलात्. (४-२-३६)
तिष्यपुष्ययोर्नक्षत्राणि. (६-४-१४९)
तिसृभावे कन्यु. (७-२-९९)
तीयस्य ङित्सु वा (१-१-३५)
तीयादीकक् स्वार्थे. (५-३-४८)
तुरीयशब्दस्याऽपिपी. (२-२-३)
तेनातिक्रामति (१९१५ कत्र धातौ)
त्यकनश्च न (७-३-४५)
त्यक्त्यपोश्च (७-३-४४)
त्यदादितः शेषे. (१-२-७२)
त्यदादीनां फिञ् वा. (४-१-१५६)
त्यदादीनां मिथः. (१-२-७२)
त्यब्नेर्ध्रुवे. (५-२-१०४)
त्रिचतुर्भ्यां हायनस्य. (४-१-२७)
त्रेश्च प्रतिषेधो. (६-१-१७१)
त्रौ च (६-३-१०१)
त्वतलोर्गुणवचनस्य (६-३-३५)
दगुकोशल..... छात्रवृषाणां. (४-१-१५५)
दरिद्रातेरार्धधातुके. (६-४-११४)
दलद्वये टाबभाव :. (८-१-१२)
दारजारौ कर्तरि. (३-३-२०)
दारावाहनोऽणन्तस्य. (३-२-४९)
दिक्पूर्वपदस्यापरस्य पश्चभावो.(५-३-३२)
दिक्शब्देभ्यस्तीरस्य. (६-३-१०९)
दिग्धसहपूर्वा. (३-२-१५)
दिवश्च दासे (६-३-२१)
दुग्वोर्दीर्घश्च (८-२-४४)
दुरः षत्वणत्वयो. (द्वि. १-४-५८)
दुरो दाशनाश. (६-३-१०९)
दुहिपच्योर्बहुलं. (३-१-८७)
दूतवणिग्भ्यां च (५-१-१२५)
दूरादेत्यः (४-२-१०४)
दृक्षे चे (६-३-९१)
दृक्षे चेति (६-३-८९+९०)
दृन्करपुनःपूर्वस्य. (६-४-८४)
दृशिग्रहणाद् भवदादि. (५-३-१४)
दृशेः क्सश्च वक्तव्यः (३-२-६०)
दृशेरग्वक्तव्यः (३-१-८६)
दृशेश्च (१-४-५२)
दृष्टे सामनि अण् वा डित्. (४-२-७)
दृष्टे सामनि जाते. (४-२-७)
दृशेश्चेति. (७-२-६८)
दृ भये इत्यस्य (३-२-१७८)
देवस्य चेति. (४-२-१३८)
देवाद् यञञौ (४-१-८५)
देवानां प्रिय इति. (६-३-२१)
दोष उपसंख्या. (७-३-५१)
द्युतिगमिजुहोतीनां. (३-२-१७८)
द्युश्चोभयाद्. (५-३-२२)
द्वन्द्वतत्पुरुषयोरुत्तर. (२-१-५१)
द्वन्द्वे घ्यन्तादजाद्यदन्तं. (२-२-३३)
द्वन्द्वे देवासुरादिभ्यः. (४-३-८८)
द्विगुप्राप्तापन्ना. (२-४-२६)
द्विगोर्नित्यम् (५-२-३७)
द्वितीयादचो लोपे. (५-३-८३)
द्वितीयाऽनुपसर्ग इति. (६-२-४७)
द्वित्वे गोयुगच् (५-२-२९)
द्वित्रिपूर्वादण् च (५-१-३५)
द्विपर्यन्तानामेवेष्टिः (७-२-१०२)
द्विषः शतुर्वा (२-३-६९)
द्विर्वचनप्रकरणे छन्दसि. (६-१-८)
द्विर्वचने परसवर्णत्वं. (८-२-३)
द्व्यच्त्र्यज्भ्यामेव (८-४-६)
धर्मुँञन्तात् स्वार्थे ड. (५-३-४५)
धर्मादिष्वनियमः (२-२-३१)
धातुरूपं च (१९१५ कत्र धातौ)
धात्वन्तयकोस्तु. (७-३-४६)
धात्वर्थनिर्देशे ण्वुँल्. (३-३-१०८)
धासु वेति. (६-३-१०९)
धूञ्प्रीञोर्नुँग्वक्तव्यः (७-३-३७)
धृषेश्चेति. (३-२-१७२)
धेनोर्भव्यायाम् (६-३-७०)
धेनोरनञ इति. (४-२-४७)
ध्यायतेः सम्प्रसारणं च (३-२-१७८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न कम्यमिचमाम् (८१७ स्वनँ धातौ)
नकारग्रहणमपि. (६-१-१६९)
नगपांसुपाण्डुभ्यश्चे. (५-२-१०७)
नञो नलोपस्तिङि क्षेपे (६-३-७३)
नञोऽस्त्यर्थानां वाच्यो. (२-२-२४)
नञ्स्नञीकक्. (४-१-१५)
नभोऽङ्गिरोमनुषां. (१-४-१८)
नरकरि. (४-२-५१)
नराच्चेति वक्तव्यम् (४-४-४९)
नवयज्ञादिभ्य उप. (४-२-३५)
नवस्य नू आदेश. (५-४-२५)
न विद्यायाः (५-३-४८)
नश्च पुराणे प्रात् (५-४-२५)
न समासे (६-१-१२३)
नान्तस्य टिलोपे. (६-४-१४४)
नाऽन्ये मितोऽहेतौ (१६२८ चिञ् धातौ)
नाभि नभं च (५-१-२) ग.सू.
नाम गोत्रं वा. (८-२-८३)
नामाख्यात. (४-३-७२)
नासिकाया नस् यत्तत्क्षुद्रेषु (६-१-६१)
नित्यमाम्रेडिते डाचि (६-१-९६)
निमित्तपर्यायप्रयोगेषु. (२-३-२७)
निमित्तात् कर्मयोगे (२-३-३६)
निमिमीलियां खलचो. (६-१-५०)
नियन्तृकर्तृकस्य. (१-४-५२)
निरादयः क्रान्ताद्यर्थे. (२-२-१८)
निर्विण्णस्योप. (८-४-२८)
निष्के चेति. (६-३-५६)
निष्टर्क्ये व्यत्ययं. (३-१-१२३)
निष्ठादेशः षत्व. (८-२-३)
निष्ठायामनिट. (७-३-५२)
निष्ठायां सेट. (३-३-१०३)
निसो गते (४-२-१०४)
नीलादोषधौ (४-१-४२)
नील्या अन्. (४-२-२)
नीवह्योर्न (१-४-५२)
नुँड्विधौ. (७-४-११)
नुँमचिरतृज्वद्. (१-४-२)
नृतिखनि. (३-१-१४५)
नृनरयोर्वृद्धिश्च (४-१-७३)
नेतुर्नक्षत्र. (५-४-११६)
नौकाकान्न. (२-३-१७)
नौ लिम्पेरिति. (३-१-१३८)
पञ्चजनादुप. (४-३-५८)
पञ्चजनादुप (५-१-९)
पण्यकम्बलः. (६-२-४२)
पत्राद् वाह्ये (४-३-१२३)
पथः पन्थ च (४-२-८०) ग.सू.
पथः संख्याव्ययादे. (२-४-१८)
पथ्यध्यायन्याय. (४-२-१२९)
पदाधिकारश्चेल्लत्व. (८-२-३)
परस्परोपपदाच्चेति. (१-३-१६)
पराङ्गकर्मकान्न (१-३-२०)
परादिश्च परान्तश्च. (६-२-१९८)
परिचर्या परिसर्या. (३-३-१०१)
परिमुखादिभ्य. (४-३-५९)
परेर्वर्जनेऽसमासे वा (८-१-५)
परेर्वा (३-३-१०७)
परेहर्ष. (६-२-१८३)
परोक्षे च लोकविज्ञाते. (३-२-१११)
परौ व्रजेः. (८-२-३०)
पर्यादयो ग्लानाद्यर्थे. (२-२-१८)
पर्श्वा णस्. (४-२-४२)
पल्यराजभ्यां चेति. (५-४-७८)
पाटेर्णिलुक् चोक् . (६-१-१२)
पाणिगृहीती भार्या. (४-१-५२)
पाणौ सृजेर्ण्यद्. (३-१-११०)
पाण्डो... ड्यण्. (४-१-१६९)
पातेर्णौ लुँग्. (७-३-३७)
पात्राद्यन्तो न (२-४-१७)
पादशतग्रहणमनर्थ. (५-४-१)
पादिषु धेट उप. (१-३-८९)
पार्श्वादिषूप. (३-२-१५)
पार्ष्णिधमन्यो. (५-२-९७)
पालकान्तान्न (४-१-४८)
पावकादीनां छन्दसि. (७-३-४५)
पाशकल्पककाम्ये. (८-३-३८)
पिञ्जश्छन्दसि. (४-२-३६)
पितुर्भ्रातरि व्यत् (४-२-३६)
पिप्पल्यादयश्च. (४-१-४१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिबतेः सुराशीध्वो. (३-२-८)
पिशङ्गादुप. (४-१-३९)
पिशाचाच्चेति. (५-२-१२९)
पीतात् कन् (४-२-२)
पीवोपवसना. (६-३-१०९)
पुच्छाच्चेति. (४-१-५५)
पुच्छादिषु धात्वर्थ. (१९४६ तुत्थ धातौ)
पुच्छादुदसने. (३-१-२०)
पुण्यसुदिनाभ्या. (२-४-१८)
पुण्याहवाचनादिभ्यो. (५-१-११०)
पुंनपुंसकयोरेकशेषे. (१-२-७२)
पुरुषाद् वध. (५-१-१०)
पुष्पमूलेषु बहु. (४-३-१६४)
पुंसानुजो जनुषा. (६-३-३)
पुंसि जाते (४-१-११०)
पू इति पूञो. (८-४-३३)
पूजायां स्वतिग्रहणं. (५-४-५९)
पूञो विनाशे (८-२-४४)
पूतिश्च चानु. (८-१-६९)
पूरण इति. (६-३-६)
पूरोरण्. (४-१-१६९)
पूर्णमासादण्. (४-२-३५)
पूर्वत्राऽसिद्धीये न स्थानि. (१-१-५७)
पूर्वपदाद्युदात्तप्रकरणे दिवो. (६-२-१९८)
पूर्वशेषोऽपि. (१-२-७२)
पूर्वाङ्गवच्चेति. (२-१-२)
पूर्वान्तोदात्तप्रकरणे महद्. (६-२-१९८)
पूर्वादिभ्यः काण्डः (४-२-५१)
पृच्छतौ सुस्नातादि. (४-४-१)
पृथिव्या ञाञौ (४-१-८५)
पृथुं मृदुं भृशं. (६-४-१६१)
प्रकृतिप्रत्ययार्थयोः. (५-२-४५)
प्रकृतिविकारभावे. (६-२-४३)
प्रकृत्याऽके राजन्य. (६-४-१६३)
प्रकृत्यादिभ्य. (२-३-१८)
प्रगस्यच्छन्दसि. (४-३-२३)
प्रतिपरसमनु. (५-४-१०७) ग.सू.
प्रतिपदविधाना षर्ष्ठी. (२-२-१०)
प्रतिषेधे स्वरदीर्घयलोपेषु. (१-१-५७)
प्रतिषेधे हसादीना. (१-३-१५)

प्रत्यये भाषायां. (८-४-४४)
प्रथमलिङ्गग्रहणं च (१-४-३)
प्रमाणपरिमाणाभ्यां. (५-२-३७)
प्रमाणे लः (५-२-३७)
प्रलम्भनाभिभव. (६-१-५०)
प्रवत्सतरकम्बल. (६-१-८६)
प्रश्नान्ताभिपूजित. (८-२-१०७)
प्रहरणार्थेभ्यश्च परे. (२-२-३६)
प्राक् शतादिति. (६-३-४७+४८+४९)
प्राग्बहुव्रीहिग्रहणं च. (५-४-६९)
प्राणिनि च (४-१-४२)
प्राण्यङ्गादेव (५-२-९६)
प्राण्यङ्गान्न (५-२-१२८)
प्रातिपदिकाद् धात्वर्थे.(१९१५ कत्र धातौ) ग.सू.
प्रात् तुम्पतौ. (६-१-१५२) ग.सू.
प्रादयो गताद्यर्थे. (२-२-१८)
प्रादिप्रसङ्गे. (२-२-१८)
प्रादिभ्यो धातुजस्य. (२-२-२४)
प्रादूहोढोढ्ये. (६-१-८६)
प्रायस्य चित्ति. (६-१-१५२)
प्लुतविकारस्तुँग्. (८-२-३)
फ़लपाकशुषा. (४-३-१६४)
फलबर्हाभ्यामिनच् (५-२-१२२)
फलसेनाङ्गवनस्पति.(२-४-१२)
फल्गुन्यषाढाभ्यां.(४-३-३४)
फेनाच्चेति. (३-१-१६)
बलादूलच्.(५-२-१२२)
बहिषष्टिलोपो .(४-१-८५)
बहुच्पूर्वाच्चेति. (५-१-३०)
बहूर्जि प्रतिषेधो.(७-१-७२)
बहुलं छन्दसीति. (३-२-८ + ७-३-८७ + ८-३-८७)
बहुलं संज्ञाछन्दसोरिति. (२-४-५४ + ४-१-५३)
बहुव्रीहौ वा (४-१-७)
बहुष्वनियमः (२-३-३३,३४)
बह्वल्पार्थान्मङ्गला. (५-४-४२)
बृहन्महतोरुप. (६-१-१६८)
ब्रह्मणि वदः (३-२-७८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मवर्चसादुप. (५-१-३८)
ब्राह्मणाच्छंशिन. (६-३-२)
भक्षस्यच्छन्दसि. (६-३-७०)
भगे च दारेरिति. (३-२-४१)
भद्राच्चेति. (५-४-६७)
भय भीत भीति. (२-१-३७)
भवतेश्चेति. (३-१-१४३)
भवने क्षेत्रे. (५-२-२९)
भवार्थे तु.(४-१-८५)
भविष्यत्येवेष्यते (३-३-१५६)
भवेद् वर्णागमाद् .(६-३-१०९)
भस्याढे तद्धिते (६-३-३५)
भागरूपनामभ्यो .(५-४-२५)
भाण्डात् समाचयने (३-१-२०)
भावप्रत्ययान्तादिमब् .(४-४-२०)
भाषायां धाञ्कृसृ .(३-२-१७१)
भाषायां शासियुधि .(३-३-१३०)
भूमनिन्दा .(५-२-९४ टी.)
भूरिदाब्नस्तुँड् .(८-२-१७)
भूषाकर्मकिरादि .(३-१-८९)
भोजं क्षत्रिये (४-१-८०) ग.सू.
भोराजन्यविशां .(८-२-८३)
भ्रुकुंसादीनामकारो .(६-३-६१)
भ्रस्जादेशात् सम्प्रसारणं .(६-४-४७)
भ्रातुर्ज्यायसः (२-२-३४)
भ्राष्ट्राग्न्योरिन्धे (६-३-७०)
भ्रुकुंसादीनां तु भवत्येव (६-३-६१)
मण्मीयौ च .(४-३-६०)
मत्वार्थाच्छः (३-३-१०८)
मत्स्यपर्यायेषु मीन .(४-४-३५)
मत्स्यस्य ङ्याम् (६-४-१४९)
मधुकमरिचयो .(५-१-७६)
मध्याच्छः (४-३-६०)
मध्यो मध्यं .(४-३-६०)
मनुष्यलुपि .(१-२-५२)
मर्मणश्चेति .(५-२-१२२)
मर्मृज्यते .(७-४-९१)
मलोपश्च वक्तव्यः (८-१-६७)
मस्जेरन्त्यात् .(१-४-४६)
महदात्वे घासकर .(६-३-४६)
महाजनाट्ठञ् (५-१-९)
महानाम्न्यादिभ्यः .(५-१-९३)
महिषाच्चेति .(४-२-८७)
माङ्याक्रोशे (३-२-१२४)
मातज्मातृकमातृषु वा (६-१-१४)
मातुर्डुलच् (४-२-३६)
मातुलोपाध्याय .(४-१-४९)
मातृपितृभ्यां पितरि .(४-२-३६)
मातृणां मातच् .(७-३-१०७)
मान्तप्रकृतिक .(३-१-८)
मामकनरकयोरुप .(७-३-४४)
माला क्षेपे (५-२-१३१) ग.सू.
मांसपृतनासानूनां .(६-१-६१)
मासाद् भृतिप्रत्यय .(५-४-११६)
मितद्रवादिभ्य .(३-२-१८०)
मिथोऽनयोः समासे .(२-२-३५)
मुखपार्श्वतसो .(४-२-१३८) ग.सू.
मुख्यार्थात्तूक्थ .(४-२-६०)
मुद्गलाच्छन्दसि .(४-१-४९)
मुहुषः प्रतिषेधः (८-३-४१)
मूलविभुजादिभ्यः कः (३-२-५)
मूलान्नञः (४-१-४)
मेधारथाभ्यां .(५-२-१०९)
यकारपरस्य रेफस्य .(६-१-३)
यक्चिणोः प्रतिषेधे णिश्रन्थि .(३-१-८९)
यक्चिणोः प्रतिषेधे हेतुमण्णि .(३-१-८९)
यजिवपिर्वहि .(६-१-१५)
यजेः कर्मणः करणसंज्ञा .(१-४-३२)
यज्ञर्त्विग्भ्यां तत् कर्मा .(५-१-७०
यञादीनामेक .(२-४-६४)
यणः प्रतिषेधो .(८-२-२३)
यणो मयो द्वे .(८-४-४६)
यतश्चाध्वकालनिर्माणं .(२-३-२८)
यति वर्णनगरयोर्नेति .(६-१-६१)
यथाकाम्ये .(८-१-६६)
यथेष्टं नामधातुषु (६-१-३)
यदायद्योरुप .(६-३-१४७)
यन्प्रकरणे पृष्ठादुप .(४-२-४२)
यमाच्चेति वक्त .(४-१-८५)
यमोऽपरिवेषणे (८१९ धातौ)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्तिकादीनां सूची

यवखदादिभ्य .(५-२-११६)
यवनाल्लिप्याम् (४-१-४९)
यवलपरे यवला .(८-३-२६)
यवाद् दोषे. (४-१-४९)
यस्मिन् विधि. (१-१-७१)
युवादेर्न (८-४-११)
यूनश्च कुत्सायाम् (४-१-१६५)
योगे चेति .(८-२-२२)
योपधप्रतिषेधे .(४-१-६३)
रञ्जेर्णौ मृगरमणे .(६-४-२४)
रथाङ्ग एवेष्यते (४-३-१२१)
रप्रकरणे खमुख .(५-२-१०७)
रयेर्मतौ बहु .(६-१-३६)
राजघ उप .(३-२-५५)
राजपर्यायस्यैवेष्यते (२-४-२३)
राजाचार्याभ्यां तु .(५-१-९)
राजाऽसे (५-१-१२७) ग.सू.
राजा ऽह्नोश्छन्दसि (६-२-१५९) ग.सू.
राज्ञो ऽपत्ये जातिग्रहणं .(४-१-१३७)
रादिफः (३-३-१०८)
रीगृत्वत .(७-४-९०)
रूपरात्रि .(८-२-६९)
रेशब्दाच्च (६-१-१७१)
रोगे चा ऽयमिष्यते (५-२-१२९)
लक्ष्म्या अच्च (५-२-१००) ग.सू.
लध्वक्षरं पूर्वम् (२-२-३४)
लुक्प्रकरणे चित्रारेवती .(४-३-३४)
लुँङि वा (६-४-११४)
लुबाख्यायिकाभ्यो .(४-३-८७)
लुम्पेदवश्यमः .(३-१-१२५)
लोकस्य पृणे (६-३-७०)
लोपः पूर्वपदस्य च (५-३-८३)
लोम्नोऽपत्येषु .(४-१-८५)
लोहितादिडाज्भ्यः क्यष्वचनं .(३-१-१३)
लोहिताल्लिङ्ग .(५-४-३१)
ल्यब्लोपे कर्मण्यधि .(२-३-२८)
वटकेभ्य इनिँ .(५-२-८२)
वतुँप्रकरणे युष्मदस्मद्भ्यां .(५-२-३९)
वत्वन्तात् स्वार्थे द्वय .(५-२-३७)
वन उपसंख्यानम् .(८-३-१)
वनो न हशः (४-१-७)
वयस्यचरम .(४-१-२०)
वयोवाचकस्यैव हायनस्य .(४-१-२७)
वर्जने प्रतिषेधो .(२-४-५४)
वर्णका तान्तवे (७-३-४५)
वर्णागमो वर्णविपर्यय .(६-३-१०९)
वर्णात् कारः (३-३-१०८)
वर्णानामानुपूर्व्येण (२-२-३४)
वर्तका शकुनौ .(७-३-४५)
वर्तमानवर्धमान .(६-२-१५९) ग.सू.
वलादावार्धधातुके .(२-४-५६)
वशिरण्योरुप .(३-३-५८)
वसतेर्लुँङ् .(३-२-११०)
वसुशब्दादपि .(४-४-१४०)
वसुशब्दाद् गुण .(४-१-४४)
वसेरश्यर्थस्य (१-४-४८)
वसेस्तव्यत् कर्तरि .(३-१-९६)
वस्त्रात् समाच्छादने (३-१-२१)
वहेस्तुरणिट् च (४-३-१२०)
वा केशेषु (६-१-६०)
वा गोमयेषु (४-२-१२९)
वाग्दिक्पश्यद्भ्यो .(६-३-२१)
वाङ्मतिपितृमतां .(४-१-८५)
वाचो वादे .(६-३-१०९)
व्याच्य ऊर्णोर्णुवद् .(३-१-३६)
वा छन्दसि (६-१-१०३)
वातदन्तबल .(५-२-९७)
वातपित्तश्लेष्मभ्यः .(५-१-३७)
वातात् समूहे च (५-२-१२२)
वातादूलः (४-२-४२)
वा नपुंसकानाम् (८-२-८)
वा नामधेयस्य (१-१-७२)
वा प्रकरणे गिरिनद्यादीनामुप .(८-४-१०)
वा प्रियस्य (२-२-३५)
वाऽऽबन्तः स्त्रियामिष्टः (२-४-१७)
वायोः प्रयोगे .(६-३-२६)
वा लिप्सायाम् (१-३-२५)
वा हतजग्धयोः (८-४-४७)
विकारसदृशे .(६-२-१५९)
विदीन्धिखिदिभ्यो .(६-१-१८१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायोनि....तत्पूर्वो .(६-३-२३)
विद्यालक्षणकल्पा .(४-२-६०)
विनापि पूर्वपदेन पश्चभावो .(५-३-३२)
विनापि प्रत्ययं .(५-३-८३)
विभक्तिनिमित्तस्वराच्च .(६-१-१९३)
विभक्तिस्वरान्नञ् .(६-१-१९३)
विभाजयितुर्णि .(४-४-४९)
विभाषा भवद्भगव .(८-३-१)
विभाषितं चापि बह्वर्थमनु. (८-१-६९)
विरूपाणामपि .(१-२-६४)
विंशतेश्चेति .(५-१-५७ + ५-२-३७)
विशसितुरिड् .(४-४-४९)
विशिपूरि .(५-१-११०)
विष्णौ न (६-३-२८)
विष्वगित्युत्तर .(५-२-१००)
विस्तारे पटच् (५-२-२९)
विस्मितप्रतिघातयो .(७-२-२९)
विहायसो विह च (३-२-३८)
वुंग्युंटावुवँङ्यणोः .(६-४-२२)
वृत्तेश्च (५-२-१०१)
वृद्धस्य च पूजायाम् (४-१-१६५)
वृद्धाच्चेति वक्तव्यम् (४-२-३९)
वृद्धेर्वृधुषि .(४-४-३०)
वृषण् वस्वश्वयोः (१-४-१८)
वेणुकादिभ्यश्छण् .(४-२-१३८)
वेर्ग्रो वक्तव्यः (५-४-११९)
वेशादिषु .(६-३-१२२)
वैरे देवासुरादिभ्यः .(४-३-१२५)
व्याधिमत्स्यबलेषु .(३-३-१७)
व्यासवरुडनिषाद .(४-१-९७)
व्रताद् भोजने तन्निवृत्तौ .(३-१-२१)
व्रीहिवत्सयोरिति .(३-२-२४)
शकन्ध्वादिषु .(६-१-९१)
शकलकर्दमाभ्यां च (४-२-२)
शक्तिः शस्त्रे (४-१-४) ग.सू.
शतरुद्राच्छश्च घश्च (४-२-२८)
शतसहस्रयोरेवेष्यते (५-२-४५)
शतसहस्रौ .(२-१-३९)
शतषष्टेः षिकन् .(४-२-६०)
शताच्चेति .(५-१-३५)
शन्शतोर्डिनिँ .(५-१-५७ + ५-२-३७)
शप उपालम्भे (१-३-२१)
शब्दायतेर्न (१-४-५२)
शब्विकरणानामेव (१-२-२१)
शमो दर्शने (८१८ धातौ)
शरः खयो द्वे .(८-४-४६)
शसि बह्वल्पार्थस्य .(६-३-३५)
शंसिदुहि .(३-१-१०९)
शस्य यो वा (२-४-५४)
शाकपार्थिवादीनां .(२-१-६०)
शाकीपलाली .(५-२-११०)
शिक्षेर्जिज्ञासायाम् (१-३-२१)
शिखादिभ्य इनिँः (५-२-११६)
शितिना अहिना .(५-४-११८)
शीतोष्णतृप्रेभ्य .(५-२-१२२)
शीलिकामिभिक्ष्या .(३-२-१)
शीले को मलोपश्च (५-३-७१)
शुनः संकोच .(६-४-१४४)
शुनः सम्प्रसारणं वा च .(५-१-२) ग.सू.
शुनो दन्तदंष्ट्रा .(६-३-१३७)
शूद्रा चाऽमहत्पूर्वा .(४-१-४)
शृङ्गवृन्दाभ्यामारकन् (५-२-१२२)
शृ वायुवर्ण .(३-३-२१)
शे तृम्फादीना .(७-३-५९)
शेपपुच्छलाङ्गूलेषु .(६-३-२१)
शेवलादीनां तृतीया .(८-३-८४)
शेषे विभाषा (२-३-६६)
शैषिकान्मतुँबर्थीया .(३-१-७)
श्चुत्वं धुँटि .(८-२-३)
शितपा शपा .(७-३-९४)
श्रच्छब्दस्योप .(१-४-५८)
श्रन्थिग्रन्थि .(१-२-६)
श्रन्थि ग्रन्थि .(६-४-१२०)
श्रविष्ठाषाढाभ्यां .(४-३-३४)
श्रितादिषु गम्यादीना .(२-१-२४)
श्रीशस्त्वाऽवतु .(८-१-२३)
श्रुयजीषिस्तुभ्यः .(३-३-९४)
श्रेण्यादिषु च्व्यर्थ .(२-१-५९)
श्रोत्रियस्य यलोपश्च (५-१-१२९)
श्वयतेर्लिंटचभ्यास .(६-१-३०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वशुरस्योकारा .(४-१-६८)
श्वेतवाहादीनां .(३-२-७२)
श्वेताश्वाश्वतर .(१९४६ तुत्थ धातौ)
षट्त्वे षड्गवच् (५-२-२९)
षष उत्वं दतृ .(६-३-१०९)
षषष्ठाजादिवचनात् .(५-३-८३)
षष्ठचर्थे चतुर्थी .(२-३-६२)
षष्ठ्यामन्त्रित .(२-१-२)
षाच्च यञः (४-१-७४)
सकर्मकाणां प्रतिषेधो .(३-१-८७)
संख्यापूर्वं रात्रं (२-४-२९)
संख्याप्रकृतेरिति. (४-२-६५)
संख्याया अल्पीयस्याः (२-२-३४)
संघाते कटच् (५-२-२९)
संज्ञायां पुंसि .(३-१-११२)
संज्ञायामण् (५-१-९३)
संज्ञायां वा (४-१-४२)
संज्ञायां स्वार्थे .(५-१-५७)
संज्ञोपसर्जन. (१-१-२६)
सति शिष्टस्वर .(६-१-१५३)
सत्त्वे निविशते .(४-१-४४)
सत्यार्थवेदानामापुँग् वक्तव्यः (३-१-२५)
सत्रकष्टकक्ष .(३-१-१४)
सदच्काण्ड .(४-१-४)
सनि ण्वुँलि ल्युँटि .(६-४-११४)
सनि राधो हिंसायामच .(७-४-५४)
सन्निपाताच्चेति .(५-१-३७)
सपूर्वाट्ठञ् वक्तव्यः (४-३-४)
सप्तम्युपमान .(२-२-२४)
समवपूर्वाच्च (३-१-११०)
सम्पदादिभ्यः .(३-३-९४)
संपुंकानां सो वक्तव्यः (८-३-५)
संभस्त्राजिन .(४-१-४)
सम्भ्रमेण प्रवृत्तौ .(८-१-१२)
समश्च बहुलम् (३-१-११२)
समस्यमाने द्व्येकत्व .(७-२-९७)
समानवाक्ये निघातयुष्मदस्मदादेशा.(८-१-२३)
समानाच्च (४-३-५९)
समानान्ययोश्चेति .(३-२-६०)
समासप्रत्ययविधौ .(१-१-७१)

समाहारे चाऽयमिष्यते (२-१-२०)
समिधामाधाने .(४-३-१२०)
समो ऽकूजने (१-३-२१)
समो वा लोप .(८-३-५)
संयोगान्तलोपो .(८-२-३)
सर्वजनाट्ठञ् खश्च (५-१-९)
सर्वतोऽक्तिन्नर्थो .(४-१-४५)
सर्वत्र गोरजादि .(४-१-८५)
सर्वत्राग्निकलिभ्यां .(४-२-८)
सर्वत्रामयस्योप .(५-२-१२२)
सर्वनामसंख्ययो .(२-२-३५)
सर्वप्रातिपदिकेभ्यः .(३-१-११)
सर्वप्रातिपदिकानां क्यचि .(७-१-५१)
सर्वसादे .(४-२-६०)
सर्वाण्णो वेति .(५-१-१०)
सर्वादिश्चेति .(५-२-१३५)
सर्वादिः सादेर्द्विगो .(४-२-६०)
सर्वोभयार्थाभ्या .(५-३-९)
संवत्सरात् फल .(४-३-१६) ग.सू.
सस्थानत्वं नमः ख्यात्रे (१०६० धातौ)
सहायाद् वा (५-१-१३१)
सहितसहाभ्यां .(४-१-७०)
सहिवहि .(३-२-१७१)
साक्षात् प्रभृतिषु च्व्यर्थवचनम् (१-४-७३)
सादकारयोः .(६-३-१२२)
साधुकारिणि च (३-२-७८)
साध्वसाधुप्रयोगे च (२-३-३६)
सांनाय्यानुजावरा .(५-४-३६)
सामान्यानतिदेशे (३-३-१३२)
सामान्ये नपुंसकम् (६-३-३४)
सारङ्गः पशु .(६-१-९१)
सासहिवावहि .(३-२-१७१)
सिँज्लोप एकादेशे .(८-२-३)
सिति च (६-१-१२३)
सिद्धे यस्येति .(४-२-९)
सिनोतेर्ग्रास .(८-२-४४)
सिँब्बहुलं णिद् .(३-१-३४)
सीमन्तः केशवेशे (६-१-९१) ग.सू.
सुदिनदुर्दिन .(३-१-१७)
सुदुरोरधिकरणे (३-२-४८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुँप्तिङुपग्रह .(३-१-८५)
सुँबन्तस्य पराङ्ग .(२-१-२)
सुँब्धातुष्ठिवुँ .(६-१-६२)
सुँब्धातोरयमपि .(६-१-६३)
सुवर्णशतमानयोरुप .(५-१-२९)
सुराया अहौ (५-४-३) ग.सू.
सूचिसूत्रि .(३-१-२२)
सूतकापुत्रिका .(७-३-४५)
सूत्रान्तादकल्पादे .(४-२-६०)
सूत्रे च धार्येऽर्थे (३-२-९)
सूर्यागस्त्ययोश्छे .(६-४-१४९)
सूर्याद् देवतायां .(४-१-४८)
सृजियुज्योः श्यँस्तु (३-१-८७)
सृजेः श्रद्धोपपन्ने .(३-१-८७)
सेक् सृप् .(६-१-६२)
स्खदिर् अव .(८२० धातौ) ग.सू.
स्तने धेटो .(३-२-२९)
स्तोमे डविधिः (५-१-५७)
स्त्रियां न (८-२-८३)
स्त्रियामपत्ये लुग् .(४-१-१२८)
स्त्रीनपुंसकयोरुत्तर .(८-१-१२)
स्त्रीप्रत्यययोरकाकार .(२-३-६६)
स्थाम्नो ऽकारः (४-१-८५)
स्थाम्नो लुग् .(४-३-६०)
स्थास्थिन्स्थृणां .(८-३-९८)
स्थेणोरलुँङीति .(२-४-३)
स्नेहे तैलच् (५-२-२९)
स्पृश उपताप .(३-३-१६)
स्पृशमृश .(३-१-४४)
स्यान्तस्योपोत्तमं च .(१-२-३७)
स्वञ्जेरुप .(८-३-११८)
स्वराद्यन्तोपसर्गा .(१-३-६४)
स्वरूपस्य पर्या .(४-४-३५)
स्वरो रोहतौ .(६-३-१०९)
स्वर्गादिभ्यो .(५-१-११०)
स्वव: स्वतवसोर्मास. (७-४-४८)
स्वाङ्गकर्मकाच्च (१-३-२७)
स्वाङ्गाद् विवृद्धौ (५-२-११७)
स्वादय औँदितः (११३९धातौ)
स्वादीरेरिणोः (६-१-८६)
हनुचलन इति .(३-१-१५)
हनो वा यद् वध .(३-१-९७)
हन्तेर्घत्वं च (६-१-१२)
हन्तेर्हिंसायां यङि .(७-४-३०)
हन्त्यर्थाश्च (१७२३ धातौ) ग.सू.
हविषः प्रस्थितस्य .(२-३-६१)
हरतेरप्रतिषेधः (१-३-१५)
हरतेर्गतताच्छील्ये (१-३-२१)
हरिद्रामहारजनाभ्या .(४-२-२)
हरीतक्यादिषु व्यक्तिः (१-२-५१)
हर्षजीविका .(६-१-१३७)
हलिकल्योरदन्तत्वं .(३-१-२१)
हलिशक्त्योरिति. (५-४-१२१)
हल्यादिभ्यो ग्रहणे (३-१-२१)
हस्तिसूचकयो .(३-२-१३)
हितनाम्नो .(६-४-१७०)
हितयोगे च .(२-३-१३)
हिमाच्चेलुः (५-२-१२२)
हिमारण्ययो .(४-१-४९)
हिरण्य इति .(३-१-१२३)
हृग्रहोर्भँश्छन्दसि (८-२-३५)
हृदयाच्चालु .(५-२-१२२)
हृद्द्युभ्यां च (६-३-९)
ह्रदप्या आप. (६-१-८०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धातूनां सूची

अंस १९१८
अकँ ७९१
अकिँ ८७
अक्षूँ ६५३
अगँ ७९२
अगिँ १४६
अघिँ १०९
अङ्क १९२७
अङ्ग १९२८
अचि (पा.) ८६२
अचुँ (पा) ८६२
अजँ २३०
अजिँ १७८६
अञ्चुँ १८८
अञ्चुँ ८६२
अञ्चुँ १७३९
अञ्जूँ १४५७
अटँ २९५
अट्टँ २५४
अट्टँ १५६०
अठिँ २६१
अडँ ३५८
अड्डँ ३४८
अणँ ४४३
अणँ ११७४
अतँ ३८
अतिँ ६१
अदँ १०११
अदिँ ६२
अनँ १०७०
अनँ (पा.) ११७४
अन्ध १९२५
अबिँ ३७८
अभिँ (पा.) ३८४
अभ्रँ ५५५
अमँ ४६४
अमँ १७२०
अयँ ४७३
अर्कँ १६४२
अर्चँ २०४
अर्चँ १८०८
अर्जँ २२४
अर्जँ १७२५
अर्थ १९०५
अर्दँ ५५
अर्दँ १८२८
अर्बँ ४१४
अर्वँ ५८३
अर्हँ ७३९
अर्हँ १७३२
अर्हँ १८३०
अलँ ५१४
अवँ ५९९
अशँ १५२२
अशुँ १२६३
अषँ (पा.) ८८६
असँ ८८६
असँ १०६५
असुँ १२०८
अहँ १२७१
अहिँ ६३४
अहिँ १७९७
आछिँ २०९
आप्लूँ १२५९
आप्लूँ १८३९
आप्लूँ(पा).१६३९
आसँ १०२१
इ(प्रश्लिष्टः)३२०
इक् १०४७
इखँ १४०
इखिँ १४१
इगिँ १५३
इङ् १०४६
इटँ ३१८
इण् १०४५
इदिँ ६३
(ञि)इन्धीँ १४४७
इलँ १३५६
इलँ १६५९
इविँ ५८६
इषँ ११२६
इषँ १३५०
इषँ १५२४
ई(प्रश्लिष्टः)३२०
ई(प्रश्लिष्टः) १०४८
ईक्षँ ६०९
ईखिँ १४२
ईङ् ११४२
ईजँ १८२
ईडँ १०१९
ईडँ १६६७
ईरँ १०१८
ईरँ १८१०
ईर्क्ष्यँ ५०९
ईर्ष्यँ ५१०
ईशँ १०२०
ईषँ ६१०
ईषँ ६८३
ईहँ ६३१
उक्षँ ६५६
उखँ १२८
उखिँ १२९
उङ् ९५३
उचँ १२२२
उछिँ २१५
उछिँ १२९३
उच्छीँ २१६
उच्छीँ १२९४
उज्झँ १३०३
उठँ ३३८
उन्दीँ १४५६
उब्जँ १३०२
उभँ १३१८
उम्भँ १३१९
उर्दँ २०
उर्वीँ ५६८
उलडिँ(पा.) १५४१
उषँ ६९५
उहिर् ७३८
ऊठँ (पा.) ३३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊन १८८८
ऊयीँ ४८२
ऊर्जँ १५४८
ऊर्णुञ् १०३९
ऊषँ ६८२
ऊहँ ६४७
ऋ ९३६
ऋ १०९७
ऋक्षि(पा.)
१२७४+१२७५
ऋचँ १३०१
ऋच्छँ १२९५
ऋजँ १७६
ऋजिँ १७७
ऋणुँ १४६६
ऋधुँ १२४४
ऋघुँ १२७०
ऋफँ १३१४
ऋम्फँ १३१५
ऋषीँ १२८६
ॠ १४९६
एजृँ १७९
एजृँ २३४
एठँ २६७
एधँ २
एषृँ ६१७
ओखृँ १२१
ओणृँ ४५३
ओलडिँ. १५४१
ककँ ९०
ककिँ ९४
कखँ १२०
कखेँ ७८३
कगेँ ७९०
कचँ १६८
कचिँ १६९
कटीँ ३२०
कटिँ (पा.) ३२०
कटेँ २९४
कठँ ३३३
कठिँ २६४
कठिँ १८४७
कडँ ३६०
कडँ १३७९
कडिँ २८२
कडिँ (पा.) ३६०
कडिँ १५८१
कड्डँ ३४९
कणँ ४४८
कणँ ७९३
कणँ १७१५
कत्थँ ३७
कत्र १९१५
कथ १८५१
कदिँ ७०
कदिँ ७७१
कनीँ ४५९
कपिँ ३७५
कमुँ ४४२
करजँ २२८
कर्ण(पा.) १९२४
कर्त (पा.) १९१५
कर्दँ ५९
कर्बँ ४१९
कर्वँ ५८०
कलँ ४९६
कलँ १६०३
कल १८६५
कल्लँ ४९७
कवृँ ३७९
कशँ(पा.) १०२४
कषँ ६८४
कसँ ८६०
कसँ(पा.) १०२४
कसिँ १०२४
काक्षिँ ६६६
काचिँ १७०
काल(पा.)१८८०
काशृँ ६४६
काशृँ ११६१
कासृँ ६२२
कि ११००
किटँ ३०१
किटँ ३१९
कितँ ९९३
किलँ १३५२
कीटँ १६३९
कीलँ ५२३
कु १०४२
कुकँ ९१
कुङ् ९५१
कुङ्(न्या.)१४००
कुचँ १८४
कुचँ ८५७
कुचँ १३६७
कुजुँ १९९
कुञ्चँ १८५
कुटँ १३६५
कुटँ (पा.) १६९८
कुटुम्बँ(पा.)१६७८
कुट्टँ १५५७
कुट्टँ १७०२
कुठिँ ३४२
कुठिँ (पा.) १५८३
कुडँ १३८२
कुडिँ २७०
कुडिँ ३२२
कुडिँ १५८२
कुणँ १३३४
कुण १८९३
कुत्सँ १६९७
कुथँ १११७
कुथँ (पा.) १५१३
कुथिँ ४३
कुद्रिँ १५३८
कुन्थँ १५१३
कुपँ १२३२
कुपँ १७८०
कुबिँ ४२५
कुबिँ १६५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुभिँ (पा.) १६५४
कुमार १८७७
कुरँ १३४०
कुर्दँ २१
कुलँ ८४२
कुशिँ १७६६
कुषँ १५१७
कुसँ १२१७
कुसिँ १७६४
कुस्मँ १७११
कुह १९०१
कूङ् १४००
कूजँ २२३
कूटँ १७०१
कूट १८९०
कूणँ १६८८
कूण (पा.) १८९६
कूलँ ५२४
कूलँ १६८८
कृञ् १२५२
(डु) कृञ् १४७१
कृडँ १३८१
कृतीँ १४३४
कृतीँ १४४६
कृप् १७४९
कृप १८६९
कृपूँ ७६१
कृविँ ५९७
कृशँ १२२६
कृषँ ९९०
कृषँ १२८५
कॄ १४०८
कॄ १४९५
कॄञ् १४८४
कॄतँ १६५२
केत १८९५
केपृँ ३६८
केलृँ ५३६
कै ९१६
क्नसुँ १११२
क्नूञ् १४७९
क्नूयीँ ४८४
क्मरँ ५५४
क्रथँ ८००
क्रदिँ ७१
क्रदिँ ७७२
(आङक्रन्द)१७२७
क्रपँ ७७०
क्रमुँ ४७२
(डु) क्रीञ् १४७२
क्रीडृँ ३५०
क्रुञ्चँ १८६
क्रुडँ १३९३
क्रुधँ ११८८
क्रुशँ ८५६
क्लथँ ८०१
क्लदिँ ७२
क्लदिँ ७७३
क्लपँ (पा.)१६५७
क्लमुँ १२०६
क्लिदिँ १५
क्लिदिँ ७३
क्लिदूँ १२४१
क्लिशँ ११६०
क्लिशूँ १५२१
क्लीबृँ ३८०
क्लुङ् (पा.) ९५८
क्लेवृँ(पा.) ५००-५०५
क्लेशँ ६०६
क्वणँ ४४९
क्वथेँ ८४६
क्षजिँ ७६८
क्षजिँ १६२०
क्षणुँ १४६४
क्षप १९४१
क्षपिँ १६१९
क्षमूँ १२०५
क्षमूँष् ४४१
क्षरँ ८५१
क्षलँ १५९६
क्षि २३६
क्षि १२७५
क्षि १४०६
क्षिणुँ १४६५
क्षिपँ ११२०
क्षिपँ १२८४
क्षीजँ २३७
क्षीबृँ ३८१
क्षीवुँ ५६६
क्षीष् १५०५
(टु) क्षु १०३६
क्षुदिर् १४४२
क्षुधँ ११८९
क्षुभँ ७५०
क्षुभँ १२३८
क्षुभँ १५१८
क्षुरँ १३४३
क्षेवुँ ५६७
क्षै ९१३
क्षोट १८७५
क्ष्णु १०३७
क्ष्मायीँ ४८५
क्ष्मीलँ ५१९
(ञि)क्ष्विदाँ(पा) ७४३
(ञि) क्ष्विदाँ १२४३
क्ष्वेलृँ ५३८
खचँ १५३०
खजँ २३२
खजिँ २३३
खटँ ३०९
खट्टँ १६३१
खडँ १५७९
खडिँ २८३
खडिँ १५८०
खदँ ५०
खनुँ ८७८
खर्जँ २२९
खर्दँ ६०
खर्बँ ४२०
खर्वँ ५८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खलँ ५४४
खवँ (पा.) १५३०
खषँ ६८५
खादृँ ४९
खिटँ ३०२
खिदँ ११६९
खिदँ १४३५
खिदँ १४४८
खुङ् (पा.) ९५१-९५४
खुजुँ २००
खुट्टँ १६३१
खुडँ (पा.) १३८६
खुडिँ १५८४
खुरँ १३४१
खुर्दँ २२
खेट १८७४
खेड(पा.) १८७४
खेलृँ ५३७
खेवृँ (पा.) ५००-५०५
खै ९१२
खोट(पा.) १८७४
खोरृँ ५५१
खोलृँ ५५०
ख्या १०६०
गजँ २४६
गजँ १६४६
गजिँ २४७
गडँ ७७६
गडिँ ६५
गडिँ ३६१
गण १८५३
गदँ ५२
गदी (गद) १८६०
गन्धँ १६८४
गम्लृँ ९८२
गर्जँ २२६
गर्जँ (पा.) १६६३
गर्दँ ५७
गर्दँ (पा.) १६६३
गर्धँ (पा.) १६६३
गर्बँ ४२१
गर्वँ ५८२
गर्व १९०७
गर्हँ ६३५
गर्हँ १८४५
गलँ ५४५
गलँ १६९९
गल्भँ ३९१
गल्हँ ६३६
गवेष १८८३
गा ११०५
गाङ् ९५०
गाधृँ ४
गाहूँ ६४८
गु १३९८
गुङ् ९४९
गुङ् (पा.) ९५१-९५४
गुजँ १३६८
गुजिँ २०३
गुठिँ(पा.) १५८३
गुडँ १३६९
गुडिँ १५८३
गुण १८९४
गुदँ २४
गुधँ ११११
गुधँ १५१६
गुपँ ९७०
गुपँ १२३३
गुपँ १७७२
गुपूँ ३९४
गुफँ १३१६
गुम्फँ १३१७
गुरीँ १३९५
गुर्दँ १६६४
गुर्दँ २३
गुर्वीँ ५७३
गुहूँ ८९६
गूरँ १६९४
गूरीँ ११५३
गृ ९३७
गृ १७०७
गृजँ २४८
गृजिँ २४९
गृधुँ १२४५
गृह १८९९
गृहूँ ६४९
गॄ १४०९
गॄ १४९७
गेपृँ ३६९
गेवृँ ५०१
गेषृँ ६१३
गै ९१७
गोम १८७६
गोस्टँ २५७
ग्रथिँ ३६
ग्रन्थँ १५१२
ग्रन्थँ १८२५
ग्रन्थँ १८३८
ग्रसँ १७५०
ग्रसुँ ६२९
ग्रहँ १५३२
ग्राम १८९२
ग्रुचुँ १९७
ग्लसुँ ६३०
ग्लहँ ६५०
ग्लुचुँ १९८
ग्लुञ्चुँ २०१
ग्लेपृँ ३६६
ग्लेपृँ ३७०
ग्लेवृँ ५०२
ग्लेषृँ (पा.) ६१३
ग्लै ९०३
घघँ १५९
घटँ ७६२
घटँ १७२३
घटँ १७६७
घटिँ १७६८
घट्टँ २५९
घट्टँ १६२९
घषँ (पा.) ६५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घस्लृँ ७१४
घिणिँ ४३३
घुङ् ९५२
घुटँ ७४५
घुटँ १३८४
घुणँ ४३६
घुणँ १३३७
घुणिँ ४३४
घुरँ १३४४
घुषिँ ६५१
घुषिर् ६५२
घुषिर् १७२६
घूरीँ ११५४
घूर्णँ ४३७
घूर्णँ १३३८
घृ ९३८
घृ १०९५
घृ १६४९
घृणिँ ४३५
घृणुँ १४६८
घृषुँ ७०७
घ्रा ९२६
ङुङ् ९५४
चकँ ९३
चकँ ७८२
चकासृँ १०७४
चक्कँ १५९४
चक्षिँङ् १०१७
चञ्चुँ १९०
चटँ १७२१
चटेँ (पा.) २९४
चडिँ २७८
चणँ ७९५
चतेँ ८६५
चदिँ ६८
चदेँ ८६६
चनँ(पा.) १८४०
चपँ ३९८
चपँ (पा.) १६२५
चपिँ १६१८
चमुँ ४६८
चमुँ १२७३
चयँ ४७७
चरँ ५५८
चरँ १७४६
चर्चँ ७१६
चर्चँ १२९८
चर्चँ १७१२
चर्बँ ४२४
चर्वँ ५७८
चलँ ८३२
चलँ १३५५
चलँ १६०७
चलिः ८१२
चषँ ८८९
चहँ ७२८
चहँ १६२५
चह १८६६
चायृँ ८८०
चि (पा.) १७९४
चिञ् १२५०
चिञ् १६२८
चिटँ ३१५
चितँ १६७३
चितिँ १५३४
चितीँ ३९
चित्र १९१७
चिरि १२७६
चिलँ १३५४
चिल्लँ ५३२
चीकँ १८२७
चीभृँ ३८३
चीवँ १७७५
चीवृँ ८७९
चुक्कँ १५९५
चुटँ १३७६
चुटँ १६१२
चुट्टँ १५५९
चुटिँ १६५८
चुडँ १३९१
चुडिँ ३२५
चुड्डँ ३४७
चुदँ १५९१
चुपँ ४०२
चुबिँ ४२८
चुबिँ १६३४
चुरँ १५३३
चुलँ १६०१
चुल्लँ ५३०
चूरीँ ११५७
चूर्णँ १५५१
चूर्णँ १६४०
चूषँ ६७२
चृतीँ १३२३
चृपँ(पा.) १८२०
चेलृँ ५३५
चेष्टँ २५६
च्यु १७४७
च्युङ् ९५५
च्युच्यँ(पा.) ५१२
च्युतिर् ४०
च्युसँ(पा.)१७४७
छदँ १८३३
छद १९३५
छदिँ १५७६
छदिर् ८१३
छमुँ ४६९
छर्दँ १५८८
छषँ ८९०
छिदिँर् १४३९
छिद्र १९२४
छुटँ १३७७
छुडँ (पा.) १३८७
छुपँ १४१७
छुरँ १३७१
उँच्छृदिँर् १४४४
छृदीँ १८२०
छृपँ (पा.) १८२०
छेद १९३४
छो ११४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जक्षँ १०७१
जजँ २४२
जजिँ २४३
जटँ ३०५
जनँ ११०४
जनीँ ११४८
जपँ ३९६
जभिँ १७१६
जभीँ ३८७
जमुँ ४७०
जर्जँ ७१५
जर्जँ १२९७
जलँ ८३३
जलँ १५४२
जल्पँ ३९७
जषँ ६८७
जसिँ १६६६
जसुँ १२१०
जसुँ १६६८
जसुँ १७१८
जागृ १०७२
जि ५६०
जि ९४६
जि (पा.) १७९४
जिमुँ (पा.) ४७०
जिरि १२७७
जिविँ ५९३
जिविँ १७९४
जिषुँ ६९६
जीवँ ५६१
जुगिँ १५७
जुचिँ(पा.)१७९४
जुडँ १३२५
जुडँ १३७८
जुडँ १६४५
जुतृँ ३२
जुनँ (पा.) १३२५
जुषँ १८३४
जुषीँ १२८७
जूरीँ ११५५
जूषँ ६८०
जृभिँ ३८८
जृ १४९३
जॄ १८१४
जॄष् ११२९
जेषृँ ६१५
जेहृँ ६४३
जै ९१४
ज्ञपँ १६२३
ज्ञा ८११
ज्ञा १५०६
ज्ञा १७३३
ज्या १४९८
ज्युङ् ९५६
ज्रि ९४७
ज्रि १८१५
ज्वरँ ७७५
ज्वलँ ८०४
ज्वलँ ८३१
झटँ ३०६
झमुँ ४७१
झर्झँ ७१७
झर्झँ १२९९
झषँ ६८८
झषँ ८९१
झॄ (पा.) १४९३
झॄष् ११३०
टकिँ १६३७
टलँ ८३४
टिकृँ १०३
टीकृँ १०४
ट्वलँ ८३५
डपँ १६७६
डिपँ १२३१
डिपँ १३७०
डिपँ १६७१
डिपँ १६७७
डीङ् ९६८
डीङ् ११३४
ढौकृँ ९८
णक्षँ ६६१
णखँ १३४
णखिँ १३५
णटँ ३१०
णटँ ७८०
णदँ ५४
णदँ १७७९
णभँ ७५१
णभँ १२३९
णभँ १५१९
णमँ ९८१
णयँ ४७९
णलँ ८३८
णशँ ११९३
णसँ ६२६
णहँ ११६५
णासृँ ६२४
णिक्षँ ६५८
णिजिँ १०२६
णिजिँर्. १०९२
णिदिँ ६६
णिदृँ ८७१
णिलँ १३५९
णिविँ ५८९
णिशँ ७२१
णिसिँ १०२५
णीञ् ९०१
णीवँ ५६५
णु १०३५
णुदँ १२८१
णुदँ १४२५
णू १३९६
णेदृँ ८७२
णेषृँ ६१६
तकँ ११७
तकिँ ११८
तक्षँ ६६४
तक्षूँ ६५४
तगिँ १४९
तजँ १६८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धातूनां सूची

तञ्चुँ १९१
तञ्चूँ १४५८
तटँ ३०८
तडँ १५७८
तडँ १८०१
तडिँ २८०
तत्रिँ १६७८
तनुँ १४६२
तनुँ १८४०
तपँ ९८५
तपँ ११५८
तपँ १८१८
तमुँ १२०१
तयँ ४७८
तर्कँ १७८१
तर्जँ २२७
तर्जँ १६८१
तर्दँ ५८
तलँ १५९७
तसिँ १७२९
तसुँ १२११
तायृँ ४८८
तिकँ १२६५
तिकृँ १०५
तिगँ १२६६
तिजँ ९७१
तिजँ १६५१
तिपृँ ३६२
तिमँ ११२२
तिलँ ५३३
तिलँ १३५३
तिलँ १६०६
तिल्लँ (पा.) ५३३
तीकृँ १०६
तीर १९१२
तीवँ ५६४
तु(सौ.धा.)१०३४
रुधातोरधः
तुजँ २४४
तुजँ (पा.) १५६५
तुजिँ २४५
तुजिँ १५६५
तुजिँ १७५६
तुटँ १३७५
तुडँ १३८५
तुडिँ २७६
तुडृँ ३५१
तुणँ १३३१
तुत्थ १९४६
तुदँ १२८०
तुपँ ४०३
तुपँ १३०८
तुफँ ४०७
तुफँ १३१०
तुबिँ ४२७
तुबिँ १६५६
तुभँ ७५२
तुभँ १२४०
तुभँ १५२०
तुम्पँ ४०४
तुम्पँ १३०९
तुम्फँ ४०८
तुम्फँ १३११
तुरँ ११०१
तुर्वीँ ५६९
तुलँ १५९८
तुषँ ११८३
तुसँ ७०९
तुहिर् ७३६
तूडृँ (पा.) ३५१
तूणँ १६८९
तूरीँ ११५१
तूलँ ५२६
तूषँ ६७३
तृंहूँ १३४९
तृक्षँ ६५९
तृणुँ १४६७
(ऊँ)तृदिँर्१४४५
तृपँ ११९४
तृपँ (पा.) १२७०
तृपँ १३०६
तृपँ १८१९
तृफँ (पा.) १३०६
तृम्फँ १३०७
(ञि) तृषाँ १२२७
तृहँ १४५४
तृंहूँ १३४९
तृहूँ १३४७
तॄ ९६९
तेजँ २३१
तेपृँ ३६३
तेवृँ ४९८
त्यजँ ९८६
त्रकिँ ९७
त्रखँ (पा.)१२८-१५५
त्रदिँ ६९
त्रपूँष् ३७४
त्रसँ १७४२
त्रसिँ १११६
त्रसिँ १७६२
त्रखिँ(पा.)१२८-१५५
त्रुटँ १३७४
त्रुटँ १६९८
त्रुपँ ४०५
त्रुफँ ४०९
त्रुम्पँ ४०६
त्रुम्फँ ४१०
त्रैङ् ९६५
त्रौकृँ ९९
त्वक्षूँ ६५५
त्वगिँ १५०
त्वचँ १३००
त्वञ्चुँ १९२
(ञि) त्वराँ ७७४
त्विषँ १००१
त्सरँ ५५३
थुडँ १३८६
थुर्वीँ ५७०
दशँ ९८९
दक्षँ ६०७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दक्षँ ७६९
दघँ १२७२
दण्ड १९२६
ददँ १७
दधँ ८
दमुँ १२०२
दम्भुँ १२६९
दयँ ४८०
दरिद्रा १०७३
दलँ ५४७
दलँ १७५२
दशिँ १६७४
दशिँ १७६५
दसँ (पा.) १६७५
दसिँ १६७५
दसिँ १७८७
दसुँ १२१२
दहँ ९९१
(डु) दाञ् १०९०
दाण् ९३०
दानँ ९९४
दाप् १०५९
दाशँ १२७८
दाशृँ ८८२
दासृँ ८९४
दाहृँ ६४५
दिविँ ५९१
दिवुँ ११०६
दिवुँ १७०६
दिवुँ १७२४
दिशँ १२८२
दिहँ १०१५
दीक्षँ ६०८
दीङ् ११३३
दीधीङ् १०७६
दीपीँ ११४९
दु ९४४
(टु) दु १२५५
दुःख १९३०
दुर्वीँ ५७१
दुलँ १५९९
दुषँ ११८४
दुहँ १०१४
दुहिर् ७३७
दूङ् ११३२
दृ १२७९
दृङ् १४१०
दृपँ ११९५
दृपँ (पा.) १३१२
दृपँ (पा.) १८२०
दृभँ १८२२
दृभीँ १३२२
दृभीँ १८२१
दृम्फँ १३१३
दृशिर् ९८८
दृहँ ७३२
दृहिँ ७३३
दॄ ८०८
दॄ १४९२
देङ् ९६२
देवृँ ४९९
दैप् ९२४
दो ११४७
द्यु १०४०
द्युतँ ७४०
द्यै ९०५
द्रमँ ४६५
द्रा १०५४
द्राक्षिँ ६६९
द्राखृँ १२४
द्राघृँ ११४
द्राडृँ २८७
द्रु ९४५
द्रुञ् १४८०
द्रुणँ १३३६
द्रुहँ ११९६
द्रेकृँ ७८
द्रै ९०६
द्विषँ १०१३
धक्कँ १५९३
धणँ (पा.) ४५२
धनँ ११०३
धविँ ५९६
(डु) धाञ् १०९१
धावुँ ६००
धि १४०५
धिक्षँ ६०२
धिविँ ५९२
धिषँ ११०२
धीङ् ११३५
धुक्षँ ६०१
धुञ् १२५४
धुर्वीँ ५७२
धू १३९७
धूञ्(पा.) १२५४
धूञ् १४८६
धूञ् १८३५
धूपँ ३९५
धूपँ १७७३
धूरीँ ११५२
धूशँ (पा.) १६३८
धूषँ (पा.) १६३८
धूसँ १६३८
धृङ् ९६०
धृङ् १४११
धृजँ २१९
धृजिँ २२०
धृञ् ९००
धृषँ १८५०
(ञि) धृषाँ १२६८
धृ (पा.) १४९३
धेक १९१४
धेट् ९०२
धोरृँ ५५२
ध्मा ९२७
ध्यै ९०८
ध्रजँ २१७
ध्रजिँ २१८
ध्रनँ ४५८
(उँ) ध्रसँ १५२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उध्रसँ (पा.) १५२३
उँध्रसँ १७४३
उ ध्रसँ (पा:) १७४३
ध्राक्षिँ ६७०
ध्राखृँ १२५
ध्राघृँ (पा.) ११४
ध्राडृँ २८८
ध्रु ९४३
ध्रु १३९९
ध्रुवँ (पा.) १३९९
ध्रेकृँ ७९
ध्रै ९०७
ध्वजँ २२१
ध्वजिँ २२२
ध्वणँ ४५२
ध्वनँ ८१६
ध्वनँ ८२८
ध्वन १८८९
ध्वंसुँ ७५४
ध्वाक्षिँ ६७१
ध्वृ ९३९
नक्कँ १५९२
नटँ १५४४
नटँ १७९२
(टु) नदिँ ६७
नर्दँ ५६
नलँ १८०२
नाथृँ ६
नाधृँ ७
निवास १८८५
निष्कँ १६८६
नीलँ ५२१
नृतीँ १११५
नॄ ८०९
नॄ १४९४
पक्षँ (पा.) ६६४
पक्षँ १५४९
(डु) पचँष् ९९६
पचिँ १७४
पचिँ १६५०
पटँ २९६
पटँ १७५३
पट १८५६
पठँ ३३०
पडिँ २८१
पडिँ १६१४
पणँ ४३८
पतँ (पा.) १५५८
पत १८६१
पल्लृँ ८४५
पथँ (पा.) १५५३
पथिँ १५७४
पथेँ ८४७
पदँ ११६८
पद १८९८
पनँ ४३९
पयँ ४७५
पर्ण १९३९
पर्दँ २९
पर्पँ ४११
पर्बँ ४१५
पर्वँ ५७६
पलँ ८३९
पल्पूल १८८१
पल्यूल(पा.) १८८१
पशँ १७१९
पष १८६२
पसिँ १६१५
पा ९२५
पा १०५६
पार १९११
पालँ १६०८
पि १४०४
पिच्छँ १५७५
पिजँ(पा.) १५६६
पिजिँ १०२८
पिजिँ १५६६
पिजिँ १७५८
पिटँ ३११
पिठँ ३३९
पिडिँ २७४
पिडिँ १६६९
पिविँ ५८७
पिशँ १४३६
पिष्लृँ १४५१
पिसँ १५६७
पिसिँ १७६३
पिसृँ ७१८
पीङ् ११४०
पीडँ १५४३
पीलँ ५२०
पीवँ ५६२
पुंसँ १६३६
पुटँ १३६६
पुटँ १७५४
पुटिँ १७९३
पुट १९१३
पुट्टँ १५५८
पुडँ १३८३
पुडिँ (पा.) ३२६
पुणँ १३३२
पुणँ (पा.) १६३५
पुथँ १११८
पुथँ १७७६
पुथिँ ४४
पुरँ १३४५
पुर्वँ ५७५
पुलँ ८४१
पुलँ १६००
पुषँ ६९९
पुषँ ११८१
पुषँ १५२८
पुषँ १७५१
पुष्पँ ११२१
पुंसँ १६३६
पुस्तँ १५८९
पूङ् ९६६
पूजँ १६४१
पूञ् १४८१
पूयीँ ४८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूरीँ ११५०
पूरीँ १८०३
पूर्ण (पा.) १६३५
पूर्वँ १६६५
पूलँ ५२७
पुरणँ १६३५
पूषँ ६७४
पृ (पा.) १०८५
पृ १२५७
पृङ् १४०१
पृचँ १८०७
पृचीँ १०३०
पृचीँ १४६१
पृजिँ(पा.) १०२८
पृडँ १३२७
पृणँ १३२८
पृथँ १५५३
पृषुँ ७०४
पृ १०८५
पॄ १४८८
पॄ १५४७
पेलृँ ५४०
पेवृँ ५०३
पेषृँ ६१४
पेसृँ ७१९
पै ९२०
पैणृँ ४५७
(ओँ)प्यायीँ ४८७
प्यैङ् ९६४
प्रच्छँ १४१२
प्रथँ ७६४
प्रथँ १५५२
प्रसँ ७६५
प्रा १०६१
प्रीङ् ११४३
प्रीञ् १४७३
प्रीञ् १८३६
प्रुङ् ९५७
प्रुडँ ३२४
प्रुषँ १५२६
प्रुषुँ ७०२
प्रेषृँ ६१८
प्रोथृँ ८६७
प्रैणृँ (पा.) ४५७
प्लिहँ ६४१
प्ली १५०२
प्लुङ् ९५८
प्लुषँ १११४
प्लुषँ १२१५
प्लुषँ १५२७
प्लुषुँ ७०३
प्सा १०५५
फक्कँ ११६
फणँ ८२१
फलँ ५२९
(ञि) फलाँ ५१५
फुल्लँ ५३१
फेलृँ ५४१
बणँ (पा.) ४५८
बदँ ५१
बधँ ९७३
बधँ १५४६
बन्धँ १५०७
बन्धँ(पा.) १५४६
बर्बँ ४१७
बर्हँ ६३७
बर्हँ १६६३
बर्हँ १७७०
बलँ ८४०
बलँ १६२७
बल्हँ ६३८
बल्हँ १७७१
बष्क १९१६
बसुँ (पा.) १२१३
बाडृँ २८६
बाधृँ ५
बाहृँ ६४४
बिटँ ३१७
बिदिँ ६४
बिलँ १३५८
बिलँ १६०५
बिसँ १२१६
बुक्कँ ११९
बुक्कँ १७१३
बुधँ ८५८
बुधँ ११७१
बुधिँर् ८७५
(उँ) बुन्दिर् ८७६
बुसँ (पा.) १२१४
बुसँ १२१८
बुस्तँ १५९०
बृहँ ७३४
बृहिँ ७३५
बृहिँ १७६९
बृहिर् (पा.) ७३५
बृहूँ (पा.) १३४६
बृहिँ १७६९
ब्युसँ(पा.) १२१४
ब्रूञ् १०४४
ब्रूसँ १६६२
भक्षँ (पा.) ८९२
भक्षँ १५५६
भजँ ९९८
भजँ १७३४
भजिँ १७६०
भञ्जोँ १४५२
भटँ ३०७
भटँ ७७९
भडिँ २७३
भडिँ १५८७
भणँ ४४६
भदिँ १२
भर्त्सँ १६८२
भर्वँ ५७९
भलँ ४९४
भलँ १७००
भल्लँ ४९५
भषँ ६९४
भसँ १०९९
भा १०५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाज १८८६
भामँ ४४०
भाम १८७२
भाषँ ६११
भासृँ ६२३
भिक्षँ ६०५
भिदिँ (पा.) ६४
भिर्दिर् १४३८
(ञि) भी १०८३
भुजँ १४५३
भुजोँ १४१६
भुवः(भू) १७४८
भू १
भू १८४४
भूषँ ६८१
भूषँ १७३०
भृजीँ १७८
भृञ् ८९८
(डु) भृञ् १०८६
भृशिँ(पा.) १७८८
भृशुँ १२२३
भृसिँ १७८८
भृ १४९०
भेषृँ ८८३
भ्यसँ ६२७
भ्रंशुँ (पा.) ७५५
भ्रशुँ १२२४
भ्रसुँ ७५५
भ्रक्षँ ८९२
भ्रणँ ४५१
भ्रमुँ ८५०
भ्रमुँ १२०४
भ्रस्जँ १२८३
भ्राजृँ १८१
(टु) भ्राजृँ ८२३
(टु) भ्राशृँ ८२४
भ्री १५०४
भ्रूणँ १६९०
भ्रेजृँ १८०
भ्रेषृँ ८८४
भ्लक्षँ ८९३
(टु) भ्लाशृँ ८२५
भ्लेषृँ ८८५
मकिँ ८९
मखँ १३२
मखिँ१३३
मगिँ १४८
मघिँ १११
मघिँ १६०
मचँ १७१
मचिँ १७३
मठँ ३३२
मठिँ २६३
मडिँ २७२
मडिँ ३२१
मडिँ १५८६
मणँ ४४७
मत्रिँ १६७९
मथिँ ४६
मथेँ ८४८
मदँ १७०५
मदिँ १३
मदीँ ८१५
मदीँ १२०७
मनँ ११७५
मनुँ १४७०
मन्थँ ४२
मन्थँ १५१०
मभ्रँ ५५७
मयँ ४७६
मर्चँ १६४८
मर्बँ ४१८
मर्वँ ५७७
मलँ ४९२
मल्लँ ४९३
मवँ ५९८
मव्यँ ५०७
मशँ ७२३
मषँ ६९१
मसीँ १२२०
मस्कँ १०२
(टु)मस्जोँ १४१४
महँ ७२९
मह १८६७
महिँ ६३३
महिँ १७९९
मा १०६२
माक्षिँ ६६८
माङ् १०८७
माङ् ११४१
मानँ ९७२
मानँ १७०९
मानँ १८४३
मार्ग(पा.) १६१६
मार्गँ १८४६
मार्जँ १६४७
माहृँ ८९५
मिच्छँ १२९६
मिजिँ १७५७
(डु) मिञ् १२४९
मिथृँ (पा.) ८६८
(ञि) मिदाँ ७४२
(ञि)मिदाँ १२४२
मिदिँ १५४०
मिदृँ ८६८
मिधृँ (पा.) ८६८
मिलँ १३६३
मिलँ १४२८
मिविँ ५८८
मिशँ ७२२
मिश्र १९२१
मिषँ १३५१
मिषुँ ६९८
मिहँ ९९२
मी १८२४
मीङ् ११३६
मीञ् १४७५
मीमृँ ४६७
मीलँ ५१६
मीवँ ५६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुचँ १७४४
मुचिँ १७२
मुच्लृँ १४२९
मुजँ २५०
मुजिँ २५१
मुटँ १३७३
मुटँ १६१३
मुठिँ २६५
मुडँ ३२३
मुडिँ २७५
मुडिँ ३२६
मुणँ १३३३
मुदँ १६
मुदँ १७४१
मुरँ १३४२
मुर्छाँ २१२
मुर्वीँ ५७४
मुषँ १५२९
मुसँ १२१९
मुस्तँ १६३०
मुहँ ११९७
मूङ् ९६७
मूत्र १९०९
मूलँ ५२८
मूलँ १६०२
मूषँ ६७५
मृक्षँ ६६३
मृग १९००
मृङ् १४०२
मृजूँ १०६६
मजूँ १८४८
मृडँ १३२६
मृडँ १३९४
मृडँ १५१५
मृणँ १३३०
मृदँ १५१४
मृधुँ ८७४
मृशँ १४२४
मृषँ ११६३
मृषँ १८४९
मृषुँ ७०६
मृ १४९१
मेङ् ९६१
मेथृँ (पा.) ८६९
मेदृँ ८६९
मेधृँ ८७०
मेधृँ (पा.) ८६९
मेपृँ ३७१
मेवृँ ५०४
मोक्षँ १७३१
मा ९२९
म्रक्षँ (पा.) ६६३
म्रक्षँ १६६०
म्रदँ ७६६
म्रुचुँ १९५
म्रुञ्चुँ १९३
म्रेडृँ २९३
म्लुचुँ १९६
म्लुञ्चुँ १९४
म्लेच्छँ २०५
म्लेच्छँ १६६१
म्लेटृँ २९२
म्लेवृँ ५०५
म्लै ९०४
यक्षँ १६९२
यजँ १००२
यतँ १७३६
यतीँ ३०
यत्रिँ १५३५
यभँ ९८०
यमँ ८१९
यमँ ९८४
यमँ १६२४
यसुँ १२०९
या १०४९
(टु) याचृँ ८६३
यु १०३३
यु १७१०
युगिँ १५६
युच्छँ २१४
युजँ ११७६
युजँ १८०६
युजिँर् १४४३
युञ् १४७८
युतृँ ३१
युधँ ११७२
युपँ १२३४
यूषँ ६७९
यौटृँ २९१
रकँ १७३७
रक्षँ ६५७
रखँ १३६
रखिँ १३७
रगँ (पा.) १७३८
रगिँ १४४
रगेँ ७८४
रघँ (पा.) १७३८
रघिँ १०७
रघिँ १७९५
रच १८६४
रँञ्जँ ९९९
रँञ्जँ ११६६
रटँ २९७
रटँ ३३४
रठँ (पा.) ३३४
रणँ ४४४
रणँ ७९४
रदँ ५३
रधँ ११९२
रपँ ४००
रफँ ४१२
रफिँ ४१३
रबिँ ३७६
रभँ ९७४
रभिँ (पा.) ३८४
रमुँ ८५३
रयँ ४८१
रविँ ५९५
रसँ ७१२
रस १९३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रहँ ७३०
रहँ १६२६
रह १८५८
रहिँ ७३१
रहिँ १७९८
रा १०५७
राखृँ १२२
राघृँ ११२
राजृँ ८२२
राधँ ११७९
राधँ १२६१
रासृँ ६२५
रि १२७४
रि १४०३
रिखँ(पा.)१२८-१५५
रिगिँ १५४
रिचँ १८१६
रिर्चि'र् १४४०
रिफँ १३०५
रिविँ ५९४
रिशँ १४१९
रिषँ ६९३
रिषँ १२३०
रिहँ (पा.) १३०५
री १४९९
रीङ् ११३७
रु १०३४
रुङ् ९५९
रुचँ ७४४
रुजँ १८०४
रुजोँ १४१५
रुटृँ ७४६
रुटँ १७८४
रुटिँ ३२७
रुठँ ३३६
रुठँ (पा.) १६७०
रुठिँ (पा.) ३२८
रुठिँ ३४५
रुडिँ (पा.) ३२८
रुदिर् १०६७
(अनो)रुधँ ११७३
रुर्धि'र् १४३७
रुपँ १२३५
रुशँ १४१८
रुशिँ १७८९
रुषँ ६९२
रुषँ १२२९
रुषँ १६७०
रुसिँ १७९१
रुहँ ८५९
रूक्ष १९१०
रूप १९३३
रूषँ ६७७
रेकृँ ८०
रेटृँ ८६४
रेपृँ ३७२
रेभृँ ३८४
रेवृँ ५०६
रेषृँ ६१९
रै ९०९
रोडृँ ३५६
रौडृँ ३५५
लक्षँ १५३७
लक्षँ १६९६
लखँ १३८
लखिँ १३९
लगँ १७३८
लगिँ १४५
लगेँ ७८५
लघिँ १०८
लघिँ १७६१
लघिँ १७९६
लच्छँ २०६
लजँ २३८
लजँ (पा.) ८३३
लजँ(पा.) १५४२
लज १९२०
लजिँ २३९
लजिँ (पा.) १५६६
लजिँ १७८५
लजिँ (पा.) १९२०
(ओँ)लजीँ १२८९
लटँ २९८
लडँ ३५९
लडँ १५३९
लडिः ८१४
लडिँ १८००
(ओँ)लडिँ (पा.) १५४१
लपँ ४०१
लबिँ ३७७
(डु) लभँष् ९७५
लर्बँ ४१६
ललँ १६८७
लषँ ८८८
लसँ ७१३
लसँ १७२८
(ओँ)लस्जीँ १२९०
ला १०५८
लाखृँ १२३
लाघृँ ११३
लाछिँ २०७
लाजँ २४०
लाजिँ २४१
लाभ १९३६
लिखँ १३६४
लिगिँ १५५
लिगिँ १७४०
लिपँ १४३२
लिशँ ११७८
लिशँ १४२०
लिहँ १०१६
ली १५००
ली १८११
लीङ् ११३८
लुजिँ(पा.) १५६६
लुजिँ १७५९
लुञ्चँ १८७
लुटँ ३१४
लुटृँ ७४७
लुटँ १३८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लुटँ १७५५
लुटिँ ३२८
लुठँ ३३७
लु॒ठँ ७४८
लुठँ १२२१
लुठिँ (पा.) ३२८
लुठिँ ३४३
लुठिँ ३४६
लुडँ (पा.) ३१४
लुडिँ (पा.) ३२८
लुण्टँ (पा.) १५६२
लुण्ठँ १५६२
लुथिँ ४५
लुपँ १२३६
लुप्लृँ १४३०
लुबिँ ४२६
लुबिँ १६५५
लुभँ १२३७
लुभँ १३०४
लूञ् १४८२
लूषँ ६७६
लूषँ १६०९
लेपृँ ३७३
लोकृँ ७६
लोकृँ १७७७
लोचृँ १६४
लोचृँ १७७८
लोडृँ ३५७
लोष्टृँ २५८
वकिँ ८८
वकिँ ९५
वक्षँ ६६२
वखँ १३०
वखिँ १३१
वगिँ १४७
वघिँ ११०
वचँ १०६३
वचँ १८४२
वजँ २५२
वञ्चुँ १८९
वञ्चुँ १७०३
वटँ ३००
वटँ ७७८
वट १८५७
वट १९१९
वटिँ १५८५
वटिँ(पा.) १९२०
वठँ ३३१
वठिँ २६२
वडिँ २७१
वडिँ(पा.) १५८५
वणँ ४४५
वदँ १००९
वदँ १८४१
वदँ (पा.)१८४१
वदिँ ११
वनँ ४६१
वनँ ४६२
वनँ ८०२
वनुँ ८०३
वनुँ १४६९
(डु) वप् १००३
वभ्रँ ५५६
(टु) वमँ ८४९
वयँ ४७४
वर १८५२
वर्चँ १६२
वर्णँ १५५०
वर्ण १९३८
वर्धँ १६५३
वर्षँ ६१२
वर्हँ ६३९
वलँ ४९०
वल्कँ १५७०
वल्गँ १४३
वल्भँ ३९०
वल्लँ ४९१
वल्हँ ६४०
वशँ १०८०
वषँ ६९०
वष्कँ १०१
वष्क १९१६
वसँ १००५
वसँ १०२३
वसँ १७४५
वस १९४५
वसुँ १२१३
वस्तँ १६८३
वहँ १००४
वहिँ ६३२
वा १०५०
वाक्षिँ ६६७
वाछिँ २०८
वात १८८२
वाशृँ ११६२
वास १८८४
विचिँर् १४४१
विच्छँ १४२२
विच्छँ १७७४
विजिँर् १०९३
(ओँ) विजीँ १२८८
(ओँ)विजीँ १४५९
विटँ ३१६
विथृँ ३३
विदँ १०६४
विदँ ११७०
विदँ १४४९
विदँ १७०८
विद्लृँ १४३१
विधँ १३२४
विलँ १३५७
विलँ १६०४
विशँ १४२३
विषँ १५२५
विषुँ ६९७
विष्कँ १६८५
विष्क १९४०
विष्लृँ १०९४
वी १०४८
वीर १९०३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वुगिँ १५८
वुक्कँ १७१३
वुसँ (पा.) १२१४
वृकँ ९२
वृक्षँ ६०३
वृङ् १५०८
वृजिँ(पा.) १०२९
वृजीँ १०२९
वृजीँ १४६०
वृजीँ १८१२
वृञ् १२५३
वृञ् १८१३
वृणँ १३२९
वृतुँ ७५७
वृतुँ ११५९
वृतुँ १७८२
वृधुँ ७५८
वृधुँ १७८३
वृशँ १२२५
वृषँ १७०४
वृषुँ ७०५
वृहूँ १३४६
वॄ १४८९
वॄञ् १४८५
वेञ् १००६
वेणृँ ८७७
वेथृँ ३४
वेनृँ (पा.) ८७७
(टु) वेपृँ ३६७
वेल १८८०
वेलृँ ५३४
वेल्लँ ५३९
वेवीङ् १०७७
वेष्टँ २५५
वेहृँ ६४२
(औँ) वै ९२१
व्यचँ १२९२
व्यथँ ७६३
व्यधँ ११८०
व्ययँ ८८१
व्यय १९३२
व्युषँ १११३
व्युषँ १२१४
व्येञ् १००७
व्रजँ २५३
व्रजँ १६१६
व्रणँ ४५०
व्रण १९३७
(औँ)व्रश्चूँ १२९१
व्री १५०३
व्रीङ् ११३९
व्रीडँ ११२५
व्रुडँ १३९२
व्ली १५०१
शंसुँ
शकँ ११८६
शकिँ ८६
शक्लृँ १२६०
शचँ १६५
शटँ २९९
शठँ ३४०
शठँ १५६३
शठँ १६९१
शठ १८५४
शडिँ २७९
शणँ ७९६
शद्लृँ ८५५
शद्लृँ १४२७
शपँ १०००
शपँ ११६७
शब्दँ १७१४
शमँ ८१८
शमँ १६९५
शमुँ १२००
शम्बँ १५५५
शर्बँ ४२२
शर्वँ ५८४
शलँ ४८९
शलँ ८४३
शल्भँ ३८९
शवँ ७२४
शशँ ७२५
शषँ ६८९
(आङः)शसिँ ६२८
शसुँ ७२६
शंसुँ ७२७
शाखृँ १२६
शाडृँ २८९
शानँ ९९५
आङःशासुँ १०२२
शासुँ १०७५
शिक्षँ ६०४
शिखिँ(पा.)१२८-१५५
शिघिँ १६१
शिजिँ १०२७
शिञ् १२४८
शिटँ ३०३
शिलँ १३६१
शिषँ ६८६
शिषँ १८१७
शिष्लृँ १४५०
शीकँ १७९०
शीकँ १८२६
शीकृँ ७५
शीङ् १०३२
शीभृँ ३८२
शीलँ ५२२
शील १८७८
शुचँ १८३
(ईँ शुचिर् ११६४
शुच्यँ ५१२
शुठँ ३४१
शुठँ १६४३
शुठिँ ३४४
शुठिँ (पा.) ३४१
शुठिँ १६४४
शुधँ ११९०
शुनँ १३३५
शुन्धँ ७४
शुन्धँ १८३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभँ ४३१
शुभँ ७४९
शुभँ १३२०
शुम्भँ ४३२
शुम्भँ १३२१
शुल्कँ १६१७
शुल्बँ १६१०
शुषँ ११८२
शूर १९०२
शूरीँ ११५६
शूर्पँ १६११
शूलँ ५२५
शूल्बँ १६१०
शूषँ ६७८
शृधुँ ७५९
शृधुँ ८७३
शृधुँ १७३५
शॄ १४८७
शेलृँ ५४२
शेवृँ (पा.)५००-५०५
शै ९१८
शो ११४४
शोणृँ ४५४
शौटृँ २९०
श्चुतिर् (पा.) ४१
श्च्युतिर् ४१
श्मीलँ ५१७
श्यैङ् ९६३
श्रकिँ ८४
श्रगिँ १५१
श्रणँ ७९७
श्रणँ १५७७
श्रणँ १८७०
श्रथँ ७९८
श्रथँ १५४५
श्रथँ १८२३
श्रथ १८७०
श्रथिँ ३५
श्रन्थँ १५०९
श्रन्थँ १५११
श्रन्थँ १८३७
श्रमुँ १२०३
श्रम्भुँ ३९२
श्रा ८१०
श्रा १०५३
श्रिञ् ८९७
श्रिषुँ ७००
श्रीञ् १४७४
श्रु ९४२
श्रै ९१८
श्रोणृँ ४५५
श्लकिँ ८५
श्लगिँ १५२
श्लथँ ७९९
श्लाखृँ १२७
श्लाघृँ ११५
श्लिषँ ११८५
श्लिषँ १५७३
श्लिषुँ ७०१
श्लोकृँ ७७
श्लोणृँ ४५६
श्वकिँ ९६
श्वचँ १६६
श्वचिँ १६७
श्वठँ १५६४
श्वठ १८५५
श्वठिँ (पा.) १५६४
श्वभ्रँ १६२२
श्वर्तँ १६२१
श्वलँ ५४८
श्वल्कँ १५६९
श्वल्लँ ५४९
श्वसँ १०६९
(टु ओँ)श्वि १०१०
श्वितॄँ ७४१
श्विदिँ १०
षगेँ ७८८
षघँ १२६७
षचँ १६३
षचँ ९९७
षञ्जँ ९८७
षटँ ३१३
षट्टँ १६३२
षणँ ४६३
षणुँ १४६३
(आङः)षदँ १८३१
षद्लृँ ८५४
षद्लृँ १४२६
षपँ ३९९
षमँ ८२९
षम्बँ १५५४
षर्जँ २२५
षर्बँ ४२३
षर्वँ ५८५
षलँ ५४६
षसँ १०७८
षस्जँ २०२
षस्तिँ १०७९
षहँ ८५२
षहँ ११२७
षहँ १८०९
षान्त्वँ १५६८
षिचँ १४३३
षिञ् १२४७
षिञ् १४७६
षिटँ ३०४
षिधँ ४७
षिधुँ ११९१
षिधूँ ४८
षिभुँ (पा.) ४२९
षिम्भुँ (पा.) ४३०
षिलँ १३६२
षिविँ (पा.) ५८९
षिवुँ ११०७
षु ९४१
षु १०४१
षुञ् १२४६
षुट्टँ १५६१
षुरँ १३३९
षुहँ ११२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षू १४०७
षूङ् ११३१
षूङ् १०३१
षूदँ २५
षूदँ १७१७
षूर्क्षँ ६६५
षृभुँ ४२९
षृम्भुँ ४३०
षेलृँ (पा.) ५४२
षेवृँ ५००
षै ९१५
षो ११४६
ष्टकँ ७८१
ष्टगेँ ७८९
ष्टनँ ४६०
ष्टभिँ ३८५
ष्टमँ ८३०
ष्टिघँ १२६४
ष्टिपृँ ३६४
ष्टिमँ ११२३
ष्टीमँ ११२४
ष्टुचँ १७५
ष्टुञ् १०४३
ष्टुपँ १६७२
ष्टुभुँ ३९३
ष्टेपृँ ३६५
ष्टै ९२२
ष्ट्यै ९११
ष्ठलँ ८३६
ष्ठा ९२८
ष्ठिवुँ ५५९
ष्ठिवुँ ११०९
ष्णसुँ ११११
ष्णा १०५२
ष्णिहँ ११९९
ष्णिहँ १५७१
ष्णु १०३८
ष्णुसुँ १११०
ष्णुहँ ११९८
ष्णै ९२३
ष्मिङ् ९४८
ष्मिङ्(पा.) १५७२
ष्वञ्जँ ९७६
ष्वदँ १८
ष्वदँ १८०५
(ञि) ष्वप् १०६८
ष्वष्कँ १००
ष्विदाँ ११८७
(ञि) ष्विदाँ ७४३
(ञि) ष्विदाँ ९७८
(ञि)ष्विदाँ (पा.) ११८७
संकेत १८९१
संग्राम १९२२
सत्र १९०६
सभाज १८८७
समीँ (पा.) १२२०
सस्तिँ १०७९
साधँ १२६२
साम १८७९
साम्बँ (पा.) १५५५
सार १८६८
सीकृँ (पा.) ७५
सुख १९२९
सूच १८७३
सूत्र १९०८
सूर्क्ष्यँ ५०८
सृ ९३५
सृ १०९८
सृजँ ११७७
सृजँ १४१३
सृप्लृँ ९८३
सेकृँ ८१
स्कन्दिर् ९७९
स्कभिँ ३८६
स्कुञ् १४७७
स्कुदिँ ९
स्खदँ ७६७
स्खदिँ
स्खदिर् ८२०
स्खलँ ५४३
स्खलिँ (पा.)
स्तन १८५९
स्तृक्षँ ६६०
स्तृञ् १२५१
स्तृहूँ १३४८
स्तृञ् १४८३
स्तेँन १८९७
स्तोम १९२३
स्त्यै ९१०
स्थुडँ १३८७
स्थूल १९०४
स्पदिँ १४
स्पर्धँ ३
स्पशँ ८८७
स्पशँ १६८०
स्पृ १२५८
स्पृशँ १४२१
स्पृह १८७१
स्फरँ (पा.) १३८८
स्फायीँ ४८६
स्फिटँ(पा.) १५७१
स्फिट्टँ १६३३
स्फुटँ २६०
स्फुटँ १३७२
स्फुटँ १७२२
स्फुटिँ(पा.) ३२९
स्फुटिँ(पा.) १५३६
स्फुटिर् ३२९
स्फुडँ १३९०
स्फुडिँ १५३६
स्फुरँ १३८८
स्फुर्छाँ २१३
स्फुलँ १३८९
(टुओँ) स्फूर्जाँ २३५
स्मिटँ १५७२
स्मीलँ ५१८
स्मृ ८०७
स्मृ ९३३
स्मृ (पा.) १२५८
स्यन्दूँ ७६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यमँ १६९३
स्यमुँ ८२६
स्रकिँ ८३
स्रंसुँ ७५३
स्रम्भुँ (पा.) ३९२
स्रम्भुँ ७५६
स्रिवुँ ११०८
स्रु ९४०
स्रेकृँ ८२
स्वकिँ (पा.) ९६
स्वनँ ८१७
स्वनँ ८२७
स्वर १८६३
स्वर्दँ १९
स्वादँ २८
स्वादँ (पा.) १८०५
स्वृ ९३२
हटँ ३१२
हठँ ३३५
हदँ ९७७
हनँ १०१२
हम्मँ ४६६
हयँ ५११
हर्यँ ५१३
हलँ ८३७
हसेँ ७२०
(ओँ) हाक् १०८९
(ओँ) हाङ् १०८८
हि १२५६
हिक्कँ ८६१
हिटँ (पा.) ३१७
हिठँ १५३१
हिडिँ २६८
हिलँ १३६०
हिविँ ५९०
हिष्कँ (पा.) १६८५
हुडिँ २६९
हुडिँ २७७
हिसिँ १४५५
हिसिँ १८२९
हु १०८२
हुडृँ ३५२
हुर्छाँ २११
हूडृँ ३५३
हुलँ ८४४
हृ १०९६
हृञ् ८९९
हृषँ १२२८
हृषुँ ७०८
हेठँ २६६
हेडँ ७७७
हेडृँ २८४
ह्रसँ ७१०
ह्री १०८४
ह्मलँ ८०६
ह्रगेँ ७८६
हेषृँ ६२०
होडृँ २८५
ह्रीच्छँ २१०
होडृँ ३५४
ह्नुङ् १०८१
ह्रेषृँ ६२१
ह्लगेँ ७८७
ह्लपँ १६५७
ह्लसँ ७११
ह्लादँ २६
ह्लादीँ २७
ह्वलँ ८०५
ह्वृ ९३१
ह्वृ ९३४
ह्वेञ्१००८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोणादिप्रकरणम् ।

प्रथमः पादः ।

१ । **कृवापाजिमिस्वदिसाध्यशूभ्य उण्** । करोतीति कारुः, शिल्पी कारकश्च । 'आतो युक्–' २७६१, वातीति वायुः । पायुर्गुदम् । जयत्यभिभवति रोगान्—जायुरौषधम् । मिनोति प्रक्षिपति देहे ऊष्माणमिति—मायुः पित्तम् । स्वादुः । साध्नोति परकार्यं–साधुः । अश्नुते–आशु शीघ्रम् । 'आशुर्व्रीहिः पाटलः स्यात्' ॥ २ । **छन्दसीणः** । 'मा न आयौ' ॥ ३ । **दॄसनिजनिचरिचटिभ्यो ञुण्** । दीर्यत इति दारु । 'स्नुः प्रस्थः सानुरस्त्रियाम्' । जानु । जानुनी । इह 'जनिवध्योश्च' २५१२ इति न निषेधः, अनुबन्धद्वयसामर्थ्यात् । चारु रम्यम् । चाटु प्रियं वाक्यम् । मृगय्वादित्वात्कुप्रत्यये 'चटु' इत्यपि ॥ ४ । **किंजरयोः श्रिणः** । किं शृणातीति–किंशारुः सस्यशूकं बाणश्च । जरामेति–जरायुर्गर्भाशयः । 'गर्भाशयो जरायुः स्यात्' ॥ ५ । **त्रो रश्च लः** । तरन्त्यनेन वर्णा इति–तालुः ॥ ६ । **कृके वचः कश्च** ।

अथोणादयः ॥ १ **कृवापा–** । डुकृञ् करणे, वा गतिगन्धनयोः, पा पाने, पा रक्षणे, जि अभिभवे, डुमिञ् प्रक्षेपणे, स्वद आस्वादने, साध संसिद्धौ, अशू व्याप्तौ । 'विश्वकर्मणि ना कारुस्त्रिषु कारकशिल्पिनोः' इति मेदिनीकोशः । 'कारुः शिल्पिनि कारके' इति धरणिकोशस्तदेतदभिप्रेत्याह—**कारुरित्यादि** । आद्ये योगरूढिः, द्वितीये तु योगमात्रमिति विवेकः । अत एव द्वितीये धात्वर्थं प्रति कारकान्वयो भवत्येव । तथा च भट्टिः—'राघवस्य ततः कार्यं कारुर्वानरपुङ्गवाः । सर्ववानरसेनानामाश्वागमनमादिशत् ॥' इति । पिबत्यनेन तैलादिकमिति **पायुर्गुदस्थानम्** । 'गुदं त्वपानं पायुर्ना' इत्यमरः । पाति रक्षतीति विग्रहे रक्षकोऽपि । तथा च मन्त्रः—'भुवस्तस्य स्वतवाँः पायुरग्ने' इति । 'स्वतवान् पायौ' इति नस्य रुत्वम् । 'अगदो जायुरित्यपि' इत्यमरः । पुंलिङ्गसाहचर्याज्जायुः पुंसि । '**मायुः** पित्तं कफः श्लेष्मा' इत्यमरः । गोपूर्वात्–गां=वाचं विकृतां मिनोति प्रक्षिपतीति **गोमायुः** शृगाल इत्युज्ज्वलदत्तः । वस्तुतस्तु मायुशब्दः 'यत्पशुर्मायुमकृत' 'गोमायुरेकः' इत्यादौ वेदभाष्यकारादिभिस्तथैव व्याख्यातत्वात् । स्वदते रोचते इति **स्वादुः** । विशेष्यनिघ्नोऽयम् । एवं **साधुरपि** ॥—**आशु शीघ्रमिति** । विलम्बाभावमात्रे क्लीबं, तद्विशिष्टद्रव्यपरत्वे तु त्रिलिङ्गम् । 'अथ शीघ्रं त्वरितम्' इत्युपक्रम्य 'क्लीबे शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्वगामि यत्' इत्यमरः । व्रीहौ पुंस्येव । 'उणादयो बहुलम्' इति बहुलवचनादन्यस्मादप्युण्भवति—रह त्यागे, गृहीला चन्द्रं रहति=त्यजतीति **राहुः** । वस निवासे, वसत्यस्मिन्सर्वमिति सर्वत्रासौ वसतीति वा **वासुः**, वासुश्चासौ देवश्च वासुदेवः । वसुदेवस्यापत्यमित्यस्मिन्नर्थे 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यणि कृते वासुदेव इति व्युत्पत्त्यन्तरमिति दिक् ॥ २ **छन्दसीणः** । उणनुवर्तते । एति गच्छतीत्यायुः ॥—**मा न आयौ इति** । आयुशब्दो मनुष्यपर्यायेषु वैदिकनिघण्टौ पठितः । अत एव 'त्वमग्ने प्रथममायुमायवे' 'मा नस्तोके तनये मा न आयौ' इत्यादिमन्त्रेषु वेदभाष्ये तथैव व्याख्यातम् । अर्वाचीनास्तु 'छन्दसीणः' इति सूत्रं बहुलवचनाद्भाषायामपि प्रवर्तत इति स्वीकृत्य 'आयुर्जीवितकालो ना' इत्यमरग्रन्थे आयुशब्दमुकारान्तं व्याचख्युः ॥ ननु 'एतेर्णिच्च' इत्युस्प्रत्यये सकारान्तो वक्ष्यमाण आयुःशब्दस्तु लोकवेदयोर्निर्विवाद एव । अत एव जटा आयुरस्येति विग्रहे 'गृध्रं हत्वा जटायुषम्' इति रामायणप्रयोगः, 'यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात्' इति श्रीहर्षप्रयोगश्च संगच्छते । तथा च 'आयुर्जीवितकालो ना' इत्यत्रायुःशब्दः सकारान्त इत्येव व्याख्यायतां किमुकारान्ताभ्युपगमेनेति चेत् । **अत्राहुः**—सकारान्त आयुःशब्दो नपुंसक इति तस्य पुंलिङ्गता नेत्याशयेन तथोक्तमिति । अन्ये तु—'छन्दसीणः' इति सूत्रस्य भाषायां प्रवृत्त्यभावे 'मा वधीष्ट जटायुं माम्' इति भट्टिप्रयोगः, 'तटीं विन्ध्यस्याद्रेरभजत जटायोः प्रथमजः' इति विन्ध्यवर्णने अभिनन्दोक्तप्रयोगश्च न संगच्छेतेत्याहुः । वस्तुतस्तु जटां याति प्राप्नोतीति जटायुः । मृगय्वादित्वात्कुः । आयातीत्यायुः । एवं च 'जटायुषा जटायुं च विद्यादायुं तथायुषा' इति द्विरूपकोशः, 'वायुना जगदायुना' इति वर्णविवेकश्च सुसाध इति दिक् ॥ ३ **दॄसनि–** । दॄ विदारणे, षणु दाने, जन जनने, चर गतौ, चट भेदने ॥ —**दार्विति** । 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः ॥—**चाट्विति** । 'चटु चाटु प्रियं वाक्यम्' इति हट्टचन्द्रः । 'चाटुर्नरि प्रियोक्तिः स्यात्' इति रत्नमालाकोशः । नरि=पुंसि । 'स चकर किल चाटून् प्रौढयोषिद्वदस्य' इति माघः । माघे तु नपुंसकमपि दर्शितम् । 'चाटु चाकृतकसंभ्रममासाम्' इति ॥ ४ **किंजरयोः–** । शॄ हिंसायाम्, इण् गतौ, आभ्यां किंजरयोरुपपदयोर्ञुण् स्यात् ॥—**सस्येति** । 'किंशारुर्ना सस्यशूके विशिखे कङ्कपक्षिणि' इति मेदिनीकोशः ॥ ५ **त्रो रश्च लः** । तॄ प्लवनतरणयोः । त्रः रश्चेति च्छेदः । केचित्तु तॄ ऋ इति प्रश्लिष्य द्वयोरपि सवर्णदीर्घे-त्रॄ, तयोस्त्रोरित्युक्त्वा ऋ गताविस्मादपि ञुण्, रस्य ल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृकेन=गलेन वक्तीति कृकवाकुः । 'कृकवाकुर्मयूरे च सरटे चरणायुधे' इति विश्वः ॥ ७ । **भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः ।** भरति बिभर्ति वा भरुः स्वामी हरश्च । म्रियन्तेऽस्मिन् भूतानि मरुर्निर्जलदेशः । शेते शयुरजगरः । तरुर्वृक्षः । चरन्ति भक्षयन्ति देवता इममिति चरुः । त्सरुः खड्गादिमुष्टिः । तनु स्वल्पम् । 'स्त्रियां मूर्तिस्तनुस्तनूः' । धनुः शस्त्रविशेषः । 'धनुषा च धनुं विदुः' । 'धनुरिवाजनि वक्रः' इति श्रीहर्षः । मयुः किंनरः । 'मद्गुः पानीयकाकिका' इति रभसः । न्यङ्क्वादित्वात्कुत्वम् । जश्त्वेन सस्य दः ॥ ८ । **अणश्च** । 'लवलेशकणाणवः' । चात्कटिवटिभ्याम् । कटुः । वटुः ॥ ९ । **धान्ये नित्** । धान्ये वाच्येऽण उप्रत्ययः स्यात्, स च नित् । नित्त्वादाद्युदात्तः । 'प्रियङ्गवश्च मेऽणवश्च मे' । 'व्रीहिभेदस्त्वणुः पुमान्' । नित्ग्रहणं 'फलिपाटि–' १८ इत्यादि सूत्रमभिव्याप्य संबध्यते ॥ १० **शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च** । शृणातीति शरुः । 'शरुरायुधकोपयोः' । स्वरुर्वज्रम् । स्नेहुर्व्याधिः । चन्द्र इत्यन्ये । त्रपु सीसम् । 'पुंसि भूम्न्यसवः प्राणाः' । 'वसुर्द्दे देऽग्नौ योक्त्रेऽशौ वसु तोये धने मणौ' । हनुर्वक्त्रैकदेशः । क्लेदुश्चन्द्रः । बन्धुः । मनुः । चात् 'बिदि अवयवे' बिन्दुः ॥ ११ । **स्यन्देः संप्रसारणं धश्च** । 'देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्' इत्यमरः ॥ १२ । **उन्देरिच्चादेः** । उनत्ति इन्दुः ॥ १३ । **ईषेः किच्च** । ईषेरुः स्यात्स च कित् आदेरिकारादेशश्च । ईषते=हिनस्ति इषुः शरः । 'इषुर्द्वयोः' ॥ १४ । **स्कन्देः सलोपश्च** । कन्दुः ॥ १५ । **सृजेरसुम् च** । चात्सलोप उप्रत्ययश्च । रज्जुः ॥ १६ । **कृतेराद्यन्तविपर्ययश्च** । ककारतकारयोर्विनिमयः । तर्कुः

इति व्याख्याय इयर्ति अर्यते वा—आलुः, शाकविशेषो घटी चेत्याहुः । 'कर्कर्यालुर्गलन्तिका' ॥ ७ **भृमृशी—** । भृञ् भरणे, मृङ् प्राणत्यागे, शीङ् स्वप्ने, तॄप्लवनतरणयोः, चर गतौ–अयं भक्षणेऽपि, त्सर छद्म गतौ, तनु विस्तारे, धन धान्ये, डुमीञ् प्रक्षेपणे, टुमस्जो शुद्धौ ॥—**भरुरिति** । 'भरुः स्वर्णे हरे पुंसि' इति मेदिनी । 'भरुर्भर्तृकनकयोः' इति हेमचन्द्रः ॥—**शयुरिति** । 'अजगरे शयुर्वाहस इत्युभौ' इत्यमरः ॥—**तरुरिति** । तरन्ति नरकमनेन रोपकाः॥—**चरुरिति** । अनवस्रावितान्तरूष्मपक्व ओदन इति याज्ञिकाः । त्रिवृच्चर्वधिकरणेऽप्येवमुक्तम् । 'उगवादिभ्यो यत्' इति सूत्रे कैयटस्त्वाह—स्थालीवाची चरुशब्दस्तात्स्थ्यादोदने भाक्त इति । 'तनुः काये त्वचि स्त्री स्यात्त्रिष्वल्पे विरले कृशे' इति मेदिनी । 'धनुः पुमान् प्रियालद्रौ राशिभेदे शरासने' इति नान्ते मेदिनी । विश्वप्रकाशमुदाहरति—**धनुषा चेत्यादि** । धनुषा सार्धं धनुं विदुरित्यर्थः । 'स्यात्तनुस्तनुषा सार्धम्' इत्यतः सार्धमित्यनुषज्यते । 'शुद्धवंशजनितोऽपि गुणस्य स्थानतामनुभवन्नपि शक्तः । क्षिप्तुरेनमृजुमाशु विपक्षं सायकम्' इति श्रीहर्षश्लोकशेषः । 'धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति' इति धन्वन्तरिः । इह पूर्वत्र च धनुरिति उकारान्तः सकारान्तो वा बोध्यः । न च सकारान्तधनुःशब्दो नपुंसक एवेति शङ्क्यम् । 'अथास्त्रियाम् । धनुश्चापौ' इत्यमरोक्त्या तस्यापि पुंस्त्वात् ॥—**किंनर इति** । 'तुरंगवदनो मयुः' इत्यमरः । 'मीनातिमिनोति–' इत्यात्वं तु नेह, बाहुलकात् । 'मयुस्तुरंगवदने मृगेऽपि मयुरिष्यते' इति विश्वः । मज्जति पानीये इति मद्गुः ॥ ८ **अणश्च** । अण शब्दे अस्मादुप्रत्ययः स्यात् ॥—**चादिति** । कटे वर्षादौ, वट वेष्टने । कटति रसनामिति कटुः । 'कटुः स्त्री कटुरोहिण्यां लताराजिकयोरपि । नपुंसकमकार्ये स्यात्पुंलिङ्गो रसमात्रके । त्रिषु तद्वत्सुगन्ध्योश्च मत्सरेऽपि खरेऽपि च' इति मेदिनी ॥—**वटुरिति** । वटतीति वटुः । 'वटुर्द्विजसुतः स्मृतः' इति संसारावर्तः । नटवद्वटुरिति तूपचारात् ॥ ९ **अभिव्याप्येति** । यद्यपि 'फलिपाटि–' इति सूत्रं यावदनुवर्तत इति न्यासग्रन्थेन 'मर्यादीकृत्य' इत्यपि प्रतीयते तथाप्यभिव्याप्येत्येवोचितम्, 'पिबतं सोम्यं मधु' इत्यादौ मधुशब्दस्याद्युदात्ततादर्शनात् । 'वोतो गुणवचनात्' इति सूत्रे हरदत्तेनाप्यभिव्याप्येति स्पष्टमभिधानाच्चेति भावः ॥ १० **शृस्वृस्निहि–** । शॄ हिंसायाम्, स्वृ शब्दोपतापयोः, ष्णिह उपतापे, त्रपूष् लज्जायाम्, असु क्षेपणे, वस निवासे, हन हिंसागत्योः, क्लिदू आर्द्रीभावे, बन्ध बन्धने, मन ज्ञाने ॥—**शरुरिति** । 'शरुः कोपे शरे वज्रे' इति हेमचन्द्रः ॥—**स्वरुर्वज्रमिति** । 'शतकोटिः स्वरुः शम्बः' इत्यमरः ॥—**त्रपु सीसमिति** । तद्धि अग्निं दृष्ट्वा त्रपते=लज्जत इव । 'त्रपु सीसकरङ्गयोः' इति मेदिनी । अस्यन्ति क्षिपन्ति शरीरमित्य**सवः** प्राणाः ॥—**हनुरिति** । 'हनुः पुमान्परो गण्डात्' इति वररुचिकोशः । स्त्रीलिङ्गोऽप्ययम् । 'हनुर्हट्टविलासिन्यां नृत्यारम्भे गदेऽस्त्रियाम् । द्वयोः कपोलावयवे' इति मेदिनीकोशः । अतिशायने मतुप् । हनुमान् । 'अन्येषामपि दृश्यते' इति दृशिग्रहणात्पाक्षिको दीर्घः, हनूमान् । स्नेहेन बध्नातीति **बन्धुः** । प्रज्ञादित्वाद्बान्धवः । 'बन्धुर्बन्धूकपुष्पे स्याद्बन्धुर्भ्रातरि बान्धवे' इति विश्वः । **मनु**रादिराजो मन्त्रश्च ॥ ११ **स्यन्देः**–। स्यन्दू प्रस्रवणे ॥ १२ **उन्देः**–। उन्दी क्लेदने ॥ १३ **ईषेः** । ईष गतिहिंसादानेषु ॥ १४ **स्कन्देः**–। स्कन्दिर् गतिशोषणयोः ॥—**कन्दुरिति** । स्कन्दत्यस्मिञ्जनताप इति व्युत्पत्त्या भोगस्थानमिति केचित् । **अन्ये तु**—स्कन्दति शोषयतीति कन्दुर्लोहादिपात्रमित्याहुः । अत एव 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना कन्दुर्वा स्वेदनी स्त्रियाम्' इत्यमरः । 'कन्दुर्वा ना' इति पूर्वेणान्वयाद्वा पुमानित्यर्थः ॥ १५ **सृजेः**–। सृज विसर्गे । सृजतीति रज्जुः, स्त्रियाम् । आगमसकारस्य श्चुत्वेन शः । जश्त्वेन जः । सृजेरजुम् चेति सुवचमिति नव्याः । 'रज्जुर्वेण्यां गुणेऽपि च' इति मेदिनी ॥ १६ **कृतेराद्यन्त—**। कृती छेदने ॥—**तर्कुरिति** । कृन्त्यतेऽनेनेति तर्कुः सूत्रवेष्टनयन्त्रविशेषः । 'तर्कुटी सूत्रला तर्कुः' इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्रवेष्टनम् ॥ १७ । नावञ्चेः । न्यङ्कादित्वात्कुत्वम् । नियतमञ्चति न्यङ्कुर्मृगः ॥ १८ । फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च । फलेर्गुक्, फल्गु । पाटेः पटिः, पाट्यतीति पटुः । नम्यतेऽनेन नाकुर्वल्मीकम् । मन्यते इति मधु । जायते इति जतु ॥ १९ । वलेर्गुक्च । 'वल संवरणे' वल्गुः ॥ २० । शः कित्सन्वच्च । श्यतेरुः स्यात्स च कित् सन्वच्च । शिशुर्बालः ॥ २१ । यो द्वे च । ययुरश्वोऽश्वमेधीयः । 'सन्वत्' इति प्रकृते द्वेग्रहणमित्वनिवृत्त्यर्थम् ॥ २२ । कुर्भ्रश्च । बभ्रुः । 'बभ्रुर्मुन्यन्तरे विष्णौ बभ्रू नकुलपिङ्गलौ' । चादन्यतोऽपि—चक्रुः कर्ता । जघ्नुर्हन्ता । पपुः पालकः ॥ २३ । पृभिदिव्यधिगृधिधृषिभ्यः । कुः स्यात् । पुरुः । भिनत्ति भिदुर्वज्रम् । 'ग्रहिज्या–' २४१२ इति संप्रसारणम्, विरहिणं विध्यति विधुः । 'विधुः शशाङ्के कर्पूरे हृषीकेशे च राक्षसे' । गृधुः कामः । धृषुर्दक्षः ॥ २४ । कृग्रोरुच्च । करोतीति कुरुः । गृणातीति गुरुः ॥ २५ । अपदुःसुषु स्थः । 'सुषामादिषु च' १०२४ इति षत्वम्, अपष्ठु प्रतिकूलम् । दुष्ठु । सुष्ठु ॥ २६ । रपेरिच्चोपधायाः । अनिष्टं रपतीति रिपुः ॥ २७ । अर्जिदृशिकम्यमिपशिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च । अर्जयति गुणान् ऋजुः । सर्वानविशेषेण पश्यतीति पशुः । कन्तुः कन्दर्पः । अन्धुः कूपः । 'पांशुर्ना न द्वयो रजः' । 'तालव्या अपि दन्त्याश्च सम्बसूकरपांसवः' । बाधते इति बाहुः । 'बाहुः स्त्रीपुंसयोर्भुजः' ॥ २८ । प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च । त्रयाणां कुः संप्रसारणं भ्रस्जेः सलोपश्च । पृथुः । मृदुः । न्यङ्कादित्वात्कुत्वम्, भृज्जति तपसा भृगुः ॥ २९ । लङ्घिबंह्योर्नलोपश्च । लघुः । * बालमूललघ्वलमङ्गुलीनां वा लो रत्व-

---

हारावली ॥ १७ नावञ्चेः । अञ्चु गतौ । 'न्यङ्कुर्मुनौ मृगे पुंसि' इति मेदिनी ॥ १८ फलिपाटि–। फल निष्पत्तौ, पट गतौ, ण्यन्तः । णम प्रह्वत्वे शब्दे, मन ज्ञाने, जनी प्रादुर्भावे, एभ्य उः स्यादेषां च यथाक्रमं गुगागमः पटि नाकि ध त इत्यादेशाश्च भवन्ति । इह एकापि षष्ठी विषयभेदाद्भिद्यते । गुगागमे हि फलेरवयवषष्ठी, पट्याद्यादेशचतुष्टयविधौ तु पाट्यादिभ्यः स्थानषष्ठी, सापि धतयोर्विधौ अन्ता–इत्युपसंह्रियत इति विवेकः । अनागमकानां सागमका आदेशा इति पक्षे तु स्थानषष्ठ्येवेति बोध्यम् । 'फल्ग्वसारेऽभिधेयवत् । नदीभेदे मलग्वां स्त्री' इति मेदिनी ॥—नाकुर्वल्मीकमिति । 'वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम्' इत्यमरः ॥—मध्विति । 'मधुश्चैत्रे च दैत्ये च मद्ये पुष्परसे मधु' इति हट्टचन्द्रः । 'मकरन्दस्य मद्यस्य माक्षिकस्यापि वाचकः । अर्धर्चादिगणे पाठात्पुंनपुंसकयोर्मधुः' इति शाश्वतः ॥ १९ वल संवरण इति । दन्त्योष्ठ्यादिः । 'वल्गुः स्याच्छगले पुंसि सुन्दरे चाभिधेयवत्' इति मेदिनी । यत्तु उज्ज्वलदत्तेन 'बलेर्गुक् च' इति ओष्ठ्यादि पठित्वा बल प्राणने इत्युपन्यस्तं तल्लक्ष्यविरोधादुपेक्ष्यम् । 'अयं नाभा वदति वल्गु वो गृहे' इत्यादौ दन्त्योष्ठ्यपाठस्य निर्विवादत्वात् ॥ २० शः कित्–॥ शो तनूकरणे, अस्मादुप्रत्ययः 'आदेच उपदेशे' इत्यात्वं, द्वित्वं, 'सन्यतः' इत्यभ्यासस्येत्वम्, 'आतो लोप इटि च' इत्याकारलोपः, शिशुः ॥ २१ यो द्वे च । या प्रापणे ॥ २२ कुर्भ्रश्च । भृञ् भरणे, अस्मात्कुप्रत्ययो धातोर्द्वित्वं च । भरतीति बभ्रुः । धरणिकोशस्थमाह—बभ्रुरित्यादि । 'बभ्रुर्वैश्वानरे शूलपाणौ च गरुडध्वजे । विशाले नकुले पुंसि पिङ्गले त्वभिधेयवत्' इति मेदिनीकोशः ॥—चादन्यतोऽपीति । भ्रः कुश्चेति वक्तव्ये प्राक् प्रत्ययनिर्देशादित्येके । भ्रश्चेति प्रकृतिसंसृष्टेन चकारेण प्रकृत्यन्तरसमुच्चयादित्यन्ये ॥ २३ पृभिदि–। पृ पालनपूरणयोः, भिदिर् विदारणे, व्यध ताडने, गृधु अभिकाङ्क्षायाम्, ञिधृषा प्रागल्भ्ये ॥—पुरुरिति । कुप्रत्यये परतः 'उदोष्ठ्यपूर्वस्य' इत्युत्वे रपरत्वम् । 'पुरुः प्राज्येऽभिधेयवत् । पुंसि स्याद्देवलोके च नृपभेदपरागयोः' इति मेदिनी । 'विधुः शशाङ्के' इत्यादिस्तु विश्वकोशः । इह सूत्रे धृषिहृषिभ्यश्चेति पठित्वा हृषुर्हर्षः । 'सूर्याग्निशनिराहद्योऽपि हृषवः' इति केचित् ॥ २४ कृग्रोरुच्च । डुकृञ् करणे, गॄ शब्दे, आभ्यां कुः स्यादुकारोऽन्तादेशश्च । 'उरण् रपरः' । 'कुरुर्नृपान्तरे भक्ते पुमान् पुंभूम्नि नीवृति' इति मेदिनी ॥ २५ अपदुःसु–। ष्ठा गतिनिवृत्तौ ॥—सुषामेत्यादि । एतच्च न्यासाद्यनुरोधेनोक्तम् । वार्तिककृता तु स्थास्थिन्स्थूनामुपसंख्यानम् । 'अपष्ठुः पुंसि बाले च वामे स्यादन्यलिङ्गकः' इति मेदिनी । वामे=प्रतिकूले । एषां त्रयाणां मृगय्वादिपाठेन सिद्धत्वात्सूत्रमिदं न्यासकारस्य न संमतमिति रक्षितः ॥ २७ अर्जिदृशि–। 'अर्ज अर्जने' अस्य ऋजिरादेशः, दृशेः पशिरादेशः, कमेस्तुगागमः । अम रोगे गत्यादौ वा, अस्य धुगागमः । पशि नाशने सौत्रो धातुरस्य दीर्घः । बाधृ लोडने, अस्य हादेशः । षड्भ्योऽपि कुप्रत्ययः स्यादित्यर्थः ॥—अविशेषेणेति । चादिगणे पश्विति पठितम् । 'पशु इत्यर्थमव्ययम्' इति धरणिः । कन्तुः कन्दर्पः । 'कन्तुर्मकराङ्कः' इति त्रिकाण्डशेषः ॥—पांशुरिति । पडि पसि नाशने चुरादिर्दन्त्यान्तः ॥—स्त्रीपुंसयोरिति । उक्तं ह्यमरेण 'द्वौ परौ द्वयोः । भुजबाहू' इति । परौ द्वौ भुजबाहुशब्दौ द्वयोः स्त्रीपुंसयोरिति तदर्थः । अकारान्तोऽप्ययम् । अत एव 'बाहोऽश्वभुजयोः पुमान्' इति दामोदरः । 'बाहा भुजे पुमान्मानभेदाश्ववृषवायुषु' इति मेदिन्यां टाबन्तोऽप्ययम् ॥ २८ प्रथिम्रदि—। प्रथ प्रख्याने, म्रद मर्दने, भ्रस्ज पाके । प्रथते इति पृथुः । 'पृथुः स्यान्महति त्रिषु । त्वक्पत्र्यां कृष्णजीरेऽथ पुमानग्नौ नृपान्तरे' इति मेदिनी । म्रदितुं शक्यतेऽकठिनत्वादिति मृदुः कोमलः । 'भृगुः शुक्रे प्रपाते च जमदग्नौ पिनाकिनि' इति विश्वः ॥ २९ लङ्घि–। लघि गतौ, बहि महि वृद्धौ ॥—लघुरिति । 'पृक्कायां स्त्री लघुः क्लीबं शीघ्रे कृष्णागुरुण्यपि' इति त्रिकाण्डशेषः । 'लघुरगुरौ च मनोज्ञे निःसारे वाच्यवत्क्लीबम् । शीघ्रे कृष्णागुरुणि च पृक्कामामो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मापद्यते । रघुर्नृपभेदः । बहुः ॥ ३० । ऊर्णोतेर्नुलोपश्च । ऊरुः सक्थि ॥ ३१ । महति ह्रस्वश्च । उरु महत् ॥ ३२ । श्लिषेः कश्च । श्लिष्यतीति श्लिकुर्भृत्यः, उद्यतो ज्योतिश्च ॥ ३३ । आङ्परयोः खनिशॄभ्यां डिच्च । आ खनतीति आखुः । परं शृणातीति परशुः । पृषोदरादित्वादकारलोपात्पर्शुरपि ॥ ३४ । हरिमितयोर्द्रुवः । 'द्रु गतौ' अस्मात् हरिमितयोरुपपदयोः कुः स च डित् । हरिभिर्द्रूयते हरिद्रुर्वृक्षः । मितं द्रवति मितद्रुः समुद्रः ॥ ३५ । शते च । शतधा द्रवति शतद्रुः । बाहुलकात्केवलादपि, द्रवत्यूर्ध्वमिति द्रुर्वृक्षः शाखा च । तद्वान् द्रुमः ॥ ३६ । खरु शङ्कु पीयु नीलङ्गु लिगु । पञ्चैते कुप्रत्ययान्ता निपात्यन्ते । खनते रेफश्चान्तादेशः, खरुः कामः क्रूरो मूर्खोऽश्वश्च । 'शङ्कुर्ना कीलसल्ययोः' । पिबतेरीत्वं युगागमश्च, पीयुर्वायसः कालः सुवर्णं च । निपूर्वात् 'लगि गतौ' अस्मात्कुरत्वं नेर्दीर्घश्च, नीलङ्गुः क्रिमिविशेषः शृगालश्च । नीलाङ्गुरिति पाठान्तरम् । तत्र धातोरपि दीर्घः । 'लगे सङ्गे' अस्य अत इत्वं च, लगतीति लिगु चित्तम् । लिगुर्मूर्खः । ३७ । मृगय्वादयश्च । एते कुप्रत्ययान्ता निपात्यन्ते । मृगं यातीति मृगयुर्व्याधः । देवयुर्धार्मिकः । मित्रयुर्लोकयात्राऽभिज्ञः । आकृतिगणोऽयम् ॥ ३८ । मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच् । मन्दुरा वाजिशाला । वाशुरा रात्रिः । मथुरा । चतुरः । चङ्कुरो रथः । अङ्कुरः । खर्जूरादित्वात् 'अङ्कूरः' अपि ॥ ३९ । व्यथेः संप्रसारणं किच्च । 'विथुरश्चोररक्षसोः' ॥ ४० । मुकुरदर्दुरौ । मुकुरो दर्पणः । बाहुलकान्मकुरोऽपि । 'दॄ विदारणे' । धातोर्द्विवचनमभ्यासस्य रुक् टिलोपश्च ।
'दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः ।
दर्दुरा चण्डिकायां स्याद्ग्रामजाले च दर्दुरम्' ॥ इति विश्वः ।

षधौ स्त्रियाम्' इति मेदिनी ॥—**नृपभेद इति** । एतेन 'अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम्' इति कालिदासवचनं व्याख्यातम् ॥—**बहुरिति** । 'बहु स्यात्त्र्यादिसंख्यासु विपुले त्वभिधेयवत्' इति मेदिनी ॥ **३० ऊरुरिति** । 'सक्थि क्लीबे पुमानूरुः' इत्यमरः । ऊर्णूयते आच्छाद्यते इत्यूरुः । कर्मणि प्रत्ययः ॥ **३१ उरु महदिति** । कर्तरि प्रत्ययः ॥ **३२ श्लिषेः**—। श्लिष आलिङ्गने अस्मात्कुप्रत्ययः कश्चान्तादेशः ॥—**उद्यत इति** । स हि यावत्कार्यं श्लिष्यति=लगति । व्याप्रियत इति यावत् ॥ **३३ आङ्परयोः**—। खनु अवदारणे, शॄ हिंसायाम् ॥—**पर्शुरपीति** । 'पर्शुः परशुना सह' इति विश्वः ॥ **३४ हरिमितेति** । द्रु गतौ, अस्माद्धरिमितयोरुपपदयोः कुः स्यात्स च डित् ॥—**हरिद्रुर्वृक्ष इति** । दारुहरिद्रा इत्येके । शतद्रुर्नदीभेदः । 'शतद्रुस्तु शुतुद्रिः स्यात्' इत्यमरः ॥—**तद्वानिति** । 'द्युद्रुभ्यां मः' इति मः ॥ **३६ खरुशङ्कु**—। खनु अवदारणे, शकि शङ्कायाम् ॥—**काम इत्यादि** । **खरुः** पतिंवरा कन्येत्यपि बोध्यम् । खरुर्दर्पे हरे दैत्ये हये श्वेते तु वाच्यवत्' इति विश्वत्रिकाण्डशेषौ । शङ्कते अस्मादिति **शङ्कुः** । 'शङ्कुः कीले गरे शस्त्रे संख्यापादपभेदयोः । यादोभेदे च पापे च स्थाणावपि च दृश्यते, इति विश्वः ॥—**पीयुरिति** । 'पीयुः काले रवौ घोरे' इति मेदिनी ॥— **क्रिमिविशेष इति** । **'नीलङ्गुः** क्रिमिजातौ स्याद्भ्रमरालीप्रसूनयोः' इति विश्वः । 'नीलङ्गुः स्यात्क्रमौ पुंसि भम्भराल्यां तु योषिति' इति मेदिनीकारः ॥—**पाठान्तरमिति** । 'नीलङ्गुरपि नीलाङ्गुः' इति विश्वः ॥—**धातोरपीति** । केचित्तु नीलशब्दे उपपदे गमेष्टिलोपः, उपपदस्य मुम्, दीर्घश्च पाक्षिको निपात्यते इत्याहुः । **'लिगु** चित्ते नपुंसकम्' इति वररुचिः ॥ **३७ मृगय्वादयश्च** । 'मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनि' इति मेदिनी । 'मृगयुर्ब्रह्मणि ख्यातो गोमायुव्याधयोरपि' इति विश्वः । 'देवयुर्वाच्यलिङ्गः स्याद्धार्मिके लोकयात्रिके' इति मेदिनी ॥—**आकृतिगण इति** । तेन पील प्रतिष्टम्भे, अस्मात्कुः । 'पीलुर्गजे द्रुमे काण्डे परमाणुप्रसूनयोः' इति विश्वः । **भाष्टास्तु**—पीलुशब्दस्य वृक्षे आर्यप्रसिद्धिर्गजे तु म्लेच्छप्रसिद्धिरित्याश्रित्य व्यवजहुः । पडि गतौ, अस्मात्कुः धातोर्वृद्धिश्च । पाण्डुः । कडि मदे—कण्डुरित्यादि बोध्यम् ॥ **३८ मन्दिवाशि**—। मदि स्तुत्यादौ, वाशृ शब्दे, मथे विलोडने, चते याचने, चङ्क इति सौत्रो धातुः, अकि लक्षणे ॥—**वाशुरा रात्रिरिति** । वाश्यन्ते अस्यामिति विग्रहः । वाशुरो गर्दभ इत्यन्ये । 'वाशुरा वाशितारात्र्योः' इति मेदिनीहेमचन्द्रौ ॥—**चङ्कुर इति** । 'चङ्कुरः स्यन्दने वृक्षे' इति मेदिनी । 'अङ्कुरो रुधिरे लोम्नि पानीयेऽभिनवोद्भिदि' इति ॥—**खर्जूरादित्वादिति** । ऊरप्रत्ययोऽपीति भावः । 'अङ्कुरोऽङ्कूर एव च' इति विश्वप्रकाशः ॥ **३९ व्यथेः**—। व्यथ भयसंचलनयोरस्मादुरच् कित्स्याद्धातोः संप्रसारणं च । दशपाद्यां तु 'व्यथेः संप्रसारणं धः किच्च' इति सूत्रं पठित्वा धकारमन्तादेशं विधाय विधुरोऽनग्निक इत्युदाहृतम् । माधवप्रसादकारादिभिरपि तदेवानुसृतं । न त्वेतद्युक्तम् । 'त्वमेषां विथुरा शवांसि' 'अथ विद्धा विथुरेणाचिदस्रा' इत्यादिमन्त्रेषु थकारपाठस्य निर्विवादत्वात् । यदपि माधवेनोक्तं—विदिभिदिच्छिदिरित्यत्र 'व्यथेः संप्रसारणं च' इति वचनात्कुरचि थान्तं रूपमिति, तदति स्थवीयः । कुरज्विधायके सूत्रे व्यथेरुपसंख्यानस्याप्रसिद्धत्वात् । तस्मादिह 'धः किच्च' इति दशपादीपाठ उपेक्ष्य एव । कथं तर्हि विधुर इति प्रयोगस्य निर्वाह इति चेत् । धुरो विगत इति प्रादिसमासेनेत्यवधेहि । 'समासान्ताः' इति सूत्रे वृत्तिपदमञ्जर्योस्तथैवोक्तत्वात् । इह व्यथेः किच्चेत्येवास्तु 'ग्रहिज्या—' इत्यनेन संप्रसारणं स्यादेवेति न भ्रमितव्यम् । ग्रहिज्यादिषु व्यधिर्विर्गचतुर्थो न त्वयमिति निष्कर्षात् ॥ **४० मुकुर इति** । मकि मण्डने, अस्मादुरच् नलोपश्च बाहुलकादिति धातोरुपधायाः पक्षे उकार इति भावः । 'मकुरो मुकुरोऽपि च' इति विश्वः । 'मकुरः स्यान्मुकुरवद्दर्पणे बकुलद्रुमे । कुलालदण्डे' इति मेदिनी ॥—**धातोर्द्विर्वचनमिति** । केचित्तु गुणो दुगागमश्च निपात्यत इत्याहुः ॥—**ग्रामजाले चेति** । यामजालेति पाठ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४१ । मद्गुरादयश्च । उरजन्ता निपात्यन्ते । माद्यतेर्गुक्, मद्गुरो मत्स्यभेदः । 'कर्बृ वर्णे', रुगागमः, 'कर्बुरः श्वेतरक्षसोः' । बध्नातेः खर्जूरादित्वादूरोऽपि, 'बन्धूरबन्धुरौ स्यातां नम्रसुन्दरयोस्त्रिषु' इति रन्तिदेवः । (ग) **कोकतेर्वा कुक् च** । कुक्कुरः । कुकुरः ॥ **४२ । असेरुरन्** । असुरः । प्रज्ञाद्यण्, आसुरः ॥ **४३ । मसेश्च** । पञ्चमे पादे 'मसेरूरन्' (उ) ६८१ इति वक्ष्यते ।

मसूरा मसुरा व्रीहिप्रभेदे पण्ययोषिति ।
मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः ।
मसूरी पादरोगे स्यादुपधाने पुनः पुमान् ।
मसूरमसुरौ च द्वौ, इति विश्वः ॥

४४ । शावशेराप्तौ । 'शु' इति आश्चर्ये । श्वशुरः । 'पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः' इत्यमरः ॥ **४५ । अविमह्योष्टिषच्** । अविषः । महिषः ॥ **४६ । अमेर्दीर्घश्च** । 'आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि ॥ **४७ । रुहेर्वृद्धिश्च** । 'रङ्कुशम्बररौहिषाः' । 'रौहिषो मृगभेदे स्याद्रौहिषं च तृणं मतम्' इति संसारावर्तः ॥ **४८ । तवेर्णिद्वा** । 'तव' इति सौत्रो धातुः । 'तविषताविषावब्धौ स्वर्गे च' । स्त्रियां तविषी ताविषी नदी देवकन्या भूमिश्च । 'तविषी बलम्' इति वेदभाष्यम् ॥ **४९ । नञि व्यथेः** । 'अव्यथिषोऽब्धिसूर्ययोः' । अव्यथिषी धरारात्र्योः ॥ **५० । किलेर्बुक् च** । किल्बिषम् ॥ **५१ । इषिमदिमुदिखिदिछिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच्** । इषिरोऽग्निः । मदिरा सुरा । 'मुदिरः कामुकाभ्रयोः' इति विश्वमेदिन्यौ । खिदिरश्चन्द्रः । 'छिदिरोऽसिकुठारयोः' । भिदिरं वज्रम् । मन्दिरं गृहम् । स्त्रियामपि, 'मन्दिरं मदिराऽपि स्यात्' इति विश्वः । 'चन्दिरौ चन्द्रहस्तिनौ' । तिमिरं तमोऽक्षिरोगश्च । मिहिरः सूर्यः । 'मुहिरः काम्यसभ्ययोः' । मुचिरो दाता । रुचिरम् । रुधिरम् । बधिरः 'शुष शोषणे' शुषिरं छिद्रम् । शुष्कमित्यन्ये ॥ **५२ । अशेर्णित्** । आशिरो वह्निरक्षसोः ॥ **५३ । अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः** । अजेर्वीभावाभावः, अजिरमङ्गणम् । शशेरुपधाया इत्वम्, शिशिरः स्यादृतोर्भेदे तुषारे शीतलेऽन्यवत् । 'श्रथ मोचने' उपधाया इत्वं रेफलोपः, प्रत्ययरेफस्य लत्वम्, शिथिलम् । स्थास्फाय्योष्टिलोपः, स्थिरं निश्चलम् । स्फिरं प्रभूतम् । तिष्ठतेर्वुक् ह्रस्वत्वं च, स्थविरः । खदिरः । बाहुलकात् शीङो वुक् ह्रस्वत्वं च,

---

न्तरम् ॥ **४१ मद्गुरादयश्च** । मदी हर्षे ॥—**कर्बुर इति** । 'कर्बुरं सलिले हेम्नि कर्बुरः पापरक्षसोः । कर्बुरा कृष्णवृन्तायां शबले पुनरन्यवत्' इति मेदिनी ॥—**बन्धूरबन्धुराविति** । बन्ध बन्धने ॥ (ग) **कुकुर इति** । कुक आदाने । 'कुक्कुरः कुकुरो मतः' इति हट्टचन्द्रः । 'कुक्कुरः सारमेये ना ग्रन्थिपर्णे नपुंसकम्' इति मेदिनी । अत सातत्यगमने, आदिदीर्घः । आतुरः । वा गतिगन्धनयोः । गुगागमः । 'वागुरा मृगबन्धिनी' इत्यादिरपि ज्ञेयम् ॥ **४२ असेः** । असु क्षेपणे ॥ **४३ मसेश्च** । मसी परिणामे । 'मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः । मसूरी पापरोगे स्यादुपधाने पुनः पुमान्' इति मेदिनी ॥ **४४ शावशेः-** । **'शु'** इति कृताकारलोपः—आशुशब्दः, तस्मिन्नुपपदे आप्तौ गम्यमानायाम् अशू व्याप्ताविव्यस्माद्धातोरुरन्स्यात्, श्वशुरो दम्पत्योः पिता । 'पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः' इत्यमरः ॥ **४५ अवि-** । अव रक्षणादौ । मह पूजायाम् ॥—**अविष इति** । राजा समुद्रश्च । महिषो महान् । 'तुरीयं धाम महिषो विवक्ति' । 'उत माता महिषमन्ववेनत्' । टित्त्वान्ङीप् । महिषी राजपत्नी ॥ **४७ रुहेः** । रुह बीजजन्मनि प्रादुर्भावे च । 'रौहिषो मृगभेदः स्याद्रौहिषं च तृणं मतम्' इति संसारावर्तः ॥ **४८ वेदभाष्यमिति** । 'इन्द्रो वृत्रस्य तविषीम्' । 'इन्द्रस्यात्र तविषीभ्यो विरप्शिन्' इत्यादिमन्त्रेष्विति भावः । वैदिकनिघण्टौ 'ओजः पाजः' इत्यादिषु बलनामसु तविषीशब्दस्य पाठश्चेह मूलमिति बोध्यम् । 'तविषः शोभनाकारे बलेऽब्धिव्यवसाययोः । तविषी देवकन्यायां पुंसि स्वर्गे महोदधौ । ताविषी चेन्द्रकन्यायां ना स्वर्गाम्बुधिकाञ्चने' इति मेदिनी ॥ **४९ नञि व्यथेः** । व्यथ भयसंचलनयोः ॥ **५० किलेः-** । किल श्वैत्यक्रीडनयोः, अस्माद्टिषच् धातोर्बुगागमश्च । 'किल्बिषं पापरोगयोः । अपराधेऽपि' इति मेदिनी ॥ **५१ इषिमदि-** । इषु इच्छायाम्, मदी हर्षे, मुद हर्षे, खिद दैन्ये, छिदिर् द्वैधीकरणे, भिदिर् विदारणे, मदि स्तुत्यादौ, चदि आह्लादे, तिम आर्द्रीभावे, मिह सेचने, मुह वैचित्ये, मुच्लृ मोक्षणे, रुच दीप्तौ, रुधिर् आवरणे, बन्ध बन्धने, शुष शोषणे ॥—**इषिरोऽग्निरिति** । आहार इत्यन्ये । 'छिदिरः पावके रज्जौ करवाले परश्वधे' इति मेदिनी । 'मन्दिरं नगरेऽगारे क्लीबं ना मकरालये' इति मेदिनी । 'चन्दिरोऽनेकपे चन्द्रे' इति च । 'तिमिरं ध्वान्ते नेत्रामयान्तरे' इति । 'मिहिरः सूर्यवृद्धयोः' इति मेदिनी । मिहिरः कामिमूर्खयोः' इति च । 'सुन्दरं रुचिरं चारु' इत्यमरः । 'रुधिरोऽङ्गारके पुंसि क्लीबं तु कुङ्कुमासृजोः' इति मेदिनी । बधिरः श्रोत्रेन्द्रियरहितः । 'शुषिरं विवरं बिलम्' इत्यमरः ॥ **५२ अशेः-** । अश भोजने ॥ **५३ अजिर-** । अज गतौ, शश प्लुतगतौ, ष्ठा गतिनिवृत्तौ, स्फायी वृद्धौ, खद हिंसायाम् ॥—**अजिरमिति** । दशपादीवृत्तौ तु नञ्पूर्वस्य जीर्यतेर्ऋवर्णलोपो निपात्यते इत्युक्तं तदपि ग्राह्यम् । 'आशु द्रुतमजिरं प्रत्नमीड्यम्' इत्यादौ न जीर्यतीत्यजिर इत्यस्यानुगुणत्वात् ॥—**अङ्गणमिति** । अङ्गेर्ल्युटि अनादेशः । नकारस्य बाहुलकात् णत्वमित्येके । अन्ये तु दन्त्यमेवेच्छन्ति । 'अजिरं प्राङ्गणे काये विषये दर्दुरेऽनिले' इति मेदिनी । 'शिशिरो ना हिमे न स्त्री ऋतुभेदे जडे त्रिषु' इति च । विश्वकोशस्थमाह—**शिशिरं स्यादिति** । खदिरो वृक्षभेदः । 'खदिरी शाकभेदे स्त्री ना चन्द्रे दन्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिबिरम् ॥ ५४ । **सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्** । सलति गच्छति निम्नमिति सलिलम् । कलिलम् । अनिलः । महिला । पृषोदरादित्वात् महेला अपि । भड इति सौत्रो धातुः, भडिलौ शूरसेवकौ । भण्डिलो दूतः कल्याणं च । शण्डिलो मुनिः । पिण्डिलो गणकः । तुण्डिलो मुखरः । कोकिलः । भविलो भव्यः । बाहुलकात्कुटिलः ॥ ५५ । **कमेः पश्च** । कपिलः ॥ ५६ । **गुपादिभ्यः कित्** । गुपिलो राजा । तिजिलो निशाकरः । गुहिलं वनम् ॥ ५७ । **मिथिलादयश्च** । मथ्यन्तेऽत्र रिपवो मिथिला नगरी । पथिलः पथिकः ॥ ५८ । **पतिकठिकुठिगडिगुडिदंशिभ्य एरक्** । पतेरः पक्षी गन्ता च । कठेरः कृच्छ्रजीवी । कुठेरः पर्णाशः । बाहुलकान्नुम्न । गडेरो मेघः । गुडेरो गुडकः । दंशेरो हिंस्रः ॥ ५९ । **कुम्बेर्नलोपश्च** । कुबेरः ॥ ६० । **शदेस्त च** । शतेरः शत्रुः ॥ ६१ । **मूलेरादयः** । एरगन्ता निपात्यन्ते । मूलेरो जटा । गुधेरो गोप्ता । गुहेरो लोहघातकः । मुहेरो मूर्खः ॥ ६२ । **कबेरोतः पश्च** । कपोतः पक्षी ॥ ६३ । **भातेर्डवतुः** । भातीति भवान् । ६४ । **कठिचकिभ्यामोरन्** । कठोरः । चकोरः ॥ ६५ । **किशोरादयश्च** ॥ किंपूर्वस्य श्रृगातेष्टिलोपः किमोऽन्त्यलोपः, किशोरोऽश्वशावः । सहोरः साधुः ॥ ६६ । **कपिगडिगण्डिकटिपटिभ्य ओलच्** । कपीति निर्देशान्नलोपः, कपोलः । गडोलगण्डोलौ गुडकपर्यायौ । कटोलः कटुः । पटोलः ॥ ६७ । **मीनातेरूरन्** । मयूरः ॥ ६८ । **स्यन्देः संप्रसारणं च** । सिन्दूरम् ॥ ६९ । **सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्** । सिनोतीति सेतुः । 'तितुत्र-' ३१६३ इति नेट् । तन्तुः । गन्तुः । मस्तु दधिमण्डम् । सच्यत इति सक्तुः, अर्धर्चादिः । 'ज्वरत्वर-' २६५४ इत्यूठ्, तत्र क्विितीत्यनुवर्तते इति मते तु बाहुलकात्, ओतुर्बिडालः । धातुः । क्रोष्टा ॥ ७० । **पः किच्च** । पिबतीति पितुः । 'पितुर्वह्नौ दिवाकरे' ॥ ७१ । **अर्तेश्च तुः** । अर्तेस्तुः स्यात्स च कित् । 'ऋतुः स्त्रीपुष्प-

धावने' इति मेदिनी ॥—**शिविरमिति** । शेरतेऽस्मिन् राजबलानि । 'निवेशः शिबिरं षण्ढे' इत्यमरः ॥ ५४ **सलिकलि—** । षल गतौ, कल संख्याने, अन प्राणने, मह पूजायाम्, भडि परिभाषणे, भदि कल्याणे सुखे च, शडि रुजायाम्, पिडि संघाते, तुडि तोडने, कुक आदाने, भू सत्तायाम्, कुट कौटिल्ये ॥—**कलिल इति** । मिश्रो गहनश्च । 'कलिलं गहनं समे' इत्यमरः ॥—**महिलेति** । 'महिला फलिनीस्त्रियोः' इति मेदिनी । 'प्रियङ्गुः फलिनी फली' इत्यमरः । —**पृषोदरेति** । तथा च दमयन्तीकाव्ये प्रयोगः—'परमहेलारतोऽप्यपरदारिकः' इति । परस्य महेला स्त्री, अथ च परमा उत्कृष्टा हेला क्रीडा तत्र रत इत्यर्थः ॥ ५५ **कमेः**—। कमु कान्तौ । अस्मादिलच् पश्चान्तादेशः । 'कपिलो रेणुकायां च शिंशपागोविशेषयोः । पुण्डरीके करिण्यां स्त्री वर्णभेदे त्रिलिङ्गकम् । नाऽनले वासुदेवे च मुनिभेदे च कुक्कुरे' इति मेदिनी । रेणुकेह लताविशेषः । 'हरेणू रेणुका कुन्ती कपिला भस्मगन्धिनी' इत्यमरात् ॥ ५६ **गुपादिभ्यः**—। गुपू रक्षणे, तिज निशाने, गुहू संवरणे ॥ ५७ **मिथिलादयश्च** । मथे विलोडने । अकारस्येत्वं निपातनात् । पथे गतौ ॥ ५८ **पतिकठि**—। पत्लृ गतौ, कठ कृच्छ्रजीवने, कुठि च, गड सेचने, गुड रक्षायाम्, दंश दशने । कुठिधातोरिदित्वात् नुमि प्राप्ते आह—**बाहुलकादिति** ॥ ५९ **कुम्बेः**-। कुबि आच्छादने। अन्येषामैश्वर्यं कुम्बतीति कुबेरः। 'कुबेरस्त्र्यम्बकसखः' ॥ ६० **शदेः**—। शद्लृ शातने ॥ ६१ **मूलेरा**—। मूल प्रतिष्ठायाम्, गुध परिवेष्टने, गुहू संवरणे, मुह वैचित्त्ये ॥ ६२ **कबेः**—। कबृ वर्णे । 'कपोतः स्याच्चित्रकण्ठे पारावतविहङ्गयोः' इति मेदिनी । 'कपोतः पक्षिमात्रेऽपि' इति त्रिकाण्डशेषः । अत्र ओतश्चश्चित्त्वं प्रामादिकम् । 'यत्कपोतः पदमग्नौ कृणोति,' 'देवाः कपोत इषितो यदिच्छन्–' इत्यादौ सर्वत्र प्रत्ययस्वरेण मध्योदात्तस्यैवोपलभ्यमानत्वादित्याहुः ॥ ६३ **भातेः** । भा दीप्तौ ॥—**भवानिति** । सर्वनामशब्दोऽयम् ॥ ६४ **कठि** । कठ कृच्छ्रजीवने, चक तृप्तौ । कठोरः कठिनः पूर्णश्च । 'कठोरताराधिपलाञ्छनच्छविः' इति माघः । चकोरः पक्षिभेदः ॥ ६५ **किशोरा** । शृ हिंसायाम् । षह मर्षणे । 'किशोरोऽश्वस्य शावके । तैलपर्ण्यौषधौ च स्यात्तरुणावस्थसूर्ययोः' इति मेदिनी ॥ ६६ **कपिगडि**—। कपि चलने, गड सेचने, गडि वदनैकदेशे, कटे वर्षावरणयोः, पट गतौ ॥—**कपोल इति** । केचित्तु सूत्रे कडिं पठन्ति । कडि मदे । कण्डोलश्चण्डालः । 'चाण्डालिका तु कण्डोलवीणा चण्डालवल्लकी' इत्यमरः ॥—**पटोल इति** । 'पटोलं वस्त्रभेदे नौषधौ ज्योत्स्न्यां तु योषिति' इति मेदिनी । कल्ल शब्दे । बाहुलकादतोऽप्योलच् । 'कल्लोलः पुंसि हर्षे स्यान्महत्सूर्मिषु वारिणः' इति मेदिनी ॥ ६८ **स्यन्देः**—। स्यन्दू प्रस्रवणे । 'सिन्दूरस्तरुभेदे स्यात्सिन्दूरं रक्तवर्णके' इति मेदिनीविश्वप्रकाशौ ॥ ६९ **सितनि**—। षिञ् बन्धने, तनु विस्तारे, गम्लृ गतौ, मसी परिणामे, षच सेचने, अव रक्षणादौ, डुधाञ् धारणपोषणयोः, क्रुश आक्रोशे । 'सेतुर्नालौ कुमारके' इति मेदिनी । 'सेतुरालौ स्त्रियां पुमान्' इत्यमरः । 'सूत्राणि नरि तन्तवः' इत्यमरः । 'मण्डं दधिभवं मस्तु' इति च । 'धातुर्ना इन्द्रियेषु च । शब्दयोनिमहाभूततद्गुणेषु रसादिषु । मनःशिलादौ श्लेष्मादौ विशेषाद्गैरिकेऽस्थि च' इति मेदिनी । 'श्लेष्मादिरसरक्तादिमहाभूतानि तद्गुणाः । इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः' इत्यमरः ॥ ७० **पः किच्च** । पा पाने । अस्मात्तुन् स च कित् । कित्त्वात् 'घुमास्था–' इतीत्त्वम् ॥ ७१ **अर्तेश्च तु** । ऋ गतौ । तुनि प्रकृते अन्तोदात्तार्थं तुः क्रियते । 'ऋतुना यज्ञं य ऋतुर्जनीनाम्' इत्यादि । 'ऋतुर्वर्षादिषट्सु च । आर्तवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालयोः' ॥ ७२ । **कमिमनिजनिगाभायाहिभ्यश्च** । एभ्यस्तुः स्यात् । 'कन्तुः कन्दर्पचित्तयोः' । मन्तुरपराधः । जन्तुः प्राणी । 'गातुः पुंस्कोकिले भृङ्गे गन्धर्वे गायनेऽपि च' । भातुरादित्यः । 'यातुरध्वगकालयोः' । रक्षसि क्लीबम् । हेतुः कारणम् ॥ ७३ । **चायः किः** । 'केतुर्ग्रहपताकयोः' ॥ ७४ । **आप्नोतेर्ह्रस्वश्च** । अप्तुः शरीरम् ॥ ७५ । **वसेस्तुन्** । वस्तु ॥ ७६ । **अगारे णिच्च** । 'वेश्मभूर्वास्तुरस्त्रियाम्' ॥ ७७ । **कृञः क्रतुः** । क्रतुर्यज्ञः ॥ ७८ । **एधिवह्योश्च तुः** । एधतुः पुरुषः । वहतुरनड्वान् ॥ ७९ । **जीवेरातुः** । 'जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे' ॥ ८० । **आतृकन् वृद्धिश्च** । जीवेरित्येव । 'जैवातृकस्त्विन्दुभिषगायुष्मत्सु कृषीवले' ॥ ८१ । **कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः** । 'कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मता' । चमूः । तनूः । धनूः शस्त्रम् । 'सर्ज सर्जने' सर्जूर्वणिक् । 'खर्ज व्यथने' खर्जूः पामा ॥ ८२ । **मृजेर्गुणश्च** । मर्जूः शुद्धिकृत् ॥ ८३ । **वहो धश्च** । 'वधूर्जायास्नुषास्त्रीषु' ॥ ८४ । **कषेश्छश्च** । कच्छूः पामा ॥ ८५ । **णित्कसिपद्यर्तेः** । कासूः शक्तिः । पादूश्चरणधारिणी । आरूः पिङ्गलः ॥ ८६ । **अणो डश्च** । अडूर्जलप्लवद्रव्यम् ॥ ८७ । **नञि लम्बेर्नलोपश्च** । 'तुम्ब्यलाबूरुभे समे इत्यमरः' ॥ ८८ । **के श्र एरङ् चास्य** । कशब्दे उपपदे श्रृणातेरूः स्यादेरङ् आदेशः । 'कशेरूस्तृणकन्दे स्त्री' । बाहुलकादुप्रत्यये— कशेरुः, क्लीबे पुंसि च ॥ ८९ । **त्रो दुट् च** । तरतेरूः स्यात्तस्य दुट् । 'तर्दूः स्याद्दारुहस्तकः' ॥ ९० । **दरिद्रातेर्यालोपश्च** । इश्च आश्च यौ तयोर्लोपः । दर्द्रूः कुष्ठप्रभेदः ॥ ९१ । **नृतिशृध्योः कूः** । नृतूर्नर्तकः । शृधूरपानम् ॥ ९२ । **ऋतेरम् च** । ऋतिः सौत्रो धातुः, ततः कूरमागमश्च, रन्तूर्देवनदी सत्यवाक् च ॥ ९३ । **अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः** । एते कूप्रत्ययान्ता निपात्यन्ते । अन्दूर्बन्धनम् । 'दृभी ग्रन्थे'

मांसि च पुमान्' इति मेदिनी । 'ऋतुः स्त्रीकुसुमेऽपि च' इत्यमरः ॥ **७२ कमिमनि** । कमु कान्तौ, मन ज्ञाने, जनी प्रादुर्भावे, गै शब्दे, भा दीप्तौ, या प्रापणे, हि गतौ वृद्धौ च । कमिग्रहणं प्रपञ्चार्थम्, 'अर्जिदृशि-' इत्यादिना कुप्रत्यये तुकि सिद्धत्वात् ॥—**मन्तुरिति** । 'मन्तुः पुंस्यपराधेऽपि मनुष्येऽपि प्रजापतौ' इति मेदिनी । 'गातुर्ना कोकिले भृङ्गे गन्धर्वे त्रिषु रोषणे' इति मेदिनी । 'भातुर्ना किरणे सूर्ये' इति च ॥ **७३ चायः किः** । चायृ पूजानिशामनयोः । अस्मात्तुः, धातोः किरादेशश्च । 'केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि' इति मेदिनी ॥ **७४ आप्नोतेः** । आप्लृ व्याप्तौ ॥—**अप्तुः शरीरमिति** । अभिलषितार्थश्च, आप्तव्यत्वात् । अत एव यागविशेषवाचकस्याप्तोर्यामशब्दस्याभिलषितार्थप्रापक इत्यवयवार्थमाहुः ॥ **७५ वसेः**—। वस निवासे ॥ **७७ कृञः**—। डुकृञ् करणे । क्रतोः कित्त्वाद्गुणाभावे यणादेशः । 'क्रतुर्यज्ञे मुनौ पुंसि' इति मेदिनी ॥ **७८ एधिवह्योश्च तुः** । एध वृद्धौ, वह प्रापणे, चित्त्वादन्तोदात्तः । 'स्योनं पत्ये वहतुं कृणुष्व' । 'वहतुः पथिके वृषभे पुमान्' इति मेदिनी ॥ **७९ जीवेः** । जीव प्राणधारणे ॥ **८० आतृकन्**—। 'जैवातृकः पुमान् सोमे कृषकायुष्मतोस्त्रिषु' इति मेदिनी ॥ **८१ कृषिचमि**—। कृष विलेखने, चमु अदने, तनु विस्तारे, धन धान्ये । रभसकोशस्थमाह—**कर्षूः पुंसीत्यादि** । 'कर्षूः पुमान् करीषाग्नौ स्त्रियां कुल्याल्पखातयोः' इति मेदिनी । 'चमूः सेनाविशेषे च सेनामात्रे च योषिति' इति मेदिनी । 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः । 'सर्जूर्वणिजि विद्युति । स्त्रियां स्वर्गे विधौ रुद्रे' इति मेदिनी । 'खर्जूः कीटान्तरे स्मृता', 'खर्जूरीपादपे कण्ड्वाम्' इति च ॥ **८२ मृजेः**—। मृजू शुद्धौ । अस्मादूः स्याद्वृद्ध्यपवादो गुणश्च । 'मर्जूः स्त्रीशुद्धौ धावकेऽपि च' इति मेदिनी ॥ **८३ वहो धश्च** । वह प्रापणे । 'वधूः स्नुषा नवोढा स्त्री भार्यापृक्काङ्गनासु च' इति विश्वः । 'पृक्का महिला च वधूः' इति त्रिकाण्डशेषः ॥ **८४ कषेश्छश्च** । कषशिषेति दण्डके हिंसार्थः । अस्मादूः स्याच्छश्चान्तादेशः । 'कच्छ्वां तु पाम पामा विचर्चिका' इत्यमरः ॥ **८५ णित्कसि**—। कस गतौ, पद गतौ, ऋ गतौ । 'कासूर्विकलवाचि स्यात्तथा शक्त्यायुधे स्त्रियाम्' इति मेदिनी । 'कासूः शक्त्यायुधे रुजि । बुद्धौ विकलवाचि स्यात्' इति हेमचन्द्रः ॥ **८६ अणो डश्च** । अण दण्डके शब्दार्थः । अस्मादूः स्यात्स च णित् डश्चान्तादेशः ॥ **८७ नञि लम्बेः** । लबि अवस्रंसने । न लम्बते इत्यलाबूः ॥ **८८ के श्र** । शॄ हिंसायाम् ॥ **८९ त्रो दुट् च** । तॄ प्लवनतरणयोः ॥—**तर्दूरिति** । 'नेड्वशि-' इति नेट् । 'वरमनादौ' इति परिगणनं तु बाहुलकान्नाश्रीयते इत्याहुः । केचित्तु इडभावे 'त्रो दुक् च' इति पठित्वा धातोर्दुगागममाहुः तेषां तु धातोर्गुणो दुर्लभः । दुगागमात्पूर्वं यत्प्राप्तं तदपि भवतीत्येवं चकारबलेन व्याख्याय वा गुणः साधनीयः ॥ **९० दरिद्रातेः**—। दरिद्रा दुर्गतौ ॥—**इश्च आश्चेति** । भोजदेवस्तु य्यालोप इति रेफादिकं पदं छित्त्वा द्वेधा व्याख्यत्-रिश्च आश्चेति व्याख्याने-दद्रूः । रश्च इश्च आश्चेति व्याख्याने तु 'अन्त्यबाधेऽन्त्यसदेशस्य' इति द्वितीयस्यैव रेफस्य लोपाद्दर्दूरिति । मृगय्वादित्वात्कुप्रत्यये दर्द्रुरित्यन्ये । 'दर्द्रुणो दर्द्रुरोगी स्यात्' इत्यमरः । इत्थं चत्वारि रूपाणि ॥ **९१ नृति**—। नृती गात्रविक्षेपे, शृधु शब्दकुत्सायाम् ॥ **९२ अन्दूदृम्भू**—। अदि बन्धने । 'नृतिशृध्योः कूः' इत्यत्र 'अंदि'ग्रहणं न कृतं वैचित्र्यार्थमित्याहुः । ला आदाने, कफपूर्वः । डुधाञ् धारणादौ, कर्कपूर्वः । षोऽन्तकर्मणि, दिधिपूर्वः षत्वं च ॥—**अन्दूर्बन्धनमिति** । 'अन्दूः स्त्रियां स्यान्निगडे प्रभेदे भूषणस्य च' इति मेदिनी । 'अन्दुको हस्तिनि गदे' इत्यमरः । अन्दूर्बुद्धिरिति व्याचख्युः ॥—**दृभी ग्रन्थ इति** । संज्ञायां कन् । 'केऽणः' इति ह्रस्वः । केचित्तु 'अम गतौ' अस्य दुक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निपातनान्नुम्, दन्भूः । अनुस्वराभावोऽपि निपातनादित्येके, दन्भूः । जनेर्बुक्, जम्बूः । 'जमु अदने' इत्यस्येत्येके । बाहुलकाद्ध्रस्वोऽपि, जम्बुः । कफं लाति कफेलूः श्लेष्मातकः, निपातनादेत्वम् । कर्कं दधाति कर्कन्धूर्बदरी, निपातनान्नुम् । दिधिं=धैर्यं स्यति=त्यजतीति दिधिषूः पुनर्भूः । केचित्तु 'अन्दूदम्भूजम्बूकम्बू' इति पठन्ति । 'दम्फ उत्क्लेशे' दम्फूः सर्पजातिः । कमेर्बुक्, कम्बूः परद्रव्यापहारी ॥ ९४ । मृग्रोरुतिः । मरुत् । गरुत् पक्षः ॥ ९५ । ग्रो मुट् च । गिरतेरुतिस्तस्य च मुट् । गर्मुत् सुवर्णं तृणविशेषश्च ॥ ९६ । हृषेरुलच् । 'हर्षुलो मृगकामिनोः' । बाहुलकाच्चटतेः, चटुलं शोभनम् ॥ ९७ । हृसृरुहियुषिभ्य इतिः । 'हरित्ककुभि वर्णे च तृणवाचिविशेषयोः' । सरित् नदी । रोहित् मृगविशेषस्य स्त्री । 'युष' इति सौत्रो धातुः । 'ऋश्यस्य रोहित् पुरुषस्य योषित्' इति भाष्यम् ॥ ९८ । ताडेर्णिलुक् च । ताडयतीति तडित् ॥ ९९ । शमेर्ढः । बाहुलकादित्संज्ञा एयादेश इट् च न । 'शण्ढः स्यात्पुंसि गोपतौ' । शण्ढः क्लीबः ॥ १०० । कमेरठः । कमठः । 'कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम्' इति मेदिनी । बाहुलकाज्जरठः ॥ १०१ । रमेर्वृद्धिश्च । रामठं हिङ्गु ॥ १०२ । शमेः खः । शङ्खः ॥ १०३ । कणेष्ठः । कण्ठः ॥ १०४ । कलस्तृपश्च । तृपतेः कलप्रत्ययः । चात्तृफतेः । तृपला लता । 'त्रिफला तु फलत्रिके' ॥ १०५ । शपेर्वश्च । शबलः ॥ १०६ । वृषादिभ्यश्चित् । वृषलः । पललम् । बाहुलकाद्गुणः, सरलः । तरलः ॥ (१) कमेर्बुक् । कम्बलः । 'मुस खण्डने'

तुदादिरयम् । दम्भतीति दम्भूः । संदर्भकर्तेत्यर्थः । कथक इत्यन्ये । कैयटमतानुरोधेनास्य रूपाणि हूहूवदित्युक्तम् । माधवादयस्तु दृढशब्दे उपपदे भुवः क्विप्प्रत्ययः । उपपदस्य दन्नादेशो निपात्यते । यद्वा दृढार्थकं दन्निति नान्तमव्ययमुपपदम् । दन्भूः-तरुः सर्पः कपिर्वेति व्याख्याय 'दन्कर-' इति यणि वर्षाभूवद्रूपमस्येत्याहुः ॥—ह्रस्वोऽपीति । अत एव विक्रमादित्येनोक्तं—'तस्या जम्बोः फलरसो नदीभूय प्रवर्तते' इति । केचित्तु 'परिणतजम्बुफलोपभोगहृष्टा' इति भारविप्रयोगं ह्रस्वान्तत्वे साधकत्वेनोदाजह्रुः । तन्न । 'इको ह्रस्वो ङ्यः-' इत्युत्तरपदाधिकारस्थह्रस्वविधायकसूत्रेण गतार्थत्वात् ॥—दिधिमिति । केचित्तु दधातेरित्वं द्वित्वं षुक् च निपात्यते । दधात्यसौ दिधिषूरित्याहुः ॥—पुनर्भूरिति । 'पुनर्भूर्दिधिषूरूढा द्विः' इत्यमरः । द्विरूढा, द्विवारं विवाहितेत्यर्थः । उज्वलदत्तोक्तं पाठमाह—केचित्त्विति । एतच्च कैयटमाधवादिग्रन्थविरुद्धम् । अत एव 'दम्भूः स्त्री सर्पचक्रयोः' इति भान्ते मेदिनी ॥ ९४ मृग्रोः-। मृङ् प्राणत्यागे, गॄ निगरणे, आभ्यामुतिः । इकारस्त्वकारस्येत्संज्ञापरित्राणार्थः ॥—मरुदिति । प्रज्ञादित्वादणि मारुतोऽपि । मरुतशब्दोऽप्यव्युत्पन्नोऽस्ति । तथा च विक्रमादित्यकोशः—'मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुत्' इति । 'कोऽयं वाति स दाक्षिणात्यमरुतः' इति कविराजश्लोकेऽनुपपत्तिं मत्वा 'दाक्षिणात्यपवनः' इति पाठं केचित्कल्पयन्त्यल्पदृश्वान इति वर्णविवेकः ॥—गरुदिति । यवादिरयम् । तेनास्मात्परस्य मतुपो मस्य 'झयः' इत्यनेन वत्वं न । गरुत्मान् ॥ ९५ गर्मुदिति । 'गर्मुत्स्त्री स्वर्णलतयोः' इति मेदिनी ॥ ९६ हृषेः-। हृष तुष्टौ ॥—चटतेरिति । चटे वर्षावरणयोः ॥ ९७ हृसृ-। हृञ् हरणे, सृ गतौ, रुह बीजजन्मनि ॥ विश्वकोशस्थमाह—हरिदिति । 'हरिद्दिशि स्त्रियां पुंसि हर्षवर्णविशेषयोः । अस्त्रियां स्यात्तृणे च' मेदिनी ॥—ऋश्यस्येति । एतेन 'गतं रोहिद्भूतां रिरमयिषुमृश्यस्य वपुषा-' इति पुष्पदन्तप्रयोगो व्याख्यातः । 'रोहिन्मृग्यां लताभेदे स्त्री नार्के' इति मेदिनी ॥ ९८ ताडेः-। तड आघाते, ण्यन्तः । 'तडित्सौदामिनी विद्युत्' इत्यमरः ॥ ९९ शमेः । शम उपशमे ॥—बाहुलकादिति । यद्यपि 'नेड्वशि कृति' इत्यनेनैव इडभावस्य सिद्धत्वात् 'इट् च न' इत्येतदयुक्तं, तथापि 'नेड्वरमनादौ' इति परिगणनाद्बहुलग्रहणमाश्रित्यैव इडभावोऽपि साधितः । 'शण्ढः स्यात्पुंसि गोपतौ । आकृष्टाण्डे वर्षवरे तृतीयप्रकृतावपि' इति मेदिनी ॥ १०० कमेः-। कमु कान्तौ । 'कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम्' इति मेदिनी ॥—जरठ इति । जॄ वयोहानौ । 'जरठः कठिने पाण्डौ कर्कशेऽप्यभिधेयवत्' इति विश्वमेदिन्यौ । 'जरठः कठिने जीर्णे' इति वैजयन्ती ॥ १०१ रमेः-। रम क्रीडायाम् ॥ १०२ शमेः-। शम उपशमे । 'शङ्खो निधौ ललाटास्थ्नि कम्बौ न स्त्री' इत्यमरः । 'शङ्खः कम्बौ न योषित्ना भालास्थिनिधिभिन्नखे' इति मेदिनी ॥ १०३ कणेः-। 'कण्ठो गले सन्निधाने ध्वनौ मदनपादपे' इति विश्वमेदिन्यौ ॥ १०४ कल-। तृप प्रीणने ॥—फलत्रिके इति । 'त्रिफला तृफला च सा' इति विश्वः । त्रिफलाशब्दसमानार्थस्तृफलाशब्द इति 'द्विगोः' इति सूत्रे रक्षितः ॥ १०५ शपेः-। शप आक्रोशे ॥ १०६ वृषादिभ्यः—। वृषु सेचने, पल गतौ, सृ गतौ, तॄ प्लवनतरणयोः । 'शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः' इत्यमरः । 'वृषलस्तुरगे शूद्रे' इति हेमचन्द्रः । 'पललं तिलचूर्णे च पिके मांसे नपुंसकम् । ना राक्षसे' इति मेदिनी ॥ कलप्रत्ययस्य कित्त्वादाह—बाहुलकादिति । 'सरलः पूतिकाष्ठे नाऽथो-दारावक्रयोस्त्रिषु' इति मेदिनी । 'सरला विरलायन्ते घनायन्ते किल द्रुमाः । न शमी न च पुन्नागा अस्मिन्संसारकानने' इत्यभियुक्तप्रयोगः ॥ (१) कमेः-। कमु कान्तौ । अस्माद् वृषादित्वेन कलप्रत्यये बाहुलकादित्यनुषज्यत इति बुक् । 'कम्बलो नागराजे स्यात्सास्नाप्रावारयोरपि । कृमावप्युत्तरासङ्गे सलिले तु नपुंसकम्' इति मेदिनी । 'मुसलं स्यादयोऽग्रे च पुंनपुंसकयोः स्त्रियाम् । तालमूल्यामाखुपर्णीगृहगोधिकयोरपि' इति मेदिनी । मूर्धन्यमध्योऽप्ययमिति वर्णदेशना । मुस खण्डन

१ 'कमेर्बुक्' 'लङ्गेर्वृद्धिश्च' 'कुटिकशिकौतिभ्यः प्रत्ययस्य मुट्' एतत्त्रयमपि बाहुलकाछब्धम् । न त्वेतानि सूत्राणि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुसलम् । (२) लङ्गेर्वृद्धिश्च । लाङ्गलम् । (३) कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् । कुट्मलः । कुडेरपि, कुड्मलः । कश्मलम् । बाहुलकाद्गुणः, कोमलम् ॥ १०७ । मृजेष्टिलोपश्च । मलम् ॥ १०८ । चुपेरच्चोपधायाः । चपलम् ॥ १०९ । शकिशम्योर्नित् । शकलम् । शमलम् ॥ ११० । छो गुक् ह्रस्वश्च । छगलः । प्रज्ञादित्वाच्छागलः ॥ १११ । ञमन्ताड्डः । दण्डः । रण्डा । खण्डः । भण्डः । वण्डश्छिन्नहस्तः । अण्डः । बाहुलकात्सत्वाभावः, षण्डः सङ्घातः । तालव्यादिरित्यपरे, शण्डः । गण्डः । चण्डः । पण्डः, क्लीबः । पण्डा बुद्धिः । फण्डः[1] ॥ ११२ । कादिभ्यः कित् । कवर्गादिभ्यो डः कित्स्यात् । कुण्डम् । काण्डम् । गुड्, गुडः । 'घुण भ्रमणे' घुण्डो भ्रमरः ॥ ११३ । स्थाचतिमृजेरालज्वालञालीयचः । तिष्ठतेरालच्, स्थालम् । स्थाली । चतेर्वालञ्, चात्वालः । मृजेरालीयच्, मार्जालीयो बिडालः ॥ ११४ ।

इति धातोर्दन्त्यान्तेषु मूर्धन्यान्तेषु च बोपदेवादिभिः पठितत्वात् । उज्ज्वलदत्तादयस्तु तालव्यमध्यमप्याहुः । अत एव 'मुसलो मुषलोऽपि च' इति विश्वकोशे मुशलोऽपि चेति पाठान्तरम् ॥ **(२) लङ्गेः**–। लगि गतौ अस्मात्कलप्रत्यये बाहुलकादित्यनुषज्ञाद्वृद्धिरिति भावः । एवमग्रेऽपि । मुडागमो बाहुलकादेव ॥ **(३) कुटिकशि**–। कुट कौटिल्ये, कश गतिशासनयोः, कु शब्दे, अस्मात्कलप्रत्यये गुणो नेत्याशङ्क्याह—**बाहुलकादिति** । 'कोमलं मृदुलं मृदु' । बाहुलकादन्यत्रापि बोध्यः । तद्यथा—कुस श्लेषणे । दन्त्यान्तोऽयम् । बोपदेवमते तु तालव्यान्तोऽपि । गुणः, **कोशलः कोसलो** वा देशविशेषः । 'वृद्धेत्कोसला–' इति सूत्रे तु दन्त्यान्त एव सांप्रदायिकः पाठः । संब संबन्धे, शंब च । **संबलं शंबलम्** । 'शंबलोऽस्त्री संबलवत् कुलपाथेय मत्सरे' इति मेदिनी । कदि आह्वाने नलोपः । गौरादित्वान्ङीषि—**कदली** । 'मन्दान्दोलितकर्पूरकदलीदलसंज्ञया । विश्रमाय श्रमापन्नानाह्वयन्तीमिवाध्वगान्' इति काशीखण्डे । अजादेराकृतिगणत्वाट्टाबपि । 'कदलाकदलौ पृश्न्यां कदलीकदलौ पुनः । रम्भावृक्षेऽथ कदली पताकामृगभेदयोः । कदली बिम्बिकायां च' इति मेदिनी । कुश इति सौत्रो धातुः । '**कुशलः** शिक्षिते त्रिषु । क्षेमे च सुकृते चापि पर्याप्तौ च नपुंसके' इति मेदिनी । कमु कान्तौ । '**कमलं** सलिले ताम्रे जलजे व्योम्नि भेषजे । मृगभेदे तु कमलः कमला श्रीवरस्त्रियोः' इति विश्वमेदिन्यौ । मडि भूषायाम् । '**मण्डलं** परिधौ कोठे देशे द्वादशराजके' इति मेदिनी । 'कोठो मण्डलकं कुष्ठ' इत्यमरः । 'बिम्बोऽस्त्री मण्डलं त्रिषु' इति च ॥ **१०७ मृजेः**–। मृजू शुद्धौ । '**मलो**ऽस्त्री पापविट्किट्टे कृपणे त्वभिधेयवत्' इति मेदिनी ॥ **१०८ चुपेः**-। चुप मन्दायां गतौ । '**चपलः** पारदे मीने चोरके प्रस्तरान्तरे । चपलाकमलाविद्युत्पुंश्चलीपिप्पलीषु च । नपुंसके तु शीघ्रे स्याद्वाच्यवत्तरले चले' इति मेदिनी ॥ **१०९ शकिशम्योः** । शक्लृ शक्तौ, शम उपशमे । **शकलं** खण्डे रोहितादीनां त्वचि च । तद्योगात् शकली मत्स्यः । मत्स्यान् शकलानिति भाष्यम् । 'शकलं त्वचि खण्डे स्याद्भागवस्तुनि वल्कले' इति मेदिनी ॥ **११० छो गुक्**–। छो छेदने । 'छगलं नीलवस्त्रे ना छागे स्त्री वृद्धदारके' इति मेदिनी ॥ **१११ ञमन्ताड्डः** । ञमिति प्रत्याहारः । दमु उपशमे, रमु क्रीडायाम्, खनु अवदारणे, मन ज्ञाने, वन संभक्तौ, अम गत्यादिषु, षणु दाने, गम्लृ गतौ, चण दाने, पण व्यवहारे स्तुतौ च । काशिकायां तु त्रिभ्य एव कणमाः स्युरित्युक्तम् । ञम् प्रत्याहारस्तु न स्वीकृतः । अष्टाध्याय्यां तस्य विषयाभावात् ॥—**दण्ड इति** । बाहुलकात् 'चुटू' इति नेत्संज्ञा । 'दण्डोऽस्त्री लगुडेऽपि स्यात्' इत्यमरः । 'रण्डा मूषकपर्ण्यां च विधवायां च योषिति । खण्डोऽस्त्री शकले नेक्षुविकारमणिभेदयोः । मण्डः पञ्चाङ्गुले शाकभेदे क्लीबं तु मस्तुनि । वण्डा तु पांसुलायां स्त्री त्रिषु हस्तादिवर्जिते' । अमन्ति संप्रयोगं यान्ति अनेनेति अण्डं प्राण्यवयवः । 'षण्डः पद्मादिसंघाते न स्त्री स्यात् गोपतौ पुमान्' । शडि रुजायाम्, अस्मात् घञि शण्डशब्दस्तालव्यादिरपि संघाते वर्तते इत्याशयेन मतान्तरमाह—**तालव्यादिरित्यपरे इति** । 'गण्डः स्यात्पुंसि खड्गिनि । चिह्नवीरकपोलेषु हयभूषणबुद्बुदे । चण्डो ना तिन्तिणीवृक्षे यमकिंकरदैत्ययोः । चण्डी कात्यायनी देव्यां हिंस्रा कोपनयोषितोः । पण्डः शठे धियि स्त्री स्यात्' इति मेदिनी ॥ फण गतौ, फण्डः । प्रज्ञादित्वादण् । फाण्डं उदरम् ॥ **११२ कादिभ्यः कित्** । कुण शब्दोपकरणयोः ॥—**कुण्डमिति** । इह कुण्डमित्यत्र प्रायेणानुस्वारमेव लिखन्ति तत्तु प्रमादकृतम् । एवमन्यत्रापि बोध्यम् । डस्य कित्त्वान्न गुणः । 'अनुनासिकस्य क्विझलोः–' इति दीर्घस्तु न भवति, बाहुलकात्संज्ञापूर्वकविधेरनित्यत्वाद्वेत्याहुः । 'कुण्डमग्न्यालये मानभेदे देवजलाशये । कुण्डी कमण्डलौ जारात्पतिवत्नीसुते पुमान् । पिठरे तु न ना' इति मेदिनी । 'अमृते जारजः कुण्डो मृते भर्तरि गोलकः' इत्यमरः ॥—**काण्डमिति** । कमु कान्तौ । 'अनुनासिकस्य–' इति दीर्घः । 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इत्यमरः । अर्वा=कुत्सितः । अत एव 'काण्डं स्तम्बे तरुस्कन्धे बाणेऽवसरनीरयोः । कुत्सिते वृक्षभिन्नाडीवृन्दे रहसि न स्त्रियाम्' इति मेदिनी । गुड् अव्यक्ते शब्दे । 'गुडो गोलेक्षुपाकयोः' इत्यमरः । गुडा स्नुही, तद्वत्केशा यस्य स गुडाकेशः शिवः, जटाधारित्वात् । 'गुडः स्याद्गोलके हस्तिसन्नाहेक्षुविकारयोः । गुडा स्नुह्यां च कथिता गुडिकायां च योषिति' इति मेदिनी । गुडाका निद्रा तस्या ईशः इति वा, जितेन्द्रियत्वादिति माधवः ॥ **११३ स्थाचति**—। ष्ठा गतिनिवृत्तौ, चते याचने, मृजू शुद्धौ । लचा सिद्धे आलच आकारश्चिन्त्यप्रयोजनः । चित्स्वरं बाधित्वा पक्षे आद्युदात्तार्थमित्येके । 'स्थालं भाजनभेदेऽपि स्थाली स्यात् पादलेखयोः' इति मेदिनी । 'चात्वालो यज्ञकुण्डे स्याद्दर्भे च' इति विश्वः । 'मार्जालीयः स्मृतः

[1] 'फण्डः' इत्यस्य मूले पाठः क्वचिद्दृश्यते, तथैवात्राप्युल्लेखः । तत्त्वबोधिनीकारेणास्योल्लेखान्नायं मूलस्थ इति प्रतीयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिचण्डिभ्यामालञ् । पातालम् । चण्डालः । प्रज्ञादित्वादणि 'चाण्डालः' अपि–इत्येके ॥ ११५ । **तमिविशिबिडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्** । तमालः । विशालः । बिडालः । मृणालम् । कुलालः । कपालम् । पलालम् । पञ्चालाः ॥ ११६ । **पतेरङ्गच् पक्षिणि** । पतङ्गः ॥ ११७ । **तरत्यादिभ्यश्च** । तरङ्गः । लवङ्गम् ॥ ११८ । **बिडादिभ्यः कित्** । बिडङ्गः । मृदङ्गः । कुरङ्गः, बाहुलकादुत्वं च ॥ ११९ । **सृवृञोर्वृद्धिश्च** । सारङ्गः । वारङ्गः, खङ्गादिसुष्टिः ॥ १२० । **गन् गम्यद्योः** । गङ्गा । अङ्गः पुरोडाशः ॥ १२१ । **छापूखडिभ्यः कित्** । छागः । पूगः । खङ्गः । बाहुलकात् 'षिट अनादरे' गन्सत्वाभावश्च । षिङ्गस्तरलः । 'षिङ्गैरगद्यत ससंभ्रममेवमेका' इति माघः ॥ १२२ । **भृञः किन्नुट् च** । भृञो गन् किस्यात्तस्य नुट् च । 'भृङ्गाः षिङ्गालिधूम्याटाः' ॥ १२३ । **शृणातेर्ह्रस्वश्च** । शृङ्गम् ॥ १२४ । **गण् शकुनौ** । नुट् चेत्यनुवर्तते । शार्ङ्गः ॥ १२५ । **मुदिग्रोर्गग्गौ** । मुद्गः । गर्गः ॥ १२६ । **अण्डन् कृसृभृवृञः** । करण्डः । सरण्डः पक्षी । भरण्डः स्वामी । वरण्डो मुखरोगः ॥ १२७ । **शृदृभसोऽदिः** । शरत् ।

शूद्रे बिडाले कायशोधने' इति मेदिनी ॥ ११४ **पतिचण्डि—**। पत्लृ गतौ, चडि कोपे। पतन्त्यस्मिन्नधर्मेणेति पातालम् । उपधावृद्धिः । 'अधोभुवनपातालं बलिसद्म रसातलम्' इत्यमरः । 'पातालं नागलोके स्याद्विवरे वडवानले' इति मेदिनी ॥—**चण्डाल इति** । इदित्त्वान्नुमि अदुपधत्वाभावान्न वृद्धिः । माधवेन तु 'पतिचण्डिभ्यामालञ्' इति नितं पठित्वा पातालशब्दे बाहुलकाद्वृद्धिमुक्त्वा, वृद्ध्यर्थमालञिति केषांचित्पाठे तु चण्डालशब्देऽपि वृद्धिः स्यादित्युक्तं । तदतिरभसात् ॥—**एके इति** । उज्ज्वलदत्तादयः । एतच्च 'कुलालवरुडकर्मारनिषादचण्डालमित्रामित्रेभ्यश्छन्दसि' इति चण्डालात्स्वार्थेऽणं विदधता वार्तिकेन तद्व्याख्येयेन च सह विरुद्धमिति बोध्यम् ॥ ११५ **तमिविशि—**। तमु काङ्क्षायाम्, विश प्रवेशने, बिड आक्रोशे, मृण हिंसायाम्, कुल संस्त्याने, कपि चलने । निर्देशान्नलोपः । पल गतौ, पचि विस्तारे । 'तमालस्तिलके खङ्गे तापिच्छे वरुणद्रुमे' इति मेदिनी । 'विशाला त्विन्द्रवारुण्यामुज्जयिन्यां तु योषिति । नृपवृक्षभिदोः पुंसि पृथुलेऽप्यभिधेयवत्' इति मेदिनी । '**बिडालो** नेत्रपिण्डे स्याद्वृषदंशकके पुमान्' इति च मेदिनी । 'ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक्' इत्यमरः । '**मृणालं** नलदे क्लीबं पुंनपुंसकयोर्बिसे' इति मेदिनी । 'कुलालः ककुभे कुम्भकारे स्त्री लञ्जनान्तरे' इति च मेदिनी । 'कुलालो घूकपक्षिणि । ककुभे कुम्भकारे च' इति हेमचन्द्रः । 'कपालोऽस्त्री शिरोऽस्थ्नि स्याद्घटादेः शकले व्रजे' इति मेदिनीविश्वप्रकाशौ । 'पाञ्चाली पुत्रिकागत्योः स्त्रियां पुंभूम्नि नीवृति' इति मेदिनी । बाहुलकात् श्यतेरपि कालन् । 'आदेच उपदेशे–' इत्यात्वम् । शाला । शल चलने । अस्मात् घञि शाला । 'सेनासुराच्छायाशालानिशानाम्' इति निपातनात्स्त्रीत्वमिति न्यासः । 'शाला द्रुस्कन्धशाखायां गृहगेहैकदेशयोः । ना झषे' इति मेदिनी ॥ ११६ **पतेरङ्गच्—**। पत्लृ गतौ । पक्षिणीत्युपलक्षणम् । 'पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः । क्लीबं सूते' इति मेदिनी । सूते–पारद इत्यर्थः ॥ ११७ **तरत्या—**। तॄ प्लवनतरणयोः । लूञ् छेदने । तरङ्ग ऊर्मिः । 'तरङ्गस्तुरगादीनामुत्काले वस्त्रभङ्गयोः' इति विश्वः । 'लवङ्गं देवकुसुमे' । आकृतिगणोऽयम् ॥ ११८ **बिडादिभ्यः—**। बिड आक्रोशे, मृद क्षोदे, कृ विक्षेपे, एभ्योऽङ्गच् कित्स्यात् । बिडङ्ग ओषधिविशेष इति उज्ज्वलदत्तः । 'बिडङ्गः कृमिसंघघ्ने बिडङ्गो नागरेऽन्यवत्' इति विश्वः । 'बिडङ्गस्त्रिष्वभिज्ञे स्यात् कृमिघ्ने पुंनपुंसकम्' इति मेदिनी । '**मृदङ्गः** पटहे घोषे' इति च । **कुरङ्गो** मृगविशेषः ॥—**बाहुलकादुत्वं चेति** । कुर शब्दे-इत्यस्मादङ्गच् । तस्य कित्वेन गुणाभाव इत्यन्ये ॥ ११९ **सृवृञोः—**। सृ गतौ, वृञ् वरणे । 'सारङ्गः पुंसि हरिणे चातके च मतङ्गजे । शबले त्रिषु' इति मेदिनी । बाहुलकात् नॄ नये । 'अथ नारङ्गः पिप्पलीरसे । यमजप्राणिनि विटे नागरङ्गद्रुमेऽपि च' इति मेदिनी ॥ १२० **गन् गम्य—**। गम्लृ गतौ, अद भक्षणे । **बाहुलकात्**–अम गत्यादिषु, अस्मादपि गन् । 'अङ्गं गात्रे उपाये च प्रतीके चाप्रधानके । अङ्गो देशविशेषे स्यादङ्ग संबोधनेऽव्ययम्' इति विश्वः । 'अङ्गं गात्रे प्रतीकोपाययोः पुंभूम्नि नीवृति । क्लीबैकत्वे त्वप्रधाने त्रिष्वङ्गवति चान्तिके' इति मेदिनी ॥ १२१ **छापू—**। छो छेदने, पूङ् पवने, खड भेदने । छायते छिद्यते वा यज्ञार्थमिति छागः । पूयते मुखमनेनेति पूगः । 'पूगस्तु क्रमुके वृन्दे' इति मेदिनी । 'खङ्गो गण्डकशृङ्गे स्यात्त्रिस्त्रिंशे गण्डकेऽपि च' इति शब्दतरङ्गिण्याम् । 'खङ्गो गण्डकशृङ्गासिबुद्धभेदेषु गण्डके' इति मेदिनी ॥ १२२ **भृञः—**। डुभृञ् धारणपोषणयोः । किदित्यनुवर्तनात्किद्ग्रहणमिह स्पष्टार्थम् । 'भृङ्गो धूम्याटषिङ्गयोः । मधुव्रते भृङ्गराजे पुंसि भृङ्गं गुडत्वचि' इति मेदिनी ॥ १२३ **शृणातेः—**। शॄ हिंसायामस्माद्गन्, धातोर्ह्रस्वत्वं प्रत्ययस्य तु कित्त्वं नुट् च । 'शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके । स्त्रीविषायां स्वर्णमीनभेदयोर्ऋषभौषधौ' इति मेदिनी । 'शृङ्गं विषाणमाख्यातं शैलाग्रे जलयन्त्रके । मीनौषधिसुवर्णानां भेदे शृङ्गी प्रयुज्यते' इत्युत्पलिनीकोषः ॥ १२४ **गण् शकुनौ** । शृणातेः शकुनौ वाच्ये गण् स्यात्तस्य नुट् । 'अचोऽञ्णिति' इति धातोर्वृद्धिः । शार्ङ्गः पक्षी । शार्ङ्गं धनुरिति तु शृङ्गस्य विकार इति बोध्यम् ॥ १२५ **मुदिग्रोः—**। मुद हर्षे, गॄ निगरणे, आभ्यां यथासंख्यं गक् ग इत्येतौ स्तः । मुद्गः सस्यभेदः । गर्गो मुनिविशेषः ॥ १२६ **अण्डन्—**। डुकृञ् करणे, सृ गतौ, भृञ् भरणे, वृञ् वरणे । 'करण्डो मधुकोशासिकारण्डेषु ललाटके' इति मेदिनी । वरण्डोऽप्यन्तरावेदौ समूहमुखरोगयोः' इति विश्वमेदिन्यौ । बाहुलकात् तॄ प्लवनतरणयोरित्यतोऽपि । 'तरण्डो बडिशीसूत्रबद्धकाष्ठादिके प्लवे' इति मेदिनी ॥ १२७ **शृदृ—**। शॄ हिंसायाम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'दरद्धृदयकूलयोः'। भसत् जघनम् ॥ १२८। **दृणातेः षुक् ह्रस्वश्च** । दृषत् ॥ १२९ । **त्यजितनियजिभ्यो डित्** । त्यद् । तद् । यद् । सर्वादयः ॥ १३० । **एतेस्तुट् च** । एतद् ॥ १३१ । **सर्तेरटिः** । 'सरट् स्याद्वातमेघयोः' । वेदभाष्ये तु 'याभिः कृशानुम्' इति मन्त्रे 'सरड्भ्यो मधुमक्षिकाभ्यः' इति व्याख्यातम् ॥ १३२। **लङ्घेर्नलोपश्च** । लघट् वायुः ॥ १३३ । **पारयतेरजिः** । पारक् सुवर्णम् ॥ १३४ । **प्रथः कित्संप्रसारणं च** । पृथक् । स्वरादिपाठादव्ययत्वम् ॥ १३५ । **भियः षुक् ह्रस्वश्च** । भिषक् ॥ १३६ । **युष्यसिभ्यां मदिक्** । 'युष्' सौत्रो धातुः । युष्मद् । अस्मद् । त्वम् । अहम् ॥ १३७ । **अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्** । एभ्यश्चतुर्दशभ्यो मन् । अर्मश्चक्षूरोगः । स्तोमः सङ्घातः । सोमः । होमः । सर्मो गमनम् । धर्मः । क्षेमं कुशलम् । क्षोमम् । प्रज्ञाद्यणि—क्षौमं च । भाम आदित्यः । यामः । 'वामः शोभनदुष्टयोः' । पद्मम् । 'यक्ष पूजायाम्' यक्ष्मो रोगराजः । नेमः ॥ १३८ । **जहातेः सन्वदालोपश्च** । 'जिह्मः कुटिलमन्दयोः' ॥ १३९ । **अवतेष्टिलोपश्च** । मन्प्रत्ययस्यायं टिलोपो न प्रकृतेः । अन्यथा 'डित्' इत्येव ब्रूयात् । 'ज्वरत्वर–' २६५४ इति ऊठौ । तयोर्दीर्घे कृते गुणः । चादिपाठादव्ययत्वमित्युज्ज्वलदत्तः । तन्न, तेषामसत्वार्थत्वात् । वस्तुतस्तु स्वरादिपाठादव्ययत्वम् । अवतीति ओम् ॥ १४० । **ग्रसेरा च** । ग्रामः ॥ १४१ । **अविसिविसिशुषिभ्यः कित्** । ऊमं नगरम् । स्यूमो रश्मिः । सिमः सर्वः । 'शुष्ममग्निसमीरयोः' ॥ १४२ । **इषियुधीन्धिदसिश्याधूसूभ्यो मक्** । 'इष्मः कामवसन्तयोः' । 'ईषि' इति पाठे दीर्घादिः । युध्मः शरो योद्धा च । इध्मः समित् । दस्मो यजमानः । श्यामः । धूमः ।

दॄ विदारणे, भस भर्त्सनदीप्त्योः । 'शरत् स्त्री वत्सरेऽप्यृतौ । दरत्स्त्रियां प्रपाते च भयपर्वतयोरपि । भसत् स्त्री भास्वरे योनौ' इति मेदिनी । 'उवे अम्बसुलाभिके' इति मन्त्रव्याख्यायां भसद्भग इति वेदभाष्यम्, 'जाघन्यां पत्नीः संयाजयन्ति भसद्वीर्या हि स्त्रियः' इत्यत्र भसज्जघनमिति व्याख्यातारः ॥ **१२८ दृणातेः–**। दॄ विदारणे । 'दृषन्निष्पेषणशिलापट्टप्रस्तरयोः स्त्रियाम्' इति मेदिनी ॥ **१२९ त्यजि—**। त्यज हानौ, तनु विस्तारे, यज देवपूजादौ ॥—**त्यदित्यादि** । डित्त्वाट्टिलोपः ॥ **१३० एतेः–**। इण् गतौ अस्मादद्दिस्तस्य तुटि गुणः । एतद् ॥ **१३१ सर्तेः–**। सृ गतौ ॥ **१३२ लङ्घेः–**। लघि शोषणे ॥ **१३३ पारयतेः–**। पार तीर कर्मसमाप्तौ, चुरादिः ॥—**पारगिति** । णिलोपः कुत्वम् ॥ **१३४ प्रथः—**। प्रथ प्रख्याने ॥ **१३५ भियः–**। ञिभी भये ॥ **१३६ युष्यसि—**। असु क्षेपणे ॥ **१३७ अर्तिस्तु–**। ऋ गतौ, ष्टुञ् स्तुतौ, षुञ् अभिषवे, हु दानादनयोः, सृ गतौ, धृञ् धारणे, क्षि क्षये, टुक्षु शब्दे, भा दीप्तौ, या प्रापणे, वा गतिगन्धनयोः, पद गतौ, णीञ् प्रापणे, 'सोमस्तुहिनदीधितौ । वानरे च कुबेरे च पितृदेवे समीरणे । वसुप्रभेदे कर्पूरे नीरे सोमलतौषधौ' इति मेदिनी ॥—**होम इति** । देवतोद्देशेन हविःप्रक्षेपः । 'धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ । अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे' इति च । 'धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ' इति विश्वः । 'क्षौमं पट्टे दुकूलेऽस्त्री क्षौमं वल्कलजांशुके । शणजेऽतसिजे' इति मेदिनी । 'भामः क्रोधे रवौ दीप्तौ' इति च । 'यामस्तु पुंसि प्रहरे संयमेऽपि प्रकीर्तितः' इति च । 'वामं धने पुंसि हरे कामदेवे पयोधरे । वल्गुप्रतीपसव्येषु त्रिषु नार्यां स्त्रियामथ । वामीशृगालीवडवारासभीकरभीषु च' इति । 'पद्मोऽस्त्री पद्मके व्यूहनिधिसंख्यान्तरेऽम्बुजे । ना नागे' इति च मेदिनी ॥—**यक्ष पूजायामिति** । अयमन्तस्थादिः । मनिन्प्रत्यये तु नकारान्तः शब्दः । 'क्षयः शोषश्च यक्ष्मा च' इत्यमरः । 'राजयक्ष्मेव रोगाणाम्' इति माघः । 'यक्ष्मणाऽपि परिहाणिराययौ' इति रघुः । अत्र जकारयकारयोर्भेदाग्रहेण 'यक्षभक्षहसनयोः' इत्युज्ज्वलदत्तेनोपन्यस्तम् । तन्न । तस्य चवर्गतृतीयादित्वात् । अत एव 'अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां चुबुकादधि । यक्ष्मं सर्वस्मात्' इति मन्त्रे यक्ष्मशब्दस्यान्तःस्थादित्वम् । 'जक्षन् क्रीडन् रममाण' इत्यादिमन्त्रे तु जक्षच्छब्दस्य चवर्गतृतीयादित्वं वेदभाष्यकृतो व्याचख्युः । 'नेमः कालेऽवधौ गर्ते प्राकारे कैतवेऽपि च' इति मेदिनी । 'नेमस्त्वर्धे प्राकारगर्तयोः । अवधौ कैतवे च' इति हेमचन्द्रः ॥ **१३८ जहातेः–**। ओहाक् त्यागे ॥—**जिह्म इति** । मन्प्रत्ययस्य सन्वत्त्वाद् द्वित्वे 'सन्यतः' इतीत्वम् । 'जिह्मस्तु कुटिले मन्दे क्लीबं तगरपादपे' इति मेदिनी ॥ **१३९ अवतेः–**। अव रक्षणादौ । 'ओं प्रश्ने स्वीकृतौ रोषे' इति विश्वः ॥ **१४० ग्रसेरा च** । ग्रसु अदने । अतो मन्धातोराकारश्च । 'ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वके' इति विश्वः । शब्दादिपूर्वको ग्रामशब्दो वृन्दे, शब्दग्रामो गुणग्राम इति यथा । 'शब्दादिपूर्वो वृन्देऽपि ग्रामः' इत्यमरः । संपूर्वोऽयं युद्धे । तदुक्तं—'संपूर्वः संयुगे स्मृतः' इति ॥ **१४१ अविसिवि–**। अव रक्षणादौ, षिवु तन्तुसन्ताने, षिञ् बन्धने, शुष शोषणे' एभ्यो रन्स्यात्स च कित् । ऊठादिकं पूर्ववत् ॥—**ऊमं नगरमिति** । 'त्वे क्रतुम्' इति मन्त्रे ऊमास्तर्पका यजमाना इति वेदभाष्यम् । टापि बाहुलकाद्ध्रस्वत्वे 'उमाऽतसीहैमवतीहरिद्राकान्तिकीर्तिषु' इति मेदिनी ॥—**स्यूमो रश्मिरिति** । सूत्रतन्तुरित्यन्ये । सिमः सर्वनामगणे पठितः । 'शुष्मं तेजसि सूर्ये ना' इति मेदिनी । शुष्मं बलमिति वेदभाष्यम् ॥ **१४२ इषियुधि–**। इष गतिहिंसादानेषु । ईष गताविति केचित् । ईष्मः । युध संप्रहारे, ञिइन्धी दीप्तौ, दसु उपक्षये, श्यैङ् गतौ, धूञ् कम्पने, षूञ् प्राणिगर्भविमोचने ॥—**युध्म इति** । 'युध्मो धनुषि संयुगे' इति मेदिनी । 'दस्मस्तु यजमाने स्यादपि चौरे हुताशने' इति च । 'त्रिषु श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिवा निशा' इत्यमरः । 'श्यामो वटे प्रयागस्य वारिदे वृद्धदारके । पिके च कृष्णहरितोः पुंसि स्यात्तद्वति त्रिषु । मरीचे सिन्धु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूमोऽन्तरिक्षम् । बाहुलकात्–ईर्मं व्रणः ॥ १४३ । **युजिरुचितिजां कुश्च** । युग्मम् । रुक्मम् । तिग्मम् ॥ १४४ । **हन्तेर्हि च** । हिमम् ॥ १४५ । **भियः षुग्वा** । भीमः । भीष्मः ॥ १४६ **घर्मः** । घृधातोर्मग्गुणश्च निपात्यते ॥ १४७ । **ग्रीष्मः** । ग्रसतेर्निपातोऽयम् । १४८ । **प्रथेः षिवन् संप्रसारणं च** । पृथिवी । 'षवन्' इत्येके, पृथवी । 'पृथवी पृथिवी पृथ्वी' इति शब्दार्णवः ॥ १४९ । **अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्** ॥ अश्वः । 'प्रुष स्नेहनादौ' 'प्रुष्वः स्यादृतुसूर्ययोः' । प्रुष्वा जलकणिका । लट्वा पक्षिभेदः फलं च । कण्वं पापम् । बाहुलकादित्वे—किण्वमपि । खट्वा । विश्वम् ॥ १५० । **इण्शीभ्यां वन्** । एवो गन्ता । 'ये च एवा मरुतः' । असत्वे निपातोऽयम् । 'शेवं मित्राय वरुणाय' ॥ १५१ । **सर्वनिघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा अतन्त्रे**[1] । अकर्तर्येते निपात्यन्ते । सृतमनेन विश्वमिति सर्वम् । निपूर्वात् घृषेर्गुणाभावोऽपि, निघृष्यतेऽनेन निघृष्वः खुरः । रिष्वो हिंस्रः । लष्वो नर्तकः । 'लिश्वः' इत्यन्ये, तत्रोपधाया इत्वमपि । शेतेऽस्मिन् सर्वमिति शिवः शम्भुः, शीङो ह्रस्वत्वम् । पद्वो रथो भूलोकश्च । प्रह्वयते इति प्रह्वः, ह्वेञ आकारवकारलोपः, जहातेरालोपो वा । ईषेर्वन्, ईष्व आचार्यः । 'ह्रष्वः' इत्यन्ये । अतन्त्रे किम् । सर्ता सारकः । बाहुलकात्—ह्रसतेः-ह्रस्वः ॥ १५२ । **शेवयह्वजिह्वाग्रीवाप्वमीवाः** । 'शेव' इत्यन्तोदात्तार्थम् । यान्त्यनेन यह्वः, ह्रस्वो हुगागमश्च । लिहन्त्यनया जिह्वा, लकारस्य जः, गुणाभावश्च । गिरन्त्यनया ग्रीवा, ईडागमश्च । आप्नोतीति–आप्वा वायुः । मीवा उदरक्रमिः । वायुरित्यन्ये ॥ १५३ । **कृगृशृदृभ्यो वः** । कर्वः काम आखुश्च । गर्वः । शर्वः । दर्वो राक्षसः ॥ १५४ । **कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः** । यौतीति युवा । वृषा इन्द्रः । तक्षा । राजा । धन्वा मरुः । धन्व शरासनम् । द्युवा सूर्यः । प्रतिदीव्यन्त्यस्मिन् प्रतिदिवा दिवसः ॥ १५५ । **सप्यशूभ्यां तुट् च** । सप्त । अष्ट ॥ १५६ । **नञि जहातेः** ।

लवणे क्लीबं स्त्री शारिवौषधौ । अप्रसूताङ्गनायां च प्रियङ्गावपि गुग्गुलौ । यमुनायां त्रियामायां कृष्णत्रिवृतिकौषधे । नीलिकायाम्' इति मेदिनी ॥—**ईर्ममिति** । ईर गतौ । 'व्रणोऽस्त्रियामीर्ममरुः क्लीबे' इत्यमरः । बाहुलकात्–जन जनन इत्यस्मादपि । जन्मम् । रुह बीजजन्मनीति निर्देशान्मनिनन्तोऽप्यस्ति स तु नान्तः । 'जनुर्जननजन्मानि' इत्यमरस्तु अकारान्तनकारान्तोभयसाधारणः ॥ १४३ **युजि–**। युजिर् योगे, रुच दीप्तौ, तिज निशाने, एभ्यो मक् कवर्गश्चान्तादेशः । 'रुक्मं तु काञ्चने लोहे' इति विश्वमेदिन्यौ । तिग्मं तीक्ष्णम् ॥ १४४ **हन्तेः–**। हन हिंसागत्योरस्मान्मक् धातोर्हिरादेशश्च । 'हिमं तुषारमलयोद्भवयोः स्यान्नपुंसकम् । शीतले वाच्यलिङ्गं' इति मेदिनी ॥ १४५ **भियः–**। ञिभी भये । बिभेत्यस्मादिति विग्रहः । 'भीष्मो गाङ्गेयघोरयोः । भीमोऽम्लवेतसे घोरे शम्भौ मध्यमपाण्डवे' इति मेदिनी ॥ १४६ **घर्मः** । घृ क्षरणदीप्त्योः ॥ १४७ **ग्रीष्मः** । ग्रसु अदने । 'घर्मः स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्भसोरपि' । 'ग्रीष्म ऊष्मर्तुभेदयोः' इति च मेदिनी ॥ १४८ **प्रथेः–**। प्रथ प्रख्याने । षित्त्वान्ङीष् । 'पृथवी पृथिवी पृथ्वी धरा सर्वंसहा रसा' इति शब्दार्णवः ॥ १४९ **अशूप्रुषि–**। अशू व्याप्तौ, लट बाल्ये, कण निमीलने, खट काङ्क्षायाम्, विश प्रवेशने । 'अश्वः पुंजातिभेदे च तुरगे च पुमानयम्' इति मेदिनी । 'अश्वः पुंभेदवाजिनोः' इति विश्वः । 'लट्वा करञ्जभेदे स्यात्फले वाद्ये खगान्तरे' इति विश्वमेदिन्यौ । 'कण्वं पापे मुनौ पुंसि' इति मेदिनी । 'किण्वं बीजाघसीधुषु' इति च पठ्यते । खट्यते=शयनार्थिभिः काङ्क्ष्यते इति खट्वा । 'विश्वा ह्यतिविषायां स्त्री जगति स्यान्नपुंसकम् । न ना शुण्ठ्यां पुंसि देवप्रभेदेष्वखिले त्रिषु' इति मेदिनी ॥ १५० **इण्–**। इण् गतौ । शीङ् स्वप्ने । शेवं सुखमिति वेदभाष्यम् । शेवं मेढ्रमित्युज्वलदत्तः ॥ १५१ **सर्वनिघृष्व—**। सृ गतौ, घृषु संघर्षे, रिष हिंसायाम्, लष कान्तौ, शीङ् स्वप्ने, पट गतौ, ह्वेञ् स्पर्धायां शब्दे च, ओहाक् त्यागे इति वा, ईष शब्दे । तन्त्रशब्दोऽत्र कर्तृवाचीत्याह—**अकर्तरीति** ॥–**निपात्यन्त इति** । वन्प्रत्ययान्ततयेति शेषः ॥—**ह्रस्व इति** । ह्रस शब्दे । 'ह्रस्वो न्यक्खर्वयोस्त्रिषु' इति मेदिनी ॥ १५२ **शेवयह्व—**। एते वन्प्रत्ययान्ता निपात्यन्ते ॥—**अन्तोदात्तार्थमिति** । 'इण्शीभ्याम्' इत्यनेन आद्युदात्तत्वसिद्धेरितिभावः । शीङ् स्वप्ने । शेवा लिङ्गाकृतिः ॥ दशपादीवृत्तिरीत्याऽऽह—**यान्त्यनेनेति** । उज्ज्वलदत्तस्तु—यज देवपूजादौ । जकारस्य हकारो यह्वो यजमान इत्याह । वैदिकनिघण्टौ महन्नामसु यह्वशब्दः पठितः । 'प्रवो यह्वं पुरूणां' । यह्वं महान्तमिति वेदभाष्यम् । लिह आस्वादने । लिहन्त्यनयेति जिह्वा । जि जये । हुगागमः । जिह्वा रसनेत्युज्ज्वलदत्तः ॥—**ग्रीवेति** । गॄ निगरणे, आप्लृ व्याप्तौ, मीङ् हिंसायाम् ॥—**मीवेति** । वेदे तु अमीवेति छित्त्वा अम रोग इत्यस्माद्वः, इट् चेत्युक्तम् । 'अमीवहा वास्तोष्पते' इत्यादिमन्त्रास्तत्रानुकूलाः ॥ १५३ **कृ गृ–**। कॄ विक्षेपे, गॄ निगरणे, शॄ हिंसायाम्, दॄ विदारणे । गर्वोऽहंकारः । शर्वो रुद्रः ॥ १५४ **कनिन्यु—**। यु मिश्रणे, वृषु सेचने, तक्षू त्वक्षू तनूकरणे, राजृ दीप्तौ, धवि गत्यर्थः, द्यु अभिगमने, दिवु क्रीडादौ । 'युवा स्यात्तरुणे श्रेष्ठे निसर्गबलशालिनि' इति, 'वृषा कर्णे महेन्द्रे ना' इति च मेदिनी । 'तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट्' इत्यमरः । 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इति च । 'समानौ मरुधन्वानौ' इति च 'अथास्त्रियाम् । धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्' इति चामरः । 'धन्वा तु मरुदेशे ना क्लीबे चापे स्थलेऽपि च' इति मेदिनी ॥ १५५ **सप्यशूभ्याम्—**। षप समवाये, अशू व्याप्तौ ॥ १५६

१ 'शिवपद्वप्र' इत्यपि पाठः क्वचिद्दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहः ॥ १५७ । श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति । एते त्रयोदश कनिप्रत्ययान्ता निपात्यन्ते । श्वयतीति श्वा । उक्षा । पूषा । 'प्लिह गतौ' इकारस्य दीर्घत्वम्, प्लेहतीति प्लीहा कुक्षिव्याधिः । 'क्लिदू आर्द्रीभावे' क्लिद्यति क्लेदा चन्द्रः । स्निह्यतेर्गुणः, स्निह्यतीति स्नेहा सुहृच्चन्द्रश्च । मुह्यन्त्यस्मिन्नाहते मूर्धा, मुहेरुपधाया दीर्घो धोऽन्तादेशो रमागमश्च । मज्जत्यस्थिषु मज्जा अस्थिसारः । अर्यपूर्वो माङ्, अर्यमा । विश्वं प्साति विश्वप्सा अग्निः । परिजायते परिज्मा चन्द्रोऽग्निश्च, जनेरुपधालोपो मश्चान्तादेशः । मातरि=अन्तरिक्षे श्वयतीति मातरिश्वा, धातोरिकारलोपः । 'मह पूजायाम्' हस्य घो वुगागमश्च, मघवा इन्द्रः ॥ इत्युणादिषु प्रथमः पादः ॥

अथ द्वितीयः पादः ।

१५८ । कृहृभ्यामेणुः । करेणुः । हरेणुर्गन्धद्रव्यम् ॥ १५९ । हनिकुषिनीरमिकाशिभ्यः क्थन् । हथो विषण्णः । कुष्ठः । नीथो नेता । रथः । काष्ठम् ॥ १६० । अवे भृञः । अवभृथः ॥ १६१ । उषिकुषिगार्तिभ्यः स्थन् । ओष्ठः । कोष्ठम् । गाथा । अर्थः । बाहुलकात्-शोथः ॥ १६२ । सर्तेर्णित् । सार्थः समूहः ॥ १६३ । जॄवृञ्भ्यामूथन् । जरूथं मांसम् । 'वरूथो रथगुप्तौ ना' ॥ १६४ । पातॄतुदिवचिरिचिसिचिभ्यस्थक् । 'पीथो रविर्घृतं पीथम्' । 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु । अवतारर्षिजुष्टाम्भःस्त्रीरजःसु च विश्रुतम्' ॥ इति विश्वः । तुत्थोऽग्निः । उक्थं सामभेदः । रिक्थम् । बाहुलकाद्रेचेरपि—'रिक्थमृक्थं धनं वसु' । सिक्थम् ॥ १६५ । अर्तेर्निरि । निर्ऋथं साम ॥ १६६ । निशीथ-

नञि—। ओहाक् त्यागे, कनिनि आतो लोपः ॥ १५७ श्वन्नुक्षन्-। टुओश्वि गतिवृद्ध्योः, उक्ष सेचने, पुष वृद्धौ, ष्णिह प्रीतौ, मुह वैचित्ये, मुर्वी बन्धने । उकारस्य दीर्घत्वे वकारस्य धकार इत्युज्ज्वलदत्तः । टुमस्जो शुद्धौ । मस्जेः सकारस्य शकारस्तस्य जश्त्वेन जः । माङ् माने शब्दे च, प्सा भक्षणे, जनी प्रादुर्भावे, टुओश्वि गतिवृद्ध्योः ॥—**कनिप्रत्ययान्ता इति** । नायं निदिति भावः । केचित्तु नित्त्वं स्वीकृत्य उक्षन्नादीनां सूत्रेऽन्तोदात्तनिपातनमाहुः । तच्च गौरवग्रस्तमित्युपेक्ष्यम् ॥—**श्वेति** । इकारलोपो निपात्यते ॥—**पूषेति** । 'सौ च' इत्युपधादीर्घः । 'इन्हन्–' इति नियमात्पूषणौ पूषण इत्यादौ न दीर्घः । 'क्लेदौषधिशशाङ्कयोः' इति यादवः ॥—**मूर्धेति** । 'मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः ॥—**मज्जेति** । नकारान्तोऽयम् । टाबन्तोऽप्यभ्युपगम्यते । 'ऊष्मया सार्धमूष्मापि मज्जोक्तो मजया सह' इति द्विरूपकोशात् । 'अर्यमा तु पुमान्सूर्ये पितृदेवान्तरेऽपि च' इति मेदिनी ॥—**परिजायत इत्यादि** । एतच्च दशपादीवृत्त्यनुरोधेनोक्तम् । 'परिज्मानं सुखं रथम्' इति मन्त्रस्य वेदभाष्ये तु परिज्मा परितो गन्ता । अजेः परिपूर्वस्य 'श्वन्नुक्षन्–' इत्यादिना मन्प्रत्ययः, अकारलोपः, आद्युदात्तत्वं च निपात्यत इत्युक्तम् । उज्ज्वलदत्तस्तु—परिज्वेति पठित्वा ज्रु इति सौत्रो धातुः परिपूर्वः, यणादेशः परिज्वा चन्द्रः–इत्याह, तल्लक्ष्यविरोधादुपेक्ष्यम् ॥—**मातरिश्वेति** । सप्तम्या अलुक् । इह भत्वविषये संप्रसारणं न भवति । 'श्वयुव–' इति सूत्रे अभिव्यक्ततरत्वेन कुक्कुरवाचकस्यैव श्वशब्दस्य तदन्तस्य च ग्रहणात् । तेन मातरिश्वनः मातरिश्वनेत्येव । इह सूत्रे इतिशब्द आद्यर्थस्तेनान्येभ्योऽपि यथादर्शनं कनिः प्रयोक्तव्यः । दशपाद्यां तु इति शब्दोऽत्र न पठ्यते ॥

इत्युणादिषु प्रथमः पादः ॥

१५८ **कृहृभ्याम्**–॥ डुकृञ् करणे, हृञ् हरणे । 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः । 'करेणुर्गजयोषायां स्त्रियां पुंसि मतङ्गजे' इति मेदिनी ॥—**गन्धद्रव्यमिति** । कलायश्चेति बोध्यम् । 'कलायस्तु सतीनकः' इत्यमरः । 'हरेणुखण्डिके चास्मिन्' इत्यमरः । 'हरेणुर्ना सतीने स्त्री रेणुकाकुलयोषितोः' इति मेदिनीविश्वप्रकाशौ ॥ १५९ **हनिकुषि**–। हन हिंसागत्योः, कुष निष्कर्षे, णीञ् प्रापणे, रमु क्रीडायाम्, काशृ दीप्तौ । 'कुष्ठं रोगे पुष्करे स्त्री' इति मेदिनी । 'कुष्ठं रोगे सुगन्धे च' इति विश्वः । 'नीथे नीथे मघवानं सुतासः' इति मन्त्रे नीथशब्दस्यान्तोदात्तत्वं बाहुलकात् । नीथे नीथे=स्तोत्रे स्तोत्रे इति वेदभाष्यम् । 'रथः पुमानवयवे स्यन्दने वेतसेऽपि च' इति मेदिनी । 'रथः स्यात्स्यन्दने काये वीरणे वेतसेऽपि च' इति विश्वः । 'काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः । स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम्' इति मेदिनी ॥ १६० **अवे**–। डुभृञ् धारणपोषणयोः । अवभृथो यज्ञावसानम् ॥ १६१ **उषिकुषि**–। उष दाहे, कुष निष्कर्षे, गै शब्दे, ऋ गतौ, एभ्यः स्थन् । 'कोष्ठं कुक्षिकुसूलयोः । **गाथा** शोके संस्कृतान्यभाषायां शेषवृक्षयोः' इति मेदिनी । 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः । **शोथः** श्वयथुः । शु गतौ ॥ १६२ **सर्तेः**–। सृ गतौ । 'सार्थो वणिक्समूहे स्यादपि संघातमात्रके' इति मेदिनीविश्वप्रकाशौ ॥ १६३ **जॄवृञ्**–। ज्या वयोहानौ क्र्यादिः, जॄष् दिवादौ । वृञ् वरणे । जरूथोऽसुरविशेष इति वेदभाष्यम् । 'जरूथं स्यात्तनुत्राणे रथगोपनवेश्मनोः' इति हेमचन्द्रः ॥ १६४ **पातॄ** । पा पाने, तॄ प्लवनतरणयोः, तुद व्यथने, वच परिभाषणे, रिचिर् विरेचने, षिच क्षरणे, ऋच स्तुतौ । 'तुत्थोऽग्नावञ्जने तुत्था नीलीसूक्ष्मैलयोरपि' इति विश्वः । 'तुत्थमञ्जनभेदे स्यान्नीलीसूक्ष्मैलयोः स्त्रियाम् । 'सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्' इति मेदिनी ॥ १६५ **अर्तेः**–। ऋ गतौ । 'द्रोघवाचस्ते निर्ऋथं सचन्ताम्' इति मन्त्रे निर्ऋथो हिंसेति वेदभाष्यम् ॥ १६६ **निशीथ**–। शीङ् स्वप्ने निपूर्वः, पा पाने गोपूर्वः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोपीथावगथाः । निशीथोऽर्धरात्रः, रात्रिमात्रं च । गोपीथं तीर्थम् । अवगथः प्रातःस्नातः ॥ १६७ । **गश्चोदि** । उद्गीथः साम्नो भागविशेषः ॥ १६८ । **समीणः** । समिथो वह्निः संग्रामश्च ॥ १६९ । **तिथपृष्ठगूथयूथप्रोथाः** । तिजेर्जलोपः, तिथोऽनलः कामश्च । पृष्ठम् । गूथं विष्ठा । यूथं समूहः । 'प्रोथमस्त्री तुरङ्गास्ये प्रोथः प्रस्थित उच्यते' ॥ १७० । **स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक्** । द्वात्रिंशतो रक् स्यात् । वलि यलोपः, स्फारम् । न्यङ्क्वादित्वात्कुत्वम्—तक्रम् । वक्रम् । शक्रः । क्षिप्रम् । क्षुद्रः । सृप्रश्चन्द्रः । तृप्रः पुरोडाशः । दृप्रो बलवान् । वन्द्रः पूजकः । उन्दी, उन्द्रो जलचरः । श्वित्रं कुष्ठम् । 'वृत्रो रिपौ ध्वनौ ध्वान्ते शैले चक्रे च दानवे' । अजेर्वी, वीरः । नीरम् । पद्रो ग्रामः । मद्रो हर्षो देशभेदश्च । 'मुद्रा प्रत्ययकारिणी' । 'खिद्रो रोगो दरिद्रश्च' । छिद्रम् । भिद्रं वज्रम् । मन्द्रः । चन्द्रः । पचाद्यचि 'चन्दः' अपि । 'हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्दो हिमद्युतिः' । दह्रोऽग्निः । दस्रः स्वर्वैद्यः । 'दभ्रः समुद्रः स्वल्पं च' । वसेः संप्रसारणे—

३१६८ । **न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्** ।८।३।११०। रेफपरस्य सकारस्य सृप्यादीनां सवनादीनां च मूर्धन्यो न स्यात् । 'पूर्वपदात्–' ३६४१ इति प्राप्तः प्रतिषिध्यत इति वृत्तिर्भूयोऽभिप्राया । तेन 'शासिवसि–' २४१० इति प्राप्तमपि न । उस्रो रश्मिः । उस्रा गौः । वास्रो दिवसः । वास्रं मन्दिरम् । शीरोऽजगरः । हस्रो मूर्खः । सिध्रः साधुः । शुभ्रम् । बाहुलकात्—**मुसे रक्**, मुस्रम् । उदश्रु ॥ १७१ । **चक्रिरम्योरुचोपधायाः** । चुक्रमम्लद्रव्यम् । रुम्रोऽरुणः ॥ १७२ । **वौ कसेः** । विकुस्रश्चन्द्रः ॥ १७३ । **अमितम्योर्दीर्घश्च** । आम्रम् । ताम्रम् ॥ १७४ । **निन्देर्नलोपश्च** । निद्रा ॥ १७५ । **अर्देर्दीर्घश्च** । आर्द्रम् ॥

'घुमास्था–' इतीत्वम् । गाङ् गतौ । अवपूर्वस्य धातोः ह्रस्वत्वम् । 'निशीथस्तु पुमानर्धरात्रे स्याद्रात्रिमात्रके' इति मेदिनी । 'प्रति त्यं चारुमध्वरम्' इति मन्त्रे 'गोपीथः सोमपानम्' इति वेदभाष्यम् । तीर्थमिति तु वृत्तिकारः ॥ **१६७ गश्चोदि** । उदि उपपदे गै शब्दे इत्यस्मात् थक् ॥ **१६८ समीणः** । इण् गतावस्मात्समि उपपदे थक् । समिथशब्दः संग्रामपर्यायेषु वैदिकनिघण्टौ पठितः । 'श्रिये जातः' इति मन्त्रे समिथाः=युद्धानीति वेदभाष्यम् । तच्च युक्तमेव, सम्यग्गेति जयार्थमत्रेति व्युत्पत्तेः । संपूर्वकेणः क्विबाद्यन्तस्य लोकेऽपि युद्धार्थत्वदर्शनाच्च । उक्तं ह्यमरेण—'समित्याजिसमिद्युधः' इति ॥ **१६९ तिथपृष्ठ–**। तिज निशाने, पृषु सेचने, गु पुरीषोत्सर्गे, यु मिश्रणे, प्रुङ् गतौ–एते थक्प्रत्ययान्ता निपात्यन्ते । 'पृष्ठं तु चरमं तनोः' इत्यमरः । 'पृष्ठं चरममात्रेऽपि देहस्यावयवान्तरे' इति मेदिनी । स्तोत्रविशेषोऽपि पृष्ठम् , 'पृष्ठैः स्तुवते' इत्यादौ तथा निर्णयात् ॥ **—गूथमिति** । निपातनाद्दीर्घः । एवं यूथेऽपि । 'यूथं तिर्यक्समूहेऽस्त्री पुष्पभेदेऽपि योषिति' इति मेदिनी । 'यूथी पुष्पप्रभेदे स्यान्मागध्यां च कुरण्टके । यूथं तिर्यक्समूहेऽपि वृन्दमात्रेऽपि भाषितम्' इति विश्वः । 'यूथं तदग्रसरगर्वितकृष्णसारम्' इति रघुः ॥**—प्रोथमिति** । निपातनाद्गुणः । 'प्रोथोऽस्त्री हयघोणायां ना कट्यामध्वगे त्रिषु' इति मेदिनी ॥ **१७० स्फायितञ्चि—**। स्फायी वृद्धौ, तञ्चु संकोचने, वञ्चु प्रलम्भने, शक्लृ शक्तौ, क्षिप प्रेरणे, क्षुदिर् संपेषणे, सृप्लृ गतौ, तृप प्रीणने, दृप हर्षमोचनयोः, वदि अभिवादनस्तुत्योः, उन्दी क्लेदने, श्विता वर्णे, वृतु वर्तने, अज गतिक्षेपणयोः, णीञ् प्रापणे, पद गतौ, मदी हर्षे, मुद हर्षे, खिद दैन्ये, छिदिर् द्वैधीकरणे, भिदिर् विदारणे, मदि स्तुतौ, चदि आह्लादने, दह भस्मीकरणे, दसु उपक्षेपे, दम्भु दम्भने, वस निवासे, वाशृ शब्दे, शीङ् स्वप्ने, हसे हसने, षिध गत्याम्, शुभ दीप्तौ ॥**—द्वात्रिंशत इति** । दशपाद्यां तु त्रयस्त्रिंशदुक्ताः । दम्भिवहिवसीति पठित्वा 'वह प्रापणे' ऊह्रोऽनड्वानित्युदाहरणात् । माधवोऽप्येवम् ॥ **—स्फारमिति** । 'नेड्वशि कृति' इति नेट् । वलि यलोपः । 'स्फारः स्यात्पुंसि विकटे करकादेश्च बुद्बुदे' इति मेदिनी ॥ **—तक्रमिति** । 'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम्' इत्यमरः । 'वक्रः स्याजटिले क्रूरे पुटभेदे शनैश्चरे' इति विश्वः । 'शक्रः पुमान् देवराजे कुटजार्जुनभूरुहोः' इति मेदिनी । 'क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवत्' इति मेदिनी ॥**—तृप्रः पुरोडाश इति** । ' न तृप्रा उरुव्यचसम्' इति मन्त्रे वेदभाष्यकारैरित्थं व्याख्यातं, प्रकृतसूत्रे उज्ज्वलदत्तादिभिश्च । दशपादीवृत्तौ तु तृप्रमाज्यं काष्ठं चेत्युक्तम् । तृप्रं दुःखमिति सुब्धातुवृत्तौ माधवः । **हिमांशुरि**त्यादि–**हिमद्युतिरि**त्यन्तं शब्दार्णवः । दस्यति—रोगान् क्षिपतीति दस्रः । 'दस्रः खरेऽश्विनीसुते' इति मेदिनी । 'दस्रः खरे चाश्विनयोः' इति विश्वः ॥ **३१६८ शासिवसीति प्राप्तमपि नेति** । एवं च 'अविन्द उस्रियाः' इति मन्त्रे षत्वाभावः सिद्धः । माधवस्तु वृत्तिग्रन्थानुरोधेन बाहुलकादिह षत्वं नेति व्याचष्ट । 'उस्रो वृषे च किरणे उस्रार्जुन्युपचित्रयोः' इति मेदिनी । 'माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी' इत्यमरः । 'वास्रो ना दिवसे क्लीबं मन्दिरे च चतुष्पथे' इति मेदिनी । 'वास्रो रासभपक्षिणोः' इत्येके । माधवेन तु 'वाश्रेव विद्युन्मिमाति' इति मन्त्रे शब्दयुक्ता प्रस्नुतस्तना धेनुर्वाश्रेति व्याख्यातम् । 'शुभ्रं स्यादभ्रके क्लीबमुद्दीप्रशुक्लयोस्त्रिषु' इति मेदिनी ॥**—मुस्रमिति** । मुस खण्डने ॥ **१७१ चक्रि—**। चक तृप्तौ, रमु क्रीडायाम्, 'चुक्रस्त्वम्लेऽम्लवेतसे । चुक्री चाङ्गेरिकायां स्याद्वृक्षाम्ले चुक्रमिष्यते' इति विश्वः ॥ **१७२ वौ कसेः** । कस गतौ । विपूर्वादस्माद्रक् स्यादुत्वं चोपधायाः ॥ **१७३ अमि—**। अम गत्यादिषु, तमु काङ्क्षायाम् । आभ्यां रक् स्यादुपधाया दीर्घश्च ॥ **१७४ निन्देः—**। णिदि कुत्सायाम् ॥

१ केचित् 'मुसे रक्' इतिं सूत्रमेवेत्याहुः ।

६७ सि० कौ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७६। शुचेर्दश्च। शूद्रः ॥ **१७७। दुरीणो लोपश्च।** दुःखेनेयते प्राप्यत इति दूरम्॥ **१७८। कृतेश्छः क्रू च।** कृच्छ्रम्। क्रूरः ॥ **१७९। रोदेर्णिलुक् च।** रोदयतीति रुद्रः ॥ **१८०। बहुलमन्यत्रापि संज्ञाछन्दसोः।** णिलुगित्येव।

'वान्ति पर्णशुषो वातास्ततः पर्णमुचोऽपरे।
ततः पर्णरुहो वान्ति ततो देवः प्रवर्षति ॥'

१८१। जोरी च। जीरोऽणुः। 'ज्यश्च' इत्येके ॥ **१८२। सुसूधागृधिभ्यः क्रन्।** सुरः। सूरः। धीरः। गृध्रः ॥ **१८३। शुसिचिमीनां दीर्घश्च।** शुः सौत्रः, शूरः। सीरम्। चीरम्। मीरः समुद्रः ॥ **१८४। वाविन्धेः।** वीध्रं विमलम् ॥ **१८५। वृधिवपिभ्यां रन्।** वर्ध्रं चर्म। वप्रः प्राकारः ॥ **१८६। ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरमेलशुक्रशुक्ल-**

१७५ अर्देः। अर्द गतौ। 'आर्द्रा नक्षत्रभेदे स्यात्त्रियां क्लिन्नेऽभिधेयवत्' इति मेदिनी ॥ **१७६ शुचेः—।** शुच शोके, अस्माद्रक् दश्चान्तादेशः, धातोर्दीर्घश्च। शूद्रो वृषलः। 'अहहा रे त्वा शूद्र' इति श्रुतौ तु रूढेर्बाधाद् योग एव पुरस्कृतः। तथा चोत्तरतन्त्रे भगवता व्यासेन सूत्रितं—'शुगस्य तदनादरश्रवणात्' इति ॥ **१७७ दुरीणो—।** इण् गतावित्यस्माद्दुर्युपपदे रक् स्याद्धातोर्लोपश्च। 'रो रि' इति रेफस्य लोपे 'ढ्रलोपे—' इति दीर्घः ॥ **१७८ कृतेः—।** कृती च्छेदने इत्यस्माद्रक् स्यात्-छ-क्रू इत्येतावादेशौ च स्तः। छस्त्वन्त्यस्यादेशः। क्रू त्वनेकाल्त्वात्सर्वस्यादेशः। 'कृच्छ्रमाख्यातमाभीले पापसांतपनादिनोः' इति विश्वमेदिन्यौ। 'स्यात्कष्टं कृच्छ्रमाभीलम्' इत्यमरः। 'क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवत्' इति विश्वः। 'नृशंसो घातुकः क्रूरः पापो धूर्तस्तु वञ्चकः' इत्यमरः ॥ **१७९ रोदेः—।** रुदिर् अश्रुविमोचने। ण्यन्तादस्माद्रक् णेश्च लुक्। 'णेरनिटि' इति लोपे तु 'पुगन्त—' इति गुणः स्यादिति णिलुक् चेत्युक्तम् ॥**—रोदयतीति रुद्र इति।** नन्वेवं 'सोऽरोदीयदरोदीत्तद्रुद्रस्य रुद्रत्वम्' इति श्रुत्या सह विरोधोऽत्र स्यादिति चेत्। अत्राहुः—'कर्तरि कृत्' इति सूत्रानुरोधेन शम्भुरित्यत्र शं भावयतीत्यन्तर्भावितण्यर्थता यथा स्वीक्रियते तथा अरोदीदित्यत्राप्यन्तर्भावितण्यर्थतायां स्वीकृतायां रोदनं कारितवानित्यर्थलाभान्नास्ति श्रुतिविरोधः। **न च** देवैरग्नौ वामं वसु स्थापितं, तच्च धनं देवैर्याचितं चेदग्निस्तु रोदनं कृतवानिति सोऽरोदीदित्यादिश्रुत्यर्थादिहान्तर्भावितण्यर्थकल्पनं न संभवतीति श्रुतिविरोधस्त्वपरिहार्य एवेति **वाच्यम्।** देवैः स्थापितं वामं वसु देवेभ्योऽग्निना न दत्तं ते देवा एव रोदनं कृतवन्तः। अग्निस्तु तदीयमदत्वा रोदनं कारितवानित्यर्थकल्पनायाः संभवात्। अथवाऽग्नौ प्रयुज्यमानरुद्रशब्दस्य 'रोदितीति रुद्रः' इत्येवार्थोऽस्तु। परन्तु ब्रह्मविष्णुरुद्रा इति व्यवह्रियमाणो यो रुद्रस्तद्वाचकरुद्रशब्दस्य 'रोदेः—' इत्युणादिसूत्रानुरोधेन 'रोदयतीति रुद्रः' इत्येवार्थकल्पनायां बाधकाभावात् श्रुतिविरोधोऽत्र नास्त्येवेति ॥ **१८० अन्यत्रापीति।** धात्वन्तरात्प्रत्ययान्तरेऽपि णेर्लुगित्यर्थः। संज्ञायामुदाहरणम्—बृंहयति=वर्धयति प्रजा इति ब्रह्मा। शं सुखं भावयतीति शम्भुरित्यादि। छन्दसि तु—वृधु वृद्धौ। 'वर्धन्तु त्वा सुष्टुतयः' वर्धयन्त्वित्यर्थः। 'य इमा जजान', जनी प्रादुर्भावे, लिटि रूपम्। जनयामासेत्यर्थः। इह णलि परतः 'अत उपधायाः' इति वृद्धिर्भवत्येव, 'जनिवध्योश्च' इति निषेधस्य चिणि ञिति णिति किति च स्वीकारात्। **न च** णिलोपे सति प्रत्ययान्तत्वात् 'कास्प्रत्ययात्' इत्याम्स्यादिति **वाच्यम्।** 'अमन्त्रे' इति पर्युदासादामोऽप्रसक्तेः। 'कास्यनेकाचः' इति वार्तिकेन तु आमृशङ्का दूरापास्तैव, लिटि णिलोपे सत्यनेकाच्त्वाभावात् ॥ ननु णलि 'णेरनिटि' इत्यनिडादावार्धधातुके णिलोपे जजानेति रूपं सिद्धमिति किमनेन लुक्युदाहरणेन? इति चेन्मैवम्। णिलोपे सति 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' इति णौ मित्त्वे 'मितां ह्रस्वः' स्यात्, प्रत्ययलक्षणन्यायेन णिपरत्वसंभवात्। ततश्च 'जजेन' इति स्यात्। लुकि सति तु प्रत्ययलक्षणन्यायो न प्रवर्तत इति मित्त्वाभावादिष्टं सिध्यति ॥ बाहुलकादसंज्ञाछन्दसोरपि क्वचिद्भवतीत्याशयेनोदाहरति**—वान्तीत्यादि।** पर्णानि शोषयन्तीति पर्णशुषः। पर्णानि मोचयन्तीति पर्णमुचः ॥ **१८१ जोरी च।** जु गतौ, सौत्रः। अस्माद्रक् ईकारश्चान्तादेशः। 'जीरः खड्गे वणिग्द्रव्ये' इति विश्वः। 'जीरस्तु जरणे खड्गे' इति मेदिनी ॥**—ज्यश्चेति।** ज्या वयोहानौ। अस्माद्रक्, 'ग्रहिज्या—' इति संप्रसारणं पूर्वरूपम् 'हलः' इति दीर्घः ॥**—एके इति।** मुख्या इत्यर्थः। तथा च 'न धातुलोप—' इति सूत्रे 'जीवेरदानुः' इत्यस्य प्रत्याख्यानार्थं 'नैतज्जीवे रूपं' किं तु 'रकि ज्यः संप्रसारणम्' इति भाष्ये उक्तम्॥ **८८२ सुसूधा—।** षुञ् अभिषवे, षूञ् प्राणिगर्भविमोचने, डुधाञ् धारणादौ, गृधु अभिकाङ्क्षायाम्। 'सुरा चषकमद्ययोः। पुंलिङ्गस्त्रिदिवेशे स्यात्' इति मेदिनी। 'सुरो देवे सुरा मद्ये चषकेऽपि सुरा क्वचित्' इति विश्वः। सुवति प्रेरयति कर्मणि लोकमिति सूरः=सूर्यः। 'सूरसूर्यार्यमादित्य' इत्यमरः। 'धीरो धैर्यान्विते स्वैरे बुधे क्लीबं तु कुङ्कुमे। स्त्रियां श्रवणतुल्यायाम्' इति मेदिनी। 'गृध्रः खगान्तरे पुंसि वाच्यलिङ्गोऽथ लुब्धके' इति च ॥ **१८३ शुसिचि—।** शु गतौ, षिञ् बन्धने, चिञ् चयने, डुमिञ् प्रक्षेपणे, एभ्यः क्रन् एषां दीर्घत्वं च। 'शूरः स्याद्यादवे भटे' इति मेदिनी। 'शूरश्चारुभटे सूर्ये' इति विश्वहेमचन्द्रौ। 'सीरोऽर्कहलयोः पुंसि चीरी झिल्लया नपुंसकम्। गोस्तने वस्त्रभेदे च रेखालेखनभेदयोः' इति मेदिनी। 'चीरं तु गोस्तने वस्त्रे चूडायां सीसकेऽपि च। चीरी कृच्छ्राटिकाझिल्लयोः' इति विश्वः ॥ **१८४ वाविन्धेः।** ञिइन्धी दीप्तौ। विपूर्वादस्मात् क्रन्, 'अनिदिताम्—' इति नलोपः। 'वीध्रं तु विमलार्थकम्' इति विशेष्यनिघ्नेऽमरः ॥ **१८५ वृधि—।** वृधु वृद्धौ, डुवप् बीजसन्ताने। 'वप्रः पितरि केदारे वप्रः प्राकाररोधसोः' इति धरणिरन्तिदेवौ। 'वप्रस्ताते पुमानस्त्री वेणुक्षेत्रचये तटे' इति मेदिनी ॥ **१८६ ऋज्रेन्द्राग्र—।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गौरवन्नेरामालाः । रजन्ता एकोनविंशतिः । निपातनाद्गुणाभावः, ऋज्रो नायकः । इदि, इन्द्रः । अङ्गेर्न लोपः, अग्रम् । 'वज्रोऽस्त्री हीरके पवौ' । डुवप्, उपधाया इत्त्वम्, विप्रः । कुम्बिचुम्ब्योर्नलोपः–कुब्रमरण्यम्, चुब्रं मुखम् । 'क्षुर विलेखने' रेफलोपः, अगुणः, क्षुरः । 'खुर छेदने' रलोपो गुणाभावश्च, खुरः । भन्देर्नलोपः, भद्रम् । 'उच समवाये' चस्य गः, उग्रः । ञिभी, भेरी । पक्षे लः, भेलो जलतरणद्रव्यम् । शुचेश्चस्य कः, शुक्रः । पक्षे लः, शुक्लः । गुङ्, वृद्धिः, 'गौरोऽरुणे सिते पीते' । 'वन संभक्तौ' वन्रो विभागी । इणो गुणाभावः, 'इरा मद्ये च वारिणि' । 'मा माने' माला ॥ १८७ । **समिकस उकन्** । 'कस गतौ' सम्यक्कसन्ति पलायन्ते जना अस्मादिति सङ्कसुको दुर्जनः, अस्थिरश्च ॥ १८८ । **पचिनशोर्णुकन् कनुमौ च** । पचेः कः, पाकुकः सूपकारः । नशेर्नम्, नंशुकः ॥ १८९ । **भियः क्रुकन्** । भीरुकः ॥ १९० । **क्रुन् शिल्पिसंज्ञयोरपूर्वस्यापि** । रजकः । इक्षुकुट्टकः । चरकः । 'चष भक्षणे' चषकः । शुनकः । भषकः ॥ १९१ । **रमे रश्च लो वा** । रमको विलासी, लमकः ॥ १९२ । **जहातेर्द्वे च** ॥ जहकस्त्यागी कालश्च ॥ १९३ । **ध्मो धम च** । धमकः कर्मकारः ॥ १९४ । **हनो वध च** । वधकः ॥ १९५ । **बहुलमन्यत्रापि** । 'कुह विस्मापने' । कुहकः । कृतकम् ॥ १९६ । **कृषेर्वृद्धिश्चोदीचाम्** । कार्षकः, कृषकः ॥ १९७ । **उदकं च** । प्रपञ्चार्थम् ॥ १९८ । **वृश्चिकृषोः किकन्** । वृश्चिकः । कृषिकः ॥ १९९ । **प्राङि पणिकषः** । प्रापणिकः पण्यविक्रयी । प्राकषिकः परदारोपजीवी ॥ २०० । **मुषेर्दीर्घश्च** । मूषिक आखुः ॥ २०१ । **स्यमेः संप्रसारणं च** । चाद्दीर्घः । सीमिको वृक्षभेदः ॥ २०२ । **क्रिय इकन्** ।

ऋज गतिस्थानादिषु, इदि परमैश्वर्ये, अगि गतौ, वज गतौ, डुवप् बीजसन्ताने, कुबि आच्छादने, चुबि वक्त्रसंयोगे, भदि कल्याणे, शुच शोके, गुङ् अव्यक्ते शब्दे, इण् गतौ ॥—**नायक इति** । '**ऋज्राश्वः** पृष्टिभिरम्बरीषः' इति मन्त्रे 'ऋज्रा गतिमन्तोऽश्वा यस्य स ऋज्राश्वः' इति वेदभाष्यम् । '**इन्द्रः** शचीपतावन्तरात्मन्यादित्ययोगयोः' इति विश्वः । '**अग्रं** पुरस्तादुपरि परिमाणे पलस्य च । आलम्बने समूहे च प्रान्ते स्यात्पुंनपुंसकम् । अधिके च प्रधाने च प्रथमे चाभिधेयवत्' इति मेदिनी । **क्षुरो** लोमच्छेदकः । 'क्षुरः स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे' इति विश्वमेदिन्यौ । '**खुरः** कोलदले शफे' इति मेदिनी । '**भद्रः** शिवे खञ्जरीटे वृषभे तु कदम्बके । करिजातिविशेषे ना क्लीबं मङ्गलमुस्तयोः' इति च । '**उग्रः** शूद्रासुते क्षत्राद्रुद्रे पुंसि त्रिषूत्कटे । स्त्रीवचाक्ष्वेडयोः' इति मेदिनी ॥—**भेरीति** । गौरादित्वान्ङीष् । 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः । '**भेलः** प्लवे भीलुके च निर्बुद्धिमुनिभेदयोः' इति विश्वः । 'भेलः प्लवे मणौ पुंसि भीरावज्ञे च वाच्यवत्' इति । '**शुक्रः** स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् । रेतोऽक्षिरुग्भिदोः क्लीबं **शुक्लो** योगान्तरे सिते । नपुंसकं तु रजते' इति च । '**गौरः** पीतेऽरुणे श्वेते विशुद्धेऽप्यभिधेयवत् । ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेसरे । गौरी त्वसंजातरजःकन्याशंकरभार्ययोः । रोचने रजनीपिङ्गाप्रियङ्गुवसुधासु च । आपगाया विशेषेऽपि यादसांपतियोषिति' इति च मेदिनी । 'नदीभेदे च गौरी स्याद्वरुणस्य च योषिति' इति विश्वः । 'अष्टवर्षा तु या दत्ता श्रुतशीलसमन्विते । सा गौरी तत्सुतो यस्तु स गौरः परिकीर्तितः' इति ब्रह्माण्डवचनं श्राद्धकाण्डे हेमाद्रिणोदाहृतं । एतेन 'गौरः शुच्याचारः' इत्यादि भाष्यं व्याख्यातम् । 'इराभूवाक्सुराप्सु च' इति मेदिनी ॥—**मालेति** । प्रत्ययरेफस्य लत्वम् । 'मालं क्षेत्रे स्त्रियां पृक्कास्रजोर्जात्यन्तरे पुमान्' इति मेदिनी । 'मालं क्षेत्रे जने मालो माला पुष्पादिदामनि' इति विश्वः । 'मालमुन्नतभूतलम्' इत्युत्पलः । 'क्षेत्रमारुह्य मालम्' इति मेघदूतः । मणिपूर्वोऽयमर्थान्तरेऽपि रूढः–'मणिमाला स्मृता हारे स्त्रीणां दन्तक्षतान्तरे' इति विश्वः । **बाहुलकात्**–तिज निशाने । रन् दीर्घत्वं जस्य वः । 'तीव्रा तु कटुरोहिण्यां राजिकागण्डदूर्वयोः । त्रिष्वत्युष्णे नितान्ते च कटौ' इति मेदिनी ॥ **१८७ समि कस–** । 'संकसुकोऽस्थिरे' इति विशेष्यनिघ्नेऽमरः ॥ **१८८ पचिनशोः–** । डुपचष् पाके, णश अदर्शने । आभ्यां णुकन् प्रत्ययः स्यात् । णकारो वृद्ध्यर्थः । अनयोर्यथाक्रमं कादेशनुमागमौ च भवतः ॥ **१८९ भियः–** । ञिभी भये । 'अधीरे कातरस्त्रस्नौ भीरुभीरुकभीलुकाः' इत्यमरः ॥ **१९० क्रुन्–** । शिल्पिन्यभिधेये संज्ञायां गम्यमानायां च क्रुन् स्यादपूर्वस्य निरुपपदस्य च । अपिशब्दात्सोपपदस्य । पञ्चम्यर्थे षष्ठी । यद्वा अर्थद्वारकसंबन्धे षष्ठी, प्रकृतिप्रत्ययार्थयोः क्रियाकारकभावात् । एवं च निरुपपदप्रकृत्यर्थनिरूपितकर्तृकारके क्रुन्नित्याद्यर्थः फलितः । शिल्पिनि तावत्—रञ्ज रागे । 'रजको धावके शुके इति विश्वः । 'रजकौ धावकशुकौ' इति हेमचन्द्रः । 'कुट्ट च्छेदने' इक्षून् कुट्टयति गौडिकः । चर गतिभक्षणयोः । संज्ञायां तु 'चषकोऽस्त्री पानपात्रम्' । शुन गतौ, भष भर्त्सने—शुनकः, भषकः श्वा ॥ **१९१ लमक इति** । ऋषिविशेषः ॥ **१९२ जहातेः–** । ओहाक् त्यागे ॥ **१९३ ध्मो धम च** । ध्मा शब्दाग्निसंयोगयोः । कुहको दाम्भिकः ॥ **१९५ कृतकमिति** । कृती छेदने ॥ **१९६ कृषेः–** । कृष विलेखने । अस्मात्क्रुन् वृद्धिश्च । कार्षकः=कृषीवलः । कृषकः स एव । 'कृषकः पुंसि फाले स्यात्कर्षके त्वभिधेयवत्' इति मेदिनी ॥ **१९७ उदकं च** । उन्दी क्लेदने । अस्मात्क्रुन् ॥ ननु 'क्रुन् शिल्पि–' इत्यादिना गतार्थमित्याशङ्कायामाह—**प्रपञ्चार्थमिति** ॥ **१९८ वृश्चिकृषोः** । ओव्रश्चू छेदने, कृष विलेखने ॥ **१९९ प्राङि–** । पण व्यवहारे । कषादिषेति दण्डके—हिंसार्थकः ॥ **२०० मुषेः–** । मुष स्तेये अस्मात्किकन् धातोर्दीर्घश्च ॥ **२०१ स्यमेः–** । स्यमु शब्दे ॥ **२०२ —क्रियः** ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रयिकः क्रेता ॥ २०३ । आङि पणिपनिपतिखनिभ्यः । आपणिकः । आपनिकः-इन्द्रनीलः किरातश्च । आपतिकः श्येनो दैवायत्तश्च । आखनिको मूषिको वराहश्च ॥ २०४ । श्यास्त्याहृञविभ्य इनच् । श्येनः । स्त्येनः । हरिणः । अविनोऽध्वर्युः ॥ २०५ । वृजेः किच्च । वृजिनम् ॥ २०६ अजेरज च । वीभावबाधनार्थम् । अजिनम् ॥ २०७ । बहुलमन्यत्रापि । कठिनम् । नलिनम् । मलिनम् । कुण्डिनम् । द्यतेः—'यत्परुषि दिनम्' । दिवसोऽपि दिनम् ॥ २०८ । द्रुदक्षिभ्यामिनन् । द्रविणम् । दक्षिणः । दक्षिणा ॥ २०९ । अर्तेः किदिच्च । इरिणं शून्यम् ॥ २१० । वेपितुह्योर्ह्रस्वश्च । विपिनम् । तुहिनम् ॥ २११ । तलिपुलिभ्यां च । 'तलिनं विरले स्तोके स्वच्छेऽपि तलिनं त्रिषु' । पुलिनम् ॥

२१२ । गर्वेरत उच्च । गौरादित्वात् ङीष् । गुर्विणी गर्भिणी ॥ २१३ । रुहेश्च । रोहिणः ॥ २१४ । महेरिनण् च । चादिनन् । माहिनम्-महिनं राज्यम् ॥ २१५ । क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं च । वाक् । प्राट् । श्रीः । स्रवत्यतो घृतादिकमिति स्रूः-यज्ञोपकरणम् । द्रूर्हिरण्यम् । कटप्रूः कामरूपी कीटश्च । 'जूराकाशे सरस्वत्यां पिशाच्यां जवने स्त्रियाम्' ॥ २१६ । आप्नोतेर्ह्रस्वश्च । आपः । अपः । अद्भिः । अद्भ्यः ॥ २१७ । परौ व्रजेः षश्च पदान्ते । व्रजेः क्विप्दीर्घौ स्तः, पदान्ते तु षश्च । परिव्राट् । परिव्राजौ ॥ २१८ । ह्रुवः श्लुवच्च । जुहूः ॥ २१९ । स्रुवः कः । स्रुवः ॥ २२० । चिक् च । इकार उच्चारणार्थः । क इत् । कुत्वम्, स्रुक् । 'स्रुवं च स्रुचश्च संमृड्ढि' ॥ २२१ । तनोतेरनश्च वः ।

डुक्रीञ् द्रव्यविनिमये ॥ २०३ आङि पणि-। पण व्यवहारे स्तुतौ च, पन च, पत्लृ गतौ, खनु अवदारणे, एभ्य आङि उपपदे इकन् स्यात् ॥—आपणिक इति । नन्वत्रैव प्रपूर्वे आङि प्रापणिक इति सिद्धौ 'प्राङि पणि' इत्यत्र पणिग्रहणं प्रपन्नार्थमित्युज्ज्वलदत्तः । उपसर्गान्तरनिवृत्त्यर्थमिति तु मनोरमायाम् । आपणिकशब्दोऽयं नित्स्वरेणाद्युदात्तः । आपणेन व्यवहरतीत्यर्थे ठकि तु 'कितः' इत्यन्तोदात्तः ॥ २०४ श्यास्त्या-। श्यैङ् गतौ, स्त्यै ष्ट्यै शब्दसंघातयोः, हृञ् हरणे, अव रक्षणादौ । 'श्येनः पत्रिणि पाण्डुरे' इति मेदिनी । स्त्येनश्चौरः । 'स्तेन चौर्ये' इति चौरादिकात्पचाद्यचि तु 'स्तेनः' इति निर्यकारोऽपि । केचित्तु 'स्तायूनां पतये नमः' इत्यादिप्रयोगोपष्टम्भेन निर्यकारस्यापि ष्टैधातोर्माधवादिभिर्भ्वादिषु स्वीकृतत्वात्प्रकृतसूत्रेऽपि ष्टैधातुमेव पठन्तः स्तेनशब्दो निर्यकार एवेत्याहुः । 'हरिणः पुंसि सारङ्गे विशदे त्वभिधेयवत् । हरिणी हरितायां च नारीभिद्वृत्तभेदयोः । सुवर्णप्रतिमायां च' इति मेदिनी ॥ २०५ वृजेः-। वृजी वर्जने । वृजिनं पापम् । 'वृजिनं कल्मषे क्लीवं केशे ना कुटिलेऽन्यवत्' इति मेदिनी ॥ २०६ अजेः-। अज गतिक्षेपणयोः । अस्मादिनच् । अजेरजादेशविधानं व्यर्थमित्यत आह —वीभावबाधनार्थमिति । 'अजिनं चर्म कृत्तिः स्त्री' इत्यमरः ॥ २०७ बहुलमन्यत्रापि । अन्यस्मादपीत्यर्थः । कठ कृच्छ्रजीवने, णल गहने, मल मल्ल धारणे, कुडि दाहे, दो अवखण्डने । 'कठिनमपि निष्ठुरे स्यात् स्तब्धे तु त्रिषु नपुंसकं स्थाल्याम् । कठिनी खटिकायामपि कठिना गुडशर्करायां च' इति मेदिनी । 'मलिनं दूषिते कृष्णे ऋतुमत्यां तु योषिति' इति मेदिनी ॥—कुण्डिनमिति । 'नगरं कुण्डिनमण्डजो ययौ' इति श्रीहर्षः । कुण्डिन ऋषिः । तस्यापत्यं कौण्डिन्यः ॥—यत्परुषीति । 'यत् परुषि=पर्वणि दिनं खण्डितं तद्देवानाम्' इति तैत्तिरीयश्रुत्यर्थः ॥ २०८ द्रुदक्षि-। द्रु गतौ, दक्ष वृद्धौ । 'द्रविणं न द्रयोर्वित्ते काञ्चने च पराक्रमे' इति मेदिनी । 'दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्तिषु । अवामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रियाम्' इति च । 'दक्षिणः सरलोदारपरच्छन्दानुवर्तिषु । वाच्यवद्दक्षिणा वाचि यज्ञदानप्रतिष्ठयोः' इति विश्वः ॥ २०९ अर्तेः-। ऋ गतौ, अस्मादिनन् कित्स्याद् इकारश्च धातोः । रपरत्वम् । 'इरिणं शून्यमूषरम्' इत्यमरः । 'इरिणं तूषरे शून्येऽपि' इति मेदिनी ॥ २१० वेपि-। टुवेपृ कम्पने, तुहिर् अर्दने, आभ्यामिनन् ह्रस्वश्च धातोः । 'अटव्यरण्यं विपिनम्' इत्यमरः ॥—तुहिनमिति । लघूपधगुणे कृते ह्रस्वः ॥ २११ तलि-। तल प्रतिष्ठायाम्, पुल महत्त्वे । 'तलिनं तरले स्तोके स्वच्छेऽपि वाच्यलिङ्गकम्' इति मेदिनी ॥ २१२ गर्वे-। गर्व मोचने, अस्मादिनन् अकारस्य उत् ॥ २१३ रुहेश्च । रुह बीजजन्मनि प्रादुर्भावे ॥—रोहिण इति । प्रज्ञादित्वादणि—रौहिणश्चन्दनतरुः ॥ २१४ महेः-। मह पूजायाम् । 'कुतस्त्वमिन्द्रमाहिनः सन्' इति मन्त्रे 'माहिनो महनीयः पूजनीयः' इति वेदभाष्यम् ॥ २१५ क्विब्वचि-। वच परिभाषणे, प्रच्छ ज्ञीप्सायाम्, श्रिञ् सेवायाम्, स्रु गतौ, द्रु गतौ, प्रुङ् गतौ, जु गतौ-सौत्रः ॥—वागिति । 'वचिस्वपि-' इति संप्रसारणाभावः, पृच्छतीति प्राट् । 'ग्रहिज्या-' इति संप्रसारणाभावः, 'च्छ्वोः शूड्-' इति शः, 'व्रश्च-' इति षत्वं, जश्त्वचर्त्वे, प्राशौ प्राशः ॥—श्रीरिति । 'कृदिकारात्-' इति ङीष् तु न भवति, कृत्प्रत्ययो य इकार इति व्याख्यानात् । कृदन्तं यदिकारान्तमिति पक्षे तु यद्यपि ङीषः प्राप्तिरस्ति तथापि कारग्रहणे तत्सामर्थ्याद्देव केवलस्येकारस्य ग्रहणादिकारान्तपक्षो दुर्बल इत्याहुः । दुर्घटस्तु ङीषि श्रीमित्यपि रक्षित इच्छतीत्याह । 'श्री वेषरचना शोभा भारती सरलद्रुमे । लक्ष्म्यां त्रिवर्गसंपत्तिविधोपकरणेषु च । विभूतौ च मतौ च स्त्री' इति मेदिनी । जूराकाशे इत्यादिमूलोदाहृतमपि मेदिनी ॥ २१६ आप्नोतेः-। आप्लृ व्याप्तौ, अस्मात्क्विप् धातोर्ह्रस्वश्च । 'आपः स्त्री भूम्नि वार्वारि' इत्यमरः ॥ २१७ परौ-। व्रज गतौ ॥ २१८ ह्रुवः-। हु दानादनयोः । अस्मात्क्विप् धातोश्च दीर्घः श्लुवद्भावाद्द्विर्वचनम् ॥ २१९ स्रुवः कः । स्रु गतौ । स्रुवो यज्ञपात्रविशेषः । 'अयं स्रुवो अभिजिघर्ति' 'स्रुवेण पार्वणौ जुहोति' इत्यादौ प्रसिद्धः ॥ २२० चिक् च । स्रुव इत्येव । योगविभाग उत्तरार्थः ॥—क इदिति । तेन स्रुक् स्रुचौ स्रुच इत्यादौ गुणो न ॥ २२१ तनोते-। तनु विस्तारे ॥ व इति संघातग्रहणं तदाह—वशब्दादेश इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तनोतेश्चिक् प्रत्ययः, अनो वशब्दादेशश्च । त्वक् ॥ २२२ । **ग्लानुदिभ्यां डौः** । ग्लौः । नौः ॥ २२३ । **चिवरव्ययम्** । डौरित्येव । ग्लौ करोति । 'कृन्मेजन्तः' ४५० इति सिद्धे नियमार्थमिदम्—उणादिप्रत्ययान्तश्च्यन्त एवेति ॥ २२४ । **रातेर्डैः** । राः । रायौ । रायः ॥ २२५ । **गमेर्डोः** ।

'गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः ।
स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि ।
नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु ।'

बाहुलकाद् द्युतेरपि डोः, 'द्यौः स्त्री स्वर्गान्तरिक्षयोः' ॥ २२६ । **भ्रमेश्च डूः** । भ्रूः । चाद्रमेः, अग्रेगूः ॥ २२७ । **दमेर्डोसिः** । दोः । दोषौ ॥ २२८ । **पणेरिज्यादेश्च वः** । वणिक् । स्वार्थेऽण्, 'नैगमो वाणिजो वणिक्' ॥ २२९ । **वशेः कित्** । 'उशिगग्नौ घृतेऽपि च' ॥ २३० । **भृञ ऊच्च** । भूरिक् भूमिः ॥ २३१ । **जसिसहोरुरिन्** । जसुरिर्वज्रम् । सहुरिरादित्यः पृथिवी च ॥ २३२ । **सुयुरुवृञो युच्** । सवनश्चन्द्रमाः । यवनः । रवणः कोकिलः । वरणः ॥ २३३ । **अशे रश च** । अश्नोतेर्युच् स्यात् रशादेशश्च । रशना काञ्ची । जिह्वावाची तु दन्त्यसकारवान् ॥ २३४ । **उन्देर्नलोपश्च** । ओदनः ॥ २३५ । **गमेर्गश्च** । गमेर्युच् स्याद्गश्चादेशः । गगनम् ॥ २३६ । **बहुलमन्यत्रापि** । युच् स्यात् । स्यन्दनः । रोचना ॥ २३७ । **रञ्जेः क्युन्** । रजनम् ॥ २३८ । **भूसूधूभ्रस्जिभ्यश्छन्दसि** । भुवनम् । सुवन

'स्त्रियां तु त्वगस्रग्धरा' इत्यमरः ॥ २२२ **ग्लानुदि-** । ग्लै हर्षक्षये, णुद प्रेरणे । 'ग्लौर्मृगाङ्कः कलानिधिः' इत्यमरः । 'स्त्रियां नौस्तरणिस्तरिः' इति च ॥ २२३ **ग्लौ करोतीति** । अग्लौः ग्लौः संपद्यते तथा करोतीत्यर्थः । अव्ययत्वात्सुपो लुक् ॥—**च्व्यन्त एवेति** । तेन ग्लौनौंगौरित्यादीनां नाव्ययत्वमिति भावः ॥ २२४ **रातेः-** । रा दाने ॥—**रा इति** । 'रायो हलि' इत्यात्वम् । 'रा स्मृतः पावके तीक्ष्णे राः पुंसि स्वर्णवित्तयोः' इति मेदिनी । 'रास्तीक्ष्णे दहने रास्तु सुवर्णे जलदे धने' इति हेमचन्द्रः ॥ २२५ **गमेः** । गम्लृ गतौ । 'गोतो णित्' गौः ॥ केशवोक्तमाह—**गौर्नादित्य इत्यादि** । 'गौः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रे पुमान् भवेत् । अर्जुनी नेत्रदिग्बाणभूवाग्वारिषु गौर्मता' इत्यमरः ॥—**द्युतेरपीति** । द्युत दीप्तौ, द्योतन्ते देवा अस्यामिति द्यौः ॥ २२६ **भ्रमेश्च-** । भ्रमु अनवस्थाने, गम्लृ गतौ । अग्रेगूः सेवकः ॥ २२७ **दमेः-** । दमु उपशमे । डित्त्वाट्टिलोपे—**दोरिति** । 'दोषं तस्य' इति श्रीहर्षप्रयोगात्पुंस्त्वम् । 'ककुद्दोषणी' इति भाष्यप्रयोगान्नपुंसकत्वम् । 'दोर्दोषा च भुजो बाहुः' इति धनंजयकोशात्स्त्रीलिङ्गोऽप्ययमित्यादि प्रागेव प्रपञ्चितम् ॥ २२८ **पणेः-** । पण व्यवहारे स्तुतौ च । अमरकोशस्थमाह—**नैगम इत्यादि** ॥ २२९ **वशेः** । वश कान्तौ, अस्मादिनिः कित्स्यात् । 'ग्रहिज्या–' इति संप्रसारणम् ॥ २३० **भृञः-** । भृञ् भरणे, अस्मादिनिः कित्स्यात् धातोरूकारान्तादेशश्च ॥ २३१ **जसि—** । जसु मोक्षणे । षह मर्षणे । 'जसुरये स्तर्यं पिप्यथुर्गाम्' इति मन्त्रे जसुरये=श्रान्तायेति, 'नीचायमानं जसुरिं न श्येनम्' इत्यत्र जसुरिं क्षुधितं श्येनं न=श्येनपक्षिणमिवेति । 'उतस्य वाजी सहुरिर्ऋतावा' इति मन्त्रे सहुरिः सहनशील इति च वेदभाष्यम् ॥ २३२ **सुयु-** । षुञ् अभिषवे, यु मिश्रणे, रु शब्दे, वृञ् वरणे । 'सवनं त्वध्वरे स्नाने सोमनिर्दलनेऽपि च' इति मेदिनी । यवनो म्लेच्छविशेषः । 'रवणः शब्दने खरे' इति च मेदिनी । रवणः कोकिल इत्येके । वरणो वृक्षभेदः । टापि तु वरणा नदी । 'वरणस्तिक्तशाकेऽपि प्राकारे वरणं वृतौ' इति विश्वः । 'वरणे वरुणः सेतुस्तिक्तशाकः कुमारकः' इत्यमरः ॥ २३३ **अशेः-** । अशू व्याप्तौ ॥—**जिह्वावाची त्विति** । रस आस्वादने चौरादिकः । ततो नन्द्यादित्वात् ल्युः । 'ण्यासश्रन्थ–' इति युज्वा । रसते स्वादयतीति रसना । 'रसनं स्वदने ध्वनौ । जिह्वायां तु न पुंसि स्याद्रास्नायां रसना स्त्रियाम्' इति मेदिनी । काञ्चीवाची तालव्यशकारवान्, जिह्वावाची तु दन्त्यसकारवानित्येषा व्यवस्था भूरिप्रयोगाभिप्रायेणोक्ता । **वस्तुतस्तु** तालव्यशकारवान् रशनाशब्दोऽपि काञ्च्यां जिह्वायां च, तथा दन्त्यसकारवान् रसनाशब्दोऽप्यर्थद्वये बोध्यः । तथा हि—'तालव्या अपि दन्त्याश्च शम्बशूकरपांशवः । रशनाऽपि च जिह्वायाम्' इति विश्वकोशाज्जिह्वायामुभयं साधु । 'रसनं निःस्वने स्वादे रसना काञ्चिजिह्वयोः' इत्यजयधरणिकोशाभ्यां काञ्च्यामप्युभयं साधु । एवं च 'अशेरश च' इति सूत्रे अशू व्याप्तौ, अश भोजने, इति धातुद्वयमपि ग्राह्यम् । रस आस्वादने, रस शब्दे, इति धातुभ्यां तु 'बहुलमन्यत्रापि' इत्यनुपदमेव वक्ष्यमाणेन युच् । तेन सर्वत्रावयवार्थानुगमोऽपि सूपपाद इत्याहुः ॥ २३४ **उन्देः-** । उन्दी क्लेदने अस्माद्युच् । '**ओदनं** न स्त्रियां भक्ते बलायामोदनी स्त्रियाम्' इति मेदिनी ॥ २३५ **गमेः-** । गम्लृ गतौ । 'नभोऽन्तरिक्षं गगनम्' इत्यमरः ॥ २३६ **बहुलमिति-** । स्यन्दू प्रस्रवणे, रुच दीप्तौ । 'स्यन्दनं तु श्रुतौ नीरे तिनिशे ना रथे स्त्रियाम्' इति मेदिनी । 'रोचना रक्तकह्लारे गोपित्तवरयोषितोः । रोचनः कूटशाल्मल्यां पुंसि स्याद्रोचके त्रिषु' इति च । चदि आह्लादे । 'चन्दनं मलयोद्भवे । चन्दनः कपिभेदे स्यान्नदीभेदे तु चन्दनी' इति विश्वः । 'चन्दनी तु नदीभिदि । चन्दनोऽस्त्री मलयजे भद्रकाल्यां नपुंसकम्' इति मेदिनी । भद्रकाली=ओषधिविशेषः । 'भद्रकाली तु गन्धोल्यां कात्यायन्यामपि स्त्रियाम्' इति मेदिनी । असु क्षेपणे । 'असनं क्षेपणे क्लीबं पुंसि स्याज्जीवकद्रुमे' इति मेदिनी । अत सातत्यगमने । राजपूर्वः । 'राजादनः क्षीरिकायां पियाले किंशुकेऽपि च' इति विश्वमेदिन्यौ । एवमन्येऽपि द्रष्टव्याः ॥ २३७ **रञ्जेः-** । रञ्ज रागे, ल्युटि तु रञ्जनम् । 'रञ्जनो रागजनने रञ्जनं रक्तचन्दने' इति मेदिनी । **बाहुलकात्कृपेरपि** क्युन् । 'कृपो रो लः' इति प्राप्तलत्वाभावश्च । कृपणः ॥ २३८ **भूसू—** । भू सत्तायां,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदित्यः । धवनो वह्निः । निधुवनं सुरतम् । भृज्जनमम्बरीषम् ॥ २३९ । कॄपॄवृजिमन्दिनिधाञः क्युः । किरणः । पुरणः समुद्रः । वृजनमन्तरिक्षम् । मन्दनं स्तोत्रम् । निधनम् ॥ २४० । धृषेर्धिष् च संज्ञायाम् । धिषणो गुरुः । धिषणा धीः ॥ २४१ । वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च । अतिप्रत्ययान्ता निपात्यन्ते । 'पृषु सेचने' गुणाभावः, पृषन्ति । बृहत् । महान् । गमेर्जगादेशः, जगत् ॥ २४२ । संश्चत्तृपद्वेहत् । एते निपात्यन्ते । पृथक्करणं शतृवद्भावनिवृत्त्यर्थम् । संचिनोतेः सुट्, इकारलोपः, संश्चत् कुहकः । तृपत् छत्रम् । विपूर्वाद्धन्तेष्टिलोपः, इत एच, 'वेहद्गर्भोपघातिनी' ॥ २४३ । छन्दस्यसानच् शुजॄभ्याम् । शवसानः पन्थाः । जरसानः पुरुषः ॥ २४४ । ऋञ्जिवृधिमन्दिसहिभ्यः कित् । ऋञ्जसानो मेघः । वृधसानः पुरुषः । मन्दसानोऽग्निर्जीवश्च । सहसानो यज्ञो मयूरश्च ॥ २४५ । अर्तेर्गुणः शुट् च । अर्शसानोऽग्निः । २४६ । सम्यानच् स्तुवः । संस्तवानो वाग्मी ॥ २४७ । युधिबुधिदृशिभ्यः किच्च । युधानः । बुधानः । 'दृशानो लोकपालकः' ॥ २४८ । हुर्छेः सनो लुक् छलोपश्च । जुहराणश्चन्द्रमाः ॥ २४९ । श्वितेर्दश्च ।

षूङ् प्राणिप्रसवे, धूञ् कम्पने, भ्रस्ज पाके । बहुलवचनाद्भाषायामपि क्वचित् । 'भुवनं विष्टपेऽपि स्यात्सलिले गगने जने' इति मेदिनी । 'विष्टपं भुवनं जगत्' इत्यमरः ॥—भृज्जनमिति । 'ग्रहिज्या–' इति संप्रसारणम् । सस्य जश्त्वेन दः, दस्य श्चुत्वेन जः । 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना' इत्यमरः ॥ २३९ कॄपॄ–। कॄ विक्षेपे, पॄ पालनादौ, वृजी वर्जने, मदि स्तुत्यादौ, डुधाञ् धारणपोषणयोः । 'निधनं स्यात्कुले नाशे' इति मेदिनी । 'निधनं कुलनाशयोः' इति हेमचन्द्रः ॥ २४० धृषेः–। ञिधृषा प्रागल्भ्ये, अस्मात्क्युः, धिषादेशश्च धातोः । 'धिषणस्त्रिदशाचार्ये धिषणा धियि योषिति' इति मेदिनी । 'गीष्पतिर्धिषणो गुरुः' इत्यमरः ॥ २४१ वर्तमाने–॥—शतृवच्चेति । तथा च 'उगिदचाम्–' इति नुमि—महान्, स्त्रियां तु 'उगितश्च' इति ङीपि—महतीत्यादि सिध्यतीति भावः ॥ ननु पृषन्महदादयः 'लटः शतृशानचौ–' इति शतृप्रत्ययान्ता एव भवन्तु । ततश्च 'वर्तमाने' इति 'शतृवच्च' इति च न कर्तव्यमिति महदेव लाघवमिति चेत् । अत्राहुः—शतृप्रत्ययान्तत्वे तु 'कर्तरि शप्' इति शप्प्रत्यये महतीत्यादौ 'आच्छीनद्योः' इति नुम् स्यात्, महानित्यादौ तु 'तास्यनुदात्तेन्ङिददुपदेशात्' इति लसार्वधातुकस्वरः स्यात्, अतिप्रत्ययान्तत्वे तु तस्यातिप्रत्ययस्यार्धधातुकत्वाभ्युपगमेन शवभावान्नोक्तदोष इत्याशयेनातिप्रत्ययान्तत्वेन निपातनं स्वीकृतमिति ॥ बृह वृद्धौ, मह पूजायाम्, गम्लृ गतौ ॥—पृषन्तीति । बिन्दुवाची पृषच्छब्दो नपुंसकमिति ध्वननाय बहुवचनमुदाहृतम् । 'पृषन्मृगे पुमान् बिन्दौ न द्वयोः पृषतोऽपि ना । अनयोश्च त्रिषु श्वेतबिन्दुयुक्तेऽप्युभाविमौ' इति मेदिनी । 'बृहती क्षुद्रवार्त्ताक्यां कण्टकार्यां च वाचि च । वारिधान्यां महत्यां च छन्दोवसनभेदयोः' इति विश्वः । शतृवद्भावात् 'उगिदचाम्–' इति नुम्, बृहन् विपुलः । 'महती वल्लकीभेदे राज्ये तु स्यान्नपुंसकम् । तत्त्वभेदे पुमान् श्रेष्ठे वाच्यवत्' इति मेदिनी । महती=नारदवीणा । 'विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती । महती नारदस्य स्यात्सरस्वत्यास्तु कच्छपी' इति वैजयन्ती । 'अवेक्ष्यमाणं महतीं मुहुर्मुहुः' इति माघः । 'जगत्स्याद्विष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु । जगती भुवने क्ष्मायां छन्दोभेदे जनेऽपि च' इति मेदिनी । तत्र वायुवाचिनः पुंलिङ्गस्य शतृवद्भावादुगित्त्वेन नुमि–जगन्, जगन्तौ, जगन्तः–इत्यादि भवति । 'द्युतिगमिजुहोतीनां द्वे च' इति व्युत्पादितस्य तु नुमभावात् 'जगत् जगतौ जगतः' इत्यादीति बोध्यम् ॥ २४२ संश्चत्तृ–। चिञ् चयने, तृप प्रीणने, हन हिंसागत्योः ॥—निपात्यन्त इति । अतिप्रत्ययान्ता इति शेषः ॥—निवृत्त्यर्थमिति । एवं च संश्चदित्यत्र 'उगिदचाम्–' इति नुमः शङ्कैव नास्ति । वेहदित्यत्र तु 'उगितश्च' इति ङीप् नेति भावः ॥—संचिनोतेरिति । सुभूतिचन्द्रस्तु संपूर्वाच्छ्चयतेः–संश्चदित्याह ॥—तृपच्छत्रमिति । चन्द्रमां इत्यन्ये । विहन्ति गर्भमिति वेहत् ॥—इत एचेति । विशब्दसंबन्धिन इकारस्य एकार इत्यर्थः । गौरित्यनुवृत्तौ 'वेहद्गर्भोपघातिनी' इत्यमरः ॥ २४३ छन्दस्य–। शु गतौ, जॄष् वयोहानौ ॥—पन्था इति । 'प्रमन्महे' इत्यादिमन्त्रद्वये शवसानशब्दो गन्तृपरतया व्याख्यातः ॥ २४४ ऋञ्जि–। ऋजि भर्जने, वृधु वृद्धौ, मदि स्तुत्यादौ, षह मर्षणे । एभ्यः–असानच् कित्स्यात् ॥—ऋञ्जसानो मेघ इति । ऋजेरिदित्वान्नुम् । इदित्त्वादेव नलोपाभावः । एवं च–अयं मन्दिसही च त्रयोऽपि पूर्वसूत्र एव पठितुं शक्याः । कित्त्वं तु वृधुधातावेवोपयुज्यते । उत्तरसूत्रेऽपि गुणग्रहणं सुत्यजम् । 'अर्तेः शुट् च वृधेः कित्' इत्युक्तौ सर्वसामञ्जस्यादित्याहुः । 'ऋञ्जसानः पुरुवार उक्थैः' 'अस्मिन् यज्ञे मन्दसाना वृषण्वसू–' इत्यादिमन्त्राणां भाष्ये तु यौगिकार्थ एव पुरस्कृतः ॥ २४५ अर्तेः–। ऋ गतौ । धातोर्गुणः प्रत्ययस्य सुडागमः । 'आसाविषदर्शसानाय–' इति मन्त्रस्य भाष्ये तु अर्शसानाय शत्रूणां हिंसित्रे इति व्याख्यातम् ॥ २४६ सम्या–। ष्टुञ् स्तुतौ अस्मात्सम्युपपदे आनच् ॥ २४७ युधि–। युध संप्रहारे । युधानो रिपुः । बुधिर् बोधने । बुधान आचार्यः । दृशिर् प्रेक्षणे । बाहुलकात्क्रपेरपि—कृपाणः खड्गः । 'कृपाणेन कथंकारं कृपणः सह गण्यते । परेषां दानसमये यः स्वकोशं विमुञ्चति' ॥ २४८ हुर्छेः–। हुर्च्छा कौटिल्ये, अस्मात्सन्नन्तादानच्स्यात्सनो लुक् छलोपश्च । 'युयोध्यस्मज्जुहुराणमेनः' इति मन्त्रे जुहुराणं=कौटिल्यकारि एनः=पापं युयोधि=पृथक् कुरु इति भाष्यम् ॥ २४९ श्वितेः–। श्विता वर्णे अस्मात्सन्नन्तादानच्, 'सन्यङोः' इति द्वित्वम् । सनो लुक् तकारस्य च दकारः । किदित्यनुवृत्तेर्न गुणः ॥—पुण्यकर्मेति । 'शिश्विदानोऽकृष्णकर्मा' इति विशेष्यनिघ्ने अमरः । अकृष्णं=शुक्लं निष्पापत्वात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'शिश्विदानः पुण्यकर्मा' ॥ २५० । **तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ** । शंसेः क्षदादिभ्यश्च क्रमात् तृन्तृचौ स्तः, तौ चानिटौ । शंस्ता स्तोता । शंस्तारौ । शंस्तरः । क्षदिः सौत्रो धातुः शकलीकरणे भक्षणे च । अनुदात्तेत्, 'वृक्ये चक्षदानम्' इति मन्त्रात्, 'उक्षाणं वा वेहतं वा क्षदन्ते' इति ब्राह्मणाच्च । 'क्षत्ता स्यात्सारथौ द्वाःस्थे वैश्यायामपि शूद्रजे' ॥ २५१ **बहुलमन्यत्रापि** । मन्, मन्ता । हन्, हन्ता । इत्यादि ॥ २५२ । **नप्तृ नेष्टृ त्वष्टृ होतृ पोतृ भ्रातृ जामातृ मातृ पितृ दुहितृ** । न पतन्त्यनेन पितरो नरके इति नप्ता पौत्रो दौहित्रश्च । नयतेः षुग्गुणश्च, नेष्टा । त्विषेरितोऽत्वम्, त्वष्टा । होता, पोता, ऋत्विग्भेदः । भ्राजतेर्जलोपः, भ्राता । जायां माति जामाता । 'मान पूजायां' नलोपः, माता । पातेराकारस्य इत्वम् । पिता । दुहेस्तृच्, इट्, गुणाभावश्च, दुहिता ॥ २५३ । **सुञ्यसेॠन्** । स्वसा ॥ २५४ । **यतेर्वृद्धिश्च** । याता । 'आर्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्' ॥ २५५ । **नञि च नन्देः** । न नन्दति ननान्दा । 'इह वृद्धिर्नानुवर्तते' इत्येके । 'ननान्दा तु स्वसा पत्युर्ननन्दा नन्दिनी च सा' इति शब्दार्णवः ॥ २५६ । **दिवेॠः** । देवा देवरः । 'स्वामिनो देवृदेवरौ' ॥ २५७ । **नयतेर्डिच्च** । ना । नरौ । नरः ॥ २५८ । **सव्ये स्थश्छन्दसि** । 'अम्बाम्ब–' २९१८ इत्यत्र—* **स्थास्थिन्स्थृणामुपसंख्यानम्** । सव्येष्ठा सारथिः । सव्येष्ठौ । सव्येष्ठरः ॥ २५९ । **अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः** । अष्टभ्योऽनिप्रत्ययः स्यात् । अरणिरग्नेर्योनिः । सरणिः । धरणिः । धमनिः । अमनिर्गतिः । अशनिः । अवनिः । तरणिः । बाहुलकात्–रजनिः ॥ २६० । **आङि शुषेः सनश्छन्दसि** । आशुशुक्षणिरग्निर्वातश्च ॥ २६१ । **कृषेरादेश्च चः** । चर्षणिर्जनः ॥

शुद्धं कर्म यस्येत्यर्थः । क्षीरस्वामिना तु प्रकृतसूत्रं विस्मृत्य 'श्विदि श्वैत्ये' अस्माल्लिटः कानजिति व्याख्यातं । तदसंगतं, कानचश्छान्दसत्वात्, इदित्त्वेन नलोपानुपपत्तेश्चेति दिक् ॥ २५० **तृन्तृचौ**—॥—**शंस्तेति** । शंसु स्तुतौ, अस्मात्तृन् । 'अप्तृन्–' इति सूत्रे नप्त्रादिग्रहणं नियमार्थम्—औणादिकतृजन्तानां चेदुपधादीर्घस्तर्हि नप्त्रादीनामेवेत्युक्तम् । तेनात्र दीर्घो नेत्युदाहरति—**शंस्तरौ शंस्तर इति** । नित्त्वादाद्युदात्तः । तथा च मन्त्रः—'ग्रावग्राभ उत शंस्ता सुविप्रः' । आदिशब्दाच्छासु अनुशिष्टौ । शास्ति विनयति सत्वान् शास्ता=बुद्धः । शास्तरौ । शास्तरः । 'शास्ता समन्तभद्रे ना शासके पुनरन्यवत्' इति । प्रपूर्वस्य तु नप्त्रादिषु पाठात् 'अप्तृन्—' इति दीर्घः—प्रशास्तारौ, प्रशास्तारः । 'क्षत्ता शूद्राच्च वैश्याजे प्रतीहारे च सारथौ । भुजिष्यातनयेऽपि स्यान्नियुक्तवेधसोः पुमान्' इति मेदिनीकोशानुसारेणाह—**वैश्यायामिति** । अमरस्तु 'क्षत्रियायां च शूद्रजे' इत्याह । णीञ् प्रापणे, उत्पूर्वः । उन्नेता ऋत्विग्भेदः ॥ २५१ **बहुलमन्यत्रापि** । अन्यत्रापि धातोर्बहुलं तृन्तृचौ भवतः । पूर्वसूत्रस्थादिशब्देनैव मन्ताहन्तेत्यादेः सिद्धत्वात्प्रपञ्चार्थमिदं सूत्रम् ॥ २५२ **नप्तृनेष्टृ**—। नप्त्रादयो दश तृन्तृजन्ता निपात्यन्ते ॥—**नप्तेति** । नञः प्रकृतिभावः, पत्लृ गतावित्यस्मात् 'अत्'शब्दलोपः । णीञ् प्रापणे, त्विष दीप्तौ, हु दानादनयोः, पूञ् पवने, भ्राजृ दीप्तौ, मा माने, पा रक्षणे, दुह प्रपूरणे । 'त्वष्टा पुमान् देवशिल्पितक्ष्णोरादित्यभिद्यपि' इति मेदिनी । जायां मातीत्यन्तर्भावितण्यर्थः ॥ २५३ **सुञ्यसेः**—। सुञि उपपदे असु क्षेपणे इत्यस्मात् ऋन्, यणादेशः, स्वसा भगिनी । 'सावसेः' इति तु क्वाचित्कः पाठः ॥ २५४ **यतेः**—। यती प्रयत्ने ॥ २५५ **नञि च**—। टुनदि समृद्धौ, अस्मान्नञ्युपपदे ऋन् ॥—**न नन्दतीति** । कृतायामपि सेवायां न तुष्यतीत्यर्थः । 'उषाप्यूषा ननान्दा च ननन्दा च प्रकीर्तिता' इति द्विरूपकोशः ॥ २५६ **दिवेः**—। दिवु क्रीडाविजिगीषादौ ॥—**देवेति** । भ्रातर इत्यनुवृत्तौ 'स्वामिनो देवृदेवरौ' इत्यमरः । 'देवे धवे देवरि माधवे च' इति श्रीहर्षः ॥ २५७ **नयतेः**–। णीञ् प्रापणे । अस्माद् ऋप्रत्ययः स च डित्, डित्त्वाट्टिलोपः । 'स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नराः' इत्यमरः ॥ २५८ **सव्ये**–। ष्ठा गतिनिवृत्तौ । अस्मात्सव्यशब्दे उपपदे ऋः स्यात्स च डित् । 'तत्पुरुषे कृति–' इति सप्तम्या अलुक् ॥—**उपसंख्यानमिति** । षत्वस्येति शेषः ॥ २५९ **अर्ति**–। ऋ गतौ, सृ गतौ, धृञ् धारणे, धमिः सौत्रः, अम गतौ, अश भोजने, अव रक्षणादौ, तॄ प्लवनतरणयोः । 'अरणिर्वह्निमन्थे ना द्वयोर्निर्मथ्यदारुणि' इति मेदिनी । 'सरणिः श्रेणिवर्त्मनोः' इति दन्त्यादौ रभसः । 'सरणिः पङ्क्तौ मार्गे स्त्री' इति मेदिनी । शॄ हिंसायां ततोऽतिप्रत्ययः । **शरणिरित्येके** । 'शरणिः पथि चावलौ' इति तालव्यादावजयः । 'इमामग्ने शरणिम्' इति मन्त्रे शरणिं=हिंसां व्रतलोपरूपां मीमृषः=क्षमस्वेति वेदभाष्यम् । धरणिर्भूमिः । 'धमनी तु शिराहट्टविलासिन्यां तु योषिति' इति मेदिनी । अमनिर्गतिः । अश्यते भुज्यते राज्यमिन्द्रेणानयेति अशनिर्वज्रम् । 'अशनिः स्त्रीपुंसयोः स्याच्चञ्चलायां रवावपि' इति मेदिनी । अवनिः पृथिवी । 'तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियाम्' इति मेदिनी । कुमारी लताविशेषः । 'तरणी रामतरणी कर्णिका चारुकेसरा । सहा कुमारी गन्धोल्योः' इति धन्वन्तरिनिघण्टुः ॥—**रजनिरिति** । रञ्ज रागे, अस्मादप्यनिः, नलोपोऽपि बाहुलकात्, 'कृदिकारात्–' इति ङीप्, रजनी । 'रजनी नीलिनी रात्रिर्हरिद्राजतुकासु च' इति मेदिनी ॥ २६० **आङि**–। शुष शोषणे अस्मात्सन्नन्तादाङि उपपदे अनिः स्यात् ॥ २६१ **कृषेरादेः**–। 'कृष विलेखने' ॥—**चर्षणिर्जन इति** । वैदिकनिघण्टौ चर्षणिशब्दस्य मनुष्यनामसु पाठात् । 'ओमासश्चर्षणीधृतः' इत्यादिमन्त्रेषु वेदभाष्यकारैस्तथैव व्याख्यातत्वाच्च । उज्ज्वलदत्तेन तु आदेश्च ध इति पठित्वा धर्षणिर्बन्धकीति व्याख्यातम् । तदयुक्तम् । तथा सति धृषेरित्येव सूत्रयेत् । प्रागल्भ्यरूपावयवार्थानुगमात् । आदेश्च ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२६२ । अदेर्मुट् च । अद्मनिरग्निः ॥ २६३ । वृतेश्च । वर्तनिः । गोवर्धनस्तु—'चकारान्मुट्, वर्त्मनिः' इत्याह ॥ २६४ । क्षिपेः किच्च । क्षिपणिरायुधम् ॥ २६५ । अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः । अर्चिर्ज्वाला । इदन्तोऽप्ययम्, 'अग्नेर्भ्राजन्ते अर्चयः' । शोचिर्दीप्तिः । हविः सर्पिः । 'इसन्-' २९८५ इति ह्रस्वः, छदिः पटलम् । छर्दिर्वमनव्याधिः । इदन्तोऽपि, 'छर्दतीसारशूलवान्' ॥ २६६ । बृंहेर्नलोपश्च । 'बर्हिर्ना कुशशुष्मणोः' ॥ २६७ । द्युतेरिसिन्नादेश्च जः । ज्योतिः ॥ २६८ । वसौ रुचेः संज्ञायाम् । वसुरोचिर्यज्ञः ॥ २६९ । भुवः कित् । भुविः समुद्रः ॥ २७० । सहो धश्च । सधिरनड्वान् ॥ २७१ । पिबतेस्थुक् । 'पाथिश्चक्षुःसमुद्रयोः' ॥ २७२ । जनेरुसिः । जनुर्जननम् ॥ २७३ । मनेर्धश्छन्दसि । मधुः ॥ २७४ । अर्तिपृवपियजितनिधनितपिभ्यो नित् । अरुः । परुर्ग्रन्थिः । वपुः । यजुः । तनुः, तनुषी, तनूंषि । धनुरस्त्रियाम् । 'धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति' । सान्तस्य उदन्तस्य वा रूपम् । 'तपुः सूर्योऽग्निशत्रुषु' ॥ २७५ एतेर्णिच्च । आयुः, आयुषी ॥ २७६ । चक्षेः शिच्च । चक्षुः ॥ २७७ । मुहेः किच्च । मुहुरव्ययम् ॥ २७८ । बहुलमन्यत्रापि । आचक्षुः । परिचक्षुः ॥ २७९ । कृगॄशॄवृञ्चतिभ्यः ष्वरच् । 'कर्वरो व्याघ्ररक्षसोः' । गर्वरोऽहंकारी । शर्वरी रात्रिः । 'वर्वरः प्राकृतो जनः' । चत्वरम् ॥ २८० । नौ सदेः । 'निषद्वरस्तु जम्बालः' । निषद्वरी रात्रिः ॥ इत्युणादिषु द्वितीयः पादः ॥

अथ तृतीयः पादः ।

२८१ । छित्वरछत्वरधीवरपीवरमीवरचीवर-

इत्यंशस्य त्यागेन लाघवाच्च । तस्मादादेश्च चः इति दशपादीवृत्तिपाठ एव युक्त इत्याहुः ॥ २६२ अदेः-। अद भक्षणे । अस्मादनिस्तस्य मुडागमश्च ॥ २६३ वृतेश्च । वृतु वर्तने अस्मादप्यनिः ॥—वर्तनिरिति । 'कृदिकारात्-' इति ङीषि तु वर्तनी । 'सरणिः पद्धतिः पद्या वर्तन्येकपदीति च' इत्यमरः ॥ २६४ क्षिपेः-। क्षिप प्रेरणे ॥—क्षिपणिरायुधमिति । 'उतस्य वाजी क्षिपणिं तुरण्यति' इति मन्त्रस्य वेदभाष्ये तु क्षिपणिं=क्षेपणमनु तुरण्यति=त्वरयति गन्तुमिति व्याख्यातम् ॥ २६५ अर्चि-। अर्च पूजायाम्, शुच शोके, हु दानादनयोः, सृप्लृ गतौ, छद अपवारणे, ण्यन्तः । छर्द वमने, अर्चिरिति सान्तम् । 'तमार्चिषा स्फूर्जयन्' इति मन्त्रः । 'नयनमिव सनिद्रं घूर्णते दैवमर्चिः' इति माघः । 'ज्वालाभासोर्नपुंस्यर्चिः' इति नानार्थे सान्तेष्वमरः ॥—इदन्तोऽपीति । णिजन्तादर्चेरत इरिति भावः । 'अर्चिर्हेतिः शिखा स्त्रियाम्' इत्यमरः । 'रोचिः शोचिरुभे क्लीबे' इति च । सर्पिर्घृतम् । छायतेऽनया छदिः । छदिः स्त्रियामेवेति लिङ्गानुशासनसूत्रम् । एवं च 'पटलं छदिः' इत्यमरग्रन्थे पटलसाहचर्याच्छदिषः क्लीबतां वदन्त उपेक्ष्याः ॥—छर्दतीति । छर्दिश्चातिसारश्च शूलश्च तानि यस्य सन्तीति विग्रहः ॥ २६६ बृंहेः-। बृहि वृद्धौ । अस्मादिसिः ॥—कुशशुष्मणोरिति । शुष्मा नाम अग्निः । 'अग्निर्वैश्वानरो वह्निः' इत्युपक्रम्य 'बर्हिः शुष्मा' इत्यमरेणोक्तत्वात् । 'बर्हिः पुंसि हुताशने । न स्त्री कुशे' इति मेदिनी ॥ २६७ द्युतेः-। द्युत दीप्तौ । 'ज्योतिरग्नौ दिवाकरे । पुमान्नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोः' इति मेदिनी ॥ २६८ वसौ-। रुच दीप्तावस्माद्वसुशब्दे उपपद इसिन्स्यात्संज्ञायाम् । बाहुलकात्केवलादपि । 'रोचिः शोचिरुभे क्लीबे' इत्यमरः ॥ २६९ भुवः-। भवतेरिसिन् स्यात्स च कित् ॥ २७० सहो-। षह मर्षणे । अस्मादिसिन् धश्चान्तादेशः ॥ २७१ पिबतेः-। पा पाने । अस्मादिसिन्, धातोश्च थुगागमः ॥ २७२ जनेः । जनी प्रादुर्भावे ॥ २७३ मनेः-। मनु अवबोधने । अस्मादुसिः स्याच्छन्दसि धकारश्चान्तादेशः । मधुः पवित्रद्रव्यम् ॥ २७४ अर्तिपृ-। ऋ गतौ, पॄ पालनपूरणयोः, डुवप् बीजसन्ताने, यज देवपूजादौ, तनु विस्तारे, धन धान्ये, तप सन्तापे, एभ्य उसिर्नित्स्यात् । 'व्रणोऽस्त्रियामीर्ममरुः क्लीबे' इत्यमरः । 'ग्रन्थिर्ना पर्वपरुषी' इति च । 'वपुः क्लीबं तनौ शस्ताकृतावपि' इति मेदिनी । शस्ताकृतिः प्रशस्ताकृतिरित्यर्थः । यजुरिति यजुर्वेदः । तनुः शरीरम् । तनुषीति । 'तनुषे तनुषेऽनङ्गम्' इति सुबन्धुः । 'स्यात्तनुस्तनुषा सार्धं धनुषा च धनुं विदुः' इति द्विरूपेषु विश्वः । 'अथास्त्रियाम् । धनुश्चापौ' इत्यमरः । 'धनुः प्रियाले ना न स्त्री राशिभेदे शरासने । धनुर्धरे त्रिषु' इति सान्ते मेदिनी ॥ २७५ एतेः-। इण् गतावित्यस्मादुसिः, णित्त्वाद् वृद्धौ कृतायामायादेशः ॥ २७६ चक्षेः-। चक्षिङ् व्यक्तायां वाचि, अस्मादुसिः शिद्भवति । शित्त्वात्ख्याञादेशाभावः । चक्षते=रूपमनुभवन्त्यनेनेति चक्षुः ॥ २७७ मुहेः-। मुह वैचित्ये । 'मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः' इत्यव्ययेष्वमरः ॥ अस्मात्परं २७८ 'बहुलमन्यत्रापि' इति सूत्रं स्पष्टत्वात्त्यक्तम् ॥ २७९ कृ गॄ-। कॄ विक्षेपे, गॄ निगरणे, शॄ हिंसायाम्, वृञ् वरणे, चते याचने । 'नैरृतः कर्वरः क्रव्यात्कर्बुरो यातुरक्षसोः' इति शब्दार्णवः । 'शर्वरी यामिनीस्त्रियोः' इति मेदिनी । 'वर्वरः पामरे केशविन्यासे नीवृदन्तरे । वर्वरः फञ्जिकायां तु वर्वरा शाकपुष्पयोः' इति विश्वः । वर्वरः पामरे केशवक्रले नीवृदन्तरे । फञ्जिकायां पुमान् शाकपुष्पभेदभिदोः स्त्रियाम्' इति मेदिनी । 'चत्वरं स्थण्डिले गणे' इति च ॥ २८० नौ सदेः-। षद्लृ विशरणादौ । निपूर्वादस्मात्ष्वरच् स्यात् । 'सदिरप्रतेः' इति षत्वम् । 'निषद्वरः स्मरे पङ्के निशायां तु निषद्वरी' इति मेदिनी ॥ इत्युणादिषु द्वितीयः पादः ॥

२८१ छित्वर-॥—अनयोरिति । छिदिर् द्वैधीकरणे, छद अपवारणे, 'छित्वरश्छेदने द्रव्ये धूर्ते वैरिणि च त्रिषु' इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीवरनीवरगह्वरकट्वरसंयद्वराः । एकादश ष्वरच्प्रत्ययान्ता निपात्यन्ते । 'छिदिर्' 'छद्' अनयोस्तकारोऽन्तादेशः, छिदेर्गुणाभावश्च—छित्वरो धूर्तः, 'छत्वरो गृहकुञ्जयोः' । धीवरः कैवर्तः । पीवरः स्थूलः । मीवरो हिंसकः । चिनोतेर्दीर्घश्च, चीवरं भिक्षुकप्रावरणम् । तीवरो जातिविशेषः । नीवरः परिवाट् । गाहतेर्ह्रस्वत्वम्, गह्वरम् । कटे वर्षादौ, कट्वरं व्यञ्जनम् । यमेर्दकारः, संयद्वरो नृपः । 'पदेः-संपद्वरः' इत्येके ॥ २८२ । **इण्सिञ्जिदीङुष्यविभ्यो नक् ।** 'इनः सूर्ये नृपे पत्यौ' । सिनः काणः । जिनोऽर्हन् । दीनः । उष्णः । ऊनः ॥ २८३ । **फेनमीनौ ।** एतौ निपात्येते । स्फायतेः फेनः । मीनः ॥ २८४ । **कृषेर्वर्णे ।** कृष्णः ॥ २८५ । **बन्धेर्ब्रधिबुधी च ।** ब्रध्नः, बुध्नः ॥ २८६ । **धापॄवस्यज्यतिभ्यो नः ।** 'धाना भ्रष्टयवे स्त्रियः' । पर्णं पत्रम्, पर्णः किंशुकः । 'वस्नो मूल्ये वेतने च' । अजेर्वी, वेनः । अतः-आदित्यः । बाहुलकात्—शृणोतेः-श्रोणः पङ्गुः ॥ २८७ । **लक्षेरट् च ।** लक्षेश्चुरादिण्यन्तान्नः स्यात्तस्याडागमश्च । चान्मुडित्येके । 'लक्षणं लक्ष्मणं नाम्नि चिह्ने च' । लक्षणो लक्ष्मणश्च रामभ्राता । 'लक्षणा हंसयोषायां सारसस्य च लक्ष्मणा' ॥ २८८ । **वनेरिच्चोपधायाः ।** वेन्ना नदी ॥ २८९ । **सिवेष्टेर्यू च ।** दीर्घोच्चारणसामर्थ्यान्न गुणः । स्यून आदित्यः । बाहुलकात् केवलो नः, ऊठ्, अन्तरङ्गत्वाद्यण्, गुणः, स्योनः ॥ २९० । **कृवृजॄसिद्रुपन्यनिस्वपिभ्यो नित् ।** कर्णः । वर्णः । 'जर्णश्चन्द्रे च वृक्षे च' । सेना । द्रोणः । पन्नो नीचैर्गतिः । अन्नमोदनः । स्वप्नो निद्रा ॥ २९१ । **घेट**

मेदिनी । डुधाञ् धारणपोषणयोः, पा पाने, मा माने, एषां त्रयाणामीत्वमन्त्यस्य निपात्यत इत्येके । अन्ये तु पीव मीव तीव नीव स्थौल्ये । एभ्यः ष्वरचि 'लोपो व्योः–' इति लोपमाहुः । '**पीवरः** कच्छपे स्थूले' इति मेदिनी ॥—**मीवर इति ।** हिंसक इत्यर्थानुगुण्येन 'मीञ् हिंसायाम्' इत्यस्मात्ष्वरजिति केचिदाहुः । 'तीवरो नाम्बुधौ व्याधे' इति मेदिनी । 'स्यात्तीवरो वाणिजके वास्तवेऽपि च दृश्यते' इति मेदिनीविश्वप्रकाशौ ॥—**गाहतेरिति ।** गाहू विलोडने । 'कट्वरं कुत्सिते वाच्यलिङ्गं तक्रे नपुंसकम्' इति मेदिनी । बाहुलकादुपपूर्वकात् 'हु दानादनयोः' इत्यस्मात्ष्वरच्युकारलोपः । 'उपह्वरं समीपे स्यादेकान्तेऽपि नपुंसकम्' इति मेदिनी । उपह्वरो रथ इति केचित् । 'तद्दु प्रयक्षतं' इति मन्त्रे तु उपह्वरे=उपगन्तव्ये समीपदेशे ॥ २८२ **इण्–।** इण् गतौ, षिञ् बन्धने, जि जये, दीङ् क्षये, उष दाहे, अव रक्षणे । 'इनः पत्यौ नृपार्कयोः' इति मेदिनी । 'जिनोऽर्हति च बुद्धे च पुंसि स्यात्त्रिषु जित्वरे' इति च । '**दीना** मूषिकयोषायां दुर्गते कातरेऽन्यवत्' इति विश्वः । '**उष्णो** ग्रीष्मे पुमान् दक्षाशीतयोरन्यलिङ्गकः' इति मेदिनी । 'ज्वरत्वर–' इत्यूठ्, **ऊनमसंपूर्णम्** ॥ २८३ **फेन–।** स्फायी वृद्धौ, अस्य फे इत्यादेशः । मीञ् हिंसायाम् । 'डिण्डीरोऽब्धिकफः **फेनः**' इत्यमरः । '**मीनो** राश्यन्तरे मत्स्ये' इति विश्वः ॥ २८४ **कृषेः–।** कृष विलेखने अस्माद्वर्णे वाच्ये नक् स्यात् । '**कृष्णः** सत्यवतीपुत्रे केशवे वायसेऽर्जुने । कृष्णा स्याद्द्रौपदीनीलीकणाद्राक्षासु योषिति । मेचके वाच्यलिङ्गः स्यात्क्लीबे मरिचलोहयोः' इति मेदिनी ॥ २८५ **बन्धेः–।** बन्ध बन्धने, अस्मान्नक् । 'भास्करोऽहस्करो **ब्रध्नः** प्रभाकरदिवाकरौ' इत्यमरः । '**बुध्नो** ना मूलरुद्रयोः' इति मेदिनी ॥ २८६ **धापॄ–।** डुधाञ् धारणादौ, पॄ पालनादौ, वस निवासे, अज गतौ, अत सातत्यगमने, एभ्यो नः स्यात् । नक् प्रत्यये सति तु वस्न इत्यत्र संप्रसारणं स्यात् । वेन इत्यत्र तु गुणो न स्यादिति भावः । '**धाना** भ्रष्टयवे प्रोक्ता धान्याकेऽभिनवोद्भिदि' इति विश्वः । '**पर्णं** पत्रं किंशुके ना' इति मेदिनी । '**वस्नस्त्ववक्रये** पुंसि चेतने स्यान्नपुंसकम्' इति च । **वेनः**–लुण्टाकः प्रजापतिश्च ॥ २८७ **लक्षेः–।** लक्ष दर्शनाङ्कनयोः ॥—**लक्षणमित्यादि ।** लक्षणलक्ष्मणशब्दौ द्वावपि नामचिह्नयोः क्लीबौ । रामभ्रातरि पुंलिङ्गौ । हंसयोषायां लक्षणा । सारसस्य योषायां 'लक्ष्मणा' इति व्यवस्थेत्यर्थः । 'लक्षणं नाम्नि चिह्ने च सौमित्रिरपि लक्षणः । लक्ष्मणं लाञ्छने नाम्नि रामभ्रातरि लक्ष्मणः' इति विश्वः । 'लक्षणं नामचिह्नयोः । लक्ष्मणं च लक्ष्मणस्तु सौमित्रौ लक्षणो यथा' इति हेमचन्द्रः । 'लक्ष्मणो लक्षणोऽपि च' इति द्विरूपकोशः । 'लक्षणं नाम्नि चिह्ने च सारस्यां लक्षणा क्वचित् । लक्ष्मणा त्वौषधीभेदे सारस्यामपि योषिति । रामभ्रातरि पुंसि स्यात्सश्रीके चाभिधेयवत्' इति मेदिनी । कोशे तु 'सारस्यामपि लक्षणा' इति निर्मकारः स्वीकृतः ॥ २८८ **वनेः–।** वन संभक्तौ, अस्मान्नः, उपधाया इत्वं च ॥—**वेन्नेति**–लघूपधगुणः ॥ २८९ **सिवेः–।** षिवु तन्तुसन्ताने ॥—**बाहुलकादिति ।** एतच्च 'च्छ्वोः शूड्–' इति सूत्रे वृत्तौ 'येन विधिः–' इति सूत्रे कैयटग्रन्थे च स्पष्टम् ॥—**यणिति ।** लघूपधगुणे कृते लेकारस्यायादेशे ऊठोऽपि 'सार्वधातुक–' इत्यादिना गुणे कृते सयोन इति स्यादिति भावः । '**स्योनः** किरणसूर्ययोः' इति मेदिनी ॥ २९० **कृवृ–।** कॄ विक्षेपे, वृञ् वरणे, दीर्घपाठे तु–वॄ वरणे, जॄष् वयोहानौ, दिवादिः । जॄ इति क्र्यादौ चुरादौ च । षिञ् बन्धने, द्रु गतौ, पन स्तुतौ, अन प्राणने, ञिष्वप् शये, एभ्यो नप्रत्ययो नित्स्यात् । '**कर्णः** पृथाज्येष्ठसुते सुवर्णालौ श्रुतावपि' इति विश्वमेदिन्यौ । **वर्णो** द्विजादिशुक्लादियशोगुणकथासु च । स्तुतौ ना न स्त्रियां भेदे रूपाक्षरविलेखने' इति मेदिनी । विश्वमेदिनीस्थमाह—**जर्णश्चन्द्र इति ।** 'जर्णो जीर्णद्रुमेन्दुषु' इति हेमचन्द्रः । 'ध्वजिनी वाहिनी सेना' इत्यमरः । 'द्रोणोऽस्त्रियामाढके स्यादाढकादिचतुष्टये । पुमान्कृपीपतौ कृष्णकाकेऽस्त्री नीवृदन्तरे । स्त्रियां काष्ठाम्बुवाहिन्यां गवादन्यामपीष्यते । अन्नं भक्ते च भुक्ते स्यात्' इति मेदिनी । 'स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमान्' इति मेदिनी ॥ २९१ **घेटः–**

६८ सि० कौ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इच्च । 'धेनः सिन्धुर्नदी धेना' ॥ २९२ । **तृषिशुषिरसिभ्यः कित्** । तृष्णा । शुष्णः सूर्यो वह्निश्च । रस्नं द्रव्यम् ॥ २९३ । **सुञो दीर्घश्च** । सूना वधस्थानम् ॥ २९४ । **रमेस्त च** । रमयतीति रत्नम् ॥ २९५ । **रास्नासास्नास्थूणावीणाः** । रास्ना गन्धद्रव्यम् । सास्ना गोगलकम्बलः । स्थूणा गृहस्तम्भः । वीणा वल्लकी ॥ २९६ । **गादाभ्यामिष्णुच्** । गेष्णुर्गायनः । देष्णुर्दाता ॥ २९७ । **कृत्यशूभ्यां क्स्नः** । कृत्स्नम् । अक्ष्णमखण्डम् ॥ २९८ । **तिजेर्दीर्घश्च** । तीक्ष्णम् ॥ २९९ । **श्लिषेरच्चोपधायाः** । श्लक्ष्णम् ॥ ३०० । **यजिमनिशुन्धिदसिजनिभ्यो युच्** । यज्युरध्वर्युः । 'मन्युर्दैन्ये क्रतौ क्रुधि' । शुन्ध्युरग्निः । दस्युस्तस्करः । जन्युः शरीरी ॥ ३०१ । **भुजिमृङ्भ्यां युक्त्युकौ** । भुज्युर्भाजनम् । मृत्युः ॥ ३०२ । **सर्तेरयुः** । सरयुर्नदी । 'अयूः' इति पाठान्तरम्, सरयूः ॥ ३०३ । **पानीविषिभ्यः पः** । पाति रक्षत्यस्मादात्मानमिति पापम् । तद्योगात्पापः । नेपः पुरोहितः । बाहुलकाद्गुणाभावे नीपो वृक्षविशेषः । वेष्पः पानीयम् ॥ ३०४ । **च्युवः किच्च** । च्युपो वक्त्रम् ॥ ३०५ । **स्तुवो दीर्घश्च** । स्तूपः समुच्छ्रायः ॥ ३०६ । **सुशृभ्यां निच्च** । चात्कित् । सूपः । बाहुलकादूत्त्वम्, शूर्पम् ॥ ३०७ । **कुयुभ्यां च** । कुवन्ति मण्डूका अस्मिन् कूपः । युवन्ति बध्नन्त्यस्मिन्पशुमिति यूपो यज्ञस्तम्भः ॥ ३०८ । **खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः** । सप्तैते पप्रत्ययान्ता निपात्यन्ते । खनतेर्नकारस्य षत्वम्, 'खष्पौ क्रोधबलात्कारौ' । शीलतेर्ह्रस्वः, शिल्पं कौशलम् । 'शसु हिंसायाम्' निपातनात्षत्वम्, शष्पं बालतृणं प्रतिभाक्षयश्च । बाधतेः षः, 'बाष्पो नेत्रजलोष्मणोः' । बाष्पं च । रौतेर्दीर्घः, 'रूपं स्वभावे सौन्दर्ये' । पॄ, 'पर्पं गृहं बालतृणं पङ्गुपीठं च' । 'तल प्रतिष्ठाकरणे' चुरादिणिचो लुक्, 'तल्पं शय्याट्टदारेषु' ॥ ३०९ । **स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच्** । 'अयामन्त-' २३११ इति णेरयादेशः—स्तनयित्नुः, हर्षयित्नुः, पोषयित्नुः, गदयित्नुर्वावदूकः, मदयित्नुर्मदिरा ॥

धेट् पाने, अस्मान्नः स्यादिच्चान्तादेशः । **'धेना** नद्यां नदे पुमान्' इति मेदिनी । 'धेनः समुद्रे नद्यां च धेना' इति विश्वः । 'श्लोको धारा' इत्यादिषु सप्तपञ्चाशत्सङ्ख्याके वाङ्नामसु धेनेति वैदिकनिघण्टौ पठितम् । अत एव 'धेना जिगाति दाशुषे' 'इन्द्र धेनाभिरिह मादयस्व' इत्यादिमन्त्रेषु धेना=वागिति व्याख्यातं भाष्ये ॥ **२९२ तृषि-।** ञितृषा पिपासायाम्, शुष शोषणे, रस शब्दे । **'तृष्णा** लिप्सापिपासयोः' इति विश्वः ॥ **२९३ सुञः-।** षुञ् अभिषवे, अस्मान्नः स्याद्धातोर्दीर्घश्च । **'सूना**ऽधोजिह्विकाऽपि च' इति नान्तेऽमरः । 'सूनं प्रसवपुष्पयोः । सूना पुत्र्यां वधस्थानगलकण्ठिकयोः स्त्रियाम्' इति मेदिनी ॥ **२९४ रमेः-।** रमेर्ण्यन्तान्नः स्यात्तकारश्चान्तादेशः । 'रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्' इति मेदिनी ॥ **२९५ रास्ना-।** रस आस्वादने, उपधादीर्घः । **'रास्ना** तु स्याद्भुजङ्गाक्ष्यामेलापर्ण्यामपि स्त्रियाम्' इति मेदिनी । षस स्वप्ने, उपधादीर्घः । 'सास्ना तु गलकम्बलः' इत्यमरः । **'सास्ना** गोगलकम्बलः' इति पाठान्तरम् । 'ष्ठा गतिनिवृत्तौ' इत्यस्य ऊत्वं प्रत्ययस्य णत्वं च । 'अथ स्थूणा स्यात्सूर्म्यां स्तम्भे गृहस्य च' इति मेदिनी । **सूर्मी** लोहप्रतिमा । वी गत्यादिषु । गुणाभावो णत्वं च । 'वीणा विद्युति वल्लक्याम्' इति मेदिनी ॥ **२९६ गादाभ्याम्-।** गै शब्दे, डुदाञ् दाने । 'गेष्णुर्नटे गायके च देष्णुर्दातरि दुर्दमे' इति विश्वः ॥ **२९७ कृत्यशू-।** कृती वेष्टने, अशू व्याप्तौ । 'कृत्स्नं सर्वाम्बुकुक्षिषु' इति मेदिनी ॥ **२९८ तिजेः-।** तिज निशाने, अस्मात्क्स्नः, धातोर्दीर्घश्च । 'तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके । क्लीबं यवाग्रके पुंसि तिग्मात्मत्यागिनोस्त्रिषु' इति मेदिनी ॥ **३०० यजि-।** यज देवपूजादौ, मन ज्ञाने, शुन्ध शुद्धौ, दसु उपक्षये, जनी प्रादुर्भावे । 'दस्युश्चौरे रिपौ पुंसि' इति मेदिनी । 'अथ जन्युः स्यात्पुंसि प्राण्यग्निधातृषु' इति च ॥ **३०१ भुजि-।** भुज पालनादौ, मृङ् प्राणत्यागे, आभ्यां यथासंख्यं युक्त्युकौ स्तः । 'मृत्युर्ना मरणे यमे' इति मेदिनी ॥ **३०२ सर्तेः-।** सृ गतौ ॥ **३०३ पानी-।** पा रक्षणे, णीञ् प्रापणे, विष्लृ व्याप्तौ । 'नीपः कदम्बबन्धूकनीलाशोकद्रुमेऽपि च' इति मेदिनी ॥ **३०४ च्युवः-।** च्युङ् गतौ । धातूनामनेकार्थत्वादिह भाषणे । च्यवन्ते=भाषन्तेऽनेनेति विग्रहः । दशपाद्यां तु 'चुपः किच्च' इति पठ्यते । चुप मन्दायां गतौ । चोपतीति च्युपः मन्दगमनकर्ता ॥ **३०५ स्तुवः-।** ष्टुञ् स्तुतौ । अस्मात्पः स्याद्धातोर्दीर्घश्च ॥ **३०६ सुशृ-।** षुञ् अभिषवे, शॄ हिंसायाम् । आभ्यां पः स्यात्स च निद्भवति । नित्त्वं तु स्वरार्थम् । 'सूपो व्यञ्जनसूदयोः' इति मेदिनी ॥ **३०७ शूर्पमिति-।** बाहुलकादुत्वं रपरत्वं 'हलि च' इति दीर्घः । 'प्रस्फोटनं शूर्पमस्त्री' इत्यमरः ॥**—कुयु-।** कु शब्दे, यु मिश्रणे । आभ्यां पः स च मिद्धातोर्दीर्घत्वं च ॥ **३०८ खष्पशिल्प-।** खनु अवदारणे, शील समाधौ, बाधृ लोडने, रु शब्दे, पॄ पालनादौ । 'खष्पः क्रोधे बलात्कृतौ' इति विश्वः । 'शष्पं बालतृणेऽपि च । पुंसि स्यात्प्रतिभाहानौ' इति मेदिनी ॥ विश्वोक्तिमाह—**बाष्प इति-॥** 'बाष्पमूष्मणि चाश्रुणि' इति कोशान्तरमभिप्रेत्याह—**बाष्पं चेति-।** 'रूपं स्वभावे सौन्दर्ये नालके पशुशब्दयोः । ग्रन्थवृत्तौ नाटकादावाकारश्लोकयोरपि' इति विश्वमेदिन्यौ । 'तल्पमट्टे कलत्रे च शयनीये च न द्वयोः' इति मेदिनी । अमरोक्तिमाह—**तल्पं शय्येति ॥ ३०९ स्तनिहृषि-।** स्तनगदी देवशब्दे—चुरादिण्यन्तौ, हृष तुष्टौ, पुष पुष्टौ, मदी हर्षग्लेपनयोः, घटादिः । एभ्यो ण्यन्तेभ्यः इत्नुच् स्यात् । **'स्तनयित्नुः** पुमान्वारिधरेऽपि स्तनितेऽपि च' इति मेदिनी । 'स्तनयित्नुः पयोवाहे तद्ध्वनौ मृगरागयोः' इति विश्वः । **'हर्षयित्नुः** सुते हेम्नि पोषयित्नुः पिके द्विजे' इति च । **'गदयित्नुः** पुमान्कामे जल्पाके कार्मुकेऽपि च' इति विश्वमेदिन्यौ । **'मदयित्नुः** कामदेवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३१० । कृहनिभ्यां क्तुः । क्रतुः शिल्पी । हत्नुर्व्याधिः शस्त्रं च ॥ **३११ । गमेः सन्वच्च** । जिगत्नुः ॥ **३१२ । दाभाभ्यां नुः** । दानुर्दाता । भानुः ॥ **३१३ । वचेर्गश्च** । वग्नुः ॥ **३१४ । धेट इच्च** । धयति सुतानिति धेनुः ॥ **३१५ । सुवः कित्** । 'सूनुः पुत्रेऽनुजे रवौ' ॥ **३१६ । जहातेर्द्वे अन्तलोपश्च** । जह्नुः ॥ **३१७ । स्थो णुः** । 'स्थाणुः कीले स्थिरे हरे' ॥ **३१८ । अजिवृरीभ्यो निच्च** । अजेर्वी, वेणुः । वर्णुर्नददेशभेदयोः । 'रेणुर्द्वयोः स्त्रियां धूलिः' ॥ **३१९ । विषेः किच्च** । विष्णुः ॥ **३२० । कृदाधाराचिकलिभ्यः कः** । बाहुलकान्न कसेस्संज्ञा । 'कर्को धवलघोटकः' । दाको दाता । धाकोऽनड्वानाधारश्च । राका पौर्णमासी । अर्कः । 'कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि' ॥ **३२१ । सृवृभूशुषिमुषिभ्यः कक्** । 'सृक उत्पलवातयोः' । 'वृकः श्वापदकाकयोः' । भूकं छिद्रम् । शुष्कः । मुष्कोऽण्डम् ॥ **३२२ । शुकवल्कोल्काः** । शुभेरन्त्यलोपः, शुकः । 'वल्कं वल्कलमस्त्रियाम्' । 'उष दाहे' षस्य लः, उल्का ॥ **३२३ । इणभीकापाशल्यतिमर्चिभ्यः कन्** । 'एके मुख्यान्यकेवलाः' । 'भेको मण्डूकमेषयोः' इति विश्वमेदिन्यौ । काकः । पाकः शिशुः । शल्कं शकलम् । अत्कः पथिकः शरीरावयवश्च । मर्कः शरीरवायुः ॥ **३२४ । नौ हः** । जहातेः कन् स्यान्नौ । निहाका गोधिका ॥

पुमान्मये नपुंसकम्' इति मेदिनी ॥ **३१० कृहनि–**। डुकृञ् करणे, हन हिंसागत्योः ॥—**क्रतुरिति** । कर्तेत्यर्थः । कित्त्वान्न गुणः ॥—**हत्नुरिति** । 'अनुदात्तोपदेश–' इत्यादिनानुनासिकलोपः । एवमुत्तरत्र—गमेरपि क्तुप्रत्यये जिगत्नुरित्यत्रापि बोध्यः ॥—**शस्त्रं चेति** । चाद्धन्ता । दशपादीवृत्तौ तु क्नुरिति तकाररहितं पठित्वा 'कृणुः कर्ता' । हनुर्वैकदेशः । बाहुलकान्नलोपः । गमेस्तु जिगत्नुरित्युदाहृतं । तत्सर्वं प्रामादिकम्, लक्ष्यविसंवादात् । तथा च श्रूयते—'सुरूपकृत्नुमूतये' 'ज्येष्ठराजं भरे कृत्नुं' 'अयं कृत्नुरगृभीतः' 'मा नो वधाय हत्नवे' 'मृगं न भीममुपहत्नुमुग्रम्' 'यो नः सनुत्य उत वा जिगत्नु' इत्यादि । अत एव हन्तिधातुं विवृण्वता माधवेन उपहत्नुरित्युदाहृत्य क्नोः कित्त्वादनुनासिकलोप इत्युक्तम् । **यत्तु** तेनैव 'सुरूपकृत्नुम्' इति मन्त्रं विवृण्वता तकारोपजनश्छान्दस इत्युक्तं तद्दशपादीवृत्तिमनुसृत्य, न तु वस्तुस्थितिमनुरुध्येति सहृदयैराकलनीयमित्याहुः ॥ **३१२ दाभाभ्याम्–**। डुदाञ् दाने, भा दीप्तौ । **दानु**र्दातरि विक्रान्ते' इति मेदिनी । '**भानू** रश्मिदिवाकरौ' इत्यमरः ॥ **३१३ वचेः–**। वच परिभाषणे । **वग्नु**र्वाचालः ॥ **३१४ धेटः–**। धेट् पाने अस्मान्नुः स्यादिकारश्चान्तादेशः । 'धेनुः स्यान्नवसूतिका' इत्यमरः ॥ **३१५ सुवः–**। षूङ् प्राणिप्रसवे । अस्मान्नुः स्यात्स च कित् । विश्वोक्तिमाह—**सूनुः पुत्रे इति**—॥ **३१६ जहातेः–**। ओहाक् त्यागे । 'जह्नुः स्यात्पुंसि राजर्षिभेदे च मधुसूदने' इति मेदिनी ॥ **३१७ स्थो णुः–**। ष्ठा गतिनिवृत्तौ । अस्माण्णुः स्यात् ॥ विश्वोक्तिमाह—**स्थाणुरिति** । 'स्थाणुः कीले हरे पुमान् । अस्त्री ध्रुवे' इति मेदिनी ॥ **३१८ अजिवृ–**। अज गतौ, वृङ् संभक्तौ, रीङ् गतिरेषणयोः, एभ्यो णुर्नित्स्यात् । 'वेणुर्नृपान्तरे वंशे' इति विश्वः । 'रेणुः स्त्रीपुंसयोर्धूलौ पुंलिङ्गः पर्पटे पुनः' इति मेदिनी ॥ **३१९ विषेः–**। विष्लृ व्याप्तौ । अस्माण्णुः स्यात्स च किच्चान्नित् । नित्त्वादाद्युदात्तत्वम् । विष्णुरिच्छा । 'विष्णुर्नारायणः कृष्णः' इत्यमरः ॥ **३२० कृदा–**। डुकृञ् करणे, डुदाञ् दाने, डुधाञ् धारणपोषणयोः, रा दाने, अर्च पूजायाम्, कल गतौ । 'कर्कः कर्के तले वह्नौ शुक्लाश्वे दर्पणे घटे' इति विश्वमेदिन्यौ । 'राका नद्यन्तरे कच्छ्वां नवजातरजः स्त्रियाम् । संपूर्णेन्दुतिथौ' इति मेदिनी । 'राका तु सरिदन्तरे । राका नवरजःकन्या पूर्णेन्दुः पूर्णिमापि च' इति विश्वः ॥ इह दा धा रा एषां 'केणः' इति ह्रस्वोऽपि बाहुलकात् संज्ञापूर्वकविधेरनित्यत्वाद्वा नेति बोध्यम् । 'अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ' इति विश्वमेदिन्यौ । 'कल्कोऽस्त्री घृततैलादिशेषे दम्भे बिभीतके । विट्किट्टयोश्च पापे च त्रिषु पापाशये पुनः' इति मेदिनी । **बाहुलकाद्रमेरपि** कः । 'रङ्कः कृपणमन्दयोः' इति मेदिनी । कपिलकादित्वाल्लत्वं, टाप् । 'लङ्का रक्षःपुरीशाखाशाकिनीकुलटासु च' इति विश्वमेदिन्यौ ॥ **३२१ सृवृ–**। सृ गतौ, वृञ् वरणे, भू सत्तायाम्, शुष शोषणे, मुष स्तेये ॥—**सृक इति** । 'सृकं संशाय पविमिन्द्र तिग्मम्' इति मन्त्रस्य वेदभाष्ये तु सृकं=सरणशीलं पविं=वज्रं संशाय=सम्यक् तीक्ष्णीकृत्येति व्याख्यातम् । 'भूकं छिद्रे च काले च' इति मेदिनी । 'मुष्को मोक्षकवृक्षे स्यात्संघाते वृषणेऽपि च' इति स एव ॥ **३२२ 'शुको** व्याससुते कीरे रावणस्य च मन्त्रिणि । शिरीषपादपे पुंसि ग्रन्थिपर्णे नपुंसकम् । **वल्कं** वल्कलशल्कयोः' इति च । '**उल्का** ज्वाला विभावसोः' इति सुभूतिचन्द्रः ॥ **३२३ इणभी–**। इण् गतौ, ञिभी भये, कै शब्दे, पा पाने, शल गतौ, अत सातत्यगमने । 'एकं संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु' इति मेदिनी । 'काकः स्याद्वायसे वृक्षप्रभेदे पीठसर्पिणि । शिरोऽवक्षालने मानप्रभेदद्वीपभेदयोः । काका स्यात्काकनासायां काकोली काकजङ्घयोः । रक्तिकायां मलप्यां च काकमाच्यां च योषिति । काकं सुरतबन्धे स्यात्काकानामपि संहतौ' इति मेदिनीविश्वप्रकाशौ । 'पाकः परिणतौ शिशौ । केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेऽपि च' इति मेदिनी । 'शल्कं तु शकले वल्के' इति च । 'मर्च' इति सौत्रो धातुरिति बहवः । 'मर्च शब्दे चौरादिकः' इति 'मिदचोऽन्त्यात्परः' इति सूत्रे कैयटः । 'मर्तो मर्तं मर्चयति द्वयेन' इति मन्त्रे मर्चयति=विघेयीकरोति भर्त्सयति वेति वेदभाष्यम् । न चैवं णिलोपस्य स्थानिवद्भावेन कुत्वाभावान्मर्क इति न सिध्येदिति वाच्यम् । पूर्वत्रासिद्धे तदभावात् । शो तनूकरणे, अस्मादपि बाहुलकात्कन् । 'शाको द्वीपान्तरेऽपि च । शक्तौ द्रुमविशेषे च पुमान् हरितके स्त्रियाम्' इति मेदिनी ॥ **३२४ नौ हः** । ओहाक् त्यागे । अस्मान्निशब्दे उपपदे कन्स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३२५ । नौ सदेर्डिच्च । 'निष्कोऽस्त्री हेम्नि तत्पले' ॥ **३२६ । स्यमेरीट् च ।** स्यमीको वल्मीकः वृक्षभेदश्च । 'इट्-ह्रस्वः' इति केचित्, स्यमिकः ॥ **३२७ । अजियुधूनीभ्यो दीर्घश्च ।** 'वीकः स्याद्वातपक्षिणोः' । यूका । धूको वायुः । नीको वृक्षविशेषः ॥ **३२८ । ह्रियो रश्च लो वा ।** 'ह्रीका ह्लीका त्रपा मता' ॥ **३२९ । शकेरुनोन्तोन्त्युनयः ।** उन-उन्त-उन्ति-उनि-एते चत्वारः स्युः । शकुनः, शकुन्तः, शकुन्तिः, शकुनिः ॥ **३३० । भुवो झिच् ।** भवन्तिः–वर्तमानकालः । बाहुलकादवेश्च, अवन्तिः । वदेः–वदन्तिः । 'किंवदन्ती जनश्रुतिः' । **३३१ । कन्युच् क्षिपेश्च ।** चाद्भुवः । 'क्षिपण्युर्वसन्तः' इत्युज्ज्वलदत्तः । 'भुवन्युः स्वामिसूर्ययोः' ॥ **३३२ । अनुङ् नदेश्च ।** चात्क्षिपेः । नदनुर्मेघः । क्षिपणुर्वातः ॥ **३३३ । कॄवृदारिभ्य उनन् ।** 'करुणो वृक्षभेदः स्यात्करुणा च कृपा मता' । वरुणः । दारुणम् ॥ **३३४ । त्रो रश्च लो वा ।** 'तरुणस्तलुनो युवा' ॥ **३३५ । क्षुधिपिशिमिथिभ्यः कित् ।** क्षुधुनो म्लेच्छजातिः । पिशुनः । मिथुनम् ॥ **३३६ । फलेर्गुक्च ।** फल्गुनः पार्थः । प्रज्ञाद्यण्, फाल्गुनः ॥ **३३७ । अशेर्लश्च ।** लशुनम् ॥ **३३८ । अर्जेर्णिलुक् च ।** अर्जुनः ॥ **३३९ । तृणाख्यायां चित् ।** चित्त्वादन्तोदात्तः । अर्जुनं तृणम् ॥ **३४० । अर्तेश्च ।** अरुणः ॥ **३४१ । अजियमिशीङ्भ्यश्च ।** 'वयुनं देवमन्दिरम्' । यमुना । शयुनोऽजगरः ॥ **३४२ । वृतॄवदिहनिकमिकषिभ्यः**

'निहाका गोधिका समे' इत्यमरः ॥ **३२५ नौ सदेः–।** षद्लृ विशरणे, अस्मान्निशब्दे उपपदे कन् स्यात् स च डित् । डित्त्वाट्टिलोपः । 'सदिरप्रतेः' इति षत्वम् । 'निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः । वक्षोलंकरणे हेममात्रे हेमपलेऽपि च' इति मेदिनी ॥ **३२६ स्यमेः–।** स्यमु शब्दे अस्मात्कन्स्यात्तस्य च ईडागमः । 'स्यमीका नीलिकायां स्त्री स्यमीको नाकुवृक्षयोः' इति मेदिनी ॥ **३२७ अजि–।** अज गतिक्षेपणयोः, यु मिश्रणे, धूञ् कम्पने, णीञ् प्रापणे, एभ्यः कन् स्यादेषां दीर्घश्च । तत्सामर्थ्याद्गुणाभावः । अजेर्वीभावः ॥ **३२८ ह्रियः–।** ह्री लज्जायाम्, अस्मात्कन्धातोर्दीर्घलं च, तत्सामर्थ्याद्गुणाभावः ॥ **३२९ शकेः–।** शक्लृ शक्तौ । 'शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः' इत्यमरः । 'शकुनस्तु पुमान्पक्षिमात्रप्रश्नविशेषयोः । शुभशंसिनिमित्ते च शकुनं स्यान्नपुंसकम्' इति मेदिनी । 'शकुन्तः कीटभेदे स्याद्भासपक्षिविहङ्गयोः' इति । 'शकुनिः पुंसि विहगे सौबले करणान्तरे' इति च ॥ **३३० भुवः–।** भू सत्तायाम् । अस्मात् झिच् स्यात् । 'झोऽन्तः', 'कृदिकारात्–' इति ङीष्, भवन्ती=लटः संज्ञा । तथा च 'अस्तिर्भवन्तीपरः प्रयोक्तव्यः' इति भाष्यम् । **बाहुलकात्कमेरपि** प्रत्ययादिलोपे धातोः कुशब्दादेशः । कुन्तिः । 'इतो मनुष्यजातेः' इति ङीष्, 'कुन्ती पाण्डुप्रियायां च शल्लक्यां गुग्गुलद्रुमे' इति मेदिनी ॥ **—अवन्तिरित्यादि ।** अव रक्षणे, वद व्यक्तायां वाचि, आभ्यामपि झिच् ॥**—वदन्तीति ।** 'कृदिकारात्–' इति ङीष् ॥ **३३१ कन्युच्–।** क्षिप प्रेरणे, भू सत्तायाम् । 'क्षिपण्युस्तु पुमान् देहे सुरभौ वाच्यलिङ्गके' इति मेदिनी । 'भुवन्युः स्यात्पुमान्भानौ ज्वलने शशलाञ्छने' इति विश्वमेदिन्यौ ॥ **३३२ अनुङ्–।** णद अव्यक्ते शब्दे । अस्मादनुङ्प्रत्ययः स्यात् ॥**—क्षिपणुरिति ।** ङित्त्वाद्गुणाभावः ॥ **३३३ कॄवृ–।** कॄ विक्षेपे, वृञ् वरणे, दॄ विदारणे, ण्यन्तः । 'करुणस्तु रसे वृक्षे कृपायां करुणा मता' इति विश्वमेदिन्यौ । वरुणस्तरुभेदेऽप्सु प्रतीचीपतिसूर्ययोः' इति विश्वः । 'दारुणं भीषणं भीष्मम्' इत्यमरः । 'दारुणो रसभेदे ना त्रिषु तु स्याद्भयावहे' इति मेदिनी ॥ **३३४ त्रो रश्च–।** तॄ प्लवनतरणयोः,अस्मादुनन्स्यात् । 'तरुणं कुब्जपुष्पे ना रुचके यूनि तु त्रिषु' इति मेदिनी ॥ गौरादित्वान् ङीषी–'तरुणी तलुनीति च' इति द्विरूपेषु विश्वः ॥ **३३५ क्षुधि–।** क्षुध बुभुक्षायाम्, पिश अवयवे, अयं दीपनायामपि । मिथिः सौत्रो धातुः । 'पिशुनो दुर्जनः खलः' इत्यमरः । 'पिशुनं कुङ्कुमे स्मृतम् । कपिवक्त्रे च काके ना सूचकक्रूरयोस्त्रिषु । पृक्कायां पिशुना स्त्री स्यात्' इति मेदिनी । 'मिथुनं न द्वयो राशिभेदे स्त्रीपुंसयुग्मके' इति च ॥ **३३६ फलेः–।** फल निष्पत्तौ, अस्मादनन् गुगागमश्च धातोः । 'फल्गुनस्तु गुडाकेशे नदीजार्जुनभूरुहे । तपस्यसंज्ञमासे तत्पूर्णिमायां च फाल्गुनी' इति मेदिनी ॥**—फाल्गुन इति ।** 'फल्गुनः फाल्गुनोऽर्जुने' इति द्विरूपकोशः ॥ **३३७ अशेः–।** अश भोजने अस्मादुनन् धातोर्लशादेशश्च । लशुनं महाकन्दः । 'लशुना लशुनं वेश्म करमलं विश्वमश्ववत्' इति मध्यतालव्येषु विश्वः । 'लसश्च' इति दन्त्यमध्यपाठस्तु प्रामादिकः ॥ **३३८ अर्जेः–।** ऋज गतिस्थानार्जनोपार्जनेषु, अस्माण्ण्यन्तादुनन् स्यात् णेश्च लुक् । इह 'णेरनिटि' इति णिलोपेनैव सिद्धे 'णिलुक् च'इत्युक्तेः फलं चिन्त्यम् ॥ **३२९ 'अर्जुनः** ककुभे पार्थे कार्तवीर्यमयूरयोः । मातुरेकसुतेऽपि स्याद्धवले पुनरन्यवत् । नपुंसकं तृणे नेत्ररोगे वाप्यर्जुनी गवि । उषायां बाहुदानद्यां कुट्टन्यामपि च क्वचित्' इति विश्वमेदिन्यौ ॥ **३४० अर्तेश्च ।** ऋ गतौ, अस्मादुनन्स्यात्स च चित् । 'अरुणोऽव्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ । निःशब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु । अरुणातिविषाश्यामामञ्जिष्ठात्रिवृतासु च' इति मेदिनी ॥ **३४१ अजि–।** अज गतिक्षेपणयोः, यम उपरमे, शीङ् स्वप्ने, एभ्य उनन् स्यात्स च चित् । अजेर्वीभावः, वीयते गम्यतेऽत्रेति **वयुनम् ।** 'विश्वानि देव वयुनानि विद्वान्' इति मन्त्रे वयुनानि प्रज्ञानानिति वेदभाष्यम् । वैदिकनिघण्टौ प्रज्ञापर्याये प्रशस्यपर्याये च वयुनशब्दः पठितः । **'यमुना** शमनस्वसा' इत्यमरः ॥ **३४२ वृ तॄ–।** वृ वरणे, तॄ प्लवनतरणयोः, वद व्यक्तायां वाचि, हन हिंसागत्योः, कमु कान्तौ, कष हिंसायाम् ॥**—वर्तेः ।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सः । वर्सः । तर्सम् । 'तर्सः प्लवसमुद्रयोः' । वत्सः । वत्सम्- वक्षः । हंसः । 'कंसोऽस्त्री पानभाजनम्' । कक्षं नक्षत्रम् ॥ ३४३ । प्लुषेरच्चोपधायाः । प्लक्षः ॥ ३४४ । मनेर्दीर्घश्च । मांसम् ॥ ३४५ । अशेर्देवने । अक्षः ॥ ३४६ । स्नुव्रश्चिकृत्यृषिभ्यः कित् । स्नुषा । वृक्षः । कृत्सम्उदकम् । ऋक्षं नक्षत्रम् ॥ ३४७ । ऋषेर्जातौ । 'ऋक्षोऽद्रिभेदे भल्लूके शोणके कृतवेधने । ऋक्षमुक्तं च नक्षत्रे'-इति विश्वः ॥ ३४८ । उन्दिगुधिकुषिभ्यश्च । उत्सः प्रस्रवणम् । गुत्सः स्तबकः । कुक्षो जठरम् ॥ ३४९ । गृधिपण्योर्दकौ च । गृत्सः कामदेवः । पक्षः ॥ ३५० । अशेः सरः । अक्षरम् ॥ ३५१ । वसेश्च । वत्सरः ॥ ३५२ । सपूर्वाच्चित् । संवत्सरः ॥ ३५३ । कृधूमदिभ्यः कित् । बाहुलकान्न षत्वम्, 'कृसरः स्यात्तिलौदनम्' । धूसरः । मत्सरः । 'मत्सरा मक्षिका ज्ञेया भम्भराली च सा मता' ॥ ३५४ । पतेरश्च लः । पत्सलः पन्थाः ॥ ३५५ । तन्यृषिभ्यां क्सरन् । 'तसरः सूत्रवेष्टने' । ऋक्षरः-ऋत्विक् ॥

तर्स इति । 'तितुत्र-' इति नेट् । षत्वे तु न भवति, बाहुलकेन षत्वे कर्तव्ये प्रत्ययसंज्ञाया अप्रवृत्तेः । कक्षशब्दे तु षत्वं भवत्येव । एतच्च भाष्यकैयटादिपर्यालोचनयोक्तम् । कथं तर्हि सर्वैरप्युणादिवृत्तिकारैरिह षत्वमुदाहृतमिति चेत् । **अत्राहुः**—अस्तु भाष्यप्रामाण्यात् वर्सं तर्समिति दन्त्यपाठोऽपि साधुः । पक्षे तु षत्वमस्तु । बाहुलकलभ्यषत्वाभावस्य पाक्षिकत्वेऽपि बाधकाभावात् । वृषितृषिभ्यां घञि कृते, ण्यन्तादेरचि 'घञर्थे कविधानम्' इति ण्यन्तात्कप्रत्यये वा कृते वर्षतर्षशब्दयोर्दुर्वारत्वात्, 'अज्विधौ भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम्' इत्यत्र 'वर्षम्' इत्याकरे उदाहृतत्वाच्च । तस्मादिह द्विरूपता फलितेति । 'वर्षोऽस्त्री भारतादौ स्याजम्बूद्वीपाब्दवृष्टिषु । प्रावृट्काले स्त्रियां भूम्नि' इति मेदिनी । 'तर्षो लिप्सोदन्ययोः' इति च । 'पुत्रादौ तर्णके वर्षे वत्सः क्लीबं तु वक्षसि' इति त्रिकाण्डशेषः । 'सद्योजातस्तु तर्णकः' । 'हंसः स्यान्मानसौकसि । निर्लोभनृपविष्ण्वर्कपरमात्मसु मत्सरे । योगभेदे मन्त्रभेदे शारीरमरुदन्तरे । तुरङ्गमप्रभेदे च' इति मेदिनी । 'कंसोऽस्त्री तैजसद्रव्ये कांस्ये मानेऽसुरे तु ना' इति च । 'कंसो दैत्यान्तरे स्मृतः । कांस्ये च कांस्यपात्रे च मानभेदे च कीर्तितः' इति विश्वः । 'कक्षा स्यादन्तरीयस्य पश्चादञ्चलपल्लवे । स्पर्धायां ना तु दोर्मूलकच्छवीरुत्तृणेषु च' इति मेदिनी ॥ ३४३ **प्लुषेः-।** प्लुष दाहे, अस्मात्सः स्यादुपधाया अकारश्च । 'प्लक्षो जटी गर्दभाण्डद्वीपभित्कुञ्जराशने' इति मेदिनी । 'प्लक्षो द्वीपविशेषे स्यात्पर्कटीगर्दभाण्डयोः । पिप्पले द्वारपार्श्वे च गृहस्य परिकीर्तितः' इति विश्वः ॥ ३४४ **मनेः** । मन ज्ञाने । 'मांसं स्यादामिषे क्लीबं कक्कोलीजट्योः स्त्रियाम्' इति मेदिनी ॥ ३४५ **अशेः** । अशू व्याप्तौ, अस्माद्देवने वाच्ये सः स्यात् । 'व्रश्चभ्रस्ज--' इत्यादिना षत्वादिकार्यम् । 'अथाक्षमिन्द्रिये । ना द्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे' इत्यमरः । 'अक्षो ज्ञानात्मशकटव्यवहारेषु पाशके । रुद्राक्षेन्द्राक्षयोः सर्पे बिभीतकतरावपि । चक्रे कर्षे पुमान् क्लीबं तुत्थसौवर्चलेन्द्रिये' इति मेदिनी ॥ ३४६ **स्नुव्रश्चि-।** ष्णु प्रस्रवणे, ओव्रश्चू छेदने, कृती छेदने, ऋषी गतौ, एभ्यः सः कित्स्यात् । **स्नुषा** पुत्रवधूः ॥—**वृक्ष इति** । सस्य कित्वाद् 'ग्रहिज्या-' इति संप्रसारणम् । 'ऋक्षः पर्वतभेदे स्याद्भल्लुके शोणके पुमान् । कृतवेधेऽप्यन्यलिङ्गं नक्षत्रे पुंनपुंसकम्' इति मेदिनी ॥ ३४७ **ऋषेर्जातौ** । पूर्वसूत्रेणैव सिद्धे ऋषेर्जातावेवेति नियमार्थं सूत्रम् । तेनान्येभ्यस्त्रिभ्यः केवलयौगिकत्वेऽपि सप्रत्ययो भवति ॥ ३४८ **उन्दिगुधि-।** उन्दी क्लेदने, गुध रोषे, कुष निष्कर्षे, एभ्यः सः कित्स्यात् । 'अनिदिताम्-' इति नलोपः । 'उत्सः प्रस्रवणं वारि' इत्यमरः । 'गुत्सः स्यात्स्तबके स्तम्बे हारभिद्ग्रन्थिपर्णयोः' इति मेदिनी । **गुच्छश्च**-'गुत्सो गुच्छो गुलुच्छवत्' इति द्विरूपकोशात् । 'स्याद् गुच्छः स्तबके स्तम्बे हारभेदकलापयोः' इति च वर्गद्वितीयान्ते मेदिनीकोशाच्च ॥ ३४९ **गृधि-।** गृधु अभिकाङ्क्षायाम्, पण व्यवहारे स्तुतौ च ॥ ननु गृधेश्चर्त्वेन गृत्स इति सिद्धे दकारविधानं व्यर्थमिति चेत् । मैवम् । चर्त्वस्यासिद्धत्वेन 'एकाचो बशः-' इति भष्भावप्रसङ्गात् । न चैवमपि प्रक्रियालाघवाय तकार एव विधीयतामिति शङ्क्यम् । 'चयो द्वितीया' इति पक्षे तकारस्य थकारापत्तेः । 'पक्षो मासार्धके पार्श्वे ग्रहे साध्यविरोधयोः । केशादेः परतो वृन्दे बले सखिसहाययोः । चुल्लीरन्ध्रे पतत्रे च राजकुञ्जरपार्श्वयोः' इति विश्वमेदिन्यौ ॥ ३५० **अशेः** । अशू व्याप्तौ, 'व्रश्च-' इत्यादिना षत्वादिकार्यम् । 'अक्षरं स्यादपवर्गे परमब्रह्मवर्णयोः' इति हेमचन्द्रः । 'अशेः सरन्' इत्युज्ज्वलदत्तादिपाठस्तु प्रामादिकः, नित्स्वरापत्तेः । इष्यते तु प्रत्ययस्वरेणाक्षरशब्दस्य मध्योदात्तत्वम् । 'ऋचो अक्षरे परमे व्योमन्' इत्यादिऋङ्मन्त्रेषु, 'त्रीणि च शतानि षष्टिश्चाक्षराणि' इति यजुषि च तथैव पाठात् । अत एव 'अश्नोतेर्वा सरोऽक्षरम्' इति द्वितीयाह्निकान्ते भाष्यकृतोक्तम् ॥ ३५१ **वसेश्च-।** वस निवासे, अस्मादपि सरः स्यात् । 'सः स्यार्धधातुके' इति तत्त्वम् ॥ ३५२ **सपूर्वाच्चित्** । पूर्वसहिताद्वसतेः परः सः स्यात्स च चित् । चित्त्वादन्तोदात्तः । 'इदुवत्सराय परिवत्सराय' । संपूर्वादिति पाठान्तरम् । तच्च लक्ष्यविरोधादुपेक्ष्यम् ॥ ३५३ **कृधू-।** डुकृञ् करणे, धूञ् कम्पने, मदी हर्षे, एभ्यः सरः कित्स्यात् । 'कृसरः स्यात्-' इत्यादि हारावलीस्थम् । 'धूसरी किन्नरीभेदे ना खरे त्रिषु पाण्डुरे' इति मेदिनी । 'मत्सरा मक्षिकायां स्यान्मात्सर्यक्रोधयोः पुमान् । असह्यपरसंपत्तौ कृपणे चाभिधेयवत्' इति च । 'मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु' इत्यमरः । 'अथ मत्सरः । असह्यपरसंपत्तौ मात्सर्ये कृपणे क्रुधि' इति विश्वः । वेदे तु 'मदी हर्षे' इति योगार्थं पुरस्कृत्य प्रयुज्यते—'इन्दुमिन्द्राय मत्सरम्' । 'तं सिन्धवो मत्सरमिन्द्रयानम्' इत्यादि । समत्सरं हर्षहेतुमिति तद्भाष्यम् ॥ ३५४ **पतेः-।** पत्लृ गतौ, अस्मात्सरः स्याद्रेफस्य लश्च ॥ ३५५ **तन्यृषि** । तनु विस्तारे, ऋषी गतौ । अमरोक्तिमाह—**तसर इति** । कित्त्वात् 'अनुदात्तोपदेश-' इत्यादिनानुनासिकलोपः ॥—**ऋक्षरः—ऋत्वि-**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३५६ । **पीयुक्कणिभ्यां कालन् ह्रस्वः संप्रसारणं च** । पीयुः सौत्रः । पियालो वृक्षभेदः । कुणालो देशभेदः ॥ ३५७ । **कठिकुषिभ्यां काकुः** । कठाकुः पक्षी । कुषाकुरग्निः सूर्यश्च ॥ ३५८ । **सर्तेर्दुक् च** । 'सृदाकुर्वातसरितोः' ॥ ३५९ । **वृतेर्वृद्धिश्च** । वार्ताकुः । बाहुलकादुकारस्य अत्वम्, वार्ताकम् ॥ ३६० । **पर्देर्नित्संप्रसारणमल्लोपश्च** । 'पृदाकुर्वृश्चिके व्याघ्रे चित्रके च सरीसृपे' ॥ ३६१ । **सृयुवचिभ्योऽन्युजागूजक्नुचः** । अन्युच्, आगूच्, अक्नुच्-एते क्रमात्स्युः । 'सरण्युर्मेघवातयोः' । यवागूः । 'वचक्नुर्विप्रवाग्मिनोः' ॥ ३६२ । **आनकः शीङ्भियः** । शयानकोऽजगरः । भयानकः ॥ ३६३ । **आणको लूधूशिङ्घिधाञ्भ्यः** । लवाणकं दात्रम् । धवाणको वातः । शिङ्घाणकः श्लेष्मा । पृषोदरादित्वात्पक्षे कलोपः, 'शिङ्घाणं नासिकामले' । 'धाणको दीनारभागः' ॥ ३६४ । **उल्मुकदर्विहोमिनः** । 'उष दाहे' पस्य लः, मुक्प्रत्ययश्च, 'उल्मुकं ज्वलदङ्गारम्' । दृणातेर्विः, दर्विः । जुहोतेर्मिनिः, होमी ॥ ३६५ । **ह्रियः कुक् रश्च लो वा** । ह्रीकुः-ह्लीकुः-लज्जावान् ॥ ३६६ । **हसिमृग्रिण्वाऽमिदमिलूपूधुर्विभ्यस्तन्** । दशभ्यस्तन् स्यात् । 'तितुत्र-' ३१६३ इति नेट्, हस्तः । मर्तः । गर्तः । एतः कुर्बरः । वातः । अन्तः । दन्तः । 'लोतः स्यादश्रुचिह्नयोः' । 'पोतो बालवहित्रयोः' । धूर्तः । **बाहुलकात्-तुसेर्दीर्घश्च**, तूस्तं पापम्, धूलिर्जटा च ॥ ३६७ । **नञ्याप इट् च** । नापितः ॥ ३६८ । **तनिमृङ्भ्यां किच्च** । ततम् । मृतम् ॥ ३६९ । **अञ्जिघृसिभ्यः** क्तः ।

गिति । 'ऋक्षरं वारिधारायामृक्षरस्त्वृत्विजि स्मृतः' इति मेदिनी । 'अनृक्षरा ऋजवः सन्तु पन्थाः' इति मन्त्रस्य वेदभाष्ये तु ऋक्षरः=कण्टक इति व्याख्यातम् ॥ **३५६ पीयुक्कणिभ्याम्-।** 'अण रण' इति दण्डके क्वणिः पठ्यते । स च शब्दार्थकः । आभ्यां कालन् स्यात्, यथाक्रमं ह्रस्वः संप्रसारणं च । 'राजादनं पियालः स्यात्' इत्यमरः । 'प्रियालः स्यात्पियालवत्' इति द्विरूपकोशः । **बाहुलकाद्भ**ञ्जेरपि कालन् । कित्त्वान्नलोपः । न्यङ्क्वादित्वात्कुत्वम् । **भगालं** नरमस्तकम् । मत्वर्थे इनिः । 'चण्डिकान्तो भगाली च लेलिहानो वृषध्वज' इति राजशेखरः ॥ **३५७ कटिकुषि-।** कठ कृच्छ्रजीवने, कुष निष्कर्षे । 'कुषाकुः कपिवह्न्यर्के ना परोत्तापिनि त्रिषु' इति मेदिनी । उज्ज्वलदत्तस्तु 'कठिकषिभ्याम्-' इति पठित्वा कष शिषेति दण्डकधातुमुपन्यस्य कषाकुरित्युदाजहार । तत्कोशविरुद्धम्, मेदिनीकोशे ह्युकारप्रक्रमे पाठात् ॥ **३५८ सर्तेः-।** सृ गतौ, अस्मात्काकुः स्याद्धातोर्दुगागमश्च । '**सृदाकु**र्नाऽनिले चक्रे ज्वलने प्रतिसूर्यके' इति मेदिनी ॥ **३५९ वृतेः-।** वृतु वर्तने, '**वार्ताकु**रपि वार्ताकी वृन्ताकोऽपि च दृश्यते' इति द्विरूपे विश्वः । 'वार्ताकी हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षणी' इत्यमरः । 'वार्ताकं पित्तलं किंचिदङ्गारपरिपाचितम्' इति वैद्यशास्त्रम् ॥ **३६० पर्देः-।** पर्द कुत्सिते शब्दे । अस्मात्काकुः स्यात्स च नित् । धातो रेफस्य संप्रसारणमकारलोपश्च । विश्वकोशस्थमाह—**पृदाकुरिति** । 'पृदाकुर्वृश्चिके व्याघ्रे सर्पचित्रकयोः पुमान्' इति मेदिनी ॥ **३६१ सृयु-।** सृ गतौ, यु मिश्रणे, वच परिभाषणे । '**सरण्यु**स्तु पुमान् वारिवाहे स्यान्मातरिश्वनि' इति मेदिनी । 'सरण्युरस्य सूनुरश्वः' इति मन्त्रस्य भाष्ये सरण्युः=शीघ्रगामीति व्याख्यातम् । '**यवागू**रुष्णिका श्राणा विलेपी तरला च सा' इत्यमरः । '**वचक्नु**स्तु पुमान् विप्रे वावदूकेऽभिधेयवत्' इति मेदिनी ॥ **३६२ आनकः-।** शीङ् स्वप्ने, ञिभी भये, बिभेत्यस्मादिति **भयानको** भयंकरः । 'भयानकः स्मृतो व्याघ्रे रसे राहौ भयंकरे' इति मेदिनी ॥ **३६३ आणको-।** लूञ् छेदने, धूञ् कम्पने, शिघि आघ्राणे, डुधाञ् धारणपोषणयोः । हारावलीस्थमाह—**शिङ्घाणमिति** । 'शिङ्घाणं काचपात्रे स्याल्लोहनासिकयोर्मले' इति विश्वः । 'शिङ्घाणः फेनडिण्डीरो नक्ररेतश्च पिच्छिलः' इति विक्रमादित्यकोशः ॥ **३६४ उल्मुक-।** एते निपात्यन्ते । निपातनप्रकारमेवाह—**उष दाहे इत्यादि** । हारावलीस्थमाह—**उल्मुकमिति** । 'दर्विः कम्बिः खजाका च' इत्यमरः ॥ **३६५ ह्रियः-।** 'ह्री लज्जायाम्' अस्मात्कुक्प्रत्ययः स्यात् । ककारो गुणनिषेधार्थः ॥ **३६६ हसि-।** हसने, मृङ् प्राणत्यागे, गॄ निगरणे, इण् गतौ, वा गतिगन्धनयोः, अम गत्यादिषु, दमु उपशमे, लूञ् छेदने, पूञ् हसे पवने, धुर्वी हिंसायाम् । '**हस्तः** करे करिकरे सप्रकोष्ठकरेऽपि च । ऋक्षे केशात्परो व्राते' इति मेदिनी ॥ अत्रायमर्थः—केशवाचकात्परो यो हस्तशब्दः स समूहवाची । तथा च केशहस्तशब्दः केशसमूहशब्दपर्याय इति । **मर्तो** भूलोकस्तत्र भवो मर्त्यः, दिगादेराकृतिगणत्वाद्यत् । **गर्त**स्त्रिगर्तभेदे स्यादवटे च कुकुन्दरे' इति मेदिनी ॥—**एत इति** । 'एतः कर्बुर आगते । अन्तःस्वरूपे नाशे वा न स्त्री शेषेऽन्तिके त्रिषु' इति च । '**दन्तो**ऽद्रिकटके कुञ्जे दशने चौषधौ स्त्रियाम्' इति च मेदिनी । 'लोतमश्रुणि चोरिते' इति विश्वः । 'क्तक्तवतू निष्ठा' इति सूत्रे लोतो मेष इति कैयटः । '**पोतः** शिशौ वहित्रे च' इति विश्वमेदिन्यौ ॥—**धूर्त इति** । 'लोपो व्योर्वलि' इति वलोपः, 'राल्लोपः' इत्यनेन लोपस्तु क्विझलोरिति क्तिन्नुवृत्तिपक्षे बोध्यः । 'हलि च' इति दीर्घः । '**धूर्त** तु खण्डलवणे धत्तूरे ना शठे त्रिषु' इति मेदिनी ॥—**तूस्तमिति-।** तुस खण्डन इत्यस्मात्तन् ॥ **३६७ नञ्या-।** आप्लृ व्याप्तौ, अस्मान्नञ्युपपदे तन्स्यादिडागमश्च । बाहुलकान्नञो नलोपाभावः ॥ **३६८ तनि-।** तनु विस्तारे, मृङ् प्राणत्यागे, आभ्यां तन्प्रत्ययः स्यात्स च कित् । कित्त्वादनुनासिकलोपः । '**ततं** वीणादिकं वाद्यम्' इत्यमरः । 'अथ ततं व्याप्ते विस्तृते च त्रिलिङ्गकम् । क्लीबं वीणादिवाद्ये स्यात्पुंलिङ्गस्तु समीरणे' इति मेदिनी । '**मृतं** तु याचिते मृत्यौ क्लीबं मृत्युमति त्रिषु' इति च ॥ **३६९ अञ्जि-।** अञ्जू व्यक्तिम्रक्षणादौ, घृ क्षरणदीप्त्योः,

१ बालमनोरमायां 'कटिकुषिभ्यां काकुः' इति सूत्रम् । कटे वर्षावरणयोरिति तस्य व्याख्यानञ्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तः । भक्तम् । घृतम् । सितम् ॥ ३७० । द्रुतनिभ्यां दीर्घश्च । दूतः । तातः ॥ ३७१ । जेर्मुट् चोदात्तः । जीमूतः ॥ ३७२ । लोष्टपलितौ । लुनातेः क्तः, तस्य सुट् धातोर्गुणः, लोष्टम् । पलितम् ॥ ३७३ । हृश्याभ्यामितन् । हरितश्येतौ वर्णभेदौ ॥ ३७४ । रुहे रश्च लो वा । 'रोहितो मृगमत्स्ययोः' । लोहितं रक्तम् ॥ ३७५ । पिशेः किच्च । पिशितं मांसम् ॥ ३७६ । क्षुदक्षिस्पृहिगृहिभ्यः आय्यः । श्रवाय्यो यज्ञपशुः । दक्षाय्यो गरुडो गृध्रश्च । स्पृहयाय्यः । गृहयाय्यो गृहस्वामी ॥ ३७७ । दिधिषाय्यः । दधातेर्द्वित्वमित्वं षुक् च, 'मित्र इव यो दिधिषाय्योऽभूत्' ॥ ३७८ । वृञ एण्यः । वरेण्यः ॥ ३७९ । स्तुवः क्सेय्यश्छन्दसि । 'स्तुषेय्यं पुरुवर्चसम्' ॥ ३८० । राजेरन्यः । राजन्यो वह्निः ॥ ३८१ । शॄरम्योश्च । शरण्यम् । रमण्यम् ॥ ३८२ । अर्तेर्निच्च । अरण्यम् ॥ ३८३ । पर्जन्यः । 'पृषु सेचने' षस्य जः, 'पर्जन्यः शक्रमेघयोः' ॥ ३८४ । वदेरान्यः । 'वदान्यस्त्यागिवाग्मिनोः' ॥

षिञ् बन्धने, एभ्यः क्तः स्यात् । निष्ठासंज्ञा तु एतस्य न भवति, उणादीनामव्युत्पन्नत्वाद्बाहुलकाद्वा । अन्यथा 'निष्ठा च द्व्यजनात्' इत्याद्युदात्तत्वं स्यादिति 'क्तक्तवतू निष्ठा' इति सूत्रे कैयटः । **अक्तं** परिच्छिन्नम् । 'अक्तः परिमाणवाचकः' इति भाष्यस्य कैयटेन तथा व्याख्यातत्वात् । 'अक्तं व्याप्ते च संकुले' इति विश्वः, इत्युज्ज्वलदत्तेनोक्तम्, तच्च लिपिभ्रमप्रयुक्तम् । विश्वकोशे हि 'व्यस्तं व्याप्ते च संकुले' इति स्थितत्वात् । तथा च मेदिन्यां वकारादिप्रक्रमे—'व्यस्तं तु व्याकुले व्याप्ते' इत्युक्तम् । '**घृत**माज्ये जले क्लीबं प्रदीप्ते त्वभिधेयवत्' । '**सितम**वसिते च बद्धे धवले त्रिषु शर्करायां स्त्री' इति मेदिनी । बाहुलकात् 'ऋ गतौ' इत्यस्मात् क्तः । '**ऋत**मुञ्छशिले जले । सत्ये दीप्ते पूजिते स्यात्' इति मेदिनी ॥ **३७० द्रुतनि-।** दु गतौ, तनु विस्तारे, आभ्यां क्तः स्याद्धातोर्दीर्घश्च । दूतः प्रेष्यः । गौरादित्वान्ङीष्, दूती । कथं तर्हि 'तेन दूति विदितं निषेदुषा' इति रघुरिति चेत् । **अत्राहुः**—दूङ् परितापे इत्यस्मात् क्तिनि दूतिरिति । 'दूत्यां दूतिरपि स्मृता' इति द्विरूपकोशः । 'तातोऽनुकम्प्ये जनके' इति विश्वमेदिन्यौ । बाहुलकात् 'शीङ् स्वप्ने' इत्यस्मादपि क्तः । **शीता** लाङ्गलपद्धतिः, रामपत्नी च । 'शीता नभःसरिति लाङ्गलपद्धतौ च शीता दशाननरिपोः सहधर्मिणी च । शीतं स्मृतं हिमगुणे च तदन्विते च शीतोऽलसे च बहुवारतरौ च दृष्टः' इति तालव्यादौ धरणिः । सीता दन्त्यादिरप्यस्ति । 'सीता लाङ्गलपद्धतिः । वैदेहीस्वर्गगङ्गासु' इति दन्त्यादौ मेदिनीकोशात् । 'सीता लाङ्गलरेखा स्याद्व्योमगङ्गा च जानकी' इति दन्त्यादौ रभसकोशाच्च ॥ **३७१ जेः-।** जि जये, अस्मात् क्तप्रत्ययस्तस्योदात्तमुडागमः स्यात् । दीर्घ इत्यनुवृत्त्या धातोर्दीर्घश्च स्यात् । इदं सूत्रमनार्षमिति केचित् । अत एव वृत्त्यादिग्रन्थे पृषोदरादिषु जीमूतशब्द उदाहृतः । 'जीमूतोऽद्रौ भृतिकरे देवताडे पयोधरे' इति मेदिनी । 'वेणी खरागरी देवताडो जीमूत इत्यपि' इत्यमरः । 'जीमूतः स्याद्वृत्तिकरे शक्रेऽद्रौ घोषके घने' इति विश्वः ॥ **३७२ लोष्ट-।** लूञ् छेदने, पल गतौ, एतौ क्तान्तौ निपात्येते । 'लोष्टानि लेष्टवः पुंसि' इत्यमरः । अत्र पुंसीत्युभयान्वयि । तेन पुंनपुंसकलिङ्गो लोष्टशब्दः । तथा च 'स्थानेऽन्तरतमे'-भाष्यम्—'लोष्टः क्षिप्तो बाहुवेगं गत्वा' इत्यादि । अत एव 'लेष्टः शण्डेऽपि लोष्टः स्यात्' इति पुंलिङ्गकाण्डे गोपालितः । 'पलितं शैलजे तापे केशपाके च कर्दमे' इति मेदिनी ॥ **३७३ हृश्या।** हृञ् हरणे, श्यैङ् गतौ । 'हरिता स्त्री च दूर्वायां हरिद्वर्णयुतेऽन्यवत्' इति मेदिनी । 'शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः' इत्यमरः ॥ **३७४ रुहेः-।** रुह बीजजन्मनि प्रादुर्भावे च । अस्मादितन् । 'रोहितं कुङ्कुमे रक्ते ऋजुशक्रशरासने । पुंसि स्यान्मीनमृगयोर्भेदे रोहितकद्रुमे' । 'लोहितं रक्तगोशीर्षकुङ्कुमाजिकुचन्दने । पुमान् नदान्तरे भौमे वर्णे च त्रिषु तद्वति' इति मेदिनी ॥ **३७५ पिशेः-।** पिश अवयवे । अयं दीपनायामपि । अस्मादितन्स्यात्स च कित् । पिशितं मांसम् । 'मांस्यां स्त्री' इति मेदिनी । मांस्यां=जटामांस्याम् । तथा च 'जटा च पिशिता पेशी' इति धन्वन्तरिः ॥ **३७६ श्रुदक्षि-।** श्रु श्रवणे, दक्ष वृद्धौ, स्पृह ईप्सायाम्—गृहू ग्रहणे-चुरादावदन्तौ । 'उद्यतस्रुचे भवसि **श्रवाय्यः**' इति मन्त्रे श्रवाय्यो मन्त्रैः श्रवणीय इति वेदभाष्यम् । '**दक्षाय्यो** यो दम आस नित्यः' इत्यादिष्वपि यौगिकार्थ एव भाष्ये पुरस्कृतः ॥—**स्पृहयाय्यः** ॥ 'अयामन्ता-' इति णेरयादेशः । एवं—**गृहयाय्य इति । ३७७ दिधिषाय्य इति ।** डुधाञ् धारणपोषणयोः । उज्ज्वलदत्तस्तु 'दधिषाय्यः' इति सूत्रं पठित्वा दधिपूर्वात्स्यतेराय्यः षत्वं च । दधिषाय्यो घृतम्-इति व्याख्यत् । दशपादीवृत्तिकारस्तु 'धिष शब्दे' अस्य द्वित्वं गुणाभावः, अलं चाभ्यासस्य निपात्यत इत्याह । प्रसादकारादयोऽप्येवमेवाहुः । तदेतत्सर्वं प्रामादिकम् । 'मित्र इव यो दिधिषाय्योऽभूत्' इति वैदिकप्रयोगा**द्दिधिषाय्य** इत्येव सूत्रं युक्तमिति प्रामाणिकाः । **३७८ वृञः-।** वृञ् वरणे । वरेण्यः श्रेष्ठः ॥ **३७९ स्तुवः-।** ष्टुञ् स्तुतौ । स्तुषेय्यं=स्तोतव्यं पुरुवर्पसं=बहुरूपमिति वेदभाष्यम् । 'स्तुवः केय्यः' इति पठित्वा कित्वाद्गुणाभावे उवङि सति 'स्तुवेय्यः पुरन्दरः' इत्युदाहरन् उज्ज्वलदत्तस्तु उदाहृतश्रुतितद्भाष्यादिविरोधादुपेक्ष्यः । तस्मादिह क्सेय्यप्रत्ययं पठन् दशपादीवृत्तिकृदेव ज्यायानित्याहुः ॥ **३८० राजेः-।** राजृ दीप्तौ । क्षत्रियजातौ तु 'राजश्वशुराद्यत्-' इति यत्प्रत्यये राजन्य इत्यन्तस्वरितः ॥ **३८१ शॄरम्योः-।** शॄ हिंसायाम्, रम क्रीडायाम् । आभ्यामन्यः स्यात् ॥ **३८२ अर्तेः-।** ऋ गतौ । अस्मादन्यः, स च नित् । 'अटव्यरण्यं विपिनम्' इत्यमरः ॥ **३८३ पर्जन्यः ।** पृषु सेचने, षस्य जः । 'पर्जन्यो मेघशब्देऽपि ध्वनदम्बुदशक्रयोः' इति मेदिनी ॥ **३८४ वदेः-।** वद व्यक्तायां वाचि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३८५ । अमिनक्षियजिवधिपतिभ्योऽत्रन् । अमत्रं भाजनम् । नक्षत्रम् । यजत्रः । वधत्रमायुधम् । 'पतत्रं च तनूरुहम्' ॥ ३८६ । गडेरादेश्च कः । कडत्रम् । डलयोरेकत्वस्मरणात्—कलत्रम् ॥ ३८७ । वृञश्चित् । वरत्रा चर्ममयी रज्जुः ॥ ३८८ । सुविदेः कत्रः । 'सुविदत्रं कुटुम्बकम्' ॥ ३८९ । कृतेर्नुम् च । कृन्तत्रं लाङ्गलम् ॥ ३९० । भृमृदृशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतच् । दशभ्योऽतच् स्यात् । भरतः । मरतो मृत्युः । 'दर्शतः सोमसूर्ययोः' । यजतः-ऋत्विक् । पर्वतः । पचतोऽग्निः । अमतो रोगः । तमतस्तृष्णापरः । नमतः प्रह्वः । हर्यतोऽश्वः ॥ ३९१ । पृषिरञ्जिभ्यां कित् । पृषतो मृगो बिन्दुश्च । रजतम् ॥ ३९२ । खलतिः । स्खलतेः सलोपः, अतच्प्रत्ययान्तस्य इत्वं च, खलतिर्निष्केशशिराः ॥ ३९३ । शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः । सप्तभ्योऽथः स्यात् । शयथोऽजगरः । शपथः । रवथः कोकिलः । गमथः पथिकः पन्थाश्च । वञ्चथो धूर्तः । 'वन्दि' इति पाठे वन्द्यते वन्दते वा—वन्दथः स्तोता स्तुत्यश्च । जीवथ आयुष्मान् । प्राणथो बलवान् । बाहुलकात्—शमिदमिभ्याम् । 'शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः' ॥ ३९४ । भृञश्चित् । भरथो लोकपालः ॥ ३९५ । रुदिविदिभ्यां ङित् । रोदितीति रुदथः शिशुः । वेत्तीति विदथः ॥ ३९६ । उपसर्गे वसेः । आवसथो गृहम् । संवसथो ग्रामः ॥ ३९७ । अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच् । त्रयोदशभ्योऽसच् स्यात् । अततीति अतसो वायुरात्मा च । अवतीति अवसो राजा भानुश्च । चमत्यस्मिन् चमसः सोमपानपात्रम् । ताम्यत्यस्मिन् तमसोऽन्धकारः । नमसः-अनुकूलः । 'रभसो वेगहर्षयोः' । लभसो धनं याचकश्च । नभते नभ्यति वा नभस आकाशः । तपसः पक्षी चन्द्रश्च । पतसः पक्षी । 'पनसः कण्टकिफलः' ।

अजयकोशस्थमाह—**वदान्य इति** ॥ **३८५ अमिनक्षि-**। अम गत्यादिषु, नक्ष गतौ, यज देवपूजादौ, वध हिंसायाम्, पत्लृ गतौ ॥—**नक्षत्रमिति** । 'नभ्राण्नपात्–' इति सूत्रे नञः प्रकृतिभावे-नक्षत्रमिति साधितं, तत्तु व्युत्पत्त्यन्तरमिति बोध्यम् । **यजत्र**मग्निहोत्रमिति प्राञ्चः । वस्तुतस्तु यजत्रो यष्टव्यदेवता । 'संते वायुर्वातेन गच्छतां संयजत्रैरङ्गानि' इति मन्त्रे तथैव व्याख्यातत्वात् । अमरकोशस्थमाह—**पतत्रं चेति** ॥ **३८६ गडेः-**। गड सेचने, अस्मादत्रन् स्यादृकारस्य ककारादेशश्च । **'कलत्रं** श्रोणिभार्ययोः' इत्यमरः ॥ **३८७ वृञः-**। वृञ् वरणे अस्मादत्रन् चित्स्यात् । चित्त्वादन्तोदात्तः । 'नध्री वध्री **वरत्रा** स्यात्' इत्यमरः । 'वरत्रायां दार्वानह्यमानः' इत्यादौ चित्स्वरः स्पष्टः ॥ **३८८ सुविदेः कत्रः** । विद ज्ञाने । इह कत्रनिति नितं केचित्पठन्ति । तत्प्रामादिकम्, 'बृहस्पतेः सुविदत्राणि राध्या' इत्यादौ नित्स्वरादर्शनात्, कृदुत्तरपदप्रकृतिस्वरेण प्रत्ययस्वरस्यैव दर्शनाच्चेत्याहुः ॥ **३८९ कृतेः-**। कृती छेदने, अस्मात्कत्रः स्याद्धातोर्नुमागमश्च । 'धन्व च यत्कृन्तत्रं च' इति मन्त्रे कृन्तत्रं=कर्तनीयमरण्यमिति वेदभाष्यम् ॥ **३९० भृमृ-**। भृञ् भरणे, मृङ् प्राणत्यागे, दृशिर् प्रेक्षणे, यज देवपूजादौ, पर्व पूरणे, डुपचष् पाके, अम गतौ, तमु काङ्क्षायाम्, णम प्रह्वत्वे शब्दे च, हर्य गतिकान्त्योः । दशपाद्यां तु—भृदृशीङिति पठित्वा 'दृङ् आदरे' द्रियते-दरतः, शेते-शयतः, इत्युदाहृतम् । तन्न । 'रुशन्तमग्निं दर्शतं बृहन्तम्', 'तरणिर्विश्वदर्शतः' 'दैव्यो दर्शतो रथः' इत्यादिमन्त्रैस्तद्भाष्येण च विरोधात् । 'भरतो नाट्यशास्त्रे मुनौ नटे । रामानुजे च दौष्यन्तौ' इति मेदिनी ॥—**यजतः ऋग्विगिति** । उज्ज्वलदत्ताद्यनुरोधेनैवमुक्तम् । वेदभाष्ये तु 'हिरण्यशृङ्गं यजतो बृहन्तम्' इत्यादिषु यजतशब्दो यष्टव्यपरतया व्याख्यातः । '**पर्वतः** पादपे पुंसि शाकमत्स्यप्रभेदयोः । देवमुन्यन्तरे शैले' इति मेदिनी ॥—**हर्यतोऽश्व इति** । 'परि त्यं हर्यतं हरिम्' 'आहर्यताय धृष्णवे' इत्यादिमन्त्रेषु हर्यतः=सर्वैः स्पृहणीय इति वेदभाष्यम् ॥ **३९१ पृषि-**। पृषु सेचने, रञ्ज रागे, आभ्यामतच् कित्स्यात् । 'पृषन् मृगे पुमान् बिन्दौ न द्वयोः पृषतोऽपि ना । अनयोश्च त्रिषु श्वेतबिन्दुयुक्तेऽप्युभाविमौ' इति मेदिनी । 'रजतं त्रिषु शुक्ले स्यात् क्लीबं हारे च दुर्वर्णे' इति च ॥ **३९२ खलतिः** । स्खल संचलने ॥ **३९३ शीङ्शपि-**। शीङ् स्वप्ने, शप आक्रोशे, रु शब्दे, गम्लृ गतौ, वञ्चु गतौ भ्वादिः, वञ्चु प्रलम्भने चुरादिः, जीव प्राणधारणे, अन प्राणने प्रपूर्वः । उज्ज्वलदत्तेनात्र वञ्चिजीवीति पठ्यते । अन्यैस्तु वञ्चिस्थाने वन्दिः पठ्यते । वञ्चथवन्दथयोरन्यतरं वेदादावुपलभ्यते, बहुश्रुतैः पाठो निर्णेयः ॥ —**वन्दथ इति** । कर्मणि कर्तरि वा प्रत्ययः ॥—**प्राणथ इति** । 'अनितेः' इति णत्वम् ॥—**शमिदमिभ्यामिति** । शम उपशमे, दमु उपशमे । 'शमथः शान्तिमन्त्रिणोः' इति मेदिनी । 'दमथस्तु पुमान् दण्डे दमे च परिकीर्तितः' इति च ॥ **३९४ भृञः-**। डुभृञ् धारणपोषणयोः । अस्मादथः स्यात्स च चित् ॥ **३९५ रुदि-**। रुदिर् अश्रुविमोचने, विद ज्ञाने, आभ्यामथः स्यात्स च ङित् । '**विदथो** योगिकृतिनोः' इति मेदिनी । अत्रोज्ज्वलदत्तः-'रुविदिभ्यां कित्' इति पठित्वा रौतीति रुवथश्चेत्युदाजहार । दशपादीवृत्तिकारस्तु—'रुदिविदिभ्यां कित्' इति पपाठ । इह तु भाष्यानुरोधेन ङिदिति पठितम् । **तथाहि**—'गाङ् कुटादि–' सूत्रे के पुनश्चङादयः ? चङअङ्नजिङ्अथङ्नङ् इति भाष्यम् । किदिति पठतां तु 'अथङ्' इति भाष्यं न सङ्गच्छेतेति दिक् ॥ **३९६ उप-**। वस निवासे, अस्मादुपसर्गे उपपदे अथः स्यात् । उज्ज्वलदत्तेन तु सोपसर्गाद्वसेरिति पठितम् । अन्यैस्तु आङि वसेरिति पठितम् ॥ **३९७ अत्यवि-**। अत सातत्यगमने, अव रक्षणादौ, चमु अदने, तमु काङ्क्षायाम्, णमु प्रह्वत्वे शब्दे च, रभ राभस्ये, डुलभष् प्राप्तौ, णभ तुभ हिंसायाम्, भ्वादौ क्र्यादौ चायम् । तप सन्तापे, पत्लृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पणसः पण्यद्रव्यम् । महसं ज्ञानम् ॥ ३९८ । **वेञस्तुट् च** । बाहुलकादात्वाभावः । वेतसः ॥ ३९९ । **वहियुभ्यां णित्** । वाहसोऽजगरः । यावसस्तृणसङ्घातः । ४०० । **वयश्च** । 'वय गतौ' वायसः काकः ॥ ४०१ । **दिवः कित्** । दिवसम्, दिवसः ॥ ४०२ । **कृशृशलिकलिगर्दिभ्योऽभच्** । करभः । शरभः । शलभः । कलभः । गर्दभः ॥ ४०३ । **ऋषिवृषिभ्यां कित्** । ऋषभः । वृषभः ॥ ४०४ । **रुषेर्निलुक् च** । 'रुष हिंसायाम्' अस्मादभच् निक्किस्यात्, लुषादेशश्च । 'लुषभो मत्तदन्तिनि' ॥ ४०५ । **रासिवल्लिभ्यां च** । रासभः । वल्लभः ॥ ४०६ । **जॄविशिभ्यां झच्** । जरन्तो महिषः । वेशन्तः पल्वलम् ॥ ४०७ । **रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि** । रोहन्तो वृक्षभेदः । नन्दन्तः पुत्रः । जीवन्त औषधम् । प्राणन्तो वायुः । षित्वान्ङीष्, रोहन्ती ॥ ४०८ । **तॄभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च** । दशभ्यो झच् स्यात्, स च षित् । तरन्तः समुद्रः । तरन्ती नौका । भवन्तः कालः । वहन्तो वायुः । वसन्तः-ऋतुः । भासन्तः सूर्यः । साधन्तो भिक्षुः । गडेर्घटादित्वान्मित्त्वं ह्रस्वः, 'अयामन्त-' २३११ इति णेरयः, गण्डयन्तो जलदः । मण्डयन्तो भूषणम् । जयन्तः शक्रपुत्रः । नन्दयन्तो नन्दकः ॥ ४०९ । **हन्तेर्मुट् हि च** । हेमन्तः ॥ ४१० । **भन्देर्नलोपश्च** । भदन्तः प्रव्रजितः ॥ ४११ । **ऋच्छेररः** । ऋच्छरा वेश्या । **बाहुलकात्-जर्जरझर्झरादयः** ॥ ४१२ । **अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चित्** । षड्भ्योऽरश्चित् स्यात् । अररं कपाटम् । कमरः कामुकः । भ्रमरः । चमरः । देवरः । वासरः ॥ ४१३ । **कुवः क्ररन्** । कुररः पक्षिभेदः ॥ ४१४ । **अङ्गिमदिमन्दिभ्य आरन्** । अङ्गारः । मदारो वराहः । 'मन्दारः पारिजातकः' ॥ ४१५ । **गडेः कड**

गतौ, पण व्यवहारे स्तुतौ च, पन च, मह पूजायाम् । गौरादित्वात् ङीष्, । **'अतसी** स्यादुमा क्षुमा' इत्यमरः । **'चमसो** यज्ञपात्रस्य भेदेऽस्त्री पिष्टके स्त्रियाम्' इति मेदिनी । 'पनसः कण्टकिफले कन्दके वानरान्तरे । स्त्रियां रोगप्रभेदे स्यात्' इति च ॥ ३९८ **वेञः** । वेञ् तन्तुसन्ताने, अस्मादसच् स्यात्तस्य तुट् । दशपादीवृत्तौ तु 'वियस्तुट् च' इति पठित्वा 'वी गतिप्रजनकान्त्यादिषु' इति धातुरुदाहृतः ॥ **३९९ वहि-** । वह प्रापणे, यु मिश्रणादौ, 'अजगरे शयुर्वाहस इत्युभौ' इत्यमरः । 'वा तु क्लीबे दिवसवासरौ' इति च ॥ **४०० यावस इति** । असचो णित्त्वाद्वृद्धिः ॥ **४०१ दिवः-** । दिवु क्रीडादौ ॥ **४०२ कृशृ-** । कॄ विक्षेपे, शॄ हिंसायाम्, शल गतौ, कल विलेखने, गर्द शब्दे । **'करभो** मणिबन्धादिकनिष्ठान्तोष्ट्रतत्सुते' इति मेदिनी । 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः । **'शरभस्तु** पशोर्भिदि' । 'करभो वानरभिदि' इति मेदिनी । 'समौ पतङ्गशलभौ' इत्यमरः । 'कलभः करिपोतकः' इति च । 'गर्दभं श्वेतकुमुदे गर्दभो गन्धभिद्यपि । रासभे गर्दभी क्षुद्रजन्तुरोगप्रभेदयोः' इति मेदिनी ॥ **४०३ ऋषि-** । ऋषी गतौ, वृषु सेचने, आभ्यां अभच् स्यात्स च कित् । 'ऋषभस्त्वौषधान्तरे । स्वरभिद्वृषयोः कर्णरन्ध्रगर्दभपुच्छयोः । उत्तरस्थः स्मृतः श्रेष्ठे स्त्रीनराकारयोषिति । शूकशिम्ब्यां शिरालायां विधवायां क्वचिन्मता' इति मेदिनी । 'वृषभः श्रेष्ठवृषयोः' इति च ॥ **४०५ रासिवल्लि-** । रासृ शब्दे, वल्ल संवरणे । 'वल्लभो दयितेऽध्यक्षे सुलक्षणतुरङ्गमे' इति मेदिनी ॥ **४०६ जॄविशि-** । जॄ वयोहानौ, विश प्रवेशने । 'वेशन्तः पल्वलं चाल्पसरः' इत्यमरः । बाहुलकादर्हतेरपि झच् । **'अर्हन्तः** क्षपणको जिनः' इति विक्रमादित्यकोशः ॥ **४०७ रुहि-** । रुह बीजजन्मनि प्रादुर्भावे च, टुनदि समृद्धौ, जीव प्राणधारणे, अन प्राणने प्रपूर्वः । एभ्य आशिषि झच्, स च षिद्भवति ॥—**प्राणन्त इति** । 'अनितेः' इति णत्वम् ॥ **४०८ तॄभू-** । तॄ प्लवनतरणयोः, भू सत्तायाम्, वह प्रापणे, वस निवासे, भासृ दीप्तौ, साध संसिद्धौ, गड सेचने-मडि भूषायाम्-उभौ ण्यन्तौ, जि जये, टुनदि समृद्धौ, ण्यन्तः ॥—**नन्दयन्त इति** । उज्ज्वलदत्तस्तु-नन्दन्त इत्युदाहृत्य पूर्वसूत्रेण गतार्थतामाशङ्क्य अनाशीरर्थं नन्दिग्रहणमित्याह । तच्चिन्त्यम्, इहाप्याशिषीत्यस्य स्वयमेवानुवर्तितत्वात् ॥ **४०९ हन्तेः-** । हन हिंसागत्योरस्मात् झच् प्रत्ययः स्यात्तस्य मुडागमः, धातोर्हिरादेशश्च ॥ **४१० भन्देः-** । भदि कल्याणे सुखे च, अस्मात् झच् स्याद्धातोर्नकारलोपश्च ॥ **४११ ऋच्छेः-** । ऋच्छ गतौ ॥—**बाहुलकादिति** । जर्ज चर्च झर्झ परिभाषणहिंसातर्जनेषु । परिभाषणभर्त्सनयोरिति तुदादौ । 'जर्जरं शैवले शक्रध्वजे त्रिपु जरत्तरे । झर्झरः स्यात्कलियुगे वाद्यभेदे नदान्तरे' इति मेदिनी । बाहुलकादेव झस्य जादेशे जर्झर इत्युज्ज्वलदत्तः ॥ **४१२ अर्तिकमि-** । ऋ गतौ, कमु कान्तौ, भ्रमु अनवस्थाने, चमु अदने, दिवु क्रीडादौ-वस निवासे-उभावपि ण्यन्तौ । **'अररं** छदकपाटयोः' इति मेदिनी । 'कपाटमररं तुल्ये' इत्यमरः । **'भ्रमरः** कामुके भृङ्गे' इति मेदिनी । **'चमरं** चामरे स्त्री तु मञ्जरीमृगभेदयोः' इति च । चमरो मृगभेदः । **देवरः** पत्युः कनिष्ठभ्राता ॥—**वासर इति** । केचित्तु—सूत्रे 'वाशिभ्यः' इति तालव्यं पठित्वा 'वाशृ शब्दे' इत्यस्मादरप्रत्यये वाश्यत इति-वाशरः कोकिल इत्याहुः ॥ **४१३ कुवः-** । कु शब्दे ॥ **४१४ अङ्गि-** । अगिर्गत्यर्थः, मदी हर्षे, मदी स्तुत्यादौ । **'अङ्गार** उल्मुके न स्त्री पुंल्लिङ्गस्तु महीसुते' इति मेदिनी । **'मन्दारः** स्यात्सुरद्रुमे । पारिभद्रेऽर्कपर्णे च मन्दारो हस्तिधूर्तयोः' इति च । मदि स्तुत्यादावित्यस्माद्बाहुलकादारुरपि, 'पारिभद्रे तु **मन्दारुर्मन्दारः** पारिजातकः' इति शब्दार्णवः ॥ **४१५ गडेः-** । गडि वदनैकदेशे, गड सेचने, अस्मादारन्प्रत्ययः स्यात्कडादेशश्च । 'कडारः कपिले दासे' इति मेदिनी । 'कडारः कपिलः पिङ्ग'

६९ सि० कौ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च । कडारः ॥ ४१६ । शृङ्गारभृङ्गारौ । शृभृञ्भ्यामारन्नुम् गुक् ह्रस्वश्च । शृङ्गारो रसः । 'भृङ्गारः कनकालुका' ॥ ४१७ । कञ्जिमृजिभ्यां चित् । कञ्जिः सौत्रो धातुः । कञ्जारो मयूरः । मार्जारः ॥ ४१८ । कमेः किदुच्चोपधायाः । चिदित्यनुवृत्तेरन्तोदात्तः । कुमारः ॥ ४१९ । तुषारादयश्च । तुषारः । कासारः । सहार आम्रभेदः ॥ ४२० । दीङो नुट् च । दीनारः सुवर्णाभरणम् ॥ ४२१ । सर्तेरपः षुक् च । सर्षपः ॥ ४२२ । उषिकुटिदलिकचिखजिभ्यः कपन् । 'उषपो वह्निसूर्ययोः' । कुटपो मानभाण्डम् । दलपः प्रहरणम् । कचपं शाकपत्रम् । खजपं घृतम् ॥ ४२३ । क्वणेः संप्रसारणं च । कुणपम् ॥ ४२४ । कपश्चाक्रवर्मणस्य । स्वरे भेदः ॥ ४२५ । विटपपिष्टपविशिपोलपाः । चत्वारोऽमी कपन् प्रत्ययान्ताः । 'विट शब्दे' विष्टपः । विशतेरादेः पः, प्रत्ययस्य तुट्, षत्वम्, पिष्टपं भुवनम् । विशतेः प्रत्ययादेरित्वम्, विशिपं मन्दिरम् । वलतेः संप्रसारणम्, 'उलपं कोमलं तृणम्' ॥ ४२६ । वृतेस्तिकन् । वर्त्तिका ॥ ४२७ । कृतिभिदिलतिभ्यः कित् । कृत्तिका । भित्तिका भित्तिः । लत्तिका गोधा ॥ ४२८ । इष्यशिभ्यां तकन् । इष्टका । अष्टका ॥ ४२९ । इणस्तशन्तशसुनौ । एतशो ब्राह्मणः, स एव एतशाः ॥ ४३० । वीपतिभ्यां तनन् । 'वी गत्यादौ' वेतनम् । पत्तनम् ॥ ४३१ । दृदलिभ्यां भः । दर्भः । 'दल्भः स्यादृषिचक्रयोः' ॥ ४३२ । अर्तिगृभ्यां भन् । अर्भः । गर्भः ॥ ४३३ । इणः कित् । इभः ॥ ४३४ । असिसञ्जिभ्यां क्थिन् । अस्थि । सक्थि ॥ ४३५ । प्लुषिकुषिशुषिभ्यः क्सिः । प्लुक्षिर्वह्निः । कुक्षिः । शुक्षिर्वातः ॥ ४३६ । अशेर्नित् । अक्षि । ४३७ । इषेः क्सुः । इक्षुः ॥ ४३८ । अवितृस्तृतन्त्रिभ्यः ईः । 'अवीर्नारी रजस्वला' । तरीर्नौः । स्तरीर्धूमः । तन्त्रीर्वीणादेर्गुणः ॥ ४३९ । यापोः किद्द्वे च ।

इत्यमरः ॥ ४१६ **शृङ्गारः**–। एतौ निपात्येते । शॄ हिंसायाम्, डुभृञ् धारणपोषणयोः, आभ्यामारन्नुम् गुग् ह्रस्वश्च ।
'**शृङ्गारः** सुरते नाट्ये रसे च गजमण्डने । नपुंसकं च वङ्गेऽपि नागसंभवचूर्णयोः' इति मेदिनी । '**भृङ्गारी** झिल्लिकायां
स्यात्कनकालौ पुनः पुमान्' इति च ॥ ४१७ **कञ्जि**–। मृजू शुद्धौ, चित्वादारन्प्रत्यय अन्तोदात्तः । '**कञ्जारो** जरठे सूर्ये
विरञ्चौ वारणे मुनौ' इति विश्वमेदिन्यौ । '**मार्जार** ओतौ खट्वाङ्गे' इति च । 'ओतुर्बिडालो मार्जारः' इत्यमरः ॥ ४१८
कमेः–। कमु कान्तौ, अस्मादारन्कित्स्यात् । '**कुमारः** स्याच्छुके स्कन्दे युवराजेऽश्ववारके । बालके वरुणद्रौ ना न द्वयोर्जात्यकाञ्चने । कुमारी शैलतनयानवम्याल्योर्नदीभिदि । सहापराजिताकन्याजम्बुद्वीपेषु च स्त्रियाम्' इति मेदिनी । विश्वप्रकाशे तु 'कुमारी रामतरणी' इति पाठः । रामतरणी लताविशेषः । सहेति प्रसिद्धः । 'तरणी रामतरणी कर्णिका चारुकेसरा । सहा कुमारी गन्धाढ्या' इति धन्वन्तरिनिघण्टुः । 'जम्बूद्वीपसहाकन्याः कुमार्योऽथाश्ववारके । बालके कार्तिकेये च
कुमारो भर्तृदारके' इति त्रिकाण्डशेषः ॥ ४१९ **तुषारा**–। एते निपात्यन्ते । तुष तुष्टौ आरन् । '**तुषारस्तुहिनं हिमम्**'
इत्यमरः । कासृ शब्दकुत्सायाम् । 'कासारः सरसी सरः' इत्यमरः ॥—**सहार इति** । षह मर्षणे ॥ ४२० **दीङो**–। दीङ्
क्षये, अस्मादारन् तस्य नुडागमश्च ॥ ४२१ **सर्तेः**–। सृ गतौ अस्मादपः स्याद्धातोः पुगागमश्च ॥ ४२२ **उषि**–। उष दाहे,
कुट कौटिल्ये, दल विदारणे, कच बन्धने, खज मन्थे ॥ ४२३ **क्वणेः**–। क्वण शब्दे । अस्मात्कपन् धातोर्वकारस्य संप्रसारणं
च । '**कुणपः** पूतिगन्धे शवेऽपि च' इति मेदिनी । 'कुणपः शवमस्त्रियाम्' इत्यमरः ॥ ४२५ **विटप**–। 'विटपो न स्त्रियां
स्तम्बशाखाविस्तारपल्लवे । विटाधिपे ना' इति मेदिनी ॥—**विशतेरिति** । विश प्रवेशने ॥—**आदेः प इति** । एतच्च
उज्ज्वलदत्तरीत्योक्तम् । अन्ये तु सूत्रे 'विष्टप' इति दन्त्योष्ठ्यादिमेव पठन्ति । युक्तं चैतत् । 'यत्र ब्रध्नस्य विष्टपम्' इत्यादौ
तथा दर्शनात् । अमरकोशेऽपि 'विष्टपं भुवनं जगत्' इति प्रचुरपाठाच्च ॥—**वलतेः**–। वल वल्ल संवरणे संचरणे च ।
'**उलपो** न स्त्री गुल्मिन्यां ना तृणान्तरे' इति मेदिनी ॥ ४२६ **वृतेः**–। वृतु वर्तने ॥ ४२७ **कृतिभिदि**–। कृती छेदने,
भिदिर् विदारणे, लतिः सौत्रो धातुः ॥ ४२८ **इष्यशि**–। इष इच्छायाम्, अशू व्याप्तौ, आभ्यां तकन् कित्स्यात् ॥—**इष्टकेति** । 'इष्टकेषीकामालानाम्–' इति निर्देशात् 'प्रत्ययस्थात्–' इति नेत्वम् । केचित्तु प्रत्ययस्थादितीत्वमिह न भवति, नित्यत्वात् । तज्ज्ञापकं तु 'मृदस्तिकन्' इति इकारोच्चारणमित्याहुः ॥ ४२९ **इणस्त**–॥—**एतशा इति** । 'अत्वसन्तस्य–' इति दीर्घः ।
एतशसौ । एतशसः ॥ ४३० **वीपति**–। पत्लृ गतौ । 'पत्तनं पुटमेदनम्' इति पुरीपर्यायेष्वमरः ॥ ४३१ **दृदलि**–। दॄ विदारणे, दल विकसने ॥ ४३२ **अर्तिगृ**–। ऋ गतौ, इयर्तीति—**अर्भः** शिशुः । संज्ञायां कनि–अर्भकः । 'गर्भो भ्रूणेऽर्भके कुक्षौ
सन्धौ पनसकण्टके' इति मेदिनी ॥ ४३३ **इणः**–। इण् गतौ, अस्माद्भन् कित्स्यात् । '**इभः** स्तम्बेरमः पद्मी' इत्यमरः ॥ ४३४
असि–। असु क्षेपणे, षञ्ज सङ्गे । 'कीकसं कुल्यम**स्थि** च' इत्यमरः । 'सक्थि क्लीबे पुमानूरुः' इति च ॥ ४३५ **प्लुषि**–। प्लुष
दाहे, कुष निष्कर्षे, शुष शोषणे ॥ ४३६ **अशेः**–। अशू व्याप्तौ, अस्मात् क्सिर्नित्स्यात् । **अक्षि** नयनम् ॥ ४३७ **इषेः**–।
इष इच्छायाम् । **इक्षुः** 'रसाल इक्षुः' इत्यमरः ॥ ४३८ **अवि**–। अव रक्षणादौ, तॄ प्लवनतरणयोः, स्तृञ् आच्छादने, तन्त्रि कुटुम्बधारणे, चुरादिर्ण्यन्तः ॥—**तरीरिति** । 'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः ॥ ४३९ **यापोः**–। या प्रापणे, पा पाने, आभ्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ययीरश्वः । 'पपीः स्यात्सोमसूर्ययोः' ॥ ४४० । लक्षेर्मुट् च । लक्ष्मीः ॥ इत्युणादिषु तृतीयः पादः ॥

अथ चतुर्थः पादः ।

४४१ । वातप्रमीः । वातशब्दे उपपदे माधातोरीप्रत्ययः स च कित् । वातप्रमीः । अयं स्त्रीपुंसयोः ॥ ४४२ । ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः कत्निज्यतुजलिजिष्टुजिष्ठजिसन्स्यनिथिनुल्यसासानुकः । द्वादशभ्यः क्रमात्स्युः । अर्तेः कत्निच्, यण्, 'बद्धमुष्टिः करो रत्निः सोऽरत्निः प्रसृताङ्गुलिः' । तनोतेर्यतुच्, तन्यतुर्वायू रात्रिश्च । अञ्जेरलिच्, अञ्जलिः । वनेरिष्टुच्, वनिष्टुः स्थविरान्त्रम् । अञ्जेरिष्ठच्, अञ्जिष्ठो भानुः । अर्पयतेरिसन्, अर्पिसोऽग्रमांसम् । मदेः स्यन्, मत्स्यः । अतेरिथिन्, अतिथिः । अङ्गेरुलिः, अङ्गुलिः । कौतेरसः, कुवसः । अच इत्येके, कवचम् । यौतेरासः, यवासो दुरालभा । कृशेरानुक्, कृशानुः ॥ ४४३ । शॄः करन् । उत्तरसूत्रे किद्ग्रहणादिह ककारस्य नेत्वम्, शर्करा ॥ ४४४ । पुषः कित् । पुष्करम् ॥ ४४५ । कलंश्च । पुष्कलम् ॥ ४४६ । गमेरिनिः । गमिष्यतीति गमी ॥ ४४७ । आङि णित् । आगामी ॥ ४४८ । भुवश्च । भावी ॥ ४४९ । प्रे स्थः । प्रस्थायी ॥ ४५० । परमे कित् । परमेष्ठी ॥ ४५१ । मन्थः । मन्थतेरिनिः किस्यात् । कित्त्वान्नकारलोपः—मन्थाः, मन्थानौ, मन्थानः ॥ ४५२ । पतः स्थ च । पन्थाः,

---

मीः कित्स्यात् द्वित्वं च धातोः ॥ ४४० लक्षेः–। लक्ष दर्शनाङ्कनयोः । चुरादिर्ण्यन्तः । अस्मादीप्रत्ययः स्यात्तस्य मुडागमो णिलो पश्च । 'लक्ष्मीः पद्मा विभूतिश्च' । 'कृदिकारात्–' इति ङीषि 'लक्ष्मी' इत्यपि भवतीति रक्षितः । 'लक्ष्मी संपत्तिशोभयोः । ऋद्ध्योषधौ च पद्मायाम्' इति मेदिनी ॥ इत्युणादिषु तृतीयः पादः ॥

४४१ माधातोरिति । मा माने, कित्त्वात् 'आतो धातोः' इत्यालोपः । 'वातप्रमीर्वातमृगः' इत्यमरः ॥—अयमिति–। 'द्विचतुःषट्पदोरगाः' इत्यमरेण चतुष्पाद्वाचिनामुभयलिङ्गतोक्तेः, सुभूतिचन्द्रादिभिरपि वातप्रमीशब्दस्य द्विलिङ्गतोक्तेश्चेति भावः । तत्र 'कृदिकारात्–' इति पाक्षिको ङीष् कैश्चिदिष्यते । न च ह्रस्वादेव 'कृदिकारात्–' इति ङीष् भवति न तु दीर्घादिति शङ्क्यम् । वर्णनिर्देशे कारप्रत्ययस्य विधानेन दीर्घादपि 'कृदिकारात्–' इति ङीषः संभवात् । अत एव वातप्रमीश्रीलक्ष्मीति पक्षे ङ्यन्ताः सुसाधव इति रक्षितः । एतच्च दुर्घटग्रन्थे स्पष्टम् । 'आशीराह्यहिदंष्ट्रायां लक्ष्मीर्लक्ष्मी हरिप्रियाम्' इति द्विरूपकोशः । अत एव 'आशीविषो विषधरः' इत्यमरकोशः संगच्छते । 'अश भोजने' इत्यस्मात् 'इणजादिभ्यः' इति इण्प्रत्यये उपधावृद्धौ 'कृदिकारात्–' इति ङीषः स्वीकारात् । 'आशीमिव कलामिन्दोः' इति राजशेखरः । 'आशीर्हिताशंसाऽहिदंष्ट्रयोः' इति सान्तेऽमरात् सान्तोऽप्याशीःशब्दोऽस्तीत्यन्यदेतत् ॥ ४४२ ऋतनि–। ऋ गतौ, तनु विस्तारे, अञ्जू व्यक्त्यादौ, वनु याचने, अञ्जूः स एव, ऋ गतौ ण्यन्तः, मदी हर्षे, अत सातत्यगमने, अगिर्गत्यर्थः, कु शब्दे, यु मिश्रणे, कृश तनूकरणे । प्रसङ्गादाह—अरत्निरिति । न रत्निः–अरत्निरिति नञ्समासः । प्रसृताङ्गुलिः सहस्तः=अरत्निरित्यर्थः । दशपादीवृत्तौ तु कत्निजित्यत्र ककारमपठित्वा अर्तेरत्निचमकितं विधाय अरत्निः साधितः । उज्ज्वलदत्तानुसारेणाह—वायू रात्रिश्चेति । तन्यतुः=शब्दो मेघः अशनिश्चेत्यपि बोध्यम् । 'आविष्कृणोमि तन्यतुर्न वृष्टिम्' इति मन्त्रे तन्यतुर्गर्जितमिति, 'सृजा वृष्टिं न तन्यतुः' इति मन्त्रे तन्यतुर्मेघ इति, 'उतस्मास्य तन्यतोरिव द्यौः' इति मन्त्रे 'दिवश्चित्रं न तन्यतुम्' इति मन्त्रे च तन्यतुरशनिरिति वेदभाष्ये व्याख्यातत्वात् । 'अञ्जलिस्तु पुमान् हस्तसंपुटे कुडवेऽपि च' इति मेदिनी ॥—स्थविरान्त्रमिति । 'वनिष्ठोर्हृदयादधि' इति मन्त्रस्य भाष्ये तथोक्तत्वात् ॥—अञ्जिष्ठ इति । केचिदञ्जेरिष्णुचमिच्छन्ति, तेषामञ्जिष्णुरुदाहरणम् ॥—अर्पिस इति । 'अर्तिह्री–' इत्यादिना पुक् । 'णेरनिटि' इति णिलोपः ॥—मदेरिति । 'मत्स्यो मीनेऽथ पुंभूम्नि देशे' इति मेदिनी । 'अतिथिः कुशपुत्रे स्यात्पुमानागन्तुके त्रिषु' इति च । 'अङ्गुलिः करशाखायां कर्णिकायां गजस्य च' इति च । कवसः सन्नाहः कंकटजातिश्च ॥—अच इति । 'कवचो गर्दभाण्डे च संनाहे पर्पटेऽपि च' इति मेदिनी ॥—यौतेरिति । 'दुरालभा कटुस्पर्शा यासो धन्वयवासकः' इति धन्वन्तरिनिघण्टुः । 'कृशानुः पावकोऽनलः' इत्यमरः ॥ ४४३ शॄः–। शॄ हिंसायाम् । 'शर्करा खण्डविकृतौ उपलाकर्परांशयोः । शर्करान्वितदेशे च रुग्भेदे शकलेऽपि च' इति मेदिनी ॥ ४४४ पुषः–। पुष पुष्टौ, अस्मात्करन्स्यात्स च कित् । 'पुष्करं खेऽम्बुपद्मयोः । तूर्यवक्त्रे खड्गफले हस्तिहस्ताग्रकाण्डयोः । कुष्ठौषधिद्वीपतीर्थभेदयोश्च नपुंसकम् । ना रोगनागविहगनृपभेदेषु वारुणौ' इति मेदिनी ॥ ४४५ कलंश्च । पुष्यतेः कलन् स्यात्, स च कित् । 'पुष्कलस्तु पूर्णे श्रेष्ठे' इति हेमचन्द्रः ॥ ४४६ गमेः–। गम्लृ गतौ । 'भविष्यति गम्यादयः' इत्याशयेनाह—गमिष्यतीति ॥ ४५७ आगामीति । इनिप्रत्ययस्य णित्वादुपधावृद्धिः । आगमिष्यतीत्यर्थः ॥ ४४८ भुवश्च । भू सत्तायाम् । अस्मादिनिः स च णित्स्यात् । भविष्यतीति भावी ॥ ४४९ प्रे स्थः । ष्ठा गतिनिवृत्तौ, प्रपूर्वादस्मादिनिः स च णित् । णित्वात् 'आतो युक्–' इति युक् । प्रस्थायी गन्तुकामः ॥ ४५० परमे । परमशब्दे उपपदे तिष्ठतेरिनिः कित्स्यात् । कित्त्वादातो लोपः, 'हलदन्तात्–' इत्यलुक् । 'परमेष्ठी पितामहः' इत्यमरः ॥ ४५१ मन्थः । मन्थ विलोडने ॥—मन्था इति । 'पथिमथि–' इत्यात्वम् । 'इतोऽत्सर्वनामस्थाने' । 'मन्था मन्थनदण्डे च वज्रे चापेऽपि च स्मृतः' ॥ ४५२ पतः–। 'पत्लृ गतौ' इत्यस्मादिनिः स्थश्चान्तादेशः । 'पथे गतौ' इत्यस्मात्पचाद्यचि अकारान्तोऽप्यस्ति । 'वाटः पथश्च मार्गश्च' इति सुभूति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पन्थानौ ॥ ४५३ । **खजेराकः** । खजाकः पक्षी ॥ ४५४ । **बलाकादयश्च** । बलाका । शलाका । पताका ॥ ४५५ । **पिनाकादयश्च** । पातेरीत्वं नुम् च । 'क्लीब-पुंसोः पिनाकः स्याच्छूलशङ्करधन्वनोः' । 'तड आघाते' तडाकः ॥ ४५६ । **कषिदूषिभ्यामीकन्** । कषीका पक्षिजातिः । 'दूषीका नेत्रयोर्मलम्' ॥ ४५७ । **अनिहृषिभ्यां किच्च** । अनीकम् । हृषीकम् ॥ ४५८ । **चङ्कणः कङ्कणश्च** । 'कण शब्दे' अस्माद्यङ्लुगन्तादीकन्, धातोः कङ्कणादेशश्च । 'घण्टिकायां कङ्कणीका सैवा प्रतिसरापि च' ।

४५९ । **शॄपॄवृञां द्वेरुक् चाभ्यासस्य** । शर्शरीको हिंस्रः । पर्परीको दिवाकरः । वर्वरीकः कुटिलकेशः ॥ ४६० । **पर्फरीकादयश्च** । 'स्फुर स्फुरणे' अस्मादीकन् धातोः पर्फरादेशः । पर्फरीकं किसलयम् । दर्दरीकं वादित्रम् । झर्झरीकं शरीरम् । तिन्तिडीको वृक्षभेदः । (ग) **चरेर्नुं च** । चञ्चरीको भ्रमरः । मर्मरीको हीनजनः । कर्करीका गलन्तिका । पुणतेः, पुण्डरीकं वादित्रम् । पुण्डरीको व्याघ्रोऽग्निर्दिग्गजश्च ॥ ४६१ । **ईषेः**

चन्द्रः । 'त्वचि त्वचः किरोऽपि स्यात्किरौ प्रोक्तः पथः पथि' इति द्विरूपेषु विश्वः । इह ऋभवो देवाः क्षिपन्त्यस्मिन्निति विग्रहे 'अन्येभ्योऽपि दृश्यते' इति डः । '**ऋभुक्षः** स्वर्गवज्रयोः' इति विश्वः । ततो मत्वर्थीयेनिः । ऋभुक्षिन्निति नान्तं प्रातिपदिकम् । 'पथिमथि–' इत्यात्वे 'इतोऽत्–' इत्यत्वे च ऋभुक्षा इन्द्रः, ऋभुक्षाणौ ऋभुक्षाण इत्युज्ज्वलदत्तः । दशपाद्यां तु 'अर्तेः भुक्षिनक्' इति सूत्रमुपन्यस्य ऋभुक्षिन्नित्युदाहृतम् । 'ऋभुक्षिणमिन्द्रमाहुव ऊतये' इति मन्त्रस्य वेदभाष्ये तत्सूत्रमुदाहृतम् । अत्रायं विवेकः—इनिप्रत्ययान्ता इति मते अन्तोदात्तत्वं न्याय्यं, प्रत्ययस्वरेण इनेरिकारस्योदात्तत्वात् । अवग्रहाभावो बाहुलकात् । द्वितीयमते त्ववग्रहाभावो न्याय्यः । परे तु प्रत्ययस्वरेणोकारस्योदात्ततया भुक्षिनक्प्रत्ययान्तस्य मध्योदात्तत्वे प्रसक्ते बाहुलकादन्तोदात्तः स्वीकर्तव्य इति ॥ **४५३ खजेः–**। खज मन्थे ॥ **४५४ बलाका–**। बल प्राणने, शल गतौ, पत्ल गतौ, एते आकप्रत्ययान्ता निपात्यन्ते । 'बलाका बकपङ्क्तिः स्याद्बलाका विसकण्ठिका । बलाका कामुकी प्रोक्ता बलाकश्च बको मतः' इति विश्वशाश्वतौ । 'शलाकाऽञ्जनयष्टिका । पताका वैजयन्त्यां च सौभाग्येऽङ्के ध्वजेऽपि च' इति विश्वः । 'पताका वैजयन्त्यां च सौभाग्ये नाटकाङ्कयोः' इति मेदिनी ॥ **४५५ पिनाका–**। एते आकप्रत्ययान्ता निपात्यन्ते । पा रक्षणे, 'पिनाकोऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः' इति मेदिनी । अमरोक्तिमाह—**क्लीबपुंसोरिति** । किंच पिष्ल संचूर्णने, षकारस्य णत्वं धातोर्यगागमः । '**पिण्याको**ऽस्त्री तिलकल्के हिङ्गुबाह्लीकसिह्लके' इति मेदिनी ॥ **४५६ कषि–**। कष खषेति दण्डके हिंसार्थकः । दुष वैकृत्ये, ण्यन्तः । 'दोषो णौ' इत्युपधाया ऊकारः । अमरोक्तिमाह—**दूषिकेति** । किंच अकृतेऽपि ईकनि दूषयतेः 'अच इः' इति इप्रत्यये दूषिः । 'कृदिकारात्–' इति ङीषि दूषी । उभाभ्यामपि स्वार्थे कनि दूषिका ह्रस्वमध्यैव । 'केऽणः' इति ङीषोऽपि ह्रस्वादेशात् । 'पिचण्डी दूषिका दूषी पिचाटं च दृशोर्मलम्' इति विक्रमादित्यकोशः । 'दूषिका तूलिकायां च मले स्याल्लोचनस्य च' इति मेदिनी ॥ **४५७ अनिहृषि–**। अन प्राणने, हृष तुष्टौ, आभ्यामीकन्स्यात् स च कित् । 'अनीकोऽस्त्री रणे सैन्ये' इति मेदिनी । 'हृषीकं विषयेन्द्रियम्' इत्यमरः ॥ **४५८ चङ्कणः**। कणधातोर्यङ्लुकि प्रत्ययलक्षणन्यायेन 'सन्यङोः' इति द्वित्वे 'कुहोश्चुः' इत्यभ्यासस्य चुत्वे 'नुगतोऽनुनासिकान्तस्य' इति नुकि चङ्कण् । ङसिङसोस्तु चङ्कणः ॥—**धातोरिति**। चङ्कणित्यस्य ॥ **४५९ शॄ पॄ–**। शॄ हिंसायाम्, पॄ पालनादौ, वृञ् वरणे, एभ्य ईकन्, एषां द्विर्वचनमभ्यासस्य रुगागमश्च ॥—**शर्करीक इत्यादि** । उरदत्वे रपरत्वम् ॥ **४६० पर्फरीका–**। ईकन्नन्ता एते निपात्यन्ते ॥—**पर्फरादेश इति** । एतच्चोज्ज्वलदत्तरीत्योक्तं, वस्तुतस्तु धातोर्द्वित्वमुकारस्याकारः, सलोपः, रुक् चाभ्यासस्येति दशपाद्यां यदुक्तं तदेव न्याय्यम् । 'चरेर्नुम् च' त्युत्तरग्रन्थानुरोधेन द्वे रुक् चेत्याद्यनुवृत्तेर्न्याय्यत्वात् ॥—**किसलयमिति** । 'नैतोशेव तुर्फरी पर्फरीका' इति मन्त्रस्य वेदभाष्ये तु ञिफला विशरणे, पॄ पालनपूरणयोः, पर्व पुर्व पूरणे, एषामन्यतमस्य निपातनमिदमित्याश्रित्य शत्रूणां विदारयितारौ, स्तोतॄणां पालकौ, इष्टार्थस्य पूरयितारौ चेति व्याख्यातम् ॥—**दर्दरीकमिति** । दॄ विदारणे, अस्मादीकन्धातोर्दर्दरादेशः ॥—**झर्झरीकमिति** । झॄष् वयोहानौ । अस्मादीकन्धातोर्झर्झरादेशः । वस्तुतस्तु दर्दरीकझर्झरीकावपि पर्फरीकवद्धातोर्द्वित्वं रुक् चाभ्यासस्येति व्याख्येयौ । उत्तरखण्डे ऋकारस्य गुणे रपरत्वम् ॥—**तित्तिडीक इति** । तिमष्टिमष्टीम आर्द्रीभावे । मकारस्योकारः, अभ्यासस्य तुक् च । 'तिन्तिणी चाम्लिका' इत्यमरे तु शब्दान्तरं बोध्यम् । तथा च 'तित्तिडी त्वम्लिका चिञ्चा तित्तिडीका कपिप्रिया' इति वाचस्पतिः । 'अम्लीका चाम्लिका चिञ्चा तित्तिडीका च तित्तिडा' इति चन्द्रः । 'अम्लीका चुक्रिका चुक्रा-साम्ला शुक्राथ शुक्लिका । अम्लिका चिञ्चिका चिञ्चा तिन्तिडीका सुतित्तिडा' इति धन्वन्तरिनिघण्टुः ॥ (ग) **चरेरिति** । 'चर गतिभक्षणयोः' अस्मादीकन् द्विर्वचनमभ्यासस्य नुमागमश्च । 'भ्रमरश्चञ्चरीकः स्याद्रोलम्बो मधुसूदनः । इन्दिन्दिरः पुष्पकीटो मधुव्रो मधुकेशयः' इति त्रिकाण्डशेषः ॥—**मर्मरीक इत्यादि** । मृङ् प्राणत्यागे, डुकृञ् करणे, आभ्यामीकन् धातोर्द्वित्वम् अभ्यासस्य रुक् । 'कर्कर्यालुर्गलन्तिका' इत्यमरः । पुण कर्मणि शुभे, णस्य डः प्रत्ययस्य रुडागमश्च । 'पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे । पुंसि व्याघ्रेऽपि दिङ्नागे कोशकारान्तरेऽपि च' इति मेदिनी ॥ **४६१ ईषेः–**। ईष गतावस्मादीकन् ह्रस्वश्च । क्रित्त्वाद्गुणाभावः । ह्रस्वविधानसामर्थ्यादेव गुणाभावे सिद्धेऽप्युत्तरार्थं कित्त्वमित्याहुः । 'इषीका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किद्धस्वश्च । इषीका शलाका ॥ ४६२ । **ऋजेश्च** । ऋजीकः–उपहतः ॥ ४६३ । **सर्तेर्नुम् च** । सृणीका लाला ॥ ४६४ । **मृडः कीकच्कङ्कणौ** । मृडीको मृगः । मृडङ्कणः शिशुः ॥ ४६५ । **अलीकादयश्च** । कीकजन्ता निपात्यन्ते । 'अल भूषणादौ' अलीकं मिथ्या । विपूर्वात्–व्यलीकं=विप्रियं खेदश्च । 'वलीकं पटलप्रान्ते' इत्यादि ॥ ४६६ । **कृतॄभ्यामीषन्** । 'करीषोऽस्त्री शुष्कगोमये' तरीषः-तरीता ॥ ४६७ । **शॄपॄभ्यां किच्च** । शिरीषः । पुरीषम् ॥ ४६८ । **अर्जेर्ऋज च** । 'ऋजीषं पिष्टपचनम्' ॥ ४६९ । **अम्बरीषः** । अयं निपात्यते । 'अबि शब्दे' 'अम्बरीषः पुमान् भ्राष्ट्रम्' । अमरस्तु– 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना' ॥ ४७० । **कॄशॄपॄकटिपटिशौटिभ्य ईरन्** । करीरो वंशाङ्कुरः । शरीरम् । परीरम् फलम् । कटीरः कन्दरो जघनप्रदेशश्च । पटीरश्चन्दनः कण्टकः कामश्च । 'शौटीरस्त्यागिवीरयोः' । ब्राह्मणादित्वात् ष्यञ्, शौटीर्यम् ॥ ४७१ । **वशेः कित्** । उशीरम् ॥ ४७२ । **कशेर्मुट् च** । कश्मीरो देशः ॥ ४७३ । **कृञ उच्च** । कुरीरं मैथुनम् ॥ ४७४ । **घसेः किच्च** । क्षीरम् ॥ ४७५ । **गभीरगम्भीरौ** । गमेर्भः । पक्षे नुम् च ॥ ४७६ । **विषा विहा** । स्यतेर्जहातेश्च विपूर्वाभ्यां 'आ'प्रत्ययः । विषा बुद्धिः । विहा स्वर्गः । अव्यये इमे ॥ ४७७ । **पच एलिमच्** । 'पचेलिमो वह्निरव्योः' ॥ ४७८ । **शीङो धुक्लक्वलञ्वालनः** । चत्वारः प्रत्ययाः स्युः । शीधु मद्यम् । शीलं स्वभावः । शैवलः । शेवालम् । बाहुलकात्–वस्य पोऽपि । 'शेवालं शैवलो

स्यादीषिकापि वानायुजवनायुजौ' इति द्विरूपकोशः ॥ **४६२ ऋजेः–** । ऋज गतौ ॥ **४६३ सर्तेः–** । 'सृ गतौ' अस्मादीकन्कित्स्याद्धातोर्नुमागमश्च । 'सृणिका स्यन्दिनी लाला' इत्यमरः ॥ **४६४ मृडः कीकच्–** । मृड सुखने । 'मृडः कीकन्' इत्युज्ज्वलदत्तादिपाठः प्रामादिकः । मृडीकशब्दस्य चित्स्वरेणान्तोदात्तत्वात् । 'मृळीके अस्य सुमतौ स्याम' इत्यादौ चित्स्वरस्यैव दर्शनात् ॥ **४६५ अलीकादा–** । 'अलीकमप्रियेऽपि स्याद्दिव्यसत्ये नपुंसकम्' इति मेदिनी । 'अलीकमप्रिये प्रोक्तमलीकमनृते दिवि' इति विश्वः । 'अलीकमप्रिये भाले वितथे' इति हेमचन्द्रः । तथा चाभियुक्तैः प्रयुज्यते—'ते दृष्टिमात्रपतिता अपि कस्य नात्र क्षोभाय पक्ष्मलदृशामलकाः खलाश्च । नीचाः सदैव सविलासमलीकलग्ना ये कालतां कुटिलतां च न संत्यजन्ति' इति । इहालीकलग्नाः भाललग्नाः अप्रिये लग्ना इत्याद्यर्थौ यथायोग्यं बोध्यः । 'व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि पीडने । ना नागरे' इति मेदिनी । वल संवरणे, 'वलीकनीध्रे पटलप्रान्ते' इत्यमरः । वलतेर्मुगागमे वल्मीकम् । 'वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम्' इत्यमरः । वहतेर्वृद्धिश्च । वाहीको गौरश्वश्च । सुप्रपूर्वादिणस्तुट् च, सुप्रतीकः । शाम्यतेः–शमीक ऋषिः । एवमन्येऽप्यूह्या इत्याशयेनाह—**इत्यादीति** ॥ **४६६ कृतॄ–** । कॄ विक्षेपे, तॄ प्लवनतरणयोः ॥ **४६७ शॄपॄ–** । शॄ हिंसायाम्, पॄ पालनादौ, आभ्यामीषन् कित्स्यात् । 'ॠत इद्धातोः' इति इत्वे रपरत्वम् । शिरीषो वृक्षभेदः । 'उदोष्ठ्यपूर्वस्य' इत्युत्वम्, 'गूथं **पुरीषं** वर्चस्कमस्त्री विष्ठाविशौ स्त्रियाम्' इत्यमरः ॥ **४६८ अर्जेः–** । अर्ज षर्ज अर्जने, अस्मादीषन् कित्स्यात् धातोर्ऋजादेशश्च । अमरोक्तिमाह—**ऋजीषमिति** । किंच उद्धृतरसः सोमलतायाः शेषोऽपि ऋजीषम् । एतच्च 'ऋजीषिणं वृषणसश्चत श्रिये' 'आसत्यो यातु मघवाँ ऋजीषी' इत्यादिमन्त्रे भाष्ये स्पष्टम् ॥ **४६९ अयमिति** । ईषन् प्रत्ययस्तस्य अरुडागमश्चेत्यर्थः । बोपालितोक्तिमाह—**अम्बरीषमित्यादि** । 'क्लीबेऽम्बरीषं भ्राष्ट्रे ना' इत्यमरः । 'अम्बरीषो रणे भ्राष्ट्रे क्लीबं पुंसि नृपान्तरे । नरकस्य प्रभेदे च किशोरे भास्करेऽपि च । आम्रातकेऽनुपाते च' इति मेदिनी ॥ **४७० कॄशॄपॄ** । कॄ विक्षेपे, शॄ हिंसायाम्, पॄ पालनपूरणयोः, कटे वर्षावरणयोः, इट किट कटी गतौ, चुरादौ पट पुटेति दण्डके भाषार्थः, शौटृ गर्वे । 'वंशाङ्कुरे करीरोऽस्त्री वृक्षभिद्घटयोः पुमान् । करीरा चीरिकायां च दन्तमूले च दन्तिनाम्' इति मेदिनी । शीर्यत इति शरीरम् । 'शरीरं वर्ष्म विग्रहः' इत्यमरः । अर्धर्चादित्वात्–'शरीरः' इति पुंलिङ्गोऽपि ॥—**परीरमिति** । पूर्यतेऽनेनेति विग्रहः । बाहुलकात्–हिडि गत्यनादरयोः, हिण्डते=इतस्ततो गच्छतीति हिण्डीरः । 'हिण्डीरोऽब्धिकफः फेनः' इत्यमरः । 'डिण्डीरोऽपि च हिण्डीरः' इति द्विरूपकोशः । किर्मीरजम्बीरतूणीरादयोऽपि बाहुलकादेव बोध्याः । 'किर्मीरो नागरङ्गे च कर्बुरे राक्षसान्तरे' इति मेदिनी । 'जम्बीरः प्रस्थपुष्पे स्यात्तथा दन्तशठद्रुमे' इति च ॥ **४७१ वशेः–** । वश कान्तौ, अस्मादीरन्कित्स्यात् । कित्त्वात्संप्रसारणादि । उशीरं वीरणमूलम् । उशीरोऽपि । 'मूलेऽस्योशीरमस्त्रियाम् । अभयं नलदं सेव्यम्' इत्यमरः ॥ **४७२ कशेः–** । कश इति सौत्रो धातुः । अस्मादीरन् तस्य मुडागमश्च । पृषोदरादित्वात्काश्मीरः ॥ **४७३ कृञः–** । डुकृञ् करणे, अस्मादीरन् धातोरन्त्यस्य उदादेशो रपरः ॥ **४७४ घसेः–** । घस्लृ अदने । अस्मादीरन् कित्स्यात् । 'गमहन–' इत्युपधालोपे कत्वं षत्वं च । 'क्षीरं दुग्धे च नीरे च' इति विश्वः ॥ **४७५ गभीर–** । गम्लृ गतौ । अस्मादीरन् भकारोऽन्तादेशः पक्षे नुमागमश्च निपात्यते । 'निम्नं गभीरं गम्भीरम्' इत्यमरः ॥ **४७६ विषः–** । षोऽन्तकर्मणि, ओहाक् त्यागे, आभ्यां विपूर्वाभ्यामाप्रत्ययो निपात्यते ॥ **४७७ पचः–** । डुपचष् पाके, अस्मादेलिमच् स्यात् । कर्तरि अयम् । कृत्यप्रत्ययेषु तु केलिमर उपसंख्यातः ॥ **४७८ शीङः–** । शीङ् स्वप्ने, शेरतेऽनेनेति शीधुर्मद्यविशेषः । 'मैरेयमासवः शीधुः' इत्यमरः । अर्धर्चादिपाठात् क्लीबं च—'पुंनपुंसकयोर्दारुजीवातुस्थाणुशीधवः' इति त्रिकाण्डशेषः । 'शीलं स्वभावे सद्वृत्ते' इति मेदिनी । 'जलनीली तु शैवालम्' इत्यमरः । 'शैवलं पद्मकाष्ठे स्यात् शैवाले तु पुमानयम्' इति मेदिनी । शब्दार्णवोक्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न स्त्री शेपालो जलनीलिका' ॥ ४७९ । मृकणिभ्यामूकोकणौ । मरूको मृगः । काणूकः काकः ॥ ४८० । वलेरूकः । वलूकः पक्षी उत्पलमूलं च ॥ ४८१ । उलूकादयश्च । वलेः संप्रसारणमूकश्च । उलूकाविन्द्रपेचकौ । वावदूको वक्ता । भल्लूकः ॥ (ग) शमेर्बुक्च । शम्बूको जलशुक्तिः ॥ ४८२ । शलिमण्डिभ्यामूकण् । शालूकं कन्दविशेषः । मण्डूकः ॥ ४८३ । नियो मिः । नेमिः ॥ ४८४ । अर्तेरूच । ऊर्मिः ॥ ४८५ । भुवः कित् । भूमिः ॥ ४८६ । अश्नोते रश् च । रश्मिः किरणो रज्जुश्च ॥ ४८७ । दल्मिः । 'दल विशरणे' दल्मिरिन्द्रायुधम् ॥ ४८८ । वीज्याज्वरिभ्यो निः । बाहुलकाण्णत्वम् । 'वेणिः स्यात्केशविन्यासः प्रवेणी च स्त्रियामुभे' । ज्यानिः । जूर्णिः ॥ ४८९ । सृवृषिभ्यां कित् । सृणिरङ्कुशः । 'वृष्णिः क्षत्रियमेषयोः' । ४९० । अङ्गेर्नलोपश्च । अग्निः ॥ ४९१ । वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् । वह्निः । श्रेणिः । श्रोणिः । योनिः । द्रोणिः । ग्लानिः । हानिः । तूर्णिः । बाहुलकात्-म्लानिः ॥ ४९२ । घृणिपृश्निपार्ष्णिचूर्णिभूर्णि । एते पञ्च निपात्यन्ते । घृणिः किरणः । स्पृशतेः सलोपः, पृश्निरल्पशरीरः । पृषेर्वृद्धिश्च, पार्ष्णिः पादतलम् । चरेरुपधाया उत्वम्, चूर्णिः कपर्दकशतम् । बिभर्तेरुत्वम्, भूर्णिर्धरणी ॥ ४९३ । वृदृभ्यां विन् । वर्विर्घस्मरः । दर्विः ॥ ४९४ । जॄशॄस्तॄजागृभ्यः क्विन् । जीर्विः पशुः । शीर्विर्हिंस्रः । स्तीर्विरध्वर्युः ।

माह—शेवालं शैवल इति ॥ ४७९ मृकणि-। मृङ् प्राणत्यागे, कण शब्दार्थः, ऊकश्च उकण् च-ऊकोकणौ, एतौ प्रत्ययौ यथाक्रमं भवतः ॥ ४८० वलेः-। वल संवरणे । 'उलूकः पुंसि काकाराविन्द्रे भारतयोधिनि' इति मेदिनी । वदेर्यङ्लुगन्तादूकः । 'वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरि' इत्यमरः ॥ ४८१ भल्लूक इति-। 'भल्ल परिभाषणे' इत्यस्मादूकः ॥ (ग) शमेः-। 'शम उपशमे' अस्मादूकः, धातोर्बुगागमश्च । शम्बूको गजकुम्भान्ते घोण्टे च शूद्रतापसे' इति मेदिनी । बाहुलकादूकप्रत्यये ह्रस्वमध्योऽपि । 'जम्बूकं जम्बुकं प्राहुः शम्बूकमपि शम्बुकम्' इति द्विरूपकोशः । जम्बूकबन्धूकादयोऽप्यत्रैव द्रष्टव्याः । 'जम्बूकः फेरवे नीचे पश्चिमाशापतावपि' इति मेदिनीविश्वप्रकाशौ । 'बन्धूकं बन्धुजीवे स्याद्बन्धूकः पीतसारके' इति च ॥ ४८२ शलिमण्डि-। शल गतौ, मडि भूषायां हर्षे च । 'सौगन्धिकं तु कह्लारम्' इत्याद्युपक्रम्य 'शालूकमेषां कन्दः स्यात्' इत्यमरः । एवं च सौगन्धिकादीनां कुमुदकैरवान्तानां कन्दो मूलं शालूकमित्यर्थः । मण्डते वर्षासमयमिति मण्डूको भेकः ॥ ४८३ नियो मिः । णीञ् प्रापणे । नयति चक्रमिति नेमिश्चक्रावयवः । 'नेमिर्ना तिनिशे कूपत्रिकाचक्रान्तयोः स्त्रियाम्' इति मेदिनी । बाहुलकादन्यतोऽपि—या प्रापणे, 'यामिः स्वसृकुलस्त्रियोः' इत्यन्तस्थादौ रभसः । 'जामिः स्वसृकुलस्त्रियोः' इति चवर्गतृतीयादावजयकोशः । 'चवर्गादिरपि प्रोक्तो जामिः स्वसृकुलस्त्रियोः' इति द्विरूपेषु विश्वः ॥ ४८४ अर्तेरूच । ऋ गतावित्यस्मान्मिः, धातोरूकारादेशश्च । उचेति वक्तुमुचितम्, रपरत्वे 'हलि च' इति दीर्घसंभवात् ॥ 'ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः । वस्त्रसंकोचरेखायां वेदनापीडयोरपि' इति मेदिनी ॥ ४८५ भुवः-। भवतेर्मिः कित्स्यात् । भवन्ति भूतान्यस्यामिति भूमिः । 'भूमिर्वसुन्धरायां स्यात्स्थानमात्रेऽपि च स्त्रियाम्' इति मेदिनी । 'भूर्भूमिरचलानन्ता' इत्यादिस्त्वमरः ॥ ४८६ अश्नोतेः । अशू व्याप्तौ, अस्मान्मिः, धातो रशादेशश्च । 'रश्मिः पुमान् दीधितौ स्यात्पक्ष्मप्रग्रहयोरपि' इति मेदिनी ॥ ४८८ वीज्या-। वी गतौ, ज्या वयोहानौ, ज्वर रोगे । अमरोक्तमाह—वेणिः स्यादित्यादि । 'कृदिकारात्–' इति ङीष् । 'वेणी केशस्य बन्धने । नद्यादेरन्तरे देवताडे' इति मेदिनी । 'वेणी खरागरी देवताडो जीमूत इत्यपि' इत्यमरः । 'ज्यानिर्हानौ स्रवन्त्यां च' इति विश्वः । 'ज्वरत्वर–' इत्युपधाया वकारस्य च ऊठ् । जूर्णिः स्त्रीरोगः ॥ ४८९ सृवृषि-। सृ गतौ, वृषु सेचने, आभ्यां निः कित्स्यात् । 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमरः । 'सृणिः स्यादङ्कुशे पुमान्' इति कोशान्तरम् । अत एव 'आरक्षमग्नमवमत्य सृणिं शिताग्रम्' इति माघे पुंलिङ्गप्रयोगः । वृष्णिस्तु यादवे मेषे वृष्णिः पाखण्डचण्डयोः' इति विश्वः । 'ऐन्द्रे वृष्णिं षोडशिनि तृतीयम्' इति श्रुतौ वृष्णिं मेषमित्यर्थः ॥—अङ्गेः । अगिर्गत्यर्थः । 'अग्निर्वैश्वानरेऽपि स्याच्चित्रकाख्यौषधौ पुमान्' इति मेदिनी ॥ ४९१ वहि-। वह प्रापणे, श्रिञ् सेवायाम्, श्रु श्रवणे, यु मिश्रणे, द्रु गतौ, ग्लै म्लै हर्षक्षये, ओहाक् त्यागे, ञित्वरा संभ्रमे, एभ्यो निः प्रत्ययः स्यात्स च नित् । 'वह्निर्वैश्वानरेऽपि स्याच्चित्रकाख्यौषधौ पुमान्' इति मेदिनी । श्रेणिः पङ्क्तिः । 'निःश्रेणिस्त्वधिरोहिणी । श्रेणिः स्त्रीपुंसयोः पङ्क्तौ समाने शिल्पिसंहतौ' इति मेदिनी । श्रोणिः कटिप्रदेशः । 'कटिः श्रोणिः ककुद्मती' इत्यमरः । योनिर्भगम् । 'योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे' इति मेदिनी । द्रोणिः सेचनी । 'कृदिकारात्–' इति ङीषि—द्रोणी । 'द्रोणोऽस्त्रियामाढके स्यादाढकादिचतुष्टये । पुमान् कृपीपतौ कृष्णकाके स्त्री नीवृदन्तरे' इति मेदिनी । ग्लानिर्दौर्बल्यम् । हानिरपचयः क्षयश्च । तूर्णिर्मनः ॥ ४९२ घृणि-। घृ सेचने, स्पृश संस्पर्शने, पृषु सेचने, चर गतौ, डुभृञ् धारणपोषणयोः । निप्रत्ययो गुणाभावश्च निपात्यते । 'घृणिः पुनः । अंशुज्वालातरङ्गेषु' इति हेमचन्द्रः । 'पृश्निरल्पतनौ' इत्यमरः । 'पार्ष्णिः स्यादुन्मदस्त्रियाम् । स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रन्थ्यधरेऽपि च' इति मेदिनी ॥—भूर्णिरिति । 'तक्वा न भूर्णिः' इति मन्त्रस्य भाष्ये तु भूर्णिर्धारकः पोषको वेति व्याख्यातम् ॥ ४९३ वृदृ-। वृञ् वरणे, दृङ् आदरे, स्त्रियां 'कृदिकारात्–' इति ङीष् । दर्वी ॥ ४९४ जॄशॄ । जॄ वयोहानौ, शॄ हिंसायाम्, स्तॄञ् आच्छादने, जागृ निद्राक्षये, क्विनः

१ अस्य गणसूत्रत्वं प्रायः सम्मतम् । 'उलूकादयश्च' इत्यस्य व्याख्यावसरे मनोरमायां शमेरित्येतद्व्याख्याय 'जम्बूकादयोऽप्यत्रैव द्रष्टव्याः' इत्युक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जागृविर्नृपः ॥ ४९५ । दिवो द्वे दीर्घश्चाभ्यासस्य । 'दीदिविः स्वर्गमोक्षयोः' ॥ ४९६ । कृविघृष्विछविस्थिविकिकीदिवि । कृविस्तन्तुवायद्रव्यम् । घृष्विर्वराहः । छास्थोर्ह्रस्वत्वं च-छविर्दीप्तिः, स्थविस्तन्तुवायः । दीव्यतेः किकीपूर्वात्-किकीदिविश्चाषः । बाहुलकाद्ह्रस्वदीर्घयोर्विनिमयः-'चाषेण किकिदीविना' ॥ ४९७ । पातेर्डतिः । पतिः ॥ ४९८ । शकेर्ऋतिन् । शकृत् ॥ ४९९ । अमेरतिः । अमतिः कालः ॥ ५०० । वहिवस्यर्तिभ्यश्चित् । वहतिः पवनः । 'वसतिर्गृहयामिन्योः' । अरतिः क्रोधः ॥ ५०१ । अञ्चेः को वा । अङ्कतिः-अञ्चतिर्वातः ॥ ५०२ । हन्तेरंह च । हन्तेरतिः स्यादंहादेशश्च धातोः । हन्ति दुरितमनया अंहतिर्दानम् । 'प्रादेशनं निर्वपणमपवर्जनमंहतिः' ॥ ५०३ । रमेर्नित् । 'रमतिः कालकामयोः' ॥ ५०४ । सूङः क्रिः । सूरिः ॥ ५०५ । अदिशदिभूशुभिभ्यः क्रिन् । अद्रिः । शद्रिः शर्करा । भूरि प्रचुरम् । शुभ्रिर्ब्रह्मा ॥ ५०६ । वङ्क्र्यादयश्च । क्रिन्नन्ता निपात्यन्ते । वङ्क्रिर्वाधभेदो गृहदारु पार्श्वास्थि च । वप्रिः क्षेत्रम् । 'अंहिरङ्घ्रिश्च चरणः' । तद्रिः सौत्रो धातुः, तन्द्रिर्मोहः । बाहुलकाद्गुणः, भेरिः ॥ ५०७ । राशदिभ्यां त्रिप् । रात्रिः । शत्रिः कुञ्जरः ॥ ५०८ । अदेस्त्रिनिश्च । चात्त्रिप् । अत्री, अत्रिणौ, अत्रिणः । अत्रिः, अत्री, अत्रयः ॥ ५०९ । पतेरत्रिन् । पतत्रिः पक्षी ॥ ५१० । मृकणिभ्यामीचिः । मरीचिः । कणीचिः पल्लवो निनादश्च ॥ ५११ ।

कित्त्वात् 'ऋत इद्धातोः' इति इत्वे रपरत्वे जीर्विरित्यादि ॥ ४९५ दिवो-। 'दिवु क्रीडादौ' अस्मात् क्विन्, शित्त्वाद्गुणाभावः 'दीदिविर्धिषणान्नयोः' इति विश्वः । 'दीदिविर्ना धिषणेऽन्न तदस्त्रियाम्' इति मेदिनी । धिषणो बृहस्पतिः । 'दीदिविर्द्वादशकरश्चक्षुः सुरगुरुर्गुरुः' इति त्रिकाण्डशेषः । 'दीदिविर्द्वादशार्चिः स्याज्जीवः प्राक्फल्गुनीसुतः' इति हारावली । 'ओदनोऽस्त्री सदीदिविः' इत्यमरः । अत्र सदीदिविः=दीदिविसहित इति व्याख्यानं न्याय्यम् । अत्र स इति विशेषणाद्दीदिविः पुंलिङ्ग इति केषांचिद्व्याख्यानं नादर्तव्यम् । स इति छेदने तु अस्त्रियामिति न लभ्येत । ततश्च 'अन्ने तदस्त्रियाम्' इति पूर्वोक्तमेदिनीग्रन्थो विरुध्येतेति ध्येयम् । 'गोपामृतस्य दीदिविम्' इति मन्त्रे तु द्योतमानमित्यर्थः ॥ ४९६ कृवि-। डुकृञ् करणे, घृषु सेचने, छो छेदने, ष्ठा गतिनिवृत्तौ, दिवु क्रीडादौ, एते क्विन्नन्ता निपात्यन्ते ॥—घृष्विर्वराह इति । 'उग्रस्य यूनः स्थविरस्य घृष्वेः' इति मन्त्रे तु घृष्वेः कामानां वर्षकस्येत्यर्थ इति व्याख्यातम्, घृषु सेचने इति धात्वर्थानुगमात् । 'छविः शोभारुचोर्योषित्' इति मेदिनी । 'अथ चाषः किकीदिविः' इत्यमरः ॥—विनिमय इति । 'किकीदिविः किकिदिविः' इति द्विरूपकोशः ॥ ४९७ पातेः-। पा रक्षणे डित्त्वाट्टिलोपः । 'पतिर्धवे ना त्रिष्वीशे' इति मेदिनी ॥ ४९८ शकेः-। शक्लृ शक्तौ । 'उच्चारावस्करौ शमलं शकृत् । गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविशौ स्त्रियाम्' इत्यमरः ॥ ४९९ अमेः-। अम गतौ । 'अथामतिः पुंसि हिमदीधितिकालयोः' इति मेदिनी ॥ ५०० वहि-। वह प्रापणे, वस निवासे, ऋ गतौ । 'वहतिः सचिवे गवि' इति विश्वः । 'वसतिः स्यात् स्त्रियां वासे यामिन्यां च निकेतने' इति मेदिनी ॥ ५०१ अञ्चेः-। अञ्चु गतौ, अस्मादतिः स्यात्ककारश्चान्तादेशो विकल्पेन ॥ ५०२ हन्तेः-। हन हिंसागत्योः, अमरोक्तिमाह—प्रादेशनमित्यादि ॥ ५०३ रमेः-। रमतेरतिः स्यात्स च नित् । 'रमतिर्नायके नाके पुंसि स्यात्' इति मेदिनी । नित्त्वमाद्युदात्तार्थम् । 'रन्तिरसि रमतिरसि' ॥ ५०४ सूङः-। षूङ् प्राणिप्रसवे । कित्त्वाद्गुणाभावः । 'धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः' इत्यमरः । दशपाद्यां तु 'सुञोरिन् दीर्घश्च' इति पाठः । तत्र रिनो नकारो नानुबन्धः, उत्तरसूत्रे क्रिन्प्रत्ययारम्भात् । अनुबन्धत्वे हि लाघवादिहैव क्रिनुच्येत । तथा च-सूरी, सूरिणौ, सूरिण इत्यादि रूपम् । अत एवाभिधानमालायां-सूरीति नान्तमुदाहृतमित्यवधेयम् । दशपादीवृत्तिकारैस्तु नित्त्वं स्वीकृत्य सूरिरित्युदाहृतं, तदेतेन प्रत्युक्तम् । स्वरविरुद्धमपि, 'सदा पश्यन्ति सूरयः' 'विसूरयो दधतो विश्वमायुः' इत्यादौ सूरिशब्दस्यान्तोदात्तत्वदर्शनात् ॥ ५०५ अदि-। अद भक्षणे, शद्लृ शातने, भू सत्तायाम्, शुभ शुम्भ शोभार्थे । 'अद्रयो द्रुमशैलार्काः' इत्यमरः । 'भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि । नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्यलिङ्गकः' इति मेदिनी ॥ ५०६ वङ्क्र्यादयश्च । वकि कौटिल्ये, टुवप् बीजसन्ताने । निपातनात्संप्रसारणाभावः । अङ्घिर्भाषार्थश्चुरादिण्यन्तः । अघि गतौ गत्यारम्भे च । ञिभी भये ॥—तन्द्रिरिति । 'कृदिकारात्-' इति पक्षे ङीष् । 'तन्द्री निद्राप्रमीलयोः' इति मेदिनी । 'तन्द्री तन्द्रिश्च तन्द्रायाम्' इति द्विरूपकोशः । 'विभज्य नक्तंदिवमस्ततन्द्रिणा' इति भारविः ॥ प्रत्ययस्य कित्त्वाद्गुणाभावमाशङ्क्याह—बाहुलकादिति ॥ ५०७ राशदि-। रा दाने, शद्लृ शातने । 'शत्रिर्नाम्भोधरे विष्णौ' इति मेदिनी । 'शत्रिमग्न उपमां केतुमर्यः' इति मन्त्रस्य वेदभाष्ये तु उपमां=उपमानभूतं केतुं=प्रख्यातं शत्रिम्=एतन्नामकं राजर्षिमिति व्याख्यातम् ॥ ५०८ अदेः-। अद भक्षणे, अत्री भक्षकः । अत्रिः=ऋषिविशेषः । उज्ज्वलदत्तादयस्तु-अदेस्त्रिनिति पठित्वा अत्रिरित्युदाजहार । तन्न । त्रिपैवेष्टसिद्धौ प्रत्ययान्तरवैयर्थ्यात् । गोवर्धनस्तु-अदेस्त्रिन्निचेति पठित्वा निदिति वचनान्नकारस्य नेत्संज्ञा, अत्री अत्रिणौ अत्रिण इत्याह । तदपि न । नित्त्वे सत्याद्युदात्तत्वापत्तेः । न चेष्टापत्तिः । जहीन्या अत्रिणं पणिं' । 'अग्ने हंसिन्या अत्रिणम्' इत्यादावन्तोदात्तस्य निर्विवादत्वात् । अत एव 'न लुमताङ्गस्य' इति सूत्रे 'अदेस्त्रिनिश्च' इत्येव कैयटोऽप्याहेति दिक् ॥ ५०९ पतेः-। पत्लृ गतौ ॥—पतत्रिरिति । पक्षवाचकात्पतत्रशब्दान्मत्वर्थे इनि तु नान्तः । पतत्री पतत्रिणौ पतत्रिण इत्यादि ॥ ५१० मृकणि-। मृङ् प्राणत्यागे, कण शब्दार्थः-कण गतौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वयतेश्चित् । श्वयीचिर्व्याधिः ॥ ५१२ । **वेञो डिच्च** । वीचिस्तरङ्गः । नञ्समासे–अवीचिर्नरकभेदः ॥ ५१३ । **ऋहनिभ्यामूषन्** । अरूषः सूर्यः । हनूषो राक्षसः ॥ ५१४ । **पुरः कुषन्** । 'पुर अग्रगमने' । पुरुषः । 'अन्येषामपि–' ३५३९ इति दीर्घः, पूरुषः ॥ ५१५ । **पॄनहिकलिभ्य उषच्** । परुषम् । नहुषः । कलुषम् ॥ ५१६ । **पीयेरूषन्** । पीय इति सौत्रो धातुः, पीयूषम् । बाहुलकाद्गुणे–'पेयूषोऽभिनवं पयः' ॥ ५१७ । **मस्जेर्नुम् च** । मञ्जूषा ॥ ५१८ । **गडेश्च** । गण्डूषः । गण्डूषा ॥ ५१९ । **अर्तेररुः** । अररुः शत्रुः, अररू, अररवः ॥ ५२० । **कुटः किच्च** । कुटरुर्वस्त्रगृहम् । कित्वप्रयोजनं चिन्त्यम् ॥ ५२१ । **शकादिभ्योऽटन्** । 'शकटोऽस्त्रियाम्', शकिर्गत्यर्थः । कङ्कटः सन्नाहः । देवटः शिल्पी । करटः । इत्यादि ॥ ५२२ । **कृकदिकडिकटिभ्योऽम्बच्** । करम्बं व्यामिश्रम् । कदि-कडी सौत्रौ । कदम्बो वृक्षभेदः । कडम्बोऽग्रभागः । कटम्बो वादित्रम् ॥ ५२३ । **कदेर्णित्पक्षिणि** । कादम्बः कलहंसः ॥ ५२४ । **कलिकर्दोरमः** । कलमः । कर्दमः ॥ ५२५ । **कुणिपुल्योः किन्दच्** । 'कुण शब्दोपकरणयोः' कुणिन्दः शब्दः । पुलिन्दो जातिविशेषः ॥ ५२६ । **कुपेर्वा वश्च** । कुपिन्दकुविन्दौ तन्तुवाये ॥ ५२७ । **नौ षञ्जेर्घथिन्** । निषङ्गथिरालिङ्गकः ॥ ५२८ । **उदर्तेश्चित्** । उदरथिः समुद्रः ॥ ५२९ । **सर्तेर्णिच्च** । सारथिः ॥ ५३० । **खर्जिपिञ्जादिभ्य ऊरोलचौ** । खर्जूरः । कर्पूरः । वल्लूरं शुष्कमांसम् । पिञ्जूलं कुशवर्तिः ।

'मरिचिः कृपणे दीप्तौ ऋषिभेदे च दृश्यते' इति विश्वः । '**मरीचिर्मुनिभेदे ना गभस्तावनपुंसकम्**' इति मेदिनी । '**कणीचिः** पुष्पितलतागुञ्जयोः शकटे स्त्रियाम्' इति च ॥ ५११ **श्वयतेः–**। टुओश्वि गतिवृद्ध्योः, अस्मादीचिप्रत्ययश्चित्स्यात् ॥ ५१२ **वेञः–**। वेञ् तन्तुसन्ताने । अस्मादीचिर्डित्स्यात् । '**वीचिः** स्वल्पे तरङ्गे स्यादवकाशे सुखे द्वयोः' इति विश्वमेदिन्यौ ॥ ५१३ **ऋहनि–**। ऋ गतौ, हन हिंसागत्योः ॥ ५१४ **पुरः**। कुष निष्कर्षे । कित्वाद्गुणाभावः । '**पुरुषः** पुरुषे सांख्यज्ञे च पुंनागपादपे' इति विश्वमेदिन्यौ ॥ ५१५ **पॄनहि–**। पॄ पालनपूरणयोः, णह बन्धने, कल शब्दसंख्यानयोः । '**परुषं** कर्बुरे रूक्षे निष्ठुरोक्तौ च वाच्यवत्' इति मेदिनी । '**नहुषो** राजविशेषे नागभिद्यपि' इति हेमचन्द्रः । उषवश्चित्त्वान्नहुषशब्दस्यान्तोदात्तत्वे प्राप्ते प्रामादित्वाद्वृषादित्वाद्वा आद्युदात्तत्वमित्याहुः । एतच्च 'देवा अकृण्वन्नहुषस्य विश्वम्' इति मन्त्रस्य भाष्ये स्पष्टम् । '**कलुषं** त्वाविलैनसोः' इति विश्वः ॥ ५१६ **पीयेः–**। 'पीयूषममृतं सुधा' इत्यमरः । '**पीयूषं** सप्तदिवसावधि क्षीरे तथाऽमृते' इति मेदिनी ॥ अमरोक्तिमाह—**पेयूष इत्यादि** ॥ ५१७ **मस्जेः–**। टुमस्जौ शुद्धौ, अस्मादूषन्स्यान्नुमागमश्च धातोः । 'मिदचोऽन्त्यात्परः', सस्य श्चुत्वेन शः, तस्य जश्त्वेन जः, तस्य 'झरो झरि–' इति वालोपः । लोपाभावपक्षे जकारद्वयम् । मञ्जूषा काष्ठमयं द्रव्यम् । पेटक इति यावत् । 'पिटकः पेटकः पेटा मञ्जूषा' इत्यमरः ॥ ५१८ **गडेः–**। गडि वदनैकदेशे । 'गण्डूषो मुखपूर्तौभपुष्करप्रसृतोन्मिते' इति मेदिनी ॥ ५१९ **अर्तेः–**। ऋ गतौ, उकारान्तोऽयं प्रत्ययो न तु सकारान्त इति स्फोरयति–अररू, अररवः इत्यनेन । न चोकारान्तत्वे विवदितव्यम् । 'कंचिद्यावीररुं शूरमर्त्यम्' 'अपाररुमदेवयजनो जहि' इत्यादिमन्त्रेषु तथा दर्शनात् । अत्र **व्याचक्षते**—'मा नः शंसो अररुषः' इति मन्त्रस्य भाष्ये सान्तोऽयमिति माधवेनोक्तं यत्तत्प्रौढिवादमात्रं न तु वास्तवम्, अररुष इति पदस्य आद्युदात्तत्वानुपपत्तिप्रसङ्गात् । तस्माद्रातेः 'लिटः क्वसुश्च' इति क्वसौ ररिवानित्यनेन नञ्समासे 'ङस्यररुष' इति व्याख्येयम् । ततश्च 'तत्पुरुषे तुल्यार्थ–' इत्यादिना पूर्वपदप्रकृतिस्वरे सत्याद्युदात्तत्वं सिध्यति । 'गुरुद्वेषो अररुषे दधन्ति' इत्यत्र स्वयमेव रातेः क्वसन्तस्य नञ्समास इत्यादि व्याख्यानात् । 'यो नो अग्ने अररिवां अघायुः' इत्यादिमन्त्रान्तरसंभवाच्चेति ॥ ५२० **कुटः–**। कुट कौटिल्ये, अस्मादरुः स्यात्स च कित् ॥—**चिन्त्यमिति** । 'गाङ् कुटादिभ्यः–' इति ङित्त्वेनैव गुणाभावसिद्धेरिति भावः ॥ ५२१ **शका** । **शकिर्गत्यर्थ इति** । शक्लृ शक्तावित्यस्मादटन्नित्येके । 'क्लीबेऽनः **शकटो**ऽस्त्री स्यात्' इत्यमरः ॥—**देवट इति** । देवृ देवने ॥—**करट इति** । डुकृञ् करणे, कॄ विक्षेपे इत्यस्माद्वा अटन् । 'काकेभगण्डौ **करटौ**' इत्यमरः । 'करटो गजगण्डे स्यात्कुसुम्भे निन्द्यजीविनि । एकादशाहादिश्राद्धे दुर्दुरूढेऽपि वायसे' इति मेदिनी ॥ ५२२ **कृकदि–**। डुकृञ् करणे, कटे वर्षावरणयोः । '**करम्बो** मिश्रिते बान्तो भान्तस्तु दधिसक्तुषु' इति विश्वः । '**कदम्बं** निकुरम्बे स्यान्नीपसर्षपयोः पुमान्' इति च ॥ ५२३ **कदेः–**। '**कादम्बः** स्यात्पुमान्पक्षिविशेषे सायकेऽपि च' इति मेदिनी ॥ ५२४ **कलि–**। कल संख्याने, कर्द कुत्सिते शब्दे । '**कलमः** पुंसि लेखन्यां शालौ पाटच्चरेपि च' इति मेदिनी ॥ ५२५ **कुणिपुल्योः–**। पुल महत्त्वे ॥ ५२६ **कुपेः–**। कुप क्रोधे । अस्मात्किंदच् स्यात्, वकारश्चान्तादेशो विकल्पेन । 'तन्तुवायः **कुविन्दः** स्यात्' इत्यमरः । **बाहुलकात्**—अल भूषणादौ । अलिन्दम् । 'यस्यामलिन्देषु न चकुरेव मुग्धाङ्गनागोमयगोमुखानि' इति माघः ॥ ५२७ **नौ षञ्जेः** । षञ्ज सङ्गे । निपूर्वादस्मात् घथिन्स्यात् । 'उपसर्गात्सुनोति–' इत्यादिना षत्वम् । 'चजोः–' इति कुत्वम् । 'आभुरस्य निषङ्गथिः' । रथकूबर इत्यर्थः ॥ ५२८ **उद–**। ऋ गतौ उत्पूर्वादस्मात् घथिन् स्यात् स च चित् ॥ ५२९ **सर्तेः–**। सृ गतौ अस्मात् घथिन् णित्स्यात् । 'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः' इत्यमरः ॥ ५३० **खर्जि–**। खर्ज मार्जने, पिञ्ज हिंसायाम् । खर्जादिभ्यः पिञ्जादिभ्यश्च यथाक्रमं ऊरऊलचौ स्तः । '**खर्जूरं** रूप्यफलयोः खर्जूरः कीटवृक्षयोः' इति मेदिनीहेमचन्द्रौ । कृपू सामर्थ्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ग) लङ्गेर्वृद्धिश्च । लाङ्गूलम् । कुसूलः । (ग) तमेर्वुग्वृद्धिश्च । ताम्बूलम् । (ग) शृणातेर्दुग्वृद्धिश्च । शार्दूलः । (ग) दुक्रोः कुक्च दुकूलम् । कुकूलम् ॥ ५३१ । कुवश्चट् दीर्घश्च । कूची चित्रलेखनिका ॥ ५३२ । समीणः । समीचः समुद्रः । समीची हरिणी ॥ ५३३ । सिवेष्टेरू च । सूचो दर्भाङ्कुरः । सूची ॥ ५३४ । शमेर्वन् । शम्बो मुसलम् । ५३५ । उल्वादयश्च । वन्नन्ता निपात्यन्ते । 'उच समवाये' चस्य लत्वं गुणाभावश्च, उल्बो गर्भाशयः । शुल्बं ताम्रम् । बिम्बम् ॥ ५३६ । स्थः स्तोऽम्बजवकौ । तिष्ठतेरम्बच् अबक एतौ स्तस्तादेशश्च । 'स्तम्बो गुच्छस्तृणादिनः' । स्तबकः पुष्पगुच्छः ॥ ५३७ । शशपिभ्यां ददनौ । 'शादो जम्बालशष्पयोः' । शब्दः ॥ ५३८ । अब्दादयश्च । अवतीत्यब्दः ॥ (ग) कौतेर्नुम् । कुन्दः ॥ ५३९ । वलिमलितनिभ्यः कयन् । वलयम् । मलयः । तनयः ॥ ५४० । वृह्वोः षुग्दुकौ च । वृषय आश्रयः । हृदयम् ॥ ५४१ । सिपीभ्यां रुः । मेरुः । पेरुः सूर्यः । बाहुलकात्–पिबतेरपि । 'संवत्सरवपुः पारुः पेरुर्वासीर्दिनप्रणीः' ॥ ५४२ । जत्वादयश्च । जत्रु, जत्रुणी । अश्रु, अश्रुणी ॥ ५४३ । रुशातिभ्यां क्रुन् । रुरुर्मृगभेदः । शातयतीति शत्रुः, प्रज्ञादौ पाठाद्ध्रस्वत्वम् ॥ ५४४ । जनिदाच्युसृवृमदिषमिनमिभृञ्भ्य इत्वन्त्वन्त्नणक्किन्शक्स्यढडटाटचः । जनित्वौ मातापितरौ । दात्वो दाता । च्यौत्नो गन्ता

बाहुलकात् 'क्रपो रो लः' इति लत्वाभावः । 'अथ कर्पूरमस्त्रियाम् । घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका' इत्यमरः । एवं शाल्पूरादयो द्रष्टव्याः । 'भेके मण्डूक-वल्ल संवरणे, वल्लूरम् । 'उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम्' इत्यमरः । एवं शालूरादयो द्रष्टव्याः । 'भेके मण्डूक-वर्षाभूशालूरप्लवदर्दुराः' इत्यमरः ॥ (ग) लङ्गेः–। लगिर्गत्यर्थः । 'लाङ्गूलं पुच्छशेफसोः' इति मेदिनी ॥—कुसूल इति । कुस श्लेषणे, दन्त्यसकारवान् । 'कुसूलं च कुसीदं च मध्यदन्त्यमुदाहृतम्' इति विश्वः । ताम्बूलादयोऽप्यत्र द्रष्टव्याः । तमु ग्लानौ, वुग् दीर्घत्वं च । 'ताम्बूली नागवल्ल्यां स्त्री क्रमुके तु नपुंसकम्' इति मेदिनी । शॄ हिंसायाम्, धातोर्वृद्धिर्दुगागमश्च । 'शार्दूलो राक्षसान्तरे । व्याघ्रे च पशुभेदे च सत्तमे तूत्तरस्थिते' इति मेदिनीविश्वप्रकाशौ । उत्तरस्थितः–उत्तरपदभूतः । शार्दूलशब्दस्तु श्रेष्ठवाची राजशार्दूल इति यथा । दु गतौ, कुङ् शब्दे, अनयोः कुक् च । 'दुकूलं श्लक्ष्णवस्त्रे स्यात् क्षौमे च' इति मेदिनी । 'कुकूलं शङ्कुसङ्कीर्णे श्वभ्रे ना तु तुषानले' इति विश्वमेदिन्यौ । 'शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना । अयं क्व च कुकूलाऽग्निकर्कशो मदनानलः' इति प्रयोगश्च ॥ ५३१ कुवः–। कु शब्दे, कुचः स्तनः । 'कुचकूचौ स्तनौ मतौ' इति विश्वः ॥—कूचीति । टित्त्वान्ङीप् ॥ ५३२ समीणः–। इण् गतौ अस्मात्सम्युपपदे चट् स्याद्दीर्घश्च धातोः ॥ ५३३ सिवेः–। षिवु तन्तुसन्ताने, अस्माच्चट् प्रत्ययः स्याट्टेरूत्वं च, टित्त्वान्ङीप् । 'सूची तु सीवनद्रव्येऽप्याङ्गिकाभिनयान्तरे' इति मेदिनी ॥ ५३४ शमेः–। शम उपशमे । 'शम्बः स्यान्मुसलाग्रस्थलोहमण्डलके पवौ । शुभान्विते त्रिषु' इति विश्वमेदिन्यौ ॥ ५३५ उल्बा । उल्बमिति । 'गर्भाशयो जरायुः स्यादुल्बं च कललोऽस्त्रियाम्' इत्यमरः । शुच शोके, चस्य लत्वं गुणाभावश्च प्राग्वत्, 'शुल्बं ताम्रे यज्ञकर्मण्याचारे जलसंनिधौ' इति मेदिनीहेमचन्द्रौ । वी गतिप्रजनकान्त्यसनखादनेषु, अस्य नुमागमो ह्रस्वत्वं च । ववयोरभेदात्–बिम्बम् । 'बिम्बस्तु प्रतिबिम्बे स्यान्मण्डले पुंनपुंसकम् । बिम्बिकायाः फले क्लीबं कृकलासे पुनः पुमान्' इति मेदिनी ॥ ५३६ स्थः स्तः–। ष्ठा गतिनिवृत्तौ, 'स्तम्बो गुल्मे तृणादीनामप्रकाण्डद्रुमेऽपि च' इति विश्वः । 'स्तम्बोऽप्रकाण्डद्रुमगुच्छयोः' इति मेदिनी । 'स्याद्गुच्छकस्तु स्तबकः' इत्यमरः ॥ ५३७ शशपि–। शो तनूकरणे, शप आक्रोशे, 'शादो जम्बालशष्पयोः' इत्यमरः । 'शष्पं बालतृणं घासः' इति च । 'शादः स्यात्कर्दमे शष्पे' इति मेदिनी । शब्दो निनादः ॥ ५३८ अब्दादयः । एते ददनन्ता निपात्यन्ते । अव रक्षणे, वस्य बः । अब्दः संवत्सरे वारिवाहमुस्तकयोः पुमान्' इति मेदिनी ॥ (ग) कौतेः–। कु शब्दे, 'कुन्दो माघ्येऽस्त्री मुकुन्दभ्रमिनिध्यन्तरेषु ना' इति च मेदिनी ॥ ५३९ वलिमलि–। वल संवरणे संचरणे च, मल मल्ल धारणे, तनु विस्तारे । वलयः कण्ठरोगे ना कङ्कणे पुंनपुंसकम्' इति मेदिनी । 'मलयः पर्वतान्तरे । शैलांशे देश आरामे त्रिवृतायां तु योषिति' इति च । 'आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियाम्' इत्यमरः ॥ ५४० वृह्वोः–। वृञ् वरणे, हृञ् हरणे, आभ्यां कयन् स्यात्, यथाक्रमं षुग्दुकावागमौ च भवतः । कयनः कित्त्वं त्विह गुणाभावार्थम् । ह्रियते विषयैरिति हृदयं मनः ॥ ५४१ सिपीभ्याम्–। डुमिञ् प्रक्षेपणे, पीङ् पाने । 'मेरुः सुमेरुर्हेमाद्रिः' इत्यमरः । पीयते रसानिति पेरुः ॥—पिबतेरिति–। पा पाने । हट्टचन्द्रोक्तिमाह—संवत्सरवपुरित्यादि ॥ ५४२ जत्वादयः । रुप्रत्ययान्ता निपात्यन्ते । जनी प्रादुर्भावे, नकारस्य तकारः । जत्रुः स्कन्धसन्धिः । 'सन्धी तस्यैव जत्रुणी' इत्यमरः । तस्य पूर्वोक्तस्य स्कन्धस्य सन्धिरित्यर्थः । असु क्षेपणे, अशू व्याप्तौ संघाते च । अश्रु–अश्रु च नयनजलम् । शीङो ह्रस्वत्वं गुगागमश्च, 'शिग्रुर्ना शाकमात्रेऽपि शोभाञ्जनमहीरुहे' इति मेदिनी ॥ ५४३ रुशाति–। रु शब्दे, शद्लृ शातने–ण्यन्तः । 'कृष्णसाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः' इत्यमरः । 'रुरुर्दैत्ये मृगेऽपि च' इति मेदिनी ॥ ५४४ जनिदा–। जनी प्रादुर्भावे, डुदाञ् दाने, च्युङ् गतौ, सृ गतौ, वृञ् वरणे, मदी हर्षे, षम ष्टम अवैकल्ये, णम प्रह्वत्वे शब्दे च, डुभृञ् धारणपोषणयोः । एभ्यो नवभ्यो यथासंख्यं नव स्युः । जनेरित्वन् । जनेरिडागमेनापि जनित्वेति रूपसिद्धाविकारोच्चारणमुत्तरार्थम् ॥—च्यौत्न इति । च्णो णित्त्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अण्डजः क्षीणपुण्यश्च । सृणिरङ्कुशश्चन्द्रः सूर्यो वायुश्च । वृशः–आर्द्रकं मूलकं च । मत्स्यः । षण्ढः । डित्वाट्टिलोपः, नमतीति नटः शैलूषः । बिभर्ति भरटः कुलालो भृतकश्च ॥ ५४५ । अन्येभ्योऽपि दृश्यन्ते । पेत्वममृतम् । भृशम् ॥ ५४६ । कुसेरुम्भोमेदेताः । कुसुम्भम्, कुसुमम्, कुसीदम्, कुसितो जनपदः ॥ ५४७ । सानसिवर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्याः । सनोतेरसिप्रत्यय उपधावृद्धिः, सानसिर्हिरण्यम् । वृञो नुक् च, वर्णसिर्जलम् । पॄ, पर्णसिर्जलगृहम् । 'तड आघाते' तण्डुलाः । 'अकि लक्षणे' उशच्, अङ्कुशः । चषेरालः, 'चषालो यूपकटकः' । इल्वलो दैत्यभेदः । पल्वलम् । ञिघृषा, ऋकारस्य इकारः, धिष्ण्यम् । शलेर्यः,. शल्यम् । 'वा पुंसि शल्यं शङ्कुर्ना' ॥ ५४८ । मूशक्यबिभ्यः क्लः । मूलम् । शक्लः प्रियंवदे । अम्लो रसः । बाहुलकादमेः–अम्लः ॥ ५४९ । माछाससिभ्यो यः । माया । छाया । सस्यम् । बाहुलकात्सुनोतेः, 'सव्यं दक्षिणवामयोः' ॥ ५५० । जनेर्यक् । 'ये विभाषा' २३१९ । जन्यं युद्धम् । जाया भार्या । ५५१ । अघ्न्यादयश्च । यगन्ता निपात्यन्ते । हन्ते यक् अडागम उपधालोपश्च, अघ्न्या माहेयी । अघ्न्यः प्रजापतिः । 'कनी दीप्तौ' कन्या । बवयोरैक्यम्, वन्ध्या ।

वृद्धिः ॥—सृणिरिति–। क्निः किंत्वान्न गुणः । नित्त्वं तु आद्युदात्तार्थम् । 'सृवृषिभ्यां कित्' इति निप्रत्यये लन्तोदात्तः साधितः ॥—वृश इति । शकः कित्त्वान्न गुणः ॥—मत्स्य इति । स्यप्रत्यये चर्त्वेन दस्य तः । अन्तोदात्तोऽयम् । 'ऋतन्यञ्जि–' इति सूत्रे तु आद्युदात्तः साधितः ॥—षण्ढ इति । बाहुलकात् 'धात्वादेः षः सः' इति षस्य सकारो न । प्रत्ययादेर्ढस्य तु प्रयोजनाभावान्नेत्संज्ञा । 'शमेर्ढः' इति सूत्रे तु तालव्यादिः साधितः । 'सायं सायो भवेत्कोशः कोषः षण्ढश्च शण्ढवत्' इति द्विरूपकोशः । 'षण्ढो वर्षवरः' इत्यमरः । 'नटी नल्यौषधी स्त्री स्याच्छैलूषाशोकयोः पुमान्' इति मेदिनी ॥—नट इति । नमतेर्डट् ॥—भरट इति । बिभर्तेरटच् ॥ ५४५ अन्येभ्योऽपि–। इलन्नादयोऽनुवर्तन्ते ॥—पेत्वमिति । पा पाने, अस्मादिलन् ॥—भृशमिति–। भृञः शक् ॥ ५४६ कुसेः–। कुस संश्लेषणे, अस्मादुम्भ उम ईद इत एते प्रत्ययाः स्युः । 'कुसुम्भं हेमनि महारजने ना कमण्डलौ' इति मेदिनी । 'कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः' इति च । 'कुसीदं जीवने वृद्ध्या क्लीबं त्रिषु कुसीदके' इति च । इह सूत्रे तृतीयो ह्रस्वादिर्दीर्घादिश्च तन्त्रेणोपात्तः । 'वृषाकप्यग्नि–' इति सूत्रे ह्रस्वादिरेवेति वृत्तिकारहरदत्तादिग्रन्थोपष्टम्भेन निर्णीतम् । 'पारलौकिककुसीदमसीदत्' इति श्रीहर्षप्रयोगात्तु दीर्घादिरित्यपि ॥ ५४७ सानसि ॥—सनोतेरिति । षणु दाने ॥—वृञो नुक् चेति । वृञ् वरणे, अस्मादसिः । दशपाद्यां तु 'सानसिधर्णसि–' इति पठित्वा 'धृञो नुक् च' धर्णसिर्लोकपाल इति व्याख्यातम् । युक्तं चैतत्, 'धर्णसिं भूरिधायसम्' इत्यादिमन्त्रानुगुणत्वात् ॥—पर्णसिरिति । पॄ पालनपूरणयोः, अस्मादसिप्रत्ययो नुक् च ॥—तण्डुला इति । उलच्प्रत्ययो नुमागमश्च धातोः । 'त्रेधा तण्डुलान्विभजेत्' इह चित्स्वरः । 'तण्डुलः स्याद्विडङ्गे च धान्यादिनिकरे पुमान्' इति मेदिनी ॥ अङ्कुश इति । अयमपि चित्स्वरेणान्तोदात्तः । तथा च मन्त्रः—'दीर्घं ह्यङ्कुशं यथा' इति 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमरः ॥—चषेराल इति । चष भक्षणे, प्रत्ययस्वरेणाद्युदात्तः । उज्ज्वलदत्तस्त्वालजिति चितमाह । तन्न । 'चषालं ये अश्वयूपाय तक्षति', 'चषालवन्तः स्वरवः पृथिव्याम्' इत्यादौ चित्स्वरादर्शनात् । अमरोक्तिमाह—चषाल इति ॥—इल्वल इति । इल स्वप्नप्रेरणयोः, वलच् गुणाभावः । 'इल्वलस्तारका राजभेदे ना दैत्यमत्स्ययोः' इति मेदिनी । 'इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः' इत्यमरः । पा पाने, अस्माद्वलच् लुगागमः ह्रस्वत्वं च । पिबन्त्यस्मिन्निति पल्वलमल्पसरः । 'वेशन्तः पल्वलं चाल्पसरः' इत्यमरः ॥—इकार इति । रपरत्वाभावो ण्यप्रत्ययश्चेति बोध्यम् । 'धिष्ण्यं स्थाने गृहे भेऽग्नौ' इत्यमरः । 'धिष्ण्यं स्थानाग्निसद्मसु । ऋक्षे शक्तौ च' इति मेदिनी ॥—शलेः–। शल गतौ । 'शल्यं तु न स्त्रियां शङ्कौ क्लीबं क्ष्वेडेषु तोमरे । मदनद्रुश्वाविधोर्ना' इति मेदिनी । 'धिष्ण्यं स्थाने च ऋक्षे च धिष्ण्योऽग्नौ धिष्ण्यमालये' इति धरणिः ॥—शलेः–। शल गतौ । 'शल्यं तु न स्त्रियां शङ्कौ क्लीबं क्ष्वेडेषु तोमरे । मदनद्रुश्वाविधोर्ना' इति मेदिनी ॥ ५४८ मूशकि–। मूङ् बन्धने, शक्लृ शक्तौ, अबि शब्दे । 'मूलं शिफाऽऽद्ययोः । मूलं वित्तेऽन्तिके' इति मेदिनी । 'शक्लः प्रियंवदे' इति विशेष्यनिघ्नेऽमरः ॥—अमेरिति । अम रोगे चुरादिण्यन्तः । बाहुलकादेवोपधाह्रस्वः । 'अम्लो रसविशेषे स्यादम्ला चाङ्गेरिकौषधौ' इति मेदिनी ॥ ५४९ माछा–। मा माने, छो छेदने, षस स्वप्ने । 'माया स्याच्छाम्बरीबुद्ध्योर्मायः पीताम्बरेऽसुरे' इति मेदिनी । 'छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः । पालनोत्कोचयोः कान्तिसच्छोभापङ्क्तिषु स्त्रियाम्' इति विश्वमेदिन्यौ । 'वृक्षादीनां फलं सस्यम्' इत्यमरः ॥—सुनोतेरिति । षुञ् अभिषवे, 'सव्यं वामे प्रतीपे च' इति मेदिनी॥ ५५० जनेः । जन जनने । यकः कित्त्वमुत्तरार्थम् । जन्यं हट्टे परीवादे सङ्ग्रामे च नपुंसकम् । जन्या मातृवयस्यायां जन्यः स्याजनके पुमान् । त्रिषूत्पाद्यजनित्रोश्च नवोढाज्ञातिभृत्ययोः । स्निग्धे' इति मेदिनी । आत्मपक्षे रूपमाह—जायेति ॥ ५५१ अघ्न्या । अघ्न्य इति । यकः कित्त्वात् 'गमहन' इत्युपधालोपे 'हो हन्तेः–' इति कुत्वेन हस्य घः । अडागममनुक्त्वा नञ्पूर्वाद्धन्तेर्यगित्यन्ये ॥—अघ्न्येति । स्त्रियां टाप् । 'माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी अर्जुन्यघ्न्या रोहिणी स्यात्' इत्यमरः । संपूर्वाद्ध्यायो यक्, आतो लोपश्च । 'संध्या पितृप्रसूनद्यन्तरयोर्युगसन्धिषु' इति मेदिनी । 'कन्या कुमारिकानार्योरोषधीराशिभेदयोः' इति विश्वमेदिन्यौ ॥—वन्ध्येति । बन्ध बन्धने । 'वन्ध्यस्त्वफलवृक्षादौ स्त्रियां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५५२। **स्नामदिपद्यर्तिपॄशकिभ्यो वनिप्** । स्नावा रसिकः । मद्वा शिवः । पद्वा पन्थाः । 'अर्वा तुरङ्गगर्ह्ययोः' । पर्वा ग्रन्थिः प्रस्तावश्च । शक्वा हस्ती । ङीब्रौ, शक्वरी अङ्गुलिः ॥ ५५३ । **शीङ्क्रुशिरुहिजिक्षिसृधृभ्यः क्वनिप्** । शीवा अजगरः । क्रुश्वा सृगालः । रुह्वा वृक्षः । जित्वा जेता । क्षित्वा वायुः । सृत्वा प्रजापतिः । धृत्वा विष्णुः ॥ ५५४ **ध्याप्योः संप्रसारणं च** । धीवा कर्मकरः । पीवा स्थूलः ॥ ५५५ । **अदेर्ध च** । अध्वा ॥ ५५६ । **प्र ईरशदोस्तुट् च** । प्रेत्वा प्रशत्त्वा च सागरः । प्रेत्वरी प्रशत्त्वरी च नदी ॥ ५५७ । **सर्वधातुभ्य इन्** । पचिरग्निः । तुडिः । तुण्डिः । वलिः । वटिः । यजिः । देवयजिः । काशत इति काशिः । यतिः । मल्लिः । मल्ली । केलिः । 'मसी परिणामे' मसिः । बाहुलकाद्गुणः, कोटिः । हेलिः । बोधिः । नन्दिः । कलिः ॥ ५५८ । **हृपिषिरुहिवृतिविदिछिदिकीर्तिभ्यश्च** । 'हरिर्विष्णा-वहाविन्द्रे भेके सिंहे हये रवौ । चन्द्रे कीले प्लवङ्गे च यमे वाते च कीर्तितः' । पेषिर्वज्रम् । रोहिर्व्रती । वर्तिः । वेदिः । छदिश्छेत्ता । कीर्तिः ॥ ५५९ । **इगुपधात्कित्** । कृषिः । ऋषिः । शुचिः । लिपिः । बाहुलकाद्वत्वे-लिबिः । 'तूल निष्कर्षे' तूलिः । तूली कूर्चिका ॥ ५६० । **भ्रमेः संप्रसारणं च** । भृमिर्वातः । बाहुलकात्—भ्रमिः ॥ ५६१ । **क्रमितमिशतिस्तम्भामत इच्च** । क्रिमिः ।

स्यादप्रजस्त्रियाम्' इति मेदिनी । कौतेर्यतीति डुक् । कुड्यमित्युज्ज्वलदत्तः । 'यतो नावः' इत्याद्युदात्तः । ड्यक्प्रत्ययान्तोऽयमन्तो-दात्त इत्यन्ये इति 'निवाते वातत्राणे' इति सूत्रे वृत्तिः । डित्त्वाट्टिलोपे सति कित्करणं व्यर्थं स्यादिति गुणप्रतिषेधार्था-त्ककाराद्ककारस्येत्त्वं नेति तत्रैव हरदत्तः । एवं स्थितेऽघ्न्यादयो यगन्ता इति प्रायोवादः ॥ **५५२ स्नामदि-**। ष्णा शौचे, मदी हर्षे, पद गतौ, ऋ गतौ, पॄ पालनपूरणयोः, शक्लृ शक्तौ । '**अर्वा** तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गकः' इति मेदिनी । '**पर्व** क्लीबं महे ग्रन्थौ प्रस्तावे लक्षणान्तरे । दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिष्वपि' इति च ॥—**ङीब्राविति** । 'वनो र च' इत्यनेन ॥—**अङ्गुलिरिति** । एतच्च 'आरोहतं दशतं शक्वरीर्मम' इत्यादिमन्त्रव्याख्यायां स्पष्टम् । '**शक्वरी** छन्दसो भेदे नदीमेखलयोरपि' इति मेदिनी ॥ **५५३ शीङ्-**। शीङ् स्वप्ने, क्रुश आह्वाने रोदने च, रुह बीजजन्मनि प्रादुर्भावे च, जि जये, क्षि निवासगत्योः, सृ गतौ, धृञ् धारणे ॥ **५५४ ध्याप्योः-**। ध्यै चिन्तायाम्, प्यैङ् वृद्धौ, आभ्यां क्वनिप्स्यात्संप्रसारणं च धातोः । हल इति दीर्घः ॥ **५५५ अदेः-**। अद भक्षणे, अस्मात्क्वनिप् धकारश्चान्तादेशः, अध्वा मार्गः ॥ **५५६ प्र ईर-**। ईर गतौ, शद्लृ शातने, आभ्यां प्रपूर्वाभ्यां क्वनिप्स्यात्तस्य तुडागमश्च ॥—**प्रेत्वरीति** । स्त्रियाम् 'वनो र च' इति ङीब्रौ ॥ **५५७ सर्वधातुभ्य इन्** । डुपचष् पाके, तुडि तोडने—तोडनं=दारणं हिंसनं च, वल संवरणे, वट वेष्टने, यज देवपूजादौ, काशृ दीप्तौ, यती प्रयत्ने । '**यतिः** स्त्री पाठविच्छेदे निकारयतिनोः पुमान्' इति मेदिनी । मल मल्ल धारणे, केलृ चलने भ्वादिः, केला विलासे-कण्ड्वादिः, किल श्वैत्यक्रीडनयोः-तुदादिः, कुट कौटिल्ये, हिल भावकरणे, बुध अवगमन, टुनदि समृद्धौ, कल शब्दसंख्यानयोः । 'गाङ्कुटादिभ्यः—' इति ङित्त्वाद्गुणाभावमाशङ्क्याह—**बाहुलकादिति** । '**कोटिः** स्त्री धनुषोऽग्रेऽश्रौ संख्याभेदप्रकर्षयोः' इति मेदिनी । '**बोधिः** पुंसि समाधेश्च भेदे पिप्पलपादपे' इति च । '**नन्दि**र्द्यूताङ्ग आनन्दे स्त्री नन्दिकेश्वरे पुमान्' इति च । 'कलिः स्त्री कलिकायां ना शूराजिकलहे युगे' इति च । इह **इन्नि**त्येव सूत्रम् । **सर्वधातुभ्य** इति तु प्रक्षिप्तं व्यर्थं च । एवं 'सर्वधातुभ्यष्ट्रन्' इत्यादावपि बोध्यमित्याहुः । अत एव दशपाद्यां ष्ट्रन्नित्येव पठितमिति दिक् ॥ **५५८ हृपिषि-**। हृञ् हरणे, पिष्लृ संचूर्णने, रुह बीजजन्मनि प्रादुर्भावे च, वृतु वर्तने । **वर्ति**र्दीपोपकरणम् । विद सत्तायाम्, विद्यते पुण्यमस्यामिति **वेदिः**, 'वेदिः परिष्कृता भूमिः' । छिदिर् द्वैधीकरणे, कॄत संशब्दने, हरतेः कीर्तयतेश्च 'अच इः' इति प्राप्ते, इतरेषां तु 'इगुपधात्—' इति कप्रत्यये प्राप्ते वचनमिदम् । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु' इत्यमरः । 'हरिश्चन्द्रार्क-वाताश्वशुकभेकयमाहिषु । कपौ सिंहे हरेऽजेंऽशौ शक्रे लोकान्तरे पुमान् । वाच्यवत्पिङ्गहरितोः' इति मेदिनी । 'वर्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः । गात्रानुलेपनी दीपदशादीपेषु योषिति' इति मेदिनी । '**वेदिः** स्यान्मण्डले पुमान् । स्त्रियामङ्गुलिमुद्रायां स्यात्परिष्कृतभूतले' इति च । '**कीर्तिः** प्रसादयशसोर्विकारे कर्दमेऽपि च' इति विश्वः ॥ **५५९ इगुप-धात्-**। कृष विलेखने, ऋषी गतौ, शुच शोके, लिप उपदेहे, इजादेरिगुपधाद्धातोरिन्स्यात्स च कित् । केचित्तु इगुपधात्किरिति पठित्वा इणोऽपवादः किप्रत्यय इति व्याचख्युः । तन्न । प्रत्ययस्वरेण ऋष्यादीनामन्तोदात्ततापत्तेः । न चेष्टापत्तिः, 'अग्निः पूर्वेभिर्ऋषिभिः' 'ऋषिर्विप्रः काव्येन' 'शुचिर्विप्रः शुचिः कविः' इत्यादौ ऋषिशुचिप्रभृतीनामाद्यु-दात्तत्वदर्शनात् । न चैवम् 'अक्षैर्मा दीव्यः कृषिमित्कृषस्व' इत्यादौ कृषिशब्दस्यान्तोदात्तता न सिध्येदिति वाच्यम् । 'इक् कृष्यादिभ्यः' इतीक्प्रत्यये सत्यन्तोदात्तत्वसिद्धेः । 'ऋषिर्वेद वसिष्ठादौ दीधितौ च पुमानयम्' इति मेदिनी । 'शुचिर्ग्रीष्माग्नि-शृङ्गारेष्वाषाढे शुद्धमन्त्रिणि' इति च ॥ **५६० भ्रमेः** । भ्रमु अनवस्थाने, अस्मादिन्स्यात् स च कित् संप्रसारणं च । 'भृमि-श्चिद्यथा वसवः पुषन्ति' इति मन्त्रे भृमिं=भरणशीलं दरिद्रं जनमिति वेदभाष्यम् ॥ **५६१ क्रमि-**। क्रमु पादविक्षेपे, तमु काङ्क्षायाम्, शतिस्तम्भौ सौत्रौ, एभ्य इन्स्यात्स च कित् । एषामत इकारादेशश्च । **क्रिमिः** क्षुद्रजन्तुः । 'क्रिमिर्ना क्रिमि-वत्कीटे लाक्षायां क्रिमिले खरे' इति विश्वमेदिन्यौ । 'पारतं पारदं वाश्नो वासरः क्रिमिवत्क्रमिः' इति द्विरूपकोशः ॥—**तिमिरिति** । 'अस्ति मत्स्यस्तिमिर्नाम तथा चास्ति तिमिंगिलः । तिमिंगिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति लक्ष्मण' इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्रसारणानुवृत्तेः 'कृमिः' अपि । तिमिर्मत्स्यभेदः । 'शितिर्मेचकशुक्लयोः' । स्तिम्भिः समुद्रः ॥ ५६२ । **मनेरुच्च ।** मुनिः ॥ ५६३ । **वर्णेर्वलिश्चाहिरण्ये ।** 'वर्णिः' सौत्रः । अस्य बलिरादेशः । 'करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्' । हिरण्ये तु वर्णिः सुवर्णम् ॥ ५६४ । **वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् ।** वासिश्छेदनवस्तुनि । वापिः, वापी । याजिर्यष्टा । राजिः, राजी । व्राजिर्वातालिः । सादिः सारथिः । 'निघातिर्लोहघातिनी' । वाशिरग्निः । वादिर्विद्वान् । वारिर्गजबन्धनी । जले तु क्लीबम् । **बाहुलकात्**—वारिः पथिकसंहतौ ॥ ५६५ । **नहो भश्च ।** 'नाभिः स्यात्क्षत्रिये पुंसि' । प्राण्यङ्गे तु स्त्रियाम् । पुंस्यपीति केचित् ॥ ५६६ । **कृषेर्वृद्धिश्छन्दसि ।** कार्षिः ॥ ५६७ । **शृः शकुनौ ।** शारिः शारिका ॥ ५६८ । **कृञ उदीचां कारुषु ।** कारिः शिल्पी ॥ ५६९ । **जनिघसिभ्यामिण् ।** जनिर्जननम् । घासिर्भक्ष्यमग्निश्च ॥ ५७० । **अज्यतिभ्यां च ।** आजिः संग्रामः । आतिः पक्षी ॥ ५७१ । **पादे च ।** पदाजिः । पदातिः ॥ ५७२ । **अशिपणाय्यो रुडायलुकौ च ।** अशे रुट्, राशिः पुञ्जः । पणायतेरायलुक्, पाणिः करः ॥ ५७३ । **वातेर्डिच्च ।** विः पक्षी । स्त्रियां 'वी' इत्यपि ॥ ५७४ । **प्रे हरतेः कूपे ।** प्रहिः कूपः ॥ ५७५ । **नौ व्यो यलोपः पूर्वस्य च दीर्घः ।** व्येञ इण् स्याद् यलोपश्च नेर्दीर्घः । नीविः, नीवी वस्त्रग्रन्थौ मूलधने च ॥ ५७६ । **समाने ख्यः स चोदात्तः ।** समानशब्दे उपपदे ख्या इत्यस्मादिण् स्यात्स च डित् यलोपश्च, समानस्य तूदात्तः स इत्यादेशश्च ।

रामायणे सप्तमाङ्के रामवाक्यम् । केचित्तु 'तद्गिलोऽप्यस्ति राघव' इति पठित्वा राघवं प्रति लक्ष्मणवाक्यमित्याहुः । **'शितिः** कृष्णे सिते भूर्जे' इति विश्वः । 'शितिर्भूर्जे ना सितासितयोस्त्रिषु' इति मेदिनी ॥ **५६२ मनेः–।** मन ज्ञाने अस्मादिन्स्यात्स च कित्, अकारस्योकारादेशश्च स्यात् । मन्यते=जानातीति **मुनिः** । 'मुनिः पुमान्वसिष्ठादौ वङ्गसेनतरौ जिने' इति मेदिनी ॥ **५६३ वर्णेः–।** अस्मादिन्स्यात्स च कित् । **'बलि**र्दैत्यप्रभेदे च करचामरदण्डयोः । उपहारे पुमान्स्त्री तु जरया श्लक्ष्णचर्मणि । गृहदारुप्रभेदे च जठरावयवेऽपि च' इति मेदिनी ॥ **५६४ वसि–।** वस निवासे, डुवप् बीजसन्ताने, यज देवपूजादौ, राजृ दीप्तौ, व्रज गतौ, षद्लृ विशरणादौ, हन हिंसागत्योः, वाशृ शब्दे, वद व्यक्तायां वाचि ण्यन्तः, वृञ् वरणे ण्यन्तः । **वासि**रिति दन्त्यसकारवान् । सूत्रेऽष्टमस्तु तालव्यशकारवान् । द्वयमपि छेदनसाधने प्रयुज्यते । 'वास्यादीनामिव करणानां कर्तृव्यापार्यत्वनियमात्' इति वैशेषिकाः । वास्यर्थमित्यत्र 'स्कोः–' इति सलोपः प्राप्नोतीति भाष्यम् । **वापि**रुदकाधारः । **वापी** प्रसिद्धा । **'राजिः** स्त्री पङ्क्तिरेखयोः' इति मेदिनी । इह वादीति ण्यन्तनिर्देशेऽपि बाहुलकादण्यन्तादपि इञ् । तथा च भूवादिसूत्रे—वदन्तीति वादयः=वाचका इति न्यासकारादयः । **'वारिः** स्मृता सरस्वत्यां वारि ह्रीबेरनीरयोः । वारी घटीभबन्धन्योः' इति विश्वः । हृञ् हरणे, अस्मादिञ् । **'हारिः** पथिकसन्तानद्यूतादिभङ्गयोः स्त्रियाम्' इति मेदिनी ॥ **५६५ नहः–।** णह बन्धने, अस्मादिञ् स्यात् भश्चान्तादेशः ॥**—स्त्रियामिति ।** लिङ्गानुशासने स्त्रियामित्यधिकारे 'नाभिरक्षत्रिये' इति सूत्रितत्वादिति भावः ॥**—पुंस्यपीति ।** तथा च मेदिनी—'नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामदे' इति । भारविश्च पुंसि प्रायुङ्क्त—'समुच्छ्वसत्पङ्कजकोशकोमलैरुपाहितश्रीण्युपनीविनाभिभिः' इति ॥ **५६६ कृषेः–।** कृष विलेखने, अस्मादिञ् वृद्धिश्च । 'इको गुणवृद्धी' इतीकः स्थाने एव वृद्धिरित्युदाहरति—**कार्षिरिति** । भाषायां तु कृषिरित्येव ॥ **५६७ शृः–।** शॄ हिंसायाम्, अस्माच्छकुनौ वाच्ये इञ्स्यात् । **'शारि**र्नाक्षोपकरणे स्त्रियां शकुनिकान्तरे । युद्धार्थगजपर्याणे व्यवहारान्तरेऽपि च' इति मेदिनी । कपिलकादित्वाल्लत्वम् । **'शालिस्तु** कलमादौ च गन्धमार्जारके पुमान्' इति मेदिनी ॥ **५६८ कृञ–।** करोतेरिञ्स्यादुदीचां मते कारुषु वाच्येषु । **'कारिः** स्त्रियां क्रियायां स्याद्वाच्यलिङ्गस्तु शिल्पिनि' इति मेदिनी । **५६९ जनि–।** जनी प्रादुर्भावे, घसॢ अदने, आभ्यामिण् । 'जनिवध्योश्च' इति वृद्धिप्रतिषेधः । **जनि**रिति स्त्रीलिङ्गम् । 'कृदिकारात्–' इति पक्षे ङीष् । **'जनी** सीमन्तिनीवध्वोरुत्पत्तावौषधीभिदि' इति मेदिनी ॥ **५७० अज्य–।** अज गतिक्षेपणयोः, अत सातत्यगमने । बाहुलकादजेर्वीभावो न ॥ **५७१ पादे च–।** पादे चोपपदे 'अज्यतिभ्यामिण्' । 'पादस्य पदाज्यातिगोपहतेषु' इति पदादेशः । पदाजिः=पादचारी । 'पदातिपत्तिपदगपादातिकपदाजयः । पद्गश्च पदिकश्च' इत्यमरः ॥ **५७२ अशिपणाय्योः–।** अशिश्च पणायिश्चाशिपणाय्यौ, तयोरिति विग्रहः । अशू व्याप्तौ, पण व्यवहारे स्तुतौ च–आयप्रत्ययान्तः, आभ्यामिण् स्यादनयोर्यथाक्रमं रुडायप्रत्ययलुकौ च भवतः । 'राशिर्मेषादिपुञ्जयोः' इति मेदिनी ॥ **५७३ वातेः–।** वा गतिगन्धनयोः, अस्मादिण स्यात् । डित्त्वाट्टिलोपः ॥ **५७४ प्रे हर–।** प्रपूर्वाद्धरतेः कूपे वाच्ये इण् । 'पुंस्येवान्धुः **प्रहिः** कूप उदपानं तु पुंसि वा' इत्यमरः ॥ **५७५ नौ व्यो–।** व्येञ् संवरणे । 'स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च' इत्यमरः । परिपणो मूलधनम् ॥ **५७६ समाने–।** ख्या प्रकथने ॥**—इण् स्यादिति ।** यत्तूज्ज्वलदत्तेनोक्तम्—इञ् स्यात्स चोदात्त इति । तन्न । संनिहितेन 'जनिघसिभ्यामिण्' इत्यनेन 'वसिवपियजि–' इत्यादिना विहितस्येञो विच्छिन्नत्वात् । यद्यपि तेनैव 'नौ व्यः' इति पूर्वसूत्रे उक्तम्—इञत्रानुवर्तते न त्विण्, उत्तरसूत्रे उदात्तवचनाज्ज्ञापकादिति । तदपि न । 'स चोदात्तः' इति हि नायं धातोः परत्र विहितं प्रत्ययं निर्दिशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानं ख्यायते जनैरिति सखा ॥ ५७७ । आङि श्रिहनिभ्यां ह्रस्वश्च । इण् स्यात्स च डित् आङो ह्रस्वश्च । 'स्त्रियः पाल्यश्रिकोटयः' । 'सर्पे वृत्रासुरेऽप्यहिः' ॥ ५७८ । अच इः । रविः । पविः । तरिः । कविः । अरिः । अलिः ॥ ५७९ । खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचलिभ्यश्च । खनिः । कषिर्हिंस्रः । अजिः । असिः । वसिर्वस्त्रम् । वनिरग्निः । सनिर्भक्तिर्दानं च । ध्वनिः । ग्रन्थिः । चलिः पशुः ॥ ५८० । वृतेश्छन्दसि । वर्तिः ॥ ५८१ । भुजेः किच्च । भुजिः ॥ ५८२ । कॄगॄशॄपॄकुटिभिदिछिदिभ्यश्च । इः कित्स्यात् । किरिर्वराहः । गिरिर्गोत्राक्षिरोगयोः । गिरिणा काणः—गिरिकाणः । शिरिः शलभो हन्ता च । पुरिर्नगरं राजा नदी च । कुटिः शाला शरीरं च । भिदिर्वज्रम् । छिदिः परशुः ॥ ५८३ । कुडिकम्प्योर्नलोपश्च । 'कुडि दाहे' कुडिर्देहः । कपिः ॥ ५८४ । सर्वधातुभ्यो मनिन् । क्रियत इति कर्म । चर्म । भस्म । जन्म । शर्म । स्थाम बलम् 'इस्मन्—' २९८५ इति ह्रस्वः, छद्म । सुत्रामा ॥ ५८५ । बृंहेर्नोऽच्च । नकारस्याकारः । 'ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिः' ॥ ५८६ । अशिशकिभ्यां छन्दसि । अश्मा । शक्मा ॥ ५८७ । हृभृधृसृस्तृशॄभ्य इमनिच् । हरिमा कालः । भरिमा कुटुम्बम् । धरिमा रूपम् । सरिमा वायुः । स्तरिमा तल्पम् । शरिमा प्रसवः ॥

तच्छब्दः किंतु समानशब्दस्य स्थाने विधीयमानमादेशं निर्देष्टुं शब्दस्वरूपपरः । तथा च कथं ज्ञापकता स्यात् ? **यदपि** स इञ् उदात्त इति व्याख्यायं समानस्य सभाव इति प्रक्रियास्मरणमात्रं कृतं । तदपि न, सभावविधायकस्याभावात् । **यदपि** स्वरमञ्जरीकारादिभिरुक्तं—'समानस्य च्छन्दसि' इति सूत्रेण सभाव इति । तदपि न, लोके सखिशब्दस्यासाधुत्वापत्तेः । अपि च 'सखा सखायमब्रवीत्' 'सखा सख्ये अपचन्' 'सखायस्त्वा ववृमहे' । 'सखा सखिभ्य ईड्यः' इत्यादिमन्त्रेषु सर्वत्र सखिशब्द आद्युदात्त एवेति निर्विवादम् । एवं च इञुदात्त इत्युज्ज्वलदत्तादिव्याख्यानं वेदवार्तानभिज्ञत्वप्रयुक्तमेवेति दिक् ॥ ५७७ **आङि—**। श्रिञ् सेवायाम्, हन हिंसागत्योः । अमरोक्तिमाह—**स्त्रिय इति** । एवं च 'सुप्रातसुश्व—' इति सूत्रे चतुरश्रेति तालव्यपाठः संगच्छते । तत्सूत्रे केषांचिद्दन्त्यपाठस्तु एतत्सूत्रापर्यालोचनामूलक एवेत्यवधेयम् ॥ नन्वेवं चतुरस्रमिति दन्त्यप्रयोगस्य कथं निर्वाहः ? इति चेत्, **अत्राहुः—**अकारान्तेन दन्त्यगर्भिणास्रशब्देन विग्रहे तत्प्रयोगः साधीयान् । न च तादृशे शब्देऽपि विप्रतिपत्तव्यम् । 'अस्रः कोणे कचे पुंसि क्लीबमश्रुणि शोणिते' इति मेदिनीकोशादिति । 'अहिर्वृत्रासुरे सर्पे' इति मेदिनी ॥ ५७८ **अच इः** । अजन्ताद्धातोरिः स्यात् । रु शब्दे, पूञ् पवने, **पविर्**वज्रम् । तॄ प्लवनतरणयोः । **तरि**र्वस्त्रादिस्थापनभाण्डम् । 'त्रियां नौस्तरणिस्तरिः' इत्यमरः । कु शब्दे । '**कवि**र्वाल्मीकिशुक्रयोः । सूरौ काव्यकरे पुंसि स्यात्खलीने तु योषिति' इति मेदिनी । ऋ गतौ, **अरिः** शत्रुः । कपिलकादित्वाद्वैकल्पिकं लत्वम् । **अलि**र्भ्रमरः ॥ ५७९ **खनि—**। खनु अवदारणे । कष खषेति दण्डके हिंसार्थकः । अज गतिक्षेपणयोः, असु क्षेपणे, वस आच्छादने, वन षण संभक्तौ, वनु याचने, षणु दाने, ध्वन शब्दे—ग्रन्थ बन्धने—उभौ चुरादी, चल कम्पने, एभ्य इः स्यात् । '**खनिः** स्त्रियामाकरः स्यात्' इत्यमरः । ण्यन्तात् 'अच इः' इति इप्रत्यये **खानि**रपि । '**खनि**रेव मता खानिः' इति द्विरूपकोशः । 'ग्रन्थिस्तु ग्रन्थिपर्णे ना बन्धे रुग्भेदपर्वणोः' इति मेदिनी । 'ग्रन्थिर्ना पर्वपरुषी' इत्यमरः ॥—**वनिरग्निरिति** । 'वनु याचने' इत्यस्मादिप्रत्यये 'वनिर्याञ्चा' इत्याहुः ॥—**चलिः पशुरिति** । 'चरिभ्यश्च' इति पाठान्तरम् । चर गतौ, चरतिर्भक्षणेऽपि । चरिः पशुः ॥ ५८० **वृतेः** । वृतु वर्तने, अस्मादिः स्यात् । बाहुलकाल्लोकेऽपि 'साज्यं च वर्तिसंयुक्तम्' इति प्रयोगः । '**वर्त्ति**र्भेषजनिर्माणे नयनाञ्जनलेखयोः । गात्रानुलेपनीदीपदशादीपेषु योषिति' इति मेदिनी ॥ ५८१ **भुजेः—**। भुज पालनाभ्यवहारयोः, अस्मादिः स्यात्स च कित् । भुजिरग्निः ॥ ५८२ **कॄगॄशॄ—**। कॄ विक्षेपे, गॄ निगरणे, शॄ हिंसायाम्, पॄ पालनपूरणयोः, कुट कौटिल्ये, भिदिर् विदारणे, छिदिर् द्वैधीकरणे । 'वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः' इत्यमरः । 'इगुपधज्ञाप्रीकिरः—' इति कप्रत्यये **किर** इत्यकारान्तोऽपि । 'त्वचि त्वचः किरोऽपि स्यात् किरौ प्रोक्तः पथः पथि' इति द्विरूपकोशः । 'गिरिर्ना नेत्ररुग्भिदि । अद्रौ गिरिजके योषिद्गीर्णौ पूज्ये पुनस्त्रिषु' इति मेदिनी ॥—**कुटिरिति** । ङीषि तु **कुटी** । 'कुटीशमीशुण्डाभ्यो रः' कुटीरः । '**कुटिः** कोटे पुमानस्त्री घटे स्त्रीपुंसयोर्गृहे । कुटी स्यात्कुम्भदास्यां च सुरायां चित्रगुच्छके' इति मेदिनी ॥ ५८३ **कुडि—**। कुडि दाहे, कपि चलने, आभ्यामिः कित्स्याद्धातोर्नलोपश्च । '**कपि**र्ना सिंहके शाखामृगे च मधुसूदने' इति च ॥ ५८४ **सर्वधातुभ्यः—**। डुकृञ् करणे, चर गतौ, चरतिर्भक्षणेऽपि, जन जनने, भस भर्त्सनदीप्त्योः । शॄ हिंसायाम्, **शर्म**=सुखं । ष्ठा गतिनिवृत्तौ, छद अपवारणे चुरादिः, त्रैङ् पालने । सुष्ठु त्रायते इति **सुत्रामा** इन्द्रः । 'कर्मव्याप्ये क्रियायां च पुंनपुंसकयोर्मतम्' इति रुद्रः । 'चर्म वृत्तौ च फलके' इति मेदिनी ॥ ५८५ **बृंहेः—**। बृहि वृद्धौ, अस्मान्मनिन्नुमो नकारस्याकारे ऋकारस्य यणादेशः । '**ब्रह्म** तत्त्वं तपो वेदे न द्वयोः पुंसि वेधसि । ऋत्विग्योगभिदोर्विप्रे' इति मेदिनी ॥ ५८६ **अशि—**। अशू व्याप्तौ संघाते च, शक्लृ शक्तौ, **शक्मा**=इन्द्रः । छन्दसीत्यस्य शकिना संबन्धो न त्वशिना । अत एव 'अश्मानमारोपयतः स्मरारेः' । इति प्रयोगः ॥ ५८७ **हृभृ** । 'हृञ् हरणे, डुभृञ् धारणपोषणयोः, धृ धारणे, सृ गतौ, स्तृञ् आच्छादने, शॄ हिंसायाम् ॥—**शरिमेति—**। एतच्चोज्ज्वलदत्तरीत्योक्तम् । दशपाद्यां तु शॄणातिर्न पठ्यते तत्स्थाने सृधातुं प्रक्षिप्य प्रत्ययं च दीर्घादिं नितं च कृत्वा 'स्तृसृभ्यामीमन्' इति पठ्यते, छन्दोग्रहणं चानुवर्तितम् । युक्तं चैतत् । 'पिपृतां नो भरीमभिः' । 'वातस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५८८ । जनिमृङ्भ्यामिमनिन् । जनिमा जन्म । मरिमा मृत्युः ॥ **५८९ । वेञः सर्वत्र ।** छन्दसि भाषायां चेत्यर्थः । वेमा तन्तुवायदण्डः, अर्धर्चादिः । 'सामनी वेमनी' इति वृत्तिः ॥ **५९० । नामन् सीमन् व्योमन् रोमन् लोमन् पाप्मन् ध्यामन् ।** सप्त अमीं निपात्यन्ते । ज्ञायतेऽनेनेति नाम । सिनोतेर्दीर्घः–सीमा, सीमानौ, सीमानः । पक्षे डाप्–सीमे, सीमाः । व्येञोऽन्त्यस्योत्वं गुणः, व्योम । रौतेः–रोम । लोम । पाप्मा पापम् । ध्याम परिमाणं तेजश्च ॥ **५९१ । मिथुने मनिः ।** उपसर्गक्रियासंबन्धो मिथुनम् । स्वरार्थमिदम् । सुशर्मा । **५९२ । सात्ऽतिभ्यां मनिन्मनिणौ ।** स्यतीति साम, सामनी । आत्मा ॥ **५९३ । हनिमशिभ्यां सिकन् ।** 'हंसिका हंसयोषिति' । मक्षिका ॥ **५९४ । कोररन् ।** कवरः ॥ **५९५ । गिर उडच् ।** गरुडः ॥ **५९६ । इन्देः कमिर्नलोपश्च ।** इदम् ॥ **५९७ । कायतेर्डिमिः ।** किम् ॥ **५९८ । सर्वधातुभ्यः ष्ट्रन् ।** वस्त्रम् । अस्त्रम् । शस्त्रम् । 'इस्मन्–' २९८५ इति ह्रस्वत्वम्, छादनाच्छत्रम् ॥ **५९९ । भ्रस्जिगमिनमिहनिविश्यशां वृद्धिश्च ।** भ्राष्ट्रः । गात्रं शकटम् । नात्रं स्तोत्रम् । हात्रं मरणम् । वैष्ट्रं विष्टपम् । आष्ट्रमाकाशम् ॥ **६०० । दिवेर्द्युच्च ।** द्यौत्रं ज्योतिः ॥ **६०१ । उषिखनिभ्यां कित् ।** उष्ट्रः । खात्रं खनित्रं जलाधारश्च ॥ **६०२ । सिविमुच्योष्टेरू च ।** सूत्रम् । मूत्रम् ॥ **६०३ । अमिचिमिदिशसिभ्यः क्त्रः ।** आत्रम् । चित्रम् । मित्रम् । शस्त्रम् ॥ **६०४ ।**

सर्गे अभवत्सरीमणि' । 'स्तीर्णं बर्हिः सुष्टरीमा जुषाणा' । 'यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिः' इत्यादिमन्त्राणां तद्भाष्यस्य चानुगुणत्वात्, उक्तप्रयोगाणां भाषायामदर्शनेन च्छन्दोऽनुवृत्तेर्न्याय्यत्वाच्च । अत एव 'वेञः सर्वत्र' इति सूत्रे सर्वत्रग्रहणं करिष्यति ॥ **५८८ जनि–।** जन जनने, मृङ् प्राणत्यागे ॥ **५८९ वेञः–।** वेञ् तन्तुसन्ताने ॥ **५९० निपात्यन्त इति ।** मनिनन्ता इति शेषः । म्ना अभ्यासे । मलोपो नाभावो वा । **नाम** संज्ञा । षिञ् बन्धने । **'सीमसीमे** स्त्रियामुभे' इत्यमरः । व्येञ् संवरणे, रु शब्दे, **रोम** गात्रकेशः । लूञ् छेदने । **लोम** स एव । पा पाने पुगागमः । ध्यै चिन्तायाम् । बाहुलकादन्येभ्योऽपि । यक्ष पूजायाम् । 'क्षयः शोषश्च **यक्ष्मा** च' इत्यमरः । षू प्रेरणे, **सोमा** चन्द्रः । डुधाञ् धारणपोषणयोः । '**धाम** देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति मेदिनी ॥ **५९१ मिथुने–।** शॄ हिंसायाम्, सुष्ठु शृणाति इति **सुशर्मा** राजविशेषः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तं पदम् । मनिनि तु-मध्योदात्तं स्यात् ॥ **५९२ साति–।** षोऽन्तकर्मणि, अत सातत्यगमने, आभ्यां यथासंख्यमेतौ स्तः । स्यति=दुःखयति दुरध्येयत्वात्**साम** । 'साम क्लीबमुपायस्य भेदे वेदान्तरेऽपि च' इति मेदिनी । '**आत्मा** पुंसि स्वभावे स्यात्प्रयत्नमनसोरपि । धृतावपि मनीषायां शरीरब्रह्मणोरपि' इति च ॥ **५९३ हनि–।** हन हिंसागत्योः, मश शब्दे रोषकृते च । '**मक्षिका** भम्भराली स्यात्' इति हारावली ॥ **५९४ कोररन् ।** कु शब्दे । **कवरः** पाठकः । बवयोरैक्यात्**कबरी** केशविन्यासः । 'जानपद–' इति ङीष् । अन्यत्र कबरा ॥ **५९५ गिरः–।** गॄ निगरणे । केचित्तु सूत्रमिदं परित्यज्य गरुता डयत इति विगृह्य ङीङो डप्रत्यये पृषोदरादित्वाद्गरुतस्तकारलोपे **गरुडशब्दं** क्लेशेन व्युत्पादयन्ति ॥ **५९६ इन्देः–।** इदि परमैश्वर्ये । उज्ज्वलदत्तस्तु कमिन्निति नितं पपाठ । तच्चिन्त्यम्, 'इदं त्वत्पात्रमिन्द्रपानम्', 'इदं ते सोम्यं मधु' इत्यादौ नित्स्वराभावात् । दशपाद्यां तु 'इणो दमक्' इति सूत्रितम् ॥ **इदमिति ।** सर्वनामशब्दोऽयं संनिहितपरामर्शी ॥ **५९७ कायतेः–।** कै गै शब्दे । प्रयोजनाभावादेव मकारस्येत्संज्ञाविरहे सिद्धे डिमेरिकार उच्चारणार्थः । डकारस्तु टिलोपार्थः । दशपाद्यां तु मान्तमेव डिमिति सूत्रितम् । **किमिति** सर्वनाम ॥ **५९८ सर्वधातुभ्यः–।** दशपाद्यां तु अर्थात्सर्वधातुभ्यो भविष्यतीत्याशयेन 'ष्ट्रन्' इत्येव सूत्रितम् । अत एवाधिकं प्रक्षिप्तमित्याहुः । वस निवासे, असु क्षेपणे, शसु हिंसायाम्, छद अपवारणे ण्यन्तः । '**अस्त्रं** प्रहरणे चापे करवाले नपुंसकम्' इति मेदिनी । पत्लृ गतौ । '**पत्त्रं** तु वाहने पर्णे स्यात् पक्षे शरपक्षिणोः' इति मेदिनी । पा पाने । **पात्रम् ।** षित्त्वान् ङीष्, '**पात्र्यमत्रे** त्रिषु क्लीबं स्रुवादौ राजमन्त्रिणि । तीरद्वयान्तरे योग्ये' इति मेदिनी । दंश दशने, 'व्रश्च–' आदिना षत्वे ष्टुत्वं, षित्वां ङीषोऽनित्यत्वाट्टाप् । **दंष्ट्रा ॥ ५९९ भ्रस्जि–।** भ्रस्ज पाके, गम्लृ गतौ, णम प्रह्वत्वे शब्दे च, हन हिंसागत्योः, विश प्रवेशने, अशू व्याप्तौ, एभ्यः ष्ट्रन् स्यादेषां वृद्धिश्च ॥—**भ्राष्ट्र इति ।** संयोगादिलोपः । 'व्रश्च–' इति षत्वे ष्टुत्वम् । 'क्लीबेऽम्बरीषं **भ्राष्ट्रो** ना' इत्यमरः । **वैष्ट्रं** विष्टपम् ॥ **६०० दिवेः–।** दिवु क्रीडादौ, अस्मात् ष्ट्रन् स्यात् द्युादेशो वृद्धिश्च धातोः ॥ **६०१ उषि–।** उष दाहे, खनु अवदारणे, आभ्यां ष्ट्रन् कित्स्यात् । **उष्ट्रः** क्रमेलकः । 'उष्ट्रे क्रमेलकमयमहाङ्गाः' इत्यमरः ॥ **६०२ सिवि–।** षिवु तन्तुसन्ताने, मुच्लृ मोक्षणे, आभ्यां ष्ट्रन्कित्स्यात् टेरूकारादेशश्च । सूत्रिमूत्रिभ्यां चुरादिण्यन्ताभ्यामेरचा रूपसिद्धेराद्युदात्तार्थमिदं सूत्रम् । न च घञा तत्सिद्धिः, 'एरच्' इत्यस्य घञो बाधकत्वात् । '**सूत्रं** तु सूचनाग्रन्थे सूत्रतन्तुव्यवस्थयोः' इति विश्वः ॥ **६०३ अमि–।** अम गतिशब्दसंभक्तिषु, चिञ् चयने, ञिमिदा स्नेहने, शसु हिंसायाम् ॥ 'अनुनासिकस्य–' इति दीर्घः । 'श्रोणिलम्बिपुरुषा**न्त्र**मेखलाम्' इति कालिदासः । 'आलेख्याश्चर्ययो**श्चित्रम्'** इत्यमरः । '**मित्रं** सुहृदि न द्वयोः । सूर्ये पुंसि' इति मेदिनी । '**शस्त्रं** लोहास्त्रयोः क्लीबं क्षुरिकायां तु योषिति' इति च । प्रत्ययस्वरेणैतेऽन्तोदात्ताः—'शुन आन्त्राणि पेचे', 'चित्रं देवानाम्', 'मित्रं नयम्', 'शत्रस्य शत्रमसि' **आन्त्रमिति ।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुवो ह्रस्वश्च । पुत्रः ॥ ६०५ । **स्त्यायतेर्ड्ट्** । स्त्री ॥ ६०६ । **गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः** । 'गोत्रं स्यान्नामवंशयोः' । गोत्रा पृथिवि । धत्रं गृहम् । वेत्रम् । पक्त्रं । वक्त्रम् । यत्रम् । सत्रम् । क्षत्रम् ॥ ६०७ । **हुयामाश्रुभसिभ्यस्त्रन्** । होत्रम् । यात्रा । मात्रा । श्रोत्रम् । भस्त्रा ॥ ६०८ । **गमेरा च** । गात्रम् ॥ ६०९ । **दादिभ्यश्छन्दसि** । दात्रम् । पात्रम् ॥ ६१० । **भूवादिगृभ्यो णित्रन्** । भावित्रम् । वादित्रम् । गारित्रमोदनम् ॥ ६११ । **चरेर्वृत्ते** । चारित्रम् ॥ ६१२ । **अशित्रादिभ्य इत्रोत्रौ** । अशित्रम् । वहित्रम् । धीरित्री मही । त्रैङ्, एवमादिभ्य उत्रः, त्रोत्रं प्रहरणम् । वृञ्, वरुत्रं प्रावरणम् ॥ ६१३ । **अमेर्द्विषति चित्** । अमित्रः शत्रुः ॥ ६१४ **आः समिण्निकषिभ्याम्** । संपूर्वादिणो निपूर्वात्कषेश्च आ स्यात् । स्वरादित्वादव्ययत्वम् । समया । निकषा । ६१५ । **चितेः कणः कश्च** । बाहुलकादगुणः, 'चिक्कणं मसृणं स्निग्धम्' ॥ ६१६ । **सूचेः स्मन्** । सूक्ष्मम् । ६१७ । **पातेर्डुम्सुन्** । पुमान् ॥ ६१८ । **रुचिभुजिभ्यां किष्यन्** । रुचिष्यमिष्टम् । भुजिष्यो दासः ॥ ६१९ । **वसेस्तिः** । 'वस्तिर्नाभेरधो द्वयोः' । 'वस्तयः स्युर्दशासूत्रे' । बाहुलकात्–शासः–'शास्तिः' राजदण्डः । विन्ध्याख्यमगमस्यतीत्यगस्तिः । शकन्ध्वादिः ॥ ६२० । **सावसेः** । स्वस्ति । स्वरादिपाठादव्ययत्वम् ॥ ६२१ **वौ तसेः** । वितस्तिः ॥ ६२२ । **पदिप्रथिभ्यां नित्** । पत्तिः । प्रथितिः,

---

इत्यादौ ॥ ६०४ **पुवः** । पूञ् पवने, अस्मात् क्तः स्यात् धातोर्ह्रस्वत्वं च । पुनाति स्ववंश्यानिति **पुत्रः** । पुंनाम्रो नरकात्त्रायते इत्यर्थे 'आतोऽनुपसर्गे कः' इति कप्रत्यये पुत्र इति व्युत्पत्त्यन्तरम् ॥ ६०५ **स्त्यायतेः**–। स्त्यै ष्ट्यै शब्दसंघातयोः ॥ **—स्त्रीति** । डित्त्वाट्टिलोपः । 'लोपो व्योः–' इति यलोपः । टित्वान्ङीप् । '**स्त्री** योषिदबला योषा नारी सीमन्तिनी वधूः' इत्यमरः ॥ ६०६ **गुधृ**–। गुङ् अव्यक्ते शब्दे, धृञ् धारणे, वी गतिप्रजनादौ, डुपचष् पाके, वच परिभाषणे, यम उपरमे, षद्लृ विशरणगत्यादौ, क्षदिः सौत्रः । '**गोत्रा** भूगव्ययोर्गोत्रः शैले गोत्रं कुलाख्ययोः । संभावनीयबोधे च काननक्षेत्रवर्त्मसु' इति मेदिनी । '**सत्र**माच्छादने यज्ञे सदादाने धनेऽपि च' इत्यमरः । '**सत्रं** यज्ञसदादानच्छादनारण्यकैतवे' इति मेदिनी । **क्षत्रं** ब्राह्मणानन्तरजातिः ॥ ६०७ **हुयामा**–। हु दानादनयोः, या प्रापणे, मा माने, श्रु श्रवणे, भस भर्त्सनदीप्त्योः । **होत्र**माहुतिः । होत्राशब्द ऋत्विक्ष्वपि स्त्रीलिङ्ग इति 'होत्राभ्यश्छः' इति सूत्रे हरदत्तादयः । '**यात्रा** तु यातनेऽपि स्याद्गमनोत्सवयोः स्त्रियाम्' इति मेदिनी । '**मात्रा** कर्णविभूषायां वित्ते माने परिच्छदे । अक्षरावयवे स्वल्पे क्लीवं कार्त्स्न्येऽवधारणे' इति च । 'कर्णशब्दग्रहौ **श्रोत्रं** श्रुतिः स्त्री श्रवणं श्रवः' इत्यमरः । '**भस्त्रा** चर्मप्रसेविका' इति च ॥ ६०८ **गमेः**—। गम्लृ गतौ, अस्मात् त्रन्स्याद्धातोराकारान्तादेशश्च । '**गात्र**मङ्गे कलेवरे । स्तम्बेरमाग्रजङ्घादिविभागेऽपि समीरितम्' इति विश्वः ॥ ६०९ **दादिभ्यः**–। दाप् लवने–एवमादिभ्यस्त्रन् । **दात्रं** धान्यादिच्छेदनसाधनम् । पा पाने, 'योग्यभाजनयोः **पात्रम्**' इत्यमरः । क्षि निवासगत्योः, **क्षेत्र**मित्यादि योज्यम् ॥ ६१० **भूवादि**–। भू सत्तायाम् । **भावित्रं** त्रैलोक्यम् । वद व्यक्तायां वाचि ण्यन्तः । **वादित्रं** तूर्यादि । गॄ निगरणे ॥ ६११ **चरेः**–। चर गतौ, अस्माण्णित्रन्स्यात् वृत्ते वाच्ये । 'वृत्तं पद्ये **चारित्रे**' इत्यमरः ॥ ननु इत्रन्प्रत्यये चरित्रमित्युक्तं ततश्च प्रज्ञायणि चारित्रमिति सिद्धौ किमनेनेति चेत् । मैवम् । स्वरे विशेषात् ॥ ६१२ **अशि**–। अशू व्याप्तौ एवमादिभ्य इत्रः, त्रैङ् पालने–एवमादिभ्य उत्रश्च स्यात् ॥—**वहित्रमिति** । वह प्रापणे ॥—**धरित्रीति** । धृञ् धारणे गौरादित्वात् ङीष् ॥ ६१३ **अमेः**–। अम गतौ, अस्मादित्रः स्यात्स च चित् । उत्रस्तु नानुवर्तते, अस्वरितत्वात् । मित्रं नेति विग्रहे त्वमित्रमिति नपुंसकम् ॥ ६१४ **आः समिण्**–। इण् गतौ । अस्मादाप्रत्यये गुणे सत्ययादेशः ॥—**कषेरिति** । कषखषेति दण्डकः । समयानिकषाशब्दौ समीपवाचकौ । बाहुलकात्–दुषेः । दोषा । दिवेराप्रत्यये बाहुलकादेवास्य गुणाभावे–**दिवा** । स्वदेराप्रत्यये बाहुलकादेव धातोर्धोन्तादेशश्च । **स्वधे**त्यादि ॥ ६१५ **चितेः**–। चिती संज्ञाने, अस्मात्कण प्रत्ययः स्यात्कश्चान्तादेशः । अमरोक्तमाह—**चिक्कणमिति** ॥ ६१६ **सूचेः**–। सूच पैशुन्ये चुरादिरस्मात्स्मन् णिलोपः । कुत्वषत्वे । '**सूक्ष्मं** स्यात्कण्टकेऽध्यात्मे पुंस्यणौ त्रिषु चाल्पके' इति मेदिनी ॥ ६१७ **पातेः**–। पा रक्षणे, अस्मात् डुम्सुन्स्यात् । डित्त्वाट्टिलोपः, उकार उच्चारणार्थ इत्युज्ज्वलदत्तः । वस्तुतस्तूगित्कार्यार्थः । सुपुंसीति 'उगितश्च' इति ङीप् । नकारः स्वरार्थः । 'पुंसोऽसुङ्' इति सूत्रे न्यासरक्षिताभ्यां पुनातेर्मक्सुन् ह्रस्वश्चेति पठितम् । पूञो डुम्सुचित्यन्ये । **भाष्ये तु**—सूतेः सप्रत्यये पुमानित्युक्तम् । 'उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः' इति तत्त्वम् ॥ ६१८ **रुचि**–। रुच दीप्तावभिप्रीतौ च, भुज पालनादौ । 'भुजिष्यस्तु स्वतन्त्रे च हस्तसूत्रकदासयोः । स्त्रियां दासीगणिकयोः' इति मेदिनी ॥ ६१९ **वसेः**–। वस निवासे, वस आच्छादने । '**वस्ति**र्द्वयोर्निरूहे नाभ्यधोभूमिदशासु च' इति मेदिनी ॥—**शास इति** । शासु अनुशिष्टौ ॥—**अस्यतीति** । असु क्षेपणे । '**अगस्तिः** कुम्भयोनौ च वङ्गसेनतरौ पुमान्' इति मेदिनी ॥ ६२० **सावसेः** । अस् भुवि, अस्मात्सावुपपदे तिः स्यात् । बहुलवचनान्न भूभावः ॥ ६२१ **वौ**–। तसु उपक्षये, अस्माद्विपूर्वात्तिः स्यात् । 'अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः' इत्यमरः । 'स्त्रीपुंसयोर्वितस्तिः स्यात्' इत्यमरमाला ॥ ६२२ **पदि**–। पद गतौ, प्रथ प्रख्याने, आभ्यां तिः स्यात्स च नित् ॥—**पत्तिरिति** । पदातिः ॥—**प्रथितिरिति** । प्रख्यातिः ॥—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(वा) तितुत्रेष्वग्रहादीनाम् इतीट् ॥ ६२३ । दृणातेर्ह्रस्वश्च । दृतिः ॥ ६२४ । कृतृकृपिभ्यः कीटन् । किरीटं शिरोवेष्टनम् । तिरीटं सुवर्णम् । कृपीटं कुक्षिवारिणोः ॥ ६२५ । रुचिवचिकुचिकुटिभ्यः कितच् । रुचितमिष्टम् । उचितम् । कुचितं परिमितम् । कुटितं कुटिलम् ॥ ६२६ । कुटिकुषिभ्यां क्मलन् । कुड्मलम् । कुष्मलम् ॥ ६२७ । कुषेर्लश्च । कुल्मलं पापम् । ६२८ । सर्वधातुभ्योऽसुन् । चेतः । सरः । पयः । सदः ॥ ६२९ । रपेरत एच्च । रेपोऽवद्यम् ॥ ६३० । अशेर्देवने युट् च । देवने=स्तुतौ । यशः ॥ ६३१ । उब्जेर्बले बलोपश्च । ओजः ॥ ६३२ । श्वेः संप्रसारणं च । शवः, शवसी । बलपर्यायोऽयम् ॥ ६३३ । श्रयतेः स्वाङ्गे शिरः किच्च । श्रयतेः शिर आदेशोऽसुन् किच्च । शिरः, शिरसी ॥ ६३४ । अर्तेरुच्च । उरः ॥ ६३५ । व्याधौ शुट् च । अर्शो गुदव्याधिः । ६३६ । उदके नुट् च । अर्तेसुरन् स्यात्तस्य च नुट् । अर्णः, अर्णसी ॥ ६३७ । इण आगसि । एनः ॥ ६३८ । रिचेर्धने घिच्च । चात्प्रत्ययस्य नुट् । घित्वा-

---

तितुत्रेष्विति । गहादित्वादिडागमनिषेधो नेति भावः ॥ ६२३ दृणातेः-। दॄ विदारणे, अस्मात्तिः स्याद्धातोर्ह्रस्वत्वं च । 'दृतिश्चर्मपुटे मत्स्ये ना' इति मेदिनी ॥ ६२४ कृतॄ-। कॄ विक्षेपे, तॄ प्लवनतरणयोः, कृपू सामर्थ्ये । 'किरीटं मुकुटे न स्त्री' इति हेमचन्द्रः । 'गोमी कृपीटमुदरे नीरे' इति विश्वः । दशपाद्यां तु 'कृतृकृपिकपिभ्यः' इति पठित्वा कम्पीट इति चतुर्थमुदाहृतम् । 'कृपो रो लः' इत्यत्र न्यासे तु कॄकृपिभ्यामिति पठ्यते । अतस्तरतिरत्र प्रक्षिप्त इति कश्चित् । 'तरतेश्चेति पृथक्पठित्वा तिरीटः कूलवृक्ष' इति कश्चिद्व्याख्यत् ॥ ६२५ रुचिवचि-। रुच दीप्तावभिप्रीतौ च, वच परिभाषणे, कुच शब्दे तारे । अथवा कुच कौटिल्याल्पीभावयोः, इकः कित्त्वात्सूत्रे नलोपेन निर्देशः । कुट कौटिल्ये ॥—उचितमिति । 'वचिस्वपि–' इत्यादिना संप्रसारणम् ॥ ६२६ कुटिकुषि-। 'कुड्मलो मुकुले पुंसि न द्वयोर्नरकान्तरे' इति मेदिनी ॥ ६२७ कुष निष्कर्षे । कुष्मलं छर्दनम् । विकसितमित्यन्ये ॥ ६२८ सर्वधातुभ्योऽसुन्-। दशपाद्यां तु 'असुन्' इत्येव सूत्रम् । चिती संज्ञाने, चित संचेदने चुरादिः, सृ गतौ । गौरादित्वान्ङीष् । 'सरसी तु महासरः' इति शब्दार्णवः । 'महान्ति सरांसि सरस्यः' इति भाष्यम् । पय गतौ, पीङ् पाने । 'पयः स्यात् क्षीरनीरयोः' इति मेदिनी । षद्लृ विशरणादौ । सदः सभा । वर्च दीप्तौ । 'वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि । पुंसि चन्द्रस्य तनये' इति मेदिनी । रुदिर् अश्रुविमोचने । 'रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक् । सहप्रयोगेऽप्यनयो रोदस्यावपि रोदसी' इति विश्वः । वी गत्यादिषु । 'वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम्' इति मेदिनी । अन प्राणने । अनो भक्तम् । 'अनोऽश्मायःसरसां जातिसंज्ञयोः' इति टचि तु अनसम् । 'पाकस्थानं महानसम्' इत्यमरः । तमु ग्लानौ । 'तमः क्लीवं गुणे शोके सैंहिकेयान्धकारयोः' इति रभसः । 'तमो ध्वान्ते गुणे शोके क्लीबं वा ना विधुंतुदे' इति मेदिनी । षह मर्षणे, 'सहो बले ज्योतिषि च पुंसि हेमन्तमार्गयोः' इति मेदिनी । तप संतापे । 'तपो लोकान्तरेऽपि च । चान्द्रायणादौ धर्मे च पुमान् शिशिरमाघयोः' इति च । मह पूजायाम् । 'महः उत्सवतेजसोः' इति मेदिनी । नभ हिंसायां भौवादिकः क्रैयादिकश्च । 'नभोऽन्तरिक्षं गगनम्' इत्यमरः । 'नभं तु नभसा सार्धं तपं तु तपसा सह । सहं च सहसा सार्धं महं च महसा सह । तमेन च तमः प्रोक्तं रजेनापि रजः समम्' इति द्विरूपकोशः ॥ नन्वसुन्प्रत्यये नभःसहस्तम इत्यादिसान्तशब्दाः सिध्यन्ति, पचाद्यचि तु नभं सहं तमं इत्याद्यजन्ता अपि सिध्यन्ति, परन्तु रज इति अकारान्तसकारान्तौ नलोपवच्छब्दौ न सिध्यत इति 'रजेनापि रजः समम्' इति कोशश्चिन्त्य एवेति चेत्, अत्राहुः—'रञ्ज रागे' इत्यस्मादसुनि 'भूरञ्जिभ्यां कित्' इति वक्ष्यमाणेनासुनः कित्त्वान्नलोपे रज इति सिध्यति । 'घनर्थे कविधानम्' इति कप्रत्यये तु रज इत्यदन्तोऽपि सिध्यतीति ॥ ६२९ रपेः । रप व्यक्तायां वाचि, अस्मादसुन् स्यादत एकारश्च ॥—रेपोऽवद्यमिति । 'अरेपसा तन्वा' इति मन्त्रे निरवद्ययेति भाष्ये उक्तं, नञ्पूर्वकरेपःशब्दस्यानवद्यवाचकत्वात् ॥ ६३० अशेः-। अशू व्याप्तौ संघाते च, अस्मादसुन्स्याद्धातोर्युडागमश्च । यशः कीर्तिः ॥ ६३१ उब्जेः । उब्ज आर्जवे, अस्मादसुन् स्याद्बले वाच्ये बकारस्य लोपश्च । 'ओजो दीप्ताववष्टम्भे प्रकाशबलयोरपि' इति मेदिनी ॥ ६३२ श्वेः-। टुओश्वि गतिवृद्ध्योः, अस्मादसुन्स्यात्संप्रसारणं च ॥ ६३३ श्रयतेः-। श्रिञ् सेवायाम्, अस्मात्स्वाङ्गे वाच्येऽसुन्स्यात्स च किद्धातोः शिरादेशश्च । 'उत्तमाङ्गं शिरः शीर्षम्' इत्यमरः । घनर्थे कप्रत्यये तु शिर इत्यदन्तोऽपि । 'शिरोवाची शिरोऽदन्तो रजोवाची रजस्तथा' इति कोशान्तरम् । 'पिण्डं दद्याद्गयाशिरे' इति वायुपुराणे । 'कुण्डलोद्घृष्टगण्डानां कुमाराणां तरस्विनाम् । निचकर्त शिरान्द्रौणिर्नालेभ्य इव पङ्कजान्' इति महाभारतम् ॥ ६३४ अर्तेः-। ऋ गतौ, अस्मादसुन् कित्स्याद्धातोरुत्वं च । रपरत्वम् । 'उरो वत्सं च वक्षश्च' इत्यमरः ॥ ६३५ व्याधौ-। अर्तेरेव व्याधौ वाच्येऽसुन् तस्य सुडागमश्च स्यात् ॥ ६३६ अर्ण इति । पानीयमित्यर्थः ॥ ६३७ इणः । इण् गतौ, अस्मात्पापे वाच्येऽसुन् स्यात्तस्य नुडागमश्च । एनः पापम् ॥ ६३८ रिचेः-। रिचिर् विरेचने, रिच वियोजनसंपर्चनयोरित्यस्माद्वा धने वाच्येऽसुन् ॥—रेक्ण इति । 'चजोः–' इति कुत्वे 'अट्कुप्वाङ्–' इति णत्वम् । इह दशपादीवृत्तौ नुटं नाद्रियते रेकः रेकसी इत्युदाहृतम् । तन्न । उत्तरसूत्रे नुडनुवृत्तेर्निर्विवादत्वात्, मण्डूकप्लुतौ मानाभावात्, लक्ष्यविसंवादाच्च । उज्ज्वलदत्तेन तु 'रिचेर्धने चित्किच्च' इति पठि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुक्त्वम्, रेक्णः सुवर्णम् ॥ ६३९ । **चायतेरन्ने ह्रस्वश्च ।** चनो भक्तम् ॥ ६४० । **वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च ।** वर्पो रूपम् । शेपो गुह्यम् ॥ ६४१ । **स्रुरीभ्यां तुट् च ।** स्रोतः । रेतः ॥ ६४२ । **पातेर्बले जुट् च ।** पाजः, पाजसी ॥ ६४३ । **उदके थुट् च ।** पाथः ॥ ६४४ । **अन्ने च ।** पाथो भक्तम् ॥ ६४५ । **अदेर्नुम् धौ च ।** अदेर्भक्ते वाच्येऽसुन् नुमागमो धादेशश्च । अन्धोऽन्नम् ॥ ६४६ । **स्कन्देश्च स्वाङ्गे ।** स्कन्दः, स्कन्दसी ॥ ६४७ । **आपः कर्माख्यायाम् ।** कर्माख्यायां ह्रस्वो नुट् च वा । अप्नः—अपः । बाहुलकात्— आपः, आपसी ॥ ६४८ । **रूपे जुट् च ।** भज्रो रूपम् ॥ ६४९ । **उदके नुम्भौ च ।** अम्भः ॥ ६५० । **नहेर्दिवि भश्च ।** नभः ॥ ६५१ । **इण आग अपराधे च ।** 'आगः पापापराधयोः' ॥ ६५२ । **अमेर्हुक्च ।** अंहः ॥ ६५३ । **रमेश्च ।** रंहः ॥ ६५४ । **देशे ह च ।** रमन्तेऽस्मिन् रहः ॥ ६५५ । **अञ्च्यञ्जियुजिभृजिभ्यः कुश्च ।** एभ्योऽसुन् कवर्गश्चान्तादेशः । 'अङ्कश्चिह्नशरीरयोः' । अङ्गः पक्षी । योगः समाधिः । भर्गस्तेजः ॥ ६५६ । **भूरञ्जिभ्यां कित् ।** भुवः । रजः ॥ ६५७ । **वसेर्णित् ।**

ना तुटं चानुवर्त्य कित्त्वाद्गुणाभावे नुटश्चुत्वेन नकारे **रिक्श्न**मिति साधितं तल्लोकवेदयोरप्रसिद्धत्वादुपेक्ष्यम् । 'नित्यं रेक्णो अमर्त्यः' 'परिषद्यं ह्यरणस्य रेक्णः' 'रेक्णः स्वत्यभि या वाममे' इत्यादिमन्त्रेषु रेक्ण इति शब्दस्य प्रसिद्धत्वात् । वैदिकनिघण्टौ च सुवर्णपर्यायेषु तथा पाठात् । वेदभाष्ये तु प्रकृतसूत्रेणैव तस्य साधितत्वाच्चापि **रेक्ण** इति प्रयोग एव साधीयानिति दिक् ॥ ६३९ **चायतेः**—। चायृ पूजानिशामनयोः । अस्मादन्ने वाच्येऽसुन्स्यात्तस्य नुट् च धातोर्ह्रस्वत्वं च । यलोपः । '**चनो** दधिष्व पचता' 'सुते दधिष्व **नश्चनः**' इत्यादिमन्त्रेषु प्रसिद्धोऽयं चनशब्दः । एतेन चणोऽन्नमित्युदाहृत्य बाहुलकाण्णत्वमिति वदन्तो दशपादीवृत्तिकारास्तदनुसारिणः प्रसादकारादयश्च परास्ताः ॥ ६४० **वृङ्**—। वृङ् संभक्तौ, शीङ् स्वप्ने, आभ्यां यथाक्रमं रूपे स्वाङ्गे च वाच्येऽसुन्स्यात्तस्य पुडागमश्च ॥—**वर्पो रूपमिति**—। 'घ्नन् छिश्नदेवाँ अभिवर्पसाऽभूत्' इत्यादिमन्त्रेषु प्रसिद्धमिदम् । 'शेपः स्याद्वृषणं पेलम्' इति सुभूतिचन्द्रः । अकारान्तोऽप्ययम्, 'शेपपुच्छलाङ्गूलेषु शुनः' इति वार्तिके शेप इति निर्देशात्, 'यस्यामुशन्तः प्रहराम शेपम्' इति वैदिकप्रयोगाच्च । 'शेपः शेपौ च शेफश्च शेफं प्रोक्तं च शेफसि' इति द्विरूपकोशः ॥ ६४१ **स्रुरीभ्याम्**—। स्रु गतौ, रीङ् श्रवणे, आभ्यामसुन् स्यात् तस्य तुट् च । '**स्रोतो**ऽम्बुवेगेन्द्रिययोः' इति विश्वः । '**रेतः** शुक्रे पारदे च' इति मेदिनी ॥ ६४२ **पातेः**—। पा रक्षणे, अस्माद्बले वाच्येऽसुन् जुडागमश्च वर्गतृतीयादिः । 'युट् च' इत्यन्तस्थादिपाठस्तूज्ज्वलदत्तस्य प्रामादिकः । 'पृथुपाजा अमर्त्यः' इत्यादिमन्त्रतद्भाष्यविरोधात् ॥ ६४३ **उदके**—। पातेरुदके वाच्येऽसुन्स्यात्तस्य थुडागमश्च । 'कबन्धमुदकं **पाथः**' इत्यमरः ॥ ६४५ **अदेः**—। अद भक्षणे । 'भिस्सा स्त्री भक्त**मन्धोऽन्नम्**' इत्यमरः । 'द्विजातिशेषेण यदेत**दन्धसा**' इति भारविः ॥ ६४६ **स्कन्देः**—। स्कन्दिर् गतिशोषणयोः । अस्मात्स्वाङ्गे वाच्येऽसुन् धश्चान्तादेशः ॥ ६४७ **आपः**—। आप्लृ व्याप्तौ । अस्मात्कर्माख्यायामसुन् ह्रस्वश्च धातोः । प्रत्ययस्य नुडागमस्तु वा स्यात् । 'अप्नस्वतीमश्विना' '**अपांसि** यस्मिन्नधि संदधुः' ॥—**बाहुलकात्**—इत्युपलक्षणम्, ह्रस्वनुटौ वा स्त इत्यपि व्याख्यानात्—इत्यपि बोध्यम् । तथा च 'ब्रुवते कतमेऽपि नपुंसकमापः' इति कोशमुदाहृत्य 'सर्वमापोमयं जगत्' इति प्रयोगो दुर्घटवृत्तौ समर्थितः ॥ ६४८ **रूपे**—। रूपे वाच्ये आप्नोतेरसुन् ह्रस्वत्वं च धातोः, प्रत्ययस्य जुडागमश्च स्यात् ॥—**अब्ज इति** । 'झलां जश् झशि' इति पकारस्य बकारः ॥ ६४९ **उदके**—। उदके वाच्ये आप्नोतेरसुन् ह्रस्वत्वं च नुमागमो भश्चान्तादेशः ॥ ६५० **नहेः**—। णह बन्धने, अस्माद्गमने वाच्येऽसुन् भश्चान्तादेशः स्यात् । '**नभो** व्योम्नि नभा मेघे श्रावणे च पतद्ग्रहे । घ्राणे मृणालसूत्रे च वर्षासु च नभाः स्मृतः' इति विश्वः । 'नभः क्लीबं व्योम्नि पुमान्घने । घ्राणश्रावणवर्षासु बिसतन्तौ पतद्ग्रहे' इति मेदिनी । 'नभः खं श्रावणो नभाः' इत्यमरः । 'नभं तु नभसा सार्धम्' इति द्विरूपकोशादकारान्तोऽपि ॥ ६५१ **इणः**—। इणोऽसुन् स्यादपराधे वाच्ये धातोरागादेशश्च । विश्वोक्तिमाह—**आग इति** ॥ ६५२ **अमेः**—। अम गत्यादौ । अस्मादसुन् हुगागमश्च धातोः स्यात् । अमन्ति गच्छन्त्यनेनाधस्तादित्य**ंहो** दुरितम् ॥ ६५३ **रमेश्च** । रमेरसुन् स्यात् हुगागमश्च धातोः । रंहो वेगः । अहिरहिभ्यामसुना सिद्धे अघिरघिभ्यामसुनि अङ्घो रङ्घ इति मा भूदिति सूत्रद्वयमिति गोवर्धनः । तथा च 'स्यान्मध्योष्मचतुर्थत्वमंहसो रंहसस्तथा' इति द्विरूपकोशः । **एवं च** 'दत्तार्घाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमङ्घोविघातम्' इति, 'रङ्घःसङ्घः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचेः सोऽवतात्स्यन्दनो वः' इत्यत्र अङ्घो रङ्घ इति घकारपाठोऽनुप्रासरसिकानां प्रामादिक इति **वदन्ति** ॥ ६५४ **देशे**—। देशे वाच्ये रमेरसुन् हकारश्चान्तादेशः स्यात् । 'रहस्तत्त्वे रते गुह्ये' इति मेदिनी ॥ ६५५ **अञ्चि**—। अञ्चु गतिपूजनयोः, अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु, युजिर् योगे, युज समाधौ, भृजी भर्जने । अङ्कः, अङ्कसी, अङ्कांसि । अङ्गः, अङ्गसी, अङ्गांसि । योगः, योगसी, योगांसि ॥—**भर्गस्तेज इति** । 'हरः स्मरहरो भर्गः' इत्यत्र तु भर्गशब्दो घञन्तः पुंलिङ्ग इति बोध्यः । उच समवाये, अस्मादसुनि बाहुलकात्कुत्वम् । न्यङ्क्वादित्वाद्वा । '**ओक** आश्रयमात्रेऽपि मन्दिरेपि नपुंसकम्' इति मेदिनी ॥ ६५६ **भूरञ्जि**—। भू सत्तायाम्, रञ्ज रागे, आभ्यामसुन्कित्स्यात् । **भुवः**=अन्तरिक्षम् । षष्ठ्यन्तप्रतिरूपकमव्ययमिदम् । **रजो** रेणुः । 'रजः क्लीबं गुणान्तरे । आर्तवे च परागे च रेणुमात्रेऽपि दृश्यते' इति मेदिनी । घञर्थे कप्रत्यये तु अका-

७१ सि० कौ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासो वस्त्रम् ॥ ६५८ । चन्देरादेश्च छः । छन्दः ॥ ६५९ । पचिवचिभ्यां सुट् च । 'पक्षसी तु स्मृतौ पक्षौ' । वक्षो हृदयम् ॥ ६६० । वहिहाधाञ्भ्यश्छन्दसि । वक्षा अनड्वान्, हासाश्चन्द्रः, धासाः पर्वत इति प्राञ्चः । वस्तुतस्तु णिदित्यनुवर्तते न तु सुट् । तेन वहेरुपधावृद्धिः । इतरयोः 'आतो युक्-' २७६१ इति युक् । 'शोणा धृष्णू नृवाहसा' । 'श्रोता हवं गृणतः स्तोमवाहाः' । 'विश्वो विहायाः' । 'वाजम्भरो विहायाः' । 'देवो न यः पृथिवीं विश्वधायाः' । 'अधारयत् पृथिवीं विश्वधायसम्' । 'धर्णसिं भूरिधायसम्' । इत्यादि ॥ ६६१ । इण आसिः । अयाः वह्निः । स्वरादिपाठादव्ययत्वम् ॥ ६६२ । मिथुनेऽसिः पूर्ववच्च सर्वम् । उपसर्गविशिष्टो धातुर्मिथुनं, तत्रासुनोऽपवादोऽसिः स्वरार्थः । यस्य धातोर्यत्कार्यं असुन्प्रत्यये उक्तं, तदत्रापि भवतीत्यर्थः-अशेर्देवने युट् चेत्यादि । सुयशाः ॥ ६६३ । नञि हन एह च । अनेहाः, अनेहसौ ॥ ६६४ । विधाञो वेध च । विदधातीति वेधाः ॥ ६६५ । नुवो धुट् च । नोधाः=ऋषिः ॥ ६६६ । गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च । असिः स्यात् । सुतपाः । जातवेदाः । 'गतिकारकोपपदात् कृत्' ३८७० इत्युत्तरपदप्रकृतिस्वरत्वे सति शेषस्यानुदात्तत्वे प्राप्ते तदपवादार्थमिदम् ॥ ६६७ । चन्द्रे मो डित् । चन्द्रोपपदान्माङोऽसिः स्यात्स च डित् । चन्द्रमाः ॥ ६६८ । वयसि धाञः । वयोधास्तरुणः ॥ ६६९ । पयसि च । पयोधाः समुद्रो मेघश्च ॥ ६७० । पुरसि च । पुरोधाः ॥ ६७१ । पुरूरवाः । पुरुशब्दस्य दीर्घो रौतेरसिश्च निपात्यते ॥ ६७२ । चक्षेर्बहुलं शिच्च । नृचक्षाः ॥ ६७३ । उषः कित् । उषः ॥ ६७४ । दमेरुनसिः । 'सप्तार्चिर्दमुनाः' ॥ ६७५ अङ्गतेरसिरिरुडागमश्च । अङ्गिराः ॥ ६७६ । सर्तेरप्पूर्वादसिः । अप्सराः । प्रायेणायं भूम्नि, अप्सरसः ॥ ६७७ । विदिभुजिभ्यां

रान्तोऽप्ययम् । 'रजोऽयं रजसा सार्धं स्त्रीपुष्पगुणधूलिषु' इत्यजयकोशः ॥ ६५७ **वसेः-।** वस निवासे, अस्मादसुन् स्यात्स च णित् । णित्वाद्वृद्धिः ॥ ६५८ **चन्देः-।** चदि आह्लादने, अस्मादसुन् आदेः-छकारश्च । '**छन्दः** पद्यप्रभेदेऽपि स्वैराचाराभिलाषयोः' इति मेदिनी । अकारान्तोऽप्ययम् । 'अभिप्रायवशौ **छन्दौ**' इत्यमरद्विरूपकोशौ ॥ ६५९ **पचि-।** डुपचष् पाके, वच परिभाषणे, आभ्यामसुन् स्यात्तस्य सुडागमश्च । चस्य कुत्वे सस्य षत्वम् । **पक्षः**, पक्षसी, पक्षांसि । 'यथा शालायै पक्षसी' इति श्रुतिः । 'पूर्वोत्तरे द्वे पक्षसी' इति च श्रुतिः । 'पूर्वोत्तरे द्वे पक्षसी' इति अनीकाधिकरणे **शाबरभाष्यम् । माधवस्तु—** 'पक्ष परिग्रहे' इत्यस्मादसुन् इत्याह ॥ ६६० **वहि-।** वह प्रापणे, ओहाक् त्यागे, डुधाञ् धारणादौ, एभ्योऽसुन् स्यात् । अत्र पूर्वसूत्रात्सुटमनुवर्तयतामुज्ज्वलदत्तादीनां मतेनोदाहरणमाह—वक्षाः, हासाः, धासाः—इति ॥**—प्राञ्च इति ।** सकलवृत्तिकृतः प्रसादकारादयश्चेत्यर्थः । एतच्चायुक्तम् । उक्तोदाहरणानि हि न तावल्लोके दृश्यन्ते न वा संभवन्ति, सूत्रेऽस्मिन् छन्दसीत्युक्तत्वात् । वेदे तु विपरीतान्येवोदाहरणानि दृश्यन्त इत्याह**—वस्तुतस्त्विति ।** वेदभाष्यकारादयश्चेहानुकूला इत्यवधेयम् ॥ ६६१ **इणः-।** इण् गतौ, अस्मादासिः स्यात् ॥ ६६२ **मिथुने-॥—सुयशा इति ।** 'अशेर्देवने युट् च' इत्यादि पूर्ववत् । सुयशाः, सुस्रोता इत्याद्युदाहार्यम् ॥ ६६३ **नञि-।** हन्तेर्नञ्युपपदेऽसिः स्यात् धातोरेहादेशश्च । 'ऋदुशनस्पुरुदंस-' इत्यादिना सावनङ् ॥ ६६४ **विधाञः-।** डुधाञ् धारणादौ, विपूर्वादस्मादसिः स्याद्वेधादेशश्च सोपसर्गधातोः । '**वेधाः** पुंसि हृषीकेशे बुधे च परमेष्ठिनि' इति मेदिनी ॥ ६६५ **नुवः-।** णु स्तुतौ, अस्मादसिः स्यात्तस्य धुडागमश्च ॥**—नोधा इति ।** 'सद्यो भुवद्वीर्याय **नोधाः**' इति मन्त्रे 'नोधा ऋषिर्भवति' इति निरुक्तम् । नवं दधातीति तु नैरुक्तं व्युत्पत्त्यन्तरं बोध्यम् ॥ ६६६ **गति-।** गतौ कारके चोपपदेऽसिः स्यात् । तप संतापे, विद ज्ञाने, विदॢ लाभे ॥ ६६७ **चन्द्रे-।** चन्द्रं रजतममृतं च । तदिव मीयतेऽसौ चन्द्रमा इति हरदत्तः । 'स च डित्' इति डित्त्वाट्टिलोपे चन्द्रमसौ चन्द्रमस इत्यादि सिध्यति ॥ ६६८ **वयसि-।** डुधाञ् धारणे, अस्माद्वयस्युपपदेऽसिः स्यात्स च डित् ॥ ६६९ **पयोधा इति ।** पयःशब्द उपपदे डुधाञः पूर्ववत् ॥ ६७० **पुरसि च ।** पुरःशब्द उपपदे पूर्ववत् । '**पुरोधास्तु** पुरोहितः' इत्यमरः ॥ ६७१ **रौतेरिति-।** रु शब्दे । '**पुरूरवा** बुधसुतो राजर्षिश्च पुरूरवाः' इत्यमरः ॥ ६७२ **चक्षेः-।** चक्षिङ् व्यक्तायां वाचि, अस्मादसिः स्यात्स च बहुलं शित् । शित्त्वात्सार्वधातुकसंज्ञायां ख्याञ् न । **नृचक्षाः**=राक्षसः । शित्त्वाभावपक्षे तु ख्याञादेशः । **प्रख्याः** प्रजापतिः ॥ ६७३ **उषः-।** उष दाहे, अस्मादसिः स्यात्स च कित् । **उषः** प्रभातम् । दशपाद्यां तु वसः किदिति पाठः । वसति सूर्येण सहेति **उषाः**=देवताविशेषः । 'अपो भि' इति सूत्रे 'उषसश्चेष्यते' इति वार्तिकस्य समुषद्भिरित्युदाहरणं विवृण्वद्भिर्हरदत्तादिभिरयं पाठः पुरस्कृतः ॥ ६७४ **दमेः-।** दमु उपशमे । 'सप्तार्चिर्दमुनाः शुक्रः' इत्यमरः । पक्षे 'अन्येषामपि दृश्यते' इति दीर्घः । 'जुष्टो **दमूनाः**' 'दमूनसं गृहपतिं वरेण्यम्' । दशपाद्यां तु 'दमेरूनसिः' इति सूत्र एव दीर्घः पठ्यते, तन्मते बाहुलकाद्ध्रस्वो बोध्यः ॥ ६७५ **अङ्गिराः—** अग्निरित्यर्थः । **अङ्गिरा** ऋषिभेदः ॥ ६७६ **सर्तेः-।** सृ गतौ ॥**—प्रायेणेति ।** 'स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपि' इति शब्दार्णवः ॥ 'अप्सरस्त्वप्सराः प्रोक्ताः सुमनाः सुमनस्सु च' इति द्विरूपकोशः । 'एकाप्सरःप्रार्थितयोर्विवादः' इति रघुः ॥ ६७७ **विदि-।** विद ज्ञाने, भुज पालनाभ्यवहारयोः, आभ्यां विश्वशब्दे उपपदेऽसिः स्यात् ॥ शब्दस्वरूपपरत्वात् 'विश्वे' इत्यत्र स्मिन्नादेशो न कृतः । उदाहरणे 'विश्वं वेत्ति भुङ्क्ते' इति विग्रहः । यत्तु 'तत्पुरुषे कृति-' इति सप्तम्या अलुक्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वे । विश्ववेदाः । विश्वभोजाः ॥ ६७८ । वशेः कनसिः । संप्रसारणम् । उशना ॥

॥ इत्युणादिषु चतुर्थः पादः ॥

अथ पञ्चमः पादः ।

६७९ । अदि भुवो डुतच् । अद्भुतम् ॥ ६८० । गुधेरूमः । गोधूमः ॥ ६८१ । मसेरूरन् । मसूरः । प्रथमे पादे 'असेरुरन्' 'मसेश्च' (४२) इत्यत्र व्याख्यातः ॥ ६८२ । स्थः किच्च । स्थूरो मनुष्यः ॥ ६८३ । पातेरतिः । पातिः स्वामी । संपातिः पक्षिराजः ॥ ६८४ । वातेर्नित् । 'वातिरादित्यसोमयोः' ॥ ६८५ । अर्तेश्च । अरतिरुद्वेगः ॥ ६८६ । तृहेः क्नो हलोपश्च । तृणम् ॥ ६८७ । वृञ्-लुटितनिताडिभ्य उलच् तण्डश्च । व्रियन्ते लुट्यन्ते तन्यन्ते ताड्यन्त इति वा तण्डुलाः ॥ ६८८ । दंसेष्टटनौ न आ च । 'दासः सेवकशूद्रयोः' ॥ ६८९ । दंशेश्च । दाशो धीवरः ॥ ६९० । उदि चेर्डैसिः । स्वरादिपाठादव्ययत्वम् । उच्चैः ॥ ६९१ । नौ दीर्घश्च । नीचैः । ६९२ । सौ रमेः क्तो दमे पूर्वपदस्य च दीर्घः । रमेः सुपूर्वाद्दमे वाच्ये क्तः स्यात् । कित्वादनुनासिकलोपः । सूरत उपशान्तो दयालुश्च ॥ ६९३ । पूञो यण् णुक् ह्रस्वश्च । यत्प्रत्ययः । पुण्यम् ॥ ६९४ । स्रंसेः शिः कुट् किच्च । स्रंसतेः शिरादेशो यत्प्रत्ययः कित्, तस्य कुडागमश्च । शिक्यम् ॥ ६९५ । अर्तेः क्युरुच्च । उरणो मेषः ॥ ६९६ । हिंसेरीरन्नीरचौ । 'हिंसीरो व्याघ्रदुष्टयोः' ॥ ६९७ । उदि दृणातेरजलौ पूर्वपदान्त्यलोपश्च । उदरम् ॥ ६९८ । डित् खनेर्मुट् स चोदात्तः । अच् अल् च डित्स्याद्धातोर्मुट्, स चोदात्तः । मुखम् ॥ ६९९ । अमेः सन् । अंसः ॥ ७०० । मुहेः खो मूर् च । मूर्खः । ७०१ । नहेर्हलोपश्च । नखः ॥ ७०२ । शीङो ह्रस्वश्च । शिखा ॥ ७०३ । माङ ऊखो मय् च । मयूखः ॥ ७०४ । कलिगलिभ्यां फगस्योच्च । कुल्फः शरीरावयवो रोगश्च । गुल्फः पादग्रन्थिः ॥ ७०५ । स्पृशेः श्वण्शुनौ पृ च । श्वण्शुनौ प्रत्ययौ 'पृ' इत्यादेशः । पार्श्वम् । 'पार्श्वोऽस्त्री कक्षयोरधः' । पर्शुरायुधम् ॥ ७०६ । श्मनि श्रयतेर्डुन् । श्मन्शब्दो मुखवाची ।

'विश्ववेदाः=अग्निः, विश्वभोजाः=इन्द्रः' इत्युज्ज्वलदत्तेनोक्तं । तन्न । तथा सति सिन्नादेशस्य दुर्वारत्वापत्तेः । 'सुमृळीको भवतु विश्ववेदाः' 'पूषाभगः प्रभृथे विश्वभोजाः' इत्यादिमन्त्रेषु सुपो लुक एव दर्शनात्, वृत्त्यन्तरे तथैवोदाहरणाच्च ॥ ६७८ वशेः-। वश कान्तौ । 'उशना भार्गवः कविः' इत्यमरः ॥ ॥ इत्युणादिषु चतुर्थः पादः ॥

६७९ अदि भुवो-। 'अत्' इत्यव्ययं आकस्मिकार्थे, तस्मिन्नुपपदे भूधातोर्डुतच्स्यात् । डित्वाट्टिलोपः । अद्भुतमाश्चर्यम् ॥ ६८० गुधेः-। गुध परिवेष्टने, गुध्यते परिवेष्ट्यते प्राणिभिरिति । 'गोधूमो नागरङ्गे स्यादोषधीव्रीहिभेदयोः' इति मेदिनी ॥ ६८१ मसेः-। मसी परिणामे ॥ ६८२ स्थः-। ष्ठा गतिनिवृत्तौ अस्मादूरन् । कित्वादालोपः ॥ स्थूरो मनुष्य इति । स्थूरस्य रायो बृहतो य ईशे' इति मन्त्रे तु योगपुरस्कारात् 'स्थिरस्येत्यर्थः' इति व्याख्यातम् ॥ ६८३ पातेः-। पा रक्षणे ॥ ६८४ वातेः-। वा गतिगन्धनयोः ॥ रभसकोशस्थमाह—वातिरिति ॥ ६८५ अर्तेः । ऋ गतौ, अस्मादतिः स्यात्स च नित् ॥ ६८६ तृहेः-। तृह हिंसायाम्, क्नस्य कित्त्वाद्गुणाभावः ॥ ६८७ वृञ्-। वृञ् वरणे, लुट विलोडने, तनु विस्तारे, तड आघाते चुरादिः, एभ्य उलच् स्यात् तण्डादेशश्च धातोः । यद्यपि 'सानसिधर्णसि-' इति सूत्रे तण्डुलशब्दो निपातितस्तथापि प्रत्ययस्वरेण मध्योदात्तः सः, अयं तु चित्स्वरेणान्तोदात्त इति विवेकः ॥ ६८८ दंसेः-। दसि दंशनदर्शनयोः, अस्माट्टटनौ स्यातां नकारस्याकारादेशः । टनो नकार आद्युदात्तार्थः । 'दासः शूद्रे दानपात्रे भृत्यधीवरयोरपि' इति विश्वः ॥ ६८९ दंशेः-। दंश दशने, अस्मादपि टटनौ स्तो नकारस्य चात्वं स्यात् । 'कैवर्ते दाशधीवरौ' इत्यमरः ॥ ६९० उदि-। चिञ् चयने । डैसो डित्त्वाट्टिलोपः ॥ ६९२ सौरमेः-। रमु क्रीडायाम् । ६९३ पूञः-। पूञ् पवने । 'पुण्यं मनोज्ञेऽभिहितं तथा सुकृतधर्मयोः' इति विश्वः ॥ ६९४ स्रंसेः-। स्रंसु अधःपतने, कित्त्वं तु गुणाभावार्थम् ॥ ६९५ अर्तेः-। ऋ गतौ अस्मात्क्युप्रत्ययः स्याद्धातोरुत्वं च । रपरत्वम् । 'युवोरनाकौ' । 'मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके' इत्यमरः ॥ ६९६ हिंसेः-। हिसि हिंसायाम् ॥ ६९७ उदि-। दॄ विदारणे ॥ ६९८ डित्खनेः-। खनु अवदारणे, अस्मादजलौ स्तः । 'मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि । सन्ध्यन्तरे नाटकादेः शब्देऽपि च नपुंसकम्' इति मेदिनी ॥ ६९९ अमेः-। अम गतौ, 'स्कन्धो भुजशिरोंसोऽस्त्री' इत्यमरः । 'अंसः स्कन्धे विभागे च' इति दन्त्यान्ते विश्वः ॥ ७०० मुहेः-। मुह वैचित्ये, अस्मात्खप्रत्ययो धातोर्मुरादेशश्च । मुह्यतीति मूर्खः । 'अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः' इत्यमरः ॥ ७०१ नहेः-। णह बन्धने । अस्मात्खः । 'नखः कररुहे षण्डे गन्धद्रव्ये नखं नखी' इति विश्वः । 'नखी स्त्रीक्लीबयोः शुक्तौ नखरे पुंनपुंसकम्' इति मेदिनी ॥ ७०२ शीङः-। शीङ् स्वप्ने, अस्मात्खः स्याद्धातोर्ह्रस्वश्च । ह्रस्वविधानसामर्थ्याद्गुणाभावः । 'शिखा शाखा बर्हिचूडालाङ्गलिक्यग्रमात्रके । चूडामात्रे शिफायां च ज्वालायां प्रपदेऽपि च' इति मेदिनी ॥ ७०३ माङः-। माङ् माने । 'मयूखस्त्विट्करज्वालासु' इत्यमरः ॥ ७०४ कलि-। कल शब्दसंख्यानयोः, गल अदने, आभ्यां फक् स्यात् धातोरकारस्योत्वं च ॥—गुल्फ इति । 'तद्ग्रन्थी घुटिके गुल्फौ' इत्यमरः । तयोः पादयोर्ग्रन्थी इत्यर्थः ॥ ७०५ स्पृशेः-। स्पृश संस्पर्शे, 'पार्श्वं कक्षाधरे चक्रोपान्ते पर्शुगणेऽपि च' इति विश्वमेदिन्यौ ॥ ७०६ श्मनि-। श्रिञ् सेवायाम्, अस्मात् श्मन्युपपदे डुन्स्यात् डित्वाट्टिलोपः । 'तद्वृद्धौ श्मश्रु पुंमुखे' इत्यमरः । पुरुषस्य मुखे तेषां=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुखमाश्रयत इति श्मश्रु ॥ ७०७। **अश्वादयश्च**। अश्रु नयनजलम् ॥ ७०८। **जनेष्टन् लोपश्च**। जटा ॥ ७०९। **अच् तस्य जङ्ग च**। तस्य जनेर्जङ्गादेशः स्यादच। जङ्गा ॥ ७१०। **हन्तेः शरीरावयवे द्वे च**। जघनम्। 'पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः' ॥ ७११। **क्लिशेरन् लो लोपश्च**। लकारस्य लोपः। केशः ॥ ७१२। **फलेरितजादेश्च पः**। पलितम् ॥ ७१३। **कृञादिभ्यः संज्ञायां वुन्**। करकः, करका। कटकः। नरकम्, नरकः। 'नरको नारकोऽपि च' इति द्विरूपकोशः। सरकं गगनम्। कोरकः, कोरकं च ॥ ७१४। **चीकयतेराद्यन्तविपर्ययश्च**। कीचको वंशभेदः ॥ ७१५। **पचिमच्योरिच्चोपधायाः**। पेचकः। मेचकः ॥ ७१६। **जनेररष्ठ च**। जठरम् ॥ ७१७। **वचिमनिभ्यां चिच्च**। वठरो मूर्खः। 'मठरो मुनिशौण्डयोः'। बिदादित्वान्माठरः। गर्गादित्वान्माठर्यः ॥ ७१८। **ऊर्जि दृणातेरलचौ पूर्वपदान्तलोपश्च**। 'ऊर्दरः शूररक्षसोः' ॥ ७१९। **कृदरादयश्च**। कृदरः कुसूलः। सृदरं बिलसत्। सृदरः सर्पः ॥ ७२०। **हन्तेर्युन्नाद्यन्तयोर्घत्वतत्वे**। घातनो मारकः ॥ ७२१। **क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्च**। क्रान्तुः पक्षी। गान्तुः पथिकः। क्षान्तुर्मशकः ॥ ७२२। **हर्यतेः कन्यन् हिरच्**। कन्यन् प्रत्ययः। हिरण्यम् ॥ ७२३। **कृञः पासः**। कर्पासः। बिल्वादित्वात्कार्पासं वस्त्रम् ॥ ७२४। **जनेस्तु रश्च**। जर्तुर्हस्ती योनिश्च ॥ ७२५। **ऊर्णोतेर्डः**। ऊर्णा ॥ ७२६। **दधातेर्यत् नुट् च**। धान्यम् ॥ ७२७। **जीर्यतेः क्रिन् रश्च वः**। 'जिव्रिः स्यात्कलपक्षिणोः'। बाहुलकात् 'हलि च' ३५४ इति दीर्घो न ॥ ७२८। **मव्यतेर्यलोपो मश्चापतुट् चालः**। मव्यतेरालप्रत्ययः स्यात्तस्यापतुडागमो धातोर्यलोपो मकारश्चान्त्यस्य। ममापतालो विषये ॥ ७२९। **ऋजेः कीकन्**। ऋजीक इन्द्रो धूमश्च ॥ ७३०। **तनोतेर्डउः**

रोम्णां वृद्धौ श्मश्रुशब्दो वर्तेत इत्यर्थः ॥ ७०७ **अश्वादयः**–। अशू व्याप्तौ, अस्मात् रुन् प्रत्ययो नञ्पूर्वात् श्रयतेर्डुन् वा। **यत्तूज्ज्वलदत्तेनोक्तम्**—अश्नोतेर्डुन् रुट् चेति। तदयुक्तम्, डित्त्वाट्टिलोपे सति धातोरश्रवणप्रसङ्गात्। न च टिलोपाभावो निपात्यत इति वाच्यम्। तथा सति डित्त्वोत्प्रेक्षणस्य निष्फलत्वापत्तेरिति दिक् ॥ ७०८ **जनेः**–। जनी प्रादुर्भावे, अस्माट्टन्प्रत्ययः स्याद्धातोरन्त्यलोपश्च। '**जटा** लग्नकचे मूले मांस्यां लुङ्गे पुनर्जटी' इति मेदिनी ॥ ७०९ **जङ्गेति**। जनेरच्प्रत्यये सति 'अजाद्यतः–' इति टाप् ॥ ७१० **हन्तेः**–। देहावयवे वाच्ये हन्तेरच्प्रत्ययः स्यात्, द्वित्वं च धातोः। अभ्यासकार्यम्, 'अभ्यासाच्च' इति कुत्वम्। अमरोक्तिमाह—**पश्चान्नितम्ब इति**। 'जघनं च स्त्रियाः श्रोणिपुरोभागे कटावपि' इति मेदिनी ॥ ७११ **क्लिशेः**–। क्लिशू विबाधने, अस्मादन्स्यात्। '**केशः** स्यात्पुंसि वरुणे ह्रीबेरे कुण्डलेऽपि च' इति मेदिनी ॥ ७१२ **फलेः**–। फल निष्पत्तौ। '**पलितं** जरसा शौक्ल्यम्' इत्यमरः। 'पलितं शैलजे तापे केशपाशे च कर्दमे' इति मेदिनी ॥ ७१३ **कृञादिभ्यः**–। डुकृञ् करणे। **करकः** कमण्डलुः। 'करकस्तु पुमान्पक्षिविशेषे दाडिमेऽपि च। द्वयोर्मेघोपले न स्त्री करके च कमण्डलौ' इति मेदिनी। **करका** वृष्टिपाषाणः। कटे वर्षावरणयोः, '**कटको** वलये सानौ'। 'कुन् शिल्पिसंज्ञयोः' इति कुनाऽप्ययं सिद्धस्तथा च गुणभाज इहैव वुनि उदाहार्याः, गुणनिषेधभाजस्तु कुनि। उदासीनास्तु यत्र कुत्रचिदिति भावः। नॄ नये। 'स्यान्नारकस्तु **नरको** निरयो दुर्गतिः स्त्रियाम्' इत्यमरः। 'नरकः पुंसि निरये देवारातिप्रभेदयोः' इति मेदिनी। **उदयनाचार्यास्तु** 'न च नरकाण्येव सन्ति' इति क्लीबं प्रयुञ्जते तन्निर्मूलमित्याहुः। सृ गतौ। '**सरको**ऽस्त्री शीधुपात्रे शीधुपानेक्षुशीधुनोः' इति मेदिनी। कुर शब्दे। '**कोरको**ऽस्त्री कुड्मले स्यात्कक्कोलकमृणालयोः' इति मेदिनी। 'विचकार कोरकाणि' इति माघः। 'कोरकः पुमान्' इत्यमरोक्तिस्तु नादर्तव्येत्याहुः। अपवरकादयोऽपि इहैव बोध्याः ॥ ७१४ **चीकयतेः**–। चीक आमन्त्रणे चुरादिः। अस्याद्यन्तविपर्ययः। पचिमच्योरित्यं चानुपदं वक्ष्यमाणं बाहुलकबललभ्यं बोध्यम्। '**कीचको** दैत्यभिद्वाताहतसस्वनवंशयोः' इति मेदिनी। डुपचष् पाके। 'उलूके करिणः पुच्छमूलोपान्ते च **पेचकः**' इत्यमरः। 'पेचको गजलाङ्गूलमूलोपान्ते च कौशिके' इति मेदिनी ॥ ७१५ मचि मुचि कल्कने। '**मेचकस्तु** मयूरस्य चन्द्रके श्यामले पुमान्। तद्युक्ते वाच्यवत्क्लीबं स्रोतोऽञ्जनान्धकारयोः' इति मेदिनी ॥ ७१६ **जनेः**–। जन जनने, जनी प्रादुर्भावे वा। '**जठरः** कठिनेऽपि स्यात्' इत्यमरः। 'जठरो न स्त्रियां कुक्षौ वृद्धकर्कटयोस्त्रिषु' इति मेदिनी ॥ ७१७ **वचि**–। वच परिभाषणे, मन ज्ञाने, आभ्यामरप्रत्ययः स्यात्स च चित्, रश्चान्तादेशः। '**वठरः** कुक्कुटे वण्टे सरठे च' इति मेदिनी ॥ ७१८ **ऊर्जि**–। दॄ विदारणे, अस्मादूर्ज्युपपदे अलचौ प्रत्ययौ स्तः ॥ ७१९ **कृदरादयश्च**–। कृ मृ सृ एतदव्ययपूर्वं कदणाति प्रकृतिका लजन्ता निपात्यन्ते ॥ ७२० **हन्तेः**–। हन हिंसागत्योः ॥ ७२१ **क्रमि**–। क्रमु पादविक्षेपे, गम्लृ गतौ, क्षमूष् सहने, एभ्यस्तुन्स्यादेषां वृद्धिश्च ॥ ७२२ **हर्यतेः**–। हर्य गतिकान्त्योः। 'हिरण्यं रेतसि द्रव्ये शातकुम्भवराटयोः। अक्षये मानभेदे स्यादकुप्ये च नपुंसकम्' इति मेदिनी ॥ ७२३ **कृञः**–। डुकृञ् करणे ॥ ७२४ **जनेः**–। तु इत्यविभक्तम्। जनेस्तुप्रत्ययो रेफश्चान्तादेशः स्यात् ॥ ७२५ **ऊर्णोतेः**–। ऊर्णुञ् आच्छादने, अस्मात् डः स्यात्। डित्त्वाट्टिलोपः, टाप्, '**ऊर्णा** मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवौ' इत्यमरः। भ्रुवोर्मध्ये य आवर्तस्तत्रेत्यर्थः। 'अन्तरान्तरेण–' इति द्वितीया ॥ ७२६ **दधातेः**–। डुधाञ् धारणादौ, अस्माद्यत् प्रत्ययः स्यात्तस्य नुडागमश्च। '**धान्यं** व्रीहिषु धान्याके' इति मेदिनी ॥ ७२७ **जीर्यतेः**–। जॄ वयोहानौ अस्मात् क्रिन्स्यात्। 'ॠत इद्धातोः'। रपरत्वम्। रेफस्य वकारादेशः ॥ ७२८ **मव्यतेः**–। मव्य बन्धने ॥—**अन्त्यस्येति**। वकारस्येत्यर्थः ॥ ७२९ **ऋजेः**–। ऋजी गतौ ॥ ७३० **तनोतेः**–। तनु विस्तारे, अस्मात् डउः प्रत्ययस्तस्य सन्वद्भावात् द्वित्वम्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्न्वच्च ।'तितउः पुंसि क्लीबे च' ॥ ७३१ । अर्भकपृथुकपाका वयसि । 'ऋधु वृधौ' अतो वुन्, भकारश्चान्तादेशः । प्रथेः कुकन्संप्रसारणं च । पिबतेः कन् ॥ ७३२ । अवद्यावमाधमार्वरेफाः कुत्सिते । वदेर्नञि यत्, अवद्यम् । अवतेरमः, वस्य पक्षे धः, अवमः–अधमः । अर्तेर्वन्, अर्वा । रिफतेस्तौदादिकात् अः, रेफः ॥ ७३३ । लीरीङोर्ह्रस्वः पुट् च तरौ श्लेषणकुत्सनयोः । तरौ प्रत्ययौ क्रमात् स्तो धातोर्ह्रस्वः प्रत्ययस्य पुट् । लिप्तं श्लिष्टम् । रिप्तं कुत्सितम् ॥ ७३४ । क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम् च । क्लिशेः कन् स्यात् उपधाया ईत्वं लस्य लोपो नामागमश्च । कीनाशो यमः । कित्वफलं चिन्त्यम् ॥ ७३५ । अश्नोतेराशुकर्मणि वरट् च । चकारादुपधाया ईत्वम् । ईश्वरः ॥ ७३६ । चतेरुरन् । चत्वारः ॥

७३७ । प्राततेररन् । प्रातः ॥ ७३८ । अमेस्तुट् च । अन्तर्मध्यम् ॥ ७३९ । दहेर्गो लोपो दश्च नः । गप्रत्ययो धातोरन्तस्य लोपो दकारस्य नकारः । नगः ॥ ७४० । सिचेः संज्ञायां हनुमौ कश्च । सिञ्चतेः कप्रत्ययो हकारादेशो नुम् च स्यात् । सिंहः ॥ ७४१ । व्याङि घ्रातेश्च जातौ । कप्रत्ययः स्यात् । व्याघ्रः ॥ ७४२ । हन्तेरच् घुर च । घोरम् ॥ ७४३ । क्षमेरुपधालोपश्च । चादच् । क्ष्मा ॥ ७४४ । तरतेर्ड्रिः । त्रयः, त्रीन् ॥ ७४५ । ग्रहेरनिः । ग्रहणिः । ङीष्, ग्रहणी व्याधिभेदः ॥ ७४६ । प्रथेरमच् । प्रथमः ॥ ७४७ । चरेश्च । चरमः ॥ ७४८ । मङ्गेरलच् । मङ्गलम् ॥

इत्युणादिषु पञ्चमः पादः ॥

भ्यासस्येत्वं च । डित्त्वाट्टिलोपः । पृथगुच्चारणसामर्थ्याद्गुणो न । तितउः=चालनी । 'सक्तुमिव **तितउना** पुनन्तो यत्र धीरा मनसा वाचमक्रत' । '**तितउः** परिपवनं भवति' इति परपशायां भाष्यम् । 'चालनी तितउः पुमान्' इत्यमरः । 'चालनं तितउन्युक्तम्' इति कोशान्तरम् ॥ 'स्याद्वास्तु हिङ्गु तितउ' इति पुंनपुंसकवर्गे त्रिकाण्डशेषः ॥ **७३१ अर्भक-**। एते निपात्यन्ते । निपातनप्रकारमेवाह—**ऋधु वृद्धावित्यादि** ॥—**प्रथेरिति** । प्रथ प्रख्याने, पा पाने–पिबति स्तनादिकमिति पाकः । 'पोतः **पाको**ऽर्भको डिम्भः पृथुकः शावकः शिशुः' इत्यमरः । '**अर्भकः** कथितो बाले मूर्खेऽपि च कृशेऽपि च । **पृथुकः** पुंसि चिपिटे शिशौ स्यादभिधेयवत्' । 'पाकः परिणतौ शिशौ । केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेऽपि च' इति मेदिनी ॥ **७३२ अवद्या-**। एते कुत्सिते निपात्यन्ते । वद व्यक्तायां वाचि, अव रक्षणादौ, ऋ गतौ, रिफ कत्थनयुद्धनिन्दाहिंसादानेषु । 'निकृष्टप्रतिकृष्ट**ार्वरेफ**याप्या**वमाधमाः**' इत्यमरः । 'कुपूयकुत्सिता**वद्य**खेटगर्ह्याणकाः समाः' इति च । '**अधमः** स्याद्गर्ह्य ऊनेऽपि' इति मेदिनी । '**अर्वा** तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गकः । **रेफो** रवर्णे पुंसि स्यात्कुत्सिते पुनरन्यवत्' इति च मेदिनी ॥ **७३३ लीरीङोः-**। लीङ् श्लेषणे, रीङ् श्रवणे ॥—**क्रमादिति** । श्लेषणे वाच्ये तप्रत्ययः कुत्सिते वाच्ये रप्रत्यय इत्यर्थः । '**लिप्तं** विषाक्ते भुक्ते च वाच्यवत्स्याद्विलेपिते' इति विश्वः ॥ **७३४ क्लिशेः-**। क्लिशू विबाधने । नामागमश्च प्रत्ययस्येति शेषः ॥—**चिन्त्यमिति** । ईत्वविधानसामर्थ्यादेव गुणाभावसिद्धेरिति भावः । '**कीनाशः** कर्षकः क्षुद्रोपांशुधूलिषु वाच्यवत् । यमे ना' इति मेदिनी ॥ **७३५ अश्नोतेः-**। अशू व्याप्तौ, अस्माद्वरट् स्यात् । आशुकर्म=वरदानादिक्रिया यस्य तस्मिन्वाच्ये, शीघ्रदातरीत्यर्थः ॥—**ईश्वर इति** । स्त्रियां तु टित्त्वान्ङीप्, ईश्वरी । प्रत्ययस्वरेण मध्योदात्ता । ईशेर्वनिपि 'वनो र च' इति ङीब्रयोस्तु धातुस्वरेणाद्युदात्ता । पुंयोगलक्षणे ङीषि–अन्तोदात्ता । 'स्थेशभासपिसकसः–' इति वरचि तदन्तादापि ईश्वरेति विवेकः । '**ईश्वरो** मन्मथे शम्भौ नाढ्ये स्वामिनि वाच्यवत् । ईश्वरी चेश्वरोमायाम्' इति मेदिनी । ईश्वरा उमायामिति छेदः । '**ईश्वरः** शङ्करेऽधीशे तत्पत्न्यामीश्वरीश्वरा' इति बोपालितः । 'विन्यस्तमङ्गलमहौषधिरीश्वरायाः' इति भारविः । दशपाद्यां तु सूत्रान्तरमपि 'हन्ते रन् घश्च' इति । हन हिंसागत्योः, अस्माद्रन्प्रत्ययः स्यात् घश्चान्तादेशः । हन्यते गम्यतेऽतिथिभिरिति **घरः** गृहम् ॥ **७३६ चतेः**। चते याचने, अस्मादुरन्स्यात् । अकार उच्चारणार्थः । 'चतुरनडुहोरामुदात्तः' इत्याम् । **चत्वारः** ॥—**प्राततेः-**। अत सातत्यगमने, प्रपूर्वादस्मादरन्स्यात् । रेफादकार उच्चारणार्थः । स्वरादिपाठादव्ययत्वम् । **प्रातर्** ॥ **७३८ अमेः-**। अम गतिशब्दसंभक्तिषु, अस्मादरन्स्यात्तस्य तुडागमश्च । अन्तःशब्दोऽपि प्रातःशब्दवत् अव्ययम् ॥ **७३९ दहेः-**। दह भस्मीकरणे । '**नगो** महीरुहे शैले भास्करे पवनाशने' इति मेदिनी ॥ **७४० सिचेः-**। षिच क्षरणे ॥—**हकारादेश इति** । धातोरन्त्यस्येत्यर्थः । '**सिंहः** कण्ठीरवे राशौ सत्तमे चोत्तरस्थितः । सिंही क्षुद्रबृहत्योः स्याद्वासके राहुमातरि' इति विश्वः ॥ **७४१ व्याङि-**। घ्रा गन्धोपादाने, अस्माज्जातौ वाच्यायां कः स्यात् । कित्त्वादातो लोपः । '**व्याघ्रः** स्यात्पुंसि शार्दूले रक्तैरण्डकरञ्जयोः । श्रेष्ठे नरादुत्तरस्थः कण्टकायां च योषिति' इति मेदिनी ॥ **७४२ हन्तेः-**। हन्तेरच् स्याद्धातोर्घुरादेशश्च । '**घोरं** भीमे हरे' इति विश्वः ॥ **७४३ क्षमेः-**। क्षमूष् सहने । '**क्ष्मा**वनिर्मेदिनी मही' इत्यमरः ॥ **७४४ तरतेः-**। तॄ प्लवनतरणयोः, अस्मात् ड्रिः स्यात् । डित्त्वाट्टिलोपः ॥ **७४५ ग्रहेः-**। ग्रह उपादाने ॥—**ङीषिति** । 'कृदिकारात्' इत्यनेन । '**ग्रहणी** रुक् प्रवाहिका' इत्यमरः ॥ **७४६ प्रथेः-**। प्रथ प्रख्याने । '**प्रथमस्तु** भवेदादौ प्रधानेऽपि च वाच्यवत्' इति मेदिनी । 'प्रथमचरम–' इति वैकल्पिकसर्वनामत्वात्पक्षे जसः शीभावः । प्रथमे, प्रथमाः ॥ **७४७ चरेश्च** । चर गतिभक्षणयोः, अस्मादमच्स्यात् । **चरमे**, चरमाः । योगविभागश्चिन्त्यप्रयोजनः । प्रथिचरिभ्यामित्येव सुवचम् ॥ **७४८ मङ्गेः** ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उखउखीत्यादिदण्डके गत्यर्थको मगिः पठ्यते । 'कल्याणं **मङ्गलं** शुभम्' । मङ्गलो ग्रहभेदः । 'मङ्गला सितदूर्वायामुमायां पुंसि भूमिजे । नपुंसकं तु कल्याणे सर्वार्थे रक्षणेऽपि च' इति मेदिनी । भावे ष्यञि माङ्गल्यम्, 'तत्र साधुः' इति यत् । '**मङ्गल्यः** स्यात्त्रायमाणाश्वत्थबिल्वमसूरके । स्त्रियां शम्यामधःपुष्प्यां मिसि शुक्लवचासु च । रोचनायामथो दध्नि क्लीबं शिवकरे त्रिषु' इति मेदिनी ॥ ॥ **इत्युणादिषु पञ्चमः पादः** ॥

उणादिप्रत्ययाः सन्ति पादोत्तरशतत्रयम् (३२५)। तेषां विवेचनं त्वत्र ज्ञानेन्द्रस्वामिभिः कृतम् ॥

प्राचा तु कतिपयानामेवोणादीनामुपन्यासः कृतो न तु सर्वेषां, सोऽप्युपन्यासो नैकप्रघट्टकतया कृतः किंतु विच्छिद्येति स्पष्टम् । तत्रापि केचित्प्रमादा मनोरमायां प्रदर्शितास्तेष्वेव कांश्चित्प्रमादान्दर्शयामः ॥ **द्वितीयपादे**—'भजो ण्विः' इति ण्विप्रकरणे 'छन्दसि सहः' 'वहश्च' इत्युपन्यस्य 'परौ व्रजेः षः पदान्ते' इति ण्विस्तेनैव षः, परिव्राट्—इत्ययं हि प्राचो ग्रन्थः, तद्व्याख्यायां तत्पौत्रेण पञ्चपाद्युणादिसूत्रे इदं पठ्यते इत्युक्तं। तदुभयमपि **प्रामादिकम्** । 'क्विब्वचि–' इति क्विब्दीर्घौ प्रक्रम्य 'परौ व्रजेः–' इति सूत्रस्य पाठात् । अस्मिन्नंशे पञ्चपादीदशपाद्योरेकवाक्यत्वात् । **यदपि** प्राचो ग्रन्थे क्वचित्पठ्यते **चिणिति** । तदप्यपाणिनीयत्वादुपेक्ष्यम् । एतेन प्रघट्टकान्तरे 'स्तुद्रुपरिव्रजां दीर्घश्च' इति केचित्—इति प्राचोग्रन्थोऽपि प्रत्युक्तः । सूत्रारूढे सर्वसंमते चार्थे केचिदित्युक्तेरप्रामाणिकत्वात् । **यदपि** 'धनर्त्तिचक्षिङ्वपितपिजनियजेरुस' इति पठितं । **तदप्यनाकरम्** । तथा हि—'जनेरुसिः' 'अर्तिपॄवपियजितनिधनितपिभ्यो नित्' 'एतेर्णिच्च' 'चक्षेः शिच्च' इति सर्वसंमतः पाठः । 'वपूंषि तस्मै वपुषो वपुष्टरम्' इत्यादिमन्त्रेषु आद्युदात्ततयाऽनुकूलश्च । वेदभाष्ये एवमेव स्थितम् । इत्यादयो **द्वितीयपादे प्रमादाः** ॥

तृतीयपादेऽपि—स्तनिदूषिपुषिगदिमदिहृदिभ्यो णेरित्नुजिति प्राचा पठितं । तत्र दूषिहृदी केषामपि वृत्तिकृतां ग्रन्थे न पठितौ । **दूषयित्नुः हृदयित्नु**रिति प्रयोगोऽप्याकरे न दृष्टः । 'स्तनिहृषिपुषिमुदिगदिमदिभ्यः' इति हि पञ्चपादीपाठः । 'घुषि-गन्धिमण्डिजनिनमिभ्यः' इति दशपाद्यामधिकं पठितमित्य**न्यदेतत्** । **यदपि** 'श्रुदक्षिस्पृहिगृहिदृजिभ्य आय्यः' इति पठित्वा **दराय्य जराय्य** इति प्राचोक्तं । तदपि न, दृजिग्रहणस्याकरानारूढत्वात् । **यदपि** 'जॄविशिभ्यां झच्' 'गण्डिमण्डिजनि-नन्दिभ्यश्च' इत्युक्त्वा '**गण्डयतो जनयन्तः**' इत्युदाहृतं प्राचा, **यच्च** गण्डयन्त इति प्रतीकमुपादाय मेघनामेदमिति व्याख्याय गडि वदनैकदेशे इति व्याख्यातृभिर्विवृतं । तत्सर्वं **प्रामादिकम्** । **तथाहि**—उणादिषु गडीति निरनुषङ्गं पठित्वा गड सेचने इति विवृतं, 'अयामन्ता' इति सूत्रे वृत्तिन्यासहरदत्तादिसकलग्रन्थेष्वेवं, माधवग्रन्थेऽप्येवमेव । **युक्तं चैतत्** । मेघ इति व्याख्यानं प्रति सेचनार्थस्यैवानुगुणत्वात् । जनेः पाठोऽप्यप्रामाणिकः । जिधातुं पठित्वा 'जयन्तः पाकशासनिः' इति सर्वैर्विवृतत्वात्, जनयन्त इति लक्ष्यस्य कैरपि अप्रदर्शितत्वात्, अप्रसिद्धत्वाच्च-इत्यादय**स्तृतीयपादे प्रमादाः** ॥

अथ चतुर्थे-यदपि कॄगॄस्तृजागृभ्यः क्विन् । कीर्विः गीर्विः स्तृर्विरिति प्राचोक्तं । तदपि लिपिभ्रमप्रयुक्तमेव । कॄ विक्षेपे, गॄ निगरणे, स्तृञ् आच्छादने, इति प्राचो ग्रन्थं विवृण्वतामुक्तिरपि मूलाशुद्ध्यैव हेया । 'जॄशॄस्तृजागृभ्यः क्विन्' इति हि पाठ उणादिवृत्तिकृतां माधवादीनां च संमतः । जीर्विः पशुः । शीर्विर्हिंस्रः । स्तीर्विरध्वर्युरिति च तत्तद्ग्रन्थेषूपपा-दितम् । स्तॄ इत्यस्य दीर्घान्तत्व एवहि 'ऋत इद्धातोः' इतीत्वं लभ्यते न तु ह्रस्वान्तत्वेऽपि, तस्माद्यथाकरमेव हि ग्रहीतु-मुचितमिति दिक् ॥ **यदपि प्राचोक्तं**—'ग्लाज्याहात्वरिभ्यो निः' इति **तदप्यनाकरम्** । आकरे हि 'वीज्याज्वरिभ्यो निः' इति पठित्वा सूत्रद्वयानन्तरं 'वहिश्री–' इति सूत्रे 'ग्लाहात्वरिभ्यो नित्' इति सूत्रितत्वात् । 'तूर्णी रथः सदानवः' इत्यादावाद्युदात्तदर्शनाच्च ॥ नच 'स्त्रियां क्तिन्' इत्यधिकारस्थं वार्तिकमेवेदं प्राचोदाहृतं न तूणादिसूत्रस्थमिति वाच्यम् । **एवमपि** त्वरतेः पाठस्यानुचितत्वात् ॥ न ह्यसौ वार्तिकेऽस्तीति दिक् ॥ एवं संस्त्याने स्त्यायतेड्रट् इत्यपि प्राचोदाहृतमप्यना-करम् । स्त्यायतेर्ड्रडित्येव सूत्रस्याकरे पञ्चपाद्यां दशपाद्यां चोपलम्भात् । 'संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः प्रसवे पुमान्' इति भाष्ये श्लोकपाठः, स एव माधवेनोपन्यस्तः । न तु सूत्रपाठस्य तथात्वं दृश्यते, एवं तद्ग्रन्थव्याख्यातॄणामपि प्रमादा ऊह्याः । तद्यथा—पाणिन्यादिमुनीनिति व्याचक्षाणैरुक्तम्—'मनेरुच्चोपधायाः' इति, न ह्येवंविधं सूत्रं पञ्चपाद्यां दशपाद्यां वाऽस्ति, अत इत्यनुवर्तमाने 'मनेरुच्च' इत्येव सूत्रितत्वादिति दिक् ॥ इति **चतुर्थपादे प्राचः प्रमादाः** ॥

॥ **इत्युणादयः समाप्ताः** ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ फिट्सूत्राणि

प्रथमपादः ।

१ । **फिषोऽन्तउदात्तः** । प्रातिपदिकं=फिट्, तस्यान्त उदात्तः स्यात् । उच्चैः । २ । **पाटलाऽपालङ्काम्बासागरार्थानाम्** । एतदर्थानामन्त उदात्तः । पाटला, फलेरुहा, सुरूपा, पाकला–इति पर्यायाः । 'लघावन्ते' ४२ इति प्राप्ते । अपालङ्क, व्याधिघात, आरेवत, आरग्वध–इति पर्यायाः । अम्बार्थः–माता । 'उनर्वन्नन्तानाम्' ३२ इत्याद्युदात्तत्वे प्राप्ते । सागरः । समुद्रः । ३ । **गेहार्थानामस्त्रियाम्** । गेहम् । 'नब्विषयस्य–' २६ इति प्राप्ते । अस्त्रियां किम् । शाला । आद्युदात्तोऽयम्, इहैव पर्युदासाज्ज्ञापकात् । ४ । **गुदस्य च** । अन्त उदात्तः स्यान्न तु स्त्रियाम् । गुदम् । अस्त्रियां किम् । आन्त्रेभ्यस्ते गुदाभ्यः । 'स्वाङ्गशिटामदन्तानाम्' २९ इत्यन्तरङ्गमाद्युदात्तत्वम्, ततष्टाप् । ५ । **ध्यपूर्वस्य स्त्रीविषयस्य** । धकारयकारपूर्वो योऽन्त्योऽच् स उदात्तः । अन्तर्धा । 'स्त्रीविषयवर्णनाम्नाम्' ४३ इति प्राप्ते । छाया । माया । जाया । 'यान्तस्यान्त्यात्पूर्वम्' ६२ इत्याद्युदात्तत्वे प्राप्ते । स्त्रीति किम् । बाह्यम्, यञन्तत्वादाद्युदात्तत्वम् । विषयग्रहणं किम् । इभ्या, क्षत्रियां । 'यतो नावः' ३६९८ इत्याद्युदात्त इभ्यशब्दः । क्षत्रियशब्दस्तु 'यान्तस्यान्त्यात्पूर्वम्' ६२ इति मध्योदात्तः । ६ । **खान्तस्याश्मादेः** । नखम् । उखा । सुखम् । दुःखम् । नखस्य 'स्वाङ्गशिटाम्–' २९ इत्याद्युदात्तत्वे प्राप्ते । उखा नाम भाण्डविशेषः, तस्य कृत्रिमत्वात् 'खय्युवर्णं कृत्रिमाख्या चेत्' ३१ इत्युवर्णस्योदात्तत्वे प्राप्ते । सुखदुःखयोः 'नब्विषयस्य–' २६ इति प्राप्ते । अश्मादेः किम् । शिखा । मुखम् । मुखस्य 'स्वाङ्गशिटाम्–' २९ इति 'नब्विषयस्य–' २६ इति वा आद्युदात्तत्वम् । शिखायास्तु 'शीङः खो निद्रस्वश्च' इति उणादिषु नित्त्वोक्तेः, अन्तरङ्गत्वाट्टापः प्रागेव 'स्वाङ्गशिटाम्–' २९ इति वा बोध्यम् । ७ । **हिष्ठवत्सरतिशत्थान्तानाम्** । एषामन्त उदात्तः स्यात् । अतिशयेन बहुलो बंहिष्ठः । नित्त्वादाद्युदात्तत्वे प्राप्ते । बंहिष्ठैरश्वैः सुवृता रथेन । यद्बंहिष्ठं नातिविधे-इत्यादौ व्यत्ययादाद्युदात्तः । परिवत्सरः । अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यते इत्याहु । सप्ततिः, अशीतिः–'लघावन्ते' ४२ इति प्राप्ते । चत्वारिंशत्, इहापि प्राग्वत् । अभ्यूर्ण्वाना प्रभृथस्यायोः–अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यत इत्याहुः । थाथादिसूत्रेण गतार्थमेतत् । ८ । **दक्षिणस्य साधौ** । अन्त उदात्तः स्यात् । साधुवाचित्वाभावे तु व्यवस्थायां सर्वनामतया 'स्वाङ्गशिटाम्–' २६ इत्याद्युदात्तः । अर्थान्तरे तु 'लघावन्ते–' ४२ इति गुरुरुदात्तः । 'दक्षिणः सरलोदारपरच्छन्दानुवर्तिषु' इति कोशः । ९ । **स्वाङ्गाख्यायामादिर्वा** । इह दक्षिणस्याद्यन्तौ पर्यायेणोदात्तौ स्तः । दक्षिणो बाहुः । आख्याग्रहणं किम् । प्रत्यङ्मुखस्यासीनस्य वामपाणिर्दक्षिणो भवति । १० । **छन्दसि च** । अस्वाङ्गार्थमिदम् । दक्षिणः । इह पर्यायेणाद्यन्तावुदात्तौ । ११ । **कृष्णस्यामृगाख्या चेत्**[1] ।

अथ फिट्सूत्राणि ॥ **१ फिषोऽन्त उदात्तः** । फिडिति पूर्वाचार्यप्रसिद्ध्या प्रातिपदिकमुच्यते, तदाह—**प्रातिपदिकं फिडिति** । ननु कथमपाणिनीयानि सूत्राण्युपन्यस्यन्ते ? पाणिनीयसूत्रैर्यः स्वर आयाति स एव प्रमाणं, तथा च 'शताच्च ठन्यतावशते' इति सूत्रे कैयटः—'नियतकालाश्च स्मृतयो व्यवस्थाहेतवः' इति मुनित्रयमतेनाद्यत्वे 'साध्वसाधुप्रविभागः' इति । **नैतत्** । अपाणिनीयान्यपि फिट्सूत्राणि पाणिनीयैराश्रीयन्ते भाष्यात् ज्ञापकात् । तथाच 'आद्युदात्तश्च' इति सूत्रे भाष्यं—'प्रातिपदिकस्य चान्त इति प्रकृतेरन्तोदात्तत्वं शास्ति' इति । तथा तस्मिन्नेव सूत्रे—प्रत्ययाद्युदात्तत्वस्यावकाशः—यत्रानुदात्ता प्रकृतिः—समत्वं, सिमत्वमिति । न हि 'फिषोऽन्त उदात्तः' 'त्वत्त्वसमसिम्–' इत्यादिफिट्सूत्राश्रयणं विना प्रकृतेरन्तोदात्तत्वं सर्वानुदात्तत्वं च संभवतीति दिक् ॥ **२ पाट—**। पाटलेत्यादय ओषधिविशेषस्य वाचकाः ॥—**लघावन्त इति प्राप्त इति** । इदं पूर्वेण परेण च संबध्यते ॥—**पर्याया इति** । वृक्षविशेषस्य वाचकाः । सागरसमुद्रयोः 'लघावन्ते–' इति प्राप्ते ॥ **३ गेहा—**। गेहार्थानामन्त उदात्तः स्यात्, स्त्रियां न ॥ **४ गुद–**। अगेहार्थमिदम् ॥ ५ ध्यपूर्वे—॥—**धकारेति** । नित्यस्त्रीलिङ्गस्येति शेषः ॥—**प्राप्ते इति** । आद्युदात्तत्वे प्राप्ते इत्यर्थः ॥—**यञन्तत्वादिति** । 'वह्निषष्टिलोपो यच्च' इति वचनात् ॥—**यतो नाव इति** । इभमर्हतीति दण्डादित्वाद्यत् ॥—**यान्तस्यान्त्यादिति** । 'क्षत्राद् घः' इति प्रत्ययस्वरेणापीति वा बोध्यम् ॥ **६ खान्तस्या—**। श् च म् च श्मौ तौ आदी यस्य स श्मादिः, न श्मादिः–अश्मादिः, तस्य शकारमकारादिभिन्नस्य खशब्दस्यान्तोदात्तः स्यात् ॥—**शीङः खो निद्रस्वश्चेत्यादि** । ननु बहुषूणादिपुस्तकेषु शीङो ह्रस्वश्चेत्येव पठ्यते । 'मुहेः खो मूर्च' इत्यतः खोऽनुवर्तते, ह्रस्वविधानसामर्थ्याद्गुणाभाव इति स्वयमप्युणादिष्वेवमेवोक्तम् । तस्मात्पूर्वापरविरुद्धोऽयं ग्रन्थ इत्यस्वरसादाह—**अन्तरङ्गत्वादित्यादि** ॥ **७ हिष्ठ—**॥—**एषामिति** । 'हिष्ठ-वत्सर-ति-शत्-थ' एतदन्तानामित्यर्थः ॥—**बंहिष्ठ इति** । बहुलशब्दात् 'अतिशायने तमबिष्ठनौ' इतीष्ठन् । 'प्रियस्थिरस्फिर–' इत्यनेन बहुलस्य बंहिरादेशः ॥—**परिवत्सर इति** । क्वचित्तु 'संवत्सरः' इति पाठः, तत्र 'वसेश्च' 'संपूर्वाच्चित्' इति सरप्रत्ययस्य चित्त्वादपि सिद्धः ॥—**सप्ततिरित्यादि** । 'पङ्क्तिविंशतित्रिंशत्–' इत्यत्र व्युत्पादिता एते ॥—**प्राग्वदिति** । 'लघावन्ते–' इति प्राप्त इत्यर्थः ॥ **८ दक्षिणस्य–**। अस्यान्त उदात्तः स्यात्प्रावीण्येऽर्थे । वीणायां दक्षिणः, प्रवीण इत्यर्थः ॥ **१० छन्दसि–**। दक्षिणस्याद्यन्तौ पर्यायेणोदात्तौ स्यातां वेदे ॥ **११ कृष्णस्य–**।

---

[1] क्वचित् चेदित्यस्याग्रे 'अन्त उदात्तः' इति वृत्तिपाठो दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'वर्णानां तण-' इत्याद्युदात्तत्वे प्राप्ते अन्तोदात्तो विधीयते । कृष्णानां व्रीहीणाम् । कृष्णो नो नाव वृषभः । मृगाख्यायां तु-कृष्णो रात्र्यै । १२ । **वा नामधेयस्य** । कृष्णस्येत्येव । अयं वां कृष्णो अश्विना । कृष्ण ऋषिः । १३ । **शुक्लगौरयोरादिः** । नित्यमुदात्तः स्यादित्येके । 'वा' इत्यनुवर्तेत इति तु युक्तम् । सरो गौरो यथा पिब-इत्यत्रान्तोदात्तदर्शनात् । १४ । **अङ्गुष्ठोदकबकवशानां छन्दस्यन्तः** । अङ्गुष्ठस्य 'स्वाङ्गानामकुर्वादीनाम्' इति द्वितीयस्योदात्तत्वे प्राप्तेऽन्तोदात्तार्थं आरम्भः । वशाग्रहणं नियमार्थम्—'छन्दस्येव' इति । तेन लोके आद्युदात्ततेत्याहुः । १५ । **पृष्ठस्य च** । छन्दस्यन्त उदात्तः स्याद्वा भाषायाम् । पृष्ठम् । १६ । **अर्जुनस्य तृणाख्या चेत्** । 'उनर्वन्नन्तानाम्' इत्याद्युदात्तस्यापवादः । १७ । **अर्यस्य स्वाम्याख्या चेत्** । 'यान्तस्यान्त्यात्पूर्वम्' इति 'यतो नावः' ३६९८ इति वाऽऽद्युदात्ते प्राप्ते वचनम् । १८ । **आशाया अदिगाख्या चेत्** । दिगाख्याव्यावृत्त्यर्थमिदम् । अत एव ज्ञापकाद्दिक्पर्यायस्याद्युदात्तता । इन्द्र आशाभ्यस्परि । १९ । **नक्षत्राणामाब्विषयाणाम्** । अन्त उदात्तः स्यात् । आश्लेषाऽनुराधादीनां 'लघावन्ते' इति प्राप्ते ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नन्तत्वेनाद्युदात्ते प्राप्ते वचनम् । २० । **न कुपूर्वस्य कृत्तिकाख्या चेत्** । अन्त उदात्तो न । कृत्तिका नक्षत्रम् । केचित्तु कुपूर्वो य आप् तद्विषयाणामिति व्याख्याय 'आर्यिका' 'बहुलिका' इत्यत्राप्यन्तोदात्तो नेत्याहुः । २१ । **घृतादीनां च** । अन्त उदात्तः । घृतं मिमिक्षे । आकृतिगणोऽयम् । २२ । **ज्येष्ठकनिष्ठयोर्वयसि** । अन्त उदात्तः स्यात् । ज्येष्ठ आह चमसा । कनिष्ठ आह चतुरः । वयसि किम् । ज्येष्ठः=श्रेष्ठः । कनिष्ठोऽल्पिकः । इह नित्स्वादाद्युदात्त एव । २३ । **बिल्वतिष्ययोः स्वरितो वा** । अनयोरन्तः स्वरितो वा स्यात् । पक्षे उदात्तः ॥

इति फिट्सूत्रेषु प्रथमः पादः ।

द्वितीयः पादः ।

२४ । **अथादिः प्राक् शकटेः** । अधिकारोऽयम् । 'शकटिशकट्योः-' इति यावत् । २५ । **ह्रस्वान्तस्य स्त्रीविषयस्य** । आदिरुदात्तः स्यात् । बलिः । तनुः । २६ । **नब्विषयस्यानिसन्तस्य** । वने न वा यः । इसन्तस्य तु-सर्पिः । नप्=नपुंसकम् । २७ । **तृणधान्यानां च द्व्यषाम्** । द्व्यचामित्यर्थः । कुशाः । काशाः । माषाः । तिलाः । बह्वचां तु-गोधूमाः । २८ । **न्रः संख्यायाः** । पञ्च । चतुष्कपालः[१] । २९ । **स्वाङ्गशिटामदन्तानाम्** । शिट् सर्वनाम । कर्णाभ्यां चुबुकादधि । ओष्ठाविव मधु । विश्वो विहायाः । ३० । **प्राणिनां कुपूर्वम्** । कवर्गात्पूर्व आदिरुदात्तः । काकः । वृकः । शुकेषु मे । प्राणिनां किम् । क्षीरं सर्पिर्मधूदकम् । ३१ । **खय्युवर्णं कृत्रिमाख्या चेत्** । खयि परे उवर्णमुदात्तं स्यात् । कन्दुकः । ३२ । **उनर्वन्नन्तानाम्** । उन-वरुणं वो रिशादसम् । ऋ-स्वसारं त्वा कृणवै । वन्-पीवानं मेषम् । ३३ । **वर्णानां तणतिनितान्तानाम्** । आदिरुदात्तः । एतः । हरिणः ।

अस्यान्त उदात्तश्छन्दसि, न तु मृगाख्यायाम् ॥ **१३ एके इति** । तन्मतेऽस्मिन्सूत्रे नामधेयस्येत्यनुवर्तते, वचनविपरिणामेनान्वयः—नामधेययोः शुक्लगौरयोरादिरुदात्त इत्यर्थः । तेन 'सरो गौरो यथा पिब' इत्यत्रान्तोदात्तत्वमेव, नामधेयत्वाभावात् ॥ **१४ अङ्गुष्ठो-** । एषामन्तोदात्तश्छन्दसि ॥—**अङ्गुष्ठस्येति** । उपलक्षणमिदम् । बकशब्देऽपि 'प्राणिनां कुपूर्वम्' इत्याद्युदात्ते प्राप्ते इति बोध्यम् ॥ **१५ वा भाषायाम्** ।—**पृष्ठमिति** । पक्षे 'स्वाङ्गशिटाम्-' इत्याद्युदात्तत्वम् ॥ **१६ अर्जुनस्य-** । अन्त उदात्तस्तृणाख्यायाम् । तृणाख्यायां किम्? अर्जुनो वृक्षः । 'उनर्वन्नन्तानाम्-' इत्याद्युदात्तः ॥ **१७ अर्यस्य-** । अन्त उदात्तः स्वाम्याख्यायाम् । 'अर्यः स्वामिवैश्ययोः' इति निपातितोऽयमर्यशब्दः ॥ **१८ आशाया-** । अदिगाख्यायामाशाशब्द आद्युदात्तः स्यात् ॥ **१९ ज्येष्ठेत्यादि** । 'प्रशस्य श्रः' 'ज्य च' इति प्रशस्यशब्दादिष्ठनि ज्यादेशः । श्रवणं श्रवः सोऽस्त्यस्याः सा श्रववती । धनं विद्यते अस्याः सा धनवती । अतिशयिता श्रववती-श्रविष्ठा । धनिष्ठा । इष्ठनि 'विन्मतोर्लुक्' इति मतुपो लुक् ॥—**आद्युदात्ते प्राप्त इति** । 'ञ्नित्यादिः-' इत्यनेन ॥ **२० कृत्तिकेति** । 'लघावन्ते-' इति आद्युदात्तत्वम् ॥ **२१ घृतमिति** । 'नब्विषयस्य-' इति प्राप्ते ॥ **२२ ज्येष्ठ इति** । उदाहरणे वृद्धशब्दस्य 'वृद्धस्य च' इतीष्ठनि ज्यादेशः । 'युवाल्पयोः कनन्यतरस्याम्' इति युवन्शब्दस्य कनादेशः । प्रत्युदाहरणे 'प्रशस्यस्य श्रः' 'ज्य च' इति प्रशस्यशब्दस्य ज्यादेशः । अल्पस्य कन् ॥—**नित्स्वादिति** । तथा च नित्स्वरापवादोऽयं योगः ॥ **२३ पक्षे उदात्त इति** । उदात्त इत्यनुवृत्तेः ॥ **इति प्रथमः पादः** ॥

२६ नब्विषयस्य । इसन्तवर्जितस्य नित्यनपुंसकस्यादिरुदात्तः स्यात् ॥—**सर्पिरिति** । 'अर्चिशुचि-' इत्यादिना इसिः ॥ **२७ तृण—** । तृणवाचिनां धान्यवाचिनां च द्व्यचामादिरुदात्तः स्यात् ॥ अषिति अचः प्राचां संज्ञा, तदाह—**द्व्यचामित्यर्थ इति** ॥—**गोधूमा इति** । 'लघावन्ते-' इति मध्योदात्तता ॥ **२८ न्रः संख्या—** । नकाररेफान्तायाः संख्याया आदिरुदात्तः ॥—**चतुष्कपाल इति** । चत्वार इत्यत्रामुस्वरेण भाव्यम्, चतुर इत्यत्र 'चतुरः शसि' इति, चतुर्भिरित्यत्र 'झल्युपोत्तमम्' इति, चतुर्णामित्यत्र 'षट्त्रिचतुर्भ्यः' इत्यनेनेति समास उदाहृतः । 'इगन्तकालकपालभगाल-' इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तोऽयम् ॥ **२९ स्वाङ्गशिटाम्-** । स्वाङ्गवाचिनामदन्तानां सर्वनाम्नामादिरुदात्तः स्यात् ॥ **३० उदकमिति** । छन्दसि 'अङ्गुष्ठोदकबकवशानाम्' इत्यन्तोदात्तः । भाषायां तु कर्दमादित्वादादिर्द्वितीयं वोदात्तम् ॥ **३२ उनर्वन्—** ।

---

१ 'चतुष्कपर्दा' इत्यपि पाठः ।

७९ सि० कौ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शितिः । पृश्निः । हरित् । ३४ । **ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये** । ऋद्वर्ज्यं ह्रस्वान्तस्यादिभूतं ह्रस्वमुदात्तं स्यात् । मुनिः । ३५ । **अक्षस्यादेवनस्य** । आदिरुदात्तः । तस्य नाक्षः । देवने तु-अक्षैर्मा दीव्यः । ३६ । **अर्धस्यासमद्योतने** । अर्धो ग्रामस्य । समेंऽशके तु–अर्धं पिप्पल्याः । ३७ । **पीतद्वर्थानाम्** । आदिरुदात्तः । पीतद्रुः सरलः । ३८ । **ग्रामादीनां च** । ग्रामः । सोमः । यामः । ३९ । **लुबन्तस्योपमेयनामधेयस्य** । चञ्चेव चञ्चा । 'स्फिगन्तस्य' इति पाठान्तरम् । स्फिगिति लुपः प्राचां संज्ञा । ४० । **न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम्** । एषामुपमेयनाम्नामादिरुदात्तो न । ताल इव तालः । मेरुरिव मेरुः । व्याघ्रः । सिंहः । महिषः । ४१ । **राजविशेषस्य यमन्वा चेत्** । यमन्वा=वृद्धः । 'आङ्गः' उदाहरणम् । 'अङ्गाः' प्रत्युदाहरणम् । ४२ । **लघावन्ते द्वयोश्च बह्वषो गुरुः** । अन्ते लघौ द्वयोश्च लघ्वोः सतोर्बह्वच्कस्य गुरुरुदात्तः । कल्याणः । कोलाहलः । ४३ । **स्त्रीविषयवर्णाक्षुपूर्वाणाम्** । एषां त्रयाणामाद्युदात्तः स्त्रीविषये । मल्लिका । वर्णः–श्येनी, हरिणी । अक्षुशब्दात्पूर्वोऽस्त्येषां ते अक्षुपूर्वाः–तरक्षुः । ४४ । **शकुनीनां च लघु पूर्वम्** । पूर्वं लघु उदात्तं स्यात् । कुक्कुटः । तित्तिरिः । ४५ । **नर्तुप्राण्याख्यायाम्** । यथालक्षणं प्राप्तमुदात्तत्वं न । वसन्तः । कृकलासः । ४६ । **धान्यानां च वृद्धक्षान्तानाम्** । आदिरुदात्तः । कान्तानाम्–श्यामाकाः । षान्तानाम्–राजमाषाः । ४७ । **जनपदशब्दानामषान्तानाम्** । आदिरुदात्तः । केकयः । ४८ । **ह्यादीनामसंयुक्तलान्तानामन्तः पूर्वं वा** । हयिति हल्संज्ञा । पललम् । शललम् । हयादीनां किम् । एकलः । असंयुक्त–इति किम् । मल्लः । ४९ । **इगन्तानां च द्व्यषाम्** । आदिरुदात्तः । कृषिः ॥

॥ इति फिट्सूत्रेषु द्वितीयः पादः ॥

तृतीयः पादः ।

५० । **अथ द्वितीयं प्रागीषात्** । 'ईषान्तस्य हयादेः–' ६६ इत्यतः प्राक् द्वितीयाधिकारः । ५१ । **त्र्यचां प्राङ्मकरात्** । 'मकरवरूढ–' ५७ इत्यतः प्राक् त्र्यचामित्यधिकारः । ५२ । **स्वाङ्गानामकुर्वादीनाम्** । कवर्गरेफवकारादीनि वर्जयित्वा त्र्यचां स्वाङ्गानां द्वितीयमुदात्तम् । ललाटम् । कुर्वादीनां तु—कपोलः, रसना, वदनम् । ५३ । **मादीनां च** । मलयः । मकरः । ५४ । **शादीनां शाका-**

ञन ऋ वन् एतदन्तानामादिरुदात्तः स्यात् ॥ **३४ ह्रस्वान्तस्य–**। अनृत्किम् ? नृशंसः ॥ **३५ अक्षस्य—**। अदेवनस्याक्षस्यादिरुदात्तः ॥ **३६ अर्धस्य–**। असमद्योतनेऽर्धशब्दस्यादिरुदात्तः ॥ **३८ ग्रामादीनां च** । आदिरुदात्तः ॥ **३९ लुबन्तस्य** । उपमेयवाचिनो लुबन्तस्यादिरुदात्तः ॥**—चञ्चेति** । 'इवे प्रतिकृतौ' इति विहितस्य 'लुम्मनुष्ये–' इति कनो लुप् । लुबन्तस्य किम् ? अग्निर्माणवकः ॥ **४० न वृक्ष–**। पूर्वेण प्राप्तमाद्युदात्तत्वं निषिध्यते । अत्र वृक्षपर्वतविशेषग्रहणात् वृक्ष इवायं वृक्षः, पर्वतः । अत्र पूर्वेणाद्युदात्तत्वं भवत्येव ॥ **४१ राजविशेषस्य–**। लुबन्तस्योपमेयनामधेयस्य राजविशेषस्याद्युदात्तः, यमन्वा चेन्नामधेयं भवति । पूर्वेणैव सिद्धे नियमार्थमिदम्—राजविशेषस्य चेद्वृद्धस्यैवेत्याहुः । फिड्वृत्तौ तु वृद्धस्य चेद्राजविशेषस्यैवेति नियमो दर्शितः ॥**—आङ्ग इति** । आङ्ग इवायमाङ्गः ॥ **४२ लघावन्ते–**। इह आदिरिति न संबध्यते, तेन नादेरपि गुरोरुदात्तः । अत एव वृषाकपिशब्दस्य गुरुरुदात्त इति 'वृषाकप्यग्नि–' इति सूत्रे वृत्त्यादिग्रन्थेषु विभावितम् । **न च** गुरूणां मध्ये य आदिरित्यर्थोऽस्त्विति वाच्यम् । 'अन्यतो ङीष्' इति सूत्रे सारङ्गकल्माषशब्दौ 'लघावन्ते–' इत्यादिना मध्योदात्ताविति हरदत्तग्रन्थविरोधादित्याहुः ॥**—कल्याण इति** । पर्यायेणादिमध्याद्युदात्तौ ॥ **४४ शकुनीनाम्** । पक्षिवाचिनाम् ॥**—पूर्वमिति** । अन्त्यात्पूर्वमित्यर्थः । अत्राप्यादिरिति न संबध्यते, पूर्वग्रहणात् ॥**—कुक्कुटेत्यादि** । मध्योदात्तावेतौ ॥ **४५ नर्तु–**। ऋतुवाचिनां प्राणिवाचिनां च यथालक्षणप्राप्तमुदात्तत्वं न ॥ **४६ धान्यानाम्–**। धान्यवाचिनां वृद्धकशब्दान्तानां षशब्दान्तानां चादिरुदात्तः ॥**—श्यामाकाः माषा इति** । अत्र 'उशीर–' इत्यनेन 'तृणधान्यानाम्–' इत्यनेन चाद्युदात्तत्वस्य सिद्धत्वात् नैषादका राजमाषा इत्युदाहर्तव्यम् । फिट्वृत्तौ तु सूत्रे **च**शब्दो न पठितः । वृत्तौ **गुरुरुदात्त** इति व्याख्यातं न त्वादिरुदात्त इति । 'नैषादकाः-बालाक्षाः' इत्युदाहृतं च । यत्तु–'धान्यानामिति किं ? श्यामाकाः' इत्युदाहृतं, तत्र श्यामाके धान्यत्वाभावश्चिन्त्यः ॥ **४७ जनपद—**। जनपदवाचिनामजन्तानामादिरुदात्तः स्यात् ॥**—केकय इति** । अत्र परत्वाद्यान्तस्यान्त्यात्पूर्वमिति स्वरेण भाव्यमतः 'अङ्गाः–वङ्गाः' इत्युदाहर्तव्यमिति वदन्ति ॥ **४८ हयादीनाम्** । हलादीनामसंयोगपूर्वो यो लशब्दस्तदन्तानामादिरुदात्तः, अन्त्यात्पूर्वं वा । केचित्तु अत्र जनपदानामित्यनुवर्तयन्ति । पञ्चालाः कोशला इत्युदाहृत्य पलालमिति प्रत्युदाहरन्ति च ॥ **४९ इग—**। अत्रापि जनपदानामित्यनुवर्त्य 'कुरवश्चेदयः' इत्युदाहृतं, कृषिरिति प्रत्युदाहृतम्, 'अक्षैर्मा दीव्यः कृषिमित् कृषस्व' इत्यत्र कृषिशब्दस्यान्तोदात्तत्वात् ॥ **इति द्वितीयः पादः** ॥

५२ कपोल इति । 'लघावन्ते–' इति मध्योदात्तम् ॥ **रसना, वदनमिति** । 'स्वाङ्गशिटाम्' इत्याद्युदात्तत्वम् ॥ **५३ मादी–॥ मलयः मकर इति** । अनयोर्मकरवरूढेति यान्तस्यान्त्यात्पूर्वमिति विशिष्यस्वरविधानान्महेन्द्र इत्युदाहर्तव्यम् ॥ **५४ शादीनां शा–**। शकारादीनां शाकवाचिनां त्र्यचां द्वितीयमुदात्तं स्यात् । केचित्तु सादीनामिति पठित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम् । शीतन्या । शतपुष्पा । ५५ । पान्तानां गुर्वादीनाम् । पादपः । आतपः । लघ्वादीनां तु—अनूपम् । द्व्यचां तु—नीपम् । ५६ । युतान्यण्यन्तानाम् । युते-अयुतम् । अनि-धमनिः । अणि-विपणिः । ५७ । मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा । एषामादिर्द्वितीयो वोदात्तः । मकरः । वरूढः । इत्यादि । ५८ । छन्दसि च । अमकराद्यर्थ आरम्भः । लक्ष्यानुसारादादिर्द्वितीयं चोदात्तं ज्ञेयम् । ५९ । कर्दमादीनां च । आदिर्द्वितीयं वोदात्तम् । ६० । सुगन्धितेजनस्य ते वा । आदिर्द्वितीयं तेशब्दश्चेति त्रयः पर्यायेणोदात्ताः । सुगन्धितेजनाः । ६१ । नपः फलान्तानाम् । आदिर्द्वितीयं वोदात्तम् । राजादनफलम् । ६२ । यान्तस्यान्त्यात्पूर्वम् । कुलायः । ६३ । थान्तस्य च नालघुनी । नाशब्दो लघु च उदात्ते स्तः । सनाथा सभा । ६४ । शिंशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूरवसां च । अन्त्यात्पूर्वमुदात्तं द्वितीयं वा । ६५ । सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानाम् । द्वितीयमुदात्तं वा । ६६ । ईषान्तस्य हयादेरादिर्वा । हलीषा । लाङ्गलीषा । ६७ । उशीरदाशेरकपालपलालशैवालश्यामाकशारीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम् । एषामादिरुदात्तः स्यात् । ६८ । महिष्यषाढयोर्जायेष्टकाख्या चेत् । आदिरुदात्तः । महिषी जाया । अषाढा उपदधाति ॥

॥ इति फिट्सूत्रेषु तृतीयः पादः ॥

चतुर्थः पादः ।

६९ । शकटिशकट्योरक्षरमक्षरं पर्यायेण ॥ उदात्तम् । शकटिः । शकटी । ७० । गोष्ठजस्य ब्राह्मणनामधेयस्य । अक्षरमक्षरं पर्यायेणोदात्तम् । गोष्ठजो ब्राह्मणः । अन्यत्र-गोष्ठजः पशुः, कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । ७१ । पारावतस्योपोत्तमवर्जम् । शेषं क्रमेणोदात्तम् । पारावतः । ७२ । धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम् । एषां चतुर्णां धूप्रभृतींश्चतुरो वर्जयित्वा शिष्टानि क्रमेणोदात्तानि । धूम्रजानुः । मुञ्जकेशः । कालवालः । स्थालीपाकः । ७३ । कपिकेशहरिकेशयोश्छन्दसि । कपिकेशः । हरिकेशः । ७४ । न्यङ्स्वरौ स्वरितौ । स्पष्टम् । न्यङ्ङुत्तानः । व्यचक्षयत्स्वः । ७५ । न्यर्बुदव्यल्कशयोरादिः । स्वरितः स्यात् । ७६ । तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः । स्वरितः स्यात् । तिलानां भवनं क्षेत्रं तिल्यम् । 'यतो नावः' ३७०१ इति प्राप्ते । ७७ । बिल्वभक्ष्यवीर्याणि छन्दसि । अन्तस्वरितानि । ननो बिल्व उदतिष्ठत् । ७८ । त्वत्त्वसमसिमेत्यनुच्चानि । स्तरीरु त्वत् । उत त्वः पश्यन् । नभन्तामन्यके समे । सिमस्मै । ७९ । सिमस्याथर्वणेऽन्त उदात्तः । 'अथर्वणे' इति प्रायिकम् । तत्र दृष्टस्येत्येवंपरं वा । तेन 'वासस्तनुते सिमस्मै' इत्यृग्वेदेऽपि भवत्येव । ८० । निपाता आद्युदात्ताः । स्वाहा । ८१ । उपसर्गाश्चाभिवर्जम् । ८२ । एवादीनामन्तः । 'एवमादीनाम्' इति पाठान्तरम् । एव । एवम् । नूनम् । सह । ते मित्र सूरिभिः सह । षष्ठस्य तृतीये 'सहस्य सः–' १००९ इति प्रकरणे सहशब्द आद्युदात्त इति प्राञ्चः, तच्चिन्त्यम् । ८३ । वाचादीनामुभावुदात्तौ । उभौग्रहणम् 'अनुदात्तं पदमेकवर्जम्' ३६४८ इत्यस्य बाधाय । ८४ । चादयोऽनुदात्ताः ।

सर्षपा इत्युदाहरन्ति ॥ ५५ पान्तानाम्–। पशब्दान्तानां गुर्वादीनां त्र्यचां द्वितीयमुदात्तं स्यात् । अनूपे अनोरप्रधानकनीयसीत्यनेनोदात्तत्वं, नीपे 'नेरनिधाने' इत्यनेनेत्याहुः ॥ ५६ युता–। युत अनि अणि एतदन्तानां त्र्यचां द्वितीयमुदात्तं स्यात् ॥ ५७ इत्यादीति । आदिशब्देन पारावत वितस्ता इक्षु आर्जि द्राक्षा कला उमा काष्ठा पेष्ठा काशीना । काशीनानामिति वक्तव्ये नुडभाव आर्षः ॥ ५८ छन्दसि–। छन्दसि मकारादीनामन्येषां चादिर्द्वितीयं वोदात्तम् । काश्यपः ॥ ५९ कर्दमः । कुलटा । उदकं । गान्धारिः ॥ ६० सुगन्धि–॥—आदिरिति । सुगन्धितेजनशब्दस्य ॥ ६१ नपः फलान्तानाम्–। नप् नपुंसकम् । नपः किम्? दासीफलो वृक्षः ॥ ६२ यान्तस्य—। यशब्दान्तस्यान्त्यात्पूर्वमुदात्तं स्यात् ॥ ६३ थान्तस्य–। केचित्तु 'आन्तस्य च नालघुनी' इति पठित्वा आकारान्तस्य नाशब्दस्य च लघुनी अन्त्यात्पूर्वे उदात्ते स्त इति व्याख्याय 'नाना' 'दिवा' 'मुधा' इत्युदाजह्रुः ॥ ६४ शिंशुमारो–। शिंशुमार इति पाठान्तरम् ॥—उष्ट्रार–। उष्टार इति पाठान्तरम् ॥ ६५ सांकाश्य–। सांकाश्यकाम्पिल्यशब्दौ 'वुञ्छण्–' इति ण्यान्तौ । दार्वाघाटशब्दो 'दारावाहनोऽणन्तस्य च टः संज्ञायाम्' इत्यण्प्रत्ययान्तः ॥ ६६ ईषान्तस्य–। ईषान्तस्य हलादेरादिरुदात्तो वा स्यात् ॥ ६७ उशीर–। अत्र श्यामाकग्रहणं चिन्त्यम्, 'धान्यानां च वृद्धक्षान्तानाम्' इत्यनेनैव सिद्धत्वात् । इदमेव ज्ञापयितुं मूले धान्यानामित्यत्र श्यामाक इत्युदाहृतम् । देवरग्रहणमपि चिन्त्यम्, 'लघावन्ते–' इत्यनेनैव सिद्धत्वात् । हृदयग्रहणं 'स्वाङ्गानामकुर्वादीनाम्' इति द्वितीयस्योदात्तत्वं बाधितुम्, अन्येषां 'लघावन्ते' इति प्राप्ते वचनम् ॥ ६८ महिष्य–। एतयोरादिरुदात्तः स्यात् यथासंख्यं जायाख्यायामिष्टकाख्यायां च ॥ इति तृतीयः पादः ॥

७८ त्वत्त्व–। एतानि सर्वानुदात्तानि ॥ ७९ सिमस्य–। सिमशब्दस्याथर्वणे वेदे उदात्तः ॥ ८१ उपसर्गाश्चाभि–।

---

१ स्वादित्यस्याग्रे 'न्युर्बुदाय स्वाहा' पाकदूर्वा व्यल्कशा, इत्यधिकः पाठः क्वचित् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पष्टम् । ८५ । **यथेति पादान्ते** । तन्नेमिमृभवो यथा । पदान्ते किम् । यथा नो अदितिः करत् । ८६ । **प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः** । पटु पटुः । ८७ । **शेषं सर्वमनुदात्तम्** । शेषं=नित्यादि, द्विरुक्तस्य परमित्यर्थः । प्रप्रायम् । दिवे दिवे ॥ ॥ **इति शान्तनवाचार्यप्रणीतेषु फिट्सूत्रेषु तुरीयः पादः ।**

अभिशब्दं वर्जयित्वा उपसर्गा आद्युदात्ताः स्युः ॥ ८५ **यथेति** । यथाशब्दः पादान्तेऽनुदात्तः स्यात् ॥ ८६ **प्रकारादि-**। 'प्रकारे गुणवचनस्य' इत्यादिद्वित्वे परस्यान्तोदात्तः स्यात् ॥—**पटु पटुरिति** । ननु 'कर्मधारयवदुत्तरेषु' इति कर्मधारयवद्भावादेव 'समासस्य' इत्यन्तोदात्तत्वे सिद्धे व्यर्थमिदमिति वाच्यम् । तस्य पाणिनीयात्पूर्वप्रवृत्तत्वेनादोषात् ॥ **शेषं** प्रकारादिद्वित्वादन्यस्मिन्द्वित्वे परं सर्वमनुदात्तं स्यात् ॥ **इति चतुर्थः पादः** ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

॥ श्रीः ॥

भैरवमिश्रकृतचन्द्रकलाव्याख्यासंवलिता

सिद्धान्तकौमुदी ।

लिङ्गानुशासनम्

स्त्र्यधिकारः ।

१ । **लिङ्गम्** । २ । **स्त्री** । अधिकारसूत्रे एते । ३ । **ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः** । ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः । स्वस्त्रादिपञ्चकस्यैव ङीब्निषेधेन 'कर्त्री' इत्यादेर्ङीपा ईकारान्तत्वात् । तिसृचतस्त्रोस्तु स्त्रियामादेशतया विधानेऽपि प्रकृत्योस्त्रिचतुरोर्ऋदन्तत्वाभावात् । ४ । **अन्यूप्रत्ययान्तो धातुः** । अनिप्रत्ययान्त ऊप्रत्ययान्तश्त्र धातुः स्त्रियां स्यात् । अवनिः । चमूः । प्रत्ययग्रहणं किम् । देवयतेः क्विप्, द्यूः । विशेष्यलिङ्गः । ५ । **अशनिभरण्यरणयः पुंसि च** । इयमयं वा अशनिः । ६ । **मिन्यन्तः** । मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । भूमिः । ग्लानिः । ७ । **वह्निवृष्ण्यग्नयः पुंसि** । पूर्वस्यापवादः । ८ । **श्रोणियोन्यूर्मयः पुंसि च** । इयमयं वा श्रोणिः । ९ । **क्तिन्नन्तः** । स्पष्टम् । कृतिः । इत्यादि[1] । १० । **ईकारान्तश्च** । ईत्प्रत्ययान्तः स्त्री स्यात् । लक्ष्मीः ।

श्रीः ॥ १-२ मूले[2]—**अधिकारसूत्रे एते इति** । उभयोरधिकारसूत्रत्वेऽपि 'लिङ्गम्' इत्याशास्त्रसमाप्तेः, द्वितीयस्तु 'ताराधारा–' ३३ इति यावदिति विवेकः । अत्रापि लिङ्गं शास्त्रीयं प्रागुक्तमेव विवक्षितम् । तच्चार्थनिष्ठं तत्तच्छब्दप्रतिपाद्यम् । तत्रायं विशेषः—शब्दशक्तिस्वभावेन कस्यचित् सर्वलिङ्गप्रतिपादकता, कस्यचिदेकलिङ्गप्रतिपादकता, कस्यचिद्द्विलिङ्गयुक्तार्थप्रतिपादकता चेति ॥ ३ यद्यपि शब्दानामर्थानां चानन्त्यात्प्रातिस्विकरूपेण तेषां ज्ञानं योगिनां युक्तयुञ्जानत्वेन व्यवहारयोग्यानामेव संभवति, न त्वस्मदादीनामज्ञानाम्, तथाप्यस्मदाद्युद्देशेन शास्त्रप्रवृत्तेर्यथा लघुनोपायेनास्मदादीनां ज्ञानं संभवेत्तथाह—**ऋकारान्ता इत्यादिना** । 'स्त्री' इति पदमेषु सूत्रेषु संबध्यते । तच्च भावप्रधाननिर्देशेन स्त्रीत्वपरम् । तस्य लिङ्गपदेन बहुव्रीहिसमासे **'स्त्रीलिङ्गाः'** इति सामानाधिकरण्येन व्यवहारः । मात्रादिशब्दानां विशेषत उपादानात् 'पञ्च' इति लब्धम् । अवधारणस्य तु यथा लाभस्तं प्रकारमाह—**स्वस्रादिपञ्चकस्यैवेति** ॥—**ङीन्निषेधेन**–'न षट्स्वस्रादिभ्यः' इति सूत्रेण ङीपो निषेधेन ॥—**कर्त्रीत्यादेरिति** । अनेन कर्तृपदेन यौगिकाः शब्दा ऋकारान्ताः परिग्राह्याः । रूढस्य क्रोष्टृप्रभृतिशब्दस्यादिना परिग्रहः । न च सप्तैवेति वक्तव्ये पञ्चैवेति नियमानुपपत्तिरिति वाच्यम् । आदेशत्वानाक्रान्ताः पञ्चैवेत्यर्थात् । यद्यपि भाष्यसंमते 'तृज्वत्क्रोष्टुः' इत्यादित्रिसूत्र्याः प्रयोगनियमार्थत्वपक्षे स्त्रियां प्रवर्तमानस्य क्रोष्टृशब्दस्याप्यादेशत्वानाक्रान्तत्वम्, तथापि परिनिष्ठिते शब्देऽयमीकारान्त एव प्रयुज्यत इति भावः ॥ ४ 'उणादयो बहुलम्' इति संगृहीतसाधुत्वकानां व्युत्पन्नत्वं शास्त्रान्तरे प्रसिद्धमिति तदभिप्रायेणाह—**अन्यू इत्यादि** ॥ **अवनिः** । 'अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः' इत्यनिः ॥—**चमूरिति** । 'कृषिचमितनिधनिसर्जिभ्य ऊः' इत्यूः । दयूः । अत्र वकारस्य 'च्छ्वोः–' इत्यूठ् ॥ ५ **अशनिभर—**। पूर्वसूत्रापवादोऽयम् ॥ ६ **मिन्यन्तः । भूमिः**—'नियो मिः' इत्यतो मिरित्यनुवर्त्य विहितो 'भुवः कित्' इति मिः । **ग्लानिः**—'वहिश्रिश्रुयुदुग्लाहात्वरिभ्यो नित्' इति निः ॥ ७ वह्न्यादिशब्दानां निप्रत्ययान्तत्वेन स्त्रीत्वे प्राप्ते आह—**वह्निवृष्णि–। वृष्णिः** । 'सृवृषिभ्यां कित्' इति निः । **अग्निः** । 'अङ्गेर्नलोपश्च' इति निः ॥ ८ **श्रोणियोन्यू–। श्रोणिः । योनिः** । 'वहिश्रि–' इतीनिः । **ऊर्मिः** । 'अर्तेरूच्च' इति मिः ॥ १० **ईकारान्तश्च** । अत्र ईकारः प्रत्यय एव, पूर्वोत्तरसाहचर्यात् ॥—**लक्ष्मीरिति** । अत्र 'लक्षेर्मुट् च' इति सूत्रे 'अवितृस्तृतन्त्रिभ्य ईः' इत्यत ईरित्यस्यानुवृत्त्या तेनेकारः प्रत्ययः । एवमव्यादिधातुभ्य ईकारप्रत्ययेऽपि स्त्रीत्वम् । तद्यथा—अवीर्नारी रजस्वला, तरीर्नौः, स्तरी धूमः, तन्त्रीर्वीणादेर्गुणः । न च 'यापोः किद्द्वे च' इति सूत्रविहितेकारान्तस्यापि स्त्रीत्वापत्तिरिति वाच्यम् । पुंस्त्वाधिकारोक्तेन 'योपधः' 'पोपधः' इत्याभ्यां परत्वाद्बाधात् । यूष

---

१ एतदुत्तरं **'ईदन्तश्च** । ईदन्तश्च प्रातिपदिकं स्त्री स्यात् । देवी । कुरुचरी । भद्रचरी । आग्नेयी । कौवेरी । वारुणी । इत्यादि' । इत्यधिकः पाठः कतिपयपुस्तकेषु । २ **मूले इति** । कौमुद्यामित्यर्थः । भैरवमिश्रकृतशेखरव्याख्यायामेतदिति 'मूले' इत्यनुषज्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११ । **उङाबन्तश्च** । कुरुः । विद्या । १२ । **य्वन्तमेकाक्षरम्** । श्रीः । भ्रूः । एकाक्षरं किम् । पृथुश्रीः । १३ । **विंशत्यादिरा नवतेः** । इयं विंशतिः ॥ त्रिंशत् । चत्वारिंशत् । पञ्चाशत् । षष्टिः । सप्ततिः । अशीतिः । नवतिः । १४ । **दुन्दुभिरक्षेषु** । इयं दुन्दुभिः । अक्षेषु किम् । अयं दुन्दुभिः । वाद्यविशेषोऽसुरो वेत्यर्थः । १५ । **नाभिरक्षत्रिये** । इयं नाभिः । १६ । **उभावन्यत्र पुंसि**[2] । दुन्दुभिर्नाभिश्चोक्तविषयादन्यत्र पुंसि स्तः । नाभिः क्षत्रियः । कथं तर्हि 'समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीविनाभिभिः' इति भारविः? उच्यते । 'दृढभक्ति' इत्यादाविव 'कोमलैः' इति सामान्ये नपुंसकं बोध्यम् । वस्तुतस्तु 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति भाष्यात्पुंस्त्वमपीह साधु । अत एव-

नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् ।
द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे ॥ इति

मेदिनी । रभसोऽप्याह-

मुख्यराट्क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः ।
चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे ॥ इति ।

एवमेवंविधेऽन्यत्रापि बोध्यम् । १७ । **तलन्तः** । अयं स्त्रियां स्यात् । शुक्लस्य भावः शुक्लता । ब्राह्मणस्य कर्म ब्राह्मणता । ग्रामस्य समूहो ग्रामता । देव एव देवता । १८ । **भूमिविद्युत्सरिल्लतावनिताभिधानानि** । भूमिर्भूः । विद्युत् सौदामनी । सरिन्निम्नगा । लता वल्ली । वनिता योषित् । १९ । **यादो नपुंसकम्** । यादःशब्दः सरिद्वाचकोऽपि क्लीबे स्यात् । २० । **भाःस्रुक्स्रग्दिगुष्णिगुपानहः** । एते स्त्रियां स्युः । इयं भाः । इत्यादि । २१ । **स्थूणोर्णे नपुंसके च** । एते स्त्रियां क्लीबे च स्तः । स्थूणा, स्थूणम् । ऊर्णा, उर्णम् । तत्र स्थूणा काष्ठमयी द्विकर्णिका । उर्णा तु मेषादिलोम । २२ । **गृहशशाभ्यां क्लीबे** । नियमार्थमिदम् । गृहशशपूर्वे स्थूणोर्णे यथासंख्यं नपुंसके स्तः । गृहस्थूणम् । 'शशोर्णं शशलोमनि' इत्यमरः । २३ । **प्रावृड्विप्रुड्रुट्तृड्विट्त्विषः** । एते स्त्रियां स्युः । २४ । **दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्यौषधिकटचङ्गुलयः**[3] । एते स्त्रियां स्युः । पक्षे ङीष् । दर्वी । दर्विः । इत्यादि । २५ । **तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिछविरात्र्यादयः**[4] । एते प्रागवत् । इयं तिथिः । इत्यादि । अमरस्त्वाह- 'तिथयो द्वयोः' इति । तथा च भारविः- 'तस्य भुवि बहुतिथास्तिथयः' इति । स्त्रीत्वे हि बहुतिथ्य इति स्यात् । श्रीहर्षश्च- 'निलिखान्निशि पौर्णिमातिथीन्' इति । २६ । **शष्कुलिराजिकुटचशनिवर्तिभ्रुकुटित्रुटिवलिपङ्क्तयः**[5] । एतेऽपि स्त्रियां स्युः । इयं शष्कुलिः । २७ । **प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः**[6] । इयं प्रतिपत् । इत्यादि । (उषा उच्छती उषा प्रातरधिष्ठात्री देवता) । २८ । **आशीर्धूःपूर्गीर्द्वारः** । इयमाशीः । इत्यादि । २९ । **अप्सुमनस्स-**

इत्यादौ प्रथमस्य, समय इत्यादौ द्वितीयस्य चारितार्थ्यात् । एवं च पपीययीशब्दस्य पुंस्त्वेऽपि न क्षतिः ॥ **११ ऊङाबन्तश्च** । 'ऊङुतः' इत्यूङ् । आब्ग्रहणेन टाप्डाप्चापां ग्रहणम् ॥ **१२ य्वन्तमेकाक्षरम्** । ईकारोऽत्र प्रत्ययः, ऊकारसाहचर्यात् ॥ **१३ विंशत्यादिरानवतेः** । विंशत्यादयः 'पङ्क्तिविंशति-' इति सूत्रनिर्दिष्टाः ॥ **१४ दुन्दुभिरक्षेषु** । अक्षेषु बोधनीयेषु यः प्रयुज्यत इत्यर्थः ॥ **१५ नाभिरक्षत्रिये** । क्षत्रियभिन्ने यो नाभिशब्दः प्रयुज्यते स स्त्रियां स्यात् ॥—**इयं नाभिरिति** । पुरुषावयवे इदम् ॥ **१६ उभावन्यत्र पुंसि** । इदं स्पष्टार्थम् । पूर्वसूत्रयोः 'अक्षेषु' 'अक्षत्रिये' इत्यभिधानेन सिद्धेः ॥—**कथं तर्हीति** । अत्र यत्कोमलैरिति तदनुपपन्नम्, स्त्रीलिङ्गनाभिशब्दार्थविशेषणत्वात् ॥—**सामान्य इति** । लिङ्गविशेषाविवक्षया नपुंसकं कोमलैरिति प्रसाध्य तस्य नाभिशब्दार्थविशेषणत्वं स्वीकार्यम् ॥ विशेष्यप्रतिपादकस्य यथा पुंस्त्वं तथाऽस्यापि भविष्यतीत्याशयेन समाधानान्तरमाह—**वस्तुतस्त्विति** ॥—**चक्रमध्यक्षत्रिययोरिति**—अत्र चक्रमध्यं च क्षत्रियश्चेति द्वन्द्वः । अत एव 'प्राण्यङ्गके द्वयोः' इति संगच्छते ॥ **१७ तलन्तः** । 'तस्य भावस्त्वतलौ' इति सूत्रविहिततल्प्रत्ययान्तं स्त्रियां स्यात् ॥ **१८ भूमिविद्युदिति** । अत्राभिधानशब्दो भूम्यादिशब्दशक्यतावच्छेदकधर्मावच्छिन्नशक्तपरः । तेन प्रमेयशब्दव्यावृत्तिः । एवमन्यत्रापि बोध्यम् ॥ **१९ यादो नपुंसकम्** । पूर्वस्यापवादः ॥ **२१ स्थूणोर्णे नपुंसके च** । चकारेण 'स्त्रियाम्' इत्यस्यानुकर्षणार्थमस्यात्र लेखः ॥ **२३ प्रावृडिति** । स्त्रीशब्दस्य पूर्वत्र चानुकृष्टत्वेऽपि 'स्वरितेनाधिकारः' इत्यस्याधिकः कार इवि व्याख्यानस्यापि प्रसिद्धत्वादत्र संबन्धः ॥ **२४ दर्विविदि** । दर्विशब्दो 'वृदृभ्यां विन्' इति विन्नन्तः, तस्मात् 'सर्वतोऽक्तिन्नर्थादित्येके' इति विकल्पेन ङीष्, दर्वी इति ॥ **२५ तिथिनाडि-**॥—**एते प्रागवदिति** । स्त्रियां स्युरित्यर्थः ॥ **२९ पुंस्त्वे-**

---

१ मुद्रितपुस्तकेष्वखिलेष्वपि 'भ्रूः' इति पाठो दृश्यते । स च प्रामादिकः, ऊकारस्यात्र प्रत्ययस्यैव ग्रहणात् । भूशब्दश्च भूधातोः क्विपि निष्पन्न इति ऊप्रत्ययान्तत्वाभावान्न तस्य ग्रहणम् । 'भ्रमेर्डूः' इति डूप्रत्ययान्तस्य 'भ्रू'शब्दस्य ग्रहणञ्च युज्यते । २ 'उभावप्यन्यत्र पुंसि' इत्याधुनिकः पाठः । ३ 'कृष्योषधि–' इत्यपि पाठः । ४ 'छविनीविरात्र्यादयः' इति पाठान्तरम् । ५ 'त्रुटिलिपिपंक्तयः' इति पाठान्तरम् । ६ सूत्रमेतत्प्राचीनपुस्तकेषु दृश्यते । मुद्रितेषु च सूत्रत्वेन नोल्लेखः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मासिकतावर्षाणां बहुत्वं च । अबादीनां पञ्चानां स्त्रीत्वं स्याद्बहुत्वं च । आप इमाः । 'स्त्रियः सुमनसः पुष्पम्' । 'सुमना मालती जातिः' । देववाची तु पुंस्येव, 'सुपर्वाणः सुमनसः' बहुत्वं प्रायिकम्' 'एका च सिकता तैलदाने असमर्था' इति अर्थवत्सूत्रे भाष्यप्रयोगात् । 'समांसमां विजायते' १८१३ इत्यत्र समायां समायामिति भाष्याश्च । 'विभाषाघ्राधेट्' २३७६ इति सूत्रे 'अघ्रासातां सुमनसौ' इति वृत्तिव्याख्यायां हरदत्तोऽप्येवम् । ३० । **स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिचः** । इयं स्रक् त्वक् ज्योक् वाक् यवागूः नौः स्फिक् । ३१ । **तृटिसीमासंबध्याः** । इयं तृटिः । सीमा । संवध्या । ३२ । **चुल्लिवेणिखार्यश्च** । स्पष्टम् । ३३ । **ताराधाराज्योत्स्नादयश्च** । ३४ । **शलाका स्त्रियां नित्यम्** । नित्यग्रहणमन्येषां क्वचिद्व्यभिचारं ज्ञापयति ॥ **इति स्त्र्यधिकारः** ॥

पुंलिङ्गाधिकारः ।

३५ । **पुमान्** । अधिकारोऽयम् । ३६ । **घञबन्तः** । पाकः । त्यागः । करः । गरः । भावार्थ एवेदम् । नपुंसकत्वविशिष्टे भावे क्तल्युड्भ्यां स्त्रीत्वविशिष्टे तु क्तिनादिभिर्बाधेन परिशेषात् । कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गम् । तथा च भाष्यम्—'संबन्धमनुवर्तिष्यते' इति । ३७ । **घाजन्तश्च** । विस्तरः । गोचरः । चयः । जयः । इत्यादि । ३८ । **भयलिङ्गभगपदानि नपुंसके** । एतानि नपुंसके स्युः । भयम् । लिङ्गम् । भगम् । पदम् । ३९ । **नङन्तः** । नङ्प्रत्ययान्तः पुंसि स्यात् । यज्ञः । यत्नः । ४० । **याच्ञा स्त्रियाम्** । पूर्वस्यापवादः । ४१ । **क्यन्तो घुः** । किप्रत्ययान्तो घुः पुंसि स्यात् । आधिः । निधिः । उदधिः । क्यन्तः किम् । दानम् । घुः किम् । जर्क्षिर्बीजम् । ४२ । **इषुधिः स्त्री च** । इषुधिशब्दः स्त्रियां पुंसि च स्यात् । पूर्वस्यापवादः । ४३ । **देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि** । एतानि पुंसि स्युः । देवाः—अमराः । असुरा दैत्याः । आत्मा क्षेत्रज्ञः । स्वर्गो नाकः । गिरिः पर्वतः । समुद्रः—अब्धिः । नखः कररुहः । केशः शिरोरुहः । दन्तो दशनः । स्तनः कुचः । भुजो दोः । कण्ठो गलः । खड्गः करवालः । शरो मार्गणः । पङ्कः कर्दमः । इत्यादि । ४४ । **त्रिविष्टपत्रिभुवने नपुंसके** । स्पष्टम् । तृतीयं विष्टपं—त्रिविष्टम्, स्वर्गाभिधानतया पुंस्त्वे प्राप्ते अयमारम्भः । ४५ । **द्यौः स्त्रियाम्** । द्योदिवोस्तन्त्रेणोपादानमिदम् । ४६ । **इषुबाहू स्त्रियां च** । चात्पुंसि । ४७ । **बाणकाण्डौ नपुंसके च** । चात्पुंसि । 'त्रिविष्टप–' इत्यादिचतुःसूत्री 'देवासुर–' इत्यस्यापवादः । ४८ । **नान्तः** । अयं पुंसि । राजा । तक्षा । न च चर्मवर्मादिष्वतिव्याप्तिः, 'मन्व्यच्कोऽकर्तरि' १४८ इति नपुंसकप्रकरणे वक्ष्यमाणत्वात् । ४९ । **क्रतुपुरुषकपोलगुल्फमेघाभिधानानि** । क्रतुरध्वरः । पुरुषो नरः । कपोलो गण्डः । गुल्फः प्रपदः । मेघो नीरदः । ५० । **अभ्रं नपुंसकम्** । पूर्वस्यापवादः । ५१ । **उकारान्तः** । अयं पुंसि स्यात् । प्रभुः । इक्षुः । 'हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम् । द्वयोः कपोलावयवे' इति मेदिनी । 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः । एवंजातीयकविशेषवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः । उक्तं च—'लिङ्गशेषविधिव्यापी विशेषैर्यद्यबाधितः' इति । एवमन्यत्रापि । ५२ । **धेनुरज्जुकुहु[1]सरयुतनु[2]करेणुप्रियङ्गवः स्त्रियाम्** । ५३ । **समासे रज्जुः पुंसि च** । कर्कटरज्जवा । कर्कट-

---

वेति । 'देवासुरात्म–' (लि. ४३) इत्यनेन पुंस्त्वबोधकेन परत्वाद्बाधादिति भावः ॥—**भाष्यप्रयोगादिति** । तेन भाष्येण सूत्रनिर्दिष्टानां बहुत्वं प्रायिकमिति कल्प्यते । तेनान्यत्र बहुत्वाभावेऽपि न क्षतिः ॥ **३४ क्वचिद्व्यभिचारमिति** । तेन तिथिशब्दस्य पूर्वत्र यथा पुंस्त्वं प्रदर्शितं तथाऽन्येषामन्यलिङ्गत्वेऽपि साधुत्वमिति सूचयति ॥ **इति लिङ्गानुशासने स्त्र्यधिकारः** ॥

३६ भावार्थ एवेति । भावे यो घञ् तदन्तस्य पुंस्त्वमित्युक्तम् । एतल्लाभप्रकारमाह—**नपुंसकेत्यादि** ॥ **३८ भयलिङ्गेत्यादि** । पूर्वस्यापवादोऽयम् ॥ **४१ क्यन्तो घुः** । किप्रत्ययोऽन्तः परो यस्मात्तादृशो यो घुसंज्ञको धातुस्तद्घटितः पुमानित्यर्थः ॥ **४३ देवासुरा**—। अत्र पङ्कशब्दान्तद्वन्द्वं कृत्वा तस्य षष्ठीसमासोऽभिधानशब्देन कर्तव्यः, अभिधानशब्दः करणल्युडन्तो वाचकशब्दपरः, तेन देवादिशब्दवाच्यतावच्छेदकेत्यादि पूर्ववद्बोध्यम् । शब्दस्वरूपापेक्षया च नपुंसकत्वम् ॥ **४४ त्रिविष्टप** ॥—**स्वर्गाभिधानत्वात्पुंस्त्वे प्राप्तेऽस्यारम्भ इति** । अत एवाहामरसिंहः—'क्लीबे त्रिविष्टपम्' इति ॥ **४५ द्यौः स्त्रियाम्** । अस्य स्वर्गाभिधानत्वात्पुंस्त्वस्य पूर्वेण प्राप्तेऽस्यारम्भः ॥ **४६ इषुबाहू** । शरभुजपर्यायाविमौ ॥ **४७ बाणकाण्डौ**—। शराभिधानोऽयम् ॥ **४८ नान्त इति** । नान्तप्रत्ययान्त इत्यर्थः ॥ **५० अभ्रं नपुंसकमिति** । मेघाभिधानविषये पूर्वस्यापवाद इत्यर्थः ॥ **५१ लिङ्गशेषविधिरिति** । लिङ्गस्य शेषः=अवशेषस्तस्य विधिः, व्यापी=काण्ड-

---

१ 'कुहू' इति दीर्घान्तपाठोऽपि क्वचित् । २ 'तनुरेणुप्रियङ्गवः' इति मुद्रितपाठः । स च प्रामादिकः, रेणुशब्दस्य 'रेणुर्द्वयोः स्त्रियां धूलिः' इति पुंस्त्वाभिधानात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रज्जुना । ५४ । श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके च । ५५ । वसु चार्थवाचि । अर्थवाचीति किम् । 'वसुर्मयूखाग्निधनाधिपेषु' । ५६ । मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च । चात्पुंसि । अयं मद्गुः । इदं मद्गुः । ५७ । रुत्वन्तः । मेरुः । सेतुः । ५८ । दारुकशेरुजतुवस्तुमस्तूनि नपुंसके । 'रुत्वन्तः' इति पुंस्त्वस्यापवादः । इदं दारु । ५९ । सक्तुर्नपुंसके च । चात्पुंसि । सक्तुः । सक्तु । ६० । प्राग्रश्मेरकारान्तः । 'रश्मिदिवसाभिधानानि' इति वक्ष्यति, प्रागेतस्मादकारान्त इत्यधिक्रियते । ६१ । कोपधः । कोपधोऽकारान्तः पुंसि स्यात् । स्तबकः । कल्कः । ६२ । चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके । पूर्वसूत्रापवादः । ६३ । कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च । चात्पुंसि । अयं कण्टकः । इदं कण्टकम् । इत्यादि । ६४ । टोपधः । टोपधोऽकारान्तः पुंसि स्यात् । घटः । पटः । ६५ । किरीटमुकुटललाटवटवीटशृङ्गाटकराटलोष्टानि नपुंसके । किरीटमित्यादि । ६६ । कुटकूटपटकपटकवाटकर्पटतटनिकटकीटकटानि नपुंसके च । चात्पुंसि । कुटः । कुटम् । इत्यादि । ६७ । णोपधः । णोपधोऽकारान्तः पुंसि स्यात् । गुणः । गणः । पाषाणः । ६८ । ऋणलवणपर्णतोरणरणोष्णानि नपुंसके । पूर्वसूत्रापवादः । ६९ । कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च । चात्पुंसि । ७० । थोपधः । रथः । ७१ । काष्ठपृष्ठसिक्थोक्थानि नपुंसके । इदं काष्ठम् । इत्यादि । ७२ । काष्ठा दिगर्था स्त्रियाम् । इमाः काष्ठाः । ७३ । तीर्थप्रोथयूथगाथानि नपुंसके च । चात्पुंसि । अयं तीर्थः । इदं तीर्थम् । ७४ । नोपधः । अदन्तः पुंसि । इनः । फेनः । ७५ । जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके । पूर्वस्यापवादः । ७६ । मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसमानभवनवसनसंभावनविभावनविमानानि नपुंसके च । चात्पुंसि । अयं मानः । इदं मानम् । ७७ । पोपधः । अदन्तः पुंसि । यूपः । दीपः सर्पः । ७८ । पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके । इदं पापम् । इत्यादि । ७९ । शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च । अयं शूर्पः । इदं शूर्पम् । इत्यादि । ८० । भोपधः । स्तम्भः । कुम्भः । ८१ । तलभं नपुंसकम् । पूर्वस्यापवादः । ८२ । जृम्भं नपुंसके च । जृम्भम् । जृम्भः । ८३ । मोपधः । सोमः । भीमः । ८४ । रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके । इदं रुक्मम् । इत्यादि । ८५ । संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च । चात्पुंसि । अयं संग्रामः । इदं संग्रामम् । ८६ । योपधः । समयः । हयः । ८७ । किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके । स्पष्टम् । ८८ । गोमयकषायमलयान्वयाव्ययानि नपुंसके च । गोमयः । गोमयम् । ८९ । रोपधः । क्षुरः । अङ्कुरः । ९० । द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दारपञ्जराजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके । इदं द्वारम् । इत्यादि । ९१ । शुक्रमदेवतायाम् । इदं शुक्रं=रेतः । ९२ । चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च । चात्पुंसि । चक्रः । चक्रम् । इत्यादि । ९३ । षोपधः । वृषः । वृक्षः । ९४ । शिरीषऋजीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके । ९५ । यूषकरीषमिषविषवर्षाणि नपुंसके च । चात्पुंसि । अयं यूषः । इदं यूषम् । इत्यादि । ९६ । सोपधः । वत्सः । वायसः । महानसः । ९७ । पनसबिसबुससाहसानि नपुंसके । ९८ । चमसरसनिर्यासोपवासकार्पासवासमासकासकंसमांसानि नपुंसके च । इदं चमसम् । अयं चमसः । इत्यादि । ९९ । कंसं चाप्राणिनि । 'कंसोऽस्त्री पानभाजनम्' ।

त्रस्य व्यापको यदि विशेषशास्त्रेण बाधितो न स्यादित्यर्थः ॥ ५४ नपुंसके चेति । चात्पुंसि ॥ ५५ वसु चार्थवाचि । अर्थवाचि वसुशब्दो नपुंसके वा द्रष्टव्यः ॥ ५७ रुत्वन्तः । उकारो नकारेत्संज्ञकः । मेरुः । सेतुरित्यत्र 'सितनिगमिमसिसच्यविधाञ्कुशिभ्यस्तुन्' इति तुन् । सूर्यवाचकः प्रथमः ॥ ५८ दारुकशेरु- । जत्वादित्वात् (उ. सू. ५५२) प्रत्ययान्ता एते ॥ ९९ कंसं चाप्राणिनि । कंसमिति शब्दस्य निर्देशात् 'नपुंसके च' इत्यस्य संबन्धः । अप्राणिनि वाच्ये

---

१ 'पुलिनाधानशय-' इति प्राचीनलिखितपाठः । २ 'संभावनवितानविमानानि-' इति पाठः । ३ 'होमोद्दामानि-' इति मुद्रितपाठः । ४ 'पत्रपात्रक्षत्राणि' इति पाठान्तरम् । ५ 'चमसांसरस-' इति मुद्रितपाठः । ६ 'कासकांसमांसानि-' इति मुद्रितपाठः । स च प्रामादिकः, उत्तरसूत्रानुरोधात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणिनि तु–कंसो नाम कश्चिद्राजा । १०० । रश्मिदिवसाभिधानानि । एतानि पुंसि स्युः । रश्मिर्मयूखः । दिवसो घस्रः । १०१ । दीधितिः स्त्रियाम् । पूर्वस्यापवादः । १०२ । दिनाहनी नपुंसके । अयमप्यपवादः १०३ । मानाभिधानि । एतानि पुंसि स्युः । कुडवः । प्रस्थः । १०४ द्रोणाढकौ नपुंसके च । इदं द्रोणम् । अयं द्रोणः । १०५ । खारीमानिके स्त्रियाम् । इयं खारी । इयं मानिका । १०६ । दाराक्षतलाजासूनां बहुत्वं च । इमे दाराः । १०७ । नाड्यपजनोपपदानि व्रणाङ्गपदानि । यथासंख्यं नाड्याद्युपपदानि व्रणादीनि पुंसि स्युः । अयं नाडीव्रणः । अपाङ्गः । जनपदः । व्रणादीनामुभयलिङ्गत्वेऽपि क्लीबत्वनिवृत्त्यर्थं सूत्रम् । १०८ । मरुद्गरुत्तरदृत्विजः । अयं मरुत् । १०९ । ऋषिराशिदृतिग्रन्थिक्रमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः । एते पुंसि स्युः । अयमृषिः । ११० । ध्वजगजमुञ्जपुञ्जाः । एते पुंसि । १११ । हस्तकुन्तान्तव्रातवातदूतधूर्तसूतचूतमुहूर्ताः । एते पुंसि । अमरस्तु 'मुहूर्तोऽस्त्रियाम्' इत्याह । ११२ । षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः । अयं षण्डः । ११३ वंशांशपुरोडाशाः । अयं वंशः । पुरो दाश्यते पुरोडाशः । कर्मणि घञ् । भवव्याख्यानयोः प्रकरणे 'पौरोडाशपुरोडाशात्ष्ठन्' १४५१ इति, विकारप्रकरणे 'व्रीहेः पुरोडाशे' १५२९ इति च निपातनात्, प्रकृतसूत्र एव निपातनाद्वा दस्य डत्वम् । 'पुरोडाशभुजामिष्टमिष्टिकर्तुमलं तराम्' इति माघः । ११४ । ह्रदकन्दकुन्दबुद्बुदशब्दाः । अयं ह्रदः । ११५ । अर्धपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः । अयमर्धः । ११६ । पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धकमृदङ्गसङ्गसमुद्गपुङ्खाः । अयं पल्लवः । इत्यादि । ११७ । सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः । एते पुंसि । अयं सारथिः । इति पुंलिङ्गाधिकारः ।

नपुंसकाधिकारः ।

११८ । नपुंसकम् । अधिकारोऽयम् । ११९ । भावे ल्युडन्तः । हसनम् । भावे किम् । पचनोऽग्निः । इध्मप्रव्रश्चनः कुठारः । १२० । निष्ठा च । भावे या निष्ठा तदन्तं क्लीबं स्यात् । हसितम् । गीतम् । १२१ । त्वष्यञौ तद्धितौ । शुक्लत्वम्, शौक्ल्यम् । ष्यञः षित्त्वसामर्थ्यात्पक्षे स्त्रीत्वम् । चातुर्यम् । चातुरी । सामग्र्यम् । सामग्री । औचित्यम् । औचिती । १२२ । कर्मणि च ब्राह्मणादिगुणवचनेभ्यः । ब्राह्मणस्य कर्म ब्राह्मण्यम् । १२३ । यद्यढग्यगञ्जण्वुञ्छाश्च भावकर्मणि । एतदन्तानि क्लीबानि । 'स्तेनाद्यन्नलोपश्च' १७९०, स्तेयम् । 'सख्युर्यः' १७९१, सख्यम् । 'कपिज्ञात्योर्ढक्' १७९२, कापेयम् । 'पत्यन्तपुरोहितादिभ्यो यक्' १७९३, आधिपत्यम् । 'प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्' १७९४, औद्गात्रम् । 'हायनान्तयुवादिभ्योऽण्' १७९५, द्वैहायनम् । 'द्वन्द्वमनोज्ञादिभ्यो वुञ्' १७९८, पितापुत्रकम् । 'होत्राभ्यश्छः' १८००, अच्छावाकियम् । 'अव्ययीभावः' ६६०, अधिस्त्रि । १२४ । द्वन्द्वैकत्वम् । पाणिपादम् । १२५ । अभाषायां

कंसशब्द इत्यर्थः ॥ दिनाहनी-। दिवसाभिधानाविमौ ॥ १०५ खारीमानिके—। मानाभिधानत्वात्पुंस्त्वे प्राप्तेऽस्यारम्भः ॥ १०६ बहुत्वं चेति । चकारः पुंस्त्वस्य समुच्चायकः ॥ १०७ नाड्यपजनोपपदानि व्रणाङ्गपदानि । अत्रोपपदशब्दः पूर्वपदपरो न तु 'तत्रोपपदम्–' इति तत्संज्ञकपरः, तस्य प्राप्त्यभावात् ॥—क्लीबत्वनिवृत्त्यर्थमिति । नपुंसकाधिकारे 'मुखनयन' (लि. १३०) इत्यादिवक्ष्यमाणसूत्रेण विवराभिधानत्वेन क्लीबत्वं प्राप्तं, तन्निवृत्त्यर्थमित्यर्थः ॥ १११ अमरस्त्विति । एवं च तन्मतेऽर्धर्चादिष्वयं द्रष्टव्यः । इति लिङ्गानुशासने पुंलिङ्गाधिकारः ॥

११९ भावे ल्युडन्तः । इदं च सूत्रं यद्यपि 'नपुंसके भावे क्तः' 'ल्युट् च' इत्यनेन गतार्थम्, तथापि स्पष्टार्थमुपात्तम् । एवमन्तग्रहणं चेति बोध्यम् ॥—इध्मप्रव्रश्चन इति । अत्र करणे ल्युट् ॥ १२० निष्ठा च । अत्र निष्ठापदं क्तस्य बोधकम् । इदमपि सूत्रं 'नपुंसके भावे क्तः' इत्यनेन गतार्थम् । प्रत्ययग्रहणे तदन्तस्य ग्रहणम् ॥ १२१ त्वष्यञौ तद्धितौ । भावे इत्यनुवर्तते । यद्यपि 'तस्य भावः' इति सूत्रे भावशब्दः प्रकृतिजन्यबोधीयप्रकारताश्रयधर्मपरः । 'भावे ल्युडन्तः' इत्यत्र तु भावशब्दो भावनाबोधक इति भेदः, तथापीह भावशब्दः शब्दाधिकारेणान्यार्थको द्रष्टव्यः ॥ १२२ कर्मणि च–। चाद्भावे । ल्यब्भावित्याद्यनुवर्तते ॥—स्तेनाद्यन्नलोपश्चेति । यद्यपीदं सूत्रं प्रागव्याख्यातमेव तथापीतः प्रभृति कथितानां नपुंसकत्वस्य स्पष्टप्रतिपत्त्यर्थमिहोपादानमिति बोध्यम् ॥ १२४ द्वन्द्वैकत्वमिति । 'द्वन्द्वश्च प्राणितूर्य–'इत्यादिना येषां द्वन्द्वानामेकवद्भावो भवति ते द्वन्द्वा नपुंसकत्वाभिधायका बोध्या इत्यर्थः ॥ १२५ अभाषायामिति । इदमपि सूत्रं 'हेमन्त-

---

१ 'क्रिमिध्वनि–' इति पाठान्तरम् । २ 'पाखण्ड' इति पाठान्तरम् । ३ 'तुरङ्गगन्धस्कन्धमृदङ्ग–' इत्यपि पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेमन्तशिशिरावहोरात्रे च । स्पष्टम् । १२६ । अनञ्कर्मधारयस्तत्पुरुषः । अधिकारोऽयम् । १२७ । अनल्पे छाया । शरच्छायम् । १२८ । राजामनुष्यपूर्वा सभा । इनसभम् । इत्यादि । १२९ । सुरासेनाच्छायाशालानिशास्त्रियां च । १३० । परवत् । अन्यस्तत्पुरुषः परवल्लिङ्गः स्यात् । 'रात्राह्नाहाः पुंसि' ८१५ । १३१ । अपथपुण्याहे नपुंसके । १३२ । संख्यापूर्वा रात्रिः । त्रिरात्रम् । संख्यापूर्वेति किम् । सर्वरात्रः । १३३ । द्विगुः स्त्रियां च । व्यवस्थया । पञ्चमूली । त्रिभुवनम् । १३४ । इसुसन्तः । हविः । धनुः । १३५ । अर्चिः स्त्रियां च । इसन्तत्वेऽपि अर्चिः स्त्रियां नपुंसके च स्यात् । इयमिदं वा अर्चिः । १३६ । छदिः स्त्रियामेव । इयं छदिः । छद्यतेऽनेनेति छदेश्चुरादिण्यन्तात् 'अर्चिशुचि–' (उ. २६५) 'इत्यादिना इस् । 'इस्मन्–' इत्यादिना ह्रस्वः । 'पटलं छदिः' इत्यमरः । तत्र पटलसाहचर्याच्छदिषः क्लीबतां वदन्तोऽमरव्याख्यातार उपेक्ष्याः । १३७ । मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि । एतेषामभिधायकानि क्लीबे स्युः । मुखमाननम् । नयनं लोचनम् । लोहं कालम्–अयः । वनं गहनम् । मांसमामिषम् । रुधिरं रक्तम् । कार्मुकं शरासनम् । विवरं बिलम् । जलं वारि । हलं लाङ्गलम् । धनं द्रविणम् । अन्नमशनम् ॥ अस्यापवादानाह त्रिसूत्र्या—

१३८ । सीरार्थौदनाः पुंसि । १३९ । वक्रनेत्रारण्यगाण्डीवानि पुंसि च । वक्रो वक्रम् । नेत्रो नेत्रम् । अरण्योऽरण्यम् । गाण्डीवो गाण्डीवम् । १४० । अटवी स्त्रियाम् । १४१ । लोपधः । कुलम् । कूलम् । स्थलम् । १४२ । तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि । अयं तूलः । १४३ । शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालनिगलपलालबिडालखिलशूलाः पुंसि च । चात् क्लीबे । शीलं । शीलः । इत्यादि । १४४ । शतादिः संख्या । शतम् । सहस्रम् । शतादिरिति किम् । एको द्वौ बहवः । संख्येति किम् । शतशृङ्गो नाम पर्वतः । १४५ । शतायुतप्रयुताः पुंसि च । अयं शतः । इदं शतम् । इत्यादि । १४६ । लक्षा[1] कोटिः स्त्रियाम् । इयं लक्षा । इयं कोटिः । 'वा लक्षा नियुतं च तत्' इत्यमरात् क्लीबेऽपि, लक्षम् । १४७ । शङ्कुः पुंसि । १४८ । सहस्रः क्वचित् । अयं सहस्रः । इदं सहस्रम् । १४९ । मन्द्व्यच्कोऽकर्तरि । मन्प्रत्ययान्तो द्व्यच्कः क्लीबं स्यान्न तु कर्तरि । चर्म । वर्म । द्व्यच्कः किम् । अणिमा । महिमा । अकर्तरि किम् । ददाति— इति दामा । १५० । ब्रह्मन् पुंसि च । अयं ब्रह्मा । इदं ब्रह्म । १५१ । नामरोमणी नपुंसके । 'मन्द्व्यच्कः'

शिशिरावहोरात्रे च छन्दसि' इति सूत्रे छन्दसीत्युपादानेन गतार्थम् । हेमन्तशिशिरावित्यत्र तु निर्देशादेव पुंस्त्वप्रतिपादकता बोध्या ॥ १२९ स्त्रियां चेति । चेन नपुंसकमित्यनुकर्षः । 'विभाषा सेना–' इति विभाषापदोपादानेनेदमपि गतार्थम् ॥ १३० परवदिति । 'परवल्लिङ्गं–' इति सूत्रोपात्त इत्यर्थः । 'परवत्' इति सूत्रस्य स्मारकमिह परवदिति, नत्विदमपूर्वम् ॥—तत्पुरुष इति । इति द्वन्द्वस्याप्युपलक्षणम् ॥ १३२ संख्यापूर्वा रात्रिः । 'संख्यापूर्वं रात्रं क्लीबम्' इत्यस्यानुवादः ॥ १३३ द्विगुः स्त्रियां चेति । चान्नपुंसकमिति संबध्यते । इदमपि 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' 'पात्राद्यन्तस्य न' इत्यनेन गतार्थम् । अत एवाह—व्यवस्थयेति ॥ १३४ इसुसन्तः । 'अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः', 'जनेरुसिः' एतयोरुपात्तावेतौ ॥ १३६ छदिः स्त्रियामेवेति । यद्यपि छदिरित्यस्येसन्तत्वेन नपुंसकत्वे प्राप्ते विशेषोपादानेन 'स्त्रियाम्' इत्यनेनैव नित्यं स्त्रीत्वलाभे सिद्धे एवकारो व्यर्थः, तथापि 'पटलं छदिः' इत्यमरग्रन्थदर्शनेन साहचर्यान्नपुंसकत्वमपीति भ्रान्तिः स्यात्तन्निवारणायैवकारः । अत एव वक्ष्यति—अमरव्याख्यातार इति ॥ १३७ अस्येति । 'मुखनयन–' इति सूत्रस्य ॥ १३८ सीरार्थौदनाः—। सीरशब्दो हलाभिधानः । अर्थशब्दस्तु धनशब्दस्य पर्यायः । ओदनशब्दोऽन्नवाची । भिस्साभिस्सटाशब्दौ तु दग्धान्नपराविति तयोः स्त्रीत्वेऽपि न क्षतिरिति ॥ १४० अटवी स्त्रियाम् । अयं वनाभिधानः ॥ १४४ संख्येति । संख्यावाचीत्यर्थः ॥ १४५ शतायुत—। अयं शतशब्दोऽनन्तवाची । 'शतादिः–' इति पूर्वसूत्रापवादोऽयम् ॥ १४६ लक्षा कोटिः—। एतयोरपि संख्यावाचकत्वान्नपुंसकत्वे प्राप्ते इदम् ॥—क्लीबेऽपीति । एवं चायमर्धर्चादिषु द्रष्टव्यः ॥ १४७ शङ्कुः पुंसि । अस्य शङ्कुशब्दस्य संख्याविशेषवाचकत्वात् 'शतादिः संख्या' इति नपुंसकत्वे प्राप्तेऽस्यारम्भः ॥ १४८ सहस्रः क्वचिदिति ॥—क्वचिदिति–अर्थविशेष इत्यर्थः । 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' इत्यत्रानन्तवाची । न चात्र सहस्रशब्दस्यानन्तपरत्वे संख्यापरत्वाभावेन सहस्रपादित्यत्र 'संख्यासुपूर्वस्य' इति पादशब्दान्त्यलोपो न स्यादिति वाच्यम् । नियतविषयपरिच्छेदकत्वरूपसंख्यात्वाभावेऽपि यथाकथंचित्संख्यायाः प्रतीतिरिति लोपः । वस्तुतश्छान्दसो लोप इति तूचितम् ॥ १४९ मन्द्व्यच्कः–। अत्र मन्प्रत्ययः श्रूयमाणनकारान्तः 'सर्वधातुभ्यो मनिन्' इति विहितः ॥—चर्म वर्मेति । चरादिधातोर्मनिन्प्रत्ययः । बाहुलकादिडभावः । अणिमादौ त्विट् । दामेत्यत्रापि 'सर्वधातुभ्यो मनिन्' (उ. ५९४) इत्यनेनैव मनिन्, परं त्वयं विशेषः—उणादिप्रत्ययान्तानां संज्ञाशब्दत्वेन यादृशी व्युत्पत्तिर्यत्रोचिता सा कल्पनीयेति कर्तर्यपि प्रत्ययः संभवतीति ॥ १५० ब्रह्मेति । 'बृंहेर्नोच्च'

[1] 'लक्षाकोटी स्त्रियाम्' इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यस्यायं प्रपञ्चः । १५२ । असन्तो द्व्यच्कः । यशः । मनः । तपः । द्व्यच्कः किम् । चन्द्रमाः । १५३ । **अप्सराः स्त्रियाम्** । एता अप्सरसः । प्रायेणायं बहुवचनान्तः । १५४ । त्रान्तः । पत्त्रम् । छत्त्रम् । १५५ । **यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव** । १५६ । **भृत्रामित्रछात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि** । अयं भृत्रः । न मित्रममित्रः । 'तस्य मित्राण्यमित्रास्ते' इति माघः । 'स्यातामामित्रौ मित्रे च' इति च । यत्तु 'द्विषोऽमित्रे' ३१११ इति सूत्रे हरदत्तेनोक्तम्—'अमेर्द्विषत् (उ. ६१३) इत्यौणादिक इत्रच् । अमेरमित्रम्, मित्रस्य व्यथयेत्' इत्यादौ मध्योदात्तस्तु चिन्त्यः । नञ्समासेऽप्येवम् । परवल्लिङ्गताऽपि स्यादिति तु तत्र दोषान्तरम्' इति, तत्प्रकृतसूत्रापर्यालोचनमूलकम् । स्वरदोषोद्भावनमपि 'नञो जरमरमित्रमृताः' ३८५० इति षाष्ठसूत्रास्मरणमूलकमिति दिक् । १५७ । **पत्त्रपात्रपवित्रसूत्रच्छत्राः पुंसि च** । १५८ । **बलकुसुमशुल्बपत्तनरणाभिधानानि** । बलं वीर्यम् । १५९ । **पद्मकमलोत्पलानि पुंसि च** । पद्मादयः शब्दाः कुसुमाभिधायित्वेऽपि द्विलिङ्गाः स्युः । अमरोऽप्याह—'वा पुंसि पद्मं नलिनम्' इति । एवं च अर्धर्चादिसूत्रे तु 'जलजे पद्मं नपुंसकमेव' इति वृत्तिग्रन्थो मतान्तरेण नेयः । १६० । **आहवसंग्रामौ पुंसि** । १६१ । आजिः स्त्रियामेव । १६२ । **फलजातिः** । फलजातिवाची शब्दो नपुंसकं स्यात् । आमलकम् । आम्रम् । १६३ । **वृक्षजातिः स्त्रियामेव** । क्वचिदेवेदम् । हरीतकी । १६४ । **वियज्जगत्सकृत्शकन्पृषत्शकृद्यकृदुदश्वितः** । एते क्लीबाः स्युः । १६५ । **नवनीतावतानानृतामृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि** । १६६ । **श्राद्धकुलिशदैवपीठकुण्डाङ्काङ्गदधिसक्थ्यक्ष्यास्यास्पदाकाशकण्वबीजानि** । एतानि क्लीबे स्युः । १६७ । **दैवं पुंसि च** । दैवम् । दैवः । १६८ । **धान्याज्यसस्यरूप्यपण्यवर्ण्यधिष्ण्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि** । इदं धान्यम् । इत्यादि । १६९ । **द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचवरशरवृन्दारकाणि** । १७० । **अक्षमिन्द्रिये** । इन्द्रिये किम् । रथाङ्गादौ मा भूत् ॥ इति नपुंसकाधिकारः ।

स्त्रीपुंसाधिकारः ।

१७१ । **स्त्रीपुंसयोः** । अधिकारोऽयम् । १७२ । **गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः** । इयमयं वा गौः । १७३ । **मृत्युसिन्धुकर्कन्धुकिष्कुकण्डुरेणवः** । इयमयं वा मृत्युः । १७४ । **गुणवचनमुकारान्तं नपुंसकं च** । त्रिलिङ्ग-

(उ. ५९५) इति मनिन्प्रत्ययः ॥ **१५२ असन्तो द्व्यच्कः** । 'सर्वधातुभ्योऽसुन्' (उ. ६३८) इति विहितोऽसुन् । तस्यासुनो येष्वनुवृत्तिस्तदन्ता अपि बोध्याः । 'चन्देर्मो डित्' (उ. ६७७) इति विहितासुन्प्रत्ययान्तश्चन्द्रमस्शब्दोऽप्यसुन्नन्तः, कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् । एवमप्सरःशब्दोऽपि ॥ **१५४ त्रान्तः** । त्रप्रत्ययान्तो नपुंसकं स्यात् । 'हुयाम–' इति विहितत्रन्प्रत्ययोऽपि 'सर्वधातुभ्यष्ट्रन्' इति त्रन्प्रत्ययो नकारानुबन्धक इति ॥ **१५५ यात्रामात्रा—** । त्रग्रहणेन गृह्यत इति नपुंसकत्वे प्राप्तेऽस्यारम्भः । एवकारो न्यायसिद्धबाध्यबाधकभावानुवादकः ॥ **१५६ भृत्रामित्र—** । पूर्वस्यापवादः ॥—**यत्त्विति** । 'दोषान्तरम्' इत्यन्ता तदुक्तिः ॥—**मध्योदात्तः**—मकारेकारस्य प्रत्ययाद्युदात्तत्वेन मध्योदात्त इति तद्भावः ॥—**चिन्त्य इति** । चित्त्वस्य सत्त्वात् ॥ नन्वमित्रशब्दो नेत्रन्तः, किंतु 'अमिचिमि–' इति मिधातुविहितक्त्रान्तमित्रशब्देन नञः समासे सति सिद्ध इत्याह—**नञ्समासेऽप्येवमिति** । अन्तोदात्त इत्यर्थः ॥ **परवल्लिङ्गतेति** । एवं सति नपुंसकत्वं स्यात् ॥ हरदत्तोक्तं दूषयति—**तत्प्रकृतेत्यादिना** ॥—**नञो जरमरेति** । यदि तु न मित्रं-अमित्र इति नञ्समासस्तदा न 'नञो जरमरमित्र–' इत्यस्य प्राप्तिः, तस्य बहुव्रीहिसमासे प्रवृत्तेरिति बोध्यम् ॥ **१५९ कुसुमाभिधायित्वेति** । वस्तुतः कुसुमाभिधायित्वेऽपीत्यर्थः । यदि तु कुसुमविशेषाभिधायकोऽयं न तु कुसुमशब्दशक्यतावच्छेदकावच्छिन्नशक्त इति विभाव्यते तदा त्वपूर्वमेवोभयलिङ्गत्वाभिधानमिति ॥—**मतान्तरेण**—जलजशब्दस्य जलजातकुसुमान्तराभिधायकत्वमित्यभिप्रायकमतान्तरेणेत्यर्थः ॥ **१६० आहवसंग्रामौ पुंसि** । एतयोर्युद्धाभिधायकत्वान्नपुंसकत्वे प्राप्ते । एवमाजिशब्दोऽपि ॥ **१६२ फलजातिरिति** । फलोपादानाद्वृक्षपरस्यामलकीशब्दस्य स्त्रीत्वेऽपि न क्षतिः ॥ **१६३ हरीतकीति** । हरीतक्याः फलानि हरीतक्यः । 'हरीतक्यादिषु व्यक्तिः' इति स्त्रीत्वाभिधानात् ॥ **१७० रथाङ्गादाविति** । आदिना देवनाक्षपरिग्रहः ॥ **इति लिङ्गानुशासने नपुंसकाधिकारः ॥**

१७१ स्त्रीपुंसयोः । अधिकारोऽयम् ॥ **१७४ नपुंसकं चेति** । चात्स्त्रीपुंसयोः ॥ **इति लिङ्गानुशासने स्त्रीपुंसाधिकारः ॥**

१ 'धिष्ण्य' इति पाठः । २ 'सत्यासत्य' इति पाठः । ३ 'मृत्युसीधु' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्यर्थः । पट्टु । पट्टुः । पट्टी । १७५ । अपत्यार्थ-स्तद्धिते । औपगवः । औपगवी । इति स्त्रीपुंसाधिकारः ।

पुंनपुंसकाधिकारः ।

१७६ । पुंनपुंसकयोः । अधिकारोऽयम् । १७७ । घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः । अयं घृतः । इदं घृतम् । १७८ । शृङ्गार्घनिदाघोद्यमशल्यदृढाः । अयं शृङ्गः । इदं शृङ्गम् । १७९ । व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चदर्भपुच्छाः । अयं व्रजः । इदं व्रजम् । १८० । कबन्धौषधायुधान्ताः । स्पष्टम् । १८१ । दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः । एते पुंनपुंसकयोः स्युः । 'कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले' इति विश्वः । शलाकावाची तु स्त्रियाम् । तथा च 'जानपद–' ५०१ आदिसूत्रेणायोविकारे ङीषि–कुशी । दारुणि तु टाप्–'कुशा वानस्पत्याः स्थ ता मा यात' इति श्रुतिः । 'अतः कृकमि–' १६० इति सूत्रे 'कुशाकर्णीषु' इति प्रयोगश्च । व्याससूत्रे च–'हानौ तूपायनशब्दे शेषत्वात्कुशाच्छन्दः' इति । तत्र शारीरकभाष्येऽप्येवम् । एवं च श्रुतिसूत्रभाष्याणामेकवाक्यत्वे स्थिते 'आच्छन्द' इत्याङ्प्रश्लेषादिपरो भामतीग्रन्थः प्रौढिवादमात्रपर इति विभावनीयं बहुश्रुतैः । १८२ । गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च । इति पुंनपुंसकाधिकारः ।

अविशिष्टलिङ्गाधिकारः ।

१८३ । अविशिष्टलिङ्गम् । १८४ । अव्ययं कतियुष्मदस्मदः । १८५ । ष्णान्ता संख्या । शिष्टा परवत् । एकः पुरुषः । एका स्त्री । एकं कुलम् । १८६ । गुणवचनं च । शुक्लः पटः । शुक्ला पटी । शुक्लं वस्त्रम् । १८७ । कृत्याश्च । १८८ । करणाधिकरणयोर्ल्युट् । १८९ । सर्वादीनि सर्वनामानि । स्पष्टार्थेयं त्रिसूत्री ॥

इति लिङ्गानुशासनं समाप्तम् ॥

इति श्रीभट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी संपूर्णा ॥

---

१८१ शलाकावाचीति । सा च शलाका काष्ठादिनिर्मिता । तत्र मानमाह—तथा चेति । इति पुंनपुंसकाधिकारः ॥

१८३ अविशिष्टलिङ्गम् । तत्तल्लिङ्गवाचकताप्रयुक्तकार्यविशेषशून्यम् ॥ १८५ शिष्टा इति । पूर्वोक्तशब्दान्यतमत्वावच्छिन्नप्रतियोगिताकभेदवन्तः ॥—परवदिति । विशेष्यवदित्यर्थः ॥ १८६ गुणवचनं च । परवदित्यनुवर्तते ॥ १८७ कृत्याश्च । कृत्यप्रत्ययान्ताः परवद्बोध्याः ॥ १८९ सर्वादीनि सर्वनामानि । सर्वनामसंज्ञकानि सर्वादीनि परवद्बोध्यानि ॥—स्पष्टार्थेति । लोकव्युत्पत्त्यैव तत्तल्लिङ्गाभिधानस्य सिद्धत्वात् । अत एव 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति भगवता भाष्यकृतोक्तम् । तेन 'यौगिकेषु शब्देषु लोकव्युत्पत्तिरेव लिङ्गाभिधाने प्रमाणम्' इति सिद्धम् ॥ इति लिङ्गानुशासनविवरणम् ॥

इति श्रीमदनन्तकल्याणसद्गुणनिधानाखिलपण्डितसार्वभौमभूमण्डलसंचारिविमलतरानवद्ययशःपार्वणपीयूषभान्वगस्त्यकुलवंशावतंसश्रीमद्भवदेवमिश्रात्मजभैरवमिश्रकल्पितायां सिद्धान्तकौमुदीव्याख्यायां लिङ्गानुशासनं संपूर्णम् ॥

---

१ 'दर्पार्मार्ध' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

सिद्धान्तकौमुदीपरिशिष्टानि ।

अथ पाणिनीयशिक्षा १

भाष्यसहिता ।

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा । शास्त्रानुपूर्व्यं[1] तद्विद्याद्यथोक्तं लोकवेदयोः ॥ १ ॥

पातु वो निकषग्रावा मतिहेम्नः सरस्वती । प्राज्ञेतरपरिच्छेदं वचसैव करोति या ॥ १ ॥

छन्दःकल्पनिरुक्तानि विवृतानीह सूरिभिः । शिक्षा न विवृता यस्मात्तस्मात्तां विवृणोम्यहम् ॥ २ ॥

अथ शिक्षां प्रवक्ष्यामीति । अथेत्ययमानन्तर्ये, वेदाध्ययनानन्तरमङ्गपाठः । किं कारणं? 'षडङ्गो वेदोऽध्येतव्यः' इति स्मरणात् । तत्र च शिक्षा प्रथमा, अथशब्दानुषङ्गात् । सा च वक्तव्येत्यथशब्दस्यार्थः । एतेनैव सिद्धे वेदस्याङ्गानन्तर्येण व्याकरणादिष्वथशब्दोऽत एव नाधीयते । केषुचित् कल्पेषु अधीयते इति चेत् 'अथातोऽधिकारः' 'अथैतस्य समाम्नायस्य' इत्येवमादिषु ? नैष दोषः । नियमार्थः सः, शिक्षानन्तरं कल्प एवाध्येतव्यो नान्यानीति । मङ्गलार्थो वा ॥ आदौ **सम्बन्धाभिधेयप्रयोजनानि** वक्तव्यानि । तत्र चायमेव **सम्बन्धो** यदुक्तोऽङ्गाङ्गिभावः । नित्यसम्बन्धानि ह्यङ्गान्यङ्गिनः । **अभिधेयं** तु स्वयमेव वक्ष्यति–'वाच उच्चारणे विधिम्' इति । **प्रयोजनं** सम्यग्वर्णोच्चारणम् । प्रयोजनमपि श्रूयते एव–'एकोऽपि वर्णः सम्यक् प्रयुक्तः स्वर्गे लोके कामधुग्भवति' इति । शिक्ष्यतेऽनया वर्णोच्चारणमिति **शिक्षा,** तां प्रकर्षेण **वक्ष्यामि**=कथयिष्यामि ॥ **पाणिनीयं मतं यथेति** । पाणिनीयमिति 'वृद्धाच्छः' इति छप्रत्ययः । तस्येदमित्यर्थनिर्देशः ॥ **मतमिति** । 'मन ज्ञाने' पाणिनीयं मतं ज्ञानं यथा तथा प्रवक्ष्यामि तैरेव प्रत्याहारैस्तयैव परिभाषया 'अचोऽस्पृष्टा यणस्त्वीषत्' इत्यादि, 'अणुदित्सवर्णस्य चाप्रत्ययः' इति, 'कण्ठ्यावहाविचुयशाः' इति च । तथाऽन्यदप्यनुक्तमत्र प्रयोजनं यत्तद् व्याकरणादेव ग्रहीतव्यं मोऽनुस्वारः' इति ॥ ननु व्याकरणे शब्दचिन्ता, अत्रापि सेति । ततश्च व्याकरणेनैव सिद्धत्वादिदमनारभ्यम् । सत्यम्, उभयोः शब्दचिन्ता, किन्तु व्याकरणे एतच्चिन्त्यते–गोशब्दः सास्नादिमत्यर्थे साधुः, इह तु–गोशब्दो जिह्वामूलेनोच्चारयितव्य इति भेदः ॥ **शास्त्रानुपूर्व्यं तद्विद्यादिति** । **शास्त्र**मिति शासेः करणे ष्ट्रन् प्रत्ययः । **आनुपूर्व्यमिति** गुरुपूर्वक्रमः । **तदिति** पाणिनिमतपरामर्शः । तत् पाणिनिमतमेवास्यापि शिक्षाख्यशास्त्रस्याप्यानुपूर्व्यं विद्यावंशपरम्परां जानीयात् । पाणिनिमतस्य यदानुपूर्व्यं यो गुरुपूर्वक्रमः स एवास्येत्यर्थः । तथा च वक्ष्यति–'शङ्करः शाङ्करीं प्रादात्' इत्यादि ॥ **यथोक्तं लोकवेदयोरिति** । समानार्थमित्यर्थः । तथा च भाष्यकारः–"य एव लौकिकाः शब्दास्त एव वैदिकास्त एव तेषामर्थाः" इति ॥ १ ॥

नन्वकारादयो वर्णाः स्वस्थानेनैवोच्चार्यन्ते, परस्थाननिराकाङ्क्षत्वात् । किमर्थः शास्त्रारम्भः? इत्याशङ्क्याह—

प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः । पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥ २ ॥

प्रसिद्धमिति । अबुद्धिभिर्बुद्धिहीनैः प्रसिद्धमपि शब्दार्थमविज्ञातं सम्मतं, पुनः पश्चाद् व्यक्तीकरिष्यामि स्फुटीकरिष्यामि । किम् ? **वाच उच्चारणे विधिं,** वाचो गिरस्तदुच्चारणे उद्गिरणे विधिं विधानम् । ननु 'विधिरत्यन्तमप्राप्तौ' इति स्मर्यते, न चात्रात्यन्तमप्राप्तिः । उक्तं च अधस्तात्–'अकारादयो वर्णाः स्वस्थानेनैवोच्चार्यन्ते' इति । उच्यते—यद्यपि स्वस्थानस्थिता उच्चार्यन्ते तथाऽप्यप्राप्तोंऽशः कथनीयोऽनुप्रदानादिः, एतदर्थो विधिशब्दः ॥ २ ॥

वागुच्चारणं च वर्णैः क्रियते, कतिसंख्यास्ते? इत्यत आह—

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः[2] । प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥ ३ ॥

त्रिषष्टिश्चतुःषष्टिर्वेति । सम्भवत इति सम्भूतेः । सकाशान्मताः ज्ञाताः । वर्णो वृणोतेः । अत्र 'यथोक्तं लोकवेदयोः' इत्युक्तम् । तत्र किं लोके संस्कृतविषया एव वर्णा उत सर्वभाषाविषयाः ? इत्याह—**प्राकृते संस्कृते चापीति** । अपिशब्दादपभ्रंशादिष्वपि ये वर्णाः सम्भूतेर्जाताः सन्तः तेऽपि ॥ **स्वयं प्रोक्ताः स्वयम्भुवेति** । ब्रह्मणा स्वयमेव हरेण प्रकर्षेणोच्चारिताः ॥ ३ ॥

कथं ते त्रिषष्टिः कथं वा चतुःषष्टिरित्याशङ्क्याह—

स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः । यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥ ४ ॥

स्वरा विंशतिरेकश्चेति । स्वरा इति 'स्वृ शब्दोपतापयोः' स्वर्यते शब्द्यतेऽनेन व्यञ्जनमिति करणेऽच् प्रत्ययः । कथं ते एकविंशतिः ? ततश्चतुरो यथास्मृति विवृणोमि—अ इ उ ऋ एते चत्वारो ह्रस्वदीर्घप्लुतभेदेन द्वादश । लृकारस्य दीर्घादयो न

---

[1] 'शास्त्रानुपूर्वं' इत्येवं पाठः क्वचिद्दृश्यते स नातीव रमणीयः । [2] सम्भवतो मताः' इति भाष्य पाठः ।

८५ सि० कौ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्तीति स्मरणात् ह्रस्व एवोपदिश्यते, अत एते त्रयोदश । ए ऐ ओ औ सन्ध्यक्षराणि, सन्ध्यक्षराणामपि ह्रस्वा न सन्तीति स्मरणात् दीर्घप्लुता एव गृह्यन्ते, ते एतेऽष्टौ पूर्वैस्त्रयोदशभिः **सहैकविंशतिः ॥ स्पर्शानां पञ्चविंशतिः ।** कादयो मावसानाः स्पर्शाः । जिह्वामूलतालुमूर्धदन्तोष्ठादिभिः परस्परं स्पर्शैरभिनिष्पत्य आविर्भवन्तीति स्पर्शाः । पूर्वैयैकविंशत्या **सह षट्चत्वारिंशत् ॥ यादयश्च स्मृता ह्यष्टाविति ।** यकारादयश्च अष्टौ–य र ल व श ष स हाः—इति । अत्र आद्याश्चत्वारोऽन्तःस्थसञ्ज्ञाः, उपरितना ऊष्माणः । पूर्वया षट्चत्वारिंशता सह **चतुःपञ्चाशत् ॥ चत्वारश्च यमाः स्मृता इति ।** यच्छन्तीति यमाः, स्वयमेवोपरमेरन् । के ते यमाः ? लोके—कुं खुं गुं घुं इति । "अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः" इत्यौदव्रजिः । तथाच—

> ह्रस्वादिभेदैश्चत्वारः प्रथमा द्वादश स्मृताः । ऌकारो ह्रस्व एवैचोऽष्टौ स्वरा एकविंशतिः ॥
> पञ्चविंशतिरष्टाविधः स्पर्शाः स्युर्यादयो यमाः । अनुस्वारो विसर्गश्च ᳵकᳶपौ प्लुतऌकारकः ॥
> त्रिषष्टिरेवं वर्णाः स्युर्ह्रस्वदीर्घादिभेदतः । अनुस्वारद्वयाद्वर्णाश्चतुःषष्टिरितीरिताः ॥

तथा च नारदः—

> अनन्त्यश्च भवेत्पूर्वो ह्यन्त्यश्च परतो यदि । तत्र मध्ये यमस्तिष्ठेत् सवर्णः पूर्ववर्णयोः ॥
> वर्गान्त्यान् शषसैः सार्धमन्तस्थैर्वाऽपि संयुतान् । दृष्ट्वा यमा निवर्तन्ते आदेशिकमिवाध्वगाः ॥

इति नारदौदव्रज्योर्मतेन यमो वर्णागम इति विधीयते । अस्मात् शास्त्रात् 'चत्वारश्च यमाः स्मृताः' इति वर्णान्तरत्वेनोपदेशः संयोगशास्त्रात् । अथ चतुरक्षराणामुदाहरणमिति प्रक्रम्य अग्निरिति यमो गकारौ द्वौ नकार इकारश्चेति । अन्ये तु यमं वर्णापत्तिं मन्यन्ते । तथा च शौनकः—"स्पर्शा यमाननुनासिकान् स्वान् परेषु स्पर्शेष्वनुनासिकेषु" इति । पूर्वया चतुःपञ्चाशता सहाष्टपञ्चाशत् ॥ ४ ॥

अनुस्वारो विसर्गश्च ᳵकᳶपौ चापि पराश्रितौ ।
दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च ॥ ५ ॥ (१)

अनुस्वारो विसर्गश्चेति । स्वरमनु भवतीत्यनुस्वारः, अनु अकारानुगमेनानुस्वारः । वक्ष्यति च–'दन्तमूल्यः स्वरानुगः' इति ॥ **विसर्ग इति ।** विविधं सृज्यते क्षिप्यते इति विसर्गः ॥ **ᳵकᳶपौ चापि पराश्रयाविति ।** पराश्रयाविति परौ ककारपकारौ आश्रयः स्थानं ययोस्तौ पराश्रयौ । तथा च वक्ष्यति—

> "अयोगवाहा विज्ञेया आश्रयस्थानभागिनः" इति ।

अपरः पाठः—**'ᳵकᳶपावपि परौ स्मृतौ'** । अनुस्वारविसर्गयोः परावित्यर्थः । अपरोऽपि पाठः—**'ᳵकᳶपौ चापि कपाश्रयौ'** ककारपकारौ आश्रयः स्थानं ययोस्तौ कपाश्रयौ । चशब्दादनुस्वारविसर्जनीयावपि पराश्रयौ ॥ **दुःस्पृष्टश्चेतीति ।** ईषत्स्पृष्टो वर्णधर्मो न वर्णान्तरम् । वक्ष्यति च—'अचोऽस्पृष्टा यणस्त्वीषत्' इति । तथा चौदव्रजिः—'तत्र स्पृष्टं प्रयतनं करणं स्पर्शानाम्' 'दुःस्पृष्टमन्तःस्थानाम्' इति । यण्भक्तिश्च ऌकारो विद्यते । अतो ऌकारो दुःस्पृष्टधर्मा, चशब्दात् ऋकारः । इतिशब्दः पादपूरणार्थः ॥ **ऌकार इति ।** ऌवर्णात् कारप्रत्ययः ॥ **प्लुत एव चेति ।** ऌकारस्य दीर्घादयो न सन्तीत्यधस्तात् परमतमुपन्यस्तम् । स्वमतं चाह—**ऌकारः प्लुत एव चेति ।** त्रिमात्रः, चशब्दाद्ध्रस्वश्च ॥ ननु वर्णानां प्रयत्नमुपरिष्टाद्वक्ष्यत्येव, किमर्थमप्रस्तुतः प्रयत्नः कथ्यते ? उच्यते, प्लुतविधानार्थं तावत्ऌकार उच्चारयितव्यः, उच्चारिते च ऌकारे लाघवार्थमप्रस्तुतोऽपि प्रयत्न उच्चारितः—दुस्पृष्टश्चेति । अनुस्वारादयः प्लुतान्ताःपञ्च । पूर्वैरष्टपञ्चाशद्भिः सह त्रिषष्टिः । चतुःषष्टिः कथम् ? 'अनुस्वारौ विसर्गश्च' इति पाठान्तरात् । कथं पुनरनुस्वारद्वयं ? ह्रस्वदीर्घभेदेनेति ब्रूमः । तथा चौदव्रजिः—"अनुस्वारावं आं इत्यनुस्वारौ ह्रस्वदीर्घौ दीर्घह्रस्वौ वर्णौ" इति । अत एव चतुःषष्टिः ॥५॥

अथ वर्णसंख्यापरिज्ञानोत्तरकालं चिन्त्यते, क एषामुच्चारयिता, कथं चोच्चारयति, केन क्रमेण चेत्याह—

आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ ६ ॥

आत्मेति । आत्मा शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तः । कथं पुनरेतदवगम्यते ? यथा शरीरेन्द्रियमनोबुद्धिव्यतिरिक्त आत्मा उच्यते, द्रष्टृत्वात् । द्रष्टा हि दृश्यादिव्यतिरिक्तो भवति, प्रयोजकत्वात् 'बुद्ध्यादीनि कर्तृप्रयोज्यानि, करणत्वाद् कुठारवत्' इति । न्यायात् श्रुतेश्च । न्यायस्तावत्—'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति स्वर्गादिफलसाधनानि कर्माणि श्रूयन्ते । स्वर्गश्च वायुशरीरोपभोग्यः, तद्व्यतिरिक्त आत्मा शरीरादेः । श्रुतेश्च "तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः" इति । शरीरापक्रमणाय शरीरादिव्यतिरिक्त आत्मा । छान्दोग्यश्रुतेश्च—"एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतीरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इति । क एषामुच्चारयितेति पृष्टे तस्योत्तरं दत्तम्–आत्मेति । कथमुच्चारयति केन क्रमेणेति प्रश्नद्वयस्योत्तरं दीयते–स आत्मा बुद्ध्या सहार्थान् बाह्यान् समर्थ्य सम्यगवगम्यार्थप्रत्यायनाय यदि शब्दा उच्चार्यन्ते तदा मनो युङ्क्ते विवक्षया वक्तुमिच्छा विवक्षा तया । तच्च

१ 'पराश्रयौ' इति भाष्यानुसारी पाठः । २ 'समर्थ्यार्थान्' इति भाष्यपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनो नियुङ्क्ते आत्मा ॥ **मनः कायाग्निमाहन्तीति** । तच्च मनो नियुक्तं सत् कायाग्निमाहन्ति कायाग्निं शरीराग्निम् अभिमुख्येनाहन्ति ॥ **स प्रेरयति मारुतमिति** । सोऽग्निरभिहतः सन्मारुतं वायुं प्रेरयति ॥ ६ ॥

मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् । प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम् ॥ ७ ॥

मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरमिति । मारुतो वायुरुरसि चरन्मन्द्रं स्वरमुत्पादयति । मन्द्रमिति मन्देरक् प्रत्ययः ॥ **प्रातस्सवनयोगमिति** । प्रातः सवनेन सह योगोऽस्येति प्रातःसवनयोगस्तम् । तथा च ऐतरेयब्राह्मणे—'अथ मन्द्रं तपति तस्मात् मन्द्रया वाचा प्रातःसवने शंसेत्' इति । गायत्रं छन्दोऽस्याश्रयः । गायत्रं गायतेः स्तुतिकर्मणः । आच्छादयति छन्दः ॥ ७ ॥

कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् । तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ ८ ॥

कण्ठ इति । मारुत इति वर्तते, सवनं छन्दः स्वरं चरन्निति च । वर्णान् जनयतीति यावत् । कण्ठे चरन्वायुर्मध्यमं स्वरं जनयति । **कण्ठे इति**—'कणेष्ठः' (उ. सू. १०३) इति ठप्रत्ययः । मध्यं दिनं युनक्तीति माध्यन्दिनं सवनभाजं त्रिष्टुप्छन्दोऽनुगामिनम् ॥ **तारमिति** । तार्तीयसवनमिति तृतीयसवनभाजुं तारं स्वरं शीर्षण्यमिति मूर्धनि चरन् वायुं जनयत्युत्पादयति जागतछन्दोऽनुगामिनम् । जागतं छन्दोऽनुगच्छतीति जागतानुगः । शीर्षण्यमिति 'शीर्षश्छन्दसि' (सू. ३५१३) इति शिरःशब्दस्य शीर्षभावः । तत्र भवं शीर्षण्यम् ॥ ८ ॥

सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥ ९ ॥

सोदीर्ण इति । स वायुरुदीर्ण उर्ध्वगतो मूर्धानं यावदुपरितनां गतिमलभमानः शिरः कपालेनावष्टब्धत्वात्पुनः प्रत्यावृत्य वक्त्रमेवापद्य वर्णाञ्जनयते उत्पादयति । पुनर्मारुतग्रहणं विस्पष्टार्थम् ॥ **तेषां विभागः पञ्चधा स्मृत इति** । तेषां वर्णानां जन्यमानानां विभागो विवेकः पञ्चधा पञ्चप्रकारः । 'संख्याया विधार्थे धा' (सू. १९८८) इति धा । स्मृतोऽनुमतः ॥ ९ ॥

कैर्हेतुभिस्तेषां वर्णानां पञ्चधा विवेक इत्याह—

स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः । इति वर्णविदः प्राहुर्निपुणं तं निबोधत ॥ १० ॥ (२)

स्वरतः इति । स्वरस्थानहेतून् व्याख्यास्यामः । वर्णानां ज्ञातार एवमाहुः—'पञ्चधा विवेको वर्णानाम्' इति । स्वरतः—उदात्तादिभेदेन । कालतः—ह्रस्वादि । स्थानं—कण्ठादि । प्रयत्नो द्विधा । अनुप्रदानं स्वस्थानादिकं घोषादि । अनु प्रकर्षेण दीयते इत्यनुप्रदानम् । 'द्वौ नादानुप्रदानौ' इत्यौदव्रजिः । पञ्चधा विवेकं वर्णानां निपुणमुच्यमानं हे श्रोतारः! निबोधत शृणुत ॥ १० ॥

अत्र किञ्चिदुच्यते बालव्युत्पत्त्यर्थम्—ननु सर्वमेवैतदनुपपन्नम् । कथम्? आत्मा बुद्ध्या सहार्थान् समर्थ्य मनो युङ्क्ते इति व्याख्यातम् । आत्मनश्च नियोजकभावो नोपपद्यते अकर्तृरूपत्वात् तस्य । तथा च श्रुतिः—"असङ्गो ह्ययं पुरुषः" इति, "अस्थूलमनण्वह्रस्वम्" इत्यादिका च । भवता चैवमात्मस्वरूपं व्याख्यातम् । आत्मनश्च नियोजकभावे शरीरेन्द्रियमनोबुद्धिव्यतिरिक्त इति शरीरादिव्यतिरिक्त आत्मा मनो युङ्क्ते इत्यनुपपन्नम् । उच्यते, अयमात्मा समर्थ्यार्थान्मनो युङ्क्ते इत्येतत् क्षेत्रज्ञाभिप्रायम् । क्षेत्रज्ञस्य तदेव स्वरूपं यन्नियोजकत्वम् । तथा च मनुः—

"योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते । यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ॥
जीवसंज्ञोऽन्तरात्माऽन्यः सहजः सर्वदेहिनाम् । येन वेदयते सर्वं सुखं दुःखं च कर्मसु ॥
तावुभौ भूतसंपृक्तौ महाक्षेत्रज्ञ एव च । उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठति ॥" इति ।

तं व्याप्येति परमात्मानमाहुः । तथा च व्यासः—

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः" ॥

ननु यद्यात्मा बुद्ध्या समर्थ्यार्थानित्युदाहृतो यो नित्यः क्षेत्रज्ञ एवात्रात्माऽभिप्रेतो भवेत् ततः क्षेत्रज्ञ एवात्मशब्दस्य चरितार्थत्वात् शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तत्वं कतरस्माच्छब्दात् त्वया वर्णितं, किमर्थं च? उच्यते, आत्मा बुद्ध्येत्यत्र द्वावप्यात्मानौ तौ क्षेत्रज्ञपरमात्माभिधेयरूपावभिप्रेतौ तन्त्रेणोच्चारितौ । तन्त्रेणोच्चारणं सूत्राणामलङ्कारः । एवं चेत् किमर्थं परमात्मनो वर्णनिमित्तत्वं यदुक्तम्, तत्रोच्यते—अपवर्गसाधनोपकारत्वाच्छिक्षायाः । अपवर्गस्य चायमेवोपायः शरीरादिव्यतिरिक्तस्य परमात्मनो बोधः । बुद्धे च बुद्ध्यादिभिरैक्यं भवति । किं तदपवर्गसाधनं यस्य शिक्षोपकारे वर्तते? उच्यते, वेदा यज्ञाश्च । तथा च श्रुतिः—"तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन च" इति । वेदानुवचनं यज्ञगतमन्त्राङ्गत्वात्सम्यग्वर्णोच्चारणेन यस्मान्मोक्षमाप्नोति । वक्ष्यति च—'अतुलं च सुखं समश्नुते' इति । अतुलं सुखं मोक्ष एव भवति । अलमतिप्रसङ्गेन ।

प्रकृतमनुसरामः—

उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः । ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥ ११ ॥

उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ । स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥१३॥
ओभावश्च विवृत्तिश्च शषसा रेफ एव च । जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ १४ ॥
यद्योभावप्रसन्धानमुकारादिपरं पदम् । स्वरान्तं तादृशं विद्याद् यदन्यद् व्यक्तमूष्मणः ॥१५॥ (३)
हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम् । औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥ १६ ॥

उदात्तश्चानुदात्तश्चेति । स्वरतः कालत इत्येतौ द्वौ हेतू श्लोके विवृणोति । स्वर उदात्तादिः । कालो मात्राप्रभृति-त्रिमात्रपर्यन्तः । उदात्त इत्युपरिष्टात् परिगृहीतः । अनुदात्तस्तद्विपरीतः, अधस्ताद् गृहीत इत्यर्थः । स्वरित इति स्वरान्तरम् । स्वरतीति स्वरितः–आक्षेपनिष्पाद्यः, य उदात्तानुदात्तविकारः । तथा च नारदः—

"उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा । त्रैस्वर्ये स्वरसंज्ञायां किंस्थानं स्वर उच्यते ॥
उच्चनीचस्थयोर्मध्ये साधारण इति श्रुतिः । तं स्वरं स्वरसंज्ञायां प्रतिजानन्ति शैक्षिकाः" ।

स्वरास्त्रय इति । त्रय एव । ऋग्यजुर्विषयाः पञ्च षट्, सप्त च सामसु । ह्रस्व एकमात्रो दीर्घो द्विमात्रः प्लुतस्त्रिमात्रः । "निमेषकाला मात्रा स्यात्" इत्यौदव्रजिः । तथा च नारदः—

"निमेषकाला मात्रा स्याद्विद्युत्कालेति चापरे" इति ।

इतिशब्दः प्रकारार्थः । अनेन प्रकारेण कालत हेतोः स्वरतश्च विषमभागनियमः । तथा च नारदः—

"स्वर उच्चस्वरो नीचस्वरः स्वरित एव च ।
व्यञ्जनान्यत्र वर्तन्ते यत्र तिष्ठति स स्वरः" इति ॥ ११–१६ ॥

स्थानत इति यदुक्तं तदाह—

कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू । स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥ १७ ॥

कण्ठ्यावहाविति । कण्ठ्यावहौ–अकारहकारौ कण्ठतो जातौ ॥ **इचुयशास्तालव्याः**—इकारश्च चवर्गश्च यकार-शकारौ च, एते तालव्याः–तालुस्थाने भवाः । 'चु' इत्युकाराऽनुबन्धो वर्गं ज्ञापयति । वर्गादावन्यत्रापि 'कुचुटुतुपु' इत्येव-मादिषु उकारः पञ्चवर्णपरिग्रहणार्थः । तथा च पाणिनिः–"अणुदित् सवर्णस्य चाप्रत्ययः" इति । औदव्रजिरपि–"स्पर्शवर्गस्य स्पर्शग्रहणे च ज्ञेयम् । वर्गस्य ग्रहणं स्थानेष्विल्याकरः" इति ॥ **ओष्ठजावुपू**—उकारः पवर्गश्च ओष्ठयोर्जातौ ॥ **स्युर्मूर्धन्या ऋटुरषा इति ।** ऋकारः टवर्गश्च रेफषकारौ च मूर्द्धन्या भवेयुः ॥ **दन्त्या लृतुलसा इति ।** लृकारस्तवर्गश्च लकार-सकारौ च दन्तेषु भवाः ॥ १७ ॥

जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः । एऐ तु कण्ठतालव्या ओऔ कण्ठोष्ठजौ स्मृतौ ॥१८॥

जिह्वामूले इति । कवर्गस्तु जिह्वामूले कथितः । **दन्त्योष्ठ्यो वः स्मृतो बुधैरिति ।** वकारो दन्तोष्ठयोर्भवतीति पण्डितैः स्मर्यते ॥ **एऐ तु कण्ठतालव्या इति ।** एकार ऐकारश्च कण्ठतालुतो जातौ ॥ **ओऔ कण्ठोष्ठजौ स्मृता-विति ।** ओकारश्चौकारश्च कण्ठोष्ठयोर्जातौ ॥ १८ ॥

अर्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत् । ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥ १९ ॥
संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् । घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥२०॥ (४)
स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् । तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ २१ ॥
अनुस्वारयमानां च नासिका स्थानमुच्यते । अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥ २२ ॥

अर्धमात्रा इति । अर्धमात्रा तु कण्ठस्य भवति । कयोः ? एकारस्यौकारस्य च । सवर्णग्राहकत्वादेकारश्च औकारश्च द्वावपि गृह्येते । अतश्चतुर्णामपि सन्ध्यक्षराणामर्धमात्रा कण्ठसबन्धिनी भवेत् । अध्यर्धास्ताल्वोष्ठस्थानाः ॥ **अयोगेति ।** अयोगवाहा इत्यनुस्वारादयश्चत्वार उच्यन्ते । अनुस्वारो विसर्गश्च ≍क≍पौ च कण्ठ्यौ । तथा च औदव्रजिः–'अयोग-वाहाः अः इति विसर्जनीयः, ≍क इति जिह्वामूलीयः, ≍प≍फ इत्युपध्मानीयः, अं इत्यनुस्वारः–नासिक्यः, इत्ययोगवाहाः' । न विद्यते योगः संयोगो वर्णान्तरेण येषां ते अयोगवाहाः ॥ **आश्रयस्थानभाजिन इति ।** आश्रयस्य ककारादेः स्थानं भाजितुं शीलं येषां ते आश्रयस्थानभाजिनः । अन्ये तु–यमानप्ययोगवाहान्मन्यन्ते । तेषां मतेन अयोगवाहशब्दः प्रत्यस्त-मितावयवो रूढिशब्दोऽश्वकर्णवद्वेदितव्यः । अनुस्वारस्य स्वरूपमाह—अनुस्वारस्य प्रकृतिः पाणिनिनैव कथिता "मोऽनुस्वारः" इति ॥ १९ ॥ २० ॥ २१ ॥ ॥ २२ ॥

अलाबुवीणानिर्घोषो दन्तमूल्यः स्वराननु । अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ॥ २३ ॥
अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये । द्विरोष्ठ्यौ तु विगृह्णीयाद् यत्रौकारवकारयोः ॥ २४ ॥
व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् । भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥२५॥ (५)
यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते । एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ॥ २६ ॥

---

१ 'भाजिनः' इति भाष्यसंमतपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रङ्गवर्णं प्रयुञ्जीरन् नो ग्रसेत् पूर्वमक्षरम् । दीर्घस्वरं प्रयुञ्जीयात् पश्चान्नासिक्यमाचरेत् ॥ २७ ॥
हृदये चैकमात्रस्त्वर्द्धमात्रस्तु मूर्धनि । नासिकायां तथाऽर्द्धं च रङ्गस्यैवं द्विमात्रता ॥ २८ ॥
हृदयादुत्करे तिष्ठन् कांस्येन समनुस्वरन् । मार्दवं च द्विमात्रं च जघन्वाँ २ इति निदर्शनम् ॥ २९ ॥
मध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ भवेत् । स रङ्गं कम्पयेत् कम्पं रथीवेति निदर्शनम् ॥ ३० ॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः । सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥ ३१ ॥ (६)
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः । अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ ३२ ॥
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः । धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ ३३ ॥
शङ्कितं भीतमुद्घृष्टमव्यक्तमनुनासिकम् । काकस्वरं शिरसिगतं तथा स्थानविवर्जितम् ॥ ३४ ॥
उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् ।
निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम् ॥ ३५ ॥
प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन ।
मध्यंदिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन ॥ ३६ ॥
तारं तु विद्यात् सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥ ३७ ॥ (७)

अलाब्विति । अलाबुस्तुम्बी, तस्या वीणाया निर्घोष इव शब्दो यस्य सोऽलाबुवीणानिर्घोषः । स्थानं दन्तमूलं तत्र भवो दन्तमूल्यः । स्वरान् अकारादीन् अनु भवतीति शेषः । हकाररेफयोः शषसेषु च सदा भवति । तथा च नारदः—

"आपद्यते मकारो रेफोष्मसु प्रत्ययेष्वनुस्वारम् । यवलेषु परसवर्णं स्पर्शेषु चोत्तमापत्तिम्" इति ।
"अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥"

इति–इमं श्लोकमनुवादरूपं केचित् पठन्ति ॥ २३—३७ ॥

स्वरतः कालतः स्थानतो वर्णानां भेदः कथितः । अधुना प्रयत्नतो भेदः कथ्यते—प्रकर्षेण यत्नो वर्णोच्चारणं प्रत्यस्पृष्टादिभिः स प्रयत्नः ।

अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शरस्तथा । शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥ ३८ ॥

अजिति । अजिति प्रत्याहारग्रहणम् । 'अ इ उ ऋ ऌ ए ओ ऐ औ' एते अस्पृष्टाः । यणः–यवरलाः, एते ईषत्स्पृष्टाः । शरिति प्रत्याहारग्रहणं–शषसाः, एते नेमस्पृष्टाः । अर्धस्पृष्टा इत्यर्थः । तथेति पादपूरणार्थः ॥ **शेषाः स्पृष्टा हलः प्रोक्ता इति** । हल इति प्रत्याहारग्रहणं हकारादारभ्याऽऽलकारात् । शेष इति–उपयुक्तादन्यः शेषः । यणः शरश्च ईषत्स्पृष्टाः, तद्वर्जिता हलः स्पृष्टाः स्वस्थानैः कथिताः ॥ **निबोधानुप्रदानत इति** । अनुप्रदानमिति स्वस्थानादिकं घोषादि अनुप्रकर्षेण दीयते इति अनुप्रदानम् "द्वौ नादानुप्रदानौ" इत्यौदव्रजिः । अनुप्रदानतो हेतोर्वर्णानां भेदं शृणु ॥ ३८ ॥

अमोऽनुनासिकान्हो नादिनो हझषः स्मृताः । ईषन्नादा यणं जश्च श्वासिनस्तु खफादयः ॥ ३९ ॥

अमिति—प्रत्याहारग्रहणं 'ञ म ङ ण न म्' ॥ **अनुनासिका इति** । स्वस्थानैरधिका अनुपाठाः, नासिकामनुभवन्तीति अनुनासिकाः–ञमङणनमोऽनुनासिकानिमान् जानीयात् । तथा च पाणिनिः–'मुखनासिकावचनोऽनुनासिकः' इति ॥ **अह्न इति**—अकारो रेफश्च हकारो झषश्च । प्रत्याहारग्रहणं—**झ इति**, 'झभघढधष्' एते अह्नादयो नादिनः स्मर्यन्ते । नाद एषामस्तीति **नादिनः** । अपरः पाठः—**अमोनुनासिका न ह्रौ** । अम इति प्रत्याहारग्रहणं 'अ इ उ ऋ ऌ ए ओ ऐ औ ह य व र ल ञ म ङ ण न म्' एते अनुनासिकाः । **न ह्रौ**—न तु रेफहकारौ अमावपि सन्तौ ॥ **नादिनो हझषः स्मृताः** । हकारो झषश्च नादिनः, झषः—झभघढधषः, अस्यार्थे पाठद्वयात् अमां हकाररेफवर्जितानां विकल्पेनानुनासिकत्वम्, ञमां तु नित्यम् । तथा च शौनकः—

"सचादयो या विहिता विवृत्तयः प्लुतोपधान्ता अनुनासिकोपधाः" इति ।

तथा उकारश्चेति करणे युक्तो रक्तः पृक्तो द्राघितः शाकलेनेति । अकाररेफयोः प्रथमे पाठे नादित्वं, द्वितीयपाठे हकाररेफयोर्नासिकत्वप्रतिषेधः ॥ **ईषन्नादा यणजशस्त्विति** । यणः कथिताः । जशस्तु जकारायाः शकारेण प्रत्याहारः 'ज ब ग ड द श्' एते यण् जशश्च ईषन्मनाक् नादाः ॥ **श्वासिनस्तु खफादय इति** । 'खफछठथाः' एते श्वासिनः श्वास एषामस्तीति श्वासिनः "श्वासो घोषाणां तृतीयात् प्रथमानामुभावघोषश्चतुर्थानां युग्माः सोष्माणम्" इति चौदव्रजिः ॥३९॥

ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत् प्रचक्षते । दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि ॥ ४० ॥
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ ४१ ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ ४२ ॥ (८)

उदात्तमाख्याति वृषोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्धा ।
उपान्तमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव ॥ ४३ ॥

---

१ 'यण्जशः' इति भाष्यपाठः । २ 'दाक्षीपुत्रः पाणिनिना' इत्येवं पाठो वैदिकसंप्रदाये समुपलभ्यते । स चानन्वितः, आर्षो वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदात्तं प्रदेशिनीं विद्यात् प्रचयं मध्यतोऽङ्गुलिम् । निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥ ४४ ॥
अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् ।
मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदात्तमिति नवपदशय्या ॥ ४५ ॥
अग्निः सोमः प्रवो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती ।
अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितम् ॥ ४६ ॥
हविषां मध्योदात्तं स्वरिति स्वरितम् । बृहस्पतिरिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम् ॥ ४७ ॥
अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः । स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥ ४८ ॥ (९)
चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः । शिखी रौति त्रिमात्रं तु नकुलस्त्वर्द्धमात्रकम् ॥ ४९ ॥
कुतीर्थादागतं दग्धमपवर्णं च भक्षितम् । न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥ ५० ॥
सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम् । सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ५१ ॥

ईषच्छ्वासांश्चरो विद्यादिति । चर इति प्रत्याहारग्रहणं 'च ट त क प श ष स र्' एतन्नामकान् ईषच्छ्वासान् जानीयात् ॥ **गोर्धामैतत्प्रचक्षत इति ।** गोर्वाचः, धाम स्थानम्, एतच्छास्त्रमाचक्षते वर्णविदः शास्त्रानुपूर्व्यमिति य उक्ताः ॥ ४०–५१ ॥

अथ मन्त्रव्यत्यासलक्षणमाह—

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ ५२ ॥
अवक्षरमनायुष्यं विस्वरं व्याधिपीडितम् । अक्षता शस्त्ररूपेण वज्रं पतति मस्तके ॥ ५३ ॥
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् । ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ ५४ ॥
हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् । ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥ ५५ ॥ (१०)

मन्त्रः—मननान्मन्त्रः **स्वरतः**—उदात्तादिभेदतः, **वर्णतः**—त्रिषष्टिरित्यादिभेदतः, **मिथ्याप्रयुक्तः**—यः स्वरो यो वर्णस्तमज्ञात्वैव प्रयुक्तः, **न तमर्थमाह**—तस्यार्थं न वेद । स ईदृशो मन्त्रो वाग्रूपो वज्रसमो यजमानं हिनस्ति । तत्र दृष्टान्तमाह—यथा स्वरतोऽपराधाद् इन्द्र एव शत्रुहन्ताऽभूदिति ॥ ५२–५५ ॥

इदानीं गुरुपूर्वकममाह—

शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते । वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥ ५६ ॥

शङ्कर इति । शङ्करः शं सुखं करोतीति शंकरः सुखकरः शाङ्करीं सुखकरीं विद्यां दाक्षीपुत्राय ऋषये दाक्षीनाम्नी ऋषिकन्या तत्पुत्राय धीमते बुद्धिमते प्रादाद्दत्तवान् ॥ ५६ ॥

सम्प्रति पाणिनिस्तुतिपरं श्लोकमाह—

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ ५७ ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः । तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ ५८ ॥
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥ ५९ ॥

येनेति । नन्वप्रकृतं स्तुतिपूर्वकं पाणिनेर्नमस्कारकरणं किमर्थम्? उच्यते, अचोऽस्पृष्टा यणस्त्वीषदिति प्रत्याहारैः शिक्षा ग्रथिता प्रत्याहाराश्च पाणिनिना शङ्करादधिगम्य कृत्स्नं समग्रं व्याकरणं प्रोक्तं शिष्योपकाराय स्वप्रत्याहारा लोके प्रवर्तिताः, तदर्थो स्तुतिः । अक्षरसमाम्नायमिति प्रत्याहारानाहुः । ऋज्वन्यत् ॥ ५७–५९ ॥

भगवतः शिक्षायाश्च साक्षात् स्तुतिपरं श्लोकमाह—

त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत् प्रयतश्च सदा द्विजः ।
स भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समश्नुते दिवीति दिवीति ॥ ६० ॥ (११)
अथ शिक्षामात्मोदात्तश्चहकारं स्वराणां यथा गीत्यचोस्पृष्टोदात्तं चाषस्तुशङ्कर एकादश ।
इति पाणिनीयशिक्षा समाप्ता ॥

त्रिनयनेति । वैतालीयं छन्दोऽस्य, अन्येषामनुष्टुप् छन्दोऽस्ति । त्रिनयनः शिवस्तस्य मुखान्निःसृता यथा गुहायाः सिंहो निष्क्रामति तथा निःसृता, एतावता त्रिनयनेनापि न कृतेत्यर्थः । तां यः-द्विजः पठेदधीयीत स धनादिभिर्युज्यते सुखमतुलं परमानन्दलक्षणमुक्तिमुक्तप्रकारेणाश्नुते प्राप्नोति । अन्यत्रामुष्मिन् लोके धनधान्यपशुकीर्तिभाग् भवत्यन्ते मुक्तिभाक्, अन्यदवान्तरफलानि स्वर्गादीनि परिमितकालत्वात् तोलयितुं शक्यन्ते—मोक्षाख्यं तु अपरिमितकालावच्छिन्नं सुखरूपमित्यर्थः ॥ ६० ॥

इति पाणिनीयशिक्षापञ्जिकाख्यं भाष्यं सम्पूर्णम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ गणपाठः ।

प्रथमोऽध्यायः ।

२१३। **सर्वादीनि सर्वनामानि** १।१।२७ ॥ सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् ॥ **इति सर्वादिः** ॥ १ ॥

४४८। **स्वरादिनिपातमव्ययम्** १।१।३७॥ स्वर अन्तर् प्रातर्, **अन्तोदात्ताः** । पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् [अन्तिकात्] पृथक्, **आद्युदात्ताः** । ह्यस् श्वस् दिवा रात्रौ सायम् चिरम् मनाक् ईषत् [शश्वत्] जोषम् तूष्णीम् बहिस् [अधस्] अवस् समया निकषा स्वयम् मृषा नक्तम् नञ् हेतौ [हे है] इद्धा अद्धा सामि, **अन्तोदात्ताः** । वत् [५।१,१५] ब्राह्मणवत् क्षत्रियवत् सना सनत् सनात् उपधा तिरस्, **आद्युदात्ताः** । अन्तरा । **अन्तोदात्तः** । अन्तरेण [मक्] ज्योक् [योक् नक्] कम् शम् सना सहसा [श्रद्धा] अलम् स्वधा वषट् विना नाना स्वस्ति अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मुधा दिष्ट्या वृथा मिथ्या । क्त्वातोसुन्कसुनः । कृन्मकारसंध्यक्षरान्तोऽव्ययीभावश्च । पुरा मिथो मिथस् प्रायस् मुहुस् प्रवाहुकम् प्रवाहिका आर्यहलम् अभीक्ष्णम् साकम् सार्धम् [सत्रम् समम्] नमस् हिरुक् । तसिलादयस्तद्धिता एधाच्च पर्यन्ताः [५।३।७-४६] शस्तसी कृत्वसुच् सुच् आस्थालौ । च्व्यर्थाश्च । [अथ] अम् आम् प्रताम् प्रतान् प्रशान् । **आकृतिगणोऽयम्** । तेनान्येऽपि । तथाहि—माङ् श्रम् कामम् [प्रकामम्] भूयस् परम् साक्षात् साचि (सावि) सत्यम् मंक्षु संवत् अवश्यम् सपदि प्रादुस् आविस् अनिशम् नित्यम् नित्यदा सदा अजस्रम् सन्ततम् उषा ओम् भूर् भुवर् झटिति तरसा सुष्ठु कु अञ्जसा अ मिथु (अमिथु) विथक् भाजक् अन्वक् चिराय चिरम् चिररात्राय चिरस्य चिरेण चिरात् अस्तम् आनुषक् अनुषक् अनुपद अम्नस् (अम्भस्) अम्नर् (अम्भर्) स्थाने वरम् दुष्ठु बलात् शु अर्वाक् सुदि वदि **इत्यादि** । तसिलादयः प्राक्पाशपः [५।३।७–४७] शस्प्रभृतयः प्राक्समासान्तेभ्यः [५।४।४२–६७] मान्तः कृत्वोर्थः । तसिवती । नानाञाविति ॥ **इति स्वरादिः** ॥ २ ॥

२० **चादयोऽसत्त्वे** १।४।५७॥ च वा ह अह एव एवम् नूनम् शश्वत् यूपत् युगपत् भूयस् सूपत् कूपत् कुवित् नेत् चेत् चण् कच्चित् यत्र तत्र नह हन्त माकिम् माकीम् माकिर् नकिम् नकीम् नकिर् आकीम् माङ् नञ् तावत् यावत् त्वा त्वै द्वै न्वै रै [रे] श्रौषट् वौषट् स्वाहा स्वधा ओम् तथा तथाहि खलु किल अथ सुष्ठु स्म अ इ उ ऋ लृ ए ऐ ओ औ आदह उञ् उकञ् वेलायाम् मात्रायाम् यथा यत् तत् किम् पुरा वधा (वध्वा) धिक् हाहा हेहै (हहे) पाट् प्याट् आहो उताहो हो अहो नो (नौ) अथो ननु मन्ये मिथ्या असि ब्रूहि तु नु इति इव वत् वात् वन बत [सम् वशम् शिकम् दिकम्] सनुकं शंवट् (छंवट्) शङ्के शुकम् खम् सनात् सनुतर् नहिकम् सत्यम् ऋतम् अद्धा इद्धा नोचेत् नचेत् नहि जातु कथम् कुतः कुत्र अव अनु हा हे [है] आहोस्वित् शम् कम् खम् दिष्ट्या पशु वट् सह [अनुषट्] आनुषक् अङ्ग फट् ताजक् भाजक् अये अरे वाट् (चाटु) कुम् खुम् घुम् अम् ईम् सीम् सिम् सि वै । उपसर्गसविभक्तिस्वरप्रतिरूपकाश्च निपाताः ॥ **आकृतिगणोऽयम्** ॥ **इति चादयः** ॥ ३ ॥

२१ **प्रादयः** १।४।५८॥ प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप ॥ **इति प्रादयः** ॥ ४ ॥

७६३ **ऊर्यादिच्विडाचश्च** १।४।६१॥ ऊरी उररी तन्थी ताली आताली वेताली धूली धूसी शकला शंसकला ध्वंसकला भ्रंसकला गुलगुधा सजूस् सजुष् फल फली विक्ली आक्ली आलोष्टी केवाली केवासी सेवासी पर्याली शेवाली वर्षाली अत्यूमशा वश्मसा मस्मसा मसमसा औषट् श्रौषट् वौषट् वषट् स्वाहा स्वधा (बन्धा) पापी प्रादुस् श्रत् आविस् ॥ **इत्यूर्यादयः** ॥५॥

७७६ **साक्षात्प्रभृतीनि च** १।४।७४॥ साक्षात् मिथ्या चिन्ता भद्रा रोचना आस्था अमा अद्धा प्राजर्या प्राजरुहा बीजर्या बीजरुहा संसर्या अर्थे लवणम् उष्णम् शीतम् उदकम् आर्द्रम् अग्नौ वशे विकसने प्रसहने प्रतपने प्रादुस् नमस् । **आकृतिगणोऽयम्** ॥ **इति साक्षात्प्रभृतयः** ॥ ६ ॥ **इति प्रथमोऽध्यायः** ।

द्वितीयोऽध्यायः ।

६७२ **तिष्ठद्गुप्रभृतीनि च** २।१।१७॥ तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेबुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संह्रियमाणयवम् संहृतबुसम् संह्रियमाणबुसम् समभूमि समपदाति सुषमम् विषमम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःषमम् निःषमम् अपसमम् आयतीसमम् [प्रोढम्] पापसमम् पुण्यसमम् प्राह्णम् प्ररथम् प्रमृगम् प्रदक्षिणम् [अपरदक्षिणम्] संप्रति असंप्रति । इच्प्रत्ययः समासान्तः । [५।४।१२७-१२८] ॥ **इति तिष्ठद्गुप्रभृतयः ॥ ७ ॥**

७१८ सप्तमी शौण्डैः २।१।४०॥ शौण्ड धूर्त कितव व्याड प्रवीण संवीत अन्तर अधि पटु पण्डित कुशल चपल निपुण ॥ **इति शौण्डादयः ॥ ८ ॥**

७२६ पात्रेसमितादयश्च २।१।४८॥ पात्रेसमिताः पात्रेबहुलाः उदुम्बरमशकः उदुम्बरकृमिः कूपकच्छपः अवटकच्छपः कूपमण्डूकः कुम्भमण्डूकः उदपानमण्डूकः नगरकाकः नगरवायसः मातरिपुरुषः पिण्डीशूरः पितरिशूरः गेहेशूरः गेहेनर्दी गेहेक्ष्वेडी गेहेविजिती गेहेव्याडः गेहेमेही गेहेदाही गेहेदृप्तः गेहेधृष्टः गर्भेतृप्तः आखनिकवकः गोष्ठेशूरः गोष्ठेविजिती गोष्ठेक्ष्वेडी गोष्ठेपटुः गोष्ठेपण्डितः गोष्ठेप्रगल्भः कर्णेटिरिटिरा कर्णेचुरुचुरा ॥ **आकृतिगणोऽयम् ॥ इति पात्रेसमितादयः ॥ ९ ॥**

७३६ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २।१।५६॥ व्याघ्र सिंह ऋक्ष ऋषभ चन्दन वृक वृष वराह हस्तिन् तरु कुञ्जर रुरु पृषत् पुण्डरीक पलाश कितव ॥ **इति व्याघ्रादयः ॥ १० ॥ आकृतिगणोऽयम् ।** तेन-मुखपद्मम् मुखकमलम् करकिसलयम् पार्थिवचन्द्रः इत्यादि ॥ ५ ॥

७३९ (१)श्रेण्यादयः (२)कृतादिभिः २।१।५९॥ (१) श्रेणि एक पूग मुकुन्द राशि निचय विषय निधन पर इन्द्र देव मुण्ड भूत श्रमण वदान्य अध्यापक अभिरूपक ब्राह्मण क्षत्रिय [विशिष्ट] पटु पण्डित कुशल चपल निपुण कृपण ॥ **इत्येते श्रेण्यादयः ॥ ११ ॥** (२) कृत मित मत भूत उक्त [युक्त] समाज्ञात समाम्नात समाख्यात संभावित [संसेवित] अवधारित अवकल्पित निराकृत उपकृत उपाकृत [दृष्ट कलित दलित उदाहृत विश्रुत उदित]। **आकृतिगणोऽयम् ॥ इति कृतादयः ॥ १२ ॥**

७४० * शाकपार्थिवादीनामुपसंख्यानम् * २।१।६०॥ शाकपार्थिव कुतुपसौश्रुत अजातौल्वलि । **आकृतिगणोऽयम् ।** कृतापकृत भुक्तविभुक्त पीतविपीत गतप्रत्यागत यातानुयात क्रयाक्रयिका पुटापुटिका फलाफलिका मानोन्मानिका ॥ **इति शाकपार्थिवादयः ॥ १३ ॥**

७५३ कुमारः श्रमणादिभिः २।१।७०॥ श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी दासी बन्धकी अध्यापक अभिरूपक पण्डित पटु मृदु कुशल चपल निपुण ॥ **इति श्रमणादयः ॥ १४ ॥**

७५५ मयूरव्यंसकादयश्च २।१।७२॥ मयूरव्यंसक छात्रव्यंसक कम्बोजमुण्ड यवनमुण्ड । छन्दसि । हस्तेगृह्य (हस्तगृह्य) पादेगृह्य (पादगृह्य) लाङ्गूलेगृह्य (लाङ्गूलगृह्य) पुनर्दाय । **एहीडादयोऽन्यपदार्थे ।** एहीडं एहियवं एहिवाणिजा-क्रिया अपेहिवाणिजा प्रेहिवाणिजा एहिस्वागता अपेहिस्वागता एहिद्वितीया अपेहिद्वितीया प्रेहिद्वितीया एहिकटा अपेहिकटा प्रेहिकटा आहरकटा प्रेहिकर्दमा प्रोहकर्दमा विधमचूडा उद्धमचूडा (उद्धरचूडा) आहरचेला आहरवसना [आहरसेना] आहरवनिता (आहरविनता) कृन्तविचक्षणा उद्धरोत्सृजा उद्धरावसृजा उद्धमविधमा उत्पचनिपचा उत्पतनिपता उच्चावचम् उच्चनीचम् आचोपचम् आचपराचम् [नखप्रचम्] निश्चप्रचम् अकिंचन स्नात्वाकालक पीत्वास्थिरक भुक्त्वासुहित प्रोष्यपापीयान् उत्पत्यपाकला निपत्यरोहिणी निषण्णश्यामा अपेहिप्रघसा एहिविघसा इहपञ्चमी इहद्वितीया । **जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति ।** जहिजोडः । जहिजोडम् । जहिस्तम्बम् । जहिस्तम्बः [उज्जहिस्तम्बम्]। **आख्यातमाख्यातेन क्रियासातत्ये ।** अश्नीतपिबता पचतभृज्जता खादतमोदता खादतवमता । खादताचमता । आहरनिवपा । आहरनिष्किरा । आवपनिष्किरा । उत्पचविपचा भिन्धिलवणा कृन्धिविचक्षणा पचलवणा प्रचप्रकूटा । **आकृतिगणोऽयम् ॥** तेन—अकुतोभयः । कान्दिशीकः । कान्देशीकः । आहोपुरुषिका अहमहमिका यदृच्छा एहिरेयाहिरा उन्मृजावमृजा द्रव्यान्तरम् आवश्यकार्यम् ॥ **इति मयूरव्यंसकादयः ॥ १५ ॥**

७०४ याजकादिभिश्च २।२।९॥ याजक पूजक परिचारक परिवेषक परिषेचक स्नापक अध्यापक उत्साह उद्वर्तक होतृ भर्तृ रथगणक पत्तिगणक ॥ **इति याजकादयः ॥ १६ ॥**

९०४ राजदन्तादिषु परम् २।२।३१॥ राजदन्तः अग्रेवणम् लिप्तवासितम् नग्नमुषितम् सिक्तसंमृष्टम् मृष्टलुञ्चितम् अवक्लिन्नपक्वम् अर्पितोप्तम् (अर्पितोतम्) उप्तगाढम् उलूखलमुसलम् तण्डुलकिण्वम् दृषदुपलम् आरग्वायनि । आरग्वायनबन्धकी । चित्ररथबाह्लीकम् । अवन्त्यश्मकम् शूद्रार्यम् स्नातकराजानौ विष्वक्सेनार्जुनौ अक्षिभ्रुवम् दारगवम् शब्दार्थौ धर्मार्थौ कामार्थौ अर्थशब्दौ अर्थधर्मौ अर्थकामौ वैकारिमतम् गाजवाजम् । गोजवाजम् । गोपालिधानपूलासम् । गोपालधानीपूलासम् । पूलासकारण्डम् । पूलासककुरण्डम् । स्थूलासम् । स्थूलपूलासम् । उशीरबीजम् । [जिज्ञास्थि] सिञ्जास्थम् । (सिञ्जाश्वत्थम्) । चित्रास्वाती । (चित्रस्वाती) । भार्यापती दंपती जंपती जायापती पुत्रपती पुत्रपशू केशश्मश्रू शिरो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विजु । शिरोबीजम् । शिरोजानु सर्पिर्मधुनी मधुसर्पिषी (आद्यन्तौ) अन्तादी गुणवृद्धी वृद्धिगुणौ ॥ इति राजदन्तादयः ॥ १७ ॥

९०२ वाहिताग्न्यादिषु २।२।३७॥ आहिताग्नि जातपुत्र जातदन्त जातश्मश्रु तैलपीत घृतपीत [मद्यपीत] ऊढभार्य गतार्थ ॥ आकृतिगणोऽयम् । तेन—गडुकण्ठ अस्युद्यत (अस्युद्यत) दण्डपाणिप्रभृतयोऽपि ॥ इत्याहिताग्न्यादयः ॥ १८ ॥

७५२ कडाराः कर्मधारये २।२।३८॥ कडार गडुल खञ्ज खोड काण कुण्ठ खलति गौर वृद्ध भिक्षुक पिङ्ग पिङ्गल (पिङ्गल) तड तनु [जठर] बधिर मठर कञ्ज बर्बर ॥ इति कडारादयः ॥ १९ ॥

५८५ *नौकाकान्नशुकशृगालवर्जेषु* २।३।१७॥ नौ काक अन्न शुक शृगाल ॥ इति नावादयः ॥ २० ॥

५६२ प्रकृत्यादिभ्य उपसंख्यानम् २।३।१८॥ प्रकृति प्राय गोत्र सम विषम द्विद्रोण पञ्चक साहस्र ॥ इति प्रकृत्यादयः ॥ २१ ॥

९१७ गवाश्वप्रभृतीनि च २।४।११॥ गवाश्वम् गवाविकम् गवैडकम् अजाविकम् अजैडकम् कुब्जवामनम् कुब्जकिरातम् पुत्रपौत्रम् श्वचण्डालम् स्त्रीकुमारम् दासीमाणवकम् शाटीपटीरम् शाटीप्रच्छदम् शाटीपट्टिकम् उष्ट्रखरम् उष्ट्रशशम् मूत्रशकृत् मूत्रपुरीषम् यकृन्मेदः मांसशोणितम् दर्भशरम् दर्भपूतीकम् अर्जुनशिरीषम् अर्जुनपुरुषम् तृणोपलम् [तृणोलपम्] दासीदासम् कुटीकुटम् भागवतीभागवतम् ॥ इति गवाश्वप्रभृतीनि ॥ २२ ॥

९२० न दधिपयआदीनि २।४।१४॥ दधिपयसी सर्पिर्मधुनी मधुसर्पिषी ब्रह्मप्रजापती शिववैश्रवणौ स्कन्दविशाखौ परिव्राजककौशिकौ (परिवाट्कौशिकौ) प्रवर्ग्योपसदौ शुक्लकृष्णौ इध्माबर्हिषी दीक्षातपसी [श्रद्धातपसी मेधातपसी] अध्ययनतपसी उलूखलमुसले आद्यवसाने श्रद्धामेधे ऋक्सामे वाङ्मनसे ॥ इति दधिपयआदीनि ॥ २३ ॥

८१७ अर्धर्चाः पुंसि च २।४।३१॥ अर्धर्च गोमय कषाय कार्षापण कुपत कुसप (कुणप) कपाट शङ्ख गूथ यूथ ध्वज कबन्ध पद्म गृह सरक कंस दिवस यूष अन्धकार दण्ड कमण्डलु मण्ड भूत द्वीप द्यूत चक्र धर्म कर्मन् मोदक शतमान यान नख नखर चरण पुच्छ दाडिम हिम रजत सक्तु पिधान सार पात्र घृत सैन्धव औषध आढक चषक द्रोण खलीन पात्रीव षष्टिक वारबाण (वारवारण) प्रोथ कपित्थ [शुष्क] शाल शील शुक्ल (शुल्क) शीधु कवच रेणु [ऋण] कपट शीकर मुसल सुवर्ण वर्ण पूर्व चमस क्षीर कर्ष आकाश अष्टापद मङ्गल निधन निर्यास जृम्भ वृत्त पुस्त बुस्त क्ष्वेडित शृङ्ग निगड [खल] मूलक मधु मूल स्थूल शराव नाल वप्र विमान मुख प्रग्रीव शूल वज्र कटक कण्टक [कर्पट] शिखर कल्क (वल्कल) नटमस्तक (नाटमस्तक) वलय कुसुम तृण पङ्क कुण्डल किरीट [कुमुद] अर्बुद अङ्कुश तिमिर आश्रय भूषण इक्वस (इष्वास) मुकुल वसन्त तटाक (तडाग) पिटक विटङ्क विडङ्ग पिण्याक माष कोश फलक दिन दैवत पिनाक समर स्थाणु अनीक उपवास शाक कर्पास [विशाल] चषाल (चखाल) खण्ड दर विटप [रण बल मक] मृणाल हस्त आर्द्र हल [सूत्र] ताण्डव गाण्डीव मण्डप पटह सौध योध पार्श्व शरीर फल [छल] पुर (पुरा) राष्ट्र अम्बर बिम्ब कुट्टिम मण्डल (कुक्कुट) कुडप ककुद खण्डल तोमर तोरण मञ्चक पञ्चक पुङ्ख मध्य [बाल] छाल वल्मीक वर्ष वस्त्र वसु देह उद्यान उद्योग स्नेह स्तेन [स्तन स्वर] संगम निष्क क्षेम शूक क्षत्रपवित्र [यौवन कलह] मालक (पालक) मूषिक [मण्डल वल्कल] कुज (कुञ्ज) विहार लोहित विषाण भवन अरण्य पुलिन दृढ आसन ऐरावत शूर्प तीर्थ लोमन (लोमश) तमाल लोह दण्डक शपथ प्रतिसर दारु धनुस् मान वर्चस्क कूर्च तण्डक मठ सहस्र ओदन प्रवाल शकट अपराह्ण नीड शकल तण्डुल ॥ इत्यर्धर्चादिः ॥ २४ ॥

१०८६ पैलादिभ्यश्च २।४।५९॥ पैल शालङ्कि सात्यकि सात्यंकामि राहवि रावणि औदञ्चि औदमजि औदमेघि औदव्यज्ञि (औदमज्जि औदभृज्जि) दैवस्थानि पैङ्गलौदायनि राहक्षति भौलिङ्गि राणि औदन्यि औद्गाहमानि औज्जिहानि औदशुद्धि तद्राजाच्चाणः (तद्राज) ॥ आकृतिगणोऽयम् ॥ इति पैलादिः ॥ २५ ॥

१०८८ न तौल्वलिभ्यः २।४।६१॥ तौल्वलि धारणि पारणि रावणि दैलीपि दैवति वार्कलि नैवति (नैवकि) दैवमित्रि (दैवमति) दैवयज्ञि चाफट्टकि बैल्वकि वैकि (वैङ्कि) आनुहारति (आनुराहति) पौष्करसादि आनुरोहति आनुति प्रादोहनि नैमिश्रि प्राडाहति बान्धकि वैशीति आसिनासि आर्हिंसि आसुरी नैमिषि आसिबन्धकि पौष्पि कारेणुपालि वैकर्णि वैरकि वैहति ॥ इति तौल्वल्यादिः ॥ २६ ॥

११४८ यस्कादिभ्यो गोत्रे २।४।६३॥ यस्क लह्य द्रुह्य अयस्थूण (अयःस्थूण) तृणकर्ण सदामत्त कम्बलहार बहिर्योग पर्णाढक कर्णाढक पिण्डीजङ्घ बकसक्थ (वकसक्थ) विश्रि कुद्रि अजवस्ति मित्रयु रक्षोमुख जङ्घारथ उत्कास कटुक मथक (मन्थक) पुष्करद् (पुष्करसद्) विषपुट उपरिमेखल क्रोष्टुकमान (क्रोष्टुमान) क्रोष्टुपाद क्रोष्टुमाय शीर्षमाय खरप पदक वर्षुक भलन्दन भडिल भण्डिल भडित ॥ एते यस्कादयः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११५१ न गोपवनादिभ्यः २।४।६७॥ गोपवन शेयु (शिग्रु) विन्दु भाजन अश्वावतान श्यामाक (श्योनाक) श्यामक श्यापर्ण ॥ **बिदाद्यन्तर्गणोऽयम्** ४।१।१०४॥ **गोपवनादिः ॥ २८ ॥**

११५२ तिककितवादिभ्यो द्वन्द्वे २।४।६८॥ तिककितवाः वङ्खरभण्डीरथाः उपकलमकाः पफकनरकाः बकनखगुदपरिणद्धाः उब्जककुभाः लङ्कशान्तमुखाः उत्तरशलङ्कटाः कृष्णाजिनकृष्णसुन्दराः अष्टककपिष्ठलाः अग्निवेशदशेरुकाः ॥ **एते तिककितवादयः ॥ २९ ॥**

११५३ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे २।४।६९॥ उपक लमक भ्राष्ट्रक कपिष्ठल कृष्णाजिन कृष्णसुन्दर चूडारक आडारक गड्डक उदङ्क सुधायुक अबन्धक पिङ्गलक पिष्टक सुपिष्ट (सुपिष्ठ) मयूरकर्ण खरीजङ्घ शलाथल पतञ्जल पदञ्जल कठेरणि कुषीतक कशकृत्स्न (काशकृत्स्न) निदाघ कलशीकण्ठ दामकण्ठ कृष्णपिङ्गल कर्णक पर्णक जटिरक बधिरक जन्तुक अनुलोम अनुपद प्रतिलोम अपजग्ध प्रतान अनभिहित कमक वराटक लेखाभ्र कमन्दक पिञ्जूलक वर्णक मसूरकर्ण मदाघ कवन्तक कमन्तक कदामत्त दामकण्ठ ॥ **एते उपकादयः ॥ ३० ॥ इति द्वितीयोऽध्यायः ।**

तृतीयोऽध्यायः ।

२६६७ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ३।१।१२॥ भृश शीघ्र चपल मन्द पण्डित उत्सुक सुमनस् दुर्मनस् अभिमनस् उन्मनस् रहस् रोहत् रेहत् संश्वत् तृपत् शश्वत् भ्रमत् वेहत् शुचिस् शुचिवर्चस् अण्डर वर्चस् ओजस् सुरजस् अरजस् ॥ **एते भृशादयः ॥ ३१ ॥**

२६६८ लोहितादिडाज्भ्यः क्यष् ३।१।१३॥ लोहित चरित नील फेन मद्र हरित दास मन्द ॥ **लोहितादिराकृतिगणः ॥ ३२ ॥**

२६७४ सुखादिभ्यः कर्तृवेदनायाम् ३।१।१८॥ सुख दुःख तृप्त कृच्छ्र अस्र आस्र अलीक प्रतीप करुण कृपण सोढ ॥ **इत्येतानि सुखादीनि ॥ ३३ ॥**

२६७८ कण्ड्वादिभ्यो यक् ३।१।२७॥ कण्डूञ् मन्तु हृणीङ् वल्गु असु [मनस्] महीङ् लाट् लेट् इरस् इरज इरञ् दुवस् उषस् वेट् मेधा कुषुभ (नमस्) मगध तन्तस् पम्पस् (पपस्) सुख दुःख [भिक्ष चरण चरम अवर] सपर अरर (भरर्) भिषज् भिष्णज् [अपर आर] इषुध वरण चुरण तुरण भुरण गद्गद एला केला खेला [बेला शेला] लिट् लोट् [लेखा लेख] रेखा द्रवस् तिरस् अगद उरस् तरण (तरिण) पयस् संभूयस् सम्बर ॥ **आकृतिगणोऽयम् ॥ इति कण्ड्वादिः ॥ ३४ ॥**

२८९६ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३।१।१३४॥(१) नन्दिवाशिमदिदूषिसाधिवर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम् । नन्दनः वाशनः मदनः दूषणः साधनः वर्धनः शोभनः रोचनः । सहितपिदमः संज्ञायाम् । सहनः तपनः दमनः जल्पनः रमणः दर्पणः संक्रन्दनः संकर्षणः संहर्षणः जनार्दनः यवनः मधुसूदनः विभीषणः लवणः चित्तविनाशनः कुलदमनः [शत्रुदमनः] ॥ **इति नन्द्यादिः ॥ ३५ ॥** (२) ग्राही उत्साही उद्दासी उद्भासी स्थायी मन्त्री संमर्दी । रक्षश्रुवपशां नौ । निरक्षी निश्रावी निवापी निशायी । याचृव्याहृसंव्याहृव्रजवदवसां प्रतिषिद्धानाम् । अयाची अव्याहारी असंव्याहारी अव्राजी अवादी अवासी । अचामचित्तकर्तृकाणाम् अकारी अहारी अविनायी [विशायी विषायी] विशायी विषयी देशे । विशयी विषयी देशः । अभिभावी भूते । अपराधी उपरोधी परिभवी परिभावी ॥ **इति ग्राह्यादिः ॥ ३६ ॥** (३) पच वच वप वद चल पत नदट् भषट् प्लवट् चरट् गरट् तरट् चोरट् गाहट् सरट् देवट् [दोषट्] जर (रज) मर (मद) क्षम (क्षप) सेव मेष कोप (कोष) मेध नर्त व्रण दर्श सर्प [दम्भ दर्प] जारभार श्वपच ॥ **पचादिराकृतिगणः ॥ ३७ ॥**

२९१९ कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् ३।२।५॥ मूलविभुज नखमुच काकगुह कुमुद महीध्र कुध्र गिध्र ॥ **आकृतिगणोऽयम् ॥ इति मूलविभुजादयः ॥ ३८ ॥**

२९२९ पार्श्वादिषूपसंख्यानम् ३।२।१५॥ पार्श्व उदर पृष्ठ उत्तान अवमूर्धन् ॥ **इति पार्श्वादिः ॥ ३९ ॥**

३१७१ भविष्यति गम्यादयः ३।३।३॥ गमी आगमी भावी प्रस्थायी प्रतिरोधी प्रतियोधी प्रतिबोधी प्रतियायी प्रतियोगी ॥ **एते गम्यादयः ॥ ४० ॥**

३२७२ ॐ संपदादिभ्यः क्विप् (वा.) ३।३।९४॥ संपद् विपद् आपद् प्रतिपद् परिषद् ॥ **एते संपदादयः ॥४१॥**

३२८१ षिद्भिदादिभ्योऽङ् ३।३।१०४॥ भिदा विदारणे । छिदा द्वैधीकरणे । विदा । क्षिपा । गुहा गिर्योषध्योः श्रद्धा मेधा गोधा । आरा शस्त्र्याम् । हारा । कारा बन्धने । क्षिया । तारा ज्योतिषि । धारा प्रपातने । रेखा चूडा पीडा वपा वसा मृजा । कृपेः संप्रसारणं च । कृपा ॥ **इति भिदादिः ॥ ४२ ॥**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३१७३ भीमादयोऽपादाने ३।४।७४॥ भीम भीष्म भयानक वह चर (वह चरु) प्रस्कन्दन प्रतपन (प्रपतन) समुद्र स्रुव स्रुक् वृष्टि (दृष्टि) रक्षः संकसुक (शङ्कु सुक) मूर्ख खलति ॥ **आकृतिगणोऽयम् ॥ इति भीमादिः ॥ ४३ ॥ इति तृतीयोऽध्यायः ।**

चतुर्थोऽध्यायः ।

४५५ अजाद्यतष्टाप् ४।१।४॥ अजा एडका कोकिला चटका अश्वा मूषिका बाला होडा पाका वत्सा मन्दा विलाता पूर्वापिहाणा (पूर्वापहाणा) अपरापहाणा । संभस्त्राजिनशणपिण्डेभ्यः फलात् । सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात् । शूद्रा चामहत्पूर्वा जातिः । क्रुञ्चा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा । मध्यमा पुंयोगेऽपि । मूलान्नञः । दंष्ट्रा ॥ **एतेजादयः ॥४४॥**

३०८ न षट्स्वस्रादिभ्यः ४।१।१०॥ स्वसृ दुहितृ ननान्दृ यातृ मातृ तिसृ चतसृ ॥ **इति स्वस्रादिः ॥ ४५ ॥**

४९३ नित्यं सपत्न्यादिषु ४।१।३५॥ समान एक वीर पिण्ड श्व (शिरी) भ्रातृ भद्र पुत्र । दासाच्छन्दसि ॥ **इति समानादिः ॥ ४६ ॥**

४९९ षिद्गौरादिभ्यश्च ४।१।४१॥ गौर मत्स्य मनुष्य शृङ्ग पिङ्गल हय गवय मुकय ऋष्य [पुट तूण] द्रुण द्रोण हरिण कोकण (काकण) पटर उणक [आमल] आमलक कुवल बिम्ब बदर फर्करक (कर्करक) तर्कार शर्कार पुष्कर शिखण्ड सलद शष्कण्ड सनन्द सुषम सुषव अलिन्द गडुल षाण्डश आढक आनन्द आश्वत्थ सृपाट आखक (आपच्चिक) शष्कुल सूर्य (सूर्मि) शूर्प सूप यूष (पूष) यूथ सूप मेथ वल्लक धातक सल्लक माल्लक मालत साल्वक वेतस वृक्ष (वृस) अतस [उभय] भृङ्ग मह मठ छेद पेश मेद श्वन् तक्षन् अनडुही अनड्वाही । एषणः करणे । देह देहल काकादन गवादन तेजन रजन लवण औद्गाहमानि आद्गाहमानि गौतम (गोतम) [पारक] अयस्थूण (अयःस्थूण) भौरिकि भौलिकि भौलिङ्गि यान मेघ आलम्बि आलजि आलब्धि आलक्षि केवाल आपक आरट नट टोट नोट मूलाट शातन [पोतन] पातन पाठन (पानठ) आस्तरण अधिकरण अधिकार अग्रहायणी (आग्रहायणी) प्रत्यवरोहिणी [सेचन] सुमङ्गलात्संज्ञायाम् । अण्डर सुन्दर मण्डल मन्थर मङ्गल पट पिण्ड [षण्ड] उर्द गुर्द शम सूद औड (आर्द्र) हृद (ह्रद) पाण्ड [भाण्डल] भाण्ड [लोहाण्ड] कदर कन्दर कदल तरुण तलुन कल्माष बृहत् महत् [सोम] सौधर्म । रोहिणी नक्षत्रे । रेवती नक्षत्रे । विकल निष्कल पुष्कल । कटाच्छ्रोणिवचने । पिप्पल्यादयश्च । पिप्पली हरितकी (हरीतकी) कोशातकी शमी वरी शरी पृथिवी क्रोष्टु मातामह पितामह ॥ **इति गौरादिः ॥ ४७ ॥**

५०४ बह्वादिभ्यश्च ४।१।४५॥ बहु पद्धति अञ्चति अङ्कति अंहति शकटि (शकति) । शक्तिः शस्त्रे । शारि वारि राति राधि [शाधि] अहि कपि यष्टि मुनि । इतः प्राण्यङ्गात् । कृदिकारादक्तिनः । सर्वतोऽक्तिन्नर्थादित्येके । चण्ड अराल कृपण कमल विकट विशाल विशङ्कट भरुज ध्वज चन्द्रभागान्नद्याम् (चन्द्रभागा नद्याम्) कल्याण उदार पुराण अहन् क्रोड नख खुर शिखा बाल शफ गुद ॥ **आकृतिगणोऽयम्** । तेन भग गल राग इत्यादि ॥ **इति बह्वादयः ॥ ४८ ॥**

५२८ शार्ङ्गरवाद्यञो ङीन् ४।१।७३॥ शार्ङ्गरव कापटव गौग्गुलव ब्राह्मण बैद गौतम कामण्डलेय ब्राह्मणकृतेय [आनिचेय] आनिधेय आशोकेय वात्स्यायन मौञ्जायन कैकस काप्य (काव्य) शैव्य एहि पर्येहि आश्मरथ्य औदपान अराल चण्डाल वतण्ड । भोगवद्गौरिमतोः संज्ञायां घादिषु [६।३।४३] नित्यं ह्रस्वार्थम् । नृनरयोर्वृद्धिश्च ॥ **इति शार्ङ्गरवादिः ॥ ४९ ॥**

१२०२ क्रौड्यादिभ्यश्च ४।१।८०॥ क्रौडि लाडि व्याडि आपिशलि आपक्षिति चौपयत चैटयत (वैटयत) सैकयत बैल्वयत सौधातकि । सूत युवत्याम् । भोज क्षत्रिये । यौतकि कौटि भौरिकि भौलिकि [शाल्मलि] शालास्थलि कापिष्ठलि गौकक्ष्य ॥ **इति क्रौड्यादिः ॥ ५० ॥**

१०७६ अश्वपत्यादिभ्यश्च ४।१।८४॥ अश्वपति [ज्ञानपति] शतपति धनपति गणपति [स्थानपति यज्ञपति] राष्ट्रपति कुलपति गृहपति [पशुपति] धान्यपति धन्वपति [बन्धुपति धर्मपति] सभापति प्राणपति क्षेत्रपति ॥ **इत्यश्वपत्यादिः ॥ ५१ ॥**

१०८० उत्सादिभ्योऽञ् ४।१।८६॥ उत्स उदपान विकर विनद महानद महानस महाप्राण तरुण तलुन । वष्कयासे । पृथिवी [धेनु] पङ्क्ति जगती त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर ग्रीष्म पीलुकुण । उदस्थान देशे । पृषदंश भल्लकीय रथंतर मध्यंदिन बृहत् महत् सत्वत् कुरु पञ्चाल इन्द्रावसान उष्णिह् ककुभ् सुवर्ण देव ग्रीष्मादच्छन्दसि ॥ **इत्युत्सादिः ॥ ५२ ॥**

१०९८ बाह्वादिभ्यश्च ४।१।९६॥ बाहु उपबाहु उपवाकु निवाकु शिवाकु वटाकु उपनिन्दु (उपबिन्दु) वृषली वृकला चूडा बलाका मूषिका कुशला भगला (छगला) ध्रुवका [ध्रुवका] सुमित्रा दुर्मित्रा पुष्करसद् अनुहरत् देवशर्मन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निशर्मन् [भद्रशर्मन्] सुशर्मन् कुनामन् (सुनामन्) पञ्चन् सप्तन् अष्टन् । अमितौजसः सलोपश्च । सुधावत् उदञ्चु शिरस् माष शराविन् मरीचि क्षेमवृद्धिन् शृङ्खलतोदिन् खरनादिन् नगरमर्दिन् प्राकारमर्दिन् लोमन् अजीगर्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम रक्तम् (उदङ्क) उदकः संज्ञायाम् । संभूयोम्भसोः सलोपश्च ॥ **आकृतिगणोऽयम् ॥** तेन सात्त्वकिः सात्यकिः जाङ्गिः ऐन्दशर्भिः आजधेनविः इत्यादि ॥ **इति बाह्वादयः ॥ ५३ ॥**

११०१ गोत्रे कुञ्जादिभ्यश्च्फञ् ।४।१।९८॥ कुञ्ज ब्रध्न शङ्ख भस्मन् गण लोमन् शठ शाक शुण्डा शुभ विपाश् स्कन्द स्कम्भ ॥ **इति कुञ्जादिः ॥ ५४ ॥**

११०३ नडादिभ्यः फक् ४।१।९९॥ नड चर (वर) बक मुञ्ज इतिक इतिश उपक (एक) लमक शलङ्कु शलङ्कं च । सप्तल वा जप्य तिक । अग्निशर्मन्वृषगणे । प्राण नर सायक दास मित्र द्वीप पिङ्गर पिङ्गल किङ्कर किङ्कल (कातर) कातल काश्यप (कुश्यप) काश्य काल्य (काव्य) अज अमुष्य (अमुष्म) कृष्णरणौ ब्राह्मणवासिष्ठे । अमित्र लिगु चित्र कुमार क्रोष्टु क्रोष्टं च । लोह दुर्ग स्तम्भ शिंशपा अग्र तृण शकट सुमनस् सुमत मिमत ऋच् जलंधर अध्वर युगंधर हंसक दण्डिन् हस्तिन् [पिण्ड] पञ्चाल चमसिन् सुकृत्य स्थिरक ब्राह्मण चटक बदर अश्वल खरप लङ्क इन्ध अस्त्र कामुक ब्रह्मदत्त उदुम्बर शोण अलोह दण्डप ॥ **इति नडादिः ॥ ५५ ॥**

११०८ अनृष्यानन्तर्ये बिदादिभ्योऽञ् ४।१।१०४॥ बिद उर्व (उर्व) कश्यप कुशिक भरद्वाज उपमन्यु किलात कन्दर्प (किंदर्भ) विश्वानर ऋषिषेण (ऋष्टषेण) (ऋष्टिषेण) ऋतभाग हर्यश्व प्रियक आपस्तम्ब कूचवार शरद्वत् शुनक (शुनक्) धेनु गोपवन शिग्रु बिन्दु [भोगक] भाजन (शमिक) अश्वावतान श्यामाक श्यामक (श्यावलि) श्यापर्ण हरित किंदास वह्यस्क अर्कजूष (अर्कलूष) वध्योग विष्णुवृद्ध प्रतिबोध रचित (रथीतर) रथन्तर गविष्ठिर निषाद (शबर अलस) मठर (मृडाकु) सृपाकु मृदु पुनर्भू पुत्र दुहितृ ननान्द । परस्त्री परशुं च ॥ **इति बिदादिः ॥ ५६ ॥**

११०९ गर्गादिभ्यो यञ् ४।१।१०५॥ गर्ग वत्स । वाजासे । संकृति अज व्याघ्रपात् विदभृत् प्राचीनयोग (अगस्ति) पुलस्ति चमस रेभ अग्निवेश शङ्ख शट शक एक धूम अवट मनस् धनंजय वृक्ष विश्वावसु जरमाण लोहित शंसित बभ्रु वल्गु मण्डु गण्डु शङ्कु लिगु गुहलु मन्तु मङ्क्षु अलिगु जिगीषु मनु तन्तु मनायी सूनु कथक कन्थक ऋक्ष तृक्ष (वृक्ष) [तनु] तरुक्ष तलुक्ष तण्ड वतण्ड कपिकत (कपि कत) कुरुकत अनडुह कण्व शकल गोकक्ष अगस्त्य कण्डिनी यज्ञवल्क पर्णवल्क अभयजात विरोहित वृषगण रहूगण शण्डिल वर्णक (चणक) चुलुक मुद्गल मुसल जमदग्नि पराशर जतूकर्ण (जातूकर्ण) महित मन्त्रित अश्मरथ शर्कराक्ष पूतिमाष स्थूरा अदरक (अररक) एलाक पिङ्गल कृष्ण गोलन्द उलूक तितिक्ष भिषज (भिषज्) [भिष्णज] भडित भण्डित दल्भ चेकित चिकित्सित देवहू इन्द्रहू एकलु पिप्पलु बृहदग्नि [सुलोहिन्] सुलाभिन् उक्थ कुटीगु ॥ **इति ॥ गर्गादिः ॥ ५७ ॥**

१११५ अश्वादिभ्यः फञ् ४।१।११०॥ अश्व अश्मन् शङ्ख शूद्रक विद पुट रोहिण खर्जूर (खजूर) [खञ्जार वस्त] पिञ्जूल भडिल भण्डिल भडित भण्डित [प्रकृत रामोद] क्षान्त [काश तीक्ष्ण गोलाङ्क अर्क स्वर स्फुट चक्र श्रविष्ठ] पविन्द पवित्र गोमिन् श्याम धूम धूम्र वाग्मिन् विश्वानर कुट । शप आत्रेये । जन जड खड ग्रीष्म अर्ह कित विशंप विशाल गिरि चपल चुप दासक वैल्य (वैल्व) प्राच्य [धर्म्य] आनडुह्य । पुंसि जाते । अर्जुन [प्रहृत] सुमनस् दुर्मनस् मन (मनन) [प्रान्त] ध्वन । आत्रेय भरद्वाजे । भरद्वाज आत्रेये । उत्स आतव कितव [वद धन्य पाद] शिव खदिर ॥ **इत्यश्वादिः ॥ ५८ ॥**

१११७ शिवादिभ्योऽण् ४।१।११२॥ शिव प्रोष्ठ प्रोष्ठिक चण्ड जम्भ भूरि दण्ड कुठार ककुभ् (ककुभा) अनभिम्लान कोहित सुख संधि मुनि ककुत्स्थ कहोड कोहड कहूय कहय रोद कपिञ्जल (कुपिञ्जल) खञ्जन वतण्ड तृणकर्ण क्षीरहद जलहद परिल (पथिक) पिष्ट हैहय [पार्षिका] गोपिका कपिलिका जटिलिका बधिरिका मञ्जीरक मजिरक वृष्णिक खञ्जास खञ्जाद खञ्जार खञ्जाल [कर्मार] रेख लेख आलेखन विश्रवण रवण वर्तनाक्ष ग्रीवाक्ष [पिटक विटप] पिटाक तृक्षाक नभक ऊर्णनाभ जरत्कारु [पृथा उत्क्षेप] पुरोहितिका सुरोहितिका सुरोहिका आर्यश्वेत (अर्यश्वेत) सुपिष्ट मसुरकर्ण मयूरकर्ण [खर्जूरकर्ण] कदूरक तक्षन् ऋष्टिषेण गङ्गा विपाश यस्क लह्य द्रुह्य अयस्थूण तृणकर्ण (तृण कर्ण) पर्ण भलन्दन विरूपाक्ष भूमि इला सपत्नी (इलासपत्नी) । द्व्यचो नद्याः । त्रिवेणी त्रिवणं च ॥ **इति शिवादिः ॥ आकृतिगणः ॥ ५९ ॥**

११२८ शुभ्रादिभ्यश्च ४।१।१२३॥ शुभ्र विष्ट पुर (विष्टपुर) ब्रह्मकृत शतद्वार शलाथल शलाकाभ्रू लेखाभ्रू (लेखाभ्र) विकंसा (विकास) रोहिणी रुक्मिणी धर्मिणी दिश् शालूक अजबस्ति शकंधि विमातृ विधवा शुक विश देवतर शकुनि शुक्र उग्र ज्ञातल (शातल) (शतल) बन्धकी सृकण्डु विश्रि अतिथि गोदन्त कुशाम्ब मकष्टु शाताहर पवष्टुरिक सुनामन् । लक्ष्मणश्यामयोर्वासिष्ठे । गोधा कृकलास अणीव प्रवाहण भरत (भारत) भरम मृकण्डु कर्पूर इतर अन्यतर

९१ सि० कौ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आलीढ. सुदन्त सुदक्ष सुवक्षस् सुदामन् कद्रु तुद अकशाय कुमारिका कुठारिका किशोरिका अम्बिका जिह्माशिन् परिधि वायुदत्त शकल शलाका खड्डूर कुबेरिका अशोका गन्धपिङ्गला खडोन्मत्ता अनुदृष्टिन् (अनुदृष्टि) जरतिन् बलीवर्दिन् विप्र बीज जीव श्वन् अश्मन् अश्व अजिर ॥ **इति शुभ्रादिः ॥ आकृतिगणः ॥ ६० ॥**

११३३ कल्याण्यादीनामिनङ् च ४।१।१२६॥ कल्याणी सुभगा दुर्भगा बन्धकी अनुदृष्टि अनुसृति (अनुसृष्टि) जरती बलीवर्दी ज्येष्ठा कनिष्ठा मध्यमा परस्त्री ॥ **इति कल्याण्यादिः ॥ ६१ ॥**

११४५ गृष्ट्यादिभ्यश्च ४।१।१३६॥ गृष्टि हृष्टि बलि हलि विश्रि कुद्रि अजवस्ति मित्रयु ॥ **इति गृष्ट्यादिः ॥ ६२ ॥**

११७१ रेवत्यादिभ्यष्ठक् ४।१।१४६॥ रेवती अश्वपाली मणिपाली द्वारपाली वृकवञ्चिन् वृकबन्धु वृकग्राह कर्णग्राह दण्डग्राह कुक्कुटाक्ष (ककुदाक्ष) चामरग्राह ॥ **इति रैवत्यादिः ॥ ६३ ॥**

११७७ कुर्वादिभ्यो ण्यः ४।१।१५१॥ कुरु गर्गर मङ्गुष अजमार रथकार वावदूक । सम्राजः क्षत्रिये । कवि मति (विमति) कापिञ्जलादि वाक् वामरथ पितृमत् इन्द्रजाली एजि वातकि दामोष्णीषि गणकारि कैशोरि कुट शालाका (शलाका) मुर पुर एरका शुभ्र अभ्र दर्भ केशिनी । वेनाच्छन्दसि । शूर्पणाय श्यावनाय श्यावरथ श्यावपुत्र सत्यकार वडभीकार पथिकार मूढ शकन्धु शङ्कु शाक शालिन् शालीन कर्तृ हर्तृ इन पिण्डी तक्षन् । वामरथस्य कण्वादिवत्स्वरवर्जम् ॥ **इति कुर्वादिः ॥ ६४ ॥**

११८० तिकादिभ्यः फिञ् ४।१।१५४॥ तिक कितव संज्ञाबालशिख (संज्ञा बाला शिखा) उरस् शाठ्य सैन्धव यमुन्द रूप्य ग्राम्य नील अमित्र गौकक्ष गोकक्ष्य (गौकक्ष्य) कुरु देवरथ तैतिल औरस् कौरव्य भौरिकि भौलिकि चौपयत चैटयत शीकयत क्षैतयत वाजवत चन्द्रमस् शुभ गङ्गा वरेण्य सुपामन् आरब्ध वाह्य खल्पक वृष लोमक वादन्य उदन्य यज्ञ ॥ **इति तिकादिः ॥ ६५ ॥**

११८४ वाकिनादीनां कुक्च ४।१।१५८॥ वाकिन गौधेर कार्कश काक लङ्का । चर्मिवर्मिणोर्नलोपश्च ॥ **इति वाकिनादिः ॥ ६६ ॥**

११९६ कम्बोजाल्लुक् ४।१।१७५॥ कम्बोज चोल केरल शक यवन ॥ **इति कम्बोजादिः ॥ ६७ ॥**

११९९ न प्राच्य(१)भर्गादि(२)यौधेयादिभ्यः ४।१।१७८॥ (१) भर्ग करूश केकय कश्मीर साल्व सुस्थाल उरस् कौरव्य ॥ **इति भर्गादिः ॥ ६८ ॥** (२) यौधेय शौक्रेय शौभ्रेय ज्यावाणेय धौर्तेय धार्तेय त्रिगर्त भरत उशीनर ॥ **इति यौधेयादिः ॥ ६९ ॥**

१२४६ भिक्षादिभ्योऽण् ४।२।३८॥ भिक्षागर्भिणी (भिक्षा गर्भिणी) क्षेत्र करीष अङ्कार (अङ्गार) चर्मिन् धर्मिन् सहस्र युवति पदाति पद्धति अथर्वन् दक्षिणा (भूत) भरत विषय श्रोत्र ॥ **इति भिक्षादिः ॥ ७० ॥**

१२५६ खण्डिकादिभ्यश्च ४।२।४५॥ खण्डिका वडवा । क्षुद्रकमालवात् सेनासंज्ञायाम् । भिक्षुक शुक उलूक श्वन् अहन् युगवरत्रा (युगवरत्र) हलबन्धा (हलबन्ध) ॥ **इति खण्डिकादिः ॥ ७१ ॥**

१२६० पाशादिभ्यो यः ४।२।४९॥ पाश तृण धूम वात अङ्गार पाटल पोत गल पिटक पिटाक शकट हल नट वन ॥ **इति पाशादिः ॥ ७२ ॥**

१२६२ ॐ खलादिभ्य इनिर्वक्तव्यः ॐ ४।२।५१॥ खल डाक कुटुम्ब शाक कुण्डलिनी ॥ **इति खलादिराकृतिगणः ॥ ७३ ॥**

१२६४ राजन्यादिभ्यो वुञ् ४।२।५३॥ राजन्य आनृत बाभ्रव्य शालङ्कायन दैवयातव (दैवयात) [अव्रीड वरत्रा] जालंधरायण [राजायन] तेलु आत्मकामेय अम्बरीषपुत्र वसाति बैल्ववन शैलूष उदुम्बर तीव्र बैल्वल आर्जुनायन संप्रिय दाक्षि ऊर्णनाभ ॥ **इति राजन्यादिराकृतिगणः ॥ ७४ ॥**

१२६५ (१)भौरिक्याद्यै(२)षुकार्यादिभ्यो विधलभक्तलौ ४।२।५४॥ (१) भौरिकी भौलिकी चौपयत चौटयत (चैटयत) काणेय वाणिजक वाणिकाज्य (वालिकाज्य) सैकयत वैकयत ॥ **इति भौरिक्यादिः ॥ ७५ ॥** (२) ऐषुकारि सारस्यायन (सारसायन) चान्द्रायण द्व्याक्षायण त्र्याक्षायण औडायन जौलायन खाडायन दासमित्र (दासमित्रि) दासमित्रायण शौद्रायण दाक्षायण शापण्डायन (शायण्डायन) तार्क्ष्यायण शौभ्रायण सौवीर [सौवीरायण] शपण्ड (शयण्ड) शौण्ड शयाण्डि (शयाण्ड) वैश्वमानव वैश्वध्येनव (वैश्वधेनव) नड तुण्डदेव विश्वदेव [सापिण्डि] ॥ **इत्यैषुकार्यादिः ॥७६॥**

१२७२ क्रतूक्थादिसूत्रान्ताट्ठक् ४।२।६०॥ उक्थ लोकायत न्यास न्याय पुनरुक्त निरुक्त निमित्त द्विपदा ज्योतिष अनुपद अनुकल्प यज्ञ धर्म चर्चा क्रमेतर श्लक्ष (श्लक्ष्ण)(श्लक्षण) संहिता पदक्रम संघट (संघट्ट) वृत्ति परिषद् संग्रह गण [गुण] आयुर्वेद (आयुर्वेद) ॥ **इत्युक्थादिः ॥ ७७ ॥**

१२७३ क्रमादिभ्यो वुन् ४।२।६१॥ क्रम पद शिक्षा मीमांसा सामन् ॥ **इति क्रमादिः ॥ ७८ ॥**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२७५ वसन्तादिभ्यष्ठक् ४।२।६३॥ वसन्त ग्रीष्म वर्षा शरद् शरत् हेमन्त शिशिर प्रथम गुण (चरम्) चरम अनुगुण अथर्वन् अथर्वण ॥ **इति वसन्तादिः** ॥ ७९ ॥

१२८९ संकलादिभ्यश्च ४।२।७५॥ संकल पुष्कल उत्तम उडुप उद्वेप उत्पुट कुम्भ निधान सुदक्ष सुदत्त सुभूत सुपूत सुनेत्र सुमङ्गल सुपिङ्गल सूत सिकत पूतिका (पूतिक) पूलास कूलास पलाश निवेश (गवेश) (गवेष) गम्भीर इतर आन् अहन् लोमन् वेमन् चरण (वरुण) बहुल सद्योज अभिषिक्त गोमृत् राजभृत् भल्ल मल्ल माल ॥ **इति संकलादिः** ॥८०॥

१२९१ सुवास्त्वादिभ्योऽण् ४।२।७७॥ सुवास्तु (सुवस्तु) वर्णू भण्डु खण्डु (सेवानिन्) सेवालिन् कर्पूरिन् शिखण्डिन् गर्त कर्कश शकटीकर्ण (शकटी कर्ण) कृष्णकर्ण [कर्क] कर्कन्धुमती गोह अहिसक्थ ॥ **इति सुवास्त्वादिः** ॥८१॥

१२९४ वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४।२।८०॥ (१) अरीहण (अहीरण) द्रुघण द्रुहण भलग (भगल) उलन्द किरण सांपरायण क्रौष्ट्रायण (क्रोष्ट्रायण) औष्ट्रायण त्रैगर्तायन मैत्रायण भास्त्रायण वैमतायण (वैमतायन) गौमतायन सौमतायन (सौमनायन) सौसायन धौमतायन सौमायन ऐन्द्रायण कौद्रायण (कौन्द्रायण) खाडायन शाण्डिल्यायन रायस्पोष विपथ विपाश उद्दण्ड उदञ्चन खाण्डवीरण वीरण काशकृत्स्न (कशकृत्स्न) जाम्बवत शिंशपा रैवत (रेवत) बिल्व सुयज्ञ शिरीष बधिर जम्बु खदिर सुशर्मन् (सशर्मन्) (भलतृ) दलतृ भलन्दन खण्डु कलन (कनल) (वालन) यज्ञदत्त ॥ **इत्यरीहणादिः** ॥८२॥ (२) कृशाश्व अरिष्ट अरिश्म वेश्मन् विशाल लोमश रोमश लोमक रोमक शबल कूट वर्चल सुवर्चल सुकर सूकर प्रातर (प्रतर) सदृश पुरग पुराग सुख (मुख) धूम अजिन विनत अवनत कुविद्यास (कुविद्यास) पराशर अरुस् अयस् मौद्गल्या- कर (मौद्गल्युकर) ॥ **इति कृशाश्वादिः** ॥ ८३ ॥ (३) ऋश्य (ऋष्य) ह्रश्य न्यग्रोध शर निलीन [निवास निवात] निधान निबन्धन (निबन्ध) [विबद्ध] परिगूढ [उपगूढ] असनि सित मत वेश्मन् उत्तराश्मन् अश्मन् स्थूल बाहु खदिर शर्करा अनडुह (अनडुह्) अरडु परिवंश वेणु वीरण (वरिण) खण्ड दण्ड परिवृत्त कर्दम अंशु ॥ **इत्यृश्यादिः** ॥८४॥ (४) कुमुद शर्करा न्यग्रोध इक्कट संकट कंकट गर्त बीज परिवाप निर्यास शकट कच मधु शिरीष अश्व अश्वत्थ बल्वज यवास कूप विकङ्कत दशग्राम ॥ **इति कुमुदादिः** ॥ ८५ ॥ (५) काश पाश अश्वत्थ पलाश पीयूक्षा चरण वास नड वन कर्दम कच्छूल कङ्कट गुह बिस तृण कर्पूर बर्बर मधुर ग्रह कपित्थ जतु सीपाल ॥ **इति काशादिः** ॥ ८६ ॥ (६) तृण नड मूल वन पर्ण वर्ण वराण बिल (विल) पुल फल अर्जुन अर्ण सुवर्ण बल चरण बुस ॥ **इति तृणादिः** ॥ ८७ ॥ (७) प्रेक्षा फलका (हलका) बन्धुका ध्रुवका क्षिपका न्यग्रोध इक्कट कङ्कट संकट कट कूप बुक पुक पुट मह परिवाप यवाष धुवका गर्त कूपक हिरण्य ॥ **इति प्रेक्षादिः** ॥ ८८ ॥(८) अश्मन् (अश्मन्) यूथ ऊष मीन मद (नद) दर्भ वृन्द गुद खण्ड नग शिखा कोट पाम कन्द कान्द कुल गह्व गुड (गुण) कुण्डल पीन गुह ॥ **इत्यश्मादिः** ॥ ८९ ॥ (९) सखि अग्निदत्त वायुदत्त सखिदत्त [गोपिल] भल्लपाल (भल्ल पाल) चक्र चक्रवाक छगल अशोक करवीर वासव वीर पूर वज्र कुशीरक शीहर (सीहर) सरक सरस समर समल सुरस रोह तमाल कदल सप्तल ॥ **इति सख्यादिः** ॥ ९० ॥ (१०) संकाश कपिल कश्मीर [समीर] सूरसेन सरक सूर। सुपन्थिन्पन्थ च । यूप (यूथ) अंश अङ्ग नासा पलित अनु नाश (अनुनाश) अश्मन् कूट मलिन दश कुम्भ शीर्ष चिरन्त (विरत) समल सीर पञ्जर मन्थ नल रोमन् लोमन् पुलिन सुपरि कटिप सकर्णक वृष्टि तीर्थ अगस्ति विकर नासिका ॥ **इति संकाशादिः** ॥९१॥ बल चुल नल दल वट लकुल उरल पुल (पुल) मूल उलडुल (उल डुल) वन कुल (वनकुल) ॥ **इति बलादिः** ॥९२॥ (१२) तुक्ष पक्ष तुष कुण्ड अण्ड कम्बलिका वलिक (बलिक) चित्र अस्ति । पथः पन्थ च । कुम्भ सीरक सरक सकल सरस समल अतिश्वन् रोमन् लोमन् हस्तिन् मकर लोमक शीर्ष निवात पाक सहक (सिंहक) अङ्कुश सुवर्णक हंसक हिंसक कुत्स बिल (विल) खिल यमल हस्त कला सकर्णक ॥ **इति पक्षादिः** ॥९३॥ (१३) कर्ण वसिष्ठ अर्क अर्कलूष द्रुपद आनडुह्य पाञ्चजन्य स्फिग (स्फिज्) कुम्भी कुन्ती जित्वन् जीवन्त कुलिश आण्डीवत् (आण्डीवत) जव जैत्र आकन (आनक) ॥ **इति कर्णादिः** ॥ ९४ ॥ (१४) सुतंगम मुनिचित विप्रचित्त महाचित्त महापुत्र स्वन श्वेत गडिक (खडिक) शुक्र विग्र (विप्र) बीजावापिन् (बीजवापिन्) (बीज वापिन्) अर्जुन श्वन् अजिर जीव (खण्डित) खण्डिन कर्ण विग्रह ॥ **इति सुतंगमादिः** ॥ ९५ ॥ (१५) प्रगदिन् मगदिन् मददिन् कविल खण्डित गदित चूडार मडार मन्दार कोविदार ॥ **इति प्रगद्यादिः** ॥ ९६ ॥ (१६) वराह पलाशा (पलाश) शेरिष (शेरीष) (शिरीष) पिनद्ध निबद्ध बलाह स्थूल विदग्ध [विजग्ध] विभग्न [निमग्न] बाहु खदिर शर्करा ॥ **इति वराहादिः** ॥ ९७ ॥ (१७) कुमुद गोमथ रथकार दशग्राम अश्वत्थ शाल्मलि [शिरीष] मुनिस्थल कुण्डल (कुट) कूट मधुकर्ण घासकुन्द शुचिकर्ण ॥ **इति कुमुदादिः** ॥ ९८ ॥

१३०३ वरणादिभ्यश्च ४।२।८२॥ वरणा शृङ्गी शाल्मलि शुण्डि (शुण्डी) शयाण्डी पर्णी ताम्रपर्णी गोद आलिङ्ग्यायन जालपदी (जानपदी) जम्बू पुष्कर चम्पा पम्पा वल्गु उज्जयिनी गया मथुरा तक्षशिला उरसा गोमती वलभी ॥ **इति वरणादिः** ॥ ९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३०७ मध्वादिभ्यश्च ४।२।८६॥ मधु बिस स्थाणु वेणु कर्कन्धु शमी करीर हिम किशरा शर्याण मरुत् वार्दाली शर इष्टका आसुति शक्ति आसन्दी शकल शलाका आमिषी इक्षु रोमन् रुष्टि रुष्य तक्षशिला कड (खड) वट वेट ॥ **इति मध्वादिः ॥ १०० ॥**

१३११ उत्करादिभ्यश्छः ४।२।९०॥ उत्कर संफल शफर पिप्पल पिप्पलीमूल अश्मन् सुवर्ण खलाजिन तिक कितव अणक त्रैवण पिचुक अश्वत्थ काश क्षुद भस्त्रा शाल जन्या अजिर चर्मन् उत्क्रोश क्षान्त खदिर शूर्पणाय श्यावनाय नैवाकव तृण वृक्ष शाक पलाश विजिगीषा अनेक आतप फल संपर अर्क गर्त अग्नि वैराणक इडा अरण्य निशान्त पर्ण (पण) नीचायक शंकर अवरोहित क्षार विशाल वेत्र अरीहण खण्ड वातागार मन्त्रणार्ह इन्द्रवृक्ष नितान्तवृक्ष (नितान्तावृक्ष) आर्द्रवृक्ष ॥ **इत्युत्करादिः ॥ १०१ ॥**

१३१२ नडादीनां कुक्च ४।२।९१॥ नड प्लक्ष बिल्व वेणु वेत्र वेतस इक्षु काष्ठ कपोत तृण । क्रुञ्चा ह्रस्वत्वं च । तक्षन्नलोपश्च ॥ **इति नडादिः ॥ १०२ ॥**

१३१७ कत्र्यादिभ्यो ढकञ् ४।२।९५॥ कत्रि उम्भि पुष्कर पुष्कल मोदन कुम्भी कुण्डिन नगरी माहिष्मती वर्मती उख्या ग्राम । कुड्याया यलोपश्च ॥ **इति कत्र्यादिः ॥ १०३ ॥**

१३१९ नद्यादिभ्यो ढक् ४।२।९७॥ नदी मही वाराणसी श्रावस्ती कौशाम्बी वनकौशाम्बी (वनकोशाम्बी) काशपरी काशफारी (काशफरी) खादिरी पूर्वनगरी पाठा माया शाल्वा दार्वा (शाल्वदार्वा) सेतकी । वडवाया वृषे ॥ **इति नद्यादिः ॥ १०४ ॥**

१३३३ प्रस्थोत्तरपदपलद्यादिकोपधादण् ४।२।११०॥ पलदी परीषद् रोमक वाहीक कलकीट बहुकीट जालकीट (जालकटि) कमलकीट कमलकीकर कमलभिदा गौष्ठी नैकती परिखा शूरसेन गोमती पटच्चर उदपान यकृल्लोम ॥ **इति पलद्यादिः ॥ १०५ ॥**

१३४२ काश्यादिभ्यष्ठञ्ञिठौ ४।२।११६॥ काशि चेदि (वेदि) सांयाति संवाह अच्युत मोदमान शकुलाद हस्ति-कर्षू कुनामन् (हिरण्या) हिरण्य करण गोवासन भारङ्गी अरिंदम अरित्र देवदत्त दशग्राम शौवावतान युवराज उपराज देवराज मोदन सिन्धुमित्र दासमित्र सुधामित्र सोममित्र छागमित्र साधमित्र । (सधमित्र) । आपदादिपूर्वपदात्का-लान्तात् । आपद् ऊर्ध्वं तत् ॥ **इति काश्यादिः ॥ १०६ ॥**

१३५३ धूमादिभ्यश्च ४।२।१२७॥ धूम षण्ड (षडण्ड) शशादन अर्जुनाव माहकस्थली आनकस्थली माहिषस्थली मानस्थली अट्टस्थली मद्रकस्थली समुद्रस्थली दाण्डायनस्थली राजस्थली विदेह राजगृह सात्रासाह शष्प मित्रवर्ध्र (मित्रवर्ध) (मज्जाली) भक्षाली मद्रकूल आजीकूल द्व्याहव त्र्याहव (द्व्याहाव) त्र्यहव (त्र्याहव) (त्र्याहाव) संस्फाय बर्बर वर्ज्य गर्त आनर्त माठर पाथेय घोष पल्ली आराज्ञी धार्तराज्ञी आवय तीर्थ । कूलात्सौवीरेषु। समुद्रान्नावि मनुष्ये च । (सनुद्रान्नावि मनुष्ये च) कुक्षि अन्तरीप द्वीप अरुण (अरण) उज्जयनी पट्टार दक्षिणापथ साकेत ॥ **इति धूमादिः ॥ १०७ ॥**

१३५९ कच्छादिभ्यश्च ४।२।१३३॥ कच्छ सिन्धु वर्ण वर्णु गन्धार मधुमत् कम्बोज कश्मीर साल्व कुरु अनुशण्ड (अनुषण्ड) द्वीप अनूप अजवाह विजापक कलूतर रङ्कु ॥ **इति कच्छादिः ॥ १०८ ॥**

१३६४ गहादिभ्यश्च ४।२।१३८॥ गह अन्तस्थ सम विषम मध्य 'मध्यंदिन चरणे' उत्तम अङ्ग वङ्ग मगध पूर्वपक्ष अपरपक्ष अधमशाख उत्तमशाख एकशाख समानशाख समानग्राम एकग्राम एकवृक्ष एकपलाश इष्वग्र इष्वनीक अवस्यन्दन कामप्रस्थ शाडिकाडायनि (खाडायन) काठेरणि लावेरणि सौमित्रि शैशिरि (शौशिरि)आसुत (आसुत्) दैवशर्मि श्रौति आर्हिंसि आमित्रि व्याडि वैजि आध्यश्वि आनृशसि (आनृशंसि) शौङ्गि आग्निशर्मि भौजि वाराटकि (वराटकी) वाल्मिकि (वाल्मीकि) क्षैमवृद्धि आश्वत्थि औद्गाहमानि ऐकविन्दवि दन्ताग्र हंस तत्वग्र (तन्त्वग्र) उत्तर अन्तर (अनन्तर) मुखपार्श्वतसोर्लोपः । जनपरयोः कुक्च देवस्य च । वेणुकादिभ्यश्छण् ॥ **इति गहादिः ॥ आकृतिगणः ॥ १०९ ॥**

१३८९ संधिवेलाद्यृतुनक्षत्रेभ्योऽण् ४।३।१६॥ संधिवेला संध्या अमावास्या त्रयोदशी चतुर्दशी पञ्चदशी पौर्णमासी प्रतिपत् । संवत्सरात्फलपर्वणोः ॥ **इति संधिवेलादिः ॥ ११० ॥**

१४३१ दिगादिभ्यो यत् ४।३।५४॥ दिश् वर्ग पूग (पूगा) गण पक्ष धाय्य मित्र मेधा अन्तर पथिन् रहस् अलीक उखा साक्षिन् देश आदि अन्त मुख जघन मेघ यूथ । उदकात्संज्ञायाम् । ज्ञाय (न्याय) वंश वेश काल आकाश ॥ **इति दिगादिः ॥ १११ ॥**

परिमुखादिभ्यश्च ४।३।५९॥ परिमुख परिहनु पर्योष्ठ पर्युलूखल परिसीर उपसीर उपस्थूण उपकलाप अनुपथ अनुपद अनुगङ्ग अनुतिल अनुसीत अनुसाय अनुसीर अनुमाष अनुयव अनुयूप अनुवंश प्रतिशाख ॥ **इति परिमुखादिः ॥ ११२ ॥**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१४३९ ※ अध्यात्मादिभ्यश्च ※ ४।३।६०॥ अध्यात्म अधिदेव अधिभूत इहलोक परलोक ॥ इत्यध्यात्मादिः ॥ आकृतिगणः ॥ ११३ ॥

१४५४ ऋगयनादिभ्यः ४।३।७३॥ ऋगयन पदव्याख्यान छन्दोमान छन्दोभाषा छन्दोविचिति न्याय पुनरुक्त निरुक्त व्याकरण निगम वास्तुविद्या क्षत्रविद्या अङ्गविद्या विद्या उत्पाद उत्पात उद्याव संवत्सर मुहूर्त उपनिषद् निमित्त शिक्षा भिक्षा ॥ इत्यृगयनादिः ११४ ॥

१४५७ शुण्डिकादिभ्योऽण् ४।३।७६॥ शुण्डिक कृकण कृपण स्थण्डिल उदपान उपल तीर्थ भूमि तृण पर्ण ॥ इति शुण्डिकादिः ॥ ११५ ॥

१४७४ शण्डिकादिभ्यो ञ्यः ४।३।९२॥ शण्डिक सर्वसेन सर्वकेश शक शट रक शङ्ख बोध ॥ इति शण्डिकादिः ॥ ११६ ॥

१४७५ (१)सिन्धु(२)तक्षशिलादिभ्योऽणञौ ४।३।९३॥ (१) सिन्धु वर्णु मधुमत् कम्बोज साल्व कश्मीर गन्धार किष्किन्धा उरसा दरद (दरद्) गन्दिका ॥ इति सिन्ध्वादिः ॥ ११७ ॥ (२) तक्षशिला वत्सोद्धरण कैर्मेदुर ग्रामणी छगल क्रोष्टुकर्ण सिंहकर्ण संकुचित किंनर काण्डधार पर्वत अवसान बर्बर कंस ॥ इति तक्षशिलादिः ॥ ११८ ॥

१४८८ शौनकादिभ्यश्छन्दसि ४।३।१०६॥ शौनक वाजसनेय शार्ङ्गरव शापेय शाष्पेय खाडायन स्तम्भ स्कन्ध (स्तम्भस्कन्ध) देवदर्शन रजभार रजुकण्ठ कठशाठ कषाय तल दण्ड पुरुषांसक अश्वपेज ॥ इति शौनकादिः ॥११९॥

१५०० कुलालादिभ्यो वुञ् ४।३।११८॥ कुलाल वरुड चाण्डाल निषाद कर्मार सेना सिरिन्ध्र (सिरिन्ध्रि) सिरिध्रि सैरिन्ध्र देवराज पर्षत् (परिषत्) वधू मधु रुरु रुद्र अनडुह् ब्रह्मन् कुम्भकार श्वपाक वैजवापि ॥ इति कुलालादिः ॥१२०॥

१५१३ रैवतिकादिभ्यश्छः ४।३।१३१॥ रैवतिक स्वापिशि क्षैमवृद्धि गौरग्रीव (गौरग्रीवि) औदमेघि औदवापि बैजवापि ॥ इति रैवतिकादिः ॥ १२१ ॥

१५१७ बिल्वादिभ्योऽण् ४।३।१३५॥ बिल्व व्रीहि काण्ड मुद्ग मसूर गोधूम इक्षु वेणु गवेधुका कर्पासी पाटली (कर्कन्धु) कर्कन्धू कुटीर ॥ इति बिल्वादिः ॥ १२२ ॥

१५२२ पलाशादिभ्यो वा ४।३।१४०॥ पलाश खदिर शिंशपा स्पन्दन पूलाक करीर शिरीष यवास विकङ्कत ॥ इति पलाशादिः ॥ १२३ ॥

१५२३ नित्यं वृद्धशरादिभ्यः ४।३।१४३॥ शर दर्भ मृद् (मृत्) कुटी तृण सोम वल्वज ॥ इति शरादिः ॥ १२४ ॥

१५३१ तालादिभ्योऽण् ४।३।१५१॥ तालाद्धनुषि । बार्हिण इन्द्रालिश इन्द्रादश इन्द्राशिष इन्द्रायुध चय श्यामाक पीयूक्षा ॥ इति तालादिः ॥ १२५ ॥

१५३३ प्राणिरजतादिभ्योऽञ् ४।३।१५३॥ रजत सीस लोह उदुम्बर नीप दारु रोहितक (रोहितक) विभीतक पीतदारु तीव्रदारु त्रिकण्टक कण्टकार ॥ इति रजतादिः ॥ १२६ ॥

१५४३ प्लक्षादिभ्योऽण् ४।३।१६३॥ प्लक्ष न्यग्रोध अश्वत्थ इङ्गुदी शिग्रु रुरु कक्षतु बृहती ॥ इति प्लक्षादिः ॥ १२७ ॥

१५४७ हरीतक्यादिभ्यश्च ४।३।१६६॥ हरीतकी कोशातकी नखरजनी शष्कण्डी दाडी दोडी श्वेतपाकी अर्जुनपाकी द्राक्षा काला ध्वाक्षा गर्मीका कण्टकारिका पिप्पली चिम्पा (चिञ्चा) शेफालिका ॥ इति हरीतक्यादिः ॥ १२८ ॥

१५४९ ※ माशब्दादिभ्य उपसंख्यानम् ※ ४।४।१॥ माशब्दः नित्यशब्दः कार्यशब्दः ॥ इति माशब्दादिः ॥ १२९ ॥

१५५० ※ आहौ प्रभूतादिभ्यः ※ ४।४।१॥ प्रभूत पर्याप्त ॥ इति प्रभूतादिः ॥ १३० ॥

१५५० ※ पृच्छतौ सुस्नातादिभ्यः ※ ४।४।१॥ सुस्नात सुखरात्रि सुखशयन ॥ इति सुस्नातादिः ॥ १३१ ॥

१५५० ※ गच्छतौ परदारादिभ्यः ※ ४।४।१॥ परदार गुरुतल्प ॥ इति परदारादिः ॥ १३२ ॥

१५५९ पर्पादिभ्यः ष्ठन् ४।४।१०॥ पर्प अश्व अश्वत्थ रथ जाल न्यास व्याल । पादः पच्च ॥ इति पर्पादिः ॥ १३३ ॥

१५६३ वेतनादिभ्यो जीवति ४।४।१२॥ वेतन वाहन अर्धवाहन (अर्धवाह) धनुर्दण्ड जाल वेश उपवेश प्रेषण उपवस्ति सुख शय्या शक्ति उपनिषद् उपदेश स्फिज् (स्फिज) पाद उपस्थ उपस्थान उपहस्त ॥ इति वेतनादिः ॥१३४॥

१५६६ हरत्युत्सङ्गादिभ्यः ४।४।१५॥ उत्सङ्ग उडुप उत्पूत (उत्पुत) उत्पन्न उत्पुट पिटक पिटाक ॥ इत्युत्सङ्गादिः ॥ १३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१५६७ भस्त्रादिभ्यः ष्ठन् ४।४।१६॥ भस्त्रा भरट भरण शीर्षभार शीर्षेभार अंसभार अंसेभार ॥ **इति भस्त्रादिः ॥ १३६ ॥**

१५७० निर्वृत्तेऽक्षद्यूतादिभ्यः ४।४।१९॥ अक्षद्यूत [जानुप्रहृत] (जानूप्रहृत) जङ्घाप्रहृत जङ्घाप्रहृत पादस्वेदन कण्टकमर्दन गतानुगत गतागत यातोपयात अनुगत ॥ **इत्यक्षद्यूतादिः ॥ १३७ ॥**

१५९९ अण्महिष्यादिभ्यः ४।४।४८॥ महिषी प्रजापति प्रजावती प्रलेपिका विलेपिका अनुलेपिका पुरोहिता (पुरोहित) मणिपाली अनुवारक [अनुचारक] होतृ यजमान ॥ **इति महिष्यादिः ॥ १३८ ॥**

१६०४ किसरादिभ्यः ष्ठन् ४।४।५३॥ किसर नरद नलद स्थागल तगर गुग्गुलु उशीर हरिद्रा हरिद्रु पर्णी (पर्णी) ॥ **इति किसरादिः ॥ १३९ ॥**

१६१३ छत्रादिभ्यो णः ४।४।६२॥ छत्र शिक्षा प्ररोहस्था बुभुक्षा चुरा तितिक्षा उपस्थान कृषि कर्मन् विश्वधा तपस् सत्य अनृत विशिखा (विशिका) विशिका भक्षा उदस्थान पुरोडा विक्षा चुक्षा मन्द्र ॥ **इति छत्रादिः ॥ १४० ॥**

१६५२ प्रतिजनादिभ्यः खञ् ४।४।९९॥ प्रतिजन इदंयुग संयुग समयुग परयुग परकुल परस्यकुल अमुष्यकुल सर्वजन विश्वजन महाजन पञ्चजन ॥ **इति प्रतिजनादिः ॥ १४१ ॥**

१६५५ कथादिभ्यष्ठक् ४।४।१०२॥ कथा विकथा विश्वकथा संकथा वितण्डा कुष्टविद् (कुष्ठविद्) जनवाद जनेवाद जनोवाद वृत्ति संग्रह गुणगण आयुर्वेद ॥ **इति कथादिः ॥ १४२ ॥**

१६५६ गुडादिभ्यष्ठञ् ४।४।१०३॥ गुड कुल्माष सक्तु अपूप मांसौदन इक्षु वेणु सङ्ग्राम संघात संक्राम संवाह प्रवास निवास उपवास ॥ **इति गुडादिः ॥ १४३ ॥**

इति चतुर्थोऽध्यायः।

पञ्चमोऽध्यायः।

१६६३ उगवादिभ्यो यत् ५।१।२॥ गो हविस् अक्षर विष बर्हिस् अष्टका स्वदा (स्खदा) युग मेधा (स्रुच्) स्रुच्। नाभि नभं च। शुनः संप्रसारणं वा च दीर्घत्वं, तत्संनियोगेन चान्तोदात्तत्वम्। ऊधसोऽनङ् च। कूप खद दर खर असुर अध्वन् (अध्वन) क्षर वेद बीज दीस दास (दीप्त) **इति गवादिः ॥ १४४ ॥**

१६६५ विभाषा हविरपूपादिभ्यः ५।१।४॥ अपूप तण्डुल अभ्युष (अभ्यूष) अभ्योष अवोष अभ्येष पृथुक ओदन सूप पूप किण्व प्रदीप मुसल कटक कर्णवेष्टक इर्गल (ईर्गल) अर्गल। अन्नविकारेभ्यश्च। यूप स्थूणा दीप अश्व पत्र ॥ **इत्यपूपादिः ॥ १४५ ॥**

१६८३ असमासे निष्कादिभ्यः ५।१।२०॥ निष्क पण पाद माष वाह द्रोण षष्टि ॥ **इति निष्कादिः ॥ १४६ ॥**

१७०५ गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ५।१।३९॥ अश्व अश्मन् गण ऊर्णा (उर्म) उमा भङ्गा क्षण (गङ्गा) वर्षा वसु ॥ **इत्यश्वादिः ॥ १४७ ॥**

१७१६ तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ५।१।५०॥ वंश कुटज वल्वज (वल्वज) मूल स्थूणा (स्थूण) अक्ष अश्मन् अश्व श्लक्ष्ण इक्षु खट्वा ॥ **इति वंशादिः ॥ १४८ ॥**

१७२९ छेदादिभ्यो नित्यम् ५।१।६४॥ छेद भेद द्रोह दोह नर्ति (नर्त) कर्ष तीर्थ संप्रयोग विप्रयोग प्रयोग विप्रकर्ष प्रेषण संप्रश्न विप्रश्न विकर्ष प्रकर्ष। विराग विरङ्गं च ॥ **इति छेदादिः ॥ १४९ ॥**

१७३१ दण्डादिभ्यो यत् ५।१।६६॥ दण्ड मुसल मधुपर्क कशा अर्घ मेघ मेधा सुवर्ण उदक वध युग गुहा भाग इभ भङ्ग ॥ **इति दण्डादिः ॥ १५० ॥**

१७५८ ❀ महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम् ❀ ५।१।९४॥ महानाम्नी आदित्यव्रत गोदान ॥ **इति महानाम्न्यादिः ॥ १५१ ॥**

१७५८ ❀ अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः ❀ ५।१।९४॥ अवान्तरदीक्षा तिलव्रत देवव्रत ॥ **इत्यवान्तरदीक्षादिः ॥ १५२ ॥**

१७६१ व्युष्टादिभ्योऽण् ५।१।९७॥ व्युष्ट नित्य निष्क्रमण प्रवेशन उपसंक्रमण तीर्थ आस्तरण सङ्ग्राम संघात ॥ **इति व्युष्टादिः ॥ १५३ ॥**

❀ अग्निपदादिभ्य उपसंख्यानम् ❀ ५।१।९७॥ अग्निपद पीलुपद (पीलुमूल) प्रवास उपवास ॥ **इत्यग्निपदादिराकृतिगणः ॥ १५४ ॥**

१७६५ तस्मै प्रभवति संतापादिभ्यः ५।१।१०१॥ संताप संनाह संग्राम संयोग संपराय संवेशन संपेष निष्पेष सर्ग निसर्ग विसर्ग उपसर्ग प्रवास उपवास संघास संवेष संवास संमोदन सक्तु। मांसौदनाद्विगृहीतादपि ॥ **इति संतापादिः ॥ १५५ ॥**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७६९ ※ तदप्रकरणे उपवस्त्रादिभ्य उपसंख्यानम् ※ ५।१।१०५॥ उपवस्तृ (उपवस्त्र) प्राशितृ चूडा श्रद्धा ॥ **इत्युपवस्त्रादिः ॥ १५६ ॥**

१७७४ अनुप्रवचनादिभ्यश्छः ५।१।१११॥ अनुप्रवचन उत्थापन उपस्थापन संवेशन प्रवेशन अनुप्रवेशन अनुवासन अनुवचन अनुवाचन अन्वारोहण प्रारम्भण आरम्भण आरोहण ॥ **इत्यनुप्रवचनादिः ॥ १५७ ॥**

१७७४ ※ स्वर्गादिभ्यो यद्वक्तव्यः ※ ५।१।१११॥ स्वर्ग यशस् आयुस् काम धन ॥ **इति स्वर्गादिः ॥ १५८ ॥**

१७७४ ※ पुण्याहवाचनादिभ्यो लुग्वक्तव्यः ※ ५।१।१११॥ पुण्याहवाचन स्वस्तिवाचन शान्तिवाचन ॥ **इति पुण्याहवाचनादिः ॥ १५९ ॥**

१७८४ पृथ्वादिभ्य इमनिज्वा ५।१।१२२॥ पृथु मृदु महत् पटु तनु लघु बहु साधु आशु उरु गुरु बहुल खण्ड दण्ड चण्ड अकिंचन बाल होड पाक वत्स मन्द स्वादु ह्रस्व दीर्घ प्रिय वृष ऋजु क्षिप्र क्षुद्र अणु ॥ **इति पृथ्वादिः ॥ १६० ॥**

१७८७ वर्णदृढादिभ्यः ष्यञ्च ५।१।१२३॥ दृढ वृढ परिवृढ भृश कृश वक्र शुक्र चुक्र आम्र कृष्ट लवण ताम्र शीत उष्ण जड बधिर पण्डित मधुर मूर्ख मूक स्थिर । वेर्यातलातमतिमनः शारदानाम् । समो मतिमनसोः । जवन ॥ **इति दृढादिः ॥ १६१ ॥**

१७८८ गुणवचनब्राह्मणादिभ्यः कर्मणि च ५।१।१२४॥ ब्राह्मण वाडव माणव । अर्हतो नुम्च । चोर धूर्त आराधय विराधय अपराधय उपराधय एकभाव द्विभाव त्रिभाव अन्यभाव अक्षेत्रज्ञ संवादिन् संवेशिन् संभाषिन् बहुभाषिन् शीर्षघातिन् विघातिन् समस्थ विषमस्थ परमस्थ मध्यमस्थ अनीश्वर कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ निश्न बालिश अलस दुःपुरुष (दुष्पुरुष) कापुरुष राजन् गणपति अधिपति गडुल दायाद विशस्ति विषम विपात निपात । सर्ववेदादिभ्यः स्वार्थे । चतुर्वेदस्योभयपदवृद्धिश्च । शौटीर ॥ **आकृतिगणोऽयम् ॥ इति ब्राह्मणादिः ॥ १६२ ॥**

१७८९ ※ चतुर्वेदादिभ्य उभयपदवृद्धिश्च ※ ५।१।१२४॥ चतुर्वेद चतुर्वर्ण चतुराश्रम सर्वविद्य त्रिलोक त्रिस्वर षड्गुण सेना अनन्तर संनिधि समीप उपमा सुख तदर्थ इतिह मणिक ॥ **इति चतुर्वेदादिः ॥ १६३ ॥**

१७९३ पत्यन्तपुरोहितादिभ्यो यक् ५।१।१२८॥ पुरोहित । राजासे । ग्रामिक (पिण्डित) पिण्डिक सुहित बालमन्द बालमद (बाल मन्द) खण्डिक दण्डिक वर्मिक कर्मिक धर्मिक शितिक (शीलिक) सूतिक मूलिक तिलक अञ्जलिक (अन्तलिक) रूपिक ऋषिक पुत्रिक अविक छत्रिक पर्षिक पथिक चर्मिक प्रतिक सारथि आस्थिक (आस्तिक) सूचिक संरक्ष सूचक (संरक्षसूचक) नास्तिक अजानिक शाकर नागर चूडिक ॥ **इति पुरोहितादिः ॥ १६४ ॥**

१७९४ प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ५।१।१२९॥ उद्गातृ उन्नेतृ प्रतिहर्तृ प्रशास्तृ होतृ पोतृ हर्तृ रथगणक पत्तिगणक सुष्ठु दुष्ठु अध्वर्यु वधू सुभग मन्त्र ॥ **इत्युद्गात्रादिः ॥ १६५ ॥**

१७९५ हायनान्तयुवादिभ्योऽण् ५।१।१३०॥ युवन् स्थविर होतृ यजमान । पुरुषासे । भ्रातृ कुतुक श्रमण (श्रवण) कटुक कमण्डलु कुस्त्री सुस्त्री दुःस्त्री सुहृदय दुर्हृदय सुहृद् दुर्हृद् सुभ्रातृ दुर्भ्रातृ वृषल परिव्राजक सब्रह्मचारिन् अनृशंस । हृदयासे । कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ । श्रोत्रियस्य यलोपश्च ॥ **इति युवादिः ॥ १६६ ॥**

१७९८ द्वन्द्वमनोज्ञादिभ्यश्च ५।१।१३३॥ मनोज्ञ प्रियरूप अभिरूप कल्याण मेधाविन् आढ्य कुलपुत्र छान्दस छात्र श्रोत्रिय चोर धूर्त विश्वदेव युवन् कुपुत्र ग्रामपुत्र ग्रामकुलाल ग्रामड (ग्रामषण्ड) ग्रामकुमार सुकुमार बहुल अवश्यपुत्र अमुष्यपुत्र अमुष्यकुल (आमुष्यकुल) सारपुत्र शतपुत्र ॥ **इति मनोज्ञादिः ॥ १६७ ॥**

१८२५ तस्य पाकमूले (१)पील्वादि(२)कर्णादिभ्यः कुणब्जाहचौ ५।२।२४॥ (१) पीलु कर्कन्धू (कर्कन्धु) शमी करीर बल (कुवल) वदर अश्वत्थ खदिर ॥ **इति पील्वादिः ॥ १६८ ॥**

(२) कर्ण अक्षि नख मुख केश पाद गुल्फ भ्रू शृङ्ग दन्त ओष्ठ पृष्ठ ॥ **इति कर्णादिः ॥ १६९ ॥**

१८३७ तदस्य संजातं तारकादिभ्य इतच् ५।२।३६॥ तारका पुष्प कर्णक मञ्जरी ऋजीष क्षण सूत्र मूत्र निष्क्रमण पुरीष उच्चार प्रचार विचार कुड्मल कण्टक मुसल मुकुल कुसुम कुतूहल स्तबक (स्तवक) किसलय पल्लव खण्ड वेग निद्रा मुद्रा बुभुक्षा धेनुष्या पिपासा श्रद्धा अभ्र पुलक अङ्गारक वर्णक द्रोह दोह सुख दुःख उत्कण्ठा भर व्याधि वर्मन् व्रण गौरव शास्त्र तरङ्ग तिलक चन्द्रक अन्धकार गर्व कुमुर (मुकुर) हर्ष उत्कर्ष रण कुवलय गर्ध क्षुध् सीमन्त ज्वर गर रोग रोमाञ्च पण्डा कज्जल तृष् कोरक कल्लोल स्थपुट फल कञ्चुक शृङ्गार अङ्कुर शैवल बकुल श्वभ्र आराल (अराल) कलङ्क कर्दम कन्दल मूर्च्छा अङ्गार हस्तक प्रतिबिम्ब विघ्नतन्त्र प्रत्यय दीक्षा गर्ज । गर्भादप्राणिनि ॥ **इति तारकादिराकृतिगणः ॥ १७० ॥**

१८६१ विमुक्तादिभ्योऽण् ५।२।६१॥ विमुक्त देवासुर रक्षोसुर उपसद् सुवर्ण परिसारक सदसत् वसु मरुत् पत्नी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत् वसुमत् महीयत्व सत्वत् बर्हवत् दशार्ण दशार्ह वयस् हविर्धान पतत्रिन् महित्री अस्यहत्य सोमापूषन् इडा अग्नाविष्णू उर्वशी वृत्रहन् ॥ इति विमुक्तादिः ॥ १७१ ॥

१८६२ गोषदादिभ्यो वुन् ५।२।६२॥ गोषद (गोषद्) इषेत्वा मातरिश्वन् देवस्यत्वा देवीरापः । कृष्णोऽस्याखरेष्ठः देवींधिया (देवींधियम्) रक्षोहण युञ्जान अञ्जन प्रभूत प्रतूर्त कृशानु (कृशाकु) ॥ **इति गोषदादिः ॥ १७२ ॥**

१८६४ आकर्षादिभ्यः कन् ५।२।६४॥ आकर्ष (आकष) त्सरु पिशाच पिचण्ड अशनि अश्मन् निचय चय विजय जय आचय नय पाद दीप ह्रद ह्राद ह्लाद गद्गद शकुनि ॥ **इत्याकर्षादिः ॥ १७३ ॥**

१८८८ इष्टादिभ्यश्च ५।२।८८॥ इष्ट पूर्त उपासादित निगदित परिगदित परिवादित निकथित निषादित निपठित संकलित परिकलित संरक्षित परिरक्षित अर्चित गणित अवकीर्ण आयुक्त गृहीत आम्नात श्रुत अधीत अवधान आसेवित अवधारित अवकल्पित निराकृत उपकृत उपाकृत अनुयुक्त अनुगणित अनुपठित व्याकुलित ॥ **इतीष्टादिः ॥ १७४ ॥**

१८९५ रसादिभ्यश्च ५।२।९५॥ रस रूप वर्ण गन्ध स्पर्श शब्द स्नेह भाव। गुणात् एकाचः ॥ **इति रसादिः ॥१७५॥**

१९०४ सिध्मादिभ्यश्च ५।२।९७॥ सिध्म गडु मणि नाभि बीज वीणा कृष्ण निष्पाव पांसु पार्श्व पर्शु हनु सक्तु (हनुसक्तु) मास (मांस) पार्ष्णिधमन्योर्दीर्घश्च। वातदन्तबलललाटानामूङ् च । जटा घटाकटाकालाः क्षेपे । पर्ण उदक प्रज्ञा सक्थि कर्ण स्नेह शीत श्याम पिङ्ग पित्त पुष्क पृथु मृदु मञ्जु मण्ड पत्र चटु कपि गण्डु ग्रन्थि श्री कुश धारा वर्ष्मन् पक्ष्मन् श्लेष्मन् पेश निष्पाद् कुण्ड । क्षुद्रजन्तूपतापयोश्च ॥ **इति सिध्मादिः ॥ १७६ ॥**

१९०७ (१)लोमादि(२)पामादि(३)पिच्छादिभ्यः शनेलचः ५।२।१००॥ (१) लोमन् रोमन् बभ्रु हरि गिरि कर्क कपि मुनि तरु ॥ **इति लोमादिः ॥ १७७ ॥**

(२) पामन् वामन् वेमन् हेमन् श्लेष्मन् कद्रु (कद्रू) बलि (वलि) सामन् ऊष्मन् कृमि । अङ्गात्कल्याणे । शाकीपलालीदद्रूणां ह्रस्वत्वं च । विष्वगित्युत्तरपदलोपश्चाकृतसंधेः । लक्ष्म्या अच्च ॥ **इति पामादिः ॥ १७८ ॥**

(३) पिच्छा उरस् ध्रुवक ध्रुवक । जटाघटाकालाः क्षेपे । वर्ण उदक पङ्क प्रज्ञा ॥ **इति पिच्छादिः॥ १७९ ॥**

१९१० ॐ ज्योत्स्नादिभ्य उपसंख्यानम् ॐ ५।२।१०३॥ ज्योत्स्ना तमिस्रा कुण्डल कुतप विसर्प विपादिका ॥ **इति ज्योत्स्नादिः ॥ १८० ॥**

१९२३ व्रीह्यादिभ्यश्च ५।२।११६॥ व्रीहि माया शाला शिखा माला मेखला केका अष्टका पताका चर्मन् कर्मन् वर्मन् दंष्ट्रा संज्ञा वडवा कुमारी नौ वीणा बलाका यवखदनौ कुमारी । शीर्षान्नञः ॥ **इति व्रीह्यादिः ॥ १८१ ॥**

१९२४ तुन्दादिभ्य इलच्च ।५।२।११७॥ तुन्द उदर पिचण्ड यव व्रीहि । स्वाङ्गाद्विवृद्धौ ॥ **इति तुन्दादिः ॥ १८२ ॥**

१९३३ अर्श आदिभ्योऽच् ५।२।१२७॥ अर्शस् उरस् तुन्द चतुर कलित (पलित) जटा घटा घाटा अभ्र अघ कर्दम अम्ल लवण । स्वाङ्गाद्धीनात् । वर्णात् ॥ **इत्यर्श आदिराकृतिगणः ॥ १८३ ॥**

१९३७ सुखादिभ्यश्च ५।२।१३१॥ सुख दुःख तृप्त (तृप्र) कृच्छ्र अस्र (आस्र) आस्र अलीक कठिण सोढ प्रतीप शील हल । माला क्षेपे । कृपण प्रणाय (प्रणय) दल कक्ष ॥ **इति सुखादिः ॥ १८४ ॥**

१९४१ पुष्करादिभ्यो देशे ५।२।१३५॥ पुष्कर पद्म उत्पल तमाल कुमुद नड कपित्थ बिस मृणाल कर्दम शालूक विगर्ह करीष शिरीष यवास (प्रवास) प्रवाह हिरण्य कैरव कल्लोल तट तरङ्ग पङ्कज सरोज राजीव नालीक सरोरुह पुटक अरविन्द अम्भोज अब्ज कमल पयस् ॥ **इति पुष्करादिः ॥ १८५ ॥**

१९४२ बलादिभ्यो मतुबन्यतरस्याम् ५।२।१३६॥ बल उत्साह उद्भास उद्वास उद्दास शिखा कुल चूडा सुल कूल आयाम व्यायाम उपयाम आरोह अवरोह परिणाह युद्ध ॥ **इति बलादिः ॥ १८६ ॥**

१९६३ ॐ दृशिग्रहणाद्भवदादियोग एव ॐ ५।३।१४॥ भवान् दीर्घायुः देवानांप्रियः आयुष्मान् ॥ **इति भवदादिः ॥ १८७ ॥**

२०५५ देवपथादिभ्यश्च ५।३।१००॥ देवपथ (हंसपथ वारिपथ रथपथ) स्थलपथ करिपथ अजपथ राजपथ शतपथ शङ्कुपथ सिन्धुपथ सिद्धगति उष्ट्रग्रीव वामरज्जु हस्त इन्द्र दण्ड पुष्प मत्स्य ॥ **इति देवपथादिराकृतिगणः ॥ १८८ ॥**

२०५८ शाखादिभ्यो यः ५।३।१०३॥ शाखा मुख जघन शृङ्ग मेघ अभ्र चरण स्कन्ध स्कद (स्कन्द) उरस् शिरस् अग्र (शाण) शरण ॥ **इति शाखादिः ॥ १८९ ॥**

२०६२ शर्करादिभ्योऽण् ५।३।१०७॥ शर्करा कपालिका कपाटिका कपिष्ठिका (कनिष्ठिका) पुण्डरीक शतपत्र गोलोमन् लोमन् गोपुच्छ नराची (गोपुच्छनराची) नकुल सिकता ॥ **इति शर्करादिः ॥ १९० ॥**

२०६३ अङ्गुल्यादिभ्यष्ठक् ५।३।१०८॥ अङ्गुली भरुज बभ्रु वल्गु मण्डर मण्डल शष्कुली हरि कपि मुनि रुह खल उदश्वित् गोणी उरस् कुलिश ॥ **इत्यङ्गुल्यादिः ॥ १९१ ॥**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२०६९ दामन्यादित्रिगर्तषष्ठाच्छः ५।३।११६॥ दामनी औलपि वैजवापि औदकि औदङ्कि अच्युतन्ति (आच्युतन्ति) अच्युतदन्ति (आच्युतदन्ति) शाकुन्तकि आकिदन्ति (आक्किदन्ति) औडवि काकदन्तकि शात्रुंतपि सार्वसेनि बिन्दु बैन्दवि तुलभ मौञ्जायन मौञ्जायनि काकन्दि सावित्रीपुत्र ॥ **इति दामन्यादिः** ॥ १९२ ॥

२०७० (१)पर्श्वादि(२)यौधेयादिभ्योऽणञौ ५।३।११७॥ (१) पर्शु असुर रक्षस् बाह्लीक वयस् वसु मरुत् सत्वत् दशार्ह पिशाच अशनि कार्षापण कर्षापण ॥ **इति पर्श्वादिः** ॥ १९३ ॥

(२) यौधेय कौशेय शौक्रेय शौभ्रेय धौर्तेय धार्तेय घार्तेय ज्यावाणेय त्रिगर्त भरत उशीनर ॥ **इति यौधेयादिः** ॥१९४॥

२०७५ स्थूलादिभ्यः प्रकारवचने कन् ५।४।३॥ स्थूल अणु माषेषु (माष इषु) कृष्ण तिलेषु । यव व्रीहिषु । इक्षु तिल । पाद्य कालावदात सुरायाम् । गोमूत्र आच्छादने । सुराया अहौ (सुरा अहौ) । जीर्ण शालिषु । पत्रमूल समस्तौ व्यस्तश्च । कुमारीपुत्र कुमारीश्वशुर मणि ॥ **इति स्थूलादिः** ॥ १९५ ॥

२०९७ यावादिभ्यः कन् ५।४।२९॥ याव मणि अस्थि तालु जानु सान्द्र पीत स्तम्ब । ऋतावुष्णशीते । पशौ लूनविपाते । अणु निपुणे । पुत्र कृत्रिमे । स्नात वेदसमाप्तौ । शून्य रिक्ते । दान कुत्सिते । तनु सूत्रे । ईयसश्च । ज्ञात अज्ञात । कुमारीक्रीडनकानि च (कुमारक्रीडनकानि च) ॥ **इति यावादिः** ॥ १९६ ॥

२१०२ विनयादिभ्यष्ठक् ५।४।३४॥ विनय समय । उपायो ह्रस्वत्वं च । संप्रति संगति कथंचित् अकस्मात् समाचार उपचार समाय (समयाचार) व्यवहार संप्रदान समुत्कर्ष समूह विशेष अत्यय ॥ **इति विनयादिः** ॥ १९७ ॥

२१०६ प्रज्ञादिभ्यश्च ५।४।३८॥ प्रज्ञ वणिज् उशिज् उष्णिज् प्रत्यक्ष विद्वस् विदन् वेदन् षोडन् विद्या मनस् । श्रोत्र शरीरे । जुह्वत् । कृष्ण मृगे । चिकीर्षत् । चोर शत्रु योध चक्षुस् वसु एनस् मरुत् क्रुञ्च सत्वत् दशार्ह वयस् व्याकृत असुर रक्षस् पिशाच अशनि कार्षापणा देवता बन्धु ॥ **इति प्रज्ञादिः** ॥ १९८ ॥

२१११ ※ आद्यादिभ्य उपसंख्यानम् ※ ५।४।४४॥ आदि मध्य अन्त पृष्ठ पार्श्व ॥ **इत्याद्यादिराकृतिगणः** ॥ १९९ ॥

६७८ अव्ययीभावे शरत्प्रभृतिभ्यः ५।४।१०७ ॥ शरद् विपाश् अनस् मनस् उपानह् अनडुह् दिव् हिमवत् हिरुक् विद् सद् दिश् दश् विश् चतुर् त्यद् तद् यद् एतद् कियत् । जराया जरस् च । प्रतिपरसमनुभ्योऽक्षणः । पथिन् ॥ **इति शरदादिः** ॥ २०० ॥

८६९ द्विदण्ड्यादिभ्यश्च ५।४।१२८॥ द्विदण्डि द्विमुसलि उभाञ्जलि उभयाञ्जलि उभादन्ति उभयादन्ति उभाहस्ति उभयाहस्ति उभाकर्णि उभयाकर्णि उभापाणि उभयापाणि उभाबाहु उभयाबाहु एकपदी प्रोष्ठपदी आच्यपदी (आढ्यपदी) सपदि (निकुच्यकर्णि) निकुच्यकरणि संहतपुच्छि अन्तेवासी अन्तवासी ॥ **इति द्विदण्ड्यादिः** ॥ २०१ ॥

८७९ पादस्य लोपोऽहस्त्यादिभ्यः ५।४।१३८॥ हस्तिन् कुद्दाल अश्व कशिक कुरुत कटोल कटोलक गण्डोल गण्डोलक कण्डोल कण्डोलक अज कपोत जाल गण्ड महिला दासी गणिका कुसूल ॥ **इति हस्त्यादिः** ॥ २०२ ॥

८८० कुम्भपदीषु च ५।४।१३९॥ कुम्भपदी एकपदी जालपदी शूलपदी मुनिपदी गुणपदी शतपदी सूत्रपदी गोधापदी कलशीपदी विपदी तृणपदी द्विपदी त्रिपदी षट्पदी दासीपदी शितिपदी (शितपदी) विष्णुपदी सुपदी निष्पदी आर्द्रपदी कुणिपदी कृष्णपदी शुचिपदी द्रोणीपदी (द्रोणपदी) द्रुपदी सूकरपदी शकृत्पदी अष्टापदी स्थूणापदी अपदी सूचीपदी ॥ **इति कुम्भपद्यादिः** ॥ २०३ ॥

८९१ उरःप्रभृतिभ्यः कप् ५।४।१५१॥ उरस् सर्पिस् उपानह् पुमान् अनड्वान् पयः नौः लक्ष्मीः दधि मधु शाली शालिः । अर्थान्नञः ॥ **इत्युरःप्रभृतयः** ॥ २०४ ॥

षष्ठोऽध्यायः ।

७९ ※ शकन्ध्वादिषु पररूपं वाच्यम् ※ ६।१।९४॥ शकन्धुः कर्कन्धुः कुलटा । सीमन्तः केशवेशे । हलीषा मनीषा लाङ्गलीषा पतञ्जलिः । सारङ्गः पशुपक्षिणोः ॥ **इति शकन्ध्वादिः** ॥ २०५ ॥

१०७२ पारस्करप्रभृतीनि च संज्ञायाम् ६।१।१५७॥ पारस्करो देशः । कारस्करो वृक्षः । रथस्पा (रयस्पा) नदी । किष्कुः प्रमाणम् । किष्किन्धा गुहा । तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च । प्रात्तुम्पतौ गवि कर्तरि ॥ **इति पारस्करादिः** ॥ २०६ ॥

३६७८ उञ्छादीनां च ६।१।१६०॥ उञ्छ म्लेच्छ जञ्ज जल्प तल्प (जल्प) जप वध । युग कालविशेषे रथाद्युपकरणे च । गरो दूष्ये । अवन्तः । वेदवेगवेष्टबन्धाः करणे । स्तुयुद्रुवश्छन्दसि । वर्तनि स्तोत्रे । श्वभ्रे दरः । साम्वतापौ भावगर्हायाम् । उत्तमशश्वत्तमौ सर्वत्र । भक्षमन्थभोगमन्थाः (देहाः) ॥ **इत्युञ्छादिः** ॥ २०७ ॥

सि० कौ० ९२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३६८८ वृषादीनां च ६।१।२०३॥ वृषः जनः ज्वरः ग्रहः हयः मयः गयः तायः तयः चयः अमः (श्रमः) वेदः सूदः अंशः गुहा । शमरणौ संज्ञायां संमतौ भावकर्मणोः । मन्त्रः शान्तिः कामः यामः आरा धारा कारा वहः कल्पः पादः ॥ **इति वृषादिराकृतिगणः** ॥ अविहितलक्षणमाद्युदात्तत्वं वृषादिषु ज्ञेयम् ॥ २०८ ॥

३७५५ विस्पष्टादीनि गुणवचनेषु ६।२।२४ ॥ विस्पष्ट विचित्र विचित्त व्यक्त संपन्न पटु पण्डित कुशल चपल निपुण ॥ **इति विस्पष्टादिः** ॥ २०९ ॥

३७६८ कार्तकौजपादयश्च ६।२।३७ ॥ कार्तकौजपौ सावर्णिमाण्डकेयौ (सावर्णिमाण्डूकेयौ) अवन्त्यश्मकाः पैलश्यापर्णेयाः कपिश्यापर्णेयाः शैतिकाक्षपाञ्चालेयाः कटुकवाधूलेयाः शाकलशुनकाः शाकलशणकाः शणकबाभ्रवाः आर्चाभिमौद्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अविमत्तकामविद्धाः बाभ्रवशालङ्कायनाः बाभ्रवदानच्युताः कठकालापाः कठकौथुमाः कौथुमलौकाक्षाः स्त्रीकुमारम् मौद्गपैप्पलादाः वत्सजरन्तः सौश्रुतपार्थिवाः जरामृत्यू याज्यानुवाक्ये ॥ **इति कार्तकौजपादिः** ॥ २१० ॥

३७७२ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च ६।२।४२॥ दासीभारः देवहूतिः देवभीतिः देवलातिः वसुनीतिः (वसूनितिः) औषधिः चन्द्रमाः ॥ **इति दासीभारादिराकृतिगणः** ॥ २११ ॥

३८१२ युक्तारोह्यादयश्च ६।२।८१॥ युक्तारोही आनतरोही (आगतरोही) आगतयोधी आगतवञ्ची आगतनन्दी आगतप्रहारी आगतमत्स्यः क्षीरहोता भगिनीभर्ता ग्रामगोधुक् अश्वत्रिरात्रः गर्गत्रिरात्रः व्युष्टित्रिरात्रः गणपादः एकशितिपाद् । पात्रेसमितादयश्च ॥ **इति युक्तारोह्यादिराकृतिगणः** ॥ २१२ ॥

३८१६ घोषादिषु च ६।२।८५॥ घोष घट (कट) वलभ ह्रद बदरी पिङ्गल (पिङ्गली) पिशङ्ग माला रक्षा शाला (श्वट्) कूट शाल्मली अश्वत्थ तृण शिल्पी मुनि (प्रेक्षाकू) प्रेक्षाक (प्रेक्षा)॥ **इति घोषादिः** ॥ २१३ ॥

३८१७ छात्र्यादयः शालायाम् ६।२।८६॥ छात्रि पेलि भाण्डि व्याडि आखण्डि आटि (आघाटि) गोमी (गोमि) ॥ **इति छात्र्यादिः** ॥ २१४ ॥

३८१८ प्रस्थेऽवृद्धमकर्क्यादीनाम् ६।२।८७॥ कर्कि (कर्की) मघ्री मकरी कर्कन्धु शमी करीरि (करीर) कन्दुक कुवल (कवल) बदरी ॥ **इति कर्क्यादिः** ॥ २१५ ॥

३८१९ मालादीनां च ६।२।८८॥ माला शाला शोणा (शोण) द्राक्षा स्राक्षा क्षामा काञ्ची एक काम दिवोदास वध्र्यश्व ॥ **इति मालादिराकृतिगणः** ॥ २१६ ॥

३८४९ क्रत्वादयश्च ६।२।११८॥ क्रतु दृशीक प्रतीक प्रतूर्ति हव्य भव्य भग ॥ **इति क्रत्वादिः** ॥ २१७ ॥

३८५६ आदिश्चिहणादीनाम् ६।२।१२५॥ चिहण मदुर मद्गुर वैतुल पटत्क वैडालिकर्णक वैडालिकर्णि कुक्कुट चिक्कण चित्कण ॥ **इति चिहणादिः** ॥ २१८ ॥

३८६२ वर्ग्यादयश्च ६।२।१३१॥ दिगादिषु वर्गादयस्त एव कृतयदन्ता वर्ग्यादयः । **इति वर्ग्यादयः** ॥ २१८ ॥

३८६५ चूर्णादीन्यप्राणिषष्ठ्याः ६।२।१३४॥ चूर्ण करिष करीष शाकिन शाकट द्राक्षा तूस्त कुन्दम दलप चमसी चक्कन चौल ॥ **इति चूर्णादिः** ॥ २२० ॥

३८६६ षट् च काण्डादीनि ६।२।१३५॥ काण्ड चीर पलल सूष शाक कूल ॥ **इति काण्डादिः** ॥

३८७१ उभे वनस्पत्यादिषु युगपत् ६।२।१४०॥ वनस्पतिः बृहस्पतिः शचीपतिः तनूनपात् नराशंसः शुनःशेपः शण्डामर्कौ तृष्णावरूत्री लम्बाविश्ववयसौ मर्मृत्युः ॥ **इति वनस्पत्यादिः** ॥ २२१ ॥

३८७७ संज्ञायामनाचितादीनाम् ६।२।१४६॥ आचित पर्याचित आस्थापित परिगृहीत निरुक्त प्रतिपन्न अपश्लिष्ट प्रश्लिष्ट उपहित उपस्थित संहितागवि ॥ **इत्याचितादिः** ॥ २२२ ॥

३८७८ प्रवृद्धादीनां च ६।२।१४७॥ प्रवृद्धं यानम् । प्रवृद्धो वृषलः । प्रयुता सूष्णवः । आकर्षे अवहितः । अवहितो भोगेषु । खट्वारूढः । कविशस्तः ॥ **इति प्रवृद्धादिः** ॥ २२३ ॥ **आकृतिगणोऽयम्** ॥ तेन । प्रवृद्धं यानम् । अप्रवृद्धो वृषकृतो रथ इत्यादि ॥

३८९१ कृत्योकेष्णुच्चार्वादयश्च ६।२।१६०॥ चारु साधु यौधिक (यौधकि) अनङ्गमेजय वदान्य अकस्मात् । वर्तमानवर्धमानत्वरमाणध्रियमाणक्रियमाणरोचमानशोभमानाः संज्ञायाम् । विकारसदृशे व्यस्तसमस्ते । गृहपति गृहपतिक । राजाह्लोश्छन्दसि ॥ **इति चार्वादिः** ॥ २२४ ॥

३९०७ न गुणादयोऽवयवाः ६।२।१७६॥ गुण अक्षर अध्याय सूक्त छन्दोमान ॥ **इति गुणादिराकृतिगणः** ॥ २२५ ॥

३९१५ निरुदकादीनि च ६।२।१८४॥ निरुदक निरुपल निर्मक्षिक निर्मशक निष्कालक निष्कालिक निष्पेष दुस्तरीप निस्तरीप निस्तरीक निरजिन उदजिन उपाजिन । परेर्हस्तपादकेशकर्षाः ॥ **इति निरुदकादिराकृतिगणः** ॥ २२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३९२४ प्रतेरंश्वादयस्तत्पुरुषे ६।२।१९३॥ अंशु जन [राजन्] उष्ट्र खेटक अजिर आर्द्रा श्रवण कृत्तिका अर्धपुर ॥ **इत्यंश्वादिः ॥ २२७ ॥**

३९२५ उपाद्यजजिनमगौरादयः ६।२।१९४॥ गौर तैष तैल लेट लोट जिह्वा कृष्ण कन्या गुध कल्प पाद ॥ **इति गौरादिः ॥ २२८ ॥**

३९३० ॐ त्रिचक्रादीनां छन्दस्युपसंख्यानम् ॐ ६।२।१९९॥ त्रिचक्र त्रिवृत् त्रिवङ्कुर ॥ **इति त्रिचक्रादिराकृतिगणः ॥ २२९ ॥**

८३२ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ६।३।३४॥ प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वसा (स्वा) कान्ता [क्षान्ता] समा चपला दुहिता वामा अबला तनया ॥ **इति प्रियादिः ॥ २३० ॥**

८३७ तसिलादिष्वाकृत्वसुचः ६।३।३५॥ तसिल् त्रल् तरप् तमप् चरट् जातीयर् कल्पप् देशीयर् रूपप् पाशप् थल् थाल् दार्हिल् तिल् थ्यन् ॥ **इति तसिलादयः ॥ २३१ ॥**

८३७ ॐ कुक्कुट्यादीनामण्डादिषु ॐ ६।३।४२॥ कुक्कुटी मृगी काकी ॥ अण्ड पद शाव भ्रकुंस (भृकुंस) भ्रकुटी (भृकुटी) ॥ **इति कुक्कुट्यादिरण्डादिश्च ॥२३२ ॥ २३३ ॥**

१०३६ पृषोदरादीनि यथोपदिष्टम् ६।३।१०९॥ पृषोदर पृषोत्थान बलाहक जीमूत श्मशान उलूखल पिशाच बृसी मयूर ॥ **इति पृषोदरादिराकृतिगणः ॥ २३४ ॥**

१०४० वनगिर्योः संज्ञायां (१)कोटर(२)किंशुलुकादीनाम् ६।३।११७॥ (१) कोटर मिश्रक सिध्रक पुरग सारिक (शारिक) ॥ **इति कोटरादिः ॥ २३५ ॥**

(२) किंशुलुक शाल्व नड अञ्जन भञ्जन लोहित कुक्कुट ॥ **इति किंशुलुकादिः ॥ २३६ ॥**

१०४३ मतौ बह्वचोऽनजिरादीनाम् ६।३।११९॥ अजिर खदिर पुलिन हंसक (हंस) कारण्ड (कारण्डव) चक्रवाक ॥ **इत्यजिरादिः ॥ २३७ ॥**

१०४४ शरादीनां च ६।३।१२०॥ शर वंश धूम अहि कपि मणि मुनि शुचि हनु ॥ **इति शरादिः ॥ २३८ ॥**

१०४५ ॐ अपीलवादीनामिति वक्तव्यम् ॐ ६।३।१२१॥ पीलु दारु रुचि चारु गम् कम् ॥ **इति पीलवादिः ॥२३९॥**

१३१३ बिल्वकादिभ्यश्छस्य लुक् ६।४।१५३॥ बिल्वक वेणु वेत्र वेतस तृण इक्षु काष्ठ कपोत क्रुञ्चा तक्षन् ॥ **नडाद्यन्तर्गणो बिल्वादिः** ॥ छविधानार्थं ये नडादयस्ते यदा छसंनियोगे कृतकुगागमास्ते **बिल्वकादयः ॥ २४० ॥**

इति षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

३५६९ स्नात्व्यादयश्च ७।१।४९॥ स्नात्वी पीत्वी ॥ **इति स्नात्व्यादिराकृतिगणः ॥ २४१ ॥**

१३८८ द्वारादीनां च ७।३।४॥ द्वार स्वर स्वग्राम स्वाध्याय व्यल्कश स्वस्ति स्वर् (स्वर) स्फ्यकृत् स्वादु मृदु श्वस् श्वन् स्व ॥ **इति द्वारादिः ॥ २४२॥**

१५५१ स्वागतादीनां च ७।३।७॥ स्वागत स्वध्वर स्वङ्ग व्यङ्ग व्यड व्यवहार स्वपति स्वपिति ॥ **इति स्वागतादिः ॥ २४३ ॥**

१४४० अनुशतिकादीनां च ७।३।२०॥ अनुशतिक अनुहोड अनुसंवरण (अनुसंचरण) अनुसंवत्सर अङ्गारवेणु असिहत्य [अस्यहत्य] अस्यहेति वध्योग पुष्करसद् अनुहरत् कुरुकत कुरुपञ्चाल उदकशुद्ध इहलोक परलोक सर्वलोक सर्वपुरुष सर्वभूमि प्रयोग परस्त्री । राजपुरुषात्ष्यञि । सूत्रनड ॥ **इत्यनुशतिकादिराकृतिगणोऽयम् ॥ २४४ ॥** तेन अभिगम अधिभूत अधिदेव चतुर्विद्या इत्यादयोऽप्यन्ये विज्ञेयाः ॥

४६४ ॐ क्षिपकादीनां चोपसंख्यानम् ॐ ७।३।४५॥ क्षिपका ध्रुवका चरका सेवका करका चटका अवका (हलका) लहका अलका कन्यका ध्रुवका एडका ॥ **इति क्षिपकादिराकृतिगणः ॥ १४५ ॥**

२८६४ न्यङ्क्वादीनां च ७।३।५३॥ न्यङ्कु मद्गु भृगु दूरेपाक (फलेपाक) बलेपाक क्षणपाक दूरेपाका फलेपाका दूरेपाकु फलेपाकु तक्र (तत्र) वक्र (चक्र) व्यतिषङ्ग अनुषङ्ग अवसर्ग उपसर्ग श्वपाक मांसपाक (मासपाक) मूलपाक कपोतपाक उलूकपाक । संज्ञायां मेघनिदाघावदाघार्घाः । न्यग्रोध वीरुत् ॥ **इति न्यङ्क्वादिः ॥ १४६ ॥**

२५८३ ॐ काण्यादीनां वेति वक्तव्यम् ॐ ७।४।३॥ कण रण भण श्रण लुप हेठ ह्वायि वाणि (चाणि) लोटि (लोठि) लोपि ॥ **इति काण्यादिः ॥ १४७ ॥ इति सप्तमोऽध्यायः ।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमोऽध्यायः ।

३९३१ तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ८।१।२७॥ गोत्र ब्रुव प्रवचन प्रहसन प्रकथन प्रत्ययन प्रपञ्च प्राय न्याय प्रचक्षण विचक्षण अवचक्षण स्वाध्याय भूयिष्ठ (भूयिष्ट) वानाम ॥ **इति गोत्रादिः ॥ २४८ ॥**

३९७१ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ८।१।६७॥ काष्ठ दारुण अज्ञात पुत्र अमातापुत्र वेश अनाज्ञात अनुज्ञात अपुत्र अयुत अद्भुत अनुक्त भृश घोर सुख परम सु अति ॥ **इति काष्ठादिः ॥ २४९ ॥**

१८९७ मादुपधायाश्च मतोर्वोऽयवादिभ्यः ८।२।९॥ यव दल्मि ऊर्मि (उर्मि) भूमि कृमि कुञ्चा वशा द्राक्षा ध्राक्षा ध्रजि ध्वजि ध्वजि निजि सिजि सञ्जि हरित् ककुद् मरुत् गरुत् (इक्षु द्रु) इक्षुद्रु मधु ॥ **इति यवादिराकृतिगणः ॥ २५० ॥**

२३५० ॐ कपिलकादीनां संज्ञाच्छन्दसोर्वेति वाच्यम् ॐ ८।२।१८॥ कपिलक निर्विलीक लोमानि पांसुल कल्प शुक्र कपिलिका तर्पिलिका तर्पिलि ॥ **आकृतिगणोऽयम् । इति कपिलकादिः ॥**

१७२ ॐ (१)अहरादीनां (२)पत्यादिषु वा रेफः ॐ ८।२।७०॥ (१) अहर् गीर् धुर् ॥ **इत्यहरादिः ॥२५१॥** २ पति गण पुत्र ॥ **इति पत्यादिः ॥ २५२ ॥**

१४४ कस्कादिषु च ८।३।४८॥ कस्कः कौतस्कुतः भ्रातुष्पुत्रः शुनस्कर्णः सद्यस्कालः सद्यस्क्रीः सायस्कः कांस्कान् सर्पिष्कुण्डिका धनुष्कपालम् बर्हिष्पलम् (बर्हिष्पलम्) यजुष्पात्रम् अयस्कान्तः तमस्काण्डः अयस्काण्डः मेदस्पिण्डः भास्करः अहस्करः ॥ **इति कस्कादिराकृतिगणः ॥ २५३ ॥**

१०२४ सुषामादिषु च ८।३।९८॥ सुषामा निःषामा दुःषामा सुषेधः निषेधः (निःषेधः) दुःषेधः सुषंधिः निःषंधिः दुःषंधिः सुष्ठु दुष्ठु । गौरिषक्थः संज्ञायाम् । प्रतिष्णिका जलाषाहम् (जलाषाडम्) नौषेचनम् दुन्दुभिषेवणम् (दुन्दुभिषेचनम्) । एति संज्ञायामगात् । नक्षत्राद्वा । हरिषेणः रोहिणीषेणः ॥ **इति सुषामादिराकृतिगणः ॥ २५४ ॥**

३१६८ न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ८।३।११०॥ सवने सवने । सूते सूते । सोमे सोमे । सवनमुखे सवनमुखे । किंसं किंसम् (किंसः किंसः) । अनुसवनमनुसवनम् । गोसनिं गोसनिम् । अश्वसनिमश्वसनिम् । **पाठान्तरम्—**सवने सवने । सवनमुखे सवनमुखे । अनुसवनमनुसवनम् । संज्ञायां बृहस्पतिसवः । शकुनिसवनम् । सोमे सोमे (सुमे सुमे) । सुते सुते । संवत्सरे संवत्सरे । बिसं बिसम् । किसं किसम् । मुसलं मुसलम् । गोसनिम् अश्वसनिम् ॥ **इति सवनादिः ॥ २५५ ॥**

१०५२ ॐ इरिकादिभ्यः प्रतिषेधो वक्तव्यः ॐ ८।४।६॥ इरिका मिरिका तिमिरा ॥ **इतीरिकादिराकृतिगणः ॥ २५६ ॥**

१०५६ ॐ वाप्रकरणे गिरिनद्यादीनां वोपसंख्यानम् ८।४।१०॥ गिरिनदी गिरिनख गिरिनद्ध गिरिनितम्ब चक्रनदी चक्रनितम्ब तूर्यमान माषोन आर्गयन ॥ **इति गिरिनद्यादिराकृतिगणः ॥ २५७ ॥**

१०५७ ॐ युवादेर्न ॐ युवन् पक्व अहन् ॥ **इति युवादिः ॥** (आर्ययूना क्षत्रिययूना प्रपक्वानि परिपक्वानि दीर्घाह्नी) **आकृतिगणोऽयम् ॥**

७९३ क्षुभ्नादिषु च ८।४।३९॥ क्षुभ्न नृगमन (नृनमन) नन्दिन् नन्दन नगर । एतान्युत्तरपदानि संज्ञायां प्रयोजयन्ति । हरिनन्दी हरिनन्दनः गिरिनगरम् । नृतिर्यङि प्रयोजयन्ति । नरीनृत्यते । नर्तन गहन नन्दन निवेश निवास अग्नि अनूप । एतान्युत्तरपदानि प्रयोजयन्ति । परिनर्तनम् परिगहनम् परिनन्दनम् शरनिवेशः शरनिवासः शराग्निः दर्भानूपः । आचार्यादणत्वं च । आचार्यभोगीनः ॥ **आकृतिगणोऽयम् ॥ पाठान्तरम् ॥** क्षुभ्ना तृप्नु नृनमन नरनगर नन्दन । यङ्नृती । गिरिनदी गृहगमन निवेश निवास अग्नि अनूप आचार्यभोगीन चतुर्हायन । इरिकादीनि वनोत्तरपदानि संज्ञायाम् । इरिका तिमिर समीर कुबेर हरि कर्मार ॥ **इति क्षुभ्नादिः ॥ २५८ ॥ इत्यष्टमोऽध्यायः ॥**

इति श्रीपाणिनिमुनिप्रणीतो गणपाठः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोणादिसूत्राणां सूची ४।

सूत्राङ्कः सूत्रम्

७६ अगारे णिच्च
५५१ अङ्ग्यादयश्च
६७५ अङ्गतेरसिरिरुडा.
४१४ अङ्गिमदिमन्दिभ्यः
४९० अङ्गेर्नलोपश्च
५७८ अच इः
७०९ अच् तस्य जङ्घ च
३४१ अजियमिशीङ्भ्यश्च
३२७ अजियुधूनीभ्यो
५३ अजिरशिशिरशिथि.
३१८ अजिवृरीभ्यो निच्च
२०६ अजेरज च
५७० अज्यतिभ्यां च
५०१ अञ्चेः को वा
६५५ अञ्च्यञ्जियुजि.
३६९ अञ्जिघसिभ्यः क्तः
८ अणश्च
८६ अणो डश्च
१२६ अण्डन्कृसृभृवृञः
३९७ अत्यविचमितमि
६७९ अदि भुवो डुतच्
५०५ अदिशदिभूशुभि.
५५५ अदेर्ध च
६४५ अदेर्नुम् धौ च
२६२ अदेर्मुट् च
५०८ अदेस्त्रिनिश्च
४५७ अनिहृषिभ्यां किच्च
३३२ अनुङ् नदेश्च
९३ अन्दूदृम्भूजम्बू.
६४४ अन्ते च
५४५ अन्येभ्योऽपि दृश्यन्ते
२५ अपदुस्सुषु स्थः
५३८ अब्दादयश्च
६०३ अमिचिमिदिशसिभ्यः
१७३ अमितम्योर्दीर्घश्च
३८५ अमिनक्षियजि.
४९९ अमेरतिः

सूत्राङ्कः सूत्रम्

४६ अमेर्दीर्घश्च
६१३ अमेर्द्विषति चित्
६५२ अमेर्हुक्च
६९९ अमेः सन्
७३८ अमेस्तुट् च
४६९ अम्बरीषः
२६५ अर्चिशुचिहुसृपि.
२७ अर्जिदृशिकम्यमि.
४६८ अर्जेर्ऋज च
३३८ अर्जेर्णिलुक् च
४१२ अर्तिकमिभ्रमिच.
४३२ अर्तिगृभ्यां भन्
२७४ अर्तिपृवपियजि.
२५९ अर्तिसृधृधम्यम्यश्य.
१३७ अर्तिस्तुसुहुसृधृ.
२०९ अर्तेः किदिच्च
६९५ अर्तेः क्युरुच्च
२४५ अर्तेर्गुणः शुट् च
३८२ अर्तेर्निच्च
१६५ अर्तेर्निरि
५१९ अर्तेररुः
६३४ अर्तेरुच्च
४८४ अर्तेरूच्च
३४० अर्तेश्च
६८५ अर्तेश्च
७१ अर्तेश्च तुः
१७५ अर्देर्दीर्घश्च
७३१ अर्भकपृथुक.
४६५ अलीकादयश्च
१३९ अवतेष्टिलोपश्च
७३२ अवद्यावमाधमा.
४३८ अवितृस्तृतन्त्रिभ्यः ईः
४५ अविमह्योष्टिषच्
१४१ अविसिविसिशु.
१६० अवे भृञः
६१२ अशित्रादिभ्य इत्रोत्रौ
५७२ अशिपणाय्यो रुडा.

सूत्राङ्कः सूत्रम्

५८६ अशिशकिभ्यां छन्दसि
१४९ अशूप्रुषिलटिकणि.
२३३ अशो रश च
५२ अशेर्णित्
३४५ अशेर्देवने
६३० अशेर्देवने युट् च
४३६ अशेर्नित्
३३७ अशेर्लशश्च
३५० अशेः सरः
४८६ अश्नोते रश् च
७३५ अश्नोतेराशुकर्मे.
७०७ अश्वादयश्च
४३४ असिसञ्जिभ्यां
४२ असेरुरन्
४४७ आङि णित्
२०३ आङि पणिपनि.
२६० आङि शुषेः सन.
५७७ आङि श्रिहनिभ्यां
३३ आङ्परयोः खनि.
३६३ आणको लूधूशिघि.
८० आतृकन् वृद्धिश्च
३६२ आनकः शीङ्भियः
६४७ आपः कर्माख्यायां
७४ आप्नोतेर्ह्रस्वश्च
२१६ आप्नोतेर्ह्रस्वश्च
६१४ आः समिण्निकषि.
५५९ इगुपधात्कित्
६५१ इण आगोऽपराधे च
६३७ इण आगसि
६६१ इण आसिः
४२९ इणस्तशन्तशसुनौ
४३३ इणः कित्
३२३ इण्मीकापाशल्य.
१५० इण्शीभ्यां वन्
२८२ इणसिञ्जिदीङुष्य.
५९६ इन्देः कमिर्नलोपश्च
५१ इषिमदिमुदिखिदि.
१४२ इषियुधीन्धिदसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उणादिसूत्राणां सूची ४।

सूत्राङ्कः सूत्रम्

४३७ इषेः क्सुः
४२८ इष्यशिभ्यां तकन्
१३ ईषेः किच्च
४६१ ईषेः किद्ध्रस्वश्च
६४३ उदके थुट् च
६३६ उदके नुट् च
६४९ उदके नुम्भौ च
१९७ उदकं च
६९० उदि चेर्डैसिः
६९७ उदि दणातेरजलो.
५२८ उद्यतेश्चित्
३४८ उन्दिगुधिकुषिभ्यश्च
१२ उन्देरिच्चादेः
२३४ उन्देर्नलोपश्च
३९६ उपसर्गे वसेः
६३१ उब्जेर्बले बलोपश्च
४८१ उल्कादयश्च
५३५ उल्वादयश्च
३६४ उल्मुकदर्विहोमिनः
६७३ उषः कित्
४२२ उषिकुटिदलिकचि.
१६१ उषिकुषिगार्तिभ्यः
६०१ उषिखनिभ्यां कित्
७१८ ऊर्जि दणातेरलचौ
७२५ ऊर्णोतेर्डः
३० ऊर्णोतेर्नुलोपश्च
७२९ ऋजेः कीकन्
४११ ऋच्छेररः
४६२ ऋजेश्च
१८६ ऋज्रेन्द्राग्रवज्र.
२४४ ऋज्रिवधिमन्दि.
४४२ ऋतन्यञ्जिवन्य.
९२ ऋतेरम् च
४०३ ऋषिवृषिभ्यां कित्
३४७ ऋषेर्जातौ
५१३ ऋहनिभ्यामूषन्
२७५ एतेर्णिच्च
१३० एतेस्तुट् च
७८ एधिवह्योश्च तुः
४१७ कञ्जिमृजिभ्यां चित्
३५७ कठिकुषिभ्यां काकुः
६४ कठिचकिभ्यामोरन्
१०३ कणेष्ठः

सूत्राङ्कः सूत्रम्

५२३ कदेर्णित्पक्षिणि
१५४ कनिन् युवृषित.
३३१ कन्युच् क्षिपेश्च
४२४ कपश्चाक्रवर्मणस्य
६६ कपिगडिगण्डिकटि.
६२ कबेरोतः पश्च
७२ कमिमनिजनिगा.
४१८ कमेः किदुच्चोपधायाः
५५ कमेः पश्च
१०० कमेरठः
४४५ कलंश्च
१०४ कलस्तृपश्च
५२४ कलिकर्योरमः
७०४ कलिगलिभ्यां फग.
४७२ कशेर्मुट् च
४५६ कषिदूषिभ्यामीकन्
८४ कषेश्छश्च
५९७ कायतेर्डिमिः
४ किञ्जरयोः श्रिणः
५० किलेर्बुक्च
६५ किशोरादयश्च
५२० कुटः किच्च
६२६ कुटिकुषिभ्यां क्मलन्
५८३ कुडिकम्प्योर्नलोपश्च
५२५ कुणिपुल्योः किन्दच्
५२६ कुपेर्वा वश्च
५९ कुम्बेर्नलोपश्च
३०७ कुयुभ्यां च
२२ कुर्भ्रश्च
४१३ कुवः क्ररन्
५३१ कुवश्चट् दीर्घश्च
६२७ कुषेर्लश्च
५४६ कुसेरुम्भोमेदेताः
५२२ कृकदिकडिकटि.
६ कृके वचः कश्च
२४ कृग्रोरुच
४७३ कृञ उच्च
५६८ कृञ उदीचां कारुषु
७७ कृञः कतुः
७२३ कृञः पासः
७१३ कृञादिभ्यः संज्ञायाम्

सूत्राङ्कः सूत्रम्

४२७ कृतिभिदिलतिभ्यः
१६ कृतेराद्यन्तविपर्ययश्च
३८९ कृतेर्नुम् च
१७८ कृतेश्छः कू च
२९७ कृत्यशूभ्यां क्स्नः
७१९ कृदरादयश्च
३२० कृदाधारार्चिकलिभ्यः
३५३ कृधूमधिभ्यः कित्
१ कृवापाजिमिस्वदि.
४९६ कृविघृष्विछविस्थवि.
३३३ कृवृदारिभ्य उनन्
८१ कृषिचमितनिधनि.
२६१ कृषेरादेश्च चः
२८४ कृषेर्वर्णे
१९६ कृषेर्वृद्धिश्चोदीचाम्
५६६ कृषेर्द्विश्छन्दसि
३१० कृहनिभ्यां क्त्नुः
१५८ कृहृभ्यामेणुः
५८२ कॄगॄशॄपॄकुटिभि
१५३ कॄगॄशॄदॄभ्यो वः
२७९ कॄगॄशॄवृञ्चतिभ्यः
६२४ कॄतॄकृपिभ्यः
४६६ कॄतॄभ्यामीषन्
२३९ कॄपॄवृजिमन्दि
२९० कॄवॄजॄसिद्रुपन्यनि
४७० कॄशॄपॄकटिपटि.
४०२ कॄशॄशलिकलिगां
८८ के श्र एरङ् चास्य
५९४ कोररन्
७२१ क्रमिगमिक्षमिभ्यः
५६१ क्रमितमिशतिस्त.
२०२ क्रिय इक्कन्
७११ क्लिशेरन् लो लोपश्च
७३४ क्लिशेरीच्चोपधायाः
४२३ क्वणेः संप्रसारणं च
११२ क्वादिभ्यः कित्
२१५ क्विब्वचिप्रच्छि.
१९० क्वुन् शिल्पिसंज्ञयोः
७४३ क्षमेरुपधालोपश्च
२६४ क्षिपेः किच्च
३७६ क्षुदक्षिरपृहिगृहिभ्यः आय्यः
३३५ क्षुधिपिशिमिथिभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्राङ्कः	सूत्रम्
४५३	खजेराकः
५७९	खनिकष्यज्यसि.
३६	खरु शङ्कु पीयु नी.
५३०	खार्जिपिञ्जादिभ्य.
३९२	खलतिः
३०८	खष्पशिल्पशष्प.
४१५	गडेः कड च
३८६	गडेरादेश्च कः
५१८	गडेश्च
१२४	गण् शकुनौ
६६६	गतिकारकोपपदयोः
१२०	गन् गम्यद्योः
४७५	गभीरगम्भीरौ.
६०८	गमेरा च
४४६	गमेरिनिः
२२५	गमेर्डोः
२३५	गमेर्गश्च
३११	गमेः सन्वच
२१२	गर्वेरत उच
१६७	गश्चोदि
२९६	गादाभ्यामिष्णुच्
५९५	गिर उडच्
६०६	गुधृवीपच्चिवच्चि.
६८०	गुधेरुमः
५६	गुपादिभ्यः कित्
३४९	गृधिपण्योर्दकौ च
१४०	ग्रसेरा च
७४५	ग्रहेरनिः
१४७	ग्रीष्मः
९५	ग्रो मुट् च
२२२	ग्लानुदिभ्यां डौः
१४६	घर्मः
४७४	घसेः किच्च
४९२	घृणिपृश्निपार्ष्णि.
१७१	चकिरम्योरुच्चोपधायाः
६७२	चक्षेर्बहुलं शिच्च
२७६	चक्षेः शिच्च
४५८	चङ्कणः कङ्कणश्च
७३६	चतेरुरन्
६५८	चन्देरादेश्च छः
६६७	चन्द्रे मो डित्
६११	चरेर्वृत्ते
७४७	चरेश्च

सूत्राङ्कः	सूत्रम्
७३	चायः किः
६३९	चायतेरन्ने ह्रस्वश्च
२२०	चिक् च
६१५	चितेः कणः कश्च
७१४	चीकयतेराद्यन्त.
१०८	चुपेरुच्चोपधायाः
३०४	च्युवः किच्च
२२३	च्विरव्ययम्
२	छन्दसीणः
२४३	छन्दस्यसानच्
१२१	छापूखडिभ्यः कित्
२८१	छित्वरछत्वर.
११०	छो गुक् ह्रस्वश्च
५४२	जज्वादयश्च
५६९	जनिघसिभ्यामिण्
५४४	जनिदाच्युसृवृम.
५८८	जनिमृङ्भ्यामिम.
७१६	जनेररष्ठ च
२७२	जनेरुसिः
५५०	जनेर्यक्
७०८	जनेष्टन् लोपश्च
७२४	जनेस्तु रश्च
२३१	जसिसहोरुरिन्
१९२	जहातेर्द्वे च
३१६	जहातेर्द्वेऽन्तलोपश्च
१३८	जहातेः सन्वदालोप.
७२७	जीर्यतेः क्रिन् रश्च.
७९	जीवेरातुः
४०६	जॄविशिभ्यां झच्
१६३	जॄवृभ्यामूथन्
४९४	जॄशॄस्तॄजागृभ्यः
३७१	जेर्मुट् चोदात्तः
१८१	जोरी च
१११	ञमन्ताड्डः
६९८	डित् खनेर्मुट्
८५	णित्कसिपद्यर्तेः
३६८	तनिमृङ्भ्यां किच्च
७३०	तनोतेर्डउः सन्वच्च
२२१	तनोतेरनश्च वः
३५५	तन्यृषिभ्यां क्सरन्
११५	तमिविशिबिडिमृणि.
७४४	तरतेर्ड्रिः
११७	तरत्यादिभ्यश्च

सूत्राङ्कः	सूत्रम्
२११	तलिपुलिभ्यां च
४८	तवेर्णिद्वा
९८	ताडेर्णिलुक्च
२९८	तिजेर्दीर्घश्च
१६९	तिथपृष्ठगूथयूथ.
४१९	तुषारादयश्च
३३९	तृणाख्यायां चित्
२५०	तृन्तृचौ शंसिक्षदा.
२९२	तृषिशुषिरसिभ्य.
६८६	तृहेः क्नो हलोपश्च
४०८	तृभूवहिवसिभासि.
१२९	त्यजितनियजिभ्यो.
८९	त्रो दुट् च
५	त्रो रश्च लः
३३४	त्रो रश्च लो वा
७२६	दधातेर्यत् नुट् च
६७४	दमेरुनसिः
२२७	दमेर्डोसिः
९०	दरिद्रातेर्यालोपश्च
४८७	दल्मिः
६८९	दंशेश्च
६८८	दंसेष्टटनौ न आ च
७३९	दहेर्गो लोपो दश्च
६०९	दादिभ्यश्छन्दसि
३१२	दाभाभ्यां नुः
३७७	दिधिषाय्यः
४०१	दिवः कित्
२५६	दिवेर्ऋः
६००	दिवेर्द्युच्
४९५	दिवो द्वे दीर्घश्चा.
४२०	दीङो नुट् च
३७०	दुतनिभ्यां दीर्घश्च
१७७	दुरीणो लोपश्च
१२८	दृणातेः षुक् ह्रस्वश्च
६२३	दृणातेर्ह्रस्वश्च
४३१	दृदलिभ्यां भः
३	दृसनिजनिचरि.
६५४	देशे ह च
२६७	द्युतेरिसिन्नादेश्च जः
२०८	द्रुदक्षिभ्यामिनन्
९	धान्ये नित्
२८६	धापॄवस्यज्यति.
२४०	धृषेर्धिष् च संज्ञायाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उणादिसूत्राणां सूची ४ ।

सूत्राङ्कः सूत्रम्

२९१ घेट इच्च
३१४ घेट इच्च
१९३ ध्मो धम च
५५४ ध्याप्योः संप्रसा.
२५५ नञि च नन्देः
१५६ नञि जहातेः
८७ नञि लम्बेर्नलोपश्च
४९ नञि व्यथेः
६६३ नञि हन एह च
३६७ नञ्याप इट् च
२५२ नप्तृ नेष्टृ त्वष्टृ होतृ
२५७ नयतेर्डिच्च
६५० नहेर्दिवि भश्च
७०१ नहेर्हलोपश्च
५६५ नहो भश्च
५३० नामन् सीमन् व्योम.
१७ नावञ्चेः
१७४ निन्देर्नलोपश्च
४८३ नियो मिः
१६६ निशीथगोपीथा.
६६५ नुवो धुट् च
९१ नृतिशृध्योः कूः
६९१ नौ दीर्घश्च
५७५ नौ व्यो यलोपः पूर्व.
५२७ नौ षञ्जेर्घथिन्
२८० नौ सदेः
३२५ नौ सदेर्डिच्च
३२४ नौ हः
७० पः किच्च
४७७ पच एलिमच्
१८८ पचिनशोर्णुकन्
७१५ पचिमच्योरिच्चो.
६५९ पचिवचिभ्यां सुट्
२२८ पणेरिज्यादेश्च वः
४५२ पतः स्थ च
५८ पतिकठिकुठिगडि.
११४ पतिचण्डिभ्यामालञ्
११६ पतेरङ्गच् पक्षिणि
५०९ पतेरत्रिन्
३५४ पते रश्च लः
६२२ प्रदिप्रथिभ्यां नित्
६६९ पयसि च
४५० परमे कित्

सूत्राङ्कः सूत्रम्

२१७ परौ व्रजेः षश्च.
३८३ पर्जन्यः
३६० पर्देर्नित्संप्रसारणम्
४६० पर्फरीकादयश्च
१६४ पातृतुदिवचिरि.
६८३ पातेरतिः
४९७ पातेर्डतिः
६१७ पातेर्डुम्सुन्
६४२ पातेर्बले जुट् च
५७१ पादे च
३०३ पानीविषिभ्यः पः
१३३ पारयतेरजिः
४५५ पिनाकादयश्च
२७१ पिबतेस्थुक्
३७५ पिशेः किच्च
३५६ पीयुक्कणिभ्यां कालन्
५१६ पीयेरूषन्
५१४ पुरः कुषन्
६७० पुरसि च
६७१ पुरूरवाः
६०४ पुवो ह्रस्वश्च
४४४ पुषः कित्
६९३ पूलो यण् णुक् ह्रस्वश्च
३९१ पृषिरञ्जिभ्यां कित्
५१५ पॄनहिकलिभ्य उषच्
२३ पॄभिदिव्यधिगृधि.
५५६ प्र ईरशदोस्तुट् च
१३४ प्रथः कित्संप्रसारणं च
२८ प्रथिम्रदिभ्रस्जां सं.
७४६ प्रथेरमच्
१४८ प्रथेः षिवन्संप्रसा.
१९९ प्राङि पणिकषः
७३७ प्राततेररन्
४४९ प्रे स्थः
५७४ प्रे हरतेः कूपे.
४३५ प्लुषिकुषिशुषिभ्यः.
३४३ प्लुषेरच्चोपधायाः
१८ फलिपाटिनमिमनि.
७१२ फलेरितजादेश्च पः
३३६ फलेर्गुक् च
२८३ फेनमीनौ
२८५ बन्धेर्ब्रधिबुधी च
४५४ बलाकादयश्च

सूत्राङ्कः सूत्रम्

१९५ बहुलमन्यत्रापि
२०७ बहुलमन्यत्रापि
२३६ बहुलमन्यत्रापि
२५१ बहुलमन्यत्रापि
२७८ बहुलमन्यत्रापि
१८० बहुलमन्यत्रापि संज्ञा
११८ बिडादिभ्यः कित्
२६६ बृंहेर्नलोपश्च
५८५ बृंहेर्नोच्च
४१० भन्देर्नलोपश्च
६३ भातेर्डवतुः
१८९ भियः क्रुकन्
१३५ भियः षुक् ह्रस्वश्च
१४५ भियः षुग्वा
३०१ भुजिमृङ्भ्यां युक्.
५८१ भुजेः किच्च
२६९ भुवः कित्
४८५ भुवः कित्
४४८ भुवश्च
३३० भुवो झिच्
६५६ भूरञ्जिभ्यां कित्
६१० भूवादिगृभ्यो णि.
२३८ भूसूधूभ्रस्जिभ्य.
२३० भृञः ऊच्च
१२२ भृञः किन्नुट् च
३९४ भृञश्चित्
३९० भृमृदृशियजि
७ भृमृशीतृचरित्स.
२२६ भ्रमेश्च डूः
५६० भ्रमेः संप्रसारणं च
५९९ भ्रस्जिगमिनमि.
७४८ मङ्गेरलच्
४१ मद्गुरादयश्च
५६२ मनेरुच
३४४ मनेर्दीर्घश्च
२७३ मनेर्धश्छन्दसि
४५१ मन्थः
३८ मन्दिवाशिमथि.
७२८ मव्यतेर्यलोपो म.
६८१ मसेरुरन्
४३ मसेश्च
५१७ मस्जेर्नुम् च
३१ महति ह्रस्वश्च
२१४ महेरिनण् च
७०३ माङ ऊखो मय् च
५४९ माछाससिभ्यो यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्राङ्कः सूत्रम्

५७ मिथिलादयश्च
५९१ मिथुने मनिः
६६२ मिथुनेऽसिः पूर्ववच्च
५४१ मिपीभ्यां रुः
६७ मीनातेरूरन्
४० मुकुरदर्दुरौ
१२५ मुदिग्रोर्गग्गौ
२०० मुषेर्दीर्घश्च
२७७ मुहेः किच्च
७०० मुहेः खो मूर्च
६१ मूलेरादयः
५४८ मूशक्यबिभ्यः क्लः
५१० मृकणिभ्यामीचिः
४७९ मृकणिभ्यामूकोकणौ
३७ मृगय्वादयश्च
९४ मृग्रोरुतिः
८२ मृजेर्गुणश्च
१०७ मृजेष्टिलोपश्च
४६४ मृडः कीकच्कङ्कणौ
३०० यजिमनिशुन्धि.
२५४ यतेर्वृद्धिश्च
४३९ यापोः किद्वे च
१४३ युजिरुचितिजां कुश्च
२४७ युधिबुधिदशिभ्यः
१३६ युष्यसिभ्यां मदिक्
२१ यो द्वे च
२३७ रञ्जेः क्युन्
६२९ रपेरत एच्च
२६ रपेरिच्चोपधायाः
६५३ रमेश्च
१९१ रमे रश्च लो वा
५०३ रगेर्नित्
१०१ रमेर्वृद्धिश्च
२९४ रमेस्त च
२२४ रातेर्डैः
३८० राजेरन्यः
५०७ राशदिभ्यां त्रिप्
४०५ राशिवल्लिभ्यां च
२९५ राल्लासाल्लास्थूणा.
६३८ रिचेर्धने घिच्च
६१८ रुचिभुजिभ्यां किष्यन्

सूत्राङ्कः सूत्रम्

६२५ रुचिवचिकुचिकुटि.
३९५ रुदिविदिभ्यां ङित्
५४३ रुशातिभ्यां क्रुन्
४०४ रुषेर्निल्लुष् च
४०७ रुहिनन्दिजीविप्रा.
४७ रुहेर्वृद्धिश्च
२१३ रुहेश्च
३७४ रुहे रश्च लो वा
६४८ रूपे जुट् च
१७९ रोदेर्णिलुक् च
२८७ लक्षेरट् च
४४० लक्षेर्मुट् च
२९ लङ्घिबंह्योर्नलो.
१३२ लङ्घेर्नलोपश्च
७३३ लीरीङोर्ह्रस्वः पुट् च
३७२ लोष्टपलितौ
५०६ वङ्क्र्यादयश्च
७१७ वचिमनिभ्यां चिच्च
३१३ वचेर्गश्च
३८४ वदेरान्यः
२८८ वनेरिच्चोपधायाः
४०० वयश्च
६६८ वयसि धाञः
५६३ वर्णेर्वलिश्चाहिरण्ये.
२४१ वर्तमाने पृषद्बृह.
५३९ वलिमलितनिभ्यः
४८० वलेरूकः
१९ वलेर्गुक् च
६७८ वशेः कनसिः
२२९ वशेः कित्
४७१ वशेः कित्
५६४ वसिवपियजि.
६५७ वसेर्णित्
३५१ वसेश्च
६१९ वसेस्तिः
७५ वसेस्तुन्
२६८ वसौ रुचेः संज्ञायाम्
३९९ वहियुभ्यां णित्
५०० वहिवस्यर्तिभ्य.
४९१ वहिश्रिश्रुयुद्रु.
६६० वहिहाधाञ्भ्यः.
८३ वहो धश्च

सूत्राङ्कः सूत्रम्

४४१ वातप्रमीः
५७३ वातेर्डिच्च
६८४ वातेर्नित्
१८४ वा विन्धेः
४२५ विटपविष्टपवि.
६७७ विदिभुजिभ्यां विश्वे
६६४ विधाञो वेध च
४७६ विषा विहा
३१९ विषेः किच्च
४८८ वीज्याज्वरिभ्यो निः
४३० वीपतिभ्यां तनन्
६४० वृङ्शीङ्भ्यां रूप.
२०५ वृजेः किच्च
३७८ वृञ एण्यः
३८७ वृञश्चित्
६८७ वृञ्लुटितनिताडि.
३५९ वृतेर्वृद्धिश्च
२६३ वृतेश्च
५८० वृतेश्छन्दसि
४२६ वृतेस्तिकन्
४९३ वृदृभ्यां विन्
१८५ वृद्धिवपिभ्यां रन्
१९८ वृश्चिकृषोः किकन्
१०६ वृषादिभ्यश्चित्
५४० वृहोः षुग्दुकौ च
३४२ वृतॄवदिहनिक.
५१२ वेञो डिच्च
५८९ वेञः सर्वत्र
३९८ वेञस्तुट् च
२१० वेपितुह्योर्ह्रस्वश्च
१७२ वौ कसेः
६२१ वौ तसेः
३९ व्यथेः संप्रसारणं.
७४१ व्याङि घ्रातेश्च जातौ
६३५ व्याधौ शुट् च
५२१ शकादिभ्योऽटन्
२० शः कित्सन्वच्च
१०९ शकिशम्योर्नित्
३२९ शकेरुनोन्तोन्त्युनयः
४९८ शकेर्ऋतिन्
३५ शते च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्राङ्कः सूत्रम्

६० शदेस्त च
१०५ शपेर्बश्च
१०२ शमेः खः
९९ शमेर्ढः
५३४ शमेर्बन्
४८२ शलिमण्डिभ्यामूकण्
४४ शावशेराप्तौ
५३७ शाशपिभ्यां ददनौ
५५३ शीङ्कुशिरुहिजिक्षि.
३९३ शीङ्शपिरूगमिवञ्चि.
४७८ शीङो धुक्लुक्.
७०२ शीङो ह्रस्वश्च
३२२ शुकवल्कोल्काः
१७६ शुचेर्दश्च
१८३ शुसिचिमीनां दीर्घश्च
४१६ शृङ्गारभृङ्गारौ
१२३ शृणातेर्ह्रस्वश्च
१२७ शॄदॄभसोऽदिः
४५९ शॄपॄवॄञ्यां द्वेरुक्.
४६७ शॄपॄभ्यां किच्च
३८१ शॄरम्योश्च
१० शॄस्तृस्निहित्रप्य०
१५२ शेवयह्वजिह्वा.
७०६ श्मनि श्रयतेर्डुन्
२०४ श्यास्त्याह्वञविभ्य.
४४३ श्रः करन्
५६७ श्रः शकुनौ
६३३ श्रयतेः स्वाङ्गे शिरः
३२ श्लिषेः कश्च
२९९ श्लिषेरच्चोपधायाः
१५७ श्वन्नुक्षन्पूषन्.
५११ श्वयतेश्चित्
२४९ श्वितेर्दश्च
६३२ श्वेः संप्रसारणं च
३५२ सपूर्वाच्चित्.
१५५ सप्यशूभ्यां तुट् च
५७६ समाने ख्यः स चो.
१८७ समिकस उकन्
१६८ समीणः
५३२ समीणः
२४६ सम्यानच् स्तुवः

सूत्राङ्कः सूत्रम्

१३१ सर्तेरटिः
४२१ सर्तेरपः षुक् च
६७६ सर्तेरप्पूर्वादसिः
३०२ सर्तेरयुः
१६२ सर्तेर्णित्
५२९ सर्तेर्णिच्च
३५८ सर्तेर्दुक् च
४६३ सर्तेर्नुम् च
५५७ सर्वधातुभ्य इन्
५८४ सर्वधातुभ्यो म.
५९८ सर्वधातुभ्यष्ट्रन्
६२८ सर्वधातुभ्योऽसुन्
१५१ सर्वनिघृष्वरिष्व.
५४ सलिकल्यनिमहि.
२५८ सव्ये स्थश्छन्दसि
२४२ संश्चत्तृपद्वेहत्.
२७० सहो धश्च
५९२ साऽतिभ्यां मनिन्.
५४७ सानसिवर्णसि.
६२० सावसेः
७४० सिचेः संज्ञायाम्.
६९ सितनिगमिमसि.
६०२ सिविमुच्योष्टेरू च
५३३ सिवेष्टेरू च
२८९ सिवेष्टेर्यू च
२९३ सुञो दीर्घश्च
२५३ सुन्यसेर्कन्
२३२ सुयुरुवृञो युच्
३१५ सुवः कित्
३८८ सुविदेः कत्रः
३०६ सुशॄभ्यां निच्च
१८२ सुसूधागृधिभ्यः
५०४ सूङः क्रिः
६१६ सूचेः स्मन्
१५ सृजेरसुम् च
३६१ सृयुवचिभ्योऽन्यु.
११९ सृवृभूर्वृद्धिश्च.
३२१ सृवृभूशुषिमुषि.
४८९ सृवृषिभ्यां कित्
६९२ सौ रमेः क्तो दमे
१४ स्कन्देः सलोपश्च
६४६ स्कन्देश्च स्वाङ्गे

सूत्राङ्कः सूत्रम्

३०९ स्तनिहृषिपुषि.
३७९ स्तुवः क्सेय्यश्छ.
३०५ स्तुवो दीर्घश्च
६०५ स्त्यायतेर्ड्रट्
६८२ स्थः किच्च
५३६ स्थः स्तोऽम्बजबकौ
११३ स्थाचतिमृजेरा.
३१७ स्थो णुः
५५२ स्नामदिपद्यर्ति.
३४६ स्नुव्रश्चिकृत्यृषि.
७०५ स्पृशेः श्वण्शुनौ
१७० स्फायितञ्चिवञ्चि.
११ स्यन्देः संप्रसारणं.
६८ स्यन्देः संप्रसारणं.
३२६ स्यमेरीट् च
२०१ स्यमेः संप्रसारणं च
६९४ स्रंसेः शिः कुट् किच्च
६४१ स्रुरीभ्यां तुट् च
२१९ स्रुवः कः
१५९ हनिकुषिनीर.
५९३ हनिमशिभ्यां सिकन्
१९४ हनो वध च
७४२ हन्तेरच् घुर च
५०२ हन्तेरंह च
४०९ हन्तेर्मुट् हि च
७२० हन्तेर्युन्नाद्यन्त.
१४४ हन्तेर्हि च
७१० हन्तेः शरीरावयवे.
३४ हरिमितयोर्द्रुवः
७२२ हर्यतेः कन्यन्.
३६६ हसिमृग्रिण्वा.
६९६ हिंसेरीरन्नीरचौ
६०७ हुयामाश्रुभसिभ्य.
२४८ हुर्छेः सनो लुक्
२१८ हुवः श्लुवच्च
५५८ हृपिषिरुहिवृतिविदि.
५८७ हृभृधृसृस्तृशॄभ्य.
३७३ हृश्याभ्यामितन्
९६ हृषेरुलच्
९७ हृसृरुहियुषिभ्य.
३६५ ह्रियः कुक् रश्च लो वा
३२८ ह्रियो रश्च लो वा

इति कौमुदीस्थोणादिसूत्रसूची समाप्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ फिट्सूत्रसूची ५ ।

सूत्राङ्कः सूत्रम्

३५ अक्षस्यादेवनस्य
१४ अङ्गुष्ठोदकबकवशा.
५० अथ द्वितीयं प्रागीषात्
२४ अथादिः प्राक् शकटेः
१६ अर्जुनस्य तृणाख्या.
३६ अर्धस्यासमद्योतने.
१७ अर्यस्य स्वाम्याख्या.
१८ आशाया अदिगाख्या
४९ इगन्तानां च द्व्यषाम्
६६ ईषान्तस्य हयादेरादि
३२ उनर्वन्नन्तानाम्
८१ उपसर्गाश्चाभिवर्जम्
६७ उशीरदाशेरकपाल.
८२ एवादीनामन्तः
७३ कपिकेशहरिकेशयो.
५९ कर्दमादीनां च
११ कृष्णस्यामृगाख्या.
३१ खय्युवर्णं कृत्रिमाख्या.
६ खान्तस्याश्मादेः
४ गुदस्य च
३ गेहार्थानामस्त्रियाम्
७० गोष्ठजस्य ब्राह्मणनाम.
३८ ग्रामादीनां च
२१ घृतादीनां च
८४ चादयोऽनुदात्ताः
१० छन्दसि च
५८ छन्दसि च
४७ जनपदशब्दानामषा.
२२ ज्येष्ठकनिष्ठयोर्वयसि

सूत्राङ्कः सूत्रम्

७६ तिल्यशिक्यकाश्मर्य.
२७ तृणधान्यानां च द्व्यषाम्
५१ त्र्यचां प्राङ्मकरात्
७८ त्वत्त्वसमसिमेत्यनु.
६३ थान्तस्य च नालघुनी
८ दक्षिणस्य साधौ
४६ धान्यानां च वृद्धक्षा.
७२ धूम्रजानुमुञ्जकेश
५ ध्यपूर्वस्य स्त्रीविष.
२० न कुपूर्वस्य कृत्तिका.
१९ नक्षत्राणामब्विषया.
६१ नपः फलान्तानाम्
२६ नब्विषयस्यानिस.
८० निपाता आद्युदात्ताः
४५ नर्तुप्राण्याख्यायाम्
४० न वृक्षपर्वतविशेष.
७४ न्यङ्स्वरौ स्वरितौ
७५ न्यर्बुदव्यल्कशयोरा.
२८ त्रः संख्यायाः
२ पाटलाऽपालङ्काम्बा.
५५ पान्तानां गुर्वादीनां
७१ पारावतस्योपोत्तम.
३७ पीतद्र्वर्थानाम्
१५ पृष्ठस्य च
८६ प्रकारादिद्विरुक्तौ
३० प्राणिनां कुपूर्वम्
१ फिषोऽन्तउदात्तः
२३ बिल्वतिष्ययोः स्वरि.

सूत्राङ्कः सूत्रम्

७७ बिल्वभक्ष्यवीर्याणि.
५७ मकरवरूढपारे
६८ महिष्यषाढयोर्जाये.
५३ मादीनां च
८५ यथेति पादान्ते
६२ यान्तस्यान्त्यात्पूर्वम्
५६ युतान्यण्यन्तानाम्
४१ राजविशेषस्य यम.
४२ लघावन्ते द्वयोश्च
३९ लुबन्तस्योपमेयना.
३३ वर्णानां तणतिनिता.
८३ वाचादीनामुभावु.
१२ वा नामधेयस्य.
६९ शकटिशकट्योरक्षर.
४४ शकुनीनां च लघु पूर्वम्
५४ शादीनां शाकानाम्
६४ शिशुमारोदुम्बरबली.
१३ शुक्लगौरयोरादिः
८७ शेषं सर्वमनुदात्तम्
६५ सांकाश्यकाम्पिल्य.
७९ सिमस्याथर्वणेऽन्त.
६० सुगन्धितेजनस्य.
४३ स्त्रीविषयवर्णाक्षु
२९ स्वाङ्गशिटामदन्तानाम्
९ स्वाङ्गाख्यायामादिर्वा
५२ स्वाङ्गानामकुर्वादीनाम्
४८ हयादीनामसंयुक्त.
७ हिष्ठवत्सरतिशत्थान्तानाम्
२५ ह्रस्वान्तस्य स्त्रीविष.
३४ ह्रस्वान्तस्य ह्रस्वम.

इति कौमुदीस्थफिट्सूत्रसूची संपूर्णा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतज्ञताज्ञापनम्

ग्रन्थस्याऽस्य प्रकाशनाय साभिरुचि प्रवृत्तान् महेन्द्रसंस्कृत-विश्वविद्यालयस्य वर्तमानपदाधिकारि महोदयान् क्रमश उपकुलपतिमाचार्यपूर्णचन्द्रढुङ्गेलं शिक्षाध्यक्षं प्रा. श्रीनारायणकुमारमाचार्यं कुलसचिवं प्रा. श्री नीलमणिढुङ्गानां कार्यकारिनिर्देशकं प्रा.डा. श्रीवेणीमाधवढकालं च कृतज्ञतावचोभिरभिनन्दयन् प्रसङ्गेऽस्मिन् शिक्षाध्यक्षं प्रा.श्रीनारायणकुमारमाचार्यं सह-प्रशासकं श्रीहरिहरमधिकारिणं शिक्षाध्यक्षचरं प्रा. श्रीमाधवशरणोपाध्यायं च महोदयान् प्रति विशेषेण स-धन्यवादं कृतज्ञतां ज्ञापयामि । अन्ते मुद्रणालयसम्बन्धिभ्य: सर्वेभ्य: सहयोगिमहोदयेभ्य: सतोषं सौहार्दं व्यनज्मि ।

हरिप्रसादशर्मा आचार्य:,
व्याख्याता

सावधानम् !

(क) आभ्यन्तरमुखपृष्ठशिर:स्थस्य 'अष्टात्रिंशं पुष्पम्' इत्यस्य स्थाने 'अष्टापञ्चाशत्तमं पुष्पम्' इत्यवधेयम् ।

(ख) २७० पृष्ठानन्तरं २७२ पृष्ठं पठित्वा २७१ पृष्ठं पाठचम्, तत: २७३ पृष्ठं पाठचम् ।

शुद्धिपत्रम्

पृष्ठे	मूले	व्याख्यायाम्	पङ्क्तौ	अशुद्धम्	शुद्धम्
५	,,	X	८	संख्या	संख्या
९	,,	X	३	१-४-४५ आद्यन्तौ	१-१-४५ आद्यन्तौ
२२	,,	X	१	कुषविलश	कुषक्लिश
५१	,,	X	२	संपंश्यते	संपश्यते
५५	,,	X	७	वैद्या:	वैद्या:
१०८	X	,,	२२	ग्रन्थोपसंहार:	ग्रन्थपूर्वाङ्गोपसंहार:
१४६	,,	X	३	रोमंन्थायते	रोमन्थायते
१५०	,,	X	३	वक्तंव्य:	वक्तव्य:
१६६	,,	X	६	पुष्पसिध्यौ	पुष्यसिध्यौ
१८८	,,	X	६	कलिङ्गेष्बवात्सी:	कलिङ्गेष्ववात्सी:
१८८	,,	X	७	तोर्लङ्	तोर्लंङ्
२२५	,,	X	४	मूषिकाविलपूरं	मूषिकाबिलपूरं
२३६	,,	X	१	एधते	एधसे
२५४	,,	X	२	तेनेह-	तेनेह न-
२५६	,,	X	६	कारव्यायणी	कौरव्यायणी
२५९	X	,,	१४	तयो:-	तयो:=तकाराकारयो: स्थाने
२७९	,,	X	३	(४-१-१५३) ताक्षण:	(४-१-१५३) । ताक्ष्ण:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३२१	,,	x	३	भस्मयम्	भस्ममयम्
३३९	x	,,	२२	रितयाद्यपि	रित्याद्यपि
३५९	,,	x	१	कार्य	कार्यं
,,	,,	x	१३	वाऽग्निपदम्	वाऽऽग्निपदम्
३६४	,,	x	३	जङस्य	जडस्य
४००	,,	x	२०	पपङ्गुलिदत्तः पडिकः	षडङ्गुलिदत्तः षडिकः
४२५	x	,,	१२	पूर्वपदकात्	पूर्वपदात्
४३५	x	,,	२६	झो ऽ न्त	झो ऽ न्तँ
४५०	x	,,	१९	सूत्रार्थोपदेशान्तरं	सूत्रार्थोपदेशानन्तरं
४७५	,,	x	६	शङ्कुलाखडः	शङ्कुलाखण्डः
४८४	,,	x	७	गोलबल्लवः	गोबल्लवः
४९७	,,	x	१२	इत्युनुवृत्तेर्नेह-	इत्यनुवृत्तेर्नेह-
४९८	,,	x	३	अशक्ताविव्युर्नेह-	अशक्ताविव्युक्तेर्नेह-
५००	,,	x	१	सखजातः	सुखजातः
५१६	,,	x	११	हृदयस्य । लासो	हृदयस्य लासो
५२५	,,	x	१७	पप उत्वं	षष उत्वं
५२६	,,	x	७	त्यादुक्तेर्नेह-	त्याद्युक्तेर्नेह-
५३१	x	,,	३०	गृह+सु	गृहे+सु
५५३	x	,,	८	झोन्तः-	झोऽन्तँः
५५८	x	,,	१३	सूत्र प्रस्तुत्यम्	सूत्रं प्रस्तुत्यम्
५८५	,,	x	१०	ब्रह्मणकुल्	ब्राह्मणकुले
५९९	,,	x	३	प्रक्रस्यते	प्रक्रंस्यते
६००	,,	x	१५	लिँङसिँचो	लिँङ्सिँचो
६३०	,,	x	१६	जिध्रति	जिघ्रति
६४७	,,	x	३	यो दीर्घः	योर्दीर्घः
६६६	,,	x	६	पूर्वपदथस्य	पूर्वपदस्थस्य
६६९	,,	x	७	भुङक्ते	भुङ्क्ते
६७०	x	,,	१५	याव....इत्येन	याव...इत्यनेन
६७९	x	,,	११	झिप्रत्ययेः	झिप्रत्यये
६८३	x	,,	४	ह एति	हँ एति
७२४	,,	x	११	प्रणिपवति	प्रणिवपति
७३६	x	,,	६	सूत्रार्थं	सूत्रार्थः
८०४	x	,,	१४	मन्दिर	मन्दिरं

(क) १-४-२९ आख्या..... २-३-५० षष्ठी.... ३-१-७ धातोः ....
सूत्रेषु क्रमश उपाध्यायादधीते, राज्ञःपुरुषः,
पठितुमिच्छति-पिपठिषति, इत्युदाहरणानि मूले स्थाप्यानि ।

(ख) भूमिकापत्रशिरः स्था replay इति लिपिमध्यगा a इति लिपिरपनेया ।

(ग) प्रायो मूलमपि विहङ्गमदृष्टया परीक्षितं तत्प्रसङ्गात् क्वचिद् व्याख्यायां दृष्टा अशुद्धयोऽपि दर्शिताः ।

शेषपरीक्षणकृ[illegible]वसराय बद्धाञ्जलये क्षमा देया विद्वद्भिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुद्रकः- मुद्रण विभाग, सिंहदरबार, काठमाडौं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu